CC-0. In Public Domain. Digitization by eGangotri

Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीमज्जैमिनीयाश्वमेधपर्वप्रारम्भः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ ॥ श्रीवेदव्यासायनमः ॥ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतीं
व्यासंततोजयमुदीरयेत् ॥ १ ॥ ॥ जनमेजयउवाच ॥ ॥ कथंयुधिष्ठिरःप्रीतोममपूर्वपितामहः ॥ हयमेधंक्रतुवरंचक्रेबंधुभिर
न्वितः ॥ २ ॥ ॥ जैमिनिरुवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिधर्मराजस्यचेष्टितम् ॥ दिवंपितामहेयातेधर्मपुत्रोऽतिदुःखितः ॥
॥ ३ ॥ यदृच्छयाचसंप्राप्तंव्यासंपप्रच्छसादरम् ॥ केनोपायेनमेब्रह्मन्गोत्रहत्याकृतंभयम् ॥ ४ ॥ ध्रुवंविनाशमाप्नोतितन्मे
ब्रूहितपोधन ॥ विनाभीष्मेणकर्णेनतथाद्रोणेनवर्जितम् ॥ ५ ॥ नमेप्रीतिप्रदंराज्यंयत्प्राप्तंपूर्वजार्जितम् ॥ कर्णस्यमंदिरं
रम्यंब्रह्मघोषसमन्वितम् ॥ ६ ॥ मयाशून्यंकृतंतच्चसांप्रतंदानवर्जितम् ॥ यत्रार्थिनांगणानित्यंलब्ध्वामानंतथाधनम् ॥ ७ ॥
हर्षादश्रूणिमुंचंतितत्रमुंचंतिशोकजम् ॥ धिङ्मदीयमिदंराज्यंयत्रभीष्मोनभानुजः ॥ ८ ॥ ताभ्यांविरहितंतद्वद्देहंचक्षुर्विव
र्जितम् ॥ बहुधाशासितस्तेनभीष्मेणामितबुद्धिना ॥ ९ ॥ नजहातिचमांशोकोघातयित्वातथाविधान् ॥ त्यक्त्वाराज्यंग
मिष्यामिराज्यंभीमःकरोतुवै ॥ १० ॥ यानितीर्थानिदानानितथायज्ञक्रियाःशुभाः ॥ कृत्वापूतोभविष्यामिनपश्यामि
हिसांप्रतम् ॥ ११ ॥ ॥ व्यासउवाच ॥ ॥ माभयंकुरुराजेंद्रनदोषस्तेभविष्यति ॥ तमुपायंकरिष्यामियेनपूतोभविष्यसि ॥
॥ १२ ॥ यथागोत्रकृतांहिंसामपहास्यसिपांडव ॥ अश्वमेधंक्रतुवरंयजस्वकुरुनंदन ॥ १३ ॥ रामेणापिपुरावीरहयमेध
त्रयंकृतम् ॥ यज्ञंकृत्वातथापुत्रराज्यंपालयमारिष ॥ १४ ॥ राजधर्मेणयल्लब्धंशासनान्माधवस्यतु ॥ तद्राज्यंतुपरित्यज्य
कस्माद्गंतुमिहेच्छसि ॥ १५ ॥ इहलोकेपरांकीर्तिंकुरुपुत्रकसुस्थिराम् ॥ यावत्तेबांधवाःसर्वेवशगाःसंतिसांप्रतम् ॥ १६ ॥

१ पूर्वपितामहः प्रपितामहः युधिष्ठिरविशेषणमेतत् । २ पितामहे भीष्माचार्ये । ३ वेदघोषः । ४ भानुजः कर्णः । ५ अपहास्यसि ओहाक्त्यागे लट् । ६ हेपुत्र ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शरीरंदोषरहितंतावच्छ्रेयःसमाचर ॥ दिवंप्राप्ताहिराजानःकृत्वापुण्यादिकाःक्रियाः ॥ १७ ॥ ॥ जैमिनिरुवाच ॥ ॥ ए
तच्छ्रुत्वावचस्तस्यव्यासस्यामिततेजसः ॥ उवाचदीनयावाचाधर्मराजोयुधिष्ठिरः ॥ १८ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ न
वित्तंविद्यतेमह्यंविनावित्तेनवैक्रतुः ॥ जायतेममविप्रर्षेनचपीडयितुंप्रजाः ॥ १९ ॥ नशक्नोमिनृपान्हंतुंपितृमातृविवर्जिता
न् ॥ दुर्योधनेनक्षपिताप्टथिवीवित्तकारणात् ॥ २० ॥ तांकथंपीडयिष्यामिधरणींकाञ्चनेच्छया ॥ साहाय्यंनैवपश्यामिसु
हृदःसमरेहताः ॥ २१ ॥ तस्माद्राज्यंपरित्यज्यगमनंममरोचते ॥ किमत्रानंतरंकार्यंतन्मेगदितुमर्हसि ॥ २२ ॥ ॥ व्या
सउवाच ॥ ॥ मरुत्तेनकृतोयागस्तुष्टाःसर्वेद्विजोत्तमाः ॥ तैस्त्यक्तंबहुलंभूमौकाञ्चनंनृपनन्दन ॥ २३ ॥ हिमाचलेतिष्ठतित
त्पतितंत्वंसमानय ॥ यन्नेतुमसमर्थास्तेविप्राराज्ञासमर्पितम् ॥ २४ ॥ मरुत्तेनवदान्येनद्रविणंशतधामखे ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ धन्योऽसौमरुतोराजायेनयागस्तथाविधः ॥ २५ ॥ कृतोबहुसुवर्णाढ्योयत्रविप्रास्तुतर्पिताः ॥ त्यक्त्वासुवर्णं
चगताःकथंतदहमानये ॥ २६ ॥ ब्राह्मणानांविशेषेणवित्तंदुःखतरंमम ॥ मत्तःपरोनानिंद्योऽन्योभविष्यतिनराधिपः ॥
॥ २७ ॥ ब्रह्मस्वेयस्यनृपतेर्मतिर्भवतिदारुणा ॥ ग्रहणान्मज्जयत्येनंशिलेवांभसिदुस्तरा ॥ २८ ॥ प्रहसिष्यंतिमांविप्रा
ममयज्ञेतथाविधे ॥ अस्मदीयंधनंराजाप्रयच्छतिहिनःकरे ॥ २९ ॥ तस्मान्नकुत्सितंकर्मकरिष्यामिकथंचन ॥ एकात्रपापे
महतीयन्मयासंगरेहताः ॥ ३० ॥ कुरवोगुरवश्चैवसुहृत्संबंधिबांधवाः ॥ संमार्जयितुमेकांहिनसमर्थोऽस्मितांत्रपाम् ॥ ३१ ॥
द्वितीयैषामहाभागविप्रद्रव्याद्भविष्यति ॥ ॥ व्यासउवाच ॥ ॥ धन्योऽसिनृपशार्दूलसम्यगुक्तंत्वयावचः ॥ ३२ ॥

१ क्षपिता क्षयंमापिता भोजमते घटादे रूपम् । २ अस्मदीयमिति अस्माभिरधस्त्यक्तमस्मद्धस्तेददातीति मां हसिष्यंतीतिभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मस्त्वंप्रतियांशंकांप्रकरोषिवृथाहिसा ॥ यदात्यक्तंधनंतैर्हिस्वाम्यंतेषातदागतम् ॥ ३३ ॥ रामेणभूःपुरादत्ताकश्यपायम
हात्मने ॥ कथंगृण्हंतिचमहींराजानःपापभीरवः ॥ ३४ ॥ दैत्यैर्जिताधराचेयंदैत्येभ्यःक्षत्रियैर्जिता ॥ गतंस्वाम्यंचविप्रा
णांतस्माद्दोषोनविद्यते ॥ ३५ ॥ यदाधराधिपत्यंहिप्राप्तंयेननृपेणच ॥ तदातस्याखिलंवित्तंजायतेनात्रसंशयः ॥ ३६ ॥
तद्धनंत्वंसमानीयकुरुयज्ञंचपाण्डव ॥ श्रुत्वाव्यासवचोराजाह्यपृच्छद्यज्ञसाधनम्॥३७॥ ॥युधिष्ठिरउवाच॥ ॥ब्राह्मणाःक
तिसंख्याकादक्षिणाकीदृशीक्रतौ ॥ हयश्चकीदृशोभाव्यस्तन्मेव्याख्यातुमर्हसि ॥ ३८ ॥ ॥ व्यासउवाच ॥ ॥ द्विजाविंश
तिसाहस्रामखादौसंप्रकीर्तिताः ॥ कुलीनाःसंमताःप्राज्ञावेदशास्त्रार्थपारगाः ॥ एकैकस्मैद्विजायात्रदक्षिणांप्रवदामिते ॥
॥ ३९ ॥ एकोगजोरथश्चैकोहयश्चैकःसकाञ्चनः ॥ प्रत्येकंगोसहस्रंचरत्नप्रस्थंसकाञ्चनम् ॥ ४० ॥ भार१श्चकांचनस्यैकः
प्रदेयादक्षिणामखे ॥ यस्मिन्दिनेहयोराजन्मुच्यतेप्रथमाहिसा ॥ ४१ ॥ दक्षिणाकथितारम्यातुरगंकथयामिते ॥ गोक्षी
रसमवर्णंचकुंदेंदुहिमसन्निभम् ॥ ४२ ॥ पीतपुच्छंश्यामकर्णंसर्वतोगतिमुत्तमम् ॥ इयामंचापिमहीपालयज्ञेऽस्मिंस्तुरगं
विदुः ॥ ४३ ॥ चैत्रमासस्यराकायांमोच्योऽयंतुरगोनृप ॥ वर्षमात्रंरक्षणीयःसर्वयोधैर्महाबलैः ॥ ४४ ॥ पुत्रोवाबांधवः
शूरोरक्षणार्थेनियोज्यते ॥ स्वयंयःकुरुतेयज्ञमसिपत्रव्रतं२चरेत् ॥ ४५ ॥ नियतःसचराजेन्द्रनात्रकार्याविचारणा ॥ इष्ट
भोगान्वर्षमात्रंसेवन्नारीविवर्जितान् ॥ ४६ ॥ एकत्रशयनंकार्यंपत्न्यासहनराधिप ॥ यावदागमनंतस्यपुनरेवप्रजायते
॥ ४७ ॥ तावत्प्रयत्नवान्कर्त्तानिवसेद्धैर्यसंयुतः ॥ हयःपुरीषंमूत्रंवाकुरुतेयत्रयत्रच ॥ ४८ ॥ गोसहस्रंप्रदेयंहिकर्तव्यं

१ रामाश्ववसवोरुद्राःसूर्योभूमिस्तथैवच ध्रुवश्चमुनयश्चैवभारसंख्याभिधीयते । २ दर्शनंस्पर्शनंक्रीडाशृंगारोगुह्यभाषणं॥मृष्टान्नंप्रियमेकत्रशयनंभार्ययासह ॥ निर्विकारंमनःकुर्यादसिपत्रव्रतंत्विदं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हवनंद्विजैः ॥ पूजनीयाश्चतेविप्रादक्षिणाभिर्नसंशयः ॥ ४९ ॥ ललाटेतुरगस्यापिपत्रंसंलिख्यकाञ्चनम् ॥ बद्धास्वनामसं
युक्तंस्वप्रतापसमन्वितम् ॥ ५० ॥ कथनीयमिदंवाक्यंमयायंतुरगोत्तमः ॥ विमुक्तोऽस्तिनृपःकश्चित्प्रतिगृह्णातुचेद्बली ॥
॥ ५१ ॥ यस्तुतंप्रतिगृह्णातिसजेतव्योबलात्स्वयम् ॥ अनेनविधिनावीरक्रतुरेषःप्रजायते ॥ ५२ ॥ असिपत्रव्रतयुतोबहु
पुण्यफलप्रदः ॥ एवमेवपुराशक्रश्चक्रेहयक्रतोःशतम् ॥ ५३ ॥ देवेंद्रत्वमवाप्यासौमोदतेचत्रिविष्टपे ॥ हयमेधशतंचक्रेदे
वेंद्रोव्रतवर्जितम् ॥ ५४ ॥ यस्तुव्रतयुतंकुर्यादश्वमेधंमहाक्रतुम् ॥ ससर्वपापनिर्मुक्तांप्रकरोतिवसुन्धराम् ॥ ५५ ॥ अनंगं
कोभवेज्जेताविनाभीष्मंहिमानवः ॥ तस्माद्भीतानकुर्वंतिव्रतयुक्तंमहामखम् ॥ ५६ ॥ यदितेविद्यतेशक्तिरनंगंप्रतिभारत ॥
विजेतुंकुरुयज्ञस्यप्रारंभंकुरुनन्दन ॥ ५७ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ सर्वथाहयमेधेऽहंशोच्योऽस्मिमुनिसत्तम ॥ नच
द्रव्यंनचहयोनसहायाश्चसंतिमे ॥ ५८ ॥ भीमादयोऽपिचमयाक्लेशिताबहवोरणे ॥ कर्णस्यपुत्रोबलवान्वृषकेतुरुदारधीः ॥
॥ ५९ ॥ बालःषोडशवर्षीयोधर्मतस्तंनयोजये ॥ घटोत्कचसुतंचैकंमेघवर्णंनयोजये ॥ ६० ॥ पिताऽस्यनिहतोरात्रौमदर्थेभा
नुसूनुना ॥ यस्यप्रसादात्सततंपांडवःपृथिवीपतीन् ॥ ६१ ॥ जितवान्केशवश्चापिसदूरेमधुसूदनः ॥ एतावदुक्त्वावचनं
समाहूयवृकोदरम् ॥ ६२ ॥ प्रत्युवाचमहाबुद्धिर्भीमसेनमिदंवचः ॥ भीमभीममहाबाहोकथंयज्ञःप्रजायते ॥ ६३ ॥ गो
त्रहिंसांकथंभीमनाशयिष्येहितद्वद ॥ बहुविघ्नकरोयागस्तस्माच्छोचामिपांडव ॥ ६४ ॥ उपहास्यपदंयास्येयद्यपूर्णोभवि
ष्यति ॥ ॥ ॥ भीमउवाच ॥ ॥ हयोनविद्यतेराष्ट्रेनवित्तंभवतोदितं ॥ ६५ ॥ नसमीपेहृषीकेशःकस्मात्प्रोक्तंहितद्वचः ॥

१ देवेंद्रत्वम् अमराधिपत्वम्। २ व्रतवर्जितम् असिपत्रव्रतरहितम्। ३ पाण्डवः अर्जुनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीपस्थःसदाकृष्णोविद्यतेतवमारिष ॥ ६६ ॥ सर्वाश्चसम्पदःसंतियदिकृष्णसमीपगः ॥ सर्वपापविनिर्मुक्तायन्नामग्रह
णेनच ॥ ६७ ॥ नराभवंतिराजेंद्रसमीपस्थस्यकिंम्फलम् ॥ नपातकन्तेनृपतेगोत्राहिंसाकृतंभुवि ॥ ६८ ॥ विनापिमाध
वोयज्ञंपावयिष्यतिमेमतिः ॥ पूर्वमेवहिराजेन्द्रयुद्धकालउपस्थिते ॥ ६९ ॥ नोदिताःस्मोवयंतेनकृष्णेनामितबुद्धिना ॥ कुर्वंतु
युद्धंसततमितितेविस्मृतंकथम् ॥ ७० ॥ राजसूयाश्वमेधानांपुण्यंपावयितुंजनम् ॥ नसमर्थंमहाराजविनातंयज्ञनायकम्॥
॥ ७१ ॥ व्यासंपृच्छस्वराजेंद्रक्रतुयोग्यंतुरंगमम् ॥ कुत्रापिवर्तमानंमेशंसत्वेषमहामुनिः ॥ ७२ ॥ ॥ जैमिनिरुवाच ॥ ॥ ए
तच्छ्रुत्वावचस्तस्यभीमस्यामिततेजसः ॥ प्रत्युवाचपुनर्व्यासोधर्मराजमिदंवचः ॥ ७३ ॥ ॥ व्यासउवाच ॥ ॥ धन्योऽसि
वीरभद्रंतेरुचिरंतवभाषितम् ॥ हयस्तुविद्यतेदूरेपुरींभद्रावतींप्रति ॥ ७४ ॥ यौवनाश्वेनवीरेणरक्ष्यमाणोदिनेदिने ॥ अ
क्षौहिणीभिर्दशभिःपाल्यतेधर्मनन्दन ॥ ७५ ॥ पवनेनापिसंपर्कोलभ्यतेनास्यवाजिनः ॥ मानवस्यवराकस्यसंख्याकाग्र
हणेनृप ॥ ७६ ॥ कृपणेनयथावित्तंपाल्यतेतुरगस्तथा ॥ राजारक्षापरोनित्यंबलात्तंकःसमानयेत् ॥ तुरगंयज्ञसिद्ध्यर्थंधर्म
राजस्यपाण्डव ॥ ७७॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेयज्ञप्रारम्भोनामप्रथमोऽध्यायः ॥ १ ॥ ॥छ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ ततोऽब्रवीद्भीमसेनःप्रहसन्निवभारत ॥ अहंहयंतंतुबलादानयिष्यामिमारिष ॥ १ ॥ एकाकीतत्र
यास्यामिजित्वातंबलिनंनृपम् ॥ ससैन्यंयातुतेराजन्संशयःसुमहानपि ॥ २ ॥ वासुदेवंचिंतयानोनरःकर्मकरोतियः ॥ स
र्वार्थसिद्धिंलभतेसत्यमेतद्ब्रवीमिते ॥ ३ ॥ वासुदेवमनादृत्यतपोयज्ञादिकंचयत् ॥ निष्फलंजायतेसर्वंयथाऽभाग्यस्यचे

१ किमिति किमुवक्तव्यम् वर्णयितुमशक्यमित्यर्थः । २ ससैन्यमिति ससैन्यंनृपंजित्वा बलाद्धयमानयिष्यामीतिपूर्वेणसंबंधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठितं ॥ ४ ॥ नानयेतुरगंचाहंगतिंघोरामवाप्नुयाम् ॥ येलोकामातृहंतृणांयेचैवपितृघातिनां ॥ ५ ॥ तेलोकाममजायेरन्य
दितंनानयेहयम् ॥ एककूपोदकग्रामेयेवसंतिद्विजातयः ॥ ६ ॥ नवेदाध्ययनंयत्रयत्रनोशिवपूजनम् ॥ तत्रक्षणंनिवसतां
लोकायेममसंतुते ॥ ७ ॥ इत्येवमुक्त्वावचनंभीमस्तूष्णींस्थितस्तदा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ भीमसेनमहाबाहोग्रह
णंतुरगस्यमे ॥ ८ ॥ विषमंभातिहृदयेत्वयैकेनवृकोदर ॥ यौवनाश्वोऽपिबलवान्बलिनस्तस्यसैनिकाः ॥ ९ ॥ एकाकीतत्र
गंतासिचिंतातुमहतीमम ॥ ॥ जैमिनिरुवाच ॥ ॥ धर्मराजस्यतद्वाक्यंश्रुत्वाकर्णात्मजोऽब्रवीत् ॥ भीमसेनद्वितीयंमांसहायं
नयमाचिरम् ॥ १० ॥ ॥ भीमसेनउवाच ॥ ॥ पितातवहतोऽस्माभिर्यदाप्रभृतिपुत्रक ॥ विलोक्यत्वन्मुखंलज्जाजायतेमह
तीहिनः ॥ ११ ॥ ॥ वृषकेतुरुवाच ॥ ॥ उपकारःकृतःसम्यग्जनकोमेरणेहतः ॥ भवद्भिःक्षात्रधर्मेणकुत्सितंतस्यनाशित
म् ॥ १२ ॥ दुर्योधनस्यभृत्योऽसौयाज्जीवंधरातले ॥ संजातोधर्मविद्वेषीसमलोऽनंतवर्जितः ॥ १३ ॥ क्लिश्यंतीचसभाम
ध्येद्रौपदीयोषितांवरा ॥ तेनकर्णेनसादृष्टायथातुविजनेसती ॥ १४ ॥ गोसहस्राणिमत्स्यस्यगृहीतानिमयाश्रुतम् ॥ म
त्पित्रापांडवेनापिमोचितानीतिचिंतये ॥ १५ ॥ अत्यंतमलपूर्णायकर्णाययुधिपातनं ॥ कृतंतुपांडवैर्वीरैःशुद्ध्यर्थंदानमुत्तम
म् ॥ १६ ॥ कश्चिद्दृत्वातिहिकरात्काचंवापिवराटिकाम् ॥ दत्वाचिंतामणिंयद्वदर्जुनेनतथाकृतम् ॥ १७ ॥ गृहांगणेवर्तमा
नंकस्यचित्त्वफलंतरुम् ॥ समुन्मूल्यनयेत्कश्चित्संस्थाप्यसुरपादपम् ॥ १८ ॥ तदाऽपराधःकिंतेनब्रूहिभीममहामते ॥ भ
वत्प्रसादात्कर्णोऽसौप्राप्तवान्भास्करंपदम् ॥ १९ ॥ अपकीर्तिस्तुतस्येयंवर्ततेऽद्यापिभूतले ॥ तामस्मिन्यज्ञकालेतेनाश

१ धर्मविद्वेषो युधिष्ठिरद्वेष्टा । २ अनंतवर्जितः श्रीकृष्णवर्जितः । अतएवसमलः सपापः । ३ मत्स्यस्यगोसहस्राणिमत्पित्रागृहीतानिपाण्डवेनमोचितानीत्यन्वयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिष्यामिपांडव ॥ २० ॥ यौवनाश्वस्यनृपतेर्निर्मथ्यबलसागरम् ॥ तुरंगंभीमसेनस्तुसमानयतुसत्वरम् ॥ २१ ॥ ॥ जैमि
निरुवाच ॥ ॥ भीमस्तस्यवचःश्रुत्वासमालिंग्याथकर्णजं ॥ समीपस्थंनिजंपौत्रमिदंवचनमब्रवीत् ॥ २२ ॥ घटोत्कचेनते
पित्रातारिताःसर्वपांडवाः ॥ स्वपृष्ठंतान्समारोप्यनीतावैगंधमादनं ॥ २३ ॥ तथात्वंधर्मराजानंवीरपालयपृष्ठतः ॥ अ
हंतुकर्णपुत्रेणसहितोहयमानये ॥ २४ ॥ पार्थेनचत्वयाराजारक्षणीयःप्रयत्नतः ॥ यावद्गृहीत्वातुरगंपुनरायामिसत्वरम् ॥
॥ २५ ॥ ॥ मेघवर्णउवाच ॥ ॥ तवगात्रात्समुत्पन्नोधीरःसचघटोत्कचः ॥ पवित्रंतत्कृतंकर्मतेनकश्चात्रविस्मयः ॥
॥ २६ ॥ तावद्रथ्या[3]जलंहीनंयावत्सुरनदीगतम् ॥ नजायतेपुनःप्राप्तंवारितत्पातकापहम् ॥ २७ ॥ सतांसंगाच्चदुःप्रापंकिं
चनैवास्तिदेहिनाम् ॥ शिला[4]रामपदंप्राप्यकिंनपूतापुराऽभवत् ॥ २८ ॥ पुरींभद्रावतींवीरगमिष्यस्यमुना[5]सह ॥ तत्रमांन
यभद्रंतेहयंतमहमानये ॥ २९ ॥ भवान्युद्धगतस्थोहियुद्धंकर्तातुकर्णजः ॥ अहंस्वपृष्ठमारोप्यतुरगंतमिहानये ॥ ३० ॥
शीघ्रंनिर्गच्छभीमाद्यनमस्कृत्यधराधिपं ॥ ध्रुवस्तेविजयःपार्थभविष्यतिमहद्यशः ॥ ३१ ॥ नमस्कारोहरेःपुंसांकिंकिंनकु
रुतेबत ॥ पुत्रमित्रकलत्रार्थराज्यस्वर्गापवर्गदः ॥ ३२ ॥ हरिस्त्वघंध्वंसयतिव्याधीनाधीन्निरस्यति ॥ धर्मंविवर्धयन्नित्यं
प्रयच्छतिमनोरथम् ॥ ३३ ॥ किञ्चिन्नदुष्कृतंपार्थहरिंप्रणमतांनृणाम् ॥ ॥ भीमउवाच ॥ ॥ धन्योऽसिपुत्रकुशलंभाष
सेपरमंहितम् ॥ ३४ ॥ त्वमागच्छमयासार्द्धंवृषकेतुरयंतथा ॥ साहाय्यार्थंमहावीरतथात्वमपिपुत्रक ॥ ३५ ॥ त्रयोवयं
गमिष्यामःपरराष्ट्रंनसंशयः ॥ ॥ जैमिनिरुवाच ॥ ॥ एतत्तयोःशुभंवाक्यंनिशम्यकुरुनन्दनः ॥ ३६ ॥ महताचैवहर्षे

१ मेघवर्णम् । २ युधिष्ठिरः । ३ रथ्याजलं ग्रामाभ्यंतरमार्गगतमुदकंयावत्सुरनदीगतंनजायते तावत्तद्धीनमपवित्रमित्यर्थः । ४ गौतमशापाच्छिलारूपंप्राप्ताऽहल्या । ५ वृषकेतुना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णप्रत्युवाचवृकोदरम् ॥ मुनिनाभाषितंकार्यंतत्सर्वमवधारितं ॥ ३७ ॥ क्रियतेभवतासर्वमावाभ्यामपिपांडव ॥ रात्रिर्जा
तातुमहतीगंतुकामस्तपोधनः ॥ ३८ ॥ तस्मादृच्छामहेसर्वेऋषिंभावयितुंगृहात् ॥ व्यासस्ततोनिर्जगामगृहात्संपूजित
स्तुतः ॥ ३९ ॥ गतेव्यासेधर्मराजःपुनश्चिंतापरोभवत् ॥ कंचपृच्छामिसुहृदंकथंवित्तसमागमः ॥ ४० ॥ भ्रातृभिःसहितोरात्रौ
दुःखितोवाक्यमब्रवीत् ॥ ॥ युधिष्ठिरउवाच ॥ ॥ कथंहयस्यानयनंकथंयज्ञक्रियाभवेत् ॥ ४१ ॥ सर्वास्वापत्सुनःपा
तिसर्वदामधुसूदनः ॥ सदूरेदेवकीपुत्रःकोहितंमेकरिष्यति ॥ ४२ ॥ हानिमग्नोऽस्मिगोविन्दगोत्रहिंसार्णवेऽप्लवे ॥ कथंयज्ञं
करिष्यामित्वंचेन्नातानजायसे ॥ ४३ ॥ यथालज्जार्णवेमग्नाद्द्रौपदीतारितात्वया ॥ तथातारयमामस्माद्वृजिनान्मधुसूदन ॥
॥ ४४ ॥ एह्येहिकृष्णगोविन्ददामोदरदयार्णव ॥ त्वंचेन्नातानचास्माकंतर्हिह्येषविधिश्च्युतः ॥ ४५ ॥ ॥ जैमिनिरुवाच ॥
॥ एतावदुक्त्वावचनंपुनःकृष्णकथामृतम् ॥ यावत्स्मरतिगोविन्दंतावद्द्वारेसमागतः ॥ ४६ ॥ स्वयंसकृष्णोभगवान्सर्वव्या
पीरमापतिः ॥ अब्रवीच्चप्रतीहारंमांनिवेदयभूपतेः ॥ ४७ ॥ समयेनैवराजानोद्रष्टव्याविदुषांमतम् ॥ तत्केशववचःश्रुत्वा
द्वारपोवाक्यमब्रवीत् ॥ ४८ ॥ ॥ प्रतीहारउवाच ॥ ॥ सर्वदातवगोविंदसमयोधर्मनंदने ॥ कथितोधर्मराजेनममा
ग्रेसमयस्तव ॥ परापवादनिरताःपरद्रव्यापहारिणः ॥ ४९ ॥ परस्त्रीकामुकायत्रतत्रनावसरस्तव ॥ नायंपरद्रव्यरतोना
पवादीनकामुकः ॥ ५० ॥ तस्माद्विलोकयनृपंकुरुचास्यमनोरथं ॥ अर्जुनंपुरतःकृत्वाभीमसेनसमन्वितः ॥ ५१ ॥ त्वांचिंत
यतिगोविंदतस्याशांपरिपूरय ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंतुकथ्यमानंतंप्रत्युवाचजनार्दनः ॥ ५२ ॥ राजानंयाहि

१ व्यासेन। २ व्यासः। ३ सत्कारेणगमयितुम्। ४ दैवंनष्टमित्यर्थः। ५ समयेन योग्यकालेएवेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भद्रंतेशासनान्ममसत्वरम् ॥ इत्युक्तोवासुदेवेनत्वरितोधर्मनंदनं ॥ ५३ ॥ प्रत्युवाचहसन्वाग्मीगत्वाकृष्णंन्यवेदयत् ॥ कृष्ण श्चैवागतोद्वारिप्रवेशंकर्तुमिच्छति ॥ तच्छ्रुत्वाभाषितंतस्यधर्मराजस्त्वरान्वितः ॥ ५४ ॥ विहायचासनंभीमंप्रत्युवाचमहामतिः ॥ ॥ युधिष्ठिरउवाच ॥ ॥ भीमब्रूतेप्रतीहारःकृष्णमत्रसमागतम् ॥ ५५ ॥ अर्धरात्रेमत्प्रियार्थंमखनिष्पत्तयेऽथवा ॥ त्व मायाहिमयासार्धंयामियत्रसमेप्रियः ॥ ५६ ॥ निर्ययौधर्मराजोऽथभ्रातृभिस्तंहरिंप्रति ॥ तावत्तेनापिहरिणाशिरसासनम स्कृतः ॥ ५७ ॥ समुत्थाप्यकराभ्यांतंमूर्ध्निचाघ्रायपांडवः ॥ समालिंग्यस्थितःकृष्णंनेत्रांभःशिरसिक्षिपन् ॥ ५८ ॥ कृष्णबाह्वंत रेलीनःसतद्दोरंतरेहरिः ॥ भीमार्जुनौहरिपदेसंलग्नौपुरतोयमौ ॥ ५९ ॥ अर्घ्यादिक्रिययाभ्यर्च्यपांडवाविस्मयंययुः ॥ द्रौपदी तंनमस्कृत्यहसंतीवाक्यमब्रवीत् ॥ ६० ॥ ॥ द्रौपद्युवाच ॥ ॥ किमर्थंक्रियतेवीरैर्विस्मयःकेशवंप्रति ॥ अर्धरात्रेपुराप्रा प्तोयदादुर्वाससोभयम् ॥ ६१ ॥ आजगामभयत्त्रातायुष्मान्समधुसूदनः ॥ वस्त्ररूपीसभामध्येमिषतांवःपुराहरिः ॥ भक्ता नामनुकम्पार्थंतस्याविर्भावइष्यते ॥ ६२ ॥ यस्मिन्कालेनजननीनपितानचबांधवाः ॥ भर्तारोनभवन्तश्वगुरवोनपिताम हाः ॥ ६३ ॥ रक्षितुंमांसमर्थाहितदासंरक्षिताऽमुना ॥ दुर्योधनेनप्रहितोदुर्वासामुनिपुङ्गवः ॥ ६४ ॥ शिष्यायुतैःपरिवृतोव नेनिवसतांयदा ॥ तदामेमनसाध्यातोदयासिंधुर्जनार्दनः ॥ ६५ ॥ प्रियांमंकगतांत्यक्त्वावायुवेगःसमागतः ॥ स्थाल्याःको णेऽवशिष्टंतुशाकपत्रंनराधिप ॥ ६६ ॥ भुक्त्वामुनिगणाःसर्वेनीतास्तृप्तिंकृपालुना ॥ यदायदासतांग्लानिर्जायतेभुविभारत ॥ ६७ ॥ तदातदास्वयंकृष्णस्त्राताभवतिसंस्मृतः ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्थंस्तुतस्तयादेव्यांतुतोषनिषसादच ॥

१ लक्ष्मीम् । २ द्रौपद्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःपरंधर्मराजोवचनंचेदमब्रवीत् ॥६८॥ ॥युधिष्ठिरउवाच॥ ॥अधुनैवस्मृतोऽसित्वंक्लेशितेनमयाहरे॥सफलंकार्यमेतन्मे भविष्यतिजनार्दन॥६९॥हयमेधमतिर्जाताहितंप्रब्रूहिकेशव॥ यदियज्ञंप्रतिविभोसमर्थोऽस्मिधरातले॥ ७०॥ ॥श्रीकृष्णउवाच॥ ॥त्वयाकर्तुंनशक्योऽस्तिसमयेधर्मनन्दन॥ यागोऽयंसहसाभूमौवीराणांतपतामिह ॥ ७१ ॥ भीममंत्रेण राजेंद्रक्रियतेशोभनामतिः॥ नायंजानातिबव्हाशीकिंचिन्मंत्रंतथामतिम् ॥ ७२ ॥ स्थूलोदरःपरंमंदोजायतेनात्रसंशयः ॥ विवर्णाराक्षसीभार्याविद्यतेऽस्यगृहेसदा ॥७३॥ तयाहृतामतिश्चास्यतस्माद्वेत्तिनपांण्डवः॥ईदृशस्याल्पबुद्धेश्चभवान्मंत्रं करोतिचेत्॥ ७४॥ तर्हिजातःपरोयागोमंत्रीयस्यवृकोदरः॥ व्यंगांगहीनाबधिराःकुयोनिपुरताश्चये॥७५॥तेषांमंत्रोह्य सुखदःप्रोक्तःकविभिरेवच ॥ कामुकानांजडानांचस्त्रीजितानांतथैवच॥७६॥ श्वशुरस्यगृहेनित्यंजामाताकर्मकारकः॥ त स्यापिनभवेन्मंत्रःकार्यसिद्धौकदाचन ॥ ७७॥ भीमोवेत्तिजरासंधंहिडंबंबकमेवच ॥ सांप्रतंयेतुसंजाताःक्षत्रियाःसुमहाब लाः॥७८॥येनदृष्टाराजसूयेभीमसेनादिभिर्नृपाः॥ धर्मिष्ठाःसुमहावीर्यावदान्याश्चजितेंद्रियाः॥७९॥तान्नजानातिभीमो ऽसौसुबहून्बलदर्पितान्॥अर्जुनेनप्रतिज्ञातंजयद्रथवधंप्रति॥८०॥ अनामंत्र्यमयासार्धंतत्साहसतरंमहत्॥ अधुनापिमहा राजभीमसेनबलेनच ॥ ८१ ॥ कथंयास्यसियज्ञस्यपारंपांडवभूमिप ॥ यज्ञेऽस्मिंश्चमहीपालतत्साहसतरंमम॥कथंसंपा ल्यतेघोटोदिक्षुसर्वासुभारत॥८२॥सर्वत्रपरिगंताऽसौदेवगंधर्वमानवान्॥ तेऽपिवीराविजेतव्याधारयंतिचयेहयं॥८३॥ असिपत्रव्रतंकार्यंप्रथमंदीक्षितेनहि॥पुरारामेणरक्षार्थंतुरगस्यमहाबलः॥८४ ॥नियुक्तोभरतोवीरोबद्धःसचहयान्वितः॥

१ भीमसेनः। २ दानशौण्डाः। ३ अश्वः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरेणसुरथेनैवपुरींशुक्तिमतींप्रति ॥ ८५ ॥ पश्चात्सराघवेणापिमोचितःपौरुषेणसः ॥ हयंतेपाडवःपार्थःपालयिष्यतिमत्स
खा ॥ ८६ ॥ कस्त्वामत्रस्थितंत्राताकस्तुमोचयिताऽर्जुनम् ॥ गृहीतंतत्रकेनापिवीरेणहयरक्षकम् ॥ एषमेसंशयस्तीव्रोजायते
धर्मनंदन ॥ ८७ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनिकृतेश्रीकृष्णोक्तिश्रवणंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ वासुदेवस्यवाक्यानिश्रुत्वाभीमोऽब्रवीद्वचः ॥ मेघगंभीरयावाचाप्रहसन्निवकेशवं ॥ १ ॥ ॥ भीमउवाच ॥
रम्योऽयंसमयःश्लाघ्यःसहसावीरपूजितः ॥ धर्मराजेनैवकृष्णकर्तुंशक्योमहाक्रतुः ॥ २ ॥ प्रत्युत्तरंमयादत्तंत्वांविचिंत्यजनार्दे
न ॥ सत्यंस्थूलोदरादेवजायंतेमतिवर्जिताः ॥ ३ ॥ त्वयोदितंचबह्वाशीमतिहीनश्चजायते ॥ एतत्सर्वंत्वच्छरीरेमयैवचनिरीक्षितं
॥ ४ ॥ तवोदरेविश्वमिदंभातिसर्वंचराचरं ॥ स्थूलोदरःकस्त्वदन्योबह्वाशीकस्तवाधिकः ॥ ५ ॥ ब्रह्मादयःसुराःसर्वेसरितःसा
गरादयः ॥ सर्वाधरादिशश्चैवकिन्नमातितवोदरे ॥ ६ ॥ त्वत्तःस्थूलोदरःकश्चिन्नभूतोनभविष्यति ॥ सभवान्मामकंभोज्यमुद
रंचजनार्दन ॥ ७ ॥ शंसन्लज्जांनचाप्नोषित्वंवैमांभाषसेमृषा ॥ कस्तुजांबवतींभार्यांवानरींमाधवंविना ॥ ८ ॥ कुरुतेरुक्मिणीं
प्राप्यगुणज्ञःखलुकेशवः ॥ वराहमत्स्यकूर्माणांयोनिःप्रियतमातव ॥ ९ ॥ वामनस्त्वंपुराजातस्तस्माद्वक्रंप्रभाषसे ॥ लज्जाश्र
यस्तेसततंकामःपुत्रपदङ्गतः ॥ १० ॥ स्त्रीजितोनत्वदन्योऽस्तिदेवानांत्वम्महातरुम् ॥ पारिजातंसमुत्पाट्यस्त्रीनिमित्तमिहा
नयेः ॥ ११ ॥ क्षीराब्धौसततंवासःश्वशुरस्यगृहेतव ॥ एतेरम्यगुणाःप्रोक्ताबहवोऽन्येपितैरलम् ॥ १२ ॥ कस्माद्दूषयसेय
ज्ञंभीषयन्वैनराधिपम् ॥ येहताःक्षत्रियाःपूर्वंजरासन्धमुखामया ॥ १३ ॥ भवंतंपुरतःकृत्वातथैवारीन्जयामहे ॥ बाहुभ्यामु

१ उक्तम् । २ जरासन्धप्रमुखाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्धरेचोर्वीविकिरन्सर्वपर्वतान् ॥ १४ ॥ कारयिष्याम्यश्वमेधंनान्यथानृपाचिंतितम् ॥ आगमिष्यतिमेकृष्णःकरिष्यतिचमत्प्रि
यम् ॥ १५ ॥ इत्थंचिंतितमस्माभिःसमागत्यान्यथाकथम् ॥ करोषिदेवकीपुत्रसफलोऽस्तुतवाश्रयः ॥ १६ ॥ पिपासया[1]पी
ड्यमानोबहुकालेनचातकः ॥ मेघस्योदयमुद्ग्रीवःसाभिलाषंनिरीक्षते ॥ १७ ॥ तादृशस्यगलेवृष्टिंखदिरांगारपूरिताम् ॥ य
दिपातयतेमेघस्तेनंकिंक्रियतेतदा ॥ १८ ॥ पंकेमग्नांहिगांत्रातुंप्राप्तोनाथःसुहर्षिता ॥ धेनुर्भवतिगोविंदसचतांचेन्निमज्जये
त् ॥ १९ ॥ तयाकस्यैवपुरतःकथनीयंजनार्दन ॥ अस्माकमपिसावस्थात्वामाश्रित्यात्रदृश्यते ॥ २० ॥ ॥ जैमिनिरुवाच ॥
भीमस्यवचनंश्रुत्वाप्रत्युवाचजनार्दनः ॥ हर्षेणमहतायुक्तस्तेजःसंवर्द्धयन्निव ॥ २१ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ धन्यो
ऽसिभीमभद्रंतेदीयतांपरिरम्भणम् ॥ त्वद्वाक्येनामुनावीरसन्तुष्टंममानसम् ॥ २२ ॥ एकंपृच्छामिराजानंकिमर्थंभयविह्व
लः ॥ करोतिहयमेधंहिघातयित्वारणेकुरून् ॥ २३ ॥ द्रोणंभीष्मंतथाकर्णंसुहृत्संबंधिबान्धवान् ॥ मन्यतेपातकंजातमात्मन
स्तुकलेवरे ॥ २४ ॥ प्रददातुचतत्सर्वंमत्करेकिल्बिषंनृपः ॥ नाशयिष्येऽखिलंपापंपूतास्तिष्ठतुधर्मजः ॥ २५ ॥ ॥ भीमउवा० ॥
त्वत्करेचार्पितंदेवस्वल्पंतद्बहुलंभवेत् ॥ वस्तुजातंनृपोवेत्तिनददातिहिदुष्कृतम् ॥ २६ ॥ यज्ञजंसुकृतंहस्तेतवदास्यतिपांड
वः ॥ अहंतत्रगमिष्यामितुरगार्थंरमापते ॥ २७ ॥ भवान्रक्षतुराजानंयावदागमनंमम ॥ सुरक्षितेनृपेचैवसफलाःसर्वसि
द्धयः ॥ २८ ॥ धर्माभवंतिदेवेशसत्यमेतद्ब्रवीमिते ॥ सुकृतेनविनाजीवानराजंतेकथंचन ॥ २९ ॥ सर्वंसुकृतिजंपुण्यंभवान्गृ
ह्णातुनःकरात् ॥ फलार्थीनैवराजाऽसौनचाहंदेवकीसुत ॥ ३० ॥ हरिंविनानतेलोकावैकुंठप्रमुखाहिनः ॥ प्रियाभवंतिसुखदा

१ चातकेन ।

CC-0. In Public Domain. Digitization by eGangotri

संगतिश्वास्तुतेसदा ॥ ३१ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोयुधिष्ठिरः प्रीतोबभूवजनमेजय ॥ बुभुजेकृष्णसहितः सुष्वापभवनेसुखम् ॥ ३२ ॥ प्रभातसमयेजातेभीमःकर्णात्मजस्तथा ॥ मेघवर्णोमहाबाहुस्त्रयस्तेनिर्गतामुदा ॥ ३३ ॥ कुंतींयुधिष्ठिरंकृष्णंनमस्कृत्यतथाऽपरान् ॥ ददौकुंतीमोदकांश्वपाथेयंपाडवायसा ॥ ३४ ॥ जननीकरसंस्पृष्टांस्तृप्तःप्राश्यवृकोदरः ॥ मोदकैस्त्व[1]न्यथातृप्तिर्जायतेनकथंचन ॥ ३५ ॥ तथाऽन्यान्मोदकान्भीमोमेघवर्णकरेददौ ॥ समालिंग्यार्जुनंतत्रइदंवचनमब्रवीत् ॥ ३६ ॥ पार्थपालयराजानंब्राह्मणान्प्रतिपालय ॥ प्राप्तंमांमंदिरंविद्धिगृहीत्वातुरगंप्रति ॥ ३७ ॥ प्रसन्नंकेशवंपश्यन्संतुष्टंममानसम् ॥ सहायौचापिहृषितावुद्योगंप्रतिपांडव ॥ ३८ ॥ स्मरणाद्वासुदेवस्यलयंगच्छंत्युपद्रवाः ॥ पातकानियथापार्थविद्रवंतितथाऽहिताः ॥ ३९ ॥ यौवनाश्वंसतुरगंप्राप्तंविद्धिससैनिकम् ॥ प्रसादात्केशवस्यास्यसंशयोमेनविद्यते ॥ ४० ॥ ॥ जैमिनिरुवाच ॥ ॥ एतावदुक्त्वावचनंपुरींभद्रावतींप्रति ॥ ययौताभ्यांयुतोधीमान्पदातिःप्राङ्मुखस्तदा ॥ ४१ ॥ लंघयित्वासं[2]विषयांस्तृतीयेऽहनितांपुरीं ॥ प्राप्तःकतिपयैर्वीरैःपुरींरम्यांकुरूद्वह ॥ ४२ ॥ ददर्शपर्वतारूढोयौवनाश्वेनपालितां ॥ काननानांसहस्त्रैस्तुसमंतात्परिवारितां ॥ ४३ ॥ संपूर्णसरसीयु[3]क्तांभूषितांनगरींशुभां ॥ यूपैर्नलभ्यतेमार्गोहोमधूमैर्नदृश्यते ॥ ४४ ॥ नबहिःश्रूयतेशब्दोवेदघोषैर्धनुःस्वनैः ॥ नगर्यास्तोरणैरम्यैःप्रासादैर्मंडपैर्मठैः ॥ ४५ ॥ सत्रैस्त्रयस्तेसंतुष्टाःप्राकारैःपरिखादिभिः ॥ ददर्शभीमसेनोऽथवनंचैवद्रुमैर्युतं ॥ ४६ ॥ फलितायत्ररंभास्ताःस्वफलैर्भांतिभूरिशः ॥ नम्राःफलातिभारेणसुगुणैःसज्जनाइव ॥ ४७ ॥ सुवृ[4]त्तैःसरलादीर्घानारिकेलद्रुमाःफलैः ॥ दृश्यंतेबहुलायत्रवंशाःसत्पुरुषैरिव ॥ ४८ ॥ रक्षंति

१ अन्यथा जननीकरसंस्पर्शाभावे। २ सः भीमः विषयान् देशान्। ३ सरोभिर्युक्तां। ४ वर्तुलाकारैः। ५ कुलानि।

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्वफलैर्नित्यंनरवाक्यानिसर्वदा ॥ सर्वकार्याणिकुर्वंतितत्रवैक्रमुकद्रुमाः ॥ ४९ ॥ सकंटकैःफलैर्नित्यंपनसाःपरतृप्तये ॥ स्थि
ताःसर्वांगजैस्तत्रदृष्टाभीमेनभारत ॥ ५० ॥ अनंतत्वंगतावृक्षाःखर्जूराणांसहस्रशः ॥ फलैःसंकुचितैरेवनृणांतापापहारिणः ॥
॥ ५१ ॥ विदीर्णैर्यत्रदाडिंब्यःस्वफलैःशुकसंयुतैः ॥ बीजपूरैःसरागैस्तैःकुर्वंतिहिहितंजने ॥ ५२ ॥ रसालाःकोकिलैर्लुब्धैःसा
रंगैश्चशिखंडिभिः ॥ सेव्यंतेमाधवस्येवगुणाःसद्भिर्निरंतरं ॥ ५३ ॥ पंचधैवत्वचाऽत्यंतांफलानिकर[1]मर्दिनां ॥ प्रयच्छंतिरुचिंर
म्यांनामानीवहरेर्गतिं ॥ ५४ ॥ वहतांजलयंत्राणामुदकंसरसीगतं ॥ प्रीणातिविविधान्वृक्षानतिथीनातिथेयवत् ॥ ५५ ॥ बीज
पूरकनारिंगजंबीरामलकद्रुमाः ॥ जंबूनिंबकदंबाश्चबाड्डामाक्रोडकावने ॥ ५६ ॥ चिंचिणीबदरीशा[2]लाःपुष्पिताशोकचंपकाः ॥
नागकेसरपुन्नागाबकुलाःपाटलाःशुभाः ॥ ५७ ॥ चंच[3]रीकाःशुकाबर्हिसारिकारुतनादिताः ॥ सुवर्णकेतकीजातीयुवतीमो
गरादयः ॥ ५८ ॥ शतपत्रीसुपत्रीचकर्णिकाश्चापिपुष्पिताः ॥ विलोक्यभीमःसंतुष्टोवनंसुरभिपादपम् ॥ ५९ ॥ वीरायकर्णपु
त्रायदर्शयित्वामहद्वनं ॥ नगरींचसुरम्यांतांवाजिपानंसरःशुभम् ॥ ६० ॥ रत्नालयंरौप्यशिलाबद्धंशीतजलंशिवम् ॥ नानास
त्वसमाकीर्णंकेशवस्येवमानसम् ॥ ६१ ॥ अब्रवीद्वृषकेतुंतंकिंकर्त्तव्यंमयाऽधुना ॥ मध्याह्नेतुरगस्यात्रभविष्यतिसमागमः ॥
॥ ६२ ॥ रक्ष्यमाणःसुबलिभिर्वीरैःसंग्रामकोविदैः ॥ नमुंचंतिहयंवीराःकृपणाःस्वधनंयथा ॥ ६३ ॥ त्रयोवयंपर्वतेऽस्मिंल्लता
वृक्षसमाकुले ॥ तावत्तिष्ठामहेसर्वेयावद्धयसमागमः ॥ ६४ ॥ पाल्यमानोऽपितुरगोग्रहीष्यामोनसंशयः ॥ अहमादौगमि
ष्यामिरणमध्येमहाबलः ॥ ६५ ॥ मत्पृष्ठपालकौवीरौभवंतौभवतांप्रभू ॥ एवंमंत्रस्तुसुखदोभविष्यतियशःप्रदः ॥ ६६ ॥

१ 'करवंद' इतिमहाराष्ट्रभाषायां २ बदरीशालाःबदरीवृक्षाः । ३ भ्रमराः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेभीमवाक्यंनामतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥
जैमिनिरुवाच ॥ ॥ भीमस्यवचनंश्रुत्वाप्रत्युवाचसकर्णजः ॥ अक्षौहिणीनांदशकंश्रूयतेचास्यभूपतेः ॥ १ ॥ तन्मध्येहयर
क्षार्थमागमिष्यंतिकेचन ॥ त्वद्बाहुबलमासाद्यनभवंतिरणेजनाः ॥ २ ॥ गंगातटमिवासाद्यपातकानांगणानृणां ॥ विनाशंचैव
गच्छंतितथाभीमतवाहिताः ॥ ३ ॥ कालकूटंविषंतावत्परितापेनदारुणं ॥ रुद्रस्यपुरतोनैवयावद्भवतिसंगतं ॥ ४ ॥ कामुकावि
षयैस्तावद्बाध्यंतेप्राणिनोभुवि ॥ यावद्वस्तुंविचारेणसंगतानभवंतिते ॥ ५ ॥ गमनागमनंतावद्देहिनामिहजायते ॥ स्मरणंवा
सुदेवस्ययावत्तेषांनरोचते ॥ ६ ॥ पितॄणांबंधनंतावन्नरकेपतनंतथा ॥ नयावत्कुलजःपुत्रोगयापिंडप्रदोभवेत् ॥ ७ ॥ धर्मराज
निमित्तंचकृष्णप्रीत्यैवृकोदर ॥ तुरगग्रहणेनूनंसिद्धिरत्रविलोक्यते ॥ ८ ॥ एतेपश्यगजाःप्राप्ताःसमदामधुपैर्वृताः ॥ करेणवश्च
करभाःकज्जलस्येवपर्वताः ॥ ९ ॥ जलपानंनकुर्वंतिनिर्मलंकलुषंजलं ॥ उन्मज्जंतिनिमज्जंतिमहामात्रैरधिष्ठिताः ॥ १० ॥ प्री
ताःप्रेमजलैःस्त्रीणांकामुकाःपुरुषाइव ॥ जलेनयेनजीवंतिसरागंकुर्वतेचतत् ॥ ११ ॥ सिंदूरेणातिरागेणस्वकपोलच्युतेनच ॥
नागकुंभान्दानहीनान्मधुपानलिनीवने ॥ १२ ॥ प्रविष्टास्तान्परित्यज्यमलिनेषुनसौहृदम् ॥ मृणालानिमरालाश्चगृह्णंतिकृप
यान्विताः ॥ १३ ॥ षट्पदेभ्यःप्रयच्छंतिभूतसाम्यंगताइव ॥ उच्छलंतिजलेमत्स्याधनंप्राप्ययथाऽधनाः ॥ १४ ॥ चक्रवाकाश्चक्र
वाक्यःसंगताःप्रेमपूरिताः ॥ दृश्यंतेऽस्मिन्हिसरसिभीमसेनमहाबल ॥ १५ ॥ अतःपरंहितुरगाःसमागच्छंतिसत्वराः ॥ गोक्षीरहि
मवर्णाश्चरक्ष्यमाणामहारथैः ॥ १६ ॥ रेणुःसमुत्थितोभूरिपश्यपांडववाजिभिः ॥ वादित्राणांतथाघोषःपताकागगनंगताः ॥

१ अस्ययौवनाश्वस्य । २ विलयंयांतितेनराइतिवापाठः । ३ ब्रह्मविचारेण । ४ निर्मलंजलंपानंनकुर्वंतिकिंतुकलुषमेवकुर्वंतीत्यर्थः । ५ आधोरणैः । ६ सरागंसमलं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १७ ॥ धूयंतेचमहाबाहोकालजिव्हायथास्थिताः ॥ यौवनाश्वोनृपःप्राप्तोभविष्यतिनसंशयः ॥ १८ ॥ वीराणांपश्यधीरा
णांमंडलानिसहस्रशः ॥ ध्वजाग्रेविद्यतेगृध्रःकस्यतंचनविद्महे ॥ १९ ॥ शुकोभातिध्वजस्थोऽपिरोरवीतिचदुंदुभिः ॥ एनंहि
बहवोयांतिवीरारणविशारदाः ॥ २० ॥ एवंविलोक्यतेयत्रतत्रवीरसमागमः ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्थंवदतिवीरेतु
वृषकेतौमहाबले ॥ २१ ॥ तुरगाजलपानार्थंयौवनाश्वस्यमारिष ॥ मध्याह्नेतत्रसंप्राप्तानानावर्णाःसहस्रशः ॥ २२ ॥ त्रि
भिस्त्रिभिस्तेविधृतादशध्रुवंकमंडिताः ॥ मंदु[2]रैर्बलिभिश्चित्रगतयःशिक्षिताश्चये ॥ २३ ॥ धा[3]राभिःपंचभिर्युक्ताश्चलत्प्रोथाः[4]सु
कंधराः ॥ मुखेभ्योनिःसरंतीवदृश्यतेखुरसंततिः ॥ २४ ॥ द्विजाननेभ्योहियथानिर्यातिपदपद्धतिः ॥ मायूरींतैत्तिरीमौष्ट्रींकुर्वं
तोगतिमुत्तमां ॥ २५ ॥ नाकुलींगतिमास्थायसमायांतिमहत्सरः ॥ आकंठंविनिमग्नास्तेपपुस्तोयंसनिःस्वनं ॥ २६ ॥ आग
तानिर्गताश्चान्येदृष्टाभीमेनभारत ॥ वृषकेतुंप्रत्युवाचभीमोवचनमुत्तमं ॥ २७ ॥ ॥ भीमउवाच ॥ ॥ प्राप्ताहयाश्चबहवःस
हयोनैववीक्ष्यते ॥ यन्निमित्तमिहप्राप्तावयंतावें[5]त्रयोजनाः ॥ २८ ॥ किंवानृपगृहेबद्धःसजलंपरिपास्यति ॥ हरिंविनानैवगति
र्धर्मराजस्यमंदिरे ॥ २९ ॥ अस्माकंविद्यतेतातभवाञ्ज्ञानातिनेतरः ॥ अपुत्राणांयथालोकाभवंतिनसुखप्रदाः ॥ ३० ॥ अदा
तृणांयथाकामाब्रह्मचर्यवतांयथा ॥ बंधूनांचयथासंगोजितस्त्रीणांविलोक्यते ॥ ३१ ॥ नृपतीनाममंत्राणांचिरंराज्यंनसुस्थिरं
॥ नयशःपुण्यहीनानांनसुखंपरिवादिनां ॥ ३२ ॥ नमोक्षोभक्तिहीनानांविष्णोरमिततेजसः ॥ वैभवंहियथानृणामनाराध्यच
शंकरं ॥ ३३ ॥ तथाहयंविनाऽस्माकंगमनंनगजाव्हये ॥ भीमस्यवचनंश्रुत्वायावद्वदतिकर्णजः ॥ ३४ ॥ तावत्सतुरगःप्राप्तोऽर

१ द्वावुरस्यौशिरस्यौद्वौद्वौद्वौरंध्रोपरंध्रयोः । एकोभालेद्यपानेचदशावर्ताध्रुवाःस्मृताः ॥ २ सादिभिः ३ आस्कंदितादिपंचगतिभिः । ४ कंपितनासाः । ५ वसामोत्रत्रयोजनाइत्यपिपाठः

CC-0. In Public Domain. Digitization by eGangotri

थिभिःपरिवारितः ॥ महागजैश्चसमदैःसादिभिःपत्तिभिस्तथा ॥ ३५ ॥ चामरैर्वीज्यमानस्तुसबलोबद्धचामरः ॥ श्वेतातपत्रैः
सञ्छन्नःक्षुद्रघंटाभिरन्वितः ॥ ३६ ॥ चंदनेनसुगंधेनकुंकुमेनापिचर्चितः ॥ तरुणीकरचिन्हानिधारयन्स्वतनौहयः ॥ ३७ ॥
धृतमाल्योविचित्रांगोमालाभिश्चविभूषितः ॥ उभाभ्यांसंगृहीतश्चजयशब्दैःसुमंगलैः ॥ ३८ ॥ कृष्णागुरुमुखैर्धूपैर्धूप्यमा
नःपुरोगमैः ॥ स्पृशतेनखुराग्रैश्चधरणींबहुवल्लभाम् ॥ ३९ ॥ नानावादित्रनादेनवीराणांगर्जितेनच ॥ हयहेषेणनागानांबृं
हितेनबभौहयः ॥ ४० ॥ भाविदर्शनपुण्येनश्रीकृष्णस्यनसंशयः ॥ पूज्यतेतुरगोनानाधूपैर्दीपैःसुमंगलैः ॥ ४१ ॥ तंविलो
क्यतथारूपंरक्षितंसुमहारथैः ॥ बालस्तद्ग्रहणेबुद्धिंसचक्रेभीमनन्दनः ॥ ४२ ॥ उत्सुकंतंतथालोक्यभीमसेनोऽब्रवीत्सुतम् ॥
॥ भीमसेनउवाच ॥ किंचिकीर्षसिवत्सत्वंब्रूहिसत्यंममाग्रतः ॥ ४३ ॥ उवाचभीमंतरसामेघवर्णोऽथराक्षसः ॥ मेघवर्णउ० ॥
त्वयाज्ञप्तोभीमसेनतुरगंपर्वतोपरि ॥ ४४ ॥ गृहीत्वावत्स्यवद्वीरतिष्ठामीतिमतिर्मम ॥ सर्वेषांपश्यतांवीरवीराणांगणनानमे ॥
॥ ४५ ॥ तंहरिंप्रसमीक्ष्याथवायुजंसमयाचत ॥ अनुज्ञांदेहिमेस्वामिन्यौवनाश्वंसपुत्रकम् ॥ ४६ ॥ बद्ध्वानयामिपश्यत्वंवृष
केतुश्चकर्णजः ॥ अथवाक्षात्रधर्मेणयुद्धेजित्वामहारिपुम् ॥ ४७ ॥ तुरंगमानयिष्यामिसंभूतोयद्यहंत्वया ॥ स्वभृत्येविद्यमा
नेकिंस्वामीयुध्यतिमारिष ॥ ४८ ॥ आनीयाहंचतुरगंकरिष्येवृक्षसंयुतम् ॥ एतावदुक्त्वावचनंप्रययौराक्षसस्तदा ॥ ४९ ॥
भूधरात्खंसमुत्पत्यमायांकुर्वन्सराक्षसीम् ॥ अन्धकारस्तदाह्यासीत्कालमेघइवोदितः ॥ ५० ॥ स्फुरंतिविद्युतोऽजस्रंस्फू
र्जथुश्चमुहुर्मुहुः ॥ तन्मध्येसिंहनादञ्चसचकारपुनःपुनः ॥ ५१ ॥ व्याकुलाश्चदिशःसर्वानप्राज्ञायतकिंचन ॥ देवासुरमनुष्या

१ वायुजं भीमम् । २ वज्रनिर्घोषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णांमहद्भयमुपाविशत् ॥ ५२ ॥ मेघनादस्यरूपेणऽयाप्तंतद्व्योममण्डलम् ॥ विमानानिचसर्वाणिभ्रमंतिस्मइतस्ततः ॥ ५३ ॥
एतस्मिन्नंतरेदेवःकश्चिदागत्यसत्वरः ॥ उवाचशक्रमासीनंसभामध्येतिदुःखितः ॥ ५४ ॥ ॥ देवउवाच ॥ ॥ भोभोस्वामि
न्नजानीषेह्यात्मनश्चशुभाशुभम् ॥ दैत्यःकश्चिदिहागत्यकुरुतेलोकयातनाम् ॥ ५५ ॥ मायांविकुरुतेऽत्यंतंलोकक्षयचिकीर्ष
या ॥ तंत्वंजहिमहाबाहोलोकानांरक्षकोह्यसि ॥ ५६ ॥ इतिश्रुत्वामहेंद्रोऽसौरोषात्प्रस्फुरिताधरः ॥ उवाचसकलान्देवान्जा
नीध्वंकोऽयमागतः ॥ ५७ ॥ समागत्यप्रपश्यंतिदेवादूरस्थिताश्चतम् ॥ दूतस्तुतैःसमाहूतःपृच्छगत्वाचकोभवान् ॥ ५८ ॥
सदूतस्तत्रगत्वावैपृष्टवान्मेघवर्णकम् ॥ ॥ देवदूतउवाच ॥ ॥ कस्त्वंवीरसमायातःसत्यंब्रूहिममाग्रतः ॥ ५९ ॥ त्वयिदृष्टे
महावीरदेवानांभयमाविशत् ॥ दूतोहंप्रेषितस्तैस्तुकिंतवात्रचिकीर्षितम् ॥ ६० ॥ ॥ मेघवर्णउवाच ॥ ॥ नभेतव्यंसुरैः
क्वापिनाम्नाऽहंमेघवर्णकः ॥ भीमस्यपौत्रोहैडिंबिर्यज्ञसाहाय्यकारकः ॥ ६१ ॥ हयंग्रहीष्येराज्ञोऽहंयौवनाश्वस्यभोसुर ॥ सं
भ्रमस्तुतदर्थेमेधर्मयज्ञार्थसिद्धये ॥ ६२ ॥ इतिश्रुत्वासदूतस्तुहर्षनिर्भरमानसः ॥ इंद्रायसर्ववृत्तांतंधर्मराजार्थमुत्तमम् ॥ ६३ ॥
कथयामासहृष्टास्तेदेवाइन्द्रादयस्तदा ॥ अपश्यन्कौतुकंतत्रमेघवर्णस्यसंयुगे ॥ ६४ ॥ मेघवर्णोऽपितंदृष्ट्वाहयंचांबरमाश्रि
तः ॥ जिहीर्षुराव्रजत्तत्रयत्रासौयज्ञियोहयः ॥ ६५ ॥ मोहयित्वातुतान्सर्वान्भूमौपात्याथवायुना ॥ रजउत्धूयचबलात्सैनि
काभयविह्वलाः ॥ ६६ ॥ केचिद्गृहीतशस्त्रास्तेकेप्यधावन्नितस्ततः ॥ एवंतुऽयाकुलीकृत्यशिलावर्षेणवायुना ॥ ६७ ॥ सिंह
नादंप्रकुर्वाणोहरिंतंजगृहेमुदा ॥ खमुत्पतंतंददृशुर्नीलमेघाकृतिंजनाः ॥ ६८ ॥ कुण्डलांगदकेयूरमुकुटाद्यैर्विराजितम् ॥ को

१ बाधाम् । २ पात्य पातयित्वाल्यप्छंदसः । ३ तुरंगम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽयंकोऽयंकुतश्चायंछिंधिभिंधीतिवादिनः ॥६९॥ इतिजल्पंतितेवीरावीक्षन्तःखंसमाश्रितम् ॥ साश्वंव्रजंतंतंदेवाःपुष्पवृष्ट्या
सिषेविरे ॥ ७० ॥ हैडिंबेकृतकृत्योऽसौधर्मराजोऽनुजैःसह ॥ त्वादृशोयस्यपौत्रोऽभूद्धर्मसाहाय्यहेतवे ॥ ७१ ॥ इतिस्तुत्वा
तुतंदेवाजग्मुस्तेस्वमथालयम् ॥ मेघनादोऽपिहंसंतंगृहीत्वाशीघ्रमागमत् ॥ ७२ ॥ आकाशस्थंसमालोक्यसाश्वंतौहर्षपूरि
तौ ॥ सिंहनादंप्रकुर्वंतौवीक्षंतौचमुहुर्मुहुः ॥ ७३ ॥ अत्रांतरेमहानासीद्धतेहंसेरवस्तदा ॥ यौवनाश्वबलेतस्मिन्नन्योन्यंजघ्नु
रुद्भटाः ॥ ७४ ॥ गत्वातेकथयामासूराज्ञेवृत्तांतमादितः ॥ तच्छ्रुत्वासहसाराजापुत्रैःसहसमागतः ॥ ७५ ॥ गतंहंसंतुतंश्रु
त्वादुःखक्रोधसमन्वितः ॥ उवाचकेननीतोऽयंहंसोह्यल्पायुषामम ॥ ७६ ॥ सदेवानपिनेष्यामिमानवान्यमसादनम् ॥ इत्यु
क्त्वासहसाराजाक्रोधेनव्याकुलीकृतः ॥ ७७ ॥ आजुहावरथान्दिव्यान्नाम्नाकालांतकोपमान् ॥ आयातास्तेरथाःशीघ्रंनम
स्कृत्यचतंप्रभुम् ॥ ७८ ॥ आदेशोदीयतांस्वामिन्कोऽद्यप्राणैर्वियोज्यताम् ॥ ॥ राजोवाच ॥ ॥ वियन्नीतोहरिर्वीराः
शीघ्रंधावतमाचिरम् ॥ ७९ ॥ इत्युक्ताःसहसोत्पत्यसहस्राणांचतुष्टयम् ॥ तरसागगनेतंतुरुरुधुर्मुमुचुःशरान् ॥ ८० ॥ मेघ
नादस्तुतान्वीरान्प्रहसन्वाक्यमब्रवीत् ॥ ॥ मेघनादउवाच ॥ ॥ यमलोकेहिगंतव्यंभवद्भिर्नात्रसंशयः ॥ ८१ ॥ इत्यु
क्त्वातान्जघानाशुतलमुष्टिभिराशुगान् ॥ शिलामादायतान्सर्वान्पोथयामासराक्षसः ॥ ८२ ॥ तेहताभीमकर्माणःकायंत्य
क्त्वादिवंगताः ॥ शापान्मनुष्यजन्मानःप्राप्तास्तेवैसुरालयम् ॥ ८३ ॥ सतान्निर्मथ्यसंग्रामेयत्रतौवृषपाण्डवौ ॥ विहायसा
तत्रगंतुंमेघवर्णःप्रचक्रमे ॥ ८४ ॥ सैनिकाश्चापरेराज्ञोयुद्धायैवमनोदधुः ॥ हाहाकारोमहानासीत्संगृहीतेहयेतदा ॥ ८५ ॥

१ तुरगम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीतस्तुरगोयेनतंगृहीतेतिवादिनः ॥ क्वगतःकेननीऽतोसौकुतोयास्यतिनःपुरः ॥ ८६ ॥ नूनमात्मविनाशायजहारतुरगं हियः ॥ अमर्त्यमपिनेष्यामोमृत्युलोकंनसंशयः ॥ ८७ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवंतस्तेसर्वेगगनेराक्षसेनहि ॥ नीयमानंचददृशुर्हरिंकोपसमन्विताः ॥ ८८ ॥ मुमुचुःशरवर्षाणिरुरुधुस्तेदिशोदश ॥ बाणैर्व्याप्यनभःसर्वंपातयंतिस्मराक्षसम् ॥ ८९ ॥ एतस्मिन्नेवकालेतुवृषकेतुर्महाबलः ॥ उवाचभीमंप्रहसन्प्राप्तोऽसौमेघवर्णकः ॥ ९० ॥ ॥ वृषकेतुरुवाच ॥ ॥ धन्योऽसौराक्षसोभीमश्लाघ्यंकर्मामुनाकृतं ॥ गृहीत्वातुरगंप्राप्तःसकथंपात्यतेपरैः ॥ ९१ ॥ एतान्पश्यरणेप्राप्तान्वीरान्रणविशारदान् ॥ धारयामिसमक्षंतेपातयिष्येनसंशयः ॥ ९२ ॥ एतावदुक्त्वावचनंगृहीत्वापरमंधनुः ॥ पदातिःप्रययौधन्वीभीमसेनस्यपश्यतः ॥ ९३ ॥ पिनाकपाणिर्भगवान्यथादैत्यगणांस्तथा ॥ अधुनाचरणेवीरास्तिष्ठध्वमितिचाब्रवीत् ॥ ९४ ॥ निवर्त्तध्वंवृथाप्राणान्मात्यजध्वंममांतिके ॥ तेतुश्रुत्वावचस्तस्यविस्मयोत्फुल्ललोचनाः ॥ ९५ ॥ कोऽयंकस्यात्मजोवीरःकिंवाज्ञापयतिस्वयं ॥ अस्माकंपुरतःस्थित्वासमाह्वयतिकालवत् ॥ ९६ ॥ प्रब्रुवंतोवचश्चैवंपुनस्तेरुरुधुस्तदा ॥ तंकर्णपुत्रंसमरेऽवर्षयंस्तेयथाघनाः ॥ ९७ ॥ सतान्बाणगणैर्घोरैःपातयित्वाधरातले ॥ ननादसिंहवद्वीरःसिंहस्कंधोमहाभुजः ॥ ९८ ॥ महारथाःशरैश्छन्नानदृश्यंतेनराधिप ॥ गजाविदारिताबाणैःपतिताधरणीतले ॥ ९९ ॥ सादिनःपत्तयःसर्वेविनष्टाःशतशोरणे ॥ तानिसैन्यानिभग्नानितस्मात्कर्णात्मजात्तदा ॥ १०० ॥ स्मरणाद्वासुदेवस्यपातकानीवसर्वशः ॥ तत्रकेचित्पुरींप्राप्ताःकथयंतिहिवैक्षयं ॥ १०१ ॥ हयोनीतःपरैराजन्नयुतंविदलीकृतं ॥ वीराणांरणधीराणांयौवनाश्वंनृपंप्रति ॥ १०२ ॥ ॥ जैमिनिरुवाच ॥

१ यमलोकम् । २ मेघनादः । ३ शत्रुभिः । ४ नृपंप्रतिकथयंतोत्युत्तरेणसंबंधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौवनाश्वोमहाबाहुर्विस्मयंपरमंगतः ॥ तच्छ्रुत्वाभाषितंतेषांमहाकोपेनपूरितः ॥ १०३ ॥ निर्ययौस्वबलेनैवनिखिलेनजना
धिपः ॥ पप्रच्छकतितेप्राप्ताःसंतिवीराःकियद्बलं ॥ १०४ ॥ ऊचुस्तेपित्रयोदृष्टाश्चतुर्थोनसमागतः ॥ एकेनगगनेराजन्नीतः
सतुरगस्तव ॥ १०५ ॥ यूनापरेणसैन्यंतुपातितंचापरःस्थितः ॥ यथाह्यवैष्णवःपुत्रःस्वकुलंनिरयेऽशुचौ ॥ १०६ ॥ ॥ यौव
नाश्वउवाच ॥ ॥ त्रयोदेवाश्चतेनूनंगृण्हंतितुरगंमम ॥ नमानुषैःशक्यतेऽसौहयोनेतुंकथंचन ॥ १०७ ॥ नयंतिमानुषाहंसंय
दितेनैवमानुषाः ॥ रणयज्ञेहितान्देवांस्तोषयिष्येऽहमद्यवै ॥ १०८ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्युक्त्वाप्रययौराजासैन्ये
नमहतावृतः ॥ प्रथमंराजशार्दूलस्तंददर्शवृकोदरम् ॥ ९ ॥ वृषध्वजंस्थितंयुद्धेविलोक्यहर्षितोऽभवत् ॥ धन्योऽसौबालक
श्चैकोवीक्ष्यतेमांसमागतम् ॥ ११० ॥ नभयंविद्यतेचास्यमृगराडिवलक्ष्यते ॥ मृत्योर्भयंनकुरुतेयथायोगीतथाशिशुः ॥ ११ ॥
तस्मात्सर्वेममैतस्यपश्यन्तुबलमुत्तमम् ॥ ॥ जैमिनिरुवाच ॥ ॥ तंतथाभाषमाणंतुससैन्यंहिसमागतम् ॥ १२ ॥ निरी
क्ष्यभीमस्तरसायोद्धुंप्रायाद्गदान्वितः ॥ वारयन्कर्णपुत्रञ्चपातयन्निवतद्बलम् ॥ १३ ॥ प्रत्युवाचतदाभीमंवृषकेतुर्मुदावचः ॥
त्रैलोक्यंयदिसंप्राप्तंसंग्रामेकुंतिनन्दन ॥ १४ ॥ तदातवभवेद्युद्धंस्वल्पंसैन्यंचमामकम् ॥ सेनेयंतुवृतातातप्रथमंपुत्रकेणते ॥
॥ १५ ॥ मयाभीममहायुद्धेवर्जनीयात्वयाऽद्यसा ॥ इमांनिर्मथ्यसकलांयशःपैत्रंतुतेकरे ॥ १६ ॥ समुत्पाद्यप्रदास्यामिमा
त्वंक्रीडयमारिष ॥ नास्थिरःसर्वदादेहस्तारुण्यंचञ्चलंतथा ॥ १७ ॥ स्थिरारमान्नकस्यापिदृश्यतेमंदिरेविभो ॥ तस्माद्यशः
स्थिरंकार्यंप्राणिभिर्भूतलेऽखिले ॥ १८ ॥ विपरीतःपरोधर्मःकविभिर्भाषितःक्षितौ ॥ परसेनामतिप्रौढांनानामुखविलोकिनी

१ पातयतीतिशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्र ॥ १९ ॥ निर्मथ्ययेनरायांतिप्राप्नुयुस्तेयशःस्थिरम् ॥ वधूंस्तेममसेनास्त्रीसभावंमांनिरीक्षते ॥१२०॥ कर्तुंचसक्षतंवक्षःश
स्त्ररूपैर्नखैर्दृढम् ॥ सेनामुखंममुखेसङ्गतंपश्यपाण्डव ॥ २१ ॥ भवंतंश्वशुरंवीक्ष्यविमुखाहिभविष्यति ॥ पताकांपल्लवव्रृतं
नमुखंदर्शयिष्यति ॥ २२ ॥ तस्मात्त्वयाचस्थातव्यंयावद्भवतिसंगतम् ॥ ममाद्यसंगरेतातसेनायास्तावदेवहि ॥ २३ ॥ ॥
भीमसेनउवाच ॥ ॥ भवान्प्रयातुप्रथमंसेनामेनांविलासिनीम् ॥ वधूजितंयदावीक्ष्येत्वांतुपुत्रकसंगरे ॥ २४ ॥ तदावधूंशास
यिष्येगदादण्डेनदूरतः ॥ शासिताहिवधूःपुत्रसफलातेभविष्यति ॥ २५ ॥ गुरुभिःशास्यतेनैवस्नुषायदिधरातले ॥ तस्याद्दु
र्वृत्तभावेनतेषांहिपतनंध्रुवम् ॥ २६ ॥ एतत्समीक्ष्यगंतव्यंत्वयावीरमहाचमूम् ॥ पदातिस्त्वंरथस्थास्तेपरेप्राप्ताहिकर्णज ॥
॥ २७ ॥ एकाकिनंप्रेरयितुंनक्षमोऽस्मिमहाबल ॥ ॥ जैमिनिरुवाच ॥ ॥ एतस्मिन्नंतरेराजन्वृषकेतुरुदारधीः ॥ २८ ॥
भीमंप्रदक्षिणीकृत्यनिर्ययौसचमूंप्रति ॥ कामीवाऽरुणनेत्रोऽयमबलांवरवर्णिनीम् ॥ २९ ॥ श्रीखण्डघनसारेणकटदानेनवा
सिताम् ॥ बिभेदवाहिनींमध्येगजकुम्भपयोधराम् ॥ १३० ॥ बाणैस्तीक्ष्णैर्महाबाहुर्वीक्षमाणःपितामहम् ॥ वीरान्पातयतेरो
षान्नरोषस्तस्यशाम्यति ॥ ३१ ॥ मद्बाणैःपातितावीरारणमध्येविदारिताः ॥ शत्रुतांनैवमुञ्चंतिकिंकर्त्तव्यमितोमया ॥ ३२ ॥
एवंसंचिंतयानोऽपिपुनःशत्रून्व्यपोथयत् ॥ चन्दनागुरुगंधीनिरणेराज्ञांमुखानिसः ॥ ३३ ॥ विच्छिन्नानीवपद्मानिनिरीक्ष्य
सस्मरेहसन् ॥ एतानिजलहीनानिनम्लायंतिममाग्रतः ॥ ३४ ॥ मत्वाबिभेदराजेंद्ररणेगजघटाःपुनः ॥ मौक्तिकानिसुवृत्ता
निगजकुंभच्युतानिच ॥ ३५ ॥ शूरकंठेषुचिक्षेपमंडनानिसकर्णजः ॥ तंतथासमरेवीरंसंहरंतंनिजंबलं ॥ ३६ ॥ यौवनाश्वोग

१ वधूःस्नुषा । २ सभावंशृंगाररसयुतम् क्रियाविशेषणमेतत् । ३ पताकाएवअंचलः (पदरइतिम०भाषया) तेनाच्छादितम् । ४ दानोदकेन। ५ भीमम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जारूढःसमागत्येदमब्रवीत् ॥ ॥ यौवनाश्वउवाच ॥ ॥ रथंगृहाणवीरत्वंमयादत्तंसमारुह ॥ ३७ ॥ भूमिस्थेनसमंयुद्धंनप्रशं
संतिसूरयः ॥ परदेशात्पुरंप्राप्तंबालंश्रमसमन्वितं ॥ ३८ ॥ योधितंबहुभिःसार्धंविरथंयोधयेकथं ॥ तवनामनजानामिनगोत्रं
जनकंचते ॥ ३९ ॥ विष्णोरिवजगत्पूज्यंनवेद्मिकुलनिर्णयम् ॥ तस्मात्प्रब्रूहिसमरेयथायुद्धंकरोमिते ॥ १४० ॥ धन्यस्त्वमपरोध
न्यस्त्वत्तोनास्तीतिमेमतिः ॥ ॥ वृषकेतुरुवाच ॥ ॥ कुलंकश्यपसंभूतंमामकंरविभासितं ॥ ४१ ॥ पृथिव्यांनापरोदातायंवि
नाजनकःसमे ॥ सभामध्येद्रौपदीचक्षिप्यतीयेनवीक्षिता ॥ ४२ ॥ धर्मादयोनगणितादुर्योधनहितैषिणा ॥ विनानंतंस्थितोय
स्तुतस्यपुत्रंनिबोधमां ॥ ४३ ॥ अर्जुनेनैवनीतोऽसौपरमंपदमव्ययं ॥ कर्णःपितामेसंग्रामेवृषकेतुरहंस्थितः ॥ ४४ ॥ युधिष्ठिर
स्ययज्ञार्थंतुरगोनीयतेमया ॥ नरथंचत्वयादत्तंप्रतिगृह्णामिसंगरे ॥ ४५ ॥ युद्धेजितंतुगृह्णंतिनदत्तंवैनराधिप ॥ १४६ ॥ ॥
॥ इत्याश्वमेधिकेपर्वणि जैमिनिकृते यौवनाश्ववृषकेतुवाक्यवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ छ छ छ ॥
॥ यौवनाश्वउवाच ॥ ॥ धन्योऽसिकर्णपुत्रत्वंप्रथमंप्रहराशुमां ॥ बालंचपलमालोक्यतस्मान्नप्रहरामिते ॥ १ ॥ ॥ वृ
षकेतुरुवाच ॥ ॥ बहुपुत्रोऽसिराजेंद्रमत्तोवृद्धतरोभवान् ॥ कृष्णदर्शनहीनोऽसिनसमोमद्बलेनवै ॥ २ ॥ त्वच्छरीरेमहाराज
विद्यतेनबलंक्वचित् ॥ अहंतावद्युवाराजन्भवान्वृद्धतरोमम ॥ ३ ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वावचनंतस्यनृपतिर्दशभिःश
रैः ॥ ताडयामासहृदयेवृषकेतुंहसन्निव ॥ ४ ॥ सताञ्छरांस्त्रिधाचक्रेनृपकोदंडनिर्गतान् ॥ बाणेनैकेनतरसाछित्त्वातंत्रिभिरार्द
यत् ॥ ५ ॥ तस्यबाणानृपंविद्ध्वाप्रविष्टाधरणीतलं ॥ पूर्वजाःकूटसाक्ष्यंहिब्रुवतोयांत्यधोयथा ॥ ६ ॥ अर्धचंद्रेणचिच्छेदकोदं

१ तंविना दुर्योधनं विना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

डंनृपतेःपुनः ॥ सगुणंचातपत्रंचचामरव्यजनानिसः ॥ ७ ॥ चक्रवाकेनतीक्ष्णेनछिद्यंतेप्रीतिजागुणाः ॥ यथाचैकेनबालस्यबा
णेनैकेनतत्तथा ॥ ८ ॥ निखिलंभूपतेस्तत्रपातितंधनुरादिकं ॥ सोऽन्यत्कार्मुकमादायसज्जंकृत्वामहाबलः ॥ ९ ॥ विव्याधकर्ण
जंषष्ट्याशराणांनतपर्वणां ॥ तेतस्यहृदयंभित्त्वापपुःशोणितमाहवे ॥१०॥ जीवनंभानुकिरणाःपिबंतितरसायथा ॥ तथासभि
न्नहृदयोबहुभिःपरिवारितः ॥ ११ ॥ चकारयुद्धंसुमहन्नृपातिंपरिपीडयन् ॥ चतुर्भिस्तुरगांस्तस्यशरैर्निन्येयमक्षयम् ॥ १२ ॥
सारथेश्चशिरःकायात्पातयामासभूतले ॥ अदृश्यंनृपतिंचक्रेयोधानांपश्यतामपि॥१३॥ हतोराजेतिशब्दोऽभूत्तस्मिन्युद्धेतथा
विधे ॥ बाणांधकारेचकृतेकर्णपुत्रेणलीलया ॥ १४ ॥पितामहस्यस्वस्यैवनाशंयुधिरिपोःपुरः ॥ लज्जितःसंदधेघोरंपावकास्त्रं
समंत्रकं ॥ १५ ॥ प्रकाशमकरोत्तेनवह्निनानृपसत्तम ॥ वारुणेनाथराजाऽपिशमयामासपावकं ॥ १६ ॥ पवनास्त्रेणबलवा
न्कर्णपुत्रोऽपिवारुणं ॥ विध्वंसयित्वाव्यनदन्महानादंरणांगणे ॥ १७ ॥ यौवनाश्वस्तदाक्रुद्धोदृष्ट्वाऽमानुषपौरुषं ॥ रथमन्यं
समारुह्यपर्वतास्त्रेणसंहरन् ॥ १८ ॥ मारुतास्त्रंचराजेंद्रकर्णपुत्रमपीडयत्॥शिलाःसहस्रधाकाशादपतन्भुविभासुराः ॥१९॥
तस्योपरिशरास्तीक्ष्णाःपतितानृपहस्ततः ॥ शरैर्नदृश्यतेवीरःसंग्रामेलोमहर्षणे ॥ २०॥ तंवीक्ष्यकुपितोभीमःपुत्रंमोचयितुंय
यौ ॥ तंविलोक्यरणेप्राप्तंभीमंकर्णात्मजस्त्वरन् ॥२१॥ प्रमथ्यशरवृष्टिंतांनृपमुक्तांहसन्निव ॥ पर्वतास्त्रंचचक्रेणविनाश्यव्यच
रद्रणे॥२२॥यौवनाश्वेनवीरेणतदस्त्रंचवृथाकृतं॥भल्लेनहृदयंतस्यभिन्नंतेनमहात्मना ॥२३॥ मूर्च्छितोनिपपातोर्व्यांवृषकेतुर्म
हाबलः॥कर्णपुत्रेचपतितेभीमःकोपसमन्वितः॥२४॥चिंतयित्वास्वहृदयेकिंवदिष्यामिधर्मजं॥कुंतींकृष्णांचपार्थंतंविनाकर्णसुतं ॥१२॥

१ उदकम् । २ यमालयम् ।

CC-0. In Public Domain. Digitization by eGangotri

गतः॥२५॥ एतस्मिन्नेवकालेतुगृहीत्वामहतींगदा ॥ तद्बलंपोथयामासवेगाद्रुद्रइवाहरत् ॥२६॥ गजकुंभान्सगदयाविदार्यच बहून्क्षणात् ॥ रथानश्वानपिनरान्पातयामासभूतले ॥ २७ ॥ जानुभ्यांभीमसेनस्यपवनस्तुसमुत्थितः ॥ भ्रामितास्तेनमातङ्गागगनेसरथाहयाः ॥ २८ ॥ नराभ्रमंतेराजेंद्रमुक्तकेशायथाऽसुराः ॥ गजागजैर्नीयमानाःसम्प्राप्तावसुधातले ॥ २९ ॥ भ्राम्यमाणंचतत्सैन्यमितश्चेतश्चदृश्यते ॥ वासुदेवस्यमाहात्म्यमश्रुत्वाचयथाजगत् ॥३०॥ ऊर्ध्वपादावस्त्रहीनानानालंकारवर्जिताः ॥ अधोवक्त्राःसरुधिराःशुष्कास्यागजसादिनः ॥ ३१ ॥ राजपुत्राभिन्नगात्राःस्रवंतोरुधिरंमुखात् ॥ गगनाद्भूतलंप्राप्ताःक्षीणपुण्यायथानराः ॥ ३२ ॥ नराश्वगजदेहेभ्यःशोणितौघाःसहस्रशः ॥ प्रावर्तंतमहाराजभीमेयुद्ध्यतिभूतले ॥ ३३ ॥ ततोनृपसुतःप्राप्तःसुवेगोनामवीर्यवान् ॥ भीमंयोधयितुंक्रोधादिदंवचनमब्रवीत् ॥ ३४ ॥ ॥ सुवेगउवाच ॥ ॥ यौवनाश्वसुतंविद्धिसुवेगंमांमहाबलम् ॥ तिष्ठयुद्धंकुरुमयासार्द्धंयास्यसिवैकुतः ॥ ३५ ॥ इत्युक्त्वासरथंत्यक्त्वागृहीत्वामहतींगदाम् ॥ भीमंजघानगदयामूर्ध्निवक्षःस्थलेतदा ॥३६॥ वृकोदरस्तंगदयाजघानसमरेबली॥तावन्योन्यंगदाभ्यांचजघ्नतुःक्रोधमूर्छितौ ॥ ३७ ॥ ततोभीमःसमुत्थाप्यसुवेगंगगनेक्षिपत् ॥ भ्रामयित्वाशतगुणंनिष्पिपेषधरातले ॥ ३८ ॥ सुवेगःपुनरुत्थायगृहीत्वापवनात्मजं ॥ भूमौममर्दराजेंद्रतदद्भुतमिवाभवत् ॥ ३९ ॥ भीमोगजंगृहीत्वैकंसुवेगोपरिचिक्षिपे ॥ समायान्तंगजंतन्तुचिक्षेपपवनात्मजे ॥ 'सगजःप्रेरितस्ताभ्यांयातायातंचकुर्वते' ॥४०॥ मुष्टिभिर्जानुभिर्घोरैःप्रहारैस्तौचजघ्नतुः ॥ उभौतौमर्दितौतत्रपतितौधरणीतले ॥ ४१ ॥ ॥ जैमिनिरुवाच ॥ ॥ वृषकेतुस्ततोमूर्छांत्यक्त्वाराजानमाहवे ॥ पंचभिस्ताडयामास

१ सुवेगःकर्ता । २ इत्यर्धंप्रक्षिप्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरैःसन्नतपर्वभिः ॥ ४२ ॥ तैर्बाणैर्मूर्छितोराजायौवनाश्वोमहाबलः ॥ विसंज्ञंसमरेवीक्ष्यवृषकेतुःसमीपगः ॥ ४३ ॥ वस्त्रवाते
ननृपतिंवीजयन्वाक्यमब्रवीत् ॥ ॥ वृषकेतुरुवाच ॥ यत्किंचिद्विद्यतेपुण्यंकृष्णाराधनसंभवं ॥ ४४ ॥ सर्वेणतेनराजासौपुन
र्जीवतुसंगरे ॥ पौरुषंवेत्तिमेकस्तुचेन्नजीवतिपार्थिवः ॥ ४५ ॥ मूर्छांविहायराजाऽपितिष्ठतिष्ठेतिवैपुनः ॥ उत्थायचरणेप्राहतं
ददर्शतथाविधं ॥ ४६ ॥ कर्णपुत्रंसमालिंग्यचेदंवचनमब्रवीत् ॥ ॥ यौवनाश्वउवाच ॥ ॥ प्राणदस्त्वंमदीयोऽसियत्त्वयाप
रिभाषितं ॥ ४७ ॥ तच्छ्रुत्वाक्रियतेयुद्धंननिंद्योऽस्तिहिमांविना ॥ गृहाणराज्यंसकलंजीवितंवशगंतव ॥ ४८ ॥ त्वत्प्रसादाद्ध
रिंवीक्ष्येभीमंदर्शयमारिष ॥ मर्त्येकर्णःसदादाताद्दात्त्वंतस्यदर्शितं ॥ ४९ ॥ त्वयापुत्रेणवीरेणपालयित्वाहिमांरणे ॥ त्वमाया
हिमयासार्धंयत्रतौबलिनौरणे॥ सुवेगभीमौपतितौमूर्छितावविलक्षितौ ॥५०॥ ॥इ०जै०यौवनाश्वपराजयोनाम पं०॥५॥
॥ जैमिनिरुवाच ॥ ॥ ततोबुद्धौमहावीरौयौवनाश्वेनवारितौ ॥ संस्तूयभीमंतरसापुरींप्रावेशयत्स्वकाम् ॥ १ ॥ मेघवर्णस्तु
तुरगंगृहीत्वाभीमसन्निधौ ॥ स्थितःप्राहहसन्वीरःकिमिदंभाग्यकारितम् ॥ २ ॥ चिंतयन्बहुधादेवमनंतंसर्वतोमुखम् ॥ ततो
नृपःप्रसन्नात्मावचनंचेदमब्रवीत् ॥ ३ ॥ प्रशंसन्पांडवंवीरंवृषकेतुंचमारिष ॥ ॥ यौवनाश्वउवाच ॥ ॥ भीमपश्यकुमार
स्यवृषकेतोर्महद्बलम् ॥ ४ ॥ संजीवितोऽस्म्यनेनाजौदयायुक्तेनसाधुना ॥ प्राणदेनकथंयुद्धंपुनरेवप्रजायते ॥ ५ ॥ तस्मा
न्मांनयभद्रंतेगोविन्दंप्रतिपाण्डव ॥ मदीयंमानसंचाद्यत्वरतेधर्मदर्शने ॥ ६ ॥ यस्यकृष्णेपराभक्तिर्मुक्तेरपिगरीयसी ॥ यत्किं
चिद्विद्यतेवित्तंपुत्रपौत्रादिकंमम ॥ ७ ॥ शरीरमपिराज्यंचसर्वंकृष्णवशंकुरु ॥ गजानांममशुभ्राणामयुतंविद्यतेशुभम् ॥

१ श्रीकृष्णम् । २ वत्सेतिचपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ इदंशिरस्तथावीरधर्मराजार्थमाहवे ॥ पातयिष्यामियज्ञेऽस्मिंस्तुरगस्यापिरक्षणे ॥ ९ ॥ शुभ्रेगजेभीमसेनमयासा
र्धंसमारुह ॥ सुवेगकर्णजावेतौगजेमत्तेसकांचने ॥ १० ॥ आरूढौमत्पुरींरम्यांप्रविशेतांममाज्ञया ॥ नगरींतुजनायांतुकिं
चित्क्षोभयितुंपुरः ॥ ११ ॥ पताकाभिर्विचित्राभिश्चंदनोदकशीतलाम् ॥ प्रभावतीभीमसेनंनीराजयतुभामिनी॥१२॥लाजा
भिश्चैवमालाभिर्भावयन्तुहिकन्यकाः ॥ एवमादिश्यनृपतिःप्रविवेशसपाण्डवः॥१३॥मेघवर्णेनसहितोमुदायुक्तोनराधिपः॥
राजमंदिरमायांतंभीमंदेवीददर्शसा॥१४॥ सुवर्णपात्रेदीपन्तुकलापञ्चशिखंशिवम् ॥ कर्पूरपुलकोद्भूतंस्त्रीभिर्युक्तासमाययौ॥
नीराजयित्वातान्वीरानिदंवचनमब्रवीत् ॥ १५ ॥ ॥ प्रभावत्युवाच ॥ ॥ येनमेकंठसूत्रंहिसुश्लथंपरिरक्षितम् ॥ कर्णजे
नाद्यतस्याथकीर्तिःस्थूलाभविष्यति॥१६॥ ॥जैमिनिरुवाच॥ ॥जातेनीराजनेराजन्नुपविष्टावरासने ॥ ततोनानाकथाःकृत्वा
भुक्त्वाचशयनङ्गताः ॥ १७ ॥ प्रभातसमयेजातेकृतकार्योनराधिपः॥ उपविष्टःसभामध्येसहभीमेनभारत ॥ १८ ॥ आदिदेश
जनंसर्वंपुरस्थंधर्मकोविदः ॥ सर्वेगच्छंतुवैतत्रयत्रतौकृष्णपाण्डवौ ॥ १९ ॥ यःकश्चिन्मामकेराष्ट्रेचातुर्वर्णोऽत्यजोपिवा ॥
नगच्छेत्कृष्णसान्निध्यंसवध्यश्चोरवन्मया ॥ २० ॥ इत्याघोष्यतदातेनभेरीदुंदुभिनिःस्वनैः ॥ सदाराःपुत्रकैःसार्कंसधना
स्तुममाज्ञया ॥ २१ ॥ निर्यातुद्रौपदींद्रष्टुंरुक्मिणींचयशस्विनीं ॥ प्रभावतीचनारीणामयुतेनविभूषिता ॥ २२ ॥ वधूवृं
देनसंयुक्ताधर्मराजपुरंप्रति ॥ मदीयोवीणकश्चायमयुतस्तंभमंडितः ॥ २३ ॥ पश्चिमाशामुपाश्रित्यदीयतांगमनायमे ॥ दुं
दुभिस्ताडयतांघोरोमेघरावोगजोपरि ॥ २४ ॥ सुवर्णपूरितायांतुकरभाःशकटावृषाः ॥ बहुनात्रकिमुक्तेनमदीयंवसुयद्भवेत्

१ काञ्चनालंकारभूषिते । २ स्वजनैःसार्धमितिपुस्तकान्तरे । ३ पटभवनम् । ४ उष्ट्राः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२५॥ तत्सर्वंकृष्णसान्निध्येनीयतामात्मकारिणः॥ यत्रभागीरथीगंगायज्ञेशोभगवान्हरिः॥ २६ ॥ संयोगश्चैवसर्वेषांकस्य
चित्तंनतोषयेत्॥ सुदेवंचसमाहूयसंदिदेशनराधिपः॥२७॥ वसुवृंदेनसंयुक्तोनानासज्जनसंयुतः॥ त्वमस्माकंपुरेश्रीमानूसं
त्यन्येसधनाजनाः॥ आत्मनासहतान्सर्वान्धर्मराजपुरंनय ॥ २८॥ ॥ जैमिनिरुवाच ॥ ॥ एवंतेनसमादिष्टोजनंप्रा
हपुरस्थितम्॥ भवद्भिर्गम्यतांतत्रयत्रतौकृष्णपाण्डवौ ॥ २९ ॥ युधिष्ठिरस्याश्वमेधोभविष्यतिसुशोभनः॥ एवमुक्ताजनाः
सर्वेहृष्टाजाताःसुखान्विताः ॥ ३० ॥ सुदेवोमातरंप्राहराजामांनेतुमिच्छति ॥ यत्रधर्मसुतोराजायत्रतौकृष्णपाण्डवौ ॥ ३१॥
जननीस्वसुतस्येदंवाक्यमाकर्ण्यचाप्रियम्॥ प्रोवाचवचनंपुत्रंनगंतव्यंकदाचन ॥ ३२॥ वित्तव्ययोनकर्त्तव्योमयिजीवतिपुत्र
क॥ वित्तहीनाह्यहंतातनजीवितुमिहोत्सहे ॥ ३३॥ ॥ पुत्रउवाच॥ ॥ तत्रभागीरथीगंगानानासंतःसमागताः॥ स्वयंस
भगवान्यत्रकृष्णस्तिष्ठतिसाग्रजः॥ ३४॥ युधिष्ठिरस्ययज्ञेऽन्येऋषयोऽपिसमागताः ॥ उत्तिष्ठजननित्वंहिगोविंदंपश्यसा
ग्रजं॥ ३५॥ ॥ वृद्धोवाच॥ ॥ मैवंवदसुदेवत्वंनागमिष्याम्यहंपुरं ॥ नदेवोनचधर्मोऽपिश्रुतपूर्वःकदाचन ॥ ३६ ॥ भर्त्रा
नैवकृतोधर्मोमत्पित्रातुकदाचन ॥ कस्योपदेशात्त्वंपुत्रप्रवृत्तोऽसिधनक्षये ॥ ३७॥ सर्वंप्रतारणंमन्येयज्ञदानादिकाःक्रियाः
अर्थवादोमतोवेदोब्राह्मणालोकवंचकाः॥ ३८॥ प्राणव्ययेनयल्लब्धंधनंतत्कोनुनाशयेत्॥ अस्माकंचकुलेधर्मोनकस्यापिसु
खप्रदः॥ ३९॥ वृद्धाऽहंसांप्रतंजाताकथंधर्मंसमाचरे॥ अकृतंनकरिष्यामिह्येतत्सत्यंवचोमम॥ ४०॥ ॥ जैमिनिरुवाच॥
एतच्छ्रुत्वावचस्तस्याःसुदेवोनृपतिंययौ॥ प्रत्युवाचवचोरम्यंनृपहास्यकरंपरं॥ ४१॥ सुदेवउवाच॥ नायातिजननीदेवमया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहमहाक्रतुं ॥ धर्मराजस्यतंद्रष्टुंनगृहंपरिमुंचति ॥ ४२ ॥ राजातस्यवचःश्रुत्वासमानीयजरद्गवा ॥ प्रोवाचवचनंरम्यंहितं तस्यायथाभवेत् ॥ ४३ ॥ ॥ राजोवाच ॥ ॥ सर्वेलोकास्तत्रयांतियत्रतौधर्ममाधवौ ॥ मयैवसहितायाहिकुरुपुण्यंगजाह्वये ॥ ४४ ॥ तत्रतिष्ठतिकृष्णोऽपिरुक्मिणीचवधूवृता ॥ अन्याश्चपावनानार्यस्तत्रमातःसमागताः ॥ ४५ ॥ सतांदर्शनमात्रेण विलयंयांतिदेहिनां ॥ पातकानिसमग्राणिनात्रकार्याविचारणा ॥४६॥ ॥ वृद्धोवाच ॥ ॥ नागमिष्यामिराजेंद्रद्रव्यंममग मिष्यति ॥ वधूगणश्चमेदुष्टोनाशयिष्यतिमद्गृहं ॥ ४७ ॥ गोधुमाःपरिपक्वामेक्षेत्रेतिष्ठंतिसांप्रतं ॥ नवनीतंचगोपावैसंक्षयि ष्यंतिमामकं ॥ ४८ ॥ दासदासीगणोरौद्रोगमिष्यतियथागतं ॥ मदाधारंगृहमिदंस्थितंराजन्नसंशयः ॥ ४९ ॥ ममकृष्णेन किंकार्यंनमेधर्मेणसांप्रतं ॥ यथास्वकर्मण्यव्यग्राःकृष्णधर्मादयःस्थिताः ॥ ५० ॥ तथास्वगृहकार्येषुसावधानाऽस्मिभूमिप ॥ भवान्राज्यंपरित्यज्यवृथागच्छतितत्पुरम् ॥ ५१ ॥ बालोऽसिद्रव्यहानिस्तेभविष्यतिनसंशयः ॥ गताःप्राणावरंमन्येनधनं भूपतेक्वचित् ॥ सर्वलोकस्यसंक्लेशोभविष्यतिनराधिप ॥ ५२ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवाणांनृपतिर्गृहीत्वातांजरद्ग वां ॥ बद्ध्वातत्ररुदंतींचदोलामारोप्यतांययौ ॥ ५३ ॥ प्रहसन्विस्मयन्नेवतृष्णांगर्हन्पुनःपुनः ॥ भीमायकथयामासचरितंचि त्तविभ्रमं ॥ ५४ ॥ तस्याजरद्गवायास्तुततोनागपुरंययौ ॥ आशाबलवतीभीमकाचिदाश्चर्यशृंखला ॥ ५५ ॥ ययाबद्धाःप्रधावं तिमुक्तास्तिष्ठंतिपंगुवत् ॥ जीर्यंतिजीर्यतःकेशादंताजीर्यंतिजीर्यतः ॥ ५६ ॥ चक्षुःश्रोत्रेचजीर्येतेतृष्णैकानतुजीर्यते ॥ तृष्णा याःपरमंदुःखंतत्त्यागात्परमंसुखम् ॥ ५७ ॥ एतावदुक्त्वावचनंसभीमंपरितोषयन् ॥ न्यवसत्पंचरात्रंचपश्चाद्वीरोविनिर्ययौ ॥

---

१ जरद्गवां एतन्नामकांतांवृद्धां । २ स्नुषासमूहः । ३ भक्षयिष्यंतीत्यन्यत्रपुस्तके । ४ मूढोसि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५८ ॥ बलेनमहतायुक्तोधर्मराजपुरंप्रति ॥ योजनानांस्थिताभूमिर्यत्रविंशतिरेवसः ॥ ५९ ॥ पप्रच्छभीमोराजानमर्हयास्ये
ग्रतोनृपं ॥ त्वांनिवेदयितुंदेवसंप्राप्तंबलसंयुतं ॥ ६० ॥ कर्णजस्तवशुश्रूषांकरिष्यतिगतेमयि ॥ एवंनिरूप्यतरसासजगाम
युधिष्ठिरम् ॥ ६१ ॥ ततोददर्शराजानंभ्रातृभिःपरिवारितम् ॥ नमस्कृत्यमहाबुद्धिर्धर्मराजंवृकोदरः ॥ समालिंग्यजनान्स
र्वानिदंवचनमब्रवीत् ॥ ६२ ॥ ॥ भीमउवाच ॥ ॥ तवप्रसादान्नृपतेवयंकुशलिनःसदा ॥ समायातःसतुरगोयौवनाश्वेनसं
युतः ॥ ६३ ॥ कर्णपुत्रेणसंग्रामेराजासपरितोषितः ॥ बलेनमहताराजासदारःससुहृद्वृतः ॥ ६४ ॥ प्रभावतीतस्यभार्याद्रौपदीं
द्रष्टुमागता ॥ महत्यासाश्रियायुक्तास्त्रीसहस्त्रैर्विलासिनी ॥ ६५ ॥ विष्णुभक्तिर्यथाराजञ्शांतिक्षांतियुतानृप ॥ ६६ ॥ इत्या
श्वमेधिकेपर्वणिजैमिनियेभीमागमोनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥
॥ जैमिनिरुवाच ॥ ॥ समागतंनृपंश्रुत्वाधर्मोवचनमब्रवीत् ॥ भीमसेनंप्रतितदाहर्षेणमहतायुतः ॥ १ ॥ ॥ युधिष्ठिरउवाच ॥
गच्छत्वंद्रौपदीपार्श्वेकथयैतद्वृकोदर ॥ यथाकरोतिवैभूषांप्रभावत्याश्चदर्शने ॥ २ ॥ ॥ जैमिनिरुवाच ॥ ॥ जगामभीमसे
नोऽथयत्रसापार्षतात्मजा ॥ विलोक्यभीमंसंप्राप्तंपार्षतीहर्षपूरिता ॥ ३ ॥ तस्थौभीमंशशिमुखीस्वागतंचेतिवादिनी ॥ ददर्श
गात्रंसंभिन्नंनानाशस्त्रैश्चमुष्टिभिः ॥ ४ ॥ ददौनिजासनंदेवीप्रपच्छकुशलंपुनः ॥ वृषकेतुंमेघवर्णंतदाकुशलिनंसती ॥ ५ ॥
॥ भीमउवाच ॥ ॥ राजासमागतोदेविसभार्यःससुतःस्वयं ॥ यौवनाश्वोमुदायुक्तःसमृद्धबलवाहनः ॥ ६ ॥ तस्यभार्याविशा
लाक्षीस्त्रीसहस्त्रैःसमन्विता ॥ वीक्षितुंत्वांचमानार्हामिहचायातिसुंदरी ॥ ७ ॥ तस्माद्भूषांकुरुशुभेस्वनारीगणसंयुता ॥ सहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्तत्रवैयांतुसर्वेदेविनृपंप्रति ॥ ८ ॥ कृष्णोदेविकुतोयातस्त्वंविनातवमंडनम् ॥ नपश्यामितथारूपंसंभवेन्ममविस्मयः ॥९॥
यदिद्वारवतींकृष्णःपरित्यज्यनृपंगतः ॥ भवित्रीतवकाशोभाप्रभावत्यासहाधुना ॥ वित्तेनमहताचासौपूरितानृपतेःप्रिया ॥
॥ १० ॥ ॥द्रौपद्युवाच ॥ ॥ अंतर्गृहेहेनिवसतिगोविंदःकिलपांडव ॥ सर्वंसुमंडनंमह्यंनिर्गच्छामोवृकोदर ॥ ११ ॥ ॥ जैमि
निरुवाच ॥ ॥ ततःकृष्णःसमागत्यसहधर्मात्मजेनवै ॥ यौवनाश्वंभावयितुंसपुत्रंप्रययौमुदा ॥ १२ ॥ चंपकायत्रबहुलाःपुष्पि
तास्तत्रसंस्थिताः ॥ यौवनाश्वोऽपितुरगंपुरस्कृत्यतुकर्णजं ॥ १३ ॥ संमुखंस्थितएवासौवीक्षमाणोनृपागमम् ॥ नानावाद्यनि
नादेनकंपयन्वसुधातलं ॥ १४ ॥ एतस्मिन्नेवकालेतुधर्मपुत्रःसमागतः ॥ ददर्शनृपतिंपार्श्वेसर्वसैन्यसमन्वितम् ॥ १५ ॥ उत्ती
र्यवाहनात्तस्मादालिंग्यवसुधाधिपम् ॥ नमस्कृतःसतेनापियौवनाश्वेनधीमता ॥ १६ ॥ तमुवाचसधर्मात्मायथाभीमादयोम
म ॥ तथात्वमसिराजेंद्रनात्रकार्याविचारणा ॥ १७ ॥ पश्यकृष्णंमहाबुद्धेसहायंममभूपते ॥ प्रभावतीद्रौपदींचकुंतींपश्यतुसत्व
रा ॥ १८ ॥ ॥ जैमिनिरुवाच ॥ ॥ यौवनाश्वोऽच्युतंकृष्णमनंतंप्रणतोऽब्रवीत् ॥ प्रहृष्टवदनोभूत्वाधर्मपुत्रस्यशृण्वतः ॥
॥ १९ ॥ ॥ यौवनाश्वउवाच ॥ ॥ धन्योऽस्मिदेवतुरगोधन्योऽयंयस्यकारणे ॥ भीमादयस्त्रयोवीराःसंप्राप्तामत्पुरंप्रति ॥
॥ २० ॥ वृषकेतुरयंधन्योममात्मायेनरक्षितः ॥ कृपाविष्टेनमनसायुद्धभूमिगतेनच ॥ २१ ॥ क्वपार्थस्तेसखाकृष्णवैष्णवानांस
दाग्रणीः ॥ येनत्वंदर्शितोलोकेसर्वपापप्रणाशनः ॥ २२ ॥ जितवान्वैकुरुक्षेत्रेयस्त्वयासहितोरणे ॥ ॥ जैमिनिरुवाच ॥ ॥
प्रभावतीचतांकुंतींपार्षतींचैवसात्वतीं ॥ २३ ॥ समालिंग्यनमस्कृत्यतस्थौहर्षपरायणा ॥ तथाब्रुवंतंनृपतिंनमस्कृत्यार्जुनोऽब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वीत् ॥ २४ ॥ ॥ अर्जुनउवाच ॥ ॥ यथायुधिष्ठिरोऽस्माकंतथात्वंहिनराधिप ॥ वृद्धोमान्यश्चसततंद्रष्टोदैवात्समागतः ॥
॥ २५ ॥ सुवेगोऽपिहितान्सर्वान्नमस्कृत्यजनार्दनम् ॥ प्रोवाचवचनंतत्रधर्मराजंमहामतिं ॥ २६ ॥ किंवर्णयामिराजेंद्रवृषकेतो
महात्मनः ॥ महिमानमतीवास्ययत्कृष्णोदर्शितोऽमुना ॥ २७ ॥ विनाकृष्णंहियद्राज्यंशरीरंचतथाधनं ॥ धार्यतेमानवैर्भूपत
त्सर्वंप्रेतभूसमं ॥२८॥ अतःपरंहृषीकेशनमोक्ष्येतेपदांबुजं ॥ विसर्जयाशुतुरगंयज्ञार्थंवैनृपस्यहि॥२९॥ ॥ जैमिनिरुवाच ॥
ततोहरिस्तुष्टमनास्तद्वाक्येनचभारत ॥ सहैवसंस्थितंवीरमालिंग्यरविपौत्रकं ॥ ३० ॥ प्रविवेशपुरींकृष्णोधर्मपुत्रेणसंयुतः ॥
उषित्वामासमेकंतुप्रत्युवाचयुधिष्ठिरम् ॥ ३१ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ चैत्रीगतामहाराजपौर्णमासीहपृष्ठतः ॥ यज्ञ
स्यावसरोदूरेमासिचैकादशेनृप ॥ ३२ ॥ तस्माद्गच्छामिनगरींद्वारकांयादवाश्रयां ॥ नान्योऽस्तिरक्षकस्तस्यांमांविनापांडुनं
दन ॥ ३३ ॥ अतोऽहंत्वरितोयामिपृच्छेत्वांगंतुमुत्सुकः ॥ गतेमयिभविष्यंतियादवाहर्षनिर्भराः ॥ ३४ ॥ तावत्त्वंयौवनाश्वेन
सहपालयवाजिनं ॥ तवयज्ञेवयंसर्वेह्यश्वमेधेनिमंत्रिताः ॥ आगमिष्यामहेनूनंतथाकार्यंविधीयतां ॥ ३५ ॥ ॥ जैमिनिरु
वाच ॥ ॥ तच्छ्रुत्वावासुदेवस्यवचनंधर्मनंदनः ॥ अनुज्ञांदत्तवांस्तस्मैज्ञात्वाकृष्णस्यमानसं ॥ ३६ ॥ केशवेतुगतेराजाव्यासे
नहिसमन्वितः ॥ तुरगंपालयामासयौवनाश्वेनचानुजैः॥३७॥सभांचकारयामाससमंडपंसद्मकारयत् ॥ द्वैपायनंततोऽपृच्छन्म
रुत्तस्यविचेष्टितं ॥ ३८ ॥ व्यासश्चकथयामाससमरुत्तस्यमहाध्वरं ॥ मरुत्तेनवृतःपूर्वंयज्ञार्थेजीवएवहि ॥ ३९ ॥ इंद्रस्तंवारया
मासनयाज्योजीवमानवः ॥ ततोनृपोऽपिसंवर्त्तंनारदादश्रृणोन्मुनिं ॥ ४० ॥ प्रार्थयित्वाक्रतुंचक्रेसंवर्त्ताच्छक्रपावकौ ॥ स्तं

१ स्मशानतुल्यम् । २ वृषकेतुम् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयित्वावरंप्राप्यक्रतुंकृत्वाचशोभनं ॥ यथागतंगतोराजापूतःस्नात्वादिवंययौ ॥ ४१॥ ॥जैमिनिरुवाच ॥ ॥युधिष्ठिरोऽ
पिपप्रच्छव्यासंधर्मान्पुनःपुनः ॥ यथामतिश्रुतान्सर्वान्कथयामासपावनान् ॥ ४२ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेमरुत्तय
ज्ञकथनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥जैमिनिरुवाच ॥ ॥श्रुत्वाव्यासमुखाद्धर्मान्धर्मराजोयुधिष्ठिरः ॥ पप्रच्छचापरान्धर्मान्सर्वलोकहितावहान् ॥ १ ॥ भग
वन्किंनरैःकार्यंसंसारभयभीरुभिः ॥ कथमत्रभवेत्कीर्तिःपरत्रचकथंसुखं ॥ २ ॥ वासुदेवःकथंतुष्येत्तत्तद्ब्रूहियथातथं ॥ ॥ व्या
सउवाच ॥ ॥ब्राह्मणोधर्मशास्त्राणिसम्यक्ज्ञात्वानकुत्सितं ॥ ३ ॥ प्रकरोतिशुभंकर्मचेहकीर्तिंसुखंपरे ॥ परापवादाद्भीत
श्चपरद्रव्यंपरस्त्रियं ॥ ४ ॥ नकामयेन्नगृह्णातिनशृणोतिहितद्वचः ॥ क्षत्रियःसर्वधर्मज्ञोदातायुद्धपरायणः ॥ ५ ॥ आत्मवित्सं
गरेप्राणान्संमुखस्त्यजतेयदि ॥ संप्राप्नोत्यमलांकीर्तिमिहलोकेपरत्रच ॥ ६ ॥ वैश्योधनसमृद्धस्तुसत्यवादीप्रियातिथिः ॥
शुश्रूषणंगवांकुर्यात्तत्परःप्राणिनांहितं ॥ ७॥ प्राप्नोतिविमलांकीर्तिंगतिंकृष्णनिषेवणात् ॥ शूद्रस्तुसेवतेविप्राञ्छूद्धवानाव
मन्यते ॥ ८ ॥ यशःपरमवप्नोतिध्यात्वानारायणंविभुं ॥ विधवायाभवेन्नारीकामासक्तासुभोगिनी ॥ ९ ॥ गुरुवादकरीदुष्टाह
ष्टापरनरंप्रति ॥ धनयुक्तारागपरासर्पिणीवसपक्षिणी ॥ १०॥ आत्मानंपातयेदाशुपत्यासहमहीपते ॥ तांयःकामयतेमंदो
दुष्टात्मासनराधमः ॥ ११ ॥ सोऽपिवैनारकींयोनिंप्राप्नोतीहनसंशयः ॥ सारंडाद्दुर्गतिंयातिशरीरस्यचविक्रयात् ॥ १२ ॥ शु
द्धस्नानंचतांबूलंचंदनंचासनानिच ॥ इच्छाभोज्यंतथापेयंपतेरिच्छाविहारिणी ॥१३॥ नित्यंधर्मपरायातुगृहकार्यकरीतथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वश्रूश्वशुरयोश्चैवपादवंदनतत्परा ॥ १४ ॥ ज्येष्ठदेवरयोश्चापिह्यनुवृत्तिपरायणा ॥ प्राप्नोतिसद्गतिंकीर्तिमिहलोकेपरत्रच ॥
॥ १५ ॥ प्राक्कर्मयोगजंचिन्हंबिभ्रतीलक्षणंत्विदं ॥ कृष्णवर्णातालुजिह्वांस्वांगुल्यास्पृशतेभुवम् ॥ १६ ॥ एतैश्चलक्षणैर्युक्ताभ
र्तृसंबंधघातिनी ॥ स्वकर्मवशतस्तेतुतस्यावैसंगतिंगताः ॥ १७ ॥ तयास्थेयंपितुर्गेहेनपरेषांगृहंव्रजेत् ॥ जटिलांपंकबहुलां
भोजनेलुब्धमानसा ॥ १८ ॥ अनाचारवतीयातुसासुखंनैवविंदति ॥ बालत्वेरक्षतिपितायौवनत्वेनिजःपतिः ॥ १९ ॥ वार्धके
रक्षतेपुत्रोनस्वतंत्राहियोषितः ॥ स्वतंत्रतायोषितांहिनशुभायोपकल्पते ॥ २० ॥ कृच्छ्रातिकृच्छ्रपाराकैःपरंशोषयतेतनुं ॥ वि
धवासासुखंजीवेत्परलोकेचमोदते ॥ २१ ॥ नव्रजेत्तीर्थयात्रांहिनकदाचिच्छुभव्रतं ॥ करोतिविधवानारीसागच्छेन्नरकंध्रुवं ॥
॥ २२ ॥ कर्तव्यंतुतयाराजञ्शरीरपरिशोषणं ॥ उपवासादिभिर्नित्यंशमःकार्योनसंशयः ॥ २३ ॥ शीलभंगेतुनारीणांदोषा
स्तुबहवोनृप ॥ स्त्रीणांनैवतुविश्वासःकर्तव्यस्तुकदाचन ॥ २४ ॥ अन्याश्रितान्यचित्तानांविश्वासोनसुखप्रदः ॥ बहुधाहसते
यातुबालंचपरिचुंबति ॥ २५ ॥ दृष्ट्वापुमांसंत्वरिताप्रस्खलंत्यनुधावति ॥ गायंतीसुस्वरंहृष्टाकर्णकंडूयतेकटिं ॥ २६ ॥ अचैलं
मस्तकंस्वंतुहासंचकुरुतेवृथा ॥ ईदृशीयाभवेन्नारीविज्ञेयाबंधकीनरैः ॥ २७ ॥ वृथापरगृहंयातिवृथापश्यतितंजनं ॥ दूतिकां
जननींवेत्तितत्संगेऽतीवलालसा ॥ २८ ॥ मालाकारीनापितीचनटीप्रव्राजिकातथा ॥ फणिव्रततिपत्राणिविक्रीणातितुयाभु
वि ॥ २९ ॥ सैरंध्रीचापिदासीचतथापतिविवर्जिता ॥ सूतिकाधवहीनाचतथाकापालिनीतुया ॥ ईदृशीनांसंगमेनयस्यास्तु
ष्यतिमानसम् ॥ ३० ॥ स्वैरिणीनांतुसाराज्ञीविज्ञेयाधर्मनंदन ॥ तस्माद्रक्षेत्स्त्रियंपार्थदुष्टसंगाद्विशेषतः ॥ ३१ ॥ असूयकोऽ

१ सकेशा । २ पापयुक्ता । ३ असती । ४ नागवल्लीदलानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थपिशुनोनास्तिकोधूर्तकोनरः ॥ समीपेसंस्थितोराज्ञांप्रजानांदुर्लभंसुखं ॥ ३२ ॥ प्रजाःपालयभद्रंतेतासुनष्टासुनश्यति ॥
नाचरंतितुयेधर्मान्नृपतेब्राह्मणादयः ॥ ३३ ॥ नचिंतयंतिदेवेशंदेवकीनंदनंहरिं ॥ नास्तिकास्तेनराज्ञेयाःसर्वधर्मबहिष्कृताः ॥
॥ ३४ ॥ एतैःसहासनंस्पर्शंमनसाऽपीहनाचरेत् ॥ आराधयंतिदेवेशंप्राणिनांमुक्तिदंहरिं ॥ देवतुल्याश्चतेज्ञेयाश्चांडालोऽपि
हरेःप्रियः ॥ ३५ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेव्यासवाक्यंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥छ॥ ॥छ॥
॥ युधिष्ठिरउवाच ॥ ॥ कथंलक्ष्मीःस्थिरातातप्राणिनांजायतेगृहे ॥ गोविंदेनसहावासःकथंजायेततद्वद ॥ १ ॥ ॥ व्यास
उवाच ॥ ॥ शृणुवत्सप्रवक्ष्यामियथालक्ष्मीःस्थिराभवेत् ॥ सत्यंशौचंविशेषेणप्राणिनांशिवचिंतनं ॥ २ ॥ तत्रस्थिरायतेल
क्ष्मीस्तत्रनारायणोहरिः ॥ मातरंपितरंपुत्रोभ्रातरंज्येष्ठमेवच ॥ ३ ॥ मन्यतेबांधवगणंतत्रलक्ष्मीःस्थिरायते ॥ भार्यापतिपरा
यत्रपतिःक्रोधवशोनचेत् ॥ ४ ॥ कृतंजानातियोमानीकूटसाक्षंनयोवदेत् ॥ श्राद्धंनवंचयेद्यस्तुवित्तशाठ्येनपैतृकं ॥ ५ ॥ श्रद्धा
वान्कुरुतेकर्मदत्वादानंनयोवदेत् ॥ कृलाशूरत्वमाजौहिनभवेद्योविकत्थनः ॥ ६ ॥ परस्त्रियंहिवंदेतमातृतुल्यांमहीपते ॥ आ
रामकारकश्चैववापीकूपमठादिकृत् ॥७॥ तडागसत्रप्रासादविप्रमंदिरकारकः ॥ कन्यादानंचयोदद्यात्सदातीर्थावगाहकः ॥८॥ स
दान्नपरोनीतः पापाच्चैवनरोत्तमः ॥ एवंविधंनरंपार्थरमासंश्रयतेभुवि ॥९॥ दुष्टात्मानंत्यजेल्लक्ष्मीःपिशुनंवृषलीपतिम् ॥ तथा
चद्यूतकर्तारंद्यूतंचनवसुप्रियम् ॥१०॥ प्रथमंवारितश्चासिसर्वैःपार्थिवबन्धुभिः ॥ दुर्योधनादिभिःसार्द्धंकृतंद्यूतंवराटकैः ॥११॥
अक्षैश्चतुभिर्भवनाक्रीडितंनचशोभनम् ॥ जितमित्येवशकुनिःसहनानाधर्मैर्नरैः ॥१२॥ मयानदैवविज्ञातंकौरवाणांध्रुवंक्षयः ॥ स
त्वंश्रियापरित्यक्तोद्यूतदोषेणभारत ॥१३॥ त्यज्यतेसश्रियानित्यंपरान्नेयस्तुलंपटः ॥ मदिरापानमत्तोयोमृगयासक्तचेतनः ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥१८॥ साधुनिन्दाकरोयस्तुयस्त्वारामादिभञ्जकः ॥ तस्करःकाञ्चनादीनांधान्यानाञ्चतथानृप ॥१५॥ रसानाञ्चैवधा
न्यानांपुस्तकस्यापहारकः ॥तृणकाष्ठसमूहानांफलादीनांनराधिप॥१६॥स्तेनोपिवस्तुजातानांसम्प्रियात्यज्य
तेनरः ॥अमायांरविसंक्रान्तौव्यतीपातेचवैधृतौ॥१७॥पितृक्षयाहेतीर्थेयोमैथुनीनरमास्सदं॥इतितेकथिताधर्माअतऊर्ध्वं
निशामय ॥ १८॥ समानयत्वंगोविंदंयथायज्ञःप्रजायते ॥ विनातुवासुदेवंतेनहिवासःसुखावहः ॥ १९ ॥ ॥ जैमिनिरु
वाच ॥ ॥ एतच्छ्रुत्वावचस्तस्यमुनेरमिततेजसः ॥ प्रत्युवाचततोराजाभीमंविनयतत्परम् ॥ २० ॥ ॥ युधिष्ठिरउवाच ॥
भीमयाहिमहाबाहोकृष्णंप्रतिममाज्ञया ॥ तमानयाशुगोविंदंपुत्रपौत्रसमन्वितं ॥ २१ ॥ यशोदांदेवकींदेवींसत्यभामांचरु
क्मिणीं ॥ एतच्छ्रुत्वावचस्तस्यधर्मराजस्यधीमतः ॥ २२ ॥ नमस्कृत्यचतंभीमोप्रतस्थेद्वारकांप्रति ॥ मार्गेबहुविधान्देशानति
चक्रामसत्वरः ॥ २३ ॥ नानाविधानिरम्याणिनानावृक्षयुतानिच ॥ वनानिसमतिक्रम्यचचारपवनात्मजः ॥ २४ ॥ पर्वतान्वि
विधान्रम्याञ्शिखरैरतिशोभितान् ॥ अतिवेगवतीश्चैवसरितोविपुलाःपथि ॥ २५ ॥ अतिक्रम्यददर्शासौदूरात्कृष्णपुरींत
दा ॥ सुवर्णकलशोपेतांतोरणैरतिशोभिताम् ॥ २६ ॥ चंदनोदकसेकेनसिक्तमार्गांतथैवच ॥ हृष्टपुष्टजनोपेतामुग्रसेनेनपालि
ताम् ॥ २७ ॥ नानावृक्षसमाकीर्णैर्नानावल्लिविराजितैः ॥ क्रीडावनैर्विराजंतींप्राकारैःपरिखावृताम् ॥ २८ ॥ अक्रूराद्यायत्र
भक्ताःसेवंतेगरुडध्वजम् ॥ रुक्मिणीसत्यभामाद्याःस्त्रियोभगवतश्चयाः ॥ २९ ॥ ताःसर्वाभगवत्प्रीत्यायस्यांसेवंतितंहरिम् ॥ ॥१८॥

CC-0. In Public Domain. Digitization by eGangotri

एवंविधांद्वारकांतांदृष्ट्वाभीमोमहाबलः ॥ ३० ॥ हर्षेणमहतायुक्तोबभूवजनमेजय ॥ द्वारकायाबहिर्देशेमहासरसिशोभने ॥ ॥ ३१ ॥ स्नात्वासर्वविधिंकृत्वाप्रवेशायोपचक्रमे ॥ परद्वारेणसंप्राप्यद्वारवत्यांवृकोदरः ॥ ३२ ॥ यदाप्रवेशंकुरुतेमंदिरेमाधवस्यसः ॥ तदासकुरुतेकृष्णोभोजनंबहुभिर्वृतः ॥ ३३ ॥ रम्यंतुदेवकीदत्तंपात्रेवैकांचनेशुभे ॥ कचोलानांचतुःषष्टिन्यस्तेसुघटितेहरिः ॥ ३४ ॥ पायसंचंद्रसंकाशंसितशर्करयायुतं ॥ भक्तंकुमुदवर्णाभंमुद्गदालिस्तथैवच ॥३५॥ नानाव्यंजनसंयुक्तंत्रिभिःपंक्तिभिरेवच ॥ निंबूरसेनसार्द्रेणफलमूलयुतेनच ॥ ३६ ॥ विकृतानिकृतान्येवशतशोभोजनेविभोः ॥ मरीचंपिप्पलीचार्द्रैरंभाशर्करयायुता ॥ ३७ ॥ सितया[3]सहितेनाथदुग्धेनक्कथितेनच ॥ घृतंसितायुतंदेव्यादत्तंप्रीत्यायशोदया ॥ ३८ ॥ पूरिकाश्चतथाक्षीरविकाराश्चप्रसाधिताः ॥ मृद्वीकाशिंशुपाचूतकरमर्दकृताःशुभाः ॥ ३९ ॥ मरीचपिप्पलीयुक्ताएलाचंद्रकसंयुताः ॥ क्कथिताःकथिकायस्मिन्भोजनेभूरिशोहरेः ॥ ४० ॥ प्रलेहिकाःकृतायत्रकचोलेरससंयुताः ॥ नानाकुसुमसंमोदयुक्ताःसूदैःकृताहिते ॥ ४१ ॥ मंडकावर्तुलारम्याःसमाःसर्वत्रबिंबवत् ॥ मधुयुक्तेनगव्येनयुक्तेतस्मिन्सुभाजने ॥ ४२ ॥ कांचनेतुकचोलेवैस्थितंकांचनसुप्रभं ॥ घृतंसुवासितंप्रीत्यादत्तंदेव्यायशोदया ॥ ४३ ॥ तत्रगोधूमचूर्णेनचंद्रकेणविलोडितं ॥ घृतंनदृश्यतेतत्रकांचनप्रभयान्वितं॥४४॥सौहालिकाःपूरिकास्तुशतच्छिद्रास्तुवेष्टिकाः॥पूपिकास्तुतथाक्षीरविकारास्तुप्रकाशिकाः॥४५॥ मणयः[10]सूत्रसंघा[11]श्चमालती[12]कुसुमादयः ॥ पर्पटाःकर्बुरा[13]रम्यामाषकूष्मांडसंयुताः ॥ ४६ ॥ वटकान्विविधान्रम्यान्भुंजतेदेव

१ आर्द्रकयुक्तेन। २ रंभाफलम्। ३ शर्करया। ४ द्राक्षा। ५ चंद्रकःकर्पूरः। ६ लेह्यानि 'मेथकुटादि' प्राकृते। ७ 'सौहाल' वंगदेशेप्रसिद्धम्। ८ 'अनरसे'म०भाषा। ९ वेष्टिका 'जिलबी' भा०। १० मणयः 'बोटवे' म० भा०। ११ सू० 'शेवया' म० भा०। १२ तत्कुसुमाकृति 'घवले' इ० भा०। १३ 'भजी'ति भा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जै०अ० कीसुतः ॥ हिंगुजाजीरमरिचैःपूरितार्द्रेणतेशुभाः ॥ ४७॥ शुक्ठेनलवणेनापिशुद्धतैलेनपूरिताः ॥ कुंकुमाभाःस्नेहहीनाःसक्ष
॥१९॥ ताइवदुर्जनाः ॥ ४८ ॥ दधिदुग्धयुताःकेचिच्चिंचिणीचूतसंयुताः ॥ द्राक्षारसयुताःकेचित्तथान्येकथिकायुताः ॥ ४९ ॥ राजिका अ० ९
जलमध्याश्चशुभान्येसितयायुताः ॥ रसैश्चतुर्भिश्चैवान्येवटकानवधास्थिताः ॥ ५० ॥ वज्रप्रभास्तुकनकाश्चारबीजसुखारि
कैः ॥ शकलैर्नारिकेलस्यलवंगशतसंयुतैः ॥ ५१ ॥ घृतक्षीरसितान्यस्ताःकटाहेतुप्रलोडिताः ॥ लब्ध्वासितास्तुकसरंरम्या
स्तत्रैवफेनिकाः ॥५२॥ पेडारिकास्तुवैबह्वयःकृताराजन्कवोष्णिकाः ॥ मोदकास्तत्रसंभूताश्चारबीजभवाःपरे ॥५३॥ सितया
तुकृताश्चान्येदुग्धाज्येनविनिर्मिताः ॥ नारिकेलफलैश्चान्येवृक्षनिर्यासनिर्मिताः ॥ ५४ ॥ चणकैश्चशुभाश्चान्येतिलैश्चणक
बीजकैः ॥ ईदृशान्मोदकान्रम्यान्कृष्णस्यार्थेतुभोजने ॥ ५५ ॥ मांसंतुसंस्कृतंसूदैर्मृगवाराहसंभवं ॥ शशिकंरौहिकंचैवचै
त्तलंमेषसंभवं ॥ ५६ ॥ मत्स्यमांसंलाविकंचतैत्तिरंरुचिदायकं ॥ नानारसयुतंरम्यंबुभुजेदेवकीसुतः ॥ ५७॥ अर्शोघ्नंमानि
नीकंदंसिंधुवारेंद्रवाहकं ॥नारिंगंचिंचिंडीकंदंकौकुरीफलमेवच॥५८॥दर्शारंकर्कटीजातंशुभंनिंबफलंशिवं ॥ टिंटांफलंलवंगंच
श्रीफलंनीरकल्ककं ॥५९॥ वल्कलंवंशकारीरंतथाकायफलंनवं ॥ द्राक्षाफलंचूतफलंरम्यंकंटकितंफलं ॥६०॥ धात्रीफलंशुक्ति
भवंफलमंबाडकंतथा ॥ रंभाफलंपिप्पलीचमरीचाश्चमनोहराः ॥ ६१ ॥ शुद्धसर्षपतैलेनलवणेनचवेष्टितं ॥ तथाराजिकयावि
त्धंत्रिभिर्वर्षैर्घटेस्थितं ॥ ६२ ॥ भुंजतेभगवान्तत्रदेवकीवाक्यतोषितः ॥ समीपस्थारुक्मिणीतुलक्ष्मणाचारुलोचना ॥ ६३॥ ॥१९॥

१ राजिकाःसर्षपाः । २ फेणिकाभेदोयम् । ३ 'माइनमुळ' म०भा० । ४ निर्गुंडी । ५ शाकभेदोऽयम । ६ 'पडवळ' इ० भा० । ७ 'कोयरी' इतिम० ८ दीर्घकर्कटीफलम् । ९ टिंटावल्लीविशेषः । १० पनसः । ११ बादामम् ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यभामाजांबवतीऽव्यजनेनसमन्विताः ॥ चारुनूपुरसंरावारणद्वलयमेखलाः ॥ ६४ ॥ हारकेयूरशोभिन्यःकृष्णपार्श्वेसुसांस्थि
ताः ॥ पृथक्पृथक्निरीक्षंत्योवीजयंत्योहसंतिच ॥६५ ॥ कथयंत्यःकथाःकाश्चिन्निरीक्षंत्योजगत्प्रभुं ॥ पारिजातभवान्यानिबि
भ्रंत्यःकुसुमानिताः ॥ ६६ ॥ सत्यभामास्मितंकृत्वाकृष्णंवचनमब्रवीत्॥ ॥सत्यभामोवाच॥ ॥सांप्रतंभोजनंकृष्णसमीचीनंसु
शिक्षितम् ॥ ६७ ॥ गोपालत्वंपरित्यज्यतक्रपानंतथोदकम् ॥ ईषन्नम्रोभवान्भूत्वादुग्धंपक्कंतुयःपुरा ॥ ६८ ॥ पीत्वाचधावसेऽर
ण्येकालिंदीतीरसंस्थितः ॥ गोपालानांयदन्नानिहरसेतत्तुविस्मृतं ॥ ६९ ॥ इदानींमानुषंधर्मंजानासिसकलंभवान् ॥ धर्मपुत्र
स्यसंगत्याविज्ञातंभवताखिलम् ॥ ७० ॥ चामरैर्वीज्यतेदिव्यैःपश्यरुक्मिणिवैभवम् ॥ अस्याश्रयेणमेनाशःकर्मणांसंभवि
ष्यति ॥ ७१ ॥ मत्तोन्यांपट्टमहिषीमात्मानंचसुशोभनम् ॥ नमांपश्यतिकल्याणिभुंजानांकर्मणःफलम् ॥ ७२ ॥ आयामिया
मिपुरतोनमांवारयतेहरिः ॥ वेदभाषितमाकर्ण्यकृष्णेमेरमतेमनः ॥ ७३ ॥ तस्मान्मयाऽपिक्रियतेसेवनंसर्वदाक्षितौ ॥ देवक्यु
वाच ॥ ॥ नलज्जसेकथंत्वंतुब्रुवंतीकेशवंप्रति ॥ ७४ ॥ अहंतथाऽस्यजननीवसुदेवोऽस्यवैपिता ॥ उभाभ्यांक्रियतेकर्मकृष्ण
तुष्टिकरंपरम् ॥ ७५ ॥ निखिलोऽयंपुरादेहेविधृतस्तुमयालघुः ॥ अहंकरोम्यस्यकर्मब्रुवतीत्वंनलज्जसे ॥ ७६ ॥ ममोदरे
यदाप्राप्तस्तदाप्राप्तंसुबंधनं ॥ वसुदेवेनवीरेणपश्यत्वंकर्मणोगतिं ॥ ७७ ॥ अलक्ष्यलक्षणश्चायंसंवृतःशत्रुसूदनः ॥ तस्मा
न्माताचास्यपितानभार्याप्राप्नुतेसुखं ॥ ७८ ॥ सर्वैस्वकर्मणाभद्रेजीवंत्येवहिमानवाः ॥ येभजंतिहरिंकृष्णंप्राप्नयुस्तेसुखंशुभे
॥ ७९ ॥ ॥ सत्यभामोवाच ॥ ॥ भवत्यासाधुवचनंप्रोक्तंकृष्णस्यसन्निधौ ॥ तत्कथंवैप्रशंसंतिसर्वेविप्राजनार्दनं ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एनंहितावकंपुत्रंविस्मयस्तत्रमेऽपरः ॥ कर्मणांनाशकृद्देवोमहतांदेवकीसुतः ॥ ८१ ॥ अस्मिन्देहेमहत्कष्टंकुर्वाणांवेत्तिमाधवः ॥ हृदयेतुधृतःपूर्वंत्वयानैवनिरीक्षितः ॥ ८२ ॥ मयातुधार्यतेभद्रेहृदयेपरिदृश्यते ॥ तस्मात्तेकर्मणांनाशःक्रियतेअमुनाशुभे ॥ ॥ ८३ ॥ तस्यास्तद्वचनंश्रुत्वाप्रसन्नवदनोहरिः ॥ यावद्वदतितांदेवींतावद्भीमःसमागतः ॥ ८४ ॥ दृष्ट्वातदासमायांतंहृषीकेशोवृकोदरम् ॥ वारयामासहितदासैरंध्रीवचनेनतम् ॥ ८५ ॥ किंवदिष्यतिभीमोसावितिबुद्ध्यानराधिप ॥ कौतुकीभीमवचनश्रवणेसर्वदाहरिः ॥ ८६ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेभीमागमोनामनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥

॥ जैमिनिरुवाच ॥ ॥ निवारितंतुकृष्णेनज्ञात्वाऽमानंवृकोदरः ॥ प्रहसन्नब्रवीद्राजन्मेघगंभीरयागिरा ॥ १ ॥ ॥ भीमउवाच ॥ ॥ मामवज्ञायकृष्णोऽसौभोजनंकुरुतेयदि ॥ सैरंध्रिवददेशेस्मिन्किंचिकीर्षतिमाधवः ॥ २ ॥ मृताकिंदेवकीदेवीसत्यभामाऽथवामृता ॥ महर्घंकिलधान्यानांमेघोराष्ट्रेनवर्षति ॥ ३ ॥ किंचपुत्रास्तत्रापौत्राराक्षसेनहताबलात् ॥ किंवास्त्रीभिःसहैवायंभोजनंकुरुतेहरिः ॥ ४ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंवदतिभीमेतुकौतुकार्थंमहीपते ॥ कृष्णश्चवादयामासफेणिकाचर्वणस्वनम् ॥ ५ ॥ पर्पटानांमहच्छब्दस्तत्रकृष्णेनवैकृतः ॥ प्रपिबन्कथिकांशब्दंघंटिकाघटनिस्वनम् ॥ ६ ॥ कुर्वन्नोष्ठपुटंरम्यंभीमसेनंप्रकोपयन् ॥ वृकोदरस्तुतच्छ्रुत्वावाक्यंप्राहहसन्निव ॥ ७ ॥ तक्रंपिबतियःपूर्वंसांप्रतंक्वथितंकथं ॥ सूतिकांतांनजानामिययाकंठोऽस्यवर्धितः ॥ ८ ॥ नासाच्छेदोवधोन्यास्य:पापिष्ठायास्ततोऽधिकम् ॥ किमंगुष्ठेनजनितोमुसलेनहलेनवा ॥ ९ ॥ नशृणोतियदाशब्दंपुनरेवाहपांडवः ॥ वटकःकिंगलेलग्नोगदयापोथयाम्यहम् ॥ १० ॥ धिग्धिक्त

१ पूतनावाइतिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोऽमदीयोऽयंयस्यकंठेमहीधराः ॥ दृश्यंतेप्रलयेनित्यंविशमानानिरर्गलम् ॥ ११ ॥ वटकस्यवराकस्यगणनाकात्रकीर्त्यते ॥
तेनाभ्यासेनगोविंदमाकुटुंबंप्रभक्षय ॥ १२ ॥ दूरदेशात्समायांतंमामाभक्षयमामितः ॥ भक्षितोनैवसुखदोभविष्यामिहरेतव
॥ १३ ॥अधोनगमनंमह्यमूर्ध्वंगंताऽस्मितेशिरः ॥ यत्रप्रविष्टेनमयादृश्यतेसचराचरं ॥ १४ ॥ कुत्सयिष्यंतिवैलोकास्त्वामेव
पुरुषोत्तमं ॥ आशयापरयाप्राप्तंभक्षमाणंहिपांडवं ॥ १५ ॥ एकाकिनंभीमसेनंनृपवाक्यप्रणोदितं ॥ किंकरिष्यतिकुंतीसावि
नाभीमंरसातले ॥ १६ ॥ तस्मात्पुत्रयुतांकुंतींभक्षयित्वासुखीभव ॥ पालितंधर्मराजेनत्वयाचाद्यनिपातितं ॥ ॥१७॥ श्रुत्वातुभ
गिनीभद्रामन्यतेत्वांतुराक्षसं ॥ कथयिष्यतिकस्मैसाबालापुत्रवियोगिनी ॥१८॥ सर्वान्संहरसेत्वंचतवदोषोनजायते ॥ सर्वा
न्सृजसिपश्चात्त्वंभीमसेनंतुमासृज ॥ १९ ॥ सृजसेयदिमांनाथस्वदासंनवृथासृज॥ ॥जैमिनिरुवाच॥ ॥ एतद्वृकोदरव
चःश्रुत्वाविस्मितमानसः॥ २० ॥ उवाचदेवकीपुत्रोभीमसेनंस्मयन्निव ॥ ॥ श्रीकृष्णउवाच ॥ ॥भीमसेनस्वागतंतेकुश
ल्यास्तेयुधिष्ठिरः ॥ २१ ॥ मयात्वंसहितोवीरभोजनंकुरुमानद ॥ ॥ भीमउवाच ॥ ॥ तृप्तोऽसिकृष्णपश्चान्मांपरिपृच्छ
सिसादरं ॥ २२ ॥ तृप्तेत्वयिजगन्नाथेपरांतृप्तिंगतोस्म्यहं ॥ ॥ श्रीकृष्णउवाच ॥ भुज्यतांभवताभीममयादत्तंमहाबल ॥
॥ २३ ॥ नचमेऽस्तिप्रियंकिंचिद्विनापार्थाद्धनंजयात् ॥ नदारानचपुत्रोवानमित्राणिनबांधवाः ॥२४॥ कश्चिद्वान्यःप्रियतमः
कुंतीपुत्राद्धनंजयात् ॥ एतावदुक्त्वावचनंगृहीत्वादक्षिणेकरे ॥ २५ ॥ भीमसेनंभोजयित्वासहसैवसमुत्थितः ॥ फणिव्रततिपत्रा
णिफालेयंस्निग्धशालयः ॥२६॥ दिव्यचंदनकर्पूरमुखामोदसमन्वितं॥गृहीत्वाभीमसेनायददौदेवोजनार्दनः ॥२७॥ उवाचच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदाऽक्रूरंसांबंजांबवतीसुतं ॥ प्रद्युम्नमनिरुद्धंचनिशठंशठमेवच ॥ २८ ॥ उवाचकृतवर्माणंदुंदुभिंताडयाशुवै ॥ यथामहाजनः
सर्वोधर्मराजपुरंव्रजेत् ॥ २९ ॥ मदाज्ञयावाजिमेधंप्रयांत्वितेयथासुखं ॥ देवकीप्रमुखाश्चैवमातरोममयांतुवै ॥ ३० ॥ रुक्मिणी
सत्यभामाद्यासर्वावध्वस्तथैवच ॥ एकएवपुरेरामोवसुदेवसमन्वितः ॥३०॥ पालयन्द्वारकांरम्यांतिष्ठत्वत्रयथासुखं॥अतःपरंध
र्मपुत्रोहयमेधंकरिष्यति ॥ ३२ ॥ यत्किंचिद्विद्यतेवित्तंशकटैःकरभैश्चतत् ॥ अश्वैरश्वतरैर्यातुधर्मराजनिकेतनं ॥ ३३ ॥ सुवर्ण
मणिमाणिक्यरुक्ममुक्ताफलानिच ॥ यत्राहंतत्रदारिद्र्यंकथमेतद्भवेत्क्षमं ॥ ३४ ॥ ॥ जैमिनिरुवाच ॥ ॥ कृतवर्मातदाराज
न्समाहत्याथदुंदुभिं ॥ प्रोवाचस्वजनान्सर्वान्कृष्णादेशेनयादवाः ॥ ३५ ॥ सर्वाःप्रकृतयश्चैवनिर्गच्छंतुममाज्ञया ॥ श्रुत्वा
क्रूरवचःसर्वेद्वारकावासिनोजनाः ॥ ३६ ॥ द्रष्टुंतमश्वमेधंचधर्मराजस्यमंदिरे ॥ विनिर्गताद्वारकायागंतुंतन्नागसाह्वयं ॥३७॥
पुरंकौतुकयुक्तास्तेकृष्णादेशेनभूपते ॥ येयेविनिर्गताराजंस्तांस्तांश्चकथयामिते ॥ ३८ ॥ ब्राह्मणावेदनिपुणाःसर्वशास्त्रविशा
रदाः ॥ धर्मज्ञाःकर्मनिपुणाःशुचयःसमदर्शनाः ॥ ३९ ॥ भार्यापुत्रयुताःसर्वेशिष्यैर्बहुभिरन्विताः ॥ वैश्याधनसमृद्धाश्चविनि
र्यातास्तदाज्ञया ॥ ४० ॥शूद्राविनिर्गताःसर्वेद्विजसेवारताःस्वयं ॥ कांस्योपजीविनःसर्वेबहुभाजनसंयुताः ॥ ४१ ॥ परीक्षका
श्चरत्नानांमणीनांचैवसर्वशः ॥ मुक्ताफलानांचतथासाधकाःस्वर्णकारकाः॥४२॥ गोविंदपुरवासाद्वैसान्नयोनिर्ययुश्चते॥मणी
नांजन्मकर्तारःपूरकास्त्रपुजीविनः ॥ ४३ ॥ धान्यविक्रयिणश्चैववस्त्रनिर्णेजकास्तथा ॥ पूगीफलयुताश्चान्येवरतांबूलजीवि
काः ॥ ४४ ॥ मालाकारास्तैलकाराःसहयंत्राविनिर्ययुः ॥ तंतुवायास्तथैवान्येवरसूत्रधराश्चये ॥ ४५ ॥ कोष्ठिकाःकर्मनिरता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्ष्टिकाःक्षौमवाससां ॥ कर्मणोगुरवःसूत्रवर्धकारास्तथैष्टिकाः ॥ ४६ ॥ आंत्रिकाःशस्त्रकर्तारःकुलालाश्चांबुवाहकाः ॥ निर्णे जकाःसरजकानटास्तत्रैवसूचकाः ॥ ४७ ॥ नापिताभित्तिकर्त्तारश्चित्रकर्मरतास्तथा ॥ तथासुराप्रकर्त्तारोध्वजिनश्चर्मजीविनः ॥ ४८ ॥ मृगयाजीविनश्चैवगोविंदेनप्रणोदिताः ॥ कुट्टिनीगुरवोवेश्यानानाभावप्रवेदकाः ॥ ४९ ॥ नृपमंडनकर्त्तारोमल्ला भटाश्चिकित्सकाः ॥ शैलूषामागधाश्चैवसर्ववर्णोपजीविनः ॥ ५० ॥ तथेंद्रजालकाराश्चकथकाःपाठकाःपरे ॥ तथाजांगलिका[1] भूपक्षुरकर्मोपजीविनः[2] ॥ ५१ ॥ व्याधाःसपंजराश्चैवकृष्णंसंवाहयंतिये ॥ घटकाश्चांबुवाहाश्चतृणवाहास्तथाऽपरे ॥ ५२ ॥ सौ रंध्र्यासंगतादास्यस्तथायेसौविदल्लकाः[3] ॥ सूक्तिकाःशस्त्रवैद्याश्चजलौकाजीविनश्चये ॥ ५३ ॥ अन्येकृष्णाज्ञयाप्रीताद्वारका याविनिर्ययुः ॥ निर्गतंबहुधासैन्यंचतुरंगंमहत्तदा ॥ ५४ ॥ नदृश्यतेतदासूर्योरजसासंवृतंनभः ॥ महारावस्तदाह्यासीत्तस्मि न्सैन्येविसर्पति ॥ ५५ ॥ वणिजानांतुशकटैर्नानावीथिवहैस्तथा ॥ द्वीपिवाहैःपक्षिवाहैर्मार्गोनैवतुलभ्यते ॥ ५६ ॥ शंभल्ये[4] कातदावृद्धाप्रहसंतीसखीजनैः ॥ प्रोवाचधावमानासावृथाकिंक्रियतेश्रमः ॥ ५७ ॥ अविवेकीहरिश्चायंनधनंसंप्रदास्यति ॥ संतुष्टोहिभवेद्येषांतेषांहरतिवैधनं ॥ ५८ ॥ वृषभेसासमारूढायावद्याऽतिस्वलीलया ॥ तापत्तस्याश्चवृषभोदृष्ट्वादासेरकंपथि ॥ ॥ ५९ ॥ पलायनपरोभूत्वापातयामासशंभलीं ॥ पतितांतांसमालोक्यप्रहसंतिस्मसैनिकाः ॥ ६० ॥ श्रीकृष्णस्यकृतानिं दासांप्रतंदुष्टयाऽनया ॥ स्वकर्मणेयंवृषभात्पतिताधरणीतले ॥ ६१ ॥ नूनमेतत्तुसंभाव्यंपापिनांपतनंभुवि ॥ साचतेषांवचः श्रुत्वाशंभलीपुनरुत्थिता ॥ ६२ ॥ कथयंतीशुभंवाक्यंसैनिकान्प्रतिभारत ॥ कृष्णमत्रविलोक्याहंपुनरेववृषस्थिता ॥ ६३ ॥

१ विषवैद्याः । २ भूपक्षुरकर्मोपजीविन इत्येकंपदम् । ३ कंचुकिनः । ४ कुट्टिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मान्मूढानजानंतिस्मरणंकेशवस्यवै ॥ पतितानांपावनंहिनान्यंपश्यामिकेशवात् ॥ ६४ ॥ ॥ जैमिनिरुवाच ॥ ॥ कृ
ष्णस्ततोहयंशुभ्रंसमारुह्याग्रतोययौ ॥ मध्याह्नसमयेसर्वैर्हष्टस्तुस्वपुराद्बहिः ॥६५॥ कशामादायतत्रैवद्विगुणांदर्शयत्यसौ ॥
धर्मराजस्यतंमार्गंयथालोकाव्रजंतिते ॥ ६६ ॥ कोटिकोटिसहस्त्रैस्तुरथानांदंतिनांतथा ॥ खर्वसंख्यैर्महासैन्यैर्वेष्टितोदेव
कीसुतः ॥ ६७ ॥ भीमसेनयुतोभूपस्वदारपरिवारितः ॥ कृष्णंविनानतिष्ठंतिद्वारकावासिनोजनाः ॥ ६८ ॥ सर्वेविनिर्गताहर्षा
त्स्वेच्छयाकौतुकेनतु ॥ मालाकारीहरिंवीक्ष्यहृष्टावचनमब्रवीत् ॥ ६९ ॥ ॥ मालाकार्युवाच ॥ ॥ कथंमध्यंदिनेकृष्णनिर्ग
मिष्यंतिमानवाः ॥ सर्वेगच्छंतिदेवेशस्ववस्तुधनजीविनः ॥ ७० ॥ वयमत्रपरंशोच्याःसुमनोभिश्वजीविनः ॥ त्वदर्थेसंगृहीता
निसुमनांसिमयाऽच्युत ॥ ७१ ॥ नम्लायंतुचतान्येवममदेयंचमौक्तिकं ॥ छत्रच्छायासमुदितंवदनंतवमाधव ॥ ७२ ॥ ताप
पूर्णाकथंयामिदेवकृष्णपदानुगा ॥ गुणयुक्तानिमाल्यानिगृहाणत्वंजनार्दन ॥ ७३ ॥ तस्यास्तद्वचनंश्रुत्वाकृष्णःप्रोवाचसस्मि
तः ॥ ॥ श्रीकृष्णउवाच ॥ ॥ दास्यामिभद्रेसर्वंतेवांछितंमौक्तिकंधनं ॥ ७४ ॥ धर्ममाश्रयमद्वाक्याद्यथातुष्यतिमेमनः ॥
॥ जैमिनिरुवाच ॥ ॥ एवंवदतिवैयावत्तावत्तैलान्वितापरा ॥ ७५ ॥ उवाचवचनंदेवश्रूयतांक्रियतांविभो ॥ तैलंनिःसरतेकृ
ष्णभित्त्वाजीर्णघटंमम ॥ ७६ ॥ व्यथांनकृष्णजानासिमदीयांयंत्रसंभवां ॥ अधुनैवसमुत्तीर्यगृहीत्वास्नेहमेवच ॥ ७७ ॥ मा
र्गोनलभ्यतेनाथशकटैस्तैलपूरितैः ॥ चलितुंनैवशक्नोमितथानीतिर्विधीयतां ॥ ७८ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेश्री
कृष्णप्रयाणंनामदशमोऽध्यायः ॥१०॥ ॥छ॥ ॥छ॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ भीमउवाच ॥ ॥ कृष्णकृष्णमहाबुद्धेपश्यैतास्तवसुप्रियाः ॥ आतपम्लानवदनाविश्राममययथासुखं ॥ १ ॥ विश्रामंकृतवा
न्कृष्णोह्यदूरेस्वपुरात्ततः ॥ तंभीमसेनःसंप्राहवासुदेवंविनोदकृत् ॥ २ ॥ कृष्णकृष्णमहाबाहोममचेतसिभासते ॥ सर्वासांयो
षितामासांत्वमेवप्रायशःपतिः ॥ ३ ॥ मालाकारीतैलकारीनापितीशंभलीचसा ॥ त्वामेवखलुजानंतिस्वपतिंनतथाहृदि ॥ ४ ॥
॥ श्रीकृष्णउवाच ॥ ॥ भवान्गृह्णातुसततंपौरुषंचेद्वृकोदर ॥ स्थूलोदरंभीमसेनंवरंवरयशोभने ॥ ५ ॥ त्वंतुशंभलिगच्छा
शुभीमंदंतविवर्जिते ॥ भीमस्तुप्रत्युवाचेदंराक्षसीमेगृहेप्रिया ॥ ६ ॥ वारयिष्यतिमायातुभक्षयिष्यतितांहिसा ॥ तस्मात्कृष्ण
गताःसंतुसर्वादंतविवर्जिताः ॥ ७ ॥ कृष्णाभिसक्तचित्तानांसर्वत्रसुखमेवहि ॥ रुक्मिणीप्रमुखाभार्याःसाध्व्यःकृष्णैकमानसाः
॥ ८ ॥ यत्रनेर्ष्यांकरिष्यंतिप्रीयतांतेनकेशवः ॥ अन्योन्यंचसपत्नीनांक्रोधश्चात्रनदृश्यते ॥ ९ ॥ यत्रजांबवतीभार्यासेर्ष्यानै
वप्रजायते ॥ त्वमाश्रित्यप्रवर्त्तंतेयेजनाःसर्वतःसुखम् ॥ १० ॥ संभवंतिकथंभूमौपुनस्तेगतिवर्जिताः ॥ ॥ श्रीकृष्णउवाच ॥
स्थानभ्रष्टाञ्जनांश्चैवकर्तातुपवनात्मजः ॥ ११ ॥ तस्माद्याहिभीमसेनंसमानयममांतिकम् ॥ एवंतांतुसमादिश्ययावद्गच्छ
तिकेशवः ॥ १२ ॥ सूतिकापतितातावत्करभेणातिगामिना ॥ साचाहदेवकीबालंसूतिकांमांसमुद्धर ॥ १३ ॥ वसुदेवादयोयेच
यादवाःसंतितेऽनघ ॥ तेषांमांसूतिकांविद्धित्वन्मातृपरिवंचिता ॥ १४ ॥ देवकीत्वांतुसुषुवेनाहूताऽस्तितदैवतु ॥ आत्मानमात्म
नादेवसृजस्येतेचयादवाः ॥ १५ ॥ तथासृजंतिनात्मानंतेनजीवामिमाधव ॥ सूतिकावचनंश्रुत्वाकृष्णःप्राहवृकोदरं ॥ १६ ॥
॥ ॥ श्रीकृष्णउवाच ॥ ॥ उत्थापयाशुभीमैनांवसुदेवंविलोकय ॥ संप्राप्तंददृशेभीमःसमुत्थाप्यहिसूतिकाम् ॥ १७ ॥ वसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवंनमस्कृत्यकृष्णभोमौमहामती ॥ बद्धांजलिपुटावग्रेप्रोचतुर्वचनंशुभं ॥ १८ ॥ गच्छामोधर्मराजानंत्वयाज्ञप्तौपरंतप ॥ वसु
देवस्तुतत्रैवप्रागात्कृष्णंसमादिशत् ॥ १९ ॥ वसुदेवउवाच ॥ ॥ गच्छगच्छहृषीकेशमयाज्ञप्तोगजाह्वयं ॥ पुनरागमनंतेऽस्तु
कुरुवाक्यंममाच्युत ॥ २० ॥ येवेदनिरताविप्राःशास्त्राध्ययनतत्पराः ॥ दानंतेभ्यस्त्वयादेयंसदाचारपरेषुच ॥ २१ ॥ परापवा
दविमुखाःशिष्टाचारपरास्तथा ॥ नेतव्याःसहितास्तेवैसमलोष्टाश्मकांचनाः ॥ २२ ॥ नवस्त्रमलिनेदानंनैवाचारविवर्जिते ॥
देयंत्वयाचराज्ञावैसत्पात्रंपूज्यतेयतः ॥२३॥ क्षत्रियाश्चापिनेतव्यादानधर्मपरायणाः ॥ युद्धेकुशलिनःशूराःक्षत्रधर्मरतास्तथा
॥ २४ ॥ वृथाभिमानिनोयेचस्त्रीजितादुष्टसंगिनः ॥ विकत्थनाश्चसंत्याज्यास्तथाऽत्मस्तुतिकारकाः ॥ २५ ॥ परोपतापिनो
येचसदाकामपराजनाः ॥ एवंविधानसंग्राह्याःश्वशुराहृतवृत्तयः ॥२६॥ जामातृजेनवित्तेनयेजीवंतिनराधमाः ॥ अपुत्रस्यमृ
तस्येहयेगृह्णंतिधनंछलात् ॥ २७ ॥ द्यूतकर्मरतानित्यमपरीक्षितकारिणः ॥ गुर्विणींयेऽभिगच्छंतिसुपर्वविमुखास्तथा ॥ २८ ॥
ऋतुकालंसंत्यजंतियेवैमोहपरायणाः ॥ नारीभिःसहिताश्चैवयेप्रकुर्वंतिभोजनम् ॥ २९ ॥ तथोत्सृजंतियेवीर्यंकुयोनौपापबुद्ध
यः ॥ परस्त्रियाऽभितप्यंतेपिशुनाःपापबुद्धयः ॥ ३० ॥ तथाऽन्येपापिनोयेचयेचसज्जननिंदकाः ॥ महापातकिनोयेचविशुद्धा
न्दूषयंतिये ॥ ३१ ॥ मासोपवासिनींसाध्वींकामयानाहिपापिनः ॥ अर्थिनंधनसंपन्नोविमुखंयःकरोतिवै ॥ ३२ ॥ दरिद्रस्तप
पसाहीनःकातरोबहुजल्पकः ॥ पापिष्ठाचापियानारीपतिवंचनतत्परा ॥ ३३ ॥ गृहकार्येषुविमुखासत्यशौचविवर्जिता ॥ नने
तव्यात्वयासार्धंकदाचिन्मधुसूदन ॥ ३४ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवंतंपितरंनमस्कृत्यजनार्दनः ॥ ततःप्रदक्षिणीकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यस्फुटंवचनमब्रवीत् ॥ ३५ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ सर्वंतातकरिष्यामित्वयोक्तंपरमंहितं ॥ महापातकिनस्त्यक्त्वायाम्य
हंतंयुधिष्ठिरं ॥ ३६ ॥ ॥ भीमउवाच ॥ ॥ वसुदेवेनवृद्धेनयदुक्तंवचनंतव ॥ त्याज्याःसर्वेजनाभूमौतत्साहसतरंमम ॥
॥ ३७ ॥साधवोयत्रतिष्ठंतितत्रवासश्चतेसदा ॥ किमत्रचित्रंगोविंददुष्टेचित्तंनिवेशय ॥ ३८ ॥ उपकारिषुयःसाधुःसाधुत्वेतस्य
कोगुणः ॥ अपकारिषुयःसाधुःससाधुःसद्भिरुच्यते ॥ ३९ ॥ समदृष्टिर्भवाशुत्वंसर्वभूतेषुकेशव ॥ भीमसेनवचःश्रुत्वावसुदे
वादयस्तथा ॥ ४० ॥ साधुसाध्विितिसंवाच्यनिर्ययुस्तेपुरींप्रति ॥ रामेणसहितोगच्छन्वसुदेवोमहामनाः ॥ ४१ ॥ उवाच
वाक्यंगोविंदंविह्वलःस्नेहलालसः ॥ ॥ वसुदेवउवाच ॥ ॥ किंकरोमिहृषीकेशत्वद्वियोगेनजीवितं ॥ ४२ ॥ नसमर्थोधार
यितुंयथादशरथःपुरा ॥ सम्यक्त्यजामिकार्यंचेत्सर्वंनष्टंभविष्यति ॥ ४३ ॥ राज्ञादशरथेनैवविवियोगाद्राघवस्यहि ॥ शोकभा
वेनसंत्यक्तंजीवितंसुप्रियंभुवि ॥ ४४ ॥ एतावदुक्त्वावचनंपरिष्वज्यात्मजंततः ॥ विससर्जाशुगमनेपरिवारसमन्वितं ॥ ४५ ॥
॥ जैमिनिरुवाच ॥ ॥ ततःकृच्छ्रेणमहतावसुदेवःपुरंययौ ॥ भीमेनसहितःकृष्णस्तथाऽतःपुरसंयुतः ॥ ४६ ॥ यावद्गच्छतिमा
र्गेसौतावद्दृष्टंमहत्सरः ॥ हंसकारंडवाकीर्णंचक्रवाकोपशोभितं ॥ ४७ ॥ अम्लानपंकजांतत्रददर्शपद्मिनींततः ॥ समाहूयाब्र
वीत्तत्ररुक्मिणींभीष्मकात्मजां ॥ ४८ ॥ ॥ वासुदेवउवाच ॥ ॥ इमांत्वंपश्यसुभगेरविभार्यामनिंदिताम् ॥ गजैर्गृहीतांमु
क्तांचमरालैर्विदलीकृतां ॥ ४९ ॥ चंचरीकद्वयवृतांस्त्रीणांचित्तंतुचंचलं ॥ निजंनाथंवंचयित्वारमयंतिपरंजनम् ॥ ५० ॥ अविलो
क्यनिजंकांतंम्लायंतिचनिशागमे ॥ हृदयेकलुषंगृह्यषट्पदंप्रस्वपंतिच ॥ ५१ ॥ नाथागमेप्रहृष्यंतिचित्रंमेयोषितांमनः ॥ प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्मिनीनांसंभवस्तुपंकादिहविलोक्यते ॥ ५२ ॥ कलुषंमानसंस्त्रीणांनिदानादेवदृश्यते ॥ चंचलेनपरामृष्टादिवाकंपत्यहर्निश
म् ॥ ५३ ॥ प्राणनाथभयाद्भीतालक्ष्यतेसधनायथा ॥ वासुदेववचःश्रुत्वारुक्मिणीवाक्यमब्रवीत् ॥ ५४ ॥ स्मितंकृत्वाविशाला
क्षीवक्रोक्त्याकेशवंप्रति ॥ ॥ रुक्मिण्युवाच ॥ ॥ हंरिंजानातिनाथंवैपद्मिनीपद्मलोचन ॥ ५५ ॥ स्वसुतानागतान्मत्वापु
ष्णात्येषागृहागतान् ॥ पुत्रपौत्रादिकान्नाथषट्पदादीञ्जनार्दन ॥ ५६ ॥ स्तनौरुदंतौपद्मिन्याःपिबेतेभ्रमराविमौ ॥ प्राण
नाथसमीपेतुषट्पदौबालकाविव ॥ ५७ ॥ दोषःकश्चात्रगोपालरुचिरंक्रियतेऽनया ॥ दूरेप्रियंतथावीक्ष्यकुरुतेचंचलंमनः ॥
॥ ५८ ॥ नतुनाथंवंचयतिरममाणापरात्परं ॥ एतत्सतांमतंनाथपद्मिन्याश्चरितंमहत् ॥ ५९ ॥ कथंनम्लायतेकृष्णनारीनाथः
परांव्रजेत् ॥ रात्रौविरहिणीबालंगृहीत्वापश्यषट्पदं ॥ ६० ॥ नित्यंनिद्रांचकुरुतेह्येषधर्मःसनातनः ॥ पद्मिनीकुचमादा
यतप्तोलिर्विरहाग्निना ॥ ६१ ॥ कुर्वन्कृष्णंमुखंप्राप्यमृतोऽसौषट्पदोयदि ॥ येकृष्णहृदयादेवतेतिष्ठंतिकथंविभो ॥ ६२ ॥
प्रियोदयेविकसितायदिगोविंदपद्मिनी ॥ जायतेकमलंचास्याःसमारोहतिशंकरम् ॥ ६३ ॥ विलोक्यनलिनींनाथविस्मितोऽ
सिवदाधुना ॥ धराहरिपदक्षुण्णासरजाहिपुराऽभवत् ॥ ६४ ॥ तस्यारजस्तुपतितंजलेहरिपदच्युतम् ॥ ततोजलरजोभ्यांहि
जातःपंकःकिलाच्युत ॥ ६५ ॥ पंकंविलोक्यनचिरान्निदानंतुनिरीक्ष्यहि ॥ ज्ञायतेतववाक्येनभीमसेनस्यशृण्वतः ॥ ६६ ॥
यथासर्वगतस्त्वंमांनतथावेत्तिकिंभवान् ॥ स्त्रियस्तुबह्वयःसंत्यान्यामांजानासिदिनेदिने ॥ ६७ ॥ नत्वदन्यंहिपश्यामिचिंत
यंतीजनार्दनं ॥ यत्किंचिद्दृश्यतेलोकेत्वयाव्याप्तंविभातिमे ॥ ६८ ॥ ॥ जैमिनिरुवाच ॥ ॥ इतितस्यावचःश्रुत्वाकृष्णस्तो

१ र्यमू ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षसमन्वितः ॥ समुत्तीर्यहयात्तस्मात्समाहूयबलाधिपम् ॥ ६९ ॥ अब्रवीत्केशवस्तंवैभेरींवादयमाचिरम् ॥ कृतवर्मातथाचक्रे गोविंदवचनान्नृप ॥ ७० ॥ रात्रौंपरिजनेनाथसहितोन्यवसद्धरिः ॥ कृताह्निकःसप्रभातेसैन्यंनिजमचोदयत् ॥ ७१ ॥ शनैः शनैश्चसंप्राप्तोदेशंधर्मेणपालितम् ॥ मार्गेयांतंहरिंवीक्ष्यपामराःपशुपालकाः ॥ ७२ ॥ व्रजौकसश्चपश्यंतिकृष्णंदधिभृतःप रे ॥ गोपालावंशहस्ताश्चगुंजाभूषणभूषिताः ॥ ७३ ॥ वादित्राणिस्वकान्येववादयंतिपुनःपुनः ॥ मुख्योस्माकमसौगोपोनंद पुत्रोनसंशयः ॥ ७४ ॥ इतिब्रुवंतस्तेकृष्णंसमालिंग्यपथिस्थिताः ॥ पृच्छंतिचहसंत्यन्येसाट्टहासंमुहुर्नृप ॥ ७५ ॥ दध्योदनंप्र यच्छंतिप्रणिपातपुरःसरम् ॥ पश्यकृष्णाद्यमेवंशवीणामतिमनोरमां ॥ ७६ ॥ गावोमयारक्ष्यमाणादेवयांतिइतस्ततः ॥ इ दानींताःस्वयंप्राप्तास्त्वांविलोक्यातिदुर्धरं ॥ ७७ ॥ भीतास्त्रस्ताधुनाव्याघ्रैर्लोभमोहमयैर्हरे ॥ मोचितामगोविंदत्वयामित्रे णसांप्रतम् ॥ ७८ ॥ कथंहयंसमारूढःस्त्रीभिश्चैवसमन्वितः ॥ कुतोमणिस्त्वयालब्धःकौस्तुभःकुंजराइमे ॥ ७९ ॥ क्वया सिकृष्णपदकंकुतोलब्धंत्वयाहृदि ॥ तत्रापरोऽब्रवीद्वाक्यंमूढवेत्सिनकेशवम् ॥ ८० ॥ यावद्धृदिपदंलग्नंश्रीवत्संचद्विजन्मनः ॥ तावच्छ्रीमानयंजातःसर्वंचलभतेहरिः ॥ ८१ ॥ ॥ जैमिनिरुवाच ॥ ॥ गोपानांतद्वचःश्रुत्वाप्रहृष्टोभगवानभूत् ॥ स र्वान्संपूज्यचापश्यत्स्त्रियश्चैवसमागताः ॥ ८२ ॥ पात्रहस्ताःसदीपास्ताःकृष्णदर्शनलालसाः ॥ सत्वरंमाधवंद्रष्टुमाव्रजंति निजाद्गृहात् ॥ ८३ ॥ काचिद्गृहेप्रकुर्वाणामथनंसाप्रधाविता ॥ गोमयेनापिलिप्तांगीकाचित्कृष्णंसमागता ॥ ८४ ॥ एका कृष्णस्यकेशेस्वांस्त्रजंचप्रददौनृप ॥ सर्वकर्माणिसंत्यज्यकाचित्प्राप्ताहरिंप्रति ॥ ८५ ॥ काचिद्व्रजोवतीगोपीचचालकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षणसन्निधिं ॥ अपराप्राहतांयांतींरजःप्रक्षाल्यगम्यताम् ॥ ८६ ॥ सरजाश्वाद्यवैसुभ्रूर्गच्छतीकिन्नलज्जसे ॥ ॥ गोप्युवाच ॥
रजःप्रक्षालितंमूढेनतुतत्परिशाम्यति ॥ ८७ ॥ कर्मणामलिनंगात्रंक्षालितुंनैवशक्यते ॥ जीवितंक्षपितंगेहेशेषंचकलुषंस्थितं
॥८८॥ तस्माद्गच्छामिगोविंदंरजसाचावृताधुना ॥ मलिनैर्गम्यतेतत्रजलंयत्रहिपुष्कलं॥८९॥शिलातलेवापीठेवाक्रियतेमल
नाशनं ॥ पादपीठेऽद्यकृष्णस्यमलयुक्तंकलेवरं ॥ विरजस्कंकरोम्यद्यलज्जांसंत्यज्यसंसदि॥९०॥इत्युक्त्वाप्रययौचाथश्रीकृष्ण
स्यसमीपतः ॥ उवाचकेशवंचान्याप्रहसंतीपुनःपुनः ॥ ९१॥ नवनीतंगृहाणत्वंकर्मणायन्मयाहृतं ॥ यशोदात्वन्मुखेदेवनवनीतं
ददौपुरा॥९२॥तयादृष्टंजगत्सर्वंतमहंत्वांविलोकये॥तयायथापुरादृष्टंतथाहमवलोकये॥९३॥त्वदन्यःकश्चगोविंदजगदास्येप्र
दर्शयेत्॥तावच्चान्यासमागत्यदृष्ट्वाकृष्णंचहर्षिता॥नमस्कृत्यस्थितारजन्सर्वैविस्मृत्यकर्मजं॥९४॥भयंगोविंदमासाद्यतदद्भु
तमिवाभवत् ॥ ॥जैमिनिरुवाच॥ ॥ततःप्राप्तोमहाबुद्धिर्भगवान्देवकीसुतः ॥ ९५ ॥ कालिंदीतीरसान्निध्येयत्ररम्यंमहद्व
नं ॥ संस्थाप्यवीणकंरम्यंसैन्यंतत्रन्यवेशयेत् ॥ सुहृज्जनंसमाहूयवचनंचेदमब्रवीत् ॥ ९६ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ देव
कींमातरंप्राहयशोदांरुक्मिणीमपि ॥ ९७॥ कार्याभवद्भिःकुंत्याश्चपरिचर्यादिनेदिने ॥ भगिनीवसुदेवस्यजननीचार्जुनस्य
च ॥ ९८॥ अन्यावृद्धतमाःप्राप्ताःसेवनीयाःप्रयत्नतः ॥ अनुसूयाऽरुंधतीचऋषिभार्याश्चशोभनाः ॥ प्रद्युम्नप्रमुखाःसर्वैश्शृण्वं
तुवचनंमम ॥९९॥ धर्मराजस्यचपुरेबहुलोकसमागमे ॥ बहुवीरयुतेरम्येयज्ञोत्सवविनोदिते॥ गुरूणांचप्रकर्तव्यंभवद्भिःपू ॥२५॥
जनंतथा ॥ १०० ॥ तावत्तेजांसिवीराणांयावत्पार्थोनदृश्यते ॥ सर्वतीर्थानिगर्जंतितावत्पापप्रणाशने ॥ १ ॥ यावन्नसिंहगेजी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदश्यतेगौतमीनदी ॥ प्रद्युम्नेनयथाराष्ट्रेस्थीयतेराजलीलया ॥ २ ॥ तथाऽत्रशक्यतेनैवस्थातुंधर्मपुरेऽधुना ॥ नकदाचिद्भवा
न्प्राप्तःपुरेहिगजसाह्वये॥३॥ यत्रभीमोविद्यमानोमहाबुद्धिःसदाशुचिः ॥ जनर्नींभवतांदेवींपार्षतींभगिनींमम ॥४॥ संभावय
तुयज्ञेऽस्मिन्भामयासहिताशुभा ॥ अयुतेनापिनारीणांसदातिष्ठतुसावृता ॥ ५ ॥ दीपहस्तायज्ञकालेभावयंतुचपार्षतीं ॥
अहंतत्रगमिष्यामिप्रथमंधर्मनंदनं ॥ ६ ॥ सत्कर्तुंस्वजनंतंतुयूयंगच्छतपृष्ठतः ॥ एवंसंदिश्यतान्सर्वान्भीमंसंस्थाप्यवीणके
॥ ७ ॥ एकाकीहयमारुह्यप्रययौहस्तिनापुरं ॥ वासुदेवोमहाबुद्धिःपरिमेयपुरःसरः ॥८ ॥ प्रविशंतंहरिंवीक्ष्यनागरोहिमहाज
नः ॥ हर्षेणमहतायुक्तःसंमुखोऽभूज्जनाधिप ॥ ९ ॥ ब्राह्मणायाज्ञिकाःसर्वेवचनंचेदमब्रुवन् ॥ अस्माभिःक्रियतेकर्मभुविस्वर्गे
च्छयासदा ॥ १० ॥ अग्निष्टोमादिभिर्यज्ञैःस्वर्गास्तेहरिणाकृताः ॥ यज्ञभुग्यज्ञकर्ताचफलदाताचकर्मणां ॥ ११ ॥ सोयमा
यातियज्ञेशोऽनेकयज्ञफलप्रदः ॥ कथंधूमांधयादृष्ट्यादृश्यतेयज्ञनायकः ॥ १२ ॥ यथाभक्तेनपार्थेनदर्शितोऽयंजनार्दनः ॥ न
तथापावकेनापिबहुसंतर्पितेनच ॥ १३ ॥ कृष्णंनवेत्तिकिंवह्निःसप्तजिह्वोऽपिविश्रुतः ॥ क्षीरंपिबतिवैसाक्षाद्द्विजिह्वःकुरुतेविषं
॥ १४ ॥ सप्तजिह्वःकथंकृष्णंदर्शयेत्कृष्णवर्त्मना ॥ तत्राब्रवीद्द्विजःकश्चिन्नदोषःपावकस्यसः ॥ १५ ॥ अस्माकंचास्तिदोषोऽ
यंकर्मादीनामनर्पणात् ॥ ततोऽन्यःप्राहतान्सर्वान्पश्यतांदेवकीसुतः ॥१६ ॥ यज्ञजंसुकृतंचास्मैकृष्णायाशुप्रदीयतां ॥ तेन
स्वर्गेणकिंकार्यंयस्मात्पतनजंभयं ॥ १७॥ निर्भयंविचरिष्यामःसांप्रतंहरिणावयं ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवंतस्ते
न्योन्यंनिरीक्ष्ययदुनंदनं ॥ १८ ॥ ऊचुःकृष्णंतदासर्वेयदादेवेनवंदिताः ॥ चराचरस्यदेवत्वंगमनागमनादिकं ॥ १९ ॥ छिंधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विप्राशिषःप्राप्यस्वस्तितेऽस्तुजगत्पते ॥ ॥जैमिनिरुवाच॥ ॥वृष्णिवीरंहिददृशुस्तदासंन्यासिनोहिते ॥ २० ॥ पादान
 तंप्रब्रुवाणानमोनारायणेतिच ॥ ॥संन्यासिनऊचुः॥ ॥नारायणस्त्वमात्मानमात्मनाऽसिनमस्कृतः ॥ २१ ॥ नारायणे
तिहिगिराऽस्माभिर्वक्तुंनपार्यते ॥ यतोवाचोनिवर्ततेसभवान्पादयोर्नतः ॥ २२ ॥ वेदांतवेद्यमभयंप्रत्यक्षंत्वामुपास्महे ॥ द्वेरूपे
वासुदेवस्यचलंचाचलमेवच ॥ २३ ॥ चलंसंन्यासिनांरूपमचलंप्रतिमादिकम् ॥ प्रणवाभ्यासनिरताःप्रणवोऽपिपदांबु
जम् ॥ २४ ॥ त्वदीयंचिंतयत्येवसदाऽद्यापिनवेत्तितत् ॥ ॥श्रीकृष्णउवाच॥ ॥ कर्मणःफलसंन्यासात्पुष्टंविष्णोःकलेव
रम् ॥ २५ ॥ भवद्भिर्ध्यानसंयुक्तैर्विश्वरूपमयंकृतम् ॥ हंसायथाभवंतश्चतथाकृष्णोऽस्मिभूतले ॥ २६ ॥ आवयोःसंगतिश्चा
स्तुरम्येधर्मपुरेसदा ॥ ॥जैमिनिरुवाच॥ ॥अनुज्ञातस्ततःकृष्णोराजमार्गेजगामसः ॥ २७ ॥ प्रासादस्थाश्चपश्यंति
योषितश्चारुलोचनाः ॥ पण्यांगनाश्चगोविंदंविलोक्येदमथाब्रुवन् ॥ २८ ॥ ॥पण्यांगनाऊचुः॥ ॥कथमायातिगोविं
दोगृह्णीतेतिसकृच्छुभः ॥ दाताहिकामुकोधूर्तःकृष्णःकमललोचनः ॥ २९ ॥ पेशलःसबलःश्रीमाल्लुँब्धःस्त्रीषुनिरंतरम् ॥ ॥शं
भल्युवाच॥ ॥एवंपुराणपुरुषंवृथानारीजनोहृदि ॥ ३० ॥ धर्तुंप्रयत्नंकुरुतेनायंधर्तुंभवेत्क्षमः ॥ समुक्तस्तत्कथंमुग्धेमु
क्तोधर्तुंनशक्यते ॥ ३१ ॥ षोडशस्त्रीसहस्राणियेनभुक्तानिभूतले ॥ यूनापुराद्यवृद्धेनबहुपुत्रेणकिंफलम् ॥ ३२ ॥ तथाऽपिका
रणंत्वेकंकेशवग्रहणेहिनः ॥ मुक्ताःसर्वाभविष्यामःसकामास्तेनसंगताः ॥ ३३ ॥ तस्मात्पुराणपुरुषात्परमार्थोहिगृह्यतां ॥ पु
मान्युवाऽस्तुवृद्धोवानसंगेसस्पृहावयम् ॥ ३४ ॥ युवतीभिर्नवृद्धाभिर्मोचनीयोजनार्दनः ॥ कृष्णाद्वृद्धोनवैकश्चिदृश्यतेऽत्रम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाजनः ॥ ३५ ॥ ब्रूतेमहाजनोमंदःसांप्रतंदेवकीसुतम् ॥ जानाम्यहंयथाचास्यचेष्टितंवेत्तिनापरा ॥ ३६ ॥ कुब्जाचकामिता
येनतथावानरकन्यका ॥ स्त्रीसमूहमिमंरम्यंसकथंपरिहास्यति ॥ ३७ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवाणासाकृष्णंसर्वा
भिःसहिताग्रतः ॥ नमस्कृत्यस्थिताहृष्टादेवेनापिप्रतोषिता ॥ ३८ ॥ ततःकृष्णस्यपुरतःस्थितोबंदिगणोमहान् ॥ तेषांवृद्धतमः
प्राहसंस्तुवञ्छ्रीपतिंमुहुः ॥ ३९ ॥ ॥ बंदिराजउवाच ॥ ॥ प्राप्तोऽयंदेवकीपुत्रःकृष्णःकंसनिषूदनः ॥ अद्यार्थिनांचसर्वेषां
भवदैन्यंगमिष्यति ॥ ४० ॥ इदंममेतिजल्पंतोजनामोहरुजावृताः ॥ कृष्णवैद्येनतेसर्वेस्वनामौषधदायिना ॥ ४१ ॥ सत्यं
वच्मिनसंदेहोभवंतिचनिरामयाः ॥ व्याधयःकामजाःसर्वेसंक्षयंयांतिचिंतनात् ॥ ४२ ॥ ब्रह्मायुरितिवैशब्दंकथंब्रूमोहरिंप्र
ति ॥ नाभिपंकजमध्यात्तुसमुत्पन्नःपितामहः ॥ ४३ ॥ पितापितामहःकोऽस्यवर्ततेतन्नविद्महे ॥ नामग्रहणमेवास्यकर्त्तव्यं
किलसिद्धये ॥ ४४ ॥ महिमानंनजानामिनाम्नोऽस्यगदितुंभुवि ॥ नामानिसुबहून्यस्यप्रतापजनितानिच ॥ ४५ ॥ नीतंनि
गममालोक्यशंखेनादिझषोऽभवत् ॥ मानुषाणांकथंमध्येवर्ण्यतेमीनजन्मतत् ॥ ४६ ॥ कूर्मःकोलोऽयमभवच्छ्रुतमेतस्यपौ
रुषम् ॥ अर्धकेसरिवेषोऽयंविप्रोभूच्चैववामनः ॥ ४७ ॥ एतानिकिलजन्मानिश्रुत्वाचास्यमहात्मनः ॥ सर्वसंपत्समायुक्तोभवि
ष्यतिनसंशयः ॥ ४८ ॥ मन्मुखाद्गतदोषस्तुकिंचित्परमुखात्तथा ॥ भविष्यतिनसंदेहःकृष्णःकोपंकरिष्यति ॥ ४९ ॥ बंदिना
ममजन्मानिकथितानिजनंप्रति ॥ कुरूपाणिध्रुवंमत्वाजिह्वांकिंमेहरिष्यति ॥ ५० ॥ सर्वंहरतिगोविंदःशारीरंमानसंत्वघं ॥ ना
मानिकीर्त्तयिष्येऽहंरामरामेतिवैपुनः ॥ ५१ ॥ रामनाम्नाऽपिसर्वज्ञःशंकरःकिलतुष्यति ॥ तेननाम्नानाकिंतुष्येद्देवोगोपालमू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तिमान् ॥ ५२ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंहिचिंत्यमानंतंवारयामासकेशवः ॥ प्रददौमुक्तमालांस्वांतस्मैकंठविलंबिनीं ॥
॥ ५३ ॥ मुक्ताफलानिसर्वेषांदत्वासप्रययौनृप ॥ धर्माधिकारिभिर्दृष्टःसर्वैस्तैःपरिवारितः ॥ १५४ ॥ इत्याश्वमेधिकेपर्वणिजै
मिनीयेश्रीकृष्णहस्तिनापुरप्रवेशोनामएकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥

॥ जनमेजयउवाच ॥ ॥ ततःपरंकिमभवत्स्मार्तभाषितमादरं ॥ किंजगादसगोविंदस्तन्मेब्रूहितपोधन ॥१॥ ॥ जैमिनि
रुवाच ॥ ॥ शृणुराजेंद्रगोविंदमब्रुवंस्तेचयद्वचः ॥ महताचैवहर्षेणधर्मराजपुरेतदा ॥ २ ॥ ॥ स्मार्ताऊचुः ॥ ॥ सम्य
गाचारकरणाद्वर्तनात्सम्यगेवनः ॥ संप्रायश्चित्तदानाद्वैत्वमस्माभिर्विलोक्यसे ॥ ३ ॥ नृपाज्ञयाजनाःसर्वेधर्ममार्गेनियोजि
ताः ॥ धर्मसंरक्षणार्थंहित्वयाजन्मकृतंभुवि ॥ ४ ॥ कुर्वंतिपातकंयेचब्रह्महत्यादिकंहरे ॥ ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः
॥ ५ ॥ तत्संसर्गीपंचमस्तुमहापातककारकाः ॥ त्वन्नामग्रहणादेवपूताःकृष्णभवंतिते ॥६॥ एतेपृच्छंतिसर्वेऽस्मान्प्रायश्चित्तं
हिकीदृशम् ॥ कृपयादीयतेऽस्माभिस्तेभ्योनामाधिकंनहि ॥ ७॥ पातकेनसमंवीक्ष्यप्रायश्चित्तंप्रयोजयेत् ॥ एतानिपातकान्ये
वस्वल्पानिहरिनामतः ॥ ८ ॥ द्वादशाब्दमुखंतस्मात्तेषुतेषुसमंभवेत् ॥ द्वादशाब्दमुखंकृत्वागात्रंतेषांतुतिष्ठति ॥९॥ हरिनाम
प्रगृह्णंतिनतिष्ठतिकलेवरं ॥ नपापानिवसंत्येवतस्मिन्देवजनार्दन ॥१०॥ एकस्तुसंशयोघोरोनकथंचनगच्छति ॥ प्रायश्चित्तप्र
दानेनसदास्मच्चित्तसंस्थितः ॥११॥ विष्णोर्नामानियेमूढानस्मरंतिविमोहिताः ॥ तेषामिहात्महंतृणांप्रायश्चित्तंनविद्महे ॥१२॥
धर्मशास्त्राणिसर्वाणिवीक्षितानिपुनःपुनः ॥ प्रायश्चित्तानिदृष्टानिसर्वपातकहानितु ॥१३॥ नश्रुतंनचदृष्टंहिप्रायश्चित्तंजनार्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न ॥ त्वत्संस्मृतिविहीनानामधमानांकथंचन ॥ १४ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधंवचःश्रुत्वाप्रसन्नःपरमेश्वरः ॥ सहै वतैःप्रयातोऽग्रेदृष्टवान्नर्त्तकीगणान् ॥ १५ ॥ प्रवर्त्तमानान्नृत्येषुकृष्णागमनकांक्षया ॥ षड्विधातालकेनाथतृप्तस्तेनचकेशवः ॥ ॥ १६ ॥ ततोमाधवमालोक्यनर्त्तकीचकरंविना ॥ वल्लीवनंदनेरम्येसुमनोभिरलंकृता ॥ १७ ॥ नेत्राभ्यांषट्पदाभ्यांचभ्रममा णापुनःपुनः ॥ वंशकीचकनादेनमृदंगकलनिःस्वनैः ॥ तोषयंतीहृषीकेशंमधुरंवाक्यमब्रवीत् ॥ १८ ॥ ॥ नर्त्तक्युवाच ॥ ॥ मांभ्रमंतींजनावीक्ष्यप्रहसंतितवाग्रतः ॥ नविंदंतिपरंमूढामद्भ्रमात्तुष्यतेहरिः ॥ १९ ॥ किंध्यानंकिंतपस्तीव्रंकिंदानंकिंचतद्व्रत म् ॥ यस्मिन्कृतेनगोविंदोदृश्यतेभुविचक्षुषा ॥ २० ॥ ध्यानेनयोगिनांनैवलीलयादृश्यतेहरिः ॥ संस्थितंमद्भ्रमेणात्रसर्वेपश्यं तुयोगिनः ॥ २१ ॥ नृत्यतांगायतांचैवनानावाद्यंप्रकुर्वताम् ॥ यथासंतुष्यतेदेवोनध्यानाद्यैरितिश्रुतम् ॥ २२ ॥ एकंसुदर्शनंचक्रं तवहस्तेजनार्दन ॥ पश्यमत्पाणिपदयोर्धृतंचक्रचतुष्टयं ॥ २३ ॥ त्वयापादेधृतागंगाकपोलेशिरसामया ॥ अचलस्त्वंहृषीकेश चंचलाऽस्मिसदाऽबला ॥ २४ ॥ त्वयैकंचाल्यतेकृष्णश्रूयतेब्रह्मगोलकं ॥ चाल्यंतेपुरतस्तेऽद्यमयैतेसप्तगोलकाः ॥ २५ ॥ षड्विं शत्संख्यकाभावास्तवदृष्टेरुदाहृताः ॥ क्रियंतेनमयातेऽत्रपश्याम्येकेनकेशवम् ॥ २६ ॥ नेत्राभ्यांकुसुमेकृष्णगृहीतेद्वेमयाभुवः ॥ पश्यामित्वांतथैवात्रविस्मयःपरमोहिमे ॥ २७ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ पदानिममगायंतीनृत्यस्वत्वंवरानने ॥ नगंतव्यंत्व याक्वापिस्थातव्यंमद्गृहेसदा ॥ २८ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःप्रविष्टोभगवान्धर्मराजस्यमंदिरे ॥ ददर्शधृतराष्ट्रेणवि दुरेणमहात्मना ॥ २९ ॥ कृपेणसहितंवीरंकुंतीपुत्रंयुधिष्ठिरं ॥ नमस्कृत्याथतान्सर्वानुपविष्टोवरासने ॥ ३० ॥ आलिंग्यपांडवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वीरंमाद्रीपुत्रौतथापरान् ॥ नमस्कृतश्चपार्थैनसर्वैस्तैर्जगतःपतिः ॥ ३१ ॥ धर्मराजेनचाघ्रातोमूर्ध्निसंतोषितोबहु ॥ कुंतींहृष्टांच
संवीक्ष्यद्रौपदींसात्वतीमपि ॥ युधिष्ठिरोपिसंहृष्टःकृष्णंवचनमब्रवीत् ॥ ३२ ॥ ॥ धर्मराजउवाच ॥ ॥ कुशलंदेवकीपुत्रवसु
देवमुखाजनाः ॥ त्वंतुभीमेनचानीतोयज्ञेऽस्मिन्मामकेशुभे॥३३॥देवकीचयशोदाचरोहिणीचैवकेशव॥मातरस्तेनसंप्राप्तानरा
नार्यश्चमारिष ॥ ३४ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ वसुदेवश्चरामेणसहितःस्थापितःपुरे ॥ अन्येसर्वेचसंप्राप्तानरानार्यश्च
मारिष ॥ ३५ ॥ भीमेनसहिताःसर्वेसंतिगंगातटेशुभे ॥ अहमग्रेचसंप्राप्तस्तवदर्शनलालसः ॥३६॥ ॥ धर्मराजउवाच॥ ॥प
श्यपार्थयथाकृष्णोब्रूतेप्राप्ताहियादवाः॥नाथेनानेनहिवयंनूनंधन्यतराःक्षितौ॥३७॥ निर्गच्छामोऽद्यवैतत्रयत्रतेसुहृदःस्थिताः
कुंतीचसौबलेयीचद्रौपदीसहिताऽधुना ॥ ३८ ॥ देवकींसम्मुखंयांतुसत्कर्तुंस्वजनंचतं ॥ महाजनाश्चसर्वेवैनिर्गच्छंतुममाज्ञ
या ॥ ३९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंसंदिश्यधर्मात्मासहकृष्णेननिर्ययौ ॥ यौवनाश्वेनवीरेणसबलेनपुराद्बहिः ॥ ४० ॥
वादित्राणितुसर्वाणिजघ्नुस्तस्मिन्समागमे ॥ द्रौपदीकेशवेनाथस्वयंसामंडिताययौ ॥ ४१ ॥ तुरंगंपुरतःकृत्वासमेतंभूरिचाम
रैः ॥ गायंतिगायकास्तत्रनृत्यंतिकुशलानटाः ॥ ४२ ॥ बंदिनःप्रतिगर्जंतिस्तुवंतःसूतमागधाः ॥ तस्मिन्बलेप्रचलितेशंखदुं
दुभिनादिते ॥ ४३ ॥ चक्रुर्नानाविधाश्चेष्टाःसर्वेलोकाश्चहर्षिताः ॥ प्रभावतीद्रष्टुकामादेवकींरुक्मिणीमपि ॥ ४४ ॥ मणिर
त्नान्युपादायबंधुभिःसहिताययौ ॥ अपरंचायुतंस्त्रीणांनानालंकारभूषितं ॥४५॥ एतैःपरिवृतोराजासकृष्णःप्राप्तवान्स्वयं ॥
ततस्तेयादवाःसर्वेसेनांव्यूह्यव्यवस्थिताः ॥४६॥ देवकीप्रमुखानांहिशिबिकाःसमलंकृताः॥सुवर्णमणिसन्नद्धाश्चित्रकौशेयसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृताः ॥४७॥ एकातुशिबिकायत्रतत्रनारीशतंनृप ॥ चामरव्यजनेगृह्यहयारुढंप्रसर्पति ॥४८॥ ततोयुधिष्ठिरःप्रीतोविलोक्य जननींहरेः॥ नमस्कृत्यस्थितश्चाग्रेभृत्यरज्जनमेजय ॥ ४९ ॥ भीमोयुधिष्ठिरंवीक्ष्यगजाद्भूमौस्थितंगुरुं ॥ स्ववाहनात्समु त्तीर्यपपातनृपपादयोः ॥ ५० ॥ प्रद्युम्नप्रमुखैर्वीरैर्धर्मराजोनमस्कृतः॥ अर्जुनाद्यैःपांडवैश्चदेवकीसानमस्कृता ॥ ५१ ॥ गृही त्वावरवासांसियशोदादेवकीतथा ॥ सौबलेयींपृथांतत्रनमस्कृत्यकरेददौ ॥ ५२ ॥ प्रभावत्यान्वितादेवीपार्षतीकृष्णमातरम् ॥ नमस्कृत्याखिलंतस्यैवस्तुजातंददौनृप ॥ ५३ ॥ स्त्रियःकृष्णस्ययाःसर्वारुक्मिणीप्रमुखाःशुभाः॥ तस्थुःकुंतींपुरस्कृत्यप्र णिपत्यददुर्धनं ॥ ५४ ॥ रुक्मिणीप्रमुखास्तत्रद्रौपदींद्रष्टुमागताः॥ चंदनंरत्नजातानिवासांसिविविधानिच ॥ ५५॥ प्रणम्य भामाप्रददौतथासर्वाश्चयोषितः॥ प्रददुश्चाब्रवीत्सत्याद्रौपदींस्मितपूर्वकम् ॥ ५६ ॥ ॥ सत्यभामोवाच ॥ ॥ कथंत्वयाकृताः पंचवश्याभूमौनिरंतरम् ॥ एकोनशक्यतेऽस्माभिर्वशीकर्तुंजगत्पतिः ॥ ५७ ॥ तमेवहित्वयामन्येगृहीतंद्रुपदात्मजे ॥ भगिनी भवतीतस्यहृदयंतेकथंहरिः ॥ ५८ ॥ नमुंचतिक्षणमपितंविनात्वंनजीवसि ॥ अंतःस्थानेसंवृतानांपंचानामपिसन्निधौ ॥ ॥ ५९ ॥ कथंगृह्णासिगोविंदंतमुपायंहिमेवद ॥ ईदृशंकर्मकुर्वाणालज्जसेनमहाजनात् ॥ ६० ॥ भयंनकुरुषेऽस्मत्तोमान्यसेध र्मकर्तृभिः ॥ ॥ द्रौपद्युवाच ॥ ॥ त्वदीयंमानसंसत्येसपत्नीमधिगच्छति ॥ ६१ ॥ त्यक्त्वाकृष्णंत्रिलोकेशंज्यायसःकर्मणःफ लम् ॥ त्वयाऽपमानितःकृष्णःसमागत्यसमाश्रये ॥ ६२ ॥ दर्शयत्येवसकलमात्मनोहृदिसंभवम् ॥ लज्जामदीयाजगतिकृष्णे नैकेनरक्षिता ॥ ६३ ॥ दुर्योधनसभामध्येवस्त्रंदत्त्वाऽक्षयंमम ॥ त्वयानशक्यतेदातुंचैलंकार्पासकादिकम् ॥ ६४ ॥ ममभ्रात्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वांप्रतार्यदत्तानिवसनानिमे ॥ बहूनांपश्यतांदेविधर्मज्ञःसतथाविधः ॥ ६५ ॥ नारदायत्वयादत्तोमाधवःपतिरात्मनः ॥
पारिजातस्तुदेवानांमंडनंयत्पुराहृतं ॥ ६६ ॥ देवद्विजगुरूणांहिवित्तंनैवात्रपंडिताः ॥ प्रतिगृह्णंतिसुभगेत्वंगृहीत्वानलज्जसे ॥
॥ ६७ ॥ नारदंचैवगर्हामिप्रतिगृह्यजनार्दनं ॥ प्रदत्तवान्कथंमंदस्तवहस्तेजगत्पतिः ॥ ६८ ॥ कृष्णादप्यधिकंत्वत्तःकिंलभ्यंते
नधीमता ॥ ब्राह्मणानांमतिर्यस्मात्पश्चादुत्पद्यतेऽनघे ॥ ६९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधंब्रुवाणांतांद्रौपदींबाणनंदिनी[1] ॥
नमस्कृत्यपृथांप्राप्तानमस्कर्तुंविशांपते ॥ ७० ॥ प्रणिपत्यार्पयामासवासांसिमणिकांचनम् ॥ उपविष्टावीणकेतुसखीभिःप
रिवारिता ॥ ७१ ॥ ततोऽब्रवीत्सत्यभामातुरंगंवीक्षयामहे ॥ देवकीसहिताःसर्वाःकौतुकंममविद्यते ॥ ७२ ॥ तच्छ्रुत्वाभाषितंत
स्याःकृष्णोराजानमब्रवीत् ॥ ॥ श्रीकृष्णउवाच ॥ ॥ तुरंगंद्रष्टुकामापिदेवकीवर्त्ततेनृप ॥ ७३ ॥ ॥ युधिष्ठिरउवाच ॥
सर्वेतिष्ठंतुवैवीरारथस्थागजमस्तके ॥ सादिनश्चभवंत्वत्रपत्तयःशस्त्रपाणयः ॥ ७४ ॥ यथानारीगणश्चायंहयंपश्यतिहर्षितः
धौम्यःपूजांकारयतुहृष्यंतुपरमाःस्त्रियः ॥ ७५ ॥ ॥ जैमिनिरुवाच ॥ ॥ सर्वाभिःपूजितश्चाश्वोवीराःसर्वेबलेस्थिताः ॥ आ
रूढायोषितस्तत्रगवाक्षंवीणकस्यतु ॥ ७६ ॥ पश्यंतितुरगंतत्रनृत्यमानंमहीतले ॥ तस्मिंश्चसमयेराजाप्राप्तवाननुशाल्वकः ॥
॥ ७७ ॥ महतापरिवारेणश्रीमताजनमेजय ॥ शाल्वस्यसंस्मरन्वैरंवीक्षमाणोजनार्दनम् ॥ ७८ ॥ धर्मराजपुरेदृष्ट्वाहर्षितोऽ
भूत्सभारत ॥ नृत्यंतंहयमालोक्यजग्राहप्रहसन्निव ॥ ७९ ॥ पृष्ठेसंस्थापयित्वातुगृध्रव्यूहमथाकरोत् ॥ सुरथंसचिवंतत्रसमा ॥२९॥
हूयेदमब्रवीत् ॥ ८० ॥ ॥ अनुशाल्वउवाच ॥ ॥ भ्रातामेसौभं[2]मारूढःकृष्णेननिहतोजले ॥ शाल्वोनाममहाबाहुःसदे

१ बाणानंदिनी बाणकन्या उषा । २ सौभम् एतन्नामकविमानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वोत्रविलोक्यते ॥ ८१ ॥ सपुत्रपौत्रोयज्ञार्थंसदारःपांडवंप्रति ॥ निमंत्रितोहिसंप्राप्तोमाऽद्यगच्छतुकेशवः ॥ ८२ ॥ गृध्रंविलो
क्यगरुडःस्थिरःस्थास्यतिसंगरे ॥ इमांमदीयांसेनांहितथापालयमारिष ॥ ८३ ॥ यथागृह्णामिगोविंदंपार्थंचरथिनांवरम् ॥
भीमादयश्चयेवीराःप्रद्युम्नसहिताअमी ॥ ८४ ॥ पालयंतिबलंसर्वंधर्मराजस्यपश्यतः ॥ तस्मान्मदीयैःसंग्रामेसर्वैरपिनकेश
वः ॥ ८५ ॥ मोचनीयःप्रयत्नेनधारणीयःसबंधुहा ॥ यस्यहस्ताद्रणेकृष्णोगमिष्यतिविलोकितः ॥ ८६ ॥ तंदुष्टंघातयिष्येऽहं
यःकृष्णधरणेऽक्षमः ॥ भ्राताववाऽस्तुसुतोवाऽस्तुसुहृन्मित्रंचवासखा ॥८७॥ वासुदेवविहीनोयोनमेभ्रातासुहृत्सखा ॥ किंगजै
किंरथैश्चैवपत्तिभिःकिंहयैरपि ॥ ८८ ॥ येचपश्यंतिसंग्रामेनगृह्णंतिजनार्दनम् ॥ कृत्वातुकुत्सितंकर्मराजवित्तापहारकम् ॥ त
त्सर्वंक्षमितंमेऽद्ययदितैर्ध्रियतेहरिः ॥ ८९ ॥ सर्वेतिष्ठंतियदिमेभृत्याहिनिखिलाःक्षमाः ॥ नापराधोध्रुवंतेषांयेकृष्णंसंमुखार
णे ॥ ९० ॥ योधयंत्यरिभिःसार्धंतेषांदास्याम्यहंवसु ॥ नापराधोध्रुवःकार्योमदीयैराजशासनात् ॥ ९१ ॥ भृत्यैस्तैःकृष्णविमु
खैर्यथाभवतिमेप्रियं ॥ कुलीनाधर्मकुशलावीरायुद्धपरायणाः ॥ ९२॥ दत्त्वाऽत्मनस्तुसर्वस्वंस्थाप्यायुद्धेमहीभुजा ॥ तेजयंति
रणेशत्रून्राज्ञामिहयशस्विनः ॥ ९३ ॥ नास्माकंकेशवादन्योविद्यतेसुखनाशनः ॥ तस्मादेकंहिबहवोधारयंतुरमापतिं॥९४॥
नदोषश्चात्रभविताधर्मएषसनातनः॥दाताऽयंयाचितानैवविमुखःसंमुखःसदा॥९५॥शस्त्रपाणिरयंनित्यंसरथोऽपिविहंगमः॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽयंनिरंतरम् ॥ ९६ ॥ कथमेकेनसंग्रामेसंधर्तुंशक्यतेहरिः ॥ कृष्णस्यग्रहणंवेत्तिह्युत्तानचंर
णात्मजः ॥ ९७॥ सदूरेविद्यतेबालःपातालेबलिरेवच ॥ किंचिद्बिभीषणोवेत्तिप्रल्हादःसम्यगेवहि ॥ ९८ ॥ ग्रहीतारंनारदंतु

१ उत्तानपदपुत्रोध्रुवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंदत्यन्येमृषावचः ॥ सत्यभामाऽर्पितंकृष्णंपरिजानेकरांगतम् ॥ ९९ ॥ संधर्तुमसमर्थोऽसौनारदोदत्तवान्यतः ॥ नान्यंतस्मा
दद्यपश्येसमर्थंहरिधारणे ॥ १०० ॥ स्वपौरुषेणगोविंदंधारयिष्येससैनिकम् ॥ ॥ जैमिनिरुवाच ॥ ॥ एता
वदुक्त्वावचनंसराजासंस्थितोरणे ॥ १ ॥ गृध्रव्यूहेमहावीर्यःश्वेतच्छत्रोरराजह ॥ बबृंहिरेगजामत्ताहयाःपुष्टाजिहेषिरे ॥
॥ २ ॥ रथाश्चक्रैःप्रणेदुश्चपदाताश्चडिंडिंबिरे ॥ दृश्यंतेतस्यतेवीरानानालंकारमंडिताः ॥ ३ ॥ दिव्यांबरधराःसर्वेसंवर्त्तेभा
स्कराइव ॥ क्वपार्थःक्वचगोविंदइतिजल्पंतिचेर्ष्यया ॥ रक्षंतस्तुरगंसर्वेपश्यंतःकृष्णवर्त्मच ॥ १०४ ॥ इत्याश्वमेधिकेपर्व
णिजैमिनीयेअनुशाल्वागमनंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ नीतेहयेकिमभवत्कथंकृष्णेनमोचितः ॥ युद्धार्थंप्रेषिताःकेऽत्रतन्मेब्रूहितपोधन ॥ १ ॥ ॥ जैमिनि
रुवाच ॥ ॥ शृणुराजेंद्रवक्ष्यामितदाकृष्णेनयत्कृतम् ॥ पांडवानांहयंनीतंविलोक्यहृदिलज्जितः ॥ २ ॥ आरूढःस्वेरथेदिव्ये
दारुकेणनियंत्रिते ॥ पांचजन्यंपूरयित्वाधर्मराजमथाब्रवीत् ॥ ३ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ अनुशाल्वेनवीरेणतुरगस्ते
ऽधुनाहृतः ॥ पश्यतांयदुवीराणांपांडवानांतथाऽग्रतः ॥ ४ ॥ स्त्रियश्चैवात्रपश्यंतिजातामेमहतीत्रपा ॥ भवान्रथस्थःसंग्रामे
पश्यत्वत्रकुतूहलम् ॥ ५ ॥ सात्यकिःकृतवर्माचप्रद्युम्नतनयस्तथा ॥ यौवनाश्वोमेघवर्णोमाद्रीपुत्रौतथैवच ॥ ६ ॥ एतेचान्येचब
हवस्तवरक्षंतुमंडलम् ॥ अहंवृकोदरःपार्थोप्रद्युम्नःसुजयस्तथा ॥ ७ ॥ वृषकेतुरयंबालःसांबोनिःशठएवच ॥ एतेपरेचतुरगं
मोचयामोमहाबलाः ॥ ८ ॥ कश्चित्करास्थितंवीरोगृह्णातुममवीटकम् ॥ ॥ जैमिनिरुवाच ॥ ॥ पुनरेवाब्रवीद्वीरःशृण्वंतुबलि ॥३०॥

१ पारिजातकरागतः इत्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोनराः ॥ ९ ॥ समानयतिपश्चाश्वंसहिगृह्णातुवीटकम् ॥ तेसर्वेकृष्णवचनंश्रुत्वावीरास्तुदारुणम् ॥ १० ॥ तस्थुर्विगतसंकल्पा
श्चिंतयंतःपुनःपुनः ॥ मुहूर्त्तमात्रंकृष्णस्यस्थितःपाणौसवीटकः ॥ ११ ॥ ततःकृष्णसुतःश्रीमान्प्रद्युम्नोहस्तसंस्थितम् ॥ जग्रा
हवीटकंतंतुवचनंचेदमब्रवीत् ॥ १२ ॥ ॥ प्रद्युम्नउवाच ॥ ॥ आनयिष्यामितुरगंशाल्वसैन्यगतंत्वहं ॥ इत्युक्त्वाप्रययौका
र्ष्णिःसन्नद्धःस्वरथेनतम् ॥ १३ ॥ अनुशाल्वंतृणीकृत्यतस्मिन्वीरसमागमे ॥ पारावतनिभैरश्वैर्मणिकांचनभूषितैः ॥ १४ ॥
उह्यमानंरथंदिव्यंमीनकेतोःसुतस्यतम् ॥ निरीक्ष्यभगवानेवंपुनरेवाब्रवीद्वचः ॥ १५ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ द्वितीयश्चा
त्रगृह्णातुमत्कराद्वीटकंनरः ॥ प्रद्युम्नसहितोयातुपौरुषंयस्यविद्यते ॥ १६ ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वावासुदेवस्यव
चनंवीक्ष्यवीटकम् ॥ वृषकेतुरुवाचेदंतच्छृणुष्वविशांपते ॥ १७ ॥ ॥ वृषकेतुरुवाच ॥ अहमेनंसहायार्थंप्रद्युम्नंयामिसंयुगे ॥
अनुशाल्वंमहावीरंगृहीत्वाकृष्णसन्निधौ ॥ १८ ॥ नानयेयदिगोविंदप्रतिज्ञांशृणुमेप्रभो ॥ ब्राह्मणीगमनाच्छूद्रोलभतेदारु
णांगतिं ॥ १९ ॥ प्राप्नुयांतामहंनूनंमहानरकदायिनीं ॥ श्राद्धभुग्ब्राह्मणोमंदोमैथुनंकुरुतेयदि ॥ २० ॥ सयांगतिंयातिदेव
प्राप्नुयांतामहंध्रुवम् ॥ ऋतुकालेतथाभार्यांपरित्यजतिमंदधीः ॥ २१ ॥ तस्यापिगतिमार्गेतंसोऽहंगच्छेन्नचानये ॥ त्यक्त्वावि
ष्णुंवासुदेवंयोभजेदन्यदैवतम् ॥ २२ ॥ तस्यापियागतिःस्वामिन्सामेस्याद्दुःखदायिनी ॥ दीयतांवीटकंमह्यंनानृतंममभाषितं
॥ २३ ॥ ॥ जैमिनिरुवाच ॥ ॥ तांबूलंकर्णपुत्रायमुदितःप्रददौतदा ॥ प्रययौतंनमस्कृत्यवृषकेतुरुदारधीः ॥ २४ ॥ स
हैवकार्ष्णिनायुद्धेदर्शयन्पौरुषंतदा ॥ प्रविश्यसैन्यंतद्घोरमनुशाल्वेनपालितम् ॥ २५ ॥ शंखंचपूरयामासनामविश्राव्यचात्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 न: ॥ ततोरणेकृष्णसुतंवृषकेतुसमन्वितम् ॥ २६ ॥ तिष्ठतिष्ठेतिभाषंतमिदंवचनमब्रवीत् ॥ पातयंतंनिजंसैन्यंवीक्ष्यतस्मि
न्महाहवे ॥ २७॥ ॥ अनुशाल्वउवाच ॥ ॥ कथंभवान्संगरेऽस्मिंस्त्यक्त्वारम्यांपुरींनिजाम् ॥ प्राप्तोममसमीपेद्यम
त्वाशत्रुंहिमांपुनः ॥ २८ ॥ त्वमनंगःपुष्पबाणस्त्रिनेत्रनयनार्चिषा ॥ कृष्णन्हदेप्रविष्टोऽसिदग्धःपूर्वमयाश्रुतम् ॥ २९ ॥ तपस्वि
नोयत्रसंतियत्रचैवपतिव्रताः ॥ विवेकरहितालोकाःपौरुषंतत्रतावकम् ॥ ३० ॥ ॥ जैमिनिरुवाच ॥ ॥ तच्छ्रुत्वावचनंत
स्यप्रद्युम्नःपंचभिःशरैः ॥ ताडयामाससहसारणेशाल्वानुजंबली ॥ ३१ ॥ अनुशाल्वोऽपितान्बाणान्मध्येचिच्छेदवेगतः ॥
बाणेनैकेनहृदयंबिभेदास्यत्वरन्निव ॥ ३२ ॥ सभिन्नहृदयःकार्ष्णिःकश्मलंचाविशन्महत् ॥ भ्राम्यमाणःशरेणाजौपतितःकृष्ण
सन्निधौ ॥ ३३ ॥ मूर्च्छितंवीक्ष्यकृष्णोऽपिप्रद्युम्नंलज्जितोहृदि ॥ समुत्तीर्यरथाद्भूमौगृहीत्वानंदनंकरे ॥ ३४ ॥ ताडयित्वापदापुत्र
मिदंवचनमब्रवीत् ॥ क्रोधेनमहतायुक्तोभर्त्सयामासभारत ॥ ३५ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ उत्तिष्ठोत्तिष्ठरेमूढनेयंद्वारव
तीपुरी ॥ यत्रत्वयाक्रीड्यतेहिस्थानमेतत्सुदारुणम् ॥ ३६ ॥ मयैतच्चिंतितंनित्यंप्रद्युम्नस्यप्रभावतः ॥ नभयंनत्रपाक्वापिभविष्य
तिरणेमम ॥ ३७ ॥ लज्जामयात्रसंप्राप्ताप्राप्तंचापिमहद्भयम् ॥ त्वयापुत्रेणदुष्टेनवीराणामत्रपश्यताम् ॥ ३८ ॥ किमर्थंरक्षि
तश्चासिबालत्वेशंबरेणहि ॥ त्वंदुरात्मन्पुरानीतोगृहान्ममनिशागमे ॥ ३९ ॥ वनंयाहिपुरींत्यक्त्वामुनिर्भूत्वाफलान्यद ॥ जनम
ध्येनवैवासस्तवयोग्योभविष्यति ॥ ४० ॥ निजंशत्रुंहिमुनयस्त्वांनिरीक्ष्यसमागतम् ॥ कुशाग्रबुद्धयःसर्वेकरिष्यंतिचभस्म
सात् ॥ ४१ ॥ भवान्बाणपुरेयातुतत्रत्यायेमहाजनाः ॥ भग्नंसंबंधिनंमत्वापालयिष्यंतिनापरे ॥ ४२ ॥ शिवपूजापरालोकास्त्वां

१ शांकरनेत्रज्वालया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्रुंशंकरस्यहि ॥ ज्ञात्वातेस्वामिनोवैरंघातयिष्यंतिमेमतिः ॥ ४३ ॥ गर्भेनगलितश्चासिरुक्मिण्याजातएवकिम् ॥ अत्रप्र
तिज्ञायामूढनकृताजीवसेकथम् ॥४४॥ करान्ममनगृह्णंतियत्रवीरामहाबलाः ॥ पत्राणितत्रप्रथमंकथंगृह्णासितानिहि ॥४५॥
॥ जैमिनिरुवाच ॥ ॥ एवंवदंतंवसुदेवनंदनंजग्राहभीमोमतिमान्महाबलः ॥ सुकोपितंकोपहराणितानिवैजगादभीमोवच
नानिमारिष ॥ ४६ ॥ ॥ भीमउवाच॥ ॥ मैवंवदहृषीकेशप्रद्युम्नंमानिनंप्रति ॥ नायंभग्नोभयाच्छत्रोर्बाणघातात्समाग
तः ॥ ४७ ॥ पदासंताडितोबालःक्रोधेनमहतात्वया ॥ पौरुषंहृदयेमत्वामिथ्यादत्तंनिजंपदम् ॥ ४८ ॥ जरासंधभयात्कृष्णत्व
यात्यक्तंनिजंपुरम् ॥ सागरस्यैवतीरेहिपुरीद्वारवतीकृता ॥ ४९ ॥ परदुःखंनजानासिसर्वेषांसुखदोभवान् ॥ कस्मात्पलायसे
कृष्णकस्त्वदन्योऽधिकःपुमान् ॥ ५० ॥ तच्छ्रुत्वाभीमसेनस्यवचनंकेशवोब्रवीत् ॥ ॥ श्रीकृष्णउवाच ॥ ॥ भीमगच्छरणे
योद्धुमनुशाल्वंमहाबलम् ॥ मयाऽस्यक्षामितंपश्यकर्णपुत्रस्यपौरुषम् ॥ ५१ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोभीमोरणश्ला
घीप्रद्युम्नसहितोययौ ॥ पातयामासतत्सैन्यंगदयाक्रोधमूर्छितः ॥ ५२ ॥ पदातिरेवराजेंद्रविष्णुवाक्यैःप्रणोदितः ॥ गजा
भिन्नाद्विधायुद्धेरथाश्चविदलीकृताः ॥ ५३ ॥ हयाहताश्चूर्णितांगानरारोषेणमर्दिताः ॥ गजंजग्राहहस्तेनचिक्षेपगगनेपुनः ॥
॥ ५४ ॥ रथास्तुतुरगैःसार्धंवीराःसारथिभिःसह ॥ गृहीत्वाभीमसेनेनजीवग्राहंविपोथिताः ॥ ५५ ॥ गजंरथंहयंभीमोगृहीत्वा
लीलयाकरे ॥ भूमौचिक्षेपरुषितोनिष्पिपेषपदापरान् ॥ ५६ ॥ विशीर्णगात्राबहवोमुखाच्छोणितमुद्वमन् ॥ बाहवःपतितारे
जुःपंचास्याइवपन्नगाः ॥ ५७ ॥ भीमपादप्रहारेणभिद्यतांशिरसांरवः॥ भिन्नानामिवभांडानांधरणीचलनेनहि ॥ ५८ ॥ श्रूय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेयाहशोराजंस्तस्मिन्वीरमहाक्षये॥ध्वजाःकणकणायंतेवातेनाभ्युत्थितेनहि ॥५९॥ गजानांरथिनांयुद्धेसादिनांपत्तिनांतथा॥
मांसमेकत्रभीमोसौपद्भ्यांसंघट्टयन्ययौ ॥६०॥ तावन्निरीक्षितस्तेनकर्णपुत्रेणपांडवः॥ अब्रवीद्भीमसेनंतंतोषयन्निवभारत ॥
॥६१॥ ॥वृषकेतुरुवाच॥ ॥भीमसेनमहाबुद्धेबालकेनफलंयदि ॥ अनेनसंगृहीतंहिसंग्रामाख्यंपरंतप ॥६२॥
त्वदन्यःकःपितालौल्यात्स्वयंगृह्णातिबालकात् ॥ अनेनसंगृहीतेननतेतृप्तिर्भविष्यति ॥६३॥ ईदृशानांसहस्राणियदिप्राप्ता
निमारिष॥ तवाग्रेऽल्पानिमन्येऽहंकिमेकंसंमुखेस्थितम् ॥६४॥ अपकीर्त्तिश्चतेतातभविष्यतिधरातले॥ पुत्रहस्तात्फलंचै
कंगृहीतंपांडवेनहि ॥६५॥ वदिष्यंतिजनाश्चैतत्तस्मात्त्याज्यंत्वयाऽधुना ॥ अल्पामिषंभीमसेननगृह्णातिचकेसरी ॥६६॥
क्षुधातुरोगजंहंतिनैवसर्पमुखेस्थितम्॥ महतांपौरुषंलोकेहितंभवतिदेहिनाम्॥६७॥ ॥जैमिनिरुवाच॥ ॥ततोभी
मोऽब्रवीद्वीरंवृषकेतुंमहाबलम्॥ फलंनिष्पीड्यबालस्यपित्राहस्तेप्रदीयते॥ स्वयमेवरणेवीरयदिगृह्णातितत्फलम् ॥६८॥
गृह्णातुयाम्यहंवीरमनुशाल्वंनराधिपम्॥ एतावदुक्त्वावचनमनुशाल्वंसमाययौ ॥६९॥ अनुशाल्वस्तमायांतंबाणेनैकेनवक्ष
सि॥ताडयामासवेगेनमूर्छितोनिपपातसः॥७०॥ मूर्छितंभीममालोक्यकृष्णःकोपसमन्वितः॥स्वयंयोद्धुंययौराजंस्तदद्भुतमि
वाभवत्॥७१॥ दारुकेणरथोनीतःकृष्णस्यगरुडध्वजः॥ अनुशाल्वस्ततोवीक्ष्यगोविंदंगरुडध्वजम् ॥७२॥ प्रत्युवाचम
हाबाहुस्तिष्ठतिष्ठजनार्दन॥त्वयाममहतोबंधुःसौभंमध्येचपातितम्॥७३॥एतस्मिन्समयेपार्श्वेस्थितोऽहंनंदनंदन॥पश्यतस्त्
वगोविंदपुत्रकःपातितोमया ॥७४॥ द्वितीयःपांडवोभीमश्चित्रमेतत्प्रदर्शितम् ॥ अहंनसंमुखस्त्वांहियस्मान्मेपातितान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राः ॥ ७५ ॥ पूर्वजाः कृष्णजानामित्वदीयौपातिताविमौ ॥ ब्रूतेमहाजनः सर्वः पतंनंनकथंचन ॥ ७६ ॥ जायतेसंमुखानाहिकृष्ण
स्यपुरतःसकृत् ॥ अहंयुवारणगतःपुराणपुरुषोभवान् ॥ ७७॥ कथंस्थास्यसियुद्धेऽस्मिन्समत्वंनैवदृश्यते ॥ मद्बाणैःपंचभि
र्भिन्नःक्वगमिष्यसिकेशव ॥ ७८ ॥ पलायितस्यदेवस्यस्थानंवेद्मिसतांमनः ॥ तदेवतावकंदुर्गमन्यैर्जेतुंनशक्यते ॥ ७९ ॥ लो
भयंत्रादिभिर्घोरैःप्रपंचादिपदातिभिः ॥ स्वसंगत्यादर्शयंतिलीनंत्वांहृदयेऽखिलम् ॥ ८० ॥ तएवनित्यंगोविंदतवगुप्तप्रका
शकाः ॥ नतेषांसंगतिंभूमौकुर्वंत्यत्रविमोहिताः ॥ सन्मंत्रवर्जितानूनंराजानस्तेनसंशयः ॥ ८१ ॥ ॥ जैमिनिरुवाच ॥ ॥
एतावदुक्त्वावचनंविव्याधतुरगाञ्शरैः ॥ चतुर्भिस्तेहयाराजंस्त्रस्ताभिन्नकलेवराः ॥ ८२ ॥ सदूरमगमद्युद्धात्तस्मिन्कालेवि
शांपते ॥ नदृष्टःकेशवस्तेनपुनःप्राहानुशाल्वकः ॥ ८३ ॥ ॥ अनुशाल्वउवाच ॥ ॥ कस्माद्विलोकितःकृष्णोगतश्चादृश्य
तांरणे ॥ दुष्कृतंस्वंनपश्यामिनेतरेषामिहाधुना ॥ ८४ ॥ किंवामदीयेराष्ट्रेहिशूद्रोवाब्राह्मणींगतः ॥ उतपित्राऽपिकन्यायाध
नंस्वीकृत्यमंडले ॥ ८५ ॥ मामकेकेनदुष्टेनदत्ताकन्याधनेनच ॥ अथवारजसायुक्तादुहितानिजमंदिरे ॥ ८६ ॥ विनाविवाहं
विधृताजनकेनाल्पमेधसा ॥ किंवाकोशेमदीयेऽत्रपुत्रहीनस्यपातितम् ॥ ८७ ॥ धनंमृतस्यदुर्वृत्तैर्मद्भृत्यैःपापकारिभिः ॥ अथ
वाब्राह्मणानांस्वंस्वीकृतंकुत्सितैर्जनैः ॥ ८८ ॥ रजस्वलांप्रियांमूढादिवाकिंसंगतिंगताः ॥ सुस्नाताकैश्चसंत्यक्तानिशामध्येतु
कामिनी ॥ ८९ ॥ भ्रूणहत्याभवत्येवसकामानांधरातले ॥ षष्ठेनांशेनवैतेषामहंपापेनकेशवम् ॥ ९० ॥ दृष्टमत्रनपश्यामिकंप्र
च्छामिरणेहरिं ॥ मामकंसुकृतंकिंचिद्विद्यतेयदितत्त्वतः ॥ ९१ ॥ तत्तस्मैसंप्रयच्छामियोमेदर्शयतेहरिं ॥ किंपश्चात्तेनपुण्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कार्यंयेनक्षितौहरिः ॥ ९२ ॥ नदृश्यतेजगन्नाथःसर्वपापापनुत्तये ॥ ॥ जैमिनिरुवाच ॥ ॥ हंसतीर्थोदकंपीत्वासर्वपापक्ष
 योभवेत् ॥ ९३ ॥ पूतोयथानरोराजन्हरिंवीक्ष्यतथाभवेत् ॥ एवंवदतिवीरेतुपुनःप्राप्तःस्वयंहरिः ॥ ९४ ॥ अनुशाल्वंत्रिभि
र्बाणैर्जघानसमरेहसन् ॥ बाणेनैकेनानुशाल्वस्तान्शरान्माधवस्यतु ॥ ९५ ॥ मध्येचिच्छेदतरसावचनंचेदमब्रवीत् ॥ ॥ अ
नुशाल्वउवाच ॥ ॥ पश्यमाधवमद्वीर्यंत्रिभिर्विरहितोभवान् ॥ ९६ ॥ मयाकृतोहिसंग्रामेह्याशुगेनाशुपातिना ॥ मदीयमा
शुगंचैकंनभवान्पातितुंक्षमः ॥ ९७ ॥ सहस्वत्वंशरंचैकंस्थिरोभूत्वामहाहवे ॥ ततोमुमोचनाराचंवासुदेवस्यवक्षसि ॥ ९८ ॥ ते
नचास्यप्रहारेणसंतुष्टइवमूर्छितः ॥ दारुकोवीक्ष्यगोविंदंसंतुष्टंतस्यतेजसा ॥ ९९ ॥ रथंरणादपोवाहयत्रराजायुधिष्ठिरः ॥
हाहाकारोमहानासीत्कृष्णंवीक्ष्यतथाविधम् ॥ १०० ॥ पलायितंबलंसर्वंपांडवानांचपश्यताम् ॥ हतान्पुत्रान्पितॄन्बंधून्सुहृत्सं
बंधिबांधवान् ॥ १ ॥ उत्सृज्योत्सृज्यगच्छंतिवदंत्येकेपरस्परम् ॥ पुत्रमांनयसंग्रामात्पिताहंपतितस्तव ॥ २ ॥ पुत्रःप्रोवाच
पितरंपलायित्वाजवात्स्थितः ॥ तवश्राद्धंगयाशीर्षेकरिष्यामीतिनिर्गतः ॥ ३ ॥ तावदन्योजनःप्राप्तोभयाद्दैत्यानुशाल्वकात् ॥
ततःसदारुकोधीमान्माधवंवीणकेऽनयत् ॥ ४ ॥ तंप्राप्तंमूर्छितंदृष्ट्वाहाहाकुलाप्रधाविताः ॥ कृष्णस्यनार्यःसकलारुक्मिणीप्रमु
खाःकिल ॥ ५ ॥ सत्यभामाहरिंवीक्ष्यप्रबुद्धंवाक्यमब्रवीत् ॥ ॥ सत्यभामोवाच ॥ ॥ समागतंरणात्पुत्रंप्रद्युम्नंरणकोवि
दम् ॥ ६ ॥ उक्तवानसिरूक्षाणिबहुदुःखकराणिच ॥ भवान्प्राप्तःकथंयुद्धादनुशाल्वभयार्दितः ॥ ७ ॥ पलायंतेजनाःसर्वेमृत्यो
र्भीताजगत्पते ॥ स्वयंगच्छामिकिंनाथचंडीभूत्वामहाहवे ॥ ८ ॥ हंतुंतमनुशाल्वंहियस्माद्भीतःसमागतः ॥ नत्वांछिंदंतिशस्त्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कार्यं येन क्षितौ हरिः ॥ ९२ ॥ नदृश्यतेजगन्नाथःसर्वपापापनुत्तये ॥ ॥ जैमिनिरुवाच ॥ ॥ हंसतीर्थोदकंपीत्वासर्वपापक्ष
 योभवेत् ॥ ९३ ॥ पूतोयथानरोराजन्हरिंवीक्ष्यतथाभवेत् ॥ एवंवदतिवीरेतुपुनःप्राप्तःस्वयंहरिः ॥ ९४ ॥ अनुशाल्वंत्रिभि
र्बाणैर्जघानसमरेहसन् ॥ बाणेनैकेनानुशाल्वस्तान्शरान्माधवस्यतु ॥ ९५ ॥ मध्येचिच्छेदतरसावचनंचेदमब्रवीत् ॥ ॥ अ
नुशाल्वउवाच ॥ ॥ पश्यमाधवमद्वीर्यंत्रिभिर्विरहितोभवान् ॥ ९६ ॥ मयाकृतोहिसंग्रामेह्याशुगेनाशुपातिना ॥ मदीयमा
शुगंचैकंनभवान्पातितुंक्षमः ॥ ९७ ॥ सहस्वत्वंशरंचैकंस्थिरोभूत्वामहाहवे ॥ ततोमुमोचनाराचंवासुदेवस्यवक्षसि ॥ ९८ ॥ ते
नचास्यप्रहारेणसंतुष्टइवमूर्छितः ॥ दारुकोवीक्ष्यगोविंदंसंतुष्टंतस्यतेजसा ॥ ९९ ॥ रथंरणादपोवाहयत्रराजायुधिष्ठिरः ॥
हाहाकारोमहानासीत्कृष्णंवीक्ष्यतथाविधम् ॥ १०० ॥ पलायितंबलंसर्वंपांडवानांचपश्यताम् ॥ हतान्पुत्रान्पितॄन्बंधून्सुहृत्सं
बंधिबांधवान् ॥ १ ॥ उत्सृज्योत्सृज्यगच्छंतिवदंत्येकेपरस्परम् ॥ पुत्रमांनयसंग्रामात्पिताहंपतितस्तव ॥ २ ॥ पुत्रःप्रोवाच
पितरंपलायित्वाजवात्स्थितः ॥ तवश्राद्धंगयाशीर्षेकरिष्यामीतिनिर्गतः ॥ ३ ॥ तावदन्योजनःप्राप्तोभयाद्दैत्यानुशाल्वकात् ॥
ततःसदारुकोधीमान्माधवंवीणकेऽनयत् ॥ ४ ॥ तंप्राप्तंमूर्छितंदृष्ट्वाहाहाकुलाप्रधाविताः ॥ कृष्णस्यनार्यःसकलारुक्मिणीप्रमु
खाःकिल ॥ ५ ॥ सत्यभामाहरिंवीक्ष्यप्रबुद्धंवाक्यमब्रवीत् ॥ ॥ सत्यभामोवाच ॥ ॥ समागतंरणात्पुत्रंप्रद्युम्नंरणकोवि
दम् ॥ ६ ॥ उक्तवानसिरूक्षाणिबहुदुःखकराणिच ॥ भवान्प्राप्तःकथंयुद्धादनुशाल्वभयार्दितः ॥ ७ ॥ पलायंतेजनाःसर्वेमृत्यो
र्भीताजगत्पते ॥ स्वयंगच्छामिकिंनाथचंडीभूत्वामहाहावे ॥ ८ ॥ हंतुंतमनुशाल्वंहियस्माद्भीतःसमागतः ॥ नत्वांछिंदंतिशस्त्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिनत्वांदहतिपावकः ॥ ९ ॥ कथंपलायितोऽसित्वंकृष्णदेवकिनंदन ॥ त्वयापादप्रहारेणपुत्रोवैताडितोभृशम् ॥ वसुदेवस्तुदू
रेवैयस्त्वांताडयतेतथा ॥ १० ॥ यद्गतंगतमेवास्तुशेषंचिंतयकेशव ॥ यथायातिहयोराज्ञश्चानुशाल्वात्सुधीमतः ॥ ११ ॥ इत्या
श्वमेधिकेपर्वणिजैमिनीयेसत्यभामावाक्यंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥छ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ इतितस्यावचःश्रुत्वानिर्ययौभगवान्पुनः ॥ अनुशाल्वंरणेयोद्धुंतस्मिन्कालेजनाधिप ॥ १ ॥ तंवीक्ष्य
चरणेप्राप्तंवृषकेतुर्महाबलः ॥ अनुशाल्वंसमाहूयतिष्ठतिष्ठेतिचाब्रवीत् ॥ २ ॥ जघानसप्तभिर्बाणैर्दैत्यराजंहसन्निव ॥ अनु
शाल्वोऽपिसंविद्धोदशभिःकर्णनंदनं ॥ ३ ॥ विव्याधहृदयेघोरैःसायकैर्निशितैस्तथा ॥ चतुर्भिस्तुरगानस्यपातयामासभूतले ॥
॥ ४ ॥ सारथेश्चशिरःकायात्क्षितौक्षिप्रमपातयत् ॥ विरथंवृषकेतुंतंसमीक्ष्यरविसारथिः ॥ ५ ॥ योजयित्वारथंदिव्यंद्वितीयंस
मुपागतः ॥ तस्मिन्रथेसमारुह्यपुनःकर्णसुतोबली ॥ ६ ॥ दैत्यराजंशरैस्तीक्ष्णैःसमंताद्व्यकिरद्रणे ॥ सारथिंपातयित्वाऽस्यह
यानपिमहाबलः ॥ जघानसमरेभूपलीलयाप्रहसन्निव ॥ ७ ॥ दैत्यनाथश्चतरसारथस्थंकर्णनंदनं ॥ समुत्थाप्यभुजाग्रेणभू
मौचिक्षेपकोपतः ॥ ८ ॥ सोऽप्येनंसरथंक्रुद्धोभूमौचिक्षेपकोपतः ॥ गृहीत्वापुनरेवैनंनिर्ययौकृष्णसन्निधौ ॥ ९ ॥ ददौकृष्णकरे
दैत्यंवचःप्राहसुशोभनं ॥ ॥ वृषकेतुरुवाच ॥ ॥ एनंपश्यहृषीकेशतुरगग्रहणेक्षमं ॥ १० ॥ त्वत्प्रसादेनसंप्राप्तंप्रतिज्ञासफ
लाऽस्तुमे ॥ ॥ श्रीकृष्णउवाच ॥ ॥ धन्योसिकर्णपुत्रत्वंभाषितंसफलंकृतं ॥ ११ ॥ अनुशाल्वंकस्त्वदन्योरणादिहसमा
नयेत् ॥ ॥एवंवदतिगोविंदेप्रबुद्धोदैत्यनायकः ॥ १२ ॥ यादवेंद्रंददर्शाग्रेघनश्यामंजगत्पतिं ॥ उवाचवचनंवाग्मीकर्णपुत्रंम

१ अनुशाल्वोविनश्यतीत्यपिपाठः २ अरुणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हामतिं ॥ १३ ॥ जितस्त्वयाऽहंवैवीरपातितःकृष्णपादयोः ॥ नपिताजननीनैवनगुरुर्नचबांधवाः ॥ १४ ॥ नदेवास्त्वरितंदेवम
नंतंदर्शयंतिच ॥ शत्रुणासत्वयाजित्वादर्शितोमधुसूदनः ॥ १५ ॥ येनमेबांधवाःसर्वेगमिताःपरमंपदं ॥ संगतिंतेनसंप्राप्यकृ
ष्णेनममविस्मयः ॥ १६ ॥ जायतेकर्णपुत्राद्यसंतोषश्चशुभावहः ॥ ययोर्वैरंतयोर्मैत्रीसंजातापौरुषेणते॥१७॥प्रभूणांहिप्रभा
वेनसंगतासंगतंसमं ॥ दृश्यतेशंकरेवीरविषंचैवामृतंसदा ॥ १८ ॥ दातारोदर्शयंत्येवजगन्नाथपदांबुजं ॥ त्वत्समोनास्तिदाता
ऽन्यःकाश्यपात्मजनंदन ॥ १९ ॥ ॥ वृषकेतुरुवाच ॥ ॥ भवान्कृष्णपदंप्राप्यब्रूतेहिममविस्मयः ॥ संजातःसांप्रतंवीरमू
कत्वंयत्रयोगिनः ॥ २० ॥ गच्छंतिशेषप्रमुखाविलोक्यमधुसूदनं ॥ तवभाषितमाकर्ण्यविस्मयोऽतीवजायते ॥ २१ ॥ ॥ अ
नुशाल्वउवाच ॥ ॥ वाक्प्रवृत्ताहरिंवीक्ष्यमदीयाकर्णनंदन ॥ ध्रुवस्येवामुनादत्तालोकास्तुहरिणाशुभाः ॥ २२ ॥ स्तौमिचा
त्रहृषीकेशंसमक्षंतवमारिष ॥ मत्प्रहारेणसंत्यक्ताजगामरणमंडलं ॥ २३ ॥ यःपांडवस्यपुरतोविश्वसृक्शास्त्रधृग्घरिः॥ किंपी
डयतेस्यशस्त्रेणविष्णोर्विश्वमयंवपुः ॥ २४ चतुर्भुजाश्चजायंतेस्मरणाद्यस्यमानवाः ॥ वैनतेयंसमारूढाःशंखचक्रगदाधराः ॥
॥ २५ ॥ सस्वयंजायतेमत्स्यःकूर्मःकोलोनृकेसरी ॥ प्रसादाद्यस्यदेवेंद्रोविविधास्ताःसुरांगनाः ॥२६॥ संप्राप्नोतिस्वयंप्राप्तः
कुब्जिकांगोपवेषधृक् ॥ पुष्णातिकृष्णोविश्वंयोनानारत्नचयेनहि ॥ २७ ॥ सभोक्ताद्रौपदीदत्तंशाकपत्रंनिशागमे ॥ सक्तून्सु
दाम्नःस्वल्पांस्तान्संप्राश्यप्राप्तवान्मुदम् ॥२८ ॥ नंदनादीनिदिव्यानिवनानिप्राप्नुवंतिते ॥ स्वयंहिकृष्णतुलसीकाननेरम
तेहरिः ॥ २९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवंतंनृपतिंसमालिंग्यस्थितोहरिः ॥ गृहीत्वादक्षिणेहस्तेदर्शयामासधर्मजं ॥

१ काश्यपः सूर्यस्तस्यात्मजः कर्ण स्तस्यनंदनो वृषकेतुस्तत्संबुद्धिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ ततो[1]युधिष्ठिरंराजानमस्कृत्यस्थितोऽग्रतः॥ उवाचधर्मराजस्तंसांत्वपूर्वमिदंवचः॥ ३१ ॥ भीमादीनांपंचमस्त्वंबांधवो
ऽसिममाधुना ॥ यज्ञंपालयमेनित्यंयथाकृष्णेनपाल्यते ॥ ३२ ॥ अनुशाल्वस्ततःसर्वान्भीमसेनमुखांस्ततः ॥ समालिंग्या
ब्रवीद्वाक्यंधर्मराजंमहामतिम् ॥ ३३ ॥ ॥ अनुशाल्वउवाच ॥ ॥ अहंबाहूशिरश्चैवस्वकीयंरणमंडले ॥ युधिष्ठिरार्थका
लेनयत्रतत्रप्रपातये ॥ ३४ ॥ एतावदुक्त्वावचनंविररामसपार्थिवः ॥ ततोविजित्यसर्वांस्तान्पार्थिवान्कर्णनंदनः ॥ ३५ ॥ आ
नयामासतुरगंयत्रराजायुधिष्ठिरः ॥ हृष्टोयुधिष्ठिरःप्राहधन्यस्त्वंकर्णनंदन ॥ ३६ ॥ प्रतिज्ञासफलावीरतवजाताममाग्रतः ॥
॥ अनुशाल्वोऽपिबंधुत्वंगमितःपुण्यसंग्रहात् ॥ ३७ ॥ दिष्ट्यासर्वंसुखाकारंसंजातंकार्यमध्यमे ॥ युवांकुशलिनौप्राप्तौप्रियौ
मेकृष्णकर्णजौ ॥ ३८ ॥ एवंप्रशस्यतौवीरौमुदितोधर्मनंदनः ॥ पुरस्कृत्यहयंवीरैःप्रविवेशगजाह्वयम् ॥ ३९ ॥ उपविष्टःसभा
मध्येसहकृष्णेनसद्विजैः ॥ देवकीचयशोदाचकुंतीचैवाथरोहिणी ॥ ४० ॥ रुक्मिणीसत्यभामाचतथैवान्याश्चयोषितः ॥ अरुं
धतीचानुसूयापूजयंत्यस्तथाशुभाः ॥ ४१ ॥ परस्परंभावयंतिराजानस्तेसमागताः ॥ भोज्यैश्चविविधैःपेयैश्चंदनागुरुधूपितै
॥ ४२ ॥ वासोभिर्मृदुभिश्चैवरांकवै[2]र्भावसंयुताः ॥ वराश्वगजदानैश्चयज्ञारंभेचमारिष ॥ ४३ ॥ समागतेहृषीकेशेदिनानांविं
शतिर्गता ॥ चैत्रीप्राप्तापौर्णमासीदीक्षितोऽभूद्युधिष्ठिरः॥ ४४ ॥द्रौपदीसहितोरौद्रं[3]मसिपत्रव्रतंचरन् ॥ संस्थाप्यतुरगंतत्रपूज
यित्वायथाविधि ॥ ४५ ॥ ब्राह्मणान्वेदसंपन्नान्वित्तेनमहतानृपः ॥ गीतवादित्रनादेनब्रह्म[4]घोषैःसुमंगलैः ॥ ४६ ॥ हयंसपत्रं
यज्ञार्थेकुंकुमेनाभिचर्चितम् ॥ चंदनेनापिमालाभिर्वरधूपैश्चधूपितम् ॥ ४७ ॥ मुमोचधर्मराजोसौतुरंगंबद्धचामरम् ॥ पा

१ सयुधिष्ठिरः । २ मृगरोमजैः । ३ तीक्ष्णम् । ४ वेदघोषैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लनार्थंहयस्याथप्रेषयामासफाल्गुनम् ॥ ४८ ॥ सुस्नातंशुभ्रवसनंदूर्वाचंपकनिर्मिताम् ॥ मालांकंठेप्रोथयित्वादधानंच
किरीटकम् ॥ ४९ ॥ गांडीवहस्तंसोत्साहंछत्रचामरशोभितम् ॥ पांडवंप्राहराजासौपार्थपालयवाजिनम् ॥ ५० ॥ वा
सुदेवप्रसादेननिर्विघ्नंतेऽस्तुपांडव ॥ शिवास्तेसंतुपंथानोजयंप्राप्नुहिभारत ॥ ५१ ॥ कुशलीपुनरागच्छससहायपरिच्छदः ॥
अनाथान्दीनवदनान्सद्वृत्तांश्चतथैवच ॥ ५२ ॥ कृतांजलीन्सशरणांस्तवास्मीतिचवादिनः ॥ पितृहीनान्बालकान्मारणेपातय
मारिष ॥ ५३ ॥ ततोधनंजयःश्रुत्वाभ्रातुर्ज्येष्ठस्यभाषितं ॥ नमस्कृत्यचतंप्रायात्कुंतींप्रष्टुंचदेवकीं ॥५४॥ प्रणम्यकुंतींतांदेवींदे
वकींकृष्णमातरम् ॥ अरुंधतींचानुसूयांतथातांरुक्मिणीमपि ॥ ५५ ॥ गांधारींधृतराष्ट्रंचप्रत्युवाचव्रजाम्यहम् ॥ भ्रात्रादिष्टो
रक्षणार्थंहयस्येतिप्रहर्षितः ॥५६ ॥ततोऽर्जुनंपरिष्वज्यकुंतीवचनमब्रवीत् ॥ धर्मराजनिमित्तंहियदियासिधनंजय ॥ ५७ ॥
केसहायाश्चतेदत्ताःसैन्यंचविविधंकियत् ॥दत्तंयुधिष्ठिरेणाद्यतन्मेब्रूहिपरंतप ॥५८॥ ॥ अर्जुनउवाच ॥ ॥ कृष्णेननोदितःका
र्ष्णिःस्वपुत्रस्तद्बलंस्वकं॥समर्पयित्वाप्रोक्तोयोरुक्मिणीनंदनःस्वयं ॥५९॥ रक्षार्थंपुत्रगच्छत्वंममादेशाच्चसांप्रतं ॥ धनंजयस्य
रक्षार्थंममप्राणोहिपांडवः ॥ ६० ॥ रक्षितुंतुरगंचैवसम्यक्पालयमांयथा ॥ पित्रास्वकीयंसर्वस्वंपुत्रहस्तेप्रदीयते ॥ ६१ ॥ स
द्वृत्तोरक्षतेवीरअसद्वृत्तोनपालयेत् ॥ तथाकर्णसुतंप्राहदेवकीनंदनोहरिः ॥ ६२ ॥ सर्वस्वंपुत्रकंसैन्यंतुरगंवृषभध्वज ॥ महा
सैन्यगतंपाहिमयादिष्टोऽसिभारत ॥ ६३ ॥ अनुशाल्वंसुबलिनंयौवनाश्वंसपुत्रकम् ॥ मत्सहायार्थमादिश्यततोऽहंप्रेषितःपृ
थे ॥ ६४ ॥ त्वयाचिंतानमेकार्याप्रसन्नःकेशवःप्रभुः ॥ ॥ कुंत्युवाच ॥ ॥ वृषकेतुस्त्वयापाल्यःसर्वयुद्धेषुभारत ॥ क्रतुस्तेस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वथाशोच्यः समागच्छेच्चतंविना ॥ ६५ ॥ लब्ध्वाजयंसमाथाहिपालयित्वातुरंगमम् ॥ हरिणामार्यतेजंतुर्हरिणारक्ष्यतेपुनः ॥
॥ ६६ ॥ सर्वदातंहरिंपार्थस्मरञ्जयमवाप्स्यसि ॥ इत्युक्त्वापुत्रकंकुंतीसाबाष्पंप्रमुमोचह ॥ ६७ ॥ ततःपार्थोहरिंवीक्ष्यनमस्कृ
त्यपुनःपुनः ॥ आरुरोहरथंदिव्यंप्रययौसैन्यसंवृतः ॥ ६८ ॥ नानावादित्रनादेनहोमधूमेनधूपितः ॥ रथारूढःकुमारीणांला
जैर्माल्यैःकरच्युतैः ॥ ६९ ॥ संछन्नांगोजयाशीर्भिःपौराणांचारुवीक्षितैः ॥ मध्याह्नसमयेकृष्णस्तंमुमोचतुरंगमम् ॥ ७० ॥ ह
योगतोदक्षिणाशांप्रेरितःकृष्णवीक्षणैः ॥ वृषकेतुर्जनान्वृद्धान्प्रणम्यस्वगृहंगतः ॥ ७१ ॥ एकःपत्नींतदाप्रष्टुंवीक्ष्यवाक्यमु
वाचताम् ॥ ॥ वृषकेतुरुवाच ॥ ॥ एषगच्छामिसुभगेपांडवेनान्वितःपुरात् ॥ ७२ ॥ एताःकुंतीमुखानार्यःसेवनीयाःप्रय
त्नतः ॥ श्वश्रूणांचैववृद्धानांसेवनात्परमंफलम् ॥ ७३ ॥ सतांसंपूजनादेवलभंतेपरमंस्त्रियः ॥ स्मर्त्तव्यावयमप्यत्रभवत्याकि
लभामिनि ॥ यस्मात्स्त्रीणांपरोधर्मोभर्तुःस्मरणमेवच ॥ ७४ ॥ ॥ भद्रावत्युवाच ॥ ॥ मदीयंमानसंत्यक्त्वात्वांकदाचिन्नग
च्छति ॥ त्वदीयंमानसंत्यक्त्वामांचेद्गच्छतिगच्छतु ॥ ७५ ॥ त्वंयथावदसेनाथतत्करोमिनचान्यथा ॥ स्त्रीणांभर्त्तापरोदेवइतिशास्त्र
विनिर्णयः ॥ ७६ ॥ अर्जुनस्यहयोनाथरक्षणीयःप्रयत्नतः ॥ युद्धंहिसंमुखंकार्यंविमुखंनकदाचन ॥ ७७ ॥ संतिकृष्णस्यना
र्यस्तुमंडलेऽस्मिन्सुकोविदाः ॥ स्मिताननाभविष्यंतिमांविलोक्यतवप्रियाम् ॥ ७८ ॥ श्रुत्वाभवंतंविमुखंकुत्रापिसुमहद्रणा
त् ॥ कयातच्छक्यतेहास्यंश्रोतुंस्त्रीमुखसंभवं ॥ ७९ ॥ एतासांप्राणनाथोहिविमुखोऽपिहिसंमुखः ॥ एतत्त्वंचिंत्यसकलंगम्य
तांकार्यसिद्धये ॥ ८० ॥ ॥ जैमिनिरुवाच ॥ ततःप्रियांकर्णसुतःप्रत्युवाचस्मयन्निव ॥ त्रैलोक्यमपिसंप्राप्तंसंग्रामेममसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखम् ॥ ८१ ॥ पांडवार्थेमयाभीरुश्चोष्यसेविदलीकृतम् ॥ यदिकर्णसुतश्चायंविमुखोजायतेरणात् ॥ ८२ ॥ वासुदेवस्यमाहात्म्यंविफलंसफलंतदा ॥ काश्यांहिमरणान्मोक्षोगयायांपिंडदानतः ॥ ८३ ॥ विपरीतमिदंभाव्यंमाघेवेणीनिमज्जनात् ॥ प्रियेऽहंयदिसंग्रामेभविष्यामिपराङ्मुखः ॥ ८४ ॥ विंबाधरंतेवदनंनपश्यामिपुनस्त्वहम् ॥ एतावदुक्त्वावचनंप्रययौबहुभिर्वृतः ॥ ॥ ८५ ॥ ब्राह्मणांश्चगवांयूथंहोमद्रव्यंचयाज्ञिकम् ॥ पुरस्कृत्यतदाराजन्वृषकेतुर्महाबलः ॥ ८६ ॥ कृष्णभीमादयःसर्वेप्रविष्टास्तेगजाह्वयम् ॥ अर्जुनस्यहयोराजन्पुरींमाहिष्मतींययौ ॥ ८७ ॥ नीलध्वजेनवीरेणरक्षितांदुर्गमंडिताम् ॥ नानाजनपदाकीर्णांनित्योत्सवविलासिनीं ॥ ८८ ॥ नर्मदाजलपानेनलिंगाकारांहिभारत ॥ मदनःकिंशिवाद्भीतःप्रविष्टस्तांविभातिमे ॥ ८९ ॥ नराणामपिनारीणांवेषैर्दिव्यैर्मनोरमाम् ॥ नीलध्वजस्यपुत्रोऽपिरममाणस्तुकानने ॥ ९० ॥ स्त्रीसहस्रेणसहितःपुष्पितासुलतासुच ॥ प्रवीरश्चंपकस्याधःस्थितस्तत्रवरासने ॥ ९१ ॥ सेव्यमानस्तुनारीभिर्गौरीभिर्जनमेजय ॥ श्यामाभिर्वरवर्णाभिर्विशालनयनःप्रभुः ॥ ९२ ॥ उवाचवचनंवीरस्तदामदनमंजरीम् ॥ भूषितांरत्नमालाभिर्विचित्राभिर्विशेषतः ॥ ९३ ॥ गृह्णंतुनार्यःसकलालताभ्यःसुमनांसिहि ॥ ततस्तास्तद्वचःश्रुत्वारणद्वलयभूषिताः ॥ ९४ ॥ सुस्मितास्तानिमाल्यानिजगृहुःकृपयान्विताः ॥ सहिताःप्राणनाथेनगायंत्यःसुस्वरंमुदा ॥ ९५ ॥ ततःप्रवीरमहिषीवनमध्येतुरंगमम् ॥ ददर्शस्वेच्छयाप्राप्तंस्थितंमदनमंजरी ॥ ९६ ॥ भूषितंरत्नमालाभिर्बद्धपत्रंसुचर्चितम् ॥ नारीणांकुंकुमकरैर्माल्यैश्चविविधैरपि ॥ ९७ ॥ अर्जुनस्यहयंवीक्ष्यप्रवीरंवाक्यमब्रवीत् ॥ ॥ मदनमंजर्युवाच ॥ ॥ गोक्षीरवर्णंतुरगंनाथपश्यसमागतम् ॥ ९८ ॥ ताम्राधरंरक्त

१ अज्ञाते रजसि श्यामा संप्राप्ते वरवर्णिनी । अप्रसूता भवेद्गौरी प्रसूता चैकदैव सा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शफंपीतपुच्छंसुकंधरम् ॥ कृष्णकर्णंकृष्णनेत्रंमुक्तंकस्यकरादमुम् ॥ ९९ ॥ आलेपत्रंसुलिखितंबद्धंवाचयमारिष ॥ नाथधारय मद्वाक्यात्तुरंगंकुरुमेप्रियम् ॥ १०० ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःप्रवीरस्तंवीक्ष्यप्रियावाक्येननोदितः ॥ हयंजग्राहकेशेषुमाल्यवत्सुसहर्षितः ॥ १ ॥ वाचयामासतत्पत्रंधर्मराजेनयत्कृतम् ॥ युधिष्ठिरस्यतुरगंयज्ञार्थेकिलमोचितम् ॥ २ ॥ रक्ष्यमाणंतुपार्थेनगृह्णंतुस्वबलान्नृपाः ॥ इतिज्ञात्वाप्रवीरोथप्रेरयामासतंहयम्[1] ॥ ३ ॥ स्त्रियःसर्वाःपुरींधैर्यात्स्थितोयुद्धेस्वयंतदा ॥ सैन्येनमहतातत्रतृणीकृत्यधनंजयं ॥ ४ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेमाहिष्मतीप्रवेशेतुरगग्रहणंनामचतुर्दशोऽध्यायः ॥ १४ ॥

॥ जैमिनिरुवाच ॥ ॥ ततःपार्थस्तुसंप्राप्तोवीक्षमाणस्तुरंगमं ॥ अनुशाल्वेनसहितोरुक्मिणीनंदनेनच ॥ १ ॥ यौवनाश्वेनराजेंद्रकर्णपुत्रेणधीमता ॥ सर्वेषामग्रतःप्राप्तोवृषकेतुर्महाबलः ॥ २ ॥ ददर्शाग्रेप्रवीरंहिस्वसैन्यव्यूहसंस्थितं ॥ तिष्ठतिष्ठेतिभाषंतंग्रहीलावरकार्मुकं ॥ ३ ॥ नीलध्वजस्यपुत्रेणप्रवीरेणमहाहयः ॥ पुरींप्रवेशितःकोपान्मोचयत्वद्यपांडवः ॥ ४ ॥ प्रवीरंतत्रप्रोवाचकर्णपुत्रःसमागतः ॥ प्रथमंयोधयत्वंमांपश्चात्पार्थंधनंजयं ॥ ५ ॥ प्रवीरःपंचभिर्बाणैर्विव्याधवृषभध्वजं ॥ चतुर्भिश्चतुरोवाहान्बाणेनैकेनसारथिं ॥ ६ ॥ सप्तभिःकर्णपुत्रस्तंनिजघानहसन्निव ॥ शुकपिच्छनिभानस्यहयान्निन्येयमक्षयं ॥ ७ ॥ चतुर्भिःसायकैःकोपात्सिंहनादमथाकरोत् ॥ प्रवीरःकर्णिनाकर्णेकर्णपुत्रमताडयत् ॥ ८ ॥ तेनबाणेनमूर्च्छांहिवृषकेतूरणेययौ ॥ बाणेनैकेनानुशाल्वस्तेनविद्धःप्रतापिना ॥ ९ ॥ अनुशाल्वशरैर्घोरैःप्रवीरोनैवदृश्यते ॥ हाहाकारोमहानासीत्तयोर्वीरसमागमे ॥ १० ॥ नीलध्वजोऽथसंप्राप्तःपावकेनसमन्वितः ॥ अक्षौहिणीभिस्तिसृभिर्वेष्टितःसंगरंप्रति ॥ ११ ॥ मोचयामासतंपुत्र

१तं हयं सर्वाः स्त्रियश्च पुरीं प्रेरयामास इति पूर्वेणान्वयो ज्ञेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मनुशाल्ववशंगतं ॥ ससर्वान्परिविव्याधदशभिर्दशभिःशरैः ॥१२॥ ॥जैमिनिरुवाच॥ ॥नीलध्वजोजघानाशुतदद्भु
 तमिवाभवत् ॥ तेनविद्धंबलंवीक्ष्य सव्यसाचीरुषान्वितः ॥ नीलध्वजंसमासाद्यतिष्ठतिष्ठेतिचाब्रवीत् ॥ १३ ॥ जघानपंचभि
र्बाणैरणेमाहिष्मतीपतिं ॥ सोऽप्यर्जुनस्यतान्बाणांश्चिच्छेदतरसाहसन् ॥ १४ ॥ छिन्नान्शरान्स्वकान्दृष्ट्वापार्थश्चक्रेऽति
पौरुषं ॥ सरथंसध्वजंसाश्वंससूतंसबलंरणे ॥ १५ ॥ अदृश्यंबाणसाहस्रैर्नीलकेतुंतदाकरोत् ॥ यमदूतंशुभैःस्तोत्रैर्विष्णोरिव
भयंकरं ॥ १६ ॥ करोतिवैष्णवःकोपान्मूर्छितंमदगर्वितं ॥ ततोमूर्छांविहायाशुपुनरेवोत्थितस्तदा ॥ १७ ॥ नामगर्जितमालो
क्यजनंदूतगणोयथा ॥ जामातरंपावकंहिसंदधेकोपपूरितः ॥ १८ ॥ नीलध्वजकरान्मुक्तःपावकोऽप्यदहच्चमूं ॥ विशालैरर्चि
भिर्दग्धाःपलायंतेमहाजनाः ॥ १९ ॥ तुरगारथिनोराजन्पत्तयःशस्त्रवर्जिताः ॥ करभाश्ववृषादग्धाभारंत्यक्त्वावनंगताः ॥
॥ २० ॥ वामीगणाश्चशकटाःपूरिताधनसंचयैः ॥ चामराणिचदह्यंतेछत्राणिकवचानिच ॥ २१ ॥ मेदोधातुंसमासाद्यपुनरे
वप्रदीप्यते ॥ कृष्णवर्त्माक्षयेप्राप्तेभूतानांचयथाऽभवत् ॥ २२ ॥ तथापार्थबलंसर्वंसमंताद्बुभुजेरणे ॥ ततोऽर्जुनोरणश्लाघीवा
रुणास्त्रंसमादधे ॥ २३ ॥ मुमुचेवन्हिनाशायनशांतस्तेनपावकः ॥ अर्जुनःप्रत्युवाचाथपावकंपरिदीपितं ॥ २४ ॥ ॥अर्जु
नउवाच॥ ॥त्वमेवसर्वदेवानांमुखंतुभ्यंनमोऽग्नये ॥ त्वत्प्रीतयेवाजिमेधंप्रकरोतियुधिष्ठिरः ॥ २५ ॥ त्वयादत्तंहिगांडीवंरथो
दिव्यस्तथैवच ॥ परमंसौहृदंदिव्यंसर्वदाक्रियतेविभो ॥ २६ ॥ बलंहृतंहयोनीतस्त्वमतीवप्रदीप्यसे ॥ किंकरोमिभवान्प्रीतिं
परित्यज्यप्रवर्तते ॥ २७ ॥ ॥जनमेजयउवाच॥ ॥कथंजामातरंवह्निंलब्धवान्समहीपतिः ॥ काचकन्यापावकायदत्तातेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महात्मना ॥ २८ ॥ एतत्सर्वंसमाचक्ष्वमयापृष्टोऽसिजैमिने ॥ कौतुकंवर्त्ततेस्माकंश्रुत्वापार्थबलंहतं ॥ २९ ॥ ॥ जैमिनिरुवा
च ॥ ॥ नीलध्वजस्यमहिषीज्वालानाम्नीसुमध्यमा ॥ स्वाहांकन्यांप्रसूतासासुंदरींधर्मतत्परां ॥ ३० ॥ सर्वलक्षणसंपन्नांकु
मारींलोकसुंदरीं ॥ वर्धमानांपितृगृहेसुंदरींबंधुपूजितां ॥ ३१ ॥ अतीवरूपसंपन्नांत्रैलोक्यस्यापिमोहिनीं ॥ नीलध्वज
स्तुतांवीक्ष्यकालेनकियतासुतां ॥ ३२ ॥ कस्मैप्रदेयाकन्येयमितिचिंतापरोऽभवत् ॥ पप्रच्छतांचारुनेत्रांभर्ताकस्तवरोचते ॥
॥ ३३ ॥ राजानोराजपुत्राश्चसंतिपुत्रिसहस्रशः ॥ पट्टस्थान्पश्यवीरांस्तांस्ततोब्रूहिस्ववल्लभं ॥ ३४ ॥ स्वाहातंप्रत्युवाचाथपि
तरंलज्जितासती ॥ ॥ स्वाहोवाच ॥ ॥ नमानुषंकामयेऽहंलोलुपंमोहवेष्टितं ॥ ३५ ॥ देववर्यंवरंतातममयोग्यंविचिंतय ॥
॥ नीलध्वजउवाच ॥ ॥ देवराजंमहाबाहुंवरंवरयशोभने ॥ ३६ ॥ आगमिष्यतिलोकेऽस्मिन्मानुषीकामुकःस्वयं ॥ मत्तेगजे
समारूढःशक्रःसोऽनंतलोचनः ॥ ३७ ॥ पितुर्वाक्यंसमाकर्ण्यस्वाहावचनमब्रवीत् ॥ ॥ स्वाहोवाच ॥ ॥ इंद्रंनकामयेतात
सर्वदोषस्यकारणं ॥ ३८ ॥ परोदयंनसहतेतपसादानकारितं ॥ देवराजोगौतमस्यप्रियांकामयतेयदि ॥ ३९ ॥ अनुजःके
शवोयेनकृतःकातंहिकामयेत् ॥ लघीयांसंजगन्नाथंविष्णुंचक्रेऽतिमोहितः ॥ ४० ॥ पदंयस्मान्महत्प्राप्तंकृतघ्नःकिलवासवः ॥
मानुषायेमयात्यक्तास्तत्रमेकारणंश्रृणु ॥ ४१ ॥ स्त्रीणांशरीरंसमलंप्रथमंतातजायते ॥ एकंनरंपतिंप्राप्यद्वितीयंकुरुतेऽत्रया
॥ सायातिनरकंघोरंशीलभंगान्मयाश्रुतं ॥ ४२ ॥ मृतेभर्तरिगात्रस्यस्पर्शंपश्चात्करोतियः ॥ सपावकोदेवमुखंभर्तामेतातरो
चते ॥ ४३ ॥ नान्यंदेवंनासुरंवाकिन्नरंवामहोरगं ॥ वरयामिवरंलोकेविनातंहव्यवाहनं ॥ ४४ ॥ यद्यायातिस्वयंवह्निरर्थयिष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिमामिह ॥ तन्मांतातमहाबुद्धेतस्मैत्वंदातुमर्हसि ॥ ४५ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधंवचःश्रुत्वास्वाहाप्रोक्तंसुभाषि
तं ॥ नीलध्वजस्तदाहृष्टोविस्मितोऽभून्महाबलः ॥४६॥ प्रहसंत्यःस्त्रियोराजन्परुषंवाक्यमब्रुवन् ॥ किमिदंभाषसेबालेविप
रीतंनृपंप्रति ॥ ४७ ॥ वह्निंत्वरंकथंब्रूषेदाहकंसर्वभक्षकं ॥ तथाहिकृष्णवर्त्मानंमेषवाहनमातुरं ॥४८॥ सप्तजिह्वंधूम्रमुखंहाकष्टं
संस्थितंत्विदं ॥ स्त्रीणांचित्तंकुरूपेहियातिमंदजनेतथा ॥ ४९ ॥ उच्चान्नीचंगतागंगापावनीयाजगत्त्रये ॥ स्वाहातेषांसमाकर्ण्य
वचनानित्वरान्विता ॥ ५० ॥ स्नातासाशुभ्रवसनास्थापयित्वाहुताशनं ॥ ब्राह्मणैःसहितानित्यंध्यायंत्युपवनेस्थिता ॥ ५१ ॥
अगुरुंचंदनंविप्राघृतंरम्यंचपायसं॥शर्करामिक्षुखंडांश्चक्षौद्रंद्राक्षास्तथातिलान्॥५२॥कर्पूरंवरतांबूलंलवंगंजातिजंफलं ॥ रं
भाफलानिजुहुवुस्तयावह्नौप्रणोदिताः ॥ ५३ ॥ मुक्तामालांगृह्यबालारणद्वलयनूपुरा॥सखीपरिवृतास्वाहाशुश्रूषंतीहुताशनं
॥ ५४ ॥ ततःकालेनमहतानारदेनप्रबोधितः ॥ पावकोविप्ररूपेणप्राप्तोनीलध्वजंप्रति ॥ ५५ ॥ विप्रंपूजितमेवादौदत्त्वाऽर्घं
स्वासनेस्थितं ॥ पप्रच्छसादरंराजन्कुतःप्राप्तोऽसिवैमुने ॥५६॥ आदेशोदीयतांमह्यंकिमाज्ञप्तःकरोम्यहं ॥ ॥ विप्रउवाच ॥
कन्यार्थिनंविद्धिराजन्विप्रंशांडिल्यगोत्रजं ॥ ५७ ॥ त्वद्गृहेविद्यतेबालामह्यंतांदेहिकन्यकां ॥ ॥ राजोवाच ॥ ॥ नमानुषंव
रयतेपावकेसस्पृहासुता ॥ ५८ ॥ अन्यांकन्यांप्रयच्छामियदितेरोचतेद्विज ॥ ॥ विप्रउवाच ॥ मांविद्धिपावकंराजन्विप्र
वेषेणसंस्थितं ॥ ५९ ॥ स्वाहासत्येनंगुरुणासंतुष्टंकामपूरितं ॥ ॥ जैमिनिरुवाच ॥ ॥ एतत्तस्यवचःश्रुत्वासस्मेरवदनोज ॥३८॥
नः ॥ ६० ॥ प्रत्युवाचाथनृपातिंतत्रस्थंविस्मितोऽपिसन् ॥ कन्यानिमित्तंविप्रोऽसौजायतेयदिपावकः ॥ ६१ ॥ त्विनापावकना

१ गुरुणा स्वाहासत्येन मत्स्यास्वाहाप्रतिज्ञया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थेनस्वाहादेयानकस्यचित् ॥ सचिवः किंनजानातिविप्रंसम्यक्परीक्षितुं ॥ ६२ ॥ ॥ प्रधानउवाच ॥ ॥ नजानीमोवयंसर्वे भवंतंपावकंस्थितं ॥ आत्मानंदर्शयविभोरम्यंपावकरूपिणं ॥ ६३ ॥ ततोविप्रमुखादग्निर्ज्वालामालीविनिर्गतः ॥ कूर्चंहिसचिवस्यापिददाहकुपितस्तदा ॥ ६४ ॥ प्रधानेदह्यमानेचसर्वेलोकाश्चकंपिरे ॥ राजातंशमयामासवह्निसूक्तेनतत्क्षणात् ॥ ६५ ॥ एतस्मिन्नंतरेराजन्विनोदःसुमहानभूत् ॥ मातृष्वसाथकन्यायाराजानंवाक्यमब्रवीत् ॥ ६६ ॥ नदातव्यात्वयाकन्याब्राह्मणायकथंचन ॥ इंद्रजालीकवद्वह्निंदर्शयत्येवभूसुरः ॥ ६७ ॥ राजातांप्रत्युवाचाथशालिकांप्रहसन्निव ॥ स्वगृहंनयभद्रंतेमम जामातरंशुभे ॥ ६८ ॥ परीक्षयविशालाक्षिविप्रोवापावकोऽपिवा ॥ ततोगृहंगतादेवीब्राह्मणेनसमन्विता ॥६९॥ प्रत्युवाचपरीक्षांमेदेहिविप्रसनातनीं ॥ अग्निर्ददाहकुपितोमंदिरंवरचित्रितं ॥ ७० ॥ तस्याश्चगोपुरंरम्यंवासोरत्नविचित्रितं ॥ तिष्ठतिष्ठेतिवचनंजगादचधनंजयः ॥ ७१ ॥ प्रच्छादनंचतस्याश्चपट्टवस्त्रंसुशोभनं ॥ दह्यमानंपरित्यज्यनग्नासाप्राद्रवद्भृशं ॥७२॥ कोलाहलश्चतत्रैवसंजातोहिनरेश्वर ॥ दुद्रुवुश्चजनाःसर्वेतत्रवह्निभयार्दिताः ॥ ७३ ॥ साप्राप्तारा जभवनंरुदंतीसुस्वरंतदा ॥ नृपवारयतंवह्निंज्वालयंतंगृहान्मम ॥ ७४ ॥ ॥ राजोवाच ॥ ॥ परीक्षितस्त्वयाभद्रेकालेनाल्पेनपावकः ॥ क्षणंप्रतीक्षविप्रस्यपरीक्षालभ्यतेयथा ॥ ७५ ॥ ॥ शालिकोवाच ॥ ॥ त्वयासाधुकृतंराजन्जामातातवतिष्ठतु ॥ एतस्मिन्नंतरेराजासमाहूयविभावसुम् ॥ ७६ ॥ समयंवह्निनाचक्रेनगंतव्यंहिमत्पुरात् ॥ ततःकन्यांप्रदास्यामियदितेरोचतेविभो ॥ ७७ ॥ आगमिष्यंतियेराष्ट्रेमदीयेतेत्वयारणे ॥ दाहनीयाःशत्रवस्तुमयाज्ञप्तेनपावक ॥ ७८ ॥ ततःप्रधानोनृपतिंप्राहकिंक्रियतेत्वया ॥ गृ

१ श्मश्रूणि । २ पावकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेजामातरंवह्निंसर्वदापरिरक्षसि ॥ ७९ ॥ स्वाहांगृहीत्वाव्रजतुयथास्थानंनराधिप ॥ प्रधानवचनंश्रुत्वाराजावचनमब्रवीत् ॥
॥ ८० ॥ यावन्नगृहजामाताजायतेममपावकः ॥ तावदेवमहत्तेजोदृश्यतेऽस्यनसंशयः ॥ ८१ ॥ जामातरिगृहेजातेक्षीणतेजाभ
विष्यति ॥ तथाऽपिपुररक्षार्थंसंश्रयामिधनंजयम् ॥ ८२ ॥ प्रदत्ताऽस्मैमयाकन्यास्वाहासचिवसांप्रतम् ॥ ॥ जैमिनिरु० ॥
ततोददौनिजांकन्यांसुलग्नेसोग्नयेतदा॥८३॥ जातेपाणिग्रहेवह्निःस्थितोराजागृहेसुखम् ॥ तंवह्निंसंदधेराजास्वजामातरमाह
वे ॥ ८४ ॥ कारणंकथितंसर्वंयत्पृष्टोऽहंजनाधिप ॥ जनमेजयमहाबुद्धेशृणुचाग्रेकथानकम् ॥ ८५ ॥ अर्जुनस्यवचःश्रुत्वापुनर्व
ह्निःप्रदीपितः ॥ चिंतयामासपार्थोऽपितथानारायणास्त्रकम् ॥ ८६ ॥ ततोनारायणास्त्रंतत्संधितंवीक्ष्यपावकः ॥ शांतिंजगा
मपार्थस्यपुरतःस्थितवानसौ ॥ ८७॥ उवाचतत्रबीभत्सुंस्वकीयंकारणंचतत् ॥ दंडस्तुपातितःपार्थतवोपरिमयाऽधुना॥८८॥
अश्वमेधेनन्नृपतिंकरोषियदिपावनम् ॥ समीपेपुंडरीकाक्षेस्थितेतवधनंजय ॥ ८९ ॥ नयागोनैवदेवावामंत्रास्तेहरिणावि
ना ॥ समर्थाःपावनंकर्तुंविश्वासस्तेनमाधवे ॥ ९० ॥ क्षीरार्णवंभवान्प्राप्यकिमजांदोग्धुमिच्छति ॥ परित्यज्योदितंसूर्यंख
द्योतंकांक्षतेकथम् ॥ ९१ ॥ सखाऽसिममवीरत्वंनकृतघ्नोऽस्मितेऽर्जुन ॥ सैन्यंमयासमासाद्यत्वदीयंपातितंरणे ॥ ९२ ॥ नारा
यणास्त्रंप्रथमंसंधत्सेयदिपांडव ॥ नतेसैन्यंमयाग्रस्तंजायतेऽत्रकथंचन ॥ ९३ ॥ संसारतापहीनास्तेयेस्मरंतिजनार्दनम् ॥ त
स्मात्तवबलंसर्वंपुनस्तिष्ठतुदंशितम् ॥ ९४ ॥ प्रयुज्यमांगतोराजास्वगृहंतन्निबोधये ॥ यथानयेत्सतुरगंसंबद्धंमंदुरोदरे ॥
॥ ९५ ॥ एतावदुक्त्वावचनंक्षमयित्वाधनंजयम् ॥ नीलध्वजसमीपेऽग्निर्गत्वासंस्थितवानयम् ॥ ९६ ॥ समागतंवीक्ष्यहुताशनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंप्रोवाचराजामदगार्वितोऽसौ ॥ दग्धंबलंतस्यधनंजयस्यत्वयाविभोसाधुकृतंरणेऽद्य ॥९७॥ नवेत्तिपार्थोममबाहुवीर्यंबलात्तुरं
गंकिमसौविनेता ॥ जामातरंचापिभवंतमीड्यंविजित्यवैयास्यतिमंदबुद्धिः ॥ ९८॥ ॥ जैमिनिरुवाच ॥ ॥ एवंनृपस्यवच
नंनिशम्योर्जितमाहवात् ॥ प्रत्युवाचहसन्वह्निस्तंहर्षात्प्रत्यषेधयत् ॥ ९९ ॥ केनास्यशक्यतेसैन्यंदग्धुंचपरिपातितुं ॥ सर्वपा
पहरोदेवोयस्यचेतसितिष्ठति ॥ १०० ॥ उत्तिष्ठनरशार्दूलपरिशामयपांडवम् ॥ दीयतामस्यतुरगोयथाभद्रंभवेत्तव ॥ १ ॥
कोऽहंधनंजयस्याग्रेहरिमित्रस्यधन्विनः ॥ खांडवंपूरितंबाणैर्यस्यवज्रपतेर्वनम् ॥ २ ॥ गृहजामातृभावेनविस्मृतंसौहृदंमया
॥ जैमिनिरुवाच ॥ ॥ ततोनीलध्वजोराजामत्वातद्वचनंहितम् ॥ ३ ॥ स्वांप्रियांप्राहतुरगोह्यर्जुनस्यार्प्यतेमया ॥
॥ ज्वालोवाच ॥ ॥ किमर्थंदीयतेहंसःसतिसैन्येभयानके ॥ ४ ॥ पुत्राःपौत्राश्चसुहृदोविद्यंतेतवबांधवाः ॥ भवान्शूरतरोनि
त्यंवित्तंकोशेनमातिते ॥ ५ ॥ क्षत्रियोऽसिविशेषेणनित्यंनृणांनजीवितम् ॥ अद्यवाऽब्दशतांतेवामृत्युर्वैप्राणिनांध्रुवः ॥ ६ ॥ प
राक्रमःप्रकर्त्तव्योनदेयोऽश्वःकथंचन ॥ प्रियावचनमाकर्ण्यहतबुद्धीरणेययौ ॥ ७॥ पुनःससैन्यकोहृष्टःकर्णहंतारमाहवे ॥ त
तोऽर्जुनोनृपंवीक्ष्यकोपादश्रूण्यमोचयत् ॥ ८ ॥ जघानतीक्ष्णैर्नाराचैस्तस्यसैन्यमनेकधा ॥ बाणैःसंछादयामासतदद्भुतमिवा
भवत् ॥ ९ ॥ पुत्रास्तस्यहतायुद्धेभ्रातरश्चमहाबलाः ॥ नृपस्यचरथोभग्नःसारथिश्चनिपातितः ॥ १० ॥ पार्थेनतरसायुद्धेस्म
रतापूर्वकारितम् ॥ नीलध्वजश्चपतितोमूर्छितःस्यंदनोपरि ॥ ११ ॥ सारथिस्तमपोवाहकश्मलेनावृतंरणात् ॥ ततोरात्रिःस
मभवद्गृहंप्राप्तोनराधिपः ॥ १२ ॥ ज्वालांप्राहाथकुपितोभर्त्सयन्निवभारत ॥ ॥ नीलध्वजउवाच ॥ ॥ त्वयादुष्टामतिर्दत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथामेसुहृदोहताः ॥ १३ ॥ गच्छवातिष्ठदुष्टेत्वंप्रयच्छामितुरंगमम् ॥ इत्युक्त्वावचनंराजागृहीत्वायज्ञवाजिनम् ॥ १४॥ प्रधा नेनान्वितःशीघ्रंरत्नान्यादायभूरिशः ॥ कांचनंस्त्रीसहस्त्रंचवस्त्राणिविविधानिच ॥ १५॥ प्रययौयत्रपार्थोऽसौनमस्कृत्यव्यव स्थितः ॥ पार्थंचक्षमयामासवचनंचेदमब्रवीत् ॥ १६ ॥ पार्थपार्थमहाबाहोकिंकरोमितवप्रियम् ॥ अर्जुनस्तंप्रत्युवाचवीरस्त्व मसिभूपते ॥ हयंपालयवर्षेऽस्मिन्मामकंसहितोमया ॥ १७॥ ॥ जैमिनिरुवाच ॥ ॥ ततःपार्थस्यतुरगोनिर्गतोदक्षिणा मुखः ॥ नीलध्वजेनसहितःपार्थःपश्चाज्जगामसः ॥ १८॥ ज्वालाजगामकुपिताचोल्मुकस्यपुरंहिसा ॥ भ्रातुःपार्श्वेसमाग त्यतस्मिन्देशेपटच्चरे ॥ रुदंतीतंनमस्कृत्यरोषादिदमभाषत ॥ १९ ॥ ॥ ज्वालोवाच ॥ ॥ अर्जुनेनगृहंदग्धंमदीयंस्वेनतेज सा ॥ भर्त्ताजितोहताःपुत्रादेवराभासुरंबलम् ॥ २० ॥ विध्वस्तंचहयोनीतोराजाचाग्रेसरःकृतः ॥ तंचेत्पातयसेवीरमन्निमित्तं धनंजयम् ॥ २१ ॥ तदात्वंमेसुहृद्भ्रातानान्यथाश्रुप्रमार्जनम् ॥ ॥ जैमिनिरुवाच ॥ ॥ उल्मुकोदूतवाक्येनज्ञात्वाज्वाला विचेष्टितम् ॥ २२ ॥ प्रत्युवाचाथभगिनींशमयन्निवभारत ॥ अत्रतिष्ठपुरेभद्रेतावकंविद्धिमंडलम् ॥ २३ ॥ कालेनकियतामा तःकरिष्येसुप्रियंतव ॥ कुपिताप्राहराजानंकथमद्यनगच्छसि ॥२४ ॥ उल्मुकःकुपितस्तत्रज्वालांवचनमब्रवीत् ॥ यथास्वकी यंभवनंनाशितंममतत्समम् ॥ २५ ॥ कर्तुमिच्छसिदुष्टेत्वंगच्छशीघ्रंगृहादितः ॥ निर्गतातद्वचःश्रुत्वागंगातीरेसमागता ॥२६ नौकांसमारुह्यतटेगच्छंतीवाक्यमब्रवीत् ॥ ॥ ज्वालोवाच ॥ ॥ मदीयेवामचरणेलग्नंगंगाजलंविदम् ॥ २७॥ पातकंसां प्रतंजातमंबुस्पर्शान्नसंशयः ॥ तच्छ्रुत्वाभाषितंतस्याःसमीपस्थाःसुकोपिताः॥२८॥किमिदंभाषसेदुष्टेनौकामाश्रित्यदारुणं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपापक्षयकरंतोयंवेत्सिनमोहिता ॥ २९ ॥ यस्यांमज्जनमात्रेणमहापातकिनोऽपिये ॥ विहायपापसंघातंविष्णुलोकंव्र
जंतिते ॥ ३० ॥ गंगेतिनाममात्रेणननरोनारकीभवेत् ॥ ततोगंगाजलात्तस्मादाविरासीत्सुमंगला ॥ ३१ ॥ उवाचवचनंतांहि
किमिदंगदितंत्वया ॥ ॥ ज्वालोवाच ॥ ॥ अपुत्रेश्शृणुमेवाक्यंत्वयापुत्राजलेहताः ॥ ३२ ॥ सप्तपूर्वंशांतनुनाप्रार्थितः काम
जित्सुतः ॥ सपार्थेनहतोबाणैःपुरस्कृत्यशिखंडिनम् ॥ ३३ ॥ तस्मात्पुत्रविहीनायाजलमत्रप्रदूषितम् ॥ गंगाततोऽर्जुनंक्रुद्धा
श्रुत्वातद्वचनंमहत् ॥ ३४ ॥ शशापषष्ठेमासेतंपततांपार्थमस्तकम् ॥ सादुष्टापतितावह्नौबाणोभूत्वाभयानकः ॥ बभ्रुवाहनतूणेहि
विवेशार्जुनमृत्यवे ॥ ३५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेफाल्गुनशापोनामपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥
॥ जैमिनिरुवाच ॥ ॥ नीलध्वजस्यनगरादग्रतःप्रययौहयः ॥ हरिर्हरिपदालंबीहरिमुद्वीक्षयन्मुदा ॥ १ ॥ अनेकार्जुनसंबाधं
सहदेवंधराभृतं ॥ विवेशविंध्यंराजेंद्रसहयःपृष्ठतोर्जुनः ॥ २ ॥ सैन्यंपश्चाद्ययौवृक्षांश्चूर्णयन्नर्जुनस्यतु ॥ विषमोऽपिसमोमार्गः
सैन्यागमनतोऽभवत् ॥ ३ ॥ वनस्थादेवतास्तत्रवनस्थंहरिसेवकं ॥ ददृशुर्वनराज्यस्ताअर्जुनंचहयंशुभं ॥ ४ ॥ ततोहयःशि
लांदृष्ट्वामहतींयोजनायतीं ॥ स्वांगंघर्षितुमारेभेतस्यांहर्षादिविस्मितः ॥ ५ ॥ पुराहरिःशिलामंघ्रिस्पर्शात्स्त्रीत्वमुपानयत् ॥ इ
तिमत्वाहरिर्मंदःपस्पर्शहर्षदंतदा ॥ ६ ॥ वज्रलेपत्वमापन्नश्चलितुंनशशाकह ॥ नामसाधर्म्यतःकेपिगच्छंतिसमतांहरेः ॥ ७ ॥
आराधनादृतेऽप्येवंभवंतिजडदेहिनः ॥ जडीभूतंसमालोक्यतंहरिंहरिसेवकाः ॥ ८ ॥ साट्टहासंजगर्जुस्तेजहसुःकेऽपिसैनिकाः ॥
संघर्षणसुखाल्लीनःकिमश्वइतरेब्रुवन् ॥ ९ ॥ केऽपिगत्वाऽर्जुनस्यापिकथयंतिहयोमृतः ॥ शिलासंघट्टमासाद्यहयमेधोऽभवत्स्व

१ अनेकार्जुनवृक्षैर्व्याप्तं । २ देवैःसहितम् । ३ हरीरामचंद्रः । ४ हरिरश्वोऽश्वमेधीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यं ॥ १० ॥ तच्छ्रुत्वावचनंतेषामर्जुनःकृष्णंतामगात् ॥ प्रद्युम्नसहितस्तत्रहयंदृष्ट्वातथाविधम् ॥ ११ ॥ विसिस्मायततोवीरोम
म्लेपंकजवन्निशि ॥ उवाचभीमावरजोमोच्यतांमोच्यतामिति ॥ १२ ॥ प्रदुद्रुवुःकशाःस्थूलागृहीत्वाऽताडयन्बलात् ॥ मुष्टि
भिर्जानुभिःकुद्दानराश्चार्जुननोदिताः॥१३॥नाश्वःपृथक्बभूवाथवैष्णवोविष्णुसेवनात् ॥ तदातेप्रेरिताश्चाराअर्जुनेनमहात्म
ना ॥१४॥ प्रष्टुंकेयंशिलाकिंस्विदितितेत्वरितामुनीन् ॥ ददृशुश्चाश्रमंरम्यंहरित्पत्रद्रुमाकुलं ॥१५॥ शालैस्तालैस्तमालैश्चक
र्णिकारैःसुशोभनैः ॥ रसालैर्बकुलैश्चैवनारिकेरैःसकेसरैः ॥ १६ ॥ सरसीभिर्विचित्राभिरनेकाभिरलंकृतं ॥ निर्बाधाःपशवोय
त्रव्याघ्रागोभिःसमाकुलाः ॥ १७ ॥ मार्जारमुखदंष्ट्रासुकंडूयंत्याखवस्तनुं ॥ सर्पाःसर्पारिभिर्युक्तानवैरंयत्रकुर्वते ॥ १८ ॥ म
त्स्यानलंमहामत्स्यानतेभक्षंतिबालकान् ॥ उलूकाःकाकवृंदेनविक्रीडंत्यभयादिने ॥१९॥ अन्येचपशवःक्रूराःसौम्यसत्त्वैःस
मागताः॥ ऋषेस्तस्यप्रभावेणसौभरेर्विश्रुतौजसः॥२०॥तमाश्रमंसमालोक्यदृग्भिस्तंसौभरिंमुनिं॥अर्जुनायसमाचख्युश्चा
रास्तेहर्षनिर्भराः॥२१॥ ॥जैमिनिरुवाच॥ ॥ततोऽर्जुनोमहाबाहुर्यौवनाश्वोवृषध्वजः॥ सात्यकिःकृष्णपुत्रश्चपंचैतेतंमुनिंय
युः॥२२॥ अद्राक्षुस्तेसौभरिंतंतपस्विनमुपस्थितं ॥ अध्यापयंतंशिष्यांश्चऋक्सामयजुषीसदा॥२३॥ वेदांतादीनिशास्त्राणि
पाठयंतमृषीन्बहून् ॥ अर्जुनस्तंनमस्कृत्यतान्मुनीनब्रवीद्वचः ॥ २४॥ ॥अर्जुनउवाच॥ ॥तपस्विन्धर्मराजस्यभ्राताऽहंह
यमेधिकं ॥ हरिंरक्षन्समायातःसोऽश्वोदृषदितास्थितवान् ॥ २५ ॥ अस्माभिर्निहताः शूराबांधवाःकुरवोरणे ॥ तत्पापनाशना ॥४१॥
र्थंहिमखआरब्धएषनः॥ २६ ॥ तस्मादपिवयंपापान्मुच्यामोदृषदोहयः ॥ तमुपायंवदविभोसौभरेऽस्यांश्चकारणं ॥ २७॥

१ खिन्नतामित्यर्थः । २ लुप्तोपमेयम् । ३ शिलायाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ ॥ततोमुनिःसौभरिरस्यवाक्यंश्रुत्वाजहासाखिलशास्त्रकर्त्ता ॥ शृण्मोऽर्जुनंकृष्णमुखेनगीतांवाचंसमग्रां हृदिधारयंतं ॥ २८ ॥ निशम्यतांबंधुजनामयातेहताइतिव्यर्थमवीवदस्त्वं ॥ वृथाऽश्वमेधश्रमएषवोऽयंसाक्षाद्धरिस्तिष्ठतितन्नवेत्सि ॥२९॥ वृथाभ्रमोवरीवर्त्तिकुरवोयुधिपातिताः॥केनकोहन्यतेहंताकस्यहिंस्योऽपिकस्यकः ॥३०॥ इतियोवक्तिवक्ताकोयस्मादेतत्तमाश्रये॥ ॥अर्जुनउवाच॥ ॥तदश्राविमयाविप्रकुरुक्षेत्रेहरेर्वचः॥३१॥दूरंकृत्वाधर्मराजंतस्मान्नहृदिसंस्थितं॥भ्रमोऽयंमेयथागच्छेत्तथाकुरुमहामते ॥ तावद्देहेनृणांमोहोयावन्नोसाधुसंगतिः ॥ ३२ ॥ ॥सौभरिरुवाच ॥ ॥ संसारोऽयंहरेर्मायासमुद्राःसरितस्तथा ॥ पर्वतावृक्षगुल्मादिलताःसर्वंचराचरम् ॥ ३३ ॥ यद्दृश्यंतदनित्यंस्यात्सनित्योमधुसूदनः ॥ तंध्यायन्जगतांनाथमश्वमेधशतैर्वृथा ॥ ३४॥ पृष्ठतस्तंहरिंकृत्वाप्राकृतंहरिमग्रतः॥ कृत्वायदागतस्तस्माज्ज्ञानमूढप्रशंससे ॥ ३५॥ कल्पवृक्षंसमुत्सृज्यएरंडंचकिलेच्छसि ॥ चिंतामणिंसमासाद्यकाचाख्यंपरिवांछसि ॥ ३६ ॥ संसारेऽस्मिन्नसारेहिदेहवान्जायतेनरः ॥ तास्मिन्देहेचाकिंसारंपूयासृक्श्लेष्मगंधिनि ॥ ३७ ॥ पृथ्व्यप्तेजोवायुखानिगूढास्थिलगसृग्दृशः ॥ प्राणादिदशकोशाश्चपंचभ्यःसंभवंतिहि ॥ ततोदेहश्चभवतिसव्यसाचिन्स्वरूपतः ॥ ३८॥ आस्थास्यतेदेहस्थितिंतु पार्थसुरूपतांप्राप्तमप्यस्थिरंस्यात् ॥ तस्मिन्सुरूपःपुरुषःपुराणःप्रविश्यलीलांकुरुतेजनार्दनः ॥ ३९ ॥ तेनापिप्रेरितायूयमश्वमेधंप्रकुर्वते ॥ कुरुध्वंतस्यविष्णोर्हिमायाकर्त्रीनधर्मराट् ॥ ४० ॥ ॥ अर्जुनउवाच ॥ ॥ युष्मत्प्रसादान्मायानोगमिष्यतिनसंशयः ॥ शिलायाःकारणंब्रूहिविस्तरेणाथसौभरे ॥ ४१ ॥ ॥सौभरिरुवाच॥ ॥ शृणुपार्थमहाबाहोशिलेयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणीपुरा ॥ आसीदुद्दालकमुनेर्भार्याचंडीतिविश्रुता ॥ ४२ ॥ विवाहसमयेविप्रैर्भर्तृवाक्यंसदाकुरु ॥ इत्यर्सद्भिश्चचण्डी
सानियुक्तापावकांतिके ॥ ४३ ॥ साबालभावात्प्रोवाचभर्तृवाक्यंकदाचन ॥ नकरिष्यामिभोविप्राःसत्यंसत्यंवदामिवः॥४४॥
तस्यावचनमाकर्ण्यविप्राःप्रोचुर्महोत्सवे ॥ ॥ विप्राऊचुः ॥ ॥ विस्मयोऽत्रनकर्तव्यःकन्यावक्तीदृशंवचः ॥ ४५ ॥ उद्दाल
कोऽपितांचण्डीमानयत्स्वेनिवेशने ॥ बालत्वान्नप्रयुक्तासागृहकर्मणिमानद ॥४६॥ अग्निहोत्रस्यशुश्रूषांकुरुतेसस्वयंमुनिः॥
दिनैःकतिपयैरेवप्रौढांतामवलोक्यसः ॥ ४७॥ प्रोवाचकुरुभद्रंतेशुश्रूषांकृष्णवर्त्मनः ॥ पुत्रास्तवभविष्यंतिवीर्यवंतोबहुश्रु
ताः ॥ ४८॥ तच्छ्रुत्वावचनंतस्यकोपादरुणलोचना ॥ नकरिष्येऽग्निशुश्रूषांपुत्रैःकिंमेप्रयोजनम् ॥ ४९ ॥ सएवंब्राह्मणःक्षि
प्रंकमण्डलुमयाचत ॥ तंकमण्डलुमादायकराभ्यांधरणीतले ॥ ५० ॥ आस्फोटयामासततोब्राह्मणोविस्मितोऽभवत् ॥ रा
त्रौसशयनेतिष्ठन्नेकाकीवाक्यमब्रवीत् ॥५१॥ ॥ उद्दालकउवाच॥ ॥ त्वांनवक्ष्येकिंचिदहंमाशेथादूरतोमम ॥ गृहाद्विनिष्क्र
म्यबलाद्बहिश्चंडीस्थिताभवत् ॥ ५२ ॥ उद्दालकोब्राह्मणपुंगवोसौचंड्यातयाविह्वलतांजगाम ॥ किंचिन्नसंध्यादिककर्मक
र्तुंशशाकपर्वस्वपितर्पणादि ॥ ५३ ॥ एकदातद्गृहंप्राप्तःकौंडिन्योमुनिसत्तमः ॥ तीर्थयात्राप्रसंगेनशिष्यैःपरिवृतःशुभैः॥५४॥
उद्दालकोऽर्घदानेनपूजयामासतंमुनिम् ॥ पूजितःसुखमासीनःकौंडिन्योमुनिरब्रवीत् ॥ ५५ ॥ ॥ कौंडिन्यउवाच ॥ ॥ क
स्मात्कृशोऽसिभोविप्रचिन्तयाप्रवृतोऽसिकिम् ॥ पुत्राःकियन्तःकन्याश्चतवसंतितपोधन ॥ ५६ ॥ ॥ उद्दालकउवाच ॥ ॥
नमेपुत्रानमेकन्याजायामेदुष्टभाषिणी॥यद्यद्वदामितांदुष्टांतत्तन्नैवकरोतिसा ॥ तयामेनप्रकर्तव्यंवचनंकल्पकोटिभिः ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परंपित्र्यंश्राद्धमस्तिकरणीयंततोऽभृशम् ॥ कृशश्चिंतापरोब्रह्मन्शाधिमांस्त्रीवशंगतम् ॥ ५८॥ तदालपितमाकर्ण्यप्रहसन्न
ब्रवीन्मुनिः ॥ कर्णेलगित्वाशनकैर्विपरीतंवचोवद ॥ ५९ ॥ माऽग्नेःशुश्रूषणंकार्षीर्मादामह्यंकमंडलुम् ॥ इत्यादिवचनंब्रूया
स्त्वमुद्दालकतांस्त्रियम् ॥ ६० ॥ इतोद्वियोजनंतीर्थंगौतमेनाभिपालितम् ॥ तद्दृष्ट्वात्रागमिष्यामिश्राद्धमारभ्यतामिति ॥ त
द्वचोमृतमापीयचंडींवाक्यमथाब्रवीत् ॥ ६१ ॥ ॥ उद्दालकउवाच ॥ ॥ प्रातरेष्यतिकौंडिन्योगृहान्निष्कासया
मितम् ॥ तस्मैभोजनवस्त्रादिनदास्येऽहंकदाचन ॥ ६२ ॥ ॥ चंडयुवाच ॥ ॥ तंभोजयेचार्चयेऽहंवस्त्रैःपुष्पैःसुशो
भनैः ॥यदाप्रोवाचसाचंडीहर्षितोऽभून्मुनिस्तदा ॥ ६३ ॥ अनयैवपरंबुद्ध्याश्राद्धंकर्त्तापरेऽहनि ॥ इतिमत्यासमालोच्यरात्रौ
जायांततोऽब्रवीत् ॥ ६४ ॥ दूराद्दूरेत्वयाचंडिशयनंकार्यमद्यवै ॥ इत्युक्तासातदाचण्डीशय्यामेकामुवासस ॥ ६५ ॥ पुनः
प्रोवाचविप्रोसौहर्षाविष्टमनास्तदा ॥ भविताश्वःपितुःश्राद्धंकरिष्येऽहंनचंडिके ॥ ६६ ॥ ॥ चंडयुवाच ॥ ॥ प्रभातेतेपितुः
श्राद्धंकरिष्येऽहंयथोचितं ॥ श्वशुरस्ययथातृप्तिर्भविष्यतिसुखान्विता ॥ ६७ ॥ ॥ उद्दालकउवाच ॥ ॥ नरात्रौब्राह्मणमहं
गच्छाम्यामंत्रितुंक्वचित् ॥ काणंखंजंश्यामदंतंकुब्जंविप्रंनिमंत्रये ॥ ६८ ॥ मूर्खंसूचकमप्रीतंवेदहीनमवैष्णवम् ॥ व्यंगंद्यूतर
तंनष्टंसरोगंवृषलीपतिम् ॥ ६९ ॥ ॥ चंडयुवाच ॥ ॥ अहंद्विजोत्तमान्विप्रान्वेदशास्त्रपरायणान् ॥ कुलीनान्संमतान्पु
त्रपौत्रभार्यासमन्वितान् ॥ ७० ॥ आमंत्रयित्वाऽद्यनिशिप्रभातेतान्समानये ॥ नत्वदीयंवचस्तथ्यंकरिष्यामिकदाचन ॥ ७१ ॥
॥ उद्दालकउवाच ॥ ॥ यदिश्राद्धंहठादेवक्रियतेचंडिमंदिरे ॥ मदीयंवाक्यमुल्लंघ्यतन्नमेसुखदायकम् ॥ ७२ ॥ अश्राद्धीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 निधान्यानितान्येवाहंसमानये ॥ श्रद्धयारहितंश्राद्धंकरिष्येचंडिनान्यथा ॥ ७३ ॥ चणकानाहरिष्यामिकोद्रवान्वर्तुलान
पि ॥ मसूरान्राजमाषांश्चकुलित्थानाढकीःपुनः ॥ ७४ ॥ बावनालांश्चनिष्पावान्वरटांश्चमठानपि ॥ खर्जूरकांश्चित्रपत्रा
न्श्राद्धेशाकंचकुत्सितम् ॥ ७५ ॥ वृंताकंगृंजरंचैवचिल्लीकोशातकीफलम् ॥ कूष्मांडकंकलिंगंचपिंडींपिण्डालकंतथा ॥ ७६ ॥
अलाबुंवर्तुलंझिंटींतंदूलीयंचपल्लवम् ॥ ॥ चंड्युवाच ॥ ॥ गोधूमांस्तण्डुलान्मुद्गान्माषांश्चैवमनोरमान् ॥ ७७ ॥ आनीया
हंकरिष्यामिपायसंमण्डकानपि ॥ मोदकान्फेणिकारम्याभक्तंकुमुदसन्निभम् ॥ ७८ ॥ गव्यंघृतंतथाक्षीरंसितारम्भाफला
निच ॥ सहकाररसंस्वादुप्रियांशिखरिणींगृहे ॥ ७९ ॥ कालेचकुतुपेश्राद्धंश्रद्धायुक्तंसवस्त्रकम् ॥ सदक्षिणंपूतशाकैर्धेनुदानेन
संयुतम् ॥ ८० ॥ इतिचण्डीवचःश्रुत्वामुनिःप्रोवाचतांप्रियाम् ॥ ॥ उद्दालकउवाच ॥ ॥ प्रसभंक्रियतेश्राद्धंपितॄणांतत्रमे
ऽहितम् ॥ ८१ ॥ अहंनीलीमयंवस्त्रंपरिधास्येसुशोभने ॥ दुष्टतैलेनदीपांश्चकर्त्तास्म्यसुकृतेच्छया ॥ ८२ ॥ ॥ चंड्युवा० ॥
मनोरमंगृहंकुर्यांतिलतैलेनदीपकान् ॥ मयाकृतान्शुचीन्वस्त्रैस्तादृशैःपरिवर्जितम् ॥ ८३ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततो
विप्रःप्रसन्नात्माचेतसानबहिःस्थितः ॥ तयाबुद्ध्यापितुःश्राद्धंसर्वंचक्रेनराधिप ॥ ८४ ॥ यावदुक्ताद्विजाःसर्वेयावद्दत्तंधनंतथा ॥
वस्त्रादिकंस्वयंभुक्तःसाचंडीचतथानृप ॥ ८५ ॥ तावद्रात्र्यागमेमोहादिदंवचनमब्रवीत् ॥ ॥ उद्दालकउवाच ॥ ॥ गृहीत्वा
चंडिपुटकंपिंडानांजान्हवीजले ॥ ८६ ॥ सुपूजितंपातयाशुश्रुत्वासागोमयावटे ॥ पिण्डांश्चिक्षेपवेगेनसमुनिःकोपपूरितः ॥
॥ ८७ ॥ तांशशापशिलादुष्टेभविष्यसिममाज्ञया ॥ चिरकालंहयस्यांगंस्पृष्ट्वामुक्ताभविष्यसि ॥ ८८ ॥ यज्ञार्थंभ्रममाण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यसेयंपार्थमहाशिला ॥ इमांमोचयभद्रंतेकरस्पर्शान्महाबल ॥ ८९ ॥ कृतंपार्थेनतत्सर्वंमुक्तःसतुरगोययौ ॥ चण्डीशापभ
यान्मुक्ताअंगस्पर्शात्तदाहरेः॥ ९० ॥ तदाबभूवसाचण्डीभर्तुर्वचनकारिणी ॥ उद्दालकोऋषिवरःपत्न्यासहमुमोदह ॥ ९१ ॥
॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेशिलामोक्षोनामषोडशोऽध्यायः॥१६॥ ॥छ॥ ॥ जैमिनिरुवाच ॥ ॥ मुक्तःसतुरगःशी
घ्रंप्रययौचंपकांपुरीं ॥ हंसध्वजेनवीरेणपालितांप्रमदामिव ॥ १ ॥ पृष्ठतोऽस्यजगामाशुकुंतीपुत्रोधनंजयः ॥ वीरैःपरिवृतोघो
रैःप्रद्युम्नप्रमुखैर्नरैः ॥ २ ॥ मुक्तामालावृतैर्दिव्यैर्वासोभिर्वेष्टितैःशुभैः ॥ ततोहंसध्वजोराजाश्रुत्वादूतमुखाद्धयं॥३॥प्राप्तंस्ववि
षयेवीरंपालयंतंतुरंगमं ॥ चिंतयामाससचिवैःसार्धंबंधुभिरात्मजैः॥४॥ ॥ हंसध्वजउवाच॥ ॥किंपार्थतुरगंप्राप्तंगृण्हामिस्वब
लाद्रणे ॥ व्यूह्यसैन्यंस्वविषयंपालयामिमहाबलात् ॥ ५ ॥ महालाभश्चभवितादृश्यतेहरिसेवकः ॥ यत्रार्जुनस्तत्रहरिःस्वयं
तिष्ठत्यसंशयं॥६॥नमयावीक्षितःकृष्णोवृद्धेनापिस्वचक्षुषा॥ तस्मान्निर्यांतुमेवीरायुद्धार्थेयाम्यहंरणं ॥७॥ ॥ जैमिनिरुवाच॥
ततोहंसध्वजोराजाऽप्याजगाममुदान्वितः ॥ सप्ततिंनायकानांसगृहीत्वाप्रमुखेस्थितः ॥ ८ ॥ नायकेनायकेसैन्यंयत्नेनपरिर
क्षितं ॥ तच्छृणुष्वमहीपालपुष्टंमानधनैःसदा॥९॥गजानांभूरिमत्तानांसहस्राण्येकसप्ततिः॥ रथानामपिनद्धानांसहस्राण्येक
सप्ततिः ॥ १० ॥ हयानामपिरूढानांलक्षंचैवातिभासुरम् ॥ पदातीनांसहस्राणियूनांत्रिनवतिर्नव ॥ ११ ॥ सर्वेतेवैष्णवावी
राःसदादानपरायणाः ॥ एकपत्नीव्रतयुताःसंमतास्तेप्रियंवदाः ॥ १२ ॥ समागतंजनंक्वापिसेवितुंतंजनाधिपम् ॥ दूरदे
शादपिप्राप्तंराजातंपरिपृच्छति ॥ १३ ॥ एकपत्नीव्रतंतातयदितेविद्यतेऽनघ ॥ ततस्त्वांधारयिष्यामिसत्यमेतद्ब्रवीमिते॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 नशौर्यैनकुलीनत्वंनचक्रापिपराक्रमः ॥ स्वदाररसिकंवीरंविष्णुभक्तिसमन्वितम् ॥ १५ ॥ वासयामिगृहेराष्ट्रेतथाऽन्येऽपिहिसै
 निकाः ॥ अनंगवेगंस्वांतेयेधारयंतिमहाबलाः ॥ १६ ॥ ॥ जैमिनिरुवाच ॥ ॥ प्रददातिधनंभूरिस्वभृत्येभ्योयथोचितम् ॥
सुमतिःसुगतिस्तुष्टःश्रद्धालुस्तस्यनायकाः ॥ १७ ॥ सचिवाःपांतितत्सैन्यंयथाभूतंनृपस्यतु ॥ भ्रातरश्चापिबलिनोविदूरथ
मुखाहिते ॥ १८ ॥ चंद्रसेनश्चंद्रकेतुश्चंद्रदेवोमहाबलः ॥ न्यायवर्तीधनबलोधर्मवाहोतिसुंदरः ॥ १९ ॥ पुत्रास्तस्यापरंपंचसु
बलःसुरथःसमः ॥ सुदर्शनःपंचमश्चसुधन्वाऽपिमहाबलः ॥ एवंविधेनसैन्येनास्थितःपार्थबलंप्रति ॥ २० ॥ हंसकेतुस्ततःसै
न्यंव्यूहयामाससत्वरः ॥ दुंदुभिंताडयामासगजारूढोजगामसः ॥ २१ ॥ निर्गच्छंतततोवीरास्तेनाज्ञप्ताःपुराद्बहिः ॥ कश्चि
त्कवचमादायपूजयामासमारिष ॥ २२ ॥ तानिशस्त्राणिचास्त्राणिहुत्वाचैवहुताशनम् ॥ तथाऽन्येनिर्गतावीराःसर्वेतेसमसाह
साः ॥ २३ ॥ भोजयित्वाद्विजगणान्पायसेनघृतेनच ॥ निर्ययुस्तेरथैरेवगजैर्मत्तैस्तथाऽपरे ॥ २४ ॥ हयैरन्येप्रार्थयंतस्तत्रयु
द्धंभयानकम् ॥ चामरच्छत्रिणःसर्वेसिंहनादंप्रचक्रिरे ॥ २५ ॥ तेषांप्रियाःस्थिताःसर्वाःप्रासादमधिकौतुकम् ॥ प्रासादस्था
श्चपश्यंत्यःप्रब्रुवंत्यश्चशोभनम् ॥ २६ ॥ काचिज्जगादवाक्यंतुप्रियांतांसुंदरींप्रति ॥ सखियुद्धेप्रयात्येषभर्तातेकेशवार्जुनौ ॥ २७ ॥
अधरेतवकिंभद्रेकृष्णोयंदृश्यतेव्रणः ॥ तत्कथंलज्जसेनैवभवतीव्रणदर्शनात् ॥ २८ ॥ तामुवाचापरातत्रमाधवंनतवाधरः ॥ स
मुच्चरतिदुष्टेऽसौभर्त्तायुक्तंप्रशासति ॥ २९ ॥ एतज्जातंसुंदरंमेविकीर्णास्तेकथंकचाः ॥ पररंध्रेषुसर्वेषांदृष्टिर्गच्छत्यचेतसां ॥
॥ ३० ॥ धीमतांसुकृतेयातिनात्रकार्याविचारणा ॥ वरंसाधुसमीपेहिकृच्छ्रेणवसतांनृणां ॥ ३१ ॥ नराज्यंत्वसतांपार्श्वेधिया

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यंहिसतोविना ॥ एतच्छ्रुत्वावचस्तस्यास्तदासागजगामिनी ॥ ३२ ॥ प्रत्युवाचहसंतीवमूढेकृष्णंनपश्यसि ॥ त्वयामयाऽत्र ज्ञातव्यंकिमप्यस्तिमहारणे ॥ ३३ ॥ ललाटंसव्रणंपश्यहंसगद्गदभाषिणि ॥ सर्वत्रभावलाभार्थंनराःकुर्वंतिसुक्षतम् ॥ ३४ ॥ स्त्रीशरीरमिदंमूढेतत्त्वंवेत्सिनचात्मनः ॥ इमांपृच्छामिसुदतींपरंकौतूहलंहिसे ॥ ३५ ॥ चंदनंवरमाल्यानिवासांसिरुचिराणि च ॥ परिम्लानानिमंदायाःकिमेतत्कारणंवद ॥ ३६ ॥ ॥ सुंदर्युवाच ॥ ॥ ललाटंसव्रणंमन्येभद्रायाःसखिमंडितम् ॥ कृष्णेनात्रपदंदत्तंवदंतिकिलयोगिनः ॥३७॥ नवक्तव्यंपुनश्चैवंपांडवस्यतुरंगमम् ॥ गृहीतुंयांतिकुशलामरालध्वजसैनिकाः ॥ ॥ ३८ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोदुंदुभिनादेननिर्गताःक्षत्रियारणे ॥ नीतःकटाहस्तैलेनपूरितोराजशासनात् ॥ ३९ ॥ ननिर्गच्छतियःकश्चित्कटाहेतैलपूरिते ॥ पात्यतेज्वलितेघोरेनप्तापुत्रसहोदराः ॥ ४० ॥ आज्ञाभंगोनरेंद्राणांविप्राणांमान खंडनम् ॥ पृथक्शय्याचनारीणामशस्त्रवधउच्यते ॥ ४१ ॥ आज्ञाभंगंनरेंद्राणांनकरोतिनरःक्वचित् ॥ शंखंपुरोहितंचक्रेतेना यंतीव्रशासनः ॥ ४२ ॥ राज्ञःपुरोहितश्चास्यनीतिशास्त्रविशारदः ॥ फलान्यपहृतान्यासन्भ्रातुस्तेनमहात्मना ॥ ४३ ॥ छिन्नं बाहुयुगंस्वंहिसतामाज्ञाविचिंत्यताम् ॥ पुरोहितवशाद्राजानीतिज्ञःसर्वदाधराम् ॥४४॥ सम्यक्पालयमानोऽसौरणेजेतापरा न्स्थितान् ॥ एवंविधंकटाहंतंविलोक्यनृपशासनात् ॥ ४५ ॥ सुधन्वाप्रथमंपुत्रोनिर्ययौनृपतिंप्रति ॥ नमस्कृत्याथजननींगृ हीत्वापरमंधनुः ॥ ४६ ॥ अवदन्मातरंयुद्धेपार्थंगच्छामियोधितुम् ॥ हरिंतमानयिष्यामिरक्षितंपांडवेनहि ॥४७॥ ॥ मातो वाच ॥ ॥ गच्छपुत्रहरिंयुद्धेविजित्यममसन्निधौ ॥ हरिंचतुष्पदंत्यक्त्वातंसमानयमुक्तिदम् ॥ ४८ ॥ बहुधानारदःप्राहतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कृष्णस्यचेष्टितम् ॥ मद्भर्त्रा विजितावीराबहवोऽपिरणांगणे ॥ ४९ ॥ नचैकःकंसहंताऽयंभुविदृष्टःस्वचक्षुषा ॥ रात्रिंदिवाहरिं
 ब्रूतेतंपश्यामितथाकुरु ॥ ५० ॥ बहुधाकुरुतत्कर्मयेनतुष्यतिकेशवः ॥ नत्वयंवशतामेतिदूराद्दूरंपलायते ॥ ५१ ॥ चक्षुर्विषय
मापन्नःपश्यभाग्यंमहाबलः ॥ पार्थंधारयभद्रंतेवशगस्तेहरिर्भवेत् ॥ ५२ ॥ स्वभक्तंनत्यजत्येषमनाक्पुत्रमयाश्रुतम् ॥ यथा
वनगतंवत्संत्यक्त्वानायातिसौरभी ॥ ५३ ॥ तथाऽपत्सुनकृष्णोऽपिस्वजनंपरिमुंचति ॥ तदग्रेनभयंकार्यंकृष्णाद्भीतोनजीवति
॥ ५४ ॥ प्रहसिष्यंतिमांसर्वेलोकाःसंबंधिनस्तथा ॥ तवभद्रेसुतःकृष्णंनिरीक्ष्यविमुखोऽभवत् ॥ ५५ ॥ तथाविधंनकर्तव्यंपुत्र
सूचकभाषितम् ॥ मयाऽद्यहर्षःक्रियतेपतनेतवपुत्रक ॥ ५६ ॥ यत्तुलोकविरुद्धंचपुत्रंप्रतिभवेद्वचः ॥ नचेतासिमदीयेऽत्रजायते
लोकभाषितम् ॥ ५७ ॥ हरेःकिंसंमुखःपुत्रपतितःपतितोभवेत् ॥ तेनैवचोद्धृताःसर्वेआत्मनाचैकविंशतिः ॥ ५८ ॥ रोदनंपुत्रताः
सर्वाःकुर्वंतुभुवियोषितः ॥ यासांपुत्राश्चपौत्राश्चनव्रजंतिहरिंप्रति ॥ ५९ ॥ ॥ सुधन्वोवाच ॥ ॥ सर्वंतेभाषितंमातःकरि
ष्येहरिमानये ॥ पौरुषंहिमयाकार्यंजयोदैवेप्रतिष्ठितः ॥ ६० ॥ तवोदरेनसंजातस्तत्रचेत्केशवंप्रभुम् ॥ विलोक्यविमुखोभूयां
गच्छेयंसद्गतिंनाहि ॥ ६१ ॥ ॥ जैमिनिरुवाच ॥ ॥ एतावदुक्त्वावचनंयावद्गच्छतिवीर्यवान् ॥ तावन्नीराजितःसम्यक्तया
कुवलयानृप ॥ ६२ ॥ लाजैश्चसुमनोभिश्चगंधैश्चोच्चैःपुनःपुनः ॥ कंठेमालांपातयित्वाभगिनीवाक्यमब्रवीत् ॥ ६३ ॥ ॥ कुव
लोवाच ॥ ॥ योद्धुंधनंजयंयासिसाधुयोधयबांधव ॥ दारुणोममवासोऽयंश्वशुरस्यगृहेसदा ॥ ६४ ॥ ज्येष्ठादयोहसंतीमेदे
वराश्चप्रहासिनः ॥ मांतत्रनिवसंतींतुयज्ञगुस्तत्परंशृणु ॥ ६५ ॥ कुवलेजनकस्तेयंमूर्खएवोपलक्ष्यते ॥ ब्रूतेकृष्णंप्रजेष्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिययथाकाशीश्वरोजितः ॥ ६६ ॥ स्वदेहेननशक्नोतिबलेनसहितःपुरीम् ॥ रम्यांद्वारवतींमंदोगंतुंजेतुंतमिच्छति ॥ ६७॥
॥ सुधन्वोवाच ॥ ॥ कुवलेपितृवाक्यंतद्देवराणांचभाषितम् ॥ सर्वंसत्यंकरिष्यामिसत्येनायुधमालभे ॥ ६८॥ नमस्कृत्या
त्रभवतींरणेयामिहरिंप्रति ॥ एतावदुक्त्वावचनंबाह्यांकक्ष्यामगात्तदा ॥ ६९ ॥ ततोददर्शतांदेवींचारुनेत्रपयोधराम् ॥ अग्र
तश्चंदनयुतांसहितांचंद्रकेणतु ॥ ७० ॥ सांभोजैश्चंपकैःपात्रंकांचनस्यसदीपकम् ॥ गृहीत्वासंस्थितातन्वीछन्नंदूर्वाक्षतैरपि
॥ ७१ ॥ कर्पूरपुलकोद्भूतैर्दीपैःपञ्चशिखैर्नवैः ॥ सारणद्वलयाबालाचारुनूपुरमेखला ॥७२॥ कौशेयंबिभ्रतीशुभ्रंकंचुकींपुष्प
रागिणीम् ॥ मुक्तामालांसुकंठेचमुखरागंतथाऽरुणम् ॥ ७३ ॥ अर्चयामासतंवीरंपतिंपतिपरायणा ॥ निरीक्षन्तीचभर्तारंत
दादृष्ट्याऽतिवक्रया ॥ ७४ ॥ तथाविधेनपात्रेणपुनर्नीराजयत्यसौ ॥ नीराजयित्वास्वंकांतंप्रत्युवाचमनास्विनी ॥ ७५ ॥ ॥
॥ प्रभावत्युवाच ॥ ॥ पश्यामिवदनंनाथकृष्णदर्शनलालसम् ॥ तावकंमांपरित्यज्यकुतोयास्यसिवैक्षणम् ॥ ७६ ॥ एकप
त्नीव्रतंनष्टंतवपश्यामिसाम्प्रतम् ॥ ययावृतोसियांयासिसानतुल्याभवेन्मम ॥ ७७ ॥ सासर्वगामिनीनाहंसद्भिःकस्मात्प्रव
र्ण्यते ॥ पितागच्छतियामेवपुत्रस्तामेवगच्छति ॥ ७८ ॥ ईदृशीहृदयेमुक्तिस्तवजागर्तिसर्वदा ॥ तांप्रदास्यतिगोविंदोमत्वाग
च्छसिसत्वरं ॥ ७९ ॥ पुंसांचित्तंक्षणंयातिसुरनारीनिषेवणे ॥ विवेकोनैवजनितःपुत्रस्तस्मात्किमाहवे ॥ ८० ॥ लौल्याद्गच्छ
सिकृष्णाग्रेहरिंवीक्ष्यनसाप्रिया ॥ भवित्रीतेमहाबाहोप्रियैकाहंपुनर्गृहे ॥ ८१ ॥ ममसङ्गात्त्वयालब्धोविवेकाख्योहिपुत्र
कः ॥ विवेकस्त्वांतुगच्छंतंनवारयतिदेहजः॥ ८२ ॥यथानरोऽपरांयातितथानारीनगच्छति ॥ गतेत्वयिगमिष्यामिमोक्षंचेन्नत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौपरः ॥ ८३ ॥ विवेकसुतसपन्नांमांगृहोत्वाभविष्यसि ॥ संसारेऽस्मिन्महाघोरेकृतकृत्योनसंशयः ॥ ८४ ॥ विवेकोरक्षते
नित्यंममनाथकलेवरम् ॥ अन्यानार्योऽपिगच्छंतिविवेकरहिताःपरम् ॥ ८५ ॥ बालत्वेजनितःपुत्रोविवेकस्तेनकश्मलम् ॥
विंदाम्यहंव्रजंतीतत्कैवल्यंप्रतिमारिष ॥ ८६ ॥ गतेत्वयिगमिष्यामिमोक्षंवीरत्वयासह ॥ वक्रेवक्रंप्रकर्तव्यंधन्येधन्यंसमाच
रेत् ॥ ८७ ॥ आदावेवगमिष्यामिचिंतयन्तीतवाननम् ॥ मुक्तिस्त्वांतुहसंतीवभयान्ममममहामते ॥ ८८ ॥ स्वनारींयःपरित्य
ज्यप्रार्थयत्येषमामिति ॥ साध्वींतथाविधांभूमौविवेकेनावृतांनृप ॥ ८९ ॥ नाथश्रद्धांनपश्यामितवभावप्रवर्तिनीम् ॥ कथि
तासाययामुक्तिरर्चनान्माधवस्यतु ॥ ९० ॥ पादौतस्याःपातनीयौछित्त्वानूनंमयानृप ॥ स्वमंदिरंयथाचेयंनगच्छतिपरंजनं ॥ ९१ ॥
श्रेयोहिभाषितंतस्याविविधंचौषधंहितम् ॥ विनाकृष्णाश्रयादन्यंकथयिष्यतिकारणम् ॥ ९२ ॥ मुखमस्यावृतंविद्धिपांसुभि
र्हरिसंभवैः ॥ एवंसंचिंत्यगच्छाशुयत्रगंतुंसमुद्यतः ॥ ९३ ॥ ॥ सुधन्वोवाच ॥ ॥ प्राप्यतेसामयाभद्रेत्वत्संगान्नात्रसंश
यः ॥ मत्पौरुषमतिक्रम्यवचःप्रोक्तमिदंत्वया ॥ ९४ ॥ वचसाऽनेनमेकामस्तिष्ठन्नपिविनिर्गतः ॥ योद्धुंप्रयामितंकृष्णंमोक्षंप्राप्नु
हिशोभने ॥ ९५ ॥ चंदनंवरवासांसिकांचनंरत्नसंचयम् ॥ शरीरंचापिमेचित्तंत्यक्त्वागच्छतुभामिनि ॥ ९६ ॥ यद्यहंत्वांपुरावे
द्मिकैवल्यरसिकांगृहे ॥ विवेकोत्पादनेयत्नंनकर्त्तात्वादृशींप्रति ॥ ९७ ॥ ॥ प्रभावत्युवाच ॥ ॥ नाथगच्छसिसंग्रामेपार्थं
योद्धुंमहाबलम् ॥ विवेकाख्योऽपितनयोहृदयेममतिष्ठति ॥ ९८ ॥ सचेन्मूर्तिंदर्शयतिस्वांतथाकुरुमेप्रियम् ॥ जलदंनात्रप
श्यामिसुस्नाताऽहंगतेत्वयि ॥ ९९ ॥ ॥ सुधन्वोवाच ॥ ॥ निरीक्ष्यकृष्णंपार्थंचपुनरायामितेंऽतिकम् ॥ विजित्यपंचभिर्बाणैःस

१ अञ्जलिदातारं पुत्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंगौतौप्रभावति ॥ १०० ॥ ॥ प्रभावत्युवाच ॥ ॥ येप्राप्तामाधवंद्रष्टुंदृष्टोयैर्मधुसूदनः ॥ नयांतितेपुनरपिसंसारेस्मिन्क
दाचन ॥ १ ॥ तत्प्रियावचनंश्रुत्वासुधन्वावाक्यमब्रवीत् ॥ यदिजानासिदेवित्वंकृष्णस्यकिलदर्शनात् ॥ २ ॥ पुनरागमनंना
स्तिजलदंयाचसेवृथा ॥ ॥प्रभावत्युवाच ॥ ॥ प्राप्नुवंतिपदंविष्णोस्त्तएवसुतसंयुताः ॥ ३ ॥ सुतानुत्पाद्यसंप्राप्तौपदंतौ
शुकनारदौ ॥ सुताननंनपश्यंतिज्ञेयास्तेऋणिनोभुवि ॥ ४ ॥ पराशांसफलांकृत्वायेव्रजंतिहिसाधवः ॥ तेषांचिंतितकार्याणि
जायंतेनात्रसंशयः ॥ ५ ॥ पराशांविफलांकृत्वायेव्रजंतिधरातले ॥ तेषांचिंतितकार्याणिनसिद्ध्यंतिकदाचन ॥ ६ ॥ ॥ सुध
न्वोवाच ॥ ॥ राजानंकिंनजानासिभद्रेत्वंतीव्रशासनम् ॥ एषघोरःसभयदोरोरवीतिचदुंदुभिः ॥ ७ ॥ कटाहंतैलसंपूर्णंसुत
प्तंबलनिर्गमे ॥ क्षेप्तव्यस्तत्रशीघ्रंयोनायातिरणमंडले ॥ ८ ॥ रात्रौयद्दीयतेदेविऋतुदानंसुतप्रदम् ॥ साधवोनप्रशंसंतिदि
वास्त्रीसंगमंक्वचित् ॥ ९ ॥ सर्वेविनिर्गतावीरायोद्धुंपित्राज्ञयाऽर्जुनम् ॥ ॥ प्रभावत्युवाच ॥ ॥ सरागांमामजित्वाग्रेयदि
गंतुंत्वमिच्छसि ॥ १० ॥ अनंगेनावृतामेकामंगैर्बहुभिरावृताम् ॥ कथंसेनांभवान्जेतुंदिवाधीरोभविष्यति ॥ ११ ॥ कृष्ण
स्यपुरतोवीरैःकालांतकयमोपमैः ॥ गतिःकानागतेनूनंत्वयिनाथेऽद्यमामकी ॥ १२ ॥ ॥ सुधन्वोवाच ॥ ॥ मैवंवदविशा
लाक्षिदिवसाःसंतितेऽबले ॥ बहवोऽपरणेपार्थोनायंपुनरवेक्षते ॥ १३ ॥ ॥ प्रभावत्युवाच ॥ ॥ षोडशोयंचदिवसोममना
थव्यवस्थितः ॥ ऋतुभंगात्तुयत्पापंतत्त्वयाज्ञायतेप्रभो ॥ १४ ॥ पितुःश्राद्धेषोडशेवैदिवसेऋतुपूरिते ॥ एकादशीव्रतंतद्वत्त्रि
तयंसंगतंभवेत् ॥ १५ ॥ किंकर्तव्यंमहाबुद्धेसंशयेऽस्मिन्सदानृभिः ॥ धर्मः सूक्ष्मोऽतिगहनःशक्यतेकेनवर्त्तितुम् ॥ १६ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सुधन्वोवाच ॥ ॥ निर्णीतंविद्यतेदेविऋषिभिर्धर्मसंकटे ॥ सांवत्सरंतुतातस्यकर्त्तव्यंभावसंयुतम् ॥ १७ ॥ आघ्रायान्नंनि
शामध्येकुर्वीतव्रतमुत्तमम् ॥ प्रियायैऋतुदानंहिप्रदेयंधीमतागृहे ॥१८॥ धर्मशास्त्रेषुनिर्णीतंपुराधर्मार्थकोविदैः॥सांवत्सरंतुवै
श्राद्धंकर्तव्यंपितृभक्तितः ॥ १९॥ एकादशीव्रतंचापिकृष्णभक्तिसमन्वितैः ॥ ऋतुदानंहिकर्त्तव्यमर्धरात्रात्परंनरैः ॥२०॥ एष
एवपरोधर्मोगृहस्थानांवरानने ॥ सुधन्वनोवचःश्रुत्वावाक्यमाहप्रभावती ॥ २१ ॥ पितातवाहवेभातिव्रतमद्यनविद्यते ॥ ऋ
तुदानंततोनाथदत्वायाहिरणेहरिं ॥ २२ ॥ ॥ जैमिनिरुवाच ॥ ॥ एतावदुक्त्वावचनंप्राणनाथंमहाबलम् ॥ उभाभ्यामपि
हस्ताभ्यांकोमलाभ्यांवरानना ॥ २३ ॥ तंकंठेधारयामासशालंवल्लीवकानने ॥ नशशाकततोगंतुंप्रियाबाहुनियंत्रितः ॥ २४॥
विमुच्यकवचंभूमौकिरीटंचहसन्नपि ॥ तयासहदिवारेमेशयनेरत्नमंडिते ॥ २५ ॥ गर्भंदधौविशालाक्षीसुस्नातोऽभूत्सभार
त ॥ सुधन्वारथमारुह्ययावद्गच्छतिमंदिरात् ॥ २६ ॥ तावद्रणेहंसकेतुर्बलाध्यक्षमुवाचह ॥ ॥ हंसध्वजउवाच ॥ ॥
सर्वेवीराइहायाताःश्रुत्वानादंचदुंदुभेः ॥ २७ ॥ सुधन्वानंनपश्यामिरणमध्येसमागतम् ॥ ममाज्ञांकिंनजानातिकटाहोवि
स्मृतःकथम् ॥ २८॥ प्रयाणदुंदुभिरयंलंघितःपुत्रकेणकिम् ॥ हरयोमेहरिंप्राप्तागजामत्ताधनंजयम् ॥ २९॥ सुधन्वनापृष्ठ
तःकिंक्रियतेकर्मकुत्सितम् ॥ तस्माद्गच्छंतुयवनाःसबलामुद्गरान्विताः ॥ ३० ॥ केशेष्वाकृष्यतंदुष्टंविकृष्यंतुधरातले ॥ आ
नयंतुकटाहस्यपार्श्वेकृष्णपराङ्मुखम् ॥ ३१ ॥ ॥ जैमिनिरुवाच ॥ ॥ तेनाज्ञप्तास्ततोराजन्यवनाःशीघ्रकारिणः ॥
जग्मुस्तन्मंदिरंरम्यंरत्नचित्रंसुधन्वनः ॥ ददृशुस्तंसमायांतंभुक्तभोगंनृपात्मजम् ॥ ३२ ॥ प्रोचुस्तच्छासनंभर्तुर्वज्रपातोप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंतदा ॥ ॥ यवनाऊचः ॥ ॥ वयंप्राप्तामहाबाहोग्रहणेतवमारिष ॥ ३३ ॥ आज्ञाभंगःकिमर्थंहिनृपतेस्तस्यकारितः ॥ स्थितोऽसिपृष्ठतोनूनंत्वयासर्वैहिवंचितम् ॥ ३४ ॥ पित्रातववयंसर्वेप्रेषिताःस्मबलादितः ॥ नेतुंत्वांसंगरेमंदंविकृष्यचधरातले ॥ ३५ ॥ उत्तिष्ठयाहिनृपतिंपार्थसैन्यनिवारकम् ॥ पद्मव्यूहंसमाश्रित्ययुद्धशौंडैःसमावृतम् ॥ ३६ ॥ ॥ जैमिनिरु० ॥ कुपितंवचनात्तेषांज्ञात्वास्वजनकंविभुम् ॥ सहैवतैःप्रयातोग्रेरथमास्थायतद्बलम् ॥ ३७ ॥ समुद्रमिवपर्याप्तंसमन्ताद्योजनत्रयम् ॥ ददर्शपितरंवीरोधनंजयजयोत्सुकम् ॥ ३८ ॥ कुपितंपितरंवीक्ष्यनमस्कृत्यपुरःस्थितः ॥ सुधन्वानंततोराजाप्रत्युवाचरुषान्वितः ॥ ३९ ॥ ॥ हंसध्वजउवाच ॥ ॥ किमर्थंशासनंवीरमदीयंलंघितंत्वया ॥ ॥ सुधन्वोवाच ॥ ॥ जलदंतेवधूर्गेहेमत्तोयाचितुमुद्यता ॥ तस्मात्स्थिरायितंराजन्प्रयाणेऽस्मिन्मयाविभो ॥ ४० ॥ ॥ हंसध्वजउवाच ॥ ॥ ध्रुवंमूर्खतरस्त्वंहियदिकृष्णोऽत्रसंमुखः ॥ नदृष्टःसंगरेसाक्षात्त्वयानोवंचितंकुलम् ॥ ४१ ॥ स्वप्रियायैभवान्दत्वाजलदंनिर्गतःपुरात् ॥ नतेनपूर्वजानांतेतृप्तिःपूर्णाप्रजायते ॥ ४२ ॥ नत्वदीयामदीयात्रजलदेनहरिंविना ॥ नचतृप्तिमुपायांतिदुरात्मंस्तेकथंचन ॥ वरुणस्यापिनोशक्तिःपिपासापूरणेनृणाम् ॥ ४३ ॥ पुत्रिणोयदिगच्छंतिस्वर्गंमोक्षंसुताधम ॥ तदाशुनांसूकराणांस्वर्गःस्यात्तुहरिंविना ॥ ४४ ॥ हयंपालयितुंप्राप्तःसव्यसाचीमहाबलः ॥ क्षणमेकंजगन्नाथोनमुंचतिरणेऽर्जुनम् ॥ ४५ ॥ धिक्तेबलंधिग्विचारोधिग्धर्मोयंत्वयाकृतः ॥ श्रुत्वाकृष्णंपुरंप्राप्तंकथंकामेगतंमनः ॥ ४६ ॥ एवंविधंकृष्णपराङ्मुखंत्वांतप्तेकटाहेकिलनिक्षिपामि ॥ मलीमसंकामरतंकुपुत्रमाकण्ठमग्नंतिलतैलपूर्णे ॥ ४७ ॥ गच्छंतुदूतामुनिसन्निधौतुपुरोहितंमेलिखि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंचशंखम् ॥ तयोःपुरःसर्वमिदंनिवेद्यपृच्छंतुतद्भाषितमेवकर्ता ॥ ४८ ॥ तयोर्वचोनैवमयाविलंघ्यंस्वजीविताद्राज्यकरादव
श्यम् ॥ कुर्वंतुतप्तंपुनरेवतैलंपश्यंतुपार्थप्रमुखाममाज्ञाम् ॥ ४९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंतेनमहीपेनप्रेरिताःशब्द
कारिणः ॥ जग्मुःप्रष्टुंमुनींद्रौतौभ्रातरौतत्पुरोहितौ ॥ ५० ॥ ॥ दूताऊचुः ॥ ॥ नृपःपृच्छतिवांकिंचित्संशयंधर्मसंकटे ॥
सुधन्वनास्थितंपृष्ठेनृपाज्ञाचविलंघिता ॥ ५१ ॥ जलदंदातुकामेनतद्भूतंनःपुरोहितौ ॥ किंकर्त्तव्यंमयातस्यपापिष्ठस्यसुध
न्वनः ॥ ५२ ॥ कटाहस्यसमीपेतुबलादेवसुतंप्रभुः ॥ आनीयतंपातयिताभवद्भ्यांसनियोजितः ॥ ५३ ॥ तैलेतप्तेपरित्यज्य
पुत्रस्नेहंनसंशयः ॥ ॥ लिखितउवाच ॥ ॥ गच्छंतुदूतानृपतिंशंसंतुममभाषितम् ॥ ५४ ॥ स्ववचोयोनमन्दात्मासत्यंकु
र्याद्धरातले ॥ भयाल्लोभाच्चनरकेचिरंतिष्ठतिदारुणे ॥ ५५ ॥ कौशिकायददौराज्यंहरिश्चन्द्रोमहामतिः ॥ क्रीतौभार्यासुतौते
नस्वसत्यंप्रतिपालितम् ॥ ५६ ॥ हंतुंप्रियांस्थितोराजारम्येभागीरथीतटे ॥ वाराणस्यांपुत्रगात्रान्मृताद्वस्त्रंजहाररसः ॥ ५७ ॥
रामंप्रव्राजयामासवनंदशरथःपुरा ॥ स्वकंवचःकृतंसत्यंकैकेय्यैयदुदाहृतम् ॥ ५८ ॥ अमुनायत्पुराप्रोक्तंपुत्रंपौत्रंसहोदरम् ॥
आज्ञाभंगकरंतैलेसुतप्तेपातयाम्यहम् ॥ ५९ ॥ तदन्यथाभवेद्देवयावत्पुत्रोनपात्यते ॥ विमुखःकेशवंवीक्ष्यपार्थंचरथिनांवर
म् ॥ ६० ॥ गृहेस्थितःस्वकामाद्यःसतेनपरिपाल्यते ॥ आवांगच्छावहेराष्ट्राद्भ्रातरौनृपतेर्बहिः ॥ ६१ ॥ तस्मिन्राष्ट्रेनवस्त
व्यंयस्मिन्राजानसत्यवाक् ॥ तत्संसर्गाद्गुणानृणांवसतांसंभवंतिहि ॥ ६२ ॥ तत्समीपेनिवसतांपातकंहिभवेन्नृणां ॥ आस
नाच्छयनाद्यानात्संपर्कात्सहभोजनात् ॥ ६३ ॥ एतावदुक्त्वावचनंलिखितःशंखसंयुतः ॥ परित्यज्यगतःसोथदूतास्तेनृपतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गताः ॥ ६४ ॥ ब्रुवंतिसर्वेतत्प्रोक्तंराजानंप्रतिमारिष ॥ गतोनृपमहाबुद्धिर्मुनिर्ग्रामाद्रुषान्वितः ॥ तमिहानयराजेन्द्रमुनिं
धर्मोपदेशकम् ॥ ६५ ॥ ॥ जैमिनिरुवाच ॥ ॥ हंसकेतुःसमादिश्यसचिवंपुत्रपातने ॥ सुतप्तेतिलतैलेचाक्षिपदुष्टं
ममाज्ञया ॥ सुधन्वानंमयिगतेत्वंधीरसचिवैर्वृतः ॥ ६६ ॥ पार्थंपश्यरणेवीरंयाम्यहंतंपुरोहितम् ॥ नमस्कर्तुंमहाबुद्धिंपुनरे
ष्यामियोधितुम् ॥ ६७ ॥ एवमुक्त्वावचोराजानमस्कृत्यपुरोहितौ ॥ आनयामासतौतत्रकटाहोयत्रतादृशः ॥ ६८ ॥ सुमतिः
सचिवश्चक्रेसर्वंनृपतिभाषितम् ॥ सुधन्वानंमहावीरंप्रत्युवाचविशांपते ॥ ६९ ॥ ॥ सुमतिरुवाच ॥ ॥ सुधन्वन्किंकरो
म्यद्यत्वांसमीक्ष्यमहाबलं ॥ हृदयेजायतेऽतीवकरुणामेमहाभुज ॥ ७० ॥ शासनंचापिनृपतेर्लंघितुंनैवशक्यते ॥ शासनंचापि
राज्ञोमेदारुणंत्वयिविद्यते ॥ ७१ ॥ ॥ सुधन्वोवाच ॥ ॥ कर्तव्यंशासनंराज्ञस्त्वयापरवशेनहि ॥ पितृवाक्येनरामेणस्व
जनन्याःशिरोहृतम् ॥ ७२ ॥ जामदग्न्येनपूर्वंतुतवकापरिदेवना ॥ प्रतीतोऽहंमहाबुद्धेकृतापुण्यक्रियाशुभा ॥ ७३ ॥ नभयंम
रणान्मह्यंतप्तेतैलेऽद्यमांक्षिप ॥ ॥ जैमिनिरुवाच ॥ ॥ सुमतिस्तंतथाभूतंस्नातंदिव्यांबरावृतम् ॥ ७४ ॥ तुलसीदलजां
मालांधारयंतंमहोरसि ॥ स्मरंतंवसुदेवस्यतनयंचापिकेशवम् ॥ ७५ ॥ उत्थाप्यतैलेचिक्षेपसुतप्तेभूपशासनात् ॥ सुधन्वाप्राह
गोविंदंप्रथमंयादृशंवचः ॥ ७६ ॥ तत्तेऽहंकथयिष्यामिशृणुष्वैकमनानृप ॥ ज्वालाकुलंवीक्ष्यतैलमावर्तशतसंकुलं ॥ ७७ ॥ प
रोदयंसमालोक्यदुर्जनस्येवमानसम् ॥ जायतेतादृशंजातंकटाहंजनमेजय ॥ ७८ ॥ ॥ सुधन्वोवाच ॥ ॥ त्राहित्राही
तिगोविंदमयायद्भाषितंवचः ॥ श्रुत्वात्वंनागतोयस्माद्विज्ञातंकारणंहरे ॥ ७९ ॥ मामवज्ञायसंप्राप्तंसुधन्वाकामचारकः ॥ प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चात्स्मरतिपापिष्ठःसंकटेऽद्यजगद्गुरुम् ॥८०॥ स्मरंतिकृच्छ्रपतितास्त्वामेवभयविह्वलाः ॥ जनानसुखसंयुक्ताःसत्यमेतद्वदा
म्यहम् ॥ ८१ ॥ धिङ्मेसौख्यंकृच्छ्ररूपंमन्येहरिविवर्जितम् ॥ प्रल्हादोगजमुख्यश्चध्रुवःपृथतनंदिनी ॥ ८२ ॥ अन्येगोपा
दयोलोकेस्मरंत्यापत्सुकेशवम् ॥ पूर्वंस्मृतोऽसितैरेवत्रातास्तेकृच्छ्रतस्त्वया ॥८३॥ अंतकालेचिन्तनंतेजायतेमुक्तिदंनृणाम्
॥ हृदयेचिन्त्यमानेननाम्नातवजनार्दन ॥ ८४॥ ममुक्तिर्नसंदेहःपरलोकेविगर्हितः ॥ सुधन्वामरणंदुष्टंप्राप्तोवीरःकटाह
जम् ॥ ८५ ॥ अद्यकृष्णार्जुनौवीरौतोषितोनामुनाबलात् ॥ गांडीवमुक्तैर्नाराचैर्गात्रंनशकलीकृतम् ॥ ८६ ॥ सुधन्वनः
समर्थस्यचोरस्येवाभवद्गतिः ॥ मनसानधृतौकृष्णौसैन्यंनंनिहतंबहु ॥८७॥ ईदृशैर्बहुभिर्वाक्यैःप्रहसिष्यंतिमांजनाः॥ वह्नि
दाहाद्द्यहरेमांत्वंरक्षितुमर्हसि ॥८८॥ द्रौपदीवस्त्ररूपेणलज्जाब्धौपतिताधृता ॥ त्वयाकृष्णेनसदसिसमक्षंद्रोणभीष्मयोः॥
॥८९॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवतिवीरेऽस्मिन्स्मरणान्माधवस्यतु ॥ तैलंसुशीतलंजातंसज्जनस्येवमानसम् ॥
॥ ९० ॥ सर्वेजनास्तंप्रसमीक्ष्यतैलेयथाजलेपंकजवत्प्रफुल्लम् ॥ सुधन्वनःकुण्डलिनंसुनेत्रंविसिस्मयुश्चाननमस्यदुःखात् ॥
॥ ९१ ॥ अश्रूणिमुंचंतिपतंतिभूमौवक्षःकराभ्यामभिताडयंति ॥ क्रोशंतिहाहेतिकिरीटकञ्चक्षिपंतिबाहून्परिधूनयंति ॥९२॥
वदंतिराजाकिमसौनचास्मान्सुधन्वनोर्थेक्षिपतेऽग्निमध्ये ॥ गच्छेमदेवंयदुनंदनंतंधनंजयंकृष्णपदंप्रपन्नम् ॥ ९३ ॥ ॥
जैमिनिरुवाच ॥ ॥ हंसध्वजःशंखयुतोददर्शपुत्रंकटाहेप्रतरंतमेनम् ॥ पुण्यान्निनामानिहरेर्जपंतंगोविन्ददामोदरमाधवेति॥
॥ ९४ ॥ शंखोऽब्रवीत्तंनृपतिंकिमेतत्तैलंनतप्तंज्वलताग्निनाऽपि ॥ किमौषधंमंत्रवरंसुतस्तेजानातिराजन्नथकैतवंवा ॥ ९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतोज्वलत्तैलमिदंकुतोमुखंप्रफुल्लपद्माभमिवास्यराजते ॥ क्षिपंतुदूतानवनारिकेलंभवेत्ततस्तैलमिदंपरीक्षितम् ॥ ९६ ॥
निशम्यतद्वाक्यमतीवतीव्रंदूतास्तदातैलसमानभूताः ॥ मुनेर्भयात्तेफलमाशुतैलेविचिक्षिपुःशंखदृशःपुरस्तात् ॥ ९७ ॥ द्वि
धाभिन्नंह्यभवत्तत्कटाहाच्छंखस्यचैकंशकलंललाटे ॥ लग्नंद्वितीयंलिखितस्यचापितथोच्छलंत्यस्तिलतैलधाराः ॥ ९८ ॥ ॥
इत्याश्वमेधिकेपर्वणिजैमिनीये सुधन्वनःसत्त्वकथनंनामसप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ छ ॥ ॥छ॥
॥ जनमेजयउवाच ॥ ॥ कथंकटाहात्समहाबलोऽपिजगामपार्थंसचमुक्तगात्रः ॥ तत्कौतुकंशंसतुजैमिनेमेनिरीक्ष्यशंखःकिम
कारितत्र॥१॥जैमिनिरुवाच॥ विलोक्यतंतैलमध्येसुधन्वानंमहामुनिः॥भृत्यंपप्रच्छवीरेणपाल्यमानेनकिंस्मृतं॥२॥औषधस्य
चमूलंवाबद्धंगात्रेतथाऽमुना॥२॥ दूताऊचुः॥नान्यत्स्मृतंकिंचिदेवविनाकृष्णंमहामतिं॥ यस्यस्मरणमात्रेणमुच्यंतेयोनिसंकटा
त्॥३ ॥प्राणिनोभूतलेब्रह्मन्संस्मृतोमाधवोऽमुना ॥ पश्यौष्ठौस्फुरमाणौत्वंशंखमाधवभाषिणौ ॥४॥ सुधन्वनोऽतिसत्त्वस्यप्रि
यादृष्टौसमागमे ॥ ॥ शंखउवाच ॥ ॥स्मृतोयद्यमुनाविष्णुःपाल्यमानेनसाधुना॥ ५ ॥धिगहंकठिनोबालंपश्यामिनिकट
स्थितः ॥ प्रायश्चित्तंस्वदेहस्यकरिष्येमरणांतिकं ॥ ६ ॥ एतावदुक्त्वावचनंतैलमध्येपपातसः ॥ समालिंग्यसुधन्वानमिदंवचन
मब्रवीत् ॥ ७ ॥ साधुक्षत्रियवीरस्त्वमसाधुरहमद्विजः ॥ येनतैलेपातितोऽसिमयापेशलचेतसा ॥ ८ ॥ भवंतितेतापयुतायेनविं
दंतिमाधवं ॥ गतश्रीकाश्चमूढाश्चनित्यंदुःखसमन्विताः ॥ ९ ॥ येस्मरंतिचगोविंदंसर्वकामफलप्रदं ॥ तापत्रयविनिर्मुक्ताजा
यंतेदुखवर्जिताः ॥ १० ॥ कथंत्वंवह्निनादग्धुंशक्यःपरमवैष्णवः ॥ मुनयोऽयंनपश्यंतिसुरासुरगुरुंहरिं ॥ ११ ॥ चेतसाऽपित्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावाचाप्राणांतेसंस्मृतोऽधुना ॥ प्रन्हादोरक्षितोयेनदग्धस्तस्माद्धुताशनात् ॥१२॥ त्वच्छरीरस्यसंपर्कात्पावनंमेवपुस्त्विदं॥
जातंपुरुषशार्दूलनोपायोऽन्योस्तिपावनः ॥ १३ ॥ राजानंराजपुत्रांश्चसैन्यंपावयसुव्रत ॥ उत्तिष्ठवत्सतैलात्त्वंमांसमुद्धरभूप
ज ॥ १४ ॥ कृष्णोऽयंपाण्डवस्यार्थेसारथ्यंप्रकरोतिच ॥ अर्जुनेनाद्यसंग्रामंकुरुवीरयथोचितम् ॥ १५ ॥ यशःस्थिरंस्वकंक्ष
त्वापश्चात्प्राप्नुहिमङ्गलम् ॥ ॥ जैमिनिरुवाच ॥ ॥ गृहीत्वातंतैलमध्याद्रणेप्राप्तोमहामुनिः ॥ १६ ॥ राजानंप्रत्युवाचेदं
पुत्रंपश्यसनातनम् ॥ ॥ शंखउवाच ॥ ॥ अनेनविधृतंमूलंसद्विद्यायामुखेस्वके ॥ १७ ॥ मंत्रराजंनृसिंहाख्यंजपतारक्षि
तंवपुः ॥ यशोमयंपावितोऽहंत्वांतुपावयितुंस्थितः ॥ १८ ॥ ततोहंसध्वजःपुत्रंसमालिंग्याब्रवीद्वचः ॥ ॥ हंसध्वजउवाच ॥
मयापित्राभवांस्त्यक्तस्तैलेपावकदीपिते ॥ १९ ॥ नदग्धोसिहुताशेनप्रभावात्केशवस्यतु ॥ माहात्म्यंवासुदेवस्यत्वांनिपात
यिताधुना॥२०॥सम्यग्वत्सपरिज्ञातंमयेदानींनसंशयः ॥ उत्तिष्ठदेहिमेवत्सपरिरंभणमद्यवै ॥२१॥ उत्तिष्ठपुत्रभद्रंतेरथमारु
ह्यसंगरे ॥ कृष्णंदर्शयपार्थस्यसारथिंममातिथिम्॥२२॥सुधन्वनावंदितौतौहृष्टेननृपभूसुरौ ॥ रथंरत्नविचित्रंतंहेमबद्धंसुकू
बरं ॥२३॥ दीर्घध्वजंचारुचक्रंगवाक्षैर्बहुभिर्वृतं ॥ हेमवर्णैर्हयैर्युक्तंबद्धचामरमाशुगम् ॥ २४ ॥ सुवर्णमालापरिभूषितंबलीमा
ल्यस्त्रजोभिर्बहुलाभिरर्चितम् ॥ नियंत्रितंसूत्रवरेणकिंकिणीनादेननृत्यंतमिवारुरोहसः ॥ २५ ॥ ॥ जैमिनिरुवाच ॥ ॥
एतस्मिन्नेवकालेतुसैन्यंभूपस्यसंस्थितम् ॥ पार्थस्यप्रमुखंघोरंकालचक्रमिवापरम् ॥ २६ ॥ वीराननेभ्यस्तांबूलंपतितंभूतले
बहु ॥ तेनभूःशुशुभेतत्रइंद्रगोपैरिवावृता ॥ २७ ॥ यथानिशागमेराजन्द्यौरियंभास्करत्विषा ॥ वीरगात्राणिमुंचंतिचंदनंस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृगोद्भवम् ॥ २८ ॥ परस्परस्यसंघर्षात्कंठेभ्योमौक्तिकस्रजः ॥ त्रुटिताश्चधरापृष्ठेदृश्यंतेजनमेजय ॥ २९ ॥ कवचानांकिरी टानांविचित्राणांरणेप्रभाः ॥ द्योतयंतिजगत्तत्रनेत्राणिचमिमीलिरे ॥ ३० ॥ चंदनंपतितंवायुरनयद्दिविसर्वतः ॥ पुष्पाणिभूत लान्नाकेगच्छंत्यूर्ध्वंनृशीर्षतः ॥ ३१ ॥ विजेतुंसुरवृक्षाणांमाल्यानिसुरभीण्यपि ॥ नराणांमुखवासेनसुगंधेनपराजितः ॥३२॥ भ्रममाणोऽभवद्राजंस्तत्रायंमलयानिलः ॥ गजपुष्करतोयेनसमापिविषमामही ॥ ३३ ॥ कृताहयखुरक्षुण्णैरजोभिःपूरिता पुनः ॥ रथनादेनघोरेणमेघसागरगर्जितम् ॥ ३४ ॥ जातंमूकमहंमन्येवाचालमपिविश्रुतम् ॥ पदातिपदविन्यासाद्भूरतीवप्र कंपिता ॥ ३५ ॥ हंसध्वजोऽब्रवीद्वीरान्गृण्हंतुतुरगंशुभम् ॥ ततस्यवचनाच्छीघ्रंगृहीत्वाहयमागताः ॥ ३६ ॥ पूजितंचर्चितंधू पवासेनबहुधूपितम् ॥ पद्मव्यूहेनृपस्तंहिस्थाप्यपुत्रैः सहोदरैः ॥ ३७ ॥ संयुतोभरतश्रेष्ठअर्जुनंयोद्धुमुद्यतः ॥ सुधन्वासुरथ श्चैवसुमतिःसचिवस्तथा ॥ ३८ ॥ वीरकेतुस्तीव्ररथःशतधन्वामहारथः ॥ सुमतेरनुजास्त्वेतेतथाऽन्येबहवोनृपाः ॥ ३९ ॥ प्रय युःपुरतःपार्थंयोद्धुकामायथासुखम् ॥ ततोदुंदुभिनिःसाणाःपटहामर्दलास्तथा ॥ ४० ॥ तत्रकीवेणुशृंगाणिमृदंगाश्चववादिरे॥ डिंडिमाःशृंगभेदाश्चपणवाश्चतथानर्काः ॥ ४१ ॥ ढक्काढोलास्तथाभेर्योगोमुखाःकाहलास्तथा ॥ झर्झराजलजास्तालावंशा मुरलिकावराः ॥ ४२ ॥ ताडितावाद्यकुशलैस्तस्मिन्वीरसमागमे ॥ तेननादेनगिरयःसागराश्चापिचुक्रुशुः ॥ ४३ ॥ कातराणां तुचेतांसिद्विधाभूतानिभारत ॥ ॥ जैमिनिरुवाच ॥ ॥ पार्थस्तदाब्रवीत्तत्रकृष्णपुत्रमिदंवचः ॥ ४४ ॥ युधिष्ठिराश्वःप्रद्यु म्ननीतोहंसध्वजेनहि ॥ तंतुमोचयितुंवीराःकेगमिष्यंतितद्वद ॥ ४५ ॥ भवान्सपुत्रोबलवान्यौवनाश्वोमहामतिः॥ अनुशाल्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्ववीरोयंकृतवर्माचसात्यकिः ॥ ४६ ॥ वृषकेतुर्महातेजा अनिरुद्धश्ववीर्यवान् ॥ नीलध्वजोऽग्निर्जामातायस्यराष्ट्रेनिरीक्षितः॥
॥ ४७ ॥ एतेचान्येचसंत्यत्रतथाऽहमपिसंस्थितः ॥ परराष्ट्रेवयंप्राप्ताःसबलस्यविशेषतः ॥ ४८ ॥ त्वंतुनाथोऽसिसर्वेषामहम
ग्रेव्रजेऽधुना ॥ ॥ प्रद्युम्नउवाच ॥ ॥ मैवंवदमहाभागविस्मृतंकृष्णभाषितम् ॥४९॥ सर्वस्वंमत्करेदत्तंपांडवाख्यंमहात्मना ॥
पित्राकृष्णेनतदहंसबलःकिंविनाशये ॥ ५० ॥ समक्षंधर्मराजस्यभीमस्यचमहात्मनः ॥ अद्यमेभुजयोःपश्यबलंपार्थरणांग
णे ॥ ५१ ॥ हंसध्वजंसुधन्वानंसुरथंसुमतिंतथा ॥ तोषयेनिशितैर्बाणैर्बलंचविनिपातये ॥ ५२ ॥ एनंनृपवरंविद्धिस्वदाररसिकं
रणे ॥ ॥ जैमिनिरुवाच ॥ ॥ प्रद्युम्नस्यवचःश्रुत्वावृषकेतुरुदारधीः ॥ ५३ ॥ नमस्कृत्याब्रवीद्वाग्मीनयुक्तंयुवयोर्वचः
कियत्सैन्यंयुवांचात्रप्रलयोत्पत्तिकारकौ ॥ ५४ ॥ मुखवातेनयोगच्छेत्तूलतुल्यबलःपुरः ॥ तदर्थंप्रेषयेत्कोत्रप्रज्वलद्वडवानल
म् ॥ ५५ ॥ नेत्रपक्ष्मप्रहारेणहन्यतेमशकोयदि ॥ तंहंतुंकश्चमंदात्मातार्क्ष्यंदिशतिनागहम् ॥ ५६ ॥ स्वल्पशीकरवर्षेणयद्र
जःपरिशाम्यति ॥ तन्नाशायकथंवर्षन्वरुणोयातिकोपतः ॥ ५७ ॥ तथाविधमिदंभातियुष्माकमितिमेमतिः ॥ भवद्भ्यामहमा
दिष्टोनानयेकिंतुरंगमम् ॥ ५८ ॥ यमदूतगणैर्बद्धंहरतेहरिकिंकरः ॥ यथासंसारिणंजीवमनंतपदसेवकम् ॥ ५९ ॥ तथानये
ऽद्यतुरगमाज्ञयाभवतोप्यहम् ॥ एषगच्छामिसंग्रामेपार्थपश्यतवाहितान् ॥६०॥ ॥ जैमिनिरुवाच ॥ ॥ निर्ययौकर्णपुत्रो
ऽग्रेपांडवेननिवारितः ॥ शंखंदध्मौमहातेजाहंसध्वजबलंप्रति ॥ रथेनातिविचित्रेणसुपताकेनगर्जता ॥ ६१ ॥ सारथिंप्राहध ॥५१॥
र्मात्मातुरंगान्नतित्तिरिप्रभान् ॥ ममनोदयसूतेतिपद्मव्यूहेसुदारुणे ॥ सारथिस्तत्क्षणादेवकशामुद्यम्यवेगवान् ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रेरयामासतुरगान्जवनानूरणकोविदः ॥ वृषकेतुंविलोक्याथसुधन्वावाक्यमब्रवीत् ॥ ६३ ॥ ॥ सुधन्वोवाच ॥ ॥ पद्म
व्यूहमदृष्टैवकः समायातिलीलया ॥ वृषोऽस्यदृश्यतेरम्योध्वजस्थोनधनंजयः ॥ ६४ ॥ एकएवापरःकश्चिद्वीरःसत्त्वसमन्वित
तः ॥ धनंजयकंणैः[1]कीर्णैर्दह्यंतेकिन्नभूभृतः ॥ ६५ ॥ तस्मादेकोबहून्प्राप्तोह्यनादृत्याधुनाहिनः ॥ अहमेनंव्रजाम्यद्यवीरंरणवि
शारदम् ॥ ६६ ॥ सूतमानयभद्रंतेवीरस्यरथसंमुखम् ॥ तेनसूतेननीतोऽसौसुधन्वारथिनांवरः ॥ ६७ ॥ उभौतौसंस्थितौयुद्धे
तत्रतीव्रपराक्रमौ ॥ सुधन्वावृषकेतुंहिपप्रच्छमुदितोहसन् ॥ ६८ ॥ ॥ सुधन्वोवाच ॥ ॥ कस्त्वंकस्यात्मजश्चासिकिन्ना
मतवसुव्रत ॥ ॥ वृषकेतुरुवाच ॥ ॥ यंभेत्तुमुद्यतोसित्वंसचास्माकंपितामहः ॥ ६९ ॥ पुत्राणामवरस्तस्ययःकर्णश्चसु
तोऽपरः ॥ दातॄणामग्रणीर्वीरोनित्यंधीरःसमेपिता ॥ ७० ॥ कश्यपस्यकुलेजातंविद्धिमांवृषकेतुकम् ॥ ॥ सुधन्वोवाच ॥ ॥
हंसध्वजस्यपुत्रोऽहंसुधन्वानाममेशुभम् ॥ ७१ ॥ मधुच्छंदाऋषिःपूर्वमस्माकंवंशकारकः ॥ तिष्ठयुद्धेममपुरःपौरुषंत्वंप्रदर्श
य ॥ ७२ ॥ तेजस्वीपूर्वजःसूर्योयथाध्वांतमपोहति ॥ तथाभवान्शत्रुबलंयुद्धेवारयिताभव ॥ स्वकुलंवर्णयंत्येवमंदाःपौरुषवर्जि
ताः ॥ ७३ ॥ ॥ वृषकेतुरुवाच ॥ ॥ अधुनादर्शयिष्यामिस्वबलंसायकेनहि ॥ एतेमदीयानाराचास्तीक्ष्णधाराःसुतेजसः
॥ ७४ ॥ सहसातवसैन्येचगमिष्यंतिमहाहवे ॥ वचसायन्मयाप्रोक्तंनानृतंतत्प्रजायते ॥ ७५ ॥ ॥जैमिनिरुवाच ॥ ॥ श
राणांमहतीवृष्टिस्तेनमुक्ताबलंप्रति ॥ सुधन्वानंछादयित्वासिंहनादमथाकरोत् ॥ ७६ ॥ भित्वाशरीराणिशरागजाश्वरथप
त्तिनां ॥ चक्रुर्जीवितहीनानिवृषकेतोर्महात्मनः ॥ ७७ ॥ सर्वतस्तेनविद्धोसौसुधन्वारथयूथपः ॥ बलंनदृश्यतेसर्वंबाणैश्छन्नं

[1] विस्फुलिङ्गैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नराधिप ॥ ७८ ॥ सुधन्वनोहयान्विद्ध्वासारथिंचमहाध्वजम् ॥ चिच्छेदतरसायुद्धेप्रहसन्पंचभिःशरैः ॥ ७९ ॥ पुनरेवाव्रणो
त्सैन्यंसर्वेषामेवपश्यताम् ॥ गार्ध्रपत्रैःसुनिशितैःशतधापातितंभुवि ॥ ८० ॥ छत्राणिचामराण्येवध्वजांश्चविविधानपि ॥ तनु
त्राणिचसंक्रुद्धोयुधिचिच्छेदकर्णजः ॥ ८१ ॥ हस्तिहस्तोपमानूबाहून्सायुधानूभूषणैर्वृतान् ॥ शिरांसिचमहाबाहुःसंदष्टौष्ठपु
टानिच ॥ ८२ ॥ तत्प्रभिन्नंबलंवीक्ष्यरथमन्यंसमाश्रितः ॥ सुधन्वापौरुषंतस्यबहुधाहृद्यमन्यत ॥ ८३ ॥ जघानतुरगानस्य
सारथिंचमहाध्वजम् ॥ तूलराशिनिभंक्लृप्तापंचभिस्तमताडयत् ॥ ८४ ॥ वृषकेतोर्धनुश्छिन्नंसतूणंपंचभिःशरैः ॥ भ्रममाणंच
तद्गात्रंगतंयत्रमहद्बलम् ॥ ८५ ॥ कर्णपुत्रस्यसंग्रामात्तदद्भुतमिवाभवत् ॥ मूर्छांविहायधर्मात्मायावत्पश्यतिमानिनम् ॥ ८६ ॥
तावद्ददर्शतंघोरंसैन्यमध्यास्थितंपुरः ॥ आत्मानंसैन्यमध्यस्थंबहुभिःपरिवारितम् ॥ ८७ ॥ विलोक्यरथहीनंचक्रोधाज्जग्राहतद्ध
नुः ॥ दृढज्यंप्रमुमोचाथबाणानूहेमविभूषितान् ॥ ८८ ॥ सर्वांगंसायकैश्छिन्नमच्छिन्नमिवधारयन् ॥ हंसध्वजस्यतत्सैन्यंच
क्रेजीवितवर्जितम् ॥ ८९ ॥ ततःपरस्यसैन्येनवेष्टितःकर्णनंदनः ॥ शक्तिभिस्तोमरैर्भल्लैर्भिंदिपालैश्चसंगरे ॥ ९० ॥ मुद्गरैरसि
भिर्घोरैःसमंताच्चविहन्यते ॥ नाराचैःकरपत्रैश्चभुशुंडीभिरयोमुखैः ॥ ९१ ॥ गदाभिःपरिघैश्चैवपट्टिशैश्चत्रिशूलकैः ॥ शस्त्रा
स्त्रैरर्द्यमानंस्वंवपुःकर्णात्मजोबली ॥ ९२ ॥ निरीक्ष्यवासुदेवस्यनामानिसहसाजपन् ॥ ततोऽन्यंचरथंसूतायोजयित्वामहाध्व
जम् ॥ ९३ ॥ कर्णात्मजस्यसान्निध्यंजगामरणमंडले ॥ तंसमारुह्यवेगेनवृषकेतुःपुनःपुनः ॥ ९४ ॥ विव्याधसायकैस्तीक्ष्णैः
सुधन्वानंहसन्निव ॥ सैन्यंचपीडयामाससमंताद्बाणवृष्टिभिः ॥ ९५ ॥ सुधन्वाकर्णपुत्रंतंहृदिविव्याधपंचभिः ॥ ॥ पुनःसमूर्छो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मगमद्वृषकेतुर्महाबलः ॥ ९६ ॥ मूर्छितंसारथिःशीघ्रंवृषकेतुंमहाबलम् ॥ रणमध्यादपोवाहतावत्कार्ष्णिःसमागतः ॥ ९७ ॥ प्रद्युम्नस्तिष्ठतिष्ठेतिसुधन्वानंसमाक्षिपत् ॥ पंचभिस्तंशरैर्घोरैःपीडयामाससंगरे ॥ ९८ ॥ सूतंसुधन्वनोरोषादनयद्यमसादनम् ॥ हयानांशकलान्येकविंशतिंक्रोधमूर्छितः ॥ ९९ ॥ चकाररथयुक्तानांचतुर्णांनिशितैःशरैः ॥ युगेकृतेऽष्टधाबाणैस्त्रिभिरेकेनकार्मुकम् ॥ १०० ॥ प्रद्युम्नेनत्रिशकलंकृतंचित्रंसुधन्वनः ॥ सुधन्वाऽपिरणेज्ञात्वाप्रद्युम्नस्यातिकौशलम् ॥ १ ॥ चकारलीलयायुद्धेपौरुषंस्वंप्रदर्शयन् ॥ संधानमद्भुतंरोषाच्छराभ्यामष्टधाहयान् ॥ २ ॥ युगंत्रिवेणुकंरम्यंकृतंषोढासुधन्वना ॥ प्रद्युम्नस्यधनुश्छिन्नंबाणेनैकेनपंचधा ॥ ३ ॥ तेनापिसारथेःकायाच्छिन्नंशीर्षंतदद्भुतम् ॥ त्रिभिःकृष्णसुतंविद्ध्वासिंहनादंचकारह ॥ ४ ॥ उभौतौबलिनौवीरौमहारणविशारदौ ॥ गगनेभूतलेयुद्धंचक्रतुःखेचराविव ॥ ५ ॥ मूर्छितौपतितौबाणैःपीडितौरुधिरोक्षितौ ॥ सुधन्वाप्युत्थितःक्रुद्धोरथमन्यंसमाश्रितः ॥ ६ ॥ ताडयामासपार्थस्यवीरान्बाणैःसहस्रशः ॥ कृतवर्माणमासाद्यजघाननवभिःशरैः ॥ ७ ॥ कृतवर्मातेनमुक्तांस्त्रिधाचिच्छेदसायकान् ॥ पंचभिःपीडयामाससुधन्वानंमहोरसि ॥ ८ ॥ सुधन्वाचततोराजन्नवभिःसायकैःक्षणात् ॥ हार्दिक्यंविरथंचक्रेहयान्हत्वाचसारथिं ॥ ९ ॥ सशरैरर्दितोवीरोरणंत्यक्त्वापलायितः ॥ अनुशाल्वस्ततोवीरःसुधन्वानंमहारणे ॥ १० ॥ समाहूयाब्रवीद्वीरोगृहीत्वासशरंधनुः ॥ ॥ अनुशाल्वउवाच ॥ ॥ सुधन्वन्बहवोवीरास्त्वयायुद्धेऽद्यतोषिताः ॥ ११ ॥ स्वबलेनसमक्षंमेपरमंकौतुकंहितत् ॥ सहस्वमच्छरंचैकंसर्वेषामेवपश्यताम् ॥ १२ ॥ ततोमुमोचनाराचंवडवानलसन्निभम् ॥ अनुशाल्वकरान्मुक्तंवीक्ष्यबाणंसुदारुणम् ॥ १३ ॥ छेत्तुंव्यवस्थितोबाणैस्तंशरंनशशाक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ प्रविष्टोहृदयेबाणस्तदातस्यसुधन्वनः ॥ १४ ॥ अनुशाल्वस्ततःसेनांदारयामाससायकैः ॥ सुधन्वानंमहाबाहुंनवभिः अ०
सायकैर्दृढैः ॥ १५ ॥ विरथंत्वरितंकृत्वापातयित्वाधरातले ॥ जगर्जचतदावीरस्ततोदैत्याधिपोबली॥१६॥अथमूर्छांविहायाशु १९
सुधन्वारथिनांवरः ॥ विव्याधैकेनबाणेनरणेशाल्वानुजंबली ॥ १७ ॥ तेनबाणेनभिन्नोसौनिपपातधरातले ॥ सेनांपार्थस्यवि
विधांनाराचैःशतधाभिनत् ॥ १८ ॥ गजानीकंसबहुधाभित्त्वाचक्रेवसुंधराम् ॥ रुधिरौघवतींराजन्विषमांमांसकर्दमां ॥१९॥
गजाननेषुभिन्नेषुहयशीर्षाणिसंगरे ॥ संगतानिस्मदृश्यंतेशतशोथसहस्रशः ॥ २० ॥ द्विधाभिन्नाहयाबाणैःसादिभिःसहिता
रणे ॥ पुरोभागेनगच्छंतिपतिताअपिधन्विनः ॥ २१ ॥ नराश्वगजदासेरखराणांरुधिरंतदा ॥ शरैश्चित्रैर्विभिन्नानांप्रावहत्स
रितंप्रति ॥ २२ ॥ तेछिन्नबाहवोबीरारुधिरौघेणवाहिताः ॥ बाहुंदांप्राप्यसकरागगनेचाभवन्क्षणात् ॥ इतस्ततोबलंभग्नंविमु
खंपांडवस्यतत् ॥ १२३ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेसुधन्वनोयुद्धवर्णनंनामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ जगर्जचसुधन्वातंसप्तत्यासात्यकिंप्रभुम् ॥ नाराचानांनिर्बिभेदतस्मिन्युद्धेजनाधिप ॥ १ ॥ सात्यकिं
पंचसप्तत्याभल्लानांस्यंदनंहयान् ॥ सूतंध्वजंतथाछत्रंत्रिवेणुंतल्पमेवच ॥ २ ॥ नीडंचक्रेपार्श्वधारंचिच्छेदाशुसुधन्वनः ॥ सुध
न्वासात्यकिंक्रुद्धश्चकारविरथंहसन् ॥ ३ ॥ उभौस्यंदनमारुह्यपुनरेवव्यवस्थितौ ॥ अंबरंबाणसाहस्रैश्छादयामासतूरणे ॥
॥ ४ ॥ उभौशरविशीर्णांगौरुधिरौघप्रवर्षिणौ ॥ किंशुकाविवराजेतेवसंतेपुष्पितौनृप ॥ ५ ॥ शक्तिंमुमोचकुपितःसात्यकिंप ॥५३॥
रिपीडयन् ॥ युयुधानःशक्तिघातात्कश्मलंप्रत्यपद्यत ॥ ६ ॥ शैनेयंमूर्छितंवीक्ष्यहाहाकारोमहानभूत् ॥ भयावृतंबलंसर्वम

१ भृत्याः । २नदीविशेषोऽयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोवाहतथाकुलम् ॥ ७ ॥ ततःपार्थोमहाबाहुःसुधन्वानंसमागमत् ॥ तिष्ठतिष्ठेतिबहुधाकुतोयासीत्यवोचत ॥ ८ ॥ ॥ अर्जुनउवाच ॥ ॥ जितामदीयाबहवस्त्वयायुद्धेमहाबल ॥ बलंतवाधिकंवीरशक्रस्येवमहात्मनः ॥ ९ ॥ मयायुद्धानिहिपुराकृतानिसुबहून्यपि ॥ द्रोणभीष्मकृपैःसार्धंकर्णेनचमहात्मना ॥ १० ॥ कालखंजैश्चबहुभिःशंकरेणासुरैःसह ॥ तथानविस्मयोजातोयथात्वांवीक्ष्यजायते ॥ ११ ॥ ॥ सुधन्वोवाच ॥ ॥ युद्धानियानिसंग्रामेत्वयापार्थकृतानिहि ॥ तत्रतेसारथिःकृष्णोहितकर्तायतःस्थितः ॥ १२ ॥ कृष्णहीनोऽसिसंग्रामेतेनतेविस्मयोभवत् ॥ त्वयात्यक्तोयदिहरिःकथंत्वंहरिणाधुना ॥ १३ ॥ संत्यक्तोऽसिमहाबुद्धेयुद्धएवममैवतु ॥ युद्धंमयासमंपार्थकर्तुंशक्तोऽसिकिन्नवा ॥ १४ ॥ तुरंगंतवयूपेऽद्यसन्निबद्धययथोचितम् ॥ हंसध्वजोनृपश्रेष्ठोवाजिमेधंकरिष्यति ॥ १५ ॥ अद्यपश्यन्तुतेदेवाःसंग्रामंकिलमामकम् ॥ संगरेत्वांविजेष्यामिसकृष्णमपिचार्जुन ॥ १६ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःपार्थोबाणशतंसंदधेकोपपूरितः ॥ सुधन्वातान्शरान्दिव्यांश्चिच्छेदप्रहसन्निव ॥ ॥ १७ ॥ दशभिस्ताडयामासशरैःकुन्तीसुतंहसन् ॥ शतेनचसहस्रेणायुतेनप्रयुतेनच ॥ १८ ॥ बाणानांछादयामासरणेक्रुद्धंधनंजयम् ॥ अर्जुनोऽपिशरांस्तस्यचिच्छेदतिलशस्तदा ॥ १९ ॥ आग्नेयास्त्रंमुमोचाथसृक्किणीपरिलेलिहन् ॥ सुधन्वनेतिकुपितोबाणवृष्टिंससर्जह ॥ २० ॥ खेनगच्छंतिखचराःपार्थसायकभेदिताः ॥ बाणांधकारेपतितंजगत्त्रयमभूत्तदा ॥ २१ ॥ सैन्यंसुधन्वनोदग्धंपावकास्त्रेणभूतले ॥ ज्वालाकुलंवीक्ष्यवह्निंदाहयंतंनिजंबलम् ॥ २२ ॥ सुधन्वावारुणास्त्रंचजग्राहाग्निनिवारणम् ॥ संजातामहतीवृष्टिस्तेनमुक्तात्स्वकार्मुकात् ॥ २३ ॥ जलदैर्भूतलंव्याप्तंगगनेविद्युतःस्थिताः ॥ निमग्नंपाण्डव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलंशिलावृष्टिभिराहतम् ॥ २४ ॥ बभ्रामसंयुगेचाथशीतेनाथविमोहितम् ॥ चातकानांमयूराणामानन्दःसुमहानभूत् ॥
॥ २५ ॥ वादित्राणिचनष्टानिचर्मनद्धानिभूतले ॥ सुवर्णचम्पकाभेषुलग्नानिसुमृदून्यपि ॥ २६ ॥ वीरांगेषुनदृश्यंतेवस्त्राणि
विविधानिच ॥ चामराणिचवर्माणिगजकुंभस्थलानिच ॥ २७ ॥ शोभाहीनानिजातानिजलपातेनसंगरे ॥ बाणाःपक्षविही
नास्तेनाभिंदंतिरणेपरान् ॥ २८ ॥ अतिवृष्ट्यानपश्यन्तिस्वंपरंपुरुषाहिते ॥ ततोऽर्जुनोमहावीरोवायव्यास्त्रंसमाददे ॥ २९ ॥
वायुनाजलदाभिन्नाध्वजाश्चपरिपातिताः ॥ भ्रामितावारणाघोटानरादासेरकाःखराः ॥ ३० ॥ एतस्मिन्नंतरेवीरसुधन्वापा
र्थकार्मुकम् ॥ अर्धचन्द्रेणचिच्छेदज्यांहिसूतंत्रिभिःशरैः ॥ ३१ ॥ शरहीनंपाण्डवञ्चचक्रेवीरोऽतिकोपितः ॥ उवाचपार्थंभग
वान्सारथिस्तेनविद्यते ॥ ३२ ॥ शरैःक्षतोसिपार्थत्वंपौरुषंक्कगतंचते ॥ सर्वगंसारथिंत्यक्त्वाप्राकृतःसारथिःकृतः ॥ ३३ ॥
स्मरस्वसूतंकृष्णाख्यंममाग्रेपतितोह्यसि ॥ ॥ जैमिनिरुवाच ॥ ॥ अर्जुनोपितुजग्राहतुरगान्स्वान्महाहवे ॥ ३४ ॥ वा
महस्तेनधनुषासमंचयुयुधेपुनः ॥ यावत्स्मरतिगोविंदंतावद्दृष्टोरथेहरिः ॥ ३५ ॥ मुंचचाश्वानर्जुनेतिव्याजहारवचोहरिः ॥
अथार्जुनोनमस्कृत्यवासुदेवंसमागतम् ॥ ३६ ॥ अश्वानांप्रग्रहांस्त्यक्त्वासावधानेनचेतसा ॥ मुमोचसायकान्घोरान्समन्ता
च्चसुधन्वने ॥ ३७ ॥ वीक्ष्यकृष्णंरथेचास्यसुधन्वावाक्यमब्रवीत् ॥ ॥ सुधन्वोवाच ॥ ॥ दृष्टस्त्वमसिगोविन्दपाण्डवा
र्थेसमागतः ॥ ३८ ॥ सर्वगत्वंमयाज्ञातंत्वदीयंकिलकेशव ॥ पार्थसूतंहरिंप्राप्यप्रतिज्ञांकुरुमज्जये ॥ ३९ ॥ अहंतुतोषयिष्या ॥५४॥
पिपौरुषेणरणेजगत् ॥ ॥ अर्जुनउवाच ॥ त्रिभिःशरैःशिरोरम्यंपातयिष्येद्यतावकम् ॥ ४० ॥ नपातयेयदिपुरःपतन्तुमम

१ स्वमीन् । २ मांजेतुं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वजाः ॥ निरयेपुण्यहीनास्तेसत्यंसत्यंनमेऽनृतम् ॥ ४१ ॥ आत्मानंपालयविभोस्वांप्रतिज्ञांवदाधुना ॥ ॥ सुधन्वोवाच ॥ त्वच्छरान्छेद्मिपुरतस्त्रींस्तत्रहरिसन्निधौ ॥ ४२ ॥ त्रिधाऽहंनकरोम्यद्यगतिंघोरामवाप्नुयाम् ॥ एतावदुक्त्वावचनंशतेनमधुसूदनम् ॥ ४३ ॥ बाणानांहृदयेहर्षाद्बिभेदसमरेबली ॥ रथश्चोत्पाटितोबाणैःसहकृष्णेनमारिष ॥ ४४ ॥ साश्वःसपार्थस्तरसाबभ्रामघटचक्रवत् ॥ धनंजयंचदशभिःसमन्ताद्व्यकिरन्शरैः ॥ ४५ ॥ रथःपार्थस्यनीतोऽसौनल्वंमात्रंमहीतले ॥ तत्क्षणात्पश्चिमंभागंहंसध्वजसुतेनहि ॥ ४६ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ पश्यपाण्डववीरस्यपौरुषंत्वंसुधन्वनः ॥ वृथावधेप्रतिज्ञातंत्रिभिर्बाणैश्चतेऽर्जुन ॥ ४७ ॥ असंमन्त्र्यमयासार्द्धंकृतंयत्साहसंपुनः ॥ जयद्रथवधेयानिकृच्छ्राणितवचाभवन् ॥ ४८ ॥ विस्मृतानिकथंपार्थनजानासिहिताहितम् ॥ रथःपद्भ्यांमयारोषाद्विधृतोऽपिहिनीयते ॥ ४९ ॥ सुधन्वनःशरेणाद्यनल्वमात्रंपरांदिशम् ॥ एकपत्नीव्रतयुतःसुधन्वाऽतीवदृश्यते ॥ ५० ॥ नत्वयानमयातत्तुव्रतंकर्तुंप्रशक्यते ॥ महत्कष्टंव्यवसितंयुद्धेऽस्मिन्प्रतिभातिमे ॥ ५१ ॥ ॥ अर्जुनउवाच ॥ ॥ गोविंदपातयाम्येनंत्रिभिर्बाणैर्नसंशयः ॥ अभविष्यन्महत्कृच्छ्रंनभवेद्यत्त्वदागमः ॥ ५२ ॥ ॥ जैमिनिरुवाच ॥ ॥ शिलीमुखैस्ततःपार्थोव्यावृणोत्सदिशोदश ॥ सुधन्वारोषिताम्राक्षोविधुन्वन्सशरंधनुः ॥ ५३ ॥ उवाचकेशवंभूयोयथागोवर्धनोगिरिः ॥ गवार्थेविधृतःकृष्णतथापालयपाण्डवम् ॥ ५४ ॥ ततःपार्थोमहाबाहुःसंदधेकार्मुकेशरम् ॥ कालानलनिभंरोषान्मुमोचास्मैप्रतापवान् ॥ ५५ ॥ तस्मिन्शरेचगोविन्दःस्वंपुण्यंसमयोजयत् ॥ गोवर्धनश्चविधृतोरक्षिताधेनवःपुरा ॥ ५६ ॥ तेनपुण्येनबाणोऽस्यसन्नद्धस्तत्क्षणात्कृतः ॥ दिविदेवाश्चसम्प्राप्तास्तयोर्यु

१ चतुःशतहस्तमितंस्थानम् ।

१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्ददिदृक्षवः ॥ ५७॥ कौतुकार्थंचसंप्राप्तास्तदाह्यप्सरसाङ्गणाः ॥ विमानमधिरूढास्तेदिव्यालंकारभूपिताः ॥ ५८ ॥ सुध
न्वासंगरेदेवंकृष्णंचहितकारकम् ॥ ज्ञात्वाप्रोवाचबलवानेतंछेत्स्यामिसायकम् ॥ ५९ ॥ बहुपुण्येनसंयुक्तंपातयेनशरंयदि ॥
सुकृतंमेवृथायातुभुक्तंराक्षसदस्युभिः ॥ ६० ॥ विज्ञापितोऽसिगोविन्दपश्यपुण्यंमयाकृतम् ॥ अर्धचंद्रंमुमोचाथपार्थसाय
कमागतम् ॥ ६१ ॥ तेनविच्छेदतरसासच्छिन्नःसायकोऽपतत् ॥ विस्मितादेवताःसर्वास्त्रैलोक्यमपिविस्मितम् ॥ ६२ ॥
शीघ्रसंधानसंयुक्तंसुधन्वानंनिरीक्ष्यतम् ॥ द्वितीयंसायकंपार्थोयावद्योजयतेपुनः ॥ ६३ ॥ तावत्कृष्णेनसशरःश्रेयसाबहुले
नच ॥ सन्नद्धःक्षितिदानेनपाण्डवंप्रतिरक्षता ॥ ६४ ॥ ॥ सुधन्वोवाच ॥ ॥ अर्जुनार्थंस्वकंपुण्यंयदिगोविन्दयोजितम् ॥
सायकेस्मिन्समक्षंतेपातयेऽर्जुनसायकम् ॥ ६५ ॥ प्रतिज्ञांशृणुवीराद्यधनंजयमहाबल ॥ द्विधाशरंकारयेनवसिष्ठोऽरुंधती
युतः ॥ ६६ ॥ मयाहतोऽद्यभवतुरक्षबाणंस्वपौरुषात् ॥ धन्योसिपार्थवीरस्त्वंयन्निमित्तंस्वकंहरिः ॥ ६७ ॥ पुण्यंददातीहर
णेनूनंश्रेयस्तवाधिकम् ॥ ततोमुमोचबाणंससूर्यमण्डलसन्निभम् ॥ ६८ ॥ पाण्डवःक्रोधनयनोयथास्वंकृपणोधनम् ॥ ब्रुवंति
गगनेदेवामानवाधरणींगताः॥६९॥किंभविष्यतिकोजेताउभयोर्वीरयोरिह ॥ बाणात्समुत्थितोवह्निर्गगनेसायकोगतः॥७०॥
अर्जुनस्यकरान्मुक्तःप्रलयंकिंकरिष्यति ॥ ततोमहाबलोवीरःसुधन्वाचातिपौरुषात् ॥ ७१ ॥ द्वितीयंपार्थबाणंतंमध्येचिच्छेद
सत्वरः ॥ शंखंदध्मौस्वकंसैन्यंहर्षयन्पितरंबलात् ॥ ७२ ॥ चकंपेवसुधादेवीबाणेछिन्नेविशांपते ॥ ततःकृष्णोऽर्जुनंप्राहमाश
रंयोजयार्जुन ॥ ७३ ॥ पांचजन्यंपूरयिष्येदेवदत्तंधमस्वच ॥ त्वंमयासहितोवीरमेनंपश्यातिपौरुषम् ॥ ७४ ॥ जीवितंतद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वद्धन्यंनृणांकीर्तिसमन्वितम् ॥ प्रतिज्ञांस्वमुखात्सत्यांकर्तृणांस्वर्गकांक्षिणाम् ॥ ७५॥ मयायंपाल्यमानस्तुदत्तापुण्यंपुरातन
म् ॥ त्वयावीरेणचतथापतनंनास्यजायते ॥ ७६ ॥ एतावदुक्त्वावचनंवादयामासवैहरिः ॥ पांचजन्यंदेवदत्तमर्जुनोऽपिमहाब
लः ॥ ७७ ॥ सपांचजन्योऽच्युतवक्त्रवायुनाजगत्सपातालवियद्दिगीश्वरम् ॥ भृशंसपूर्णोदरनिःसृतध्वनिःसुकम्पयामास
युगात्ययेयथा ॥ ७८॥ पूरयित्वापुनःप्राहकृष्णःकमललोचनः ॥ गृहाणसायकंहस्तेशीघ्रंपार्थममाज्ञया ॥७९॥ ॥ जैमि
निनिरुवाच ॥ ॥ गृहीतःसायकोहस्तेपाण्डवेनमहात्मना ॥ वासुदेवस्तुतंबाणंसुदृढंदेवसंयुतम् ॥ ८० ॥ ब्रह्माणंपश्चिमे
भागेयोजयित्वाशरस्यहि ॥ मध्येकालंफलेतस्थौस्वयमेवजनार्दनः ॥ ८१ ॥ पुण्यंरामावतारेयत्कृतंतत्सायकेऽर्पितम् ॥ ततो
हाहाकृतंसर्वंयदापार्थेनसंधितः ॥सशरस्तादृशोराजन्सुधन्वावाक्यमब्रवीत् ॥ ८२ ॥ ॥ सुधन्वोवाच ॥ ॥ जानामिगो
विन्दकृतंत्वदीयंरणेऽर्जुनार्थंसहसावधेमे ॥ शरस्थितंविश्वतनुंभवंतंपार्थप्रतिज्ञांकुरुसंस्मराद्य ॥ ८३ ॥ ॥ अर्जुनउवाच ॥
अनेनबाणेननपातयामिशिरस्त्वदीयंसकिरीटमद्य ॥ विभेदनाद्विष्णुगिरीशयोर्यत्पापंसमग्रंममचास्तुवीर ॥ ८४ ॥ ॥ सु
धन्वोवाच ॥ ॥ रात्रौशिवस्यापिगतश्चकाशींपूजांहरत्यंघ्रितलेनपापः ॥ स्नातश्चतीर्थेमणिकर्णिकायांयःकोऽपिसोऽहंनभि
देशरंचेत् ॥ ८५ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोऽर्जुनःसंदधेसायकंतंसुदीपितंवह्निशिखावमंतम् ॥ निःसारयंतंगगनेऽप्स
रोगणान्देवान्भयान्मानवतांनयंतम् ॥ ८६ ॥ वादित्राणिचसर्वाणिविनष्टानिशरस्वनात् ॥ भ्रांतंमहीतलंबाणात्सुधन्वानव्य
मोहत ॥ ८७ ॥ उवाचपार्थंकुपितस्त्वन्निमित्तंमहाहवे ॥ सर्वेसुराःप्ररक्षन्तुबाणंमत्तोहरादयः ॥ ८८ ॥ एषच्छेद्मिनसंदेहोहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हतोस्मिधनंजय ॥ लज्जांहंसध्वजोराजाप्राप्नोतिजननीचसा ॥ ८९ ॥ भार्याचमेविशालाक्षीकुत्स्यतेसाप्रभावती ॥ नृसिंहं
त्वामहंवेद्मिपार्थस्यरथसारथिम् ॥ ९० ॥ नपरित्यज्यगंतव्यमस्मिन्कालेजनार्दन ॥ तिष्ठगोविंदयुद्धस्वत्वंपार्थकुरुपौरुषम् ॥
॥ ९१ एतावदुक्त्वाकृष्णंतुजघ्वाचिच्छेदसायकम् ॥ पपातसायकस्यार्धंमध्येछिन्नंसुधन्वना ॥ ९२ ॥ हाहाकारोमहानासीच्छि
न्नेबाणेतथाविधे ॥ स्वबाहुंताडयामाससुधन्वारणमध्यगः ॥ ९३ ॥ चंद्रमंडलमेवाथचकंपेबाणनाशनात् ॥ सजलःपूर्वजश्चंद्रो
निर्जलत्वंकिरीटिनः ॥९४॥ प्राप्तवान्शरभंगेनतदद्भुतमिवाभवत् ॥ अर्धंबाणस्यशीर्षंतद्रम्यंज्वलितकुंडलम् ॥ सुधन्वनोऽपि
चिच्छेदनिधानंपौरुषस्यहि ॥ ९५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेसुधन्वनोवधोनामएकोनविंशोऽध्यायः ॥ १९ ॥ ॥छ॥
जैमिनिरुवाच ॥ ॥ तच्छिन्नंत्वरितंप्राप्तंशिरःकृष्णपदांबुजं ॥ जपन्केशवरामेतिनृसिंहेतिमुदायुतं ॥ १ ॥ अतिवेगेनबभ्राम
कबंधःसमराजिरे ॥ करप्राप्तान्हयान्नागान्रथांश्चिक्षेपवेगवान् ॥२॥ पार्थसैन्यंहतंभूरिकबंधेनसुधन्वनः ॥ गृहीतंतच्छिरोर
म्यंकेशवेनपदेस्थितं ॥ ३ ॥ उभाभ्यामपिहस्ताभ्यांसुमुखंपश्यतातदा ॥ मुखाद्विनिर्गतंतेजःप्रविष्टंकेशवानने ॥ ४ ॥ सुधन्व
नोतिसत्वस्यकृष्णोजानातिनेतरः ॥ ततःसकेशवस्तूर्णंचिक्षेपस्वकराद्रथे ॥ ५ ॥ हंसध्वजस्यतच्छीर्षंरम्यंज्वलितकुंडलं ॥ हंस
ध्वजोऽपिजग्राहपतितंपुत्रकंरणे ॥ ६ ॥ गृहीत्वासंमुखंवीक्ष्यवचनंचेदमब्रवीत् ॥ ॥ हंसध्वजउवाच ॥ ॥ सुधन्वन्किंकृ
तंपुत्रकथंतातनभाषसे ॥ ७ ॥ पिताऽहंतेनमांवेत्सिरुष्टोऽसिकिमुसुव्रत ॥ कटाहेतप्ततैलेत्वंमयाक्षिप्तोऽसिपुत्रक ॥ ८ ॥ पुत्रस्ने
हंपरित्यज्यदंडेनपरिपीडितः ॥ प्रतिज्ञासफलायुद्धेकृताकृष्णौचतोषितौ ॥९॥ प्रभावतीमनसिजःशमितोधीमतात्वया ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥जैमिनिरुवाच॥ ॥वदनंपुत्रकस्याथचुचुंबेप्रहसन्निव॥ १०॥ स्वभालेतस्यतद्भालंयोजयित्वास्थितोरथे ॥ पुनरेवाहराजा
सौपुत्रशोकेनपीडितः॥ ११॥ उत्तिष्ठपुत्रपार्थस्यगृहाणतुरगंबलात्॥ प्रद्युम्नप्रमुखैर्वीरैःसमंयुद्धंरणेकुरु॥ १२॥ जनन्याभा
षितंसत्यंकृतंकुवलयोदितम्॥ शृण्वंतुभ्रातरःसर्वेत्वदीयाःसुरथादयः॥ १३॥ मयार्थितःसुधन्वाऽसौनम्रूतेनैवगच्छति॥ तस्य
तद्भाषितंश्रुत्वासुरथोवाक्यमब्रवीत्॥ १४॥ ॥सुरथउवाच॥ ॥किमर्थंरोदनंतातक्रियतेद्यत्वयारणे॥ करेगृहीत्वापुत्रस्य
शीर्षंयुद्धेहतस्यच॥ १५॥ ॥हंसध्वजउवाच॥ ॥रोदनेकारणंचैकंसंजातंपुत्रकस्यमे ॥ छिन्नंशिरोऽस्यपतितंमाधवस्य
पदांबुजे॥ १६॥ तत्पदंतुपरित्यक्तंकृष्णस्यशिरसाऽमुना॥ महतासुकृतेनापिप्राप्यतेहरिसन्निधिः॥ १७॥ दुष्कृतेनातिघोरे
णवियोगस्तस्यजायते॥ किंचास्यदुष्कृतंघोरंममवापरितिष्ठति॥ १८॥ कृष्णांघ्रिपंकजगतंचंचरीकनिभंशिरः॥ क्षणमात्रं
नस्थितंतद्रोदनंममजायते॥ १९॥ त्यक्तंकृष्णेनसुरथममोपरिसुधन्वनः॥ आगतंपश्यतेभ्रातुःशिरोज्वलितकुंडलं॥ २०॥
एतत्त्यजामिकृष्णस्यरथेपुत्रशिरोमहत्॥ ॥जैमिनिरुवाच॥ ॥हंसध्वजेनतच्छीर्षंत्यक्तंकृष्णरथेपुनः॥ २१॥ कृष्णोगृ
हीत्वाचिक्षेपगगनेंऽतर्हितंचतत्॥ हरोगृहीत्वातच्छीर्षंरम्यंज्वलितकुंडलं॥ २२॥ संदधेरुंडमालायांभक्ताभयदशंकरः॥ सुरथोऽ
पिस्वजनकंप्राहदुःखात्प्रवारयन्॥ २३॥ पश्याद्यतातमेयुद्धंकृष्णयोश्चमयासह ॥ क्रियमाणंसमक्षंतेसर्वेपश्यंतुसैनिकाः॥
॥ २४॥ कृष्णेनस्वमुखेक्षिप्तोममभ्रातामहाबलः॥ तमद्यकेशवंभेत्स्येपार्थंचरथिनांवरम्॥ २५ यद्ययंपुरतस्तिष्ठेद्देवकीनंदनो
हरिः॥ एतावदुक्त्वावचनंरथमारुह्यसत्वरः॥ २६॥ सैन्येनमहतायुक्तःपार्थंयोद्धुमुपाययौ॥ स्वशंखंपूरयित्वाऽग्रेसिंहनादमथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोत् ॥ २७ ॥ रसातलंभिन्नमिवसंजातंजनमेजय ॥ गृहीत्वासधनुर्हस्तेसुरथःपार्थमब्रवीत् ॥ २८ ॥ तिष्ठपार्थाद्यसंग्रामेम
यासहमहाबल ॥ सम्यक्कृष्णार्जुनंपाहिसुरथोऽस्मितवाहितः॥२९॥सुधन्वामेहतोभ्रातास्वपुण्येनत्वयाहरे॥ बालचेष्टाकृतादे
वस्वहानिर्नेनिरीक्षिता ॥ ३० ॥ यथाकश्चिच्छिशुःकृष्णमौक्तिकानिप्रयच्छति॥गृह्णातिबदराण्येवतथापुण्यंत्वायाऽर्पितं॥३१॥
सुधन्वनोजीवितंतुगृहीत्वाबदरोपमम्॥ मुक्ताफलंत्वयादत्तंकःकेनपरिवंचितः ॥ ३२ ॥ गोपालोऽसिनसंदहोनमांजानासिकेश
व ॥ कुतोगतःसुधन्वामेनाहंपश्यामिबांधवं ॥ ३३ ॥ अद्यपांडवमासाद्यपरोहर्षःप्रजायते ॥ ॥ जैमिनिरुवाच ॥ ॥ तंतथा
विधमालोक्यपार्थंकृष्णोऽब्रवीद्वचः ॥ ३४ ॥ नचास्यपुरतःस्थेयंत्वयापार्थमहाहवे ॥ भ्रातृदुःखेनसंतप्तःसुकृतीचमहाबलः ॥
॥ ३५ ॥ अन्येगच्छंतुवैवीराःसुरथंयोधितुंरणे ॥ भवान्गंताऽद्यचेद्वीरंमहानर्थोभविष्यति ॥ ३६॥ ॥ अर्जुनउवाच ॥ ॥
अशुभानांसहस्राणित्वयाभग्नानिमेहरे ॥ अनेनसुरथेनाद्यानर्थःकीदृग्भविष्यति ॥ ३७॥ ॥ श्रीकृष्णउवाच ॥ ॥ द्विती
यांसृष्टिमारब्धुंवीक्ष्यचैनंरणेस्थितम् ॥ पितामहस्यमहतीचिंताजायेतसर्वदा ॥ ३८॥ सुरथस्यबलंभूरिस्वल्पंतवधनंजय ॥
त्वयाममतंकार्यंकृतमस्तिपुरासदा ॥ ३९॥ प्रद्युम्नप्रमुखावीराःपातयंतुमहाहवे ॥ उपायोविद्यतेनास्यपातनेपांडवर्षभ ॥
॥ ४०॥ त्वदर्थंसुकृतंदत्तंसुधन्वाकृच्छ्रतोहतः॥किंचिदस्यभवेत्पार्थदुष्कृतंसुकृतं बहु॥४१॥विजयेतस्यजायंतेसिद्धयोऽत्रनसंश
यः॥ केवलंसुकृतंचास्यशरीरेपरितिष्ठति॥४२॥ यस्मिन्क्षणेनपुंसोऽत्रसुकृतंविद्यतेऽनघ॥व्याघ्रतस्कर राजन्यसर्पाग्नीनांभयंभ
वेत् ॥४३॥ तस्मिन्क्षणेनसंदेहःकुतःसुकृतकारिणां॥ ॥ जैमिनिरुवाच ॥ ॥ समाहूयाब्रवीत्पुत्रंमाधवोरुक्मिणीसुतं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४४ ॥ सर्वथाबहुभिर्वीरैः पातनीयोमहाबलैः ॥ सुरथोरणमध्येतुगृहीतायामिपांडवम् ॥ ४५ ॥ कृष्णस्यवचनात्सर्वेप्रद्युम्ना
द्याविनिर्ययुः ॥ अर्जुनस्यरथंकृष्णःप्रेरयामाससंगरात् ॥ ४६ ॥ योजनानांत्रयंभूमिर्यत्रतिष्ठतिसत्वरः ॥ पश्चाद्युद्धंसमभव
त्सुरथेनापरैःसह ॥ ४७ ॥ सुरथस्तत्रकोपेनभ्रातृहंतारमाहवे ॥ योद्धुमायात्ततस्तौतुनदृष्टौकृष्णपांडवौ ॥ ४८ ॥ सुरथस्तुत
तोवाक्यंरणेप्राहप्रतापवान् ॥ शत्रूंसुधन्वनोनात्रपश्यामीतिरणांगणे ॥ ४९ ॥ शिशुभिःसहयोद्धव्यंमयाशोच्यैःकथंत्विह ॥
अपराधिनावुभावेतौकृष्णपार्थौनसंशयः ॥ ५० ॥ एतान्कृत्वातुपुरतःपलाय्यान्यत्रसंस्थितौ ॥ एतान्निवार्यपश्चात्तौहन्मियुद्धे
महाबलौ ॥ पातालेचांतरिक्षेवाक्कयास्येतेममाग्रतः ॥ ५१ ॥ एतत्सर्वंविनिश्चित्यसुरथःप्राहसैनिकान् ॥ सैन्यमध्येनपश्यामि
क्कयातौकृष्णपांडवौ ॥ ५२ ॥ ॥ सैनिकाऊचुः ॥ ॥ किंवृथाजल्पसेवीरप्राकृतःकातरोयथा ॥ येस्थिताःपुरतोयुद्धेतैस्त्वंयुद्धय
स्वसंगरे ॥ ५३ ॥ पश्चाद्द्रक्ष्यसितंकृष्णंपार्थंचतववैरिणम् ॥ एतावदुक्त्वातैःसर्वैःसुरथःपरिवारितः ॥ ५४ ॥ सुरथस्तान्महावी
रान्नाराचैःसमपोथयत् ॥ केचिन्निपतितावीराःकेचिन्मध्येविदारिताः ॥ ५५ ॥ गदयाछिन्नशिरसोहतवाहाःस्मशेरते ॥ हाहाभू
तंबलंसर्वंकृतंवीरेणतत्क्षणात् ॥ ५६ ॥ योजनानांत्रयंसैन्यंमध्येऽव्यूहस्ययत्स्थितम् ॥ भिन्नंतत्तेनराजेंद्रप्राप्तस्तत्रयतोहरिः ॥ ५७ ॥
ददर्शकेशवंवीरंपार्थंचरथिनांवरम् ॥ वासुदेवंतुबाणौघैःसमंताद्व्यकिरत्तदा ॥ ५८ ॥ पार्थोऽपिविद्धोराजेंद्रसायकैःकंकपत्रिभिः ॥
धनंजयस्तंसमरेतिष्ठतिष्ठेतिचाब्रवीत् ॥ ५९ ॥ ततोबाणसहस्रेणससूतंसहयंनृप ॥ ताडयामासवेगेनसरथंशत्रुतापनम् ॥
॥ ६० ॥ धनुश्चिच्छेदसगुणंध्वजंचसपताकिनम् ॥ रथश्चतिलशस्तस्यसुरथस्याहवेकृतः ॥ ६१ ॥ हयान्निहत्यचबलात्तंवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 व्याधशतेनच ॥ सुरथःपांडवंवीरंचकारशरपूरितम् ॥ ६२ ॥ नानाशस्त्रैस्तथास्त्रैश्चतयोर्युद्धमभून्नृप ॥ ततःसकेशवोराजन्पाड
वंप्राहसंगरे ॥ ६३ ॥ पश्यवीरस्यधैर्यंत्वंयुद्धंचकुरुतेयथा ॥ सुधन्वनोवियोगेनमन्येसैन्यंवधिष्यति ॥ ६४ ॥ एनंत्यक्त्वागत
श्चाहंनमांत्यजतिचार्जुन ॥ अयमेवाग्रतोयोद्धादृश्यतेऽत्रत्वयामया ॥ ६५ ॥ पश्यबाणैर्जगद्व्याप्तंनास्यवीर्यंप्रलीयते ॥ कृष्ण
स्यवचनात्पार्थःकुपितोवाक्यमब्रवीत् ॥ ६६ ॥ ॥ अर्जुनउवाच ॥ ॥ एनंदेवहनिष्यामिमहावीरंतवाग्रतः ॥ नासाध्यं
विद्यतेकिंचित्प्रसादात्तवकेशव ॥६७॥ ॥ जैमिनिरुवाच ॥ ॥ततोजघानसुरथंसायकानांशतेनच ॥ सुरथस्यरथोवेगाद्गगने
तत्क्षणंगतः ॥ ६८ ॥ पार्थंविव्याधकृष्णंचशरैश्चित्रैःशिलाशितैः ॥ उवाचप्रहसन्वीरःपांडवंश्वेतवाहनम् ॥ ६९ ॥ रथंतेभेद्मि
बाणौघैस्त्वंपार्थपरिपालय ॥शरप्रहाराभिहतोरथोबभ्रामभूतले ॥ ७० ॥ अर्जुनस्यसकृष्णस्यसरुद्रस्यमहारणे ॥ ततःपद्भ्यां
रथंपीड्यवासुदेवःक्रुधान्वितः ॥ ७१ ॥ धरांप्रवेशयित्वाऽग्रेतथाऽपिपरिनीयते ॥ नरथःस्थितएवात्रकृष्णोविस्मयमाययौ ॥
॥ ७२ ॥ शिलाशितैर्गार्ध्रपत्रैर्भिन्नौकृष्णार्जुनावुभौ ॥ पाञ्चजन्यंपूरयित्वादेवदत्तंधनंजयः ॥ ७३ ॥ कृष्णश्चतरसारोषात्पां
डवंवाक्यमब्रवीत् ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मयाधृतोऽपिहिरथःसुरथस्याशुगेनतु ॥ नीयतेऽत्रबलादेवविरथंसुरथंकुरु ॥
॥ ७४ ॥ ॥ ततोऽर्जुनोरणेक्रुद्धस्तस्यदिव्यंमहारथम् ॥ सहयंसध्वजंबाणैःससूतंशतधाच्छिनत् ॥ ७५ ॥ विरथःसुरथोराज
न्पाण्डवेनरणेकृतः ॥ तावत्पवनपुत्रेणस्वलांगूलेनवेष्टितः ॥ ७६ ॥रथःपार्थस्यभूमध्येसुबद्धस्तत्क्षणात्कृतः ॥ संधारितश्चकृ
ष्णेननजगामस्थितःपुनः ॥ ७७ ॥ ॥ सुरथउवाच ॥ वेद्मिकेशवभारेणनद्धंपार्थरथंतव ॥ उभाभ्यांनीयतेयोऽधस्तमहंचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वरेपुनः ॥ ७८ ॥ गृहीत्वास्यन्दनस्येषांस्वबलेननृपात्मजः ॥ मग्नंरथंसमुत्थाप्यपुनःप्रोवाचहर्षितः ॥ ७९ ॥ वदपार्थकुतो
युद्धाच्चिक्षिपामिरथंतव ॥ सागरेवाथमेरौवातस्मिन्वाहास्तिनापुरे ॥ ८० ॥ रथस्थेनापिपार्थेनताडितःपंचभिःशरैः ॥ सुरथोमू
र्छितोराजन्मुक्तःसचरथःकरात् ॥ ८१ ॥ मूर्छांविहायसुरथोरथमन्यंसमाश्रितः ॥ तावुभौक्रूरनयनौपुनरेवाप्ययुद्ध्यताम् ॥
॥ ८२ ॥ अर्धचंद्रैश्चनाराचैर्वत्सदंतैःशिलीमुखैः ॥ वाराहकर्णनालीकैःक्षुरप्रैःकण्टकामुखैः ॥ ८३ ॥ ॥ सुरथउवाच ॥ ॥
प्रतिज्ञांकुरुवीराद्यपार्थसत्यांतुकांचन ॥ प्रतिज्ञातेनानृतात्रसंजातेतिपुराश्रुतम् ॥ ८४ ॥ ॥ अर्जुनउवाच ॥ ॥ त्वामहं
पातयिष्यामिसमक्षंजनकस्यते ॥ प्रतिज्ञातंमयावीरत्वंब्रूहिस्वांयथोचिताम् ॥ ८५ ॥ ॥ सुरथउवाच ॥ ॥ त्वामहंपातयिष्या
मिरथाद्भूमाविहार्जुन ॥ नकुर्यांचेद्वचःसत्यंसुकृतंमेप्रणश्यतु ॥ ८६ ॥ ॥ जैमिनिरुवाच ॥ ॥ एतस्मिन्नंतरेवीरःपार्थंचश
रवृष्टिभिः ॥ छादयामासराजेंद्रपाण्डवोऽपितथाकरोत् ॥ ८७ ॥ शतमष्टोत्तरंपार्थोरथानांसुरथस्यच ॥ व्यधमच्छतधारोषा
द्बलंचनिहतंबहु ॥ ८८ ॥ अर्धचंद्रेणसुरथश्चिच्छेदास्यमहात्मनः ॥ कार्मुकज्यांसनाराचैःपाण्डवंप्रत्यविध्यत ॥ ८९ ॥ पुनः
कृत्वाऽर्जुनःस्वंहिकार्मुकंगुणसंयुतम् ॥ विरथंराजपुत्रंतंशस्त्रास्त्रैश्चसमन्वितम् ॥ ९० ॥ अर्धचंद्रेणविव्याधबाहुमूलेधनंजयः ॥
छिन्नोऽस्यदक्षिणोहस्तोनानालंकारमण्डितः ॥ ९१ ॥ निपपातधरादेशेविस्फुरन्संमुखोऽर्जुनम् ॥ सुरथोवामहस्तेनगृही
त्वामहतींगदाम् ॥ ९२ ॥ पार्थस्यतुरगान्क्रुद्धोजघानचजनार्दनम् ॥ सहस्रंसगजानांचपातयामासभूतले ॥ ९३ ॥ द्वेसह
स्रेरथानांचहयानामयुतंरणे ॥ इतस्ततोधावमानःसुरथोरथिनांवरः ॥ ९४ ॥ तिष्ठपार्थहरेतिष्ठतिष्ठंतुबालेनोनृपाः ॥ ब्रुवन्

१ ईषां रथदण्डम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जघानतरसापत्तीनामयुतंबली ॥ ९५ ॥ ततोर्जुनेनवामोऽस्यसगदः पातितःकरः ॥ कराभ्यांवर्जितोवीरः सुरथः पार्थमब्रवीत् ॥
॥ ९६ ॥ आत्मानंरक्षपार्थाद्यरथंपालयमाधव ॥ धनंजयंनिजंमित्रंप्राप्तोऽस्मितवचाहितः ॥ ९७ ॥ ॥ जैमिनिरुवाच ॥ ॥
धावमानोमहावीरश्छिन्नहस्तोऽर्जुनंप्रति ॥ तमायांतंतदापार्थश्चतुर्भिःसायकैर्नृप ॥ संधानमकरोच्चापेशृणुपार्थेनयत्कृतम् ॥
॥ ९८ ॥ एकेनहृदयंभित्वाद्वाभ्यांपादौचचिच्छिदे ॥ छिन्नपादोऽपिसुरथोयावद्यातिरथंप्रति ॥ ९९ ॥ सर्वदेवमयेनाथबाणे
नास्यमहच्छिरः ॥ सकुंडलंदीर्घनेत्रंतावच्चिच्छेदपांडवः ॥ १०० ॥ छिन्नपादंकबंधंतद्धावमानमितस्ततः ॥ पातयामासबहुलं
सैन्यंपार्थस्यकूटवत् ॥ १ ॥ शिरोलग्नंपार्थभालेमूर्छितस्तेनपांडवः ॥ भूमौपपाततच्छीर्षंकृष्णस्यपदमन्वगात् ॥ २ ॥ ॥ इ
त्याश्वमेधिकेपर्वणिजैमिनीयेसुरथवधोनामाविंशतितमोऽध्यायः ॥ २० ॥ ॥छ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ कृष्णोगृहीत्वातच्छीर्षंहस्ताभ्यामब्रवीत्ततः ॥ समुत्थाप्यार्जुनंभूम्याः समारोप्यस्वकरथे ॥ १ ॥ वेत्सि
पार्थमहाबाहुंसुरथंतथ्यवादिनं ॥ प्रतिज्ञापालितायेनकृतासत्याममांतिके ॥ २ ॥ ॥ अर्जुनउवाच ॥ ॥ पातितोऽस्म्यमु
नादेवत्वत्प्रसादात्पुनःस्थितः ॥ तन्नकौतुकमेवात्रधन्योऽयंनेतरोजनः ॥ ३ ॥ तद्देहिममहस्तेऽद्यवंदाम्येतच्छिरोमहत् ॥ यथाशू
रत्वमायामिस्पर्शात्तुशिरसोहरे ॥ ४ ॥ गृहीत्वातत्स्वयंपार्थोववंदेश्मश्रुलंरणे ॥ कृष्णःसस्मारगरुडंस्मृतमात्रःसमागतः ॥ ५ ॥ वै
नतेयोनमस्कृत्यस्वनाथंचाग्रतःस्थितः ॥ ॥ श्रीकृष्णउवाच ॥ ॥ गृहीत्वैतद्विशालाक्षंशिरस्त्वंसुरथस्यच ॥ ६ ॥ प्रयागेपात
याशुत्वंनियोगान्ममकाश्यपे ॥ ॥ गरुडउवाच ॥ ॥ जलमात्रंतत्रगंगायमुनाचसरस्वती ॥ ७ ॥ पातितेनूनमेतस्यकिंका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यँचभविष्यति॥ माधवोऽत्रभवान्भातिकिमर्थंनीयतेमया ॥८॥ गंगाजलेमनुष्यस्ययावदस्थिप्रतिष्ठते ॥ तावत्सदेहोस्वर्गस्थःकुरुतेऽमृतभोजनम्॥ ९ ॥ तवाननेमहत्तेजःप्रविष्टंसुरथस्यहि ॥ तथाऽपितत्रयास्यामिसतामाज्ञागरीयसी ॥१० ॥ तवदासोऽस्मिगोविंददीयतांमत्करेशिरः॥ ॥श्रीकृष्णउवाच॥ ॥पावनंतत्प्रयागंमेभविष्यत्यमुनाखग॥ ११ ॥ कोशेमदीयेवीरस्यशिरोरत्नंप्रपातय॥ ॥जैमिनिरुवाच॥ ॥वैनतेयोगृहीत्वाथसुरथस्यमहच्छिरः॥ जगामगगनेयावत्तावत्तद्ददृशेहरः॥ १२ ॥ पार्वतीसहितोनाकेवृषारुढोगणैर्वृतः ॥ कैलासनाथोभगवान्वरदःशूलधारकः॥ १३ ॥ चराचरगुरुःशंभुःसृष्टिकृल्लोकपालकः ॥ पितामहादिदेवानामाराध्यःसुरथस्यकम्॥ १४॥ नीयमानंकाश्यपिनाप्रयागंप्रतिमारिष ॥ उवाचभृंगिलोकेशोयाहित्वंगरुडंप्रति ॥ १५॥ पार्वतीप्रत्युवाचाथकिमेतन्नीयतेऽमुना॥ गरुडेनविरूपाक्षपरंकौतूहलंहिमे ॥ १६ ॥ ॥ ॥श्रीशिवउवाच॥ ॥ अर्जुनेनहतोवीरःशिरोऽस्यगरुडःशुभे ॥ आदिष्टःकिलकृष्णेनप्रयागेयातिपातितुं॥ १७॥ मयायंप्रेरितोभद्रेसमानेतुंममांतिकं॥ भृंगिस्तन्मुंडमालार्थंशिरोज्वलितकुंडलम्॥ १८॥ भ्रातुरस्याहृतंपूर्वंशिरःकमललोचने ॥ सुरथस्यद्वितीयंमेभविष्यतिसुभूषणं॥ १९॥ धर्मिष्ठानांवदान्यानांकृतज्ञानांसदामया॥ शूराणांजितकामानांशिरसांमंडनंमहत् ॥ २० ॥ध्रियतेकिलवामोरुनेतरेषांकदाचन॥ ॥जैमिनिरुवाच॥ ॥महादेवस्यवचनंश्रुत्वाभृंगिःखगाधिपम्॥ ॥ २१ ॥ प्राप्यवेगेनमहताचेदंवचनमब्रवीत्॥ ॥भृंगिरुवाच॥ ॥वैनतेयमहाभागदेहित्वंमत्करेशिरः ॥ त्वत्तोबलाद्गृहीष्यामिनमांवेत्सिखगाधिप ॥२२॥ नाहंसर्पोवैनतेयभयंकुर्वेनतावकम्॥ मुंचमुंचनजानासिममतेजःसुदारुणम्॥

१ शिरः। २ गरुडेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ २३ ॥ ततस्तंगरुडोभृंगिंपक्षाभ्यामवधूयहि ॥ जगामतीर्थराजेहिभृंगिस्त्रिनयनंगतः ॥२४॥ पक्षवातेनघोरेणतरसाशुष्क
 पर्णवत् ॥ पार्वतीतंसमीक्ष्याथप्रहसंतीवचोऽब्रवीत् ॥ २५ ॥ ॥ पार्वत्युवाच ॥ ॥ शिवदूतनजानासिगरुडंहरिवाहनं ॥
यस्यत्वंपक्षवातेनप्राप्तोऽसिहरसन्निधौ ॥ २६ ॥ शुष्कगात्रंकथंदूतंबलहीनंहिशंकर ॥ भवांस्तन्नोदयेद्वीरंगरुडंपन्नगाशनम्
॥ २७॥ वृषोवृद्धोयस्यपत्रंप्रियासागरगामिनी ॥ गजचर्मपरंवस्त्रंशस्त्रंखट्वांगमेवच ॥ २८॥ प्रियावचनमाकर्ण्यप्रसन्नःशंकरो
ऽब्रवीत् ॥ ॥ श्रीशंकरउवाच ॥ ॥ वृषगच्छमयाज्ञप्तोवैनतेयात्समानय ॥ २९ ॥ यथादूतबलंवेत्तिपार्वतीवरवर्णिनी ॥ नं
दीहरसमादिष्टोजगामगरुडंप्रति ॥ ३० ॥ गृहीतुंतच्छिरोरम्यंकोपेनमहतायुतः ॥ वृषनासाप्रवातेनगरुडस्यकलेवरम् ॥
॥ ३१ ॥ बभ्रामभूतलंसर्वंतास्मिन्कालेविशांपते ॥ नशशाकस्ववातेननीयमानंखगाधिपम् ॥ ३२ ॥ तदाधारयितुंरोषात्तूलंगज
इवांगणे ॥ वनानिसरितश्चैवगिरीन्यातिचसागरान् ॥ ३३ ॥ सत्यलोकंचकैलासंवैकुंठमपिपावनम् ॥ ततोदैववशादेवप्रया
गमगमत्खगः ॥ ३४ ॥ मुमोचतीर्थेतत्राशुकृष्णंवाक्यमनुस्मरन् ॥ पातितंजलमध्येतुगृहीतंनंदिनातदा ॥ ३५ ॥ गरुडोऽपिम
हाविष्णुंपुनःप्राप्तोहसन्निव ॥ नंदीददौशंभुकरेशिरोज्वलितकुंडलम् ॥ ३६ ॥ शंभुनामुंडमालायांमध्येरत्नंशिरःकृतम् ॥ हंस
ध्वजोऽपितंपुत्रंपतितंवीक्ष्यसत्वरः ॥ ३७ ॥ रथमारुह्यसबलःप्रायाद्योद्धुंधनंजयम् ॥ कंपिताप्टथिवीदेवीशेषोपिचालितोऽभव
त् ॥ ३८॥ तंवीक्ष्यकुपितंवीरंसबलंतरसाहरिः ॥ रथात्समुत्तीर्यतदाप्रसार्यस्वकरौस्थितः ॥ ३९ ॥ उवाचकेशवोवीरंहंसध्व
जमकल्मषम् ॥ ॥ श्रीकृष्णउवाच ॥ ॥ आलिंगनंदेहिविभोप्रीतिश्चमहतीत्वयि ॥ रणात्कोपंपरित्यज्यपुत्रशोकंचमारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष ॥ ४० ॥ हंसध्वजोवीक्ष्यहरिंरथाद्भूमिमगात्तदा ॥ समालिंग्यहरिंतस्थौप्रहसन्वाक्यमब्रवीत् ॥ ४१ ॥ ॥ हंसध्वजउ
वाच ॥ ॥ प्राप्तोऽस्म्यनाथोनाथंत्वांपुत्रशोकश्चकीदृशः ॥ भवाद्भयंनमेदेवनान्यतोवानकालतः ॥४२॥ ॥श्रीकृष्णउवाच॥
मुंचाश्वंपांडवंरक्षगमिष्यामियुधिष्ठिरम् ॥ यथाऽहंपांडवस्यार्थेसंत्यजामिकलेवरम् ॥ ४३ ॥ तथाभवानपिरणेपालयत्वेनमर्जु
नम् ॥ पार्थंपश्यसखायंमेरथोपरिसुसंस्थितम् ॥ ४४ ॥ ततोऽर्जुनंसमानीयकेशवःक्लेशनाशनः ॥ उभयोःसंगमंकृत्वामोचयि
त्वातुरंगमम् ॥ ४५ ॥ पंचरात्रंस्थितस्तस्मिन्नगरेकेशवोगतः ॥ युधिष्ठिरस्यनगरंप्राप्यसर्वंन्यवेदयत् ॥ ४६ ॥ तुरगोबं
धनान्मुक्तःपरिबभ्राममेदिनीं ॥ तमनुप्रययौपार्थोमरालध्वजसंयुतः ॥ ४७ ॥ प्रद्युम्नप्रमुखैर्वीरैःपाल्यमानउदङ्मुखः ॥ मु
क्तमात्रःसतुरगःप्राप्तोदेशान्भयानकान् ॥ ४८ ॥ रथिभिःपंचभिःसार्धंपार्थस्तंनैवमुंचति ॥ हंसध्वजोविशालाक्षोरुक्मिणी
तनयस्तथा ॥ ४९ ॥ अनुशाल्वोमहाबाहुर्वृषकेतुर्महाबलः ॥ सुवेगःपंचमश्चैवसर्वेरक्षंतिपांडवम् ॥ ५० ॥ तुरगोजलपाना
र्थंप्रविष्टोनलिनीयुतम् ॥ महत्सरोऽभवत्तत्रतुरगीनिर्गताबहिः ॥ ५१ ॥ तांवीक्ष्यविस्मिताःसर्वेकिमिदंदैवकारितम् ॥ तुरग
स्तुरगीजातावनंचैतत्सुदारुणम् ॥ ५२ ॥ पृष्ठतोऽनुययुःसर्वेततःप्राप्ताऽपरंसरः ॥ प्रविष्टाजलमध्येसाततोव्याघ्रीबभूवह ॥
॥ ५३ ॥ अब्रुवन्पार्थमुख्यास्तेकिमिदंहिभविष्यति ॥ निर्ययौसोऽपिमृगयुस्तस्मात्तोयाज्जनाधिप ॥ ५४ ॥ ॥ जनमेजय
वाच ॥ ॥ आश्चर्यंभवताचोक्तंवनेतस्मिन्महामुने ॥ किंकारणंजलेतस्मिन्प्रविष्टेतुरगेतदा ॥ ५५ ॥ तत्क्षणाद्वडवाजाता
कारणंतत्रकिंद्विज ॥ किंतत्सरोवनंकिंतद्वडवाकेनहेतुना ॥ ५६ ॥ जातापुनर्व्याघ्रतांचसर्वंसंशयितंविभो ॥ सकथंतुरगोजातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पुनरेववदस्वतत् ॥ ५७॥ ॥जैमिनिरुवाच॥ ॥भृगुराजन्पुरावृत्तंवनेचास्मिन्सरोवरे॥ उमावनंसरेरम्यंतयातप्तंमह
 त्तपः॥ ५८॥ रुद्रःप्रसन्नःसततंममभूयादितीच्छया ॥ तपश्चरामिभोस्वामिन्विघ्ननाशंसदाकुरु॥ ५९॥ इतिसंकल्प्यसादे
वीचिरंतेपेमहत्तपः॥ तत्रकश्चिद्दुराचारोदैत्योविघ्नार्थमागमत्॥ ६०॥ सप्राहदेवींतत्रस्थांकिमर्थंतप्यसेतपः॥ वपुस्तेसुंदरं
भद्रेकिमलभ्यंतवाधुना ॥ ६१॥ सर्वदास्याम्यहंतुभ्यंममभार्याभवानघे॥ निशम्यनीचवाक्यानिसादेवीकुपिताचतम्॥६२॥
शशापरोषताम्राक्षीभस्मीभवसुदुर्मते॥ ततस्तंभस्मसात्कृत्वाप्राहसावनदेवताः॥ ६३॥ अद्यप्रभृतिमद्वाक्याद्वनेचास्मिन्स
रोवरे॥ आगमिष्यतियःकश्चिन्मामवज्ञायमूढधीः॥ स्त्रीलिंगचिह्नितोनूनंभविष्यतिनसंशयः॥ ६४॥ तदाप्रभृतिभोराजन्प्र
विशेद्यःपुमान्कुधीः॥ स्त्रीचिह्नंदृश्यतेसद्योदेव्याःशापेनपांडव ॥ ६५॥ अतोऽयंतुरगःसद्योजलस्पर्शेनतत्क्षणात्॥ वडवात्वं
समापन्नस्तत्सर्वंशापकारणम्॥ ६६॥ यस्त्वयाह्यपरःप्रश्नोहरिर्व्याघ्रोयथाभवत्॥ तमाकर्णयराजेंद्रपृच्छतःकथयामिते ॥
॥ ६७॥ पुराकृतयुगेविप्रअकृतव्रणसंज्ञकः॥ पर्यटन्सकलांपृथ्वींतीर्थयात्रार्थमादरात्॥ ६८॥ तत्रतत्रतपस्तप्त्वाकदाचि
त्कालपर्ययात्॥ इमंदेशमनुप्राप्तोदृष्ट्वाचैतन्महत्सरः॥ ६९॥ स्नातुंप्रविष्टःशुद्धात्माजपन्मंत्रांश्चवारुणान्॥ पीत्वास्नात्वाच
विधिवन्निर्गतःसजलाद्बहिः॥ ७०॥ जलग्राहस्तस्यपादेकश्चिल्लग्नःसुदारुणः॥ दंतैस्तुदंतंतमृषिंकर्षयंतंमहाजले॥ ७१॥
दृष्ट्वातंदारुणंग्राहंकर्षयंतंपुनःपुनः॥ कोऽयंदुष्टतरःप्राप्तोजलेऽस्मिन्कर्षतेबलात्॥ ७२॥ दैत्योवादानवश्चायंमत्स्योदुष्टत
रोऽथवा॥ दुष्टेजलेप्रवेशोऽद्यकथमासीन्मतिर्मम ॥ ७३॥ इतिसंचिन्त्यमनसाकोपाविष्टोऽभवन्मुनिः॥ शशापतज्जलंदुष्टंज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लस्थांतत्रदेवताम् ॥ ७४ ॥ अस्मिन्जलेसुदुष्टेहियस्तुस्पर्शंकरिष्यति ॥ सतुव्याघ्रोभवेत्सद्योनानृतंममभाषितम् ॥ ७५ ॥
इत्युक्त्वाप्रययौविप्रोमोचयित्वाग्रहंबलात् ॥ तदाप्रभृतिपानीयमेतद्दुष्टमभून्नृप ॥ ७६ ॥ इतिपृष्टंत्वयायत्तुतत्सर्वंकथितंमया॥
भूयःकथंसतुरगोजातस्तत्तुनिबोधमे ॥ ७७ ॥ अर्जुनस्तुरगंदृष्ट्वाव्याघ्ररूपंभयानकम् ॥ मनसाचिन्तयामासविष्णुंसर्वभया
पहम् ॥ ७८ ॥ यस्यप्रभावान्मुक्ताःस्मोदुर्योधनभयात्पुरा ॥ सदेवःपातुमांत्वत्रविषमेऽस्मिन्सुदारणे ॥ ७९ ॥ सैनिकान्मो
हनूरात्रौदिवाचयदुनन्दनः ॥ यज्ञंयुधिष्ठिरस्याद्यसिद्धिंनयतुसोऽच्युतः॥ ८० ॥इतिध्यात्वाहरिंपार्थस्तस्थिवानकुतोभयः ॥
तस्मिन्क्षणेव्याघ्ररूपंत्यक्त्वाचाश्वोऽभवत्पुनः ॥ ८१ ॥ पूर्वरूपंहयंदृष्ट्वाहर्षात्तेननृतुर्भृशम् ॥ नानाविधानिवाद्यानिवादयन्तो
मुदाययुः ॥ ८२ ॥ ततोदैववशाज्जातःपुनःसतुरगोययौ ॥ नानाविधांस्ततोदेशान्स्त्रीमयान्सुरसानपि ॥ ८३ ॥ स्त्रियश्चसंति
गहनाःसुरूपानवयौवनाः ॥ राज्यंनारीचकुरुतेनपुमांस्तत्रजीवति ॥ ८४ ॥ यस्तासांसंगतिंकुर्याद्रूपलावण्यमोहितः ॥ मुख
वासेनरम्येणनयनांचलताडितः ॥ ८५ ॥ गीतेनाथचनृत्येनहास्येनमृदुभाषितैः ॥ मासमात्रंस्त्रियंप्राप्यपश्चात्प्राप्नोतिवैशस
म् ॥ ८६ ॥ रतंसमतरंकृत्वाविषमंदंशनंपुनः ॥ नखप्रहारैर्विविधैर्हाहतास्मीतिभाषणैः ॥ ८७ ॥ ताडनैर्मुष्टिघातैश्चग्रहणै
र्मुखचुंबनैः ॥ जिह्वाघातेनसमदंकूजितैःपक्षिसन्निभैः ॥ ८८ ॥ वन्दनैर्वीक्षणैर्वक्रैस्त्वदासीतिभाषणैः ॥ आगतोऽसिगतश्चा
सित्वयाकान्यास्मृताऽधुना ॥ ८९ ॥ जननीतवकाप्राप्ताभगिनीगच्छमद्गृहात् ॥ भावलाभेनसहितःसंजातोवदसुव्रत॥ ९० ॥
एवंविधैर्वचोभिस्ताःकुर्वंतिगतजीवितम् ॥ तेनैवस्वेनलिंगेनप्रविशंतिहुताशनम्॥९१ ॥ काचिज्जीवतिसागर्भंधत्तेकन्यांप्रसूय

१ तस्माद्देशाद्विनिर्यातरितिपुस्तकान्तरेपाठभेदोदृश्यते सयोग्यरितिभाति

CC-0. In Public Domain. Digitization by eGangotri

जै०अ० ते ॥ प्रविष्टस्तुरगः पार्थोवीरैः पंचभिरावृतः ॥ ९२ ॥ उवाचतान्महावीरान्वयंस्त्रीमंडलेस्थिताः ॥ अत्रैताविषकन्याश्चतिष्ठं अ०
॥६२॥ तिबलसंयुताः ॥ ९३ ॥ नयिष्यंतिहयंघोराःकष्टमत्रभविष्यति ॥ एवंब्रुवतिपार्थेचस्त्रीणांवृंदंसमागतम् ॥ ९४ ॥ हयारूढं २२
चंपकाभंमुक्तामालाविभूषितम् ॥ नानालंकारसंयुक्तंहावभावसमन्वितम् ॥ ९५ ॥ बद्धचामरमाकण्ठेसतूणंसधनुर्धरम् ॥ अ
र्जुनाश्वंगृहीत्वाथनारीकाचननिर्गता ॥ ९६ ॥ स्वामिनींप्रतिगत्वासादर्शयामासवाजिनम् ॥ युधिष्ठिरस्यभ्रातात्रतुरंगंप्रतिर
क्षति ॥ तवादेशान्मयानीतस्तुरगःकिंकरोम्यतः ॥ ९७ ॥ ॥ राज्ञ्युवाच ॥ ॥ वाजिशालांनयैनंत्वंयामिपार्थंचयोधितुम् ॥
साचकारततःसर्वंराज्ञीपाण्डवमन्वगात् ॥ ९८ ॥ ॥ इत्याश्वमेधिकेप० जै० स्त्रीराज्यगमनंनाम एकविंशो० ॥ २१ ॥ ॥
जैमिनिरुवाच ॥ ॥ चंद्राननानांवीराणांलक्षेणपरिवारिता ॥ तुरगानधिरूढानांस्थितापार्थरथंप्रति ॥ १ ॥ पीनोन्नतकुचानांसा
श्यामानांचारुलोचना ॥ गजकुंभस्थितानांहिलक्षेणापिवृताबभौ ॥ २ ॥ रथमारुह्यनारीणांलक्षंचपुरतःस्थितं ॥ लक्षत्रयंपांड
वंतंपरिवार्यस्थितंरणे ॥ ३ ॥ प्रमीलानामसाराज्ञीप्रत्युवाचधनंजयम् ॥ ॥ प्रमीलोवाच ॥ ॥ मयाधृतस्तेतुरगस्तंमोचयितुमि
च्छसि ॥ ४ ॥ कुरुयुद्धंमयासार्धंव्यपनेष्यामित्वद्बलं ॥ सहस्वमत्प्रहारंत्वंधैर्येणमहतार्जुन ॥ ५ ॥ प्रथमंताडितःपार्थोनेत्रभावैःप्र
माथिभिः ॥ ततोबाणेननिर्भिन्नोहृदयेगिरिदारिणा ॥ ६ ॥ सचूचुकनिभाग्रेणतयासस्मितयानृप ॥ ततोऽतरेपंचवीराविद्धाःसर्वा
भिरेवते ॥ ७ ॥ कर्तव्यंविस्मृतंतेषांविनाकर्णसुतंतदा ॥ राज्ञीप्राहार्जुनंवीरंनमांजानासिचार्जुन ॥ ८ ॥ त्वांविजित्यकरिष्यामि ॥६२॥
स्वदासंविद्धिपांडव ॥ किंकरिष्यसियागेनमयासहमधुंपिब ॥ ९ ॥ दर्शयिष्यामितेसौख्यंयन्नदृष्टंत्वयापुरा ॥ ॥ अर्जुनउ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ ॥ तवसंगे नमरणंजायतेऽत्रमयाश्रुतं ॥ १० ॥ यागार्थंपाल्यतेकेनतुरगः पांडवंविना ॥ ॥ प्रमीलोवाच ॥ ॥ अ
र्जुनोभयथानूनंतवमृत्युरयंस्थितः ॥ ११ ॥ मच्छरैर्नयनैर्वापिताड्यमानोनजीवसि ॥ मत्संगमात्सुखावाप्तिर्निधनंहिमयास
ह ॥ १२ ॥ नाराचैः पीड्यमानोऽपिमृतोऽयर्थंगमिष्यसि ॥ नवक्ष्यामिवृथावाचंतवपार्थरतानचेत् ॥ १३ ॥ शरैस्त्वांपातयिष्या
मिविजेष्यामिरतेनवा ॥ विनात्वांजीवितंत्यक्ष्येतत्सर्वमवधारय ॥ १४ ॥ आवयोर्मरणंप्राप्तंदर्शनादेवमारिष ॥ तस्मान्मदी
यंरुचिरंयौवनंभुंक्ष्वपांडव ॥ १५ ॥ अर्जुनस्तांतदावीक्ष्यब्रुवंतींकामपीडितां ॥ लक्ष्मणंचिंतयित्वाथतथाशूर्पणखांहृदि ॥ १६ ॥ नि
जघानशरैः षड्भिस्तयातेपंचधाकृताः ॥ धनंजयंशरैर्घोरैः सप्तभिः समताडयत् १७ पुनः शरसहस्रैः साऽदृश्यंचक्रेर्जुनंरणे ॥ मोह
नास्त्रंपांडवोऽपिसंदधेकार्मुकेस्वके ॥ १८ ॥ प्रमीलामोहनास्त्रंतत्सगुणंसायकैस्त्रिभिः ॥ छित्वाप्राहार्जुनंमूढमोहनास्त्रंनभातिते ॥
॥ १९ ॥ अर्जुनः सगुणंकृत्वास्वधनुः कोपपूरितः ॥ यावत्पातयतेतांहिवाणीखेचाभवत्तदा ॥ २० ॥ मापार्थसाहसंकार्षीः संग्रामेस्त्रीव
धंप्रति ॥ नैवशक्यात्वयाजेतुंवर्षाणामयुतेनच ॥ २१ ॥ इमांवरयभद्रंतेयदिजीवितुमिच्छसि ॥ इमांप्रब्रूहिनगरंत्वांविनेष्यामि
भामिनि ॥ २२ ॥ पार्थस्तद्भाषितंश्रुत्वासर्वंचक्रेयथोदितम् ॥ प्रमीलांवरयामासयुद्धभूमौविशांपते ॥ २३ ॥ उवाचतांविशाला
क्षींसंगमंहस्तिनापुरे ॥ तवदास्यामिभद्रेऽहंव्रतस्थोहयरक्षणे ॥ २४ ॥ कृष्णस्यदर्शनाद्दोषागमिष्यंतिहितावकाः ॥ एतासाम
पिसर्वासांभर्त्तारोमत्पुरेशुभे ॥ २५ ॥ भविष्यंतिनसंदेहोहयंमुंचव्रजाम्यहम् ॥ सहितावालमायाहिव्रजवाहास्तिनापुरे ॥ २६
ततोमुक्तातंतुरगंसाजगामयुधिष्ठिरम् ॥ हयोययौवृक्षदेशान्फलितान्मानुषैर्गजैः ॥ २७ ॥ स्त्रीभिर्गोभिश्चपशुभिरजात्रिकख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रैरपि ॥ प्रभातेचैवजायंतेमध्यान्हेयौवनान्विताः ॥ २८ ॥ सायंकालेम्रियंतेहिवृक्षेषुविविधाजनाः ॥ ययौतत्रापिपार्थोऽसावि
स्मयोत्फुल्ललोचनः ॥ २९ ॥ ततोदेशान्सविविधांस्तुरंगेणसमन्वितः ॥ कर्णप्रावरणानेकवक्त्रानेकाक्षपादकान् ॥ ३० ॥ हयान
नांस्त्रिनेत्रांस्तान्दीर्घनासांस्त्रिपादकान् ॥ सश्रृंगानेकश्रृंगांश्चखरवक्त्रानुपाययौ ॥ ३१ ॥ भीषणस्यपुरंप्राप्तोराक्षसस्यतुरंग
मः ॥ राक्षसास्तत्रबहवोवसंतिपुरुषादकाः ॥ ३२ ॥ पापाचाराःकोपयुक्तादीर्घकालप्रजीविनः ॥ कोटित्रितयमेतेषांराक्षसा
नांपुरःस्थितम् ॥ ३३ ॥ भीषणस्यपुरोधास्तुमेदोहासतुरंगमम् ॥ ददर्शभ्रममाणंहिकाननेब्रह्मराक्षसः ॥ ३४ ॥ ज्ञात्वापार्थह
यंप्राप्तंभीषणस्यांतिकंययौ॥ नरांत्रसूत्रसंभूतंकंठेयज्ञोपवीतकम्॥३५॥बिभ्रन्नरकपालानांजपमालांभयानकां॥गजवक्त्रास्य
शुष्कस्यसजलंहिकमंडलुम् ॥ ३६ ॥ नेत्रगोलकजांकंठेप्रोतांघोरांस्त्रजंतथा ॥ गजदासेरकौयुक्तौकर्णयोस्तस्यभूषणे॥३७॥
गजपृष्ठभवस्यास्थनोदंडंचसपलंकरे ॥ उवाचभीषणंगत्वापार्थःप्राप्तस्तवाहितः ॥३८॥ तुरंगंपालयानोऽत्रविद्धितंराक्षसाधि
प ॥ पिताहितेबकोनामनिहतोस्याग्रजेनसः ॥ ३९ ॥ एनंभीमानुजंशीघ्रंगृहीत्वायज्ञमाचर ॥ सर्वलक्षणसंयुक्तंनरमेधंममाज्ञ
या ॥ ४० ॥ आचार्योऽहंभविष्यामिसंत्यन्येब्रह्मराक्षसाः ॥ कुलीनाव्रतयुक्ताश्चचातुर्मास्यव्रतेस्थिताः ॥ ४१ ॥ येकुर्वंतिसुरा
पानंरुधिरेणापितोषिताः ॥ मासोपवासिनीनांतुमांसेनश्रावणेव्रतम् ॥ ४२ ॥ तथाभाद्रपदंप्राप्ययतीनामूर्ध्वरेतसां ॥ आहा
रेणैवजीवंतिआश्विनेचजटावताम् ॥ ४३ ॥ कार्तिकेचकुमाराणांपलेनव्रतधारकाः ॥ तस्माद्धारयपार्थंहिससैन्यंहितुरंगमम् ॥ ॥६३॥
॥ ४४ ॥ व्रतस्थाश्चिरकालंहितिष्ठंतिब्रह्मराक्षसाः ॥ गजान्धनंजयस्याद्यभक्षयंतुतथाहयान् ॥ ४५ ॥ नराणांरुधिरेणैवको

१ दासरकःउष्ट्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णेनगलनालतः ॥ मांसेनचमुदायुक्ताभवंत्वेतेऽद्यतापसाः ॥ ४६ ॥ रावणेनकृतोयज्ञोनरमेधोमहात्मना ॥ तस्मिन्यज्ञेसुतृप्ता
स्तुसर्वेतेब्रह्मराक्षसाः ॥ ४७ ॥ सांप्रतंत्वत्कृतेयज्ञेवयंतृप्ताभवामहे ॥ ॥ भीषणउवाच ॥ ॥ सर्वंतातकरिष्यामियथोक्तं
भवताममा ॥ ४८ ॥ पितृशत्रुंपुरंप्राप्तंकथमद्यनधारये ॥ भवादृशैर्वृतश्चाद्यसुविद्यैर्ब्रह्मराक्षसैः ॥ ४९ ॥ एकंपृच्छामितातत्वां
यज्ञेकिंतवभोजनम् ॥ मयादेयंतवविभोपार्थसैन्याद्यथोचितम् ॥ ५० ॥ स्वरुचिंशंसतुभवानिहयज्ञंसमाचरे ॥ ॥ मेदोहा
उवाच ॥ नराणामतिपुष्टानांमेदैःप्रीतिश्चलोचनैः ॥ ५१ ॥ गजानांचनराणांचहयानांनयनैर्मम ॥ मेदक्लिन्नैःपरातृप्तिस्त्वत्प्र
सादाद्भविष्यति ॥ ५२ ॥ सहस्रमात्रंराजेंद्रपदातीनांचभोजनम् ॥ तवयज्ञेकरिष्यामिबह्वाशीर्नापरैःसमः ॥ ५३ ॥ तस्यभा
षितमाकर्ण्यराक्षसोमुदितोऽभवत् ॥ चकारमण्डपंरम्यंसपुरोहितऋत्विजैः ॥ ५४ ॥ यज्ञार्थंतरसायोद्धुंप्रायात्पार्थचमूंप्रति ॥
राक्षसानांचघोराणांवृतःकोटित्रयेणसः ॥ ५५ ॥ राक्षस्यःपर्वतारूढाददृशुःपार्थमागतम् ॥ हनूमंतंविलोक्यैकाराक्षसीवाक्य
मब्रवीत् ॥ ५६ ॥ ॥ राक्षस्युवाच ॥ पलायध्वंपलायध्वंभवतीनांनजीवितम् ॥ वानरंचात्रपश्यामिनिहतायेनराक्षसाः ॥
॥ ५७ ॥ रावणस्यपुरेदृष्टोमयाऽयंयत्रजानकी ॥ स्थिताशोकवनेदेवीतदाप्रभृतिमेभयम् ॥ ५८ ॥ ॥ जैमिनिरुवाच ॥ ॥
राक्षसीवाक्यमाकर्ण्यप्राहलंबोदरापरा ॥ कृशहस्तपदादीर्घग्रीवानल्वसमुच्छ्रया ॥ ५९ ॥ रावणंमावदनरान्मृत्युंप्राप्तंममा
ग्रतः ॥ वानरंभक्षयिष्यामिसभयंपुरतस्तव ॥ ६० ॥ तांतुचैवापराप्राहाकिंत्वयागदितंकृशे ॥ पश्यमेत्वंस्तनौदीर्घौस्थूलौभूमौ
विलंबिनौ ॥ ६१ ॥ योजनंप्राप्यमत्पृष्ठेकृष्यंतौद्रुमनाशनौ ॥ कुचेनपाण्डवंहान्मिहनूमंतंचवानरम् ॥ ६२ ॥ सैन्यंचभारतंवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गान्माभीतोराक्षसीगणः ॥ जयतांवानरान्मंदोनमांजानातिभीषणः ॥ ६३ ॥ तावत्तृतीयाकुपितापुत्रंतांयोजनस्तनीम् ॥ ज
 गादकिंभयंत्वत्तोगमिष्यतिकुचेनकिम् ॥ ६४ ॥ स्तनौतेयोजनंप्राप्तौबिल्वमात्रौममाग्रतः ॥ योजनंकुचयोःप्राप्तंचूचुकंममप
श्यत ॥ ६५ ॥ सर्वासांव्यपनेष्यामिभयंहत्वाकपीश्वरम् ॥ एतावदुक्त्वावचनंपार्थसैन्यंनिरीक्ष्यसा ॥ ६६ ॥ उत्प्लुत्यगगने
तीव्राहाहाकुत्वाप्रधाविता ॥ कुचाभ्यांभ्रममाणाभ्यांस्थूलाभ्यांसंगरेनृप ॥ ६७ ॥ पातयंतीबलंभूरिचूर्णयंतीमहागजान् ॥
यत्रयत्रकुचौलग्नौतत्रतत्पातितंबलम् ॥ ६८ ॥ परमाणुनिभंसैन्यंकृतंकेवलयातया ॥ उत्क्षिपन्तीगजानश्वान्नरानपिसुदारु
णान् ॥ ६९ ॥ अन्याश्चबह्व्योराक्षस्यस्तथाचक्रुःक्षयंरणे ॥ राक्षसास्तेऽपितान्वीरान्पातयामासुराहवे ॥ ७० ॥ भीषणः
पार्थमासाद्यचेदंवचनमब्रवीत् ॥ ॥ भीषणउवाच ॥ ॥ तिष्ठपार्थकुतोयासिदिष्ट्याद्दष्टोऽसिसंगरे ॥ ७१ ॥ भीमेनमेहतस्ता
तस्तदाहंनसमीपगः ॥ त्वामद्यसंगरेजित्वानरमेधंसमाचरे ॥ ७२ ॥ ततोभीमंवधिष्यामिपास्याभिरुधिरंबलात् ॥ ततोमुमो
चबाणौघान्मुद्गरान्पर्वतान्द्रुमान् ॥ ७३ ॥ पाण्डवंपीडयामासराक्षसैःसहितोबली ॥ अर्जुनस्तंतथाभूतंसगणंराक्षसंशरैः ॥
॥ ७४ ॥ बिभेदशतसाहस्त्रैःसमंताल्लोमवाहिभिः ॥ हनूमान्राक्षसीनांहिचकारकदनंमहत् ॥ ७५ ॥ लांगूलवेष्टिताःसर्वास्ता
डिताधरणीतले ॥ गतप्राणाभिन्नगात्राःकीर्णकेश्योहताश्चताः ॥ ७६ ॥ भयात्पलायिताःकाश्चिद्याताःपर्वतसानुषु ॥ रक्षोघ्नैः
पांडवोमंत्रैःसंमंत्र्यनिशितान्शरान् ॥ ७७ ॥ मुमोचराक्षसबलेभीतास्तेदुद्रुवुर्वने ॥ भीषणःससृजेमायांराक्षसींक्रोधपूरितः ॥
॥ ७८ ॥ सद्योऽभवन्पर्वताश्चसिंहाश्चशतशोगजाः ॥ शार्दूलाःशरभाव्याघ्रास्तरक्षाविद्युतस्तथा ॥ ७९ ॥ भीषणेनरणेराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्पांडवंप्रतिमायया ॥ आश्रमेऋषिरेवासील्लीनशांतमृगद्विजे ॥ ८० ॥ गंगातीरेस्वशिष्येभ्योनिगदन्ब्रह्मनिस्पृहः ॥ अर्जुनं
प्राहतरसाराक्षसैस्त्रासितावयम् ॥ ८१ ॥ नलभामःसुखेनैवतपःकर्तुंधनंजय ॥ स्वागतंतेऽस्तुतिष्ठत्वंवस आघूर्णिकोभव ॥ ८२ ॥ ऋ
षीणामाश्रमेभुक्ताऽलभंतेक्षत्रियाबलम् ॥ कियंतमथकालंत्वंस्थित्वापार्थमयासह ॥ ८३ ॥ अभ्यस्यविद्यांरुचिरांमयादत्तांधनं
जय ॥ तयाह्येतेमरिष्यंतिराक्षसानात्रसंशयः ॥ ८४ ॥ ज्ञात्वामायांपांडवोऽथनिहत्यासुरभीषणं ॥ गृहीत्वाकांचनंतस्यर
त्नानिविविधानिच ॥ ८५ ॥ हयांस्तित्तिरिकल्माषान्छत्रंदिव्यंचकुंडले ॥ ततोजगामपुत्रस्यसहयःश्वेतवाहनः ॥ ८६ ॥ रम्यं
मणिपुरंनामबभ्रुवाहनपालितम् ॥ नराःसत्यव्रतायत्रनार्यश्चपतिसेवकाः ॥ ८७ ॥ वेदार्थशास्त्रनिपुणोभातियत्रमहाजनः ॥
चिंतनंवासुदेवस्यनान्यांचिंतांप्रकुर्वते ॥ ८८ ॥ बंधनंकेशपुष्पाणांपशूनांसदयाइव ॥ प्रकुर्वंतिचसंघातंनारीणांकामिनीयुताः ॥
॥ ८९ ॥ स्वप्नेऽपिनानृतंयत्रप्रवदंतिजनाःक्वचित् ॥ मुक्ताश्चकामिनीनांहिहृदयेऽपिचमस्तके ॥ ९० ॥ नासाग्रेभांतिराजेंद्रस
तोयावृत्तलोलकाः ॥ शूराश्चयत्रशतशोबभ्रुवाहनपूजिताः ॥ ९१ ॥ महाकालमपिप्राप्तंतोषयंतिबलेनतम् ॥ विमुखानरणेवो
रानार्थिनांपुरतःक्वचित् ॥ ९२ जायंतेदेहदानेनवदान्याःप्रार्थिताःसदा ॥ प्राकृतस्यजनस्यापिमुखाद्वाणीसुसंस्कृता ॥ ९३ ॥
निर्यातिसर्वदायत्रप्राप्तस्तत्रतुरंगमः ॥ तुष्टपुष्टजनाकीर्णंनित्योत्सवविभूषितम् ॥ ९४ ॥ रम्यंसुवर्णप्राकारंनगरंचार्जुनेश्चतत् ॥
रक्षितंचमहावीरैः सबलैर्वीर्यशालिभिः ॥ ९५ ॥ सहस्त्रंशकटानांहिपूरितंकांचनेनच ॥ हंसध्वजादिभिर्दत्तःप्रत्यब्दंनृपतेःक
रः ॥ ९६ ॥ सुवर्णरूप्यरत्नैश्चबभ्रुवाहनकारितम् ॥ सुचित्रंगृहवीथीभिःप्रासादैर्गोपुरैर्मठैः ॥ ९७ ॥ द्वितीयमिववैकुंठंस्थापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविष्णुनाक्षितौ ॥ निरीक्ष्यतत्तथारूपंनगरंचार्जुनोऽब्रवीत् ॥ वयंकुतोऽत्रसंप्राप्तामरालध्वजशंसमे ॥ ९८॥ ॥इत्याश्वमेधि
केपर्वणिजैमिनीयेमणिपूरागमनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ॥ ॥जैमिनिरुवाच॥ ॥हंसध्वजःपार्थ
वचःसमाकर्ण्यब्रवीत्स्वयम् ॥ बभ्रुवाहननामात्रनृपतिर्वर्ततेर्जुन॥ १ ॥यस्मैसुवर्णसंपूर्णशकटानांसहस्रकम् ॥प्रत्यब्दंदीयते
पार्थमयान्यैःपार्थिवैःसदा ॥ २ ॥ रम्यंमणिपुरंतस्यसंगताःस्मोहयान्विताः ॥ तेजस्वीसबलःप्राज्ञोवेदार्थमनुवर्तकः ॥ ३ ॥
वृद्धानुशासनेमग्नःपरस्त्रीविमुखःसदा ॥ दातॄणांप्रथमश्चैकोयथानारायणोहरिः ॥ ४ ॥ सुमतिश्चास्यविख्यातोमहासत्वप
राक्रमः ॥ सेनानाथोऽस्यधीरोऽत्रसकोपंशंकरंसहेत् ॥ ५॥ परस्यसुकृतंकर्मपरमाणुनिभंरणे ॥ राज्ञेनिवेदयत्येवनस्मरत्यप
कारकम् ॥ ६ ॥ हयंग्रहीष्यंतियदिसैनिकाश्चास्यभूपतेः ॥ क्लेशेनमहतामोक्तुंशक्नुमोवाजिनंपुनः ॥ ७॥ एवंब्रुवतिवीरेहिगृध्रः
परमदारुणः ॥ धनंजयकिरीटाग्रेस्थितोमृत्युप्रदर्शकः॥ ८ ॥ तेनतेविस्मिताःसर्वेत्रासंजग्मुश्चकंपिरे॥ ॥जैमिनिरुवाच ॥
परंतुरंगंनगरेश्रुत्वाधावंतमागतम् ॥ ९ ॥ पाल्यमानंमहावीरैःसबलेनकिरीटिना ॥ ग्राहयामासराजासौलीलयाबभ्रुवाह
नः ॥ १० ॥ वीराणांयुधिशूराणांसहस्रेणतुरंगमम् ॥ रात्रौसदसिचानीयददर्शहरिमुत्तमम् ॥ ११ ॥ पूजितंचर्चितंरम्यंमु
क्ताफलविभूषितम् ॥ सिंहासनेचोपविष्टोरत्नकांचननिर्मिते ॥ १२ ॥ सभातस्यविचित्रैवरत्नचित्राहिरण्मयी ॥ अयुतस्तंभसं
युक्तानानाभावप्रदर्शका ॥ १३ ॥ हंसाश्चैवमयूराश्चशुकाःपारावतास्तथा ॥ सारिकाःकोकिलाःकेकारत्नकांचननिर्मिताः ॥
॥ १४॥ सजीवाइवलक्ष्यंतेराज्ञःसदसिशोभनाः ॥ द्रुमैरत्नमयैर्दिव्यैर्गजमत्तैःसमावृताः॥ १५॥ईहामृगैःकृत्रिमैश्चमीनैर्नक्रैःसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोभिताः ॥ रत्नप्रदीपाःशतशोयत्रकांचनदीपकाः ॥ १६ ॥ गंधतैलावसिक्ताश्चकर्पूरपुलकैस्तथा ॥ प्रदीपितासभाभातिदी
पैर्नानाविधैर्नृप ॥ १७ ॥ नृपभूषणकांत्याचशस्त्राणामपिभारत ॥ कर्पूराणामपिकणैःपतितैर्भूमिकंबलाः ॥ १८ ॥ अरुणासि
तवर्णास्तेदृश्यंतेजनमेजय ॥ धूपवासेनपुष्पाणांगंधेनागुरुणासह॥१९॥ कस्तूरीनिकरैस्तौयैर्गंधराजैःसुकेसरैः ॥ मूर्छयंतीस
भालोकानुपविष्टान्नृपांतिके ॥ २० ॥ चित्रांगदासुतोवीक्ष्यतुरंगंपत्रवाचनात्॥युधिष्ठिरस्यतंज्ञात्वाहयंपार्थेनपालितम् ॥२१ ॥
सुबुद्धिंपरिपप्रच्छमंत्रिणंमंत्रिसत्तमं॥जननीमेपार्थपत्नीनृत्यंतीपितृसद्मनि॥२२॥तालहीनायदाजाताशप्तापित्रामहात्मना॥
नक्रीभूताचिरंतिष्ठजलेविगततालिके ॥ २३ ॥ यदाऽर्जुनस्यचरणौप्राप्स्यसेदैवयोगतः ॥ सत्वांमोचयिताभर्ताभविष्यतिनसं
शयः ॥ २४ ॥ तथाजातंपुरापार्थात्संजातोऽहंपुरेशुभे ॥ जननीमेपरित्यज्यगतोसातंयुधिष्ठिरं ॥ २५ ॥ मयाराज्यंमहत्प्राप्तंपु
त्रोऽहंपांडवस्यहि ॥ किंकरोमिसुबुद्धेत्रमयाकार्यंविनाशितम् ॥ स्वपितुस्तुरगश्चायंसमानीतोऽविचारतः ॥ २६ ॥ ॥सुबु
द्धिरुवाच ॥ ॥ एवमेतन्नसंदेहःप्रथमंनविचारितम् ॥ त्वयैवपालनीयोयंवर्षमात्रंतुरंगमः ॥ २७ ॥ स्वपितुःशासनंकार्यंहंतव्या
हयहारिणः ॥ पुत्राणांपरमोधर्मःक्रियतेपितृपूजनम् ॥ २८ ॥ अधुनाविविधंवित्तंराज्यंचनृपसत्तम ॥ समर्पयार्जुनायाथप्रसा
दयनिजंगुरुम् ॥ २९ ॥ ब्राह्मणैःसंयुताःसर्वेनरनारीसमावृताः ॥ कुमारीणांगणाःपुष्टागजारूढाव्रजंतुतम् ॥ ३० ॥ नृत्यंत्यो
यांतुनर्तक्यःप्रगायंतश्चगायकाः ॥ वयंसर्वेसैनिकास्तेनागरास्तेमहाजनाः ॥३१॥ संभावयित्वाजनकंतावकंहरिसेवकम् ॥प्र
यच्छामोहयंशीघ्रमेवंमंत्रःसुखोदयः ॥ ३२ ॥ ॥जैमिनिरुवाच ॥ ॥ श्रुत्वासुबुद्धेर्वचनंराजासौबभ्रुवाहनः ॥ प्रययौसब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लः शीघ्रं गृहीत्वाथतुरंगमम् ॥ ३३ ॥ ब्राह्मणैः सहितोवीरैर्नागरैश्चमहाजनैः ॥ चंदनानिचकस्तूरीकर्पूरनिकरान्बहून् ॥ ३४ ॥ वाहितैःशकटैःसाकंतथाऽन्यैरत्नपूरितैः ॥ गजैर्मत्तैश्चंद्रगौरैरथैःकनकचित्रितैः ॥ ३५ ॥ श्यामकर्णैश्चतुरगैर्वेष्टितःपांडवंमुदा ॥ वादित्राणांचनादेनजयशब्दैःसुमंगलैः ॥ ३६ ॥ गजारूढकुमारीणांकरमुक्तैःसुमौक्तिकैः ॥ अग्रतोधूपधूमैश्चलाजैर्दूर्वादलैर्वृतः ॥ ३७ ॥ यत्रव्यूह्यनिजंसैन्यंस्थितोवानरकेतनः ॥ प्रद्युम्नंपुरतःकृत्वायौवनाश्वंसपुत्रकम् ॥ ३८ ॥ अनुशाल्वंमहावीरंनीलकेतुंसुधार्मिकम् ॥ हंसध्वजंमहाराजंशैनेयंचमहाबलम् ॥ ३९ ॥ हार्दिक्यंयादवाध्यक्षंतथाऽन्यान्यादवान्विभुः ॥ गजादुत्तीर्यवीरोऽसौबलवान्बभ्रुवाहनः ॥ ४० ॥ नमन्नमन्नाजगामपश्यतांसर्वभूभुजां ॥ पदातिश्चार्जुनसुतःप्रहृष्टःप्रत्ययात्स्वयं ॥ ॥ ४१ ॥ संस्थाप्यवस्तुजातंतद्यदानीतंतदग्रतः ॥ मुक्ताकेशान्क्षालनार्थंपादयोःपांडवस्यहि ॥ ४२ ॥ विरजस्कौकृतौपादौस्वकेशैःपरितोषितः ॥ ववर्षुःकन्यकाःसर्वाःपुष्पमुक्ताफलानिच ॥ ४३ ॥ सबलःसपपातोर्व्यांदंडवद्बभ्रुवाहनः ॥ अर्जुनस्यांतिकेराजन्साश्रुकंठोमहामतिः ॥ ४४ ॥ पार्थस्यांघ्रिंसमासाद्यपुनरेवोत्थितोऽब्रवीत् ॥ ॥ बभ्रुवाहनउवाच ॥ ॥ तवाहंपुत्रकस्तातउलूप्यापरिवर्धितः ॥ ४५ ॥ चित्रांगदाप्रसूतंमांत्वत्तस्तीर्थकरात्पुरा ॥ बभ्रुवाहननामाहंनजानेतुरगंतव ॥ ४६ ॥ गृहाणराज्यंनिखिलंशाधिमांत्वंधनंजय ॥ पुनरेवार्जुनपुरोनिपपातविशांपते ॥ ४७ ॥ क्षमस्वेतिवदन्वाग्मीसभृत्योबलसंयुतः ॥ तंतथाभाषमाणंतेनिरीक्ष्यार्जुनसैनिकाः ॥ ४८ ॥ प्रद्युम्नप्रमुखाःप्रोचुःपार्थंप्रतिमहीपते ॥ पुत्रंकथंनगृह्णासिब्रुवंतंपरमंहितम् ॥ ४९ ॥ मानीचपतितोभूमौतमुत्थापयपांडव ॥ पश्यश्रियंचमहतींस्वपुत्रस्यातितेजसः ॥ ५० ॥ ॥ जैमिनिरुवाच ॥ ॥ तेषां

१ पांडवं प्रययावितिपूर्वेणान्वयः २ बभ्रुवाहनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषितमाकर्ण्यपार्थःक्रोधसमन्वितः ॥ पदातंताडयित्वाथबभ्रुवाहनमौरसम् ॥ ५१ ॥ मस्तकेभर्त्सयन्कोपात्कालकल्पंसुदारुणम् ॥ भाविनाचविनाशेननिगीर्णोवाक्यमब्रवीत् ॥ ५२ ॥ ॥ अर्जुनउवाच ॥ ॥ नत्वंममौरसःपुत्रोभयग्रस्तकलेवरः ॥ चित्रांगदाप्रसूतात्वंवैश्यान्मन्येनपांडवात् ॥ ५३ ॥ प्रथमंविधृतःकस्मात्तुरगोमेस्वपौरुषात् ॥ भयेनवैश्यवत्त्वंतुतुरगंदातुमिच्छसि ॥ ५४ ॥ नमयाजनितश्चान्यस्त्वादृशःक्लीबपौरुषः ॥ सुतःसजनितोयस्तुमहाबुद्धिपराक्रमः ॥ ५५ ॥ कृष्णाप्रियोधर्मपरोममचापिप्रियोगतः ॥ सुभद्रानंदनःपुत्रोममैकःक्षत्रियांतकृत् ॥ ५६ ॥ येनद्रोणमुखावीराःसंग्रामेविमुखाःकृताः ॥ चक्रव्यूहंविनिर्भिद्यरक्षितोधर्मनंदनः ॥ ५७ ॥ क्वजंबूकःक्वपंचास्यःक्वखंजःक्वचशीघ्रगः ॥ त्वंजंबूकःकुतःसिंहःसुभद्रानंदनोमम ॥ ५८ ॥ मूढसैन्यंनपतितंतावकंमच्छरैःक्षितौ ॥ नबाणाहृदितेलग्नाःकथंभीतोऽसिदुर्मते ॥ ५९ ॥ गंधर्वराजदुहिताजननीतवनर्तकी ॥ त्वंनटोभवगच्छाद्यराज्यंत्यक्त्वागृहेधनुः ॥ ६० ॥ त्यजैतद्विपुलंरम्यंरथंचकुलपांसन ॥ क्षात्रधर्मेणतेहीनंजीवितंनसुखप्रदम् ॥ ॥ ६१ ॥ मातृवंशंगृहाणत्वंबध्वाकंठेतुमर्दलम्[2] ॥ वालेयंपृष्ठतोबध्वारंगेनृत्यंप्रवर्तय ॥ ६२ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःसबुबुधेसर्वंयत्पित्राभाषितंतदा ॥ प्रत्युवाचहसन्वाग्मीसकोपस्तत्रपांडवम् ॥ ६३ ॥ ॥ बभ्रुवाहनउवाच ॥ ॥ सर्वंतेक्षामितंपार्थनत्वेकंक्षामयेपुनः ॥ वैश्याज्जातंमन्यसेमांजननीमेप्रदूषिता ॥ ६४ ॥ त्वयाल्पबुद्धिनालोकेसमक्षंमेद्यसंगरे ॥ क्षत्रियत्वंदर्शयामितवाग्रेतुधनंजय ॥ ६५ ॥ गच्छंतुकन्यकाःसर्वाःपुरमध्येमहाजनाः ॥ सैनिकाश्चात्रतिष्ठंतुहयोऽयंचनिबध्यताम् ॥ ६६ ॥ कथंमोचयितापार्थोभविष्यतितुरंगमम् ॥ मयाधृतःपौरुषेणव्यूह्यसेनांहिभासुरां ॥ ६७ ॥ सुबुद्धिप्रमुखावीरायत्ताः

१ स्वर्गप्राप्तइत्यर्थः । २ वाद्यविशेषम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संतुरणेमम ॥ सर्वेतेतादृशंचक्रुर्गृहीत्वातुरगंस्थिताः ॥ ६८ ॥ महत्सैन्यंस्थितंघोरंसशब्दंकालरूपधृक ॥ चामरापेडसंयुक्तंरु
द्राक्षवलयंपृथु ॥ ६९ ॥ नानारत्नसुवर्णेनभूषितंचारुकुंडलम् ॥ नानावादित्रशंखानांनादेनैवविनादितम् ॥७०॥ गजानामर्बुदं
नद्धंघंटाकंबलधारिणाम् ॥ रथानामपिराजेंद्रस्थापितंकोटिसप्तकम् ॥ ७१ ॥ हयानामपिरूढानामर्बुदद्वितयंतथा ॥ पदाती
नांसुपुष्टानांत्रितयंचार्बुदस्यहि ॥७२॥ महावीराःसदापुष्टाःसंग्रामकुशलानृप ॥ अन्योन्यस्यहितेयुक्ताःसत्यव्रतपरायणाः ॥
॥ ७३ ॥ चित्रांगदात्मजेनैतेयोजितास्तत्क्षणान्नृप ॥ तैस्तदावेष्टितंसैन्यंपांडवस्यमहात्मनः ॥ ७४ ॥ नानाशस्त्रप्रहरणैर्मो
हलोभैर्यथाजगत् ॥ घोरैःकिलकिलाशब्दैःसिंहनादैश्चतर्जनैः ॥ ७५ ॥ तिष्ठतिष्ठेतिभाषद्भिःपातयद्भिःपरान्रणे ॥ ततोरथंसमा
रुह्यदिव्यंकनकचित्रितम् ॥ ७६ ॥ त्रिभूमिकंसुशस्त्राढ्यंमुक्तामालाविभूषितम् ॥ प्रलंबचामरधरंमयूराश्वंपताकिनम् ॥७७॥
किंकिणीशतसंपूर्णंशक्रस्यंदनहासकम् ॥ उवाचकार्ष्णिःपितरंतिष्ठेतिपरुषंरणे ॥ ७८ ॥ ॥ बभ्रुवाहनउवाच ॥ ॥ गृहा
णार्जुनकोदंडंपौरुषंपश्यमामकम् ॥ पितृभावेनचानीतोमयायंतुरगस्तव ॥ ७९ ॥ पुनःसमर्पितस्तुभ्यंसर्वंराज्यंनिवेदितम् ॥
शरणंचागतोऽहंत्वांतन्मान्यंनाभवत्तव ॥ ८० ॥ संग्रामएवचेन्मान्यस्तवपार्थनसंधिता ॥ सन्नद्धंविद्धिमांरौद्रंकस्त्वांत्राताद्यवि
द्यते ॥ ८१ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंवदंतंसमरेबभ्रुवाहनमातुरम् ॥ समाह्वयंतंपार्थंहियुद्धार्थंदैत्यनायकः ॥ ८२ ॥
अनुशाल्वोरथारूढस्तमियायसुरोषितः ॥ शरैःसुपुंखैर्नवभिस्तंविव्याधहसन्निव ॥८३॥ कार्ष्णिःशतेनबाणानामनुशाल्वंसमा
किरत् ॥ दैत्याधिपस्तान्नाराचान्मध्येचिच्छेदसत्वरः ॥ ८४ ॥ छिन्नान्शरान्वीक्ष्यरोषान्मुमोचान्यान्शिलाशितान् ॥ कोटि ॥६७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शः शुकपत्रान्स्सरणे दैत्याधिपं प्रति ॥ ८५ ॥ उभौ शरविभिन्नाङ्गौ रुधिरेणपरिप्लुतौ ॥ व्यराजेतां महाराज पुष्पितौ किंशुकाविव ॥ ॥ ८६ ॥ पूरयामास तु र्बाणैर्गगनं गतदैवतम् ॥ जलदाविव तोयौघैः परस्परवधैषिणौ ॥ ८७ ॥ अनुशाल्वस्य तुरगान्बाणैर्नि न्येयमक्षयम् ॥ चतुर्भिः पंचमेनापि सारथिं च हसन्निव ॥ ८८ ॥ रथं चिच्छेद षष्ठेन तिलशः प्रहसन्निव ॥ सप्तमेन ध्वजश्छिन्नो धनुश्चैवाष्टमेन तु ॥ ८९ ॥ सुवर्णपुंखैर्दशभिर्दैत्यराजं समाकिरत् ॥ अन्यं रथं समारुह्य गृहीत्वाऽन्यन्महद्धनुः ॥ ९० ॥ अनु शाल्वोऽपि विरथं चकारार्जुनपुत्रकम् ॥ शरीरं बाणसाहस्रैर्भिन्नं तस्य सुतेजसः ॥ ९१ ॥ स पुनः कार्ष्णिनाराजन्विरथस्तत्क्षणा त्कृतः ॥ दैत्याधिपो गदां घोरां प्राहिणोद्बभ्रुवाहने ॥ ९२ ॥ गदाप्रहाराभिहतो मणिपूरपुराधिपः ॥ अनुशाल्वं शरैर्घोरैर्नवभिः समताडयत् ॥ ९३ ॥ तैः शरैरर्दितो राजा मूर्छितो निपपात सः ॥ तं विसंज्ञं समीक्ष्याथ प्रद्युम्नो योद्धुमाययौ ॥ ९४ ॥ तिष्ठतिष्ठेति च वदन्बभ्रुवाहनमार्दयत् ॥ प्रहरंस्तरसा बाणैस्तर्जयन्परुषोक्तिभिः ॥ ९५ ॥ सुवर्णपुंखैर्दशभिः पुनर्विव्याध पाण्डविम्[1] ॥ ब भ्रुवाहस्ततः क्रुद्धो बाणानामयुतेन तम् ॥ ९६ ॥ प्रद्युम्नमपि संग्रामेऽनंगं चक्रे यथोचितम् ॥ पूर्वजन्मन्यनंगोऽभूदस्मिन्नपि तथा भवत् ॥ ९७ ॥ चित्ते यथामुना विद्धः कार्याकार्येषु मूढधीः ॥ न गोत्रजां नात्र सुतां नारीं प्राप्य विमुंचति ॥ ९८ ॥ संगरे पीडितस्त द्वत्कार्ष्णिः स नृपसत्तम ॥ प्रद्युम्नः शरसंपर्कात्कर्तव्यं नान्वविन्दत ॥ ९९ ॥ बभ्रुवाहोऽर्जुनस्यापि सेनां तां चतुरंगिणीम् ॥ ममं थ बाणैर्बहुभिः सर्वकायविदारिभिः ॥ १०० ॥ तं वीक्ष्य कृष्णतनयः पुनर्विव्याध सायकैः ॥ बभ्रुवाहं च सबलं सर्वे तेमोहिता रणे ॥ १ ॥ मातंगा मदसंयुक्ताः कामबाणप्रपीडिताः ॥ पतिता विस्मयः कोऽत्र भ्रममाणा रणांगणे ॥ २ ॥ विकीर्णकंबलास्तत्र भिन्नकुंभा विचे

१ बभ्रुवाहनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तसः ॥ यक्षांगनाश्चकुर्वंतिसहारंयौवनंनिजम् ॥३॥ गजकुंभोत्थितैःसांद्रैःरम्यंमुक्ताफलैर्मृधे ॥ नरशीर्षमेदोहीनंकृत्वारुधिरपू
रितम् ॥ ४ ॥ अन्योन्यंतेनशिरसाताडयंतिहसंतिच ॥ गजशीर्षंसरुधिरंप्रक्षिपंतिपरस्परम् ॥ ५ ॥ गजदंतैश्चतुःषष्टियोगि
न्यश्चारुविभ्रमम् ॥ नृत्यंत्योगायनंचक्रुस्तदद्भुतमिवाभवत् ॥ ६ ॥ शुष्कांगायत्रवेतालाःकुर्वंतिस्वांतनुंरणे॥पुष्टांमांसैश्चमेदो
भिःप्रलिंपंतितथाबहिः ॥ ७ ॥ गजमस्तकमादायभैरवाहयमस्तकम् ॥ नरस्यापिखरस्यापिकरभस्यमहच्छिरः ॥ ८ ॥ नृत्य
न्गोलकवद्युद्धेप्रक्षिपंत्यूर्ध्वमूर्ध्वतः ॥ कंकालाभैरवायक्षाःपिशाचारुधिरंपपुः ॥ ९ ॥ गजांत्ररज्जुभिर्नृत्यंचक्रिरेध्वनिनोमृधे ॥
वेतालाश्चपिशाचाश्चसमृदंगामुदान्विताः ॥ १० ॥ नरशीर्षमथाबध्यचरणेक्षुद्रघंटिकाम् ॥ नृत्यंतिखलुगायंनितास्मिन्वीरस
मागमे ॥ ११ ॥ कृतपानाःस्मदृश्यंतेकोटिशःशब्दवादकाः ॥ शुंडांगजस्यत्रुटितांगृहीत्वामुखवायुना ॥ १२ ॥ पिशाचाःपूरयं
तिस्मकाहलान्नृपसत्तम ॥ गजकर्णौगृहीत्वैकोझर्झरौवादयन्ययौ ॥ १३ ॥ आददेकरभग्रीवांभुक्तमांसांहिजंबुकैः ॥ नरांत्रतं
त्रींवीणांचतामवादयतिस्मसः ॥ १४ ॥ ग्रीवापादविहीनानिगजांगानिचवाजिनाम् ॥ भग्नानिमेदोनद्धानिवादयंतिमृदंगव
त् ॥ १५ ॥ ब्रह्मग्रहास्तत्रराजन्प्रद्युम्नेकिलयुध्यति ॥ शिरांसितत्रवीराणांछिन्नान्यादायकौतुकात् ॥ १६ ॥ स्वक्रीडाकंदुकां
श्चक्रुर्भैरवाःस्वगणैस्तदा ॥ यत्रयत्रहतंसैन्यंकृष्णपुत्रेणमारिष ॥ १७ ॥ शोणितौघानदीतत्रकेशशैवालशाद्वला ॥ निमग्ना
स्तत्रमातंगानदृश्यंतेकुतोनराः ॥ १८ ॥ यथावैतरणीघोराद्वितीयैषाप्रवर्तिता ॥ ११९ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमि
नीयेप्रद्युम्नयुद्धवर्णनंनामत्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ ॥ नदीतीरेश्वापदाश्चकर्षंतःकुणपानिह॥ आंत्राणिपतितान्याशुभक्षयंतोववाशिरे ॥ १ ॥ मांसकर्दमजं दुर्गंनृकपालोपलंतटे ॥ कृत्वाचभैरवास्तत्रचक्रिरेकलहंमुदा ॥ २ ॥ प्राकारस्थाःसाट्टहासंशिरोभिर्गजवाजिनां ॥ गजमेदोद्भ वांरौद्रामांत्रसूत्रपतंगिकाम् ॥ ३ ॥ कालखंडकलांगूलांकंकालागगनेक्षिपन् ॥ एतच्चान्यत्तदाचक्रुःप्रद्युम्नस्यरणेनृप ॥ ४ ॥ पुनःप्रद्युम्नवीरोऽसौपीडयन्वाहिनींबलात् ॥ चकारकदनंघोरंपदातीनांनृपोत्तम ॥५॥ यथाप्रलयकालेचभूतानांशशिशेखरः निहतास्तेनमातंगासदमत्ताःसहस्रशः ॥६॥ रथाश्वरथिभिःसाकंचूर्णितारणमूर्धनि॥हयाश्वसहयारोहाःप्रद्युम्नेनबलीयसा ॥ ॥ ७॥ पातिताभूतलेराजन्बाणैःशतसहस्रशः ॥ पौरुषंदर्शयामासबभ्रुवाहनसैनिकान् ॥ ८॥ तथातंवीक्ष्यकुपितंबभ्रुवाहोम हाबलः ॥ शरैःसंछाद्यतुरगान्सारथिंचझषध्वजम् ॥९॥ मूर्छितंतरसाभूमौपातयामासकोपितः ॥ रथानांविंशतिस्तस्यप्रद्युम्न स्यमहात्मनः ॥ १० ॥ नाशेनाशेस्वीकृतानांछिन्नापार्थात्मजेनहि ॥ तथैवकृष्णपुत्रेणप्रद्युम्नेनमहारणे ॥ ११ ॥ चूर्णीकृताहिब हवोरथास्तस्यबलीयसा ॥ अपातयद्रणेकार्ष्णिमूर्छितंतस्यसारथिं ॥ १२ ॥ उत्थायभूमौकुपितःकृष्णपुत्रोऽथरोषतः ॥ तथाप्र द्युम्नमपिचनिष्पिपेषार्जुनात्मजः ॥ १३ ॥ प्रहारैःकश्मलंतैस्तुरुक्मिणीनंदनोययौ ॥ उत्थितःपुनरेवासौगदांजग्राहदारुणा म् ॥ १४ ॥ मुमोचास्मैकृष्णपुत्रश्चिच्छेदैनांत्रिभिःशरैः ॥ बभ्रुवाहश्चतरसापंचभिस्तमपीडयत् ॥ १५॥ रुक्मिणीतनयेनापि बहुधाताडितःशरैः ॥ उभौशस्त्रास्त्रकुशलौशूरौपरमधन्विनौ ॥ १६ ॥ उभौगगनगौराजन्नुभौभूतलचारिणौ ॥ तौचक्रतुस्तदा बाणपूर्णंगगनमंडलम् ॥ १७ ॥ भूतलंचापिराजेंद्रयुद्धेवैलोमहर्षणे ॥ परस्परस्यसंघातान्मयूखान्भासुरानपि ॥ चक्रतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तौतदाबाणैर्यथामोहोहरेःस्थितः ॥ १८ ॥ भिन्नाःसायकवर्षेणभूभृतःकटकैःसह॥ पर्वताइवराजंतेधातुरागप्रवाहिनः॥१९॥ छिन्नशीर्षामानहीनागतश्रीकागतासवः ॥ शिरांसिपतितान्येवग्रहीलामहदायुधम् ॥ २० ॥ कबंधाःशतसाहस्रास्तस्मिन्युद्धे समुत्थिताः ॥ तरुणीकरजैर्भिन्नावीरास्तेरतिसंगरे ॥ २१ ॥ यथाऽयथांनजानंतितथायुद्धेशरव्यथाम् ॥ केचित्खड्गकरावीराः पतिताधरणीतले ॥ २२ ॥ करपत्रधराःकेचिद्गदाहस्तास्तथापरे ॥॥ त्रिशूलधारिणश्चान्येसमरेशक्तिसंयुताः ॥ २३ ॥ भुशुंडी पाशपरिघकुद्दालवरधारिणः ॥ भिंदिपालायुधाश्चैवमुसलैश्चापियोधिनः ॥ २४ ॥ सपट्टिशायष्टिधरास्तथैवांकुशयोधिनः ॥ कुंतायुधधराःकेचित्कुठारपरशूधराः ॥ २५ ॥ सशस्त्रायेचसंप्राप्ताहताःपार्थसुतेनते ॥ वरान्गजान्शरैर्घोरैःसारोहान्सांकु शान्रणे ॥ २६ ॥ सघंटान्विदलीकृत्यननादार्जुननंदनः ॥ तस्यबाणोरथंभित्वाहयंभित्वातथागजम् ॥ २७ ॥ पदातिनंसकव चंयातिदूरेनतिष्ठति ॥ यत्रयत्रतृणंभूरितत्रवह्निःप्रसर्पति ॥ २८ ॥ वनेप्रज्वलितेयद्वत्तद्वद्बाणःसगच्छति ॥ एवमेकेनतत्सैन्यं व्याप्तंपार्थस्यधीमता ॥२९॥ अनुशाल्वःपुनर्वीरंनदन्योद्धुमुपाययौ ॥ प्रद्युम्नोनीलकेतुश्चयौवनाश्वःसपुत्रकः ॥ ३० ॥ हंसध्व जःपुत्रयुतोमेघवर्णोबलाधिकः ॥ एतेसर्वेतमेकंहिनाभावन्योधितुंक्षमाः ॥ ३१ ॥ पंचभिःपंचभिर्बाणैस्तान्सर्वान्गतचेतनान् ॥ विरथान्गजहीनांश्चगताश्वान्छत्रवर्जितान् ॥ ३२ ॥ महाबलान्कीर्णकेशान्भूषणैःपरिमोचितान् ॥ चकारसमरेकार्ष्णिःशुष्का स्यान्गतचामरान् ॥ ३३ ॥ रुधिरंस्वंपिबंतश्चसोमपानमिवाध्वरे ॥ भ्रमंतश्चश्वसंतश्चधावंतश्चरणांगणे ॥ ३४ ॥ पलायंतश्च भिन्नास्तेशरैःकनकचित्रितैः ॥ काश्चित्प्रविष्टोनागस्यगतांत्रस्यकलेवरम् ॥३५॥ सुखंसमन्यतेयावत्तावत्प्राप्तौमहावृकौ ॥गज

१ गजस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहात्समाकृष्य्यचक्रतुर्नेत्रवर्जितम् ॥ ३६ ॥ विभिद्यहृदयंतस्यवृकौमांसंप्रजक्षतुः ॥ तथापरःशत्रुहतःशिवाभिःपरिनीयते ॥ ॥ ३७ ॥ सरागंहृदयंतस्यघनकुंकुमचर्चितम् ॥ शिवानखैःपरिच्छिन्नंददर्शभुविचाप्सराः ॥ ३८ ॥ तमारोप्यविमानेस्वेपतिंच क्रेसुरांगना ॥ प्रत्युवाचहसंतीचशिवानाथकलेवरम् ॥ ३९ ॥ पश्यभूमौदारयंतितावकंरणमंडले ॥ मयाऽधुनापीड्यतेतेस्त नाभ्यांकरुणानमे ॥ ४० ॥ तथैवान्योविशालाक्ष्याराात्रौदष्टाधरोदिवा ॥ स्वेनैवचरणेकोपात्पुनर्नाकेसुरस्त्रिया ॥ ४१ ॥ व्यथां त्रिवारंसंप्राप्यहृष्टस्तत्कौतुकंमहत् ॥ गजदेहेप्रलंबंतंबाणभिन्नंकलेवरम् ॥ ४२ ॥ एकंरणेद्वितीयंतुपश्यत्यन्योऽपिसंस्थितः ॥ दोलयान्दोलितंनाकेदिव्यस्त्रीभिरलंकृतम् ॥ ४३ ॥ सुपेशलस्वर्गरामाबाहुपाशेनयंत्रितः ॥ कश्चिद्रणगतान्पाशान्दारुणान्स्मर तिस्महि ॥ ४४ ॥ इतरस्तत्रसंग्रामेपतितेस्वेकलेवरे ॥ ददर्शवृष्टिंमहतींपतंतींगजपुष्करात् ॥ ४५ ॥ विमानेऽपिप्रियावक्त्रमद गंडूषजांघनाम् ॥ एवंतेनतदायुद्धंकृतमर्जुनसूनुना ॥ ४६ ॥ सैन्यंप्रहतमप्रीतंभग्नंचपरिपालितम् ॥ चतुर्विधंसैन्यमसौजग्रा हस्वमिवाहवे ॥ ४७ ॥ बाणैर्विमोहितावन्वीरान्स्वपुरेहर्षितोनयत् ॥ नीयंतेगजशालासुगजाःपार्थस्यवाजिनः ॥ ४८ ॥ मंदु रासुचपार्थस्यपुत्रेणचबलीयसा ॥ रथास्तुत्रस्तुजातंतत्पुरमध्येगतंनृप ॥ प्रद्युम्नप्रमुखावीरामोहिताःशरवृष्टिभिः ॥ ४९ ॥ इ त्याश्वमेधिकेपर्वणिजैमिनीयेबभ्रुवाहनयुद्धवर्णनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ छ ॥

॥ जैमिनिरुवाच ॥ ॥ संग्रामस्त्वभवद्राजन्बभ्रुवाहनपार्थयोः ॥ यथाकुशस्यरामस्यवाजिमेधहयेधृते ॥ १ ॥ ॥ जनमेजय उवाच ॥ ॥ कथंरामःकुशंपुत्रंशमयच्छरवृष्टिभिः ॥ कथंचतेनपुत्रेणजितोरामोरणाजिरे ॥ २ ॥ रामोनवेत्तिस्वंसूनुमेतन्मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विस्तराद्वद ॥ यस्माद्रामकथाविप्रसर्वपातकनाशिनी ॥ ३ ॥ ॥ जैमिनिरुवाच ॥ ॥ शृणुराजन्महाबाहोरामस्यचरितंम
हत् ॥ विस्तरेणयथापूर्ववदतोमेनिशामय ॥ ४ ॥ रामस्त्वंरावणंहत्वाकुंभकर्णंमहाबलम् ॥ तथाऽन्यान्राक्षसान्घोरान्मेघनाद
मुखान्रणे ॥ ५ ॥ सीतामग्निमुखाच्छुद्धामादायस्वपुरंययौ ॥ बिभीषणेनवीरेणलक्ष्मणेनमहात्मना ॥ ६ ॥ तथाहनूमत्प्रमुखै
र्वानरैःपरिवारितः ॥ अयोध्यांप्रविवेशाथवसिष्ठप्रमुखाद्विजाः ॥ ७ ॥ पठंतोमंगलंसूक्तंरामसम्मुखमाययुः ॥ वसिष्ठप्रमुखा
न्दृष्ट्वाततोदाशरथीरथात् ॥८॥ अवातरत्क्षणाद्रामोनमश्चक्रेचतान्मुनीन्॥पश्चाच्चलक्ष्मणःसीतानमस्कारंप्रचक्रतुः ॥९॥ ततः
सतैर्नियुक्तोऽसौरामोराजीवलोचनः ॥ कैकेयींचसुमित्रांचभरतंलक्ष्मणंतथा ॥ १० ॥ शत्रुघ्नंचपुरस्कृत्यववंदेरघुवंशजः ॥ कौ
सल्यांजननींपश्चान्नमस्कर्तुमगाच्चसः ॥ ११ ॥ मलिनांपंकदिग्धांगींरामदर्शनलालसाम् ॥ भर्तृदुःखपरिक्लिन्नांहर्षितां
रामदर्शनात् ॥ १२ ॥ दृष्ट्वापद्मपलाशाक्षंरामंहर्षसमन्विता ॥ परिरभ्यचिरंतस्थौधनंप्राप्याधनोयथा ॥ १३ ॥ स्नापयंतीदृगं
भोभिःस्नेहेनबहुनासुतम् ॥ विशेषेणजटावंतंचिरंस्नानमवर्तयत् ॥ १४ ॥ ततोरामंकराग्रेणपस्पर्शजननीतथा ॥ राक्षसास्त्र
क्षतंदृष्ट्वाप्रोवाचवचनंशुभम् ॥ १५ ॥ वसिष्ठप्रमुखारामंवदंतिकिमिदंवचः ॥ अच्छेद्योऽयमभेद्योऽयमक्लेद्योऽयंसुतस्तव ॥
॥ १६ ॥ तदिदानींवृथामन्येबाणैर्भिन्नोऽसिराघव ॥ अथवाशिवभक्तंत्वामाहुःकेचिन्मुनीश्वराः ॥ १७ ॥ तस्माद्दत्तंत्वयास्था
नंबाणानामितिमेमतिः ॥ स्पृष्ट्वातदंगंकौसल्यास्वपाणिभ्यांदयावती ॥ १८ ॥ आनंदंपरमंप्राप्ताज्ञानंलब्ध्वेवब्राह्मणः ॥ त
त्करस्पर्शतोरामोमुक्तोदुःखैःसुदारुणैः ॥ १९ ॥ ततोरामोमहाबाहुर्जननींशिरसाचताम् ॥ नमस्कृत्यततोबंधूनपृच्छकुश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंचतान् ॥ २० ॥ हर्षितोभ्रातृभिःसर्वैरयोध्यायामुवासस ॥ पालयन्पृथिवींसर्वांसशैलवनकाननाम् ॥ २१ ॥ प्रजाःस्व
स्थाह्यवर्तंतविप्रावेदपरायणाः ॥ आतृप्तेश्चपयःपीत्वावत्सायत्रोपरेमिरे ॥ २२॥ गोपालादुदुहुस्तत्रघटोध्नीर्गाःशुभास्तदा॥
फलंतिसततंवृक्षालताःपुष्पंतिसर्वदा ॥ २३ ॥ ओषध्यःफलवंत्यस्तादुष्कालादेर्विनाशकाः ॥ सरयूतीरमासाद्ययज्ञान्कुर्वंति
याजकाः ॥ २४ ॥ यूपस्तम्भाःसमंताच्चपशुभिरुपशोभिताः ॥ दृश्यंतेस्थाणुतांप्राप्ताअध्वरांतेसमुच्छ्रिताः ॥ २५ ॥ ॥
जैमिनिरुवाच ॥ ॥ एवंसरामःसुखितःपृथिव्यांत्रिभिश्चतैर्भ्रातृभिरग्निकल्पैः ॥ रराजराजीवपलाशनेत्रोगुणैस्त्रिभिःसत्वर
जस्तमोभिः ॥ २६ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेअयोध्याप्रवेशोनामपञ्चविंशतितमोऽध्या० ॥२५॥
॥ जैमिनिरुवाच ॥ ॥ दशवर्षसहस्राणिराज्यंचक्रेसराघवः ॥ प्रजांनलेभेसीतायांपालयन्पूर्वजस्थितिं ॥ १ ॥ ततःकालेन
महतागर्भमाधत्तमारिष ॥ नक्षत्रेवैष्णवेतुर्येपादेतद्देवताभिधे ॥ २ ॥ चरेलग्नेप्रवृत्तेचमातुर्देशांतरप्रदे ॥ ततःसचतुरोमासान्रे
मेपत्न्यासहेश्वरः ॥ ३ ॥ प्राप्तेतुपंचमेमासेरामःस्वप्नेददर्शसः ॥ सीतांभागीरथीतीरेविपलंतीमनाथवत् ॥ ४ ॥ लक्ष्मणेनपरि
त्यक्तामित्यहोविस्मयान्वितः ॥ प्रातःकृताह्निकोरामोवसिष्ठमिदमब्रवीत् ॥ ५ ॥ ॥ रामउवाच ॥ ॥ स्वप्नेपश्यामिरुदतीं
सीतांभागीरथीतटे ॥ तद्गर्भविघ्नशांत्यर्थंतस्याःपुंसवनक्रिया ॥ ६ ॥ शीघ्रमादिश्यतांब्रह्मन्पुन्नक्षत्रेदिनेशुभे ॥ तस्यतद्वचनं
श्रुत्वावसिष्ठोमुनिपुंगवः ॥ ७ ॥ ॥ वसिष्ठउवाच ॥ ॥ कर्तव्याशुक्लपक्षेतुकृष्णपक्षोव्यपोहतु ॥ पुष्यार्कयोगेपंच
म्यांकार्यंपुंसवनंविभो ॥ ८ ॥ मुहूर्त्तस्यदिनंयावदागमिष्यतिराघव ॥ तावद्रामममहाबाहोक्रियतांविप्रतर्पणम् ॥ ९ ॥ मुनेस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वचनंश्रुत्वारामोलक्ष्मणमब्रवीत् ॥ सीतापुंसवनंभ्रातःपंचम्यांचभविष्यति ॥ १० ॥ तावत्त्वंगच्छभद्रंतेजनकंचसमानय ॥ वि
श्वामित्रंमुनिश्रेष्ठंमुनिभिःपरिवारितं॥ ११॥ लक्ष्मणोऽपिनमस्कृत्यरामस्योत्तरतोययौ ॥ ततोरामोमहाबाहुःशिल्पिभिर्मंडपं
शुभम् ॥ १२॥ अकारयत्त्रिगव्यूतिमितमायामतःसमम् ॥ तस्मिन्वसिष्ठोरुचिरंस्थंडिलंसमकल्पयत् ॥ १३॥ उदुंबरफलानांच
स्रजंतत्रचकारसः ॥ शललंत्रिषुशुभ्रंचतथावैसूत्रवेष्टनम् ॥ १४॥ पीठमौदुंबरंतत्रचतुरस्रंचवल्लकीं ॥ समकल्पयदेतानिक्रि
यांगानिमुनीश्वरः ॥ १५॥ तावत्सलक्ष्मणस्तूर्णंविश्वामित्रंमहामुनिम् ॥ जनकंचसमाहूयरामंनत्वेदमब्रवीत् ॥ १६॥ ॥
लक्ष्मणउवाच ॥ ॥ आगतोजनकोरामविश्वामित्रोमहातपाः ॥ अर्घ्यादिक्रिययाभ्रातःपूजयैतौसमागतौ ॥ १७॥ रामस्त
द्वचनंश्रुत्वाविश्वामित्रनरेश्वरौ ॥ नमस्काराघ्यंदानेनपूजयामासतौतदा ॥ १८॥ ततःप्राप्तेमुहूर्तेचवसिष्ठोव्याहरद्वचः ॥ राम
त्वंसीतयासार्धंकुरुस्नानादिकाःक्रियाः ॥ १९ ॥ मंडपंचसमायाहिमातृभ्रातृसमावृतः ॥ अथदाशरथीरामःसुस्नातःसीतया
सह ॥ २० ॥ आगतोमंडपंरम्यंब्राह्मणैःसमलंकृतम् ॥ वेदविद्भिःसदाचारैःस्मृतिज्ञैःकर्मकोविदैः ॥ २१ ॥ ततोवसिष्ठोरामंतां
चतुष्केसंन्यवेशयत् ॥ चरुपूर्वमथोहोमंतिलाज्याहुतिभिःक्रमात् ॥ २२ ॥ चक्रेब्रह्मात्मजःसर्वंसलिलेनाभ्यषिंचनम् ॥ सीता
यामूर्धजेष्वेवंसूत्रवेष्टंसमाक्षिपत् ॥ २३ ॥ विष्णुबीजकृतांमालांयज्ञांगफलसंभवाम् ॥ वसिष्ठेनसमाक्षिप्तांबिभ्रतीजानकीत
दा ॥ २४ ॥ ब्रह्मगोलकसंघातंबिभ्रतीवविराजते ॥ वीणांप्रवीणोभरतोवादयन्जानकींप्रति ॥ सशिक्षापयिषुर्गीतंगर्भस्यैवब ॥७१॥
भौविभुः ॥ २५॥ एवंकृतस्वस्त्ययनोरघूद्वहोमुनीश्वरान्पायसशर्कराज्यैः ॥ संतर्प्यवस्त्राणिसुवर्णभूषणंददौरथानश्वगणान्

१ वीणाम् । २ वसिष्ठः । ३ उदुंबरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजेभ्यः ॥ २६ ॥ ॥ जैमिनिरुवाच ॥ ॥ जनकेनापिरामायदत्तंराज्यमकंटकम् ॥ विश्वामित्रंपुरस्कृत्यवनवासंततोययौ ॥ २७ ॥ अयोध्यायांदाशरथिःशयानःकिलसीतया ॥ एकदारात्रिसमयेहृष्टःसीतांवचोऽब्रवीत् ॥ २८ ॥ ॥ रामउवाच ॥ दोहदःकीदृशोभद्रेकस्मिन्वस्तुनितद्वद ॥ सीतातद्वचनंश्रुत्वाभर्तारमिदमब्रवीत् ॥ २९ ॥ ॥ सीतोवाच ॥ ॥ तवप्रसादान्मेकामःपरिपूर्णःसदाऽनघ ॥ परंभागीरथीतीरेगंतुमिच्छामिराघव ॥ ३० ॥ ऋषिपत्न्यश्चयत्रासन्नृषयोऽजिनवाससः ॥ जहासरामःकिमिदंनतृप्तावनवासतः ॥ ३१ ॥ सीतेत्वंदण्डकारण्येवर्षाणिनवपंचच ॥ अद्यवादोहदस्तेऽयंप्रथमोनिष्फलःकथम् ॥ ३२ ॥ प्रातर्भागीरथीतीरेगमनंतेस्तुजानकि ॥ इतितस्यैप्रतिश्रुत्यसुष्वापससुखंप्रभुः ॥ ३३ ॥ निशीथेतुव्यतिक्रांतेचाराःपुरचरानिशि ॥ रामंरहःसमागम्यवाक्यमूचुःपृथक्पृथक् ॥ ३४ ॥ तवकीर्तिप्रतापश्चसर्वतोवर्ण्यतेजनैः ॥ रामःपृच्छत्यतिदृढंलोकानांकीदृशीस्थितिः ॥ ३५ ॥ ममवाममभार्यायाभ्रातॄणांदुष्कृतंकिल ॥ सुकृतंवात्वयाचारभ्रमतानिशियच्छ्रुतम् ॥ ॥ ३६ ॥ तत्सत्यंवदचारत्वंमाभीतिंकुरुदण्डतः ॥ चारोऽपिरघुनाथंतंप्रत्युवाचहसन्निव ॥ ३७ ॥ ॥ चारउवाच ॥ ॥ रामत्वद्दर्शनादेवदुष्कृतंभस्मसाद्भवेत् ॥ तवापिदुष्कृतंमन्येविपरीतंरघूद्वह ॥ ३८ ॥ वयंस्थानानिपापानिभ्रमामोरघुनन्दन ॥ त्वांदृष्ट्वासर्वपापेभ्योमुच्येमभरताग्रज ॥ ३९ ॥ तथाऽपिलोकोदुर्वारःकिंचिद्दुष्टंवदत्यसौ ॥ निशार्धेभ्रमताराजन्दृष्टंचित्रतरंमया ॥ ४० कस्यचिद्रजकस्यास्यांपुर्यांभार्यात्यगाद्गृहम् ॥ पितुर्वेश्मसमासाद्यतस्थौदिनचतुष्टयं ॥ ४१ ॥ रजक्याजनकश्चिंतामगमत्किंमयाकृतम् ॥ स्मृत्यागमविरुद्धंहिकन्यायत्पितृवेश्मनि ॥ ४२ ॥ तस्माद्दुहितरंचैतांनयिष्येभर्तृसन्निधिं ॥ यथांबर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थंकलुषंशोधयेहंस्वकैःकरैः ॥ ४३ ॥ तथास्थितायांकन्यायांगृहेयत्तन्नशोध्यत ॥ इत्युक्त्वाभ्रातृभिःसर्वैरजकःपरिवेष्टितः ॥ अ०
॥ ४४ ॥ जामातरंसमासाद्यकन्यांतस्मैन्यवेदयत् ॥ ततःक्रुद्धोऽब्रवीद्वाक्यंसृक्किणीपरिलेलिहन् ॥ ४५ ॥ जामाताहस्तमुद्य २६
म्यरामोहमितिवोमतिः ॥ राक्षसानांगृहेसीतांवसंतीमाजहारयः ॥ ४६ ॥ एतावदेवरघुनंदनसोऽब्रवीत्तद्वाक्यंपुनःपुनरिदंर
जकोऽत्रकोपात् ॥ राज्ञासमर्थपदवीमधितिष्ठतातद्रामेणचेत्कृतमहंनतथाकरोमि ॥ ४७ ॥ इत्थंवचांसिस्मवदत्यवश्यंनान्यो
जनोवक्तुमलंबभूव ॥ ततोमयावाक्यमिदंविविकंसत्यंब्रवीत्येषकुतोहिरामः ॥ ४८ ॥ गंगातटद्वीपनिखातयूपःस्वधर्मनिष्ठः
पितृवाक्यकर्ता ॥ जेतादशास्यस्यजगच्छरण्यःसराघवःकेनसमोऽस्तिलोके ॥ ४९ ॥ आचारेषुनिषण्णोऽयंनगुणेषुचसस्पृ
हः ॥ मूढोनवेत्तितंरामंगुणिनंरजकोह्ययम् ॥ ५० ॥ मनसाचिंतयित्वैवंरामत्वामहमागमम् ॥ दूतंतंतुविसृज्याशुचिंतयामास
राघवः ॥ ५१ ॥ शुद्धाऽपिजानकीवह्नौलोकेऽस्मिन्परिगर्ह्यते ॥ तस्मात्त्यजेयंनोवेत्तिचिरंदध्यौसजानकीम् ॥ ५२ ॥ कथंतांमृ
गशावाक्षींसीतांपद्मनिभाननां ॥ त्यजामिश्रोत्रियोमुख्यामाचारस्यैवपद्धतिम् ॥ ५३ ॥ अथचेमांपरित्यक्ष्येकलौविप्रायथा
श्रुतिम् ॥ इतिचिंतयतस्तस्यप्रातःकालोभवत्तदा ॥ ५४ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोऽसौजानकीत्यागेमनःकृत्वारघूद्व
हः ॥ आह्वयामासभरतंशत्रुघ्नंलक्ष्मणंतथा ॥ ५५ ॥ एतस्मिन्नंतरेप्राप्तोभरतोलक्ष्मणस्तथा ॥ शत्रुघ्नश्चमहाबाहुःसेवितुंरघुनं
दनम् ॥ ५६ ॥ ददृशुस्तेततोरामंविषण्णंदीनचेतसम् ॥ प्रोचुस्तेऽन्योन्यमासीनंरामंशीघ्रंनचागताः ॥ ५७ ॥ तस्मात्किंकु ॥७२॥
पितोभ्राताहृष्ट्वाऽस्मान्दानवर्जितान् ॥ किमस्माभिर्द्विजश्रेष्ठाःप्रातर्नोपूजिताइति ॥ ५८ ॥ नप्रातर्जागृताःकिंवाकिंवाशीघ्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमस्कृताः ॥ इत्येतत्संवदंतस्तेभ्रातरोवह्नितेजसः ॥ ५९ ॥ आयातारघुनाथंतंनमस्कृत्येदमब्रुवन् ॥ त्वन्मनस्कान्सदारामत्व
त्समर्पितकर्मणः ॥ ६० ॥ त्वद्दर्शनसमुत्कण्ठान्किमस्मान्नाभिनन्दसे ॥ रामस्तेषांवचःश्रुत्वासशनैर्वाक्यमब्रवीत् ॥ ६१ ॥
॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्याने रामवाक्यंनामषड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ छ ॥ ॥
॥ जैमिनिरुवाच ॥ ॥ रामस्तुकथयामासचारेणोक्तंयथानिशि ॥ सीताचगर्ह्यतेलोकैर्यथापाखंडिभिःश्रुतिः ॥ १ ॥ लोकाप
वादभीतेनत्यज्यतेजानकीमया ॥ संसारभयभीतेनयोगिना ममता यथा ॥२॥ तद्रामवाक्यमाकर्ण्यवज्रपातोपमंतदा ॥ भ्रात
रस्तेत्रयोऽभूवन्रोमांचितवपुर्धराः ॥ ३ ॥ अब्रवीद्भरतस्तेषांरघुनाथमिदंवचः ॥ कृपालुस्त्वंरामचंद्रत्वय्येवपरिगीयते ॥४ ॥ अं
त्यजेभ्योबलात्कश्चित्कपिलांगांसमानयेत्॥पश्चात्संसर्गदुष्टत्वात्त्यजेत्तांविपिनेतुकः ॥५॥ जानकींत्वंतथादायराक्षसात्त्यक्तुमि
च्छसि ॥ सीतातुभ्यंददौशुद्धिमात्मनोऽग्निमुखेपरा ॥ तत्त्वयाविस्मृतंरामकिंवापित्रापुरोदितम् ॥ ६ ॥ वह्नौप्रदीप्तेज्वालाभि
र्लिहंतीभिरिवांबरम्॥ सीतायांचप्रविष्टायांतदादशरथोब्रवीत् ॥ ७ ॥ विमानस्थोंऽबरेरामत्वांप्रतीदंग्वचःशुभम् ॥ इमांशुद्धां
विद्धिपुत्रजानकींभर्तृतत्पराम् ॥ ८ ॥ अस्याश्चरित्रेणकुलंनःसर्वंविमलीकृतम् ॥ येमृताःपुत्रशोकेनतेषांगतिरनुत्तमा ॥ ९ ॥
जानकीनःस्नुषायेनतेनवासस्त्रिविष्टपे ॥ एतद्दशरथेनोक्तंवचनंविस्मृतोभवान् ॥ १० ॥ ब्रह्मादिभिर्देवगणैर्यत्प्रोक्तंतच्चसंस्मर
॥ वह्नौविशुद्धावैदेहीफुल्लासत्कलिकायथा ॥ ११ ॥ गुंफितावानरैर्दृष्टामालेवरघुसत्तम ॥ तथापितेमनोरामकठिनंपरिलक्ष्य
ते ॥ १२ ॥ ॥ जैमिनिरुवाच ॥ ॥ भरतेनेदृशैर्वाक्यैःप्रोक्तोरामोऽब्रवीद्वचः ॥ सत्यमुक्तंत्वयाभ्रातःशुद्धाजनकनंदिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ लोकापवादोदुर्वारोराज्ञांकीर्तिविनाशनः ॥ कीर्तिहीनंजन्मयेषांजीवंतोऽपिमृताहिते ॥ १४ ॥ पुरूरवाहरिश्चंद्रोनहु
षोवैन्यएवच ॥ वरिष्ठान्नृपमुख्यास्तेगीयंतेयशसाभुवि ॥ १५ ॥ मान्धातासगरश्चैवह्यंबरीषोभगीरथः ॥ ऋतुपर्णोनलश्चैव
येचान्येपुण्यकीर्तयः ॥ १६ ॥ ख्यातिंप्राप्ताहिराजानःसत्कीर्त्यैवरघूद्वह ॥ नकीर्तिसदृशंकिञ्चिन्नराणामिहविद्यते ॥ १७ ॥
पापत्राणंपुण्यदञ्चस्वर्गादिप्राप्तिकारकम् ॥ अपकीर्तिस्तुयस्यैवगीयतेमानवैर्भुवि ॥ १८ ॥ तस्यजन्मवृथामन्येजीवितंचनि
रर्थकम् ॥ मुहूर्तमपिजीवेतनरःशुद्धेनकर्मणा ॥ १९ ॥ युगांतमपिनैवेहनरःकीर्तिविनाक्वचित् ॥ किन्नजीवंतिहिचिरंकाकोलू
कादिपक्षिणः ॥ २० ॥ तथातज्जीवितंमन्येनृणांकीर्तिविवर्जितम् ॥ यैःपुत्रैर्बंधुभिर्दारैःपुंसामपयशोभवेत् ॥ २१ ॥ त्याज्याः
पुत्राबान्धवाश्चदाराःप्राणप्रियाअपि ॥ श्रूयतेहिपुराराज्ञाशिबिनासत्यवादिना ॥ २२ ॥ कीर्त्यर्थंहिस्वदेहस्यदत्तंमांसंहिविष्ण
वे ॥ तथैवकवचंकर्णोवासवायददौपुरा ॥ २३ ॥ जीवनंवैनतेयायददौजीमूतवाहनः ॥ ददौदधीचिरस्थीनिकीर्त्यर्थंकीर्तिकृदृ
षिः ॥ २४ ॥ तस्मादिमांपरित्यक्ष्येजीर्णांत्वचमिवोरगः ॥ जीवितेममचेदिच्छातवकैकेयिनन्दन ॥ २५ ॥ पुनस्त्वयानवक्तव्यंत
र्हीदंवचनंमयि ॥ तावत्सलक्ष्मणःक्रुद्धोधुन्वन्हस्तावथाब्रवीत् ॥ २६ ॥ निष्पिष्यपाणिनापाणिंनिःश्वसन्नुरगोयथा ॥ विसृ
जंश्चस्वनेत्राभ्यांकवोष्णंवारिदुःखजम् ॥ २७ ॥ ॥ लक्ष्मणोवाच ॥ ॥ आःकिंलोकापवादेनत्याज्यासीतारघूद्वह ॥ भा
र्याकलहतःकश्चिन्मातरंत्यक्तुमर्हति ॥ २८ ॥ तथात्वंसर्वलोकस्यजननींहातुमिच्छसि ॥ पापिनस्तान्हनिष्यामियेसीतांदूष ॥७३॥
यंतिहि ॥ २९ ॥ म्लेच्छपूज्यैरधमुण्डैर्यवनैर्दूष्यतेश्रुतिः ॥ साकिंत्याज्याद्विजवरैरितिरामविचारय ॥ ३० ॥ शत्रुघ्नःकुपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्तावद्राघवंप्रत्यवोचत॥ ॥शत्रुघ्नउवाच॥ ॥रामत्वंयद्वचोब्रूषेत्यक्ष्येप्राणानहंयथा॥ त्वयायेत्याजिताःप्राणास्तेऽमरत्वं प्रपेदिरे ॥३१॥ यदित्वंहास्यसिप्राणानमरस्त्वंभविष्यसि॥ तथायेत्वांसमाश्रित्यवर्तेयुःपापयोनयः ॥३२॥ निर्दुखानीरुजास्तेस्युःकिम्पुनर्जनकात्मजा॥ अथवात्वांमृतंसीताजीवयेत्पतिलालसा ॥३३॥ त्वंचतांमृगशावाक्षींमृतांजीवयसेकथम्॥ शत्रुघ्नस्यवचःश्रुत्वाऽवोचद्रामःशनैःशनैः ॥३४॥ ॥रामउवाच॥ ॥आत्मानमप्यहंजह्यांयुष्मांश्चपुरुषर्षभ ॥ अपवादभयाद्भीतःकिम्पुनर्जनकात्मजाम्॥३५॥ ॥जैमिनिरुवाच॥ ॥रामेब्रुवतिराजेंद्रसीतांत्यक्तुंकृतोद्यमे ॥ ततोभरतशत्रुघ्नौगृहंस्वंस्वमगच्छताम्॥३६॥ लक्ष्मणोनययौरामंत्यक्त्वादुःखाटवीगतम्॥ लक्ष्मणंकेवलंदृष्ट्वारामोवाक्यमथाब्रवीत्॥ ॥३७॥ सौमित्रेछिंधिखड्गेनशिरोमेनविचारय॥ सीतांभागीरथीतीरेत्यक्तुंवागच्छमाचिरम्॥३८॥ सीतापरित्यागभवोदोषोममतवास्तुन॥ नौमितेचरणौभ्रातःसीतांमुञ्चसरित्तटे ॥३९॥ रामेणोक्तोलक्ष्मणस्तुलज्जयावनतःश्वसन्॥ संशयाक्रांतचित्तःसन्चिंतयामासचेतसि॥४०॥ श्रूयतेधर्मशास्त्रेषुगुरोराज्ञागरीयसी॥ पुरापरशुरामेणस्वपितुर्वचनात्तथा ॥४१॥ परश्वधेनवैछिन्नमाशुस्वजननीशिरः॥ मनसानिश्चयंकृत्वाकर्तुंरामवचोनृप ॥४२॥ यंतारमब्रवीद्धोरोरथमानयसाश्वकम्॥ तेनानीतंरथवरंसमारुह्यजगामसः ॥४३॥ सीताभवनमुद्दिश्यततोऽश्वान्यपतन्भुवि॥ अथयंत्राकशाघातैस्ताडितास्तेययुःशनैः ॥४४॥ संप्राप्यसीताभवनंलक्ष्मणोऽवतरद्रथात्॥ प्रविश्यभवनंसीतांनमश्चक्रेप्यवाङ्मुखः ॥४५॥ सीतैवंविधमालोक्यलक्ष्मणंवाक्यमब्रवीत्॥ ॥सीतोवाच॥ ॥मनोरथप्रदोभर्त्ताममराजीवलोचनः॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयाहसंत्यायद्रात्रोयाचितंतद्दौरघुः ॥ दत्तेऽपिनिष्फलंदेवयावत्त्वंनैवदृश्यसे ॥ ४७॥ अधुनातद्रघोर्वाक्यंसत्यंकर्तुंत्वमाग
तः ॥ गृहीष्यामिविचित्राणिवासांस्यगुरुचंदनम् ॥ ४८॥ मुनिभ्योमुनिपत्नीभ्योदातुंश्रेयोऽभिवृद्धये ॥ तत्तस्यावचनंश्रुत्वाल
क्ष्मणोहृदिविव्यथे ॥ ४९ ॥ मुंचन्नश्रूणिशनकैरेवंकुर्वीतिसोऽब्रवीत् ॥ भ्रातुर्वचनपाशेनबद्धःपरवशस्तदा ॥ ५० ॥ ॥ जैमि
निरुवाच ॥ ॥ ततःसीतादुकूलानिनिदधौस्यंदनोपरि ॥ अजिनानिविचित्राणिखाद्यानिविविधानिच ॥ ५१ ॥ पादुकेराम
चंद्रस्यसौवर्णेमणिचित्रिते ॥ एवंसंस्थाप्यवस्तूनिश्वश्रूंप्रष्टुमथोययौ ॥ ५२ ॥ कौसल्यांरामजननींसीतानत्वेदमब्रवीत् ॥ दो
हदोममसंजातोरंतुंभागीरथीतटे ॥ ५३ ॥ तंचपूरयितुंप्राप्तोलक्ष्मणोममदेवरः ॥ अनुज्ञायुष्मदीयाचेत्ततोगच्छामितद्वनम् ॥
॥ ५४ ॥ सीतावचनमाकर्ण्यकौसल्याप्राहजानकीम् ॥ ॥ कौसल्योवाच ॥ ॥ सीतेकथंवनंयासिवृक्षकंटकसंयुतम् ॥ वरा
हव्याघ्रसिंहादिसत्त्वैर्व्याप्तंभयंकरम् ॥ ५५ ॥ शीतोष्णवातवर्षादिदुःखदंत्वमनिंदिते ॥ चिरात्प्राप्तंराज्यसुखंपरित्यज्यशुचि
स्मिते ॥ ५६ ॥ कठोरहृदयैःसेव्यंवनंगंतुमिहेच्छसि ॥ त्वंतुरामंपरित्यज्यवनंगंतुंनचार्हसि ॥ ५७ ॥ मुखंप्रभातेमलिनंतवोष्ठौ
शुष्यतःश्रमात् ॥ ॥ सीतोवाच ॥ ॥ मद्भर्त्तावनवासीचसदाकंटकमर्दनः ॥ ५८ ॥ निर्मलोजीवयेद्यस्तुवानरान्कोटि
शारणे ॥ तंस्मरंतींतादृशींमांदुःखदंनवनंभवेत् ॥ ५९ ॥ रामनामजपंत्याश्चममोष्ठौशुष्यतःकथम् ॥ मनोवाक्कर्मभिःसेवायु
ष्मदीयाकृतामया ॥ ६० ॥ ततोममवनेनार्तिर्भविष्यतिचनौमिवः ॥ इतिप्रदक्षिणीकृत्यश्वश्रूंसीताभिनंदिता ॥ ६१ ॥ कैके
यींचसुमित्रांचनत्वापृष्ट्वाजगामसा ॥ यत्रासौलक्ष्मणःशूरोरथमादायतस्थिवान् ॥ ६२ ॥ आरुरोहरथंसीताहर्षनिर्भरमान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा ॥ सगद्गदितकण्ठोसौसौमित्रिःप्राहसारथिम् ॥ ६३ ॥ चोदयाश्वान्कशाघातैर्यथाशीघ्रंप्रयांतिहि ॥ ॥ जैमिनिरु० ॥
तस्यतद्वचनंश्रुत्वोवाचसूतोथलक्ष्मणम् ॥ ६४ ॥ अहमश्वमनोवेद्मियथावत्पुरुषर्षभ ॥ चलाचलप्रोथतयावकुकामाइमेहयाः
॥ ६५ ॥ शीघ्रंहियदिगच्छेमततोनश्वरणैर्महि ॥ दूयेतसीतादुःखेनदुःखिताऽदौविशेषतः ॥ ६६ ॥ संग्रामेनोगतिःश्लाघ्याने
दृशेकुत्सितेपथि ॥ इत्येवंहृदिमन्यंतेवाजिनोभरतानुज ॥ तथाऽपिप्रेरयाम्यद्यपश्यमेहस्तलाघवम् ॥ ६७ ॥ इत्येवमुक्त्वा
वचनंससारथिःपाण्योस्तलेनाभिजघानकन्धराम् ॥ रश्मीन्समादायकशामुदीरयन्प्राचोदयत्तीव्रयान्हयांस्तदा ॥ ६८ ॥
॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेलक्ष्मणप्रस्थानंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ गच्छंतींतांसमालोक्यसीतांपद्मनिभाननाम् ॥ अयोध्याऽतीवदुःखेनव्यथितावातचंचलैः ॥ १ ॥ ध्व
जानांपल्लवैरेनांवारयंतीवदृश्यते ॥ ततस्तेनरथेनासौगच्छंतीजानकीपथि ॥ २ ॥ ददर्शदुर्निमित्तानिघोराणिसुबहून्यपि ॥
शिवासंमुखमागत्यव्यरावीद्भैरवंयथा ॥ ३ ॥ हरिणामार्गमुल्लंघ्यप्रधावंतिस्मसर्वशः ॥ स्फुरतिस्मततोनेत्रंदक्षिणंपुरुषर्षभ ॥ ४ ॥
॥ जैमिनिरुवाच ॥ ॥ ततस्तुविपरीतानिदुश्चिन्हानिविलोक्यसा ॥ विस्मिताजानकीवीरंलक्ष्मणंप्रत्यवोचत ॥ ५ ॥ पश्यलक्ष्म
णचिन्हानिशिवागोमायवोमृगाः ॥ मार्गमावृत्यतिष्ठंतिरुदंतिभयसूचकाः ॥ ६ ॥ परंस्वस्त्यस्तुरामायकौसल्याहर्षकारिणे ॥
तस्यबाह्वोर्बलंभूयादायुष्यंपरिवर्धताम् ॥ ७ ॥ येनरामेणघोराणिरक्षोवृंदानिभूतले ॥ पातितानिशरैस्तीक्ष्णैःशुभंतस्यास्तुस
र्वदा ॥ ८ ॥ खरश्चदूषणोयेनत्रिशिरायमसादनम् ॥ प्रापितावैजनस्थानेसराज्यंकुरुतांध्रुवं ॥ ९ ॥ अगाधोगाधतांनीतोवानरैर्यै

CC-0. In Public Domain. Digitization by eGangotri

नसागरः ॥ बिभीषणोभयात्त्रातःसोऽस्त्वयोध्यापतिःसुखी ॥१०॥ महाबलौरावणकुंभकर्णौलंकापतीतौप्रथितौपृथिव्या॥पाप
स्यसाक्षादिवमूर्तिभाजौभिन्नौरणेयेनशरैःसुतीक्ष्णैः॥११॥मंदोदरीनेत्रजलैश्चलंकामभ्युक्ष्यवीरंहरिसूनुमग्रे ॥ यःप्रेरयामास
मदर्थमेवसराघवोविश्वसुखप्रदोऽस्तु ॥१२॥ एवंवदंतीजनकात्मजासौप्रायात्त्रिमार्गांजनपापहंत्रीं ॥ कल्लोलजालंगगनेवित
न्वतींपयोऽतिगौरंदधतींपवित्रं ॥१३॥ जंब्वाम्रचंपककुलिंदपटाउमसारखर्जूरपूगकदलीपनसाढ्यतीरां॥द्राक्षाफलस्तबकशो
भितमंडपालींसौवर्णकेतकवनावलिमुद्वहंतीं ॥१४॥ तांदेवलोकतटिनींप्रसमीक्ष्यसीताहृष्टाबभूवसफलंममजन्मचैतत् ॥ राम
स्यकीर्तिमिवशुभ्रतमांप्रवाहैःपापानिसर्वजगतःखलुनाशयंतीं ॥१५॥ ॥जैमिनिरुवाच॥ ॥लक्ष्मणस्तुरथात्तस्मादवतीर्यय
थाभुवं॥नावंनाविकसंयुक्तामारुरोहतयासह ॥१६॥ गंगायास्तटमासाद्यपरंभयविवर्धनं ॥ अवातरत्ततःसीतानावोलक्ष्मणए
वच॥ १७॥ सौमित्रिर्जानकीचापिसस्नतुर्जाह्नवीजले ॥ परिधायततोवस्त्रेजग्मतुर्वनगह्वरम् ॥१८॥यस्मिन्धवाश्चखदिराधा
त्र्योबदरिकास्तथा ॥ बकुलाःपिप्पलाःशुष्काःकोटरैश्चोपलक्षिताः ॥ १९ ॥ कुशानांकंटकास्तीक्ष्णास्तथागोक्षुरकाद
यः॥निंबाश्चबहवःसंतिक्रूराःपक्षिगणास्तथा ॥२०॥ जीर्णबोधिद्रुमस्थाश्चकाकाःक्रेंकारकारिणः॥ तेषांकोटरमध्यस्थाःसर्पाः
फूत्कारकारिणः॥ २१ ॥ चित्तकारण्यमहिषाःसूकराःस्थूलदंष्ट्रिणः ॥ कृष्णांगाऊर्ध्वपुच्छाश्चवृश्चिकाबहवस्तथा ॥ २२ ॥व्या
घ्रामृगगणंधर्तुंनिश्चलायोगिनोयथा ॥ विडालामूषकबिलंसमाश्रित्यखनंतिवै ॥२३॥ तथाविधंवनंदृष्ट्वासीतारोमांचिताब ॥७५॥
भौ ॥ यथारामस्यकीर्तिस्त्रीकंटकैःपरिवेष्टिता ॥ २४ ॥ सौमित्रिमब्रवीद्भीतादुर्निमित्तानिपश्यती ॥ ॥सीतोवाच ॥ ॥सौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मित्रेनचपश्यामिमुनीनामाश्रमानहम् ॥ पवित्रवेषास्ताःसाध्वीर्नपश्यामितपस्विनीः ॥ २५ ॥ मौंजीकृष्णाजिनभृतोद्वादशा ब्दान्नशिखाभृतः ॥ ऋषिपुत्रान्नपश्यामिमुनीन्वल्कलवाससः ॥ २६ ॥ नाग्निहोत्रोत्थितोधूमोदृश्यतेभरतानुज ॥ सर्वतोदृश्य तेचायंदावःकाष्ठतृणंदहन् ॥ २७॥ नवेदध्वनिरत्रास्तिश्रूयतेपक्षिणांरुतं ॥ कथंवेदध्वनिःश्राव्यरुत्यजंत्यारघुनंदनम् ॥२८॥ मयासौरघुनाथश्चत्यक्तोबुद्ध्याततोनहि ॥ दृश्यंतेमुनिपत्न्यस्तामुनिपुत्रामुनीश्वराः ॥२९॥ पवित्रैरेवदृश्यंतेपवित्राश्रमवासि नः॥मयारामपराङ्मुख्यापवित्राणिकुरूपया॥३०॥कथंतान्यग्निहोत्राणिदृश्यंतेवनवासिनां॥ ॥जैमिनिरुवाच ॥ ॥वचां सितानिसौमित्रिःशृण्वन्नश्रूण्यमुंचत ॥ ३१ ॥ अधःपश्यन्नुवाचासौलक्ष्मणोविह्वलोबहु ॥ ॥लक्ष्मणउवाच ॥ ॥सीतेस आश्रमोदूरेगम्यतांवैशनैःशनैः ॥ ३२ ॥ रामेणत्वंपरित्यक्तासत्यंलोकापवादतः ॥ तवापिदोहदोजातोद्रष्टुंभागीरथींनदीं ॥ ॥ ३३ ॥ मामसौप्रेरयामासत्वांहातुंगहनेवने ॥ किंकरोम्यवशोमातर्भ्रातुस्तस्यवचोहरः ॥ ३४ ॥ इतितस्यवचःश्रुत्वापपातध रणीतले ॥ मूर्छिताजानकीतस्मिन्नंबराद्रोहिणीयथा ॥ ३५॥ छिन्नमूलायथावल्लीगृष्टिःशूलाभिपीडिता ॥ कुमारीसर्पदष्टेवतद्व त्साभूतलेऽपतत् ॥ ३६ ॥ ततस्तांलक्ष्मणस्त्रस्तोवस्त्रांतेनाभ्यवीजयत् ॥ हस्तेनैकेनचच्छायांकुर्वंश्चमुखपंकजे ॥३७॥ उवाच यदिरामस्यसाक्षात्सेवाकृतामया ॥ तर्हीयंजानकीशीघ्रंसमुत्तिष्ठतुतादृशी ॥ ३८ ॥ इत्येवंवदतस्तस्यचेतनांलभतेस्मसा ॥ ने त्रेसमुन्मिलंतीवैलक्ष्मणंददृशेपुरः ॥ ३९ ॥ अवोचतशनैरेवमांत्यक्त्वागहनेवने ॥ कथंयास्यसिसौमित्रेजनस्थानेयथापुरा ॥ ॥ ४० ॥ देवराणांदेवरस्त्वंममपूज्यतमोमतः ॥ त्वयाऽहंदंडकेत्राताविराधांकगतापुरा ॥ ४१ ॥ फलमूलांबुभिःशुद्धैःपरिचर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतालया ॥ पर्णशालाविचित्रास्तामदर्थमुपकल्पिताः ॥ ४२ ॥ इदानींत्वदृतेतास्ताःकःकरिष्यतिलक्ष्मण ॥ अग्रतःपातिरामो
मांपृष्ठतस्तुभवान्वने ॥ ४३ ॥ हादुःखन्तुमयाप्राप्तंरामोमांविजहौयतः ॥ अपराधादृतेवीरोराजाराजीवलोचनः ॥ ४४॥ म
नसाकर्मणावाचानापराध्यामितंपतिम् ॥ सदातच्चरणौचित्तेचिन्तयामिमनोरमौ ॥ ४५ ॥ मुखंपद्मविशालाक्षंनिर्मलंचंद्रबिं
बवत् ॥ चारुदंष्ट्रंश्मश्रुलञ्चकुण्डलाभ्यांसुशोभितम् ॥ ४६ ॥ मुक्तामाणिक्ययुक्तेनकिरीटेनोपलक्षितम् ॥ द्रक्ष्यामिरामस्य
कथंपतितागहनेवने ॥ ४७॥ काकपक्षधरःपूर्वंरामःकौशिकसंयुतः ॥ आगतोमिथिलांपूर्णस्त्वयासहमहामते ॥ ४८॥ त्र्यंब
कंद्विधाचक्रेपरिणेतुंचमांधनुः ॥ मदर्थेवानरैःसार्द्धंसख्यंयोव्यदधाद्रघुः ॥ ४९ ॥ मद्वियोगेसतिपुरावृक्षानालिङ्गतिस्मयः ॥
सरामोऽयजहात्सीतांदैवमेवहिकारणम् ॥ ५० ॥ नदोषस्तस्यरामस्यममायमितिचिन्तये ॥ अथवाप्राक्तनानांहिविपाको
ममकर्मणाम् ॥ ५१ ॥ लक्ष्मणत्वंमहाबाहोनिर्दोषश्चैवराघवः ॥ अयोध्यांगच्छशीघ्रंत्वंयतोहिपरवानसि ॥ ५२ ॥ योगभैर
क्षितादेवोयोवैलंकाधिवासिनीम् ॥ मांसवैरक्षिताचाद्यनदुःखंकर्तुमर्हसि ॥ ५३ ॥ लक्ष्मणत्वंमहाबाहोश्वश्रूंविज्ञापनंकुरु ॥
युष्माकंचरणोनित्यंचिन्तयामिवनेचरा ॥ ५४॥ ससत्वाहंवनेत्यक्तारामेणापिविजानता ॥ इत्येवंविलपंतीसाजानकीगहने
वने ॥ ५५॥ पुनरेवशुभाचारालक्ष्मणंवाक्यमब्रवीत् ॥ ॥ सीतोवाच ॥ ॥ व्यापारेऽस्मिन्कथंरामस्त्वांकृपालुमयोजयत् ॥
॥ ५६ ॥ प्रेरणीयःससुग्रीवःकठिनोभ्रातृघातकः ॥ विभीषणोवाबलवान्रावणद्रोहकारकः ॥ ५७ ॥ योयत्रविषयेदक्षःसत
त्रविनियोज्यते ॥वृथात्वांप्रेरयामासत्यागेममरघूद्वहः ॥ गच्छलक्ष्मणभद्रंतेस्वांपुरींरामपालिताम् ॥ ५८ ॥ मार्गेक्षेमंभवतुते ॥७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातातेकुप्यतेरघुः ॥ इतितस्यावचःश्रुत्वासौमित्रिर्दुःखितोभृशम् ॥ ५९ ॥ प्रदक्षिणीकृत्यतदानमश्चक्रेण्यवाङ्मुखः ॥ गच्छ
न्नुवाचसौमित्रिस्त्वांमातर्वनदेवताः ॥६०॥ रक्षंतुविपिनेचास्मिन्नेषगच्छामितद्वशः ॥ निर्ययौलक्ष्मणोवीरःपश्यंस्तांजनकात्म
जाम् ॥ ६१ ॥ पादौनचलतस्तस्यकृच्छ्रेणमहतायया ॥ पश्यतीजानकीमूर्तिंलक्ष्मणस्यापिनिश्चला ॥ ६२ ॥ नददर्शतदातंतु
निपपातधरातले ॥ मूर्छिताजानकीतत्रमुहूर्तंस्मावतिष्ठति ॥ ६३ ॥ अथैत्यवीरःसौमित्रिस्तीर्त्वाभागीरथींययौ ॥ एकाकिनी
वनेबालाविललापमृगोयथा ॥ ६४ ॥ हापापंकिंमयाचीर्णयत्त्यक्तागहनेवने ॥ जनकस्यकुलेजातादत्तास्मैरघवेपुरा ॥ ६५ ॥
दिशोवलोकयामासशून्याश्चविदिशस्तथा ॥ आगमिष्यतिचैवायंलक्ष्मणोऽपिहसेच्चकिम् ॥ ६६ ॥ पुनर्मूर्छामवाप्यासौजान
कीभयविह्वला ॥ तद्दुःखदुःखिताहंसारुदंतिक्रूरनिस्वनम् ॥ ६७ ॥ मृणालानिपरित्यज्यतदद्भुतमिवाभवत् ॥ तृणांकुरंविहा
याशुसीतांपश्यंतितादृशीम् ॥ ६८ ॥ एणशावाहरिण्यश्चकृष्णसाराविशेषतः ॥ मयूरान्नृत्यमुत्सृज्यतस्मिन्कालेप्रधाविताः ॥
॥ ६९ ॥ शकुंताविजहुर्भक्षंछायांपक्षैःस्मकुर्वते ॥ जलस्थाःपक्षिणश्चाभिसिषिचुर्जनकात्मजाम् ॥ ७० ॥ चमर्यःपुच्छचमरैर्वी
जयंतिस्मजानकीम् ॥ अथभागीरथीतीरेस्नातःपुष्पाण्युपाहरन् ॥ ७१ ॥ अर्चयामासपवनःसीतांसौगंध्यसंयुतः ॥ तदास्थि
ताविशालाक्षीरामरामेतिभाषिणी ॥ ७२ ॥ विचेष्टंतीमुक्तकेशाभूमौपांसुभिरावृता ॥ यदिप्राणानिमान्हास्येभ्रूणहत्याभविष्य
ति ॥ ७३ ॥ किंकरोमिक्कगच्छामिकोमेत्राताभविष्यति ॥ इतस्ततोधावमानास्खलंतीचपदेपदे ॥ कुशानांकंटकास्तीक्ष्णाःपा
दयोराचरन्व्यथाम् ॥ ७४ ॥ सुस्रुवेरुधिरंपद्भ्यांवैदेह्याभरतर्षभ ॥ एवंदुःखातुराबालावर्ततेस्मतदावने ॥ ७५ ॥ तावत्सधीमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्बहुभिःसमावृतोवाल्मीकिरुग्रैश्चतपोभिरीडितः॥ यूपानथंछेदयितुंमखार्थंसमागतस्तांददर्शविषण्णाम्॥ ७६॥ ॥इत्या
श्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेवाल्मीकिसमागमोनामाष्टाविंशोऽध्यायः॥ २८॥ ॥छ॥ ॥छ॥
॥जैमिनिरुवाच॥ ॥वाल्मीकिस्तांततोदृष्ट्वाविषण्णांदीनचेतसां॥ तपःसिद्धिमिवच्छिन्नांस्वकीयामनवेक्षणात्॥ १॥ उवाच
कात्वंकल्याणिपुत्रीकस्यपरिग्रहः॥ कस्मादस्मिन्वनेशून्येतिष्ठसेविस्तराद्वद॥ २॥ ततःसीतानमस्कृत्यप्रोवाचातीवदुःखि
ता॥ सुतावैजनकस्याहंस्नुषादशरथस्यच॥ रामस्यभार्याभूदेवसदापतिपरायणा॥ त्यक्तास्मितेनवारेणनजानेकेनहेतुना॥
॥ ४॥ वाल्मीकिस्तांसमाश्वास्यप्रोवाचवचनंशुभम्॥ ॥वाल्मीकिरुवाच॥ ॥सीतेलभस्वपुत्रौद्वौमाशोकंकुरुसुव्रते॥
वाल्मीकिरितिनामाहंमुनिर्जनकपूजितः॥ ५॥ प्राप्ताश्रमंमेरुचिरंपत्रपुष्पफलावृतम्॥ पर्णशालांविधास्यामित्वदर्थंवरवर्णि
नि॥ ६॥ यत्रप्रसूतिर्भवितारुचिरातवजानकि॥ मुनेस्तद्वचनंश्रुत्वाहर्षिताजनकात्मजा॥ ७॥ निदाघार्तामयूरीवश्रुत्वावैघन
निस्वनम्॥ बाढमित्येवमुक्त्वासाप्रययौपृष्ठतोमुनेः॥ ८॥ तयासहमहाभागोवाल्मीकिःप्रापआश्रमम्॥ यस्मिन्व्याघ्राश्च
सिंहाश्चगोभिःक्रीडंतिहर्षिताः॥ ९॥ बिडालास्येषुलीयंतेमूषकाःस्वबिलेयथा॥ नकुलाउरगाश्चैवमयूरायत्ररेमिरे॥ १०॥
रमंतेस्ममृगैःसार्धंचित्तकास्त्यक्तमत्सराः॥ सरसीषुविचित्रासुबकोमत्स्यान्नहंतिहि॥ ११॥ साचैनमाश्रमंदृष्ट्वावाल्मीकेस्तां
स्तपोधनान्॥ ऋषिभार्याःशुभाचाराऋषिपुत्रांश्चशोभनान्॥ १२॥ हर्षेणमहताविष्टानमश्चक्रेपुनःपुनः॥ ताभिस्तैश्चप्रयु
क्ताशीर्जानकीशुभलक्षणा॥ १३॥ कल्पितांमुनिपुत्रैश्चपर्णशालामुपाविशत्॥दत्तानिमुनिपत्नीभिःफलानिबुभुजेपयः॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीत्वासुनिर्मलंतस्याशालायांसास्मतिष्ठति ॥ नौतिस्मचरणौनित्यंवाल्मीकेःशृणुतेकथाः ॥ १५ ॥ एवंतस्मिन्वसंत्याश्चसीता
याह्यगमन्नव ॥ मासागर्भस्यवाल्मीकेराश्रमेफलितद्रुमे ॥ १६ ॥ अतीतेनवमेमासेजानकीसुषुवेयमौ ॥ निशीथेसुमुहूर्तेचमु
निपत्न्योविचक्षणाः ॥ १७ ॥ तत्रत्यमुपचारंतुकल्पयामासुरागताः ॥ गायंतिगीतंहर्षेणसीतेयंसुषुवेयमौ ॥ १८ ॥ अनयोःप्र
भयावेश्मदीप्तमासीत्समंततः ॥ दिशस्तुविमलाजाताववौवातोऽतिसौरभः ॥ १९ ॥ प्रदक्षिणार्चिस्तत्रासौव्यशोभतहुताश
नः ॥ ततःशिष्याःप्रधावंतिवाल्मीकिंप्रतिशंसितुम् ॥ २० ॥ असूतपुत्रौभोब्रह्मन्जानकीविस्मयोमहान् ॥ ततोमुनिःकुशान्
रम्यॉंल्लवान्मुष्टिमितान्दधन् ॥ २१ ॥ आगतोयत्रतौबालौदृष्ट्वाहर्षसमन्वितः ॥ तावभ्यषिंचद्दर्भैश्चलवैःसार्धंमुनिस्तदा ॥२२॥
तन्नामानौमुनिश्चक्रेकुशोलवइतिस्वयम् ॥ दिनेदिनेवर्धमानौचंद्रसूर्याविवोदितौ ॥ २३ ॥ जातकर्मादिकंसर्वंचक्रेसऋषिसत्त
मः ॥ द्वादशाब्देततोमौंजीबंधनंव्यदधात्तयोः ॥ २४ ॥ प्रार्थयित्वाकामधेनुंवसिष्ठान्मुनिपुंगवः ॥ वाल्मीकिर्भोजयामासब्राह्म
णान्वनवासिनः ॥ २५ ॥ कामधेनोःसकाशाद्धिभक्तःप्रादुरभूच्छुभः ॥ सूपंविचित्रंमुद्गानांशाकाश्चविविधाअपि ॥ २६ ॥ चंद्र
बिंबसमाजाताःपूपाःशतसहस्रशः ॥ पूरिकाघृतपक्वाश्चशतछिद्राउदुंबराः ॥ २७ ॥ फलान्यमृतकल्पानिप्रादुर्भूतानिधेनुतः ॥
करंजिकामोदकाश्चतथावैसूत्रकोद्भवाः ॥ २८ ॥ निस्तुषाणांतिलानांचनारिकेलसमुद्भवाः ॥ चारबीजोद्भवावृक्षनिर्यासकृतबं
धनाः ॥ २९ ॥ फेणिकाश्चंद्रबिंबाभाःसहस्रपुटसंयुताः ॥ पर्पटामाषसंभूतास्तथातंडुलचुर्णजाः ॥३०॥ एवंविधानिचान्नानिप
क्वान्नानिददातिगौः ॥तेनचान्नेनवाल्मीकिस्तर्पयामासतान्जनान् ॥३१॥ ततःकृतोपनयनावागतौद्वौकुमरकौ ॥अध्येषातांशिशू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जै०अ० वेदंसागंवाल्मीकिनोदितं ॥ ३२ ॥ तस्माद्रामचरित्रंतज्जगतुर्मधुरस्वनौ ॥ लवस्तालधरश्चासीद्वीणाहस्तःकुशोजगौ ॥ ३३ ॥ अ०
॥ ७८॥ आलापैर्गगनंसर्वंव्याप्नुवन्शृण्वतांमनः ॥ ततस्तेमुनयोहृष्टाःसाधुसाध्वितिचाब्रुवन् ॥ ३४ ॥ धनुषीप्रददौधीमान्वाल्मीकिः २९
सगुणेदृढे ॥ इषुधीचाक्षयौरैभ्यस्ताभ्यांतस्यमुनेःसखा ॥ ३५॥ तपोधनास्ततःसर्वेअस्त्रग्रामंतयोर्ददुः॥ तपोबलेनतेसर्वेमुनयः
प्रददुःशरान् ॥ ३६ ॥ किरीटकवचान्येकेददुःखड्गौचचर्मणी ॥ एवंधनुर्धरौवीरौतनुत्राणभृतौयमौ ॥ ३७ ॥ काकपक्षधरौत
स्मिन्नाश्रमेचरतःस्मतौ ॥ सीतांशुश्रूषमाणौतौकंदमुलफलैःशुभैः ॥ ३८॥ पादसंवाहनैश्चापिपरांप्रीतींवितेनतुः ॥ ॥ जै
मिनिरुवाच ॥ ॥ अयोध्यायांमहाबाहुःपालयन्रघुवंशजः ॥ ३९ ॥ नशर्मलेभेरामोऽसौब्रह्महत्याभिपीडितः ॥ अश्वमेध
क्रतुवरंकर्तुकामोऽप्यभूद्रघुः॥ ४० ॥ वसिष्ठंचसमाहूयविश्वामित्रंचगालवम् ॥ वामदेवंसजाबालिमिदंवचनमब्रवीत् ॥४१॥
॥ ॥ रामउवाच॥ ॥ अश्वमेधंकरिष्यामिकथ्यतांतस्यवैविधिः ॥ अश्वश्चकीदृशोभाव्योदानंकीदृग्विधीयते ॥ किंमयाच
रणीयंस्याद्व्रतंतच्चनिरूप्यताम् ॥४२॥ ततोवसिष्ठःकथयांबभूवदुःखेनसाध्यःकिलयज्ञएषः ॥ अश्वश्चभाव्यःकुमुदेंदुवर्णः
पीतश्चपुच्छेमलिनश्चकर्णे ॥ ४३ ॥ सरक्षणीयोऽब्दमलन्घवीरैर्धृतःपरैश्चापिविमोक्षणीयः ॥ आरंभएवास्यहिविप्रवर्याःपू
ज्याःसहस्त्रंश्रुतिपारगाश्च ॥ ४४ ॥ एकोरथोवारणएकएवदशाश्वमुख्याश्चसुवर्णभारः ॥ शतंगवांहेमविभूषितानांप्रस्थश्च
देयोवरमौक्तिकानां ॥ ४५ ॥ एकैकशोभृत्यचतुष्टयंचकार्येषुदक्षंकिलदेयमत्र ॥ ४६ ॥ असिपत्रव्रतंरामकथंत्वन्नुविधास्यसि॥ ॥७८॥
यज्ञकर्मणिवैभार्याद्वितीयासहधर्मिणी ॥ ४७॥ तयाविरहितंरामविफलंपरिकथ्यते ॥ ॥ रामउवाच ॥ ॥ सौवर्णींप्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माकार्याजानकीसदृशीप्रभो ॥ तादृश्यासीतयासार्धंकरिष्येव्रतमुत्तमम् ॥ ४८ ॥ अश्वमेधसमारंभःक्रियतांमुनिपुंगवैः ॥ अश्वशालासुरुचिरंशास्त्रोक्तैर्लक्षणैर्युतम् ॥ ४९ ॥ निरीक्ष्यवाजिनंमह्यंततोदीक्षाप्रदीयतां ॥ तद्भाषितमुपश्रुत्यवसिष्ठोमुनिभिर्वृतः ॥ ५० ॥ वाजिशालासुधवलमश्वमाहारयन्नरैः ॥ गोक्षीरवर्णमुखतःकुंकुमाभंसुकेसरम् ॥ ५१ ॥ एकतःश्यामकर्णंतंहयमालोक्यविस्मितः ॥ वसिष्ठोब्राह्मणान्सर्वान्सहस्त्रंपर्यपूजयत् ॥ ५२ ॥ वस्त्रालंकरणैर्दिव्यैर्वाजिभिश्चमनोजवैः ॥ रथैश्चवारणैर्मत्तैःकलधौततरैःशुभैः ॥ ५३ ॥ दोग्ध्रीभिर्धेनुभिश्चैवपूजयामासतान्द्विजान् ॥ ततश्चदीक्षितोरामस्तादृश्यासीतयासह ॥ ॥ ५४ ॥ हयंतंपूजयामासचंदनेनसुगंधिना ॥ पुष्पैःस्त्रग्भिश्चचमरैःशोभितंरघुनन्दनः ॥ ५५ ॥ भालेबध्वाचसौवर्णपत्रंतस्यहरेःपुनः ॥ तस्मिन्पत्रेविलिखितंरामोदशरथात्मजः ॥५६॥ एकवीराद्यकौसल्यातस्याःपुत्रोमहाबलः॥तेनमुक्तंहरिवरंगृह्णातुबलवान्नृपः ॥ ५७ ॥ इत्यभिप्रायसहितंपत्रंभालेऽव्यशोभत ॥ शत्रुघ्नंचादिदेशाथलयारक्ष्यस्तुरंगमः ॥ ५८ ॥ ततःसतुरगोमुक्तःपृष्ठतोलक्ष्मणानुजः ॥ अक्षौहिणीभिस्तिसृभिर्जगामसहितोबली ॥ ५९ ॥ नानादेशान्व्यतिक्रम्यनगरोपवनानिच ॥ लीलयाविचचाराशुशत्रुघ्नसहितोहयः ॥६०॥ राजानस्तंहयंदृष्ट्वानमश्चक्रुःपराङ्मुखाः ॥ येशूराबलवंतश्चतेगृणंतिहयोत्तमम् ॥ ॥ ६१ ॥ तान्जित्वाबलवान्वीरान्शत्रुघ्नोमोचयद्धयं ॥ ततःसतुरगःप्राप्तोवाल्मीकेराश्रमेशुभे ॥ ६२ ॥ वाल्मीकिर्वरुणाहूतोमखार्थंतलमभ्यगात् ॥ आश्रमोपवनंरम्यंप्रविवेशतुरंगमः ॥ ६३ ॥ दाडिमाःफलितायत्रचूताःपल्लविनोनवाः ॥ मुनिद्रुमाःपुष्पवंतोराज्यःकिंचंद्रिकांचिताः ॥ ६४ ॥ अनेकाःपुष्पजात्यश्चपुल्लितादेवताइव ॥ मृद्वीकामंडपारम्याघटयंत्रैःसुशोभिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६५ ॥ रंभास्ताःफलितायत्रस्वर्लोकात्किंसमागताः ॥ तद्रक्षमाणोवीरोसौधनुष्पाणिर्लवोबली ॥६६ ॥ दूर्वांकुरांश्चरंतंतुवा
जिनंददृशेपुरः ॥ ऋषिपुत्रान्समाहूयहयाभ्याशंजगामसः ॥ ६७ ॥ हरेर्भालगतंपत्रंवाचयामासबालकः ॥ एकवीराद्यकौस
ल्यातस्याःपुत्रोरघूद्वहः ॥ ६८ ॥ तेनरामेणमुक्तोऽसौवाजीगृण्हालिमंबली॥तत्पत्रस्थमभिप्रायंज्ञात्वाशीघ्रंलवोऽब्रवीत्॥६९॥
अस्माकंजननीवंध्यात्वेकवीरानसाकिमु ॥ इत्येवमुक्त्वावचनंलवोदध्रेतुरंगमम् ॥ ७० ॥ उत्तरीयंसमुत्क्षिप्यबबंधकदलीतरौ॥
वारयंतिस्मतंवीरंमुनिपुत्राभयान्विताः ॥ ७१ ॥ ॥ मुनिपुत्राऊचुः ॥ ॥ लवत्वयारामवाजीवृथाऽयंबद्ध्यतेबलात् ॥ अ
स्ययेरक्षकास्तेत्वांनेष्यंतित्यज्यतामयं ॥ ७२ ॥ अनादृत्यवचस्तेषामब्रवीत्कुपितोलवः ॥ ॥ लवउवाच ॥ ॥ ऋषिस्त्रीकु
क्षिजायूयमहंसीतोदरोद्भवः ॥ ७३ ॥ सीतायाश्चोदरेजातःकृमिरेवनसंशयः ॥ यद्यमुंवाजिनंबध्वामुच्येयंभयशंकया ॥ परंश्रे
यस्तुमरणंनलज्जामामुपाव्रजेत् ॥ ७४ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेतुरगग्रहणोनामएकोन
त्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ ततःप्राप्तंमहत्सैन्यंरथवाजिसमाकुलम् ॥ मत्तद्विरदसंबाधंपत्तिभिश्चसमावृतम् ॥ १ ॥ कुतोऽश्वश्च
कुतोऽश्वश्चव्याहरंतोमहाबलाः ॥ रथिनःशतसाहस्राःप्राप्ताःशत्रुघ्नपालिताः ॥ २ ॥ ददृशुःकदलीवृक्षेबद्धमश्वंमहारथाः ॥ प
प्रच्छुःकेनबद्धोऽयंलघूंस्तान्ब्रह्मचारिणः ॥ ३ ॥ तेऽब्रुवन्नाम्नवृक्षस्यमूलेतिष्ठतिनिर्भयः ॥ लवश्चनाम्नाविख्यातस्तेनायंविधृ
तोहयः ॥ ४ ॥ प्रहस्यरथिनस्तेतुप्रोचुर्मूर्खोऽस्तिबालकः ॥ बलंहयंपालयन्नोनजानात्येषवैशिशुः ॥ ५ ॥ मुच्यतांमुच्यतांचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वोयथाशीघ्रंव्रजेद्दरम् ॥ तावत्प्राप्तोमहाबाहुर्धनुष्पाणिर्लवोबली ॥ ६ ॥ किमिदंगर्वितैर्वीरैःक्रियतेहयमोचनम् ॥ मांजित्वा मुच्यतामश्वोमयितिष्ठतिनक्कचित् ॥ ७ ॥ अशृण्वतांवचस्तेषांमोक्तृणांहयमुत्तमम् ॥ चिच्छेदहस्तान्सलवोबलेननिशितैः शरैः ॥ ८ ॥ तेछिन्नहस्तायोद्धारोब्रुवन्तिस्मनिपात्यताम् ॥ ततस्तंशरवर्षेणववृषुस्तेसमागताः ॥ ९ ॥ केचिच्छक्तीश्चपाशांश्चचिक्षिपुःशतशोबलात् ॥ आपतच्छरसंघातोनपस्पर्शलवंतदा ॥ १० ॥ यथाहिगौतमीतोयेस्नातंपापचयोमहान् ॥ तच्छस्त्रसंघंचिच्छेदयोगीवभवबन्धनम् ॥ ११ ॥ पंचभिःपंचभिर्बाणैरेकैकंहद्यताडयत् ॥ निषंगाभ्यामक्षयाभ्यांगृण्हन्बाणान्मुमोचसः ॥ १२ ॥ गजाभिन्नाद्विधाबाणैःशुण्डाच्छिन्नाद्विधाद्विधा ॥ शिरांस्याधोरणानांचचिच्छेदनिशितैःशरैः ॥ १३ ॥ काश्मीरकंबलान्वीरोघंटाश्चिच्छेदलंबिताः ॥ हस्तिमंचान्पताकाश्चव्यलुनात्सलवोबली ॥ १४ ॥ रथान्कांचनसन्नाहानच्छिनद्धन्विनांवरः ॥ चक्राणिचक्ररक्षांश्चत्रिवेणून्सारथींस्तथा ॥ १५ ॥ अश्वांश्चव्यधमद्बाणैस्तथावैरथसारथीन् ॥ चामराणिध्वजस्तम्भान्धनूंषिसुदृढानिच ॥ १६ ॥ तूणीरान्निशितैर्बाणैश्चिच्छेदसकुशानुजः ॥ अवधीत्तुरगांश्चापिसाश्वारोहान्रघूत्तमः ॥ १७ ॥ पदातीन्सायुधान्प्रासांश्चिच्छेदतिलशस्तदा ॥ एवंलवोमहत्कर्मचक्रेसंग्राममूर्द्धनि ॥ १८ ॥ ॥ जैमिनिरुवाच ॥ ॥ सदृष्ट्वानिहतंसैन्यंबालकेनपदातिना ॥ शत्रुघ्नःकुपितोवीरोरथमारुह्यचागमत् ॥ विस्फारयन्धनुःश्रेष्ठंतिष्ठतिष्ठेतिचाब्रवीत् ॥ १९ ॥ एवंवदंतंशत्रुघ्नंविव्याधदशभिःशरैः ॥ श्रयन्माहेश्वरंस्थानंलवोनिर्भयमानसः ॥ २० ॥ हृदिचैकेनविव्याधचतुर्भिश्चतुरोहयान् ॥ अच्छिनत्ध्वजमेकेनचतुर्भिश्चक्ररक्षकान् ॥ २१ ॥ ततश्चैकेनबाणेनधनुर्ज्यामच्छिनल्लवः ॥ आरोपयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाशत्रुघ्नोज्यांद्वितीयांशरासने ॥ २२॥ ततोनालीकनाराचांस्तीक्ष्णभल्लान्मुमोचसः ॥ त्रिभिर्ललाटेविव्याधलवंतंलक्ष्मणा नुजः ॥ २३॥ त्रिभिस्तैस्ताडितोबालःप्रहसन्वाक्यमब्रवीत् ॥ ॥ लवउवाच ॥ ॥ ललाटेममपुष्पाणिलग्नानिकमलानि किम् ॥ २४॥ एतावत्तेबलंवीरसमग्रंपरिलक्ष्यते ॥ इत्येवमुक्त्वावचनंचतुर्भिश्चतुरोहयान् ॥ २५ ॥ अनयन्निशितैर्बाणैर्यम स्यसदनंमहत् ॥ सारथेश्चशिरःकायाच्छरेणैकेनचाहरत् ॥ २६॥ द्वाभ्यांशराभ्यांचिच्छेदध्वजंचास्यसमुच्छ्रितम् ॥ द्विधा चक्रेलवोबाणैःशत्रुघ्नस्यधनुर्दृढम् ॥ २७ ॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः ॥ शत्रुघ्नःकुपितोवीरोधनुरन्यत्समाददे ॥ २८॥ सगुणंधनुरादायशरंचैकंसमाददे ॥ पीतवर्णंसुनिशितंगार्ध्रपत्रैरलंकृतम् ॥ २९ ॥ ततोऽब्रवीत्सशत्रुघ्नःपलायस्व शिशोऽधुना ॥ अन्यथामरणंतेस्यात्कृपामांबाधतेत्वयि ॥ ३० ॥ तदाकर्ण्यवचस्तस्यकुपितोबलवाँल्लवः ॥ चिच्छेदतंशरंदिव्यंस द्विधाव्यपतद्विभो ॥ ३१ ॥ यथाहिपूर्वजाःपापात्स्वर्गाद्वैनिपतंत्यधः ॥ कूटसाक्ष्यंचयेकुर्युर्व्यवहारच्युतास्तथा ॥ ३२ ॥ शत्रु घ्नोविस्मयाविष्टोबाणंचान्यंसमाददे ॥ तंशरंकालसंकाशंयावद्धनुषिसंदधे ॥ ३३ ॥ तावत्सचापंसशरंचिच्छेदकुपितोलवः ॥ ततोजग्राहशत्रुघ्नोलवणंयेनचावधीत् ॥ ३४ ॥ तद्धनुस्तंशरंदिव्यंसूर्यवैश्वानरप्रभम् ॥ मुमोचबाणंरुचिरंहतोऽसीतिवचस्तथा ॥ ३५॥ अमोघंसशरंज्ञात्वालवःसस्मारतंकुशम् ॥ अस्मिन्नवसरेभ्राताकुशोमेविद्यतेयदि ॥ ३६ ॥ तदाऽस्यबाणस्यभयंन स्यान्ममकदाचन ॥ अथतेजानकीसत्यात्पातिव्रत्यादमुंशरम् ॥ ३७ ॥ छेद्मिमेस्यात्ततःकीर्तिरितिबाणंमुमोचसः ॥ तेनबा णेनतंबाणंमध्येचिच्छेदबालकः ॥ ३८॥ ॥ जैमिनिरुवाच ॥ ॥ पूर्वार्धंन्यपतद्भूमावुत्तरार्धंचनापतत् ॥ तेनार्धेनधनुश्छिन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लवस्यहृदयंतथा ॥ ३९ ॥ सच्छिन्नधन्वाहृदिताडितोभृशंविभग्नचापोनिपपातभूतले ॥ शिखीसुवेषोरुधिरावलिप्तोमुमोहबा
लोनविवेदकिंचन ॥ ४० ॥ ततःशंखाश्चभेर्यश्चवादयंतःसुहर्षिताः ॥ योधाःशत्रुघ्नसैन्यस्थामृतशेषाजगर्जिरे ॥ ४१ ॥ मुमुचु
स्तंहयंवीराभीतंदृष्ट्वाचतंलवम् ॥ मुक्तःसतुरगोयोधैर्बभ्रामोपवनेतदा ॥ ४२ ॥ कृपाविष्टश्चशत्रुघ्नोलवमुत्थाप्यपाणिना ॥ रा
माकृतिरयंबालःसिच्यतांपयसाऽधुना ॥ ४३ ततस्तेसेवकाःशीघ्रमंभोभिःसिषिचुर्लवम् ॥ सजीवंरथमारोप्यपृष्ठतोऽश्वस्यते
ययुः ॥ ४४ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेलवमूर्छाप्राप्तिर्नामात्रिंशोऽध्यायः ॥ ३० ॥
॥ जनमेजयउवाच ॥ ॥ लवेधृतेयथायुद्धंघोररूपंबभूवह ॥ जगामकुत्रचकुशःकथंसीतानवेदतत् ॥ १ ॥ ॥ जैमिनेसर्व
माचक्ष्वपवित्रांकुशसत्कथां ॥ ॥ जैमिनिरुवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिकुशस्यचरितंमहत् ॥ २॥ यच्छ्रुत्वासर्वपापेभ्यो
मुच्यतेस्त्रीपुमानपि ॥ अश्वेप्रचलितेतस्मिँल्लवेनीतेमहारथैः ॥ ३ ॥ अश्रुपूर्णमुखाःसीतांमुनिपुत्रास्तदाययुः ॥ सीतेबद्धोलवे
नाश्वःकस्यचिन्नृपतेर्बलात् ॥ ४ ॥ नृपतेस्तस्यसैन्येनपुत्रस्तेयुयुधेलवः ॥ निहत्यसैन्यंबालोऽसौश्रांतोवीरेणकेनचित् ॥ ५ ॥
धृतोहस्तगतंछित्वाधनुर्नीतःपुरंप्रति ॥ तद्वाक्यमाकर्ण्यबभूवजानकीचित्रस्थितादेववरांगनासती ॥ यथाहिविद्युत्ध्वनिनाकु
मारिकाधनीनरोवस्त्वपहारतोयथा ॥ ६ ॥ ॥ सीतोवाच ॥ ॥ मनसाकर्मणावाचायद्यहंरामतत्परा ॥ तेनसत्येनमेपुत्रो
लवोऽस्तुकुशलीरणे ॥ ७ ॥ तावज्जीव्याल्लवःपुत्रोयावज्ज्येष्ठःसमाव्रजेत् ॥ एकाकीनिहतोबालःपापिष्ठैस्तैर्महारथैः ॥८॥ रुरो
दसाभृशंबालापुत्रशोकेनपीडिता ॥ मामनापृच्छ्यथयातोऽसिशासनेनिरतोलव ॥९॥ चंद्रबिंबसमानंतेमुखंबाणैरभिद्यत ॥ ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रंचशकलीजातंलवस्यनिशितैःशरैः ॥ १० ॥ कंदमूलफलाशीचद्वादशाब्दोविचक्षणः ॥ परंतुयुद्ध्यतांतेषांशूराणांतंचबाल
कम् ॥ ११ ॥ कराःकथंप्रवृत्तास्तेनिर्दयानांचपापिनां ॥ अस्मिंश्चसमयेतातोवाल्मीकिर्नकुशोबलि ॥ १२ ॥ कस्येदंपुरतोव
क्ष्येदुःखंप्राप्तंसुदारुणम् ॥ ॥ जैमिनिरुवाच ॥ तावत्समित्कुशाहारीवनान्निवर्त्यतेकुशः ॥ आगच्छतःकुशस्याथदुर्निमि
त्तानिभारत ॥ १३ ॥ बहूनिपथिजातानिचित्तोद्वेगकराणिच ॥ अपसंव्यंमृगायांतिनदंतोभैरवंरवम् ॥ १४ ॥ ततःसव्यथया
विष्टोरामपुत्रोरघूद्वहः ॥ चिंतयामासमनसाकेशवंविघ्नहारिणम् ॥ १५ ॥ चिंतयाविष्टमनसोबाहूतौस्फुरितौभृशं ॥ नेत्राभ्यां
स्वयमेवांभःसुस्रवेविव्यथेमनः ॥ १६ ॥ एवंसआश्रमद्वारंकुशःप्राप्तोव्यचिंतयत् ॥ लवोजवेनचायातिकथंमेसंमुखोनहि ॥
॥ १७ ॥ आयातंतंलवंप्रातर्निवारयितवानहम् ॥ तस्मात्किंकुपितोनैतिकेनचासौधृतोलवः ॥ १८ ॥ इत्येवंचिंतयन्वीरोददर्श
जननींस्वकां ॥ सीतांनमस्कृत्यकुशोजगादवचनंशुभम् ॥ १९ ॥ मातःकस्मात्प्रलापोऽयंक्रियतेक्वलवोगतः ॥ ॥ सीतोवाच ॥
वत्सत्वयिगतेरण्येफलान्याहर्तुमंजसा ॥ २० ॥ सहितोमुनिपुत्रैस्तुलवःक्रीडापरायणः ॥ उद्यानंगतवांस्तत्रकस्यचिन्नृपतेर्हयः ॥
॥ २१ ॥ विचरन्निच्छयाप्राप्तोह्यग्रहीत्तंबलाल्लवः ॥ यथाबलंयुद्ध्यमानोरणेमूर्च्छामुपागतः ॥ २२ ॥ तैर्नीयतेपुरंबध्वाजीव
न्वामृतएववा ॥ कस्तंमोचयिताबालंत्वांविनाकुशपुत्रक ॥ २३ ॥ यथाविष्णुःस्मृतोभक्तंसंसारान्मोचयेद्द्रुतम् ॥ ततस्यावचनं
श्रुत्वात्रिशाखांभ्रुकुटींदधन् ॥ २४ ॥ नेत्रेविलोहितेबिभ्रत्कुशोवचनमब्रवीत् ॥ ॥ कुशउवाच ॥ ॥ अद्यमद्बाणभिन्नानांवै
रिणांरुधिरंधरा ॥ २५ ॥ पास्यतेरुचिरंकोष्णंशोषितंसूर्यभानुभिः ॥ इंद्रश्चवरुणोवापिकुबेरोवामहाबलः ॥ २६ ॥ यमश्चयक्ष

१ अपसव्यंतु दक्षिण मित्यमरः । २ इषदुष्णं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधर्वास्तेषांसाहाय्यकारिणः ॥ भवंतुसर्वेदेवाश्चसाध्याश्चापिमरुद्गणाः ॥ २७॥ तथाऽपितानूरणेजित्वालवंतंपरिमोचये ॥ ए
षगच्छामिभोमातर्निषंगौधनुरेवच ॥ २८॥ प्रदेहिचर्मखड्गंचकिरीटंकवचंतथा ॥ तत्पुत्रवचनंश्रुत्वासत्वरंजानकीतदा ॥ प्रवि
श्यशालांतांरम्यांप्रददाविषुधीधनुः ॥ २९ ॥ चर्मखड्गंकिरीटंचकवचंचकुशोऽग्रहीत् ॥ सन्नद्धःकवचीखड्गीचापबाणधरोयुवा ॥
॥ ३० ॥ कुशोययौनमस्कृत्यजननींतांचजानकीम् ॥ सीतयासौप्रयुक्ताशीःकुशोबाहूव्यताडयत् ॥३१ ॥ विस्फारयन्धनुश्चो
ग्रंजगामत्वरितोबली ॥ यथामत्तद्विपान्सिंहीतनयोऽभ्येतिनिर्भयः ॥ ३२ ॥ गच्छतस्तांस्ततोदृष्ट्वाशत्रून्दूरादथाह्वयत् ॥ तिष्ठं
तुवैरिणःसर्वेयदिशक्तिर्हिविद्यते ॥ ३३ ॥ नोचेद्बंधुर्मदीयोऽसौमुच्यतांवाथयुद्ध्यताम् ॥ अनिर्जित्यकुशंवीरंनोपसर्पितुमर्हथ ॥
॥ ३४ ॥ तच्छ्रुत्वावचनंघोरंयोधावाक्यमथाब्रुवन् ॥ कोऽयमायातिवीरोसौखड्गचर्मधरोयुवा ॥ ३५ ॥ शरचापयुतःशूरःकिरी
टीकवचीमहान् ॥ कालोनूनंहिसर्वेषामयंनोभविताकिल ॥ ३६ ॥ इतिजल्पंतिवैसर्वेसैन्यकाभयविह्वलाः ॥ ध्वजाःकणकणा
यंतेद्रुमावातेरिताइव ॥ ३७ ॥ किरीटानिचवीराणांगृध्राःपस्पर्शुरंबरात् ॥ तस्मिन्कालेनिषंगेभ्यःस्वयंनिर्यांत्यलंशराः ॥ ३८ ॥
कोशेभ्यश्चपृथग्भूताःस्वयमेवासयोययुः ॥ चंडोवातःप्रववृतेद्रुमानुन्मूलयन्ध्वजान् ॥ ३९ ॥ रजसासंवृतंव्योमसूर्योऽतर्धान
मागमत् ॥ क्षणात्प्रशांतेरजसिवीरास्तंददृशुःकुशम् ॥ ४० ॥ ॥ जैमिनिरुवाच ॥ ॥ आयांतंतंकुशंदृष्ट्वाशत्रुघ्नोवाक्यमब्र
वीत् ॥ गच्छसेनापतेशीघ्रंनिवारयशिशुंशरैः ॥ यावत्सैन्यंव्यूहयामस्तावद्युध्यस्वमारिष ॥ ४१ ॥ ॥ सेनापतिरुवाच ॥
अहमेनंहनिष्यामिप्रसादात्तवसुव्रत ॥ इत्युक्त्वाप्रययौबालंसेनाध्यक्षस्तदाबली ॥ ४२ ॥ तिष्ठतिष्ठेतिचोवाचविव्याधदशभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरैः ॥ कुशस्तानच्छिनद्बाणान्सेनावाहमताडयत् ॥ ४३ ॥ चतुर्भिश्चतुरोऽस्याश्वान्जघानकुपितःकुशः ॥ सारथेश्चाशिरः
कायाज्जहारप्रहसन्निव ॥ ४४ ॥ रथंचातिलशःकृत्वातान्हत्वापार्ष्णिसारथीन् ॥ चिच्छेदचधनुस्तस्यकवचंचातिनिर्मलम् ॥
॥ ४५ ॥ द्वाभ्यांशराभ्यांचिच्छेदहस्तौतस्यदुरात्मनः ॥ चरणौव्यलुनात्तस्यजंघेतेमांसलेकुशः ॥ ४६ ॥ जहारश्मश्रुलं
वक्त्रंकंठाज्ज्वलितकुंडलम् ॥ सेनावाहेहतेतस्मिन्हाहाकारोमहानभूत् ॥ ४७॥ सेनावाहंहतंदृष्ट्वाभ्रातातस्यनगाह्वयः ॥ आज
गामगजारूढःशक्त्यातमहनत्कुशम् ॥ ४८ ॥ तांशक्तिंवह्निकूटाभांज्वलंतीमशनीमिव ॥ चिच्छेदपंचभिर्बाणैःसीतासूनुर्महाब
लः ॥ ४९ ॥ चरणांश्चतुरोऽप्यस्यगजस्यव्यलुनात्कुशः ॥ सच्छिन्नचरणात्तस्माद्गजादाप्लुत्यधारयन् ॥ ५० ॥. गदांविचि
त्रांमहतींनगोसौव्यगमत्कुशं ॥ कुशस्तंगादिनंहस्तंचिच्छेदाशीविषोपमम् ॥ ५१ ॥ वामहस्तेनभूमिस्थंचक्रंजग्राहसत्वरः ॥
तमप्यपातयद्भूमौबाहुंचक्रधरंकुशः ॥ ५२ ॥ तथाऽपिधावमानस्यचरणावच्छिनद्द्रुतम् ॥ सच्छिन्नचरणोवीरश्छिन्नबाहुर्नगोब
ली ॥५३॥ धूलिधूसरसर्वांगोरुधिरेणपरिप्लुतः ॥ आससादनगोबालंराहुःसूर्यमिवांबरे ॥ ५४ ॥ छिन्नाभ्यामथबाहुभ्यांगदां
चिक्षेपतंप्रति ॥ सतयाताडितोवीरःपदान्नचलितःपदम् ॥ ५५ ॥ तुतोषास्यकुशोवीरःप्रतापेनचतादृशाः ॥ ततःसुनिशितंबाणं
वधायास्यमुमोचसः ॥ ५६ ॥ शरेणतेनवैछिन्नंशिरःखेतद्व्यलीयत ॥ शंभुनामुंडमालार्थंगृहीतंतद्वरंशिरः ॥ ५७ ॥ एवंनगेवि
निहतेकुशःकोपसमन्वितः ॥ तत्सैन्यंव्यहनद्बाणैर्दंडपाणिरिवांतकः ॥ ५८ ॥ गजान्पर्वतसंकाशान्विददारवृषेवसः ॥ उच्छ ॥८२॥
लद्रुधिरेणाथवीरास्तेरक्तवाससः ॥ ५९ ॥ अजायंतभृशंविप्राःपुष्पिताइवकिंशुकाः ॥ बाणैःपतद्भिस्तुबलादग्निःप्रादुरभून्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हान् ॥ ६० ॥ रथनागैर्धनोवह्निर्वर्द्धेसचबालकः ॥ पताद्भिर्वारणैर्मत्तैर्म्रियंतेस्ममहारथाः ॥ ६१ ॥ स्वयमेवविदीर्यंतेरथाश्वक्रा णितेध्वजाः ॥ जहुःप्राणानश्वचराःशरैर्भिन्नकलेवराः ॥ ६२ ॥ हस्त्यश्वरथसंघाताःपदातान्यपतन्भुवि ॥ विष्णुभक्तिमकुर्वा णाःसंसृताविवचाधमाः ॥ ६३ ॥ कन्यावित्तेनयोजीवेत्तदीयाःपितरोयथा ॥ एवंविनिहतंसैन्यंरथनागसमाकुलम् ॥ ६४ ॥ कुशेनतेनवीरेणस्वधर्मेणेवदुष्कृतम् ॥ ६५ ॥ ॥ इ० प० जै० कुशलवोपा० कुशयुद्धवर्णनंनामएकत्रिंशोध्यायः ॥ ३१ ॥

॥ जैमिनिरुवाच ॥ ॥ ततःप्राप्तोमहाबाहुःशत्रुघ्नोधुनयन्धनुः ॥ विव्याधनवभिर्बाणैःकुशंतंकोपपूरितः ॥ १ ॥ ततःकुशोपि बलवान्रथंसाश्वंव्यचूर्णयत् ॥ शत्रुघ्नंहृदिविव्याधशरेणानतपर्वणा ॥ २ ॥ पुनश्चषष्ट्याविव्याधनाराचानांस्तनांतरे ॥ सोऽतिविद्धस्तुशत्रुघ्नोरथोपस्थेपपातह ॥ ३ ॥ यथामत्तोहिमातङ्गःस्खलितःपर्वतेऽपतत् ॥ हतशेषाश्चयेयोधास्तेऽप्ययोध्यां ययुर्द्रुतम् ॥ ४ ॥ अथमूर्च्छांविहायासौलवोऽपश्यत्स्वबान्धवम् ॥ उत्थायपरिरभ्यैनंकुशंवीरंजहर्षच ॥ ५ ॥ उवाचचकुशं भ्रातर्धारयामितुरंगमम् ॥ तेनानुनीतःसलवोबबंधेतंतुरंगमम् ॥ ६ ॥ उभौतौभ्रातरौयुक्तौयथावायुविभावसू ॥ प्रतीक्षमाणौ वीराणामागमंतस्थतुर्बलात् ॥ ७ ॥ ॥ जैमिनिरुवाच ॥ ॥ मृतशेषाश्चयेयोधास्तेगत्वाराममब्रुवन् ॥ समासीनंदीक्षितंच मृगशृंगपरिग्रहम् ॥ ८ ॥ त्वचंरुरोर्वसानंचदण्डधारंसुमेखलम् ॥ भ्रातृभ्यांसहितंशूरंमुनिभिःपरिवारितम् ॥ ९ ॥ तिलाज्यहोम संभूतधूमेनारुणलोचनम् ॥ सुवर्णसीतयायुक्तंमंडपस्थमिदंवचः ॥ १० ॥ ॥ योधाऊचुः ॥ ॥ हेरामतेश्वःपृथिवीचचार वीरोपिकाश्चिन्नदधारतंपुनः ॥ एकोऽग्रहीत्तादृशएवबालकस्तेनास्मदीयंनिहतंबलंच ॥ ११ ॥ धृतःकथंचित्तवचानुजेनच्छित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनुःश्रांततनुर्हिबालः ॥ तस्यापरोबंधुरदीनसत्वःप्राप्तःसचापासिधरोबलीयान् ॥ १२ ॥ तेनापिशेषंनिहतंतवोग्रंसैन्यंचसेना
पतिनासमेतम् ॥ तस्मिन्हतेकश्मलमाशुसैन्यंजगामसर्वाःप्रदिशोदिशश्च ॥ १३ ॥ ॥ जैमिनिरुवाच ॥ ॥ तेषांतद्वचनं
श्रुत्वारामोविस्मयमागतः ॥ उवाचकिमयंजल्पोयुष्माकंकिमुतभ्रमः ॥ १४ ॥ पैशाच्यंकिमुयुष्माकंशत्रुघ्नःकेनपात्यते ॥
॥ योधाऊचुः ॥ ॥ नजल्पोऽस्मासुराजेंद्रनभ्रमोनपिशाचता ॥ १५ ॥ स्मृतोयैस्त्वंसकृद्रामनजल्पोनपिशाचता ॥ भ्रमोनवि
द्यतेतेषांजायतेज्ञानमुत्तमम् ॥ १६ ॥ साक्षाद्दृष्टेत्वयिविभोभ्रमोऽस्मासुकथंभवेत् ॥ जल्पःपिशाचतावापिकुतःस्याद्रघुनंदन ॥
॥ १७ ॥ रणेशेतेसशत्रुघ्नःशिशोर्बाणैःप्रपीडितः ॥ ततःसुदुःखितोरामोविलपन्निदमब्रवीत् ॥ १८ ॥ ॥ रामउवाच ॥ ॥
विप्रद्विट्लवणोयेनघातितोनिशितैःशरैः ॥ मदीयंवचनंकर्तासशत्रुघ्नोऽर्भकैर्हतः ॥ १९ ॥ केनदोषेणमेभ्राताह्यवस्थांतादृशीं
गतः ॥ एहिलक्ष्मणभद्रंतेशृणुमेपरमंवचः ॥ २० ॥ अहंहिदीक्षितोभ्रातर्नमयायोद्धुमिष्यते ॥ सैन्येनमहतायुक्तोभ्रातातिष्ठ
तियत्रते ॥ २१ ॥ तत्रगत्वाप्रयोद्धव्यंमोच्योऽश्वःसत्त्वबांधवः ॥ तद्वाक्याल्लक्ष्मणस्तूर्णंप्रययौसैनिकैःसह ॥ २२ ॥ ततोमत्ता
श्चमातंगारथाःकांचनभूषणाः ॥ सादिनोनगरात्तस्मात्पत्तयश्चविनिर्ययुः ॥ २३ ॥ सर्वेरक्तपताकाश्चसर्वेरक्तांबरध्वजाः ॥ चं
दनेनावलिप्तांगारणत्कंकणमंडिताः ॥ २४ ॥ वीरश्रीपरिणेतारोमालाभिर्बद्धमूर्धजाः ॥ साक्षात्कालावताराःकिंयुद्धसंस्थामभी
प्सवः ॥ २५ ॥ युवानःश्मश्रुलावीरायुद्धशौंडाःप्रहारिणः ॥ श्वेतांबरधराःसर्वेधीराःश्वेतपताकिनः ॥ २६ ॥ एकपत्नीव्रतयुता ॥८३॥
धर्मिष्ठाश्चजितेंद्रियाः ॥ निर्ययुर्नगरात्तस्माच्छतशोऽथसहस्रशः ॥ २७ ॥ तेषामधिपतिर्ह्यासील्लक्ष्मणोबलवत्तरः ॥ सेनानीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालजिच्चासीद्धर्मिष्ठोब्राह्मणप्रियः ॥ २८ ॥ गच्छतातेनसैन्येनकृताःशुष्काःसमुद्रगाः ॥ सरितःपर्वताश्चूर्णीभूतावाजिखुरैर्दृ
ढैः ॥ २९ ॥ विपिनानिस्थलान्यासंस्तृणंशत्रुमुखेस्थितम् ॥ तत्परिग्रहणैस्तैस्तुपयोनसरितामपि ॥३०॥ चक्रैरथानामश्वानां
खुरैःप्रादुरभूद्रजः ॥ मेघानामुपरिष्टात्तद्रजःपंकीबभूवह ॥ ३१ ॥ तेनपंकेनमेघेषुघनत्वमभवत्तदा ॥ उच्चानांवारणानांचशुंडा
दंडैर्भृशंहताः ॥ ३२ ॥ घनाःपलायंतशनैःपंकभारविनामिताः ॥ पुरस्तादुत्प्लवंतिस्मखड्गचर्मधरानराः ॥ ३३ ॥ अश्ववाहाः
प्रधावंतिकुर्वंतोविविधागतीः ॥ मेघनिर्घोषगंभीरंगर्जंतःप्रययुर्रथाः ॥३४॥ कंपयंतोधरांनागाःपर्वताइवनिर्ययुः ॥ ॥ जैमि
निरुवाच ॥ ॥ बबृंहिरेगजामत्ताहयायुद्धेजिहेषिरे ॥ ३५ ॥ जगर्जिरेरथाश्चक्रैःपत्तयश्चडिडिंबिरे ॥ ततःप्राप्तमनीकंतल्ल
क्ष्मणस्यभयानकम् ॥ यत्रासौमूर्छितःशेतेशत्रुघ्नःसैनिकःसह ॥३६॥ ततःसुमित्रातनयःपुरस्ताज्ज्येष्ठोययौकालजितासमेतः ॥
ददर्शवीरंविकलंसुकेशंशत्रुघ्नमात्यंतिकजीवशेषम् ॥ ३७ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेल
क्ष्मणागमनंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥छ॥ ॥छ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ तत्सैन्यंभीषणंदृष्ट्वातत्प्रभुंलक्ष्मणंतथा ॥ उवाचनिर्भयोवीरःशत्रूणामंकुशःकुशः ॥ १ ॥ किमिदानीं
चकर्तव्यंलवसैन्यंसमागतम् ॥ वारणानांरथानांचसंख्याकर्तुंनपार्यते ॥ २ ॥ ॥ लवउवाच ॥ ॥ युद्धमत्रप्रकर्तव्यंहंतव्या
सैनिकास्त्वमी ॥ कूष्मांडफलवद्भेद्यारथाश्छेद्यारसालवत् ॥ ३ ॥ शिरांसिपक्वफलवत्पातनीयानिभूतले ॥ भ्रातःकुशमहाबा
होसमग्रस्यबलस्यते ॥ ४ ॥ नयोग्यमेतत्सैन्यंस्यादगस्त्यस्येवसागरः ॥ नचसिंहस्यपुरतोजम्बूकालीप्रसर्पति ॥ ५ ॥ पु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यांभागीरथींदृष्ट्वापापराशिःक्षयंव्रजेत् ॥ तथात्वांसमरेसेनादृष्ट्वाशीघ्रंविनश्यति ॥ ६ ॥ केवलंश्रोत्रियैरेवधार्यस्त्वंनचसैनिकैः ॥ अहंहिवाहिनीवेगान्नभग्नःस्यांकथंचन ॥ ७॥ उत्तिष्ठधनुरुद्यम्यबाणान्योजयमाचिरम् ॥ अहंसैन्यमिदंसर्वंरुणध्मिनिशितैःशरैः ॥ ८ ॥ किंकरोमिधनुश्छिन्नंततःसूर्यमुदैक्षत ॥ लवोनिश्चलयादृष्ट्यामनसाप्रार्थयन्धनुः ॥ ९ ॥ ॥ लवउवाच ॥ नमःसवित्रेसूर्यायपूष्णेज्योतिष्मतेनमः ॥ नमःसप्ततुरंगायनित्यंव्योमचरायच ॥ १० ॥ मेषादीनामदीशायमासिमासिनमोनमः ॥ अयनद्वयकर्त्रेचप्रकाशायनमोऽस्तुते ॥ ११ ॥ मूकांधबधिराणांचवाङ्नेत्रश्रोत्रदायच ॥ शिरोर्तिशूलकुष्ठानांनाशकायनमोऽस्तुते ॥ १२ ॥ नमःसुवर्णवर्णायसहस्रकिरणायच ॥ जगतामेकनेत्रायभवतेभास्करायच ॥ १३ ॥ दिवाकरायपिंगायपयःस्रष्ट्रेघनायतु ॥ नमःपर्यायरूपायजन्मत्राणक्षयायते ॥ १४ ॥ ऋग्वेदरूपिणेतुभ्यंनमोब्राह्मणरूपिणे ॥ यजुःसामाथर्वकर्त्रेपुराणागमकारिणे ॥ १५ ॥ गाथेतिहासकर्त्रेतेनमोब्रह्मस्वरूपिणे ॥ नमोविश्वस्वरूपायरुद्ररूपायतेनमः ॥ १६ ॥ विश्वस्यवांछितकरायमनोरमायविश्वेश्वरायपुरुषायसदाऽमलाय ॥ हंसायचण्डघृणयेमणिकुण्डलायनौम्याहवेजयकरंधनुरद्यमेऽस्तु ॥ १७ ॥ ॥ जैमिनिरुवाच ॥ ॥ स्तोत्रेणानेनसंतुष्टोरविर्दिव्यंशरासनम् ॥ ददौलवायसौरंचपठतांश्रेयउत्तमम् ॥ ॥ १८ ॥ सुवर्णपट्टैरुचिरैर्निबद्धंसगुणंदृढम् ॥ धनुःप्राप्यमहाबाहुर्लवःकुशमथाब्रवीत् ॥ १९ ॥ ॥ लवउवाच ॥ ॥ उपदिष्टंहियत्स्तोत्रंमुनिनागुरुणामम ॥ सौरंतज्जपितंभ्रातस्तस्माल्लब्धंमयाधनुः ॥ २० ॥ यद्यदस्त्रमयंवस्तुतदहंप्राप्तवान्महत् ॥ इत्येवमुक्त्वावचनंसंजग्मातेमहाबलौ ॥ २१ ॥ दग्धुंसैन्याटवींकिंतौप्राप्तौवायुविभावसू ॥ तौप्रविष्टौचमूंघोरांलक्ष्मणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाभिपालिताम् ॥ २२ ॥ वर्षमाणौशरान्घोरान्जीमूताविवपर्वते ॥ आवर्तःसुमहानासीत्तयोःसैन्येप्रविष्टयोः ॥ २३ ॥
मैनाकमंदराभ्यांतुमथ्यमानेइवार्णवे ॥ सिंहनादात्तयोरेवयोजनार्धंगतंबलम् ॥ २४ ॥ कालजिल्लक्ष्मणौक्रुद्धौरुरुधाते
शरैःकुशम् ॥ लक्ष्मणस्यचसैन्येनलवोरुद्धोतिपौरुषः ॥ २५ ॥ अम्योगजानांहिशतेनजातास्ततोधिकास्ताहिशतंशतेन ॥ ग
जेगजेतत्ररथादशासन्रथेरथेवाजिशतंबभूव ॥ २६ ॥ हरौहरौपत्तिशतंहितस्थावेवंअमीणांशतकेनरुद्धः ॥ ततोनिजघ्नुःशर
वज्रमुद्गरैःप्रासैर्लवंतेशतशश्चयोधाः ॥ २७ ॥ गदासिशक्त्यर्ष्टिपरश्वधैश्चकुंतैस्तथासंभ्रमवाजियुक्ताः ॥ पाशैःकरग्राहकरैश्च
बालमेकाकिनंतेपरिवव्रुरेनम् ॥ २८ ॥ द्विषोनिजघ्नेनिशितैःक्षुरप्रैःशिरांसिभूमावपतन्स्फुरंति ॥ लवोलवेनाहवकर्मकुर्वन्नना
दकल्पांतकरोयथायमः ॥ २९ ॥ शतंशतेनविव्याधद्विशतंद्विशतेनच ॥ सहस्रार्धंतदर्धेनसहस्त्रमयुतेनच ॥ ३० ॥ वीराणामह
नत्क्रुद्धःप्रयुतंप्रयुतेनच ॥ ॥ जैमिनिरुवाच ॥ ॥ चत्वारिंशद्भमीर्हत्वागजानांसिंहविक्रमः ॥ ३१ ॥ शरैःसंभिन्नसर्वांगो
दिशःसर्वाव्यलोकयत् ॥ इतःसैन्यंप्रचलितंरथवारणसंकुलम् ॥ ३२ ॥ लसत्खड्गप्रभाभिश्चश्यामीभूतंगजैरपि ॥ ददर्शघोरं
सलवोनकुशंपृष्ठतस्तथा ॥ ३३ ॥ तदादध्यौचिरंबालोभ्राताामेक्कगतःकुशः ॥ इतिचिंतयतस्तस्यलवस्यधनुरुत्तम ॥ ३४ ॥ जहार
राक्षसःक्रुद्धोमातुलोलवणस्ययः ॥ रुधिराक्षइतिख्यातोरामंशरणमागतः ॥ ३५ ॥ लवोजवात्पलायंतंधनुरादायराक्षसम् ॥
तिष्ठतिष्ठेतिचोवाचमत्तोजीवन्क्कयास्यसि ॥ ३६ ॥ इत्येवमुक्त्वावचनंचक्रंजग्राहपाणिना ॥ जनन्याश्चरणौचित्तेचिंतयित्वाम
हाभुजः ॥ ३७ ॥ सचक्रमादायखमुत्पपातश्येनोयथाभक्षमिवप्रगृण्हन् ॥ शिखीवपुष्मान्क्षतजावलिप्तोरराजसाक्षादिवचक्र

१ हस्तिनः १०० अश्वसादिनः १०००० रथिनः १००० पादचारिणः १००००००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिः ॥ ३८ ॥ गगनस्थंलवंदृष्ट्वायोधाबिभ्युःपतेदिति ॥ ततश्चापेषुरुचिरांच्छरांस्तेयुयुजुर्भयात् ॥ केचिद्दधुश्चचर्माणिसुदृढा
निस्वमूर्धसु ॥३९॥ अस्मानुपरिवीरोऽसौपतिष्यतिनसंशयः ॥ इतिकृत्वामतिंकेचित्स्यंदनस्याधआगमन् ॥४०॥ बाणनिर्भि
न्नवर्ष्माणोवारणाभुविशेरते ॥ तेषामुदरमध्यस्थाःकेचिच्छन्नामहारथाः ॥ ४१ ॥ एवंस्मभीतावीरायेतेप्येवंचक्रिरेतदा ॥ अव
शिष्टामहावीरानिर्यातास्तुदशैवहि ॥ ४२ ॥ राज्ञोदशरथस्यासीन्मंत्रीसुज्ञोहितत्सुताः ॥ जितश्रमोधार्मिकश्चसुकेतुःशत्रुसूद
नः ॥ ४३ ॥ चंद्रोमदःशलःकालोमल्लःसिंहश्चतेदश ॥ विव्यधुःसायकैस्तीक्ष्णैर्लवंखेचक्रपाणिनम्॥ ४४ ॥ दशभिर्दशभिर्बा
णैश्चिच्छिदुश्चक्रमुच्छ्रिताः ॥ छिन्नचक्रोलवःशीघ्रंजग्राहपरिघंभुवि ॥ ४५ ॥ जघानमंत्रिपुत्रांस्तान्परिघेणहसन्निव ॥ तेछि
न्नचर्मवर्माणोनिपेतुःशोणितोक्षिताः ॥ ४६ ॥ वेदबाह्याःकुशास्त्रज्ञाविष्णुभक्तिविवर्जिताः ॥ मातापित्रोर्भक्तिहीनानास्तिका
रौरवेयथा ॥ ४७ ॥ तावत्सराक्षसःप्राप्तोरुधिराक्षोगदांदधन् ॥ गदयाताडयामासमूर्ध्नितंलवमोजसा ॥ ४८ ॥ जगाममूर्च्छां
बालोसौमुहूर्त्तंभूतलेऽपतत् ॥ मूर्च्छांविहायसलवस्तदातस्थौगजेंद्रवत् ॥ ४९ ॥ कुंतमादायभूमिस्थंप्रययौराक्षसंप्रति ॥
केशेष्वाक्षिप्यतंदुष्टंकुंतेनाभ्यहराच्छिरः ॥ ५० ॥ स्वधनुर्जगृहेवीरःसूर्यदत्तंननादच ॥ मुमोचनिशितान्बाणान्सैन्यक्षयकरा
न्बहून् ॥ ५१ ॥ ततःसैन्येनमहतावेष्टितःपुनरेवसः ॥ गर्भस्थोहियथाजंतुरज्ञानेनबहिःस्थितः ॥ ५२ ॥ वेष्ट्यतेतद्वदप्येषस्ते
नसैन्येनवेष्टितः ॥ तृणैरावेष्टितोवह्निस्तान्येवदहतिध्रुवम् ॥ ५३ ॥ तद्वत्सबालस्तत्सैन्यमदहत्कोपपूरितः ॥ ५४ ॥ ॥ इत्या
श्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेलवयुद्धविजयवर्णनोनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ ॥ कुशस्तंलक्ष्मणंदृष्ट्वाप्रययौसिंहविक्रमः ॥ आयातंपंचभिर्बाणैर्लक्ष्मणोभिजघानतम् ॥ १ ॥ तैस्ता
डितःकुशोवीरस्त्विदंवचनमब्रवीत् ॥ ॥ कुशउवाच ॥ ॥ स्थिरोभवमहावीरमापदंपृष्ठतःकुरुः ॥ २ ॥ इत्येवमुक्त्वावचनं
बाणंचैकंमुमोचसः ॥ तेनबाणेनसरथोबभ्रामघटिकाद्वयम् ॥ ३ ॥ अतिभ्रमेणचत्वारोवाजिनःपंचतांययुः ॥ ततोऽन्यंरथमा
रुह्यलक्ष्मणोमुमुचेशरान् ॥ ४ ॥ द्वाभ्यांशराभ्यांचिच्छेदकवचंचातिनिर्मलम् ॥ किरीटंचत्रिभिर्बाणैस्तदद्भुतमिवाभवत् ॥
॥ ५ ॥ सभिन्नकवचोवीरोमुक्तत्वक्सर्पराडिव ॥ तस्मिन्रणेरराजाथसीतासूनुर्गतक्लमः ॥ ६ ॥ अब्रवील्लक्ष्मणंवीरःकुशोविन
यपूर्वकम् ॥ द्विषद्भावंपरित्यज्यममभारस्त्वयाहृतः ॥ ७ ॥ उपकारःकृतोनूनंत्वयाकर्तातथाऽप्यहम् ॥ सैन्यभारोमहानस्तित
वलक्ष्मणसांप्रतं ॥ ८ ॥ तंसर्वंनाशयिष्यामिपश्यमेहस्तलाघवम् ॥ अथसूक्तंजपन्नुच्चैराथर्वश्रुतिविश्रुतम् ॥ आग्नेयमस्त्रंमुमुचेसी
तासूनुर्महाबलः ॥ ९ ॥ आग्नेयास्त्रात्ततोज्वालाःप्रादुर्भूताःसहस्रशः ॥ ताभिस्तस्यरथोदग्धोलक्ष्मणस्यमहात्मनः ॥ १० ॥
सैन्यंदग्धंपताकाश्चवासांस्याभरणानिच ॥ ज्वलत्कंचुकिनोवीरादग्धश्मश्रुशिरोरुहाः ॥ ११ ॥ दह्यंतेस्मसटापुच्छंवाजिनांहं
सवर्णिनां ॥ रथाश्चक्राणिदह्यंतेछत्राणिचामराणिच ॥ १२ ॥ आयुधानिचसर्वाणिदग्धान्यासन्हविर्भुजा ॥ दह्यमानंततोदृ
ष्ट्वासैन्यंशत्रुनिबर्हणः ॥ १३ ॥ लक्ष्मणःशमयामासतदस्त्रंवारुणास्त्रतः ॥ ततःकुशोमहावीरोवायव्यंसंदधेशरम् ॥ १४ ॥ वा
यव्यास्त्रेणतेसर्वेवीरावियतिउड्डिरे ॥ तदारथगजामत्ताःपतंत्यनिलरंहसा ॥ १५ ॥ ॥ जैमिनिरुवाच ॥ ॥ सेनानीःकाल
जित्क्रुद्धोलक्ष्मणंवाक्यमब्रवीत् ॥ संहरिष्याम्यहंबालंवेलेवमकरालयम् ॥ १६ ॥ यावत्कनिष्ठोनायातितावत्कुर्वेपराक्रमम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवमुक्त्वावचनंकुशंप्रायात्सकालजित् ॥ १७ ॥ ॥सेनाध्यक्षउवाच॥ ॥ त्वमद्यनूनंसंप्राप्तोरामचंद्रबलक्षयः ॥ जातोय
द्यपिकुर्वेहंकुशस्योन्मूलनंध्रुवम् ॥ १८ ॥ कालजिद्भाषितंश्रुत्वाकुशोवचनमब्रवीत् ॥ ॥ कुशउवाच ॥ ॥ अजागलस्तन
स्येवव्यर्थंनामविभाव्यते ॥ बधिरस्ययथाकर्णौवृथाश्रवणवर्जितौ॥१९॥बालानांहियथाब्रह्मतृणस्याग्निर्यथावृथा ॥ सेनाध्य
क्षःकुतःकेनत्वादृशोबहुजल्पकः ॥ २० ॥ त्वयिपश्यतिरेमूढसैन्यंहंतिममानुजः ॥ बाणंछिंधिमयामुक्तंतवजिह्वाविदारकम् ॥
॥ २१ ॥ इत्युक्त्वाकालजिज्जिह्वामलुनादिषुणाकुशः ॥ मौनीत्वंसांप्रतंजातोवाहिन्यांसंस्थितंलवम् ॥ २२ ॥ अनयाशुचसंपू
ज्यत्वंमौनव्रतमाचर ॥ अत्यंतंकालजित्क्रुद्धःशरेणानतपर्वणा ॥ २३॥ कुशंतंहृदयेविध्वावामहस्तमताडयत् ॥ चिच्छेदतस्या
पिकुशोबाणैर्हस्तंचदक्षिणं॥२४॥ततोऽर्धचंद्रेणशिरश्चिच्छेदास्यसकुंडलं॥हतेकालजितिप्रौढेकुशंसौमित्रिरभ्यगात्॥२५॥व
र्षन्बाणगणान्घोरान्शालतालवटच्छिदः ॥ कुशंजघानहृदयेबाणैःषड्भिरथोद्दढम् ॥ २६ ॥ शक्तिंचिक्षेपसौमित्रिःकुशंप्रतिग
दामपि ॥ कुंतंखड्गंचपरशुंतोमरंचर्मचाक्षिपत् ॥ २७ ॥ कुशस्तुसप्तधातानिशस्त्राणिपरिचिच्छिदे ॥ ननर्दसिंहवद्वीरस्तिष्ठति
ष्ठशरान्सह ॥ २८ ॥ इत्येवमुक्त्वानाराचान्पञ्चवाल्मीकिनाऽर्पितान् ॥ गार्ध्रपत्रान्सुनिशितान्विषमान्पन्नगानिव ॥ २९ ॥ ज्व
लदग्निकणान्वीरःकुशोधनुषिसंदधे ॥ अथमुक्ताःशराव्योम्निज्वलंतोमर्मभेदिनः ॥ ३० ॥ बिभिदुर्हृदयंतस्यलक्ष्मणस्यमहा
त्मनः ॥ सौमित्रिश्चपपातोर्व्यांसूर्यःखादिवनिष्प्रभः ॥ ३१ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःशुश्रावनिनदंलवस्यसकुशो
रणे ॥ खड्गचर्मधरश्चायंपुप्लुवेपक्षिराडिव ॥ ३२ ॥ ददर्शतंलवंशूरंवेष्टितंगजपंक्तिभिः ॥ खड्गेनाभ्यहनत्क्रुद्धोगजांश्चरथिनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहून् ॥ ३३ ॥ अमीजघानताःसर्वाःक्षणाल्लवममोचयत् ॥ वाल्मीकेराश्रमेताभ्यांसैन्यंसर्वंनिपातितम् ॥ ३४ ॥ तस्थतुर्निर्भ
यौवीरौवीक्षमाणौस्वमाश्रमम् ॥ ३५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकुशलवोपाख्यानेलक्ष्मणसेनापराजयो
नामचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ गंगातीरेरामचंद्रोदीक्षितोयज्ञमंडपे ॥ भरतंप्रत्युवाचाथमुनिभिःपरिवारितः ॥ १ ॥ ॥ रामउवाच ॥
कथंनायातिवीरोसौविजित्यहयहारिणौ ॥ याभ्यांपराजयंप्रापशत्रुघ्नःसतवानुजः ॥ २ ॥ सौमित्रिंवीक्ष्यसंग्रामेत्रैलोक्यंसचरा
चरम् ॥ स्वप्नमध्येविलीयेतप्रत्यक्षंकःसहिष्यति ॥ ३ ॥ तमद्यबहुभिर्वीरैःसेवितंरोषपूरितम् ॥ पतनादनुजस्यापिमयाज्ञप्तंन
तौक्षमौ ॥४॥ योधितुंवनजावज्ञौचपलौनाथवर्जितौ ॥ लक्ष्मणस्यभयात्रस्तौशरणंकंगमिष्यतः ॥५॥ आनयिष्यतिसौमित्रिः
शत्रुघ्नंधर्मलोकतः ॥ स्वप्रतापेनपतितंजनन्यैदर्शयिष्यति ॥ ६ ॥ लक्ष्मणंकुपितंश्रुत्वासंहरंतंस्वबालकौ ॥ प्रार्थयिष्यत्यना
थाकंरक्षणायतयोःप्रसूः ॥ ७ ॥ कुतःप्राप्तौस्वनाशायदारकौविघ्नकारकौ ॥ दिनद्वयंविहीनंमेवर्षमध्येतुरंगमः ॥८॥ शत्रुघ्नर
क्षितःप्रापयाभ्यांपार्श्वेनिबंधनम् ॥ मामनादृत्यभरतंसुग्रीवंचबिभीषणम् ॥ ९ ॥ अंगदंवालितनयंहनूमंतंमहाबलम् ॥
अन्यान्ममसुहृद्बंधूंस्तृणीकृत्यापहारकौ ॥ १० ॥ वाजिनंकरसंप्राप्तंपश्यतांबालचेष्टितम् ॥ भरतप्रेरयजनान्तंदेशंयत्रमे
हयः ॥ ११ ॥ लक्ष्मणंप्रतिसंग्रामेयथानयतिवाजिनम् ॥ वचनंकुरुतेक्रुद्धःसौमित्रिर्मामकंसदा ॥ १२ ॥ ॥ जैमि
निरुवाच ॥ ॥ भरतेनसमाहूताःपंचदूतामहाबलाः ॥ रामपार्श्वेक्षणादेत्यतानुवाचस्वयंप्रभुः ॥ १३ ॥ ॥ श्रीरामउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातलक्ष्मममानेतुंब्रूतमद्वाक्यमेवतम् ॥ जीवितेनयुतौयुद्धेमोहनास्त्रेणमोहितौ ॥ १४ ॥ रक्षणीयौत्वयाबालौसागसावपिल
क्ष्मण ॥ त्वंवीरोऽसिवृतश्चासिशूरैःसर्वास्त्रकोविदैः ॥ १५ ॥ रथस्थोऽसिसमर्थोऽसिविरथौतौनिराश्रयौ ॥ अत्रानयशिशूवे
गान्मापातयरणेऽबलौ ॥ १६ ॥ परबालेदयायुक्तंचित्तंकुर्वंतियेजनाः ॥ तेपुत्रपौत्रैःसहिताजायंतेभुविसाधवः ॥ १७ ॥
मयानपुत्रवदनंसीतावदनसन्निभम् ॥ वीक्षितंभुविजातेनततस्तौमोचयायम्यहम् ॥ १८ ॥ प्रष्टव्यौकस्यपुत्रौतौकिमर्थंवन
चारिणौ ॥ पुत्रयोर्जननीकुत्रतत्पृष्ट्वातांसमानय ॥ १९ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंदिशतिरामेतुदूतान्प्रतिविशांपते ॥
तावद्दूताःशरैर्भिन्नाःक्षतजौघप्रवाहिणः ॥ २० ॥ लक्ष्मणस्यमहावीरारामंशरणमाययुः ॥ रामरामेतिजल्पन्तःशंसंतःसुमह
द्भयम् ॥ २१ ॥ रामरामहाबाहोत्राह्यस्मान्महतोभयात् ॥ बहुलेनबलेनापिवृतःशूरःसलक्ष्मणः ॥ २२ ॥ प्रापतत्काननंघो
रंशत्रुघ्नोयत्रमूर्च्छितः ॥ ससैनिकःक्षतोबाणैःकुशस्यपरितिष्ठति ॥ २३ ॥ कुशसायकभिन्नांगैरुधिरापीडवाहिभिः ॥ वीरैर्न
ज्ञायतेकिंचित्किंशुकैःपुष्पितैरिव ॥ २४ ॥ वज्रपातसहावीरानानाशस्त्रैप्रपीडिताः ॥ नजानंतिव्यथांयेवैतेकुशेनविमूर्च्छिताः ॥
॥ २५ ॥ लवेनैकेनशिशुनाकृतासावाहिनीघना ॥ विमुखाभूभ्रृतंप्राप्तादृष्ट्वाबालस्यचेष्टितम् ॥ २६ ॥ लक्ष्मणस्यबलाध्यक्षः
पतितोभुविराघव ॥ कालजिद्बहुभिःसार्द्धंकुशबाणैःप्रपीडतः ॥ २७ ॥ लक्ष्मणेनकृतंयुद्धंभ्रातरौवीक्षितौवने ॥ स्वमनःकृपया
युक्तंवैरंत्यक्त्वाऽनुजस्यतत् ॥ २८ ॥ ततःकुशंप्रत्युवाचसौमित्रिःसतवानुजः ॥ गच्छबालकमुक्तोऽसिकनिष्ठेनसमंगृहम् ॥ २९ ॥
जनन्यैब्रूहिमुक्तोस्मिसामयुक्तेनकेनचित् ॥ लक्ष्मणस्यवचःश्रुत्वाकुशोलक्ष्मणमब्रवीत् ॥ ३० ॥ त्वंगच्छराममुक्तोऽसिदुःखि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंत्वांनयोधये ॥ नक्षमाल्पाप्यहोरामेसाम्प्रतंहिविलोक्यते ॥ ३१ ॥ यःसानुजंभवंतन्तुक्लेशयन्नागतःस्वयम् ॥ भीतोऽवमा
नसंसर्गकारकाद्राघवादसि ॥ ३२ ॥ कृपाधृतात्वन्निमित्तमक्षतोयाहिलक्ष्मण ॥ प्रहराशुशरौघैर्मांपौरुषंचेद्विभातिते ॥३३॥
लक्ष्मणस्तंजघानाथहृदयेसप्तभिःशरैः ॥ तेशरास्तंतदाभित्वाबालंयुद्धेतथाविधे ॥ ३४ ॥ पतिताःकाननेतीक्ष्णाबिभिदुःपाद
पानपि ॥ ततःकुशस्यबाणौघैर्लक्ष्मणस्यकलेवरम् ॥३५॥ समाकीर्णंत्वग्विहीनंक्षणादेवरणेकृतम् ॥ कर्तुंकिंलक्ष्मणोवेत्तिनवी
नंस्वंकलेवरम् ॥ ३६ ॥ पूर्वाभ्यासेनकेनापितस्माद्बालंप्रयोधितः ॥ पश्चात्पपातधीरोऽसौकुण्डलीसायकैःक्षतः ॥ ३७ ॥ भ
ग्नंबलंतेपतितंगतंरामदिशोदश ॥ भ्रातरौतौमहावीरौक्षतौशत्रुघ्नलक्ष्मणौ ॥ ३८ ॥ ताभ्यांविहीनाहिवयंतुभ्यंशंसितुमाग
ताः ॥ त्यजदीक्षांरघुपतेकुरुयुद्धंवनेव्रज ॥ ३९ ॥ यावन्नायांतितेबाणाःकुशकार्मुकनिःसृताः ॥ नान्यस्यगणनातस्यकुशस्य
पुरतःप्रभो ॥ ४० ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधानिवाक्यानिश्रुत्वातेषांसराघवः ॥ मूर्छितोनिपपातोर्व्यांभरतस्या
ग्रजस्तदा ॥ ४१ ॥ गृहीतोभरतेनाथसिक्तश्चैवांभसारघुः ॥ परिमृज्यास्यनेत्रेचसमाश्वास्यपुनःपुनः ॥ ४२ ॥ चेतनासंहि
तंवीक्ष्यभरतोवाक्यमब्रवीत् ॥ ॥ भरतउवाच ॥ ॥ माविषादेमनःकार्षीर्लक्ष्मणंप्रतिराघव ॥ ४३ ॥ शत्रुघ्नेनसमंयुद्धेत
वार्थेविनिपातितम् ॥ लक्ष्मणस्त्यक्तुकामोऽयंस्वदेहंदुःखितोभृशम् ॥४४॥ परित्यज्यागतोदेवींयदाप्रभृतिकानने ॥ सीतादुः
खेननोजीवन्पुनरायातितेंऽतिकम् ॥ ४५ ॥ शंसितुंसपुराप्राप्तस्तवादेशोमयाकृतः ॥ तथाऽपिनकृपाजाताजानक्यांनचलक्ष्म
णे ॥ ४६ ॥ संस्मृत्यसमयेमृत्युमकरोल्लक्ष्मणोहृदि ॥ अथरामनिमित्तंहियज्ञकार्येसबान्धवः ॥ ४७ ॥ स्मृत्वात्यागंहिसीता

३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यायुद्धेतत्याजजीवितम् ॥ निरापराधांत्यक्त्वायांवनेसीतांसमागतः ॥ ४८ ॥ तत्रत्यंकिल्बिषंदेहेधारयन्संस्थितःसदा ॥ तस्या
द्यकुशकोदण्डप्रचण्डशरगङ्गया ॥४९॥ क्षालितंकिल्बिषंगात्राद्रामपूतोऽद्यलक्ष्मणः ॥ भरतंमामपूतंहिनप्रेरयसिकिंचन॥
॥ ५० ॥ अद्यराघवयास्यामितत्कर्तुंपावनंवपुः ॥ विचारःसकलोजातःसीतात्यागेचतेवने ॥ ५१ ॥ अयोध्यायांस्थितोजीवन्न
तथाऽद्यकरोम्यहम् ॥ कथंहीनोत्रतिष्ठामिसीताशत्रुघ्नलक्ष्मणैः ॥ ५२ ॥ एवंवदंतंभरतंजगादभरताग्रजः ॥ ॥ श्रीरामउ० ॥
कोऽसौभरतजानीहिसबालोव्रजकानने ॥ ५३ ॥ तमानयकुशंजित्वासानुजंममसन्निधौ ॥ समुत्थापयवीरौतौमूर्च्छितौममबां
धवौ ॥ ५४ ॥ हनूमानपियात्वेषजांबवान्वानरैःसह ॥ तवानुवृत्तिंकुर्वाणःकुरुवाक्यंममोदितम् ॥ ५५ ॥ पितृवाक्यंमयाऽका
रिव्रजताकाननंप्रति ॥ त्वयातुनकृतंतस्यजनकस्यवचोमहत् ॥ ५६ ॥ नंदिग्रामेप्रवसताजटावल्कलधारिणा ॥ इदानींत
स्यपापस्यनिष्कृतिंकुरुराघव ॥ ५७ ॥ मद्वाक्यकरणादेवपूतोभवमहामते ॥ भरतस्त्वब्रवीद्वाक्यंकथयामिरघूद्वह ॥ ५८ ॥
द्वौश्रुतौबालकौवीरौतवसैन्यनिपातकौ ॥ नतौभवान्विजानातिहनूमान्वेत्तिवानवा ॥ ५९ ॥ अंगदोवाविजानातिनीतिज्ञःस
चिवस्तव ॥ ॥ अंगदउवाच ॥ ॥ मन्येहंबालकौतौतुरामदुर्मंत्ररूपिणौ ॥ ६० ॥ सीतांलोकापवादेनयज्जहौरघुनंदनः॥
॥ जैमिनिरुवाच ॥ ॥ एवंरामसमादिष्टोहनुमत्प्रमुखैर्वृतः ॥ ६१ ॥ निर्ययौभरतःक्रोधाद्रथमारुह्यसत्वरः ॥ निर्गतंबहुलंसै
न्यंगगनेभूतलेपिच ॥ ६२ ॥ राघवस्यपुराद्रम्यान्नरवानरसंकुलम् ॥ भरतःकाननंप्राप्यहनूमंतमुवाचह ॥ ६३ ॥ ॥ भरत ॥८८॥
उवाच ॥ ॥ हनूमन्पश्यसंग्रामेकुशबाणैर्निपातिताः ॥ रामस्यवीराबहवोविशिरस्काविबाहवः ॥ ६४ ॥ गजान्रथान्हया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वीरान्करभग्नगतमस्तकान् ॥ धावमानान्पुरःपश्यगतस्वास्थ्यानितस्ततः ॥ ६५ ॥ कुतस्तौपतितौवीरौरणेशत्रुघ्नलक्ष्मणौ ॥
शोणितेनात्रनीयंतेबहुलेनमहाबलाः ॥६६ ॥ भागीरथींप्रतिबलान्नीतौकिंममबांधवौ ॥ क्वचित्कराःक्वचित्पादाःक्वचिद्दंतान्नृणा
मिह ॥ ६७ ॥ दृश्यंतेवाहनानांतुक्वचित्केशाःक्वचित्स्रजः ॥ नदीमिमांसमुल्लंघ्यव्रजपारंनिरीक्षय ॥ ६८ ॥ यथागतोसिलंकां
त्वंतीर्त्वाजलनिधिंपुरा ॥ तत्रतौपश्यपतितौबांधवौमामकौभुवि ॥ ६९ ॥ विलोकनीयौतौबालौत्वयाकुशलवौक्वचित् ॥ ॥हनू
मानुवाच ॥ ॥ तदातीर्णोऽस्मिभरतसागरंसीतयास्वयम् ॥७०॥ संमुखासापुराजाताविमुखाद्यविलोक्यते ॥ शोणितौ
घांनदींमन्येदुस्तरांलक्ष्मणाग्रज ॥ ७१ ॥ तथापितववाक्येनवीक्षितुंयामिबांधवौ ॥ इत्युक्त्वातांनदींतीर्त्वाददर्शपतितावु
भौ ॥ ७२ ॥ शरनिर्भिन्नसर्वांगौरणेशत्रुघ्नलक्ष्मणौ ॥ प्रार्थयंताविवधरांसीतात्यागेनदुःखिताम् ॥ ७३ ॥ माकोपंव्रजनौस्था
नंदेहिसीताद्रुहोरिति ॥ हनूमांस्तौगृहीत्वाथबाहुभ्यांपुनरागतः ॥ ७४ ॥ भरतस्यसमीपंहिमूर्च्छितौतरसान्नृप ॥ ददर्शभरतो
भिन्नौकुशबाणैःसमंततः ॥ ७५ ॥ रथेसंस्थापयामासभ्रातरौविस्मयान्वितः ॥ रक्षणेचांगदंदत्वाहनूमंतमुवाचह ॥ ७६ ॥ क्व
गतौबालकौवीरौरामसैन्यनिपातकौ ॥ हनूमन्पश्यकुत्रापिबालवेषधरौसुरौ ॥ ७७ ॥ गतौलक्ष्मणशत्रुघ्नौपातयित्वामहार
णे ॥ ॥हनूमानुवाच ॥ ॥ मेघनादशरैर्नायंमूर्छितोलक्ष्मणस्तथा ॥ ७८ ॥ यथाकुशशरैर्व्याप्तोनजहातिहिकश्मलम् ॥
मूर्च्छेनामामुपैत्येषावीक्ष्यलक्ष्मणमातुरम् ॥ पश्यंतिसैनिकाःसर्वेबालाभ्यांनिहतंबलम् ॥ ७९ ॥ ॥इत्याश्वमेधिकेपर्व
णिजैमिनीयेकुशलवोपाख्यानेहनूमद्वाक्यंनामपंचत्रिंशोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ ॥ एतस्मिन्नन्तरेप्राप्तोधनुर्विस्फारयन्कुशः ॥ खड्गचर्मधरोवीरोलवःसंग्राममागमत् ॥ १ ॥ प्रकाशयि
त्वापृथिवींकरैःसागरमेखलाम् ॥ सूर्योऽस्तर्धानमापेदेध्वांतश्चसमपद्यत ॥ २ ॥ आत्मनश्चपरेषांचवीरोनज्ञायतेतदा ॥ अन्यो
न्यंनामभिस्तेवैक्रोशंतिरणकोविदाः ॥ ३ ॥ गजामत्ताश्चधावन्तिचूर्णयंतोरथान्बहून् ॥ रथवेगेनाश्ववीराःपतंतिहयपृष्ठतः ॥
॥ ४ ॥ हयवेगेनाश्ववीराःपत्तयोभुविशेरते ॥ दोधूयखड्गंसलवःप्रविवेशमहाचमूम् ॥ ५ ॥ शिरस्याधायचर्माशुखड्गेनाश्वप
दोऽच्छिनत् ॥ हस्तिहस्तान्विशालांश्चचिच्छेदसकुशानुजः ॥ ६ ॥ दीर्घहस्तौसमालंब्यव्रजन्नुपरिहस्तिनम् ॥ विदारयतिकुं
भौसकाष्ठानीवकुठारकः ॥ ७ ॥ मुक्ताफलानिजगृहेमुष्टिभिर्भुविचाक्षिपत् ॥ हस्तिदंतेषुपतितैःखड्गैर्भृशभयानकाः ॥ ८ ॥
समुत्थिताश्चाग्निकणास्तेदहंतिस्मसैनिकान् ॥ तावत्क्रुद्धोमहाबाहुःकुशोबाणान्मुमोचसः ॥ ९ ॥ शिरांसिचिच्छिदेवीरोबाहू
नंगदभूषितान् ॥ शिरांसिकरिणांबाणैरनयद्दिवमोजसा ॥ १० ॥ आकाशेद्यापतेप्राप्ताएकीभावंव्यवस्थिताः ॥ अतःपरंहि
नक्षत्रंनभूतंनभविष्यति ॥ ११ ॥ तस्मान्नक्षत्रतांप्राप्ताःखेहस्ताहस्तिनांतथा ॥ वर्षंत्यद्यापिभूपृष्ठेहस्तादानोदकंबहु ॥ १२ ॥
सावित्रंतस्यपानीयंनिदानंमौक्तिकस्यच ॥ एवंहिकरिशीर्षाणिछिन्नानिशतशोरणे ॥ १३ ॥ कुशेनतेनवीरेणतदद्भुतमिवाभ
वत् ॥ अथकोदण्डटंकारबधिरीकृतदिग्गजः ॥ १४ ॥ ददर्शभरतःकिंतौकार्तिकेयगणेश्वरौ ॥ संहरंतौनिजंसैन्यंवनंवायुवि
भावसू ॥ १५ ॥ मुमोचनिशितान्बाणांस्तोयधाराइवाम्बुदः ॥ ॥ जैमिनिरुवाच ॥ ॥ बालकौकार्मुकयुतौघनश्यामौच
संगतौ ॥ १६ ॥ काकपक्षधरौवीक्ष्यहनूमानिदमब्रवीत् ॥ ॥ हनूमानुवाच ॥ ॥ एतौरामाकृतीबालौबलंरामस्यवीक्षकौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७॥ सज्जास्तिष्ठन्तुसर्वत्रभरताद्यामहाबलाः॥ एवंब्रुवतिवीरेतुतदापवननन्दने ॥ १८ ॥ तावत्कुशःप्रत्युवाचलवंरणगतं
तदा॥ पश्यसैन्यंलवप्राप्तंतुरंगंनेतुमिच्छति ॥ १९ ॥ व्रजाम्येतद्बलंभ्रातस्तुरंगंत्वंहिपालय ॥ ततोरामानुजंवीक्ष्यकुशोवच
नमब्रवीत्॥ २०॥ ॥ कुशउवाच ॥ ॥ शत्रुघ्नोलक्ष्मणश्चोभौशयातेनिहतंबलम् ॥ किन्नाममेनजानासिशत्रुंमांकुशमाग
तम् ॥ २१ ॥ ॥भरतउवाच ॥ ॥ त्वांनयिष्याम्यहंयुद्धात्पराजित्यनिजांपुरीम् ॥ सानुजंत्वरितंबालंघोटंमुंचव्रजाधु
ना ॥ २२ ॥ जननींतेतापसींमेकरुणावीक्ष्यजायते ॥ जनन्यैब्रूहिमुक्तोऽस्मिसबंधुर्भरतेनच ॥ २३ ॥ क्षामितंस्वबलस्याद्य
पातनंयत्त्वयाकृतम् ॥ तच्छ्रुत्वावचनंतस्यकुशोबाणैरथार्दयत् ॥ २४ ॥ भरतंसप्तभिर्वीरंवानरान्पञ्चसप्तभिः ॥ हनूमंतंशतेना
यंताडयामाससंगरे ॥ २५ ॥ बाणानांवालिपुत्रञ्चसहस्रेणहसन्निव ॥ नीलंपंचशतैर्विध्वासप्तत्याचनलंरणे ॥ २६ ॥ जांब
वंतंत्रिसाहस्त्रैर्बाणैर्विंध्याधरोषितः ॥ यस्ययस्यशरोलग्नोनितरांहृदयेबलात् ॥ २७ ॥ मूर्च्छान्वितस्यपतितःसीतापुत्रेणताडि
तः ॥ बाणैःषड्भिश्चराजेंद्रलवेनातिबलीयसा ॥ २८ ॥ भरतस्यधनुश्छिन्नंरथश्चशकलीकृतः ॥ कुशकोदण्डनिर्मुक्तैर्मुमोहभ
रतःशरैः ॥ २९ ॥ गिरिमुत्पाट्यहनुमान्भरतंवीक्ष्यमूर्च्छितम् ॥ चिक्षेपसीतासुतयोर्मूर्ध्नियोजनमायतम् ॥ ३० तंपर्वतंदीर्घ
नेत्रौबाणैश्चक्रतुरंबरे ॥ त्रसरेणुनिभंरुद्धगात्रभूतिसुखप्रदम् ॥ ३१ ॥ पंचभिस्तंहरिसुतंप्रभिन्नमपिमूर्च्छितम् ॥ शरैःकनक
चित्रैश्चकुशश्चक्रेस्वपौरुषात् ॥ ३२ ॥ ततोभग्नंबलंभूयोरामायपतितंजनः ॥ कथयामासराजेंद्रश्रुत्वारामोविनिर्ययौ ॥ ३३ ॥
ससुग्रीवोमहाबाहुर्भ्रातृदुःखेनदुःखितः ॥ बिभीषणयुतःश्रीमान्विस्मयोत्फुल्ललोचनः ॥ ३४ ॥ वनंप्राप्यरथारूढस्तौददर्श

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 बलंचतत् ॥ हतप्रहतविध्वस्तंरामेतिपरिभाषिच ॥ ३५ ॥ ॥ जैमिनिरुवाच ॥ ॥ पप्रच्छरामस्तौबालौस्वाकृतीधन्वि
 नांवरौ ॥ कुतोऽधीतोधनुर्वेदोभवद्भ्यांयद्धतंबलम् ॥ ३६ ॥ केनोपनीतौविधिवत्किंस्विद्वेदेकृतश्रमौ ॥ किंस्वित्कलासुकुशलौध
र्मश्रवणतत्परौ ॥ ३७ ॥ कच्चिन्नपरदारेषुविरुद्धाद्दृष्टिरीर्यते ॥ कच्चित्तेषुचविप्रेषुप्रतिज्ञायाश्चपालनम् ॥ ३८॥ कस्तातःकाचज
ननीकुत्रवासोनिवेद्यतां ॥ तद्भाषितमुपश्रुत्यकुशोवचनमब्रवीत् ॥ ३९ ॥ ॥ कुशउवाच ॥ ॥किमस्मदीयकथयावंशजोद्भव
यान्नृप ॥ क्षात्रंपौरुषमुत्सृज्यकथ्यतेत्वादृशैर्जनैः ॥४०॥ शीघ्रंयुध्यस्वराजेंद्रविलंबःक्रियतेकथम् ॥ नतुरंगोह्यस्मदीयउच्यतां
वाथयुध्यताम् ॥ ४१ ॥ इतिवाक्यंतयोःश्रुत्वारामोऽवोचद्विशांपते ॥ नकरिष्याम्यहंयुद्धंभवान्कथयतांकुलम् ॥ ४२ ॥ ॥कु
शउवाच ॥ ॥ केवलंसुषुवेसीताक्षमाशीलौचनौवने ॥ आवयोःकृतवान्सर्वंजातकर्मादिकंमुनिः ॥ ४३ ॥ उपनिन्येचवाल्मी
किर्वेदंसम्यगपाठयत् ॥ तथारामस्यचरितंसन्मनोनिर्वृतिप्रदम् ॥ ४४ ॥ तत्तदभ्यासयोगेनदृष्टिर्विमलतांव्रजेत् ॥ बुद्धिस्वा
स्थ्यंमनःस्वास्थ्यंप्रतापश्चापिवर्धते॥४५॥तस्माद्धतंबलंसर्वंयोधानांतवपश्यतां ॥ ममतानास्तितेरामपुत्रदारधनेषुच ॥४६॥
तस्माद्धतस्यसैन्यस्यगणनातेनविद्यते ॥ नशक्तिर्विद्यतेरामसात्यक्ताकिंत्वयावने ॥४७॥ शक्तिहीनोनरःकस्तुयुध्येतनिशितैः
शरैः ॥ ॥ जैमिनिरुवाच ॥ ॥ रामोमन्यतपुत्रौतौसीतातनयकीर्तनात् ॥ धिगस्तुखलुनोयुद्धमित्युक्त्वाधनुरुज्जहौ ॥४८॥
पपातरथनीडेथमूर्च्छितोजनमेजय ॥ ॥ जैमिनिरुवाच ॥ ॥ मूर्च्छांविहायधर्मात्माधीरःसत्यपराक्रमः ॥ ४९ ॥ सुग्रीवंपरि
पप्रच्छरामःपरपुरंजयः ॥ एतौकस्यात्मजौवीरौजानीहिकपिसत्तम ॥ ५० ॥ ॥ सुग्रीवउवाच ॥ ॥ पुराणपुरुषाज्जातावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तौमन्येऽत्रराघव ॥ प्रतिबिंबंतावकंहिवनमध्येविलोक्यते ॥ ५१ ॥ नापरंसंगरेमन्येजययुक्तंविनाप्रभुम् ॥ तवाग्रेयामिबालौ
हियुधियोधयितुंनृप ॥ ५२ ॥ गृहीत्वाशाखिनंराजन्मुमोचपुरतस्तयोः ॥ तौवृक्षंतिलशःकृत्वाचक्रतुर्मूर्च्छितंहरिम् ॥ ५३ ॥
शरैःसुनिशितैस्तावन्नीलोयुध्यतवानरः ॥ नीलंबाणेनविव्याधकुशःकोपसमन्वितः ॥ ५४ ॥ बभूवुर्बहवोनीलारुधिरात्तस्यचा
परे ॥ तैश्चव्याप्तंरणंसर्वंतत्प्रमाणैर्महाबलैः ॥ ५५ ॥ तावत्कुशेनवीरेणबुद्ध्यासम्यग्विचारितम् ॥ जलौकास्त्रेणतेसर्वेविद्धाःपेतु
र्धरातले ॥ ५६ ॥ सचापिपतितोनीलःपरेभग्नाश्चसैनिकाः ॥ एकएवस्थितोरामोनाभवन्सैनिकाश्चते ॥ ५७ ॥ रामोमुमोचना
राचांस्तीक्ष्णान्कालानलप्रभान् ॥ मार्गणानिष्फलाःपेतुःकृपणस्येवमंदिरे ॥ ५८ ॥ मनोरथानिर्धनस्यशरन्मेघाइवांबरे ॥ यं
यंबाणंमुमोचासौराघवःकुपितोमृधे ॥ ५९ ॥ तंतंद्विधाचक्रतुस्तौसचतुर्धाभवच्छरः ॥ एवंतदाऽभवद्युद्धंलोकविस्मयकारकम् ॥
॥ ६० ॥ दृष्ट्वातुल्यंबलंसम्यग्बालयोरघुनंदनः ॥ सीतावदनवद्वक्त्रौदृष्ट्वाबाणैश्चताडितः ॥ ६१ ॥ पपातरथनीडेथमूर्छितोजन
मेजय ॥ ततःकुशलवौज्ञात्वामूर्च्छितंजानकीपतिं॥६२॥समुत्तीर्यरथात्तस्माज्जगृहातेऽस्यकुंडले ॥ केयूरंकंठहारंचलक्ष्मणस्या
पिमंडनम् ॥ ६३ ॥ सर्वेषामपिवीराणांपतितानांरणांगणे ॥ एतस्मिन्नंतरेराजन्लवःकुशमथाब्रवीत् ॥ ६४ ॥ भ्रातःकुशग्रही
ष्यामिहनूमंतंमहाबलम् ॥ सीतावीक्ष्यकपिंहृष्टाभविष्यतिनसंशयः ॥ ६५ ॥ रामस्यचरथंरम्यमध्यारोहसुदुर्जयम् ॥ लक्ष्म
णस्यरथंरम्यमधिरुह्यव्रजाम्यहम् ॥ ६६ ॥ जांबवत्प्रमुखान्वीरान्स्वरथेपरिपातय ॥ ॥ जैमिनिरुवाच ॥ ॥ हनूमज्जांब
वंतौचमूर्छाविरहितौभुवि ॥ ६७ ॥ वानरावूचतुस्तथ्यंमीलयावोऽत्रलोचने॥६८॥ ॥ हनूमानुवाच ॥ ॥ पश्यरामादयोवीरामू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्च्छिताबालसायकैः॥जांबवन्मांचकुरुतेमूर्च्छितंरामसंभव॥६९॥किंकरिष्यामियदिमांसनेष्यतिबलात्कुशः॥ सीतासमीपेमर
णंभविष्यतिनसंशयः ॥ ७० ॥ एवंब्रुवाणेवीरेतुप्राप्तोरणगतोलवः ॥ जग्राहवानरौतौहिमुदाकपटमूर्च्छितौ ॥ ७१ ॥ सीता
समीपेगत्वाथसर्वंनिगदतुश्चतौ ॥ जितोरामःससैन्योहिसमानीतंचभूषणम् ॥ ७२ ॥ वानरौकौतुकार्थंतेमयानीतौनिरीक्ष
य ॥ मातर्भ्रात्राकृतंयुद्धंविजयीपुनरागतः ॥ ७३ ॥ सीतापुत्रौपरिष्वज्यवचनंचेदमब्रवीत्॥ ॥ सीतोवाच ॥ ॥ मानिनौवा
नरौमुंचरणमध्येचपुत्रक ॥ ७४ ॥ मांनिरीक्ष्यमृतावेतौजीवहीनौभविष्यतः॥ ततोलवोमुमोचैतौरणमध्येमहामतिः ॥ ७५ ॥
एतस्मिन्नंतरेराजन्वाल्मीकिर्वरुणालयात् ॥ आजगाममहातेजाऋषिभिःपरिवारितः ॥ ७६ ॥ तौगत्वाथाकथयतांसर्वंकृ
त्यमशेषतः ॥ ततोज्ञात्वामुनिवरःसर्वानुत्थाप्यवारिणा ॥ ७७॥ प्रोक्ष्यामृतमयेनैवमुवाचरघुनन्दनम् ॥ ॥ वाल्मीकिरु० ॥
तवपुत्रौमहाराजगृह्यतांरघुनन्दन ॥ ७८॥ मन्यसेयदिसीतांचनिर्दोषांनेतुमर्हसि ॥ उत्थायरामोनगरींप्रविवेशससैनिकः॥
॥ ७९ ॥ विस्मयन्नेवचहयंमुक्तंवाल्मीकिनाचतम् ॥ पालयामासवीरैस्तैःपश्चाद्यज्ञोमहान्कृतः ॥ ८० ॥ यज्ञोत्सवेवर्तमाने
वाल्मीकिर्मुनिपुंगवः ॥ सीतांनीत्वापुत्रयुतांसंस्थाप्यरघुसन्निधौ ॥ ८१ ॥ रामःपुत्रयुतोजातःसीतयासहितःस्थितः ॥ मुनीन्वि
सर्जयामासयज्ञांतेचपुरस्कृतान् ॥ ८२ ॥ रामःसीतागतंस्नेहंनिदधेतदपत्ययोः ॥ युद्धंतुपुत्रयोर्यद्वज्जातंरामेणवैपुरा ॥ ८३॥
तथापार्थस्यपुत्रस्ययुद्धंप्रावर्तताद्भुतम् ॥ ॥ सूतउवाच ॥ ॥ पारिक्षितायसकलंकथयामासजैमिनिः ॥ ८४ ॥ तत्तुयुष्मभ्यमा
ख्यातंमयावैमुनिपुंगवाः ॥ नाख्यातवानिदंयुद्धंवाल्मकिःपितृपुत्रयोः ॥ ८५ ॥ यद्याख्यास्यदमज्जिष्यल्लोकोयंकरुणार्णवे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमाख्यानकंरम्यंयेशृण्वंतिनरोत्तमाः ॥ ८६ ॥ तेपुत्रपौत्रसहिताभुक्त्वाभोगान्मनोरमान् ॥ सर्वपापविनिर्मुक्तालभंतेवि
ष्णुमव्ययम्॥८७॥शृणोतीदंपुण्यशीलंश्रावयेच्चेदमुत्तमम् ॥ नरःफलमवाप्नोतिराजसूयाश्वमेधयोः॥८८॥ काञ्चनेनविमानेन
स्वर्गंयातिनरोत्तमः॥ पुनर्लक्ष्मीरूपयुतोजायतेविमलेकुले ॥ ८९ ॥ श्रुत्वात्विदमुपाख्यानंश्राव्यमन्यन्नरोचते॥ पुंस्कोकिल
रुतंश्रुत्वारूक्षाध्वांक्षस्यवागिव॥९०॥ ॥इत्या०प०जै०कुशलवोपा०रामाश्वमेधपरिसमाप्तौफलस्तुतिव०षट्त्रिं०॥३६॥
॥ जैमिनिरुवाच ॥ ॥ हंसध्वजेनतुमुलंकृतंयुद्धंनराधिप॥ सबाणैर्बभ्रुवाहस्याच्छिलारथसहस्रकम् ॥१॥ सरथंपातयित्वा
ग्रेबिभेदास्यवपुःशरैः॥ अस्त्राणिपार्थपुत्रस्यविफलानिकृतानिवै ॥ २ ॥ अक्षौहिणीपंचकंतुविजितंजनमेजय॥ स्मृत्वाकृष्ण
स्यवचनंपुत्रयोःपतनंमृधे॥ ३ ॥ बभ्रुवाहस्तुपार्थायबाणंचपरिमुंचति ॥ तेनवीरसहस्राणांबलंभवतिपातितम् ॥ ४ ॥ पार्थपु
त्रस्यबाणौघैर्मरालध्वजवाजिनः॥ रथोऽपिपरमाणुत्वंप्राप्तवान्समरेतदा॥ ५ ॥ सभिन्नहृदयोराजाहंसकेतुःक्षितिंययौ॥पति
तेचमहावीर्येहंसकेतौमहात्मनि॥ ६ ॥ सुवेगःसंगरेयोद्धुंबभ्रुवाहनमागतः ॥ जघाननवभिर्बाणैःपार्थसूनुंसवक्षसि॥ ७ ॥ छ
त्रंध्वजंधनुश्चास्यत्रिभिर्बाणैर्द्विधाकरोत्॥ शतेनचसहस्राणांताडयामासवक्षसि ॥ ८ ॥ पुनर्वीरसहस्रस्यकदनंकृतवानसौ ॥
गजानांचंद्रशुभ्राणांशतानिचमहाहवे ॥ ९ ॥ निहत्यपृथिवींचक्रेमांसपकांसुदारुणाम् ॥ युद्धक्षेत्रंतुतत्सर्वंकर्षित्वागजमस्त
कैः॥ १० ॥ अधश्चोर्ध्वंकरैर्वाजिगजस्कंधनियंत्रितैः॥ अंत्रैस्त्रिगुणितैर्योक्त्रैर्गजमुक्ताफलानिच ॥ ११ ॥ कृत्वाबीजंवपंतश्चत
स्मिन्कालेविशांपते॥ शिरांसिमूलफलवत्प्रवपंतिचभैरवाः ॥ १२ ॥ यक्षिण्योनागचरणैश्छिन्नैर्मुसलकंडनम्॥ नृशीर्षाणांस्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कुर्वंतिगायंत्यःशतशोभृशम् ॥ १३ ॥ यंत्रैर्गजाननमयैश्छिन्नैःपिष्यंतिचापराः॥ पुनःसुवेगःसंधायशरंकालानलोपमम्॥१४॥
मुमोचार्जुनपुत्रायमध्यतःसद्विधाकरोत् ॥ अग्रभागंतथाप्यस्यसंमुखंचागतंरणे ॥ १५॥ तंचापिद्विदलीकृत्ययावत्पश्यतिचा
र्जुनिः॥ शकलेपुनरायातेतेद्विधाकारितेऽमुना ॥ १६ ॥ शकलानांचतुष्कंयत्तद्भूमौपतितंनृप ॥ पंचमंबाणशकलमग्रभागगतं
तुयत् ॥ हृदयेऽस्यप्रविष्टंतन्मूर्च्छितोऽभूत्तदाऽर्जुनिः॥ १७॥ विहायपुनरेवायंकश्मलंसहसोत्थितः ॥ ततःपरंप्रज्वलितःप्रल
येपावकोयथा॥ १८॥ जघानपांडवींसेनांस्थितांपार्थरथंप्रति ॥ तस्मिन्दिनेस्थितौद्वौतुपार्थकर्णसुतावुभौ ॥ १९ ॥ कायना
शेविलीयंतौयथाजीवौपरस्परम् ॥ अन्येयेमूर्च्छितानीताजीवशेषारणात्परम् ॥ २० ॥ उलूपीपालयामासविशल्यैर्विविधौष
धैः॥ पुरासमुद्धृतायस्माद्गुरुशापात्सुमानिनी॥ २१॥ नागराजसुतादेवीदिष्ट्यापार्थेनसंगता ॥ तीर्थयात्राप्रसंगेनतथाचित्रांग
दाचसा ॥ २२ ॥ उवाचपांडवस्तत्रवृषकेतुंमहाबलम् ॥ ॥अर्जुनउवाच ॥ ॥ सैन्यंनष्टंकर्णपुत्रवस्तुजातंचमेहतम् ॥
॥२३॥ हंसध्वजमुखावीराःपतितामसन्निधौ ॥ प्रद्युम्नःसहपुत्रेणनीतोमणिपुरंप्रति ॥ २४॥ मदर्थेयोधितौवीरौनिर्भिन्नौ
सायकैश्चतौ ॥ अनुशाल्वोऽपिसमरेपतितोनैवदृश्यते॥ २५॥ सुवेगोनिहतश्चाद्यनीताश्चममवीरकाः ॥ छत्रैर्ध्वजैःकार्मुकैश्च
चामरैश्चवरांशुकैः॥ २६ ॥ एकस्त्वमसिपुत्रात्रनापरःकोऽपिदृश्यते॥ निर्गच्छत्वंतुनगरेयत्रतौधर्ममाधवौ॥ २७॥ कुलपुत्रोऽ
सिभद्रंतेदातृणांबीजमेवच ॥ एवंब्रुवतिपार्थेचयावत्तस्याग्रतोनृप॥ २८॥ तावत्पार्थकिरीटस्थोगृध्रस्तीव्रंववाशह॥ ज्ञात्वागृ
ध्रंमस्तकेस्वेशंसंतंवैशसंस्वकम्॥ २९॥ तथाकपोतंनीडेचरथस्यकिलशायिनम् ॥ शिरोहीनांनिजांछायांनासाविरहितंमुख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ स्फुलिंगवर्जितेनेत्रेप्रत्युवाचपुनर्वचः ॥ ३० ॥ पुत्रप्रयाहिनगरंधर्मंभीमजनार्दनान् ॥ शंसत्वंवैशसंघोरंदुर्निमित्तानिमेर
णे ॥ ३१ ॥ भवान्यदिमयासार्धंप्राप्नोतिमरणंरणे ॥ तवाद्यनाशेनष्टास्तेभविष्यंतिपरंक्षितौ ॥ ३२ ॥ बहुधायोधितश्चासिभि
न्नबाणैर्वपुस्तव ॥ विनात्वांनपृथाजीवेत्तस्मान्मामुच्यगम्यताम् ॥ ३३ ॥ अकार्यंचमहज्जातंमत्तोराजाचदीक्षितः ॥ असिपत्रव्र
तचरःकथंयज्ञक्रियाभवेत् ॥ ३४ ॥ युधिष्ठिरस्यनस्नानंयज्ञांतेऽवभृथादिकम् ॥ जलयात्राचतुःषष्टिदंपतीभिःकृतानच ॥ ३५ ॥
युधिष्ठिरमुखावीराभीमाद्याममबांधवाः ॥ छत्रंशतशलाकंतद्व्याघ्रचर्मसमन्वितम् ॥३६॥ युधिष्ठिरस्यपुरतोयज्ञारंभेनधारित
म् ॥ गौरीणांनैवनारीणांसहस्रंचामरान्वितम् ॥ ३७ ॥ अग्रतोधर्मराजस्यगतंलाजप्रवर्षणम् ॥ विप्राणांवेदनिर्घोषोनैवस्व
मंडपंगतः ॥ ३८ ॥ नस्रुवाःकनकाबद्धानस्रुचोबहुसंस्कृताः ॥ वैकंकताश्चयज्ञेचचषालैर्मंडितानते ॥ ३९ ॥ यूपाबैल्वाबादरा
श्चपालाशाःखादिराःशुभाः ॥ नतत्पताकावेदीनांपूजनंमामकैःकृतम् ॥ ४० ॥ वासुदेवंपुरस्कृत्यरुक्मिणीनैवतोषिता ॥ अनु
सूयारुन्धतीनांवृद्धानामृषियोषिताम् ॥ ४१ ॥ सभर्तृकाणांयज्ञांतेनमस्कृत्ययुधिष्ठिरः ॥ आशीर्भिरभियुक्तोनमयापार्थेन
कारितः ॥ ४२ ॥ धिग्जीवितंममवृथामन्येयुद्धंकरोम्यतः ॥ ॥ वृषकेतुरुवाच ॥ ॥ नव्रजामिभयान्मृत्योरणेत्यक्त्वाधनं
जयम् ॥ ४३ ॥ सूर्यःपितामहोभातिमद्भंगात्पतितोभवेत् ॥ अभग्नोभंगमायातितस्मान्मृत्युस्तुकीदृशः ॥ ४४ ॥ त्वंप्रयाहिम
हाबाहोगमनंकीदृशंमम ॥ एकपत्नीचसारम्यानमांप्राप्तंनिरीक्षते ॥ ४५ ॥ विमुखंत्वांपरित्यज्यसत्यमेतद्वदामिते ॥ पश्या
द्यपौरुषंपार्थबभ्रुवाहनमागतम् ॥ ४६ ॥योधयामिसमक्षन्तेससैन्यमपिसंगरे ॥ मित्रार्थेयस्त्यजेत्प्राणान्गवार्थेचद्विजन्मनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४७ ॥ स्वामिकार्येचसमरेतस्यलोकाःसनातनाः ॥ जायंतेनात्रसंदेहःकैवल्यमपिचिंतितम् ॥ ४८ ॥ यावत्पार्थोमहाबाहुः
संग्रामेपरितिष्ठति ॥ तावत्क्रतुरयंजातःकिंवृथामांप्रभाषसे ॥ ४९ ॥ एतावदुक्त्वावचनंनमस्कृत्यययौमुदा ॥ रथेनापिपता
केनबभ्रुवाहनमाह्वयत् ॥ ५० ॥ तिष्ठंतियेरणेधीराःपाण्डवस्यत्वयाहताः ॥ तेषामेवाद्यसर्वेषांकरिष्येशांतिकंमहत् ॥ ५१ ॥
एवंब्रुवंतंबलिनंकर्णसूनुंशरैस्त्रिभिः ॥ विव्याधहृदयेशीघ्रंतेभित्वाधरणींगताः ॥ ५२ ॥ तृषिताइवराजेंद्रपातुंभोगवतीजलम् ॥
वृषकेतुःशरैःषड्भिस्तंजघानस्तनांतरे ॥ ५३ ॥ सशरैरर्दितःकार्ष्णिर्भ्राम्यमाणःकथंचन ॥ संस्थाप्यात्मानमव्यग्रोयोधया
मासकर्णजम् ॥ ५४ ॥ तिलशस्तद्रथंकृत्वानिपात्यरथसारथिम् ॥ हयान्हत्वाचसमरेशंखंदध्मौप्रतापवान् ॥ ५५ ॥ तस्यांगं
पूरयित्वाथशरैःकनकचित्रितैः ॥ ततोजघाननाराचैःकर्णसूनुंमहाबलम् ॥ ५६ ॥ रथंतस्यसुचित्रंतंससूतंचयुगैर्युतम् ॥ छित्वा
शतसहस्रेणताडयामासपाण्डविः ॥ ५७ ॥ आग्नेयमस्त्रंतरसाप्रयुयोजनृपात्मजः ॥ वारुणंकर्णजेनापिबभ्रुवाहेप्रयोजितम् ॥
॥ ५८ ॥ स्वयमेवाथतेनापिवायव्यास्त्रंसुरोपितम् ॥ पार्वतास्त्रंचशाक्रंचकौबेरमतिदारुणम् ॥ ५९ ॥ त्वाष्ट्रंचातिबलःश्रीमान्प्रे
रयामासवैरिणम् ॥ सौरंचशांभवंचास्त्रंसर्वशस्त्रविदारणम् ॥ ६० ॥ कार्तिकेयकृतंचास्त्रंयाम्यंशस्त्रंस्वमाहवे ॥ एवंशस्त्रास्त्रसंपा
तैःकदनंचाभवद्भृशम् ॥ ६१ ॥ बहवोनिहतावीरास्तस्मिन्युद्धेमहात्मनोः ॥ संवर्तकालेराजेंद्रयमेनेवनिपातिताः ॥ ६२ ॥ रुद्रा
क्रीडनकंजातंभूततुष्टिकरंमहत् ॥ निधनंरथनागानांपदातीनांचकर्णजात् ॥ ६३ ॥ तस्यास्त्रैर्वेष्टितःकार्ष्णिश्चिंतयित्वाथवैष्ण ॥९३॥
वम् ॥ सर्वाण्यस्त्राणितेनायंबभ्रुवाहोमहाबलः ॥ ६४ ॥ शमयित्वाशरैर्घोरैर्वाडवास्त्रंसमाददे ॥ उवाचकर्णपुत्रंतंबहवोनिहता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मया ॥ ६५ ॥ नाहंवैतादृशोऽप्याप्तोयथाकर्णात्मजेनच ॥ एनमत्रहनिष्यामिवृत्रंनमुचिहायथा ॥ ६६ ॥ एवंतमुद्दिश्यरणेचिक्षे
पाशुगमाहवे ॥ हृदयेऽस्यशरोलग्नोवृषकेतोर्महात्मनः ॥ ६७ ॥ बाणोगृहीत्वागगनेभ्रामयामासकर्णजम् ॥ दिशश्चप्रदिशः
सर्वाःसरितःसागरानपि ॥ ६८ ॥ नपपातधरादेशेतदद्भुतमिवाभवत् ॥ अनेनैवस्वगात्रेणभिनत्त्येषपितामहम् ॥ ६९ ॥ त्रिमु
हूर्त्तंपरंसंस्थ्येयत्रयत्रशरोगतः ॥ तत्रतत्ररणेप्राप्तौपितापुत्रावुभावपि ॥ ७० ॥ निरीक्षंतौकर्णपुत्रंनीयमानंशरेणच ॥ मुहूर्तत्रि
तयादूर्ध्वंनिपपातधरातले ॥ ७१ ॥ तस्मिन्मणिपुरेराजन्पार्थस्यपुरतस्तदा॥ततःकर्णात्मजःक्रुद्धःपुनरेवोत्थितोक्षिपत्॥७२॥
शरान्पंचरथेतस्ययुक्तस्यसहसाहसन् ॥ तेशरास्तंरथंसाश्वंससूतंसपताकिनम् ॥ ७३ ॥ आनयन्सहितास्तेननाकलोकंमनो
रमम् ॥ रविमंडलमत्युग्रंप्रविशंतंरथंस्वकम् ॥ ७४ ॥ बाणनिर्भिन्नकायोऽपिवीक्ष्यात्मानंमुमोचसः ॥ सरथोभानुनादग्धोय
थासंपातिरंडजः ॥ ७५ ॥ पतंतंबभ्रुवाहंचवृषकेतुःशरैःपुनः ॥ प्रेषयामासगगनेस्वपितामहमंडले ॥ ७६ ॥ हंसध्वजोमदीयो
त्रजितोवीरस्त्वयापुरा ॥ तदर्थंबभ्रुवाहत्वांप्रेरयामिसुरालये ॥ ७७ ॥ ईदृशंकुपितोवाक्यंप्रत्युवाचविशांपते ॥ तावच्छरांस्त्रि
धाकृत्वास्वगात्राद्बभ्रुवाहनः ॥ ७८ ॥ पपातकुपितोऽतीवतस्योपरियथाचलः ॥ घर्षयामासचकरौचकंपेकंधरांचह ॥ ७९ ॥ पं
चभिःसायकैस्तत्रविव्याधरविपौत्रकः ॥ एवंकर्णात्मजोवीरोबभ्रुवाहश्चभूतले ॥ ८० ॥ युध्यमानौशरैर्घोरैःपार्थःपश्यतिकौतु
कम् ॥ ऊचेपार्थंकर्णसुतोयुद्धेतास्मिंस्तथाविधे ॥ ८१ ॥ रथचक्रंहिकर्णस्यनिमग्नंपुरुषर्षभ ॥ कथंतेनतदाप्रोक्तंतिष्ठेतिवचनंप्र
भो ॥ ८२ ॥ कर्णेनचमहायुद्धेनायंतद्वत्प्रभाषते ॥ मयाभिन्नशरीरोपिपरंयुद्धंनमुंचति ॥ ८३ ॥ एवंब्रुवाणेवीरेतुपार्थस्यपुरतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनः ॥ पपातकार्ष्णिःकुपितोमूर्ध्निकर्णसुतस्यहि ॥ ८४ ॥ भिद्यमानोरणंबाणैःशस्त्रैर्नानाविधैरपि ॥ उभौतौस्यन्दनारूढौक्ष
णेनविरथौदिवि ॥ ८५ ॥ उत्पतंतौपातयंतौरथस्थौददृशुर्जनाः ॥ अन्योन्यंस्वशरैर्घोरैर्नीयमानौसुरालये ॥ ८६ ॥ उभयो
र्गात्रजंमांसंछिन्नंबाणैःसहस्रधा ॥ नीयतेगगनेगृध्रैस्तथाऽन्यैःश्येनपत्रिभिः ॥ ८७ ॥ एकःक्षितौद्वितीयःखेपुनरेवक्षितौचखे
॥ तावेतौतादृशौराजन्दिनानांपञ्चकंरणे ॥ ८८ ॥ पंचमेदिवसेकार्ष्णिःकर्णपुत्रंतथाविधम् ॥ बहुभिःसायकैस्तीक्ष्णैःसमंताद्व्य
किरत्पुनः ॥ ८९ ॥ उवाचक्रोधनयनोधन्यस्त्वमसिनापरः ॥ वृषकेतोनमेयुद्धंकृतंकेनापिमानिना ॥ ९० ॥ इदानींस्मरवीर
त्वंतथादेवंजनार्दनम् ॥ अथबाणैर्जीवितंतेपातयिष्यामिसंगरे ॥ ९१ ॥ ॥ जैमिनिरुवाच ॥ ॥ अर्धचंद्रंमुमोचास्मैकर्णपु
त्रायमारिष ॥ तमायांतंत्रिधाकृत्वायावन्नदतिकर्णजः ॥ ९२ ॥ तावत्तेनापरोबाणोमुक्तःकनकचित्रितः ॥ सकण्ठनालात्तच्छी
र्षंजहारगगनेगतः ॥ ९३ ॥ छिन्नंशिरःखात्प्रपतत्प्रलग्नंहृदयेतदा ॥ बभ्रुवाहस्यराजेंद्रपातयित्वाकलेवरम् ॥ पश्चात्कन्दुक
वत्प्राप्तंपार्थस्यपदयोःशुभम् ॥ ९४ ॥ ॥ इत्या०प०जै०बभ्रुवाहनविजये वृषकेतुवधोनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥

॥ जैमिनिरुवाच ॥ ॥ वृषकेतोस्तदाराजन्संग्रामेतुमहच्छिरः ॥ जपत्केशवरामेतिनृसिंहेतिमुदायुतम् ॥ १ ॥ अग्रहीत्तर
सापार्थःकराभ्यांकुंडलान्वितम् ॥ कबंधोधावमानःसन्निपपातरणेरिपून् ॥ २ ॥ पातयित्वापिसुमुखंरिपुंनृत्यतिसंगरे ॥ तत्सु
रूपंसमालोक्यविललापार्जुनस्तदा ॥ ३ ॥ हाकष्टंसुमहत्प्राप्तंविनात्वांपुत्रसंगरे ॥ कथयिष्यामिकिंगत्वाधर्मात्मानंयुधिष्ठिर
म् ॥ ४ ॥ त्वांविनापुरुषव्याघ्रकुतींदेवींचपार्षतीं ॥ मात्राहंशिक्षितश्चास्मिरक्षणीयस्त्वयाशिशुः ॥ ५ ॥ किमुत्तरंनुतांवक्ष्येभीम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेनंचसांप्रतम् ॥ नकुलंसहदेवंचकृष्णदेवंचमेप्रियम् ॥ ६ ॥ यौवनाश्वस्यतुरगःसमानीतःस्वपौरुषात् ॥ कथंत्वयासुतप्राणा
स्त्यक्ताकृष्णंविनाग्रतः ॥ ७ ॥ तवप्राणश्चकिंकृष्णोयथाप्राणाहरेर्वयम् ॥ शरीरंतावकंपुत्रभक्षितंगगनेखगैः ॥ ८ ॥ स्वगात्रं
हिसमुत्कृत्यपिताशक्रायतेददौ ॥ शक्रपुत्रस्यकार्येऽत्रविहंगेभ्यस्त्वयाऽर्पितम् ॥ ९ ॥ बहुवारंभीमसेनोगच्छत्येकोमहारणे ॥
द्वितीयोननरःकश्चित्तस्ययातिसहायताम् ॥ १० ॥ त्वयाशत्रुशिरांस्येवपंकजानिकरेणच ॥ गृहीत्वारुधिराक्तानिमौक्तिका
निरणांगणे ॥ ११ ॥ पितामहायसूर्यायदत्तोऽर्घःप्रत्यहंमुदा ॥ प्रथितौद्वौस्थितौवीरौदिवाकरधनंजयौ ॥ १२ ॥ आवयोःपतनं
भाव्यंत्वयिवीरेद्यपातिते ॥ भास्करःसत्कृतोनाकेयशसातावकेनच ॥ १३ ॥ अहंतुशिरसाऽनेनकृष्णगोविंदवादिना ॥ एतत्कृ
तंमहद्वैरंमयासार्धंहिपुत्रक ॥ १४ ॥ पितामेनिहतःकर्णःपार्थेनचरणांगणे ॥ कृत्वादुःखातुरंपार्थंततोसिप्रथमंगतः ॥ १५ ॥ य
थारथस्यचक्रंहिग्रस्तंभूम्यापितुश्चते ॥ शापितातेनवीरेणकृतामातंगसंगिनी ॥ १६ ॥ उपकारकरंश्रीमन्नान्यंपश्यामिसांप्रत
म् ॥ अद्यमेनिहतंसैन्यमद्यमेनिहतःसुतः ॥ १७ ॥ सुभद्रानंदनःशूरोनष्टमद्यकुलंमम ॥ कृष्णेनापिपरित्यक्तोवृषकेतौचपाति
ते ॥ १८ ॥ यथासूर्यंविनाभूमिर्गृहंदीपविवर्जितम् ॥ लिंगहीनायथापिंडीजयश्रीस्त्वांविनातथा ॥ १९ ॥ इत्युक्त्वामुक्तकंठस्तंसं
स्मरन्नर्जुनोऽरुदत् ॥ क्वगतोसिहृषीकेशदुःखितंमांनविंदसे ॥ २० ॥ नायासिस्मृतमात्रस्त्वंमन्येत्यक्तोऽस्मिसांप्रतम् ॥ एताव
दुक्त्वावचनंमूर्च्छितोन्यपतद्भुवि ॥ २१ ॥ हृदयेतच्छिरःकृत्वातस्मिन्महतिसंगरे ॥ ततश्चित्रांगदासूनुःपतितंधरणीतले ॥ २२ ॥
धनुष्कोट्याप्रताड्यैनंप्रहसन्वाक्यमब्रवीत् ॥ कथंवैश्यभवाःपार्थतुलनार्थंसमागताः ॥ २३ ॥ रणार्णवेयशःपोतमारूढोस्म्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धुनारणे ॥ धनानिकानिवीराणांशिरांस्यल्पानिकानिच ॥ २४ ॥ सर्वेषामेवसार्धंहितुलितंतद्धनंजय ॥ वृषकेतोःशिरश्चित्रंशि
वपूजनलिंगके ॥ २५ ॥ उत्तिष्ठार्पयदेवायशंकरायधनंजय ॥ तुष्टःप्रदास्यतिहरःशस्त्रंपाशुपतंचते ॥ २६ ॥ स्मारयिष्यतियु
द्धार्थेक्षयंत्वंचगमिष्यसि ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःप्रबुद्धोबलवान्पार्थःकोपसमन्वितः ॥ तच्छिरोरथमादायस्थापयि
त्वादधद्धनुः ॥ २७ ॥ उवाचपुत्रंतरसाशूरंतंबभ्रुवाहनम् ॥ संहाररूपिणंवीक्ष्यक्वयास्यसिममाग्रतः ॥ २८ ॥ सर्वेवीरामदीया
हिपातिताश्चापरेधृताः ॥ त्वांहत्वामोचयाम्येतान्कुपितोऽहंमहाहवे ॥ २९ ॥ गृहाणसायकंवीरवृषकेतुंचमामकम् ॥ पातयि
त्वास्ववीर्येणकीदृशंजीवितंतव ॥ ३० ॥ सहस्वमत्प्रहारंहिभिनद्मिगिरिमप्यहम् ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोमुमोच
बाणौघांस्तोयौघानिवतोयदः ॥ ३१ ॥ चित्रांगदात्मजस्याग्रेतैर्भिन्नंप्रबलंबलम् ॥ शरीरंतस्यवीरस्यभित्वापार्थोमहाबलः ॥
॥ ३२ ॥ ननादभैरवंनादंघनस्तनितवद्भृशम् ॥ अर्जुनस्यशरैर्नागानीयमानारथाश्चते ॥ ३३ ॥ हयाःपदातयोराजन्दिविच
क्रीकृताद्दृढम् ॥ पार्थबाणैर्जगद्व्याप्तंदुर्गप्राकारभंजकैः ॥ ३४ ॥ यथाप्रवर्धितोवायुःशुष्कपत्राणिभूतलात् ॥ तृणान्यावर्तयत्या
शुगगनेपांडवःशरैः ॥ ३५ ॥ शरवृष्ट्याशरीराणिपतितानिमृतानिच ॥ दह्यंतेतेजसायुद्धेपांडवस्यविशांपते ॥ ३६ ॥ शरपुंख
भवेनाथवायुनानीयतेरजः ॥ सेनाजुषापांडवेनहतानांनरवाजिनां ॥ ३७ ॥ वडवानलवत्तीव्रमदहत्सधनंजयः ॥ यैर्दृष्टःसंगरेपार्थ
स्तेऽभवन्मोक्षसंयुताः ॥ ३८ ॥ यथाकाश्यामंतकालेभवभीतैर्जनैर्हरः ॥ तथापार्थोऽपिदेहांतेतेऽपिजातास्तथाविधाः ॥ ३९ ॥ ॥९५॥
बभ्रुवाहंशरैर्घोरैःसंच्छाद्य०्यनदद्बली ॥ नादानंनचसंधानंनमोक्षंपांडवस्यते ॥ ४० ॥ रणमध्येचदद्दृशुःप्रलयंमेनिरेजनाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वापयंतिसहसातेजसापांडवस्यतु ॥ ४१ ॥ बभ्रुवाहस्ततःक्रुद्धोविव्याधचधनंजयम् ॥ चतुर्भिःसायकैस्तीक्ष्णैस्तुरंगान्सा
रथिंत्रिभिः ॥ ४२ ॥ छत्रंचैकेनबाणेनसप्तभिःपवनात्मजम् ॥ प्रकुर्वाणौमहद्युद्धमन्योन्यजयकांक्षिणौ ॥ ४३ ॥ ॥ बभ्रुवाह
नउवाच ॥ ॥ पार्थद्रोणाच्चदेवेभ्यस्त्वयास्त्राणिपुराविभो ॥ शिक्षितान्यधुनातानिविफलानिकथंतव ॥ ४४ ॥ नायातिसार
थिःकस्मात्तन्नजानासिदुर्मते ॥ पतिव्रतामेजननीदूषितागतबुद्धिना ॥ ४५ ॥ त्वयाममसमक्षंहिसतांदोषोभयावहः ॥ यावद्भ
वांश्चसमरेयत्रकुत्रापिसंस्थितः॥४६॥ तावत्समागतःकृष्णःस्मृतःपूर्वंत्वयार्जुन ॥ स्मरणंविस्मृतंचासीत्तस्यविष्णोर्महात्मनः॥
॥ ४७॥ क्षणंप्रतीक्षामिरणेयावत्स्मरसिकेशवम् ॥ नयुद्धंप्रकरिष्यामित्वयापूर्वंधनंजय ॥ ४८ ॥ कृष्णविस्मृतियुक्तानांमहा
हानिःपदेपदे ॥ स्मरत्वंनाथवत्त्वातुमागर्वंचवृथाकुरु ॥ ४९ ॥ कर्णस्यसुतेनसतांसंमतंशक्रनंदन ॥ यथापुराकृतंयुद्धंमयासार्धं
महात्मना ॥ ५० ॥ तथाकुरुनिजंशौर्यंप्रदर्शयममार्जुन ॥ कर्णपुत्रोरणेधीरःसोऽपिस्वर्गंगतोधुना ॥ ५१ ॥ ॥ जैमिनिरुवाच॥
एवंतेनतदाप्रोक्तःसव्यसाचीरुषान्वितः ॥ ववर्षमोहंसंत्यज्यभल्लान्कनकभूषितान् ॥ ५२ ॥ रथस्थंबलिनंपुत्रंविव्याधप्रहस
न्निव ॥ तैःशरैरग्निसंकाशैःसविद्धोनरणंजहौ ॥ ५३ ॥ गगनंपूरयामासस्वबाणैर्बभ्रुवाहनः ॥ सव्यसाचिनमत्युग्रोबिभेदनि
शितैःशरैः ॥ ५४ ॥ कर्तव्यंविस्मृतःपार्थोगंगाशापेनमोहितः ॥ यंयंशरंससंधत्तेयच्छस्त्रंशापमोहितः ॥ ५५ ॥ तंतंशरंचतच्छ
स्त्रंयुधिचिच्छेदपुत्रकः ॥ एतस्मिन्नंतरेराजन्कुपितोबभ्रुवाहनः ॥ ५६ ॥ अर्धचंद्रंस्वकोदंडेसंदधेपरवीरहा ॥ ज्वालायुक्तंका
लकल्पंवडवानलसन्निभम् ॥ ५७ ॥ ततश्चकंपिरेदेवाःशक्राद्याःपितरस्तथा ॥ सूर्यादयोग्रहाःसर्वेभुजंगाश्चभयावृताः॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विधाभिन्नाधरादेवीउल्कानांपतनंततः ॥ ववौसशर्करोवायूरुधिरंववृषुर्घना ॥ ५९ ॥ प्रसमीक्ष्यार्जुनोबाणंप्रलयानलरूपिणम् ॥ स्वबाणैरपिभीमैस्तंनसशाकव्यपोहितुम् ॥ ६० ॥ चिंतयामासगोविंदंयावत्पार्थोमहाबलः ॥ तावाद्वणेनतीव्रेणशिरोज्वलितकुण्डलम् ॥ ६१ ॥ छिन्नंपार्थस्यतरसानिपपातधरातले ॥ पश्चात्कबन्धःपतितोवृषकेतोरणांतिके ॥ ६२ ॥ पार्थस्यकुन्तीपुत्रस्यदेहोराजन्रणाजिरे ॥ अनेकरत्नसंयुक्तएकादश्यांनिशामुखे ॥ ६३ ॥ कार्तिकेमासिसौम्येचऋक्षेचैवोत्तराभिधे ॥ मुखंपार्थस्यतच्छिन्नंवासुदेवेतिजल्पकम् ॥ ६४ ॥ क्षणमासीदभिनवंछिन्नालंकारवर्जितम् ॥ द्वौसूर्यौपतितौभूमौमेनिरेशिरसीतयोः ॥ ६५ ॥ जनाःसकरुणास्तत्रवृषकेतुधनंजयौ ॥ चित्रांगदातदाप्राप्तामणिपूरंपुरोत्तमम् ॥ ६६ ॥ श्रुत्वायुद्धंचशापंचह्यर्जुनस्यैवनारदात् ॥ रथारूढाचाल्पजनाविनाधर्माज्ञयानृप ॥ ६७ ॥ हाहाकारोमहानासीत्तस्मिन्कालेसुदारुणः ॥ बभ्रुवाहस्यचबलेहर्षश्चसुमहानभूत् ॥ ६८ ॥ वादित्राणिचसंजघ्नुःपुष्पवर्षंचकन्यकाः ॥ चक्रुर्मुदायुताःसर्वाःस्वनाथविजयेतदा ॥ ६९ स्तुवंतोबंदिनःप्राप्ताबभ्रुवाहनपौरुषम् ॥ राजोऽपिसबलःप्रीतोरणेविस्मृतसौहृदः ॥ ७० ॥ प्रविवेशपुरंरम्यंपताकाभिःसुशोभितम् ॥ पुष्पप्रकरसंयुक्तंसिक्तंचंदनवारिणा ॥ ७१ ॥ नृत्यंतीभिःस्मनारीभिःपरितःपरिवारितम् ॥ सपुत्रादीपसंयुक्तादूर्वादलधराःस्त्रियः ॥ ७२ ॥ गोरोचनंकुंकुमंचदधिदिव्यांबरान्विताः ॥ नीराजयंत्योराजानमुलूप्यासहमारिष ॥ ७३ ॥ कथयंतिवचांसीहतदाचित्रांगदांप्रति ॥ धन्यासिदेविवीरंत्वंप्रसूतासिमहाबलम् ॥ ७४ ॥ येनायंनिहतःपार्थोविजयीयःसदाक्षितौ ॥ तासांवचनमाकर्ण्यवरालंकारमंडिता ॥ ७५ ॥ नीराजनार्थंपुत्रस्यआयातासापपातह ॥ महानंदेविषादोऽभूद्बभ्रुवाहनमंदिरे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ सर्वाश्चनार्यः सहसापरिवार्यस्थितागृहे ॥ रुदंत्यः सिषिचुस्तोयैः शीतलैश्चंदनान्वितैः ॥ ७७ ॥ वीजयंत्यस्ताडयं
त्योहृदयंनिजमुष्टिभिः ॥ स्वामिनींपतितांवीक्ष्यराजानंचापरागता ॥ ७८ ॥ कथयामासपतितांपार्थपुत्रायमारिष ॥ नजानी
मोनरश्रेष्ठजननीपतिताऽद्यते ॥ ७९ ॥ तामुत्थापयभद्रंतेउलूपीमपिमाचिरम् ॥ बभ्रुवाहः समुत्तीर्यरथात्तस्माद्ददर्शताम् ॥ ८०
कंठसूत्रेणरहितांताटंकद्वयवर्जिताम् ॥ श्वसंतींपन्नगसुतांद्वितीयांजननींचतां ॥ ८१ ॥ समुत्थाप्यतदातेननेत्राणिमृजितानि
च ॥ ततस्तेजीवितयुतेवीक्ष्यहृष्टोऽब्रवीदिदम् ॥ ८२ ॥ आनंदकालेपतितेजनन्यौमेकथंक्षितौ ॥ शृणुतांमातरौयुद्धंहयहेतोर्म
याकृतम् ॥ ८३ ॥ पार्थोह्यर्जुननामात्रकाश्चित्प्राप्तोऽश्वरक्षणे ॥ महावीरैर्वृतोधीरैः प्रद्युम्नप्रमुखैर्हितैः ॥ ८४ ॥ तेसर्वेनिर्जिता
मातः पार्थः सनिहतोयुधि ॥ वीराणामपिसर्वेषांगुरुर्बालोप्यसौहतः ॥ ८५ ॥ वृषकेतुरितिख्यातः कर्णपुत्रोमहाबलः ॥ तेनाहं
मोहितोभूरिवीरेणैवरणांगणे ॥ ८६ ॥ महताचैवकृच्छ्रेणसंग्रामेनिहतः शुचिः ॥ गृहाणकंठसूत्रंत्वंताटंकेकर्णभूषणे ॥ ८७ ॥
अमंगलंतेरूपंहिदृश्यतेमंडनंविना ॥ ॥ चित्रांगदोवाच ॥ ॥ किंकृतंपापरूपेणत्वयापुत्रेणसांप्रतम् ॥ ८८ ॥ पितरंस्वंपा
तयित्वापार्थंधर्मानुजंवरम् ॥ नारायणसखायंतंकुंत्यैनागेंद्रदायकम् ॥ ८९ ॥ मंडनंमेत्वयाभग्नंकंठसूत्रंतथाहृतम् ॥ तालपत्रं
तथानष्टंवदन्मूढनलज्जसे ॥ ९० ॥ धिक्तेप्रतिबलंतेजोयत्पार्थः पातितोरणे ॥ अद्यधर्मात्मजोराजाकामवस्थांगमिष्यति ॥ ९१ ॥
यज्ञेनष्टेदीक्षितश्चब्राह्मणैः परिवारितः ॥ कुंतीपार्थविहीनाद्यत्वयापौत्रेणसाकृता ॥ ९२ ॥ कथंकृपायुतंचित्तंनकृतंजनकं
प्रति ॥ यस्माज्जातोऽसिपापत्वंपार्थाद्विनयकोविदात् ॥ ९३ ॥ सचात्रनिहतः शूरोममभर्त्तावृथात्वया ॥ असंमंत्र्यमयासार्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंयुद्धंकृतंरणे ॥ ९४ ॥ शस्त्राणांसंग्रहोनूनंतावकोदेहदारकः ॥ कथंनभिद्यतेवक्षस्तावकंपितृघातक ॥ ९५॥ कर्णभूषात्वमा
मुंचकिंमांवदसिदुर्मते ॥ कण्ठेमेखादिरांगारतप्तांघोरांचशृंखलाम् ॥ ९६ ॥ क्षिप्रंपातयकर्णेमेलोहशंकुंचपुत्रक ॥ त्वपाति
तःसमेभर्तास्थानंदर्शयमाचिरम् ॥ ९७॥ यथानेनसमंयामीत्युक्त्वापुत्रंचनिर्गता ॥ भूषणानिपरित्यज्ययत्रास्तिपाण्ड
वः ॥ ९८ ॥ उलूपीवारयामासक्षणेतस्मिन्विशांपते ॥ चित्रांगदांप्रत्युवाचउलूपीभरतर्षभ ॥ ९९ ॥ पार्थस्यमरणेदेविसंश
योवर्ततेमम ॥ यक्षराजसुतेपश्यप्रविशामिस्वकंवनम् ॥ १०० ॥ यत्रपार्थेनकथितंममाग्रेमरणंपुरा ॥ दाडिमीपंचकंदेविय
दादग्धंभविष्यति ॥ १ ॥ स्वयमेवतदाज्ञेयंभवत्यामरणंमम ॥ आयाहियत्रपश्यामिसंकेतंतादृशंवने ॥ २ ॥ गृहीत्वातांतदा
देवीनागेंद्रतनयावने ॥ ददर्शपंचकंदग्धंदाडिमीनांविनाग्निना ॥ ३ ॥ ततोनागेंद्रदुहिताहाहानाथेतिभाषिणी ॥ चित्रांगदा
न्वितामाप्तापार्थस्यशिरसोंऽतिके॥४॥तावदेवससैन्यासासपुत्रादीपभासिता ॥ मुक्तकेशाददर्शाथपतितंश्वेतवाहनं॥५॥छिन्नं
चतच्छिरोदृष्ट्वासमीपेवैष्णवस्यहि ॥ पार्थस्यपादयोर्देहंकृत्वावचनमब्रवीत् ॥ ६ ॥ ममदेहोगतोनाथपादस्पर्शोस्तुतेऽनघ ॥
सार्धंत्वयापदंप्राप्स्येस्पृशंतीदेहसंयुता ॥ ७॥ इहत्वंयदिरुष्टोऽसिममपुत्रापमानतः ॥ तवदास्यंकरिष्यामिक्षमस्वाद्यधनं
जय ॥ ८ ॥ उत्तिष्ठनाथगावोऽद्यविराटस्यमहीपतेः ॥ नीयंतेकौरवैर्भूयोनिवर्तयितुमर्हसि ॥ ९ ॥ द्रोणंद्रुपदराजेनपुरावीरा
पमानितम् ॥ बद्ध्वातंपार्थतांतस्मैकिन्नदर्शयसेऽर्जुन ॥ १० ॥ द्रौपदीवरणेवीराःसंतिनाथसमागताः ॥ मत्स्ययंत्रंपरंभित्वातां
त्वंपार्थसमानय ॥ ११ ॥ नाहंसापत्नजंभावंकरिष्येपुरतस्तव ॥ एषप्राप्तोहुताशस्त्वांप्रार्थितुंखांडवंवनम् ॥ १२ ॥ आच्छा ॥९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितंकुरुविभोबाणैःपंजरकंपुनः ॥ किरातवेषप्रच्छन्नःसूकरंवनगंहरः ॥ १३ ॥ नयत्येषमहाकोलंत्वदीयंशरणागतम् ॥ एवंब्रु
वतिसाबालातथाचित्रांगदाचसा ॥ १४ ॥ गृहीत्वापार्थशीर्षंततस्तथाऽन्यंकुंडलान्वितम् ॥ वृषकेतोरुभेदेव्यौरुरुदातेघनस्वन
म् ॥ १५ ॥ कर्णपुत्रमहाबाहोपितातेपांडवेनहि ॥ संग्रामेनिहतःपुत्रपितृवैरंनचस्थितम् ॥ १६ ॥ हाहताऽस्मिविनष्टास्मिक
र्णपुत्रेनिपातिते ॥ बभ्रुवाहनभद्रंतेकुरुमेत्वंमनोगतम् ॥ १७ ॥ खड्गेनमामकंछिंधिशिरोरामाधिकोभव ॥ रामेणनिहतामाता
रेणुकाकेवलापुरा ॥ १८ ॥ त्वंनिजंजनकंहत्वाजननीयुगुलंबलात् ॥ पातयस्वनतेरामःसमतांतुगमिष्यति ॥ १९ ॥ काष्ठान्या
हरपुत्रात्रकुरुदीप्तंचपावकम् ॥ उलूपीसहितांमांत्वंदग्धुमर्हसिसुव्रत ॥ २० ॥ एकंकष्टतरंकार्यंकृतंदुःखविवर्धनम् ॥ अर्थि
नांसुरवृक्षाख्यंवृषकेतुंघ्नतात्वया ॥ २१ ॥ आशामयाकृतापुत्रप्राप्स्येऽहंहस्तिनापुरं ॥ तत्रयज्ञक्रियारंभेपार्थेनसहितानृपम् ॥
॥ २२ ॥ कृष्णंचरुक्मिणींसत्यांद्रौपदींसात्वतीमपि ॥ उत्तरांचविशालाक्षीमूषांबाणसुतामपि ॥ २३ ॥ तन्मातरंस्त्रीयुताहंप्रदा
स्येबहुलंधनम् ॥ विलोक्यनिखिलंलोकंहताशाहंत्वयाकृता ॥ २४ ॥ ॥ बभ्रुवाहनुवाच ॥ ॥ ज्ञातोमयापितामातर्गतोऽहं
तस्यसन्निधौ ॥ तुरंगंतंपुरस्कृत्यनमस्कर्तुंधनंजयम् ॥ २५ ॥ मामुवाचपरंदुष्टंगदितुंतन्नशक्यते ॥ अतःपरंनसंदेहोभूमौकी
र्तिविवर्जितं ॥ २६ ॥ पितृहंतारमालोक्यजनोमांत्यजतुस्फुटम् ॥ नतीर्थंपावनंकर्तुंपितृघ्नंमांधरातले ॥ २७ ॥ नदानंनव्रतं
यज्ञोनापिज्ञानंभविष्यति ॥ सचक्रपाणिर्मित्रस्यपातनात्पावनस्तथा ॥ २८ ॥ रोषेणमहतायुक्तोनिरयेपातयिष्यति ॥ सर्वा
णियांतिकृष्णस्यस्मरणात्पातकानिच ॥ २९ ॥ नवैष्णवस्यपार्थस्यमयाविनिहतस्यच ॥ कुत्सितंमामकंज्ञात्वास्वमित्रस्याति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखितः ॥ ३० ॥ प्रत्यक्षमपिकृष्णोऽत्रप्राप्तःकिल्बिषनाशकृत् ॥ धनंजयवधस्यांहोनाशयिष्यतिकेशवः ॥ ३१ ॥ तस्माद्वह्नि
प्रवेशेमेमतिर्जाताद्यशोभना ॥ एकंहिविस्मृतामाताउलूपीपन्नगीपुरा॥३२॥ जातमात्रंहिमांदुष्टंपितृघ्नंज्ञानसंयुता ॥ ज्ञात्वाप्र
सूतिसमयेनहतोबालसर्पवत् ॥ ३३ ॥ ततोऽहंनाभवंदुष्टोजननीशोकदायकः ॥ वैधव्यदानदीक्षायामरिस्त्रीणामहंगुरुः॥३४॥
यःपुरासांप्रतंजातोमातृवैधव्यदायकः ॥ वह्निंतस्माद्विशाम्यद्यनान्यथाशुद्धिरस्तिमे ॥ ३५ ॥ ॥जैमिनिरुवाच॥ ॥त
तःप्रेष्यानुवाचासौकाष्ठानांसंचयोमहान् ॥ क्रियतांक्रियतांतूर्णंप्रवेक्ष्येजातवेदसं ॥ ३६ ॥ ॥चित्रांगदोवाच॥ ॥क्षणं
प्रतीक्षवैपुत्रपितृघातकदुर्मते ॥ उपायःकरणीयोऽत्रयदिजीवेद्धनंजयः ॥ ३७॥ ॥उलूप्युवाच॥ ॥उपायोऽस्तिमया
दृष्टःपार्थसंजीवनायवै ॥ पातालेविद्यतेपुत्रमृतसंजीवकोमणिः ॥ ३८॥ शेषराजस्यकोशस्थोरक्ष्यतेचमहाविषैः ॥ मृतान्मृता
न्पन्नगान्हिपुनःसंजीवयंतिते ॥३९॥ दृष्ट्याचदाहयंत्येतेपर्वतान्सतृणान्द्रुमान् ॥ कर्कोटकश्चकुलिकोवासुकिस्तक्षकस्तथा ॥
॥ ४० ॥ शंखकोदीर्घजिह्वश्चमूषकादश्चभासुरः ॥ फणानांशतसंयुक्ताद्विशतास्त्रिशताःपरे ॥ ४१ ॥ चतुःशताःपञ्चशताःषट्
शताःसुविषोल्बणाः ॥ केचित्सप्तशताःसर्पाःफणैर्मणिविदीपितैः ॥ ४२ ॥ फणैर्नवशताअष्टशताह्यासन्फणैःस्थिताः ॥ शेषं
चवेत्सिबलिनंधरापर्वतधारिणम् ॥ ४३ ॥ शयनंवासुदेवस्यसश्रीकस्ययथासुखम् ॥ निर्भयंजायतेयस्मात्तस्मात्कश्चानयेन्म
णिम् ॥ ४४ ॥ दृष्टोप्युपायोविफलःपितुस्तेजीवनेऽद्यकिम् ॥ वैधव्यंबाधतेपुत्रसहयास्यामिमाचिरम् ॥ ४५ ॥ यावन्नकुंती
चायातिमांनपश्यतिपन्नगीम् ॥ पतिघ्नींतावदेवाहंहन्तव्यापुत्रकलया ॥ ४६ ॥ तथाचित्रांगदाचेयंसखीमेजननीचते ॥ संजी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वकंमणिंशंभुःपन्नगेभ्योददौपुरा ॥ ४७॥ भीतेभ्योवैनतेयाच्चतंमणिंजीवरूपिणम् ॥ नतेदास्यंतिपार्थायतस्माच्छोचामिपु
त्रक॥ ४८॥ ॥ बभ्रुवाहनउवाच ॥ ॥ केसर्पाःप्राकृतामातःक्रुद्धेमय्यर्जुनांतके ॥ नदास्यंतिमणिंधैर्यात्स्वबलाद्विषगर्ज
नात् ॥ ४९ ॥ भिनद्मिसप्तपातालानाहरिष्यामिचामृतम् ॥ मणिंचविफणान्कृत्वापन्नगांस्तान्महाविषान् ॥ ५० ॥ तोषितः
शंकरोयेनवासवाद्यास्तथासुराः ॥ तोषिताअमुनापित्रासमयायुधिघातितः ॥ ५१ ॥ मातामहवधोपायेकीदृशंमेभविष्यति॥
प्रथमंपातयिष्यामिसर्वान्सर्पान्समागतान् ॥ ५२ ॥ ततःपार्थेनसहितान्मणिनाजीवयेपरान् ॥ वृषकेतुमुखान्वीरान्क्षणंमा
तःप्रतीक्षताम् ॥ ५३ ॥ तेसर्पाजीवितयुगागमिष्यंतियथासुखम् ॥ मयासंजीविताःसर्वेगृहीत्वाजीवदंमणिम् ॥ ५४ ॥ पाल
याद्यार्जुनंनाथंममवीरैःसमन्विता ॥ अद्यपश्यंतुमेवीर्यंत्रयोलोकाःसदेवताः ॥ ५५ ॥ ॥ उलूप्युवाच ॥ ॥ किमिदंभाषसे
मूढपौरुषंमणिसंग्रहे ॥ महाविषान्पन्नगेंद्रान्कथंतानवमन्यसे ॥ ५६ ॥ शेषराट्सुमहाकायोमहामायोमनोजवः ॥ दुर्बलोब
लिनासार्द्धंवैरंकुर्वन्नलज्जसे ॥ ५७ ॥ ॥ बभ्रुवाहनउवाच ॥ ॥ उक्तंवचोनानृतंमेभविष्यतिकथंचन ॥ हरोऽपियदितान्स
र्पान्पालयिष्यतिरोषितः ॥ ५८ ॥ कुबेरवासवयमैःसहितःसन्नमेभयम् ॥ चित्रार्पितानिवबलैःकरिष्याम्यसुरानहीन् ॥ ५९ ॥
अर्जुनस्यसुतोयोऽहंपौत्रःपाण्डोश्चनिर्भयः ॥ ॥ उलूप्युवाच ॥ ॥ मापुत्रसाहसंकार्षीरुपायंप्रदिशामिते ॥ ६० ॥ सखा
मेपुण्डरीकोऽत्रमंत्रीमंत्रविदांवरः ॥ पातालेप्रेरयिष्येतंप्रथमंपितरंप्रति ॥ ६१ ॥ यथातेषांमनोवीरकृपायुक्तंकरिष्यति ॥ बु
द्ध्याभवेद्धियत्कार्यंतद्बलेननजायते ॥ ६२ ॥ बुद्ध्याशमेनचेत्कार्यंप्राणिनामिहजायते ॥ पौरुषंक्लेशसंयुक्तंकःकुर्याद्बुद्धिसंयुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंपुत्रंवारयित्वासमाहूयाशुपन्नगम् ॥ पुंडरीकंपांडवस्यजीवनार्थंसमादिशत् ॥ ६४ ॥
गच्छपन्नगनागेंद्रंगृहीत्वाकंठभूषणम् ॥ मदीयेकर्णपत्रेचशेषंगच्छममाज्ञया ॥ ६५ ॥ पार्थस्यकर्णपुत्रस्यवृत्तांतंपुत्रकारितं
समयेवर्त्तमानायकथनीयंमहात्मने ॥ ६६ ॥ महद्भिरनुयुक्तायदुष्टसंगच्युतायच ॥ यथामणिंतवकरेप्रयच्छतितथाकुरु॥६७॥
शिवास्तेसन्तुपन्थानोमत्प्रियार्थंहिगच्छतः ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःसमंत्रसहितंवचनंप्राहपन्नगः ॥ ६८ ॥ उलू
पींशोकसंयुक्तांसांत्वयन्निवभारत ॥ देवियामित्वयाज्ञप्तःसर्पराजनिवेशनम् ॥ ६९ ॥ दिव्यंमणिंसमाहर्तुंसपुत्रापालयार्जुनं॥
अर्जुनस्यशरीरंहिचिरकालंनतिष्ठति ॥ ७० ॥ मृतानामिहजंतूनांगात्रंनश्यतिभूतले ॥ नशीघ्रंजायतेकार्यंनृणांराजसभासुच
॥७१॥ बहुकार्याहिराजानोनस्मरंतिहिसौहृदं ॥ दशामिपांडवस्यांगंमद्विषान्नविनंक्ष्यति ॥ ७२ ॥ भवत्यारक्षितव्यंहिरत्याऽनं
गस्यरक्षितं॥ ॥बभ्रुवाहनउवाच॥ ॥वृषकेतोःशरीरंत्वंप्रथमंदशपन्नग॥७३॥योधितोयोमयासार्द्धंसंग्रामेचनिपातितः॥यथा
पार्थसखाचायंप्राप्स्यतेजीवितंस्वकं॥७४॥नजीवितंधारयतिमात्पिताअमुनाविना॥वृषकेतुयुतंपार्थंकृत्वात्वंसक्षतंव्रज ॥७५॥
शरीरंपांडवस्याद्यपालयामिनसंशयः॥ ॥जैमिनिरुवाच॥ ॥पुंडरीकस्तदातस्यवाक्यात्पार्थंतदाऽदशत्॥७६॥वृषकेतोश्चत
रसानागराजपुरंगयौ ॥ ददर्शचातलंघोरंमहासर्पविभूषितं ॥ ७७॥ सर्वंतत्कांचनमयंरम्यंविपुलकाननं ॥ अयुतंयोजनानां
हिगणितंशास्त्रकोविदैः ॥ ७८॥ दिव्याभिर्नागकन्याभिर्वृतंतदतिशोभनम् ॥ वितलंचप्रविष्टोऽसौदिव्यंचंपकशोभितम् ॥
॥ ७९ ॥ सुतलञ्चशमीवृक्षैःकांचनैःफलितैःशुभैः ॥ महातलंचाम्रवृक्षैर्नानापत्रिविचित्रितैः ॥ ८० ॥ वृतंमरकतैरन्यैर्दिव्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चंदनकाननैः ॥ रसातलंतथाभूतंवीक्ष्यविस्मयमागमत् ॥ ८१ ॥ दोलारूढाभिरधिकंपन्नगीभिर्विराजितम् ॥ पातालेपरमं लिंगंसंवीक्ष्यहाटकेश्वरम् ॥ ८२ ॥ स्थितंभोगावतीतीरेदिव्यचंपकपूजितम् ॥ सर्पैर्मनोरमैस्तत्रनागस्त्रीभिर्निरंतरम् ॥८३॥ स्तूयमानंचरम्याभिर्मंडिताभिःकुचैर्घनैः ॥ संतुष्टोभून्नमस्कृत्यस्नात्वाभोगवतीजले ॥ ८४ ॥ विमलैःपद्मगन्धैश्चमहापातकनाशनैः ॥ दिव्यैर्वृक्षैर्लताभिश्चशोभितंचामृतेनच ॥ ८५ ॥ नवकुण्डैःसुधापूर्णैर्महानागैःसुरक्षितम् ॥ मंदिरंशेषराजस्यप्रविवेशमहत्तरम् ॥ ८६ ॥ नानाभावैर्विचित्रंहिसर्वतश्चसुशोभनम् ॥ नानारत्नमयंदिव्यंनानासद्मविराजितम् ॥ ८७ ॥ मंडितंशेषराजेनसहस्रफणशोभिना ॥ उपविष्टंददर्शैनंप्रभयापरयायुतम् ॥ ८८ ॥ वृतंकर्कोटकाद्यैस्तैःशेषंतक्षकपन्नगैः ॥ जपंतंवासुदेवेतिवाङ्मनःकायकर्मभिः ॥ ८९ ॥ पुण्डरीकःप्रणम्यैनंकंठसूत्रंप्रदर्शयत् ॥ ताटंकपत्रेदुहितुर्नागराजस्यसंसदि ॥ ९० ॥ पुरतःस्थितएवास्यप्रत्युवाचधराधरम् ॥ ॥ पुण्डरीकउवाच ॥ ॥ नाथाहंशरणंप्राप्तोभवंतंपन्नगेश्वरम् ॥ ॥ ९१ ॥ उलूप्याप्रेषितःपार्श्वेत्वदीयमिहकाम्यया ॥ दौहित्रेणकृतंकर्मस्वपिताचार्जुनोहतः ॥ ९२ ॥ संजीवनार्थंपार्थस्यदीयतांमणिसत्तमः ॥ ॥ शेषउवाच ॥ ॥ तस्याःपतिर्महाबाहुःकन्यायाममपाण्डवः ॥ ९३ ॥ सव्यसाचीकृष्णसूतःसंग्रामेहरतोषकः ॥ हरदत्तवरश्चायमजेयःससुरासुरैः ॥ ९४ ॥ तच्चवाक्यंशंकरस्यशक्यतेनव्यपोहितुम् ॥ जानामिपौरुषंतस्यवैष्णवस्यधनुष्मतः ॥ ९५ ॥ केनासौपातितःपार्थोमुक्तःकिंतेनकेशवः ॥ केशवेनविनातंचकःसमर्थःसुरक्षितुम् ॥ ९६ ॥ किमर्थंदुहितोलूपीमत्समीपंहितार्थिनी ॥ त्वांवैसंप्रेषितवतीसर्वंतत्कारणंवद ॥ ९७ ॥ परमोविस्मयोमेऽद्यश्रुत्वापार्थस्यपातनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ पुंडरीकउवाच ॥ ॥ भीष्मद्रोणप्रभृतयः संग्रामेधर्मसूनुना ॥ ९८ ॥ गोत्रजानिहताःसर्वेतेषांदुःखेनदुखितः ॥ युधिष्ठिरः
क्रतुवरंकर्तुकामोमहीतले ॥ ९९ ॥ यंहयंमोचयामासतंनिजग्राहपांडविः ॥ अर्जुनेनावितंतंचबभ्रुवाहोमहाबलः ॥२००॥ जा
तंमणिपुरेयुद्धंबभ्रुवाहनपार्थयोः ॥ पुत्रेणसहतोयुद्धेगंगाशापेनमोहितः ॥ १ ॥ विद्यतेपांडवोभूमौदुहितुस्तेपतिःप्रियः ॥ सं
जीवनायपार्थस्यसन्निधौतेमहामते ॥ २ ॥ उलूपीमांनिजंदूतंव्यादिशत्परमाशया ॥ तथाकुरुष्वमांनागयथातेवैयशोभवेत् ॥
॥ ३ ॥ धर्मानुजंकृष्णरतंकारयंतंमहाक्रतुम् ॥ जामातरंनिजंयुद्धेप्रहतंजीवयप्रभो ॥ ४ ॥ महतांवैभवंलोकेपरोपकृतयेसदा ॥
जायतेऽसतांवित्तंपरनाशायकेवलम् ॥ ५ ॥ किंपुनःकृष्णशरणोवैष्णवस्तेसुतापतिः ॥ महद्भिःपतिताःपाल्याःस्ववृत्तेनधनेन
च ॥ ६ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंशेषस्तदातेनपुंडरीकेणयाचितः ॥ प्रत्युवाचमहासर्पान्पश्यंतुविधिकारितम् ॥ ७ ॥
पांडवार्थंप्रदास्यामिमणिंजीवितदायकम् ॥ किंवित्तेनशरीरेणकिंराज्येनेहपन्नगाः ॥ ८ ॥ नजीवतिपुनःपार्थोविधृतेनमयाखि
लाः ॥ मृतंपार्थंहिसुधयामणिनावाऽद्यजीवये ॥ ९ ॥ वैष्णवार्थमदत्तौद्वावारनालकपर्दकौ ॥ मयालोभेनविधृतौभविष्येतेसुधा
मणी ॥ १० ॥ शास्तापनयकर्तॄणांविद्यतेकिलकेशवः ॥ येनायंदंडितःपार्थोहयमेधप्रकारकः ॥ ११ ॥ तस्मादयंपुंडरीकोमणिं
यातुममाज्ञया ॥ गृहीत्वावैष्णवंपार्थंपुनःसंजीवयत्वयम् ॥ १२ ॥ एवंविधंशेषवचस्तेनिशम्यपरस्परम् ॥ दुःखिताःपन्नगाश्चा
सन्नशुभंमेनिरेहृदि ॥ १३ ॥ तेषांमध्येमहाबुद्धिर्धृतराष्ट्रोऽपिपन्नगः ॥ प्रत्युवाचधराधारंविस्तरंतुकथानकम् ॥ १४ ॥ ॥धृत
राष्ट्रउवाच ॥ ॥ वदान्यानामदेयंहिकिंचिन्नास्तिधरातले ॥ तथापिनाथवक्ष्येहमात्मनःसदृशंवचः ॥ १५ ॥ मर्त्यलोकेकथंरा ॥१००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मणिंजीवितदायकम् ॥ मानुषस्यमृतस्यार्थेत्वमेनंमोक्तुमर्हसि ॥ १६ ॥ गुरुघ्नस्यकृतघ्नस्यनौषधिर्नमणिर्नृप ॥ नमंत्रादेवताश्चैवजायंतेचार्थसाधकाः ॥ १७ ॥ असत्यामानवामृत्युंप्राप्यजीवंतिनैवते ॥ मूलंस्वकंनवृक्षाश्चदर्शयंतिफलप्रदाः ॥ १८ ॥ भवान्पन्नगसर्वस्वंमणिंयच्छतिजीवदम् ॥ सततंवैनतेयेनविग्रहोनाथविद्यते ॥ १९ ॥ मतंगमुनिशापेनपातालंनविशत्यसौ ॥ भूतलस्थंमणिंप्राप्यगरुडःकिंननेष्यति ॥ २० ॥ कृतघ्नामानुषाःसर्वेमणिगर्वेणगर्विताः ॥ सुधामपिनयिष्यंतित्यक्त्वानोविषजंभयम् ॥ २१ ॥ सुधामणिविहीनानांपन्नगानांफणास्थितान् ॥ ग्रहीष्यंतिमणींस्तत्रस्त्रियोऽपिमृगलोचनाः ॥ २२ ॥ ततोराजिलतांप्राप्यसर्पाणांजीवितंवृथा ॥ स्थानंचसुंदरंवीक्ष्यकथंहास्यतिपांडवः ॥ २३ ॥ निर्विषान्गतसंस्थानान्गतश्रीकान्गृहेगृहे ॥ पन्नगान्भ्रामयिष्यंतिभिक्षुकाःस्वोदरंभराः ॥ २४ ॥ हितंयज्जायतेकार्यंनृपाणांमंत्रिभिश्चतत् ॥ प्रवक्तव्यंयथाबुद्ध्यानृपाःकुर्वंतुवानवा ॥ २५ ॥ ॥ जैमिनिरुवाच ॥ ॥ शेषस्तद्वचनंश्रुत्वाप्राहैनंधृतराष्ट्रकम् ॥ महातापयुतंवाग्मीप्रहसन्धरणीधरः ॥ २६ ॥ ॥ शेषउवाच ॥ ॥ तववाक्येनविधृतःकथंसंजीवकोमणिः ॥ नदीयतेमयातस्मैपांडवायमहात्मने ॥ २७ ॥ मूर्खेणसहवासोपिदेशेग्रामेपुरेगृहे॥अनर्थएवसंभाव्योव्यवहारंविनैवहि॥२८॥वरंजलधिपातालज्वलनावटपातनम् ॥ नविवेकविहीनेनमूर्खेणसहसंगतम् ॥२९॥ कीर्तिःपराभवित्रीमेदत्तेसंजीवकेमणौ ॥ नास्माभिश्चेन्मणिर्दत्तःपार्थःकिंनसजीवति ॥ ३० ॥ तत्रकृष्णेनमणिनाजीवितंप्राप्स्यतेऽर्जुनः ॥ नूनंकृष्णमणेर्मूढप्राप्स्यतेसचराचरम्॥ ३१ ॥ प्राप्नोतिजीवसंभारयुक्ताःस्मचिरजीविनः ॥ वत्सान्हृत्वापुराकृष्णात्सगोपान्सत्यलोकधृक्॥ ३२ ॥ अनयत्स्वपदंसर्पजिज्ञासुर्मधुसूदनम् ॥

१ राजिलतां डुंडुभत्वम्. समौराजिलडुंडुभावित्यपरः । भाषयादुतोंडेइतिप्रसिद्धम्। २ ब्रह्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यलोकगतागोपानापश्यन्गोपबालकम् ॥ ३३ ॥ निनिंदुस्तेविधातारंजगदुर्बालमध्रुवम् ॥ धिक्सत्यलोकोविफलोयत्रकृ
ष्णोनविद्यते ॥ ३४ ॥ यशोदानन्दनेनाद्यकिमर्थंवंचितावयम् ॥ कमलाद्ब्रह्मणोजन्मश्रुतंतदनृतंध्रुवम् ॥ ३५ ॥ पंकजंहरि
नाभौतज्जातंपातकभस्मजम् ॥ नोचेत्कृष्णप्रियानस्मान्कुर्यात्कर्मजडान्कथम् ॥ ३६ ॥ तेषांवचनमाकर्ण्यसत्यंमेनेतथाविधिः॥
नवीनारचितागोपाःसवत्सायेनविष्णुना ॥ ३७ ॥ सपुत्रास्ताःस्त्रियोगावस्तोषिताबालकेनच ॥ किंपृथांमृतपुत्रांतांविशो
कांनकरिष्यति ॥ ३८ ॥ तृणंवज्रायतेकृष्णाद्वज्रंवाजायतेतृणम् ॥ तस्माद्दास्येमणिंसर्पानमेऽत्रास्तिविचारणा ॥ ३९ ॥ प
रोपकृतयेजन्मसाधूनामिहजायते ॥ दधीचिनादर्शितंतद्देवकार्यंप्रकुर्वता ॥ ४० ॥ ॥ धृतराष्ट्रउवाच ॥ ॥ तंचकृष्णमणिं
प्राप्ययदिजीवेतपाण्डवः ॥ वृथामणिंप्रेरयसेयेनजीवामहेवयम् ॥ ४१ ॥ रोचतेपन्नगानांतेविनाशोगरुडाद्यदि ॥ प्रदेहित्वं
मणिंनाथनब्रूमोऽत्रपुनर्वचः ॥ २४२ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेबभ्रुवाहनविजयोनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ जैमिनिरुवाच ॥ ॥ एवंविधंवचःश्रुत्वापुंडरीकफणाभृतम् ॥ शेषस्तंप्रत्युवाचाथनकुलंनःप्रयच्छति ॥ १ ॥ संजीवकमणिं
नागगच्छत्वंबभ्रुवाहनं ॥ मयाप्रोक्तमिदंब्रूहिमन्यंतेहिनमेवचः॥२॥ दुष्टानांप्राणिनांजन्मनोपकारायजायते॥किमर्थंकेशवंत्य
क्त्वायाचितुंमांत्वथागतः॥३॥प्रार्थयिष्यंतिमनुजामत्वापातालवासिनः॥वयंस्थिताभयान्नूनंसदाकरपदच्युताः ॥४ ॥ ततोजगा
मभग्नाशःपुंडरीकोरणांगणे ॥ यत्रपार्थःप्रावृतस्तैर्बभ्रुवाहनसैनिकैः॥५॥कर्पूरदीपैःशतशोभासितेवीणकान्विते॥दीपाश्चंदनतै
लेनकेचित्सिक्ताःप्रभान्विताः॥६॥यत्रास्तेरुदतीसातुपार्थपार्थेतिभाषिणी॥उलूपीह्यपराराजन्यत्रचित्रांगदाचसा॥७॥ आश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यापुंडरीकस्यचिंतयंतीसमागमम् ॥ ददर्शाथततोनागंविफलंतंसमागतम् ॥ ८ ॥ ॥ पुंडरीकउवाच ॥ ॥ नप्रयच्छंतिमा
नांधाममणिंसर्पाःसुरोषिताः ॥ पावकेपुत्रदत्तेतत्प्रविशत्वंयथासुखम् ॥ ९ ॥ ॥ जैमिनिरुवाच ॥ ॥ तस्यतद्वचनंश्रुत्वाका
र्ष्णिःकोपसमन्वितः ॥ आदिदेशबलंसर्वंस्वयमेवययौनृप ॥ १० ॥ रक्षांविधायपार्थस्यगृहीत्वास्वशरान्बहून् ॥ कोपादश्रू
णिमुंचन्हिश्रोत्राभ्यांपावकार्चिषः ॥ ११ ॥ क्वशेषोवासुकिःक्वास्तेक्वचतेतक्षकादयः ॥ कर्कोटशंखकुलिकाधृतराष्ट्रःक्वपन्नगः
॥ १२ ॥ मणिंतेभ्योहराम्यद्यसुधामपिधनानिच ॥ पार्थःपितामेपतितोधर्मराजस्यचानुजः ॥ १३ ॥ कृष्णस्यसेवकोभूमौकथं
स्थास्यतिमत्पुरः ॥ अद्यसर्पानसत्तुल्यान्पश्यंतुममसैनिकाः ॥ १४ ॥ निर्दग्धवपुषःसर्वेपांडवार्थेरसातले ॥ अद्यभोगवतीतोयं
भिन्नंमत्सायकैःक्षितिं ॥ १५ ॥ प्रयातुपांडवस्यांगंक्षालयत्त्वपरितिष्ठतु ॥ अद्यसर्पमणीन्सर्वान्स्त्रियोगृह्णंतुलीलया ॥ १६ ॥
अद्यजीवंतुतेसर्वेमयायेसंगरेहताः ॥ अद्यशेषनिमित्तंचेच्छंकरःपुरतोभवेत् ॥ १७ ॥ शिरसास्वेनतंदेवंवारयिष्येनसंशयः ॥
शरैश्चराचरंव्याप्तंपश्यंतुस्थापितंजनाः ॥ १८ ॥ ॥ जैमिनिरुवाच ॥ ॥ वरदत्तप्रभावेणपातालंनिर्ययौबली ॥ महासैन्यपरी
तोसौपांडविर्निर्भयोपिसन् ॥ १९ ॥ पातालमुखमासाद्यरचयामासतद्बलम् ॥ विज्ञातःसर्पराजेनक्रुद्धःपार्थसुतोबली ॥ २० ॥
शेषःप्रोवाचतान्सर्वान्स्वभृत्यान्नयवर्जितान् ॥ धृतराष्ट्रेणमंदेनरोषितोबभ्रुवाहनः ॥ २१ ॥ यथायुद्धेहताःसर्वेसुताविगतबुद्धि
ना ॥ नरेणधृतराष्ट्रेणपन्नगेनतथावयम् ॥ २२ ॥ कःकृष्णभृत्यंसंग्रामेविजेष्यतिसतिष्ठतु ॥ अद्यकालानलज्वालामालाजालैरसा
तलम् ॥ २३ ॥ भस्मसात्पन्नगान्सर्वान्करिष्यतिमतिर्मम ॥ धृतराष्ट्रेणवीरोऽसौयोधनीयोमहाबलः ॥ २४ ॥ येनयद्वापितंबीजंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तफलंतेनभुज्यते॥ककोंटकस्तक्षकस्तुतथाऽन्येयांतुयोधितुम्॥२५॥ततोनृपाज्ञयासैन्यंनिर्गतंस्वपुराद्बहिः॥ वमंतश्चधमं
तश्चविषपूरप्रवर्षिणः॥२६॥तदाद्विशतशीर्षायेक्रुद्धास्त्रिशतशीर्षकाः॥चतुःशतफणाश्चान्येसैन्येनचतुरंगिणा॥२७॥नि
र्ययुस्तेमहावीरादिव्यरूपवपुर्धराः॥धन्विनोदिव्यकवचामत्तमातंगसंस्थिताः॥२८॥हयैरथैस्तथैवान्येपदाताश्चसहस्रशः
॥हारकुंडलकेयूरकिरीटघनमौक्तिकैः॥२९॥मस्तकाभास्वरायेषांमणिरत्नविभूषिताः॥सुविचित्राःसुवर्णस्यनानालंकार
मण्डिताः॥३०॥विराजमानाराजेंद्रपार्थपुत्रमथापतन्॥योजनानांपंचकंहिभूमिंव्याप्यस्थितारणे॥३१॥तेषांमुखेभ्यो
निष्पेतुर्घोरास्ताविषवृष्टयः॥विस्फुलिंगसहस्रैस्तुदह्यमानंतुतद्बलम्॥३२॥निजंवीक्ष्यार्जुनसुतोररक्षाथस्वपौरुषात्॥
सेनेतेसर्पनरयोर्मिलितेतत्क्षणाद्युधि॥३३॥भ्रुवाविवविराजेतेरुद्रस्यप्रलयागमे॥ततःप्रववृतेयुद्धंसेनयोरुभयोस्तदा॥
॥३४॥बाणखड्गगदापातैर्मुसलैःप्रासकुन्तकैः॥पातितैःपात्यमानैश्चरणंतद्दारुणंबभौ॥३५॥ब्रह्मेंद्रचंद्रैःससुरैर्व्योमस्थं
परिदृश्यते॥जयंनागपतेःकेचित्केचित्कार्ष्णेःशशंसिरे॥३६॥युद्धेप्रवर्तमानेतुमानवाविषमोहिताः॥सर्पैर्दष्टाविनाशंते
जग्मुस्तत्रसहस्रशः॥३७॥धृतराष्ट्रेणतत्सैन्यंपार्थपुत्रस्यपातितम्॥शस्त्रास्त्रैर्विविधैर्घोरैःसहस्राण्येकाविंशतिः॥३८॥
क्रुद्धस्ततोमहाबाहुर्बभ्रुवाहोऽपितादृशम्॥धृतराष्ट्रंरणेचक्रेविरथंहतवाहनम्॥३९॥सेनामसह्यांतत्राजौविष्णोरमिततेज
सः॥स्मरणाद्बाणजालेनकार्ष्णिश्चक्रेमहाक्षयम्॥४०॥पतंतिमणयोभिन्नाःशरैःसर्पफणाच्युताः॥प्रलयेगगनाद्भूमौनक्ष
त्राणीवभारत॥४१॥ततःप्ररुद्धोबहुभिःसमंतात्तैर्महाविषैः॥रराजरौद्ररूपोऽयंपार्वतीशोरणेयथा॥४२॥शुशुभेयमुना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारिगतोनंदात्मजोयथा ॥ सैन्यंभस्मनिभंवीक्ष्यजातंसर्वत्रफूत्कृतैः ॥ ४३ ॥ तेषांफणावायुजवैर्बभ्रुवाहोऽपिसंदधे ॥ मयूरास्त्रं महद्भीमंसर्वनागनिषूदनम् ॥ ४४ ॥ मधुवर्षंततश्चक्रेलिप्तांगाःपवनाशनाः॥मधुनातेततोजाताबाणैर्भिन्नकलेवराः ॥४५ ॥ पिपीलिकास्त्रंवीरेणमुक्तंपार्थसुतेनच ॥ ताभिर्विलिप्तगात्रास्तेसंग्रामंविजहुस्तदा ॥ ४६॥ धृतराष्ट्रस्यसर्वांगंजातंपलविवर्जितम् ॥ भित्वाऽस्थीनिपुनर्मज्जांपन्नगस्यपिपीलिकाः ॥ अस्थीनिचिंचाफलवत्कोटरंहिप्रकुर्वते ॥ ४७॥ दष्टस्तथाह्येषपिपीलिकाभिर्यथाभिगंतुंनशशाकवीरः ॥ बाणैर्मयूरैर्नकुलैश्चघोरैःपिपीलिकाभिर्मधुनाचसर्पाः ॥ ४८॥ वित्रास्यमानारणमंडलेतेगतानिकेतंधरणीधरस्य ॥ ४९ ॥ राजातान्भिन्नसर्वांगान्प्रत्युवाचहसन्निव ॥ ॥ शेषउवाच ॥ ॥ पलायनंकथंतस्मान्मानुषाद्युद्धकोविदैः ॥ ५० ॥ कृतंभवद्भिःसकलैःसाधुमंत्रविशारदैः ॥ प्रदीयमानोधर्मार्थैवारितोयैर्महामणिः ॥ ५१ ॥ कथंनतंवारयतेमंत्रीशोहितकोविदः ॥ ईदृशंतंमणिंकस्मात्परिरक्षतिनोसुधाम् ॥ ५२ ॥ समर्थैचधनंदेयंशरीरमपिवल्लभम् ॥ अदत्तमुभयंशोच्यंश्मशानेस्त्रागिवस्थिता ॥ ५३ ॥ शीघ्रंमणिंचार्पयततक्षकाद्यामहाविषाः ॥ छत्रंशतशलाकंचकुंडलेचमहाधने ॥ ॥ ५४ ॥ दिव्यरत्नमयीस्त्रक्चप्रदेयापार्थसूनवे ॥ यावन्नधूमकल्लोलैःपूरितंतेनभूतलम् ॥ ५५ ॥ तावद्गच्छामहेसर्वेयत्रास्तेकेशवप्रियः ॥ शोच्येनानेनमणिनाकिंकार्यंपांडवस्यहि ॥ ५६ ॥ भविष्यतिसमीपस्थेकृष्णेत्रैलोक्यपालके ॥ यथाक्षीरार्णवेनीतमजाक्षीरंनगण्यते ॥ ५७ ॥ कामधेनुःसुरतरुःकल्पवल्लीतथाहरौ ॥ भवंतःपन्नगाःसर्वैमानुषेणपराजिताः ॥५८॥ प्रायश्चित्तंप्रकुर्वंतुमणिदानप्रभंजकाः ॥ मयासहहरिंप्राप्तंपांडवार्थंमहापुरे ॥ ५९ ॥ पश्यंतुगरुडारूढमभयामृत्युनाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नम् ॥ विलोक्यतेयदिहरिर्नयनैर्भक्तिसंयुतैः ॥ ६० ॥ जीवैर्नेतान्वैनतेयोबाधितुंनक्षमोंऽतकः ॥ ततःपातालविवरान्निर्ग
तःपन्नगेश्वरः॥६१॥मणिमादायरत्नानिविविधानिबहूनिच॥वस्त्रालंकरणाद्यंचवस्तुजातंतथाबहु॥ ६२॥पार्थपुत्रायतद्दातुमा
ययौचस्वयंप्रभुः ॥ ॥ जैमिनिरुवाच ॥ ॥ गृहीत्वातंमणिंराजावित्तंचविविधंतदा ॥ ६३ ॥ प्रायान्मणिपुरेरम्येपा
र्थपुत्रोमुदान्वितः ॥ धृतराष्ट्रस्ततोदुःखंप्राप्तवान्यादृशंनृप ॥ ६४ ॥ कथयिष्यामितेवीरसम्यगाकर्णयाधुना ॥ पुत्राभ्यां
सहितोगेहेस्वकेमंत्रमथाकरोत् ॥ ६५ ॥ दुःस्वभावंचदुर्बुद्धिंसमाहूयेदमब्रवीत् ॥ अनर्थःसुमहान्जातःपुत्रौप्रज्ञाप्रकारितः ॥
॥ ६६ ॥ पार्थेनजीवितंप्राप्तंतन्नमेसुखदायकम् ॥ धर्मानुजश्चभविताविजयीबभ्रुवाहनः ॥ ६७॥ भविष्यत्यश्वमेधश्चचि
रंवैराहिपांडवाः ॥ किमत्रानंतरंकार्यंब्रुवतांपुत्रकावुभौ ॥ ६८ ॥ मयानिवारितोराजाहितार्थंदीर्घदर्शिना ॥ ॥ दुर्बुद्धिरु
वाच ॥ ॥ शोकंजहिमहाबाहोकुतोदुर्बुद्धिनाक्रतुः ॥ ६९ ॥ यत्राहंतत्रपुण्यस्यकथाक्वापिनजायते ॥ जनितोऽस्मित्वयाता
तदुःस्वभावश्चमेऽनुजः ॥ ७० ॥ आवाभ्यांतातपुत्राभ्यांसहितःशोचसेकथम् ॥ अहंभ्रात्रायुतोयेषांगृहेतिष्ठामिवैक्षणं॥७१॥
जयंतत्रनपश्यामिकुतोवैयाज्ञिकोविधिः॥शत्रूणांपतनंतेषांनरकेनत्वषेमतिः ॥ ७२ ॥ त्वंप्रयाहियतोराजायातिजीवयितुंन
रम्॥ अहमग्रेगमिष्यामिहर्तुंपार्थशिरोमहत् ॥ ७३ ॥ पातयिष्येवनेघोरेमहागरुडवर्जिते ॥ कथंसंजीवयिष्यंतिनीतेशिर
सिसंगरात् ॥ ७४॥ एतावदुक्त्वावचनंदुःस्वभावेनसंयुतः ॥ जगामचशिरोहर्तुंपार्थस्यहिसकुंडलम् ॥ ७५॥ अनयद्धकदा
लभ्यस्यवनेशून्येस्थितश्वसः॥ चित्रांगदातथोलूपीनापश्येतांमहच्छिरः ॥ ७६ ॥ प्रोचतुःकिमिदंजातंहाहतःपांडवोमुहुः ॥ के

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननीतंशिरोरम्यंसुचारुहरिजल्पकम् ॥ ७७ ॥ ॥ जैमिनिरुवाच ॥ ॥ पतितेधर्मपत्न्यौतेपार्थपादांतिकेतदा ॥ ततःकलक
लश्चासीद्रणमध्येविशांपते ॥ ७८ ॥ बभ्रुवाहोपिशमितस्तैःसर्वैःसहितोमुदा ॥ शेषंपुरस्कृत्यपुरंप्रविवेशमहाबलः ॥ ७९ ॥
सतुलब्ध्वामणिंयावत्प्रविश्यरणमंडलम् ॥ तत्रपश्यतितंपार्थंतावच्छुश्रावतंध्वनिम् ॥ ८० ॥ शिरोनीतंशिरोनीतंकेनापिस्व
पितुश्छलात् ॥ पतितेमातरौवीक्ष्यपार्थगात्रंविशीर्षकम् ॥ ८१ ॥ निपपातधरायांतुमृतकल्पोमहीपते ॥ यस्मिन्कालेकिरीटी
हिपतितोरणमंडले ॥ ८२ ॥ तस्मिन्दिनेनिशामध्येस्वप्नंकुंतीददर्शह ॥ पार्थायधर्मराजायसकृष्णायचसत्वरा ॥ ८३ ॥ प्रबुद्धाक
थयामासस्वप्नंरात्रौसमीक्षितम् ॥ मयाधनंजयोदृष्टस्तैलवाप्यंतरेगतः ॥ ८४ ॥ दासेरकंसमारूढोगतोसौदक्षिणांदिशम् ॥
गोमयेनानुलिप्तांगोजपाकुसुममंडितः ॥ ८५ ॥ नूनंनविद्यतेपार्थोवेद्मिकृष्णसखातव ॥ हृदयंभिद्यतेमेऽद्यसुभद्राकंकणंगत
म् ॥ ८६ ॥ कृष्णस्तस्यावचःश्रुत्वासस्मारगरुडंप्रभुः ॥ आजगामाथगरुडस्तमारूढोजगत्पतिः ॥ ८७ ॥ कुंतींचमातरंभीमं
देवकींगोपकन्यकां ॥ समारोप्यययौतत्रयत्रास्तेपतितोऽर्जुनः ॥ ८८ ॥ अयुतस्तंभसंयुक्तेवीणकेस्त्रीभिरन्विते ॥ ददर्शचर
णंघोरंबभ्रुवाहेनकारितं ॥ ८९ ॥ रात्रौरत्नप्रदीपैश्चभासितंहेमकुंडलैः ॥ बाहुभिश्चंदनादिग्धैःकिरीटैःकटकैर्वृतं ॥ ९० ॥ ना
रीणांचसहस्रैस्तंपार्थंवीक्ष्यावृतंहरिः ॥ नारीवदनचंद्रैश्चपार्थस्यमुखपंकजं ॥ ९१ ॥ विम्लानतामिदंनीतंक्कापिक्कापीत्यवो
चत ॥ भीमःकृष्णंप्रत्युवाचकृष्णसूर्योदयेऽधुना ॥ ९२ ॥ प्रकाशितंमुखांभोजंभ्रातुर्मेसंभविष्यति ॥ ॥ जैमिनिरुवाच ॥
ततःसमुत्तीर्यखगाद्वासुदेवोमहायशाः ॥ ९३ ॥ भीमेनसहताभिश्चपार्थंवीक्ष्याब्रवीद्वचः ॥ किंजातंकेनवीरेणपातितोऽसिधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जय ॥ ९४ ॥ इयंचदेवकीमातायशोदाजननीचमे ॥ कुंतीपितृष्वसाभीमोरणेत्वांवीक्षतेमुहुः ॥ ९५ ॥ तंतथावादिनंकृष्णंभी
मोवचनमब्रवीत् ॥ त्वमेवयदिगोविंदपतितंपरिपृच्छसि ॥ ९६ ॥ किमंधकारजनितंभयंवेत्तिदिवाकरः ॥ सकोमदीयंसंग्रामेगृ
हीत्वात्रतुरंगमं ॥ ९७ ॥ पातयित्वागतःकोपिमांहिजानातुसंगतं ॥ कोसौपार्थसमोवीरःपतितोऽर्जुनसन्निधौ ॥ ९८ ॥ एतंद्वि
तीयंजानामिकर्णपुत्रंचपातितं ॥ एवमुक्तातत्रगत्वाभीमसेनोतिविह्वलः ॥ ९९ ॥ विललापमहाबाहुरर्जुनेतिमुहुर्मुहुः ॥ ॥ जै
मिनिरुवाच ॥ ॥ ततःप्रबुद्धोवीरोऽसौबभ्रुवाहोमहाबलः ॥ १०० ॥ जनन्यौतस्यतेबुद्धेददृशातेजनार्दनं ॥ कुंतींयशोदासं
युक्तांदेवकींचवृकोदरं ॥ १ ॥ प्रद्युम्नेनानिरुद्धेनयुयुधानेनचान्वितं ॥ ज्ञात्वाऽर्जुनसुतोभीमंप्रत्युवाचातिदुःखितः ॥ २ ॥ मयापु
त्रेणजनकोनिहतोभीमपापिना ॥ सैन्यंचपातितंकर्णपुत्रश्चनिहतोरणे ॥ ३ ॥ एवंविधंसागसंमांगदयापरिपोथय ॥ स्वजी
वितविनाशार्थंकृतोनामैषविग्रहः ॥ ४ ॥ शेषमुख्याश्चसम्प्राप्तागृहीत्वाजीवदंमणिम् ॥ मध्येकेनापिदुष्टेनशिरोनीतंपितुश्च
मे ॥ ५ ॥ नमस्करोमिगोविंदचरणौतेकृपांकुरु ॥ सुदर्शनेनचक्रेणशिरोमेछिंधिमाचिरम् ॥ ६ ॥ यथापुराराहुकण्ठोमधुसूदन
पातितः ॥ यस्मिन्कालेनजननीनपितानचबान्धवः ॥ ७ ॥ जनास्तिष्ठतितत्रत्वंसर्वदापरिरक्षसि ॥ पितृहन्तागमिष्यामिदेवा
हंनरकार्णवान् ॥ ८ ॥ नपीडयिष्यतिचमांदृष्टस्त्वमसिचक्षुषा ॥ तवागमेनमृत्युर्मेभाव्यश्चनरकोहतः ॥ ९ ॥ मृत्युःप्रियोमेप
रमोजीवितंदुःखदंमहत् ॥ तववैष्णवसर्वस्वंमयाचोरेणमोषितम् ॥ १० ॥ ईश्वराज्ञालंघिताहित्रिशूलेशांकरेक्षिप ॥ अथवा ॥१०४॥
द्यजगन्नाथछिंधिचक्रेणमेछिरः ॥ ११ ॥ पितामहींनपश्यामिजनन्याननमस्कृता ॥ अब्रुवाणाकथंकुंतोनाशीर्वादंप्रयच्छति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११२ ॥ ॥ इत्याश्वमेधिकेपर्वणि जैमिनीये कृष्णागमोनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ छ ॥ ॥
॥ जनमेजयउवाच ॥ ॥ कथंधनंजयोवीरोजीवितस्तत्रसुव्रत ॥ मणिस्पर्शेनकृष्णेनजीवितंतस्यतद्वद ॥ १ ॥ ॥ जैमिनि
रुवाच ॥ ॥ ततःकुंतींप्रत्युवाचनागराजस्यकन्यका ॥ नमस्कृतासिदेवित्वंसर्पिण्याविषदंष्ट्रया ॥ २ ॥ संलग्नयापार्थकरेभव
तीगोमतीनुकिम् ॥ तयासपन्नगस्त्यक्तःपुत्रहंतायथापुरा ॥ ३ ॥ तथाऽहंसांप्रतंत्यक्तात्वयावैराजकन्यया ॥ शापदंडेनत्पनंम
दीयंपरिपोथय ॥ ४ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःप्ररुरुदुःसर्वाःसहकुंत्यामहास्वनम् ॥ हापांडवेतिपतिताःसर्वेषांपश्य
तामपि ॥ ५ ॥ अथशेषःप्रत्युवाचनमस्कृत्यजनार्दनम् ॥ हृषीकेशजगन्नाथकिमिदंवीक्ष्यतेत्वया ॥ ६ ॥ धर्मराजस्यनिखिलंकु
लंमग्नंरसातले ॥ तदुद्धरकृपासिंधोमणिनाऽनेनमाचिरम् ॥ ७ ॥ यतःपाषाणजातीयोमज्जयेन्नैवतारयेत् ॥ सुधापिसुलभाचे
यंजनार्दनतवेच्छया ॥ ८ ॥ मग्नंकुलंमज्जयसेपांडवस्यमहात्मनः ॥ रोदनेनजनानांहिनपश्यामोवयंशिरः ॥ ९ ॥ क्वगतंकेन
नीतंवापार्थस्यधरणीतलात् ॥ यदत्रानंतरंकार्यंविष्णुनाक्रियतामिह ॥ १० ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ शृण्वंतुसर्वेवच
नंमदीयंमंत्रसंयुतम् ॥ यद्यहंब्रह्मचर्येणनभग्नोभूतलेसदा ॥ ११ ॥ तेनमेसुकृतेनाद्यपार्थस्यायातुतच्छिरः ॥ यैर्नीतंतेपतंत्वद्य
भिन्नशीर्षाममाज्ञया ॥ १२ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवतिदेवेशेविनष्टौधृतराष्ट्रजौ ॥ पांडवस्यशिरःप्राप्तंतदामणिपु
रेनृप ॥ १३ ॥ गृहीत्वाकेशवोदिव्यंमणिंशेषात्स्वयंप्रभुः ॥ प्रत्युवाचहरस्याज्ञानहंतव्याहिमादृशैः ॥ १४ ॥ पार्थःशंभुप्रसादे
नमणिनाजीवितंपुनः ॥ प्राप्नोतुयत्तास्तिष्ठंतुयोजयेस्यमणिंहृदि ॥ १५ ॥ प्रथमंकर्णपुत्रस्यपश्चात्पार्थस्यधन्विनः ॥ उ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्उत्तिष्ठकर्णपुत्राद्यमणिस्तेहृदयेधृतः ॥ १६ ॥ ॥ जैमिनिरुवाच ॥ ॥ धृतेमणौकर्णपुत्रस्यशीर्षंबाणैर्भिन्नंबभ्रुवाहस्ययुद्धे ॥
तथालग्नंचायसंचुंबकेनयथापुराघनघातैर्विशीर्णं ॥ १७ ॥ समुत्थितःकर्णपुत्रोमनीषीबाणान्पुनःसंदधानोहिचापे ॥ कृष्णकृ
ष्णकेशवेतिब्रुवाणंरणेपुनास्तिष्ठतिष्ठेतिवीरम् ॥ १८ ॥ चुचुंबतत्केशवोऽतिप्रहर्षान्नमस्कृतःकर्णपुत्रेणकृष्णः ॥ समुत्थितेकर्णपु
त्रेथपार्थस्तथाबुद्धोविधिनातेनकृष्णात् ॥ १९ ॥ यथादेहीमाययाभिन्नभावःसंप्राप्यासौनिर्विकारंसुयोगात् ॥ तैर्वीक्षितःपन्न
गैःसव्यसाचीत्रिभिर्वीरैःकृष्णबाहुप्रगुप्तः ॥ तेपुष्पवर्षंमुमुचुःसुराःकेपार्थस्यदध्मुर्विविधांश्चशंखान् ॥ २० ॥ आनंदितास्त
दासर्वेसैनिकाःपांडवस्यते ॥ ववंदिरेऽथसंप्राप्तान्कृष्णकुंतीमुखान्प्रभून् ॥ २१ ॥ वृषकेतुस्तदावीरोनमस्कृत्याखिलान्मुदा ॥
ददर्शभीमंकुंतींचप्रहृष्टांपुत्रदर्शनात् ॥ २२ ॥ सर्वेतेसंगतावीराःप्रद्युम्नप्रमुखाःपुनः ॥ प्रविष्टाबभ्रुवाहस्यपुरंकृष्णानुगान्नृप ॥
॥ २३ ॥ सर्वैःपुरस्थैःसुजनैःपूजितावित्तसंचयैः ॥ सप्तषष्टिर्वरानार्योनृत्यंत्योभावसंयुताः ॥ २४ ॥ कुबेरइववित्ताढ्यादृष्टास्तै
शतशःपुरे ॥ पताकिनंनादयुक्तंगजाश्वरथमंडितम् ॥ २५ ॥ कुबेरनगराभासंवीक्ष्यतेविस्मिताभृशम् ॥ मुक्ताफलचतुष्केथस
कृष्णंसव्यसाचिनम् ॥ २६ ॥ सभायांबभ्रुवाहस्यस्थापयंतोऽब्रुवन्वचः ॥ तेवीरानागसहितामात्रपांकुरुपांडव ॥ २७ ॥ पुत्रे
णजीवितश्चास्मिहतसैन्योऽस्म्यहंकृतः ॥ सर्वत्रजयमन्विच्छेत्पुत्रादेकात्पराजयम् ॥ २८ ॥ गंगाशापेनसंजातंपतनंतेधनंज
य ॥ पुनःकृष्णप्रसादेनजीवितोसिधनंजय ॥ २९ ॥ भीमेनसहितोवीरपश्यपुत्रस्यवैभवम् ॥ चित्रांगदांप्रियांपार्थद्वितीयांना ॥१०५
गकन्यकाम् ॥ ३० ॥ संभावयमहाभागपुत्रंवीरंचलज्जितम् ॥ गृहाणसकलंराज्यंपुत्रेणयदुपार्जितम् ॥ ३१ ॥ वासुदेवम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाबुद्धे प्रबोधय धनंजयम् ॥ संगमश्चैतयोः कार्यः कुंत्यापुत्रकपौत्रयोः ॥ ३२ ॥ देवक्याभीमसेनेनजनन्यातेयशोदया ॥ अधो
मुखश्चवीरोऽसौनार्जुनंपरिपश्यति ॥ ३३ ॥ त्यक्तुकामोनिजंदेहंकलुषंस्वपितुर्वधात् ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःकृष्णेन
संयुक्तंस्थापयित्वानिजासने ॥३४॥ पितरंप्राहपुत्रोसौबभ्रुवाहोमहायशाः ॥ हिमाचलंगमिष्यामिपातयिष्येकलेवरम्॥३५॥
नान्यथापातकंघोरंगमिष्यतिकलेवरात् ॥ कृष्णभक्तस्यचगुरोर्धर्मकार्यप्रकारिणः ॥ ३६ ॥ वधोनसुखदोमह्यंतस्मात्त्य
क्ष्येकलेवरम् ॥ ॥ भीमसेनउवाच ॥ ॥ यदितेपातकंगात्रेभवेद्वीरमहीतले॥ ३७॥ नतिष्ठतिसमीपेतेदेवकीनंदनोहरिः॥
यथावयंतेपितरःपातयित्वापितामहम् ॥ ३८॥ गुरुंद्रोणंभानुपुत्रंस्थिताःकृष्णेनवीक्षिताः ॥ तथात्वंजीवत्पितृकोहरिणापाव
नीकृतः ॥ ३९ ॥ तुरंगंधर्मराजस्यत्यक्त्वाशोकंचपालय ॥ तवकागणनापुत्रकृष्णाग्रेपापकर्मणाम् ॥ ४० ॥ पंचपातककर्तारः
किन्नाम्नाऽस्यनतारिताः ॥ तुर्येयुगेचसंप्राप्तेमानवान्पापपूरितान् ॥ ४१ ॥ पावयिष्यतिनामास्यविष्णोरमिततेजसः ॥ कुतो
दुःखंकुतोदैन्यंकुतःपापभयंनृणाम् ॥ ४२॥ येषांसद्भावसंयुक्ताजिह्वास्यात्कृष्णवादिनी ॥ ॥ जैमिनिरुवाच ॥ ॥ तेकृष्णे
नकृताःसर्वेवैरशोकविवर्जिताः ॥ ४३ प्रमोदिताश्चसंतुष्टास्तदामणिपुरेनृप ॥ वादित्राणिचसंजघ्नुर्दर्दुर्दानानिभूरिशः ॥ ४४ ॥
विस्मयंतस्ययुद्धस्यचरितंबहुमेनिरे ॥ वृषकेतुंचकृष्णंचशशंसुःशेषसंयुताः ॥ ४५ ॥ मुमोचतुरगंकृष्णःपंचमेदिवसेततः ॥
कुंतीवधूभिःसहितामुमुदेपौत्रमंदिरे ॥ ४६ ॥ गायंतिगायकास्तत्रनृत्यंतिस्मनटादयः ॥ मुदितोमाधवोराजन्पार्थपुत्रसम
न्वितम् ॥ ४७॥ वरासनेचोपविष्टमिदंवचनमब्रवीत् ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ वयंसुतोषिताःसर्वेबभ्रुवाहस्यमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जै०अ० दिरे ॥ ४८ ॥ सुखेनपंचरात्रंनोगतंपश्यधनंजय ॥ इदानींभीमसेनोऽयंसहकुंत्यायशोदया ॥ ४९ ॥ उलूप्यासहितोराज्यंध अ०
॥१०६॥ र्मराजस्यगच्छतु ॥ चित्रांगदातथायातुगृहीत्वाविविधंधनम् ॥ ५० ॥ प्रारंभंकारयंत्वंतेयज्ञस्यैतिमतिर्मम ॥ चिंतांसुमहतींरा ४१
जाकरिष्यतिगतेमयि ॥ ५१ ॥ भवान्पुत्रयुतश्चाहंवृषकेतुस्तथापरः ॥ हंसध्वजश्चवीरोऽसौतथाऽन्येसंतुरक्षणे ॥ ५२ ॥ अग्रे
संतिमहाबाहोराजानोवैष्णवाःपरे ॥ अजेयास्तेमयाप्याशुतेनाहंत्वांत्यजेकथम् ॥ ५३ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंहिमं
त्रंकृत्वाथप्रेरयामासपांडवम् ॥ वासुदेवोमहाभागोवित्तंचबहुलंस्त्रियः ॥ ५४ ॥ रक्षणार्थंस्थितोराष्ट्रेतुरंगस्यस्यातिकौतुकात् ॥
शेषादयस्ततःसर्पाःकृष्णंविज्ञाप्यतंमुदा ॥ ५५ ॥ पातालमभिजग्मुर्वैबभ्रुवाहेनपूजिताः ॥ यइदंवासुदेवस्यचरितंसार्जुनस्य
च ॥ ५६ ॥ शृणुयात्सर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ संजीवनंचार्जुनस्यसहकर्णात्मजेनच ॥ ५७ ॥ कथानकंपुण्यकरंयःकृ
ष्णस्यशृणोतिसः ॥ दुर्मृत्युनानबाध्येतकदाचिदपिवैनरः ॥ ५८ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेबभ्रुवाहनविज
योनामचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ जनमेजयउवाच ॥ ॥ ततःपरंकिमभवत्कथंकृष्णेनसंयुतः ॥ वीरैर्वृतःसव्यसाचीररक्षतुरगंमुने ॥ १ ॥ परमंजायतेसौख्यं
शृण्वानस्यतवाननात् ॥ हृदिमेवासुदेवस्यपिबतःसुकथामृतम् ॥ २ ॥ संतापनुत्क्षीरनिधिरेकएवसदोच्यते ॥ किंपुनश्चंद्रकि
रणैर्मलयानिलसंयुतैः ॥ ३ ॥ सुशीतलत्वंगमितःसुमनोभिरलंकृतः ॥ चरितंवासुदेवस्यगहनंरससंयुतम् ॥ ४ ॥ तथाभूतमहं ॥१०६॥
मन्येवदतस्तेमहामते ॥ भीमिगतेनागपुरंकिंचकारजनार्दनः ॥ ५ ॥ तत्सर्वंकथयाद्यत्वंमयापृष्टोऽसिसत्तम ॥ बिलानितानिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्येऽहंमुखानिजगतांपते ॥ ६ ॥ प्रवदंतिनमाहात्म्यंयेषांपूर्णानिकोटकैः ॥ बभ्रुवाहपुरान्मुक्तोवाजिराजोमहामुने ॥ ७॥ का
निराष्ट्राणितुरगःपरिबभ्रामतद्वद ॥ ॥ जैमिनिरुवाच ॥ ॥ पुरात्प्रमुक्तोराजेंद्रतैःसकृष्णैर्महाबलैः ॥ ८॥ यावत्प्रयातितु
रगस्तावत्ताम्रध्वजेनसः ॥ वीक्षितोरक्षतास्वंहिवाजिमेधतुरंगमम् ॥ ९ ॥ प्रमुक्तंरत्ननगरात्स्वपित्राबर्हिकेतुना ॥ ताम्रध्व
जस्यहंसंतमर्जुनस्यहयोययौ ॥ १० ॥ आघ्रायवदनंतस्यस्तब्धकर्णोररासह ॥ चरणेनोद्धृतेनैनंताडयामासभारत ॥ ११॥
प्राथंमुक्ताफलमयंदशनैश्चादशत्क्रुधा ॥ पश्चामेनंद्वितीयोऽपिताडयामासवक्षसि ॥ १२ ॥ स्कंधकण्डूयनंपश्चाच्चक्रतुस्तौतु
वाजिनौ ॥ ताम्रध्वजःप्रधानंस्वंपप्रच्छबहुलध्वजम् ॥१३ ॥ कस्ययज्ञनिमित्तंहिमुक्तःपत्रंप्रवाचय ॥ बहुलध्वजस्ततःपत्रं
धृत्वावाजिनमुत्तमम् ॥ १४॥ पपाठपत्रजंभावंराज्ञेसर्वंन्यवेदयत् ॥ राजाश्रुत्वाप्रधानस्यवचनंकोपपूरितः ॥ १५ ॥ जग्रा
हपांडवहयंकृष्णाभ्यामपरिक्षितम् ॥ प्रद्युम्नेनानिरुद्धेनतथाहंसध्वजेनच ॥ १६ ॥ अनुशाल्वेनवीरेणकर्णपुत्रेणधीमता ॥
पाल्यमानंगतभयस्तथावीरैःसमन्वितम् ॥ १७॥ स्वांसेनांसर्वशस्त्राढ्यांरचयन्वाक्यमब्रवीत् ॥ ॥ ताम्रध्वजउवाच ॥
ममपित्रादीक्षितेनकृतायज्ञास्तुसप्तवै ॥ १८ ॥ पुनश्चायंनरपतिःप्रकर्ताचाष्टमंक्रतुम् ॥ अष्टमेनतुरंगेणपितुश्चैवाष्टमःक्र
तुः ॥ १९ ॥ भविष्यतिसकृष्णोयमन्येतेकृष्णवर्जिताः ॥ संजातायेकृताःपूर्वंतिष्ठंतुहरिसंमुखाः ॥ २० ॥ भवंतश्चमहाबुद्धेमहद्यु
द्धंभविष्यति ॥ ॥ बहुलाश्वउवाच ॥ ॥ तवसैन्येनपार्थस्यबहुलेनाल्पकंभुवि ॥ २१ ॥ संछादितंबलंराजन्यथाक्वापिन
दृश्यते ॥ जानातिराष्ट्रंराजेंद्रोबभ्रुवाहोऽथवानवा ॥ २२ ॥ प्रददातिकरंभारंमुक्तानांयःपितुश्चते ॥ मुक्ताफलानिगच्छंतिमयू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रध्वजमंदिरे ॥ २३ ॥ नित्यंपुष्पांजलौकार्येनर्त्तकीनांरजांसिवत् ॥ अस्मिन्ग्रामेमहावीरैरणोयंदृश्यतेकृतः ॥ २४ ॥ अशक्ताः पतिताःकेचित्केचिन्मृत्युमुपागताः ॥ निर्धनानामपुष्टानामल्पपौरुषकारिणाम् ॥ २५ ॥ एतेषांकीदृशंयुद्धंभविष्यतिहयेधृते ॥ ॥ ताम्रध्वजउवाच ॥ ॥ अन्येषामत्रवीराणांगणनाकाममाग्रतः ॥ २६ ॥ वीरावत्ररणेधीरौबभ्रुवाहनकर्णजौ ॥ नारदात्पौरुषंरात्रावेतयोःसंश्रुतंमया ॥ २७ ॥ नरनारायणौतेनकथितौपार्थमाधवौ ॥ प्रद्युम्नश्चानिरुद्धश्चयुयुधानस्तथापरः ॥ २८ ॥ एतेकृष्णसमावीरास्ततोयुद्धंभविष्यति ॥ अर्धचंद्रेणव्यूहेनवाहिनींरचितांकुरु ॥ २९ ॥ पांचजन्यस्वनंघोरंप्रकरोतिजनार्दनः देवदत्तंपांडवश्चशंखंवादयतेभृशम् ॥ तुरगार्थंसमायांतिरथिनःशस्त्रपाणयः ॥ ३० ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधाय तरसाराजायुद्धेस्थितस्तदा ॥ सकृत्वानिश्चयंधैर्यात्कृष्णेनाथनिरीक्षितः ॥ ३१ ॥ वासुदेवस्तुतान्दृष्ट्वायोद्धुंयोधानवस्थितान् ॥ उवाचवाक्यंप्रहसन्पार्थंसंस्पृश्यपाणिना ॥ ३२ ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ पार्थताम्रध्वजंपश्यमयूरध्वजनंदनम् ॥ अनेनविधृतःसोश्वस्त्वदीयःस्वंप्ररक्षता ॥ ३३ ॥ अत्रयुद्धंव्यवसितंसुमहद्वीरपातनम् ॥ मोचयाश्वंमहावीराच्छंखाद्वेदंयथाहरिः ॥ ३४ ॥ प्रद्युम्नाद्याश्चयेवीराबभ्रुवाहनपालिताः ॥ सर्वेयुद्धंकरिष्यंतिलंमयासहितोऽनघ ॥ ३५ ॥ रणभूमिंपरित्यज्यसमायाहियतोव्रजे ॥ पितास्यदीक्षितःपार्थविद्यतेनर्मदातटे ॥ ३६ ॥ शूरोयंजितकामस्तुसत्यवागनसूयकः ॥ नयोधनीयःपार्थेनसत्यमेतद्वदामिते ॥ ३७ ॥ गृध्रव्यूहंहिरचययथास्थानंधनंजय ॥ एतान्वीरान्महाकायांस्ताम्रध्वजबलेस्थितान् ॥ ३८ ॥ जानामिकालरूपांस्तान्सर्वेयुध्यंतुमामकाः ॥ अहंस्वरथमारुह्यदारुकेणनियंत्रितम् ॥ ३९ ॥ योत्स्यामिसहितःपुत्रैःपौत्रैःश्रां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोसिपांडव ॥ विनाशंसर्ववीराणामद्यमन्येसमागतम् ॥ ४० ॥ ॥ जैमिनिरुवाच ॥ ॥ एतावदुक्त्वावचनंमाधवःस्वरथंग
तः ॥ गृध्रव्यूहेनसहितस्तुरंगंप्रतिमारिष ॥ ४१ ॥ वासुदेवंरथस्थंतेददृशुःसर्वपार्थिवाः ॥ गृध्रस्यचमुखेराजाग्रीवायामनुशा
ल्वकः ॥ ४२ ॥ हंसध्वजोनेत्रसंस्थःपक्षयोर्यदुनंदनौ ॥ प्रद्युम्नश्चानिरुद्धश्चसात्यकिर्भोजवर्धनः ॥ ४३ ॥ पादयोरुभयोर्मध्ये
गृध्रस्यकिलसंस्थितौ ॥ यौवनाश्वोमेघवर्णोव्यूहरक्षाविधायिनौ ॥ ४४ ॥ अर्जुनंहृदयेवीरंबहुभिःपरिवारितम् ॥ चंचुस्थिता
वुभौवीरौबभ्रुवाहनकर्णजौ ॥ ४५ ॥ एतान्वीक्ष्यबहून्वीरान्बहूनन्यांश्चपार्थिवान् ॥ ताम्रध्वजोमुदायुक्तआजुहावजनार्दन
म् ॥ ४६ ॥ मयागृहीतंतुरगंपार्थस्यमहतोरणात् ॥ यदिमोचयितुंकृष्णस्वयंप्राप्तोऽसिसंगरे ॥ ४७ ॥ धैर्यंरणेप्रकर्तव्यंपार्थं
पालयकेशव ॥ मदीयंवाजिनंयांतंकिंनधारयसेविभो ॥ ४८ ॥ नान्येषांविद्यतेशक्तिस्त्वांविनादेवकीसुत ॥ मयासमंप्रहारंगेस
म्यग्योधयितुंहरे ॥ ४९ ॥ सुदर्शनंहिशार्ङ्गंचशस्त्राण्यन्यानिधारय ॥ नविद्यतेभयंमेत्रदृष्टस्त्वमसिचेद्रणे ॥ ५० ॥ ॥ इत्या
श्वमेधिकेपर्वणिजैमिनीयेकृष्णताम्रध्वजभाषणंनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥छ॥ ॥छ॥
जैमिनिरुवाच ॥ ॥ एतावदुक्त्वावचनंपार्थसैन्यंतथाविधम् ॥ नाराचैरर्धचंद्रैश्चसमंताद्व्यकिरद्बली ॥ १ ॥ पार्थंजघानसप्त
त्याशराणांकेशवंत्रिभिः ॥ बाणैर्बिभेदतरसासिंहनादमथाकरोत् ॥ २ ॥ दारुकंपंचभिर्बाणैश्चतुर्भिश्चतुरोहयान् ॥ विव्याध
कुपितोवीरस्तदद्भुतमिवाभवत् ॥ ३ ॥ नवभिःसात्यकिंवीरंकृतवर्माणमष्टभिः ॥ प्रद्युम्नंचसहस्रेणानिरुद्धमयुतेनच ॥ ४ ॥
अनिरुद्धस्ततोवीरःसमाहूयेदमब्रवीत् ॥ तिष्ठताम्रध्वजरणेपश्यत्वंममपौरुषम् ॥ ५ ॥ सहस्वमेप्रहारंहिमुंचमुंचतुरंगमम् ॥ क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वात्रातारणान्मंदपुरतोममतद्वद ॥ ६ ॥ ॥ताम्रध्वजउवाच ॥ ॥ मदनात्तावकंजन्मपुष्पबाणाद्विशेषतः ॥ बाणकन्याप
तिस्त्वंतुकिंयुद्धंप्रकरिष्यसि ॥ ७ ॥ बाणेनरक्षितःपूर्वमूषास्नेहेनसाधुना ॥ नाहंतथाविधंकार्यंकरिष्यामिमहारणे ॥ ८ ॥ अद्य
कृष्णस्यपुरतःपातयिष्येमहाशरैः ॥ आत्मानंपालयविभोनभवेज्जीवितंतव ॥ ९ ॥ ॥अनिरुद्धउवाच ॥ ॥ बाणंमुंचाभि
तिष्ठत्वंबहुधाकिंप्रभाषसे ॥ आत्मानंस्वयमेवेहवर्णयंतिनपंडिताः ॥ १० ॥ ॥ जैमिनिरुवाच ॥ ॥ बाणंमुमोचानिरुद्धःप्रल
यानलसन्निभं ॥ ११ ॥ बिभेदहृदयंतस्यसुचित्रस्यधनुष्मतः ॥ सुचित्रोपिशराणांहिनवत्यायदुनंदनं ॥ १२ ॥ विव्याधसम
रेतूर्णंशरांस्तान्पंचधापरः ॥ अनिरुद्धःक्षणाच्चक्रेवीरंशिखिनिभंरणे ॥ १३ ॥ चतुर्भिर्निहतावाहाःपंचमेनाथसारथिं॥जघान
चततस्तस्यवीरानन्यांश्चदारुणान् ॥ १४ ॥ अनिरुद्धशरैर्भिन्नादृश्यंतेसर्वसैनिकाः ॥ चित्रांगावनमध्यस्थाःस्फुरंतस्तेतथा
ऽभवन् ॥ १५ ॥ बाहूंश्चिच्छेदवीराणामंगुलीश्चनखांस्तथा ॥ मणिबंधंपृथक्चक्रेहस्तदंडंचमारिष ॥ १६ ॥ वक्षस्थलानिचा
स्थीनिकटिदेशान्सुमांसलान् ॥ शिरांसिचपृथक्चक्रेनेत्राणिचसहसन्निव ॥ १७ ॥ दंतान्भ्रुवस्तथाश्मश्रूःक्रुद्धश्चिच्छेदयादवः
॥ परमाणूपमांनीतास्तस्यवीरस्यसैनिकाः ॥ १८ ॥ वायुनातद्रजोनीतंसागरेहिमहात्मना ॥ अनिरुद्धप्रयुक्तेनतस्मिन्कालेवि
शांपते ॥ १९ ॥ चतुर्विधंबलंहत्वाविधूमोऽग्निरिवज्वलन् ॥ अक्षौहिणोनांत्रितयंपातितंबलिनाऽमुना ॥ २० ॥ कृष्णपौत्रेणवीरे
णसुचित्रस्यरणांगणे ॥ पुनरन्यंमहत्सैन्यंपोथयामाससायकैः ॥ २१ ॥ पतंगाइवतेसर्वेदग्धाःकार्मुकधारिणः ॥ रथाविभिन्ना
स्तिलशोगजास्त्रस्तावनंगताः ॥ २२ ॥ हयाहताःसाश्ववीराबाणैस्तेविदलीकृताः ॥ सुचित्रोऽपिमहाबाहुःप्रद्युम्नतनयंरणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ बाणैर्विंध्याधनिशितैर्विरथंतंचकारसः ॥ तंरथंभग्नचक्राक्षंत्यक्त्वाकार्मुकमाददे ॥ २४ ॥ जघानबाणजांनाथःसुचित्रं
बहुभिःशरैः ॥ विरथंताम्रकेतुंहिचक्रेक्रोधसमन्वितः ॥२५॥ उभौतौविरथौवीरौक्षितिस्थौचक्रतूरणं ॥ ततोऽनिरुद्धंकृत्वासौमू
र्च्छितंस्वरथंस्थितः ॥ २६ ॥ पातयामाससंप्राप्तान्वीरान्पांडवसैनिकान् ॥ प्रद्युम्नंपंचभिर्बाणैःक्षिप्त्वाऽसौवाक्यमब्रवीत् ॥
॥ २७ ॥ कामःसुयोद्धापिमयायदियुद्धेपराजितः ॥ कथंनयुद्धंकुरुतेदेवकीनंदनोहरिः ॥ २८ ॥ आयातुयातुगोविंदःकार्यंजा
तंतुमामकम् ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःप्राप्तोमहाबाहुःकर्णपुत्रोमहायशाः ॥ २९ ॥ वृषकेतुःसमाहूयपंचभिर्नि
शितैःशरैः ॥ जघानताम्रकेतुंहिविरथंतमथाकरोत् ॥ ३० ॥ ततोन्यंरथमास्थाययावत्पातयतेशिशुम् ॥ तावद्रथोद्वितीयोऽपि
कर्णपुत्रेणचूर्णितः ॥ ३१ ॥ यंयंरथंप्रयात्येषसुचित्रःसिंहलीलया ॥ तंतंचिच्छेदसमरेवृषकेतुरुदारधीः ॥ ३२ ॥ एवंशतत्रयं
तेनरथानांतस्यपातितम् ॥ अन्यंरथंगतोराजाबाणैःकर्णात्मजंरणे ॥ ३३ ॥ मूर्च्छितंपातयामासदेहंव्याधिगणोयथा ॥ एवं
भित्वानुशाल्वंतंचक्रेपौरुषवर्जितम् ॥ ३४ ॥ यौवनाश्वंशरेणैवरथाद्भूमौव्यपातयत् ॥ सात्यकिस्तस्यतुरगान्हत्वाबाणैश्चस
प्तभिः ॥ ३५ ॥ करोतिनादंशंखस्ययावत्तेनाथपातितः ॥ कृतवर्माशराभ्यांहिपीडितोनिपपातह ॥ ३६ ॥ सुचित्रस्याग्रतोरा
ज्ञस्तदद्भुतमिवाभवत् ॥ विरेजुस्तेनराभूमौपतिताश्चास्यसायकैः ॥ ३७ ॥ क्षीणपुण्याइवजनागगनाद्भूतलेयथा ॥ बभ्रुवाह
नमायांतंसुचित्रोवीक्ष्यसंगरे ॥ ३८ ॥ प्रत्युवाचहसन्वीरस्त्वमेवपरियुद्ध्यसि ॥ क्षणंतिष्ठसियुद्धेमेपुरतोबाणपंचकम् ॥ ३९ ॥
त्वंविमोचयसेधैर्यात्त्यजेहंमौक्तिकंकरम् ॥ ॥जैमिनिरुवाच॥ ॥कार्ष्णिर्मुमोचनाराचान्पंचताम्रध्वजंप्रति ॥ तेबाणाःसप्त

१ उषापतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातेनसुचित्रेणविभेदिताः ॥ ४० ॥ रथःसंचूर्णितश्चास्यबभ्रुवाहस्यतत्क्षणात् ॥ पतितोभूतलेकार्ष्णिःखिलीभूतोमहारणे ॥ अ० ४२
॥ ४१ ॥ पततस्तस्यवीरस्यशरीराद्भूषणानिच ॥ विभिन्नानिविकीर्णानिनक्षत्राणीवसंक्षये ॥ ४२ ॥ तादृशंपार्थतनयंपातालत
लभेदिनम् ॥ खिलीकृत्ययथौरोषात्तिष्ठकृष्णेतिवादकः ॥ ४३ ॥ तंवीक्ष्यवीरानेत्राणिनिमील्यगतजीविताः ॥ तत्राभवन्महा
राजरुद्रंवीक्ष्येवजंतवः ॥ ४४ ॥ वाहनानिपरित्यज्यपलायंतेस्मसैनिकाः ॥ हंसध्वजंसमाकीर्णंबाणैस्तस्यमहात्मनः ॥४५॥
परित्यज्यप्रगच्छंतितस्मिन्युद्धेऽतिभास्वरे ॥ त्यक्त्वाऽथयुद्धेचास्त्राणितथाशस्त्राणिचापरे ॥ ४६ ॥ रुधिरौघेविलीयंतेमीनाइव
विशांपते ॥ नात्मानंतेप्रजानंतिशरजालेनमोहिताः ॥ ४७ ॥ माभैष्टवीरामाभैष्टेत्युक्त्वावीरोधनंजयः ॥ आजगामाथसमरेधनु
र्विस्फारयन्स्वकम् ॥ ४८ ॥ अब्रुवंस्तेहिकिंपार्थतुरंगेणकरिष्यसि ॥ गोत्रवध्याभयेनासौकुरुतेयज्ञमुत्तमम् ॥ ४९ ॥ अस्यह
स्तेननिखिलानस्मान्हत्वाधनंजय ॥ किंकरिष्यसिपुण्यंहियेनपूतोभविष्यसि ॥ ५० ॥ एवंविधांस्तदाशब्दान्ब्रुवाणाःसंगरेमु
हुः ॥ ततःपार्थेनवीरेणस्तंभितंतादृशंबलं ॥ ५१ ॥ ॥ इत्याश्वमे०जैमिनीयेताम्रध्वजविजयोनामद्विचत्वारिंशोऽध्यायः ॥४२॥
॥ जैमिनिरुवाच ॥ ॥ पार्थःसुचित्रमासाद्यनवभिःसायकैर्नृप ॥ विव्याधवक्षसिक्रुद्धस्तैःशरैःपातितोरथात् ॥ १ ॥ अन्यंस्यं
दनमारुह्यसुचित्रोरथिनांवरः ॥ व्यकिरत्पांडवंबाणैःसमंताद्घनवद्गिरिं ॥ २ ॥ पार्थोऽपितमदृश्यंहिकृत्वायुद्धेशिलीमुखैः ॥ स्व
शंखंपूरयामासतिष्ठेतिप्राहमारिष ॥ ३ ॥ रथंचिच्छेदतिलशःसहयंसूतसंयुतम् ॥ अन्यंरथंप्रयातोयंसुचित्रोरोषपूरितः ॥ ॥१०९॥
॥ ४ ॥ पार्थस्यतुरगान्सूतंपातयित्वाऽब्रवीद्वचः ॥ हयास्तेनिहताःसूतोमयायंपातितोरथात् ॥ ५ ॥ क्वगमिष्यसिनेष्यामिस्वपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रंहंससंयुतम् ॥ तस्यवाक्येनभिन्नोसौविव्याधार्जुनआहवे ॥ ६ ॥ तंवीरंरथसंयुक्तंचक्रेभग्नकलेवरं ॥ रथानांतस्यवीरस्यसह
स्त्रंपरिपातितम् ॥ ७ ॥ किरीटिनातदायुद्धेनायंतिष्ठतिसंगरात् ॥ पार्थंविव्याधनाराचैःसुचित्रोऽन्यरथंगतः ॥ ८ ॥ अर्जुनंमू
र्च्छितंचक्रेकृष्णस्यपुरतस्तदा ॥ मूर्च्छांत्यक्त्वाजघानाथसुचित्रंपांडवःशरैः ॥ ९ ॥ ततस्ताम्रध्वजःपार्थंसरथंदक्षिणांदिशम् ॥
बाणैःसुनिशितैर्निन्येयोजनंधरणीपथम् ॥ १० ॥ समागतंरथंवीक्ष्यपुनरेवमहाशरैः ॥ बिभेदसकलंतस्यपांडवस्यातिपौरुषात्
॥ ११ ॥ अर्जुनस्तंहिसरथंगगनेसायकैस्त्रिभिः ॥ प्रेरयामासवेगेनासिंहनादमथाकरोत् ॥ १२ ॥ सारथिंचरथंचैवप्राप्यपा
र्थोऽपरंरणे ॥ सुचित्रस्यघनांसेनांनिन्येयमपुरंप्रति ॥ १३ ॥ अर्जुनंव्यधमद्राजाशरैःकनकचित्रितैः ॥ उभौचित्रास्त्रविद्वांसौ
चित्रमंडलकारिणौ ॥ १४ ॥ वीरश्रियावृतौधीरौनमुंचेतांमहारणम् ॥ उभौयुद्धंपरित्यज्यनगतौतद्धिकौतुकम् ॥ १५ ॥ अक्षौ
हिणीनांद्विशतंपार्थेनविनिपातितम् ॥ सुचित्रेणापिपार्थस्यप्रयुतंनिहतंबलम् ॥ १६ ॥ चक्रतुर्दारुणंयुद्धमन्योन्यजयकांक्षि
णौ ॥ धनुश्चिच्छेदपार्थस्यध्वजंचकनकावृतम् ॥ १७ ॥ पताकांचक्रगोप्तारौसर्वोपकरणानिच ॥ छत्रंरथंचतुरगान्संरंभात्सू
तमेवच ॥ १८ ॥ यंयंरथंनृपोयातितंतंचिच्छेदशक्रजः ॥ सहस्रंपुनरेवास्यद्वितीयंजनमेजय ॥ १९ ॥ रथानांतत्रभग्नंहिसु
चित्रस्यातिधन्विनः ॥ पार्थबाणैःपीडितांगःपौरुषंनविमुंचति ॥ २० ॥ तस्यमांसकणाश्छिन्नाःपतंतिपवनाहताः ॥ कृष्णस्यम
स्तकेराजन्धरण्यांखेचसंस्थिताः ॥ २१ ॥ एवंविधंतदाजातंयुद्धंत्रैलोक्यमोहनम् ॥ वीरयोरुभयोर्घोरंदिनानांसप्तकंनृप ॥ २२ ॥
दिवारात्रंप्रकुर्वाणौयुद्धंवीक्ष्यभियावृताः ॥ सर्वेवीरास्तदाराजन्विस्मयंतस्यमेनिरे ॥ २३ ॥ सुचित्रःपाण्डवरथंगृहीत्वागग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेगतः ॥ श्येनवद्यचरद्राजन्नामिषंक्रोधमूर्छितः ॥ २४ ॥ चिक्षेपभूतलेदूरात्साश्वध्वजपताकिनम् ॥ तंनिरीक्ष्याथगोविंदः स्वकर
णदधौहरिः ॥ २५ ॥ ॥ ताम्रध्वजउवाच ॥ ॥ मयायंपोथितः पार्थः सरथोगगनाद्भुवि ॥ त्वयायदिधृतोहस्तेपौरुषंमामकं
शुभम् ॥ २६ ॥ तंतथाभाषमाणंतुराजानंमधुसूदनः ॥ जघानगदयामूर्ध्निपदाचहृदयेतथा ॥ २७ ॥ सभिन्नहृदयोभूपः प्राप
तत्कृष्णसम्मुखः ॥ स्वरथंसमवस्थायकृष्णंविव्याधसायकैः ॥ २८ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ पार्थत्वमेवसंग्रामेयुध्यस्वाहं
चयोधये ॥ आवयोः संगमेनायंविजेतव्योमतिर्मम ॥ २९ ॥ माशंकांकुरुवीरेऽस्मिन्महासत्वेधनंजय ॥ पश्यद्रवंतींपृतनांसुचि
त्रशरपीडिताम् ॥ ३० ॥ बभ्रुवाहनमुख्यायेतेऽमुनाहेलयाजिताः ॥ गाण्डीवमुक्तैर्नाराचैस्त्वंप्रपातयमाचिरम् ॥ ३१ ॥ शार्ङ्गे
णधनुषाचैनंपातयेनात्रचिंतनम् ॥ ततोमुमोचगोविंदः कार्मुकात्स्वान्महाशरान् ॥ ३२ ॥ अर्जुनः संमुखोवीरंविव्याधहरिणोदि
तः ॥ तथापिकेशवस्तंहिव्यकिरद्रथसंस्थितम् ॥ ३३ ॥ नरनारायणौतेनविद्धौबाणैः सुतेजनैः ॥ उभयोर्धनुषीचक्रेगुणहीने
स्वसायकैः ॥ ३४ ॥ उवाचकेशवंराजाहर्षेणोत्फुल्ललोचनः ॥ जनेनद्वौपृथग्भूतौसंयोज्यौभूतिमिच्छता ॥ ३५ ॥ अर्जुनस्यर
थंत्यक्त्वासूतत्वंतत्रकेशव ॥ महारथोऽपरोभूत्वायुध्यसेयत्नमास्थितः ॥ ३६ ॥ त्वयाविहीनः पार्थोऽसौपतत्येवनसंशयः ॥ सार
थिर्भवगोविंदमापातयधनंजयं ॥ ३७ ॥ ततः कृष्णोरथंत्यक्त्वापार्थसूतोभवत्पुनः ॥ प्रेरयामासतुरगान्जवनान्किंकिणीयु
तान् ॥ ३८ ॥ तंरथंचावसंघट्यकशाघातेनसारथिः ॥ ताडयामासवेगेनकोपादरुणलोचनः ॥ ३९ ॥ सुचित्रोपिशरैस्तीक्ष्णैर्द
शभिर्मधुसूदनम् ॥ विव्याधपाण्डवंषष्ट्याशराणांपृथिवीपते ॥ ४० ॥ छत्रंपार्थस्यचिच्छेदपुनः कृष्णंशतेनच ॥ अर्जुनस्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरस्यरथंचक्रेविचूर्णितम् ॥ ४१ ॥ गात्रंबिभेदनाराचैःसमंताल्लोमवाहिभिः ॥ यत्रयत्रार्जुनशरैर्नीयतेतत्कलेवरम् ॥ ४२ ॥ पुनरायातिपार्थस्यसमीपेशस्त्रसंयुतम् ॥ पदात्पदंतमायांतंसुचित्रंमाधवोऽक्षिपत् ॥ ४३ ॥ पदप्रहाराभिहतःपपातधरणीतले ॥ पुनरुत्थायवीरोऽसौगजंमत्तंसमाश्रितः ॥ ४४ ॥ तत्रसंस्थःशरैस्तीक्ष्णैर्व्यधमत्कृष्णपांडवौ ॥ रथंसकृष्णंसाश्वंतंचक्रेभ्रमसमाकुलं ॥ ४५ ॥ मूर्छांत्यक्त्वाचयेवीराबभ्रुवाहनसन्निभाः ॥ योद्धुंप्राप्तास्ताम्रकेतुंतेभिन्नाःपतिताःशरैः ॥ ४६ ॥ एवंविधंप्रयुद्ध्यंतंसुचित्रंमाधवःक्रुधा ॥ गृहीत्वादारुणंदिव्यंकरेचक्रंसुदर्शनं ॥ ४७ ॥ तिष्ठतिष्ठेतिराजानंसमरेऽप्राद्रवद्रथात् ॥ धराचकंपितातत्रदेवानांभयमाविशत् ॥ ४८ ॥ समुद्राश्चुक्षुभुःसूर्यश्चकंपेभ्रमितादिशः ॥ शेषाद्याःपन्नगाःसर्वेभयात्कुंडलिनोभवन् ॥ ४९ ॥ ताम्रध्वजोगजंत्यक्त्वासंमुखःकृष्णमागमत् ॥ तेनचक्रेणदेवेशश्चकारकदनंमहत् ॥ ५० ॥ शतमक्षौहिणीनांतुक्रुद्धेनहरिणाहतं ॥ ५१ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेताम्रध्वजयुद्धेश्रीकृष्णकोपोनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥

॥ जैमिनिरुवाच ॥ ॥ पतितांवीक्ष्यतांसेनांसुचित्रोहर्षपूरितः ॥ प्रोवाचकृष्णंकुपितंचक्रपाणिंमहाहवे ॥ १ ॥ सेनाहताकृतंकार्यंमध्येचांतरदायिनी ॥ इदानींत्वांहिपश्यामियथारूपमवस्थितम् ॥ २ ॥ सुदर्शनंचतेरूपंकथंत्यक्ष्येहमद्यवै ॥ पित्रानियुक्तोयज्ञार्थंतिष्ठेतिमधुसूदन ॥ ३ ॥ त्वमश्वंरक्षतादेवमयाकस्माद्विलोकितः ॥ यथाकाचंविचिन्वन्हिलभेद्दिव्यंमणिंतथा ॥ ४ ॥ अर्जुनार्थंत्वयापुण्यंयुद्धेपूर्वंसमर्पितम् ॥ अधुनास्वशरीरंहिनियोजयसिकेशव ॥ ५ ॥ चक्रहस्तंधारयामिपार्थंचरथिनांवरम् ॥ ममतातस्ययज्ञेऽस्मिन्यथाजायेतदैवतम् ॥ ६ ॥ एतावदुक्त्वावचनंचक्रहस्तंपरामृशत् ॥ दक्षिणेनकरेणैवकरंकृष्णस्यसंगरे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जै०अ० ॥ ७ ॥ वामहस्तेनदेवस्यपदंजग्राहवेगतः ॥ ललाटेस्वेपदंस्थाप्यसंमुखोऽर्जुनमाद्रवत् ॥८॥तमायांतंसकृष्णंहिपार्थोऽपिव्य अ०
॥१११॥ चरत्तदा ॥ कृष्णाज्ञयाशराणांस्वेकार्मुकेसंदधेशतम् ॥ ९ ॥ समाकिरत्तथाभूतंसुचित्रंजनमेजय ॥ पार्थंपदाताडयित्वाताम्रकेतु
र्महाबलः ॥ १० ॥ जग्राहकृष्णसंयुक्तंबाहुभ्यांसंगरेमुदा ॥ ततःकृष्णेनचाक्षिप्तःपपातधरणीतले ॥ ११ ॥ पततातेनतौकृष्णा ४४
वाकृष्टौहस्तवेगतः ॥ पतितौतावपितदापृथ्व्यांमोहसमन्वितौ ॥ १२ ॥ उत्थितःस्वयमेवासौयावत्पश्यतिभूतले ॥ तावद्ददर्श
तौयातौतुरंगौस्वपुरंप्रति ॥ १३ ॥ हतावशेषान्वीरांस्तान्गृहीत्वाप्रययौनृप ॥ मयूरकेतुंसंप्राप्यकालेनकियतातदा ॥ १४ ॥
स्थितोबहिःपुराभ्याशेरम्येवैयज्ञमंडपे ॥ पुत्रंवीक्ष्यागतंराजाहयौचपरमंबलम् ॥ १५ ॥ प्रत्युवाचहसन्वीरःपुत्रंस्वंतंशिखिध्व
जः ॥ ॥ मयूरध्वजउवाच ॥ ॥ पुनरेवहयोवत्ससंप्राप्तोवर्षवर्जितः ॥ १६ ॥ द्वितीयःकस्यतुरगोनृपतेर्धारितस्त्वया ॥ तंपु
त्रःप्रत्युवाचेदंनमस्कृत्याग्रतःस्थितः ॥ दीक्षितंशृंगहस्तंहिमृगाजिनपरिग्रहम् ॥ १७ ॥ ॥ ताम्रध्वजउवाच ॥ ॥ यज्ञा
र्थंधर्मराजेनसकृष्णोहयरक्षणे ॥ नियुक्तःसव्यसाचीहिधनुर्विद्याविशारदः ॥ १८ ॥ वीरैःपरिवृतोधीरैःसमयावीक्षितःपुरि ॥
बभ्रुवाहस्यनृपतेस्तुरंगंपरिरक्षतः ॥ १९ ॥ तत्रयुद्धंव्यवसितंयादृशंपृच्छमानिनम् ॥ निजंप्रधानंबलिनंवक्तारंबहुलध्वजम् ॥
इतिपुत्रवचःश्रुत्वाऽमात्यंपप्रच्छसादरम् ॥ २० ॥ ॥ बहुलध्वजउवाच ॥ ॥ प्रद्युम्नप्रमुखावीराःपांडवार्थेमहाबलाः ॥ पा
तितास्तवपुत्रेणपश्चात्कृष्णौहियोधितौ ॥ २१ ॥ ताभ्यांयुद्धंमहत्कृत्वागृहीत्वाकृष्णमाधवौ ॥ तस्मिन्रणेपातितौतौमूर्च्छितौतत ॥१११॥
वसूनुना ॥ २२ ॥ ततःपरंद्वौतुरगौनिर्गतौस्वेच्छयारणात् ॥ एतयोःपृष्ठतःप्राप्तस्ताम्रकेतुर्निजंपुरम् ॥ २३ ॥ मूर्च्छांत्यक्त्वाकृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णपार्थौकिंकर्तारौनवेद्मितत् ॥ वयंकुशलिनःप्राप्ताःसहयाःसांस्थितंत्विदम् ॥ २४ ॥ ॥ मयूरध्वजउवाच ॥ ॥ अकार्यंतु
महत्कृत्वापुत्रःप्राप्तोममांतिकम् ॥ गृहीत्वातुरगौमंदोहाकष्टंवंचितोऽस्म्यहम् ॥ २५ ॥ परित्यज्यवशंप्राप्तौहृषीकेशधनंजयौ
हयाभ्यांनैवमेयज्ञोभविष्यतिमतिर्मम ॥ २६ ॥ पुत्रकःशत्रुरूपेणप्राप्तोमांबाधितुंगृहे ॥ यदिदेवस्त्वयादृष्टोभगवान्मधुसूद
नः ॥ २७ ॥ सोर्जुनोयुद्धसमयेविनातंकथमागतः ॥ यथाहिदुर्भगानारीपतिंप्राप्यनिशामुखे ॥ २८ ॥ कदाचिद्दैवयोगेनर्नानि
द्रांप्रकुरुतेतथा ॥ त्वयाकृतंहरिंत्यज्यगच्छदूरेहिमद्गृहात् ॥ २९ ॥ वेत्सित्वमात्मनोबुद्धिंधन्यांतुरगसंग्रहात् ॥ तुलसीकान
नंत्यक्त्वाविजयाहिसमाश्रिता ॥ ३० ॥ वराचंपकजांमालामधःकृत्वासुमोहितः ॥ कस्तुगृण्हातिसरसोधत्तूरकुसुमस्रजम् ॥ ३१ ॥
यज्ञंत्यक्त्वागमिष्यामिहयौदूरेक्षिपाम्यहम् ॥ स्थानंशंससुदुर्बुद्धेयत्रतौकृष्णपांडवौ ॥ ३२ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवं
विनिश्चयंकृत्वास्थितःसनृपतिर्गृहे ॥ सपत्नीकःकृष्णकांक्षीपुत्रंगर्हन्पुनःपुनः ॥ ३३ ॥ कृष्णोमणिपुरेबुद्धः प्रबुद्धाश्चेतरेजनाः ॥
ततःकृष्णंसव्यसाचीप्राहेदंवचनंनृप ॥ ३४ ॥ ॥ अर्जुनउवाच ॥ ॥ क्कगतौतुरगौनाथक्कचायंभूपतिर्गतः ॥ तत्रमांनयदेवे
शयत्रयुद्धंप्रजायते ॥ ३५ ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ हयौरत्नपुरंपार्थगतौमन्येमहाहवात् ॥ तत्रगच्छामहेसर्वेमयूर
ध्वजपालिते ॥ ३६ ॥ त्वंमयासहितश्चाग्रेयांतुवीराश्चपृष्ठतः ॥ अग्रेतेदर्शयिष्यामिमयूरध्वजसाहसं ॥ ३७ ॥ गृहीत्वापांडवंह
स्तेप्रययौतंनृपंप्रति ॥ पृष्ठतोनिर्गतंसैन्यंपांडवस्यमहात्मनः ॥ ३८ ॥ वासुदेवस्ततःपार्थमिदंवचनमब्रवीत् ॥ ॥ श्रीवासुदे
वउवाच ॥ ॥ दीक्षितस्यपुरंरम्यंदिव्यप्राकारतोरणं ॥ ३९ ॥ पार्थपश्यनृपस्यास्यचरितंमानसंतथा ॥ प्रतारयितुमायाते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिसत्यंनमोक्ष्यति ॥ ४० ॥ वृद्धोहंब्राह्मणोभूत्वाप्रार्थयेयादृशंनृपं ॥ त्वांबालकंकरिष्यामिहितार्थंतवसुव्रत ॥ ४१ ॥ एह्यागच्छमयासार्द्धंप्रविशामिपुरंमहत् ॥ निशामध्येचरिष्यामिरक्षितंबहुभिर्जनैः ॥ ४२ ॥ ॥ जैमिनिरुवाच ॥ ॥ प्रविश्यतौतथाभूतौनिशामध्येत्वपश्यताम् ॥ निद्रितानांजनानांहिस्त्रीयुतानांवचेष्टितम् ॥ ४३ ॥ दृष्टाःकृष्णेनतेलोकावरमञ्चकशायिनः ॥ परस्परंप्रब्रुवाणाःकौतुकेनजनाधिप ॥ ४४ ॥ कश्चित्पुमान्निजांकांतांचंद्रदीपेनभासिताम् ॥ गृहीत्वावदनंतस्याःस्वकरेणाब्रवीद्वचः ॥ ४५ ॥ सर्वांगानिचतेवीक्ष्यभद्रेकुवलयाक्षिमे ॥ नतथाजायतेतृप्तिर्यथाकृष्णविलोकने ॥ ४६ ॥ नार्युवाच ॥ ॥ सकृष्णास्मिध्रुवंनाथरतिकालेहिपश्यसि ॥ मल्लोचनस्थंकृष्णंतमोक्षंमन्येसमागतम् ॥ ४७ ॥ ॥ प्रियउवाच ॥ ॥ गृहीताःकुटिलाभद्रेमदीयाःशिरसिस्थिताः ॥ त्वयाकरेणवामेनभिन्नकेशोनकिंभवे ॥ ४८ ॥ ॥ नार्युवाच ॥ ॥ मुंचाधरपुटंधीरमाभिंधिकुचमंडलम् ॥ सुवृत्तयोःकृतोभेदःस्खलनायोपजायते ॥ ४९ ॥ ॥ पुरुषउवाच ॥ ॥ सुवृत्तानांमौक्तिनांत्यक्तसंगाविमौकुचौ ॥ तावत्संपीडयिष्यामिभवेतांकृष्णचूचुकौ ॥ ५० ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंविधानिवाक्यानिशृण्वन्रात्रौजनार्दनः ॥ ततःप्रभातसमयेवर्त्तमानेऽर्जुनान्वितः ॥ ५१ ॥ प्रययौनृपतिंद्रष्टुमुपविष्टंवरासने ॥ विविधैःपार्थिवैर्गुप्तंमंडपेभूसुरैर्वृते ॥ ५२ ॥ कस्तूरीनिकरैश्चंद्रकलाभिश्चैवसंयुते ॥ नानारत्नचतुष्केथतंददर्शजनार्दनः ॥ ५३ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेताम्रध्वजविजयोनामचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ जैमिनिरुवाच ॥ ॥ दीक्षितंजाययायुक्तंतुरंगद्वयसंयुतं ॥ तमब्रवीत्तदाविप्रःस्वस्तीतिप्रथमंवचः ॥ १ ॥ ॥ द्विजउवाच ॥

१ वक्राःकेशाइतिशेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्तितेनृपशार्दूलविद्धिमांसंगतंद्विजं ॥ सशिष्यंपश्यसंप्राप्तंमंडपेयज्ञकारिते ॥ २ ॥ ॥ मयूरध्वजउवाच ॥ ॥ समुत्थि
तोऽस्म्यहंविप्रनमस्कर्तुंसशिष्यकं ॥ भवंतंयावदेवात्रतावत्स्वस्तिप्रभाषसे ॥ ३ ॥ नमस्कारंविनाविप्रस्वस्तिब्रूतेजनाययः ॥
शापेनांकिततःकार्यंतस्माद्युक्तंनतेकृतं ॥ ४ ॥ ॥ जैमिनिरुवाच ॥ ॥ पपातदंडवत्पश्चाद्वासुदेवस्यचाग्रतः ॥ समुत्थापित
एवासौकृष्णेनामितबुद्धिना ॥ ५ ॥ पप्रच्छनृपतिर्भूयोहरिंप्रच्छन्नभूसुरं ॥ कस्मात्प्राप्तंपूज्यपादैःसशिष्यैर्ममंडपं ॥ ६ ॥ किं
प्रियंभवतांकार्यंप्रब्रुवंतुमयाधुना ॥ धन्योऽस्म्यनुगृहीतोऽस्मिनादेयंममविद्यते ॥ ७ ॥ ॥ विप्रउवाच ॥ ॥ नमस्कारं
विनाविप्रैःस्वस्तिवाच्योनराधिपः ॥ विज्ञप्तिकालेतुपरैर्नमस्कार्योमहीपतिः ॥ ८ ॥ ॥ राजोवाच ॥ ॥ आदेशोदीयतांम
ह्यमार्यैरद्याविशंकया ॥ कुर्वेऽहंसकलंकार्यंजीवितेनधनेनच ॥ ९ ॥ ॥ ब्राह्मणउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामियदर्थमहमा
गतः ॥ रम्याद्धर्मपुरात्कर्तुंविवाहंस्वसुतस्यहि ॥ १० ॥ कृष्णशर्माद्विजस्तत्रकन्यायुक्तःपुरोहितः ॥ विद्यतेमान्यशीलोयंमत्वा
दास्यतिकन्यकां ॥ ११ ॥ आयामिपुत्रसहितोयावत्तेनगरंप्रति ॥ तावन्मार्गेवनेघोरेसिंहःकोपसमन्वितः ॥ १२ ॥ जग्राहपुत्रं
तरुणंपश्यतोममपार्थिव ॥ ततोमयास्वपुत्रस्यमोक्षणेचोद्यमःकृतः ॥ १३ ॥ स्मृतोनृसिंहस्तत्राशुनागतःस्मरणान्मम ॥ दुःखि
तंमांसवैसिंहःप्रत्युवाचहसन्निव ॥ १४ ॥ मनुष्यवाक्पीडयन्मेपुत्रगात्रंतदानखैः ॥ दंष्ट्राभिर्भीषणाभिश्चतर्जयन्लांगुलेनमा
म ॥ १५ ॥ ॥ सिंहउवाच ॥ ॥ वृथाश्रमंहिविप्रेंद्रपुत्रंप्रतिकरिष्यसि ॥ मयाग्रस्तंहिकालेननान्यस्तारयितुंक्षमः ॥ १६ ॥
गच्छशिष्येणसहितःस्वगृहंमाविचारय ॥ हिंस्राणांपुरतोवासोनसुखायोपजायते ॥ १७ ॥ अन्यंजनयपुत्रंत्वंयस्तेलोकप्रदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ अपुत्रस्यपरोलोकोनास्तिवेदेनभाषितम् ॥ १८ ॥ ॥ ब्राह्मणउवाच ॥ ॥ मांभक्षयित्वासिंहत्वंमुंचपुत्रंहिलोकद
म्॥ वृद्धस्याल्पायुषोव्यर्थंजीवितंपुत्रवर्जितम् ॥ १९ ॥ ॥ सिंहउवाच ॥ ॥ वयंतुमृत्युनाग्रस्तंघातयामोजनंक्वचित् ॥
साहाय्यकारकाःसर्वेसर्पहिंस्रजलादिकाः ॥ २० ॥ तवायुष्यंहिबहुलंगतायुस्तवपुत्रकः ॥ तस्माद्गच्छमयाज्ञप्तःकिमिदंक्रि
यतेत्वया॥२१॥ ॥ब्राह्मणउवाच॥ केनोपायेनदानेनतपसावाप्रमुंचसि ॥ तदाप्रोक्तंकेसरिणात्वत्तःकिम्प्रार्थ्यतेनृप ॥२२ ॥
मयूरध्वजउवाच ॥ ॥ विप्रेंद्रमामकेराष्ट्रेक्षुद्रःसिंहोनविद्यते ॥ नारसिंहंविनाकोऽन्यस्तवपुत्रंप्रधारयेत् ॥२३॥ ॥ ब्राह्म
णउवाच ॥ ॥ सिंहेनप्रार्थितंकिंचित्त्वत्तोयन्नृपसत्तम ॥ भविष्यतिहितद्देयंयत्त्वांयाचतिकेसरी ॥ २४ ॥ ॥ राजोवाच ॥ ॥
किम्प्रार्थितंकेसरीणामत्तोदास्यामितेऽनघ ॥ तद्ब्रूहिशीघ्रंविप्रेंद्रनानृतंममभाषितं ॥ २५ ॥ ॥ ब्राह्मणउवाच ॥ ॥ प्रदास्य
सिकथंतत्तुमयायत्प्रार्थ्यतेकिमु ॥ अपुत्रत्वंदारुणंहिकःप्राणान्दयितान्नृप ॥ २६ ॥ सिंहेनप्रार्थितंदत्ताभवांश्चेच्छृणुदारुणं ॥
तेनोक्तोऽहंमहारण्येशरीरार्धंसमानय ॥ २७ ॥ मयूरकेतोःपुत्रंतेततोमुंचामिभूसुर ॥ त्वदीयंतपसादग्धंवृद्धंगात्रंनरोचते ॥
॥ २८ ॥ नानाविधफलैःपुष्टंदिव्यदुग्धरसैर्वपुः ॥ मयूरकेतोर्निर्भिन्नंसुप्रियंममदीयताम् ॥ २९ ॥ यावच्चनानयेर्गात्रंतादृशं
तावदेवहि ॥ पुत्रंनतेभक्षयेहंसत्यमेतद्ददामिते ॥ ३० ॥ ॥ ब्राह्मणउवाच ॥ ॥ किमर्थंस्वशरीरंहिराजाभेत्स्यतिसुन्दरम् ॥
परार्थेनैवगच्छामिमृगाधिपनराधिपम् ॥ ३१ ॥ सिंहेनोक्तंपुनरपिगच्छविप्रनृपंप्रति ॥ ददौदधीचिरस्थीनिकवचंभानुजोय
था ॥ ३२ ॥ तथाप्रदास्यतिवपुर्विप्रार्थेनान्यथाभवेत् ॥ यशस्विनांशरीरेस्वेप्रीतिर्नमहतीक्वचित् ॥ ३३ ॥ रणमध्येपातनीयं ॥११३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजार्थेबाहुजैर्वपुः ॥ त्वंविप्रसुतहीनोऽसिततोयाहितदंतिकम् ॥ ३४ ॥ तंप्रार्थयमहीपालंगत्वाशोकविनाशनम् ॥ बहवोजनि
तास्तेनपुत्राराज्यंचिरंकृतम् ॥३५॥ त्वांवीक्ष्यकृपयायुक्तोभविष्यतिनसंशयः ॥ अर्थिनाप्रार्थ्यतेसर्वैजनोयच्छतुवानवा ॥३६॥
॥ ब्राह्मणउवाच ॥ ॥ इत्थंतेनवनेप्रोक्तंसिंहेनाहंप्रचोदितः ॥ सशिष्यस्त्वद्गृहंप्राप्तःपुत्रशोकातुरोनृप ॥ ३७॥ केनाप्युपाये
नवनेसिंहात्पुत्रंसमानय ॥ अदृष्टःकेसरीजातःकथयन्दारुणंवचः ॥३८ ॥ शरीरार्धैविनातस्यनागंतव्यंमहीपतेः ॥ आगतस्य
नतेपुत्रंविनागात्रंप्रमोचये॥३९॥इतितेनयदाप्रोक्तंतदात्वामहमागतः॥निवेद्यदुःखंभूपालेस्थातव्यंदुर्बलैर्जनैः॥४०॥रामचंद्रे
णवीरेणब्राह्मणस्यमृतःसुतः ॥ ब्रह्मचर्यव्रतकरःपुरानीतःस्वपौरुषात् ॥ ४१ ॥ नृपाशयाहंपुत्रार्थीभवंतंसमुपागतः ॥ रामतु
ल्यंहिसत्वेनमत्वाधैर्येणपार्थिव ॥ ४२ ॥ ॥ नृपउवाच ॥ ॥ तिष्ठविप्रेंद्रदास्यामिमंडपेस्वंकलेवरम् ॥ सर्वेषामत्रविप्राणा
मग्रेसाधूदितंमया ॥ ४३ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवमुक्त्वावचोराजापुत्रंराज्येन्यवेशयत् ॥ सुस्नातोजान्हवीतोयैःशाल
ग्रामशिलाजलैः ॥ ४४ ॥ तुलसीदलजांमालांकंठेकृत्वाहसन्निव ॥ शंखचक्रांकितंगात्रंकृत्वाराजामुदान्वितः ॥ ४५ ॥ सभामंड
पमागत्यसर्वान्विप्रानुवाचसः ॥ ॥ मयूरध्वजउवाच ॥ ॥ एनंकृष्णंविप्ररूपंपुत्रार्थमांसमागतम् ॥ ४६ ॥ अर्चयामिस्व
देहार्धाद्यथापुत्रयुतोभवेत् ॥ पश्यंतुकौतुकंसर्वेब्राह्मणायज्ञवाटके ॥ ४७॥ वार्धकीकाःसमायांतुकरपत्रसमन्विताः ॥ द्वौस्तं
भौरोपयंत्वत्रभिंदंतुममस्तकम् ॥ ४८ ॥ येषांप्रियोऽहंसततंतैर्नवाच्यंहिदूषणं ॥ ४९ ॥ ॥ इत्याश्वमेधिकेपर्वणिजै
मिनीयेमयूरध्वजदेहार्धदाननिश्चयोनामपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥छ॥ ॥छ॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ ॥ तस्यवाक्यंहितेश्रुत्वाप्रधानाश्चद्विजास्तदा ॥ कंपिताश्चभियायुक्ताबभूवुर्नृपसत्तम ॥ १ ॥ प्रब्रुवंतः सकरुणंकुतःकालनिभोद्विजः ॥ आगतःप्राणहरणोराज्ञोस्माकंहिनिर्दयः ॥ २ ॥ बहवोयाचकादृष्टास्त्वीदृशोनकदाचन ॥ राज्ञोदेहंयाचयेत्कोनिर्दयोनिरपत्रपः ॥ ३ ॥ सिंहोहिघातुकोल्लोकेप्रसिद्धोमांसभक्षकः ॥ अयंचमानुषोजात्याब्राह्मणोज्ञानवांस्तथा ॥ ४ ॥ स्वार्थनिष्ठःकथंजातोभूत्वाब्राह्मणजातिजः ॥ अस्माकंकउपायोऽत्रभावियत्तद्भविष्यति ॥ ५ ॥ अवश्यंभाविभावानांप्रतीकारोनविद्यते ॥ सत्यवादीप्रियातिथ्यःकथंवार्योमहीपतिः ॥ ६ ॥ किमयंविप्ररूपेणपुराप्राप्तोयथाबलिम् ॥ वामनोयज्ञसमयेतथाविघ्नोहरिंद्विजम् ॥ ७ ॥ एवंबदंतस्तेसर्वेतदाराज्ञानिवारिताः ॥ ततोनृपोहर्षितोभूद्दत्वादानान्यनेकशः ॥ ८ ॥ तदायातावार्धकीकाःस्तंभौद्वौरोपितौहितैः ॥ तिर्यक्काष्ठंकृतंचैकंदृढंबद्धंचरज्जुभिः ॥ ९ ॥ आदिदेशतदाराजाकरपत्रंस्वमस्तके ॥ धर्तुंस्वयंहर्षयुतःसर्वेषामेवपश्यताम् ॥ १० ॥ क्षालयित्वाविप्रपादौराजावचनमब्रवीत् ॥ शरीरार्द्धेनगोविंदःप्रीयतांयज्ञनायकः ॥ ११ ॥ अस्मत्कुलप्रसूतानांनराणांशुभमिच्छताम् ॥ सभायांविप्रकार्येहिददतांयौवनंधनम् ॥ १२ ॥ गृहाणविप्रभिन्नंमेशरीरार्द्धंनृकेसरी ॥ संतोषंपरमंयातुभिनद्मिस्वंकलेवरम् ॥ १३ ॥ रेरेमल्लामयाज्ञप्ताःकर्षंतुस्वबलान्मम ॥ गात्रंबद्धंपट्टगुणैर्माचिरंयातुभूसुरः ॥ १४ ॥ धन्योस्मिन्भूतलेजातोब्राह्मणेनामुनाकृतः ॥ शृण्वंतुलोकाःसकलाभाषितंममसादरम् ॥ ॥ १५ ॥ परोपकृतयेयेषांशरीरंवित्तसंग्रहः ॥ यातियत्तत्स्थितंशोच्यमुभयंदानवर्जितम् ॥ १६ ॥ तस्मात्प्रहर्षःकर्तव्योमांनिरीक्ष्यसभासदैः ॥ ॥ जैमिनिरुवाच ॥ ॥ हाहाभूतंतदाराष्ट्रंवीक्ष्यराजानमेवच ॥ १७ ॥ क्रंदमानंहिसंजातंकुररीगणसन्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भम् ॥ महिषीतस्यनृपतेःसमागत्याब्रवीन्नृपम् ॥ १८ ॥ विप्रस्यपुरतोहृष्टारम्याराजन्कुमुद्वती ॥ ॥ कुमुद्वत्युवाच ॥ ॥ राजन्विप्रायदेहार्धंत्वयादेयंमयाश्रुतम् ॥ १९ ॥ तवार्धगात्रंभार्यास्मिमांदत्वासत्यवाग्भव ॥ सजीवंदीयतेदानंभिन्नंतेगतजीवितम् ॥ २० ॥ परेणाभिन्नंपंचास्योनगृह्णातिमतिर्मम ॥ तुर्यांशोयदिदेयोहिभवेद्धर्ंहितेवपुः ॥ २१ ॥ अर्धंप्रार्थयतेसिंहःस्त्रीरूपंविद्धिमारिष ॥ प्राणनाथस्यपुरतोयानारीमृत्युमाव्रजेत् ॥२२ ॥ उत्तमांगतिमाप्नोतिनात्रकार्याविचारणा ॥ तस्यास्तद्वचनंश्रुत्वाविप्रःप्रोवाचसत्वरः ॥ २३ ॥ एकाग्रमनसंज्ञात्वाराजानंवाक्यकोविदः ॥ ॥ विप्रउवाच ॥ ॥ सिंहेनकथितंराजन्वामांगंस्त्रीमहीपतेः ॥ २४ ॥ दक्षिणांगंप्रदेयंमेवामांगंनीयतेकथम् ॥ शरीरदक्षिणांगंमेदातुंसिंहायचार्हसि ॥ २५ ॥ नदास्यसिकदाचित्त्वंनिराशोयामितंप्रति ॥ तेनैवप्रेषितोराजन्सामीप्यंतवसुव्रत ॥ २६ ॥ गत्वातंकथयिष्यामिपुत्रंभक्षयथासुखम् ॥ एवंविप्रेप्रवदतिशृण्वतांवैसभासदाम् ॥ २७ ॥ पश्यतांकौतुकंचैवराजपुत्रोऽतिहर्षितः ॥ तंब्राह्मणंशिष्ययुतंगिराकोमलयातदा ॥ २८ ॥ संपादयन्पितुःकीर्तिमुवाचपरयामुदा ॥ ॥ ताम्रध्वजउवाच ॥ ॥ योवैपितासपुत्रोहिश्रुतिरेषासनातनी ॥ ॥ २९ ॥ ब्राह्मणार्थेहिमत्पित्राशरीरार्धंसमर्पितम् ॥ शरीरार्धंसमग्रंहिपितुर्भवतिपुत्रकः ॥ ३० ॥ प्रसन्नस्तरुणंवीक्ष्यमांसपुष्टंमृगाधिपः ॥ भविष्यतिमहाबुद्धेपुत्रस्यचमहद्यशः ॥ ३१ ॥ भीष्मरामादिभिर्लब्धंपितृवाक्यकरैर्यशः ॥ ॥ ब्राह्मणउ० ॥ सत्यंत्वंभाषसेपुत्रवचःकेसरिणःशृणु ॥ ३२ ॥ पुत्रेणभार्ययाभिन्नंमयूरध्वजमस्तकम् ॥ द्विधाजातंशरीराद्धिदक्षिणांगंत्वमानन ॥ ३३ ॥ कथंतदन्यथाकर्तुंशक्यतेमद्विधेनतु ॥ ॥ जैमिनिरुवाच ॥ ॥ ततःसनृपशार्दूलोवारयित्वाप्रियांसुतम् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तयोःकरेददौराजाकरपत्रंमुदान्वितः ॥ स्त्रीपुत्रयोःपुरस्तस्यब्राह्मणस्यमहात्मनः ॥ ३५ ॥ जपन्केशवरामेतिनृसिंहेतिचधैर्य
तः ॥ ददृशुस्तंतथाभूतंसर्वेदेवाःसवासवाः ॥ ३६ ॥ यदाधृतंमस्तकेस्वेकरपत्रंमहात्मना ॥ महतांचाभवत्ग्लानिर्दुःखिताःपौ
रजाजनाः ॥ ३७ ॥ भार्याजग्राहतद्वाक्यात्करपत्रंचपुत्रकः ॥ गायंतीरामरामेतिब्राह्मणंवाक्यमब्रवीत् ॥ ३८ ॥ सर्वेषांशृण्व
तांतत्रभिनद्मिस्वपतिंद्विज ॥ नृसिंहेनपुराभिन्नःस्तंभोयद्वत्सुकोपिना ॥ ३९ ॥ विदारितोदैत्यनाथस्तद्वन्नाथंमहामतिम् ॥
॥ नृपउवाच ॥ ॥ करपत्रंकरस्थंतेप्रियेपश्यामिताद्दशम् ॥ ४० ॥ केतक्याःकोमलंपत्रंशरीरेसुखदंयथा ॥ त्वंभिंधिकंमेनिः
शंकंकरजैरिवसंगमे ॥ ४१ ॥ यथातत्रनमेपीडाजायतेचनखैःप्रिये ॥ तथाद्यकरपत्रस्यदंतैःकमलकोमलैः ॥ ४२ ॥ ततःसात
स्यभूपस्यमस्तकंपुत्रसंयुता ॥ बिभेदकरपत्रेणसमक्षंकृष्णपार्थयोः ॥ ४३ ॥ हाहाकारोमहानासीद्भिन्नेकेजनमेजय ॥ वामने
त्रेजलंप्राप्तंतदाविप्रोदुरासदः ॥ ४४ ॥ प्रत्युवाचमहीपालंभिन्नंभ्रमिततारकम् ॥ नग्रहीष्यामितेगात्रंरुदन्यच्छसिमारिष
॥ ४५ ॥ अभावोपहतंदानंनगृह्णंतिविपश्चितः ॥ विनापुत्रेणमेस्वर्गोरुद्धस्तिष्ठतितिष्ठतु ॥ ४६ ॥ सिंहोयातुयथास्थानंगृहीत्वा
ममबालकम् ॥ रुदित्वावामनेत्रेणराजादेहार्धमप्ययम् ॥ ४७ ॥ ददातितदहंविप्रःकथंगृह्णामिसत्तमः ॥ एतावदुक्त्वावचनंप
रित्यज्यमहीपतिम् ॥ ४८ ॥ प्रययोपश्यतांतेषांपार्थयुक्तोजनार्दनः ॥ गच्छंतंब्राह्मणंवीक्ष्यपतिंप्राहकुमुद्वती ॥ ४९ ॥ गृहीत्वा
मस्तकंभिन्नंकराभ्यांसमुखीसती ॥ ॥ कुमुद्वत्युवाच ॥ ॥ सत्यव्रतमहाबुद्धेवदान्यानांशिरोमणे ॥ ५० ॥ ब्राह्मणस्त्वांम
याभिन्नंपरित्यज्याद्यगच्छति ॥ नाथवारयगच्छंतंविप्रंदेहार्धयाचकम् ॥ ५१ ॥ गतेऽगृहीत्वाविफलातवकीर्तिर्भविष्यति ॥ ॥

१ शिरः । कंशिरोंबुनोरित्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपउवाच॥ ॥भिन्नंत्वयाधृतंभद्रेमस्तकंमामकंपुनः ॥ ५२॥ ततोऽब्रवीमिविप्रेंद्रंव्रजंतंकाननेगृहान् ॥ मागच्छमुनिशा
र्दूलश्रुत्वायाहिवचोमम ॥ ५३॥ वामांगलोचनेप्राप्तंयस्मात्तोयंद्विजोत्तम॥ दक्षिणांगंब्राह्मणार्थेमदीयंसाधुसङ्गतम् ॥५४॥
वामांगंपतितंभूमौवृथायातीतिरोदितम् ॥ नव्यथाकरपत्रान्मेतीक्ष्णाद्भवतिताद्दशी ॥ ५५॥ याद्दशीविप्रविमुखाद्वामांगाद्दि
हजायते॥इतितस्यवचःश्रुत्वाप्रसन्नःपरमेश्वरः ॥ ५६॥ आत्मनोदर्शयामासस्वरूपंभूपसन्निधौ ॥ समालिंग्याब्रवीद्वीरंकृ
ष्णःकमललोचनः ॥ ५७॥ धन्योऽसिनृपशार्दूलमयूरध्वजसुव्रत॥ परीक्षितोऽसिबहुधामयात्वंपाण्डवेनच ॥ ५८॥ यज्ञंकु
रुमहाबाहोसपत्नीकःसपुत्रकः॥ ताम्रध्वजेनसंग्रामेतोषितौतवसूनुना ॥ ५९॥ मूर्च्छितौसैन्यसहितौकृतौवीरप्रमाथिनौ॥
मांनिरीक्ष्यकुतोदुःखंजायतेप्राणिनामिह ॥ ६०॥ देहार्धंहित्वयादत्तंमद्वाक्येनमहात्मना ॥ तवयज्ञेभविष्यामिकर्मकर्तामहा
मते ॥६१॥ यस्माद्भक्तपराधीनोजितोस्मितवसूनुना॥ युधिष्ठिरस्यतुरगंगृहाणत्वमपिस्फुटम् ॥ ६२॥ द्वौहयौसमयेहुत्वा
कीर्तिंप्राप्नुहिशोभनाम्॥ कीद्दशस्तवगात्रस्यभेदोऽयंममपश्यतः ॥ ६३॥ ॥मयूरध्वजउवाच॥ ॥धामतेपरमंविष्णो
पदंचबहुलंप्रभो॥ भिन्नंकृत्वाशरीरंमेप्रविष्टंयद्बहिःस्थितम् ॥ ६४ ॥ श्रीपतेवासुदेवाद्यधन्योहंतेकृतःप्रभो ॥ किंमेयज्ञेनगो
विंदयदितुष्टोसिकेशव ॥ ६५॥ द्दष्टेत्वयिजगन्नाथेकीर्तितेनमितेश्रुते॥ यज्ञकोटिकृतंपुण्यंभवतीतिनसंशयः ॥ ६६ ॥ त्वया
प्रोक्तंकर्मकर्तातथाकुरुजनार्दन॥ तुरंगौमांचमत्पुत्रान्मत्प्रियांचमहाजनम् ॥ ६७॥ गृहीत्वायज्ञकर्तॄंश्चयज्ञोपकरणानिच ॥
स्वकरेणमहाविष्णोहृदयंस्वंनिवेशय ॥ ६८॥ भवंतंप्राप्यगोविंदंमयाचेत्क्रियतेक्रतुः ॥ प्रहसिष्यंतिमांविप्रावेदवेदांगपार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाः ॥ ६९ ॥ महांतमग्निमुत्सृज्यहिमेनपरिपीडितः ॥ कःसेवेतनरोमूढोविस्फुलिंगानूजनार्दन ॥ ७० ॥ तृषितोजान्हवीतो
यंहित्वानोहारमाव्रजेत् ॥ मूढधीर्वाजिनौप्राप्यत्वामवज्ञायमाधवम् ॥ ७१ ॥ यजतेहयमेधाभ्यांसदंड्योरविसूनुना ॥ पुत्र
कोमेकृष्णपार्थौत्यक्त्वायुद्धेसमागतः ॥७२ ॥ भाग्योदयान्मयादृष्टौनरनारायणाविमौ ॥ नमस्तेपुण्डरीकाक्षब्रह्मणेगुरवेनमः॥
॥ ७३ ॥ ब्रह्मगोलोकसाहस्त्रैःफलितायनमोनमः ॥ हंत्रेगोप्त्रेनमस्तेऽस्तुसृष्टिकर्त्रेप्रमीढुषे ॥ ७४ ॥ अनन्तायसुपूर्णायवेद
निःश्वासकारिणे ॥ श्रीधरायनमोनाथशेषमंचकशायिने ॥ ७५॥ लवणघ्नायशान्तायनमस्तेकलितायच ॥ ज्ञानायज्ञानग
म्यायनमःकालजितायच ॥ ७६ ॥ नमोदृश्यायवेद्यायनमःपारंपरायच ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंस्तुतस्तदातेनवि
श्वात्मामधुसूदनः ॥ ७७॥ प्रसन्नात्माऽभवत्कृष्णोभक्तिंपार्थायदर्शयन् ॥ त्रिरात्रंचस्थितस्तत्रभक्त्यातुष्टोजगत्प्रभुः ॥ ७८॥
केशवेनसभंपश्चात्प्रययौवाजिपालने ॥ दत्वाकृष्णकरेसर्वंवित्तंजीवितमेवच ॥ सुहृद्भिःसहितोराजापार्थमालिंग्यचाग्रतः ॥
॥ ७९ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेमयूरध्वजविजयवर्णनंनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ तुरंगमौगतौराजन्पुरेवैवीरवर्मणः ॥ सर्वसैन्ययुतःकृष्णःपालयन्नन्वगान्मुदा ॥ १ ॥ धर्मश्चतुष्पदोय
त्रतेनभूपतिनाकृतः ॥ जामातायस्यशमनोराष्ट्रेतिष्ठतिमूर्तिमान् ॥ २ ॥ सारस्वतपुरेरम्येनिवसंतिहिधार्मिकाः ॥ धर्मार्थकाम
मोक्षाणांपारगायत्रमानवाः ॥ ३ ॥ स्वप्नेऽपिकुत्सितेमार्गेनगच्छंतिकदाचन ॥ अर्जुनंकृष्णसहितंरक्षंतंवरवाजिनौ ॥ ४ ॥ शु
श्राववीरवर्मासौराष्ट्रेबहुलसेवके ॥ आदिदेशततोराजाग्रहणार्थंमहाबलान् ॥ ५ ॥ तुरगौमामकेराष्ट्रेपांडवस्यमहात्मनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रताधर्मरतापुण्यसर्वस्वदायिनी ॥ ७ ॥ त्वामेवप्रत्यहंवेत्तितांत्वंवरयमाचिरं ॥ पराशांसफलांसंतःकुर्वंत्येवहिनेतरे ॥ ८ ॥ मनु
ष्यवेषमास्थायस्वभृत्यैःसहितोव्रज ॥ सारस्वतेपुरेरम्येपालितेवीरवर्मणा ॥ ९ ॥ चतुष्पदोयत्रवृषोगततातंकाश्चमानवाः ॥ पु
रीचसात्वयाधन्याभविष्यतिसतिर्मम ॥ १० ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ नारदंप्रेरयामासपुरेसारस्वतेयमः ॥ वैशाखेमा
सिशुक्लेवैपक्षेतांवरयाम्यहम् ॥ ११ ॥ इत्युक्तोनारदस्तेनप्रययौवीरवर्मकम् ॥ कथयामासवृत्तांतंयमेनोक्तंसुमंगलम् ॥ १२ ॥
राजाकन्याविवाहंतुकर्तुंकामोव्यवस्थितः ॥ यमोऽपिनायकानांतुशतमष्टोत्तरंमुदा ॥ १३ ॥ आदिदेशमहाकायान्महाबलपरा
क्रमान् ॥ महावीरंनिजंचैवतेषांमध्येपुरस्कृतम् ॥ १४ ॥ क्षयंप्रधानंरोगाणांनायकंवाक्यमब्रवीत् ॥ शेषंहिब्रह्महत्यायाःस्वर
धातुविनाशकम् ॥ १५ ॥ ॥ यमउवाच ॥ ॥ यक्ष्मन्विवाहेरम्येमेस्वभृत्यैःपरिवारितः ॥ आमंत्रितःसमायाहिभुविचित्र
पुरंप्रति ॥ १६ ॥ ॥ यक्ष्मोवाच ॥ ॥ कथंसमागमोनाथतस्मिन्राष्ट्रेभविष्यति ॥ विप्रप्रियाश्चतेलोकाराजापिद्विजसेव
कः ॥ १७ ॥ विप्राणांपठतांचोग्रोध्वनिर्धूमश्चहोमजः ॥ मन्नेत्रश्रोत्रयोर्दुःखंकरिष्यतिनसंशयः ॥ १८ ॥ प्रमेहंपुत्रकंसूक्ष्मंघृ
ताक्षंमूत्रनाशकं ॥ बहुकालेनजंतूनांमद्गुणैःसंमितंभुवि ॥ १९ ॥ विषूचिकायास्त्वधिकोमहिमाकेनलभ्यते ॥ क्षणेनमानुषंहंति
दासीतरविनंदन ॥ २० ॥ भ्रातुःस्थानंनपश्यामिपांडोरमिततेजसः ॥ भ्रातुर्भार्याविशालाक्षीशोफाहर्त्रीपरंजनं ॥ २१ ॥ त
यासहसुतस्तेनपांडुनासजलोदरः ॥ जनितःस्वगुणैस्तुल्यस्तंकुत्रविनिवेशये ॥ २२ ॥ राजाधर्मपरोनित्यंशुचिश्चैवमहाजनः ॥
यत्रजातोभानुपुत्रतत्राहंकिंशरीरवान् ॥ २३ ॥ कोहंशोच्यतरोनाथव्रणानांपुरतःस्थितः ॥ त्वयासुमानितानांहिपरमाणुनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भः प्रभो ॥ २४ ॥ एतेषांपरमंतेजोभूपतीन्हंतिपौरुषात् ॥ गुरुस्त्रीसंगमरतान्विप्रघ्नान्शिशुघातकान् ॥ २५ ॥ व्रणस्यबहु
रूपाणिशतमष्टोत्तरंविभो ॥ विचर्चिकाप्रियायस्यपुत्रश्चास्यभगंदरः॥२६॥ गुरुस्त्रीगामिनांशिश्नमूलेकिलभगोभवेत् ॥ गुरू
णांस्वप्रशास्तृणांछायांक्वापिनमानवाः ॥ २७ ॥ स्पृशंतिधर्मनिरतावीरवर्माऽपितादृशः ॥ एतस्यस्फोटराजस्यनिवासस्तत्र
नेष्यते ॥ २८ ॥ त्रयोदशविधश्चायंज्वरराट्सन्निपातिकः ॥ गुरुस्तुशंभुजनितःकुतःस्थास्यतितद्दृढ ॥ २९ ॥ अतिसारश्च
वीरोऽसौनायकस्तेमहाबलः ॥ प्रियासंग्रहणीयस्यपुत्रोध्मानश्चभासुरः ॥ ३० ॥ अरोचकःक्रोधनश्चपुत्रःपरमपातकः॥एतै
र्तोनिवासंक्कप्राप्स्यतेनाथतद्वद ॥ ३१ ॥ शतानित्रीणिशूलानांतानियानिमहात्मनाम् ॥ गमिष्यंतिलयंतत्रस्थानहीना
निमारिष ॥ ३२ ॥ हिक्काश्वासादयश्चैतेकासकुष्ठामहाबलाः ॥ उपरिस्थावायुभूताभ्रमितुंनक्षमाःपुरे ॥ ३२ ॥ धनुर्वातादयो
वाताःकर्णशूलोऽपिभासुरः ॥ नेत्ररोगामहाकायामुखरोगाश्चपातकाः ॥ ३४ ॥ वल्मीकंगण्डमालाचतथाऽपस्मारएवच ॥ बा
लकोडमरूरौद्रोविस्तीर्णाचशिरोव्यथा ॥ ३५ ॥ एतेमुख्यतमारोगास्तथाऽन्येबहवोयम ॥ लयाज्ञप्तानगच्छंतिपुरेकस्मान्म
हीपतेः ॥ ३६ ॥ ॥ यमउवाच ॥ भवंतोविविधाकारामहारोगामहाबलाः ॥ स्वरूपेणनृपंयांतुदिव्यालंकारमण्डिताः॥३७॥
यथाममपुरेवासःक्रियतेवचनंतथा ॥ सर्वैरपिनृपस्यास्यकर्तव्यंवीरवर्मणः॥३८॥ येजीवाःपापसंयुक्तास्तेपश्यन्तुनिपातनान्॥
रोगान्भयानकान्भूमौशुभान्सुकृतकारिणः ॥ ३९ ॥ मांचपश्यंतिधर्मिष्ठाधर्मरूपंनचेतरे ॥ कालानलशरीरंहिवीक्षंतेपापका ॥११८॥
रिणः ॥ ४० ॥ ब्रह्महत्याकृतायेनप्राणिनागतबुद्धिना ॥ ननिस्तीर्णाब्रह्महत्यागलत्कुष्ठविशेषतः ॥ ४१ ॥ तस्यगात्रेरोगरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जस्थानंतेनात्रसंशयः॥ त्वयाग्रस्तोजनःकुर्याद्यदिजाप्यंहिशांकरम् ॥ ४२ ॥ महारुद्रंसहोमंचदानंविप्राययच्छति ॥ सुवर्ण पुरुषंनिष्कैश्चतुर्विंशतिभिःकृतम् ॥ ४३ ॥ ततःपरंतस्यगात्रंत्यज्यतांसर्वदात्वया ॥ कृतपुण्यस्यपुरतोभृत्यवद्वर्तनंतव ॥४४॥ क्षयीतुवित्तहीनश्चसोमवारेसमाश्रयेत्॥ गौतमींसागरस्थांचेत्स्नानार्थंमासमात्रकम् ॥ ४५॥ स्नातमात्रंजनंयक्ष्मन्मापीडय पतिष्यसि॥इयंचतेप्रियादेवीपातनीतत्क्षणान्नृणाम् ॥ ४६ ॥ विषूचिकानरंयेनपातकेनप्रगच्छति ॥ देवतार्थेदीयमानंवित्तं हरतिमन्दधीः॥ ४७॥ ब्राह्मणान्भोजनस्थान्हिवियोजयतिपातकी ॥ अन्नमेकःस्वयंभुंक्तेवंचयित्वासुतान्द्विजान् ॥ ४८॥ तं प्रियातेमहाभागबाधतेसाविषूचिका॥अन्नदंसुरसेवांहिकुर्वंतंनतुपीडयेत्॥ ४९ ॥ पितृगोत्रभवांनारींकामयंतिविमोहिताः॥ नराश्चनार्योऽपितथापुरुषेषुचसंयुताः ॥ ५० ॥ तेपीड्यंतेप्रमेहेनपुत्रकेणतवप्रभो॥ सुवर्णतस्कराश्चान्येमूत्रकृच्छ्रेणसर्वदा॥ ॥ ५१ ॥ सुवर्णसिकतांदत्वासौवर्णंदेवभूषणम्॥ पलंप्रमाणंतुलितंप्रमेहान्मुच्यतेजनः ॥ ५२ ॥ सुवर्णकमलंदानंकृत्वापूर्णप लेनतु॥ द्विजायश्रोत्रियायात्रमूत्रकृच्छ्रात्प्रमुच्यते ॥ ५३ ॥ लिंगपीडाशिवस्वंचयेहरंतिविलोभतः ॥ परप्रभांसमालोक्यमु खंस्फुरितकारिणः॥ ५४॥ कुम्भीपाकादिनरकेपतंतिहेमकारिणः॥ कुनखाश्चप्रजायंतेमांसपिंडोपमाःपरम्॥ ५५॥ शरीरं पाण्डुसंकाशंपाण्डुनासहिपीड्यते॥ ददातिदानंविप्रायमाहिषंशास्त्रसंमतम्॥५६॥ पिण्याकसर्षपोपेतंजपाकुसुमपूजितम्॥ तीर्थेरम्येमुद्गलाख्येवैष्णवंकुरुतेजपम्॥५७॥ त्रिपंचाशत्सहस्राणियोनरस्तंप्रमुंचतु॥पाण्डुनामातवभ्रातानचेत्सोऽपिमरिष्य ति ॥ ५८ ॥ अजांप्रयच्छतिनरःश्रद्धयाकाञ्चनावृताम्॥ विप्रायवेदविदुषेशोफामुञ्चतितंनरम् ॥ ५९ ॥ नरस्थातव्यंत्वया

१ चतुर्भिर्व्रीहिभिर्गुंजागुंजाःपंचपणःपणान् । अष्टौधरणमष्टौचकर्षंतांश्चतुरःपलं । तुलांपलशतंप्राहुर्भारःस्याद्विंशतिस्तुलाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यगात्रेपुंसः कथंचन ॥ जलोदरोयातुजनंगर्भपातिनमादरात् ॥ ६० ॥ पश्चात्त्यजतुतंभूतप्रपापुण्येनभूषितम् ॥ शतम
ष्टोत्तरंघोरंव्रणानांममानिनां ॥ ६१ ॥ तुलापुरुषदानेनसमग्रंतत्प्रशाम्यति ॥ अर्धप्रसूतांसुरभींयथोक्तांयः प्रयच्छति ॥
॥ ६२ ॥ तस्यगात्रेचतैः सर्वैर्व्रणैः स्थेयंनकर्हिचित् ॥ विचर्चिकानरंदुष्टंरसतस्करिणंचिरम् ॥ ६३ ॥ परिपीडयतेतावद्यावद्दत्तं
नकांचनम् ॥ भगंदरोजनंत्यक्त्वासौवर्णकदलीफलम् ॥ ६४ ॥ दातारंपलमात्रंहिब्राह्मणायप्रगच्छतु ॥ सन्निपातोनरंचैवशिव
प्रासादभंजकम् ॥ ६५ ॥ समाश्रयतिभूलोकेयातिविश्वासघातकम् ॥ परापवादवक्तारमतोसारोव्रजत्वसौ ॥ ६६ ॥ जीर्णपूर्तं
प्रकर्त्तारंसमाश्रयतुतेसखा ॥ धर्मद्रव्यंगृहीतारंयातुसंग्रहणीजनम् ॥ ६७ ॥ मेषीप्रदानात्सायातुअतिसारप्रियासती ॥ भुं
जतोब्राह्मणान्द्वेष्टितमरोचकआव्रजेत् ॥ ६८ ॥ भोजयेद्द्विविधान्नेनतंचजह्यादरोचकः ॥ धिक्शब्दंसुहृदोयश्चप्रहारंकुरुतेज
नः ॥ ६९ ॥ संपीडयंतियेलोकान्पथिभल्लैः प्रहरस्यतु ॥ आशाभंगंविदधतेयांतुशूलगणाश्चतान् ॥ ७० ॥ कारागृहनिबद्धान्नृ
न्पंजरस्थांश्चपक्षिणः ॥ पथिचोरैर्हन्यमानान्मोचयंतिमहाभयात् ॥ ७१ ॥ सदाशिवेतुयेभक्तानतान्शूलशतत्रयं ॥ हिक्काप्रि
यातुयात्वेनंसहतेनपरोदयम् ॥ ७२ ॥ लक्षहोमप्रकर्त्तारंमाव्रजेदनघंजनम् ॥ निरीक्ष्ययक्षवित्तंचधनुर्वातः प्रयातुतम् ॥ ७३ ॥
माषमेरुंतैलवापींप्रदातारंविमुंचतु ॥ हरेः कथांनशृण्वंतियेनसाधुजनस्यच ॥ ७४ ॥ तान्नरान्कर्णशूलोयंव्याप्नुयान्नेतरान्जू
न् ॥ कपिलाधेनुदातॄंश्चशृण्वंतोवैष्णवींकथाम् ॥ ७५ ॥ परस्वेजायतेदृष्टिर्नेत्ररुक्तंनरंव्रजेत् ॥ हारिणंपरदाराणामन्नंयानेन
भुंजताम् ॥ ७६ ॥ सुवर्णकमलस्यात्रप्रदातारंविमुंचति ॥ शैलेशंसोमनाथंचकाशीनाथंचवीक्षकम् ॥ ७७ ॥ यदिपश्यतिसंसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रंविनाशयतितत्क्षणात् ॥ किंतुनेत्ररुजांवृंदंनदाहयतितादृशान् ॥ ७८ ॥ पितृहाचेतनाहीनोमातृहांधश्चजायते ॥ नरकांतंप्र
कुर्वीतप्रायश्चित्तैर्यथाविधि ॥ ७९ ॥ वाणीयस्यनसंजाताकदाचित्साधुवर्णने ॥ परापवादिनीनित्यंमुखसंतापकारिणी ॥८०॥
मुखरोगस्तमालोक्यसकुटुंबःप्रहृष्यति ॥ यःस्तौतिसाधुसंयुक्तंशिवंभक्त्यासदाजनः ॥ ८१ ॥ ददातिवृषभंश्वेतंब्राह्मणायय
थोचितम् ॥ मुखरुक्तंजनंवीक्ष्यदूराद्दूरम्पलायते ॥ ८२ ॥ त्वंरक्षेतिधनंप्रोक्तःस्वयंलोभेनमोहितः ॥ स्थापितंनददात्यस्मैवि
त्तेशायोरुपातकी ॥ ८३ ॥ वल्मीकंतत्पदंप्राप्यस्थूलंजायेतरोपितम् ॥ ब्राह्मणेभ्योधनंभूरिप्रयच्छतिजनस्तुयः ॥ ८४ ॥ तं
नवल्मीककोयातिपीडितुंहरिसेवकम् ॥ परस्याननसंस्थंयोग्रासंहरतिमंदधीः ॥ ८५ ॥ देवोपकरणान्येवगंडमालातमीहते ॥
नानारत्नप्रदानेनगंडमालाविलीयते ॥ ८६ ॥ गुरुपत्नींगच्छतीहसकंडूकुष्ठवान्भवेत् ॥ कंडूकुष्ठंप्रयात्येवशिवघंटाप्रदानतः
॥ ८७ ॥ वदान्यंलाभसंतुष्टंपरंवीक्ष्यविमूर्च्छति ॥ तमपस्माररोगोऽयंभ्रामयन्परितिष्ठति ॥ ८८ ॥ कृष्णधेनुप्रदानेनहेमपु
ष्करतोव्रजेत् ॥ दंभेनाचरतेधर्मंगजचर्मप्रयातुतं ॥ ८९ ॥ हंसतीर्थोदकस्नानकारकंनसमाश्रयेत् ॥ शिरोर्तिप्रमुखारोगायां
तिविश्वासघातकम् ॥ ९० ॥ सूर्यपूजादिकैःपुण्यैःप्रणश्यंतिनसंशयः ॥ धर्मसूत्रंपरस्याथयेच्छिंदंतिनराधमाः ॥ ९१ ॥ डमरु
र्वालुकंगाढंमुंचतस्तान्नपादतः ॥ स्वर्णसूत्रस्यदेवेभ्योब्राह्मणेभ्यःप्रदानतः ॥ ९२ ॥ जायंतेवालुकैर्मुक्ताबाधतेतान्नवालुकम् ॥
कर्मणामनसावाचापरद्रोहंकरोतियः ॥ ९३ ॥ संप्रेत्यापुत्रतांगच्छेन्नात्रकार्याविचारणा ॥ शृणुयाद्धरिवंशंवैवारत्रितयमेवच ॥
समुक्तस्तेनपापेनपुत्रवान्धनवान्भवेत् ॥ ९४ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंयमेनयत्प्रोक्तंशृण्वंतिभुविमानवाः ॥ तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोगजापीडाभविष्यतिकदाचन ॥ ९५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेकर्मविपाकवर्णनंनामाष्टचत्वारिंशोऽध्यायः ४८
॥ जैमिनिरुवाच ॥ ॥ ततोयमस्तुतैर्भृत्यैः कामरूपैः समन्वितः ॥ परिणेतुंनृपसुतांनारदोयत्रविद्यते ॥ १ ॥ तत्प्राप्यरम्यंन
गरंवीक्ष्यसारस्वतंयमः ॥ वरयामासधर्मिष्ठांमालिनींतत्परांविभुः ॥ २ ॥ होमशालांस्थितांदेवींतर्पयंतींहुताशनं ॥ अर्चयं
तींनारदादीनृषीन्मृगयतींपतिं ॥ ३ ॥ तांप्राप्यकामिनींधर्मोराजानंवाक्यमब्रवीत् ॥ प्रसन्नोऽस्मिवरंब्रूहिकंप्रयच्छामितेऽ
नघ ॥ ४ ॥ स्वल्पेनकिलकालेनतवमृत्युर्विलोक्यते ॥ ॥ वीरवर्मोवाच ॥ ॥ जामातस्तेवरंनैववांछाम्यत्रात्मजीवदं ॥
॥ ५ ॥ कन्यावित्तेनजीवंतितेनरानिरयंगताः ॥ ॥ धर्मराजउवाच ॥ ॥ भवान्दाताप्रतिग्राहीधर्मोऽहंतोषितस्त्वया ॥६॥
आशीर्भिरभिनंदामिदातारंकोऽत्रविस्मयः ॥ ॥ नृपउवाच ॥ ॥ यस्मिन्दिनेमेमरणंभविष्यतिहिभानुज ॥ ७ ॥ त्वद्वरेणह
षीकेशंतस्मिन्नहनिकामये ॥ ॥ यमउवाच ॥ ॥ तावत्त्वांनविमुंचामियावत्कृष्णसमागमः ॥ ८ ॥ त्वन्निमित्तंपरबलंधारयि
ष्यामिमेवरः ॥ ॥ वासुदेवउवाच ॥ ॥ एषपार्थयमोभातितवसैन्यंप्रतापयन् ॥ ९ ॥ वीरवर्माणमायांतंपश्यमद्दर्शनोत्सुकं
वृतंमहारथैर्वीरैः सन्नद्धोभवपांडव ॥ १० ॥ मयूरकेतुप्रमुखाबभ्रुवाहनकर्णजौ ॥ प्रद्युम्नाद्याश्चयुत्ध्यंतुकौतुकंत्वंविलोकय ॥
॥ ११ ॥ भविष्यतिमहद्युद्धमनेकगजपातनं ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवतिदेवेशेकृष्णेपार्थरथस्थिते ॥ १२ ॥ वीरवर्मा
र्जुनंप्राहप्राप्ययुद्धेतथाविधे ॥ एतेमयाजितावीरास्त्वदीयाः पार्थसंगरे ॥ १३ ॥ परंनमामिकाकंडूस्त्वांविनापरिशाम्यति ॥
गोविंदभववीरस्त्वंपार्थोभवतुवानवा ॥ १४ ॥ सहस्वमत्प्रहारंत्वंतिष्ठमामुंचसंगरं ॥ एतावदुक्त्वावचनंशरैः सप्तभिरर्जुनं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ ताडयामासहृदयेबाणषष्ट्याजनार्दनं ॥ बाणैस्तेपंचभिर्वीरामूर्च्छिताःपतिताःक्षितौ ॥ १६ ॥ मयूरकेतुप्रमुखास्तद
द्भुतमिवाभवत् ॥ अर्जुनोऽपिनृपंबाणैःसमंताद्व्यकिरद्रणे ॥ १७ ॥ मुंचाश्वौमामकौक्रोधाद्धुवाणोऽपिपुनःपुनः ॥ ॥ नृपउवा
च ॥ ॥ उभौगृहीतौतुरगौयथायुद्धेमयाऽर्जुन ॥ १८ ॥ तथाऽत्रधारयेवीरौसंमुखौमाधवार्जुनौ ॥ ॥ जैमिनिरुवाच ॥ ॥ पा
र्थंबाणसहस्रैस्तुसकृष्णंवीरवर्मकः ॥ १९ ॥ संछादयित्वाव्यनदत्सतोयइवतोयदः ॥ तस्यबाणान्सव्यसाचीचकारतिलशः
क्षणात् ॥ २० ॥ सुमंत्रइवशत्रूणांदेशान्प्राज्ञैरधिष्ठितः ॥ जघानसप्तभिर्बाणैर्वीरवर्माणमाहवे ॥ २१ ॥ पार्थंजघानषष्ट्या
सौशराणांतिग्मतेजसां ॥ वासुदेवंशतेनापिहनूमंतंशतेनच ॥ २२ ॥ हयाभिन्नाःशरैर्घोरैर्धृताःकृष्णेनयेकरे ॥ तस्माद्गच्छं
तितेभूमौविषमायांनराधिप ॥ २३ ॥ अन्येवीराःशरैश्छन्नानदृश्यंतेचभूतले ॥ भ्रमितंपांडवबलंमोहेनेवयथाजगत् ॥२४॥
वीरमर्माणमालोक्यकृष्णःप्रोवाचपांडवं ॥ ॥ श्रीवासुदेवउवाच ॥ ॥ वेत्सिपार्थमहाबाहोयथान्येक्षत्रियाजिताः ॥ २५ ॥
तथाविजेष्यामिरणेवीरवर्माणमत्रवै ॥ नासौशक्योमयाजेतुमुपायैस्तेनिपातिताः ॥ २६ ॥ यथाकर्णस्यतच्चक्रंग्रस्तंभूम्या
महारणे ॥ नास्यचक्रंग्रसेद्देवीसमर्थोजायतेपुनः ॥ २७ ॥ सुदर्शनेनतच्छिन्नंशिशुपालशिरोमहत् ॥ नास्यकंठात्पातयितुंक्ष
मंचक्रंहिमामकं ॥ २८ ॥ सिंधुराजस्यविशिखैर्नीतंशीर्षंरणाद्बहिः ॥ यैस्तावकैर्नतैरस्यवीक्ष्यतेदाहदंमुखं ॥ २९ ॥ हनूमाने
वसंग्रामेरथंलांगूलबंधनैः ॥ निबध्नातुहिवीरस्यसंग्रामेवीरवर्मणः ॥ ३० ॥ भ्रामयित्वाशतगुणंप्रमुंचतुमहार्णवे ॥ ॥ हनु
मानुवाच ॥ ॥ नेदंवनंरावणस्यजंबुमालीनराक्षसः ॥ ३१ ॥ जानकीत्रासकारिण्योराक्षस्योनपुरःस्थिताः ॥ ॥ श्रीवासुदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वउवाच ॥ ॥ मयादिष्टोरथंचास्यप्रक्षिपत्वंहिवायुज ॥ ३२ ॥ अप्याकार्यशतंकार्यंधर्मार्थेहित्वयामया ॥ ॥ जैमिनिरुवा
च ॥ ॥ प्रेरितोवासुदेवेनगृहीत्वास्यरथंहरिः ॥ ३३ ॥ साश्वंससूतंसनृपंप्रस्थितोगगनंप्रति ॥ परित्यज्यरथंराजातत्क्षणा
त्पांडवस्यहि ॥ ३४ ॥ गृहीत्वारथमाकाशेप्रपेदेपवनात्मजं ॥ प्रत्युवाचहनूमंतंत्वयामेनीयतेरथः ॥३५॥ शून्योहिविपुलःकृष्ण
रथंपश्यमयाहृतं ॥ नयिष्यसिरथंयत्रतत्रमाधवपांडवौ ॥ ३६ ॥ नयिष्यामिनमुंचामिदैवात्त्यक्तौत्वयारणे ॥ क्षीराब्धौकृष्णना
थस्यशयनंशेषमंचके ॥ ३७ ॥ रमाविरहिणीनित्यंयाचिंतयतिमाधवं ॥ पार्थभक्त्याहृतंकांतंसाप्राप्नोतुमयार्पितं ॥ ३८ ॥ न
यथातेभातिसूर्योनचंद्रंवीक्षतेतथा ॥ यन्निमित्तंगतश्चंद्रस्तंजानंतुविचक्षणाः ॥ ३९ ॥ त्वत्तोऽधिकंकृतंकर्महृदिजानातितत्त्वतः ॥
॥ हनुमानुवाच ॥ ॥ महिमातेमयादृष्टोवर्णितोतुलयाऽनघ ॥४०॥ तनोतिपौरुषंस्वंयःसाधुभिर्वर्ण्यतेनसः ॥ ॥ वीरवर्मोवा
च ॥ ॥ रथंगृहीत्वामेवीरनगंतुंपार्यतेत्वया ॥ ४१ ॥ सहस्वमत्प्रहारंहिमयाकृष्णौयथाधृतौ ॥ ततोजघानसरथंहनूमंतंस्वमु
ष्टिना ॥ ४२ ॥ तस्यमुष्टिप्रहारेणनयययौपवनात्मजः ॥ एवमेकेनतेवीरास्त्रयोयुद्धेतथाधृताः ॥ ४३ ॥ तंनृपंहृदयेकृष्णोजघान
स्वपदात्वरन् ॥ मूर्छितःसपपातोर्व्यांगृहीत्वाचरणौहृदि ॥ मुहूर्तार्धेनतांहित्वापुनरेवोत्थितोऽब्रवीत् ॥ ४४ ॥ मयात्रयोधृतायू
यंनैकोऽहंविधृतस्त्रिभिः ॥ यमेनमरणंप्रोक्तंमदीयंतद्गतंकुतः ॥ ४५ ॥ नीतौपार्थस्यतुरगौमयावीराःप्रतोषिताः ॥ कृष्णांघ्रि
स्पर्शतोनूनंमृत्युर्मेऽद्यपलायितः ॥ ४६ ततोवीक्ष्यनृपंकृष्णःस्वेरथेसमवस्थितं ॥ उवाचपांडवंयुद्धेशृणुफाल्गुनमेवचः ॥४७॥
नायंवर्षसहस्रेणविजेतव्यस्त्वयामया ॥ सर्वास्त्रसंग्रहंवेत्तिलघुहस्तोमहाबलः ॥ ४८ ॥ सर्वेजितारणेवीरास्तथाऽहमपितोषि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः॥ ॥ अर्जुनउवाच॥ ॥ येनत्वंतोषितोनाथविजयीसप्रजायते ॥ ४९ ॥ पौरुषेणमदीयेननैवाप्नोतिपराजयम् ॥ एवंब्रु
वाणंवीरोऽसौपार्थंप्रोवाचसत्वरः॥ ५० ॥ वीरवर्माप्रसन्नस्त्वंमैवंवदधनंजय॥ ॥ वीरवर्मोवाच॥ ॥ चराचरंत्वयापार्थश
क्यतेजेतुमाहवे॥ ५१ ॥ त्वद्वाक्येनामुनावीरप्रसन्नंजायतेमनः ॥ इत्युक्त्वाधनुरुत्सृज्यपतितःकृष्णपादयोः॥ ५२ ॥ निपपात
तदाराजापार्थमालिंग्यसत्वरः॥ तुरगाभ्यांसमंस्वंहिराज्यंदेहंस्वकंददौ ॥ ५३ ॥ श्रीकृष्णनाथस्यकरेकृत्वावीरैश्चसौहृदम् ॥
तोषयन्कृष्णनाथस्यभक्त्याचित्तंपुरःस्थितः ॥ ५४ ॥ षष्ठेऽथदिवसेराजादर्शयामाससत्वरम् ॥ सारस्वतंपुरंस्वंहिवित्तंपार्था
यधीमते॥ मौक्तिकान्यष्टधायानिधनानिचबहूनिच ॥ ५५ ॥ रत्नजातंतुसकलंयन्नेतुंनैवशक्यते॥ गजानांचन्द्रशुभ्राणांसह
स्राण्येकसप्ततिः॥ ५६ ॥ एकतःश्यामकर्णान्हितुरगान्सुबहूनपि॥ सुन्दरीणांसहस्राणिनवपार्थकरेददौ ॥ ५७॥ स्वयंपुरः
सरोभूत्वापालयामासवाजिनौ॥ ततःपार्थमुखावीराददृशुर्भासुरंनदम् ॥ ५८ ॥ नानाचक्राकुलजलमावर्त्तशतसंकुलम् ॥
नयंतिहिगजान्यत्रमीनास्तानितरेझषाः ॥ ५९ ॥ महद्भिर्जनकल्लोलैर्हसंतमिवसागरम् ॥ पार्थोऽब्रवीन्महाभागंवीरवर्माण
मादरात् ॥ ६० ॥ प्रतियामिनदंयातौहयौवारितरौमम ॥ पोतैस्तारयमत्सैन्यंवीरवर्मातथाऽकरोत् ॥ ६१ ॥ तीर्णंसैन्यंसम
ग्रंहिपार्थस्यजनमेजय॥ ६२ ॥ ॥ इत्या० प० जैमिनीये वीरवर्मविजयकथनंनामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥
॥ जैमिनिरुवाच॥ ॥ सारस्वतपुरान्मुक्तौवाजिनौनिर्गतौनृप॥ लंबोदरंनमस्कृत्यवक्ष्येऽहंयत्रतौगतौ॥ १ ॥ वायुवेगसमौ
दांतौचंद्रदीप्तिमुखौहरी॥ चंद्रहासपुरंप्राप्तौततःकौंतलकंशुभम् ॥ २ ॥ पृष्ठतोऽनुययुःसर्वेकृष्णप्रद्युम्नजिष्णवः॥ हंसध्वजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ताम्रकेतुःप्रवीरःफाल्गुनिर्वृषः ॥ ३ ॥ वीक्षमाणास्तुरंगौतौव्यामोहाविष्टचेतसः ॥ वाजिनौनःकुतःप्राप्तौकेननीतौतलंग
तौ ॥ ४ ॥ आकाशमुत्प्लुतौकिंतु वियद्गीवाःस्मतेऽभवन् ॥ तावद्ददृशुराकाशेपुरुषंदीप्ततेजसं ॥ ५ ॥ भ्राजमानंश्रियातीवद्वितीय
मिवभास्करम् ॥ मुनीनांप्रवरंचैववेदवेदांगपारगं ॥ ६ ॥ नारदंकलहप्रेप्सुंवैष्णवानांगरीयसम् ॥ कृष्णमाधवगोविंदनृसिंह
मधुसूदन ॥ ७ ॥ जपंतंमनसानित्यंभक्त्याकेवलयायुतं ॥ पृथक्पृथङ्नमश्चक्रुर्मुनिंतंफाल्गुनादयः ॥ ८ ॥ कुतःप्राप्तंपूज्यपा
दैर्दृष्टौनःकिंतुरंगमौ ॥ इत्यमुंपरिपप्रच्छफाल्गुनःस्वामिगौरवात् ॥ ९ ॥ नारदस्त्वब्रवीदश्वौगतौकौंतलकंपुरं ॥ यत्रराजाचं
द्रहासोवैष्णवःपालितांपुरीं ॥१०॥ यस्मैकुंतलकोराजाराज्यंदत्त्वावनंययौ ॥ धृष्टबुद्धेःप्रधानस्यकन्यांयःपरिणीतवान्॥११॥
केरलाधिपतेःपुत्रःकुलिंदेनानुपालितः ॥ लक्ष्मीपतेःप्रसादात्सप्राप्यकौंतलकांपुरीम् ॥ १२ ॥ चंद्रहासोमहाबाहुर्योद्धातादृङ्
नविद्यते ॥ अमीनृपतयस्तस्यकलांनार्हंतिषोडशीं ॥१३ ॥नारदस्यवचःश्रुत्वाबीभत्सुर्विस्मयान्वितः॥प्रत्युवाचकआहोस्विच्च
चंद्रहासोमहाबलः ॥ १४ ॥ शंसनारदमेसर्वंचरित्रंविस्मयान्वितम् ॥ चंद्रहासस्यनृपतेर्विस्तरेणयथातथं ॥ १५ ॥ योभक्तोह
रिमेधस्यवासुदेवस्यभूपतिः ॥ ॥ नारदउवाच ॥ ॥ समयःकीदृशःपार्थहयौमार्गच्युतौतव ॥ १६ ॥ चिंतातुरोधर्म
राजोविद्यतेहास्तिनापुरे ॥ ॥ अर्जुनउवाच ॥ ॥ उभयोःसेनयोर्मध्येकथंकृष्णमुखादहम् ॥ १७ ॥ अश्रौषंस्वस्थचित्तः
सन्कुरुक्षेत्रेकथानकम् ॥ सत्कथाश्रावणेयेषांपुंसांनसमयोभवेत् ॥ १८ ॥ वंचितास्तेहिकालेननराह्यल्पायुषोभुवि ॥ तस्मा
त्सर्वप्रयत्नेनकथयस्वकथामिमां ॥ १९ ॥ अश्वोमेयातुविप्रेंद्रयज्ञोभवतुवानवा ॥ श्रेयोर्थिभिर्नरैःसम्यक्श्रोतव्यावैष्णवीक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

था ॥ २० ॥ एतद्यज्ञशतंचाश्वमेधादीनांप्रकीर्तितम् ॥ ॥ नारदउवाच ॥ ॥ केरलाधिपतिःपूर्वमासीद्राजासुधर्मिकाः ॥
॥ २१ ॥ राज्यंचकारमेधावीविधिवत्पालयन्महीम् ॥ तस्यपुत्रोऽभवन्मूलनक्षत्रेबहुभाग्यवान् ॥ २२ ॥ तस्मात्कतिपयैरेवदि
वसैर्वेष्टितंपुरं ॥ वैरिभिस्तस्यनृपतेरंतेश्लेष्मादिभिर्यथा ॥ २३ ॥ युद्धंकृत्वासनृपतिर्जहौप्राणान्सुधार्मिकः ॥ परलोकगतंश्रु
त्वापतिंपत्न्यन्वगान्मुदा ॥ २४ ॥ पितृभ्यांरहितंबालंधात्रीकौंतलकंपुरम् ॥ निन्येपुरःश्रियस्तस्याभविष्यत्पतिमूर्जितम् ॥
॥ २५ ॥ वर्षाणित्रीणिचतथापालितोयत्नतःशिशुः ॥ धात्र्याकंडनपेषादिकर्मभिःकौंतलेपुरे ॥ २६॥ ध्यायंतीस्वनृपंधात्रीसंत
प्यतिदिनेदिने ॥ ततःपुंचत्वमगमद्धात्रीबालंविनासती ॥ २७ ॥ सोऽर्भकस्त्र्यब्दिकोगौरोलक्षणैरभिलक्षितः ॥ वामपादेलघुं
षष्ठीमंगुलिंबिभ्रदेवहि ॥ २८ ॥ तदास्नेहेनबहुनाकाभिश्चित्प्रतिपालितः ॥ स्त्रीभिःपंचाब्दिकोजातस्ततःस्वैरंचचारसः ॥२९॥
वीथ्यांतथाऽर्भकैःसार्धंरेमेभुंक्तेचतैःसह॥भोजयंतिचतंकाश्चित्स्नापयंतिपुरस्त्रियः॥लेपयंतिसुगंधैश्चचंदनैर्वरयोषितः॥३०॥स्व
पित्यपिचताभिश्चबालस्तस्मिन्पुरेऽर्जुन ॥ कंचुकादिप्रयच्छंतिवरोष्णीषंचकाश्चन॥३१॥उपानहौपट्टसूत्ररज्जुबिभ्रच्छुचिःशु
चिः॥धृष्टबुद्धेःप्रधानस्यमंदिरंस्वेच्छयागमत्॥३२॥ विप्रैर्योगीश्वरैःशांतैर्मुनिभिःसमलंकृतं॥तंशिशुंमुनयःसर्वेदृष्ट्वाविस्मयमा
गताः॥३३॥पश्चाच्चबुभुजुस्तेनशिशुनापांडुनंदन॥धृष्टबुद्धिर्विनीतःसन्तान्मुनीन्पर्यपूजयत्॥३४॥अर्घ्यादिक्रिययासम्यग्
भोजयामासपायसं॥विविधान्नमपूपांश्चमोदकान्वटकानपि ॥३५॥तृप्तास्तेमुनयोबालःस्वाचांताधौतपाणयः॥धृष्टबुद्धिप्रदत्ते
नचंदनेनसुगंधिना ॥३६॥ वस्त्रालंकरणैरम्यैस्तोषितास्तेऽब्रुवन्वचः ॥ धृष्टबुद्धेऽभिनंदामश्चिरंजीवसुखीभव ॥ ३७॥ यस्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावीक्षितोबालः पुरस्तात्पंचवार्षिकः ॥ कोऽयंकस्यसुतःप्राप्तःकस्माद्देशाच्चतद्वद ॥ ३८ ॥ इतिपृष्टोधृष्टबुद्धिःप्रत्युवाचस्मय
न्निव ॥ कतिबालानसंत्यस्मिन्ननाथाःपुटभेदने ॥ राजकार्यगरीयस्त्वान्नाहंजानामिबालकम् ॥ ३९॥ ॥ मुनयऊचुः ॥ ॥
मनोहरोलक्षणलक्षितांगोबालोध्रुवंराज्यधरोविभाति ॥ त्वंधृष्टबुद्धेप्रतिपालयैनंत्वत्संपदांपालयिताऽर्भकोऽग्रे ॥ ४० ॥ ततो
विसृष्टामुनयःसरोषंबुद्ध्याऽमुनाचिंतयताकिमीदृक् ॥ यथागतंतेमुनयोऽभिजग्मुःसराजमंत्रीभृशमन्वतप्यत् ॥ ४१ ॥ किमे
भिरीड्यैरुदितंवचोमांयत्संपदांतेऽधिपतिर्भविष्यति ॥ बालःकथंतद्विपरीतकर्तातेषांमुनीनामहमास्मिवाक्यम् ॥ ४२ ॥ विचा
र्यमंत्रीनृपतेःशिशोर्वधंसमाह्वयत्सोंऽत्यजचंदमातुरः ॥ रेरेपशुघ्नावनगव्हरंमहद्विनीयबालंप्रतिहंतुमर्हथ ॥४३॥ चिह्नंशरीर
स्यकिमप्यवश्यमानाय्यमस्मत्परितुष्टिकारि ॥ ततोभवद्भ्योविविधामहिष्योमयाप्रदेयाघटदुग्धभाजः ॥ ४४ ॥ ॥ नारद
उवाच ॥ ॥ तस्यवाक्यंसमाकर्ण्यचांडालाहर्षिताःशिशुम् ॥ प्रतार्यजगृहुर्मर्त्तांनिन्युस्तंवनगह्वरम् ॥ ४५ ॥ भयानकैःपक्षि
संघैःसेवितंकंटकैर्युतम् ॥ सुधार्मिकस्यतनयंहसंतमवधार्यतम् ॥ ४६ ॥ शस्त्राणिशितधाराणिकोशेभ्योजगृहुस्तदा ॥ भ्रम
तातेनशिशुनायादृष्टाप्रतिमाहरेः ॥ ४७ ॥ शालग्रामशिलारम्यातांमुखेसोऽर्भकोऽक्षिपत् ॥ संक्रीड्यमानःशिशुभिर्यष्टिपा
षाणगोलकैः ॥४८॥ उच्यमानोवयस्यैःकिंसुखेनक्रीडसेऽमुना ॥ वर्तुलेनोपलेनाद्यसोऽब्रवीत्तान्शिशून्प्रति ॥४९ ॥ सखायः
संतिबहुधाचित्रपाषाणगोलकाः ॥ ईदृशोऽनुपमःस्निग्धोनापरोवीक्षितोमया ॥ ५० ॥ क्रीडाम्येभिरहंपूर्ववर्तुलैरश्मगोलकैः ॥
भग्नेषुतेषुचांतेऽहंरमिष्याम्यधुनाध्रुवम् ॥५१॥ सबालस्तांशिलांरम्यांधारयन्वदनेऽरमत् ॥ ॥ नारदउवाच ॥ ॥ अनुग्र ॥१२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हान्ममपुराध्रुवोविष्णुमतोषयत् ॥ ५२ ॥ तथैवपार्थदेवेशंदध्यौनारायणंस्वयम् ॥ कृष्णकृष्णजगन्नाथवासुदेवजनार्दन॥५३॥
चांडालाःशितधारैश्चखड्गैर्घ्नंतिजगत्पते ॥ पाहिमांपरमानंदसर्वव्यापिन्नमोस्तुते ॥ ५४ ॥ ध्रुवश्चरक्षितोयेनप्रह्लादोगजराट्
तथा ॥ निर्नाथनीचदीनानांत्वंनाथःपरिगीयसे ॥ ५५॥ नमातानपिताबंधुरस्माकंनचगोत्रजाः ॥ नत्रातायदिगोविंदःकोमेत्रा
ताभविष्यति ॥ ५६ ॥ पाहिव्यसनतोमाऽद्यसर्वव्यापिन्नमोस्तुते ॥ ततोदेवःसभगवांश्चांडलांस्तानमूमुहत् ॥ ५७॥ मोहि
तास्त्वंत्यजावाक्यमब्रुवन्कीदृशःशिशुः ॥ सुकुमारोविशालाक्षोदीर्घबाहुर्मनोहरः ॥५८॥ किंधृष्टबुद्धिनाप्रोक्तंहंतव्योबालकोव
ने ॥ यच्चांत्यजावयंपूर्वंनानापापेनकर्मणा ॥ ५९ ॥ बालकस्यवधाद्घोराभविष्यामोऽत्रकीदृशाः ॥ अथवाकेनदोषेणपितृभ्यांर
हितोऽभवत् ॥ ६० ॥ इत्युदीर्यशिशोर्देहंनिरीक्षंस्तेंऽत्यजास्तदा ॥ वामपादेकृशांषष्ठीमगुलिंददृशुस्तदा ॥ ६१ ॥ छित्वानया
मश्चिह्नार्थंधृष्टबुद्धेर्दुरात्मनः ॥ इत्युक्त्वाचिच्छिदुःषष्ठीमंगुलितंविमुच्यच ॥ ६२ ॥ त्वरितास्तेपुरंजग्मुश्चिह्नमादायहर्षिताः ॥
धृष्टबुद्धिंनमस्कृत्यदर्शयामासुरंगुलिं ॥ ६३ ॥ जहर्षहृदिदुर्बुद्धिर्मयाकारिवचोवृथा ॥ मुनीनामथचांडालान्माहिषीभिरतोषय
त् ॥ ६४ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेचंद्रहासोपाख्यानेपंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ शृणुपार्थमहाबाहोसबालोगहनेवने ॥ स्मरणात्तवमित्रस्यचांडालैर्नहतस्तदा ॥ १ ॥ बालोवातरुणो
वृद्धःस्त्रीपुमान्देवकीसुतम् ॥ स्मरत्यहर्निशंपार्थकृच्छ्रान्मुक्तोनसंशयः ॥ २ ॥ छिन्नषष्ठांगुलिर्बालःक्षरद्रुधिरलेपवान् ॥ भृशं
रुरोददुःखार्तोमोहयन्हरिणीगणम् ॥ ३ ॥ पाहिमांदेवदेवेशकृष्णनाथकृपानिधे ॥ कृच्छ्रान्मोचयमांकांतसर्वव्यापिन्नमोऽस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ ४ ॥ ताहरिण्यःसमागम्यलिलिहुश्चरणंशनैः ॥ अस्मत्पतिःस्वभर्तारंविहायवनगह्वरम् ॥ ५ ॥ प्रविष्टःकामुकोऽस्माकंत
स्मात्तेनविवर्जितः ॥ मुखरूपेणचंद्रोऽयंस्त्रवदश्रुलवःस्फुटम् ॥ ६ ॥ वाहनेनविनास्वामीनभसःस्खलितोभुवि ॥ प्रसादयंत्य
इवतालिलिहुर्विजनेवने ॥ ७ ॥ पक्षिणोदुःखिताःसर्वेछायांपक्षैःस्मकुर्वते ॥ उलूकावृन्दशश्चैवस्थितादुःखान्ननिर्गताः ॥८॥
पारावतास्तुतद्दुःखात्कृत्वातुकठिनंस्वरम् ॥ पूरयंतिस्मपाषाणैरुदरंशोकविह्वलाः ॥ ९ ॥ एतस्मिन्नंतरेप्राप्तोदेशाध्यक्षःकुलिं
दकः ॥ तद्देशरक्षणार्थायआगतोवनगह्वरे ॥ १० ॥ अथोददर्शतंबालंस्त्रवदश्रुलवाननम् ॥ जपंतंहरिनामानिरामगोविं
दमापते ॥ ११ ॥ त्राहिमांकरुणासिंधोद्रौपदीचयथापुरा ॥ किमुपेक्षसिमांबालंवनेमात्राविवर्जितम् ॥ १२ ॥ यद्युपेक्षसि
मानाथतवैवहितदात्रपा ॥ त्वद्भक्तानावसीदंतिश्रुतमेतन्मयाविभो ॥ १३ ॥ श्रुत्वावाक्यंसनृपतिःकुलिंदोविस्मयान्वितः ॥ अ
वतीर्यहयात्क्षिप्रंबालंचपरिसांत्वयन् ॥ १४ ॥ उवाचवाक्यंमेधावीसोऽश्रूणिपरिमार्जयन् ॥ कःपितातवकामाताक्कचतेसुह
दांगणः ॥ किमर्थंनिर्जनेऽरण्येस्थितःप्रब्रूहिमांशिशो ॥ १५ ॥ ॥ बालकउवाच ॥ ॥ ममंमातापिताकृष्णस्तेनाहंपरिपा
लितः ॥ तमपश्यन्महाराजरोदनंक्रियतेमया ॥ १६ ॥ श्रुत्वैतच्चिंतयामाससराजाजनमेजय ॥ ममापुत्रस्यजायेतपुत्रोऽसौ
वैष्णवःशिशुः ॥ १७ ॥ इत्युक्त्वातंसमालिंग्यवाजिपृष्ठेत्वरोपयत् ॥ स्वयंचारुह्यनगरींचन्दनाख्यांकुलिंदकः ॥ १८ ॥ ययौप
रिजनैःसार्धंहर्षोदर्कात्स्फुरद्भुजः ॥ गच्छन्पथ्यब्रवीत्सामेपापर्द्धिःपुण्यदाभवत् ॥ १९ ॥ इत्थंब्रुवन्सनगरींसम्प्राप्तश्चन्दनाव
तीम् ॥ प्रविवेशकुलिन्दःस्वंभवनंपुत्रसंयुतः ॥ २० ॥ मेधाविन्यैस्वराज्ञ्यैतंपुत्रंलब्धंन्यवेदयत् ॥ साहर्षिताऽब्रवीद्वाक्यमशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्याहंतुकेवलम् ॥ जातामनोरथाःसर्वेपाविताऽहंनसंशयः ॥ २१ ॥ ॥ नारदउवाच ॥ ॥ ततःकुलिन्दोमेधावीउत्सवं
समचीकरत् ॥ ब्राह्मणान्स्नातकान्वेदविदुषःपर्यपूजयत् ॥ २२ ॥ गणकाअब्रुवन्हृष्टाहेकुलिन्दतवार्भकः ॥ अयंबहुश्रवाः
श्रीमान्विष्णुभक्तोमहायशाः ॥ चंद्रःशुद्धमुखाद्रम्याद्धसतोऽस्यपतिष्यति ॥ २३ ॥ चंद्रहासेतिनाम्नाऽयंभविष्यतिधरापतिः॥
ततःप्रभृतिभोपार्थचन्द्रहासोदिनेदिने ॥ २४ ॥ कुलिंदस्याशयासार्धंव्यवर्धतयथाशशी ॥ अकृष्टपच्यापृथिवीप्रजाआनंद
निर्भराः ॥ २५ ॥ गावश्चघटदोहिन्योदेशआसन्मनोरमाः ॥ सप्ताब्दिकश्चन्द्रहासोनानाक्षरविनिर्णयम् ॥ २६ ॥ विचार्य
सम्यङ्मनसाहरिरित्यक्षरद्वयम् ॥ सजजापसदाक्रुद्धस्तदासोऽक्षरपाठकः ॥ २७ ॥ अहर्निशंचन्द्रहासहरिरित्यक्षरद्वयम्॥
उदाहरसिनान्यांस्त्वंवर्णान्पठसिचार्भक ॥ २८ ॥ ॥ चंद्रहासउवाच ॥ ॥ सिद्धोवर्णसमाम्नायःसमग्रोह्यच्युतेमया ॥ ह
रिरित्यक्षरालापान्नान्यंनिःसरतेमुखात् ॥ २९ ॥ मदीयात्किंकरोम्यद्यकिंकरोभवतामहम् ॥ ततोगुरुश्चुकोपास्मैवंशंभिन्नं
करेदधत् ॥ ३० ॥ ककेतिभणभोशिष्ययथैवंपरिवर्तते ॥ चंद्रहासोऽब्रवीद्वाक्यंभीतवत्तंशनैःशनैः ॥ ३१ ॥ नभणामिकदाचि
न्मेनजिह्वापरिवर्त्तते ॥ हरिनामजपिष्यामिनान्यैःशास्त्रैःप्रयोजनम्॥३२॥यत्रनामहरेर्नास्तितानिशास्त्राणिकिंप्रभो ॥ यस्मि
न्शास्त्रेपुराणेचहरिनामनदृश्यते ॥ ३३ ॥ श्रोतव्यंनैवतच्छास्त्रंयदिब्रह्मास्वयंवदेत् ॥ ॥ नारदउवाच ॥ ॥ शृणुपार्थम
हाबाहोवैष्णवस्यशिशोःपुनः ॥ ३४ ॥ चरितंचन्द्रहासस्यसर्वपापप्रणाशनम् ॥ एतस्मिन्नंतरेक्रुद्धःकुलिंदभवनंययौ॥ ३५ ॥
चन्द्रहासगुरुर्गत्वाकुलिन्दंवाक्यमब्रवीत् ॥ महद्भूतस्यसंचारात्कस्यचित्तवपुत्रकः ॥अहर्निशंहरिरितिप्रजल्पन्परितिष्ठति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ पाठितोऽपिमयाशास्त्रंकुबुद्धिर्नपठत्यसौ ॥ यद्याज्ञाममराजेंद्रतर्हिंशास्मिनसंशयः ॥ ३७॥ ॥कुलिन्दउवाच॥
दैवाल्लब्धोमयापुत्रःसकथंताड्यतेऽधुना ॥ ईदृशोऽपिपिशाचोऽयंमूर्खःपालयिताध्रुवम् ॥ ३८ ॥ नाश्राविगुरुभिश्चित्रंशिशो
राचरितंमहत् ॥ एकादशीदिनेप्राप्तेनान्नंभुंक्तेनचामृतम् ॥ ३९ ॥ अमुंविनाकथंभुंक्षेतस्येयंस्थितिरीदृशी ॥ तस्माद्याहिगृहं
विप्रचंद्रहासोयथासुखं ॥ ४० ॥ वर्त्ततामष्टमेऽब्देऽस्यमेखलाबंधनक्रियां ॥ करिष्यामिततश्चायंवेदाभ्यासंकरिष्यति ॥ ४१॥
यथागतंगतोविप्रोहर्षितोऽभूत्कुलिंदकः ॥ गाढमालिंग्यतंपुत्रंचंद्रहासंमनोरमं ॥ ४२ ॥ अनेनैकेनपुत्रेणपाविताविषयामम ॥
विष्णुभक्तेनदक्षेणकिमन्यैर्बहुभिःसुतैः ॥ ४३॥ सर्पिण्याबहवःपुत्राजायंतेहंरिभक्षकाः ॥ अयंहरिपदध्यानगतचित्तःसुतोमम
॥ ४४ ॥ किंमयाचरितंपूर्वंतपःपंचाग्निसाधनं ॥ येनाहंप्राप्तवान्पुत्रंवैष्णवंजनवल्लभं ॥ ४५॥ ॥नारदउवाच॥ ॥अथाष्टमे
ऽब्देसंप्राप्तेमेखलाबंधनक्रियां ॥ चंद्रहासस्यसकलांव्यदधात्सकुलिंदकः ॥ ४६ ॥ ततोवेदाहुतीर्हुत्वासांगंवेदमपाठयत् ॥
अपीपठच्चंद्रहासोवेदंध्यायन्हारिंहृदि ॥ ४७ ॥ पठित्वानिखिलंवेदंसोऽब्रवीत्प्रीयतांहरिः ॥ वेदेषुस्मृतिशास्त्रेषुगीयतेमेप्रभुर्ह
रिः ॥ ४८ ॥ तन्नपश्याम्यहंवस्तुयत्रनायंहरिःस्थितः ॥ इत्थंवेदार्थमालोक्यधनुर्वेदमथाभ्यसत् ॥ ४९ ॥ हृदंगणेहरिंलक्ष्यं
स्थाप्यबाणानमूमुचत् ॥ सद्भक्तिचापेवर्त्ततंदृढंतंसात्विकंगुणं ॥ ५० ॥ परामृश्यचसंयोज्यचित्तमेकंशरःकृतः ॥ येनापिऋजु
नाबालःप्रापलक्ष्यंजनार्दनं ॥ ५१ ॥ अमुनातुप्रकारेणयेतुलक्ष्यंनजानते ॥ तान्जनानर्दयत्येवतल्लक्षंपांडुनंदन ॥ ५२ ॥ ॥१२५॥
॥ नारदउवाच ॥ ॥शरीरतूणात्स्वयमेवपंचबाणाययुस्तस्यकुलिंदसूनोः ॥ एकीभवंस्तस्यह्यनुप्रविष्टाजनार्दनंलक्ष्यमती

१ भेकभक्षकाः । २ हृदेवांऽगणंतस्मिन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचित्रं ॥ ५३ ॥ एवंधनुर्वेदमथाभ्यसत्सततोगुरूंस्तानपिपर्यपूजयत् ॥ वाजीगणंशत्रुगणंसमग्रमपीपलद्देशमजीजयत्तं ॥
॥ ५४ ॥ हंसाधिरूढश्चलकुंडलोऽसौखलीनमाक्रम्यचकारनम्रं ॥ गुरुभ्यआहस्मनमेश्रमोऽस्तीत्यूचेहरिंप्राप्यकथंविमूढः ॥
॥ ५५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेचंद्रहासोपाख्यानेचंद्रहासविद्याभ्यासवर्णनंनामैकपंचाशत्तमोऽध्यायः ॥५१॥
॥ अर्जुनउवाच ॥ ॥ धन्यास्तेविषयायेषुतादृशोवैष्णवःस्थितः ॥ अभ्यासमीदृशंचक्रेधनुर्वेदस्यनारद ॥ १ ॥ हरिभक्तंक
दावीक्ष्येइतीहामेसदाभवत् ॥ आवयोःशब्दसान्निध्यंवर्त्ततेनेतरेष्विदम् ॥ २ ॥ औत्तानचरणोठ्योम्निपातालेसबलिःस्थितः॥
बिभीषणस्तुलंकायांसस्वर्गेनःपितामहः ॥ ३ ॥ इतस्ततस्त्वंभ्रमसिकुतस्त्वद्दर्शनंमम ॥ अधुनाभाग्यसंयोगाज्जातोनौसंगमो
मुने ॥ ४ ॥ अधुनाचन्द्रहासंतंदृष्ट्वाप्राप्स्येमहत्फलम् ॥ कथयस्वकथामेतांसुधारूपांममोरमाम् ॥ ५ ॥ तारुण्यंविषमंप्रा
प्यकिमाचरितवान्मुने ॥ चंद्रहासोनृपवरस्तन्ममाचक्ष्वतत्वतः ॥ ६ ॥ ॥ नारदउवाच ॥ ॥ अथोनषोडशाब्दोऽसौजन
कंवाक्यमब्रवीत् ॥ विभोददासिचेन्मह्यमाज्ञांदिग्विजयायतान् ॥ ७ ॥ याम्यहंसकलान्भूपान्जित्वातवबलादरीन् ॥ धनंस
मानयिष्यामिनरराजैःसमंनृप ॥ ८ ॥ कुलिंदःप्रत्युवाचेदंकथमेकःप्रयास्यसि ॥ राजानःसंतिदुर्जेयाःसैन्येनमहतावृताः॥९॥
अथवावासुदेवंतंसंस्मृत्यगच्छसेहठात् ॥ अस्मत्स्वामीधृष्टबुद्धिर्मंत्रीकौंतलपस्यसः ॥ १० ॥ शतग्रामकएवायंदेशस्तेनार्पि
तोमम ॥ इतस्तस्यैवनृपतेर्वैरिणोबलवत्तराः ॥ ११ ॥ पीडयंतिस्मसद्देशंतामाकर्ण्यपरेमिरे ॥ इत्थंपितुर्वचःश्रुत्वाचंद्रहासोय
यौमुदा ॥ १२ ॥ रथिभिःपंचभिःसार्धंदेशांस्तान्वीरपूरितान् ॥ तान्सर्वानजयद्धन्वीचंद्रहासोनृपान्हसन् ॥ १३ ॥ वृथाराज्य

१ ध्रुवः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मदेनामीमत्तानाराधयन्हरिम् ॥ परिभूतान्मयामत्तान्रथिनःसादिनोनरान् ॥ १४ ॥ नरक्षितामयाग्रस्तान्तेदेवंजनार्दन
म् ॥ चंद्रहासभयाद्भीतावैरिणस्तेविलिल्यिरे ॥ वासुदेवकथालापात्कलिदोषायथोल्कटाः ॥ १५ ॥ ॥ नारदउवाच ॥ ॥
विजित्यनृपतीन्सर्वान्गजानश्वान्सहस्रशः ॥ सुवर्णरत्नमुक्ताभिःपूरितान्शकटान्बहून् ॥ १६ ॥ चंद्रहासःसमादायस्वांपुरीं
चंदनावतीम् ॥ आविवेशकुलिंदेनसंमुखेनाभिनंदितः ॥ १७ ॥ दीपदीपितपात्रेणमात्रानीराजितस्तथा ॥ पितरौचनमस्कृत्य
शिबिकायामरोपयत् ॥ १८ ॥ नरवाहैर्गृहीतायांपदातिःप्रययौपुरः ॥ वहन्नुपानहौपित्रोश्चंद्रहासोऽब्रवीद्वचः ॥ १९ ॥ पित्रो
र्भक्त्याविनाकिंचिल्लभ्यतेभुविनोनरैः ॥ लक्ष्मीनारायणावेतौपितरौचिंतयाम्यहम् ॥ २० ॥ ॥ नारदउवाच ॥ ॥ चतुष्पथे
समायांतंददृशुःपौरयोषितः ॥ चंद्रहासंविशालाक्षंहसंतंमदनंश्रिया ॥ २१ ॥ चंद्रहासइहआगतःसखींप्राहकाचिदबलाचस
स्मितम् ॥ चंद्रहासइहयावदंचितोहंतिपातकचमूंविलोकनैः ॥ २२ ॥ तामथालपतकाचिदहोस्विल्लज्जसेनगदतीकिमवद्यम् ॥
यःसदाहसतिकामुकवृंदमत्रिजोविकलमेतदवश्यम् ॥ २३ ॥ एवमादिवचःशृण्वंश्चंद्रहासःस्वमालयम् ॥ प्रविवेशसुहन्मित्र
पितृव्यादीन्प्रतोषयन् ॥ २४ ॥ अथाभ्यषिंचत्तंपुत्रंचंद्रहासंस्वकेपदे ॥ वेदविद्भिर्द्विजैःसार्धंकुलिंदःपंचमीदिने ॥ २५ ॥
महोत्सवंतदाचक्रुःपौराःसर्वेयथाक्रमम् ॥ प्रक्षाल्यतोयैःप्रथमंस्वानिस्वान्यंगणानिच ॥ २६ ॥ प्रमार्जुश्चंदनैःशुभ्रैश्चांद्रैः
संचूर्णकैर्व्यधुः ॥ चतुष्काणिपताकाश्चवितेनुर्हर्षिताजनाः ॥ २७ ॥ उच्चैर्जगुर्नामहरेःपदैर्ललितवर्त्तनैः ॥ एकीभूयततःपौराश्चं ॥१२६॥
द्रहासमपूजयन् ॥ २८ ॥ चंदनेनसुगंधेनकेसरेणसुचंद्रिणा ॥ तथाचंपकमालाभिर्धूपैरगुरुजैःशुभैः ॥ २९ ॥ नीराजयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यचरेतांचिरंरम्येपौरुषेणाहरंतुतौ ॥ ६ ॥ नृपस्यवचनंश्रुत्वानिर्गतंविविधंबलं ॥ महावीराःपंचधीराग्रहणार्थेविनिर्गताः ॥
॥ ७॥ सुभालःसुरभोलीलःकुवलःसरलश्चते ॥ पुत्रादिव्यरथारूढाधन्विनोवीरवर्मणः ॥ ८ ॥ तेप्राप्ताःपाण्डवबलंतृणीकृ
त्यरणस्थितान् ॥ गृहीत्वावाजिनौरोषात्प्रयाताभूपसन्निधौ ॥ ९ ॥ यावद्गच्छंतितेवीरानृपंप्रतिमहाबलाः ॥ बभ्रुवाहेनरा
जेंद्रआहूतास्तावदेवहि ॥ १० ॥ शंखनादेनवीरांस्तान्कृत्वाबधिरकर्णकान् ॥ पार्थपुत्रस्तदारोषाद्ध्यधमच्छत्रुवाहिनीम् ॥
॥ ११ बभ्रुवाहोमहातेजाःशरैःकनकचित्रितैः ॥ ततोयुद्धंसमभवत्तुमुलंभूपदारुणम् ॥ १२ ॥ केशाकेशिरणेऽतीवमुष्टामुष्टिन
खानखि ॥ पदातिगणमेवाग्रेजग्मुर्वीरामदोत्कटाः ॥ १३ ॥ रथागजैःसंगतास्तेगजाःकुत्रापिवाजिभिः ॥ विपरीतमिदंजातंरु
द्रक्रीडनसन्निभम् ॥ १४ ॥ बभ्रुवाहेनवीरेणहन्यमानंबलंमहत् ॥ संचुकोचतथाभूतमग्नौचर्महितंयथा ॥ १५ ॥ संयमिन्याः
पतिस्तावत्समागत्यनराधिपम् ॥ समुत्कृष्टंपार्थबलंघातयामासरोषितः ॥ १६ ॥ धर्मराजेनपार्थस्यपातितंविविधंबलम् ॥ ह
तप्रवीरमत्युग्रंश्वशुरार्थेनराधिप ॥ १७ ॥ पार्थोवीक्ष्यहतंसैन्यंजामात्रावीरवर्मणः ॥ उवाचकेशवंदेवंविस्मयन्निवभारत ॥
॥ १८ ॥ कोसौदेवोहृषीकेशनररूपेणमेबलम् ॥ तीक्ष्णैःशरैःपातयतेसमक्षंतवमाधव ॥ १९ ॥ ॥ वासुदेवउवाच ॥ ॥ य
मंविद्धिमहाबाहोपुरतःस्थितमाहवे ॥ प्रार्थितंचैवकन्यार्थेस्वपुरेवीरवर्मणा ॥ २० ॥ ॥ अर्जुनउवाच ॥ ॥ किमेतत्कृष्णक
थितंयमोनृपसुतापतिः ॥ कथमेतत्संगतंहितत्सर्वंवदकेशव ॥ २१ ॥ ॥ कृष्णउवाच ॥ ॥ मालिनीनामकन्यास्यसंजातावी
रवर्मणः ॥ मानुषंनवरंपार्थवृणुतेभुविमानिनी ॥ २२ ॥ यदापृष्टापुरागेहेपित्रासामालिनीशुभा ॥ कस्तेवरोमयाकार्योमानुषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेच्छसेयदि ॥ २३ ॥ ॥ मालिन्युवाच ॥ ॥ धर्मराजायमांतातदेहित्वंनापरोवरः ॥ अन्येमृतानरायांतियमस्यसदनंप्रति
॥ २४ ॥ धर्मराजशरीरंहिप्राप्याहंकीर्तिमाप्नुयाम् ॥ कृष्णप्राप्तान्जनान्यास्येस्वगुणैःपतितोषकैः ॥ २५ ॥ नरस्यपाणिग्रह
णंप्रथमंक्रियतेमया ॥ पश्चाद्वह्नौशरीरंमेयदिस्पृष्टंभविष्यति ॥ २६ ॥ द्वितीयस्यजनस्याहंनाप्नुयांसंगतिंयथा ॥ तथाताततवि
धातव्योधर्मराजोहिमेवरः ॥ २७ ॥ यानारीपुरुषंप्राप्यपितृदत्तंभुविस्थिता ॥ वंचयित्वानिजंकांतमपरंयातिमोहिता ॥ २८ ॥
तांतुवैवस्वतोराजानरकेपातयत्यसौ ॥ तमेवादौवरंकृत्वानिदेशेस्थीयतेमया ॥२९॥ तत्रमांधर्मराजोऽयंपालयिष्यतिपापतः ॥
सुगुप्तंसर्वदाताततवपुण्यंभविष्यति ॥ ३० ॥ प्राकृतायसुतादत्ताभवेत्पुण्यप्रदायिनी ॥ किंतुधर्मायमूर्तायदत्ताऽहंतुशिवप्रदा
॥ ३१ ॥ एवंविधंमयातातकर्त्तव्यंहृदिचिंतितम् ॥ नानाविधानिकार्याणिधर्मगुप्तानियानिमे ॥ तदामनोरथोरम्योभविष्यति
हिमामकः ॥ ३२ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेवीरवर्मयुद्धवर्णनंनामसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ एवंविधंसुतावाक्यंवीरवर्मानिशम्यतत् ॥ यमसूक्तैर्दिवारात्रंसयमंस्तौतिनित्यशः ॥ १ ॥ मालिनीवि
धिवद्देवसमाराधनतत्परा ॥ बभूवयौवनंप्राप्यध्यानभावंनसाजहौ ॥ २ ॥ नारदेनतदाज्ञातंचिंतितंनृपतेःसुता ॥ ईदृशंकुरुते
भावंनैनांवेत्तियमःस्वयं ॥ ३ ॥ तंगत्वाकथयिष्यामिभावमस्याःसुशोभनं ॥ धर्मकार्यंप्रकुर्वाणायमप्रीत्यैदिनेदिने ॥ ४ ॥ हृ
दिस्थितंमनुष्याणांविंदत्येवसुचेष्टितम् ॥ समवर्तीकथंमंदोमालिन्याःफलदूषकः ॥ ५ ॥ ॥ जैमिनिरुवाच ॥ ॥ ततोजगा
मदेवर्षिर्यमस्यसदनंप्रति ॥ न्यवेदयत्प्रियांतस्मैमालिनींराजकन्यकाम् ॥६॥ धर्मराजनजानासिमालिनींत्वामनुव्रतां ॥ सत्य

१ यमाय।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्मतदातंचकर्पूरदीपकैः ॥ एवंसंपूजितःपौरैश्चंद्रहासोब्रवीच्चतान् ॥ ३० ॥ अतःप्रभृतिभोपौराःप्राप्तेयाम्येदिनेशुभे ॥ उ
त्सवंचैकभक्तंयोनकरोतिसमेरिपुः ॥ ३१ ॥ तथाविष्णोस्तिथौचान्नंयोभुंक्तेसमहानरिः ॥ पातकानांगणःसर्वःप्राप्तेचैकादशी
दिने ॥ ३२ ॥ भीतोविलीयतेचान्नेनभोक्तव्यंततोनरैः ॥ घटिकाःषट्तुपंचाशद्दृश्यतेदशमीयदा ॥ ३३॥ रिक्तातिथिःसामंतव्या
दशमीत्वपरेहनि ॥ अविद्धाचैवकर्तव्यावैष्णवैर्विष्णुवल्लभा ॥ ३४ ॥ पापाद्भीताधर्मरताविष्णोर्भक्तिसमन्विताः ॥ उभयोःपक्ष
योरात्रौयेजाग्रतिहरेर्दिने ॥ ३५ ॥ तेषामहंसदादासोभविष्यामिनसंशयः ॥ आयुष्यंचपलंतादृग्जलबुद्बुदसन्निभम् ॥३६॥
चिंतयध्वंजनामूढामाधवंवर्ष्मसुस्थिरम् ॥ अस्थिस्तंभंस्नायुबद्धंमांसक्षतजलेपनम् ॥ ३७ ॥ शतच्छिद्रंग्रहैर्व्याप्तंलोभक्रो
धादिवैरिभिः ॥ एतादृशंशरीरंचव्रतमेकादशीसमम् ॥ ३८ ॥ यद्विचार्यक्षमंबुद्ध्यातद्यूयंकर्तुमर्हथ ॥ एकादशीसमांकिंचित्पा
वनंभुवनत्रये ॥ ३९ ॥ नश्रुतंनमयादृष्टंतस्याःस्वामीहरिर्यतः ॥ इत्यादिष्टास्तेनपौराहृष्टास्तदनुमेनिरे ॥ ४० ॥ सुवर्णर
त्नवासोभिःपौरानन्यांश्चदुर्बलान् ॥ चंद्रहासोद्विजान्सर्वान्समलंकृतवान्मुदा ॥ ४१ ॥ मंदिराणिविचित्राणिसद्विजार्थमका
रयत् ॥ वापीकूपतडागादिपूर्तंविष्ण्वालयानिच ॥ ४२ ॥ शिवालयानिसत्राणिबहून्योगेश्वराश्रमान् ॥ प्रपाश्चकारविविधाः
फलपत्रपयोधिकाः ॥ ४३ ॥ ॥ नारदउवाच ॥ ॥ देशाद्देशात्तदालोकाआजग्मुश्चंदनावतीम् ॥ ब्राह्मणाःक्षत्रियावैश्याः
शूद्रप्रभृतयःप्रजाः ॥ ४४ ॥ पुत्रपौत्रैःपरिवृताधनधान्यसमन्विताः ॥ संस्थापयामासमुदाप्रजाःसर्वाःकुलिंदजः ॥ ४५ ॥प्र
जाभिरष्टादशभिर्हृष्टाभिश्चसमन्वितः ॥ चंद्रहासोहरौभक्तिंव्यवर्धयततांपुरीम् ॥ ४६ ॥ यस्यांसमागतश्चार्थीकुबेरंहसति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रिया ॥ दत्तयाचंद्रहासेनप्रीयतामित्यधोक्षजः ॥ ४७ ॥ तांचंदनाङ्कांपरिपालयंतंतंचंद्रहासंजनकःकुलिंदः ॥ उवाचहेपु
त्रमयाप्रदेयंनिष्कायुतंकुंतलपायराज्ञे ॥ ४८ ॥ तदर्धमस्मत्प्रभवेप्रदेयंतदर्धमप्यर्धममुष्यपत्न्यै ॥ तत्प्रेषयाशुत्वमुदा
रसत्वप्रीतिंयथामंत्रिनृपौलभेतां ॥ ४९ ॥ इतःषड्योजनंवत्सविद्यतेकौंतलंपुरं ॥ यस्मिन्कौंतलपोराजागालवेनपुरोधसा ॥
॥ ५० ॥ राज्यंचकुरुतेसम्यङ्मंत्रिणाधृष्टबुद्धिना ॥ चंद्रहासःसमाकर्ण्यपितुर्वाक्यंप्रहर्षितः ॥ ५१ ॥ यन्मंत्रिणेचराज्ञेचप
त्न्यैयत्प्रेर्यतेवसु ॥ तत्सर्वंगालवायाशुदीयतेतातसत्वरं ॥ इत्युक्त्वावस्तुजातंतत्प्रेषयामाससलीलया ॥ ५२ ॥ वामीभिरुष्ट्रैःशक
टैर्दुकूलानिचकांचनं ॥ शुभ्रंचमलयंचारुकर्पूरंमृगसंभवं ॥ ५३ ॥ गजाःसंप्रेषितास्तेनवाजिनश्चमनोरमाः ॥ तस्मैकुंतलपाया
सौमंत्रिणेधृष्टबुद्धये ॥ ५४ ॥ चारुविज्ञप्तिसहितंपत्रंप्रेषितवान्पुनः ॥ पत्रंचतद्धनंसर्वंसमादायप्रतस्थिरे ॥ ५५ ॥ सेवकाश्चंद्र
हासस्यप्रापुःकौंतलकंपुरम् ॥ एकादशीदिनेप्राप्तेसायाह्नेतस्यसेवकाः ॥ ५६ ॥ पुरोपकंठेसुजलांनदींदृष्ट्वाऽब्रुवन्वचः ॥ स्ना
त्वासंपूज्यचहरिंप्रविशामततःपुरम् ॥ ५७ ॥ हरेःसंपूजनात्सद्योभद्रंनोहिभविष्यति ॥ ॥ नारदउवाच ॥ ॥ सस्नुःप्रणेमुर्जे
पुस्तेदध्युर्नारायणंतदा ॥ ५८ ॥ दधुःशिरसितांदेवींतुलसींहरिवल्लभाम् ॥ एवंनियममास्थायविविशुस्तस्यमंदिरम् ॥ ५९ ॥
सेवकाश्चंद्रहासस्यमंत्रिणोधृष्टबुद्धिनः ॥ तानार्द्रवाससोदृष्ट्वाधृष्टबुद्धिरदूषयत् ॥ ६० ॥ मनसीत्थंकुलिंदोऽसौमृतस्तेनेदृशा
अमी ॥ अथाब्रवीत्संप्रणतान्सकुलिंदस्यसेवकान् ॥ ६१ ॥ कदापंचत्वमापन्नःकुलिंदोदेशरक्षकः ॥ दिनानिकतिजातानित
च्चानिष्टमभून्महत् ॥ ६२ ॥ ॥ सेवकाऊचुः ॥ ॥ अनिष्टंवैरिणांभूयान्माकुलिंदस्यजातुचित् ॥ कुलिंदस्यसुपुत्रेणचं

१ वडवाभिः। २ चंदनम्। ३ कस्तूरीम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रहासेनधीमता ॥ ६३ ॥ कृत्वादिग्विजयंयुष्मत्प्रदेयंप्रेषितंवसु ॥ अमीहिरण्यकलशैःकर्पूरागुरुचंदनैः ॥ ६४ ॥ दुकूलैःशकटाःपूर्णाआयांतितवमंदिरे ॥ एषांसप्तगुणाःप्राप्ताःकुन्तलाधिपतेर्गृहम् ॥ ६५ ॥ विस्मितोधृष्टबुद्धिस्तद्धनंजग्राहहर्षितः ॥ उवाचसूदान्देवान्नमेभ्योदेयंसुशोभनम् ॥ ६६ ॥ आहूताबहुशस्तैस्तेसूदैर्जग्मुर्नसेवकाः ॥ सुदास्तदाधृष्टबुद्धेःकथयामासुरादरात् ॥ ६७ ॥ आकार्योवाचतान्मंत्रीकुपितोरक्तलोचनः ॥ ॥ धृष्टबुद्धिरुवाच ॥ ॥ दत्तान्नमपियेगर्वादभीक्ष्णंनोपभुंजते ॥ ६८ ॥ कुलिंदंनिगडेबध्वाकुर्वेहंधनवर्जितम् ॥ तन्मंत्रिणोवचःश्रुत्वासेवकाह्यब्रुवन्प्रभो ॥ ६९ ॥ नगर्वितावयंस्वामिन्नभुंजामोहरेर्दिने ॥ कृतघ्नानांचसंपर्कोमार्गेनःसमपद्यत ॥ ७० ॥ तस्माद्विशेषतोनान्नंस्वीकुर्मोमंत्रिसत्तम ॥ अथप्रेष्यवचःश्रुत्वाप्रीतःप्रातरभोजयत् ॥ ७१ ॥ तान्स्वयंबुभुजेपश्चादामंत्र्यनृपतिंययौ ॥ आलोचितुंधृष्टबुद्धिःपुरींतांचन्दनावतीम् ॥ ॥ ७२ ॥ संदिश्यमदनंपुत्रंव्यापारेनृपतेरथ ॥ सम्प्राप्ताविषयाकन्यापितरंतमभाषत ॥ ७३ ॥ प्रत्यहंयोमयासिक्तःसरसालःफलोद्गमी ॥ वर्ततेताततस्याद्यपालनंहृदिचिंतय ॥ वैयग्र्यंराजकार्यत्वात्तवनित्यंप्रजायते ॥ ७४ ॥ इत्युक्तोपरताकन्यायौवनोद्भिन्नशैशवा ॥ तामाश्वास्यययौमन्त्रीहर्षितःसेवकैःसह ॥ ७५ ॥ द्वाभ्यांदिनाभ्यांनगरींप्रापतांचन्दनावतीं ॥ महारण्यमिदंचादावद्याहोस्मिन्महापुरी ॥ ७६ ॥ इतिविस्मयमापन्नंमंत्रिणंसम्मुखागतः ॥ कुलिन्दःसहपुत्रेणनमस्कृत्यानयद्गृहम् ॥ ॥ ७७ ॥ पूजयामासविधिवत्सपुत्रःप्रणतःस्थितः ॥ तंमंत्रीपरिपप्रच्छपुत्रस्तेऽयंकदाभवत् ॥ ७८ ॥ नाख्यातवान्पुत्रजन्मभवान्नःपुरतःकथम् ॥ ॥ कुलिन्दउवाच ॥ ॥ औरसोनहिपुत्रोमेस्वयंप्राप्तोमनोरमः ॥ ७९ ॥ एकदामृगयाविष्टचित्तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंवनगह्वरम् ॥ प्रविष्टःकौंतलपुराद्योजनद्वयसंमितम् ॥ ८० ॥ तत्राद्राक्षमहंबालंछिन्नषष्ठांगुलिंसुतम् ॥ पंचाब्दमधिकंपुत्रा
दौरसाद्वरिसेवकम् ॥ ८१ ॥ चंद्रहासंविष्णुभक्तंजानीहित्वंमहामते ॥ ॥ नारदउवाच ॥ ॥ अंतर्दृष्टिरभूत्पार्थयोगि
वद्दृष्टधीःक्षणम् ॥ ८२ ॥ नजानन्विष्णुभक्तंतंचन्द्रहासंविमूढधीः॥ अंतर्विवृणुतेस्मायंकिंचित्सत्यंमुनेर्वचः ॥ ८३ ॥ सएवा
यंमयाबालोज्ञायतेषोडशाब्दिकः ॥ चाण्डालैर्वंचितश्चाहमंगुलीदर्शकैर्ध्रुवम् ॥ ८४ ॥ द्वौपुत्रौममविद्येतेयुवानौमदनामलौ ॥
तौकिंकरिष्यतश्चेत्स्यादयंमेसम्पदांप्रभुः ॥ ८५ ॥ अतिक्रांतंहियत्कार्यंपश्चाच्चिंतयतेबुधः॥ तच्चास्यनभवेत्कार्यंचिंतयानोवि
नश्यति ॥ ८६ ॥ यद्गतंगतमेवास्तुकरिष्याम्यनृतंवचः ॥ मुनीनामथनिश्चित्यमनसाथाब्रवीद्गिरम् ॥ ८७ ॥ धारयन्हर्षचि
ह्नानिबाह्यांतर्मलिनस्तथा ॥ यथापाखण्डजाबुद्धिर्मनुष्यस्यमहीपते ॥ ८८ ॥ ॥ धृष्टबुद्धिरुवाच ॥ ॥ सफलंतवजन्माद्ययेन
प्राप्तःसुतःशुभः ॥ ममापिहृदयेहर्षःसंजातस्तुमहानहो ॥ ८९ ॥ तवपुत्रंसमालोक्यसचवक्तुंनशक्यते ॥ ९० ॥ इत्थंवचःप्रा
हनिगूढभावंक्षुरंप्रलिप्तंमधुनेवतीक्ष्णम् ॥ यथातृणैश्छादितगर्तमेवयथान्नमाविष्टविषंविचित्रम् ॥ ९१ ॥ इत्याश्वमेधिके
पर्वणिजैमिनीयेचन्द्रहासोपाख्यानेधृष्टबुद्धेश्चन्दनावतींप्रतिगमनंनामद्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ ॥ छ ॥
॥ नारदउवाच॥ ॥पुनर्दध्यौधृष्टबुद्धिःकुबुद्धीनांमहार्णवः ॥ कथंमुनिवचोसत्यंकथंपंचत्वमेत्ययं॥१॥प्रत्यक्षंहन्मिचेदत्रकुलिंदत
नयंरिपुं ॥ तदामांविविधैःशस्त्रैर्हिंस्युरेतेनसंशयः ॥ २ ॥ ततोभवेतांनूनंमेदुःखितौमदनामलौ ॥ स्वयमेववधंकुर्यामुतराजभ
टैरहं ॥ ३ ॥ नामुनातुप्रकारेणहंतुंशक्योमयारिपुः ॥ शंभुनायद्धृतंकंठेतद्दानाद्धन्मितंरिपुं ॥ ४ ॥ चंद्रहासमितिध्यात्वाहर्षितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽब्रवीद्वचः ॥ चंद्रहासर्विचित्रंत्वंपत्रमानयलेखनीं ॥५॥ मर्षीयथालिखित्वैकंपत्रंत्वांप्रेषयेपुरं ॥ तेनार्पितमुपादायपत्रमेकांत
संस्थितः ॥ ६ ॥ धृष्टधीरर्पयामासतस्मिन्वर्णान्यथाक्रमं ॥ स्वस्तिश्रीरस्तुमदनवक्तुंकारणमीदृशं ॥ ७ ॥ चंद्रहासोऽर्हितोऽ
तीवममायंसंपदांपदं ॥ ज्ञातव्योनात्रसंदेहःपुत्रकार्यंत्वयेदृशं ॥ ८ ॥ मारूपंमावयोद्राक्षीःकुलंशीलंपराक्रमं ॥ विद्यांवित्तंवि
लंबंमाऽमित्रस्यास्यकुरुध्रुवं ॥ ९ ॥ विषमस्मैप्रदातव्यंत्वयामदनशत्रवे ॥ पार्वतीशमितिध्यात्वाकृतार्थाःस्यामयद्वयं ॥ १० ॥
चंद्रहासंविशालाक्षमूचिवान्मद्वचःशृणु ॥ महत्कौंतलकेकार्यंविद्यतेमदनंप्रति ॥ ११ ॥ त्वंयाहिपत्रंहिमयामुद्रितंमाविमोचय
॥ भूयाद्गूढंतवहितंपत्रेदत्तेसुतायमे ॥ १२ ॥ त्वंभेत्सियदिमुद्रांमेभविष्यतिमलंतव ॥ उभयोःशिवयोर्भेदाद्यथावत्तवजायते ॥
॥ १३ ॥ शीघ्रंवाजिनमारुह्यचतुर्भिःसेवकैर्वृतः ॥ याहिकौंतलकंपुत्रधर्म्यंद्रष्टाऽसिपुत्रकं ॥ १४ ॥ ॥ नारदउवाच ॥ ॥ सत
त्पत्रमुपादायवेगमास्थायशोभनं ॥ मंत्रिणंतंनमस्कृत्यकुलिंदंपितरंततः ॥ १५ ॥ मेधावतीमगात्प्रष्टुंनमस्कर्तुंकुलिंदवत् ॥
तयानीराजितश्चाथआशीर्भिरभिनंदितः ॥ १६ ॥ दधिदूर्वाक्षतोन्मिश्रंतिलकंकुर्वतीप्रसूः ॥ अब्रवीत्सातुपंथानःशिवास्तेसंतु
सर्वदा ॥ १७ ॥ मुखंनारायणःपातुबाहूपातुजनार्दनः ॥ वक्षःपातुहृषीकेशउदरंपातुमाधवः ॥ १८ ॥ पद्मनाभःसदापातुना
भिंकुक्षिंनृकेसरी ॥ कटिंकमलपत्राक्षोजंघेद्वेमधुसूदनः ॥ १९ ॥ जानुनीयज्ञभोक्तातेगुल्फौदामोदरोवतु ॥ सहस्रपादघ्रियुगं
सहस्राक्षस्तवाक्षिणी ॥ २० ॥ त्रिविक्रमःपातुसर्वंशरीरंतवपुत्रक ॥ समयाहिपुनःशीघ्रंपत्न्यात्वमनुरूपया ॥ २१ ॥ यथात्वंनृ
पतेःकुक्षिंप्राप्तःसहजयाश्रिया ॥ चन्द्रहासोऽथजननींनमस्कृत्यपरीत्यच ॥२२॥ प्रायादश्वाधिरूढस्तैःप्रेष्यैःप्रियहितेरतैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ग्रामांतरात्समायांतंसददर्शवधूवरम् ॥ २३ ॥ हरिद्राकुंकुमोद्रेकरंजितारंमनोरमम् ॥ नववत्सामथाद्राक्षीद्दृष्टिंसपुरतःस्थिता
 म् ॥ २४ ॥ तस्मैपथिवनाध्यक्षाःप्रददुर्दाडिमीफलम् ॥ केचिच्चंपकमालाभिरर्चयंतिस्मतंपथि ॥ २५ ॥ बबंधुर्मुकुटंभालेना
नापुष्पमयंमुदा ॥ नवोवरइवाभातिचन्द्रहासःससुन्दरः ॥ २६ ॥ प्राप्यकौंतलकाभ्याशेरम्यंक्रीडावनेसरः ॥ वरटाभिःसमं
हंसायत्रगार्हस्थ्यमास्थिताः ॥ कमलोदयेनमहताधवलाब्रह्मपंत्रजाः[1] ॥ २७ ॥ तस्यामलांभःसरसःसमीपेवनंददर्शाम्रतमा
लनीलम् ॥ सचंद्रहासोऽद्भुतमेवमेनेसाक्षाद्वसंतंचवसंतमत्र ॥ २८ ॥ फुल्लंपलाशंनवकुंकुमाभंतमेववक्रंकिलबिभ्रतंतम् ॥ वन
श्रियासंगमकज्जलांकंतत्पत्रवल्लीधरमद्भुताभम् ॥ २९ ॥ ततःपल्लविताआसन्द्रुमास्तस्मिन्मधौसति ॥ मंजर्यःपल्लवारम्याभां
तिचूततरौतदा ॥ ३० ॥ तस्मिन्पल्लवितेऽत्यंतंकोकिलामधुरस्वरं ॥ चुकूजकामिनांचित्तमाकर्षंतीवदूतिका ॥ ३१ ॥ पुन्नागबकु
लाशोकचंपकाःपुष्पिताबभुः ॥ मालतीयूथिकाजात्यःपुष्पस्तनभरानताः ॥ ३२ ॥ केतक्यःपुष्पगंधाढ्यालीनभ्रमरलोचनाः ॥
पुष्पवर्षैरर्चयंत्यःस्वभर्त्तारंचमाधवम् ॥ ३३ ॥ ॥ नारदउवाच ॥ ॥ मधोरुत्सवमालोक्यकुलिंदतनयोमुदम् ॥ परांप्राप
हरेरेवचरित्रंहृदयेदधत् ॥ ३४ ॥ स्नात्वासंपूज्यचहरिंतैःपुष्पैर्मधुसंभवैः ॥ संकल्पयित्वाहरयेपाथेयंबुभुजेशनैः ॥ ३५ ॥ सेव
कैःक्षिप्तदूर्वादिंपुरस्ताद्वाजिनंतरौ ॥ रसालेसन्निियम्याथअशेतप्रहरद्वयं ॥ ३६ ॥ अथकौंतलपस्यैकाकन्याचंपकमालि
नी ॥ धृष्टबुद्धेश्चविषयारतिंहसतियाश्रिया ॥ ३७ ॥ कन्यकेजग्मतुःकन्याशतेनपरिवारिते ॥ वसंतागमपुष्पाढ्यंपुरोपव
नमुत्तमम् ॥ ३८ ॥ पुष्पावचयमिच्छंत्यःकर्तुंसर्वाश्चकन्यकाः ॥ सार्धत्रयोदशाब्दास्तायौवनोद्भेदचंचलाः ॥ ३९ ॥ कौसुंबांबरधा

१ब्रह्मपत्रजाः ब्रह्मणःपत्रंवाहनं तस्माज्जाताः हंसा इतिपूर्वेणान्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिण्यः स्फुरत्कंचुकपल्लवाः ॥ नवबिल्वफलाभाभ्यांस्तनाभ्यांसमलंकृताः ॥ ४० ॥ रम्यमौक्तिकहारैश्चमंडिताभ्यांशनैर्ययुः ॥ नृत्यंत्योनूपुररवैस्तालिकाशब्दकैःपथि ॥ ४१ ॥ गायंत्यःस्महसंत्यःस्मक्षरत्तांबूलचंद्रकाः ॥ प्रापुःक्रीडावनंरम्यंकोकिलालापनादितम् ॥ ४२ ॥ हस्तिनीपुरतःकाचिद्ययौपुष्पौघवीक्षया ॥ तांचैवभीतोवाचैकाकन्याबिल्वफलस्तनी ॥ ४३ ॥ मागाहास्तिनिकुंजंत्वमेकापुष्पाभिलाषिणी ॥ दारयिष्यतिमुक्ताढ्यौस्तनकुंभौनृकेसरी ॥ ४४ ॥ परस्परंहसंत्यस्ताःप्रकुर्वन्पुष्पसंचयम् ॥ मालतीयूथिकाजातीमोगरादिकवीरुधाम् ॥ ४५ ॥ कन्याःसुमनसांमालाश्चक्रुःकंठेषुतादधुः ॥ सपुष्पांदाडिमींवीक्ष्यप्राहचंपकमालिनी ॥ ४६ ॥ विषयेसुभगेपश्यमहदद्भुतमग्रतः ॥ आदौपुष्पोद्गमःपश्चाद्दृश्यतेस्मफलोद्गमः ॥ ४७ ॥ विपरीतंत्वयिकथंजातंबिल्वफलस्तनि ॥ वनस्पतीनांधर्मोऽयंविषयाप्राहभूपजाम् ॥ ४८ ॥ अथपुष्पाण्युपादायशिरस्याधायनिद्रिताम् ॥ पुष्पावचयस्विन्नांगींविषयाप्राहभूपजाम् ॥ ४९ ॥ शिरस्याधायपुष्पाणिमाशेथास्त्वंवरानने ॥ कश्चिद्दंतर्वनेभोगीकुंडलीत्वांसमेष्यति ॥ ५० ॥ ॥ राजकन्योवाच ॥ ॥ विषयेतेमुखेशोभावरीवर्तिसुधांशुजित् ॥ स्तनौवक्षसिवर्त्तेतेरत्याकिंमन्मथःसह ॥ ५१ ॥ भक्त्याप्रादुरभूतांतौस्वप्नंदत्वातवाशये ॥ कंचित्प्रार्थयपूजार्थमनयोर्लिंगयोःसखि ॥ ५२ ॥ चंदनेनसुगंधेनकेसरेणसुचंद्रिणा ॥ पत्रालिभिर्विचित्राभिर्यएतावर्चितुंक्षमः ॥ ५३ ॥ सायंप्रातर्ह्यनलसोदक्षस्तंप्रार्थयाधुना ॥ प्राणानपिस्वकान्दत्वापूजकंत्वंवशीकुरु ॥ ५४ ॥ चक्षुःस्फुरतितेवामंकाकोरौत्याम्रमास्थितः ॥ शंसतीवप्रियंप्राप्तंपूजकंतवदेवयोः ॥ ५५ ॥ इत्थंचंपकमालिन्यावचःश्रुत्वाजहाससा ॥ उवाचवचनंरम्यंलज्जतीवप्रधानजा ॥ ५६ ॥ ॥ विषयोवाच ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलंपुष्पचयेनाद्यसंतप्तारविणावयम् ॥ यामःशीतजलंतस्मात्तत्सरःकमलाकरं ॥ ५७ ॥ तच्छ्रुत्वावचनंतस्याःकन्यकानिर्ययु र्वनात् ॥ केचिद्दोलाधिरूढेतेगायंत्यौमधुरस्वरम् ॥ ५८ ॥ प्रहरंत्यौतदाऽन्योऽन्यंकन्यकेकुचमंडले ॥ त्रुटन्मौक्तिकहारेतेदो लायाअवतेरतुः ॥ ५९ ॥ काचित्पुष्पचयंकृत्वाराजकन्यांप्रधाविता ॥ विषयाम्पिहर्षेणपुष्पवर्षमथाक्षिपत् ॥ ६० ॥ एवंतास्त त्सरःप्रापुःपद्मिनीषंडमंडितम् ॥ हंसाभीताःपलायंतेसिंजितश्रवणाद्घनात् ॥ ६१ ॥ अस्माकंमनसोल्लासिसरःकलुषितंभवेत् ॥ पुष्पवंत्योविशेषेणकन्याआयांतिकामुकाः ॥ ६२ ॥ ॥ नारदउवाच ॥ ॥ सरस्तीरेदुकूलानिरम्यकार्पासकानिच ॥ क न्याभिस्त्यज्यमानानिमर्मरेतिविचुक्रुशुः ॥ ६३ ॥ सूक्ष्माण्यपिदुकूलानिनेतुंनक्षमतेनिलः ॥ तासांगुणमयैःपाशैर्बद्धोनिश्च लतांययौ ॥ ६४ ॥ ताश्चंपकांग्योविविशुस्तत्सरःशिवलीलया ॥ अगाधंनिर्मलंगाधंकलुषंतत्सरोभवत् ॥ ६५ ॥ क न्याभिर्निष्ककंठोभिस्तादृशीभिरधिष्ठितम् ॥ परस्परंहाससूक्तीश्चक्रुस्ताअभितःसरः ॥ ६६ ॥ क्रीडालोलकरास्फालत्त्रुट न्मौक्तिकपूरितम् ॥ मणिबंधस्खलद्रम्यप्रवालमणिचित्रितम् ॥ ६७ ॥ अनंतश्रीधरंतासांमुखचंद्रैरलंकृतम् ॥ तत्सरःशुशु भेतीवरत्नाकरनिभंस्फुटम् ॥ ६८ ॥ परस्परंताःसिषिचुर्जलेनातिसुगंधिना ॥ स्तनकुंकुमकस्तूरीचंदनागुरुगंधिना ॥ ६९ ॥ उच्छलज्जलबिंदूनांमिषेणजलदेवताः ॥ क्रीडंतेमौक्तिकैश्चैताःकन्यकाःशुशुभुर्वने ॥ ७० ॥ बिंदुवर्षसमालोक्यचातकाघनशंक या ॥ मुखंव्यादायपश्यंतिघनपंक्तीःपिपासया ॥ ७१ ॥ रम्यैःकनकनालैस्तुबबंधुःकाश्चकांचन ॥ जहसुर्बभ्रमुःकन्याडिंडिमं चुक्रुशुर्जगुः ॥ ७२ ॥ एवंस्मताःसरसिकुंकुमनीरभाजिस्नात्वाऽबलाःपरिदधुःस्मदुकूलवृंदम् ॥ ताटंकपत्रदरमौक्तिकहारनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्कैः पूर्णोडुपाभतिलकैर्व्यधुरंगभूषाम् ॥ ७३ ॥ तांविहायजलकेलिमुत्तमांधृष्टबुद्धितनयातटस्थिता ॥ अन्ववैक्षतहरींयथार
माचंद्रहासमथसासरतीरे ॥ ७४ ॥ षोडशाब्दवयसंसुकुमारंश्मश्रुलंविमलदीर्घललाटम् ॥ पट्टबद्धहयमल्पजनंतंसिंहशाव
मिवबाढममंस्त ॥ ७५ ॥ इत्याश्वमेधिकेपर्वणिजै० चंद्रहासोपाख्यानेत्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ जलक्रीडारुणाक्ष्यस्तानिर्ययुःस्वान्गृहान्प्रति ॥ विषयानययौपार्थचंद्रहासगुणैर्वृता ॥ १ ॥ गच्छ
त्सुमानुषेष्वेकोनिधिंपश्यत्पुरस्थितम् ॥ सयथानिश्चलस्तत्रतथासाविषयास्थिता ॥२॥ किंनयाम्यथवायामिसुंदरंपुरुषंवने॥
अमुंविवेकंमदनस्तदीयंव्यलुनाच्छरैः ॥ ३ ॥ सैरंध्रींसासमाहूयनूपुरौप्रददौनिजौ ॥ ततःपदंपदेक्त्वाद्दुकूलेऽपिविशंकिता ॥
॥ ४ ॥ हंसीवसायथाहंसंययौदृष्टस्तुरंगमः ॥ चरन्दूर्वांकुरान्श्यामान्श्यामयासनमस्कृतः ॥ ५ ॥ ममप्राणान्प्रियेसक्ता
न्माशब्देनवियोजय ॥ इतिब्रुवंतीशनकैःप्राप्ताकुंडलिनंजनम् ॥ ६ ॥ पतिवत्तंहिविषयादत्तदृष्टिरवैक्षत ॥ ततोददर्शरुचिरं
पत्रंकंचुकनिःसृतम् ॥ ७ ॥ गृहीत्वातत्करेणाशुमुद्रामुन्मुच्यविस्मिता ॥ वाचयामासतत्पत्रंपितुरत्यंतहर्षिता ॥ ८ ॥ स्व
स्तिश्रीरस्तुमदनवक्तुंकारणमीदृशम् ॥ चंद्रहासोऽहितोतीवममायंसंपदांप्रभुः ॥ ९ ॥ ज्ञातव्योनात्रसंदेहःपुत्रकार्यंत्वयेदृ
शम् ॥ मारूपंमावयोद्राक्षीःकुलंशीलंपराक्रमम् ॥ १० ॥ विद्यांबलंविलंबंमामित्रस्यास्यकुरुध्रुवम् ॥ विषमस्मैप्रदातव्यं
त्वयामदनशत्रवे ॥ ११ ॥ पार्वतीशमितिध्यात्वाकृतार्थाःस्यामयद्द्वयम् ॥ दध्यौसाविषयापश्चादभिप्रायंविवृण्वती ॥१२॥ सं
पदांमेप्रभुर्नित्यंहितोमदनसन्निभः ॥ एवमादिमयापत्रेरुचिरंविक्ष्यतेयथा ॥ १३ ॥ वरंमनोरमंवीक्ष्यमद्रूपंहर्षनिर्भरः ॥ वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षमस्मैप्रदातव्यमत्रचस्वालमेपिता ॥ १४ ॥ पितुर्वैपत्रमालोक्यमदनोऽपिहनिष्यति ॥ कनिष्ठिकानखेनाथतीक्ष्णेनादाय सुन्दरी ॥ १५ ॥ रसालद्रुमनिर्यासंलिलेखविषयातदा ॥ विषयास्मैप्रदातव्येत्येवंवर्णान्समालिखत् ॥ १६ ॥ पत्रंरसाल निर्यासकृतमुद्रंविधायसा ॥ कंचुकाभ्यंतरेन्यस्यविषयाऽगान्निवेशनम् ॥ १७ ॥ पुनःपुनश्चपश्यन्तीपृष्ठतःप्राणवल्लभम् ॥ ततोदृष्ट्वाव्रजंतीसासखीभिर्विषयातदा ॥ १८ ॥ ॥ सख्यऊचुः ॥ ॥ कस्माद्विलंबितंभद्रेकस्माद्धर्षोमहांस्त्वयि ॥ कस्मा द्वैवीक्ष्यतेपृष्ठेकच्चिद्दृष्टोनृकेसरी ॥ १९ ॥ सिंहोदृष्टःकथंत्यक्तःसुप्तोनूनंत्वयेक्षितः ॥ मन्येतदीयंसर्वस्वंमुष्णासित्वंनिगूहसे ॥ ॥ २० ॥ क्रीडन्त्योहास्यवचनैःसर्वाःस्वंस्वंगृहंययुः ॥ प्रहस्यविषयाकन्याशुश्रावपुटभेदने ॥ २१ ॥ विवाहोत्सवकार्याणां पणवानांतुनिःस्वनम् ॥ गायंतीनांपुरंध्रीणांसंगीतध्वनिमिश्रितम् ॥ २२ ॥ सूर्यंदृग्भ्यांप्रपश्यंतीप्रार्थयंतीपतिंप्रियम् ॥ विष यागृहमागत्यहृष्टासाप्रियदर्शनात् ॥ २३ ॥ सप्तभूमिकमास्थायमंदिरंसाव्यलोकयत् ॥ चन्द्रहासोऽपिसायाह्नेप्रबुद्धःसिंह विक्रमः ॥ २४ ॥ प्रक्षालितास्यःकृतवक्त्रशुद्धिःपल्याणयुक्तंहयमारुरोह ॥ चतुर्भिरेवानुगतःस्वभृत्यैःपुरंविवेशाप्रतिमप्रभा वः ॥ २५ ॥ यस्मिन्पुरेधर्ममतिःसुमन्त्रीराजापरन्ध्यानपरःसयोगी ॥ आस्तेपरंगालवसूक्तिमुक्ताफलानिगृण्हन्ननिशंवि चिंतयत् ॥ २६ ॥ चंद्रहासोधृष्टबुद्धिभवनंप्रापसत्वरः ॥ अवतीर्यहयात्तस्माद्द्वाःस्थंवचनमब्रवीत् ॥ २७ ॥ अंतःकथयरे द्वाःस्थमदनंप्रतिमेवचः ॥ श्रीमद्धृष्टमतेर्वाक्यकारकश्चन्द्रहासकः ॥ २८ ॥ प्राप्तोवचनसंदेशकथापत्रधरोबहिः ॥ शिरआनम्य सद्वाःस्थःस्वामिनंमदनंययौ ॥ २९ ॥ शंसितुंचन्द्रहासंतंपार्थाकर्णयविस्मयम् ॥ सद्वाःस्थोह्यपरंद्वाःस्थंगत्वावचनमब्रवीत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ चन्द्रहासमनुप्राप्तंमदनायनिवेदय ॥ द्वितीयोद्वाःस्थमागम्यतृतीयंवाक्यमब्रवीत् ॥ ३१ ॥ तृतीयस्तुचतुर्थंचचतुर्थः
पंचमंतथा ॥ पंचमश्चागमत्षष्ठंषष्ठःसप्तममाव्रजत् ॥ ३२ ॥ द्वाःस्थंविवेकनामानंमदनस्यप्रियंसदा ॥ श्रद्धायष्टिधरंषष्ठश्च
न्द्रहासंन्यवेदयत् ॥ ३३ ॥ ॥ नारदउवाच ॥ ॥ विवेकनामाद्वाःस्थोयंश्रद्धायष्टिंकरेदधत् ॥ प्रययौमदनायाशुचंद्रहा
संनिवेदितुम् ॥ ३४ ॥ सिंहासनेचोपविष्टंमदनंशंकरप्रियम् ॥ ददर्शदक्षिणेपार्श्वेवेदशास्त्रविदोजनान् ॥ ३५ ॥ कवीन्सद्युक्ति
कर्तॄंश्चवक्तॄन्कृष्णगुणान्बहून् ॥ कृष्णवेषनटान्कृष्णगीतनृत्यप्रगायकान् ॥ ३६ ॥ कृष्णस्यकृष्णभक्तानांबंदिनोगुणवर्णका
न् ॥ वामपार्श्वेक्षत्रियांश्चकृष्णभक्तिपरायणान् ॥ ३७ ॥ नानादेशसमायातान्दूतान्शास्त्रविशारदान् ॥ चामरैर्वीज्यमानंच
मदनंधृष्टबुद्धिजम् ॥ विवेकनामाद्वाःस्थस्तंनमस्कृत्यालपद्गिरम् ॥ ३८ ॥ ॥ विवेकउवाच ॥ ॥ केवलंतवभृत्योऽहंप्रिय
श्चनपितुस्तव ॥ पितुस्तेऽन्यःक्रोधनामाहिंसायष्टिधरःप्रियः ॥ ३९ ॥ सस्वामिभक्तोमदनयावन्नायातितेसदः ॥ तावन्मदी
यंवचनंश्रृणुसभ्यैःसमन्वितः ॥ ४० ॥ यश्चिंत्यतेसदाशांतैर्योगिभिर्मधुसूदनः ॥ तस्यभक्तश्चन्द्रहासःप्राप्तोद्वारंमहामते ॥ ४१ ॥
अहंतवपितुर्भीतःक्रोधस्यानुचरस्यच ॥ नयामिशंसितुंकिञ्चित्प्राप्तंत्वाम्प्रतिनब्रुवे ॥ ४२ ॥ जनस्तवपितुःप्रेष्यःस्वयंवामांह
निष्यति ॥ इत्थंमनोरमंतस्यवचनंशास्त्रसंमितम् ॥ ४३ ॥ उत्तस्थौचसमाकर्ण्यमदनस्तैःसभाजनैः ॥ स्खलद्दुकूलाभरणःप्रां
चलंचसमुत्क्षिपत् ॥ ४४ ॥ क्षणाद्ददर्शमदनश्चन्द्रहासंहरेःप्रियम् ॥ नमस्कृत्याभिलिंग्याथसभांरम्यांसमानयत् ॥ ४५ ॥
वरासनेसन्निवेश्यसम्पूज्यमदनोऽब्रवीत् ॥ कच्चित्कुलिन्दःकुशलीकच्चित्कुशलिनीप्रिया ॥ ४६ ॥ कच्चित्तेविषयेविप्रावेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यासंप्रकुर्वते ॥ कच्चित्क्षत्रियविट्शूद्राःपूजयंतिद्विजान्धनैः ॥ ४७॥ कच्चित्प्रजानोपिशुनैर्बाध्यंतेदुःखदैःक्रूरैः ॥ अपित्वंकुश
लीप्राप्तश्चिन्तयन्मनसाहरिम् ॥ ४८ ॥ किमत्रागमनेकार्यंतदाचक्ष्वजनप्रियम् ॥ ॥ चन्द्रहासउवाच ॥ ॥ युष्मादृशां
सतांसंगाद्विपदोयांतिसंक्षयम् ॥ ४९ ॥ कृष्णेतुभक्तिःसुदृढाजायतेमुक्तिदानृणाम् ॥ संदेशात्तेपितुःप्राप्तःपत्रंगृण्हीष्ववाच
य ॥ ५० ॥ एकान्तेगूढमस्त्यत्रमहत्कार्यंनवेद्मितत् ॥ करेगृहीत्वामदनःपत्रंप्रोवाचविस्मितः ॥ ५१ ॥ शृण्वन्तुनिखिलाःप
त्रमेकांतेकरवाणिकिम् ॥ अथपत्रंसभामध्येवाचयिष्यामिनान्यथा ॥ ५२ ॥ शृण्वतांसर्वलोकानांवाचयामासमंत्रिजः ॥ स्व
स्त्यस्तुमदनायाशुविषयास्मैप्रदीयताम् ॥ ५३ ॥ नरूपंनकुलंशौर्यंमाविद्यांचावलोकय ॥ इतिपत्रेस्थितंवीक्ष्यहर्षितोमदनो
ब्रवीत् ॥ ५४ ॥ अद्यमेपावितोवंशःपित्रासर्वेचबांधवाः ॥ मयायच्चिंत्यतेनित्यंस्वयमेवाभवच्चतत् ॥ ५५ ॥ ॥ नारदउवाच ॥
हर्म्यस्यसप्तमेपृष्ठेविषयाकाममोहिता ॥ सखीभिःसवयोभिस्तंचंद्रहासमवैक्षत ॥ ५६ ॥ ध्यायंतीमनसादेवींपार्वतींशंकरप्रि
याम् ॥ भर्तारंदेहिमेदेविदाक्षायणिनमोऽस्तुते ॥ ५७ ॥ त्वत्प्रियार्थंकरिष्यामिव्रतंनभसिचागते ॥ कृष्णपक्षेतृतीयायांरात्रौकृ
त्वातुपूजनम् ॥ ५८ ॥ गंधैश्चविविधैर्धूपैःपक्वान्नैर्मोदकादिभिः ॥ पुष्पमंडपिकांकृत्वामूर्तिंचित्रमयींशुभाम् ॥ ५९ ॥ तोषयिष्या
मिनक्तेनतथाजागरणेनच ॥ मदनस्यमुखाद्वाणीसत्यानिर्यातुवेदवत् ॥ ६० ॥ इतिसंचिंतयंतींतांवयस्याकाचिदब्रवीत् ॥ मनो
रथस्तेकिंजातःकिंचिंतयसिभामिनि ॥ ६१ ॥ तयाचंपकमालिन्याहसंत्यायदुदाहृतं ॥ वक्षोभित्वानिर्गतौतौभक्त्याकिंतेरति
स्मरौ ॥ ६२ ॥ प्रियंप्रार्थयपूजार्थमनयोस्तापसंक्वचित् ॥ दृष्टःसतापसःप्राणानस्मैसात्वंप्रयच्छच ॥ ६३ ॥ इत्थंसखीनांवच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेनबालाप्रहर्षिताधोवदनालिलेख ॥ भूमिंपदांगुष्ठनखेनभर्तुर्गुणानिवाश्र्यान्विषयाऽतिनम्रा ॥ ६२ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेचंद्रहासमदनसंभाषणंनामचतुःपंचाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ छ ॥
॥ अर्जुनउवाच ॥ ॥ अतःपरंकिमभवन्मदनोधृष्टबुद्धिजः ॥ कथंविवाहमकरोद्विषयाचन्द्रहासयोः ॥ १ ॥ कथञ्चचन्दनावत्याःप्राप्तोमन्त्रीस्वकंपुरम् ॥ किमब्रवीत्समदनंतन्ममाचक्ष्वनारद ॥ २ ॥ ॥ नारदउवाच ॥ ॥ अथविप्रान्समाहूय ज्योतिःशास्त्रविशारदान् ॥ पप्रच्छमदनोलग्नंविषयाचन्द्रहासयोः ॥ ३ ॥ गणकास्त्वब्रुवन्वाक्यंमदनंप्रतिहर्षिताः ॥ शुक्रजीवावधिपतीतृतीयैकादशंशुभम् ॥ ४ ॥ अनयोस्तवभाग्याच्चगोरजोध्रियतेपुनः ॥ पताकाइवकुर्वंत्यःपुच्छैरूर्ध्वमुखैःपुरम् ॥ ५ ॥ लक्षयित्वाऽभिधावन्त्योगावोवत्सदिदृक्षवः ॥ त्रिगुणोद्धूतयारज्ज्वाबद्धंगोष्ठेहिचातुरम् ॥ ६ ॥ पश्यभाग्योदयंवत्सवैष्णवस्यसमागमात् ॥ अद्यैवरुचिरंलग्नंसर्वदोषविवर्जितम् ॥ ७ ॥ गोधूलिकंवराहाद्यैरुदितंफलदंनृणाम् ॥ तेषामाकर्ण्यवचनंमदनोहर्षनिर्भरः ॥ ८ ॥ आदिदेशपुरंध्रीस्ताःपातिव्रत्योपशोभिताः ॥ स्नापयंत्वद्यविषयांचंद्रहासंपृथक्पृथक् ॥ ९ ॥ सजलैःकलशैरार्द्रपल्लवैस्तंतुभिर्युतैः ॥ परिधाप्यचवासांसिसमानयितुमर्हथ ॥ १० ॥ रक्तचन्दनवर्णाढ्योमदनस्तमुपाययौ ॥ उत्तिष्ठोत्तिष्ठभद्रंतेचन्द्रहासमहामते ॥ ११ ॥ पतिव्रताकरधृतैःकलशैःस्नाहिवारुणैः ॥ ॥ नारदउवाच ॥ ॥ सुस्नातंचन्द्रहासंतंगृहेरम्येन्यवेशयत् ॥ १२ ॥ मदनःसाधुशब्दादिमधुपर्कमचीकरत् ॥ जाययातारकाक्ष्याचपादप्रक्षालनंकृतम् ॥ ॥ १३ ॥ तंचंद्रहासंरमणीयवेषमंतर्गृहेसोऽप्यनयत्स्मराव्हः ॥ स्वांकन्यकांतांविषयामथांतराचित्रांपटींमंत्रयुतैरधारयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ पप्रच्छगोत्रंमदनस्तदीयंपितुःपितुस्तत्पितुराशुनाम ॥ सचन्द्रहासोप्यवदत्स्वगोत्रंहरिःस्वयंमेजनकःसएव ॥
॥ १५॥ पितामहःसप्रपितामहश्चहरेर्नचान्योऽस्तिसुहृद्द्वितीयः ॥ ऋतेकुलिंदाच्चगुरोर्मदीयादाधारशक्तेर्नचतस्यपत्न्याः ॥
॥ १६ ॥ तच्चंद्रहासीयमनन्यभावंवचोनिशाम्यार्थपतिःस्वकामात् ॥ स्वसारमुच्चैःप्रददाद्विराऽस्मैलक्ष्मीपतिस्तृप्तिमुपैतुदा
नात् ॥ १७ ॥ बद्धांजलीकुंकुमचर्चितांगौतौदंपतीप्रापतुराशुवेदीम् ॥ हुताशनंतर्पितमाज्यपूरैःपरीयतुःसप्तपदान्यथाता
म्॥१८॥द्विजान्नमश्चक्रतुराशिषस्ताःस्वीचक्रतुःकांतिमवापतुस्तौ ॥ पतिव्रतानांतिलकानिभालेसंदधतुःपत्रफलानिपाणौ
॥१९॥ततोऽसौमदनोहृष्टःप्रददौमंडनंबहु ॥ गावश्चघटदोहिन्योमहिष्यःक्षीरसिंधवः ॥ २० ॥ मुक्ताफलानिरत्नानिस्वच्छा
निविविधानिच॥वासांस्यगुरुकर्पूरचंदनानिचवीर्यदान्॥२१॥दत्वातुमदनोदध्यौकिमस्मैदीयतेमया॥चंद्रहासायचात्मानमर्प
यामीतिमेमतिः ॥ २२ ॥ मिषतांसर्वलोकानांमदनोवाक्यमब्रवीत् ॥ इदंशिरःसरोजंचकालायास्मैगमिष्यते ॥ २३ ॥ यदा
कदाचिद्दास्यामिक्रीडनार्थंकरांबुजे ॥ यथायंचंद्रहासोमेजामाताविषयान्वितः ॥२४॥ पुत्रपौत्रैःपरिवृतश्चिरकालंप्रशास्त्विमा
म् ॥ तथाभूयाच्चमेपुण्याद्विष्णोराराधनात्मकात् ॥ नानालंकरणैर्वस्त्रैःपूजयित्वाथगालवम् ॥ २५ ॥ मदनःप्रत्युवाचाथद्वि
जानन्यांश्चयाचकान् ॥ प्रातःसर्वैरलंकार्यंगृहंपूज्यतमैर्मम ॥ २६ ॥ यथाशक्त्याकिंकरोऽहंपूजयिष्यामिचाखिलान् ॥ ता
न्विसृज्यद्विजान्सर्वांश्चंद्रहासमभोजयत् ॥ २७ ॥ विषयासहितंकामोबुभुजेस्वजनान्वितः ॥ सुष्वापमदनःकिंचिद्रात्र्यां
जातेसमुत्थितः ॥ २८ ॥ कृत्वात्मचिंतनंपश्चादादिदेशवचोहरान् ॥ मंडपंरचयंत्वेकेचित्रयंत्वद्यमंदिरम् ॥ २९ ॥ संमार्जयं ॥१३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुकेचिच्चचंदनोदकसेचनैः ॥ उच्चैःक्रियंतांविपुलाःपताकादंडमंडिताः ॥ ३० ॥ ॥ नारदउवाच ॥ ॥ तैस्तदाकारिबी
भत्सोसेवकैरथनिर्मलाः ॥ दिशःकुर्वन्समुदितोविनतातनयोविपात् ॥ ३१ ॥ कथयन्निवलोकानांस्वामिनंसमुपागतम् ॥ उ
त्थीयंतांतुभोलोकाःक्रियतांवौदिक्रोविधिः ॥ ३२ ॥ उदयाचलकूटस्थोरविःसन्निहितोभवत् ॥ चंद्रहासःसमालोक्ययज्ञात्वास
म्यगथोज्वलम् ॥ ३३ ॥ रात्रिजंप्राणिनांचित्तमोहध्वांतमपोथयत् ॥ विषयाचंद्रहासौतौस्नापितौविमलैर्जलैः ॥ ३४ ॥
हरिद्राचंपकस्नेहैरुद्वर्त्यचपुरंध्रिभिः ॥ परिधाप्यचवासांसिमुकुटाभ्यामलंकृतौ ॥ ३५ ॥ तौदंपतीततोवेदीमागतौस्त्रीपुरस्कृ
तौ ॥ कृतस्वस्त्ययनौविप्रैरुपविष्टौवरासने ॥ ३६ ॥ अथप्राप्ताद्विजाःपूज्यावेदशास्त्रविशारदाः ॥ नराश्वगजदेहानांसम्यग्रक्षा
चिकित्सकाः ॥ ३७ ॥ मागधानर्त्तकागीतशिक्षकावंशधारिणः ॥ मृदंगवादकावेश्याःशैलूषाजलचित्रकाः ॥ ३८ ॥ ऊर्ध्ववंशंस
मारुह्ययेक्रीडंतिनराःक्षितौ ॥ मुखाद्वन्हेर्महाज्वालामुत्सृजंतितथाचये ॥ ३९ ॥ ढक्काडमरुजीवाश्वकिन्नरामधुरस्वराः ॥ सू
तायेचपुराणस्थानुच्चरंतिनृपान्सदा ॥ ४० ॥ प्रेतलोकगतान्शूरान्वर्णयंतिचमागधाः ॥ वर्तमानान्नृपान्सम्यग्येतुसंग्राम
कारिणः ॥ ४१ ॥ वर्णयंतिप्रबंधैर्येबंदिनस्तेसमाययुः ॥ नानाबंधेषुकुशलामल्लास्तेब्रह्मचारिणः ॥ ४२ ॥ एवंनानाविधैर्लो
कैःसंकीर्णंतस्यमंदिरम् ॥ मदनस्याभवत्पार्थतृष्णौकानसमागता ॥ ४३ ॥ अन्येसर्वजनाःप्राप्ताालाभकौतुकवीक्षया ॥ तेभ्यो
रत्नानिवासांसिकांचनंप्रददौबहु ॥ ४४ ॥ अनुक्रमात्समदनोविनयाढ्यैर्वचोमृतैः ॥ सुहृत्संबंधिनःसर्वांस्तोषयामासभा
रत ॥ ४५ ॥ हृष्टपुष्टजनाकीर्णंतदभूत्कौंतलंपुरम् ॥ वैष्णवागमनात्पार्थविष्णुभक्तेःफलंशृणु ॥ ४६ ॥ अकैतवंहृषीकेशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायंतिमनसासदा ॥ तेषांविघ्नगणाःपार्थकिंकरिष्यंतिनिर्बलाः ॥ ४७ ॥ विषमस्मैप्रदातव्यमितिहितोश्चमंत्रिणा ॥ प्रेरितश्चं
द्रहासोऽयंविषयांप्रापकन्यकाम्॥४८॥भूमौपरवशोजंतुरभिमानीभवेद्वृथा ॥ हठाद्यःकुरुतेजंतुस्तन्नसिद्ध्यतिकर्हिचित्॥४९॥
विवाहस्त्वभवज्जिष्णोविषयाचंद्रहासयोः ॥ अतःपरंयदभवत्तदाकर्णयनिश्चलः ॥ अभक्तिभक्त्योर्माहात्म्यंपुंसांविस्मयकार
कम् ॥ ५० ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेचंद्रहासविवाहोनामपंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ तस्यांतुचंदनावत्यांकुलिंदंनिगडैर्दृढैः ॥ धृष्टबुद्धिर्वबंधासौदंडयामासताःप्रजाः ॥ १ ॥ कंठेबद्ध्वाशि
लांतोयेनिमज्यार्थमयाचत ॥ ज्वलदग्नेरुपरिताःप्रजादग्धेऽर्थलिप्सया ॥ २ ॥ अतूतुदत्समांसानिशस्त्रैश्चपुरवासिनाम् ॥ अ
पाययच्चूर्णतोयंनासारंध्रेणकांश्चन ॥ ३ ॥ दंडयित्वाप्रजाश्चैवंधृष्टबुद्धिरथोब्रवीत् ॥ कुलिंदत्वंहिरेमूढमांनजानासिदारुणम्
॥ ४ ॥ चंद्रहासाश्रयेणत्वंगर्वितोसिधनागमात् ॥ द्रव्यंतत्प्रेषितंमह्यंतेनसार्धंभवान्कथं ॥ ५ ॥ नागतोसिविमूढात्मन्सेवकाः
प्रेषितास्त्वया ॥ तेपिमत्तामयादत्तमन्नमादन्नबालिशाः ॥ ६ ॥ सांप्रतंत्वंव्रतंदानंकरोषिधनगर्वतः ॥ मदीयंनाशितंद्रव्यंनिश्च
लंतुत्वयाव्ययात् ॥ ७ ॥ आशैशवात्कदाचिन्मेनास्यांपुरिशिवालयं ॥ विष्ण्वालयंतडागानिवापीकूपमठाःप्रपाः ॥ ८ ॥ ब्राह्म
णानांगृहाश्चेहपुराणपठनंतथा ॥ नबभूवुरिदानींतुसर्वतस्तन्मयीपुरी ॥ ९ ॥ कृतालयामदीयेनवित्तेननिखिलेनच ॥ कुत्रवे
श्मविदःसंतिकुत्रतेशिल्पिनोगताः ॥ १० ॥ यैर्भक्षितंमदीयंतद्वसुसर्वंदुरात्मभिः ॥ क्वगताब्राह्मणास्तेवैसर्वेपुर्यधिकारिणः
॥ ११ ॥ इत्थंनिर्भर्त्सयामासकुलिंदंधृष्टधीस्तदा ॥ लोभमाहूयसचिवंसेवकंवाक्यमब्रवीत् ॥ १२ ॥ तृष्णयाजाययासार्धंत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीमांचंदनावतीं ॥ इतिसंदिश्यतंपश्चाद्ययौकौंतलकंपुरं ॥ १३ ॥ हर्षेणमहतायुक्तआदायविपुलंधनं ॥ पुत्रंमनसिसंचिंत्यचं
द्रहासंतथैवच ॥ १४ ॥ मदीयोमदनःपुत्रोविषंतस्मैप्रदास्यति ॥ तृतीयोदिवसोह्यद्यचंद्रासेगतेसति ॥ १५ ॥ एकेनावापनग
रंद्वितीयेवासरेरिपुः ॥ प्राप्तोनूनंसमदनःसायाह्नेतत्करिष्यति ॥ १६ ॥ यामेनैकेनयास्यामिकृतकार्यःपुरंप्रति ॥ इतिसंचिंत्यम
नसाशिबिकामारुरोहसः ॥ १७ ॥ ऊढांचत्रिंशतैःपुंभिर्मत्स्यभुग्भिर्महाबलैः ॥ पार्थगच्छन्धृष्टबुद्धिःपापात्मादंडमाददे ॥ १८ ॥
वैणवंग्रंथिलंदीर्घंताडयामासधीवरान् ॥ शीघ्रंगच्छतरेदुष्टाधीवरामत्स्यभक्षकाः ॥ १९ ॥ तेऽब्रुवन्नृपगच्छामोमंत्रिन्शीघ्रत
रंप्रभो ॥ माताडयभृशंदंडप्रहारैर्गच्छतोह्निनः ॥ २० ॥ नहुषस्यकुलेजातोभवान्किनमुनीश्वराः ॥ वयंस्मभूपमन्युत्वाद्बो
गिराजंनकुर्महे ॥ २१ ॥ सुवातेपोतवज्जग्मुर्धीवराधीवराश्चते ॥ उपर्युपरिडीयंतेकाकाःस्मशिबिकांहठात् ॥ २२ ॥ चंच्वाभि
घातंकुर्वंतिपक्षतुंडनखैश्चतम् ॥ एवंपार्थाभवत्तत्रविद्धिपापस्यचेष्टितम् ॥ २३ ॥ तावत्पुरःप्रादुरभूद्विशालःफणाभिराकाश
मिवालिहन्वै ॥ पुच्छंनिवेश्यक्षितिपृष्ठएवप्रोवाचसर्पोनृगिराविषाढ्यः ॥ २४ ॥ त्वदीयसौवर्णघटेषुनित्यंवसामिरक्षंस्त्वसू
नुनातत् ॥ स्थानंमदीयंकिलनाशितंहिगच्छामितेस्वास्तिअलंविषादात् ॥ २५ ॥ इत्येवमुक्त्वावचनंसर्पःपातालमाविशत् ॥
विसिस्मायसमूढात्मानाजानाद्गूढपाद्भचः ॥ २६ ॥ धृष्टबुद्धिःपुनर्दंडप्रहारैर्धीवरान्दृढम् ॥ उत्तिष्ठंश्चर्वयन्नोष्ठौदंतैर्दतांश्चपीड
यन् ॥ २७ ॥ युष्माकंचरणान्ग्रामंगत्वाछेत्स्यामिमाचिरम् ॥ इत्थंसपीडयन्प्राप्तोधीवरान्कौंतलंपुरम् ॥ २८ ॥ यामेनैकेनशु
श्रावधृष्टधीस्तूर्यनिःस्वनम् ॥ चिंतयामासमनसाकार्यंपुत्रेणतत्कृतम् ॥ २९ ॥ ॥ नारदउवाच ॥ ॥ तस्माद्विमानादवरु

१ कैवर्तैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यमूढःपदातिरेकःप्रययौपुरस्तात् ॥ ददर्शसूतानथमागधान्बहून्स्वलंकृतान्बंदिनएववस्त्रैः ॥ ३० ॥ ॥बंदिनऊचुः॥ ॥
आगच्छशीघ्रंधृष्टबुद्धेसुतेनकृतंकार्यंसूरिणातत्तुसर्वम् ॥ ब्रह्मायुस्तेचन्द्रहासस्यभूयात्तथासूनोर्मदनस्यातिदातुः ॥ ३१ ॥
॥धृष्टबुद्धिरुवाच ॥आःपापारेबंदिनश्चन्द्रहासःकोसौदूरात्सर्पतहन्मिदंडैः॥इत्यूचिवान्धृष्टबुद्धिःपुरस्तात्पूज्यान्विप्रान्पूजितां
श्चंदनेन ॥ ३२ ॥ नानाक्षौमैर्भूषितान्भूषणैश्चगृहान्स्वीयानागतानन्वपश्यत् ॥ ३३ ॥ ॥विप्राऊचुः॥ ॥भूयादेवंस्वस्तितेधृ
ष्टबुद्धेकुतोलब्धश्चन्द्रहासोवरोयम् ॥ भाग्योदयस्तवरम्योविभातियेनेदृशीकीर्तिरापूर्यतेते ॥ ३४ ॥ निशम्यतेषांवचनंदुरा
त्माजज्वालमंत्रीकिलवाडवोऽब्धौ ॥ दंडंसमुद्यम्यकुतःपुरस्ताद्गमिष्यथेत्यादिजजल्पविप्रान् ॥ ३५ ॥ विप्राःपलायंतिवि
सृज्यवासःकृष्णाजिनंतेतुततःस्खलंतः ॥ विमुक्तकेशाःस्खलदुत्तरीययज्ञोपवीताःपथिनिःश्वसंतः ॥ ३६ ॥ ततोहृष्टागाय
कामंत्रिणंतेप्रोचूराज्यंचन्द्रहासोविधत्ताम् ॥ सतांश्चक्रेभिन्नकपालवीणामृदङ्गढक्कानकभेरिवंशान् ॥ ३७ ॥ पश्यंश्चित्रंद्वा
रिवर्णैर्विचित्रंप्रायाद्द्वाराभ्यंतरंधृष्टबुद्धिः ॥ नीराजितुंचम्पकांग्योभिजग्मुर्दीपान्विताःकुंकुमचर्चिताश्च ॥ ३८ ॥ आहस्मता
धृष्टधीरुत्सवोऽयंकस्मात्कृतःकिंचलब्धंसुतेन ॥ ऊचुर्मृगाक्ष्यस्तवसूनुनाद्यलब्धोहितश्चंद्रहासःकुलस्य ॥ ३९ ॥ दुष्टोमूढोधृ
ष्टधीराहतस्मैधनंदत्तंचन्द्रहासायतेन ॥ ४० ॥ ॥स्त्रियऊचुः॥ ॥मैवंब्रूहिचन्द्रसाहायतस्मैदत्ताकन्याविषयापुत्रकेण ॥
तासांवचःशल्यविभिन्नगात्रोबिभ्रच्छोणेलोचनेक्रोधयुक्तः ॥ ४१ ॥ ततःप्रायात्सप्तमद्वारमध्यंयत्रास्तेयंद्वारपालोविवेकः ॥ ॥१३५॥
श्रद्धायष्टिस्तंचदृष्ट्वाससारप्राप्तेक्रोधेकाविवेकस्यवार्ता ॥ ४२ ॥ अथापश्यद्धृष्टधीर्वेदिकायांतंचंद्रहासंविषयांचकन्याम् ॥ ब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धांचलांचन्द्रहासांचलेनपुष्पोद्गुंफमुकुटंबिभ्रतींच ॥ ४३ ॥ स्वेदोमहान्वेपथुश्चास्यगात्रेप्रादुर्बभूवाप्रतिमःशुष्कमास्यम् ॥
क्रुद्धोदध्यौकिंकृतंमत्सुतेनयन्नापश्यद्गूढपत्रंमदीयम् ॥ ४४ ॥ जामाताथोश्वशुरंवीक्ष्यपत्न्यासहोत्थितःकुरुतेस्मप्रणामम्
॥ यथाऽव्याघ्रंबालमृगोविलोक्यतथाचामुंनाभ्यनन्दद्विरापि ॥ ४५॥ अथमदनमुपागतंप्रनम्रंचरणयुगेवदतिस्मधृष्टबुद्धिः ॥
वदसुतकिमकारिरेदुरात्मन्ममचमनोनहितोषमाजगाम ॥ ४६ ॥ आहस्मतंमदनस्तातपत्रंविलोक्याहंदत्तवान्स्वांस्वसार
म् ॥ वरायास्मैचन्द्रहासायधेनूर्वासोहिरण्यंमहिषीःकोटिशोऽद्य ॥ ४७ ॥ कस्मात्तातःक्रुध्यतिमांविलोक्यकोशागारंपश्यरि
क्तंकृतंतत् ॥ नानादेशादागतेभ्योद्विजेभ्योदत्तंद्रव्यंयाचकेभ्योऽखिलेभ्यः ॥ ४८ ॥ ॥ नारदउवाच ॥ ॥ आःपापोयोधु
नयन्स्वंकपालंहस्तेहस्तंपेषयन्निःश्वसन्सः ॥ प्रोवाचेदंधृष्टधीर्याहिघोरंवनंभिक्षामटकृष्णाजिनीत्वम् ॥४९॥ ॥ मदनउ० ॥
नैतच्चित्रंतातरामोवनंकिंपितुर्वाक्यान्निरगात्पुण्यकीर्तिः ॥ तथावनंतववाक्यात्प्रयास्येपरंन्यूनंकिंकृतंमेविवाहे ॥ ५० ॥ नाहू
तोयंदेशपालःकुलिन्दःपत्नीतदीयाकिंकरोम्यल्पकाले ॥ समायातस्तत्सुतोलेखिपत्रंशीघ्रंबलंनमुहूर्तंस्त्वथेत्थम् ॥ ५१ ॥ किं
वाधुनायामिकुलिंदमेकःसमाहूयात्रानयिष्येनमस्ये ॥ न्यूनंनान्यद्विषयायाविवाहेसर्वेदत्तावाजिनोहास्तिनश्च ॥ बाहूशिरो
दायिमयावरायपूज्यायकृष्णानुचरायतात ॥ ५२ ॥ ॥ धृष्टबुद्धिरुवाच ॥ ॥ दूरंप्रसर्पनमुखंममदर्शयाद्यपत्रंसमानयनि
रीक्षयतत्रांकिंस्वित् ॥ तेनाहृतंपत्रमपश्यदेषमंत्रीविधातुर्लिपिमन्वमंस्त ॥ ५३ ॥ क्षणंदध्यौसांत्वयामासपुत्रंसत्यंत्वदीयंकि
लवीक्षितञ्च ॥ मयात्वसौचन्द्रहासोविसृष्टस्तथापत्रंलिखितंगूढभावम् ॥ ५४ ॥ जातोदैवाद्विषयायाविवाहोनाहंकर्त्तानभवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नापरोऽपि ॥ इत्थंसमाश्वास्यसुतंदुरात्मातंचन्द्रहासंपरिपूज्यदम्भात् ॥ ५५ ॥ जातेचतुर्थेदिवसेचतुर्थीकर्मण्यधात्कैतवाद्धृ
ष्टबुद्धिः ॥ ततःपरंदूयमानःसराजन्कर्ताकिमत्राद्यविपक्षपक्षे ॥ ५६ ॥ कृतंमयाह्येकमहोद्वितीयमग्रेकथंकार्यममुष्यशत्रोः ॥
इत्थंनिमग्नःसतुशोकासिंधौकर्तव्यनौकारहितेऽल्पबुद्धिः ॥ ५७ ॥ ॥ इत्याश्वमेधिकेपर्वणि जैमिनीये धृष्टबुद्धिसंतापो
नामषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥
॥ नारदउवाच ॥ ॥ धृष्टधीश्चिंतयामासविपरीतमभून्मम ॥ दत्तातुविषयाकन्यावध्यायास्मदरातये ॥ १ ॥ अतःपरंमयाका
र्यंकिंकंगच्छामिबांधवं ॥ पुत्रोयंमद्वशेनैववर्त्ततेमदनोमलः ॥ २ ॥ आभ्यांमदीयंहिकुलंपुत्राभ्यांनाशितंध्रुवं ॥ चंद्रहासोविशे
षेणनाशयिष्यतिमत्कुलं ॥ ३ ॥ विषयाविधवाभूयात्करिष्याम्यनृतंवचः ॥ मुनीनामितिसंचित्यचांडालांस्तानथाह्वयत् ॥ ४ ॥
एकांतेसंस्थितःपाप्मासंदिदेशशनैःशनैः ॥ चंडिकायतनंबाह्येपुराद्दुपवनेशुभे ॥ ५ ॥ करवालकराःसर्वेतत्रगच्छथमौनिनः
॥ गूढंतस्यस्थिताःकोणद्वयेनिश्चलमानसाः ॥ ६ ॥ जातेपितृप्रसूकालेयःकश्चिदपियास्यति ॥ भवद्भिःसहिहंतव्योमाविचार
यतध्रुवं ॥ ७ ॥ पूर्वंयथावंचितोऽहंतथामाकुरुताधुना ॥ युष्माकंसंपदामर्धंप्रदास्येमदनांशकं ॥ ८ ॥ तस्यवाक्यंसमाकर्ण्यते
ऽत्यजाश्चंडिकालयं ॥ जग्मुःप्रच्छन्नवेषाश्चतृतीयप्रहरेसति ॥ ९ ॥ धृष्टबुद्धिश्चंद्रहासंविनयाद्वाक्यमब्रवीत् ॥ चंद्रहासम
हाप्राज्ञशृणुमेवचनंहितं ॥ १० ॥ अस्माकंहिकुलेदेवीचंडिकापूज्यतेकिल ॥ कृतोद्वाहोभवानद्यतांनमस्कुरुमातरं ॥ ११ ॥
सायंसंध्यांविधायाशुपुष्पाण्यादायचंदनं ॥ एकःप्रयाहितांदेवींपुरबाह्यकृतालयां ॥ १२ ॥ पूजितुंचनमस्कर्त्तुमित्यादिश्यकु

CC-0. In Public Domain. Digitization by eGangotri

धीःस्थितः ॥ ओमित्युक्त्वाततोवाक्यंचंद्रहासोह्यकैतवात् ॥ १३ ॥ ससंध्यावंदनंकृत्वागंतुकामोबभूवह ॥ अंबिकालयमेवा
सौचंद्रहासोमहायशाः ॥ १४ ॥ ॥ नारदउवाच ॥ ॥ एतस्मिन्नंतरेपार्थराजाकौंतलपःसुधीः ॥ गालवंतंसमन्हूयदेहचे
ष्टामथाब्रवीत् ॥ १५ ॥ स्वामिन्गालवभूलोकेराज्यंमेकुर्वतोर्नहि ॥ सुखमस्तितनुच्छायामशिरस्कांविलोकये ॥ १६ ॥
उत्क्रांतिसमयोमेऽद्यसमायातोनसंशयः ॥ अरिष्टाध्यायमाख्याहियंश्रुत्वानिर्वृतिंलभे ॥ १७ ॥ ॥ गालवउवाच ॥ ॥ अ
रिष्टानिमहाराजशृणुवक्ष्यामितानिते ॥ ॥ दत्तात्रेयोह्यलर्काययान्याचख्यौमहात्मने ॥ १८ ॥ अरिष्टानिसमालोक्यमृत्युं
जानातियोगवित् ॥ देवमार्गेध्रुवंशुक्रंसोमच्छायामरुंधतीम् ॥ १९ ॥ योनपश्येन्नजीवेत्सनरःसंवत्सरात्परम् ॥ अरश्मिबिंबं
सूर्यस्यवन्हिंचैवांशुमालिनम् ॥ २० ॥ दृष्ट्वैकादशमासाच्चनरस्तूर्ध्वंनजीवति ॥ सुवर्णवर्णान्वृक्षांश्चनवमासान्सजीवति ॥ २१ ॥
स्थूलःकृशःकृशःस्थूलोयोऽकस्मादेवजायते ॥ प्रकृतिश्चविवर्त्तेततस्यायुश्चाष्टमासिकम् ॥ २२ ॥ खंडंयस्यपदंपार्ष्ण्योःपाद
स्याग्रेतथाभवेत् ॥ पांसुकर्दमयोर्मध्येसप्तमासान्सजीवति ॥ २३ ॥ कपोतगृध्रोलूकाश्चवायसोवापिमूर्धनि ॥ क्रव्यादोवाख
गोलीनःषण्मासायुःप्रदर्शकाः ॥ हन्यतेकाकपंक्तीभिःपांसुवर्षेणयोनरः ॥ २४ ॥ स्फुरेच्चयस्यवैचर्मस्तनादूर्ध्वमुरस्थलम् ॥
तस्यापिपंचभिर्मासैर्विद्यान्मृत्युमुपस्थितम् ॥ २५ ॥ स्वांछायांचान्यथादृष्ट्वाचतुर्मासान्सजीवति ॥ अनभ्रेविद्युतंदृष्ट्वादक्षि
णांदिशमाश्रिताम् ॥ २६ ॥ योनिशींद्रधनुर्वापिजीवितंद्वित्रिमासिकम् ॥ घृतेतैलेऽथवादर्शेतोयेवाप्यात्मनस्तनुं ॥ २७ ॥
यःपश्येदशिरस्कांचमासार्धंनसजीवति ॥ यस्यह्यस्थिसमोगंधोगात्रेशवसमोऽपिवा ॥ २८ ॥ तस्यार्धमासिकंज्ञेयंनरस्यन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पजीवितम् ॥ यस्यवैस्नातमात्रस्यहृत्पद्ममवशुष्यति ॥ २९ ॥ पिबतश्चजलंशोषोदशाहंसोऽपिजीवति ॥ ऋक्षवानरयुग्मस्थो
गायन्योदक्षिणांदिशम् ॥ ३० ॥ स्वप्नेप्रयातितस्यापिमृत्युस्तकालमृच्छति ॥ रक्तकृष्णांबरधरागायंतीहसतीचया ॥ ३१ ॥
दक्षिणाशांनयेन्नारीस्वप्नेसोऽपिनजीवति ॥ नग्नंक्षपणिकंस्वप्नेहसमानंप्रपश्यति ॥ ३२ ॥ यएवंतस्यचक्षिप्रंविद्यान्मृत्युमुप
स्थितम् ॥ आमस्तकतलाद्यस्तुनिमग्नःपंकसागरे ॥ ३३ ॥ स्वप्नेपश्यत्यथात्मानंनरःसद्योम्रियेतसः ॥ कोशागारंरथागारंध
क्षयंतंस्वकंशिरः ॥ ३४ ॥ दृष्ट्वास्वप्नेदशाहेनमृत्युरेवनसंशयः ॥ करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः ॥ ३५ ॥ पाषाणैस्ताडि
तःस्वप्नेसद्योमृत्युमवाप्नुयात् ॥ नात्मानंपरनेत्रस्थंवीक्षतेनसजीवति ॥ ३६ ॥ पिधायकर्णौनिर्घोषंनशृणोत्यात्मसंभवम् ॥
स्वभावपैपरीत्येनवर्ततेनसजीवति ॥ ३७ ॥ देवान्नार्चयतेविप्रान्गुरून्वृद्धांश्चनिंदति ॥ मातापित्रोरसत्कारंजामातॄणांकरो
तियः ॥ ३८ ॥ योगिनांज्ञानविदुषामन्येषांचमहात्मनाम् ॥ प्राप्तकालःसपुरुषोनतुजीवतिवैक्षणम् ॥ ३९ ॥ योगिनासततंय
त्नादरिष्टान्यवनीपते ॥ विलोक्यस्वासनेस्थित्वाध्यातव्यंपरमंपदम् ॥ ४० ॥ सारभूतमुपासीतज्ज्ञानंयत्कार्यसानधम् ॥ इदंज्ञेय
मिदंज्ञेयमितियस्तृषितश्चरेत् ॥ ४१ ॥ अपिकल्पसहस्त्रायुर्नसज्ज्ञानमवाप्नुयात् ॥ त्यक्तसंगोनिराहारोजितक्रोधोजितेंद्रि
यः ॥ ४२ ॥ विषयेभ्योनिवर्त्याशुमनोध्यानेनिवेशयेत् ॥ ॥ नारदउवाच ॥ ॥ योगसारंसमाकर्ण्यगालवान्मुनिपुंगवा
त् ॥ ४३ ॥ राज्यंत्यक्तुमनाःसोथजीर्णांत्वचमिवोरगः ॥ तत्रोपविष्टंमदनंसमाहूयेदमब्रवीत् ॥ ४४ ॥ राजाकौंतलपस्तस्यक ॥१३७॥
र्णेजामातरंस्वकम् ॥ समानयाशुमदनकरिष्येह्यात्मनोहितम् ॥ ४५ ॥ बाढमित्यालपित्वासप्रायाज्जामातरंप्रति ॥ सूर्येजपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसूनाभेह्यस्तंगिरिमुपाश्रिते ॥ ४६ ॥ ददर्शचंद्रहासंतंकृतसंध्याविधिंशुचिं ॥ पुष्पकर्पूरकस्तूरीचंदनांबरधारिणम् ॥ ४७॥
हरिद्राकुंकुमोन्मर्दगौरांगंमुकुटावृतम् ॥ एकाकिनंसमायांतंपथिदृष्ट्वाऽब्रवीत्स्मरः ॥ ४८ ॥ अयित्वंचंद्रहासाशुकुतोव्रजसित
द्वद ॥ चंद्रहासोब्रवीद्वाक्यंपित्राहंप्रेरितस्तव ॥ ४९ ॥ चंडिकांचनमस्कर्त्तुंमहिषघ्नींबहिःस्थिताम् ॥ वारयामासमदनस्त्वंया
हिनृपमंदिरम् ॥ ५० ॥ देहिचंदनपुष्पाणित्वंनृपंत्वरितंव्रज ॥ इत्युक्त्वापुष्पमालाढ्यंपात्रमाच्छिद्यतत्करात् ॥ ५१ ॥ ययौसम
दनश्चैकश्चंडिकाभवनंतदा ॥ अवतीर्यहयात्तस्मात्सेवकान्विनिवार्यच ॥ ५२ ॥ व्रतभंगभयात्पार्थच्छत्रचामरवर्जितः ॥ चंद्र
हासस्तमारुह्यवाजिनंचप्रयत्नतः ॥ ५३ ॥ तैरेवसेवकैःसार्धंछत्रचामरवीजितः ॥ प्रापकौंतलपंवेगान्नमस्कृत्यपुरःस्थितः ॥
॥ ५४ ॥ चंद्रहासंसमालोक्यराजाकौंतलपोऽब्रवीत् ॥ स्वामिन्गालववयास्यामिवनंत्यक्त्वापरिच्छदम् ॥ ५५ ॥ सर्वसंगपरि
त्यागंपात्रेकुर्वेद्यवैष्णवे ॥ ओमित्युक्तःसमुनिनाददौचंपकमालिनीम् ॥ ५६ ॥ चंद्रहासायनिखिलंराज्यंप्रादादवाङ्मुखः ॥
परित्यज्यचवस्त्राणिनग्नऊर्ध्वभुजोनृपः ॥ ५७ ॥ वनंजगामसंत्यक्त्वासमलोष्टाश्मकांचनः ॥ प्राप्ययोगर्द्धिमतुलांपरांनि
र्वाणलक्षणां ॥ ५८ ॥ पश्यंस्तुच्छमिमंसर्वंसदेवासुरमानुषम् ॥ पाशैर्गुणमयैर्बद्धंबध्यमानंचनित्यशः ॥ ५९ ॥ पुत्रस्वभ्रातृ
पौत्रादिस्वपारक्यादिभावितैः ॥ आकृष्यमाणंकरणैर्दुःखार्तंभिन्नदर्शनम् ॥ ६० ॥ अज्ञानपंकगर्तस्थमनुबुद्ध्वामहीपतिः ॥
आत्मानंचसमुत्तीर्णंगाथामेतामगायत ॥ ६१ ॥ अहोकष्टंयदस्माभिःपूर्वंराज्यमनुष्ठितम् ॥ अपिपश्चान्मयाज्ञातंयोगान्नास्ति
परंसुखम् ॥ ६२ ॥ ॥ नारदउवाच ॥ ॥ इत्थंसंसारपाशेभ्योमुक्तःकौंतलपोनृपः ॥ सिंहासनेचंद्रहासंगालवःसोभ्यषेच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत् ॥ ६३ ॥ गांधर्वेण विवाहेन तदा चंपकमालिनीम् ॥ परिणिन्ये चंद्रहासः सूर्ये स्तंयातिपाटले ॥ ६४ ॥ ॥ नारद उवाच ॥
पुष्पाणि च समादाय गच्छन्स मदनः पथि ॥ ददर्श युध्यत्पुरतो बिडालद्वयमातुरम् ॥ ६५ ॥ हस्ताच्चंदनपुष्पाणां पात्रं भूमावथा
पतत् ॥ रुधिरं प्रस्रवन्नेत्रान्मदनस्य मुखात्तथा ॥ ६६ ॥ उलूकः स च वै मूर्ध्नि स्थितवान्भीमनिःस्वनः ॥ तथाप्यगणयन्पार्थ म
दनो वाक्यमब्रवीत् ॥ ६७ ॥ अपि स्वस्ति भवेत्तस्मै चंद्रहासाय धीमते ॥ वैष्णवाय च धीराय जामात्रे मम सांप्रतम् ॥ ६८ ॥ इत्ये
वं चिंतयन्प्राप मदनश्चंडिकालयम् ॥ ६९ ॥ अवाङ्मुखः सन्स विवेश धीमान्कपाटयुग्मं प्रहरन्करेण ॥ शब्दं समाकर्ण्य च ते पशु
घ्नाः शस्त्राणि यत्नाज्जगृहुः प्रमत्ताः ॥ ७० ॥ कर्णे लगित्वाशनकैरवोचन्द्विजघ्नधेनुघ्नशिशुघ्नकाश्चित् ॥ प्राप्तो मुमूर्षुस्तदिहात्र जं
तुः स्वनाम वैयर्थ्यमहो न कार्यं ॥ ७१ ॥ न लंघनीयः कुलधर्म एष नीतिस्ततो हिंस्युरमुं च शूलैः ॥ अथ प्रविष्टं मदनं सुवेषं दक्षं पितुर्वा
क्यकरं पशुघ्नाः ॥ ७२ ॥ शूलैश्च खड्गैर्निशितैश्च पट्टिशैर्जघ्नुस्तदा प्राह सुतः सुमंत्रिणः ॥ हे चंडिके वैष्णविनो लुलायो दैत्यो निशुं
भोऽपि न शुंभ एव ॥ न रक्तबीजोऽहमिहागतस्त्वां कस्माच्च शूलैरभिहंसि मातः ॥ ७३ ॥ न प्रार्थयाम्यद्य च जीवितार्थं त्वं साक्षिणी मेव
चनस्य भूयाः ॥ यच्चंद्रहासार्थमभाणि बाहू शिरः प्रदास्ये ह्यनृणो हमासम् ॥ ७४ ॥ इत्यूचिवान्मंत्रिपुत्रस्तदानीं जहौ प्राणानुच्च
रन्माधवेति ॥ चांडालास्ते प्रस्फुरद्वाक्यभीता जग्मुस्ते वै को हतोऽस्माभिरेव ॥ ७५ ॥ ॥ इत्याश्वमेधिके पर्वणि जैमिनी
ये कुंतलपुरराज्यप्राप्तिर्नाम सप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ छ ॥ ॥
॥ नारद उवाच ॥ ॥ राज्यं लब्ध्वा चंद्रहासः पत्नीं चंपकमालिनीं ॥ शुभे गजे तया सार्धमारुरोह निशागमे ॥ १ ॥ नमस्कर्तुं धृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्टबुद्धिं मृदंगध्वनिशोभितः ॥ आजगामत्वरायुक्तोदिदृक्षुःश्वशुरंनृप ॥ २ ॥ शंसंतिस्मवचस्तस्मैमंत्रिणेचवचोहराः ॥ मंत्रिन्स
मागतंपश्यचंद्रहासंनृपंनवम् ॥ ३ ॥ जामातरंतवविभोराज्ञःकौंतलपस्यच ॥ तेषांवचनमाकर्ण्यक्रोधान्मंत्रीवचोऽब्रवीत् ॥४॥
युष्माकंरसनांछेत्स्येमूलमारभ्यपापिनाम् ॥ कोऽन्यःकौंतलपाद्राजाभविष्यतिधरातले ॥५॥ वचोहराब्रुवंतिस्मस्वामिन्दृ
ष्ट्वावलोकय ॥ तावत्प्राप्तश्चंद्रहासोजाययासहितःपुरः ॥ ६ ॥ ददर्शधृष्टबुद्धिस्तंनेत्रेस्वेपरिमार्जयन् ॥ उताहोस्वित्सुतःप्रा
प्तोमदनोऽयंभविष्यति ॥ ७ ॥ पुरतोविद्यतेकन्यायथाचंपकमालिनी ॥ उवाचोच्चैस्तदामंत्रीरेरेमदनकिंकृतम् ॥ ८ ॥ इतिचिं
तयतस्तस्यचंद्रहासःपुरःस्थितः ॥ अवतीर्यगजात्तस्मात्पादौजग्राहमंत्रिणः ॥ ९ ॥ चुबुकेधृष्टबुद्धिस्तंदधारनभवान्गतः ॥ चं
डिकाभवनंरम्यंगोत्रास्थितिविनाशकृत् ॥ १० ॥ ॥ चंद्रहासउवाच ॥ ॥ यावद्गच्छाम्यहंस्वामिन्पुष्पचंदनपात्रभृत् ॥
तावत्कौंतलपादेशकारकोमदनश्चमाम् ॥ ११ ॥ वारयामासपश्चाच्चस्वयंदेवींजगामसः ॥ तत्तस्यवचनंश्रुत्वाकठोरंमर्मभेदि
च ॥ १२ ॥ ऊर्ध्वबाहुर्मुक्तकेशोमंत्रीसविलपन्ययौ ॥ परार्थेयोऽवटंकर्तातस्मिन्सपततिध्रुवम् ॥ १३ ॥ तस्मात्सर्वप्रयत्नेनप्रा
णिनांहितमाचरेत् ॥ उत्तिष्ठन्निपतन्भूमौध्वांतेघोरेस्थितःपथि ॥ १४ ॥ धृष्टबुद्धिर्जगामाशुपश्यन्प्रेतस्थलींबहिः ॥ प्रज्वलं
तिचितायत्रभस्मवातेननीयते ॥ १५ ॥ तंदृष्ट्वाभूतवेतालकंकालावाक्यमब्रुवन् ॥ अस्मत्तोऽभ्यधिकःकोऽपिसमायातिचपश्य
ताम् ॥ १६ ॥ तत्रापरोऽब्रवीत्प्रेतःकोस्मत्तोऽभ्यधिकोभवेत् ॥ मयाप्रेष्येणयुष्माकंघातितंब्राह्मणत्रयम् ॥ १७ ॥ विश्वासध
नहर्त्तारंपरनिंदापरायणम् ॥ विद्धिमांसर्वदाभूतजंतुघ्नंभयदंसताम् ॥ १८ ॥ तथाब्राह्मणहंतारंभ्रातरंमेऽद्यपश्यत ॥ ममपुत्राद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यधिकस्तस्मात्पथिकघातकात् ॥ १९ ॥ तावद्ब्रह्मग्रहस्त्वेकः प्रहसन्वाक्यमब्रवीत् ॥ अधिकस्तेसुतोभ्रातात्वंततोब्रह्मघातकी ॥ २० ॥ अयमायातिचान्योऽस्तित्वादृशोनचमादृशः ॥ तस्मात्पलायनंकार्यंयुष्माभिर्नचदर्शनम् ॥ २१ ॥ कर्तव्यंतस्यपापस्यदुष्टस्यातिविरोधिनः ॥ मित्रद्रोहीकृतघ्नोऽयंविश्वासस्यैवघातकः ॥ २२ ॥ अयमायातिपापिष्ठस्तस्माद्दूरंपलायते ॥ इत्यालोच्यपलायंतेतंदृष्ट्वाभूतभैरवाः ॥ २३ ॥ धृष्टधीःपुत्रशोकार्तश्चिताकाष्ठानिसंदधत् ॥ ज्वलंतिपाणौप्रययौचंडिकाभवनंप्रति ॥ २४ ॥ ददर्शपुत्रंमदनंखड्गशूलविदारितम् ॥ चंडिकापुरतोनूनंपशुंद्वात्रिंशतागुणैः ॥ २५ ॥ अन्वितंतंसुचारित्रंयोगिनांतपतांवरम् ॥ ज्ञातार्थसमयंशांतंमनोवाक्कायदंडकम् ॥ २६ ॥ विभिन्नकलशंदिव्यंप्रासादमिवभूतले ॥ काश्मीरमिवसंभिन्नंलिंगंपाखंडिभिर्नरैः ॥ २७ ॥ दृष्ट्वातंमदनंपुत्रंतथाच्छिन्नमनोरथः ॥ स्वकीयस्यैववंशस्यछिन्नंमूलंसधृष्टधीः ॥ २८ ॥ परित्यज्यचिताकाष्ठंपश्यन्ससुतमातुरः ॥ आलिलिंगतथाभूतंसमुत्थाप्यचपाणिना ॥ २९ ॥ ॥ धृष्टबुद्धिरुवाच ॥ ॥ उत्तिष्ठोत्तिष्ठरेपुत्रचंद्रहासःसमागतः ॥ तस्मैत्वंविषयांकन्यांप्रदेहिविपुलंधनम् ॥ ३० ॥ मयात्वंकठिनैर्वाक्यैःपीडितोऽसिप्रकोपितः ॥ सांप्रतंवैष्णवद्रोहफलंप्राप्तंमयासुत ॥ ३१ ॥ वैष्णवद्रोहिणांसत्यंहृदयंतुविदीर्यते ॥ तस्मान्मदीयंहृदयंविदीर्णमधुनाभवत् ॥ ३२ ॥ अयंसमदनोयस्यरतिःकृष्णेसदास्थिता ॥ नायंशिवद्रोहकरोनयोगीजनतापनः ॥ ३३ ॥ इत्थंविलप्यबहुधाधृष्टधीःस्वशिरस्तदा ॥ आस्फालयामासभृशंस्तंभेधातुविभूषिते ॥ ३४ ॥ सभिन्नमस्तकोभूमौस्फुटितांडमिवापतत् ॥ तास्मिन्निपतितेपार्थधृष्टबुद्धौचतत्सुते ॥ ३५ ॥ प्रभातसमयेजातेतापसःपुष्पतोयभृत् ॥ चंडिकाभवनंप्रायात्स्नापितुंपूजितुंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तां॥३६॥प्राविशद्भवनंदेव्याःसलिंगीपुरतोमृतौ॥धृष्टधीमदनौशांतौदीपाविवददर्शह॥३७॥ आहोस्वित्किंबभूवात्रनवराज्य
फलंस्फुटम्॥मंत्रिपुत्रावपिहतौनृपकौंतलपप्रियौ॥३८॥आगतश्चंद्रहासायतापसःशंसितुंतदा॥ ॥तापसउ०॥ ॥केनापिनि
हतौराजन्धृष्टधीमदनौबहिः॥३९॥चंडिकाभवनेरात्रौतच्छीघ्रमवधार्यतां॥ तस्यवाक्यंसमाकर्ण्यपद्मामेवागतोनृपः॥४०॥
चन्द्रहासःसुदुःखार्त्तोदेव्याभवनमातुरः॥ ददर्शपुरतोदेव्याःपितापुत्रौचतादृशौ ॥४१॥ चन्द्रहासोऽब्रवीद्वाक्यंहेमातश्चंडि
केमयि॥ क्रुद्धाऽसिचेन्मांगृहाणत्वयाएतौवृथाहतौ ॥४२॥ इत्युक्त्वापुरतोदेव्याःपितापुत्रौचतादृशौ ॥ दृष्ट्वास्नात्वाशुचिर्भूत्वा
स्वस्तिवाच्यततोनृपः ॥४३॥ कुण्डंखनित्वारुचिरंचतुरस्रंसुलक्षणम्॥ तस्मिन्पावकमारोप्यबलिदीपपुरःसरम्॥४४॥ जु
हावाज्यतिलान्रम्यान्पायसंसितयासह॥ स्वदेहमांसमुद्धृत्यसूक्तंजप्त्वाजुहावसः ॥४५॥ सर्वंमांसंचन्द्रहासोहुत्वापादशि
रोधरान्॥अस्थीनिधारयन्शीर्षंप्राहस्मजगदंबिकां ॥४६॥ चराचरगुरोर्विष्णोश्चिच्छक्तिस्त्वमुदाहृता॥सर्वेषांकर्मणांमातःसा
क्षिणीत्वंपृथक्स्थिता ॥४७॥ अधुनाच्छेद्मिखड्गेनशिरस्तेनजगत्पतिः॥ प्रीयतांसहृषीकेशस्त्वद्रूपःकालिकेंऽबिके ॥४८॥
इत्येवमुक्त्वातंखड्गंयावत्कण्ठेदधारसः॥ तावत्प्रादुर्बभूवैषाचंडिकाप्राहतंनृपम् ॥४९॥ मैवमात्मवधंकार्षीरेषपाप्माकुकर्म
णा॥ पंचत्वमगमन्मंत्रीतत्सुतोप्यददाद्दृणम् ॥५०॥ त्वदीयंयत्पुराप्रोक्तंविवाहसमयेस्वसुः ॥ प्रसन्नाहंहरेर्भक्तचन्द्रहासत
वाधुना॥ वरौप्रार्थयभद्रंतेस्वेच्छयामानसौध्रुवम् ॥५१॥ ॥ चंद्रहासउवाच॥ ॥ हरौभक्तिःसदाभूयान्ममजन्मनिज
न्मनि॥ वरोऽयंप्रथमोमातर्द्वितीयेनमृतौत्विमौ ॥५२॥ पितापुत्रौप्रजीवेतांजगत्पावनितेनमः॥ ॥ श्रीदेव्युवाच॥ ॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चलातेहरौभक्तिर्भविष्यतिचसात्विकी ॥ ५३ ॥ पुत्रोऽपिभविताशूरस्तोषयिष्यतियोहरिम् ॥ आशैशवाच्चरित्रंतेचन्द्रहासक
लौयुगे ॥ ५४ ॥ नरानार्यश्चसततंश्रोष्यंतिपरमादरात् ॥ पठिष्यंतिचयेभक्त्याहृदिकृत्वाजनार्दनम् ॥ ५५ ॥ तेषांभक्तिर्हि
सुदृढाभविष्यतिरमापतौ ॥ चन्द्रहासमहाप्राज्ञआयाहिपुरतोमम ॥ स्थिरोभवमुहूर्तार्धंपिधायनयनेस्वके ॥ ५६ ॥ ॥
नारदउवाच ॥ ॥ तथाचक्रेसनृपतिर्वैष्णवीशक्तिरुत्थिता ॥ खड्गशक्तिगदाब्जाद्यैरायुधैःपरिवारिता ॥ ५७ ॥ दध्रेनृपस्यशि
रसिहस्तंज्ञानोपदेशकम् ॥ ततस्तावेवसोपश्यद्धृष्टधीमदनौनृप ॥ ५८ ॥ तादृग्रूपवयोवेषौयथासुप्तोत्थितौहितौ ॥ आत्मानंपू
र्ववच्चापिनिर्व्रणंचन्दनार्चितम् ॥ ५९ ॥ नतांददर्शजननींजगदंबांहरेस्तनुम् ॥ खात्पुष्पवृष्टिंपतितांसुरमुक्तांविलोक्यच ॥
॥६०॥नमश्चक्रेधृष्टबुद्धिंचन्द्रहासःस्मरंतथा ॥ समालिंग्यसुसंपूज्यश्वशुरंवाक्यमब्रवीत् ॥ ६१ ॥ ॥ चन्द्रहासउवाच ॥
हरेर्माययात्वियंसर्वाकश्चजीवतिकोमृतः ॥ तस्मात्सर्वप्रयत्नेनभजामस्तमधोक्षजम् ॥ ६२ ॥ ॥ नारदउवाच ॥ ॥ एवंसवै
ष्णवःपार्थव्यसनेननपीडितः ॥ प्रविवेशपरंताभ्यांचंद्रहासःपुरंनिजम् ॥ ६३ ॥ ॥ अर्जुनउवाच ॥ ॥ दैवात्प्रापमहद्रा
ज्यंचंद्रहासोमहामुने ॥ कुलिंदेनतुपश्चाच्चदुःखितेनतुकिंकृतम् ॥ ६४ ॥ ॥ नारदउवाच ॥ ॥ शृणुपार्थमहाबाहोकुलिंद
स्यचचेष्टितम् ॥ गतेऽथचंद्रहासेसपीडितोधृष्टबुद्धिना ॥ ६५ ॥ विचार्यमनसादेवंहरिंबन्धविमोक्षकम् ॥ धनंतद्ब्राह्मणेभ्यस्तु
दत्वानिर्वेदमागमत् ॥ ६६ ॥ पुत्रंमेचन्द्रहासाख्यंत्वद्भक्तंत्वत्परायणम् ॥ त्वयादत्तंहृषीकेशरक्षास्मात्पापचेष्टितात् ॥ ६७ ॥ इत्यु ॥१४०॥
क्त्वास्वगृहेतस्मिन्सपत्नीकःसबांधवः प्रविवेशहुताशंवैनिर्विण्णोध्यानतत्परः ॥ ६८ ॥ एतस्मिन्नंतरेलोकाधृष्टबुद्धौन्यवेदय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न् ॥ स्वामिन्कुलिंदोनृपतिःसर्वदाहितकृत्तव ॥ ६९ ॥ दुःखात्सपरिवारोऽसौविशतिस्महुताशनम् ॥ इतितेषांवचःश्रुत्वाप्रेरि
तोहरिणाययौ ॥ ७० ॥ विचार्यमनसासम्यक्पुत्रोऽस्यनिहतोमया ॥ किमर्थंघातयाम्येनंवृद्धंधनविवर्जितम् ॥ ७१ ॥ पुत्र
हीनोमृतोह्येषदैवेनहिनिपातितः ॥ एवंविमृश्यमनसाशीघ्रंगत्वान्यवारयत् ॥ ७२ ॥ माकुलिंदविषादंत्वंकुरुद्रव्यापहारजम्॥
पुनर्दास्यामितेवित्तंदेशंचविविधंवसु ॥ ७३ ॥ इतिनानाविधैर्वाक्यैराश्वस्तःसकुलिंदकः ॥ पुत्राशांपरमांकृत्वाउत्थितःप्रणना
मतम् ॥ ७४ ॥ धृष्टबुद्धिस्त्वाजगामतंनिवार्यस्वमंदिरम् ॥ कुलिंदेनश्रुतंसर्वंचंद्रहासेनयत्कृतम् ॥ ७५ ॥ तच्छ्रुत्वाहर्षसंपन्नोह
रिंनत्वाद्विजान्धनैः ॥ पूजयामासधर्मात्मायाचकानथसर्वशः ॥ ७६ ॥ चंद्रहासोऽपितद्राज्यंलब्ध्वातानर्चयद्द्विजान् ॥ स्वयंतु
बंधुभिःसार्धमदनेनद्विजातिभिः ॥ ७७ ॥ आनयामासपितरंमातरंपुत्रवत्सलाम् ॥ ततःकौंतलकेराज्यंचकाराब्दशतत्रयम् ॥
॥ ७८ ॥ विषयाऽसूततनयंमकरध्वजमूर्जितं ॥ असूतशूरंपद्माक्षंसुतंचंपकमालिनी ॥ ७९ ॥ इत्थंपार्थमहाबाहोचंद्रहासःपुरा
शिशुः ॥ शालिग्रामशिलासंगान्निस्ततारभवार्णवम् ॥ ८० ॥ तस्मात्संपूजयेन्नित्यंशालिग्रामशिलांनरः ॥ शालिग्रामशिला
चक्रंद्वारकायाःसमुद्भवं ॥ ८१ ॥ कलिकालेविभुःपार्थनजहातिजनार्दनः ॥ सर्वलोकोपकाराययतिरूपेणतिष्ठति ॥ ८२ ॥ त
स्मात्सर्वप्रयत्नेनयतिःपूज्योहिकेशवः ॥ द्विरूपेदेवदेवस्यचरंचाचरमेवच ॥ ८३ ॥ चरंसंन्यासिनंप्राहुरचरंचक्रचिह्नितम् ॥ य
दीच्छसिहिदुष्पारंतर्तुंसंसारसागरम् ॥ ८४ ॥ शालिग्राममयंशैलंभक्त्यार्चयमहामते ॥ शालिग्रामशिलाचक्रंयेयच्छंतिमही
पते ॥ ८५ ॥ विष्णुभक्तायविप्रायतस्यमुक्तिर्नदुर्लभा ॥ अर्चितःपूजितोध्यातःसंस्तुतःशैलनायकः ॥ ८६ ॥ पापिनामुपकारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्किंपुनर्धर्मशीलिनाम् ॥ नैमिषाच्चप्रयागाच्चगंगासागरसंगमात् ॥ ८७॥ कुरुक्षेत्राच्छतगुणंशालिग्रामशिलार्चनम् ॥ यदि
युक्तामहापापैर्जन्मकोटिसमुद्भवैः ॥ ८८ ॥ मुच्यंतेनात्रसंदेहःशालिग्रामशिलार्चनात् ॥ शालिग्रामशिलात्यक्तंचंदनंवाथकुंकु
मम् ॥ ८९ ॥ देहेधारयतेनित्यंसमुक्तोनात्रसंशयः ॥ शालिग्रामशिलात्यक्तंनिर्माल्यंशिरसावहेत् ॥ ९० ॥ हरिरेवसमंतऽयो
ब्रह्मणाकथितंस्वयम् ॥ शालिग्रामशिलादत्तंनैवेद्यंयस्तुभक्षयेत् ॥ ९१ ॥ सिक्थेसिक्थेभवेत्पुण्यंकपिलागोसमुद्भवं ॥ शालि
ग्रामशिलास्पर्शयेकुर्वंतिदिनेदिने ॥ ९२ ॥ तैःकृतंपूजनंभूपपितृविप्रदिवौकसाम् ॥ शालिग्रामसमीपेतुयःश्राद्धंकुरुतेनरः ॥
॥ ९३ ॥ नित्यंनैमित्तिकंवापिगयाश्राद्धसमंभवेत् ॥ शालिग्रामसमीपेतुभक्त्यापुस्तकवाचनम् ॥ ९४॥ भारतंहरिवंशंवापुत्रदं
धनदंभवेत् ॥ श्रीमद्भागवतंपुण्यंभुक्तिमुक्तिफलप्रदम् ॥ ९५ ॥ शृणोतिहृष्टमनसासपुनातिजनान्बहून् ॥ शालिग्रामशिला
यस्यनित्यंतिष्ठतिवेश्मनि ॥ ९६ ॥ तत्रसर्वाणितीर्थानिसंतिसर्वेसुरामखाः ॥ अंतकालेऽपियस्यास्येशालिग्रामशिलोदकम्॥
॥ ९७ ॥ क्षिप्यतेपापिनोपीहसयातिपरमांगतिम् ॥ नारायणसमोबंधुर्नतिथिर्द्वादशीसमा ॥ ९८ ॥ विष्णुपादोदकैस्तीर्थंनतु
ल्यंभुवनत्रये ॥ दर्शनात्पातकंहंतितुलसीनवपल्लवा ॥ ९९ ॥ तस्यास्तुदीर्घमंजर्यांनित्यंवसतिकेशवः ॥ तत्पत्रैःकेशवःपूज्योग
लितैरपिचार्जुन ॥ १०० ॥ तस्ययज्ञकृतंपुण्यंभवतीतिनसंशयः ॥ ॥नारदउवाच ॥ ॥ शालिग्रामशिलायास्तुमहिमाव
र्णितुंमया ॥ १ ॥ नशक्यतेबहुत्वाच्चगमिष्यामिसुरालयं ॥ इत्युक्त्वानारदःप्रायादर्जुनोविस्मयंययौ ॥ २ ॥ सतांसंगाद्विनालो
केलभ्यतेनसुखंनरैः ॥ इतिब्रुवन्सव्यसाचीसर्वैर्भूपतिभिर्वृतः ॥ ३ ॥ जगामचंद्रहासस्यपुरंकौंतलकंमुदा ॥ ॥जैमिनिरुवाच॥

१ सिक्थोभक्तपुलाकेनेत्यादिमेदिनी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासमिमंभक्त्यायःशृणोतिपठत्यपि ॥ सभुक्त्वाविविधान्भोगान्विष्णुलोकेमहीयते॥१०५॥ ॥इत्याश्वमेधिकेपर्वणि
जैमिनीयेचंद्रहासोपाख्यानेशालिग्राममहिमावर्णनोनामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ छ ॥
॥ जनमेजयउवाच ॥ ॥ दधारचंद्रहासःकिंवाजिनौतौनवामुने ॥ एतत्सर्वंसमाख्याहिमयापृष्टोऽसिजैमिने ॥ १ ॥ ॥ जै
मिनिरुवाच ॥ ॥ प्रातःकालेतुबाह्यस्थौतस्मिन्कौंतलकेपुरे ॥ ददर्शतुर्हरीप्राप्तौपद्माक्षमकरध्वजौ ॥ २ ॥ विस्मयंपरमं
प्राप्तौदधतुस्तौतुरंगमौ ॥ पत्राभिप्रायमालोक्यजग्मतुःपितरंतदा ॥ ३ ॥ चंद्रहासोऽपिविज्ञायप्राप्तौपार्थतुरंगमौ ॥ प्रहर्षम
तुलंलेभेजातःकृष्णसमागमः ॥ ४ ॥ आशैशवान्मयादेवोनित्यंयाश्रित्यतेहरिः ॥ सकेशवःपार्थयुतोनूनमत्रागमिष्यति ॥ ५ ॥
विषयातनयंप्राहचन्द्रहासःशुभंवचः ॥ साक्षाद्धर्मस्यसम्प्राप्तौवाजिनौपुत्रसाम्प्रतम् ॥ ६ ॥ रक्षितौवर्षमात्रंतैःकेशेनेतिमया
श्रुतम् ॥ धारयिष्यसिचेदेतौपूर्णाब्देविफलःक्रतुः ॥ ७ ॥ त्वंरक्षवाजिनौपुत्रमासमात्रंप्रयत्नतः ॥ बद्धेमौवाजिनौपश्चाद्धर्म
राजायचार्पय ॥ ८ ॥ सुकृतेनैवनःकार्यंवाजिभ्यांकिंप्रयोजनम् ॥ सुकृतंवासुदेवस्यदर्शनान्नोभविष्यति ॥ ९ ॥ अहंयोत्स्ये
ऽद्यपार्थेनयथातुष्येदयंहरिः ॥ ॥ जैमिनिरुवाच ॥ ॥ विषयातनयःप्रायाद्वाजिनौपरिपालयन् ॥ १० ॥ चन्द्रहासोऽपि
नगराद्बहिस्तस्थौससैनिकः ॥ एतस्मिन्नन्तरेप्राप्तःसपार्थःःकृष्णसारथिः ॥ ११ ॥ ददर्शचन्द्रहासंतंगरीयांसंतुवैष्णवम् ॥
शंखचक्रांकिततनुंबिभ्राणंचोर्ध्वपुंड्रकम् ॥ १२ ॥ श्रीमत्कृष्णपदांभोजतुलसीपूतमस्तकम् ॥ वयोवृद्धंतपोवृद्धंज्ञानवृद्धंनवं
युधि ॥ १३ ॥ पार्थोऽब्रवीन्मेसफलंजन्मचास्मत्कुलंतथा ॥ यच्चन्द्रहासोदृष्टोऽयंबाल्यादारभ्यवैष्णवः ॥ १४ ॥ अथकृष्णोऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तस्थौरथोपस्थेचतुर्भुजः॥ शंखचक्रगदांभोजैरायुधैःसमलंकृतः ॥ १५ ॥ तंदृष्ट्वापुण्डरीकाक्षंचन्द्रहासोरथात्तदा ॥ अवती
र्यनमश्चक्रेपार्थस्यपुरतस्तदा ॥ १६ ॥ आलिलिंगहरिर्दोर्भिश्चन्द्रहासंविशांपते ॥ ॥ वासुदेवउवाच ॥ ॥ उत्तिष्ठालिं
ग्यभोपार्थमद्भक्तंध्रुवसन्निभम् ॥ १७ ॥ चन्द्रहासंमहाबाहुंवृद्धंसद्धर्मकारकम् ॥ ॥ पार्थउवाच ॥ ॥ श्रेयान्स्वधर्मोविगु
णःपरधर्मात्स्वनुष्ठितात् ॥ १८ ॥ इत्थंहिशिक्षितंकृष्णत्वयाभीष्मसमागमे ॥ विपरीतंकथंब्रूषेसांप्रतंदेवकीसुत ॥ १९ ॥ युद्ध
मत्रप्रकर्तव्यंकथमालिंगनंददे ॥ नमस्करोमिचरणौवृद्धत्वादस्यभूपतेः ॥ २० ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मद्भक्तश्चनमस्का
र्यःसमालिंग्योविशेषतः ॥ कपिलागोशतेदत्तेयत्फलंजायतेनृणाम् ॥ २१ ॥ तत्फलंलभतेपार्थवैष्णवालिंगनान्नरः ॥ मद्भक्ते
षुचयाप्रीतिःसधर्मःपरिकीर्तितः ॥ २२ ॥ परिष्वजैनंचन्द्रहासंवैष्णवंविष्णुवल्लभम् ॥ २३ ॥ ॥ जैमिनिरुवाच ॥ ॥ अ
थार्जुनोगाढमालिंग्यतस्थौतंचन्द्रहासंकृष्णवाक्येनतुष्टः ॥ तदाब्रवीच्चन्द्रहासोऽपिवाक्यंयुद्धायाहंसंस्थितःपाण्डुसूनो॥२४॥
मखोविनश्येत्तवनूनंविसृष्टःपुत्रोमयावाजिनोरक्षणार्थम् ॥ जातंसख्यंनौहरेःसद्वचोभिस्तस्मादमुंकेशवंसंश्रयावः॥ २५॥एवं
चोभौभाषमाणौतुरंगौसमायातौयत्रकृष्णार्जुनौस्तः ॥ तयोःपृष्ठेविषयासूनुरागान्नमश्चक्रेपितरंतौचकृष्णौ ॥ २६ ॥ प्र
द्युम्नाद्यैःपूजितश्चन्द्रहासस्तस्थौकृष्णंसंस्तुवन्वाग्विलासैः ॥ २७ ॥ ॥ जैमिनिरुवाच ॥ ॥ महोत्सवेनतौकृष्णौप्रवेश्य
नगरंमुदा ॥ चन्द्रहासःकृष्णयुतःसबभौभूपुरन्दरः ॥ २८ ॥ चन्द्रहासाश्रयात्सर्वेजनाःकृष्णपरायणाः ॥ धृष्टबुद्धिःपुत्रयुतः
कृतार्थःसमपद्यत ॥ २९ ॥ तत्पदंवासुदेवस्यवैष्णवानुग्रहान्नृप ॥ ततोगालवमाहूयहरेःपूजांव्यधान्नृप ॥ ३० ॥ गालवंतंस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मालोक्य आगच्छंतंतदाहरिः ॥ नमश्चक्रेयोगिराजंपरमानंदनिर्भरम् ॥ ३१ ॥ गालवोपिनमश्चक्रेपरमात्मानमव्ययम् ॥ म
नसातत्पदंध्यायन्मुहूर्तंतन्मयोह्यभूत् ॥ ३२॥ पूजांप्रापहरिस्तत्र चन्द्रहासेनतोषितः ॥ स्थित्वात्रिरात्रंनगरेअनुज्ञाप्यचगाल
वं॥३३॥निर्ययौनगरात्तस्मात्कृष्णःकमललोचनः॥चन्द्रहासोऽपितद्राज्यंददौकृष्णकरेमुदा ॥३४॥ कृष्णोपिप्रददौसर्वंतत्पुत्रा
यार्जुनाज्ञया ॥ अर्जुनःपरमानन्दमवापनृपदर्शनात् ॥ ३५ ॥ इदंचरित्रंचन्द्रहासस्यभक्त्यानरःपठेच्छृणुयाद्यःसमग्रं ॥ सचा
प्नुयाद्बलमायुश्चपुत्रान्सदाचारान्विष्णुभक्तांश्चदातॄन्॥३६॥कृष्णेभक्तिःसुदृढाह्यन्तकालेसंसाराब्धेस्तारयेद्वासुदेवः॥३७॥
॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेचन्द्रहासोपाख्यानसमाप्तिर्नामैकोनषष्ठितमोऽध्यायः ॥ ५९ ॥ ॥ छ ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ चंद्रहासःपुराध्यक्षंविषयातनयंव्यधात् ॥ अब्रवीच्चमयापुत्रवार्धकलाद्वनंमहत् ॥ १ ॥ गंतव्यंमोक्षला
भायसमोक्षःसुलभोऽधुना ॥ कृष्णस्यदर्शनाज्जातोनमुंचामिततोहरिम् ॥ २ ॥ इतिसंदिश्यतनयंकृष्णेनसहितोययौ ॥ पालय
न्वाजिनौतस्यपार्थस्यामिततेजसः ॥ ३ ॥ येषुयेषुचदेशेषुतौप्राप्तौवाजिनौनृप ॥ तत्रत्यैराजभिर्मुक्तौनमस्कृत्यमहाभयात् ॥
॥ ४ ॥ केचिद्धरीतुहरिणापालितौवीक्ष्यसादरम् ॥ दक्षिणीकृत्यसंपूज्यभक्त्यानत्वाग्रतःस्थिताः ॥ ५ ॥ अथोत्तरस्यामंभोधिं
दिशिप्राप्तौतुरंगमौ ॥ प्रविष्टौसरितांपत्युर्जलेगाधेविशांपते ॥ ६ ॥ दुःखंप्राप्ताःपार्थमुख्यायोधाःप्रोचुर्हरिंप्रति ॥ किमिदा
नींप्रकर्तव्यंतयोःप्राप्तिःकथंभवेत् ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ पंचानांकेवलाह्यश्वाःसंतिवारिचराःशुभाः ॥ हंसध्वज
स्यजिष्णोश्चबभ्रुवाहस्यमद्भुवः ॥ ८ ॥ मयूरकेतोःपंचैतेरथाःसर्वत्रगामिनः ॥ इत्युक्त्वाप्रविवेशाब्धिंकृष्णस्तेचमहारथाः॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददर्शफाल्गुनोवृद्धंमुनिंमध्येसरित्पतेः ॥ द्वीपस्थंधारयंतंकेवटपत्रंकरेणच ॥ १० ॥ जीर्णंशुष्कंशतच्छिद्रंलूतामंदिरमंडितम् ॥
बकदाल्भ्यंमहाभागंनिमील्यनयनेस्थितम् ॥ ११ ॥ अवतेरूरथेभ्यश्चनमश्चक्रुश्चतेमुदा ॥ उन्मील्यनयनेदीप्तेकृष्णादींस्ता
न्विलोक्यच ॥ १२ ॥ हर्षादुत्फुल्लनयनोगाथामेतामगायत ॥ अहोपंचभिरानीतोहृषीकेशोऽतिचंचलैः ॥ १३ ॥ अतःपरंहिनो
वासोमंडलेऽस्मिन्नसौख्यकृत् ॥ इतिब्रुवंतंतमृषिंपार्थःप्राहसविस्मितः ॥ १४ ॥ युष्माभिर्ध्रियतेपत्रंशुष्कंनक्रियतेगृहम् ॥
युष्माकंजानुनीभित्त्वाकिंशुकौनिर्गताविमौ ॥ १५ ॥ ययोःकृतंनीडशतंपक्षिभिर्गृहिणीयुतैः ॥ वल्मीकानिविराजंतेपुरस्तात्पृ
ष्ठतश्चवः ॥ १६ ॥ येभ्योनिर्यांत्यमीसर्पायुष्मत्स्कंधस्थिताःसुखम् ॥ पिबंतिवायुमास्यैर्वःकुर्वंत्यासनमुच्छ्रितम् ॥ १७ ॥
कंडूयंतिमृगाःस्वांगमहोनिस्पृहतादृढा ॥ प्रहस्यबकदाल्भ्योसौश्रुत्वापार्थस्यभाषितम् ॥ १८ ॥ उवाचहर्षयंश्चित्तंतदीयंशु
भयागिरा ॥ १९ ॥ ॥ बकदाल्भ्यउवाच ॥ ॥ क्लेशावहोदारपरिग्रहोयंपापस्यमूलंहिभवेदधोगतिः ॥ तत्पोषणेकार्यम
कार्यमेतद्विचारएषोऽतितरांविनश्येत् ॥ २० ॥ नष्टेविचारेकुतएवमोक्षस्तृष्णावरीवर्तिनृणामतीव ॥ एतेमदीयाःखलुवत्ससं
घाद्वृद्धिंगताःक्षेत्रवहाभवेयुः ॥ २१ ॥ पुत्राःकथंस्युश्चतथैवपौत्रावेदांश्चशास्त्राणिकथंपठेयुः ॥ विवाहएषांभविताकथंस्वित्प्रे
क्षाम्यहंपुत्रमुखंकदास्वित् ॥ २२ ॥ एवंसदाचिंतयतेगृहस्थःस्त्रीपाशबद्धोनतुधर्ममार्गं ॥ अतोमयाकारिनदारसंग्रहोनपर्ण
शालाविहिताऽल्पमायुः ॥ २३ ॥ पार्थोऽब्रवीत्किंयदायुर्गतंवःशुष्कंपर्णंमस्तकेबिभ्रतांच ॥ प्राहस्मायुर्बकदाल्भ्योऽर्जुनंनःकि
यान्यातःकालइहस्थितानाम् ॥ २४ ॥ मार्कंडेयालोमशाःकत्यभूवंस्तेषांसंख्यांकर्तुमलंमयापि ॥ अस्तंगताब्रह्मणांविंशति

१ लूतास्त्रीतन्तुवायोर्णनाभमर्कटकासमाइत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri

र्मैस्थितस्यात्रप्रायआयुष्यमल्पम् ॥२५॥ तस्मादहंनकरोम्यत्रजिष्णोवारंवारंनाशमायात्यपारः ॥ यदायदाब्रह्मणोह्यंत
कालस्तदातदावारिमयंजगत्स्यात् ॥ २६ ॥ वटश्चैकःस्निग्धपत्रोविभातिशाखाशतैर्व्याप्नुवन्रोदसींच ॥ तच्छाखायांवटपत्रे
शयानंपश्यामिबालंहसमानंरुदंतम् ॥ २७॥ पादांगुष्ठंवदनेसन्निवेश्यगौरंधयंतंसुनसंचारुवक्रम् ॥ तद्दर्शनात्सागरेमज्जितो
ऽहंनतादृशःसंप्रतिकान्यवार्ता ॥ २८॥ सएवायंकृष्णरूपोहिजातःपंचानांवःसंगवशान्मयाप्तः ॥ २९ ॥ ॥ बकदाल्भ्य
उवाच ॥ ॥ कस्माद्दूरंदूरमस्मत्सकाशात्प्रयासिविष्णोमांजलेऽस्मिन्विहाय ॥ बालोभूस्त्वंवटपत्रेशयानोदृष्टोयदाप्रार्थि
तोनैवकिंचित् ॥ ३० ॥ युवाद्यलक्ष्मीमधिगम्यधर्मपुत्रंकथंदर्शयतेनमांत्वम् ॥ आलिंगनंदेहिजगन्निवासधर्मंस्वयंदर्शयत
त्पुरंच ॥ ३१ ॥ ॥जैमिनिरुवाच॥ ॥इत्यूचिवान्समुनिस्तंचकृष्णंसमालिंग्यप्राहतंफाल्गुनंच ॥ मद्वासार्थंगृहमेतत्स्फु
टंस्यान्मुक्तिर्ध्रुवाग्राहिणीयत्रभाति ॥ ३२ ॥ करोमिकिंनगृहंनापिपत्नींनतादृशीमधिगच्छामिपार्थ ॥ तस्मात्कालोगमितःशु
ष्कपत्रैःपश्याधुनागृहदारानवाप्तान् ॥ ३३ ॥ एवंब्रुवंतंबकदाल्भ्यंसकृष्णःसंभावयामासवचोभिरीड्यैः ॥ त्वमेवसाक्षात्पुरु
षःपुराणस्त्वयादृष्टाब्रह्मणांविंशतिश्च. ॥ ३४ ॥ सर्वेषांनःपूज्यतमस्त्वमेवजातोयज्ञःसफलोधर्मसूनोः ॥ प्रहस्यैषन्मुनिराह
स्मविष्णुंत्वयाभारोमयिगर्वस्यमुक्तः ॥ ३५ ॥ परंगर्वोऽथगलन्मेसमग्रस्तथास्यपंकेरुहजन्मनश्च ॥ तत्त्वंसमाकर्णयपार्थ
यत्नात्कृष्णःसर्ववेदवेदस्यमूलम् ॥ ३६ ॥ महाकल्पेवेदसंज्ञोविरिंचिश्चत्वारिंशद्वार्षिकोमामियाय ॥ पठन्वेदान्मानसौ
कोविरूपःप्रोवाचेदंगर्वभारेणवाक्यम् ॥ ३७॥ कस्त्वंकिमर्थंध्रियतेपर्णमेतत्त्वयाघोरंतप्यतेवेद्मिकामात् ॥ प्रसन्नोहंप्रार्थयवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ञ्छितंचब्रह्माहमित्येवमवेहिविप्र ॥ ३८॥ तच्छ्रुत्वाहंचाब्रुवंगर्वभाराद्ब्रह्माणंतंगच्छदूरंदुरात्मन् ॥ मयादृष्टास्त्वादृशाविंशति
 श्चत्वंमह्यंकिंदास्यसेयाहियाहि ॥ ३९ ॥ एवंमयिब्रुवतिप्रादुरासीद्वात्याघोरादारयंतीवपृथ्वीम् ॥ आवर्तेनद्रुमभंगंविधत्या
नीतौतदाद्वावपित्वंविशालम् ॥ ४० ॥ औदुंबरादन्यमौदुंबरंहिविशंत्यमीजंतवःकर्मनुन्नाः ॥ तथाप्रविष्टौदेवदेवस्यविष्णोर्ब्र
ह्मांडैस्तैःफलितस्यद्वितीयं ॥४१॥ अस्माद्रम्यंब्रह्मलोकंविरिंचिःप्रविश्याहंविस्मयंचाप्तवान्सः॥ ततःप्रोवाचाष्टमुखोविरिंचिः
समाह्वयन्नौपरिपप्रच्छपार्थ ॥४२॥ कस्माद्युवांप्राप्तवंतावपूर्वौकिन्नामानौशंसतंमत्पुरस्तात् ॥ चतुर्मुखोथावदत्सत्यलोक न्म
मागतंविद्धिमांपद्मयोनिं॥४३॥शिष्यंयोमेपरिचर्यार्थमागान्नाम्नास्फुटंबकदाल्भ्यःप्रसिद्धः॥ निशम्योच्चैरष्टमुखोजहासभवा
न्ब्रह्माशिष्यएवद्वितीयः॥४४॥ तावत्तद्वैयावदहंनदृष्टौब्रह्माशिष्यौसंप्रतिमेभवंतौ ॥ शौचार्थमत्रापिजलंमृदंचसमानयेतांस्व
स्थचित्तौमदर्थं॥४५॥ एवंब्रुवत्यष्टमुखेविरिंचौवात्याघोरामांचतावप्यनैषीत् ॥ मयासार्धंखेभ्रमंतौविरिंचीविष्णोःप्रविष्टौब्रह्म
गोलंतृतीयं॥४६ ॥यस्मिँल्लोकाःपुण्यशीलावदान्यादृष्ट्वाऽस्मांस्तेजहसुःकेभवंतः॥ कस्माद्देशादागतानामकिंवस्तत्सर्वंवैब्रूत
लज्जांविहाय ॥ ४७ ॥ आहस्माथोवसुवक्त्रोविरिंचिरहंप्राप्तोब्रह्मलोकान्मनोज्ञात् ॥ प्रोचुर्लोकास्तेतदाब्रूतमैवंकलांवक्त्रःश्रो
ष्यतिवैविरिंचिः॥ ४८ ॥ आयातपश्यतविहायविरिंचिगर्वंमौनंसमाश्रयतदेवमजंप्रणम्य ॥ ततोवयंभीतभीताःप्रयाताविलो
कितुंषोडशतुंडकंच ॥ ४९ ॥ जहासोच्चैःषोडशास्योविरिंचिर्दृष्ट्वाचतुर्वक्त्रमथाष्टवक्त्रम् ॥ ५० ॥ अहोचित्रमहोचित्रंब्रह्मण्यपि
मयिस्थिते ॥ इतिगर्वायतेतस्मिन्विरंचौषोडशानने ॥ ५१ ॥ वात्याप्रादुरभूद्घोरातयाभ्रांतावयंविभो ॥ अधोवक्त्राऊर्ध्वपादा

१. षोडशमुखः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्ताब्रह्मालयंपरम् ॥ ५२ ॥ द्वात्रिंशद्वदनोब्रह्मायत्रलोकस्तुसुन्दरः ॥ नापृच्छत्कश्चिदेवास्मान्नामतत्रभवोजनः ॥ ५३ ॥
ततोवयंस्मचत्वारोदृष्ट्वादैवाद्विरिंचिना ॥ आहूताःकृपयापश्चात्परिपप्रच्छनामसः ॥ ५४ ॥ ॥ द्वात्रिंशद्वदनउवाच ॥ ॥
प्रहस्यपूर्वंगर्वितोऽतीवसत्यंब्रह्माब्रवीदहमेवास्मिनान्यः ॥ खद्योतालिर्द्योत्यतेतावदेवयावत्सूर्योध्वांतहानाभ्युदेति ॥ ५५ ॥
द्वात्रिंशद्वदनोप्येवंब्रुवन्वात्यापरिप्लुतः ॥ खेभ्रमत्संहितोऽस्माभिश्चतुःषष्ट्याननंस्थितम् ॥ ५६ ॥ ददृशेगोलकेन्यस्मिन्स
गर्वंकृतवान्बहु ॥ एवंद्विगुणयावृद्ध्यागर्वितास्तेविरिंचयः ॥ ५७ ॥ प्राप्ताःसहस्रनयनंसहस्रवदनंविभुम् ॥ स्तूयमानंचमुनि
भिःसनकाद्यैस्तथासुरैः ॥ ५८ ॥ अथतानागतान्दृष्ट्वासहस्रवदनोऽब्रवीत् ॥ कुतःप्राप्तंपूज्यपादैर्ब्रह्मभिःस्वागतंहिवः ॥ ५९ ॥
युष्मत्प्रसादाल्लोकेऽस्मिन्ख्यातिंप्राप्स्याम्यनुत्तमाम् ॥ इतिब्रुवाणंपुरुषंप्रणम्यधरणींगताः ॥ ६० ॥ विहायगर्वंब्रह्माणस्तु
ष्टुवुस्तमधोक्षजम् ॥ ततःप्रसन्नोभगवान्यथास्थानंन्यवेशयत् ॥ ६१ ॥ तान्विरिंचीनहंपार्थविहायास्मान्स्थितोंबुधौ ॥ तस्मा
द्गर्वोनकर्तव्यःपुंभिःसच्छास्त्रकोविदैः ॥ ६२ ॥ मुनेर्भाषितमाकर्ण्यहर्षितौकृष्णपाण्डवौ ॥ ददर्शतुस्तुरंगौतौकथांश्रुत्वाविनिर्ग
तौ ॥ ६३ ॥ प्रार्थयित्वामुनिंकृष्णःशिबिकायामरोपयत् ॥ ६४ ॥ ॥ इत्याश्वमेधिकेपर्वणि जैमिनीये बकदाल्भ्यसंवा
दो नाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥
॥ जैमिनिरुवाच ॥ ॥ व्यावृत्यवाजिनौशीघ्रंपुरंजायद्रथंशुभम् ॥ प्रापतुर्यत्रनृपतिर्दौःशलेयःशिशुःस्थितः ॥ १ ॥ सिंहास
नस्थःसचिवैःसेव्यमानःसभास्थितैः ॥ श्रुत्वाचफाल्गुनंप्राप्तंसजयद्रथघातिनम् ॥ २ ॥ उच्चैःप्रकंपेप्रस्विन्नोरोमांचितवपुर्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः ॥ जहौप्राणान्दौःशलेयःसिंहासनगतोभयात् ॥ ३ ॥ विलपंतीततःप्राप्तादुःशलाफाल्गुनंप्रति ॥ दृष्ट्वाकृष्णंनमस्कृत्यप्रा
होच्चैस्त्राहिमामिति ॥ ४ ॥ जिष्णुनानिहतोभर्तासांप्रतंचसुतोमम ॥ त्वामहंशरणंप्राप्ताकृष्णकृष्णजगत्पते ॥ ५ ॥ अथो
त्थितोरथात्पार्थःस्वसारंसंप्रणम्यच ॥ अब्रवीन्नकृतंकिंचित्तवपुत्रस्यवैशसम् ॥ ६ ॥ तथाऽपिक्षम्यतांसर्वंमयायच्चपुराकृत
म् ॥ गृह्णीष्वहस्तिनोमत्तान्सहस्रंलक्षमेववा ॥ ७ ॥ जित्वाचवैरिणःसर्वंराज्यंदास्यामितेऽनघे ॥ अर्जुनस्यवचःश्रुत्वादुः
शलादुःखिताभृशम् ॥ ८ ॥ कृष्णंनत्वापुनर्वाक्यमुवाचक्लेशसंयुता ॥ दुःखहंतात्वमेवात्रप्राणिनांहृदिसंस्थितः ॥ ९ ॥ द्रौ
पद्यासंस्मृतःपूर्वंदुःखंतस्याव्यपोहयत् ॥ अन्येषामपिजंतूनांस्मरणाद्दुःखहानिदः ॥ १० ॥ कृतार्थादर्शनेनाद्यजातास्मि
तववैप्रभो ॥ पतिहीनापुत्रहीनापार्थेनास्मिकृताविभो ॥ ११ ॥ नत्रपाजायतेतस्यसम्बन्धद्योतनेनच ॥ सांप्रतंपुत्रहीना
चराज्यहीनातथाकृता ॥ १२ ॥ कथमश्वगजानांचसहस्रंदातुमिच्छसि ॥ ब्रुवंत्येवंबहुविधंलुठंतीकृष्णपादयोः ॥ १३ ॥
नेत्रांबुनाक्षालयन्तीपादाब्जंसुरदुर्लभम् ॥ एवंसुदुःखितांदृष्ट्वाआर्तत्राणपरोहरिः ॥१४॥ आश्वासयामासचतांभवमायाप्रपी
डिताम् ॥ उत्तिष्ठोत्तिष्ठभद्रंतेगच्छपुत्रस्यसन्निधौ ॥ १५ ॥ इत्युक्त्वासहपार्थेनप्रविवेशपुरंतदा ॥ हर्म्येसभायांपतितंददर्श
तनयंशुभम् ॥ १६ ॥ उत्तिष्ठभोवत्सभयंमाकृथाममसन्निधौ ॥ इत्युक्त्वापाणिनाबालंपस्पर्शमधुसूदनः ॥ उत्थितस्तत्क्षणादे
वप्रणनामहरिंमुदा ॥१७॥ वंदितौतुजनैःसर्वैःकृष्णपार्थौमुदान्वितैः ॥ भेरीमृदङ्गपटहगीतनृत्यमहोत्सवैः ॥१८॥ मांगल्यंपरमं ॥१४५॥
चक्रुर्नागराःकृष्णसन्निधौ ॥ अर्जुनःशमयामासदुःशलांपुत्रसंयुताम् ॥ १९ ॥ अब्दःपूर्णोऽद्यसंजातोगंतव्यंतुगजाह्वये ॥ नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रितासमायाहिकुंतींद्रष्टुंचपार्वतीम् ॥ २० ॥ सातथेत्यब्रवीत्पार्थैहृष्टश्चासीद्विशापते ॥ ॥ जैमिनिरुवाच ॥ ॥ हर्षिता साहृषीकेशंदुःशलावाक्यमब्रवीत् ॥ २१ ॥ एवमेवत्वयाकार्यंभक्तानांजीवनंसदा ॥ प्रसादात्तवराज्यंमेप्राप्तंगच्छासिधर्मज म् ॥ २२ ॥ इत्युक्त्वापुत्रसहितानिर्गताचगजाह्वयम् ॥ आनयत्तत्पुरंसर्वंयज्ञार्थंपाण्डवोऽर्जुनः ॥ २३ ॥ ॥ इत्याश्वमेधिकेपर्वणि जैमिनीये जयद्रथपुरेदुःशलासांत्वनंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ जैमिनिरुवाच ॥ ॥ पूर्णेब्देदेवकीपुत्रःपार्थस्यतुरगौमुदा ॥ दधौस्वयंवनेरम्यौभ्रममाणौस्वलीलया ॥ १ ॥ प्रत्युवाचक थंपार्थवीरैर्भूपतिभिर्वृताम् ॥ दिष्ट्याभूमिंपार्थहयौभ्रमितौनिखिलामपि ॥ २ ॥ चिरकालंधर्मराजःक्लिश्यतेविविधैर्यमैः ॥ व र्षमात्रंहिसंजातंकुर्मःकर्माग्निसन्निधौ ॥ ३ ॥ अद्यसर्वैमहीपालापांडवंधर्मनंदनम् ॥ वीक्षितुंत्वरितायांतुत्वयासहगजा ह्वयम् ॥ ४ ॥ पुरस्कृत्यहयावग्रेनानावादित्रवादकाः ॥ नर्तक्योविविधैस्तालैर्हस्तकैःकरणैस्तथा ॥ ५ ॥ प्रद्युम्नश्चानिरुद्धश्च वृषकेतुर्महाबलः ॥ बभ्रुवाहोपिशैनेयोवीरवर्मानुशाल्वकः ॥ ६ ॥ बर्हिकेतुर्हंसकेतुस्तथानीलध्वजोबली ॥ ताम्रध्वजोमहा वीरःप्रवीरश्चमहारथः ॥ ७ ॥ यौवनाश्वश्चंद्रहासस्तथाऽन्येबहवोनृपाः ॥ भूषिताविविधैर्हारैःकटकैरंगदैस्तथा ॥ ८ ॥ कुण्डलैश्चामरैधूपवासैःपुष्पैर्विलासिताः ॥ नानाकुसुममालाभिर्वरचंपकमंडिताः ॥ ९ ॥ रात्रौपुरंप्रयांत्वेतेदीपिकाभिःप्रका शिताः ॥ गंधतैलावसिक्ताभिःप्रस्तुताबंदिभिर्भृशम् ॥ अहमग्रेप्रयास्यामिधर्मराजपुरंप्रति ॥ १० ॥ ॥ जैमिनिरुवाच॥ एतावदुक्त्वावचनंकृष्णोनागपुरंययौ ॥ यत्रास्तेधर्मतनयोमहर्षिपरिवारितः ॥ ११ ॥ गंगातीरेवरक्षेत्रेदिव्यमंडपमंडिते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवकीप्रमुखायत्रस्त्रियःसंतिमनोरमाः ॥ १२ ॥ धर्मराजगृहंप्राप्यराजानंवीक्ष्यमाधवः ॥ नमस्कृत्याग्रतस्तस्थौनृपेणाप्य
भिनंदितः ॥ १३ ॥ शशंसपार्थसंप्राप्तंहयंराजन्यमण्डलम् ॥ प्राप्तोनीलध्वजोराजाहंसकेतुर्महाबलः ॥ १४ ॥ मयूरकेतुर्ब
लवान्बहुधायःपरीक्षितः ॥ धर्मराजतवभ्रात्रात्वत्पुण्येनजितान्नृपाः ॥ १५ ॥ सुधन्वायोधितोवीरोराजन्कृच्छ्रेणसंयुगे ॥ सुर
थेनापिसभयाःकृतावीरेणतेविभो ॥ १६ ॥ ततोमणिपुरंप्राप्तःसव्यसाचीहयान्वितः ॥ बभ्रुवाहेणसंग्रामेपुत्रेणनिहतोऽर्जु
नः ॥ १७ ॥ उलूपीमणिनापार्थंजीवयामासभामिनी ॥ प्रथमंकर्णपुत्रंतंसर्ववीरप्रतोषकम् ॥ १८ ॥ संजीवयित्वात्वरिता
तस्मिन्कालेपतिव्रता ॥ पुत्रेणसहितःपार्थोययौसारस्वतंपुरं ॥ १९ ॥ वीरवर्मावशीयत्रसंजातःस्वयमेवसः ॥ ततःकौंतलकं
वाजीप्राप्तस्तेधर्मनंदन ॥ २० ॥ चंद्रहासोधिपोयत्रदुर्जयःससुरासुरैः ॥ ततःसतुरगोयातोमध्येनदनदीपतेः ॥ २१ ॥ शु
ष्कंपत्रंयत्रकृत्वामस्तकेबकदाल्भ्यकः ॥ चिरंस्थितोमहातेजास्तपस्तप्तुंचसुव्रतः ॥ २२ ॥ ददृशुःपार्थमुख्यास्तेपंचवी
रामयासह ॥ तंमुनिंहिपुरस्कृत्यसमानयतितेऽनुजः ॥ २३ ॥ वित्तंबहुसमानीतंरत्नानिविविधानिच ॥ स्तोकाहिपृथि
वीपार्थप्रतापस्तेऽधिकःप्रभो ॥ २४ ॥ एवंकुशलिनःसर्वेपुनःप्राप्ताःस्वमंदिरम् ॥ यथामांवीक्षसेराजंस्तथासर्वान्विलो
कय ॥ २५ ॥ एहिभीममहाबाहोदेहिमेपरिरंभणम् ॥ ततोभीमादिभिर्वीरैर्वासुदेवोनमस्कृतः ॥ २६ ॥ नमस्कृत्यहरिःकुं
तींमातृस्ताःपुरतःस्थिताः ॥ ववंदेमुदितस्तत्रकथयन्कुशलंस्वकम् ॥ २७ ॥ द्रौपदीचसुभद्राचनमस्कृत्यजनार्दनम् ॥
स्थितासमीपंकृष्णस्यहर्षव्याकुललोचना ॥ २८ ॥ गांधारींधृतराष्ट्रंचविदुरंसंजयान्वितम् ॥ ददर्शकृष्णोभगवान्परिष्वज्य

॥१४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथासुखम् ॥ २९ ॥ ततोभीमेनसहितोविवेशस्वंनिवेशनम् ॥ यत्रसारुक्मिणीदेवीसत्यभामाचलक्ष्मणा ॥ ३० ॥ तथाजां ववतीरम्याकृष्णदर्शनलालसा ॥ एताश्चान्याश्चताबह्व्योवीक्षंतेहरिमागतम् ॥ ३१ ॥ उवाचसत्यभामाथस्वनाथंसुसमाग तम् ॥ पालितःपांडवोनाथसहयःसबलोवने ॥ ३२ ॥ काचित्त्रात्तात्वयानोवानारीकुब्जाऽथवामना ॥ प्रमीलांहियथापा र्थःप्रयाणेऽस्मिन्प्रलब्धवान् ॥ ३३ ॥ ॥ जैमिनिरुवाच ॥ ॥ तस्यास्तद्वचनंश्रुत्वाप्रहस्यमधुसूदनः ॥ प्रत्युवाचसमीप स्थंभीमसेनंमहामतिः ॥ ३४॥ अस्याःश्रुतंभीमवचोवक्रंयन्मांप्रभाषितम् ॥ बहुपुत्रोऽस्मिसंजातःपौत्रैरपिसमन्वितः ॥३५॥ युधिष्ठिरस्यनगरेबहुवृद्धसमागमे ॥ यस्यमेऽत्रास्थितिर्जातात्रपाहिस्त्रीपरिग्रहे ॥३६॥ एवमेवनजानातिसत्यावक्तुंचगोपने॥ बालत्वेयत्कृतंकिंचित्सांप्रतंतन्नमेप्रियम् ॥ ३७॥ एतस्मिन्नंतरेप्राप्तःप्रतीहारोमहीपतेः॥ कृष्णंविलोक्यभीमंचविनीतवदुवाच ह ॥ ३८ ॥ उत्तिष्ठंतुजनाःसर्वेकृष्णमुख्यान्नृपालये ॥ सर्वैस्तुसहितःकृष्णकुरुयज्ञंमनोरमम् ॥ ३९ ॥ ॥ जैमिनिरुवाच ॥ ततोदेवोनृपंप्राप्यप्रत्युवाचमहाबलः ॥ त्वयाऽत्रराजन्स्थातव्यंयज्ञवाटेमनोरमे ॥४०॥ अहंचधृतराष्ट्रेणवृद्धैश्चपरिवारितः॥ ऋषिभिःसहितोयास्येभ्रातृभिःसहितोग्रतः ॥ ४१ ॥ अर्जुनोयत्रतंदिव्यंपरिवार्यमहाबलः॥ बकदाल्भ्यंसुचरितंसहयःसं स्थितःपथि ॥ ४२ ॥ कुंतीचसंमुखायातुतथैवममयोषितः ॥ संभावयंतुसंप्राप्तंमुनिस्त्रीगणसंयुताः ॥ ४३ ॥ ब्राह्मणाद्याश्चयेव र्णावेदध्वनिसमन्विताः ॥ लाजवर्षंप्रकुर्वाणागजस्थाश्चकुमारिकाः ॥४४॥ पताकाभिर्विचित्राभिर्नगरंसमलंकृतम् ॥ नरैश्च नृत्यसंयुक्तैर्नानाकौतुकमिश्रितैः ॥ ४५ ॥ पुष्पोत्करैःसमाकीर्णंचंदनोदकशीतलैः ॥ कुर्वंतुराजपुरुषाःपार्थस्याद्यसमागमे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥४६॥एवंकृष्णेनतेसर्वेसंदिष्टास्तैस्तथाकृतं॥पुरस्कृत्यहृषीकेशंनिर्गताःपुरवासिनः॥४७॥प्राप्तःपार्थौहयौप्राप्तौदिष्ट्यादिष्ट्ये
 तिवादिनः॥रुक्मिणीस्ववधूवृंदैःसहिताशिबिकांययौ॥४८॥उषास्त्रीणांसहस्राणिपुरस्कृत्यययौपथि॥ तथासत्यास्वकंवृंदंना
रीणांसमलंकृतं॥४९॥कुसुमैःपारिजातस्यदुकूलैःक्षीरहासकैः ॥ कुसुंभरंगयुक्तैश्चरम्यकार्पासकैर्ययौ ॥५०॥ततोजांबवतीदे
वीनिरगान्मानिनीगणैः ॥ मुक्तामालावृतैःकांतैर्युवभावसमन्वितैः ॥५१॥ वेष्टितैर्दिव्यवसनैस्तमालनिभकंचुकैः ॥हर्षादतीव
निर्यांतिसमूहाःस्त्रीमयाःपथि ॥५२॥ परस्परस्यसंघर्षात्क्षरत्कुंकुमपंकिलां ॥ छिन्नमौक्तिकहाराणांतोयेनधरणींस्त्रियः ॥५३॥
चक्रुःकर्पूरदानेनच्युतेनचकरात्करैः॥गजस्थादेवकीदेवीयशोदारुक्मिणीस्थिता ॥५४॥कुंतीचैवगजेमत्तेप्रस्थितापांडवंप्रति॥
धृतातपत्रासर्वास्तायोषितश्चलचामराः ॥५५॥ हर्षेणमार्गेसंयांतिवीक्षितुंचारुलोचनाः ॥ धनंजयंचिरात्प्राप्तंवासुदेवेननोदि
ताः ॥ ५६ ॥ एवंमहाजनयुतःप्रातःस्नानंमलापहम् ॥ कृत्वाकुसुमगंधेनवासितोहिसमस्थले ॥ ५७॥ व्यूह्यसेनांस्वयंरम्या
मर्धचंद्रनिभांहरिः॥ अग्रतोब्राह्मणाःसर्वेवेदध्वनिकृतःस्थिताः ॥ ५८॥ तेषांपत्न्योययुश्चाग्रेदधिदूर्वाक्षतैर्युताः ॥ क्षत्रियाः
स्वर्णपात्रेषुधृतकर्पूरदीपिकाः ॥ ५९ ॥ गोरोचनंकुंकुमचंदनानिसुवर्णपात्रेषुनिधायवेश्याः ॥ कौसुंभवस्त्रैश्चविकासितांग्यस्त
स्थुःप्रभासन्मुकुटाःकृशांग्यः ॥ ६० ॥ महाजनानांपुरतश्चवेश्यानृत्यंतिमुक्ताफललोलहाराः ॥ प्रमाथिभिर्नेत्रकटाक्षवीक्षणै
र्विकाशयंत्याशुमनांसियूनाम् ॥ ६१ ॥ नृत्येनताःपथिहरिंपरितोषयंतिसद्भावहावरसतालयुगेनरामाः ॥ मुग्धंचतत्स्वमुखप
द्मरसाधिरूढंतस्थुःकरैरलिकुलंविनिवारयंत्यः॥६२॥ ॥इत्या०प०जै०अर्जुनागमोनामद्विषष्टितमोऽध्यायः॥६२॥ ॥छ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जैमिनिरुवाच ॥ पार्थःप्राप्तोवृतोभूपैःकालेनकियतानृप ॥ यत्रतिष्ठतिकृष्णोसौमहाजनयुतःपथि ॥ १ ॥ अर्जुनेनस्व
कंसैन्यंरचितंराजभिर्युतम् ॥ समुत्तीर्यस्वयंयानात्पुरस्कृत्यतुरंगमौ ॥ २ ॥ नृपतीन्पुरतःकृत्वाऋषिंचशिबिकांस्थितम् ॥ त्य
क्त्वायानानिभूपालाःप्रयांतिहरिसंमुखम् ॥ ३ ॥ ददृशुःपार्थसैन्यंतेलीनंकृष्णकलेवरे ॥ धर्मराजनिमित्तंहिसैन्यरूपःस्वयंह
रिः ॥ ४ ॥ गजामत्ताहयाःशुभ्रारथाश्चैवपदातयः ॥ राजानोराजपुत्राश्चबभूवुःकृष्णरूपिणः ॥ ५ ॥ सर्वेसुंदररूपाणिकृत्वा
यत्राग्रतःस्थिताः ॥ राजानःप्रसमीक्ष्याथप्रोचुस्तेवैपरस्परम् ॥ ६ ॥ दृष्टावैबहवोऽस्माभिर्देशाःपार्थहयानुगैः ॥ देशानांवैभ
वेनापितुष्टानिविदुषामपि ॥ ७ ॥ मनांसियानितान्यत्रवीक्ष्ययौधिष्ठिरंपुरं ॥ गर्हयंतिनिजंचारुवैभवंदेशसंभवं ॥ ८ ॥ पुण्यं
धनंसुखंधर्मोदेवोद्यानस्यकौतुकम् ॥ संपदोबहुलायत्रहसंतिभुवनत्रयम् ॥ ९ ॥ जनाःपुण्यप्रियायास्मिन्नानामंडनभूषि
ताः ॥ रतिरूपास्तुकामिन्योनरामन्मथरूपिणः ॥ १० ॥ सूर्येंद्रवाहनैर्मान्यारत्नालंकारभूषिताः ॥ विलोक्यंतेगजायत्रकिं
प्रसूताहरेर्गजात् ॥ ११ ॥ नानारत्नैःकिरीटैश्चभूषितारत्नकंबलैः ॥ धाराभिःपंचभिर्युक्तायत्रसंतितुरंगमाः ॥ १२ ॥ विजे
तारःसुरहयान्स्ववेगेनसमार्चिताः ॥ किमत्रवर्ण्यतेचारुपांडवस्यपुरेहरिः ॥ १३ ॥ सर्वंव्याप्यस्थितोऽनंतःस्वभाभिर्भासय
न्दिशः ॥ कन्यकाकरनिर्मुक्तैर्मौक्तिकैरत्नमिश्रितैः ॥१४॥ पार्थागमेभूभृतोऽत्रक्रियंतेहारसंयुताः ॥ एतेराजप्रभृतयोविराजंते
ऽत्रचामरैः ॥ १५ ॥ उद्यताश्चलितैर्वीराःकिमूर्ध्वकरभास्कराः ॥ अत्रायांतिहिवृंदानिऋषीणामूर्ध्वरेतसां ॥ १६ ॥ याचितुं
दीक्षिताद्धर्माद्दसिपत्रव्रतास्थितात् ॥ धूपधूमेनगगनंसमांसलमिवाभवत् ॥ १७ ॥ कृष्णस्योपरिभूलोकेवादित्रभयशंकितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एपासेनात्रविरजाधर्मराजस्यवीक्ष्यते ॥ १८ ॥ चलितापिधृताधीरैःस्वयंकृष्णेनरक्षिता ॥ एवंब्रुवंतस्तेसर्वैराजानःसंगताहरि
म् ॥ १९ ॥ तत्रपार्थोमहाबुद्धिःकृष्णमुख्यान्महाजनान् ॥ नमस्कृत्यमुदालिंग्यदर्शयामासभूपतीन् ॥ २० ॥ सौबलेयींचकुं
तींचदेवकींचपितृव्यकं ॥ धृतराष्ट्रंचविदुरंप्रत्युवाचधनंजयः ॥ २१ ॥ एनंपश्यंतुमेपूज्यंराजानंचंद्रहासकम् ॥ विषयाभिरतं
वीरंविष्णुभक्तंसमागतम् ॥ २२ ॥ वीरवर्मान्नृपश्रेष्ठोनानावीरगणाग्रणीः ॥ नमस्करोतिपुरतोधृतराष्ट्रमहीपते ॥ २३ ॥ मयू
केतुःसमुपैतिचायंविभेदितोयोहरिणानभिन्नः ॥ स्वधर्मतोवीरजनंतृणंखेन्यवेशयद्बाणसमीरणेन ॥ २४ ॥ एनंविभावयनृपं
सुधियांवरिष्ठंत्वत्पादसेवनरतंसहसाभिपन्नम् ॥ यस्यप्रतापरविणारिपुवक्त्रपद्मंसंकोचितंगतबलंस्वकरैर्दिवापि ॥ २५ ॥ यः
शेषराजभवनान्मणिमाजहारयोनागभोगविलसद्विषमादधार ॥ योजान्हवीगहनशापदवाग्निदग्धंमांबांधवैर्युतमचीकरदे
तिसोयम् ॥ २६ ॥ हंसध्वजंपश्यपुरःपादयोःप्रणतंनृपः ॥ यस्यपुत्रौमहावीरौशंकरंपार्वतीपतिम् ॥ २७ ॥ स्वशिरोभ्यांप्रभा
युक्तंचक्रतुर्मुदितंदिवि ॥ येनसर्वैरणेवीराःस्वप्रतापेनमोचिताः ॥ २८ ॥ तंकर्णपुत्रंप्रणतंपरिष्वजजनाधिप ॥ नीलध्वजंचब
लिनंसमुत्थापयमारिष ॥ वन्हिनायेनतत्सैन्यंदग्धंसंशयितावयम् ॥ २९ ॥ ॥ जैमिनिरुवाच ॥ ततःसर्वेनृपास्तेनधृताराष्ट्रे
णपूजिताः ॥ समागत्यमहात्मानंधर्मराजंववंदिरे ॥ ३० ॥ नमस्कृत्यार्जुनस्तंवैसमालिंग्याग्रतःस्थितः ॥ भीमसेनंचवृद्धांस्तान
भिवंद्यप्रहर्षितः ॥ ३१ ॥ कुंतीवीक्ष्यसुतंप्राप्तंशरतोमरदारितं ॥ परिष्वज्यस्थितावीरंमुंचतीहर्षजंजलं ॥ ३२ ॥ कर्णपुत्रंसमा ॥१४८॥
घ्रायमूर्ध्निवैप्रियबालकं ॥ प्रत्युवाचलयासर्वैरक्षितंवृषकेतुना ॥ ३३ ॥ तथाप्रहर्षिताकुंतीस्थिताधर्मनिवेशने ॥ युधिष्ठि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोऽथऋषिभिःसहितःकर्षितुंययौ ॥ ३४ ॥ क्षेत्रंगृहीत्वावृषभौद्रौपदींचसुमध्यमाम् ॥ ओषधीःसमुपादायदीक्षितोवसुमेव
च ॥ ३५ ॥ कृष्णाद्याःसर्वभूपालाःपश्यंतःपृष्ठगामिनः ॥ कुंतीचदेवकीदेवीयशोदावरवर्णिनी ॥ ३६ ॥ सिषिचुश्चंदनजलैः
सकर्पूरैर्युधिष्ठिरम् ॥ मंत्रपाठंप्रकुर्वंतिब्राह्मणाःस्त्रीभिरन्विताः ॥ ३७ ॥ कृषित्वातत्तदाक्षेत्रमिष्टिकाचयनंततः ॥ चकारत्वरि
तोमंत्रैरिष्टिकानांचतुःशतैः ॥ ३८ ॥ चतुर्वेदैश्चविधिवद्व्यासमुख्यैःप्रचोदितः ॥ बकदाल्भ्येनमुनिनासमस्तैर्वेदितेनच ॥ ३९ ॥
सुपर्णाचितिरेकाहिप्रथमातत्रसाकृता ॥ सुपर्णाख्याचहंसाख्याइष्टिकानांचतुःशतैः ॥ ४० ॥ दक्षिणस्तस्यपक्षस्तुविहितोय
ज्ञवेदिभिः ॥ चतुश्चत्वारिंशताचशतेनैकेनचैवहि ॥ ४१ ॥ अनेनैवान्यपक्षोहिपुच्छंमध्येशतेनच ॥ एकविंशतियुक्तेनतस्यवैर
चितंमुखम् ॥ ४२ ॥ द्वितीयाद्विगुणाभिर्हिकृताइयेनैवसाचितिः ॥ इष्टिकाभिस्तृतीयातुतस्मिन्वैद्विगुणातथा ॥ ४३ ॥ चतुर्थी
पंचमीयावत्सुपर्णानांचपंचकम् ॥ संजातंपरिशिष्टैश्चवेष्टितंबहुभिस्तथा ॥ ४४ ॥ अष्टद्वारयुतंरम्यंमंडपंचक्रिरेबुधाः ॥ सुप
ताकंसुकुंडानामष्टकंयाज्ञिकैःकृतम् ॥ ४५ ॥ षट्खादिराःकृतायूपाःसप्तपालाशजाःकृताः ॥ पंचबैल्वाश्चरचिताःपंचश्लेष्मा
तकस्यते ॥ ४६ ॥ चषालैर्भूषितास्तत्रवेदिकात्रितयंकृतं ॥ स्रुवाश्चस्थापितारम्याजुहूनांशतमेवच ॥ ४७ ॥ वैकंकतीनांराजेंद्रस्रु
चीनांषष्टिरेवच ॥ गोचर्मलोहितंसोमवल्लीमुसलमेवच ॥ ४८ ॥ मंडपेविहितंसर्वंतथारम्यमुलूखलम् ॥ संभाराणिचभूरीणिव
स्तुजातंसमाहृतम् ॥ ४९ ॥ आचार्यस्तुकृतोव्यासोबकदाल्भ्यःपितामहः ॥ ऋत्विजश्चकृतादिव्याऋषयोदीप्ततेजसः ॥ ५० ॥
वामदेवोवसिष्ठश्चगौतमोऽत्रिःपराशरः ॥ भारद्वाजोजामदग्न्यःकहोडोभागुरिस्तथा ॥ ५१ ॥ रैभ्यःसुमंतुःकौंडिन्योजातूक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यौऽथगालवः ॥ सौभरिर्लोमशाद्याश्चकृतास्तेऋत्विजःक्रमात् ॥ ५२ ॥ रक्षांविधायसन्मंत्रैरक्षोघ्नैर्द्वारपालकाः ॥ वृतास्तेधर्म
राजेनतस्मिन्यज्ञेमनोरमे ॥ ५३ ॥ विश्वामित्रश्चपुलहोधौम्यश्चारुणिरेवच ॥ उपमन्युर्वायुभक्षोमधुच्छंदाविभांडकः ॥
॥ ५४ ॥ एतेकृताद्वारपालास्तस्मिन्यज्ञेऽतिसुंदरे ॥ एतेचान्येचबहवोवृतास्तेपूजिताःक्रमात् ॥ ५५ ॥ दीक्षितेनतदाराजन्मृ
गाजिनविधारिणा ॥ नवनीतानुलिप्तेनद्रौपदीसहचारिणा ॥ ५६ ॥ व्यासस्ततःप्रत्युवाचदीक्षितंधर्मनंदनं ॥ उपविष्टांश्चभूपा
लान्दिव्यसिंहासनेषुच ॥ ५७ ॥ दंपतीनांचतुःषष्टिर्यातुगंगातटंशुभम् ॥ आहर्तुंजान्हवीतोयंमयादिष्टंयथोचितम् ॥ ५८ ॥
अत्रिस्तुपत्नीसहितोवसिष्ठोरुंधतीयुतः ॥ रुक्मिणीसहितःकृष्णःसुभद्रासहितोऽर्जुनः ॥ मायावतीयुतोवीरःप्रद्युम्नोयातुस
त्वरः ॥ ५९ ॥ उषागृहीतकरकाअनिरुद्धान्वितासतो ॥ हिडिंबयाभीमसेनोवृषकेतुःप्रभद्रया ॥ ६० ॥ मयूरकेतुःप्रियया ली
लावत्याऽप्यगच्छतु ॥ प्रभावत्यायौवनाश्वोनीलकेतुःसुनंदया ॥ ६१ ॥ गृह्णातुकलशंशीघ्रमनुशाल्वोधमिल्लया ॥ एतेमयाहि
निर्दिष्टास्तथाऽन्येजान्हवीजलम् ॥ ६२ ॥ आनयंतुनृपस्यार्थेसदाराःकलशैःशुभम् ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंव्यास
समादिष्टाःस्वपत्नीसहितामुदा ॥ ६३ ॥ आनेतुंजान्हवीतोयंप्रस्थिताबद्धपल्लवाः ॥ वादित्राणांस्वनोरम्यःप्रावर्ततजलागमे
॥ ६४ ॥ ब्राह्मणाद्याश्चयेलोकागजस्थाश्चकुमारिकाः ॥ मुक्ताफलानिवर्षंत्यःशृण्वंत्यःशंखगर्जितम् ॥ ६५ ॥ पठंतस्तत्रमुन
योगायंतोगीतकोविदाः ॥ तत्रनृत्यंप्रकुर्वाणास्तेलोकाःप्रस्थिताःपुरः ॥ ६६ ॥ नानाशृंगारसहितोनिर्ययौसमहाजनः ॥ देव
कींचैवकुंतींचपुरस्कृत्यजनार्दनः ॥ ६७ ॥ तदाकुंतीचकृष्णस्यगृहीत्वावस्त्रपल्लवम् ॥ बबंधरुक्मिणीपट्टकूलप्रांतेमनस्विनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६८ ॥ तत्कौतुकंसमालोक्यनारदोमुनिसत्तमः ॥ जगामसत्याभवनंशंसितुंकृष्णनिर्गमम् ॥ ६९ ॥ ॥ नारदउवाच ॥ ॥
सत्यभामेशृणुवचोमदीयंकृष्णवल्लभे ॥ यज्ञारंभेसतांपार्श्वेनानानृपसमागमे ॥ ७० ॥ रुक्मिणीबहुलंमानंप्रपेदेहरिसंयुता ॥
निर्यातिजलमानेतुंकृष्णेनैवसुसंयुता ॥ ७१ ॥ धृतातपत्रासायातिसधृपाचलचामरा ॥ लभतेराजसन्मानंसैवनान्याःस्त्रियोह
रेः ॥ ७२ ॥ समर्थःकामपुत्रोऽसौपौत्रोयस्यानिरुद्धकः ॥ कस्माद्विशयितंगेहेलयासत्येचतद्वद ॥ ७३ ॥ समीपेतांसमालोक्य
मुखदाक्ष्येणकेशवः ॥ तत्रानेष्यत्सत्यभामेयद्यासिष्यःसमीपगा ॥ ७४ ॥ ॥ सत्यभामोवाच ॥ ॥ अत्रतिष्ठतिगोविंदोम
द्गृहेमुनिसत्तम ॥ अनेनसहितायास्येतत्त्वंपश्यसमागमम् ॥ ७५ ॥ ॥ जैमिनिरुवाच ॥ ॥ नारदोददृशेसत्याःकेतनेता
र्क्ष्यकेतनम् ॥ उवाचकेशवंविप्रस्त्वंदृष्टोऽसीतिसंसदि ॥ ७६ ॥ सत्यागृहेचपश्यामिविस्मयोमेप्रजायते ॥ युधिष्ठिरस्यपुरतो
मयादृष्टोऽसिमंत्रदः ॥ ७७ ॥ सत्यायुक्तःप्रयास्येवंगच्छगच्छजपत्पते ॥ निर्जगामगृहात्तस्मान्निर्गतंवीक्ष्यमाधवम् ॥ ७८ ॥
नारदोमुनिरन्यत्रययौजांबवतीगृहं ॥ प्रविश्यमंदिरंतस्याःप्राहजांबवतीमिदम् ॥ ७९ ॥ ॥ नारदउवाच ॥ ॥ स्थितासि
किंगृहेमातर्नगतासिनृपालयम् ॥ आहर्तुंजान्हवीतोयंयत्रयातिस्वयंहरिः ॥ ८० ॥ रुक्मिणींसत्यभामांचसहनेष्यतिमाध
वः ॥ ॥ जांबवत्युवाच ॥ ॥ सर्वास्तेनयुताःसंतिमहिष्यःकेशवस्यताः ॥ ८१ ॥ यांपरित्यज्यगंतासौसानजीवतिमानि
नी ॥ अस्मिन्समागमेरम्येसाधूनामपमानिता ॥ ८२ ॥ ॥ जैमिनिरुवाच ॥ ॥ तत्रापिनारदोवीक्ष्यमाधवंबद्धपल्लवम् ॥
मंदिराणिसगोपीनांबभ्राममुनिसत्तमः ॥ ८३ ॥ सर्वाणितानिसद्मानिसकृष्णानीत्यमन्यत ॥ पुनरागत्यदेवर्षिर्मंडपेपांडवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 हि ॥ ८४ ॥ ऋत्विग्भिःसहितस्तस्थौस्तुवन्कृष्णंसनातनम् ॥ वसिष्ठेनसमंसर्वैराजानोजान्हवीतटे ॥ ८५ ॥ जग्मुःसकृष्णाः
 सानंदामहावीरैःसुरक्षिताः ॥ व्यासेनमंत्रितंतोयंपूजिताजलदेवताः ॥ ८६ ॥ पूरयित्वाततोव्यासःकलशंचसपुष्पकम् ॥ ददौ
करेऽनुसूयायास्तस्मिन्कालेनराधिप॥ ८७ ॥ सुवर्णकलशंचैकंपरिपूर्णमरुंधती॥जग्राहपुरतस्तेषांमुनीनांभावितात्मनां॥८८॥
रुक्मिणीमस्तकेस्वेतुकलशंतोयपूरितम् ॥ अरुंधत्यार्पितंस्त्रेहाद्गंगातीरेदधौमुदा ॥ ८९ ॥ रुक्मिणींप्रत्युवाचाथवसिष्ठस्य
प्रियासती ॥ दूयतेतवभद्रेकंपुष्पभारेणयद्गृहे ॥ ९० ॥ तस्मिन्मयाऽर्पितेनात्रकलशेननदूयसे ॥ अरुंधतीवचःश्रुत्वासुभद्रावा
क्यमब्रवीत् ॥ ९१ ॥ एषाभारसहामातर्येनगोवर्धनोगिरिः ॥ धृतःकरेगवार्थंचसप्ताहंचस्वलीलया ॥ ९२ ॥ रुक्मिणीतंदिवा
रात्रौहृदिधृत्वानदूयते ॥ पतिव्रतानांधर्मोऽयंकृतःकेवलयाऽनया ॥ ९३ ॥ ॥ रुक्मिण्युवाच ॥ ॥ ममव्रतंसमालोक्यसुभ
द्रातंधनंजयम् ॥ धारयंतीहृदिसदासौख्यमाप्नोतिनित्यशः ॥ ९४ ॥ ॥ जैमिनिरुवाच ॥ ॥ एवंब्रुवंत्यस्ताःसर्वाजगृहुःकल
शान्बहून् ॥ स्वेस्वेशिरसिपुष्पाढ्येधृतमौक्तिकपुंजके ॥ ९५ ॥ सभर्तृकाश्चसंप्राप्तायज्ञवाटेतथाविधे ॥ मृदंगायत्रवाद्यंतेशं
खाश्चपटहैःसह ॥ ९६ ॥ वीणाश्चविविधाभेर्यःशंखाश्चकाहलाःशुभाः ॥ तत्रानीयजलंपुण्यंपावितःसतुरंगमः ॥ द्रौपद्याधर्म
राजेनयूपेबद्धःसुपूजितः ॥ ९७ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेजलयात्रावर्णनंनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥छ॥
॥ जैमिनिरुवाच ॥ ॥ ततःप्रववृतेयज्ञोधर्मराजस्यशासनात् ॥ यज्ञविद्याविधानेनस्नातोयंमंत्रितैर्जलैः ॥ १ ॥ भीमार्जुनाद
यःसर्वेसकृष्णाःकर्मकारकाः ॥ पादप्रक्षालनंकृत्वामुनीनांभावितात्मनाम् ॥ २ ॥ स्वयमेवहृषीकेशःस्थापयामासतानृषीन् ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोपविष्टावासांसिपरिधायद्विजोत्तमाः ॥ ३ ॥ चंदनेनानुलिप्तांगादिव्यालंकारभूषिताः ॥ स्त्रग्विणोंदत्तमाल्याश्चदत्तकर्पूरवी
टिकाः ॥ ४ ॥ सुवर्णपीठेष्वासीनाःसंस्तुताःकृष्णपाण्डवैः॥दीयतांदीयतामन्नंशब्दोभून्नृपतेर्गृहे ॥५॥ युधिष्ठिरस्ययज्ञेतुनाना
द्विजसमागमे ॥ सुवर्णंचैवरत्नानिवासांसिरुचिराणिच ॥ ६ ॥ गजाश्वरथयानानिगोसहस्त्राणिचन्दनम् ॥ छत्राणिचामरा
ण्येवदासीदासगणान्महीम् ॥ ७ ॥ अर्थिभ्यश्चेतरेभ्यश्चमंदिराणिधनानिच ॥ यस्ययस्यप्रियंयत्तुतत्तस्मैदीयतामिति॥ ८ ॥
युधिष्ठिरःकृतस्नानोयज्ञकर्मणिदीक्षितः ॥ सुवर्णचयमासाद्यसमानीयतुरंगमम् ॥ ९ ॥ प्रोवाचाग्रेपशुरभूच्छ्रुतिमेतांपठन्पु
रः ॥ पिबभोस्त्वमपोघोटतवलोकोभविष्यति ॥ १० ॥ युधिष्ठिरस्यतद्वाक्यमाकर्ण्यतुरगःस्वयम् ॥ धुनयामासवदनमपश्य
त्केशवंमुदा ॥ ११ ॥ प्रोथाभ्यांस्वमभिप्रायंशशंसनकुलायसः ॥ ज्ञात्वाभावंतुरङ्गस्यनकुलःप्राहधर्मजम् ॥ १२ ॥ वाजीशं
सतिराजेंद्रनाहंयास्येत्रिविष्टपम् ॥ अन्येषुकिंतुयज्ञेषुस्वर्गकामेषुयेहयाः ॥ १३ ॥ त्रिविष्टपंगतावीरतेषुकृष्णोनकर्मकृत् ॥ अ
नीश्वरेषुयज्ञेषुस्वर्गस्तुपरमंफलम् ॥ १४ ॥ जायतेभुविकर्तृणामास्मिन्यज्ञेफलंहरिः ॥ ममापिकृष्णवदनेस्थितंपश्यंतुयाज्ञि
काः ॥ १५ ॥ ॥ नकुलउवाच ॥ ॥ एवंब्रूतेधर्मराजतुरंगस्तेमहाक्रतौ ॥ अथैनंमुनयःसर्वेयूपपार्श्वेसुमंत्रितः ॥ १६ ॥ रा
जानःस्त्रीसमूहोऽपियांतंपश्यंतुमाधवम् ॥ नकुलस्यवचःश्रुत्वायूपेनीतस्तुरंगमः ॥ १७ ॥ यूपेबद्धोहयोविप्रैःसकृष्णैरभिमंत्रि
तः ॥ ॥ धौम्यउवाच ॥ ॥ भीमखड्गंसमादायतिष्ठत्वंनिश्चलःक्षणम् ॥ १८ ॥ यावत्परीक्षांकुर्वेऽहंवाजिनोऽस्यमहामते ॥
ततोधौम्योहयस्याशुवामकर्णंन्यपीडयत् ॥ १९ ॥ तावत्क्षीरस्यधारातुनिर्गताजनमेजय ॥ विस्मिताःसकलालोकाःशोणितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैवदृश्यते ॥ २० ॥ धौम्योऽब्रवीद्भीमसेनंछिंधिकिंवाजिनोधुना ॥ यथातुष्येज्जगन्नाथःपुराणपुरुषोत्तमः ॥ २१ ॥ वादित्रनादेमहतिप्रवर्तितेभीमोलुनात्तस्यहयस्यशीर्षं ॥ ऊर्ध्वंगतंतच्चशिरोनचाधःसूर्येप्रविष्टंकिलवह्निरूपम् ॥ २२ ॥ शुद्धंज्ञात्वाहृषीकेशस्तुतोदैनमुरस्थले ॥ बैल्वेनकण्टकेनापिभिन्नःकृष्णेनपावनः ॥ २३ ॥ निर्गताक्षीरधारातुतुरगस्यकलेवरात् ॥ धारांविनिर्गतांवीक्ष्यऋषयोधर्ममब्रुवन् ॥ २४ ॥ एवंविधोनकस्यापिशुद्धःपूर्वंतुरंगमः ॥ शुद्धंज्ञात्वाहृषीकेशोधर्मपुत्रंतुसोऽब्रवीत् ॥ ॥ २५ ॥ तथाब्रुवंस्तेऋषयोदृष्ट्वाशुद्धंतुरंगमम् ॥ दिष्ट्यातेसफलोयज्ञोजायतेह्ययुधिष्ठिर ॥ २६ ॥ तेषांसंवदतामेवंतुरंगमकलेवरात् ॥ निर्गतंसुमहत्तेजःप्रविष्टंकेशवानने ॥ २७ ॥ पश्चाच्छरीरंपतितंभूत्वाकर्पूरमेवतत् ॥ विभूतिरिवरुद्रस्यच्युतागात्रादशोभत ॥ २८ ॥ विस्मितामुनयस्तंतुकर्पूरंवीक्ष्यतेभवन् ॥ कर्पूरंजुहुवुस्तेतुहोमकुंडेतुतत्क्षणात् ॥ २९ ॥ यत्रोपविष्टोराजासौसपत्नीकःसमाधवः ॥ व्यासोगृहीत्वाकर्पूरंस्त्रुवेणेदमथाब्रवीत् ॥ ३० ॥ ॥ व्यासउवाच ॥ ॥ गृहाणेंद्रमहायज्ञेघनसाराहुतिंविभो ॥ एहिराज्ञार्पितामेनांदुर्लभामग्रतःकलौ ॥ ३१ ॥ शक्रःसमागतःसाक्षात्प्रत्युवाचमहामुनिम् ॥ देहिपावकवक्त्रेणयावत्तृप्तिर्ममाक्षया ॥ ३२ ॥ यांवीक्ष्यतृप्तिंप्राप्तोऽस्मिभुक्त्वाशंचभविष्यति ॥ व्यासस्ततोजुहावाग्नौवसंतेदशमीदिने ॥ ॥ ३३ ॥ शुक्लपक्षेहिचैत्रस्यसार्पर्क्षेगुरुवासरे ॥ स्वाहेतींद्रायविधिवत्परमामाहुतिंददौ ॥ ३४ ॥ चंद्रादिदेवताभ्यश्चतत्तन्मंत्रैर्यथाक्रमम् ॥ ततोदिग्देवताभ्यश्चमंत्रैर्दत्वायथाविधि ॥ ३५ ॥ घनसारंजुहावाग्नौदेवतानांपुरस्तदा ॥ हवनेनजगत्प्रीतंबभूवसचराचरं ॥ ३६ ॥ होमधूपेनराजासौपूतःप्रीतोयुधिष्ठिरः ॥ समालिंग्याब्रवीद्भीमंदिष्ट्याजातश्चमेक्रतुः ॥ ३७ ॥ यज्ञांतेऽवभृ

१ शिरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थस्नानंकुर्वेऽहंनात्रसंशयः ॥ ॥ जैमिनिरुवाच ॥ ॥ ऋषिभिःसहितःकृष्णःस्नापयामासपार्थिवं ॥ ३८ ॥ सदारंभीमसेना
द्यैर्वृतंभूपतिभिस्तथा ॥ सोमपानंकारयित्वाप्राशयित्वायथाक्रमं ॥ ३९ ॥ पुरोडाशंतुसर्वेभ्योदत्वाशेषंतदाह्यदत् ॥ जयशब्दै
र्वंदिनस्तैतथावादित्रनिःस्वनैः ॥ ४० ॥ तुष्टुवुर्धर्मराजानंगुणगीतैश्चगायकाः ॥ नीराजनंततश्चक्रुर्देवकीप्रमुखाःस्त्रियः॥४१॥
कुंतीवधूभिःसहितामुदिताप्रापतत्सुखम् ॥ कृत्वापूर्णाहुतिंराजाउपविष्टोयुधिष्ठिरः ॥ ४२ ॥ अलंकृतश्चकृष्णेनतत्रराजामहा
त्मना ॥ शुशुभेमघवानेवयथास्वर्गेसुरोत्तमैः ॥ ४३ ॥ पूर्वंहरिंपूजयित्वावस्त्रालंकारचंदनैः ॥ व्यासायपृथिवींसर्वांददौराजा
मुदान्वितः ॥ ४४ ॥ संकल्पपूर्वंविधिवत्पुनर्व्यासःक्रमाद्ददौ ॥ तद्द्रव्यंब्राह्मणेभ्यश्चदीनेभ्यश्चददौऋषिः ॥ ४५ ॥ रत्नाद्रि
शिखरस्थंतुचरंतंकनकंवृषम् ॥ बकदाल्भ्यायचददौतदाराजायुधिष्ठिरः ॥ ४६ ॥ एकोरथोवारणएकएवदशाश्वमुख्याश्चसु
वर्णभारः ॥ शतंगवांहेमविभूषितानांप्रस्थश्चदत्तोवरमौक्तिकानाम् ॥ एकैकशोभृत्यचतुष्टयंचकार्येषुदक्षंसददौनरेंद्रः॥४७॥
ऋत्विग्भ्योद्वारपालेभ्योददौपूर्णमनोरथः ॥ तदर्धार्धक्रमेणैवइच्छादानान्यनेकशः ॥ ४८॥ ददौयुधिष्ठिरोराजानृपतीनप्यतो
षयत् ॥ तुरंगाणांसहस्रंचगजानांचशतंशतम् ॥ ४९ ॥ अलंकारान्सुवर्णस्यकोटिंचप्रददौनृपः ॥ प्रत्येकंनृपतीन्पूज्यद्विगुणे
नैवयादवान् ॥ ५० ॥ रुक्मिण्याद्यास्त्रियःसर्वाअलंकारैश्चतोषिताः ॥ उपवेश्यासनेकृष्णमलंकारशतैर्युतम् ॥ ५१ ॥ यज्ञ
जंसुकृतंसर्वंहृषीकेशकरेददौ ॥ वादित्रनादःसंजज्ञेपुष्पवृष्टिःपपातच ॥ ५२ ॥ भीमाद्याःपाण्डवाःसर्वेयज्ञःकृष्णेनकारितः ॥
इतिब्रुवंतःसततंहर्षिताश्चाभवन्नृप ॥ ५३ ॥ मोचिताःपशवःसर्वेयेचयूपेनियंत्रिताः ॥ तुष्टुवुस्तेजनाःसर्वेयज्ञःकृष्णेनकारितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५४ ॥ यज्ञप्रकरणंश्रुत्वामुच्यंतेसर्वपातकैः ॥ सर्वैश्चपूजितास्तेवैसंतिष्ठंतिधरातले ॥ ५५ ॥ ॥ इत्याश्वमेधिकेपर्वणि जैमिनीये युधिष्ठिराभिषेकोनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

॥ जैमिनिरुवाच ॥ ॥ यज्ञस्यांतेभीमसेनःप्रार्थयित्वामुनीन्नृपान् ॥ सकृष्णान्भोजयामासविविधान्नेनमारिष ॥ १ ॥ ॥जनमेजयउवाच ॥ ॥ कथंतेभोजिताविप्राःसकृष्णाश्चमहीभुजः ॥ ययारीत्यास्त्रियोबालाभीमेनरसकारिणा ॥ २ ॥ अन्नानि कानिजातानिसर्वंशंसमहामुने ॥ कौतुकंजायतेऽतीवशृण्वतोमेतवाननात् ॥ ३ ॥ ॥ जैमिनिरुवाच ॥ ॥ शृणुराजेंद्रवक्ष्यामिभीमसेनेनयत्कृतम् ॥ मंडपेनवरत्नाढ्येरम्येकांचनभूषिते ॥ ४ ॥ तत्रचंदनजातेषुपीठास्तरणकंबलाः ॥ सरत्नाःस्थापिताभांतिपुष्पप्रकरपूरिताः ॥ ५ ॥ कचोलानांचतुःषष्टिर्हैमस्थालीनियंत्रिताः ॥ प्रतिविप्रंधृतास्थालीरत्नदीपद्वयान्विता ॥ ॥ ६ ॥ तिरस्करिण्यःपुष्पाणांचंद्रिकालंबिताःशुभाः ॥ कृष्णागुरुकृतैर्धूपैर्वासितेमंडपेऽमले ॥ ७ ॥ सुगंधेनजलेनाथपात्रप्रक्षालनंकृतम् ॥ प्रतिपात्रंसुवर्णस्यधृतोरत्नकमण्डलुः ॥ ८ ॥ ततोभीमेनसरसंपायसंतुप्रवेशितम् ॥ ददृशुर्ब्राह्मणास्थाल्यांचंद्रबिंबमिवोदितम् ॥ ९ ॥ भक्तंसूपान्वितंचैवयूथिकाकुड्मलप्रभम् ॥ १० ॥ पुष्पपत्रफलमूलदारुभिर्वल्कलैर्व्यंजनपत्रकृतानि ॥ व्यंजनानिकटुतिक्तकखंडैर्निर्मितानिपवनात्मजयत्नात् ॥ ११ ॥ कश्चिद्द्विजस्तदापूपान्वीक्ष्यपप्रच्छचापरं ॥ नवनस्थेनचमयादृष्टमेतद्विकिंवद ॥ १२ ॥ पृच्छंतंप्राहविप्रोसौमत्वाऽत्मानमतोऽधिकम् ॥ चंद्रस्यशकलंविद्धिपतितंशतधाभुवि ॥ ॥ १३ ॥ एवंवदतिविप्रेऽस्मिन्ततःप्राप्ताःस्मफेनिकाः ॥ स्थालेस्वस्मिन्समीक्ष्यैकोब्राह्मणोविस्मयंगतः ॥ १४ ॥ मरालेध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेराजसर्यासतपत्रयुतोमहान् ॥ समुत्पन्नइतिप्राहवायुभक्षोमहातपाः ॥ १५ ॥ दंतोलूखलिनाप्रोक्तंमोदकान्वीक्ष्ययद्वचः ॥ औदुंबराणिचामूनिविषयेऽस्मिन्मयोच्यते॥१६॥ भक्तंमेनेद्विजःकश्चित्पुष्पाणिकुटजस्यतु ॥ करंजिकांमुनिवरोकर्णिकांमन्यतेपरः ॥ १७ ॥ वटकंकनकाभंतुमेनेकश्चिद्द्विजस्तदा ॥ पतितंभानवीयंकिंरथचक्रंममाग्रतः ॥ १८ ॥ द्राक्षारसंपिबंत्येकेकेचिच्चूतरसंमुदा ॥ लुठितंहिसितामध्येघृताक्तंकदलीफलम् ॥ १९ ॥ मुखेचिक्षेपसकलंमुनिशिष्योगतत्वचम् ॥ सिताज्यैर्मंडकंविप्रोवेष्टयित्वाततोऽपरः ॥ २० ॥ चिक्षेपमुखमध्येतुसंप्राप्तःसुखमुत्तमम् ॥ मेनेमोक्षसुखंतुच्छंभक्षयन्खण्डलड्डुकान् ॥ २१ ॥ इत्थंभीमेनतेविप्रास्तथाऽन्येक्षत्रियादयः ॥ लोकाःसंभोजिताःसर्वेतस्मिन्यज्ञमहोत्सवे ॥ २२ ॥ संतर्पिताहितेविप्रादिव्यचंदनचर्चिताः ॥ तांबूलंचंद्रसंयुक्तंदृष्ट्वाविस्मयमाशताः ॥ २३ ॥ शुष्कपत्राणिसंचूर्ण्यभक्षयामोवनेवयम् ॥ तेकृतावरतांबूलरसज्ञाधर्मसूनुना ॥ २४ ॥ ॥ जैमिनिरुवाच ॥ ॥ ब्राह्मणैःसहितोराजाक्षत्रियैश्चमहाबलैः ॥ उपविष्टःसयज्ञांतेसकृष्णोयज्ञमंडपे ॥ २५ ॥ ततःप्राप्तौविप्रवरौविवदंतौहिसंसदि ॥ धर्मराजंसमागत्यप्रोचतुर्वचनंनृप ॥ २६ ॥ धर्मराजावयोर्वादंसम्यक्छिंधिमहामते ॥ ॥ राजोवाच ॥ ॥ बकदाल्भ्यमुखाःसंतिवसिष्ठात्रिपुरोगमाः ॥ २७ ॥ यत्रसभ्याःसुमनसस्तत्रवादकथाहिका ॥ निरूपयस्वविप्रेंद्रकारणंस्वंपृथक्पृथक् ॥ २८ ॥ ॥ ब्राह्मणउवाच ॥ ॥ एभिस्तुमत्करेदत्तंक्षेत्रंस्वीयंयथाक्रमम् ॥ तत्पुनःकर्षितंतस्मान्निधानंनिर्गतंनृप ॥ २९ ॥ धान्यमेवमयाग्राह्यंयत्क्षेत्रेजायतेपुनः ॥ निधानंनग्रहीष्येऽहंनमदीयंहितद्ध्रुवम् ॥ ३० ॥ एभिरेवतुतद्ग्राह्यंमयात्यक्तंनृपाधुना ॥ पश्यमांपीडयंत्येतेनिधानेननगतत्रपाः ॥ ३१ ॥ ॥ युधिष्ठिर

१ क्षेत्रंपक्वंयथाक्रममितिपुस्तकान्तरेसुपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ सत्यंवदमहाबुद्धेकिमर्थंपीड्यसेद्विजम् ॥ भवान्गृह्णातुतद्द्रव्यंयन्नदत्तंत्वयापुरा ॥ ३२ ॥ ॥ ब्राह्मणउवाच ॥ ॥
मयासमर्पितंक्षेत्रंपुरास्मैधर्मनंदन ॥ यत्किंचिज्जायतेतास्मिन्ब्राह्मणस्यनतन्मम ॥ ३३ ॥ तच्छ्रुत्वावचनंकृष्णःप्रत्युवाचहसन्नि
व ॥ मासत्रयंतुविप्रेंद्रौस्थिरौभवितुमर्हथः ॥ ३४ ॥ कृष्णवाक्येनतुष्टौतौक्षिप्त्वावित्तंनृपालये ॥ जग्मतुश्चगृहंराजन्प्रतीक्षंतौ
चतद्दिनम् ॥ ३५ ॥ ॥ राजोवाच ॥ ॥ अधुनामाधवकथंनिर्णयोनत्वयाकृतः ॥ सर्वेषांपश्यतामेवविस्मयोमेमहान्विभो ॥
॥ ३६ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ ऋषयःसंतिराजानःसुखेनतवसन्निधौ ॥ यज्ज्ञांतेमुदितालोकामध्येवादकथाकथम् ॥ ३७ ॥
मासेतृतीयेघोरस्तुभविष्यतिकलिर्नृप ॥ द्रव्यार्थेविवदंतौहिताडयंतौपरस्परम् ॥ ३८ ॥ मुष्टामुष्टिसंप्रहारंकेशाकेशिनखान
खि ॥ आगंतारौचतेपार्श्वेकलिनामथितौनृप ॥ ३९ ॥ त्वंतद्धनंद्विधाकृत्वाताभ्यांदास्यसिमेमतिः ॥ भविष्यंतिकलौविप्राआ
चारश्रुतिवर्जिताः ॥ ४० ॥ राजानोधर्महीनाश्चपीडयिष्यंतितेप्रजाः ॥ अधर्मवल्लभोलोकोधर्मद्वेषीचमत्सरी ॥ ४१ ॥ द्यूत
मद्यरतानित्यंसर्वेव्यसनिनःसदा ॥ देवकार्येपितॄणांवासाधुस्त्रीभरणेतथा ॥ ४२ ॥ ब्राह्मणार्थेधनंस्वल्पंदत्वातेदुःखभाजिनः ॥
भविष्यंतिकलौराजन्मुदितागणिकागृहे ॥ ४३ ॥ नेष्यंतिचधनंभूरिद्यूतादिव्यसनेष्वपि ॥ जननींजीर्णवस्त्रेणवेष्टयिष्यंति
तेकलौ ॥ ४४ ॥ वेश्यांवापुंश्चलींवापिदुकूलैर्विविधैःस्वयं ॥ धत्तूरकस्यपुष्पाणिकरवीरभवानिच ॥ ४५ ॥ सकंटकानिपुष्पा
णिनयिष्यंतिशिवालये ॥ वरपंकजजांमालांकर्पूरंचंदनंतथा ॥ ४६ ॥ नेष्यंतिकुमुदंचारुवेश्यास्त्रीकुलटागृहे ॥ मातरंपितरंचै
वत्यजंतिहिजनाःकलौ ॥ ४७ ॥ स्त्रीसेवकाभविष्यंतिपरिचारकवत्सदा ॥ जननींताडयिष्यंतिलालयिष्यंतिस्वांस्त्रियम् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वश्रूश्वशुरयोश्चैवस्नुषाःकलियुगेनृप ॥ वदिष्यंत्यप्रियंवाक्यंहृदयेशल्यकारकम् ॥ ४९ ॥ नविश्वासंकरिष्यंतिदेवेषुब्राह्मणे षुच ॥ कर्मभ्रष्टाभविष्यंतिचतुर्वर्णाःकलौयुगे ॥५०॥ स्वीयंकर्मपरित्यज्यपरकीयंप्रकुर्वते ॥ ॥जैमिनिरुवाच॥ ॥ एवंकृ ष्णेनकथिताःकलिधर्माभयावहाः ॥ ततोवीराःकथाश्चक्रुर्यज्ञांतेकृष्णपांडवाः॥ ५१ ॥ ॥इत्याश्वमेधिकेपर्वणिजैमिनीये कलिधर्मवर्णनोनामपंचषष्टितमोध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ जैमिनिरुवाच ॥ ॥ श्रूयतांराजशार्दूलमहदाश्चर्यमुत्तमं ॥ अश्वमेधेमहायज्ञेनिवृत्तेयदभूद्विभो ॥ १ ॥ तर्पितेषुद्विजाद्ये पुज्ञातिसंबंधिबंधुषु ॥ दीनांधकृपणेचापितदाभरतसत्तम ॥ २ ॥ जायमानेमहानादेदिक्षुसर्वासुभारत ॥ पतत्सुपुष्पवर्षेषुध र्मराजस्यमूर्धनि ॥ ३ ॥ गर्वितोऽभूत्तदाराजाधर्मपुत्रोयुधिष्ठिरः ॥ बिलान्निष्क्रम्यनकुलोरुक्मपार्श्वस्तदानृप ॥ ४ ॥ वज्राश निसमंनादममुंचतविशांपते ॥ सकृदुत्सृज्यतंनादंत्रासयानोद्विजान्नृपान् ॥ ५ ॥ मानुषंवचनंप्राहधृष्टोबिलशयोमहान् ॥ सक्तुप्रस्थेनवोनायंयज्ञस्तुल्योनराधिप ॥ ६ ॥ उंछवृत्तेर्वदान्यस्यकुरुक्षेत्रनिवासिनः ॥ तस्यतद्वचनंश्रुत्वानकुलस्यविशांप ते ॥ ७ ॥ विस्मयंपरमंजग्मुःसर्वेतेब्राह्मणर्षभाः ॥ ततःसमेत्यनकुलंपर्यपृच्छंततेद्विजाः ॥ ८ ॥ कुतस्त्वंसमनुप्राप्तोह्यस्मिन्य ज्ञसमागमे ॥ किंबलंपरमंतुभ्यंकिंश्रुतंकिंपरायणम् ॥ ९ ॥ कथंभवंतंविद्यामोयोनोयज्ञंविगर्हसे ॥ अविलुप्यागमंकृत्स्नंवि विधैर्याज्ञिकैःकृतम् ॥ १० ॥ यथागमंयथान्यायंकर्तव्यंचतथाकृतम् ॥ पूजार्हाःपूजितायत्रविधिवच्छास्त्रचक्षुषा ॥ ११ ॥ मंत्र पूर्वंहुतश्चाग्निर्दानंदत्तममत्सरम् ॥ तुष्टाद्विजर्षभाश्चात्रदानैर्बहुविधैरपि ॥ १२ ॥ क्षत्रियाश्चसुयुद्धेनश्राद्धैरपिपितामहाः ॥ पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लनेनविशस्तुष्टाःकामैःशूद्राश्चयोषितः ॥ १३ ॥ अनुक्रोशैस्तथादानैराशीर्भिश्चपृथग्जनाः ॥ ज्ञातिसंबंधिनस्तुष्टाःशौचेनच
नृपस्यनः ॥ १४ ॥ देवाहविर्भिःपुण्यैश्चरक्षणैःशरणार्थिनः ॥ यदत्रन्यूनंतद्ब्रूहिसभायांब्राह्मणस्यहि ॥१५॥ श्रद्धेयवाक्यःप्रा
ज्ञस्त्वंदिव्यरूपंबिभर्षिच ॥ सभागतैश्चपृष्टस्त्वंतत्त्वतोवक्तुमर्हसि॥१६॥इतिपृष्टोद्विजैस्तैश्चप्रहस्यनकुलोऽब्रवीत् ॥ नैषानृता
मयावाणीप्रोक्तागर्वेणवाद्विजाः ॥ १७॥ यन्मयोक्तमिदंसर्वंयुष्माभिश्चाप्युपश्रुतम् ॥ सक्तुप्रस्थेनवोनायंयज्ञस्तुल्योनराधि
प ॥ १८॥ उंछवृत्तेर्वदान्यस्यकुरुक्षेत्रनिवासिनः ॥ शृणुताव्यग्रमनसःशंसतोमेद्विजर्षभाः ॥ १९ ॥ अनुभूतंचदृष्टंचयन्म
याद्भुतमुत्तमम् ॥ धर्मक्षेत्रेकुरुक्षेत्रेधर्मज्ञैर्बहुभिर्वृते ॥ २० ॥ उंछवृत्तिर्द्विजःकश्चित्कापोतींवृत्तिमास्थितः ॥ सभार्यःसहपुत्रेण
सस्नुषस्तपसिस्थितः ॥ २१ ॥ वधूचतुर्थोवृद्धःसधर्मात्मानियतेंद्रियः ॥ षष्ठेकालेसदाविप्रोभुंक्तेतैःसहसुव्रतः ॥ २२ ॥ क
पोतधर्मिणस्तस्यदुर्भिक्षेसतिदारुणे ॥ नाभविष्यत्तदाविप्राःसंचयस्तन्निबोधमे ॥ २३ ॥ क्षीणौषधिसमावेशेद्रव्यहीनोभ
वत्तदा ॥ कालेकालेपुसंप्राप्तेनैवाविंदतभोजनम् ॥ २४ ॥ क्षुधापरिगताःसर्वेप्रातिष्ठंततदातुते ॥ उंछस्तदाशुक्लपक्षेमध्येतप
तिभास्करे ॥ २५ ॥ तृषार्तश्चक्षुधार्तश्चसविप्रस्तपसिस्थितः ॥ उंछंनप्राप्तवानेवसार्धंपरिजनैस्ततः ॥ २६ ॥ सतथैवक्षुधा
विष्टःस्पृष्ट्वातोयंयथाविधि ॥ क्षपयमासतंकालंसार्धंपरिजनेनवै ॥ २७ ॥ अथषष्ठेगतेकालेसयवप्रस्थमर्जयत् ॥ यवप्रस्थेन
तेसक्तूनकुर्वंस्तुतपस्विनः ॥ २८ ॥ कृतजप्याह्निकास्तेतुहुत्वाग्निंचयथाविधि ॥ कुडवंकुडवंसर्वेव्यभजंततपस्विनः ॥ २९ ॥ ॥१५४॥
अथागमद्द्विजःकश्चिदतिथिर्भुंजतांतदा ॥ तंपूजयित्वाविधिवत्सविप्रःप्रीतमानसः ॥ ३० ॥ प्रोवाचमधुरंवाक्यंमनःप्राल्हाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारकम् ॥ ॥ विप्रउवाच ॥ ॥ धन्योस्म्यनुगृहीतोस्मिपावितोस्मियतोभवान् ॥ प्राप्तोस्यतिथिवेलायांघर्मार्तस्येवतोय
दः ॥ ३१ ॥ स्वागतंतेद्विजश्रेष्ठभूयःसुस्वागतंतव ॥ सनाथःक्रियतांब्रह्मन्नुटजोयंप्रविश्यताम् ॥ ३२ ॥ तेगृहागृहिणःसत्याये
षुमार्गश्रमातुराः ॥ स्वगृहेष्विवविश्रांताभवंतिचभवादृशः ॥ ३३ ॥ अहोतीवसभाग्यास्तेनिःस्वापिगृहमेधिनः ॥ येषामशू
न्यादिवसागच्छंत्यतिथिपूजनैः ॥ ३४ ॥ तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता ॥ एतान्यपिसतांगेहेनोच्छिद्यंतेकदाचन ॥ ३५ ॥
देयमार्तस्यशरणंपथिश्रांतस्यचासनं ॥ तृषितस्यतुपानीयंक्षुधितस्यापिभोजनम् ॥ ३६ ॥ चक्षुर्दद्यान्मनोदद्याद्वाचंदद्यात्सु
केवलाम् ॥ अभ्युत्थानानुव्रजनंकुर्यान्न्यायेनचार्चनम् ॥ ३७ ॥ ॥ नकुलउवाच ॥ ॥ एवमुक्त्वासधर्मात्मातमभ्यर्च्ययथा
विधि ॥ स्वभागंप्रददौहृष्टोनचतृप्यतितेनसः ॥ ३८ ॥ ततोऽस्यभार्याक्षुत्क्षामावृद्धाम्लानातपास्विनी ॥ त्वगस्थिभूतावेपंतीभ
र्तारमिदमब्रवीत् ॥ ३९ ॥ ॥ भार्योवाच ॥ ॥ ममापिभागोभोस्वामिन्दीयतांमाविचारय ॥ अर्थिनामन्नदानेनकृतार्था
स्यामहंध्रुवम् ॥ ४० ॥ ॥ ब्राह्मणउवाच ॥ ॥ अपिकीटपतंगानांमृगादीनांचशोभने ॥ स्त्रियोरक्ष्याश्चपोष्याश्चनचैवंव
क्तुमर्हसि ॥ ४१ ॥ धर्मकामार्थकार्याणिशुश्रूषाकुलसंततिः ॥ दारेष्वधीनःस्वर्गश्चपितॄणामात्मनस्तथा ॥ ४२ ॥ भुंक्ष्वतस्मा
त्स्वसक्तूंश्चनतेकश्चिदतिक्रमः ॥ अनुज्ञातामयाभद्रेकुरुवाक्यंमयेरितम् ॥ ४३ ॥ योनानुकंपतेभार्यांनपुष्णातिनराधमः ॥
नयशोमहदाप्नोतिनरकंचाधिगच्छति ॥ ४४ ॥ ॥ ब्राह्मण्युवाच ॥ ॥ सहधर्मचरौधात्रासृष्टौभार्यापतीद्विज ॥ तस्मान्मह
तिधर्मेत्वंनबाधांकर्तुमर्हसि ॥ ४५ ॥ पतिर्नार्याःपरोधर्मःपतिरेवहिदैवतम् ॥ पतिरेवपरोबंधुःपतिरेवपरागतिः ॥ धर्ममर्थंचका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंचयशःस्वर्गतिरेवच ॥ ४६ ॥ पत्यौप्रसन्नेस्त्रीसर्वमेतत्प्राप्नोत्यसंशयम् ॥ कर्मणामनसावाचायास्त्रीपतिमनुव्रता॥ ४७॥ इह
चैवमहाभागासादेवैरपिपूज्यते ॥ नमयालब्ध्यभुक्तेतुभुक्तपूर्वंकदाचन ॥ ४८ ॥ व्रतमेतद्द्विदित्वातुत्वंसक्तून्दातुमर्हसि ॥ ॥न
कुलउवाच ॥ ॥ एवमुक्तोगृहीत्वातान्सक्तून्सोतिथयेददौ ॥ ४९ ॥ भक्षयित्वातिथिस्तांश्चनैवतृप्तोभवत्तदा ॥ ततःपुत्रोविनी
तात्मापितरंप्राहधर्मवित् ॥ ५० ॥ ॥ पुत्रउवाच ॥ ॥ तृप्त्यर्थमतिथेस्तातमद्भागोपिप्रदीयताम् ॥ किंतस्यजीवितफलंप्रा
प्तोयस्याशयातिथिः ॥ ५१ ॥ शून्यादिवगृहाद्दीनोनिराशःप्रतिगच्छति ॥ विष्णुमुद्दिश्ययेचान्नमात्मानंपीडयंत्यपि ॥ ५२ ॥
ददतितेहरेर्लोकेपूज्यंतेदैवतैरपि ॥ तेनार्जितेनवित्तेनकिंतेषांदुष्टचेतसाम् ॥ ५३ ॥ अतिथिर्यस्यभग्नाशोगृहात्प्रतिनिगच्छ
ति ॥ अतएवमयाचैवभागोदेयोद्विजन्मने ॥ ५४ ॥ कुटुंबंपीडयित्वातुत्यक्त्वालोभंविमत्सरः ॥ ददातियोतिथेरन्नंसयातिपर
मांगतिं ॥ ५५ ॥ ॥ पितोवाच ॥ ॥ अपिवर्षशतायुस्त्वंबालएवमतोमम ॥ बालानांक्षुद्बलवतीतस्मात्त्वंभुंक्ष्वपुत्रक ॥५६॥
जयंतिलोकान्पुत्रेणश्रुतिरेषासनातनी ॥ त्वयातुजीवतापुत्रलोकाःसर्वेहितामम ॥ ५७ ॥ तस्माज्जिगीषतालोकान्रक्ष्यस्त्वं
सर्वथामया ॥ यस्मान्ममासिपुत्रस्त्वंनाहंमृत्योर्बिभेम्यतः ॥ ५८ ॥ प्रायशःपापकारित्वान्मृत्योरुद्विजतेजनः ॥ कृतकृत्याः
प्रतीक्ष्यंतेमृत्युंप्रियमिवातिथिं ॥ ५९ ॥ पुत्रउवाच ॥ ॥ पूर्वेवयसिपुण्णातिपितापुत्रमितिश्रुतिः ॥ उत्तरेपितरंपुत्रस्तस्मा
त्सक्तून्प्रयच्छमे ॥ ६० ॥ ॥ नकुलउवाच ॥ ॥ इत्युक्तःसगृहीत्वातुसक्तून्सोतिथयेददौ ॥ भुक्त्वातानपिसर्वांस्तुनैवतृप्तिम
वाप्तवान् ॥६१॥ ततःप्रीतास्नुषाप्राहश्वशुरंविनयान्विता ॥ मद्भागोऽपिमहाभागविप्रस्यास्यप्रदीयताम् ॥ ६२॥ ॥ श्वशुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ॥ योषिद्बालास्नुषासाध्वीनियमव्रतकर्शिता ॥ कुलसंततिहेतुश्चरक्ष्यात्वंसर्वदामया ॥ ६३ ॥ गुरुशुश्रूषणेसक्तां नियमस्थांपतिव्रताम् ॥ त्वांदृष्ट्वाम्लानवदनांपीड्यतेचमनोमम ॥ ६४ ॥ ॥ स्नुषोवाच ॥ ॥ ममत्वंस्वामिनःस्वामीदेवता याश्चदेवता ॥ गुरोर्गुरुर्गरीयांश्चनैवंत्वंवक्तुमर्हसि ॥ ६५ ॥ अनुकंप्येतिसंचिंत्यदृढभक्तेतिवापुनः ॥ प्रयच्छभगवन्सक्तुन्दीना मनुगृहाणमाम् ॥ ६६ ॥ ॥ नकुलउवाच ॥ ॥ ततस्तानपिसक्तून्सगृहीत्वातिथयेददौ ॥ बुभुजेथातिथिःसर्वान्नचासौचु क्षुभेद्विजः ॥ ६७ ॥ अनुग्रहंमन्यमानःसकुटुंबोमहातपाः ॥ धर्मवर्त्मनियुक्तात्मानचचालाचलोपमः ॥ ६८ ॥ तंशुद्धभावंविज्ञा यप्रीतःप्रोवाचसोतिथिः ॥ धर्मोहंद्विजरूपेणजिज्ञासुस्त्वामिहागतः ॥ ६९ ॥ दमस्तपोदयादानंशौचमिंद्रियनिग्रहः ॥ सत्यं क्षमार्जवंज्ञानमित्येतेसूनवोमम॥७०॥तस्मान्नित्यमिमान्यस्तुभक्त्यामेभजतेनरः॥तस्यभक्तिमतस्तुष्टोगतिमिष्टांददाम्यहं॥ ॥७१॥यस्मात्तुशुद्धभावेनदत्तमुंछार्जितंत्वया ॥ कृच्छ्रंप्राप्तेनसर्वस्वंब्रह्मलोकंततोव्रज॥७२॥स्वर्गस्थास्त्रिदशाःसर्वेदिव्याब्रह्म र्षयस्तथा॥स्तुवंतुदानमेतत्तेविस्मयाविष्टमानसाः ७३ सक्तुप्रस्थपरित्यागंश्रद्धयासमचीकरत्॥तेनाशुभवतोनूनंपप्रथेहिय शोभूवि॥७४॥अग्नयःसफलास्तेऽद्यवेदायज्ञास्तपांसिच ॥ येनेदृशोह्यनुप्राप्तोभावोभूतेषुदुर्लभः॥७५॥इत्थंतस्मिन्महाराज ब्रुवाणेमुनिपुंगवे ॥ गगनात्पुष्पवृष्टिश्चपतितातस्यमूर्धनि॥७६॥तेजःप्रज्ञांबलंधैर्यंक्षुन्नाशयतिदेहिनां ॥ दुर्जयांतांयोजयतिते नस्वर्गोजितोभवेत् ॥ ७७ ॥ भार्यापुत्रःस्नुषासाध्वीतथैवात्मासुदुस्त्यजः ॥ सर्वाण्येतानिधर्मार्थेत्यक्तानितृणवत्त्वया ॥७८॥ नतथाप्रीयतेधर्मोदानैर्दत्तैर्महाधनैः ॥ न्यायलब्धैर्यथाह्यर्थैःश्रद्धापूतैःसतुष्यति॥ ७९॥ अश्रद्धापरमंपापंश्रद्धापापविनाशिनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ जहातिपापंश्रद्धावान्जीर्णांत्वचमिवोरगः ॥ ८० ॥ बहुश्रद्धाविरहितंनष्टमाहुर्मनीषिणः ॥ वार्यपिश्रद्धयादत्तमक्षय्यमुपजा
यते ॥ ८१ ॥ रंतिदेवस्तुधर्मात्मापुरानिष्किंचनोभवत् ॥ श्रद्धापूतःसधर्मात्मानाकपृष्ठमितोगतः ॥ ८२ ॥ आत्ममांसप्रदानेन
शिबिरौशीनरोयथा ॥ सर्वदुःखविनिर्मुक्तोमुमुदेदेववच्चिरम् ॥ ८३ ॥ पश्यदेवविमानंखेतवप्राप्तमिदंद्विज ॥ स्वर्गंगच्छसमा
रुह्यसभार्यःससुतस्नुषः ॥ ८४ ॥ ॥ नकुलउवाच ॥ ॥ इत्युक्तःपरितुष्टेनसाक्षाद्धर्मेणसंद्विजः ॥ दिव्यंविमानमारुह्यसकु
टुंबोययौदिवम् ॥ ८५ ॥ ततोहंतेषुयातेषुबिलान्निःसृत्यसत्वरम् ॥ दिव्यपुष्पसमाकीर्णेसक्तुतोयेव्यचेष्टयम् ॥ ८६ ॥ अथधर्म
प्रसादान्मेमुनेस्तस्यचतेजसा ॥ दिव्यपुष्पविमर्दाच्चहैमंपार्श्वमभूदिदम्॥८७॥द्वितीयंतुकथंपार्श्वेहैमंस्यादितिचिंतयन् ॥तपो
वनानितीर्थानियज्ञांश्चाप्यगमंस्तथा ॥ ततोयज्ञमिमंश्रुत्वाधर्मराजस्यधीमतः॥८८॥ आशयापरयाप्राप्तोनतुकांचनतांगतः॥
॥ ८९ ॥ ॥ जैमिनिरुवाच ॥ ॥ इत्येवंकथयित्वातुद्विजानांनकुलस्तदा ॥ ययौयथागतंराजन्विप्राणांतत्रपश्यतां ॥ ९० ॥ ए
तत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि ॥ अश्वमेधेमहायज्ञेयदाश्चर्यमभूत्तदा॥९१॥तस्मान्नविस्मयःकार्यस्त्वयायज्ञेषुपार्थिव॥
विनैवयज्ञैर्मुनयःश्रद्धापूतादिवंगताः॥९२॥अद्रोहःसर्वभूतेषुसंतोषःसत्यमार्जवं॥सर्वेंद्रियजयःशांतिस्तपश्चस्वर्गसाधनम् ॥
॥९३॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेनकुलोपाख्यानेसकुटुंबब्राह्मणस्वर्गप्राप्तिर्नामषट्षष्टितमोध्यायः ॥ ६६ ॥ ॥ छ ॥
॥ जनमेजयउवाच ॥ ॥ कोसौनकुलरूपेणशिरसाकांचनेनच ॥ प्राहमानुषवद्वाचमेतत्पृष्टोब्रवीहिमे ॥ १ ॥ ॥ जैमिनिरु
वाच ॥ ॥ श्रूयतांनकुलोयोसौयथावागस्यमानुषी ॥ इहार्थेयत्पुरावृत्तंतदिहैकमनाःशृणु ॥ २ ॥ श्राद्धंसंकल्पयामासजम ॥१५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दग्निःपुराकिल ॥ होमधेनुस्तमागाद्वैस्वर्गलोकादरिंदम ॥ ३ ॥ तत्क्षीरंस्थापयामासनवेभांडेदृढेशुभे ॥ तच्चक्रोधःस्वरूपेण सर्पस्यपर्यधर्षयत् ॥ ४ ॥ जिज्ञासुस्तमृषिश्रेष्ठंकिंकुर्याद्विविषीकृते ॥ इतिसंचिंत्यदुर्मेधाधर्षयामासतत्पयः ॥ ५ ॥ तमाज्ञाय मुनिःकोपंनचास्यचुकुपेतदा ॥ सतुक्रोधस्तमाहेदंप्रांजलिर्मूर्तिमान्स्थितः ॥ ६ ॥ जितोऽस्मीतिभृगुश्रेष्ठभृगवोह्यतिरोषिणः ॥ लोकेमिथ्यापवादोयंयत्त्वयाऽस्मिपराजितः ॥ ७ ॥ सोहंत्वयिस्थितोह्यद्यक्षमावतिमहात्मनि ॥ बिभेमितपसःसाक्षात्प्रसादंकुरुमेप्रभो ॥ ८ ॥ ॥ जमदग्निरुवाच ॥ ॥ साक्षाद्दृष्टोसिमेक्रोधगच्छत्वंविगतज्वरः ॥ नममापकृतंतेऽद्यनमन्युर्विद्यतेमम ॥ ९ ॥ यानुद्दिश्येतिसंकल्पःपयस्यस्मिन्कृतोमया ॥ पितरस्तेमहाभागास्तेभ्योबुध्यस्वगम्यताम् ॥ १० ॥ इत्युक्तो जातसंत्रासस्तत्रैवांतरधीयत ॥ पितॄणामभिषंगात्तुनकुलत्वमुपागतः ॥ ११ ॥ सतान्प्रसादयामासशापस्यांतोभवेदिति ॥ तैश्चाप्युक्तोयदाधर्मसभायांकृष्णसन्निधौ ॥ १२ ॥ उंछवृत्तेःकथांब्रूषेतदामुक्तोभविष्यसि ॥ इत्युक्तोयाज्ञिकान्देशान्धर्मारण्यानिचैवहि ॥ १३ ॥ कृष्णस्यदर्शनाकांक्षीतंयज्ञंसमुपागतः ॥ धर्मपुत्रमथाक्षिप्यसक्तुप्रस्थेनतेनसः ॥ १४ ॥ मुक्तःशापात्तथावृत्तंतवतस्यमहात्मनः ॥ पश्यतामेवनस्तत्रनकुलोंऽतरधीयत ॥ १५ ॥ सचापिभगवान्कृष्णःशंखचक्रगदाधरः ॥ आसमाप्तेर्जगन्नाथोयज्ञंरक्षितवान्हरिः ॥ १६ ॥ रक्षित्वासमहाबाहुःपाण्डवैःपूजितश्चिरम् ॥ रममाणःपुरेतस्मिन्नुवासदिवसान्बहून् ॥ १७ ॥ ॥ इत्याश्वमेधिकेपर्वणिजैमिनीयेनकुलोपाख्यानसमाप्तिर्नामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ छ ॥

॥ जैमिनिरुवाच ॥ ॥ ततःकृष्णादयःसर्वेधर्मराजेनधीमता ॥ पूजितायादवास्तत्रनृपाश्चबहुमानिताः ॥ १ ॥ नरनारीमही

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालाःस्वानिसौख्यानिभेजिरे ॥ हर्षप्रमुदितालोकाह्यासन्धर्मेणपालिताः ॥ २ ॥ आश्वमेधिकमेतच्चपर्वतुभ्यंप्रकीर्तितं ॥
शृण्वथास्यफलंराजन्सत्यंहिगदतोमम ॥ ३ ॥ धेनूनांहिसहस्रेचदत्तेभवतियत्फलम् ॥ तत्प्राप्नोतिसमग्रंयःशृणुयादाश्वमे
धिकम् ॥ ४ ॥ फलंशतगुणंतस्माद्ग्रंथदःसमवाप्नुयात् ॥ योदद्यात्पुस्तकंगांचब्राह्मणायगृहंश्रियम् ॥ ५ ॥गौरींवरयतेकन्यांनी
लंवावृषमुत्सृजेत् ॥ आश्वमेधिकमध्यायंशृणुयाद्यःसमौचतौ ॥ ६॥ यौवनाश्वमुखानांचनृपाणांचशुभाःकथाः ॥ शृणुयाच्छ्रा
वयेत्सोऽपिकलिदोषैर्नलिप्यते ॥ ७ ॥ ब्राह्मणोलभतेविद्यांधनार्थीप्राप्नुयाद्धनम् ॥ क्षत्रियोजायतेशूरःप्राप्नुयान्नपराजयम् ॥
॥ ८ ॥ अपुत्रोलभतेपुत्रंरोगीरोगैर्विमुच्यते ॥ अष्टादशपुराणानांपठनाद्यत्फलंभवेत् ॥ ९ ॥ तत्फलंसमवाप्नोतिभारतश्रवणा
न्नरः ॥ समग्रंभारतंतेनश्रुतंभवतिभारत ॥ १० ॥ यश्चाश्वमेधिकंसर्वंशृणुयाद्भावपूर्वकम् ॥ अस्मिन्पर्वणिराजेंद्रसमाप्तेपूजनं
शृणु ॥ ११ ॥ ब्राह्मणान्भक्ष्यभोज्यैश्चसम्पूज्यवस्त्रभूषणैः ॥ अश्वोदेयःसुवर्णस्यदशकर्षविनिर्मितः ॥ १२ ॥ प्रत्यक्षोवृषभो
देयस्तस्यपर्वफलंमहत् ॥ यथाशक्त्यथवाकार्योविधिःपर्वणियःस्मृतः ॥ १३ ॥दानंदत्त्वानृपश्रेष्ठसंपूर्णफलभाग्भवेत् ॥चतुर्दश
चपर्वाणिकथितानिविशांपते ॥ १४ ॥ अतश्चाश्रमवासाख्यंपर्वराजञ्छृणुष्वतत् ॥ १५ ॥ ॥ इत्याश्वमेधिकेपर्वणिजै
मिनीयेअश्वमेधश्रवणफलवर्णनोनामाष्टषष्टितमोऽध्यायः ॥६८॥ ॥छ॥ ॥समाप्तोजैमिनीयाश्वमेधः॥ ॥छ॥

अयं जैमिनीयाश्वमेधग्रंथो मुंबय्यां श्रीकृष्णदासाख्यगुप्तात्मजाभ्यां गंगाविष्णु, खेमराजाभ्यां स्वीये "श्रीवेङ्कटेश्वर" मुद्रालयेंऽकि
तः नेत्राब्धिनंदेंदुमिते (१९४२) वैक्रमाब्दे मुनिखेभभू १८०७ शके ॥ ॥ ॥ छ ॥ ॥ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगदीद

पश्चिमले को आगमन तिर ढल्यो पृथ्वीलाई बाहिर आफ्नु
पर्दछ अ पनि त्यसपछि इश्वरलाई जो मैसमाछ अनादि
हिप्रयोजन छैन, त्यो मात्र निरपेक्ष पनि लाई पनि

ईश्वर जो साक्षी स्वयं आफैमा आफ्नो पनि आगमन भइसक्यो
अर्थात् आफ्नो स्वरूपमा आफ्नो आगमन भइसक्यो स्वयं
मनेगर्छन् यो स्वरूप सत्य जस्तो, यसमा अलिकति पनि
मिथ्यात्व पुनः प्रवाह कालमा उत्पन्न छ। किनकि
प्रदर्शन उचित छैन, किनकि यो जगत्मा रचना छ
दिकोशाहि कारण हो। पनि यस्तै पनि हुन्छ
न आफ्नू स्वरूपमा, परन्तु मनशाहि आइराखेको
कोशिश गरियो, यो त कालकी हुन्छ, किनकि, यस
स्वरूपवाहि को प्रादुर्भाव, यो पनि आफ्नो आफू
स्थिति मा प्रतिवादिलाई भनिन्छ र पनि। ईश्वर
पोशाहि को कारण पनि आदि कोशाहि हो, पोशाहि
त्यस्तै को कारण पिता आदि कोशाहि हुन्छ,
पहिले कोशिश गर्दछ माता पिता कालमा हुन्छ।
किनकि, यो समय पछि आफ्नो मनन गर्दा, पोशाहि
रहित प्रविधिहरूको, जो पनि आदि को कारण कोशाहि
छन्, उचित कोई परलोक न होला। यो समय मा ईश्वर
स्वाभाविक गर्दछ, तेस्रो कालाई हानि लैकाउने हो। ९८
किं च पिता आदि का शाहि जुन भौतिक देहको कारण
हुन्छ सबैका आफ्नू पनि मानिन्छ, सूक्ष्म शाहि भन्दा
गर्नुलाई पनि अनुभव भन्दा भागहरू हुँदैछन्,
ब्रह्मादि कारण प्रकृति पनि मिथ्या नै सिद्ध होला।
कारण यो तिनको पनि त्यसैले भइसकेपछि, पूर्वोत्पत्तिको पुनः
समानसँग शाहि को सर्व या प्रभाव भएपछि। पोशाहिको
कालमा, शाहि को कारण आदि शाहि गरेपछि, पोशाहि
होला। यो पछि नाल देख आफ्ना आगिलो छ। यस
पोशाहि भनेर भनि पहिलो कारण को बाट छैन, ९६।
दिपैंच प्रत्येक अध्ययन गर्दा हित भएकाले, अवश्य कोशि
परिणाम रोग पनि कोशिमा शारीरिक छ। अतः
भागवतरूप योग्यको तर्क विनाशी अवश्य भएमा पोशि
इत्यादि मा योजनात् कोई पनि यो अवधि भए पर्याप्त बाट
मन धर्म आदि जैमिनीय मत उल्लेख गर्न छ। यहाँ प्रत्यक्ष
मतको पनि भेदवादलाई अपनाएको छ। यसका लागि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible] लाई अज्ञानले [illegible] छ । [illegible]
पृथ्वी आदि जो चार तत्त्व हो तेहि [illegible] प्रकाश [illegible]
घट आदि को आकारले संमिलित भएर [illegible] प्रकार कोई [illegible]
पृथ्वी आदि को [illegible] का [illegible] को [illegible]
[illegible] पैके [illegible] मा [illegible] छ [illegible]
आदि [illegible] धर्म को [illegible]
[illegible] जाग्रत [illegible] आदि अनेक [illegible]
को [illegible] आदि अनेक [illegible]
नाना प्रकार को [illegible]
आदि अनेक जाति को छ [illegible]
[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

[illegible] को [illegible] पर [illegible]
[illegible] २१३ [illegible]

[illegible]
[illegible]
[illegible]
[illegible] कालि [illegible]
[illegible]
[illegible]
[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible]

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ योगवासिष्ठे प्रथमं वैराग्यप्रकरणं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमहागणपतिचरणारविंदाभ्यांनमः ॥ ॥ ॐनमोब्रह्मणेब्रह्मविद्भ्योब्रह्मविद्यासंप्रदायकर्तृभ्योवसिष्ठविश्वामित्रव्यासवाल्मीकिशुकादिभ्यःश्रीरामभद्रायच ॥ ॐ अजमजर
मनाद्यनंतमंतर्निजसुखबोधसदद्वितीयपूर्णम् ॥ शिवमखिलहृदिस्फुरत्स्वमायाविकसितविश्वविलासमानताःस्मः ॥ १ ॥ स्मृतिफलितसमस्ताभीष्टमुद्यद्दिनेशप्रतिभटनिजशोभा
शांतविघ्नांधकारम् ॥ कमपिशिवभवान्योरंकसौभाग्यमंतःसुरमणिमवलंबेचारुलंबोदराख्यम् ॥ २ ॥ मुग्धस्मितांचितमनोज्ञमुखेंदुबिंबंस्निग्धामृतप्रतिमचारुकृपाकटाक्षम् ॥
अग्रेसरैरनुसृतंमुनिभिर्मुनीनांन्यग्रोधमूलवसतिंगुरुमाश्रयामः ॥ ३ ॥ त्रिभुवनावनकृत्यकृतोदयःसदभयामलबोधसुखाद्वयः ॥ सुजनहृद्गिरिगह्वरकेसरीशरणमस्तुसदानरकेस
री ॥ ४ ॥ दक्षेवराक्षवलयावभयंचवामेयापुस्तकंचदधतीविधिनेत्रपेया ॥ साशारदाब्जनयनाशरदिंदुशोभाभासास्वयाहरतुमेहृदयांधकारम् ॥ ५ ॥ येनेत्राणिहरस्ययैर्जग
दिदंप्रद्योतितंचेष्टतेयत्रैवायततेश्रुतिस्मृतिनुतोधर्मःसशर्मोदयः ॥ येकालंकलयंतियेचपरमस्वज्योतिरात्मोपमास्तेसूर्येंद्वनलाभवंतुहृदिमेबोधाब्जिनीभानवः ॥ ६ ॥ वक्रेंदुभिर्दि
क्षुतमोहरद्भिर्वेदार्थसारामृतमुद्गिरंतम् ॥ वाणीभुजाश्लिष्टमभीष्टसिद्ध्यैतंब्रह्मविद्यादिगुरुंप्रपद्ये ॥७॥ यद्वाक्यामृतपायिनांप्रतिपदंसत्यंसुधानीरसायद्वाक्यार्थविचारणादभिमतः
स्वर्गोऽपिकारागृहम् ॥ यद्वाणीविशदात्मपूर्णमनसांतुच्छंजगत्तूलवत्तस्मैश्रीगुरवेवसिष्ठमुनयेनित्यंनमस्कुर्महे ॥ ८ ॥ यस्यार्षंप्रथिताजगत्त्रयहितासावेदमातापरायश्चक्रेतपसा
वशेसुरगणानन्यान्सिसृक्षुर्जगत् ॥ तंबोधांबुनिधिंतपस्विमुकुटालंकारचिंतामणिंविश्वामित्रमुनिंशरण्यमनघंभूयोनमस्यामहे ॥ ९ ॥ श्रुत्वाब्रह्मेत्ररामःप्रकटितमहिमायेनत
स्मैवसिष्ठोयःसीतांब्रह्मविद्यामिवसदसिपुनःसत्यशुद्धांकिलादात् ॥ यद्वाणीमोहमूलंशमयतिजगदानंदसंदोहदोग्ध्रीतस्मैवाल्मीकयेश्रीगुरुनमगुरवेभूरिभावैर्नताःस्मः ॥ १० ॥ पू
र्णानंदस्वभावःस्वजनहितकृतेमाययोपात्तकायःकारुण्यादुद्दिधीर्षुर्जनमनवरतंमोहपंकेनिमग्नम् ॥ आविश्यांतर्वसिष्ठंबहिरपिकलयन्शिष्यभावंवितेनेयःसंवादेनशास्त्रामृतज
लधिममुंरामचंद्रंप्रपद्ये ॥ ११ ॥ विद्याभिःसहविश्रुताश्रितवतीयेषांमुखंभारतीसत्वोत्कर्षसमाधिभिःस्थिरमहोतद्ब्रह्मयेषांहृदि ॥ पादांभोरुहमाश्रिताश्चसततंतीर्थैःसमंसंपदः
श्रीसर्वज्ञसरस्वतीतिविदितान्श्रीमद्गुरूंस्तान्भजे ॥ १२ ॥ श्रीःसंश्रितैवचरणौहृदयंचरामश्चंद्रोमुखंगुणभरेणसरस्वतीच ॥ येषामतस्तदभिधांकितनामधेयान्श्रीमद्गुरून्गुरुतरा
न्प्रणतोस्मिनित्यम् ॥ १३ ॥ तापध्वस्तिव्यापृतकारुण्यकटाक्षान्व्याख्यावाणीनिर्वृतसर्वांघ्रिशरण्यान् ॥ श्रीमद्रामानंदमुनीनद्भुतचर्यानार्यान्नित्यंदेशिकवर्यान्प्रणतोस्मि ॥ १४ ॥
विश्वेशोपिहरिःशरण्यचरणोयान्मानयन्सौहृदाच्छांतान्नित्यमनुव्रजामिरजसापूयेयचेत्यब्रवीत् ॥ यत्पूजांविदधेश्रुतिर्मतिमतांसर्वेष्टसिद्ध्यैसदाजीवन्मुक्तसुखात्मपूर्णमनसस्ता
न्ब्रह्मनिष्ठान्भजे ॥ १५ ॥ कृतिभिरसुकराःक्वनुप्रबंधाःक्वचबतबालिशबुद्धिरेषजंतुः ॥ तदपिविरचनेऽत्रसद्गुरूणांसदयनिरीक्षणमेवमेऽवलंबः ॥ १६ ॥ अशेषविद्यांबुधिपार
गाणामपास्तरागादिमनोमलानाम् ॥ कृपानिधीनांकृतिनांममास्मिन्सतांपदाब्जस्मरणंसहायः ॥ १७ ॥ यत्कृपालेशमात्रेणतीर्णोऽस्मिभवसागरम् ॥ श्रीमद्गंगाधरेंद्राख्यान्
श्रीगुरूंस्तान्सदाभजे ॥ १८ ॥ आनंदबोधयतिनाश्रीमद्गुरुवचोमृतैः ॥ वासिष्ठार्थप्रकाशोयंयथामतिवितन्यते ॥ १९ ॥ प्रशंसंतुस्वैरंमतिभिरथनिंदंतुसुधियःप्रवृत्तिर्मेयस्मा
न्भवतिजनाराधनकृते ॥ अनेनव्याजेनामृतरसवसिष्ठोक्तिभरितेविहर्तुंवांछामिप्रतिदिवसमानंदजलधौ ॥ २० ॥ यथामतिबुभुत्सुभ्यःसाहाय्यंसंकटेष्विव ॥ दुरूहश्लोकभा
वेषुदर्शयिष्येपरिश्रमम् ॥ २१ ॥ स्थितमेकरसेयुक्त्यानानारसविजृंभणम् ॥ वासिष्ठंरोचयत्वेतत्सुभोज्यंलवणंयथा ॥ २२ ॥ अप्यल्पमतिदुर्बोधंस्फुटंव्याख्यास्यतेपदम् ॥ द्वि
त्रिर्व्याख्यातपूर्वंतुदुरूहमपिमोक्ष्यते ॥ २३ ॥ अनन्यपूर्वव्याख्यातंग्रंथंमेव्याचिकीर्षतः ॥ संतःश्रमज्ञाःकृपयाक्षमध्वंस्खलितंक्वचित् ॥ २४ ॥ ॐमथजगदिदमनादिमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहनिशासुप्तमनवरतदुःस्वप्नभ्रमपरंपराकल्पितेजन्मजरामयमरणहर्षामर्षशोकाद्यनर्थसंकटसहस्रसंकुलेग्रहातिग्रहव्याघ्रभीषणेतापत्रितयदावानलज्वालमालाकुलेषडूर्मि
जालेऽरिषड्वर्गव्याधबध्यमानप्राणिनिकायेसंसारमहारण्येमोमुह्यमानंविवेकांधंप्रबोधोपायदौर्लभ्याद्विषीदत्समुदीक्ष्यशास्त्रभानूदयेनतत्प्रबोधनायभगवतःपद्मजन्मनःशासना
॥ १ ॥ त्स्वतश्चप्रवर्त्तमानःपरमकारुणिकोभगवान्वाल्मीकिःप्रारिप्सितस्यमहतःशास्त्रस्यनिर्विघ्नपरिसमाप्तिप्रचयगमनादिसिद्धयेवक्ष्यमाणश्रुतिस्मृतिसदाचारप्रापितंसर्वविघ्नमूलो
च्छेदक्षमंसच्चिदानंदाद्वयप्रत्यगात्मपरब्रह्मप्रणतिलक्षणंमंगलमाचरन्नर्थाच्छास्त्रस्यविषयप्रयोजनेतटस्थस्वरूपलक्षणाभ्यांसंक्षिप्यदिदर्शयिषुःप्रथमंयतोवाइमानिभूतानि
जायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेतीतिश्रुत्युक्ततटस्थलक्षणसिद्धसदद्वयस्वभावंतत्पदार्थंनमस्यति ॥ यतइति ॥ यतोयस्मात्परमार्थसदद्वि
तीयात्मवस्तुनःप्रकृतिभूतात्सर्वाण्याकाशादीनिमहाभूतानिभौतिकानिचसर्गादिकालेयत्सत्तयैवसत्तांप्रतिलभ्यभांतिप्रथंतेआविर्भवंतीत्यर्थः ॥ तथास्थितिकालेचयत्सत्तयै
वस्थितानितथाप्रलयकालेपियत्रैवयत्सत्तामात्रपरिशेषेणोपशमंतिरोभावंयांतितस्मैसत्यात्मनेस्वाध्यारोपितसर्वभावानांपारमार्थिकस्वरूपभूतायसर्वप्राणिनांवास्तवात्मभूता
यचपरब्रह्मणेनमः ॥ तन्नमस्कारेचयत्रदेवाःसर्वएकंभवंतीतिश्रुतेरनमस्कृतस्यदेवतांतरस्यापरिशेषात्सर्वनमस्कारसिद्धास्यमंगलस्यसर्वोत्कर्षात्सर्वविघ्नोच्छेदादिफलसिद्धिः ॥

श्रीगणेशायनमः ॥ ॥ यतःसर्वाणिभूतानिप्रतिभांतिस्थितानिच ॥ यत्रैवोपशमंयांतितस्मैसत्यात्मनेनमः ॥ १ ॥

अत्रयतोभूतानीतिपदाभ्यांयतोवाइमानिभूतानिजायंते जन्माद्यस्ययतइतितद्घटितश्रुतिसूत्रोक्तलक्षणप्रत्यभिज्ञानादस्यतन्मूलकत्वमितिनसांख्यादिकल्पितमहदादिकारणेषु
यास्कोपदर्शितावांतरकारणेषुचातिव्याप्तिः ॥ अत्रप्रकृतिपंचम्यैवोपादानत्वलाभात्त्रितयोपादानंलक्षणत्रयप्रदर्शनायेतिकेचित् ॥ निमित्तेपिपंचमीदर्शनाल्लयाधारत्वोक्तिरु
पादानत्वलाभाय ॥ स्थितिहेतुत्वोक्तिस्तुचेतनानामेवपालकत्वदर्शनाच्चेतनत्वलाभेनकर्त्रंतरनिरासायेतित्रितयलब्धमभिन्ननिमित्तोपादानत्वमेकमेवलक्षणमित्यन्ये ॥ वस्तु
तस्तुसत्यंज्ञानमनंतंब्रह्मसदेवसोम्येदमग्रआसीदितिश्रुतौज्ञेयत्वेनोपक्रांताद्वितीयसन्मात्रवस्तुपरिचयायतस्माद्वाएतस्मादात्मनआकाशःसंभूतस्तत्तेजोसृजतेत्यादिनातटस्थलक्ष
णावतारात्सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीतेतिश्रुत्युपदर्शितदिशोत्पत्त्यादिकालत्रयेपिसदव्यभिचारात्कार्यस्यकारणव्यतिरिक्तसत्त्वानुपलंभाच्चपरसत्तोपजीवित्वा
दध्यारोपितंकार्यजातमाविद्यकमनृतंकारणतत्त्वमेवब्रह्मवस्तुसत्यमित्यध्यारोपापवादाभ्यांनिष्प्रपंचविषयप्रयोजनसिद्धिप्रतिपादनायत्रितयघटितलक्षणोपादानम् ॥ नह्येकै
कोपादानेकार्यस्यविवर्तत्वसिद्धिरिति ॥ अतएवहिश्रुतौजायंतेअभिसंविशंतीतिपदेप्रतिभानाप्रतिभानलक्षणाविर्भावतिरोभावपरेनविकारपरेइतिसूचनायप्रतिभांत्युपशमंयां ॥ १ ॥
तीत्युक्तम् ॥ वृद्धिविपरिणामयोराविर्भावेऽपक्षयस्यचतिरोभावेंतर्भावात्स्थितेश्चाधिष्ठानसत्तानुवेधमात्ररूपत्वान्नाध्यारोपातिरिक्तविकारसिद्धिः ॥ उपपादयिष्यतेचेत्थमेव
जगद्विरचनंविस्तरेणोत्पत्तिप्रकरणे ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिभांतीतिसामान्यतःसूचितंतस्यचिदेकरसत्वंसर्वानुभवसिद्धत्वेनोपपादयंस्त्वंपदार्थतत्त्वभूतंतमेवपुनर्नमस्यति ॥ ज्ञातेति अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीति श्रुतेर्यस्माद्बिंबभूतात्कूटस्थचिदेकरसात्स्वतःस्वयमेवप्रतिबिंबभावेनसमष्टिव्यष्टिविज्ञानमनोमयकोशद्वयात्मकांतःकरणोपाध्यनुप्रवेशेनप्रतप्तायःपिंडप्रविष्टवह्निरिवाध्यस्तैक्येनतज्जाड्यमभिभूयतदभिज्वलयन्ज्ञाता ॥ विस्फुलिंगानिवतद्वृत्तीरभिज्वलयन्ज्ञानम् ॥ वृत्तौविषयाकारापन्नायांस्वयमपितद्द्वारातदाकारस्तद्भावमिवापन्नोज्ञेयम् ॥ परोक्षसाधारण्येनोक्तमेवार्थंप्रत्यक्षेणस्फुटीकर्त्तुमाह ॥ द्रष्टेति ॥ सएवज्ञानेंद्रियाण्युपादायद्रष्टा ॥ तत्संप्रयोगजन्यवृत्तीरुपादायदर्शनम् ॥ तत्फलात्मनाविषयान्व्याप्यताद्रूप्यानुरंजनात्स्वयमपिदृश्यइवभवतीतिदृश्यभूः ॥ तथासएवकर्मेंद्रियप्राणशरीराण्युपादायकर्त्ता ॥ फलभोक्तृभावेनक्रियोत्पादननिमित्तत्वाद्धेतुः ॥ क्रियासाकल्यवैकल्ययोरहमेवसकलोविकलइतिक्रियाभिमानाच्चक्रिया ॥ एषहिद्रष्टाश्रोतामंताकर्त्ताबोद्धाविज्ञानात्मापुरुषःप्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुरित्यादिश्रुतेः॥ एवंसर्वव्यवहारेषुप्रतीचःस्वपरस्फूर्त्तिनिर्वाहकत्वाच्चिद्रूपतयासर्वानुभवसिद्धोपिविचित्रोपाध्यनुरंजनव्यामोहाच्चित्रपटेप्रभाशौक्ल्यमिवनविविच्यानुभूयतइतिपृथक्करणाययस्मादितिनिमित्तपंचम्यानिर्देशः ॥ यत्सन्निधाननिमित्तकमेवकर्त्रादिस्फुरणंनतुयत्स्वभावभूतंव्यभिचारित्वाद्दृशोदृश्यस्वभावत्वानुपपत्तेश्चेतिभावः॥ अतस्तस्मैज्ञात्रादिसाक्षिणेपरमार्थतोज्ञप्त्या

ज्ञाताज्ञानंतथाज्ञेयंद्रष्टादर्शनदृश्यभूः॥ कर्त्ताहेतुःक्रियायस्मात्तस्मैज्ञप्त्यात्मनेनमः ॥ २ ॥
स्फुरंतिसीकरायस्मादानंदस्यांबरेवनौ॥ सर्वेषांजीवनंतस्मैब्रह्मानंदात्मनेनमः॥ ३ ॥

त्मनेज्ञप्तिमात्रत्वेनपरिशिष्टायप्रत्यगात्मनेनमइत्यर्थः ॥ २ ॥ एवंपदार्थौपरिशोध्यतटस्थलक्षणपर्यवसानस्थानमानंदोब्रह्मेतिव्यजानादितिश्रुतिदर्शितनिरतिशयानंदरूपंपरमपुरुषार्थभूतमखंडवाक्यार्थंनमस्यति॥ स्फुरंतीति ॥ यस्मात्प्रत्यगात्मनोऽविद्यावरणकामादिविक्षेपतिरस्कृतनिरतिशयानंदसमुद्रादंबरेआकाशेब्रह्मलोकांतेस्वर्गेदेवेष्वितियावत्॥ तथाअवनौभूमौमनुष्यादिस्तंबपर्यंतेषुतत्तदुच्चावचविषयेंद्रियसंयोगजनितांतःकरणवृत्तिवैशद्यतारतम्येनावरणाभिभवतारतम्यात्सरोमुकुरमण्यादिषुगिरिप्रतिबिंबाइवौपाधिकभेदतारतम्येनविभाव्यमानत्वादानंदस्यसीकराःकणाइवसीकराःस्फुरंति ॥ सर्वैर्भ्रांत्याअनात्मत्वेनात्मशेषत्वेनपरिच्छेदभेदवैचित्र्यदुःखसंभेदक्षयिष्णुत्वादिभिश्चानुभूयंतइतियावत् ॥ परमार्थतस्तुनतथाकिंतुतदेवनिष्कृष्टोपाधिभेदंसर्वेषांब्रह्मादिस्तंबपर्यंतानांजीव्यतेअनेनेतिजीवनंसारभूतमात्मतत्त्वम् ॥ नप्राणेननापानेनमर्त्योजीवतिकश्चन इतरेणतुजीवंतियस्मिन्नेतावुपाश्रितौ एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति कोह्येवान्यात्कःप्राण्याद्यदेषआकाशआनंदोनस्यादितिश्रुतेः ॥ अतएवभेदकाभावात्स्वरूपलक्षणैक्याच्चसएवयतोवाचोनिवर्त्ततेअप्राप्यमनसासहआनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेतिश्रुतिप्रसिद्धापरिच्छिन्नब्रह्मानंदआत्माच॥नान्यआत्मानामकश्चिदस्ति नान्योतोस्तिद्रष्टानान्योतोस्तिविज्ञातेत्यादिश्रुतेः ॥ तस्मैब्रह्मानंदात्मनेपरमपुरुषार्थरूपायनमइत्यर्थः॥ इहमंगलाचरणंशास्त्रनिर्माणारंभार्थमुत्तरसर्गेतुशिष्येभ्यस्तदुपदेशस्यारंभार्थमितिनपौनरुक्त्यम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्षदैवसंवादःसंप्रदायविशुद्धये ॥ रामाज्ञाननिमित्तंचाप्युपोद्घातायवर्ण्यते ॥ १ ॥ इत्थंमंगलविषयादिप्रदर्शनमुखेनशास्त्रार्थंसुप्रबोधायसंक्षेपतःप्रदर्श्यसहसाधनोपपत्त्या दिभिर्विस्तरेणतमेवार्थंव्युत्पादयितुंशास्त्रमारभमाणस्तस्मिन्श्रोतॄणांविश्वासदार्ढ्यायबहुतरब्रह्मविन्मूर्द्धन्यमहर्षिजुष्टब्रह्मादिसंप्रदायप्राप्तजीवन्मुक्तिफलब्रह्मविद्योपबृंहणरूप त्वप्रदर्शनायश्रीवसिष्ठरामसंवादावतारणोपोद्घातभूतामाख्यायिकामारभते ॥ सुतीक्ष्णइत्यादिना ॥ सुतीक्ष्णःतपःकर्मोपासनाशोधितत्वाच्छोभनादुरूहार्थग्रहणपटीयस्त्वाच्चती क्ष्णाबुद्धिर्यस्येतियोगरूढाऽन्वर्थनामधेयः ॥ ब्राह्मणग्रहणंब्राह्मणानामेवब्रह्मविद्यायांमुख्याधिकारइतिद्योतनार्थम् ॥ संशयेनजिज्ञासायैआकृष्टंमानसंयस्येतिजिज्ञासुरित्य र्थः ॥ सादरंविध्युक्तसमित्पाणित्वप्रणिपातप्रपत्त्याद्यादरसहितंयथास्यात्तथा ॥ ४ ॥ धर्मतत्त्वंचजानासीतिधर्मतत्त्वज्ञ ॥ सर्वेषुशास्त्रेषुविशिष्टंनिश्चितंनिश्चयोयस्यसतथा ॥ परस्परविरुद्धार्थानेकश्रुतिस्मृतिवादिविप्रतिपत्तिजटिलत्वात्सहसादुरुच्छेदतयामहान् ॥ एतंसंशयंतदपनोदकंतत्त्वमितियावत् ॥ ५ ॥ कारणमुत्पादकम् ॥ साधनंव्यंजकम् ॥ अत्रमोक्षोहिपरमपुरुषार्थरूपत्वप्रसिद्धेर्नित्यनिरतिशयानंदरूपोवाच्यःसचस्वर्गएव ॥ यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरम् अभिलाषोपनीतंचतत्सुखंस्वःपदास्पदमितिश्रुत्या

सुतीक्ष्णोब्राह्मणःकश्चित्संशयाकृष्टमानसः ॥ अगस्तेराश्रमंगत्वामुनिंपप्रच्छसादरम् ॥ ४ ॥ ॥ सुती क्ष्णउवाच ॥ ॥ भगवन्धर्मतत्त्वज्ञसर्वशास्त्रविनिश्चित ॥ संशयोस्तिमहानेकस्त्वमेतंकृपयावद ॥ ५ ॥ मोक्षस्यकारणंकर्मज्ञानंवामोक्षसाधनम् ॥ उभयंवाविनिश्चित्यएकंकथयकारणम् ॥ ६ ॥

सस्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वादितिजैमिनिवचनाच्चतस्यतथात्वसिद्धेः ॥ नचजन्यत्वेननाशानुमानम् ॥ श्रुतिविरुद्धेर्थेअनुमानानुदयात् ॥ तस्याजन्यत्वेसाधनोपदेशा नर्थक्यप्रसंगादितिकर्ममीमांसकमतानुसारेणकारणंकर्मेतिप्रथमःकल्पः ॥ नकर्मणानप्रजया प्लवाह्येतेअदृढायज्ञरूपाइत्यादिश्रुतिभिःकर्मफलानित्यत्वप्रतिपादनाज्ज्ञात्वातंमृ त्युमत्येतिनान्यःपंथाविमुक्तयेइत्यादिश्रुत्यामुक्तौज्ञानातिरिक्तसाधननिषेधाज्ज्ञानस्यचप्रमाणजन्यस्यवस्त्वभिव्यक्त्यतिरिक्तफलाप्रसिद्धेरित्यौपनिषदमतमवलंब्यद्वितीयःक ल्पः ॥ वाजसनेयिनांमंत्रोपनिषदिकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइतियावज्जीवानुष्ठेयत्वेनकर्म असुर्यानामतेलोकाअंधेनतमसावृताइत्यादिनाअविद्वन्निंदापूर्वकंब्रह्म विद्यांचप्रस्तुत्यतयोरेकैकस्यमोक्षसाधनतां अंधंतमःप्रविशंतियेविद्यामुपासतेततोभूयइवतेतमोयउविद्यायांरताइतिनिंदित्वाविद्यांचाविद्यांचयस्तद्वेदोभयंसह अविद्ययामृ त्युंतीर्त्वाविद्ययामृतमश्नुतइतिसमुच्चितयोरात्यंतिकानर्थनिवृत्तिनिरतिशयानंदावाप्तिलक्षणमोक्षहेतुत्वाभिधानात्तृतीयःकल्पइतित्रिकोटिकःसंशयोदर्शितः ॥ तेष्वेकंनिर्णय कारणंकथयेत्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्नदुःखेनेतिश्रुतेर्बहुतरश्रुत्यादिविरोधेनापेक्षिकनित्यत्वपरत्वात्तेषुप्रथमकल्पस्यासंभवंद्वितीयतृतीयकल्पयोःकर्मणांचित्तशुद्धिद्वाराज्ञानांगत्वेपिश्रुतितात्पर्याविरोधादभेदंच मन्यमानोऽगस्तिःप्रतिवचनमुवाच ॥ उभाभ्यामित्यादिना ॥ यथाखेआकाशेपक्षिणामुभाभ्यांपक्षाभ्यामेवगतिरभिमतदेशप्राप्तिर्जायतेनैकैकेनतथैवतद्विष्णोःपरमंपदमिति श्रुतिप्रसिद्धंसंसाराध्वनःपारंकैवल्यमधिकारिणामात्मनिज्ञानकर्मभ्यांजायतेनैकैकेन ॥ कर्मणांपूर्वभावस्तुप्रवृत्तिनिवृत्त्योर्युगपदसंभवाद्विरुद्धाधिकारिविशेषणकत्वाच्चार्थ सिद्धइतिनयौगपद्यांशेदृष्टांतः ॥ यथादर्पणेप्रतिबिंबोदयेमार्जनालोकौद्वावप्यावश्यकौतद्वत्कर्मकृतचित्तशुद्धिःप्रमाणजन्यवृत्तिश्चाविद्यानिवृत्तावावश्यके ॥ अशुद्धचित्तैःश तशःश्रुतेऽपिज्ञानफलादर्शनादितिभावः ॥ ७ ॥ तदेवद्रढयन्पुनराह ॥ केवलादिति ॥ साधनंव्यंजकंविदुर्ब्रह्मविदइतिशेषः ॥ तथाचविदुषामनुभवसिद्धेनात्रविप्रतिपत्तव्यमिति

अगस्तिरुवाच॥ ॥उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः॥ तथैवज्ञानकर्मभ्यांजायतेपरमंपदम् ॥ ७॥ केवलात्कर्मणोज्ञाना न्नहिमोक्षोभिजायते॥किंतूभाभ्यांभवेन्मोक्षःसाधनंतूभयंविदुः॥८॥अस्मिन्नर्थेपुरावृत्तमितिहासंवदामिते॥ कारुण्याख्यःपुराकश्चि द्ब्राह्मणोधीतवेदकः॥९॥ अग्निवेश्यस्यपुत्रोभूद्वेदवेदांगपारगः॥ गुरोरधीतविद्यःसन्नाजगामगृहंप्रति॥१०॥तस्थावकर्मकृत्तूष्णींसंश यानोगृहेतदा॥ अग्निवेश्योविलोक्याथपुत्रंकर्मविवर्जितम्॥११॥प्राहएतद्वचोनिंद्यंगुरुःपुत्रंहितायच॥ ॥अग्निवेश्यउवाच॥ ॥कि मेतत्पुत्रकुरुषेपालनंनस्वकर्मणः॥१२॥ अकर्मनिरतःसिद्धिंकथंप्राप्स्यसितद्वद॥ कर्मणोस्मान्निवृत्तेःकिंकारणंतन्निवेद्यताम्॥१३॥ कारुण्यउवाच॥ ॥यावज्जीवमग्निहोत्रंनित्यंसंध्यामुपासयेत्॥ प्रवृत्तिरूपोधर्मोयंश्रुत्यास्मृत्याचचोदितः॥१४॥ नधनेनभवेन्मोक्षः कर्मणाप्रजयानवा॥त्यागमात्रेणकिंत्वेकेयतयोश्नंतिचामृतम्॥ १५ ॥इतिश्रुत्योर्द्वयोर्मध्येकिंकर्त्तव्यंमयागुरो॥ इतिसंदिग्धतांग त्वातूष्णींभूतोस्मिकर्मणि॥ १६॥ ॥अगस्तिरुवाच॥ ॥इत्युक्त्वातातविप्रोसौकारुण्योमौनमागतः॥ तथाविधंसुतंदृष्ट्वापुनःप्राहगु रुःसुतम्॥१७॥

भावः ॥ विद्यांचाविद्यांचेतिश्रुतिस्तूपासनकर्मसमुच्चयपरानब्रह्मविद्यायाःकर्मसमुच्चयपरा ॥ तदंगत्वेनोपक्रमेतेनत्यक्तेनभुंजीथाइतिसंन्यासविधिविरोधादितिप्रपंचितंभाष्य कृद्भिरितिनकश्चिद्विरोधः ॥ नत्वत्रयथाश्रुतमापाततोगृहीत्वाज्ञानकर्मसमुच्चयपक्षएवैतद्ग्रंथाभिमतइतिभ्रमितव्यम् ॥ अलब्धज्ञानदृष्टीनांक्रियामुत्रपरायणम् यस्यनास्त्यं बरंपट्टंकंबलंकित्यजत्यसावित्यादिनामणिकाचोपाख्यानेनचोत्तरत्रकेवलज्ञानेनैवमुक्तिरितिव्यवस्थापनेनपूर्वोत्तरविरोधापत्तेः ॥ ८॥९॥१० ॥ ११॥ प्राहएतदित्यसंधिःसंहि तायाअनित्यत्वात् ॥ नियमविधिनाकर्मपरित्यागान्निंदार्हंपुत्रम् ॥१२॥ सिद्धिंप्रत्यवायपरिहारंस्वर्गंमोक्षंवा ॥१३॥ अग्निहोत्रंजुहोतीतिवाक्यशेषः ॥ चोदितोविहितः॥१४॥ एकेमुख्याः ॥ चकारोऽनर्थनिवृत्तिसमुच्चयार्थः ॥ १५ ॥ द्वयोर्विरुद्धार्थयोरितियावत् ॥ संदिग्धतांसंदिहानताम् ॥ अकर्मकत्वाद्गत्यर्थाकर्मकेतिकर्त्तरिक्तः ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकांसर्वसंदेहमूलाज्ञानोच्छेदित्वान्मुख्यांकथांवक्ष्यमाणमहारामायणरूपाम् ॥ मुख्यत्वंचप्रसिद्धमादित्यपुराणेपंचदशाध्याये ॥ ज्ञानंनचात्मनोधर्मोनगुणोवाकथंचन ज्ञानस्वरूपएवात्मानित्यःसर्वगतःशिवः ॥ अहमात्मासमस्तानांभूतानांपरमेश्वरः ॥ एकएवपदार्थाश्चकल्पितामयिषण्मुख ॥ विज्ञानमेतदखिलंविश्वाकारमबुद्धयः ॥ पश्यंतिज्ञानिनस्त्वेकमात्मरूपमिदंजगत् ॥ दुर्विज्ञेयंवसिष्ठेनरामायकथितंपुरेतिषण्मुखंप्रतिशिवेनाविद्यास्वरूपंब्रह्मतत्त्वंचविस्तरेणोपदिश्यस्ववाक्येविश्वासदार्ढ्यायविश्वसनीयतमत्वेनप्रसिद्धस्यब्रह्मविद्यामूर्धन्यस्यास्यग्रंथस्यसंमतित्वेनोदाहरणात् ॥ द्वितीयंपुत्रेतिसंबोधनंकथार्थलक्षणपितृधनग्रहणयोग्यत्वद्योतनार्थम् ॥ १८ ॥ उत्तमाब्रह्मविद्याधिकारिविशेषणसंपन्नत्वाच्छ्रेष्ठा ॥ १९ ॥ २० ॥ ज्ञानोपदेशफलभागिनीत्वान्महाभागा ॥ चकारोनकेवलंनाम्नैवकिंतुशोभनायांब्रह्मविद्यायांरुचिःसंजाताअस्याइत्यर्थतो

अग्निवेश्यउवाच॥ ॥शृणुपुत्रकथामेकांतदर्थंहृदयेखिलम्॥ मत्तोवधार्यपुत्रत्वंयथेच्छसितथाकुरु॥ १८ ॥ सुरुचिर्नामकाचित्स्त्री अप्सरोगणउत्तमा॥ उपविष्टाहिमवतःशिखरेशिखिसंवृते॥ १९॥ रमंतेकामसंतप्ताःकिन्नर्योयत्रकिन्नरैः॥स्वर्धुन्योघेनसंस्पृष्टेमहाघौघविनाशिना॥ २०॥ दूतमिंद्रस्यगच्छंतमंतरिक्षेददर्शसा॥ तमुवाचमहाभागासुरुचिश्चाप्सरोवरा॥२१॥ ॥सुरुचिरुवाच॥ ॥देवदूतमहाभागकुतआगम्यतेत्वया॥ अधुनाकुत्रगंतासितत्सर्वंकृपयावद॥ २२॥ ॥देवदूतउवाच॥ ॥साधुपृष्टंत्वयासुभ्रुयथावत्कथयामिते॥ अरिष्टनेमीराजर्षिर्दत्वाराज्यंसुतायवै॥ २३॥ वीतरागःसधर्मात्मानिर्ययौतपसेवनम्॥ तपश्चरत्यसौराजापर्वतेगंधमादने॥ २४॥ कार्यंकृत्वामयातत्रततआगम्यतेधुना॥ गंतास्मिपार्श्वेशक्रस्यतंवृत्तांतंनिवेदितुम्॥ २५॥

पिसुरुचिरितिसमुच्चयार्थः ॥ दिव्यदृशादूतब्रह्मवित्त्वपरिज्ञानसमर्थत्वाच्चेतराप्सरोभ्योवरा ॥ २१ ॥ सुरुचिरुवाचेति ॥ अर्थाद्योग्यतयाऽभ्युत्थानाभिवादनोपायनाहरणापूजनोपगमनपूर्वकमितिगम्यते ॥ स्वाभिलषितब्रह्मविद्यासंपन्नस्त्वमितिद्योतनायमहाभागेतिसंबोधनम् ॥ प्रकृतोपयोगयोग्योन्योपि कैषतदाभूत्कुतएतदागादितोमुच्यमानःक्वगमिष्यसीतिश्रौतप्रश्नसाम्याद्देहोपाधिकजीवभावेनकस्मादागम्यतेउपाध्यपगमेनचकस्मिन्स्वरूपेगंतासित्वमितिसर्वाधिष्ठानब्रह्मतत्त्वविषयएवप्रश्नोभिप्रेतइतिगम्यते ॥ तत्सर्वंपूर्णंकृपयावदेतिपदस्वारस्यादप्ययमेवप्रश्नार्थइतिगम्यते ॥ २२ ॥ गूढाभिसंधिर्महान्प्रश्नार्थोभ्रूविलासेनसूचितःस्वेनपरिज्ञातइतिस्वाभिप्रायंसूचयंस्तथैवसंबोधयति ॥ सुभ्रिवति ॥ यथावत्यथावृत्तंयथार्थमात्मतत्त्वंच ॥ २३ ॥ २४ ॥ कार्यमवश्यसंपाद्यमात्मज्ञानेनकृतार्थत्वंतस्यस्वस्यचकृत्वासंपाद्य वृत्तःसंपन्नःअंतःसंसारसीमायस्यतंतथाभूतंराजानमितिचार्थः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवहितत्तथाविधंजिज्ञासमानासोवाच ॥ वृत्तांतःप्राप्तसंसारांतःसराजाकोभवत्कीदृक्स्वरूपेणस्थितइतिनिगूढःप्रश्नः ॥ बह्वत्रवक्तव्यंनाल्पेनतदसंभावनादिदोषशांतिरि त्यनुद्वेगप्रार्थना ॥ देवानांपरोक्षप्रियत्वाच्चस्फुटोक्त्याप्रश्नोत्तरयोःस्वायत्तयोरपिनिगूढोक्त्यात्रते ॥ २६ ॥ २७ ॥ इतिवक्ष्यमाणप्रकारेण ॥ तत्रगंधमादने ॥ विरक्तश्चेत्तत्तद्द ष्ट्याल्पंकुत्सितंचेत्युपेक्षार्हमितिसूचनायविमानकमितिकन्प्रयुक्तः ॥ २८ ॥ शोभितांतानिविमानविशेषणानि ॥ २९ ॥ विमानाद्बहिरपिसैनिकैस्तालवेणुमृदंगादिगृहीत्वेत्य नुषंगः ॥ ३० ॥ ३१ ॥ उपस्कराणिगुणवत्तयोपकल्पितानिभोगसाधनानि ॥ उपात्प्रतियत्नेतिसुट् ॥ संप्रतिस्वस्यतत्त्वज्ञत्वादज्ञदृशाभिमतेदेहादिद्वारकेस्वगमनेउन्मादादिकृत

अप्सराउवाच॥ ॥वृत्तांतःकोभवत्तत्रकथयस्वममप्रभो॥प्रष्टुकामाविनीतास्मिनोद्वेगंकर्त्तुमर्हसि ॥ २६॥ देवदूतउवाच॥श्रृणुभ द्रेयथावृत्तंविस्तरेणवदामिते॥ तस्मिन्राज्ञिवनेतत्रतपश्चरतिदुस्तरम्॥ २७॥ इत्यहंदेवराजेनसुभ्रूराज्ञापितस्तदा॥दूतत्वंतत्रगच्छा शुगृहीत्वेदंविमानकम्॥ २८॥ अप्सरोगणसंयुक्तंनानावादित्रशोभितम्॥ गंधर्वसिद्धयक्षैश्चकिन्नराद्यैश्चशोभितम्॥ २९॥ तालवे णुमृदंगादिपर्वतेगंधमादने॥ नानावृक्षसमाकीर्णेगत्वातास्मिन्गिरौशुभे॥ ३०॥ अरिष्टनेमिंराजानंदूतारोप्यविमानके॥ आनयस्व र्गभोगायनगरीममरावतीम्॥ ३१॥ ॥दूतउवाच॥ ॥इत्याज्ञांप्राप्यशक्रस्यगृहीत्वातद्विमानकम्॥ सर्वोपस्करसंयुक्तंतस्मिन्नद्रा वहंययौ॥ ३२॥ आगत्यपर्वतेतस्मिन्राज्ञोगत्वाश्रमंमया॥ निवेदितामहेंद्रस्यसर्वाज्ञारिष्टनेमये॥ ३३॥ इतिमद्वचनंश्रुत्वासंशया नोवदच्छुभे॥ ॥राजोवाच॥ ॥प्रष्टुमिच्छामिदूतत्वांतन्मेत्वंवक्तुमर्हसि॥ ३४॥ गुणादोषाश्चकेतत्रस्वर्गेवदममाग्रतः॥ज्ञात्वास्थि तिंतुतत्रत्यांकरिष्येहंयथारुचि॥ ३५॥ ॥दूतउवाच॥ ॥स्वर्गेपुण्यस्यसामग्र्याभुज्यतेपरमंसुखम्॥ उत्तमेनतुपुण्येनप्राप्नोतिस्वर्गमु त्तमम्॥ ३६॥ मध्यमेनतथामध्यःस्वर्गोभवतिनान्यथा॥ कनिष्ठेनतुपुण्येनस्वर्गोभवतितादृशः॥ ३७॥ परोत्कर्षासहिष्णुत्वंस्पर्धाचै वसमैश्चतैः॥ कनिष्ठेषुचसंतोषोयावत्पुण्यक्षयोभवेत्॥ ३८॥

इवपारोक्ष्यारोपान्मत्तोहंकिलविललापेतिवद्ययावितिलिट् ॥ ३२ ॥ ३३ ॥ ३४ ॥ स्थितिंगुणदोषन्यूनाधिक्यव्यवस्थितिम् ॥ तत्रत्यांस्वर्गस्थाम् ॥ ३५ ॥ सामग्र्यासमग्र तया ॥ क्षुद्रपुण्यानामपिप्राचुर्येणेत्यर्थः ॥ परममल्पपुण्येभ्योऽधिकम् ॥ एकैकेनाप्युत्कृष्टतमेनतत्क्षयावध्युत्कृष्टंसुखंलभ्यमित्याह ॥ उत्तमेनेति ॥ ३६ ॥ एवंमध्यमकनि ष्ठत्वेअपिप्राचुर्योत्कृष्टत्वाभ्यांबोध्ये ॥ ३७ ॥ अनुत्तमपुण्यफलेषुदोषांतराण्याह ॥ परेति ॥ तैरुत्कृष्टैःस्पर्धमानैश्चसहेतिशेषः ॥ तथाचतत्प्रयुक्तंदुःखंदुःसहमितिभावः ॥ या वदितिसर्वसाधारणमिदम् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानवाश्वभवंतिरमणीयकर्मविशेषे तच्चदुर्लभमितिसूचनायचकारः ॥ ३९ ॥ स्वर्गफलमित्यभेदान्वयः ॥ ४० ॥ पापानांतपसानिःशेषंक्षपणात्सुकृतानामसतिरागेजन्माहे
तुत्वाद्विरक्तस्यममदेहपातादेवमोक्षोभविष्यतीतिराजाशयः ॥ ४१ ॥ विमानंचतदिदंचेतिकर्मधारयः ॥ अथवास्वागमनप्रत्याख्यानेनविगतोमानोस्येतिदेवदूतविशेषणंविमा
नेतिपृथक्पदम् ॥ अतएवतत्क्षमापणायनमोस्तुतइत्युक्तिः ॥ ४२ ॥ महतांशक्रसभागतानामाश्चर्यतांविस्मयहेतुताम् ॥ ४३ ॥ अविषयनियोगदुःखितदूताश्वासनायमधुर
या ॥ आश्रमंवाल्मीकेरित्युत्तरेणान्वयः ॥ ४४ ॥ स्वबोधार्थमात्मतत्त्वज्ञानाय ॥ स्वपदश्लेषात्त्वापिस्यात्मबोधोभावीतिध्वनितम् ॥ संदेशंवाचिकम् ॥ ४५ ॥ रागिणोराग

क्षीणेपुण्येविशंत्येतंमर्त्यलोकंचमानवाः ॥ इत्यादिगुणदोषाश्चस्वर्गेराजन्नवस्थिताः ॥ ३९ ॥ इतिश्रुत्वावचोभद्रेसराजाप्रत्यभाषत
॥ राजोवाच ॥ ॥ नेच्छामिदेवदूताहंस्वर्गमीदृग्विधंफलम् ॥ ४० ॥ अतःपरंमहोग्रंतुतपःकृत्वाकलेवरम् ॥ त्यक्ष्याम्यहमशुद्धंहिजीर्णां
त्वचमिवोरगः ॥ ४१ ॥ देवदूतविमानेदंगृहीत्वात्वंयथागतः ॥ तथागच्छमहेंद्रस्यसन्निधौत्वंनमोस्तुते ॥ ४२ ॥ ॥ देवदूतउवाच ॥
इत्युक्तोहंगतोभद्रेशक्रस्याग्रेनिवेदितुं ॥ यथावृत्तंनिवेद्याथमहदाश्चर्यतांगतः ॥ ४३ ॥ पुनःप्राहमहेंद्रोमांश्लक्ष्णंमधुरयागिरा ॥ ॥ इंद्र
उवाच ॥ ॥ दूतगच्छपुनस्तत्रतंराजानंनयाश्रमम् ॥ ४४ ॥ वाल्मीकेर्ज्ञाततत्त्वस्यस्वबोधार्थविरागिणम् ॥ संदेशंममवाल्मीकेर्महर्षे
स्त्वंनिवेदय ॥ ४५ ॥ महर्षेत्वंविनीतायराज्ञेस्मैवीतरागिणे ॥ नस्वर्गमिच्छतेतत्त्वंप्रबोधयमहामुने ॥ ४६ ॥ तेनसंसारदुःखार्तोमोक्षमे
ष्यतिचक्रमात् ॥ इत्युक्त्वादेवराजेनप्रेषितोहंतदंतिके ॥ ४७ ॥ मयागत्यपुनस्तत्रराजावल्मीकजन्मने ॥ निवेदितोमहेंद्रस्यराज्ञामोक्ष
स्यसाधनम् ॥ ४८ ॥ ततोवल्मीकजन्मासौराजानंसमपृच्छत ॥ अनामयमतिप्रीत्याकुशलप्रश्नवार्त्तया ॥ ४९ ॥ ॥ राजोवाच ॥
भगवन्धर्मतत्त्वज्ञज्ञातज्ञेयविदांवर ॥ कृतार्थोहंभवद्दृष्ट्यातदेवकुशलंमम ॥ ५० ॥

मूलाःकाम्यप्रवृत्तयोरागापगमादेववीतागतायस्येत्यर्थः ॥ स्वर्गंनेच्छते ॥ ४६ ॥ तेनतत्वबोधनेन ॥ उपदेशक्रमादुपदिष्टार्थस्यचित्तेसंक्रमान्मनोनाशांतमननादिक्रमाद्वा
॥ ४७ ॥ मयामहेंद्रस्यसंदेशेनसहराजानिवेदितः ॥ राज्ञास्वमोक्षस्यसाधनंस्वाभिलषितंनिवेदितमितिविपरिणामेनसंबंधः ॥ ४८ ॥ देशकोशपुत्रतपःप्रभृतीनांकुशलप्रश्नवार्त्त
यैवार्थादनामयंसमपृच्छतेत्यर्थः ॥ ४९ ॥ आद्येनविशेषणेनकर्मकांडरहस्यज्ञताद्वितीयेनब्रह्मतत्त्वज्ञतातृतीयेनलोकतत्त्वज्ञताचदर्शिता ॥ भवद्दृष्ट्याभवतोदर्शनेनभवदीयकृपा
दृष्ट्याच ॥ तत्भवद्दृष्टिप्रयुक्तंकार्तार्थ्यमेव ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रष्टुमिच्छामीतिदूतसंदेशादेवप्रश्नविषयपरिज्ञानेपिनापृष्टःकस्यचिद्ब्रूयादितिप्रसक्तोपेक्षतावारणाय ॥ ततूतत्रश्रेयोरूपे ॥ श्रेयांसिबहुविघ्नानीतिप्रवादप्रसक्तांविघ्नसंभावनांनि
वारयति ॥ अविघ्नेनेति ॥ तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युरितिश्रुतेर्देवानांप्रातिकूल्येहिविघ्नसंभावनास्यान्नतुतदस्तिदेवराजाज्ञयैवाहंयतःपृच्छामीतिभावः ॥ संसारबंध
प्रयुक्तदुःखैरार्त्तिःपुनःपुनर्नाशस्तस्मान्मुंचामिमुक्तोभवामि ॥ आद्योमोक्षस्वरूपस्यप्रश्नोद्वितीयोमोक्षसाधनस्य ॥ ५१ ॥ कैकेयीवरापदेशात्स्वस्थानप्रच्युतस्यरामस्यराक्ष
सान्विजित्यपुनःस्वस्थानायनाभ्युदयप्राप्तिवच्छापापदेशात्स्वरूपात्प्रच्युतस्यतस्यवसिष्ठोपदेशादज्ञानादिराक्षसान्निहत्यपुनःस्वस्वरूपावाप्त्यभ्युदयप्रतिपादकत्वादन्वर्थनाम
कंयंथंरामायणंश्रुत्वाश्रवणेनप्रमाणासंभावनां मननेनत्ववधार्यप्रमेयासंभावनां यत्नेननिदिध्यासनेनविपरीतभावनांचनिरस्य साक्षात्कारेणेतिशेषः ॥ ५२ ॥ वसिष्ठरामयोः
संवादरूपेणप्रवृत्तांमोक्षोपायानांकथाम् ॥ ननरेणावरेणप्रोक्तएषसुविज्ञेयोबहुधाचिंत्यमानइतिश्रुतेर्नातत्त्वज्ञोपदेशाच्छिष्यस्यकृतार्थतेतिस्वस्यतत्त्वज्ञतामाह ॥ ज्ञातस्वभा

भगवन्प्रष्टुमिच्छामितदविघ्नेनमेवद॥ संसारबंधदुःखार्तःकथंमुंचामितद्वद॥ ५१॥ ॥वाल्मीकिरुवाच॥ ॥श्रृणुराजन्प्रवक्ष्यामि
रामायणमखंडितम्॥ श्रुत्वावधार्ययत्नेनजीवन्मुक्तोभविष्यसि॥ ५२॥ वसिष्ठरामसंवादंमोक्षोपायकथांशुभाम्॥ ज्ञातस्वभावोरा
जेंद्रवदामिश्रूयतांबुध ॥ ५३ ॥ ॥राजोवाच॥ ॥कोरामःकीदृशःकस्यबद्धोवामुक्तएववा॥ एतन्मेनिश्चितंब्रूहिज्ञानंतत्त्वविदांवर
॥५४॥ ॥वाल्मीकिरुवाच॥ ॥शापव्याजवशादेवराजवेषधरोहरिः॥ आहृताज्ञानसंपन्नःकिंचिज्ज्ञोसौभवत्प्रभुः॥५५॥ ॥रा
जोवाच॥ ॥चिदानंदस्वरूपेहिरामेचैतन्यविग्रहे॥ शापस्यकारणंब्रूहिकःशप्ताचेतिमेवद॥५६॥

वइति ॥ ५३ ॥ वसिष्ठरामसंवादमित्यत्रद्वंद्वेल्पाचोपिपरनिपाताद्रामस्यशिष्यतासूचितासात्वज्ञस्यैवसंभवतिनेश्वरस्य रामस्तुभगवदवतारत्वात्सर्वज्ञएवोचितइतिसंदिहानःपृ
च्छति ॥ कोरामइति ॥ किमन्यएवकश्चिद्रामनामाउतप्रसिद्धोनित्यमुक्तोविष्णुरित्यर्थः ॥ ज्ञायतेऽनेनेतिज्ञानंनिश्चयकारणमित्यर्थः ॥ ५४ ॥ तदेवाह ॥ शापेति ॥ व्याजोऽप
देशः ॥ आहृतेनस्वभक्तवाक्यसत्यतासंपादनायेच्छास्वीकृतेनाज्ञानेनाज्ञप्रायःसंपन्नःभवत्अभवत् ॥ अडभावश्छांदसः ॥ ५५ ॥ महर्षिभिरपराधिनोहिशप्यंते अपराधोह्य
पूर्णकामस्याज्ञस्यस्यान्नचानावृतचिदानंदस्वरूपत्वादतथाभूतस्यरामस्यतत्संभवः शापादेवतदुक्तौत्वन्योन्याश्रयइत्यभिप्रेत्याह ॥ चिदानंदेति ॥ परमार्थतश्चिदभिन्नानंदस्व
रूपे ॥ व्यवहारेऽपिचैतन्यमेवभक्तानुकंपयाविग्रहात्मनापरिणतंयस्यतस्मिन् ॥ ५६ ॥

१ शशापेतिपाठांतरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्कामअवसदितिच्छांदसंयत्वम् ॥ निर्गताःकामारागादयोयत्रेतिनिष्कामेब्रह्मसद्मनीतिवा ॥ ५७॥ कुमारंसनत्कुमारंविनान्यैःसत्यलोकनिवासिभिःपूजितइत्यनुषंगः ॥५८॥ कामेनकृतोव्याप्तः ॥ कृतेचतृतीयासमासइतिदृद्धिः ॥ ५९ ॥ किंचित्कालमितिकर्मधारयः ॥ कालाध्वनोरत्यंतसंयोगइतिद्वितीया ॥ ६० ॥ क्रोधेनमूर्छितोमोहितःसमुच्छ्रितश्च ॥ ६१ ॥ वृंदयाजलंधरभार्यया ॥ छलनंपतिवेषेणमोहयित्वापातिव्रत्यभंगरूपंवंचनम् ॥ शापितःशप्तः ॥ अध्यारोपितप्रेषणयाणिच् ॥ ६२ ॥ वेषधृग्विष्णुमितिकर्मधा

वाल्मीकिरुवाच ॥ ॥ सनत्कुमारोनिष्कामअवसद्ब्रह्मसद्मनि ॥ वैकुंठादागतोविष्णुस्त्रैलोक्याधिपतिःप्रभुः ॥ ५७॥ ब्रह्मणापूजितस्तत्रसत्यलोकनिवासिभिः ॥ विनाकुमारंतंदृष्ट्वात्युवाचप्रभुरीश्वरः ॥ ५८ ॥ सनत्कुमारस्तब्धोसिनिष्कामोगर्वचेष्टया ॥ अतस्त्वंभवकामार्तःशरजन्मेतिनामतः ॥५९॥ तेनापिशापितोविष्णुःसर्वज्ञत्वंतवास्तियत् ॥ किंचित्कालंहितत्त्यक्त्वात्वमज्ञानीभविष्यसि ॥६०॥ भृगुर्भार्याहतांदृष्ट्वात्युवाचक्रोधमूर्छितः ॥ विष्णोतवापिभार्यायावियोगोहिभविष्यति ॥६१॥ वृंदयाशापितोविष्णुश्छलनंयत्त्वयाकृतम् ॥ अतस्त्वंस्त्रीवियोगंतुवचनान्ममयास्यसि ॥ ६२ ॥ भार्याहिदेवदत्तस्यपयोष्णीतीरसंस्थिता ॥ नृसिंहवेषधृग्विष्णुंदृष्ट्वापंचत्वमागता ॥ ६३ ॥ तेनशप्तोहिनृहरिर्दुःखार्त्तःस्त्रीवियोगतः ॥ तवापिभार्ययासार्धंवियोगोहिभविष्यति ॥ ६४ ॥ भृगुणैवंकुमारेणशापितोदेवशर्मणा ॥ वृंदयाशापितोविष्णुस्तेनमानुष्यतांगतः ॥ ६५॥ एतत्तेकथितंसर्वंशापव्याजस्यकारणम् ॥ इदानींवच्मितत्सर्वंसावधानमतिःशृणु ॥ ६६ ॥ ॥ इत्यार्षेवासिष्ठमहारामायणेवाल्मीकीयेदेवदूतोक्तेमोक्षोपायेद्वात्रिंशत्साहस्र्यांसंहितायांवैराग्यप्रकरणेसूत्रपातनकोनामप्रथमःसर्गः ॥ १ ॥

रयः ॥ ६३ ॥ दुःखैर्दुःखसाध्यैःसुकृतैःकृतःसाक्षात्कृतोपिनृहरिस्तेनशप्तः ॥ ६४ ॥ आद्यशापेनसाक्षाद्दितैरैराक्षेपादज्ञानप्राप्तिः ॥ अतएवहिरामस्यत्रिःसीतावियोगोरावणापहारेणमिथ्यापवादेनभूतलप्रवेशेनचेति ॥ नचिरंत्वयिवत्स्यतीतितारायावचनंत्वधिक्षेपमात्रंनशापः ॥ तस्याजीवत्यपिवालिनिसुग्रीवेणोपभुक्तत्वस्यधर्मतोमातरंयस्तुस्त्रीकरोतिजुगुप्सितइत्यंगदवाक्येनप्रसिद्धत्वात्पातिव्रत्यभंगेननिकृष्टयोनितयाचोत्कृष्टायरामायशापप्रदानेअसामर्थ्यात् ॥ मानुष्यतांमनुष्यएवमानुष्यस्तद्भावम् ॥ ६५ ॥ तत्पूर्वंपृष्टंमोक्षसाधनम् ॥ सर्वंसानुबंधम् ॥ तत्महारामायणंसर्वंग्रंथतोद्वात्रिंशत्सहस्रमितंसंपूर्णंवा ॥६६॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवैराग्यप्रकरणेप्रथमःसर्गः ॥ १ ॥

१ अत्रापिपूर्वरूपाभावआर्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओमथप्रारिप्सितस्यमहतःशास्त्रस्यनिर्विघ्नपरिसमाप्तिप्रचयगमनादिसिद्धयेमंगलादीनिमंगलमध्यानिमंगलांतानिशास्त्राणिप्रथंतेवीरपुरुषकाण्यायुष्मत्पुरुषकाणिचभवंतीति महाभाष्योपदर्शितश्रुतिबोधितकर्त्तव्यताकंसर्वावभासकचिदेकरससर्वप्रत्यगभिन्नपरब्रह्मप्रणतिलक्षणंमंगलमाचरन्नर्थाच्छास्त्रस्यविषयप्रयोजनेदर्शयति ॥ दिवीति ॥ दिवि द्युलोकेभूमौभूलोकेतथाआकाशेअंतरिक्षलोकेबहिरधिभूतंअंतरध्यात्मंचकारादधिदैवंचमेममयोविभुर्विभातिविविधरूपेणप्रथतेस्वाविद्यया ॥ परमार्थतस्त्ववभासात्मानि विकारचिन्मात्रस्वभावस्तस्मैसर्वेषामात्मनेनमइत्यर्थः ॥ अथवा पृथिवीपूर्वरूपंद्यौरुत्तररूपमितिश्रुताविवात्रापिदिविब्रह्मांडस्योर्ध्वकपालेस्वर्णमयेभूमावधःकपालेरजतमये आकाशेतयोःसंधौसूक्ष्माकाशेब्रह्मांडाद्बहिरंतश्चयोविशेषेणसूर्यचंद्राग्निवागादिभ्योप्यतिशयेनस्वप्रकाशापरिच्छिन्नस्वभावत्वाद्भाति ॥ तत्कुतः ॥ यतोयमवभासात्मासूर्यादी नामप्यवभासकआत्माच ॥ येनसूर्यस्तपतितेजसेद्धः आत्मैवास्यज्योतिर्भवति ज्योतिषामपितज्ज्योतिरित्यादिश्रुतिस्मृतिभ्यः ॥ तस्मैसर्वात्मनेसर्ववस्तूनांपारमार्थिकस्वरूपभू तायनमइत्यर्थः ॥ अथवादिविद्योतनैकरसेभूमानंदात्मकेतुर्यस्वरूपेतथाअवस्थाद्वयोत्पत्तिभूमावव्याकृताकाशेबहिर्बहिःप्रज्ञभोग्येजागरेंतःअंतःप्रज्ञभोग्येस्वप्नेचकारात्तत्सं धौमरणमूर्छाद्यवस्थासुचयोविविधोभातिस्थूलसूक्ष्मकारणाभिमानितयातद्भोक्तृतयातत्साक्षितयानिष्प्रपंचपूर्णानंदचिन्मात्रस्वभावेनचेत्यर्थः ॥ तर्हिंकिनानारसएवनेत्याह ॥ अवभासात्मेति ॥ चिन्मात्रस्वभावइत्यर्थः ॥ तस्मैदृश्यस्यदृग्व्यतिरेकात्सर्वश्वासावात्माचसाविद्यत्वनिरविद्यत्वाभ्यामितिसर्वात्मनेनमइत्यर्थः॥ अथवादिविसार्वज्ञ्यादिसंपन्न

दिविभूमौतथाकाशेबहिरंतश्चमेविभुः॥ योविभात्यवभासात्मातस्मैसर्वात्मनेनमः॥ १ ॥

त्वात्द्योतमानेकारणोपाधौतथाकर्मबीजोद्भवभूमौकार्योपाधौतथाकाशेअंतरालेआसमंतात्काशतेइतिव्युत्पत्त्यास्वरूपप्रकाशबहुलेवाजीवन्मुक्तिदशायांबहिर्निरुपाधिस्वरू पेंऽतःकार्यकारणोपाध्यंतर्गतमायांतःकरणवृत्तिभेदेषुचयःअवभासैकस्वभावोविभातितस्मैसर्वोपाधिनिष्कृष्टायात्मनेनमइत्यर्थः ॥ अथवादिविद्योतनात्मकेतेजसिभूमौपृथि व्यामाकाशेव्योम्निअंतःआंतरालिकयोःसलिलपवनयोर्बहिर्बहिर्भूतेअव्याकृतेचकारान्निरुपाधिकत्वाच्छब्दाद्ययोग्यपारमार्थिकरूपेचयोनुवृत्तःसन्मात्रस्वभावोविभातिस एवावभासमानःप्रत्यगात्मातस्मैसर्वात्मनेपूर्णानंदस्वरूपायमेमह्यंनमइत्यर्थः॥ अथवादिविदेवलोकेबहिस्तटस्थतयापूज्यदेवतेश्वराद्यात्मनाभूमौभूलोकेअंतःदेहांतर्वर्तितयापूज कात्मनाआकाशेअंतरालेचक्रियाफलसाधनाद्यात्मनामेममस्वरूपानवभासदशायांपरिच्छेदेनान्यथाभातोपियःसंप्रतितत्त्वदृष्ट्युदयात्स्पष्टमवभासमानात्माविभुस्त्रिविधपरि च्छेदशून्योविस्पष्टंभातितस्मैसर्वात्मनेसर्वशब्दःपूर्णपरस्तस्मात्तत्सर्वमभवदितिवत्पूर्णानंदस्वरूपायनमइत्यर्थः॥ अथवादिविउपरिष्टाद्भूमावधस्तादाकाशेंऽतरालेबहिःप्रागादिदि क्षुविदिक्षुचअंतःशरीरांतःचकारात्तत्पूर्वोत्तरकालयोर्यःअवभासात्माचिदेकरसोविभातितत्त्वदृशोमम ॥ आत्मैवाधस्तादात्मोपरिष्टादित्यादिश्रुतेः ॥ तस्मैसर्वात्मनेआत्मैवेदंसर्व मितिसर्वप्रपंचबाधेनपरिशेषितायपरमात्मनेनमइत्यर्थः ॥ एवमर्थांतराण्यपियथाबुद्धिवैभवमूहनीयानि ॥ अत्रार्थात्तथाविधंब्रह्मैवाज्ञातंशास्त्रस्यविषयः ॥ ज्ञानात्तद्भावस्थि तिश्चपरमनिर्वाणरूपंप्रयोजनमितिसूचितम् ॥ उत्तरत्राप्येतदेवस्पष्टंदर्शयिष्यते ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निष्कामअवसदितिच्छांदसंयत्वम् ॥ निर्गताःकामारागादयोयत्रेतिनिष्कामेब्रह्मसद्मनीतिवा ॥ ५७॥ कुमारंसनत्कुमारंविनान्यैःसत्यलोकनिवासिभिःपूजितइत्यनुषंगः ॥५८॥ कामेनकृतोव्याप्तः ॥ कृतेचतृतीयासमासइतिवृद्धिः ॥ ५९ ॥ किंचित्कालमितिकर्मधारयः ॥ कालाध्वनोरत्यंतसंयोगइतिद्वितीया ॥ ६० ॥ क्रोधेनमूर्छितोमोहितःसमुच्छ्रितश्च ॥ ६१ ॥ वृंदयाजलंधरभार्यया ॥ छलनंपतिवेषेणमोहयित्वापातिव्रत्यभंगरूपंवंचनम् ॥ शापितःशप्तः ॥ अध्यारोपितप्रेषणयाणिच् ॥ ६२ ॥ वेषधृग्विष्णुमितिकर्मधारयः ॥ ६३ ॥ दुःखैर्दुःखसाध्यैःसुकृतैःकृतःसाक्षात्कृतोपिनृहरिस्तेनशप्तः ॥ ६४ ॥ आद्यशापेनसाक्षादितरैराक्षेपादज्ञानप्राप्तिः ॥ अतएवहिरामस्यत्रिःसीतावियोगोरावणापहारेणमिथ्यापवादेनभूतलप्रवेशेनचेति ॥ नचिरंत्वयिवत्स्यतीतितारायावचनंत्वधिक्षेपमात्रंनशापः ॥ तस्याजीवत्यपिवालिनिसुग्रीवेणोपभुक्तत्वस्यधर्मतोभ्रातरंयस्तुस्त्रीकरोतिजुगुप्सितइत्यंगदवाक्येनप्रसिद्धत्वात्पातिव्रत्यभंगेननिकृष्टयोनितयाचोत्कृष्टायरामायशापप्रदानेअसामर्थ्यात् ॥ मानुष्यतांमनुष्यएवमानुष्यस्तद्भावम् ॥ ६५ ॥ तत्पूर्वपृष्टंमोक्षसाधनम् ॥ सर्वसानुबंधम् ॥ तत्महारामायणंसर्वंग्रंथतोद्वात्रिंशत्सहस्रमितंसंपूर्णंवा ॥६६॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवैराग्यप्रकरणेप्रथमःसर्गः॥१॥

वाल्मीकिरुवाच॥ ॥सनत्कुमारोनिष्कामअवसद्ब्रह्मसद्मनि॥ वैकुंठादागतोविष्णुस्त्रैलोक्याधिपतिःप्रभुः ॥५७॥ ब्रह्मणापूजितस्तत्रसत्यलोकनिवासिभिः॥ विनाकुमारंतंदृष्ट्वात्युवाचप्रभुरीश्वरः॥ ५८ ॥ सनत्कुमारस्तब्धोसिनिष्कामोगर्वचेष्टया ॥ अतस्त्वंभवकामार्तःशरजन्मेतिनामतः॥५९॥ तेनापिशापितोविष्णुःसर्वज्ञत्वंतवास्तियत्॥ किंचित्कालंहितत्त्यक्त्वात्वमज्ञानीभविष्यसि॥६०॥ भृगुर्भार्यांहतांदृष्ट्वात्युवाचक्रोधमूर्छितः॥विष्णोतवापिभार्यायावियोगोहिभविष्यति॥६१॥ वृंदयाशापितोविष्णुश्छलनंयत्त्वयाकृतम्॥ अतस्त्वंस्त्रीवियोगंतुवचनान्ममयास्यसि ॥ ६२ ॥ भार्याहिदेवदत्तस्यपयोष्णीतीरसंस्थिता॥ नृसिंहवेषधृग्विष्णुंदृष्ट्वापंचत्वमागता ॥६३॥ तेनशप्तोहिनृहरिर्दुःखार्त्तःस्त्रीवियोगतः॥ तवापिभार्ययासार्धंवियोगोहिभविष्यति॥६४॥ भृगुणैवंकुमारेणशापितोदेवशर्मणा॥ वृंदयाशापितोविष्णुस्तेनमानुष्यतांगतः ॥६५॥ एतत्तेकथितंसर्वंशापव्याजस्यकारणम् ॥ इदानींवच्मितत्सर्वंसावधानमतिःशृणु ॥६६॥ ॥इत्यार्षेवासिष्ठमहारामायणेवाल्मीकीयेदेवदूतोक्तेमोक्षोपायेद्वात्रिंशत्साहस्र्यांसंहितायांवैराग्यप्रकरणेसूत्रपातनकोनामप्रथमःसर्गः॥१॥

१ अत्रापिपूर्ववद्रूपाभावआर्षः

CC-0. In Public Domain. Digitization by eGangotri

ओमथप्रारिप्सितस्यमहतःशास्त्रस्यनिर्विघ्नपरिसमाप्तिप्रचयगमनादिसिद्ध्येमंगलादीनिमंगलमध्यानिमंगलांतानिशास्त्राणिप्रथंतेवीरपुरुषकाण्यायुष्मत्पुरुषकाणिचभवंतीति महाभाष्योपदर्शितश्रुतिबोधितकर्त्तव्यताकंसर्वावभासकचिदेकरससर्वप्रत्यगभिन्नपरब्रह्मप्रणतिलक्षणंमंगलमाचरन्नर्थाच्छास्त्रस्यविषयप्रयोजनेदर्शयति ॥ दिवीति ॥ दिवि द्युलोकेभूमौभूलोकेतथाआकाशेअंतरिक्षलोकेबहिरधिभूतंअंतरध्यात्मंचकारादधिदैवंचमेममयोविभुर्विभातिविविधरूपेणप्रथतेस्वाविद्यया ॥ परमार्थतस्त्ववभासात्मानि विकारचिन्मात्रस्वभावस्तस्मैसर्वेषामात्मनेनमइत्यर्थः ॥ अथवा पृथिवीपूर्वरूपंद्यौरुत्तररूपमितिश्रुताविवात्रापिदिविब्रह्मांडस्योर्ध्वकपालेस्वर्णमयेभूमावधःकपालेरजतमये आकाशेतयोःसंधौसूक्ष्माकाशेब्रह्मांडाद्बहिरंतश्चयोविशेषेणसूर्यचंद्राग्निवागादिभ्योप्यतिशयेनस्वप्रकाशापरिच्छिन्नस्वभावत्वाद्भाति ॥ तत्कुतः ॥ यतोयमवभासात्मासूर्यादी नामप्यवभासकआत्माच ॥ येनसूर्यस्तपतितेजसेद्धः आत्मैवास्यज्योतिर्भवति ज्योतिषामपितज्ज्योतिरित्यादिश्रुतिस्मृतिभ्यः ॥ तस्मैसर्वात्मनेसर्ववस्तूनांपारमार्थिकस्वरूपभू तायनमइत्यर्थः ॥ अथवादिविद्योतनैकरसेभूमानंदात्मकेतुर्यस्वरूपेतथाअवस्थाद्वयोत्पत्तिभूमावव्याकृताकाशेबहिर्बहिःप्रज्ञभोग्येजागरेंतःअंतःप्रज्ञभोग्येस्वप्नेचकारात्तत्सं धौमरणमूर्छाद्यवस्थासुचयोविविधोभातिस्थूलसूक्ष्मकारणाभिमानितयातद्भोक्तृतयातत्साक्षितयानिष्प्रपंचपूर्णानंदचिन्मात्रस्वभावेनचेत्यर्थः ॥ तर्हिकिंनानारसएवनेत्याह ॥ अवभासात्मेति ॥ चिन्मात्रस्वभावइत्यर्थः ॥ तस्मैदृश्यस्यदृगव्यतिरेकात्सर्वश्चासावात्माचसाविद्यत्वनिरविद्यत्वाभ्यामितिसर्वात्मनेनमइत्यर्थः ॥ अथवादिविसार्वज्ञ्यादिसंपन्न

दिविभूमौतथाकाशेबहिरंतश्चमेविभुः ॥ योविभात्यवभासात्मातस्मैसर्वात्मनेनमः ॥ १ ॥

त्वात्द्योतमानेकारणोपाधौतथाकर्मबीजोद्भवभूमौकार्योपाधौतथाकाशेअंतरालेआसमंतात्काशतेइतिव्युत्पत्त्यास्वरूपप्रकाशबहुलेवाजीवन्मुक्तिदशायांबहिर्निरुपाधिस्वरू पेंऽतःकार्यकारणोपाध्यंतर्गतमायांतःकरणवृत्तिभेदेषुचयःअवभासैकस्वभावोविभातितस्मैसर्वोपाधिनिष्कृष्टायात्मनेनमइत्यर्थः ॥ अथवादिविद्योतनात्मकेतेजसिभूमौपृथि व्यामाकाशेव्योम्निअंतःआंतरालिकयोःसलिलपवनयोर्बहिर्बहिर्भूतेअव्याकृतेचकारान्निरुपाधिकत्वाच्छब्दाद्ययोग्यपारमार्थिकरूपेचयोनुवृत्तःसन्मात्रस्वभावोविभातिस एवावभासमानःप्रत्यगात्मातस्मैसर्वात्मनेपूर्णानंदस्वरूपायमेमह्यंनमइत्यर्थः ॥ अथवादिविदेवलोकेबहिस्तट्टस्थतयापूज्यदेवतेश्वराद्यात्मनाभूमौभूलोकेअंतःदेहांतर्वर्तितयापूज कात्मनाआकाशेअंतरालेचक्रियाफलसाधनाद्यात्मनामेममस्वरूपानवभासदशायांपरिच्छेदेनान्यथांभातोपियःसंप्रतितत्त्वदृष्ट्युदयात्स्पष्टमवभासमानात्माविभुस्त्रिविधपरि च्छेदशून्योविस्पष्टंभातितस्मैसर्वात्मनेसर्वशब्दःपूर्णपरस्तस्मात्तत्सर्वमभवदितिवत्पूर्णानंदस्वरूपायनमइत्यर्थः ॥ अथवादिविउपरिष्टाद्भूमावधस्तादाकाशेंऽतरालेबहिःप्रागादिदि क्षुविदिक्षुचअंतःशरीरांतःचकारात्तत्पूर्वोत्तरकालयोर्यःअवभासात्माचिदेकरसोविभातितत्त्वदृशोमम ॥ आत्मैवाधस्तादात्मोपरिष्टादित्यादिश्रुतेः ॥ तस्मैसर्वात्मनेआत्मैवेदंसर्व मितिसर्वप्रपंचबाधेनपरिशेषितायपरमात्मनेनमइत्यर्थः ॥ एवमर्थांतराण्यपियथाबुद्धिवैभवमूहनीयानि ॥ अत्रार्थात्तथाविधंब्रह्मैवाज्ञातंशास्त्रस्यविषयः ॥ ज्ञानात्तद्भावस्थि तिश्चपरमनिर्वाणरूपंप्रयोजनमितिसूचितम् ॥ उत्तरत्राप्येतदेवस्पष्टंदर्शयिष्यते ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्कामअवसदितिच्छांदसंयत्वम् ॥ निर्गताःकामारागादयोयत्रेतिनिष्कामेब्रह्मसद्मनीतिवा ॥ ५७॥ कुमारंसनत्कुमारंविनान्यैःसत्यलोकनिवासिभिःपूजितइत्यनुषंगः ॥५८॥ कामेनकृतोव्याप्तः ॥ कृतेचतृतीयासमासइतिटद्धिः ॥ ५९ ॥ किंचित्कालमितिकर्मधारयः ॥ कालाध्वनोरत्यंतसंयोगइतिद्वितीया ॥ ६० ॥ क्रोधेनमूर्छितोमोहितःसमुच्छ्रितश्च ॥ ६१ ॥ दंदयाजलंधरभार्यया ॥ छलनंपतिवेषेणमोहयित्वापातिव्रत्यभंगरूपंवंचनम् ॥ शापितःशप्तः ॥ अध्यारोपितप्रेषणयाणिच् ॥ ६२ ॥ वेषधृग्विष्णुमितिकर्मधा

वाल्मीकिरुवाच॥ ॥सनत्कुमारोनिष्कामअवसद्ब्रह्मसद्मनि॥ वैकुंठादागतोविष्णुस्त्रैलोक्याधिपतिःप्रभुः ॥५७॥ ब्रह्मणापूजितस्तत्रसत्यलोकनिवासिभिः॥ विनाकुमारंतंदृष्ट्वाह्युवाचप्रभुरीश्वरः॥ ५८ ॥ सनत्कुमारस्तब्धोसिनिष्कामोगर्वचेष्टया ॥ अतस्त्वंभवकामार्तःशरजन्मेतिनामतः॥५९॥ तेनापिशापितोविष्णुःसर्वज्ञत्वंतवास्तियत् ॥ किंचित्कालंहितत्त्यक्त्वात्वमज्ञानीभविष्यसि ॥६०॥ भृगुर्भार्यांहतांदृष्ट्वाह्युवाचक्रोधमूर्छितः॥विष्णोतवापिभार्यायावियोगोहिभविष्यति॥६१॥ दंदयाशापितोविष्णुश्छलनंयत्त्वयाकृतम्॥ अतस्त्वंस्त्रीवियोगंतुवचनान्ममयास्यसि ॥ ६२ ॥ भार्याहिदेवदत्तस्यपयोष्णीतीरसंस्थिता॥ नृसिंहवेषधृग्विष्णुंदृष्ट्वापंचत्वमागता ॥६३॥ तेनशप्तोहिनृहरिर्दुःखार्त्तःस्त्रीवियोगतः॥ तवापिभार्ययासार्धंवियोगोहिभविष्यति॥६४॥ भृगुणैवंकुमारेणशापितोदेवशर्मणा॥ दंदयाशापितोविष्णुस्तेनमानुष्यतांगतः ॥ ६५॥ एतत्तेकथितंसर्वंशापव्याजस्यकारणम् ॥ इदानींवच्मितत्सर्वंसावधानमतिःशृणु ॥६६॥ ॥इत्यार्षेवासिष्ठमहारामायणेवाल्मीकीयेदेवदूतोक्तेमोक्षोपायेद्वात्रिंशत्साहस्र्यांसंहितायांवैराग्यप्रकरणेसूत्रपातनकोनामप्रथमःसर्गः॥१॥

रयः ॥ ६३ ॥ दुःखैर्दुःखसाध्यैःसुकृतैःकृतःसाक्षात्कृतोपिनृहरिस्तेनशप्तः ॥ ६४ ॥ आद्यशापेनसाक्षादितरैराक्षेपादज्ञानप्राप्तिः ॥ अतएवहिरामस्यत्रिःसीतावियोगोरावणापहारेणमिथ्यापवादेनभूतलप्रवेशेनचेति ॥ नचिरंत्वयिवत्स्यतीतितारायावचनंत्वधिक्षेपमात्रंनशापः ॥ तस्याजीवत्यपिवालिनिसुग्रीवेणोपभुक्तत्वस्यधर्मतोमातरंयस्तुस्त्रीकरोतिजुगुप्सितइत्यंगदवाक्येनप्रसिद्धत्वात्पातिव्रत्यभंगेननिकृष्टयोनितयाचोत्कृष्टायरामायशापप्रदानेअसामर्थ्यात् ॥ मानुष्यतांमनुष्यएवमानुष्यस्तद्भावम् ॥ ६५ ॥ तत्पूर्वंपृष्टंमोक्षसाधनम् ॥ सर्वंसानुबंधम् ॥ तत्महारामायणंसर्वंग्रंथतोद्वात्रिंशत्सहस्रमितंसंपूर्णंवा ॥६६॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवैराग्यप्रकरणेप्रथमःसर्गः॥१॥

१ अत्रापिपूर्वरूपाभावआर्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओमथप्रारिप्सितस्यमहतःशास्त्रस्यनिर्विघ्नपरिसमाप्तिप्रचयगमनादिसिद्धयेमंगलादीनिमंगलमध्यानिमंगलांतानिशास्त्राणिप्रथंतेवीरपुरुषकाण्यायुष्मत्पुरुषकाणिचभवंतीति
महाभाष्योपदर्शितश्रुतिबोधितकर्त्तव्यताकंसर्वावभासकचिदेकरससर्वप्रत्यगभिन्नपरब्रह्मप्रणतिलक्षणंमंगलमाचरन्नर्थाच्छास्त्रस्यविषयप्रयोजनेदर्शयति ॥ दिवीति ॥ दिवि
द्युलोकेभूमौभूलोकेतथाआकाशेअंतरिक्षलोकेबहिरधिभूतंअंतरध्यात्मंचकारादधिदैवंचमेममयोविभुर्विभातिविविधरूपेणप्रथतेस्वाविद्यया ॥ परमार्थतस्त्ववभासात्मानि
र्विकारचिन्मात्रस्वभावस्तस्मैसर्वेषामात्मनेनमइत्यर्थः ॥ अथवा पृथिवीपूर्वरूपंद्यौरुत्तररूपमितिश्रुताविवात्रापिदिविब्रह्मांडस्योर्ध्वकपालेस्वर्णमयेभूमावधःकपालेरजतमये
आकाशेतयोःसंधौसूक्ष्माकाशेब्रह्मांडाद्बहिरंतश्चयोविशेषेणसूर्यचंद्राग्निवागादिभ्योप्यतिशयेनस्वप्रकाशापरिच्छिन्नस्वभावत्वाद्भाति ॥ तत्कुतः ॥ यतोयमवभासात्मासूर्यादी
नामप्यवभासकआत्माच ॥ येनसूर्यस्तपतितेजसेद्धः आत्मैवास्यज्योतिर्भवति ज्योतिषामपितज्ज्योतिरित्यादिश्रुतिस्मृतिभ्यः ॥ तस्मैसर्वात्मनेसर्ववस्तूनांपारमार्थिकस्वरूपभू
तायनमइत्यर्थः ॥ अथवादिविद्योतनैकरसेभूमानंदात्मकेतुर्यस्वरूपेतथाअवस्थाद्वयोत्पत्तिभूमावव्याकृताकाशेबहिर्बहिःप्रज्ञभोग्येजागरेंतःअंतःप्रज्ञभोग्येस्वप्नेचकारात्तत्सं
धौमरणमूर्छाद्यवस्थासुचयोविविधोभातिस्थूलसूक्ष्मकारणाभिमानितयातद्भोक्तृतयातत्साक्षितयानिष्प्रपंचपूर्णानंदचिन्मात्रस्वभावेनचेत्यर्थः ॥ तर्हिकिंनानारसएवनेत्याह ॥
अवभासात्मेति ॥ चिन्मात्रस्वभावइत्यर्थः ॥ तस्मैदृश्यस्यदृगव्यतिरेकात्सर्वश्चासावात्माचसाविद्यत्वनिरविद्यत्वाभ्यामितिसर्वात्मनेनमइत्यर्थः॥ अथवादिविसार्वज्ञ्यादिसंपन्न

दिविभूमौतथाकाशेबहिरंतश्चमेविभुः॥ योविभात्यवभासात्मातस्मैसर्वात्मनेनमः॥ १ ॥

त्वात्द्योतमानेकारणोपाधौतथाकर्मबीजोद्भवभूमौकार्योपाधौतथाकाशेअंतरालेआसमंतात्काशतेइतिव्युत्पत्त्यास्वरूपप्रकाशबहुलेवाजीवन्मुक्तिदशायांबहिर्निरुपाधिस्वरू
पेंऽतःकार्यकारणोपाध्यंतर्गतमायांतःकरणवृत्तिभेदेषुचयःअवभासैकस्वभावोविभातितस्मैसर्वोपाधिनिष्कृष्टायात्मनेनमइत्यर्थः ॥ अथवादिविद्योतनात्मकेतेजसिभूमौपृथि
व्यामाकाशेव्योम्निअंतःआंतरालिकयोःसलिलपवनयोर्बहिर्बहिर्भूतेअव्याकृतेचकारान्निरुपाधिकत्वाच्छब्दाद्ययोग्यपारमार्थिकरूपेचयोनुवृत्तःसन्मात्रस्वभावोविभातिस
एवावभासमानःप्रत्यगात्मातस्मैसर्वात्मनेपूर्णानंदस्वरूपायमेमह्यंनमइत्यर्थः॥ अथवादिविदेवलोकेबहिस्तटस्थतयापूज्यदेवतेश्वराद्यात्मनाभूमौभूलोकेअंतःदेहांतर्वर्तितयापूज
कात्मनाआकाशेअंतरालेचक्रियाफलसाधनाद्यात्मनामेममस्वरूपानवभासदशायांपरिच्छेदेनान्यथाभातोपियःसंप्रतितत्त्वदृष्ट्युदयात्स्पष्टमवभासमानात्माविभुस्त्रिविधपरि
च्छेदशून्योविस्पष्टंभातितस्मैसर्वात्मनेसर्वशब्दःपूर्णपरस्तस्मात्तत्सर्वमभवदितिवत्पूर्णानंदस्वरूपायनमइत्यर्थः॥ अथवादिविउपरिष्टाद्भूमावधस्तादाकाशेंऽतरालेबहिःप्रागादिदि
क्षुविदिक्षुचअंतःशरीरांतःचकारात्तत्पूर्वोत्तरकालयोर्यःअवभासात्माचिदेकरसोविभातितत्त्वदृशोमम ॥ आत्मैवाधस्तादात्मोपरिष्टादित्यादिश्रुतेः ॥ तस्मैसर्वात्मनेआत्मैवेदंसर्व
मितिसर्वप्रपंचबाधेनपरिशेषितायपरमात्मनेनमइत्यर्थः ॥ एवमर्थांतराण्यपियथाबुद्धिवैभवमूहनीयानि ॥ अत्रार्थात्तथाविधंब्रह्मैवाज्ञातंशास्त्रस्यविषयः ॥ ज्ञानात्तद्भावस्थि
तिश्चपरमनिर्वाणरूपंप्रयोजनमितिसूचितम् ॥ उत्तरत्राप्येतदेवस्पष्टंदर्शयिष्यते ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अधिकारीकथोपायसंबंधोधातृशासनात् ॥ निर्माणमस्यग्रंथस्यमुक्तचर्याचकीर्त्यते ॥१॥ अथास्मिन्ग्रंथेकोऽधिकारीकिमज्ञउताज्ञः ॥ नाद्यः ॥ तस्येदेहादावात्मबुद्धिदार्ढ्ये नरागितयाचमुमुक्षाविरहात् ॥ नचविषयदोषदर्शनाज्जननमरणादिदुःखदर्शनाच्चतस्यैववैराग्योदयेमुमुक्षासंपत्तावधिकारइतिवाच्यम् ॥ रागिणामुत्कटविषयरिरक्षिषादर्शनेन सत्स्वेवविषयेषुतद्दोषनिर्हरणोपायान्वेषितयाविशिष्टविषयान्वेषितयाचैहिकामुष्मिकतदुपायेच्छुतयाप्रवृत्तेः ॥ नापिज्ञः ॥ तस्यकृतकृत्यतयाग्रंथसाध्यप्रयोजनालिप्सुतयाग्रं थेप्रवृत्त्यनुपपत्तेरित्याशंक्यविशिष्टाधिकारिणंदर्शयति ॥ अहमिति ॥ उतेत्यप्यर्थे ॥ सत्यंनात्यंतमज्ञोनापिज्ञोऽस्मिन्शास्त्रेऽधिकारीकिंतुयस्याहंबद्धोस्मिन्संसारेऽनादिकाला दारभ्यकारानिगडादिबद्धइवपरिच्छेदपारवश्यजन्मजरामरणादिदुःखमनुभवन्शोचामि आत्यंतिकशोकतरणेचात्मज्ञानमेवोपायस्तरतिशोकमात्मविदितिश्रुतेः॥तेनात्मज्ञानेना हंविमुक्तःस्यामित्युत्कटजिज्ञासासहितोनिश्चयोऽस्तिसविनयोपायनादिनागुरुमुपगतोऽस्मिन्शास्त्रेऽधिकारवान् ॥शास्त्रश्रवणादिफलभागित्यर्थः॥तथाचाज्ञस्यैवबद्धतरसुकृतैः क्षीणरागादिदोषस्यविवेकोदयाज्जिज्ञासोरधिकारइतिभावः ॥ २ ॥ ननुक्षीणरागादिदोषस्त्रैवर्णिकश्चेत्ससंन्यासपूर्वकवेदांतश्रवणएवाधिकारी ॥ पूर्वकांडार्थानुष्ठानस्यचित्तशु द्धिद्वारोत्तरकांडाधिकारप्रापकत्वस्यतमेतंवेदानुवचनेनेत्यादिश्रुतिसिद्धत्वात् ॥ नचात्रैवर्णिकस्यात्राधिकारः ॥ तस्यनावेदविन्मनुतेतंबृहंतमित्यधिकारनिषेधात्तस्मान्नाधिका रीसुलभइतिचेन्न ॥ स्मार्तकर्मवदुपपत्तेः ॥ यथात्रैवर्णिकस्यत्रेताग्निसाध्येकर्मण्यधिकारेप्यनाहिताग्निसाधारणःस्मार्त्तकर्माधिकारोप्यस्त्येवंतथाश्रौतज्ञानाधिकारिणोप्यसं

वाल्मीकिरुवाच॥ ॥अहंबद्धोविमुक्तःस्यामितियस्यास्तिनिश्चयः॥नात्यंतमज्ञोनोतज्ञःसोस्मिञ्छास्त्रेधिकारवान् ॥ २॥ कथोपा यान्विचार्यादौमोक्षोपायानिमानथ॥योविचारयतिप्राज्ञोनसभूयोभिजायते॥ ३॥

न्यासिमुमुक्षुसाधारणोऽस्मिन्नपिग्रंथेऽस्त्यधिकारः ॥ अज्ञानावधिकश्च॥अस्यापिस्मृतिवद्वेदोपबृंहणत्वात्॥ तथाचोक्तम् ॥वेदवेद्येपरेपुंसिजातेदशरथात्मजे॥ वेदःप्राचेतसादा सीत्साक्षाद्रामायणात्मनेति॥तत्रपूर्वकांडस्यरामचरितकथाव्याजेनोपबृंहणंषट्कांडंसोत्तरंपूर्वरामायणमुत्तरकांडस्यषट्प्रकरणमिदंसोत्तरमिति ॥ यथाचकेषुचित्स्मार्त्तकर्मसु स्त्रीशूद्रसाधारणोऽधिकारस्तथाऽस्यापिश्रवणेपुराणवत् ॥ श्रावयेच्चतुरोवर्णान्कृत्वाब्राह्मणमग्रतः ॥ जनश्चशूद्रोपिमहत्त्वमीयादित्यादिवचनालिंगात् ॥ नावेदविन्मनुतेतंबृहंतं त्वौपनिषदंपुरुषंपृच्छामीत्यादिवचनंत्ववेदविदःश्रौतज्ञानानधिकारपरमितिकेचित् ॥ अपरोक्षज्ञानापर्यवसानपरमित्यन्ये ॥ वेदपूर्वकत्वप्राशस्त्यपरमित्यपरे ॥ सर्वथाप्यस्त्येवा न्येषामपिपौराणिकसाधारणेज्ञानेऽधिकारः॥ सहिसर्वैर्विजिज्ञास्यआत्मावर्णैस्तथाश्रमैरित्यादिवचनेभ्यः ॥ तत्रश्रौतज्ञानेपूर्वकांडोक्तधर्मानुष्ठानजन्याचित्तशुद्धिरिवेहापिपूर्व रामायणोपदर्शितस्वस्ववर्णाश्रमोचितनिष्कामधर्मानुष्ठानजाचित्तशुद्धिर्जिज्ञासोत्पादनद्वाराहेतुरितिपूर्वोत्तररामायणयोर्हेतुहेतुमद्भावसंगतिंदर्शयन्सर्वानर्थनिवृत्तिरूपंप्रयोज नांतरमाह ॥ कथोपायानिति ॥ कथाएवधर्मतत्त्वज्ञानानुष्ठानेश्वरप्रपत्तिषुज्ञानाधिकारप्रापकेषुउपायोयस्मिन्ग्रंथेसपूर्वरामायणग्रंथःकथोपायः॥ कांडभेदाभिप्रायंबहुवच नम् ॥ तानादौविचार्यतदर्थानुष्ठानप्राप्ताधिकारःसन्योऽधिकारीमान्वक्ष्यमाणषट्प्रकरणरूपान्मोक्षोपायान्विचारयतिप्राज्ञःप्रज्ञाप्लुष्टकामकर्मवासनाऽज्ञानबीजःसभूयोनाभि जायतेजन्मादिदुःखभाङ्नभवतिविमुच्यतइत्यर्थः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन्सांप्रतिकेषट्पंचाशत्सहस्रसंमितेरामायणेअनादिकालाभ्यस्तरागादिदोषोच्छेदक्षमत्वान्महाबलान्रामकथारूपांश्चतुर्विंशतिसहस्रमितान्षट्कांडानहंकृत्वेत्युत्तरेणसं
बंधः ॥ ४ ॥ शिष्यविशेषणान्यधिकारसंपत्तिद्योतकानि ॥ एकएवाग्रंग्रहणधारणप्रचारपटुःप्रधानशिष्योयस्यसतथा ॥ अनुग्रहप्रेमसमाहितचित्तोवा ॥ अर्थिनइतिभरद्वा
जस्यापिविशेषणम् ॥ ५ ॥ एतेमत्तःप्राप्ताःपूर्वरामायणरूपाः ॥ उदाहृताःकीर्त्तिताः ॥ ६ ॥ वरव्याजेनजगदुद्धारसाधनंमोक्षशास्त्रंकरणीयमितिमहानाशयोऽभिप्रायोयस्य
सतथा ॥ ७ ॥ भूतंपूर्वमुत्पन्नम् ॥ भव्यमुत्पत्स्यमानम् ॥ अद्यपूर्वरामायणार्थानुष्ठानजन्यचित्तपरिशुद्धिकाले ॥ जनताअधिकारिजनसमूहः ॥ ८ ॥ अत्रास्मिन्पृष्टेऽर्थे ॥
यद्यस्मात्समारब्धंनतुकृत्स्नंकृतम् ॥ ९ ॥ श्रुतेअर्थात्कृत्स्नसिद्ध्यनंतरमितिगम्यते ॥ सेतुंदृष्ट्वासमुद्रस्यब्रह्महत्यांव्यपोहतीत्यादिस्मृतिप्रसिद्धानंतगुणशालिना ॥ १० ॥ ११ ॥

अस्मिन्रामायणेरामकथोपायान्महाबलान् ॥ एतांस्तुप्रथमंकृत्वापुराहमरिमर्दन ॥ ४ ॥ शिष्यायास्मिविनीतायभरद्वाजायधीम
ते ॥ एकाग्रोदत्तवांस्तस्मैमणिमब्धिरिवार्थिने ॥ ५ ॥ ततएतेकथोपायाभरद्वाजेनधीमता ॥ कस्मिंश्चिन्मेरुगहनेब्रह्मणोग्रउदाहृताः
॥ ६ ॥ अथास्यतुष्टोभगवान्ब्रह्मालोकपितामहः ॥ वरंपुत्रगृहाणेतितमुवाचमहाशयः ॥ ७ ॥ ॥ भरद्वाजउवाच ॥ ॥ भगवन्भूतभ
व्येशवरोयंमेद्यरोचते ॥ येनेयंजनतादुःखान्मुच्यतेतदुदाहर ॥ ८ ॥ ॥ श्रीब्रह्मोवाच ॥ ॥ गुरुंवाल्मीकिमत्राशुप्रार्थयस्वप्रयत्नतः ॥ ते
नेदंयत्समारब्धंरामायणमनिंदितम् ॥ ९ ॥ तस्मिञ्छ्रुतेनरोमोहात्समग्रात्संतरिष्यति ॥ सेतुनेवांबुधेःपारमपारगुणशालिना ॥ १० ॥
श्रीवाल्मीकिरुवाच ॥ ॥ इत्युक्त्वासभरद्वाजंपरमेष्ठीमदाश्रमम् ॥ अभ्यागच्छत्समंतेनभरद्वाजेनभूतकृत् ॥ ११ ॥ तूर्णंसंपूजितोदेवः
सोर्घ्यपाद्यादिनामया ॥ अवोचन्मांमहासत्वःसर्वभूतहितेरतः ॥ १२ ॥ रामस्वभावकथनादस्माद्वरमुनेत्वया ॥ नोद्वेगात्सपरित्याज्य
आसमाप्तेरनिंदितात् ॥ १३ ॥ ग्रंथेनानेनलोकोयमस्मात्संसारसंकटात् ॥ समुत्तरिष्यतिक्षिप्रंपोतेनेवाशुसागरात् ॥ १४ ॥ वक्तुंतदेवमे
वार्थमहमागतवानयम् ॥ कुरुलोकहितार्थंत्वंशास्त्रमित्युक्तवानजः ॥ १५ ॥

यद्यपिस्रष्टारजःप्रधानस्तथापिजगदुद्धारोद्भूतकरुणत्वान्महासत्वःसत्वगुणसंपन्नोऽतएवसर्वभूतहितेरतः ॥ १२ ॥ ल्यब्लोपेपंचमी ॥ रामस्वभावकथनंप्रस्तुत्येत्यर्थः ॥ उद्वेगाद्वि
स्तृतग्रंथनिर्माणक्लेशप्रयुक्तात्सग्रंथआसमाप्तेर्नपरित्याज्यः ॥ अवश्यंसमग्रोनिर्मातव्यइतियावत् ॥ १३ ॥ संसारसंकटादित्यपादानपंचम्यासमुत्तीर्णस्यात्यंतिकंसंसारविश्ले
षंदर्शयति ॥ क्षिप्रंक्षेपःप्रेरणंतत्स्वभावेनपोतेन ॥ व्यत्ययेनप्रथमा ॥ अन्यथाआशुपदेनपुनरुक्त्यापत्तेः ॥ क्षिप्रपोतेनेतिपाठश्चेन्नकापिचिंता ॥ आशुज्ञानोदयसमकालमेव
ननुपोतेनसागरसमुत्तरणमेवाप्रसिद्धमितिकथंदृष्टांतः ॥ एवंतर्हिसागरेपतितस्यपोतेनोद्धरणमेवात्रसमुत्तरणंविवक्षितमाशुपदस्वारस्यात् ॥ अतएवापादानपंचम्येवकृतेति ॥
॥ १४ ॥ तत्तस्माद्धेतोर्भरद्वाजद्वाराआज्ञासंदेशसंभवेऽप्येवमर्थंवक्तुमयंजगन्मान्योहमेवागतवानितिसंबंधः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मपादस्पर्शेनपुण्यतमत्वमाश्रमस्य ॥ १६ ॥ स्वस्थयाधियेत्युक्तेःपूर्वंब्रह्मागमनहर्षविस्मयव्यग्रचित्तत्वाद्ब्रह्मवाक्यमर्थतोनावधारितमितिगम्यते ॥ अतएवापृच्छमित्याह ॥ १७ ॥ १८ ॥ यथापूर्वंकथोपायरामायणंकृतंतथामोक्षोपायरामायणमितिशेषः ॥ १९ ॥ रामःकथंव्यवहृतोव्यवहृतवान्‌किमज्ञःशोचन्नितरवद्वुतजीवन्मुक्तवत् ॥ २० ॥ चकाराद्दशरथपरिग्रहः ॥ चकारापिशब्दद्वयंतत्परिवारसमुच्चयार्थम् ॥ २१ ॥ स्फुटंमद्बोधपर्यवसितम् ॥ जनतयात्वदुपदेशश्रवणकृतार्थजनसमूहेन ॥२२ ॥ सादरमुपायनाहरणोपगमनप्रणतिप्रार्थनाद्यादरसहितम् ॥ २३ ॥ संमोहआत्मतत्त्वापरिज्ञानंतद्रूपंमलंपंकम् ॥ अलमितिवाछेदः ॥ २४ ॥ असंसक्तयामिथ्येतिनिश्चयादनभिनिविष्टया ॥ २५ ॥ महामनाअपरिच्छिन्नवस्तुनिवेशात्तथाविधचित्तः ॥ चकाराःपूर्ववत् ॥ २६ ॥ कृतास्त्राविरोधौरामसखायौ ॥ बोधपारंचरमंबोधंयदुत्तरंबोद्धव्यांतराप्रशिशेषः ॥ २७ ॥ सत्योयथार्थवक्ता ॥ इंद्रजिदयमन्यएवसुग्रीवामात्यः ॥ २८ ॥ अंतःसमनीरागचेतसोबहिस्तुयथाप्रारब्धंप्राप्तमनुवर्त्तमानाः ॥ २९ ॥ हुतंदत्तमितिश्रौतस्मार्त्तकर्मोपलक्षणम् ॥ गृहीतमुषितमितितत्तत्कालोचितलौकिकसद्व्यवहारोपलक्षणम् ॥ स्मृतमित्युभयगोचरपूर्वापरप्रतिसंधानोपलक्षणम् ॥ ३० ॥

ममपुण्याश्रमात्तस्मात्क्षणादंतर्द्धिमागतः ॥ मुहूर्त्ताभ्युत्थितःप्रोच्चैस्तरंगइववारिणः ॥ १६ ॥ तस्मिन्प्रयातेभगवत्यहंविस्मयमागतः ॥ पुनस्तत्रभरद्वाजमपृच्छंस्वस्थयाधिया ॥ १७ ॥ किमेतद्ब्रह्मणाप्रोक्तंभरद्वाजवदाशुमे ॥ इत्युक्तेनपुनःप्रोक्तंभरद्वाजेनतेनमे ॥ १८ ॥ ॥भरद्वाजउवाच ॥ ॥ एतदुक्तंभगवतायथारामायणंकुरु ॥ सर्वलोकहितार्थायसंसारार्णवतारकम् ॥ १९ ॥ मह्यंचभगवन्ब्रूहिकथंसंसारसंकटे ॥ रामोव्यवहृतोप्यस्मिन्भरतश्चमहामनाः ॥ २० ॥ शत्रुघ्नोलक्ष्मणश्चापिसीताचापियशस्विनी ॥ रामानुयायिनस्तेवामंत्रिपुत्रामहाधियः ॥ २१ ॥ निर्दुःखितांयथैतेनुप्राप्तास्तद्ब्रूहिमेस्फुटम् ॥ तथैवाहंभविष्यामिततोजनतयासह ॥ २२ ॥ भरद्वाजेनराजेंद्रवदेत्युक्तोस्मिसादरम् ॥ तदाकर्त्तुंविभोराज्ञामहंवक्तुंप्रवृत्तवान् ॥ २३ ॥ शृणुवत्सभरद्वाजयथापृष्टंवदामिते ॥ श्रुतेनयेनसंमोहमलंदूरेकरिष्यसि ॥ २४ ॥ तथाव्यवहरप्राज्ञयथाव्यवहृतःसुखी ॥ सर्वासंसक्तयाबुद्ध्यारामोराजीवलोचनः ॥ २५ ॥ लक्ष्मणोभरतश्चैवशत्रुघ्नश्चमहामनाः ॥ कौसल्याचसुमित्राचसीतादशरथस्तथा ॥ २६ ॥ कृतास्त्रश्चाविरोधश्चबोधपारमुपागताः ॥ वसिष्ठोवामदेवश्चमंत्रिणोष्टौतथेतरे ॥ २७ ॥ धृष्टिर्जयंतोभासश्चसत्योविजयएवच ॥ विभीषणःसुषेणश्चहनुमानिंद्रजित्तथा ॥ २८ ॥ एतेष्टौमंत्रिणःप्रोक्ताःसमनीरागचेतसः ॥ जीवन्मुक्तामहात्मानोयथाप्राप्तानुवर्तिनः ॥ २९ ॥ एतैर्यथाहुतंदत्तंगृहीतमुषितंस्मृतम् ॥ तथाचेद्वर्त्तसेपुत्रमुक्तएवासिसंकटात् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युक्तितत्त्वनिश्चयादंतःसमरसत्वम् ॥ उदारसत्वोदृढीकृतोत्कृष्टज्ञानबलः ॥ इष्टवियोगजंदुःखंशोकः ॥ दीनःकृपणस्तद्भावोदैन्यम् ॥ तयोर्मूलमभिमानज्वरःसगतोयस्य ॥ निरतिशयानंदात्मनास्थितःसन्नित्यतृप्तः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठतात्पर्यप्रकाशेवै० द्वितीयःसर्गः ॥ २ ॥ ॥७॥ ॥ दृश्यसंमार्जनोपायोवासनाभेदलक्षणम् ॥ रामस्यतीर्थयात्राचविस्तरेणात्रवर्ण्यते ॥ १ ॥ यथारामादयोजीवन्मुक्ताव्यवहृतवंतस्तथात्वंव्यवहरेत्युक्तोजीवन्मुक्तस्थितिप्राप्त्युपायंरामस्यतत्प्राप्तिक्रमोपवर्णनश्रवणद्वारैवजिज्ञासमानोभरद्वाजःपृच्छति ॥ जीवन्मुक्तेति ॥ राघवमादितःकृत्वावर्ण्यत्वेनप्रधानीकृत्यजीवन्मुक्तस्थितिंकथयेतिसंबंधः ॥ अथवाराघवंक्रमाज्जीवन्मुक्तिस्थितिंजीवन्मुक्तावस्थंकृत्वाकल्पयित्वामेआदितःकथययथायेनक्रमेणाहंनित्यंसुखीभविष्यामीतिसंबंधः ॥ अथवाराघवसंवादकथायामादितःप्रष्टृत्वेनवसिष्ठंचवक्तृत्वेनकृत्वेत्यर्थः ॥ तथाचजनकयाज्ञवल्क्यौकल्पयित्वायथाश्रुतिःस्वयमेवसंवादकथयातत्त्वंबोधयतितथात्वमपिबोधयेत्यर्थः ॥ तथाचात्रतत्त्वज्ञत्वेनकल्पितानांदशरथादीनांपूर्वरामायणेमूढचर्यामुक्त्यभावदर्शनेनित्यमुक्तस्यचरामस्यतस्यहनदेवाश्वनाभूत्याईशतइत्यादिश्रुतिविरुद्धशापनिमित्ताज्ञत्वादिवर्णनेचनक्षतिरनादेर्जीवस्यब्रह्माभेदबोधनायश्रुतौब्रह्मणएवकार्योपाधिप्रवेशेनागंतुकजीवभावकल्पनवदविरोधोपपत्तेः ॥१ ॥ एवंवाल्मीकिःपृष्टोलक्षणस्वरूपसाधनफलैर्जीवन्मुक्तिस्थितिंविस्तरेणविवक्षुःप्रथमंसुखप्रतिपत्तयेसंक्षिप्यमुक्तिलक्षणस्वरूपेदर्शयति ॥ भ्रमस्येति ॥ हेसाधोआकाशेनैल्यवदत्यंतासंभावितस्यकल्पनयाजातस्यजागतस्यजगतःसंबंधिनोऽध्यासलक्षणस्यभ्रमस्यतन्मूलाविद्यावासनोच्छेदेनापुनःस्मरणंयथाभवतितथाविस्मरणंयत्तदेववरंसर्वोत्कृष्टंमुक्तिलक्षणंस्वरूपंचमन्येप्रमाणानुभवाभ्यांनिश्चितवानस्मीत्यर्थः ॥ यद्यपिपरोक्षज्ञानिनोपिसुषुप्तौनिर्विकल्पसमाधौचदृश्यविस्मरणमस्तितथापितन्नापुनःस्मरणम् ॥ अथवापुनःस्मर्यतेयेनांतःकरणेनतत्पुनःस्मरणंनविद्यतेयस्मिंस्तत्तथाविस्मरणंस्मरणाभावः ॥ द्वैतप्रतिभासमात्राभावोपलक्षणमेतत् ॥ अथवाविस्मरणमिवविस्मरणम् ॥ यथाविस्मृतविषयस्यसत्येवानुभवितर्यप्रतीतिस्तथासत्येवचैतन्येदृश्याप्रतीतिरित्यर्थः ॥ तर्हिकिंपरमार्थसत्यस्यैवदृश्यस्यसांख्याभिमतमुक्ताविवाप्रतीतिमात्रंतन्नेत्याह ॥ भ्रमस्येति ॥ अध्यस्तस्येत्यर्थः ॥ कथंतस्यभ्रमत्वंसंस्काराजन्यत्वादित्याशंक्याह ॥ जागतस्येति ॥ पूर्वपूर्वजगद्व्यवहारजन्यसंस्कारपरिनिष्ठितस्येत्यर्थः ॥ ननुतर्हिदोषजत्वाभावान्निरधिष्ठानत्वाच्चनभ्रमत्वमित्याशंक्याह ॥ आकाशवर्णवज्जातस्येति ॥ यथादूरत्वाविमर्शदोषजत्वादाकाशवर्णभ्रमस्तद्वदविद्यादोषाद्ब्रह्मणिजगद्भ्रमइत्यर्थः ॥ तथाचात्यंतिकदृश्योच्छेदस्तल्लक्षणंतदुपलक्षितचिन्मात्रावस्थितिःस्वरूपमित्यर्थः ॥ २ ॥

अपारसंसारसमुद्रपातीलब्ध्वापरांयुक्तिमुदारसत्वः॥ नशोकमायातिनदैन्यमेतिगतज्वरस्तिष्ठतिनित्यतृप्तः॥ ३१॥ ॥इत्यार्षेवासिष्ठमहारामायणेवाल्मीकीयेदे० मोक्षोपायेषुवै० सूत्रपातनिकोनामद्वितीयःसर्गः॥ २॥ ॥७॥ ॥भरद्वाजउवाच॥ ॥जीवन्मुक्तस्थितिंब्रह्मन्कृत्वाराघवमादितः॥ क्रमात्कथयमेनित्यंभविष्यामिसुखीयथा॥ १॥ ॥श्रीवाल्मीकिरुवाच॥ ॥भ्रमस्यजागतस्यास्यजातस्याकाशवर्णवत्॥ अपुनःस्मरणंमन्येसाधोविस्मरणंवरम्॥ २॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्येइत्यनेनतयोःस्वानुभवसिद्धत्वंदर्शितंतर्हस्माभिस्तत्कुतोनानुभूयतेतत्राह ॥ दृश्येति ॥ दृश्यस्यात्यंताभावबोधोबाधस्तंविना ॥ ततउक्तलक्षणंस्वरूपंच ॥ अननुभवस्यका
लतोदेशतश्चव्यापकत्वप्रदर्शनायकदाचित्केनचिदिति ॥ दृश्यबाधस्तर्हिकेनहेतुनातमाह ॥ स्वबोधइति ॥ सर्वजगदधिष्ठानप्रत्यगभिन्नात्मतत्त्वसाक्षात्कारादेवसइत्यतस्तत्सा
क्षात्कारोन्विष्यतामुपायेनसाध्यतामित्यर्थः ॥ ३ ॥ तर्हितस्यकउपायस्तत्राह ॥ सचेति ॥ इहास्मिन्शास्त्रेअधिगतेसतीतिशेषः ॥ आकर्णयसिचेद्यावत्तत्त्वनिर्णयमितिशेषः
॥ ४ ॥ उक्तमर्थमेवस्फुटतरमाह ॥ जगदितिद्वाभ्यां ॥ अमुनाएतद्ग्रंथोपदर्शितेन ॥ ५ ॥ अनुभूयतइत्युक्तोऽनुभवःकिमात्मचैतन्यमेवोतान्यः ॥ नतावदन्यः ॥ चिद्यतिरिक्त
स्यजडतयाविषयतयाचानुभवत्वायोगात् ॥ आत्मैवचेत्सपूर्वमेवास्तीतिकिंशास्त्रेणेत्याशंक्याह ॥ दृश्यमिति ॥ सत्यमात्मैवानुभवस्तथाप्यसौदृश्यसहकृतोनतदनुभवःकिंतुम
नसोवृत्तिरूपेणात्मतत्त्वसाक्षात्कारबोधेनाविद्यानाशात्तदुपादानकदृश्यमार्जनंदृश्यंकालत्रयेपिनास्तीत्येवंरूपंसंपन्नंचेन्नित्यसिद्धात्मरूपापिपरानिर्वाणनिर्वृतिस्तस्मात्तत्त्वज्ञा

दृश्यात्यंताभावबोधंविनातन्नानुभूयते॥ कदाचित्केनचिन्नामस्वबोधोन्विष्यतामतः॥ ३ ॥ सचेहसंभवत्येवतदर्थमिदमाततम्॥ शा
स्त्रमाकर्णयसिचेत्तत्त्वमाप्स्यसिनान्यथा॥ ४ ॥ जगद्भ्रमोयंदृश्योपिनास्त्येवेत्यनुभूयते॥ वर्णोव्योम्नइवाखेदाद्विचारेणामुनानघ॥ ५॥
दृश्यंनास्तीतिबोधेनमनसोदृश्यमार्ज्जनम्॥ संपन्नंचेत्तदुत्पन्नापरानिर्वाणनिर्वृतिः॥ ६॥ अन्यथाशास्त्रगर्त्तेषुलुठतांभवतामिह॥ भव
त्यकृत्रिमाज्ञानांकल्पैरपिननिर्वृतिः॥ ७॥ अशेषेणपरित्यागोवासनानांयउत्तमः॥ मोक्षइत्युच्यतेब्रह्मन्सएवविमलक्रमः॥८॥ क्षीणा
यांवासनायांतुचेतोगलतिसत्वरम्॥ क्षीणायांशीतसंतत्यांब्रह्मन्हिमकणोयथा॥ ९॥

नादुत्पन्नेवभवतीतिकेवलस्तद्वारास्वरूपभूतोप्यनुभवःशास्त्रफलमित्यर्थः ॥ ६ ॥ ननुशास्त्रांतरोपदर्शितोपायैरेवमुक्तिःकिंनस्यात्तत्राह ॥ अन्यथेति ॥ उक्तोपायापरिग्रहेअ
कृत्रिमाअजन्याअनादिरज्ञानंअज्ञायेषांअनात्मशास्त्रगर्त्तेषुलुठतांरागांधपतनहेतुगर्त्तप्रायतत्तच्छास्त्रबोधितोपायैरैहिकामुष्मिकविषयासक्त्याप्रवर्त्तमानानांअतएवतदुपभो
गायपुनःपुनरिहसंसारेभवतांजन्मगृह्णतांपुरुषापसदानामनंतैर्ब्रह्मकल्पैरपिनिर्वृतिर्विश्रांतिसुखंनास्ति ॥ अनाद्यज्ञानस्यज्ञानातिरिक्तसाधनसहस्रैरप्यनिवृत्तेरितिभावः ॥ ७॥ न
नुउपासनाद्युपायांतरसाध्याःसालोक्यादयोऽन्येपिमोक्षाःप्रसिद्धास्तैस्तेषांकथंननिर्वृतिस्तत्राहाशेषेणेति ॥ वासनानांजन्मबीजानामशेषेणयःपरित्यागोमूलोच्छेदेनात्यंतोच्छे
दःसमुख्योमोक्षः ॥ मुचधातोर्बंधनिवृत्तौरूढत्वाद्वासनानामेवमुख्यबंधत्वात्सालोक्यादौतदभावान्मोक्षशब्दोगौणइतिसमुख्यएवविमलैर्विगताविद्यादिमलैःक्रम्यतेनान्यः ॥
कर्मभिरुपासनैःश्रवणादिभिश्चदिनेदिनेचित्तवैमल्यमेवसर्ववासनाक्षयांतंसाधनक्रमोयस्यतथाविधइतिवार्थः ॥ ८ ॥ ननुवासनापगमेपितद्धेतोर्मनसःसत्वात्पुनर्वासनाउत्पत्स्यं
तेततोबंधोपिस्यादित्याशंक्याह ॥ क्षीणायामिति ॥ मनसोवासनापुंजरूपत्वादित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसिनष्टेपिस्थूलदेहएवबंधःस्थास्यतीत्याशंक्याह ॥ अयमिति ॥ भूतपंजरोभूतसमुदायारब्धः ॥ भूतानांप्राणिपक्षिणांपंजरस्थानीयोवा ॥ तथाचवासनाक्षयेसोपिनिवर्त्तत इत्यर्थः ॥ १० ॥ एवमुपोद्घातेनपरांमुक्तिमुपवर्ण्यप्रस्तुतांजीवन्मुक्तिविवक्षुस्तदर्थंवासनाद्वैविध्यमाह ॥ वासनेति ॥ ११ ॥ तत्रमलिनांलक्षयति ॥ अज्ञानेति ॥ वासनाबीजानांप्ररोहेअज्ञानंसुक्षेत्रंतस्मिन्सुघनाकाराविषयानुसंधानाभ्यासोपचिताकारावासनाबीजम् ॥ रागद्वेषादिभिरुपचितत्वात् ॥ घनोनिबिडोऽहंकारउपसेचकःक्षेत्रिकस्तेनहिसा वर्ध्यमानासंतन्यमानाचशालतेशोभते ॥ १२ ॥ शुद्धांलक्षयति ॥ पुनरिति ॥ यथाबीजांतःसूक्ष्माअंकुराःसंतएवकालजलादिसंबंधादाविर्भवंतितथावासनांतर्भाविजन्मपरंपराःसत्यएवकामकर्मादिनिमित्तवशादाविर्भवंति अत्यंतासतोजन्मायोगात्तत्रतत्त्वज्ञानेनाविद्याक्षेत्रदाहेनांतर्गतजन्मांकुरनाशेपिस्वपरप्रारब्धेनप्रतिबद्धाभृष्टबीजवद्देहधारण

अयंवासनयादेहोध्रियतेभूतपंजरः ॥ तनुनांतर्निविष्टेनमुक्तौघस्तंतुनायथा ॥ १० ॥ वासनाद्विविधाप्रोक्ताशुद्धाचमलिनातथा ॥ मलिनाजन्मनोहेतुःशुद्धाजन्मविनाशिनी ॥ ११ ॥ अज्ञानसुघनाकाराघनाहंकारशालिनी ॥ पुनर्जन्मकरीप्रोक्तामलिनावासनाबुधैः ॥ १२ ॥ पुनर्जन्मांकुरंत्यक्त्वास्थितासंभृष्टबीजवत् ॥ देहार्थंध्रियतेज्ञातज्ञेयाशुद्धेतिचोच्यते ॥ १३ ॥ अपुनर्जन्मकरणीजीवन्मुक्तेषुदेहिषु ॥ वासनाविद्यतेशुद्धादेहेचक्रइवभ्रमः ॥ १४ ॥ येशुद्धवासनाभूयोनजन्माऽनर्थभाजनम् ॥ ज्ञातज्ञेयास्तउच्यंतेजीवन्मुक्तामहाधियः ॥ १५ ॥ जीवन्मुक्तिपदंप्राप्तोयथारामोमहामतिः ॥ तत्तेहंशृणुवक्ष्यामिजरामरणशांतये ॥ १६ ॥ भरद्वाजमहाबुद्धेरामक्रममिमंशुभम् ॥ शृणुवक्ष्यामितेनैवसर्वंज्ञास्यसिसर्वदा ॥ १७ ॥ विद्यागृहाद्विनिष्क्रम्यरामोराजीवलोचनः ॥ दिवसान्यनयद्गेहेलीलाभिरकुतोभयः ॥ १८ ॥

मात्रप्रयोजनावासनाशिष्यतेसाशुद्धेत्यर्थः ॥ १३ ॥ उक्तमेवार्थंस्फुटयति ॥ अपुनरिति ॥ देहिष्विति ॥ देहधारणकार्येणतेष्वपिवासनासद्भावोऽनुमीयतइतिभावः ॥ १४ ॥ फलेनसहप्रस्तुतांजीवन्मुक्तिमाश्रयेणलक्षयति ॥ यइति ॥ तथाचतत्त्वज्ञानप्लुष्टजन्मांकुरशक्तिकवासनामात्रधृतशरीरत्वंजीवन्मुक्तलक्षणंफलितम् ॥ १५ ॥ तत्साधननिरूपणंप्रतिजानीते ॥ जीवन्मुक्तीति ॥ तथाविधंजीवन्मुक्तिपदंरामोयथायेनसाधनक्रमेणप्राप्तस्तद्वक्ष्यामि ॥ जरामरणोपलक्षितसर्वानर्थनिवृत्तिस्तत्फलमित्यर्थः ॥ १६ ॥ उक्तार्थमेवस्फुटयन्फलांतरमाह ॥ भरद्वाजेति ॥ एकविज्ञानेनसर्वविज्ञानमपितत्फलमित्यर्थः ॥ १७ ॥ विद्यागृहाद्ब्रह्मचर्याश्रमोचितगुरुकुलवासाद्विनिष्क्रम्येत्यर्थात्सर्वविद्यास्थानग्रहणोत्तरमितिगम्यते ॥ नास्तिकुतोऽपिभयंयस्यसतथोक्तः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विगतज्वरमितिसौराज्याव्प्रजानांज्वरादिपीडापिनास्तिकिंवाच्यमन्याःपीडानसंतीतिद्योतनार्थम् ॥ १९ ॥ रामस्यमनस्तीर्थपुण्याश्रमश्रेणीर्द्रष्टुमुत्कंठितमभूदितिसंबंधः ॥ पूर्वश्लोकस्थसप्तम्यंतानामप्यत्रैवान्वयः ॥ २० ॥ नन्वध्यात्मशास्त्रेऽस्मिंस्तीर्थयात्रोपवर्णनस्यवक्ष्यमाणमृगयोपवर्णनस्यचकःसंबंधः ॥ नचरामचरित्रत्वादेवात्रोपवर्णनम् ॥ रामजन्मादेरप्यत्रैववर्णनीयत्वापत्तेःपूर्वरामायणवैयर्थ्याच्चेतिचेदत्रोच्यते ॥ कथोपायान्विचार्येत्यत्रस्वस्ववर्णोचितयज्ञादिकर्मजन्याचित्तशुद्धिर्ब्रह्मविद्याधिकारेउपयुज्यत इत्युक्तम् ॥ यस्तुवयोविद्याद्यसंपत्त्यायज्ञाद्यनुष्ठातुमक्षमस्तस्यतीर्थयात्रादिनापियज्ञादिफलचित्तशुद्ध्याधिकारःसिद्ध्यति ॥ एतेभौमाम्मयायज्ञास्तीर्थरूपेणनिर्मिताइतिवचना

अथगच्छतिकालेतुपालयत्यवनिंनृपे ॥ प्रजासुवीतशोकासुस्थितासुविगतज्वरम् ॥ १९ ॥ तीर्थपुण्याश्रमश्रेणीर्द्रष्टुमुत्कंठितंमनः ॥
रामस्याभूद्भृशंतत्रकदाचिद्गुणशालिनः ॥ २० ॥ राघवश्चिंतयित्वैवमुपेत्यचरणौपितुः ॥ हंसःपद्माविवनवौजग्राहनखकेसरौ ॥ २१ ॥
॥ श्रीरामउवाच ॥ ॥ तीर्थानिदेवसद्मानिवनान्यायतनानिच ॥ द्रष्टुमुत्कंठितंतातममेदंनाथमानसम् ॥ २२ ॥ तदेतामर्थितांपूर्वांसफ
लांकर्त्तुमर्हसि ॥ नसोस्तिभुवनेनाथत्वयायोर्थीनमानितः ॥ २३ ॥ इतिसंप्रार्थितोराजावसिष्ठेनसमंतदा ॥ विचार्यामुंचदेवैनंरामंप्रथ
ममर्थिनम् ॥ २४ ॥ शुभेनक्षत्रदिवसेभ्रातृभ्यांसहराघवः ॥ मंगलालंकृतवपुःकृतस्वस्त्ययनोद्विजैः ॥ २५ ॥ वसिष्ठप्रहितैर्विप्रैःशास्त्रज्ञै
श्वसमन्वितः ॥ स्निग्धैःकतिपयैरेवराजपुत्रवरैःसह ॥ २६ ॥ अंबाभिर्विहिताशीर्भिरालिंग्यालिंग्यभूषितः ॥ निरगात्स्वगृहात्तस्मात्तीर्थ
यात्रार्थमुद्यतः ॥ २७ ॥ निर्गतःस्वपुरात्पौरैस्तूर्यघोषेणवादितः ॥ पीयमानःपुरस्त्रीणांनेत्रैर्भृंगौघभंगुरैः ॥ २८ ॥ ग्रामीणललनालोलहस्त
पद्मापनोदितैः ॥ लाजवर्षैर्विकीर्णात्माहिमैरिवहिमाचलः ॥ २९ ॥

दितिसूचनायतीर्थयात्रोपवर्णनम् ॥ अतएवहिनरामंदृद्धवयस्कंपरिकल्प्यात्मजिज्ञासोपवर्णनंकृतमुक्तार्थसूचनानापत्तेः ॥ मृगयोपवर्णनंतुदृष्टकौतुकदर्शनोत्कंठायाअप्यात्म जिज्ञासाप्रतिबंधकत्वाद्यदितत्कौतुकानुभवमंतरेणसोत्कंठानापैतितर्हितदनुभूयैववातदसारतानिश्चयेनतदुत्कंठामपोह्यनिष्प्रत्यूहंश्रवणादिप्रतिष्ठोभवेदितिविशेषबोधनार्थमिति सर्वंसमंजसम् ॥ राघवएवमुक्तमर्थंचिंतयित्वापितुश्चरणौजग्राह ॥ जीवत्पितृकस्यपितृसन्निधौपित्राज्ञापूर्वमेवधर्माधिकारादितिभावः ॥ २१ ॥ नाथेतिस्वस्यपारतंत्र्यसूच नार्थम् ॥ २२ ॥ पूर्वांप्राथमिकीम् ॥ नमानितःअभिलषितार्थसंपादनेननसंतोषितः ॥ २३ ॥ अमुंचदेवनपुत्रविश्लेषदुःखान्नानुमेने ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ भृंगौघभं गुरैर्भ्रमरसमूहवच्चंचलैः ॥ अर्थात्कुसुमेष्वितिगम्यते ॥ २८ ॥ अपनोदितैःप्रेरितैः ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

आवर्जयन्दानमानादिनावशीकुर्वन् ॥ जंगलान्येवजांगलान्जीर्णारण्यानि ॥ ३० ॥ ददर्शेत्यस्यपावनानाश्रमाञ्छुभानित्यनेसर्वत्रसंबंधः ॥ ३१॥ आयतनानिदेवमुन्यायतनानि जनांतेषुलक्षणयाजनपदांतेषु ॥ ३२ ॥ ३३ ॥ वेर्णीकेवलाम् ॥ कृष्णवेणींकृष्णयासंभिन्नांताम् ॥ ३४ ॥ श्रीगिरिंश्रीशैलम् ॥ ३५ ॥ क्रमशप्रांसरः ॥ वडवावदनंहयपीवतीर्थम् ॥ ३६ ॥ महातीर्थमिर्तीद्रद्युम्नसरोविशेषणम् ॥ ३७ ॥ ३८ ॥ कुंजान्लतागृहान् ॥ कुलशैलाहिमवदादयः ॥ ३९ ॥ चकारोनुक्ततत्तत्स्थानसमुच्चयार्थः॥४०॥

आवर्जयन्विप्रगणान्परिशृण्वन्प्रजाशिषः॥ आलोकयन्दिगंतांश्चपरिचक्रामजांगलान्॥ ३० ॥ अथारभ्यस्वकात्तस्मात्क्रमात्कोशलमंडलात्॥ स्नानदानतपोध्यानपूर्वकंसददर्शह॥३१॥ नदीतीराणिपुण्यानिवनान्यायतनानिच॥ जंगलानिजनांतेषुतटान्यब्धिमहीभृताम् ॥ ३२ ॥ मंदाकिनीमिंदुनिभांकालिंदींचोत्पलामलाम् ॥ सरस्वतींशतद्रूंचचंद्रभागामिरावतीम् ॥ ३३ ॥ वेणींचकृष्णवेणींचनिर्विंध्यांसरयूंतथा॥ चर्मण्वतींवितस्तांचविपाशांबाहुदामपि॥ ३४॥ प्रयागंनैमिषंचैवधर्मारण्यंगयांतथा॥ वाराणसींश्रीगिरिंचकेदारंपुष्करंतथा॥ ३५॥ मानसंचक्रमसरस्तथैवोत्तरमानसम्॥ वडवावदनंचैवतीर्थवृंदंससादरम्॥ ३६॥ अग्नितीर्थंमहातीर्थमिंद्रद्युम्नसरस्तथा॥ सरांसिसरितश्चैवतथानदङ्दावलीम् ॥ ३७॥ स्वामिनंकार्तिकेयंचशालग्रामंहरिंतथा ॥ स्थानानिचचतुःषष्टिंहरेरथहरस्यच॥ ३८॥ नानाश्चर्यविचित्राणिचतुरब्धितटानिच॥ विंध्यमंदरकुंजांश्चकुलशैलस्थलानिच ॥ ३९॥ राजर्षीणांचमहतांब्रह्मर्षीणांतथैवच॥ देवानांब्राह्मणानांचपावनानाश्रमाञ्छुभान्॥ ४० ॥ भूयोभूयःसबभ्रामभ्रातृभ्यांसहमानदः॥ चतुर्ष्वपिदिगंतेषुसर्वानेवमहीतटान्॥ ४१ ॥ अमरकिन्नरमानवमानितःसमवलोक्यमहीमखिलामिमाम्॥ उपययौस्वगृहंरघुनंदनोविहृतदिक्शिवलोकमिवेश्वरः॥ ४२॥ ॥इत्यार्षेवा०वा०दे०मो०वै०तीर्थयात्राकरणंनामतृतीयःसर्गः॥ ३॥ ॥श्रीवाल्मीकिरुवाच॥ ॥रामःपुष्पांजलिव्रातैर्विकीर्णःपुरवासिभिः॥ प्रविवेशगृहंश्रीमाञ्जयंतोविष्टपंयथा॥ १ ॥

भूयोभूयइतिपूर्वदृष्टानामपिपरावृत्त्यौसंनिहितानांकौतुकान्महिमातिशयप्रकटनायवाभूयोगमनम् ॥ ४१ ॥ तत्रतत्रसन्निहितैरमरादिभिर्मानितःपूजितोरघुनंदनोऽखिलांजंबूद्वीपालिकांमहींसम्यगवलोक्यस्वगृहमयोध्यामुपययावितिसंबंधः ॥ ईश्वरःशिवः ॥ ४२ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेवैरा०तीर्थयात्राकरणंनामतृतीयःसर्गः ॥३॥ तीर्थयात्रागतस्यात्रसुहृदानंदनंगृहे ॥ रामस्याखेटचर्यादिव्यवहारश्चवर्ण्यते ॥ १ ॥ रामइति ॥ व्रातैःसमूहैः ॥ मंगलाचारार्थंविकीर्णः ॥ विष्टपंत्रिविष्टपम् ॥ नामैकदेशेनामग्रहणात् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमागतःप्रथमप्रवासादागतः ॥ २ ॥ मुहुःआलिंगितस्यतेषुसमुचितमभिवादप्रियाभिलापाद्याचरणंयस्यसतथोक्तः ॥ नममौस्वदेहइतिशेषः ॥ हर्षेणोत्फुल्लइतिभावः ॥ ३ ॥ तस्मिन्दशरथगृहेदाशरथेरामस्यप्रियकथनैःप्रियवाक्यैः आनंदिताजनाइतिशेषः ॥ मिथःअन्योन्यंदिशोजुघूर्णुर्बभ्रमुर्दिशिदिशिभ्रांतवंतः ॥ हर्षकृतव्यामोहाद्दिग्भ्रमंप्रापुरितिवार्थः ॥ दृष्टांतेप्येवम् ॥ अथवादिक्शब्देनतत्रस्थाजनालक्ष्यंते ॥ दाशरथेःप्रियकथाभिरुपलक्षितामिथःसमवेताउत्सवविशेषेमृदुवंशस्वनैःक्रीडंतइवबभ्रमुरित्यर्थः ॥ ४ ॥ मत्तैर्हृष्टैर्जनैरुत्कृष्टतयामुक्तःकलोगंभीरोयःकोलाहलस्तेनआकुलोव्याप्तः ॥ ५ ॥ इतस्ततोदृष्टान्देशाचारानितस्ततोवर्णयन्नितिवासुखमुवासेत्यन्वयः ॥ ६ ॥ प्रातरित्या

प्रणनामाथपितरंवसिष्ठंभ्रातृबांधवान् ॥ ब्राह्मणान्कुलवृद्धांश्चराघवःप्रथमागतः ॥ २ ॥ सुहृद्भिर्मातृभिश्चैवपित्राद्विजगणेनच ॥ मुहुरालिंगिताचारोराघवोनममौमुदा ॥ ३ ॥ तस्मिन्गृहेदाशरथेःप्रियप्रकथनैर्मिथः ॥ जुघूर्णुर्मधुरैराशाम्रृदुवंशस्वनैरिव ॥ ४ ॥ बभूवाथदिनान्यष्टौरामागमनउत्सवः ॥ सुखंमत्तजनोन्मुक्तकलकोलाहलाकुलः ॥ ५ ॥ उवाससमुखंगेहेततःप्रभृतिराघवः ॥ वर्णयन्विविधाकारान्देशाचारानितस्ततः ॥ ६ ॥ प्रातरुत्थायरामोसौकृत्वासंध्यांयथाविधि ॥ सभासंस्थंददर्शेंद्रसमंस्वपितरंतथा ॥ ७ ॥ कथाभिःसुविचित्राभिःसवसिष्ठादिभिःसह ॥ स्थित्वादिनचतुर्भागंज्ञानगर्भाभिरादृतः ॥ ८ ॥ जगामपित्रानुज्ञातोमहत्यासेनयावृतः ॥ वराहमहिषाकीर्णवनमाखेटकेच्छया ॥ ९ ॥ ततआगत्यसदनेकृत्वास्नानादिकंक्रमम् ॥ समित्रबांधवोभुक्तानिनायससुहृन्निशाम् ॥ १० ॥ एवंप्रायदिनाचारोभ्रातृभ्यांसहराघवः ॥ आगत्यतीर्थयात्रायाःसमुवासपितुर्गृहे ॥ ११ ॥ नृपतिसंव्यवहारमनोज्ञयासुजनचेतसिचंद्रिकयानया ॥ परिनिनायदिनानिसचेष्टयास्तुतसुधारसपेशलयानघ ॥ १२ ॥ ॥ इत्यार्षेवा० म० वा० दे० मो० वै० दिवसव्यवहारनिरूपणंनामचतुर्थःसर्गः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

दिवीप्साभिप्रायम् ॥ तथेतिपूर्वश्लोकोक्तसमुच्चयार्थम् ॥ ७ ॥ सरामोवसिष्ठादिभिःसहस्थित्वाअनुरूपाभिःकथाभिरादृतःसन्दिनचतुर्भागम् ॥ अत्यंतसंयोगेद्वितीया ॥ दिनस्यचतुर्थभागेइत्यर्थः ॥ आखेटकेच्छयावनंजगामेत्युत्तरेणान्वयः ॥ ८ ॥ आखेटकंमृगया ॥ ९ ॥ १० ॥ मृगयादीनामनित्यत्वद्योतनायप्रायेति ॥ भ्रातृभ्यांलक्ष्मणशत्रुघ्नाभ्याम् ॥ ११ ॥ हेअनघेतिराज्ञोभरद्वाजस्यवासंबोधनम् ॥ सरामोनृपतीनांराज्ञांसमुचितेनव्यवहारेणमनोज्ञयामनोहरयासुजनानांचेतसिचंद्रिकावदाह्लादिकयाअतएवस्तुताप्रशस्तासुधारसवत्पेशलाचतुराचयातथाविधया ॥ स्तुतेतिस्नुतेतिवापाठेक्षरितायासुधातद्द्रसेनमाधुर्येणपेशलयाऽनयापूर्वोक्तयाचेष्टयादिनानिपरिनिनायअतिवाहयामास ॥ १२ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेचतुर्थःसर्गः ॥ ४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामस्यकायेकार्श्यादिनिर्वेदादिहवर्ण्यते ॥ राज्ञस्तद्धेतुजिज्ञासावसिष्ठोक्तेरुपक्रमः ॥ १ ॥ इत्थंश्रीरामस्यचित्तशुद्ध्युपायानुष्ठानचर्यामुपवर्ण्यतत्फलवैराग्यादिसाधनसंपत्तिं विवक्षुरुपक्रमते ॥ अथेति ॥ ऊनेचतुर्थांशेनषोडशेवर्षेवर्त्तमानेरामःकार्श्यंजगामेतिचतुर्थेनसंबंधः ॥ रघूद्वहेइतिव्यवहितस्यराज्ञःसन्निहितस्यशत्रुघ्नस्यलक्ष्मणस्यवाविशेषणंनतुरामपरामर्शि ॥ रामःकार्श्यंजगामेत्यनेनानन्वयापत्तेः ॥ लक्षणहेत्वोरितिशानचोविषयेआश्रयभेदमंतरेणभावस्यभावांतरालक्षकत्वेभावलक्षणसप्तम्यनुपपत्तेः ॥ १ ॥ भरतइति ॥ इतएवपूर्वंरामायणानुक्तमपिविनाशत्रुघ्नंभरतस्यमातामहगृहगमनंविवाहात्प्रागागमनंचकल्प्यते ॥ नित्यमित्यनेनापिपूर्वमपिबहुवारंतत्रभरतगमनमवस्थानंचासीदितिगम्यते ॥ २ ॥ जनींवधूंवहंतीतिजन्यास्तांस्त्रायतेवस्त्रालंकारादिभिरितिजन्यत्रोविवाहस्तदर्थम् ॥ ३ ॥ कार्श्यादीनिनिर्वेदचिंतादुःखलिंगानिवर्ण्यंते ॥ ४ ॥ विशालाक्ष

श्रीवाल्मीकिरुवाच ॥ ॥ अथोनषोडशेवर्षेवर्त्तमानेरघूद्वहे ॥ रामानुयायिनितथाशत्रुघ्नेलक्ष्मणेपिच ॥ १ ॥ भरतेसंस्थितेनित्यंमातामहगृहेसुखम् ॥ पालयत्यवनिंराज्ञियथावदखिलामिमाम् ॥ २ ॥ जन्यत्रार्थंचपुत्राणांप्रत्यहंसहमंत्रिभिः ॥ कृतमंत्रेमहाप्राज्ञेतज्ज्ञेदशरथेनृपे ॥ ३ ॥ कृतायांतीर्थयात्रायांरामोनिजगृहेस्थितः ॥ जगामानुदिनंकार्श्यंशरदीवामलंसरः ॥ ४ ॥ कुमारस्यविशालाक्षंपांडुतांमुखमाददे ॥ पाकफुल्लदलंशुक्लंसालिमालमिवांबुजम् ॥ ५ ॥ कपोलतलसंलीनपाणिःपद्मासनस्थितः ॥ चिंतापरवशस्तूष्णीमव्यापारोबभूवह ॥ ६ ॥ कृशांगश्चिंतयायुक्तःखेदीपरमदुर्मनाः ॥ नोवाचकस्यचित्किंचिल्लिपिकर्मार्पितोपमः ॥ ७ ॥ खेदात्परिजनेनासौप्रार्थ्यमानःपुनःपुनः ॥ चकाराह्निकमाचारंपरिम्लानमुखांबुजः ॥ ८ ॥ एवंगुणविशिष्टंतंरामंगुणगणाकरम् ॥ आलोक्यभ्रातरावस्यतामेवाययतुर्दशाम् ॥ ९ ॥ तथातेषुतनूजेषुखेदवत्सुकृशेषुच ॥ सपत्नीकोमहीपालश्चिंताविवशतांययौ ॥ १० ॥ कातेपुत्रघनाचिंतेत्येवंरामंपुनःपुनः ॥ अपृच्छत्स्निग्धयावाचानैवाकथयदस्यसः ॥ ११ ॥ नकिंचित्तातमेदुःखमित्युक्त्वापितुरंकगः ॥ रामोराजीवपत्राक्षस्तूष्णीमेवस्मतिष्ठति ॥ १२ ॥ ततोदशरथोराजारामःकिंखेदवानिति ॥ अपृच्छत्सर्वकार्यज्ञंवसिष्ठंवदतांवरम् ॥ १३ ॥ इत्युक्तश्चिंतयित्वासवसिष्ठमुनिनानृपः ॥ अस्त्यत्रकारणंश्रीमन्माराजन्दुःखमस्तुते ॥ १४ ॥

त्वविशिष्टस्योपमानायसालिमालमिति ॥ ५ ॥ अव्यापारोनिश्चेष्टः ॥ ६ ॥ लिपिकर्मार्पितश्चित्रलिखितउपमायस्य ॥ ७ ॥ आह्निकंअहन्यवश्यकर्त्तव्यम् ॥ ८ ॥ गुणगणाकरंतंराममेवंपूर्वोक्तचिंतादिभिर्गुणैर्विशेषणैर्विशिष्टमालोक्येत्यन्वयः ॥ ९ ॥ १० ॥ नाकथयदेव ॥ कथनप्रयोजनासिद्धिनिश्चयादितिभावः ॥ ११ ॥ दुःखंत्वयापरिहर्त्तुंशक्यमित्याशयइतिनान्वतवादिता ॥ तिष्ठतिस्मतस्थौ ॥ स्मयोगाल्लिड्विषयेलट् ॥ १२ ॥ किंनिमित्तमितिशेषः ॥ १३ ॥ इतिपृष्टेनवसिष्ठमुनिनासनृपइतिएवंप्रकारेणउक्तः ॥ तदेवाह ॥ अस्त्यत्रेत्यादिनार्धेनोत्तरश्लोकसहितेन ॥ रामचिंतायाःशुभोदर्कत्वसूचनायश्रीमन्नितिसंबोधनम् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संतःअल्पेनकारणवशेनकोपंविषादकलनांचनवहंति ॥ यथामहांतिभूतानिपृथिव्यादीनिसर्गेणसृष्टिफलवशेनसंहारवेगेनचविनानविकारवंतिनोपचयापक्षयविकारंभजंते ॥ ॥ १५ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेतात्पर्यप्रकाशेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ विश्वामित्रागमोराज्ञाविधिवत्पूजनंमुनेः ॥ राज्ञःप्रहर्षात्कार्यस्यप्रतिज्ञा चात्रवर्ण्यते ॥ १ ॥ मुनिनाथेनवसिष्ठेन ॥ इतिउक्तप्रकारेण ॥ सामान्याकारेणेत्यर्थः ॥ अतएवपार्थिवेविशेषेसंदेहवतिनिर्णयायकश्चित्कालोयस्यतंकिंचित्कालंप्रतीक्षणंय स्यतथाभूतेसति ॥ १ ॥ राज्ञीषुनृपसद्मसुस्थितास्विितिसंबंधः ॥ राज्ञीभेदात्सद्मभेदःप्रसिद्धइतिबहुवचनम् ॥ चेष्टाविशेषलिंगैर्निर्वेदकारणपरिज्ञानायसावधानासु ॥ २ ॥ एत

कोपंविषादकलनांविततंचहर्षंनाल्पेनकारणवशेनवहंतिसंतः॥सर्गेणसंहृतिजवेनविनाजगत्यांभूतानिभूपनमहांतिविकारवंति॥१५
॥इत्यार्षेवासिष्ठमहारामायणेवा०दे०मो० वैराग्यप्रकरणेकार्श्यनिवेदनंनामपंचमःसर्गः॥५॥ ॥७॥ ॥श्रीवाल्मीकि
रुवाच॥ ॥इत्युक्तेमुनिनाथेनसंदेहवतिपार्थिवे॥खेदवत्यास्थितेमौनंकिंचित्कालप्रतीक्षणे ॥ १ ॥ परिखिन्नासुसर्वासुराज्ञीषुनृप
सद्मसु॥ स्थितासुसावधानासुरामचेष्टासुसर्वतः॥२॥एतस्मिन्नेवकालेतुविश्वामित्रइतिश्रुतः॥ महर्षिरभ्यगाद्द्रष्टुंतमयोध्यानराधि
पम्॥३॥ तस्ययज्ञोथरक्षोभिस्तथाविलुलुपेकिल॥मायावीर्यबलोन्मत्तैर्धर्मकार्यस्यधीमतः॥ ४॥रक्षार्थंतस्ययज्ञस्यद्रष्टुमैच्छत्सपा
र्थिवम्॥ नहिशक्तोत्यविघ्नेनसमाप्तुंसमुनिःक्रतुं॥५॥ ततस्तेषांविनाशार्थमुद्यतस्तपसांनिधिः॥ विश्वामित्रोमहातेजाअयोध्यामभ्य
गात्पुरीम्॥ ६॥सराज्ञोदर्शनाकांक्षीद्वाराध्यक्षानुवाचह॥शीघ्रमाख्यातमांप्राप्तंकौशिकंगाधिनःसुतं॥७॥ तस्यतद्वचनंश्रुत्वाद्वास्था
राजगृहंययुः॥ संभ्रांतमनसःसर्वेतेनवाक्येनचोदिताः॥८॥ तेगत्वाराजसदनंविश्वामित्रमृषिंततः॥ प्राप्तमावेदयामासुःप्रतिहाराःप
तेस्तदा॥ ९॥ अथास्थानगतंभूपंराजमंडलमालिनम्॥समुपेत्यत्वरायुक्तोयाष्टीकोसौव्यजिज्ञपत्॥ १०॥

स्मिन्निति ॥ यद्यपिभावलक्षणसप्तमीभिरेवकालविशेषोलभ्यतेतथापिलोकदृष्ट्याअनवसरेविश्वामित्रागमनमितिसूचनायविशिष्यकालेइत्युपादानम् ॥ श्रुतोविश्रुतः ॥ ३ ॥ धर्मएवकार्योऽवश्यकर्त्तव्योयस्यतथाभूतस्ययज्ञस्तथाविलुलुपेयथासतंनराधिपमभ्यगादितिपूर्वेणपार्थिवंद्रष्टुमैच्छदित्युत्तरेणवासंबंधः ॥ ४ ॥ समाप्तुंसमापयितुंसम्यगास माप्तेःप्राप्तुंवा ॥ ५ ॥ उद्यतउद्युक्तः ॥ ६ ॥ आख्यातराज्ञेइतिशेषः ॥ ७ ॥ विलंबेशापभयात्संभ्रांतमनसः ॥ ८ ॥ सीदतिनिषीदत्यस्मिन्निितिसदनंसभास्थानम् ॥ प्रतिहारा द्वारपालाः ॥ स्वपतेर्बहिर्द्वास्थस्यस्वस्वामिनःसभाद्वास्थस्यवायाष्टीकस्य ॥ गतिबुद्धीतिकर्मणएवशेषत्वविवक्षयाषष्ठी ॥ ९ ॥ असौद्वास्थैर्निवेदितार्थोयाष्टीकोयष्टिप्रहरणः ॥ ॥ ११ ॥
शक्तियष्ट्योरीकक् ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महातेजामहाप्रभावः ॥ कांत्यातुबालभास्करइवभासुरः ॥ तदुपपादनायज्वालारुणेति ॥ श्रीमांस्तपोलक्ष्मीवान् ॥ ११ ॥ तंराजद्वारप्रदेशमूर्ध्वतःसभासुरपताकांतंपरितश्च साश्वेभपुरुषायुधं ॥ कीर्णकांचनंव्याप्तसौवर्णमिवपिंगलम् ॥ १२ ॥ विश्वामित्रोमुनिःप्राप्तइत्यनुद्धतयागिराराजनिराजानंप्रतिनिवेदयति विज्ञापनंकुर्वाणेयाष्टीकेवीक्ष्यमाणेतुदृष्टमात्रेसतिसराजसत्तमःप्रोत्तस्थावित्युत्तरेणसंबंधः ॥ १३ ॥ किमनवधार्यैवनेत्याह ॥ इतियाष्टीकवचनमाकर्ण्यैति ॥ सामंताअल्पदेशाधीश्वराः ॥ विष्टरात्सिंहासनात् ॥ १४ ॥ मालितोवेष्टितः ॥ सराजसत्तमोवसिष्ठवामदेवाभ्यांसहजगामेत्युत्तरेणान्वयः ॥ १५ ॥ यत्रविश्वामित्रोमहामुनिस्तत्रासौजगामेतिसंबंधः ॥ १६ ॥ तपःपराक्रमाभिव्यंजकवैलक्षण्याभ्यामोजस्तेजसोर्भेदः ॥ १७ ॥ जराजरठयावयःप्रकर्षपलितया ॥ १८ ॥ दीप्तंतेजःप्रकर्षाद्दुर्दर्शम् ॥ उपशांतंसौम्यम् ॥ अप्रतिघातिअप्रधृष्यम् ॥

देवद्वारिमहातेजाबालभास्करभासुरः ॥ ज्वालारुणजटाजूटःपुमाञ्छ्रीमानवस्थितः ॥ ११ ॥ सभासुरपताकांतंसाश्वेभपुरुषायुधम् ॥ कृतवांस्तंप्रदेशंयस्तेजोभिःकीर्णकांचनम् ॥ १२ ॥ वीक्ष्यमाणेतुयाष्टीकेनिवेदयतिराजनि ॥ विश्वामित्रोमुनिःप्राप्तइत्यनुद्धतयागिरा ॥ १३ ॥ इतियाष्टीकवचनमाकर्ण्यनृपसत्तमः ॥ ससमंत्रीससामंतःप्रोत्तस्थौहेमविष्टरात् ॥ १४ ॥ पदातिरेवसहसाराज्ञांवृंदेनमालितः ॥ वसिष्ठवामदेवाभ्यांसहसामंतसंस्तुतः ॥ १५ ॥ जगामयत्रतत्रासौविश्वामित्रोमहामुनिः ॥ ददर्शमुनिशार्दूलंद्वारभूमाववस्थितम् ॥ १६ ॥ केनापिकारणेनोर्वीतलमर्कमुपागतम् ॥ ब्राह्मेणतेजसाक्रांतंक्षात्रेणचमहौजसा ॥ १७ ॥ जराजरठयानित्यंतपःप्रसररूक्षया ॥ जटावल्यावृतस्कंधंससंध्याभ्रमिवाचलम् ॥ १८ ॥ उपशांतंचकांतंचदीप्तमप्रतिघातिच ॥ निभृतंचोर्जिताकारंदधानंभास्वरंवपुः ॥ १९ ॥ पेशलेनातिभीमेनप्रसन्नेनाकुलेनच ॥ गंभीरेणातिपूर्णेनतेजसारंजितप्रभम् ॥ २० ॥ अनंतजीवितदशासखीमेकामनिंदिताम् ॥ धारयंतंकरेश्लक्ष्णांकुंडीमम्लानमानसं ॥ २१ ॥

कांतंप्रियदर्शनम् ॥ ऊर्जितःप्रगल्भआकारोऽवयवसन्निवेशोयस्यतत्तथोक्तम् ॥ निभृतंविनयोपपन्नम् ॥ भास्वरंकांतिमत् ॥ भास्करमितिपाठेसूर्यसदृशम् ॥ देवपथादित्वात्कनोलुप् ॥ विशेषणान्युभयत्रयोज्यानि ॥ १९ ॥ पेशलेनदृष्टिमनःप्रीणनचतुरेण ॥ भीमेनभयानकेन ॥ आकुलेनप्रकर्षाच्चलता ॥ गंभीरेणअनाकलनीयेन ॥ अतिपूर्णेनापरिच्छेद्येन ॥ आश्रयसंवलितंतेजः ॥ बहिःप्रसृताप्रभा ॥ तेजःप्रकर्षवैलक्षण्यानुविधायित्वात्प्रभाप्रकर्षवैलक्षण्यानांतदनुरूपासैतेनेरंजितेवेतितथोक्तिः ॥ २० ॥ अनंतजीवितदशाचिरजीवितदशातस्याःसखींचिरपरिगृहीतामित्यर्थः ॥ श्लक्ष्णांस्निग्धाम् ॥ कुंडींकमंडलुम् ॥ अम्लानंप्रसन्नंमानसंमनोयस्य ॥ २१ ॥

१ प्रभा. २ तेजसा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुराण्यक्षराणिसंभाषणानियेषु ॥ मधुराभाषणसहितैरित्यर्थः ॥२२॥ युक्तानिवयःप्रकर्षानुरूपाणियज्ञोपवीतान्यंगेयस्यतम् ॥२३॥ दूरादालोक्यपूर्वमेवानताकृतिर्भूपालो मुनिप्रणनामेतिसंबंधः ॥ अंत्यंपदंक्रियाविशेषणम् ॥ २४ ॥ अभिवादयांचक्रेसपुतमाशीर्भिःप्रत्यभिवादयामासेत्यर्थः ॥ २५॥ पूजयामासुःप्रशशंसुः ॥ आदृताआदरयुक्ताः ॥२६॥अशंकितोपनीतेनअवितर्कितोपगतेन ॥ तेइतिकर्मणिकर्त्तरिवाषष्ठी॥२७॥अनुग्रहमेवभाविभाग्यानुरूपंरूपयन्निरूपयति ॥ यदिति ॥ अनादिकारणरहितम् ॥ अनेनो त्पत्तिवृद्धिविपरिणामानांनिरासः॥ अक्षुण्णमनपक्षयम् ॥ अपायेनविनाशेनचविवर्जितम् ॥ औपाधिकैःस्वांशसुखलवैःसर्वानानंदयतीत्यानंदंयत्परमपुरुषार्थसुखंप्रसिद्धंतदेव

करुणाक्रांतचेतस्त्वात्प्रसन्नैर्मधुराक्षरैः॥ वीक्षणैरमृतेनेवसंसिंचंतमिमाःप्रजाः ॥ २२ ॥ युक्तयज्ञोपवीतांगंधवलप्रोन्नतभ्रुवम्॥ अनंतंविस्मयंचांतःप्रयच्छंतमिवेक्षितुः॥२३॥ मुनिमालोक्यभूपालोदूरादेवानताकृतिः॥प्रणनामगलन्मौलिमणिमालितभूतलम्॥२४ मुनिरप्यवनीनाथंभास्वानिवशतक्रतुम्॥ तत्राभिवादयांचक्रेमधुरोदारयागिरा॥ २५॥ ततोवसिष्ठप्रमुखाःसर्वएवद्विजातयः॥ स्वागतादिक्रमेणैनंपूजयामासुरादृताः॥२६॥ ॥दशरथउवाच॥ ॥ अशंकितोपनीतेनभास्वतादर्शनेनते॥ साधोस्वनुगृहीताःस्मोरविणेवांबुजाकराः॥ २७॥ यदनादियदक्षुण्णंयदपायविवर्जितम्॥ तदानंदसुखंप्राप्तंमयात्वद्दर्शनान्मुने ॥ २८॥ अद्यवर्त्तामहेनूनंधन्यानांधुरिधर्मतः॥ भवदागमनस्येमेयद्वयंलक्ष्यमागताः॥ २९ ॥ एवंप्रकथयंतोत्रराजानोथमहर्षयः॥ आसनेषुसभास्थानमासाद्यसमुपाविशन्॥ ३० ॥ सदृष्ट्वामालितंलक्ष्म्याभीतस्तमृषिसत्तमम्॥ प्रहृष्टवदनोराजास्वयमर्घ्यंन्यवेदयत् ॥ ३१ ॥ सराज्ञःप्रतिगृह्यार्घ्यंशास्त्रदृष्टेनकर्मणा॥ प्रदक्षिणंप्रकुर्वंतंराजानंपर्यपूजयत्॥ ३२॥ सराज्ञापूजितस्तेनप्रहृष्टवदनस्तदा॥ कुशलंचाव्ययंचैवपर्यपृच्छन्नराधिपम् ॥ ३३॥ वसिष्ठेनसमागम्यप्रहस्यमुनिपुंगवः॥ यथार्हंचार्चयित्वैनंपप्रच्छानामयंततः॥ ३४ ॥ क्षणंयथार्हमन्योन्यंपूजयित्वासमेत्यच॥ तेसर्वेहृष्टमनसोमहाराजनिवेशने॥ ३५॥ यथोचितासनगतामिथःसंवृद्धतेजसः॥ परस्परेणपप्रच्छुःसर्वेनामयमादरात्॥ ३६॥

प्राप्तमित्यर्थः ॥ २८ ॥ धन्यानांकृतार्थानांधुरिअग्रस्थाने ॥ लक्ष्यं भावप्रधानोनिर्देशः ॥ लक्ष्यताम् ॥ २९ ॥ एवंदशरथोक्तप्रकारेणैवराजानोमहर्षयश्चप्रकथयंतःअथसभास्थानमासाद्यआसनेषुसमुपाविशन्नित्यन्वयः ॥ ३० ॥ लक्ष्म्यातपोलक्ष्म्याभीतः ॥ अर्घ्यार्थस्योदकस्याप्यन्यद्वाराआहारणेऽपराधशंकयास्वयमेवाहृत्यार्घ्यंन्यवेदयदित्यर्थः ॥ ३१ ॥ पर्यपूजयत्प्रशशंस ॥ ३२ ॥ कुशलंदेहमंत्रिभूत्यादिषु ॥ अव्ययंकोशेषु ॥ ३३ ॥ एवंवसिष्ठमर्चयित्वायथार्हंशिष्यमृगपक्ष्यादिष्वनामयंपप्रच्छेत्यर्थः ॥ ३४ ॥ अन्योन्यंसमेत्यपूजयित्वाचयथोचितासनगताःसंतःपप्रच्छुरित्युत्तरेणसंबंधः ॥ ३५ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्येनचकारेणानुक्तगंधपुष्पवस्त्रालंकारादेःसमुच्चयः ॥ द्वितीयेनदक्षिणाफलतांबूलादेः ॥ तेषांचबहुविधत्वाद्भूयोभूयइति ॥ ३७ ॥ प्रयतःपवित्रः ॥ इदंवक्ष्यमाणम् ॥ ३८॥ यथायोगंमर्त्यस्यकर्षकस्येतिचशेषः ॥ ३९ ॥ अर्थलाभोदरिद्रस्येतिशेषः ॥ ४० ॥ ईप्सितेनचिराभिलषितेनमणिमंत्राभ्युदयादिना ॥ इष्टस्यप्रियतमस्यपुत्रभ्रात्रादेः ॥ दूरादितिशेषः ॥ ४१ ॥ त्वदागमात्हर्षइत्यनुषज्यते ॥ ४२ ॥ ४३ ॥ प्रथमःप्रश्नःप्रदेयविषयः ॥ द्वितीयःकर्त्तव्यसेवाविषयः ॥४४॥ पूजापात्रत्वमेवोपपादयति ॥ पूर्वमिति॥ तपसाब्रह्मर्षित्वमनुप्राप्तइतिसंबंधः ॥ ४५॥ शीतयतितापशांत्यासुखयति ॥ मुख्यार्थाभेदोत्प्रेक्षार्थइवशब्दः ॥४६॥ इच्छादीनांपरोपसर्पणहेतुत्वंप्रसिद्धम् ॥ विषयस्नेहातिश

उपविश्यायतस्मैसविश्वामित्रायधीमते॥ पाद्यमर्घ्यंचगांचैवभूयोभूयोन्यवेदयत् ॥ ३७॥ अर्चयित्वातुविधिवद्विश्वामित्रमभाषत॥ प्रांजलिःप्रयतोवाक्यमिदंप्रीतमनानृपः॥३८॥ यथाऽमृतस्यसंप्राप्तिर्यथावर्षमवर्षके॥ यथांधस्येक्षणप्राप्तिर्भवदागमनंतथा॥३९॥ यथेष्टदारसंपर्कात्पुत्रजन्माप्रजावतः॥ स्वप्नदृष्टार्थलाभश्चभवदागमनंतथा॥ ४० ॥ यथेप्सितेनसंयोगइष्टस्यागमनंयथा ॥ प्रणष्टस्य यथालाभोभवदागमनंतथा॥ ४१ ॥ यथाहर्षोनभोगत्यामृतस्यपुनरागमात्॥ तथात्वदागमाद्ब्रह्मन्स्वागतंतेमहामुने॥ ४२ ॥ ब्रह्मलोकनिवासोहिकस्यनप्रीतिमावहेत्॥ मुनेतवागमस्तद्वत्सत्यमेवब्रवीमिते ॥ ४३ ॥ कश्चतेपरमःकामःकिंचतेकरवाण्यहम्॥ पात्रभूतोसिमेविप्रप्राप्तःपरमधार्मिकः॥ ४४॥ पूर्वंराजर्षिशब्देनतपसाद्योतितप्रभः॥ ब्रह्मर्षित्वमनुप्राप्तःपूज्योसिभगवन्मया ॥ ४५॥ गंगाजलाभिषेकेणयथाप्रीतिर्भवेन्मम॥ तथात्वद्दर्शनात्प्रीतिरंतःशीतयतीवमाम्॥ ४६ ॥ विगतेच्छाभयक्रोधोवीतरागोनिरामयः॥ इदमत्यद्भुतंब्रह्मन्यद्भवान्मामुपागतः॥ ४७॥ शुभक्षेत्रगतंचाहमात्मानमपकल्मषम्॥ चंद्रबिंबइवोन्मग्नंवेदवेद्यविदांवर ॥ ४८ ॥ साक्षादिवब्रह्मणोमेतवाभ्यागमनंमतम्॥ पूतोस्म्यनुगृहीतश्चतवाभ्यागमनान्मुने ॥ ४९ ॥ त्वदागमनपुण्येनसाधोयदनुरंजितम्॥ अद्यमेसफलंजन्मजीवितंतत्सुजीवितम्॥ ५० ॥ त्वामिहाभ्यागतंदृष्ट्वाप्रतिपूज्यप्रणम्यच ॥ आत्मन्येवनमाम्यंतर्दृष्ट्वेंदुंजलधिर्यथा॥ ५१ ॥ यत्कार्यंयेनवार्थेनप्राप्तोसिमुनिपुंगव॥ कृतमित्येवतद्विद्धिमान्योसीतिसदामम॥ ५२॥

योविषयाकारेणचित्तस्यरंजनाद्रागः ॥ ४७ ॥ देवर्षिजुष्टस्थानानामेवक्षेत्रत्वात्त्वत्सन्निधानाद्गृहमपितथेतिभावः ॥ अतएवापकल्मषमपगतपापमतएवधर्मोत्कर्षादमृतमयचंद्रमंडलप्राप्यात्रोन्मग्नमिवेत्युत्प्रेक्षा ॥ ४८ ॥ धर्मेणपूतः ॥ यशोभ्युदयाभ्यामनुगृहीतः ॥ ४९ ॥ तदेवस्फुटयति ॥ त्वदिति ॥५०॥ पुण्यहर्षाभ्यामभिवृद्धत्वादात्मनिशरीरेप्रस्थांतःस्वारीवनसंमामीत्यर्थः ॥ जलधिर्वेलासीम्नोरितिशेषः ॥ ५१ ॥ सदामान्योसीतिहेतोस्तदुभयंकृतमित्येवविद्धि ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यैः कर्तुमशक्यमपिकरिष्याम्येव दातुमशक्यमपिदास्याम्येव यद्यस्माद्दीयमानंवस्तुत्वयित्वादृशेसत्पात्रेप्रतिपद्यतेप्रतिपत्तिलाभेनसार्थकंभवतीतिभावः ॥ ५३ ॥ उत्साहातिशयात्पूर्वार्धोक्तमेवपुनराह ॥ कार्यस्येति ॥ लोभादिहेतुकत्वंवारयति ॥ धर्मतः कर्त्तेति ॥ ५४ ॥ आत्मविदास्वतपःप्रभावाभिज्ञेन ॥ गुणैर्विशिष्टमितिवाक्यविशेषणम् ॥ ५५ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०षष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ राज्ञः प्रशंसाथमुनेर्यज्ञविघ्ननिवेदनम् ॥ रक्षोवधायरामस्ययाञ्चाचात्रोपवर्ण्यते ॥१॥ अद्भुतविस्तरंआश्चर्यार्थविस्तारयुक्तम् ॥ १ ॥ सदृशंयुक्तम् ॥ तत्रहेतुगर्भेविशेषणे ॥ वंशप्रभावाद्गुरुप्रभावाच्चेत्यर्थः ॥ २ ॥ त्वद्गतंविवक्षितंतस्यकार्यविनिर्णयंतत्संबंधिकर्त्त

स्वकार्येनविमर्शंत्वंकर्तुमर्हसिकौशिक॥ भगवन्नास्त्यदेयंमेत्वयियत्प्रतिपद्यते ॥ ५३ ॥ कार्यस्यनविचारंत्वंकर्तुमर्हसिधर्मतः॥ कर्त्ताचाहमशेषंतेदैवतंपरमंभवान् ॥ ५४ ॥ इदमतिमधुरंनिशम्यवाक्यंश्रुतिसुखमात्मविदाविनीतमुक्तम्॥ प्रथितगुणयशागुणैर्विशिष्टंमुनिवृषभःपरमंजगामहर्षम्॥५५॥ ॥इत्यार्षेवासिष्ठम०वा०दे०मो०वै०विश्वामित्राभ्यागमनंनामषष्ठःसर्गः॥६॥ ॥७॥ ॥श्रीवाल्मीकिरुवाच॥ ॥तच्छ्रुत्वाराजसिंहस्यवाक्यमद्भुतविस्तरम्॥ हृष्टरोमामहातेजाविश्वामित्रोऽभ्यभाषत ॥ १ ॥ सदृशंराजशार्दूलतवैवैतन्महीतले॥ महावंशप्रसूतस्यवसिष्ठवशवर्त्तिनः ॥ २ ॥ यत्तुमेत्वद्गतंवाक्यंतस्यकार्यविनिर्णयम्॥ कुरुत्वंराजशार्दूलधर्मंसमनुपालय ॥ ३ ॥ अहंधर्मंसमातिष्ठेसिद्ध्यर्थंपुरुषर्षभ॥ तस्यविघ्नकराघोराराक्षसाममसंस्थिताः ॥ ४ ॥ यदायदातुयज्ञेनयजेहंविबुधव्रजान्॥ तदातदातुमेयज्ञंविनिघ्नंतिनिशाचराः ॥ ५ ॥ बहुशोविहितेतस्मिन्मयाराक्षसनायकाः॥ अकिरंस्तेमहींयागेमांसेनरुधिरेणच ॥६॥ अवधूतेतथाभूतेतस्मिन्यागकदंबके॥ कृतश्रमोनिरुत्साहस्तस्माद्देशादुपागतः॥७॥ नचमेक्रोधमुत्स्रष्टुंबुद्धिर्भवतिपार्थिव॥ तथाभूतंहितत्कर्मनशापस्तस्यविद्यते॥ ८ ॥ ईदृशीयज्ञदीक्षासाममतस्मिन्महाक्रतौ॥ त्वत्प्रसादादविघ्नेनप्रापयेयंमहाफलम् ॥ ९ ॥ त्रातुमर्हसिमामार्त्तंशरणार्थिनमागतम्॥ अर्थिनांयन्निराशत्वंसत्तमेभिभवोहिसः ॥ १० ॥ तवास्तितनयःश्रीमान्दृप्तशार्दूलविक्रमः॥ महेंद्रसदृशोवीर्येरामोरक्षोविदारणः ॥ ११ ॥

व्यार्थनिश्चयंकुरुप्रथममितिशेषः ॥ तत्कदाचिदधर्म्यंचेदशक्यमित्याशंक्याह ॥ धर्ममिति ॥ ३ ॥ तदेवाहाहमित्यादिना ॥ धर्मंयज्ञंसमातिष्ठेआरभे ॥ ४ ॥ विबुधव्रजान्देवसंघान् ॥ ५ ॥ विहितेऽनुष्ठिते ॥ ६ ॥ अवधूतेविघ्नैर्निरस्ते ॥ यागकदंबकेयज्ञसमूहे ॥ ७ ॥ ननुशापेनैवतेकुतोननिरस्तास्तत्राह ॥ नचेति ॥८ ॥ ईदृशीक्रोधशापाद्ययोग्या ॥ प्रापयेयं स्वार्थेणिच् प्राप्नुयाम ॥ ९ ॥ सत्तमेसाधुतमे ॥ सत्तमेतिपाठेतुसंबोधनम् ॥ अभिभवस्तिरस्कारःअर्थात्सत्तमानाम् ॥ ऐकपद्यंवा ॥ १० ॥ उत्तरत्रतमितिदर्शनादत्रयइत्यध्याहार्यम् ॥ विशेषणानिविवक्षितार्थोपपादकानि ॥ ११ ॥ ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यपराक्रममोघपराक्रमम् ॥ काकपक्षौकर्णमूलशिखेक्षत्रियाचारसिद्धे ॥ १२ ॥ नन्वकृतास्त्रोबालोयंकथंशक्तस्तत्राह ॥ शक्तइति ॥ गुप्तोरक्षितः ॥ अपकर्त्तारोयज्ञस्य लोकस्येतिवाशेषः ॥ मूर्धविनिग्रहेशिरश्छेदे ॥ १३ ॥ श्रेयःअस्त्रविद्याप्रदानरूपम् ॥ अस्त्रभेदाद्बहुरूपंप्रभावतस्त्वनंतकमनवधिकम् ॥ १४ ॥ स्थातुंपुरइतिशेषः ॥ वनेरणे वनोद्भूतेईरणाख्येतृणे ॥ तस्यपेलवतयामृगत्राणाक्षमत्वात् ॥ रणेइतिवाछेदः ॥ १५ ॥ ननुमद्भृत्यैर्मयावातेनिग्राह्याइतिराजाभिसंधिमालक्ष्याह ॥ तेषांचेति ॥ काकुत्स्थात्र कृताद्रामात् ॥ १६ ॥ तत्कुतस्तत्राह ॥ वीर्येति ॥ उत्सिक्तागर्विताः ॥ नकेवलंस्वबलेनैवंकिंतुस्वामिबलेनापीत्याह ॥ खरेति ॥ १७ ॥ तर्हिरामस्यापितेकथंसाध्यास्तत्राह ॥ रामस्येति ॥ अनारतगताअविरतनिर्गताः ॥ यथादृष्ट्यभिभवेक्षमाअपिपांसवोनदृष्ट्यभिभवेक्षमास्तद्वदित्यर्थः ॥ १८ ॥ भवतुतथातथापिपुत्रोदुस्त्यजःपितृभिरित्याशंक्याह॥

तंपुत्रंराजशार्दूलरामंसत्यपराक्रमम् ॥ काकपक्षधरंशूरंज्येष्ठंमेदातुमर्हसि ॥ १२ ॥ शक्तोह्येषमयागुप्तोदिव्येनस्वेनतेजसा ॥ राक्षसा येऽपकर्त्तारस्तेषांमूर्द्धविनिग्रहे ॥ १३ ॥ श्रेयश्चास्यकरिष्यामिबहुरूपमनंतकम् ॥ त्रयाणामपिलोकानांयेनपूज्योभविष्यति ॥ १४ ॥ नचतेराममासाद्यस्थातुंशक्तानिशाचराः ॥ क्रुद्धंकेसरिणंदृष्ट्वावनेरणइवैणकाः ॥ १५ ॥ तेषांनचान्यःकाकुत्स्थाद्योद्धुमुत्सहतेपुमान् ॥ ऋतेकेसरिणःक्रुद्धान्मत्तानांकरिणामिव ॥ १६ ॥ वीर्योत्सिक्ताहितेपापाःकालकूटोपमारणे ॥ खरदूषणयोर्भृत्याःकृतांताःकुपिताइव ॥ १७ ॥ रामस्यराजशार्दूलसहिष्यंतेनसायकान् ॥ अनारतगताधाराजलदस्येवपांसवः ॥ १८ ॥ नचपुत्रकृतंस्नेहंकर्त्तुमर्हसिपार्थिव ॥ नतदस्तिजगत्यस्मिन्यन्नदेयंमहात्मनाम् ॥ १९ ॥ हंतनूनंविजानामिहतांस्तान्विद्धिराक्षसान् ॥ नह्यस्मदादयःप्राज्ञाःसंदिग्धेसंप्रवृत्तयः ॥ २० ॥ अहंवेद्मिमहात्मानंरामंराजीवलोचनम् ॥ वसिष्ठश्चमहातेजायेचान्येदीर्घदर्शिनः ॥ २१ ॥ यदिधर्मोमहत्त्वंचयशस्तेमनसिस्थितम् ॥ तन्मह्यंसमभिप्रेतमात्मजंदातुमर्हसि ॥ २२ ॥ दशरात्रश्चमेयज्ञोयस्मिन्रामेणराक्षसाः ॥ हंतव्याविघ्नकर्त्तारोममयज्ञस्यवैरिणः ॥ २३ ॥ अत्राप्यनुज्ञांकाकुत्स्थददतांतवमंत्रिणः ॥ वसिष्ठप्रमुखाःसर्वेतेनरामंविसर्जय ॥ २४ ॥

नचेति ॥ ममपुत्रोयमितिप्राकृतंस्नेहमनुरागम् ॥ तत्कुतस्तत्राह ॥ नतदिति ॥ तथाहि ॥ शिबिदधीच्यलर्कप्रभृतयःस्वदेहचक्षुराद्यपिददुरितिभावः ॥ १९ ॥ नात्रापायशंकापि किंतुविजयाभ्युदयएवेत्याह ॥ हंतेति ॥ नूनमितिनिश्चये ॥ विजानामितपसेतिशेषः ॥ त्वमपिविद्धिमद्वचसेतिशेषः ॥ तदेवद्रढयति ॥ नहीति ॥ २० ॥ महांतंजीवोपाध्यपरिच्छिन्नमात्मानमीश्वरमित्यर्थः ॥ प्रभावतोवामहात्मानम् ॥ वसिष्ठश्चवेत्तीतिविपरिणामेनानुषंगः ॥ एवमुत्तरत्रापि ॥ दीर्घदर्शिनोयोगसिद्ध्याव्यवहितविप्रकृष्टदर्शनशीलाः ॥ २१ ॥ धर्मोमहत्त्वंयशश्चरक्ष्यमितिमनसितेस्थितंयदितर्हि ॥ समभिप्रेतंप्रियतममित्यात्मजविशेषणंसम्यगभिप्रेतमध्यवसितंयथाभवतीतिक्रियाविशेषणंवा ॥ २२ ॥ दशरात्रोदशाहोरात्रसाध्यः ॥ २३ ॥ अत्रास्मिन्नर्थेतवमंत्रिणःसर्वेवसिष्ठप्रमुखाअपीतिसंबंधः ॥ तेनतेषामनुज्ञादानेन ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालोयज्ञांगभूतोवसंतादिर्यथानात्येतीतिसंबंधः ॥ २५ ॥ अभिलषितसाधनानुग्रहउपकारस्तद्भावम् ॥ महद्बहुवित्तव्ययायाससाध्यमपिकार्यंफलरिक्ततामेतिसंपन्नफलत्वे
नोपकारोपिप्रीतिरिक्ततामेतीत्यर्थः ॥ २६ ॥ मुनिवाक्यमुपसंहरति ॥ इत्येवमिति ॥ २७॥ उपपन्नानियुक्तियुक्तानिपदानिप्रसिद्धानिवचनार्हवस्तूनिवायस्मिन्कर्मणितत्तथा ॥
ननुशक्यमुच्यतांकिमुपपत्तिंचिंतयेनितत्राह ॥ धीमानिति ॥ लोकोमनोरथपूर्त्यापितुष्यतिधीमांस्तुतत्पूर्त्तावपियुक्तियुक्तकथनेनविनानतुष्यतीतियुक्ताउपपत्तिंचिंतेतिभावः
॥ २८ ॥ ॥ इतिश्रीवासिष्ठमहारा॰तात्पर्यप्रकाशेवै॰सप्तमःसर्गः ॥ ७ ॥ ॥ ७ ॥ ॥ स्नेहाद्राज्ञोत्ररामस्ययुद्धायोग्यत्ववर्णनम् ॥ रावणादिबलंज्ञात्वाविषादश्चोपवर्ण्य
ते ॥ १ ॥ उपपन्नतरोत्तरालाभान्निश्चेष्टः ॥ पूर्वोक्तरामदशानुसंधानात्प्रतिज्ञातार्थासामर्थ्यान्मुनिवचनस्यचदुरुल्लंघ्यत्वात्सदैन्यम् ॥ इदंवक्ष्यमाणम् ॥ १ ॥ किंचिदूनःषोडशो

नात्येतिकालःकालज्ञयथायंममराघव॥ तथाकुरुष्वंभद्रंतेमाचशोकेमनःकृथाः॥२५॥ कार्यमण्वपिकालेतुकृतमेत्युपकारताम्॥ म
हदप्युपकारोपिरिक्ततामेत्यकालतः॥२६॥ इत्येवमुक्त्वाधर्मात्माधर्मार्थसहितंवचः॥ विरराममहातेजाविश्वामित्रोमुनीश्वरः॥२७॥
श्रुत्वावचोमुनिवरस्यमहानुभावस्तूष्णीमतिष्ठदुपपन्नपदंसवक्तुम्॥ नोयुक्तियुक्तकथनेनविनैतितोषंधीमानपूरितमनोभिमतश्चलो
कः॥२८॥ ॥इत्यार्षेवासिष्ठे॰वा॰दे॰मो॰वै॰विश्वामित्रवाक्यंनामसप्तमःसर्गः॥७॥ ॥७॥ ॥वाल्मीकिरुवाच॥ ॥तच्छ्रु
त्वाराजशार्दूलोविश्वामित्रस्यभाषितम्॥ मुहूर्तमासीन्निश्चेष्टःसदैन्यंचेदमब्रवीत्॥१॥ ऊनषोडशवर्षोयंरामोराजीवलोचनः॥ नयु
द्धयोग्यतामस्यपश्यामिसहराक्षसैः॥२॥ इयमक्षोहिणीपूर्णायस्याःपतिरहंप्रभो॥ तयापरिवृतोयुद्धंदास्यामिपिशिताशिनाम्॥३॥
इमेहिशूराविक्रांताभृत्यामंत्रविशारदाः॥ अहंचैषांधनुष्पाणिर्गोप्तासमरमूर्द्धनि॥४॥ एभिःसहैववीराणांमहेंद्रमहतामपि॥ ददामि
युद्धंमत्तानांकरिणामिवकेसरी॥५॥ बालोरामस्त्वनीकेषुनजानातिबलाबलम्॥ अंतःपुराद्दतेदृष्टानानेनान्यारणावनिः॥६॥ नशस्त्रैः
परमैर्युक्तोनचयुद्धविशारदः॥ नवास्त्रैःशूरकोटीनांतज्ज्ञःसमरभूमिषु॥७॥

वर्षोऽस्येतित्रिपदबहुव्रीहिः ॥ युद्धयोग्यतैवनास्तिराक्षसैःसहतुसुतरामितिभावः ॥ २ ॥ तर्हिकिंव्यर्थःप्रयासोनेत्याह ॥ इयमिति ॥ अक्षौहिणीलक्षणंतुएकेभैकरथाश्च्यश्वाप
त्तिःपंचपदातिका ॥ पत्त्यंगैस्त्रिगुणैःसर्वैःक्रमादाख्यायथोत्तरम् ॥ सेनामुखंगुल्मगणौवाहिनीपृतनाचमूः ॥ अनीकिनीदशानीकिन्यक्षौहिणीत्यमरसिंहेनैवभारतादिप्रसिद्धंसं
गृह्योक्तम् ॥ ३ ॥ अत्रयुद्धे ॥ गोप्तारक्षकः ॥ ४ ॥ महेंद्रादपिमहताम् ॥ ५ ॥ नन्वनेनरणावनिर्नदृष्टेत्येववक्तव्येअन्येतिविशेषणवैयर्थ्यम् ॥ एवंतर्हिपुरस्यांतरंतःपुरमित्यव्य
यीभावः ॥ पुरमध्येखुरलीक्रीडार्थकल्पितरणावनेरन्यावनिर्नदृष्टेत्यर्थः ॥ ६ ॥ धृत्वायैःप्रक्रियतेतानिशस्त्राणि ॥ क्षिप्त्वायैःप्रक्रियतेतान्यस्त्राणि ॥ शूरकोटीनांसमरभूमिष्वि ॥१४॥
तिसंबंधः ॥ तज्ज्ञोयुद्धज्ञः ॥ वैशारद्यंदूरेज्ञानमप्यस्यनास्तीतिभावः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिशीलनंअस्येतिशेषः ॥ पुल्लिंगपाठेतुपरिमितंशीलनमस्येतिबहुव्रीहिः ॥ ८ ॥ कीर्णपुष्पाण्येवोपहाराःपूजायासु ॥ स्वकासुस्वीयासु ॥ अजिरभूमिषुचत्वरस्थलेषु ॥ ९ ॥ अतितरामित्यस्यपंचम्यंतेनहरिणःकृशइत्याभ्यांचसंबंधः ॥ हरिणःपांडुः ॥तत्रदृष्टांतः ॥ पद्मैःपद्मयावाआभातीतिपद्माभस्तदाकरः ॥ आतश्चोपसर्गइतिकः॥ सहिमेनतुषारेणेत्र ॥१०॥ विहर्तुंसंचरितुम् ॥ क्रीडितुमितितुन ॥ अकर्मकत्वापत्तेः ॥ ११ ॥ तत्कृतेतन्निमित्तम् ॥ निःसारतांनिरुत्साहबलतांनिःसुखतांवा ॥ १२ ॥ ईदृशइतिशरीरेणबालइतिवयसा आधिनावशीकृतइतिबुद्ध्यादिनाचतस्याशक्तताप्रेषणानर्हताचदर्शिता ॥ तत्रापियोद्धुंतदपिनिशाचरैःसहसुतरामयुक्तइतिभावः ॥ १३ ॥ ननुधर्मलिप्सोस्तवांकित

केवलंपुष्पखंडेषुनगरोपवनेषुच ॥ उद्यानवनकुंजेषुसदैवपरिशीलनम् ॥ ८ ॥ विहर्तुमेषजानातिसहराजकुमारकैः ॥ कीर्णपुष्पोपहारासुस्वकास्वजिरभूमिषु ॥ ९ ॥ अद्यत्वतितरांब्रह्मन्ममभाग्यविपर्ययात् ॥ हिमेनेवहिपद्माभःसंपन्नोहरिणःकृशः ॥ १० ॥ नात्तुमन्नानिशक्नोतिनविहर्तुंगृहावनिम् ॥ अंतःखेदपरीतात्मातूष्णींतिष्ठतिकेवलम् ॥ ११ ॥ सदारःसहभृत्योहंतत्कृतेमुनिनायक ॥ शरदीवपयोवाहोनूनंनिःसारतांगतः ॥ १२ ॥ ईदृशोसौसुतोबालआधिनाथवशीकृतः ॥ कथंददामितंतुभ्यंयोद्धुंसहनिशाचरैः ॥ १३ ॥ अपिबालांगनासंगादपिसाधोसुधारसात् ॥ राज्यादपिसुखायैवपुत्रस्नेहोमहामते ॥ १४ ॥ येदुरंतामहारंभास्त्रिषुलोकेषुखेददाः ॥ पुत्रस्नेहेनसंतोपिकुर्वंतेतानसंशयम् ॥ १५ ॥ असवोथधनंदारास्त्यज्यंतेमानवैःसुखम् ॥ नपुत्रोमुनिशार्दूलस्वभावोत्येषजंतुषु ॥ १६ ॥ राक्षसाःक्रूरकर्माणःकूटयुद्धविशारदाः ॥ रामस्तान्योधयत्वित्थंयुक्तिरेवातिदुःसहा ॥ १७ ॥ विप्रयुक्तोहिरामेणमुहूर्तमपिनोत्सहे ॥ जीवितुंजीविताकांक्षीनरामंनेतुमर्हसि ॥ १८ ॥ नववर्षसहस्राणिममजातस्यकौशिक ॥ दुःखेनोत्पादितास्त्वेतेचत्वारःपुत्रकामया ॥ १९ ॥ प्रधानभूतस्तेष्वेवरामःकमललोचनः ॥ तंविनेहत्रयोप्यन्येधारयंतिनजीवितम् ॥ २० ॥

द्विरोधिनापुत्रस्नेहेनेत्याशंक्याह ॥ अपीति ॥ उक्तसुखान्येवहिधर्मफलंतानिपुत्रसुखंनातिशेरतइतिभावः ॥ १४ ॥ दुरंताश्चिरसाध्यास्तपःक्लेशास्तान् ॥ संतोधार्मिकाअपि ॥१५॥ सुखंत्यज्यतइतिविपरिणामेनानुषंगः ॥ १६ ॥ इत्थंपूर्वोक्तप्रकारेणस्थितोरामः ॥ इत्थमीदृशीयुक्तिरितिवा ॥ १७ ॥ रामेनीतेराक्षसवधोनसंभावितःप्रत्युतसपुत्रस्यममैववधस्त्वयासंपादितःस्यादित्याहचतुर्भिः ॥ विप्रयुक्तइति ॥ तथाचयज्ञधर्मापेक्षयातवमहानधर्मःस्यादितिभावः ॥१८॥ ननुषष्टिवर्षसहस्राणिजातस्यममकौशिकेतिपूर्वरामायणेउक्तंकथंतद्विरुद्धमत्रोच्यते ॥ सत्यम् ॥ अतोनयथाश्रुतोन्वयःकिंतुनववर्षसहस्राणिपुत्रकाम्ययोपलक्षितस्यजातस्यममदुःखेनदुःखसाध्येनाश्वमेधपुत्रेष्ट्यादिनाचत्वारउत्पादिताइति ॥ १९ ॥ तेषुरामएवप्रधानभूतोयथाशरीरेषुप्राणःअतएवतेषांप्रियतमः ॥ किंततस्तत्राह ॥ तंविनेति ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्णांमरणादितिकिंवाच्यमेकस्य यस्यनयनेत्रयाणामन्येषामपिमरणंसतादृशोरामएवमृत्युरूपान्राक्षसान्प्रतिनीयतेभवतेतिचतुर्भिरपिहीनंमांमृतमेवविद्धीत्यर्थः ॥ २१ ॥ निशाचरेति ॥ हस्य रामस्यनयनमात्रेणापित्वन्मृत्युःसंभावितइत्यभिप्रेत्याह ॥ चतुर्णामिति ॥ धर्ममयंधर्मप्रचुरम् ॥ २२ ॥ यदिरामंननयामितदाकथंकार्यसिद्धिस्तत्राह ॥ निशाचरेति ॥ हस्य रामस्यनयनमात्रेणापिस्वमृत्युःसंभावितइत्यभिप्रेत्याह ॥ कियत्प्रमाणाःसंख्यापरिमाणेन ॥ के श्वरथपादातैश्चतुरंगंबलंसैन्यम् ॥ २३ ॥ अपरिज्ञायनास्कंदेदितिपरबलंजिज्ञासुःपृच्छति ॥ किंवीर्याइति ॥ कथंचतेवर्त्तंतइतिशेषः ॥ कियत्प्रमाणाःसंख्यापरिमाणेन ॥ के चैवनामतः ॥ २४ ॥ प्रकर्त्तव्यंप्रतिकर्त्तव्यम् ॥ प्रहर्त्तव्यमितिपाठेस्पष्टम् ॥ २५ ॥ वीर्येणोत्सिक्ताऊर्जिताः ॥ हिप्रसिद्धाः ॥ २६ ॥ तदेवस्फुटयति ॥ श्रूयतइति ॥ २७ ॥ वीर्याणिविभूतयश्चेतिद्वंद्वगर्भकर्म किलेतिसंभावने ॥ सचेत्शंसेतिसंबंधः ॥ तर्त्तार्हि ॥२८॥ तत्कुतस्तत्राह ॥ कालेइति ॥ पृथगिति ॥ कदाचित्केषुचिदेवेतिव्यवस्थयेत्यर्थः ॥

चतुर्णामात्मजानांहिप्रीतिरत्रैवमेपरा ॥ ज्येष्ठंधर्ममयंतस्मान्नरामंनेतुमर्हसि ॥ २२ ॥ निशाचरबलंहंतुंमुनेयदितवेप्सितम् ॥ चतुरंगसमायुक्तंमयासहबलंनय ॥ २३ ॥ किंवीर्याराक्षसास्तेतुकस्यपुत्राःकथंचते ॥ कियत्प्रमाणाःकेचैवइतिवर्णयमेस्फुटम् ॥ २४ ॥ कथंतेनप्रकर्त्तव्यंतेषांरामेणरक्षसाम् ॥ मामकैर्वाबलैर्ब्रह्मन्मयावाकूटयोधिनाम् ॥ २५ ॥ सर्वमेशंसभगवन्यथातेषांमहारणे ॥ स्थातव्यंदुष्टभाग्यानांवीर्योत्सिक्ताहिराक्षसाः ॥ २६ ॥ श्रूयतेहिमहावीर्योरावणोनामराक्षसः ॥ साक्षाद्वैश्रवणभ्रातापुत्रोविश्रवसोमुनेः ॥ २७ ॥ सचेत्तवमखेविघ्नंकरोतिकिलदुर्मतिः ॥ तत्संग्रामेनशक्ताःस्मोवयंतस्यदुरात्मनः ॥ २८ ॥ कालेकालेपृथग्ब्रह्मन्भूरिवीर्यविभूतयः ॥ भूतेष्वभ्युदयंयांतिप्रलीयंतेचकालतः ॥ २९ ॥ अद्यास्मिंस्तुवयंकालेरावणादिषुशत्रुषु ॥ नसमर्थाःपुरःस्थातुंनियतेरेषनिश्चयः ॥ ३० ॥ तस्मात्प्रसादंधर्मज्ञकुरुत्वंममपुत्रके ॥ ममचैवाल्पभाग्यस्यभवान्हिपरदैवतम् ॥ ३१ ॥ देवदानवगंधर्वायक्षाःपतगपन्नगाः ॥ नशक्तारावणंयोद्धुंकिंपुनःपुरुषायुधि ॥ ३२ ॥ महावीर्यवतांवीर्यमादत्तेयुधिराक्षसः ॥ तेनसार्द्धंनशक्ताःस्मसंयुगेतस्यबालकैः ॥ ३३ ॥ अयमन्यतमःकालःपेलवीकृतसज्जनः ॥ राघवोपिगतोदैन्यंयतोवार्द्धकजर्जरः ॥ ३४ ॥

धारयः ॥ २९ ॥ किंततस्तत्राह ॥ अद्येति ॥ अस्मिन्कालेनसमर्थास्तत्राप्यद्यसुतरामित्याशयः ॥ नियतेर्दैवस्यईश्वरस्येतियावत् ॥ ३० ॥ अनुकंप्यःपुत्रःपुत्रकस्तस्मिन् ॥ अर्थिमनोरथसमर्थनासमर्थत्वादल्पभाग्यस्य ॥३१॥ ननुकुतस्तवेदृशमधैर्यंतत्राह ॥ देवेति ॥ पुरुषामनुष्याः ॥३२॥ महतांपूज्यतमानांवीर्यवतामिंद्रादीनामपिआदत्तेअपहरतीवराक्षसोरावणः ॥ संयुगेयोद्धुमितिशेषः ॥ येनसहवयंनशक्ताःस्मतस्यबालकैःकिंशक्यमितिशेषः ॥ अथवातस्यबालकैरिंद्रजित्प्रभृतिभिःसहापिनशक्ताःस्मइतिपूर्वेण संबंधः ॥ ३३ ॥ अशक्तौहेत्वंतरमाह ॥ अयमिति ॥ पेलवीकृतानिर्बलीकृताःसज्जनायेनसः ॥ राघवःस्वयमेववार्द्धकेनयतोजर्जरःशिथिलः ॥ अथवाराघवोरामोवृद्धकएववार्द्धकःसइवजर्जरः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवेतिकल्पांतरे ॥ यज्ञघ्नंतवेतिशेषः ॥ कथयतुभवानितिशेषः ॥ असुरप्रख्यंदैत्यसदृशंदैत्याद्राक्षस्यामुत्पन्नत्वात् ॥ शैवशूलबलेनतस्याजय्यत्वान्मांधातृमृत्युत्वाच्चनैवेत्यवधारणम् ॥ ३५॥ अथवेत्यनुषज्यते ॥ सुंदोपसुंदपुत्रौमारीचसुबाहू ॥ ३६ ॥ अदत्तमपिरामंतपोबलान्नेष्याम्येवेतिचेत्तत्राह ॥ अथेति ॥ तेत्वया ॥ तर्त्तार्हिउक्तकल्पे ॥ कर्त्तुरेवशेषत्वविक्षयाषष्ठी ॥ एवकारोराक्षसव्यावृत्त्यर्थः ॥ अन्यथाअमृत्वातु ॥ शाश्वतंनिश्चितम् ॥ ३७ ॥ असौरघूद्वहोदशरथोमुनेरभिमतेरामप्रेषणेराक्षसवधेचसंशयेकर्त्तव्यमथवानकर्त्तव्यंसेत्स्यत्यथवानसेत्स्यतीत्यादिरूपेकल्लोलेमहोर्मिजालेनिमग्नइवक्षणंसुखंनिश्चयमपिनाज्ञासीत् ॥ यतःसप्रोद्वीचौजलधौमुह्यमानइवासीदितिशेषः ॥ ३८॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०अष्टमःसर्गः ॥ ८ ॥ ॥ ७ ॥ ॥ विश्वामित्रस्यकोपोत्रतत्तपोस्त्रबलोक्तिभिः ॥ वसिष्ठेनशनैराज्ञःसमाधानंचवर्ण्यते ॥ १ ॥

अथवालवणंब्रह्मन्यज्ञघ्नंतंमधोःसुतम् ॥ कथयत्वसुरप्रख्यंनैवमोक्ष्यामिपुत्रकम् ॥ ३५ ॥ सुंदोपसुंदयोश्चैवपुत्रौवैवस्वतोपमौ ॥ यज्ञविघ्नकरौब्रूहिनतेदास्यामिपुत्रकम् ॥ ३६ ॥ अथनेष्यसिचेद्ब्रह्मंस्तद्धतोस्म्यहमेवते ॥ अन्यथातुनपश्यामिशाश्वतंजयमात्मनः ॥ ३७॥ इत्युक्त्वामृदुवचनंरघूद्वहोसौकल्लोलेमुनिमतसंशयेनिमग्नः॥ नाज्ञासीत्क्षणमपिनिश्चयंमहात्माप्रोद्वीचाविवजलधौसमुह्यमानः॥३८॥ ॥इत्यार्षेवासिष्ठमहारामायणेवा०दे०मो०वै०दशरथवाक्यंनामाष्टमःसर्गः॥८॥ ॥७॥ ॥वाल्मीकिरुवाच॥ ॥तच्छ्रुत्वावचनंतस्यस्नेहपर्याकुलेक्षणम्॥समन्युःकौशिकोवाक्यंप्रत्युवाचमहीपतिम्॥ १ ॥ करिष्यामीतिसंश्रुत्यप्रतिज्ञांहातुमर्हसि॥ सभवान्केसरीभूत्वामृगतामिववांछसि ॥ २॥ राघवाणामयुक्तोयंकुलस्यास्यविपर्ययः॥ नकदाचनजायंतेशीतांशोरुष्णरश्मयः॥ ३ ॥ यदित्वंनक्षमोराजन्गमिष्यामियथागतम् ॥ हीनप्रतिज्ञःकाकुत्स्थसुखीभवसबांधवः॥ ४॥ ॥वाल्मीकिरुवाच॥ ॥तस्मिन्कोपपरीतेथविश्वामित्रेमहात्मनि॥ चचालवसुधाकृत्स्नासुरांश्चभयमाविशत्॥ ५॥ क्रोधाभिभूतंविज्ञायजगन्मित्रंमहामुनिम्॥ धृतिमान्सुव्रतोधीमान्वसिष्ठोवाक्यमब्रवीत्॥ ६ ॥

स्नेहेनपर्याकुलेव्याकुलेईक्षणेनेत्रेयस्मिंस्तुल्यकालतयातत्तथाभूतंवचनंश्रुत्वेत्यर्थः ॥ १ ॥ संश्रुत्यअंगीकृत्य ॥ सप्रसिद्धोभवान्पूज्यःत्वमित्यध्याहार्यम् ॥ अन्यथामध्यमपुरुषद्वयानुपपत्तेः ॥ २ ॥ राघवाणांकुलस्यअयंविपर्ययोनृतवादलक्षणोऽयुक्तः ॥ तदेवव्यतिरेकन्यासेनसमर्थयति ॥ नेति ॥ ३ ॥ नक्षमोनसमर्थः ॥ ४ ॥ परीतेव्याप्ते ॥ महात्मनितपोमाहात्म्यशालिनि ॥ पत्युरपराधादपराधिधारणापराधाद्वामामेवशप्स्यतीतिभयाद्वसुधाचचाल ॥किमन्यमेवतपसारावणादिहंतारंस्रक्ष्यतिसचास्मानपिजेष्यतीतिसुरान्भयमाविशत् ॥ चादन्यानपि ॥ ५ ॥ जगन्मित्रंविश्वामित्रम् ॥ विश्वस्यमित्रंविश्वामित्रइतितन्नामार्थप्रसिद्धेः ॥ मित्रेचर्षाविति पूर्वपदस्यदीर्घः ॥ यद्यपिवसिष्ठोपिकोपेनैवतत्कोपप्रतीकारेसमर्थस्तथापिनचुक्रोधयतोसौधृत्यादिमानितिभावः ॥ ६ ॥

१ विश्वस्यहवैमित्रंविश्वामित्रआसेतिश्रुतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैलोक्येपियेगुणवतांगुणाःप्रसिद्धास्तैःसर्वैर्भूषितः ॥ ७ ॥ प्रतिज्ञापालनंव्रतंतच्छोभनंयस्यतथाविधएतावंतंकालंभूत्वेत्यर्थः ॥ भवच्छब्दमध्यमपुरुषौपूर्ववत् ॥ धर्मेणयश
साचयुतइतित्रिषुलोकेषुविख्यातः ॥ ८ ॥ स्वस्यस्वानांचधर्मंप्रतिज्ञापालनंप्रतिपद्यस्व ॥ त्रिष्वपिभुवनेष्वभिलषितसंपादनेईष्टइतित्रिभुवनेशस्तस्य ॥ ९ ॥ तन्नहरेदित्यन्वयः
॥ १० ॥ यद्वृत्ताःसंतिराजानस्तद्वृत्ताःसंतिहिप्रजाइतिन्यायात्प्रजामर्यादापालनायापिप्रतिज्ञावश्यंपालनीयेत्याह ॥ इक्ष्वाकिितिद्वाभ्याम् ॥ नपालयस्यनृतीकरोषिचेत् ॥ ११ ॥
प्रणीतेनप्रवर्त्तितेन ॥ जंतवोजंतुसदृशाअज्ञाअपि ॥ १२ ॥ पुरुषसिंहेनपुरुषश्रेष्ठेनविश्वामित्रेण ॥ ज्वलनेनेति ॥ इंद्रनिलयेवस्थितमममृतंपरितःप्राकारभूतेनाग्निनारक्ष्यतइति
प्रसिद्धम् ॥ कृतास्त्रंशिक्षितास्त्रम् ॥ शक्ष्यंतिधर्षयितुमितिशेषः ॥ १३ ॥ उक्तार्थोपपत्तयेविश्वामित्रप्रभावंप्रपंचयति ॥ एषइति ॥ परंअयनंस्थानम् ॥ १४ ॥ सचराचरेप्रसिद्धमि

॥ श्रीवसिष्ठउवाच ॥ ॥ इक्ष्वाकूणांकुलेजातःसाक्षाद्धर्मइवापरः ॥ भवान्दशरथःश्रीमांस्त्रैलोक्यगुणभूषितः ॥ ७ ॥ धृतिमान्सुव्रतोभू
त्वानधर्मंहातुमर्हसि ॥ त्रिषुलोकेषुविख्यातोधर्मेणयशसायुतः ॥ ८ ॥ स्वधर्मंप्रतिपद्यस्वनधर्मंहातुमर्हसि ॥ मुनेस्त्रिभुवनेशस्यवचनंक
र्तुमर्हसि ॥ ९ ॥ करिष्यामीतिसंश्रुत्यतत्तेराजन्नकुर्वतः ॥ इष्टापूर्त्तंहरेद्धर्मंतस्माद्रामंविसर्जय ॥ १० ॥ इक्ष्वाकुवंशजातोपिस्वयंदशरथो
पिसन् ॥ नपालयसिचेद्वाक्यंकोपरःपालयिष्यति ॥ ११ ॥ युष्मदादिप्रणीतेनव्यवहारेणजंतवः ॥ मर्यादांनविमुंचंतितांनहातुंत्वमर्हसि
॥ १२ ॥ गुप्तंपुरुषसिंहेनज्वलनेनामृतंयथा ॥ कृतास्त्रमकृतास्त्रंवानैनंशक्ष्यंतिराक्षसाः ॥ १३ ॥ एषविग्रहवान्धर्मएषवीर्यवतांवरः ॥
एषबुद्ध्याधिकोलोकेतपसांचपरायणम् ॥ १४ ॥ एषोस्त्रंविविधंवेत्तित्रैलोक्येसचराचरे ॥ नैतदन्यःपुमान्वेत्तिनचवेत्स्यतिकश्चन ॥ १५ ॥
नदेवानर्षयःकेचिन्नासुरानचराक्षसाः ॥ ननागायक्षगंधर्वाःसमेताःसदृशामुनेः ॥ १६ ॥ अस्त्रमस्मैकृशाश्वेनपरैःपरमदुर्जयम् ॥ कौशि
कायपुरादत्तंयदाराज्यंसमन्वगात् ॥ १७ ॥ तेहिपुत्राःकृशाश्वस्यप्रजापतिसुतोपमाः ॥ एनमन्वचरन्वीरादीप्तिमंतोमहौजसः ॥ १८ ॥

तिशेषः ॥ सचराचरेअन्योनवेत्तीत्युत्तरान्वयिवा ॥ १५ ॥ नसदृशाःप्रभावेणेतिशेषः ॥ नन्विदंकथंसंगच्छतांभृग्वंगिरोगस्त्यप्रभृतीनांमहर्षीणांब्रह्मादीनांदेवानांचप्रत्येकमपि
न्यूनप्रभावत्वानुपपत्तेरितिचेदेवंतर्हितत्त्वदृशास्यब्रह्मभावमन्येषामाभिमानिकंपरिच्छिन्नभावमभिप्रेत्येदमुच्यतइत्यदोषः ॥ नचब्रह्मभावेनापितेषामेतत्सादृश्यम् ॥ तत्रभेदा
भावेनतद्घटितस्यतस्यायोगात् ॥ तथाचश्रुतिः ॥ तस्यहनदेवाश्चनाभूत्याईशतेआत्माह्येषांसभवतीति ॥ १६ ॥ कृशाश्वेनजनितमितिशेषः ॥ दत्तंतपसातोषितेनरुद्रेणेतिशेषः ॥
प्रसिद्धमिदंपूर्वरामायणे ॥ १७ ॥ तेअस्त्रदेवाः ॥ प्रजापतिसुतोरुद्रस्तदुपमाःसंहारे ॥ वीराविक्रांताः ॥ ओजःशत्रुनिर्जयसामर्थ्यम् ॥ एनंविश्वामित्रंतपःप्रभावेणवशीकृतत्वा
दन्वचरन्ननुचरवत्सेवंते ॥ भूतकालोनविवक्षितः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषुप्रधानानाह ॥ जयेत्यादिना ॥ दाक्षायिण्यौदक्षकन्ये ॥ १९ ॥ तान्विभज्यदर्शयति ॥ पंचाशतमिति ॥ लब्धवरापतिशुश्रूषयेतिशेषः ॥ सुरसैन्यानामितिकर्त्तरिषष्ठी ॥ अतोयोग्यतयाअसुरवधएवलभ्यते ॥ २० ॥ संघर्षान्परास्त्राभिभवनशीलत्वात्तदाख्यान् ॥ दुराकारांस्तीक्ष्णाकारान् ॥ २१ ॥ जगत्सर्वमनुतेयोगबलात्साक्षात्पश्यतितच्छीलो जगन्मुनिः ॥ अतएवरामविजयमपिभाविनंदृष्ट्वैवसमागतइतिनबुद्धिवैक्लव्यंयुक्तमित्तिभावः ॥ २२ ॥ तदेवद्रढयन्नाह ॥ अस्मिन्निति ॥ सत्वंप्रभावः ॥ पुरुषस्यसाधारणस्यापि ॥ अमरत्वमेतिअर्थात्सपुरुषः ॥ तथाचसाधारणपुरुषस्याप्येतत्सन्निधानमात्रेणापियत्रप्राप्तादपिमृत्योर्नभयंप्रत्युतामरत्वप्राप्तिस्तत्रमहाप्रभावस्यरामस्यगोप्तरितस्मिन्क्षुद्रेभ्योराक्षसेभ्योभयमत्यंतमसंभावितमितिमूढवन्माविषीदेत्यर्थः ॥ २३ ॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवै० नवमःसर्गः ॥ ९ ॥ ॥ ७ ॥ ॥ राज्ञात्रप्रहितो

जयाचसुप्रभाचैवदाक्षायिण्यौसुमध्यमे ॥ तयोस्तुयान्यपत्यानिशतंपरमदुर्जयम् ॥ १९ ॥ पंचाशतंसुतान्जज्ञेजयालब्धवरापुरा ॥ वधार्थंसुरसैन्यानांतेक्षमाकामचारिणः ॥ २० ॥ सुप्रभाजनयामासपुत्रान्पंचाशतंपरान् ॥ संघर्षान्नामदुर्धर्षान्दुराकारान्वलीयसः ॥ २१ ॥ एवंवीर्योमहातेजाविश्वामित्रोजगन्मुनिः ॥ नरामगमनेबुद्धिंविक्लवांकर्तुमर्हसि ॥ २२ ॥ अस्मिन्महासत्वतमेमुनींद्रेस्थितेसमीपेपुरुषस्यसाधो ॥ प्राप्तेपिमृत्यावमरत्वमेतिमादीनतांगच्छयथाविमूढः ॥ २३ ॥ ॥ इत्यार्षेवा० वा० दे० मो० वै० वसिष्ठसमाश्वासनंनामनवमःसर्गः ॥ ९ ॥ ॥ ७ ॥ ॥ वाल्मीकिरुवाच ॥ ॥ तथावसिष्ठेब्रुवतिराजादशरथःसुतम् ॥ संप्रहृष्टमनारामंमाजुहाव सलक्ष्मणम् ॥ १ ॥ ॥ दशरथउवाच ॥ प्रतिहारमहाबाहुंरामंसत्यपराक्रमम् ॥ सलक्ष्मणमविघ्नेनपुण्यार्थंशीघ्रमानय ॥ २ ॥ इतिराज्ञाविसृष्टोसौगत्वांतःपुरमंदिरम् ॥ मुहूर्त्तमात्रेणागत्यसमुवाचमहीपतिम् ॥ ३ ॥ देवदोर्द्दलिताशेषरिपोरामःस्वमंदिरे ॥ विमनाःसंस्थितोरात्रौषट्पदःकमलेयथा ॥ ४ ॥ आगच्छामिक्षणेनेतिवक्तिध्यायतिचैकतः ॥ नकस्यचिच्चनिकटेस्थातुमिच्छतिखिन्नधीः ॥ ५ ॥ इत्युक्तस्तेनभूपालस्तंरामानुचरंजनम् ॥ सर्वमाश्वासयामासपप्रच्छचयथाक्रमम् ॥ ६ ॥

गत्वायाष्टीकोरामचेष्टितम् ॥ विज्ञायपुनरागत्यराज्ञेकृत्स्नंन्यवेदयत् ॥ १ ॥ तथेति ॥ उक्तिफलस्यसंप्रहर्षस्यपरगामित्वाद्ब्रूञःपरस्मैपदम् ॥ हेतौशता ॥ १ ॥ अविघ्नेनपुण्यार्थंनिर्विघ्नंमुनेर्यज्ञसिद्ध्यर्थम् ॥ अथवासत्यवचनपरिपालनरूपेमहापुण्येपूर्वोपस्थितमिथ्याशोकवह्निलंबेनान्योपिविघ्नोमाभूदित्यभिप्रेत्यैवमुक्तम् ॥ शीघ्रपदेनाप्येतदेवद्योत्यते ॥ २ ॥ विसृष्टःप्रेषितः ॥ अंतःपुरांतस्थंराममंदिरम् ॥ ३ ॥ विमनाःविषण्णमनाः ॥ ४ ॥ क्षणोघटिकायाःषष्ठोभागः ॥ एकतइतिवक्तीत्यनेनापिसंबध्यते ॥ उक्तिर्वाङ्मात्रेणनमनःपूर्वकंमुख्यंतुध्यायत्येवेतिभावः ॥ ५ ॥ तंप्रतीहारेणसहरामसमाचारनिवेदनायागतंरामानुचरंजनमनाश्वस्तानसम्यङ्निवेदयेयुरित्याश्वासयामास ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकःक्रियायाःप्रश्नोऽपरःकार्श्यविषादाद्यवस्थानाम् ॥ ७ ॥ यष्टिमिवकृशंदेहंदेहयष्टिम् ॥ खिन्नादुःखिताः ॥ तथाचयद्द्रष्टॄणामप्येतादृशेखेदकार्श्येतस्यतेकिंवाच्येइतिभावः ॥८॥राजीवंकमलम् ॥ यतोयस्माद्दिनात्प्रभृत्यागतस्तिष्ठतीतिपदमध्याहार्यम् ॥ अन्यथाआगमनस्यप्रात्यहिकत्वाभावेनाधिकरणातिरिक्तारंभकालानपेक्षत्वेनप्रथमस्यप्रभृतीतिपदस्यवैय्यर्थ्यात् ॥ यदाआगतस्ततःप्रभृतीत्येतावतैवतैवसिद्धेः ॥ स्थितेस्तुप्रात्यहिकत्वाद्दौर्मनस्यवदस्येवाधिकरणकालातिरिक्तारंभकालापेक्षेतिनतद्वैय्यर्थ्यमिति ॥ ९ ॥ आह्निकंनिजव्यापारंभोजनादि ॥ नकरोतिवेत्यनास्थाद्योतनाय ॥ १० ॥ देवार्चनाचदानंचेतिवादेवार्चनंचआदानंचेतिवाविग्रहः ॥ ११ ॥ नारीभिःसहेतिशेषः ॥ दोलाप्रेंखोलिका ॥ अंगणेक्रीडाचत्वरे ॥ यथावर्षधाराभिः सहताउपभुंजानश्चातकःक्रीडतितथानक्रीडतिचेत्यन्वयः ॥ १२ ॥ मुकुलाकारैर्माणिक्यैःप्रोताखचिता ॥ द्यौःस्वर्गः ॥

कथंकीदृग्विधोरामइतिपृष्टोमहीभृता॥ रामभृत्यजनःखिन्नोवाक्यमाहमहीपतिम्॥ ७॥ देहयष्टिमिमांदेवधारयंतइमेवयम् ॥ खिन्नाःखेदेपरिम्लानतनौरामेसुतेतव ॥८॥ रामोराजीवपत्राक्षोयतःप्रभृतिचागतः॥ सविप्रस्तीर्थयात्रायास्ततःप्रभृतिदुर्मनाः॥ ९ ॥ यत्नप्रार्थनयास्माकंनिजव्यापारमाह्निकम् ॥ सोयमाम्लानवदनःकरोतिनकरोतिवा॥ १० ॥ स्नानदेवार्चनादानभोजनादिषुदुर्मनाः॥ प्रार्थितोपिहिनात्मेरश्चात्यशनमीश्वरः॥ ११ ॥ लोलांतःपुरनारीभिःकृतदोलाभिरंगणे ॥ नचक्रीडतिलीलाभिर्धाराभिरिवचातकः॥ १२॥ माणिक्यमुकुलप्रोताकेयूरकटकावलिः॥ नानंदयतितंराजन्द्यौःपातविषयंयथा॥ १३॥ क्रीडद्वधूविलोकेषुवहत्कुसुमवायुषु ॥ लतावलयगेहेषुभवत्यतिविषादवान्॥ १४॥ यद्द्रव्यमुचितंस्वादुपेशलंचित्तहारिच ॥ बाष्पपूर्णेक्षणइवतेनैवपरिखिद्यते॥ १५॥ किमिमादुःखदायिन्यःप्रस्फुरंतीःपुरांगनाः॥ इतिनृत्तविलासेषुकामिनीःपरिनिंदति ॥ १६॥ भोजनंशयनंयानंविलासंस्नानमासनम्॥ उन्मत्तचेष्टितइवनाभिनंदत्यनिंदितम्॥ १७॥

पातविषयमासन्नपतनंस्वर्गिणम् ॥ १३ ॥ क्रीडंतीभिर्वधूभिर्विलोक्यंतइतिवाक्रीडंतीनांवधूनांविविधंलोकनानिलोकायत्रेतिवापदभेदे ॥ क्रीडद्वधूनांविलोकाएवेषवोबाणास्तइववहंतःकुसुमवायवोयत्रेत्यैकपद्येविग्रहः ॥ लतानांवलयनंवेष्टनंवलयस्तत्संबंधिषुगेहेषुकुंजेष्वित्यर्थः ॥ १४ ॥ उचितमुपभोगेलोकशास्त्राविरुद्धम् ॥ पेशलंचतुरम् ॥ चित्तहारिमनोहरम् ॥ १५ ॥ प्रस्फुरंतीर्हावभावलावण्यविलासादिभिःशोभमानानृत्यंतीर्वादृष्ट्वाकियतोदुःखदायिन्यइतिनिंदतीतियोजना ॥ प्रस्फुरंतीतिपाठऋजुः ॥ १६॥ शयनमासनमित्यधिकरणेल्युटौअन्येकरणेल्युटः ॥ विलसंतियेनयस्मिन्वातम् ॥ अनिंदितंनिर्दोषम् ॥ इदंसर्वविशेषणम् ॥ १७ ॥

१ साय २ नृत्येत्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंगितैर्मनोरथैः ॥ असत्असारम् ॥ १८ ॥ उदेतिहृष्यति ॥ निमज्जतिसज्जते ॥ कार्येष्वारंभेषुनतिष्ठत्यास्थांनकरोति ॥ १९ ॥ अलकेषुवल्लर्यःपुष्परता दिमंजर्योविलोलायासांताः ॥ हेलाःश्रृंगारभावजाश्चेष्टाः ॥ मृगीपक्षेअलकाइवपुष्पमंजर्यः ॥ हेलयेवचलितलोचनाश्चपलेक्षणाः ॥२०॥ विपिनेष्वरण्येषु ॥ जंतुषुजंतुसदृशेषुपामरेषु ॥ दैवाद्विक्रीतोमनुष्योयथाएकांतादिष्वेवरतिंबध्नातितद्वत् ॥ २१ ॥ तयाप्रसिद्धया ॥ परिव्राजांयेधर्माअपरिग्रहादयस्तद्वत्तंपरिव्राजमेवअनुयातिअनुकरोति ॥ २२ ॥ एकयामुख्यया ॥ २३ ॥ तर्हितत्रकिंकरोतितत्राह ॥ बद्धेति ॥ शून्यंपरमार्थालंबनेनमनोयस्यसःपरितिष्ठति ॥ ध्यायन्नित्यर्थाल्लभ्यते ॥ २४ ॥ उदयास्तमयावत्रप्रसादविषादौ ॥ सु

किंसंपदाकिंविपदाकिंगेहेनकिमिंगितैः ॥ सर्वमेवासदित्युक्त्वातूष्णीमेकोवतिष्ठते ॥ १८ ॥ नोदेतिपरिहासेषुनभोगेषुनिमज्जति ॥ नचतिष्ठतिकार्येषुमौनमेवावलंबते ॥ १९ ॥ विलोलालकवल्लर्योहेलावलितलोचनाः ॥ नानंदयंतितंनार्योमृग्योवनतरुंयथा ॥ २० ॥ एकांतेषुदिगंतेषुतीरेषुविपिनेषुच ॥ रतिमायात्यरण्येषुविक्रीतइवजंतुषु ॥ २१ ॥ वस्त्रपानाशनादानपराङ्मुखतयातया ॥ परिव्राड्धर्मिणंभूपसोनुयातितपस्विनम् ॥ २२ ॥ एकएववसन्देशेजनशून्येजनेश्वर ॥ नहसत्येकयाबुद्ध्यानगायतिनरोदिति ॥ २३ ॥ बद्धपद्मासनःशून्यमनावामकरस्थले ॥ कपोलतलमाधायकेवलंपरितिष्ठति ॥ २४ ॥ नाभिमानमुपादत्तेनचवांछतिराजताम् ॥ नोदेतिनास्तमायातिसुखदुःखानुवृत्तिषु ॥ २५ ॥ नविद्मःकिमसौयातिकिंकरोतिकिमीहते ॥ किंध्यायतिकिमायातिकथंकिमनुधावति ॥ २६ ॥ प्रत्यहंकृशतामेतिप्रत्यहंयातिपांडुताम् ॥ विरागंप्रत्यहंयातिशरदंतइवद्रुमः ॥ २७ ॥ अनुयातौतथैवैतौराजन्शत्रुघ्नलक्ष्मणौ ॥ तादृशावेवतस्यैवप्रतिबिंबाविवस्थितौ ॥ २८ ॥ भृत्यैराजभिरंबाभिःसंपृष्टोपिपुनःपुनः ॥ उक्त्वानकिंचिदेवेतितूष्णीमास्तेनिरीहितः ॥ २९ ॥ आपातमात्रहृद्येषुमाभोगेषुमनःकृथाः ॥ इतिपार्श्वगतंभव्यमनुशास्तिसुहृज्जनम् ॥ ३० ॥ नानाविभवरम्यासुस्त्रीषुगोष्ठीगतासुच ॥ पुरःस्थितमिवास्नेहोनाशमेवानुपश्यति ॥ ३१ ॥ नीतमायुरनायासपदप्राप्तिविवर्जितैः ॥ चेष्टितैरितिकाकल्याभूयोभूयःप्रगायति ॥ ३२ ॥

खदुःखानुवृत्तिष्विष्टानिष्टसंयोगेषु ॥ २५ ॥ ईहतेइच्छति ॥ अनुधावत्यनुसरति ॥ २६ ॥ विरागंवैराग्यम् ॥ द्रुमपक्षेवैवर्ण्यंरूक्षतामितियावत् ॥ २७ ॥ अनुयातौस्नेहादनुसृतौ ॥ अर्थाद्राममितिगम्यते ॥ तादृशावेवयादृशोरामः ॥२८॥ नकिंचिदित्युक्तेस्तैःपरिहर्तुंशक्यंकिंचिन्नास्तीतिरामाशयः ॥ निरीहितःस्वाभिप्रायव्यंजकचेष्टाशून्यः ॥२९॥ आपतनमापातोविषयेंद्रियसंयोगः ॥ मात्रपदात्परिणामकटुताद्योत्यते ॥ भवतीतिभव्योविवेकीतंनतुसर्वम् ॥ ३० ॥ गोष्ठीविलासस्थानम् ॥ ३१ ॥ प्राप्तिविवर्जितैःपुरुषैः ॥ चेष्टितैर्बहिःप्रवृत्तिभिः ॥ नीतंव्यर्थेतिशेषः ॥ प्राप्तिविवर्जितैश्चेष्टितैरितिसामानाधिकरण्यंवा ॥ अस्मिन्कल्पेनीतंमयेतिशेषः ॥ काकल्यामधुरास्फुटयावाचा ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनेष्टंराजसूयेनमंडलस्येश्वरश्चयः ॥ शास्तियश्चाज्ञयाराज्ञःससम्राट् ॥ अन्यमनाइति ॥ सम्यक्स्वप्रकाशतयाराजतइतिसम्राट्परमात्मेत्यर्थांतरेमनोयस्येत्यर्थः ॥ तस्यचा परिज्ञानान्मुनिस्तत्पर्यालोचनपरः ॥ स्वाभिमतानाशासनादसाराशासनाच्चोपेक्षाहासौ ॥ ३३ ॥ सर्वत्रवस्तुनिसुसमेत्यगुणतःफलतश्चशोभनंस्वानुरूपंतत्प्राप्यापि ॥३४॥ ननु गुणाद्युत्कर्षाद्विस्मययोग्येवस्तुनिविस्मयएवोचितःकथंतत्रावज्ञातत्राह ॥ अपीति ॥ यस्मिन्मनसिबाह्यवस्तुगोचरोविस्मयःस्यात्तन्मनएवइत्थंईदृशविस्मयास्पदमित्यर्थः ॥ कथम् ॥ यतआकाशरूपेआकाशस्थितेवामहारण्येतादृशकमलिन्यासदृशमितिशेषः ॥ द्वावपिशब्दावसंभावनाद्वयद्योतकौ ॥ यथाआकाशेरण्यमरण्येचकमलिन्यत्यंत मसंभावितातथाआत्मनिमनोमनसिचविस्मयइतिनिश्चयादस्यबाह्यवस्तुनिविस्मयोनजायतइतिभावः ॥३५॥ नभेदयंतिनभिंदंति ॥ प्रेषणाध्यारोपाणिच् ॥ धाराजलधाराः ॥ ३६ ॥ आवासंनिवासस्थानं ॥ अर्थिनेयाचकाय ॥ ३७॥ कल्पनामयःकल्पनाप्रचुरः ॥ मोहोभ्रमः ॥ ३८ ॥ आक्रंदपरःइष्टवियोगादितिशेषः ॥ तथाचान्वयव्यतिरेका

सघाद्भवेतिपार्श्वस्थंवदंतमनुजीविनम् ॥ प्रलपंतमिवोन्मत्तंहसत्यन्यमनामुनिः ॥ ३३ ॥ नप्रोक्तमाकर्णयतिईक्षतेनपुरोगतम् ॥ करोत्यवज्ञांसर्वत्रसुसमेत्यापिवस्तुनि ॥ ३४ ॥ अप्याकाशसरोजिन्याअप्याकाशमहावने ॥ इत्थमेतन्मनइतिविस्मयोस्यनजायते ॥३५॥ कांतामध्यगतस्यापिमनोस्यमदनेषवः ॥ नभेदयंतिदुर्भेद्यंधाराइवमहोपलम् ॥३६॥ आपदामेकमावासमभिवांछसिकिंधनम् ॥ अनुशिष्येतिसर्वस्वमर्थिनेसंप्रयच्छति ॥३७॥ इयमापदियंसंपदित्येवंकल्पनामयः ॥ मनसोभ्युदितोमोहइतिश्लोकान्प्रगायति ॥ ३८ ॥ हाहतोहमनाथोहमित्याक्रंदपरोपिसन् ॥ नजनोयातिवैराग्यंचित्रमित्येववक्त्यसौ ॥३९॥ रघुकाननशालेनरामेणरिपुघातिना ॥ भृशमित्थंस्थितेनैववयंखेदमुपागताः ॥ ४० ॥ नविद्मःकिंमहाबाहोतस्यतादृशचेतसः ॥ कुर्मःकमलपत्राक्षगतिरत्रहिनोभवान् ॥ ४१ ॥ राजानमथवाविप्रमुपदेष्टारमग्रतः ॥ हसत्यज्ञमिवाव्यग्रःसोवधीरयतिप्रभो ॥४२॥ यदेवेदमिदंस्फारंजगन्नामयदुत्थितम् ॥ नैतद्वस्तुनचैवाहमितिनिर्णीयसंस्थितः ॥४३॥ नारौनात्मनिनोमित्रेनराज्येनचमातरि ॥ नसंपदानविपदातस्यास्थानविभोबहिः ॥४४॥ निरस्तास्थोनिराशोसौनिरीहोसौनिरास्पदः ॥ नमूढोनचमुक्तोसौतेनतप्यामहेभृशम् ॥ ४५ ॥

भ्यांरागादिदुःखमितिपश्यन्नपीतिभावः ॥ ३९ ॥ रघुपदेनरघुवंशोलक्ष्यते ॥ शालोवृक्षविशेषःप्रसिद्धः ॥ एवकारोहेत्वंतरव्यावृत्तये ॥ ४० ॥ किंकुर्मःशोकापनयार्थमितिशेषः ॥४१ ॥ ननुनीतिज्ञैःसंव्यवहारोपदेशे नास्यमोहोपनीयतांतत्राह ॥ राजानमिति ॥ उपदेष्टाररंराजनीतिव्यवहारानितिशेषः ॥ अवधीरयत्यनभिनंदनेनतिरस्करोतीव ॥ ४२॥ यातीतियत्गत्वरंनश्वरमेवेत्यर्थः ॥ इदमिदंबहुविधंबहिर्दृष्टिगम्यम् ॥ स्फारंविस्तीर्णम् ॥ वसतीतिवस्तुसदेकरूपम् ॥ अहमितिबुद्धिगम्यंचनैवंवस्तुकिंत्वन्यादृशमेवेतिनिर्णीयतज्जिज्ञासुःसंस्थितः ॥ ४३ ॥ विषयेपंचसप्तम्यः ॥ विषयस्यैवहेतुत्वविवक्षयाद्वेतृतीये ॥ बहिशब्देनसामान्योक्तस्यैवपूर्वःप्रपंचः ॥ ४४ ॥ स्वपराधीनविषयत्वाभ्यामास्थाशयोर्भेदः ॥ विशेषाभावादेवनिरीहोनिरिच्छः ॥ बाह्यविषयेचेदंतर्हिदुःखहेत्वभावात्कुतोसौदुःखीतत्राह ॥ निरास्पदइति ॥ यतोयमलब्धात्मविश्रांतिरित्यर्थः ॥ नमूढोविवेकित्वान्नचमुक्तोविश्रांत्यनुदयात् ॥ ४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणत्यागपरइति ॥ रागादिदोषाणामेवजन्मबीजत्वात्तद्रहितस्यममप्राणापगमादेवमुक्तिःसेत्स्यतीतितदाशयइतिभावः ॥ ४६ ॥ अवग्रहेवर्षप्रतिबंधे ॥ ४७ ॥ तोकेपुत्रेचिंता कार्श्यादिशाखानांप्रसरेणप्रतानेनशालिनींविस्तीर्णां आपत्तांआपन्नताम् ॥ आर्षत्वाल्लुकारलोपः ॥ यद्वाआपद्यतइत्यापत्आपन्नस्तद्भावम् ॥ अथवाआपत्तांइतिच्छेदः ॥ इतितोकेआपदितिव्यवहितेनसंबंधः ॥ द्वितीयांतानिपूर्वाणितामित्यस्यविशेषणानि ॥ उद्धर्तुमुन्मूलयितुंसमुदेतुसम्यगुद्युक्तोस्तुभवानितिशेषः ॥ ४८ ॥ आभोगिकृत्रिमवेषव त् ॥ वेषःकृत्रिमआभोगः ॥ प्रतिविषायतेप्रतिकूलविषवदाचरति ॥ ४९ ॥ एवंभूतंतंयःप्रकृतेव्यवहारेनिवेशयितुंक्षमःसईदृशोमहासत्वोमहाबलःकइवस्यान्नकोपीत्यर्थः ॥ इवेत्यनर्थकोनिपातः ॥ अथवात्वांविनेतिशेषः ॥ त्वमिवयोभवतिसएवक्षमःस्यादितिभावः ॥ ५० ॥ आर्त्तिलक्षणानितमांसिविवेकप्रतिरोधकानियस्मात्तथाविधंसकलंमो

किंधनेनकिमंबाभिःकिंराज्येनकिमीहया ॥ इतिनिश्चयवानंतःप्राणत्यागपरःस्थितः ॥ ४६ ॥ भोगेप्यायुषिराज्येषुमित्रेपितरिमातरि ॥ परमुद्वेगमायातश्चातकोवग्रहेयथा ॥ ४७ ॥ इतितोकेसमायातांशाखाप्रसरशालिनीम् ॥ आपत्तामलमुद्धर्तुंसमुदेतुदयापरः ॥ ४८ ॥ तस्यतादृक्स्वभावस्यसमग्रविभवान्वितम् ॥ संसारजालमाभोगिप्रभोप्रतिविषायते ॥ ४९ ॥ ईदृशःस्यान्महासत्वःकइवास्मिन्महीत ले ॥ प्रकृतेव्यवहारेतंयोनिवेशयितुंक्षमः ॥ ५० ॥ मनसिमोहमपास्यमहामनाःसकलमार्त्तितमःकिलसाधुताम् ॥ सफलतांनयतीहत मोहरन्दिनकरोभुविभास्करतामिव ॥ ५१ ॥ ॥ इत्यार्षवासिष्ठ० वा० दे० मो० वैराग्यप्रकरणेराघवविषादोनामदशमःसर्गः ॥ १० ॥ श्रीविश्वामित्रउवाच ॥ ॥ एवंचेत्तन्महाप्राज्ञाभवंतोरघुनंदनम् ॥ इहानयंतुत्वरिताहरिणंहरिणाइव ॥ १ ॥ एषमोहोरघुपतेर्नापद्धोन चरागतः ॥ विवेकवैराग्यवतोबोधएवमहोदयः ॥ २ ॥

हंरामस्यमनसिअपास्यइहास्मिन्रामेविषयेस्वीयांसाधुतामुपदेशसमर्थतांयःसफलतांनयतिसतादृशोमहामनाःकइवस्यादितिपूर्वेणसंबंधः ॥ तत्रदृष्टांतः ॥ तमोहरन्सन्दिनक रोभुविविषयेयथास्वकीयांभास्करतांसफलतांनयतितद्वत् ॥ ५१ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेवै० दशमःसर्गः ॥ १० ॥ ॥ ७ ॥ ॥ विश्वामित्राज्ञया रामस्यानीतस्यसभांतरे ॥ राज्ञाश्वासनमाध्यादिवीजप्रश्नश्चवर्ण्यते ॥ १ ॥ एवमुक्तप्रकारेणनिर्विण्णोदुःखितोमोहितश्चेत्तस्मिन्विषयेमहाप्राज्ञाःपरीक्षणकुशलाभवंतः ॥ ह रिणंयूथपतिंहरिणास्तदनुयायिनोमृगाः ॥ १ ॥ आपद्धोरागतोवायोजडीभावःसएवमोहः अयंतुविवेकादिमतोबोधफलत्वाद्बोधएवेतिमहोदयएवेत्यर्थः ॥ २ ॥

१ मोहशब्दस्यनपुंसकत्वंटीकाकारस्याभिमतंभातिपूर्वव्याख्यातविशेषणात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणशब्दौशीघ्रमित्यर्थे ॥ इहैवचेत्यन्वयः ॥ द्वितीयइहशब्दआगमनदेशएवमोहापनयद्योतनार्थः ॥ घनंमेघम् ॥ ३ ॥ ननुमोहेपनीतेपितस्यकासिद्धिस्तत्राह ॥ एतस्मिन्नि ति ॥ तस्मिन्नुपस्थितेतद्विष्णोःपरमंपदमितिश्रुतिप्रसिद्धेउत्तमेपदेस्वात्मनि ॥ ४ ॥ सत्यतामबाधितवस्तुताम् ॥ मुदितांमुदितताम् ॥ तलोपश्छांदसः ॥ परमानंदरूपताम् ॥ प्रज्ञां अपरिच्छिन्नज्ञानरूपताम् ॥ मुदिआनंदाविर्भावेसतितांप्रसिद्धांप्रज्ञामितिवा ॥ पीतामृतपक्षेश्रुत्युक्तस्यधर्मफलस्यप्रत्यक्षीकरणाद्यथार्थतांस्वर्गसुखितांदैवज्ञानसंपन्नतांचेति क्रमादर्थः ॥ पीनतांवरवर्णत्वंशरीरे ॥५॥ ननुव्यवहारस्याविद्यकत्वप्रसिद्धेश्छत्रापायेछायापायइवतदपायोपिस्यात्तत्वनिष्टःप्रजानांतत्राह ॥ निजामिति ॥ निजांस्ववर्णाश्र मोचिताम् ॥ प्रकृतामुपक्रांताम् ॥ यद्यपिपरिपूर्णकामस्तथापिजीवतासर्वव्यवहारस्यदुस्त्यजत्वादवश्यमुपादेयेव्यवहारेप्रकृतत्यागेन्योपादानेचहेत्वभावात्स्वचरितयाहिजना

इहायातुक्षणाद्रामइहचैववयंक्षणात् ॥ मोहंतस्यापनेष्यामोमारुतोद्रेर्घनंयथा ॥ ३ ॥ एतस्मिन्मार्जितेयुक्त्यामोहेसरघुनंदनः ॥ वि
श्रांतिमेष्यतिपदेतस्मिन्वयमिवोत्तमे ॥ ४ ॥ सत्यतांमुदितांप्रज्ञांविश्रांतिमपतापताम् ॥ पीनतांवरवर्णत्वंपीतामृतइवैष्यति ॥ ५ ॥ नि
जांचप्रकृतामेवव्यवहारपरंपराम् ॥ परिपूर्णमनामान्यआचरिष्यत्यखंडितम् ॥ ६ ॥ भविष्यतिमहासत्वोज्ञातलोकपरावरः ॥ सुखदुः
खदशाहीनःसमलोष्टाश्मकांचनः ॥ ७ ॥ इत्युक्तेमुनिनाथेनराजासंपूर्णमानसः ॥ प्राहिणोद्राममानेतुंभूयोदूतपरंपराम् ॥ ८ ॥ एताव
ताथकालेनरामोनिजगृहासनात् ॥ पितुःसकाशमागंतुमुत्थितोर्कइवाचलात् ॥ ९ ॥ वृतःकतिपयैर्भृत्यैर्भ्रातृभ्यांचजगामह ॥ तत्पुण्यं
स्वपितुःस्थानंस्वर्गंसुरपतेरिव ॥ १० ॥ दूरादेवददर्शासौरामोदशरथंतदा ॥ वृतंराजसमूहेनदेवौघेनेववासवम् ॥ ११ ॥ वसिष्ठविश्वा
मित्राभ्यांसेवितंपार्श्वयोर्द्वयोः ॥ सर्वशास्त्रार्थतज्ज्ञेनमंत्रिवृंदेनमालितम् ॥ १२ ॥

नुयाहकत्वाच्चनिजामेवव्यवहारपरंपरामविच्छिन्नमाचरिष्यतीत्यर्थः ॥ ६ ॥ ननुतामाचरंस्तत्रासज्जेतततःपूर्ववत्सुखदुःखदशावानपिस्यान्नेत्याह ॥ भविष्यतीति ॥ सत्वंमनना दिजंज्ञानदार्ढ्यंबलम् ॥ परंकारणतत्त्वमवरंकार्यतत्त्वम् ॥ लोकेतदुभयंज्ञातंयेन ॥ अथवालोकानांप्राणिनांपरंपरमपुरुषार्थरूपमवरंसांसारिकभ्रमणरूपंचविवेकतोज्ञातंयेन ॥ अथवालोकात्माविराट्परमव्याकृतमवरंहिरण्यगर्भाख्यंचपरमार्थतोब्रह्मैवनपृथगस्तीतिज्ञातंयेन ॥ अतएवानासक्तौसमलोष्टाश्मकांचनःसुखदुःखादिहीनश्चेत्यर्थः ॥ ७ ॥ भूयइत्युक्तेवसिष्ठवचनात्प्राक्प्रतीहारादन्येपिदूताःप्रेषिताएवेतिगम्यते ॥ ८ ॥ अथप्रतीहारगमनानंतरंनिजगृहासनादुत्थितोरामएतावतामुनिसंवादपरिमितेनकालेनस्वपितुः स्थानंजगामेत्युत्तरेणसंबंधः ॥ ९ ॥ वसिष्ठविश्वामित्रादिमहर्षिजुष्टत्वात्पुण्यम् ॥ १० ॥ ११ ॥ सेवितंप्रियहितमधुरोक्तिभिर्लालितम् ॥ सर्वान्शास्त्रार्थांस्तन्वंतिलोकेविस्ता रयंतीतिसर्वशास्त्रार्थततस्तथाविधाश्चतेज्ञाश्चयेमंत्रिणस्तेषांवृंदेन ॥ १२ ॥

१ ज्ञाश्चेत्यस्याग्रेतेषांइनायेइत्यपेक्षितमितिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ककुब्भिर्दिग्भिः ॥ १३ ॥ उपसमीपेआयांतम् ॥ गुहःकार्त्तिकेयः ॥ १४ ॥ कीदृशंददृशुस्तदाह ॥ सत्त्वेत्यादिपंचभिः ॥ शीतस्तापोपशमनेनाह्लादकस्तुषारश्चतद्भावःशैत्यं तेनहिमाचलमिवश्रितम् ॥ शैत्यस्यैवसत्वेत्यादीनिचत्वारिश्लिष्टानिविशेषणानि॥सत्वेनशांतिविवेकहेतुनासत्वगुणेनप्राणिनिकायेनचव्याप्तांतरेण ॥ सकलैःपूर्णैःकलासहितचं द्रेणचसेवितुंयोग्येन ॥ गंभीरेणानवगाह्यांतेनस्फुटेनव्यक्तेनचेतियथोचितंसंबंधः ॥ १५ ॥ सौम्यंप्रियदर्शनम् ॥ सममन्यूनानतिरिक्तांगम् ॥ कांतंमनोहरम् ॥ उपशांतमनुग्रम् ॥ परस्यार्थस्यपुरुषार्थस्य ॥ १६ ॥ सम्यगुद्यन्यौवनारंभोयस्यतम् ॥ वृद्धवदुपशमेनशोभनम् ॥ अनुद्विग्नमविवेकापगमात् ॥ अनानंदमप्राप्तपरमानंदम् ॥ १७ ॥ जगद्यात्रा संसारगतिः ॥ पवित्राणांगुणानांपवित्रगुणानांपुरुषाणांवागोचरंविषयम् ॥ गुणैःसर्वैर्महासत्वैकलोभेनैवसम्यगाश्रितम ॥ १८ ॥ अविक्षुभितयावृत्त्यास्थित्यासर्वसाधनसंप

वसिष्ठविश्वामित्राद्यास्तथादश चारुचामरहस्ताभिःकांताभिःसमुपासितम् ॥ ककुब्भिरिवमूर्त्ताभिःसंस्थिताभिर्यथोचितम् ॥ १३ ॥ रथादयः ॥ ददृशूराघवंदूरादुपायांतंगुहोपमम् ॥ १४ ॥ सत्त्वावष्टब्धगर्भेणशैत्येनेवहिमाचलम् ॥ श्रितंसकलसेव्येनगंभीरेणस्फुटेन च ॥ १५ ॥ सौम्यंसमंशुभाकारंविनयोदारमानसम् ॥ कांतोपशांतवपुषंपरस्यार्थस्यभाजनम् ॥ १६ ॥ समुद्यद्यौवनारंभंवृद्धोपशम शोभनम् ॥ अनुद्विग्नमनानंदंपूर्णप्रायमनोरथम् ॥ १७ ॥ विचारितजगद्यात्रंपवित्रगुणगोचरम् ॥ महासत्वैकलोभेनगुणैरिवसमा श्रितम् ॥ १८ ॥ उदारमार्यमापूर्णमंतःकरणकोटरम् ॥ अविक्षुभितयावृत्त्यादर्शयंतमनुत्तमम् ॥ १९ ॥ एवंगुणगणाकीर्णोदूरादेवरघूद्व हः ॥ परिमेयस्मिताच्छाच्छस्वहारांबरपल्लवः ॥ २० ॥ प्रणनामचलच्चारुचूडामणिमरीचिना ॥ शिरसावसुधाकंपलोलदेवाचलश्रिया ॥ २१ ॥ एवंमुनींद्रेब्रुवतिपितुःपादाभिवंदनम् ॥ कर्त्तुमभ्याजगामाथरामःकमललोचनः ॥ २२ ॥ प्रथमंपितरंपश्चान्मुनीमान्यैकमा नितौ ॥ ततोविप्रांस्ततोबंधूंस्ततोगुरुगणान्सुहृत् ॥ २३ ॥ जग्राहचततोदृष्ट्यामनाङ्मूर्ध्नातथागिरा ॥ राजलोकेनविहितांतांप्रणामपरं पराम् ॥ २४ ॥ विहिताशीर्मुनिभ्यांतुरामःसुसममानसः ॥ आससादपितुःपुण्यंसमीपंसुरसुंदरः ॥ २५ ॥ पादाभिवंदनपरंतमथासौम हीपतिः ॥ शिरस्यभ्यालिलिंगाशुचुचुंबचपुनःपुनः ॥ २६ ॥

त्तावपितत्त्वबोधविश्रांत्यभावादीषत्पूर्णमंतःकरणस्यकोटरंछिद्रमिवस्थितंमनोरथंदर्शयंतंसूचयंतम् ॥ अनुत्तममितिरामविशेषणंवा ॥ १९ ॥ रघूद्वहःप्रणनामेत्युत्तरेणान्वयः॥ अंबरमेवपल्लवोंबरपल्लवः ॥ परिमेयौस्मितमिवाच्छादच्छौस्वीयौहारांबरपल्लवौयस्यसः ॥ २० ॥ चूडामणिःशिरोरत्नम् ॥ देवाचलःसुमेरुः ॥ २१ ॥ एवंसर्गादिश्लोकसप्तको क्तप्रकारेणमुनींद्रेविश्वामित्रेब्रुवतिसत्यथरामःपितुःपादाभिवंदनंकर्त्तुमभ्याजगामेतिसंबंधः ॥ २२ ॥ मुनीवसिष्ठविश्वामित्रौ ॥ मान्यैरपिमुख्यतयामानितौ ॥ सुहृत्शोभन हृदयोरामः ॥ २३ ॥ मनाङ्नम्रेणमूर्ध्नेतितदुचितेषुविनयसूचनाय ॥ २४ ॥ सुसममानसःआशीरर्थलाभालाभयोः ॥ २५ ॥ शिरसिआघ्रायेतिशेषः ॥ अभ्यालिलिंगअ भिमुखमालिंगितवान् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथारामंतथैव ॥ राजहंसोंबुजेयथेतिचुंबनेदृष्टांतः ॥ २७ ॥ उत्संगेअंके ॥ अंशुकेवस्त्रे ॥ न्यविक्षतउपाविशत् ॥ २८ ॥ जडवदविवेकिवत् ॥ जीर्णयाशिथिलया ॥ खेदायदैन्याय ॥ आत्माजीवः ॥ २९ ॥ वृद्धैःपित्रादिभिः ॥ गुरुभिराचार्यैः ॥ प्रजापालनधर्मसाधनत्वात्पुण्यंपदंराजस्थानंस्वर्गादिचअनुधावताअनुसरता ॥ ३० ॥ असन्निहितादूरेतिष्ठंतिनोपसर्पंति ॥ सन्निहितास्तुपरिपेलवाःसर्वतोलघीयस्यस्तिष्ठंतिनकार्यक्षमाइत्यर्थः ॥ मोहस्यप्रसरेतुतद्विपरीताभवंतीत्यर्थः ॥ ३१ ॥ त्वमेवशूरोयतस्त्वयाविषयारयोविजिताः ॥ प्रसिद्धाअरयोदुरुच्छेदाएवनतेस्वेनदुःखेनारभ्यंते विषयारयस्तुस्वेनैवदुःखेनैवसंपादितादुःखांतरपरंपरारंभकादुरुच्छेदाश्चेतिभावः ॥ ३२ ॥ एवंभूतोपित्वमज्ञानांयोग्येव्यामोहसागरेअतज्ज्ञइवानात्मज्ञइवकिंनिमज्जसि ॥ कल्लोलावृहत्तरंगाविक्षेपाः ॥ जाड्यंमौढ्यमावरणम् ॥ ३३ ॥ चलतानीलोत्पलसमूहेनसमांलोचनयोर्लोलतांचंचलताम् ॥ चेतोव्यपचित्तंतेनकृताम् ॥ केनहेतुनाविमुह्यसिभ्राम्यसि तवभ्रांतिहेतुःकइत्यर्थः ॥ ३४ ॥ आधयोमानसव्यथामनःपरिलुंपंतिविषादयंति ॥ कस्मिन्निष्ठासमाप्तिर्येषांते ॥ कस्मिन्नूकामेसंपन्नेशाम्यंतीत्यर्थः ॥ अथवाकिमाश्रिताः ॥ केचेतितत्स्वरूपप्रश्नः ॥ केनेतितन्निमित्तप्रश्नः ॥ कियंतइतितद्विभागप्रश्नः ॥ कारणेनेतिकेनेत्यनेनसंबध्यते ॥ गेहंगृहम् ॥ आखनंतीत्याखवोमूषकाः ॥ ३५ ॥ नन्वाधिहेत्वादयोजगतिप्रसिद्धाएवतेकुतःपृच्छ्यंतेतत्राह ॥ मन्यइति ॥ सत्यंप्रसिद्धास्त्वंतुतेषामनुचितानामुत्तममुचितंपदंस्थानंनभवसि ॥ आपन्नोदरिद्रोवातत्पदंस्यात् ॥ ततवचआपत्सुअप्रयोज्यंप्रतीकार्यंनास्ति ॥ पितृप्रभावेणैवसर्वापदांनिरस्तत्वात् ॥ अपिचतेआधयोनिहीनाःस्वतएवनिरस्ताःसर्वसौभाग्यसंपन्नतयापूर्णत्वादितिभावः ॥ ३६ ॥ अभिमतमनतिक्रम्ययथाभिमतम् ॥ अभिमतार्थमप्रच्छाद्येत्यर्थः ॥ अनघेतिहेतुगर्भम् ॥ सर्वमेवाभिमतंप्राप्स्यसीतिसंबंधः ॥ येनाभिमतलाभेनपुनराधयस्त्वांनभेत्स्यंते ॥ ३७ ॥

भूमौपरिजशत्रुघ्नंलक्ष्मणंचैवतथैवपरवीरहा ॥ आलिलिंगघनस्नेहोराजहंसोंबुजेयथा ॥ २७ ॥ उत्संगेपुत्रतिष्ठेतिवदत्यथमहीपतौ ॥ भूमौपरिजनास्तीर्णेसोंशुकेथन्यविक्षत ॥ २८ ॥ ॥राजोवाच ॥ ॥पुत्रप्राप्तविवेकस्त्वंकल्याणानांचभाजनम् ॥ जडवज्जीर्णयाबुद्ध्याखेदायात्मानदीयताम् ॥ २९ ॥ वृद्धविप्रगुरुप्रोक्तंत्वादृशेनानुतिष्ठता ॥ पदमासाद्यतेपुण्यंनमोहमनुधावता ॥ ३० ॥ तावदेवापदोदूरेतिष्ठंतिपरिपेलवाः ॥ यावदेवनमोहस्यप्रसरःपुत्रदीयते ॥ ३१ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥राजपुत्रमहाबाहोशूरस्त्वंविजितास्त्वया ॥ दुरुच्छेदादुरारंभाअप्यमीविषयारयः ॥ ३२ ॥ किमतज्ज्ञइवाज्ञानांयोग्येव्यामोहसागरे ॥ विनिमज्जसिकल्लोलबहुलेजाड्यशालिनि ॥ ३३ ॥ ॥विश्वामित्रउवाच ॥ ॥चलन्नीलोत्पलव्यूहसमलोचनलोलताम् ॥ ब्रूहिचेतःकृतांत्यक्त्वाहेतुनाकेनमुह्यसि ॥ ३४ ॥ किंनिष्ठाःकेचतेकेनकियंतःकारणेनते ॥ आधयःप्रविलुंपंतिमनोगेहमिवाखवः ॥ ३५ ॥ मन्येनानुचितानांत्वमाधीनांपदमुत्तमम् ॥ आपत्सुचाप्रयोज्यंतेनिहीनाअपिचाधयः ॥ ३६ ॥ यथाभिमतमाशुत्वंब्रूहिप्राप्स्यसिचानघ ॥ सर्वमेवपुनर्येनभेत्स्यंतेत्वांतुनाधयः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुमतेर्विश्वामित्रस्यइतिउक्तमुचितानांस्वाभिलाषानुरूपाणामर्थानांविलासःप्रकाशोगर्भेतात्पर्येयस्यतथाविधंवाक्यंनिशम्यरघुवंशकेतुःश्रीरामःअनुमिताभिमतार्थसिद्धिःस
नूखेदंतत्याजेतिसंबंधः ॥ वारिवाहेमेघे ॥ बर्हीमयूरः ॥३८॥ ॥ इतिश्रीवासिष्ठमहारा॰तात्पर्यप्रकाशेवै॰एकादशःसर्गः ॥११॥ ॥७॥ ॥ भोगानांदुःखरूपत्वं
विषयादेरसत्यता ॥ संपदामप्यनर्थत्वमित्याद्यत्रोपवर्ण्यते ॥ १ ॥ समाश्वस्यसम्यगाश्वासंप्राप्य ॥ परिपूर्णार्थगौरवादिवमंथरंमंदप्रवृत्तमतएवचारु ॥ १ ॥ कोलंघयतीति ॥
तथाचभवदाज्ञापरिपालनायवदामिनतुधार्ष्ट्येनेतिभावः ॥२ ॥ इत्थंविनयोक्त्यामुनिवशीकृत्यस्ववृत्तानुवादव्याजेनधर्मानुष्ठानजन्यचित्तशुद्ध्याविवेकवैराग्याभ्यांविचारोदयं
स्वस्यदर्शयति ॥ अहंतावदित्यादिचतुर्भिः ॥ ३ ॥ विव्हृतःसंचरितवान् ॥ गत्यर्थत्वात्कर्त्तरिक्तः ॥ ४ ॥ ईदृशोवक्ष्यमाणलक्षणः ॥ ५ ॥ भोगेषुरसोरागस्तच्छून्यया ॥६॥ किं
नामसुखंनकिंचिदित्यर्थः ॥ संततिर्विस्तारः ॥ असुखत्वमेवोपपादयति ॥ जायतइति ॥ मृतिबीजंभवेज्जन्मजन्मबीजंभवेन्मृतिरितिवचनादितिभावः ॥ ७ ॥ नन्वस्तुतथातथा

इत्युक्तमस्यसुमतेरघुवंशकेतुराकर्ण्यवाक्यमुचितार्थविलासगर्भम् ॥ तत्याजखेदमभिगर्जतिवारिवाहेबर्हीयथात्वनुमिताभिमतार्थ
सिद्धिः ॥ ३८ ॥ ॥ इत्यार्षेवासिष्ठमहा॰वा॰दे॰मो॰वैरा॰राघवसमाश्वासनंनामैकादशःसर्गः ॥ ११ ॥ ॥ ७ ॥ ॥ श्रीवाल्मीकिरु
वाच ॥ ॥ इतिपृष्टोमुनींद्रेणसमाश्वस्यचराघवः ॥ उवाचवचनंचारुपरिपूर्णार्थमंथरम् ॥ १ ॥ ॥ श्रीरामउवाच ॥ ॥ भगवन्भवता
पृष्टोयथावदधुनाखिलम् ॥ कथयाम्यहमज्ञोपिकोलंघयतिसद्वचः ॥ २ ॥ अहंतावदयंजातोनिजेस्मिन्पितृसद्मनि ॥ क्रमेणवृद्धिंसंप्रा
प्तःप्राप्तविद्यश्चसंस्थितः ॥ ३ ॥ ततःसदाचारपरोभूत्वाहंमुनिनायक ॥ विव्हृतस्तीर्थयात्रार्थमुर्वीमंबुधिमेखलाम् ॥ ४ ॥ एतावताथकाले
नसंसारास्थामिमांहरन् ॥ समुद्भूतोमनसिमेविचारःसोयमीदृशः ॥ ५ ॥ विवेकेनपरीतात्मातेनाहंतदनुस्वयम् ॥ भोगनीरसयाबुद्ध्या
प्रविचारितवानिदम् ॥ ६ ॥ किंनामेदंबतसुखंयेयंसंसारसंततिः ॥ जायतेमृतयेलोकोम्रियतेजननायच ॥ ७ ॥ अस्थिराःसर्वएवेमेसच
राचरचेष्टिताः ॥ आपदांपतयःपापाभावाविभवभूमयः ॥ ८ ॥ अयःशलाकासदृशाःपरस्परमसंगिनः ॥ श्लिष्यंतेकेवलंभावामनःकल्प
नयास्वया ॥ ९ ॥

प्यंतरालेविभवभूमिषुसुखमनुभूयतएवेतितत्राह ॥ अस्थिराइति ॥ चराणांप्रवृत्तिनिवृत्त्यधीनसाध
नसाध्याअचराणांतुदैवोपपन्नसाधनायत्तेत्युभयविधाभोगप्रवृत्तिस्तल्लक्षणचेष्टितसहिताअपिविभवभूमयोवैभवसमयमात्रस्थितिकाभावाविषयाःस्रक्चंदनान्नपानादयोनसु
खदायतोऽस्थिराअलाभवियोगकालयोर्दुःखदाइत्यर्थः ॥ तथाप्युपभोगकालेतेभ्यःसुखमाशंक्याह ॥ आपदांपतयइति ॥ पतयःस्वामिनःश्रेष्ठाइतियावत् ॥ रागादिदोषोपज
ननेनपरमापत्प्रापकत्वात्तद्रूपाएवेत्यर्थः ॥ अनिषिद्धाएवंनिषिद्धास्तुपापाअपिपापजनकत्वात् ॥ तथाचविषसंपृक्तान्नसदृशत्वान्नतद्भोगेसुखमितिनास्तिसंसारेसुखमितिसि
द्धमितिभावः ॥ ८ ॥ यदिनतेसुखदास्तर्हिकथंसुखकारकत्वेनपरस्परंसंबध्यंतेतत्राह ॥ अयइति ॥ सर्वेपिभावाःस्वतोलोहशलाकाःसूच्यादयइवपरस्परमसंगिनःसंबंधशून्या
एवपरंतुअनयाममेदंभोगसाधनमनेनेत्थमिदंकरिष्यामीत्यादिमनःकल्पनयाकेवलंक्रियाकारकादिभावेनश्लिष्यंतेसंबद्ध्यंते ॥ तथैवान्वयव्यतिरेकदर्शनादित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंभावानांसंबंधमात्रंमनोधीनंकिंतुजन्मस्थितिप्रकाशभंगाअपीतिसर्वांशेमनोधीनमेवजगदित्याह ॥ मनइति ॥ तर्हिमनएवसुखसाधनमस्तुनेत्याह ॥ मनइति ॥ असच्छू न्यमिवविवेकेआभाति ॥ तथाचनततोपिसुखसिद्धिरितिवयमेतावंतंकालंकेनसुखंस्यादितिमोहिताःस्म ॥ १०॥ अतःपरिशेषाद्भ्रांतिरेवेयमितिदर्शयति ॥ असतैवेति ॥ संसारेसु खतत्साधनयोरसत्वादेवेत्यर्थः ॥ कष्टंयथास्यात्तथाविकुष्टाआकुष्टाः ॥ दार्ष्टांतिकेमृगतृष्णांभःसदृश्यासुखाशयेतिगम्यते ॥ मुग्धमृगामूढहरिणाः ॥११॥ संस्थिताःपरवशा इत्यर्थः ॥ जानानाअभिज्ञंमन्याअपिवयंमूढाएव॥ शांबरंशंबरसंबंधि ॥ मायेयमितिभावः ॥१२॥ भोगाविषयसुखलवाःकिंनाम ॥ दृष्टनष्टस्वभावत्वाद्दुरंतदुःखबीजत्वाच्चदौ र्भाग्यरूपाएवनपुरुषार्थइतिभावः ॥ यैर्वयंमुधाव्यर्थमेवबद्धाइतिभावनाभ्रांतिर्येषांतेतथाभूताःसंस्थिताः ॥ १३॥ आइतिस्मरणाभिलापे ॥ बहुकालेनज्ञातम् ॥ किंतदाह ॥ व्यर्थमेवमोहेनिपतिताइति ॥ वनेश्वभ्रेवनांतर्गतगर्ते ॥ १४ ॥ कोहं इदंदृश्यजातंकिंस्वरूपं किमर्थंचागतं राज्येनचमेकिं भोगैश्चकिं किमिदंसर्वंमिथ्यैवोतकिंचित्सत्यमपि त

मनःसमायत्तमिदंजगदाभोगिदृश्यते॥ मनश्चासदिवाभातिकेनस्मपरिमोहिताः ॥ १० ॥ असतैववयंकष्टंविकुष्टामूढबुद्धयः॥ मृगतृ ष्णांभसादूरेवनेमुग्धमृगाइव ॥ ११ ॥ नकेनचिच्चविक्रीताविक्रीताइवसंस्थिताः॥ बतमूढावयंसर्वेजानानाअपिशांबरम्॥ १२ ॥ कि मेतेषुप्रपंचेषुभोगानामसुदुर्भगाः॥ मुधैवहिवयंमोहात्संस्थिताबद्धभावनाः॥१३ ॥ आज्ञातंबहुकालेनव्यर्थमेववयंवने॥ मोहेनिप तितामुग्धाःश्वभ्रेमुग्धामृगाइव ॥ १४॥ किंमेराज्येनकिंभोगैःकोहंकिमिदमागतम्॥ यन्मिथ्यैवास्तुतन्मिथ्याकस्यनामकिमागतम् ॥ १५॥ एवंविमृशतोब्रह्मन्सर्वेष्वेवततोमम॥ भावेष्वरतिरायातापथिकस्यमरुष्विव ॥ १६॥ तदेतद्भगवन्ब्रूहिकिमिदंपरिणश्यति॥ किमिदंजायतेभूयःकिमिदंपरिवर्द्धते ॥ १७॥

त्रकिंदृष्टिःसत्योतदृश्यं तत्रयन्मिथ्यैवतदेवमिथ्यास्तुनतुवैपरीत्यम् ॥ तस्यमिथ्यात्वेकस्यकिमागतं नकापिक्षतिरितिभावः ॥ १५ ॥ एवंकिंनामेदमित्यादिनवश्लोकोक्तप्रकारे णविमृशतोविचारयतः ॥ अरतिर्वैरस्यम् ॥ मरुषुनिर्जलभूमिषु ॥ १६ ॥ एवंस्वस्यविचारोत्पत्तिप्रकारमुपवर्ण्यप्रष्टव्यांशंदर्शयति ॥ तदेतदित्यादिपंचभिः ॥ तत्तस्माद्विमर्शेअ सारत्वात्तत्रादौविनाशोत्पत्तिविकारस्वरूपमसंभावितमिवमन्यमानःपृच्छति ॥ किमिदमित्यादिना ॥ इदंसत्यतयासर्वानुभवप्रमाणसिद्धंदृश्यंपरिणश्यतिसर्वात्मनाअसदिवापद्य तेतत्किंसतोऽसत्वविरोधाद्यद्यसदेवेतिकश्चिद्ब्रूयात्तर्हिभूयोजायतेसत्वमापद्यतेतदिदंकिंसत्वासत्वबहिर्भूतान्वृद्ध्यादिविकारांश्चेदंभजतेतदपियदिपूर्वावस्थंनश्यत्यवस्थांतरवच्चो त्पद्यतेतर्हिप्रत्यभिज्ञाविरोधोवृद्ध्यादिव्यवहारानुपपत्तिश्च ॥ यदिपूर्वावस्थंननश्यतितर्हियुगपदुभयावस्थत्वप्रसंगः अवस्थांतरस्याप्यनुवर्त्तनात्सर्वभावानांकौटस्थ्यापत्तिश्च॥ यद्यवस्थाभावेभ्योभिद्येरंस्तर्हितासामभावत्वमभेदेचस्थायिन्यवस्थावतिपर्यायवृत्तितानुपपत्तिश्चेतिभावः ॥ अस्यप्रश्नत्रयस्योत्तरार्थमुत्पत्तिस्थित्युपशमप्रकारणानि ॥ अ थवाइदंशरीरंकिंनश्यतिपुनःकिंजायतेकिंवर्द्धते ॥ नकश्चिदस्यजन्मादिनार्थइत्यर्थः ॥ १७ ॥ ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोनास्तीत्येतावदेवनप्रत्युतानर्थपरंपराप्यस्तीत्याह ॥ जरेति ॥ संपदामप्यनर्थहेतुत्वादनर्थेषुगणनम् ॥ १८ ॥ ननुभोगहेतुत्वाद्देहस्यार्थोप्यस्तीत्याशंक्याह ॥ भोगैरिति ॥ तैरेवतैरेवेतितेषामपूर्वत्वाभावात्पिष्टपेषणवद्वैरस्यद्योतनाय ॥ अमीभोगलंपटाः ॥ जर्जरतांशैथिल्यम् ॥ तथाचभोगानामप्यनर्थत्वमेवेतिभावः ॥ १९ ॥ प्रज्ञावतामप्यात्यंतिकदुःखोपशमनोपायासंपादनेव्यर्थैवसाप्रज्ञेत्यचेतनप्रायास्तइत्यभिप्रेत्याह ॥ अचेतनाइति ॥ व्यर्थंपुरुषार्थोपयोगंविना ॥ वेणवः कीचकास्तेस्युर्येस्वनंत्यनिलोद्धताः ॥ २० ॥ हेतुनाकेनमुह्यसीतिप्रश्नस्योत्तरमाह ॥ शाम्यतीति ॥ २१ ॥ संसारदुःखैःपाषाणइवनीरंध्रंनिश्छिद्रंनिबिडपूरितंहृदयंयस्येत्यर्थः ॥ निजलोकाःस्वजनास्तेपिमदर्थंरुद्युरितिभयादेव ॥ २२ ॥ शुष्केणानश्रुणारोदनेननीरसाःप्रीतिशून्याअतएवस्वहेतुहर्षादिशून्यास्ताःस्वजनविषादप्रतिबंधायपरंविडंब्यमानामन्मुखस्यकृत्रिमस्मिताभिलापा

जरामरणमापच्चजननंसंपदस्तथा॥आविर्भावतिरोभावैर्विवर्द्धंतेपुनःपुनः॥१८॥भोगैस्तैरेवतैरेवतुच्छैर्वयममीकिल॥पश्यजर्जरतांनीतावातैरिवगिरिद्रुमाः॥ १९ ॥ अचेतनाइवजनाःपवनैःप्राणनामभिः ॥ ध्वनंतःसंस्थिताव्यर्थंयथाकीचकवेणवः॥ २० ॥ शाम्यतीदंकथंदुःखमितितप्तोस्मिचिंतया॥जरद्द्रुमइवोग्रेणकोटरस्थेनवह्निना॥२१॥ संसारदुःखपाषाणनीरंध्रहृदयोप्यहम्॥ निजलोकभयादेवगलद्बाष्पंनरोदिमि॥ २२ ॥ शून्यामन्मुखवृत्तीस्ताःशुष्करोदननीरसाः॥ विवेकएवहृत्संस्थोममैकांतेषुपश्यति ॥ २३॥ भृशंमुह्यामिसंस्मृत्यभावाभावमयींस्थितिम्॥ दारिद्र्येणेवसुभगोदूरेसंसारचेष्टया॥२४॥ मोहयंतिमनोवृत्तिंखंडयंतिगुणावलिम्॥ दुःखजालंप्रयच्छंतिविप्रलंभपराःश्रियः॥ २५॥ चिंतानिचयचक्राणिनानंदायधनानिमे॥ संप्रसूतकलत्राणिगृहाण्युग्रापदामिव॥ २६॥ विविधदोषदशापरिचिंतनैर्विततभंगुरकारणकल्पितैः॥ ममननिर्वृतिमेतिमनोमुनेनिगडितस्ययथावनदंतिनः॥ २७॥

दिवृत्तीर्मर्मविवेकएवपश्यतीत्यर्थः ॥ २३॥ भावानांप्रियतमविषयाणामभावोविनाशस्तत्प्रचुराम् ॥ अथवाभावःसर्वदुःखोपशमनोपलक्षितपरमानंदभावस्तदभावोऽज्ञानंतद्धिकारभूतांस्थितिंसंस्मृत्यविचार्यसंसारचेष्टयाभृशंमुह्यामि ॥ सुभगोधनादिसंपन्नोदूरेअर्थात्सौभाग्यात्परतोदैवात्प्राप्तेनदारिद्र्येणपूर्वदशांसंस्मृत्ययथामुह्यतितद्वत् ॥ २४ ॥ ननुश्रीभिरेवत्वदभिमतोर्थःसेत्स्यति श्रीमतांकिन्नुदुर्लभमितिप्रवादात्तत्राह ॥ मोहयंतीति ॥ विप्रलंभोवंचनम् ॥ २५ ॥ तदेवप्रपंचयति ॥ चिंतेति ॥ धनिनश्चिंताधाराभिस्तिलशःखंडनेननिचयायराशीकरणायप्रवृत्तानिचक्राणि ॥ उग्रापदांदारिद्र्यशत्रुरोगादितीव्रापत्सहस्रपीडितानाम् ॥ २६ ॥ देहादिभावानांसततसंभावितभंगुरत्वहेतुसमर्थितैर्विविधानांदृष्टादृष्टदोषाणांदुर्दशानांचपरिचिंतनैर्हेतुभिर्ममनोनिर्वृतिंसुखंनैति ॥ दंतिपक्षेविस्ताररहितगर्तपिधानभंगुरकाष्ठादिपतनकारणसंपादितैरपरिज्ञानक्षुत्तृषादिदोषाणांपतनबंधनादिदुर्दशानांचपरिचिंतनैरित्यर्थः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानलक्षणायांनिशिलोकेजनेमोहोऽविचारस्तल्लक्षणाभिर्मिहिकाभिस्तुषारधूमैर्गतालोकेविनष्टशास्त्रज्योतिषिसतिखलाःपरदुःखदास्तत्रसुचतुराविषयशतचोराःकालेकालेसर्वदादिशिदिशिसर्वदिक्षुविवेकलक्षणमुख्यरत्नहरणेप्रोद्युक्ताःप्रकृष्टोद्योगयुक्ताःसंतःप्रवृत्तावर्त्तंतइतिशेषः ॥ रणेयुद्धेतेषांवधायविदुषःप्रोज्झ्यतत्त्वज्ञान्विहायान्येकेसुभटाःशक्तानकेपीत्यर्थः ॥ इवकारस्तत्सदृशानामपिदौर्लभ्यद्योतनार्थः ॥ विनातमोनाशंतद्वधासंभवादितिभावः ॥२८॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवै०द्वादशःसर्गः ॥ १२ ॥ ॥ ७ ॥ ॥ याश्रियासर्वमूढानांयाभोगानर्थदासदा ॥ दोषैर्बहुविधैःसाश्रीरासर्गांतंविनिंद्यते ॥ १ ॥ इत्थंविषयाणामसारानर्थतांप्रतिपाद्यविषयसंपादनमूलश्रियोपितथाविधतांप्रतिपादयितुमुपक्रमते ॥ इयमित्यादिना ॥ अस्मिन्संसारेस्थिताअनपगतासतीबहुतरसुखहेतुत्वादुदाराउत्कृष्टेतिपरिकल्पितामूढजनैरितिशेषः ॥ वस्तुतस्तुसापिपरिमोहायैवनूनंयतोवधबंधनरकादिकदर्थनाएवकदर्थास्तान्ददातिनसुखलेशमपीतिभावः ॥ प्राप्तापरिमोहायाप्राप्ताविद्युक्तावाकदर्थंदेतिवा ॥ कुत्सितान्अर्थान्ध

खलाःकालेकालेनिशिनिशितमोहैकमिहिकागतालोकेलोकेविषयशतचोराःसुचतुराः ॥ प्रवृत्ताःप्रोद्युक्तादिशिदिशिविवेकैकहरणेरणेशक्तास्तेषांकइवविदुषःप्रोज्झ्यसुभटाः ॥ २८ ॥ ॥इत्यार्षेवा०वा०दे०मो०वैराग्यप्रकरणेप्रथमपरितापोनामद्वादशःसर्गः ॥ १२ ॥ श्रीरामउवाच ॥ ॥इयमस्मिन्स्थितोदारासंसारेपरिकल्पिता ॥ श्रीर्मुनेपरिमोहायसापिनूनंकदर्थदा ॥१॥ उल्लासबहुलानंतकल्लोलानलमाकुलान् ॥ जडान्प्रवहतिस्फारान्प्रावृषीवतरंगिणी ॥२॥ चिंतादुहितरोबह्व्योभूरिदुर्ललितैधिताः ॥ चंचलाःप्रभवंत्यस्यास्तरंगाःसरितोयथा ॥ ३ ॥ एषाहिपदमेकत्रननिबध्नातिदुर्भगा ॥ दग्धेवानियताचारमितश्चेतश्चधावति ॥ ४ ॥ जनयंतीपरंदाहंपरामृष्टांगिकासती ॥ विनाशमेवधत्तेतद्दीपलेखेवकज्जलम् ॥ ५ ॥ गुणागुणविचारेणविनैवकिलपार्श्वगम् ॥ राजप्रकृतिवन्मूढादुरारूढावलंबते ॥६॥

नानिददातिनविवेकमितिवाकदर्थदा ॥ १ ॥ उल्लासैरुत्साहैर्बहुलाअनंताःकल्लोलामनोरथपरंपरायेषांतान्स्फारान्बहून्जडान्मूर्खान्प्रवहतिपारवश्यमापाद्याकर्षति ॥ तरंगिणीपक्षेऊर्ध्वैलासोनाद्यंतेनबहुलानुपचितानानंतान्कल्लोलांस्तरंगान्जडान्मलिनान्वहतिधारयति ॥ २ ॥ अस्याःश्रियश्चिंतालक्षणादुहितरःपुत्र्यःप्रभवंति ॥ दुर्ललितैर्दुष्टचेष्टितैरेधितावर्द्धिताः ॥ ३ ॥ यथाकाचिद्दुर्भगामोहाद्दर्द्धिक्रियदाआस्कंद्यदग्धासतीएकत्रपदंननिबध्नातिपादंनस्थापयतिकिंत्वनियतचेष्टंयथास्यात्तथाइतश्चेतश्चधावनितथाश्रीरपिपदंस्थानंअनियताचारंशास्त्रविहिताचरणशून्यंपुरुषंप्राप्येतिशेषः ॥ ४ ॥ व्ययापहारादिनापरामृष्टैकदेशापरंदाहंजनयंतीश्रीमतइत्यर्थः ॥ अंतःमध्येअकांडएवेत्यर्थः ॥ विनाशंस्वस्याःस्वोपभोक्तुर्वा ॥ दीपलेखापक्षेपरामृष्टांगिकास्पृष्टावयवा ॥ विनाशस्यतमोनिष्ठत्वद्योतनायकज्जलदृष्टांतः ॥ ५ ॥ दुरारूढादुःखेनसंपादितापिनगुणवतांधार्मिकाणामेवोपभोगायभवतिकिंतुगुणागुणविचारेणविनायंकंचित्संनिहितमवलंबते ॥ यथाराज्ञांप्रकृतिःस्वभावः ॥ बहुधामूढाराजानोनधार्मिकैर्गुणवद्भिःसहरमंतेकिंतुयेनकेनचित्संनिहितेनसहेतिप्रसिद्धम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यकर्मणःक्षीरंफलंधनराज्यलाभादिलोभंहिंसानृतादिदोषसर्पवेगानांविस्तारायभवतितेनतेनैवयुद्धद्यूतवाणिज्यादिकर्मणैषाश्रीविस्तारमधिगच्छतिनयागदानादिना ॥ प्रत्यु
ततेषांव्ययहेतुत्वादित्यर्थः ॥ ७ ॥ शीतमृदुस्पर्शपदेनदयादाक्षिण्यस्नेहाद्युपलक्ष्यते ॥ वातसमूहोवात्या ॥ परुषीकृतोदुःसहीकृतः ॥ ८ ॥ तदेवस्पष्टयति ॥ प्राज्ञाइति ॥ स्प
ष्टम् ॥ ९ ॥ गुप्तारक्षिताविनाशनंविनाशसाधनंधत्तेसंपादयति ॥ मृतिंमरणम् ॥ १० ॥ ननुश्रीमंतोपिधार्मिकायशस्विनश्चकेचिद्दृश्यंतेतत्राह ॥ श्रीमानिति ॥ स्पष्टम् ॥ ११ ॥
दुःखलक्षणानांभोगिनांसर्पाणाम् ॥ १२ ॥ सत्कार्याणिपुण्यकर्माणितल्लक्षणपद्मानांरजनीरात्रिःसंकोचहेतुरित्यर्थः ॥ एवंदुःखकैरवाणांचंद्रिकाविकासहेतुः ॥ सुदृष्टिर्दयादृ
ष्टिःपरमार्थदृष्टिर्वातद्रूपदीपिकायावात्यावातसमूहः ॥ कल्लोलौघयुक्तातरंगिणीच ॥ तस्याअपिदीपप्रशमनहेतुत्वात् ॥ रूढत्वान्नविशेषणवैयर्थ्यम् ॥ युग्मरूपकम् ॥ १३ ॥ संभ्र

कर्मणातेनतेनैषाविस्तारमनुगच्छति ॥ दोषाशीविषवेगस्ययत्क्षीरंविस्तरायते[1] ॥ ७ ॥ तावच्छीतमृदुस्पर्शःपरेस्वेचजनेजनः ॥ वात्यये
वहिमंयावच्छ्रियानपरुषीकृतः ॥ ८ ॥ प्राज्ञाःशूराःकृतज्ञाश्चपेशलामृदवश्चये ॥ पांसुमुष्टयेवमणयःश्रियातेमलिनीकृताः ॥ ९ ॥ न
श्रीःसुखायभगवन्दुःखायैवहिवर्द्धते ॥ गुप्ताविनाशनंधत्तेमृतिंविषलतायथा ॥ १० ॥ श्रीमानजननिंद्यश्चशूरश्चाप्यविकत्थनः ॥ समदृष्टिः
प्रभुश्चैवदुर्लभाःपुरुषास्त्रयः ॥ ११ ॥ एषाहिविषमादुःखभोगिनांगहनागुहा ॥ घनमोहगजेंद्राणांविंध्यशैलमहातटी ॥ १२ ॥ सत्कार्य
पद्मरजनीदुःखकैरवचंद्रिका ॥ सुदृष्टिदीपिकावात्याकल्लोलौघतरंगिणी ॥ १३ ॥ संभ्रमाभ्रादिपदवीविषादविषवर्द्धिनी ॥ केदारिका
विकल्पानांखेदायभयभोगिनी ॥ १४ ॥ हिमंवैराग्यवल्लीनांविकारोलूकयामिनी ॥ राहुदंष्ट्राविवेकेंदोःसौजन्यांभोजचंद्रिका ॥ १५ ॥
इंद्रायुधवदालोलनानारागमनोहरा ॥ लोलातडिदिवोत्पन्नध्वंसिनीचजडाश्रया ॥ १६ ॥ चापलावजितारण्यनकुलीनकुलीनजा ॥
विप्रलंभनतात्पर्य्यजितोग्रमृगतृष्णिका ॥ १७ ॥ लहरीवैकरूपेणपदंक्षणमकुर्वती ॥ चलादीपशिखेवातिदुर्ज्ञेयगतिगोचरा ॥ १८ ॥

मोभयंभ्रांतिश्चतद्रूपाणामभ्राणामादिपदवीप्रथममार्गःपुरोवातादिः ॥ केदारिकाक्षेत्रभक्तिर्विकल्पसस्यानाम ॥ खेदःआयोलाभोयस्यतथाविधस्यभयस्यजननेभोगिनीसर्पि
णी ॥ भयभोगवतीखेदायेतिपृथक्पदंवा ॥ १४ ॥ विकाराश्चित्तविकाराःकामादयः ॥ १५ ॥ इंद्रायुधंशक्रधनुस्तद्वत् ॥ चंद्रायुधमितिपाठेप्यर्द्धचंद्रवद्वक्रमायुधमिंद्रायुधमे
व ॥ आलोलाअचिरस्थायिनोरागावर्णाः ॥ जडामूर्खाः ॥ तएवप्रायःश्रीमंतोदृश्यंते ॥ १६ ॥ चापलेनावमत्यजिताअरण्यनकुल्योयया ॥ नकुलीनादौष्कुलेयाः ॥ नश
ब्दोयंनंतुनञ् ॥ विप्रलंभनतात्पर्यंप्रतारणानुकूल्यम् ॥ मृगतृष्णायाउग्रताग्रीष्मेप्रसिद्धा ॥ १७ ॥ एकरूपेणक्षणमपिपदंस्थानकार्यमवस्थानमकुर्वती ॥ सदाक्षयवृद्धिस्वभा
वत्वात् ॥ दुर्ज्ञेयागतिरतर्कितदुर्दशागोचरोयस्याः ॥ १८ ॥

१ विस्तरायतेइत्यस्यफलितार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपह्नतैःपरस्वैरर्थवत्या अप
विपहव्यग्रायुद्धोत्सुकजनास्तएवकरींद्राः ॥ स्वयंचतीक्ष्णातीक्ष्णाशयान्क्रूरहृदयानाश्रयतेच ॥ कर्मधारयेपूर्वतीक्ष्णापदस्यपुंवद्भावः ॥ १९ ॥ तमितिपरामर्शाद्यस्येतिलभ्यते ॥
हृतान्वामृत्युनाअर्थयतेवांछतितच्छीलया ॥ दुराधयःपरिलीनाःप्रच्छन्नाश्चोरवद्यस्याम् ॥ आहिताग्न्यादित्वकल्पनात्परनिपातः ॥ २० ॥ कुत्सितोर्थःपतनमरणादिर्यस्मा
तथाचयस्यपुरुषस्यअलक्ष्म्यासपत्न्येवस्वयंदूरेणोत्सारितातमेवचिरंसपत्न्योपभुक्तंपुनरादरादाश्लिष्यतीवेयंनमानवतींकितुनिर्लज्जेत्यर्थः ॥२१ ॥ कुत्सितोर्थःपतनमरणादिर्यस्मा
दितिकदर्थःसाहसंतेनसाध्यालभ्या ॥ व्यालावलीगात्रैर्विवृत्तदेहावेष्टितशरीरा ॥ श्वभ्रेजीर्णकूपादिगर्त्ते ॥२२॥ ॥ इतिश्रीवा०म०तात्पर्यप्रकाशेवै० त्रयोदशःसर्गः ॥१३॥
व्याधिरोगजराग्रस्तंकामादिकलुषीकृतम् ॥ जीवितंयौवनंचायुरिहमूर्खस्यनियते ॥ १ ॥ श्रीरिवायुरपिनसुखायेत्याह ॥ आयुरित्यादिना ॥ पल्लवस्यकोणःप्रांतभागस्तस्या

सिंहीवविग्रहव्यग्रकरींद्रकुलपोथिनी ॥ खड्गधारेवशिशिरातीक्ष्णतीक्ष्णाशयाश्रया ॥ १९ ॥ नानयापह्नतार्थिन्यादुराधिपरिलीनया ॥
पश्याम्यभव्ययालक्ष्म्याकिंचिद्दुःखादृतेसुखम् ॥ २० ॥ दूरेणोत्सारिताऽलक्ष्म्यापुनरेवतमादरात् ॥ अहोबताश्लिष्यतीवनिर्लज्जादुर्ज
नासदा ॥२१॥ मनोरमाकर्षतिचित्तवृत्तिंकदर्थसाध्याक्षणभंगुराच ॥ व्यालावलीगात्रविवृत्तदेहाश्वभ्रोत्थितापुष्पलतेवलक्ष्मीः ॥ २२ ॥
॥ इत्यार्षेवा० वा० दे० मो० वै० लक्ष्मीनिराकरणंनामत्रयोदशःसर्गः ॥ १३ ॥ ॥ ७५ ॥ ॥ श्रीरामउवाच ॥ ॥ आयुःपल्लवकोणाग्रलं
बांबुकणभंगुरम् ॥ उन्मत्तमिवसंत्यज्ययात्यकांडेशरीरकम् ॥ १ ॥ विषयाशीविषासंगपरिजर्जरचेतसाम् ॥ अप्रौढात्मविवेकानामा
युरायासकारणम् ॥२॥ येतुविज्ञातविज्ञेयाविश्रांताविततेपदे ॥ भावाभावसमाश्वासमायुस्तेषांसुखायते ॥३॥ वयंपरिमिताकारपरि
निष्ठितनिश्चयाः ॥ संसाराभ्रतडित्पुंजेमुनेनायुषिनिर्वृताः ॥ ४ ॥ युज्यतेवेष्टनंवायोराकाशस्यचखंडनं ॥ ग्रथनंचतरंगाणामास्थानायु
षियुज्यते ॥ ५ ॥ पेलवंशरदीवाभ्रमस्नेहइवदीपकः ॥ तरंगकइवालोलंगतमेवोपलक्ष्यते ॥ ६ ॥ तरंगंप्रतिबिंबेंदुंतडित्पुंजंनभोंबुजम् ॥
ग्रहीतुमास्थांबध्नामिनत्वायुषिहतस्थितौ ॥ ७ ॥ अविश्रांतमनाःशून्यमायुराततमीहते ॥ दुःखायैवविमूढोंतर्गर्भमश्वतरीयथा ॥ ८ ॥

कुत्सायामनुकंपायांचकन् ॥ १ ॥
प्ययेलंबमानोंबुकणोहिमजलबिंदुरिवभंगुरमस्थिरम् ॥ उन्मत्तमितिप्रथमांतमायुरुपमानंद्वितीयांतंशरीरोपमानंवा ॥ अकांडेअनवसरे ॥ कुत्सायामनुकंपायांचकन् ॥ १ ॥
विषयलक्षणैःसर्पैरासंगेनसर्वतःशिथिलितचित्तानाम् ॥ नविद्यतेप्रौढआत्मनिविवेकोयेषांपुरुषाणाम् ॥ २ ॥ किंब्रह्मविदामप्येवंनेत्याह ॥ येत्विति ॥ विततेपदेअपरिच्छिन्ने
वस्तुनि ॥ भावाभावयोर्लाभालाभयोःसमआश्वासश्चित्तसमाधानंयस्यतत् ॥ ३॥ परिमिताकारेदेहादौपरिनिष्ठितएतावदेवात्मरूपमितिसिद्धोनिश्चयोयेषाम् ॥ निर्वृताःसुखि
ताः ॥ ४ ॥ आस्थाविश्वासः ॥ ५ ॥ पेलवमल्पम् ॥ अस्नेहोनिस्तैलः ॥ आयुरितिविपरिणामेनव्यवहितंवासंबद्ध्यते ॥ ६ ॥ हतस्थितौअस्थिरे ॥७॥ आत्यंतिकतृष्णोपरमो
मनसोविश्रांतिः ॥ शून्यंसुखेनव्यर्थमित्यर्थः ॥ आततंविस्तीर्णम् ॥ ईहतेइच्छति ॥ अश्वाद्गर्दभ्यामुत्पन्नाअश्वतरी ॥ तस्याउदरविदारणेनैवगर्भनिर्गमनंप्रसिद्धम् ॥ ८ ॥

१ पातिनीतिपा.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यांसंसारसंस्तौसंसारभ्रमणेप्रसिद्धाकायवल्लीदेहलतासर्गसागरेआंभसोजलविकारभूतःफेनएव अत्यंतास्थिरत्वात् ॥ अतोऽस्मिन्जीवितंजीवनंमेनरोचतइत्यर्थः ॥ ९ ॥ प्राप्यमवश्यंप्राप्तुंयोग्यंपरमपुरुषार्थरूपम् ॥ निर्वृतेर्जीवन्मुक्तिसुखस्य ॥ १० ॥ मननेनमननफलेनतत्त्वबोधेनवासनाक्षयेणवानजीवतितुच्छीभवति ॥ ११ ॥ तएवसाधुजीविताःप्रशस्यजीवनाजाताइतिसंबंधः ॥ जरठाश्चिरजीविनोपिगर्दभवदप्रशस्यजीवनाः ॥ अशुचिदेहात्मबुद्धेरितिभावः ॥ १२ ॥ भारोभारइवव्यर्थश्रमहेतुः ॥ ज्ञानंचज्ञानमपियत्सर्वश्रमनिवारकत्वेनप्रसिद्धंकिमन्यदितिभावः ॥ १३ ॥ ईहितंचेष्टितम् ॥ भारशब्दार्थंस्वयमेवाह ॥ भारधरस्येवेत्यादिना ॥ १४ ॥ विश्रांतिःसर्वश्रमनिवृत्तिः ॥ आप्

संसारसंसृतावस्यांफेनोस्मिन्सर्गसागरे॥ कायवल्ल्यांभसोब्रह्मन्जीवितंमेनरोचते ॥ ९ ॥ प्राप्यंसंप्राप्यतेयेनभूयोयेननशोच्यते ॥ परायानिर्वृतेःस्थानंयत्तज्जीवितमुच्यते॥ १०॥ तरवोपिहिजीवंतिजीवंतिमृगपक्षिणः॥ सजीवतिमनोयस्यमननेनेनजीवति॥ ११॥ जातास्तएवजगतिजंतवःसाधुजीविताः॥ येपुनर्नेहजायंतेशेषाजरठगर्दभाः ॥ १२॥ भारोविवेकिनःशास्त्रंभारोज्ञानंचरागिणः॥ अशांतस्यमनोभारोभारोनात्मविदोवपुः॥ १३॥ रूपमायुर्मनोबुद्धिरहंकारस्तथेहितम्॥ भारोभारधरस्येवसर्वंदुःखायदुर्धियः॥ १४॥ अविश्रांतमनापूर्णमापदांपरमास्पदम्॥ नीडंरोगविहंगानामायुरायासनंदृढम् ॥ १५॥ प्रत्यहंखेदमुत्सृज्यशनैरलमनारतम्॥ आखुनेवजरद्धृभ्रंकालेनविनिहन्यते ॥ १६॥ शरीरबिलविश्रांतैर्विषदाहप्रदायिभिः॥ रोगैरापीयतेरौद्रैर्व्यालैरिववनानिलः ॥ १७॥ प्रस्नुवानैरविच्छेदंतुच्छैरंतरवासिभिः॥ दुःखैराघृश्यतेक्रूरैर्घुणैरिवजरद्द्रुमः॥ १८॥ नूनंनिगरणायाशुघनगर्द्धमनारतम्॥ आखुर्मार्जारकेणेवमरणेनावलोक्यते॥ १९॥ गंधादिगुणगर्भिण्याशून्ययाऽशक्तिवेश्यया॥ अन्नंमहाशनेनेवजरयापरिजीर्यते ॥ २०॥ दिनैःकतिपयैरेवपरिज्ञायगतादरम्॥ दुर्जनःसुजनेनेवयौवनेनावमुच्यते ॥ २१॥ विनाशसुहृदानित्यंजरामरणबंधुना॥ रूपंखिगवरेणेवकृतांतेनाभिलष्यते ॥ २२ ॥

र्त्तिःपूर्णकामता ॥ आयासनंश्रमसाधनम् ॥ १५ ॥ प्रत्यहमित्यस्यखेदमुत्सृज्येत्यनेनैवनिराकांक्षीकरणादनारतमित्यस्यनवैयर्थ्यम् ॥ विनिहन्यतेआयुरित्यर्थः ॥ १६ ॥ विषवद्दाहप्रदानशीलैः ॥ आपीयतेआयुरितिशेषः ॥ व्यालैःसर्पैः ॥ १७ ॥ प्रस्नुवानैःक्षरद्भिःपूयरक्तमलादि ॥ घुणपक्षेरजांसि ॥ दुःखैरोगादिदुःखैःआसमंताद्घृश्यतेच्छिद्यते ॥ आघृष्यतइतिपाठेप्ययमेवार्थः ॥ घुणाःकाष्ठकीटकाः ॥ १८ ॥ निगरणंग्रसनम् ॥ घनगर्द्धंप्रचुराभिलाषंयथास्यात्तथा ॥ १९ ॥ जरयावेश्ययाअशक्तिक्षीणबलंयथास्यात्तथापरिजीर्यतेआयुःपुरुषोवा ॥ तत्रदृष्टांतः ॥ महाशनेनबह्वाशिनान्नमिवेति ॥ २० ॥ यौवनस्यादरःपुरुषार्थोपयोजनंतद्रहितंपरिज्ञाय ॥ गतादरमितिक्रियाविशेषणंवा ॥ दुर्जनइतियावन्नपरिज्ञायतेतावदेवसुजनैराद्रियतइतिप्रसिद्धम् ॥ २१ ॥ खिगवरोविटश्रेष्ठः ॥ रूपंसौंदर्यमिव ॥ अभिलष्यतेआयुःपुरुषोवा ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धयासुखभासितयास्थिरतयाचसततमुज्झितंत्यक्तमुत्तमफल्गुअतितुच्छंगुणवर्जितंचयथेदमायुस्तथाजगत्यन्यन्नास्तीतिसंबंधः ॥ २३ ॥ ॥ इतिश्रीवा
तयाजीवन्मुक्तप्रसिद्धयासुखभासितयास्थिरतयाचसततमुज्झितंत्यक्तमुत्तमफल्गुअतितुच्छंगुणवर्जितंचयथेदमायुस्तथाजगत्यन्यन्नास्तीतिसंबंधः ॥ ममताव्रततेर्मूलमहंकारोविशेषतः ॥ १ ॥ एवमहंकार
सिष्ठमहारामायणतात्पर्यप्रकाशेवै० चतुर्दशःसर्गः ॥ १४॥ ॥७॥ ॥ सर्वानर्थसमारंभमूलस्तंभोत्रनिंद्यते ॥ ममताव्रततेर्मूलमहंकारोविशेषतः ॥ १ ॥ एवमहंकार
स्यापिनसुखहेतुताप्रत्युतसर्वदोषाणामभिमानमूलत्वादनर्थत्वमेवेतिविस्तरेणदर्शयति ॥ मुधैवेत्यादिना ॥ मोहादज्ञानान्निमित्तान्मुधाव्यर्थमेवाहंकारोभ्युत्थितोव्यर्थमेवचपरि
तोवर्द्धतेनततःपुरुषार्थोस्तीत्यर्थः ॥ तस्योपादानमपिमोहएवेतिदर्शयति ॥ मिथ्यामयेनेति ॥ आमयेनेतिवाच्छेदः ॥ अहंकाराख्येनशत्रुणाशातनशीलेनरोगेणेतितदर्थः॥ १॥ वि
विधाःसाध्यसाधनफलप्रवृत्तिलक्षणाआकारायस्यसतथाविधःसंसारःअनादिकालादारभ्यजन्ममरणनरकाद्यनंतदुःखपरंपरामनुभूयापिपुनःपुनस्तद्धेतून्सुखलवानायासस

स्थिरतयासुखभासितयातयाससततमुज्झितमुत्तमफल्गुच॥ जगतिनास्तितथागुणवर्ज्जितंमरणभाजनमायुरिदंयथा॥२३॥ ॥इत्या
र्षेवा०वा०दे०मो० वैराग्यप्रकरणेजीवितगर्हानामचतुर्दशःसर्गः॥ १४॥ ॥७॥ ॥श्रीरामउवाच॥ ॥ मुधैवाभ्युत्थितो
मोहान्मुधैवपरिवर्द्धते॥ मिथ्यामयेनभीतोस्मिदुरहंकारशत्रुणा॥ १ ॥ अहंकारवशादेवदोषकोशकदर्थताम्॥ ददातिदीनदीनानांसं
सारोविविधाकृतिः॥ २ ॥ अहंकारवशादापदहंकाराद्दुराधयः॥ अहंकारवशादीहात्वहंकारोममामयः॥ ३ ॥ तमहंकारमाश्रित्यपरमं
चिरवैरिणम्॥ नभुंजेनपिबाम्यंभःकिमुभोगान्भुजेमुने॥ ४ ॥ संसाररजनीदीर्घामायामनसिमोहिनी॥ ततहंकारदोषेणकिरातेनेव
वागुरा॥ ५॥ यानिदुःखानिदीर्घाणिविषमाणिमहांतिच ॥ अहंकारात्प्रसूतानितान्यगात्खदिराइव ॥ ६ ॥ शमेंदुसैंहिकेयास्यं[1]गुणप
द्महिमाशनिम्॥ साम्यमेघशरत्कालमहंकारंत्यजाम्यहम्॥ ७॥

हस्तैरपिलिप्समानत्वाद्दीनेभ्योपिदीनानांविषयलंपटानांरागद्वेषदुर्व्यसनादिदोषलक्षणेषुकोशगृहेषुसद्व्यवहारानुपयोगात्कदर्थतांकुत्सितधनभावंददातिसंपादयतियत्तदहंकारव
शादेवेत्यर्थः ॥ २ ॥ तत्फलमेवदिक्प्रदर्शनेनप्रपंचयति ॥ अहंकारवशादिति ॥ आपत्शारीरदुःखम् ॥ आधयोमानसदुःखानि ॥ ईहारागोदुश्चेष्टावा ॥ ममआमयोरोगः ॥ म
नोमयइतिपाठेपिलुप्तैकदेशोमनसआमयोमनोविकारइतिवार्थः ॥ ३ ॥ भुजेभुंजे ॥ विकरणलोपश्छांदसः ॥ भजेइतिवापाठः ॥ ४ ॥ संसारलक्षणतमिस्रायांदीर्घाआयता
वागुरामृगबंधनी ॥ ५ ॥ विषमाणिदुरुत्तराणि ॥ अगात्पर्वतात् ॥ खदिरावृक्षविशेषाः ॥ ६ ॥ सैंहिकेयोराहुः ॥ हिममशनिरिवेत्युपमितसमासः ॥ साम्यंसमदर्शितासएवसर्व
भूतेषुदयावर्षित्वान्मेघः ॥ ७ ॥

१ क्वचित्पुस्तकेसिंहिकेयास्यमितिमूलपाठोवृद्धभावच्छांदसइतितट्टीकाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंकारत्यागेदेहाभिमानममतादयःस्वयमेवशाम्यंतीतिदर्शयति ॥ नाहमिति ॥ शांतोनिर्वैरः ॥ स्वात्मनीवआत्मौपम्येनसर्वभूतानिपश्यन्नित्यर्थः ॥ जिनोबुद्धःसयथाअहिं
सापरस्तद्वत् ॥ निंद्येष्वपिगुणोग्राह्यइतिन्यायेनजिनोदाहरणम् ॥ जितइतिवापाठः ॥ ८ ॥ अवस्तुतुच्छमसारंवा ॥ ९ ॥ १० ॥ उद्वेगानामशांतमनोमूलत्वात्तच्छांत्यागतोद्वे
गः ॥ ननुभोगसंपत्तिभिरेवकुतोनतथास्यात्तत्राह ॥ भोगौघइति ॥ भंगुरदेहेंद्रियविषयाद्यधीनः ॥ तथाचतत्तदेकैकभंगेप्युद्वेगप्रसक्तिर्दुर्वारेतिभावः ॥ ११ ॥ अहंकारोविवे
कज्योतिर्गणतिरोधायकत्वाद्वारिदःपरितोजृंभतेगात्राणिविस्तारयति ॥ १२ ॥ वृत्तिरत्रतुल्यशीलता ॥ १३ ॥ स्तब्धत्वदुर्विनामत्वाभ्यांविंध्यसाम्यम् ॥ विस्फूर्जतिगर्जति ॥

नाहंरामोनमेवांछाभावेषुनचमेमनः॥ शांतआसितुमिच्छामिस्वात्मनीवजिनोयथा॥ ८ ॥ अहंकारवशाद्यद्यन्मयाभुक्तंहुतंकृतम्॥
सर्वंतत्तदवस्त्वेववस्त्वहंकाररिक्तता॥ ९ ॥ अहमित्यस्तिचेद्ब्रह्मन्नहमापदिदुःखितः ॥ नास्तिचेत्सुखितस्तस्मादनहंकारितावरं ॥ १० ॥
अहंकारंपरित्यज्यमुनेशांतमनस्तया॥ अवतिष्ठेगतोद्वेगोभोगौघोभंगुरास्पदः ॥ ११ ॥ ब्रह्मन्यावदहंकारवारिदःपरिजृंभते॥ तावद्वि
कासमायातितृष्णाकुटजमंजरी॥ १२ ॥ अहंकारघनेशांतेतृष्णानवतडिल्लता ॥ शांतदीपशिखावच्चक्वापियात्यतिसत्वरम् ॥ १३ ॥
अहंकारमहाविंध्येमनोमत्तमहागजः॥ विस्फूर्जतिघनास्फोटैःस्तनितैरिववारिदः॥ १४॥ इहदेहमहारण्येघनाहंकारकेसरी॥ योयमु
ल्लसतिस्फारस्तेनेदंजगदाततम्॥ १५॥ तृष्णातंतुलवप्रोताबहुजन्मपरंपरा ॥ अहंकारोग्रखिंगेनकंठेमुक्तावलीकृता ॥ १६ ॥ पुत्रमि
त्रकलत्रादितंत्रमंत्रविवर्जितम्॥ प्रसारितमनेनेहमुनेहंकारवैरिणा॥ १७॥ प्रमार्जितेहमित्यस्मिन्पदेस्वयमपिद्रुतम्॥ प्रमार्जिताभ
वंत्येतेसर्वएवदुराधयः॥ १८॥ अहमित्यंबुदेशांतेशनैश्चशमशातिनी॥ मनोगगनसंमोहमिहिकाक्वापिगच्छति॥ १९॥ निरहंकारवृ
त्तेर्मेमौर्ख्याच्छोकेनसीदतः॥ यत्किंचिदुचितंब्रह्मंस्तदाख्यातुमिहार्हसि॥ २०॥

घनैरास्फोटैर्युद्धोत्साहैर्घनानांनिबिडशिलादीनामास्फोटनध्वनिभिर्वा ॥१४॥ स्फारस्तैस्तैर्गर्वहेतुभिरुपचितः ॥ जगदाततंसुकृतदुष्कृतादिबीजोपचयेनविस्तारितम् ॥ सहीदम
न्नंधियाधियाजनयत्तेकर्मभिरितिश्रुतेरितिभावः ॥ १५ ॥ लवएकदेशः ॥ जन्मपरंपरादेहपरंपरा ॥ खिंगोविटः ॥ १६॥ पुत्रमित्रादिरूपंतंत्रमंत्रविवर्जितंवशीकरणोन्मादादि
साधनमितिशेषः ॥ लौकिकयौक्तिकोपायस्तंत्रम् ॥ १७ ॥ प्रमार्जितेमूलोच्छेदेननिरस्ते ॥ १८ ॥ अहंकारोच्छेदस्यमंदाधिकारिणांचिरसाधनाभ्यासप्रबोधसाध्यत्वाच्छनै
रित्युक्तम् ॥ मुख्याधिकारिणांशीघ्रमपीतिसमुच्चयायचकारः ॥ शमशातनीशांतिनिकृंतनी ॥ मनोगगनस्थामोहमिहिकामहाभ्रांतिनीहारपटली ॥ १९ ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तमगुणेनशांत्या
एवमहंकारंतद्युक्तानर्थंतदुच्छेदफलंचोपवर्ण्यस्वस्यतत्त्यागप्रयुक्तांश्रवणाधिकारसंपत्तिंवदन्नुपदेशंप्रार्थयते ॥ सर्वापदामिति ॥ अंतरस्थंहृदयस्थम् ॥ उत्तमगुणेनशांत्या
दिनोन्मुक्तम् ॥ अहंकृतिरूपंपदंलक्ष्मलांछनमित्यर्थः ॥ पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः ॥ यत्नाद्विवेकदार्ढ्यात् ॥ शेषेणावशिष्टेनसंपाद्येनसहमामनुशाध्युपदि
शआत्मतत्त्वमितिशेषः ॥ २१ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०पंचदशःसर्गः ॥ १५ ॥ ॥ ७ ॥ ॥ इहचित्तमनोदोषाविस्तरेणोपपत्तिभिः ॥ रामेणसंप्र
काश्यंतेदृष्टांतैश्चापिभूरिभिः ॥१॥ अहंकारवच्चित्तमनसोरपिनसुखहेतुताकिंतुदुःखहेतुतैवेत्याह ॥ दोषैरित्यादिना ॥ ल्यब्लोपेपंचम्यौ ॥ महत्सेवांद्वारमाहुर्विमुक्तेरितिवचनात्
सद्भिर्मुमुक्षुभिरवश्यंकर्त्तव्यमार्यसेवनंविहायेत्यर्थः ॥ दोषैःकामादिभिर्जर्जरतांशैथिल्यंपुरुषार्थसाधनापटुत्वमितियावत् ॥ वातांतर्वायुप्रवाहमध्येपिच्छलववद्बर्हावयवच्चलति

यत्नादहंकृतिपदंपरितोतिदुःखंशेषेणमांसमनुशाधिमहानुभाव ॥ २१ ॥ सर्वापदांनिलयमध्रुवमंतरस्थमुन्मुक्तमुत्तमगुणेननसंश्रयामि ॥ यत्नादहंकृतिपदंपरितोतिदुःखंशेषेणमांसमनुशाधिमहानुभाव ॥ २१
सर्वापदांनिलयमध्रुवमंतरस्थमुन्मुक्तमुत्तमगुणेननसंश्रयामि ॥

॥ इत्यार्षेवा०वा०दे०मो०वै०अहंकारजुगुप्सानामपंचदशःसर्गः ॥ १५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ दोषैर्जर्जरतां यातिसत्कार्यादार्यसेवनात् ॥ वातांतःपिच्छलववच्चेतश्चलतिचंचलम् ॥ १ ॥ इतश्चेतश्चसुव्यग्रंव्यर्थमेवाभिधावति ॥ दूराद्दूरतरंदीनं ग्रामेकौलेयकोयथा ॥ २ ॥ नप्राप्नोतिक्वचित्किंचित्प्राप्तैरपिमहाधनैः ॥ नांतःसंपूर्णतामेतिकरंडकइवांबुभिः ॥ ३ ॥ नित्यमेवमुनेशून्यं कदाशावागुरावृतम् ॥ नमनोनिर्वृतिंयातिमृगोयूथादिवच्युतः ॥ ४ ॥ तरंगतरलांवृत्तिंदधदालूनशीर्णताम् ॥ परित्यज्यक्षणमपिहृदये यातिनस्थितिम् ॥ ५ ॥ मनोमननविक्षुब्धंदिशोदशविधावति ॥ मंदराहननोद्धूतंक्षीरार्णवपयोयथा ॥ ६ ॥ कल्लोलकलितावर्त्तमायाम करमालितम् ॥ ननिरोद्धुंसमर्थोस्मिमनोमयमहार्णवम् ॥ ७ ॥ भोगदूर्वांकुराकांक्षीश्वभ्रपातमचिंतयन् ॥ मनोहरिणकोब्रह्मन्दूरंवि परिधावति ॥ ८ ॥ नकदाचनमेचेतःस्वामालूनविशीर्णताम् ॥ त्यजत्याकुलयावृत्त्याचंचलत्वमिवार्णवः ॥ ९ ॥ चेतश्चंचलयावृत्त्याचिं तानिचयचंचुरम् ॥ धृतिंबध्नातिनैकत्रपंजरेकेसरीयथा ॥ १० ॥

इतश्चेति ॥ युक्तायुक्तविमर्शमंतरेणेत्यर्थः ॥ सुव्यग्रमतिव्याकु
लम् ॥ ...

॥ १ ॥ तदेवसदृष्टांतंदर्शयति ॥ इतश्चेति ॥ युक्तायुक्तविमर्शमंतरेणेत्यर्थः ॥ सुव्यग्रमतिव्याकु
यतश्चंचलंचपलस्वभावमित्यर्थः ॥ मनसोपिप्राणवाताधीनंचलनमितिवक्ष्यति ॥ १ ॥ तदेवसदृष्टांतंदर्शयति ॥ इतश्चेति ॥ युक्तायुक्तविमर्शमंतरेणेत्यर्थः ॥ सुव्यग्रमतिव्याकु
लम् ॥ क्वापिस्वपूर्त्तिहेत्वलाभाद्दीनम् ॥ कौलेयकःसारमेयः ॥ २ ॥ वंशवेत्रादिशलाकारचितोवस्त्राद्याधानपात्रविशेषःकरंडकः ॥ ३ ॥ शून्यंस्वतोविषयतश्च ॥ सजाती
यानांतिरश्चांसमूहोयूथः ॥ ४ ॥ स्थूलावयवानांविभागआलूनता ॥ सूक्ष्माणांतुसशीर्णता ॥ कर्मधारयात्तल् ॥ ५ ॥ मननैर्विषयानुसंधानैर्विक्षुब्धविविधक्षोभंप्राप्तम् ॥ ६ ॥
कल्लोलसदृशैर्भोगलाभोत्साहैःकलितावर्त्तसंपादितमज्जनानुकूलभ्रमणम् ॥ मायाःपरवंचनोपायास्तएवक्रूरत्वान्मकराः ॥ ७ ॥ श्वभ्रपातंनरकगर्त्तपातम् ॥ ८ ॥ आलूनवि
शीर्णताव्याख्याता ॥ ९ ॥ चचुरमतिचपलम् ॥ चरतेर्यङंतात्पचाद्यचियङोचिचेतियङ्लुकिचरफलोश्चेत्यभ्यासस्यनुक् उत्परस्यातइत्युत्वम् ॥ धृतिंधैर्यम् ॥ स्वतएवचपल
स्वभावंचितानिचयेनचाल्यमानंतुसुतरामितिबलान्निरुध्यमानमपिधैर्यंनबध्नातीत्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साचमनसोमोहरथानारोहणेनित्यसिद्धत्वादस्मि
उत्कर्षापकर्षयोरुपाधिकल्पितत्वात्परमार्थतःसर्वभूतेष्वात्मनएकरूपतासैवतथाजीवन्मुक्तैरनुभूयमानासमतासुखमित्युच्यते ॥
चित्तस्यप्रत्यक्प्रवणवृत्तयोबहुतरद्वैतविषयासक्तिकल्पनालक्षणशय्या
न्नेवशरीरेप्राप्तापिमोहरथारूढेनमनसायस्तत्वादसारदेहमात्रात्मभावःपरिशिष्यतइतिभावः ॥ ११ ॥
क्रोडीकृताअंतर्निवेशिताअहमिदंम
यांविलीनाःसुप्तप्रायाःप्रबोधकशास्त्राचार्योपदेशमंतरेणकेवलस्वबुद्धिकृतविचारसहस्रेणापिनप्रबुद्ध्यंते ॥ तेनतदप्रबोधेनाहंतप्ये ॥ १२ ॥
दृष्टांतेतृष्णासदृशसूत्रेस्थितात्मनेतिजालक
मेदमित्यन्योन्यतादात्म्यसंसर्गाध्यासलक्षणादृढग्रंथयोयस्मिंस्तथाविधेभोगतृष्णासूत्रेस्थितेनात्मनास्वेनैवकर्त्राचेतसाकरणेन ॥
चिंतैवज्वालातयाआकुलेनेतिरूप
विशेषणम् ॥ आमिषतृष्णासूत्रेस्थितात्मनाव्याधेनकर्त्राजालकेनकरणेनेतिवार्थः ॥ १३ ॥ संततोविस्तारितःअमर्षःक्रोधएवधूमोयस्य
चिंत्यते
कसंपादितधूमादिसंपत्त्यावह्निसादृश्यमेवविवक्ष्यतेनवह्नित्वमितिनरूपकोपमानविरोधः ॥ उपमानविशेषणत्वपक्षेनमृष्यतेसह्यतइत्यमर्षोदुःसहस्तथाविधेनधूमेन ॥

मु
मनोमोहरथारूढंशरीरात्समतासुखम् ॥ हरत्यपहतोद्वेगंहंसःक्षीरमिवांभसः ॥ ११ ॥ अनल्पकल्पनातल्पेविलीनाश्चित्तवृत्तयः ॥
नींद्रनप्रबुद्ध्यंतेतेनतप्येहमाकुलः ॥ १२ ॥ क्रोडीकृतदृढग्रंथितृष्णासूत्रेस्थितात्मना ॥ विहगोजालकेनेवब्रह्मन्बद्धोस्मिचेतसा ॥ १३ ॥
श
संततामर्षधूमेनचिंताज्वालाकुलेनच ॥ वह्निनेवतृणंशुष्कंमुनेदग्धोस्मिचेतसा ॥ १४ ॥ क्रूरेणजडतांयातस्तृष्णाभार्यानुगामिना ॥
अ
वंकौलेयकेनेवब्रह्मन्भुक्तोस्मिचेतसा ॥ १५ ॥ तरंगतरलास्फालवृत्तिनाजडरूपिणा ॥ तटवृक्षइवौघेनब्रह्मन्नीतोस्मिचेतसा ॥ १६ ॥
वांतरनिपातायशून्येवाभ्रमणायच ॥ तृणंचंडानिलेनेवदूरेनीतोस्मिचेतसा ॥ १७ ॥ संसारजलधेरस्मान्नित्यमुत्तरणोन्मुखः ॥ सेतुने
वपयःपूरोरोधितोस्मिकुचेतसा ॥ १८ ॥

अन्यत्रतृष्णाव
दग्धैरिति चिताज्वालेतिव्याख्येयमेवमन्यत्रापि ॥ १४ ॥ जडतामज्ञतांयातःप्राप्तोऽहमितिशेषः ॥ क्रूरेणनिष्ठुरेण ॥ तृष्णाभार्येवेत्युपमितसमासोरूपकंवा ॥
त्सदापूर्णोदरीभार्याशुनीतदनुगामिनाकौलेयकेनशुना ॥ जडतांभारतांप्राप्तंशवंकुणपइवेतिसंबंधः ॥ १५ ॥ तरंगवत्तरलाआस्फालाःअलभ्यविषयेप्रतिहन्यमानावृत्तयोयस्ये
धर्मप्रवृत्त्यास्वर्गारोहेअकांड
तिचेतःपक्षे ॥ अन्यत्रतरंगास्तरलाआस्फालवृत्तयोयस्मिंस्तेनडलयोरभेदाज्जलरूपिणाओघेनपूरेणनदीतटवृक्षइवनिपात्यनीतोस्मि ॥ १६ ॥
अथैतयोःपथोर्नकतरेणचनतानीमानिक्षुद्राण्यसकृदा
निपातायतदभावेसुखलेशशून्येइहैवकीटपतंगादिजन्मभिर्भ्रमणाय ॥ तथाचश्रुतिः ॥ एतमेवाध्वानंपुनर्निवर्त्तंतइति ॥
जलधौह्यस्मादितिसप्तमीपाठेउत्त
वर्तीनिभूतानिभवंतिजायस्वम्रियस्वेत्येतत्तृतीयंस्थानमितिच ॥ उपमानपक्षेस्पष्टम् ॥ १७ ॥ संसारजलधेरुत्तरणोन्मुखोनिर्गमनोद्युक्तः ॥
रणोन्मुखोहंसंसारजलधावेवनिरुद्धस्थापितोस्मीत्यर्थः ॥ यथासेतुनाक्षुद्रनदीपयःपूरोरुद्ध्यतेतद्वत् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ बालबिभीषि
पृथ्वीपातालशब्दाभ्यां तत्सदृशावूर्ध्वाधोदेशौ लक्ष्येते ॥ रज्ज्वा जलादिभाराकर्षणार्थं कृतो बद्धभारं तिर्यक्काष्ठप्रोतवलयाकारभारं वा कूपकाष्ठं प्रसिद्धम् ॥ २० ॥ दुःखेनापि यद्धीतुम
कार्थकल्पितवेतालको यथा बालबुद्ध्या स्फारतां प्राप्तस्तस्यैव बाल्यापगमे विचारादसत्त्वमापद्यते तथाऽज्ञबुद्ध्या दुर्जयं मनो विवेके तु निःस्वरूपमेवेत्यर्थः ॥ २० ॥ दुःखेनापि यद्धीतुम
शक्यो मनोलक्षणो ग्रहः ॥ अशनेरपि निष्ठुर इति
शक्यो मनोलक्षणो गृह्णातीति ग्रहः पिशाचः उष्णतरः सदा संतापकत्वात् ॥ कष्टतरः क्रमः अतिक्रमणं वशीकार इति यावत् ॥ वज्रात् हीरकादपि दृढो दुर्भेदः ॥ अशनेरपि निष्ठुर इति
वा ॥ २१ ॥ कार्येषु विषयेषु पतति झटित्येवासज्जते ॥ विरतिं निवृत्तिं चिराभ्यस्तेभ्योऽपि सद्यापारेभ्य इति शेषः ॥ यथा बालः कदाचिद्दपि प्राप्तात्क्रीडनकान्निर्मिताच्चिरोपात्ता
वा ॥ २१ ॥ ॥ २२ ॥ विषमः कष्टतरः
दप्यध्ययनाद्विरतिं याति तद्वत् ॥ २२ ॥ सर्वाणि विशेषणान्यब्धिमनसोस्तुल्यानि स्पष्टानि ॥ अहिताः कामादयरयः षट् त एव व्यालाः सर्पा यस्मिन् ॥ २३ ॥ विषमः कष्टतरः

कूपकाष्ठं कुदाम्नेव वेष्टितोस्मि कुचेतसा ॥ १९ ॥ मिथ्यैव स्फाररूपेण विचाराद्विशरारु
पातालाद्गच्छता पृथ्वीं पृथ्व्याः पातालगामिना ॥ कूपकाष्ठं कुदाम्नेव वेष्टितोस्मि कुचेतसा ॥ १९ ॥ मिथ्यैव स्फाररूपेण विचाराद्विशरारु
णा ॥ बालो वेतालकेनेव गृहीतोस्मि कुचेतसा ॥ २० ॥ वह्नेरुष्णतरः शैलादपि कष्टतरक्रमः ॥ वज्रादपि दृढो ब्रह्मन्दुर्निग्रहमनोग्रहः ॥ २१ ॥
चेतः पतति कार्येषु विहगः स्वामिषेष्विव ॥ क्षणेन विरतिं याति बालः क्रीडनकादिव ॥ २२ ॥ जडप्रकृतिरालोलो विततावर्तवृत्तिमान् ॥
मनोब्धिरहितव्यालो दूरं नयति तात माम् ॥ २३ ॥ अप्यब्धिपानान्महतः सुमेरून्मूलनादपि ॥ अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः
॥ २४ ॥ चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम् ॥ तस्मिन्क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥ २५ ॥ चित्तादिमानि सुखदुःखश
तानि नूनमभ्यागतान्यगवरादिव काननानि ॥ तस्मिन्विवेकवशतस्तनुतां प्रयाते मन्ये मुने निपुणमेव गलंति तानि ॥ २६ ॥ सकलगुणज
याशायत्र बद्धा महद्भिस्तमरिमिह विजेतुं चित्तमभ्युत्थितोहम् ॥ विगतरतितयांतर्नाभिनंदामि लक्ष्मीं जडमलिनविलासां मेघलेखामि
वेंदुः ॥ २७ ॥ ॥ इत्यार्षे वासि० वा० दे० मो० वैराग्ये चित्तदौरात्म्यं नाम षोडशः सर्गः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥

॥ २६ ॥

॥ उक्तमेव दृष्टांतेन स्पष्टयति ॥ चित्तादिति ॥ नूनमिति वितर्के ॥ अभ्यागतानि प्ररूढानि ॥ अगवरादिरिश्रेष्ठाद्विध्यादेः ॥ तनु
॥ २४ ॥ चिकित्स्यं रोगवदवश्यमपनेयम् ॥ २५ ॥ उक्तमेव दृष्टांतेन स्पष्टयति ॥ चित्तादिति ॥ नूनमिति वितर्के ॥ अभ्यागतानि प्ररूढानि ॥ अगवरादिरिश्रेष्ठाद्विध्यादेः ॥ तनु
तां सूक्ष्मतां निर्वासनतया भर्जितबीजप्रायतामिति यावत् ॥ २६ ॥ महद्भिर्मुमुक्षुभिर्यत्र यस्मिंश्चित्ते जिते सति सकलानां शांतिदांत्यादिगुणानां जयः स्वाधीनतासंपत्तिस्तस्य सकलाः
कामकर्मवासनादिकलासहिता गुणाः सत्त्वरजस्तमांसि यस्यास्तस्या अविद्याया जयो नाशस्तस्य सकला गुणा आनंदलवा यस्मिन्निरतिशयानंदे तस्य जयः प्राप्तिस्तस्य वा आशा
निबद्धेत्यर्थः ॥ इह अस्मिन्नेव शरीरे ॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिरिति श्रुतेः ॥ अभ्युद्यत उद्युक्तोस्मि ॥ विगतरतितया वैराग्यसंपत्त्या अंतर्मनसि जडा
न्मूर्खान्मलिनानशुद्धांश्च विलासयत्युत्साहयति शोभयति वा जडो मोहहेतुर्मलिनः पापहेतुर्विलासो यस्या वा ताम् ॥ मेघलेखापक्षे जलेन मलिना नीला विलसतीत्यर्थः ॥ २७ ॥
इति वासिष्ठमहारामायणतात्पर्यप्रकाशे वै० षोडशः सर्गः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वपापौघजननीं दैन्यकार्पण्यमृत्युदा ॥ भ्रमयंतीजगत्कृत्स्नंतृष्णैकात्रविनिंद्यते ॥ १ ॥ हार्दस्यपरमप्रेमास्पदस्यआत्मतत्त्वस्यत्द्दयोद्भवस्यविवेकादेश्वतिरोधानेअंधकारशर्वर्यातमिस्रया ॥ दुरंतयादुरुच्छेदया ॥ इहचेतनाकाशेजीवे ॥ रागादिदोषलक्षणाःकौशिकपंक्तयउलूकश्रेणयः ॥ १॥ समूढेअपह्तेरसमार्दवेस्नेहदयेदाक्षिण्यविनयौवायस्या॥ शोषंनैष्ठुर्यम् ॥ प्रसिद्धेत्वारसमार्द्दवेपंकसाधारणे ॥ अथवासम्यगूढेप्राप्तेरसमार्दवेयेनतथाविधोहंसंप्रतिशोषंतच्छून्यतांनीतइत्यर्थः ॥ २ ॥ शून्येविचारेण ॥ अरण्यपक्षेजनैः ॥३॥नत्तदार्त्तिविलापवचोभिर्विरचिताश्रुनीहारजलकणा ॥ कांचनस्यस्वर्णादेरुपसमीपेवनंवननंमनोभिलाषातिशयस्तेनपांडुतापादनादुज्ज्वला ॥ अन्यत्रनीहारजलेनैवचणकावद्धंतइतिवचोयोग्यानिशारचितानीहारजलकणायस्याम् ॥समीपस्थेनधत्तूरवनेनोज्ज्वलाशोभमानार्चितालक्षणाचणकसस्यानांमंजरीअर्थात्तृष्णाक्षेत्रेविकासमायाति॥

श्रीरामउवाच ॥ ॥हार्दांधकारशर्वर्यातृष्णयेहदुरंतया॥ स्फुरंतिचेतनाकाशेदोषाःकौशिकपंक्तयः ॥ १ ॥ अंतर्दाहप्रदायिन्यासमूढरसमार्द्दवः॥ पंकआदित्यदीप्त्येवशोषंनीतोस्मिचिंतया ॥ २ ॥ ममचित्तमहारण्येव्यामोहतिमिराकुले ॥ शून्येतांडविनीजाताभृशमाशापिशाचिका॥३॥ वचोरचितनीहाराकांचनोपवनोज्ज्वला॥ नूनंविकासमायातिचिंताचणकमंजरी॥४॥ अलमंतर्भ्रमायैवतृष्णातरलिताशया॥ आयाताविषमोल्लासमूर्मिरंबुनिधाविव ॥५॥ उद्दामकल्लोलरवादेहाद्रौवहतीहमे॥ तरंगतरलाकारातरत्तृष्णातरंगिणी॥ ६॥ वेगंसंरोद्धुमुदितोवात्ययेवजरत्तृणम्॥ नीतःकलुषयाक्वापितृष्णयाचित्तचातकः ॥ ७ ॥ यांयामहमतीवास्थांसंश्रयामिगुणश्रियाम्॥ तांतांकृंततिमेतृष्णातंत्रीमिवकुमूषिका ॥८॥ पयसीवजरत्पर्णंवायाविवजरत्तृणम् ॥ नभसीवशरन्मेघश्चिंताचक्रेभ्रमाम्यहम्॥ ९ ॥ गंतुमास्पदमात्मीयमसमर्थाधियोवयम्॥ चिंताजालेविमुत्यामोजालेशकुनयोयथा॥ १०॥ तृष्णाभिधानयाताताग्धोस्मिज्वालयातथा॥ यथादाहोपशमनमाशंकेनामृतैरपि॥ ११ ॥ दूरंदूरमितोगत्वासमेत्यचपुनःपुनः॥ भ्रमत्याशुदिगंतेषुतृष्णोन्मत्तातुरंगमी॥ १२॥

नूनमित्युत्प्रेक्षा ॥ ४ ॥ तरलिताशयाविक्षोभितचित्ता ॥ अन्यत्रचचलितमध्यभागा ॥ तृष्णाअंबुनिधावूर्मिरिवअलमत्यर्थमंतर्भ्रमायैवविषमोल्लासंकष्टबहलंधनार्जनोत्साहंआयाताप्रापितवती ॥ अन्यत्रभ्रमणायैवविसदृशमूर्ध्वनात्यंप्राप्तेत्यर्थः ॥ ५ ॥ उद्दामाउच्छ्रिनाःअधिक्षेपानृतभाषणादयःप्रवृत्तिकल्लोलरवायस्याः ॥ अतएवउक्ततरंगैस्तरलाकारा तरंतीविषयाद्विषयांतरंप्लवमानायातृष्णातल्लक्षणातरंगिणीनदीमेदेहपर्वतेवहति प्रवहति ॥६ ॥ वेगंस्वचापल्यम् ॥ उदितउद्युक्तः ॥ धर्ममेघाख्यसमाधिरसपानायेत्यर्थाद्गम्यते ॥ चित्तलक्षणश्चातकःकलुषयारजोमलिनयावात्यया वातसमूहेनक्कापिअयोग्येविषयेनीतः ॥ ७ ॥ गुणश्रियांविवेकवैराग्यादिगुणसंपदांविषयेयांयामास्थामुत्साहंकृंततिच्छिनत्ति ॥ तंत्रींचर्मगुणांवीणाम् ॥ ८ ॥ पयसिआवर्तजले ॥९ ॥ आत्मीयंस्वीयमास्पदंप्रतिष्ठांपारमार्थिकंरूपमितियावत् ॥ गंतुंप्राप्तुम् ॥ १० ॥ आशंकेसंभावयामि ॥ ११ ॥द्विरुक्तिर्व्यवहितविप्रकृष्टविषयलाभाय ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धर्माधर्मरूपविषयानुसारात्कृतौसंपादितौस्वर्गनरकयोर्गमागमौगमनागमनेयया ॥ क्षुब्धासंचलिता ॥ भोक्तृभोग्यतादात्म्यसंसर्गाध्यासोग्रंथिस्तद्वती ॥ आरघट्टायरज्जुर्घटी यंत्रोपरितनरज्जुस्तत्पक्षेपिचत्वारिविशेषणानिप्रसिद्धान्येव ॥ १३ ॥ देहेअंतर्मनसिग्रथितयाप्रोतया ॥ बलीवर्दरज्जुपक्षेनासादिप्रदेशेप्रोतया ॥ वाह्यतेऐहिकामुष्मिकसाधनस हस्रभारमित्यर्थः ॥ १४ ॥ नित्यंकृष्टमाकर्षणंयस्याःस्वभावस्तथाभूतयातृष्णयाकिरात्याखगेषुजालमिवइदंप्रसिद्धंपुत्रमित्रकलत्रादिजालंलोकेषुजनेषुरच्यते ॥ १५ ॥ धी रंप्राज्ञंधैर्यवंतंच ॥ सेक्षणंविवेकचक्षुष्मंतंप्रसिद्धंच ॥ शर्वरीरात्रिः ॥ १६ ॥ कौटिल्यसहस्रवती ॥ कोमलःसुखलवोन्मुखःस्पर्शोविषयलाभोयस्याः ॥ परिणामेतुविषसदृशं यद्वैषम्यंवैरबंधवधादितच्छंसनशीला ॥ दशतीवमोहयति ॥ भोगिनीपक्षेस्पष्टोर्थः ॥ १७ ॥ मायाश्वआमयारोगाश्वतेषांमायाकार्यवंचनादीनांसर्वस्यैववामायाकार्यप्रपंच स्यउत्पादनशीलादौर्भाग्यंहतभाग्यता ॥ दीनादैन्यवती ॥ १८ ॥ तंद्रीभिःप्रमीलाभिस्तंत्रीगणैर्नाडीसमूहैश्वपरिवेष्टितंकोशंशरीरंदधाना ॥ जर्जरवल्लकीजीर्णस्फुटितालाबु

जडसंसर्गिणीतृष्णाकृतोर्ध्वाधोगमागमा ॥ क्षुब्धाग्रंथिमतीनित्यमारघट्टाग्ररज्जुवत् ॥ १३ ॥ अंतर्ग्रथितयादेहेसर्वदुश्छेदयानया ॥ रज्जेवेवाशुबलीवर्दस्तृष्णयावाह्यतेजनः ॥ १४ ॥ पुत्रमित्रकलत्रादितृष्णयानित्यकृष्टया ॥ खगेष्विवकिरात्येदंजालंलोकेषुरच्यते ॥ १५ ॥ भीषयत्यपिधीरंमामंधयत्यपिसेक्षणम् ॥ खेदयत्यपिसानंदंतृष्णाकृष्णेवशर्वरी ॥ १६ ॥ कुटिलाकोमलस्पर्शाविषवैषम्यशंसिनी ॥ दशत्यपिमनाक्स्पृष्टातृष्णाकृष्णेवभोगिनी ॥ १७ ॥ भिंदतीहृदयंपुंसांमायामयविधायिनी ॥ दौर्भाग्यदायिनीदीनातृष्णाकृष्णेवराक्षसी ॥ १८ ॥ तंद्रीतंत्रीगणैःकोशंदधानापरिवेष्टितम् ॥ नानंदेराजतेप्रह्वस्तृष्णाजर्जरवल्लकी ॥ १९ ॥ नित्यमेवातिमलिनाकटुकोन्मादायिनी ॥ दीर्घतंत्रीघनस्नेहातृष्णागह्वरवल्लरी ॥ २० ॥ अनानंदकरीशून्यानिष्फलाव्यर्थमुन्नता ॥ अमंगलकरीक्रूरातृष्णाक्षीणेवमंजरी ॥ २१ ॥ अनावर्जितचित्तापिसर्वमेवानुधावति ॥ नचाप्नोतिफलंकिंचित्तृष्णाजीर्णेवकामिनी ॥ २२ ॥ संसारवृंदेमहतिनानारससमाकुले ॥ भुवनाभोगरंगेषुतृष्णाजरठनर्त्तकी ॥ २३ ॥

कावीणा ॥ सापिहितंद्र्याअलाब्वंतरसंपादनालस्येनविच्छिन्नतंत्रीभिःसीवनेनवेष्टितमलाबुकोशंदधानाऽमंगलत्वाद्यथानमांगलिकोत्सवानंदेराजतेतथातृष्णापि ॥ तृष्णाक्षय लभ्येनिर्विक्षेपनिरतिशयानंदेनराजते ॥ तथाचोक्तं ॥ यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम् ॥ तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलामिति ॥ १९ ॥ कटुकःपरिणामदुःखो यउन्मादस्तद्दानशीला ॥ शेषंस्पष्टम् ॥ गह्वरवल्लरीपर्वतगुहोत्पन्नालता ॥ सापिहिसूर्यरश्म्यसंस्पर्शान्नित्यमेवम्लानातिक्तोन्मादहेतुफलदायिनीदूरावलंबित्वाद्दीर्घप्रतानाघने स्नेहाबहुनिर्यासावेतितद्दर्शिनांप्रसिद्धम् ॥ २० ॥ तृष्णापक्षेस्पष्टोर्थः ॥ अन्यत्रशून्यापुष्पैः ॥ उन्नताआम्रादेरूर्ध्वशाखासुस्थिता ॥ क्रूराशुष्कत्वात्कंटकप्राया ॥ २१ ॥ अ नावर्जितमवशीकृतंचित्तंयया ॥ फलंलाभंभोगंवा ॥ जीर्णाकामिनीवृद्धवेश्या ॥ २२ ॥ नानारसैःशोकमोहादिभिः ॥ नर्त्तकीपक्षेकरुणहास्यबीभत्सादिभिः ॥ रंगेषुनृत्य शालासु ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जंगलेजीर्णारण्ये ॥ तताविस्तीर्णा ॥ २४ ॥ नशक्नोतिसाधयितुमितिशेषः ॥ अन्यत्रयद्यत्रगंतुमितिशेषः ॥ आनंदरहितंनैर्बल्येननिरुत्साहत्वात् ॥ २५ ॥ नीहारेवर्षावश्याये
तत्सदृशमोहावरणेचस्फुरतिनृत्यति ॥ आलोकेविवेकप्रकाशेप्रकाशोपलक्षितेशरदिच ॥ दुर्लंघ्येषुअसाध्यदुर्गमेषु ॥ पदंव्यवसायंनीडंच ॥ २६ ॥ फलजलान्यकालेचिरंशू
न्या ॥ तत्कालेपिअंतरांतरामध्येमध्येशून्या ॥ उल्लासंफलजलसंपत्त्योपचयम् ॥ प्रावृट्तरंगिणीवर्षर्त्तुमात्रप्रवहानदी ॥ २७ ॥ नष्टंनष्टफलम् ॥ तृष्णालोलाक्षुत्तृड्व्याकु
ला ॥ २८ ॥ अलंघ्येदुष्प्रापेदुर्लंघ्येच ॥ पदंव्यवसितंपादन्यासंच ॥ फलंलाभंशलाटुंच ॥ २९ ॥ इदंशुभमुचितंवाकृत्वाआरभ्यतदपरिसमाप्यैवइदमशुभमनुचितंचअसमंज
संप्रक्रमविरुद्धंसर्वमेवकार्यंसहसैवायात्यनुसरतितथापिनोपरमतेकिंतुअनारतंसर्वदैवयततेशुभाशुभफलाय ॥ यथाप्राणिकर्मानुसारिणोदैवस्यविधातुश्चेष्टातद्वत् ॥ ३० ॥ हृ

जराकुसुमितारूढापातोत्पातफलावलिः॥ संसारजंगलेदीर्घेतृष्णाविषलतातता॥२४॥ यन्नशक्नोतितत्रापिधत्तेतांडवितांगतिम्॥ नृ
त्यत्यानंदरहितंतृष्णाजीर्णेवनर्त्तकी॥२५॥भृशंस्फुरतिनीहारेशाम्यत्यालोकआगते॥दुर्लंघ्येषुपदंधत्तेचिंताचपलबर्हिणी॥२६॥जडक
ल्लोलबहुलाचिरंशून्यांतरांतरा॥क्षणमुल्लासमायातितृष्णाप्रावृट्तरंगिणी॥२७॥नष्टमुत्सृज्यतिष्ठंतंतृष्णावृक्षमिवापरम्॥पुरुषात्पुरुषं
यातितृष्णालोलेवपक्षिणी॥२८॥ पदंकरोत्यलंघ्येपितृप्तापिफलमीहते॥ चिरंतिष्ठतिनैकत्रतृष्णाचपलमर्कटी॥२९॥इदंकृत्वेदमाया
तिसर्वमेवासमंजसम्॥ अनारतंचयततेतृष्णाचेष्टेवदैविकी॥३०॥क्षणमायातिपातालंक्षणंयातिनभस्थलम्॥क्षणंभ्रमतिदिक्कुंजे
तृष्णाहृत्पद्मषट्पदी॥३१॥सर्वसंसारदोषाणांतृष्णैकादीर्घदुःखदा॥ अंतःपुरस्थमपियायोजयत्यतिसंकटे॥३२॥ प्रयच्छतिपरंजा
ड्यंपरमालोकरोधिनी॥ मोहनीहारगहनातृष्णाजलदमालिका॥३३॥ सर्वेषांजंतुजातानांसंसारव्यवहारिणाम्॥परिप्रोतमनोमाला
तृष्णाबंधनरज्जुवत्॥३४॥ विचित्रवर्णाविगुणादीर्घामलिनसंस्थितिः॥शून्याशून्यपदातृष्णाशक्रकार्मुकधर्मिणी॥३५॥ अशनिर्गुण
सस्यानांफलिताशरदापदाम्॥ हिमंसंवित्सरोजानांतमसांदीर्घयामिनी॥३६॥

त्पद्मेषट्पदीभ्रमरिका ॥ शेषंप्राग्व्याख्यातप्रायम् ॥ ३१॥ दीर्घदुःखदाचिरदुःखदा ॥ दीर्घबडिशरज्जुरिववधकसन्निधावाकृष्यमरणादिदुःखदा ॥ तदेवोपपादयति ॥ अंतःपुर
स्थमपीति ॥ ३२ ॥ जाड्यंमौर्ख्यंशैत्यंवा ॥ परमालोकःपरंज्योतिरात्मासूर्यश्च ॥ मोहयतिपूर्वापरंदिग्विभागंचेतिमोहोऽविवेकस्तद्रूपेणनीहारेणगहनादुर्गमा ॥ ३३ ॥ यथा
बहूनांपशूनांकंठदामभिःप्रोतामालोपमानातिर्यग्दीर्घरज्जुस्तद्वत् ॥ ३४ ॥ विचित्रविषयानुरंजितत्वाद्विचित्रवर्णा विविधविस्मयहेतुरूपवतीच ॥ विगुणाअसद्गुणाज्याशून्या
च ॥ मलिनःपुरुषोमेघश्चसंस्थितिराधारोयस्याः ॥ स्वतस्तुच्छत्वाच्छून्याअवस्तु ॥ मनोनभोधिष्ठितत्वाच्छून्यपदा ॥ शक्रकार्मुकमिंद्रायुधम् ॥ ३५ ॥ गुणलक्षणसस्यान
अशनिः ॥ संवित्सरोजानांबोधपद्मानांहिमंविघातिकेत्यर्थः ॥ आपदांतुफलिताफलितसस्याशरद्वर्धिकेत्यर्थः ॥ एवंतमसामपिहैमंतरात्रिः ॥ ३६ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैरवाणांकुमुदानाम् कार्यालयस्यप्रवृत्तिलक्षणनीडस्यगृहविटंकस्यवा ॥ मानसामनोरथाः ॥ वल्लकीवीणा ॥ ३७ ॥ न्यग्रोहनीतिन्यग्रोधोवटस्तस्यसुलताप्ररोहवल्ली ॥ ग ॥ ३८ ॥ समुद्गिकासंपुटिका ॥ ३९ ॥ आलोकईषद्विवेकप्रकाशः ॥ व्योमैववीथीतदुपमा ॥ नीहारसदृशैर्व्यामोहैः ॥ ४० ॥ एवंतृष्णामुपवर्ण्यतदुपशांतिफलमाह ॥ च्छतीत्यादिना ॥ कायव्यायामोदेहप्रयुक्तश्रमस्तस्यशांतयेमुक्तयेइतियावत् ॥ तमीकृष्णपक्षरात्रिः ॥ घनतमोमेघांधकारस्तेनकृष्णा ॥ सायथारक्षोनिवृत्तयेनक्तंचरप्रचारा भावायउपशमंविनाशंगच्छतितद्वत् ॥ ४१ ॥ मूकःअध्यात्मशास्त्रकथाशून्यः ॥ लोकोजनः ॥ विलुलिताशयोव्याकुलचित्तः ॥ विषविशेषप्रयुक्तविषूचिकारोगवन्मृत्युहेतु तृष्णायावदेवानुसरंतीसंधत्तेसम्यग्धारयतिनसंत्यजतीत्यर्थः ॥ ४२ ॥ तर्हितत्त्यागेकउपायस्तत्राह ॥ लोकइति ॥ चिंतात्रविषयानुस्मरणम् ॥ उज्झितयात्यक्तया ॥ तथाच

संसारनाटकनटीकार्यालयविहंगमी॥ मानसारण्यहरिणीस्मरसंगीतवल्लकी ॥ ३७॥ व्यवहाराब्धिलहरीमोहमातंगशृंखला ॥ सर्ग न्यग्रोधसुलतादुःखकैरवचंद्रिका ॥ ३८ ॥ जरामरणदुःखानामेकारत्नसमुद्गिका ॥ आधिव्याधिविलासानांनित्यंमत्ताविलासिनी ॥ ३९ ॥ क्षणमालोकविमलासांधकारलवाक्षणम् ॥ व्योमवीथ्युपमातृष्णानीहारगहनाक्षणम् ॥४०॥ गच्छत्युपशमंतृष्णाकायव्या यामशांतये॥ तमीघनतमःकृष्णायथारक्षोनिवृत्तये॥४१॥तावन्मुह्यत्ययंमूकोलोकोविलुलिताशयः॥यावदेवानुसंधत्तेतृष्णाविषवि षूचिका॥४२॥ लोकोयमखिलंदुःखंचिंतयोज्झितयोज्झति॥ तृष्णाविषूचिकामंत्रश्चिंतात्यागोहिकथ्यते॥४३॥ तृणपाषाणकाष्ठादि सर्वमामिषशंकया॥ आददानास्फुरत्यंतेतृष्णामत्सीह्रदेयथा॥४४॥ रोगार्त्तिरंगनातृष्णागंभीरमपिमानवम्॥ उत्तानतांनयत्याशुसू र्यांशवइवांबुजम्॥ ४५॥ अंतःशून्याग्रंथिमत्योदीर्घस्वांकुरकंटकाः॥ मुक्तामणिप्रियानित्यंतृष्णावेणुलताइव॥ ४६॥ अहोबतमहच्चि त्रंतृष्णामपिमहाधियः॥ दुश्छेदामपिकृंतंतिविवेकेनामलासिना॥४७॥ नासिधारानवज्रार्चिर्नतप्तायःकणार्चिषः॥तथातीक्ष्णायथा ब्रह्मंस्तृष्णेयंहृदिसंस्थिता॥ ४८॥ उज्ज्वलासिततीक्ष्णाग्रास्नेहदीर्घदशापरा॥ प्रकाशादाहदुस्पर्शातृष्णादीपशिखाइव॥ ४९॥

भगवद्वाक्यम् ॥ ध्यायतोविषयान्पुंसःसंगस्तेषूपजायतेइति ॥ ४३ ॥ आमिषशंकयाभक्ष्यमितिसंभावनया ॥ सायथाअंतेबडिशमप्यादायाहन्यमानास्फुरतितद्वत्तृष्णापीत्य र्थः ॥ ४४ ॥ रोगपीडास्त्रीतृष्णाच ॥ गंभीरंधीरम् ॥ उत्तानतांअधीरतामूर्ध्वविकासितांच ॥ ४५ ॥ ग्रंथयोदृढाभिनिवेशाःपर्वाणिच ॥ तृष्णायाअंकुराश्चिताः ॥ कंटकादुः खानि ॥ मुक्तामणयश्चप्रियायासाम् ॥ वेणुलतापक्षेतासांमुक्ताकरत्वान्मुक्ताएवमणयःसर्वजनप्रियायासु ॥ ४६ ॥ विवेकोपितदुच्छेदहेतुरितिदर्शयति ॥ अहोइति ॥ ४७ ॥ असिधारादयोबाह्यत्वात्कदाचिदेवानर्थस्तृष्णातुहृदिस्थितत्वात्सदैवेतितेभ्योप्याधिक्यमितिभावः ॥ ४८ ॥ मध्येभोगविभवोज्ज्वलाअंतेतुअसितंतीक्ष्णंचाग्रंयस्याःसा ॥ तमो मृत्युपर्यवसानेत्यर्थः ॥ मातृभार्यापुत्रस्नेहैर्दीर्घाबाल्ययौवनवार्द्धकदशाःपराउत्कृष्टायस्याः ॥ प्रकाशाप्रत्यक्षा ॥ इष्टवियोगप्रयुक्तैरंतर्दाहैर्दुःस्पर्शाअसह्या ॥ दीपशिखापक्षे स्नेहस्तैलम् ॥ दशावर्तिः ॥ शिष्टंस्पष्टम् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेरुसमंगौरवेण ॥ स्थिरंअपरिग्रहव्रतेन ॥ तृणीकरोतियाञ्चादैन्यमापाद्यतृणवदुपेक्ष्यंचलंचकरोति ॥ यथाहुः ॥ तृणाल्लघुतरस्तूलस्तूलादपिचयाचकः ॥ वायुनाकिंननीतो सौमामयंयाचयिष्यतीति ॥ ५० ॥ संस्तीर्णानिविस्तीर्णानिगहनानिसाहसकार्याण्यरण्यानिचयस्याम् ॥ अथवाएकैवतृष्णाआशाकाममलोभलांपट्यादिभावैश्चतुर्दशसुलोके षुविस्तीर्णाचासौगहनादुर्लक्ष्याचेतिकर्मधारयः ॥ एवंनिबिडजालवद्बंधनहेत्वाशापाशरजोगुणप्रचुरानिबिडलताजालधूलिप्रचुराच ॥ शिष्टंस्पष्टम् ॥ ५१ ॥ कथंविस्तीर्णा कथंचगहनाकथंचैका आश्रयविषयशब्दादिभेदेनाशाकाममलोभादीनांभेदादित्याशंक्योक्तमर्थंदृष्टांतेनोपपादयत्येकैवेति ॥ वपुःस्थितैवतृष्णाएकैवसर्वभुवनानामांतरेषुभो ग्येषुलब्धलक्ष्याप्राप्तविषयासतीजगतिव्यवहारभूमौदुर्लक्ष्यतामुपगतैवस्थितादेहतृष्णैवसर्वतृष्णात्वमाशाकामादिभावंचप्राप्तेतिनस्पष्टंविभाव्यतइत्यर्थः ॥ यथारसनेंद्रियाल

अपिमेरुसमंप्राज्ञमपिशूरमपिस्थिरम् ॥ तृणीकरोतितृष्णैकानिमेषेणनरोत्तमम् ॥५०॥ संस्तीर्णगहनाभीमाघनजालरजोमयी॥सां धकारोग्रनीहारातृष्णाविंध्यमहातटी ॥ ५१ ॥ एकैवसर्वभुवनांतरलब्धलक्ष्यादुर्लक्ष्यतामुपगतैववपुःस्थितैव ॥ तृष्णास्थिताजगतिचं चलवीचिमालेक्षीरोदकांबुतरलेमधुरेवशक्तिः॥५२॥ ॥इत्यार्षेवासिष्ठम० वा० दे० मो० वैराग्यप्रकरणेतृष्णाभंगोनामसप्तदशःसर्गः ॥१७॥ ॥ ७ ॥ ॥श्रीरामउवाच॥ ॥ आर्द्रांत्रतंत्रीगहनोविकारीपरिपातवान् ॥ देहःस्फुरतिसंसारेसोपिदुःखायकेवलम् ॥ १ ॥ अज्ञोपितज्ज्ञसदृशोवलितात्मचमत्कृतिः ॥ युक्त्याभव्योप्यभव्योपिनजडोनापिचेतनः ॥ २ ॥

नावपुःस्थिताएकैवमाधुर्यशक्तिःसर्वेषांभुवनानांजलानामांतरेजलसामान्येलब्धप्रतिष्ठाचंचलवीचिमालेनदीसमुद्रादौक्षरणात्क्षीरमुंदनात्क्लेदनादुदकमंबनात्शब्दनादंब्विति क्रियाशब्दभेदेनतरलेअव्यवस्थितेजलेस्थितादुर्लक्ष्यतामुपगताएकैवेतिनविभाव्यतेतद्वत् ॥ जीवनंभुवनंवनम् ॥ नीरक्षीरांबुशंबरमित्यमरः ॥५२॥ ॥ इतिश्रीवासिष्ठमहा० तात्पर्यप्रकाशेवै० सप्तदशःसर्गः ॥ १७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ आधिव्याधिबहुक्लेशजरामरणभंगुरः ॥ निदानंमानतृष्णादेर्देहएवात्रनिंद्यते ॥ १ ॥ अस्तुतृष्णादुः खहेतुस्तथापिजीवन्भद्राणिपश्यतीतिन्यायाद्देहस्यसुखभोगायतनत्वप्रसिद्धेःसर्वेषांतत्रप्रीत्यतिशयदर्शनाच्चसुखहेतुत्वमित्याशंक्यतस्यापिदुःखहेतुत्वमेवेत्युपपादयति ॥ आ र्द्रेत्यादिना ॥ आंत्राण्युदरस्थमलमूत्रादिभस्त्राः ॥ तंत्र्योनाड्यः ॥ परितःपातःपतनोपघातोमरणंच ॥ १ ॥ अज्ञोजडोपितज्ज्ञंजानातीतितज्ज्ञआत्मातत्सदृशस्तत्रायः ॥ स्व तस्तादृशप्राणादिकोशचतुष्काधारवत्वाच्चवलितावेष्टितेवपंचगुणाआत्मचमत्कृतिरध्यस्तचित्तादात्म्यंयस्मिन् ॥ भव्योमोक्षाधिकारसंपत्तौ ॥ नजडोनेतरजडतुल्यः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विवेकःशोधस्तच्छून्यत्वादेवविमूढआत्मायस्मि
अतएवचिज्जडदृष्ट्योर्मध्येकिमयमात्मकोटौस्यादुतानात्मकोटाविति संशयेदोलायितोऽनिर्णयदुष्टआशयोमनोयस्मिन् ॥ यतोसौदोलायितदुराशयश्चंचलाशुद्धचित्तइत्य
र्थः ॥ ३ ॥ अथवाप्रपश्यतीतिपाठेजडदृगज्ञःअजडदृग्विवेकीतयोराद्योस्मिन्देहेआत्मबुद्ध्यामोहंसंसारमेवप्रपश्यतिनपुरुषार्थम् ॥ उपेक्षार्हतांवक्तुंवृक्षत्वेनरूपयतिचतुर्भिः ॥ प्रतिक्षणंप्रतिहर्षलवंप्रत्यार्त्तवंच
॥ ५ ॥ स्तोकेनाल्पेनान्नपानादिनाशीतातपादिनाच ॥ नीचोऽधमोऽशुचिरितियावत् ॥ ४ ॥ शिरःपीठंशिरस्थानम् ॥ ६ ॥ श्रवौकर्णौता
घनउन्नतःस्कंधोंसःशाखामूलंच ॥ द्विजादंतास्तएवश्लेषात्पक्षिणस्तेषांश्रेणिबद्धानामाधारस्तंभइवशुभास्थितिर्यस्य ॥

जडाजडदृशोर्मध्येदोलायितदुराशयः॥ अविवेकीविमूढात्मामोहमेवप्रयच्छति ॥ ३ ॥ स्तोकेनानंदमायातिस्तोकेनायातिखेदिताम्
नास्तिदेहसमःशोच्योनीचोगुणबहिष्कृतः ॥ ४ ॥ आगमापायिनानित्यंदंतकेसरशालिना ॥ विकासस्मितपुष्पेणप्रतिक्षणमलंकृतः
॥५॥ भुजशाखोघनस्कंधोद्विजस्तंभशुभस्थितिः॥ लोचनालिविलाक्रांतःशिरःपीठबृहत्फलः॥६॥ श्रवदंतरसग्रस्तोहस्तपादसुपल्लवः॥
गुल्मवान्कार्यसंघातोविहंगमतंतास्पदः॥ ७॥ सच्छायोदेहवृक्षोयंजीवपांथगणास्पदः॥कस्यात्मीयःकस्यपरआस्थानास्थाकिलात्र
के ॥ ८ ॥ तातसंतरणार्थेनगृहीतायांपुनःपुनः॥ नाविदेहलतायांचकस्यस्यादात्मभावना॥ ९ ॥ देहनाम्निवनेशून्येबहुगर्त्तसमाकुले॥
तनूरुहासंख्यतरौविश्वासंकोधिगच्छति॥ १० ॥ मांसस्नाय्वस्थिवलितेशरीरपटहेऽदृढे॥ मार्जारवदहंताततिष्ठाम्यत्रगतध्वनौ ॥ ११ ॥
संसारारण्यसंरूढोविलसच्चित्तमर्कटः॥ चिंतामंजरिताकारोदीर्घदुःखघुणक्षतः ॥ १२ ॥

वेवदंतेनरसयतइतिदंतरसौकाष्ठकुट्टकाख्यौपक्षिणौताभ्यांयस्तश्चंचुप्रहारैःकुट्टितइवसच्छिद्रः ॥ गुल्मंरोगविशेषोमूलप्ररोहाश्चतद्वान् ॥ कार्यःकर्त्तुंशक्यःसम्यक्घातश्छेदनभे
दनादिःशस्त्रकुठारादिनायस्य ॥ विहंगमौद्वासुपर्णेतिमंत्रप्रसिद्धौजीवेश्वरौबुद्धिजीवौवाताभ्यांकृतहृदयनीडः ॥ ७ ॥ छायाकांतिःप्रसिद्धच्छायाच ॥ परःशत्रुः ॥ आस्थाप्री
तिरनास्थाद्वेषश्चात्रास्मिन्देहतरौकेअयुक्तेइत्युपेक्ष्येइतिभावः ॥ ८ ॥ नन्वात्मत्वेनसर्वजनप्रसिद्धोयंकथमुपेक्ष्यस्तत्राह ॥ तातेति ॥ संतरणमायुर्नद्याःसंसारांबुधेर्वापरतीरगम
नम् ॥ नाविनौकायाम् ॥ ९ ॥ विश्वासंनिःशंकचिरावस्थानयोग्यताप्रत्ययम् ॥ १० ॥ स्नायवःशिराः ॥ पटहोवाद्यविशेषः ॥ अदृढेअसारेसच्छिद्रेच ॥ गतध्वनौअप्राप्तनि
र्गमनोपायोपदेशशब्दे ॥ ११ ॥ देहमेवपुनःषड्भिःवृक्षत्वेनरूपयति ॥ संसारेत्यादिना ॥ घुणाःकाष्ठकीटास्तैःक्षतश्छिद्रितः ॥ १२ ॥

१ कृतास्पदइतिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

प्लक्षस्यत्वक्पल्लवादेर्मांगलिकत्वेनपुण्योद्गमहेतुत्वात्स्मितपुण्योद्गमः ॥ पुष्पोद्गमइतिवापाठः ॥ १३ ॥ स्कंधशब्देनबाहूलक्ष्येते ॥ लतेशाखे ॥ समेशाखालतेइत्यमरः ॥
ओघजालशब्दौशरीरभेदेननेयौ ॥ जात्यैक्येनैवप्लक्षत्वरूपणात् ॥ पवनोत्रप्राणः ॥ १४ ॥ शोभनेजानुनीमध्यमपर्वणीयस्यसतथाविधोधःकायएवस्तंभसदृशोभागोय
स्य ॥ सयावत्सरसच्छाययायौवनकांत्याशीतलच्छाययाचयुक्तस्तावत्कामपांथनिषेवितइत्यर्थः ॥ १५ ॥ आदीर्घेतिच्छेदः ॥ प्लक्षोपर्यपिक्वचित्तृणोत्पत्तिःप्रसिद्धा ॥ १६ ॥
विभक्तवासनालक्षणप्ररोहजटाजालवेष्टितमूलत्वाद्दुर्लवादुरुच्छेदाआकृतिःस्वरूपंयस्य ॥ व्यायामःश्रमःसएवविविधआयामोविटपदैर्घ्यंतेनविरसःप्रियसंस्पर्शहीनोरुक्षश्च
॥१७॥ लुठनुभूमौपतित्वापरिवर्त्तताम् ॥१८॥ वलंतीमुहुःप्रसरंतीतृष्णालक्षणागृहस्वामिनीयस्मिन् ॥ अतएवरागेणकामेनगैरिकादिरंजकद्रव्येणचरंजितानिसर्वांगानियस्मि

तृष्णाभुजंगमीगेहंकोपकाकरुतालयः॥स्मितपुण्योद्गमःश्रीमाञ्छुभाशुभमहाफलः॥१३॥सुस्कंधौघलताजालोहस्तस्तबकसुंदरः॥
पवनस्पंदिताशेषस्वांगावयवपल्लवः॥ १४॥ सर्वेंद्रियखगाधारःसुजानुस्तंभउन्नतः॥ सरसच्छाययायुक्तःकामपांथनिषेवितः॥१५॥
मूर्द्धसंजनितादीर्घशिरोरुहतृणावलिः॥ अहंकारगृध्रकृतकुलायःसुषिरोदरः॥ १६ ॥ विच्छिन्नवासनाजालमूलत्वाद्दुर्लवाकृतिः॥
व्यायामविरसःकायप्लक्षोयंनसुखायमे॥ १७॥ कलेवरमहंकारगृहस्थस्यमहागृहम् ॥ लुठत्वभ्येतुवास्थैर्यंकिमनेनमुनेमम ॥ १८ ॥
पंक्तिबद्धेंद्रियपशुंवलत्तृष्णागृहांगनम्॥ रागरंजितसर्वांगंनेष्टंदेहगृहंमम ॥ १९॥ पृष्ठास्थिकाष्ठसंघट्टपरिसंकटकोटरम् ॥ आंत्ररज्जु
शिराबद्धंनेष्टंदेहगृहंमम॥२०॥ प्रसृतस्नायुतंत्रीकंरक्तांबुकृतकर्दमम्॥ जरामंकोलधवलंनेष्टंदेहगृहंमम॥२१॥चित्तभृत्यकृतानंतचेष्टा
वष्टंभसंस्थिति॥ मिथ्यामोहमहास्थूणंनेष्टंदेहगृहंमम ॥ २२॥ दुःखार्भककृताक्रंदंसुखशय्यामनोरमम्॥ दुरीहादग्धदासीकंनेष्टंदेह
गृहंमम॥ २३॥ मलाढ्यविषयव्यूहभांडोपस्करसंकटम्॥ अज्ञानक्षारवलितंनेष्टंदेहगृहंमम॥ २४॥ गुल्फगुग्गुलुविश्रांतजानूर्ध्वस्तंभ
मस्तकम्॥ दीर्घदोर्दारुसुदृढंनेष्टंदेहगृहंमम॥ २५॥

न्॥ १९ ॥पृष्ठास्थिलक्षणकाष्ठानांसंघट्टेनपरितःसंकटःसंकुचितावकाशःकोटरोयस्य ॥ आंत्राणिमलमूत्रान्नरसादिप्रसरार्थादीर्घपेश्यः ॥ २० ॥ स्नायवःशिरास्ताएवतंत्र्यो
वीणादिसूत्राणिबंधनरज्जवोवायस्मिन् ॥ अस्वांगत्वान्नाडीतंत्र्योःस्वांगेइतिनकप्निषेधः ॥ मंकोलंचूर्णम् ॥ २१ ॥ अवष्टंभःपतनप्रतिविधानम् ॥ मिथ्याअनृतंमोहोऽज्ञानं
चस्थूणेआधारस्तंभौ ॥ कर्मधारयोवा ॥ २२ ॥ दुरीहादुश्चेष्टासैवदग्धादाहव्रणपीडितादासीयस्मिन् ॥ २३ ॥ अतएवमलाढ्यैर्दोषबहुलैरनिर्णिक्तैश्च विषयव्यूहलक्षणैर्भां
डैरुपस्करैर्द्रव्यादिसाधनैश्चसंकीर्णम् ॥ क्षारंलवणादिभित्त्यादिविशीर्णतादिहेतुरूपोवा ॥ २४ ॥ जंघास्तंभस्यगुल्फोगुग्गुलुआधारकाष्ठस्थानीयस्तत्रविश्रांतस्यप्रतिष्ठितस्या
र्थान्जंघास्तंभस्यजानुमस्तकंतदपिस्वाधाराधारेपरंपरयाप्रतिष्ठितमेव ॥ मूलशैथिल्येसर्वशैथिल्यापत्तेः ॥ दोषौबाहू ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकटान्यक्षाणिज्ञानेंद्रियाणि ॥ प्रज्ञाबुद्धिः ॥ प्रकटेतितद्विशेषणंक्रियाविशेषणंवा ॥ २६ ॥ मूर्द्धजाःकेशास्तएवच्छादनंछदिः ॥ कर्णाविवकुंडलमुक्तादिश्रीयुक्तेचंद्रशालेशिरोगृहे ॥ निर्व्यूहाःकाष्ठचित्रकाः ॥ २७ ॥ पेटविवरमुदरच्छिद्रम् ॥ २८ ॥ सरमाशुनीवभ्रमणदैन्यकलहादिकारिणीक्षुत्तयारणितांतरम् ॥ भांकारोभीषणध्वनिः ॥ २९ ॥ ॥ ३० ॥ मर्कटिकाप्रसिद्धाकवाटविष्कंभकाष्ठंवा ॥ ३१ ॥ सुधाचूर्णम् ॥ त्वगेवसुधालेपस्तेनमसृणंस्निग्धम् ॥ यंत्राणिघरट्टशकटादीनितेषामिवसंधीनांसंचारोभ्रमणादिस्तेषामेवसंचारोवा ॥ मनएवसदातनआखुर्मूषकस्तेनोत्खातमिवशैथिल्यरजस्वलादिभावमापादितम् ॥ ३२ ॥ स्मितानिईषद्धसितान्येवदीपाः ॥ तमःपूरैरज्ञानांधकारप्रवाहैः

प्रकटाक्षगवाक्षांतःक्रीडत्प्रज्ञागृहांगनम् ॥ चिंतादुहितृकंब्रह्मन्नेष्टंदेहगृहंमम॥ २६॥मूर्धजाच्छादनच्छन्नकर्णश्रीचंद्रशालिकम् ॥ आदीर्घांगुलिनिर्व्यूहंनेष्टंदेहगृहंमम ॥ २७ ॥ सर्वांगकुड्यसंघातघनरोमयवांकुरम् ॥ संशून्यपेटविवरंनेष्टंदेहगृहंमम ॥ २८ ॥ नखोर्णनाभिनिलयंसरमारणितांतरम् ॥ भांकारकारिपवनंनेष्टंदेहगृहंमम ॥ २९ ॥ प्रवेशनिर्गमव्यग्रवातवेगमनारतम् ॥ वितताक्षगवाक्षंतन्नेष्टंदेहगृहंमम ॥ ३० ॥ जिह्वामर्कटिकाक्रांतवदनद्वारभीषणम् ॥ दृष्टदंतास्थिशकलंनेष्टंदेहगृहंमम ॥ ३१ ॥ त्वक्सुधालेपमसृणंयंत्रसंचारचंचलम् ॥ मनःसदाखुनोत्खातंनेष्टंदेहगृहंमम ॥३२॥ स्मितदीपप्रभोद्भासिक्षणमानंदसुंदरम् ॥ क्षणंव्याप्तंतमःपूरैर्नेष्टंदेहगृहंमम ॥ ३३ ॥ समस्तरोगायतनंवलीपलितपत्तनम् ॥ सर्वाधिसारगहनंनेष्टंदेहगृहंमम ॥ ३४ ॥ अक्षर्क्षक्षोभविषमाशून्यानिःसारकोटरा ॥ तमोगहनदिक्कुंजानेष्टादेहाटवीमम ॥ ३५ ॥ देहालयंधारयितुंनशक्तोमिमुनीश्वर ॥ पंकमग्नंसमुद्धर्तुंगजमल्पबलोयथा ॥ ३६ ॥ किंश्रियाकिंचराज्येनकिंकायेनकिमीहितैः॥ दिनैःकतिपयैरेवकालःसर्वंनिकृंतति ॥ ३७ ॥ रक्तमांसमयस्यास्यसबाह्याभ्यंतरंमुने ॥ नाशैकधर्मिणोब्रूहिकैवकायस्यरम्यता ॥ ३८ ॥ मरणावसरेकायाजीवंनानुसरंतिये ॥ तेषुताततकृतघ्नेषुकैवास्थावदधीमताम् ॥ ३९ ॥ मत्तेभकर्णाग्रचलःकायोलंबांबुभंगुरः ॥ नसंत्यजतिमांयावत्तावदेनंत्यजाम्यहम् ॥ ४० ॥ पवनस्पंदतरलःपेलवःकायपल्लवः ॥ जर्जरस्तनुवृत्तश्चनेष्टोमेकटुनीरसः ॥ ४१ ॥

॥ ३३ ॥ वलीत्वक्शैथिल्यम् ॥ पत्तनंनगरंनिवासस्थानमितियावत् ॥ आधयोमानसदुःखानितान्येवसारःप्राधान्येनभोग्यत्वात्तैर्गहनंदुर्गममरण्यायमानंवा ॥ ३४ ॥ अक्षाणींद्रियाण्येवऋक्षाभल्लूकाः ॥ ३५ ॥ ३६ ॥ ईहितैश्चेष्टितैर्मनोरथैर्वा ॥ निकृंततिच्छिनत्ति ॥ ३७ ॥ सबाह्याभ्यंतरंविमृश्येतिशेषः ॥ ३८ ॥ नानुसरंतिनानुगच्छंति ॥ कृतंपालनपोषणाद्युपकारंघ्नंतिप्रत्युपकाराभावादितिकृतघ्नाः ॥ ३९ ॥ चलश्चपलः ॥ लंबंलंबमानंयदंबुजलकणः ॥ सन्निधानान्मत्तेभकर्णाग्रएवेतिगम्यते ॥ भंगुरोनश्वरः॥४०॥ ॥३०॥
आधिव्याधिकंटकशतक्षतत्वाज्जर्जरःशिथिलः ॥ तनुवृत्तःक्षुद्रस्वभावः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालपल्लवमिवपेलवांमृद्वींतनुतांकार्श्यम् ॥ पेलवमितिपाठेक्रियाविशेषणम् ॥ आश्रयद्वाराउभयत्रापियोग्यता ॥ ४२ ॥ तानिपुनःपुनःपूर्वोपभुक्तान्येव ॥ वीप्सितार्थस्यैवबु
द्ध्यारूढस्यसर्वनाम्नापरामर्शाद्विनापिद्विर्वचनंवीप्सालभ्यते ॥ प्राकृतःपामरः ॥ ४३ ॥ संसेव्यसंप्राप्य ॥ उच्छ्रायमुपचयमुत्कर्षंवा ॥ स्थैर्यमविनाशिताम् ॥ ४४ ॥ ४५ ॥ तृ
ष्णैवकुहरकमल्पच्छिद्रम् ॥ सुप्तःसुप्तइवमूढः ॥ अतएवमुक्तेहआलोढ्वारानुकूलेच्छाचेष्टाविधुरोऽतएवमूकोगुरूपसर्पणेनतत्प्रश्नादिवाग्निकलश्च ॥ कच्छोपलक्षितदुर्रिद्रियै
र्दुर्विषयकर्दमरसास्वादित्वात्कच्छपः ॥ ४६ ॥ दहनमेवैकोर्थोमुख्यप्रयोजनंतद्योग्यानि ॥ तेषुतेषांमध्ये ॥ ४७ ॥ वलनंवलःप्रतानवेष्टनम् ॥ निपातोऽधोगतिस्तत्फलस्तत्पर्य

भुक्त्वापीत्वाचिरंकालंबालपल्लवपेलवाम् ॥ तनुतामेत्ययत्नेनविनाशमनुधावति ॥ ४२ ॥ तान्येवसुखदुःखानिभावाभावमयान्यसौ ॥ भूयोप्यनुभवन्कायःप्राकृतोहिनलज्जते ॥ ४३ ॥ सुचिरंप्रभुतांकृत्वासंसेव्यविभवश्रियम् ॥ नोच्छ्रायमेतिनस्थैर्यंकायःकिमितिपाल्यते ॥ ४४ ॥ जराकालेजरामेतिमृत्युकालेतथामृतिम् ॥ समएवाविशेषज्ञःकायोभोगिदरिद्रयोः ॥ ४५ ॥ संसारांभोधिजठरेतृष्णाकुहरकांतरे ॥ सुप्तस्तिष्ठतिमुक्तेहोमूकोयंकायकच्छपः ॥ ४६ ॥ दहनैकार्थयोग्यानिकायकाष्ठानिभूरिशः ॥ संसाराब्धाविहोह्यंतेकंचित्तेषुनरंविदुः ॥ ४७ ॥ दीर्घदौरात्म्यवलयानिपातफलपातया ॥ नदेहलतयाकार्यंकिंचिदस्तिविवेकिनः ॥ ४८ ॥ मज्जन्कर्दमकोशेषुझटित्येवजरांगतः ॥ नज्ञायतेयात्यचिरात्कःकथंदेहदर्दुरः ॥ ४९ ॥ निःसारसकलारंभाःकायाश्चपलवायवः ॥ रजोमार्गेणगच्छंतोदृश्यंतेनेहकेनचित् ॥ ५० ॥ वायोर्दीपस्यमनसोगच्छतोज्ञायतेगतिः ॥ आगच्छतश्चभगवच्छरीरस्यकदाचन ॥ ५१ ॥ बद्धास्थायेशरीरेषुबद्धास्थायेजगत्स्थितौ ॥ तान्मोहमदिरोन्मत्तान्धिग्धिगस्तुपुनःपुनः ॥ ५२ ॥ नाहंदेहस्यनोदेहोममनायमहंतथा ॥ इतिविश्रांतचित्तायेतेमुनेपुरुषोत्तमाः ॥ ५३ ॥ मानावमानबहुलाबहुलाभमनोरमाः ॥ शरीरमात्रबद्धास्थंघ्नंतिदोषदृशोनरम् ॥ ५४ ॥ शरीरश्वभ्रशायिन्यापिशाच्यापेशलांगया ॥ अहंकारचमत्कृत्याच्छलेनच्छलितावयम् ॥ ५५ ॥

वसितः पातोमरणंयस्याः ॥ निपातफलैर्दुश्चरितैःपातोयस्याइतिवा ॥ ४८ ॥ कर्दमकोशेषुपंकाधारेषुविषयपल्वलेषु ॥ कथंकैर्दुर्दशाप्रकारैः ॥ दर्दुरोभेकः ॥ ४९ ॥ निःसारा
नीरसाः ॥ कायाएवचपलावायवोझंझापवनाः ॥ रजोमार्गेणराजसप्रवृत्त्याधूलिमात्रपरिशेषेणवा ॥ धूलिसहितेनाकाशमार्गेणान्यत्र ॥ ५० ॥ अत्रदीपशरीरयोर्गत्यागती
विनाशोत्पत्ती ॥ पूर्वश्लोकादनुकृष्यशरीरस्यनेहकेनचिज्ज्ञायतइतिसंबंधः ॥ ५१ ॥ आस्थासारत्वचिरस्थायित्वसत्यत्वाद्यभिमानः ॥ कंठोक्तेपिपौनःपुन्येद्विर्वचनमतिश
यार्थम् ॥ ५२ ॥ अयमिदंत्वेनघटादिवज्जडोदेहोहंनेतिविचार्यविश्रांतचित्ताः परमात्मनीतिशेषः ॥ पुरुषोत्तमाःपुरुषश्रेष्ठाविष्णुस्वरूपाएवेतिवा ॥ ५३ ॥ दोषदृशोदुर्दृष्टयो
विशेष्याः ॥ घ्नंतिमृत्युवशंनयंति ॥ ५४ ॥ अहंकारस्यचमत्कृतिर्भोगतृष्णादिःसैवपिशाची ॥ छलेनकपटेनछलिताअसारेसारतामापाद्यसारापहारेणप्रतारिताः ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रज्ञासद्बुद्धिः ॥ वराकीदीना ॥ मिथ्याज्ञानमेवकुराक्षसी ॥ एकिकाविवेकादिस्वसहायशून्या ॥ ५६ ॥ यदादृश्यवर्गेनकिंचिदपिसत्यंतदातदंतःपातिशरीरमपितथैवेतिस्वतएव दग्धप्रायेणासतापिशरीरेणजीवसमूहःप्रतार्यतेचित्रमाश्चर्यमेतदित्यर्थः ॥ ५७ ॥ यदिजनताविप्रलंभेनकायस्यकिंचित्प्रयोजनंस्यात्तदायुज्येतापितदपिनास्तीत्याहद्वाभ्याम् ॥ ५८ ॥ कार्याणिसांसारिकधावनान्येवपरआवर्त्तोभ्रसांभ्रमः ॥ व्यर्थंस्वार्थशून्यंयथास्यात्तथानिष्फलःपरार्थशून्योपीत्यर्थः ॥ ५९ ॥ कुतःकायादिदृश्यवर्गस्यासत्यत्वं तत्राह ॥ मिथ्येति ॥ यतोमिथ्याभूतस्याज्ञानस्यविकारइत्यर्थः ॥ स्वप्नसंभ्रमनगरतुल्ये ॥ अथवास्वाप्नभ्रांतीनामाधारे ॥ शरीरएवस्वप्नदर्शनात् ॥ स्वेशरीरेयथाकामंपरिवर्त्त तइतिश्रुतेः ॥ नगरस्यनागरिकव्यापारतुल्यसत्ताकत्वादित्यर्थः ॥ ६० ॥ विश्वसितुविश्वासंकरोतु ॥ विग्रहेदेहे ॥ ६१ ॥ हठवृत्तिषुभंगुरताशैघ्र्येस्वस्वोत्कर्षख्यापनायबलात्प्र वृत्तेषुपदार्थेषुमध्येसततभंगुरकार्यसमूहविजयिनोयेयेतडिच्छरदभ्रादयस्तेभ्योपिजातजयंलब्धोत्कर्षम् ॥ तत्कुतस्तत्राह ॥ प्रबलदोषमिति ॥ नाशहेतुदोषसामग्रीबाहुल्यादि

प्रज्ञावराकीसर्वैवकायबद्धास्थयानया ॥ मिथ्याज्ञानकुराक्षस्याछलिताकष्टमेकिका ॥५६॥ नकिंचिदपिदृश्येस्मिन्सत्यंतेनहतात्मना ॥ चित्रंदग्धशरीरेणजनताविप्रलभ्यते ॥ ५७ ॥ दिनैःकतिपयैरेवनिर्झरांबुकणोयथा ॥ पतत्ययमयत्नेनजरठःकायपल्लवः ॥ ५८ ॥ कायो यमचिरापायोबुद्बुदोंबुनिधाविव ॥ व्यर्थंकार्यपरावर्त्तेपरिस्फुरतिनिष्फलः ॥ ५९ ॥ मिथ्याज्ञानविकारेस्मिन्स्वप्नसंभ्रमपत्तने ॥ काये स्फुटतरापायेक्षणमास्थानमेद्विज ॥ ६० ॥ तडित्सुशरदभ्रेषुगंधर्वनगरेषुच ॥ स्थैर्यंयेनविनिर्णीतंसविश्वसितुविग्रहे ॥ ६१ ॥ सततभं गुरकार्यपरंपराविजयिजातजयंहठवृत्तिषु ॥ प्रबलदोषमिदंतुकलेवरंतृणमिवाहमपोह्यसुखंस्थितः ॥ ६२ ॥ ॥ इत्यार्षेवासि० वा० द० मो० वै० कायजुगुप्सानामाष्टादशःसर्गः ॥ १८ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ लब्ध्वापितरलाकारेकार्यभारतरंगिणि ॥ संसार सागरेजन्मबाल्यंदुःखायकेवलम् ॥ १ ॥ अशक्तिरापदस्तृष्णामूकतामूढबुद्धिता ॥ गृध्नुतालोलतादैन्यंसर्वंबाल्येप्रवर्त्तते ॥ २ ॥

त्यर्थः ॥ आपोह्यतुच्छबुद्ध्यानिरस्य ॥ ६२ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेवै० अष्टादशःसर्गः ॥ १८ ॥ ॥ ७ ॥ ॥ अज्ञानक्षुत्तृषारोगाशौचचापलदूषितम् ॥ तिर्यग्जं तुसमावस्थंबाल्यमप्यत्रनिंद्यते ॥ १ ॥ ननुनदेहस्यसर्वाअवस्थादुःखरूपास्तद्बाल्यस्यसर्वजनस्पृहणीयतयारम्यतरत्वात्तद्यथा महाराजोवामहाब्राह्मणोवामहाकुमारोवाअति घ्नीमानंदस्यगत्वाशयीतेतिश्रुत्यापिबाल्यस्यानंदबहुलत्वप्रतिपादनादित्याशंक्यविस्तरेणतस्यानर्थबहुलतांप्रपंचयितुंप्रतिजानीते ॥ लब्ध्वापीति ॥ कार्यभारैर्नानाकर्त्तव्याभि निवेशैः ॥ प्रकृत्यादित्वात्तृतीया ॥ धान्येनधनवानितिवत्तद्धितप्रकृत्यर्थेअभेदेनान्वयः ॥ तरलाअस्थिराआकाराश्चतुर्विधशरीराणियस्मिन् ॥ अन्यत्रचंचलस्वभावे ॥ संसा रसागरेजन्ममनुष्यजन्म ॥ बाल्यंकेवलंदुःखायैवलभतेजंतुरितिशेषः ॥ अपिनामनुष्यजन्मनोऽतिदौर्लभ्यंद्योत्यते ॥ तथाचश्रुतिः ॥ ततोवैतद्दुर्निष्प्रपतरमिति ॥ १ ॥ प्रतिज्ञा तार्थंप्रपंचयतिअशक्तिरित्यादिना ॥ गृध्नुतासाभिलाषता ॥ तृष्णाभक्षणादिविषये गृध्नुताक्रीडाकौतुकादिविषयेतदलाभेदैन्यमितिभेदः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चकारोऽनुक्तानंतदुर्दशासमुच्चयार्थः ॥ बंधनम् ॥ अधिकरणेल्युट् ॥ आलानंमजबंधनस्तंभः ॥३॥ जरारोगे समाहारद्वंद्वेएकवद्भावः ॥ तास्तादृश्यः॥परितःकृंतंतिछिंदंतीवपी डयंति ॥ याःयादृश्यः ॥ ४ ॥ तिर्यग्जातयःपश्वादयस्तैःसमआरंभोयस्य ॥ अवधीरितोभर्त्सितः ॥ ५ ॥ पुरःस्थितंप्रतिबिंबमिवस्फुटंघनंनिबिडंअज्ञानंप्रतिक्षणंचित्तेतत्तद्विष यप्रतिबिंबनैर्वाघनानिबहुलानिभ्रांतिज्ञानानियस्मिन् ॥ अतएवनानासंकल्पैःपेलवंमृदुतुच्छमितियावत् ॥ तत्तत्संकल्पितविषयालाभादालूनंसर्वतश्छिन्नमिवसंशीर्णमिवस दादुःखितंमनोयस्मिन् ॥ ६ ॥ भयंलक्षणयादुःखंमुख्यमेववा ॥ भयादपिभयांतरोत्पत्तेः ॥ अबुद्ध्याअज्ञानेन ॥ हिशब्दोप्यर्थे ॥ ७॥ सामान्यविशेषाभ्यांबुद्ध्याबुद्धिपूर्वकत्वा

रोषरोदनरौद्रासुदैन्यजर्जरितासुच ॥ दशासुबंधनंबाल्यमालानंकरिणामिव ॥ ३ ॥ नमृतौनजरारोगेनचापदिनयौवने ॥ तांश्चिंताःपं रिकृंतंतिहृदयंशैशवेषुयाः ॥४॥ तिर्यग्जातिसमारंभःसर्वैरेवावधीरितः ॥ लोलोबालसमाचारोमरणादपिदुःखदः ॥ ५॥ प्रतिबिंबघना ज्ञानंनानासंकल्पपेलवम् ॥ बाल्यमालूनसंशीर्णमनःकस्यसुखावहम् ॥ ६ ॥ जलवह्न्यनिलाजस्रजातभीत्यापदेपदे ॥ यद्भयंशैशवे ऽबुद्ध्याकस्यापदिहितद्भवेत् ॥ ७ ॥ लीलासुदुर्विलासेषुदुरीहासुदुराशये ॥ परममोहमाधत्तेबालोबलवदापतन् ॥ ८ विकल्पकल्पिता रंभंदुर्विलासंदुरास्पदम् ॥ शैशवंशासनायैवपुरुषस्यनशांतये ॥ ९ ॥ येदोषायेदुराचारादुष्क्रमायेदुराधयः ॥ तेसर्वेसंस्थिताबाल्येदु र्गर्त्तइवकौशिकाः ॥ १० ॥ बाल्यंरम्यमितिव्यर्थबुद्धयःकल्पयंतिये ॥ तान्मूर्खपुरुषान्ब्रह्मन्धिगस्तुहतचेतसः ॥ ११ ॥ यत्रदोलाकृतिमनः परिस्फुरतिवृत्तिषु ॥ त्रैलोक्याऽभव्यमपितत्कथंभवतितुष्टये ॥ १२ ॥ सर्वेषामेवसत्वानांसर्वावस्थाभ्यएवहि ॥ मनश्चंचलतामेतिबा ल्येदशगुणंमुने ॥ १३ ॥ मनःप्रकृत्यैवचलंबाल्यंचंचलतांवरम् ॥ तयोःसंश्लिष्यतोस्त्राताकइवांतःकुचापले ॥ १४ ॥ स्त्रीलोचनैस्तडित्पुं जैर्ज्वालाजालैस्तरंगकैः ॥ चापलंशिक्षितंब्रह्मञ्छैशवाक्रांतचेतसः ॥ १५ ॥

भ्यांमानसत्वेनचलीलादीनांभेदः ॥ मोहंसारताभ्रमम ॥८॥ निष्फलेपिकर्मणिबालप्रमत्तादिवचनादपिकौतूहलेनकल्पितमहारंभम् ॥ दुरास्पदंदुष्प्रतिष्ठम् ॥ शासनायगुर्वादिकृ तकशाताडनादिदुःखायैवनविश्रांतये ॥ ९ ॥ दुष्क्रमादुरुत्तराः कौशिकावायसारातयः ॥ १० ॥ यच्छंकितंबाल्यंरम्यतरमितितत्राह ॥ बाल्यमिति ॥ श्रुतिस्तुरागादिविक्षेपा प्ररोहेस्वाभाविकात्मसुखाविर्भावसंभावनार्थानबाल्यरम्यतापरेतिभावः ॥ ११ ॥ तदरम्यतामेवोपपादयति ॥ यत्रेत्यादिना ॥ त्रैलोक्येअभव्यममंगलंतदपीत्यन्वयः ॥ १२ ॥ नकेवलंमनुष्याणामेवाभव्यमपितुसर्वजंतूनामित्याह ॥ सर्वेषामिति ॥ मनश्चांचल्यातिशयस्यदुःखातिशयहेतुताप्रसिद्धैवेतिभावः ॥ १३ ॥ संश्लिष्यतोर्मिलतोः ॥ कुचाप लेतत्प्रयुक्तानर्थे ॥ १४ ॥ शैशवेनाक्रांताच्चेतसश्चित्तात्सकाशात्शिक्षितमभ्यस्तंनूनमित्युत्प्रेक्षा ॥ १५ ॥

१ विनिकृंततीतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भंगुरस्थिती ॥ नुमभावश्छांदसः ॥ चपलस्वभावे ॥ १६ ॥ दुःखभूतानिप्रभूतदुःखानिदुर्व्यसनादीनि ॥ १७ ॥ तत्तदाविषवद्दुःसहेनवैषम्येणचित्तविकारेण ॥ मूर्छनांमूर्छाम् ॥ १८ ॥ कौलेयकःश्वा ॥ विशेषणानिसाधारणानि ॥ १९ ॥ बाष्पमश्रुऊष्मोद्गमश्च ॥ जडाशयोऽज्ञबुद्धिरचेतनश्च ॥ वर्षोक्षिततप्तभूमावपिबाष्पादयःप्रसिद्धाः ॥ २० ॥ भयंचआहारश्चभयाहारौ ॥ दृष्टंसन्निहितमदृष्टमसन्निहितम् ॥ लोलेबुद्धिवपुषीयस्य ॥ २१ ॥ भावान्पदार्थान् ॥ विनिष्कृत्तश्छिन्नः ॥ २२ ॥ दुरीहाभिर्दुश्चेष्टाभिर्दुष्टम

शैशवंचमनश्चैवसर्वास्वेवहिवृत्तिषु ॥ भ्रातराविवलक्ष्येतेसततंभंगुरस्थिती ॥ १६ ॥ सर्वाणिदुःखभूतानिसर्वैदोषादुराधयः ॥ बालमेवोपजीवंतिश्रीमंतमिवमानवाः ॥ १७ ॥ नवंनवंप्रीतिकरंनशिशुःप्रत्यहंयदि ॥ प्राप्नोतितदसौयातिविषवैषम्यमूर्छनाम् ॥ १८ ॥ स्तोकेनवशमायातिस्तोकेनैतिविकारिताम् ॥ अमेध्यएवरमतेबालःकौलेयकोयथा ॥ १९ ॥ अजस्रबाष्पवदनःकर्दमाक्तोजडाशयः ॥ वर्षोक्षितस्यतप्तस्यस्थलस्यसदृशःशिशुः ॥ २० ॥ भयाहारपरंदीनंदृष्टादृष्टाभिलाषिच ॥ लोलबुद्धिवपुर्द्धत्तेबाल्यंदुःखायकेवलम् ॥ २१ ॥ स्वसंकल्पाभिलषितान्भावानप्राप्यतप्तधीः ॥ दुःखमेत्यबलोबालोविनिष्कृत्तइवाशये ॥ २२ ॥ दुरीहालब्धलक्षाणिबहुवक्रोल्वणानिच ॥ बालस्ययानिदुःखानिमुनेतानिनकस्यचित् ॥ २३ ॥ बालोबलवतास्वेनमनोरथविलासिना ॥ मनसातप्यतेनित्यंग्रीष्मेणेववनस्थली ॥ २४ ॥ विद्यागृहगतोबालोपरामेतिकदर्थनाम् ॥ आलानइवनागेंद्रोविषवैषम्यभीषणाम् ॥ २५ ॥ नानामनोरथमयीमिथ्याकल्पितकल्पना ॥ दुःखायात्यंतदीर्घायबालतापेलवाशया ॥ २६ ॥ संदृष्टोभुवनंभोक्तुमिंदुमादातुमंबरात् ॥ वांछतेयेनमौर्ख्येणतत्सुखायकथंभवेत् ॥ २७ ॥ अंतश्चित्तेरशक्तस्यशीतातपनिवारणे ॥ कोविशेषोमहाबुद्धेबालस्योर्वीरुहस्तथा ॥ २८ ॥ उड्डीतुमभिवांछंतिपक्षाभ्यांक्षुत्परायणाः ॥ भयाहारपरानित्यंबालाविहगधर्मिणः ॥ २९ ॥ शैशवेगुरुतोभीतिर्मातृतःपितृतस्तथा ॥ जनतोज्येष्ठबालाच्चशैशवंभयमंदिरम् ॥ ३० ॥

नोरथैर्बालब्धलक्षाणिप्राप्तास्पदानि ॥ बहुभिर्वक्रैरनृजुभिर्वचनोपायैरुल्बणानिक्रूराणि ॥ २३ ॥ २४ ॥ अपरांप्रागुक्तादन्यामपिकदर्थनांपारवश्यकशाघाताद्यनिष्टपरंपराम् ॥ २५ ॥ मिथ्यावस्तुष्वेवकल्पिताकल्पनासत्यताबुद्धिर्यस्याम् ॥ २६ ॥ कदाचिद्भोजनेच्छयारुदन्बालोभुवनंतेभोजनंदास्यामीतिप्रतारणेनसंदृष्टस्तदेवभोक्तुंवांछतेवांछतीतिप्रसिद्धम् ॥ २७ ॥ अंतर्मनसिचित्तिःशीतातपादिदुःखसंवेदनंयस्य ॥ उर्वीरुहोवृक्षस्य ॥ २८ ॥ उड्डीतुमुड्डयितुम् ॥ इड्गुणाभावश्छांदसः ॥ पक्षाभ्यांलक्षणयाबाहुभ्याम् ॥ विहगधर्मिणःपक्षिसमाः ॥ २९ ॥ ३० ॥

१ क्वचिद्बाल्यमितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकलाभिर्दोषदशाभिर्विहताशयंदूषितांतःकरणम् ॥ अविवेकलक्षणस्यविलासिनोनिरंकुशविहारशीलस्यशरणंगृहम् ॥ चिदितिनिपातोऽप्यर्थे ॥ एवकारोभिन्नक्रमः ॥ कस्यापिपरितुष्टयेसुखायअलमत्यर्थंनैवभवतीत्यर्थः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०एकोनविंशःसर्गः ॥ १९ ॥ ॥ ५ ॥ ॥ लोभद्वेषमदासूयामानमात्सर्यदूषितम् ॥ कामाद्यनर्थसदनंयौवनंचात्रनिंद्यते ॥ १ ॥ अस्तुबाल्यमतिमौर्ख्याशक्तिपारतंत्र्येभ्योदुःखबहुलंयौवनंतुतदभावान्नानाभोगरसरंजितत्वाच्चसुखहेतुरेवेतिस्पृहणीयमेवेत्याशंक्यतस्यसुतरामनर्थतांप्रपंचयितुमुपक्रमते ॥ बाल्यानर्थमित्यादिना ॥ संभ्रमेणभोगोत्साहेनभ्रांत्यावक्ष्यमाणकामपिशाचादिनावाअभिहताशयोदूषितांतःकरणः ॥ आचतुर्दशवर्षमांडव्येनमर्यादाकरणान्नतथाबाल्यंनिपाताययौवनंतुनिपातायैवेतिभावः ॥ १ ॥ तत्रयौवने ॥ अनंताविलासाश्चेष्टायस्य ॥ वृत्तीरागद्वेषादिपरिणामान् ॥ जडोमूर्खः ॥ २ ॥ परिभूयतेविवेकंतिरस्कृत्यवशीक्रियते ॥ ३ ॥ अतएवाऽवशमस्वतंत्रंचेतोललनानांयुवतीनामिवलोलवृत्तीनांचंचलस्थितिकानांचितानांअवृतीःवरणंवृतिस्तिरोधानंतदभावान्स्वैरप्रसरानितियावत् ॥ अर्पयतिप्रयच्छति ॥ यथानिध्यादिदर्शनायबालानांकरतलेर्पितंसिद्धाजनंलोलवृत्तीनांतन्नयनप्रभाणांअवृतीःअनावरणानि ॥ भूमिशिलादिव्यवधानतिरस्कारेणस्वैरंनिधिदर्शनसमर्थतामितियावत् ॥ ४ ॥ तत्रयौवनेतादृशाशयंकामचिंतादिवशीकृतचित्तमतएवतद्रूपंतत्प्रायंतंपुरुषंनरकादिहेतुत्वाद्ययक्लेशसाध्यत्वाच्चदुष्टाआरंभाःस्त्रीद्यूतकलहादिव्यसनारंभायेभ्यस्तेतथाविधास्तेतेप्रसिद्धारागलोभादिदोषाःप्रतिलुंपंतिविनाशयंति ॥ येदोषास्तेनयौवनेनैवदुष्टाअतिशयंनीताइत्यर्थः ॥ ५ ॥ अतएवमहानरकेति ॥ स्पष्टम् ॥ ६ ॥ रसाःश्रृंगारादयःकट्वादयोविषयाभिलाषादुस्तरजलानिच ॥ प्राचुर्येमयट् ॥ रागलोभादीनांचोरव्याघ्रसर्पादीनांचचित्रैराश्चर्यहेतुभिर्वृत्तांतनिचयैरुंभितापूरिताभूर्यौवनारण्यभूमिः ॥ ७ ॥

सकलदोषदशाविहताशयंशरणमप्यविवेकविलासिनः॥इहनकस्यचिदेवमहामुनेभवतिबाल्यमलंपरितुष्टये॥ ३१ ॥ ॥इत्यार्षेवासि०वा०दे०मो०वै०बाल्यजुगुप्सानामैकोनविंशःसर्गः॥ १९॥ ॥ ५॥ ॥श्रीरामउवाच॥ ॥बाल्यानर्थमथत्यक्त्वापुमानभिहताशयः॥ आरोहतिनिपाताययौवनंसंभ्रमेणतु॥१॥ तत्रानंतविलासस्यलोलस्यस्वस्यचेतसः॥ वृत्तीरनुभवन्यातिदुःखाद्दुःखांतरंजडः॥ २ ॥ स्वचित्तबिलसंस्थेननानासंभ्रमकारिणा॥ बलात्कामपिशाचेनविवशःपरिभूयते॥ ३॥ चिंतानांलोलवृत्तीनांललनानामिवाऽवृतीः॥ अर्पयत्यवशंचेतोबालानामंजनंयथा ॥ ४ ॥ तेतेदोषादुरारंभास्तत्रतंतादृशाशयम् ॥ तद्रूपंप्रतिलुंपंतिदुष्टास्तेनैवयेमुने॥ ५॥ महानरकबीजेनसंततभ्रमदायिना॥ यौवनेननयेनष्टानष्टानान्येनतेजनाः॥ ६॥ नानारसमयीचित्रवृत्तांतनिचयोंभिता॥ भीमायौवनभूर्येनतीर्णाधीरःसउच्यते॥ ७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनानिबहुलानिगर्जितानीवसाभिमानोक्तयोघनानांमेघानांगर्जितानिचयस्मिन् ॥ अतएवविद्युदिवप्रकाशमानम् ॥ ८ ॥ भोगकालेमधुरमतएवस्वादुत्तदयंतिक्तंपरिणामतःदूषणंनिंदाहेतुदोषाणांभूषणमलंकारायमाणम् ॥ सुरायाःकल्लोलामदविलासाः ॥ ९ ॥ विप्रलंभदंवंचनप्रदम् ॥ १० ॥ सर्वस्यक्षणमनोहरस्यवस्तुजातस्यमध्येअग्रेअग्रेसरंश्रेष्ठमित्यर्थः ॥ गंधर्वनगरदर्शनस्यमरणचिह्नत्वात्तत्पक्षेसर्वस्यवयसोग्रेअंतेइत्यर्थः ॥ ११ ॥ ज्यामुक्तइषुर्यावताकालेनलक्ष्यंप्रपततितावत्कालंसुखदम् ॥ १२ ॥ रमणंरमणीयं ॥ सद्भावःशुभचित्तता ॥ १३ ॥ सर्वेषांदुःखदायेकेचनसमारंभास्तेसर्वेइत्यन्वयः ॥ क्षयेप्रलये ॥ १४ ॥ भैरवाकारवान्भगवानीश्वरोपियौवनयुक्ताज्ञानसत्रेर्नूनंबिभेति ॥

निमेषभासुराकारमालोलघनगर्जितम् ॥ विद्युत्प्रकाशमशिवंयौवनंमेनरोचते ॥ ८ ॥ मधुरंस्वादुतिक्तंचदूषणंदोषभूषणम् ॥ सुराकल्लोलसदृशंयौवनंमेनरोचते ॥ ९ ॥ असत्यंसत्यसंकाशमचिराद्विप्रलंभदम् ॥ स्वप्नांगनासंगसमंयौवनंमेनरोचते ॥ १० ॥ सर्वस्याग्रेसर्वपुंसःक्षणमात्रमनोहरम् ॥ गंधर्वनगरप्रख्यंयौवनंमेनरोचते ॥ ११ ॥ इषुप्रपातमात्रंहिसुखदंदुःखभासुरम् ॥ दाहदोषप्रदंनित्यंयौवनंमेनरोचते ॥ १२ ॥ आपातमात्ररमणंसद्भावरहितांतरम् ॥ वेश्यास्त्रीसंगमप्रख्यंयौवनंमेनरोचते ॥ १३ ॥ येकेचनसमारंभास्तेसर्वेसर्वदुःखदाः ॥ तारुण्येसंनिधिंयांतिमहोत्पाताइवक्षये ॥ १४ ॥ हार्दांधकारकारिण्याभैरवाकारवानपि ॥ यौवनाज्ञानयामिन्याबिभेतिभगवानपि ॥ १५ ॥ सुविस्मृतशुभाचारंबुद्धिवैधुर्यदायिनम् ॥ ददात्यतितरामेषभ्रमंयौवनसंभ्रमः ॥ १६ ॥ कांतावियोगजातेनहृदिदुःस्पर्शवह्निना ॥ यौवनेदह्यतेजंतुस्तरुर्दावाग्निनायथा ॥ १७ ॥ सुनिर्मलापिविस्तीर्णापावन्यपिहियौवने ॥ मतिःकलुषतामेतिप्रावृषीवतरंगिणी ॥ १८ ॥ शक्यतेघनकल्लोलाभीमालंघयितुंनदी ॥ नतुतारुण्यतरलातृष्णातरलितांतरा ॥ १९ ॥ साकांतातौनूस्तौपीनौतेविलासास्तदाननम् ॥ तारुण्यइतिचिंताभिर्यातिजर्जरतांजनः ॥ २० ॥ नरंतरलतृष्णार्त्तंयुवानमिहसाधवः ॥ पूजयंतिनतुच्छिन्नंजरत्तृणलवंयथा ॥ २१ ॥ नाशायैवमदार्त्तस्यदोषमौक्तिकधारिणः ॥ अभिमानमहेभस्यनित्यालानंहियौवनम् ॥ २२ ॥

कथमन्यथासदैवविवेकज्ञानचंद्रंधारयतीतिभावः ॥ १५ ॥ भ्रमंभ्रांतिम् ॥ संभ्रमोमोहः ॥ १६ ॥ दुःस्पर्शःस्प्रष्टुमशक्यःशोकवह्निस्तेनहृदिचित्तेदह्यते ॥ १७ ॥ दोषमार्जनेननिर्मला ॥ औदार्येणविस्तीर्णा ॥ गुणाधानैःपावनी ॥ चकारःशैत्यमाधुर्याद्यनुक्तसमुच्चयार्थः ॥ १८ ॥ तारुण्येनतरलाचंचलाचित्तवृत्तिः ॥ भोगतृष्णातरलितानिआंतराणींद्रियाणियस्याम् ॥ १९ ॥ जर्जरतांशैथिल्यम् ॥ २० ॥ तरलास्तृष्णार्त्तयोयस्मिन् ॥ केवलंनपूजयंतिकिंत्ववमन्यंतेऽपीतिद्योतनायतुशब्दः ॥ २१ ॥ मानभंगस्तुमनस्विनांमरणोपमइत्यभिप्रेत्याह ॥ नाशायैवेति ॥ अभिमानएवमहेभस्तस्य ॥ अथवाअभिमानैर्महेभवत्स्तब्धस्याविवेकिपुरुषस्य ॥ नाशायाधःपाताय ॥ नित्यालानमभीक्ष्णंबंधनायस्तंभः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टालाभवियोगाभ्यामंतर्दाहाच्छोषस्तद्युक्तरोदनान्येवदृक्षाः ॥ दोषाएवाशीविषाःसर्पाः ॥ बतेतिखेदे ॥ २३ ॥ रस्यतेइतिरसःसुखलवमकरंदस्तेनकेसुखेविषयेसरंतिप्रसरंतीतिरागादयएवकेसरास्तैश्चसंबाधंनिबिडितम् ॥ दलानिपत्राणि ॥ चंचरीकाभ्रमराः ॥ पुष्करंपद्मम् ॥ २४ ॥ कृतंपापमकृतंपुण्यंलौकिककार्याणिवाकृताकृतानिपतनहेतुत्वात्कुपक्षाः ॥ आलयोनीडम् ॥ २५ ॥ असंख्यत्वादेवगतसंख्यानांकल्लोलानांविकल्पतरंगाणाम् ॥ विलासिनांविलसनशीलानाम् ॥ अनपेक्षितमर्यादोऽनवधिः ॥ अनपेक्षितमनिष्टंजरादिदुःखमेवमर्यादापर्यवसानभूर्यस्येतिवा ॥ २६ ॥ चित्ताकाशेप्रसादप्रकाशविवेकदृक्प्रसरादीनांसर्वेषांगुणानांसृज्यंतेसाधुसंगमसच्छास्त्रप्रयत्नादिभिरुत्पाद्यंतेइतिसर्गास्तेषाम् ॥ विशेष्यविशेषणभावेकामचारात्परनिपातः ॥ प्रयत्नसहस्रसाधितानामपिसद्गुणानामितियावत् ॥ स्थितिंस्थैर्यमपनेतुंदक्षःसमर्थः ॥ अनिलपक्षेगुणसर्गाणां

मनोविपुलमूलानांदोषाशीविषधारिणाम् ॥ शोषरोदनवृक्षाणांयौवनंबतकाननम् ॥ २३ ॥ रसकेसरसंबाधंकुविकल्पदलाकुलम् ॥ दुश्चिंताचंचरीकाणांपुष्करंविद्धियौवनम् ॥ २४ ॥ कृताकृतकुपक्षाणांत्वत्सरस्तीरचारिणाम् ॥ आधिव्याधिविहंगानामालयोनवयौवनम् ॥ २५ ॥ जडानांगतसंख्यानांकल्लोलानांविलासिनाम् ॥ अनपेक्षितमर्यादोवारिधिर्नवयौवनम् ॥ २६ ॥ सर्वेषांगुणसर्गाणांपरिरूढरजस्तमाः ॥ अपनेतुंस्थितिंदक्षोविषमोयौवनानिलः ॥ २७ ॥ नयंतिपांडुतांवक्रमाकुलावकरोत्कटाः ॥ आरोहंतिपरांकोटिंरूक्षायौवनपांसवः ॥ २८ ॥ उद्बोधयतिदोषालिंविकृंततिगुणावलिम् ॥ नराणांयौवनोल्लासोविलासोदुष्कृतश्रियाम् ॥ २९ ॥ शरीरपंकजरजश्चंचलांमतिषट्पदीम् ॥ निबध्नन्मोहयत्येषनवयौवनचंद्रमाः ॥ ३० ॥ शरीरखंडकोद्भूतारम्यायौवनवल्लरी ॥ लग्नमेवमनोभृंगंमदयत्युन्नतिंगता ॥ ३१ ॥ शरीरमरुतापोत्थांयुवताम्मृगतृष्णिकाम् ॥ मनोमृगाःप्रधावंतःपतंतिविषयावटे ॥ ३२ ॥ शरीरशर्वरीज्योत्स्नाचित्तकेसरिणःसटा ॥ लहरीजीवितांभोधेर्युवतामेनतुष्टये ॥ ३३ ॥

लूतास्पृष्टतंतूनांच ॥ २७ ॥ पांडुतामिति ॥ विषयवासनोत्थरोगैरित्यर्थः ॥ आकुलैश्चालितैरवकैरुत्कराशुचितृणपर्णादितुल्यैरिंद्रियैरुत्कटादुःसहाः ॥ परांकोटिंदोषोत्कर्षमूर्ध्वदेशंच ॥ २८ ॥ दोषाणामालिंसमूहम् ॥ दुष्कृतश्रियांपापसंपदांविलासहेतुत्वाद्विलासः ॥ २९ ॥ रजोगुणपरागनिरुद्धविवेकपक्षत्वाद्देहपंकजएवचंचलांमतिषट्पदींबुद्धिभ्रमरीमर्थात्तदभिमानकोशेनिबध्नन्मोहयति ॥ ३० ॥ शरीरलक्षणेखंडकेअल्पेवनखंडेकुंजेवा ॥ वल्लरीपुष्पमंजरी ॥ मदयतिमोहयति ॥ उन्नतिमुत्कर्षमूर्ध्वदेशंच ॥ ३१ ॥ शरीरमेवमरुभूमिस्तत्रकामातपतापेनोत्थांप्रतिभातांयुवतायौवनंसैवमृगतृष्णिकातांप्रतिधावंतः ॥ विषयलक्षणेअवटेगर्ते ॥ ३२ ॥ शरीरमेवशर्वरीरात्रिस्तस्याज्योत्स्नाचंद्रिका ॥ चित्तलक्षणस्यकेसरिणःसटास्कंधलोम ॥ तेनहिसशोभते ॥ लहरीवीचिमाला ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येयंयुवतासेयंहियस्माद्देहजंगलेकतिचिद्दिनानिफलितासंजातफलाशरत्शरत्कालः॥ अचिरादेवक्षयमेष्यतीतिभावः॥ अतोऽस्यांसमाश्वासंनार्हथेतिस्वजनान्प्रत्युक्तिः॥३४॥ उक्तमेवप्रपंचयति ॥ झटितीत्यादिभिःषड्भिः ॥ ३५ ॥ परांकोटिमुत्कर्षकाष्ठाम् ॥ वल्गंतिगच्छंति ॥ वृद्धिमितियावत् ॥ सज्वराःससंतापाः ॥ पूर्वंचवीप्सादर्शनात्तदातदेतिप रिणेयम् ॥ ३६ ॥ विवल्गंतिविशेषेणसंचरंति ॥ यामिनीरात्रिः ॥ ३७ ॥ विकाराश्चित्तविकाराबाललीलाश्च ॥ ३८ ॥ क्षणभंगिनायौवनेनमोहाद्योहर्षमायातिसनरमृगोम नुष्यःसन्नपिपशुरेव ॥ यतोसौमहामुग्धः ॥ ३९ ॥ मानमोहादभिमानसहितादज्ञानात् ॥ अभिलष्यतिसारबुद्ध्यासज्जने ॥ ४० ॥ सुखेनअहिंसासत्यास्तेयब्रह्मचर्याद्यनुपक्ष येण ॥ ४१ ॥ उत्कृष्टानांमहतांमकराणांग्राहाणामाकरःखनिः ॥ रागादिकल्लोलानांबलेनोल्लसनशीलम् ॥ हतंनिंदितम् ॥ कुत्सितानिकुत्सनैरितितत्पुरुषः॥ ४२ ॥ ननुबाल्य

दिनानिकतिचिद्येयंफलितादेहजंगले॥ युवताशरदस्यांहिनसमाश्वासमर्हथ ॥ ३४ ॥ झटित्येवप्रयात्येवशरीराद्युवताखगः॥ क्षणेनै वाल्पभाग्यस्यहस्ताच्चिंतामणिर्यथा॥ ३५॥ यदायदापरांकोटिमध्यारोहतियौवनम् ॥ वल्गंतिसज्वराःकामास्तदानाशायकेवलम् ॥ ३६॥ तावदेवविवल्गंतिरागद्वेषपिशाचकाः॥ नास्तमेतिसमस्तैषायावद्यौवनयामिनी॥३७॥ नानाविकारबहुलेवराकेक्षणनाशि नि॥ कारुण्यंकुरुतारुण्येम्रियमाणेसुतेयथा ॥ ३८ ॥ हर्षमायातियोमोहात्पुरुषःक्षणभंगिना ॥ यौवनेनमहामुग्धःसवैनरमृगस्मृतः ॥ ३९ ॥ मानमोहान्मदोन्मत्तंयौवनंयोभिलष्यति॥ अचिरेणसदुर्बुद्धिःपश्चात्तापेनयुज्यते ॥ ४० ॥ तेपूज्यास्तेमहात्मानस्तएवपुरुषाभु वि॥ येसुखेनसमुत्तीर्णाःसाधोयौवनसंकटात्॥ ४१ ॥ सुखेनतीर्यतेंभोधिरुत्कृष्टमकराकरः ॥ नकल्लोलबलोल्लासिसदोषंहतयौवनम् ॥ ४२ ॥ विनयभूषितमार्यजनास्पदंकरुणयोज्वलमावलितंगुणैः॥ इहहिदुर्लभमंगसुयौवनंजगतिकाननमंबरगंयथा॥ ४३॥ ॥इ त्यार्षेवा०वा०दे०मो०वै०यौवनगर्हानामविंशतितमःसर्गः॥ २० ॥ ॥छ॥ ॥छ॥ ॥छ॥

वार्द्धकयोर्मौर्ख्याशक्तिभ्यांपुरुषार्थसाधनायोग्यत्वाद्यौवनस्यापिदोषबहुलत्वान्नास्तिकदापिपुरुषस्यसाधनसंपत्त्यापुरुषार्थप्रत्याशेत्याशंक्यनसर्वंयौवनंनिंद्यतेकिंतुदुर्यौवन मेवसुयौवनंतुपुरुषार्थपर्यवसितमेवेतिलक्षणैस्तद्दर्शयंस्तस्यदुर्लभतामाह ॥ विनयेति ॥ आर्याःपूज्याजनामुनिजनाआस्पदंस्थानंयस्य आर्यजनानांसाधूनामास्पदमावास स्थानवद्विश्रांतिदमितिवा ॥ गुणैःशांतिदांत्यादिभिः॥ जगतिसंसारे ॥ हिशब्दोप्यर्थे ॥ इहास्मिन्मनुष्यजन्मन्यपिसुदुर्लभंकिमन्यत्रेत्यर्थः ॥ अंबरगंकाननंनंदनवनम् ॥ तत्पक्षे वीन्पक्षिणोनयंतिप्रापयंतिस्वसन्निधिमितिविनयाःकल्पवृक्षास्तैर्भूषितम् ॥ आर्यजनादेवास्तेषामास्पदम् ॥ अतएवकरुणयादययाऊर्जितम् ॥ गुणैःफलपुष्पसमृद्ध्यादिभिः कल्पलतागुणैरावलितंवेष्टितमितिवा ॥ इहभुविसुदुर्लभमितियोज्यम् ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठमहारामा०तात्पर्यप्रकाशेवै०विंशतितमःसर्गः ॥ २० ॥ ॥छ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्यक्षनरकव्रातनिष्पन्ननिखिलांगिकाः ॥ स्त्रियोप्यत्रविनिर्यंतेपुंसांनरकजन्मदाः ॥ १ ॥ येषुस्त्रीपिंडेषुयूनांरमणीयताभ्रमस्तेषांस्वरूपंविविच्यदर्शयितुमुपक्रमते ॥ मांसेत्यादिना ॥ स्नायवःशिराः ॥ ग्रथनंग्रंथिस्तेनशालिन्याःशोभमानायामांसमय्याःपांचालिकायाःप्रतिमायाःस्त्रियाःशकटादियंत्रमिवलोलेचंचलेअंगपंजरेशोभनमिवयन्मन्यंतेतत्किंनकिंचिदित्यर्थः ॥ १ ॥ उक्तमेवप्रपंचयिष्यन्प्रथमंयूनांयत्रनेत्रेविलासविभ्रमस्तत्रविवेकेअशोभनतांदर्शयति ॥ त्वगिति ॥ समाहारद्वंद्वः ॥ रम्यंचेत्सज्जंस्व ॥ किंमुधेति॥ नोचेदितिशेषः ॥ मुधाव्यर्थम् ॥ २ ॥ विपुलाशयोविवेकविस्तीर्णबुद्धिः ॥ ३ ॥ अंगेतिकोमलामंत्रणे ॥ लुंठंतिउपघ्नंति ॥ क्रव्यादामांसाशिनोगृध्रगोमाय्वादयः ॥ ४ ॥ रयः

श्रीरामउवाच॥ ॥ मांसपांचालिकायास्तुयंत्रलोलेंगपंजरे॥ स्नाय्वस्थिग्रंथिशालिन्याःस्त्रियाःकिमिवशोभनम् ॥ १ ॥ त्वङ्मांसरक्तवाष्पांबुपृथक्कृत्वाविलोचनम्॥ समालोकयरम्यंचेत्किंमुधापरिमुह्यसि ॥ २ ॥ इतःकेशाइतोरक्तमितीयंप्रमदातनुः॥ किमेतयानिंदितयाकरोतिविपुलाशयः ॥ ३ ॥ वासोविलेपनैर्यानिलालितानिपुनःपुनः ॥ तान्यंगान्यंगलुंठंतिक्रव्यादाःसर्वदेहिनाम् ॥ ४ ॥ मेरुशृंगतटोल्लासिगंगाजलरयोपमा॥ दृष्टायस्मिन्स्तनेमुक्ताहारस्योल्लासशालिता॥५॥ श्मशानेषुदिगंतेषुसएवललनास्तनः॥ श्वभिरास्वाद्यतेकालेलघुपिंडइवांधसः ॥ ६ ॥ रक्तमांसास्थिदिग्धानिकरभस्ययथावने॥ तथैवांगानिकामिन्यास्तांप्रत्यपिहिकोग्रहः॥ ७॥ आपातरमणीयत्वंकल्पतेकेवलंस्त्रियाः॥ मन्येतदपिनास्त्यत्रमुनेमोहैककारणम् ॥ ८॥ विपुलोल्लासदायिन्यामदमन्मथपूर्वकम्॥ कोविशेषोविकारिण्यामदिरायाःस्त्रियास्तथा॥९॥ ललनालानसंलीनामुनेमानवदंतिनः॥ प्रबोधंनाधिगच्छंतिदृढैरपिशमांकुशैः॥ १०॥ केशकज्जलधारिण्योदुःस्पर्शालोचनप्रियाः॥ दुष्कृताग्निशिखानार्योदहंतितृणवन्नरम् ॥ ११ ॥

प्रवाहः ॥ मुक्ताहारस्यउल्लासशालिताशोभायस्मिन्स्तनेदृष्टासएवललनास्तनइत्युत्तरेणसंबंधः ॥ ५॥ आस्वाद्यतेरुच्याभक्ष्यते ॥ अंधसओदनस्य ॥ ६ ॥ दिग्धान्युपचितानिकरभस्यखरस्योष्ट्रस्यवा ॥ ग्रहआग्रहआशातिशयइतियावत् ॥ ७॥ अविचारजंज्ञानमापातंपतनावधीतिवा ॥ कल्पतेयुज्यते ॥ यतोमोहैककारणंचित्तविभ्रमैकनिमित्तकंतत् ॥ नहितथाविधंशुक्तिरजताद्यस्तीतिभावः ॥ ८ ॥ विकारिण्याःस्वतःकामकिण्वादिविकारवत्याःस्खलनकलहादिविकारिण्यावा ॥ ९ ॥ सम्यग्लीनामदमोहात्सुप्तप्रायाः ॥ प्रबोधंविवेकजागरणम् ॥ १० ॥ नार्यःस्त्रियःदुष्कृताग्नीनांशिखाज्वालाः ॥ तदेवतद्धर्मैरुपपादयति ॥ केशेति ॥ केशाएवकज्जलानिकेशान्कज्जलानिचवाधारयितुंशीलंयासाम् ॥ दुःस्पर्शाःस्प्रष्टुमशक्याः ॥ लोचनप्रियाःप्रियदर्शनाः ॥ अतएवहिनरंतृणवद्दहंति ॥ ११ ॥

---

१ फलितार्थकथनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतिदूरेसंयमिन्यांदारुणंयथास्यात्तथाज्वलतामपिनरकाग्नीनामिहत्याअपिनार्यश्चारुइंधनमितिकार्यकारणतःसरसाअपिनीरसाइतिस्वतश्चविरोधाभासः॥ अथवादारुणमि त्यपींधनविशेषणमेव ॥ तथाचतत्रापिस्वतएवविरोधाभासः ॥ परिहारस्तुवासनादुष्टत्वात्सरसाआपाततःनीरसाःपरमार्थतः ॥ एवंचारुआपाततःदारुणंफलतइति ॥ १२ ॥ यामिन्याआकारोंधकारःसएवसइववाकबरीकेशपाशोयस्याः ॥ तरंत्योभ्रमंत्यस्तारकानक्षत्राण्येवलोचनानितानीवचतरत्तारकेचलत्कनीनिकेवालोचनेयस्याः ॥ एवमिंदु बिंबमेवेंदुबिंबमिववावदनंयस्याः ॥ कुसुमोत्करएवकुसुमोत्करइववाहासोऽस्याअस्तीतिविग्रहः ॥ १३ ॥ शृंगारलीलाभिर्विलोलाःपुरुषायस्याम् ॥ अतएवतेषांकार्याणा मवश्यकर्त्तव्यानांधर्मविवेकवैराग्यादीनांसंहारस्यकारिणी ॥ दीर्घयामिनीवव्यर्थमायुर्विनाशायेतिभावः ॥ १४ ॥ नकेवलंपुरुषार्थविघातिताअपित्वनर्थहेतुतापीत्याह ॥ पु

ज्वलतामतिदूरेपिसरसाअपिनीरसाः॥स्त्रियोहिनरकाग्नीनामिंधनंचारुदारुणम्॥ १२॥ विकीर्णाकारकवरीतरत्तारकलोचना॥ पूर्णे दुबिंबवदनाकुसुमोत्करहासिनी॥ १३॥ लीलाविलोलपुरुषाकार्यसंहारकारिणी॥ परंविमोहनंबुद्धेःकामिनीदीर्घयामिनी॥ १४॥ पु ष्पाभिराममधुराकरपल्लवशालिनी॥ भ्रमराक्षिविलासाढ्यास्तनस्तबकधारिणी॥ १५॥ पुष्पकेसरगौरांगीनरमारणतत्परा॥ ददात्युन्म त्तवैवश्यंकांताविषलतायथा॥ १६॥ सत्कार्योच्छ्वासमात्रेणभुजंगदलनोत्कया॥ कांतयोध्रियतेजंतुःकरभ्येवोरगोबिलात्॥ १७॥ का मनाग्नाकिरातेनविकीर्णामुग्धचेतसाम्॥ नार्योनरविहंगानामंगबंधनवागुराः॥ १८॥ ललनाविपुलालानेमनोमत्तमतंगजः॥ रतिशृं खलयाबद्धस्तिष्ठतिमूकवत्॥ १९॥ जन्मपल्वलमत्स्यानांचित्तकर्दमचारिणां॥ पुंसांदुर्वासनारज्जुर्नारीबडिशपिंडिका॥ २०॥ मं दुरंचतुरंगाणामालानमिवदंतिनाम्॥ पुंसांमंत्रइवाहीनांबंधनंवामलोचना॥ २१॥ नानारसवतीचित्राभोगभूमिरियंमुने॥ स्त्रियमा श्रित्यसंयातापरामिहहिसंस्थितिम्॥ २२॥ सर्वेषांदोषरत्नानांसुसमुद्गिकयानया॥ दुःखशृंखलयानित्यमलमस्तुममस्त्रिया॥ २३॥

ष्पेत्यादिद्वाभ्याम् ॥ भ्रमराइवभ्रमराएववाअक्षिविलासास्तैराढ्या ॥ एवंस्तनावेवस्तनाविव ॥ १५॥ पुष्पकेसरैःपुष्पकेसराणीववा ॥ उन्मत्तानांकामोन्मादात्स्ववसेविनांमूर्खा णांमूर्छामरणादिवैवश्यंददाति ॥ १६ ॥ करभ्यत्रभल्लूकी ॥ साहिबिलस्थान्सर्पादीन्श्वासबलेनाकृष्यभक्षयतीतिप्रसिद्धम् ॥ तथासत्कार्यैरलीकसत्कारैरुच्छ्वासआश्वासनं तावन्मात्रेणभुजंगानांविटानांदलनेवित्तचित्तापहारेणविनाशेसोत्कंठयाकांतयाजंतुरुध्रियतेवशीक्रियतइत्यर्थः ॥ १७ ॥ विकीर्णाःप्रसारिताः ॥ वागुराजालानि ॥ १८ ॥ ॥ १९ ॥ बडिशंमत्स्यवेधनकंटकस्तत्रत्यापिष्टपिंडिका ॥ २० ॥ मंदुरंमंदुरावाजिशाला ॥ २१ ॥ इयंभोगभूमिर्ब्रह्मांडलक्षणाइहसंसारेपरांदृढांसंस्थितिंचिरस्थितिंसंयाता प्राप्ता ॥ २२ ॥ सुसमुद्गिकयादृढसंपुटिकया ॥ अलंपर्याप्तंप्रयोजनंनास्तीत्यर्थः ॥ २३ ॥

१ वित्तमितिपा०

CC-0. In Public Domain. Digitization by eGangotri

अवस्तुनातुच्छेन ॥ २४ ॥ विशरारुतांविशीर्णताम् ॥ २५ ॥ स्थूलैरसूक्ष्मदर्शिभिः ॥ ललितालालिताः ॥ पितृभूमिषुश्मशानेषु ॥ २६ ॥ कर्पूरगोरोचनचंदनादिकृतास्तिलकरचनाविशेषाःपत्रांकुराः ॥ पीयतेशुष्यते ॥ पैशोषणे ॥ अकर्मकत्वाद्भावेलः ॥ २७ ॥ स्त्रियःकेशाःलेखउल्लेखउत्प्रेक्षासैवलेखिकाताम् ॥ भस्मधूसरत्वाज्जीर्णचामरवदुत्प्रेक्ष्यतांयांति ॥ उडुवन्नक्षत्रवत् ॥ २८ ॥ पिबंतिशोषयंति ॥ पांसवोधूलयः ॥ क्रव्यंमांसमदंतीतिक्रव्यादाअनेकशःसंतीतिशेषः शिवास्सृगाली ॥ २९ ॥ स्थितिःपरिणतिः ॥ ॥ ३० ॥ संघट्टनंसंघट्टस्तत्कृतंसंस्थानंसन्निवेशं ॥ रसाद्रागाद्धियान्वितोबुद्धिमान्कथमभिपततु ॥ अर्हेकृत्यतृचश्चेतिचकारेणलोडपिसमुच्चीयतइतिकेचित् ॥ ३१ ॥ पारलौ

किंस्तनेनकिमक्ष्णावाकिंनितंबेनकिंभ्रुवा॥ मांसमात्रैकसारेणकरोम्यहमवस्तुना॥ २४॥ इतोमांसमितोरक्तमितोस्थीनीतिवासरैः॥ ब्रह्मन्कतिपयैरेवयातिस्त्रीविशरारुताम् ॥ २५ ॥ यास्तातपुरुषैःस्थूलैर्ललितामनुजैःप्रियाः ॥ तामुनेप्रविभक्तांग्यःस्वपंतिपितृभूमिषु ॥ २६॥ यस्मिन्घनतरस्नेहंमुखेपत्रांकुराःस्त्रियः॥ कांतेनरचिताब्रह्मन्पीयतेतेनजंगले॥ २७ ॥ केशाःश्मशानवृक्षेषुयांतिचामरलेखिकां॥ अस्थीन्युडुवदाभांतिदिनैरवनिमंडले॥ २८॥ पिबंतिपांसवोरक्तंक्रव्यादाश्चाप्यनेकशः॥ चर्माणिचशिवाभुंक्तेखंयांतिप्राणवायवः॥ २९॥इत्येषाललनांगानामचिरेणैवभाविनी॥स्थितिर्मयावःकथिताकिंभ्रांतिमनुधावथ॥३०॥ भूतपंचकसंघट्टसंस्थानंललनाभिधम्॥ रसादभिपतत्वेतत्कथंनामधियान्वितः॥ ३१॥ शाखाप्रतानगहनाकटूम्लफलमालिनी॥ सुतालोत्तालतामेतिचिंताकांतानुसारिणी॥ ३२॥ कांदिग्भूततयाचेतोघनगर्द्धांधमाकुलम्॥ परंमोहमुपादत्तेयूथभ्रष्टमृगोयथा॥ ३३॥ शोच्यतांपरमांयातितरुणस्तरुणीपरः॥ निबद्धःकरिणीलोलोविंध्यखातेयथागजः॥ ३४॥ यस्यस्त्रीतस्यभोगेच्छानिःस्त्रीकस्यक्वभोगभूः॥ स्त्रियंत्यक्त्वाजगत्त्यक्तंजगत्त्यक्त्वासुखीभवेत्॥ ३५ ॥ आपातमात्ररमणेषुसुदुस्तरेषुभोगेषुनाहमलिपक्षतिचंचलेषु॥ ब्रह्मन्रमेमरणरोगजरादिभीत्याशाम्याम्यहंपरमुपैमिपदंप्रयत्नात्॥ ३६॥इत्यार्षेवा०वा०दे०मो०वै०स्त्रीजुगुप्सानामैकविंशतितमःसर्गः॥ २१॥ ॥ ७॥ ॥ ७॥

किंकटुःखंकटुफलमैहिकशोकरागादिकंत्वीषत्सुखलवमिश्रत्वात्कटूम्लम् ॥ सुतालेत्यारण्यकलताविशेषः ॥ तत्पक्षेशलाटूनांकटुतावानानामम्लता ॥ उत्तालतामूर्द्धविस्तीर्णताम् ॥ ३२ ॥ आकुलमुक्तांचितयेतिगम्यते ॥ अतएवघनेननिबिडेनगर्द्धेनधनाभिलाषेणांधम् ॥ कांदिशंगमिष्यामिक्वधनंलप्स्यामीत्येवंभूततयाचेतोमोहमुपादत्ते ॥ ३३॥ खातेगर्त्ते ॥ ३४ ॥ भवनंभूःसंभवः ॥ ३५ ॥ पक्षतिःपक्षमूलम् ॥ मरणजन्मजरादिभीत्याभोगेष्वहंनरमेइतिसंबंधः ॥ शाम्याम्युपरतोस्मि ॥ उपैमीतिवर्त्तमानसामीप्येवर्त्तमानवत् ॥ ३६ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०एकविंशतितमःसर्गः ॥ २१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शोकमोहवियोगार्त्तिविषादगदसंकुलम् ॥ चिंतापरिभवस्थानंवृद्धत्वमिहनिंद्यते ॥ १ ॥ ननुकामादिदोषप्राबल्यान्मास्तुयौवनेसुखंवृद्धावस्थायांतुतदुपशांतौविनीतैःपुत्रपौत्रादिभिर्गृहेसेव्यमानस्यबहुतरंसुखंभविष्यतीत्याशंक्यतत्रदुःखस्थानानामानंत्यंविस्तरेणविवक्षुःप्रथमं स्वकुलपांसिसर्पाणांदयापरकुलेकुतइतिन्यायेनकर्कशतमत्वमाह ॥ अपर्याप्तमिति ॥ अपर्याप्तमसंपूर्णक्रीडाकौतुकाद्यभिलाषे ॥ पिबतिग्रसति ॥ यौवनंचस्त्र्यादिभोगाभिलाषेअपर्याप्तमितियोज्यम् ॥ १ ॥ पामराणांपरमप्रेमास्पदसुखायतनस्यदेहस्यैवशिथिलीकरणेकतत्रसुखप्रत्याशेत्याह ॥ हिमाशनिरित्यादिना ॥ हिममशनिर्वज्रमिवेतिहिमाशनिः ॥ अंबुकमंबुकणंतृणाग्रस्थमितियावत् ॥ २ ॥ जरठरूपिणीत्यौल्लेक्षिकं ॥ यदिस्वयंतथानस्यात्कथमन्यांस्तथाकुर्यादिति ॥ विषलवोभुक्तइतिशेषः ॥ ३ ॥ समशब्दोत्रसर्वपर्यायः ॥ कामिन्योजराजीर्णकलेवरंसर्वंपुरुषंकरभंउष्ट्रं

श्रीरामउवाच॥ ॥अपर्याप्तंहिबालत्वंबलात्पिबतियौवनं ॥ यौवनंचजरापश्चात्पश्यकर्कशतांमिथः॥ १ ॥ हिमाशनिरिवांभोजंवात्येवशरदंबुकम्॥ देहंजरानाशयतिनदीतीरतरुंयथा॥ २ ॥ जर्जरीकृतसर्वांगीजराजरठरूपिणी॥ विरूपतांनयत्याशुदेहंविषलवोयथा॥ ३ ॥ शिथिलादीर्घसर्वांगंजराजीर्णकलेवरम्॥ समंपश्यंतिकामिन्यःपुरुषंकरभंयथा॥ ४॥ अनायासकदर्थिन्यागृहीतेजरसाजने॥ पलाय्यगच्छतिप्रज्ञासपत्न्येवाहतांगना ॥ ५॥ दासाःपुत्राःस्त्रियश्चैवबांधवाःसुहृदस्तथा ॥ हसंत्युन्मत्तकमिवनरंवार्द्धककंपितम् ॥६॥ दुष्प्रेक्ष्यंजरठंदीनंहीनंगुणपराक्रमैः॥ गृध्रोवृक्षमिवादीर्घगर्द्धोत्यभ्येतिवृद्धकम्॥ ७॥ दैन्यदोषमयीदीर्घाहृदिदाहप्रदायिनी॥ सर्वापदामेकसखीवार्द्धकेवर्द्धतेस्पृहा॥ ८॥ कर्त्तव्यंकिंमयाकष्टंपरत्रेत्यतिदारुणम्॥ अप्रतीकारयोग्यंहिवर्द्धतेवार्द्धकेभयम्॥ ९ ॥ कोहंवराकःकिमिवकरोमिकथमेवच॥ तिष्ठामिमौनमेवेतिदीनतोदेतिवार्द्धके॥ १०॥ कथंकदामेकिमिवस्वादुस्याद्भोजनंजनात्॥ इत्यजस्रंजराचैषाचेतोदहतिवार्द्धके॥ ११ ॥ गर्द्धोभ्युदेतिसोल्लासमुपभोक्तुंनशक्यते॥ हृदयंदह्यतेनूनंशक्तिदौस्थ्येनवार्द्धके ॥ १२ ॥

यथातथापश्यंति ॥ तदेवोपपादयति ॥ शिथिलेति ॥ शिथिलान्यादीर्घाणिसर्वांगानियस्यतम् ॥ ४ ॥ अनायासेनविनैवायासम् ॥ कदर्थयितुंदैन्यंप्रापयितुंशीलंयस्याः ॥ आहतापरिभूता ॥ ५ ॥ उन्मत्तकमितिकुत्सायांकन् ॥ ६ ॥ आदीर्घमतिदीर्घम् ॥ गर्द्धोभिलाषातिशयः ॥ वृक्षपक्षेसफलशाखाविटपविस्तारणेनपरेषांपक्ष्यंतराणामाक्रमैराक्रमणैः ॥ ७ ॥ दैन्यदोषप्रचुरा ॥ ८ ॥ कष्टमितिदौर्मनस्यद्योतकोनिपातः ॥ ९ ॥ कोहमित्यादिर्दीनतायाएवोल्लेखः ॥ किंकथंशब्दौसाध्यसाधनचिंतापरौ ॥ १० ॥ वार्द्धकेजनान्प्राप्य ॥ एषाउक्तलक्षणाअपरापिजराचेतोदहतीतिसंबंधः ॥ इहपूर्वश्लोकेचइवशब्दोविषयविसंवादद्योतनार्थः ॥ ११ ॥ भोक्तुंशक्तौजरणाशक्तिस्तच्छक्तौभोक्तुमशक्तिरित्यादिशक्तिदौस्थ्यम् ॥ १२ ॥

---

१ ल्यब्लोपेपंचमी

CC-0. In Public Domain. Digitization by eGangotri

कायस्यक्लेशैःपीडनैरपकारिणी ॥ बक्याअपित्वाश्रयद्रुमपीडकत्वंप्रसिद्धम् ॥ रोगलक्षणेनोरगेणाकीर्णायस्तायावद्रौतिरोदितितावन्मरणकौशिकःकुतोप्यागतएवदृश्यतइतिसंबंधः ॥ १३ ॥ घनमांध्यंमूर्छातदेवतिमिरमंधकारः ॥ १४ ॥ पूर्वार्द्धार्थोदृष्टांतः ॥ प्रजातांसंभूताम् ॥ १५ ॥ अधिउपर्यापततितद्विनाशायेतिभावः ॥ १६ ॥ आभातिईषच्छोभतेपि ॥ १७ ॥ कासएवक्कणितंध्वनिस्तत्करणशीला ॥ गृध्रीआमिषमिवनरंतरसावेगेननिगरणायैवादत्तइत्यन्वयः ॥ १८ ॥ प्रलुनातिविनाशयति ॥ कुमारीबालिका ॥ कैरवंकुमुदम् ॥ १९ ॥ वात्यात्रशिशिरर्तुवायुसमूहः ॥ साहिसीत्कारादिकारयतिशरीरंतरुपल्लवंचपांसुध्वस्तंकृत्वाविदारयत्येवंजरापि ॥ २० ॥ परिम्लानांबुजस्यश्रियं

जराजीर्णबकीयावत्कायक्लेशापकारिणी ॥ रौतिरोगोरगाकीर्णाकायद्रुमशिरःस्थिता ॥ १३ ॥ तावदागतएवाशुकुतोपिपरिदृश्यते ॥ घनांध्यतिमिराकांक्षीमुनेमरणकौशिकः ॥ १४ ॥ सायंसंध्यांप्रजातांवैतमःसमनुधावति ॥ जरांवपुषिदृष्ट्वैवमृतिःसमनुधावति ॥ १५ ॥ जराकुसुमितंदेहद्रुमंदृष्ट्वैवदूरतः ॥ अध्यापततिवेगेनमुनेमरणमर्कटः ॥ १६ ॥ शून्यंनगरमाभातिभातिच्छिन्नलतोद्रुमः ॥ भात्यनावृष्टिमान्देशोनजराजर्जरंवपुः ॥ १७ ॥ क्षणान्निगरणायैवकासक्कणितकारिणी ॥ गृध्रीवामिषमादत्तेतरसैवनरंजरा ॥ १८ ॥ दृष्ट्वैवसोत्सुकेवाशुप्रगृह्यशिरसिक्षणम् ॥ प्रलुनातिजरादेहंकुमारीकैरवंयथा ॥ १९ ॥ सीत्कारकारिणीपांसुपरुषापरिजर्जरम् ॥ शरीरंशातयत्येषावात्येवतरुपल्लवम् ॥ २० ॥ जरसोपहतोदेहोधत्तेजर्जरतांगतः ॥ तुषारनिकराकीर्णपरिम्लानांबुजश्रियम् ॥ २१ ॥ जराज्योत्स्नोदितैवेयंशिरःशिखरिपृष्ठतः ॥ विकासयतिसंरब्धंवातकासकुमुद्वती ॥ २२ ॥ परिपक्वंसमालोक्यजराक्षारविधूसरम् ॥ शिरःकूश्मांडकंभुंक्तेपुंसांकालःकिलेश्वरः ॥ २३ ॥ जराजह्नुसुतोद्युक्तामूलान्यस्यनिकृंतति ॥ शरीरतीरवृक्षस्यचलत्यायुषिसत्वरम् ॥ २४ ॥ जरामार्जारिकाभुंक्तेयौवनाखुंतथोद्धता ॥ परमुल्लासमायातिशरीरामिषगर्द्धिनी ॥ २५ ॥ काचिदस्तिजगत्यस्मिन्नामंगलकरीतथा ॥ यथाजराक्रोशकरीदेहजंगलजंबुकी ॥ २६ ॥

साम्यम् ॥ २१ ॥ जरैवज्योत्स्नाकौमुदी ॥ शिरएवशिखरिपृष्ठंपर्वतोर्ध्वदेशः ॥ वातकासौरोगौतावेवकुमुद्वतीकुमुदलतांसंरब्धंसोद्योगंविकासयति ॥ २२ ॥ जरैवक्षारोलवणादिचूर्णंतेनविधूसरमुपस्कृतमितियावत् ॥ ईश्वरःस्वामीशिरःकूश्मांडस्य ॥ तेनैवोत्पाद्यवर्द्धितत्वात् ॥ २३ ॥ जह्नुसुतागंगा ॥ अविरामांद्युद्युक्तेव ॥ आयुषिआयुःप्रवाहेसत्वरंचलतिसति ॥ २४ ॥ यौवनमेवाखनतिविषयबिलमित्याखुस्तंभुंक्तेतथाशरीरामिषस्यगर्द्धिनीभक्षणेच्छुः ॥ २५ ॥ जरैवदेहजंगलेजंबुकीशिवा ॥ आक्रोशोरोदनमारावश्च ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्द्रकाष्ठेदह्यमानेज्वालायामपिसीत्कारःप्रसिद्धः ॥ २७ ॥ तन्वीअल्पा ॥ तनुःशरीरम् ॥ २८ ॥ कर्पूरपादपंकदलीतरुम् ॥ उद्धरतिउन्मूलयति ॥ २९ ॥ आगच्छतआगमिष्यतः ॥ वर्त्तमानसामीप्येवर्त्तमानवत् ॥ जराधवलचामरंयस्याः ॥ स्वास्वीया ॥ आधिव्याधीनांपताकिनीसेना ॥ ३० ॥ अद्रिकोटरेदुष्प्रवेशेपर्वतविवरेपियेधैर्येणप्रविष्टाः ॥ ३१ ॥ तुषारोहिमंतेनवलितेसंकोचिते ॥ अक्षाणींद्रियाण्येवशिशवोबालाः ॥ ३२ ॥ दंडोवलंबनयष्टिस्तद्रूपेणतृतीयपादेनोपलक्षिता ॥ कासाधोवायूमुरजोवाद्यविशेषोयस्याः ॥ ३३ ॥ अस्याःप्रसिद्धायाःसंसाराख्यस्यराज्ञःसंसृतेर्व्यवहारस्यसंबंधिनी ॥ गंधयतिरागादिभिर्वासयतिचित्तंसभांचेतिगंधोविषयभोगःकस्तूर्यादिगंधद्रव्यंचतस्य

कासश्वाससमसीत्कारादुःखधूमतमोमयी ॥ जराज्वालाज्वलत्येषायस्याःसौदग्धएवहि ॥ २७ ॥ जरसावक्रतामेतिशुक्लावयवपल्लवा ॥ तातितन्वीतनुर्नृणांलतापुष्पानतायथा ॥ २८ ॥ जराकर्पूरधवलंदेहकर्पूरपादपम् ॥ मुनेमरणमातंगोनूनमुद्धरतिक्षणात् ॥ २९ ॥ मरणस्यमुनेराज्ञोजराधवलचामरा ॥ आगच्छतोग्रेनिर्यातिस्वाधिव्याधिपताकिनी ॥ ३० ॥ नजिताःशत्रुभिःसंख्येप्रविष्टायेद्रिकोटरे ॥ तेजराजीर्णराक्षस्यापश्याशुविजितामुने ॥ ३१ ॥ जरातुषारवलितेशरीरसदनांतरे ॥ शक्नुवंत्यक्षशिशवःस्पंदितुंनमनागपि ॥ ३२ ॥ दंडतृतीयपादेनप्रस्खलंतीमुहुर्मुहुः ॥ कासाधोवायुमुरजाजरायोषित्प्रनृत्यति ॥ ३३ ॥ संसारसंसृतेरस्यागंधकुट्यांशिरोगता ॥ देहयष्ट्यांजरानाम्नीचामरश्रीर्विराजते ॥ ३४ ॥ जराचंद्रोदयसितेशरीरनगरेस्थिते ॥ क्षणाद्विकासमायातिमुनेमरणकैरवम् ॥ ३५ ॥ जरासुधालेपसितेशरीरांतःपुरांतरे ॥ अशक्तिरार्त्तिरापच्चतिष्ठंतिसुखमंगनाः ॥ ३६ ॥ अभावोग्रेसरीयत्रजराजयतिजंतुषु ॥ कस्तत्रेहसमाश्वासोममंदमतेर्मुने ॥ ३७ ॥ किंतेनदुर्जीवितदुर्ग्रहेणजरागतेनापिहिजीव्यतेयत् ॥ जराजगत्यामजिताजनानांसर्वैषणास्तातति रस्करोति ॥ ३८ ॥ ॥ इत्यार्षेवासिष्ठमहारा०वा०दे०वै०जराजुगुप्सानामद्वाविंशतितमःसर्गः ॥ २२ ॥ ॥ ७१ ॥

कुट्यांआश्रयभूतायांदेहयष्ट्यांशिरोगताजरानाम्नीचामरश्रीर्विराजते ॥ सौंदर्यसौरभ्यमंदवायुप्रसरादिभिरित्यर्थः ॥ ३४ ॥ स्थितेजीविताशासरसीतिशेषः ॥ ३५ ॥ सुधाचूर्णम् ॥ ३६ ॥ यत्रयेषुजंतुषुचतुर्विधशरीरेषुप्रथमंजराजयत्यभिभवति ॥ अयेचअभावोमृत्युःसरणंसरःसरोस्यास्तीतिसरी अवश्यमागंतेत्यर्थः ॥ अभावाग्रेसरीतिपाठश्चेत्स्पष्टः ॥ तत्रतेषुशरीरेषुमध्येइहास्मिन्शरीरेममकःसमाश्वासोविस्रंभः ॥ ननुवसिष्ठादीनामपितुल्यमेतदित्याशंक्याह ॥ मंदमतेरिति ॥ अतत्त्वज्ञस्येतियावत् ॥ ३७ ॥ दुर्जीवितेदुःखजीवनेदुर्ग्रहोदुरापहस्तेनकिंव्यर्थमित्यर्थः ॥ सर्वैषणाःसर्वानभिलाषान् ॥ ३८ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्य०वै०द्वाविंशतितमःसर्गः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमयन्नृत्यविलासौघैःसर्वप्राणिक्रियाप्रियाम् ॥ गुणदोषबलोत्कर्षैःकालएकोत्रवर्ण्यते ॥ १ ॥ इत्थंभोग्यायाःश्रियोभोगतृष्णायाभोगावसरभूतबाल्याद्यवस्थानांचदोषप्रपंचनेनदुरंतदुःखमात्रपर्यवसानोपपादनेनचस्वस्येहामुत्रार्थफलभोगविरागोदर्शितः संप्रतिकामादिस्वभावप्रपंचनमुखेननित्यानित्यवस्तुविवेकंदर्शयितुंभूमिकामारचयति ॥ विकल्पेति ॥ ममेदंभोग्यमहमस्यभोक्ता इमानिचतत्साधनानि अनेनेदमित्थंसंपाद्यचिरंभोक्ष्यामि इदमद्यमयालब्धमिमंप्राप्स्येमनोरथमित्याद्यनंतमनोविकल्पकल्पनैरनल्पानि जल्पितानिव्यवहारवचनानियेषांतैः अल्पेदेहेआत्मबुद्धिरल्पेषुसुखलवेषुपरमपुरुषार्थबुद्धिश्चयेषांतैर्मूढजनैः शत्रुमित्रोदासीनादिभेदैर्हेयोपादेयोपेक्ष्यादिभेदैस्तत्प्रयुक्तरागद्वेषादिभेदैश्च संसरत्यस्मिन्निति संसारोब्रह्मांडंतस्यकुहरेछिद्रेभ्रमोन्यथाग्रहःउद्धुरतामतिगुरुतांदुरुच्छेदतामितियावत् ॥ नीतःप्रापितः ॥ १ ॥ जालमिवदूरादप्याकृष्यबंधकाविषयाः पंजरमिवपरिच्छिद्यबंधकोदेहस्तयोःसमाहारे भ्रांतिसिद्धत्वादेवावस्तुभूतेइहसंसारेसतांविवेकिनामास्थाकथमिवजायते ॥ तत्प्रकारेदृष्टांतोप्यप्रसिद्धइतिसूचनायेवकारः ॥ तदेवदृष्टांतेनद्रढयति ॥ बालाएवेति ॥ मुकुरेदर्पणे ॥ २ ॥ इहईदृशेपिसंसारेयेषांपेलवाक्षुद्रासुखभावनासुखाशातामाखुर्बिलतृणाग्रात्कूपेलंबमानंतन्मात्रावलंबजिजीविषुकीटावलंबिताग्रंलूतातंतुमिवाशेषंनिरवशेषंयथास्यात्तथा ॥ ३॥ इहास्यांव्यवहारभूमौजगतिजातमुत्पन्नंतत्तादृशंवस्तुनास्तियत्कालोनग्रसतइतिनञआवृत्त्यासंबंधः॥ घस्मरोभक्षकः ॥ चंद्रोदयादिनिमित्तैःप्रोत्थमुपचितमब्धिंवाडवोवडवानलः ॥ ४ ॥ समस्तसामान्यतयासर्वपदार्थसाधारण्येन ॥ कालएवमहेश्वरःसंहाररुद्रः ॥ ५ ॥ महतामपीतिकर्मणएवशेषत्वविवक्षयाषष्ठी ॥ बलबुद्धिवैभवादिनामहांत्यपिभूतानिक्षणमपिनप्रतिपालयतिनप्रतीक्षतेसद्यएवनिहंतीत्यर्थः ॥ ६ ॥ रूपैःक्रियौपाधिकरूपैः ॥ आक्रम्यवशीकृत्य ॥ ७ ॥ ८ ॥

श्रीरामउवाच॥ ॥विकल्पकल्पनानल्पजल्पितैरल्पबुद्धिभिः॥ भेदैरुद्धुरतांनीतःसंसारकुहरेभ्रमः॥ १॥ सतांकथमिवास्थेहजायते जालपंजरे॥बालाएवात्तुमिच्छंतिफलंमुकुरबिंबितम्॥ २॥ इहापिविद्यतेयेषांपेलवासुखभावना॥ आखुस्तंतुमिवाशेषंकालस्तामपिकृंतति॥ ३॥ नतदस्तीहयदयंकालःसकलघस्मरः॥ ग्रसतेतज्जगज्जातंप्रोत्थाब्धिमिववाडवः॥ ४॥ समस्तसामान्यतयाभीमःकालोमहेश्वरः॥ दृश्यसत्तामिमांसर्वांकवलीकर्तुमुद्यतः॥ ५॥ महतामपिनोदेवःप्रतिपालयतिक्षणम्॥ कालःकवलितानंतविश्वोविश्वात्मतांगतः॥ ६॥ युगवत्सरकल्पाख्यैःकिंचित्प्रकटतांगतः॥ रूपैरलक्ष्यरूपात्मासर्वमाक्रम्यतिष्ठति॥ ७॥ येरम्यायेशुभारंभाःसुमेरुगुरवोपिये॥ कालेनविनिगीर्णास्तेगरुडेनेवपन्नगाः॥ ८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाषाणादिवत्कठिनोव्याघ्रादिवत्क्रूरःक्रकचादिवत्कर्कशइतिभेदः ॥ निगिरतियसति ॥९॥ कवलनविषयएवैकांतमतिर्नियतचित्तः ॥ एकंगिरन्नपरमत्ति ॥ गिरीनपीतिपाठेस्प ष्टम् ॥ १० ॥ हरणादियत्किंचिद्भ्रनादौप्रसिद्धंतत्सर्वंतत्तत्कर्तृरूपेणस्थितःकालएवकरोतीतिभावः ॥ ११॥ प्रविभागोव्याकृतावस्थातत्स्थान्यंडजादिचतुर्विधभूतबीजानिअ सत्तयाबंधात्नाशेनअसत्वापादनात्भिनत्तिविदार्यभक्षयतीत्युत्प्रेक्षा ॥ दृष्टांतःस्पष्टः॥१२॥स्फीताअभिमानाद्युपचितायाजनताजनसमूहास्तेषांजीवराजीजीवसमूहःसैववनी महद्वनंतत्र्योगजःकालः॥राजीविनीतिपाठेतुकमलिनीतस्याविनाशनेगजइत्यर्थः ॥ तदनुरूपंविशिनष्टि ॥ शुभाशुभेति ॥ स्फूर्जतिगर्जति॥१३॥ विरिंचिरपंचीकृतभूतात्मामू लंयेषांतथाविधाब्रह्मांडाएवमहांतोदेवतारूपफलविशिष्टाद्रुमायस्मिंस्तथाभूतम् ॥ वेषःकृत्रिमआभोगोमायिकंजगद्रूपंतदस्यास्तीत्याभोगि ॥ द्वेवावब्रह्मणोरूपेमूर्त्तंचैवामूर्त्तं

निर्दयःकठिनःक्रूरःकर्कशःरूपणोधमः॥ नतदस्तियदद्यापिनकालोनिगिरत्ययं॥ ९ ॥ कालःकवलनैकांतमतिरत्तिगिरन्नपि॥ अनंतैर पिलोकौघैर्नायंतृप्तोमहाशनः॥ १० ॥ हरत्ययंनाशयतिकरोत्यत्तिनिहंतिच ॥ कालःसंसारनृत्तंहिनानारूपंयथानटः ॥ ११ ॥ भिनत्ति प्रविभागस्थभूतबीजान्यनारतम्॥ जगत्यसत्तयाबंधाद्दाडिमानियथाशुकः ॥ १२॥ शुभाशुभविषाणाग्रविलूनजनपल्लवः॥ स्फूर्ज तिस्फीतजनताजीवराजीवनीगजः॥ १३ ॥ विरिंचिमूलब्रह्मांडबृहद्देवफलद्रुमम्॥ ब्रह्मकाननमाभोगिपरमावृत्त्यतिष्ठति॥ १४॥ या मिनीभ्रमरापूर्णारचयन्दिनमंजरीः ॥ वर्षकल्पकलावल्लीर्नकदाचनखिद्यते ॥ १५॥ भिद्यतेनावभग्नोपिदग्धोपिहिनदह्यते॥ दृश्यते नापिदृश्योपिधूर्तचूडामणिर्मुने ॥ १६ ॥ एकेनैवनिमेषेणकिंचिदुत्थापयत्यलम् ॥ किंचिद्विनाशयत्युच्चैर्मनोराज्यवदाततः॥ १७॥

चेतिश्रुतेःसप्रपंचमित्यर्थः ॥ ब्रह्मैवकाननंदुस्तरत्वादरण्यंपरमत्यर्थमावृत्त्यसर्वतोव्याप्यकालस्तिष्ठति ॥ कालोदरएवसर्ववस्तूनामुत्पत्तिस्थितिविनाशदर्शनादितिभावः ॥ वि रिंचिमजब्रह्मांडंमहद्दिवफलद्रुममितिपाठस्यैवसार्वत्रिकत्वेतुविरिंचिमुक्तब्रह्मांडकारणंमायाशबलमितियावत्॥अजाश्चतुर्मुखाःप्रतिब्रह्मांडंतस्यैवलीलाविग्रहास्तत्सहितंब्रह्मां डम् ॥ जातावेकवचनम् ॥ तदेवमहत् ॥ दिवादेवाः ॥ गुणाभावश्छांदसः ॥ तदुपलक्षितचतुर्विधभूतान्येवतत्तत्कर्मफलयुक्ताद्रुमायस्मिंस्तथाविधम् ॥ आभोगिकृत्रिमवेषव तूईषद्भोगयुक्तंसर्वतःसर्पव्याप्तप्रायंवाब्रह्मकाननमावृत्त्यतिष्ठतीत्यर्थः ॥१४॥ यामिन्योरात्रयस्तद्रूपैर्भ्रमरैरापूर्णाः॥दिनान्यहान्येवमंजर्योयासुताः ॥ वर्षःसंवत्सरःकल्पोब्रह्माहः कलास्त्रिंशत्काष्ठाश्चेत्येवंरूपावल्लीर्लतारचयन्कालपुरुषोनकदाचनखिद्यतेखेदाद्विरमतीतियावत् ॥ १५ ॥ तत्तत्कार्यात्मनाअवभग्नोदग्धोदृश्योपिवास्वरूपेणनभंगादिप्रा मोतीत्यर्थः ॥ १६ ॥ १७ ॥

---

१ मूलस्थबृहच्छब्दपर्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तद्युगानुरूपचेष्टैवस्वकीयदुर्विलासेषुविलासिनीप्राणिनांकष्टेनैवपुष्टाकालस्यभार्यातयाद्रव्यैर्भौतिकदेहेंद्रियादिभिस्तादात्म्याध्यासादेकरूपकृतद्रूपमज्ञातात्मस्वरूपंयस्यतं जनंजीवंस्वर्गनरकादिष्वावर्त्तयन्स्थितः ॥ १८ ॥ आत्मंभरितयास्वकुक्षिपूरणमात्रस्वभावेन ॥ आत्मसात्स्वाधीनंकर्त्तुंग्रसितुमितियावत् ॥ १९ ॥ पर्याप्तंसमयम् ॥ अत्रास्मिन्काले ॥ २० ॥ निक्षिप्तंपुनःपुनरास्फालितंलीलार्थंकंदुकयुगलंयेन ॥ २१ ॥ कलितकल्पनोनाशितप्राणिविभागः ॥ २२ ॥ उड्डामरंनिरंकुशंवृत्तंचरित्रंयस्य ॥ अंगेभ्योविनिर्गतैर्वायुभिर्मेरुर्भूर्जत्वगिवसर्वतोविशीर्यमाणः ॥ २३ ॥ २४ ॥ अन्यान्सर्गान्दधद्धारयन्नेवार्थादन्यानजस्रमुत्थितानुत्ध्वस्तांश्चसर्गान्धत्ते ॥ अजस्रोत्थितोनित्योद्युक्तइति

दुर्विलासविलासिन्याचेष्टयाकष्टपुष्टया ॥ द्रव्यैकरूपकृद्रूपंजनमावर्त्तयन्स्थितः ॥ १८ ॥ तृणंपांसुंमहेंद्रंचसुमेरुंपर्णमर्णवम् ॥ आत्मंभरितयासर्वमात्मसात्कर्त्तुमुद्यतः ॥ १९ ॥ क्रौर्यमत्रैवपर्याप्तंलुब्धतात्रैवसंस्थिता ॥ सर्वदौर्भाग्यमत्रैवचापलंवापिदुःसहम् ॥ २० ॥ प्रेरयन्लीलयार्केंदूक्रीडतीवनभस्तले ॥ निक्षिप्तलीलायुगलोनिजेबालइवांगणे ॥ २१ ॥ सर्वभूतास्थिमालाभिरापादवलिताकृतिः ॥ विलसत्येवकल्पांतेकालःकलितकल्पनः ॥ २२ ॥ अस्योड्डामरवृत्तस्यकल्पांतेंगविनिर्गतैः ॥ प्रस्फुरत्यंबरेमेरुर्भूर्जत्वगिववायुभिः ॥ २३ ॥ रुद्रोभूत्वाभवत्येषमहेंद्रोथपितामहः ॥ शक्रोवैश्रवणश्चापिपुनरेवनकिंचन ॥ २४ ॥ धत्तेऽजस्रोत्थितोत्ध्वस्तान्सर्गानमितभास्वरान् ॥ अन्यान्दधद्दिवानक्तंवीचीरब्धिरिवात्मनि ॥ २५ ॥ महाकल्पाभिधानेभ्योवृक्षेभ्यःपरिशातयन् ॥ देवासुरगणान्पक्वान्फलभारानिवस्थितः ॥ २६ ॥ कालोयंभूतमशकघुंघुमानांप्रपातिनाम् ॥ ब्रह्मांडोदुंबरौघानांबृहत्पादपतांगतः ॥ २७ ॥ सत्तामात्रकुमुद्वत्याचिज्ज्योत्स्नापरिफुल्लया ॥ वपुर्विनोदयत्येकंक्रियाप्रियतमान्वितः ॥ २८ ॥ अनंतापारपर्यंतबद्धपीठंनिजंवपुः ॥ महाशैलवदुत्तुंगमवलंब्यव्यवस्थितः ॥ २९ ॥ क्वचिद्घ्यामतमःश्यामंक्वचित्कांतियुतंततम् ॥ द्वयेनापिक्वचिद्रिक्तंस्वभावंभावयन्स्थितः ॥ ३० ॥

कालविशेषणंवा ॥ वीचीस्तरंगान् ॥ २५ ॥ शातयन्पातयन् ॥ २६ ॥ भूतानिप्राणिनएवमशकास्तैर्घुंघुमानांघुंघुमितिध्वनतांब्रह्मांडोदुंबरफलौघानां ॥ २७ ॥ चिन्सर्वाधिष्ठानचैतन्यमेवज्योत्स्नाचंद्रिकातत्सन्निधानमात्रेणपरितःफुल्लयाव्यक्ततांप्राप्तयाजगत्सत्तासामान्यलक्षणयाकुमुद्वत्याकुमुदिन्याविनोदहेतुतयातत्तत्प्राणिशुभाशुभक्रियालक्षणप्रियतमयाअन्वितःसन्नेकमद्वितीयंवपुःस्वरूपंविनोदयति ॥ विनोदोहिव्यवहारकौतुकैःकालक्षेपस्तत्रकालस्यविहर्त्तुःकालांतराप्रसिद्धेःस्ववपुरेवविनोदयतीतिभावः ॥ २८ ॥ अनंतेऽपरिच्छिन्नेअनंतायांभुविचअतएवापारपर्यंतेपूर्वोत्तरावधिशून्येब्रह्मणिप्रदेशेचबद्धपीठंप्रतिष्ठितं ॥ २९ ॥ क्वचिन्निशीथांजनादौश्यामैस्तमोभिस्तमइववाश्यामम् ॥ क्वचिद्दिनराकामण्यादौ ॥ क्वचित्कुड्यकुसूलादौ ॥ रिक्तंशून्यम् ॥ स्वभावंस्वकार्यम् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संलीनानामसंख्यप्राणिसंसाराणांसारवत्परिशिष्टयास्वात्मसत्तयास्वरूपस्थित्यासर्वाधारत्वाद्भारघनयानिबद्धपदःप्रतिष्ठितस्तद्भावम् ॥३१॥३२॥ हेलयाअनास्थया ॥ पालय
तिनविनाशयति ॥ अनहंकारंनिरभिमानंयथास्यात्तथाआततंविस्तीर्णम् ॥३३॥यामिनीरात्रिःसैवमालिन्यात्पंकस्तस्मात्कलितामुद्गताम् ॥ दिनान्येवकोकनदावलीरक्तोत्पल
समूहःस्वात्माकालस्वरूपमेवसरस्तस्मिन् ॥३४॥कृपणोलुब्धोऽतएवनूतनसंमार्जन्यंतरसंपादनासमर्थः ॥ सकृन्मार्जनेनबहुतरकनकलाभेप्यसंतुष्टश्चेतिभावः ॥ गिरिंकनकाच
लम् ॥ अतएवकनकक्षोदान्गिरेःशीर्णानितिगम्यते ॥ ३५ ॥ प्रकारांतरेणतस्यकार्पण्यमाह ॥ संचारयन्निति ॥ कोणकेषुदिक्कोणेषु ॥ ३६ ॥ सूर्याक्षणोऽनुरूपोऽहरेवविनिमे
षस्तेन ॥ ३७ ॥ जगदेवजीर्णाकुटीतृणगृहंतत्रकीर्णान्प्रमादात्पतितान् ॥ मृत्युरेवसमुद्गकःसंपुटकस्तस्मिन् ॥ ३८ ॥ गुणैस्तंतुभिर्विद्याविनयादिभिश्च ॥ लोकोजनः ॥ अंगे

संलीनासंख्यसंसारसारयास्वात्मसत्तया॥ उर्व्येवभारघनयानिबद्धपदतांगतः॥३१॥नखिद्यतेनाद्रियतेनायातिनचगच्छति॥ नास्तमे
तिनचोदेतिमहाकल्पशतैरपि॥३२॥ केवलंजगदारंभलीलयाघनहेलया॥ पालयत्यात्मनात्मानमनहंकारमाततम्॥३३॥ यामिनीपं
ककलितांदिनकोकनदावलीम्॥ मेघभ्रमरिकामात्मसरस्यारोपयन्स्थितः॥३४॥ गृहीत्वाकृपणःकृष्णांरजनींजीर्णमार्जनीम्॥ आ
लोककनकक्षोदानाहरत्यभितोगिरिम्॥३५॥ संचारयन्क्रियांगुल्याकोणकेष्वर्कदीपिकाम्॥ जगत्सद्मनिकार्पण्यात्किंकिमस्तीतिवी
क्षते॥३६॥ प्रेक्ष्याहर्विनीमेषेणसूर्याक्षणापाकवंत्यलम्॥लोकपालफलान्यत्तिजगज्जीर्णवनादयम्॥३७॥ जगज्जीर्णकुटीकीर्णानर्प
यत्युग्रकोटरे॥ क्रमेणगुणवल्लोकमणीन्मृत्युसमुद्गके॥३८॥ गुणैरापूर्यतेयैवलोकरत्नावलीभृशम्॥ भूषार्थंभुवतामंगेकृत्वाभूयोनि
कृंतति॥३९॥ दिनहंसानुसृतयानिशेंदीवरमालया॥ तारकेसरयाजस्रंचपलोवलयत्यलम्॥४०॥ शैलार्णर्क्षधराशृंगजगदूर्णायुसौ
निकः॥ प्रत्यहंपिबतेप्रेक्ष्यतारारक्तकणानपि ॥ ४१ ॥ तारुण्यनलिनीसोमआयुर्मातंगकेसरी॥ ननदस्तिनयस्यायंतुच्छातुच्छस्य
तस्करः॥४२॥

स्वावयवेकृतत्रेतादौ ॥ यद्यपिसर्वंनिकृंततितथापिगुणवतांविनाशएवप्रसिद्धिमायातीतिश्लोकद्वयेतदुक्तिः ॥ ३९ ॥ ताराणिदीर्घाणिनक्षत्राण्येववाकेसराणियस्यामुत्पलमा
लायाम् ॥ हंसनिवेशस्यानौचित्यद्योतनायचपलइति ॥ वलयतिवलयवद्धारयति ॥ पंचत्वंगुलिकवत्सरकरप्रकोष्ठेइतिशेषः ॥ ४० ॥ अर्णाअर्णवाः ॥ द्यौर्लोकः ॥ शैलाद
यश्चत्वारःप्रधानत्वाच्छृंगाणियेषांजगल्लक्षणानामूर्णायूनांमेषाणांसूनाहिंसास्थानंतत्रभवःसौनिकोहिंसकःकालोनभोंगणविकीर्णांस्तारानक्षत्राण्येवरक्तकणास्तानपिप्रेक्ष्यप्र
त्यहमहन्यहनिपिबतेलेढीत्युत्प्रेक्षा ॥ आत्मनेपदंछांदसम् ॥ ४१ ॥ तुच्छस्यक्षुद्रस्यातुच्छस्यमहतश्चवस्तुजातस्यमध्येयस्यायंतस्करोनभवतितन्नास्तीतिसंबंधः ॥ ४२ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिष्टाःसंचूर्णिताम्मृत्युमुखेपातिताश्वजंतवोयेनतथाभूतेन कल्पःसंवर्त्तस्तद्रूपेणकेलिविलासेन नविद्यंतेभावायस्यतथाभूतःसन्सुषुप्ताविवभावरूपाज्ञानावभासकेनस्वात्मना स्वाधिष्ठानब्रह्मचैतन्येनतस्मिन्नेवात्मनिरमतेविश्राम्यतिनततःपृथग्विभज्यतइत्यर्थः ॥ ४३ ॥ एवंप्रलयेविश्रम्याथपुनःसर्गकालेविश्वस्यकर्ताभोक्तासंहर्तास्मर्तेत्यादिसर्ववस्तु भावंगतःस्वयमेवभवतीतिशेषः ॥ ४४॥ नकलाभिर्बुद्धिकौशलैःकलितंकेनापिनिश्चितमांतरंरहस्यंयस्यतत् तथासुभगंपुण्यफलभोगानुरूपंतद्विपरीतंदुर्भगंयद्रूपंतस्यधरंसकल मपिवपुःप्रकटयन्गोपयन्नुपसंहरंश्चविलसति ॥ कालइतिशेषः ॥ हीतिप्रसिद्धौ ॥ इहजगतिकालस्यबलंनृषुप्रसिद्धमेवेत्यर्थः ॥ ४५ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्र काशेवै०त्रयोविंशतितमःसर्गः ॥ २३ ॥ ॥ ७ ॥ ॥ सएववर्ण्यतेकालश्चंडीप्रियतमान्वितः ॥ मृगयाकौतुकाविष्टराजपुत्रतयाधुना ॥ १ ॥ सांप्रतंतमेवकालंमृग

कल्पकेलिविलासेनपिष्टपातितजंतुना॥अभावोभावभासेनरमतेस्वात्मनात्मनि॥४३॥ कर्त्ताभोक्ताथसंहर्त्तास्मर्तासर्वपदंगतः॥४४॥ सकलमप्यकलाकलितांतरंसुभगदुर्भगरूपधरंवपुः॥प्रकटयन्सहसैवचगोपयन्विलसतीहहिकालबलंनृषु॥४५॥ ॥इत्यार्षेवासि० वा०दे०मो०वै०कालापवादोनामत्रयोविंशतितमःसर्गः॥२३॥ ॥७॥ ॥श्रीरामउवाच॥ ॥अस्योड्डामरलीलस्यदूरास्तसकलापदः॥ संसारेराजपुत्रस्यकालस्याकलितौजसः ॥ १ ॥ अस्यैवाचरतोदीनैर्मुग्धैर्भूतमृगव्रजैः॥ आखेटकंजर्जरितेजगज्जंगलजालके ॥ २॥ एकदेशोल्लसच्चारुवडवानलपंकजा॥ क्रीडापुष्करिणीरम्याकल्पकालमहार्णवः॥ ३॥ कटुतिक्ताम्लभूताद्यैःसदधिक्षीरसागरैः॥ तैरेवतैःपर्युषितैर्जगद्भिःकल्पवर्त्तनम्॥ ४॥ चंडीचतुरसंचारासर्वमातृगणान्विता॥ संसारवनविन्यस्ताव्याघ्रीभूतौघघातिनी॥ ५॥

याकौतुकविहारिमहाराजपुत्रभावेनरूपयितुंप्रतिजानीते ॥ अस्येति ॥ उड्डामराउद्भटालीलायस्य ॥ दूरेअस्तानिरस्ताःसकलापदोयस्य ॥ अकलितौजसःअचिंत्यपराक्रम स्य॥राजतेप्रसिद्धसूर्यचंद्रादीनपिप्रकाशयन्दीप्यतइतिराजापरंब्रह्मतस्यअनादिमायामहिषीसंबंधलब्धस्वरूपत्वाज्जगद्यौवराज्यसंपद्भोक्तृत्वाच्चपुत्रस्यकालस्यचरित्रंवर्ण्यतइ तिशेषः ॥ १ ॥ अस्यैवकल्पकालमहार्णवःक्रीडापुष्करिणीकृतइत्युत्तरत्रसंबंधः ॥ मुग्धैरज्ञैः ॥ भूतान्येवमृगव्रजास्तैः ॥ वध्यानामपिवधकविनोदहेतुत्वात्तृतीया ॥ आखेट कंमृगयाविनोदम् ॥ २ ॥ अर्थाज्जगज्जंगलस्यैकदेशे ॥ ३ ॥ भूतपदंप्रत्येकंसंबध्यते ॥ दधिक्षीरादिसागरसहितैस्तैस्तैरेवप्रत्यहमेकरूपैःपर्युषितैश्चिरस्थितैर्जगद्भिःकल्पवर्त्तनं प्रातरशनंतस्यैत्यनुषज्यते ॥ कटुतिक्तदध्यादिसहितपर्युषितप्रातराशोद्रविडेषुप्रसिद्धः ॥ ४ ॥ तस्यानुरूपांप्रियामाह ॥ चंडीति ॥ व्याघ्रीवभूतौघघातिनीसंसारवनेविन्यस्ता विहर्तुंविनियुक्ताचंडीकालरात्रिस्तस्यप्रियेतिशेषः ॥ ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्यपानपात्रीमाह ॥ पृथ्वीति॥पृथ्वीभूरेवतस्यकरतलेपृथ्वीमहतीपानपात्री ॥ आसवसौगंध्यशोभाद्यर्थंपानपात्र्याअपिकमलोत्पलादिजालसमावृतत्वंसंभवति ॥६॥ तस्य भूजावष्टब्धेपंजरेनृसिंहोवतारोदानवादिवधक्रीडार्थंवाजाख्यःशकुंतकःपक्षीकृतः॥ सकीदृक् ॥ विरावीगर्जनशीलः ॥ विकटोडुःसहआस्फोटोभुजास्फालनध्वनिर्यस्य ॥ सटाभिःकेसरैर्विकटोदुर्दर्शःपीनोंसःस्कंधोयस्य॥७॥ महाकालःपाषाणाख्यायिकायांवक्ष्यमाणःसंहारभैरवोलीलार्थंकोकिलबालकःकृतः ॥ सोपिकीदृक् ॥ तस्यब्रह्मांडमालाधारित्वान्नानालाबुघटितवीणेवस्वरूपतोध्वनितश्चमधुरः ॥ यद्यपितत्स्वरूपध्वनीअन्येषांभीषणौतथापिततोप्युग्रशीलानांदृष्ट्यामधुरएवेतितथोक्तिः ॥ शरद्व्योमेवश्यामलस्वच्छकांतिः ॥ ८ ॥ स्फूर्जितंटंकारध्वनिः ॥ वांतानिःसारितादुःखशरावलिर्येन ॥ तस्यअभावःसंहारस्तन्नामाकोदंडोधनुःसर्वतःपरिस्फुरति ॥ ९ ॥ भ्रमत्स्वपिलक्ष्येषुस्वयंचलन्नप्यमोघबाणत्वाल्लक्ष्यंविदारयन्नतएवसर्वेभ्योलक्ष्यवेधिभ्यःपरिउपरिविलसन्नतएवजरतिजगतिजनिताःसंपादिताविलोलाव्याकुलामर्कटामर्कटवच्चपलवृत्तयोविषयलंप

पृथ्वीकरतलेपृथ्वीपानपात्रीरसान्विता॥ कमलोत्पलकल्हारलोलजालकमालिता॥ ६ ॥ विरावीविकटास्फोटोनृसिंहोभुजपंजरे॥ सटाविकटपीनांसःकृतःक्रीडाशकुंतकः॥७॥ अलाबुवीणामधुरःशरद्व्योमलसच्छविः॥ देवःकिलमहाकालोलीलाकोकिलबालकः॥८॥ अजस्रस्फूर्जिताकारोवांतदुःखशरावलिः॥ अभावनामकोदंडःपरिस्फुरतिसर्वतः॥ ९ ॥ अनुत्तमस्त्वधिकविलासपंडितोभ्रमच्चलन्परिविलसन्विदारयन्॥ जरज्जगज्जनितविलोलमर्कटःपरिस्फुरद्वपुरिहकालईहते ॥ १० ॥ इत्यार्षेवा०वा०दे०मो०वै०कालविलासोनामचतुर्विंशतितमःसर्गः॥ २४॥ ॥ ७ ॥ ॥श्रीरामउवाच॥ ॥अत्रैवदुर्विलासानांचूडामणिरिहापरः॥ करोत्यत्तीतिलोकेस्मिन्दैवंकालश्चकथ्यते॥ १ ॥ क्रियामात्राद‍ृतेयस्यस्वपरिस्पंदरूपिणः॥ नान्यदालक्ष्यतेरूपंनकर्मनसमीहितम्॥ २ ॥ तेनेयमखिलाभूतसंततिःपरिपेलवा॥ तापेनहिममालेवनीताविधुरतांभृशम् ॥ ३ ॥

टजनायेनसतथाविधःकालोराजकुमारःपरिस्फुरद्वपुर्विराजमानशरीरईहतेमृगयाविहारेणचेष्टते ॥ मर्कटत्वेनरूपणंतुप्रक्रमविशेषणाननुगुणत्वादनभिप्रेतम् ॥ १० ॥ ॥ इति श्रीवासिष्ठमहारामा०तात्पर्यप्रकाशेवै०चतुर्विंशतितमःसर्गः ॥ २४ ॥ ॥ ७ ॥ ॥ अपरस्यात्रकालस्यक्रियातत्फलरूपिणः ॥ चित्रोनियतिकांतस्यनृत्यविस्तर ईर्यते ॥ १ ॥ एवंमहाकालंराजपुत्रत्वेनोपवर्ण्यतदुपाधिभूतंक्रियात्मकंकालंतद्विनोदायद्वैरूप्येणनर्तकत्वेनपरिकल्प्यवर्णयितुमुपक्रमते ॥ अत्रैवेत्यादिना ॥ दुष्टोविलासोयेषांतेषुचूडामणिरिवश्रेष्ठः ॥ अपरःपूर्वोक्तादन्यः ॥ दीव्यतिव्यवहरतिप्राणिनांकर्मफलदानेनेतिदैवंफलावस्थःकृतांतः ॥ कलयत्यवश्यंफलंसंपादयतीतिक्रियाकालइत्येकएव पूर्वोत्तरावस्थाभेदेनद्वेधाकथ्यतइत्यर्थः ॥ १ ॥ तत्रद्वितीयंसूचीकटाहन्यायेनप्रथमंवर्णयति ॥ क्रियेति ॥क्रियात्रफलसिद्धिः ॥ समीहितमभिलषितम् ॥ २ ॥ भूतसंततिःप्राणिनिकायः ॥ तापेनातपेन ॥ हिममालानीहारपटली ॥ विधुरतांविनाशिताम् ॥ सर्वस्याप्यनर्थस्यस्वकर्मकृतत्वादितिभावः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

आभोगिविस्तीर्णंजगन्मंडलंनर्त्तनागारंनृत्यशाला ॥ रागद्वेषादिप्रयुक्तप्रवृत्त्यतिशयस्यसर्वप्राणिप्रत्यक्षत्वान्नृत्यमस्यविस्तरेणवर्ण्यते ॥ ४ ॥ आपंशास्त्रैकगम्यत्वाद्विश्वास दार्ढ्यायविस्तरेणवर्णयितुमुपक्रमते ॥ तृतीयमित्यादिना ॥ पूर्वसर्गोक्तापेक्षयातृतीयम् ॥ कापालिकवपुःकापालिकवेषम् ॥ ५ ॥ नियतिःकृतस्यकर्मणःफलावश्यंभावनिय मस्तस्यामतिरागिणः ॥ अवश्यंफलंप्रयच्छतइत्यर्थः ॥ ६ ॥ तस्यांगेषुभूषणान्याह ॥ शेषइति ॥ त्रिधाप्रसिद्धोगंगावाहोगंगाप्रवाहः ॥ चकारेणसमुच्चितयोरेकशेषेणताविति परामर्शः ॥ अवीतेप्राचीनावीते ॥ संसरत्यस्मिन्निति संसारस्त्रैलोक्यंतद्देववक्षः ॥ ७ ॥ करमूलयोःप्रकोष्ठयोः ॥ ब्रह्मांडकर्णिकामेरुः ॥ ८ ॥ बिंदवश्चित्रबिंदवः ॥ पुष्करावर्त्तौसंवर्त्तमेघौपल्लवौदशेयस्य धौतंक्षालितमंबरमाकाशमेवांबरंवस्त्रम् ॥ कापालिकानांमध्यच्छिद्रकंठावसक्तैककंथांबरधारणप्रसिद्धेः ॥ ९ ॥ अनस्तमितसंरंभमविरतप्रय

यदिदंदृश्यतेकिंचिज्जगदाभोगिमंडलम् ॥ तत्तस्यनर्त्तनागारमिहासावतिनृत्यति ॥ ४ ॥ तृतीयंचकृतांतेतिनामविभ्रत्सुदारुणम् ॥ कापालिकवपुर्मत्तंदैवंजगतिनृत्यति ॥ ५ नृत्यतोहिकृतांतस्यनितांतमिवरागिणः ॥ नित्यंनियतिकांतायांमुनेपरमकामिता ॥ ६ ॥ शेषःशशिकलाशुभ्रोगंगावाहश्चतौत्रिधा ॥ उपवीतेअवीतेचउभौसंसारवक्षसि ॥ ७ ॥ चंद्रार्कमंडलेहेमकटकौकरमूलयोः ॥ लीलासरसिजंहस्तेब्रह्मन्ब्रह्मांडकर्णिका ॥ ८ ॥ तारांबिंदुचितंलोलपुष्करावर्त्तपल्लवम् ॥ एकार्णवपयोधौतमेकमंबरमंबरम् ॥ ९ ॥ एवंरूपस्यतस्याग्रेनियतिर्नित्यकामिनी ॥ अनस्तमितसंरंभमारंभैःपरिनृत्यति ॥ १० ॥ तस्यानर्त्तनलोलायाजगन्मंडपकोटरे ॥ अरुद्धस्पंदरूपायाआगमापायचंचुरे ॥ ११ ॥ चारुभूषणमंगेषुदेवलोकांतरावली ॥ आपातालंनभोलंबंकबरीमंडलंबृहत् ॥ १२ ॥ नरकालीचमंजीरमालाकलकलोज्वला ॥ प्रोतादुष्कृतसूत्रेणपातालचरणेस्थिता ॥ १३ ॥ कस्तूरिकातिलककंक्रियासंख्योपकल्पितम् ॥ चित्रितंचित्रगुप्तेनयमेवदनपट्टके ॥ १४ ॥

त्नम् ॥ प्राणिसम्यभोगानुकूलकार्यारंभैः ॥ १० ॥ अरुद्धस्पंदरूपायाःअप्रतिबद्धक्रियाशक्तेः ॥ नृत्यद्रष्टृप्राणिनामागमापायाभ्यांचंचुरेचंचले ॥ चरतेःपचाद्यचियङ्लुकिचरफलोश्चेत्यभ्यासस्यनुकुउत्परस्यातइत्युत्वम् ॥ ११ ॥ देवसहितालोकांतराणांभुवनभेदानामावलिस्तस्यानियतेरंगेषुचारुभूषणंभवतीतिप्रतिवाक्यंकल्प्यम् ॥ आपातालंपातालपर्यंतंनभस्तस्यालंबंलंबमानंकबरीमंडलंश्यामत्वात् ॥ १२ ॥ कलकलैःरोदनकोलाहलैरुज्वलानरकाग्निभिर्दीप्यमानानरकालीतस्याःपाताललक्षणेचरणेस्थितामंजरीमाला ॥ मंजरीशब्देनपादकिंकिण्योलक्ष्यंते ॥ अन्यथासूत्रप्रोतत्वानुपपत्तेः ॥ १३ ॥ प्राणिकर्मसौरभ्यप्रकटहेतुत्वात्कस्तूरीभूतेनचित्रगुप्तेनकरणेनयमरूपेवदनावयवभूतेपट्टकेफलकेललाटेइतियावत् ॥ यमेहिचित्रगुप्तोविराजते ॥ पादललाटयोराद्यंतावयवयोःकृत्यैवतद्वदितरावयवकॢप्तिर्यथायोगमर्थाद्बोध्या ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालस्यपत्युःआस्यंलक्षणयामुखविलासभ्रूभंगकटाक्षादिसूचितमभिप्रायम् ॥ स्फुटतांशैलानांघनाआरवाःशब्दायस्मिन्कर्मणितत्तथा ॥ १५ ॥ तस्यान्नृत्यप्रकारमेवप्रपं चयतिषड्भिः ॥ पश्चात्पृष्ठतः ॥ बर्हिभिर्मयूरैः ॥ सर्वेषांतृतीयांतानांराजतेइतिपंचमस्थेनसंबंधः ॥ भीषणैरित्यंतस्यहरमूर्द्धभिरित्युत्तरेणान्वयः ॥ भांकारोध्वनिविशेषः ॥ १६॥ चंद्रांतबहुव्रीहिघटितःकर्मधारयः ॥ कबराःकेशास्तद्रूपैश्चामरैः ॥ १७॥ अचलाःपर्वतास्तदाकारैस्तुंबकैरलाबुपात्रैः ॥ तैःकापालिकव्यवहारस्यप्रसिद्धत्वात् ॥ शतशब्दस्य कृतैकशेषस्यबहुवचनांतस्यबहुव्रीहिस्तेनसंप्रोत्तरसहस्रलाभः ॥ १८ ॥ शारीरंशरीरावयवभूतंपृष्ठास्थि ॥ भीषयतिभापयतीवअन्येषांभयार्थम् ॥ १९॥ विश्वरूपाणिनाना काराणियानिशिरश्चक्राणिमस्तकवृंदानितान्येवपुष्करमालातयाविविधंवल्गंत्याभ्रमंत्या ॥ २० ॥ पुष्करावर्त्ताख्याःसंवर्त्तमेघाएवडमरोडमरुकंतस्योड्डामरारवैरुद्भटशब्दैः॥

कालास्यंसमुपादायकल्पांतेषुकिलाकुला॥ नृत्यत्येषापुनर्देवीस्फुटच्छैलघनारवम्॥ १५॥ पश्चात्प्रालंबविभ्रांतकौमारमृतबर्हिभिः॥ नेत्रत्रयबृहद्रंध्रभूरिभांकारभीषणैः॥ १६॥ लंबलोलजटाचंद्रविकीर्णहरमूर्द्धभिः॥ उच्चरच्चारुमंदारगौरीकबरचामरैः॥ १७॥ उत्तांड वाचलाकारभैरवोदरतुंबकैः॥ रणत्सशतरंध्रेंद्रदेहभिक्षाकपालकैः॥ १८॥ शुष्कशारीरखट्वांगभरैरापूरितांबरम्॥ भीषयत्यात्मनात्मानं सर्वसंहारकारिणी॥ १९॥ विश्वरूपशिरश्चक्रचारुपुष्करमालया॥ तांडवेषुविवल्गंत्यामहाकल्पेपुराजते॥ २०॥ प्रमत्तपुष्करावर्त्तड मरोड्डामरारवैः॥ तस्याःकिलपलायंतेकल्पांतेतुंबुरादयः॥ २१॥ नृत्यतोंतःकृतांतस्यचंद्रमंडलभासिनः॥ तारकाचंद्रिकाचारुव्योमपि च्छावचूलिनः॥ २२॥ एकस्मिञ्छ्रवणेदीप्ताहिमवानस्थिमुद्रिका॥ अपरेचमहामेरुःकांताकांचनकर्णिका॥ २३ ॥ अत्रैवकुंडलेलो लेचंद्रार्कौगंडमंडले॥ लोकालोकाचलश्रेणीसर्वतःकटिमेखला॥ २४॥ इतश्चेतश्चगच्छंतीविद्युद्वलयकर्णिका ॥ अनिलांदोलिताभा तिनीरदांशुकपट्टिका॥ २५ ॥

तुंबुरादयोगंधर्वाः ॥ २१ ॥ इत्थंनियतेःसपरिकरंनृत्यमुपवर्ण्यतद्भर्त्तुरपितद्वर्णयन्भूषणान्याह ॥ नृत्यतइत्यादिना ॥ अंतःप्रागुक्तनृत्यशालांतः ॥ चंद्रमंडलेनवक्ष्यमाणकुंडल भूतेनभासिनःशोभमानस्य ॥ तारकाभिश्चंद्रिकयाचतारकालक्षणचंद्रप्रतिकृतिभिश्चचारुमनोहरंव्योमैवपिच्छंतेनावचूलिनोभूषितकेशस्यकृतांतस्यश्रवणेइत्युत्तरेणान्वयः ॥ २२ ॥ एकस्मिन्दक्षिणेश्रवणेकर्णे ॥ अस्थिमयीमुद्रिकामुद्रिकाकारंकुंडलंकापालिकानुरूपम् ॥ अपरेवामे ॥ कर्णिकाकर्णभूषणंकुंडलमितियावत् ॥ २३ ॥ अत्रअन योरेवकर्णयोः॥ श्रेणीतिशृंगबाहुल्यात्कल्पब्रह्मांडभेदाद्वा॥ २४॥ विद्युद्वलयकर्णिकाकर्णिकाकृतिकंकणम्॥ नीरदामेघाएवनानावर्णत्वाद्वस्त्रपट्टादिपटच्चरघटिताकंथा॥ २५॥

१ नवच्छिद्रत्वेनप्रसिद्धेभ्योदेहेभ्यइंद्रदेहस्यसहस्राक्षत्वेनसप्ताधिकसहस्रच्छिद्रत्वाद्वैलक्षण्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीणेभ्योजगद्भ्यः पूर्वसर्गेभ्योवातैर्निर्गतैःकृतांतैर्मृत्युभिःसंभृतैर्मिलितैरिवस्थितैर्मुसलादिभिर्विरचिताअस्यमालाशोभतेइत्युत्तरेणान्वयः ॥ २६ ॥ शेषस्यनागराजस्यभोगःशरीरम् ॥ आयुधभृच्छरीरसामान्योपलक्षणमेतत् ॥ प्राथमिकमुसलसंबंधात्शेषग्रहणम् ॥ तदेवमहासूत्रंतत्रप्रोतइवसंबद्धेकालस्यपूर्वोक्तराजपुत्रस्यकराद्दैवाच्च्युतेसंसरणशीलस्यजीवमृगसंघस्यबंधनायआमुक्तेपाशेग्रथितामालाअस्यकृतांतस्यकंठेशोभते ॥ २७ ॥ मकरिकादिलांछनान्यन्येषांकंकणेषुनिर्जीवानिप्रसिद्धानितद्वैलक्षण्यार्थंजीवोल्लसदिति ॥ २८ ॥ व्यवहाराःशास्त्रीयाःस्वाभाविकाश्चतएवमहांतोलक्षणभूतारोमावर्त्ताः ॥ रजस्तमसीप्रकृतिगुणौ ॥ २९ ॥ तांडवस्योद्भवोयस्यास्तथाविधांनृत्येहांगात्रविक्षे

मुसलैःपट्टिशैःप्रासैःशूलैस्तोमरमुद्गरैः ॥ तीक्ष्णैःक्षीणजगद्वातकृतांतैरिवसंभृतैः ॥ २६ ॥ संसारबंधनादीर्घेपाशेकालकरच्युते ॥ शेषभोगमहासूत्रप्रोतेमालास्यशोभते ॥ २७ ॥ जीवोल्लसन्मकरिकारत्नतेजोभिरुज्वला ॥ सप्ताब्धिकंकणश्रेणीभुजयोरस्यभूषणम् ॥ २८ ॥ व्यवहारमहावर्त्तासुखदुःखपरंपरा ॥ रजःपूर्णतमःश्यामारोमालीतस्यराजते ॥ २९ ॥ एवंप्रायःसकल्पांतेकृतांतस्तांडवोद्भवाम् ॥ उपसंहृत्यनृत्येहांस्रष्ट्रासहमहेश्वरम् ॥ ३० ॥ पुनर्लास्यमयींनृत्यलीलांसर्गस्वरूपिणीम् ॥ तनोतीमांजराशोकदुःखाभिभवभूषिताम् ॥ ३१ ॥ भूयःकरोतिभुवनानिवनांतराणिलोकांतराणिजनजालककल्पनांच ॥ आचारचारुकलनामचलांचलांचपंकाद्यथार्भकजनोरचनामखिन्नः ॥ ३२ ॥ ॥ इत्यार्षेवा० वा० दे० मो० वै० कृतांतविलसितंनामपंचविंशतितमःसर्गः ॥ २५ ॥ श्रीरामउवाच ॥ वृत्तेस्मिन्नेवमेतेषांकालादीनांमहामुने ॥ संसारनाम्निकैवास्थामादृशानांवदत्विह ॥ १ ॥ विक्रीताइवतिष्ठामएतैर्दैवादिभिर्वयम् ॥ मुनेप्रपंचरचनैर्मुग्धावनमृगाइव ॥ २ ॥

पेच्छामुपसंहृत्यचिरंविश्रम्येतियावत् ॥ महेश्वरैर्ब्रह्मादिभिःसहितंपुनःस्रष्ट्राइमांनृत्यलीलांतनोतीत्युत्तरेणसंबंधः ॥ ३० ॥ लास्यमयीमभिनयप्रचुराम् ॥ ३१ ॥ आचाराणांश्रौतस्मार्त्तादिसत्कर्मणांचारुकलनांसम्यक्प्रवृत्तिम् ॥ अचलांकृतत्रेतयोश्चलांकलिद्वापरयोः ॥ रचनांक्रीडापुत्रिकादिरूपाम् ॥ ३५ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्र० वै० पंचविंशतितमःसर्गः ॥ २५ ॥ ॥ ७ ॥ ॥ इहप्रपंच्यतेदोषैर्भूरिसंसारदुर्दशा ॥ कालादिपारतंत्र्येणवैराग्यस्योपपत्तये ॥ १ ॥ करोत्वेवंकालःकिंतेनतइत्याशंक्यकालादिसर्ववस्तुषुस्वस्यदोषदर्शनंप्रपंचयिष्यंस्तत्फलंवैराग्यरूपानास्थासंपत्तिंदर्शयति ॥ वृत्तइत्यादिना ॥ एवमुक्तरूपे ॥ वृत्तेचरित्रे ॥ आस्थाआश्वासः ॥ १ ॥ दैवंप्राक्तनंकर्मआदिःप्रधानंयेषांतैरेतैःप्रागुक्तैश्चतुर्भिः ॥ शब्दादिविषयप्रपंचरचनैर्मुग्धामोहिताः ॥ २ ॥

१ आदीर्घेइत्यस्यफलितोर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनार्यैःसमआम्नायश्चरित्राभ्यासोयस्य ॥ अविरतमसमाप्तभोगजीवितादितृणंसंततमितिवा ॥ समासोक्त्याअनार्यः शिष्टैरपरिगृहीतःसमाम्नायोबौद्धाद्यसच्छास्त्रोपदेशोय स्य ॥ कवलनोन्मुखउदरभरणमात्रपरः ॥ कालनामाधूर्त्तःअसन्मार्गप्रवर्त्तनेनलोकंजनमित्यर्थांतरमपिगम्यते ॥ ३ ॥ दुराशाभिरंतर्दहति ॥ दारुणचेष्टयाडुश्चारित्र्येण बहि रपीतिशेषः ॥ तथादृष्टांतेपियोज्यम् ॥ ४ ॥ कालमर्यादारूपकृतांतस्यवल्लभाप्रियाइंद्रियाणांपराक्प्रवृत्तिनियमलक्षणानियतिर्नियतेषुसमाधिपरेषुउन्मुखीउद्युक्तातेषांधृति धैर्यंविधुरयतिवियोजयति ॥ तत्रहेतुः ॥ स्त्रीत्वादिति ॥ ५ ॥ अजरंतरुणंवपुर्जरांनीत्वाग्रापय्य ॥ ६ ॥ निर्दयराजानामिंद्रःस्वामीअतिनिर्दयइतियावत् ॥ ७ ॥ सर्वाब्रह्मांता अपिभूतजातयःप्राणिजातयोविरक्तदशाफल्गुविभवास्तुच्छैश्वर्याः ॥ भोगभूमयोविषयालोकावा ॥ ८ ॥ जडतयामोहेन ॥ हृतमपनीतम् ॥ ९ ॥ कलनंकलाविषयानुसंधा

एषोनार्यसमाम्नायःकालःकवलनोन्मुखः॥ जगत्यविरतंलोकंपातयत्यापदर्णवे ॥ ३ ॥ दहत्यंतर्दुराशाभिर्दैवोदारुणचेष्टया ॥ लोकमु ष्णप्रकाशाभिर्ज्वालाभिर्दहनोयथा ॥ ४ ॥ धृतिंविधुरयत्येषामर्यादारूपवल्लभा ॥ स्त्रीत्वात्स्वभावचपलानियतिर्नियतोन्मुखी ॥ ५ ॥ ग्र सतेविरतंभूतजालंसर्पइवानिलम् ॥ कृतांतःकर्कशाचारोजरांनीत्वाजरंवपुः ॥ ६ ॥ यमोनिर्घृणराजेंद्रोनार्त्तनामानुकंपते ॥ सर्वभूतद योदारोजनोदुर्लभतांगतः ॥ ७ ॥ सर्वाएवमुनेफल्गुविभवाभूतजातयः ॥ दुःखायैवदुरंतायदारुणाभोगभूमयः ॥ ८ ॥ आयुरत्यंतचपलं मृत्युरेकांतनिष्ठुरः ॥ तारुण्यंचातितरलंबाल्यंजडतयाहृतम् ॥ ९ ॥ कलाकलंकितोलोकोबंधवोभवबंधनम् ॥ भोगाभवमहारोगास्तृ ष्णाश्चमृगतृष्णिकाः ॥ १० ॥ शत्रवश्चेंद्रियाण्येवसत्यंयातमसत्यताम् ॥ प्रहरत्यात्मनैवात्मामनसैवमनोरिपुः ॥ ११ ॥ अहंकारःकलंका यबुद्धयःपरिपेलवाः ॥ क्रियादुष्फलदायिन्योलीलाःस्त्रीनिष्ठतांगताः ॥ १२ ॥ वांछाविषयशालिन्यःसच्चमत्कृतयःक्षताः ॥ नार्योदोषप ताकिन्योरसानीरसतांगताः ॥ १३ ॥ वस्त्ववस्तुतयाज्ञातंदत्तंचित्तमहंकृतौ ॥ अभाववेधिताभावाभावांतोनाधिगम्यते ॥ १४ ॥

नम् ॥ १० ॥ सत्यंपरमार्थतआत्मेतिगृहीतंदेहादि तस्यविवेकेअसत्यतांअपरमार्थात्मताम् ॥ यद्वासत्यंसत्यज्ञानादिलक्षणंवस्तुअसत्यताम् ॥ मनएवबंधहेतुत्त्वाद्रिपुर्यस्यतथा भूतआत्मामनोभिमानान्मनोभूतआत्मानंमनसैवात्मनाप्रहरतीवदुःखीकरोति ॥ ११ ॥ अहंकारोऽभिमानप्रधानमंतःकरणंकलंकायलांछनायस्वरूपदूषणायेतियावत् ॥ बु द्धयोध्यवसायात्मिकास्तद्वृत्तयोबहिर्मुखत्वात्परिपेलवाम्रदवःस्वरूपनिष्ठादार्ढ्यशून्याः ॥ क्रियाःप्रवृत्तयःशारीराः ॥ लीलामानसविलासाः ॥ १२ ॥ सच्चमत्कृतयआत्म स्फूर्त्तिचमत्काराः ॥ दोषाणांपताकिन्योध्वजिन्यः ॥ रसाअनुरागानीरसतामनुरागशून्यताम् ॥ विषयाअस्पृहणीयतामितिवा ॥ १३ ॥ वस्तुअलौकिकंकार्यकारणसंघाता त्मनाज्ञातम् ॥ चित्तंदत्तंअभिनिवेशितमितियावत् ॥ अभाववेधितानाशग्रस्ताः ॥ भावानामनित्यपदार्थानामंतोऽवसानभूमिरात्मा ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोपगच्छतीत्यादिर्लोकेअतिदौर्लभ्योक्तिर्नतुस्वस्यप्रक्रमविरोधात् ॥ १५ ॥ अधिगम्यतेलभ्यते ॥ १६ ॥ स्थितिर्जीवनम् ॥ अवस्तुनिफल्गुविषये ॥ १७ ॥ मांद्येनमौर्ख्ये
ण ॥ पातैकपरमंनाशैकपर्यवसितम् ॥ १८ ॥ ननुधार्मिकस्यतवकथंगतिर्नविद्यतेतत्राह ॥ क्वचिदिति ॥ स्वर्गादिगतेरप्यनित्यतयास्वप्रसुखप्रायत्वादितिभावः ॥ १९ ॥ मुदि
तापरसुखदर्शनसंतोषः ॥ नीचताशब्देनतद्धेतुरसूयादिर्गृह्यते ॥ २० ॥ अधीरतामस्थिरताम् ॥ पातोत्पातौमरणजन्मनीऊर्ध्वाधोगमनेवा ॥ आश्लेषःसंगः ॥ २१ ॥ भावना

तप्यतेकेवलंसाधोमतिराकुलितांतरा ॥ रागरोगोविलसतिविरागोनोपगच्छति ॥ १५ ॥ रजोगुणहताद्दृष्टिस्तमःसंपरिवर्द्धते ॥ नचाधि
गम्यतेसत्वंतत्त्वमत्यंतदूरतः ॥ १६ ॥ स्थितिरस्थिरतांयातामृतिरागमनोन्मुखी ॥ धृतिर्वैधुर्यमायातारतिर्नित्यमवस्तुनि ॥ १७ ॥ मति
र्मांद्येनमलिनापातैकपरमंवपुः ॥ ज्वलतीवजरादेहेप्रतिस्फुरतिदुष्कृतम् ॥ १८ ॥ यत्नेनयातियुवतादूरेसज्जनसंगतिः ॥ गतिर्नविद्यते
काचित्क्वचिन्नोदेतिसत्यता ॥ १९ ॥ मनोविमुह्यतीवांतर्मुदितादूरतांगता ॥ नोज्ज्वलाकरुणोदेतिदूरादायातिनीचता ॥ २० ॥ धीरता
ऽधीरतामेतिपातोत्पातपरोजनः ॥ सुलभोदुर्ज्जनाश्लेषोदुर्लभःसत्समागमः ॥ २१ ॥ आगमापायिनोभावाभावनाभवबंधनी ॥ नी
यतेकेवलंक्वापिनित्यंभूतपरंपरा ॥ २२ ॥ दिशोपिहिनदृश्यंतेदेशोप्यन्यापदेशभाक् ॥ शैलाअपिविशीर्यंतेकैवास्थामादृशेजने ॥ २३ ॥
अद्यतेसत्तयापिद्यौर्भुवनंचापिभुज्यते ॥ धरापियातिवैधुर्यंकैवास्थामादृशेजने ॥ २४ ॥ शुष्यंत्यपिसमुद्राश्चशीर्यंतेतारकाअपि ॥ सि
द्धाअपिविनश्यंतिकैवास्थामादृशेजने ॥ २५ ॥ दानवाअपिदीर्यंतेध्रुवोप्यध्रुवजीवितः ॥ अमराअपिमार्यंतेकैवास्थामादृशेजने ॥ २६ ॥
शक्रोप्याक्रम्यतेवक्रैर्यमोपिहिनियम्यते ॥ वायुरप्येत्यवायुत्वंकैवास्थामादृशेजने ॥ २७ ॥ सोमोपिव्योमतांयातिमार्त्तंडोप्येतिखंडता
म् ॥ मग्नतामग्निरप्येतिकैवास्थामादृशेजने ॥ २८ ॥ परमेष्ठ्यपिनिष्ठावान्ह्रियतेहरिरप्यजः ॥ भवोप्यभावमायातिकैवास्थामादृशे
जने ॥ २९ ॥ कालःसंकाल्यतेयेननियतिश्चापिनीयते ॥ खमप्यालीयतेनंतंकैवास्थामादृशेजने ॥ ३० ॥

वासना भावेष्वपगतेष्वपिसानापैतीतिभवेबंधनीबंधहेतुः ॥ भूतपरंपराप्राणिनिकायः ॥ कालेनेतिशेषः ॥ २२ ॥ दिशोयासुकालाद्भयंनास्तितादृश्यः ॥ तदेवप्रपंचयति ॥ दे
शइति ॥ देशःसद्व्यवहारोपदेशः ॥ यद्वा ॥ दिशतिप्रयच्छतिप्राणिभ्योवकाशमितिदेशइति ॥ व्यपदेशादन्यंविरुद्धमपदेशंव्यवहारंस्वस्यैवनिरवकाशत्वमितियावत् ॥ २३ ॥
द्यौराकाशोऽपिसत्तयासन्मात्रस्वभावेनेश्वरेणाद्यते ॥ २४ ॥ सिद्धाज्ञानातिरिक्तैर्योगमंत्ररसायनादिभिः ॥ २५ ॥ २६ ॥ वक्रैराक्रम्यतेचर्व्यते ॥ नितरांयम्यतेउपरमंप्राप्य
ते ॥ २७ ॥ व्योमतांशून्यताम् ॥ २८ ॥ निष्ठापरिसमाप्तिः ॥ ह्रियतेसंह्रियते ॥ २९ ॥ कालःप्रागुक्तस्त्रिविधः ॥ खमत्रबहिरावरणाकाशः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्राव्यंश्रोत्रेंद्रियाविषयःअवाच्यंवागगम्यंदुर्दर्शंचक्षुराद्यगम्यंयतत्त्वंसूक्ष्मंरूपंयस्य ॥ मूर्त्तिःस्थूलंरूपम् ॥ विडंब्यंतेस्वात्मन्येवमाययाप्रदर्श्यंते ॥ तत्त्वमाच्छाद्यकल्पितमेव प्रदर्शयतीत्यर्थः ॥ ३१ ॥ अहंकारकलामभिमानांशमेत्यप्राप्यस्थितेषुमध्येइतिशेषः ॥ ३२ ॥ सर्वबाधकत्वोपपादनायतस्यनिरंकुशंस्वातंत्र्यमाह ॥ शिलेत्यादित्रिभिः ॥ साश्वोश्वसहितोरथस्तद्भावंप्राप्तः ॥ यआदित्येतिष्ठन्नित्यादिश्रुतेः ॥ स्वाधिरूढेनेश्वरेणप्रेर्यमाणःशिलाशैलवप्राद्विदुर्गमप्रदेशेषुकिरणाश्वपादैःसंचरन्निवस्थितोदिवाकरोरथवद्लेक्ष्यते ॥ वनंजलंयोग्यतयापर्वतशिखराद्वेगेनप्रवहत्तेनयथावर्त्तुलाःस्फटिकादिपाषाणाअधोधःप्रेर्यंतेतद्वद्वशोऽस्वतंत्रः ॥ सूर्यादीनामपिमरुत्प्रवाहेणोह्यमानत्वादितिभावः ॥३३॥ धराभूमिःसैवगोलकम् ॥ ज्योतिःशास्त्रेतथाप्रसिद्धेः ॥ धिष्ण्यंदेवानामायतनभूतंचक्रंज्योतिश्चक्रंतेनवेष्ट्यतेपरितोव्याप्यते ॥ अक्षोटंफलविशेषः ॥ युगावर्त्तेषुभूमेर्दाह

अश्राव्यावाच्यदुर्दर्शतत्त्वेनाज्ञातमूर्तिना ॥ भुवनानिविडंब्यंतेकेनचिद्भ्रमदायिना ॥ ३१ ॥ अहंकारकलामेत्यसर्वत्रांतरवासिना ॥ न सोस्तित्रिपुलोकेषुयस्तेनेहनबाध्यते ॥ ३२ ॥ शिलाशैलकवप्रेषुसाश्वभूतोदिवाकरः ॥ वनपाषाणवन्नित्यमवशःपरिचोद्यते ॥ ३३ ॥ धरागोलकमंतस्थसुरासुरगणास्पदम् ॥ वेष्ट्यतेधिष्ण्यचक्रेणपक्वाक्षोटमिवत्वचा ॥ ३४ ॥ दिविदेवाभुविनराःपातालेषुचभोगिनः ॥ कल्पिताःकल्पमात्रेणनीयंतेजर्ज्जरांदशाम् ॥ ३५ ॥ कामश्चजगदीशानरणलब्धपराक्रमः ॥ अक्रमेणैवविक्रांतोलोकमाक्रम्यवल्गति ॥ ३६ ॥ वसंतोमत्तमातंगोमदैःकुसुमवर्षणैः ॥ आमोदितककुप्चक्रश्चेतोनयतिचापलम् ॥ ३७ ॥ अनुरक्तांगनालोललोचनालोकिताकृति ॥ स्वस्थीकर्त्तुंमनःशक्तोनविवेकोमहानपि ॥ ३८ ॥ परोपकारकारिण्यापरार्तिपरितप्तया ॥ बुद्धएवसुखीमन्येस्वात्मशीतलयाधिया ॥ ३९ ॥ उत्पन्नध्वंसिनःकालवडवानलपातिनः ॥ संख्यातुंकेनशक्यंतेकल्लोलाजीवितांबुधौ ॥ ४० ॥ सर्वएवनरामोहाद्दुराशापाशपाशिनः ॥ दोषगुल्मकसारंगाविशीर्णाजन्मजंगले ॥ ४१ ॥

प्लवनादिविकारेष्याकल्पंज्योतिश्चक्रस्याविनाशाद्दार्ढ्यसूचनायपक्वेतिविशेषणम् ॥ ३४ ॥ कल्पमात्रेणसंकल्पमात्रेण ॥ तथाचात्यंतपारवश्यमपिजगतोमहान्दोषइतिभावः ॥ ३५ ॥ दोषांतराण्यप्याह ॥ कामइत्यादिना ॥ अक्रमेणअनुचितप्रकारेण ॥ आक्रम्यवशीकृत्य ॥ नियंतुरीश्वराद्बिभेतिचेन्नविश्रृंखलःस्यात् नासौतथेत्याह ॥ जगदीशानेति ॥ ३६ ॥ वसंतएवमत्तमातंगःकुसुमवर्षणमेवमदवर्षणमितिव्यस्तरूपकम् ॥ चापलमितिभयोन्मादभावद्वयसंभेदः ॥ ३७ ॥ ३८ ॥ बुद्धःप्रबुद्धतत्त्वःपुरुषः ॥ बोधश्चातिदुर्लभइतिभावः ॥ ३९ ॥ ध्वंसित्वेहेतुः ॥ कालेति ॥ भावाइतिशेषः ॥ ४० ॥ पूर्वोक्तदोषलक्षणेषुगुल्मकेषुस्थिताःसारंगामृगाःपक्षिणोवादुराशापाशेनपाशिनोबद्धाःसंतोजन्मजंगलेविशीर्णाइतिसंबंधः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैरुक्तदोषयुक्तैः कुकर्मभिः काम्यनिषिद्धाचरणैरायुः संक्षीयते ॥ फलं स्वर्गनरकादि ॥ आकाशे चेत्यादपस्तत्रलतापिस्यात्तत्कृतकंठपाशोल्लुंबनसदृशमसारंनिरालंबनदुःखंपत नावसानस्थितिकमित्यर्थः ॥ आस्तांतन्निवृत्त्युपायोदूरेतच्चिंतापिदुर्लभेत्याह ॥ नहीति ॥४२॥ तत्प्रमोषसामग्रीतुप्रतिक्षणमतिसुलभेत्याह ॥ अद्येति ॥ गलतिविशीर्यते॥४३॥
॥ इतिश्रीवासिष्ठम॰तात्पर्यप्र॰वै॰षड्विंशः सर्गः ॥ २६ ॥ ॥ ७ ॥ ॥ उक्तानुक्तेषुभावेषुनिःश्रेयसविरोधिषु ॥ विस्तरेणपुनर्दोषावैराग्यायेहकीर्तिताः ॥ १ ॥ प्रत्येकमुक्तेष्वनुक्तेषुचभावेषुसमुच्चित्यदोषांतराणिप्रपंचयन्स्वचित्तविश्रांतिहेत्वलाभंदर्शयति ॥ अन्यच्चेत्यादिना ॥ अन्यच्चशृण्वितिशेषः ॥ आपाततोमनोरमेवस्तुतस्त्वरम्येजगत्स्वरूपेयेनलब्धेनचेतोऽतिविश्रांतिपूर्णकामतामुपैतितत्तादृशंकिंचिदप्यर्थजातंनायातिचेतसिततोऽन्यच्चतत्त्वंनायातिनलभ्यतइतइतिवार्थः ॥ १॥ दाराएवदर्योगिरिगुहाः ॥ विशे

संक्षीयतेजगतिजन्मपरंपरासुलोकस्यतैरिहकुकर्मभिरायुरेतत् ॥ आकाशपादपलताकृतपाशकल्पंयेषांफलंनहिविचारविदोपिविद्मः ॥४२॥ अद्योत्सवोयमृतुरेषतथेहयात्रातेबंधवःसुखमिदंसविशेषभोगम् ॥ इत्थंमुधैवकलयन्सुविकल्पजालमालोलपेलवमतिर्गलतीहलोकः ॥ ४३ ॥ ॥ इत्यार्षेवासिष्ठमहा॰वा॰दे॰मो॰वै॰दैवदुर्विलासवर्णनंनामषड्विंशः सर्गः ॥ २६ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ अन्यच्चताताततिरामरम्येमनोरमेचेहजगत्स्वरूपे ॥ नकिंचिदायातितदर्थजातंयेनातिविश्रांतिमुपैतिचेतः ॥ १ ॥ बाल्येगतेकल्पितकेलिलोलेमनोमृगेदारदरीषुजीर्णे ॥ शरीरकेजर्जरतांप्रयातेविदूयतेकेवलमेवलोकः ॥ २ ॥ जरातुषाराभिहतांशरीरसरोजिनींदूरतरेविमुच्य ॥ क्षणाद्गतेजीवितचंचरीकेजनस्यसंसारसरोवशुष्कम् ॥ ३ ॥ यदायदापाकमुपैतिनूनंतदातदेयंरतिमातनोति ॥ जराभराऽनल्पनवप्रसूनाविजर्जराकायलतानराणाम् ॥ ४ ॥ तृष्णानदीसारतरप्रवाहग्रस्ताखिलानंतपदार्थजाता ॥ तटस्थसंतोषसुवृक्षमूलनिकाषदक्षावहतीहलोके ॥ ५ ॥ शारीरनौश्चर्मनिबंधबद्धाभवांबुधावालुलिताभ्रमंती ॥ प्रलोड्यतेपंचभिरिंद्रियाख्यैरधोभवंतीमकरैरधीरा ॥ ६ ॥ तृष्णालताकाननचारिणोमीशाखाशतंकाममहीरुहेषु ॥ परिभ्रमंतःक्षपयंतिकालंमनोमृगानोफलमाप्नुवंति ॥ ७ ॥ कृच्छ्रेषुदूरास्तविषादमोहाःस्वास्थ्येषुनोत्सिक्तमनोभिरामाः ॥ सुदुर्लभाःसंप्रतिसुंदरीभिरनाहतांतःकरणामहांतः ॥ ८ ॥

षेणदूयतेउपतप्यते ॥ केवलंपुरुषार्थसाधनशून्यतयाव्यर्थायुःक्षपणेनेत्यर्थः ॥ २ ॥ जीवितंजीवनंसएवचंचरीकोभ्रमरः ॥ संसारोत्रैहिकसमारंभस्तदेवसरः ॥ ३ ॥ रतिंप्रीतिमातनोतिमृत्योरितिशेषः ॥ नराणांकायएवलतावल्ली ॥ ४ ॥ सारतरोवेगवत्तरोबलवत्तरोवा ॥ मूलनिकाषोवप्रनिकृंतनंतत्रदक्षासमर्था ॥५॥ चर्मणानिबंधनेनआच्छादनेनबद्धा ॥ चर्ममयीतरिर्दक्षिणदेशेप्रसिद्धा ॥ ऊर्मिभिरालुलिताव्याकुलितास्वतश्चलघुत्वाद्भ्रमंतीअतएवाधोभवंतीमज्जनोन्मुखीइंद्रियग्राहैरपिप्रलोड्यते ॥ यतोऽधीरानविद्यंतेधीराविवेकधीमंतोवैराग्यधैर्यशालिनोवाजीवायस्यांतथाविधा ॥ ६॥ लताप्रधानंकाननंलताकाननं ॥ शाखाशतंपरिभ्रमंतइतिविशेषणान्मृगाअत्रशाखामृगाःकालमायुःक्षपयंति ॥ ७ ॥ कृच्छ्रेषुआपत्सु ॥ स्वास्थ्येषुसंपत्सु ॥ नोत्सिक्तेनागर्वितेनमनसाअभिरामाः ॥ नञर्थकोनशब्दोप्यस्तितस्यसमासः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घटाःसमूहास्तएवतरंगायस्मिन् ॥ येतरंतितेमयिशौर्योत्कर्षविमर्शपरेसतिनशूरानोत्कृष्टशूराः ॥ मद्दृष्ट्येतियावत् ॥ येदेहेंद्रियांभोधिवर्त्तमानंविवेकवैराग्यादिनाभाविनंचमूला
ज्ञानोच्छेदेनतरंत्यतिक्रामंतितएवशूराः ॥ तच्चदुर्लभमुपायदौर्लभ्यादितिभावः॥ ९॥ ननुकर्मैवतत्रोपायोस्तुतत्राह ॥ अक्लिष्टेति ॥ अप्यर्थएवकारः॥ कस्यचित्काचिदपिक्रिया
अक्लिष्टंक्लेशेननाशेनवारहितंपर्यंतःसंसारावसानंतद्रूपंयत्फलंतेनअभिरामानदृश्यते ॥ तद्यथेहकर्मचितोलोकःक्षीयतएवमेवामुत्रपुण्यचितोलोकःक्षीयतइत्यादिश्रुतेः ॥ कृत
कफलस्यनाशनियमादिष्टनाशस्यदुःखपर्यवसितत्वाच्चेतिभावः ॥ यांक्रियामेत्यआश्रित्य ॥ विश्रांतिस्वास्थ्यम् ॥ १० ॥ यत्रअसतिभाग्योदयेकीर्त्तिप्रतापलक्ष्म्यावल्पफ
लानामपिधैर्यादिक्षतिहेतुरागलोभादिप्राबल्याद्दौर्लभ्यंतत्रकिंवाच्यंमहाफलस्यमोक्षस्येत्यभिप्रेत्याह ॥ कीर्त्यैति ॥ श्रियासंपदा ॥ गृहमर्थिगृहम् ॥ सत्वबलेनसात्विकक्षमा
विनयौदार्यादिबलेनलक्ष्मीम् ॥ तेनहिसापूर्णेवराजते ॥ ११ ॥ सतितुभाग्योदयेसर्वस्यसर्वत्रसर्वाभिलषितप्राप्तिःसुलभेतिपुरुषप्रयत्नवैयर्थ्यमभिप्रेत्याह ॥ अप्यंतरस्थमिति ॥

तरंतिमातंगघटातरंगंरणांबुधिंयेमयितेनशूराः॥शूरास्तएवेहमनस्तरंगंदेहेंद्रियांभोधिमिमंतरंति॥ ९ ॥अक्लिष्टपर्यंतफलाभिरामान
दृश्यतेकस्यचिदेवकाचित्॥क्रियादुराशाहतचित्तवृत्तिर्यामेत्यविश्रांतिमुपैतिलोकः ॥ १० ॥ कीर्त्याजगद्दिक्कुहरंप्रतापैःश्रियागृहंसत्त्व
बलेनलक्ष्मीम्॥येपूरयंत्यक्षतधैर्यबंधानतेजगत्यांसुलभामहांतः॥ ११ ॥अप्यंतरस्थंगिरिशैलभित्तेर्वज्रालयाभ्यंतरसंस्थितंवा॥स
र्वंसमायांतिससिद्धिवेगाःसर्वाःश्रियःसंततमापदश्च॥ १२ ॥पुत्राश्चदाराश्चधनंचबुद्ध्याप्रकल्प्यतेतातरसायनाभम्॥सर्वंतुतन्नोपक
रोत्यथांतेयत्रातिरम्याविषमूर्छनैव ॥ १३ ॥ विषादयुक्तोविषमामवस्थामुपागतःकायवयोवसाने॥भावान्स्मरन्स्वानिहधर्मरिक्तान्
जंतुर्जरावानिहदह्यतेंतः ॥ १४ ॥ कामार्थधर्मान्निकृतांतराभिःक्रियाभिरादौदिवसानिनीत्वा॥चेतश्चलद्बर्हिणपिच्छलोलंविश्रांतिमा
गच्छतुकेनपुंसः॥ १५ ॥पुरोगतैरप्यनवाप्तरूपैस्तरंगिणीतुंगतरंगकल्पैः॥क्रियाफलैर्दैववशादुपेतैर्विडंब्यतेभिन्नरुचिर्हिलोकः॥ १६ ॥

गिरेःशैलीशिलामयीयाभित्तिः ॥ कर्मधारयनिमित्तःपुंवद्भावः ॥ तन्मध्येस्थितमपिवज्रनिर्मितत्वादभेद्यस्यालयस्याभ्यंतरेसंस्थितमपिवासर्वंसभाग्यजनमितिशेषः ॥ सिद्धयो
ऽणिमादयस्तेषांवेगैस्त्वराभिःसहिताः ॥ आपद्ग्रहणंदृष्टांतार्थम् ॥ १२ ॥ अक्लिष्टपर्यंतेत्यनुपदोक्तमेवप्रपंचयति ॥ पुत्राश्चेत्यादिना ॥ प्रकल्प्यतेभ्रांत्येतिशेषः ॥ अंतेमृत्युका
ले ॥ अतिरम्याअपिभोगविषयायत्रविषमूर्छनावद्दुःखायैव ॥ १३ ॥ धर्मरिक्तान्पुण्यसंग्रहशून्यान् ॥ १४ ॥ आदौधनार्जनभोगतृष्णाप्राबल्यात्कामार्थाभ्यामेवधर्मावा
प्तौकृतांतराभिराक्रांतावकाशाभिर्लौकिकक्रियाभिः ॥ बर्हिणोमयूरस्तस्यपिच्छंबर्हमिवलोलम् ॥ कायवयोवसानेइत्येतदत्राप्यनुषज्यते ॥ १५ ॥ ननुमास्तुधर्मार्जनशून्या
नांचेतसिविश्रांतिस्तदर्जनवतांभवदादीनांतत्फललाभात्कुतोनसेत्याशंक्यधर्मफलस्वर्गपुत्रादेरप्यसारतामाह ॥ पुरोगतैरिति ॥ तरंगवद्भंगुरैरतएवानवाप्तरूपैरप्राप्तप्रायैः ॥ हिय
स्माद्भिन्नेअनात्मनिरुचिर्यस्यसलोकोजनोविडंब्यतेवंच्यते ॥ अयंभावः ॥ सएवहिलाभइत्युच्यतेयल्लब्ध्वंनापैत्यनर्थेनानपर्यवस्यति ॥ अन्यस्तुलाभोविडंबनमात्रम् ॥ यथा
अल्पायुःपुत्रलाभोयथावामत्स्यस्यबडिशामिषलाभः ॥ तथाचश्रुतिः ॥ सयोन्यदात्मनःप्रियंब्रुवाणंब्रूयात्प्रियंरोत्स्यतीति ॥ तथाचनतल्लाभादाश्वासइति ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थमासुरसंपद्विस्तारप्रदर्शनेनप्रपंचयति ॥ इमानीत्यादिना ॥ इमानिसन्निहितानिसद्यःकर्त्तव्यान्यमूनिविप्रकृष्टानिदेशकालांतरेकर्त्तव्यानीतिविभावितानिनिरंतरंचिंतितान्यपर्यंतमनोरमाणिपरिणामेऽनर्थरूपाणि ॥ जायानांजनानांचरंजनेनप्रियाचरणेनदेहजरांतंचेतोऽपिजरयंतिविवेकाद्भ्रंशयंतीतियावत् ॥ १७ ॥ कुतोप्यहोभिःकतिपयैरेवदिनैः ॥ १८ ॥ अह्निदिवसेविवेकिजनानामनुसरणेनसत्कर्मभिश्चरहितेसतिकोनिद्रामुपैतिविनामूढमितिशेषः ॥ १९ ॥ २० ॥ कुतोप्यनिर्द्धारिततत्त्वाद्धेतोःसंवर्द्धितैः ॥ भावैर्विषयैर्विलोड्यमानाभ्राम्यमाणा ॥ पातंमृत्युम् ॥ यातमितिपाठेउपायातमागतंयातंगतंचअहोनवेत्ति ॥ २१ ॥ सर्वप्राणिनांप्रियत्वेनप्रसिद्धैरसुभिःप्राणैर्यजमानैस्तएवजनैडकानरमेषाःपशवः ॥ हतशब्दःकुत्सायाम् ॥ कुत्सितकर्मलक्षणेषुयूपेषुबद्धाःसंतोदोषांजनैःकालवर्णमुखंयथास्यात्तथाक्रियंतेसंस्क्रियंते ॥ तेके ॥ यैर्विषयासक्तिदेहपोषणादिबलात्पीनतामेवोपेत्यस्थितंनविवेकवैराग्याद्यभ्यस्तमित्यर्थः ॥ अतएवहितेरोगर्त्विग्भिःसंज्ञपनविशसनादिनाशरीरस्यबाधेननाशेनहेतुनानभवंतिअसत्प्रायाभवंतीत्युत्प्रेक्षा ॥ असन्नेवसभवति असद्ब्रह्मेतिवेदचेदितिश्रुतेः ॥ यज्ञविशेषेषुमेषाणामपिपशुत्वंप्रसिद्धम् ॥ एडकशब्दस्यच्छागेषुवालक्षणा ॥ अथवायैरेवजनैडकैःपोषकैःस्वयंपीनतामुपेत्यस्थितास्तएवजनैडकाःप्रियासुभिर्बलाद्धतकर्मपाशैर्बद्धाःकालस्यमृत्योर्मुखंप्रतिक्रियंतेउपक्रियंतेअतएवकृतघ्नाअसवःशरीरबाधेनहेतुनातेप्रियासवोनभवंतिकिंत्वप्रियाःशत्रवः ॥ तथाचनप्राणपोषणमात्रपरेणभाव्यमितिभावः ॥ अथवाअसुपोषणपराअपिनमूढजनाःप्रियासवः ॥ तेषांमृत्युमुखप्रवेशोपायाचरणेनप्रत्युतप्राणविघातकत्वात् किंतुतत्त्वज्ञाएवेहप्रियासवः ॥ प्राणानांतत्त्वदृशानित्यात्मभावमापाद्यरक्षकत्वात् ॥ अतस्तैःप्रियासुभिर्हतकर्मबद्धास्तेप्रसिद्धामूढजनैडकाःकालमुखमिवक्रियंतेनाद्रियंतइतियावत् ॥ कस्तेष्वतिशयस्तत्राह ॥ यैस्तत्त्वज्ञानबलाच्छरीरत्रयबाधेनपीनतामपरिच्छिन्नतामेवोपेत्यस्थितमितिहेतोस्तेजनैडकवद्देहात्ममतयोनभवंतीत्ययमेवातिशयइत्यर्थः ॥ २२ ॥

इमान्यमूनीतिविभावितानिकार्याण्यपर्यंतमनोरमाणि ॥ जनस्यजायाजनरंजनेनजवाज्जरांतंजरयंतिचेतः ॥ १७ ॥ पर्णानिजीर्णानियथातरूणांसमेत्यजन्माशुलयंप्रयांति ॥ तथैवलोकाःस्वविवेकहीनाःसमेत्यगच्छंतिकुतोप्यहोभिः ॥ १८ ॥ इतस्ततोदूरतरंविहृत्यप्रविश्यगेहंदिवसावसाने ॥ विवेकिलोकाश्रयसाधुकर्मरिक्तेह्निरात्रौकउपैतिनिद्राम् ॥ १९ ॥ विद्रावितेशत्रुजनेसमस्तेसमागतायामभितश्चलक्ष्म्याम् ॥ सेव्यंतएतानिसुखानियावत्तावत्समायातिकुतोपिमृत्युः ॥ २० ॥ कुतोपिसंवर्द्धिततुच्छरूपैर्भावैरमीभिःक्षणनष्टदृष्टैः ॥ विलोड्यमानाजनताजगत्यांनवेत्युपायातमहोनुपातम् ॥ २१ ॥ प्रियासुभिःकालमुखंक्रियंतेजनैडकास्तेहतकर्मबद्धाः ॥ यैःपीनतामेवबलादुपेत्यशरीरबाधेननतेभवंति ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाआगच्छतिएवंसत्वरैवगच्छति ॥ कुतोपीत्युक्त्यायतआगच्छतियत्रचगच्छतितज्जिज्ञासितमितिसूचितम् ॥ २३ ॥ रक्तच्छदारक्तौष्ठयोरक्तवस्त्रावारक्तपल्लवाश्च ॥ षट्प
दाइवषट्पदाएवचाक्षीणियासाम् ॥ विषद्रुमेष्वालोलालताविषलताः ॥ २४ ॥ इतोमनुष्यलोकादन्यतःस्वर्गनरकादिभ्यश्च ॥ मुधाव्यर्थमेव ॥ इहास्माभिर्मिलितव्यमिति
परस्पराभिप्रायनिबंधनःसंकेतस्तेनसंपादितस्वरूपा ॥ देवोत्सवादियात्रायांसमासंगःसमाजमेलनम् ॥ २५ ॥ संसाराजन्ममरणपरंपरास्तेषांमालासुप्रदीपानांशांतिषुक्षणिक
ज्वालोपरमप्रवाहेष्विवतत्त्वंपारमार्थिकंवस्तुनज्ञायतेइतिसंबंधः ॥ सर्वाणिविशेषणान्युभयसाधारणानि ॥ दशावाल्यादयोवर्त्तिकाश्च ॥ स्नेहोरागस्तैलंच ॥ चलाचलासु
चंचलासु ॥ अतात्त्विकीषुमिथ्याभूतासु ॥ २६ ॥ यथाकुलालचक्रिकाभ्रमंत्यप्यसावधानपुरुषबुद्धौचिरंस्थिरैवेयंनभ्रमतीतिप्रतीतिंजनयतिएवमियंसंसारप्रवृत्तिकुचक्रि

अजस्रमागच्छतिसत्वरैवमनारतंगच्छतिसत्वरैव ॥ कुतोपिलोलाजनताजगत्यांतरंगमालाक्षणभंगुरेव ॥ २३ ॥ प्राणापहारैकपरा
नराणांमनोमनोहारितयाहरंति॥रक्तच्छदाश्चंचलषट्पदाक्ष्योविषद्रुमालोललताःस्त्रियश्च ॥ २४ ॥इतोन्यतश्चोपगतामुधैवसमानसंके
तनिबद्धभावा ॥ यात्रासमासंगसमानराणांकलत्रमित्रव्यवहारमाया ॥ २५ ॥ प्रदीपशांतिष्विवभुक्तभूरिदशास्वतिस्नेहनिबंधनीषु ॥
संसारमालासुचलाचलासुनज्ञायतेतत्त्वमतात्विकीषु ॥ २६ ॥ संसारसंरंभकुचक्रिकेयंप्रावृट्पयोबुद्बुदभंगुरापि ॥ असावधानस्यज
नस्यबुद्धौचिरस्थिरप्रत्ययमातनोति ॥ २७ ॥ शोभोज्ज्वलादैववशाद्विनष्टागुणाःस्थिताःसंप्रतिजर्जरत्वे ॥ आश्वासनादूरतरंप्रयाताज
नस्यहेमंतइवांबुजस्य ॥ २८ ॥ पुनःपुनर्दैववशादुपेत्यस्वदेहभारेणकृतोपकारः ॥ विलूयतेयत्रतरुःकुठारैराश्वासनेतत्रहिकःप्रसंगः
॥ २९ ॥ मनोरमस्याप्यतिदोषवृत्तेरंतर्विघातायसमुत्थितस्य ॥ विषद्रुमस्येवजनस्यसंगादासाद्यतेसंप्रतिमूर्छनैव ॥ ३० ॥

कावार्षिकजलबुद्बुदवदनित्यापिचिरस्थायितांप्रतीतिंजनयतीत्यर्थः ॥ २७ ॥ जनस्यअंबुजस्येवसंप्रतियौवनेशरदिचयेसौंदर्यसौगंध्यादयोगुणाःशोभोज्ज्वलाःस्थितास्तएवगु
णावार्द्धकेनजर्जरत्वेहेमंतेचदैववशाद्विनष्टाःसंतआश्वासनायाश्चित्तसमाधानस्यआघ्राणस्यचदूरतरंप्रयातादुर्लभाभविष्यंतीतिनतेषुविश्वासइतिभावः ॥ २८ ॥ यत्रसंसारे
भूजलपवनादिदैववशात्पुरुषोपकारमनपेक्ष्यैवेतियावत् ॥ जन्माभिवृद्धिफलपुष्पादिसमृद्धिमुपेत्यस्वदेहस्यभारेणधारणेनपुनःपुनर्जनेभ्यश्छायापत्रपुष्पफलादिभिःकृतोपका
रोऽनपराध्यपितरुर्वृक्षःकुठारैर्विलूयतेछिद्यते ॥ तत्रसंसारे ॥ तत्रप्रतिपदप्रसक्तापराधस्याकृतोपकारस्यचमनुष्यस्याश्वासनेकःप्रसंगः ॥ तथाचमृत्युरनपकारिणमपिहनिष्य
त्येवेतिभावः ॥ २९ ॥ नन्वस्त्वन्यत्रदोषस्तथापिहितैषिषुस्वजनेषुकोदोषस्तत्राह ॥ मनोरमस्येति ॥ अतिशयितदोषाःस्नेहभोगादिवृत्तयोदाहभ्रमणादिवृत्तयश्चयस्मात् ॥ अं
तरुपशमस्यजीवितस्यचविघातायोद्युक्तस्योत्पन्नस्यचमूर्छनामूढताकश्मलंवाआसाद्यतइत्ययमेवदोषइतिभावः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारदृष्टिषुकास्तादृशोदृष्टयः ॥ क्रियालौकिक्यः ॥ मायाछलम् ॥ ३१ ॥ नन्वन्यासांप्रजानांभंगुरत्वेऽपिविरिंचिसालोक्यंप्राप्तानांप्रजानांकल्पायुषांनभंगुरत्वमित्याशंक्याह ॥ कल्पेति ॥ कल्पौघानामतीतानागतानंतकल्पानांसंख्यायाअकलनेअपरिज्ञानेआनंत्याविशेषात्कल्पाअपिविष्णुरुद्रादिदृशाक्षणाएवेतिविरिंच्याअपिकल्पाभिधानक्षणजीविनएव ॥ अतोवयवशालिनिकालसमूहेलघुत्वदीर्घत्वधियश्चिराचिरजीवनबुद्ध्योपिद्रष्टृकल्पनाधीनत्वादसत्याः ॥ तुल्यन्यायेनब्रह्मांडाअप्यनंतकोटिब्रह्मांडदृशांदृशाअणवएवेत्यणुमहत्त्वादिबुद्ध्योप्यसत्याबोध्याः ॥ ३२ ॥ एवंप्रकृतिदृष्टौविकारजातमप्यसत्यमेवप्रतिभातीत्याह ॥ सर्वत्रेति ॥ स्वार्थेमयट् ॥ प्रकृत्याचारुरित्यादिवदभेदेतृतीया ॥ महीध्रावस्तुतःपाषाणाएव महीमृदेव जनामांसादीन्येव ॥ कथंतर्हिपर्वतादिविशेषबुद्धिस्तत्राह ॥ पौरुषेति ॥ व्यवहारायपुरुषकृतैर्नामरूपसंकेतैःप्रतिनियतस्वभावाइत्यर्थः ॥ परमार्थतस्तुअपूर्वंपूर्वसिद्धकारणादन्यन्नास्ति ॥ तथाचसर्वत्रन्यायसाम्याद्विकारहीनंपरित्यक्तविकारंसर्वंजगत्प्रकृतिभूतमेकमेवपरमार्थवस्त्वस्तीतियुक्त्यासंभाव्यतइत्यर्थः ॥ अथवाअस्तुपर्वतादिविकाराणामसत्यत्वंतत्प्रकृतीनांपाषाणमृदादीनांतुतत्कुतस्तत्राह ॥ नापूर्वमिति ॥ तेषामपिस्वकारणमहाभूतविकारत्वादिहभोग्यवर्गेविकारव्यतिरिक्तंनास्तीतिमिथ्यात्वादप्यनाश्वासएवेत्यर्थः ॥ ३३ ॥ पाषाणमृदादीनांमहाभूतमात्रत्वमुक्तंस्फुटयति ॥ आलोक्यतइति ॥ अनुवित्हाइतिच्छेदः ॥ पयोजलंतदनुबद्धस्तत्कारणत्वेनतदिंधनत्वेनवातत्संबद्धोवह्निः ॥ यद्यपिभौमोवह्निःपार्थिवेंधनस्तथापिकाष्ठाद्यंतर्गताप्यस्नेहांशमात्रदाहित्वात्पयोनुबद्धएव ॥ अस्तंनयतिसूर्यचंद्राग्न्युदकादीनीत्यस्तनयोवायुः ॥ नभआकाशः ॥ तिष्ठतिनचलतीतिस्थाःपृथिवी ॥ इत्येतन्महाभूतपंचकमेवानुविध्यतेपरस्परंसंबध्यतइत्यनुवित्मिलितंसत्गोघटादिनानापदार्थलक्ष्म्याएतज्जगच्चेतनयाबुद्ध्याआलोक्यतेअविवेकिभिः ॥ हाइतिखेदावद्योतकोनिपातः ॥ विवेकदृशापृथग्विभागेनपर्यालोचनेतुइतरत्पंचभूतातिरिक्तंनकिंचिदस्तीत्यर्थः ॥ तथाचश्रुतिः ॥ यदग्नेरोहितंरूपंतेजसस्तद्रूपंयच्छुक्लंतदपांयत्कृष्णंतदन्नस्यअपागादग्नेरग्नित्वंवाचारंभणंविकारोनामधेयंत्रीणिरूपाणीत्येवसत्यमिति ॥ ३४ ॥

कास्तादृशोयासुनसंतिदोषाःकास्तादिशोयासुनदुःखदाहः ॥ कास्ताःप्रजायासुनभंगुरत्वंकास्ताःक्रियायासुननाममाया ॥ ३१ ॥ कल्पाभिधानक्षणजीविनोहिकल्पौघसंख्याकलनेविरिंच्याः ॥ अतःकलाशालिनिकालजालेलघुत्वदीर्घत्वधियोप्यसत्याः ॥ ३२ ॥ सर्वत्रपाषाणमयामहीध्रामृदामहीदारुभिरेववृक्षाः ॥ मांसैर्जनाःपौरुषबद्धभावानापूर्वमस्तीहविकारहीनम् ॥ ३३ ॥ आलोक्यतेचेतनयानुविद्धापयोनुबद्धोस्तनयोनभःस्थाः ॥ पृथग्विभागेनपदार्थलक्ष्म्याएतज्जगन्नेतरदस्तिकिंचित् ॥ ३४ ॥

१ मूलस्थमांसपदस्यास्थ्याद्युपलक्षकत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवंपदार्थानामसत्यत्वेकथंजनानांव्यवहारभोगचमत्कारः नहिशुक्तिरजतेनकंकणंकर्त्तुंशक्यमित्याशंक्याह ॥ चमत्कृतिरिति ॥ इहमिथ्याभूतेपिपदार्थजातेव्यवहारकुशलतयामनस्विनांप्रेक्षावतामपिलोकानांचेतसिभोगचमत्कारकरीव्यवहारचमत्कृतिरपिप्रसिद्धानचित्ररूपानाश्चर्यभूता ॥ यतस्तथाविधाचमत्कृतिःकदाचित्केषांचिन्नराणांस्वप्नेमिथ्याभूतमपिविषयमभिलक्ष्यएतिप्राप्नोतिदृश्यतइतियावत् ॥ यद्यपिसर्वेषामपिस्वप्नेभोगाःप्रसिद्धास्तथापिसुखदुःखातिशयभोगारंभेझटित्येवजागरणदर्शनात्प्रबलकर्मोद्भवेसत्येवचिरभोगचमत्कृतिर्यथाहरिश्चंद्रस्यस्वर्गनरकभोगयोरितिसूचनायकदाचित्केषांचिदित्युक्तम् ॥ ३५ ॥ ननुयद्यस्तिभोगचमत्कृतिस्तर्हिकिमधुनैवविरज्यसे भोगान्भुक्तोत्तरेवयसिविरज्यात्मविचारस्यकर्त्तुंयुक्तत्वादित्याशंक्यभोगासक्तौवैराग्यस्यविचारस्यचसदैवदौर्लभ्यमित्याह ॥ अद्येति अद्याधुनातनेपूर्वेवयसियातेस्मिन्नुत्तरेपिचवयसिआकाशवल्लीफलवन्मिथ्याभूतायाअपिभोगासक्तिकल्पनायाअविचारान्महत्त्वेसतिभोगतत्साधनादिलोभलवेनाहतानांनाशितानांपुरुषाणाम् ॥ यद्यप्यासक्तिमहत्त्वेलो

चमत्कृतिश्चेहमनस्विलोकचेतश्चमत्कारकरीनराणाम् ॥ स्वप्नेपिसाधोविषयंकदाचित्केषांचिदभ्येतिनचित्ररूपा ॥ ३५ ॥ अद्यापियातेपिचकल्पनायाआकाशवल्लीफलवन्महत्त्वे ॥ उदेतिनोलोभलवाहतानामुदारवृत्तांतमयीकथैव ॥ ३६ ॥ आदातुमिच्छन्पदमुत्तमानांस्वचेतसैवापहतोद्यलोकः ॥ पतत्यशंकंपशुरद्रिकूटादानीलवल्लीफलवांछयैव ॥ ३७ ॥ अवांतरन्यस्तनिरर्थकांशश्छायालतापत्रफलप्रसूनाः ॥ शरीरएवक्षतसंपदश्चश्वभ्रद्रुमाअद्यतनानराश्च ॥ ३८ ॥

भवैपुल्यमस्त्येवतथापिविनाशेतस्यलेशोप्यलमितिसूचनायलवग्रहणम् ॥ उदारस्यसर्वोत्कृष्टस्यपरमात्मनोयोवृत्तांतःस्वरूपनिरूपणवार्त्तातत्प्रचुराकथैवनोदेति ॥ निरंतरंतद्विचारस्तुदूरनिरस्तइतिभावः ॥ ३६ ॥ आसक्तौनकेवलंपुरुषार्थहानिःप्रत्युतमहाननर्थोपीत्याह ॥ आदातुमिति ॥ उत्तमानामुत्कृष्टभोगशालिनांपदंस्थानंसाम्यंराज्यधनादिवाआदातुंसंपादयितुमिच्छन्स्वैरंयतमानोलोकोरागलोभादिमूढेनस्वचेतसापहतःसन्नद्यास्मिन्पूर्ववयस्येवाशंकंपतति ॥ अमुमर्थमर्थांतरन्यासेनद्रढयति ॥ पशुरित्यादिना ॥ पशुश्छागादिःपततीत्यनुषज्यते ॥ आनीलाहरितावल्लीअर्थाद्विषमस्थाकरीरादिवल्लीगृह्यते ॥ ३७ ॥ अवांतरेदुर्गमेगर्त्तोदरएवन्यस्तान्यतएवनिरर्थकांशान्यंशतोपिप्राणिभिरनुपभोग्यत्वाद्व्यर्थानीतियावत् ॥ छायादीनियेषांतथाविधाःश्वभ्रद्रुमाःशरीरेस्वशरीरपोषणायैवोपयोगात्क्षताव्यर्थंनाशिताविद्याविनयधनादिसंपदोयैस्तथाविधानराश्चतुल्याएव ॥ व्यर्थजन्मत्वादित्यर्थः ॥ निरर्थकांशेइतिपाठेसप्तम्याअलुक्छांदसः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपिकचिद्धार्मिका अपिसंतितथापिविवेकिनोदुर्लभाइतिवक्तुंजनद्वैविध्यमाह॥क्वचिदिति ॥ देशांतरालशब्देनात्रप्रकृतानुसाराच्चित्तभूमयोगृह्यंते ॥ मार्दवंदयादाक्षिण्यक्षमा
दिसौंदर्यंविद्याविनयादिचतद्वत्सु ॥ कठोरेषुक्रोधलोभनैष्ठुर्यशालिषु ॥ वनमध्यभागानांखंडेष्ववयवेषु ॥ ३९॥ जनानांदुर्दशांदृष्ट्वादुःखितस्तन्निमित्तंदैवंनिंदति ॥ धातुरिति ॥
शवस्यअचेतनत्वान्मृतकल्पस्यधातुर्दैवस्य ॥ यदिजीवन्स्यान्नेदृशोनिर्दयःस्यादित्यभिप्रायः ॥ दिवसंप्रतिदिनेदिने ॥ कर्मप्रवचनीयेनैववीप्साद्योतनान्नद्विवचनंकृतम्॥फलतो
भीषणान्यापाततोरम्याणि ॥ वाशब्दःसमुच्चये ॥ विलुलितांततमैःरागादिभिरत्यंतव्याकुलितचित्तैराकुलानि ॥ परिणामेकष्टफलपाकेनदूषितारंभाभ्युदयानिनवानिकार्या
णिकेषांविवेकिनांमनांसिनविस्मापयंति ॥ ४० ॥ उक्तमर्थमनूद्योपसंहरंस्तन्निमित्तंस्वस्योद्वेगंदर्शयति ॥ जनइति ॥ कुकलाभिःकौटिल्यचातुर्यैः ॥ सुजनोविवेकी ॥ दुःखै

क्वचिज्जनामार्दवसुंदरेषुक्वचित्कठोरेषुचसंचरंति ॥ देशांतरालेषुनिरंतरेषुवनांतखंडेष्विवकृष्णसाराः ॥ ३९ ॥ धातुर्नवानिदिवसंप्रति
भीषणानिरम्याणिवाविलुलितांततमाकुलानि ॥ कार्याणिकष्टफलपाकहतोदयानिविस्मापयंतिनशवस्यमनांसिकेषाम् ॥ ४० ॥ जनः
कामासक्तोविविधकुकलाचेष्टनपरःसतुस्वप्नेप्यस्मिन्जगतिसुलभोनाद्यसुजनः ॥ क्रियादुःखासंगाविधुरविधुरानूनमखिलानजाने
नेतव्याकथमिवदशाजीवितमयी॥४१॥ ॥इत्यार्षेवासिष्ठमहारा०वा०दे०मो०वै०निःश्रेयसविरोधिभावानित्यताप्रतिपादनंनाम
सप्तविंशतितमःसर्गः॥ २७॥ ॥ ६ ॥ ॥श्रीरामउवाच॥ ॥यच्चेदंदृश्यतेकिंचिज्जगत्स्थावरजंगमम् ॥ तत्सर्वमस्थिरंब्रह्मन्स्वप्नसं
गमसंनिभम् ॥ १ ॥ शुष्कसागरसंकाशोनिखातोयोद्यदृश्यते ॥ सप्रातरभ्रसंवीतोनगःसंपद्यतेमने ॥ २ ॥ योवनव्यूहविस्तीर्णोविलीढ
गगनोमहान्॥दिनैरेवसयात्युर्वीसमतांकूपतांचवा॥३॥यदंगमद्यसंवीतंकौशेयस्रग्विलेपनैः॥दिगंबरंतदेवश्वोदूरेविशरितावटे॥४॥

रसंगोऽसंबंधस्तदविधुरैस्तद्रहितभिन्नैरत्यंतदुःखरहितैःसाधनैःफलैर्वाविधुरारहिता ॥ अवश्यंदुःखानुबंधिन्येवेतियावत् ॥ ४१ ॥ ॥ इतिवासिष्ठमहारा०तात्पर्यप्रकाशेवै०
सप्तविंशतितमःसर्गः ॥ २७ ॥ ॥ ६ ॥ ॥ इहसर्वेषुभोग्येषुवैरस्यप्रतिपत्तये ॥ वर्ण्यतेसर्वभावानांविपर्यासिस्वभावता ॥ १ ॥ सर्वभावानामविरतविपर्यासस्व
भावतादर्शनादपिनतेष्वाश्वासइत्याह ॥ यच्चेदमित्यादिना ॥ स्वप्नेसंगमःसमाजमेलनम् ॥ १ ॥ निखातोगर्त्तः ॥ प्रातर्ग्रहणंकालांतरोपलक्षणम् ॥ २ ॥ वनव्यूहेनवनसमुदाये
न ॥ विलीढगगनश्चुंबितनभस्तलउन्नतइतियावत् ॥ महान्परिणाहतः ॥ दिनैःकैश्चिदेव ॥ ३ ॥ अवटेगर्त्ते ॥ विशरिताविशीर्णंभविता ॥ लुट् ॥ ४ ॥

---

१ अत्रनैक्ष्ण्येतिक्वचित्पाठः   २ पुस्तकांतरेगगनोऽचलइतिपाठोदृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चंचुलंपुनःपुनश्चरत् ॥ ५ ॥ अधिगच्छतिप्राप्नोति ॥ ६ ॥ महारण्यमरण्यानी ॥ विस्तीर्णतयानीलतयाचनभोमंडलोपमा ॥ ७ ॥ लताभिर्वलितासंवृता ॥ मरुमह्याःपदंलक्ष
णंनिर्वृक्षजलताम् ॥ ८ ॥ वारिभूरुदकस्थानम् ॥ विपर्यस्यतिविपरीतावस्थामापद्यते ॥ ९ ॥ पूर्वस्वभावात्स्वभावांतरम् ॥ १० ॥ अल्पोदीपोदीपकः ॥ ११ ॥ यथाकुसूला
दावजस्रंपुनःपुनःपूर्यमाणोधान्यादिबीजराशिर्व्ययेनविपर्यासंक्षेत्रेउप्तोजलेनपूर्यमाणोवोच्छूनतांकुरसस्यादिभावेनविपर्यासमित्यर्थः ॥१२ ॥ इयंजागतीस्थितिरेवसंसारस्यक
र्तृभोक्तृतासंतानलक्षणायाआरभटीआडंबरातिशयःसैवनटीनर्त्तकीस्वकौशलातिशयप्रकटनायनृत्तेआवेशेनविवृत्तापरिवर्त्तमानेवजनितभ्रमाआलक्ष्यतेइतिसंबंधः ॥ तद

यत्राद्यनगरंदृष्टंविचित्राचारचंचलम् ॥ तत्रैवोदेतिदिवसैःसंशून्यारण्यधर्मता ॥ ५ ॥ यःपुमानद्यतेजस्वीमंडलान्यधितिष्ठति ॥ सभस्म
कुटतांराजन्दिवसैरधिगच्छति ॥ ६ ॥ अरण्यानीमहाभीमायानभोमंडलोपमा ॥ पताकाच्छादिताकाशासैवसंपद्यतेपुरी ॥ ७ ॥ याल
तावलिताभीमाभात्यद्यविपिनावली ॥ दिवसैरेवसायातिपुनर्मरुमहीपदम् ॥ ८ ॥ सलिलंस्थलतांयातिस्थलीभवतिवारिभूः ॥ विपर्य
स्यतिसर्वंहिसकाष्ठांबुतृणंजगत् ॥ ९ ॥ अनित्यंयौवनंबाल्यंशरीरंद्रव्यसंचयाः ॥ भावाद्भावांतरंयांतितरंगवदनारतम् ॥ १० ॥ वातां
तर्दीपकशिखालोलंजगतिजीवितम् ॥ तडित्स्फुरणसंकाशापदार्थश्रीर्जगत्त्रये ॥ ११ ॥ विपर्यासमियंयातिभूरिभूतपरंपरा ॥ बीजरा
शिरिवाजस्रंपूर्यमाणःपुनःपुनः ॥ १२ ॥ मनःपवनपर्यस्तभूरिभूतरजःपटा ॥ पातोत्पातपरावर्त्तपराभिनयभूषिता ॥ १३ ॥ आलक्ष्यते
स्थितिरियंजागतीजनितभ्रमा ॥ नृत्तावेशविवृत्तेवसंसारारभटीनटी ॥ १४ ॥ गंधर्वनगराकारविपर्यासविधायिनी ॥ अपांगभंगुरो
दारव्यवहारमनोरमा ॥ १५ ॥ तडित्तरलमालोकमातन्वानापुनःपुनः ॥ संसाररचनाराजन्नृत्तसक्तेवराजते ॥ १६ ॥

नुरूपंविशिनष्टि ॥ मनएवपवनस्तेनपर्यस्तमुद्धूतंभूरिभूतंप्राणिलक्षणंरजोवृंदमेवपटोयस्याः ॥ अतएवप्राणिनांपातोनरकादावुत्पातःस्वर्गेपरावर्त्तोमध्यमलोकेतएवपराउत्कृ
ष्टाअभिनयाभावव्यंजकचेष्टास्ताभिर्भूषिता ॥ १३ ॥ १४ ॥ तामेववर्णयतिद्वाभ्याम् ॥ गंधर्वेति ॥ विपर्यासोभ्रांतिःवंशनटीनांनेत्रपिधानगारुडविद्याप्रसिद्धा ॥ अपांगावि
वभंगुरैश्चपलैरपांगपातैश्चभंगुरैर्व्यवहारैर्मनोरमा ॥ १५ ॥ तडितमेवतडितमिवचतरलंआलोकंआलोकनम् ॥ १६ ॥

॥ १ संसारस्येत्यादेःप्रकटनायेत्यंतस्यग्रंथस्यस्थानेपुरातनपुस्तके (स्वकौशलातिशयप्रकटनायप्राणिनांजन्ममृत्युसंसरणलक्षणायामारभट्यांनटीवंशनटी ॥ आर
भटीनटीतिसमुदायोवातद्वाचकः) इतिपाठोदृश्यते ॥ अयमेवमुख्यइतिभातिपंचदशश्लोकटीकानुगुण्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेउत्सवविभवशालिनः ॥ १७ ॥ हतदग्धशब्दौनिंदावचनौ ॥ १८ ॥ तिर्यक्त्वंपश्वादिजन्म ॥ १९ ॥ कालःकालात्मारविःसूर्यः ॥ रचयन्भूतजातमितिशेषः ॥ राज्यहानिअ तिवाह्यविनाशावधिस्वरचितस्यभूतजातस्येतिशेषः ॥ २० ॥ अनुधावंत्यनुसरंति ॥ वाडवंवडवानलम् ॥ २१ ॥ वाडवस्यभागलक्षणयावह्नेः ॥ प्रसिद्धस्यवाडवस्याबिंधनत्वे नसंशुष्कविशेषणानुपयोगात् ॥ २२ ॥ २३ ॥ स्वदंतेरोचंते ॥ २४ ॥ क्षणमल्पकालम् ॥ जनइतिशेषः ॥ २५ ॥ निहतशब्दोनिंदावचनोनश्वरवचनोवा ॥ २६ ॥ अनियत

दिवसास्तेमहांतस्तेसंपदस्ताःक्रियाश्चताः॥ सर्वेस्मृतिपथंयातंयामोवयमपिक्षणात् ॥ १७ ॥ प्रत्यहंक्षयमायातिप्रत्यहंजायतेपुनः ॥ अद्यापिहतरूपायानांतोस्यादग्धसंसृतेः॥ १८ ॥ तिर्यक्त्वंपुरुषायांतितिर्यञ्चोनरतामपि ॥ देवाश्चादेवतांयांतिकिमिवेहविभोस्थिरम् ॥ १९ ॥ रचयन्रश्मिजालेनराज्यहानिपुनःपुनः॥ अतिवाह्यरविःकालोविनाशावधिमीक्षते॥२०॥ ब्रह्माविष्णुश्चरुद्रश्चसर्वावाभूत जातयः॥ नाशमेवानुधावंतिसलिलानीववाडवम्॥ २१ ॥ द्यौःक्षमावायुराकाशंपर्वताःसरितोदिशः ॥ विनाशवाडवस्यैतत्सर्वंसंशु ष्कमिंधनम्॥ २२ ॥ धनानिबांधवाभृत्यामित्राणिविभवाश्चये॥ विनाशभयभीतस्यसर्वंनीरसतांगतम्॥ २३ ॥ स्वदंतेतावदेवैतेभा वाजगतिधीमते॥ यावत्स्मृतिपथंयातिनविनाशकुराक्षसः॥ २४ ॥ क्षणमैश्वर्यमायातिक्षणमेतिदरिद्रताम् ॥ क्षणंविगतरोगत्त्वंक्ष णमागतरोगताम्॥ २५॥ प्रतिक्षणविपर्यासदायिनानिहतात्मना॥ जगद्भ्रमेणकेनामधीमंतोहिनमोहिताः॥ २६॥ तमःपंकसमाल ब्धंक्षणमाकाशमंडलम्॥ क्षणंकनकनिष्यंदकोमलालोकसुंदरम्॥ २७॥ क्षणंजलदनीलाब्जमालावलितकोटरम्॥ क्षणमुड्डामरर वंक्षणंमूकमिवस्थितम्॥ २८॥ क्षणंताराविरचितंक्षणमर्केणभूषितम् ॥ क्षणमिंदुकृताह्लादंक्षणंसर्वबहिष्कृतम्॥ २९ ॥ आगमा पायपरयाक्षणसंस्थितिनाशया॥ नबिभेतिहिसंसारेधीरोपिकइवानया ॥ ३० ॥ आपदःक्षणमायांतिक्षणमायांतिसंपदः॥ क्षणंज न्मक्षणंमृत्युर्मुनेकिमिवनक्षणम्॥ ३१ ॥ प्रागासीदन्यएवेहजातस्त्वन्योनरोदिनैः॥ सदैकरूपंभगवन्किंचिदस्तिनसुस्थिरम्॥ ३२॥ घटस्यपटताद्दृष्टापटस्यापिघटस्थितिः॥ नतदस्तिनयद्दृष्टंविपर्यस्यतिसंसृतौ॥ ३३॥

स्थितिमेवोदाहरणेनप्रपंचयति ॥ तमइत्यादित्रिभिः ॥ आकाशमंडलोदाहरणंदृष्टांतार्थम् ॥ तमोलक्षणेनपंकेनसम्यगालब्धंस्पृष्टम् ॥ कनकस्यनिष्यंदोद्रवइवरम्येणकोमलेनसुखस्पर्शेनचंद्राद्यालोकेन॥२७॥जलदाएवनीलाब्जमा लास्ताभिर्वेष्टितोदरम् ॥ उड्डामरस्तारः ॥ २८ ॥ आलोकातिरिक्तैःपर्यायेणवापूर्वोक्तैःसर्वैर्बहिष्कृतंरहितम्[1] ॥२९॥ इवशब्दोनर्थकोदृष्टांतदौर्लभ्यार्थोवा ॥ एवमुत्तरत्रापि॥ अनयाजगत्स्थित्या ॥ ३० ॥ ३१ ॥ इहसदैकरूपंसुस्थिरंनकिंचिदस्तीतिसंबंधः ॥ ३२ ॥ घटस्यकार्पासक्षेत्रेविशीर्णस्यकार्पासपरिणामक्रमेणपटतादृष्टेत्यर्थः ॥ ३३॥

१ मवेतिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धिविपरिणामापक्षयविनाशपुनर्जन्माख्याःपंचभावविकारास्तनोत्यादिभिरुच्यंते ॥ ताःक्रमेणप्राप्नुवानंनरंदेहाभिमानिनंप्रतितेभावविकारानिवर्त्ततेनचिरंतिष्ठंतीतितेपिविपर्यस्यंतीत्यर्थः ॥ यद्यप्यस्तीतिसत्तापिभावविकारेषुयास्केनपठ्यतेतथापिसाधिष्ठानब्रह्मसत्तानुवेधोनविकारइतिभावः ॥ ३४ ॥ आवर्त्यतेविपर्यस्यते ॥ ३५ ॥ जनताचेतनसमूहः ॥ जडस्याचेतनस्यप्राणकरणादेः ॥ डलयोरभेदाज्जलस्यचस्पंदेनपरामर्शात्संसर्गात् ॥ ३६ ॥ अल्पदिनैर्यातीतिशेषः ॥ ३७ ॥ नटोयथाहर्षविषादाद्यभिनयतितद्वत् ॥ ३८ ॥ त्रिभिरितआदिशब्दैर्हर्षविषादमोहहेतवोविचित्राउच्यंते ॥ ३९ ॥ चिनोतिव्रीह्यादीनिवसंचयेनोपचयंनयतितैरन्यानुत्पादयतितांश्वनिहत्यात्तिभक्षयतिततोलब्धास्वादस्तथैवनिरंतरंभोक्तुमन्यानपिजंतूनास्तृजतिविधिः ॥ स्पष्टंचनरंप्रतिहर्षविषादादयोराज्यहानीवसदाप्राप्यनिवर्त्ततइत्यर्थः ॥ ४० ॥ तदेवहेत्वस्थैर्येणविशदयति ॥ आ

तनोत्युत्पादयत्यत्तिनिहत्यास्तृजतिक्रमात् ॥ सततंराज्यहानीवनिवर्त्ततेनरंप्रति ॥ ३४ ॥ अशूरेणहतःशूरएकेनापिहतंशतम् ॥ प्राकृताः
प्रभुतांयाताःसर्वमावर्त्यतेजगत् ॥ ३५ ॥ जनतेयंविपर्यासमजस्रमनुगच्छति ॥ जडस्पंदपरामर्शात्तरंगाणामिवावली ॥ ३६ ॥ बाल्य
मल्पदिनैरेवयौवनश्रीस्ततोजरा ॥ देहेपिनैकरूपत्वंकास्थाबाह्येषुवस्तुषु ॥ ३७ ॥ क्षणमानंदितामेतिक्षणमेतिविषादिताम् ॥ क्षणंसौ
म्यत्वमायातिसर्वस्मिन्नटवन्मनः ॥ ३८ ॥ इतश्चान्यदितश्चान्यदितश्चान्यदयंविधिः ॥ रचयन्वस्तुनायातिखेदंलीलास्विवार्भकः ॥ ३९ ॥
चिनोत्युत्पादयत्यत्तिनिहत्यास्तृजतिक्रमात् ॥ सततंराज्यहानीवनिवर्त्ततेनरंप्रति ॥ ४० ॥ आविर्भावतिरोभावभागिनोभवभागिनः ॥
जनस्यस्थिरतांयांतिनापदोनचसंपदः ॥ ४१ ॥ कालःक्रीडत्ययंप्रायःसर्वमापदिपातयन् ॥ हेलाविचलिताशेषचतुराचारचंचुरः ॥ ४२ ॥
समविषमविपाकतोविभिन्नास्त्रिभुवनभूतपरंपराफलौघाः ॥ समयपवनपातिताःपतंतिप्रतिदिनमाततसंसृतिद्रुमेभ्यः ॥ ४३ ॥ इत्यार्षे
वा० वा० दे० मो० वै० सर्वभावाऽविरतविपर्यासप्रतिपादनंनामाष्टाविंशःसर्गः ॥ २८ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ इ
तिमेदोषदावाग्निदग्धेमहतिचेतसि ॥ प्रस्फुरंतिनभोगाशामृगतृष्णाःसरःस्विव ॥ १ ॥

विर्भावेति ॥ ४१ ॥ हेलयाअनादरेणैवविचलिताःपरिवर्त्तिताअशेषाश्चतुराःसमर्थाअपियेनतथाविधेआचरणेचंचुरःकुशलः ॥ ४२ ॥ कर्मणांरसानांचसमविषमविपाकतोनानाविधास्त्रैलोक्यप्राणिनिकायलक्षणाःफलसमूहाःसंसृतयःसंसाराःप्रतिजीवंभिन्नास्तल्लक्षणेभ्योद्रुमेभ्यःसमयःकालस्तल्लक्षणेनपवनेनपातिताःप्रतिदिनंपतंति ॥ तथाचपतनपर्यवसितंसर्वंदुष्टमेवेतिनक्वचिदास्थायुक्तेतिभावः ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेवै० अष्टाविंशःसर्गः ॥ २८ ॥ ॥ ७ ॥ ॥ दोषाणांदर्शनात्सर्वनिर्वेदःस्वस्यवर्ण्यते ॥ रामेणतत्प्रशांत्यर्थमुपदेशस्तथार्थ्यते ॥ १ ॥ इत्थंदोषदर्शनात्स्वचित्तेतत्त्वबुभुत्सापर्यवसितंनिर्वेदंदर्शयति ॥ इतीत्यादिना ॥ दोषपदेनतद्दर्शनंलक्ष्यते ॥ दोषाणामेववाविवेकबुद्ध्यारूढानांदग्धृताविवक्ष्यते ॥ एवंदग्धेदग्धास्थाबीजे ॥ महतिविवेकविपुले ॥ मरुष्वेवहिमृगतृष्णाःस्फुरंतिनसरःसु ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषेनिपाठेस्पष्टम् ॥ एतीतिपाठेनुप्रत्यहमहन्यहनियातिसतिसंसारसंस्थितिरपिकटुतानैष्ठुर्यातिशयंवैरस्यातिशयंवाएतीतियोज्यम ॥ कालेनपाकप्रकर्षवशादल्पकटुकटुतरमि
त्येवमवस्थाभेदैर्लोला:कटुरसायथानिंबानांलता:बालवृक्षान्यंतितद्वत्॥२॥ वैराग्याभावेभोगाशास्फुरणेत्वनर्थमाह ॥ वृद्धिमिति ॥ करंज:कंटकवृक्षः ॥ प्रत्यहंधर्मपादापच
याद्धर्मपादोपचयाच्चेतिभाव: ॥३॥ दिनंप्रतिप्रतिदिनम् ॥ ननुवीप्सायांद्विर्वचनाभावेऽवश्यंनित्येनाव्ययीभावेनभाव्यम् ॥ सत्यम ॥ तथापिच्छांदसत्वात्सनकृत: ॥ परिपाकशु
ष्कामाषाणांशिंबीकाशिंबीव ॥ माषशिंबीटंकाररवेणभज्यतेमर्यादातुतंविनेत्येतावान्विशेषइत्यर्थ: ॥ ४ ॥ आकलितास्वीकृता ॥ एकांतऐकाग्र्यम् ॥ ५ ॥ अर्थाशालक्षण

प्रत्यहंयातिकटुतामेषासंसारसंस्थिति:॥ कालपाकवशाल्लोलारसानिंबलतायथा॥२॥ वृद्धिमायातिदौर्जन्यंसौजन्यंयातितानवम्॥
करंजकर्कशेराजन्प्रत्यहंजनचेतसि॥ ३॥ भज्यतेभुविमर्यादाझटित्येवदिनंप्रति॥ शुष्केवमाषशिंबीकाटंकारकरवंविना॥४॥ राज्ये
भ्योभोगपूगेभ्यश्चिंतावज्ञोमुनीश्वर॥ निरस्तचिंताकलितावरमेकांतशीलता ॥ ५॥ नानंदायममोद्यानंनसुखायममस्त्रिय: ॥ नहर्षा
यममार्थाशाशाम्यामिमनसासह॥ ६॥ अनित्यश्चासुखोलोकस्तृष्णातातदुरुद्वहा॥ चापलोपहतंचेत:कथंयास्यामिनिर्वृतिम्॥७॥ना
भिनंदामिमरणंनाभिनंदामिजीवितम्॥ यथातिष्ठामितिष्ठामितथैवविगतज्वरम्॥ ८ ॥ किंमेराज्येनकिंभोगै:किमर्थैनकिमीहितै:॥
अहंकारवशादेतत्सएवगलितोमम॥ ९ ॥ जन्मावलिवरत्रायामिंद्रियग्रंथयोदृढा:॥ येबद्धास्तद्विमोक्षार्थंयतंतेयेतउत्तमा:॥ १० ॥ म
थितंमानिनीलोकैर्मनोमकरकेतुना॥ कोमलंखुरनिष्पेषै:कमलंकरिणायथा॥ ११ ॥ अद्यचेत्स्वच्छयाबुद्ध्यामुनींद्रनचिकित्स्यते ॥ भू
यश्चित्तचिकित्सायास्तत्किलावसर:कुत:॥ १२ ॥ विषंविषयवैषम्यंनविषंविषमुच्यते॥ जन्मांतरघ्नाविषयाएकदेहहरंविषम्॥ १३॥

याधनप्राप्ति: ॥ ६ ॥ शांतिविनानान्योनिर्वृतिहेतुरस्तीत्याह ॥ अनित्यश्चेति ॥ ७ ॥ ८ ॥ ईहितै:राज्यादिविषयैरभिलाषैश्चेष्टितैर्वा ॥ एतत्राज्यादि ॥ ९ ॥ इंद्रियाण्येवयं
थयोदृढा विषयासंगस्यदुस्त्यजत्वात् ॥ तैर्यंथिभिर्येजन्मावलीलक्षणायांवरत्रायांचर्मरज्जौबद्धाजीवास्तेषांमध्येयेतद्विमोक्षार्थंयतंतेतएवोत्तमाइतिसंबंध: ॥ १० ॥ मकरके
तुनाकर्त्रामानिनीलोकै:करणैर्मथितंहिंसितम ॥ ११ ॥ अद्यास्मिन्बाल्येवयसि ॥ तत्तर्हि ॥ पेलव:सूद्भरोवृक्षोरूढस्कंधोदुरुद्धरइतिन्यायादितिभाव: ॥ १२ ॥ विषयलक्षणं
वैषम्यमनार्जवम् ॥ जन्मांतरेष्वपिघ्नंतिमृत्युंप्रापयंतीतिजन्मांतरघ्ना: ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतत्त्वज्ञाअपिविषयान्भुंजानाःसुखादिभागिनोदृश्यंतेतथाचतेषुकोविशेषस्तत्राह ॥ नेति ॥ ज्ञस्यात्मज्ञस्य ॥ १४ ॥ सर्वदुःखासंगमूलोच्छेदित्वात्ज्ञत्वमेवमहान्पुरुषार्थइ तितदर्थमुपदेशंप्रार्थयते ॥ तदिति ॥ तत्तस्मादुक्तहेतोर्यथाऽहंज्ञःसन्वीतशोकभयायासोभवामिशीघ्रंभविष्यामि ॥ वर्त्तमानसामीप्येलट् ॥ तथैवआशुउपदिशेतिसंबंधः ॥ १५ ॥ उपदेशाविलंबायस्वस्यदुःखातिशयासहिष्णुतानिर्वेदोत्कंठ्येदर्शयति ॥ वासनेत्यादिना ॥ वासनालक्षणैर्जालैर्लतासंकटैर्वागुराभिर्वावलितावेष्टिता ॥ निपंतत्युत्पतंति चानयोरितिनिपातोत्पातौनिम्नोन्नतप्रदेशौविपत्संपदौनिरयस्वर्गौवा ॥ अज्ञतैवाटवीअरण्यम् ॥ १६ ॥ क्रकचस्यायैर्दशनैर्विनिष्पेषंघर्षणम् ॥ आशाविषयाभ्यांततंवैशसंविश सनम् ॥ १७ ॥ इदमनिष्टमस्तीतितन्निवारणेइदमिष्टंनास्तीतितत्संपादनेचप्रवृत्तिनिवृत्त्यादिव्यवहाररूपोऽविद्यांजनप्रयुक्तोभ्रमःस्वभावतएवचलंचेतोरजोराशिमनिलोवायु

नसुखानिनदुःखानिनमित्राणिनबांधवाः ॥ नजीवितंनमरणंबंधायज्ञस्यचेतसः ॥ १४ ॥ तद्ब्रवामियथाब्रह्मन्पूर्वापरविदांवर ॥ वीत शोकभयायासोज्ञस्तथोपदिशाशुमे ॥ १५ ॥ वासनांजालवलितादुःखकंटकसंकुला ॥ निपातोत्पातबहुलाभीमरूपाऽज्ञताटवी ॥ १६ ॥ क्रकचाग्रविनिष्पेषंसोढुंशक्तोम्यहंमुने ॥ संसारव्यवहारोत्थंनाशाविषयवैशसम् ॥ १७ ॥ इदंनास्तीदमस्तीतिव्यवहारांजनभ्रमः ॥ धु नोतीदंचलंचेतोरजोराशिमिवानिलः ॥ १८ ॥ तृष्णातंतुलवप्रोतंजीवसंचयमौक्तिकम् ॥ चिद्दृढांगतयानित्यंविकसच्चित्तनायकम् ॥ १९ ॥ संसारहारमरतिःकालव्यालविभूषणम् ॥ त्रोटयाम्यहमक्रूरंवागुरामिवकेसरी ॥ २० ॥ नीहारंहृदयाटव्यांमनस्तिमिरमाशु मे ॥ केनविज्ञानदीपेनभिंधितत्त्वविदांवर ॥ २१ ॥

रिवधुनोतिकंपयति ॥ हर्षविषादचिंतादिभिर्विशारयतीत्यर्थः ॥ तूलराशिमिवानलइतिपाठेतुदाहोलक्ष्यते ॥ १८ ॥ तृष्णैवतंतुलवःसूक्ष्मतंतुस्तत्रप्रोतंगुंफितम् ॥ जीवसंचयाजी वसमूहाएवमौक्तिकानियस्मिन् ॥ साक्षिचिद्याप्त्यातैजसत्वेनस्वच्छरूपतयाचविकसद्विशेषेणदीप्यमानंचित्तमेवनायकःप्रधानःशिखामणिर्यस्मिंस्तथाविधम् ॥ १९ ॥ कालोमृ त्युःसएवव्यालः षिगस्तस्यविभूषणमलंकारभूतंसंसारलक्षणंहारंमुक्तासरमरतिर्वैराग्यादिसंपन्नोऽसहमानोवाऽहमक्रूरमक्रोधहिंसादितीक्ष्णोपायंयथास्यात्तथावागुरांकेसरीव त्रोटयामि ॥ भवदुपदेशजन्यज्ञानेनेतिभावः ॥ २० ॥ हृदयंहृत्पुंडरीकस्थानंतदेवदुष्प्रवेशत्वादटवी ॥ तस्यजाड्यावरणहेतुत्वान्नीहारंमिहिकाभूतम् ॥ तत्रात्मतत्त्वान्वेषणप्र वृत्तस्यमनसस्तिमिरमिवविवेकनेत्रपिधायकमज्ञानंकेनसुखकरेणशिरइवप्रधानेनवाविज्ञायतेअनेनेतिविज्ञानमुपदेशःसएवदीपयतिदिशइतिदीपःसूर्यस्तेनभिंधिविदारय ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येउत्तममानसानांसंगेनतत्फलेनोपदेशेनक्षयंनाप्नुवंतितेतथाविधादुराधयोजगतिनविद्यंतएवेतिसंबंधः ॥ २२ ॥ ननुशांत्यादिदार्ढ्यशून्येबालेत्वयिकृतोप्युपदेशःकथंफलिष्य तीत्याशंक्यस्वस्यशांत्यादिदार्ढ्यंदर्शयति ॥ आयुरिति ॥ यथाराज्ञाबहुष्वधिकारलिप्सुषुसत्सुयेषुलोभकातरतादिदोषैराष्ट्रपीडापराक्रमणादिप्रसक्तिस्तान्विहायकस्मैचिदेवगु णवतेसमर्थायप्रधानाधिकारमुद्रासमर्प्यतेतथामयाद्यअस्मिन्नपिवयसिआयुर्भोगयौवनादिषुतृष्णाचापलादिदोषैश्चित्तदुःखनाशाद्यनर्थमाकलय्यतानिविहायसर्वदोषरहिता यैसमर्थायैचशांतयेप्रशमायैवदृढाअचलाचित्तेविषयेअधिकारमुद्राअर्पितेत्यर्थः ॥ वायुविघट्टितायामभ्रपटल्यांलंबमानंयदंबुतद्वद्भंगुरम् ॥ मेघानांवितानोविस्तारोवितानमि वविस्तृतावामेघास्तेषांमध्येविलसंतीसौदामिनीविद्युदिवचंचलाः ॥ यौवनसंबंधिन्योलालनाश्चित्तविनोदाः ॥ इवार्थेचशब्दः ॥ जलस्यरयोवेगइवलोलाः ॥ तुल्ययोरेवो

विद्यंतएवेहनतेमहात्मन्दुराधयोनक्षयमाप्नुवंति॥ येसंगमेनोत्तममानसानांनिशातमांसीवनिशाकरेण॥२२॥ आयुर्वायुविघट्टिता भ्रपटलीलंबांबुवद्भंगुरंभोगामेघवितानमध्यविलसत्सौदामिनीचंचलाः॥लोलायौवनलालनाजलरयश्चेत्याकलय्यद्रुतंमुद्रैवाद्यदृढा र्पितानन्मयाचित्तेचिरंशांतये॥ २३॥ ॥इत्यार्षेवा० वा० दे० मो० वै० सकलपदार्थानास्थाप्रतिपादनंनामैकोनत्रिंशःसर्गः ॥ २९ ॥

॥श्रीरामउवाच॥ ॥एवमभ्युत्थितानर्थशतसंकटकोटरे॥जगदालोक्यनिर्मग्नंमनोमननकर्दमे॥१॥ मनोमेभ्रमतीवेदंसंभ्रमश्चोपजा यते॥ गात्राणिपरिकंपंतेपत्राणीवजरत्तरोः॥ २॥ अनाप्तोत्तमसंतोषधैर्योत्संगाकुलामतिः॥ शून्यास्पदाबिभेतीहबालेवाल्पबलेश्वरा ॥ ३ ॥ विकल्पेभ्योलुठंत्येताश्चांतःकरणवृत्तयः॥ श्वभ्रेभ्यइवसारंगास्तुच्छालंबविडंबिताः॥ ४॥

र्सगतःसमुच्चयोदृष्टइत्यर्थाद्वाइवार्थलाभः ॥ द्रुतंशीघ्रमाकलय्यविचार्य ॥ २३ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेवै० एकोनत्रिंशःसर्गः ॥ २९ ॥ ॥ ७ ॥ स्वचित्तोद्वेगमेवेहहेतुभिःसंप्रकाशयन् ॥ तन्निरासायविश्रांत्यैप्रार्थयत्युपदेशनम् ॥ १ ॥ स्वचित्तोद्वेगमेवहेतुभिःप्रपंचयन्विश्रांतिहेतुतत्त्वोपदेशमेवविस्तरेणप्रार्थयति ॥ एव मित्यादिना ॥ एवमुक्तप्रकारैरनर्थशतैःसंकटेनिबिडितेअर्थात्संसारांधकूपस्यकोटरेच्छिद्रेजगज्जीवजातंनिर्मग्नमालोक्यमनोमननमत्रचिंतातल्लक्षणेकर्दमेनिमग्नंममेतिशेषः ॥ ॥ १ ॥ संभ्रमोभयम् ॥ जरत्तरोर्जीर्णवृक्षस्य ॥ २ ॥ नआप्तउत्तमसंतोषोधैर्यलक्षणोमातुरुत्संगोययासामतिःशिशुस्थानीयाबिभेति ॥ अल्पबलोरक्षणासमर्थईश्वरःपतिर्य स्याःसाबालास्त्रीयथारण्यादौबिभेतितद्वत् ॥ ३ ॥ तुच्छैरालंबैर्विषयैर्विडंबितावंचिताअंतःकरणवृत्तयोविकल्पेभ्योविक्षेपदुःखेभ्योविक्षेपदुःखानिप्राप्नुम् ॥ क्रियार्थोपपदस्य चकर्मणिस्थानिनइतिकर्मणिचतुर्थी ॥ लुठंतिगच्छंतिदुःखगर्त्तेपतंतीतियावत् ॥ यथासारंगामृगास्तुच्छलंबमानतृणादिवंचिताःश्वभ्रेषुपतंतितद्वत् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रहेतुमाह ॥ अविवेकेति ॥ नविद्यतेविवेकोयेषांपुरुषाणांतदास्पदास्तदाश्रिताश्चक्षुरादयोयनःकष्टेसंसारस्थानएवरूढाश्चिरपरिचयेनदृढवासितानतुसत्पदेपरमार्थवस्तुनीत्यर्थः ॥ ५ ॥ जीवएवेश्वरःपतिस्तस्मिन्नायत्तानिबद्धा ॥ अवस्थितिमुपरमम् ॥ यथेप्सितंविषयंदेशंच ॥ यातिप्राप्नोति ॥ ६ ॥ वस्तूनिविषयान्पर्णादींश्चविवेकहिमोपघाताच्च जंतीरसावशेषात्कानिचिद्बिभ्रती ॥ रसोप्यस्यपरंदृष्ट्वानिवर्त्ततइतिभगवद्वचनाद्विनात्मदर्शनंरसानिवृत्तेः ॥ मार्गशीर्षस्यांतःपौषारंभः ॥ ७ ॥ तामंतरालावस्थामेवक्लेशावहांस्वस्यप्रपंचयति ॥ अपहस्तितेति ॥ उक्ताचित्तस्यानवस्थितिरस्थिरता हस्तादपगमिताःसर्वेसांसारिकाःपारमार्थिकाश्चार्थाःसुखानियस्मिंस्तद्यथास्यात्तथाआस्थिता ॥ तथाचोभयभ्रंशःसंपन्नइतिभावः ॥ यतआत्मानंमांसंसारस्थितिःस्वविवेकमात्रेणार्द्धप्रबोधादर्द्धमुत्सृज्यार्द्धंचगृहीत्वावस्थितेत्यर्थः ॥ ८ ॥ अंतरवष्टंभआत्मतत्त्वनिश्चयावलंबनं तेनदरिद्रातद्रहिताआत्मतत्त्वनिश्चयेसंशयितेतियावत् ॥ मेमतिश्छिन्नवृक्षस्यमूलेनस्थाणुनाकर्त्रायथामंदांधकारेस्थाणुर्वाचोरोवेतिसत्यासत्यकोटित्वाच्चलिताचलितेनसंशये

अविवेकास्पदाभ्रष्टाःकष्टेरूढानसत्पदे॥ अंधकूपमिवापन्नावराकाश्चक्षुरादयः॥५॥ नावस्थितिमुपायातिनचयातियथेप्सितम्॥ चिंताजीवेश्वरायत्ताकांतेवप्रियसद्मनि॥६॥ जर्जरीकृत्यवस्तूनित्यजंतीबिभ्रतीतथा॥ मार्गशीर्षांतवल्लीवधृतिर्विधुरतांगता॥७॥ अपहस्तितसर्वार्थमनवस्थितिरास्थिता॥ गृहीत्वोत्सृज्यचात्मानंभवस्थितिरवस्थिता॥८॥ चलिताचलितेनांतरवष्टंभेनमेमतिः॥ दरिद्राछिन्नवृक्षस्यमूलेनेवविडंब्यते॥९॥ चेतश्चंचलमाभोगिभुवनांतर्विहारिच॥ नसंभ्रमंजहातीदंस्वविमानमिवामरः॥१०॥ अतोऽतुच्छमनायासमनुपाधिगतभ्रमम्॥ किंतत्स्थितिपदंसाधोयत्रशोकोनविद्यते॥११॥

नहेतुनामतिर्विडंब्यतेतद्वदिदंतत्त्वंस्यादिदंवातत्त्वमितिसंशयेनविडंब्यतइत्यर्थः ॥ अथवाउक्तलक्षणामेमतिर्दोषदर्शनजन्यवैराग्यदार्ढ्याद्रागेभ्यश्चलितेनअपगतसंशयेनमूलाज्ञानानुच्छेदादचलितेनचवासनाप्ररोहेणहेतुनाछिन्नवृक्षस्यमूलेनमूलानुच्छेदात्पुनःप्ररोहोन्मुखेनविडंब्यतेअनुक्रियतइवेत्यर्थः ॥ ९ ॥ स्वतएवचंचलमाभोगिनानाभोगवासनाविस्तीर्णभुवनांतर्विहरणेनचदृढाभ्यस्तचापलमतोबलान्निगृह्यमाणमपितत्त्वज्ञानावष्टंभाभावात्संभ्रमंचापलंनजहाति ॥ विमानपक्षेआभोगिनानाभोगसामग्रीपूर्णम् ॥१० अतुच्छंपरमार्थसत्यं जन्ममरणायासरहितं देहाद्युपाधिशून्यं भ्रमहेतूच्छेदाद्गतभ्रमं स्थितिपदंविश्रांतिस्थानम् ॥ यत्रगत्वोयत्प्राप्य ॥ ११ ॥

१ एतट्टीकानुरोधेनमूलेसाधोइत्यस्यस्थानेगत्वेतिपाठोपेक्षितइतिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंयमिवसर्वेषुदृष्टादृष्टफलारंभेषु ॥ परास्तत्परास्तदनुकूलालौकिकवैदिकव्यवहारपराएवेत्यर्थः ॥ १२ ॥ संसारपंकेनपुण्यपापरूपेणशोकमोहादिनाच ॥ १३ ॥ १४ ॥ विषयाभोगाविषयवेषाभोगिनःसर्पाः ॥ भंगुरौनश्वरौकुटिलौचाकारविभवौयेषाम् ॥ सर्पपक्षेविभवोविषसामर्थ्यम् ॥ भव्यतांमंगलताम् ॥ १५ ॥ मृदिताविलोडिता ॥ कलंकाः कामादयःकर्दमशैवलादयश्च ॥ प्रसादंनैर्मल्यम् ॥ शेमुषीप्रज्ञासैवसरसीमहत्सरः ॥ दक्षिणापथेमहांतिसरांसिसरस्यइत्युच्यंतइ तिमहाभाष्योक्तेः ॥ १६ ॥ निवहेप्रवाहरूपे ॥ १७ ॥ परदुःखादावात्मवत्स्वदुःखादौतृणवत् ॥ अंतर्दृष्ट्याआत्मवत्बहिर्दृष्ट्यातृणवत् ॥ कलयन्पश्यन् ॥ मनसोमन्मथंकामादिवृत्तिम् ॥ १८ ॥ महापुरुषंजीवन्मुक्त

सर्वारंभसमारूढाःसुजनाजनकादयः॥ व्यवहारपराएवकथमुत्तमतांगताः॥ १२ ॥ लग्नेनापिकिलांगेषुबहुधाबहुमानद॥ कथंसंसारपंकेनपुमानिहनलिप्यते॥ १३ ॥ कांदृष्टिंसमुपाश्रित्यभवंतोवीतकल्मषाः॥ महांतोविचरंतीहजीवन्मुक्तामहाशयाः॥ १४ ॥ लोभयंतोभयायैवविषयाभोगभोगिनः॥ भंगुराकारविभवाःकथमायांतिभव्यताम्॥ १५ ॥ मोहमातंगमृदिताकलंककलितांतरा॥ परंप्रसादमायातिशेमुषीसरसीकथम्॥ १६ ॥ संसारएवनिवहेजनोव्यवहरन्नपि॥ नबंधंकथमाप्नोतिपद्मपत्रेपयोयथा॥ १७ ॥ आत्मवत्तृणवच्चेदंसकलंकलयन्जनः॥ कथमुत्तमतामेतिमनोमन्मथमस्पृशन्॥ १८ ॥ कंमहापुरुषंपारमुपायातंमहोदधेः॥ आचारेणानुसंस्मृत्यजनोयातिनदुःखिताम्॥ १९ ॥ किंतत्स्याद्युचितंश्रेयःकिंतत्स्याद्युचितंफलम्॥ वर्त्तितव्यंचसंसारेकथंनामासमंजसे ॥ २० ॥ तत्त्वंकथयमेकिंचिद्येनास्यजगतःप्रभो॥ वेद्मिपूर्वापरंधातुश्चेष्टितस्यानवस्थितेः॥ २१ ॥ हृदयाकाशशशिनश्चेतसोमलमार्जनम्॥ यथामेजायतेब्रह्मंस्तथानिर्विघ्नमाचर॥ २२ ॥ किमिहस्याद्युपादेयंकिंवाहेयमथेतरत्॥ कथंविश्रांतिमायातुचेतश्चपलमद्रिवत्॥ २३ ॥ केनपावनमंत्रेणदुःसंसृतिविषूचिका॥ शाम्यतीयमनायाससमायासशतकारिणी॥ २४ ॥ कथंशीतलतामंतरानंदतरुमंजरीम्॥ पूर्णचंद्रइवाक्षीणांभृशमासादयाम्यहम्॥ २५ ॥ प्राप्यांतःपूर्णतांपूर्णोनशोचामियथापुनः॥ संतोभवंतस्तत्त्वज्ञास्तथेहोपदिशंतुमाम्॥ २६ ॥

म् ॥ महदत्राज्ञानंतल्लक्षणादुदधेः ॥ आचारेणचरित्रेणानुलक्षीकृत्यस्मृत्वातद्वदेवस्मृत्वाआचर्येत्यर्थः ॥ १९ ॥ उचितमनश्वरत्वात्प्राप्तुंयोग्यम् ॥ श्रेयोमोक्षः ॥ फलंकर्मोपासनादेः ॥ २० ॥ येनउपदेशेन ॥ अनवस्थितेःअव्यवस्थितस्य ॥ असमस्थितेरितिपाठेविषमस्थितेः ॥ धातुश्चेष्टितस्यजगतः ॥ पूर्वापरमाद्यंतयोरवशिष्टंवस्तु ॥ २१ ॥ चेतसः साभासांतःकरणस्य ॥ मलमज्ञानम् ॥ २२ ॥ इतरत्अहेयमनुपादेयंच ॥ २३ ॥ रोगाणांपापमूलत्वात्तन्निरासद्वारापावनेनपवनदोषोपशमनहेतुनावा ॥ २४ ॥ आनंदतरोर्मंजरीमिवस्थितांशीतलताम् ॥ भृशंदेशिकपरिच्छेदशून्याम् ॥ अक्षीणांकालिकपरिच्छेदशून्यामितियावत् ॥ २५ ॥ २६ ॥

---

१ अव्ययमेतत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनंदपदेप्रधानविश्रांतिरात्यंतिकंस्थैर्यंतेनरिक्तंशून्यम् ॥ कदर्थयंतिपीडयंति ॥ २७ ॥ ॥ इतिश्रीवासिष्ठ० त्रिंशत्तमःसर्गः ॥ ३० ॥ ॥ ७ ॥ ॥ संसारेर्जीवितंप्रावृड्घनदुर्जीवितोपमम् ॥ येनसौख्यपदंयातिसउपायोत्रपृच्छयते ॥ १ ॥ करिष्यमाणप्रश्नोपोद्घातत्वेनसंसारेजीवितंप्रावृड्घनत्वेनकल्पयति ॥ प्रोच्चेत्यादिषड्भिः ॥ सर्वेषांसमम्यंतानांकउपायइत्यादिभिःसंबंधः ॥ प्रोच्चःप्रांशुः ॥ लंबोलंबमानोंबुकणइवभंगुरे ॥ यद्यपिहेमंतेप्येतदस्तितथापिवर्षास्वासारपातादाशुतरभंगुरतेतिविशेषः ॥ ईशानःशिवस्तद्भूषणशीतांशुःकलामात्रशेषइवमृदुन्यल्पेदुर्लक्ष्यइतियावत् ॥ वर्षासुचंद्रएवदुर्लक्ष्यस्तत्रापिकलामात्रशेषःसुतरामितिभावः ॥ इदमप्यायुषएवविशेषणम् ॥ कुत्सितेल्पेवादेहेदेहके ॥ १ ॥ केदारेषुशालिक्षेत्रेषु ॥ कोणोत्रमध्यभागःसइवभंगुरेअस्थिरेदेहकेइतिपूर्वेणसंबंधः ॥ सुहृदांमित्राणांसुजनानांआप्तबंधुजनानांसंगमएववागुरावत्प्रद्धोलताप्रतानवलयः ॥ सद्गतिमार्गनिरोधकत्वात् ॥ २॥ वासनालक्षणेनपुरोवातेनवलितेआवेष्टितेमोहोग्रमिहिकामेघेइत्यन्वयः ॥ मिहिकातुषारोमेघानामारंभावस्था ॥ घनंनिरंतरम् ॥ गर्जनंसामान्यतःस्फूर्जनंत्वशनिपातपर्यंतमित्यपौनरुक्त्यम् ॥ ३ ॥ लोलेचंचले ॥ कलापिनिमयूरे ॥ आस्फोटःकलहःकलिकापुटभेदश्च ॥ ४ ॥ सर्वभूतान्येवाखवः ॥ वर्षासुबहुजंतुभक्षणान्मार्जाराणांबलातिशयःप्रसिद्धः ॥ स्यंदोजलप्रवाहः ॥ कुतोभूमितोऽपिशब्दान्नभस्तश्च ॥ कुतोप्यतर्कितस्थानादितिवा ॥ ५ ॥ आरण्यकवातवर्षादिपीडानिवृत्तौछत्रच्छदिःकटादिरुपायःरसगुटिकौषधलेपादिनाद्भुतंनिर्दृष्टिदूरदेशेगतिः संकटोत्तारकमंत्रदेवतादेश्चिंता गिरिगुहादेःसमाश्रयोवासाधनानियथालोकेप्रसिद्धानितथाअत्रापिपृच्छयंते ॥ अशुभमेवोदर्कऔत्तरकालिकंफलंयस्यास्तथाविधानभवेत् ॥ ६ ॥ सुधियस्तपोज्ञानशक्त्यूर्जितबुद्धयोभवादृशास्तुच्छमतिफल्गवपियद्वस्तुरम्यतांननयंतिनेतुमसमर्थाइतियावत् ॥ तदेतत्पृथिव्यांमनुष्यादिषुदिविदेवेषुवानास्ति ॥ यतस्त्रिशंकोस्तादृशोगुरुशापोप्याकल्पभोग्यस्वर्गपरिणतःशुनःशेपस्यचमृत्युर्दीर्घायुष्यपर्यवसितइतिभावः ॥ ७ ॥

अनुत्तमानंदपदप्रधानविश्रांतिरिक्तंसततंमहात्मन् ॥ कदर्थयंतीहभृशंविकल्पाःश्वानोवनेदेहमिवाल्पजीवम् ॥ २७ ॥ ॥ इ० वासिष्ठम० वा० दे० मो० वै० प्रयोजनकथनंनामत्रिंशत्तमःसर्गः ॥ ३० ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ प्रोच्चवृक्षचलत्पत्रलंबांबुलवभंगुरे ॥ आयुषीशानशीतांशुकलामृदुनिदेहके ॥ १ ॥ केदारविरटद्भेककंठत्वक्कोणभंगुरे ॥ वागुरावलयेजंतोःसुहृत्सुजनसंगमे ॥ २ ॥ वासनावातवलितेकदाशातडितिस्फुटे ॥ मोहोग्रमिहिकामेघेघनंस्फूर्जतिगर्जति ॥ ३ ॥ नृत्यत्युत्तांडवंचंडेलोलेलोभकलापिनि ॥ सुविकासिनिसास्फोटेत्यनर्थकुटजद्रुमे ॥ ४ ॥ क्रूरेकृतांतमार्जारेसर्वभूताखुहारिणि ॥ अश्रांतस्यंदसंचारेकुतोप्युपरिपातिनि ॥ ५ ॥ कउपायोगतिःकावाकाचिंताकःसमाश्रयः ॥ केनेयमशुभोदर्कानभवेज्जीविताटवी ॥ ६ ॥ नतदस्तिपृथिव्यांवादिविदेवेषुवाक्वचित् ॥ सुधियस्तुच्छमप्येतद्यन्नयंतिनरम्यताम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीरंध्रंनिरंतरंदुःखकलनयाआकुलःअतएवनीरसः ॥ सुस्वादुतांसरसताम् ॥ मूढतांविनामूढतानिरासद्वारा ॥ कथंकेनोपायेनसुस्वादुतामेतीत्यर्थः ॥ ८ ॥ सर्वदुःखनिदानभूता याआशायाःप्रसिद्धस्वभावप्रतिकूलोविपाकःपूर्णकामतासएवक्षीरस्नानम् ॥ उपैतिसंसारइतिशेषः ॥ पुष्पैःशुभ्रेणरम्येणमधुनावसंतेन ॥ ९ ॥ कामेनकलंकितान्मनश्चंद्रमसः ॥ तेनविद्वदनुभवप्रसिद्धेनकेनक्षालनेनापमृष्टकामादिमलाअमृतद्युतिराह्लादचंद्रिकाउदेतीत्यन्वयः ॥ १० ॥ दृष्टासंसारस्यगतिरनर्थपर्यवसानलक्षणायेन दृष्टादृष्टेऐहिकामुष्मिकभोगैर्वैराग्यबोधदार्ढ्याभ्यांविनाशितवताकेनमहापुरुषेणेवव्यवहर्त्तव्यमस्माभिस्तमुदाहरेतिशेषः ॥ केनैवेतिपाठेव्यवहारेणेतिशेषः ॥ ११ ॥ १२ ॥ धीरवर्येतिसंबोधनम् ॥

अयंहिदग्धसंसारोनीरंध्रकलनाकुलः ॥ कथंसुस्वादुतामेतिनीरसोमूढतांविना ॥ ८ ॥ आशाप्रतिविपाकेनक्षीरस्नानेनरम्यताम् ॥ उपैतिपुष्पशुभ्रेणमधुनेववसुंधरा ॥ ९ ॥ अपमृष्टमलोदेतिक्षालनेनामृतद्युतिः ॥ मनश्चंद्रमसःकेनतेनकामकलंकितात् ॥ १० ॥ दृष्टसंसारगतिनादृष्टादृष्टविनाशिना ॥ केनेवव्यवहर्त्तव्यंसंसारवनवीथिषु ॥ ११ ॥ रागद्वेषमहारोगाभोगपूगाविभूतयः ॥ कथंजंतुंनबाधंतेसंसारार्णवचारिणम् ॥ १२ ॥ कथंचधीरवर्याग्नौपततापिनदह्यते ॥ पावकेपारदेनेवरसेनरसशालिना ॥ १३ ॥ यस्मात्किलजगत्यस्मिन्व्यवहारक्रियाविना ॥ नस्थितिःसंभवत्यब्धौपतितस्याजलायथा ॥ १४ ॥ रागद्वेषविनिर्मुक्तासुखदुःखविवर्जिता ॥ कृशानोर्दाहहीनेवशिखानास्तीहसत्क्रिया ॥ १५ ॥ मनोमननशालिन्याःसत्तायाभुवनत्रये ॥ क्षयोयुक्तिंविनानास्तिब्रूततामलमुत्तमाम् ॥ १६ ॥ व्यवहारवतोयुक्त्यादुःखंनायातिमेयया ॥ अथवाव्यवहारस्यब्रूततांयुक्तिमुत्तमाम् ॥ १७ ॥ तत्कथंकेनवाकिंवाकृतमुत्तमचेतसा ॥ पूर्वंयेनैतिविश्रामंपरमंपावनंमनः ॥ १८ ॥ यथाजानासिभगवंस्तथामोहनिवृत्तये ॥ ब्रूहिमेसाधवोयेननूनंनिर्दुःखतांगताः ॥ १९ ॥

अग्नौअग्निवद्दाहकेसंसारे ॥ रसोज्ञानामृतंतेनशालिना ॥ १३ ॥ ननुयदिव्यवहाराद्दुःखंतर्हिसंत्यज्यतांतत्राह ॥ यस्मादिति ॥ व्यवहाराणांक्रियाःसंपादनानिविना ॥ अब्धौपतितस्यजातस्यमत्स्यादेर्यथाअजलास्थितिर्नसंभवतितद्वत् ॥ १४ ॥ नन्वस्तुदुर्व्यवहारेदुःखंसत्क्रियायांतुनतत्संभावनेत्याशंक्याह ॥ रागेति ॥ १५ ॥ तिष्ठतुबाह्यव्यवहारोमनश्चांचल्यमेवपरंदुःखमतस्तच्चिकित्सैववक्तव्येत्याह ॥ मनइति ॥ मनसोमननंविषयावलंबस्तच्छालिन्येवसत्ताविषयावलंबक्षयएवमनःसत्ताक्षयःसचसर्वविषबाधकतत्त्वबोधहेतुयुक्त्युपदेशंविनानास्त्यतस्तांयुक्तिमलमत्यर्थंयावद्बोधोदयंब्रूतउपदिशंत्वित्यर्थः ॥ १६ ॥ १७ ॥ तत्युक्त्यामोहनिरसनंकेनवापूर्वंकृतंकथंकेनप्रकारेणकृतंतेनकिंवाप्राप्तंतत्त्वंयथाजानासितथाब्रूहीत्युत्तरेणसंबंधः ॥ १८ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तादृशयुक्त्यलाभेस्वस्यदेहत्यागांतंप्रायोपवेशनमेवनजीवनव्यवहारादयइत्याह ॥ अथवेत्यादिसप्तभिः ॥ २० ॥ स्वयमेवविचार्यवानाप्नोमिचेत्तर्हि ॥ २१ ॥ २२ ॥ २३ ॥ मौनेवागादिसर्वव्यवहाराभावे ॥ लिपिकर्मसुचित्रक्रियासु ॥ अर्पितोलिखितः ॥ २४ ॥ सन्निवेशमवयवसंस्थानरूपम् ॥ २५ ॥ नमेइदमितिशेषः ॥ अन्योपिनमे ॥ अस्नेहोनिस्तैलः ॥२६॥ शीतकरश्चंद्रः ॥ इतिउक्तवान्सन्महतांगुरूणांवसिष्ठादीनांपुरतस्तूष्णींबभूव ॥ यथाकेकारवमुक्तवान्नीलकंठोमयूरोघनानांपुरतस्तूर्ष्णीभवतितद्वत् ॥२७॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०एकत्रिंशत्तमःसर्गः ॥ ३१ ॥ रामवाक्यंश्रुतवतांवर्ण्यतेभूरिविस्मयः ॥ नराणाममराणांचपुष्पवर्षश्चखाच्युतः ॥ १ ॥ स्वविवेकसम्य

अथवातादृशीयुक्तिर्यदिब्रह्मन्नविद्यते॥ नवक्तिममवाकश्चिद्विद्यमानामपिस्फुटम्॥२०॥ स्वयंचैवनचाप्नोमितांविश्रांतिमनुत्तमाम्॥ तदहंत्यक्तसर्वेहोनिरहंकारतांगतः॥ २१ ॥ नभोक्ष्येनपिबाम्यंबुनाहंपरिदधेंबरम्॥ करोमिनाहंव्यापारंस्नानदानाशनादिकम्॥ २२॥ नचतिष्ठामिकार्येषुसंपत्स्वापद्दशासुच॥ नकिंचिदपिवांछामिदेहत्यागादृतेमुने॥ २३॥ केवलंविगताशंकोनिर्ममोगतमत्सरः॥ मौनएवेहतिष्ठामिलिपिकर्मस्विवार्पितः॥ २४॥ अथक्रमेणसंत्यज्यप्रश्वासोच्छ्वाससंविदः॥ संनिवेशंत्यजामीममनर्थंदेहनामकम्॥२५॥ नाहमस्यनमेनान्यःशाम्याम्यस्नेहदीपवत्॥ सर्वमेवपरित्यज्यत्यजामीदंकलेवरम्॥ २६॥ ॥श्रीवाल्मीकिरुवाच॥ ॥इत्युक्तवानमलशीतकराभिरामोरामोमहत्तरविचारविकासिचेताः॥ तूष्णींबभूवपुरतोमहतांघनानांकेकारवंश्रमवशादिवनीलकंठः॥ २७॥ ॥ इत्यार्षेवा०वा०दे०मो०वै०राघवप्रश्नोनामएकत्रिंशत्तमःसर्गः॥ ३१॥ ॥श्रीवाल्मीकिरुवाच॥ ॥वदत्येवंमनोमोहविनिवृत्तिकरंवचः॥ रामेराजीवपत्राक्षेतस्मिन्राजकुमारके॥ १ ॥ सर्वेबभूवुस्तत्रस्थाविस्मयोत्फुल्ललोचनाः॥ भिन्नांबरादेहरुहैर्गिरःश्रोतुमिवोद्धुरैः॥ २ ॥ विरागवासनापास्तसमस्तभववासनाः॥ मुहूर्त्तमम्रतांभोधिवीचीविलुलिताइव ॥ ३॥ तागिरोरामभद्रस्यतस्यचित्रार्पितैरिव॥ संश्रुताःश्रृणुकैरंतरानंदपदपीवरैः॥ ४॥

ग्विचारमूलमिदंश्रीरामवचनजातंस्वतोविचारासमर्थानांमुमुक्षूणामुपदेशरूपत्वादादराभ्यासाभ्यामुपादेयतममितिसूचनायप्रशंसमानस्तदुपर्यपिबादरायणःसंभवादितिन्यायसिद्धंदेवादीनामपिवक्ष्यमाणब्रह्मविद्याधिकारंदर्शयितुंतत्कृतांश्रीरामवाक्यप्रशंसांतत्समागममहोत्सवंचवर्णयितुमुपक्रमते ॥ वदत्येवमित्यादिना ॥ रामेएवंवदतिसतितत्रस्थाःसर्वेवक्ष्यमाणविस्मयरोमांचादिविशिष्टाबभूवुरित्युत्तरत्रान्वयः ॥ १ ॥ उक्तारामगिरःश्रोतुमुद्धुरैरुत्सारितजाड्यभारैरुत्थितैरितियावत् ॥ देहरुहैरोमभिर्भिन्नांबराश्छिद्रितवस्त्राइवेत्युत्प्रेक्षा ॥ २ ॥ विरागवासनयाअपास्तासमस्ताभवहेतुरागद्वेषादिवासनायेषाम ॥ ३ ॥ श्रृणुकैःश्रवणसमर्थैः ॥ आनंदस्यपदेनलक्ष्मणापीवरैःपुष्टैः ॥ ४ ॥ ॥५२॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५ ॥ पर्श्वादयोदेशविशेषास्तद्राजादयःपारशवादयः ॥ पर्श्वादित्वादण् ॥ ६ ॥ ७ ॥ वातायनंगवाक्षः ॥ ८ ॥ विटंकःसौधाग्रकपोतपालिका ॥ ९ ॥ १० ॥ देवेशादिक्प तयः ॥ श्रुताइतिसर्वत्रसंबध्यते ॥ ११ ॥ रघुकुलमेवाकाशोनिर्मलत्वात्तस्यशशांकेपूर्णचंद्रे ॥ पूर्णेहिशशोलक्ष्यतेतर्हिकलंकितापिस्यादित्याशंक्याह ॥ शशिसुंदरेइति ॥ सौं दर्यातिशयलाभायपूर्णतोपलक्षणार्थंशशोपादानंनस्वार्थमितिभावः ॥ १२ ॥ सिद्धग्रहणंमुमुक्षुदेवयोनिमात्रोपलक्षणम् ॥ सार्थःसंघः ॥ १३ ॥ द्वंद्वंमिथुनम् ॥ मुदिताःसंतु

वसिष्ठविश्वामित्राद्यैर्मुनिभिःसंसदिस्थितैः ॥ जयंतधृष्टिप्रमुखैर्मंत्रिभिर्मंत्रकोविदैः ॥ ५ ॥ नृपैर्दशरथप्रख्यैःपौरैःपारशवादिभिः ॥ सा मंतैराजपुत्रैश्चब्राह्मणैर्ब्रह्मवादिभिः ॥ ६ ॥ तथाभृत्यैरमात्यैश्चपंजरस्थैश्चपक्षिभिः ॥ क्रीडामृगैर्गतस्पंदैस्तुरंगैस्त्यक्तचर्वणैः ॥ ७ ॥ कौस ल्याप्रमुखैश्चैवनिजवातायनस्थितैः ॥ संशांतभूषणारावैरस्पंदैर्वनितागणैः ॥ ८ ॥ उद्यानवल्लीनिलयैर्विटंकनिलयैरपि ॥ अक्षुब्धपक्ष ततिभिर्विहंगैर्विरतारवैः ॥ ९ ॥ सिद्धैर्नभश्चरैश्चैवतथागंधर्वकिन्नरैः ॥ नारदव्यासपुलहप्रमुखैर्मुनिपुंगवैः ॥ १० ॥ अन्यैश्चदेवदेवेशवि द्याधरमहोरगैः ॥ रामस्यताविचित्रार्थामहोदारागिरःश्रुताः ॥ ११ ॥ अथतूष्णींस्थितवतिरामेराजीवलोचने ॥ तस्मिन्रघुकुलाकाश शशांकेशशिसुंदरे ॥ १२ ॥ साधुवादगिरासार्धंसिद्धसार्थसमीरिता ॥ वितानकसमाव्योम्नःपौष्पीवृष्टिःपपातह ॥ १३ ॥ मंदारकोशवि श्रांतभ्रमरद्वंद्वनादिनी ॥ मधुरामोदसौंदर्यमुदितोन्मदमानवा ॥ १४ ॥ व्योमवातविनुन्नेवतारकाणांपरंपरा ॥ पतितेवधरापीठेस्वर्ग स्त्रीहसितच्छटा ॥ १५ ॥ वृष्यमूककचन्मेघलवावलिरिवच्युता ॥ हैयंगवीनपिंडानामीरितेवपरंपरा ॥ १६ ॥ हिमवृष्टिरिवोदारामुक्ताहा रचयोपमा ॥ ऐंदवीरश्मिमालेवक्षीरोर्मीणामिवाततिः ॥ १७ ॥ किंजल्कांभोजवलिताभ्रमद्भृंगकदंबका ॥ सीत्कारगायदामोदिमधु रानिललोलिता ॥ १८ ॥ प्रभ्रमत्केतकीव्यूहाप्रस्फुरत्कैरवोत्करा ॥ प्रपतत्कुंदवलयाचलत्कुवलयालया ॥ १९ ॥ आपूरितांगणरसागृहा च्छादनचत्वरा ॥ उद्ग्रीवपुरवास्तव्यनरनारीविलोकिता ॥ २० ॥

ष्टाः ॥ उन्मदाअस्वाधीनचित्ताः ॥ १४ ॥ विनुन्नापातिता ॥ हसितच्छटाहास्यकांतिः ॥ १५ ॥ वृष्यावर्षणशीलामूकागर्जनवर्जिताविद्युद्भिःकचंतोदीप्तायेमेघास्तेषांलवाव लिर्लेशसमूहः ॥ १६ ॥ १७ ॥ किंजल्कःकेसरस्तत्प्रधानैरंभोजैर्वलितासहिता ॥ जनानांस्पर्शसुखाभिनयसीत्कारध्वनिभिर्गायतामधुरेणमंदत्वात्सुखस्पर्शेनानिलेनलोलि ताईषच्चालिता ॥ १८ ॥ व्यूहादयःसमूहार्थाः ॥ १९ ॥ रसाभूमिः ॥ आपूरितानिचत्वरांतानियया ॥ पुरवास्तव्यैःपुरवासिभिः ॥ २० ॥

---

१ इदंचिंत्यम् ॥ पर्श्वादिगणेपरशुशब्दस्याभावात्तस्याकृतिगणत्वाभावाच्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरभ्रमतएवोत्पलसंकाशंयद्व्योमततःपतितावृष्टिर्वर्णितपुष्पवृष्टिः ॥ स्मयोविस्मयः ॥ २१ ॥ मुहूर्तस्यचतुर्थभागोर्द्धघटीतावत्कालंपपात ॥ हकिल ॥ २२ ॥ आपूरिताःस भातद्गतालोकाश्चयेन ॥ शांतेउपरतेसति ॥ २३ ॥ दिवमभितःस्वर्गस्यसर्वप्रदेशेषु ॥ श्रुतिरसायनंश्रोत्रामृतंवेदसारभूतंवा ॥ २४ ॥ नगोचराअर्थायस्मिंस्तथाविधम् ॥ २५ ॥ बतेत्येतादृशवाक्यश्रवणहीनंजन्मव्यर्थमितिखेदे ॥ २६ ॥ अधिगतायाःप्राप्तायाःजातिकुलचारित्र्यधर्माभिज्ञतादिभिरुत्तमतायाःसार्थक्यापादनात्पदंत्राणंलक्षणभूतंवायद्वा क्यजातंकथितवांस्तेनवयंप्रतिबोधिताः ॥ स्वर्गादिसुखानामप्यसारतामितिभावः ॥ २७ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेवै०द्वात्रिंशःसर्गः ॥ ३२ ॥ ॥ ७ ॥

निरभ्रोत्पलसंकाशव्योमवृष्टिरनाकुला ॥ अदृष्टपूर्वासर्वस्यजनस्यजनितस्मया ॥ २१ ॥ अदृश्यांबरसिद्धौघकरोत्करसमीरिता ॥ सा मुहूर्त्तचतुर्भागंपुष्पवृष्टिःपपातह ॥ २२ ॥ आपूरितसभालोकेशांतेकुसुमवर्षणे ॥ इमंसिद्धगणालापंशुश्रुवुस्तेसभागताः ॥ २३ ॥ आ कल्पंसिद्धसेनासुभ्रमद्भिरभितोदिवम् ॥ अपूर्वमिदमस्माभिःश्रुतंश्रुतिरसायनम् ॥ २४ ॥ यदनेनकिलोदारमुक्तंरघुकुलेंदुना ॥ वीत रागतयातद्धिवाक्पतेरप्यगोचरम् ॥ २५ ॥ अहोबतमहत्पुण्यमद्यास्माभिरिदंश्रुतम् ॥ वचोराममुखोद्भूतंमहाह्लादकरंधियः ॥ २६ ॥ उपशमामृतसुंदरमादरादधिगतोत्तमतापदमेषयत् ॥ कथितवानुचितंरघुनंदनःसपदितेनवयंप्रतिबोधिताः ॥ २७ ॥ इत्यार्षेवा०वा० दे०मो०वै०नभश्चरसाधुवादोनामद्वात्रिंशःसर्गः ॥ ३२ ॥ ॥ ७ ॥ ॥ सिद्धाऊचुः ॥ ॥ पावनस्यास्यवचसःप्रोक्तस्यरघुकेतु ना ॥ निर्णयंश्रोतुमुचितंवक्ष्यमाणंमहर्षिभिः ॥ १ ॥ नारदव्यासपुलहप्रमुखामुनिपुंगवाः ॥ आगच्छताश्वविघ्नेनसर्वएवमहर्षयः ॥ २ ॥ घतामःपरितःपुण्यामेतांदाशरथींसभाम् ॥ नीरंध्रांकनकोद्योतांपद्मिनीमिवषट्पदाः ॥ ३ ॥ ॥ श्रीवाल्मीकिरुवाच ॥ ॥ इत्युक्तेसा समस्तैवव्योमवासनिवासिनी ॥ तांपपातसभांतत्रदिव्यामुनिपरंपरा ॥ ४ ॥

अवतारोत्रसिद्धानांसभायामुपवर्ण्यते ॥ यथोचितोपविष्टैस्तैरामवाक्यप्रशंसनम् ॥ १ ॥ सिद्धैःकृतांरामवाक्यादिप्रशंसामेवमहीकुर्वंस्तेषांप्रश्ननिर्णयोत्तरशुश्रूषांसभाप्रवेशा दिकंचवर्णयितुमुपक्रमते ॥ सिद्धाऊचुरित्यादिना ॥ रघुशब्देनतद्वंशोलक्ष्यतेतस्यकेतुवत्ख्यापकेनेत्यर्थः ॥ १ ॥ आशुआगच्छतअविघ्नेनश्रोतुमितिशेषः ॥ श्रेयांसिबहुवि घ्नानीतिनविलंबनमुचितमितिभावः ॥ २ ॥ नीरंध्रांपूर्णामर्थात्संपदेतिगम्यते ॥ अतएवकनकैरुद्योतामुत्कृष्टप्रकाशाम् ॥ पद्मिनीपक्षेकेसरश्रियांकनकैरिवोद्योतमानाम् ॥ ३ ॥ व्योमवासोनिवासस्थानंयेषांविमानानांतेषुनिवासिनी ॥ विस्तीर्णायांसभायांयत्रप्रदेशेरामादयस्तत्र ॥ ४ ॥

---

१ सिद्धैरितिशेषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामेववर्णयत्यष्टभिः ॥ अग्रेप्रमुखस्थानेस्थितम् ॥ नउत्स्त्रष्टारणद्वीणायेनतंमुनीश्वरंनारदम् ॥ पयसाजलेनपीनःपूर्णोघनइवश्यामंव्यासमेवचअंतरातयोरंतरालेइत्यर्थः ॥ अंतरांतरेणयुक्तेइतिषष्ठ्यर्थेद्वितीया ॥ भृग्वंगिरःपुलस्त्यादिमुनिनायकैर्मंडिताभूषितेत्युत्तरेणसंबंधः ॥ ५॥ भृग्वादीनितेषांनामानि ॥ ६ ॥ परामर्शैनसंघर्षणेनदुःसंस्थानानिविसंष्ठुलानिमृगाजिनानियस्याः ॥ ७ ॥ तेजःप्रसरेणपाटलाश्वेतरक्ता ॥८॥९ ॥ अन्याप्रसिद्धविलक्षणा ॥ अतिकालेनचिरेणसंभृताएकत्रसंचिता ॥ १० ॥ व्यासएकतःनारदो

अग्रस्थितमनुत्स्त्रष्टरणद्वीणंमुनीश्वरम् ॥ पयःपीनघनश्यामंव्यासमेवकिलांतरा ॥ ५ ॥ भृग्वंगिरःपुलस्त्यादिमुनिनायकमंडिता ॥ च्यवनोद्दालकोशीरशरलोमादिमालिता ॥ ६ ॥ परस्परपरामर्शदुःसंस्थानमृगाजिना ॥ लीलाक्षमालावलयासुकमंडलुधारिणी ॥ ७ ॥ तारावलिरिवव्योम्नितेजःप्रसरपाटला ॥ सूर्यावलिरिवान्योन्यंभासिताननमंडना ॥ ८ ॥ रत्नावलिरिवान्योन्यंनानावर्णकृतांगिका ॥ मुक्तावलिरिवान्योन्यंकृतशोभातिशायिनी ॥ ९ ॥ कौमुदीवृष्टिरन्येवद्वितीयेवार्कमंडली ॥ संभृतेवातिकालेनपूर्णचंद्रपरंपरा ॥ १० ॥ ताराजालइवांभोदोव्यासोयत्रविराजते ॥ तारौघइवशीतांशुर्नारदोत्रविराजते ॥ ११ ॥ देवेष्विवसुराधीशःपुलस्त्योत्रविराजते ॥ आदित्यइवदेवानामंगिरास्तुविराजते ॥ १२ ॥ अथास्यांसिद्धसेनायांपतंत्यांनभसोरसाम् ॥ उत्तस्थौमुनिसंपूर्णातदादाशरथीसभा ॥ १३ ॥ मिश्रीभूताविरेजुस्तेनभश्वरमहीचराः ॥ परस्परवृतांगाभाभासयंतोदिशोदश ॥ १४ ॥ वेणुदंडावृतकरालीलाकमलधारिणः ॥ दूर्वांकुराक्रांतशिखाःसचूडामणिमुर्द्धजाः ॥ १५ ॥ जटाजूटैश्चकपिलामौलिमालितमस्तकाः ॥ प्रकोष्ठगाक्षवलयामल्लिकावलयान्विताः ॥ १६ ॥ चीरवल्कलसंवीताःस्रक्कौशेयावगुंठिताः ॥ विलोलमेखलापाशाश्चलन्मुक्ताकलापिनः ॥ १७ ॥ वसिष्ठविश्वामित्रौतान्पूजयामासतुःक्रमात् ॥ अर्घ्यैःपाद्यैर्वचोभिश्चसर्वानेवनभश्चरान् ॥ १८ ॥ वसिष्ठविश्वामित्रौतेपूजयामासुरादरात् ॥ अर्घ्यैःपाद्यैर्वचोभिश्चनभश्चरमहागणाः ॥ १९ ॥ सर्वादरेणसिद्धौघंपूजयामासभूपतिः ॥ सिद्धौघोभूपतिंचैवकुशलप्रश्नवार्त्तया ॥ २० ॥ तैःस्तैःप्रणयसंरंभैरन्योन्यंप्राप्तसत्क्रियाः ॥ उपाविशन्विष्टरेषुनभश्चरमहीचराः ॥ २१ ॥ वचोभिःपुष्पवर्षेणसाधुवादेनचाभितः ॥ रामंतपूजयामासुःपुरःप्रणतमास्थितम् ॥ २२ ॥

न्यतइतिशेषः ॥ ११ ॥ ॥ १२ ॥ रसांसीमाभूमिम् ॥ पतंत्यांप्रविशंत्याम् ॥ १३ ॥ परस्परंवृताभिर्मिश्रिताभिरंगानामाभाभिःकांतिभिः ॥ १४ ॥ लीलाकमलधारिणःकेचिदितियथायोग्यंशेषः ॥ १५ ॥ मौलावग्रभागेमालितंमालाभिर्वेष्टितंमस्तकंशिरोयेषाम् ॥ प्रकोष्ठःकरमूलम् ॥ १६ ॥ चीरवल्कलयोरवांतरजात्याभेदः ॥ कलापिनोभूषिताः ॥ कर्मधारयादप्यतिशायनेत्राइनिः ॥ १७ ॥ १८ ॥ १९ ॥ कुशलप्रश्नसहितयावार्त्तयातत्कालोचितकथया ॥ २० ॥ प्रणयःप्रीतिस्तदुचितैर्दानमानादिसंरंभैः ॥ सत्क्रियापूजा ॥ विष्टरेष्वासनेषु ॥ २१ ॥ वचोभिरुचितकथालापैः ॥ साधुवादेनप्रशंसनेन ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रतेषांमध्ये ॥ असौरामः ॥ विश्वामित्रादयःअथआस्थिताउपविष्टाइतिसप्रमेनसंबंधः ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ ज्ञातमवश्यंज्ञेयमात्मतत्त्वंज्ञेयमात्रंवायैः ॥ नायकाःश्रेष्ठाः ॥ २७ ॥ अनूचानाआचार्याद्विधिवदधीतसांगवेदाः ॥ आनमितानन्नंविनयेन ॥ २८ ॥ तदुक्तीरेवप्रपंचयत्यहोइत्यादिभिरष्टादशभिः ॥ कल्याणैर्वक्ष्यमाणषोडशगुणैःशालिनीशोभमाना ॥२९॥ विचार्येत्थमेवेतिव्यवस्थापिताःपरिनिष्ठितावक्तव्यार्थायस्मिन् ॥ सबोधंपदार्थतत्त्वबोधसहितंनकल्पनामात्रव्यवस्थापितार्थमितियावत् ॥ अतएवविद्वत्सभोचितम् ॥ स्फुटंव्यक्तवर्णम् ॥ उदारमुत्कृष्टबह्वाशयगर्भम् ॥ प्रियंहृदयानंदनम ॥ आर्याणांपूज्यानामर्हमुचितम् ॥ अविह्वलंचित्तचांचल्यप्रयुक्तदोषशून्यम् ॥ स्फुटमर्थतः ॥ ३० ॥ अभिव्यक्तानिव्याकरणपरिशोधितानिपदानियस्मिन् ॥ इष्टंहितम् ॥ स्पष्टंयस्तादिदोषरहितम् ॥ तुष्टिमत्तृष्णाक्षयप्रयुक्तसंतोषवत् ॥ ३१ ॥ सर्वे

आसांचक्रेचतत्रासौराज्यलक्ष्मीविराजितः ॥ विश्वामित्रोवसिष्ठश्चवामदेवोथमंत्रिणः ॥२३॥ नारदोदेवपुत्रश्चव्यासश्चमुनिपुंगवः ॥ मरीचिरथदुर्वासामुनिरांगिरसस्तथा ॥ २४ ॥ क्रतुःपुलस्त्यःपुलहःशरलोमामुनीश्वरः ॥ वात्स्यायनोभरद्वाजोवाल्मीकिर्मुनिपुंगवः ॥ २५ ॥ उद्दालकऋचीकश्चशर्यातिश्च्यवनस्तथा ॥ २६ ॥ एतेचान्येचबहवोवेदवेदांगपारगाः ॥ ज्ञातज्ञेयामहात्मानआस्थितास्तत्रनायकाः ॥ २७ ॥ वसिष्ठविश्वामित्राभ्यांसहतेनारदादयः ॥ इदमूचुरनूचानाराममानमिताननम् ॥ २८ ॥ अहोबतकुमारेणकल्याणगुणशालिनी ॥ वागुक्तापरमोदारावैराग्यरसगर्भिणी ॥ २९ ॥ परिनिष्ठितवक्तव्यंसबोधमुचितंस्फुटम् ॥ उदारंप्रियमार्यार्हमविह्वलमविस्फुटम् ॥ ३० ॥ अभिव्यक्तपदंस्पष्टमिष्टंस्पष्टंचतुष्टिमत् ॥ करोतिराघवप्रोक्तंवचःकस्यनविस्मयम् ॥ ३१ ॥ शतादेकतमस्यैवसर्वोदारचमत्कृतिः ॥ ईप्सितार्थार्पणैकांतदक्षाभवतिभारती ॥ ३२ ॥ कुमारत्वांविनाकस्यविवेकफलशालिनी ॥ परंविकासमायातिप्रज्ञाशरलताततः ॥ ३३ ॥ प्रज्ञादीपशिखायस्यरामस्येवहृदिस्थिता ॥ प्रज्वलत्यसमालोककारिणीसपुमान्स्मृतः ॥ ३४ ॥

भ्योवक्तृभ्यःसर्वांशेपिवाउदाराउत्कृष्टाचमत्कृतिःसहृदयास्वादनीयंसौष्ठवंयस्यास्तथाविधाअतएवईप्सितस्याभिप्रेतस्यार्थस्यार्पणेबोधनेएकांतदक्षानियमेनसमर्थाभारतीवाणीवाग्मिशतादपिमुख्येषुमुख्यतमस्यैवविकासंस्फूर्त्तिमायातिनसर्वेषाम् ॥ पंचमीविभक्तेइतिशताद्विभज्यनिर्धारितेषुतमपानिर्धारणांतरप्रत्ययात्सर्वोदारतोपपत्तिः ॥ ३२ ॥ प्रज्ञाशरइवसूक्ष्मार्थभेदिनीप्रज्ञाशरःसैवलतावल्ली ॥ विकासंविचारवैराग्यपुष्पपल्लवाभ्यामुपचयम् ॥ शकारपाठेप्रकाशम् ॥ ३३ ॥ असममनन्यसाधारणमालोकंपदार्थतत्त्वप्रकाशंकरोतिअसमस्याध्यस्तदेहेंद्रियादिसाम्याद्विविक्तस्यात्मनआलोकनंकरोतितच्छीलावा ॥ सएवपुमान् ॥ अन्यस्तुपुरुषार्थासमर्थःस्त्रीप्रायइतिभावः ॥ ३४ ॥

१ श्लोकार्धेन २ अबाधितमर्थतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राममनोरथसंपत्तेरवश्यकर्त्तव्यतांतत्प्रशंसनेनोत्तमाधिकारप्राप्तिख्यापनमुखेनोक्त्वातदुपेक्षणेदोषमाह ॥ सकलेति ॥ सकललोकानांसर्वजनानांचमत्कृतिर्गुणशीलविनया
दिभिःसमुचितप्रष्टव्यरहस्योद्घाटनेनचानंदस्तत्कारिणोराघवचेतसोप्यभिमतंतत्त्वजिज्ञासालक्षणोमनोरथोयद्विनोफलत्यस्मदाद्यभिज्ञोपदेशेनेतिशेषः ॥ नोइतिनञ्पर्यायोनि

सकललोकचमत्कृतिकारिणोप्यभिमतंयदिराघवचेतसः ॥ फलतिनोतदिमेवयमेवहिस्फुटतरंमुनयोहतबुद्धयः ॥ ४६ ॥ ॥ इत्यार्षेश्री
मद्वाल्मीकिविरचितेवासिष्ठमहारामायणेदेवदूतोक्तेद्वात्रिंशत्साहस्र्यांसंहितायांमोक्षोपायेवैराग्यप्रकरणेनभश्चरमहीचरसंमेलनंना
मत्रयस्त्रिंशःसर्गः ॥ ३३ ॥ ॥ वैराग्यप्रकरणंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

पातः ॥ तर्त्तर्हिहतबुद्धयोदुर्बुद्धयः ॥ अभिज्ञतानिष्फलैवस्यादितिभावः ॥ तस्मादवश्यमुपदेष्टव्यमितिसिद्धम् ॥ ४६ ॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रें
द्रसरस्वतीपूज्यपादप्रशिष्येणश्रीगंगाधरेंद्रसरस्वतीपूज्यपादशिष्येणश्रीमदानंदबोधेंद्रसरस्वत्याख्यभिक्षुणाविरचितेश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेवैराग्यप्रकरणेत्रय
स्त्रिंशःसर्गः ॥ ३३ ॥ ॥ वैराग्यप्रकरणंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तभज्ञाहीनाजनारक्तादियंत्रात्मकदेहात्मबुद्धित्वात्तान्येवशब्दस्पर्शादिपदार्थाननुकर्षंत्युपभुंजते अन्यश्चसचेतनआत्मानास्तीतिचार्वाकैतैवमेतेषांफलितेतिभावः॥ अथवा यदितेषुसचेतनःस्यादवश्यंपुरुषार्थेयतेतैवयतोनयतंतेतस्माद्घटकुड्यादिवदचेतनाएवतेइतिनिंदार्थमपक्कवः॥ ३५ ॥ येनविमृशंतितेपशवः ॥ ३६ ॥ अयंरामः॥ अरयःकामादयस्तेषांमर्दनः ॥ ३७ ॥ अनुत्तमःसर्वोत्कृष्टश्चमत्कारोमाधुर्यविशेषोयेषांतथाविधानितत्त्वसाक्षात्कारफलानियेषु ॥ सहकारद्रुमाआम्रवृक्षाः ॥ ३८ ॥ स्वबुद्धिकृते

रक्तमांसास्थियंत्राणिबहून्यतितराणिच॥ पदार्थानभिकर्षंतिनास्तितेषुसचेतनः॥ ३५॥ जन्ममृत्युजरादुःखमनुयांतिपुनःपुनः॥ विमृशंतिनसंसारंपशवःपरिमोहिताः॥ ३६॥ कथंचित्क्वचिदेवैकोदृश्यतेविमलाशयः॥ पूर्वापरविचाराहोंयथायमरिमर्दनः॥ ३७॥ अनुत्तमचमत्कारफलाःसुभगमूर्त्तयः॥ भव्याहिविरलालोकेसहकारद्रुमाइव ॥ ३८॥ सम्यग्दृष्टजगद्यात्रास्वविवेकचमत्कृतिः॥ अस्मिन्मान्यमतावंतरियमद्यैवदृश्यते॥ ३९॥ सुभगाःसुलभारोहाःफलपल्लवशालिनः॥ जायंतेतरवोदेशेनतुचंदनपादपाः॥ ४०॥ वृक्षाःप्रतिवनंसंतिनित्यंसफलपल्लवाः॥ नत्वपूर्वचमत्कारोलवंगःसुलभःसदा॥ ४१ ॥ ज्योत्स्नेवशीताशशिनःसुतरोरिवमंजरी॥ पुष्पादामोदलेखेवदृष्टारामाच्चमत्कृतिः॥ ४२॥ अस्मिन्नुद्दामदौरात्म्यदैवनिर्माणनिर्मिते ॥ द्विजेंद्राद्ग्धसंसारेसारोत्यत्यंतदुर्लभः॥ ४३ ॥ यतंतेसारसंप्राप्तौयेयशोनिधयोधियः॥ धन्याधुरिसतांगण्यास्तएवपुरुषोत्तमाः॥ ४४॥ नरामेणसमोस्तीहदृष्टोलोकेषुकश्चन॥ विवेकवानुदारात्मानभावीचेतिनोमतिः॥ ४५॥

नैवविवेकेनतत्त्वदर्शनपर्यंताचमत्कृतिः॥ अद्यास्मिन्नेववयसि ॥ तच्चाश्चर्यमितिभावः॥ ३९ ॥ सुभगाःसुंदराः॥ देशेसर्वत्रेतिशेषः ॥ ४० ॥ ४१ ॥ आमोदलेखापरिमलपंक्तिः॥ ४२ ॥ उद्दामंदौरात्म्यंयस्यतथाविधस्यदैवस्यप्राक्तनकर्मणस्तदनुसारिणोविधातुर्वानिर्माणेनसृष्ट्यानिर्मितेरचिते ॥ हेद्विजेंद्राः॥ सारोविवेकेनात्मलाभः॥ ४३॥ ध्यायंतीतिधियःसदातत्त्वचिंतनपराःसंतोयेयतंतेतेधन्याःसतांधुरिगण्याः॥ ४४ ॥ इहसांप्रतंनास्तिप्राङ्नदृष्टोऽग्रेचनभावी ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इदं योगवासिष्ठस्य वैराग्याख्यं प्रथमं प्रकरणं मुंबय्याख्यराजधान्यां
गणपतकृष्णाजीमुद्रायंत्रालये मुद्रितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति योगवासिष्ठे प्रथमं वैराग्य प्रकरणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ योगवासिष्ठे द्वितीयं मुमुक्षुव्यवहारप्रकरणं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ॥ अजमजरममायमेकंनिजसौख्यंलवांचिताखिलानंदम् ॥ हृदिनिहितमात्मसारंनिगमांतामृतरसायनंवंदे ॥ १ ॥ श्रीरामादिवचनमुखेनवर्णितापिसाध नसंपन्नमुमुक्षुभिःकेनक्रमेणव्यवहरद्भिःसंपाद्याकथंचतयातत्त्वविश्रांतिलाभइतिप्रत्येकंविविच्यतेषामुपदेशायद्वितीयंप्रकरणमारभमाणःश्रीवाल्मीकिरुवाच ॥ स्वयंविचारा त्संबुद्धेपित्राचोक्तेप्यविश्वसन् ॥ जनकोक्त्याशुकस्तत्त्वेविश्रांतइतिकीर्त्यते ॥ १ ॥ तत्रादौमंदवैराग्यादिसाधनानांसहसैवाधिकारसंपत्तिभ्रमेणश्रवणादौप्रवृत्तिर्माभूदितिशु काख्यायिकयातत्परिपाकलक्षणानिदर्शयन्नाचार्याद्धैवविद्याविदितासाधिष्ठंप्रापदितिश्रुतेःकुलाचार्यंवसिष्ठंश्रीरामस्योपदेशनायपूर्ववृत्तांतस्मारणतत्त्वोपदेशोपक्रमाभ्यांप्रो त्साहयिष्यन्स्वप्रयोजनसिद्ध्यैवश्रवणायचत्वरमाणोविश्वामित्रएवप्रथममभ्यभाषतेत्याह ॥ इतीति ॥ सभायामागतैःसिद्धैःअग्रगतंपुरःस्थितमधिकारसीम्निस्थितंच ॥ मु ख्याधिकारिणांदौर्लभ्याद्रामेरसज्ञतमत्वाद्वर्त्तिष्यमाणब्रह्मचर्चायांचप्रीत्या ॥ १ ॥ ज्ञेयमज्ञातत्वादवश्यज्ञातव्यम् ॥ सर्वहेयोपादेयरहस्यम् ॥ तथाचसारासारविवेचनपर

श्रीगणेशायनमः॥ अथमुमुक्षुव्यवहारप्रकरणम्॥ ॥श्रीवाल्मीकिरुवाच॥ ॥इतिनादेनमहतावचस्युक्तेसभागतैः॥ राममग्रगतं प्रीत्याविश्वामित्रोऽभ्यभाषत॥ १ ॥ नराघवतवास्त्यन्यज्ज्ञेयंज्ञानवतांवर ॥ स्वयैवसूक्ष्मयाबुद्ध्यासर्वंविज्ञातवानसि॥ २ ॥ केवलंमा र्जनामात्रंमनागेवोपयुज्यते॥ स्वभावविमलेनित्यंस्वबुद्धिमुकुरेतव॥ ३ ॥ भगवद्व्यासपुत्रस्यशुकस्येवमतिस्तव॥ विश्रांतिमात्रमेवां तर्ज्ञातज्ञेयाप्यपेक्षते ॥ ४ ॥ ॥श्रीरामउवाच॥ ॥भगवद्व्यासपुत्रस्यशुकस्यभगवन्कथम्॥ ज्ञेयेप्यादौनविश्रांतंविश्रांतंचधियापु नः॥ ५ ॥ ॥विश्वामित्रउवाच॥ ॥आत्मोदंतसमंरामकथ्यमानमिदंमया॥ शृणुव्यासात्मजोदंतंजन्मनामंतकारणम्॥ ६ ॥ योयं मंजनशैलाभोनिविष्टोहेमविष्टरे॥ पार्श्वेतवपितुर्व्यासोभगवान्भास्करद्युतिः॥ ७ ॥ अस्याभूदिंदुवदनस्तनयोनयकोविदः ॥ शुको नाममहाप्राज्ञोयज्ञोमूर्त्येवसुस्थितः॥ ८ ॥ प्रविचारयतोलोकयात्रामलमिमांहृदि ॥ तवेवकिलतस्यापिविवेकउदभूदयम्॥ ९ ॥ ते नासौस्वविवेकेनस्वयमेवमहामनाः॥ प्रविचार्यचिरंचारुयत्सत्यंतदवाप्तवान्॥ १० ॥

याबुद्ध्यापरमार्थसारभूतमखंडाद्वयचिन्मात्ररूपमात्मतत्त्वमपित्वयाविदितमेवेत्यर्थः ॥ २ ॥ तर्हिकुतोनविश्रांतिस्तत्राह ॥ केवलमिति ॥ मार्जनाअविश्वाससंदेहमालिन्य निराकरणंतावन्मात्रम् ॥ स्वबुद्ध्याविदितेपिप्रमाणाचार्यादिसंवादमंतरेणविश्वासाभावादित्यर्थः ॥ तथाचाहुर्बलवदपिशिक्षितानामात्मन्यप्रत्ययंचेतइति ॥ ३ ॥ भगवतोव्या सस्य ॥ अत्रव्यासशुकौप्राक्तनद्वापरांतजातौगृह्येते ॥ प्रतिद्वापरांतंव्यासावतारभेदप्रसिद्धेः ॥ ४ ॥ ज्ञेयेस्वेनैवविचारेणज्ञातुंशक्येपितत्त्वे ॥ धियागुरूपदेशसंवादिन्याबुद्ध्या ॥ पुनःपश्चाद्विश्रांतम् ॥ भावेक्तः ॥ ५ ॥ आत्मोदंतसमंस्ववृत्तांतसदृशम् ॥ जन्मनामंतोमोक्षः ॥ ६ ॥ अंजनशैलोनीलाद्रिरितिप्रसिद्धोवर्षपर्वतः ॥ निविष्टउपविष्टः ॥ विष्टरे आसने ॥ ७ ॥ नयकोविदःसर्वशास्त्रज्ञः ॥ मूर्त्याशरीरेणयुक्तोयज्ञइवसुस्थितः ॥ ८ ॥ विवेकोविचारः ॥ अयमीदृशः ॥ ९ ॥ यत्परमार्थसत्यमात्मतत्त्वमद्वितीयचिन्मात्ररूपंतद वाप्तवान्ज्ञातवान् ॥ ज्ञानस्यैवतल्लाभत्वात् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविश्रांतीहेतुरविश्वासः ॥ ११ ॥ विररामउपरतंविरक्तमितियावत् ॥ भूरिभंगेभ्योबहुतरविनाशदुःखहेतुभ्यः ॥ धाराभ्यःअवार्षिकजलधाराभ्यः ॥ १२ ॥ कृष्णद्वैपायनं व्यासम् ॥ १३ ॥ परवंचनार्थंकृत्रिमचेष्टितमाडंबरंकथंकेनक्रमेणअभ्युत्थितमुत्पन्नं ॥ कदावाप्रशममत्यंतोच्छेदं ॥ कियत्देशकालपरिमाणतः॥ कस्यसंसारःकिंदेहस्यउतइंद्रियाणामुतमनसःप्राणस्यवाउतसंघातस्यउततदन्यस्यविकारिणोनिर्विकारचिन्मात्रस्यवेतिपप्रच्छेतिपूर्वेणान्वयः ॥ १४ ॥ विदितात्मनाव्यासेनअखिलंवक्तव्यंयथावत्प्रोक्तमित्यन्वयः ॥ १५ ॥ आअज्ञासिषमितिच्छेदः ॥ ननुयद्यत्रप्राकृत्स्यविचारेणैवज्ञातस्यस्मरणार्थोयंआइतिनिपातस्तर्हिवाक्यस्मरणयोरङिदित्यनाङ्त्वान्निपातएकाजनाङितिप्रगृह्यत्वेप्रकृतिभावोन्याय्यः ॥ सत्यम् ॥ तथापिपूर्वंआसमंताद्विशिष्याज्ञासिषमितिधात्वर्थातिशयद्योतकतयाक्रियायोगस्यापिविवक्षितत्वात्तत्रैकशेषादिनाआङोपिसंग्रहा

स्वयंप्राप्तेपरेवस्तुन्यविश्रांतमनाःस्थितः॥ इदंवस्त्विितिविश्वासंनासावात्मन्युपाययौ ॥ ११ ॥ केवलंविरराामास्यचेतोविगतचापलम्॥ भोगेभ्योभूरिभंगेभ्योधाराभ्यइवचातकः॥ १२॥ एकदासोऽमलप्रज्ञोमेरावेकांतसुस्थितम् ॥ पप्रच्छपितरंभक्त्याकृष्णद्वैपायनंमुनिम् ॥ १३ ॥ संसाराडंबरमिदंकथमभ्युत्थितंमुने ॥ कथंचप्रशमंयातिकियत्कस्यकदेतिवा ॥ १४ ॥ इतिपृष्टेनमुनिनाव्यासेनाखिलमात्मजे ॥ यथावदमलंप्रोक्तंवक्तव्यंविदितात्मना ॥ १५ ॥ आज्ञासिषंपूर्वमेतदहमित्यथतत्पितुः॥ सशुकःशुभयाबुद्ध्यानवाक्यंबहुमन्यत ॥ १६ ॥ व्यासोपिभगवान्बुध्वापुत्राभिप्रायमीदृशम् ॥ प्रत्युवाचपुनःपुत्रंनाहंजानामितत्त्वतः ॥ १७ ॥ जनकोनामभूपालोविद्यते वसुधातले ॥ यथावद्वेत्त्यसौवेद्यंतस्मात्सर्वमवाप्स्यसि ॥ १८ ॥ पित्रेत्युक्तःशुकःप्रायात्सुमेरोर्वसुधातले ॥ विदेहनगरींप्रापजनकेनाभिपालिताम् ॥ १९ ॥ आवेदितोसौयाष्टीकैर्जनकायमहात्मने ॥ द्वारिव्याससुतोराजन्शुकोत्रस्थितवानिति ॥ २० ॥ जिज्ञासार्थंशुकस्यासावास्तामेवेत्यवज्ञया ॥ उक्त्वाबभूवजनकस्तूष्णींसप्तदिनान्यथ ॥ २१ ॥ ततःप्रवेशयामासजनकःशुकमंगणम् ॥ तत्राहानिससप्तैवतथैवावसदुन्मनाः ॥ २२ ॥ अथप्रवेशयामासजनकोंतःपुरंशुकम् ॥ राजानदृश्यतेतावदितिसप्तदिनानिच ॥ २३ ॥ तत्रोन्मदाभिःकांताभिर्भोजनैर्भोगसंचयैः ॥ जनकोलालयामासशुकंशशिसमाननम् ॥ २४ ॥

न्निपातएकाजनाङित्यत्रआङ्वर्ज्यइतिप्रसज्यप्रतिषेधपक्षस्वीकारात्प्रतिषेधाश्चबलीयांसोभवंतीतिमहाभाष्योक्तेःप्रगृह्यसंज्ञानिषेधात्संधिःसाधुरेव ॥ अथउपदेशानंतरंशुकस्तत्पितुर्वाक्यंआज्ञासिषमित्यनपूर्वार्थतयाशुभयाबुद्ध्यानबहुमन्यतेत्यन्वयः ॥ १६ ॥ पुत्राभिप्रायंबुध्वातद्बुद्धिमेवानुसरन्प्रत्युवाचनाहंजानामि ॥ उक्तादन्यदितिभावः ॥ १७ ॥ १८ ॥ विदेहानामजनपदास्तेषांनगरींमिथिलाम् ॥ १९ ॥ याष्टीकैर्द्वाःस्थैर्यष्टिधरैः ॥ २० ॥ जनकोपिविदितशुकवृत्तांतःसहसैवोपदेशेव्यासवचनवदवहेलनयातस्याकृतार्थतामाभूदितिशुकस्यवैराग्यादिसाधनानांविश्वासस्यस्थैर्यस्यचजिज्ञासार्थम् ॥ अवज्ञयाउपेक्षया ॥ २१ ॥ अंगणंप्रहांतश्चत्वरम् ॥ उन्मनाःतत्त्वजिज्ञासोत्कंठाविस्तनानादरइतियावत् ॥ २२ ॥ यावद्भोजनादिभिस्त्वंनपूज्यसेतावद्राजानदृश्यतेइतिवादनविशेषेणतत्रांतःपुरेसप्तदिनानिभोगसंचयैर्लालयामासेत्युत्तरेणसंबंधः ॥ २३ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाजकुर्नविचकुः ॥ बद्धपीठंदृढमूलम् ॥ २५ ॥ केवलमित्यवधारणे ॥ भोगानादरयोःसुसमोऽतएवस्वस्थः ॥ तत्रहेतुर्मौनीनिगृहीतवागादींद्रियः ॥ २६ ॥ इत्थंपरीक्षणेनप रिज्ञातस्तत्त्वदर्शनपर्यंतप्रतिष्ठितोविचारवैराग्यादिपरिपाकस्वभावोयस्यतम् ॥ २७ ॥ निःशेषितानिनिरवशेषंकृतानिजगतिप्रसिद्धानिकार्याण्यवश्यकर्त्तव्यानिपरमपुरुषार्थ साधनानियेनतथाविधहेकृतकृत्येत्यर्थः ॥ सर्वसुखलवानामात्मसुखेंतर्भावात्तत्प्राप्त्यैवप्राप्ताऽखिलमनोरथ ॥ २८ ॥ संसारेति ॥ प्राग्व्याख्यातम् ॥ २९ ॥ इतिपृष्टेनजन केनतस्यशुकस्यपित्रापुरापूर्वंयत्प्रोक्तंतदेवकथितमित्यन्वयः ॥ ३० ॥ समुदाहृतंसम्यगुदाहरणोपपत्तिभिर्व्याख्यातम् ॥ ३१ ॥ वाक्यार्थःसर्वोपनिषद्गतमहावाक्यानामर्थः ॥ तत्तात्पर्यनिर्णायकन्यायप्रदर्शनपरेषुसूत्रभाष्यादिशास्त्रेषु ॥ ३२ ॥ स्वस्मिन्नज्ञानोपहितेआत्मनिविविधंकल्पयतीतिविकल्पोनंतकामकर्मवासनाबीजसंभृतंप्रलयसुषुप्त्योः

तेभोगास्तानिदुःखानिव्यासपुत्रस्यतन्मनः ॥ नाजकुर्मंदपवनाबद्धपीठमिवाचलम् ॥ २५ ॥ केवलंसुसमःस्वस्थोमौनीमुदितमानसः ॥ अतिष्ठत्सशुकस्तत्रसंपूर्णइवचंद्रमाः ॥ २६ ॥ परिज्ञातस्वभावंतंशुकंसजनकोनृपः ॥ आनीतंमुदितात्मानमवलोक्यननामह ॥ २७ ॥ निःशेषितजगत्कार्यप्राप्ताऽखिलमनोरथ ॥ किमीप्सितंतवेत्याशुकृतस्वागतमाहतम् ॥ २८ ॥ ॥ श्रीशुकउवाच ॥ ॥ संसाराडंबरमिदंकथमभ्युत्थितंगुरो ॥ कथंप्रशममायातियथावत्कथयाशुमे ॥ २९ ॥ ॥ विश्वामित्रउवाच ॥ ॥ जनकेनेतिपृष्टेनशुकस्यकथितंतदा ॥ तदेवयत्पुराप्रोक्तंतस्यपित्रामहात्मना ॥ ३० ॥ ॥ श्रीशुकउवाच ॥ ॥ स्वयमेवमयापूर्वमेतज्ज्ञातंविवेकतः ॥ एतदेवचपृष्टेनपित्रामेसमुदाहृतम् ॥ ३१ ॥ भवताप्येषएवार्थःकथितोवाग्विदांवर ॥ एषएवचवाक्यार्थःशास्त्रेषुपरिदृश्यते ॥ ३२ ॥ यथायंस्वविकल्पोत्थःस्वविकल्पपरिक्षयात् ॥ क्षीयतेदग्धसंसारोनिःसारइतिनिश्चयः ॥ ३३ ॥

समष्टिव्यष्टिसंस्कारपरिशेषेणाव्याकृतेलीनमनादिजीवभावोपाधिभूतमंतःकरणंतस्मात्प्रलयक्रमविपरीतक्रमेणप्रथमपंचीकृतवियदाद्युत्पत्तिक्रमेणसमष्टिहिरण्यगर्भात्मना ततःपंचीकरणेनविराडात्मनाततोन्नादिक्रमेणव्यष्टिस्थूलदेहात्मनातदंतर्व्यष्टिलिंगात्मनाचोत्थआविर्भूतोमहानर्थरूपोवर्त्तते ॥ सचकर्मोपासनसमुच्चयमात्रानुष्ठानेनाध्यात्मिकव्यष्टिभावपरिच्छेदवासनामात्रक्षयेसमष्टिहिरण्यगर्भभावेनावतिष्ठते॥ श्रवणादिपरिपाकजन्यतत्त्वसाक्षात्कारेणसवासनकार्यकारणाविद्यानाशेतुमूलोच्छेदेनात्यंतमंतःकरणपरिक्षयान्निःशेषंक्षीयते ॥ दग्धशब्दोनिंदायाम् ॥ अथवास्वप्रकाशात्मनिदुःस्थितत्वान्मिथ्यात्वाच्चपूर्वमेवदग्धप्रायोतएवनिःसारःसभूयःसाक्षात्कारप्रलयानलव्याप्तौकथंतिष्ठेदितिभावः ॥ उपरिदग्धतृणवदंतःसारावशेषेणपुनःपुनःप्ररोहशंकावारणायवानिःसारइतिनिश्चयस्तत्त्वविदामितिशेषः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतन्मयास्वयमेवपूर्वंविचारेणपरिज्ञातंयन्तदेवसत्यंकिंतर्हितदचलमसंदिग्धंत्वदियथाभवतितथाब्रूहि ॥ जगत्नानाविषयानिदंव्रातत्त्वंस्यादन्यद्वेत्यविश्वासेनभ्रमताचेतसाभ्रा
म्यमाणोहंत्वत्तस्त्वद्वचनविश्वासादितियावत् ॥ विश्रांतिंतत्रैवस्थैर्यमाप्नोमि ॥ ३४ ॥ अतोऽस्मात्त्वयापरिज्ञानात् ॥ निश्चयोनिश्चेतव्योर्थः ॥ ३५ ॥ तमेवदृढनिश्चयायपुन
राह ॥ अविच्छिन्नेति ॥ ३६ ॥ महात्मनस्तवेतिशेषः ॥ प्राक्भोगेभ्यः ॥ इहास्यांनिश्चयदशायाम् ॥ दृश्यात्दृश्यमात्रात् ॥३७॥ बालापिविषयत्यागशूरत्वान्महावीर॥३८॥
यथातवपूर्णताजातातथातवपितुर्नैतिदार्ढ्यार्थंप्रशंसा ॥ एवमुत्तरत्रापि ॥३९॥४०॥ दृश्येबाह्यविषयेनपतसिदृश्यदर्शनस्यैवसंसारपातत्वात् ॥ उदरमंतरंकुरुतेअथतस्यभयंभव
तीतिश्रुतेः ॥ भ्रांतिर्ज्ञेयांतरसद्भावभ्रमंदृश्यदर्शनभ्रमंवा ॥ ४१ ॥ सपूर्वोक्तोऽविच्छिन्नचिदात्मैकस्त्वमित्येवमनुशिष्टः ॥ सशुकः ॥ स्वच्छेदृश्यमालिन्यशून्ये ॥ ४२ ॥ सात्विक

तत्किमेतन्महाबाहोसत्यंब्रूहिममाचलम् ॥ त्वत्तोविश्रांतिमाप्नोमिचेतसाभ्रमताजगत् ॥ ३४ ॥ ॥ जनकउवाच ॥ ॥ नातःपरतरःक
श्चिन्निश्चयोऽस्त्यपरोमुने॥ स्वयमेवत्वयाज्ञातंगुरुतश्चपुनःश्रुतम्॥३५॥ अविच्छिन्नचिदात्मैकःपुमानस्तीहनेतरत्॥ स्वसंकल्पवशाद्बद्धो
निःसंकल्पश्चमुच्यते॥ ३६॥ तेनत्वयास्फुटंज्ञातंज्ञेयंयस्यमहात्मनः॥ भोगेभ्योविरतिर्जाताद्दृश्याद्वाक्सकलादिह ॥ ३७॥ तवबालम
हावीरमतिर्विरतिमागता॥ भोगेभ्योदीर्घरोगेभ्यःकिमन्यच्छ्रोतुमिच्छसि॥ ३८॥ नतथापूर्णताजातासर्वज्ञानमहानिधेः॥ तिष्ठतस्तप
सिस्फारेपितुस्तवयथातव॥ ३९॥ व्यासादधिकएवाहंव्यासशिष्योसितत्सुतः॥ भोगेच्छातानवेनेहमत्तोप्यत्यधिकोभवान्॥४०॥ प्रा
संप्राप्तव्यमखिलंभवतापूर्णचेतसा॥ नदृश्येपतसिब्रह्मन्मुक्तस्त्वंभ्रांतिमुत्सृज॥४१॥ अनुशिष्टःसइत्येवंजनकेनमहात्मना॥ अतिष्ठत्स
शुकस्तूष्णींस्वच्छेपरमवस्तुनि॥ ४२॥ वीतशोकभयायासोनिरीहश्छिन्नसंशयः॥ जगामशिखरंमेरोःसमाध्यर्थमनिंदितम्॥ ४३॥
तत्रवर्षसहस्राणिनिर्विकल्पसमाधिना॥ दशस्थित्वाशशामासावात्मन्यस्नेहदीपवत्॥४४॥ व्यपगतकलनाकलंकशुद्धःस्वयममलात्म
निपावनेपदेसौ॥ सलिलकणइवांबुधौमहात्माविगलितवासनमेकतांजगाम॥ ४५॥ इतिश्रीवासिष्ठमहारामायणेवाल्मीकीयेदेवदू
तोक्तेमोक्षोपायेमुमुक्षुव्यवहारप्रकरणेशुकनिर्याणंनामप्रथमःसर्गः॥ १॥ देवाधिष्ठितत्वेनविक्षेपहेत्वभावादनिंदितंसमाध्यनुकूलमितियावत् ॥४३॥

शशामविदेहमुक्तोभूत् ॥ ४४ ॥ कलनादृश्योन्मुखताकलंकस्तन्मूलमज्ञानंतदुभयापगमाच्छुद्धः॥ अतएवादृश्यसंचितागामिपुण्यपापाश्लेषविनाशाभ्याममलात्मनिप्रारब्धक
र्मक्षपणादशुद्धदेहादिनिवृत्तेःपावनेपदेपरमात्मवस्तुनि ॥ सलिलकणपक्षेकलनापृथग्भावः ॥ कलंकोनीलमेघसंबंधः ॥ एकतांभेदकोपाध्यपगमेवास्तवमखंडैक्यम्॥ तथाचो
क्तंविष्णुपुराणे ॥ विभेदजनकेऽज्ञानेनाशमात्यंतिकंगते ॥ आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीति॥४५॥ ॥ इतिवा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेप्रथमःसर्गः ॥ १ ॥ ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहरामोपदेशार्थंविश्वामित्रेणधीमता ॥ प्रार्थितस्यवसिष्ठस्यतदुत्साहःप्रकीर्त्यते ॥ १ ॥ शुकाख्यायिकांप्रकृतेयोजयन्रामोपदेशायवसिष्ठंप्रवर्त्तयितुमारभमाणोविश्वामित्रउ
वाच ॥ तस्येत्यादिना ॥ यथायावत्प्रकारमुपयुक्तमुपपत्तियुक्तमुपदेशनमुपयुज्यतेतावदेवतेनवापिउपयुक्तंयुज्यतइतिसंबंधः ॥ उपयुक्तमभूदितिपूर्ववाक्यमात्रशेषतयातुनव्या
ख्येयं ॥ समानवाक्येयुष्मदस्मदादेशविधानेनविरोधात् ॥ १ ॥ उक्तमर्थंसर्वमुनिसंमत्यासमर्थयितुंमुनीश्वराइतितेषांसंबोधनम् ॥ स्वदंतेरोचंते ॥ अस्मैरामाय ॥ रुच्यर्थानांप्री
यमाणइतिसंप्रदानत्वाच्चतुर्थी ॥ २ ॥ ३ ॥ भावनयावासनया ॥ तानवमल्पताम् ॥ ४ ॥ यावद्विषयवासनाक्षीयतेतावतामुच्यते ॥ सर्वथाक्षयेतुसर्वतोमुक्तिरितिभावः ॥ ५ ॥

श्रीविश्वामित्रउवाच ॥ ॥ तस्यव्यासतनूजस्यमलमात्रोपमार्ज्जनम् ॥ यथोपयुक्तंतेरामतावदेवोपयुज्यते ॥ १ ॥ ज्ञेयमेतेनविज्ञातमशे
षेणमुनीश्वराः ॥ स्वदंतेस्मैनयद्भोगारोगाइवसुमेधसे ॥ २ ॥ ज्ञातज्ञेयस्यमनसोनूनमेतद्धिलक्षणम् ॥ नस्वदंतेसमग्राणिभोगवृंदानियत्पु
नः ॥ ३ ॥ भोगभावनयायातिबंधोदार्ढ्यमवस्तुजः ॥ तयोपशांतयायातिबंधोजगतितानवम् ॥ ४ ॥ वासनातानवंराममोक्षइत्युच्यतेबु
धैः ॥ पदार्थवासनादार्ढ्यंबंधइत्यभिधीयते ॥ ५ ॥ स्वात्मतत्त्वाभिगमनंभवतिप्रायशोनृणाम् ॥ मुनेर्विषयवैरस्यंकदर्थाद्धुपजायते ॥ ६ ॥
सम्यक्पश्यतियस्तज्ज्ञोज्ञातज्ञेयःसपंडितः ॥ नस्वदंतेबलादेवतस्मैभोगामहात्मने ॥ ७ ॥ यशःप्रभृतिनायस्मैहेतुनैवविनापुनः ॥ भुवि
भोगानरोचंतेसजीवन्मुक्तउच्यते ॥ ८ ॥ ज्ञेयंयावन्नविज्ञातंतावत्तावन्नजायते ॥ विषयेष्वरतिर्जंतोर्मरुभूमौलतायथा ॥ ९ ॥ अतएवहि
विज्ञातज्ञेयंविद्धिरघूद्वहम् ॥ यदेनंरंजयंत्येतानरम्याभोगभूमयः ॥ १० ॥

अभिगमनमापातज्ञानम् ॥ प्रायशःअल्पश्रवणाद्यायासेनापि ॥अपरोक्षदृक्स्वरूपस्यदृश्यविवेकमात्रेणैवसुपरिचयत्वादितिभावः ॥ कदर्थात्क्लेशात् ॥ ६ ॥ तर्ह्यलंतावताकिंवै
राग्येणतत्राह ॥ सम्यगिति ॥ सम्यक्रागाद्यप्रतिहतंयथास्यात्तथायःपश्यतिसएवतज्ज्ञस्तत्त्वज्ञानजन्याविद्योच्छेदफलभागितिज्ञातज्ञेयःपंडितश्च ॥ आपातदर्शीतुमौर्ख्यान्नपग
मान्नतथेतिभावः ॥ ७ ॥ प्रभृतिग्रहणेनपूजालाभादयोगृह्यंते ॥ हेतुनाउद्देश्येनफलेनविनैव ॥ तथाचनदांभिकभोगत्यागादिष्टसिद्धिरित्यर्थः ॥ ८ ॥ वैराग्यबोधोपरमाणाम
भिवृद्धौपरस्परसहायत्वाज्ज्ञानपरिपाकातिशयेनैवमूलोच्छेदादात्यंतिकरागक्षयइत्याह ॥ ज्ञेयमिति ॥ यावद्यावन्नविज्ञातंतावत्तावद्विषयेष्वरतिर्नजायतइतिव्यतिरेकप्रकर्षाद
न्वयप्रकर्षोलक्ष्यते ॥ रसोप्यस्यपरंदृष्ट्वानिवर्त्ततइतिभगवद्वचनादितिभावः ॥ ९ ॥ भोगभूमयोविषयाः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यद्दिरामस्तत्त्वज्ञस्तर्हिकिमर्थमुपदेशार्थंवक्ष्यमाणावसिष्ठप्रार्थनातत्राह ॥ रामइति ॥ सतोवसिष्ठस्यमुखात् ॥ आप्नोत्येवान्योप्यधिकारीतिशेषः॥ तथाचसर्वोपकारायोपदेशप्रार्थनेत्यर्थः॥ अथवारामोयदंतस्तत्त्वंजानातितद्रामएवविश्वासदार्ढ्याभावादनाप्नप्रायत्र सिष्ठमुखादाकर्ण्यविश्वस्तस्तत्रचित्तविश्रांतिमाप्नोत्येवेत्यर्थः ॥ ११ ॥ तदेवस्फुटमाह ॥ केवलमिति ॥ केवलीभावविश्रांतिर्द्वैतनिरासेअद्वितीयचिन्मात्रपरिशेषम् ॥ शरल्लक्ष्मीपक्षेविश्रमणंनिर्मेघनिर्मलाकाशमात्रपरिशेषम् ॥ खल्वितिनिश्चयेनविश्वासेनेत्यर्थः ॥ १२ ॥ १३ ॥ ननुत्वयैवकुतोनोपदिश्यतेतत्राह ॥ रघूणामिति ॥ रघूपलक्षितानामिक्ष्वाकूणांनराघवाणामेवप्रभुर्नियंता ॥ तदतिक्रमेत्रिशंकुप्रभृतीनांदंडदर्शनादिति

रामोयदंतर्जानातितद्वस्त्वित्येवसन्मुखात्॥ आकर्ण्यचित्तविश्रांतिमाप्नोत्येवमुनीश्वराः॥ ११॥ केवलंकेवलीभावविश्रांतिसमपेक्षते॥ रामबुद्धिःशरल्लक्ष्मीःखलुविश्रमणंयथा॥ १२॥ अत्रास्यचित्तविश्रांत्यैराघवस्यमहात्मनः॥ युक्तिंकथयतुश्रीमानवसिष्ठोभगवानयम्॥ १३॥ रघूणामेषसर्वेषांप्रभुःकुलगुरुःसदा॥ सर्वज्ञःसर्वसाक्षीचत्रिकालामलदर्शनः॥ १४॥ वसिष्ठभगवन्पूर्वंकच्चित्स्मरसियस्त्वयम्॥ आवयोर्वैरशांत्यर्थंश्रेयसेचमहाधियाम्॥ १५॥ निषधाद्रेर्मुनीनांचसानौसरलसंकुले॥ उपदिष्टंभगवताज्ञानंपद्मभुवाबहु॥ १६॥ येनयुक्तिमताब्रह्मन्ज्ञानेनेयंहिवासना॥ सांसारीनूनमायातिशमंश्यामेवभास्वता॥ १७॥ तदेवयुक्तिमज्ज्ञेयंरामायांतेनिवासिने॥ ब्रह्मन्नुपदिशाशुत्वंयेनविश्रांतिमेष्यति॥ १८॥ कदर्थनाचनैवैषारामोहिगतकल्मषः॥ निर्मलेमुकुरेवक्त्रमयत्नेनैवबिंबति॥ १९॥ तज्ज्ञानंसचशास्त्रार्थस्तद्वैदग्ध्यमनिंदितम्॥ सच्छिष्यायविरक्तायसाधोयदुपदिश्यते॥ २०॥ अशिष्यायाविरक्तायययत्किंचिदुपदिश्यते॥ तत्प्रयात्यपवित्रत्वंगोक्षीरंश्वदृताविव॥ २१॥ वीतरागभयक्रोधानिर्मानागलितैनसः॥ वदंतित्वादृशायत्रतत्रविश्राम्यतीहधीः॥ २२॥

भावः ॥ सर्वज्ञःशास्त्रतः ॥ सर्वस्यसाक्षीतत्त्वतोयोगबलेनविभागशश्चसाक्षाद्द्रष्टा ॥ साक्षाद्द्रष्टरिसंज्ञायामितीनिः ॥ तत्रहेतुस्त्रिष्वपिकालेष्वमलंमोहातिरस्कृतंदर्शनसाधनंमनोयस्य ॥ १४ ॥ कच्चिदितिहितप्रश्ने ॥ महाधियांमुनीनामित्युत्तरेणान्वयः ॥ १५॥ सानौप्रस्थदेशे ॥ सरलावृक्षविशेषाः ॥ बहुश्रेष्ठमुपपत्तितोवाबहु ॥ १६॥ येनज्ञानेन ॥ युक्तिरुपपत्तिस्तदेकताननताच ॥ १७ ॥ १८ ॥ अल्पफलोबहुप्रयासःकदर्थना॥ १९॥ नेयंकदर्थनाप्रत्युताभिज्ञतादयादिसार्थक्यापादनादभ्युदयएवेत्याह ॥ तदिति ॥ विदग्धःपंडितस्तद्भावोवैदग्ध्यम् ॥ अनिंदितंप्रशस्तम् ॥ पात्रेष्वप्रतिपत्तौवैयर्थ्यान्निंदितमेवस्यादितिभावः ॥ २० ॥ दृतिश्चर्मभस्त्रा ॥ २१ ॥ रागादीनामविद्यामूलकत्वात्तदुच्छेदादेववीतरागादयः ॥ गलितैनसोनिष्पापाः ॥ इहास्यामुपदेशदशायामेवअस्मिन्नित्यपरोक्षेआत्मतत्त्वेवा ॥ २२ ॥

॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गाधिपुत्रेणविश्वामित्रेण ॥ अपूजयन्प्राशंसन् ॥ २३ ॥ यतोयंब्रह्मणःपुत्रोब्रह्मेवमहातेजस्त्वादिगुणविशिष्टोऽतोदिव्यानामपिमहर्षीणांपुरतोब्रह्मेवोवाचेतिभावः ॥ २४ ॥ तत्त्वज्ञानांलक्षणभूतानमानित्वादिगुणान्स्वाचरितैःशिक्षयन्निवविनयोक्तिभिःप्रार्थितार्थनिरूपणंप्रतिजानीते ॥ मुनेइत्यादिना ॥ आदिशसिआज्ञापयसि ॥ २५ ॥ ज्ञानोदये अज्ञाननिवृत्तौनविलंबइतिद्योतनायाश्विति ॥ २६ ॥ यज्ज्ञानंपुरापद्मजन्मनाप्रोक्तंतत्सर्वमखंडितमविच्छिन्नंग्रंथतोर्थतश्चस्मरामि ॥ अथवाअखंडितमपरिच्छिन्नमतएवसर्वं पूर्णंयज्ज्ञानस्वरूपमात्मतत्त्वंतदखंडितंनिरंतरंस्मरामिअनुसंदधे ॥२७॥ असौमहात्मावसिष्ठइतिनिगदितवान्व्यक्तंप्रतिज्ञातवान्सन्यथाशूरोनटोवाभूषणाच्छादनायुधादिपरि

इत्युक्तेगाधिपुत्रेणव्यासनारदपूर्वकाः ॥ मुनयस्तेतमेवार्थंसाधुसाध्वित्यपूजयन् ॥ २३ ॥ अथोवाचमहातेजाराज्ञःपार्श्वेव्यवस्थितः ॥ ब्रह्मेवब्रह्मणःपुत्रोवसिष्ठोभगवान्मुनिः ॥ २४ ॥ वसिष्ठउवाच ॥ ॥ मुनेयदादिशसिमेतदविघ्नंकरोम्यहम् ॥ कःसमर्थःसमर्थोपिसतां लंघयितुंवचः ॥ २५ ॥ अहंहिराजपुत्राणांरामादीनांमनस्तमः ॥ ज्ञानेनापनयाम्याशुदीपेनेवनिशातमः ॥ २६ ॥ स्मराम्यखंडितंसर्वंसंसारभ्रमशांतये ॥ निषधाद्रौपुराप्रोक्तंयज्ज्ञानंपद्मजन्मना ॥ २७ ॥ ॥ श्रीवाल्मीकिरुवाच ॥ ॥ इतिनिगदितवानसौमहात्मापरिकरबंधगृहीतवक्तृतेजाः ॥ अकथयदिदमज्ञतोपशांत्यैपरमपदैकविबोधनंवसिष्ठः ॥ २८ ॥ ॥ इतिश्रीवासिष्ठम० वा० दे० मो० मुमुक्षु० विश्वामित्रवाक्यंनामद्वितीयःसर्गः ॥ २ ॥ ॥ ७ ॥ श्रीवसिष्ठउवाच ॥ ॥ पूर्वमुक्तंभगवतायज्ज्ञानंपद्मजन्मना ॥ सर्गादौलोकशांत्यर्थंतदिदंकथयाम्यहम् ॥ १ ॥

करबंधनेनोद्युक्तःशोभतेतथैववशिष्यप्रबोधानुरंजनोपायदृष्टांतोपाख्यानप्रमाणतर्काद्यनुसंधानोत्साहादिपरिकरबंधनेनगृहीतंस्वीकृतंवक्तॄणांव्याख्यातॄणांतेजःशोभाविशेषो येनतथाविधःसन्सर्वेषांजगतामज्ञतायाउपशांत्यैमूलोच्छेदायेदंवक्ष्यमाणंपरमपदस्यैकंमुख्यंविबोध्यतेयेनतद्विबोधनंशास्त्रमकथयत् ॥ २८ ॥ ॥ इतिश्रीमद्वासिष्ठमहारा० तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेद्वितीयःसर्गः ॥ २ ॥ ॥ ७ ॥ ॥ स्थूलाद्विजगदारोपनिरासाभ्यांप्रसाध्यते ॥ प्रत्यक्चिदात्माविषयोरामशंकाकृतिच्छलात् ॥ १ ॥ इत्थंप्राक्तनंसर्वंप्रतिसंधायविस्तरेणतद्वक्तुकामःसद्गुरुस्मरणरूपंमंगलमाचरन्विद्यासंप्रदायशुद्धिंचदर्शयन्शिष्यावधानायपुनःप्रतिजानीते ॥ पूर्वमिति ॥ लोकानां शांतिःसर्वसंसारदुःखोपशांतिस्तदर्थंयज्ज्ञानंज्ञानसाधनंशास्त्रमुक्तंतदेवेदंकथयामिनान्यदितिसंप्रदायशुद्धिरुक्ता ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थंप्रतिज्ञयाअवधापितोरामःसत्यामन्यजिज्ञासायांतदवधानायोगात्सूचीकटाहन्यायेनप्रथममुत्पन्नःसंशयस्तदपनोदंप्रार्थयमानउवाच ॥ कथयिष्यसीति ॥ एतत्संशय निरस्त्यनंतरमितिभावः ॥ इमंव्यासस्यशिष्टलोकवत्जीवनदर्शनाच्छुकस्यचविदेहमुक्तिश्रवणात्संजातम् ॥ २ ॥ तमेवदर्शयति ॥ पितेति ॥ नन्वघटितोयंसंशयः ॥ न ॥ आत्यंतिकदुःखोच्छेदोपलक्षितनिरतिशयानंदस्वप्रकाशात्ममात्रपरिशेषरूपत्वाद्विदेहमुक्तिरेवज्ञानफलंतच्चेत्सर्वज्ञस्यापिव्यासस्यनसंपन्नंज्ञानस्यानित्यफलत्वंप्राप्तम् ॥ किंचयदि ज्ञानेनाज्ञानंनिःशेषमुच्छिन्नंतर्हिभृग्वादिवत्जीवनासंभवउपादाननाशेकार्यावस्थानायोगात् ॥अजीवनेचब्रह्मविद्याप्रवर्त्तकाभावात्संप्रदायोच्छेदः॥अथनोच्छिन्नंतर्हिनिर्मोक्षःसिद्धएव॥ नहिकर्मैवज्ञानमदृष्टद्वारामरणोत्तरंफलतितस्यकालत्रयेप्यखंडात्मनावस्थितस्येत्यविधेयत्वादितिनजीवन्मुक्तिसिद्धिरितिभावः॥३॥ इतिपृष्टोभगवान्वसिष्ठोयावद्रामोबंधस्याविद्यकत्वमविद्यास्वरूपंतत्साक्ष्यपरिच्छिन्नसर्वाधारचित्स्वरूपंचनजानातितावज्जीवन्मुक्तौनविश्वसितीतिप्रथमंतद्व्युत्पाद्यपश्चात्समाधास्यामीतिमन्यमानस्तद

श्रीरामउवाच॥ ॥कथयिष्यसिविस्तीर्णांभगवन्मोक्षसंहिताम्॥ ॥इमंतावत्क्षणंजातंसंशयंमेनिवारय॥२॥ पिताशुकस्यसर्वज्ञो गुरुर्व्यासोमहामतिः॥ विदेहमुक्तोनकथंकथंमुक्तःसुतोस्यसः॥ ३॥ ॥श्रीवसिष्ठउवाच॥ ॥परमार्कप्रकाशांतस्त्रिजगत्त्रसरेणवः॥ उत्पत्योत्पत्यलीनायेनसंख्यामुपयांतिते ॥ ४ ॥ वर्त्तमानाश्चयाःसंतित्रैलोक्यगणकोटयः॥ शक्यंतेताश्चसंख्यातुंनैवकाश्चनकेनचित् ॥ ५॥ भविष्यंतिपरांभोधौजगत्सर्गतरंगकाः॥ तांश्चवैपरिसंख्यातुंसाकथैवनविद्यते॥६॥ ॥श्रीरामउवाच॥ ॥याभूतायाभविष्यंत्योजगत्सर्गपरंपराः॥ तासांविचारणायुक्तावर्त्तमानास्तुकाइव॥ ७॥

र्थंसुखबोधत्वात्साक्षिणिस्थूलप्रपंचपरंपराध्यारोपंदर्शयति ॥ परमार्केत्यादिश्लोकत्रयेण ॥ नतत्रसूर्योभातिनचंद्रतारकं येनसूर्यस्तपतितेजसेद्धइत्यादिश्रुतेःसूर्यादिसर्वजगदवभासकत्वात्परमार्कःपरमात्मासएवचित्प्रकाशस्तदंतःपूर्वेयेत्रिजगदुपलक्षितानंतकोटिब्रह्मांडलक्षणास्त्रसरेणवउत्पत्योत्पत्यस्थित्वास्थित्वालीनास्तेसंख्यांनोपयांतिसंख्यातुंन शक्यंतइत्यर्थः॥एतेनव्यासादयोप्यसंख्याताउत्पद्यंतइतिसूचितम् ॥४॥ वर्त्तमानाःसंतीति ॥ आरब्धापरिसमाप्तत्वंवर्त्तमानता ॥ उक्तिकालसंबंधोस्तितेतिनपौनरुक्त्यम्॥ ५॥परःपरमात्मासएवांभोधिः ॥ येभविष्यंतितान् ॥ साप्रसिद्धा ॥ कथावाक्प्रवृत्तिः॥ अनेनत्रैकालिकजगदुत्पत्त्याद्याधारभूतेपरमात्मनिजगदध्यारोपोदर्शितः ॥ ६ ॥ पृष्टमर्थमुपेक्ष्यान्यद्वदनोगुरोर्निगूढाशयःस्वेनसम्यग्विदितइतिगुरोरुत्साहायस्वकौशलंसूचयन्रामस्तेषुसर्गेषुस्वयंकंचिद्विशेषमुवाच ॥ याइति ॥ यद्यपिवर्त्तमानाःसर्गाःप्रातिस्विकरूपेणा संख्येयास्तथापितेकालतःकूलद्वयदर्शनाद्भूतभविष्यत्सर्गापेक्षयान्यूनसंख्याइतिविदिताएवेतिभावः ॥ काइवकिंभूताइवोतभविष्यंतइव॥नोभयसाम्यमपीतिनतत्वंक्तावेषांविचारणायुक्तेत्यर्थः ॥ तथाचानंतानामागंतूनांतेषामुपादानमात्मतत्त्वमनंतमेकमनागंतुकंचिद्रूपंत्वयादर्शितमितिमयाविदितमितिभावः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंनिगूढाशयपरिज्ञानेनतत्रविशेषोक्त्याप्रोत्साहितःपूर्वोक्तस्थूलप्रपंचस्यमिथ्यात्वबोधनायसूक्ष्मभूतानामेवपंचीकरणेनस्थूलीभावावभासात्सूक्ष्मप्रपंचमात्रतेतिदर्शयिष्यन् श्रीवसिष्ठउवाच ॥ तिर्यगिति ॥ तिर्य्यंञ्चःपशुपक्ष्यादयःपुरुषामनुष्यादेवाःप्रसिद्धाआदिःप्रधानोयस्यप्राणिनिकायस्यतस्यमध्येयोयस्मिन्नेवप्रदेशेयदैवविनश्यतिम्रियतेसो सौप्रत्यगात्मातस्मिन्नेवप्रदेशेतदैवेदंवक्ष्यमाणंजगत्त्रयंप्रपश्यतिनान्यत्रनवाचिरेणेत्यर्थः ॥ ८ ॥ सकिमुपकरणःकिंस्वरूपश्चपश्यतितत्राह ॥ आतिवाहिकेति ॥ अतिवहनमति वाहोधूमार्चिरादिमार्गाभिमानिदेवैःपरलोकप्रापणंतत्रसाधुरातिवाहिकस्तन्नाम्नाचित्तशरीरेणचित्ताहंकारमनोबुद्धिदशेंद्रियप्राणघटितेनवासनामयेनसूक्ष्मशरीरेणस्वहृद्येवां तर्व्योम्निदहराकाशेजगत्त्रयंवासनामयमेवानुभवतिभ्रांत्या वासनामयतत्तच्छरीराणिवाप्राप्नोतिक्रमशः ॥ वस्तुतस्तुसव्योमात्माप्रागुक्तचिदाकाशस्वरूपःअतएवाजोजन्मादि विक्रियारहितश्चेत्यर्थः ॥ ननुतेनप्रद्योतेनैषआत्मानिष्क्रामतिचक्षुषोवामूर्ध्नोवाअन्येभ्योवाशरीरदेशेभ्यस्तमुत्क्रामंतंप्राणोनूत्क्रामति उत्क्रामंतंस्थितंवापीत्याद्यनेकश्रुतिस्मृति

श्रीवसिष्ठउवाच॥ ॥ तिर्यक्पुरुषदेवादेर्योनामसविनश्यति॥ यस्मिन्नेवप्रदेशेसौतदैवेदंप्रपश्यति॥ ८ ॥ आतिवाहिकनाम्नांतःस्वहृद्येवजगत्त्रयम्॥ व्योम्निचित्तशरीरेणव्योमात्मानुभवत्यजः॥ ९ ॥ एवंमृताम्रियंतेचमरिष्यंतिचकोटयः॥ भूतानांयांजगंत्याशामुदिता निपृथक्पृथक्॥ १० ॥ संकल्पनिर्माणमिवमनोराज्यविलासवत्॥ इंद्रजालामालइवकथार्थप्रतिभासवत्॥ ११ ॥

प्रसिद्धिविरुद्धंमृतस्यस्वहृद्येवपरलोकदर्शनंकथमुच्यतइतिचेत् सत्यम् ॥ कर्मोपासनानुरूपव्यवहारदृष्ट्यातेश्रुतिस्मृतिवादाः ॥ इहतुपरमार्थदृष्ट्याअस्मिन्द्यावापृथिवीअंतरे वसमाहितेइतिश्रुतिवादवद्धृद्येवपरलोककल्पनमुच्यते ॥ आत्मनोवैपुल्याद्धृदयस्याप्यपरिच्छिन्नत्वात्साक्षिणोहृदयपरिच्छेदंनिवार्यनिष्क्रियत्वंप्रपंचस्यवासनामात्रमयत्वंच व्युत्पादयितुंपरलोकवदुत्क्रमणगमनादेरपितत्रैवकल्पनामात्रेणाप्युपपत्तेरित्यभिप्रेत्येत्यविरोधः ॥ ९ ॥ एकत्रव्युत्पादितंन्यायंसर्वत्रदर्शयति ॥ एवमिति ॥ भूतानांकोटयइत्य न्वयः ॥ जगंतिदृश्यजातानिमरणकालेतेषांजगतांवासनासुलीनानियानियांआशांवासनांयस्यांयस्यांवासनायांकर्मपरिपाकानुरोधात्पृथक्पृथग्देवमनुष्यपश्वादियोनिभेदेन उदितानिउद्भाव्यस्फुरंतितानितान्येवप्रामुवंतीतिशेषः ॥ यद्यद्भवंतितदाभवंति यंयंवापिस्मरन्भावमित्यादिश्रुतिस्मृतिभ्यइतिभावः ॥ १० ॥इत्थंवासनामयत्वेजगतोयत्फलितं परमार्थदृष्ट्याभ्रमरूपत्वंतदाह ॥ संकल्पेत्यादिषड्भिः ॥ संकल्पेमानसपूजादौरत्नमयप्रासादादेर्यत्नेननिर्माणंमनोराज्येत्वयत्नेनेतिभेदः ॥ निर्वाणमितिपाठेनिर्वृतिर्निर्वाणंसुखंसां कल्पिकांगनापरिष्वंगादिजम् ॥ इंद्रजालान्यारचितामालेवयस्मिन्भ्रमेसइव ॥ ११ ॥

---

१ कल्पिते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्वांतोवातरोगविशेषस्तेनभूकंपभ्रमः ॥ बालस्यभीषणार्थंकल्पितःपिशाचस्तद्वत् ॥ मुक्तालीमौक्तिकसमूहः ॥ नौकारूढानांनौस्पंदेतीरस्थतरूणांयानंगमनंभ्रांत्याप्रसिद्धम् ॥ ॥ १२ ॥ संविन्निदर्शनम् ॥ स्मृतेःस्मरणाज्जातंकल्पितंखेपुष्पंतद्वत् ॥ जगत्संसरणमितिप्रथमांतं प्रथमांतप्राक्तनदृष्टांतान्वयानुरोधात् ॥ अनुभवतीत्यत्रतुद्वितीयांततयाविपरिणामेनसंबध्यते ॥ मृतइतिजातस्याप्युपलक्षणं ॥ १३ ॥ तर्हिकथंवैधर्म्याच्चनस्वप्नादिवदितिभगवतोबादरायणस्यसूत्रं भोक्तुश्चिरंतत्रवैधर्म्येणनियतव्यवहारादिःसत्यताप्रत्ययश्चतत्राह ॥ तत्रेति ॥ अतिपरिणामश्चिरपरिचयः ॥ घनतांपंचीकरणेनदृढताम् ॥ तथाचतत्कृतएववैधर्म्यादिव्यवहारइतिभावः ॥ १४ ॥ अनवस्थितस्वभावत्वादपिजगतोमिथ्यात्वमितिदर्शयितुमाह ॥ पुनरिति ॥ ईहाजन्मोत्तरंमरणपर्यंतंचेष्टा ॥१५॥ वासनायाअंतःअंतरेअन्येपुरुषादेहाः ॥ पुरुषाइतिपश्वादीनामप्युपलक्षणम् ॥ कदलीदलस्य

दुर्वांतभूकंपइवत्रस्तबालपिशाचवत्॥ मुक्तालीवामलेव्योम्निनौस्पंदतरुयानवत् ॥ १२॥ स्वप्नसंवित्तिपुरवत्स्मृतिजातखपुष्पवत्॥ जगत्संसरणंस्वांतर्मृतोनुभवतिस्वयम्॥ १३॥ तत्रातिपरिणामेनतदेवघनतांगतम्॥ इहलोकोयमित्येवजीवाकाशेविजृंभते ॥ १४॥ पुनस्तत्रैवजन्मेहामरणाद्यनुभूतिमान्॥ परंलोकंकल्पयतिमृतस्तत्रतथापुनः॥१५॥ तदंतरन्येपुरुषास्तेषामंतस्तथेतरे॥ संसारइतिभांतीमेकदलीदलपीठवत्॥ १६॥ नपृथ्व्यादिमहाभूतगणानचजगत्क्रमाः॥ मृतानांसंतितत्रापितथाप्येषांजगद्भ्रमाः॥१७॥ अविद्यैवस्वनंतेयंनानाप्रसरशालिनी॥ जडानांसरिदादीर्घातरत्सर्गतरंगिणी॥ १८॥ परमार्थांबुधौस्फारेरामसर्गतरंगकाः॥ भूयोभूयोनुवर्त्तंते तएवान्येचभूरिशः॥ १९॥ सर्वतःसदृशाःकेचित्कुलक्रममनोगुणैः॥ केचिदर्द्धेनसदृशाःकेचिच्चातिविलक्षणाः॥ २०॥ इमंव्यासमुनितत्रद्वात्रिंशंसंस्मराम्यहम्॥ यथासंभवविज्ञानदृशासंदृश्यमानया॥ २१॥

पीठान्याधारभूताःकदलीत्वचस्तद्वत् ॥ १६ ॥ एवंमिथ्यात्वेसिद्धेतदपवादेनात्मपरिशेषसिद्धिरित्यभिप्रेत्याह ॥ पृथ्व्यादीति ॥ ज्ञानंविनानोच्छिद्यंतेइतिशेषः ॥ एवंप्रपंचापवादेनपरिशिष्टात्मसिद्धिः ॥ १७ ॥ मूलोच्छेदंविनानापलापमात्रेणतन्निवृत्तिसिद्धिरित्यभिप्रेत्यविद्योच्छेद्यत्वप्रसिद्धयेसूक्ष्मभावेनव्युत्पादितप्रपंचस्यकारणाविद्यामात्रत्वमाह॥ अविद्यैवेति ॥ जडानांमूढानांआदीर्घादुस्तरेतियावत् ॥ तरद्भिश्चलद्भिःसर्गैस्तरंगिणीतरंगवती ॥ १८ ॥ अविद्यादिसर्वकल्पनाधिष्ठानंदर्शयति ॥ परमार्थेति ॥ तेप्राक्तनाअभिनवाश्च ॥ १९ ॥ २० ॥ प्रकृतशंकासमाधानोपोद्घातेनजगद्यत्रस्थितिंप्रकृतशास्त्रविषयंचव्युत्पाद्यशंकासमाधानमुपक्रमते ॥ इममित्यादिना ॥पुराणभारतादिनिर्माणकार्यैः संदृश्यमानयाप्रसिद्धया यथोचितेनसंभवेनजन्मनाविज्ञानेनशास्त्रादिज्ञानेनदृशाब्रह्मविद्ययाचोपलक्षितेषु तत्रतेषुव्याससर्गतरंगकेषु इमंद्वात्रिंशंसंस्मरामीतिसंबंधः ॥ २१ ॥ ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेष्वप्यवांतरविशेषमाह ॥ द्वादशेति ॥ अल्पधियोब्रह्मविद्ब्रह्मविद्वरोब्रह्मविद्वरीयान्ब्रह्मविद्वरिष्ठइतिप्रसिद्धेषुचतुर्थस्थानाविश्रांतेरल्पबुद्धयः ॥ ईहितैराधिकारिकचेष्टाभिः ॥ २२ ॥ तथैवपूर्वसदृशाअन्यथैवतद्विलक्षणाश्चेत्यर्थः ॥ २३ ॥ २४ ॥ ब्राह्मीब्राह्मकल्पावयवभूतात्रेतासांप्रतमस्तिप्रतिकल्पंचासीद्भविष्यतिच ॥ सपूर्वसदृशोऽन्यस्तद्विलक्षणः ॥ त्वंरामोऽहंवसिष्ठः ॥ २५ ॥ अस्यपुरोवर्त्तिनोव्यासस्यव्यासजीवस्य ॥ २६ ॥ २७ ॥ इतरेविसदृशाः ॥ विदःअभिज्ञाः ॥ २८ ॥ करिष्यतिअयमितिशेषः ॥ २९ ॥ कुलस्यस्ववंशस्यभरतवंशस्यवाप्रथांप्रख्यातिम् ॥ ब्रह्मत्वंहैरण्यगर्भाधिकारम् ॥ वैदेहमोक्षणंविदेहमुक्ततांप्रामेनेतिशेषः ॥ भाव्यमितिभावेकृत्यः ॥ अथवावैदेहमोक्षणंभाव्यं

द्वादशाल्पधियस्तत्रकुलाकारैरीहितैःसमाः ॥ दशसर्वेसमाकाराःशिष्टाःकुलविलक्षणाः ॥ २२ ॥ अद्याप्यन्येभविष्यंतिव्यासवाल्मीकयस्तथा ॥ भृग्वंगिरःपुलस्त्याश्चतथैवाप्यन्यथैवच ॥ २३ ॥ नराःसुरर्षिदेवानांगणाःसंभूयभूरिशः ॥ उत्पद्यंतेविलीयंतेकदाचिच्चपृथक्पृथक् ॥ २४ ॥ ब्राह्मीद्वासप्ततिस्त्रेताआसीदस्तिभविष्यति ॥ सएवान्यश्चलोकाश्चत्वंचाहंचेतिवेद्म्यहम् ॥ २५ ॥ क्रमेणास्यमुनेरित्थंव्यासस्याद्भुतकर्मणः ॥ संलक्ष्यतेवतारोयंदशमोदीर्घदर्शिनः ॥ २६ ॥ अभूमव्यासवाल्मीकियुक्तावयमनेकशः ॥ अभूमवयमेवेमेबहुशश्चपृथक्पृथक् ॥ २७ ॥ अभूमवयमेवेमेसदृशाइतरेविदः ॥ अभूमवयमेवेमेनानाकाराःसमाशयाः ॥ २८ ॥ भाव्यमद्याप्यनेनेहननुवाराष्टकंपुनः ॥ भूयोपिभारतंनामसेतिहासंकरिष्यति ॥ २९ ॥ कृत्वावेदविभागंचनीत्वानेनकुलप्रथाम् ॥ ब्रह्मत्वंचतथाकृत्वाभाव्यंवैदेहमोक्षणम् ॥ ३० ॥ वीतशोकभयःशांतनिर्वाणोगतकल्पनः ॥ जीवन्मुक्तोजितप्रनाव्यासोयमितिवर्णितः ॥ ३१ ॥ वित्तबंधुवयःकर्मविद्याविज्ञानचेष्टितैः ॥ समानिसंतिभूतानिकदाचिन्नतुतानितु ॥ ३२ ॥ क्वचित्सर्गशतैस्तानिभवंतिनभवंतिवा ॥ कदाचिदपिमायेयमित्थमंतविवर्जिता ॥ ३३ ॥ यच्छतीयंविपर्यासंभूरिभूतपरंपरा ॥ बीजराशिरिवाजस्रंपूर्यमाणःपुनःपुनः ॥ ३४ ॥

प्राप्तव्यम् ॥ भूप्राप्तावात्मनेपदीतस्मात्कर्मणिकृत्यः ॥ ३० ॥ तस्यसांप्रतंजीवन्मुक्ततांदर्शयति ॥ वीतेति ॥ निर्वाणोनिर्गतोमोहबंधात् ॥ गत्यर्थत्वात्कर्त्तरिक्तः ॥ निर्वाणोवातेइतिनिष्ठानत्वम् ॥ शांतश्चासौनिर्वाणश्चेतिकर्मधारयः ॥ अतएवगताअहंममेत्यध्यासकल्पनायस्य ॥ अतएवचवीतशोकभयः ॥ ३१ ॥ क्वचित्तुतानिनसमानीत्यन्वयः ॥ ३२ ॥ क्वचित्कदाचिदपिभवंति ॥ ३३ ॥ भूतपरंपराप्राणिनिकायः ॥ यथाधान्यादिबीजराशिर्मानायपुनःपुनःप्रस्थादौपूर्यमाणःपुनाराशीकृतोनपूर्वक्रमसंनिविष्टबीजोभवतिकिंतुविपर्यासंयच्छतितद्वत् ॥ ३४ ॥

१ इदंपूर्वोत्तरान्वयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संनिवेशोवयवसंस्थानविशेषःक्रमोवा ॥ ३५ ॥ जीवन्मुक्तस्ययोगबलादाधिकारिकनानाशरीरपरिग्रहेपिनमुक्तिस्वरूपप्रच्युतिरित्याह ॥ आश्वस्तेति ॥ आश्वस्तांतःकरणः समाहितचित्तः ॥ सर्वस्योपपादकोहेतुर्निरावरणइति ॥ अनाश्वासविकल्पासारदेहादिमयत्वाशांततृष्यादीनामविद्यावरणप्रयुक्तत्वात्तदभावादित्यर्थः ॥ तथाचजीवन्मुक्तिरेव ज्ञानफलंसाचनपाक्षिकीतिभावः ॥ ३६ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेतृतीयःसर्गः ॥ ३॥ ॥ मुक्तानुभवतोमुक्त्योरविशेषोऽत्रकीर्त्यते ॥ मूलदार्ढ्यायशास्त्रीयंपौरुषंचप्रशस्यते ॥ १ ॥ आत्मनोनित्यमुक्तस्वभावस्याज्ञानावरणमेवबंधः ॥ ज्ञानेनतन्नाशएवमुक्तिः ॥ नष्टेत्वज्ञानेपरिज्ञातश्चित्रव्याघ्रइवदृश्यमानोपि व्यवहारःकौतुकायैवनानर्थायेतिनजीवन्मुक्तविदेहमुक्तयोर्विशेषइतिपूर्वशंकांसमाधायप्रस्तुतमात्मतत्त्वंविस्तरेणोपदेष्टुकामःप्रथमंमूलदार्ढ्यायपुरुषप्रयत्नंसमर्थयति ॥ सौम्ये त्यादिना ॥ हेसौम्यप्रियदर्शन ॥ अंबुत्वेनिश्चलांबुत्वे ॥ समैवनविषमा ॥ तथैवअदेहसदेहमुन्योर्मुक्ततास्वरूपावस्थितिःसमैवेत्यर्थः॥ १॥विषयेनचविषयाधीनातुन॥यदिमुक्तिः

तेनैवसन्निवेशेनतथान्येनपुनःपुनः॥ सर्गाकाराःप्रवर्त्तंतेतरंगाःकालवारिधेः॥३५॥ आश्वस्तांतःकरणःशांतविकल्पःस्वरूपसारमयः॥ परमशमामृततृप्तस्तिष्ठतिविद्वान्निरावरणः ॥ ३६ ॥ ॥इतिश्रीवासिष्ठमहारामायणेवा०दे०मो० मुमुक्षुव्यवहारप्रकरणेभूयोभूयः सर्गानुवर्णनंनामतृतीयःसर्गः॥ ३॥ ॥ ६४॥ ॥वसिष्ठउवाच॥ ॥सौम्यांबुत्वेतरंगत्वेसलिलस्यांबुतायथा॥ समैवाब्धौतथाऽदेहसदेहमुनिमुक्तता॥१॥ सदेहावास्त्वदेहावामुक्तताविषयेनच॥ अनास्वादितभोगस्यकुतोभोज्यानुभूतयः ॥ २॥ जीवन्मुक्तंमुनिश्रेष्ठंकेवलंहिपदार्थवत्॥ पश्यामःपुरतोनास्यपुनर्विघ्नोंतराशयम्॥३॥सदेहादेहमुक्तानांभेदःकोबोधरूपिणाम्॥यदेवांबुतरंगत्वेसौम्यत्वेपितदेव तत्॥ ४ ॥ नमनागपिभेदोस्तिसदेहादेहमुक्तयोः॥ सस्पंदोप्यथवास्पंदोवायुरेवयथाऽनिलः॥ ५॥

स्वर्गादिरिवविषयाधीनास्यात्तर्हितथैवविषयवैषम्याद्विषमास्यादितिभावः ॥ ननुतथापिभोक्तृत्वाभोक्तृत्वकृतोविशेषोस्त्येवभोगार्थत्वाद्देहस्थितेस्तत्राह ॥ अनास्वादितेति ॥ भोगेषुसत्यबुद्ध्याभोक्तृत्वाभिमानेनभोगास्वादनेहिभोगकृतोविशेषःस्यान्नत्वसंगोदासीनात्मैकत्वदर्शिनःसइतिभावः ॥ २ ॥ तर्हिकथमस्यसदेहत्वंतत्राह ॥ जीवन्मुक्तमिति ॥ मुनिश्रेष्ठंव्यासंपदार्थवत्सदेहवत्पुरतःपश्यामः ॥ स्वकल्पनयेतिशेषः ॥ अंतराशयमंतर्गतंविदेहत्वनिश्चयम् ॥ तथाचयद्यप्ययंसदेहइवास्माभिर्वीक्ष्यतेतथाप्यसौस्वनिश्चयेनांतर्विदेहएवास्तइतिनास्यस्वानुभवतोविशेषइतिभावः ॥ ३ ॥ अबोधएवहिभेदकस्तदपगमेबोधमात्रपरिशेषेकोभेदकइत्यर्थः ॥ सौम्यत्वेनिश्चलतयाप्रसन्नत्वे ॥ तत्अंबु ॥ तदेवअंभएव ॥ ४ ॥ अंबुनिकदाचिदस्वच्छत्वादिकृतोविशेषोपिस्यादितिदृष्टांतांतरेणोक्तंसमर्थयते ॥ नमनागिति ॥ ५ ॥

~~प्रा आस्य वि~~ पुरतः विघ्नो [illegible] आम्नाय [illegible] पुरतः [illegible]

CC-0. In Public Domain. Digitization by eGangotri

अत्रक्वचित्पुस्तकेषु मयोक्तंकेवलीभावंतत्तत्स्मरणजीवनम् ॥ सदेहस्यविदेहस्यसमतैवसदाशिवा इतिश्लोकोऽधिकःपठ्यतेतस्यायमर्थः ॥ ननुवायुःसस्पंदःशिशिरस्तरुतरंगादिकंपहेतुस्त्वगिंद्रियवेद्यश्च अस्पंदस्तुतद्विपरीतइतितत्रापिभेदोऽस्त्येवेतिकथंतदभावेसौदृष्टांतस्तत्राह ॥ मयेति ॥ हेरामत्वंसर्वत्रउक्तंविवक्षितंतत्तद्दृष्टांतस्मरणस्यजीवनंसारभूतंकेवलीभावंवस्तुनःस्वरूपाप्रच्युतिलक्षणंमयउपमिनुनत्वविवक्षितंकार्यभेदकृतंवैलक्षण्यंकल्पयेत्यर्थः ॥ तथाचैकांशेनदृष्टांतोनसर्वांशेइतिभावः ॥ मिनोतेरेवगणकार्यस्यानित्यत्वाच्छपिलोटिमयेतिरूपम् ॥ तथासतिफलितमाह ॥ सदेहस्येति ॥ किंचसदेहविदेहबंधमोक्षादिव्यवहारोप्यज्ञदृशाकल्पनयैवनपरमार्थदृशेत्याह ॥ सदेहेति ॥ अस्माकंवसिष्ठस्यतस्यव्यासस्यापिसदेहाविदेहावामुक्तताप्रमायाःपरमार्थदृष्टेरास्पदंविषयोनास्तिकिंतुअविभागिनीद्वैतशून्यास्वात्मैकतैवास्तीतितल्लाभरूपेज्ञानफलेविशेषाभावान्नज्ञानस्यानित्यफलतादोषशंकावकाशोनापिज्ञानोदयेदेहपातापत्तिः ॥ स्वविरोध्यंशस्यैवज्ञानेनबाधाद्देहधारणस्यचप्रारब्धफलत्वेनज्ञानतुल्यत्वेनोपजीव्यत्वेनचज्ञानाविरुद्धत्वादुपादाननिद्रानाशेपिस्वप्नसंस्कारस्यकंचित्कालमनुवृत्तिवदविद्योच्छेदेपियावत्प्रारब्धंदेहादिप्रतिभासोपपत्तेरितिभावः ॥ ६ ॥ इत्थंनिरस्तेसंशयेप्रकृतस्यावसरंदर्शयति ॥ तस्मा

सदेहावाविदेहावामुक्ततानप्रमास्पदम्[1] ॥ अस्माकमपितस्यास्तिस्वैकतास्त्यविभागिनी ॥ ६ ॥ तस्मात्प्रकृतमेवेदंशृणुश्रवणभूषणम् ॥ मयोपदिश्यमानंत्वंज्ञानमज्ञांध्यनाशनम् ॥ ७ ॥ सर्वमेवेहहिसदासंसारेरघुनंदन ॥ सम्यक्प्रयुक्तात्सर्वेणपौरुषात्समवाप्यते ॥ ८ ॥ इहहींदोरिवोदेतिशीतलाह्लादनंहृदि ॥ परिस्पंदफलप्राप्तौपौरुषादेवनान्यतः ॥ ९ ॥

दिति ॥ अज्ञानमज्ञासैवांध्यंतस्यनाशनम् ॥ ७ ॥ ननुशुकादीनांशमदमादिसाधनसंपन्नानांश्रवणंफलितंकथमन्येषामाधुनिकानांतत्फलिष्यतिसाधनानांदुःसंपादत्वादित्याशंक्यपुरुषप्रयत्नस्यासाध्यंनास्तीत्याह ॥ सर्वमेवेति ॥ सर्वेणसदासर्वमेवावाप्यतेतर्हिकथंक्वचिद्यत्नवैफल्यदर्शनंतत्राह ॥ सम्यगिति ॥ अनुपरमएवसम्यक्प्रयोगः ॥ समवाप्यतेसंप्राप्यते ॥ ८ ॥ परिस्पंदःशास्त्रविहितकायवाक्चित्तचलनरूपंकर्मतस्यफलंचित्तशुद्धिद्वाराज्ञानंतत्प्राप्तौसत्यांहृदिशीतलंकामक्रोधादिसंतापाप्रतिहतमाह्लादनंजीवन्मुक्तिसुखमुदेति ॥ तथाचश्रुतिः ॥ सएकोब्रह्मणआनंदःश्रोत्रियस्यचाकामहतस्येति ॥ स्मृतिश्च यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखम् ॥ तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलामिति ॥ तत्तुसर्वंपौरुषादेवभवतिनान्यतइतिपुरुषप्रयत्नएवनिर्भरःकार्यइतिभावः ॥ ९ ॥

---

१ अत्रसदेहादेहमुक्त्यैक्यमुपमेयं उक्तंविवक्षितं तत्सादृश्यार्थंस्मर्यतेतत्स्मरणंसस्पंदास्पंदानिलैक्यमुपमानंतस्यजीवनंउपमेयसादृश्योल्लासापादकंकेवलीभावंपरिस्पंदत्यागात्केवलेनैकांशेनऐक्यसादृश्यभावेनउपमेयंमयउपमाविषयंकुरु ॥ ~~मुक्तता~~ प्रमायाः आस्पदं विषयो नैवास्ति,) नव०: प्रमायाः अविभागिनी, अर्थात् निर्विकल्पा मुक्तता आस्पदं अपि अस्ति, प्रकर्षेण आहोः = प्रकृतम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननुदैवप्रातिकूल्येपौरुषंव्यर्थंदृश्यते तथाचश्रेयांसिबहुविघ्नानीतिप्रवादान्नतत्फलाश्वासइत्याशंक्यदैवस्यपौरुषेंतर्भावंदौर्बल्यंचवक्ष्यमाणमभिप्रेत्यस्वतंत्रंतन्निरस्यति ॥ पौरुषमिति ॥ गमनभोजनादिपौरुषंस्पंदद्वारादेशांतरंतृप्त्यादिवानयत्प्रापयत्प्रत्यक्षतोदृष्टमितिनयत्पदस्यपूर्वेणवा यद्दैवंनदृष्टंतत्तुनविद्यतइतिपदभंगेनोत्तरेणवान्वयः ॥ १० ॥ किंतत्पौरुषंयत्प्रशस्यतेतदाह ॥ साध्विति ॥ अंगग्रहणंवाचोप्युपलक्षणम् ॥ ११ ॥ ईहतेचेष्टते ॥ क्वचिद्विघ्नैःप्रतिघातःशास्त्रोक्तक्रमभ्रंशादेवेतिसूचनायक्रमादित्युक्तम् ॥ सांगात्कर्मणःफलावश्यंभावनियमादितिभावः ॥ १२ ॥ तमेवनियमंबहुशःसंवादेनद्रढयति ॥ पौरुषेणेत्यादिचतुर्भिः ॥ १३ ॥ अंभोरुहास्पदंपद्मासनंअधिष्ठायेतिशेषः ॥ ब्रह्मतांहिरण्यगर्भतांगुणमूर्त्तिसारूप्यमुक्तिंवा ॥ एवमुत्तरयोरपि ॥ १४ ॥ १५ ॥ १६ ॥ पुरुषार्थेनपौरुषेण ॥ जीयतेअभिभूयते ॥ १७ ॥ नन्वनंतकोटिकल्पार्जितानामनंतानांप्राक्तनकर्मणांकथमल्पेनाद्यतनेनपौरुषेणजयस्तत्राह ॥ यत्नवद्भिरिति ॥ निगीर्यंतेप्रलयाधिकारिदेवताभावंप्राप्तैःपुरुषैरित्यर्थः ॥ यद्यप्यनंतानिकर्माणितथापितेषांमूलैक्यात्तन्नाशेनजयःसुकरइत्यभिप्रेत्याह ॥ कैवेति ॥ १८ ॥ उक्तमर्थमुपसंहरंस्तद्भ्रंशेऽनर्थमाह ॥ शास्त्रेति ॥ शास्त्रैःश्रुत्यादिभिर्नियंत्रितंनियमितंयत्पौरुषंतदेवपरममवश्यसंपाद्यंयस्यास्तथाविधायापुरुषस्यपुरुषतानिरंतरोद्युक्ततास्यात्सैवाभिमतफलभरस्यसिद्ध्यैभवतिहि ॥ अन्यथाअशास्त्रीयातुअनर्थायेत्यर्थः ॥ १९ ॥

पौरुषंस्पंदफलवद्दृष्टंप्रत्यक्षतोनयत् ॥ कल्पितंमोहितैर्मंदैर्दैवंकिंचिन्नविद्यते ॥ १० ॥ साधूपदिष्टमार्गेणयन्मनोंगविचेष्टितम् ॥ तत्पौरुषंतत्सफलमन्यदुन्मत्तचेष्टितम् ॥ ११ ॥ योयमर्थंप्रार्थयतेतदर्थंचेहतेक्रमात् ॥ अवश्यंसतमाप्नोतिनचेदर्द्धान्निवर्त्तते ॥ १२ ॥ पौरुषेणप्रयत्नेनत्रैलोक्यैश्वर्यसुंदराम् ॥ कश्चित्प्राणिविशेषोहिशक्रतांसमुपागतः ॥ १३ ॥ पौरुषेणैवयत्नेनसहसांभोरुहास्पदम् ॥ कश्चिदेवचिदुल्लासोब्रह्मतामधितिष्ठति ॥ १४ ॥ सारेणपुरुषार्थेनस्वेनैवगरुडध्वजः ॥ कश्चिदेवपुमानेवपुरुषोत्तमतांगतः ॥ १५ ॥ पौरुषेणैवयत्नेनललनावलिताकृतिः ॥ शरीरीकश्चिदेवेहगतश्चंद्रार्द्धचूडताम् ॥ १६ ॥ प्राक्तनंचैहिकंचेतिद्विविधंविद्धिपौरुषम् ॥ प्राक्तनोद्यतनेनाशुपुरुषार्थेनजीयते ॥ १७ ॥ यत्नवद्भिर्दृढाभ्यासैःप्रज्ञोत्साहसमन्वितैः ॥ मेरवोपिनिगीर्यंतेकैवप्राक्पौरुषेकथा ॥ १८ ॥ शास्त्रनियंत्रितपौरुषपरमापुरुषस्यपुरुषतायास्यात् ॥ अभिमतफलभरसिद्ध्यैभवतिहिसैवान्यथात्वनर्थाय ॥ १९ ॥

---

१ तत्साफल्यमितिक्वचित्पाठः २. कृतिम.

CC-0. In Public Domain. Digitization by eGangotri

नन्वल्पधनबलबुद्धीनांकथंमहाधनबलबुद्धिसाध्यपौरुषफललाभइत्याशंक्यतेषामपिस्वशक्यपौरुषपरंपरयैवेहजन्मनिजन्मांतरेवामहाधनादिसंपत्त्यातल्लाभःसिध्यति ॥ नहिपुरुषस्यदुर्दशासुदशावासदैवभवतीत्यभिप्रेत्यशास्त्रीयप्रयत्नतच्छैथिल्ययोःफलतोमहदंतरंदर्शयंति॥कस्यांचिदिति॥पुंसःशास्त्रीयप्रयत्नशैथिल्येस्वयंस्वतएवस्वाभाविकरागादिवशादात्मनोदुःस्थितिरसन्मार्गस्थितिस्तद्वशात्कस्यांचिद्दारिद्र्यरोगबंधनादिदुर्दशायांस्वहस्तादेरप्यस्वाधीनत्वादंगुल्यग्राणांनिपीडितेनपीडासाध्येनापिनिकुंचनेनसंपाद्यादेकचुलुकात्करसंमितसलिलात्मुखेआउप्यतेक्षिप्यतइत्यावापस्तथाविधोबिंदुरपिदुर्लभत्वाद्बहुमतोभवति ॥ तस्यैवशास्त्रीययत्नदार्ढ्येधर्मोत्कर्षात्कस्यांचित्प्रियव्रतादिवत्सप्तद्वीपाधिपत्यदशायांभर्त्तव्येभ्यःपुत्रादिभ्यउचितोदायादिसंविभागस्तत्करणेजलराश्यादयोंऽतरालीकृतागर्भीकृतायथातथाविधासंपूर्णापृथ्व्यपिनपृथ्वीनमहतीभवेत् ॥ नबहुमताभवेदित्यर्थः ॥ तथाहिप्रसिद्धंपुराणे ॥ प्रियव्रतोत्तानपादौतावेवावांस्तुहीतरूइति ॥ २० ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेचतुर्थःसर्गः ॥४ ॥

कस्यांचित्स्वयमात्मदुःस्थितिवशात्पुंसोदशायांशनैरंगुल्यग्रनिपीडितैकचुलुकादावापबिंदुर्बहुः॥ कस्यांचिज्जलराशिपर्वतपुरद्वीपांतरालीकृताभर्त्तव्योचितसंविभागकरणेपृथ्वीनपृथ्वीभवेत् ॥ २० ॥ ॥इतिश्रीवासिष्ठमहारा०वा०दे०मो०मुमुक्षु० पौरुषप्रकरणंनामचतुर्थःसर्गः॥४॥ ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥प्रवृत्तिरेवप्रथमंयथाशास्त्रविहारिणाम्॥प्रभेववर्णभेदानांसाधनीसर्वकर्मणाम् ॥ १ ॥ मनसावांछ्यतेयच्चयथाशास्त्रंनकर्मणा॥ साध्यतेमत्तलीलासौमोहनीनार्थसाधनी ॥ २ ॥ यथासंयततेयेनतथातेनानुभूयते॥ स्वकर्मैवेतिचास्तेन्याव्यतिरिक्तान्दैवदृक् ॥ ३ ॥

प्राबल्येपौरुषस्यात्राप्यवश्यंफलसंगमे ॥ दैवस्याव्यतिरेकेचयुक्तिदृष्टांतईर्यते ॥ १ ॥ यत्पूर्वमुक्तंपौरुषातिरेकेणदैवस्यासत्वंदैवात्पौरुषस्यप्राबल्यंपौरुषादेवपुरुषार्थसिद्धिरितिचतत्सर्वमुपपत्तिभिःसमर्थयितुंप्रतिजानीते ॥ प्रवृत्तिरेवेति ॥ शास्त्रमनतिक्रम्यविहारिणांवाङ्मनःकायैर्व्यवहरणशीलानामधिकारिणांसर्वकर्मणांसर्वेषांपुरुषार्थानांसिद्धौप्रथमंप्रवृत्तिरेवकारणंयथानीलपीतादिवर्णभेदानामभिव्यक्तौप्रभैवसाधनीतद्वत् ॥ तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ ॥ आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यतइत्यादिस्मृतेरितिभावः ॥ १ ॥ ननुतृप्त्यादिवदृष्टफलत्वाद्विद्यायाःकस्तत्साधनेशास्त्रीयनियमस्योपयोगस्तत्राह ॥ मनसेति ॥ असौमत्तलीलाउन्मत्तचेष्टेव ॥ साध्यतेतेनेतिशेषः ॥ अतएवनपुरुषार्थसाधनीप्रत्युतमोहनी ॥ दृष्टफलत्वेप्यशास्त्रीयोपायस्यान्वयव्यतिरेकादर्शनेनाहेतुत्वादितिभावः ॥ २ ॥ शास्त्रीयस्ययत्नस्यशास्त्रीयमेवफलमशास्त्रीयस्यचाशास्त्रीयमेवेत्यौचित्यबलाच्चव्यवस्थासिद्धिरित्याह ॥ यथेति ॥ ननुदैवादुभयवैपरीत्यमपिस्यात्तत्राह ॥ आस्तेन्याव्यतिरिक्तान्दैवदृगिति ॥ प्राक्तनकर्मैवफलावस्थंदैवमित्युच्यतेनेनततोतिरिक्तंदैवंदृश्यतइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थमेवस्फुटयति॥ उच्छास्त्रमिति॥ शास्त्रितंशास्त्रनियतम्॥ प्रातिपदिकाद्धात्वर्थेणिचित्कः॥४॥हुडौमेषौ॥ कदाचित्समौकदाचिदसमौ॥ अत्रअनयोर्मध्ये॥५॥तंत्रेणशास्त्रीयनियमेन॥ अतंद्रेणेतिपाठेनिरालस्येनपुंसा ॥ ६ ॥ ननुमनुष्याणांत्रिभिर्ऋणवाजायतेइतिश्रुतौदेवादिऋणित्वश्रवणात्तस्मादेषांतन्नप्रियंयदेतन्मनुष्याविद्युरितिश्रवणाच्चैतैरस्यावश्यंविघ्नाचरणेकृतोपियत्नोविफलःस्यादित्याशंक्याह॥ द्वाविति॥ दोषेपुसत्स्वेवदेवानांविघ्नशक्तेःस्वप्रयत्नेनदोषजयेतेषांविघ्नशक्तिःकुंठीभवतीतिभावः ॥ ७ ॥ ननुशास्त्रीयमार्गेयतमानानामपिकश्चिद्रोगाद्यनर्थःकथंदृश्यतेतत्राह॥ अनर्थइति॥ तथाचतदपिजय्यमेवेतिभावः ॥ ८ ॥ शुभेनाद्यतनपौरुषेण॥ उद्युक्तंविघ्नाचरणायेत्यर्थः॥ ९॥

उच्छास्त्रंशास्त्रितंचेतिद्विविधंपौरुषंस्मृतम्॥ तत्रोच्छास्त्रमनर्थायपरमार्थायशास्त्रितम्॥ ४॥ द्वौहुडाविवयुध्येतेपुरुषार्थौसमासमौ॥
प्राक्तनश्चैहिकश्चैवशाम्यत्यत्राल्पवीर्यवान्॥ ५॥ अतःपुरुषयत्नेनयतितव्यंयथातथा॥ पुंसातंत्रेणसद्योगाद्येनाश्वद्यतनोजयेत्॥ ६॥
द्वौहुडाविवयुध्येतेपुरुषार्थौसमासमौ॥ आत्मीयश्चान्यदीयश्चजयत्यतिबलस्तयोः॥ ७॥ अनर्थःप्राप्यतेयत्रशास्त्रितादपिपौरुषात्॥
अनर्थकर्तृबलवत्तत्रज्ञेयंस्वपौरुषम्॥८॥ परंपौरुषमाश्रित्यदंतैर्दंतान्विचूर्णयन्॥ शुभेनाऽशुभमुद्युक्तंप्राक्तनंपौरुषंजयेत्॥९॥प्राक्तनःपुरुषार्थोसौमांनियोजयतीतिधीः॥ बलादधस्पदीकार्याप्रत्यक्षादधिकानसा॥ १०॥ तावत्तावत्प्रयत्नेनयतितव्यंसुपौरुषम्॥प्राक्तनंपौरुषंयावदशुभंशाम्यतिस्वयम्॥ ११॥ दोषःशाम्यत्यसंदेहंप्राक्तनोद्यतनैर्गुणैः॥ दृष्टांतोत्रह्यस्तनस्यदोषस्याद्यगुणैःक्षयः ॥ १२ ॥
असद्दैवमधःकृत्वानित्यमुद्रिक्तयाधिया॥ संसारोत्तरणंभूत्यैयतेताधातुमात्मनि॥ १३ ॥ नगंतव्यमनुद्योगैःसाम्यंपुरुषगर्दभैः॥ उद्योगस्तुयथाशास्त्रंलोकद्वितयसिद्धये॥ १४ ॥ संसारकुहरादस्मान्निर्गतव्यंस्वयंबलात्॥ पौरुषंयत्नमाश्रित्यहरिणेवारिपंजरात्॥ १५॥
प्रत्यहंप्रत्यवेक्षेतदेहंनश्वरमात्मनः॥ संत्यजेत्पशुभिस्तुल्यंश्रयेत्सत्पुरुषोचितम्॥ १६॥

पुरुषार्थःकर्मफलम्॥ अधस्पदीकार्यापादेनाक्रमणीयाविनाशनीयेतियावत्॥ अधःशिरसीपदेइतिसत्वम्॥ १० ॥ सुपौरुषमितिक्रियाविशेषणम्॥ स्वयमितिनिःशेषतालाभायविशेषणंपरतःशांतौतदपगमेपुनरुद्भवोमाभूदिति ॥ ११ ॥ प्राक्तनएवप्रबलःकिंनस्यात्तत्राह॥ दोषइति॥ ह्यस्तनस्यपूर्वेद्युस्तनस्यदोषस्याजीर्णादेः॥ गुणैर्लंघनादिभिः॥ १२ ॥ असद्दैवंप्राक्तनदुरदृष्टमद्यतनसुकृतैरुद्रिक्तयाधियाअधःकृत्वापरिभूयआत्मनिसंसारोत्तरणमाधातुंसंपादयितुंभूत्यैशमदमश्रवणादिसंपदेयतेत ॥ १३ ॥ लोकद्वितयंस्वर्गापवर्गौ ॥ १४ ॥ हरिणासिंहेनअरिभिर्मनुष्यैःकृताद्बंधनपंजरादिव॥ विष्णुनाअसुरैःप्रयुक्तान्मायापंजरादिवेतिवा॥ १५ ॥ तुल्यंतुल्यताम् ॥ भावप्रधानोनिर्देशः॥ सत्पुरुषोचितंसाधुसंगमसच्छास्त्रादिश्रयेत्॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलिलंद्रवपिच्छिलम् ॥ वयःसर्वपुरुषार्थसाधनंयौवनम् ॥ भस्मसात्भस्मप्रायंव्यर्थमितियावत् ॥ १७ ॥ नकिंचनप्राक्तनशुभाशुभातिरिक्तमित्यर्थः ॥ १८ ॥ अद्यतनयोर
दृष्टरूपयोःशुभाशुभयोःप्रत्यक्षमानंश्रुतिः ॥ दृष्टयोस्त्वन्वयव्यतिरेकसहकृतंचक्षुरादि ॥ तत्सिद्धमद्यतनशुभपौरुषमुत्सृज्येत्यर्थः ॥ एवंचसर्वव्यवहारकदंबस्यातिप्रसिद्धंप्रत्य
क्षश्रुतिप्रमाणंप्रभुसंमितमुत्सृज्यपौरुषप्रयत्नफलसंदिग्धःसन्प्रयत्नफलविघटकानुमानिकंदैवंप्रत्यप्रयत्नाद्बिभ्यन्नपसरतियः ॥ स्वभुजाभ्यांभीतइतिगम्यमानत्वाद्भीत्रार्थानामि
त्यपादानता ॥ १९ ॥ नदृष्टाश्रेष्ठानांपौरुषेणैवपुरुषार्थंप्राप्तानांविश्वामित्रादीनांदृष्टिर्यैस्तेषाम् ॥२०॥ विवेकंनित्यानित्यादिविवेकोपलक्षितसाधनचतुष्टयम् ॥ २१॥ श्रवणा
दिप्रवणतांस्थिरीकर्तुमन्यचेष्टांनिंदति ॥ चित्तेइति ॥ यथाशास्त्रंनिजैरीहितैःश्रवणमननादिचेष्टाभिरर्थंपरमार्थभूतमात्मतत्त्वमचिंतयतामतएवतंपुरुषार्थमसंसाधयतामेवमूढा
नांदुरंतनरकादिहेतुत्वाद्दुष्टमीप्सितंभोगलिप्सांधिक् ॥ तस्यशोच्यतेत्यर्थः ॥ एवकारोयोग्यजन्मलाभेपितदसाधनेपुनस्तद्दौर्लभ्यद्योतनार्थः ॥ तथाचश्रुतिः ॥ इहचेदवेदीदथ

किंचित्कांतान्नपानादिकलिलंकोमलंगृहे॥व्रणेकीटइवास्वाद्यवयःकार्यंनभस्मसात्॥१७॥ शुभेनपौरुषेणाशुभमासाद्यतेफलम्॥
अशुभेनाशुभंनित्यंदैवंनामनकिंचन॥१८॥प्रत्यक्षमानमुत्सृज्ययोनुमानमुपैत्यसौ॥स्वभुजाभ्यामिमौसर्पाविितिप्रेक्ष्यपलायते॥१९
दैवंसंप्रेरयतिमामितिदग्धधियांमुखम्॥ अदृष्टश्रेष्ठदृष्टीनांदृष्ट्वालक्ष्मीर्निवर्त्तते ॥ २० ॥तस्मात्पुरुषयत्नेनविवेकंपूर्वमाश्रयेत् ॥ आत्म
ज्ञानमहार्थानिशास्त्राणिप्रविचारयेत्॥२१॥चित्तेचिंतयतामर्थंयथाशास्त्रंनिजेहितैः॥असंसाधयतामेवमूढानांधिग्दुरीप्सितम्॥ २२
पौरुषंचनवानंतंनयत्नमभिवांछ्यते॥ नयत्नेनापिमहताप्राप्यतेरत्नमश्मतः॥ २३॥ यथाघटःपरिमितोयथापरिमितःपटः॥ नियतःप
रिमाणस्थःपुरुषार्थस्तथैवच॥ २४॥ सचसच्छास्त्रसत्संगसदाचारैर्निजंफलम्॥ददातीतिस्वभावोयमन्यथानार्थसिद्धये ॥ २५॥ स्व
रूपंपौरुषस्यैतदेवंव्यवहरन्नरः॥ यातिनिष्फलयत्नत्वंनकदाचनकश्चन॥ २६॥

सत्यमस्तिनचेदिहावेदीन्महतीविनष्टिरिति ॥ २२ ॥ नन्वियंतंकालंपौरुषंकार्यमित्यवध्यनवगमेनतस्यानंत्यात्परिश्रमबाहुल्याच्चकथंतत्रप्रवृत्तिस्तत्राह ॥ पौरुषंचेति ॥ तत्पौरु
षमनंतमनवधिकंन ॥ साक्षात्कारोदयस्यैवअवधित्वात् ॥ यत्नंपरिश्रममभिलक्ष्यचनवांछ्यतेनापेक्ष्यते॥प्रत्यक्षावगमंधर्म्यंसुसुखंकर्तुमव्ययमितिभगवद्वचनादितिभावः॥नन्वि
दंपूर्णाहुत्यासर्वान्कामानवाप्नोतीतिवत्प्ररोचनामात्रंश्रमाधिक्येसत्येवफलाधिक्यनियमादित्याशंक्यान्वयव्यभिचारमाह ॥ नेति ॥ रत्नतत्त्वपरीक्षाकुशलानांविनैवश्रमंलाभा
तिशयदर्शनाद्व्यतिरेकेव्यभिचारोपिबोध्यः ॥२३॥ पूर्वार्द्धोक्तंदृष्टांतेनद्रढयति ॥ यथेति ॥ घटोजलेयत्त्रापरिच्छेदकत्वेनपटस्तुदैर्घ्यादिनापरिमितःप्रमाणैर्निश्चितस्तथैवपुरुषार्थः
पौरुषयत्नोपिपरिमाणेसाक्षात्कारफलावधौतिष्ठतीतिपरिमाणस्थोनियतएव ॥ २४ ॥ सपौरुषयत्नःसदाचारैःसहितइतिशेषः ॥२५॥ स्वरूपंपौरुषस्यैतदित्युक्तोपसंहारः ॥ ता
दृशस्यफलाव्यभिचारमाह ॥ एवमिति ॥ २६ ॥

---

१ तैलमश्मतइतिकचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तंद्रढयितुमन्यत्रापिन्याय्यस्यपौरुषस्यफलाव्यभिचारंदर्शयति ॥ दैन्येति ॥ अन्येनलहरिश्चंद्रादयः ॥ २७ ॥ यदिनश्रमापेक्षात्तर्ह्येतेतत्करिष्यामःकिमधुनैवतेनेत्याशंक्याह ॥ आबाल्यादिति ॥ अलमत्यंतमभ्यस्तैर्नतुसहसाकृतैःकोमलकंटकायमानैरित्यर्थः ॥ २८ ॥ प्रत्यक्षतोदृष्टमस्मदादिभिर्जीवन्मुक्तैरित्यर्थः ॥ कृतंसाधनतः ॥ २९ ॥ यद्येवंतर्हिनकुतःसर्वैयतंतेतत्राह ॥ आलस्यमिति ॥ अनर्थहेतुत्वादर्थविघातकत्वाच्चानर्थः ॥ बहुधनकःसंपन्नतमः ॥ शेषाद्विभाषेतिकप् ॥ बहुश्रुतःपंडितः॥सागरांतैःसमुद्रांतैःसहिताअवनिर्भूमिः ॥ तस्मादालस्यमुत्सृज्यबाल्यात्प्रभृतिसत्संगमादिपरेणभाव्यमितिमुख्यःपक्षइतिभावः ॥ ३० ॥ यद्यप्यत्यंतबाल्यप्रभृतिकर्त्तुंनशक्यतेतर्हियौवनमारभ्यवायतितव्यमित्याह ॥ बाल्यइति ॥ नरःअविरतैश्चपलैर्बालैःकल्पिताभिःक्रीडाभिर्लोलेबाल्येगतेसतिदोर्दंडाभ्यांगुरुशुश्रूषादिसमर्थाभ्यांदोर्भ्यांमंडितंवयोयौवनंततःप्रभृतिपदपदार्थ

दैन्यदारिद्र्यदुःखार्त्ताअप्यन्येपुरुषोत्तमाः॥पौरुषेणैवयत्नेनयातादेवेंद्रतुल्यताम्॥२७॥आबाल्यादलमभ्यस्तैःशास्त्रसत्संगमादिभिः॥गुणैःपुरुषयत्नेनस्वार्थःसंप्राप्यतेयतः॥ २८ ॥ इतिप्रत्यक्षतोदृष्टमनुभूतंश्रुतंकृतम्॥ दैवात्तमितिमन्यंतेयेहतास्तेकुबुद्धयः॥ २९॥ आलस्यंयदिनभवेज्जगत्यनर्थःकोनस्याद्बहुधनकोबहुश्रुतोवा ॥ आलस्यादियमवनिःससागरांतासंपूर्णानरपशुभिश्चनिर्द्धनैश्च ॥ ३० ॥ बाल्येगतेऽविरतकल्पितकेलिलोलेदोर्द्दंडमंडितवयःप्रभृतिप्रयत्नात् ॥ सत्संगमैःपदपदार्थविशुद्धबुद्धिःकुर्यान्नरःस्वगुणदोषविचारणानि॥ ३१ ॥ ॥श्रीवाल्मीकिरुवाच॥ ॥इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम॥ स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरेणसहाजगाम ॥ ३२॥ ॥इतिश्रीवासिष्ठमहा०वा०दे०मो०मुमुक्षुव्यवहारप्रकरणेपौरुषस्थापनंनामपंचमःसर्गः॥ ५॥ ॥प्रथमोदिवसः॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

विशुद्धबुद्धिःपदतदर्थतत्परीक्षाकुशलोव्युत्पन्नःसन्नित्यर्थः ॥ गुरुसतीर्थ्याभिज्ञतमादिसत्संगमैः स्वस्यआत्मनोगुणानांशांत्यादीनांदोषाणांरागादीनांचार्थानर्थपर्यवसानपर्यालोचनलक्षणानिविचारणानिकुर्यात् ॥३१ ॥ श्रीवाल्मीकिरुवाचारिष्टनेमिनंप्रतीतिदेवदूतोक्तिः ॥ मुनौवाल्मीकौइतिउक्तप्रकारेणवसिष्ठोक्तंभरद्वाजंप्रत्युक्तवतिसतिदिवसोजगाम ॥ इनःसूर्यश्चास्तंजगाम॥ भरद्वाजादिमुनिसभाचवाल्मीकयेकृतनमस्करणासायंतनायसंध्योपास्त्यग्निहोत्रादिविधयेस्नातुंजगाम॥अथश्यामायारात्रेःक्षयेसतिप्रातःरविकरेणआतपेनसहआजगाम ॥ पुनर्वाल्मीकिसन्निधिमित्यर्थः ॥ उत्तरत्रापिसर्वत्रायंश्लोकएवमेवव्याख्येयोनतुमुनौवसिष्ठेइत्युक्तवतीति ॥ उत्तरत्रविस्तरेणतत्रतत्रदशरथसभोत्थानवर्णनस्याह्निकशेषानुष्ठानस्यरात्रौरामादिभिःश्रुतार्थचिंतनस्योषःकालसूर्योदयादेश्चवर्णनविस्तरस्याकांडप्रस्तुतप्रलापत्वापत्तेः ॥३२॥ ॥इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रास्तिप्रबलंदैवंतत्रापिपरपौरुषम् ॥ प्रोच्यतेबलवद्दैवंप्राक्तनंवास्यपौरुषम् ॥ १ ॥ उक्तमेवार्थंप्रतिष्ठापयिष्यन्वसिष्ठउवाच ॥ तस्मादिति ॥ तस्मात्स्वतंत्रस्यदुर्वचत्वात् प्राक्तनपौरुषादन्यद्दैवंनास्ति ॥ तद्दैवंतदधीनोहंनस्वतंत्रइतिदैष्टिकतामितियावत् ॥ दूरतःप्रोज्झ्यत्यक्त्वा ॥ उत्तारयेत् संसारादितिशेषः ॥ १ ॥ किंतद्बलंतद्दर्शयति ॥ यथेति ॥ २ ॥ हाकष्टमितिदुःखरूपेणपरिणतंप्राक्तनंकर्मोच्यतेतदेवदैवमित्यर्थः ॥ ३ ॥ इतराकारंस्वरूपांतरवत् ॥ अस्तुप्राक्तनकर्मैवदैवंकिंततस्तत्राह ॥ बालइति ॥ ४ ॥ चारुणा आचारेणप्रायश्चित्तादिना ॥ शुभतामशुभाक्षमताम् ॥ ५ ॥ लोभयंतीतिलोभाविषयसुखलवास्तेषुलंपटाःसंतोयेनयतंतेतेदीनाः ॥ प्राकृताःपामराः ॥ ६ ॥ यत्रापिदैवप्राब

श्रीवसिष्ठउवाच ॥ तस्मात्प्राक्पौरुषाद्दैवंनान्यत्तत्प्रोज्झ्यदूरतः ॥ साधुसंगमसच्छास्त्रैर्जीवमुत्तारयेद्बलात् ॥ १ ॥ यथायथाप्रयत्नःस्याद्भवेदाशुफलंतथा ॥ इतिपौरुषमेवास्तिदैवमस्तुतदेवच ॥ २ ॥ दुःखाद्यथादुःखकालेहाकष्टमितिकथ्यते ॥ हाकष्टशब्दपर्यायस्तथाहादैवमित्यपि ॥ ३ ॥ प्राक्स्वकर्मेतराकारंदैवंनामनविद्यते ॥ बालःप्रबलपुंसेवतज्जेतुमिहशक्यते ॥ ४ ॥ ह्यस्तनोदुष्टआचारआचारेणाद्यचारुणा ॥ यथाशुशुभतामेतिप्राक्तनंकर्मतत्तथा ॥ ५ ॥ तज्जयाययतंतेयेनलोभलवलंपटाः ॥ तेदीनाःप्राकृतामूढाःस्थितादैवपरायणाः ॥ ६ ॥ पौरुषेणकृतंकर्मदैवाद्यदभिनश्यति ॥ तत्रनाशयितुर्ज्ञेयंपौरुषंबलवत्तरम् ॥ ७ ॥ यदेकवृंतफलयोरथैकंशून्यकोटरम् ॥ तत्रप्रयत्नःस्फुरितस्तथातद्रसंसविदः ॥ ८ ॥ यत्प्रयांतिजगद्भावाःसंसिद्धाअपिसंक्षयम् ॥ क्षयकारकयत्नस्यत्यत्रज्ञेयंमहद्बलम् ॥ ९ ॥ द्वौहुडाविवयुद्ध्येतेपुरुषार्थौपरस्परम् ॥ यएवबलवांस्तत्रसएवजयतिक्षणात् ॥ १० ॥ भिक्षुकोमंगलेभेननृपोयक्रियतेबलात् ॥ तदमात्येभपौराणांप्रयत्नस्यबलंमहत् ॥ ११ ॥ पौरुषेणान्नमाक्रम्ययथादंतेनचूर्ण्यते ॥ अन्यःपौरुषमाश्रित्यतथाशूरेणचूर्ण्यते ॥ १२ ॥ अन्नभूताहिमहतांलघवोयत्नशालिनाम् ॥ यथेष्टंविनियोज्यंतेतेनकर्मसुलोष्टवत् ॥ १३ ॥

ल्यप्रसिद्धिस्तत्रापिपौरुषस्यैवप्राबल्यमितिदर्शयति ॥ पौरुषेणेति ॥ ७ ॥ नन्वस्तुपुरुषतंत्रेष्वेवमपुरुषतंत्रेषुतुदैवमेवशरणंस्यात्तत्राह ॥ यदिति ॥ शून्यकोटरंरसशून्यंदृश्यतइतिशेषः ॥ तद्रसंसेवंत्युपभुंक्तेयःपुरुषःकीटादिर्वातस्यप्राक्तनऐहिकोवाप्रयत्नएवतद्रसविधानायस्फुरितः ॥ ८ ॥ एकत्रोक्तंन्यायमन्यत्रापिदर्शयति ॥ यदित्यादिना ॥ यत्यत्र ॥ जगतिप्रसिद्धाभावाःपदार्थाः ॥ ९ ॥ तत्रोक्तंस्मारयति ॥ द्वाविति ॥ १० ॥ राजवंशाभावेपौरामात्यविसृष्टेनमंगलालंकृतेनेभेनगजेनयःकश्चिद्भिक्षुकोपिनृपःक्रियतेइतिप्रसिद्धंयत्तदितिसंबंधः ॥ ११ ॥ अन्नमदनार्हंचर्वणयोग्यमितियावत् ॥ आत्तमितिपाठेमुखेनगृहीतंतदेव ॥ आक्रम्यनिष्पीड्य ॥ अन्योदुर्बलः ॥ शूरेणप्रबलेन ॥ १२ ॥ हियस्माद्धेतोः ॥ अन्नभूताउपभोग्यभूताः ॥ लघवोऽल्पबलाः ॥ तेनहेतुना ॥ लोष्टंशुष्कमृत्पिंडः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिस्वस्मिन् ॥ अबुद्धिनामूढेन ॥१४ ॥ तेषांशक्तानामपिभूतानांबलवद्भूतंयत्तदधिष्ठातृनियंतृएतत्सतांविद्यमानप्राणिनांमिथःपरस्परंस्फुटंव्यक्तंनतुदैवंस्थितमित्यन्वयः॥ यत्नस्तेनेतिपाठेनुनेनहेतुनायत्नएवस्थितोनदैवंस्थितमितिभित्त्वाव्याख्येयम् ॥ १५ ॥ अविकल्पाऐकमत्यापन्नेतियावत् ॥ स्वभावधीःस्वारसिकीबुद्धिर्यासैवभिक्षुकराजभावस्यकर्त्तृकर्त्रीप्रजास्थितेश्चधर्त्तृधारयित्री॥ पदसंस्कारपक्षेंतरंगंसामान्येनपुंसकंबहिरंगेणविशेष्यसंबंधेननबाध्यते॥ तथाचमहाभाष्येशास्त्रेणधर्मनियमइतिवार्त्तिकशेषप्रसंगेनप्रयोगः॥ शक्यंचानेनस्वमांसादिभिरपिक्षुत्प्रतिहंतुंतत्रशास्त्रेणनियमःक्रियतेपंचपंचनखाभक्ष्याइतीति ॥ १६ ॥ अन्यपौरुषेणान्यस्यफलभोगेअतिप्रसंगमाशंक्यपक्षांतरमाह ॥ भिक्षुकइति ॥ तत्रप्राक्तनंबलवत्पौरुषंवाकारणमित्यन्वयः॥ १७॥ पुरुषंस्पंदयतीतिपुरुषस्पंदोयत्नः॥ अनुद्वेगवाननुद्वेगादुपरतः॥ तथाविधस्त्विदानींतनएवसंभवतिन

शक्तस्यपौरुषंदृश्यमदृश्यंवापियद्भवेत्॥ तद्दैवमित्यशक्तेनबुद्धमात्मन्यबुद्धिना ॥ १४ ॥ भूतानांबलवद्भूतंयत्तद्दैवमितिस्थितम्॥ तत्तेषामप्यधिष्ठातृसत्तामेतत्स्फुटंमिथः॥ १५॥ शास्त्रामात्येभपौराणामविकल्पास्वभावधीः॥ यासाभिक्षुकराज्यस्यकर्त्तृधर्त्तृप्रजास्थितेः॥ १६॥भिक्षुकोमंगलेभेननृपोयक्रियतेक्वचित्॥प्राक्तनंपौरुषंतत्रबलवद्वापिकारणम्॥१७॥ऐहिकःप्राक्तनंहंतिप्राक्तनोद्यतनंबलात्॥ सर्वदापुरुषस्पंदस्तत्रानुद्वेगवाञ्जयी॥ १८॥ द्वयोरद्यतनस्यैवप्रत्यक्षाद्बलिताभवेत्॥ दैवंजेतुंयतोयत्नैर्बालोयूनेवशक्यते ॥ १९॥ मेघेननीयतेयद्वद्वत्सरोपार्जिताकृषिः॥ मेघस्यपुरुषार्थोसौजयत्यधिकयत्नवान्॥२०॥ क्रमेणोपार्जितेप्यर्थेनष्टेकार्यानखेदिता॥ नबलंयत्रमेशक्तंतत्रकापरिदेवना॥२१॥ यन्नशक्नोमितस्यार्थेयदिदुःखंकरोम्यहम्॥ तदमारितमृत्योर्मेयुक्तंप्रत्यहरोदनम्॥ २२॥ देशकालक्रियाद्रव्यवशतोविस्फुरंत्यमी॥ सर्वएवजगद्भावाजयत्यधिकयत्नवान् ॥ २३॥ तस्मात्पौरुषमाश्रित्यसच्छास्त्रैःसत्समागमैः॥ प्रज्ञाममलतांनीत्वासंसारजलधिंतरेत्॥२४॥ प्राक्तनश्चैहिकश्चेमौपुरुषार्थौफलद्रुमौ॥ संजातौपुरुषारण्येजयत्यभ्यधिकस्तयोः॥२५॥

प्राक्तनस्तस्यप्रागेवविच्छिन्नत्वादितिभावः ॥ १८ ॥ तमेवस्पष्टमाह ॥ द्वयोरिति ॥ १९ ॥ ननुकरकादिनिपातेनकृषिफलविघाताद्दैववैपरीत्यमेवदृष्टमित्याशंक्यसोप्यस्मदिष्टसाधकएवदृष्टांतइत्याह ॥ मेघेनेति॥नीयतेअपनीयतेविनाश्यतइत्यर्थः॥ मेघस्यमेघाभिमानिपुरुषस्यासौपुरुषार्थोयद्वत्तद्वदन्यत्रापिबोध्यमित्यर्थः॥ अभ्युपेत्यचेदंवस्तुतस्तुतत्रापिप्राक्तनंस्वस्यपौरुषमेवादृष्टद्वाराहेतुः ॥२०॥ अस्तुवाक्वचित्पौरुषवैफल्यंतथापिनखेदोयुक्तःकिंतुपुनरुद्योगएवयुक्तइत्याह ॥ क्रमेणेत्यादिचतुर्भिः॥ २१ ॥ २२ ॥ देशेति ॥ तथाचयत्रदेशेकालेवास्वयत्नोविफलोभूत्तद्विहायदेशांतरेकालांतरेक्रियांतरेणद्रव्यांतरेणवायतितव्यमेव ॥ प्रागादिदिक्षुविघ्नितस्यापिविश्वामित्रतपसउत्तरदिशिसिद्धिदर्शनादितिभावः॥ २३ ॥ २४ ॥ फलतौफलजननसमर्थौतथाविधौचतौद्रुमौचफलद्रुमौसंजातौपुरुषारण्ये॥ एकस्यमूलच्छेदेनशोषेपरस्यप्ररोहोत्रजयः॥ २५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थानभ्युपगमेअनिष्टंदर्शयन्नीश्वराधीनतावादंनिराचष्टे ॥ कर्मैत्यादिना ॥ योननिहंतिअनीशोऽस्वतंत्रोयंजंतुरीश्वरप्रेरितःसन्स्वर्गंनरकमेववागच्छेद्विनापिपुण्यपापाभ्या मित्यर्थः॥२६॥तथाचानिर्मोक्षप्रसंगइत्याह ॥ सइति ॥२७॥ स्वपक्षेतुनायंदोषइत्याह ॥ यस्त्विति ॥ प्रयत्नकौशलमत्रचमत्कारः॥२८॥ ईश्वरस्वातंत्र्यनिरासमुपसंहरति ॥क श्चिदिति ॥ ननुएषह्येवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषते यआत्मनितिष्ठन्नात्मानमंतरोयमयति ईश्वरः सर्वभूतानांहृद्देशेर्जुनतिष्ठति इत्यादिश्रुतिस्मृतिविरुद्धंकथ मीश्वरापलापेनजीवस्वातंत्र्यमुच्यते॥ननुभवतापिकथंयथाकारीयथाचारीतथाभवतिसाधुकारीसाधुर्भवतिपापकारीपापोभवति यजेतजुहुयाद्दद्यात् कर्ताशास्त्रार्थवत्वात् न कर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभुरित्याद्यनेकश्रुतिसूत्रस्मृत्यनुभवविरुद्धंजीवस्यपारतंत्र्यमुच्यते ॥ नह्यस्वतंत्रोजीवःकर्त्ताभवति ॥ स्वतंत्रःकर्त्तेत्यनुशासनविरोधात् ॥ नवाब लवत्तरेश्वरायत्तोयंविधिशतेननिषेधसहस्रेणवाप्रवर्त्तयितुंनिवर्त्तयितुंवाशक्यते ॥ कथंवाबलादीश्वरेणब्रह्मवधादौप्रवर्त्तितोयमपराधीस्यात् ॥ कथंवाविषमेषुस्वयमेवकांश्चि त्प्रवर्त्यतान्नरकादिभागिनःकुर्वाणस्येश्वरस्यवैषम्यनैर्घृण्यदोषौनस्याताम्॥कथंवाअंतर्यामिब्राह्मणवाक्यशेषेनान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतानान्योतोस्तिमंतेत्यादिनाजी

कर्मयःप्राक्तनंतुच्छंननिहंतिशुभेहितैः॥ अज्ञोजंतुरनीशोसावात्मनःसुखदुःखयोः॥ २६ ॥ ईश्वरप्रेरितोगच्छेत्स्वर्गंनरकमेववा॥ स सदैवपराधीनःपशुरेवनसंशयः॥ २७॥ यस्तूदारचमत्कारःसदाचारविहारवान् ॥ सनिर्यातिजगन्मोहान्मृगेंद्रःपंजरादिव॥ २८ ॥ कश्चिन्मांप्रेरयत्येवमित्यनर्थकुकल्पने ॥ यःस्थितोऽदृष्टमुत्सृज्यत्याज्योसौदूरतोधमः॥ २९ ॥ व्यवहारसहस्राणियान्युपायांतियांति च॥ यथाशास्त्रंविहर्त्तव्यंतेषुत्यक्त्वासुखासुखे॥३०॥ यथाशास्त्रमनुच्छिन्नांमर्यादांस्वामनुज्झतः॥ उपतिष्ठंतिसर्वाणिरत्नान्यंबुनिधा विव॥३१॥ स्वार्थप्रापककार्यैकप्रयत्नपरताबुधैः॥ प्रोक्तापौरुषशब्देनसासिद्ध्यैशास्त्रयंत्रिता॥ ३२॥

वापलापेनेश्वरैकस्वातंत्र्यसमर्थनंचसंगच्छताम्॥यदितुकेवलाज्ञपुरुषदृष्टिमवलंब्यकर्मकांडप्रवृत्तेर्जीवस्वातंत्र्यवादः तच्छैथिल्यापादनेनसर्वभूतेष्वैकात्म्यव्युत्पादनायप्रवृत्तां विवेकदृष्टिमवलंब्येश्वरैकस्वातंत्र्यवादः तत्फलज्ञानेनलब्धांपूर्वदृष्टिमवलंब्यतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूः नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभु रित्यादिश्रुतिस्मृतिवादाः यथास्वप्नदर्पणादौदारुहस्तिधावनस्यहस्तिदृष्ट्यादर्शनेहस्तीधावतिनदारु दारुदृशादर्शनेतुदार्वेवधावतिनहस्ती परमार्थदृशातुनहस्तीनवादारुनवाधा वत्यविकृतंपुरुषदर्पणादिस्वरूपमेवास्तेइतिवादास्तद्वदित्यविरोधंब्रूषेतर्हिमोक्षोपायप्रवर्त्तकवसिष्ठवचनस्याप्यज्ञविषयत्वाद्युक्तएवात्रेश्वरस्वातंत्र्यनिरासः ॥ तथाचभगवत्पादी यंभाष्यम् ॥ तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासंपुरस्कृत्यसर्वेप्रमाणप्रमेयव्यवहारालौकिकाःप्रवृत्ताःसर्वाणिचशास्त्राणिविधिनिषेधमोक्षपराणीति ॥ एवंचाज्ञदृष्टि सिद्धजीवस्वातंत्र्यपक्षप्राप्तकर्मानुसारेणनियंतुरीश्वरस्यनवैषम्यनैर्घृण्यादिप्रसक्तिरपीतिभावः ॥ २९ ॥ उपायांतिलाभादिफलेन ॥ यांतितद्विघातेन॥तेषुप्रियाप्रियेरागद्वेषौत्य क्त्वायथाशास्त्रमेवव्यवहर्त्तव्यमित्यर्थः ॥ ३० ॥ सर्वाणिअभीष्टानीतिशेषः ॥ ३१ ॥ पौरुषशब्दार्थमाह ॥ स्वार्थेति ॥ स्वार्थःसुखंदुःखनिवृत्तिश्चतत्प्रापकाणियान्यवश्यकर्त्त व्यानिसाधनानितदेकप्रयत्नतत्परतेत्यर्थः॥ सासिद्ध्यैपरमपुरुषार्थाय ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पंदोदेहादिचलनंतद्धर्मिण्यातत्परंपरारूपयाशुश्रूषयाश्रवणादिक्रियया साधुसंगमेनसच्छास्त्रैश्चासंभावनादिदोषनिरासेननिशितयास्वयाधियास्वयमात्माउन्नीयतेउद्ध्रियते साचास्यस्वार्थसाधकतेत्यर्थः ॥३३॥ साधुसच्छास्त्रयोर्लक्षणमाह ॥ अनंतमिति ॥ समताअज्ञानकृतवैषम्यनिवृत्तिः ॥३४॥ यल्लोकद्वयहितंपौरुषंभवेत्तद्देवदेवलोकभुक्तशिष्टं देवलोकादिहागत्यस्थितस्यदैवशब्देनकथ्यतइत्यर्थः ॥ ३५ ॥ तदेतद्युक्तमेतस्मिन्नास्तिसंदेहइतिशेषः ॥ तन्नापवदामहेनर्निदामः ॥ किंतर्हिनिंद्यतेतदाह ॥ मूढैरिति ॥ तेक्षयंगताइत्यपवदामहेइतिशेषः ॥३६॥ ननुप्राग्देवलोकावाप्तिरपिदैवादेवकिंनस्यात्तत्राह ॥ नित्यमिति ॥ प्रसाधितंफलेनोपसंहरति ॥ ह्यस्तनीत्यादिना ॥३७॥ एवंअद्यतन्याप्राक्तनी शोभामभ्येतीतिपूर्वेणान्वयः ॥ नन्वस्तुप्राक्तनजयःपुरुषार्थसिद्धिस्तुकुतस्तत्राह ॥ तस्मादिति ॥ यःकार्यवान्भवेत्तस्यतत्फलंकरामलकवद्दृष्टमित्यन्वयः ॥३८॥ हेशुभाशयत त्तस्मात्कारणान्निजस्यस्वस्यविकल्पोर्थशून्याचित्तवृत्तिस्तद्वशादुपकल्पितमतएवासन्मयम् ॥ स्वार्थेमयट् ॥ तत्रहेतुः ॥ सकलैःकारणैःकार्यैःप्रयोजनैश्चविवर्जितमितितथा

क्रिययास्पंदधर्मिण्यास्वार्थसाधकतास्वयम् ॥ साधुसंगमसच्छास्त्रतीक्ष्णयोन्नीयतेधिया॥३३॥अनंतंसमतानंदंपरमार्थंविदुर्बुधाः॥ सयेभ्यःप्राप्यतेनित्यंतेसेव्याःशास्त्रसाधवः॥३४॥देवलोकादिहागत्यलोकद्वयहितंभवेत्॥प्राक्तनंपौरुषंतद्दैवशब्देनकथ्यते॥३५॥तद्युक्तमेतदंतस्मिन्नास्तिनापवदामहे॥मूढैःप्रकल्पितंदैवंमन्यंतेयेक्षयंगताः॥३६॥नित्यंस्वपौरुषादेवलोकद्वयहितंभवेत्॥ह्यस्तनीदुष्क्रियाभ्येतिशोभांसत्क्रिययायथा॥३७॥अद्यैवंप्राक्तनीतस्माद्यत्नाद्यःकार्यवान्भवेत्॥करामलकवद्दृष्टंपौरुषादेवतत्फलम्॥मूढःप्रत्यक्षमुत्सृज्यदैवमोहेनिमज्जति॥३८॥सकलकारणकार्य्यविवर्जितंनिजविकल्पबलादुपकल्पितम्॥ तदनपेक्ष्यहिदैवमसन्मयंश्रयशुभाशयपौरुषमात्मनः॥ ३९ ॥शास्त्रैःसदाचरविजृंभितदेशधर्मैर्यत्कल्पितंफलमतीवचिरप्ररूढम् ॥ तास्मिन्हृदिस्फुरतिचोपनमेतिचित्तमंगावलीतदनुपौरुषमेतदाहुः॥४०॥ बुध्द्वैवपौरुषफलंपुरुषत्वमेतदात्मप्रयत्नपरतैवसदैवकार्या॥ नेयाततःसफलतांपरमामथासौ सच्छास्त्रसाधुजनपंडितसेवनेन ॥ ४१ ॥दैवपौरुषविचारचारुभिश्चेदमाचरितमात्मपौरुषम् ॥ नित्यमेवजयतीतिभाविततैःकार्यआर्यजनसेवयोद्यमः॥ ४२ ॥

विधंदैवमनपेक्ष्यपौरुषंश्रयस्वीकुरु ॥ ३९ ॥ किंतत्पौरुषंयच्छ्रयेत्युच्यतेतदाह ॥ शास्त्रैरिति ॥ वेदस्मृत्यादिभिःशास्त्रैःसतामाचरणंसदाचरः ॥ घञर्थेकविधानमितिकः ॥ तेनविजृंभितविस्तीर्णायेदेशधर्मास्तत्तद्देशनियताचारास्तैश्चयच्चित्तशुद्धिलक्षणंज्ञानलक्षणंचफलंकल्पितंसमर्थितमतीवचिरंप्ररूढं प्रसिद्धंचतस्मिन्हृदिबुद्धौस्फुरति ॥ अभिलषितेसतितत्साधनाचरणेच्छयाचित्तंचोपनंस्पंदम् ॥ चुपमंदायांगतौल्युट् ॥ एतिप्राप्नोतितदनुसारेणअंगावलीइंद्रियहस्तपादादिश्चोपनमेतिश्रवणादिनाव्यवहरतिएतदेवपौरुषमित्याहुःशिष्टाइत्यर्थः ॥ ४० ॥ एतत्पुरुषत्वमधिकारिपुंजन्मपौरुषफलंपुरुषार्थसिद्धावेवसफलंनान्यथेतिबुध्द्वासदैवआत्मप्रयत्नपरतैवकार्या ॥ अथासौप्रयत्नपरतासच्छास्त्राणांसाधुजनानांसेवनेनतदनुगतविचारेणात्मज्ञानफललाभेनसफलतांनेयाप्रापणीया ॥ नयतेर्द्विकर्मणःप्रधानेनीहृकृष्वहामितिप्रधानकर्मणएवकृत्येनाभिधानादप्रधानेकर्म्मणिद्वितीया ॥ ४१ ॥ इदमात्मपौरुषंनित्यमाचरितंसद्दैवंजयत्येवेतिदैवपौरुषयोर्बलाबलविचारेणचारुभिश्चकाराच्छमदमादिमद्भिरधिकारिभिरार्यजनसेवयानित्यंभाविततैःश्रवणादिभिरुद्यमःकार्यस्तत्त्वज्ञानायेत्यर्थः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषजीवऐहिकमिहास्मिन्नधिकारिजन्मनिसंपाद्यमानंसहजंशास्त्रबोधितत्वात्सत्यंफलाविसंवादीतियावत् ॥ तथाविधंपौरुषमेवसिद्धौपरमपुरुषार्थलाभायेतिबुध्वानित्यसंतु
ष्टानांपराणांसर्वोत्कृष्टानांपंडितानांब्रह्मविदांसेवनेनसेवालक्षणेनावितथेनामोघेनमृष्टेनमधुरतरेणवरौषधेनजन्मप्रबंधोजन्मपरंपरातन्मयंतत्प्रचुरमामयंशांतिनयतु ॥ अधीष्टे
लोट् ॥ अतिसुलभोपायेसतिकिमर्थमवसीदतीत्यर्थः ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेदैवनिराकरणंनामषष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥
पौरुषैकप्रधानत्वमुदाहरणविस्तरैः ॥ प्रत्युदाहरणैश्चात्रयुक्तिभिश्चसमर्थ्यते ॥ १॥ कृतमेवंदैवनिरासेनपौरुषप्राधान्यसमर्थनमुदाहरणप्रत्युदाहरणैर्दृढीकरिष्यन्नधिकारिणोहि
तोपदेशोपपत्तिभिःपुरुषार्थेअवतारयति ॥ प्राप्येति ॥ अल्पाआधिवेदनामानसदुःखभोगायस्मिन् ॥ समादध्याच्चित्तसमाधानायप्रयतेत ॥ १ ॥ अनिच्छतःकथंयत्नःस्यादि
तितत्रेच्छावश्यकत्वमाह ॥ दैवमिति ॥ संपूर्णाभिवांछितोभवतीतिशेषः ॥ २ ॥ अन्वयमुखेनोक्तमर्थंव्यतिरेकमुखेनापिसमर्थयति ॥ येइति ॥ आत्मविद्विषःस्वात्मशत्रवः

जन्मप्रबंधमयमामयमेषजीवोबुध्वैहिकंसहजपौरुषमेवसिद्धौ ॥ शांतिंनयत्ववितथेनवरौषधेनमृष्टेनतुष्टपरपंडितसेवनेन ॥ ४३ ॥
इतिश्रीवासि० वा० दे० मो० मुमुक्षुव्यवहारप्रकरणेदैवनिराकरणंनामषष्ठःसर्गः ॥ ६ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ प्राप्यव्याधिविनि
र्मुक्तंदेहमल्पाधिवेदनम् ॥ तथात्मनिसमादध्याद्यथाभूयोनजायते ॥ १ ॥ दैवंपुरुषकारेणयोनिवर्त्तितुमिच्छति ॥ इहवामुत्रजगतिससं
पूर्णाभिवांछितः ॥ २ ॥ येसमुद्योगमुत्सृज्यस्थितादैवपरायणाः ॥ तेधर्ममर्थंकामंचनाशयंत्यात्मविद्विषः ॥ ३ ॥ संवित्स्पंदोमनःस्पंदऐं
द्रियस्पंदएवच ॥ एतानिपुरुषार्थस्यरूपाण्येभ्यःफलोदयः ॥ ४ ॥ यथासंवेदनंचेतस्तथातत्स्पंदमृच्छति ॥ तथैवकायश्चलतितथैवफल
भोक्तृता ॥ ५ ॥ आबालमेतत्संसिद्धंयत्रयत्रयथायथा ॥ दैवंतुनक्वचिद्दृष्टमतोजगतिपौरुषम् ॥ ६ ॥ पुरुषार्थेनदेवानांगुरुरेवबृहस्पतिः ॥
शुक्रोदैत्येंद्रगुरुतांपुरुषार्थेनचास्थितः ॥ ७ ॥ दैन्यदारिद्र्यदुःखार्त्ताअपिसाधोनरोत्तमाः ॥ पौरुषेणैवयत्नेनयातादेवेंद्रतुल्यताम् ॥ ८ ॥

॥ ३ ॥ प्रत्यक्षपौरुषविरुद्धंदैवंप्रत्याचिख्यासुःपौरुषस्यप्रत्यक्षसिद्धंस्वरूपमाह ॥ संवित्स्पंदइत्यादिना ॥ संवित्स्पंदःपुरुषार्थतत्साधनस्फूर्त्तिस्तेनतत्साधनेच्छायत्नोमनःस्पंदस्ते
नकर्मेंद्रियाणामंगचालनायप्रवृत्तिरैंद्रियस्पंदः ॥ एवकारचकाराभ्यांतत्प्रयुक्तकायबाह्योपकरणस्पंदोपिसंगृह्यते ॥ एतानिपुरुषार्थस्यपौरुषस्यरूपाणिक्रमिकविभेदाः ॥ एते
भ्योनिरंतरवृत्तेभ्यःफलोदयोऽभिलषितार्थसिद्धिःप्रसिद्धेत्यर्थः ॥ ४ ॥ उक्तमर्थंविवृणोति ॥ यथेति ॥ यथासंवेदनंसाक्षिणियादृशीविषयस्फूर्त्तिःपूर्वंभवतिततोमनस्तादृशंस्पं
दमृच्छतिगच्छति ॥ तथैवकर्मेंद्रियस्पंदेनकायश्चलति ॥ क्रियानुसारिणीचफलसिद्धिरित्यर्थः ॥ ५ ॥ यत्रयत्रफलेलौकिकेवैदिकेवायथायथापौरुषमुपयुज्यते ध्यानादौमान
समेवप्रधानमासनमौनेतदंगे स्तवनादौवाचिकमेवप्रधानमैकाग्र्यसांमुख्येतदंगे यात्रादौतुकायिकमेवप्रधानंवाङ्मनोनियमौतदंगे क्वचित्तुद्वयोर्द्वयोःप्राधान्यंक्वचित्त्रयाणामिति
तत्रतत्रतथातथातत्पौरुषमाबालंबालानभिव्याप्यसंसिद्धंप्रत्यक्षसिद्धंदैवंतुनक्वचिद्दृष्टमित्यसदेवेत्यर्थः ॥ ६ ॥ उक्तमर्थमुदाहरणैःस्फुटयति ॥ पुरुषार्थेनेत्यादिचतुर्भिः ॥ ७ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नानाविधानामैश्वर्यरूपाणांविभवानांसमाश्रयानहुषादयः ॥ ९ ॥ भावाविभवाअभावाविपदस्तेषांसहस्रेषु ॥ निवृत्ताअतिक्रांताः ॥ १० ॥ लौकिकाःस्वतएवयागादयः स्वतःशास्त्रतश्चज्ञानंतुस्वतःशास्त्रतोगुरुतश्चेतित्रिसिद्धयः ॥ (ननुदैवोसिद्धीयमहा) निर्व्यापारदैवदुर्ग्रहवादिनांमतावलंबनेसर्वविधीनामुच्छेदप्रसंगः ॥ सोमेनयजेतेत्यादिवाक्यबोधितयागानांव्यापारजन्यत्वाद्भावनानांचपुरुषप्रवृत्तिनिमित्तत्वात्प्रवृत्तेश्चपरिस्पंदरूपत्वात् ॥ ११ ॥ तेषुप्रस्तुतोपयोगिसारंदर्शयति ॥ अशुभेष्विति ॥ १२ ॥ श्रेयःसर्वोत्कृष्टम् ॥ अतुच्छंपरमार्थसत्यम् ॥ अपायविवर्जितंनित्यम् ॥ फलतोयद्यदीदृशंतत्तदाचर ॥ १३ ॥ आशुशीघ्रंभवतीतिशेषः ॥ इतिनिश्चित्य ॥ १४ ॥ क्रमआचरणम् ॥ दुः

महांतोविभवास्वादैर्नानाश्वर्यसमाश्रयाः॥ पौरुषेणैवदोषेणनरकातिथितांगताः॥ ९ ॥ भावाभावसहस्रेषुदशासुविविधासुच॥ स्वपौरुषवशादेवनिवृत्ताभूतजातयः॥ १० ॥ शास्त्रतोगुरुतश्चैवस्वतश्चेतित्रिसिद्धयः॥ सर्वत्रपुरुषार्थस्यनदैवस्यकदाचन॥ ११ ॥ अशुभेषुसमाविष्टंशुभेष्वेवावतारयेत्॥ प्रयत्नाच्चित्तमित्येषसर्वशास्त्रार्थसंग्रहः॥ १२॥ यच्छ्रेयोयदतुच्छंचयदपायविवर्जितम्॥ तत्तदाचरयत्नेनपुत्रेतिगुरवःस्थिताः॥ १३॥ यथायथाप्रयत्नोमेफलमाशुतथातथा॥ इत्यहंपौरुषादेवफलभाङ्नतुदैवतः॥ १४॥ पौरुषाद्दृश्यतेसिद्धिःपौरुषाद्धीमतांक्रमः॥ दैवमाश्वासनामात्रंदुःखेपेलवबुद्धिषु॥ १५॥ प्रत्यक्षप्रमुखैर्नित्यंप्रमाणैःपौरुषक्रमः॥ फलितोदृश्यतेलोकेदेशांतरगमादिकः॥ १६॥ भोक्तातृप्यतिनाभोक्तागंतागच्छतिनागतिः॥ वक्तावक्तिनचावक्तापौरुषंसफलंनृणाम्॥ १७॥ पौरुषेणदुरंतेभ्यःसंकटेभ्यःसुबुद्धयः॥ समुत्तरंत्ययत्नेननतुमोघतयानया ॥ १८ ॥ योयोयथाप्रयततेससतत्तत्फलैकभाक्॥ नतुतूष्णींस्थितेनेहकेनचित्प्राप्यतेफलम्॥ १९॥ शुभेनपुरुषार्थेनशुभमासाद्यतेफलम्॥ अशुभेनाशुभंरामयथेच्छसितथाकुरु॥ २०॥ पुरुषार्थात्फलप्राप्तिर्देशकालवशादिह॥ प्राप्ताचिरेणशीघ्रंवायासौदैवमितिस्मृता॥ २१॥ नदैवंदृश्यतेदृष्ट्यानचलोकांतरेस्थितम्॥ उक्तंदैवाभिधानेनस्वर्ल्लोकेकर्मणःफलम्॥ २२॥ पुरुषोजायतेलोकेवर्द्धतेजीर्यतेपुनः॥ नतत्रदृश्यतेदैवंजरायौवनबाल्यवत्॥ २३॥

खेरुदत्सुपेलवबुद्धिष्वल्पबुद्धिषुआश्वासनामात्रमश्रुमार्जनतुल्यम् ॥ १५ ॥ देशांतरेगमनंगमः ॥ १६ ॥ इतिसफलंदृष्टमितिशेषः ॥ १७॥ मोघतयानिर्व्यापाररूपया ॥ अनयादैवदृष्ट्या ॥ १८ ॥ एकभाक्नियतंभाजनम् ॥ १९ ॥ २० ॥ यदिदैवेमहतीभक्तिस्तर्हिपौरुषमेवदैवबुद्ध्यावलंब्यतांनत्वसत्कल्पमन्यदित्यभिप्रेत्याह॥ पुरुषार्थादित्यादिना॥ फलप्राप्तिःफलसंपत् ॥ २१ ॥ ननुस्वर्गादिलोकस्थंदैवमिहादर्शनेननापलपितुंशक्यंतत्राह ॥ नेति ॥ स्वर्लोकेस्वर्गलोके ॥ २२ ॥ तत्रपुरुषे ॥ २३ ॥

१ एतावंत्यक्षराणिपुस्तकत्रयेदृष्टानीतितथैवस्थापितानि ॥ (ननुदैवस्यत्रिसिद्धयः) इतिचेद्वरमितिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदसत्पौरुषयोर्विभागमाह ॥ अर्थेत्यादिना ॥ २४ ॥ देशांतरप्राप्तिःपादयोःपौरुषेण ॥ अन्योव्यापारश्चांगांतराणांपौरुषेणैवनदैवतोदृष्टइत्यर्थः ॥ २५ ॥ अनर्थस्यप्राप्तिर्य स्मादितिव्यधिकरणपदबहुव्रीहिः ॥ कर्मणिक्तिनिसमानाधिकरणपदोवा ॥ नकिंचिच्छुभमितिशेषः ॥ अशुभंतुप्राप्यतएव ॥ २६ ॥ अधिकविवक्षयोक्तमेवपुनराह ॥ क्रिय येत्यादिना ॥ क्रिययेतितृतीयांतपाठःप्राग्व्याख्यातः ॥ क्वचित्तुक्रियायाःस्पंदधर्मिण्याइतिपाठस्तत्रक्रियायाःस्वार्थसाधकताप्रसिद्धेतितत्फलभूतयाधियास्वयमुन्नीयतेउन्निध्र यतइत्यर्थः ॥ २७ ॥ समताअज्ञानकृतवैषम्यनिवृत्तिस्तदुपलक्षितमानंदंयेविदुःसचानंदोयेभ्यःप्राप्यतेतेसेव्याःप्रणिपातपरिप्रश्नशुश्रूषादिभिरभ्यासेनचावर्ज्जनीयाः ॥ २८ ॥

अर्थप्रापककार्यैकप्रयत्नपरताबुधैः॥ प्रोक्तापौरुषशब्देनसर्वमासाद्यतेनया॥ २४॥ देशाद्देशांतरप्राप्तिर्हस्तस्यद्रव्यधारणम्॥ व्यापा रश्चतथांगानांपौरुषेणनदैवतः॥ २५॥ अनर्थप्राप्तिकार्यैकप्रयत्नपरतातुया॥ प्रोक्ताप्रोन्मत्तचेष्टेतिनकिंचित्प्राप्यतेनया॥ २६ ॥ क्रि ययास्पंदधर्मिण्यास्वार्थसाधकतास्वयम्॥ साधुसंगमसच्छास्त्रतीक्ष्णयोन्नीयतेधिया ॥ २७॥ अनंतसमतानंदंपरमार्थस्वकंविदुः॥ सयेभ्यःप्राप्यतेयत्नात्सेव्यास्तेशास्त्रसाधवः॥२८॥ सच्छास्त्रादिगुणोमत्यासच्छास्त्रादिगुणान्मतिः॥ विवर्धेतेमिथोभ्यासात्सरोब्जावि वकालतः॥२९॥ आबाल्यादलमभ्यस्तैःशास्त्रसत्संगमादिभिः॥ गुणैःपुरुषयत्नेनस्वार्थःसंपद्यतेहितः॥ ३०॥ पौरुषेणजितादैत्याःस्था पिताभुवनक्रियाः॥ रचितानिजगंतीहविष्णुनानचदैवतः॥ ३१ ॥ जगतिपुरुषकारकारणेस्मिन्कुरुरघुनाथचिरंतथाप्रयत्नम्॥ व्रज सितरुसरीसृपाभिधानांसुभगयथानदशामशंकएव॥३२॥ ॥इतिश्रीवासिष्ठमहारामायणेवा०दे०मो० मुमुक्षुव्यवहारप्रकरणेपौ रुषप्राधान्यसमर्थनंनामसप्तमःसर्गः॥७॥ ॥छ॥

यद्विवक्षयोक्तमपिपुनरुक्तंतदाह ॥ सच्छास्त्रेति ॥ आदिपदात्साधुसंगमपरिग्रहः ॥ तत्रसाधुसंगमाभ्यासस्यगुणस्तत्समशीलताप्राप्तिः ॥ शास्त्राभ्यासस्यगुणःशास्त्रतात्पर्यज्ञानं॥ मतिस्तत्त्वबोधः ॥ यथायथायंगुरुशुश्रूषाशास्त्राभ्यासपरोभवतितथातथास्यबोधोविवर्द्धते ॥ यथायथाचबोधाभिवृद्धिस्तथातथागुरुशास्त्रविश्वासवृद्धिस्तद्गुणवृद्ध्यासुखादि वृद्ध्योत्तरोत्तरभूमिकामारोहति ॥ कालतश्चिरकालतोवर्षाकालतश्च ॥ २९ ॥ तथाचतद्विवृद्धयेचिरंयत्नःकार्यइतिवक्तुमुक्तमेवपुनराह ॥ आबाल्यादिति ॥ ३० ॥ ३१ ॥ पुरुषकारःपौरुषंतदेवपुरुषार्थकारणंयस्मिंस्तथाविधेजगति ॥ रघुनाथेत्यधिकृतकुलश्रेष्ठत्वद्योतनायसंबोधनम् ॥ सरीसृपःसर्पः ॥ ३२ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्य प्रकाशेमुमुक्षुव्यवहारप्रकरणेसप्तमःसर्गः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वर्णितंदैवमिथ्यात्वमुदाहरणविस्तरैः ॥ उपजीव्यविरोधादियुक्तिभिश्चसमर्थ्यते ॥ १ ॥ इत्थंदैवंनिरस्यपौरुषस्वातंत्र्यसमर्थितेप्यनाश्वासेनमोमुह्यमानंप्राग्वैराग्यप्रकरणेपंच
विंशेसर्गे अत्रैवदुर्विलासानांचूडामणिरिहापरः ॥ करोत्यर्त्तातिलोकेस्मिन्दैवंकालश्चकथ्यते ॥ तेनेयमखिलाभूतसंततिःपरिपेलवा ॥ तापेनहिममालेवनीताविधुरतांभृशम् ॥
नृत्यतोहिकृतांतस्यनितांतमिवरागिणः ॥ नित्यंनियतिकांतायांमुनेपरमकामितेत्यादिनास्वेनविस्तरेणोपवर्णितंबहुतरश्रुतिस्मृतिपुराणेतिहासेषुपरमस्वतंत्रतयाप्रसिद्धंदैवंदुरपह्नवमि
तिमन्यमानंश्रीरामंलिंगैरुपलक्ष्ययावदस्यदैवस्वातंत्र्येउपजीव्यविरोधोनप्रदर्शितस्तावन्नविश्वसिष्यतीतितंदिदर्शयिषुःश्रीवसिष्ठउवाच ॥ नाकृतिरित्यादिना ॥ आकृतिर्जाति
रनुगतसंस्थानंच ॥ कर्मस्पंदपराक्रमाणांमानसशारीरफलोपधानैःसामान्यविशेषतद्विशेषभावेनवाभेदः ॥ यस्यैनेनसंततिदैवंकिंस्वरूपमितिनतत्त्वतोनिर्णीयजनैरुच्यते ॥ यतो
दुर्वचंतत्तस्मान्मिथ्याज्ञानवद्देवरूढमित्यर्थः ॥ मिथोऽज्ञानवदितिपाठेपिअज्ञानंभ्रांतिज्ञानंतद्वद्देवमिथोन्योन्यंव्यवहारेरूढमित्यर्थः ॥ १ ॥ किमधिष्ठानाभ्रांतिरितिचेत्तद्दर्शयन्

श्रीवसिष्ठउवाच॥ ॥नाकृतिर्नचकर्माणिनस्पंदोनपराक्रमः॥ तन्मिथ्याज्ञानवद्रूढंदैवंनामकिमुच्यते॥ १ ॥ स्वकर्मफलसंप्राप्ताविद
मित्थमितीतियाः॥ गिरस्तादैवनाम्नैताःप्रसिद्धिंसमुपागताः॥२॥ तत्रैवमूढमतिभिर्दैवमस्तीतिनिश्चयः॥ आत्तोदुरवबोधेनरज्ज्वामि
वभुजंगमः॥३॥ ह्यस्तनीदुष्क्रियाभ्येतिशोभांसत्क्रिययायथा॥ अद्यैवंप्राक्तनीतस्माद्यत्नात्सत्कार्यवान्भवेत्॥४॥ मूढानुमानसंसिद्धं
दैवंयस्यास्तिदुर्मतेः॥ दैवाद्दाहोस्तिनैवेतिगंतव्यंतेनपावके॥५॥ दैवमेवेहचेत्कर्तृपुंसःकिमिवचेष्टया॥ स्नानदानासनोच्चारान्दैवमेव
करिष्यति॥६॥ किंवाशास्त्रोपदेशेनमूकोयंपुरुषःकिल॥ संचार्यतेतुदैवेनकिंकस्येहोपदिश्यते॥ ७॥ नचनिस्पंदतालोकेदृष्टेहशवतांवि
ना॥ स्पंदाच्चफलसंप्राप्तिस्तस्माद्दैवंनिरर्थकम्॥८॥नचामूर्त्तेनदैवेनमूर्त्तस्यसहकर्तृता॥ पुंसःसंदृश्यतेकाचित्तस्माद्दैवंनिरर्थकम्॥९॥

मिथोव्यवहारंस्फुटयति ॥ स्वकर्मेति ॥ इदंकर्मइत्थमनेनक्रमेणानुष्ठितमितिएवंरूपफलसंपन्नमितियागिरोवाग्व्यवहारास्ताःलक्षणयातद्विषयाइत्यर्थः ॥ २ ॥ तत्रतेषु ॥ दुरव
बोधेनभ्रांत्या ॥ आत्तोगृहीतः ॥३॥ तथाचमदुक्तमेवफलितमित्याह ॥ ह्यस्तनीति ॥४॥ उपजीव्यप्रमाणविरोधंविवक्षुःप्रथमंप्रत्यक्षस्वक्रियाविरोधमाह ॥ मूढेति ॥ दाहोनै
वास्तीतिदेवान्निश्चित्यगंतव्यमित्यन्वयः ॥ ५ ॥ उच्चारान्दानाद्यंगमंत्राद्युच्चारणानि ॥ ६ ॥ तथाचवेदादिप्रामाण्यविरोधइत्याह ॥ किमिति ॥ मूकोवाग्व्यापारेप्यस्वतंत्रः
॥ ७ ॥ दृष्टविरोधोपीत्याह ॥ नचेति ॥ ८ ॥ ननुदेहादिस्पंदःकर्त्रंतरसमुच्चयकर्तृकःक्रियात्वात्शिबिकोद्वहनवदित्यनुमानेमूर्त्तकर्त्रंतरस्यप्रत्यक्षबाधेअमूर्त्तःसहकारिकर्त्तासे
त्स्यतितदेवदैवंनःसिद्धमित्याशंक्याह ॥ नचेति ॥ तथाचमूर्त्तसमुच्चितकर्तृकत्वंदृश्यसमुच्चितकर्तृकत्वंचोपाधिरित्यर्थः॥तथाचपक्षेउपाध्यभावाभावेनसाध्याभावःसिद्धइत्या
ह ॥ तस्मादिति ॥ ९ ॥

क्वचिल्लेखनवपनादौ मिथः परस्परं लेखनीक्षुराद्यंगानि समासाद्य प्राप्य योर्द्वयोर्मध्ये द्वितीयस्य प्रत्याख्यानमेकैकस्य कर्तृता च संदृश्यत इत्यनुषज्यते ॥ क्वचित्तु पुस्तके पुंसः संदृश्यत इत्यर्द्धं पुनः पठ्यते ॥ एतेन हस्तपादमनोबुद्ध्यादिवत्क्रियोपकरणत्वेनापि दैवकल्पना शानिरस्तेत्याह ॥ हस्तादीनामिति ॥ तत्र हस्तादौ सतितेन दैवस्यान्यथासिद्धेः करणत्वाऽयोगाद्वातरोगादिनाहतत्वेन ष्टत्वे सतीत्युक्तम् ॥ हइतिकिलार्थे ॥ १० ॥ ११ ॥ किंच दैवसिद्धौ कर्त्रादिकारकबुद्धिरेव मानं तत्पृथग्भूतबुद्धिर्वा ॥ द्वितीये क्रियायामनुपयुक्तोन्य एव दैवमिति निरर्थकोऽर्थः कल्पितः स्यात् ॥ आद्ये प्रसिद्धकर्त्रादिरेव दैवशब्देनोक्तः स्यादित्याह ॥ पृथगिति ॥ ननु समानपांडित्यादिफलमीहमानानामधीयानानां किंचिदेवतः फलेन युज्यंते न सर्वैं तत्रावश्यं वैषम्ये निमित्तं कल्प्यं कार्यवैषम्यलिंगस्य कल्पनाप्रमाणत्वादिति चेत्तत्राह ॥ कल्पनायामिति ॥ तत्रापि दृष्टसजातीयपौरुषमेव प्राक्तनं कल्प्यते नाप्रसिद्धं दैव

मिथोंगानि समासाद्य द्वयोरेकैककर्तृता ॥ हस्तादीनां हतत्वे हन दैवेन क्वचित्कृतम् ॥ १० ॥ मनोबुद्धिवदप्येतद्दैवं नेहानुभूयते ॥ आगोपालं कृतप्रज्ञैस्तेन दैवमसत्सदा ॥ ११ ॥ पृथक् चेद्बुद्धिरन्योर्थः सैव चेत्का न्यता तयोः ॥ कल्पनायां प्रमाणं चेत्पौरुषं किं न कल्प्यते ॥ १२ ॥ नामूर्तैस्तेन संगोऽस्ति नभसेव वपुष्मतः ॥ मूर्तं च दृश्यते लग्नं तस्माद्दैवं न विद्यते ॥ १३ ॥ विनियोक्त्रथ भूतानामस्त्यन्यच्चेज्जगत्त्रये ॥ शेरते भूतवृंदानि दैवं सर्वं करिष्यति ॥ १४ ॥ दैवेन त्वभियुक्तोहं तत्करोमीदृशं स्थितम् ॥ समाश्वासनवागेषा न दैवं परमार्थतः ॥ १५ ॥ मूढैः प्रकल्पितं दैवं तत्परास्ते क्षयं गताः ॥ प्राज्ञास्तु पौरुषार्थेन पदमुत्तमतां गताः ॥ १६ ॥ ये शूरा ये च विक्रांता ये प्राज्ञा ये च पंडिताः ॥ तैस्तैः किमिव लोकेस्मिन्वद दैवं प्रतीक्ष्यते ॥ १७ ॥ कालविद्भिर्विनिर्णीता यस्यातिचिरजीविता ॥ स चेज्जीवति संछिन्नशिरास्तद्दैवमुत्तमम् ॥ १८ ॥ कालविद्भिर्विनिर्णीतं पांडित्यं यस्य राघव ॥ अनध्यापित एवासौ तज्ज्ञश्चेद्दैवमुत्तमम् ॥ १९ ॥ विश्वामित्रेण मुनिना दैवमुत्सृज्य दूरतः ॥ पौरुषेणैव संप्राप्तं ब्राह्मण्यं राम नान्यथा ॥ २० ॥ अस्माभिरपरै रामपुरुषैर्मुनितां गतैः ॥ पौरुषेणैव संप्राप्ता चिरं गगनगामिता ॥ २१ ॥ उत्साद्य देवसंघातं चक्रुस्त्रिभुवनोदरे ॥ पौरुषेणैव यत्नेन साम्राज्यं दानवेश्वराः ॥ २२ ॥

मित्यर्थः ॥ १२ ॥ कारकांतरसहकारित्वायोग्यत्वादपि न तत्कल्पना युक्तेत्याह ॥ नेति ॥ तेन कारकांतरेण ॥ संगः संयोगः ॥ वपुष्मतोस्मदादेः ॥ चकारोवधारणे ॥ यस्मान्मूर्त्तमेव लग्नं परस्परसंयुक्तं दृश्यते तस्मात् ॥ १३ ॥ शेरते शयीरन् ॥ व्यत्ययेन लिङर्थे लट् ॥ १४ ॥ अभियुक्तः प्रेरितः ॥ स्थितं दैवसंकल्पसिद्धम् ॥ १५ ॥ १६ ॥ किमिति काकुः प्रश्नच्छलेनाक्षेपे ॥ १७ ॥ ननु दैवज्ञा यद्यहानुनिवेदयंति तद्दैवं दैवमित्याशंक्य तेषां लिंगविधया चारभेदेन पौरुषतः फलसूचकत्वमेव न कारणतेत्यभिप्रेत्याह ॥ कालविद्भिरिति ॥ १८ ॥ उत्तमं श्रेष्ठं कारणं सिद्ध्येदिति शेषः ॥ १९ ॥ विश्वासदार्ढ्याय पुरोगतेष्वेव पौरुषफलमुदाहरति ॥ विश्वामित्रेणेति ॥ २० ॥ २१ ॥ यत्तु प्रसिद्धमिंद्रादिदैवं तदपि पौरुषेण पराजितं प्रसिद्धमित्याह ॥ उत्साद्येति ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योपितस्यजयःसोपिपौरुषादेवनस्वतइत्याह ॥ आलूनेति ॥ आभोगिविस्तीर्णजगत् आलूनंछिन्नंशीर्णंजर्जरीकृतंचशत्रुसैन्यंयस्मिन्युद्धादिकर्मणितद्यथास्यात्तथाआजक्रुः
प्रत्याजक्रुः ॥ तथाचदैवस्यापिदैवंपौरुषमेवेतिभावः ॥ २३ ॥ अनयारालमधूच्छिष्टादिलेपनादिरूपेणप्रसिद्धयापौरुषयुक्त्या ॥ करंडकेवंशसंपुटके ॥ २४ ॥ भरणंस्वजनपो
षणम् ॥ आदानंबलात्परराष्ट्रादेः ॥ संरंभःक्रोधेनपरनिग्रहः ॥ विभ्रमाभोगविलासाः ॥ अन्येपियेश्रमभूमयःकष्टसाध्याःपुरुषार्थास्तेषुदैवस्यशक्ततानदृश्यते॥ ओषधिग्रहणं
मणिमंत्राद्युपलक्षणंतस्येव ॥ २५ ॥ हेशुभाशयत्वंनिजःस्वीयोविकल्पोभ्रमस्तस्मादुपकल्पितमिवासन्मयंतुच्छप्रायंदैवमनपेक्ष्यपौरुषंश्रयआश्रय ॥ २६ ॥ ॥ इतिवासि
ष्ठमहारामा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेअष्टमःसर्गः ॥ ८ ॥ ॥ ७ ॥ ॥ दैवापलापसिद्ध्यर्थंमनोमात्रत्वमुच्यते ॥ कर्मणःसफलस्यात्रमनसश्चचिदात्मता ॥ १ ॥
पूर्वंपौरुषस्वातंत्र्यसिद्धयेक्वचिद्दैवमसदेवनास्त्येवेत्यपलपितम् क्वचित्तुप्राक्तनप्रयत्नजन्यकर्मैवदैवंपौरुषमेववादैवमित्युक्तं तत्रप्रथमकल्पेदृढतरलोकवेदप्रसिद्धेर्निरालंबनत्वाप

आलूनशीर्णमाभोगिजगदाजक्रुरोजसा ॥ पौरुषेणैवयत्नेनदानवेभ्यःसुरेश्वराः ॥ २३ ॥ रामपौरुषयुक्त्याचसलिलंधार्य्यतेनया॥
चिरंकरंडकेचारुनदैवंतत्रकारणम्॥ २४ ॥ भरणादानसंरंभविभ्रमश्रमभूमिषु॥ शक्तताद्दश्यतेरामनदैवस्यौषधेरिव ॥ २५ ॥ सक
लकारणकार्यविवर्जितंनिजविकल्पवशादुपकल्पितम् ॥ त्वमनपेक्ष्यहिदैवमसन्मयंश्रयशुभाशयपौरुषमुत्तमम् ॥ २६ ॥ ॥इति
श्रीवासिष्ठमहारामायणेवा०दे०मो०मुमुक्षुव्य०दैवनिराकरणंनामअष्टमःसर्गः॥८॥ ॥७॥ ॥श्रीरामउवाच॥ ॥भगवन्सर्व
धर्मज्ञप्रतिष्ठामलमागतम्॥ यल्लोकेतद्ददब्रह्मन्दैवंनामकिमुच्यते॥ १ ॥ ॥श्रीवसिष्ठउवाच॥ ॥पौरुषंसर्वकार्याणांकर्त्तृराघवनेत
रत्॥ फलभोक्तृचसर्वत्रनदैवंतत्रकारणम्॥ २॥ दैवंनकिंचित्कुरुतेनभुंक्तेनचविद्यते ॥ नदृश्यतेनाद्रियतेकेवलंकल्पनेदृशी ॥ ३ ॥ सि
द्धस्यपौरुषेणेहफलस्यफलशालिना॥ शुभाशुभार्थसंपत्तिर्दैवशब्देनकथ्यते॥ ४॥

त्तिमसतिदुर्बलेनत्सापेक्षपौरुषप्राबल्योक्तिविरोधंच द्वितीयेतुअसद्दैवमितिप्रतिज्ञानुपपत्तिमाधुनिकप्रवृत्तीनामपिपूर्वकर्मफलतयातदनुगुणतयैवोत्पत्तौतद्विरोधित्वाभावेनता
भिस्तज्जयोक्तिविरोधंतत्पारतंत्र्येपिपुरुषस्वातंत्र्यविघातंचाक्षेप्स्यामीतिगूढाभिसंधिःश्रीरामस्तदर्थंगुरोःकतरस्मिन्कल्पेनिर्भरइतिजिज्ञासुरुवाच ॥ भगवन्निति ॥ प्रतिष्ठांप्रसि
द्धिमलमत्यंतमागतंप्राप्तंयद्दैवंतत्किमसद्वुतसदेवेत्यर्थः ॥१॥ एवंपृष्टोज्ञातरामाभिप्रायःश्रीवसिष्ठोपिदैवापलापोपपत्त्यैवजगदपलापेनाद्वितीयमात्मतत्त्वंबुबोधयिषुःकल्पयोःफ
लतोनास्तिभेदइतिगूढाभिप्रायःप्रथमकल्पमेवावलंब्योक्तमेवोवाच॥ पौरुषमिति ॥ वस्तुतउदासीनत्वादात्मनोनकर्त्तृत्वंनवाभोक्तृत्वमितिद्योतनायकरणेपिपौरुषेतत्कर्तृताव्य
पदेशः ॥ २ ॥ विवेकिभिर्नाद्रियते ॥ कल्पनानिरूढभ्रांतिर्ह्लोकानामित्यर्थः ॥ ३ ॥ निरालंबनत्वानुपपत्तिपरिहरति ॥ सिद्धस्येति ॥ फलशालिनाअवश्यंफलवतापौरुषेण
सिद्धस्यवनितापिंडादेर्भर्त्तृसपत्न्यादिभिःशुभाशुभंयत्प्राप्यतेतदेवालंब्यदैवमितिव्यवह्रियतइत्यर्थः ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथममिष्टस्यपश्चादनिष्टापिप्राप्तिर्भवतिकदाचित्प्रथममनिष्टस्यपश्चादिष्टापीतितथोक्तिः ॥ कथ्यतेलोकैरितिशेषः ॥ ५ ॥ लौकायतिकानांमतमाह ॥ भावीति ॥ पुरुषार्थो त्रभोगः ॥ ६ ॥ सिद्धांतमाह ॥ नन्विति ॥ कस्यचित्किंचिद्देवंदैवमाकाशरूपंशून्यकल्पंनभोनैल्यसदृशंवाकरोतिभ्रांतदृशानकरोतिविवेकिदृशा ॥ ७ ॥ इदंफलमित्थमेतद्बीजात्मनाप्राकूस्थितम् ॥८॥९॥इष्टानिष्टफलयोःप्राप्तौसत्यामिदंप्राक्तनंकर्मइत्थमेवंप्रकारमित्यस्यार्थस्य॥सर्वकल्पनानांपौरुषेएवांतर्भावः॥१०॥ कल्पद्वयाभेदोक्त्याऽऽशयमप्रतिपद्यमानःप्रथमकल्पेनोपक्रम्यद्वितीयकल्पेनोपसंहारेविरोधंमन्यमानःस्वाभिसंधिप्रकाशयन्श्रीरामउवाच ॥ भगवन्निति ॥ यत्प्राक्तनंकर्मतद्देवपुनःपुनर्दैवमितियद्युक्तंतर्हितद्विद्यतएवनविद्यतेइतित्वयाकथमपमृष्टमपलपितम् ॥ अपलापवचनस्यकोभिप्रायइत्यर्थः ॥ ११ ॥ स्वाभिसंधिप्रकटयन्श्रीवसिष्ठउवाच ॥ साध्विति ॥ जानासिविरोधंकल्पद्वयेपिदोषांश्चेतिभावः ॥ स्थिरादोषाशंकानुपहता ॥१२॥ कर्मभावेनकायिकवाचिककर्मभावेन ॥ यद्धिमनसाध्यायतितद्वाचावदतितत्कर्मणाकरोतीतिश्रुतेस्तथैवानुभ

पौरुषोपनतानित्यमिष्टानिष्टस्यवस्तुनः॥प्राप्तिरिष्टाप्यनिष्टावादैवशब्देनकथ्यते ॥ ५ ॥ भावीत्ववश्यमेवार्थःपुरुषार्थैकसाधनः॥ यः सोस्मिँल्लोकसंघातेदैवशब्देनकथ्यते॥ ६॥ ननुराघवलोकस्यकस्यचित्किंचिदेवहि॥ दैवमाकाशरूपंहिकरोतिनकरोतिच ॥ ७॥ पुरुषार्थस्यसिद्धस्यशुभाशुभफलोदये॥ इदमित्थंस्थितमितियोक्तिस्तद्दैवमुच्यते॥ ८॥ इत्थंममाभवद्बुद्धिरित्थंमेनिश्चयोत्यभूत् ॥ इतिकर्मफलप्राप्तौयोक्तिस्तद्दैवमुच्यते ॥ ९ ॥ इष्टानिष्टफलप्राप्ताविदमित्यस्यवाचकम् ॥ आश्वासनामात्रवचोदैवमित्येवकथ्यते॥ १० ॥

॥श्रीरामउवाच॥ ॥भगवन्सर्वधर्मज्ञयत्प्राक्कर्मोपसंचितम् ॥ तद्दैवंदैवमित्युक्तमपमृष्टंकथंत्वया ॥ ११॥ ॥श्रीवसिष्ठउवाच॥

साधुराघवजानासिश्रृणुवक्ष्यामितेखिलम्॥ दैवंनास्तीतितियेनस्थिराबुद्धिर्भविष्यति॥ १२॥ यामनोवासनापूर्वंबभूवकिलभूरिशः॥ सैवेयंकर्मभावेननृणांपरिणतिंगता॥१३॥ जंतुर्यद्वासनोरामतत्कर्त्ताभवतिक्षणात्॥ अन्यकर्मान्यभावश्चेत्येतन्नैवोपपद्यते॥ १४॥ ग्रामगोग्राममाप्नोतिपत्तनार्थीचपत्तनम्॥ योयोयद्वासनस्तत्रससप्रयततेसदा ॥ १५॥ यदेवतीव्रसंवेगाद्दृढंकर्मकृतंपुरा॥तदेवदैवशब्देनपर्यायेणेहकथ्यते॥ १६॥ एवंकर्मस्थकर्माणिकर्मप्रौढास्ववासना॥ वासनामनसोनान्यामनोहिपुरुषःस्मृतः॥ १७॥

वाच्चेतिभावः ॥१३॥ तदेवान्वयव्यतिरेकोपदर्शनेनोपपादयति ॥ जंतुरिति ॥१४॥ विशेषेसहचारदर्शनात्सामान्येव्याप्तिःसिद्धेत्याह ॥ ग्रामगइति ॥ ग्रामगोग्रामगमनगोचरोद्भूतवासनः ॥१५॥ तीव्रसंवेगात्फलाभिलाषातिशयात् ॥ कर्मप्रयत्नप्राबल्येनकृतंयत् ॥१६॥ कर्मसुतिष्ठंतीतिकर्मस्थाःकर्त्तारस्तेषांसर्वाणिकर्माण्येवमुक्तरीत्यैवभवंति ॥ कर्मचप्रौढाउपचितास्ववासनैव ॥ वासनाचत्वकारणान्मनसोनान्या ॥ वाचारंभणंविकारोनामधेयमितिश्रुत्युक्तन्यायात् ॥ यद्यपिवाक्काययोरपिकर्मदृश्यतेतथापितयोरपिविमर्शेमनोवासनामात्रत्वंवक्ष्यमाणमभिप्रेत्यैवमुक्तम् ॥ मनश्चपुरुषःपूर्णात्मैवनततोव्यतिरिच्यते ॥ तन्मनोकुरुतआत्मन्वीस्यामितीत्यादिश्रुतेर्मनसःपुरुषविवर्त्तत्वादितिभावः॥१७॥

१ पौरुषजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरुषस्यचपरमार्थतोनिर्विकारचिन्मात्ररूपत्वान्मनसोऽसत्वेकर्मासत्वात्तदात्मकदैवासत्वंफलितमित्याह ॥ यदिति ॥ १८ ॥ प्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृ ण्वन्श्रोत्रंमन्वानोमनइतिश्रुतेरात्मनएवाध्यासान्मनआदिभावेनस्थितस्यकर्मतत्फलभावेनाप्यवस्थितिरितिसएवदैवमितियद्युच्यतेतर्हिअस्तुनाममनतेनपुरुषस्वातंत्र्यविघातइत्या शयेनाह ॥ एषएवेति ॥ मनःमनआदिभावंप्राप्तः ॥ १९ ॥ यद्यत्यंतासदेवमनस्तर्हिकथंतेनव्यवहारसिद्धिर्वंध्यापुत्रादिनातददर्शनादित्याशंक्ययौक्तिकदृशातस्यानिर्वचनीय तांदर्शयंस्तदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानमित्यादिश्रुतिमनुरुध्यमनसएवदैवादिसंज्ञाभेदाइत्याह ॥ मनइति ॥ दुर्निश्चयस्यसत्त्वासत्त्वचिज्जडत्वभेदाभेदादिनात त्त्वतोनिश्चेतुमशक्यस्यमिथ्याभूतस्यमनसस्तदात्मतापन्नस्यपुरुषस्येतियावत् ॥२०॥ तथाचपुरुषस्वातंत्र्यंसिद्धमित्याह ॥एवंनामेति ॥ एवंपूर्वोक्तविधानिनामानियस्य॥२१॥ सपुरुषकारः ॥ २२ ॥ एवमंपिप्राक्तनवासनापरवशस्यनेदानींस्वातंत्र्यसिद्धिरितिरामःशंकते ॥ प्राक्तनमिति ॥ कृपणोदीनःपरवशइतियावत् ॥२३॥ अस्त्विदानींफलेअस्वातं

यद्दैवंतानिकर्माणिकर्मसाधोमनोहितत् ॥ मनोहिपुरुषस्तस्माद्दैवंनास्तीतिनिश्चयः॥ १८॥ एषएवमनोजंतुर्यद्यत्प्रयततेहितम् ॥ कृतंत त्तदवाप्नोतिस्वतएवहिदैवतः॥१९॥ मनश्चित्तंवासनाचकर्मदैवंचनिश्चयः ॥रामदुर्निश्चयस्यैताःसंज्ञास्सद्भिरुदाहृताः ॥ २० ॥ एवं नामाहिपुरुषोदृढभावनयायथा॥ नित्यंप्रयततेरामफलमाप्नोत्यलंतथा ॥ २१ ॥ एवंपुरुषकारेणसर्वमेवरघूद्वह॥ प्राप्यतेनेतरेणेहत स्मात्सशुभदोस्तुते॥२२॥ ॥श्रीरामउवाच॥ ॥प्राक्तनंवासनाजालंनियोजयतिमांयथा॥ मुनेतथैवतिष्ठामिकृपणःकिंकरोम्यहम् ॥२३॥ ॥श्रीवसिष्ठउवाच॥ ॥अतएवहिरामत्वंश्रेयःप्राप्नोषिशाश्वतम् ॥ स्वप्रयत्नोपनीतेनपौरुषेणैवनान्यथा॥ २४॥ द्विविधोवा सनाव्यूहःशुभश्चैवाशुभश्चते॥ प्राक्तनोविद्यतेरामद्वयोरेकतरोथवा ॥ २५ ॥ वासनौघेनशुद्धेनतत्रचेदद्यनीयसे॥ तत्क्रमेणशुभेनैव पदंप्राप्स्यसिशाश्वतम् ॥ २६ ॥ अथचेदशुभोभावस्त्वांयोजयतिसंकटे॥ प्राक्तनस्तदसौयत्नाज्जेतव्योभवताबलात् ॥ २७॥

त्र्यंऔत्तरकालिकफलानुकूलेयत्नेतुस्वातंत्र्यमस्त्येव ॥ सद्विद्यासंपन्नजन्मानुमितसत्प्रयत्नप्रारब्धफलायाःपूर्ववासनायाःस्वविरुद्धफलमात्रप्रतिरोधकत्वात्तदधिकृतजन्मन्य पितत्प्रवृत्त्यस्वातंत्र्येकर्मब्रह्मविद्यापरशास्त्रवैयर्थ्यप्रसंगादित्यभिप्रेत्यश्रीवसिष्ठउवाच ॥ अतएवहीति ॥ अतःअधिकृतजन्महेतुवासनानुगुण्यादेव ॥ वासनानुगुण्यस्यजन्मवि वेकसंपद्विशेषेणानुमानादितिभावः ॥ प्राप्नोषिप्राप्स्यसि ॥ वर्त्तमानसामीप्येवर्त्तमानवद्व्यपदेशः ॥ २४ ॥ उक्तमेवार्थंसमर्थयितुंवासनांविभज्यपृच्छति ॥ द्विविधइति ॥२५॥ तत्राद्येतावदाह ॥ वासनौघेनेति ॥ २६॥ द्वितीयेप्याह ॥ अथेति॥ नस्वातंत्र्येणवासनानामुद्बोधःकिंतूद्बोधकानुसारेण ॥ यद्यसत्समागमादिनादैवादेकाअशुभवासनोद्भवेत्सा पितद्विरोधिसाधुसंगमसच्छास्त्रसेवनेनविरोधिवासनामुद्भाव्योत्पाद्यवाझटितितिरस्कार्येत्यर्थः ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुयोमनसितिष्ठन्मनसोंतरोयंमनोनवेदेतिमनसःप्रेरकःप्राज्ञात्मान्यःश्रूयतेतदधीनेमनोवासनोद्भवेकथंममसद्वासनोद्भवस्वातंत्र्यमित्याशंक्याह ॥ प्राज्ञइति ॥ यश्चेतनमात्रश्चि न्मात्रस्वभावःप्राज्ञःश्रुतःसएवत्वंनजडात्मकःसूक्ष्मःस्थूलोवादेहस्त्वंयेनान्यःस्याः ॥ नान्योतोस्तिद्रष्टातत्त्वमसीत्यादिश्रुतेः ॥ तत्तस्मादेवंचिन्मात्रस्वरूपस्यतवअन्येनचेतसाचे तनेनचेत्यत्वंभास्यत्वंकविद्यते ॥ यदिप्राज्ञस्त्वदन्यःस्यात्तर्हिचितश्चिदंतरेणप्रकाशायोगात्त्वामपश्यन्नसर्वज्ञएवसस्यादतस्त्वमेवसइतिव्यतिहारेणैक्यंसिद्धमितिभावः ॥ पाठांत रेअन्येनत्वंचेत्यदिचेत्यसेभास्यसेतर्हितेतवचेतस्त्वंचेतनत्वंकविद्यते ॥ चिद्भास्यस्यजडत्वापत्तेदुर्वारत्वादित्यर्थः ॥ २८ ॥ चितश्चिदंतरवेद्यत्वेतदप्यन्यवेद्यमित्यनवस्थापिस्या दित्याह॥अन्यइति ॥इमंतच्चेतयितारंकश्चेतयेत् ॥ तस्याप्यन्यश्चेदनवस्थास्यात्साचनवास्तवीवस्तुसिद्धिकरीतितवसद्वासनोद्बोधयत्नेस्वातंत्र्यमव्याहतमितिभावः ॥ २९ ॥ पु रुषस्वातंत्र्यप्रसाधनस्यफलमाह ॥ शुभाशुभाभ्यामिति ॥ ३० ॥ ३१ ॥ चित्तनदीहिद्विधाप्रवहतिपुण्यायचपापायचतत्रैकस्रोतोनिरोधेअपरत्रद्विगुणंवहतीतियोगशास्त्रोक्ति

प्राज्ञश्चेतनमात्रस्त्वंनदेहस्त्वंजडात्मकः॥ अन्येनचेतसातत्तेचेत्यत्वंक्वैवविद्यते॥ २८॥ अन्यस्त्वांचेतयतिचेत्तंचेतयतिकोपरः॥ कइमं चेतयेत्तस्मादनवस्थानवास्तवी॥ २९॥ शुभाशुभाभ्यांमार्गाभ्यांवहंतीवासनासरित्॥ पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि॥ ३०॥ अशुभेषुसमाविष्टंशुभेष्वेवावतारय॥ स्वंमनःपुरुषार्थेनबलेनबलिनांवर॥ ३१॥ अशुभाच्चालितंयातिशुभंतस्मादपीतरत्॥ जंतोश्चि त्तंतुशिशुवत्तस्मात्तच्चालयेद्बलात्॥ ३२॥ समतासांत्वनेनाशुनद्रागितिशनैःशनैः॥ पौरुषेणैवयत्नेनपालयेच्चित्तबालकम्॥ ३३॥ वासनौघस्त्वयापूर्वमभ्यासेनघनीकृतः॥ शुभोवाप्यशुभोवापिशुभमद्यघनीकुरु॥ ३४॥ प्रागभ्यासवशाद्यातायदातेवासनोदयम्॥ तदाभ्यासस्यसाफल्यंविद्धित्वमरिमर्दन॥ ३५॥ इदानीमपितेयातिघनतांवासनानघ॥ अभ्यासवशतस्तस्माच्छुभाभ्यासमुपाहर ॥ ३६॥ पूर्वंचेद्घनतांयातानाभ्यासात्तववासना॥ वर्द्धिष्यतेतुनेदानीमपितातसुखीभव॥ ३७॥

मनुस्तत्याह ॥ अशुभादिति ॥ चालितंनिवारितम् ॥ तस्माच्छुभादपिचालितमितरदशुभम् ॥ चालयेदशुभादितिशेषः ॥ ३२ ॥ इतिउक्तक्रमेणचित्तबालकमाशुशीघ्रमेवरागा दिवैषम्यत्याजनेनस्वाभाविक्यांसमतायांसांत्वनेननिर्दोषतामापाद्यशनैःशनैरात्मस्वरूपेनिरोधलक्षणेनपौरुषेणप्रयत्नेनपालयेन्नतुद्रागेवहठान्निरुध्यादुद्वेगात्समाधानभंशो माभूदिति ॥ तथाचभगवद्वचनंशनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतयेत्यादि ॥ ३३ ॥ त्वयाशुभोवाअशुभोवाघनीकृतोस्तुनामतथाप्यद्यशुभमेवघनीकुरु ॥ प्रथमेफलशैघ्र्याय द्वितीयेतुविरोधिनिरासायतस्यावश्यकत्वादितिभावः ॥ ३४ ॥ नचवासनाभ्यासस्यवैफल्यंशंक्यंपूर्ववासनाभ्यासेषुप्रत्यक्षतःफलकॢप्तेरित्याह ॥ प्रागिति ॥ उदयमुद्भवंघनीभा वमित्यर्थः ॥ ३५ ॥ इदानीमपीति ॥ तद्वदेवेतिभावः ॥ ३६ ॥ प्राक्तनवासनाघनीभावेपिसंदिहानंप्रत्याह ॥ पूर्वमिति ॥ तथाचयथोचितंसुखेनव्यवहर्त्तव्यमितिनदुर्वासनाद्व द्विप्रयुक्तानर्थसंभावनेनविषादस्तेयुक्तइतिभावः ॥ ३७ ॥

---

१ अन्येनचेत्यसेचेत्तेचेतस्त्वंक्वेवविद्यतेइति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिकिमितिशुभवासनावर्द्धनेमांप्रवर्त्तयसितत्राह ॥ संदिग्धायामपीति ॥ समाहरउपचिनु ॥ शुभादाचरणादस्यांशुभायांवासनावृद्धौतुनकश्चनदोषः ॥ शुभाशुभफलारंभेसंदिग्धेपिशुभंचरेत् ॥ यदिनस्यात्तदाकिंस्याद्यदिस्यान्नास्तिकोहतइतिन्यायादितिभावः ॥ ३८ ॥ वस्तुतस्तुनसंदेहसंभावना अन्यत्राप्यभ्यासस्याभ्यस्यमानदार्ढ्यहेतुत्वक्लृप्तेरित्याह ॥ यद्यदिति ॥ ३९ ॥ ४० ॥ तर्हिकियत्कालंशुभवासनाअभ्यसनीयातत्राह ॥ अव्युत्पन्नेति ॥ तत्त्वज्ञानपर्यंतमित्यर्थः ॥ प्रमाणानियुक्त्यनुभवादीनि ॥ ४१ ॥ पक्वावस्थादिलग्नमलभागाःक्षारपाकेनेवशिथिलितारागादिवासनाकषायायस्यतेन ततस्तदनंतरंविज्ञातात्मवस्तुना ॥ तथाचस्मृतिः ॥ कषायेकर्मभिःपक्वेततोज्ञानंप्रजायतइति ॥ अतएवनिराधिनाअपगतमानसदुःखेनपूर्णेनेतियावत् ॥ ४२ ॥ उक्तमेवार्थंसंक्षिप्योपसंहरन्नाचरणीयंशुभंलक्षयति ॥ यदिति ॥ मनोज्ञभावाःशुभवासनास्तत्संपन्नयाबुद्ध्यापदंपरमार्थवस्तुअधिगमयसाक्षात्कुरु ॥ तच्छुभवासनानुसरणमप्यवमुच्यसाधुस्वरूपेतिष्ठ ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणे

संदिग्धायामपिभृशंशुभामेवसमाहर ॥ अस्यांतुवासनावृद्धौशुभाद्दोषोनकश्चन ॥ ३८ ॥ यद्यदभ्यस्यतेलोकेतन्मयेनैवभूयते ॥ इत्याकुमारंप्राज्ञेपुदृष्टंसंदेहवर्ज्जितम् ॥ ३९ ॥ शुभवासनयायुक्तस्तदत्रभवभूतये ॥ परंपौरुषमाश्रित्यविजित्येंद्रियपंचकम् ॥ ४० ॥ अव्युत्पन्नमनायावद्भवानज्ञाततत्पदः ॥ गुरुशास्त्रप्रमाणैस्तुनिर्णीतंतावदाचर ॥ ४१ ॥ ततःपक्वकषायेणनूनंविज्ञातवस्तुना ॥ शुभोप्यसौत्वयात्याज्योवासनौघोनिराधिना ॥ ४२ ॥ यदतिसुभगमार्यसेवितंतच्छुभमनुसृत्यमनोज्ञभावबुद्ध्या ॥ अधिगमयपदंसदाविशोकंतदनुतदप्यवमुच्यसाधुतिष्ठ ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेवा०दे०मो०मुमुक्षुव्यवहारप्रकरणेकर्मविचारोनामनवमःसर्गः ॥९॥ ॥७॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ यथास्थितंब्रह्मतत्त्वंसत्तानियतिरुच्यते ॥ साविनेतुर्विनेतृत्वंसाविनेयविनेयता ॥ १ ॥

नवमःसर्गः ॥९॥ ॥ ७ ॥ ॥ धातुःस्वस्यचजन्मात्रसमस्तजनमुक्तये ॥ स्वोपदेशइतिप्रोक्तोज्ञानावतरणक्रमः ॥ १ ॥ नन्वस्तुदैवंनामप्राक्तनंपौरुषमेवेतितदाधुनिकेनशुभाचरणेनजय्यंनियतिस्तुदुर्ज्जयैव ॥ याहिकृतांतस्यकांतेतिवर्णितावैराग्यप्रकरणे ॥ तांहिभाविपदार्थानामवश्यंभावलक्षणांभवितव्यतापरपर्यायामप्रतीकार्यामाहुरभियुक्ताः ॥ अवश्यंभाविभावानांप्रतीकारोभवेद्यदि ॥ तदादुःखैर्नलिप्येरन्नलरामयुधिष्ठिराइति ॥ तथाचतन्नियम्यत्वेपिपुरुषस्यनस्वातंत्र्यमितिशंकांपरिजिहीर्षुःश्रीवसिष्ठउवाच ॥ यथास्थितमिति ॥ ब्रह्मतत्त्वंयथास्थितंसच्चिदानंदस्वप्रकाशात्मनासर्वत्रसमतयासर्वानुकूल्येनस्थितंतत्संबंधिनीसर्वपदार्थानांसत्तैवभविष्यत्कालसंबंधेनव्यपदिश्यमानाभवितव्यताख्यानियतिरुच्यते ॥ सत्ताचसर्वत्रयथास्थितंब्रह्मतत्त्वं ॥ तदेवहिकारणकार्ययोर्नियामकनियम्यरूपेणावतिष्ठते ॥ कारणेसत्यवश्यंकार्येणभाव्यंकार्येसत्यवश्यंकारणेनभाव्यमितिनियतिर्नियमः ॥ साचविनेतुर्नियंतुःकारणादेर्विनेतृत्वंकार्यादिनियामकत्वम् ॥ विनेयस्यनियम्यस्यचकार्यादेर्विनेयतानियम्यता ॥ नियतपूर्वकालसत्ताकारणतानियतपश्चात्कालसत्ताकार्यतेतितयोर्देशकालविशेषितसत्तामात्ररूपत्वादित्यर्थः ॥ पूर्वोक्तनियतिरपिसर्वकारणभूतब्रह्मसत्तारूपकालशक्तिरितिभावः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतःसर्वानुकूलब्रह्मसत्तारूपत्वात्पौरुषसाफल्येप्यनुकूलैवनियतिर्नप्रतिकूलेत्यतउक्तंवचनंवक्ष्यमाणमिदमेकाग्र्यकरणोपायबोधकंप्रथमंतदेववचनमाह ॥ पौरुषमित्यादिना ॥ २ ॥ इंद्रियाणिमनोरथंविषयाभिलाषंस्वारूढानिसंतिअवांतरेमुक्तेरर्वाक्तनेऐहिकस्वर्गादिसुखेनिपातनशीलानिभवंत्यतस्तानियथामनोरथंनारोहंतितथापौरुषेणप्रयत्नेनसंयम्यमनःसमतांनयेत्यर्थः ॥ ३ ॥ तदनंतरंयत्कार्यंतदाह ॥ इहेत्यादिना ॥ इहसिद्धिर्जीवन्मुक्तता अमुत्रसिद्धिर्विदेहमुक्तता ॥ इहमनुष्यलोकेअमुत्रस्वर्गादिलोकेषुचाधिकारिणांज्ञानसिद्ध्यर्थमितिवा ॥ मोक्षोपायमयींमोक्षसाधनोपदेशप्रचुराम् ॥ यांसंहितांवक्ष्येतांस्वीकुर्विंतिशेषः ॥ ४ ॥ तच्छ्रवणेमंदविरक्तस्यापिनाधिकारइतिद्योतनायापुनर्ग्रहणायेति ॥ शमसंतोषौशांतिवैतृष्ण्यसुखे ॥ ५ ॥ कर्मकांडश्रुतयःपूर्ववाक्यानि ॥ उपासनापरश्रुतयउत्तरवाक्यानि ॥ अर्थविचारोज्ञानसाधकत्वं ॥ पूर्वापरवाक्यार्थविचार

अतःपौरुषमाश्रित्यश्रेयसेनित्यबांधवम् ॥ एकाग्रंकुरुतच्चित्तंशृणुचोक्तमिदंमम ॥ २ ॥ अवांतरनिपातीनिस्वारूढानिमनोरथम् ॥ पौरुषेणेंद्रियाण्याशुसंयम्यसमतांनय ॥ ३ ॥ इहामुत्रचसिद्ध्यर्थंपुरुषार्थफलप्रदाम् ॥ मोक्षोपायमयींवक्ष्येसंहितांसारनिर्मिताम् ॥ ४ ॥ अपुनर्ग्रहणायांतस्त्यक्तासंसारवासनाम् ॥ संपूर्णौशमसंतोषावादायोदारयाधिया ॥ ५ ॥ सपूर्वापरवाक्यार्थविचारविषयाहतम् ॥ मनःसमरसंकृत्वासानुसंधानमात्मनि ॥ ६ ॥ सुखदुःखक्षयकरंमहानंदैककारणम् ॥ मोक्षोपायमिमंरामवक्ष्यमाणंमयाशृणु ॥ ७ ॥ इमांमोक्षकथांश्रुत्वासहसर्वैर्विवेकिभिः ॥ परंयास्यसिनिर्दुःखंनाशोयत्रनविद्यते ॥ ८ ॥ इदमुक्तंपुराकल्पेब्रह्मणापरमेष्ठिना ॥ सर्वदुःखक्षयकरंपरमाश्वासनंधियः ॥ ९ ॥ ॥ श्रीरामउवाच ॥ ॥ केनोक्तंकारणेनेदंब्रह्मन्पूर्वंस्वयंभुवा ॥ कथंचभवताप्राप्तमेतत्कथयमेप्रभो ॥ १० ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अस्त्यनंतविलासात्मासर्वगःसर्वसंश्रयः ॥ चिदाकाशोविनाशात्माप्रदीपःसर्वजंतुषु ॥ ११ ॥ स्पंदास्पंदसमाकारात्ततोविष्णुरजायत ॥ स्पंदमानरसापूरात्तरंगःसागरादिव ॥ १२ ॥

सहितंचतद्विषयैरहतंचेतिविग्रहः ॥ आत्मनिसानुसंधानंसमरसंगुरुशास्त्रोपदिष्टप्रकारस्यस्वानुभवस्यचैकरस्यापादनसहितमितियावत् ॥ ६ ॥ ७ ॥ अविवेकिनांश्रवणशालाप्रवेशमपिवारयितुंसर्वैर्विवेकिभिरित्युक्तिः ॥ ८ ॥ इत्थंसांगंश्रवणमवतार्यश्रोतव्यशास्त्रादरसिद्ध्येतदवतारप्रकारंविवक्षुराह ॥ इदमिति ॥ पुराकल्पेकल्पादौ ॥ ९ ॥ वसिष्ठाभिप्रायानुरूपंजिज्ञासुःश्रीरामउवाच ॥ केनेति ॥ १० ॥ तत्रादौपरमेष्ठिनोजन्मवक्तुंतन्मूलकारणमाह ॥ अस्तीति ॥ अनंतानांमायिकविलासानामधिष्ठानभूतआत्माअस्ति॥ सर्वगःसर्वांतरःसर्वसंश्रयःसर्वाधारइतितस्यमायातत्कार्यातिरेकद्योतनायोक्तम् ॥ सर्वजंतुषुप्रदीपइतिप्रत्यकूचिद्रूपत्वेननित्यापरोक्षतालाभाय ॥ ११ ॥ मायातत्कार्याणांस्पंदेअस्पंदेचसमएकआकारःस्वभावोयस्यतस्मान्निर्विकारादित्यर्थः ॥ विष्णुःसर्वकार्यव्यापनशीलोब्रह्मांडात्माविराट्सूक्ष्मभूतसृष्टिक्रमेणाजायत ॥ स्पंदमानस्यरसस्यजलस्यआपूरात्स्पंदास्पंदयोरप्यप्रच्युतजलैकस्वभावात्सागरात्तरंगइव ॥ अनेननिर्विकाराज्जगदुत्पत्तिर्विवर्त्तरूपैवनपरिणामइतिध्वन्यते ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यविराजःसुमेरुःकर्णिकायस्यदिशोदलानियस्यतादृशात्तारकाकेसरवतोहृदयांबुजात् ॥ १३ ॥ देवानांमुनीनांचमंडलैःसमूहैः ॥ सर्गंप्राणिनिकायम् ॥ १४ ॥ १५ ॥ भावाभावौलाभालाभौताभ्यांविषण्णमंगंमनोयस्य ॥ उत्पत्तिरुत्पातस्तत्सन्निहितोध्वंसोमरणंतच्चतत्परमल्पजीवितमितियावत् ॥ एतस्मिन्भूतजातीनांसर्गेनानाविधैर्विषयभोगव्यसनैःसंकुलंजनस्यदुःखंदृष्ट्वेत्युत्तरत्रान्वयः ॥ १६ ॥ ईशस्तद्दुःखनिवारणसमर्थः ॥ १७ ॥ अंतयतिनाशयतीत्यंतःकउपायःस्यादितिचिंतयामास ॥ १८ ॥ प्रथमंशुद्धिसा

सुमेरुकर्णिकात्तस्यदिग्दलाद्धृदयांबुजात् ॥ तारकाकेसरवतःपरमेष्ठीव्यजायत ॥ १३ ॥ वेदवेदार्थविद्देवमुनिमंडलमंडितः ॥ सोसृजत्सकलंसर्गंविकल्पौघंयथामनः ॥ १४ ॥ जंबूद्वीपस्यकोणेस्मिन्वर्षेभारतनामनि ॥ ससर्ज्जजनसर्गौघंव्याधिव्याधिपरिप्लुतम् ॥ १५ ॥ भावाभावविषण्णांगमुत्पातध्वंसतत्परम् ॥ सर्गेस्मिन्भूतजातीनांनानाव्यसनसंकुलम् ॥ १६ ॥ जनस्यैतस्यदुःखंतद्दृष्ट्वासकललोककृत् ॥ जगामकरुणामीशःपुत्रदुःखार्दितायथा ॥ १७ ॥ कएतेषांहताशानांदुःखस्यांतोहतायुषाम् ॥ स्यादितिक्षणमेकाग्रंचिंतयामास भूतये ॥ १८ ॥ इतिसंचिंत्यभगवान्ससर्जस्वयमीश्वरः ॥ तपोधर्मंचदानंचसत्यंतीर्थानिचैवहि ॥ १९ ॥ एतत्सृष्ट्वापुनर्देवश्चिंतयामासभूतकृत् ॥ पुंसांनानेनसर्गस्यदुःखस्यांतइतिस्वयम् ॥ २० ॥ निर्वाणंनामपरमंसुखंयेनपुनर्जनः ॥ नजायतेनम्रियतेतज्ज्ञानादेवलभ्यते ॥ २१ ॥ संसारोत्तरणेजंतोरुपायोज्ञानमेवहि ॥ तपोदानंतथातीर्थमनुपायाःप्रकीर्त्तिताः ॥ २२ ॥ तत्तावद्दुःखमोक्षार्थंजनस्यास्यहतात्मनः ॥ प्रत्यग्रंतरणोपायमाशुप्रकटयाम्यहम् ॥ २३ ॥ इतिसंचिंत्यभगवान्ब्रह्माकमलसंस्थितः ॥ मनसापरिसंकल्प्यमामुत्पादितवानिमम् ॥ २४ ॥ कुतोप्युत्पन्नएवाशुततोहंसमुपस्थितः ॥ पितुस्तस्यपुनःशीघ्रमूर्मिरूर्मेरिवानघ ॥ २५ ॥ कमंडलुधरोनाथःसकमंडलुनामया ॥ साक्षमालःसाक्षमालंसप्रणम्याभिवादितः ॥ २६ ॥ एहिपुत्रेतिमामुक्त्वासस्वाब्जस्योत्तरेदले ॥ शुक्लाभ्रइवशीतांशुंयोजयामासपाणिना २७

धनसर्गमाह ॥ इतीति ॥ १९ ॥ सर्गस्यस्रष्टेःसंबंधिनांपुंसांस्वस्रष्टानामितियावत् ॥ अंतोमूलतोनिवृत्तिः ॥ २० ॥ जनोजीवःपुनर्नजायतेनम्रियतेतन्निर्वाणम् ॥ २१ ॥ अनुपायाअसाधनानिप्रकीर्त्तिताःनकर्मणानप्रजयाधनेनप्लवाह्येतेअदृढायज्ञरूपाइत्यादिश्रुतिषु ॥ २२ ॥ प्रत्यग्रंनवंदृढमितियावत् ॥ २३ ॥ इमंत्वत्पुरःस्थंमाम् ॥ २४ ॥ कुतोपिअनिर्वचनीयमायावशादेवोपाध्युत्पत्त्योत्पन्नःसन्नाशुसमुपस्थितःपितुःपितरमित्यर्थः ॥ २५ ॥ साक्षमालंयथास्यात्तथाप्रणम्यनम्रीभूयाभिवादितोनमस्कृतः ॥ २६ ॥ योजयामाससंयोजयामास ॥ उपवेशितवानितियावत् ॥ २७ ॥

१ सर्वभूतानामितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २८ ॥ वानरजातिरिवचंचलंचापलहेतुरज्ञानंकर्त्तृतेचेतःकर्मअभ्याविशतुप्रविशतु ॥ शशःकलंकः ॥ २९ ॥ विचारःपरमेष्ठिनःसंकल्पस्तत्समनंतरम् ॥ सर्वंपूर्णम् ॥ किलेत्याश्चर्ये ॥ ३० ॥ दीनतांअपहृतधनइवकार्पण्यम् ॥ ३१ ॥ तूष्णींनिर्व्यापारोव्यवस्थितः ॥ ३२ ॥ दुःखमुपहंतीतिदुःखोपघातउपायस्तम् ॥ कर्मण्यण् ॥ ३३ ॥ ३४ ॥ तेनमेप्रोक्तमित्युत्तरेणान्वयः ॥ ३५ ॥ पितुरधिकःसर्वोत्कृष्टोभिप्रायस्तत्त्वावबोधइवनिर्मलःपरिपूर्णस्वभावःस्थितः ॥ किलेत्याश्चर्ये ॥ ३६ ॥ सवक्ताउपदेष्टापितामामुवाच

मृगकृत्तिपरीधानोमृगकृत्तिनिजांबरम् ॥ मामुवाचपिताब्रह्मासुहंसःसारसंयथा ॥ २८ ॥ मुहूर्त्तमात्रंतेपुत्रचेतोवानरचंचलम् ॥ अज्ञानमभ्याविशतुशशःशशधरंयथा ॥ २९ ॥ इतितेनाशुशप्तःसन्विचारसमनंतरम् ॥ अहंविस्मृतवान्सर्वंस्वरूपममलंकिल ॥ ३० ॥ अथाहंदीनतांयातःस्थितोऽसंबुद्धयाधिया ॥ दुःखशोकाभिसंतप्तोजातोजनइवाधनः ॥ ३१ ॥ कष्टंसंसारनामायंदोषःकथमिहागतः ॥ इतिचिंतितवानंतस्तूष्णीमेवव्यवस्थितः ॥ ३२ ॥ अथाभ्यधात्समांतातःपुत्रकिंदुःखवानसि ॥ दुःखोपघातंमांपृच्छसुखीनित्यंभविष्यसि ॥ ३३ ॥ ततःपृष्टःसभगवान्मयासकललोककृत् ॥ हेमपद्मदलस्थेनसंसारव्याधिभेषजम् ॥ ३४ ॥ कथंनाथमहादुःखमयःसंसारआगतः ॥ कथंचक्षीयतेजंतोरितिपृष्टेनतेनमे ॥ ३५ ॥ तज्ज्ञानंसुबहुप्रोक्तंयज्ज्ञात्वापावनंपरम् ॥ अहंपितुरभिप्रायःकिलाधिकइवस्थितः ॥ ३६ ॥ ततोविदितवेद्यंमांनिजांप्रकृतिमास्थितम् ॥ सउवाचजगत्कर्त्तावक्तासकलकारणम् ॥ ३७ ॥ शापेनाज्ञपदंनीत्वापृच्छकस्त्वंमयाकृतः ॥ पुत्रास्यज्ञानसारस्यसमस्तजनसिद्धये ॥ ३८ ॥ इदानींशांतशापस्त्वंपरंबोधमुपागतः ॥ संस्थितोहमिवैकात्माकनकंकनकादिवत् ॥ ३९ ॥ गच्छेदानींमहीपृष्ठेजंबूद्वीपांतरस्थितम् ॥ साधोभरतवर्षंत्वंलोकानुग्रहहेतुना ॥ ४० ॥ तत्रक्रियाकांडपरास्त्वयापुत्रमहाधिया ॥ उपदेश्याःक्रियाकांडक्रमेणक्रमशालिना ॥ ४१ ॥ विरक्तचित्ताश्चतथामहाप्राज्ञाविचारिणः ॥ उपदेश्यास्त्वयासाधोज्ञानेनानंददायिना ॥ ४२ ॥ इतितेननियुक्तोहंपित्राकमलयोनिना ॥ इहराघवतिष्ठामियावद्भूतपरंपरा ॥ ४३ ॥

॥ ३७ ॥ समस्तानामधिकारिजनानांज्ञानसिद्धये ॥ ३८ ॥ यथाकनकंचिरंमालिन्यसंसर्गादकनकभावमिवापन्नंपुनःशोधनेनादिकालस्थितशुद्धकनकभावेनावतिष्ठतेतद्वत ॥ ३९ ॥ फलमपिप्राग्बुद्ध्युपारूढंक्रियाहेतुरितिहेतुनेत्युच्यते ॥ ४० ॥ तत्रेति ॥ नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनामितिन्यायादितिभावः ॥ ४१ ॥ महाप्राज्ञाःसूक्ष्मार्थग्रहणपटवः विचारिणोविमर्शशीलाः ॥ ४२ ॥ भूतपरंपराअधिकारिजनप्रवाहोयावत्स्थास्यतितावत् ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्त्तव्यंक्रियाप्रयोजनम् ॥ मनोऽतिक्रांतोऽतिमनानिर्मनस्कः ॥ अतएवसततंसुप्तेवनिरभिमानाधीर्यस्यांतयात्वत्त्याकार्यंयथाप्राप्तानुवर्त्तनंकरोमि ॥ अथवासंशांतयात्वच्च्या स्थितोहंसततसुप्ताअज्ञास्तेषांधियाकार्यंकरोमिस्वधियातुनकिंचित्करोमीत्यर्थः ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेतात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेदशमःसर्गः ॥ १० ॥ ॥ ७ ॥ ॥ ज्ञानावतारविस्तारोरामवैराग्यसंस्तवः ॥ वक्तृप्रच्छकलक्ष्मादिप्राधान्येनात्रवर्ण्यते ॥ १ ॥ पुनर्विस्तरेणज्ञानावतारप्रकारंवक्तृप्रच्छकलक्षणंचवर्ण यिष्यंस्तदवतारायोक्तमुपसंहरति ॥ एतदिति ॥ ममएतावज्ज्ञानावतरणंस्वंस्वीयंईहितंजन्मादिचेष्टितंकमलोद्भवस्यमत्पितुश्चेष्टितंचैवतेकथितमित्यन्वयः ॥ १ ॥ सुकृतोदया त्पुण्यपरिपाकात् ॥ २ ॥ तादृशसुकृतोदयःकीदृग्विधलक्षणैःपरिज्ञेयःकीदृशाश्चतल्लक्ष्यवस्तूपदेशप्रकाराइतिप्राक्तनकथाविस्तरश्रवणमुखेनजिज्ञासुःश्रीरामउवाच ॥ कथमि

कर्त्तव्यमस्तिनममेहहिकिंचिदेवस्थातव्यमित्यतिमनाभुविसंस्थितोस्मि ॥ संशांतयाससततसुप्तधियेहत्वत्त्याकार्यंकरोमिनचकिंचिदहं करोमि ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेवा०दे०मोक्षोपायेमुमुक्षुव्य०ज्ञानावतरणंनामदशमःसर्गः ॥ १० ॥ ॥ ७ ॥
॥ श्रीवसिष्ठउवाच ॥ ॥ एतत्तेकथितंसर्वंज्ञानावतरणंभुवि ॥ मयास्वमीहितंचैवकमलोद्भवचेष्टितम् ॥ १ ॥ तदिदंपरमंज्ञानंश्रोतुमद्य तवानघ ॥ भृशमुत्कंठितंचेतोमहतःसुकृतोदयात् ॥ २ ॥ ॥ श्रीरामउवाच ॥ ॥ कथंब्रह्मन्भगवतोलोकेज्ञानावतारणे ॥ सर्गादनंतरं बुद्धिःप्रवृत्तापरमेष्ठिनः ॥ ३ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ परमेब्रह्मणिब्रह्मास्वभाववशतःस्वयम् ॥ जातःस्पंदमयोनित्यमूर्मिरंबुनिधा विव ॥ ४ ॥ दृष्ट्वैवमातुरंसर्गंसर्गस्यसकलांगतिम् ॥ भूतभव्यभविष्यस्थांददर्शपरमेश्वरः ॥ ५ ॥ सक्रियाक्रमकालस्यकृतादेःक्षयआ गते ॥ मोहमालोच्यलोकानांकारुण्यमगमत्प्रभुः ॥ ६ ॥ ततोमामीश्वरःसृष्ट्वाज्ञानेनायोज्यचासकृत् ॥ विससर्जमहीपीठंलोकस्या ज्ञानशांतये ॥ ७ ॥ यथाहंप्रहितस्तेनतथान्येचमहर्षयः ॥ सनत्कुमारप्रमुखानारदाद्याश्चभूरिशः ॥ ८ ॥ क्रियाक्रमेणपुण्येनतथाज्ञानक्र मेणच ॥ मनोमोहामयोन्नद्धमुद्धर्त्तुंलोकमीरिताः ॥ ९ ॥

ति ॥ कथंकेनप्रकारेण ॥ तंप्रकारंविस्तरेणवर्णयेत्यर्थः ॥ ३ ॥ स्वस्यभावःप्राक्तनविद्याकर्मवासनाप्रचयस्तद्वशतः ॥ स्वयमेवतदनुरूपोपाध्यात्माजातः ॥ स्पंदमयःक्रियाश क्तिप्रचुरः ॥ नित्यमभीक्ष्णम् ॥ ४ ॥ सचभुवनभूतग्रामसर्गानंतरंसर्गेसृष्टजनमेवंजन्मजरामृत्युनरकादिप्रकारेणस्वाज्ञानवशादातुरंदुःखितंदृष्ट्वातदृष्टांतेनैवभूतभव्यभविष्यत्का लस्थामपिसर्गस्यसकलांगतिंददर्श ॥ ५ ॥ विशेषेणचस्वर्गापवर्गसाधनानुष्ठानयोग्यकालस्यकृतयुगादेःक्षयेआगतेलोकस्यभाविनंमोहमालोच्य ॥ ६ ॥ असकृदुपदेशेनज्ञा नेनायोज्यसंयोज्य ॥ ७ ॥ ८ ॥ क्रियाकर्मतदुपदेशक्रमेण ॥ चादुपासनोपदेशक्रमेण ॥ मनश्चमोहोज्ञानंचतावेववातयुक्तोवाआमयःसंसाररोगस्तेनोन्नद्धंबद्धंवशीकृतमिति यावत् ॥ ईरिताःप्रेरिताः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महर्षिभिर्भूपालाःपरिकल्पिताइत्युत्तरेणान्वयः ॥ शुद्धेवैदिकेरागलोभाद्यनुपहतेवा ॥१०॥ विधानार्थंप्रवर्त्तनार्थम् ॥ ११ ॥ अथराजकल्पनानंतरंराज्ञांप्रजानांचस्वस्वधर्म नियमनोचितानिस्मृतिशास्त्राणिकल्पितानि ॥ १२ ॥ भोजनग्रहणंभोगमात्रस्योपलक्षणंशालिग्रहणंचविषयमात्रस्य ॥ १३ ॥ द्वंद्वानिलक्षणयातन्निष्ठानिवैराणि ॥ विषया र्थंदेशार्थंभोग्यार्थंवा ॥ यद्वाद्वंद्वानिशीतोष्णादीनि ॥ विषयार्थंतत्परिहारोपायविषयसंपादनार्थम् ॥ ततश्वविषयसिद्धेर्धनमूलत्वाद्धनार्थंभूतानिपरभूभुजांदंड्यतांदंडनीयतां संप्रयातानि ॥ १४ ॥ पूर्वंक्षमाःसमर्थाअपिततस्तदनंतरंनसमर्थाःसंतोदीनाएवदैन्यास्तद्भावंयाताः ॥ देहेआत्मताबुद्ध्यायुद्धादौदेहनाशेआत्मनाशभयादित्यर्थः ॥१५॥ सम्य

महर्षिभिस्ततस्तैस्तैःक्षीणेकृतयुगेपुरा ॥ क्रमात्क्रियाक्रमेशुद्धेपृथिव्यांतनुतांगते ॥ १० ॥ क्रियाक्रमविधानार्थंमर्यादानियमायच ॥ पृथग्देशविभागेनभूपालाःपरिकल्पिताः ॥ ११ ॥ बहूनिस्मृतिशास्त्राणियज्ञशास्त्राणिचावनौ ॥ धर्मकामार्थसिद्ध्यर्थंकल्पितान्युचिता न्यथ ॥ १२ ॥ कालचक्रेवहत्यस्मिंस्ततोविगलितेक्रमे ॥ प्रत्यहंभोजनपरेजनेशाल्यर्ज्जनोन्मुखे ॥ १३ ॥ द्वंद्वानिसंप्रवृत्तानिविषयार्थंम हीभुजाम् ॥ दंड्यतांसंप्रयातानिभूतानिभुविभूरिशः ॥ १४ ॥ ततोयुद्धंविनाभूपामहींपालयितुंक्षमाः ॥ नसमर्थास्तदायाताःप्रजाभिः सहदैन्यताम् ॥ १५ ॥ तेषांदैन्यापनोदार्थंसम्यग्दृष्टिक्रमायच ॥ ततोस्मदादिभिःप्रोक्तामहत्योज्ञानदृष्टयः ॥१६॥ अध्यात्मविद्यातेनेयं पूर्वंराजसुवर्णिता ॥ तदनुप्रसृतालोकेराजविद्येत्युदाहृता ॥ १७॥ राजविद्याराजगुह्यमध्यात्मज्ञानमुत्तमम् ॥ ज्ञात्वाराघवराजानः परांनिर्दुःखतांगताः ॥ १८ ॥ अथराजस्वतीतेषुबहुष्वमलकीर्त्तिषु ॥ अस्माद्दशरथाद्रामजातोद्यत्वमिहावनौ ॥ १९ ॥ तवचातिप्रसन्ने स्मिन्जातंमनसिपावनम् ॥ निर्निमित्तमिदंचारुवैराग्यमरिमर्द्दन ॥ २० ॥ सर्वस्यैवहिसर्वस्यसाधोरपिविवेकिनः ॥ निमित्तपूर्वंवैरा ग्यंजायतेरामराजसम् ॥ २१ ॥ इदंत्वपूर्वमुत्पन्नंचमत्कारकरंसताम् ॥ तवानिमित्तंवैराग्यंसात्विकंस्वविवेकजम् ॥ २२॥ बीभत्संवि षयंदृष्ट्वाकोनामनविरज्यते ॥ सतामुत्तमवैराग्यंविवेकादेवजायते ॥ २३ ॥ तेमहांतोमहाप्राज्ञानिमित्तेनविनैवहि ॥ वैराग्यंजायतेये षांतेषांह्यमलमानसम् ॥ २४ ॥

ग्दृष्टिरात्मतत्त्वज्ञानंतस्यक्रमणंक्रमोलोकेप्रचारस्तस्मै ॥ १६ ॥ तेनोक्तहेतुना ॥ राजविद्येत्युदाहृताव्यासादिभिः ॥ १७ ॥ १८ ॥ १९ ॥ अतिप्रसन्नेअत्यंतंनिर्मले ॥ निर्नि मित्तंश्मशानमापद्दैन्यमितिवक्ष्यमाणदृष्टनिमित्तरहितम् ॥ २० ॥ सर्वस्यविवेकिनःपुरुषसार्थस्यमध्येसाधोरुत्तमत्वेनप्रसिद्धस्यापिसर्वस्यबहुतरजनस्यसर्वस्यविषयस्यसं बंधीतिवा ॥ रजोगुणकार्यदृष्टदुःखानुभवनिमित्तमतएवराजसम् ॥ २१ ॥ सत्वात्सुखंचज्ञानंचेत्यादिस्मृतेर्विवेकज्ञानमात्रजत्वात्सात्विकम् ॥ २२ ॥ उक्तमेवव्यनक्ति ॥ बी भत्समिति ॥ २३ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वविवेकवशादेवयश्चमत्कारपरामर्शस्तत्स्वाभिमुख्यंतेनेतरविषयेभ्योविरक्तया ॥२५॥२६॥इदंदृश्यजातमिंद्रजालमिवेंद्रजालंमायिकमितियावत्॥नवाह्यमेवकिंतुवाह्यसहितमाभ्यंतरंदेहेंद्रियप्राणमनोबुद्ध्यविद्यांतमपि॥२७॥२८॥अलमत्यंतमागतःप्राप्तवान् ॥ ज्ञानानांविद्यानांसारआत्मविद्यातस्य ॥ २९ ॥ तपःप्रभावाद्देवप्रसादाच्च यस्यदेवेपराभक्तिः ईश्वरानुग्रहादेवपुंसामद्वैतवासना ॥ प्रसादादेवरुद्रस्यभवानीसहितस्यतु ॥ अध्यात्मविषयंज्ञानंजायतेबहुजन्मभिरित्यादिश्रुतिस्मृत्याद्यनुसरन्नाह॥प्रसादादिति ॥३०॥तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेत्यादिश्रुतिमनुसृत्याह ॥ क्रियाक्रमेणेति ॥ क्रियाक्रमश्चगर्भाधानपुंसवनसीमतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनंचत्वारिवेदव्रतानिस्नानंसहधर्मचारिणीसंयोगःपंचानांयज्ञानामनुष्ठानमष्टकापार्वणंश्राद्धंश्रावण्याग्रयणीचैत्र्याश्वयुजीतिसप्तपाकसंस्थाअग्न्याधेयम

स्वविवेकचमत्कारपरामर्शविरक्तया॥ राजतेहिधियाजंतुर्युवेववरमालया ॥ २५ ॥ परामृश्यविवेकेनसंसाररचनामिमाम्॥ वैराग्यंयेऽधिगच्छंतितएवपुरुषोत्तमाः॥ २६ ॥ स्वविवेकवशादेवविचार्येदंपुनःपुनः ॥इंद्रजालंपरित्याज्यंसबाह्याभ्यंतरंबलात् ॥ २७ ॥ श्मशानमापदंदैन्यंदृष्ट्वाकोनविरज्यते॥ तद्वैराग्यंपरंश्रेयःस्वतोयदभिजायते ॥ २८ ॥ अकृत्रिमविरागत्वंमहत्त्वमलमागतः ॥ योग्योसिज्ञानसारस्यबीजस्येवमृदुस्थलम्॥ २९ ॥ प्रसादात्परमेशस्यनाथस्यपरमात्मनः॥ त्वादृशस्यशुभाबुद्धिर्विवेकमनुधावति॥३०॥ क्रियाक्रमेणमहतातपसानियमेनच॥ दानेनतीर्थयात्राभिश्चिरकालंविवेकतः ॥ ३१ ॥ दुष्कृतेक्षयमापन्नेपरमार्थविचारणे॥ काकतालीययोगेनबुद्धिर्जंतोःप्रवर्त्तते॥३२॥ क्रियापरास्तावदलंचक्रावर्त्तिभिरावृताः॥भ्रमंतीहजनायावन्नपश्यंतिपरंपदम्॥ ३३ ॥

ग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबंधःसौत्रामणीतिसप्तहविर्यज्ञसंस्थाअग्निष्टोमोऽत्यग्निष्टोमउक्थ्यःषोळशीवाजपेयोतिरात्रआप्तोर्यामइतिसप्तसोमयज्ञसंस्थाइत्येतेचत्वारिंशत्संस्काराअष्टावात्मगुणादयासर्वभूतेषुक्षांतिरनसूयाशौचमनायासोमांगल्यमकार्पण्यमस्पृहेतियस्यैतेचत्वारिंशत्संस्काराअष्टावात्मगुणाश्चसब्रह्मणःसायुज्यंप्राप्नोतीतिगौतमस्मृतौदर्शितः ॥ नियमेनेंद्रियप्राणमनोनियमनेन ॥ ३१ ॥ काकागमनमिवतालपतनमिवसंपन्नेनयोगेनसाधनसमूहमेलनेन ॥ समासाच्चतद्विषयादित्युपमानविषयात्समासादुपमानांतेरुढः ॥ तथाचब्रह्मजिज्ञासाप्रयोजकविचारोदयएवदुर्ल्लभइतिभावः ॥ ३२ ॥ तत्कुतः ॥ यावत्परंपदंनपश्यंतितावच्चक्रमिवावर्त्तयंतिभ्रमयंतिपुरुषंतच्छीलैरागादिभिरावृताःसंतःसर्वेप्यैहिकामुष्मिकभोगसाधनक्रियापराएवेहसंसारेभ्रमंति ॥ अविद्यायामंतरेवर्त्तमानाःस्वयंधीराःपंडितंमन्यमानाः दंद्रम्यमाणाःपरियंतिमूढाअंधेनैवनीयमानायथांधाइत्यादिश्रुतेरितिभावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाभूतंयथास्थितंपरमार्थभूतमित्यर्थः ॥ इदंनित्यापरोक्षंब्रह्मतत्त्वंपरंचतदेव ॥ यद्वा ॥ इदंदृश्यजातंयथाभूतंपरमार्थतःअसदसारंदुःखभूतंविवेकबुद्ध्यादृष्ट्वेत्यर्थः ॥ परंब्रह्म यांतिज्ञानेनप्राप्नुवंति ॥ आलानंबंधनस्तंभस्तस्मान्निर्गताः ॥ ३४ ॥ देहेनतादात्म्याध्यासाद्युक्तएकीभूतइवमिलितः ॥ अतएवमहानपिजंतुःकृमिकीटादिप्रायः ॥ ३५ ॥ महाधियोविवेकिनः ॥ ३६ ॥ नित्यमवहितयाविचाराभ्यासपरया ॥ तयाविवेकवैराग्यादिसंपत्त्याप्रसिद्धयाबुद्ध्या ॥ अवहितएकाग्रःसन् ॥ ३७ ॥ संरंभोविक्षेपवेगः वाचोवेगंमनसःक्रोधवेगंजिह्वावेगमुदरोपस्थवेगमित्यादिप्रसिद्धः ॥ ३८ ॥ ३९ ॥ ४० ॥ विज्ञातानिविज्ञेयानिविचार्यज्ञातुंयोग्यान्यध्यात्मशास्त्राणियेनअतएवसम्यग्दर्शनंब्रह्मत

यथाभूतमिदंदृष्ट्वासंसारंतन्मयींधियम् ॥ परित्यज्यपरंयांतिनिरालानागजाइव ॥ ३४॥ विषमेयमनंतेहरामसंसारसंस्तृतिः॥ देहयुक्तोमहाजंतुर्विनाज्ञाननंनपश्यति ॥ ३५॥ ज्ञानयुक्तिप्लवेनैवसंसाराब्धिंसुदुस्तरम् ॥ महाधियःसमुत्तीर्णानिमेषेणरघूद्वह ॥ ३६ ॥ तामिमांज्ञानयुक्तिंत्वंसंसारांभोधितारिणीम् ॥ शृणुष्वावहितोबुद्ध्यानित्यावहितयातया ॥ ३७॥ यस्मादनंतसंरंभाजागत्योदुःखभीतयः॥ चिरायांतर्दहंत्येताविनायुक्तिमनिंदिताम् ॥ ३८ ॥ शीतवातातपादीनिद्वंद्वदुःखानिराघव ॥ ज्ञानयुक्तिंविनाकेनसह्यतांयांतिसाधुषु ॥ ३९ ॥ आपतंतिप्रतिपदंयथाकालंदहंतिच ॥ दुःखचिंतानरंमूढंतृणमग्निशिखाइव ॥ ४० ॥ प्राज्ञंविज्ञातविज्ञेयंसम्यग्दर्शनमाधयः॥ नदहंतिवनंवर्षासिक्तमग्निशिखाइव ॥ ४१ ॥ आधिव्याधिपरावर्त्तेसंसारमरुमारुते॥ क्षुभितेपिनतत्त्वज्ञोभज्यतेकल्पवृक्षवत् ॥ ४२ ॥ तत्त्वंज्ञातुमतोयत्नाद्धीमानेवहिधीमता॥ प्रामाणिकःप्रबुद्धात्माप्रष्टव्यःप्रणयान्वितम् ॥ ४३॥ प्रामाणिकस्यपृष्टस्यवक्तुरुत्तमचेतसः॥ यत्नेनवचनंग्राह्यमंशुकेनेवकुंकुमम् ॥ ४४॥ अतत्त्वज्ञमनादेयवचनंवाग्विदांवर ॥ यःपृच्छतिनरंतस्मान्नास्तिमूढतरोपरः॥ ४५॥ प्रामाणिकस्यतज्ज्ञस्यवक्तुःपृष्टस्ययत्नतः॥ नानुतिष्ठतियोवाक्यंनान्यस्तस्मान्नराधमः ॥ ४६ ॥ अज्ञतातज्ज्ञतेपूर्वंवक्तुर्निर्णीयकार्यतः॥ यःकरोतिनरःप्रश्नंप्रच्छकःसमहामतिः॥ ४७॥

त्त्वसाक्षात्कारोयस्यतम् ॥ आधयोमानसव्यथाः ॥ ४१ ॥ आधिव्याधयएवपराउत्कृष्टाआवर्त्ताश्चक्रवातायस्मिन्संसाररूपेमरुदेशप्रसिद्धेमारुतेक्षुभितेसंचलितेपि ॥ भज्यते आमर्द्यतेपीड्यतइत्यर्थः ॥ ४२ ॥ यत्नादुपगमनप्रणिपातसेवादिप्रयत्नात् ॥ प्रामाणिकःश्रुत्यादिप्रमाणकुशलः ॥ ४३ ॥ यथाकुंकुमद्रवेरंजनायनिमज्जितेनांशुकेनवस्त्रेणकुंकुमंतद्भावानुरंजनेनानपायिगृह्यतेतद्वद्ग्राह्यम् ॥ ४४ ॥ तदर्थंवक्तृप्रच्छकलक्षणंविवक्षुरपरीक्षकंनिंदति ॥ अतत्त्वज्ञमिति ॥ नआदेयंग्राह्यंवचनंयस्य ॥ ४५ ॥ ४६ ॥ कार्यतो व्यवहारलिंगतः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परीक्षणेनप्रकृष्टवक्तारमनिर्णीय ॥ बालोमूर्खः ॥ ४८ ॥ पूर्वापरयोरुक्तानुक्तयोःसमाधानेविविच्यावधारणेक्षमासमर्थाबुद्धिर्यस्य ॥ ४९ ॥ एवमपरीक्ष्यवक्तारमपिनिंदति॥ प्रामाणिकेति ॥ ५० ॥ वक्तृप्रच्छकलक्षणोक्तेःप्रकृतोपयोगंदर्शयति ॥ त्वमिति ॥ ५१ ॥ ५२ ॥ कुलेनगुणैःसदाचारादिभिश्चमहान् ॥ ५३ ॥ मेधाप्रतिभाशालिनीत्वंविशेषणद्वयेनलभ्यते ॥ अर्कभाःसूर्यप्रभा ॥ ५४ ॥ आदरदृढीकरणायाह ॥ यद्यदिति ॥ प्रयत्नतश्चिराभ्यासादिप्रयत्नेन ॥ ५५ ॥ प्रयत्नांतरमप्याह ॥ मनइति ॥ ५६ ॥ तत्रप्रथमोपदेष्टव्यार्थमाह ॥ अविवेकिनमिति ॥ नविद्यतेज्ञानंशास्त्रोत्थंयस्यतम् ॥ दूरतरेअतिदूरे ॥ ५७ ॥ तत्फलमाह ॥ नित्यमिति ॥ ५८ ॥ ५९ ॥ अशक्तौत्रयस्तदशक्तौद्वौवा

अनिर्णीयप्रवक्तारंबालःप्रश्नंकरोतियः॥ अधमःप्रच्छकःसस्यान्नमहार्थस्यभाजनम् ॥४८॥ पूर्वापरसमाधानक्षमबुद्धावनिंदिते॥ पृष्टंप्राज्ञेनवक्तव्यंनाधमेपशुधर्मिणि ॥ ४९ ॥ प्रामाणिकार्थयोग्यत्वंप्रच्छकस्याविचार्यच ॥ योवक्तितमिहप्राज्ञाःप्राहुर्मूढतरंनरम् ॥५०॥ त्वमतीवगुणश्लाघीप्रच्छकोरघुनंदन॥ अहंचवक्तुंजानामिसमोयोगोयमावयोः ॥ ५१ ॥ यदहंवच्मितद्यत्नात्त्वयाशब्दार्थकोविद॥ एतद्वस्त्वितिनिर्णीयत्हृदिकार्यमखंडितम् ॥ ५२ ॥ महानसिविरक्तोसितत्त्वज्ञोसिजनस्थितौ ॥ त्वयिचोक्तंलगत्यंतःकुंकुमांबुयथांशुके॥ ५३॥ उक्तावधानपरमापरमार्थविवेचिनी॥ विशत्यर्थंतवप्रज्ञाजलमध्यमिवार्कभाः ॥ ५४ ॥ यद्यद्वच्मितदादेयंत्हृदिकार्यंप्रयत्नतः॥ नोचेत्प्रष्टव्यएवाहंनत्वयेहनिरर्थकम् ॥ ५५॥ मनोहिचपलंरामसंसारवनमर्कटम्॥ संशोध्यत्हृदियत्नेनश्रोतव्यापरमार्थगीः ॥५६॥ अविवेकिनमज्ञानमसज्जनरतिंजनम् ॥ चिरंदूरतरेकृत्वापूजनीयाहिसाधवः ॥ ५७॥ नित्यंसज्जनसंपर्काद्विवेकउपजायते॥ विवेकपादपस्यैवभोगमोक्षौफलेस्मृतौ॥५८॥ मोक्षद्वारेद्वारपालाश्चत्वारःपरिकीर्त्तिताः॥ शमोविचारःसंतोषश्चतुर्थःसाधुसंगमः॥५९॥ एतेसेव्याःप्रयत्नेनचत्वारोद्वौत्रयोथवा॥द्वारमुद्घाटयंत्येतेमोक्षराजगृहेतथा॥६०॥ एकंवासर्वयत्नेनप्राणांस्त्यक्त्वासमाश्रयेत्॥ एकस्मिन्वशगेयांतिचत्वारोपिवशंयतः॥६१॥ सविवेकोहिशास्त्रस्यज्ञानस्यतपसःश्रुतेः॥ भाजनंभूषणाकारोभास्करस्तेजसामिव॥ ६२ ॥ घनतामुपयातंहिप्रज्ञामांद्यमचेतसाम् ॥ यातिस्थावरतामंबुजाड्यात्पाषाणतामिव ॥६३॥ त्वंतुराघवसौजन्यगुणशास्त्रार्थदृष्टिभिः॥ विकासितांतःकरणःस्थितःपद्मइवोदये॥६४॥

॥ ६० ॥ प्राणांस्त्यक्त्वेत्यादरणीयत्वातिशयोक्तिः ॥६१ ॥ विवेकेनसहितःसविवेकःपुरुषःशास्त्रस्यश्रुतेःश्रवणस्यतपसस्तदर्थालोचनस्यचभाजनंयोग्यः॥ भूषणाकारःशिरोभूषणमिवश्रेष्ठोनादरणीयः ॥ तेजसांमध्येभास्करइव ॥ ६२ ॥ प्रज्ञामांद्यंमौर्ख्यम् ॥ घनतामभेद्यताम् ॥ स्थावरतामद्रवतांकाठिन्यमितियावत् ॥ जाड्यात्शीतातिशयात् ॥ प्रसिद्धंहीदंहिमकरकादौ ॥ ६३ ॥ उन्मुखीकरणायपुनारामंप्रशंसति ॥ त्वंत्विति ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवबोद्धुंमंतुम् ॥ उद्धतौऊर्ध्वीकृतौकर्णौयेनतथाविधोजंतुर्मृगादिरिव ॥ ६५ ॥ सुजनानांधर्मःसौजन्यंविनयादितद्रूपाणांसंपदाम् ॥ ६६॥ प्रज्ञांविवेकग्रहणधारणपटीयसीं बुद्धिम् ॥ ६७ ॥ तद्वृद्धावप्येतद्ग्रंथपरिशीलनमेवोपायइत्यभिप्रेत्याह ॥ एतदिति ॥ ६८ ॥ आस्पदंप्रतिष्ठा ॥ यतःसंमोहयेत्तस्मादितिशेषः ॥ मौर्ख्यमज्ञानम् ॥ ६९ ॥ दुराशयासर्पगतिकुटिलगतिवहतीतिसर्पगत्येनत्हृदिल्हृद्गतेप्रतीचिवल्गताविक्षेपसहस्रात्मनाचलता ॥ चेतोबुद्धिश्चिदात्मावा ॥ संकोचंसंकुचितपद्मवदप्रसन्नतांमालिन्यमितियावत् ॥७० ॥ कर्तर्हिप्रसीदतितमाह ॥ प्राज्ञेइति ॥ इयंप्रागुक्ता वस्तुपरमार्थरूपंदृश्यतेययासावस्तुदृष्टिःसूक्ष्मबुद्धिः ॥ दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेः ॥ यथार्थभूतायथार्थवस्त्वैकरस्यमापन्ना ॥ अथत्रावस्तुभूतादृष्टिश्चिदात्माप्राज्ञेउपदेष्टरिसतिप्रसीदत्यज्ञानमालिन्यमपास्यस्फुरति ॥७१॥ मतिविकासलक्षणमाचक्षाणस्तद्वंतंप्रशंस

इमांज्ञानगिरंश्रोतुमवबोद्धुंचसन्मते ॥ अर्हस्युद्धतकर्णस्त्वंजंतुर्वीणास्वनंयथा ॥ ६५ ॥ वैराग्याभ्यासयोगेनसमसौजन्यसंपदाम् ॥ अर्जनांकुरुतांरामयत्रनाशोनविद्यते ॥६६॥ शास्त्रसज्जनसंसर्गपूर्वकैःसतपोदमैः ॥ आदौसंसारमुक्त्यर्थंप्रज्ञामेवाभिवर्द्धयेत् ॥६७॥ एतदेवास्यमौर्ख्यस्यपरमंविद्धिनाशनम् ॥ यदिदंप्रेक्ष्यतेशास्त्रंकिंचित्संस्कृतयाधिया ॥६८॥ संसारविषवृक्षोयमेकमास्पदमापदाम् ॥ अज्ञंसंमोहयेन्नित्यंमौर्ख्यंयत्नेननाशयेत् ॥ ६९ ॥ दुराशासर्पगत्येनमौर्ख्येणत्हृदिवल्गता ॥ चेतःसंकोचमायातिचर्माग्नाविवयोजितम् ॥७०॥ प्राज्ञेयथार्थभूतेयंवस्तुदृष्टिःप्रसीदति ॥ दृगिवेंदौनिरंभ्रोदेसकलामलमंडले ॥ ७१ ॥ पूर्वापरविचारार्थचारुचातुर्यशालिनी ॥ सविकासामतिर्यस्यसपुमानिहकथ्यते ॥ ७२ ॥ विकसितेनसितेनतमोमुचावरविचारणशीतलरोचिषा ॥ गुणवताहृदयेनविराजसेत्वममलेननभःशशिनायथा ॥७३॥ ॥इतिश्रीवासिष्ठमहारा०वा०दे०मो०मुमुक्षुव्यवहारप्रकरणेवक्तृप्रच्छकलक्षणंनामएकादशः सर्गः ॥११॥ ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥परिपूर्णमनामान्यःप्रष्टुंजानासिराघव ॥ वेत्सिचोक्तंचतनाहंप्रवृत्तोवक्तुमादरात् ॥ १ ॥

ति ॥ पूर्वेति ॥ पूर्वापरविचारेणसूक्ष्मतमार्थग्रहणपटीयसाचातुर्येणचशोभमानामतिःसविकासेत्यर्थः ॥ पुमान्पुरुषार्थसंपादनेनसार्थकीकृतपुंजन्मेत्यर्थः ॥७२॥ त्वमतिस्तर्हि सविकासानवेतिसंदिहानंराममाश्वासयन्नाह ॥ विकसितेनेति ॥ तमोऽज्ञानंमुंचताअतएवसितेनस्वच्छेनगुणवताशांत्यादिगुणशालिनाहृदयेनप्रागुक्तबुद्ध्यात्वंविराजसे ॥ ७३॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेएकादशःसर्गः ॥ ११ ॥ ॥७॥ ॥ अनर्थताभवगतेर्ज्ञानमाहात्म्यमुत्तमम् ॥ रामेचप्रच्छकगुणसमृद्धिरिहवर्ण्यते ॥ १ ॥ अन्येषामपिविवेकवैराग्यदार्ढ्यायसंसारगतेरनर्थरूपतांज्ञानमाहात्म्यंचविवक्षुस्तत्प्ररोचनायनकेवलंत्वयिसविकासाबुद्धिरेवापित्वन्येपिबहवोगुणाःप्रच्छकलक्षणंचसमग्रमस्तीतिप्रशंसनेनरामंप्रोत्साहयन्श्रीवसिष्ठउवाच ॥ परिपूर्णमनाइति ॥ उक्तवक्ष्यमाणैर्गुणैःपरिपूर्णमनोयस्य ॥ उक्तंचसामान्योक्तिसूचितमपिवेत्सिविशिष्यावधारयसि ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजसामतेश्वापलंस्यात्तमसात्वावरणमतस्तद्रहितामतएवशुद्धसत्वगुणेपरमात्मनिचानुपातिनीम ॥ आत्मनिसंस्थाप्यस्वस्थीकृत्य ॥ स्थिरउद्युक्तः ॥ २ ॥ रत्नानांश्रीःसंपत्रत्नसहिताश्रीर्लक्ष्मीश्च ॥ ३ ॥ शिष्यांश्चपुत्रवत्पश्येदितिन्यायात्सुतेतिसंबोधनम् ॥ आर्द्रत्वंसद्रवताम् ॥ लग्नश्चंद्रकराणामुत्करोयस्मिन् ॥ ४ ॥ अभ्यासःपरिशीलनंसंबंधइतियावत् ॥ शुद्धस्यतव ॥ दीर्घैःसर्वदिक्प्रसृतैः॥संततैरविच्छिन्नैः ॥ पद्मपक्षेगुणैस्तंतुभिःसौरभ्यादिभिश्च ॥ ५ ॥ भाजनंश्रवणफलप्रबोधाधारः ॥ शुद्धाशुभ्रा ॥ सविकासाचंद्रकृतप्रबोधाधारः ॥ यथाचंद्रएवकुमुद्वतीसविकासातथेयंकथात्वय्येवसविकासेतिवार्थः ॥ ६ ॥ नन्वस्यकथाश्रवणसमारंभस्यकोवधिरितिचेत्परमपददर्शनविश्रांतिरेवेत्यभिप्रेत्याह ॥ येकेचनेति ॥ तेसर्वेसमारंभास्ताःसर्वाःप्रमाणप्रमेयदृष्टयः ॥ नन्विहपुमान्स्त्रियेत्येकशेषेणभाव्यंनहिद्वंद्वइवैकशेषोवैकल्पिकइतिचेत्सत्यम ॥ तथापिमहाभाष्याद्यभि

रजस्तमोभ्यांरहितांशुद्धसत्वानुपातिनीम् ॥ मतिमात्मनिसंस्थाप्यज्ञानंश्रोतुंस्थिरोभव ॥ २ ॥ विद्यतेत्वयिसर्वैवप्रच्छकस्यगुणावली ॥ वक्तुर्गुणालीचमयिरत्नश्रीर्जलधौयथा ॥ ३ ॥ आप्तवानसिवैराग्यंविवेकासंगजंसुत ॥ चंद्रकांतइवार्द्रत्वंलग्नचंद्रकरोत्करः ॥४॥ चिरमाशैशवादेवतवाभ्यासोस्तिसद्गुणैः ॥ शुद्धैःशुद्धस्यदीर्घैश्चपद्मस्येवातिसंततैः ॥५॥ अतःशृणुकथांवक्ष्येत्वमेवास्याहिभाजनम् ॥ नहिचंद्रंविनाशुद्धासविकासाकुमुद्वती ॥ ६ ॥ येकेचनसमारंभायाश्चकाश्चनदृष्टयः ॥ तेचताश्चपदेदृष्टेनिःशेषंयांतिवैशमम् ॥ ७ ॥ यदिविज्ञानविश्रांतिर्नभवेद्भव्यचेतसः ॥ तदस्यांसंसृतौसाधुश्चितामौढ्यंसहेतकः ॥ ८ ॥ परंप्राप्यविलीयंतेसर्वामननवृत्तयः ॥ कल्पांतार्कगणासंगात्कुलशैलशिलाइव ॥ ९ ॥ दुःसहारामसंसारविषावेशविषूचिका ॥ योगगारुडमंत्रेणपावनेनप्रशाम्यति ॥ १० ॥ सचयोगःसज्जनेनसहशास्त्रविचारणात् ॥ परमार्थज्ञानमंत्रोनूनंलभ्यतएवच ॥ ११ ॥ अवश्यमिहहिविचारेकृतेसकलदुःखपरिक्षयोभवतीतिमंतव्यंनातोविचारदृष्टयोऽवहेलयांद्रष्टव्याः ॥ १२ ॥

युक्तप्रयोगेष्वेकशेषवृत्तेःस्वपदविग्रहवाक्यप्रयोगदर्शनाददोषः ॥७॥ उक्तविश्रांताबनाश्वासंवारयति ॥ यदीति ॥ साधुर्विवेकीकःसहेत ॥ तदसहनात्त्वमिवदेहत्यागोयुक्तःस्यादितिभावः ॥ ८ ॥ नकेवलंबाह्यदृष्टयएवविलीयंतेऽपितुमानसाअपीत्याह ॥ परमिति ॥ तथाचश्रुतिः ॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरइति ॥ दृष्टांतपक्षेहिरण्यगर्भस्यायुरंतम् ॥ ९ ॥ लोकेविषसंबंधादपिविषूचिकाप्रसिद्धा ॥ योगोजीवस्यब्रह्मैक्यबोधःसएवगारुडमंत्रस्तेन ॥ पावनेनविषशोधनेन ॥ १० ॥ सज्जनेनगुरुसतीर्थ्यादिनासह ॥ चकारात्फलतिच ॥ ११ ॥ पद्योक्तमर्थंगद्यैःप्रपंचयति ॥ अवश्यमित्यादिना ॥ इहास्मिन्नधिकारिजन्मनिअवश्यंभवतीत्यन्वयः ॥ अवहेलयाअनादरेणनद्रष्टव्याः ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचारवतासम्यगदर्शनवताअतएवशीतलांतःकरणेनपुरुषेण ॥ वशतइतिपाठेनुविचारस्यवशोऽपरोक्षबोधस्ततः ॥ सर्पेणपरिपक्कांजीर्णांत्वचमिवसर्वमाधिपंजरंसंत्यज्याखिलमिदंजगदिंद्रजालमिवकौतुकंसुखरूपमवलोक्यते ॥ परमित्यवधारणेनिपातः ॥ परमुत्कृष्टंदुःखमितिवा ॥ १३ ॥ प्रतिज्ञातंवैषम्यमेवदृष्टांतैःप्रपंचयति ॥ भोगीवेत्यादिना ॥ मोहांधकूपेइत्यंतेसर्वत्रसंसाररागस्यैवकर्तृत्वेनान्वयः ॥ विवशीकरोतीत्यंतेसर्वत्रअशंकितपरिपतितपुरुषानित्यस्यकर्मतयान्वयः ॥ अशंकितमनाशंकितमनर्थशंकांविनैवमोहाद्विषयेषुपरिपतितान्पुरुषानितितदर्थः ॥ शिरसिपतितःपाषाणइवविवशीकरोतिमूर्छयति ॥ प्रज्ञांविवेकदृष्टिम् ॥ स्थितिंमर्यादाम् ॥ पातयतिपुरुषानित्यनुषज्जते ॥ मोहलक्षणेअंधकारयुक्तकूपे ॥ अंधकूपोनरकविशेषोवा ॥ जर्जरीकरोत्यभिषवेणसोममिवशिथिलीकरोतिपुरुषानित्येव ॥ किंबहुनेत्येकोक्त्याप्याह ॥ ननदस्तीति ॥ १४ ॥ नरकाणांमलमूत्रादीनांनगराणीवशरीराणितेषांनिकरःस्वस्वजनपोष्यवर्गादिसमूहस्तत्रानुरागेणपुरुषमनुबध्नातितच्छीलाविषयलक्षणाविषूचिकायदिर्नाचिकित्स्यतेतर्त्तहिनितरांतत्तद्वक्ष्यमाणंनरकदुर्दशासहस्रंकरोति ॥ १५॥ यत्रशिलाशितापाषाणभक्षकता ॥ असिभिःशातःखंडनं ॥ पातःपर्वताग्रेभ्यःपातनं ॥ उपलघनैस्ताडनं ॥ अग्निनादाहः॥

विचारवतापुरुषेणसकलमिदमाधिपंजरंसर्पेणत्वचमिवपरिपक्कांसंत्यज्यविगतज्वरेणशीतलांतःकरणेनविनोदादिंद्रजालमिवजगदखिलमालोक्यतेसम्यग्दर्शनवताअसम्यग्दर्शनवतोहिपरंदुःखमिदम्॥ १३ ॥ विषमोद्यतितरांसंसाररागोभोगीवदशतिअसिरिवच्छिनत्तिकुंतइववेधयति रज्जुरिवावेष्टयति पावकइवदहति रात्रिरिवांधयतिअशंकितपरिपतितपुरुषान्पाषाणइवविवशीकरोति हरतिप्रज्ञांनाशयतिस्थितिंपातयतिमोहांधकूपेतृष्णाजर्जरीकरोति ननदास्तिकिंचिद्दुःखंसंसारीयन्नप्राप्नोति॥१४॥ दुरंतेयंकिलविषयविषूचिकायदिनचिकित्स्यतेतन्नितरांनरकनगरनिकरफलानुबंधिनीतत्तत्करोति॥ १५॥ यत्रशिलाशितासिशातःपातउपलताडनमग्निदाहोहिमावसेकोंगावकर्त्तनंचंदनचर्चातरुवनानिघुणवृत्तांतःपरिवेषोंगपरिमार्जनमनवरतानलविचलितसमरनाराचनिपातो

हिमेनावसेकःसदाआर्द्रता ॥ अंगानामवकर्त्तनंछेदनंकुठारकर्त्तर्यादिभिः॥ चंदनकाष्ठस्येवचर्चाघर्षणंशिलाफलकेषु ॥ असिपत्रतरूणांवनानितेषुधावनमितियावत् ॥ घुणाःकाष्ठांतःकीटकास्तेषामिववृत्तांतःसर्वांगेकाष्ठयंत्रनिपीडनं ॥ परिवेषस्तत्प्रायःकटकशृंखलाभिःपरितोवेष्टनं ॥ अंगानांकंटकमार्ज्जनीभिःपरिमार्ज्जनंनिस्त्वचनमितियावत्॥ अनवरतमनलविचलितान्यग्निज्वालानिःसरणानियेभ्यस्तथाविधानांसमरनाराचानांयुद्धप्रक्षिप्तबाणानांधारावदविच्छेदेननिपतनंनिपातः ॥ निदाघस्यग्रीष्मकालस्यविनोदोतिवाहनं विनैवच्छायापानीयाभ्यामितिशेषः ॥ तथाशिशिरेधारागृहेषुसीकरवर्षणम्॥ शिरसश्छिन्नप्ररूढस्यपुनःपुनश्छेदः॥सुखनिद्राविषयेतुमूकीकरणंवार्त्तापिनास्तीत्यर्थः॥ आननस्यमुद्रापिधानेननिरुच्छ्वासत्वापादनम्॥ बांधुर्यंनिम्नोन्नतभावोंगानां विसंष्ठुलत्वाद्व्यवहाराक्षमतेतियावत्॥पर्वतवन्महानुपचयोदेहस्यैकैकांगस्यवेत्यर्थः॥अथवायत्रशिलाशितादिचतुष्टयंहिमावसेकवत्सोढव्यं ॥ अंगावकर्त्तनंचंदनलेपवत् ॥ तरुवनादित्रयमंगपरिमार्जनवत् देहसंस्कारवत् ॥ विशिष्टशरधारानिपातस्तुनिदाघविनोदनार्थधारा

१ मूलानुरोधेनैतट्टीकायोजनंविचारणीयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहसीकरवर्षणवत् ॥ शिरश्छेदप्रयुक्तंमरणंसुखनिद्रावत् ॥ मुखपिधानेनबलान्मूकीकरणंचसहजवृत्त्याआननमुद्रावत् ॥ बांधुर्यंचमहासंपदुपचयवदवश्यंसोढव्यमित्यर्थः
॥ १६ ॥ दुःखस्थानानामानंत्याद्दिक्प्रदर्शनमात्रंसैतदितिप्रदर्श्योपसंहरंस्तद्वर्णनस्यप्रकृतोपयोगमाह ॥ तदेवमिति ॥ चलैर्नश्वरैर्देहैर्यंत्रणंयंत्रंसंकोचःपरिच्छेदःपारवश्यंचत
स्मिन् ॥ एवंवक्ष्यमाणरीत्या ॥ तमेवाह ॥ यथेति ॥ १७॥ ननुकथंशास्त्रविचाराच्छ्रेयोभवतीतिनिश्चयस्तत्पराणामपिमांडव्यादीनांदुर्द्दशासहस्रदर्शनादित्याशंकांपरिहरन्वि
चारादृष्टफलतांदर्शयति ॥ अन्यच्चेति ॥ ज्ञानकवचेनावगुंठितशरीराअतएवादुःखार्हाअप्येतेपूर्वोक्तमुन्यादयोऽज्ञवन्मनोवृत्तिपूर्विकांदुःखकरींतांतांसंसारकदर्थनामनुभवंत
स्तिष्ठंतीतियदिमन्यसेतर्हितेकथंसततमेवमुदितमनसस्तिष्ठंतीत्येवमन्वयः ॥ मुनयोध्यानपराः ॥ ऋषयोमंत्रजपपराः ॥ विप्राःकर्मपराः ॥ राजानोजनकादयः ॥ १८ ॥ इह
हीत्यस्यदेहलीदीपन्यायेनपूर्वोत्तरश्लोकेचान्वयः ॥ तर्हिकीदृशीतेषांस्थितिस्तामाह ॥ विकौतुकाइति ॥ अपूर्वविषयदर्शनोपभोगोत्साहःकौतुकंतद्रहिताः ॥ विकल्पै

निदाघविनोदनं धारागृहसीकरवर्षणं शिरश्छेदः सुखनिद्रामूकीकरणमाननमुद्राबांधुर्यमहानुपचयः ॥ १६॥ तदेवंविधकष्टचेष्टास
हस्रदारुणेसंसारचलयंत्रेस्मिन्राघवनावहेलनाकर्त्तव्या अवश्यमेवंविचारणीयमेवंचावबोद्धव्यं यथाकिलशास्त्रविचाराच्छ्रेयोभ
वतीति ॥१७॥ अन्यच्चरघुकुलेंदोयदिचैतेमहामुनयोमहर्षयश्चविप्राश्चराजानश्चज्ञानकवचेनावगुंठितशरीरास्तेकथमदुःखक्षमाअ
पिदुःखकरींतांतांवृत्तिपूर्विकांसंसारकदर्थनामनुभवंतःसततमेवमुदितमनसस्तिष्ठंति ॥ १८॥ इहहि॥ विकौतुकाविगतविकल्पविप्ल
वायथास्थिताहरिहरपद्मजादयः॥ नरोत्तमाःसमधिगतात्मदीपकास्तथास्थिताजगतिविशुद्धबुद्धयः॥ १९॥ परिक्षीणेमोहेविगलति
घनेज्ञानजलदेपरिज्ञातेतत्त्वेसमधिगतआत्मन्यतितते ॥ विचार्यार्यैःसार्द्धंचलितवपुषोवैसदृशतोधियादृष्टेतत्त्वेरमणमटनंजागतमि
दम्॥ २०॥ अन्यच्चराघव॥प्रसन्नेचित्तत्त्वेत्वद्दिशमभवेवल्गतिपरेशमाभोगीभूतास्वखिलकलनादृष्टिषुपुरः॥ समंयातिस्वांतःकरण
घटनास्वादितरसंधियादृष्टेतत्त्वेरमणमटनंजागतमिदम्॥ २१॥

विप्लवोविक्षेपस्तद्रहिताः ॥ १९ ॥ यदिब्रह्मादिदेववदेतेपूर्णकामास्तर्हिकथंतेषांसंसारेष्वटनदर्शनमित्याशंकांपरिहरन्विचारादेर्जीवन्मुक्तिविहरणफलतांदर्शयति ॥ परिक्षीणे
इति ॥ आर्यैर्गुर्वादिभिःसार्द्धंविचार्यपदार्थपरिशोधनेसदृशतस्तादात्म्याध्यासप्रसक्तात्मसादृश्याच्चलितान्यनात्मभावेननिरस्तानिवपूंषिस्थूलादिशरीराणियेनतस्याधिकारि
णःप्रथमंवाक्यात्तत्त्वेपरिज्ञातेमननेनचअतितते अपरिच्छिन्नेआत्मनिसम्यगसंभावनानिरासेनाधिगते धियानिदिध्यासननिरस्तविपरीतभावनयाबुद्ध्याचतस्यभावस्तत्त्वंब्रह्म
भावस्तस्मिन्दृष्टेसाक्षात्कृतेसति मोहेपरिक्षीणेतत्कार्यनिबिडभ्रांतिज्ञानमेघेचविगलतिसतीदंजागतमटनंभ्रमणंरमणंक्रीडनमेवनपीडनमित्यर्थः॥२०॥ रमणत्वमेवोपपादयति॥
प्रसन्नेइति ॥ चित्तत्वेचैतन्यमात्रस्वभावेपरमार्थवस्तुनिप्रसन्नेसतिपरेउत्कृष्टेशमभवेशांत्याविर्भावेवल्गतिप्राप्तेअखिलकलनादृष्टिषुसमस्तबुद्धिवृत्तिषुशमाभोगीभूतासुशांति ॥२२॥
रसास्वादरूपासुसतीषुस्वांतःकरणघटनाआस्वादितब्रह्मरसंयथास्यात्तथासमंवैषम्यशून्यस्वभावंयातिगच्छति ॥ अतोयुक्तंरमणत्वमित्यर्थः ॥ २१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मानंरथिनंविद्धिशरीरंरथमेवत्वित्यादिरूपकदृष्ट्यावारमणमुपपन्नमित्याह ॥ रथइति ॥ स्थाणुश्छिन्नतरुरिवाचेतनोदेहोरथः इंद्रियाणांविषयाभिमुखीगतिस्तुरगाणां रचनागतिचातुरी परितःस्पंदश्चालनंयेनसप्रग्रहोवातःप्राणप्रधानंमनः अर्थाद्रथादिभिर्वहनेनप्रापणेनकलिताःप्राप्ताआनंदरूपाविषयायेनतथाविधोदेहीआत्मासमाधौपरः परमात्मैवव्यवहारकालेबुद्ध्युपाधिपरिच्छेदादणुःसूक्ष्मोवारथीतिशेषः ॥ एवंभूतोहंजगतिविहरामीतिधियापिरमणमेवेत्यर्थः ॥ १५ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्य प्रकाशेमुमुक्षुव्यवहारप्रकरणेद्वादशःसर्गः ॥ १२ ॥ ॥ ७ ॥ ॥ वर्णिताइहबाहुल्याद्वैराग्यादिगुणोदयाः ॥ जीवन्मुक्तिफलोन्नद्धाविशेषेणशमःपुनः ॥ १ ॥ वैराग्यशां त्यादिसाधनानिवर्णयिष्यन्प्रस्तुतांजीवन्मुक्तिस्थितिमेववर्णयति ॥ एतामिति ॥ अभ्युदिताःसाम्राज्याभ्युदयंप्राप्ताइव ॥१॥ यतःशुभाशुभमुपादातुंहातुंवानवांछंत्यतएवतत्सा

अन्यच्च ॥ रथःस्थाणुर्देहःस्तुरगरचनाचेंद्रियगतिःपरिस्पंदोवातोवहनकलितानंदविषयः ॥ परोणुर्वादेहीजगतिविहरामीत्यनघयाधि याद्दृष्टेतत्त्वेरमणमटनंजागतमिदम् ॥ २२ ॥ ॥इतिश्रीवासिष्ठमहारा०वा०दे०मो०मुमुक्षु०प्रकरणेतत्त्वमाहात्म्यवर्णनंनामद्वादशः सर्गः॥१२॥ ॥श्रीवसिष्ठउवाच॥ ॥एतांदृष्टिमवष्टभ्यदृष्टात्मानःसुबुद्धयः॥विचरंतीहसंसारेमहांतोभ्युदिताइव॥१॥नशोचंतिनवांछं तिनयाचंतेशुभाशुभम्॥सर्वमेवचकुर्वंतिनकुर्वंतीहकिंचन॥२॥स्वच्छमेवावतिष्ठंतेस्वच्छंकुर्वंतियांतिहि॥हेयोपादेयतापक्षरहिताः स्वात्मनिस्थिताः॥ ३॥आयांतिचनचायांतिप्रयांतिचनयांतिच ॥ कुर्वंत्यपिनकुर्वंतिनवदंतिवदंतिच ॥ ४ ॥ येकेचनसमारंभायाश्च काश्चनदृष्टयः ॥हेयोपादेयतस्तास्ताःक्षीयंतेधिगतेपदे ॥ ५ ॥ परित्यक्तसमस्तेहंमनोमधुरवृत्तिमत्॥ सर्वतःसुखमभ्येतिचंद्रबिंबइव स्थितम्॥ ६॥ अपिनिर्मननारंभमप्यस्ताखिलकौतुकम्॥ आत्मन्येवनमात्यंतरिंदाविवरसायनम्॥ ७॥ नकरोतींद्रजालानिनानुधा वतिवासनाम्॥ बालचापलमुत्सृज्यपूर्वमेवविराजते॥८॥ एवंविधाहिवृत्तयआत्मतत्त्वावलोकनाल्लभ्यंतेनान्यथा॥ ९॥ तस्माद्विचा रेणात्मैवान्वेष्टव्यउपासनीयोज्ञातव्योयावज्जीवंपुरुषेणनेतरदिति॥ १०॥

धनानिनयाचंते ॥२॥ असंगात्मदर्शनात्स्वच्छंनिर्लेपम्॥कुर्वंति शास्त्रीयम् ॥ गच्छंतिलौकिकसन्मार्गम् ॥ ३ ॥ आयांतिप्रयांत्यन्यदृशात्मदृशातुन ॥ सचक्षुरचक्षुरिवसकर्णोऽकर्णइवसमनाअमनाइवेत्यादिश्रुतेरितिभावः ॥४॥ क्षीयंतेप्रयो जकद्वेषरागयोःक्षयात्तद्विषयसत्यताबुद्धिक्षयाच्चेतिभावः ॥ ५ ॥ ईहाइच्छाचेष्टाच ॥ मधुरवृत्तिःशांतिर्ब्रह्माकारताच ॥ सुखंकर्तृ ॥ मनःकर्म ॥ चंद्रबिंबेस्थितंस्वर्गिणमिव मनःकर्तृचंद्रबिंबेस्थितमिवेत्युत्प्रेक्षावा ॥ ६ ॥ विषयमननकौतुकयोरेवविक्षेपहेतुत्वात्तदभावेनिर्विक्षेपंसुखमित्यनुषज्यते ॥ सुखात्मतापन्नंमनइत्यर्थः ॥ नमातिनपरिच्छि द्यते ॥ इंदौपूर्णचंद्रे ॥ रसायनममृतम् ॥ ७ ॥ इंद्रजालानिमायिकविक्षेपान् ॥ वासनांतद्धेतुम् ॥ बालानामिवभ्रांतिप्रसक्तंचापलमुत्सृज्यपूर्वमनादिसिद्धमात्मसुखमेवविराज ते ॥ ८ ॥ प्रयोजनप्रपंचनस्यप्रस्तुतोपयोगंपुनर्गद्येनोपसंहरति ॥ एवमिति ॥ वृत्तयःस्थितयः ॥ ९ ॥ अन्वेषणंश्रवणमननाभ्यासः ॥ उपासनंनिदिध्यासनम् ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकवाक्यताएकार्थनिष्ठतानिश्चयः ॥ यस्याधिकारिणः ॥ श्रवणादेरभ्यासेन ॥११ ॥ अवहेलितौशास्त्रतदर्थौयैः ॥ अवज्ञाताउपेक्षितामहांतःपूज्याजनास्तत्त्वज्ञायैः ॥१२॥ ॥ १३॥ दुरधिगमानिशास्त्राणिकथंमौर्ख्यनिवृत्तिःस्यात्तत्राह ॥ किंचिदिति ॥ ईषद्व्युत्पन्नानामपीत्यर्थः ॥१४॥ यथोचितैर्दृष्टांतैः॥ वाक्यार्थःपरमात्माबंधुःप्रियतमोऽवश्यंलब्धुमिष्टोयस्यतेन श्राव्यमवश्यंश्रोतव्यम् ॥ १५ ॥ तुच्छाअधमाः ॥ १६ ॥ सर्वदुर्दशाहेत्वपेक्षयाएकैकादुर्दशापिवरमित्याहद्वाभ्याम् ॥१७॥ कोटरेष्वेववा ॥१८॥ मोहोमू

स्वानुभूतेश्चशास्त्रस्यगुरोश्चैवैकवाक्यता॥यस्याभ्यासेनतेनात्मासंततेनावलोक्यते॥११॥अवहेलितशास्त्रार्थैरवज्ञातमहाजनैः॥कष्टामप्यापदंप्राप्तोनमूढैःसमतामियात्॥१२॥नव्याधिर्नविषंनापत्तथानाधिश्चभूतले॥खेदायस्वशरीरस्थंमौर्ख्यमेकंयथानृणाम्॥१३॥ किंचित्संस्कृतबुद्धीनांश्रुतंशास्त्रमिदंयथा ॥ मौर्ख्यापहंतथाशास्त्रमन्यदस्तिनकिंचन ॥ १४ ॥ इदंश्राव्यंसुखकरंयथादृष्टांतसुंदरम् ॥ अविरुद्धमशेषेणशास्त्रंवाक्यार्थबंधुना॥१५॥अपदोयादुरुत्तारायाश्चतुच्छाःकुयोनयः॥तास्तामौर्ख्यात्प्रसूयंतेखदिरादिवकंटकाः॥१६॥ वरंशरावहस्तस्यचांडालागारवीथिषु॥भिक्षार्थमटनंरामनमौर्ख्यहतजीवितम्॥१७॥वरंघोरांधकूपेषुकोटरेष्वेवभूरुहाम्॥ अंधकीटत्वमेकांतेनमौर्ख्यमतिदुःखदम्॥१८॥इममालोकमासाद्यमोक्षोपायमयंजनः॥अंधतामेतिनपुनःकश्चिन्मोहतमस्यपि॥१९॥ तावन्नयतिसंकोचंतृष्णावैमानवांबुजम्॥ यावद्विवेकसूर्यस्यनोदिताविमलाप्रभा ॥ २० ॥ संसारदुःखमोक्षार्थमादृशैःसहबंधुभिः॥ स्वरूपमात्मनोज्ञात्वागुरुशास्त्रप्रमाणतः॥ २१ ॥ जीवन्मुक्ताश्चरंतीहयथाहरिहरादयः ॥ यथाब्रह्मर्षयश्चान्येतथाविहरराघव ॥ २२ ॥ अनंतानीहदुःखानिसुखंतृणलवोपमम्॥ नातःसुखेषुबध्नीयादृष्टिंदुःखानुबंधिषु ॥ २३॥ यदनंतमनायासंतत्पदंसारसिद्धये॥ साधनीयंप्रयत्नेनपुरुषेणविजानता ॥ २४ ॥ तएवपुरुषार्थस्यभाजनंपुरुषोत्तमाः॥ अनुत्तमपदालंबिमनोयेषांगतज्वरम्॥२५॥ संभोगाशनमात्रेणराज्यादिषुसुखेषुये॥ संतुष्टादुष्टमनसोविद्धितानंधदर्दुरान् ॥ २६॥ येशठेषुदुरंतेषुदुष्कृतारंभशालिषु॥ द्विषत्सुमित्ररूपेषु भक्तावैभोगभोगिषु॥ २७॥ तेयांतिदुर्गमाद्दुर्गंदुःखाद्दुःखंभयाद्भयम्॥ नरकान्नरकंमूढामोहमंथरबुद्धयः ॥ २८ ॥

र्छामृत्युद्वारंतल्लक्षणेपितमसिनांधतामेतिकिमन्यत्रेत्यर्थः ॥ १९ ॥ ननुतृष्णात्यागेउपायंनपश्यामस्तत्राह ॥ तावदिति ॥ मानवमेवांबुजंपद्मम् ॥ २० ॥ ज्ञात्वाविहरेत्युत्तरेणान्वयः ॥ २१ ॥ २२ ॥ दृष्टिमास्थाम् ॥ २३ ॥ तदात्मतत्त्वंपद्यतेप्राप्यतेयेनतज्ज्ञानंतत्पदंपरमपुरुषार्थसिद्धयेसाधनीयम् ॥ २४ ॥ नविद्यतेउत्तममुत्कृष्टतममन्यद्यस्मात्तथाविधंपदंवस्तुतदालंबि ॥ २५ ॥ दर्दुरान्भेकान् ॥ सहिकूपस्थोनबहिःपश्यतितत्राप्यंधश्चेत्सुतरामितिभावः ॥ २६ ॥ शठेषुवंचकेषुदुरंतेषुदुरुच्छेदेषुप्रबलेष्वितियावत् ॥ भक्ताःसक्तायेतेयांतीत्युत्तरेणान्वयः ॥ २७ ॥ दुर्गमात्संकटात् ॥ मंथरबुद्धयोमंदबुद्धयः ॥२८ ॥

CC-0. In Public Domain. Digitization by eGangotri

सुखस्यानंतरंदुःखंदुःखस्यानंतरंसुखम् घटीयंत्रवदश्रांतंभ्रमन्यातिपुनःपुनरित्यादिवाक्यैःसुखदुःखदशयोःपरस्परविनाशोक्तेरयंकदापिश्रेयसितिष्ठतीतिश्रेयस्थोविश्रांतिभाङ्न भवति ॥ प्रत्यक्षतोपितयोर्भंगुरताप्रसिद्धेत्याह ॥ सुखदुःखेति ॥ २९ ॥ सुविविक्ताःसम्यग्विवेकिनः ॥ ३० ॥ संसारसरिद्रूपामिमामापदम् ॥ ३१ ॥ विषवन्मूर्छनेनसमुच्छ्रये णसंमोहंकश्मलंदातुंशीलंयासांतासुसंसाराख्यमायासुमिथ्यावंचनोपायेषु ॥ ३२ ॥ तार्णस्यतृणविकारस्य ॥ राहोःशिरइतिवत्संस्तराद्भेदकल्पनयाषष्ठी ॥ ३३ ॥ ननुसंसारा त्परमन्यन्नास्त्येवतत्रकिमवलंब्यसंसारेअरतिःकार्येत्याशंक्याह ॥ यदिति ॥ शेमुषीलभ्यंज्ञानमात्रेणप्राप्तुंशक्यमस्त्येव ॥ ननास्ति ॥ तदसत्त्वेजगदांध्यप्रसंगादात्मापलापायो गाच्चेतिभावः ॥ तथाचोक्तंपुराणेषु ॥ असत्यस्मिन्जगन्नाथेअंधीभूतमिदंभवेत् सूर्येणेवविहीनत्वान्निरालोकंजगद्यथेति ॥ श्रुतिश्च ॥ असन्नेवसभवति असद्ब्रह्मेतिवेदचेत् अस्तिब्रह्मेतिचेद्वेद संतमेनंततोविदुरिति ॥ ३४ ॥ संदिग्धेपरलोकेपिवरंश्रुतिपथाश्रयः यदिनस्यात्तदाकिंस्याद्यदिस्यान्नास्तिकोहतइतिन्यायेनसंदिहानंप्रत्यप्याह ॥ नास्तिचे

परस्परविनाशोक्तेःश्रेयःस्थोनकदाचन॥ सुखदुःखदशेरामतडित्प्रासरभंगुरे॥ २९॥ येविरक्तामहात्मानःसुविविक्ताभवादृशाः॥ पुरुषान्विद्धितान्वंद्यान्भोगमोक्षैकभाजनान् ॥ ३० ॥ विवेकंपरमाश्रित्यवैराग्याभ्यासयोगतः॥ संसारसरितंघोरामिमामापदमुत्तरेत् ॥ ३१ ॥ नस्वप्नव्यंचसंसारमायास्विहविजानता॥ विषमूर्छनसंमोहदायिनीषुविवेकिना॥३२॥ संसारमिममासाद्ययस्तिष्ठत्यवहेलया॥ ज्वलितस्यगृहस्योच्चैःशेतेतार्णस्यसंस्तरे ॥ ३३॥ यत्प्राप्यननिवर्त्ततेयदासाद्यनशोचते ॥ तत्पदंशेमुषीलभ्यमस्त्येवात्रनसंशयः ॥ ३४ ॥ नास्तिचेत्तद्विचारेणदोषःकोभवतांभवेत्॥ अस्तिचेत्तत्समुत्तीर्णाभविष्यथभवार्णवात् ॥ ३५॥ प्रवृत्तिःपुरुषस्येहमोक्षोपायविचारणे॥ यदाभवत्याशुतदामोक्षभागीसउच्यते॥ ३६॥ अनपायिनिराशंकंस्वास्थ्यंविगतविभ्रमम् ॥ नविनाकेवलीभावाद्विद्यते भुवनत्रये॥ ३७॥ तत्प्राप्तावुत्तमप्राप्तौनक्लेशउपजायते॥ नधनान्युपकुर्वंतिनमित्राणिनबांधवाः॥ ३८॥ नहस्तपादचलनंनदेशांतरसंगमः॥ नकायक्लेशवैधुर्यंनतीर्थायतनाश्रयाः॥ ३९॥

दिति ॥ संदेहेपिमहाफलस्योपेक्षानर्हत्वाच्चेतिभावः ॥ ३५ ॥ तर्हिकथंनसर्वेप्रवर्त्तंतइत्याशंक्य यावन्नानुग्रहःसाक्षाज्जायतेपरमेशितुः तावन्नसद्गुरुंकश्चित्सच्छास्त्रंवापिविंदतीतिवचनादीश्वरानुग्रहलभ्यमोक्षभागिताशालिनएवमोक्षसाधनेप्रवृत्तिर्नसर्वेषामित्याह ॥ प्रवृत्तिरिति ॥ प्रवृत्तिफलंलिंगानुमेयंमोक्षभागित्वमितिभावः ॥३६॥ ननुदेहेंद्रियविषयशून्यकेवलीभावहेतुनाकिमनेनशास्त्रेण सत्स्वेवदेहादिषूपायांतरेणापिस्वर्गादिसुखस्यसंभवादित्याशंक्याह ॥ अनपायीति ॥ स्वर्गादिअपायपतनाशंकाऽस्वास्थ्यादिग्रस्तमेवेतिकेवलीभावएवपुरुषार्थइतिभावः ॥ ३७ ॥ तदितियोग्यत्वाद्व्यवहितविचारप्रवृत्तिपरामर्शः ॥ तस्याःप्राप्तौसत्यामुत्तमस्यकैवल्यस्यप्राप्तौक्लेशोनोपजायते ॥ ननुधनादिभिरेवकेवलीभावोस्तुकिंविचारेणतत्राह ॥ नेति ॥ ३८ ॥ हस्तपादचलनंकायिकनमस्कारादौ ॥ देशांतरसंगमोयात्रादौ ॥ उपवासादौकायक्लेशेनबलोत्साहनिद्रादिवैधुर्य्यम् ॥ तीर्थायतनानिक्षेत्राणितत्रनिवासाः ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केनतर्हितत्प्राप्यतेतत्राह ॥ पुरुषार्थैति ॥ पुरुषार्थःश्रवणमननिदिध्यासनपौरुषंतदेकसाध्येन ॥ द्वैतवासनाविरोधिब्रह्माकारदृढवासनायाएकार्थेनतुल्यविषयेणकर्मणासाध्येनसाक्षात्कारेणेत्यर्थः ॥ मनोमात्रस्यद्वैतस्यमूलोच्छेदलक्षणेनजयेन ॥ यथाहुः ॥ एवंनिरंतरकृताब्रह्मैवास्मीतिवासना हरत्यविद्याविक्षेपान्रोगानिवरसायनमिति॥४०॥ विवेकोदेहेंद्रियादेरात्मनःपृथक्करणं ॥ विचारश्चश्रवणमननिदिध्यासनैरसंभावनादिनिरासः एकांतऐकाग्र्यंचताभ्यांनिश्चेतुंशक्यम् ॥ दुःखजालानिविषयान् ॥४१॥ सप्राप्नपदः ॥ ४२ ॥ संसारेसारत्वेनप्रसिद्धसुखानामुत्कर्षैइतरेषामसाराणांसत्तास्फूर्त्योःसीमांतंपरमावधिम् ॥ सुखस्यआसाराणांमेघस्थानीयमवधिमितिवा ॥ एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति साकाष्ठासापरागतिरित्यादिश्रुतेरितिभावः ॥ अनुत्तमानिष्पंदाआनंदरसाविर्भावाध्यानिनांयस्मात् ॥४३ ॥ ४४ ॥ अनंतेसमःसंयोगऐकरस्य

पुरुषार्थैकसाध्येनवासनैकार्थकर्मणा॥ केवलंतन्मनोमात्रजयेनासाद्यतेपदम्॥४०॥ विवेकमात्रसाध्यंतद्विचारैकांतनिश्चयम्॥त्यजतादुःखजालानिनरेणैतदवाप्यते॥४१॥ सुखसेव्यासनस्थेनतद्विचारयतास्वयम्॥ नशोच्यतेपदंप्राप्यनसभूयोहिजायते॥ ४२॥ तत्समस्तसुखासारसीमांतंसाधवोविदुः॥ तदनुत्तमनिष्पंदंपरमाहूरसायनम्॥ ४३॥ क्षयित्वात्सर्वभावानांस्वर्गमानुष्ययोर्द्वयोः॥सुखंनास्त्येवसलिलंमृगतृष्णास्विवैतयोः॥४४॥ अतोमनोजयश्चिंत्यःशमसंतोषसाधनः॥ अनंतसमसंयोगस्तस्मादानंदआप्यते॥४५॥ तिष्ठतागच्छताचैवपततान्भ्रमतातथा॥ रक्षसादानवेनापिदेवेनपुरुषेणवा ॥ ४६॥ मनःप्रशमनोद्भूतंतत्प्राप्यंपरमंसुखम्॥ विकासिशमपुष्पस्यविवेकोच्चतरोःफलम्॥४७॥ व्यवहारपरेणापिकार्यवृंदमविंदता॥ भानुनेवांबरस्थेननोज्झतेनचवांछ्यते॥ ४८॥ मनःप्रशांतमत्यच्छंविश्रांतंविगतभ्रमम्॥ अनीहंविगताभीष्टंनाभिवांछतिनोज्झति॥४९॥ मोक्षद्वारेद्वारपालानिमाञ्छृणुयथाक्रमम्॥येषामेकतमासक्त्यामोक्षद्वारंप्रविश्यते॥५०॥ सुखदोषदशादीर्घासंसारमरुमंडली॥ जंतोःशीतलतामेतिशीतरश्मेःसमप्रभा॥५१॥

लक्षणः ॥ ४५ ॥ शारीरपरिश्रमोमनुष्याधिकारनियमश्चनास्तीत्याह ॥ तिष्ठतेत्यादिना ॥४६॥ विकासीशमःपुष्पंयस्यउच्चस्योत्कृष्टस्यतरोःकल्पवृक्षस्यफलंपरंसुखम्॥४७॥ ननुतत्प्राप्तमपिपुनर्व्यवहारप्रसक्तावपैष्यतीत्याशंक्याह ॥ व्यवहारेति ॥ नोज्झ्यतेनोत्सृज्यतेपूर्णत्वेनाहेयत्वादतएवनवांछ्यते ॥ ४८ ॥ सतिमनसिकथंनवांछास्यात्तत्राह ॥ मनइति ॥४९॥ प्रागनुक्तांतानपिविस्तरेणवर्ण्यमानान्शृणु॥५०॥तत्रासर्गसमाप्तेःशमंप्रस्तोतुमुपक्रमते ॥सुखेति॥ सुखशब्देनतदाशालक्ष्यते ॥ सैवाध्वगस्यतृषातापसमादोषदशातयादीर्घादुरतिक्रमाशीतलतामेतिशमेनेत्यपकृष्यते ॥ समप्रभाप्रभासमा॥ पदव्यत्यासश्छांदसः॥यथाचंद्रस्यस्वीयाप्रभातद्वत् ॥शीतरश्मिसमप्रभेतिपाठेस्पष्टम्॥५१॥

१ एकादशेसर्गे मोक्षद्वारेद्वारपालाइत्यादिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हियस्माच्छमेनश्रेयआसाद्यतेअतआयुर्घृतमितिवद्भेदोपचारात्तत्परमंपदंतद्विष्णोःपरमंपदमितिश्रुतिप्रसिद्धंशमएव ॥ एवंनसन्नचासंछिवएवकेवलइतिश्रुतिप्रसिद्धःशिवोपि शमएव ॥ एवंतरतिशोकमात्मविदित्यादिश्रुतिसिद्धासर्वदुःखोपशांतिरपिशमएवेत्यर्थः ॥ ५२ ॥ रागद्वेषाद्यतापितत्वाच्छीतलोनिर्मोहत्वादच्छतरश्चआत्माविज्ञानात्मायस्य ॥ ५३ ॥ आशयश्चित्तम् ॥ ज्ञानलब्धास्वाभाविकशुद्धताशमेनद्विगुणीभवंतीवाभिवर्द्धतइव ॥ यथाक्षीरोदानांशुभ्रताचंद्रोदयेनेत्यर्थः ॥ ५४ ॥ कुशेशयंपद्मम् ॥ हरेःस माहरिणातुल्याः ॥ हरेर्हृत्पद्मस्यैवबहिर्ब्रह्मासनपद्मतयाद्वैधीभावादितिभावः ॥ ५५ ॥ कुलीनाःसत्कुलास्तएवेंदवःस्वपरकुलोद्योतपापोपशमहेतुत्वात् ॥ विजितेंद्रवइतिपा

शमेनासाद्यतेश्रेयःशमोहिपरमंपदम् ॥ शमःशिवःशमःशांतिःशमोभ्रांतिनिवारणम् ॥५२॥ पुंसःप्रशमतृप्तस्यशीतलाच्छतरात्मनः॥
शमभूषितचित्तस्यशत्रुरप्येतिमित्रताम् ॥५३॥ शमचंद्रमसायेषामाशयःसमलंकृतः ॥ क्षीरोदानामिवोदेतितेषांपरमशुद्धता॥५४॥
हृत्कुशेशयकोशेषुयेषांशमकुशेशयम् ॥ सतांविकसितंतेहिद्वित्पद्माःसमाहरेः ॥५५॥ शमश्रीःशोभतेयेषांमुखेंदावकलंकिते ॥ तेकु
लीनेंदवोवंद्याःसौंदर्यविजितेंद्रियाः॥५६॥ त्रैलोक्योदरवर्त्तिन्योनानंदायतथाश्रियः ॥ साम्राज्यसंपत्प्रतिमायथाशमविभूतयः॥५७॥
यानिदुःखानियातृष्णादुःसहायेदुराधयः ॥ तत्सर्वंशांतचेतःसुतमोर्केष्विवनश्यति ॥ ५८ ॥ मनोहिसर्वभूतानांप्रसादमधिगच्छति॥
नतथेंदोर्यथाशांतेजनेजनितकौतुकम् ॥ ५९ ॥ शमशालिनिसौहार्दवतिसर्वेषुजंतुषु ॥ सुजनेपरमंतत्त्वंस्वयमेवप्रसीदति ॥ ६० ॥ मा
तरीवपरंयांतिविषमाणिमृदूनिच ॥ विश्वासमिहभूतानिसर्वाणिशमशालिनि ॥ ६१ ॥ नरसायनपानेननलक्ष्म्यालिंगनेनच ॥ तथा
सुखमवाप्नोतिशमेनांतर्यथामनः ॥ ६२ ॥ सर्वाधिव्याधिचलितंक्रांतंतृष्णावरत्रया ॥ मनःशमामृतासेकैःसमाश्वासयराघव ॥६३॥
यत्करोषियदश्नासिशमशीतलयाधिया ॥ तत्रातिस्वदतेस्वादुनेतरत्तातमानसे ॥ ६४ ॥

ठेस्पष्टम् ॥ पाठांतरेतुसौंदर्येणगुणैर्विजितानिवशीकृतानिपरेषामपिचक्षुर्मनःप्रभृतीनींद्रियाणियैः ॥ ५६ ॥ साम्राज्यसंपत्प्रतिमेवाकारमात्रेणसदृशीयासांनतुगुणांतैरित्यर्थः ॥ ५७ ॥ तत्सर्वमितिनपुंसकमनपुंसकेनेत्येकशेषैकवद्भावः ॥५८॥ इंदोश्चंद्रान्निमित्तभूतात् ॥ विषयस्यापिनिमित्तत्वविवक्षयापंचमी ॥ जनितंकौतुकंस्वात्मानुभवचमत्कारो यस्मिंस्तथाभूतंसद्यथाप्रसादमधिगच्छतीतिसंबंधः ॥ ५९ ॥ स्वयमेवेत्यनायासोक्तिः ॥६०॥ विषमाणिक्रूरकुटिलाशयानि ॥ मृदूनितद्विपरीतानि ॥६१॥ इंद्रपदेअमृतरसाय नपानेन ॥ विष्णुपदेलक्ष्म्यालिंगनेन ॥ ६२ ॥ चलितंभीषणेनकंपितम् ॥ वरत्रयाचर्मरज्ज्वाक्रांतमितस्ततआकृष्टंश्रांतमितियावत् ॥ ६३ ॥ स्वादुमधुरंयथास्यात्तथातत्रतत् मानसेऽतिस्वदतेरोचते ॥ ६४ ॥

१ एतट्टीकानुरोधेनमूलस्थःपाठस्तृतीयोपेक्षितःसकापिनोपलब्धः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वृतिसुखम् ॥ तयानिर्वृत्या ॥ रोहंतिपुनःप्रादुर्भवंति ॥ मन्येइत्युत्प्रेक्षा ॥ ६५ ॥ ६६ ॥ सुसन्नद्धानिसम्यग्गुप्तानिसमस्तान्यंगानियस्यतम् ॥ अमृतरूपेणवर्मणाकवचेन ॥ वेधयंतिपीडयंति ॥ दुःखानिदुःखनिमित्तानि ॥ ६७ ॥ यथापुरुषइतिशेषः ॥ ६८ ॥ जनस्तांतुष्टिंनैर्तीत्यर्थः ॥ शमयुक्तःआशयोयस्यतम् ॥ ६९ ॥ जीवतिसफलजीवनो भवति ॥ ७० ॥ अनुद्धतंविनीतंमनोयस्य ॥ साधुःशांतोयत्प्रमादादपराधमपीतियावत् ॥ ७१ ॥ इदानींदांभिकसात्विकपरीक्षणायशांतलक्षणान्याह ॥ श्रुत्वेत्यादिना ॥ शुभाशुभंप्रियाप्रियम् ॥ ७२ ॥ भाविसुखादिनकांक्षतिप्रारब्धप्रापितंचनोज्झति ॥ ७३ ॥ आर्जवमपितल्लक्षणमित्याह ॥ स्पृष्ट्वेति ॥ स्पृष्ट्वाज्ञात्वापिपरकौटिल्यादीनीतिशे

शमामृतरसाच्छन्नंमनोयामेतिनिर्वृतिम्॥ छिन्नान्यपितयांगानिमन्येरोहंतिराघव॥ ६५॥ नपिशाचानरक्षांसिनदैत्यानचशत्रवः॥ नचव्याघ्रभुजंगावाद्विषंतिशमशालिनम् ॥ ६६ ॥ सुसन्नद्धसमस्तांगंप्रशमामृतवर्मणा॥ वेधयंतिनदुःखानिशरावज्रशिलामिव ॥ ६७॥ नतथाशोभतेराजाअप्यंतःपुरसंस्थितः ॥ समयास्वच्छयाबुद्ध्यायथोपशमशीलया ॥ ६८॥ प्राणात्प्रियतरंदृष्ट्वातुष्टिमेतिन वैजनः॥ यामायातिजनःशांतिमवलोक्यशमाशयम्॥ ६९॥ समयाशमशालिन्यावृत्त्यायःसाधुवर्त्तते॥ अभिनंदितयालोकेजीवतीह सनेतरः॥ ७०॥ अनुद्धतमनाःशांतःसाधुःकर्मकरोतियत्॥ तत्सर्वमभिनंदंतितस्येमाभूतजातयः॥ ७१ ॥ श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वा घ्रात्वाशुभाशुभम्॥ नहृष्यतिग्लायतियःसशांतइतिकथ्यते ॥ ७२॥ यःसमःसर्वभूतेषुभाविकांक्षतिनोज्झति॥ जित्वेंद्रियाणियत्नेन सशांतइतिकथ्यते॥ ७३ ॥ स्पृष्ट्वावदातयाबुद्ध्यायथैवांतस्तथाबहिः॥ दृश्यंतेयत्रकार्याणिसशांतइतिकथ्यते॥ ७४॥ तुषारकरबिंबा भंमनोयस्यनिराकुलम्॥ मरणोत्सवयुद्धेषुसशांतइतिकथ्यते॥ ७५॥ स्थितोपिनास्थितइवनहृष्यतिनकुप्यति ॥ यःसुषुप्तसमःस्वस्थः सशांतइतिकथ्यते॥ ७६ ॥ अमृतस्यंदसुभगायस्यसर्वजनंप्रति॥ दृष्टिःप्रसरतिप्रीतासशांतइतिकथ्यते ॥ ७७॥ योंतःशीतलतांयातो योभावेषुनमज्जति॥ व्यवहारीनसंमूढःसशांतइतिकथ्यते॥ ७८॥ अप्यापत्सुदुरंतासुकल्पांतेषुमहत्स्वपि॥ तुच्छेहंनमनोयस्यसशांत इतिकथ्यते ॥ ७९॥ आकाशसदृशीयस्यपुंसःसंव्यवहारिणः॥ कलंकमेतिनमतिःसशांतइतिकथ्यते॥ ८०॥

षः ॥ मोक्षोपायतयाकर्तव्यानिकार्याणि ॥ ७४ ॥ मरणोत्सवयुद्धेषुभयरागक्रोधैर्निराकुलमसंभ्रममतएवतुषारकरश्चंद्रस्तद्बिंबाभम् ॥ ७५॥ हर्षकोपनिमित्तवत्प्रदेशेस्थितो पि ॥ ७६ ॥ अमृतस्यंदोऽमृतप्रवाहइवसुभगासुखदा ॥ ७७ ॥ भावेषुविषयेषुव्यवहारीसन्नपिनमज्जतिनासज्जते ॥ ७८ ॥ महत्सुचिरकालिकेषु ॥ तुच्छेमिथ्याभूतेनश्वरेदे हादौयस्याहमितिमनोनास्ति ॥ ७९ ॥ परमाकाशेनब्रह्मणासदृशीसमरसाप्रसिद्धाकाशवदविकार्यावा ॥ कलंकंरागादिलेपम् ॥ ८० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकेपिसर्वगुणश्रैष्ठ्येनशमःप्रसिद्धइत्याह॥ तपःस्विष्विति ॥ ८१ ॥८२॥ गुणानांपूगानांसमूहानांसीमांतोवधिः ॥ एकांतभूषणंमुख्यभूषणम् ॥ श्रीमान्सर्वगुणसंपत्तिमान्शमोविराजते ॥ ८३ ॥ अहार्यैपरैरपहर्त्तुमशक्यमार्यैःपूज्यैर्गुप्तंसावधानतयारक्षितंपरमुत्कृष्टंसाधनमवलंब्यमहानुभावायथायेनक्रमेणपरंपदंप्रयाताःप्राप्तास्तमेवक्रममनुपालयअवलंब्यरक्षस्वेत्यर्थः ॥ ८४ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेत्रयोदशःसर्गः ॥ १३ ॥ ॥७॥ ॥ साधुसंगमसच्छास्त्रभावशुद्ध्युपवृंहितः ॥ शमसंतोषयोर्हेतुर्विचारोत्रप्रशस्यते ॥ १ ॥ इत्थमोक्षद्वारपालंशमाख्यमाद्यमुपवर्ण्यद्वितीयंविचारंवर्णयिष्यन्वसिष्ठउवाच ॥ शास्त्रेति ॥ तत्रार्थानर्थानुबंधविचारःसारासारविचारोहेयोपादेयविचारःप्रमाणतात्पर्यविचारआत्मतत्त्वपरीक्षाचेतिविचारःपंचविधः ॥ तत्रस्वाभाविकप्रवृत्तेर्विषयाणांचानर्थानुबंधिताशास्त्रीयप्रवृत्तेर्वैराग्यादेश्चपुरुषार्थानुबंधितेत्यन्वयव्यतिरेकादिनापरीक्षात्मकआद्यः ॥ स्त्रीपुत्रस्वदेहादिषुस्वतोबीजतःपरिणामतश्चाशुचिविण्मूत्राद्यमंगलत्वपरीक्षात्माब्रह्मलोकांतसुखाना

तपःस्विषुवद्धुज्ञेषुयाजकेषुनृपेषुच ॥ वलवत्सुगुणाढ्येषुशमवानेवराजते ॥ ८१ ॥ शमसंसक्तमनसांमहतांगुणशालिनाम् ॥ उदेतिनिर्वृतिश्चित्ताज्ज्योत्स्नेवसितरोचिषः ॥ ८२ ॥ सीमांतोगुणपूगानांपौरुषैकांतभूषणम् ॥ संकटेषुभयस्थानेशमःश्रीमान्विराजते ॥ ८३ ॥ शमममृतमहार्यमार्यगुप्तंपरमवलंब्यपरंपदंप्रयाताः ॥ रघुतनययथामहानुभावाःक्रममनुपालयसिद्धयेतमेव ॥ ८४ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेवा०दे०मो०मुमुक्षुव्यवहारप्रकरणेशमनिरूपणंनामत्रयोदशःसर्गः ॥ १३ ॥ ॥७॥ ॥ श्रीवसिष्ठउवाच ॥ शास्त्रावबोधामलयाधियापरमपूतया ॥ कर्त्तव्यःकारणज्ञेनविचारोनिशमात्मनः ॥ १ ॥

मनित्यत्वदुःखसंभिन्नत्वादिपरीक्षात्माचद्वितीयः ॥ एतौवैराग्यमुमुक्षाहेतू ॥ मुमुक्षोत्तरमपिमोक्षसाधनंकर्मवोपासनमेव तेअपिकिंसमुच्चितेउतज्ञानसमुच्चितेउतज्ञानमेवेतिपरीक्षात्मातृतीयः ॥ यदापिज्ञानमेवतदापितत्किंसांख्यवैशेषिकाद्यभिमतंकपिलगौतमोक्ततत्तच्छास्त्रप्रमाणकंश्रौतमेववा ॥ यदापिश्रौतंतदापिकिंश्रुतीनांद्वैतेउताद्वैतेसविशेषेउतनिर्विशेषेआत्मन्यनात्मनिवातात्पर्यमितिपरीक्षात्माचतुर्थः ॥ सचश्रवणमित्युच्यते ॥ श्रुत्यादिप्रमाणानामप्यद्वितीयेसच्चिदानंदब्रह्मात्मनितात्पर्यावधारणेपिस्वात्मनिपरमार्थतस्तथात्वंसंभवतिनवेतिरत्नपरीक्षान्यायेनानुभवनिष्ठगुरुसतीर्थ्यादिसंवादेनजीवेश्वरजगत्तत्त्वपरिशोधनेनचयावदवधारणंपरीक्षणात्मापंचमः ॥ तत्राद्यानांत्रयाणांफलंसाधनचतुष्टयसंपत्तिरंत्ययोस्तुक्रमात्प्रमाणप्रमेयासंभावनानिवृत्तिस्तत्राद्यायद्यपिभाग्यवशतःस्वतोपिचभवंतितथापिस्वप्रत्ययदृढीकारायपुनर्गुरुशास्त्रपुरःसरंकर्त्तव्याः ॥ अंत्यौतुगुरुशास्त्राभ्यामेवभवतइतिसर्वसाधारण्येनशास्त्रावबोधामलयाधियेत्युक्तम् ॥ कारणज्ञेनविषयविशंयपूर्वपक्षसिद्धांतप्रयोजनविभागज्ञानवतापुंसाप्रमाणप्रमेयतत्त्वप्रतिपादनोपायकुशलेनगुरुणासहेतिवार्थः ॥ तत्रचित्तशुद्धेरप्युपयोगंदर्शयति ॥ परमपूतयेति ॥ १ ॥

---

१ संशयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णतांसूक्ष्मतत्त्वावगाहनकुशलताम् ॥ २ ॥ आपदेववद्रुरुत्तरत्वाद्वनम् ॥ अनंताभिरीहाभिःप्रवृत्तिभिःपरितःपल्लवितेवरागादिभिर्विवृद्धाआकृतिःसन्निवेशोयस्य ॥ क्रकचं काष्ठंदारणम ॥ ३ ॥ बंधुनाशादिषुदुःखस्थानेषुयदुचितंकर्त्तव्यंयेनचोपायेनदुःखोत्तरणंचित्तसमाधानंचतत्सर्वंमोहेनवैचित्त्येनव्याप्तंनस्फुरतीतियावत् ॥ तत्रविचारएवगतिस्तत्प्रतिसंधानेहेतुरित्यर्थः ॥ ४ ॥ तदेवाह ॥ नेति ॥ ५ ॥ तेजःसामर्थ्यम् ॥ प्रतिपत्तिस्तत्तत्कालोचितास्फूर्त्तिः ॥ क्रियातदनुष्ठानंतरफलंच ॥ फलंतिनिष्पद्यंतेसफलीभवंतिवा ॥ ६ ॥ युक्तमुचितमुपादेयमयुक्तमनुचितंहेयंतयोःप्रकाशनेमहादीपम् ॥ स्फारमनल्पम् ॥ ७ ॥ आलूनानित्दृदयस्थानिविवेकांभोजानियैस्तान् ॥ शुद्धात्माजल्पच्छल

विचारात्तीक्ष्णतामेत्यधीःपश्यतिपरंपदम् ॥ दीर्घसंसाररोगस्यविचारोहिमहौषधम् ॥ २ ॥ आपद्वनमनंतेहापरिपल्लविताकृति ॥ विचारक्रकचच्छिन्नंनैवभूयःप्ररोहति ॥ ३ ॥ मोहेनबंधुनाशेषुसंकटेषुशमेषुच ॥ सर्वंव्याप्तंमहाप्राज्ञविचारोहिसतांगतिः ॥ ४ ॥ नविचारंविनाकश्चिदुपायोस्तिविपश्चिताम् ॥ विचारादशुभंत्यक्त्वाशुभमायातिधीःसताम् ॥ ५ ॥ बलंबुद्धिश्चतेजश्चप्रतिपत्तिःक्रियाफलम् ॥ फलंत्येतानिसर्वाणिविचारेणैवधीमताम् ॥ ६ ॥ युक्तायुक्तमहादीपमभिवांछितसाधकम् ॥ स्फारंविचारमाश्रित्यसंसारजलधिंतरेत् ॥ ७ ॥ आलूनत्दृदयांभोजान्महामोहमतंगजान् ॥ विदारयतिशुद्धात्माविचारोनामकेसरी ॥ ८ ॥ मूढाःकालवशेनेहयद्गताःपरमंपदम् ॥ तद्विचारप्रदीपस्यविजृंभितमनुत्तमम् ॥ ९ ॥ राज्यानिसंपदःस्फाराभोगोमोक्षश्चशाश्वतः ॥ विचारकल्पवृक्षस्यफलान्येतानिराघव ॥ १० ॥ याविवेकविकासिन्योमतयोमहतामिह ॥ नताविपदिमज्जंतितुंबकानीववारिणि ॥ ११ ॥ विचारोदयकारिण्याधियाव्यवहरंतिये ॥ फलानामत्युदाराणांभाजनंहिभवंतिते ॥ १२ ॥ मूर्खत्दृत्काननस्थानामाशाप्रथमरोधिनाम् ॥ अविचारकरंजानांमंजर्योदुःखरीतयः ॥ १३ ॥ कज्जलक्षोदमलिनामदिरामदधर्मिणी ॥ अविचारमयीनिद्रायातुतेराघवक्षयम् ॥ १४ ॥ महापदतिदीर्घेषुसद्विचारपरोनरः ॥ ननिमज्जतिमोहेषुतेजोराशिस्तमःस्विव ॥ १५ ॥

जात्यादिदोषशून्यः ॥ ८ ॥ मूढास्तरणोपायमार्गव्यामूढाः ॥ विजृंभितंतादृशमार्गप्रकाशनस्यफलम् ॥ ९ ॥ १० ॥ विवेकोत्रविचारस्तेनविकासिन्योयामतयस्तानमज्जंतिनविषीदंति ॥ तुंबकानिशुष्कालाबुकानि ॥ ११ ॥ विचारवतीधीर्विवेकोदयकारिणीतयायेव्यवहरंति ॥ उदाराणांश्रेष्ठानाम् ॥ १२ ॥ मूर्खाणांत्दृन्मनएवकाननंवनंतत्स्थानाम् ॥ पुरुषार्थविषयेआशांमुमुक्षांप्रथमंरुंधंतितच्छीलानाम् ॥ करंजानांकुबेराक्षवल्लीनाम् ॥ तत्पक्षेआशादिशः ॥ तेहिवृतिभावेनदिशोरुंधंति ॥ मंजर्यःफलकोशमंजर्योदुःखव्यवहाराडंबरभूतास्ताहिसकंटकाःकटुकफलगर्भाःप्रसिद्धाः ॥ १३ ॥ क्षोदश्चूर्णमिवमलिना ॥ मदिरामदधर्माभ्रांतिस्खलनादयस्तद्वती ॥ क्षयंयातुविचारेणेतिशेषः ॥ १४ ॥ महत्यआपदोयेषुतेचनेअतिदीर्घाश्चतेषुमोहेषुअज्ञानेषु ॥ तेजोराशिःसूर्यः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानसंमनएवसरस्तदेवहिमवत्कुक्षौप्रसिद्धंमानसंसरः ॥ शैत्यौन्नत्यस्थैर्यादिगुणैर्हिमवानिव ॥ १६ ॥ मांद्यंमौर्ख्यम् ॥ चंद्रदैवत्यचंद्रवद्विवेकप्रकाशयोग्येचमनसिचंद्रिकास दृशज्ञानसुखाविर्भावएवोचितस्तस्माद्यस्यमूर्खस्यशोकदुःखाद्युद्भवस्तस्यचंद्रादप्यशनिर्वज्रमुदेति ॥ यथाशिशोर्बालस्यमौर्ख्याद्यक्षःप्रागुक्तवेतालउदेतितद्वत् ॥ १७ ॥ नि र्विवेकोनराधमोदुःखबीजानामेवनिरंतरभरणायनिर्मितंखंडकंभूकुसूलम् ॥ नविद्यतेस्थूलंयस्मात्तथाविधमतिस्थूलमित्यर्थः ॥ विपल्लक्षणानांनवलतानांमधुर्वसंतउल्लासहेतु रित्यर्थः ॥ १८ ॥ दुरारंभाःस्वपरदुःखानुकूलकर्माणि ॥ दुराचारानिषिद्धाचरणानि ॥ भ्रांतिआविर्भवंति ॥ १९ ॥ एकांतेननियमेनवनद्रुमसमानधर्माणम् ॥ एकांतेमनुष्या सेव्यस्थानेवाविद्यमानेनवनद्रुमेणसधर्माणम् ॥ अतएवसाधूनामध्वगानांछायाश्रयदानादिकार्येषुसाधुषुपुरुषार्थोपयोगिषुकार्येषुवाऽक्षमंमसमर्थम् ॥ २० ॥ विविक्तंविचार

मानसेसरसिस्वच्छेविचारकमलोत्करः ॥ नूनंविकसितोयस्यहिमवानिवभातिसः ॥ १६ ॥ विचारविकलायस्यमतिर्मांद्यमुपेयुषः ॥ त स्योदेत्यशनिश्चंद्रान्मुधायक्षःशिशोरिव ॥ १७ ॥ दुःखखंडकमस्थूलंविपन्नवलतामधुः ॥ रामदूरेपरित्याज्योनिर्विवेकोनराधमः ॥ १८ ॥ येकेचनदुरारंभादुराचारादुराधयः ॥ अविचारेणतेभ्रांतिवेतालास्तमसायथा ॥ १९ ॥ अविचारिणमेकांतवनद्रुमसधर्मकम् ॥ अक्ष मंसाधुकार्येषुदूरेकुरुरघूद्वह ॥ २० ॥ विविक्तंहिमनोजंतोराशावैवश्यवर्जितम् ॥ परांनिर्वृतिमभ्येतिपूर्णचंद्रइवात्मनि ॥ २१ ॥ विवे कितोदितादेहेसर्वंशीतलयत्यलम् ॥ अलंकरोतिचात्यंतंज्योत्स्नेवभुवनंयथा ॥ २२ ॥ परमार्थपताकायाधियोधवलचामरम् ॥ विचा रोराजतेजंतोरजन्यामिवचंद्रमाः ॥ २३ ॥ विचारचारवोजीवाभासयंतोदिशोदश ॥ भ्रांतिभास्करवन्नूनंभूयोभवभयापहाः ॥ २४ ॥ बालस्यस्वमनोमोहकल्पितःप्राणहारकः ॥ रात्रौनभसिवेतालोविचारेणविलीयते ॥ २५ ॥ सर्वएवजगद्भावाअविचारेणचारवः ॥ अविद्यमानसद्भावाविचारविशरारवः ॥ २६ ॥

वत् ॥ आशायांवैवश्येनपारवश्येनवर्जितम् ॥ निर्वृतिंविश्रांतिसुखम् ॥ २१ ॥ ज्योत्स्नाचंद्रिकेव ॥ भुवनंजलंयथातापार्त्तंसर्वंजनंशीतलयतितृषार्त्तंचअलंतृप्तंकरोतितद्वत् ॥ २२ ॥ जंतोरधिकारिजन्मवतःपुरुषस्यपरमार्थस्योत्कृष्टपुरुषार्थलक्षणराजभावप्राप्तेःसूचकत्वात्पताकायाधियःशुद्धबुद्धेःसंबंधिविचारोधवलचामरमिवासाधारणंराजचि ह्नंराजते ॥ रूपितपताकाचामरयोरजनीचंद्रमसावुपमाने ॥ तत्ररजन्यावैयधिकरण्येनोपमानत्वं ॥ २३ ॥ जीवाविचारेणैवक्रमाच्चारवोजीवन्मुक्तभूताःसंतोभूयसांप्राणिनां विचारप्रकाशेनभवभयलक्षणंतमोपघ्नंतोभास्करवद्भांति ॥ २४ ॥ ननुविचारेणभयनिवृत्तिःक्वदृष्टातत्राह ॥ बालस्येति ॥ निशिबहिर्गमनप्रतिबंधार्थंकल्पितोवेतालस्तथासं सारोविलीयते ॥ २५ ॥ अस्तुतत्रतथाप्रकृतेकथंभयनिवृत्तिरित्याशंक्यभयहेतोर्जगतोविचारेणमिथ्यात्वनिर्णयादित्याह ॥ सर्वएवेति ॥ चारवःसत्यवद्रमणीयाः ॥ विशरारवः शिलास्फालितलोष्टादिवद्विशरणशीलाअसारामिथ्याभूताइतियावत् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तमेवस्पष्टयति पुंसइति ॥ २७ ॥ नभयनिवृत्तिरेवकिंतुनिरतिशयानंदावाप्तिरपितत्फलमित्याह ॥ सममिति ॥ समंजगद्वैषम्यशून्यम ॥ अनपाश्रयमनन्याधीनम् ॥ केवलीभावंकैवल्यम् ॥२८॥ तद्विच्छेदशंकांवारयति ॥ अचलेति ॥ तेनविचारेणप्रकटस्याभोगस्यनिरतिशयानंदस्यतेजसासामर्थ्येनचांचल्यहेत्वज्ञानेनष्टेअचलस्थितितयाउदाराआनंदपूर्णतालक्षणानिष्कामताउदेति ॥२९॥ अचलस्थितिरेवोत्तमत्वंतत्प्रदयापूर्वोक्तयाविचारलक्षणयामहौषध्यासिद्धःपुरुषोनाभिवांछत्यप्राप्तंप्राप्तंचनोज्झति कृतकृत्योभवतीत्यर्थः ॥ ३० ॥ ननुचित्तंयदिविचारजन्यज्ञानेननश्येत्तर्हिजीवनासंभवोयदिननश्येत्तर्हिपुनर्विक्षेपानूजनयेदेवेतिकथंकृतकृत्यतेत्याशंक्याह ॥ तदिति ॥ यथाभर्जितंबीजंबीजाभासतांगतंनांकुरारंभक्षमंतद्वदाभासतांगतंचित्तमपिखमाकाशमिवाततिततमतिविस्तीर्णब्रह्मभावंप्राप्तमांतरंविक्षेपबीजवासनाजालंयस्य ॥ नास्तंविनाशमेतियेनजी

पुंसोनिजमनोमोहकल्पितोनल्पदुःखदः॥ संसारचिरवेतालोविचारेणविलीयते॥ २७॥ समंसुखंनिराबाधमनंतमनपाश्रयम्॥ विद्धीमंकेवलीभावंविचारोच्चतरोःफलम्॥२८॥ अचलस्थितितोदाराप्रकटाभोगतेजसा॥ तेननिष्कामतोदेतिशीततेवेंदुनोदिता॥२९॥ स्वविचारमहौषध्यासाधुश्चित्तनिषण्णया॥तयोत्तमत्वप्रदयानाभिवांछतिनोज्झति॥३०॥ तत्पदालंबनंचेतःस्फारमाभासमागतम्॥ नास्तमेतिनचोदेतिखमिवाततितांतरम्॥३१॥नददातिनचादत्तेनचोन्नमतिशाम्यति॥केवलंसाक्षिवत्पश्यन्जगदाभोगितिष्ठति॥३२॥ नचशाम्यतिनाप्यंतर्नापिबाह्येवतिष्ठति॥ नचनैष्कर्म्यमादत्तेनचकर्मणिमज्जति॥ ३३॥ उपेक्षतेगतंवस्तुसंप्राप्तमनुवर्त्तते॥ नक्षुब्धोनचवाक्षुब्धोभातिपूर्णइवार्णवः॥ ३४॥ एवंपूर्णेनमनसामहात्मानोमहाशयाः॥ जीवन्मुक्ताजगत्यस्मिन्विहरंतीहयोगिनः॥ ३५॥ उषित्वासुचिरंकालंधीरास्तेयावदीप्सितम्॥ तेतमंतेपरित्यज्ययांतिकेवलतांतताम्॥ ३६॥ कोहंकस्यचसंसारइत्यापद्यपिधीमता॥ चिंतनीयंप्रयत्नेनसप्रतीकारमात्मना॥ ३७॥

वनंनस्यान्नापिरागद्वेषादिवृत्तिभिरुदेतियेनविक्षेपःस्यादित्यर्थः ॥ यद्वाचेतःआभासंभर्जितबीजमिवनोदेतियेनविक्षेपःस्यात् ॥ अनादिवासनयास्फारतांगतदृढंविषयसंस्कारवशान्नविनाशमेति ॥ ३१ ॥ तत्कुतः ॥ यतोजगद्विषयानयंकेवलंसाक्षिवदौदासीन्येनपश्यंस्तेषुरागितयामनोनददातिसत्यतयापुरुषार्थबुद्ध्याचनादत्तेनोपभुंक्ते ॥ ३२ ॥ नसुषुप्ताविवोपाधिशांत्याशाम्यतिनापिस्वप्नवदांतरवासनामयेनिमज्जतिनवामूढजनजाग्रद्वद्बाह्येवसन्नस्तिष्ठति ॥ ३३ ॥ अर्णवपक्षेगतंलक्ष्मीकौस्तुभादिवस्तुउपेक्षतेनतत्प्राप्त्यैयतते ॥ क्षुब्धोमर्यादात्यागपर्यंतंक्षोभवान् ॥ अक्षुब्धस्तिमितःस्वाभाविकंव्यवहारंत्यजन्नितियावत् ॥ क्षोभादिफलाभावसमुच्चयार्थश्चकारः ॥३४॥ इहास्मिन्शरीरेएवानुभूयमानोजीवब्रह्मैक्यलक्षणोयोगोयेषामस्तिते ॥ ३५ ॥ तमुपाध्याभासम् ॥ ततामपरिच्छिन्नांकेवलतांविदेहकैवल्यम् ॥ ३६ ॥ आपद्यपिकुटुंबादिव्यापृतायामपि ॥ सप्रतीकारंतत्प्रतीकारश्रवणाद्यनुष्ठानसहितंयथास्यात्तथा ॥ आत्मनास्वेनैव ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्योवश्यकर्त्तव्यःसंकटेष्वर्थकृच्छ्रेषुसंदिह्यतइतिसंदेहःसंधिविग्रहादिस्तंजानातिनिश्चिनोति ॥ ३८ ॥ वेदानांकर्मकांडानांवेदांतानांचसिद्धांतस्थितयोधर्मब्रह्मतत्त्वलक्षणा
स्तात्पर्यविश्रांतिभूमयःस्थितेःपुरुषार्थप्रतिष्ठायाःकारणंप्रापिकाइतियावत् ॥ दीपेनचेतितुल्ययोरेवसमुच्चयइत्यौत्सर्गिकनियमात्सादृश्यंगम्यते ॥ ३९॥ प्रसिद्धलोचनमंधका
रेनष्टमिवबहुतेजःसुसूर्यादिषुजिह्मितंप्रतिहतंव्यवहितविप्रकृष्टग्रहणेष्वसमर्थंचविचारलक्षणंलोचनंतुनतथेत्यर्थः ॥४० ॥ विवेकोविचारआत्मेवप्रियःप्रधानोवायस्यसपुरुषो
दिव्यचक्षुर्जयतिअभिभवत्यापदोविनाशयतिप्राप्नोतिवापुरुषार्थम् ॥ ४१ ॥ विचारेष्वपियःसारभूतस्तमाह ॥ परमात्मेति ॥ स्त्रीमयोजात्मइतिवदत्यासक्त्यातत्प्रायताद्योत
नायमयट् ॥ क्षणंक्षणमपि ॥ उदरमंतरंकुरुते अथतस्यभयंभवतीतिश्रुतेः ॥ साहानिस्तन्महाच्छिद्रंसांधतासाचमूकता यत्क्षणंवामुहूर्त्तंवाशिवमेकंनचिंतयेदितिलैंगवचनाच्चे

कार्यसंकटसंदेहंराजाजानातिराघव ॥ निष्फलंसफलंवापिविचारेणैवनान्यथा ॥ ३८ ॥ वेदवेदांतसिद्धांतस्थितयःस्थितिकारणम् ॥
निर्णीयंतेविचारेणदीपेनचभुवोनिशि ॥ ३९ ॥ अनष्टमंधकारेषुबहुतेजःस्वजिह्मितम् ॥ पश्यत्यपिव्यवहितंविचारश्चारुलोचनं ॥ ४० ॥
विवेकांधोहिजात्यंधःशोच्यःसर्वस्यदुर्मतिः ॥ दिव्यचक्षुर्विवेकात्माजयत्यखिलवस्तुषु ॥ ४१ ॥ परमात्ममयीमान्यामहानंदैकसाधि
नी ॥ क्षणमेकंपरित्याज्यानविचारचमत्कृतिः ॥ ४२ ॥ विचारचारुपुरुषोमहतामपिरोचते ॥ परिपक्वचमत्कारंसहकारफलंयथा ॥ ४३ ॥
विचारकांतमतयोनानेकेषुपुनःपुनः ॥ लुठंतिदुःखश्वभ्रेषुज्ञाताध्वगतयोनराः ॥ ४४ ॥ नचरौतितथारोगीनानर्थशतजर्जरः ॥ अविचा
रविनष्टात्मायथाज्ञःपरिरोदिति ॥ ४५ ॥ वरंकर्दमभेकत्वंमलकीटकतावरम् ॥ वरमंधगुहाहित्वंनंनरस्याविचारिता ॥ ४६ ॥ सर्वानर्थ
निजावासंसर्वसाधुतिरस्कृतम् ॥ सर्वदौस्थित्यसीमांतमविचारंपरित्यजेत् ॥ ४७ ॥ नित्यंविचारयुक्तेनभवितव्यंमहात्मना ॥ तथांधकू
पेपततांविचारोह्यवलंबनम् ॥ ४८ ॥ स्वयमेवात्मनात्मानमवष्टभ्यविचारतः ॥ संसारमोहजलधेस्तारयेत्स्वमनोमृगम् ॥ ४९ ॥ कोहं
कथमयंदोषःसंसाराख्यउपागतः ॥ न्यायेनेतिपरामर्शोविचारइतिकथ्यते ॥ ५० ॥

तिभावः ॥ ४२ ॥ महतांविदिततत्त्वानांकिंपुनर्विविदिषूणामितिद्योतनार्थमपिशब्दः ॥ परिपक्वःपरिपाकनिष्पन्नश्चमत्कारोमाधुर्यातिशयोयस्मिन् ॥ सहकारस्याम्रस्यफलम् ॥ ४३ ॥
विचारेणैवज्ञाताअनुभवाध्वनिगतिर्यैः ॥ समासोक्त्यालौकिकाध्वगवृत्तांतोपिगम्यते ॥ ४४ ॥ विषशस्त्रघाताद्यनर्थशतैर्जर्जरःशिथिलांगोपितथानचरौतियथाअविचारेण
विनष्टोविनाशितप्रायआत्मायेनसोज्ञःपरितोजन्मपरंपरासुरोदिति ॥ ४५ ॥ ४६ ॥ ४७ ॥ तथाहिप्रसिद्धम् ॥ अंधयतीत्यंधस्तथाविधःकूपोरागादिफलाभेदेनोच्यते ॥ ४८ ॥
अवष्टभ्यरागादिप्रवाहाकृष्टमपिबलात्स्थिरीकृत्य ॥ ४९ ॥ विचारस्वरूपमेवदर्शयति ॥ कोहमिति ॥ किंदेहादिरेवाहमुततद्विलक्षणइतित्वंपदार्थविचारः ॥ संसारःकथंकेनहे
तुनाअधिष्ठानेआगतइतितत्पदार्थविचारः ॥ श्रुतिमुन्याचार्यसांप्रदायिकदर्शितेनन्यायेन ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिलायादुर्मतेश्चत्हृदयंमनआंतरावयवश्च ॥ दुःखायपीडायै॥टंकच्छेदादिकष्टनिष्पाद्यत्वाद्दुष्टायखायच्छिद्रायेवचंकृतंधात्रा ॥ नान्यत्रतस्योपयोगइत्यर्थः ॥ सादृश्यलाभः प्राग्वत् ॥ यतस्तदंधादचक्षुषोप्यंधंमोहेनचसुघनमतिनिबिडम् ॥ अंधोह्यदृष्ट्वाकूपेपततिमनस्तुदृष्ट्वापिमोहान्नरकेष्वपिपततीति ॥ शिलात्हृदयपक्षेअंधादप्यंधंजडत्वान्मोहाद पिसुघनंकठोरत्वादित्यर्थः ॥ अथवायोदुर्मतिरविचारीचपुरुषस्तस्यत्हृदयंशिलायाःसकाशात्कृतमित्युत्प्रेक्षा ॥ यतोंधादंधंमोहेनसुघनंच ॥ अतस्तच्चिरंकेवलंदुःखायैवेत्यर्थः ॥ ५१ ॥ भावःसत्यस्तस्ययहउपादानंअभावोऽसत्यस्तस्योत्सर्गस्त्यागस्तौपश्यतांप्रेक्षावतामिहव्यवहारभूमौसाधुसम्यक्तत्त्वंविचारंविनानज्ञायते ॥ ५२ ॥ तत्त्वंवस्तुनोनित्य त्वंतत्त्वज्ञानाद्विश्रांतिर्मनोनैश्चल्यम् ॥ अतोविश्रांतेःशांतत्वमेवसर्वदुःखपरिक्षयः ॥ ५३ ॥ विस्तरोक्तंसंक्षिप्योपसंहरति ॥ सफलतामिति ॥ यतःसर्वोपिजनःस्फुटविचारदृशैव

अंधांधमोहसुघनंचिरंदुःखायकेवलम्॥ कृतंशिलायात्हृदयंदुर्मतेश्चाविचारिणः॥ ५१ ॥ भावाभावग्रहोत्सर्गदृशामिहहिराघव॥ न विचारादृतेतत्त्वंज्ञायतेसाधुकिंचन॥ ५२॥ विचाराज्ज्ञायतेतत्त्वंतत्त्वाद्विश्रांतिरात्मनि॥ अतोमनसिशांतत्वंसर्वदुःखपरिक्षयः॥ ५३॥ सफलतांफलतेभुविकर्मणांप्रकटतांकिलगच्छतिउत्तमाम्॥ स्फुटविचारदृशैवविचारिताशमवतेभवतेचविरोचताम्॥ ५४॥ ॥इति श्रीवासिष्ठमहारामायणेवा०दे०मोक्षोपायेमुमुक्षुव्यवहारप्रकरणेविचारनिरूपणंनामचतुर्दशःसर्गः॥ १४॥ ॥ ६॥ ॥श्री वसिष्ठउवाच॥ ॥संतोषोहिपरंश्रेयःसंतोषःसुखमुच्यते॥ संतुष्टःपरमभ्येतिविश्राममरिसूदन ॥ १ ॥ संतोषैश्वर्यसुखिनांचिरविश्रांत चेतसाम्॥ साम्राज्यमपिशांतानांजरत्तृणलवायते॥ २ ॥ संतोषशालिनीबुद्धीरामसंसारवृत्तिषु॥ विषमास्वप्यनुद्विग्नानकदाचनहीय ते॥ ३ ॥ संतोषामृतपानेनयेशांतास्तृप्तिमागताः॥ भोगश्रीरतुलातेषामेषाप्रतिविषायते ॥ ४ ॥

लौकिकवैदिककर्मणांसफलतांफलतेनिष्पादयति ॥ आत्मतत्वस्यउत्तमांवक्ष्यमाणसप्तमभूमिकांतामुत्कृष्यमाणांप्रकटतांचगच्छतिप्राप्नोति ॥ अतःसमाधिसाधनसंपत्तिमतेभ वतेचतादृशीविचारितारोचताम् ॥ गच्छतिउत्तमामित्यसंधिर्वाक्येसंहितायाअनित्यत्वात् ॥५४ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमु०प्रकरणेचतुर्दशःसर्गः ॥१४॥ वैराग्यकल्पवृक्षस्यच्छायेवसुखशीतलः ॥ तृतीयोद्वारपालोत्रसंतोषउपवर्ण्यते ॥ १ ॥ क्रमप्राप्तंतृतीयद्वारपालंसंतोषंवर्णयति ॥ संतोषइत्यादिना ॥ वक्ष्यमाणलक्षणःसंतो षएवपरंश्रेयोमोक्षःसुखमितरदपि ॥ आयुर्घृतमितिवत्साधनेफलाभेदारोपेणस्तुतिः ॥ विश्राममात्यंतिकदुःखविक्षेपनिवृत्तिम् ॥ १ ॥ संतोषलक्षणेनैश्वर्येणप्राभवेनसुखिनां ॥ चिरंविश्रांतमाश्वस्तंचेतोयेषाम् ॥ जरतोजीर्णस्यतृणस्यलवोलेशःसइवाचरतितुच्छीभवतीत्यर्थः ॥ २ ॥ विषमासुदारिद्र्यवियोगादिवैषम्यवतीष्वपिसंसारस्थितिषुदैवात्प्रस क्तासुसंतोषशालिनीबुद्धिर्नहीयतेसुखेननवियुज्यतइत्यर्थः ॥ ३ ॥ प्रतिकूलविषवदाचरतितथाभातीत्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिमधुरआनंदप्रचुरआस्वादोनुभवोयस्य ॥ आशादैन्यादिदोषनाशनः ॥ ५ ॥ संतोषमाश्रयलक्षणेनलक्षयति ॥ अप्राप्तेति ॥ प्राप्तेपिविषयेमिथ्यात्वादप्राप्तसमतांतत्प्राप्ति निमित्तहर्षादिराहित्येनपूर्वावस्थासमतांवागतः ॥ तत्रहेतुमाह ॥ अदृष्टेति ॥ ६ ॥ आत्मनात्स्वेनैवननिमित्तांतरेण ॥ आत्मन्येवनविषयांतरे ॥ ७ ॥ अंबुजपक्षेसम्यक्कृतोषस्तृ पानिवृत्तिर्येनतेनजलेनशीतलमाप्यायितम् ॥ ८ ॥ वैवश्यंपारवश्यंतेनविवशेव्याकुले ॥ म्लानेआदर्शेवक्रमिवनप्रतिबिंबतिव्यक्तीभवति ॥ उपदिष्टमपीत्यर्थः ॥ ९ ॥ यस्य नरांबुजस्यविकासायासौप्रागुक्तःसंतोषभास्करउदितस्तन्नरांबुजमज्ञानलक्षणयागाढांधकाररात्र्यासंकोचंनयाति ॥ १० ॥ ११ ॥ प्रागुक्तंलक्षणमनूद्यलक्षणांतरमप्याह ॥

नतथासुखयंत्येताःपीयूषरसवीचयः ॥ यथातिमधुरास्वादःसंतोषोदोषनाशनः ॥ ५ ॥ अप्राप्तवांछामुत्सृज्यसंप्राप्तेसमतांगतः ॥ अ
दृष्टखेदाखेदोयःससंतुष्टइहोच्यते ॥ ६ ॥ आत्मनात्मनिसंतोषंयावद्यातिनमानसम् ॥ उद्भवंत्यापदस्तावल्लताइवमनोबिलात् ॥ ७ ॥
संतोषशीतलंचेतःशुद्धविज्ञानदृष्टिभिः ॥ भृशंविकासमायातिसूर्यांशुभिरिवांबुजम् ॥ ८ ॥ आशावैवश्यविवशेचित्तेसंतोषवर्जिते ॥
म्लानेवक्रमिवादर्शेनज्ञानंप्रतिबिंबति ॥ ९ ॥ अज्ञानघनयामिन्यासंकोचंननरांबुजम् ॥ यात्यसावुदितोयस्यनित्यंसंतोषभास्करः
॥ १० ॥ अकिंचनोप्यसौजंतुःसाम्राज्यसुखमश्नुते ॥ आधिव्याधिविनिर्मुक्तंसंतुष्टंयस्यमानसम् ॥ ११ ॥ नाभिवांछत्यसंप्राप्तंप्राप्तंभुं
क्तेयथाक्रमम् ॥ यःसुसौम्यसमाचारःसंतुष्टइतिकथ्यते ॥ १२ ॥ संतुष्टिपरतृप्तस्यमहतःपूर्णचेतसः ॥ क्षीराब्धेरिवशुद्धस्यमुखेलक्ष्मीर्वि
राजते ॥ १३ ॥ पूर्णतामलमाश्रित्यस्वात्मन्येवात्मनास्वयम् ॥ पौरुषेणप्रयत्नेनतृष्णांसर्वत्रवर्जयेत् ॥ १४ ॥ संतोषामृतपूर्णस्यशांतशी
तलयाधिया ॥ स्वयंस्थैर्यंमनोयातिशीतांशोरिवशाश्वतम् ॥ १५ ॥ संतोषपुष्टमनसंभृत्याइवमहर्द्धयः ॥ राजानमुपतिष्ठंतिकिंकरत्वमु
पागताः ॥ १६ ॥ आत्मनैवात्मनिस्वस्थेसंतुष्टेपुरुषेस्थिते ॥ प्रशाम्यंत्याधयःसर्वेप्रावृषीवाशुपांशवः ॥ १७ ॥

नेति ॥ यथाक्रमंप्राप्तंसुखंदुःखंच ॥ सौम्योजगदानंदनःसम्यगाचारआचरणंयस्य ॥ १२ ॥ मुखकांतिविशेषोपितल्लक्षणमित्याह ॥ संतुष्टीति ॥ १३ ॥ स्वात्मन्यात्मनैवपूर्णतां निरतिशयानंदरूपतामाश्रित्यानुभवेनावलंब्य ॥ १४ ॥ शीतांशोरिवसंतोषलक्षणेनामृतेनपूर्णस्यपुंसःक्रोधसंतापहेत्वभावाच्छांताशीतलाचयाधीस्तयानिमित्तभूतयामनःशा श्वतंस्थैर्यंयाति ॥ १५ ॥ विनैवविषयार्जनंसंतोषमात्रेणकथंदेहयात्रासिद्धिस्तत्राह ॥ संतोषेति ॥ भृत्याराजानमिवमहत्यऋद्धयःसंपदउपतिष्ठंति ॥ तथाचाहुः ॥ आशाया दासायेदासास्तेसर्वलोकस्य ॥ आशादासीयेषांतेषांदासायतेलोकइति ॥ १६ ॥ नन्वस्त्वेवंदेहयात्रातथापिदेवानामिवमानसंदुःखंदुश्चिकित्स्यंतत्राह ॥ आत्मनैवेति ॥ पांश वोधूलयः ॥ तालव्याअपिदंत्याश्चशंबशूकरपांशवः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथापिकारणकलंकावरणेनदुःखबीजेनयद्दुःखंतत्स्यादेवेतितत्राह ॥ नित्यमिति ॥ यथाअमायांक्षीणेंदुःकलंकाद्भेदेनाविभाव्यमानत्वात्कलंकमग्नइवभवतिसूर्यसन्निधानाच्च नशीतलयावृत्त्यावर्त्ततेसएवपौर्णमास्यांकलापूर्णतयाकलंकस्यापिभासकत्वात्तद्विविक्तयाशुद्धयावृत्त्याभातितद्वत्पुरुषोप्यसंतोषेमोहकलंकमग्नइवतापत्रयेणदह्यमानइव भवतिसंतोषामृतकलापूर्णस्त्वज्ञानकलंकसाक्षित्वात्तदसंस्पृष्टयास्वात्मसुखशीतलयावृत्त्याभातीत्यर्थः ॥ १८ ॥ समतासर्वत्रसंतोषादवैषम्यबुद्धिः ॥ १९ ॥ तस्यसर्वोत्कृष्टता माह ॥ समतयेति ॥ नभश्चरादेवामहांतोमुनयोपिप्रणमंतिनमस्यंति ॥ २० ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेमु०पंचदशःसर्गः ॥ १५ ॥ ॥ ७ ॥ ॥ चतुर्थो

नित्यंशीतलयारामकलंकपरिभिन्नया॥पुरुषःशुद्धयावृत्त्याभातिपूर्णतयेंदुवत् ॥ १८॥ समतासुंदरंवक्त्रंपुरुषस्यावलोकयन्॥ तोष मेतियथालोकोनतथाधनसंचयैः ॥ १९ ॥ समतयामतयागुणशालिनांपुरुषराडिहयःसमलंकृतः॥ तममलंप्रणमंतिनभश्चराअपि महामुनयोरघुनंदन॥ २०॥ ॥इतिश्रीवासि०वा०दे०मो०मु०संतोषनिरूपणंनामपंचदशःसर्गः॥ १५॥ ॥७॥ ॥श्रीवसि ष्ठउवाच॥ विशेषेणमहाबुद्धेसंसारोत्तरणेनृणाम्॥ सर्वत्रोपकरोतीहसाधुःसाधुसमागमः ॥ १ ॥ साधुसंगतरोर्जातंविवेककुसुमंसि तम्॥ रक्षंतियेमहात्मानोभाजनंतेफलश्रियः॥ २॥ शून्यमाकीर्णतामेतिमृतिरप्युत्सवायते ॥ आपत्संपदिवाभातिविद्वज्जनसमागमे ॥ ३ ॥ हिममापत्सरोजिन्यामोहनीहारमारुतः॥ जयत्येकोजगत्यस्मिन्साधुःसाधुसमागमः ॥ ४॥ परंविवर्द्धनंबुद्धेरज्ञानतरुशातन म्॥ समुत्सारणमाधीनांविद्धिसाधुसमागमम् ॥ ५ ॥ विवेकःपरमोदीपोजायतेसाधुसंगमात्॥ मनोहरोज्वलोनूनमासेकादिवगु च्छकः॥ ६ ॥ निरपायांनिराबाधांनिर्वृतिंनित्यपीवरीम्॥ अनुत्तमांप्रयच्छंतिसाधुसंगविभूतयः॥ ७॥ अपिकष्टतरांप्राप्तैर्दशांविवश तांगतैः॥ मनागपिनसंत्याज्यामानवैःसाधुसंगतिः ॥ ८ ॥ साधुसंगतयोलोकेसन्मार्गस्यचदीपिकाः॥ हार्दांधकारहारिण्योभासोज्ञा नविवस्वतः॥ ९ ॥

द्वारपालोत्रवर्ण्यतेसाधुसंगमः ॥ चतुर्ष्वेकैकसेवापिपुरुषार्थफलेत्यपि ॥ १॥ चतुर्थमपिद्वारपालंसाधुसमागममुपवर्णयंश्चतुर्ष्वेकैकविषयेपौरुषस्यपुरुषार्थपर्यवसानंदर्शयिष्य न्वसिष्ठउवाच ॥ विशेषेणेति ॥ सर्वत्रसर्वावस्थासु ॥ १ ॥ फलश्रियोमोक्षफलसंपदोभाजनंभवंतीतिशेषः ॥ २ ॥ शून्यंस्वजनधनादिशून्यंदुःखस्थानमाकीर्णतांतद्व्याप्तताम् ॥ ३ ॥ आपल्लक्षणायाःसरोजिन्याःकमलिन्याहिमंप्रालेयम् ॥ साधुःप्रशस्तः ॥ ४ ॥ बुद्धेर्विवेकज्ञानस्यविशेषेणवर्द्धनम् ॥ शातनंविशरणकरणम् ॥ ५ ॥ मनोहरश्चासावु ज्वलोनिर्मलश्च ॥ आरामासेकाद्गुच्छकःपुष्पफलगुच्छः ॥ ६ ॥ नित्यपीवरींनित्यंवर्द्धमानांनित्यामपरिच्छिन्नामितिवा ॥ निर्वृतिंसुखम् ॥ ७ ॥ मनाकूईषदपिक्षणमपीति यावत् ॥ ८ ॥ सन्मार्गस्यसदाचारस्यदीपिकायावदज्ञाननिशानुवृत्तिस्तावत् ॥ तदुत्तरकालंतुज्ञानरूपस्यसूर्यस्यभासःप्रकाशाः ॥ ९ ॥ ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीतसितयेतितापमालिन्यक्षयलाभायविशेषणे ॥ अध्वरैर्यज्ञैः ॥ १० ॥ ग्रंथिरंतःकरणतद्धर्म्मतादात्म्यसंसर्गाध्यासलक्षणश्चिदचिद्ग्रंथिः ॥ ११ ॥ अलभ्यलाभतयामणय इव ॥ १२ ॥ कमलालक्ष्मीस्तत्पक्षेसताविष्णुनासमागमःसर्वोत्कृष्टसौंदर्यंच ॥ नन्वेतेतत्सोदर्याणामप्यप्सरसांस्तः ॥ १३ ॥ पदस्यब्रह्मालवस्तुनश्चूडामणिस्थानीयस्य वहूनां तत्प्राप्त्यैयतमानानांमध्येअयावचूलिताप्रथमंतत्प्राप्त्याशिरोभूषणीकरणम् ॥ प्रथिताप्रख्यापिता ॥ चूडायामवतंसनमवचूडः ॥ मयूरव्यंसकादित्वात्समासस्ततस्तत्करोतीति णिचिताच्छीलिकणिन्यंताद्भावेतल् ॥ डलयोरभेदाल्लत्वम् ॥ १४ ॥ सर्वोपायेनदानमानसेवनादिसर्वप्रयत्नेन ॥ उपायास्तरणोपायाः ॥ १५ ॥ यैःसंतोहेलयापिनदृष्टास्तेनर

यःस्नातःशीतसितयासाधुसंगतिगंगया ॥ किंतस्यदानैःकिंतीर्थैःकिंतपोभिःकिमध्वरैः ॥ १० ॥ नीरागाश्छिन्नसंदेहागलितग्रंथयोनघ ॥ साधवोयदिविद्यंतेकिंतपस्तीर्थसंग्रहैः ॥ ११ ॥ विश्रांतमनसोधन्याःप्रयत्नेनपरेणहि ॥ दरिद्रेणेवमणयःप्रेक्षणीयाहिसाधवः ॥ १२ ॥ सत्समागमसौंदर्यशालिनीधीमतांमतिः ॥ कमलेवाप्सरोवृंदेसर्वदैवविराजते ॥ १३ ॥ तेनामलविचारस्यपदस्याग्रावचूलिता ॥ प्रथितायेनधन्येननत्यक्तासाधुसंगतिः ॥ १४ ॥ विच्छिन्नग्रंथयस्तज्ज्ञाःसाधवःसर्वसंमताः ॥ सर्वोपायेनसंसेव्यास्तेह्युपायाभवांबुधौ ॥ १५ ॥ तएतेनरकाग्नीनांसंशुष्केंधनतांगताः ॥ यैर्दृष्टाहेलयासंतोनरकानलवारिदाः ॥ १६ ॥ दारिद्र्यंमरणंदुःखमित्यादिविषयोभ्रमः ॥ संप्रशाम्यत्यशेषेणसाधुसंगमभेषजैः ॥ १७ ॥ संतोषःसाधुसंगश्चविचारोथशमस्तथा ॥ एतएवभवांभोधावुपायास्तरणेनृणाम् ॥ १८ ॥ संतोषःपरमोलाभःसत्संगःपरमागतिः ॥ विचारःपरमंज्ञानंशमोहिपरमंसुखम् ॥ १९ ॥ चत्वारएतेविमलाउपायाभवभेदने ॥ यैरभ्यस्तास्तउत्तीर्णामोहवारिभवार्णवात् ॥ २० ॥ एकस्मिन्नेववैतेषामभ्यस्तेविमलोदये ॥ चत्वारोपिकिलाभ्यस्ताभवंतिसुधियांवर ॥ २१ ॥ एकोप्येकोपिसर्वेषामेषांप्रसवभूरिह ॥ सर्वसंसिद्धयेतस्माद्यत्नेनैकंसमाश्रयेत् ॥ २२ ॥ सत्समागमसंतोषविचाराःसुविचारितम् ॥ प्रवर्त्ततेशमस्वच्छेवाहनानीवसागरे ॥ २३ ॥

काग्नीनामिंधनानिपोषकाभवंति ॥ हेलयाअनादरेण ॥ नरकलक्षणस्यानलस्यवारिदामेघाइवप्रशमनहेतवः ॥ १६ ॥ भ्रमःसन्निपातः ॥ अशेषेणमूलोच्छेदेन ॥ १७ ॥ सर्वनिद्वारपालान्युगपत्प्रशिशंसिषुरनुवदति ॥ संतोषइति ॥ १८ ॥ सर्वत्रफलाभेदारोपः ॥ १९ ॥ मोहएववारियस्मिंस्तथाविधाद्भवार्णवात् ॥ २० ॥ सर्वाभ्यासासामर्थ्येप्याह ॥ एकस्मिन्निति ॥ २१ ॥ प्रसवभूरुत्पत्तिस्थानम् ॥ २२ ॥ शमादूर्मिविक्षेपराहित्येनस्वच्छे ॥ रागादिग्राहैरुपघातोयथानस्यात्तथाचिरंसुविचारितमतिसावधानमिति क्रियाविशेषणम् ॥ वाहनानिपण्यसंभारवाहकामहापोताः ॥ तत्रहिपोतवणिजांसावधानताप्रसिद्धा ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रियोज्ञानसंपदोलौकिक्यश्च ॥ २४ ॥ प्रपूर्णेंदौसौंदर्याद्याइवमानवेप्रसादादयोगुणाःप्रवर्त्ततइत्यन्वयः ॥ २५ ॥ मंत्रिणोवरयतेसदाविचारायस्वीकरोतिमंत्रितार्थान्वावृणो तिसंवृणोतिगोपयतीतिमंत्रिवरस्तस्मिन्राजनि ॥ २६ ॥ एकतमंवागुणम् ॥ २७ ॥ अंतर्दृढदियावदेकोगुणोनप्राप्तइतिशेषः ॥ २८ ॥ विचूर्णयेद्विघट्टयेदित्युद्योगातिशयोक्तिः ॥ २९ ॥ ननुसात्विकदेवादिजन्मनेयतितव्यंतत्रविनैवगुणार्ज्जनश्रमंज्ञानंसेत्स्यतितत्राह ॥ देवइति ॥ यावद्गुणान्नोपार्ज्जयसितावत् ॥ ३० ॥ बलमुपागतेअभ्यासेनदृढीकृतइ तियावत् ॥ दोषविवशस्यगुणविवशस्यवाचेतसोदोषाःक्षीयंते ॥ ३१ ॥ परस्परविरोधिनोरेकाभिवृद्धौतत्सजातीयकुलाभिवृद्धेरितरक्षयःप्रसिद्धएवेत्याह ॥ गुणेइति ॥ ३२ ॥

विचारसंतोषशमसत्समागमशालिनि ॥ प्रवर्त्ततेश्रियोजंतौकल्पवृक्षाश्रितेयथा ॥ २४ ॥ विचारशमसत्संगसंतोषवतिमानवे ॥ प्रवर्त्ततेप्रपूर्णेंदौसौंदर्याद्यागुणाइव ॥ २५ ॥ सत्संगसंतोषशमविचारवतिसन्मतौ ॥ प्रवर्त्ततेमंत्रिवरेराजनीवजयश्रियः ॥ २६ ॥ तस्मादेकतमंनित्यमेतेषांरघुनंदन ॥ पौरुषेणमनोजित्वायत्नेनाभ्याहरेद्गुणम् ॥ २७ ॥ परंपौरुषमाश्रित्यजित्वाचित्तमतंगजम् ॥ यावदेकोगुणोनांतस्तावन्नास्त्युत्तमागतिः ॥ २८ ॥ पौरुषेणप्रयत्नेनदंतैर्दंतान्विचूर्णयेत् ॥ यावन्नाभिनिविष्टंतेमनोरामगुणार्जने ॥ २९ ॥ देवोभवाथयक्षोवापुरुषःपादपोथवा ॥ तावत्तवमहाबाहोनोपायोस्तीहकश्चन ॥ ३० ॥ एकस्मिन्नेवफलदेगुणेबलमुपागते ॥ क्षीयंतेसर्वएवाशुदोषाविवशचेतसः ॥ ३१ ॥ गुणेविवृद्धेवर्द्धंतेगुणादोषजयप्रदाः ॥ दोषेविवृद्धेवर्द्धंतेदोषागुणविनाशनाः ॥ ३२ ॥ मनोमोहवनेत्वस्मिन्वेगिनीवासनासरित् ॥ शुभाशुभबृहत्कूलानित्यंवहतिजंतुषु ॥ ३३ ॥ साहिस्वेनप्रयत्नेनयस्मिन्नेवनिपात्यते ॥ कूलेतेनैववहतियथेच्छसितथाकुरु ॥ ३४ ॥ पुरुषयत्नजवेनमनोवनेशुभतटानुगतांक्रमशःकुरु ॥ वरमतेनिजभावमहानदीमहहतेनमनागपिनोह्यसे ॥ ३५ ॥

॥ इतिश्रीवासिष्ठ० वा० दे० मोक्षो० मुमु० सदाचारनिरूपणंनामषोडशःसर्गः ॥ १६ ॥ ॥ ७ ॥

॥ श्रीवसिष्ठउवाच ॥ ॥ एवमंतर्विवेकोयःसमहानिहराघव ॥ योग्योज्ञानगिरःश्रोतुंराजेवनयभारतीम् ॥ १ ॥

कूलशब्देनद्वौप्रवाहौलक्ष्येते ॥ ३३ ॥ निपात्यतेएकतरनिरोधेनेत्यर्थः ॥ ३४ ॥ शुभतटानुगतांसद्वासनाप्रवाहानुगताम् ॥ तेनतथाकरणेन ॥ नोह्यसेअशुभप्रवाहेणनापनीतोभविष्यसीत्यर्थः ॥ ३५ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेषोडशःसर्गः ॥ १६ ॥ ॥ ७ ॥ ॥ ग्रंथसंख्याविभागोत्रभिन्नःप्रकरणक्रमैः ॥ विभक्तैर्वर्णनीयार्थैर्गुणैश्चाथोपवर्ण्यते ॥ १ ॥ एवंसाधनान्युपवर्ण्यतत्संपन्नस्यप्रस्तुतग्रंथश्रवणादिनापुरुषार्थसिद्धिंदर्शयन्ग्रंथप्रवृत्तिक्रमंप्रकरणादिविभागेनवर्णयितुमुपक्रमते ॥ एवमित्यादिना ॥ एवमुक्तप्रकारोंऽतर्मनस्यागतोविवेकोविचारादिगुणसंपद्यस्य ॥ नयभारतींनीतिशास्त्रवाणीम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

अवदातोनिर्मलः ॥ अवदातस्यनिर्दोषप्रकाशकस्य ॥ जडानांमूर्खाणांमेघजलानांचसंगेनोज्झितउत्सृष्टस्तद्रहितइतियावत् ॥ २ ॥ रामस्योक्तगुणसंपदभावशंकांनिराचष्टे ॥ त्वमिति ॥ ३ ॥ ४ ॥ उक्तगुणासंपन्नस्यानधिकारमाह ॥ पावनानामिति ॥ उक्तगुणसंपन्नोभवतीतिभव्यः ॥ भव्यगेयेत्यादिनायत् ॥ ५ ॥ सारभूतैरर्थैःसंमितापूर्णासारभूतोपनिषद्भिस्तुल्येतिवा ॥६॥ विनिद्रस्यपुरोदीपेज्वलितेसत्यनिच्छतोपितस्ययथाआलोकःपदार्थदर्शनंसम्यक्प्रवर्त्ततेतथाअनयाश्रुतयानिर्वात्यनेनेतिनिर्वाणंमोक्षसाधनीभूतंज्ञानंभवेत् ॥ ७ ॥ स्वयमेवाप्रेक्ष्यसम्यक्परिशील्यज्ञाताअन्येनवर्णितास्वयंश्रुतावा ॥ गंगापक्षेभ्रांतिशांत्याभ्रमणहेतुभूतपापतापोपशांत्या ॥ ८ ॥ अवलोकनाद्रज्जुतत्त्वस्येति

अवदातोवदातस्यविचारस्यमहाशयः॥ जडसंगोज्झितोयोग्यःशरदिंदोर्यथानभः॥ २॥ त्वमेतयाखंडितयागुणलक्ष्म्यासमाश्रितः॥ मनोमोहहरंवाक्यंवक्ष्यमाणमिदंशृणु॥ ३॥ पुण्यकल्पद्रुमोयस्यफलभारानतःस्थितः॥ मुक्तयेजायतेजंतोस्तस्येदंश्रोतुमुद्यमः॥ ४॥ पावनानामुदाराणांपरबोधैकदायिनाम्॥ वचसांभाजनंभूत्यैभव्योभवतिनाधमः॥ ५॥ मोक्षोपायाभिधानेयंसंहितासारसंमिता॥ त्रिंशद्द्वेचसहस्राणिज्ञातानिर्वाणदायिनी॥ ६॥ दीपेयथाविनिद्रस्यज्वलितेसंप्रवर्त्तते॥ आलोकोनिच्छतोप्येवंनिर्वाणमनयाभवेत् ॥ ७॥ स्वयंज्ञाताश्रुतावापिभ्रांतिशांत्यैकसौख्यदा॥ आप्रेक्ष्यवर्णितासद्योयथास्वर्गतरंगिणी॥ ८॥ यथारज्ज्वामहिभ्रांतिर्विनश्यत्यवलोकनात्॥ तथैतत्प्रेक्षणात्शांतिमेतिसंसारदुःखिता॥ ९॥ युक्तियुक्तार्थवाक्यानिकल्पितानिपृथक्पृथक्॥ दृष्टांतसारसूक्तानिचास्यांप्रकरणानिषट्॥ १०॥ वैराग्याख्यंप्रकरणंप्रथमंपरिकीर्त्तितम्॥ विरागोवर्द्धतेयेनसेकेनेवमरौतरुः॥ ११॥ (अनुबंधेनसहितंदिष्टतत्त्वनिरूपणं॥) सार्द्धसहस्रंग्रंथस्ययस्मिन्हृदिविचारिते॥ प्रकाशाच्छुद्धतोदेतिमणाविवसुमार्जिते॥ १२॥ मुमुक्षुव्यवहाराख्यंततःप्रकरणंकृतम्॥ सहस्रमात्रंग्रंथस्ययुक्तिग्रंथेनसुंदरम्॥ १३॥ स्वभावोहिमुमुक्षूणांनराणांयत्रवर्ण्यते॥ अथोत्पत्तिप्रकरणंदृष्टांताख्यायिकामयम्॥ १४॥

शेषः ॥ ९ ॥ युक्तिभिर्व्युत्पादकतर्कैर्युक्ताउपपन्नाअर्थायेषांतथाविधानिवाक्यानियेषुतथाविधानि दृष्टांताःसाराःश्रेष्ठायेषुतथाविधानि सूक्तान्याख्यायिकायेषुतादृशानि षट्प्रकरणानि ॥ अस्यांसंहितायाम् ॥ १० ॥ तान्येवनामभिःक्रमाद्विभजते ॥ वैराग्याख्यमित्यादिना ॥ मरौनिर्जलप्रदेशेपि ॥ ११ ॥ प्रकाशाद्विषयदोषपरिज्ञानात् ॥ शुद्धतामालिन्यनिवृत्तिः ॥ १२ ॥ ततस्तदुत्तरम् ॥ ग्रंथस्यश्लोकानांसंख्ययेतिशेषः ॥ १३ ॥ मुमुक्षूणांस्वःस्वीयोभावोधिकारनिर्वाहकसाधनकलापः ॥ दृष्टांताख्यायिकाभिश्चप्रचुरम् ॥ १४ ॥

---

१ इदमर्धमधिकंपुस्तकद्वयेउपलब्धम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहमितिप्रत्यगात्मरूपं ॥ त्वंग्रहणमिदंकारोपलक्षणम् ॥ अहमिदमितिरूपिणीद्रष्टृदृश्यभेदवैचित्र्यसंपत् ॥ यत्रोत्पत्तिप्रकरणे ॥ वस्तुतोनुत्पन्नैवोत्थितेवोत्पन्नेवभ्रांत्याप्रतीय
तइतिवर्ण्यतेइत्युत्तरेणान्वयः ॥ १५ ॥ यस्मिन्प्रकरणेश्रुतेसतिउत्तरोत्तरज्ञानभूमिकाकलनेनश्रोताइदंसास्मद्युष्मदस्मद्युष्मत्सहितंप्रतीयमानभिन्नार्थयोस्त्वंपदाहंपदयोरैका
र्थ्यप्रतिपादकमनंतब्रह्मांडविस्तारसहितंप्रतिब्रह्मांडंचलोकाकाशपर्वतादिसहितमखिलंजगत्सचेतनमचेतनमित्यंतंसार्द्धैकादशश्लोकैर्वक्ष्यमाणप्रकारमंतःस्वात्मन्येवबुध्यतेइ
त्यादिकुलकान्वयः ॥ १६ ॥ पिंडग्रहोमूर्त्तद्रव्यतापरिग्रहस्तेनविनिर्मुक्तम् ॥ भेदोभित्तिस्तद्रहितमतएवाविद्यमानपर्वतादिभावम् ॥ १७ ॥ पत्तनंनगरम् ॥ स्वप्नोपलंभेयेप्रती
यमानाभावाःपदार्थास्तदाभम् ॥ १८ ॥ अर्थशून्योपलंभनादितिहेतुर्यथायोगंपूर्वोत्तरदृष्टांतेषुसर्वत्रसंबध्यते ॥ मृगतृष्णांबुनइववर्त्तनंस्थितिःपरिवर्त्तनंवायस्य ॥ १९ ॥ नौ
कायानेशैलानांचलनभ्रमःप्रसिद्धः ॥ सत्येनलाभेनपुरुषार्थेनविवर्जितम् ॥ चित्तभ्रमकल्पितपिशाचः ॥ जगद्बीजमायायामिथ्यात्वादात्मनश्चनिर्विकारत्वान्निर्बीजमपिभासु

सप्तग्रंथसहस्राणिविज्ञानप्रतिपादकम् ॥ जागतीद्रष्टृदृश्यश्रीरहंत्वमितिरूपिणी ॥ १५ ॥ अनुत्पन्नैवोत्थितेवयत्रेतिपरिवर्ण्यते ॥ यस्मि
न्श्रुतेजगदिदंश्रोतांतर्बुध्यतेखिलम् ॥ १६ ॥ सास्मद्युष्मत्सविस्तारंसलोकाकाशपर्वतम् ॥ पिंडग्रहविनिर्मुक्तंनिर्भित्तिकमपर्वतम् ॥ १७ ॥
पृथ्व्यादिभूतरहितंसंकल्पइवपत्तनम् ॥ स्वप्नोपलंभभावाभंमनोराज्यवदाततम् ॥ १८ ॥ गंधर्वनगरप्रख्यमर्थशून्योपलंभनात् ॥ द्विचंद्र
विभ्रमाभासंमृगतृष्णांबुवर्त्तनम् ॥ १९ ॥ नौयानेलोलशैलाभंसत्यलाभविवर्जितम् ॥ चित्तभ्रमपिशाचाभंनिर्बीजमपिभासुरम्
॥ २० ॥ कथार्थप्रतिभासाभंव्योममुक्तावलीनिभम् ॥ कटकत्वंयथाहेम्नितरंगत्वंयथांभसि ॥ २१ ॥ यथानभसिनीलत्वमसदेवोत्थितं
सदा ॥ अभित्तिरंगरहितमुपलब्धिमनोहरम् ॥ २२ ॥ स्वप्नेवाव्योम्निवाचित्रमकर्तृचिरभासुरम् ॥ अवह्निरेववह्नित्वंधत्तेचित्रानलोय
था ॥ २३ ॥ दधात्येवंजगच्छब्दरूपार्थमसदात्मकम् ॥ तरंगोत्पलमालाभंदृष्टनृत्यमिवोत्थितम् ॥ २४ ॥ चक्रचीत्कारपूर्णस्यजलराशि
मिवोद्यतम् ॥ शीर्णपत्त्रंभ्रष्टनष्टंग्रीष्मेवनमिवारसम् ॥ २५ ॥

रंप्रकाशमानम् ॥ २० ॥ कथाश्रवणासक्तौसंस्कारेणप्रत्यक्षवत्कथार्थप्रतिभासःप्रसिद्धः ॥ व्योम्निकल्पितामुक्तावल्यः ॥ कटकत्वतरंगत्वेयथाहेमजलस्वरूपव्यतिरेकेणदु
र्निरूपेइतिमिथ्याभूते ॥ २१ ॥ अभित्तिरंगैर्लेख्यवर्णैश्चरहितमकर्तृचित्रंस्वप्नेव्योम्निवाभासतेतद्वदित्युत्तरेणान्वयः ॥ उपलब्धिमनोहरंपूर्वानुभवस्मृतिमात्रमनोहरमित्यर्थः
॥ २२ ॥ चित्रलिखितोऽनलोवह्निः ॥ २३ ॥ असदात्मकंसत्जगच्छब्दस्यगच्छतिविचारेनतिष्ठतीतिजगदित्यनुरूपार्थंधत्तेसंपादयति ॥ तरंगेषुउत्पलमालाभ्रांतिकल्पिता ॥
पूर्वदृष्टंनृत्यंस्मर्यमाणंमनस्युत्थितमिव ॥ २४ ॥ चक्रश्चक्रवाकः ॥ मुखसंबंधिवायुयुक्तस्तुषारसमूहश्चीत्कारः ॥ यथाउत्तानशायिनःपुरुषस्यकवेर्वाचक्रवाकचीत्कारेणपूर्ण
स्यनभसोदर्शनेउद्यतंउत्प्रेक्षितंजलराशिसरइव ॥ शीर्णपत्रमरसंशुष्कंनिःसारंच ॥ अतएवभ्रष्टंछायाशोभादिभिर्नष्टंफलादिसमृद्धिरहितम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरणेव्यग्राणांचित्तंभ्रांतिमूर्छोन्मुखमस्थिरंचप्रसिद्धम् ॥ शिलानांगृहाःपर्वतास्तेषांगुहास्थानमिवसांधकारशून्यभीषणम् ॥ सांधकारगुहास्वैकैकनृत्तमिवोन्मत्तचेष्टितप्राय म् ॥ २६ ॥ परमार्थतस्तुप्रशांताज्ञाननीहारंविज्ञानशरदंबरंच ॥ सम्यगुत्कीर्णटंकच्छेदादिनाकल्पितंप्रतिमाद्याकारमिव ॥ २७ ॥ मृत्पंकाभिर्रचितचेतनाचेतनाकारंपरमार्थ तोमृन्मात्रस्वभावमिवाधिष्ठानपृथक्सत्ताशून्यंजगदुत्पन्नमितिबुध्यतेश्रोतेत्यर्थः ॥ ततस्तस्मादुत्पत्तिप्रकरणादनंतरम् ॥ २८ ॥ व्याख्यानंप्रपंचतदधिष्ठानतत्त्वस्थितिव्युत्पाद नमाख्यायिकाःकथास्तत्प्रचुरम् ॥ तदेवाह ॥ इत्थमित्यादिभिश्चतुर्भिरर्द्धैः॥ब्रह्मैवद्रष्टृदृश्यक्रमंप्रकर्षेणऊढंस्वीकुर्वत्सत्इत्थंवर्ण्यमानप्रकारेणजगद्भावरूपेणाहंभावरूपेणचभो क्तृभोग्यलक्षणेनकर्तृत्वसंतानितेनस्थितिमुपागतमितिअत्रस्थितिप्रकरणेकीर्तितमित्युत्तरेणान्वयः ॥ २९ ॥ ३० ॥ वृद्धिग्रहणंविपरिणामस्याप्युपलक्षणम् ॥ चिरमनादिका

मरणव्यग्रचित्ताभंशिलागृहगुहास्पदम्॥ अंधकारगुहैकैकनृत्तमुन्मत्तचेष्टितम्॥ २६ ॥ प्रशांताज्ञाननीहारंविज्ञानशरदंबरम् ॥ समु त्कीर्णमिवस्तंभेचित्रंभित्ताविवोदितम्॥ २७॥ पंकादिवाभिरचितंसचेतनमचेतनम्॥ ततःस्थितिप्रकरणंचतुर्थंपरिकल्पितम्॥ २८॥ त्रीणिग्रंथसहस्राणिव्याख्यानाख्यायिकामयम्॥ इत्थंजगदहंभावरूपस्थितिमुपागतम् ॥ २९ ॥ द्रष्टृदृश्यक्रमंप्रौढमित्यत्रपरिकीर्त्ति तम्॥ दशदिङ्मंडलाभोगभासुरोयंजगद्भ्रमः ॥ ३० ॥ इत्थमभ्यागतोवृद्धिमितितत्रोच्यतेचिरम्॥ उपशांतिप्रकरणंततःपंचसहस्रकम् ॥ ३१ ॥ पंचमंपावनंप्रोक्तंयुक्तिसंततिसुंदरम्॥ इदंजगदहंत्वंचसइतिभ्रांतिरुत्थिता ॥ ३२ ॥ इत्थंसंशाम्यतीत्यस्मिन्कथ्यतेश्लोक संग्रहैः॥ उपशांतिप्रकरणेश्रुतेशाम्यतिसंसृतिः॥ ३३ ॥ प्रभ्रष्टचित्रसेनेवकिंचिल्लभ्योपलंभना॥ शतांशशिष्टाभवतिसंशांतभ्रांतरूपि णी॥ ३४ ॥ अन्यसंकल्पचित्तस्थानगरश्रीरिवासती॥ अलभ्यवस्तुपार्श्वस्थस्वप्नयुद्धचिरारवा ॥ ३५ ॥

लादारभ्याऽभ्यागतोस्ति ॥ ३१ ॥ ३२ ॥ संशाम्यतिजीवन्मुक्तिक्रमेणोपक्षीणंसह्लेशतोवशिष्यतइत्यस्मिन्नुपशांतिप्रकरणेकथ्यते ॥ लेशतोवशेषमेवतच्छ्रवणफलकीर्त्तनमु खेनस्फुटयति ॥ उपशांतीत्यादिसौम्यवारिसरित्समेत्यंतेन ॥ ३३ ॥ प्रभ्रष्टाविशीर्णप्रायाचित्रलिखितसेनेव ॥ ३४ ॥ तत्राप्युत्तरोत्तरभूमिकाजयेअपक्षयप्रकर्षाल्लक्ष्याल क्ष्यसंस्कारमात्रेणपरिशेषंदृष्टांतैराह ॥ अन्येत्यादिना ॥ परकीयसंकल्पनिर्मितत्वात्तच्चित्तस्था ॥ नलभ्यंवस्तुधनादियाभ्यांतथाविधौसंकल्पयितृपुरुषपार्श्वस्थपुरुषांतरस्य स्वप्नयुद्धचिरारवौयस्यांतथाविधानगरश्रीरिवमिथ्यात्वेनतुल्ययोरपिपरकीयक्रियाशब्दयोरविषयीभूतेतियावत् ॥ सायथास्वप्नद्रष्टृदशाकिंचित्स्फुटलक्ष्यासंकल्पयितुर्दशातु ईषल्लक्ष्याप्यसतीस्वतएवशाम्यतितद्वदित्यर्थः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोप्युपशांतिप्रकर्षेअलक्ष्यावस्थयापरिशेषेशांतेत्यादिनवदृष्टांताः ॥ शांतउपरतोयःसंकल्पस्तेनकल्पितस्यमत्तगजवन्निरंकुशस्याभ्रस्यभीषणःअशनिशब्दःस्फूर्ज्जथुस्तद्वत्॥ विस्मृतंस्वप्नेनसंकल्पेनवानिर्माणंयस्यनगरस्यतदुपमा ॥ ३६ ॥ भविष्यतोनगरस्योद्यानेप्रसूयतेयावंध्यातद्वदमलंनिर्मलंशून्यमेवांगंस्वरूपंयस्यास्तस्यावंध्यायाजिह्वयाउच्यमानायेउपावीररसाद्युपेताःस्वपुत्रयुद्धादिकथार्थाः ॥३७॥३८॥ अनुत्पन्नवनस्पंदइवअस्फुटाकृतिरलक्ष्याकारा ॥ वसंतेनेवरसरंजनायस्याः ॥ ३९ ॥ सौम्यंनिश्चलत्वात्प्रसन्नम् ॥४०॥ शिष्टःद्वात्रिंशत्सहस्रमध्येपरिगणितसार्द्धसप्तदशसहस्रावशिष्टःसार्द्धचतुर्दशसहस्रमितियावत् ॥ मूलाविद्योच्छेदाच्छांताःसर्वकल्पनायस्मिन् ॥४१॥ श्रोताअकले

शांतसंकल्पमत्ताभ्रभीषणाशनिशब्दवत् ॥ विस्मृतस्वप्नसंकल्पनिर्माणनगरोपमा ॥३६॥ भविष्यन्नगरोद्यानप्रसूवंध्यामलांगिका ॥ तस्याजिह्वोच्यमानोग्रकथार्थानुभवोपमा ॥३७॥ अनुल्लिखितचित्रस्यचित्रव्याप्तेवभित्तिभूः ॥ परिविस्मर्यमाणार्थकल्पनानगरीनिभा ॥ ३८ ॥ सर्वर्त्तुमदनुत्पन्नवनस्पंदास्फुटाकृतिः ॥ भाविपुष्पवनाकारवसंतरसरंजना ॥ ३९ ॥ अंतर्लीनतरंगौघसौम्यवारिसरित्समा ॥ निर्वाणाख्यंप्रकरणंततःषष्ठमुदाहृतम् ॥ ४० ॥ शिष्टोग्रंथःपरीमाणंतस्यज्ञानमहार्थदः ॥ बुद्धेतस्मिन्भवेच्छ्रेयोनिर्वाणंशांतकल्पनम् ॥४१॥ अचेत्यचित्प्रकाशात्माविज्ञानात्मानिरामयः ॥ परमाकाशकोशाच्छःशांतसर्वभवभ्रमः ॥४२॥ निर्वापितजगद्यात्रःकृतकर्त्तव्यसुस्थितः ॥ समस्तजनतारंभवज्रस्तंभोनभोनिभः ॥ ४३ ॥ विनिगीर्णयथासंख्यजगज्जालातितृप्तिमान् ॥ आकाशीभूतनिःशेषरूपालोकमनस्कृतिः ॥ ४४ ॥ कार्यकारणकर्त्तृत्वहेयादेयदृशोज्झितः ॥ सदेहइवनिर्देहःससंसारोप्यसंसृतिः ॥ ४५ ॥ चिन्मयोघनपाषाणजठरापीवरोपमः ॥ चिदादित्यस्तपँल्लोकानंधकारोपरोपमम् ॥ ४६ ॥

वरइत्यंतेनवर्ण्यमानस्वभावोभवेदित्यन्वयः ॥ अचेत्योनिर्विषयःअतएवनिरामयः ॥४२॥ यथावज्रमणिस्तंभःस्वप्रतिबिंबितसमस्तजनतामविकृतएवारभतेजनतानात्समारंभाणांचाधारस्तद्वत् ॥ ४३ ॥ विनिगीर्णैर्यथाप्रसिद्धसंख्यैर्ज्जगज्जालैरिवअतितृप्तिमानित्युत्प्रेक्षा ॥ रूपालोकोवाह्येंद्रियैर्भोगः ॥ मनस्कृतिर्मानसः ॥४४॥ कार्यकारणकर्तृत्वेआधिभूताध्यात्मिकाधिदैवरूपेस्वीकारपरित्यागदृशा ॥ ४५ ॥ घनंपाषाणजठरमिवापीवरंनिश्छिद्रंपूर्णमन्यदप्युपमायस्य ॥ चिदादित्यःस्वाज्ञानपरिकल्पितान्लोकान्स्वाकारवृत्तीद्धेनस्वालोकेनतपन्परप्रकाशरूपोपिदृश्याभावादेवतत्प्रथाविषयेअंधकारोपरोपमंरलयोरभेदाद्वनीभूतांधकारोपलसदृशंपरमांध्यमिवागतइतिपरेणान्वयः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४७ ॥ देहवानकलेवरइति ॥ तथाचश्रुतिः ॥ अशरीरंशरीरेष्वनवस्थेष्ववस्थितम् ॥ महांतंविभुमात्मानंमत्वाधीरोनशोचतीति ॥ जगतस्तत्साक्षात्कारबाध्यत्वमुक्तंसंभावयि तुंतस्यजगत्कल्पनाधिष्ठानत्वेनापरिच्छिन्नत्वमाह ॥ कस्मिंश्चिदित्यादिना ॥ रोमकोटिवत्परिच्छिन्नाविद्यायाअप्ययमेएकदेशेजगल्लक्ष्मीरवतिष्ठते ॥ तथाचश्रुतिः ॥ पादोस्यसर्वा भूतानित्रिपादस्यामृतंदिवीति स्मृतिश्च ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदिति ॥ ४८ ॥ नन्वविस्तृतदेशेकथमतिविस्तृतजगद्भानमित्याशंकादर्पणोदरेसाभ्रग्रहनक्ष त्रव्योमसमावेशदर्शनान्नाज्ञानस्यास्तिदुष्करमित्यभिप्रेत्याह ॥ परमाणाविति ॥ स्वकोटरेस्वांतःकल्पिताकाशे ॥ चिदाकाशस्येतिपाठेअर्थाच्चिदाकाशएवधत्तेपश्यतिच ॥ अ थशब्दःसमुच्चये ॥ ४९ ॥ महामतेर्जीवन्मुक्तस्यहृदयंपरमात्मैवतस्यविततताविस्तीर्णताहरिहरादीनांलक्षशतैरपितुलनमियत्तापरिच्छेदंनैति ॥ तत्किंतेषामसामर्थ्यात् ॥ न ॥ यतोयस्माद्धेतोर्नविद्यतेउत्तममुत्कृष्टतमंसत्तयाआनंत्येनानंदत्वाभाव्येनचयस्मात्तथाविधस्यात्मवस्तुनःसाप्रविततताअपरिच्छिन्नतापरमार्थतएवास्तिनत्वाकाशादीनामिवद्र

परप्रकाशरूपोपिपरमांध्यमिवागतः ॥ रुद्धसंस्तृतिदुर्लीलःप्रक्षीणाशाविषूचिकः ॥ ४७ ॥ नष्टाहंकारवेतालोदेहवानकलेवरः ॥ कस्मिं श्चिद्रोमकोट्यग्रेतस्येयमवतिष्ठते ॥ जगल्लक्ष्मीर्महामेरोःपुष्पेङ्कचिदिवालिनी ॥ ४८ ॥ परमाणौपरमाणौचिदाकाशःस्वकोटरे ॥ जगल्ल क्ष्मीसहस्राणिधत्तेकृत्वाथपश्यति ॥ ४९ ॥ विततताहृदयस्यमहामतेर्हरिहराब्जजलक्षशतैरपि ॥ तुलनमेतिनमुक्तिमतोयतःप्रविततता स्तिनिरुत्तमवस्तुनः ॥ ५० ॥ ॥ इतिश्रीवासिष्ठमहारामायणेवा० दे० मो० मुमुक्षु० ग्रंथसंख्यादिवर्णनंनामसप्तदशःसर्गः ॥ १७ ॥

॥ श्रीवसिष्ठउवाच ॥ ॥ अस्यांवाचितमात्रायांप्रबोधःसंप्रवर्त्तते ॥ बीजादिवसतोव्युप्तादवश्यंभाविसत्फलम् ॥ १ ॥ अपिपौरुषमादे यंशास्त्रंचेद्युक्तिबोधकम् ॥ अन्यत्त्वार्षमपित्याज्यंभाव्यंन्याय्यैकसेविना ॥ २ ॥

ष्टृपुरुषाशक्तिकल्पितेत्यर्थः ॥ ५० ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेसप्तदशःसर्गः ॥ १७ ॥ ॥ ७ ॥ ॥ एतद्ग्रंथगुणामुख्या मुख्यैरप्यानुषंगिकैः ॥ फलैःसहनिरूप्यंतेयाश्चांशाश्चोपमास्त्विह ॥ १ ॥ इत्थंप्रकरणभेदंविषयप्रयोजनाभ्यामुपवर्ण्यसमग्रग्रंथगुणान्वर्णयंस्तत्रतत्रदृष्टांतोपन्यासेषुयाद्यांशं तात्पर्यंचग्रंथशैलीपरिज्ञानायवक्तुमुपक्रमते ॥ अस्यामित्यादिना ॥ अस्यांषट्प्रकरणीरूपायांमोक्षोपायसंहितायांसतोऽनुपहतशक्तेर्व्युप्ताद्विशिष्टक्षेत्रकालेउप्तादवश्यंभावि सत्फलंयथाप्रवर्त्ततेतद्वत् ॥ १ ॥ ननुसतीष्वनेकशाखाभेदभिन्नासुश्रुतिषुताविहायपुरुषबुद्धिविरचितमिदमेवोपादेयतयाकिमर्थमुच्यतेतत्राह ॥ अपीति ॥ युक्तिभिर्बोधकंत त्त्वनिर्णायकम् ॥ ऋषिर्वेदस्तत्रभवमार्षम् ॥ न्यायादनपेतंन्याय्यंतदेवमुख्यमित्यनुसरताभाव्यंपुरुषेणेत्यर्थः ॥ यद्यपिश्रुतयोभ्यर्हितास्तथापिगूढाभिसंधित्वात्सहसानानुभवा यालमितिनसाधारणाधिकारिभिरुपादेयाः ॥ तत्साराभिज्ञानुभवमूलकयुक्तिघटितंत्विदंशास्त्रंस्फुटाभिसंधित्वादनुभवेसंनिकृष्यतइत्यवश्यमादरेणसेव्यमिति ॥ २ ॥

---

१ तदैक्यप्रमेयगताज्ञाननिवृत्तिस्तत्स्वरूपानंदावाप्तिश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एतदेवार्थांतरन्यासेनद्रढयति ॥ युक्तियुक्तमिति ॥ ३ ॥ ननुयदिपौरुषमप्युपादेयंतर्ह्यस्मद्बंश्यरचितानेवकांश्चित्प्रबंधान्श्रोष्यामोनेमंग्रंथमितितत्राप्याह ॥ यइति ॥ ४ ॥ तर्ह्य स्मिन्कोतिशयस्तमाह ॥ यथेति ॥ उषसिप्रातर्वेलायांप्रवृत्तायाम् ॥ उषावाअश्वस्येत्यादौस्त्रीलिंगस्याप्युषःशब्दस्यदर्शनात् ॥५॥ गुडजिह्विकान्यायेनानुषंगिकफलानिदि दर्शयिषुःशाब्दव्युत्पत्तिप्रथमफलमाह ॥ श्रुतायामितिद्वाभ्याम् ॥ आंतमंतपर्यंतंश्रुतायामापाततोबुद्ध्वाविचारेणदृढंसंस्कारेआगतेसति ॥ ६ ॥ सभास्थानस्यउच्चैर्भूषणंशि

युक्तियुक्तमुपादेयंवचनंबालकादपि ॥ अन्यत्तृणमिवत्याज्यमप्युक्तंपद्मजन्मना ॥ ३ ॥ योस्मत्तातस्यकूपोयमितिकौपंपिबत्यपः ॥ त्य क्त्वागांगंपुरस्थंतंकोनुशास्त्यतिरागिणम् ॥४॥ यथोषसिप्रवृत्तायामालोकोवश्यमेष्यति ॥ अस्यांवाचितमात्रायांसुविवेकस्तथैष्यति ॥५॥ श्रुतायांप्राज्ञवदनाद्बुद्ध्वांतंस्वयमेवच ॥ शनैःशनैर्विचारेणबुद्धौसंस्कारआगते ॥ ६ ॥ पूर्वंतावदुदेत्यंतर्भृशंसंस्कृतवाक्यता ॥ शुद्धयुक्तालतेवोच्चैर्यासभास्थानभूषणम् ॥ ७ ॥ परानागरतोदेतिमहत्त्वगुणशालिनी ॥ सायया स्नेहमायांतिराजानोअमराअपि ॥८॥ पूर्वापरज्ञःसर्वत्रनरोभवतिबुद्धिमान् ॥ पदार्थानांयथादीपहस्तोनिशिसुलोचनः ॥ ९ ॥ लोभमोहादयोदोषास्तानवंयांत्यलंश नैः ॥ धियोदिशःसमासन्नशरदोमिहिकायथा ॥ १० ॥ केवलंसमवेक्ष्यंतेविवेकाभ्यासनंधियः ॥ नकिंचनफलंधत्तेस्वाभ्यासेनविना क्रिया ॥ ११ ॥ मनःप्रसादमायातिशरदीवमहत्सरः ॥ परंसाम्यमुपादत्तेनिर्मंदरइवार्णवः ॥१२॥ निरस्तकालिमारत्नशिखेवास्ततमःप टा ॥ प्रतिज्वलत्यलंप्रज्ञापदार्थप्रविभागिनी ॥ १३ ॥ दैन्यदारिद्र्यदोषाढ्यादृष्टयोर्दर्शितांतराः ॥ ननिकृंततिमर्माणिससन्नाहमिवेषवः ॥ १४ ॥ हृदयंनावलुंपंतिभीमाःसंसृतिभीतयः ॥ पुरःस्थितमपिप्राज्ञंमहोपलमिवेषवः ॥ १५ ॥

रोभूषणमिवप्रकाशिकेत्यर्थः ॥ ७ ॥ अर्थव्युत्पत्तिचातुर्यमपिद्वितीयंफलमित्याह ॥ परेति ॥ नागरताचतुरता ॥ अमराअमरवत्पूज्याविद्वांसोपि ॥ ८ ॥ ९ ॥ समासन्नाशरत् यस्यांतथाविधायादिशोमिहिकानीहारइवधियोदोषास्तानवमल्पतांयांति ॥ १० ॥ समवेक्ष्यंतेअपेक्ष्यंतेतव ॥ तत्रहेतुर्नकिंचनेति ॥ ११ ॥ साम्यमवैषम्यम् ॥ निर्मंदरोमथनो त्तरंनिर्गतमंदरः ॥ १२ ॥ निरस्तकालिमाअविद्यमानव्यामोहकज्जलारत्नदीपशिखेव ॥ १३ ॥ दर्शितमांतरंधनादिविषयनिःसारत्वंयासांतथाविधाःसत्यः ॥ १४ ॥ भीति हेतूनांपुरस्थितमपिप्राज्ञंप्रकृतशास्त्रज्ञं ॥ हृदयंचित्तम् ॥ महोपलपक्षेप्रकर्षेणअज्ञम् ॥ १५ ॥ दैन्यदारिद्र्यदोषाव्या:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुंस्त्वंपौरुषम् ॥ संसारेजन्मनआदित्वेपौरुषस्यप्राधान्यंकर्मणआदित्वेतुदैवस्य ॥ शाम्यतिद्वयोरप्यविद्यामूलमिथ्यात्वनिश्चयादितिभावः॥ १६ ॥ संशांतिःरागद्वेषाद्यक्षुब्धता॥ प्रज्ञालक्षणेआलोकेप्रज्ञाहेतौसूर्यालोकेच ॥ १७ ॥ स्थितंप्रतिष्ठितम् ॥ एतच्छास्त्रविचारिणः ॥ १८ ॥ एवमानुषंगिकफलान्युक्त्वामुख्यंदर्शयति ॥ सेति ॥ शनैर्भूमिकाक्रमैः ॥ १९ ॥ परमस्यपरमात्मनआलोकनमालोकस्तंददातीतिपरमालोकदा ॥ अस्यैतद्ग्रंथविचारकस्य ॥ २० ॥ शमेनालोकिनिप्रकाशवति ॥ अनर्थसूचकाःकामादिधूमकेतवः ॥ तेषांरात्राववोदयप्रसिद्धेः ॥ २१ ॥ अचंचलेसून्नतेस्वात्मपदे ॥ दृष्टांतपक्षेतुपर्वते ॥ डलयोरभेदाज्जडे ॥ अतृष्णाःपुरुषाजलेअतृष्णाअभ्रमालिकाःशाम्यंतीत्या

कथंस्यादादिताजन्मकर्मणांदैवपुंस्त्वयोः॥ इत्यादिसंशयगणःशाम्यत्यह्निियथातमः ॥ १६ ॥ सर्वदासर्वभावेषुसंशांतिरुपजायते॥ यामिन्यामिवशांतायांप्रज्ञालोकउपागते॥ १७॥ समुद्रस्येवगांभीर्यंधैर्यंमेरोरिवस्थितम्॥ अंतःशीतलताचेंदोरिवोदेतिविचारिणः ॥ १८॥ साजीवन्मुक्ततातस्यशनैःपरिणतिंगता॥ शांताशेषविशेषस्यभवत्यविषयोगिराम्॥ १९॥ सर्वार्थशीतलाशुद्धापरमालोकदास्यधीः॥ परंप्रकाशमायातिज्योत्स्नेवशरदैन्दवी ॥ २० ॥ हृद्याकाशेविवेकार्केशमालोकिनिनिर्मले॥ अनर्थसार्थकर्त्तारोनोद्यंतिकिलकेतवः॥ २१ ॥ शाम्यंतिशुद्धिमायांतिसौम्यास्तिष्ठंतिसून्नते॥ अचंचलेजलेतृष्णाःशरदीवाभ्रमालिकाः ॥ २२॥ यत्किंचनकरीक्रूराग्राम्यताविनिवर्त्तते॥ दीनाननापिशाचानांलीलेवदिवसागमे॥ २३॥ धर्मभित्तौभृशंलग्नांधियंधैर्यधुरंगताम्॥ आधयोनविधुन्वंतिवाताश्चित्रलतामिव॥ २४॥ नपतत्यवटेज्ञस्तुविषयासंगरूपिणि॥ कःकिलज्ञातसरणिःश्वभ्रंसमनुधावति ॥ २५॥ सच्छास्त्रसाधुवृत्तानामविरोधिनिकर्मणि॥ रमतेधीर्यथाप्राप्तेसाध्वीवांतःपुराजिरे॥ २६॥ जगतांकोटिलक्षेषुयावंतःपरमाणवः॥ तेषामेकैकशोंतःस्थान्सर्गान्पश्यत्यसंगधीः॥ २७॥ मोक्षोपायावबोधेनशुद्धांतःकरणंजनम्॥ नखेदयतिभोगौघोनचानंदयतिक्वचित्॥ २८॥ परमाणौपरमाणौसर्गवर्गानिरर्गलाः॥ येपतंत्युत्पतंत्यंबुवीचिवत्तान्सपश्यति ॥ २९ ॥ नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति॥ कार्याण्येषप्रवुद्धोपिनिष्प्रबुद्धइवद्रुमः॥ ३० ॥

दिसाधारणंयोज्यम् ॥ २२ ॥ यत्किंचनकरीपरविद्वेषादिकारिणी ॥ ग्राम्यताअश्लीलवचनता ॥ दीनान्याननानियस्याम् ॥ २३ ॥ धारयतीतिधर्मःशमदमादिःपरमात्मावासएवभित्तिर्विश्वचित्राधारत्वात्तस्यांभृशमैकरस्येनलग्नानविधुन्वंतिनकंपयंति ॥ चित्रलिखितांलतामिव ॥ २४ ॥ ज्ञस्तत्त्ववित् ॥ अवटेमोहगर्त्ते ॥ २५ ॥ तस्ययथेष्टाचरणंवारयति ॥ सदिति ॥ यथायोगंप्राप्तेसाध्वीपतिव्रतेव ॥ २६ ॥ सर्गान्ब्रह्मांडान् ॥ मायायाअघटितघटनापटीयस्त्वनिश्चयादितिभावः ॥ २७ ॥ २८ ॥ निरर्गलाअसंकीर्णाः॥ उत्पातपातावाविर्भावतिरोभावौ ॥ २९ ॥ संप्रवृत्तान्यरिष्टानि ॥ निवृत्तानीष्टानि ॥ प्रबुद्धःकार्यफलादिस्वरूपाभिज्ञोपितदनभिज्ञोद्रुमइव ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकसामान्यइतरजनसदृशः ॥ अपराजितोऽविकृतचित्तः ॥ ३१ ॥ तात्पर्यपर्यालोचनेनप्रतिश्लोकंविविच्यताम् ॥ उक्तमुक्तिमात्रमितिनमंतव्यंकितुवराणांब्रह्मादीनांशाप वत्वरवत्शापवद्वाअनुभूयतएव ॥ ३२ ॥ माधुर्योपमादिशब्दार्थालंकारभेदोपादानायालंकारविभूषणयोःपृथग्ग्रहणम् ॥ ३३ ॥ किंचित्पदपदार्थवित्पुरुषइदंकाव्यंस्वय मेवबुध्यतेऽवगच्छति ॥ ३४ ॥ मतेविचारिते ॥ नोपयुज्यते तत्फलानामेतत्फलेंतर्भावादितिभावः ॥ ३५ ॥ यद्यपियंथांतराभ्यासादपिपांडित्यंभवतितथापितन्नचित्तसंस्कारपूर्व कमतएवेदमपूर्वम् ॥ ३६ ॥ द्रष्टृदृश्योभयशांतौदृङ्मात्रात्माशुद्धःपरिशिष्यतइतिभावः ॥ ३७ ॥ नोइतिनञर्थोनिपातः ॥ नभ्रमयतीत्यर्थः ॥ ३८ ॥ कल्पनामात्रमेतदितिप

दृश्यतेलोकसामान्योयथाप्राप्तानुवृत्तिमान् ॥ इष्टानिष्टफलप्राप्तौहृदयेनापराजितः ॥ ३१ ॥ बुद्ध्वेदमखिलंशास्त्रंवाचयित्वाविविच्य ताम् ॥ अनुभूयतएवैतन्नतूक्तंवरशापवत् ॥ ३२ ॥ शास्त्रंसुबोधमेवेदंसालंकारविभूषितम् ॥ काव्यंरसमयंचारुदृष्टांतैःप्रतिपादितम् ॥ ३३ ॥ बुध्यतेस्वयमेवेदंकिंचित्पदपदार्थवित् ॥ स्वयंवस्तुनवेत्तीदंश्रोतव्यंतेनपंडितात् ॥ ३४ ॥ यस्मिन्श्रुतेमतेज्ञातेतपोध्यानजपा दिकम् ॥ मोक्षप्राप्तौनरस्येहनकिंचिदुपयुज्यते ॥ ३५ ॥ एतच्छास्त्रघनाभ्यासात्पौनःपुन्येनवीक्षणात् ॥ पांडित्यंस्यादपूर्वंहिचित्तसं स्कारपूर्वकम् ॥ ३६ ॥ अहंजगदितिप्रौढोद्रष्टृदृश्यपिशाचकः ॥ पिशाचोर्कोदयेनेवस्वयंशाम्यत्ययत्नतः ॥ ३७ ॥ भ्रमोजगदहंचेतिस्थि तएवोपशाम्यति ॥ स्वप्नमोहःपरिज्ञातइवनोभ्रमयत्यलम् ॥ ३८ ॥ यथासंकल्पनगरेपुंसोहर्षविषादिता ॥ नबाधतेतथैवास्मिन्परिज्ञाते जगद्भ्रमे ॥ ३९ ॥ चित्रसर्पःपरिज्ञातोनसर्पभयदोयथा ॥ दृश्यसर्पःपरिज्ञातस्तथानसुखदुःखदः ॥ ४० ॥ परिज्ञानेनसर्पत्वंचित्रसर्पस्य नश्यति ॥ यथातथैवसंसारःस्थितएवोपशाम्यति ॥ ४१ ॥ सुमनःपल्लवामर्देकिंचिद्व्यतिकरोभवेत् ॥ परमार्थपदप्राप्तौनतुव्यतिकरोल्प कः ॥ ४२ ॥ गच्छत्यवयवःस्पंदंसुमनःपत्रमर्दने ॥ इहधीमात्ररोधस्तुनांगावयवचालनम् ॥ ४३ ॥ सुखासनोपविष्टेनयथासंभवम श्नता ॥ भोगजालंसदाचारविरुद्धेषुनतिष्ठता ॥ ४४ ॥

रिज्ञाते ॥ ३९ ॥ चित्रलिखितःसर्पः ॥ ४० ॥ अधिष्ठानपरिशेषेणस्थितएव ॥ ४१ ॥ नन्वतिविततःप्रपंचःकुद्दालकोटिभिरपिदुर्भेदःकथमल्पायासेनशाम्येदित्याशंक्यज्ञा नप्रभावस्तादृशइत्यभिप्रेत्याह ॥ सुमनइति ॥ सुमनसांपुष्पाणांपल्लवानामामर्देनखसूच्यादिनाभेदनेव्यतिकरःप्रयत्नातिशयः ॥ कश्चिच्चासौव्यतिकरश्चेतिकर्मधारयः ॥ अ ल्पकःस्वल्पोपि ॥ ननुकिमर्थंतर्हिप्राक्पौरुषसमर्थनमितिचेत्ज्ञानप्रतिबंधकरागासंभावनादिपुरुषापराधनिरासार्थमेवेति ॥ ४२ ॥ इहतुधीस्पंदस्यापिरोधोनकस्यचिदंगस्य तदवयवस्यवाचालनम् ॥ ४३ ॥ शास्त्रविरुद्धेषुमार्गेषुनतिष्ठतापुरुषेणआस्वाद्यतेइतिव्यवहितेनान्वयः ॥ ४४ ॥ ॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथाक्षणंयथाकालम् ॥ इतरदुपनिषन्मोक्षधर्मादि ॥ ४५ ॥ महदपरिच्छिन्नंज्ञानंपरमात्मातस्यबोधःसाक्षादनुभवः ॥ ४६ ॥ इत्थंगुणतःफलतःसौलभ्यतश्चशास्त्रंप्रशस्यतद्वि मुखान्निंदति ॥ एतावतीति ॥ कीर्त्तयितुमप्ययोग्याः ॥ आत्मघातित्वादितिभावः ॥ ४७ ॥ स्तुतिनिंदयोःप्रकृतोपयोगंदर्शयति ॥ शृण्विति ॥ बुद्ध्यायेसारतराअत्यंतपरिशुद्धा स्तेषामंतरमंतरंगभूतं विवेकबुद्धिमाह्याणांसारतराणामंतरमवधिभूतं बुद्धेरपिसारतरमांतरंप्रत्यग्भूतमात्मतत्त्वंविषयभूतंयस्मिन्निितिवातथोक्तम्॥ज्ञानंविस्तारयतीतिज्ञानविस्ता रंशास्त्रम् ॥ कर्मण्यण् ॥ ४८ ॥ आपातनंशास्त्रावतारस्तदुपायोऽवधारणरूपआपातनिकाताम् ॥ यथायेनदृष्टांतेन ॥ परिभाषयाउपक्रमोपसंहारादिरूपयातत्तद्बोधोपयोगि संकेतेनचयथाश्रूयतेताम् ॥ ४९ ॥ तत्रदृष्टांतस्यलक्षणमाह ॥ येनेति ॥ दृष्टेनार्थेनसाधर्म्येणबोध्यतेयेनतद्बोधनम् ॥ तदेवविवृणोति ॥ बोधोपकारफलदमिति ॥ दृष्टःअंतः

यथाक्षणंयथादेशंप्रविचारयतासुखम्॥ यथासंभवसत्संगमिदंशास्त्रमथेतरत् ॥ ४५ ॥ आसाद्यतेमहाज्ञानबोधःसंसारशांतिदः॥ नभूयोजायतेयेनयोनियंत्रप्रपीडनम्॥ ४६ ॥ एतावत्यपियेऽभीताःपापाभोगरसेस्थिताः॥ स्वमात्रविष्ठाकृमयःकीर्त्तनीयानतेधमाः ॥ ४७॥ शृणुतावदिदानींत्वंकथ्यमानमिदंमया॥ राघवज्ञानविस्तारंबुद्धिसारतरांतरम् ॥ ४८॥ यथेदंश्रूयतेशास्त्रंतामापातनिकांशृ णु॥ विचार्यतेयथार्थोयंयथाचपरिभाषया ॥ ४९ ॥ येनेहाननुभूतेर्थेदृष्टेनार्थेनबोधनं॥ बोधोपकारफलदंतंदृष्टांतंविदुर्बुधाः ॥ ५० ॥ दृष्टांतेनविनारामनापूर्वार्थोवबुध्यते॥ यथादीपंविनारात्रौभांडोपस्करणंगृहे॥ ५१ ॥ यैर्यैःकाकुत्स्थदृष्टांतैस्त्वंमयेहावबोध्यसे ॥ सर्वे सकारणास्तेहिप्राप्यंतुसदकारणम्॥ ५२॥ उपमानोपमेयानांकार्यकारणतोदिता॥ वर्जयित्वापरंब्रह्मसर्वेषामेवविद्यते॥ ५३ ॥

सादृश्यबलेनप्रकृतार्थनिर्णयोयेनसदृष्टांतइतितदर्थज्ञाबुधाः ॥५०॥ अपूर्वार्थोऽदृष्टार्थोऽद्भुतार्थोवा ॥ उपस्करणंगुणवदुपकरणम् ॥ उपात्प्रतियत्नेतिसुट् ॥ ५१ ॥ दृष्टांतेषुवि वक्षितसादृश्यविवेकायहेयांशंदर्शयति ॥ यैरिति ॥ सकारणाजन्याअतएवानृताश्च ॥ ज्ञेयंतुसत्परमार्थसत्यमकारणंनित्यं ॥ मिथ्याभूतैरेवमृत्सुवर्णाद्युपादानैर्दृष्टांतैःसद्ब्रह्मका रणंबोध्यते ॥ तथाचजन्यत्वानृतत्वादयोदृष्टांतधर्माहेयाइत्यर्थः ॥ ५२ ॥ परब्रह्मदृष्टांतेष्वेवायंनियमोनान्यदृष्टांतेष्वित्याह ॥ उपमानेति ॥ कार्यकारणताकार्यत्वकारण त्वादिनासादृश्यमुदितापूर्वोक्ता ॥ अयमर्थः ॥ यथाविचारादिभिर्बिंबग्राहकंज्ञानमुत्पद्यतेइत्युच्यतेतथाज्ञानाद्बिंबमुत्पद्यतेइतिनवक्तव्यंब्रह्मणउत्पत्तेर्वक्तुमशक्यत्वात् ॥ ५३॥

---

१ आदिनाअभ्यासःअपूर्वताफलंअर्थवादउपपत्तिश्च

CC-0. In Public Domain. Digitization by eGangotri

॥ ३५ ॥ २

वर्जयित्वापरंब्रह्मोरयुक्तंविस्पष्टयति ॥ ब्रह्मेति ॥ एकदेशसधर्मत्वमादायतत्रांतःप्रकृतनिर्णयः ॥ अयंभावः ॥ जगद्विवर्तब्रह्माधिष्ठानबोधनेभुजंगविवर्ताधिष्ठानबोधकरज्जुदृष्टांतस्याधिष्ठानविवर्तांशमात्रेणदृष्टांतत्वंनतुदार्ष्टांतिकनित्यत्वसुखित्वादिसर्वांशेन ॥ ५४ ॥ ननुकिमित्येकदेशेसदृष्टांतएवोपादीयतइतिचेत्सर्वांशसादृश्याप्रसिद्धेरेवेत्यभिप्रेत्याह ॥ योयइति ॥ स्वप्नजातइवमिथ्याभूतोजगदंतर्गतएवनवास्तवः ॥ द्वितीयपरमार्थसच्चिदानंदवस्त्वप्रसिद्धेरितिभावः ॥ ५५ ॥ वैकल्पिकाविकल्पोद्भूताउक्तयः ॥ ब्रह्मसद्वितीयमद्वितीयंवा ॥ सद्वितीयंचेदपसिद्धांतः ॥ अद्वितीयंचेद्गुरुशास्त्राद्यभावाज्ज्ञानानुत्पत्तिः ॥ एवंविकल्पोक्तयोनोद्यंति ॥ ५६ ॥ एतेनदृष्टांतोपन्यासस्यानुमानोन्नयनेनबोधकत्वेदृष्टांतहेतुव्याप्त्यादेरन्नतत्वेव्याप्यत्वासिद्धिःस्वरूपासिद्धिरित्यादयःप्रापंचिकैर्हेतुभिःसत्यत्वादिसाधनेविरुद्धत्वादयश्चहेत्वाभासताप्रयोजकदोषाःस्युरितितार्किकप्रत्य

ब्रह्मोपदेशेदृष्टांतोयस्त्वेहहिकथ्यते॥ एकदेशसधर्मत्वंतत्रांतःपरिगृह्यते॥५४॥ योयोनामेहदृष्टांतोब्रह्मतत्त्वावबोधने॥ दीयतेससबोद्धव्यःस्वप्नजातोजगद्गतः॥५५॥ एवंसतिनिराकारेब्रह्मण्याकारवान्कथम्॥ दृष्टांतइतिनोद्यंतिमूर्खवैकल्पिकोक्तयः॥ ५६॥ अन्यासिद्धविरुद्धादिदृग्दृष्टांतप्रदूषणैः॥ स्वप्नोपमत्वाज्जगतःसमुदेतिनकिंचन॥ ५७॥ अवस्तुपूर्वापरयोर्वर्त्तमानेविचारितम्॥ यथाजाग्रत्तथास्वप्नःसिद्धमाबालमागतम्॥ ५८॥ स्वप्नसंकल्पनाध्यानवरशापौषधादिभिः॥ यथार्थाइहदृष्टांतास्तद्रूपत्वाज्जगत्स्थितेः॥ ५९॥

वस्थानस्याप्यवसरोनिरस्तइत्याह ॥ अन्येति ॥ अन्येषामसिद्धविरुद्धादिदोषदृशांतार्किकाणांदृष्टांतप्रदूषणैर्दूष्यस्यहेत्वादेर्जगतःस्वप्नोपमत्वाद्वस्तुनिनकिंचिद्दूषणंसमुदेतीत्यर्थः ॥ साध्यसिद्धिपर्यंतंबोध्यबोधकव्यवहारस्तुव्यावहारिकसत्यतामात्रेणाप्युपपन्नइतिभावः ॥ ५७ ॥ उक्तंस्वप्नोपमत्वंतत्साधर्म्यप्रदर्शनेनोपपादयति ॥ अवस्त्विति ॥ पूर्वापरयोरुत्पत्तिविनाशपूर्वोत्तरकालयोरवस्तुअभावग्रस्तंवर्त्तमानेकालेपिउपादानाद्भेदाभेदसत्तयाअविचारितंविचार्यवादिसहस्रेणापिनिर्णेतुमशक्यम् ॥ वर्तमानकालेतुविचारितंसदवस्त्वितिवा ॥ यथाजाग्रद्वस्तुतथास्वप्नोपीतिमिथ्यात्वेनसाम्यमित्यर्थः ॥५८ ॥ ननुप्रातिभासिकसत्तावतास्वप्नेनकथंव्यावहारिकसत्तातुल्यतेतिचेत्परस्परहेतुफलभावदर्शनाल्लौकिकाचाराच्चतुल्यतेत्याह ॥ स्वप्नेति ॥ जाग्रतिकार्याकार्यत्वेनसंदिग्धयात्रादौदेवताप्रार्थनादिनाशयानस्यस्वप्नेकार्यमितिसंकल्पोदयेतथाचिंतनेचिंतनोपलक्षितचिरकालपूजामंत्रजपस्तुत्यादिनातदनुकूलवरलाभेशत्रूणांमुनिशापादिदर्शनेनवाप्रातर्यात्रादिकरणेशत्रुजयादिदर्शनात्स्वप्नौषधलाभेनजागरेरोगशांतिदर्शनाच्चतत्साम्येनसर्वजगत्स्थितेरपितद्रूपत्वात्स्वप्नदृष्टांतायथार्थाः ॥ ५९ ॥

॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षोपायकृतावाल्मीकिनाअन्येपिपूर्वरामायणादयोयेग्रंथाःकृतास्तेष्वपिदृष्टांतानांसंभवदंशसाम्यबोधनेव्यवस्थाप्रसिद्धेत्यर्थः ॥ ६० ॥ ननुतर्हिश्रोतारःस्वप्नसाम्यमुक्तंकुतःसहसैवनबुध्यंतेकुतोवाविप्रतिपद्यंतेइत्याशंक्याध्यात्मशास्त्रश्रवणसंस्काराभावेनजगत्सत्यताभ्रमादित्याह ॥ स्वप्नाभत्वमिति ॥ वक्तुंबोधयितुम् ॥ पार्यतेशक्यते ॥ श्रोतॄणांविरोधिसंस्कारोच्छेदस्यचिरसाध्यत्वादितिभावः ॥ ६१ ॥ ध्यानेपिनगरकल्पनंमानसपूजायांप्रसिद्धम् ॥ ६२ ॥ यदिजगतिस्वप्नाद्युपमानेसर्वांशेपिसाधर्म्यंविवक्षितंतर्हिब्रह्मण्यपिकटकमुकुटाद्युपादानस्वर्णदृष्टांतेतद्वदेवपरिणामिताकुतोनविवक्ष्यतेतत्राह ॥ अकारणेइति ॥ तदेतद्ब्रह्मापूर्वमनपरं एकमेवाद्वितीयमित्यादिश्रुतिभिश्चितिशक्तिरपरिणामिन्यप्रतिसंक्रमाशुद्धाचानंताच अव्यक्तोयमचिंत्योयमविकार्योयमुच्यतेइत्यादिस्मृतिभिरसंगोदासीनस्यपरिणामहेतुत्वासंस्पर्शाच्चितोजाड्याकाराघटनाच्चेत्यादियुक्तिभि

मोक्षोपायकृताग्रंथकारेणान्येपियेकृताः॥ग्रंथास्तेष्वियमेवैकाव्यवस्थाबोध्यबोधने॥६०॥स्वप्नाभत्वंचजगतःश्रुतेशास्त्रेवबोध्यते॥
शीघ्रंनपार्यतेवक्तुंवाक्किलक्रमवर्त्तिनी ॥ ६१ ॥ स्वप्नसंकल्पनाध्याननगराद्युपमंजगत्॥ यतस्तएवदृष्टांतास्तस्मात्संतीहनेतरे ॥ ६२ ॥
अकारणेकारणतायद्बोधायोपमीयते॥ नतत्रसर्वसाधर्म्यंसंभवत्युपमाश्रमैः ॥ ६३॥ उपमेयस्योपमानादेकांशेनसधर्मता॥ अंगीकार्यावबोधायधीमतानिर्विवादिना॥६४॥अर्थावलोकनेदीपादाभामात्रादृतेकिल॥ नस्थानतैलवर्त्यादिकिंचिद्प्युपयुज्यते॥६५॥
एकदेशसमर्थत्वादुपमेयाववबोधनम्॥उपमानंकरोत्यंगदीपोर्थप्रभयायथा॥ ६६॥ दृष्टांतस्यांशमात्रेणबोध्यबोधोदयेसति ॥ उपादेयतयाग्राह्योमहावाक्यार्थनिश्चयः ॥ ६७॥

श्चपरिणामाघटनादकारणेअपरिणामिनियत्यत्रपरिणामिस्वर्णादिवत्कारणतोपमीयतेतत्रोपमाप्रयुक्तैःश्रमैःप्रयत्नैरपिसर्वांशेसाधर्म्यंनलब्धुंशक्यमित्यर्थः ॥ ६३ ॥ तदेवस्पष्टमाह ॥ उपमेयस्येति ॥ ६४ ॥ लोकेपिमणिदीपइवेक्ष्यतइत्यादौनाविवक्षितांशसादृश्यबोधोदृष्टइत्याह ॥ अर्थेतिद्वाभ्याम् ॥ श्लोकद्वयस्ययथाश्रुतार्थोवा[1]स्पष्टः॥ आभामात्रात्प्रकाशमात्रात् ॥ ६५ ॥ ६६ ॥ एतच्छास्त्रीयसर्वदृष्टांतानामुपयोगमाह ॥ दृष्टांतस्येति ॥ जगतःस्वप्नादिदृष्टांतैर्मिथ्यात्वेप्रतीचआकाशसवित्रादिदृष्टांतस्यब्रह्मणोमृल्लोहादिदृष्टांतस्यचपदार्थपरिशोधनेनबोध्यलक्ष्यार्थैबोधोदयेसतिसकार्याविद्योच्छेदार्थमवश्योपादेयतयासर्वश्रुतिशास्त्रमहातात्पर्यविषयोहंब्रह्मास्मीतिमहावाक्यार्थनिश्चयोग्राह्यइत्यर्थः ॥ ६७ ॥

---

१ अत्रवेत्यधिकमिवभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वहंगौरःस्थूलइत्यादिप्रत्यक्षेणौषधपानारोग्यलाभादिप्रवृत्तिफलदर्शनलिंगेनपरव्यवहारसाम्योपमानेनसर्वव्यावहारिकमहाजनवाक्यैर्ब्राह्मणोयजेतेत्यादिश्रुत्यास्मृत्याधर्म
शास्त्रैरनेकतार्किकादियुक्तिभिश्चदेहस्तदन्योवाकर्त्तृभोक्तृत्वादिस्वभावआत्मावगम्यतेतत्कथंप्रत्यक्षाद्यनेकप्रमाणविरुद्धोर्थोमहावाक्यमात्रादुपादेयइत्याशंक्याह ॥ नेति ॥
अनुभूतिर्विद्वत्प्रत्यक्षंतदपलापपर्यवसितैरपवित्रदेहाद्यात्मभावविषयत्वादपवित्रशुनकसूकरादिजन्मफलत्वाच्चापवित्रैर्विकल्पितैर्ब्रह्मसप्रमाणमप्रमाणंवा सप्रमाणंचेद्द्वैतहानिः
अप्रमाणंचेत्प्रमेयहानिरित्यादिभिर्विकल्पैःपरमपुरुषार्थानुबंधिनीप्रबुद्धताप्रबोधयोग्याभिज्ञताननाशनीया ॥ यथाचदेहादेरात्मत्वासंभवस्तथावक्ष्यतइतिभावः ॥ ६८ ॥ न
नुसर्वजनस्यनिरुपाधिकस्वेच्छाविहारसुखार्थित्वाद्वयालोरामतमस्यचार्वाकादेर्भार्यापुत्रमित्रादेश्चदृष्टबहुतरविचित्रभोगसुखानुबंधिस्वाभाविकस्वप्रीतिविषयेप्रवर्त्तकंसंसार
सारतादिवचनंकथंहेयंकथंवातपःक्लेशसंयमवित्तव्ययायासानुबंधीष्टपुत्रवित्तभार्यादिवियोजकसंन्यासभिक्षाटनादिदृष्टानर्थसहस्रपर्यवसितंनिर्विषयात्ममात्रपरिशेषात्मक
परमदारिद्र्यलक्षणमोक्षफलानुषंगिब्रह्मात्मैकत्वबोधकत्वाद्वैरिवाक्यकल्पमचेतनंश्रौतंमहावाक्यमुपादेयमित्याशंक्याह ॥ विचारणादिति ॥ सत्यमविचारणादेवमेवविचार

नकुतार्किकतामेत्यनाशनीयाप्रबुद्धता ॥ अनुभूत्यपलापांतैरपवित्रैर्विकल्पितैः ॥ ६८ ॥ विचारणादनुभवकारिवैरिणोपिवाङ्मयंत्व
नुगतमस्मदादिषु ॥ स्त्रियोक्तमप्यपपरमार्थंवैदिकंवचोवचःप्रलपनमेवनागमः ॥ ६९ ॥ अस्माकमस्तिमतिरंगतयेतिसर्वशास्त्रैकवा
क्यकरणंफलितंयतोयः ॥ प्रातीतिकार्थमपशास्त्रनिजांगपुष्टात्संवेदनादितरदस्तिततःप्रमाणम् ॥ ७० ॥ ॥ इतिश्रीवासि० वा० दे०
मो० मुमु० दृष्टांतनिरूपणंनामाष्टादशःसर्गः ॥ १८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

णात्तुवैरिणोवैरित्वेनज्ञातस्यापिवाङ्मयंवाक्यंनित्यनिरतिशयानंदात्मरूपंपरमपुरुषार्थानुभवकारीतिअस्मदादिष्वनुभवनिष्ठेषुपरमाप्ततमंसर्वप्रमाणमूर्द्धन्यमित्यनुगतमेव ॥ अ
पगतंपरमार्थभूतंवैदिकंपुरुषार्थतत्त्वंयस्मात्तथाविधंवचोवाक्यंस्त्रियापरमप्रेयस्योक्तमपिमृत्युनरकाद्यनर्थपरंपरानुबंधित्वाद्वचःप्रलपनंवाक्प्रलापमात्रमेवनआगमोनाप्तवच
नंनवाप्रमाणमित्यर्थः ॥ ६९ ॥ ननुतर्हिकपिलकणादजैमिनिप्रभृतयोवेदार्थज्ञाअपिकथमन्यथैवपुरुषार्थतदुपायतत्त्वंनिरूपितवंतोभवंतस्त्वन्यथानिरूपयंतितत्रभवदुक्तौको
विशेषस्तत्राह ॥ अस्माकमिति ॥ हेअंगअस्माकंयतोयस्यामतेःसकाशाद्यस्तत्त्वसाक्षात्कारजीवन्मुक्तिलक्षणःशुभावहोविधिस्तादृशीमतिरस्ति ॥ तयाइतिपूर्वोक्तप्रकारे
णप्रातीतिकोऽपरोक्षानुभवयोग्योर्थःपरमपुरुषार्थोयस्मात्तथाविधंसर्वशास्त्राणांसकलश्रुत्यध्यात्मशास्त्राणामेकवाक्यकरणमेकमहावाक्यार्थपर्यवसानंफलितम् ॥ ततःअप
शास्त्रंश्रुतितात्पर्याविषयीभूतंनिजांगैस्तर्कादिभिरेवपुष्टंयत्सांख्यकणादादिसंवेदनंतस्मादितरन्महावाक्यार्थरूपंप्रातीतिकार्थमपरोक्षानुभवयोग्यार्थकंप्रमाणमस्माकमस्तिन
तुतेषाम् ॥ कुतर्कोपहतमतित्वेनश्रुतितात्पर्यावधारणयोग्यमतिशून्यत्वादित्यर्थः ॥ ७० ॥ ॥ इतिश्रीवासिष्ठमहारा०ता०मुमु०प्रकरणेऽष्टादशःसर्गः ॥ १८ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टांतार्थप्रसंगेनमानतत्त्वंविशोध्यते ॥ नित्यापरोक्षंब्रह्मैवद्रष्टृदृश्यादिसाक्षियत् ॥ १ ॥ प्रासंगिकंसमर्थ्यंतत्प्रसक्तंप्रमाणतत्त्वंनिर्णिनीषुःप्रस्तुतमुखेनोपक्रममाणःश्रीवसिष्ठ उवाच ॥ विशिष्टेति ॥ विशिष्टोविशेषेणप्रतिपादयितुंविवक्षितोयोंशस्तेनैवसधर्मत्वंसर्वत्रोपमानेषुगृह्यते ॥ अन्यथागौरिवगवयइत्यादौजात्यादिनापिसादृश्यविवक्षायांभेदा भावादुपमानमात्रोच्छेदःस्यादित्यर्थः ॥ १ ॥ दृष्टांतबुद्धेःफलमाह ॥ दृष्टांतबुद्धाविति ॥ तत्त्वंपदार्थशोधनोपयोगितत्तद्दृष्टांतबुद्धौसत्यामेकमद्वितीयंयज्ज्ञानस्वरूपमात्मतत्त्वं तदेवसर्ववेदांततात्पर्यविषयत्वाच्छास्त्रार्थस्तस्यवेदनात्तद्गोचराखंडाकारवृत्त्युदयात्तदभिव्यक्तमहावाक्यार्थभूतब्रह्मस्वरूपेणैवसम्यक्सिद्धाअज्ञानतत्कार्यशांतिर्निर्वाणंदृष्टां तबुद्धिफलमुच्यतेइत्यर्थः ॥ २ ॥ तदेवस्फुटमाह ॥ तस्मादिति ॥ दार्ष्टांतंदार्ष्टांतिकम् ॥ तस्येदमित्यणू ॥ तद्भेदतद्गतभूयोधर्मवत्त्वादिप्रसंजकैःकिमयंसर्वांशेदृष्टांतउतकतिपय धर्मांशइत्यादिविकल्पोल्लसितैःअलंप्रयोजनंनास्तीत्यर्थः ॥ केनतर्हिप्रयोजनंतदाह ॥ ययाकयाचिदिति ॥ पदलक्षार्थतात्पर्यग्रहणानुकूलयाकल्पितधर्मवत्त्वादियुक्त्यापीत्य

॥श्रीवसिष्ठउवाच॥ ॥विशिष्टांशसमर्थत्वमुपमानेषुगृह्यते॥कोभेदःसर्वसादृश्येतूपमानोपमेययोः॥ १ ॥ दृष्टांतबुद्धावेकात्मज्ञान शास्त्रार्थवेदनात्॥महावाक्यार्थसंसिद्धाशांतिर्निर्वाणमुच्यते॥२॥ तस्माद्दृष्टांतदार्ष्टांतविकल्पोल्लसितैरलम्॥ ययाकयाचिद्युक्त्यातुम हावाक्यार्थमाश्रयेत्॥३॥ शांतिःश्रेयःपरंविद्धितत्प्राप्तौयत्नवान्भव॥ भोक्तव्यमोदनंप्राप्तंकिंतत्सिद्धौविकल्पितैः॥४॥ अकारणैःकार णिभिर्बोधार्थमुपमीयते ॥ उपमानैस्तूपमेयैःसदृशैरेकदेशतः ॥५॥ स्थातव्यंनेहभोगेषुविवेकरहितात्मना ॥ उपलोदरसंजातपरिपी नांधभेकवत्॥६॥ दृष्टांतैर्यत्नमाश्रित्यजेतव्यंपरमंपदम्॥विचारणवताभाव्यंशांतिशास्त्रार्थशालिना॥ ७॥ शास्त्रोपदेशसौजन्यप्रज्ञा तज्ज्ञसमागमैः॥ अंतरांतरसंपन्नधर्मार्थोपार्जनक्रियः॥८॥

र्थः ॥३॥ ननुसर्वसंसारशांतौतदंतर्गतदृष्टांतयुक्त्यादीनामपिबाधादाभासतास्यादित्याशंकाफलसिद्ध्यनंतरंसाधनक्षतेरदूषणत्वमित्याह ॥ शांतिरिति ॥ भोक्तव्यंभुक्तियोग्यंप्राप्तं सिद्धंचेत्तत्सिद्धौसाधनभूतैर्दृष्टांतादिभिर्विकल्पितैराभासितैःकिमनिष्टमितिशेषः ॥ ४ ॥ औषधंपिबभ्रातुरिवतेशिखावर्द्धिष्यतइतिबालप्रवृत्तिकारणिभिःशिखावृद्ध्यकारणैर पीष्टसाधनत्वादेकदेशतःसदृशैरुपमानैरुपमेयैश्चबालस्यौषधपानंतस्यतत्रेष्टसाधनताबोधार्थमुपमीयतेलोकेतद्वदत्रापीत्यर्थः ॥ ५ ॥ तत्रानात्मविषयदृष्टांतंप्रकृतोपयोगितयो दाहरन्शांत्यादौप्रवर्त्तयति ॥ स्थातव्यमित्यादिना ॥ परिपीनश्वासावंधभेकश्चतद्वत् ॥ ६ ॥ एवंविधैर्दृष्टांतैःप्रतिबोधितेनेतिशेषः ॥ ७ ॥ उपशमेतिपाठेशास्त्रपदेनतदभ्यास उपलक्ष्यते ॥ तज्ज्ञाःशास्त्रादिज्ञाआत्मज्ञाश्च ॥ अंतरांतरेणपूर्वपूर्वांतरंगसाधनक्रमेणसंपन्नानां दिनेदिनेचवेदांतश्रवणाद्भक्तिसंयुतात् ॥ गुरुशुश्रूषयायुक्तात्कृच्छ्राशीतिफलंल भेत् ॥ योयजेताश्वमेधेनमासिमासिशतंसमाः ॥ नयःक्रुध्येतसर्वस्यतयोरक्रोधनोवरइत्यादिस्मृतिप्रसिद्धधर्माणांगुरुशुश्रूषाद्युपयोग्यर्थानांशास्त्रतात्पर्यचमत्कृतार्थानांचउपा र्जनमेवक्रियायस्यतथाविधःसन्विचारयेदित्युत्तरेणान्वयः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अपुनर्नाशामपुनरावर्त्तिनींतुर्यपदाभिधांशिवमद्वैतंचतुर्थंमन्यंतइतिश्रुतौचतुर्थपदाभिधेयांसप्तमभूमिकाप्रतिष्ठालक्षणाम् ॥ ९ ॥ तत्प्राप्तावेवसर्वकर्त्तव्यविश्रांतिरित्याह ॥ तुर्येतिद्वाभ्याम् ॥ प्रतिलंघिताआपोयेनतस्यउत्तीर्णस्येत्यर्थः ॥ जीवतऐहिकोऽर्थोऽजीवतःपारलौकिकश्चार्थः फलंकृतेनाकृतेनवाकर्मणानास्तीतिपरेणान्वयः ॥ १० ॥ श्रुतिस्मृतीश्रवणमननेतद्रूपैर्मनोविक्षेपैः ॥ ११ ॥ ननुविरुद्धमिदमुच्यते गृहस्थस्यतथायतेरिति तत्तदाश्रमनियतधर्मनिष्ठता नकृतेनाकृतेनार्थइतिचानियतधर्मनिष्ठता तत्रनिर्मंदरइवार्णवइत्यात्यंतिकविक्षेपनिवृत्तिपरोदृष्टांतःकथंसंगच्छतामित्याशंक्यमत्प्रागुक्तमात्मतत्त्वविषयेएकदेशेनसादृश्यंग्राह्यमितितदभिप्रेत्येदमुदाहृतमित्याह ॥ एकांशेनेत्यादिपंचदशभिः ॥ उपमेयसधर्मताअत्राभिप्रेतेतिशेषः ॥ अवश्यंचैवंबोद्धव्यंबोध्यार्थबोधानुगुणत्वात् ॥ बोधश्चंचुरिवपरखंडनायैवमुखसंलग्नोनतुहृदयप्रवेशीयस्यतथाविधेनभूत्वानस्थेयंस्वपुरुषार्थविघातापत्तेरितिभावः ॥ १२ ॥ बोध्यंबोधार्हंबोद्धव्यमवश्यंबोद्धव्यमेवेत्यावश्यकेतव्यः ॥ दृष्टांतखंडनप्रवृत्तौतुवरघातन्यायापत्तिरित्याह ॥ युक्तेति ॥ १३ ॥ तत्रबोधचंचोर्लक्षणतोद्वैविध्यमाह ॥ हृदयइति ॥ ज्ञानफलमनर्थत्वेनविकल्पयन्नाद्यइत्यर्थः ॥ १४ ॥ खमब्दोमेघइवस्वमात्मभूतंबोधंमलिनयति ॥ ज्ञप्तितत्साधनंचकुतर्कैर्विकल्पयन्द्वितीयइत्यर्थः ॥ १५ ॥ प्रासंगिकंबोधचंचुलक्षणमभिधायव्यवहारेपिजीवन्मुक्तस्यनिर्मंदरार्णवदृष्टांतलब्धंनिष्क्रियत्वंप्रत्यक्षादिप्रमाणतत्त्वपरीक्षणमुखेनजीवस्याद्वितीयकूटस्थचिन्मात्रस्वभावताव्युत्पादनेनसमर्थयितुमुपक्रमते ॥ सर्वेत्यादिना ॥ अपामब्धिःसमुद्रइवसर्वप्रमाणप्रामाण्यानांपदंमूलतोविश्रांतितश्चाधारभूतंप्रत्यक्षमेवैकंमुख्यंतत्त्वमितियावत् ॥ अतस्तत्प्रत्यक्षमेवमयातत्त्वतोवर्ण्यमानंशृण्वित्यर्थः ॥ १६ ॥ यथासर्वप्रमाणानामक्षाणींद्रियाणिसारस्तथासर्वाक्षाणामध्यक्षमपरोक्षंवेदनंसारंविदुः ॥ तदेवमुख्यंप्रत्यक्षं ॥ तत्प्रतिपदवच्छेदभूतमाश्रयभूतंविषयभूतंचघटमहंजानामीतित्रिपुटीप्रत्ययात्सिद्धंतदपिप्रत्यक्षमेव ॥ १७ ॥

तावद्विचारयेत्प्राज्ञोयावद्विश्रांतिमात्मनि ॥ संप्रयात्यपुनर्नाशांशांतिंतुर्यपदाभिधाम् ॥ ९ ॥ तुर्यविश्रांतियुक्तस्यप्रतीपस्यभवार्णवात् ॥ जीवतोजीवतश्चैवगृहस्थस्यतथायतेः ॥ १० ॥ नकृतेनाकृतेनार्थोनश्रुतिस्मृतिविभ्रमैः ॥ निर्मंदरइवांभोधिःसतिष्ठतियथास्थितम् ॥ ११ ॥ एकांशेनोपमानानामुपमेयसधर्मता ॥ बोद्धव्यंबोध्यबोधायनस्थेयंबोधचंचुना ॥ १२ ॥ ययाकयाचिद्युक्त्यातुबोद्धव्यंबोध्यमेवते ॥ युक्तायुक्तंनपश्यंतिव्याकुलाबोधचंचवः ॥ १३ ॥ हृदयेसंविदाकाशेविश्रांतेनुभवात्मनि ॥ वस्तुन्यनर्थंयःप्राहबोधचंचुःसउच्यते ॥ १४ ॥ अभिमानविकल्पांशैरज्ञोज्ञप्तिंविकल्पयेत् ॥ बोधंमलिनयत्यंतःस्वंखमब्दइवामलम् ॥ १५ ॥ सर्वप्रमाणसत्तानांपदमब्धिरपामिव ॥ प्रमाणमेकमेवेहप्रत्यक्षंतदतःशृणु ॥ १६ ॥ सर्वाक्षसारमध्यक्षंवेदनंविदुरुत्तमाः ॥ नूनंतत्प्रतिपत्सिद्धंतत्प्रत्यक्षमुदाहृतम् ॥ १७ ॥

१ स्याऽथवायतेरितिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

तत्रत्रिपुटीमनुसृत्यप्रकाशात्मनाभवनमनुभूतिर्वैद्यायास्त्रिपुट्याःप्रकाशनंवेदनंत्रितयंप्रतिप्रकाशात्मनाऽऽपत्तिर्व्याप्तिःप्रतिपत्तिरितियथाभिधमभिधामक्षरार्थमनतिक्रम्यत्रिपुटीव्यापिनःसाक्षिचिन्मात्रस्यप्रत्यक्षमितिव्यवहारभूमौनामकृतंससाक्ष्येवजीवःप्राणधारणनिमित्तेनव्यपदिश्यतइत्यर्थः ॥ १८ ॥ साक्ष्येववृत्त्युपाधौसंविदित्युच्यते अहंताप्रत्ययात्मकस्तुपुमान्प्रमातेत्युच्यते सएवयया विषयाकारवृत्त्याबाह्यावरणभंगेआविर्भवतिसापदार्थोविषयइतिसाक्ष्येवक्रमात्त्रैविध्यंभजतइत्यर्थः ॥ १९ ॥ व्यष्टावुपपाद्य समष्टौहिरण्यगर्भेप्ययमेवक्रमइत्याह ॥ सइति ॥ संकल्पविकल्पप्रधानांतःकरणानामाद्यैःसमष्टिभिः ॥ २० ॥ तत्साक्षिप्रत्यक्षंप्राक्सर्गादावकारणमेवसर्गलीलयास्वयमेव स्फुरित्वात्मनिसर्गभावापन्नेस्वस्मिन्नेवस्वयंकारणंभूतम् ॥ २१ ॥ एकस्मिन्वास्तवकार्यकारणत्वायोगादसदपिअज्ञानोस्यजीवस्यसदिवस्थितम् ॥ अस्यामविचारसंवलिता

अनुभूतेर्वेदनस्यप्रतिपत्तेर्यथाभिधम् ॥ प्रत्यक्षमितिनामेहकृतंजीवःसएवनः ॥ १८ ॥ सएवसंवित्सपुमानहंताप्रत्ययात्मकः ॥ सय योदेतिसंवित्त्यासापदार्थइतिस्मृता ॥ १९ ॥ ससंकल्पविकल्पाद्यैःकृतनानाक्रमभ्रमैः ॥ जगत्तयास्फुरत्यंबुतरंगादितयायथा ॥ २० ॥ प्रागकारणमेवाशुसर्गादौसर्गलीलया ॥ स्फुरित्वाकारणंभूतंप्रत्यक्षंस्वयमात्मनि ॥ २१ ॥ कारणंत्वविचारोत्थजीवस्यासदपिस्थितम् ॥ सदिवास्यांजगद्रूपंप्रकृतौव्यक्तिमागतम् ॥ २२ ॥ स्वयमेवविचारस्तुस्वतउत्थंस्वकंवपुः ॥ नाशयित्वाकरोत्याशुप्रत्यक्षंपरमंमहत् ॥ २३ ॥ विचारवान्विचारोपिआत्मानमवगच्छति ॥ यदातदानिरुल्लेखंपरमेवावशिष्यते ॥ २४ ॥ मनस्यनीहितेशांतेस्वबुद्धींद्रियकर्मभिः ॥ नहिकश्चित्कृतैरर्थोनाकृतैरप्यभावनात् ॥ २५ ॥

त्मरूपायांप्रकृतौजगद्रूपमपिव्यक्तिमागतमेवमसौप्रपंचोध्यारोपितइतिभावः ॥ २२ ॥ अपवादंदर्शयति ॥ स्वयंमेवेति ॥ एवंविचारस्तदभिव्यक्तसाक्षात्कारोपिस्वयमेवसस्वतउत्थंपरमार्थतःस्वात्मकमेवजगद्वपुरज्ञानोच्छेदेननाशयित्वास्वात्मकमनावृतंमहदपरिच्छिन्नंप्रत्यक्षंपरमंपरमपुरुषार्थरूपंकरोतीत्युपचारमात्रमित्यर्थः ॥ २३ ॥ तर्हिसविचारश्चरमसाक्षात्कारवृत्तिर्वामोक्षेशिष्येत तस्यान्येननाशेनवस्थापत्तिस्तत्राह ॥ विचारोपीति ॥ यदाविचारवानात्मानमवगच्छतिआत्माकारीभवतितदाविचारोपिनिरुल्लेखंशब्दप्रत्ययोल्लेखायोग्यम् ॥ २४ ॥ तदित्थंबाधितेप्रपंचेस्वबुद्धींद्रियकर्मभिःसहमनसिशांतेसतिबाधितस्यपुनःसत्यत्वेनाविभावनात् ॥ प्रारब्धाधीनचलनाभासेननक्रियातत्फलभोक्तृतेइत्यर्थः ॥ २५ ॥

---

१ अस्योत्तरश्लोकस्यचटीकायांजीर्णपुस्तकांतरे प्रतीकानंतरं (एवंविचारवान्विचारस्तत्पर्यवसितसाक्षात्कारोपि) इति ॥ उत्तरत्रतर्हीत्यतःप्राक् (विचारवानितिप्राक्संबध्यते) इति ॥ प्रतीकानंतरं (यदाआत्मानमवगच्छतिआत्माकारीभवति ॥ निरुल्लेखंशब्दप्रत्ययोल्लेखायोग्यम्) इतिचपाठोदृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनःशांतौकर्मेन्द्रियाणांतत्प्रवृत्तिनिमित्तस्यचाभावादचलत्वमभिप्रेत्यनिर्मन्दरइवांभोधिरितिदृष्टांतोपन्यासः ॥ नसज्ञदृशाचलनाभासेपिजीवन्मुक्तानांचलनसिद्धिरितिभावः ॥ २६ ॥ वेदनंविषयस्फूर्त्तिः ॥ यथाकाष्ठप्रणाल्यंतर्गतदारुमेषद्वयस्यपरस्परशिरोविघट्टनानुकूलेचलनेअंतर्गतारज्जुःसूत्रमाकृष्यमाणाहेतुस्तथा ॥ २७ ॥ ननुमनश्चलनेनिर्विषयवेदनस्यहेतुत्वायोगात्सविषयंतद्वाच्यं तत्रमनश्चलनादपिपूर्वंसिद्धोविषयोवाच्यः तथाविषयाणांमनोमयत्वस्यप्रागुक्तत्वाद्विषयसिद्धेःप्राङ्मनःसिद्धिर्वाच्येत्यन्योन्याश्रयइत्याशंक्यसर्वसंस्काररूपेणमायाशबलचिदंतरधिष्ठानसत्तयासदेवाविर्भवतीत्याह॥ रूपेति ॥ बहिरिंद्रियैर्विषयग्रहोरूपालोकोमनसाविषयानुसंधानंमनस्कारस्तदुभयविषयाःपदार्थाश्चतैर्व्याकुलम् ॥ २८ ॥ ननुतर्हिकथंकादाचित्कतदुत्पत्त्यांविव्यवस्थास्यात्तत्राह ॥ सर्वेति ॥ उदेतिकर्मपरिपाकव्यवस्थयायादृशंप्राणिकर्मभोगायाविर्भवतितदात्म

मनस्यनीहितेशांतेनप्रवर्त्ततएवते ॥ कर्मेंद्रियाणिकर्मादावसंचारितयंत्रवत् ॥ २६ ॥ मनोयंत्रस्यचलनेकारणंवेदनंविदुः ॥ प्रणालीदारुमेषस्यरज्जुरंतर्गतायथा ॥ २७ ॥ रूपालोकमनस्कारपदार्थव्याकुलंजगत् ॥ विद्यतेवेदनस्यांतर्वातांतःस्पंदनंयथा ॥ २८ ॥ सर्वात्मवेदनंशुद्धंयथोदेतितदात्मकम् ॥ भातिप्रसृतदिक्कालबाह्यांतारूपदेहकम् ॥ २९ ॥ द्रष्टैवदृश्यताभासंस्वरूपंधारयन्स्थितः ॥ स्वंयथायत्रयद्रूपंप्रतिभातितथैवतत् ॥ ३० ॥ ससर्वात्मायथायत्रसमुल्लासमुपागतः ॥ तिष्ठत्याशुतथातत्रतद्रूपइवराजते ॥ ३१ ॥ सर्वात्मकतयाद्रष्टुर्दृश्यत्वमिवयुज्यते ॥ दृश्यत्वंद्रष्टृसद्भावेदृश्यतापिनवास्तवी ॥ ३२ ॥ अकारणकमेवातोब्रह्मसिद्धमिदंस्थितम् ॥ प्रत्यक्षमेवनिर्मातृतस्यांशास्त्वनुमादयः ॥ ३३ ॥

कमुत्पन्नमिवप्रसृतदिक्कालबाह्याभ्यंतरपदार्थवेषंभाति ॥ अंतारूपेतिढ्लोपइतिदीर्घः ॥ २९ ॥ तर्हि[2]सविचारश्चरमंस्वंदेहादिदृश्यताभासंद्रष्टैवतदेवमेस्वरूपमितिमोहाद्धारयन्सर्वात्माजीवभावेनस्थितइत्यर्थः ॥ युक्तंचैतदित्याह ॥ स्वमिति ॥ ३० ॥ तदेवस्फुटमाह ॥ सइति ॥ ३१ ॥ इवकारसूचितंदृश्यमिथ्यात्वमुपपादयति ॥ दृश्यत्वमिति ॥ दृक्स्वरूपोद्रष्टायदिदृक्स्वरूपात्प्रच्युतोदृश्यत्वमापद्येतततर्हिनिर्द्रष्टृकदृश्यसिद्धिरेवनस्यात् ॥ यद्यप्रच्युतस्तर्हिदृश्यतास्यविवर्त्तमात्रंरज्जुस्वभावादप्रच्युतस्यसर्पभाववदितिमिथ्यात्वमेवेत्यर्थः ॥ ३२ ॥ अतःकार्यमिथ्यात्वेतत्सापेक्षकारणभावस्यापिमिथ्यात्वादकारणकंसिद्धम् ॥ इत्थंप्रत्यक्षतत्त्वविमर्शेब्रह्मैवाद्वयंसिद्धमित्युपसंहरति ॥ इदंस्थितंप्रत्यक्षमेवेति ॥ अनुमानादयस्तुप्रत्यक्षपूर्वकत्वात्तत्पर्यवसितत्वाच्चतदंशाएवेतिसर्वप्रमाणतत्त्वमात्मैवेत्यर्थः ॥ ३३ ॥

१ परमार्थतस्त्वरूपदेहकमेव २ तर्हीत्यारभ्यचरममित्यंतंपुस्तकांतरेनास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहावलोकनन्यायेनदैवनिरासंस्मारयन्पौरुषस्यैवैतत्फलमित्याह ॥ स्वेति ॥ परमार्थतःस्वकीयप्राक्तनप्रयत्नमात्रेदैवमितिकल्पयित्वातदधीनोहमितितदुपासनपरोयःपुरुषस्तत्कल्पितंदैवशब्दार्थंदूरेअपास्येंद्रियादिजयेशूरेणाधिकारिणास्वपौरुषेणैवतत्परमपदंअंतर्हृद्येवासाद्यतेप्राप्यते ॥ ३४ ॥ सत्येनपरमार्थनिष्ठेन सितेनप्रमाणपरिशुद्धेन तावद्विचारययावत्स्वयमेवस्वबुद्ध्यात्रिविधपरिच्छेदशून्यंपदमभ्युपैषिसाक्षात्कारेणप्राप्नोषि ॥ ३५ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेप्रमाणनिरूपणंनामएकोनविंशतितमःसर्गः ॥ १९ ॥ ॥ ७ ॥ ॥ प्रज्ञाबुद्धिप्रकारोत्रमहापुरुषलक्षणम् ॥ सदाचारक्रमाश्चोक्ताःपरस्परविवर्द्धनाः ॥ १ ॥ उक्तंज्ञानंमहापुरुषेष्वेवप्रतितिष्ठतिनान्येषु महापुरुषताचवक्ष्यमाणसदाचारेणसिद्ध्यतीतिसदाचारंवर्णयितुमुपक्रममाणःश्रीवसिष्ठउवाच ॥ आर्येति आदौआर्याणांसंगमैस्तदुपदेशाचरणशिक्षणयु

स्वयत्नमात्रेयदुपासकोयस्तद्दैवशब्दार्थमपास्यदूरे ॥ शूरेणसाधोपदमुत्तमंतत्स्वपौरुषेणैवहिलभ्यतेंतः ॥ ३४ ॥ विचारयाचार्यपरंपराणांमतेनसत्येनसितेनतावत् ॥ यावद्विशुद्धंस्वयमेवबुद्ध्यात्वनंतरूपंपरमभ्युपैषि ॥ ३५ ॥ ॥ इतिश्रीवासिष्ठमहारामायणेवा० दे० मो० मु० प्रमाणनिरूपणंनामएकोनविंशतितमःसर्गः ॥ १९ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ आर्यसंगमयुक्त्यादौप्रज्ञांवृद्धिंनयेद्बलात् ॥ ततोमहापुरुषतांमहापुरुषलक्षणैः ॥ १ ॥ योयोयेनगुणेनेहपुरुषःप्रविराजते ॥ शिष्येत्तेनतमेवाशुतस्माद्बुद्धिंविवर्द्धयेत् ॥ २ ॥ महापुरुषताह्येषाशमादिगुणशालिनी ॥ सम्यग्ज्ञानंविनारामसिद्धिमेतिनकांचन ॥ ३ ॥ ज्ञानाच्छमादयोयांतिवृद्धिंसत्पुरुषक्रमाः ॥ श्लाघनीयाःफलेनांतर्वृष्टेरिवनवांकुराः ॥ ४ ॥ शमादिभ्योगुणेभ्यश्चवर्द्धतेज्ञानमुत्तमम् ॥ अन्नात्मकेभ्योयज्ञेभ्यःशालिवृष्टिरिवोत्तमा ॥ ५ ॥ गुणाःशमादयोज्ञानाच्छमादिभ्यस्तथाज्ञता ॥ परस्परंविवर्द्धतेतेअब्जसरसीइव ॥ ६ ॥

क्त्याप्रज्ञांवृद्धिंनयेत् ॥ ततःस्वंमहापुरुषलक्षणैर्वक्ष्यमाणैर्महापुरुषतांनयेत ॥ १ ॥ तत्रयदिसर्वेगुणाएकस्मिन्पुरुषेनलभ्येरंस्तर्हियोयःपुरुषोयेनयेनगुणेनप्रभूतोविज्ञायतेसतेनैवेतरेभ्यःशिष्यतेविशिष्यतेतस्मात्पुरुषात्तंतमेवाशुशिक्षित्वास्वबुद्धिंविवर्द्धयेत् ॥ शिक्षेतेतिपाठेतुस्पष्टम् ॥ २ ॥ एषाशमादिगुणप्रज्ञाशालितैवमहापुरुषता ॥ ३ ॥ सत्पुरुषैःक्रम्यंतेआचर्यंतइतिसत्पुरुषक्रमाःसदाचाराअमानित्वादयश्चअंतःफलेनात्मसुखाविर्भावेनश्लाघनीयाःप्रशस्याः ॥ ४ ॥ शाल्याद्यन्नोत्पत्तिहेतुभूताद्वृष्टिरिव ॥ तथाचस्मृतिः अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ ५ ॥ युगपत्परस्परवृद्ध्यनुरूपदृष्टांतोपन्यासायोक्तमेवपुनराह ॥ गुणाइति ॥ तेअब्जसरसीइवेत्युभयत्रापिप्रगृह्यत्वादसंधिः ॥ अब्जैःसरसःशैत्यसौगंध्यशोभादिगुणैर्वृद्धिरत्रविवक्षिता ॥ ६ ॥

१ इदंमूलेलभ्यतेइत्यनेनविसंवाद्यपिसर्वपुस्तकेषुदर्शनात्तथैवस्थापितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंज्ञानसदाचारयोरपिपरस्परवृद्धिहेतुतेत्याह ॥ ज्ञानमिति ॥ ७ ॥ शमेनप्रज्ञामहापुरुषतादिनाचनिपुणोयःपुरुषार्थःश्रवणादिप्रयत्नस्तत्क्रमेणज्ञानसदाचारावभ्यसेत् ॥ ८ ॥
॥९॥ विवृद्धिफलमपितयोस्तुल्यकालमेवभवतीतिसदृष्टांतमाह ॥ यथेतिद्वाभ्याम् ॥ पक्वशालिक्षेत्ररक्षिण्याःस्त्रियाःखगोत्सादनांशेव्यापारांतराकर्त्र्याअपिविततकरतालध्व
नियुक्तयागीत्याआनुषंगिकखगोत्सादेनतुल्यकालोगीतानंदःप्रवर्त्तते ॥ १० ॥ तथाज्ञानविघ्नरागमानादिनिरासांशेनिरिच्छेन अतएवाकर्त्र्यापिज्ञानसाधनश्रवणसदाचाराभ्या
॥३९॥ मनुष्ठिताभ्यांतन्मात्रकर्तृरूपिणापुंसाआनुषंगिकविघ्ननिरासेनसमंपरमपदमासाद्यते ॥ ११ ॥ यथाएवंप्रकारोयंसदाचारक्रमोमयाप्रोक्तस्तथाअधुनाउत्तरप्रकरणेज्ञानक्रम २
उपदिश्यतेइतिवक्ष्यमाणप्रतिज्ञा ॥ १२ ॥ साधनकलापोपदेशंफलकीर्त्तनेनोपसंहरति ॥ इदमित्यादिना ॥ किलेतिसांप्रदायिकार्षप्रसिद्धौ ॥ १३ ॥ बलादितिसाधनप्रभावो

ज्ञानंसत्पुरुषाचाराज्ज्ञानात्सत्पुरुषक्रमः॥ परस्परंगतौवृद्धिंज्ञानसत्पुरुषक्रमौ ॥ ७॥ शमप्रज्ञादिनिपुणपुरुषार्थक्रमेणच ॥ अभ्यसे
त्पुरुषोधीमान्ज्ञानसत्पुरुषक्रमौ ॥ ८ ॥ नयावत्सममभ्यस्तौज्ञानसत्पुरुषक्रमौ ॥ एकोपिनैतयोस्तातपुरुषस्येहसिद्ध्यति ॥ ९ ॥ य
थाकलमरक्षिण्यागीत्याविततताल्या ॥ खगोत्सादेनसहितंगीतानंदःप्रसाध्यते ॥ १० ॥ ज्ञानसत्पुरुषेहाभ्यामकर्त्र्याकर्तृरूपिणा ॥
तथापुंसानिरिच्छेनसममासाद्यतेपदम् ॥ ११ ॥ सदाचारक्रमःप्रोक्तोमयैवंरघुनंदन ॥ तथोपदिश्यतेसम्यगेवंज्ञानक्रमोधुना ॥ १२ ॥
इदंयशस्यमायुष्यंपुरुषार्थफलप्रदम् ॥ तज्ज्ञादाप्ताच्चसच्छास्त्रंश्रोतव्यंकिलधीमता ॥ १३ ॥ श्रुत्वात्वंबुद्धिनैर्मल्याद्बलाद्यास्यसितत्पद
म् ॥ यथाकतकसंश्लेषात्प्रसादंकलुषंपयः ॥ १४ ॥ विदितवेद्यमिदंहिमनोमुनेर्विवशमेवहियातिपरंपदम् ॥ यदवबुद्धमखंडितमुत्तमं
तदवबोधवशान्नजहातिहि ॥ १५ ॥ ॥ इत्यार्षेश्रीवासिष्ठमहारामायणेदेवदूतोक्तेद्वात्रिंशत्साहस्र्यांसंहितायांवाल्मीकियेमोक्षो
पायेमुमुक्षुव्यवहारप्रकरणेसदाचारनिरूपणंनामविंशतितमःसर्गः॥ २० ॥ समाप्तमिदंद्वितीयंमुमुक्षुव्यवहारप्रकरणम् ॥ २ ॥

क्तिः ॥ प्रसादंनैर्मल्यम् ॥ १४ ॥ मुनेःप्रकृतसाधनसंपत्त्यामननशीलस्यमनोविदितवेद्यंसत्तद्बलाद्विवशंपरंपदमनिच्छदपियाति ॥ नकेवलंसाधनप्राबल्यादेवैवंकिंतुवेद्यतत्त्वस्व
भावादपीत्याह ॥ यदिति ॥ अवबोधवशात् अवबोधाधीनत्वादवबोधात्मकचरमवृत्तीद्धत्वादितियावत् ॥ अवधूयाज्ञानतत्कार्यंबुद्धंजागरूकमखंडितमुत्तमंयत्पदंतन्मनोनज
हाति ॥ अज्ञानंतत्कार्यांतरैःसमंबाधतएवेत्यर्थः ॥ हीतिविद्वत्प्रसिद्धौ ॥ तथाचाहुः ॥ देहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकम् ॥ आत्मन्येवभवेद्यस्यसनेच्छन्नपिमुच्यते॥१५॥
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रेंद्रसरस्वतीपूज्यपादप्रशिष्येणश्रीमद्गंगाधरेंद्रसरस्वतीशिष्येणश्रीमदानंदबोधेंद्रसरस्वत्याख्यभिक्षुणाविरचितेश्रीवासिष्ठमहारा
मायणतात्पर्यप्रकाशेमुमुक्षुव्यवहारप्रकरणेविंशतितमःसर्गः ॥ २० ॥ ॥ समाप्तोयंमुमुक्षुव्यवहारप्रकरणप्रकाशः ॥ ॥ शुभंभूयात् ॥ ॥ ७ ॥

१ प्रसिद्ध्यतीत्यपेक्षितमितिभाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इदं योगवासिष्ठस्य मुमुक्षुव्यवहाराख्यं द्वितीयं प्रकरणं मुंबय्याख्यराजधान्यां गणपतकृष्णाजीमुद्रायंत्रालये मुद्रितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति योगवासिष्ठे द्वितीयं मुमुक्षुव्यवहारप्रकरणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ योगवासिष्ठे तृतीयमुत्पत्तिप्रकरणं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवद्वासिष्ठे प्रः २६ [illegible] २६ [illegible] प्रकरणसमाप्ति

॥ श्रीगणेशायनमः ॥ ॥ सत्यंज्ञानमनंतमेकमजरंनित्यंविभुंशाश्वतंप्रत्यग्ब्रह्मरसायनंसुखघनंपूर्णंपरंपावनम् ॥ स्वात्मज्योतिरनादिमध्यनिधनंमायाविलासैर्मुहुर्विश्वाकारम
पास्तमायमभयंवंदेविशुद्धंपदम् ॥ १ ॥ ज्ञानादेवात्मनोमोक्षोनतुकर्मसमाधिभिः ॥ अज्ञातोसौस्वसदृश्यंसृजत्येवेतिकीर्त्यते ॥ २ ॥ अथयथोक्तसाधनसंपन्नस्याधिकारिण
स्तावद्विचारयेत्प्राज्ञोयावद्विश्रांतिमात्मनि ॥ संप्रयात्यपुनर्नाशांशांतितुर्यपदाभिधामितियावत्तत्वापरोक्षावधारणंकर्त्तव्यतयाविहितंविचारप्रकारंप्रकरणद्वयोपवर्णितसमस्त
साधनसंपन्नायाधिकारिमूर्द्धन्यायश्रीरामाय अथोपदिश्यतेसम्यगेवंज्ञानक्रमोधुनेतिप्रतिज्ञापूर्वकमुत्तरग्रंथेनविस्तरेणवर्णयितुंप्रवृत्तोभगवान्श्रीवसिष्ठःसृष्टिप्रकारोपवर्णनमु
खेनब्रह्माद्वैतंप्रतिपादयितुंप्रवृत्तस्योत्पत्तिप्रकरणस्यसुखप्रबोधायप्रथमंसंक्षिप्यतात्पर्यंदिदर्शयिषुस्तद्धेदंतर्ह्यव्याकृतमासीदित्यादिसृष्टिप्रदर्शकश्रौतसंदर्भस्याहंब्रह्मास्मीत्यादिम
हावाक्यार्थबोधइवात्रापिदृष्टांतस्यैकदेशेनबोध्यबोधोदयेसतिउपादेयतयात्राप्योमहावाक्यार्थनिर्णयइतिप्रागुक्तरीत्यापर्यवसानमितिदर्शयति ॥ वाग्भाभिरित्यादिना ॥ ब्रह्मै
ववाग्भाभिर्महावाक्यजाखंडाकारवृत्तीद्धस्वात्मप्रकाशैर्ब्रह्मवित्स्वतत्त्वंसाक्षात्कृतवत्सद्भातिपारमार्थिकनित्यमुक्तपूर्णस्वरूपेणप्रकाशते ॥ स्वमुक्तौवाक्यजन्यवृत्त्यतिरिक्तंना
पेक्षतइतिभावः ॥ तत्कुतः ॥ यतोयदिदंदेहेंद्रियादिवियदादिचदृश्यंबंधरूपमात्मनिप्रत्यगात्मभूतेब्रह्मण्येवस्वप्नइवाविर्भूतंभाति ॥ नहिस्वाप्नबंधनिवृत्तिःप्रबोधातिरिक्तंसाधनम
पेक्षतइतिभावः ॥ तथाचश्रुतौ ॥ यद्ब्रह्मविद्ययाभविष्यंतोमनुष्यामन्यंतेकिमुतद्ब्रह्मावेद्यंस्यात्तत्सर्वमभवदित्याक्षिप्योत्तरमुक्तंब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मी
तितस्मात्तत्सर्वमभवदिति ॥ सर्वंपूर्णमसंसारिभूमानंदैकस्वभावमित्यर्थः ॥ अस्यांश्रुतौब्रह्मस्वयंस्वतत्त्वबोधान्मुक्तबंधंपूर्णमभूदित्युक्तेस्तदेवप्राक्स्वतत्त्वप्रतिबोधात्स्वप्नइवद्वैतप्रि

श्रीगणेशायनमः ॥ ॥ वाग्भाभिर्ब्रह्मविद्ब्रह्मभातिस्वप्नइवात्मनि ॥ यदिदंतत्स्वशब्दोत्थैर्योयद्वेत्तिसवेत्तितत् ॥ १ ॥

याप्रियदर्शनपरिच्छेदलक्षणंबंधमनुभवतीवेतिबंधस्यमिथ्यात्वंप्रतीचएवब्रह्मत्वंचस्फुटतरमवगम्यते ॥ तत्रयथातदुपपादकार्थवादभूतानांतन्नामरूपाभ्यामेवव्याक्रियत सए
षइहप्रविष्टआनखाग्रेभ्यइत्यादिप्राक्तनसृष्टिप्रवेशादिवाक्यानांजगज्जीवभावयोरज्ञातब्रह्ममात्रोपादानकयोरुत्पत्त्यादिकालत्रयेपिब्रह्मव्यतिरिक्तसत्ताऽसंभवान्मिथ्यात्वमेवे
त्युपपादनेनस्वप्रधानमहावाक्यतात्पर्यविषयब्रह्माद्वैतपर्यवसानंतद्वदत्रापिबोध्यमितिभावः ॥ भवतुतथाकिंनस्तेनेतितत्राह ॥ तदित्यादिना ॥ तद्ब्रह्मइदानींतनोऽस्मदादिरपियो
ऽधिकारीस्वशब्दोत्थैःश्रवणाद्युपायैर्यत्यादृशंतत्त्वतस्तथावेत्तिअहमेवब्रह्मेतिसाक्षात्करोतिसतत्प्रागुक्तंपूर्णनित्यमुक्तब्रह्मभावरूपंमोक्षफलमपिवेत्तिजीवन्नेवसाक्षादनुभवति
तथाचश्रुतिः ॥ तद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्तथर्षीणांतथामनुष्याणांतद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेहंमनुरभवंसूर्यश्चेतीति ॥ अथवायन्मुमुक्षूणामज्ञातत्त्वाज्जि
ज्ञासितमिदंसर्वजनानामात्मत्वेनप्रत्यक्षंब्रह्मवचनंवाक्वाचकशब्दप्रपंचोभातीतिभास्तत्प्रकाश्यार्थप्रपंचश्चताभिस्त्रयंवाइदंनामरूपंकर्मेतिश्रुतिदर्शितद्वैतप्रपंचभावैरविविक्तत
याब्रह्मवित्स्वंपश्यत्सदात्मनिस्वस्मिन्स्वप्नइववधबंधशोकमोहादिदुःखिस्वभावंभाति ॥ तत्तथाभातमपिब्रह्मयोधिकारीस्वशब्दोत्थैःस्वात्ममात्रपरिशेषकनेतिनेतीत्यादिवाक्य
कृतैर्द्वैतनिषेधैर्यत्यादृशंपरिशिष्टंवेत्तिसएवतद्ब्रह्मतत्त्वतोवेत्तिनत्वध्यारोपितनामरूपादिसंवलितदर्शीत्यर्थः ॥ अथवावागितिवचनादिक्रियाशक्तिप्रधानानिकर्मेंद्रियाण्युपल
क्ष्यंते ॥ भाइतिप्रकाशप्रधानानिज्ञानेंद्रियाणि ॥ तैर्द्वारैर्योब्रह्मविद्वस्तुतोब्रह्मापिपश्यतिसब्रह्मसन्नप्यात्मनिस्वप्नइवाब्रह्मभूतोन्यथाभाति ॥ बहिर्मुखस्यतत्त्वदर्शनासिद्धेः ॥ प
रांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्नित्यादिश्रुतेः ॥ यस्त्वधिकारीयत्प्रसिद्धमिदंप्रपंचरूपमपिस्वशब्दोत्थैर्ब्रह्मैवेदंसर्वंआत्मैवेदंसर्वमित्यादिपरमार्थपरवाक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्यबोधैर्यत्सर्वाधिष्ठानसन्मात्रंवेत्तिसव्यावृत्तबाह्येंद्रियप्रसरःप्रत्यङ्मुखस्तद्ब्रह्मवेत्ति ॥ तथाचबाह्यदृष्ट्याब्रह्मापिदृष्टमनर्थएवप्रामाणिकप्रत्यग्दृष्ट्यातुजगदपिदृष्टंपुरुषार्थाये
तिस्टष्टिप्रपंचनव्याजेनप्रत्यग्दृष्टिव्युत्पादनेऽस्यप्रकरणस्यतात्पर्यमित्यर्थः ॥ अथवावक्ष्यमाणाभिरुपदेशवाग्भिर्भाभिर्दृष्टांताख्यानोपपत्तिप्रकाशैश्चैतदुच्यतेइतिशेषः ॥ यद्ब्र
॥ १ ॥ ह्मविदेवपरमार्थतोब्रह्मनब्रह्मनामकमर्थांतरंव्यवहितविप्रकृष्टदेशेस्थात्मनोन्यदेवास्तीतिभ्रमितव्यमिति ॥ यदिदंदृश्यप्रपंचरूपंतत्स्वप्नइवात्मन्येवाध्यस्तंभातिनतदपिपरमार्थस
त्यमन्यदस्तीतिभ्रमितव्यमिति ॥ तत्रचोक्तब्रह्मभावजगद्भावद्वयेयोविवेक्यविवेकीवायदेवस्वशब्दोत्थैर्ब्राह्मणोहंक्षत्रियोहंदेवदत्तोहमितिस्वाभाविकलौकिकप्रसिद्धमिथ्यास्व
शब्दजन्यैर्वाब्रह्मैवाहंचिदेवाहमित्यादिशास्त्रीयसत्यार्थस्वशब्दजन्यैर्वाप्रत्ययैर्यद्यादृशंस्वरूपंस्वस्यवेत्तिसतदेववेत्तिपुनःपुनरनुभवति ॥ संसार्यात्मदर्शिनःसंसारएवफलतिब्र
ह्मात्मदर्शिनस्तुब्रह्मभावएवेतितद्दर्शिनैवभाव्यमितिभावः ॥ अथवाननुप्रागुपदिष्टमेवब्रह्मयथास्थितंब्रह्मतत्त्वंसत्तानियतिरुच्यतेअस्यनंतविलासात्मासर्वगःसर्वसंश्रयइत्यादि
नातत्रोपदिष्टेब्रह्मणिशमाद्यभावाच्चित्तास्थैर्येप्राप्तेशमादिसाधनानितद्दृढीकारायपौरुषप्रयत्नश्चोपदिष्टइतिनोपदेष्टव्यांतरमवशिष्यते ॥ यदिसकृदुपदिष्टवाक्यार्थप्रकाशैर्ब्रह्म
नभातितर्हिशतकृत्वोप्युपदिश्यमानंतथैवेतिकिमस्यैवपुनःपुनरुपदेशेनपिष्टपेषणप्रायेणेत्याशंक्याह ॥ वाग्भाभिरिति ॥ योब्रह्मवित्ब्रह्मवेत्ताश्रोतावाग्भाभिःसकृदुपदेशवा
क्यार्थप्रकाशैर्हेतुभिर्यद्ब्रह्मस्वयमेवेतिभातिप्रथतेतत्स्वप्नइवबाधितप्रायंनदृढतरंभवतिनिद्रावशोऽनिरूढनाक्षत्रादिस्वनामघटितोपांशुप्रबोधकवाक्यमिवनसम्यगवधारयतीति
वार्थः ॥ सएवहेदेवदत्तहेयज्ञदत्तेत्यादिचिरव्यवहारनिरूढस्वनामसंबोधनोत्थैरिवबहुकालाभ्यस्तश्रवणाद्यभ्यासदृढपरिचितमहावाक्योत्थप्रत्ययैर्यद्वेत्तिसएवतद्वेत्ति ॥ तादृ
शासंदिग्धस्वात्मबोधएवाविद्योच्छेदहेतुरित्यर्थः ॥ तथाचतादृशदृढनिश्चयापरोक्षानुभवायपुनःपुनरुपपत्तिभिरुपदेशोयावत्फलोदयमभ्यसनीयइत्युत्तरग्रंथोपपत्तिरितिभा
वः ॥ तथाचसूत्रमावृत्तिरसकृदुपदेशादिति ॥ अथवायथाअब्रह्मविज्ञाग्रद्वयादिचिरवासनावासितःस्वप्नेअविद्ययाकुत्सनभर्त्सनभीषणादिवाग्भिर्भयकंपपलायनगर्त्तपतना
दिप्रतिभाभिश्चोपलक्षितोदुःखीभाति यथावाउपासकोजाग्रद्देवभाववासनावासितःस्वप्नेदेवइवराजेवस्तुतिप्रशंसनादिवाग्भिर्जक्षणक्रीडनविमानारोहनभोविहारादिप्रतिभा
भिश्चोपलक्षितोभातितथाब्रह्मविदपिचिराभ्यस्तश्रवणादिवासितःस्वप्नेब्रह्मैवेदंसर्वमात्मैवेदंसर्वंअहमेवेदंसर्वोस्मीतिपरमार्थप्रतिपादकवाग्भिर्वास्तवब्रह्मभावप्रतिभाभिश्चभाति॥
तथाफलावस्थायामपिस्वप्नवत्परलोकफलस्यापिदृढाभ्यस्तवासनानुसारित्वस्यलीलोपाख्यानादौव्युत्पादयिष्यमाणत्वात् ॥ नन्वत्रकिंप्रमाणंतत्राह ॥ यदिति ॥ यदिदंस्वप्न
वत्परलोकस्यापिवासनानुसारित्वंतत्स्वयमेवशब्दयंतिबोधयंतिनतुमूलसापेक्षतयेतिस्वशब्दाःश्रुतयस्तदुत्थैःप्रत्ययैःस्वतःप्रमाणभूतैरध्यवसीयते ॥ अथयत्रैनंघ्नंतीवजिनंतीवह
स्तीवविच्छादयतिगर्त्तमिवपततियदेवजाग्रद्भयंपश्यतितदत्राविद्ययामन्यतेऽथोयत्रदेवइवराजेवाहमेवेदंसर्वोस्मीतिमन्यतेसोस्यपरमोलोकः ॥ तद्यइहव्याघ्रोवासिंहोवायद्यद्भ
वंतितदाभवंति ॥ यच्चित्तस्तन्मयोभवतिगुह्यमेतत्सनातनंमनोकृतेंनायात्यस्मिनशरीरेइत्यादिश्रुतिभ्यः ॥ यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरम् ॥ तंतमेवैतिकौंतेयसदातद्भावभा
वितः ॥ तस्मात्सर्वेषुकालेषुमामनुस्मरेत्यादिस्मृतिभ्यश्चेत्यर्थः ॥ तथाचाभ्यासदशायांयोयद्वेत्तिसंसार्यात्मानंब्रह्मात्मभावंवासफलावस्थायामपितद्वेत्त्यनुभवतीतिनिरंतरंब्रह्मा
नुभववासनैवदृढीकार्येत्युत्पत्तिप्रकरणतात्पर्यार्थइतिभावः ॥ अथवावाग्भिःश्रुतिस्मृत्यादिशब्दप्रमाणैर्भाभिर्विद्वदनुभवप्रकाशैश्चब्रह्मविद्ब्रह्मैव ॥ यदिदमस्याज्ञानदशाप्रसिद्ध
मब्रह्मत्वमवस्थात्रयंचतदात्मनिस्वप्नइवभाति ॥ तस्यत्रयआवसथास्त्रयःस्वप्नाइतिश्रुतेः ॥ तस्मात्संभावनामात्रःसंसारःप्रत्यगात्मनि ॥ उक्तेर्थेसंशयश्चेत्स्यात्प्रत्यग्दृष्ट्यानिरी ॥ १ ॥

Nepal Sanskrit University, Balmeekl Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्यतामितिवार्त्तिकादिप्रसिद्धविद्वदनुभवाच्च ॥ तदुक्तार्थद्वयंबोऽधिकारीस्वःस्वीयःकरतलामलकवदपरोक्षीकृतात्मतत्त्वउपदेशकुशलआचार्यस्तस्योपदेशशब्दोत्थैरनुभवानुकूलैरूहापोहाद्युपायैर्यथादृशंवेत्तिसएवस्वानुभवतोऽपितद्वेत्ति ॥ आचार्यवान्पुरुषोवेद ॥ आचार्याद्धैव विद्याविदितासाधिष्ठंप्रापत् ॥ आश्चर्योज्ञाताकुशलानुशिष्टइत्यादिश्रुतेरित्यर्थः ॥ अथवाब्रह्मविदामनुभवसिद्धंब्रह्मव्यवहारेवाग्भाभिस्तुल्यंभातियथावाकूघटादिशब्दःसंकेतात्स्वानुरंजितमर्थंप्रकाशयंतीतद्भावापन्नेवस्वयंप्रथते यथाभाआलोकोऽपितथाप्रथते एवंब्रह्मापिभास्यानुरंजितंतदविविक्तस्वप्रकाशंप्रथतइत्यर्थः ॥ नन्वसंगाद्वितीयस्यकथंपरानुरंजनेनप्रथनंतत्राह ॥ यदिति ॥ यद्यस्मात्कारणादात्मन्यध्यासेनस्वमइवइदंतनोतीतीदंतत्सर्वप्रपंचविवर्तोपादानमित्यर्थः ॥ तथाचकारणस्यकार्यानुरंजनंयुक्तमेव कार्यमिथ्यात्वाच्चनासंगाद्वितीयताविरोधइतिभावः ॥ तत्तथाभूतंब्रह्मस्वशब्दोत्थैरनुगतस्वयंरूपमात्रपरामर्शात्मादिशब्दनिष्कृष्टबोधैर्योवेत्तिसतदसंगोदासीनस्वप्रकाशचिन्मात्रस्वभावंवेत्तिनविशेषनामरूपसंवलितदर्शीत्यर्थः ॥ अथवाब्रह्मस्वप्रकाशत्वाद्ब्रह्मवित्स्वप्रथायामन्यनिरपेक्षमपिवाग्भाभिर्वागेवास्यज्योतिर्भवतिआदित्यएवास्यज्योतिर्भवतीतिश्रुत्युक्तैर्ज्योतिरंतरैर्व्यामोहात्स्वमइवात्मनिज्योतिरंतरासंकीर्णदशायामेवसमाध्यादौनिष्कृष्टंभातिनसंसारजागरे ॥ श्रुत्यातत्रैवात्मैवास्यज्योतिर्भवत्यात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेइतिस्वयंज्योतिष्ट्वस्फुटीभावप्रदर्शनात् ॥ इत्थंस्वमेव्युत्पादितस्यस्वयंज्योतिरात्मनोजागरेप्यनुभवेउपायमाह ॥ यदिति ॥ इदमितितदितिस्वमितिचशब्दैरुत्थैराधिभौतिकाधिदैविकाध्यात्मिकविषयप्रत्ययैर्भोक्तारंप्रतिएतिआ

न्यायेनानेनलोकेऽस्मिन्सर्गेब्रह्मांबरेसति॥ किमिदंकस्यकुत्रेतिचोद्यमूचेनिराकृतम्॥ २॥

गच्छतीतियत्तथाविधंयद्विषयजातंतद्योवेत्तिसतद्ब्रह्मैवसन्वेत्तिनतुकल्पितोपाध्यात्मासन्वेत्ति ॥ जडात्मनोवेदनशक्त्यभावान्नान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतेतिद्रष्टृश्रोत्रंतरप्रतिषेधाच्चेतिभावः ॥ तथाचबहिरर्थप्रकाशेज्योतिरंतरसंकीर्णत्वेऽपिनांतरुपनीतार्थप्रथायांतत्संकरइतिजागरेपिस्वयंज्योतिरात्माविवेकिभिःसुबोधइतिसदैवतद्विमर्शपरेणभाव्यमित्याशयः ॥ अथवायदिदमिहलोकरूपंकर्मस्थानंतत्स्वर्गादिरूपंतत्फलस्थानंस्वंस्वयंतत्फलभोक्ताचेतित्रितयप्रतिपादककर्मकांडशब्दोत्थैःप्रत्ययैर्यद्भातियच्चोपनिषद्वाग्भिर्मननादिप्रकाशैश्चाहंब्रह्मविद्ब्रह्मेतिवाभातितत्सर्वंस्वमइवाप्रबुद्धएवात्मनिभातिनभूमात्मनि ॥ यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिश्रुतेः ॥ सर्वाणिचशास्त्राणिविधिनिषेधमोक्षपराण्यविद्यावद्विषयत्वंनातिवर्त्तंतइतिभाष्याच्च ॥ तदिदंरहस्यंयोगस्तंद्वेदतद्वेदेतिश्रुतिविडंबयन्नाह ॥ योयद्वेत्तीति ॥ विद्वदनुभवैकसिद्धमिदमित्यर्थः ॥ दुरूहस्यास्यपद्यस्यसुधीभिरपिदुर्गमाः ॥ इमेगुरुप्रसादेनदशार्थाःसंप्रकाशिताः ॥ १ ॥ इत्थंप्रकरणार्थसंक्षेपोपदर्शनमुखेनावांतरविषयेप्रदर्शितेप्रपंचमिथ्यात्वज्ञानलक्षणावांतरप्रयोजनानुबंधीप्राक्तनचोद्यपरिहारोप्यर्थात्सिद्धइत्याह ॥ न्यायेनेति ॥ अनेनसंक्षेपतोदर्शितेनविस्तरतोवक्ष्यमाणेनाध्यस्तस्याधिष्ठानात्पृथगसत्वन्यायेनाध्यारोपापवादन्यायेनवाब्रह्मांबरेऽध्यासक्रमेणास्मिन्परिदृश्यमानेसर्गेप्रपंचरूपेसतिसर्गेवाऽपवादक्रमेणलोकेवलोक्यमानेब्रह्मांबरेब्रह्माकाशमात्रेसति तदेतद्भगवन्ब्रूहिकिमिदंपरिणश्यति ॥ किमिदंजायतेभूयःकिमिदंपरिवर्द्धतइत्यादिनाभवान्प्राग्यत्सतोनाशाद्यसंभवचोद्यमूचेतत्स्वतोनिराकृतमेवोचे ॥ सतोनाशाद्यनभ्युपगमान्नश्वरस्यसत्त्वानभ्युपगमाच्चोद्यविषयाभावादित्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमवांतरविषयफलेप्रदर्श्यविस्तरोक्तिंप्रतिजानीते ॥ अहमिति ॥ इदंसंक्षिप्यदर्शितमर्थजातंवच्मिविस्तरेणेत्यर्थः ॥ प्रमाणतोऽनुभवतश्चयथाज्ञानं परीक्षणतोयथावस्तु साधनोपपत्तिनिरूपणतोयथाक्रमं श्रोतृबुद्धिपरिपाकानुसारतश्चयथास्वभावम् ॥ सर्वत्रपदार्थानतिवृत्तावव्ययीभावः ॥ अथवायथावस्त्वितिसर्गपूर्वावस्थोक्तिस्तदासर्वजगतः सन्मात्ररूपत्वात् ॥ यथाज्ञानमितिसर्गारंभकलनोन्मुखत्वोक्तिः ॥ यथाक्रममितिस्थूलीभावेनसृष्टिक्रमोक्तिः ॥ यथास्वभावमितिजगदारोपदशायामप्यविकृतस्वभावोक्तिः॥ सर्वमितिज्ञानप्राप्यपूर्णभावोक्तिः ॥ तस्मात्तत्सर्वमभवदितिश्रुतौपूर्णभावेसर्वशब्ददर्शनात् ॥ बुधेत्युत्तमाधिकारस्मारणंश्रवणादरोत्पादनार्थम् ॥ ३ ॥ स्वप्नवदात्मनीतियदुक्तंतस्यतात्पर्यंविशदयति ॥ स्वप्नवदिति ॥ चिन्नभोदेहविज्जीवभावापन्नंसद्यज्जगत्पश्यतितत्स्वप्नवत्पश्यति ॥ यथास्वप्नदर्शनंविषयबाधेऽपिनबाध्यतेतद्वज्जगद्दर्शनमपीति ॥ दृशेःसत्यत्वेतात्पर्यमितिभावः ॥ एवमहमितिप्रत्यगात्मतादात्म्येनत्वमितिपराग्भावेनचभासमानंप्रपंचरूपमपिस्वप्नसंसारदृष्टांतेदार्ष्टांतिकत्वेनसमन्वितंसम्यक्संबद्धम् ॥तस्यमिथ्यात्वेतात्पर्यमितिभावः ॥ अथवाननुप्रमाणजस्यकथमप्रमाणजंस्वप्नदर्शनंदृष्टांतस्तत्राह ॥ देहविदिति ॥ यद्यपिबाह्यंजगत्प्रमाणैःपश्यतितथापिकार्यकरणसंघातात्मकव्यष्टिसमष्टि

अहंतावद्यथाज्ञानंयथावस्तुयथाक्रमम् ॥ यथास्वभावंतत्सर्वंवच्मीदंश्रूयतांबुध ॥ ३ ॥ स्वप्नवत्पश्यतिजगच्चिन्नभोदेहवित्स्वयम् ॥ स्वप्नसंसारदृष्टांतएवाहंत्वंसमन्वितम् ॥ ४ ॥ मुमुक्षुव्यवहारोक्तिमयात्प्रकरणात्परम् ॥ अथोत्पत्तिप्रकरणंमयेदंपरिकथ्यते ॥ ५ ॥ बंधोयंदृश्यसद्भावाद्दृश्याभावेनबंधनम् ॥ नसंभवतिदृश्यंतुयथेदंतच्छृणुक्रमात् ॥ ६ ॥ उत्पद्यतेयोजगतिसएवकिलवर्द्धते ॥ सएवमोक्षमाप्नोतिस्वर्गंवानरकंचवा ॥ ७ ॥

देहभासकःस्वयमेवनबाह्यप्रमाणसापेक्षइत्यर्थः ॥ ननुरूपादिमत्वाद्देहोऽपिचक्षुरादिनैवभासतांतत्राह ॥ अहंत्वमिति ॥ यदिचक्षुरादिनाभासेततर्हीदमित्येवभासेत ॥ तद्विषयेसर्वत्रेदंत्वदर्शनात् ॥ अहंत्वंतुतत्रभासमानंस्वप्नसंसारदृष्टांतएवसमन्वितंयुक्तमित्यर्थः॥ अथवाअस्तुदेहस्यस्वप्नसाम्यंतथापिकथंबाह्यनामरूपात्मकजगन्मात्रस्यतथात्वंतत्राह ॥ अहंत्वंसमन्वितमिति ॥ नबाह्यरूपादितावन्मात्रंनिष्कृष्टंभासतेकिंतुरूपमहंपश्यामीतित्रिपुटीभूतमहमर्थसंवलितत्वमर्थरूपंतत्तुसाक्षिमात्रगम्यत्वात्स्वप्नसंसारदृष्टांतेदार्ष्टांतिकंभवत्येवेतिशेषः ॥ नह्यध्यस्तगोचरज्ञानेसत्यार्थोविषयोभवति ॥ अध्यस्तमेवहिपरिस्फुरतिभ्रमेषुनान्यत्कथंचनपरिस्फुरतिभ्रमेष्विति सिद्धांताद्बाह्यप्रमाणानांव्यवहारेष्वर्थाविसंवादमात्रेणापिव्यावहारिकप्रामाण्याविघातादितिभावः ॥४॥ अथेत्यानंतर्येणहेतुतासंगतिर्दर्शिता ॥५॥ ननुबंधनिरासोपायार्थिनोममकिमनेनदृश्यमिथ्यात्वपरोत्पत्तिप्रकरणश्रवणेनेत्यत्राह ॥ बंधइति ॥६ ॥ ननुनदृश्यासंभवमात्रेणबंधनिवृत्तिः ॥ उत्पत्तिवृद्धिनाशस्वर्गनरकादेर्बंधस्यदृष्टधर्मताप्रत्ययेनात्मकोट्यंतःपातेनदृश्यनिवृत्तावपितदनिवृत्तेरित्याशंक्याह ॥ उत्पद्यतइतिद्वाभ्याम् ॥ सत्यमुत्पद्यतेयःसएववृद्ध्यपक्षयस्वर्गनरकादीन्बंधमोक्षौचानुभवेन्नत्वात्माउत्पत्त्यादिस्वभावः॥ स्वस्वरूपानवबोधेनैवतस्योत्पत्त्यादिभ्रमविभावनादित्यर्थः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतःस्वानवबोधादेवबंधोऽतःस्वावबोधार्थंतद्दृश्यासंभवंतावद्वक्ष्यमाणप्रकारंकथयामि ॥यथाउत्पत्त्यादिसंबंधःसंसृतौदृश्यसंसारकोटौयेतिनात्मकोटौ॥आत्मातुदृश्योत्पत्तेःपूर्वं यथातथैवनाणुमात्रमपिविक्रियतइत्यर्थः॥ तथाचश्रुतिः॥ ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः॥ नमुमुक्षुर्नवैमुक्तिरित्येषापरमार्थतेति ॥ ८॥ अयमेवास्यप्रकरणस्यार्थइति वक्ष्यमाणविस्तरोपोद्घाततयास्मिन्सर्गेसंक्षेपतःप्रपंच्यतइत्याह ॥ इदमिति ॥ अयंचासौप्रकरणार्थश्चेतिकर्मधारयः ॥ प्रकरणार्थमुत्पत्तिप्रकरणोपोद्घातायइदमेतत्सर्गप्रतिपाद्य मितिवा॥ ९॥पूर्वमेवहियोयथेत्युक्तार्थस्योपपादनायप्रलयावस्थापरिशिष्टात्मस्वरूपंवक्तुंपूर्वसर्गस्यकारणेलयप्रकारंदृष्टांतेनाह॥ यदिदमिति॥ सांख्यनैय्यायिकाद्यभिमतप्रधा नपरमाण्वादिपरिशेषात्मकप्रलयवैधर्म्यार्थंदृष्टांतोक्तिः ॥१०॥ स्तिमितमक्रियममूर्त्तत्वात् ॥ गंभीरमपरिच्छेद्यत्वात् ॥ अरूपत्वान्नतेजः ॥ भारूपत्वान्नतमः ॥ निर्द्धर्मकत्वाद नाख्यम् ॥ अज्ञानावृतत्वादनभिव्यक्तंप्रपंचसंस्काराधारत्वाद्वाअनभिव्यक्तम्॥११॥ उत्कृष्टप्रमाणश्रुतिगम्यत्वादृतम् ॥ यच्चाप्नोतियदादत्तेयच्चात्तिविषयानिह ॥ यच्चास्यसं ततोभावस्तस्मादात्मेतिशब्द्यतइतिव्यासोक्तरीत्याआत्मा ॥ सत्यतोत्कर्षावधित्वात्परम् ॥ बृहत्त्वाज्जगदाकारबृंहकत्वाद्वाब्रह्म ॥ यथाशास्त्रंविद्वद्भिरनुभूयमानंसत्यम् ॥ व्यवहा

अतस्तेस्वावबोधार्थंतत्तावत्कथयाम्यहम्॥ उत्पत्तिःसंसृतावेतिपूर्वमेवहियोयथा॥ ८ ॥इदंप्रकरणार्थंत्वंसंक्षेपाच्छृणुराघव ॥ ततःसं कथयिष्यामिविस्तरंतेयथेप्सितम् ॥ ९ ॥ यदिदंदृश्यतेसर्वंजगत्स्थावरजंगमम् ॥ तत्सुषुप्ताविवस्वप्नःकल्पांतेप्रविनश्यति ॥ १० ॥ तत स्तिमितगंभीरंनतेजोनतमस्ततम् ॥ अनाख्यमनभिव्यक्तंसत्किंचिदवशिष्यते ॥ ११ ॥ ऋतमात्मापरंब्रह्मसत्यमित्यादिकाबुधैः॥ कल्पि ताव्यवहारार्थंतस्यसंज्ञामहात्मनः॥ १२॥ सतथाभूतएवात्मास्वयमन्यइवोल्लसन्॥ जीवतामुपयातीवभाविनाम्नाकदर्थिताम्॥ १३॥ ततःसजीवशब्दार्थकलनाकुलतांगतः॥ मनोभवतिभूतात्माममनानान्मंथरीभवन्॥ १४॥ मनःसंपद्यतेतेनमहतःपरमात्मनः॥ सुस्थिरा दस्थिराकारस्तरंगइववारिधेः॥ १५॥ तत्स्वयंस्वैरमेवाशुसंकल्पयतिनित्यशः॥ तेनेत्थमिंद्रजालश्रीर्विततेयंवितन्यते॥ १६॥

रउपदेश्योपदेशस्तदर्थम् ॥ १२ ॥ सर्गादौतस्यानृतंसमष्टिजीवभावमाह ॥ सइति ॥ तथाभूतश्चित्स्वभावेनस्थितएवमोहादन्योजडआकाशादिक्रमोद्भूतलिंगसमष्ट्यात्मा तदनुप्रवेशात्तदभिमानेनसइवोल्लसंस्तदंतर्गतप्राणधारणोपाधिनादेहनिष्पत्त्युत्तरभाविवागभिव्यक्त्यधीनत्वाद्भाविनाजीवनाम्नाकदर्थितांकुत्सितार्थत्वेनसंपादितांजीवतांसेतीव भ्रांत्या ॥ वस्तुतस्तुनैत्येवेत्यर्थः ॥ १३ ॥ इत्थंज्ञानशक्तिमात्रसाध्यंसर्गमुक्त्वाक्रियाशक्तिसहकृततत्साध्यंतमाह ॥ ततइति ॥ जीवशब्दार्थःक्रियाशक्तिप्रधानप्राणधृतिस्तत्क लनेनआकुलतांचंचलताम् ॥ भूतात्माभौतिकलिंगात्मा ॥ संकल्पविकल्पमननान्मंथरीभवन्जाड्येनमंदीभवन् ॥ १४ ॥ तेनमनोभावेन ॥ महतःपरमात्मनइतिल्यब्लोपेपंच म्यौ ॥ तादृशपरमात्मभावंविस्मृत्येत्यर्थः ॥ मनःसंपद्यतेमनोधर्मसंकल्पादीनात्मनइतिमन्यते ॥ १५॥ तदेवंसमष्टिमनोभावमापन्नंहिरण्यगर्भाख्यंब्रह्मस्वयमन्येनाबोधितमपि पूर्ववासनानुरोधाद्विराड्भावंभुवनादिभावंतत्रचतुर्विधभूतग्रामभावमितिनित्यंस्वैरमेवसंकल्पयतीत्यर्थः ॥ तेनसत्यसंकल्पेन ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थमध्यारोपसहस्रेणापिनाधिष्ठानस्यपारमार्थिकस्थितिभंगइतिदर्शयितुंदृष्टांतमाह ॥ यथेति ॥ हेमकटकरूपात्कांचनात्कटकशब्दार्थोयथापृथक्त्वार्होनेत्यन्वयः ॥ परेब्र
ह्मणिप्रतिभाताजगच्छब्दार्थतापिततःपृथक्त्वार्हानेत्यर्थः ॥ १७ ॥ द्वयोःपृथक्त्वानर्हत्वेनैकसत्ताकतासिद्धासाचानागंतुकब्रह्मभावेस्वतोजगद्भावेतुतदधीनानस्वतइत्याह ॥ ब्रह्म
ण्येवेति ॥ इदंजगत्अनंतात्मपरित्यक्तपरिच्छेदस्वभावंब्रह्मस्वभावएवास्तिजगच्छब्दकार्थेअंतवदात्मस्वभावेतुनास्तिकटकात्मतायथाहेमस्वभावेऽस्तिनकटकस्वभावेतद्वत्
॥ १८ ॥ यदिस्वतोनास्तिकथंसतीवभातितत्राह ॥ सतीति ॥ तापोमरुमरीचिस्तत्कल्पितनद्यालहरीवजागतीइंद्रजालश्रीरसत्यपिसतीवप्रवितन्यतइत्यन्वयः ॥ १९ ॥ तस्या
असत्वंतुआविद्यकत्वेनाविद्यात्मकत्वादित्यभिप्रेत्यतदनुरूपनामभिरविद्यांदर्शयति ॥ अविद्येति ॥ विद्यापोह्यत्वादविद्या ॥ ऊर्ध्वाधस्तिर्यक्संसरणहेतुत्वात्संसृतिः ॥ अस्वातं
त्र्यप्रयोजकत्वाद्बंधः ॥ मिथ्यात्वान्माया ॥ भ्रमहेतुत्वान्मोहः ॥ दुस्तरत्वान्महत् ॥ स्वरूपावरकत्वात्तमइत्यादीनिनामानि ॥ २० ॥ २१॥ ज्ञानेनबाधितुंप्राप्तुंचयोग्यंबंधमो

यथाकटकशब्दार्थःपृथक्त्वार्होनकांचनात् ॥ नहेमकटकात्तद्वज्जगच्छब्दार्थतापरे॥१७॥ब्रह्मण्येवास्त्यनंतात्मयथास्थितमिदंजगत् ॥ न
जगच्छब्दकार्थेस्तिहेम्नीवकटकात्मता ॥ १८॥ सतीवाप्यसतीतापनद्येवलहरीचला ॥ मनसेंद्रजालश्रीर्जागतीप्रवितन्यते॥१९॥अवि
द्यासंसृतिर्बंधोमायामोहोमहत्तमः॥ कल्पितानीतिनामानियस्याःसकलवेदिभिः ॥२०॥ बंधस्यतावद्रूपंत्वंकथ्यमानमिदंशृणु ॥ ततः
स्वरूपंमोक्षस्यज्ञास्यसींदुनिभानन ॥ २१ ॥ द्रष्टुर्दृश्यस्यसत्तांगबंधइत्यभिधीयते ॥ द्रष्टादृश्यबलाद्बद्धोदृश्याभावेविमुच्यते ॥ २२ ॥ ज
गत्त्वमहमित्यादिर्मिथ्यात्मादृश्यमुच्यते ॥ यावदेतत्संभवतितावन्मोक्षोनविद्यते ॥ २३ ॥ नेदंनेदमितिव्यर्थप्रलापैर्नोपशाम्यति ॥ संक
ल्पजनकैर्दृश्यव्याधिःप्रत्युतवर्द्धते॥२४॥ नचतर्कभरक्षोदैर्नतीर्थनियमादिभिः ॥ सतोदृश्यस्यजगतोयस्मादेतिविचारकाः ॥२५॥ जग
दृश्यंतुयद्यस्तिनशाम्यत्येवकस्यचित् ॥ नासतोविद्यतेभावोनाभावोविद्यतेसतः॥२६॥ अचेत्यचित्स्वरूपात्मायत्रयत्रैवतिष्ठति ॥ द्रष्टा
तत्रास्यदृश्यश्रीःसमुदेत्यप्यणूदरे ॥ २७॥

क्षयोःस्वरूपमाह ॥ द्रष्टुरिति ॥ अंगेतिप्रियसंबोधने ॥ २२ ॥ २३ ॥ ननुयदिदृश्यासंभवएवमोक्षस्तर्हितदातदोपस्थितस्यदृश्यस्यनेदंनेदमितिनिरासेनैवरोगनिरासेनारोग्यमिव
ससेत्स्यतीतिकिंतत्त्वज्ञानायासेनेत्यतआह ॥ नेदमिति ॥ नेदमितिप्रलापोहिसतिदृश्येबाधितार्थत्वात्तद्विरोधिदृश्यांतरोत्पादनसंकल्पेनतदुत्पादनेनपूर्वदृश्यनिरासकोवाच्यस्तथा
सत्येकदृश्यनिरासायदृश्यद्वयजननाद्वर्द्धतइत्यर्थः ॥ २४ ॥ हेविचारकाःदृश्यस्यसतःदृश्येसतितर्कातिशयादिनादृश्यव्याधिर्नशाम्यतीत्येतावदेवनकिंत्वन्योप्येतिआगच्छती
त्यर्थः ॥ षष्ठीचानादरइतिभावलक्षणेषष्ठी ॥ दृश्यसत्तानानादरादुपेक्ष्याकिंतुविचारेणबाध्येत्यर्थः ॥ २५ ॥ किंचदृश्यस्यस्वतःसत्ताभ्युपगमेसतोबाधायोगादनिर्मोक्षःस्यादि
त्याह ॥ जगदिति ॥ २६ ॥ नन्वयंद्रष्टातपोध्यानादिबलाद्दृश्यनिर्मुक्तेदृश्यसमावेशायोग्यपरमाणूदरादौवागत्वातिष्ठन्दृश्यनिर्मुक्तोभविष्यतीतिकथमनिर्मोक्षस्तत्राह ॥ अचे
त्येति ॥तपआदिनाअचेत्योबोद्धुमशक्यःअज्ञातआत्मायस्यसद्रष्टातादृशात्मनएवदृश्यबीजत्वादणूदरेपिभ्रांत्यावैपुल्यप्रतिभासाविरोधात्तत्रापिदृश्यबंधोदुर्वारइतिभावः॥२७॥

१ वशाद्बद्धइतिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमुपसंहरति ॥ तस्मादिति ॥ स्वस्थानेप्रमृष्टंदेशांतरप्राप्याप्यत्यक्तंचेत्यर्थः ॥ कांजिकंपर्युषितौदनोदकंसुराविशेषोवा ॥ २८ ॥ परमाणूदरेप्यात्मनिब्रह्मांडसमावेशसंभावनार्थमादर्शइति ॥ यथाविपुलप्रदेशेतथैवनसंकोचेनेत्यर्थः ॥ २९ ॥ ३० ॥ स्थूलोजागरेसूक्ष्मःस्वप्नेभावाभावग्रहःसुषुप्तौतूत्सर्गइति ॥ चलाचलोऽस्थिरः ॥ ३१ ॥ ज्ञाननिरपेक्षसविकल्पकसमाधिनादृश्यमार्जनमाशंक्याह ॥ इदमिति ॥ अस्मृतस्यप्रमार्जनायोगात्तत्स्मृतौतुसमाधिभंगादितिभावः ॥ ३२ ॥ अतएवननिर्विकल्पकसमाधिनापितन्मार्जनमित्याह ॥ सतीति ॥ सतितुनिर्विकल्पकसमाधौचित्तसत्वेचेतनत्वंतद्बाधेतुर्यत्वंचोपपद्यते ॥ दृश्येसतितुनिर्विकल्पसमाधिर्नैवकुतइत्यन्वयः ॥ नचाक्षयसुषुप्तत्वंतुर्यंचापीतिपाठेतुस्पष्टम् ॥ ३३ ॥ अस्तुवासमाधिस्तथापिसंसारोदुर्वारइत्याह ॥ व्युत्थानइति ॥ भातिभासमानेप्रतीचिप्राप्तंभवतीत्युत्तरेणान्वयः ॥ ३४ ॥ भूयोप्यनर्थनिपातेसंभावितेसतिक्षणमात्रसमाधानेनकिंसुखमित्याक्षेपसुखंनास्तीत्यर्थः ॥ ३५ ॥ यदिनिर्विकल्पेस्थितिंकदाप्यव्युत्थानंव्रजेत्तत्तर्ह्यक्षयसुखंविनापिज्ञानंप्राप्तमितियदिमन्येतेतिपराभिप्रायानुवादः ॥ अक्षयसुषुप्ताभमितिमौढ्यानुच्छेदादपुरुषार्थतासूचिता ॥ ३६ ॥ उत्तरमाह ॥ प्राप्यतइति ॥ अस्मिन्मनोलक्षणेदृश्येसतिकेनचित्समाधियत्नवतापिकिंनामदृश्यंनप्राप्यतेयतोस्यचित्ततायत्रयत्रविषयेआयातितत्रतत्रतदनुबंधीजगद्भ्रमोदुर्निवारइत्यर्थः ॥ ३७ ॥ किंचायमज्ञत्वादनात्मानमेवपाषाणादिसमाधौभावयेत्तदस्यतदंतेफलकालेऽपिदृश्यतामेतिनदृङ्मात्रपरिशेषसमाधिसिद्धिरित्याह ॥ द्रष्टेति ॥ ३८ ॥ समाधिबललब्धनिर्दुःखपाषाणभावेऽपिनस्थैर्यप्रत्याशेत्याह ॥ नचेति ॥ इत्ययमर्थःसर्वैःसमाधिनिष्ठैरनुभूयते ॥ ३९ ॥

तस्मादस्तिजगद्दृश्यंतत्प्रमृष्टमिदंमया ॥ त्यक्तंतपोध्यानजपैरितिकांजिकत्तमिवत् ॥ २८ ॥ यदिरामजगद्दृश्यमस्तितत्प्रतिबिंबति ॥ परमाणूदरेप्यस्मिंश्चिदादर्शेतथैवहि ॥ २९ ॥ यत्रतत्रास्थितेयद्वद्दर्पणेप्रतिबिंबति ॥ अद्र्यब्ध्युर्वीनदीवारिचिदादर्शेतथैवहि ॥ ३० ॥ ततस्तत्रपुनर्दुःखंजरामरणजन्मनी ॥ भावाभावग्रहोत्सर्गःस्थूलसूक्ष्मचलाचलः ॥ ३१ ॥ इदंप्रमार्जितंदृश्यंमयाचात्राहमास्थितः ॥ एतदेवाक्षयंबीजंसमाधौसंस्थितिस्मृतेः ॥ ३२ ॥ सतित्वस्मिन्कुतोदृश्येनिर्विकल्पसमाधिता ॥ समाधौचेतनत्वंतुतुर्यंचाप्युपपद्यते ॥ ३३ ॥ व्युत्थानेहिसमाधानात्सुषुप्तांतइवाखिलम् ॥ जगद्दुःखमिदंभातियथास्थितमखंडितम् ॥ ३४ ॥ प्राप्तंभवतिहेरामतत्किंनामसमाधिभिः ॥ भूयोनर्थनिपातेहिक्षणसाम्येहिकिंसुखम् ॥ ३५ ॥ यदिवापिसमाधानेनिर्विकल्पेस्थितिंव्रजेत् ॥ तदक्षयसुषुप्ताभंतन्मन्येतामलंपदम् ॥ ३६ ॥ प्राप्यतेसतिदृश्येऽस्मिन्नचकिंनामकेनचित् ॥ यत्रयत्रकिलायातिचित्ततास्यजगद्भ्रमः ॥ ३७ ॥ द्रष्टाथयदिपाषाणरूपतांभावयन्बलात् ॥ किलास्तेतत्तदंतेपिभूयोस्योदेतिदृश्यता ॥ ३८ ॥ नचपाषाणतातुल्यानिर्विकल्पसमाधयः ॥ केषांचित्स्थितिमायांतिसर्वैरित्यनुभूयते ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माभूदनिरूढानांस्थैर्यंतद्भावापत्तिपर्यंतनिरूढसमाधीनांतुस्थैर्यंस्यात्तत्राह ॥ नचेति ॥ रूढिंयाताअप्यचेतनानित्यपाषाणतादितुल्याःसमाधयःसर्वसंसारशांत्युपलक्षितमग्रपदं मोक्षरूपंनभवंति ॥ ४० ॥ अतःप्रागुक्तमेवसिद्धमित्याह ॥ तस्मादिति ॥ ४१ ॥ साविद्येद्रष्टरिदृश्यसद्भावंदृष्टांतैःसाधयति ॥ आलीनेत्यादिचतुर्भिः ॥ पद्माक्षकोटरेभाविकमलिनीवल्लयाबीजमुपादानभूतमालीनंसूक्ष्मीभूतंपद्मवल्लरीरूपंयथाआस्तेअसतउत्पत्त्ययोगात्तथाद्रष्टरिदृश्यसहिताधीरस्त्येवेत्यर्थः ॥ ४२ ॥ ४३ ॥ स्तनश्चोद्भवोऽपिदुर्वारइत्यत्रापिदृष्टांतमाह ॥ यत्रेति॥४४॥यदुक्तंपरमाणूदरेपीतितत्रापितमाह ॥यथेति॥यथातवत्वदिअंतर्मनोराज्यधीःस्वानुभूत्यैवदृष्टा ॥ स्वप्नःसंकल्पश्चदृष्टइतिविपरिणामः॥४५॥ एवमुक्तदृष्टांतवत्एतंद्रष्टारमपिदृश्यलक्षणारूपिकानिहंति ॥ स्त्रीवेषेणमोहयित्वापुरुषान्निघ्नंत्यःपिशाच्योरूपिकाइत्युच्यंते ॥ ४६ ॥ यदिसर्वंदृश्यंत्वय्यस्तितर्ह्यधुनैवसर्वैःकुतो

नचपाषाणतातुल्यारूढिंयाताःसमाधयः ॥ भवंत्यग्रपदंशांतंचिद्रूपमजमक्षयम् ॥ ४० ॥ तस्माद्यदीदंसदृश्यंतन्नशाम्येत्कदाचन ॥ शाम्येत्तपोजपध्यानैर्दृश्यमित्यज्ञकल्पना ॥ ४१ ॥ आलीनवल्लरीरूपंयथापद्माक्षकोटरे ॥ आस्तेकमलिनीबीजंतथाद्रष्टरिदृश्यधीः ॥ ४२ ॥ यथारसःपदार्थेषुयथातैलंतिलादिषु ॥ कुसुमेषुयथामोदस्तथाद्रष्टरिदृश्यधीः ॥ ४३ ॥ यत्रतत्रास्थितस्यापिकर्पूरादेःसुगंधिता ॥ यथोदेतितथादृश्यंचिद्धातोरुदरेजगत् ॥४४॥ यथाचात्रतवस्वप्नःसंकल्पश्चित्तराज्यधीः॥स्वानुभूत्यैवदृष्टांतस्तथात्वय्यस्तिदृश्यभूः॥४५॥ तस्माच्चित्तविकल्पस्थपिशाचोबालकंयथा ॥ विनिहंत्येवमप्येतंद्रष्टारंदृश्यरूपिका ॥ ४६ ॥ यथांकुरोंतर्बीजस्यसंस्थितोदेशकालतः॥ करोतिभासुरंदेहंतनोत्येवंहिदृश्यधीः ॥ ४७॥ द्रव्यस्यत्वय्येवचमत्कृतिर्यथासदोदितास्त्यस्तमितोज्झितोदरे ॥ द्रव्यस्यचिन्मात्रशरीरिणस्तथास्वभावभूतास्त्युदरेजगत्स्थितिः॥४८॥ ॥इत्यार्षेवासिष्ठमहारामायणेवा०दे० मोक्षोपायेषूत्पत्तिप्रकरणेबंधहेतुवर्णनंनामप्रथमःसर्गः॥ १ ॥ ॥७१॥ ॥श्रीवसिष्ठउवाच॥ ॥इदमाकाशजाख्यानंश्रृणुश्रवणभूषणम् ॥ उत्पत्त्याख्यंप्रकरणंयेनराघवबुद्ध्यते॥१॥

नानुभूयतेतत्राह ॥ यथेति ॥ देशकालकर्मपरिपाकाअपितदाविर्भावसहकारिणइतिभावः ॥ ४७ ॥ अतर्क्याकार्यवैचित्र्यशक्तिश्चमत्कृतिःसायथाबीजादिद्रव्यस्योदरेकोटरेत्वदिसारभागेएवास्तितथाचिन्मात्रस्वभावस्यविद्याशरीरिणोप्यात्मद्रव्यस्याप्युदरेंतश्चिदचित्संवलनस्वभावभूताजगत्स्थितिरतीतानागतजगत्सत्तास्तीत्युक्तार्थनिगमनम् ॥ ४८ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेप्रथमःसर्गः ॥ १ ॥ ॥७१॥ ॥ अज्ञोभौतिकदेहात्मामृत्युभक्षोनतत्त्ववित् ॥ आकाशजोद्विजइवचिन्मात्रात्मेतिकीर्त्यते ॥ १ ॥ कामकर्मवासनासंभृताविद्योपहितआत्मैवजगद्बीजंमृत्युबीजंचविद्ययातद्बीजशक्तिदाहेतुनमृत्युवशोभवतीतिप्रागुक्तार्थेविशेषंदर्शयितुंजगदाद्यसृष्टत्वशोधनेनवक्ष्यमाणार्थोपोद्घातसंगतामाख्यायिकांवर्णयिष्यन्श्रीवसिष्ठउवाच ॥ इदमिति ॥ आकाशादध्यस्ताविद्यानैल्याधारत्वेनाकाशसदृशाद्विद्यावृतत्वादीषत्प्रकाशाद्वाब्रह्मणोजातआकाशजोलिंगसमष्ट्यात्माहिरण्यगर्भस्तस्याख्यानम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यथाकृतायविजितायाधरेयाःसंयंतीत्यादिश्रुत्याहैरण्यगर्भपदप्रापकसंवर्गविद्यादिधर्मैसर्वप्रजाकृतधर्माणामंतर्भाववर्णनात्परमधार्मिकः॥ ध्यानमात्मचिंतनंतदेकनिष्ठः॥२॥ चिरंजीवतिमृत्युवशोनभवतियदातदेत्यर्थः ॥ ३ ॥ ४ ॥ तत्पुरंमेरुमध्येप्रसिद्धम् ॥ सत्यलोकेमृत्योरप्रवेशात् ॥ उद्युक्ताउद्योगयुक्ताःसमर्थाः ॥ ५ ॥ समाधिविघातकप्रतिरोधायपूर्वमेवब्रह्मणाप्राकारतयासंकल्पितोऽग्निः ॥ एनंमृत्युम् ॥ ६ ॥ अग्निज्वालानांमहतींमालांवलयंविदार्य ॥ ७ ॥ अवष्टब्धुंस्प्रष्टुम् ॥ ८ ॥ ९ ॥ एकःअसहायः ॥ तत्कर्तॄ

अस्त्याकाशजोनामद्विजःपरमधार्मिकः॥ ध्यानैकनिष्ठःसततंप्रजानांचहितेरतः ॥ २ ॥ सचिरंजीवतियदातदाम्त्युरचिंतयत्॥ सर्वाण्येवक्रमेणाहंभूतान्यद्मिकिलाक्षयः ॥ ३॥ एनमाकाशजंविप्रंनकस्माद्भक्षयाम्यहम् ॥ अत्रमेकुंठिताशक्तिःखड्गधाराइवोपले ॥४॥ इतिसंचिंत्यतंहंतुमगच्छत्तत्पुरंतदा॥ त्यजंत्युद्यममुद्युक्तानस्वकर्माणिकेचन॥ ५॥ ततस्तत्सदनंयावन्मृत्युःप्रविशतिस्वयम्॥ तावदेनंदहत्यग्निःकल्पांतज्वलनोपमः॥६॥ अग्निज्वालामहामालांविदार्यांतर्गतोप्यसौ॥ द्विजंदृष्ट्वासमादातुंहस्तेनैच्छत्प्रयत्नतः ॥ ७॥ नचाशकत्पुरोदृष्टमपिहस्तशतैर्द्विजं॥ बलवानप्यवष्टब्धुंसंकल्पपुरुषंयथा ॥८॥ अथागत्ययमंमृत्युरपृच्छत्संशयच्छिदम्॥ किमित्यहंनशक्नोमिभोक्तुमाकाशजंविभो ॥९॥ ॥यमउवाच॥ ॥मृत्योनकिंचिच्छक्तस्त्वमेकोमारयितुंबलात्॥ मारणीयस्यकर्माणितत्कर्तॄणीतिनेतरत्॥ १०॥ तस्मादेतस्यविप्रस्यमारणीयस्ययत्नतः॥ कर्माण्यन्विष्यतेषांत्वंसाहाय्येनैनमत्स्यसि ॥ ११ ॥ ततःसमृत्युर्बभ्रामतत्कर्मान्वेषणादृतः॥ मंडलानिदिगंतांश्चसरांसिसरितोदिशः ॥ १२ ॥ वनजंगलजालानिशैलानब्धितटानिच ॥ द्वीपांतराण्यरण्यानिनगराणिपुराणिच ॥ १३ ॥ ग्रामाण्यखिलराष्ट्राणिदेशांतर्गहनानिच ॥ एवंभूमंडलंभ्रांत्वानकुतश्चित्सकानिचित् ॥ १४॥ तान्याकाशजकर्माणिलब्धवान्मृत्युरुद्यतः॥ वंध्यापुत्रमिवप्राज्ञःसंकल्पाद्रिमिवापरः॥१५॥ समपृच्छद्यथागत्ययमंसर्वार्थकोविदम्॥ परायणंहिप्रभवःसंदेहेष्वनुजीविनाम्॥१६॥ ॥मृत्युरुवाच॥ ॥आकाशजस्यकर्माणिक्वस्थितानिवदप्रभो॥ धर्मराजोथसंचिंत्यसुचिरंप्रोक्तवानिदम्॥१७॥ आकाशजस्यकर्माणिमृत्योसंतिनकानिचित्॥ एषआकाशजोविप्रोजातःखादेवकेवलात्॥ १८॥

णिमारणकर्तॄणि ॥ इतिएतस्मान्नेतरत्त्वदशक्तौकारणमितिशेषः ॥ १० ॥ अन्विष्यगवेषणंकुरु ॥ इषगतौश्यन्लोट्हिः ॥ साहाय्येनआनुकूल्येन ॥ ११ ॥ कस्मिन्देशेऽयंप्राक्कर्मकृतवानितिसप्रणिधानंपर्यालोचनमेवचिरयत्ननिष्पाद्यत्वाद्भ्रामेत्युच्यतेनदेशसंचरणम् ॥ कर्तृलिंगसमवायिनामदृष्टानांबहिरन्वेषणाप्रसक्तेः ॥ १२ ॥ पुराणिमहानगरोपकंठेशाखानगराणि ॥ १३ ॥ १४ ॥ लब्धवानुपलब्धवान् अपरःसंकल्पयितुरन्यःपुरुषः ॥ १५ ॥ अनुजीविनांभृत्यानाम् ॥ १६ ॥ १७ ॥ प्रारब्धाधिकारफलानांफलारंभेनैवविनाशात्संचितानांज्ञानेनबाधादागामिनांबीजाभावान्नसंत्येवेत्युक्तिः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहकारीण्यभिमानरागादीनिमृत्योर्मारणेवासहकारीणिकर्माण्ययतनानीतिशेषः ॥ १९ ॥ संबंधइति ॥ तथाचसूत्रम् ॥ तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशाविति ॥ अजाताकृतेरनुत्पन्नाकारस्येव ॥ २०॥ कारणानामविद्यादीनांनिर्विकारस्यविकारहेतूनांवा ॥ तस्माद्विकारायोगात् ॥ २१॥ मास्तुशारीरंमानसंतुस्यात्तत्राह ॥ नैतदिति ॥ पूर्वदेहस्पंदवासनावशोहिचित्तस्पंदस्तदभावादेवाद्यतनंशारीरमपिआद्यमदनार्हंमृत्योःकर्मनसंचितम् ॥२२॥ एवंचसत्ययंपरब्रह्मस्वभावएवस्थितोनदृश्यस्वभावइत्याह ॥ एवमिति ॥ २३॥ तद्भावेतुप्राक्तनकर्मादिप्रसक्तिरेवनास्तीत्याह ॥ प्राक्तनानीति ॥ २४॥ ननुतर्हिकथमयमस्माभिःप्राणदेहादिक्रियावान्दृश्यतेतत्राह ॥ प्राणेति ॥ तदस्माभिस्त्वाविद्यया

आकाशादेवयोजातःसव्योमैवामलंभवेत् ॥ सहकारीणिनोसंतिनकर्माण्यस्यकानिचित् ॥ १९ ॥ संबंधःप्राक्तनेनास्यनमनागपिकर्मणा ॥ अस्तिवंध्यासुतस्येवतथाऽजाताकृतेरिव ॥ २० ॥ कारणानामभावेनतस्मादाकाशमेवसः ॥ नैतस्यपूर्वकर्मास्तिनभसीवमहाद्रुमः ॥ २१ ॥ नैतदस्यावशंचित्तमभावात्पूर्वकर्मणाम् ॥ अद्यतावदनेनाद्यंनकिंचित्कर्मसंचितम् ॥ २२ ॥ एवमाकाशकोशात्माविशदाकाशरूपिणि ॥ स्वकारणेस्थितोनित्यःकारणानिनकानिचित् ॥ २३ ॥ प्राक्तनानिनसंत्यस्यकर्माण्यद्यकरोतिनो ॥ किंचिदप्येवमेषोत्रविज्ञानाकाशमात्रकः ॥ २४ ॥ प्राणस्पंदोस्ययत्कर्मलक्ष्यतेचास्मदादिभिः ॥ दृश्यतेऽस्माभिरेवंतन्नत्वस्यास्यत्रकर्मधीः ॥ २५ ॥ संस्थिताभावयंतीवचिद्रूपैवपरात्पदात् ॥ भिन्नमाकारमात्मीयंचित्स्तंभेशालभंजिका ॥ २६ ॥ तथैवपरमार्थात्[1]सखात्मभूतःस्थितोद्विजः ॥ यथाद्रवत्वंपयसिशून्यत्वंचयथांबरे ॥ २७ ॥ स्पंदत्वंचयथावायोस्तथैषपरमेपदे ॥ कर्माण्यद्यतनान्यस्यसंचितानिनसंतिहि ॥२८॥ नपूर्वाण्येषतेनेहनसंसारवशंगतः ॥ सहकारिकारणानामभावेयःप्रजायते ॥ २९ ॥ नासौस्वकारणाद्भिन्नोभवतीत्यनुभूयते ॥ कारणानामभावेनतस्मादेषस्वयंभवः ॥ ३० ॥ कर्त्तानपूर्वनाप्यद्यकथमाक्रम्यतेवद ॥ यदैषकल्पनांबुद्ध्यामृतिनाम्नींकरिष्यति ॥ ३१ ॥ पृथ्व्यादिमानयमहमितियस्यचनिश्चयः ॥ सपार्थिवोभवत्याशुग्रहीतुंसचशक्यते ॥ ३२ ॥

भ्रांत्यादृश्यतेनत्वस्यतत्रसत्यताधीरस्तीत्यर्थः ॥२५॥ कथंतर्हितस्यदेहादिधीस्तामाह ॥संस्थितेति ॥ चित्स्तंभेचिद्रूपैवशालभंजिकाप्रतिमाआत्मीयंभिन्नंचिद्विलक्षणमाकारं भावयंतीवस्थिता ॥ तथाचभावनामात्ररूपंतन्नवास्तवमित्यस्यधीरित्यर्थः ॥२६॥ क्वचित्त्वस्यदृष्टांतार्थमनुत्कीर्णायथास्तंभेसंस्थिताशालभंजिकेत्यर्द्धमधिकंपठ्यते ॥ २७॥ ॥२८॥ उपपादितप्रकारेणकर्मासंभवानुवादस्यफलकीर्त्तनंनसंसारवशंगतइति ॥ प्रसिद्धरजतकारणाजन्यशुक्तिरजतस्येवतदीयदेहादेर्मिथ्यात्वनिर्णयेतत्प्रयुक्तकर्तृत्वादिबाधान्नमृत्य्वाक्रमणप्रसक्तिरित्याह ॥ सहकारीत्यादिनावदेत्यंतेन ॥ २९॥ ३० ॥ ननुजीवांतराणामप्येतद्यष्टित्वात्कथंतेवामृत्युनागृह्यंतेतत्राह ॥ यदैषइति ॥ यस्यजीवस्यपृथ्व्यादिमान्देहएवाहमितिनिश्चयोस्तिसमूढःपार्थिवदेहएवभवतितस्यएषब्रह्मायदासत्यसंकल्पबुद्ध्यामृतिनाम्नींकल्पनांकरिष्यतितदासत्वयाग्रहीतुंशक्यतइत्यर्थः ॥ ३१ ॥ ३२ ॥

[1] परमार्थातःस्वात्मभूतइतिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथ्व्यादिमयदेहकलनायाअभावान्नरूपवान्नाकारवान् ॥३३॥ निर्विकारस्यशून्यस्यविकारमजस्यजन्मसतांपृथ्व्यादीनामसत्त्वंचोक्तमसंभावयन्मृत्युरुवाच ॥ भगवन्निति॥ ॥३४॥ परस्याकाशत्वोक्तिःपृथ्व्यादिनामसत्वोक्तिश्चनशून्यत्वाभिप्रायेणकिंतुकार्यस्यकारणपृथक्सत्ताशून्यत्वाभिप्रायेण एवमजस्यजन्मोक्तिर्विवर्ताभिप्रायेणनपरिणामाभिप्रायेणेत्याशयंसूचयन्यमउवाच ॥ नकदाचनेति ॥ यतोयंद्विजःपरमार्थतःकेवलविज्ञानभामात्रंतत्ततोहेतोस्तथैवसदास्थितोनविकृतइत्यर्थः ॥३५॥ आद्यंतयोस्तन्मात्रपरिशेषात्तदेवास्यस्वाभाविकंसत्यंरूपमित्याशयेनाह ॥ महाप्रलयेतिसार्द्धेन ॥ ३६ ॥ तदाप्रलयेस्थितमित्यन्वयः ॥ यदुक्तंदृश्यतेऽस्माभिरेवंतदितितदुपपादयति ॥ तदन्वित्यादि

पृथ्व्यादिकलनाभावादेषविप्रोनरूपवान्॥ दृढरज्ज्वेवगगनंग्रहीतुंनैवयुज्यते ॥ ३३॥ ॥मृत्युरुवाच॥ ॥भगवन्जायतेशून्यात्कथंनामवदेतिमे॥ पृथ्व्यादयःकथंसंतिनसंतिवदवाकथम्॥ ३४॥ ॥यमउवाच॥ ॥नकदाचनजातोसौनचनास्तिकदाचन॥ द्विजःकेवलविज्ञानभामात्रंतत्तथास्थितः॥ ३५॥ महाप्रलयसंपत्तौनकिंचिदवशिष्यते॥ ब्रह्मास्तेशांतमजरमनंतात्मैवकेवलम्॥ ३६॥ शून्यंनित्योदितंसूक्ष्मंनिरुपाधिपरंस्थितम्॥ तदातदनुयेनास्यनिकटेद्रिनिभंमहः॥ ३७॥ संविन्मात्रस्वभावत्वाद्देहोहमितिचेतति॥ काकतालीयवद्भ्रांतमाकारंतेनपश्यति ॥ ३८॥ सएषब्राह्मणस्तस्मिन्सर्गादावंबरोदरे ॥ निर्विकल्पश्चिदाकाशरूपमास्थायसंस्थितः॥ ३९ ॥ नास्यदेहोनकर्माणिनकर्तृत्वंनवासना॥ एषशुद्धचिदाकाशोविज्ञानघनआततः॥४०॥ प्राक्तनंवासनाजालंकिंचिदस्यनविद्यते॥ केवलंव्योमरूपस्यभारूपस्येवतेजसः॥ ४१ ॥ वेदनामात्रसंशांतावीदृशोपिनदृश्यते ॥ तस्माद्यथाचिदाकाशस्तथातत्प्रतिपत्तयः ॥ ४२ ॥ कुतःकिलात्रपृथ्व्यादेःकीदृशःसंभवःकथम्॥ एतदाक्रमणेमृत्योतस्मान्मायत्नवान्भव॥४३॥ ग्रहीतुंयुज्यतेव्योमनकदाचनकेनचित्॥ श्रुत्वैतद्विस्मितोमृत्युर्जगामनिजमंदिरम्॥ ४४॥

ना ॥ तदनुसर्गारंभकालेयेनवासनादृष्टसंभृतजीवाविद्याहेतुनाअस्यसंविन्मात्रस्वभावत्वान्निकटेपुरोविषयभावेनअद्रिनिभंपर्वतवदनिवार्यंविराड्रूपंचतुर्मुखंवादेहोहमित्यभिलापार्हंमहःस्थूलंरूपंचेततिईषत्स्फुरतितदातेनैवतादृशविद्याहेतुनाकाकतालीयवदकस्मात्स्वप्नइवभ्रांतंमिथ्याभूतंतमाकारंपश्यतिअस्मदादिजनइत्यर्थः ॥ ३७ ॥ ३८ ॥ तथाचपरदृष्ट्यध्यस्तदेहादिनानास्यनिर्विकल्पतादिक्षतिरितिप्रागुक्तमव्याहतमित्याशयेनाह ॥ सएषइत्यादि ॥ ३९ ॥ ४० ॥ ४१ ॥ वेदनाबहिर्मुखचित्प्रवृत्तिस्तन्मात्रसंशांतौईदृशःप्रातिभासिकरूपोपि ॥ वेदनाशांतिस्तर्हिकथंतत्राह ॥ तस्मादिति ॥ अधिष्ठानतत्त्वपरिचयेनविषयबाधेतत्प्रतिपत्तयोवेदनाअपियथाचिदाकाशस्तथैवतद्भावादवतिष्ठंतइत्यर्थः ॥ ४२ ॥ यत्रचित्स्वभावानांवेदनानामप्यसहनंतत्रदूरेपृथ्व्यादिसहनसंभावनेतितवनाक्रमणंप्रत्याशेत्याशयेनाह ॥ कुतइति ॥ ४३ ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आकाशजद्विजइतिनामांतरप्रतिपादितोब्रह्मैवमयाआख्यायिकातात्पर्यार्थोजगन्मिथ्यात्वमपिपरिज्ञातमितिसूचनेनगुरुंप्रहर्षयन्श्रीरामउवाच ॥ ब्रह्मेति ॥ विज्ञानात्माजीवसमष्टिरूपः ॥ ४५ ॥ विवादंसंवादम् ॥ ४६ ॥ मन्वोःअंतरेसंधिकाले ॥ अजजस्याक्रांतौमारणेआरंभमुद्योगम् ॥ ४७ ॥ कथमशक्येऽपिमृत्योःपुनःपुनरुद्योगइतिचेद्यसनितयेत्याह ॥ यदेवेति ॥ ४८ ॥ आख्यायिकामुखोक्तार्थकंठतोऽपिवदंस्तच्छरीरादेर्मनोमात्रत्वमाह ॥ ब्रह्मेति ॥ ४९ ॥ ५० ॥ आकाशेयथाआवाङ्मुखेंद्रनीलमहाकटा

श्रीरामउवाच ॥ ॥ब्रह्मैषकथितोदेवस्त्वयामेप्रपितामहः ॥ स्वयंभूरजएकात्माविज्ञानात्मेतिमेमतिः ॥४५॥ ॥श्रीवसिष्ठउवाच ॥ एवमेतन्मयारामब्रह्मैषकथितस्तव ॥ विवादमकरोन्मृत्युर्यमेनैतत्कृतेपुरा ॥४६॥ मन्वंतरेसर्वभक्षोयदामृत्युर्हरन्प्रजाः ॥बलमेत्यजजाक्रांतावारंभमकरोत्स्वयम् ॥४७॥ तदेवधर्मराजेनयमेनाश्वनुशासितः ॥ यदेवक्रियतेनित्यंरतिस्तत्रैवजायते ॥४८॥ब्रह्माकिलपराकाशवपुराक्रम्यतेकथम् ॥ मनोमात्रंचसंकल्पःपृथ्व्यादिरहिताकृतिः ॥४९॥ यश्चिद्व्योमचमत्कारःकिलाकारानुभूतिमान् ॥सचिद्व्योमैवनोतस्यकारणत्वंनकार्यता ॥ ५० ॥ आकाशस्फुरदाकारःसंकल्पपुरुषोयथा ॥ पृथ्व्यादिरहितोभातिस्वयंभूर्भासतेतथा ॥५१॥ निर्मलेव्योम्निमुक्तालीसंकल्पस्वप्नयोःपुरम् ॥ अपृथ्व्यादियथाभातिस्वयंभूर्भासतेतथा ॥ ५२॥ नदृश्यमस्तिनद्रष्टापरमात्मनिकेवले ॥ स्वयंचित्तातथाप्येषस्वयंभूरितिभासते ॥ ५३ ॥ संकल्पमात्रमेवैतन्मनोब्रह्मेतिकथ्यते ॥ संकल्पाकाशपुरुषोनास्यपृथ्व्यादिविद्यते ॥ ५४ ॥ यथाचित्रकृदंतःस्थानिर्देहाभातिपुत्रिका ॥ तथैवभासतेब्रह्माचिदाकाशाच्छरंजनम् ॥ ५५ ॥ चिद्व्योमकेवलमनंतमनादिमध्यंब्रह्मेतिभातिनिजचित्तवशात्स्वयंभूः ॥ आकारवानिवपुमानिववस्तुतस्तुवंध्यातनूजइवतस्यतुनास्तिदेहः ॥ ५६ ॥ ॥इत्यार्षेवासिष्ठमहारामायणे वा०दे० मो० उत्पत्तिप्रकरणेआद्यस्रष्टृकर्तृवर्णनंनामद्वितीयःसर्गः ॥ २ ॥

हाकारःपृथ्व्यादिरहितोभातितथेत्यर्थः ॥ ५१ ॥५२॥ स्वयंचित्ताचिन्मात्रस्वभावैवअस्ति ॥५३॥ संकल्पमात्रमेवमनोरूपंनपृथ्व्यादिघटितंसएवब्रह्मापद्मजइत्यर्थः॥५४॥ निराकारस्यसंकल्पस्यकथंपुरुषाकारतातत्राह ॥ यथेति ॥ चित्रकृतोहिलेख्यप्रतिमाकारमंतःसंकल्पेनविधायतथैवबहिर्लिखतोऽतःस्थापुत्रिकाचित्रप्रतिमायथानिर्देहापितदाकाराभातितथैवचिदाकाशस्याच्छंस्वच्छंयद्रंजनंप्रतिबिंबयाहकंमनस्तद्ब्रह्माप्रजापतिशरीराकारंभाति ॥५५॥ तत्रमनसस्तदाकारकल्पनापरिणामोनवास्तवःकिंतुशुद्धंब्रह्मैवाज्ञानात्तथाविवर्त्ततइत्याह ॥ चिद्व्योमेति ॥ ब्रह्मास्वयंभूरित्याकारवानिवेत्यन्वयः ॥ ५६ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेद्वितीयःसर्गः॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोरूपोयतोब्रह्मातत्संकल्पमयंजगत् ॥ मनोराज्यवदेवेदमसदित्यत्रकीर्त्यते॥ १॥मनोमात्रंचसंकल्पःपृथ्व्यादिरहिताकृतिरितिप्रागुक्तरीत्याब्रह्मणोमनोरूपत्वाभ्युपगमेमनसोवासनाजालरूपत्वात्प्राक्तनंवासनाजालंकिंचिदस्यनविद्यतइत्युक्तिरयुक्तेतिमन्यमानःश्रीरामउवाच ॥ एवमेवेतिद्वाभ्याम् ॥ मनःशुद्धंपृथ्व्यादिरहितम् ॥एवमेवप्रसिद्धम् ॥ उत्तरत्रतर्हीत्यर्थेतदितिप्रयोगात्तदाकांक्षितमत्रयदीत्यध्याहार्यम् ॥ १॥अत्रास्मिन्ब्रह्मणःशरीरेप्राक्तनीपूर्वशरीरत्यागकालोद्भूतास्मृतिस्तवममअन्यस्यवापुरुषस्यभूतानांपश्वादीनांचशरीरेप्राक्तनीस्मृतिर्यथाकारणंतथाकस्मात्कारणंन यंयंवापिस्मरन्भावमित्यादिस्मृतेः ॥ यदिप्राक्तनीस्मृतिरस्तितर्हितदुद्भवाधारसंस्कारदेहादिकमपिप्राक्तनंदुर्वारमितिभावः ॥ २ ॥ सत्यंपूर्वदेहादिसिद्धौतदनुभूतगोचरास्मृतिःकारणंस्यात्तदेवासिद्धमितिश्रीवसिष्ठउवाच ॥ पूर्वमितिद्वाभ्याम् ॥ ननुतद्वैतल्लोकजिदेवेत्यादिश्रुतिभिस्तत्क्रतुन्यायेनचहैरण्यगर्भपदस्यकर्मोपासनसमुच्चयफलत्वप्रसिद्धेःकथंप्राग्देहवासनाद्यसत्वोक्तिःकथंवामनोमयस्यतद्देहस्यापृथ्व्यादिमयत्वोक्तिर्मनसोन्नमयंहिसोम्यमनइत्यन्नविकारत्वपरश्रु

श्रीरामउवाच॥ ॥एवमेवमनःशुद्धंपृथ्व्यादिरहितंत्वया॥ मनोब्रह्मेतिकथितंसत्यंपृथ्व्यादिवर्जितम्॥ १ ॥ तदत्रप्राक्तनीब्रह्मन्स्मृतिःकस्मान्नकारणम्॥ यथाममतवान्यस्यभूतानांचेतिमेवद॥२॥ ॥श्रीवसिष्ठउवाच॥ ॥पूर्वदेहोस्तियस्याद्यपूर्वकर्मसमन्वितः॥ तस्यस्मृतिःसंभवतिकारणंसंसृतिस्थितेः ॥ ३ ॥ ब्रह्मणःप्राक्तनंकर्मयदाकिंचिन्नविद्यते॥ प्राक्तनीसंस्मृतिस्तस्यतदोदेतिकुतःकथम्॥ ४ ॥ तस्मादकारणंभातिवास्वचित्तैककारणम्॥ स्वकारणादनन्यात्मास्वयंभूःस्वयमात्मवान्॥ ५॥ आतिवाहिकएवासौदेहोस्त्यस्यस्वयंभुवः॥ नत्वाधिभौतिकोरामदेहोऽजस्योपपद्यते ॥ ६॥ ॥ श्रीरामउवाच ॥ ॥ आतिवाहिकएकोस्तिदेहोन्यस्त्वाधिभौतिकः॥ सर्वासांभूतजातीनांब्रह्मणोस्त्येकएवकिम्॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥सर्वेषामेवदेहौद्वौभूतानांकारणात्मनाम्॥ अजस्यकारणाभावादेकएवातिवाहिकः॥ ८॥

तिविरोधादपंचीकृतभूतकार्यत्वसिद्धांतविरोधाच्चेतिचेत् ॥ सत्यमज्ञदृशैवंयन्मदन्यन्नास्तिकस्मान्नुबिभेमीति सहसिद्धंचतुष्टयमितिश्रुतिस्मृतिसिद्धतदीयतत्त्वदृशातुत्रैकालिकप्रपंचस्यापिनासीदस्तिभविष्यतीतित्रैकालिकबाधान्नपूर्वदेहवासनादिसत्वमितितथोक्तिः ॥ बाधितानुवृत्तौतुमनसितद्देहेचदग्धपटेतांतवत्वमिवनपृथ्व्यादिमयत्वंयथापूर्वमस्तीतिनकश्चिद्विरोधः ॥ यत्राबाधिताज्ञमनःसंकल्पनगरादेरपिनसत्यत्वंभौतिकत्वंवातत्रकिंवाच्यंतत्त्वज्ञानबाधितानुवृत्तवैरिंच्यमनःसंकल्पजस्यविश्वस्यतथात्वमित्यभिप्रेत्यवक्ष्यमाणजगन्मिथ्यात्वौपयिकत्वात्तत्त्वदृष्टिमेवावष्टभ्यपूर्वदेहवासनाद्यपलापोनाज्ञदृष्ट्यनुवाद्युपास्तिफलश्रुतिपुरस्कारेणेति ॥ ३ ॥ ४ ॥ स्वचित्तंदेहद्रष्टृचित्तंतदेकंकारणमितितस्यस्वतश्चित्ताभावोक्तिः ॥ ५ ॥ अतिवहनमर्चिर्धूमादिमार्गेणलोकांतरप्रापणंतत्रसाधुरस्मदादिलिंगदेहइवातिवाहिकःसूक्ष्मइतियावत् ॥ आधिभौतिकःस्थूलभूतजः ॥ ६ ॥ ७ ॥ कारणात्मनांचक्षुरादिव्यावहारिकप्रमाणवेद्यपंचीकृतभूतरूपकारणात्मनाम् ॥ कारणाभावात्अविद्याऽपंचीकृतभूतानामनन्यपरश्रुतिचक्षुराद्यवेद्यत्वेनसाक्षिवेद्यत्वेनचप्रातिभासिकत्वेनव्यावहारिकसत्यत्वाभावात्प्रागुक्तरीत्यावाकारणाभावादित्यर्थः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रकारांतरेणाप्याह ॥ सर्वासामिति ॥ ९ ॥ आकाशात्मा चिदाकाशमात्ररूपः ॥ आरोपितस्याधिष्ठानातिरिक्तस्वरूपाभावात् ॥ १० ॥ इत्थंचतत्संकल्पकल्पितजगतोपितद धिष्ठानचिन्मात्रताफलितेतिविवक्षुराह ॥ चित्तेति ॥ ११ ॥ अन्यैस्तत्संकल्पव्यतिरिक्तैःकारणांतरैःकारणभेदैः ॥ यतोयस्मादुपादानाज्जातमितिशेषः ॥ अनुभूयनेकनककुंडलादौ ॥ तथाचजगतोब्रह्ममात्रतासिद्धेतिभावः ॥ १२ ॥ तेनजीवस्यापितन्मात्रतासिद्धेत्याह ॥ निर्वाणमात्रमिति ॥ यतःसचित्तोपाधिश्चित्तभ्रांत्याचित्तमात्रभूतोऽपिपरमार्थतःसचिदाकाशएवास्तेनभौतिकपुरुषादिभावमायातीत्यर्थः ॥ १३ ॥ स्वताअहंभावस्तस्योदयः ॥ १४ ॥ एतदुपादानकस्थूलस्यैतन्मात्रत्वादनन्यैतत्स्वरूपिणी ॥ १५॥ अध्यस्तमनोविकारस्यजगतोप्यध्यस्ततैवफलितेत्याह ॥ प्रतिभानेति ॥ प्रतिभानंप्रतिभासस्तन्मात्रसिद्धाकृतेःप्रातिभासिकाकारादित्यर्थः ॥ अथवापरमार्थचिन्मात्राकारा

सर्वासांभूतजातीनामेकोजःकारणंपरम् ॥ अजस्यकारणंनास्तितेनासावेकदेहवान् ॥ ९ ॥ नास्त्येवभौतिकोदेहःप्रथमस्यप्रजापतेः ॥ आकाशात्माचभात्येषआतिवाहिकदेहवान् ॥ १० ॥ चित्तमात्रशरीरोसौनपृथ्व्यादिक्रमात्मकः ॥ आद्यःप्रजापतिर्व्योमवपुःप्रतनुतेप्रजाः ॥ ११ ॥ ताश्चचिद्व्योमरूपिण्योविनान्यैःकारणांतरैः ॥ यद्यतस्तत्तदेवेतिसर्वैरेवानुभूयते ॥ १२ ॥ निर्वाणमात्रंपुरुषःपरोबोधःसएवच ॥ चित्तमात्रंतदेवास्तेनायातिवसुधादिताम् ॥ १३ ॥ सर्वेषांभूतजातानांसंसारव्यवहारिणाम् ॥ प्रथमोसौप्रतिस्पंदश्चित्तदेहःस्वतोदयः ॥ १४ ॥ अस्मात्पूर्वात्प्रतिस्पंदादनन्यैतत्स्वरूपिणी ॥ इयंप्रविस्तृतासृष्टिःस्पंदसृष्टिरिवानिलात् ॥ १५ ॥ प्रतिभानाकृतेरस्मात्प्रतिभामात्ररूपधृक् ॥ विभात्येवमयंसर्गःसत्यानुभववान्स्थितः ॥ १६ ॥ दृष्टांतोत्रभवत्स्वप्नस्वप्नस्त्रीसुरतंयथा ॥ असदप्यर्थसंपत्त्यासत्यानुभवभासुरम् ॥ १७ ॥ अपृथ्व्यादिमयोभातिव्योमाकृतिरदेहकः ॥ सदेहइवभूतेशःस्वात्मभूःपुरुषाकृतिः ॥ १८ ॥ संवित्संकल्परूपत्वान्नोदेतिसमुदेतिच ॥ स्वायत्तत्वात्स्वभावस्यनोदेतिनचशाम्यति ॥ १९ ॥ ब्रह्मासंकल्पपुरुषःपृथ्व्यादिरहिताकृतिः ॥ केवलंचित्तमात्रात्माकारणंत्रिजगत्स्थितेः ॥ २० ॥ संकल्पएषकचतियथानामस्वयंभुवः ॥ व्योमात्मैषतथाभातिभवत्संकल्पशैलवत् ॥ २१ ॥ आतिवाहिकमेवांतर्विस्मृत्यादृढरूपया ॥ आधिभौतिकबोधेनमुधाभातिपिशाचवत् ॥ २२ ॥

चिन्मात्ररूपधृगपिसर्गएवंपरिदृश्यमानाऽचिदाकारेणविभातीत्यर्थः ॥ १६ ॥ स्वप्नेयोन्यःस्वप्नस्तत्रत्यस्त्रीसुरतमितिसूक्ष्मकल्पनांतर्गतस्थूलकल्पनादृष्टांतत्वोपपत्त्यर्थम् ॥ अर्थसंपत्त्याव्यवहारप्रयोजननिष्पत्त्या ॥ १७ ॥ तथाचप्रागुक्तंनासंभावितमित्याह ॥ अपृथ्व्यादीति ॥ १८ ॥ नोदेतिपरमार्थतःसमुदेतिभ्रांत्यातत्राद्यमुपपादयति ॥ स्वायत्तत्वादिति ॥ जगद्भाववदविद्याद्यधीनत्वाभावादितिभावः ॥ स्वभावस्यस्वरूपस्थितेः ॥ १९ ॥ २० ॥ यथायादृशप्राणिकर्मानुरोधेनयेनयेनप्रकारेणकचतिविकसति ॥ तथातेनप्रकारेण ॥ २१ ॥ तर्हिकथंसर्वेषांसंकल्पशैलविलक्षणाधिभौतिकत्वार्थक्रियासामर्थ्याद्यनुभवस्तत्राह ॥ आतिवाहिकमिति ॥ स्वरूपविस्मृत्याआतिवाहिकभावविस्मृत्याच ॥ २२ ॥ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हि विरिंचेरप्यस्मदादिवदातिवाहिकभावविस्मृतिःकिंनस्यात्तत्राह ॥ इदमिति ॥ इदंवैरिंचरूपंमहाचितेर्मायाशबलब्रह्मणःप्रथमतासर्वस्थूलप्रपंचापेक्षयाकारणीभूतसूक्ष्मभूतात्मकतेतियावत् ॥ तत्रउद्योगेनसंकल्पेनसत्यसंकल्पत्वात्तथैवसंप्रबुद्धंप्रत्यक्षमाविर्भूतमतस्तमोनाच्छादितत्वेनविरिंचेःशुद्धसंवित्त्वान्नातिवाहिकविस्मृतिरुदेतीत्यर्थः ॥ २३ ॥ ॥ २४ ॥ यदायस्मिन्कल्पेयतइतिवार्थः ॥ यस्माज्जातंयज्जातम् ॥ २५ ॥ इत्थंचान्नेनसोम्यशुंगेनापोमूलमन्विच्छेतिश्रुतिदर्शितन्यायेनजगतोमनोमात्रत्वंमनसश्चब्रह्ममात्रतेतिब्रह्माद्वैतंफलितमित्याह ॥ अजस्येत्यादित्रिभिः ॥ २६ ॥ २७ ॥ इत्थंचभेदकाभावात्कार्यकारणभावायोगाज्जगद्ब्रह्मैवसंपन्नमित्याह ॥ कार्येति ॥ २८ ॥ २९ ॥ ३० ॥ इत्थंचतत्त्वज्ञानांजगतएवबाधेदेहादौनाधिभौतिकताप्रत्ययसंभवइत्याह ॥ आधिभौतिकतेति ॥ ३१ ॥ कैमुतिकन्यायेनाप्युक्तमर्थंद्रढयति ॥ आतिवाहिकेति ॥ आतिवाहि

इदंप्रथमतोद्योगसंप्रबुद्धंमहाचितेः ॥ नोदेतिशुद्धसंवित्त्वादातिवाहिकविस्मृतिः ॥ २३ ॥ आधिभौतिकजातेननास्योदेतिपिशाचिका ॥ असत्यामृगतृष्णेवमिथ्याजाड्यभ्रमप्रदा ॥ २४ ॥ मनोमात्रंयदाब्रह्मानपृथ्व्यादिमयात्मकः ॥ मनोमात्रमतोविश्वंयद्यज्जातंतदेवहि ॥ २५ ॥ अजस्यसहकारीणिकारणानिनसंतियत् ॥ तज्जस्यापिनसंत्येवतानितस्मात्तुकानिचित् ॥ २६ ॥ कारणात्कार्यवैचित्र्यंतेननात्रास्तिकिंचन ॥ यादृशंकारणंशुद्धंकार्यंतादृगितिस्थितम् ॥ २७ ॥ कार्यकारणताप्यत्रनकिंचिदुपपद्यते ॥ यादृगेवपरंब्रह्मतादृगेवजगत्रयम् ॥ २८ ॥ मनस्तामिवयातेनब्रह्मणातन्यतेजगत् ॥ अनन्यदात्मनःशुद्धाद्द्रवत्वमिववारिणः ॥ २९ ॥ मनसातन्यतेसर्वमसदेवेदमाततम् ॥ यथासंकल्पनगरंयथागंधर्वपत्तनम् ॥ ३० ॥ आधिभौतिकतानास्तिरज्ज्वामिवभुजंगता ॥ ब्रह्मादयःप्रबुद्धास्तुकथंतिष्ठंतितत्रते ॥ ३१ ॥ आतिवाहिकएवास्तिनप्रबुद्धमतेःकिल ॥ आधिभौतिकदेहस्यवाचोवात्रकुतःकथम् ॥ ३२ ॥ मनोनाम्नोमनुष्यस्यविरिंच्याकारधारिणः ॥ मनोराज्यंजगदितिसत्यरूपमिवस्थितम् ॥ ३३ ॥ मनएवविरिंचित्वंतद्धिसंकल्पनात्मकम् ॥ स्ववपुःस्फारतांनीत्वामनसेदंवितन्यते ॥ ३४ ॥ विरिंचोमनसोरूपंविरिंचस्यमनोवपुः ॥ पृथ्व्यादिर्विद्यतेनात्रतेनपृथ्व्यादिकल्पितम् ॥ ३५ ॥ पद्माक्षेपद्मिनीवांतर्मनोऽस्त्यस्तिदृश्यता ॥ मनोदृश्यदृशौभिन्नेनकदाचनकेनचित् ॥ ३६ ॥

कःप्रातिभासिकःसोऽपिनास्त्येवतत्राधिभौतिकस्यवाचःकुतोहेतोःकथंकेनप्रकारेण ॥ ३२ ॥ मनुष्यस्येतिप्राक्तनोपासकावस्थांस्मृत्वोक्तिः ॥ ३३ ॥ विरिंचित्वंसर्वस्रष्टृत्वम् ॥ हियस्मात्तद्विरिंचित्वंविरिंचेःसंकल्पनात्मकंनबाह्योपकरणाधीनम् ॥ स्फारतांविपुलताम् ॥ इदंविश्वम् ॥ ३४ ॥ अत्रमनसि ॥ तेनहेतुनामनसावाकल्पितमध्यस्तमात्मनीतिशेषः ॥ ३५ ॥ मनोऽन्तर्हृदि ॥ मनोंतः ॥ दृश्यतालक्षणयादृश्यवर्गः ॥ ननुकथंविरुद्धमिदमुच्यते पृथ्व्यादिर्विद्यतेनात्र मनोऽन्तर्यस्तिदृश्यतेतिचेत्तत्राह ॥ मनोदृश्येति ॥ यतोमनश्चदृश्यंचतयोःसमाहारोमनोदृश्यंतदुभयदृक्साक्ष्यात्माचतेउभेकेनचित्कदाचननभिन्नेनविवेचिते ॥ यावत्तेनविवेचितेतावदज्ञानानुच्छेदादस्त्येवेत्युक्तमितिभावः ॥ अथवामनश्च दृश्यदृक् दृश्यदर्शनंचतेनभिन्ने ॥ तथाचमनसउच्छेदएवदृश्यदर्शनोच्छेदइतिभावः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रान्वयव्यतिरेकसिद्धदृष्टांतान्वदन्निगमयति ॥ यथेति ॥ ३७ ॥ ३८ ॥ दृश्यधीर्मनः ॥ ३९ ॥ ननुकिमर्थंमहतायत्नेनदृश्यमिथ्यात्वंसाध्यतेतस्यसत्यत्वेकाक्षतिस्तत्राह ॥ सच्चेदिति ॥ स्थितोपिशाम्येत्किंपुनर्मिथ्याभूतइत्यर्थः ॥ तत्केवलत्वमेवविमोक्षमाहुः ॥ ४० ॥ ॥ इतिश्रीवासिष्ठमहारामायणतात्पर्यप्रकाशेउत्पत्तिप्र० तृतीयःसर्गः ॥ ३ ॥ श्रुत्वोपदेशंप्रथममुत्थानादिनिशाक्रमः ॥ प्रातरागमनंचित्रस्वभावश्चात्रवर्ण्यते ॥ १ ॥ एकरसेएकाग्रे ॥ १ ॥ एकरसतामेवलिंगैर्दर्शयिति ॥ शांतेष्वित्यादिना ॥ हारीताःपक्षिविशेषाः ॥ २ ॥ राजसद्मनिलक्षणयाराजसद्मस्थप्राणिनिकायेचित्रभित्तौन्यस्तेचित्रइवस्थितेइतिविपरिणामेनानुषंगः ॥३ ॥ तानवमल्पताम् ॥ ४ ॥ आमोदेनमांसलाःपुष्टाः ॥

यथाचात्रतवस्वप्नःसंकल्पश्चित्तराज्यधीः॥ स्वानुभूत्यैवदृष्टांतस्तस्माद्धृयस्तिदृश्यभूः॥ ३७॥ तस्माच्चित्तविकल्पस्थपिशाचोबालकंयथा॥ विनिहंत्येवमेषांतर्द्रष्टारंदृश्यरूपिका॥३८॥ यथांकुरोंतर्बीजस्यसंस्थितोदेशकालतः॥करोतिभासुरंदेहंतनोत्येवंहिदृश्यधीः॥३९॥ संच्चेन्नशाम्यतिकदाचनदृश्यदुःखंदृश्येत्वशाम्यतिनबोद्धरिकेवलत्वम् ॥ दृश्येत्वसंभवतिबोद्धरिबोद्धृभावःशाम्येत्स्थितोपिहितदस्यविमोक्षमाहुः॥४०॥ ॥इत्यार्षेवासिष्ठमहारामायणेवा०दे०मो०उत्पत्तिप्र० बंधहेतुवर्णनंनामतृतीयःसर्गः॥३॥ ॥७॥ ॥श्रीवाल्मीकिरुवाच॥ ॥कथयत्येवमुद्दामवचनेमुनिनायके॥श्रोतुमेकरसेजातेजनेमौनमुपस्थिते॥ १ ॥ शांतेषुकिंकिणीजालरवेषुस्पंदनंविना॥ पंजरांतरहारीतशुकेष्वप्यस्तकेलिषु ॥ २ ॥ सुविस्मृतविलासासुस्थितासुललनास्वपि॥ चित्रभित्ताविवन्यस्तेसमस्तेराजसद्मनि॥३॥मुहूर्त्तशेषमभवद्दिवसंमधुरातपम्॥ व्यवहाररविकरैःसहतानवमाययुः॥४॥ववुरुत्फुल्लकमलप्रकरामोदमांसलाः॥ वायवोमधुरस्पंदाःश्रवणार्थमिवागताः॥५॥ श्रुतंचिंतयितुंभानुरिवाहोरचनाश्रमम्॥ तत्याजैकांतमगमच्छून्यमस्तगिरेस्तटम्॥ ६ ॥ उत्तस्थुर्मिहिकारंभसमतावनभूमिषु॥ विज्ञानश्रवणादंतःशीतलाःशांतताइव॥ ७॥ बभूवुरल्पसंचाराजनादशसुदिक्ष्वपि॥ सावधानतयाश्रोतुमिवसंत्यक्तचेष्टिताः॥ ८ ॥ छायादीर्घत्वमाजग्मुर्वासिष्ठंवचनक्रमम्॥इवश्रोतुमशेषाणांवस्तूनांदीर्घकंधराः ॥ ९ ॥ प्रतीहारःपुरःप्रह्वोभूत्वाहवसुधाधिपम्॥ देवस्नानद्विजार्चासुकालोव्यतिगतोभृशम् ॥ १० ॥

मधुरोमंदत्वात्सुखकरःस्पंदोयेषाम् ॥ सर्वत्रविशेषणानिसाधारणानि ॥ उपमानमुत्प्रेक्षावा ॥ ५ ॥ भानुःश्रुतंश्रवणावधृतमर्थंचिंतयितुंमननेनदृढीकर्तुमिवेत्युत्प्रेक्षा ॥ शून्यंजनशून्यम् ॥ ६ ॥ मिहिकानांतुषाराणामारंभेणसमताअविषमताः ॥ अतःशीतलाइतिसाधारणंविशेषणम् ॥ ७॥ संत्यक्तानिचेष्टितानिव्यापारांतराणियैः ॥८॥ अशेषाणांवस्तूनांछायाअशेषाणांश्रोतॄणांदीर्घाःकंधराःकंठावचनक्रमंश्रोतुमिवदीर्घत्वमाजग्मुः ॥ असमासश्छांदसः ॥ ९ ॥ प्रतीहारोद्वारपालः ॥ प्रह्वोनम्रोभूत्वा ॥ १० ॥

२-५ [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्तुत्योपसंस्तुत्य ॥ ११ ॥ एवमस्तुइत्युक्त्वा ॥१२॥१३॥ सभाशब्दोजनवचनः ॥ निःस्पृहैर्मुनिभीराजदत्तरत्नानामुपेक्षणान्मंडलाकारेणकीर्णानांरत्नौघानांप्रभापरिवेषेणआवृतजनानना ॥ १४ ॥ स्तुताअपस्तुतास्वर्णजटितपट्टवस्त्राणांआभाकांतिर्यैस्तथाविधानिऊरुस्तनांतराणियस्यां ॥ १५ ॥ शेखरस्यशिरोग्रस्यउत्संगवद्विस्तृतभागे ॥ घुंघुमेत्यव्यक्तध्वन्यनुकरणम् ॥ १६ ॥ १७ ॥ १८ ॥ श्यामाकृष्णा ॥ बालांगनापक्षेयौवनमध्यस्था ॥ संभवादुपमानदर्शनस्यापितत्कालतागम्यते ॥ १९ ॥ सद्ब्रह्मतदात्मापुरुषोब्रह्मतन्निष्ठश्चतयोर्व्रतम् ॥ २० ॥ २१ ॥ अवदातानिर्मलाः ॥ चित्तेअर्थान्निद्रावृतेइतिगम्यते ॥ २२ ॥ किंचित्किंचित्कुंकुमच्छाययेवविचित्रयाभानोर्भासाभूषितैर्मेघैःपीतवा

ततोवसिष्ठोभगवान्संस्तुत्यमधुरांगिरम् ॥ अद्यतावन्महाराजश्रुतमेतावदस्तुवः ॥ ११ ॥ प्रातरन्यद्वदिष्यामिइत्युक्त्वामौनवानभूत् ॥ इत्याकर्ण्यैवमस्तूक्त्वाभूपतिर्भूतिवृद्धये ॥ १२ ॥ पुष्पपाद्यार्घसन्मानदक्षिणादानपूजया ॥ सदेवर्षिमुनीन्विप्रान्पूजयामाससादरम् ॥ १३ ॥ अथोत्तस्थौसभासर्वासराजमुनिमंडला ॥ मंडलाकीर्णरत्नौघपरिवेषावृतानना ॥ १४ ॥ परस्परांगसंघट्टरणत्केयूरकंकणा ॥ हारभारावृतस्वर्णपट्टाभोरुस्तनांतरा ॥ १५ ॥ शेखरोत्संगविश्रांतप्रबुद्धमधुपस्वनैः ॥ सघुंघुमशिरोभारावदद्भिरिवमूर्द्धजैः ॥ १६ ॥ कांचनाभरणोद्योतकनकीकृतदिङ्मुखाः ॥ बुद्धिस्थमुनिवागर्थसंशांतेंद्रियवृत्तयः ॥ १७ ॥ जग्मुर्नभश्चराव्योमभूचराभूमिमंडलम् ॥ चक्रुर्दिनसमाचारंसर्वेतेस्वेषुसद्मसु ॥ १८ ॥ एतस्मिन्नंतरेश्यामायामिनीसमदृश्यत ॥ जनसंघाद्विनिर्मुक्तागृहेबालांगनायथा ॥ १९ ॥ देशांतरंभासयितुंययौदिवसनायकः ॥ सर्वत्रालोककर्तृत्वमेवसत्पुरुषव्रतम् ॥ २० ॥ उदभूदभितःसंध्यातारानिकरधारिणी ॥ उत्फुल्लकिंशुकवनावसंतश्रीरिवोदिता ॥ २१ ॥ चूतनीपकदंबाग्रग्रामचैत्यगृहोदरे ॥ निलिल्यिरेखगाश्चित्तेवदातावृत्तयोयथा ॥ २२ ॥ भानोर्भासाभूषितैर्मेघलेशैःकिंचित्किंचित्कुंकुमच्छाययेव ॥ पाश्चात्योद्रिःपीतवासाःसमेघैस्ताराहारःश्रीयुतःखंसमेतः ॥ २३ ॥ पूजामादायसंध्यायांप्रगतायांयथागतम् ॥ अंधकाराःसमुत्तस्थुर्वेतालावपुषायथा ॥ २४ ॥ अवश्यायकणास्पंदीहेलाविधुतपल्लवः ॥ कोमलःकुमुदाशंसीववावाशीतलोनिलः ॥ २५ ॥

साः ॥ तारालक्षणहारेणश्रियाचयुक्तः ॥ सप्रागुक्तःपाश्चात्योस्ताद्रिर्भानोर्भासाभूषितैर्मेघलेशैरुपलक्षितमर्थात्ताराहारंश्रीयुतंचेतिसमानधर्मकंखंआकाशंचसमेतःप्रविष्टः ॥ तथापीतवासाविष्णुरुक्तधर्माश्रीयुतोनिरावरणंस्वानुरूपंध्यायिनांहृदयाकाशंप्रविशतितद्वत् ॥ संध्यासुहिभगवद्ध्यानंप्रशस्तमितिसमासोक्त्यागम्यते ॥ २३ ॥ संध्यायांदेव्यांपूजामादायगतायांतद्गणावेतालावपुषायथासमुत्तिष्ठंतितद्वत् ॥ २४ ॥ कलिकाविकासात्कुमुदान्यासमंताच्छंसत्यनुमापयतितच्छीलः ॥ विशेषणत्रयानुसारादाशीतलग्रहणंमांद्यसौरभ्ययोरप्युपलक्षणम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीहारपटावृतत्वादविस्फुटास्तारकानक्षत्राणिकनीनिकाश्चयासांताः ॥ धवस्यभानोरस्तमयाद्विधवाइव ॥ २६ ॥ तेजोलक्षणेनदुग्धप्रवाहेणपूरयन् ॥ रसायनममृतंतन्मयाकारः ॥ २७ ॥ श्रुताज्ञानगिरोयेनतथाविधान्महीपानांचित्तात् ॥ २८ ॥ विचित्राःवसिष्ठोपदिष्टाअर्थाःस्वचेतसीवस्वेषामास्पदेषुप्रतिष्ठासुविशश्रमुर्विश्रांताः ॥ २९ ॥ श्यामारात्रिः ॥ उषःप्रत्यूषः ॥ ३० ॥ हृताअपनीताः ॥ कुसुमवृष्टयोवृष्टिनिपतितकुसुमानीवेत्यत्रतात्पर्यम् ॥ ३१ ॥ प्रभाभिरुन्मीलितानिजनलोचनानियेन ॥ ३२ ॥ तमोघ्नैरितिपाठेतमोविघातकैःकांचनशृंगैरित्यर्थः ॥ ३३ ॥ ह्यस्तनेनपूर्वेद्युस्तनेन ॥ ३४ ॥ वातमुक्तानिर्वातापद्मिनीपद्मवतीसरसीव ॥ ३५ ॥ प्रसंगंप्रस्तावम् ॥ ३६ ॥ रूपंतात्विकस्वरूपम् ॥ यद्रूपंमनोवक्ष्यतिजगतोपितदेवरूपमितिननिस्तत्त्वतालक्षणंमिथ्यात्वंसेत्स्यतीतिरामाशयः ॥ ३७ ॥ नाममात्रादिति ॥ अतएवतत्कार्येषुवाचारंभणंविकारोनामधेयमितिश्रुतमिथ्यात्वोपपत्तिरितिभावः ॥ शून्यजडाकृतेरितिभूतव्योम्नोमनसश्चसाधारणम् ॥ ३८ ॥ नभःसाम्यमेवोपपादयति ॥ नेति ॥ ३९ ॥ इदंजगदस्मान्मनसः ॥ भ्रमस्तद्विषयोध्यस्तइतियावत् ॥ तदुपमम ॥ ४० ॥ यद्यपिमनोनामपरमार्थतोनास्त्येवतथापिशास्त्रीयव्यवहारोपयुक्तंकल्पितंतद्रूपमाह ॥ मध्येइति ॥ प्रत्यक्षेपुरःसतःस्मृत्यादिपरोक्षेत्वसतोवाऽर्थस्यमध्येयदेतत्तदाकारप्रतिभानंप्रथांगतंसर्वजनानांतन्मइत्यर्थः ॥ ४१ ॥

परमांध्यमुपाजग्मुर्दिशोऽविस्फुटतारकाः॥ लंबदीर्घतमःकेश्योविधवाइवयोषितः॥२६॥ आययौभुवनंतेजःक्षीरपूरेणपूरयन्॥ रसायनमयाकारःशशिक्षीरार्णवोनभः॥ २७॥ जग्मुस्तिमिरसंघाताःपलाय्यक्काप्यदृश्यताम्॥ श्रुतज्ञानगिरश्चित्तान्महीपानामिवाज्ञताः ॥ २८॥ ऋषयोभूमिपालाश्चमुनयोब्राह्मणास्तथा॥ चेतसीवविचित्रार्थाःस्वास्पदेषुविशश्रमुः ॥ २९॥ यमकायोपमाश्यामाययौतिमिरमांसला॥ आययौमिहिकास्फारातत्रतेषामुषःशनैः॥ ३०॥ अंतर्धानमुपाजग्मुस्तारानभसिभासुराः ॥ प्रभातपवनेनेवहृताःकुसुमवृष्टयः॥३१॥ दृश्यतामाजगामार्कःप्रभोन्मीलितलोचनः॥ विवेकवृत्तिर्महतांमनसीवनवोदिता॥३२॥ भानोर्भासाभूषितैर्मेघलेशैःकिंचित्किंचित्कुंकुमच्छाययेव॥ पूर्वक्ष्माभृत्पीतवासास्समेघैस्ताराहारःश्रीयुतःखंसमेतः ॥ ३३ ॥ सभांपुनरुपाजग्मुर्नभश्चरमहीचराः ॥ ह्यस्तनेनक्रमेणैवकृतप्रातस्तनक्रमाः ॥ ३४ ॥ पूर्ववत्संनिवेशेनविवेशसकलासभा ॥ बभूवास्पंदिताकारावातमुक्तेवपद्मिनी॥३५॥ अथप्रसंगमासाद्यरामोमधुरयागिरा॥ उवाचमुनिशार्दूलंवसिष्ठंवदतांवरम्॥३६॥

॥श्रीरामउवाच॥

॥भगवन्मनसोरूपंकीदृशंवदमेस्फुटम्॥ यस्मात्तेनेयमखिलातन्यतेलोकमंजरी॥ ३७॥

॥श्रीवसिष्ठउवाच॥

॥रामास्यमनसोरूपंनकिंचिदपिदृश्यते॥नाममात्रादृतेव्योम्नोयथाशून्यजडाकृतेः॥३८॥ नबाह्येनापिहृदयेसद्रूपंविद्यतेमनः॥सर्वत्रैवस्थितंचैतद्विद्धिरामयथानभः ॥ ३९॥इदमस्मात्समुत्पन्नंमृगतृष्णांबुसन्निभम्॥ रूपंतुक्षणसंकल्पाद्द्वितीयेंदुभ्रमोपमम्॥ ४०॥ मध्येयदेतदर्थस्यप्रतिभानंप्रथांगतम्॥सतोवाप्यसतोवापितन्मनोविद्धिनेतरत्॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवसंक्षिप्याह ॥ यदिति ॥ निराकारचितोयोर्थाकाराध्यासस्तन्मनइत्यर्थः ॥ ४२ ॥ एवंवृत्तिसामान्यैस्तल्लक्षणमुक्त्वाअसाधारणवृत्त्याप्याह ॥ संकल्पनमिति ॥ ४३ ॥ तदेवविषयभेदव्यवस्थितिंप्रदर्शनेनद्रढयति॥यत्रेति॥४४॥ननुचित्संवलितैववृत्तिःपदार्थप्रतिभासनमित्युच्यतेतत्रचितःसत्यत्वेकथंतद्घटितमनसोमिथ्यात्वंतत्राह॥सत्यमिति ॥ मिथ्याविषयाकारान्मिथ्यावासत्यचित्संवलनात्सत्यंवायथाविवक्षमस्तुनतत्राग्रहः यादृशंमनस्तत्समष्टिरपितन्मात्रस्वभावासैवविरिंचिरित्येतत्तुनव्याहतमित्याह ॥ असत्यमिति ॥४५॥ यदिसर्वाकारमनोदेहोसौतर्हितस्यकिमन्यत्स्रज्यंतत्राह ॥ आतिवाहिकेति ॥ सूक्ष्माणामेवचिरंमिलितावस्थितेर्मिश्रणात्पंचीकरणेस्थूलपृथ्व्यादिबुद्धिंसएवधत्तेतदेवास्यस्रष्टृत्वमित्यर्थः ॥ ४६ ॥ मनआदिप्रपंचःसर्वोप्यविद्याविलासत्वादविद्यैवतस्याएवोत्तरोत्तरंनामानीत्याह ॥ अविद्येति ॥ ४७ ॥ यद्युत्पन्नस्यदृश्यस्याविद्यात्वंमनस्त्वंवा

यदर्थप्रतिभानंतन्मनइत्यभिधीयते॥ अन्यन्नकिंचिदप्यस्तिमनोनामकदाचन॥४२॥ संकल्पनंमनोविद्धिसंकल्पात्तन्नभिद्यते॥ यथा द्रवत्वात्सलिलंतथास्पंदोयथानिलात्॥ ४३॥ यत्रसंकल्पनंतत्रतन्मनोंगतथास्थितम्॥ संकल्पमनसोभिन्नेनकदाचनकेचन॥ ४४॥ सत्यमस्त्वथवासत्यंपदार्थप्रतिभासनम्॥ तावन्मात्रंमनोविद्धितद्ब्रह्मैवपितामहः॥४५॥ आतिवाहिकदेहात्मामनइत्यभिधीयते॥ आधिभौतिकबुद्धिंतुसआधत्तेचिरस्थितेः॥४६॥ अविद्यासंसृतिश्चित्तंमनोबंधोमलस्तमः॥इतिपर्यायनामानिदृश्यस्यविदुरुत्तमाः॥४७॥ नहिदृश्यादृतेकिंचिन्मनसोरूपमस्तिहि॥ दृश्यंचोत्पन्नमेवैतन्नेतिवक्ष्याम्यहंपुनः॥४८॥यथाकमलबीजांतःस्थिताकमलवल्लरी॥महाचित्परमाण्वंतस्तथादृश्यंजगत्स्थितम्॥ ४९॥ प्रकाशस्ययथालोकोयथावातस्यचापलं॥ यथाद्रवत्वंपयसिदृश्यत्वंद्रष्टरीदृशम्॥ ५०॥ अंगदत्वंयथाहेम्निमृगनद्यांयथाजलम्॥ भित्तिर्यथास्वप्नपुरेतथादृष्टरिदृश्यधीः॥ ५१॥ एवंद्रष्टरिदृश्यत्वमनन्यदिवयत्स्थितम्॥ तदप्युन्मार्जयाम्याशुत्वच्चित्तादर्शतोमलम्॥ ५२॥ यद्द्रष्टुरस्याद्रष्टृत्वंदृश्याभावेभवेद्बलात्॥ तद्विद्धिकेवलीभावंततएवासतःसतः॥ ५३॥ तत्तामुपगतेभावेरागद्वेषादिवासनाः॥ शाम्यंत्यस्पंदितेवातेस्पंदनक्षुब्धतायथा॥ ५४॥

तर्हिकथंतयोरनादित्वप्रसिद्धिस्तत्राह ॥ दृश्यंचेति ॥ ४८ ॥ तथाचचित्यविद्यास्थितिरेवजगत्स्थितिरितिफलितमित्याशयेनाह ॥ यथेति ॥ ४९ ॥ साविद्यचितोदृश्याव्यभिचाराद्दृश्यस्यतत्स्वभावताफलितेत्याह ॥ प्रकाशस्येति ॥ ईदृशमेवंप्रकारंस्वभावइतियावत् ॥ ५० ॥ तत्स्वभावत्वेतदपृथक्सत्ताफलितेत्याह ॥ अंगदत्वमिति ॥ ५१ ॥ ५२ ॥ यदिति ॥ दृश्यस्यद्रष्टृपृथक्सत्तापगमेअन्यसत्तयान्यस्यसत्त्वायोगात् दृश्याभावेतद्बलादस्यद्रष्टुश्चिन्मात्रस्ययदद्रष्टृत्वंभवेत्ततएवासतोबाधिताद्दृश्यात्सतःसन्मात्रचिद्रूपेणपरिशिष्टस्यात्मनस्तत्केवलीभावंविद्धीत्यर्थः ॥ ५३ ॥ अस्त्वेवंतथापिकथंप्रतिज्ञातंमच्चित्तादर्शेदृश्यमलमार्जनंसिध्यतितत्राह ॥ तत्तामिति ॥ भावेचित्तेतत्तांकैवल्यबोधेनतद्भावम् ॥ वातस्पंदनप्रयुक्तवनजलाशयादिक्षुब्धताः ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्विषयज्ञानस्थितिमसंभावयंतंदृष्टांतेनानुभावयति ॥ असंभवतीत्यादिभिः ॥ ५५॥ असत्तामितिच्छेदः ॥५६॥ केवलदर्पणात्मस्वरूपिणी ॥५७॥ चितोदृश्योन्मुखत्वंवीक्षणं तच्छून्ये ॥ ५८ ॥ दृश्यस्यासत्वेत्वदुक्तःकेवलीभावःस्यात्तदेवानुभवविरुद्धंसत्सदित्येवदृश्यानुभवादितिपरिणामवादमभिप्रेत्यश्रीरामःशंकते ॥ सच्चेदितिद्वाभ्याम् ॥ ५९ ॥ मनसाभवोजन्मादिस्तद्भ्रमकरी ॥ ६० ॥ असतोप्यविद्ययासदनुबोधादृश्यस्यसत्ताभ्रमःकेवलीभावसाक्षात्कारेणाविद्यानाशेतुनायंभ्रमःसमुदेतीतिगूढाभिसंधिःप्रथमंजीवन्मुक्तदर्शनलिंगेनानिर्मोक्षप्रसंजनेनचदृश्येसत्यताविश्वासंवारयन्विवर्त्तवादमाश्रित्यश्रीवसिष्ठउवाच ॥ अस्येत्यादिना ॥ चेतनत्वेनाभिमतंदेहादिमृतिमेष्यतिअचेतनंतुनंक्ष्यतीति बाधएवद्वेधोक्तः ॥ ६१ ॥ परिणामवादेदोषमाह ॥ यदिति ॥ अयंभावः ॥ परिणामवादेह्युत्तरोत्तरावस्थाभिःपूर्वपूर्वावस्थातिरोभावमात्रंनोच्छेदः सतोऽसत्वायोगात्

असंभवतिसर्वस्मिन्दिग्भूम्याकाशरूपिणि ॥ प्रकाश्येयादृशंरूपंप्रकाशस्यामलंभवेत् ॥५५॥ त्रिजगत्त्वमहंचेतिदृश्येऽसत्तामुपागते ॥ द्रष्टुःस्यात्केवलीभावस्तादृशोविमलात्मनः ॥ ५६ ॥ अनामाखिलशैलादिप्रतिबिंबेहियादृशी ॥ स्याद्दर्प्पणेदर्पणताकेवलात्मस्वरूपिणी ॥५७॥ अहंत्वंजगदित्यादौप्रशांतेदृश्यसंभ्रमे ॥ स्यात्तादृशीकेवलतास्थितेद्रष्टर्यवीक्षणे॥५८॥ ॥श्रीरामउवाच॥ ॥सच्चेन्नशाम्यत्येवेदंनाभावोविद्यतेसतः॥ असत्तांचनविद्योस्मिन्दृश्येदोषप्रदायिनि ॥ ५९ ॥ तस्मात्कथमियंशाम्येद्दृश्यनदृश्यविषूचिका॥ मनोभवभ्रमकरीदुःखसंततिदायिनी ॥ ६० ॥ ॥श्रीवसिष्ठउवाच॥ ॥अस्यदृश्यपिशाचस्यशांत्यैमंत्रमिमंशृणु ॥ रामात्यंतमयंयेनस्मृतिमेष्यतिनंक्ष्यति ॥६१॥ यदस्तितस्यनाशोस्तिनकदाचनराघव ॥ तस्मात्तन्नष्टमप्यंतर्बीजभूतंभवेद्धृदि ॥६२॥ स्मृतिबीजाच्चिदाकाशेपुनरुद्भूयदृश्यधीः॥ लोकशैलांबराकारंदोषंवितनुतेऽतनुम् ॥६३॥ इत्यनिर्मोक्षदोषःस्यान्नचतस्येहसंभवः॥ यस्माद्देवर्षिमुनयोदृश्यंतेमुक्तिभाजनम् ॥६४॥ यदिस्याज्जगदादीदंतस्मान्मोक्षोनकस्यचित् ॥ बाह्यस्थमस्तुहृत्स्थंवादृश्यंनाशायकेवलम् ॥६५॥ तस्मादिमांप्रतिज्ञांत्वंशृणुरामातिभीषणाम् ॥ यामुत्तरेणग्रंथेननूनंत्वमवबुध्यसे ॥६६॥ अयमाकाशभूतादिरूपोहंचेतिलक्षितः॥ जगच्छब्दस्यनामार्थोननुनास्त्येवकश्चन ॥६७॥ यदिदंदृश्यतेकिंचिद्दृश्यजातंपुरोगतम् ॥ परब्रह्मैवतत्सर्वमजरामरमव्ययम् ॥६८॥

तथाचनाशलक्षणषष्ठविकारेणापितिरोहितस्यद्वैतस्यचित्तेप्रकृतौवास्थितस्यकामकर्मवासनाबीजात्पुनरुद्भवोदुर्वारइत्यनिर्मोक्षप्रसंगइति ॥ ६२ ॥ स्मृतिग्रहणंभोगोपयुक्तांतःकरणवृत्तिप्रमुखजगन्मात्रोपलक्षणम् ॥ ६३ ॥ मुक्तिभाजनंजीवन्मुक्ताः ॥ ६४ ॥ ननुचिदात्मायंस्वबाह्यप्रधानस्थमेवदृश्यंबुद्ध्यविवेकात्स्वहृत्स्थतयापश्यतिसोयंसंसारःविवेकज्ञानोदयात्तदविवेकाभिमाननिवृत्तौसत्यपिबहिस्तस्मिंस्ततोमोक्षःस्यादितिसांख्यरीतिमाशंक्याह ॥ यदीति ॥ ६५ ॥ तस्माद्विवर्त्तवादएवपरिशिष्यतइत्याशयेनाह ॥ तस्मादित्यादिना ॥ विषयरागिणामारंभादिवादिनांचभीषणाम् ॥ यथाहुर्गौडपादाः ॥ अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिनाम् ॥ योगिनोबिभ्यतियस्मादभयेभयदर्शिनइति ॥ ६६ ॥ ६७ ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीचोयद्ब्रह्मैक्यंतत्पूर्णेपूर्णंप्रसरतियतस्तच्छांतावस्थात्रयेशांतंवियदादिद्वैतंव्यवस्थितम् ॥ यतश्चव्योमन्येवघटाद्युपाधित्याणाद्व्योमेवोदितम् ॥ अतोब्रह्मण्येवब्रह्मतिष्ठतिनाणुमात्रमपितद्विकृतमित्यर्थः ॥ यत्रहियदध्यासस्तत्कृतेनगुणेनदोषेणवाअणुमात्रेणापिसनसंबद्ध्यतइति ॥ ६९ ॥ चिद्बुद्धिप्रतिबिंबचैतन्यम् ॥ ७० ॥ उक्तेविवर्त्तवादेपामराणामसंभावनामुद्घाटयन् ॥ श्रीरामउवाच ॥ वंध्यापुत्रेणेत्यादिना ॥ अत्रप्रायःपदार्थवाक्यार्थोभयासंभवप्रदर्शनायतथादृष्टांताः ॥७१॥ इत्येतानिवचांसीवप्रतिभांतीतिशेषः ॥७२॥ भवताप्रामाणिकमूर्द्धन्येनापिममविवेकशालिनोऽप्रतार्यस्यापीतिपामराशयसर्वस्वोक्तिः ॥ ७३ ॥ इदानींस्वाशयानुरूपमाह ॥ यथेति ॥७४॥ उक्तदोषंपरिहृत्यासतो

पूर्णेपूर्णंप्रसरतिशांतेशांतंव्यवस्थितम् ॥ व्योमन्येवोदितंव्योमब्रह्मणिब्रह्मतिष्ठति ॥ ६९ ॥ नदृश्यमस्तिसद्रूपंनद्रष्टानचदर्शनम् ॥ नशून्यंनजडंनोचिच्छांतमेवेदमाततम् ॥ ७० ॥ ॥ श्रीरामउवाच ॥ ॥ वंध्यापुत्रेणपिष्टोद्रिःशशशृंगंप्रगायति ॥ प्रसार्यभुजसंपातंशिलानृत्यतितांडवम् ॥ ७१ ॥ स्रवंतिसिकतास्तैलंपठंत्युपलपुत्रिकाः ॥ गर्जंतिचित्रजलदाइतीवेदंवचःप्रभो ॥ ७२ ॥ जरामरणदुःखादिशैलाकाशमयंजगत् ॥ नास्तीतिकिमिदंनामभवतापिममोच्यते ॥ ७३ ॥ यथेदंनस्थितंविश्वंनोत्पन्नंनचविद्यते ॥ तथाकथयमेब्रह्मन्येनैतन्निश्चितंभवेत् ॥ ७४ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ नासमन्वितवागस्मिश्शृणुराघवकथ्यते ॥ यथेदमसदाभातिवंध्यापुत्रइवारवी ॥ ७५ ॥ इदमादावनुत्पन्नंसर्गादौतेननास्त्यलम् ॥ इदंहिमनसोभातिस्वप्नादौपत्तनंयथा ॥ ७६ ॥ मनएवचसर्गादावनुत्पन्नमसद्वपुः ॥ तदेतच्छृणुवक्ष्यामियथैवमनुभूयते ॥ ७७ ॥ मनोदृश्यमयंदोषंतनोतीमंक्षयात्मकम् ॥ असदेवसदाकारंस्वप्नःस्वप्नांतरंयथा ॥ ७८ ॥ तत्स्वयंस्वैरमेवाशुसंकल्पयतिदेहकम् ॥ तेनेयमिंद्रजालश्रीर्विततेनवितन्यते ॥ ७९ ॥ स्फुरतिवल्गतिगच्छतियाचतेभ्रमतिमज्जतिसंहरतिस्वयम् ॥ अपरतामुपयात्यपिकेवलंचलतिचंचलशक्तितयामनः ॥ ८० ॥ ॥ इत्या० वा० वा० दे० मो० उत्पत्तिप्रकरणार्थकल्पनंनामचतुर्थःसर्गः ॥ ४ ॥ ॥ श्रीरामउवाच ॥ ॥ भगवन्मुनिशार्दूलकिमिवेहमनोभ्रमे ॥ विद्यतेकथमुत्पन्नंमनोमायामयंकुतः ॥ १ ॥

पिसत्यवद्भानंस्वप्नदृष्टांतेनसंभावयिष्यन् ॥ श्रीवसिष्ठउवाच ॥ नेत्यादिना ॥ आरवीध्वनिमान् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ विततेनचिरंभावनाविपुलेन ॥ ७९ ॥ केवलंमनएवचंचलशक्तितयायच्चलतितत्रैवस्फुरतीत्यादिभ्रमविभावनमितिभावः ॥ अपरतांसांसारिकदशाप्रयुक्तमपकर्षंकेवलंकैवल्यलक्षणोत्कर्षंचोपयाति ॥ ८० ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्प० उत्पत्ति० चतुर्थःसर्गः ॥ ४ ॥ विश्वस्यमूलंहिमनस्तस्यमूलमिहोच्यते ॥ तदेवमनसस्तत्त्वंविश्वस्येतिचवर्ण्यते ॥ १॥ एवंमनोमिथ्यात्ववर्णनेनप्रकरणार्थेकृतेतदधिष्ठानतत्त्वंतदारोपप्रकारंतस्यमिथ्यात्वेकारणंचविस्तरेणजिज्ञासमानः ॥ श्रीरामउवाच ॥ भगवन्निति ॥ किंविद्यतेमनोभ्रमेपरमार्थभूतंमूलंकिमित्यर्थः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वंजगदुत्पत्तिमूलमपहायमनोमूलमात्रप्रश्नेबीजमाह ॥ आदाविति ॥ आद्यस्यमूलपरिज्ञानेनैवसंक्षेपतःसर्वमूलपरिज्ञानोपपत्तेरित्याशयः ॥ २ ॥ तत्राद्यप्रश्नोत्तरंमुख्यत्वा द्विस्तरेणासर्गसमाप्तेर्वसिष्ठउवाच ॥ महाप्रलयेति ॥ अर्थाज्जगति ॥ असत्तांसूक्ष्मीभावादर्थक्रियाऽसमर्थताम् ॥ भाविनोऽशेषदृश्यसर्गस्यआदौ ॥ शांतंनिर्विक्षेपम् ॥३॥ सर्व कृत्सर्वक्रियाशक्तिसंपन्नः ॥ ४ ॥ मुक्तैर्जीवन्मुक्तैरवगम्यतेप्रत्यक्षमनुभूयते ॥ स्वोभावःअनारोपितरूपंतज्जानंकित्वारोपितधर्मजाः ॥ ५ ॥ सर्ववादिनामपिसएवतत्तद्बुद्धिक ल्पितविशेषैःसिद्धांतविषयइत्यविवादःसर्वाधिष्ठानेतस्मिन्नित्याह ॥ यइति ॥ विज्ञानमात्रंक्षणिकविज्ञानमात्रम् ॥ ६ ॥ सर्वेषांप्रत्यगात्मापिसएवेत्याह ॥ वक्तेति ॥ कृतंसत्यं

उत्पत्तिमादावितिमेसमासेनवदप्रभो ॥ प्रवक्ष्यसिततःशिष्टंवक्तव्यंवदतांवर ॥ २ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ महाप्रलयसंपत्तावसत्तां समुपागते ॥ अशेषदृश्यसर्गादौशांतमेवावशिष्यते ॥ ३ ॥ आस्तेनस्तमितोभास्वानजोदेवोनिरामयः ॥ सर्वदासर्वकृत्सर्वःपरमात्मामहे श्वरः ॥ ४ ॥ यतोवाचोनिवर्त्तंतेयोमुक्तैरवगम्यते ॥ यस्यचात्मादिकाःसंज्ञाःकल्पितानस्वभावजाः ॥ ५ ॥ यःपुमान्सांख्यदृष्टीनांब्रह्मवे दांतवादिनाम् ॥ विज्ञानमात्रंविज्ञानविदामेकांतनिर्मलम् ॥ ६ ॥ यःशून्यवादिनांशून्योभासकोयोर्कतेजसाम् ॥ वक्तामंताकृतंभो क्ताद्रष्टाकर्त्तासदैवसः ॥ ७ ॥ सन्नप्यसद्योजगतियोदेहस्थोपिदूरगः ॥ चित्प्रकाशोह्ययंयस्मादालोकइवभास्वतः ॥ ८ ॥ यस्माद्विष्णवाद योदेवाःसूर्यादिवमरीचयः ॥ यस्माज्जगंत्यनंतानिबुद्बुदाजलधेरिव ॥ ९ ॥ यंयांतिदृश्यवृंदानिपयांसीवमहार्णवम् ॥ यआत्मानंपदा र्थंचप्रकाशयतिदीपवत् ॥ १० ॥ यआकाशेशरीरेचदृषत्स्वप्सुलतासुच ॥ पांसुष्वद्रिषुवातेषुपातालेषुचसंस्थितः ॥ ११ ॥ यःप्लावय तिसंरब्धंपुर्यष्टकमितस्ततः ॥ येनमूकीकृतामूढाःशिलाध्यानमिवास्थिताः ॥ १२ ॥ व्योमयेनकृतंशून्यंशैलायेनघनीकृताः ॥ आपोद्रुताः कृतायेनदीपोयस्यवशोरविः ॥ १३ ॥ प्रसरंतियतश्चित्राःसंसारासारवृष्टयः ॥ अक्षयामृतसंपूर्णादंभोदादिववृष्टयः ॥ १४ ॥ आविर्भा वतिरोभावमयास्त्रिभुवनोर्मयः ॥ स्फुरंत्यतितेयस्मिन्मराविवमरीचयः ॥ १५ ॥

॥ ७ ॥ असत्वापादकाविद्यावृतत्वात्पामरदृशाअसत् ॥ अतएवदूरगः ॥ ८ ॥ देवाःप्रकाशप्राधान्यान्मरीचयइव ॥ अचेतनजगंतितुबुद्बुदानीव ॥ जायंतइतिशेषः ॥ ९ ॥ यां तिप्रलयेनापियंति ॥ तस्यैवस्वप्रकाशत्वात्स्वपरप्रथानिर्वाहकत्वमाह ॥ यइति ॥ आत्मानंप्रकाशयतीत्यभेदेपिराहोःशिरइतिवदुपचारः ॥ १० ॥ तस्यैवसर्वांतरत्वेनसर्वगत त्वमाह ॥ यइति ॥ ११ ॥ संरब्धंस्वस्वव्यापारेषूद्युक्तंकर्मेंद्रियाणिज्ञानेंद्रियाणिभूतसूक्ष्माणिप्राणाअविद्याकामकर्मांतःकरणमितिपुर्यष्टकमितस्ततोंतर्बहिश्चस्वचिद्वास्याप्लाव यति ॥ चेतनानांचेतनतायप्रयुक्तेत्यर्थः ॥ एवमचेतनानामपिवैचित्र्येसएवहेतुरित्याह ॥ येनेत्यादिना ॥ १२ ॥ यस्यवशःसनूरविर्दीपोदीप्तिस्वभावःप्रकाशकइतियावत् ॥ ये नसूर्यस्तपतितेजसेद्धइतिश्रुतेः ॥ १३ ॥ संसारलक्षणाअसारदृष्टयएवआसारवृष्टयः ॥ अक्षयेणनित्येनबहलेनचामृतेनसुखेनजलेनचसंपूर्णादितियथायोगमुभयविशेषणम् ॥ १४ ॥ प्राचुर्येमयट् ॥ अतितेत्यंतविस्तीर्णे ॥ मरीचयस्तदुदकानि ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रपंचात्मनानाशरूपः ॥ स्वरूपेणत्वविनाशात्मा ॥ सूक्ष्मतमत्वादंतर्गुप्तः ॥ महत्तमत्वात्सर्वतोप्यतिरिक्तः ॥ निष्प्रपंचतयावशिष्टः ॥ तथाचश्रुतिः ॥ पादोस्यसर्वाभूतानित्रिपा दस्यामृतंदिवीति ॥ १६ ॥ प्रकृतिर्मायासैवव्रततिर्लता ॥ व्योम्निशुद्धचिति ॥ येनेश्वरेण ॥ १७ ॥ समुद्गकेसंपुटके ॥ १८ ॥ भूतानिजाड्यप्राधान्याद्धाराजलानि ॥ स्फुटा श्चित्प्रकाशप्रधानाःस्रष्टयस्तडितः ॥ १९ ॥ चमत्कुर्वंतिविचित्रकार्याणिकुर्वते ॥ २० ॥ यःप्रसिद्धोदेवनरतिर्यगादिकायःअरक्तस्यासंगस्यानिच्छतश्चयस्यसन्निधौइदंदृश्य भूतमतएवपरमत्यंतंजडमपिचलति ॥ पदसंस्कारपक्षाश्रयणात्सामान्येनपुंसकम् ॥ २१ ॥ सर्गकालेवश्यंस्रष्ट्याभाव्यंप्रलयकालेचप्रलयेनेत्यादिनियमोनियतिस्तदवच्छेदकौ देशकालौ ॥ तत्राप्तौबीजाद्यंतर्गतकार्यस्यबीजोच्छूनतयाचलनम् ॥ बीजपुटंभित्त्वांकुरादिनिर्गमनेनस्पंदनम् ॥ ततःकांडपत्रशाखादिक्रमेणफलावसानोव्यापारःक्रिया ॥ इ त्येवंक्रमेणसर्वभावायेनसत्तांव्यवहारार्थक्रियासमर्थतांगताः ॥ सर्वसत्तातिगामिनेतितस्यजगद्विलक्षणपारमार्थिकसत्तोक्ता ॥ २२॥ अथवासएवमायिकव्योमादिभावैर्वचित

नाशरूपोविनाशात्मायोंतःस्थःसर्वजंतुषु॥गुप्तोयोप्यतिरिक्तोपिसर्वभावेषुसंस्थितः॥१६॥ प्रकृतिव्रततिर्व्योम्निजाताब्रह्मांडसत्फला॥ चित्तमूलेंद्रियदलायेननृत्यतिवायुना॥१७॥ यश्चिन्मणिःप्रकचतिप्रतिदेहसमुद्गके॥ यस्मिन्निंदौस्फुरंत्येताजगज्जालमरीचयः॥१८॥ प्रशांतेचिद्घनेयस्मिन्स्फुरंत्यमृतवर्षिणि॥ धाराजलानिभूतानिस्रष्टयस्तडितःस्फुटाः॥१९॥ चमत्कुर्वंतिवस्तूनियद्दालोकतयामिथः॥ असज्जातमसद्येनयेनसत्सत्त्वमागतम्॥२०॥चलतीदमनिच्छस्यकायोयोयस्यसन्निधौ॥जडंपरमरक्तस्यशांतमात्मनितिष्ठतः॥२१॥ नियतिर्देशकालौचचलनंस्पंदनंक्रिया॥ इतियेनगताःसत्तांसर्वसत्तातिगामिना॥ २२॥ शुद्धसंविन्मयत्वाद्यःखंभवेद्व्योमचिंतया॥ प दार्थचिंतयार्थत्वमिवतिष्ठत्यधिष्ठितः॥ २३॥ कुर्वन्नपीहजगतांमहतामनंतवृंदंनकिंचनकरोतिनकाश्चनापि॥ स्वात्मन्यनस्तमयसंवि दिनिर्विकारेत्यक्तोदयस्थितिमतिस्थितएकएव ॥ २४ ॥ ॥इत्यार्षेवा० महारा० वा० दे० मोक्षोपायेषूत्पत्तिप्रकरणेमूलकारणदेवस्व रूपवर्णनंनामपंचमःसर्गः॥५॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥अस्यदेवाधिदेवस्यपरस्यपरमात्मनः॥ज्ञानादेवपरा सिद्धिर्नत्वनुष्ठानदुःखतः॥ १ ॥

याव्योमादिभावेनसंपन्नोनततोन्यद्व्योमादिशब्दभागस्तीत्याह ॥ शुद्धेति ॥ तथाचश्रुतिः ॥ सर्वाणिरूपाणिविचित्यधीरोनामानिकृत्वाभिवदन्यदास्तइति ॥ चमत्कुर्वंतीत्यायेतदंतेनश्लोकचतुष्टयेनजगदारोपप्रकारप्रश्नस्याप्युत्तरमुक्तम्॥२३ संप्रतितस्यमिथ्यात्वेकारणमाह ॥ कुर्वन्नपीति ॥ निर्विकारेअतएवत्यक्तस्वजातीयाद्युदयादिमतियतोयंस्थितस्ततोऽयंमहतांजगतांब्रह्मांडानांवृंदंतत्रविचित्रलीलाश्चकुर्वन्नपि नकिंचनकार्यंनकाश्चनक्रियाःकरोतीतिनिर्विकारोपादानकत्वमेवकार्यमिथ्यात्वेहेतुरित्यर्थः ॥ २४ ॥ ॥ इतिश्रीवासिष्ठ० उत्पत्ति० पंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ज्ञानादेवभवेत्प्राप्तिरात्मनोनतुकर्मभिः ॥ ज्ञानोपायेष्वतोयत्नःक्रमश्चात्रोपवर्ण्यते ॥ १ ॥ इत्थंजगन्मूलकारणंदेवस्वरूपमुपवर्ण्यतत्प्राप्त्युपायज्ञानसाधनान्युपदिदिक्षुःश्रीवसि ष्ठउवाच ॥ अस्येत्यादि ॥ देवस्यहिरण्यगर्भस्यादिकारणत्वात्तदधिदेवस्यद्योतकत्वाद्देवानामिंद्रियमनसामपिसाक्षितयाप्रकाशकत्वात्तेषामधिदेवस्येतिवा ॥ १ ॥

परमात्मा॰ कथं भूतस्यतस्य
यः नरतीर्यगादिनां काय स्वरूपस्य यस्य अरक्तस्य परमात्मनः सांनिधौ दृश्य भूतं इदंजडं शान्तमपि चलतीव कृयावानिव दृश्यते । २१।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुष्ठानमिववक्ष्यमाणप्रयत्नसंपाद्यत्वाज्ज्ञानमपिगौण्यानुष्ठानमुच्यते ॥ कर्मकोटिभिरपिदुर्भेद्यस्यज्ञानमात्रेणनिवृत्तावनुरूपंदृष्टांतमाह ॥ मृगतृष्णेति ॥ निरूपितंदृष्टम् ॥ २ ॥ नातिदूरेनातिसन्निहितेक्रियामंतरेणालभ्येविषमादिस्थेचफलेक्रियासफलास्यादात्मातुनतथेतितस्यनक्रियालभ्यतेत्याह ॥ नहीति ॥ विस्मृतकंठचामीकरवज्ज्ञानलभ्यतात्व स्यसुलभेत्याह ॥ स्वानंदेति ॥ ३ ॥ अत्रास्यांप्रागुक्तदेवप्राप्तौ ॥ ४ ॥ अत्रतत्प्राप्तिसाधनेज्ञानेऽपिकुतःसर्वथाकर्मनिरपेक्षतातत्राह ॥ साधनमिति ॥ यद्यतोमोहजालस्यबाध नमकृत्रिमंनित्यसिद्धंब्रह्मैवचरमसाक्षात्कारवृत्त्यारूढंसद्बाधनंबाधेकारणंनान्यदित्यर्थः ॥ ५॥ दुःखनिवृत्तौजीवन्मुक्तौवातर्हिसाधनांतरंस्यात्तत्राह ॥ अयमिति ॥ ६ ॥ तमेतं

अत्रज्ञानमनुष्ठानंनत्वन्यदुपयुज्यते ॥ मृगतृष्णाजलभ्रांतिशांतौचेदंनिरूपितम् ॥ २ ॥ नह्येषदूरेनाभ्याशेनालभ्योविषमेनच ॥ स्वानंदाभासरूपोसौस्वदेहादेवलभ्यते ॥ ३ ॥ किंचिन्नोपकरोत्यत्रतपोदानव्रतादिकम् ॥ स्वभावमात्रेविश्रांतिमृतेनात्रास्तिसाधनम् ॥ ४ ॥ साधुसंगमसच्छास्त्रपरतैवात्रकारणम् ॥ साधनंबाधनंमोहजालस्ययदकृत्रिमम् ॥ ५ ॥ अयंसदेवइत्येवसंपरिज्ञानमात्रतः ॥ जंतोर्नजायतेदुःखंजीवन्मुक्तत्वमेतिच ॥ ६ ॥ ॥ श्रीरामउवाच ॥ ॥ संपरिज्ञातमात्रेणकिलानेनात्मनात्मना ॥ पुनर्दोषानबाधंतेमरणाद्याःकदाचन ॥ ७ ॥ देवदेवोमहानेषकुतोदूरादवाप्यते ॥ तपसाकेनतीव्रेणक्लेशेनकियताथवा ॥ ८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ स्वपौरुषप्रयत्नेनविवेकेनविकासिना ॥ सदेवोज्ञायतेरामनतपःस्नानकर्मभिः ॥ ९ ॥ रागद्वेषतमःक्रोधमदमात्सर्यवर्ज्जनम् ॥ विनारामतपोदानंक्लेशएवनवास्तवम् ॥ १० ॥ रागाद्युपगतेचित्तेवंचयित्वापरंधनम् ॥ यदर्ज्यतेतस्यदानाद्यस्यार्थास्तस्यतत्फलम् ॥ ११ ॥ रागाद्युपहतेचित्तेव्रतादिक्रियतेचयत् ॥ तद्दंभःप्रोच्यतेतस्यफलमस्तिमनाङ्नच ॥ १२ ॥ तस्मात्पुरुषयत्नेनमुख्यमौषधमाहरेत् ॥ सच्छास्त्रसज्जनासंगौसंसृतिव्याधिनाशिनौ ॥ १३ ॥ अत्रैकंपौरुषंयत्नंवर्जयित्वेतरागतिः ॥ सर्वदुःखक्षयप्राप्तौनकाचिदुपपद्यते ॥ १४ ॥

वेदानुवचनेनेतिप्रत्यक्षंयज्ञदानतपसांज्ञानसाधनत्वश्रवणात्किंचिन्नोपकरोतीत्याद्युक्तिःसाधारणतपआदिविषयातीव्रतरतपआदिविधित्सयेतिमन्यमानःश्रीरामउवाच ॥ संपरीति ॥ ७ ॥ अदूराच्छीघ्रमवाप्यतेज्ञानेनप्राप्यते ॥ शीघ्रंतज्ज्ञानंकेनोपायेनसिद्ध्यतीत्यर्थः ॥ ८ ॥ विविदिषार्थेविहितानांनिष्कामकर्मणांजन्मांतरानुष्ठितसाधारणानांविविदिषोत्पत्तावेवोपक्षयात्तत्यामुत्कटविविदिषायांश्रवणादिप्रयत्नएवोपयुज्यतेनतपआदीतिमन्यमानःश्रीवसिष्ठउवाच ॥ स्वपौरुषेत्यादिना ॥ ९ ॥ नवास्तवंसाधनमितिशेषः ॥ १० ॥ तत्कुतस्तत्राह ॥ रागादीति ॥ सतिरागादौधनार्जनेपरवंचनाद्यवश्यंभावाच्चित्तशुद्धेरेवदौर्लभ्याद्दानादेःकाम्यंफलमपिदुर्लभंदूरेततोज्ञानमोक्षप्रत्याशेत्याशयेनाह ॥ रागादीति द्वाभ्याम् ॥ ११ ॥ १२ ॥ मुख्यमौषधमेवादौद्विधादर्शयति ॥ सच्छास्त्रेति ॥ १३ ॥ इतरागतिरुपायांतरम् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ वृत्त्याजीवनसाधनसंपत्त्या ॥ भोगगंधंभोगवासनांतदभिनिवेशमितियावत् ॥ १६ ॥ अनुद्विग्नतयाअशक्यमिदमितिनिर्वेदउद्विग्नतातद्वर्जनेन ॥ स्वयाआत्मीययाहि तयेतियावत् ॥ १७ ॥ गर्हितंशास्त्रशिष्टैर्निदितम् ॥ १८ ॥ परिज्ञातःस्वभावआत्मतत्त्वंयेनतस्य ॥ १९ ॥ साधुंलक्षयति ॥ देशइति ॥ सुजनाःश्रुतिस्मृत्याचारनिष्ठास्तत्प्राया स्तत्प्रचुरालोकाजनायंप्रचक्षतेसचेद्विशिष्टैर्ज्ञानवैराग्यादिगुणैःसहितःस्यात्तर्हिससाधुःस्यादित्यर्थः ॥ २० ॥ आत्मानमधिकृत्यप्रवृत्ताविद्याज्ञानमध्यात्मविद्यातदुत्पत्त्यनुकूल विचारात्मककथायाआश्रयंशास्त्रमुपनिषत्सूत्रभाष्यैतद्ग्रंथादि ॥ २१ ॥ ननुसत्स्वनेकेषूपायेषुकुतःसाधुसंगमसच्छास्त्रेएवप्रशस्येतेतत्राह ॥ सच्छास्त्रेति ॥ अविद्यामोहाविद्या विरोधिनोरागादयश्च ॥ जलानांपंकाइतिशेषः ॥ मतयोबाह्यमनोवृत्तयोयोगाभ्यासाद्विनश्यंति ॥ २२ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्पत्ति०षष्ठःसर्गः ॥ ६॥

शृणुतत्पौरुषंकीदृगात्मज्ञानस्यलब्धये॥ येनशाम्यत्यशेषेणरागद्वेषविषूचिका॥ १५॥ यथासंभवयावृत्त्यालोकशास्त्राविरुद्धया॥ संतोषसंतुष्टमनाभोगगंधंपरित्यजेत् ॥ १६ ॥ यथासंभवमुद्योगादनुद्विग्नतयास्वया ॥ साधुसंगमसच्छास्त्रपरतांप्रथमंश्रयेत् ॥ १७॥ यथाप्राप्तार्थसंतुष्टोयोगर्हितमुपेक्षते॥ साधुसंगमसच्छास्त्रपरःशीघ्रंसमुच्यते॥ १८॥ विचारेणपरिज्ञातस्वभावस्यमहामतेः॥ अनुकंप्याभवंत्येतेब्रह्मविष्णिवद्रशंकराः ॥ १९ ॥ देशेयंसुजनप्रायालोकाःसाधुंप्रचक्षते ॥ सविशिष्टःससाधुःस्यात्तंप्रयत्नेनसंश्रयेत्॥ २०॥ अध्यात्मविद्याविद्यानांप्रधानंतत्कथाश्रयम्॥ शास्त्रंसच्छास्त्रमित्याहुर्मुच्यतेतद्विचारणात् ॥ २१ ॥ सच्छास्त्रसत्संगमजैर्विवेकैस्तथा विनश्यंतिबलादविद्याः॥ यथाजलानांकतकानुषंगाद्यथाजनानांमतयोपियोगात्॥ २२॥ ॥इत्यार्षेवासिष्ठम०वा०दे० मोक्षोपाये उत्पत्ति० मुमुक्षुप्रयत्नोपदेशोनामषष्ठःसर्गः ॥६ ॥

॥ ७॥ ॥श्रीरामउवाच॥ ॥ यएषदेवःकथितोयस्मिन्ज्ञातेविमुच्यते ॥ वद क्वासौस्थितोब्रह्मन्कथमेनमहंलभे॥ १॥ ॥श्रीवसिष्ठउवाच॥ ॥ यएषदेवःकथितोनैषदूरेवतिष्ठते ॥ शरीरेसंस्थितोनित्यंचिन्मात्रमितिविश्रुतः॥ २॥ एषसर्वमिदंविश्वंनविश्वंचैषसर्वगः॥ विद्यतेह्येषएवैकोनतुविश्वाभिधास्तिदृक्॥ ३ ॥

विरिंच्यादिजगन्मूलंयोदेवःप्राङ्गिरूपितः ॥ निरस्तनिखिलोपाधेस्तस्यतत्त्वमिहोच्यते ॥ १ ॥ प्रसंगजिज्ञासितेसाधनेपरिज्ञातेप्रस्तुतजगत्कारणस्यवास्तवंरूपंजिज्ञासुःश्रीरामउवाच ॥ यइति ॥ योविरिंच्यादिकारणभूतएषप्रत्यगात्मभूतोदेवःप्राक्कथितःअसौककस्मिन्नुपाधावनावरणेनाभिव्यक्तःकीदृशेवातत्त्वेस्थितः ॥ कथंलभेइत्यौत्सुक्योक्तिःसाधनानांपूर्वमुक्तत्वादंतरंगोपायांतरप्रश्नोवा ॥ १ ॥ तत्रादौप्रथमप्रश्नोत्तरमाह ॥ यइति ॥ नैषदूरेवतिष्ठतइत्यौत्सुक्यपरिहारार्थमुक्तिः ॥ शरीरेसामान्याभिव्यक्त्यातदंतर्हृदयपुंडरीकेतुविशेषतःसम्यगभिव्यक्तःस्थितइत्यर्थः ॥ २ ॥ तर्हिकिंदेहपरिच्छिन्नएवसनेत्याह ॥ एषइति ॥ तर्हिकिंदृश्यविश्वाकारएवनेत्याह ॥ नेति ॥ सर्वाधिष्ठानभावेनसर्वगतत्वप्रतिपादनायविश्वात्मत्वोक्तिरितिभावः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंकार्यात्मकंविश्वमेवतद्यतिरेकेणनास्तिकिंतुतत्कारणमायापिसहतद्गुणाभिमानिदेवैरित्याशयेनाह ॥ चिन्मात्रमेषइति ॥ गरुडस्येश्वरोनियंताविष्णुः ॥ तपनस्यत्रिमूर्त्यात्मत्वप्रसिद्धेस्तत्पंक्तावुक्तिः ॥ ४ ॥ चिन्मात्रमित्यत्रकर्त्तरिक्किबंतान्मात्रचिचेतनमात्रंविश्वमित्यर्थोलभ्यतेतच्चलोकेआबालगोपालंप्रसिद्धंपुरुषार्थापर्यवसितंचेतिनोपदेशार्हमितिमन्यमानानामाशयमुद्घाटयन्रामःशंकते ॥ बालाअपीति॥५॥नासौकर्त्तरिक्किप्अपितुभावे ॥ तथाचनोक्तदोषइतिमन्यमानोवसिष्ठःप्रागुक्तकल्पंनिदति ॥ चिन्मात्रमिति॥ किंचिदल्पमपिनविज्ञातं ॥ भ्रांतेरज्ञानलेशस्याप्यनिवृत्तेरितिभावः ॥ ६ ॥ कुतोनविज्ञातंतत्राह ॥ चेतनमिति ॥ कर्त्तरिक्किबंतत्वेचिच्चेतनशब्दौतुल्यार्थौस्यातां ॥ नंद्यादिल्युप्रत्ययस्यापिकर्त्तर्येवविधानाच्चितिकर्त्तृतदर्थःस्यात् ॥नचनित्यचितेःकर्तृत्वसंभवइत्यनित्यमनोवृत्तिप्रतिफलनचित्परिग्रहेतदाश्रयभूतमंतःकरणमेवात्मतयागृह्णंस्तदात्माजीवउक्तःस्यात् ॥ सचबहिर्मुखतयाविषयानेवसारतयापश्यन्पशुः ॥ एतस्मादेवदेहेंद्रियविषयवासनानुसारात्तत्तद्देहपरिग्रहेजरामरणादयोंतस्थानिर्यातीवाविर्भवंतीत्यर्थः ॥ ७ ॥ ननुमू

चिन्मात्रमेषशशिभृच्चिन्मात्रंगरुडेश्वरः॥ चिन्मात्रमेवतपनश्चिन्मात्रंकमलोद्भवः ॥ ४ ॥ ॥ श्रीरामउवाच ॥ ॥ बालाअपिवदंत्येतद्यदिचेतनमात्रकम्॥ जगदित्येवकैवात्रनामस्यादुपदेशता ॥ ५ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ चिन्मात्रंचेतनंविश्वमितियज्ज्ञातवानसि॥ नकिंचिदेवविज्ञातंभवताभवनाशनम् ॥ ६ ॥ चेतनंरामसंसारोजीवएषपशुःस्मृतः॥ एतस्मादेवनिर्यातिजरामरणभीतयः॥ ७॥ पशुरज्ञोह्यमूर्त्तोपिदुःखस्यैवैषभाजनम्॥ चेतनत्वाच्चेतनीयंमनोऽनर्थःस्वयंस्थितः॥८॥ चेत्यनिर्मुक्ततायास्यादचेत्योन्मुखताथवा॥ अस्यसाभरितावस्थातांज्ञात्वानानुशोचति॥ ९ ॥ भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे ॥ १० ॥ तस्यचेत्योन्मुखत्वंतुचेत्यासंभवनंविना॥ रोद्धुंनशक्यतेदृश्यंचेत्यंशाम्यतिवैकथम्॥ ११ ॥

र्त्तस्थूलशरीरातिरिक्ततयातज्ज्ञानादेवजरामरणादिप्रत्ययःसिद्धःअशरीरंवावसंतंनप्रियाप्रियेस्पृशतइतिश्रुतेरित्याशंक्याह ॥ पशुरिति ॥ अमूर्त्तस्थूलदेहशून्योप्यसौनकृतार्थोयतोऽज्ञःअज्ञानवान्चेतनीयंयन्मनस्तद्रूपोऽनर्थश्चस्वयंभूत्वास्थितोऽतोदुःखस्यैवभाजनम् ॥ अशरीरमित्यादिश्रुतेस्तुस्थूलसूक्ष्मकारणाख्यदेहत्रयरहितंप्रियाप्रियेनस्पृशतइत्यर्थोनस्थूलदेहमात्ररहितमिति ॥ तथात्वेपिस्वप्नेप्रियाप्रियदर्शनादितिभावः ॥ ८ ॥ कीदृशस्यतर्हितस्यज्ञानात्कृतकृत्यतातत्राह ॥ चेत्येति ॥ चेत्यनिर्मुक्ततामुक्तौअचेत्योन्मुखतातुसमाधौप्रसिद्धा ॥ ९॥ तत्रश्रुतिंप्रमाणयति ॥ भिद्यतइति ॥ मूलाज्ञाननाशात्तत्कार्यांतःकरणतादात्म्याध्यासलक्षणोहृदयग्रंथिर्भिद्यतेनश्यतितन्नाशादेवतन्मूलकसंशयादयोपीत्यर्थः ॥ परंकारणमप्यवरंयस्मात्तथाविधे ॥ १० ॥ ननुतर्हिचित्तनिरोधलक्षणयोगेनैवचेत्योन्मुखत्वस्यरोद्धुंशक्यत्वात्किंज्ञानप्रयासेनतत्राह ॥ तस्येति ॥ चेत्यस्यदृश्यस्यासंभवनंज्ञानेनमूलतोबाधं ॥ शाम्यतिवैकथंविनाज्ञानमितिशेषः ॥ तथाचविनाज्ञानंतादृशस्वरूपसमाधिरेवनसिद्ध्यतीत्यर्थः ॥ ११ ॥ ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंमोक्षोपिज्ञानमंतरेणदुर्लभइत्याह ॥ अचेत्येति ॥ यन्मोक्षाख्यमचेत्यचित्स्वरूपंतच्चअसंभवनंप्रागुक्तचेत्यासंभवनंविनाक्व॥हियस्मात्समाधौकेवलंस्वरूपोन्मुखत्वमपिचेत्य रोधतोदृश्यबाधादेवभवतितत्रकिंवाच्यंमोक्षेतदावश्यकत्वमितिभावः ॥ १२ ॥ यस्मिन्निति ॥ ननुरामस्येदंप्रश्नश्लोकद्वयमप्यसंगतं चेतनंरामसंसारोजीवएषपशुःस्मृतइति जीवस्वरूपस्यतदाधारस्यमनोमूलकारणस्यचप्रागुक्तत्वेनाद्यश्लोकानुत्थानात् ॥ ब्रह्मस्वरूपस्यचसर्गाद्यश्लोकेपृष्टत्वेनपुनःप्रश्नानर्हत्वादितिचेत् एवंतर्हिनयथाश्रुतप्रश्नोरामा भिप्रेतःकिंत्वाक्षेपः ॥ तथाहि ॥ ननुजीवएवसंसारइतिव्याहतंतस्यब्रह्मप्राप्तौब्रह्मणोऽपिसंसारित्वप्रसंगात् ॥ तदप्राप्तौतुतत्साधनज्ञानशास्त्रादिवैयर्थ्यं ॥ तस्मादन्यदेवजैवंरूपं वाच्यं ॥ तथातदाधारोऽपिकिंब्रह्मैवउतान्यत् ॥ आद्येज्ञानेनब्रह्माध्यस्तसर्वद्वैतेनसहबाधापत्तौवरघातन्यायापत्तिः ॥ द्वितीयेब्रह्माद्वैतव्याघातइतिमन्यमानःश्रीरामःपृच्छति ॥ यस्मिन्निति ॥ व्योमेवरूपीकल्पितरूपवान् ॥ कुत्रकस्मिन्नाधारेतिष्ठतिकीदृशःकिंसंसारकोटावुतान्यकोटावित्यर्थः ॥ १३ ॥ किंचयदिजीवःसंसारकोटावेवतर्हितस्यसंसा

अचेत्यचित्स्वरूपंयत्तच्चासंभवनंविना॥ क्वस्वरूपोन्मुखत्वंहिकेवलंचेत्यरोधतः॥ १२ ॥ ॥ श्रीरामउवाच॥ ॥ यस्मिञ्जीवेहिविज्ञाते नविनश्यतिसंसृतिः॥ व्योमरूपीपशुस्त्वज्ञःसब्रह्मन्कुत्रकीदृशः॥ १३॥ साधुसंगमसच्छास्त्रैःसंसारार्णवतारकः॥ दृश्यतेपरमात्मायः सब्रह्मन्वदकीदृशः॥ १४ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ यदेतच्चेतनंजीवोविशीर्णोजन्मजंगले॥ एतमात्मानमिच्छंतियेतेज्ञाःपंडिताअ पि॥ १५॥ जीवएवहिसंसारश्चेतनादुःखसंततिः॥ अस्मिन्ज्ञातेनविज्ञातंकिंचिद्भवतिकुत्रचित्॥ १६ ॥ ज्ञायतेपरमात्माचेद्रामदुःख स्यसंततिः॥ क्षयमेतिविषावेशशांताविवविषूचिका॥ १७॥ ॥ श्रीरामउवाच॥ ॥ रूपंकथयमेब्रह्मन्यथावत्परमात्मनः॥ यस्मिन्दृ ष्टेमनोमोहान्समग्रान्संतरिष्यति॥ १८॥

रार्णवतारकोयःशास्त्रैरुपदिश्यतेसकीदृशः ॥ नहिजलधिमेवजलधेःकश्चित्तारयति ॥ तस्माद्व्याहतंजीवस्यसंसारत्ववचनमिति ॥ १४ ॥ स्यादेतदेवंयदिजीवएवसंसरेज्जीवएव स्वज्ञानान्मुच्येतजीवएववातात्विकआत्मास्यात् ॥ नत्वेवम् ॥ ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवदितिश्रुतौब्रह्मणएवस्वाज्ञानात्संसारःस्वज्ञा नान्मुक्तिरितिप्रतिपादनविरोधात् ॥ नान्योऽतोस्तिद्रष्टेत्यादिचेतनधात्वंतरप्रतिषेधविरोधाच्च ॥ यदातुब्रह्मैवअनेनजीवेनात्मनेतिश्रुतेरिदंकारास्पदत्वात्कल्पितत्वाच्चानात्मभूतेन संसारकोट्यंतर्भूतेनैवजीवेनात्मतयाभ्रांत्यागृहीतेनतद्धर्मैर्जीवोहमितिमन्यमानंसंसरतितदाजीवस्यैवसंसारत्वंपर्यवसन्नमितितद्बाधेऽपिनवरघातन्यायापातादिदोषइत्यभिप्रेत्य स्वोक्तमेवद्रढयन्श्रीवसिष्ठउवाच ॥ यदेतदित्यादिना ॥ जन्मग्रहणंशरीरसंघोपलक्षणम् ॥ १५ ॥ १६ ॥ १७ ॥ एवंसमाहितोरामःसर्गोपक्रमपृष्टार्थमेवप्रासंगिकोक्तिव्यव हितमितिपुनःस्पष्टंपृच्छति ॥ रूपमिति ॥ कार्यबाहुल्यान्मोहानितिबहुवचनम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रलोकेनिर्विषयज्ञानाप्रसिद्धेर्निर्विषयानावृतापरोक्षचिद्रूपंतदित्युक्तेप्यनुभवपथानारोहाद्यथातत्तमारोहतितथाह॥ देशादिति॥ शाखाग्रचंद्रदर्शनेचक्षुर्द्वारानिःसृतांतःकरणाभिव्यक्तापरोक्षसंविदःशाखादेशाद्दूरंचंद्रदेशंनिमिषांतरमात्रेणप्राप्तायाःशाखाचंद्रयोर्युगपद्ग्रहणान्यथानुपपत्त्याशाखाप्रदेशमारभ्यचंद्रपर्यंतमनुस्यूतता अवश्यंवाच्या ॥ अंतरालेविच्छेदेकारणानुभवयोरभावात् ॥ तत्रतस्याःशाखाचंद्रप्रदेशयोःसविषयत्वेऽपिमध्येयद्वपुःस्वरूपंतदेवनिर्विषयापरोक्षचिद्रूपंप्रसिद्धमितिपरमात्मनोऽपितद्रूपंज्ञेयमित्यर्थः ॥१९॥यथास्थितेःनाशादिविकारमंतरेणैवस्वस्थानेमिथ्यात्वमापन्नस्येतियावत् ॥ जगत्स्थितेरितिपाठेपिगच्छतिबाधमितिजगदितिव्युत्पत्त्याअयमेवार्थः ॥२०॥ तदेवस्पष्टमाह॥ द्रष्टृिति॥आकाशबाधेऽप्यपरिच्छिन्नत्वेनविपुलत्वादाकाशम्॥२१॥जगत्स्वभावशून्यमपियत्सर्ववस्तुयाथात्म्यभूतस्वरूपेणपूर्णत्वादणुमात्रेणाप्यशून्यमिवशून्यमसदपिजगद्यस्मिन्स्थितंसद्भावमापन्नमित्यर्थः ॥ सर्गलक्षणाओघायस्यतथाविधेअज्ञानेसतियत्सदप्यनुपयोगाच्छून्यमिवशून्यम् ॥२२॥ महाचित्प्रचुरत्वादस्थूलादिधर्मकमप्यज्ञदृशा

श्रीवसिष्ठउवाच॥ ॥देशाद्देशांतरंदूरंप्राप्तायाःसंविदोवपुः॥ निमिषेणैवयन्मध्येतद्रूपंपरमात्मनः॥ १९ ॥ अत्यंताभावएवास्तिसंसारस्ययथास्थितेः॥ यस्मिन्बोधमहांभोधौतद्रूपंपरमात्मनः ॥ २० ॥ द्रष्टृदृश्यक्रमोयत्रस्थितोप्यस्तमयंगतः ॥ यदनाकाशमाकाशंतद्रूपंपरमात्मनः ॥ २१ ॥ अशून्यमिवयच्छून्यंयस्मिन्शून्यंजगत्स्थितम् ॥ सर्गौघेसतियच्छून्यंतद्रूपंपरमात्मनः ॥ २२ ॥ यन्महाचिन्मयमपिबृहत्पाषाणवत्स्थितम्॥ जडंवाजडमेवांतस्तद्रूपंपरमात्मनः ॥ २३ ॥ सबाह्याभ्यंतरंयेनसर्वंसंप्राप्यसंगमम् ॥ स्वरूपसत्तामाप्नोतितद्रूपंपरमात्मनः॥ २४ ॥ प्रकाशस्ययथालोकःशून्यत्वंनभसोयथा॥ तथेदंसंस्थितंयत्रतद्रूपंपरमात्मनः ॥ २५॥ श्रीरामउवाच॥ ॥सद्रूपंपरमात्मेतिकथंनामहिबुध्यते॥इयतोस्यजगन्नाम्नोदृश्यस्यासंभवःकथम्॥ २६॥ ॥श्रीवसिष्ठउवाच॥ ॥भ्रमस्यजागतस्यास्यजातस्याकाशवर्णवत्॥ अत्यंताभावसंबोधेयदिरूढिरलंभवेत्॥ २७॥

पाषाणवद्बृहत्स्थूलमंतरजडमेवजडंवा ॥ इवार्थेवाशब्दः ॥ जडमिवस्थितमित्यर्थः ॥ २३ ॥ बाह्यमधिभूताधिदैवमभ्यंतरमध्यात्मंचयत्प्रसिद्धंतत्सहितंसर्वंगजयेनसंगममाध्यासिकतादात्म्यंसंप्राप्यसत्सदितिव्यवहारयोग्यतालक्षणांस्वरूपसत्तामाप्नोतीत्यर्थः ॥ २४ ॥ प्रकाशादेरालोकादियथाआत्मतयासंस्थितंतथेतिलोकदृष्ट्यादृष्टांतोक्तिः ॥ वस्तुतस्त्वांत्यात्कार्यादनुगतंब्रह्मैवसर्वभावानामात्मानत्वांतरालिकाःप्रकाशादयइति ॥२५॥ यत्खलुप्रमाणैर्यथावगम्यतेतत्तथैवसत्नरूपांतरेण ॥ ब्रह्मचनावगम्यतेतत्कथंसद्रूपंनिश्चेतुंशक्यंजगच्चतथावगम्यमानंकथमसदितिरामःशंकते ॥ सद्रूपमिति ॥ इयतइदंप्रमाणस्यविपुलस्यबहुप्रमाणसिद्धस्यचेत्यर्थः ॥ २६ ॥ ब्रह्मप्रमाणैर्नावगम्यतइत्यसिद्धम्॥ असतिप्रतिबंधकेमहावाक्यैस्तदवगमात् ॥ प्रतिबंधनिरासस्तुतदध्यस्तद्वैतमिथ्यात्वबोधेनैव ॥ नहिसर्पादिकमप्रत्याख्यायरज्जुतत्त्वंबोधयितुंशक्यमित्यभिप्रेत्यश्रीवसिष्ठउवाच॥ भ्रमस्येत्यादिना ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२८॥ यःशिष्यतेसबुद्ध्यतेयोबुद्ध्यते ॥ सततोबोधात्बोद्धुरात्मैवजायतइत्यर्थः॥२ ९॥ उक्तेर्थेउपपत्तिमाह ॥ नेति ॥ विदोब्रह्मणःप्रतिबिंबोनास्तिबुद्धाविति शेषः ॥ बुद्धौप्रतिबिंबितंहिब्रह्मस्यावरकमज्ञानंदहत्तत्त्वतःप्रतीयेत ॥ नचाध्यस्तसत्यताबुद्धौब्रह्मप्रतिबिंबति ॥ विरोधिद्वैताक्रांतबुद्धावद्वैतप्रतिबिंबानुदयादित्यर्थः ॥ ननुद्वैतप्रतिबिंबशून्यतादशायां ब्रह्मप्रतिबिंबतांतत्राह ॥ क्वचिदिति ॥ यथाआदर्शःक्वचिदपिकिंचित्प्रतिबिंबग्रहणंविनानावतिष्ठतेतद्वद्बुद्धिरपिद्वैतप्रतिबिंबग्रहणंविनेत्यर्थः ॥३० ॥ अनयोपपत्त्यापिप्रागुक्तंसिद्धमित्याह ॥ जगदिति ॥ स्वसत्ताऽसंभवंमिथ्यात्वंतन्निश्चयमितियावत् ॥३१॥ रामःकिंचिदधिकंविशेषमभिप्रेत्यद्वितीयंप्रश्नमुत्थापयति ॥ इयतइति ॥ भवेदेवंयदिब्रह्मणिजगदध्यस्तंस्यात्तदेवत्वसंभवि चिन्मात्ररूपत्वात्परमसूक्ष्मेब्रह्मणिइयतोब्रह्मांडविस्तृतस्थूलप्रपंचस्याध्यासाघटनात्तदेतदाह ॥ क्वमेरुरिति ॥३२ ॥ भवेदेवंयदिजगतिस्थूलताविम

तज्ज्ञातंब्रह्मणोरूपंभवेन्नान्येनकर्मणा॥दृश्यात्यंताभावतस्तुक्तेनान्याशुभागतिः॥२८॥अत्यंताभावसंपत्तौदृश्यस्यास्ययथास्थितेः॥ शिष्यतेपरमार्थोसौबुद्ध्यतेजायतेततः॥२९॥ नविदःप्रतिबिंबोस्तिदृश्याभावादृतेक्वचित्॥क्वचिन्नाप्रतिबिंबेनकिलादर्शोवतिष्ठते॥३० जगन्नाम्नोस्यदृश्यस्यस्वसत्तासंभवंविना॥बुद्ध्यतेपरमंतत्त्वंनकदाचनकेनचित्॥३१॥ ॥श्रीरामउवाच॥ ॥इयतोदृश्यजातस्यब्रह्मांडस्यजगत्स्थितेः॥ मुनेकथमसत्तास्तिक्वमेरुःसर्षपोदरे ॥ ३२॥ ॥श्रीवसिष्ठउवाच॥ ॥दिनानिकतिचिद्रामयदितिष्ठस्यखिन्नधीः॥ साधुसंगमसच्छास्त्रपरमस्तदहंक्षणात्॥३३॥ प्रमार्जयामितेदृश्यंबोधेमृगजलंयथा॥ दृश्याभावेद्रष्टताचशाम्येद्बोधोवशिष्यते॥३४॥ द्रष्टत्वंसतिदृश्येस्मिन्दृश्यत्वंसत्यथेक्षके॥ एकत्वंसतिहिद्वित्वेद्वित्वंचैकत्वयोजने ॥ ३५॥ एकाभावेद्वयोरेवसिद्धिर्भवतिनात्रहि॥ द्वित्वैक्यद्रष्टृदृश्यत्वक्षयेसदवशिष्यते॥३६॥ अहंतादिजगद्दृश्यंसर्वंतेमार्जयाम्यहम्॥ अत्यंताभावसंवित्त्यामनोमुकुरतोमलम्॥ ३७॥नासतोविद्यतेभावोनाभावोविद्यतेसतः॥ यत्तुनास्तिस्वभावेनकःक्लेशस्तस्यमार्जने॥ ३८॥ जगदादावनुत्पन्नंयच्चेदंदृश्यतेततम्॥ तत्स्वात्मन्येवविमलेब्रह्मचित्त्वात्स्वबृंहितं॥ ३९॥ जगन्नाम्नानचोत्पन्नंनचास्तिनचदृश्यते॥ हेम्नीवकटकादित्वंकिमेतन्मार्जनेश्रमः॥ ४०॥

र्शसहास्यान्नतुसातथा स्थूलताप्रत्ययएवयदातवास्माभिःकालेनोपपत्तिभिःशिथिलीकरिष्यतेतदात्वमस्मदुक्तमवधारयिष्यसीत्यभिप्रेत्य श्रीवसिष्ठउवाच॥दिनानीत्यादिना॥ अखिन्नधीरनुद्विग्नचित्तः ॥ ३३ ॥ ३४ ॥ दृश्यद्वैताभावेनकेवलंद्रष्टुरेवाभावःकिंतुद्वित्वैकत्वयोरपीत्युपपादयति ॥ द्रष्टृत्वमिति ॥ सतिईक्षकेद्रष्टरीत्यर्थः ॥ एकत्वंहिद्वित्वादावन्यत्रप्रसिद्धेसतितद्व्यावृत्तयेकल्प्यतेनव्यावर्त्याप्रसिद्धावित्यर्थः ॥ ३५ ॥ इत्थंद्वैतैक्यवर्जितंसन्मात्रंपरिशिष्यतइत्याह ॥ द्वित्वैक्येति ॥ ३६॥ प्रकारांतरेणापिदृश्यमार्जनंप्रतिजानीते ॥ अहंतादीति ॥ ३७ ॥ असतोहिसत्ताविकारोविवर्त्तःस्वरूपंवोच्येत नत्रयमपि खपुष्पादौत्रयस्याप्यदर्शनादेवंसतोप्यसत्त्वंस्वरूपव्याघातादेवासंभवीत्यनिर्वचनीयतासिद्धौनतस्यमार्जनेक्लेशइत्यर्थः ॥ ३८ ॥ एवमुत्पत्तिरपिसतोव्यर्थाअसतस्त्वसंभविनीतिहेम्निकल्पितंकटकत्वंहेमदृष्ट्यैवसुबाधमित्याह ॥ जगदितिद्वाभ्याम् ॥ ३९॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यमाणप्रकारांतरोक्तीरपिप्रसंगात्प्रतिजानीते ॥ तथेति ॥ ४१ ॥ अनुत्पन्नस्यसत्तैवग्रहणमप्यसदेवेत्याह ॥ आदाविति ॥ ४२ ॥ एवंचभ्रांतितद्विषययोरुभयोरप्यसत्तासि
द्धेतिसदृष्टांतमाह ॥ यथेति ॥ ४३ ॥ किंतर्हिदर्शनाभासेषुपरमार्थतोस्तितदाह ॥ यदिदमिति ॥ युक्तितआख्यानाद्युपपत्तितः ॥ ४४ ॥ अनुभवयथानारोहेकियुक्तिसहस्रे
णापिलक्ष्यापराद्धेषोर्धानुष्कस्येवेत्यवहेलनामाशंक्याह ॥ यदिति ॥ तज्ज्ञास्तत्त्वज्ञाः ॥ अवमत्यअनादृत्य ॥ कष्टेनिर्युक्तिकेआग्रहोऽभिनिवेशोयस्यतथाविधोयोभवतितम
॥ १५ ॥ ज्ञमेवविदुःप्राज्ञाइतिशेषः ॥ ४५ ॥ ॥ इतिश्रीवासिष्ठमहा०तात्पर्यप्रकाशेउत्पत्तिप्र०सप्तमःसर्गः ॥ ७ ॥ प्रागुक्ततत्त्वविज्ञानंसच्छास्त्रेभ्योनचान्यतः ॥ सच्छास्त्रेष्वप्ययंग्रंथः ३

तथैतद्विस्तरेणाहंवक्ष्यामिबहुयुक्तिभिः॥ अबाधितंयथातत्त्वंस्वयमेवानुभूयते॥ ४१ ॥ आदावेवहिनोत्पन्नंयत्तस्येहास्तिताकुतः ॥ कु
तोमरौजलसरिद्वितीयेंदौकुतोग्रहः॥ ४२॥ यथावंध्यासुतोनास्तियथानास्तिमरौजलम्॥ यथानास्तिनभोवृक्षस्तथानास्तिजगद्भ्रमः॥
॥ ४३ ॥ यदिदंदृश्यतेरामतद्ब्रह्मैवनिरामयम्॥ एतत्पुरस्ताद्वक्ष्यामियुक्तितोनगिरैवच ॥ ४४ ॥ यन्नामयुक्तिभिरिहप्रवदंतितज्ज्ञास्तत्रा
वहेलनमयुक्तमुदारबुद्धे॥ योयुक्तियुक्तमवमत्यविमूढबुद्धिःकष्टाग्रहोभवतितंविदुरज्ञमेव ॥ ४५ ॥ ॥ इत्यार्षेवा० उ० जगदादिदृश्या
सत्ताप्रतिज्ञानामसप्तमःसर्गः॥ ७ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ कथैतज्ज्ञायतेयुक्त्याकथमेतत्प्रसिद्ध्यति॥ न्यायानुभूतएतस्मि
न्नज्ञेयमवशिष्यते॥ १ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ बहुकालमियंरूढामिथ्याज्ञानविषूचिका ॥ जगन्नाम्न्यविचाराख्याविनाज्ञानंन
शाम्यति ॥ २ ॥ वदाम्याख्यायिकारामयाइमाबोधसिद्धये ॥ ताश्चेच्छृणोषितत्साधोमुक्तएवासिबुद्धिमान् ॥ ३ ॥ नोचेदुद्वेगशीलत्वाद
र्द्धादुत्थायगच्छसि॥ तत्तिर्यग्धर्मिणस्तेघनाकिंचिदपिसेत्स्यति ॥ ४ ॥ योयमर्थंप्रार्थयतेतदर्थंयततेतथा॥ सोवश्यंतदवाप्नोतिनचेच्छ्रांतो
निवर्त्तते ॥ ५ ॥ साधुसंगमसच्छास्त्रपरोभवसिरामचेत्॥ तद्दिनैरेवनोमासैःप्राप्नोषिपरमंपदम् ॥ ६ ॥ ॥ श्रीरामउवाच ॥ ॥ आत्म
ज्ञानप्रबोधायशास्त्रंशास्त्रविदांवर॥ किंनामतत्प्रधानंस्याद्यस्मिन्ज्ञातेनशोच्यते ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ आत्मज्ञानप्रधाना
नामिदमेवमहामते॥ शास्त्राणांपरमंशास्त्रंमहारामायणंशुभम् ॥ ८ ॥ इतिहासोत्तमादस्माच्छ्रुताद्बोधःप्रवर्त्तते॥ सर्वेषामितिहासाना
मयंसारउदाहृतः॥ ९ ॥ श्रुतेस्मिन्वाङ्मयेयस्माज्जीवन्मुक्तत्वमक्षयम् ॥ उदेतिस्वयमेवातइदमेवातिपावनम् ॥ १० ॥

सद्यःफलइतीर्यते ॥ १ ॥ वक्ष्यामियुक्तितइतियत्प्रतिज्ञातंगुरुणातत्श्रीरामःपृच्छति ॥ कथैतदिति ॥ यदिदंदृश्यतेरामतद्ब्रह्मैवनिरामयमितियदुक्तमेतत् ॥ एतस्मिन्नित्यनेनाप्यस्यै
वपरामर्शः ॥ १ ॥ २ ॥ वदामिवक्ष्यामि ॥ इमास्त्वत्पृष्टयुक्तिप्रधानाःसन्निहिताः ॥ ३ ॥ नोचेतूनश्रृणोषिचेत् ॥ अश्रवणेहेतुमाह ॥ उद्वेगेति ॥ तत्तर्हितिरश्चांपश्वादीनांधर्मः
सच्छास्त्रश्रवणायोग्यतातद्वतः ॥ ४ ॥ ननुमहतामपिदुर्लभमिदंकथंमादृशेनलभ्येतेतिमंदमतेरनाश्वासमाशंक्याह ॥ यइति ॥ निवर्त्ततेअर्द्धप्रयत्नादितिशेषः ॥ ५ ॥ ६ ॥ ७ ॥ ॥ १५ ॥
॥ ८ ॥ कुतोस्योत्तमत्वंतत्राह ॥ सर्वेषामिति ॥ ९ ॥ वाङ्मयेवाक्यसंदर्भात्मकेग्रंथे ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथास्वप्नादौस्थितेएवस्वप्नोयमितिपरिज्ञातेस्वप्नसत्यत्वभावनाअस्तमभ्येतितद्वत् ॥ ११ ॥ अन्यत्रग्रंथांतरे ॥ यद्बोधोपयुक्तयुक्तिजातम् ॥ विज्ञानशास्त्रधनानांकोशगृहम् ॥
॥ १२ ॥ बोधस्येतरग्रंथजन्यबोधस्यापिपरमुत्कृष्टंबोधम् ॥ पंचम्यर्थेषष्ठी ॥१३॥ यस्मैएतन्नरोचतेसोन्यत्सच्छास्त्रंविचारयतुनास्माकंतत्रप्रद्वेषइत्यर्थः ॥१४॥ कस्तर्ह्यस्याति
शयेहेतुस्तमाह ॥ जीवन्मुक्तत्वमिति ॥ १५ ॥ एतज्जीवन्मुक्तत्वमात्मनास्वयमेववेत्त्यनुभवति ॥ इदमस्माभिरुक्तंवरवत्शापवद्वायथावत्यथार्थमेवभवतिनान्यथेत्यर्थः॥१६॥
स्वात्मविचारणात्मिकयाप्रकृतग्रंथकथयैवनश्यति ॥ धनैर्दानैस्तपोभिःश्रुतैर्द्वैतशास्त्रश्रवणैःकर्मकांडरूपैर्वेदैश्चद्वैतवेदशास्त्रलक्षणेनकथनेनवाक्यप्रबंधेनउदितयागहोमादिय
त्नशतेनचतेसंसृतिदुःखंनोनश्यतीत्यर्थः ॥ १७ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्पत्ति०अष्टमःसर्गः ॥ ८ ॥ ॥७॥ ॥ जीवन्मुक्तस्यलक्ष्माणितस्य

स्थितमेवास्तमायातिजगद्दृश्यंविचारणात् ॥ यथास्वप्नेपरिज्ञातेस्वप्नादावेवभावना ॥ ११ ॥ यदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित् ॥
इमंसमस्तविज्ञानशास्त्रकोशंविदुर्बुधाः ॥ १२ ॥ यइदंशृणुयान्नित्यंतस्योदारचमत्कृतेः ॥ बोधस्यापिपरंबोधंबुद्धिरेतिनसंशयः ॥ १३ ॥
यस्मैनेदंत्वरुचयेरोचतेदुष्कृतोदयात् ॥ विचारयतुयत्किंचित्सच्छास्त्रंज्ञानवाङ्मयम् ॥ १४ ॥ जीवन्मुक्तत्वमस्मिंस्तुश्रुतेसमनुभूयते ॥
स्वयमेवयथापीतेनीरोगत्वंवरौषधे ॥ १५ ॥ श्रूयमाणेहिशास्त्रेस्मिन्श्रोतावेत्त्येतदात्मना ॥ यथावदिदमस्माभिर्ननूक्तंवरशापवत्
॥ १६ ॥ नश्यतिसंसृतिदुःखमिदंतेस्वात्मविचारणयाकथयैव ॥ नोधनदानतपःश्रुतवेदैस्तत्कथनोदितयत्नशतेन ॥ १७ ॥ ॥ इत्यार्षे
वा०वा०दे०मो०उत्पत्ति०सच्छास्त्रनिरूपणंनामाष्टमःसर्गः ॥ ८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ तच्चित्तास्तद्गतप्राणाबोधयंतःपरस्प
रम् ॥ कथयंतश्चतन्नित्यंतुष्यंतिचरमंतिच ॥ १ ॥ तेषांज्ञानैकनिष्ठानामात्मज्ञानविचारिणाम् ॥ साजीवन्मुक्ततोदेतिविदेहान्मुक्ततैवया
॥२॥ ॥श्रीरामउवाच॥ ॥ब्रह्मन्विदेहमुक्तस्यजीवन्मुक्तस्यलक्षणम् ॥ ब्रूहियेनतथैवाहंयतेशास्त्रदृशाधिया ॥३॥ ॥श्रीवसिष्ठउवाच॥
यथास्थितमिदंयस्यव्यवहारवतोपिच ॥ अस्तंगतंस्थितंव्योमजीवन्मुक्तःसउच्यते ॥ ४ ॥

सर्वात्मतातथा ॥ जगत्प्रलयशिष्टात्मस्वरूपंचेहकीर्त्यते ॥ १ ॥ आत्मविचारोपियावदवधारणंतदेकप्रवणतालक्षणएवापेक्ष्यतेनकादाचित्कोव्यापारांतरव्यवहिताद्यत्तोवा ॥
आत्मक्रीडआत्मरतिःक्रियावानेषब्रह्मविदांवरिष्ठः ॥ ब्रह्मसंस्थोऽमृतत्वमेतीत्यादिश्रुतेरित्यभिप्रेत्यश्रीवसिष्ठउवाच ॥ तच्चित्ताइति ॥ तस्मिन्नात्मन्येवचित्तंयेषाम् ॥ तद्गतास्त
त्प्राप्तावेवोद्युक्ताःप्राणाजीवनव्यापारायेषाम् ॥ १ ॥ ज्ञानेज्ञानसाधनश्रवणादौएकानिष्ठाअनन्यव्यापारतालक्षणास्थितिर्येषाम् ॥ विदेहाद्देहविगमाद्याशुद्धामुक्ततैवनान्येत्य
र्थः ॥ २ ॥ श्रवणादिफलोक्तिप्रसंजितेजीवन्मुक्तविदेहमुक्तलक्षणेजिज्ञासुःश्रीरामउवाच ॥ ब्रह्मन्निति ॥ शास्त्रलक्षणयादृशाचक्षुषोत्पादितयाधिया ॥ ३ ॥ विदेहमुक्तेर्जी
वन्मुक्तिपूर्वकत्वात्पाठक्रमादर्थक्रमोबलीयानितिन्यायेनप्रश्नक्रममुल्लंघ्यप्रथमंजीवन्मुक्तलक्षणंश्रीवसिष्ठउवाच ॥ यथेति ॥ शास्त्रानिषिद्धव्यवहारवतोपियस्यविश्वंपरमार्थ
दृशाबाधादस्तंगतंसद्व्योमआकाशमिवशून्यंस्थितंदर्पणनगरमिवप्रतीयमानमपिनास्त्येवेत्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽव्यवहर्त्तासन्नपिनैवकिंचित्करोमीतियुक्तोमन्येततत्त्वविदितिभगवदुक्तदिशाजाग्रत्यपिसुप्तवन्निर्विकारआस्ते ॥ ५॥ ६ ॥ निर्विकारेस्वात्मनिसुषुप्तइवतिष्ठतीतिसुषुप्तस्थस्त थाभूतोपियोऽविद्यानिद्राक्षयात्स्वात्मनिजागर्त्तिदेहेंद्रियादिबाधादिंद्रियैरर्थोपलब्धिलक्षणाजाग्रद्यस्यनविद्यते ॥ यस्यबोधोनिर्वासनइतिजाग्रद्वासनोद्भवनिमित्तःस्वप्नोपिय स्यनविद्यतइतिभावः ॥७॥ अनुरूपंयथोचितंनटइवानुकाराभिनयमितिवा ॥ अच्छेनिरावरणात्मनितिष्ठतीत्यच्छस्थः ॥ सुपिस्थइतिकः ॥८ ॥ नलिप्यतेकर्त्तृत्वाकर्त्तृत्वाभिमा नाभ्यामित्यर्थः ॥९॥ यस्यविदश्चिदात्मनउन्मेषादावरणविघटनात्त्रिलोक्याःप्रलयंनिमेषादावरणाच्चप्राक्संभवंयःपश्येदित्यर्थः ॥ विदेहमुक्तावेवनिःशेषोन्मेषात्साक्षिणीश्वरे चावरणाभावाच्चोभयत्राप्यद्वादित्युक्तिः ॥१०॥ नोद्विजतेनबिभेति ॥ लोकोजनः ॥ यतोसौहर्षामर्षभयहेत्वज्ञानाभिमानोन्मुक्तः ॥११॥ यतोसौसचित्तःसचेतनोपिनिश्चित्तो

बोधैकनिष्ठतांयातोजाग्रत्येवसुषुप्तवत् ॥ यआस्तेव्यवहर्त्तैवजीवन्मुक्तःसउच्यते ॥ ५ ॥ नोदेतिनास्तमायातिसुखेदुःखेमुखप्रभा ॥ य थाप्राप्तस्थितेर्यस्यजीवन्मुक्तःसउच्यते ॥६॥ योजागर्तिसुषुप्तस्थोयस्यजाग्रन्नविद्यते ॥ यस्यनिर्वासनोबोधः सजीवन्मुक्तउच्यते ॥७॥ रागद्वेषभयादीनामनुरूपंचरन्नपि ॥ योंतर्व्योमवदच्छस्थःसजीवन्मुक्तउच्यते ॥ ८ ॥ यस्यनाहंकृतोभावोयस्यबुद्धिर्नलिप्यते ॥ कुर्वतो ऽकुर्वतोवापिसजीवन्मुक्तउच्यते ॥ ९ ॥ यस्योन्मेषनिमेषार्द्धाद्विदःप्रलयसंभवौ ॥ पश्येत्त्रिलोक्याःस्वसमःसजीवन्मुक्तउच्यते ॥ १० ॥ य स्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः ॥ हर्षामर्षभयोन्मुक्तःसजीवन्मुक्तउच्यते ॥ ११ शांतसंसारकलनःकलावानपिनिष्कलः ॥ यः सचित्तोपिनिश्चित्तःसजीवन्मुक्तउच्यते ॥१२॥ यःसमस्तार्थजातेषुव्यवहार्यपिशीतलः ॥ पदार्थेष्वपिपूर्णात्मासजीवन्मुक्तउच्यते ॥१३॥ जीवन्मुक्तपदंत्यक्त्वादेहेकालवशीकृते ॥ विशत्यदेहमुक्तत्वंपवनोस्पंदतामिव ॥१४॥ विदेहमुक्तोनोदेतिनास्तमेतिनशाम्यति ॥ नसन्ना सन्नदूरस्थोनचाहंनचनेतरः ॥ १५ ॥ सूर्योभूत्वाप्रतपतिविष्णुःपातिजगत्त्रयम् ॥ रुद्रःसर्वान्संहरतिसर्गान्सृजतिपद्मजः ॥ १६ ॥ खंभू त्वापवनस्कंधंधत्तेसर्षिसुरासुरम् ॥ कुलाचलगतोभूत्वालोकपालपुरास्पदः ॥ १७॥

निर्मनस्कः ॥ शांतासंसारस्यकलनासत्यतामतिर्यस्यसः ॥ परदृष्ट्याकलावान्देहावयववानपिनिष्कलोनिरवयवः ॥ १२ ॥ शीतलोरागाद्यतापितः ॥ यतोयंरागादिविषयेष्व पिपदार्थेषुपूर्णस्तेषामप्यात्मा ॥ नह्यहेयोपादेयेस्वात्मनितदध्यस्तेमिथ्यात्वेननिश्चितेवार्थेरागादिसंभवइतिभावः ॥ १३ ॥ इदानींप्रथमपृष्टंविदेहमुक्तलक्षणंवक्तुमुपक्रमते ॥ जीवन्मुक्तेति ॥ कालेनवशीकृतेग्रस्तेप्रारब्धक्षयेसतीतियावत् ॥१४॥ तस्यादौविद्वदनुभवसिद्धंस्वरूपलक्षणमाह ॥ विदेहमुक्तइति ॥ उदयास्तमयौवृद्ध्यपक्षयौ ॥ सन्व्यक्तः ॥ असन्नव्यक्तः ॥ नचअहंअहंनेतिचन ॥ नचइतरः ॥ १५ ॥ तस्यलोकदृष्ट्यासार्वात्म्यलक्षणंतटस्थलक्षणमाह ॥ सूर्यइत्यादिना ॥ १६ ॥ कुलाचलोमेरुर्मानसोत्तरश्च ॥ त योरेवलोकपालपुरप्रसिद्धेः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकस्थितिंजनमर्यादाम् ॥ १८ ॥ हालाहलसंज्ञंविषंभूत्वाम्रतंमरणंप्रसवर्ती।तिच्छांदसोविकरणव्यत्ययः ॥ १९ ॥ तेजोभवत्प्रकटयत्याशादिशः ॥ २० ॥ चित्तःस्फुटांतः
करणाभिव्यक्तचैतन्यतः ॥ स्थावराकृतिःअस्फुटचित्तत्वाज्जडप्रायाकृतिः ॥ भूरेवस्त्रीताम् ॥२१॥ परमार्कवपुरनावरणचिदात्माप्रकाशांततत्प्रकाशव्याप्तंत्रिजगदादित्रसरेण्वं
तंपदार्थौघंविसारयन्विस्तारयन्नपिस्वयंशांतंनिर्विकारमेवावतिष्ठते ॥ २२ ॥ २३ ॥ प्रतिबंधबाहुल्येनसमदृष्टिदौर्लभ्यान्मुक्तेर्दौर्लभ्यंमन्यमानस्तत्प्राप्त्युपायसोत्कंठःश्रीरामउ
वाच ॥ कथमिति ॥ हियस्माद्विषमादृष्टिः ॥ एषामुक्तिर्दुष्प्राप्या ॥ अथकथंचित्प्रापितत्रचित्तस्थैर्यस्यदुष्करत्वाद्दुरारोहेतिमेनिश्चयइत्यन्वयः ॥ २४ ॥ एवंसोत्कंठंरामंत
त्प्राप्त्युपायोपदेशेनाश्वासयन्श्रीवसिष्ठउवाच ॥ मुक्तिरित्यादिना ॥ २५ ॥ अनात्मन्यारोपितप्रत्यक्त्वमहंत्वम् ॥ पराक्त्वेतनत्वंत्वंत्वम् ॥ सतःसदितिभासमानस्याप्यस्यवंध्यापु

भूमिर्भूत्वाबिभर्त्तीमांलोकस्थितिमखंडिताम्॥ तृणगुल्मलताभूत्वाददातिफलसंततिम्॥ १८ ॥ बिभ्रज्जलानलाकारंज्वलतिद्रवतिद्रु
तम्॥ चंद्रोम्रतंप्रसवतिम्रतंहालाहलंविषम्॥ १९॥ तेजःप्रकटयत्याशास्तनोत्यांध्यंतमोभवत्॥ शून्यंसद्व्योमतामेतिगिरिःसन्रोधय
त्यलम्॥ २०॥ करोतिजंगमंचित्तःस्थावरंस्थावराकृतिः॥ भूत्वार्णवोवलयतिभूस्त्रियंवलयोयथा॥ २१ ॥ परमार्कवपुर्भूत्वाप्रकाशां
तंविसारयन्॥ त्रिजगत्त्रसरेण्वोघंशांतमेवावतिष्ठते॥ २२॥ यत्किंचिदिदमाभातिभातंभानमुपैष्यति ॥ कालत्रयगतंदृश्यंतदसौसर्व
मेवच॥ २३॥ ॥श्रीरामउवाच॥ ॥कथमेवंवदब्रह्मन्भूयतेविषमाहिमे॥ दृष्टिरेषाथदुष्प्राप्यादुराक्रम्येतिनिश्चयः॥ २४॥ श्रीवसि
ष्ठउवाच॥ ॥मुक्तिरेषोच्यतेरामब्रह्मैतत्समुदाहृतम्॥ निर्वाणमेतत्कथितंशृणुतत्प्राप्यतेकथम्॥ २५॥ यदिदंदृश्यतेदृश्यमहंत्वंतादिसं
युतम्॥ सतोप्यस्यात्यनुत्पत्त्याबुद्धयैतदवाप्यते॥ २६॥ ॥श्रीरामउवाच॥ ॥विदेहमुक्तास्त्रैलोक्यंसंपद्यंतेयदातदा॥ मन्येतेसर्गता
मेवगतावेद्यविदांवर॥ २७॥ ॥श्रीवसिष्ठउवाच॥ ॥विद्यतेचेत्त्रिभुवनंतत्तत्तांसंप्रयांतुते॥ यत्रत्रैलोक्यशब्दार्थोनसंभवतिकश्चन
॥ २८॥ एतत्त्रिलोकतांयातंब्रह्मेत्युक्तार्थधीःकुतः॥ तस्मान्नोसंभवत्येषाजगच्छब्दार्थकल्पना ॥ २९॥ अनन्यच्छांतमाभासमात्रमा
काशनिर्मलम्॥ ब्रह्मैवजगदित्येतत्सर्वंसत्वाववबोधतः॥ ३०॥ अहंहिहेमकटकेविचार्यापिनदृष्टवान्॥ कटकत्वंक्वचिन्नामऋतेनिर्मल
हाटकात्॥ ३१॥

त्रस्येवात्यंतमनुत्पत्त्या ॥ २६ ॥ ब्रह्मणःसार्वात्म्यश्रवणाद्ब्रह्मप्राप्तौतद्भावेनसंसारप्राप्तिरेवकिंनस्यादितिरामःशंकते ॥ विदेहेति ॥ तेविदेहमुक्ताःसर्गतांसंसारभावमेवगताइतिम
न्ये ॥ २७ ॥ प्रागुक्तात्यंतानुत्पत्तिमेवावलंब्यवसिष्ठःपरिहरति ॥ विद्यतेचेदिति ॥ तत्तर्हितत्तांतत्तत्सर्गरूपताम् ॥ तेमुक्ताः ॥ यत्रनसंभवतितत्रउक्तार्थधीःकुतइत्युत्तरेणान्व
यः ॥ २८ ॥ उक्तार्थधीस्त्वच्छंकितार्थबुद्धिः ॥ तस्मादित्युपसंहारः ॥ २९ ॥ अनन्यदद्वयम् ॥ आभासमात्रंचिन्मात्रम् ॥ सत्वंसन्मात्रभावस्तदवबोधतः ॥ ३० ॥ प्रत्यग्दृष्ट्या
पर्यालोचनेतदध्यस्तस्यासत्वंदृष्टांतैरनुभावयति ॥ अहंहीत्यादिना ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ ३३ ॥ ३४ ॥ एवंदर्शितदृष्टांतान्पर्यालोच्यगुरूक्तार्थंश्लोकद्वयेनसंभावयंस्तत्रविपरीतभावनाविक्षेपात्पुनरसंभावनाविकल्पोदयैरप्रतिष्ठितेनमनसावधारयितुमशक्नुवन्निवतदवधारणोपायंपृच्छति ॥ अत्यंतेत्यादिना ॥ जगद्दृश्यस्यात्यंताभावसंपत्तिर्बाधस्तया ॥ ३५ ॥ मिथःएकसंख्ययोःसंपन्नयोर्बाधपरिशिष्टस्वप्रकाशात्मभावापन्नयोरितियावत् ॥ ३६ ॥ ३७ ॥ ३८ ॥ श्रुतार्थस्यसकृत्संभावनोदयेपुनःपुनश्चिरमननाभ्यासएवतत्प्रतिष्ठावधारणोपायइतिश्रीवसिष्ठउवाच ॥ बहुकालमित्यादिना ॥ ३९ ॥ शिखरारूढस्यपुंसःसर्वतःसममधःप्रपतनंयस्मात्तथाविधेऽद्रौसमेतुल्यकालेआरोहावरोहणेयथाझटित्येवकर्तुंनशक्यतेतद्वत् ॥ ४० ॥ ४१ ॥ वक्ष्यमाणजगत्प्रल

जलादृतेपयोवीचौनाहंपश्यामिकिंचन॥ वीचित्वंतादृशंदृष्टंयत्रनास्त्येवतत्रहि॥ ३२ ॥ स्पंदत्वंपवनादन्यन्नकदाचनकुत्रचित्॥ स्पंदएवसदावायुर्जगत्तस्मान्नभिद्यते॥३३॥ यथाशून्यत्वमाकाशेतापएवमरौजलं॥ तेजएवसदालोकेब्रह्मैवत्रिजगत्तथा॥३४॥ ॥श्रीरामउवाच॥ ॥अत्यंताभावसंपत्त्याजगद्दृश्यस्यमुक्तता॥यथोदेतिमुनेयुक्त्यातांममोपदिशोत्तमाम्॥३५॥मिथःसंपन्नयोर्द्रष्टृदृश्ययोरेकसंख्ययोः ॥ द्वयाभावेस्थितिंयातेनिर्वाणमवशिष्यते ॥ ३६ ॥ दृश्यस्यजगतस्तस्मादत्यंतासंभवोयथा ॥ ब्रह्मैवेत्थंस्वभावस्थंबुध्यतेवदमेतथा॥३७॥ कयैतज्ज्ञायतेयुक्त्याकथमेतत्प्रसिद्ध्यति॥ एतस्मिंस्तुमुनेसिद्धेनसाध्यमवशिष्यते ॥ ३८॥ ॥श्रीवसिष्ठउवाच॥ ॥बहुकालमियंरूढामिथ्याज्ञानविषूचिका॥नूनंविचारमंत्रेणनिर्मूलमुपशाम्यति॥३९॥ नशक्यतेझटित्येषासमुत्सादयितुंक्षणात्॥ समप्रपतनेत्यद्रौसमरोहावरोहणे॥४०॥ तस्माद्भ्यासयोगेनयुक्त्यान्यायोपपत्तिभिः॥ जगद्भ्रांतिर्यथाशाम्येत्तवेदंकथ्यतेशृणु॥ ॥४१॥ वक्ष्याम्याख्यायिकांरामयामिमांबोधसिद्धये॥ तांचेच्छृणोषितत्साधोमुक्तएवासिबोधवान् ॥ ४२ ॥ अथोत्पत्तिप्रकरणंमयेदंतवकथ्यते॥ यत्किलोत्पद्यतेरामतेनमुक्तेनभूयते ॥ ४३ ॥ इयमित्थंजगद्भ्रांतिर्भात्यजातैवखात्मिका ॥ इत्युत्पत्तिप्रकरणेकथ्यतेस्मिन्मयाधुना॥४४॥ यदिदंदृश्यतेकिंचिज्जगत्स्थावरजंगमम्॥ सर्वंसर्वप्रकाराढ्यंससुरासुरकिंनरम्॥४५॥ तन्महाप्रलयेप्राप्तेरुद्रादिपरिणामिनि॥ भवत्यसद्दृश्यात्मकापियातिविनश्यति॥ ४६॥

याख्यायिकाम् ॥ ४२ ॥ अथप्रलयाख्यायिकानंतरम् ॥ उत्पत्तिप्रकरणंजगदुत्पत्तिक्रमः ॥ सचनिर्विकारोपादानकोविवर्त्तएवपर्यवस्यतीतिबंधमिथ्यात्वेस्वतःसिद्धएवमोक्षइतितद्वर्णनाशयइत्याह ॥ यदित्यादिना ॥ यद्यदुत्पद्यतेइतिप्रतिपाद्यतेतेनतेनमुक्तेनतत्तद्बंधशून्येनस्वेनभूयतेस्थीयतइत्यर्थः ॥ ४३ ॥ ४४ ॥ अजातैवखात्मिकाभातीत्युक्तमर्थंप्रलयाख्यायिकयासमर्थयितुमुपक्रमते ॥ यदिदमिति ॥ यदिदंजगद्दृश्यतेतत्प्रलयेअसद्भवतीत्युत्तरेणान्वयः ॥ ४५ ॥ महाप्रलयेप्राकृते ॥ रुद्रादीनांपरिणामिनितिरोभावयितरि ॥ विनश्यतीत्यस्यन्याख्याअसदृश्यात्मेति ॥ ४६ ॥ ॥ १७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंशून्यांतंनश्यतिनेत्याह ॥ ततइति ॥ अनाख्यमनभिव्यक्तमितिनामरूपप्रतिषेधः ॥ ४७ ॥ तत्प्रतिषेधेनामरूपशून्यवस्तुनोजगत्यत्यंताप्रसिद्धेःशून्यतामाशंक्याह ॥ नेति ॥ तर्हितस्याशून्यस्याकारदृश्यदर्शनादिभावःपरिशेषात्स्यात्तत्राह ॥ नापीत्यादिना ॥ आकारमितिच्छांदसंमत्वर्थीयाजंतंवा ॥ ४८ ॥ अनाख्यत्वादेवाव्यपदेशात्म ॥ अव्यपदेश्यतामेवप्रपंचयति ॥ नसदित्यादिना ॥ भवनंकालसंबंधउत्पत्तिर्वातद्वानूभावः ॥ ४९ ॥ नविद्यतेआदिःकारणंयस्यतदनादि ॥ ५० ॥ मुक्ताभुजांहंसानांतत्परिणामत्वात्पूर्वंमुक्तात्मनापश्चाद्धंसात्मनाचदृष्टतदुभयानुगतद्रव्यवच्चित्रभ्रांत्यादिदृष्टमुक्तामयहंसवद्वा ॥ यश्चेदमध्यारोपदृशा ॥ नैवेदमपवाददृशा ॥ सदसदात्मकोव्यक्ताव्यक्तावस्थाद्वयानुगतः ॥ ५१ ॥ कर्णनासाद्यभावेपिश्रवणादिकमस्यस्वमेप्रत्यक्षम् ॥ तथाचश्रुतिः ॥ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णइति ॥ ५२ ॥ येनालोकेनप्रागु

ततस्तिमितगंभीरंनतेजोनतमस्ततम् ॥ अनाख्यमनभिव्यक्तंसत्किंचिदवशिष्यते ॥ ४७ ॥ नशून्यंनापिचाकारंनदृश्यंनचदर्शनम् ॥ नचभूतपदार्थौघोयदनंततयास्थितम् ॥ ४८ ॥ किमप्यव्यपदेशात्मपूर्णात्पूर्णतराकृति ॥ नसन्नासन्नसदसन्नभावोभवनंनच ॥ ४९ ॥ चिन्मात्रंचेत्यरहितमनंतमजरंशिवम् ॥ अनादिमध्यपर्यंतंयदनादिनिरामयम् ॥ ५० ॥ यस्मिन्जगत्प्रस्फुरतिदृष्टमौक्तिकहंसवत् ॥ यश्चेदंयश्चनैवेदंदेवःसदसदात्मकः ॥ ५१ ॥ अकर्णजिह्वानासात्वङ्नेत्रःसर्वत्रसर्वदा ॥ शृणोत्यास्वादयतियोजिघ्रेत्स्पृशतिपश्यति ॥ ५२ ॥ सएवसदसद्रूपंयेनालोकेनलक्ष्यते ॥ सर्गचित्रमनाद्यंतंस्वरूपंचाप्यरंजनम् ॥ ५३ ॥ अर्द्धोन्मीलितदृश्यभ्रूमध्येतारकवज्जगत् ॥ व्योमात्मैवसदाभासंस्वरूपंयोभिपश्यति ॥ ५४ ॥ यस्यान्यदस्तिनविभोःकारणंशशशृंगवत् ॥ यस्येदंचजगत्कार्यंतरंगौघइवांभसः ॥ ५५ ॥ ज्वलतःसर्वतोजस्रंचित्तस्थानेषुतिष्ठतः ॥ यस्यचिन्मात्रदीपस्यभासाभातिजगत्त्रयम् ॥ ५६ ॥ यंविनाऽर्कादयोप्येतेप्रकाशास्तिमिरोपमाः ॥ सतियस्मिन्प्रवर्त्तंतेत्रिजगन्मृगतृष्णिकाः ॥ ५७ ॥

क्तसदसद्रूपंलक्ष्यतेसचिदालोकोऽपिसएव ॥ तथाअज्ञानसत्वेसर्गचित्रमज्ञाननिवृत्तौत्वनाद्यंतंस्वरूपंचाप्यप्राप्यरंजनंप्रथनंसएवेत्यर्थः ॥ ५३ ॥ एवंजीवन्मुक्तदशायांबाधितजगदाभासदर्शनमपिसएवेत्याह ॥ अर्द्धेति ॥ यथायोगिनःखेचरमुद्रायांभ्रूमध्येदृष्टिनिवेशेअर्द्धोन्मीलितचक्षुर्दृश्यभ्रूमध्येनिविष्टंकृष्णतारकमस्फुटत्वात्सदाभासंजगत्पश्यंतीतद्वद्योव्योमात्मैवसदाभासंस्वरूपंपश्यतिसोपिसएवेत्यर्थः ॥ खेचरमुद्रायास्तुलक्षणमुक्तंयोगशास्त्रे ॥ कपालकुहरेजिह्वाप्रविष्टाविपरीतगा ॥ भ्रुवोरंतर्गतादृष्टिर्मुद्राभवतिखेचरी ॥ नपीड्यतेसरोगेणनचलिप्यतेकर्मणा ॥ बाध्यतेनसकालेनयोमुद्रांवेत्तिखेचरीमिति ॥ ५४ ॥ ५५ ॥ एवंसर्वलयाधारतत्पदार्थरूपंप्रदर्श्यत्वंपदार्थरूपेणापितंदर्शयितुमुपक्रमते ॥ ज्वलतइत्यादिना ॥ सर्वतःसामान्यतोज्वलतोदीप्यमानस्यचित्तस्थानेषुत्वनावृतत्वादजस्रंविशेषाभिव्यक्त्याज्वलतस्तिष्ठतः ॥ ५६ ॥ यथांधस्यदिनंजातमप्यप्रकाशरूपंतथाद्रूपंयंविनातिमिरोपमाः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मिन्मनोभावेनसस्पंदेजगल्लक्ष्मीःसमुदेतीव ॥ निःस्पंदेअंतःप्रत्यक्तत्वंगतेप्राप्तेतुनचसमुदेति ॥ चोवधारणे ॥ अलातेज्वलदुल्मुकेनिशिभ्राम्यमाणेचक्राकारताप्रसिद्धा ॥५८॥ उक्तमेवस्पष्टमाह ॥ जगदिति ॥ यस्यस्वभावःपारमार्थिकरूपंतुनिर्मलोऽक्षयः ॥५९॥ उक्तस्पंदास्पंदयोःसद्रूपपूर्णतयोरनन्यथाभावात्तद्व्यतिरिक्तान्यथाभावस्यविवर्त्ततापर्यवसानानान्नैवभिन्नानवस्तुतइत्यर्थः ॥ ६० ॥ तस्यप्रबुद्धाज्ज्ञमुक्तदृक्प्रसिद्धंत्रैविध्यमाह ॥ सर्वदैवेति ॥ ६१ ॥ मुमुक्षुहेयोपादेयताप्रयोजकमपितस्योक्तरूपद्वयमेवेत्याशयेनाह ॥ यदिति ॥ ६२ ॥ आमोदइवसारइतिशेषः ॥ सर्ववस्तुप्रत्यक्षवृत्तिषुप्रथारूपेणस्थितोपिवृत्तिविषयनिष्कर्षेणाग्राह्योग्रहीतुमशक्यः ॥ ६३ ॥ वागिंद्रियाभावान्मूकोप

सस्पंदेसमुदेतीवनिःस्पंदांतर्गतेनच॥ इयंयस्मिन्जगल्लक्ष्मीरलातइवचक्रता ॥ ५८ ॥ जगन्निर्माणविलयविलासोव्यापकोमहान् ॥ स्पंदास्पंदात्मकोयस्यस्वभावोनिर्मलोऽक्षयः॥ ५९ ॥ स्पंदास्पंदमयीयस्यपवनस्येवसर्वगा ॥ सत्तानान्नैवभिन्नेवव्यवहारान्नवस्तुतः ॥ ६० ॥ सर्वदैवप्रबुद्धोयःसुप्तोयःसर्वदैवच ॥ नसुप्तोनप्रबुद्धश्चयःसर्वत्रैवसर्वदा ॥ ६१ ॥ यदस्पंदंशिवंशांतंयत्स्पंदंत्रिजगत्स्थितिः॥ स्पंदास्पंदविलासात्मायएकोभरिताकृतिः ॥६२॥ आमोदइवपुष्पेषुननश्यतिविनाशिषु ॥ प्रत्यक्षस्थोप्यथाग्राह्यःशौक्ल्यंशुक्लपटेयथा ॥ ६३ ॥ मूकोपमोपियोऽमूकोमंतायोप्युपलोपमः॥ योभोक्तानित्यतृप्तोपिकर्त्तायश्चाप्यकिंचनः॥६४॥ योऽनंगोपिसमस्तांगःसहस्रकरलोचनः॥ नकिंचित्संस्थितेनापियेनव्याप्तमिदंजगत् ॥ ६५ ॥ निरिंद्रियबलस्यापियस्याशेषेंद्रियक्रियाः ॥ यस्यनिर्मननस्यैतामनोनिर्माणरीतयः ॥ ६६ ॥ यदनालोकनाद्भ्रांतिसंसारोरगभीतयः ॥ यस्मिन्दृष्टेपलायंतेसर्वाशाःसर्वभीतयः॥ ६७॥ साक्षिणिस्फारआभासेध्रुवेदीपइवक्रियाः॥ सतियस्मिन्प्रवर्त्ततेचित्तेहाःस्पंदपूर्विकाः॥ ६८ ॥ यस्माद्घटपटाकारपदार्थशतपंक्तयः॥ तरंगगणकल्लोलवीचयोवारिधेरिव ॥ ६९ ॥ सएवान्यतयोदेतियत्पदार्थशतभ्रमैः॥ कटकांगदकेयूरनूपुरैरिवकांचनम् ॥ ७० ॥ यस्त्वमेकोवभासात्मायोहमेतेजनाश्चये ॥ यश्चनत्वमबुद्धात्मानाहंनैतेजनाश्चयः॥ ७१ ॥

मोपिसर्ववाक्प्रवृत्तिनिमित्तत्वादमूकः ॥ एवंमननविकारहीनत्वादुपलोपमोपिमंतेत्यादिबोध्यम् ॥ नास्तिकिंचनक्रियादिनिमित्तंयस्यसोऽकिंचनः ॥ ६४ ॥ समस्तानामंगान्येवांगानियस्यअतएवसहस्राण्यनंतानिकरलोचनादीनियस्य ॥ ६५ ॥ एताःप्रसिद्धजगद्रूपाः ॥ ६६ ॥ आशाःकामादिशःप्रतीतिवा ॥ ६७॥ दीपेसतिनाट्यादिक्रियाइवस्फारेअपरिच्छिन्नेआभासेप्रकाशरूपेअतएवसाक्षिणियस्मिन्सतिचित्तस्येहाश्चेष्टाःप्रवर्त्तते ॥ ६८ ॥ वारिधेरिवप्रवर्त्ततेइत्यनुषज्यते ॥ ६९ ॥ सचिदात्मैवान्यतयाजडप्रपंचात्मना ॥ येप्रसिद्धाश्चतेपदार्थशतभ्रमाश्चेतिकर्मधारयादित्थंभावेतृतीया ॥ ७० ॥ यःअवभासतइत्यवभासस्त्वयासाक्षात्कृतआत्मासत्वमेवैकः ॥ एवंमयाजनैर्वासाक्षात्कृतस्तत्तदात्मैवैकः ॥ अबुद्धात्मातुतद्विपरीतइत्यर्थः ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असाअनन्याप्यन्येत्र अनतिरिक्ताप्यतिरिक्तेव ॥ अतिरेकोत्रपृथक्त्वमितिनपौनरुक्त्यम् ॥ साप्राक्सिद्धैवासेवोत्पत्तिसिद्धेव ॥ ७२ ॥ कालस्यकलनाःषड्भावविकाराःदृश्यस्य दृश्यतादर्शनफलव्याप्तिः ॥ मानसीकलनाइष्टानिष्टप्राप्तिपरिहारविषयामनोरथविकल्पायेननिमित्तेन ॥ क्रमाद्यदीयसच्चिदानंदरूपतानिर्वाह्याइतियावत् ॥ तच्चत्रयंयस्यभा साजगद्विभासनमेवनान्यत् ॥ अज्ञातसाधारणीसर्वव्याप्तिःसंत्ता अनावृतमात्रव्याप्तिर्दर्शनंतत्रानुकूलवेदनीयमात्रव्याप्तिरानंदतेत्यवांतरौपाधिकवैलक्षण्येपिभारूपव्याप्तेरेक त्वादितिभावः ॥ ७३ ॥ देहकर्मेंद्रियोपाधौक्रियां ज्ञानेंद्रियोपाधौरूपादि अंतःकरणोपाधौचेतनं प्रमातारंच यत्स्वरूपःसन्वेत्तितत्प्रमातृनिष्कृष्टचिद्रूपमसौ ॥ येनविषयव्या प्तत्तिनिष्कृष्टचिद्रूपेणवेत्सितदप्यसौदेवइत्यर्थः ॥ ७४ ॥ तथाचत्रिपुटीसाक्षीसइतिफलितमित्याह ॥ द्रष्ट्रिति ॥ अवधानमेकाग्रेणमनसाउपाधिभ्योनिष्कृष्यदर्शनम् ॥ ७५॥ इत्थंतत्त्वंपदार्थौनिर्दिश्यवाक्यार्थमंतेदर्शयति ॥ अजमिति ॥ कारणंकारणानामितितत्पदवाच्यार्थस्यनिर्देशः ॥ शून्यमित्यंतस्तत्पदलक्ष्यार्थस्य ॥ विश्वंकृत्स्नंवेदनमित्यवस्था

अन्येवाप्यतिरिक्तेवसैवासेवचभंगुरा ॥ पयसीवतरंगालीयस्मात्स्फुरतिदृश्यभूः ॥ ७२ ॥ यतःकालस्यकलनायतोदृश्यस्यदृश्यता ॥ मा नसीकलनायेनयस्यभासाविभासनम् ॥ ७३ ॥ क्रियांरूपंरसंगंधंशब्दंस्पर्शंचचेतनं ॥ यद्वेत्सितदसौदेवोयेनवेत्सितदप्यसौ ॥ ७४ ॥ द्र ष्टृदर्शनदृश्यानांमध्येयद्दर्शनंस्थितम् ॥ साधोतदवधानेनस्वात्मानमवबुद्ध्यसे ॥ ७५ ॥ अजमजरमनाद्यंशाश्वतंब्रह्मनित्यंशिवममल ममोघंवंद्यमुच्चैरनिंद्यम् ॥ सकलकलनशून्यंकारणंकारणानामनुभवनमवेद्यंवेदनंविश्वमंतः ॥ ७६ ॥ ॥ इत्यार्षेवा० वा० दे० उ० मो० परमकारणवर्णनंनामनवमःसर्गः ॥ ९ ॥ ॥ ६ ॥ ॥ श्रीरामउवाच ॥ ॥ महाप्रलयसंपत्तौयदेतदवशिष्यते ॥ भवत्येतदनाकारं नामनास्त्यत्रसंशयः ॥ १ ॥ नशून्यंकथमेतत्स्यान्नप्रकाशःकथंभवेत् ॥ कथंवानतमोरूपंकथंवानैवभास्वरम् ॥ २ ॥ कथंवानैवचिद्रूपं जीवोवानकथंभवेत् ॥ कथंनबुद्धितत्त्वंस्यात्कथंवानमनोभवेत् ॥ ३ ॥

त्रयद्रष्टृत्वंपदवाच्यस्य ॥ अवेद्यंवेदनमितिवेद्यावस्थात्रयनिर्मुक्तत्वंपदलक्ष्यस्य ॥ समभिव्याहाराच्चाखंडवाक्यार्थोपदेशइति ॥ ७६ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्य प्रकाशेउ० नवमःसर्गः ॥ ९ ॥ ॥ ६ ॥ ॥ विरोधमिवसंभाव्यप्रागुक्तेब्रह्मलक्षणे ॥ क्रमात्तत्परिहारेणतात्पर्यमिहवर्ण्यते ॥१॥ महाप्रलयेयत्सत्किंचिदवशिष्यतेतत् न्नतेजोनतमइत्यादिविरुद्धरूपमसंभावितंमन्यमानस्तथोक्तेस्तात्पर्यंजिज्ञासुःश्रीरामएकतरार्थसंभावनोपन्यासेनप्रश्नभूमिकांरचयति ॥ महाप्रलयेति ॥ आकारविलयेअना कारताप्रसिद्धेःसंभावितमिदमितिद्योतनायनामेतिनिपातः ॥ १ ॥ इदानींप्रष्टव्यार्थंदर्शयति ॥ नेत्यादिना ॥ नष्टस्याशून्यतादुर्लभातेजस्तमसोरन्यतरनाशेन्यतरापरिशेषोप्य प्रसिद्धइत्यर्थः ॥ प्रकाश्यविलयात्तदानींपरप्रकाशरूपत्वाभावेपिखद्योतवत्स्वमात्रप्रकाशेनभास्वरंकथंनभवेदित्यर्थः ॥ २ ॥ दृश्यातिरिक्तस्यदर्शनत्वप्रसिद्धेर्नदृश्यंनचदर्शन मित्युक्तिव्याघातमभिप्रेत्याह ॥ कथंवेति ॥ यदितुदृश्यदर्शनातिरिक्तोद्रष्टैवप्रसिद्धइत्युच्यतेतर्हिंजीवोबुद्धितत्त्वंमनोवाकथंनभवेत्तेषामेवमतभेदेनद्रष्टृत्वप्रसिद्धेस्तथाचतेषामे वलोकेप्राणिवाचकभूतशब्दाभिलप्यत्वान्नचभूतपदार्थौघइत्युक्तिव्याघातइतिभावः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्चोक्तंयस्त्वमेकोवभासात्मायोहमेतेजनाश्वयः ॥ यश्चनत्वमबुद्धात्मानाहंनैतेजनाश्वयइतितदपिस्वोक्तिव्याहतमित्यभिप्रेत्याह ॥ कथंवेति ॥ किंचित्त्वमहमादि ॥ ४ ॥ मदाशयमतिक्रम्यप्रश्नोऽतिप्रश्नः ॥ भेत्ताछेत्तात्वत्प्रश्नबीजंसंशयंस्वाशयोद्घाटनेनेतिशेषः ॥ अंशुमान्सूर्यः ॥ ५ ॥ ६ ॥ स्तंभोत्कीर्णप्रतिमायाःस्तंभसत्तातिरिक्तसत्ताभावात्त्सत्तयास्थितेरनुत्कीर्णदशायामप्यनपायादितिभावः ॥ ७ ॥ अयंप्रपंचोव्यवहारतः ॥ सत्योवापरमार्थतोऽसत्योवाभवतुयत्रयस्मिन्नधिष्ठानेवभासतेतत्रास्यनशून्यता ॥ शून्यस्यारोपाधिष्ठानत्वायोगादित्यर्थः ॥ ८ ॥ अन्वयमुखसमर्थितमर्थंव्यतिरेकमुखेनापिसमर्थयते ॥ यथेति ॥ तथातत्पदंजगच्छून्यंनेतिसंबंधः ॥ यतोब्रह्मैवप्राग्जगद्भातंतेनहेतुनेत्यर्थः ॥९॥ ननुतदायदिजगदस्तितर्हिप्रलयानुपपत्तिर्यदिनास्तितर्हिप्रागेवतच्छून्यतेतिसत्त्वासत्त्वव्याघातंदृष्टांतेनवारयति ॥ सौम्येति ॥ वीचिर्लीनेतिशेषः ॥ शून्याशून्यपदंअनिर्वचनीयतांशून्याशून्योभयकल्पनाधिष्ठानंपरमार्थवस्तुप्राप्तमितिवा ॥१०॥ यदिस्तंभपुत्रिकावद्देवप्रलयेजगदस्तितर्हिकथंवादिभिस्तत्रविमुह्यतेनस्तंभपुत्रिकायांतत्रा

कथंवानैवकिंचित्स्यात्कथंवासर्वमित्यपि ॥ अनयैववचोभंग्याममसमोहइवोदितः ॥ ४ ॥ ॥श्रीवसिष्ठउवाच॥ ॥विषमोयमतिप्रश्नोभवतासमुदाहृतः ॥ भेत्तास्म्यहंत्वयत्नेननैशंतमइवांशुमान् ॥५॥ महाकल्पांतसंपत्तौयत्तत्सदवशिष्यते ॥ तद्रामनयथाशून्यंतदिदंश्रणुकथ्यते ॥ ६ ॥ अनुत्कीर्णायथास्तंभेसंस्थिताशालभंजिका ॥ तथाविश्वंस्थितंतत्रतेनशून्यंनतत्पदम् ॥ ७ ॥ अयमित्थंमहाभोगोजगदाख्योवभासते ॥ सत्योभवत्वसत्योवायत्रतत्रत्वशून्यता ॥८॥ यथानपुत्रिकाशून्यःस्तंभोनुत्कीर्णपुत्रिकः ॥ तथाभातंजगद्ब्रह्मतेनशून्यंनतत्पदम् ॥ ९ ॥ सौम्यांभसियथावीचिर्नचास्तिनचनास्तिच ॥ तथाजगद्ब्रह्मणीदंशून्याशून्यंपदंगतम् ॥ १० ॥ देशकालादिशांतत्वात्पुत्रिकारचनंद्रुमे ॥ संभवत्ययथाऽतोवैतेनानंतेविमुह्यते ॥११॥ तत्स्तंभपुत्रिकाद्येतत्परमार्थेजगत्स्थितेः ॥ एकदेशेनसदृशमुपमानंनसर्वथा ॥ १२ ॥ नकदाचिदुदेतीदंपरस्मान्नचशाम्यति ॥ इत्थंस्थितंकेवलंसद्ब्रह्मस्वात्मनिसंस्थितम् ॥ १३ ॥

ह ॥ देशेति ॥ पुत्रिकारचनयोग्यकर्तृकर्माधारदेशस्यअहरादिकालस्यआदिपदात्कर्तृकरणोपकरणादेश्वविषयेशांतत्वान्निराकांक्षत्वात्सर्वसामग्रीसंपत्तेरित्यर्थः ॥ द्रुमेद्रुमविकारस्तंभेपुत्रिकारचनंसंभवतितेनतत्रतत्सत्तासंभावयितुंशक्यतइत्यर्थः ॥ अनंतेत्रिविधपरिच्छेदशून्येब्रह्मणितुअयथायथोक्तसामग्र्यदर्शनमित्यर्थः ॥ वैइतिनिश्चये अतस्तेनप्रसिद्धेनवादिजनेनविमुह्यतेमोहःप्राप्यतेइत्यर्थः ॥ ११ ॥ यद्युक्तरीत्यावैषम्यंकथंतर्हिस्तंभपुत्रिकादृष्टांतस्तत्राह ॥ तदिति ॥ तदेतत्प्रागुक्तंस्तंभपुत्रिकादिपरमार्थेब्रह्मणिएकदेशेनतत्सत्तानुच्छेदांशेन ॥ १२॥ नन्वस्तूक्तरीत्याजगत्सत्तातदुदयास्तमययोर्विरुद्धयोस्तुतत्रयुगपत्कथंसत्तेत्याशंक्यतयोःस्वधर्मिव्यतिरिक्तसत्तानभ्युपगमाद्धर्मिपृथक्सत्तानिरासेसंभावनैवनास्तीत्याशयेनाह ॥ नकदाचिदिति ॥ १३ ॥

१ आधारसत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वशून्यत्वेनोदेतिनशाम्यतीतिशून्यार्थकनञाकथमुल्लेखस्तत्राह ॥ अशून्येति ॥ प्रतियोगिन्यशून्यत्वंसिद्धवत्कृत्यतदपेक्षयावस्त्वंतरेतच्छून्यताकल्प्यतेकल्पितांचशून्यता मपेक्ष्यप्रतियोगिन्यशून्यत्वमितिपरस्परसापेक्षकल्पनेशून्यताशून्यतेकुतःसंभवतइत्यर्थः ॥ १४ ॥ इत्थंप्रथमप्रश्नेपदंव्यवस्थाप्यद्वितीयमपिसमाधत्ते ॥ ब्रह्मणीत्यादिना ॥ अविधनस्यपार्थिवेंधनस्यवाव्ययेनहिसूर्यानलादेःसंभवः ॥ अव्ययेतुब्रह्मणिसकुतइतिनप्रकाशइत्युक्तिरितिभावः ॥ एतेनकथंवानैवभास्वरमित्यस्याप्युत्तरमुक्तमेव ॥ १५ ॥ कथंवानतमोरूपमित्येतत्समाधत्ते ॥ महाभूतेति ॥ सूर्यादिमहाभूताभावजंतुतमःपृथ्व्यादिमहाभूतप्रकाशानांअभावोविरोधीसनूपरप्रकाश्येषुपृथ्व्यादिष्वेवतमइत्युच्यतेनस्वप्रकाशेतेन्नात्रनतमइत्यर्थः ॥ तुशब्दोमायातमोव्यावृत्त्यर्थः ॥ १६ ॥ स्वप्रकाशतामनुभवेनसाधयति ॥ स्वानुभूतिरिति ॥ यद्यपिबुद्ध्यादयोन्येनानुभूयंतेतथापितेषामंतर्योस्ति सतेनैवानुभूयतेस्वातिरिक्तानुभवंनापेक्षते ॥ अन्यथाअनवस्थापत्तेरित्यर्थः ॥१७॥ द्वितीयतृतीयप्रश्नोत्तरमुपपादितमुपसंहरति ॥ मुक्तमिति ॥ इतिउक्तविधयाबोध्यमितिशे

अशून्यापेक्षयाशून्यशब्दार्थपरिकल्पना ॥ अशून्यत्वात्संभवतःशून्यताशून्यतेकुतः॥ १४ ॥ ब्रह्मण्ययंप्रकाशोहिनसंभवतिभूतजः॥ सूर्यानलेंदुतारादिःकुतस्तत्रकिलाव्यये॥ १५॥ महाभूतप्रकाशानामभावस्तमउच्यते॥ महाभूताभावजंतुतेनात्रनतमःक्वचित्॥ १६॥ स्वानुभूतिःप्रकाशोस्यकेवलंव्योमरूपिणः॥ योंतरस्तिसतेनैवनत्वन्येनानुभूयते॥ १७॥ मुक्तंतमःप्रकाशाभ्यामित्येतदजरंपदम्॥ आकाशकोशमेवेदंविद्धिकोशंजगत्स्थितेः ॥ १८ ॥ बिल्वस्यबिल्वमध्यस्ययथाभेदोनकश्चन॥ तथास्तिब्रह्मजगतोर्नमनागपिभिन्नता ॥ १९॥ सलिलांतर्यथावीचिर्म्हदोंतर्घटकोयथा॥ तथायत्रजगत्सत्तातत्कथंखात्मकंभवेत्॥ २० ॥ भूजलाद्युपमानश्रीःसाकारांतासमानसा॥ ब्रह्मत्वाकाशविशदंतस्यांतस्थंतथैवतत् ॥ २१ ॥ तस्माद्यादृक्चिदाकाशमाकाशादपिनिर्मलम्॥ तदंतस्थंतादृगेवजगच्छब्दार्थभागपि॥ २२ ॥ मरीचेंतर्यथातैक्ष्ण्यमंतेभोक्तुर्नलक्ष्यते॥ चिन्मात्रत्वंचिदाकाशेतथाचेत्यकलांविना॥ २३॥

षः ॥ जगत्स्थितेर्धनस्थानीयायाःकोशगृहस्थानीयंब्रह्मआकाशोदरस्वच्छंविद्धीत्यर्थः ॥१८॥ अंत्योपांत्यप्रश्नोत्तरमाह ॥ बिल्वस्येति ॥ मध्यस्योदरस्य॥ १९॥अल्पोघटोघटकः ॥ सिंहावलोकनन्यायेनाह ॥ तत्कथमिति ॥ खात्मकंशून्यम् ॥ २० ॥ ननुजलांतस्थितायाभुवोघटाद्यंतर्गतजलादेर्वाआधारस्वभावत्वादर्शनात्कथंब्रह्मांतर्गतजगतस्तदाब्रह्मस्वभावतातत्राह ॥ भूजलादीति ॥ त्वदुक्ताभूजलाद्युपमानश्रीर्नसमायतःसाकारमंतोवसानंदर्शनावधिर्यस्यास्तथाविधा॥तस्यनिराकारस्यब्रह्मणोंतस्थंतज्जगत्तुविलीनत्वान्निराकारमेवेतितथैवेत्यर्थः ॥ २१ ॥ उक्तमेवार्थंस्फुटमाह ॥ तस्मादिति ॥ २२ ॥ अतएवचतुर्थप्रश्नोपिनिराकृतइत्याह ॥ मरीचइति ॥ सत्यंदृश्यातिरिक्तमेवदर्शनत्वेनप्रसिद्धंतत्तुदृश्याभावेनदर्शनत्वव्यवहारार्हमितिभावः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादिति ॥ अतएवचिदादिशब्दाःप्रतीचिलक्षणयैवप्रवर्त्तंतेनमुख्यवृत्त्येतिभावः ॥ यथाजगद्धृयेचितस्तद्विषयतालक्षणाचित्तानिवर्त्ततेएवंचिद्विषयत्वलक्षणाजगतोजगत्ता पीत्याह ॥ जगत्तेति ॥ तावन्मात्रात्मतावशाद्बहीरूपालोका अंतर्मनस्काराश्चतन्मयाइत्युत्तरेणसंबंधः ॥ २४ ॥ वक्ष्यमाणासुसमसुपंचम्यंतभूमिकागतानांसुषुप्तमुत्तरयोस्तु र्यम् ॥ २५ ॥ उक्तार्थमेवपूर्वोत्तरार्द्धाभ्यांस्पष्टमाह ॥ तेनेति ॥ सर्वाभासानांसंस्काराणांसमुद्गकःसंपुटकः ॥ २६ ॥ अनाकारब्रह्मात्मनाकथंसाकारजगत्सत्तेत्याशंक्ययथा नानाकाराणामूर्मीणामेकाकारजलात्मनेत्यविरोधइत्यभिप्रेत्याह ॥ आकारिणीति ॥ सौम्येनिश्चलत्वात्प्रसन्ने ॥ २७ ॥ एवमुपाधिभूतस्यजगतःकारणाव्यतिरेकमुक्त्वातदुपा धिकजीवस्यापितमाह ॥ पूर्णादिति ॥ यत्पूर्णाद्ब्रह्मणःसकाशादौपाधिकभेदेनजीवभावेनप्रसरतितत्परमार्थतःपूर्णमेव ॥ तत्रसाकारस्यपूर्णत्वायोगाद्यत्पूर्णतन्निराकृति ॥ य

तस्माच्चिद्प्यचिद्रूपंचेत्यरिक्तंतदात्मनि॥जगत्तातादृगेवेयंतावन्मात्रात्मतावशात्॥ २४ ॥ रूपालोकमनस्कारास्तन्मयाएवनेतरत्॥ यथास्थितमतोविश्वंसुषुप्तंतुर्यमेववा ॥ २५ ॥ तेनयोगीसुषुप्तात्माव्यवहार्यपिशांतधीः ॥ आस्तेब्रह्मनिराभासंसर्वाभाससमुद्गकः ॥ २६॥ आकारिणियथासौम्येस्थितास्तोयेमहोर्मयः॥ अनाकृतौतथाविश्वंस्थितंतत्सदृशंपरे॥ २७॥ पूर्णात्पूर्णंप्रसरतियत्तत्पूर्णंनिरा कृति॥ ब्रह्मणोविश्वमाभातंतद्विस्वार्थंविचक्षितम्॥ २८॥ पूर्णात्पूर्णंप्रसरतिसंस्थितंपूर्णमेवतत्॥ अतोविश्वमनुत्पन्नंयच्चोत्पन्नंतदेव तत्॥ २९॥ चेत्यासंभवतस्तस्मिन्यदेकाजगदर्थता॥ आस्वादकासंभवतोमरीचेकैवतीक्ष्णता॥ ३० ॥ सत्येवेयमसत्यैवचित्तचेत्या दितापरे॥ तद्भावात्प्रतिबिंबस्यप्रतिबिंबार्हताकुतः॥ ३१ ॥ परमाणोरपिपरंतदणीयोऽप्यणीयसः ॥ शुद्धंसूक्ष्मंपरंशांतंतदाकाशोदराद पि॥ ३२॥ दिक्कालाद्यनवच्छिन्नरूपत्वादतिविस्तृतम्॥ तदनाद्यंतमाभासंभासनीयविवर्ज्जितम् ॥ ३३॥

द्पूर्णतर्हिकिमर्थंविश्वात्मनाजीवभावेनचाभातंतत्राह ॥ यदिति ॥ यद्विश्वात्मनाभातंतद्विस्वार्थंस्वस्वरूपलाभप्रयोजनसिद्धयेविचक्षितम्दिदृक्षितम् ॥ क्रमादधिकारिशरी रप्राप्यास्वतत्त्वसाक्षात्कारेणाज्ञानतिरोहितस्वात्मलाभार्थंजगज्जीवभावेनप्रसरतीत्यर्थः ॥ तथाचश्रुतिः ॥ रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणायेति ॥ २८ ॥ कथंत द्दिदृक्षितंतदाह ॥ पूर्णादिति ॥ उक्तार्थम् ॥ २९ ॥ यद्यस्मात्कारणाज्जगच्छब्दार्थताएकाएकरसासंपन्नेत्यर्थः ॥ पदेइतिपाठेकाइत्यपह्नवे ॥ ३० ॥ एकरसत्वादेवचित्तचेत्या दिनानारसताऽसत्यैवसत्येवप्रतिभासतइत्यर्थः॥ एवंचोपाध्यभावेप्रतिबिंबजीवभावार्हताकुतोनास्त्येवेतिजीवोवानकथंभवेदितिशंकापिनिरस्तेतिभावः ॥३१॥ जीवोहिअणुर्म ध्यमपरिमाणोवापुण्यपापादिदूषितत्वादशुद्धःस्वभासनीयविषयभोक्ताप्रसिद्धस्तत्तुतद्विपरीतमित्याह ॥ परमाणोरपीतिद्वाभ्याम् ॥ ३२ ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्विषयप्रथात्वलक्षणचिद्रूपत्वमेवनसहतेतदनुकूलप्रतिकूलविषयभोक्तृतालक्षणंजीवत्वंसुतरामित्याह॥ चिद्रूपमिति ॥ एतेनकथंनबुद्धितत्वंस्यात्कथंवानमनोभवेदितिशंकापिप्रत्युक्तेत्याह ॥ कथमिति ॥३४॥ उक्तमेवस्पष्टयति ॥ चिद्रूपेति ॥ ३५॥ सर्वप्रश्नसमाधानेफलितमुपसंहरति ॥ एवमिति ॥३६॥ एवंसमाहितोरामःसमाहितेचेतसियेनरूपेणतदपरोक्षमनुभवितुंशक्यंतदसाधारणंरूपंपरिचेतुकामःपुनःपृच्छति ॥ परमार्थस्येति ॥ ३७ ॥ तदिदमपरोक्षम् ॥ ३८ ॥ यथासमाधौनिरोधेनवृत्तिसंक्षयेसतिनिरिंधनाग्निवन्मनसःस्वमात्मानंमनःस्वरूपमपिनाशयित्वायदनाख्येयंस्वप्रकाशसद्रूपमवशिष्यतेतदित्यर्थः ॥ ३९ ॥ एवंनिर्विकल्पसमाध्यारंभेदृश्याभावाद्द्रष्टाप्रमातापिविलीनवद्भातीतित्रिपुटीलयभासनंसाक्षिरूपंतदित्यर्थः ॥ ४० ॥ एवंसमाधिव्युत्थानप्राक्कालेभाविजीवस्वभावायाश्चितेरचेत्योन्मुखंयद्वपुःस्वरूपंतदित्यर्थः ॥ यद्यपिसमाधिमध्यकालेपिस्फु

चिद्रूपमेवनोयत्रलभ्यतेतत्रजीवता॥ कथंस्याच्चित्तताकारावासनानित्यरूपिणी॥ ३४॥ चिद्रूपानुदयादेवतत्रनास्त्येवजीवता॥ नबुद्धिताचित्ततावानेंद्रियत्वंनवासना॥३५॥ एवमित्थंमहारंभपूर्णमप्यजरंपदम्॥ अस्मद्दृष्ट्यास्थितंशांतंशून्यमाकाशतोधिकम्॥३६॥ ॥श्रीरामउवाच॥ ॥परमार्थस्यकिंरूपंतस्यानंतचिदाकृतेः॥ पुनरेतन्ममाचक्ष्वनिपुणंबोधवृद्धये॥ ३७॥ ॥श्रीवसिष्ठउवाच॥ ॥महाप्रलयसंपत्तौसर्वकारणकारणम्॥ शिष्यतेपरमंब्रह्मतदिदंवर्ण्यतेशृणु ॥ ३८ ॥ नाशयित्वास्वमात्मानंमनसोवृत्तिसंक्षये॥ सद्रूपंयदनाख्येयंतद्रूपंतस्यवस्तुनः॥३९॥ नास्तिदृश्यंजगद्द्रष्टादृश्याभावाद्विलीनवत्॥ भातीतिभासनंयत्स्यात्तद्रूपंतस्यवस्तुनः॥४०॥ चितेर्जीवस्वभावायायदचेत्योन्मुखंवपुः॥ चिन्मात्रंविमलंशांतंतद्रूपंपरमात्मनः ॥४१॥ अंगलग्नेपिवातादौस्पर्शाद्यनुभवंविना॥ जीवतश्चेतसोरूपंयत्तद्रूपंपरमात्मनः॥ ४२॥ अस्वप्नायाअनंतायाअजडायामनःस्थितेः॥ यद्रूपंचिरनिद्रायास्तत्तदानघशिष्यते॥ ४३॥

रत्परमात्मरूपमेवतथापितदपिसूक्ष्मत्वान्नारुरुक्षुणाभ्यासवशायालक्षयितुंशक्यमित्याद्यंतप्रदर्शनम् ॥ ४१ ॥ इदानीमारूढानुभवसिद्धंतन्मध्यस्फुरद्रूपेणापितद्दर्शयति ॥ अंगेति ॥ ब्रह्माकाराविच्छिन्नापरोक्षवृत्तिमत्वाच्चेतसोजीवतएवचित्तेजीवत्येवसतिक्षीरोदकवद्ब्रह्मण्यैकरस्येनतिरोभूतत्वाच्चित्तमनादृत्येत्यर्थः ॥ षष्ठीचानादरइतिभावलक्षणेषष्ठी ॥ वातादौअंगलग्नेपितत्स्पर्शाद्यनुभवंविनास्फुरद्यद्रूपंतदेवतद्रूपमित्यर्थः ॥ क्वचित्तुपुस्तकेएतत्पूर्वार्द्धस्थानेअंगुष्ठस्याथवांगुल्यावाताद्यस्पर्शनेसतीतिपठ्यतेतत्रांगुष्ठस्यतथांगुल्याश्चयेवातादयोनोदनादिव्यापारास्तेषामस्पर्शनेस्पर्शाप्रतिसंधानेसतीत्यर्थः ॥ वागतिगंधनयोः भावेक्तः ॥ ४२ ॥ इदानींयोगाभ्यासविधुराणामप्यनुभवपथंयथारोहतितथाह ॥ अस्वप्नायाइति ॥ स्वप्नदर्शनशून्यामशकमत्कुणाद्यविच्छिन्नामनोविश्रांतिहेतुर्यासुषुप्तिः सैवचेतसोजाड्यहीनाचिरंसंभाव्येततद्रूपंप्रलयेवशिष्यतइत्यर्थः॥४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योम्नोहृदयंरहस्यंशून्यत्वं पवनस्यहृदयमंतर्बहिःपूर्णत्वं शिलायास्तुघनत्वंतस्यैवाचेत्यस्यचेत्यभिन्नस्यचेत्यरहितस्यचचिद्व्योम्नःसतोयद्रूपंभवेत्तत्तदित्यर्थः ॥ ४४ ॥ किंबहु
नासर्वस्यापिजीवतश्चेत्यचित्तपरित्यागेयास्थितिःपरिशिष्यतेसातद्रूपमित्याह ॥ अचेत्यस्येति ॥ ४५ ॥ यत्तद्द्रष्टृकोटौअन्नमयांतेआत्मतयाप्रस्तुतस्यचित्प्रकाशस्यैकैककोशवि
वेकेनपर्यालोच्यमानस्यानंदमयकोशस्याप्यांतरत्वान्मध्यं दृश्यकोटौचमूर्त्तप्रपंचसारभूतादित्यात्मकप्रकाशस्यामूर्त्तप्रपंचसारभूतस्यखस्याकाशस्यलिंगसमष्ट्यात्मनोऽव्या
कृताकाशस्यवाआंतरत्वाद्यन्मध्यं दर्शनस्यचाक्षुषादिवृत्तिरूपस्यचांतःस्फुरणरूपत्वाद्यन्मध्यं क्रमादानंदसच्चिद्रूपंप्रसिद्धंतदित्यर्थः ॥ तथाचतैत्तिरीयाणामुपनिषदिअन्नम
यादीनांकोशानामांतरमानंदमयेकाशंप्रदर्श्य तस्यप्रियमेवशिरः मोदोदक्षिणःपक्षः प्रमोदउत्तरःपक्षः आनंदआत्मा ब्रह्मपुच्छंप्रतिष्ठेतितस्याप्यांतरंब्रह्मदर्शितम् ॥ बृहदारण्यके

यद्व्योम्नोहृदयंयद्वाशिलायाःपवनस्यच ॥ तस्याचेत्यस्यचिद्व्योम्नस्तद्रूपंपरमात्मनः ॥ ४४ ॥ अचेत्यस्यामनस्कस्यजीवतोयास्वभाव
तः॥ स्यात्स्थितिःसापराशांतासत्तातस्याद्यवस्तुनः॥ ४५॥ चित्प्रकाशस्ययन्मध्यंप्रकाशस्यापिखस्यवा॥ दर्शनस्यचयन्मध्यंतद्रूपंब्रह्म
णोविदुः ॥ ४६ ॥ वेदनस्यप्रकाशस्यदृश्यस्यतमसस्तथा ॥ वेदनंयदनाद्यंतंतद्रूपंपरमात्मनः ॥ ४७ ॥ यतोजगदुदेतीवनित्यानुदित
रूप्यपि॥ विभिन्नवदिवाभिन्नंतद्रूपंपरमार्थकम्॥ ४८॥ व्यवहारपरस्यापियत्पाषाणवदासनम्॥ अव्योम्नएवव्योमत्वंतद्रूपंपरमात्म
नः॥ ४९॥ वेद्यवेदनवेत्तृत्वरूपत्त्रयमिदंपुरः॥ यत्रोदेत्यस्तमायातितत्तत्परमदुर्लभम्॥ ५०॥ वेद्यवेदनवेत्तृत्वंयत्रेदंप्रतिबिंबति॥ अबु
द्ध्यादौमहादर्शेतद्रूपंपरमंस्मृतम् ॥ ५१ ॥ मनःस्वप्नेंद्रियैर्मुक्तंयद्रूपंस्यान्महाचितेः॥ जंगमेस्थावरेवापितत्सर्वांतेऽवशिष्यते ॥ ५२॥
स्थावराणांहियद्रूपंतच्चेद्बोधमयंभवेत्॥ मनोबुद्ध्यादिनिर्मुक्तंतत्परेणोपमीयते॥ ५३॥

च द्वेवावब्रह्मणोरूपेमूर्त्तंचैवामूर्त्तंचेतिप्रस्तुत्यतस्यैतस्यमूर्त्तस्यैषरसोयएषतपतितस्यैतस्यामूर्तस्यैषरसोयएषएतस्मिन्मंडलेपुरुषइतितदुभयसारंप्रदर्श्याथातआदेशोनेतिनेतीतिमू
र्त्तामूर्त्तारोपाधिष्ठानंतदांतरंब्रह्मतन्निषेधेनदर्शितम् ॥ प्रतिबोधविदितंमतमितितलवकारिणामुपनिषदिब्रह्मणःसर्वबुद्धिवृत्त्यांतरत्वमुक्तमिति ॥ ४६॥ बुद्धिवृत्तेरर्थस्फुरणस्यविष
यस्याज्ञानस्यचयत्साक्षिभूतंवेदनंतेषामाद्यंतप्रथात्वादनाद्यंतंतदित्यर्थः ॥ ४७ ॥ ४८ ॥ मायिकव्यवहारपरस्यापिज्ञस्येश्वरस्यवायत्पाषाणवदचलमासनम् ॥ अच्छिद्रस्यैव
सर्वजगदवकाशदातृत्वाद्व्योमत्वंयस्येतिशेषस्तदित्यर्थः ॥ ४९ ॥ वेद्यादित्रिपुटीजन्मादिनिमित्तंयत्सच्चिदात्मरूपंतदेवतदित्याह ॥ वेद्येति ॥५०॥ निमित्ततापिनपरिणामेनकिंतु
विवर्त्तभावेनेत्याह ॥ वेद्येति ॥ ५१ ॥ स्वप्नैरिंद्रियोपलक्षितजागरैश्चमुक्तंमनोयत्सुषुमात्मरूपंस्यात्तदेवस्थावरेजंगमेचदृश्यप्रलयकालेवशिष्यते ॥ ५२ ॥ स्थावराणांरूपम
चलस्वभावः ॥ परेणपरमात्मना ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तप्रलयात्मतत्त्वावस्थानमुपसंहरति ॥ ब्रह्मेति ॥ एतत्सर्वानुभवसिद्धप्रत्यगात्मभूतम् ॥ इहास्मिन्नूजगति ॥ सर्वोपधिव्ययः सर्वोपाधिलयः ॥ मायासंवलनात्प्राचूर्येमयट् ॥ ॥ ५४ ॥ ॥ इतिश्रीवासिष्ठ० उत्पत्ति० दशमःसर्गः ॥ १० ॥ ॥ सदधिष्ठानतःसत्ताप्रलयेऽपिनवार्यते ॥ स्वतस्तुसत्ताजगतःसर्गेप्यत्रनिवार्यते ॥ १ ॥ नन्वस्तुप्रलयेजगत्सत्तासामान्यात्मकब्रह्ममात्रपरिशेषात्प्रातिस्विकसत्तयाजगतोनिवृत्तावपितादूप्येणसत्तासर्गेतुप्रलयवैलक्षण्यस्यसर्वानुभवसिद्धत्वात्स्वतंत्रसत्ताप्यपरावाच्या ॥ तथाचतयोपेतंजगद्ब्रह्मणिनिवर्त्तमानमन्यत्रतिष्ठतीत्येवसंभाव्यते ॥ नाभावोविद्यतेसतइतिसतोऽसत्वस्यत्वयैववारितत्वात् ॥ तथाचयत्रतिष्ठतितदेवजगतःपरायणमुपदिश्यतामितिमन्यमानःश्रीरामउवाच ॥ इदमिति ॥ इदमेवंविधंचतुर्दशभुवनदेवनरासुरतिर्यगाद्यनंतविस्तारस्रूपंयस्यइदमित्थंभासुरंस्फुटतरंदृश्यंप्रत्यक्षादिदृढीकृतंजगत् महाप्रलयसंप्राप्तौक्केवतिष्ठतितद्ब

ब्रह्मार्कविष्णुहरशक्रसदाशिवादिशांतौशिवंपरममेतदिहैकमास्ते॥ सर्वोपाधिव्ययवशादविकल्परूपंचैतन्यमात्रमयमुज्झितविश्वसंगम् ॥ ५४॥ ॥इत्यार्षेवा० वा० दे० उत्पत्ति० मोक्षोपायेमहाकल्पांतावशिष्टपरमभाववर्णनंनामदशमःसर्गः ॥ १० ॥ ॥ ६९ ॥

॥श्रीरामउवाच ॥ ॥इदंरूपमिदंदृश्यंजगन्नास्तीतिभासुरम् ॥ महाप्रलयसंप्राप्तौभोब्रह्मन्क्वेवतिष्ठति॥ १ ॥ ॥ श्रीवसिष्ठउवाच ॥ कुतआयातिकीदृग्वावंध्यापुत्रःक्वगच्छति॥ क्वयातिकुतआयातिवदवाव्योमकाननम्॥ २॥ ॥श्रीरामउवाच॥ ॥वंध्यापुत्रोव्योमवनंनैवास्तिनभविष्यति॥ कीदृशीदृश्यतातस्यकीदृशीतस्यनास्तिता॥३॥ ॥श्रीवसिष्ठउवाच॥ ॥वंध्यापुत्रव्योमवनेयथानस्तःकदाचन॥ जगदाद्यखिलंदृश्यंतथानास्तिकदाचन॥ ४॥ नचोत्पन्नंनचध्वंसियत्किलादौनविद्यते॥ उत्पत्तिःकीदृशीतस्यनाशशब्दस्यकाकथा॥५॥ ॥श्रीरामउवाच॥ ॥वंध्यापुत्रनभोवृक्षकल्पनातावदस्तिहि॥ सायथानाशजन्माढ्यातथैवेदंनकिंभवेत्॥ ६॥

देतिशेषः ॥ गच्छतीतिपाठेऽपिप्राप्त्यर्थस्यगमेरुक्तएवार्थः ॥ १ ॥ सर्वपदार्थानामुत्पत्तिकालेयदिपृथक्सत्तयाकुतश्चिदागमनंस्यात्तर्हितस्यप्रलयेन्यत्रगमनंतत्रस्थितिश्चस्यात्तदेवतावद्वंध्यापुत्रवदस्यनास्तीत्याशयेन वसिष्ठउवाच ॥ कुतइति ॥ २ ॥ रामोदृष्टांतदार्ष्टांतिकयोर्वैषम्यंशंकते ॥वंध्येति ॥ तात्कालिकस्वसत्ताभविष्यत्कालिकसत्ताप्रत्यक्षवेद्यताचतयोर्नास्तीतिवैषम्यमितिप्रतियोग्यस्तित्वाप्रसिद्धौनास्तितापितयोर्दुर्वचेत्यर्थः ॥ ३ ॥ यद्येवंतर्हिजगदपिस्वसत्तयानास्तिनभविष्यतिनदृश्यमपीतितस्यतत्साम्यमेवेति वसिष्ठआहवंध्येति ॥ ४ ॥ सत्ताभावेउत्पत्त्याद्यपिजगतोनसिद्ध्यतीत्याह ॥ नचेति ॥ ५ ॥ ननुप्रत्यक्षसिद्धोत्पत्त्यादिमतोजगतोनवंध्यापुत्रादिरुपमानम् ॥ अत्यंतासतउपमानत्वादर्शनाच्चअतःपरिशेषाद्विकल्परूपस्तत्प्रत्ययएवोपमानंजन्मनाशादिमत्त्वेनतस्यजगत्साधर्म्यसंभवादितिरामःशंकते ॥ वंध्येति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यात्तस्योपमानताययुपमेयजगदंतःपातोनस्यात् ॥ तदंतःपातेतुतस्यनोपमानतासंभवइत्यपरमार्थसतोजगतोमदुक्तएवदृष्टांतःपरिशिष्यतइत्याशयेनवसिष्ठउवाच ॥ तुल्यस्येति ॥ तुल्यस्योपमातुमिष्टस्यदृश्यस्योपमेयबहिर्भूततुलाऽलाभेनदुस्थस्योपमातुमशक्यस्योपमेयकोटिप्रविष्टैर्भावैकैर्यत्तोलनमुपमावचनंतत् निरन्वयाअनन्वयालंकारोदाहरणभूतायथाउक्तिस्तथैव ॥ यथागगनंगगनाकारंसागरःसागरोपमइत्युक्तिरनुपमत्वेपर्यवस्यतितथैवस्यादितिनविकल्पकल्पनादृष्टांतः ॥ अतोजगतःपृथक्सत्तायथामदुक्तवंध्यापुत्रादिसत्तातथैवेत्यर्थः ॥ असतःसदृष्टांतत्वादर्शनेप्यसदृष्टांतनानविरुद्ध्यते ॥ वंध्यापुत्रइवखपुष्पमसदित्युक्तिदर्शनादितिभावः ॥ ७ ॥ ननुप्रत्यक्षमुपलभ्यमानस्यकथमसत्त्वमित्याशंक्यतथाविधस्यापिसम्यग्दर्शनेबाधदृष्टेरसत्त्वंबहुनरदृष्टांतेषुप्रसिद्धमित्याह ॥ कटकत्वमित्यादिपंचभिः ॥ ८ ॥ व्यतिरेकोभेदस्तद्वत् ॥ उपलब्धिमदुपलभ्यमानमपि ॥ ९ ॥ १० ॥ ११ ॥ दृष्टंअनुभूयमानमपि ॥ १२ ॥ १३ ॥ कथंकारणासंभवस्तमाह ॥ क्वेति ॥ पृथ्व्यादेर्जडवस्तुनोहिजडमेवकारणंभवितुंशक्तंतत्त्वसंभवद्भूतजाड्यंब्रह्म ॥ क्वचिदपिस्वविरुद्धपरिणामादर्शनादितिभावः ॥ १४ ॥ परिणामदृष्ट्यानेदंकिंचिदुदितंविवर्त्तदृष्ट्यातुयद्यपिविरुद्धारोपोपिसंभवतितथापितत्कारणमेवेत्थंजगद्भावेनावस्थितंनपृथक्कार्यसत्तास्तीत्यर्थः ॥ १५ ॥ नन्वज्ञानमेवतर्हिपरिणामिकारणमस्तीतिकथंकारणाभावस्तत्राह ॥ अज्ञानमेवेति ॥ यदज्ञानमेवजगदाकारपरिणतंभातीत्युच्यतेतत्संविदंजगदात्मनाआभासयतीतिसंविदाभासम् ॥ संविदमेवजगदात्मनाविवर्त्तयतीत्यर्थः ॥ अज्ञानपरिणामस्यसंविद्विवर्त्तत्वमेवस्वप्नेप्रसिद्धमित्याह ॥ यदिति ॥ १६ ॥ तदेवस्पष्टमाह ॥ संविदिति ॥ १७ ॥ तथाचजगतोब्रह्ममात्रत्वंयत्प्रतिज्ञातंतत्सिद्धमित्याह ॥ यदिदमिति आत्मनिपरमार्थस्वभावे ॥ १८ ॥

श्रीवसिष्ठउवाच ॥ (॥ तुल्यस्यातुलदुःस्थस्यभावकैःकिलतोलनम् ॥ निरन्वयायथैवोक्तिर्जगत्सत्तातथैवहि ॥)७॥ यथासौवर्णकटके दृश्यमानमिदंस्फुटम् ॥ कटकत्वंतुनैवास्तिजगत्त्वंनतथापरे ॥ ८ ॥ आकाशेचयथानास्तिशून्यत्वंव्यतिरेकवत् ॥ जगत्त्वंब्रह्मणितथानास्त्येवाप्युपलब्धिमत् ॥ ९ ॥ कज्जलान्नयथाकार्ष्ण्यंशैत्यंचनयथाहिमात् ॥ पृथगेवंभवेद्बुद्धंजगन्नास्तिपरेपदे ॥ १० ॥ यथाशैत्यंनशशिनोनहिमाद्व्यतिरिच्यते ॥ ब्रह्मणोनतथासर्गोविद्यतेव्यतिरेकवान् ॥ ११ ॥ मरुनद्यांयथातोयंद्वितीयेंदौयथेंदुता ॥ नास्त्येवेहजगन्नामदृष्टमप्यमलात्मनि ॥ १२ ॥ आदावेवहियन्नास्तिकारणासंभवात्स्वयम् ॥ वर्त्तमानेपितन्नास्तिनाशःस्यात्तत्रकीदृशः ॥ १३ ॥ क्वासंभवद्भूतजाड्यंपृथ्व्यादेर्जडवस्तुनः ॥ कारणंभवितुंशक्तंछायायाश्चातपोयथा ॥ १४ ॥ कारणाभावतःकार्यंनेदंतत्किंचनोदितम् ॥ यत्तत्कारणमेवास्तितदेवेत्थमवस्थितम् ॥ १५ ॥ अज्ञानमेवयद्भातिसंविदाभासमेवतत् ॥ यज्जगद्दृश्यतेस्वप्नेसंवित्कचनमेवतत् ॥ १६ ॥ संवित्कचनमेवांतर्यथास्वप्नेजगद्भ्रमः ॥ सर्गादौब्रह्मणितथाजगत्कचनमाततम् ॥ १७ ॥ यदिदंदृश्यतेकिंचित्सदैवात्मनिसंस्थितम् ॥ नास्तमेतिनचोदेतिजगत्किंचित्कदाचन ॥ १८ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ स्वप्नसंविदःस्वप्नद्रष्टुरंतर्गताचित्चैतन्यमेवपुरमिवयथाआस्ते ॥ २० ॥ जगत्प्रत्ययस्यसुघनत्वेनस्वप्नस्यचकात्स्न्यैंनानभिव्यक्ततयापेलवत्वेनवैषम्यंद्रष्टृदृश्यसंबंधस्य चस्वाभाविकत्वेनानिवार्यत्वान्मुक्त्यसंभवंचरामःशंकते ॥ एवंचेदित्यादिना ॥ इदंदृश्यविषमेवमुक्तरीत्यास्वप्नानुभूतिवदसच्चेदाकल्पांतंव्यवहाराविसंवादार्हंसुघनंदृढमितिप्रत्य योयस्मिंस्तथाविधंकथंजातमित्यर्थः ॥ स्वप्नानुभूतिमदितिपाठेपिस्वदृष्टांततयास्वप्नानुभूतिमत्तत्सदृशमित्येवार्थः ॥ २१ ॥ द्रष्टादुर्वारइतिशेषः ॥ एवमुत्तरवाक्ययोरपि ॥ द्व योर्मध्येएकस्यक्षयेहिमुक्तिःस्यात्सएवदुर्घटइतिभावः ॥ २२ ॥ कुतोदुर्घटस्तत्राह ॥ अत्यंतेति ॥ अत्यंतंमूलापरिशेषेणासंभवोयस्य ॥ मूलाविद्याबाधेनात्यंतिकइत्यर्थः ॥ दृश्यत्वमपरिहार्यमितिशेषः ॥ अतोमोक्षधीर्नसंभवतीत्यर्थः ॥ २३ ॥ मास्त्वत्यंतासंभवबोधःसंभूतस्यैवविद्ययाक्षयोस्तुतत्राह ॥ दृश्यमिति ॥ तत्तर्हिस्मरणमिवस्मरणंसंस्कारा

यथाद्रवत्वंसलिलंस्पंदनंपवनोयथा॥ यथाप्रकाशआभासोब्रह्मैवत्रिजगत्तथा ॥ १९ ॥ यथापुरमिवास्तेंतर्चिदेवस्वप्नसंविदः॥ तथा जगदिवाभातिस्वात्मैवपरमात्मनि॥ २०॥ ॥श्रीरामउवाच॥ ॥एवंचेत्तत्कथंब्रह्मन्सुघनप्रत्ययंवद॥ इदंदृश्यविषंजातमसत्स्वप्नानु भूतिवत्॥ २१ ॥ सतिदृश्येकिलद्रष्टासतिद्रष्टरिदृश्यता॥ एकसत्त्वेद्वयोर्बंधोमुक्तिरेकक्षयेद्वयोः॥ २२॥ अत्यंतासंभवोयावद्बुद्धोदृश्यस्य नक्षयः ॥ तावद्द्रष्टरिदृश्यत्वंनसंभवतिमोक्षधीः ॥ २३ ॥ दृश्यंचेत्संभवत्यादौपश्चात्क्षयमुपालभेत्॥ तद्दृश्यस्मरणानर्थरूपोबंधोनशा म्यति ॥ २४॥ यत्रक्वचनसंस्थस्यस्वादर्शस्येवचिद्वतेः॥ प्रतिबिंबोलगत्येवसर्वस्मृतिमयोत्यलम् ॥ २५ ॥ आदावेवहिनोत्पन्नंदृश्यंना स्त्येवचेत्स्वयम्॥ द्रष्टुर्दृश्यस्वभावत्वात्तत्संभवतिमुक्तता॥२६॥तस्माद्संभवन्मुक्तेर्ममप्रोत्सार्ययुक्तिभिः॥ अत्यंतासंभवोयावत्कथया त्मविदांवर॥ २७॥ ॥श्रीवसिष्ठउवाच॥ ॥असदेवसदाभातिजगत्सर्वात्मकंयथा॥श्रृण्वहंकथयारामदीर्घयाकथयामिते॥ २८॥ व्यवसायकथावाक्यैर्यावत्तत्रानुवर्णितम्॥नविश्राम्यतितेतावद्धृदिपांसुर्यथाह्रदे॥२९॥अत्यंताभावमस्यास्त्वंजगत्सर्गभ्रमस्थितेः॥ बुद्ध्वैकध्याननिष्ठात्माव्यवहारंकरिष्यसि॥ ३०॥

त्मनास्थितस्यपुनरुद्भवःसएवानर्थः ॥ २४ ॥ दृश्यप्रदेशपरिहाणेनैवदृश्यासंभवोपपत्तिशंकायास्तुपरिहारस्त्वयैवप्रागुक्तइत्याह ॥ यत्रेति ॥ २५ ॥ यद्यनुत्पन्नंस्यात्तदाद्रष्टुश्चै तन्यस्यदृश्यस्वभावत्वान्मुक्तासंभवेत् ॥ नत्वनुत्पन्नमनुभूयतेअतोनद्रष्टुःस्वभावनिर्मुक्तिरितिभावः ॥ २६ ॥ तस्मान्ममअसंभवन्मुक्तेर्मुक्त्यसंभवस्यशंकामितिशेषः ॥ याव न्निरूढःस्यात्तावत्कथय ॥ २७ ॥ यच्छंकितंस्वप्नवैषम्यंतस्यवक्ष्यमाणसृष्ट्याख्यायिकयासमाधानंवसिष्ठःप्रतिजानीते ॥ असदिति ॥ दीर्घयामंडपोपाख्यानादिविस्तारितया यद्यपिसुघनप्रत्ययंतथाप्यसदेवसदात्मनावभातीत्यंशेस्वप्नसाम्यमस्येवसुघनप्रत्ययतातुचिरानुवृत्त्येतिभावः ॥ २८ ॥ व्यवसायःपूर्वेषांव्यवहारस्तत्कथावाक्यैः ॥ २९ ॥ तेनै वनेद्वितीयशंकानिरासस्तत्त्वेविश्रांतिर्लौकव्यवहारश्चसेत्स्यतीत्याह ॥ अत्यंतेति ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयोजनादिभावेग्रस्तंतइतिमहाः प्रयोजनाभावेतूत्सृज्यंतइत्युत्सर्गाः स्थूलसूक्ष्मादिविषयेषुचलाचलास्तदनुरूपादृशोव्यवहारदृष्टयोनवेधयिष्यंतिरागाद्युद्भवेननपीडयिष्यंतीत्यर्थः ॥ प्राग्व्याख्यातोवार्थोयाद्यः ॥ ३१ ॥ अत्रद्वितीयकल्पनारहितेप्यात्मनि ॥ ३२॥ हेअंगइमानिजगंतितस्मादात्मनःसकाशाद्विजृंभितानिआविर्भूतानि ॥ किंतटस्थेश्वरादिवभेदेननेत्याह ॥ सइति ॥ समहात्मापिसकलासकलंसमष्टिव्यष्टिरूपंइदंबहिरिंद्रियैर्दृश्यमानंरूपावलोकनप्रकारास्पदमंतस्तुमनोमननप्रकाराकारास्पदंभूत्वास्वयमेवोदेतिविलीयतेच ॥ उदयविलयभावेनभ्रांत्याविभाव्यतइत्यर्थः ॥ ३३ ॥ ॥ इतिश्रीवासिष्ठमहारा० उत्पत्तिप्रकरणेएकादशःसर्गः ॥ ११ ॥ ॥ ७ ॥ ॥ अत्यंतासंभवंवक्तुमपवादेनकृत्स्नशः ॥ सर्गस्तदनुरूपोस्मिन्नध्यारोपःप्रपंच्यते ॥ १ ॥ प्रतिज्ञातार्थंवक्तुमुपक्रममाणःश्रीवसिष्ठउवाच ॥ एतस्मादिति ॥ १ ॥ यथाप्रतिपुरुषंसुषुप्तात्मरूपमेवस्वप्नवद्विवर्त्ततेतथाब्रह्मापीतिदृष्टानुसारिणीयंकल्पनेत्यर्थः ॥ तत्रैकपुरुषवासनामात्रकार्यत्वात्स्वप्नोनसुघनप्रत्ययःसर्ववासनाकार्यत्वाच्चप्रपंचःसुघनप्रत्ययइतिपूर्वशंका

भावाभावग्रहोत्सर्गस्थूलसूक्ष्मचलाचलाः ॥ दृशस्त्वांवेधयिष्यंतिनमहाद्रिमिवेषवः॥ ३१ ॥ सएषोस्त्येकएवात्मानद्वितीयास्तिकल्पना॥ जगदत्रयथोत्पन्नंतत्तेवक्ष्यामिराघव॥ ३२ ॥ तस्मादिमानिसकलानिविजृंभितानिसोपीदमंगसकलासकलंमहात्मा ॥ रूपावलोकनमनोमननप्रकाराकारास्पदंस्वयमुदेतिविलीयतेच ॥ ३३ ॥ इत्यार्षेवा० वा० दे० मो० उत्पत्तिप्रकरणेपरमार्थवर्णनंनामएकादशःसर्गः॥ ११ ॥ ॥ ७ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ एतस्मात्परमाच्छांतात्पदात्परमपावनात्॥ यथेदमुत्थितंविश्वंतच्छृणूत्तमयाधिया॥ १ ॥ सुषुप्तंस्वप्नवद्भातिभातिब्रह्मैवसर्गवत्॥ सर्वात्मकंचतत्स्थानंतत्रतावत्क्रमंशृणु ॥ २ ॥ तस्यानंतप्रकाशात्मरूपस्यानंतचिन्मणेः॥ सत्तामात्रात्मकंविश्वंयदजस्रंस्वभावतः॥ ३॥ तदात्मनिस्वयंकिंचिच्चेत्यतामिवगच्छति ॥ अगृहीतात्मकंसंविदहंमर्शनपूर्वकम्॥ ४॥ भाविनामार्थकलनैःकिंचिदूहितरूपकम् ॥ आकाशादणुशुद्धंचसर्वस्मिन्भातिबोधनं॥ ५ ॥ ततःसापरमासत्तासचेतश्चेतनोन्मुखी॥ चिन्नामयोग्याभवतिकिंचिल्लभ्यतयातथा ॥ ६ ॥

परिहारमभिप्रेत्याह ॥ सर्वात्मकंचेति ॥ सर्वात्मकत्वंचात्मावाइदमेकएवाग्रआसीदितिश्रुतौसर्ववाचीदंपदसामानाधिकरण्यात् ॥ तत्स्थानंसर्वसुषुप्तसमष्टिप्रलयावस्थंब्रह्म ॥ २ ॥ यद्यस्मात्कारणाद्विश्वंचिन्मणेःसत्तामात्रमात्मापरमार्थरूपंयस्यतथाविधंतत्तस्माच्चेत्यतामिवगच्छतीत्युत्तरेणसंबंधः ॥ ३ ॥ तस्यप्रथमंसईक्षतलोकानुसृजाइतिश्रुतिसिद्धमीक्षणभावंदर्शयति ॥ तदित्यादित्रिभिः ॥ संविदाअहंमर्शनपूर्वकमगृहीतात्मकमहंकाराध्यासंविनेतियावत् ॥ आकाशादणुशुद्धंचयद्बोधनंतत्सर्वस्मिन्स्रष्टव्यविषयेभाविनामरूपानुसंधानैःकिंचिदूहितानिरूपकाणियस्मिंस्तथाविधंसच्चेत्यतामिवगच्छतीत्यन्वयः ॥ ४ ॥ ५ ॥ तस्येक्षणवृत्तितद्विपयोपाधिभ्यामीश्वरजीवभावौदर्शयति ॥ ततइति ॥ चेतईक्षणात्मिकावृत्तिस्तत्सहिताचेतनातदभिव्यक्तचैतन्यंतदुन्मुखीतत्प्रधानासतीचेतयतीतिचित्सर्वज्ञेश्वरस्तन्नामयोग्येत्यर्थः ॥ वाक्प्रवृत्तिविषयधर्मवत्त्वेनवाग्व्यवहारलभ्यतया ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिरानुवृत्त्याघनादृढीभूताईक्षणसंवेदनायस्यास्तथाविधासतीआत्तागृहीताकलनातद्विषयसूक्ष्मप्रपंचात्मभावलक्षणपरिच्छेदकलनाययाअतएवपरंपदमपरिच्छिन्नभूमात्म भावंविस्मरणेनोज्झतितदाभाविप्राणधारणोपाधिकजीवहिरण्यगर्भादिनामिकासंभवतीत्यर्थः ॥ ७ ॥ तथाभावेऽपिनब्रह्मसत्तायाःस्वरूपक्षतिरित्याह ॥ सत्तेति ॥ तदाब्रह्मस त्तैवभावनामात्रसारासंसरणोन्मुखीभवतिनविकारादिक्रियासारेत्यर्थः ॥ तत्कुतस्तत्राह ॥ वस्तुस्वभावेनेति ॥ कथंतर्हिजीवभावस्तत्राह ॥ अन्विति ॥ तामिमांसत्तामेवानुसृ त्यरज्जौसर्पइवजीवभावउत्तिष्ठतीत्यर्थः ॥ ८ ॥ इदानींमहाभूतसर्गंविवक्षुःप्रथममाकाशसर्गमाह ॥ समनंतरमिति ॥ अस्याजीवसत्तायाःसमनंतरमेवखसत्ताइतरभूतावकाश दत्वाच्छून्यताप्रायाउदेति ॥ सूर्यादिसर्गोत्तरंभविष्यंतीनामाकाशाद्यभिधानामासमंतात्काशतेप्रकाशतइत्याद्यर्थदा ॥ ९ ॥ तत्रप्रागुक्तजीवस्याहंताभिमानंतदाप्रभृतिद्विपरा र्द्धपरिमिततदायुःकालक्लृप्तिंचाह ॥ अहंतेति ॥ भविष्यदित्यादिपूर्ववत् ॥ १० ॥ इयमाकाशाहंकारकालसृष्टिर्नहिरण्यगर्भादेर्वाकिंतुतद्वेषोपहितपरमात्मसत्तायाएवतस्याए

घनसंवेदनापश्चाद्भाविजीवादिनामिका॥ संभवत्यात्तकलनायदोज्झतिपरंपदम् ॥ ७॥ सत्तैवभावनामात्रसारासंसरणोन्मुखी॥ तदावस्तुस्वभावेनत्वनुत्तिष्ठतितामिमाम्॥ ८॥ समनंतरमेवास्याःखसत्तोदेतिशून्यता॥ शब्दादिगुणबीजंसाभविष्यदभिधार्थदा॥ ९ अहंतोदेतितदनुसहवैकालसत्तया॥ भविष्यदभिधार्थेनबीजंमुख्यंजगत्स्थितेः॥ १०॥ तस्याःशक्तेःपरायास्तुस्वसंवेदनमात्रकम्॥ एतज्जालमसद्रूपंसदिवोदेतिविस्फुरत्॥ ११॥ एवंप्रायात्मिकासंविद्बीजंसंकल्पशाखिनः॥ भवत्यहंकारकणस्ततःस्पंदतयामरुत्॥ १२॥ चिदहंतावतीव्योमशब्दतन्मात्रभावनात्॥ खतोघनीभूयशनैःखतन्मात्रंभवत्यलम्॥ १३॥ भाविनामार्थरूपंतद्बीजंशब्दौघशाखिनः॥ पदवाक्यप्रमाणाख्यंवेदवृंदंविकासितम्॥ १४॥ तस्मादुदेष्यत्यखिलाजगच्छ्रीःपरमात्मनः॥ शब्दौघनिर्मितार्थौघपरिणाम विसारिणः॥ १५॥

वसर्वकारणत्वादित्याह ॥ तस्याइति ॥ शक्तिशब्देनात्रपरसत्तैवोच्यते ॥ तस्याअविकृतत्वद्योतनायस्वसंवेदनमात्रकमिति ॥ ११ ॥ एवंप्रायात्मिकावियदहंकारेणवियत्प्राय आत्मास्वरूपंयस्यास्तथाविधासंविद्बियत्कार्यगोचरसंकल्पवृक्षस्यबीजमित्यर्थः ॥ अतएवतस्याहंकारस्यकणएकदेशइवपरिच्छिन्नस्पंदशक्तिप्रधानतयामरुद्वायुर्भवत्याविर्भ वतीत्यर्थः ॥ १२॥ तस्याएववियदहंतोपहितपरसत्तायाःसर्वशब्दबीजभूतशब्दतन्मात्रात्मताभावनात्तदुत्पत्तिरित्याह ॥ चिदिति ॥ खतआकाशभावादतिसूक्ष्मादीषद्घनीभूयख तन्मात्रंशब्दतन्मात्रंभवतीत्यर्थः ॥ यद्यपिसांख्यदर्शनपुराणादिषुतन्मात्रतोभूतोत्पत्तिःप्रसिद्धातथाप्यात्मनआकाशःसंभूतस्तत्तेजोसृजतेत्यादिश्रुतिषुवियदादीनांसाक्षाद्ब्रह्मोपा दानकत्वश्रवणात्तद्यथादुंदुभेर्हन्यमानस्येत्यादौशब्दसामान्यस्यतद्विशेषोपादानत्वश्रवणाच्चाकाशादेवशब्दसामान्यात्मकतन्मात्रोत्पत्तिरुक्तेतिनदोषः ॥ १३ ॥ शब्दतन्मात्रस्य वेदादिसर्वशब्दविशेषोपादानत्वमाह ॥ भावीति ॥ १४ ॥ तस्माद्वेदभावापन्नात्परमात्मनोजगच्छ्रीरुदेष्यत्युत्पत्स्यते ॥ सभूरितिव्याहरत्सभुवमसृजत् एतइतिवैप्रजापतिर्देवा नसृजत असृग्रमितिमनुष्यानिंदवइतिपितॄनित्यादिश्रुतेरित्यर्थः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदुक्तंभाविजीवादिनामिकेतितद्वायूत्पत्तौतस्यैवप्राणत्वात्तद्धारणनिमित्तेनसिद्धमित्याह ॥ चिदिति ॥ एवमुक्तप्रकारोवाय्वंतःसंततिपरिवारोयस्याःसा ॥ तस्याःसर्वमूर्त्याकार
हेतुतामाह ॥ बीजमिति ॥ रूपमत्रमूर्त्याकारः ॥ १६ ॥ तस्यव्यष्टिप्राणभावेनाध्यात्मिकसर्वक्रियाहेतुत्वमाह ॥ चतुर्दशेति ॥ चतुर्दशभुवनभेदाच्चतुर्दशविधंप्राणिजालंत
तउक्तात्प्राणवायोर्निमित्तात्स्वेनव्याप्तांतरालंजगज्जठराणिब्रह्मांडोदराणितद्रूपंगर्त्तौघंप्रसरिष्यतिसंचरिष्यति ॥ १७ ॥ तस्यैववायुत्वाभिमानोपहितचैतन्यस्यसर्वस्पर्शविशे
षोपादानस्पर्शतन्मात्रभावमावहप्रवाहाद्येकोनपंचाशत्पवनस्कंधविभागेनसर्वपदार्थक्रियास्पंदनिमित्तत्वंचाह ॥ असंप्राप्तेतिद्वाभ्याम् ॥ प्रागसंप्राप्ताभिधाचाराऽपिवायुभा
वाभिमानजवात्प्रस्फुरद्वपुः ॥ १८ ॥ १९ ॥ ततस्तेजसउत्पत्तिमाह ॥ तत्रेति ॥ चिद्विलासःप्रकाशात्मकत्वभावना ॥ शेषंपूर्ववत् ॥ तेजस्तन्मात्रकंरूपतन्मात्रकम् ॥ २० ॥
तत्तेजः ॥ विजृंभेवक्षणव्यादानाविद्युत् ॥ आदिपदाच्चंद्रनक्षत्रादि ॥ २१ ॥ ततोजलोत्पत्तिमाह ॥ भावयन्निति ॥ सतेजोभूतआत्माअंभसोरसस्कंधइवाहमस्मीतितनुतांतच्छ

चिदेवंपरिवारासाजीवशब्देनकथ्यते ॥ भाविशब्दार्थजालेनबीजंरूपौघशाखिनः ॥ १६ ॥ चतुर्दशविधंभूतजालमावलितांतरं ॥ जग
ज्जठरगर्त्तौघंप्रसरिष्यतिवैततः ॥ १७ ॥ असंप्राप्ताभिधाचाराचिज्जवात्प्रस्फुरद्वपुः ॥ साचैवस्पर्शतन्मात्रंभावनाद्भवतिक्षणात् ॥ १८ ॥
पवनस्कंधविस्तारंबीजंस्पर्शौघशाखिनः ॥ सर्वभूतक्रियास्पंदस्तस्मात्संप्रसरिष्यति ॥ १९ ॥ तत्रैवचिद्विलासेनप्रकाशोनुभवाद्भवेत् ॥
तेजस्तन्मात्रकंतत्तुभविष्यदभिधार्थकम् ॥ २० ॥ तत्सूर्याग्निविजृंभादिबीजमालोकशाखिनः ॥ तस्माद्रूपविभेदेनसंसारःप्रसरिष्यति
॥ २१ ॥ भावयंस्तनुतामेवरसस्कंधइवांभसः ॥ स्वदनंतस्यसंघस्यरसतन्मात्रमुच्यते ॥ २२ ॥ भाविवारिविलासात्मातद्बीजंरसशाखि
नः ॥ अन्योन्यस्वदनेतस्मात्संसारःप्रसरिष्यति ॥ २३ ॥ भविष्यद्रूपसंकल्पनामासौकल्पनात्मकः ॥ संकल्पात्मगुणैर्गंधतन्मात्रत्वंप्रपश्य
ति ॥ २४ ॥ भाविभूगोलकत्वेनबीजमाकृतिशाखिनः ॥ सर्वाधारात्मनस्तस्मात्संसारःप्रसरिष्यति ॥ २५ ॥ चिताविभाव्यमानानितन्मा
त्राणिपरस्परम् ॥ स्वयंपरिणतान्यंतरंबुनीवनिरंतरम् ॥ २६ ॥

रीरतांपरिच्छिन्नतांवाभावयन्संस्तद्भावमाप
यतइतिशेषः ॥ तस्यजलात्मकस्यसंघस्यमूर्तद्रव्यस्यजिह्वयाआस्वादनेमधुरमिदमितियत्स्वदनंतद्रसविशेषोपादानसामान्यरूपत्वाद्रसतन्मात्रमुच्यतइत्यर्थः ॥ २२ ॥ तस्यै
वरसस्येंद्रियविषयभावेनान्योन्यस्वदनेतद्विषयरागाद्युद्भवेनपुनःपुनर्विषयार्जनप्रवृत्त्यात्मासंसारःप्रसरिष्यतीत्यर्थः ॥ एवंपूर्वत्रापि ॥ २३ ॥ ततःपृथिवीसर्गमाह ॥ भविष्य
दिति ॥ असौजलभावापन्नःपरमात्मापृथिव्येवाहमितिसंकल्पनात्मकःसन्भविष्यत्तद्रूपसंकल्पनामाभूत्वागंधसंकल्पात्मगुणैःस्वस्यगंधतन्मात्रत्वंप्रपश्यतीत्यर्थः ॥ २४ ॥ त
स्योपयोगमाह ॥ भावीति ॥ भूगोलकत्वेनब्रह्मांडगोलकत्वेनज्योतिषप्रसिद्धभूगोलकत्वेनवा ॥ आकृतिर्मनुष्याद्याकारः ॥ २५ ॥ एवमुत्पन्नानांभूतानांमिश्रणेनब्रह्मांडाकारप ॥२४॥
रिणतिमाह ॥ चितेति ॥ पूर्वोक्तभूताहंभावापन्नयाचिताब्रह्मांडाकारेणविभाव्यमानानिअंतर्दशगुणोत्तरस्यावरणांतरंबुनिबुद्बुदानीवब्रह्मांडात्मनापरिणतानीत्यर्थः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कियत्कालंतेषांविमिश्रभावेनावस्थानंतदाह ॥ तथेति ॥ एतानिभूतानितथाविमिश्राणियथापुनःसर्वनाशपर्यंतंनविविक्तानिशुद्धान्युपलभ्यंते ॥ २७॥ ब्रह्मसत्तयाप्राकूसता मेवस्थूलात्मनाविर्भावइतिसदृष्टांतमाह ॥ संवित्तीति ॥ गगनमत्राव्याकृताकाशः ॥ २८ ॥ ननुसूक्ष्मतमत्वादनवकाशेषुतन्मात्रेषुस्थूलावस्थितिर्विरुद्धातत्राह ॥ प्रसवमिति ॥ नवास्तवंतत्रावस्थानंकिंतुमायिकप्रसवादिदर्शनमात्रंतच्चपरमाण्वाद्यंतरेपिसंभवति ॥ स्वप्नेसूक्ष्मतमनाडीच्छिद्रेष्वपिविशालतमजगद्दर्शनादितिभावः ॥२९॥ तेषांस्थूलभावेपि नस्वरूपसौक्ष्म्यापायोविवर्त्तस्याविकारकत्वादित्याह ॥ विवर्त्तमिति ॥ तत्रहेतुः ॥ चिद्बोधितानीति ॥ अविकारचिदनुविद्धत्वादित्यर्थः ॥ अतएवनविलंबइत्याह ॥ क्षणादिति॥ परिणामपक्षेहिकूश्मांडोपचयइवविलंबःस्यात् ॥ ३० ॥ उक्तार्थस्मारणेनोपसंहरति ॥ तन्मात्रेति ॥ एतदुक्तप्रकारम् ॥ छांदसीक्लीबता ॥३१ ॥ इत्थंचयदुक्तंब्रह्मैवजगदाका रंभवतीतितत्सिद्धमित्याह ॥ बीजमिति ॥ जगतस्तन्मात्रपंचकंबीजंकारणंतस्यचबीजंपरेणपरमात्मनाअव्यवहितासाक्षात्संबद्धाजगत्स्थितिहेतुर्मायाशक्तिरेव ॥ इत्थंचतत्व

तथैतानिविमिश्राणिविविक्तानिपुनर्यथा॥ नशुद्धान्युपलभ्यंतेसर्वनाशांतमेवहि ॥ २७॥ संवित्तिमात्ररूपाणिस्थितानिगगनोदरे ॥ भवंतिवटजालानियथाबीजकणांतरे॥ २८॥ प्रसवंपरिपश्यंतिशतशाखंस्फुरंतिच॥ परमाण्वंतरेभांतिक्षणात्कल्पीभवंतिच॥ २९॥ विवर्त्तमेवधावंतिनिर्विवर्त्तानिसंतिच॥ चिद्बोधितानिसर्वाणिक्षणात्पिंडीभवंतिच॥ ३०॥ तन्मात्रगणमेतत्स्यात्सासंकल्पात्मिकाचितिः॥ वेदनात्रसरेणवाभ्रमनाकारैवपश्यति॥३१॥ बीजंजगत्सुननुपंचकमात्रमेवबीजंपराव्यवहितास्थितिशक्तिराद्या॥बीजंतदेवभवतीतिसदानुभूतंचिन्मात्रमेवमजमाद्यमतोजगच्छ्रीः ॥ ३२ ॥ ॥इत्यार्षेवा०वा०दे०मोक्षो०उत्पत्ति०जगदुत्पत्तिवर्णनंनामद्वादशः सर्गः॥ १२॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥परमेब्रह्मणिस्फारेसमेरामसमेस्थिते॥ अनुत्पन्ननभस्तेजस्तमःसत्ताचिदात्मनि ॥ १ ॥ पूर्वंचेत्यत्वकलनंसतश्चेत्यांशचेतनात्॥ उदेतिचित्तकलनंचितिशक्तित्वचेतनात् ॥ २ ॥ ततोजीवत्वकलनंचेत्यसंयोगचेतनात्॥ ततोस्यमायाकलनंचेत्यैकपरतावशात्॥ ३ ॥

रमात्मतत्त्वमेवमायाशक्त्याबीजंभवन्मायापगमेतदेवभवतीतिप्रतिज्ञातार्थसिद्धिरित्यर्थः ॥ ३२ ॥ ॥ इतिश्रीवासिष्ठ०उ०द्वादशःसर्गः ॥ १२ ॥ ॥ ७ ॥ सर्गोक्त्या प्राग्जगद्भावोवर्णितोब्रह्मणोन्तःतः ॥ जीवभावोधुनातस्यदेहाद्यामिश्रवर्ण्यते ॥ १ ॥ प्रलयेसुषुप्ताविवविलयेनमायाशबलब्रह्मभावंप्राप्तानांजीवोपाधीनांपुनराविर्भावक्रमंस हेतुकंश्रीवसिष्ठउवाच ॥ परमइत्यादिपंचभिः ॥ विकारकृतवैषम्यशून्यमायाशबलत्वात्समेसमेचाधिष्ठानेस्थितेअनुत्पन्नानांनभस्तेजस्तमआदीनांयाकारणात्मनासत्तातद्रूपे चिदात्मनि ॥ १ ॥ चितश्चेतयितृभावलक्षणजीवत्वस्यविषयकरणसिद्धिपूर्वकत्वात्तदध्यासंप्रथमंदर्शयति ॥ पूर्वमिति ॥ कलनंकल्पनम् ॥ तत्रहेतुःसद्वस्तुनस्तत्तथास्वभावतैव ॥ एवमुत्तरत्रापि ॥ यदेवाध्यस्यतेतत्तथास्वभावतायाश्चितिपूर्वसिद्धत्वात्सर्वत्रनिमित्तता ॥ २ ॥ मायात्राहंभावः ॥ अहंभावकलनमितिपाठेतुस्पष्टम् ॥ साहिजीवभावस्य निरूढावस्था ॥ एकपरतातावन्मात्रोहमित्यभिमानः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिणामतउपचयतः॥ इत्थंधर्मसिद्धौशब्दादिविषयमात्राणांवासनात्मनास्वांतर्गतानांस्वमइवमननात्तद्घटितंमनोरूपमेतदेवसंपद्यतइत्यर्थः ॥४॥ तस्यस्थूलदेहभावापत्तिमाह॥ उच्छूनादिति॥ वासनात्मनांशब्दतन्मात्राणामन्यैःस्पर्शादितन्मात्रैर्भावनान्मेलनात्पंचीकृतभावेनोच्छूनादाध्यात्मिकमहाभूतरूपिणःस्थूलदेहभावापन्नान्मनसइतियावत्॥ ५॥ उक्तमुपसंहरति॥ झटितीत्यादिना॥ अकृतमनिच्छासंपन्नम्॥ ६॥ ७॥ पश्चादुत्तरकाले॥ स्वप्नवित्स्वप्नद्रष्टा॥ स्वंस्वानुभूयमानम्॥ वस्तुतस्तुतदसगमेवेत्याह॥ चिन्मात्रात्मकमेवेति॥ यच्चिन्मात्रात्मकंतत्यत्रतत्रस्थमपिजगदाद्यंकुरंमुंचत्येवेत्युत्तरेणान्वयः॥ ८॥ पंचकंतन्मात्राणाम्॥ ९॥ एवमित्यादेःसर्वस्योत्तरान्वयः॥ १०॥ चिच्छक्त्याचेत्यप्रथनशक्त्या॥ स्वांगभूतात्मास्वशरीरमिवसंपन्नस्वरूपः॥ अनेनपंचकगणेन॥ इदंस्थूलम्॥ ११॥ आकाशरूपमिवस्वकल्पनाधिष्ठानात्मनिस्थितत्वात्सन्मयंनस्व

ततोबुद्धित्वकलनमहंतापरिणामतः॥ एतदेवमनस्तादिशब्दतन्मात्रकादिमत्॥ ४॥ उच्छूनादन्यतन्मात्रभावनाद्भूतरूपिणः॥ अयमित्थंमहागुल्मोजगदादिर्विलोक्यते॥ ५॥ झटित्येवंक्रमेणेतिस्वप्नेपुरमिवाकृतम्॥ महाकाशमहाटव्यामुद्भूयोद्भूयनश्यति॥ ६॥ जगत्करंजकुंजानांबीजमेतदवापजम्॥ नापेक्षतेकिंचिदपिक्षितिवार्यनलादिकम्॥ ७॥ एतच्चिदात्मकंपश्चात्किलोर्व्यादिकरिष्यति॥ स्वंस्वप्नवित्पुरमिवचिन्मात्रात्मकमेवयत्॥ ८॥ जगदाद्यंकुरंयत्रतत्रस्थमपिमुंचति॥ जगतःपंचकंबीजंपंचकस्यचिदव्यया॥ ९॥ यद्बीजंतत्फलंविद्धितस्माद्ब्रह्ममयंजगत्॥ एवमेषमहाकाशेसर्गादौपंचकोगणः॥ १०॥ चिच्छक्त्यास्वांगभूतात्माकल्पितोस्तिनवास्तवः॥ अनेनोच्छूनतामेत्ययदपीदंवितन्यते॥ ११॥ तदप्याकाशरूपात्मकल्पनात्मनिसन्मयम्॥ क्वचिन्ननामतत्सिद्धंयदसिद्धेनसाध्यते॥ १२॥ स्वरूपंयद्विकल्पात्मकथंतत्सत्यतामियात्॥ अथचेत्पंचकंब्रह्मब्रह्मात्मकतयाधिया॥ १३॥ तत्पंचकंविद्धिप्रौढोब्रह्मैवत्रिजगत्क्रमः॥ यथास्फुरतिसर्गादावेषपंचकसंभवः॥ १४॥ तथैवाद्येहभूतत्वेयातिकारणतांस्वयम्॥ एवंनजायतेकिंचिज्जगज्जातंनलक्ष्यते॥ १५॥ स्वप्नसंकल्पपुरवदसत्सदनुभूयते॥ ब्रह्माकाशपराकाशेजीवाकाशत्वमात्मनि॥ १६॥ इतिचित्यवदातात्मापृथ्व्यादीनामसंभवात्॥ इत्येषजीवःकथितोव्योम्निखात्माइवोदितः॥ १७॥

तइत्यर्थः॥ तदेवोपपादयति॥ क्वचिदिति॥ १२॥ ननुपंचकगणस्यब्रह्मण्यध्यस्तस्यास्तुब्रह्ममात्रतातत्कार्यस्यतुसाकथंतत्राह॥ अथेति॥ १३॥ तत्पंचकंतत्कार्यस्थूलभूतपंचकमपिचिद्ब्रह्मैव॥ हीतिकारणकार्ययोरेकत्वप्रसिद्धेर्हेतोरित्यर्थः॥ तथाचप्रौढोरूढस्त्रिजगत्क्रमोब्रह्मैवेतिसिद्धमित्यर्थः॥ कथंतर्ह्यभिन्नेकारणत्वव्यवहारस्तत्राह॥ यथेति॥ १४॥ भूतत्वेपौर्वकालिकत्वे॥ स्वयंऔत्तरकालिकंस्वंप्रत्येवेतिशेषः॥ उपसंहरत्येवमिति॥ १५॥ तदुपाधिकजीवभावोप्यसन्नेवेतिदर्शयन्नसतःसत्त्वानुभवासंभावनांदृष्टांतेनापनुदति॥ स्वप्नेति॥ ब्रह्माकाशरूपेपराकाशेपरमप्रकाशेआत्मनिजीवाकाशत्वंअसत्सदिवानुभूयते॥ १६॥ अवदातात्माप्रपश्यतीत्यध्याहृत्यान्वयः॥ वस्तुतःपृथ्व्यादीनांपरिच्छेदोपाधीनामसंभवाद्व्योम्निगंधर्वनगरगृहघटादिपरिच्छिन्नःखादेवकल्पनयाउदितः॥ स्वात्मैवैषजीवःकथितइत्यर्थः॥ १७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसामान्याभिमानेनब्रह्मणःसमष्टिजीवभावमुक्त्वाविशेषाभिमानेनव्यष्टितद्भावेनस्थूलदेहांततादात्म्यारोपक्रमंप्रपंचयितुमारभते ॥ जीवाकाशइत्यादिना ॥ तत्रादौभावनयैवसमष्ट्युपाधेर्व्यष्ट्यंतःकरणांकुरारंभंदर्शयति ॥ जीवाकाशइत्यादिना ॥ तस्मिन्परमेश्वरेकल्पितःसमष्टिजीवाकाशोविस्तृतमपिस्वंअणुरल्पतरःस्फुलिंगवत्तेजःकणोस्मीतिचिंतयातथैवात्मानंचेतत्यनुभवतीत्युत्तरेणान्वयः ॥ एतदेवाभिप्रेत्याहश्रुतिर्यथाऽग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वएतआत्मानोव्युच्चरंतीति ॥ १८ ॥ तस्याभावनोपचयादुपचयमाह ॥ यदित्यादिना ॥ यच्चेततितदेवोच्छूनमिवभावयति ॥१९॥ यद्भावयतितत्संकल्पेंदुर्यथानसन्तथाअसदेवेत्यर्थः ॥ तद्भावनफलमाह ॥ तमेवेति ॥२०॥ द्रष्टृदृश्यभावसंवलनेतस्योपचयंदर्शयति ॥ किंचिदिति ॥ अणुतेजःकणभावमपहायतारकासादृश्यंविदन्किंचित्स्थौल्यमादत्तइव॥ अयमेवास्यभूतमात्रासंवलितलिंगात्मभावः ॥ २१ ॥ अयंजीवस्ततस्तादृशवेदनात्सतारकाकारएवस्वात्माआसबभूव तत्रहेतुद्वयमाह ॥ यथाभावितेति ॥ सोहमितितद्भावाभिनयः ॥ २२ ॥ अयंलिंगदेहप्रत्ययोभा

जीवाकाशस्त्विमंदेहंयथाविंदतितच्छृणु ॥ जीवाकाशःस्वमेवासौतस्मिंस्तुपरमेश्वरे ॥ १८ ॥ अणुतेजःकणोस्मीतिस्वयंचेततिचिंतया॥ यत्तदेवोच्छूनमिवभावयत्यात्मनांबरे ॥ १९ ॥ असदेवसदाकारंसंकल्पेंदुर्यथानसन् ॥ तमेवभावयन्द्रष्टृदृस्वरूपतयास्थितः ॥ २० ॥ एकएवद्वितामेतिस्वप्नेस्वमृतिबोधवत् ॥ किंचित्स्थौल्यमिवादत्तेततस्तारकतांविदन् ॥ २१ ॥ यथाभावितमात्रार्थभावितात्द्विश्वरूपतः ॥ सएवस्वात्मासततोप्ययंसोहमितिस्वयम् ॥ २२ ॥ चित्ताप्रत्ययमाधत्तेस्वप्नेस्वामिवपांथताम् ॥ तारकाकारमाकारंभाविदेहाभिधंतथा ॥ २३ ॥ भावयन्यातितद्भावंचित्तंचेत्यार्थतामिव ॥ परित्यज्यैवतद्बाह्यंततस्तारककोटरे ॥ २४ ॥ अंतर्भातिबहिष्ठोपिपर्वतोमुकुरेयथा ॥ कूपसंस्थोयथादेहःसमुद्गकगतंवचः ॥ २५ ॥ स्वप्नसंकल्पयोःसंविद्देह्येतज्जीवकोणुके ॥ स्वरूपतारकांतस्थोजीवोयंचेततिस्वयम् ॥ २६ ॥

विस्थूलदेहप्रत्ययश्चचित्तकल्पनावशादेवेत्याह ॥ चित्तादिति ॥ तारकाकारंप्रागुक्तलिंगाकारम् ॥ २३ ॥ तत्रदृष्टांतश्चित्तंचेत्यार्थतांविषयाकारतामिवेति ॥ वस्तुनःसर्वोपाधिबाह्यस्यापिमोहात्तद्भावपरित्यागेनोपाध्यंतर्भानंसदृष्टांतमुपपादयंस्तस्यस्वप्नादिवासनामयसंसारमाह ॥ परित्यज्यैवेत्यादिना ॥ तारककोटरेउपाध्यंतःकल्पिताकाशे॥२४॥ यथासर्वत्रव्यवहारसमर्थोदेहःकूपसंस्थस्तावन्मात्रव्यवहारीभाति ॥ यथावादूराच्छ्रवणयोग्यमप्याक्रोशादिवचःसमुद्गकगतंसंपुटकावरुद्धमबहिःप्रसारि ॥ २५ ॥ यथावास्वप्नसंकल्पयोःसंविद्देहांतरेवस्वप्नादिपश्यतितथाअणुकेप्रागुक्तस्फुलिंगसदृशोपाधौ स्वरूपतयाकल्पिततारकांतस्थोवासनामयदेहादिव्यवहारंचेततीत्यर्थः ॥ चित्तंचेत्यार्थतामिवेतिदृष्टांतपक्षेपिपरित्यज्येत्यादिसार्द्धश्लोकद्वयमेवंयोज्यम् ॥ स्वप्नसंकल्पयोर्बहिष्ठोपिविषयस्तद्बाह्यरूपंपरित्यज्यैवअंतर्भाति यथाकूपजलप्रतिबिंबितोदेहोयथावागुहादिसंपुटगतंप्रतिध्वनिवचस्तथाजीवकएतद्वासनामयंवेद्यंवेत्ति ॥ शिष्टंप्राग्वत् ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेतद्वासनामयदेहादिव्यवहारदशानिष्कर्षेबुद्धिचित्तादिपरिणामत्वात्तत्तद्रूपकं परमार्थदृशाविमर्शेतुज्ञानसत्तानंदरूपकमेव ॥ तत्तत्स्थूलदेहभावनयातद्भावापन्नस्यचक्षुरादिकल्पनयाजाग्रद्व्यवहारसंसारंप्रपंचयति ॥ जीवाकाशइत्यादिना ॥ २७ ॥ २८ ॥ २९ ॥ स्वदनंरसनेंद्रियम् ॥ ३० ॥ यत्स्पंदतेतद्वायुःप्राणादिवृत्तिः ॥ ३१ ॥ भावयत्अध्यस्यत्आस्तेब्रह्म ॥ ३२ ॥ ३३ ॥ चित्तदेहांबरमेवस्थौल्येनस्थूलदेहाकृतिर्यस्य ॥ स्फुलिंगाकारादिबाह्यविषयांतस्वकल्पनाकारंब्रह्मतदंतेसंस्थंआवरणादिसंस्थायुक्तमंडंब्रह्मांडं

तदेतद्बुद्धिचित्तादिज्ञानसत्तादिरूपकम् ॥ जीवाकाश[1]ःस्वतस्तत्रतारकाकाशकोशगम् ॥ २७ ॥ प्रेक्षेहमितिभावेनद्रष्टुंप्रसरतीवखे ॥ ततोरंध्रद्वयेनैवभाविबाह्याभिधंपुनः ॥ २८ ॥ येनपश्यतितन्नेत्रयुगंनाम्नाभविष्यति ॥ येनस्पृशतिसावैत्वग्यच्छृणोतिश्रुतिस्तुसा ॥ २९ ॥ येनजिघ्रतितद्घ्राणंसस्वमात्मनिपश्यति ॥ तत्तस्यस्वदनंपश्चाद्रसनाचोल्लसिष्यति ॥ ३० ॥ स्पंदतेयत्सतद्वायुश्चेष्टाकर्मेंद्रियव्रजम् ॥ रूपालोकमनस्कारजातमित्यपिभावयत् ॥ ३१ ॥ आतिवाहिकदेहात्मातिष्ठत्यंबरमंबरे ॥ एवमुच्छूनतांतस्मिन्भावयत्तेजसःकणे ॥ ३२ ॥ असत्यांसत्यसंकाशांब्रह्मास्तेजीवशब्दवत् ॥इत्थंसजीवशब्दार्थःकलनाकुलतांगतः ॥ ३३ ॥ आतिवाहिकदेहात्माचित्तदेहांबराकृतिः ॥ स्वकल्पनांतआकारमंडंसंस्थंप्रपश्यति ॥ ३४ ॥ कश्चिज्जलगतंवेत्तिकश्चित्सद्मात्स्वरूपिणम् ॥ भाविब्रह्मांडकलनांपश्यत्यनुभवत्यपि ॥ ३५ ॥ आत्मगर्भगृहंचित्ताद्यथासंकल्पमात्मनः ॥ देशकालक्रियाद्रव्यकल्पनावेदनंसतत् ॥ ३६ ॥भावरूपछब्दनिर्माताशब्दैर्बध्नातिकल्पितैः ॥ आतिवाहिकदेहोसावित्यसत्यजगद्भ्रमे ॥ ३७ ॥ असत्यएवकचतिस्वप्नेखोड्डयनंयथा ॥ इत्यनुत्पन्नएवासौस्वयंभूःस्वयमुत्थितः ॥ ३८ ॥ आतिवाहिकदेहात्माप्रभुराद्यःप्रजापतिः ॥ एतास्मिन्नपिसंपन्नेब्रह्मांडाकारिणिभ्रमे ॥ ३९ ॥ नकिंचिदपिसंपन्नंनचजातंनदृश्यते ॥ तद्ब्रह्माकाशमाकाशमेवस्थितमनंतकम् ॥ ४० ॥ संकल्पनगराकारमेतत्सदपिनैवसत् ॥ अनिर्मितमरागंचएतद्वैचित्रमुत्थितम् ॥ ४१ ॥

प्रपश्यतीत्यर्थः ॥ ३४ ॥ तस्यैवजलांतर्गतब्रह्मांडशरीराहंभाववेदनंतदंतश्चतुर्मुखशरीराहंभाववेदनंचेतिद्वैविध्यमाह ॥ कश्चिदिति ॥ ३५ ॥ आत्मनआत्मत्वेनाभिमताच्चित्तादेवनिमित्ताद्यथासंकल्पमात्मनोगर्भगृहवासनिमित्तत्वाद्गर्भगृहंदेशादिकल्पनावेदनंभावयन्नामादिनिर्मातेश्वरएवतत्तच्छब्दैस्तांस्तानर्थानात्मानंचबध्नातीत्युत्तरेणान्वयः ॥ ३६ ॥ ३७ ॥ उपपादितायाउत्पत्त्याख्यायिकायाःप्रस्तुतोपयोगमाह ॥ इत्यनुत्पन्नइति ॥ ३८ ॥ ३९ ॥ ४० ॥ अरागंरंगद्रव्यशून्यम् ॥ ४१ ॥

१ शस्ततस्तत्रेतिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाह्यसामग्र्याअनिर्मितमांतरप्रयत्नेनत्वकृतमितिभेदः ॥ ननुतर्हिदृष्टसंस्कारादिसामग्रीजन्यमेवजगत्किनस्यात्तत्राह॥महाकल्पेइति ॥ अयंभावः ॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे ॥परस्यांतेकृतात्मानःप्रविशंतिपरंपदं यावदधिकारमवस्थितिराधिकारिकाणामित्यादिस्मृतिसूत्रोपदर्शितन्यायेनमहाकल्पांतेप्राक्तनानांब्रह्मादीनांमुक्तत्वावधारणान्नतदीयादृष्टसंस्कारेणाग्रिमजगन्निर्माणम् ॥ यस्तूपासकःकल्पादौहिरण्यगर्भादिपदंलभतेनतेनकदापिप्राग्विचित्रंजगत्सृष्टमित्यनुभवाभावेतत्संस्कारासंभवाज्जगतोनसंस्कारजत्वमितिस्वमैंद्रजालवदकस्मादेवाविद्यथैवोद्भूतत्वान्मिथ्यात्वमेवेति ॥ ४२ ॥ ४३ ॥ ननुतर्ह्यनादिसाक्ष्यनुभवादेवतत्संस्कारोस्तुतज्जश्चप्रपंचोस्तुतत्राह ॥ अनादीति ॥ अवनिकादिकेपृथ्व्यादिसर्गविषये ॥ यादृशंतादृशंभवेदितिशेषः ॥ साक्षिवेद्यस्वप्नादेर्मिथ्यात्वदृष्टेस्तज्जनितसंस्कारजस्यापिमिथ्यात्वमेवस्यादितिभावः ॥ ४४ ॥ यादृक्स्वयंभूस्तादृक्तज्ज

अकृतंचानुभूतंचनसत्यंसत्यवत्स्थितम् ॥ महाकल्पेविमुक्तत्वाद्ब्रह्मादीनामसंशयम् ॥ ४२ ॥ स्मृतिर्नप्राक्तनीकाचित्कारणंवास्वयंभुवः ॥ तेनयादृक्स्वयंभूःस्यात्तादृक्तज्जमिदंस्मृतम् ॥ ४३ ॥ अनाद्यनुभवस्त्वित्थंयोत्रास्त्यवनिकादिके ॥ स्वप्नानुभूतंपृथ्व्यादिप्रबोधेयादृशंभवेत् ॥ ४४ ॥ स्मृतःसव्योममात्रात्मासर्वदैवस्मृतंजगत् ॥ यत्रयत्रयथातोयेद्रवत्वंनामभिद्यते ॥ ४५ ॥ तत्रतत्रतथानान्यःसर्गोस्तिपरमात्मनि ॥ स्रष्टिरेवमियंप्रौढासमएवत्वयंस्थितः ॥ ४६ ॥ भात्येवंनामब्रह्मांडंव्योमात्मेवातिनिर्मलम् ॥ दृश्यमेवमिदंशांतंस्वात्मनिर्मितविभ्रमम् ॥ ४७ ॥ निराधारंनिराधेयमद्वैतंचैक्यवर्जितम् ॥ जगत्संविदिजातायामपिजातंनकिंचन ॥ ४८ ॥ परमाकाशमाशून्यमच्छमेवव्यवस्थितम् ॥ सर्वसंसारतानास्तियदेवतदवस्थितम् ॥ ४९ ॥ नाधेयंतत्रनाधारोनदृश्यंनचद्रष्टता ॥ ब्रह्मांडंनास्तिनब्रह्मानचवैतंडिकाक्वचित् ॥ ५० ॥ नजगन्नापिजगतीशांतमेवाखिलंस्थितम् ॥ ब्रह्मैवकचतिस्वच्छमित्थमात्मात्मनात्मनि ॥ ५१ ॥ चित्वाद्द्रवत्वात्सलिलमिवावर्त्ततयात्मनि ॥ असदेवेदमाभातिसदिवेहानुभूयते ॥ ५२ ॥ विनश्यत्यसदेवांतेस्वप्नेस्वमरणंयथा ॥ अथवास्वस्वरूपत्वात्सदेवेदमनामयम् ॥ अखंडितमनाद्यंतंज्ञानमात्रांबरोदरम् ॥ ५३ ॥

मितियदुक्तंतद्विवृणोति ॥ स्मृतइति ॥ सस्वयंभूःस्मृतइवस्मृतःस्मर्यमाणातीतपदार्थवद्व्योममात्रात्माशून्यमात्रस्वभावस्तथाजगदपीत्यर्थः ॥ यत्रयत्रदेशेकालेचयथातोयेद्रवत्वंनभिद्यतइत्यग्रिमनञोत्रापिसंबंधः ॥ नामेतिप्रसिद्धौ ॥ ४५ ॥ प्रौढाभाति ॥ परमार्थतस्तुसमोजगद्वैषम्यशून्यएवस्थितः ॥ ४६ ॥ उक्तमेवविवृणोति ॥ भातीत्यादिना ॥ ४७ ॥ द्वैतंव्यवहाराभावेव्यावर्त्याभावादेकत्वसंख्ययापिवर्जितम् ॥ संविदिभ्रांतौ ॥ ४८ ॥ सर्वःसंसारोयस्मिंस्तद्भावोनास्ति ॥ ४९ ॥ वैतंडिकामोहमदांधजनवेतंडघटा ॥ जगद्विमर्शस्थाप्यपक्षाभावात्प्रसक्तावादिनोवैतंडिकतावा ॥ ५० ॥ ५१ ॥ ५२ ॥ इत्थमपवाददृष्ट्यास्वतोजगतःशून्यत्वमुक्त्वाअधिष्ठानदृष्ट्यात्वाह ॥ अथवेति ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहावलोकनन्यायेनप्रागुक्तंसर्वमनुसंधायोपसंहरति ॥ आकाशएवेति ॥ परमेब्रह्मणिप्रजेशःस्वयंभूराकाशःशून्यमेव ॥ यःसमःपरमात्मासएवशून्यप्रजेशाद्यात्मनाकचतिप्रथते ॥ हियस्मात्सप्रजेशआतिवाहिकवपुर्मनोमयशरीरोनपांचभौतिकः ॥ तेनतत्संकल्पमात्ररूपत्वेनपृथ्व्यादिनसत्सत्यम् ॥ यथानजातमनुत्पन्नंशशशृंगादिनास्तितद्वदित्यर्थः ॥ यथानजातंनास्तिचतथोपवर्णितमितिशेषोवा ॥ ५४ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेत्रयोदशःसर्गः ॥ १३ ॥ ॥ ७ ॥ ॥ प्राग्वर्णितेजीवभावेपरिच्छेदादिसंशयान् ॥ युक्त्यानिरस्यब्रह्मैक्यंशिष्टमत्रानुवर्ण्यते ॥ १ ॥ तत्रादौसमष्टिविराड्जीवपरिच्छेदनिरासायवृत्तानुवादेनभूमिकांरचयति ॥ इत्थमित्यादिना ॥ १ ॥ तदनुगुणांविराड्देहकल्पनांविवक्षुस्तदर्थंसमष्टिजीवभावसिद्धिमाह ॥ परमेति ॥२॥ आकाशरूपमजहदित्येतत्पूर्वान्वयि॥ आंतरीसंकल्पात्मिकाचिद्वृत्तिरेवंवक्ष्यमाणविराडुपाधिविषयांद्वयतांआत्मताभ्रांत्याप्रेमास्पदतांवेत्तीव ॥ ३ ॥ संकल्पजत्वोक्तेःफलंदर्शयति ॥ पृथ्व्यादीति ॥ ४ ॥ क्षयोनिवासस्तद्रहितः ॥ स्थिरंचिरस्थायिस्वप्नपुरंयदिस्यात्त

आकाशएवपरमेप्रथमःप्रजेशोनित्यंस्वयंकचतिशून्यतयासमोयः॥ सद्यातिवाहिकवपुर्नतुभूतरूपीपृथ्व्यादितेननसदस्तियथानजातम्॥ ५४॥ ॥इत्यार्षेवा०वा०दे० मोक्षोपायेषूत्पत्तिप्रकरणेस्वयंभूपत्तिवर्णनंनामत्रयोदशःसर्गः॥ १३॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच ॥ ॥इत्थंजगदहंतादिदृश्यजातंनकिंचन॥ अजातत्वान्नचास्त्येवयच्चास्तिपरमेवतत् ॥ १ ॥ परमाकाशमेवादौजीवतांचेततिस्वयम्॥ निःस्पंदांभोधिकुहरेसलिलंस्पंदतामिव॥ २॥ आकाशरूपमजहदेवंवेत्तीवद्वयताम्॥ स्वप्नसंकल्पशैलादाविवचिद्वृत्तिरांतरी॥ ३॥ पृथ्व्यादिरहितोदेहोयोविराडात्मकोमहान्॥ आतिवाहिकएवासौचिन्मात्राच्छनभोमयः॥४॥अक्षयःस्वप्नशैलाभःस्थिरस्वप्नपुरोपमः॥ चित्रकृत्स्थिरचित्तस्थचित्रसैन्यसमाकृतिः॥ ५॥ अनिखातमहास्तंभपुत्रिकौघसमोपमः ॥ ब्रह्माकाशेऽनिखातात्मासुस्तंभेशालभंजिका॥ ६॥ आद्यःप्रजापतिःपूर्वंस्वयंभूरितिविश्रुतः॥ प्राक्तनानांस्वकार्याणामभावादप्यकारणः॥७॥ महाप्रलयपर्यंतेष्वाद्यकालपितामहाः ॥ मुच्यंतेसर्वएवातःप्राक्तनंकर्मतेषुकिम्॥८॥ सोकुड्यएवकुड्यात्मादृश्यादृश्यःस्वयंस्थितः॥ नचदृश्यंनचद्रष्टानस्रष्टासर्वमेवच॥ ९॥ प्रतिशब्दपदार्थानांसर्वेषामेषएवसः॥ तस्मादुदेतिजीवालीदीपालीदीपकादिव॥ १० ॥

दातदुपमः ॥ चित्रकृतःस्थिरंनिश्चलंयदिचित्रंस्यात्तदातद्वासनात्मकचित्रसैन्यसमाकृतिः ॥ ५ ॥ अनिखाताअनुत्कीर्णायेमहास्तंभपुत्रिकौघास्तत्समाश्रयेन्येतेसर्वेप्युपमायस्य ॥ ब्रह्माकाशलक्षणेसुस्तंभेअनिखातात्माअनुत्कीर्णस्वरूपाशालभंजिकेतिरूपकम् ॥ ६ ॥ आधिभौतिकंरूपंमिथ्येत्युक्त्वातस्याधिदैविकमपितत्तथैवेत्याह ॥ आद्यइत्यादिना ॥ तत्रहेतून्प्राग्वर्णितानेवस्मारयति ॥ प्राक्तनानामित्यादिसार्द्धेन ॥ स्वकार्याणांस्वकर्मणाम् ॥ ७ ॥ ८ ॥ अकुड्येदर्पणादौप्रतिबिंबकुड्यात्मेवदृश्योप्यसत्वान्नदर्शनार्हः ॥ असत्वमुपपादयितुमसंगनिर्विकारचितिद्रष्टादृश्यंदर्शनंस्रष्टासृष्टिःसर्जनंभोक्ताभोग्यंभोगइतित्रिपुटीत्रयासंभवमाह ॥ नचेति ॥ सर्वमित्यनुक्तषट्कपरिग्रहः ॥ ९ ॥ एवंसर्वनिषेधेपिनप्रतिशब्दार्थानांशून्यता ॥ यस्मादेषप्रत्यगात्मैवप्रतिशब्दपदार्थानांसआत्मास्थितः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनसंकल्पात्मकविराट्कार्यत्वाद्यष्टिदेहिनामपिसंकल्पमात्रमयत्वंनसत्यपृथ्व्यादिघटितत्वमित्याह ॥ संकल्पइति ॥ यथाआदिमात्हिरण्यगर्भान्मिथ्यात्वान्नितरांशून्योविराडु त्पन्नस्तद्वद्विराजोव्यष्ट्यात्मापीत्यर्थः ॥ ११ ॥ एकस्वभावत्वेनैवव्यष्टिसमष्ट्योरेकत्वंप्रसाध्यतेनब्रह्मैक्यपरिशेषःसिद्धइत्याह ॥ अस्मादित्यादिना ॥ येव्यष्टिजीवाःसहका रिकारणानामभावादेकोऽसहायएवपरिस्पंदतेतथाविधादस्माद्विराजःप्रसरंतितेसएवनान्ये ॥ तथाविधाद्वृक्षात्प्रसृतानांशाखादीनांततोभेदादर्शनादितिभावः ॥ १२ ॥ १३ ॥ ॥ १४ ॥ व्यष्टिसमष्टितन्मूलानामेकत्वेव्यष्टिसमष्ट्योरवास्तवत्वंतन्मूलस्यैववस्तुतेतिकुतःमूलसमष्ट्योरवास्तवत्वंव्यष्टिविभागस्यैवप्रत्यक्षादिप्रमाणसिद्धस्यवास्तवत्वंकिनस्या त्तेनासमाजादौसमष्ट्यपगमेपिव्यष्टिपरिशेषेणतस्याःसत्यत्वक्लृप्तेरितिमन्यमानःश्रीरामउवाच ॥ किंस्यादिति ॥ व्यष्टिमात्रसत्यत्वेव्यष्टिजीवएवैकबुद्धिपरिमितत्वादेकदेशाव स्थितेर्वापरस्परसंश्लेषेणैकपिंडात्मतापत्तेर्वाकल्पितसमष्ट्यात्मासंभाव्यतइतिभावः ॥ १५ ॥ अवश्यंचैवमभ्युपेयमन्यथावृष्टिवारिधिजलकणवद्विस्फुलिंगवद्वासमष्टरुद्धत्वेअ

संकल्पएवसंकल्पात्किलैतिक्ष्मादिवर्जितः॥ आदिमादिवनिःशून्यःस्वप्नात्स्वप्नांतरंयथा॥ ११ ॥ अस्मादेकप्रतिस्पंदाज्जीवाःसंप्रसरं तिये॥ सहकारिकारणानामभावाच्चसएवते ॥ १२ ॥ सहकारिकारणानामभावेकार्यकारणम् ॥ एकमेतदतोनान्यःपरस्मात्सर्गवि भ्रमः॥ १३॥ ब्रह्मैवाद्योविराडात्माविराडात्मैवसर्गता॥जीवाकाशःसएवेत्थंस्थितःपृथ्व्याद्यसद्घतः॥१४॥ ॥श्रीरामउवाच॥ ॥किं स्यात्परिमितोजीवोराशिराहोअनंतकः॥ आहोस्विदस्त्यनंतात्माजीवपिंडोऽचलोपमः॥१५॥ धाराःपयोमुचइवशीकराइववारिधेः॥ कणास्तप्तायसइवकस्मान्निर्यातिजीवकाः ॥ १६ ॥ इतिमेभगवन्ब्रूहिजीवजालविनिर्णयम् ॥ ज्ञातमेतन्मयाप्रायस्तदेवप्रकटीकुरु ॥१७॥ ॥श्रीवसिष्ठउवाच॥ ॥एकएवनजीवोस्तिराशीनांसंभवःकुतः॥ शशशृंगंसमुड्डीयप्रयातीवहितेवचः॥१८॥नजीवोस्तिनजी वानांराशयःसंतिराघव॥ नचैकःपर्वतप्रख्योजीवपिंडोस्तिकश्चन ॥ १९॥ जीवशब्दार्थकलनाःसमस्तकलनान्विताः ॥ नेहकाश्चनसं तीतिनिश्चयोस्तुतवाचलः॥२०॥शुद्धचिन्मात्रममलंब्रह्मास्तीहहिसर्वगम्॥ तद्यथासर्वशक्तित्वाद्विंदतेयाःस्वयंकलाः॥२१॥ चिन्मात्रा नुक्रमेणैवसंप्रफुल्ललतामिव॥ ननुमूर्त्ताममूर्त्तांवातामेवाशुप्रपश्यति॥ २२ ॥ जीवोबुद्धिःक्रियास्पंदोमनोद्वित्वैक्यमित्यपि॥ स्वसत्तां प्रकचंतींतांनियोजयतिवेदने ॥ २३॥

नित्यत्वापत्त्याकृतहानाकृताभ्यागमःस्यादित्याशयेनाह ॥ धाराइति ॥ कस्मादिति ॥ य स्मान्निर्यातितन्नसंभावयितुंशक्यमित्यर्थः ॥ १६ ॥ विशेषजिज्ञासयावैपरीत्यापादनंनदुर्मेधस्तयात्वदाशयानवबोधादित्याह ॥ ज्ञातमिति ॥ १७ ॥ प्रयोजनवद्ब्रह्मात्मैकत्व सिद्ध्येएकाधिष्ठानाअनेककल्पनालघीयसीतिसमष्टिजीवंपरिकल्प्यतदुपहितव्यष्टिकल्पनामयोक्तानव्यष्टिसमष्ट्योरन्यतरसत्यत्वायजीवोत्पत्त्यादिप्रतिपादनायवातत्रचनत्व दाशंकाप्रसरइत्याशयेनश्रीवसिष्ठउवाच ॥ एकइति ॥ अप्यर्थेएवकारः ॥ १८ ॥ १९ ॥ कलनाःप्रतिभासाः ॥ २० ॥ कलाःकल्पनाकौशलानिविंदतेलभतेअनुसंधत्तइति यावत् ॥ २१ ॥ तत्तत्संकल्पवृत्तिक्रमानुसारिणांचितोमात्राणामाभासानामनुप्रवेशेनैवनिमित्तेनतामेवकलांमूर्त्तामूर्त्तस्वरूपेणाविर्भूतांप्रपश्यति यथालताक्रमेणस्वांकोरकि तामथसंप्रफुल्लतांचपश्यतितद्वत् ॥ २२ ॥ दर्शनप्रकारमेवविषयप्रपंचनेनविशदयति ॥ जीवइति ॥ तद्ब्रह्मैववेदनेनियोजयतिविषयीकरोतीतियावत् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्रकचनंचास्याविषयैवतदपगमेतुनिर्विक्षेपस्वरूपमात्रावस्थितिरित्याह ॥ सेति ॥ अबुद्धाअज्ञानादेतैवैवमुक्तरूपाभवति ॥ प्रेक्षयात्मप्रबोधेन ॥ प्रबोधएवदुर्लभइत्याह॥ नत्विति ॥ २४ ॥ निवर्त्तितस्याबोधस्यतर्हिकिमात्मनापरिशेषः ॥ नतावद्बोधात्मनातस्यतदकारणत्वाद्विरोधाच्च नाप्यन्यात्मनान्यपरिशेषादित्याशंक्याह ॥ यथेति ॥२५॥ उपपादितमुपसंहरति ॥ एवमिति ॥ चिदेवसारोऽबाध्यांशस्तेनैवपरमार्थरूपेणरूपवान् ॥ २६ ॥ सर्वतोप्यनणुतयाअपरिच्छिन्नतयाविषयभेदापगमेतत्कलनभेदोवनच्छेदेवनातपभेदइवापगतइतिब्रह्ममात्रपरिशेषइत्याह ॥ विद्यतइति ॥ २७ ॥ उक्तमभ्युपगम्यश्रीरामःप्रागुक्तेव्यष्टिसमष्टिजीवयोरभेदेव्यष्टिजीवेच्छादेरपिसमष्टिधर्मत्वेनामोघत्वापत्त्याभोगमोक्षाव्यवस्थांशंकते ॥ एवमिति ॥ एतत्प्राग्वर्णितमेवमेवेत्यभ्युपगमः ॥ जगज्जीवाअन्येसर्वेजीवाः ॥ २८ ॥ ब्रह्मप्रथमंसत्यसंकल्पसमष्टिजीवभावापन्नंसत्स्वसंकल्पाधीनवृत्तिव्यष्टिजीवभावमापद्यते ॥ तत्रपूर्वसंकल्पविरुद्धेर्थेनव्यष्टीनांसत्यसंकल्पतासिद्धिरितिपरिहरन्श्रीवसिष्ठउवाच ॥ महाजीवेति ॥ यथाजगद्व्यवस्थासिद्ध्यतितथेच्छंअहमे

साऽबुद्धैवभवत्येवंभवेद्ब्रह्मैवबोधतः ॥ अबोधःप्रेक्षयायातिनाशंनतुप्रबुद्ध्यते ॥ २४ ॥ यथांधकारोदीपेनप्रेक्ष्यमाणःप्रणश्यति ॥ नचास्यज्ञायतेतत्त्वमबोधस्यैवमेवहि ॥ २५ ॥ एवंब्रह्मैवजीवात्मानिर्विभागोनिरंतरः ॥ सर्वशक्तिरनाद्यंतोमहाचित्साररूपवान् ॥ २६ ॥ सर्वानणुतयात्वस्यनक्वचिद्भेदकल्पना ॥ विद्यतेयाहिकलनासातदेवानुभूतितः ॥ २७ ॥ ॥ श्रीरामउवाच ॥ ॥ एवमेतत्कथंब्रह्मन्नेकजीवेच्छयाखिलाः ॥ जगज्जीवानयुज्यंतेमहाजीवैकतावशात् ॥ २८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ महाजीवात्मतद्ब्रह्मसर्वशक्तिमयात्मकम् ॥ स्थितंतथेच्छमेवेहनिर्विभागंनिरंतरम् ॥ २९ ॥ यदेवेच्छतितत्तस्यभवत्याशुमहात्मनः ॥ पूर्वंतेनेष्टमिच्छादिततोद्वित्वमुदेतियत् ॥ ३० ॥ पश्चाद्द्वित्वविभक्तानांस्वशक्तीनांप्रकल्पितः ॥ अनेनेत्थंहिभवतीत्येवंतेनक्रियाक्रमः ॥ ३१ ॥ तंविनानुदयेत्वासांप्रधानेच्छैवरोहति ॥ शक्त्यात्मजातयाब्राह्म्यानियमोयंप्रकल्पितः ॥ ३२ ॥ यस्याजीवाभिधानायाःशक्त्यपेक्षाफलत्यसौ ॥ प्रधानशक्तिनियमानुष्ठानेनविनानतु ॥ ३३ ॥ प्रधानशक्तिनियमःसुप्रतिष्ठोभवेद्भवेत् ॥ तत्फलंशक्त्यधीनत्वान्नेहितानांक्वचिद्भवेत् ॥ ३४ ॥ एवंब्रह्ममहाजीवोविद्यतेंतादिवर्जितः ॥ जीवकोटिमहाकोटीभवत्यथनकिंचन ॥ ३५ ॥

वसर्वदासर्वेषुसत्यसंकल्पःस्यामितीच्छावदितियावत् ॥ निर्विभागंव्यष्टिविभागात्पूर्वंतच्छून्यम् ॥ निरंतरमित्युत्तरान्वयि ॥ २९ ॥ इच्छासत्यसंकल्पः ॥ आदिपदात्तेनेतरेच्छाप्रतिरोधः ॥ द्वित्वंव्यष्टिविभागः ॥३०॥ स्वशक्तीनांस्वांशजीवानां ॥ अनेनदंडचक्रादिबाह्योपकरणेनेत्थंभ्रमणादिनाघटादिभवतीतिक्रियाक्रमोनसंकल्पमात्रादित्यर्थः ॥३१॥ ननुतर्हिकथमन्येषामपिमहर्षीणांक्रियाक्रमंविनापिसंकल्पादेवकार्यदर्शनंतत्राह ॥ तमिति ॥ एवंतंक्रियाक्रमंविनाकार्यानुदयेनियतेसतियत्क्वचिदासांमहर्ष्यादिव्यष्टिशक्तीनांक्रियाक्रमंविनाइच्छारोहतितत्प्रधानस्यसमष्टेरिच्छैवरोहति ॥ अस्यायंसंकल्पःसिद्ध्यत्वितिप्रधानस्यैवतत्रेच्छाकल्प्यतइत्यर्थः ॥ ३२ ॥ उक्तार्थमेवस्पष्टयति ॥ यस्याइति ॥ असौफलति ॥ ३३ ॥ क्रियाक्रमस्यापिफलसिद्धिःप्रधानसंकल्पाधीनैवेत्याह ॥ प्रधानेति ॥ सुप्रतिष्ठःसम्यक्फलसिद्ध्यनुगुणोयदिभवेत्तदाईहितानांकार्यादिचेष्टानामपिफलंभवेदितिसंबंधः ॥ ३४ ॥ एवंचनिष्कर्षेब्रह्मैवमहाजीवःसएवव्यष्टिसमष्टिकोटिद्वयंभवतीतिफलितमित्युपसंहरति ॥ एवमिति ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्तरोक्तंबोधसौकर्यायसंक्षिप्यदर्शयति ॥ चेत्येति ॥ समममविषमंब्रह्मस्वरूपम् ॥ ३६ ॥ ब्रह्मभावोजीवानामुपासनेनसमष्टिभावप्राप्तिक्रमेणवाअत्रैवज्ञानेनसाक्षाद्वासमुदेती
त्याह ॥ एवमिति ॥ आत्मजीवत्वंप्रागुक्तब्रह्मभावमहाजीवत्वम् ॥ यथाताम्राणांहिमतारसौषधैः पाकक्रमेणवास्पर्शसंयोगेअक्रमेणवाभवतितद्वत् ॥ ३७ ॥ जीवजगद्भावौ
विमर्शेचिच्चमत्कारमात्रंनवस्त्वंतरमित्याह ॥ अत्रेति ॥ आंतरेप्रलयरूपेमहाकाशे ॥ ३८ ॥ ३९ ॥ कोसौचिच्चमत्कारस्तमाह ॥ चितइति ॥ जगत्संस्कारसंस्कृतमायाप्रतिफल
नेनतदैकरस्येनस्वात्मास्वादश्चिदालेहः तस्यामात्मचितिप्रबिंबतिस्फुरति ॥ ४० ॥ साचिदालीढाचिद्वास्तवचिद्रूपाद्भेत्तुमशक्यापिपरिणामादिशब्दैर्भिन्नेवविबुद्ध्यते ॥ ४१ ॥
चितस्तदधीनप्रकाशस्यचेत्यस्यचस्वतःस्वाभाविकंयदविच्छिन्नविलासात्मअविविक्तस्वभावापन्नंस्वदनंतदेवजगदितिभ्रांत्यास्थितमित्यर्थः ॥ ४२ ॥ तत्राप्यहंतादर्शनंपूर्वंत

चेत्यसंवेदनाज्जीवोभवत्यायातिसंस्मृतिम् ॥ तदसंवेदनाद्रूपंसमायातिसमंपुनः ॥ ३६ ॥ एवंकनिष्ठजीवानांज्येष्ठजीवक्रमाक्रमैः ॥ स
मुदेत्यात्मजीवत्वंताम्राणामिवहेमता ॥ ३७ ॥ अत्रांतरेमहाकाशइत्थमेषगणोप्यसन् ॥ स्वात्मैवसदिवोदेतिचिच्चमत्करणात्मकः ॥ ३८ ॥
स्वयमेवचमत्कारोयःसमापद्यतेचितः ॥ भविष्यन्नामदेहादितदहंभावनंविदुः ॥ ३९ ॥ चितोयस्माच्चिदालेहस्तन्मयत्वादनंतकः ॥ सए
षभुवनाभोगइतितस्यांप्रबिंबति ॥ ४० ॥ परिणामविकारादिशब्दैःसैवचिदव्यया ॥ तादृग्रूपादभेद्यापिस्वशक्त्यैवविबुद्ध्यते ॥ ४१ ॥ अ
विच्छिन्नविलासात्मस्वतोयत्स्वदनंचितः ॥ चेत्यस्यचप्रकाशस्यजगदित्येवतत्स्थितम् ॥ ४२ ॥ आकाशादपिसूक्ष्मैषायाशक्तिर्विंतता
चितः ॥ सास्वभावतएवैतामहंतांपरिपश्यति ॥ ४३ ॥ आत्मन्यात्मात्मनैवास्यायस्रस्फुरतिवारिवत् ॥ जगदंतमहंताणुंतदैषासंप्रपश्यति
॥ ४४ ॥ चमत्कारकरीचारुयच्चमत्कुरुतेचितिः ॥ स्वयंस्वात्मनितस्यैवजगन्नामकृतंततः ॥ ४५ ॥ चितश्चेत्यमहंकारःसैवराघवकल्पना ॥
तन्मात्रादिचिदेवातोद्वित्वैकत्वेक्कसंस्थिते ॥ ४६ ॥ जीवहेत्वादिसंत्यागेत्वंचाहंचेतिसंत्यज ॥ शेषःसदसतोर्मध्येभवत्यर्थात्मकोभवेत् ॥
॥ ४७ ॥ चितायथादौकलितास्वसत्तासातथोदिता ॥ अभिन्नादृश्यतेव्योम्नःसत्तासत्तेनविग्रहे ॥ ४८ ॥

त्कृतंचपरिच्छिन्नजगद्रूपदर्शनमित्याह ॥ आकाशादितिद्वाभ्याम् ॥ ४३ ॥ बहिर्बहिःस्थौल्योत्कर्षणपरंपरायांजगद्ब्रह्मांडोंतेयस्यतथाविधमहंताणुम् ॥ ४४ ॥ तथाचचिच्चम
त्कृतेरेवजगदिति नामकरणंनजगत्पृथगस्तीतिफलितमित्याह ॥ चमत्कारेति ॥ ४५ ॥ चिदधीनमहंकारकल्पनंतदधीनंतन्मात्रादिजगत्कल्पनमितिस्थितेयदधीनमन्यकल्पनंतदे
वपरिशिष्टमित्याह चितइति ॥ ४६ ॥ सदसतोःसत्यानृतयोःकल्पनयोर्मध्येत्वंचाहंचेतिचेतनपरिच्छेदकल्पनैवदुःखजातस्त्यागेकृतेशेषःस्वतएवविकल्पकाभावात्सन्मात्ररूपः
संपद्यतइत्याह ॥ जीवेति ॥ भावप्रधानोनिर्देशः ॥ जीवभावंप्रतिहेतुर्निमित्तंवासनाकर्मादि ॥ आदिपदादुपादानपरिग्रहः ॥ भवत्यर्थःसत्तातदात्मकः ॥ ४७ ॥ ज्ञानेनदृश्य
तत्संवलितसत्तापायेपूर्वसिद्धाधिष्ठानसत्तायथास्थितैवोदितामेघापायेनिर्मलव्योमसत्तावदित्याह ॥ चितेति ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुभावितंनिष्प्रपंचत्वमनुमानेनापिद्रढयति ॥ विश्वमिति ॥ ईहाख्यंमनश्चेष्टारूपंसूक्ष्मंजगत्खंशून्यमेव ॥ तथाविबुधानामिंद्रियतदधिष्ठातृदेवानामालयः साकारःस्थूलश्च विश्वविराड्रूपइतिद्विविधमपिविश्वंखंशून्यमेवास्तिचिच्चमत्काररूपत्वादित्यर्थः ॥ ४९ ॥ तत्रव्याप्त्यादिसिद्धयेउदाहरणादिदर्शयति ॥ योयदिति ॥ सावयवजलादिकार्येंत रंगादावपितथादृष्टंनिरवयवचित्कार्येकैवकथेत्यर्थः ॥ ५० ॥ इत्थंचनामरूपनिष्कृष्टापरिच्छिन्नचिद्रूपमेवजगतस्तात्त्विकंरूपंफलितमित्याह ॥ चितेरिति ॥ ५१ ॥ वैपरी त्यदर्शनेपिजगद्रचनाचिद्रचनैवेतिफलितमित्याह ॥ मनइति ॥५२॥ एवंजगतश्चिन्मयत्वेसतिचिद्धर्मतैवफलितेत्याह ॥ चितइति ॥ चिच्चित्त्वयोश्चकल्पनरूपभानाद्भेदोनवस्तु तइतिजगत्कुतः ॥ ५३ ॥ वर्णितांजगतश्चिन्मात्रतामुक्तिवैचित्र्यैर्दृढंव्युत्पादयितुमुपक्रमते ॥ चितेरित्यादिना ॥ चितेरर्थप्रथनशक्तिरेवजीवतदुपाधिभूततन्मात्रमात्रंसज्जगदि तित्रेधेणस्थितेत्यर्थः ॥ ५४ ॥ ततश्चित्तादहंकारशक्तिस्फुरणमेवस्पंदनकर्मप्राणसंवलनेजीवशब्दवाच्यंभविष्यतीत्याह ॥ चित्तादिति ॥ ५५ ॥ तथाभावेपिनचित्स्वभावेभे

विश्वंखंजगदीहाख्यंखमस्तिविबुधालयः॥ साकारश्चिच्चमत्काररूपत्वान्नान्यदस्तिहि॥ ४९ ॥ योयद्विलासस्तस्मात्सनकदाचनभिद्यते अपिसावयवंतस्मात्कैवानवयवेकथा॥५०॥ चितेर्नित्यमचेत्यायानिर्नाम्न्याविततारुतेः॥यद्रूपंजगतोरूपंतत्तत्स्फुरणरूपिणः॥५१॥ मनोबुद्धिरहंकारोभूतानिगिरयोदिशः॥ इतियायास्तुरचनाश्चितस्तत्त्वाज्जगत्स्थितेः॥५२॥ चितेश्चित्त्वंजगद्विद्धिनाजगच्चित्त्वमस्तिहि॥ अजगत्त्वादचिच्चित्स्याद्भानाद्भेदोजगत्कुतः॥ ५३ ॥ चितेर्मरीचिबीजस्यनिजायांतश्चमत्कृतिः॥ साचैषाजीवतन्मात्रमात्रंजगदिति स्थिता ॥ ५४॥ चित्तात्स्वशक्तिकचनंयदहंभावनंचितः॥ जीवःस्पंदनकर्मात्माभविष्यदभिधोत्यसौ ॥ ५५॥ यच्चिच्चित्त्वेनकचनंस्वसं पाद्याभिधात्मकम्॥ स्वविकारैर्व्यवच्छेद्यंभिद्यतेनोनविद्यते॥ ५६ ॥ चित्स्पंदरूपिणोरस्तिनभेदःकर्तृकर्मणोः॥ स्पंदमात्रंभवेत्कर्मसए वपुरुषःस्मृतः॥ ५७॥ जीवश्चित्तपरिस्पंदःपुंसांचित्तंसएवच॥ मनस्त्विंद्रियरूपंसत्तत्तांनानेवगच्छति॥ ५८॥ शांताशेषविशेषंहिचि त्प्रकाशच्छटाजगत्॥ कार्यकारणकादित्वंतस्मादन्यन्नविद्यते ॥ ५९ ॥ अच्छेद्योहमदाह्योहमक्लेद्योऽशोष्यएवच॥ नित्यःसर्वगतःस्था णुरचलोहमितिस्थितम्॥ ६० ॥

दइत्याह ॥ यदिति ॥ यत्ययद्यपिचितश्चित्त्वेनकचनंस्वविकारैरहंतादिभिर्व्यवच्छेद्यंसत्स्वसंपाद्यजीवाद्यभिधात्मकंसंपन्नंतथापितद्यवच्छिन्नरूपमुपाधिमिथ्यात्वान्नविद्यतइति नोभिद्यतेनैवभेदप्रसक्तिरित्यर्थः ॥ ५६ ॥ चित्स्पंदशक्तिभेदादहंकारप्राणोपहितजीवभेदमाशंक्याह ॥ चिदिति ॥ चित्प्रधानोहंकारःकर्त्तास्पंदप्रधानःप्राणःक्रिया नहिस्वक्रि ययाकर्त्ताभिद्यतेअतःसचित्स्पंदसंवलितएवपुरुषोजीवइत्यर्थः ॥ ५७ ॥ एवंचित्तमनइंद्रियादिभावेपिनजीवभेदः ॥ जीवोपाधिमनसएवगोलकभेदेनेंद्रियभावेनावस्थानादि त्याह ॥ जीवइति ॥ ५८ ॥ एवंजगज्जीवभेदनिरासेफलितमुपसंहरति ॥ शांतेति ॥ हियस्मात्तुच्छतरकार्यकारणादिभावस्वभावंजगत्प्रागुक्तरीत्याचित्प्रकाशस्यछटाप्रांतइव तदभिन्नसत्तास्फूर्त्तिकंतस्माद्धेतोरन्यन्नविद्यतेइतिशांताशेषविशेषंप्रत्यगात्मरूपमेवसंपन्नमित्यर्थः ॥ ५९ ॥ तत्रसर्वानर्थनिवृत्तिदर्शयति ॥ अच्छेद्यइति ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदपरिज्ञानादेवद्वैतवादिनांविवादभेदोनास्माकमित्याह ॥ विवदंतइति ॥ स्वस्वभ्रमैरन्यान्भ्रमयंतोयथातद्वत् ॥ ६१ ॥ अज्ञतज्ज्ञयोर्दृश्येमूर्तामूर्त्तभावनाकृतएवसत्यमिथ्यात्वप्रयुक्तद्वैताद्वैतविभागइत्याह ॥ दृश्यइति ॥ ६२ ॥ चेत्येरसआसक्तिस्तद्रूपजलसेकाच्चिद्वसंतश्रीरूपाशक्तिर्मायाकालादिनामिकांस्वमंजरींतनोति ॥ आकाशेप्रथमभूतेऊर्ध्वदेशेचविशदां ॥ ६३ ॥ यथाब्रह्मस्वाधीनकल्पनाक्रमैर्जगज्जीवभावंप्राप्तंतथास्वाधीनैरेवबोधक्रमैःस्वरूपेवतिष्ठतइत्याह ॥ स्वयमित्यादिसार्द्धचतुर्भिः ॥ चित्स्वयमेवानाहतमच्छिन्नगर्भमेवसत्प्रथममाकाशकल्पनेसच्छिद्रत्वादंडकमंडसदृशंब्रह्मांडरूपंवास्फुरति ॥ ततोऽडजात्मकोवायुःसूत्रात्मावातस्कंधरूपोवास्फुरतीतिसर्वत्रानुषंगः ॥६४ ॥ ततोवक्ष्यमाणतेजोजन्मानंतरंवारिअप्त्वंभूत्वास्फुरति ॥ तच्चनतडागादिनिखातगंभूसर्गात्प्राक्तदयोगात् ॥ साचित्स्वयंविचित्राःस्वर्णरजतादिधातवोयस्यांपृथिव्यांतद्भावं श्रेष्ठानांदेवासुरमनुष्याणामंगंदेहादिभावमपिनिर्माणेनप्रापितम् ॥६५॥ जगदाप्यायकचंद्रात्मनापिस्वयमेवाभूदित्याह ॥ स्वयमिति ॥ भौमौषधिरसभेदानामपिचंद्राधीनत्वात्स्वविचि

विवदंतेतथात्यत्रविवदंतोयथाभ्रमैः॥भ्रमयंतोवयंत्वेतेजाताविगतविभ्रमाः॥६१॥दृश्येमूर्त्तेज्ञसंरूढेविकारादिपृथग्भवेत्॥नामूर्त्तेतज्ज्ञकचितेचित्खेसदसदात्मनि ॥ ६२ ॥ चित्तरौचेत्यरसतःशक्तिःकालादिनामिकां ॥ तनोत्याकाशविशदांचिन्मधुश्रीःस्वमंजरीम् ॥६३॥ स्वयंविचित्रंस्फुरतिचिदंडकमनाहतम्॥स्वयंविलक्षणस्पंदंचिद्वायुरंडजात्मकः ॥ ६४ ॥ स्वयंविचित्रंकचनंचिद्वारिननिखातगं॥स्वयंविचित्रधातुत्वंश्रेष्ठांगमपिनिर्मितम् ॥ ६५ ॥ स्वविचित्ररसोल्लासाचिज्ज्योत्स्नासततोदिता॥स्वयंचिदेवप्रकटश्चिदालोकोमहात्मकः॥ ६६॥स्वयमस्तंगतेबाह्येस्वज्ञानादुदिताचितिः॥स्वयंजडेषुजाड्येनपदंसौषुप्तमागता॥६७॥स्वयंस्पंदितयास्पंदिचित्त्वाच्चितिमहानभः॥चित्प्रकाशप्रकाशोहिजगदस्तिचनास्तिच॥६८॥चिदाकाशैकशून्यत्वंजगदस्तिचनास्तिच ॥ चिदालोकमहारूपंजगदस्तिचनास्तिच॥६९॥चिन्मारुतपरिस्पंदोजगदस्तिचनास्तिच॥चिद्घनध्वांतकृष्णत्वंजगदस्तिचनास्तिच॥ ७० ॥ चिदर्कालोकदिवसोजगदस्तिचनास्तिच ॥ चित्कज्जलरजस्तैलपरमाणुर्जगत्क्रमः॥ ७१ ॥

त्रेत्युक्तम् ॥ अत्रतेजःसर्गःपाठक्रमादार्थक्रमोबलीयानितिप्रागुक्तवायुसर्गानंतरंबोध्यः ॥ चिदंडकमित्यादिसमस्तंसर्वत्ररूपकंवाबोध्यम् ॥ ६६ ॥ स्वज्ञानादेवबाह्येदृश्येऽस्तंगतेसतिउदिताआविर्भूतपूर्णभावाअवतिष्ठतइतिशेषः ॥ जडेषुस्थावरादिषु ॥ ६७ ॥ उक्तमेवार्थंसंक्षिप्याहार्द्धेन ॥ अविचारेस्पंदस्वभावप्राणाद्यात्मभावकल्पनेस्पंदिसंसार्येवभवति ॥ स्वविचाराविर्भूतचित्त्वात्तुचित्येवस्वस्वभावेवतिष्ठतइत्यर्थः ॥ तदवस्थस्यकिंजगदस्तिउतनास्ति ॥ सत्वेसंसारापत्तिरसत्वेत्वसद्यात्मिप्रसंगइत्याशंक्यसर्वदाजगतोब्रह्मसत्तयासत्त्वमेवस्वसत्तयात्वसत्त्वमेवेत्याह ॥ चित्प्रकाशइत्याद्यर्द्धषट्केन ॥ सर्वत्रचित्सत्तोपजीवित्वप्रदर्शनायप्रकाशादिभावरूपितत्तद्धर्मतोक्तिः ॥ प्रकाशस्यतेजसःप्रकाशोभास्वररूपम ॥ ६८ ॥ ६९ ॥ ७० ॥ तैलदाहेकज्जलस्येवजगद्बाधेचिदवशेषात्कज्जलत्वोक्तिर्नकार्यत्वाभिप्रायेण ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७२ ॥ ७३ ॥ ७४ ॥ सर्वत्रचिदपृथक्सत्वादेवजगतश्चिद्धर्मत्वमभिप्रेतमितिस्फुटमाह ॥ चित्सत्तैवेति ॥ ७५ ॥ खेमलंनैल्यमिवप्रतीतमपिनस्थितम् ॥ असदपिभुवनत्रय
मित्युक्तविधयासन्मयत्वेनसदित्यर्थः ॥ ७६ ॥ जगदसत्तातर्हिवस्त्वंतरंस्यात्तत्राह ॥ अविकल्पेति ॥ कल्पितनिरूपितसत्तासत्तयोरधिष्ठानातिरेकादर्शनादित्यर्थः ॥ सावयव
निरवयवयोःकथमपृथक्सत्वमितिवदतस्तार्किकान्विद्वदनुभवापलापिनोधिक्करोति ॥ अवयवेति ॥ ७७ ॥ तत्रयुक्तिविरोधमाह ॥ नविद्यतइति ॥ अद्र्यब्धिभिरुर्व्यादिभि
स्तत्तदीश्वरैश्वसहितंजगत् ॥ ७८ ॥ प्रसज्यतइतिप्रसंगः ॥ कर्मणिघञ् ॥ तत्रइतरस्यावयवादेर्विभ्रमःकःप्रसक्तःस्यादित्यर्थः ॥ विशदास्वच्छा ॥ ७९ ॥ शांतंमिथ्यात्वादसदे
वाखिलंयथास्फटिकशिलाप्रतिबिंबनगरसन्निवेशंधत्तेतद्वत् ॥ कुतोखिलस्यशांतत्वंतत्राह ॥ पदार्थेति ॥ सर्वपदार्थाधिष्ठानेचिदाकाशेऽयंभूताकाशजोमलोवाय्वादिःसावय

चिदग्न्यौष्ण्यंजगल्लेखाजगच्चिच्छंखशुक्लता॥जगच्चिच्छैलजठरंचिज्जलद्रवताजगत्॥७२॥ जगच्चिदिक्षुमाधुर्यंचित्क्षीरस्निग्धताजग
त्॥ जगच्चिद्धिमशीतत्वंचिज्ज्वालाज्वलनंजगत् ॥ ७३॥ जगच्चित्सर्षपस्नेहोवीचिश्चित्सरितोजगत् ॥ जगच्चित्क्षौद्रमाधुर्यंजगच्चित्क
नकांगदम्॥ ७४ ॥ जगच्चित्पुष्पसौगंध्यंचिल्लताग्रफलंजगत्॥ चित्सत्तैवजगत्सत्ताजगत्सत्तैवचिद्वपुः ॥ ७५॥ अत्रभेदविकारादिनखे
मलमिवस्थितम्॥ इतीदंसन्मयत्वेनसदसद्भुवनत्रयम् ॥ ७६॥ अविकल्पतदात्मत्वात्सत्तासत्तैकतैवच ॥ अवयवावयविताशब्दार्थौ
शशशृंगवत्॥ ७७॥ अनुभूत्यपलापायकल्पितोयैर्धिगस्तुतान् ॥ नविद्यतेजगद्यत्रसाद्र्यब्ध्युर्वीनदीश्वरम् ॥ ७८॥ चिदेकत्वात्प्रसंगः
स्यात्कस्तत्रेतरविभ्रमः॥ शिलात्ददयपीनापिस्वाकाशेविशदैवचित् ॥ ७९॥ धत्तेंतरखिलंशांतंसन्निवेशंयथाशिला ॥ पदार्थनिकरा
काशेत्वयमाकाशजोमलः॥८०॥ सत्तासत्तात्मतात्वत्तामत्ताश्लेषानसंतिते॥ पल्लवांतरलेखौघसन्निवेशवदाततं ॥ ८१ ॥ अन्यान
न्यात्मकमिदंधत्तेंतश्चित्स्वभावतः॥ समस्तकारणौघानांकारणादिःपितामहः ॥ ८२ ॥ स्वभावतोकारणात्मचित्तंचिद्ध्यनुभूतितः॥ न
चासत्त्वमचेत्यायाश्चितोवाचापिसिद्ध्यति॥८३॥ यदस्तितदुदेतीतिदृष्टंबीजादिवांकुरः॥८४॥

वप्रपंचः ॥ तत्रभूताकाशेप्यसंगस्वभावेयदितत्कार्यश्लेषानसंतितदाचिदाकाशेसत्तासत्ताद्याःश्लेषाःसुतरांनसंतीत्यर्थः ॥ ८० ॥ तर्हिचित्यसतोजगत्सन्निवेशस्यकथंभानंतत्रा
ह ॥ पल्लवेति ॥ यथापल्लवंशिरारेखौघसन्निवेशंपल्लवात्पृथगनिरूढत्वादसदेवतदन्यानन्यात्मकतयास्थितंधत्तेचिदपितथाजगदित्यर्थः ॥ ८१॥ निर्विकाराकाशोपादानकत्त्वा
ज्जगद्विकारस्यमिथ्यात्वमुक्तंसंप्रतिमिथ्याविकल्पसहस्रात्मकचित्तसमष्ट्यात्मकहिरण्यगर्भनिदानकत्वादपिजगतोमिथ्यात्वमित्याह ॥ समस्तेति ॥८२॥ चित्तकार्यमानोरथिक
विकल्पानामसत्त्वादेवचित्तमकारणात्मतदेवपितामहइत्यर्थः ॥ चेत्यासत्वेचितोप्यसत्त्वंतस्यास्तदव्यभिचारदर्शनादितिवाचापिचितोऽसत्त्वंनसिद्ध्यति ॥ हियस्माच्चिदनुभूतितः
सिद्धा ॥ अनुभवविरुद्धेचनवाचःप्रामाण्यमित्यर्थः ॥ ८३ ॥ यदिजगत्स्वतःसत्स्यात्तदाज्ञानाद्युपायसहस्रैरप्यनुच्छेद्यमेवस्यात्ततआत्यंतिकोच्छेदासंभवेनपुनराविर्भावावर्ज ॥ ३० ॥
नादनिर्मोक्षप्रसंगःस्यादित्याशयेनाह ॥ यदिति ॥ ८४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिदृश्यस्यसत्तायांमहानाग्रहस्तर्हिअनुभवेनभेदंनिरस्यपरमपदात्मकचिन्मयत्वेनतत्सत्तयैवसास्वीकार्येत्याह ॥ गगनइति ॥ ८५॥८६॥ ॥ इतिश्रीवासिष्ठ० उत्पत्ति० चतुर्दशःसर्गः ॥ १४ ॥ ॥ ७ ॥ ॥ शश्वद्दृष्टांतयुक्त्योघैरुक्तार्थमनुभावयन् ॥ विस्तृतंमंडपाख्यानमत्रोपक्रमतेमुनिः ॥ १ ॥ जगच्चिदाकाशमेवेतिप्रतिज्ञा ॥ कथंतर्हि पृथग्भातितत्राह ॥ यथेति ॥ यथाविमलेव्योम्नि भ्रांत्यामुक्तानांसंघोमौक्तिकंभातितद्वत् ॥ चिद्गगनंस्वात्मैवयथाजगत्तथादृष्टांतःश्रूयतामितिशेषः ॥ १ ॥ नचोत्कर्त्रीति ॥ तदुत्कर्तृचेतनांतराप्रसिद्धेर्निर्विकारासंगस्योत्कर्त्तनासंभवाच्चेतिभावः ॥ २ ॥ दृश्यविदोजगत्प्रत्ययाः ॥ ३ ॥ जगदतिमहत्त्वेनमूढैरवगतमपिविद्वद्दृष्ट्यावस्तुतोजालसूर्यमरीच्यणुकादप्यतिफल्ग्वित्याह ॥ जालेति ॥ सूर्याभायायोजालच्छिद्रप्रयुक्तोदंडमुसलाद्याकारस्तदंतर्गतानिरजांसि ॥ अपिशब्दादन्येषांस्थूलतमत्वांकिंवाच्यमित्याशयः ॥ अथवाजगदवभासकसाक्षिच्चित्प्रकाशस्यसूर्यालोकादिप्रकाशात्तदंतर्गतपरमाण्वादिभ्योप्यतिसूक्ष्मत्वमित्याह ॥ जालेति ॥ ४ ॥ तदेवोपपादयितुंमरीचितदणुवैधर्म्यंचितिदर्शयति ॥ जगदिति ॥ ५ ॥ व्यतिरेकतोनभातीत्युक्तेरनुभवविरोधंपरिहरति ॥ अनुभूतान्यपीति ॥ ६ ॥ अनेकदिनावस्थाभिन्नस्यकथंस्वप्नसंकल्पसाम्यंतत्राह ॥ पिंडेति ॥ पिंडग्रहोमूर्त्तत्वस्वीकारः ॥ ७ ॥ ८ ॥ जगतांदृश्यश्रीर्दृशिसाक्षिचैतन्यएवैकतःस्वप्नमारोप्यकेनचसारासारविवेचकबुद्धिलक्षणेनतुलामध्यकंटकप्रदेशेनतुलितासाम्येनावधारिताचेत्सैवजागरेस्वप्नइवकलनोन्मुक्तासतीव्योमशून्यंब्रह्मैववाजृंभतेप्रथते ॥ ९ ॥ तथाचाविवेकिदृशैवब्रह्मादिशब्दार्थाज्जगच्छब्दार्थभेदोनतत्त्वज्ञदृशेत्याह ॥ वर्जयित्वेति ॥ १०॥

गगनइवसुशून्यभेदमस्तित्रिभुवनमंगमहाचितोंतरस्याः ॥ परमपदमयंसमस्तदृश्यंत्विदमितिनिश्चयवान्भवानुभूतेः ॥ ८५ ॥ इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमितोजगाम ॥ स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरैश्चसहाजगाम ॥८६॥ इत्यार्षेवा० वा० दे० मोक्षोपायेउत्पत्तिप्रकरणेब्रह्मप्रतिपादनंनामचतुर्दशःसर्गः॥१४॥ तृतीयोदिवसः३ ॥७॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ जगदाकाशमेवेदंयथाहिव्योम्निमौक्तिकम् ॥ विमलेभातिस्वात्मैवजगच्चिद्गगनंयथा ॥ १ ॥ अनुत्कीर्णैवभातीवत्रिजगच्छालभंजिका ॥ चित्स्तंभेनैवसोत्कीर्णानचोत्कर्त्तात्रविद्यते ॥ २ ॥ समुद्रेंतर्जलस्पंदाःस्वभावादच्युताअपि ॥ वीचिवेगाभवंतीवपरेदृश्यविदस्तथा ॥ ३ ॥ जालांतर्गतसूर्याभाजालाकाररजांस्यपि ॥ जगद्भानंप्रतिस्थूलान्यणुंप्रतियथाचलाः ॥ ४ ॥ जगद्भानंनभातीदंब्रह्मणोव्यतिरेकतः ॥ जालसूर्यांशुजालंतुव्यतिरेकानुभूतिदम् ॥५॥ अनुभूतान्यपीमानिजगंतिव्योमरूपिणि ॥ पृथ्व्यादीनिनसंत्येवस्वप्नसंकल्पयोरिव ॥ ६ ॥ पिंडग्रहोजगत्यस्मिन्विज्ञानाकाशरूपिणि ॥ मरुनद्यांजलमिवनसंभवतिकुत्रचित् ॥ ७ ॥ जगत्यपिंडग्राहेस्मिन्संकल्पनगरोपमे ॥ मरौसरिदिवाभातिदृश्यताभ्रांतिरूपिणी ॥ ८ ॥ स्वप्नाद्दृश्येवजगतांतुलादेशेनकेनच ॥ तुलिताकलनोन्मुक्तादृश्यश्रीव्योंमजृंभते ॥ ९ ॥ वर्जयित्वाज्ञविज्ञानंजगच्छब्दार्थभाजनम् ॥ जगद्ब्रह्मस्वशब्दानामर्थेनास्त्येवभिन्नता ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हितत्त्वज्ञदृशांजगत्प्रतीतिस्तत्साक्षिदर्शनमित्युक्तेशून्यात्मकनभःप्रतीतदालोकस्यप्रकाशत्वदर्शनमिवेत्याह ॥ इदमिति ॥ साक्षिचैतन्यंप्रतिजगद्दर्शनंतर्हिकथंतत्राप्याह ॥
तथेति ॥११॥ कथमत्यंतमलिनस्यदृश्यस्यस्वच्छतमचिन्मात्रतेत्याशंक्यप्रतीतिकालिकैवबाह्यमानसदृश्ययोर्मलिनतातिरोभावकालेतुपरस्परापेक्षयास्वच्छतमतैवपरिशिष्यत
इत्याह ॥ यथेति ॥ जगज्जाग्रत्प्रपंचः ॥ सांकल्पिकग्रहणंस्वाप्नस्याप्युपलक्षणम् ॥ १२ ॥ उपसंहरति ॥ तस्मादित्यादिना ॥ शून्यौशून्यार्थावर्थशून्यौवा ॥ १३ ॥ १४ ॥
एवमुक्तरीत्यामहाकाशेमायाकाशेस्थितंजगदभित्तिमन्निरावरणंचिदाकाशमेव ॥ परिच्छिन्नजगदभेदेचितोपितावन्मात्रतांवारयति ॥ तद्देशस्येति ॥ तद्देशस्यचित्प्रदेशस्या
णुमात्रस्याल्पतरस्यापिअल्पांतःकरणवृत्तितद्वासनापरिच्छिन्नाणुतमचिद्भागेपिसर्वजगत्परिच्छेदभानेनतदंतर्भाव्यस्यजगतस्तदग्रपूरकत्वेदूरनिरस्ताब्रह्मचैतन्यस्यतावन्मात्रतेति

इदंत्वचेत्यचिन्मात्रंभानोर्भातंनभःप्रति ॥ तथासूक्ष्मंयथामेघंप्रतिसंकल्पवारिदः ॥ ११ ॥ यथास्वप्नपुरंस्वच्छंजाग्रत्पुरवरंप्रति ॥ तथा
जगदिदंस्वच्छंसांकल्पिकजगत्प्रति ॥ १२ ॥ तस्मादचेत्यचिद्रूपंजगद्व्योमैवकेवलम् ॥ शून्यौव्योमजगच्छब्दौपर्यायौविद्धिचिन्मयौ
॥ १३ ॥ तस्मान्नकिंचिदुत्पन्नंजगदादीहदृश्यकम् ॥ अनाख्यमनभिव्यक्तंयथास्थितमवस्थितम् ॥ १४ ॥ जगदेवंमहाकाशेचिदाका
शमभित्तिमत् ॥ तद्देशस्याणुमात्रस्यतुलायाश्चाग्रपूरकम् ॥ १५ ॥ आकाशरूपमेवाच्छंपिंडग्रहविवर्जितम् ॥ व्योम्निव्योममयंचित्रं
संकल्पपुरवत्स्थितम् ॥ १६ ॥ अत्रेदंमंडपाख्यानंशृणुश्रवणभूषणम् ॥ निःसंदेहोयथैषोर्थश्चित्तेविश्रांतिमेष्यति ॥ १७ ॥ ॥ श्रीराम
उवाच ॥ ॥ सद्बोधवृद्धयेब्रह्मन्समासेनवदाशुमे ॥ मंडपाख्यानमखिलंयेनबोधोविवर्द्धते ॥ १८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अभूद
स्मिन्महीपीठेकुलपद्मोविकाशवान् ॥ पद्मोनामनृपःश्रीमान्बहुपुत्रोविवेकवान् ॥ १९ ॥ मर्यादापालनांभोधिर्द्विषत्तिमिरभास्करः ॥
कांताकुमुदिनीचंद्रोदोषतृणहुताशनः ॥ २० ॥ मेरुर्विबुधवृंदानांयशश्चंद्रोभवार्णवे ॥ सरःसद्गुणहंसानांकमलामलभास्करः ॥ २१ ॥
संग्रामवीरुत्पवनोमनोमातंगकेसरी ॥ समस्तविद्यादयितःसर्वाश्चर्यगुणाकरः ॥ २२ ॥ सुरारिसागरक्षोभविलसन्मंदराचलः ॥ विला
सपुष्पौघमधुःसौभाग्यकुसुमायुधः ॥ २३ ॥

भावः ॥ १५ ॥ कथंव्योमवच्छून्यप्रायचित्तवृत्तितद्वासनांतर्भूताविपुलतमजगदवस्थितिस्तत्राह ॥ आकाशेति ॥ पिंडग्रहोमूर्त्तिस्वीकारः ॥ तत्रानुभवारोहायदृष्टांतमाह ॥ संक
ल्पेति ॥ १६ ॥ उक्तेर्थेरामस्यसंदेहव्यामोहानवधारणानिलिंगैरुपलक्ष्यश्रीवसिष्ठस्तदपनोदायतदुपपत्तिसहस्रकथानुरंजनान्वितंविस्तृतंमंडपोपाख्यानंश्रावयितुंप्रतिजानीते ॥
अत्रेति ॥ १७ ॥ समासेनानुपयुक्तार्थसंक्षेपेण ॥ पूर्वतरप्रतिज्ञायामिवोक्तिविलंबमाशंक्याह ॥ आश्विति ॥ १८ ॥ कुलस्यवंशस्यपद्मइवयशःसौरभ्यहेतुत्वात्पद्मः ॥ १९ ॥ वर्णा
श्रममर्यादावेलाद्वीपमर्यादाच ॥ २० ॥ विबुधाविद्वांसोदेवाश्चतद्वृंदानाम् ॥ कमलाःसंपदस्तल्लक्षणकमलानांभास्करः ॥ २१ ॥ संग्रामेवीरुत्प्रायाणांपरेषांपवनइवप्रकंपयिताअ
तएवमानोर्जिततन्मनोलक्षणमातंगानांकेसरी ॥ शत्रून्मानभंगेननमयितानहंतेत्याशयः ॥ दयितःप्रियः ॥ २२ ॥ तस्येंद्रशत्रुजेतृत्वमाह ॥ सुरारीति ॥ मधुर्वसंतः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वासाध्यधरण्युद्धारादिसाधनोद्योगःसाहसम् ॥ दुश्चेष्टाविषवल्लीनामनलइवदाहकः ॥ कुत्सायांकन् ॥ २४ ॥ वलितावेष्टिता ॥ कमलालक्ष्मीः ॥ २५ ॥ सर्वास्वनुवृत्तिषु भर्तृसेवाप्रकारेषुसर्वेषांपरिजनानांवाअनुवृत्तिष्वनुकूलाचरणेषुललिता ॥२६॥ अलकाएवअलयोभ्रमराः ॥ सितांगीनिर्मलांगी ॥ कर्णिकेवकर्णिकयाचगौरी ॥ एवमग्रेप्युपमानसाधारणविशेषणानियोज्यानि ॥ २७ ॥ रसःप्रेमामकरंदश्च ॥ २८॥ अवदाततनुःस्वच्छदेहा ॥२९॥३०॥३१॥ ॥ इतिश्रीवासिष्ठमहा०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेपं

लीलालतालास्यमरुत्साहसोत्साहकेशवः॥ सौजन्यकैरवशशीदुर्लीलावल्लिकानलः॥२४॥तस्यास्तिसुभगाभार्यालीलानामविलासिनी॥ सर्वसौभाग्यवलिताकमलेवोदिताऽवनौ॥२५॥ सर्वानुवृत्तिललितालीलामधुरभाषिणी॥ सानंदमंदचलिताद्वितीयेंदूदयस्मिता ॥ २६ ॥ अलकालिमनोहारिवदनांभोजशालिनी॥ सितांगीकर्णिकागौरीजंगमेवसरोजिनी॥ २७॥ लताविलासकुंदौघभासिनीरसशालिनी॥ प्रवालहस्तापुष्पाभामधुश्रीरिवदेहिनी॥ २८ ॥ अवदाततनुःपुण्यास्पर्शनाह्लादकारिणी॥ गंगेवगांगतादेहवतीहंसविलासिनी॥ २९ ॥ तस्यभूतलपुष्पेषोःसकलाह्लाददायिनः॥ परिचर्याचिरंकर्त्तुमन्यारतिरिवोदिता ॥ ३० ॥ उद्विग्नेप्रोद्विग्नामुदितेमुदितासमाकुलाकुलिते॥ प्रतिबिंबसमाकांतासंक्रुद्धेकेवलंभीता॥ ३१ ॥ ॥इ०वासि०वा०दे०मो०उत्पत्तिप्रकरणेमंडपोपाख्यानेराजवर्णनंनामपंचदशःसर्गः॥१५॥ ॥श्रीवसिष्ठउवाच॥ ॥भूतलाप्सरसासार्द्धमनन्यदयितापतिः॥ अकृत्रिमप्रेमरसंसरेमेकांतयातया ॥ १॥ उद्यानवनगुल्मेषुतमालगहनेषुच॥ पुष्पमंडपरम्येषुलतावलयसद्मसु ॥ २ ॥ पुष्पांतःपुरशय्यासुपुष्पसंभारवीथिषु॥ वसंतोद्यानदोलासुक्रीडापुष्करणीषुच॥ ३ ॥ चंदनद्रुमशैलेषुसंतानकतलेषुच॥ कदंबनीपगेहेषुपारिभद्रोदरेषुच॥ ४ ॥ विकसत्कुंदमंदारमकरंदसुगंधिषु॥ वसंतवनजालेषुकूजत्कोकिलपक्षिषु ॥ ५ ॥ नानारण्यतृणानांचस्थलेषुमृदुदीप्तिषु॥ निर्झरेषुतरत्तारसीकरासारवर्षिषु ॥ ६ ॥ शैलानांमणिमाणिक्यशिलानांफलकेषुच॥ देवर्षिमुनिगेहेषुदूरपुण्याश्रमेषुच ॥ ७॥ कुमुद्वतीषुफुल्लासुस्मेरासुनलिनीषुच॥ वनस्थलीषुकृष्णासुफुल्लासुफलिनीषुच॥ ८॥

चदशःसर्गः ॥ १५ ॥ ॥७॥ ॥ अतृप्तिःकामभोगेभ्योभूयोदुःखावसानता ॥ देवैरप्यन्यथाकर्त्तुमशक्येत्यत्रकीर्त्यते ॥ १ ॥ अनन्यदयितापतिरितिप्रेमरसस्याकृत्रिमत्वे हेतुः ॥ १ ॥ उद्यानवनगुल्मेष्वित्यादीनारेमेइत्यत्रैवान्वयः ॥ २ ॥ ३ ॥ संतानकाःकल्पवृक्षविशेषाःस्वप्रभावादिंद्रप्रसादाद्वाप्राप्तास्तेषांतलेषु ॥ ४ ॥ ५॥ तरतांप्लवमानानांतारसीकराणामासारोधारासंपातः ॥ ६ ॥ देवर्षिमुनिगेहेषुसहयात्रारूपंरमणम् ॥ ७ ॥ कुमुद्वतीषुनिशिनलिनीषुदिवा ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरसदृशैस्तारुण्यैः ॥ सुंदराणांविषयाणामीहितैरीप्सितैः ॥ ईहितैर्विलासचेष्टितैः ॥ ९ ॥ प्रहेलिकाःलौकिकपरिहासकथाः ॥ आख्यानानिपौराणिकानि ॥ अक्षरमुष्ट्याद योऽद्भूतविशेषाः ॥ १० ॥ नाट्यदृश्यार्थाःप्रबंधानाटिकाः ॥ श्रवणमात्रास्वाद्यकाव्यनिबंधकथाआख्यायिकाः ॥ विदूनांविदुषांमतिभिःक्रम्यंतेअवगम्यंतइतिविदुमतिक्रमैर्गू ढाशयश्लोकैः ॥ नगरग्रामचेष्टितैरनुकृतैरितियावत् ॥ ११ ॥ वलितैर्वेष्टनैः ॥ १२ ॥ फुल्लैःपुष्पैर्लताभिर्गुंजाभिर्वादेहस्यगोपनंपिधानंयेषुतथाविधैर्नखव्रणैर्नखक्षतैः ॥ १३ ॥

सुरतैःसुरतारुण्यैःसुंदरःसुंदरेहितैः ॥ ईहितैःपेशलान्योन्यघनप्रेमरसाधिकैः ॥ ९ ॥ प्रहेलिकाभिराख्यानैस्तथाचाक्षरमुष्टिभिः ॥ अष्टा पदैर्बहुधूतैस्तथागूढचतुर्थकैः ॥ १० ॥ नाटिकाख्यायिकाभिश्चश्लोकैर्विदुमतिक्रमैः ॥ देशकालविभागैश्चनगरग्रामचेष्टितैः ॥ ११ ॥ स्र ग्दाममालावलितैर्नानाभरणयोजनैः ॥ लीलाविलोलचलनैर्विचित्ररसभोजनैः ॥ १२ ॥ आर्द्रकुंकुमकर्पूरतांबूलिदलचर्वणैः ॥ फुल्लपुष्प लतागुंजादेहगोपनखव्रणैः ॥ १३ ॥ समालंभनलीलाभिर्मालाप्रहरणक्रमैः ॥ गृहेकुसुमदोलाभिरन्योन्यंदोलनक्रमैः ॥ १४ ॥ नौया नयुग्महस्त्यश्वदांतोष्ट्रादिगमागमैः ॥ जलकेलिविलासेनपरस्परसमुक्षणैः ॥ १५ ॥ नृत्यगीतकलालास्यताललतांडवमंडनैः ॥ संगीत कैःसंकथनैर्वीणामुरजवादनैः ॥ १६ ॥ उद्यानेषुसरित्तीरवृक्षेपुवरवीथिषु ॥ अंतःपुरेषुहर्म्येषुफुल्लदोलावदोलनैः ॥ १७ ॥ सातथासुख संवृद्धातस्यप्रणयिनीप्रिया ॥ एकदाचिंतयामाससुभ्रूःसंकल्पशालिनी ॥ १८ ॥ प्राणेभ्योपिप्रियोभर्त्तामममैषजगतीपतिः ॥ यौवनोल्ला सवान्श्रीमान्कथंस्यादजरामरः ॥ १९ ॥ भर्त्रानेनसहोत्तुंगस्तनीकुसुमसद्मसु ॥ कथंस्वैरंचिरंकांतारमेयुगशतान्यहम् ॥ २० ॥ तथाय तेयत्नमतस्तपोजपयमेहितैः ॥ रजनीशमुखोराजायथास्यादजरामरः ॥ २१ ॥ ज्ञानवृद्धांस्तपोवृद्धान्विद्यावृद्धानहंद्विजान् ॥ पृच्छामि तावन्मरणंकथंनस्यान्नृणामिति ॥ २२ ॥ इत्यानीयाथसंपूज्यद्विजान्पप्रच्छसानता ॥ अमरत्वंकथंविप्राभवेदितिपुनःपुनः ॥ २३ ॥ वि प्राऊचुः ॥ तपोजपयमैर्देविसमस्ताःसिद्धसिद्धयः ॥ संप्राप्यंतेऽमरत्वंतुनकदाचनलभ्यते ॥ २४ ॥ इत्याकर्ण्यद्विजमुखाच्चिंतयामाससा पुनः ॥ इदंस्वप्रज्ञयैवाशुभीताप्रियवियोगतः ॥ २५ ॥ मरणंभर्त्तुरग्रेमेयदिदैवाद्भविष्यति ॥ तत्सर्वदुःखनिर्मुक्तासंस्थास्येसुखमात्मनि ॥ २६ ॥ अथवर्षसहस्रेणभर्त्तादौचेन्मरिष्यति ॥ तत्करिष्येतथायेनजीवोगेहान्नयास्यति ॥ २७ ॥

अनुधावनेनस्पर्शःसमालंभनंतत्प्रधानलीलाभिः ॥ १४ ॥ नौभिर्यानंजलेषु ॥ युग्मभूतहस्त्यश्वानांदांतानांदमनेनशिक्षितानामुष्ट्रादीनांचगमागमैश्चंक्रमणपरिवर्त्तनैः ॥ १५ ॥ गीतिकथालापाःसंकथनानि ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ यमेहितैर्नियमानुष्ठानैः ॥ २१ ॥ २२ ॥ इतिचिंतयामासेतिपूर्वतनेनान्वयः ॥ अमरत्वंभर्त्तुःस्वस्यचेतिशे षः ॥ २३ ॥ २४ ॥ स्वप्रज्ञयैवइदंवक्ष्यमाणंचिंतयामास ॥ २५ ॥ आत्मनिसर्वदुःखनिर्मुक्ता ॥ परलोकेएतज्जन्मस्मरणाभावेनभर्तृवियोगदुःखाप्रसक्तेरितिभावः ॥ २६ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धांतस्यांतःपुरस्यमंडपे ॥ २८ ॥ ज्ञप्तिंचिद्रूपम् ॥ २९ ॥ नाथमनुक्त्वेति ॥ ननुयास्त्रीभर्त्राऽननुज्ञाताउपवासव्रतंचरेत् ॥ आयुष्यंहरतेभर्तुर्मृतानरकमृच्छतीतिनिंदितमिदं कथंयथाशास्त्रमितिचेत् ॥ प्रत्यक्षंवापरोक्षंवासदाभर्तृहितंचरेत् ॥ व्रतोपवासनियमैरुपचारैश्चलौकिकैरितिशास्त्रानिंदायाभर्तृहितातिरिक्तस्वकाम्योपवासादिविषयत्वाददोषः ॥ ३० ॥ ३१ ॥ सर्वस्मिन्शास्त्रार्थेअस्त्यवश्यंफलमितिबुद्धिःसर्वास्तिक्यम् ॥ ३२ ॥ ३३ ॥ अतिष्ठत्अनुष्ठितवती ॥ ३४ ॥ बाह्योपचारैःपूजिताभावोपचारैःप्रतिमानिता

तद्धमद्भर्त्तृजीवेस्मिन्निजेशुद्धांतमंडपे ॥ भर्त्राविलोकितानित्यंनिवत्स्यामियथासुखम् ॥ २८ ॥ अद्यैवारभ्यैतदर्थंदेवींज्ञप्तिंसरस्वतीम् ॥ जपोपवासनियमैरातोषंपूजयाम्यहम् ॥ २९ ॥ इतिनिश्चित्यसानाथमनुक्त्वैववरांगना ॥ यथाशास्त्रंचचारोग्रंतथानियममास्थिता ॥ ३० ॥ त्रिरात्रस्यत्रिरात्रस्यपर्यंतेकृतपारणा ॥ देवद्विजगुरुप्राज्ञविद्वत्पूजापरायणा ॥ ३१ ॥ स्नानदानतपोध्याननित्योद्युक्तशरीरिका ॥ सर्वास्तिक्यसदाचारकारिणीक्लेशहारिणी ॥ ३२ ॥ यथाकालंयथोद्योगंयथाशास्त्रंयथाक्रमम् ॥ तोषयामासभर्त्तारमपरिज्ञातसंस्थितिः ॥ ३३ ॥ त्रिरात्रशतमेवंसाबालानियमशालिनी ॥ अनारतंतपोनिष्ठामतिष्ठत्कष्टचेष्टया ॥ ३४ ॥ त्रिरात्राणांशतेचाथपूजिताप्रतिमानिता ॥ तुष्टाभगवतीगौरीवागीशासमुवाचताम् ॥ ३५ ॥ ॥सरस्वत्युवाच॥ ॥निरंतरेणतपसाभर्त्तृभक्त्यतिशालिना ॥ परितुष्टास्मितेवत्सेगृहाणवरमीप्सितम् ॥ ३६ ॥ राज्ञ्युवाच ॥ ॥जयजन्मजराज्वालादाहदोषशशिप्रभे ॥ जयहार्दांधकारौघनिवारणरविप्रभे ॥ ३७ ॥ अंबमातर्जगन्मातस्त्रायस्वकृपणामिमाम् ॥ इदंवरद्वयंदेहियदहंप्रार्थयेशुभे ॥ ३८ ॥ एकंतावद्विदेहस्यभर्त्तुर्ज्जीवोममांबिके ॥ अस्मादेवहिमायासीन्निजांतःपुरमंडपात् ॥ ३९ ॥ द्वितीयंत्वांमहादेविप्रार्थयेहंयदायदा ॥ दर्शनायवरार्थायतदामेदेहिदर्शनम् ॥ ४० ॥ इत्याकर्ण्यजगन्मातातवास्त्वेवमितिस्वयम् ॥ उक्त्वांतर्द्धानमगमत्स्रोत्थायोर्मिरिवार्णवे ॥ ४१ ॥ अथसाराजमहिषीपरितुष्टेष्टदेवता ॥ श्रुतगीतेवहरिणीबभूवानंदधारिणी ॥ ४२ ॥ पक्षमासर्त्तुकटकेदिनारेवर्षदंडके ॥ क्षणनाभौस्पंदमयेकालचक्रेवहत्यथ ॥ ४३ ॥

॥ ३५ ॥ ३६ ॥ भाविभर्तृजीवनब्रह्मविद्याप्राप्तिभाग्यानुरूपामेवस्तुतिंदैवाद्राज्ञ्युवाच ॥ जयेति ॥ ३७ ॥ इमांमामितिशेषः ॥ ३८ ॥ ३९ ॥ यदायदावरार्थायदर्शनायप्रार्थयेतदादर्शनंदेहीत्यन्वयः ॥ ४० ॥ ४१ ॥ ४२ ॥ पक्षानेमिकटकामासामध्यकटकाऋतवोनाभिकटकायस्य ॥ त्रिनाभिचक्रमजरमितिश्रुतेः ॥ त्रितयानुस्यूतानिदिनान्यरास्तिर्यगनुप्रोतशंकवःकेसरप्रायायस्य ॥ वर्षसंवत्सरोक्षदंडकोयस्य ॥ क्षणस्त्रिंशत्कलात्मकोनाभिर्मध्यच्छिद्रंयस्यतथाविधेसूर्यादिस्पंदमये ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रणखंडितदेहस्येत्युत्तराद्धुष्यते ॥ पत्युस्तत्प्राणनादिलिंगैःप्रत्यक्षप्रायंचेतनंतनौलिंगदेहेअंतर्द्धितिरोभावमाययौ ॥ ४४ ॥ नलिनीपद्मिनी ॥ ४५ ॥ विषवदुष्णेननिःश्वसनेन ध्वस्तोविवर्णीकृतः ॥ सशल्येवेत्युत्प्रेक्षा मृगीयथेत्युपमेतिनयथाशब्दपौनरुक्त्यम् ॥ सशल्येतिमृग्याअपिविशेषणम् ॥४६॥ सद्मश्रीर्गृहशोभा ॥ भूषिताप्राग्दीपेनालंकृता ॥ ॥ ४७ ॥ स्रोतसःप्रवाहस्यक्षयेशोषेक्षारेणोषेणविधूसरा ॥ ४८ ॥ मानिनीप्राग्भर्तृमन्मानवतीतत्क्षयान्मरणोन्मुखी ॥ ४९ ॥ सकृपाप्राग्बहुजन्मस्वाराधितत्वात्तत्त्वज्ञानदानपर्यवसितकृपावती ॥ आकाशभवाअशरीरिणीतियावत् ॥ अन्वकंपतेत्यनुकंपाफलमाश्वासनंलक्ष्यते ॥५०॥ ॥ इतिश्रीवासिष्ठमहा०तात्पर्य०उत्पत्ति०षोडशःसर्गः॥१६

अंतर्द्धिमाजगामास्याःपत्युस्तच्चेतनंतनौ॥संदृश्यमानमेवाशुशुष्कपत्त्ररसोयथा॥४४॥रणखंडितदेहेऽस्मिन्मृतेंतःपुरमंडपे॥निर्जलानलिनीवासौपरांम्लानिमुपाययौ॥ ४५ ॥ विषोष्णश्वसनध्वस्तसकलाधरपल्लवा ॥ प्रापसामरणावस्थांसशल्येवमृगीयथा ॥ ४६ ॥प्रापसातमसांधत्वंतस्मिन्मरणमागते ॥ दीपज्वालालवेक्षीणेसद्मश्रीरिवभूषिता ॥ ४७॥ कार्श्यमापक्षणेनासौबालाविरसतांगता ॥ यथास्रोतस्विनीस्रोतःक्षयेक्षारविधूसरा ॥ ४८ ॥ क्षिप्रमाक्रंदिनीक्षिप्रंमौनंमूकावियोगिनी ॥ बभूवचक्रवाकीवमानिनीमरणोन्मुखी ॥४९॥ अथतामतिमात्रविह्वलांसकृपाकाशभवासरस्वती॥शफरींह्रदशोषविह्वलांप्रथमावृष्टिरिवान्वकंपत॥ ५० ॥ ॥इत्यार्षेवा० वा०दे०मो०मंडपोपाख्यानेराज्ञीपरिदेवनंनामषोडशःसर्गः॥ १६॥ ॥ ७॥ ॥श्रीसरस्वत्युवाच॥ ॥ शवीभूतमिमंवत्सेभर्त्तारंपुष्पपुंजके॥ आच्छाद्यस्थापयैनंत्वंपुनर्भर्त्तारमेष्यसि॥ १ ॥पुष्पाणिम्लानिमेष्यंतिनोनचैषविनंक्ष्यति॥ भूयश्चतवभर्त्तृत्वमचिरेणकरिष्यति॥ २ ॥ एतदीयश्चजीवोसावाकाशविशदस्तव॥ ननिर्गमिष्यतिक्षिप्रमितोंतःपुरमंडपात्॥ ३॥ षट्पदश्रेणिनयनासमाकर्ण्येतिवंधुभिः॥ सासमाश्वासितागत्यपयोभिरिवपद्मिनी॥ ४॥ पतिंसंस्थाप्यतत्रैवपुष्पपूरप्रगोपितम् ॥ किंचिदाश्वासितातिष्ठद्दरिद्रेवनिधानिनी॥ ५॥ तस्मिन्नेवदिनेसैषातस्मिन्नूर्द्ध्वशुद्धांतमंडपे॥ अर्द्धरात्रेपरिजनेसर्वस्मिन्निद्रयाहृते॥ ६॥ ज्ञप्तिंभगवतींदेवींशुद्धध्यानमहाधिया॥ दुःखादाह्वाययामाससोवाचसमुपेत्यताम्॥ ७॥ किंस्मृतास्मित्वयावत्सेधत्सेकिमितिशोकिताम्॥ संसारभ्रांतयोभ्रांतिमृगतृष्णांबुवन्मुधा॥८॥ ॥लीलोवाच॥ ॥क्कममावस्थितोभर्त्ताकिंकरोत्यथकीदृशः॥ समीपंनयमांतस्यनैकाशक्नोमिजीवितुम्॥ ९॥

अन्वयव्यतिरेकाभ्यांनव्यप्राक्तनसर्गयोः ॥ मनोमात्रविलासत्वात्तुल्यत्वमिहबोध्यते ॥ १ ॥ अशरीरिण्येवाश्वासनवरप्रदानाभ्यामनुकंपमानाश्रीसरस्वत्युवाच ॥ शवीभूतमिति ॥ पुष्पपुंजकेपुष्पराशौ ॥ १ ॥ नोइतिनिषेधार्थोनिपातःपूर्वान्वयी ॥ २ ॥ प्राक्तनवरस्यासत्यताशंकांवारयति॥ एतदीयइति ॥ ३ ॥ यथापयःशोषाच्छुष्यंतीपद्मिनीपयोभिरागत्याश्वास्यतेतद्वत् ॥ ४ ॥ ५ ॥ शुद्धांतोऽवरोधः ॥ ६ ॥ शुद्धध्यानसहितमहाधियाआहूतेवागतेत्याह्वाययामासेत्युत्प्रेक्षा ॥ अर्त्तिह्नीत्येतदपवादेनशाच्छासाह्वेत्यादिनायुक् ॥ सासरस्वती ॥ ७ ॥ तत्रादौशोकापनयायतद्धेतूनांमिथ्यात्वमाह ॥ संसारेति ॥ ८ ॥ ९ ॥

१ प्रमौनाक्रांतपाठः

CC-0. In Public Domain. Digitization by eGangotri

इहलोकवत्परलोककल्पनाया अपि चिन्मात्राधिष्ठानकत्वं दर्शयितुं चिदाकाशं विविच्य दर्शयति ॥ चित्तेति ॥ वासनामयं चित्ताकाशं निरूढं व्यावहारिकं तृतीयकं उभयसंधावुभयशून्यं चिदाकाशं सुलक्ष्यमिति भावः ॥ १० ॥ तैतूत्वत्पृष्टभर्त्रवस्थानस्थलादिवस्तुतश्चिदाकाशकोशात्मकमेव अतः पृथगविद्यमानमपि चिदाकाशस्यैकाग्र्यचिंतनात् आशु इत एव दृश्यते अथ तत्र गत्वा अनुभूयते चेत्यर्थः ॥ ११ ॥ तदर्थं चिदाकाशं परिचाययति ॥ देशादिति ॥ क्रमिकविषयद्वयाभाससंधौ तदुभयशून्यचिदाकाशः सुलक्ष्य इत्यर्थः ॥ १२ ॥ अतस्त्वत्प्राप्तिरेव तद्भावस्थितभर्तृसमीपप्राप्तिस्तत्रैव भर्तृपरलोककल्पनादित्याशयेनाह तस्मिन्निति ॥ १३ ॥ कथं तर्हि तत्प्राप्तिस्तत्रोपायमाह ॥ अत्यंतेति ॥ तत्त्वदर्शनेनाविद्याक्षये द्वैतानुदय एवात्यंताभावसंपत्तिः ॥ तत्र नान्यः पंथा इति श्रुतिर्मानमित्यभिप्रेत्याह ॥ नान्यथेति ॥ मम तर्हि कथं ज्ञानप्राप्तिस्तत्राह ॥ मद्वरेणेति ॥ १४ ॥ लीलया वरप्र

श्रीदेव्युवाच ॥ ॥ चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ॥ द्वाभ्यां शून्यतरं विद्धि चिदाकाशं वरानने ॥ १० ॥ तच्चिदाकाशकोशात्म चिदाकाशैकभावनात् ॥ अविद्यमानमप्याशु दृश्यते थानुभूयते ॥ ११ ॥ देशाद्देशांतरप्राप्तौ संविदो मध्यमेव यत् ॥ निमिषेण चिदाकाशं तद्विद्धि वरवर्णिनि ॥ १२ ॥ तस्मिन्निरस्तनिःशेषसंकल्पा स्थितिमेषि चेत् ॥ सर्वात्मकं पदं तत्त्वं त्वं तदाप्नोष्यसंशयम् ॥ १३ ॥ अत्यंताभावसंपत्त्या जगतश्चैतदाप्यते ॥ नान्यथा मद्वरेणाशु त्वं तु प्राप्स्यसि सुंदरि ॥ १४ ॥ ॥ श्रीवसिष्ठ उवाच ॥ ॥ इत्युक्त्वा साययौ देवी दिव्यमात्मीयमास्पदम् ॥ लीला तु लीलयैवासीन्निर्विकल्पसमाधिभाक् ॥ १५ ॥ तत्तत्याज निमेषेण सांतःकरणपंजरम् ॥ स्वदेहं खमिवोड्डीनामुक्तनीडा विहंगमी ॥ १६ ॥ ददर्श खस्था भर्तारं तस्मिन्नेवालयांबरे ॥ संस्थितं पृथिवीपालमास्थाने बहुराजनि ॥ १७ ॥ सिंहासने समारूढं जय जीवेति संस्तुतम् ॥ प्रस्तुतं मंडलानीककार्यमाहर्तुमादृतम् ॥ १८ ॥ पताकामंजरीकीर्णराजधानीगृहस्थितम् ॥ पूर्वद्वारस्थितासंख्यमुनिविप्रर्षिमंडलम् ॥ १९ ॥ दक्षिणद्वारगासंख्यराजराजेशमंडलम् ॥ पश्चिमद्वारगासंख्यललनालोकमंडलम् ॥ २० ॥ उत्तरद्वारगासंख्यरथहस्त्यश्वसंकुलम् ॥ एकभृत्यविनिर्णीतदक्षिणापथविग्रहम् ॥ २१ ॥

भावाद्विनैवाभ्यासश्रमम् ॥ १५ ॥ लोहपंजरवद्दुर्भेद्यांतःकरणसहितं स्थूलदेहम् ॥ स्थिरीकृतचेतसा अभिमानत्याग एवात्र विवक्षितो न तु मरणवद्बहिर्निर्गमनम् ॥ १६ ॥ खमत्र चिदाकाशस्तत्स्था सती आलयांबरे आविर्भूतस्ववासनाकर्मानुरूपदेहगेहादिसंपत्त्या संस्थितम् ॥ १७ ॥ प्रस्तुतमुपस्थितं कार्यमाहर्तुं संपादयितुम् ॥ १८ ॥ पताकामंडलैर्व्याप्ताया राजधान्याः प्रधानगृहे स्थितम् ॥ इत आरभ्य बहुपदबहुव्रीहयः सर्वे ॥ १९ ॥ ललनालोकाः स्त्रीजनाः ॥ २० ॥ एकभृत्यवचसा विनिर्णीतो दक्षिणापथे विग्रहो युद्धप्रसंगो येन ॥ २१ ॥

---

१ क्वचिज्जीर्णपुस्तके (चिदाकाशमेवस्वावरणाज्ञानाविविक्तं स्फुरदसज्जगदात्मना सद्यो दृश्यते तेन च दुःखाद्यनुभूयत इत्याह ॥ तदिति ॥ ११ ॥) एतावदेव वर्तते ॥ तदित्यादि इत्यर्थ इत्यंतं नास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदेशराजानांतद्वश्यतांदर्शयति ॥ कर्णाटेति ॥ क्रियाक्रमोव्यवहारमर्यादास्थापनम् ॥ निर्णीताःनिगृह्यवशीकृताः ॥ २२ ॥ मालदानामीशेनराज्ञासम्यगाक्रांतास्तंगणादेशविशेषाः ॥ २३ ॥ महेंद्रपर्वतेभवोमाहेंद्रःसिद्धस्तपस्वीतेनोक्तावर्णितासहस्रमुखविस्तारादिविचित्रागगनापगागंगायस्मै ॥२४॥ अब्धितटमालोकितवानित्यब्धितटालोकोदूतस्तेनवर्णितः ॥ असंख्यानांश्रेणीबद्धानांभूपालानांकलाभिःकांतिभिः ॥ २५ ॥ तूर्यांयंवाद्यश्रेष्ठम् ॥ बंदिकोलाहलोल्लासस्यप्रतिश्रुतःप्रतिध्वनिकरावनकुंजरायस्या॥२६॥

कर्णाटनाथरचितपूर्वदेशक्रियाक्रमम् ॥ सुराष्ट्राधिपनिर्णीतसर्वम्लेच्छोत्तरापथम् ॥ २२॥ मालदेशसमाक्रांतसर्वपाश्चात्यसंगणम् ॥ दक्षिणाब्धितटायातलंकादूतविनोदितम् ॥ २३ ॥ पूर्वाब्धितटमाहेंद्रसिद्धोक्तगगनापगम् ॥ उत्तराब्धितटायातदूतवर्णितगुह्यकम् ॥ २४ ॥ पश्चिमाब्धितटालोकवर्णितास्तमयक्रमम् ॥ असंख्यबद्धभूपालकलाकीर्णाखिलाजिरम् ॥ २५॥ यज्ञवाटपठद्विप्रजिततुर्यौग्रनिःस्वनम् ॥ बंदिकोलाहलोल्लासप्रतिश्रुद्वनकुंजरम् ॥२६॥ गेयवाद्योद्यतध्वानप्रध्वनद्गगनांतरम् ॥ हयहस्तिरथारांजिरजोमेघघनांबरम् ॥ २७॥ पुष्पकर्पूरधूपाढ्यगंधामोदितपर्वतम् ॥ सर्वमंडलसंभाररचितानेकशासनम् ॥२८॥ यशःकर्पूरजलदसुशुभ्रांबरपर्वतम् ॥ रोदसीस्तंभभूतैकस्वप्रतापजितार्ककम् ॥२९॥ आरंभमंथरोदारकार्यसंव्यग्रभूमिपम् ॥नानानगरनिर्माणसोद्योगस्थपतीश्वरम् ॥३० पपाताथमहारंभासातांनरपतेःसभाम् ॥ व्योमात्मिकाव्योममयींमिहिकेवांबराटवीम् ॥ ३१ ॥ भ्रमंतींतत्रतामग्रेददृशुस्तेनकेचन ॥ संकल्पमात्ररचितांपुरुषाःकामिनीमिव ॥ ३२ ॥ तथातेतांनददृशुःसंचरंतींपुरोगताम् ॥ अन्यसंकल्परचितामन्येननगरींयथा ॥ ३३॥ प्राक्तनानेवतान्सर्वान्स्वान्ददर्शसभागतान् ॥ भूभृतेवसुसंप्राप्तान्नगरान्नगरांतरम् ॥ ३४ ॥ तद्देशांस्तत्समाचारांस्तथातानेवबालकान् ॥ ताएवबालवनितास्तांस्तानेवचमंत्रिणः ॥ ३५ ॥ तानेवभूमिपालांश्चतांस्तानेवचपंडितान् ॥ तानेवनर्मसचिवान्भृत्यांस्तानेवतादृशान् ॥ ३६ ॥

गेयेभ्योवाद्येभ्यश्चोद्यैतैर्ध्वानैःप्रध्वनद्गगनमध्यंयस्य ॥ २७ ॥ पर्वतशब्देनपर्वतसदृशाःप्रासादाउच्यंते ॥ सर्वेभ्योमंडलेभ्यआहृत्योपायनादिसंभरंतिपूरयंतिगृहंयेभृत्यास्तेभ्योरचितानेकशासनम् ॥ २८ ॥ स्वयशःकर्पूरराश्युपमानाजलदलक्षणाःसुशुभ्राअंबरोद्भूतपर्वतायस्य ॥२९॥ आरंभमंथरेषुगुरुतरारंभेषूदारकार्येषुसंव्यग्राभूमिपाःसामंतायस्य॥ स्थपतयःशिल्पिकुलपतयः ॥ ३० ॥ पपातप्रविवेश ॥ सालीला ॥ वासनामात्ररूपत्वादुभयोर्व्योमरूपता ॥ मिहिकानीहारपटली ॥ ३१ ॥ संकल्पमात्ररचितामित्युभयान्वयि ॥ ३२ ॥ ३३ ॥ स्वान्स्वीयान् ॥ भूभृतासहेतिशेषः ॥ ३४ ॥ तैःस्वदेशीयैःसमआचारोयेषांतान् ॥ ३५ ॥ नर्मसचिवान्रहस्यविचारसहायान् ॥ ३६ ॥

१ हयादीनांआसर्वतोराजयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासनामयेस्वाप्नइवनपूर्वसादृश्यनियमइत्याह ॥ अथेति ॥ ३७ ॥ घनैर्निबिडैर्दावैररण्यैः ॥ ३८ ॥ ३९ ॥ ४० ॥ तस्मिन्वासनानगरेआलोक्यनगरवास्तव्याःप्राक्तननगरस्थाः ॥ ४१ ॥ प्रज्ञप्तिःसरस्वतीतत्प्रसादजेनबोधेनसमाधिव्युत्थानेन ॥ तथैवपूर्ववदेवस्थितानितिशेषः ॥ ४२ ॥ आस्थानंसभायांसन्निधानम् ॥ ४३ ॥ ४४ ॥ यथाक्रमंयथोचितं

अथान्यानप्यपूर्वांश्चपंडितान्सुहृदस्तथा ॥ व्यवहारांस्तथान्यांश्चपौरानन्यांस्तथैवच ॥ ३७ ॥ मध्याह्नकालेदिवसेघनदावाकुलादिशः ॥ अंतरिक्षंसचंद्रार्कंसांभोदपवनध्वनि ॥ ३८ ॥ महीरुहनदीशैलपुरपत्तनमंडितम् ॥ नानानगरविन्यासजंगलग्रामसंकुलम् ॥ ३९ ॥ द्विरष्टवर्षभूपालंप्राक्तन्याजरसोज्झितम् ॥ प्राक्तनींजनतांसर्वांसमस्तान्ग्रामवासिनः ॥ ४० ॥ सातानालोक्यललनाचिंतापरवशाभवत् ॥ तस्मिन्नगरवास्तव्याःकिंतेसर्वेम्रताइति ॥ ४१ ॥ पुनःप्रज्ञप्तिबोधेनप्राक्तनांतःपुरंगता ॥ क्षणेनचददर्शात्रसार्द्धरात्रेतथैवतान् ॥ ४२ ॥ अथसोत्थापयामासनिद्राक्रांतंसखीजनम् ॥ आहचातीवमेदुःखमास्थानंदीयतामिति ॥ ४३ ॥ भर्त्तुःसिंहासनस्यास्यपार्श्वेतिष्ठाम्यहंयदि ॥ पश्यामिसभ्यसंघातंतत्रजीवामिनान्यथा ॥ ४४ ॥ सराजपरिवारोथतयेत्युक्तेयथाक्रमम् ॥ आसीद्विनिद्रःसंव्यग्रःसर्वःसर्वस्वकर्मणि ॥ ४५ ॥ पौरान्सभ्यान्समानेतुंययुर्याष्टीकपंक्तयः ॥ व्यवहारंकलयितुमुर्व्यामर्ककराइव ॥ ४६ ॥ आस्थानभूमिंभृत्याश्चमार्जयामासुरादृताः ॥ प्रावृट्पयोदमलिनंखंशरद्वासराइव ॥ ४७ ॥ अंगणंप्रतिदीपौघास्तस्थुःपीततमोंभसः ॥ आश्चर्यदर्शनायेवसंप्राप्ताऋक्षपंक्तयः ॥ ४८ ॥ जनताःपूरयामासुःपूरैरजिरभूमिकाः ॥ अब्धीन्प्रलयसंशुष्कान्पुरासर्गइवांभसा ॥ ४९ ॥ आजग्मुर्मंत्रिसामंताःस्वंस्वंस्थानमनिंदिताः ॥ त्रैलोक्येपुनरुत्पन्नेलोकपालायथादिशः ॥ ५० ॥ ववुराकीर्णकर्पूरसांद्रावश्यायशीतलाः ॥ उत्फुल्लकुसुमोद्धांतमांसलामोदितानिलाः ॥ ५१ ॥ पर्यंतेषुप्रतीहारास्तस्थुर्द्धवलवाससः ॥ ऋष्यमूकार्कतापार्त्तमेघमालाइवाद्रिषु ॥ ५२ ॥ प्रभापीततमःपुंजाःपेतुःपुष्पोत्कराभुवि ॥ चंडमारुतविध्वस्तास्तारकानिकराइव ॥ ५३ ॥

सर्वस्मिन्स्वस्वोचितकर्मणि ॥ ४५ ॥ ४६ ॥ ४७ ॥ ऋक्षपंक्तयोनक्षत्रसमूहाः ॥ ४८ ॥ पूरैःपूरवत्प्रवृत्तैःसंघैः ॥ पुरासर्गोजनसृष्टिप्राक्कालः ॥ ४९ ॥ ५० ॥ अवश्यायोहिमम् ॥ धावल्यशैत्याभ्यांतत्सादृश्योपपादनायाकीर्णकर्पूरेति ॥ कुसुमोद्धांतैर्मकरंदैर्मांसलःपुष्टआमोदःसंजातोयेषां ॥ तारकादित्वादितच् ॥ ५१ ॥ पर्यंतेष्वास्थानप्रांतेषु ॥ ऋष्यमूकःसुग्रीवालयस्तत्रसुग्रीवानुग्रहायार्कस्यविशेषसन्निधानात्तत्तापार्त्ताः ॥ अद्रिषुहिमवदादिषु ॥ ५२ ॥ चंडमारुतोत्रप्रलयमारुतः ॥ ५३ ॥

१ सर्वानितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५४ ॥ स्मरस्यचेतसिलीलारतिरिवस्मरविकृतेचेतसिलीलाश्रृंगारचेष्टेववा ॥ ५५ ॥ आर्यान्मान्यान् ॥ ५६ ॥ खलुजीवनंनिश्चितंजीवनंतदभ्युदितया ॥ ५७ ॥ इतिश्रीवा
सिष्ठमहा०तात्प०उत्पत्ति०सप्तदशःसर्गः ॥ १७ ॥ ॥ ७ ॥ ॥ समाधिदृष्टसर्गस्यपूर्वसर्गस्यचाधुना॥ दृश्यत्वात्तुल्यमिथ्यात्वेचिन्मात्रस्थितिरुच्यते ॥ १ ॥ इत्थमास्थान
दर्शनादिनाविनोदयाम्याश्वासयामीतींगितैरभिप्रायसूचकचेष्टाभिर्भूपान्बोधयित्वा ॥ १ ॥ पुष्पैर्गुप्तस्यच्छन्नस्यभर्तुःपार्श्वेउपविश्येतिशेषः ॥ २ ॥ तत्रसमाधिदृष्टेंतरवत्यव

आस्थानंपूरयामासुर्महीपालानुयायिनः॥ उत्फुल्लकमलोत्कीर्णहंसाइवसरोवरम्॥५४॥ सिंहासनसमीपस्थेहैमचित्रासनेनवे॥ उपा
विशदसौलीलालीलेवस्मरचेतसि॥ ५५॥ददर्शतान्नृपान्सर्वान्पूर्वानेवयथास्थितान्॥ गुरुनार्यान्सखीन्सभ्यान्सुहृत्संबंधिबांधवान्
॥५६॥ सकलमेवहिपूर्ववदेवसासमवलोक्यमुदंपरमांययौ॥ नृपतिराष्ट्रजनंखलुजीवनाभ्युदितयाचवभौशशिवच्छ्रिया॥५७॥ ॥इ
त्यार्षेवा०वा०दे०मो०उ०लीलोपाख्यानेसंदेहराष्ट्रवर्णनंनामसप्तदशःसर्गः॥ १७॥ ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥ इत्थं
विनोदयामीदंदुःखदंचित्तमित्यलम्॥ बोधयित्वेंगितैर्भूपानास्थानादुःस्थिताथसा॥ १॥ प्रविश्यांतःपुरंभर्तुःपार्श्वेंतःपुरमंडपे॥ विवेश
पुष्पगुप्तस्यचिंतयामासचेतसा॥ २॥ अहोविचित्रामायेयमेतेऽस्मत्पुरमानवाः ॥ बहिरंतरवद्देशेतत्रचेहचसंस्थिताः॥ ३॥ तालीतमा
लहिंतालमालितागिरयोप्यमी॥ यथातत्रतथेहापिबतमायेयमातता ॥ ४ ॥ आदर्शांतर्बहिश्चैवयथाशैलोनुभूयते॥ बहिरंतश्चिदादर्शे
तथासर्गोनुभूयते॥ ५॥ तत्रभ्रांतिमयःसर्गःकःस्यात्कःपारमार्थिकः॥ इतिपृच्छामिवागीशामभ्यर्च्योक्तमसंशयम् ॥ ६ ॥ इतिनिश्चि
त्यतांदेवींपूजयामाससातदा॥ ददर्शचपुरःप्राप्तांकुमारीरूपधारिणीम् ॥ ७ ॥ भद्रासनगतांदेवीमुपविश्यपुरोगता ॥ परमार्थमहाश
क्तिलीलापृच्छद्भुविस्थिता॥८॥ ॥लीलोवाच ॥ ॥ अनुकंप्यस्यनोदेविभजंत्युद्वेगमुत्तमाः ॥ त्वयैवंकिलसर्गादौस्थापितास्थितिरु
त्तमा॥ ९ ॥ तदिदंयत्पुरःप्रज्ञापृच्छामिपरमेश्वरि॥ तद्ब्रूहित्वत्कृतोनूनंसफलोमेस्त्वनुग्रहः ॥ १० ॥ अस्यादर्शोजगन्नाम्नःखादप्यधिक
निर्मलः॥ यस्ययोजनकोटीनांकोटयोवयवोमनाक् ॥ ११ ॥

काशवतिदेशेइहास्मत्पुरेच ॥ ३ ॥ तथेहापिसंस्थिताइत्यनुषज्यते ॥ ४ ॥ मायात्वमेवदृष्टांतेनसंभावयति ॥ आदर्शइति ॥ ५ ॥ तर्हिदृष्टांतवदेवान्यनरस्यैवमिथ्यात्वंनद्वयो
रपीतिसंभावनात्संदेहंदर्शयति ॥ तत्रेति ॥ वागीशामभ्यर्च्यतदग्रेस्वेनोक्तंसंशयमसंशयंयथास्यात्तथापृच्छामि ॥ ६ ॥ ७ ॥ भूविस्थितालीलापुरोगताभूत्वोपविश्यापृच्छदि
त्यन्वयः ॥ ८ ॥ अनुकंप्यस्यदयोचितस्यविषयेइतिशेषः ॥ स्थितिर्मर्यादा ॥९॥ तत्तस्मादिदंपृच्छामितद्ब्रूहि ॥ १० संशयबीजोद्घाटनायोपोद्घातेनसमाध्यनुभूतमालस्वरूपंप्र ॥३५॥
थममनुवदत्यस्येत्यादित्रिभिः ॥ मनाक्अल्पः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निःसंधितानिसंसर्गागोचराण्यखंडार्थानीतियावत् ॥ वचांसियस्मिंस्तथाविधःप्रज्ञानज्योतिर्घनःअमूर्त्तत्वान्मृदुरकठिनोनिःशेषतापोपशमाच्छीतलोनिर्भित्तिर्निरावरणोनिर्भे दोवासर्वव्यवहारेष्वयतःस्फुरन्निर्तिशेषः ॥ १२ ॥ यत्रात्मादर्शेदिक्कालौतदंतश्चसर्वकार्याणांकलनाउत्पत्तिरुत्पन्नानामाकाशेवकाशप्राप्तिस्तेजोनयनादिभिःप्रकाशःप्रकाशि तानांचार्थक्रियास्वनेनेदमित्थमेवोपपादितमीदृशव्यवहारोपयुक्तमितिनियतिक्रमाःपरांदेशकालविस्तीर्णांपरिणतिंविकारवैचित्र्यंगताःप्राप्ताःप्रतिबिंबवदंतःस्फुरंति ॥ १३ ॥ औपोद्घातिकप्रसंजितंप्रस्तुतंपृच्छति ॥ त्रिजगदिति ॥ तत्रतयोर्मध्ये ॥ कृत्रिमाकाल्पनिकीमिथ्येतियावत् ॥ १४ ॥ तत्त्वदृशाजगत्यकृत्रिमत्वंनास्त्येवेत्याशयेनसंशयबीजंनि रसिष्यंतीदेवीपृच्छति ॥ अकृत्रिमत्वमिति ॥ १५ ॥ विपुलत्वेनप्रमितस्यतदपर्याप्तदेशकालपरिच्छेदोमिथ्यात्वव्याप्योगिरिप्रतिबिंबादौदृष्टःसचभर्तृप्रपंचएवदृश्यतेनास्मिन्नि

निःसंधितंवचोज्योतिर्घनोमृदुसुशीतलः ॥ अचेत्यचिदितिख्यातोनाम्नानिर्भित्तिरप्रतः ॥ १२ ॥ दिक्कालकलनाकाशप्रकाशनियतिक्र माः ॥ यत्रेमेप्रतिबिंबंतिपरांपरिणतिंगताः ॥ १३ ॥ त्रिजगत्प्रतिबिंबश्रीर्बहिरंतश्चसंस्थिता ॥ तत्रवैकृत्रिमाकास्यात्कासौवास्यादकृत्रि मा ॥ १४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ अकृत्रिमत्वंसर्गस्यकीदृशंवदसुंदरि ॥ कीदृशंकृत्रिमत्वंस्याद्यथावत्कथयेतिमे ॥ १५ ॥ ॥ लीलोवाच ॥ यथाहमिहतिष्ठामित्वंचदेविस्थितांबिके ॥ असावकृत्रिमःसर्गइतिदेवेशिवेद्म्यहम् ॥ १६ ॥ यत्राधुनासभर्त्तामेस्थितःसर्गःसकृत्रिमः ॥ अहंमन्येयतःशून्योदेशकालाद्यपूरकः ॥ १७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ कृत्रिमोऽकृत्रिमात्सर्गान्नकदाचनजायते ॥ नहिकारणतःकार्यमुदे त्यसदृशंक्वचित् ॥ १८ ॥ ॥ लीलोवाच ॥ ॥ दृश्यतेकारणात्कार्यंसुविलक्षणमंबिके ॥ अंब्वादातुमशक्तान्मृद्घटस्तज्जस्तदास्पदम् ॥ ॥ १९ ॥ ॥ श्रीदेव्युवाच ॥ ॥ संपद्यतेहियत्कार्यंकारणैःसहकारिभिः ॥ मुख्यकारणवैचित्र्यंकिंचित्तत्रावलोक्यते ॥ २० ॥

तिवैधर्म्यदर्शिनीलीलोवाच ॥ यथेत्यादिद्वाभ्याम् वेद्मिसंभावयामि ॥ १६ ॥ शून्योमिथ्याभूतोयतःस्वावस्थित्यपर्याप्तस्याल्पस्यापिदेशकालव्यवहारादेरपूरकःप्रतिबिंबस्थ मपर्वतादिस्तथादृष्टइत्यर्थः ॥ १७ ॥ भर्तृसर्गोनिर्हेतुकःसहेतुकोवा ॥ नाद्यः ॥ अनुत्पत्तिप्रसंगात् ॥ द्वितीयेकृत्रिमहेतुकोऽकृत्रिमहेतुकोवा ॥ तदाऽद्येपिएतत्सर्गहेतुकोन्यहेतु कोवा ॥ तत्रान्यस्याप्रसिद्धेराद्यकल्पपरिशेषेकृत्रिमहेतोरस्यापिसर्गस्यकृत्रिमत्वप्रसंगः ॥ भिन्नसत्ताकयोर्हेतुफलभावादर्शनादितिनसर्गयोर्वैधर्म्यमित्याशयेनदेव्युत्तरमाह ॥ कृत्रिमइति ॥ १८ ॥ उक्तनियमेलीलाव्यभिचारंशंकमानाह ॥ दृश्यतइति ॥ पिंडभूताम्मृतअंबुजलमादातुमंतर्धारयितुमशक्तात्तज्जोघटस्तुतस्यांबुनआस्पदंधारणसमर्थोदृश्य ते ॥ तथाचसमशक्तितानियमवन्नसमसत्तानियमोपिसंभवतीतिभावः ॥ १९ ॥ उपादानवैचित्र्यात्सहकारिनिमित्तवैचित्र्याद्वापिंडघटयोर्वैचित्र्यमस्तुयत्खलुतुल्योपादान निमित्तकंयथादीपाद्दीपांतरंनतत्रवैचित्र्यंदृश्यते ॥ प्रकृतसर्गयोरपितथात्वमेवेत्याशयेनदेवीसमाधत्ते ॥ संपद्यतइति ॥ मुख्यमसाधारणंदंडचक्रादि ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वद्भर्तृसर्गस्यतुनासाधारणकारणवैचित्र्यंकल्पयितुंशक्यमुभयोर्मायाकामकर्मवासनामात्रमूलकत्वाविशेषादित्याशयेनाह ॥ वदेति ॥ एतत्सर्गांतर्गतपृथ्व्यादिषुमध्येत्वद्भर्तृस र्गस्यकिंकारणंयेनवैचित्र्यंस्यात् ॥ भौतिकेष्वपियथाएतद्भूमंडलतोभूतिरुत्पत्तिर्जातातथातद्भूमंडलतस्तत्रेतिनवैषम्यमित्यर्थः ॥ २१ ॥ अत्रत्यभूम्यादेरेवतत्रत्यभूम्याद्युत्पत्ति रस्त्वितिचेत्तत्राह ॥ गतमिति ॥ अगतेनतत्रकार्यजननायोगादितिभावः ॥ २२ ॥ तस्मादत्रत्यसहकारिकारणानामभावेऽपियासामर्थ्यलक्षणासहकारिताउदेतिकार्यान्यथानु पपत्त्याकल्प्यतेसातत्पूर्वसर्गकारणात्कामकर्मवासनाविद्यात्मकादन्यदन्यान ॥ छांदसीक्लीबता ॥ तथाचनवैलक्षण्यसिद्धिरित्यर्थः ॥ २३ ॥ सत्यैतत्सर्गानुभवजन्यसंस्कारजः प्रमुष्टसत्ताकस्मृतितुल्यःस्वप्नइवमद्भर्तुःसर्गोस्त्वितिविधांतरेणवैधर्म्यंलीलाशंकते ॥ स्मृतिरिति ॥ २४ ॥ तर्हितज्जस्तस्मात्पूर्वदृष्टसर्गात्संस्कारद्वाराजातस्तेभर्तुःसर्गोयथास्मृतिरा काशरूपास्मृतिरिवपुरोवर्त्तिविषयशून्यत्वादाकाशरूपस्तथाअनुभूतःसंस्कारहेत्वनुभवविषयःपूर्वसर्गोऽपिव्योमैवयतःसोपितथातत्पूर्वसर्गसंस्कारजइत्यर्थः ॥ २५ ॥ उक्तमर्थं

वदतद्भर्तृसर्गस्यकिंपृथ्व्यादिषुकारणम् ॥ तद्भूमंडलतोभूतिर्जातातत्रवरानने ॥ २१ ॥ गतंचेदितउड्डीयकुतःस्यादिहभूतलम् ॥ सह कारीणिकानीवकारणान्यत्रकारणे ॥ २२ ॥ कारणानामभावेपियोदेतिसहकारिता ॥ तत्पूर्वकारणान्नान्यत्सर्वंणेत्यनुभूयते ॥ २३ ॥ लीलोवाच ॥ ॥स्मृतिःसादेविमद्भर्तुस्तथास्फारत्वमागता ॥ स्मृतिस्तत्कारणंवेद्मिसर्गोयमितिनिश्चयः ॥ २४ ॥ ॥श्रीदेव्युवाच ॥ ॥स्मृ तिराकाशरूपाचयथातज्जस्तथैवते ॥ भर्तुःसर्गोनुभूतोऽपिसव्योमैवतथाबले ॥ २५ ॥ ॥ लीलोवाच ॥ ॥ स्मृत्याकाशमयःसर्गोय थाभर्तुर्ममोदितः ॥ तथैवेममहंमन्येससर्गोत्रनिदर्शनम् ॥ २६ ॥ ॥श्रीदेव्युवाच ॥ ॥ एवमेतदसत्सर्गोभर्तुस्तैर्भातिभासुरः ॥ तथैवाय मिहाभातिपश्याम्येतदहंसुते ॥ २७ ॥ ॥ ॥लीलोवाच ॥ ॥ यथापत्युरमूर्त्तोस्मात्सर्गात्सर्गोभ्रमात्मकः ॥ जातस्तथाकथयमेजगद्भ्र मनिवृत्तये ॥ २८ ॥ ॥श्रीदेव्युवाच ॥ ॥ प्राक्स्मृतेर्भ्रांतिमात्रात्मासर्गोयमुदितोयथा ॥ स्वप्नभ्रमात्मकोभातितथेदंकथ्यतेशृणु ॥ २९ ॥ अस्तिक्वचिच्चिदाकाशेक्वचित्संसारमंडपः ॥ आकाशकाचदलवत्संस्थानाच्छादिताकृतिः ॥ ३० ॥ मेरुस्तंभस्थलोकेशपुरंध्रीशालभंजि कः ॥ चतुर्दशापवरकस्त्रिगर्त्तोभानुदीपकः ॥ ३१ ॥ कोणस्थभूतवल्मीकव्याप्तपर्वतलोष्टकः ॥ अनेकपुत्रजरठप्रजेशब्राह्मणास्पदम् ॥ ३२

विमृश्याभ्युपगतवतीलीलादेव्याशयानुरूपमेवाह ॥ स्मृतीति ॥ २६ ॥ लीलोक्तिमनुमोदमानादेव्युवाच ॥ एवमिति ॥ सर्वथाअसन्सर्गोयस्मिन्सआत्मैवभर्तुस्तैस्तैःसर्गभावै र्भाति ॥ २७ ॥ २८ ॥ अस्यापिसर्गस्यपूर्वसर्गगोचरसंस्कारजन्यभ्रांतित्वमेवेत्युक्तार्थस्योपपादनायमंडपोपाख्यानारंभंप्रतिजानीते ॥ प्रागिति ॥ २९ ॥ तदुपयोगितयासंसा रंजीर्णमंडपत्वेनवर्णयति ॥ अस्तीत्यादिना ॥ क्वचिदज्ञानावृतांशेतत्रापिक्वचित्स्रष्टृंतःकरणभागे ॥ कश्चिदितिपाठेस्पष्टम् ॥ आकाशरूपंयत्काचखंडवन्नीलमूर्ध्वावयवसंस्था नंतेनाच्छादिताकृतिः ॥ ३० ॥ लोकपालतत्पुरंध्रीलक्षणाःप्रतिमायस्मिन् ॥ चतुर्दशभुवनरूपाअपवरकाअंतर्गृहायस्मिन् ॥ त्रिभुवनांतरालानिगर्त्तायस्मिन् ॥ ३१ ॥ भूतवं म्रीणांवल्मीकप्रायनगरादिव्याप्ताःपर्वतमृत्खंडायस्मिन् ॥ प्रजेशोब्रह्मासएवब्राह्मणः ॥ ३२ ॥

१ पुरातनपुस्तके (गताचेदितिमूलपाठः ॥ गतेति ॥ भूमिरितिशेषः ॥ अगतयातत्र) इत्यादिर्टीकाचोपलब्धा ॥ २ वम्रीशब्देनउपदीकाउच्यंतेयाभ्यवल्मीकंजनयंति

CC-0. In Public Domain. Digitization by eGangotri

कोशकाराःस्वबंधनकोशनिर्मातृकृमिविशेषाः ॥ घुंघुमेतिध्वन्यनुकरणम् ॥३३॥ वातमार्गौघःसएवमहावंशः ॥ मधुविद्यायांद्यौरेवतिरश्चीनवंशइत्युक्तेः ॥३४॥ लोकानांभ्वा
दीनांआंतराःपुरग्रामाएवमंडपांतर्गतभांडोपस्करातिशयाः ॥३५॥३६ ॥ तत्रतस्मिन्मंडपे ॥ कोणलोष्टतलयोर्बहुत्वंपाशबहुत्ववदविवक्षितम् ॥ अल्पोग्रामोग्रामकःसएवगर्तकः
॥३७॥ गोमत्वेनैवक्षीरवत्वलाभेपश्वंतरसंपत्तेरपिद्योतनायक्षीरवानित्युक्तिः ॥ सर्वेऽपिवर्णाश्रमाअतिथयःपूज्याःपोष्याश्चयस्य ॥३८॥ ॥ इतिश्रीवासिष्ठम०तात्पर्य०उत्प०
अष्टादशःसर्गः ॥१८॥ ॥७॥ ॥राजदर्शनराज्येच्छादृढसंकल्पतोजनिः ॥ पाद्मस्यास्यापिसर्गस्यप्राग्जन्मोत्त्यात्रवर्ण्यते॥१॥वित्तंदैवंमानुषंच ॥ वासिष्ठानिचेष्टितानीक्ष्वाकुवं
शपौरोहित्यरामोपदेशादीनितद्वहितः ॥१॥ प्रसिद्धारुंधतीस्वव्योमनिइयंतुभूमिव्योमनीतिविशेषः ॥२॥ चेतनोजीवस्तत्सत्तयातत्स्वरूपस्थित्या॥ प्रसिद्धारुंधतीवसिष्ठयोस्तत्त्व

जीवौघकोशकाराढ्योव्योमोर्ध्वतलकालिमा॥ नभोनिवाससिद्धौघमशकाहितघुंघुमः ॥ ३३ ॥ पयोदगृहधूमोग्रजालावलितकोण
कः॥ वातमार्गमहावंशस्थितवैमानकीटकः ॥ ३४ ॥ सुरासुरादिदुर्बाललीलाकलकलाकुलः ॥ लोकांतरपुरग्रामभांडोपस्करनिर्भरः
॥ ३५ ॥ सरःस्रोतोब्धिसरसीजललोक्षितमहीतलः॥ पातालभूतलस्वर्गभागभासुरकोटरः॥ ३६ ॥ तत्रकस्मिंश्चिदेकस्मिन्कोणेष्वंबरको
टरे॥ शैललोष्टतलेष्वेकोगिरिग्रामकगर्त्तकः॥३७॥ तस्मिन्नदीशैलवनोपगूढेसाग्निःसदारःसुतवानरोगः॥ गोक्षीरवान्राजभयाद्विमु
क्तःसर्वातिथिधर्मपरोद्विजोभूत्॥३८॥ ॥इत्यार्षेवा०वा०दे०मो० लीलोपाख्यानेसकलजगद्भ्रांतिप्रतिपादनंनामाष्टादशःसर्गः॥ १८
श्रीदेव्युवाच॥ ॥वित्तवेषवयःकर्मविद्याविभवचेष्टितैः॥ वसिष्ठस्यैवसदृशोनतुवासिष्ठचेष्टितः॥ १॥ वसिष्ठइतिनाम्नासौतस्याभूदिंदु
सुंदरी॥नाम्नात्वरुंधतीभार्याभूमिव्योमन्यरुंधती ॥ २ ॥ वित्तवेषवयःकर्मविद्याविभवचेष्टितैः ॥ समैवसाप्यरुंधत्यानतुचेतनसत्तया
॥ ३ ॥ अकृत्रिमप्रेमरसाविलासालसगामिनी॥ सास्यसंसारसर्वस्वमासीत्कुमुदहासिनी॥ ४ ॥ सविप्रस्तस्यशैलस्यसानौसरलशाद्व
ले॥ कदाचिदुपविष्टःसन्ददर्शाधोमहीपतिम्॥५॥ समग्रपरिवारेणयांतमाखेटकेच्छया॥ महतासैन्यघोषेणमेरोरिवबिभित्सया॥ ६
चामरैःकीर्णचंद्रांशुपताकाभिर्लतावनं॥ कुर्वाणंखंसितच्छत्रमंडलैरूप्यकुट्टिमम्॥ ७॥ अश्वपादूत्खनत्क्ष्माजरेणुपूरावृतांबरम्॥ हा
स्तिकोत्तंभितकरवाताद्दालकगोपितम्॥ ८ ॥

ज्ञतयाजीवन्मुक्तत्वात्तयोस्तूत्तरजन्मभाविज्ञानत्वेनतदानीमज्ञतयाबद्धत्वादित्यर्थः ॥ ३॥४ ॥ सानौप्रस्थदे
शे ॥ सरलाःसमाःशाद्वलाहरिततृणभूमयोयस्मिन् ॥ ५ ॥ आखेटकंमृगया ॥ बिभित्सयाविदारणसंभावनया ॥ आशंकायांसन्वक्तव्यइतिसन् ॥६॥ लतावनंचामरैःपताका
भिश्चकीर्णचंद्रांशुकुर्वाणंतथाखंसितच्छत्रमंडलैरूप्यसौधंकुर्वाणम् ॥ उभयत्रतत्सदृशमित्यर्थः ॥ ७॥ अश्वानांपादूभिःखुरत्राणलोहैःखनंत्यांमृदुत्वात्खननेअनुकूलीभवंत्यां
क्ष्मायांजातैरेणुभिःपूरिताकाशम् ॥ आरोहतिहस्तीतिवत्कर्मणोप्यानुकूल्याचरणविवक्षयाकर्तृत्वाच्छतृप्रत्ययः ॥ तर्हिकिंराजाऽपिरजोभिःकीर्णोनेत्याह ॥ हास्तिकेति ॥ ह
स्तिनांसमूहोहास्तिकम् ॥ अचित्तहस्तिधेनोष्ठगितिठक् ॥ तत्पृष्टस्थैरुत्तंभितानिरुद्धाःकराःसूर्यरश्मयोवाताश्चयैस्तथाविधैरद्दालकैःस्वर्णरजतमुक्तामंडपैर्गोपितंरक्षितम् ॥ ८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कलकलाःकोलाहलास्तैर्दिग्भ्रमादावर्त्तवन्द्रवंतिदशदिशांमृगादिभूतमंडलानियस्यतम् ॥ ९ ॥ चिंतितवान्चिंतापूर्वकंसंकल्पितवान् ॥ १० ॥ ११ ॥ १२ ॥ सुचरित्राचरणशिक्षणैःपुरंधारयंतीतिपुरंध्र्यस्तासांदिशांचमुखानिकर्पूरमिश्रचंदनेनयशसाचक्रमादिंदूदयेनेवावदातानिसप्रकाशानिकदाकुर्याम् ॥ १३ ॥ एवमिच्छामुपवर्ण्येष्टविषयेसंकल्पमाह ॥ इत्थमिति ॥ १४ ॥ हिमात्मिकाअशनिर्वज्रमंभोजमिवसरोजलेजर्जरःसेतुशैथिल्यंतद्वत्तेवचेत्यर्थः ॥ १५ ॥ पुष्पतैौवसंते ॥ १६ ॥ १७ ॥ स्वमंडपाद्बहिरितिशेषः ॥ मायासीदेवेत्यन्वयः ॥ अतःप्रार्थनात्सप्रार्थितोऽर्थोंगीकृतोदत्तइतियावत् ॥ १८ ॥ पंचत्वंमरणम् ॥ अंतःकरणवासनावच्छिन्नंब्रह्मजीवाकाशस्तद्भावेनस्थितः ॥ १९ ॥

महाकलकलावर्त्तद्रवद्दिग्भूतमंडलम् ॥ कचत्कांचनमाणिक्यहारकेयूरमंडलम् ॥९॥ तमालोक्यमहीपालमिदंचिंतितवानसौ ॥ अहोनुरम्यानृपतासर्वसौभाग्यभासिता ॥ १० ॥ पदातिरथहस्त्यश्वपताकाच्छत्रचामरैः ॥ कदास्यांदशदिक्कुंजपूरकोहंमहीपतिः ॥ ११ ॥ कदामेवायवःकुंदमकरंदसुगंधयः ॥ पास्यंत्यंतःपुरस्त्रीणांसुरतश्रमसीकरान् ॥ १२ ॥ कर्पूरेणपुरंध्रीणांपूर्णेनयशसादिशाम् ॥ इंदूदयावदातानिकदाकुर्यांमुखान्यहम् ॥ १३ ॥ इत्थंततःप्रभृत्येषविप्रःसंकल्पवानभूत् ॥ स्वधर्मनिरतोनित्यंयावज्जीवमतंद्रितः ॥ १४ ॥ हिमाशनिरिवांभोजंजर्जरीकर्त्तुमाद्दता ॥ जलेजर्जरितेवाथजराद्विजमुपाययौ ॥ १५॥ आसन्नमरणस्याथभार्याम्लानिमुपाययौ ॥ तस्यशाम्यतिपुष्पतैौलतेवग्रीष्मभीतितः ॥ १६ ॥ मामथाराधितवतीसाततस्त्वमिवांगना ॥ अमरत्वंसुदुष्प्रापंबुद्ध्वेमंसाव्रणोद्दरम् ॥ १७॥ देविस्वमंडपादेवजीवोभर्त्तुर्मृतस्यमे ॥ मायासीदित्यतस्तस्याःसएवांगीकृतोमया ॥ १८ ॥ अथकालवशाद्विप्रःसपंचत्वमुपाययौ ॥ तस्मिन्नेवगृहाकाशेजीवाकाशतयास्थितः ॥ १९ ॥ संपन्नःप्राक्तनानल्पसंकल्पवशतःस्वयम् ॥ आकाशवपुरेवैषपतिःपरमशक्तिमान् ॥ २० ॥ प्रभावजितभूपीठःप्रतापाक्रांतविष्टपः ॥ कृपापालितपातालस्त्रिलोकविजयीनृपः ॥ २१ ॥ कल्पाग्निररिवृक्षाणांस्त्रीणांमकरकेतनः ॥ मेरुर्विषयवायूनांसाध्वज्ञानांदिवाकरः ॥ २२ ॥ आदर्शःसर्वशास्त्राणामर्थिनांकल्पपादपः ॥ पादपीठंद्विजाग्र्याणांराकाधर्मामृतत्विषः ॥ २३ ॥ स्वगृहाभ्यंतराकाशेचित्ताकाशमयात्मनि ॥ तस्मिन्द्विजेशवीभूतेभूताकाशशरीरिणि ॥ २४ ॥ सातस्यब्राह्मणीभार्याशोकेनात्यंतकर्शिता ॥ शुष्केवमाषशिंबीकाल्हृदयेनद्विधाभवत् ॥ २५॥ भर्त्रासहशवीभूतादेहमुत्सृज्यदूरतः ॥ आतिवाहिकदेहेनभर्त्तारंसमुपाययौ ॥ २६ ॥ नदीनिखातमिवतंभर्त्तारमनुसृत्यसा ॥ आजगामविशोकत्वंसावासंतीवमंजरी ॥ २७ ॥

नृपःसंपन्नइत्युत्तरत्रान्वयः ॥ परमशक्तिमान्दैवमानुषशक्तिविशिष्टः ॥ २० ॥ तेएवशक्तीप्रभावप्रतापशब्दाभ्यांविभज्योक्तेः ॥ विष्टपोत्रत्रिविष्टपंभूपातालयोःपृथग्ग्रहणात् ॥ २१ ॥ दावाग्नौपुनःप्ररोहसंभावनापिस्यान्नतुकल्पाग्नौ ॥ विषयाएववायवश्चापलहेतुत्वात्तेषांमेरुरिवाप्रकंप्योविष्टंभकश्च ॥ २२ ॥ धर्मलक्षणस्यामृतत्विषश्चंद्रस्यराकापौर्णिमा ॥ २३ ॥ चित्तसंस्कारावच्छिन्नब्रह्माकाशप्रचुरात्मनि ॥ अतएवआकाशशरीरिणि ॥ शवीभूतेमृतेसति ॥ २४ ॥ २५ ॥ परलोकातिवहनयोग्येनमानसेनदेहेन ॥ २६ ॥ निखातंनिम्नदेशं ॥ साप्रसिद्धा ॥ वासंतीवसंतकालप्ररूढा ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रगिरिग्रामे ॥ वासरंवर्त्ततइतिशेषः ॥ कंदरशब्देनगृहमंडपोगौण्योच्यते ॥ २८ ॥ ॥ इतिश्रीवासिष्ठमहारा० उत्पत्ति० एकोनविंशतितमःसर्गः ॥ १९ ॥ ॥ ७ ॥
श्रुतेप्रागूजन्मचरितेप्यसंभावनकातरा ॥ लीलात्रबोध्यतेदेव्यादृष्टांतैश्चोपपत्तिभिः ॥ १ ॥ सद्विजोद्यभूपत्वमागतःसंस्तेभर्त्तासंपन्नः ॥ १ ॥ शिवश्चशिवाचशिवौ ॥ २ ॥
उक्तांकथामुपसंहरंतीसर्गद्वयवत्प्राक्तनोऽपिसर्गोभ्रमएवेत्याह ॥ एषइति ॥ तत्रब्रह्माकाशस्यजीवभावभ्रमएवमूलमित्याह ॥ भ्रांतीति ॥ ३ ॥ उत्तरोत्तरभ्रमेपूर्वपूर्वभ्रमोहेतुरि
तिदर्शयति ॥ भ्रमादिति ॥ स्वदृष्ट्याअसत्यएवअधिष्ठानदृष्ट्यासत्योवा ॥ ४ ॥ एवंचमिथ्यानर्थबोधत्वेनसर्वसर्गाणांतुल्यतेवेत्याह ॥ तस्मादिति ॥ ५ ॥ असंभावनयाचिरंवि

तत्रास्यविप्रस्यगृहाणिसंतिभूस्थावरादीनिधनानिसंति॥ अद्याष्टमंवासरमामृत्योर्जीवोगिरिग्रामककंदरस्थः॥२८॥ ॥इत्यार्षेवा०
वा०दे०मो०उ०लीलोपाख्यानेब्राह्मणमरणंनामैकोनविंशतितमःसर्गः॥१९॥ ॥ ॥श्रीदेव्युवाच॥ ॥सतेभर्त्ताद्यसंपन्नोद्विजोभूप
त्वमागतः ॥ यासावरुंधतीनामब्राह्मणीसात्वमंगने ॥ १ ॥ इहेमौकुरुतोराज्यंतौभवंतौसुदंपती ॥ चक्रवाकाविवनवौभुविजातौशि
वाविव ॥ २ ॥ एषतेकथितःसर्वःप्राक्तनःसंसृतिक्रमः ॥ भ्रांतिमात्रकमाकाशमेवंजीवस्वरूपधृक् ॥ ३ ॥ भ्रमादस्माच्चिदाकाशेभ्रमोयं
प्रतिबिंबितः॥ असत्यएववासत्योभवतोर्भवभंगदः ॥ ४ ॥ तस्माद्भ्रांतिमयःकःस्यात्कोवाभ्रांत्युज्झितोभवेत् ॥ सर्गोनिरर्गलानर्थबो
धान्नान्योविजृंभते॥५॥ ॥श्रीवसिष्ठउवाच॥ ॥इत्याकर्ण्यचिरंचारुविस्मयोत्फुल्ललोचना॥ भूत्वोवाचवचोलीलालीलालसपदा
क्षरम्॥६॥ ॥लीलोवाच॥ ॥देविभोस्त्वद्वचोमिथ्याकथंसंपन्नमीदृशम्॥ क्वविप्रजीवःस्वगृहेक्वेमेवयमिहस्थिताः ॥७॥ तादृग्लो
कांतरंसाभूस्तेशैलास्तादिशोदश॥ कथंभ्रांतिगृहस्यांतर्मद्भर्त्तायेष्ववस्थितः॥८॥ मत्तऐरावतोबद्धःसर्षपस्येवकोटरे॥ मशकेनकृतंयु
द्धंसिंहौघैरणुकोटरे॥ ९॥ पद्माक्षेस्थापितोमेरुर्निगीर्णोभृंगसूनुना॥ स्वप्नाब्दगर्जितंश्रुत्वाचित्रंनृत्यंतिबर्हिणः ॥ १०॥ असमंजसमे
वैतद्यथासर्वेश्वरेश्वरि॥ तथागृहांतःपृथ्वीचशैलाश्चेत्यसमंजसम् ॥ ११॥ यथावदेतद्देवेशिकथयामलयाधिया ॥ प्रसादानुगृहीतेहि
नोद्विजंतेमहौजसः॥ १२ ॥ ॥श्रीदेव्युवाच ॥ ॥ नाहंमिथ्यावदामीदंयथावच्छृणुसुंदरि॥ भेदनंनियतीनांहिक्रियतेनास्मदादिभिः
॥ १३ ॥ विभिद्यमानामन्येनस्थापयाम्यहमेवयाम्॥ मर्यादांतांमयाभिन्नांकोऽपरःपालयिष्यति॥ १४॥ सग्रामद्विजजीवात्मातस्मि
न्नेवस्वसद्मनि ॥ व्योम्न्येवेदंमहाराष्ट्रंव्योमात्मैवप्रपश्यति॥ १५॥

स्मयोत्फुल्ललोचनाभूत्वा ॥ ६॥ मिथ्याअनृतमथवात्वद्वचस्त्वमिथ्याईदृशंविरुद्धमिदंकथंसंपन्नमित्यर्थः ॥ इहास्मिन्विपुलेदेशे ॥७॥ समाधिदृष्टभर्तृसर्गोऽपिस्वगृहेअसंभावि
तइत्याह ॥ तादृगिति ॥८॥ असंभावनापुष्टयेदेव्युक्तार्थेदृष्टांतैरसमंजसतामुपपादयति ॥ मत्तइत्यादित्रिभिः ॥ ९॥१०॥११॥ यथावत्यथैतदुपपद्यतेतथेत्यर्थः ॥१२॥ असा
मंजस्योपपादनसंभावितमनृतवदनंपरिहरंतीदेव्याह ॥ नाहमितिद्वाभ्याम् ॥ नियतीनांनानृतंवदेदित्यादिश्रौतनियमानाम् ॥१३॥१४॥ राजवासनोपहितचिद्व्योमात्मैव ॥ १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावेवावांचेत्कुतोनप्रत्यभिजानीवोमरणस्यवाकिंरूपंतत्राह ॥ प्राक्तनीति ॥ १६ ॥ १७ ॥ १८ ॥ असत्यस्याऽपिसत्यवद्भानेनिमित्तमाह ॥ तस्मादिति ॥ पंचकोशांतर्गतसत्य चिद्व्योम्नोनिमित्तादित्यर्थः ॥ १९ ॥ प्राक्सर्गस्यासत्यत्वेऽस्यसर्गस्यकिंतत्राह ॥ असत्यादिति ॥ २० ॥ २१ ॥ सर्वप्रपंचमिथ्यात्वेचिन्मात्रपरिशेषेचानुभवसिद्धदृष्टांतमुखेनानु मानप्रमाणान्याह ॥ स्वप्नेति ॥ २२ ॥ अनेनसर्गेणनकेवलंगेहाकाशएवनपूर्यतेकिंतुतदेकदेशस्थजीवाकाशैकदेशोऽपि अतोमिथ्यात्वमित्याह ॥ स्थितइतिद्वाभ्याम् ॥ २३ ॥ निर्मलेनभसिकुंडलितकेशाकारभ्रमःकेशोंड्रकः ॥ २४ ॥ एवंचविप्रसदनस्यविपुलसर्गांतःप्ररोहेणाश्वनरीकुक्षेर्गर्भेणेवनविनाशशंकापीत्याह ॥ तस्मिन्निति ॥ एवकारोभिन्न

प्राक्तनीसास्मृतिर्लग्नायुवयोरुदितान्यथा ॥ स्वप्नेजाग्रत्स्मृतिर्यद्वदेतन्मरणमंगने ॥ १६ ॥ यथास्वप्नेत्रिभुवनंसंकल्पेत्रिजगद्यथा ॥ य
थाकथार्थसंग्रामोमरुभूमौजलंयथा ॥ १७ ॥ तस्यब्राह्मणगेहस्यसशैलवनपत्तना ॥ इयमंतःस्थिताभूमिःसंकल्पादर्शयोरिव ॥ १८ ॥
असत्यैवेयमाभातिसत्येवघनसर्गता ॥ तस्मात्सत्यावभासस्यचिद्व्योम्नःकोशकोटरे ॥ १९ ॥ असत्याद्यत्समुत्पन्नंस्मृत्यानामतदप्यस
त् ॥ मृगतृष्णातरंगिण्यांतरंगोपिनसद्यतः ॥ २० ॥ इदंत्वदीयंसदनंतद्गेहाकाशकोशगम् ॥ विद्धिमांत्वांचसर्वंचतच्चिद्व्योमैवकेवलम्
॥ २१ ॥ स्वप्नसंभ्रमसंकल्पस्वानुभूतिपरंपराः ॥ प्रमाणान्यत्रमुख्यानिसंबोधायप्रदीपवत् ॥ २२ ॥ स्थितोब्राह्मणगेहांतर्द्विजजीवस्तदंब
रे ॥ ससमुद्रवनापृथ्वीस्थितान्नइवषट्पदः ॥ २३ ॥ तस्याःकस्मिंश्चिदेकस्मिन्पेलवेकोणकोटरे ॥ इदंपत्तनदेहादिकेशोंड्रकइवांबरे ॥ २४ ॥
तस्मिन्नस्मिन्पुरेतन्वितदेवसदनंस्थितम् ॥ तस्मात्किंत्रसरेण्वंतर्जगद्वृंदमिवस्थितम् ॥ २५ ॥ परमाणौपरमाणौसंतिवत्सेचिदात्मनि ॥
अंतरंतर्जगंतीतिकिंत्वेतन्नामशंक्यते ॥ २६ ॥ ॥ लीलोवाच ॥ ॥ अष्टमेदिवसेविप्रःसमृतःपरमेश्वरि ॥ गतोवर्षगणोस्माकंमातःकथमि
दंभवेत् ॥ २७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ देशदैर्घ्ययथानास्तिकालदैर्घ्यंतथांगने ॥ नास्त्येवेतियथान्यायंकथ्यमानंमयाशृणु ॥ २८ ॥ यथै
तत्प्रतिभामात्रंजगत्सर्गावभासनम् ॥ तथैतत्प्रतिभामात्रंक्षणकल्पावभासनम् ॥ २९ ॥ क्षणकल्पंजगत्सर्वंत्वत्तामत्तात्मजन्मनां ॥ य
थावत्प्रतिभासस्यवक्ष्येक्रममिमंशृणु ॥ ३० ॥ अनुभूयक्षणंजीवोमिथ्यामरणमूर्छनम् ॥ विस्मृत्यप्राक्तनंभावमन्यंपश्यतिसुव्रते ॥ ३१

क्रमः ॥ तस्मिन्सदनेऽस्मिन्सर्गेपुरेचांतर्निरूढेऽपीतिशेषः ॥ तद्विप्रसदनंस्थितमेवनविदीर्णमित्यर्थः ॥ एवंचतस्माद्विप्रसदनादुदात्ततात्किमाश्चर्यंयतस्त्रसरेण्वंतरेपिजगद्वृंदंस्थितम् ॥ इवकारोमिथ्यात्वेनासामंजस्यपरिहारद्योतनार्थः ॥ २५ ॥ आकाशादिजगत्सर्गेनप्राक्तनीनिरवकाशताविरोधिनीतिपरमाण्ववच्छिन्नचिदात्मन्यपितत्संभवेनिरालंबैवासंभवाशं केत्याह ॥ परमाणाविति ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ प्रतिभामात्रत्वंकुतस्तत्राह ॥ क्षणेति ॥ यतःक्षणकल्पादिसर्वंजगत्त्वत्तामत्ताध्यासाधीनात्मजन्मभ्रमवतामेवप्रतिभा सतेइतिशेषः ॥ तत्प्रतिभासक्रमंवक्तुंप्रतिजानीते ॥ यथावदिति ॥ ३० ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योमेवाधारदेहादिशून्योऽपिचेततिस्मरतिसंस्कारउद्भवतीतियावत् ॥ ३२ ॥ ३३ ॥ आस्पदंगृहम् ॥ ३४ ॥ ३५ ॥ ननुबांधवानांदेहसंबंधित्वेनकल्पनात्तदीयत्वेपिकथंस्वी यत्वंतत्राह ॥ चित्तेति ॥ देहभावापन्नचित्तस्यात्माकाशस्यचदृढतरैक्याध्यासात्तेवस्तुतोऽन्येऽपिस्वेस्वीयाअपिभवंतीत्यर्थः ॥ एवंनामैवंसतिदेहभावापन्ने ॥ ३६ ॥ ३७ ॥ स्वप्नेसर्वत्रसर्वेषुद्रष्टृदृश्यभावेनकल्पितभेदेष्वदर्शनानुगताचित्तदुभयबाधेएकतयादृष्टदर्शनाभूयोदृष्टायस्मात्तस्मान्नकिंचिदप्यभ्युदितमितिपूर्वत्रान्वयः ॥ ३८॥ असतामेवभ्रां

तदेवोन्मेषमात्रेणव्योम्न्येवव्योमरूप्यपि ॥ आधेयोयमिहाधारेस्थितोहमितिचेतति ॥ ३२॥ हस्तपादादिमान्देहोममायमितिपश्यति॥ यदेवचेततिवपुस्तदेवेदंसपश्यति ॥ ३३ ॥ एतस्याहंपितुःपुत्रोवर्षाण्येतानिसंतिमे ॥ इमेमेबांधवारम्याममेदंरम्यमास्पदम्॥ ३४ ॥ जातोहमभवंबालोवृद्धियातोहमीदृशः॥ बांधवाश्चास्यमेसर्वेतथैवविचरंत्यमी॥ ३५॥ चित्ताकाशघनैकत्वात्स्वेप्यन्येपिभवंतिते॥ एवं नामोदितेप्यस्यचित्तेसंसारखंडके ॥ ३६ ॥ नकिंचिदप्यभ्युदितंस्थितंव्योमैवनिर्मलम्॥ स्वप्नेद्रष्टरियद्वच्चित्तद्वद्दृश्येचिदेवसा ॥ ३७॥ सर्वगैकतयायस्मात्सास्वप्नेदृष्टदर्शना॥ यथास्वप्नेतथोदेतिपरलोकदृगादिभिः॥ ३८ ॥ परलोकेयथोदेतितथैवेहाभ्युदेतिसा॥ तत्स्वप्नप रलोकेहलोकानामसतांसताम्॥ ३९ ॥ नमनागपिभेदोस्तिवीचीनामिववारिणि॥ अतोजातमिदंविश्वमजातत्वादनाशिच ॥ ४० ॥ स्वरूपत्वात्तुनास्त्येवयच्चभातिचिदेवसा॥यथैवचेत्यनिर्हीणापरमव्योमरूपिणी॥४१॥ सचेत्यापितथैवैषापरमव्योमरूपिणी ॥ तस्मा च्चेत्यमतोनान्यद्वीचित्वादीववारितः॥४२॥ वीचित्वंचरसेनास्तिशशशृंगवदेवहि॥ सैवचेत्यमिवापन्नास्वभावादच्युताप्यलम्॥४३॥ तस्मान्नास्त्येवदृश्योर्थःकुतोऽतोद्रष्टृदृश्यधीः॥ निमिषेणैवजीवस्यमृतिमोहादनंतरम्॥४४॥ त्रिजगद्दृश्यसर्गश्रीःप्रतिभामुपगच्छति॥ यथादेशंयथाकालंयथारंभंयथाक्रमम्॥४५॥ यथोत्पादंयथामातृयथापितृयथौरसम्॥यथावयोयथासंविद्यथास्थानंयथेहितम्॥ ॥४६॥ यथाबंधुयथाभृत्यंयथेहास्तमयोदयम्॥ अजातएवजातोहमितिचेततिचिद्वपुः ॥ ४७॥

त्यासताम् ॥ ३९ ॥ ४० ॥ स्वंआत्मैवपारमार्थिकंरूपंयस्यतत्त्वाज्जगद्रूपेणनास्त्येव ॥ किंतर्हिप्रत्यक्षादिप्रमाणैर्भातितत्राह ॥ यच्चेति ॥ अधिष्ठानचैतन्यमेवसर्वप्रमाणैर्भातित स्यैवाज्ञातत्वेनअबाध्यत्वेनचप्रमाणयोग्यत्वान्नतुजडंतत्रावरणकृत्याभावेनप्रमाणप्रवृत्तिफलाभावादितिभावः ॥ ४१ ॥ सचेत्येति ॥ आरोपितचेत्येनाधिष्ठानादूषणादितिभा वःअतोस्याश्चितः ॥ ४२ ॥ रसतन्मात्रमेवहिजलस्यतत्त्वंनचतत्रवीचित्वम् ॥ रसनयानुपलंभात् ॥ यत्तुचक्षुषातथाग्रहणंतद्भूतांतरसंसर्गोपाधिकमितिभावः ॥ ४३ ॥ ४४ ॥ वासनानांप्रतिनियतदेशकालादिविषयत्वात्तत्प्रयुक्तप्रतिभापितथैवेत्याह ॥ यथादेशमित्यादिना ॥ ४५ ॥ ४६ ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राक्षसयोनौशंभोर्वरान्मातृसमानवयःप्राप्याप्रथमंयौवनेप्राप्तेऽपिकल्पितबाल्यादिस्मृतिमयःक्रमःपश्चादुदेतीतिपरेणसंबंधः ॥ ४८ ॥ ४९ ॥ ५० ॥ प्रसिद्धंचेदंमार्कंडेयादिपु
राणेषुलोकेचेत्याह॥रात्रिरिति ॥ ५१ ॥५२॥ लकिलक्षणे ॥ अलंकितंप्रमाणैरलक्षितंवदंतितच्छीलेष्वलंकितवादिषुमुग्धजनेषुइतिएतत्पूर्वोक्तंसर्वंदृष्टम् ॥ अविद्ययानकेवल
मसद्भानंकिंतुसद्विरुद्धभानमपिप्रसिद्धमित्याह ॥ शून्यमिति ॥ आकीर्णतांजनसमाजव्याप्तताम् ॥ ५३॥ मरिचबीजकणेतैक्ष्ण्यंस्तंभेषुअरचितप्रतिमाजालंचयथास्थितमेवंय
स्मिन्नजेइदंदृश्यमनन्यत्सत्तत्सत्तयैवास्ति ॥ तस्यात्मनःअस्तिबंधनविमोक्षदृशःअस्तीतितिङंतप्रतिरूपकमव्ययम् ॥ सत्यंबंधमोक्षदृष्टयइत्यर्थः ॥ कुतोनिमित्तात्काःकिंरूपाः
स्युः ॥ सर्वथाप्यसंभाविताइत्यर्थः ॥ ५४ ॥ ॥ इतिश्रीवासिष्ठमहारा० उत्प० विंशतितमःसर्गः ॥ २० ॥ ॥ ७ ॥ ॥ स्थूलंविचारतःसूक्ष्मंतदविद्याविचारतः॥ सापिचि

देशकालक्रियाद्रव्यमनोबुद्धींद्रियादिच॥ झटित्येवमृतेरंतेवपुःपश्यतियौवने ॥ ४८ ॥ एषामातापिताह्येषबालोभूवमहंत्विति॥ नानु
भूतोनुभूतोवायःस्यात्स्मृतिमयःक्रमः॥ ४९ ॥ पश्चादुदेत्यसौतस्यपुष्पस्येवफलोदयः ॥ निमिषेणैवमेकल्पोगतइत्यनुभूयते ॥ ५० ॥
रात्रिर्द्वादशवर्षाणिहरिश्चंद्रेतथाह्यभूत्॥ कांताविरहिणामेकंवासरंवत्सरायते ॥ ५१ ॥ मृतोजातोहमन्योमेपितेतिस्वप्नताखिव॥ अ
भुक्तस्यैवभोगस्यभुक्तधीरुपजायते॥ ५२॥ भुक्तेप्यभुक्तधीर्दृष्टमित्यलंकितवादिषु ॥ शून्यमाकीर्णतामेतितुल्यंव्यसनमुत्सवैः॥ विप्र
लंभोपिलाभश्चमदस्वप्नादिसंविदि ॥ ५३ ॥ तैक्ष्ण्यंयथामरिचबीजकणेस्थितंस्वंस्तंभेषुचारचितपुत्रकजालमंतः॥ दृश्यंत्वनन्यदिदमे
वमजेस्तिशांतंतस्यास्तिबंधनविमोक्षदृशःकुतःकाः ॥ ५४॥ इत्यार्षेवासि० वा० दे० मो० उत्प० लीलोपाख्यानेपरमार्थप्रतिपादनंनाम
विंशतितमःसर्गः॥ २० ॥ ॥ ७॥ ॥श्रीदेव्युवाच॥ ॥प्रतिभांतिजगंत्याशुमृतिमोहादनंतरम्॥जीवस्योन्मीलनादक्ष्णो
रूपाणीवाखिलान्यलम्॥ १ ॥ दिक्कालकलनाकाशधर्मकर्ममयानिच॥परिस्फुरंत्यनंतानिकल्पांतस्थैर्यवंतिच॥ २॥ नानुभूतंनयद्दृष्टं त
न्मयाकृतमित्यपि॥ तत्क्षणात्स्मृतितामेतिस्वप्नेस्वमरणंयथा ॥ ३॥ भ्रांतिरेवमनंतेयंचिद्व्योमव्योम्निभासुरा ॥ अपकुड्याजगन्नाम्नीन
गरीकल्पनात्मिका॥ ४॥ इदंजगदयंसर्गःस्मृतिरेवेतिजृंभते॥ दूरकल्पक्षणाभ्यासविपर्यासैकरूपिणी॥ ५॥ नानुभूतानुभूताचस्मृतिरि
त्थंद्विरूपिणी॥पूर्वकारणरिक्तैवचिद्रूपैवप्रवर्त्तते॥६॥नानुभूतेनुभूतत्वसंविदंतरुदेत्यपि॥स्वप्नभ्रमादावन्यस्मिन्पितरीवपितुःस्मृतिः॥७॥

न्मात्रमेवेतिदेव्यालीलात्रबोध्यते ॥ १ ॥ उक्तमेवार्थंविशेषंवक्तुंपुनःप्रपंचयंत्याह ॥ प्रतिभांतीति ॥१॥ धर्ममयानिस्वर्गादीनि॥ कर्ममयानिगृहादीनि ॥ कल्पांतपर्यंतंस्थैर्यवं
तिपृथ्व्यादीनि ॥ २ ॥ मायिकस्मृत्यनुभवाभासयोःप्रसिद्धस्मृत्यनुभववैधर्म्यमाह ॥ नानुभूतमिति ॥ ३ ॥ चिद्व्योम्नोव्योम्निमायाकाशे ॥४॥ षड्विधविकारेष्वाद्यत्रयप्राधान्ये
नसर्गः ॥ अंत्यत्रयप्राधान्येनजगत् ॥ स्मृतिरितितद्धेतुर्वासनोच्यते ॥ साहिसन्निहितेसांप्रतिकेऽपिदूरंकल्पश्चेतिदेशकालविप्रकर्षात्मनाशाश्वतेनिष्क्रियेचक्षणतदभ्यासात्मकघ
टिकामुहूर्त्तदिनपक्षाद्यात्मनाचयोविपर्यासोभ्रमस्तदेकरूपिणी ॥ ५ ॥ उक्तमुपसंहरति ॥ नानुभूतेति ॥ ६ ॥ नन्वननुभूतेअनुभूतत्वभ्रमःक्वदृष्टस्तत्राह ॥ नानुभूतइति ॥ ७॥

CC-0. In Public Domain. Digitization by eGangotri

नन्वनादौसंसारेसर्वमेवानुभूतमितिस्मृतिरैक्यंप्रमुष्टतत्ताकास्तुनभ्रांतिस्तत्राह ॥ कदाचिदिति ॥ प्रतिभाऽनुभवः ॥ प्रजापतेःप्रथमसर्गेष्वित्यर्थः ॥ रूपेणस्मृतिरूपेण ॥ ८ ॥ तथाचअनुभूतमेवप्रतिभासतइतिननियमइत्याह ॥ दृश्यमिति ॥ ९ ॥ प्रजेशत्वंप्राङ्नानुभूतमेव ॥ सहसिद्धंचतुष्टयमितिस्मृत्यातत्रज्ञानोदयावश्यंभावेपुनर्जन्मायोगादितिभावः ॥ १० ॥ यतोवासनापुंजात्मकचित्तमयःसंसारस्ततस्तदुच्छेदादात्यंतिकनिर्वासनात्मिकाविस्मृतिरेवमोक्षःफलितइत्याह ॥ अत्यंतेति ॥ ईप्सितानीप्सितेप्रियाप्रिये ॥ अशरीरंवावसंतंनप्रियाप्रियेस्पृशतइतिश्रुतेः ॥ कुतोनस्तस्तत्राह ॥ काचनेति ॥ यामोक्षेकाचनचित्परिशिष्यतेसाकस्यविषयस्यभोक्तुर्वायत्प्रयुक्तेप्रियाप्रियेस्यातामित्यर्थः ॥ तथाचश्रुतिः ॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्याद्या ॥ केचनेतिपाठेतुस्पष्टम् ॥ ११ ॥ अहंताजगतोःस्थितिःप्रतिष्ठाअविद्यातस्याअत्यंताभावसंपत्तिर्बाधः ॥ १२ ॥ सर्प

कदाचित्स्मृतितांत्यक्त्वाप्रतिभामात्रमेवसत्॥ भातिप्रथमसर्गेषुरूपेणतदनुक्रमात्॥८॥ दृश्यंत्रिभुवनादीदमनुभूतंस्मृतौस्थितम्॥ केषांचित्तन्विकेषांचिन्नानुभूतंस्मृतौस्थितम्॥९॥ प्रतिभासतएवेदंकेषांचित्स्मरणंविना॥ चिदणूनांप्रजेशत्वंकाकतालीयवद्यतः॥१०॥ अत्यंतविस्मृतंविश्वंमोक्षइत्यभिधीयते॥ईप्सितानीप्सितेतत्रनस्तःकाचनकस्यचित्॥११॥अत्यंताभावसंपत्तिंविनाहंताजगत्स्थितेः॥ अनुत्पादमयीत्येषानोदेत्येवविमुक्तता॥१२॥रज्ज्वांसर्पभ्रमःसर्पशब्दार्थासंभवंस्थितम्॥अनुत्पादमयंत्यक्त्वाशांतोऽपिहिनशाम्यति॥१३॥अर्द्धशांतोनशांतोसौसमेत्यर्थतयापुनः॥उदेत्येकपिशाचांतेपिशाचोन्योत्यधीमतः॥१४॥संसारश्चायमाभोगीपरमेवेतिनिश्चयः॥कारणाभावतोभातियदिहाभातमेवतत्॥१५॥ ॥लीलोवाच॥ ॥ब्राह्मणब्राह्मणीरूपेसर्गेकारणसंस्मृतिः॥कथमभ्युत्थितासास्यस्मरणीयमिदंविना॥१६॥ ॥श्रीदेव्युवाच॥ ॥पितामहस्मृतिस्तत्रकारणंतस्यनस्मृतिः॥पूर्वंनसंभवत्येवमुक्तत्वात्पद्मजन्मनः॥१७॥

शब्दार्थयोरसंभवमभावंरज्ज्वात्मनास्थितंत्यक्त्वाउपेक्ष्यअबुद्ध्वेतियावत् ॥ १३ ॥ ननुयोगेनमनोवृत्तिप्रशमादेवसशाम्यतुकिंज्ञानेनतत्राह ॥ अर्द्धेति ॥ तेनविक्षेपांशशांत्याअर्द्धशांतोप्यसौनशांतोयतोव्युत्थानेपुनर्विक्षेपार्थतयाउदेति ॥ अधीर्मूढतातद्वतः ॥ १४ ॥ तथाचज्ञानेनैवनिस्तारइत्याह ॥ संसारइति ॥ कारणाभावतःअविद्याबाधाद्यद्दिभातितत्तर्हिआभातमेवनपुनरावरणादिशंकास्तीत्यर्थः ॥ १५ ॥ यत्प्रागुक्तमस्यसर्गस्यब्राह्मणब्राह्मणीसर्गाभ्यस्तवासनाकार्यत्वंतत्रानुपपत्तिंलीलाशंकते ॥ ब्राह्मणेति ॥ एतत्सर्गेकारणभूतासंस्मृतिरत्रसर्वत्रसंस्कारः ॥ स्मरणीयंस्मरणयोग्यंप्रागनुभूतमितियावत्॥इदंएतत्कालदृश्यंविना ॥ इदानींतनस्यप्रागसत्त्वेनतदनुभवाभावान्नसंस्कारलक्षणवासनातदानींसंभवतीत्यर्थः ॥ १६ ॥ नसंस्कारएववासना ॥ द्वितीयायाअपिवक्ष्यमाणत्वात् ॥ यदितुसंस्कारमपितत्रावश्यकंमन्यसेतर्हिपितामहस्यसर्वज्ञतयाभाव्यर्थेप्यनुभवसंभवात्तदीयसंस्कारएवतत्रकारणम् ॥ तद्देहादिसर्गेतुतस्यापिसंस्कारोनहेतुः ॥ नचपूर्वपितामहसंस्कारोहेतुस्तस्यपूर्वकल्पांतेमुक्तत्वादित्यर्थः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरणीयाभावप्रयुक्तोपिस्मृत्यसंभवस्तत्रास्तीत्याह ॥ पूर्वमिति॥तस्मात्पूर्वपद्मजदेहादिवासनांचितमायोपहितचैतन्यस्यतथास्थितेस्तदेवस्वयंइतिएवंविधेनअपूर्वपद्मजात्मना विवर्त्ततइत्यर्थः ॥ १८ ॥ पूर्वपद्मजवासनांचिताविद्यायास्तदीयतत्त्वज्ञानेनबाधालोचनेत्याह ॥ अभूवमिति ॥ १९ ॥ प्रतिभामयत्वादेवहितस्यतत्सर्गस्यचबाधउपपन्नइत्या शयेनाह ॥ एवमिति ॥२० ॥ द्विविधायाःपूर्वानुभवजन्यसंस्कारजायाअनाद्यविद्याशक्तिरूपवासनांतरजायाश्चहैरण्यगर्भ्याअन्यदीयायाश्चवा ॥ परमंपदमत्रमायाशबलंब्र ह्म॥शुद्धेतुनकार्यकारणभावादिभेदगंधोप्यस्तीत्याह ॥ कार्येति॥२१॥ अविमर्शात्मकमायाकृतःकार्यकारणविकल्पोविमर्शैबाध्यतइतिदर्शयितुंविमृशति ॥ कार्यमिति ॥ पटः कार्यंतंतवःकारणमितितुरीवेमादिसहकारिभिःकारणैःस्यात्तत्रोपकारमकुर्वाणानांसहकारित्वायोगादुपकाररूपमपिकार्यंतथाविधैरेववाच्यमित्यनवस्थापत्तेस्तस्योपकारस्या भावात्कार्यकारणभावबाधेतत्कल्पनाधिष्ठानतंत्वाद्यैक्यंनशाम्यतिभेदकारणाभावादित्यर्थः॥२२॥ नन्वस्तुयुक्त्यैवंअनुभवारूढंत्विदंकथंस्यादितितदर्थंप्रत्यग्दृष्टिंव्युत्पादयति॥

पूर्वंनसंभवत्येवस्मरणीयमितिस्वयम्॥ पद्मजादित्वमायातिचैतन्यस्यतथास्थितेः ॥ १८ ॥ अभूवमहमित्यन्यःप्रजानाथःप्रजापतेः॥ काकतालीयवत्कश्चिद्भवतिप्रतिभामयः ॥ १९ ॥ एवमभ्युदितेलोकेनकिंचिन्नकदाचन ॥ क्वचिदभ्युदितंनामकेवलंचिन्नभःस्थितम् ॥ २० ॥ द्विविधायाःस्मृतेरस्याःकारणंपरमंपदम् ॥ कार्यकारणभावोसावेकएवचिदंबरे ॥ २१ ॥ कार्यंचकारणंचैवकारणैःसहकारि भिः॥ कार्यकारणयोरैक्यात्तदभावान्नशाम्यति ॥ २२ ॥ महाचिद्रूपमेवत्वंस्मरणंविद्धिवेदनम्॥ कार्यकारणतातेनसशब्दोनचवास्त वः॥ २३॥ एवंनकिंचिदुत्पन्नंदृश्यंचिज्जगदाद्यपि ॥ चिदाकाशेचिदाकाशंकेवलंस्वात्मनिस्थितम्॥ २४॥ ॥लीलोवाच॥ ॥अहोनु परमादृष्टिर्दर्शितादेविमेत्वया॥ रूपश्रीर्जागतीप्रातःप्रभयेवेक्षणद्युतिः ॥ २५॥ इदानीमहमेतस्यांयावत्परिणतादृशि॥ नाभ्यासेनवि नातावद्धिधीदंदेविकौतुकम् ॥ २६ ॥

महाचिद्रूपमिति॥स्मर्यतेयेनतत्स्मरणंचित्संवलितंव्यष्टिसमष्ट्यंतःकरणंतदेववेदनंतद्धिमायाशबलस्येश्वरस्यकार्यम् ॥तत्रमायोपाधेरंतःकरणाकारोपाधेश्च भेदेपरामृश्यमानेतदुप हिताधिष्ठानसन्मात्रेऽपिभेदकल्पनात्कार्यसत्ताकारणसत्ताधीनजन्मेतिभ्रांत्यापूर्वावस्थंसत्कारणंउत्तरावस्थंसत्कार्यमितिवेत्सितन्नतथाविद्याःकिंतुमायातत्कार्याकारावुपेक्ष्य तदुभयानुगतसन्मात्रात्मकमहाचिद्रूपमेवस्मरणंविद्धि ॥ तेनयथोक्तलक्षणेनप्रत्यग्दर्शनेनबाधिताकार्यकारणतासकार्यकारणशब्दएवपरिशेक्ष्यतेसोप्यनयादृशादृष्टोनवास्तव इति॥इयंप्रत्यग्दृष्टिःस्फुटतरमुपपादितास्माभिःस्वाराज्यसिद्धौ ॥ पिंडावस्थाघटत्वेमनसिकलयतोहेतुकार्यत्वधीःस्यान्मृन्मात्रंयद्वदेकंस्फुटमभिमृशतोनैवहेतुर्नकार्यम्॥तद्वन्मा यिप्रपंचौझटितिकलयतोब्रह्मविश्वस्यहेतुःसन्मात्रंत्वेकरूपंपटुपरिमृशतोनैवमायीनविश्वमिति॥वार्त्तिकेचोक्तम् ॥ तस्मात्संभावनामात्रःसंसारःप्रत्यगात्मनि ॥ उक्तेर्थेसंशयश्चे त्स्यात्प्रत्यग्दृष्ट्यानिरीक्ष्यतामिति ॥२३॥ इत्थंचनिष्प्रपंचत्वंप्रतिष्ठितमित्युपसंहरति ॥ एवमिति ॥ चिदाकाशइति ॥ स्वेमहिम्निप्रतिष्ठितइतिश्रुतेरितिभावः ॥२४॥ तयादृष्ट्या प्रतिबुद्धालीलोवाच ॥ अहोइति ॥ ईक्षणेनद्योत्यतेप्रकाश्यतइतीक्षणद्युतिःस्फुटेतियावत् ॥२५॥परिणतिर्व्युत्पत्तिदार्ढ्यम् ॥ इदंवक्ष्यमाणंकौतुकमुत्कंठांभिधिनाशय॥२६॥ ॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ तदवलोकनेपूर्ववत्समाधिनैतद्देहविस्मरणमावश्यकमित्याह ॥ अचेत्येति ॥ चिद्रूपमयींप्राचुर्येमयट् ॥ कारणब्रह्मरूपतामितियावत् ॥ २८ ॥ चिन्नभःस्थितंमाया व्योमात्मानंतंसर्गम् ॥ २९ ॥ सहपश्यावोद्रक्ष्यावः ॥ अर्गलंविष्कंभःप्रतिरोधकइतियावत् ॥ ३० ॥ अनुग्रहप्रयुक्तादाग्रहादभिनिवेशात् ॥ ३१ ॥ मायामात्रत्वादमूर्त्तानि ॥ मुधाग्रहान्मिथ्याज्ञानात् ॥ ऊर्मिकांगुलिमुद्रिका ॥ ३२ ॥ ऊर्मिकात्वमहेमरूपमित्यर्थः ॥ ३३ ॥ काचिन्माया ॥ धूलिविरोधिन्यंबुनिधौप्रतिबिंबधूलिरिव ॥ ३४ ॥ उक्तेर्थे प्रमाणासंभावनामूलोच्छेदायदृढतराणिप्रमाणानिदर्शयति॥अयमिति॥ मुख्यंप्रमाणंवेदांताः तत्तात्पर्यार्थस्यानुभवारोपणायगुरवः स्वानुभवस्तुफलीभूतंप्रमाणमित्यर्थः॥ ३५॥

यत्रासौब्राह्मणोगेहेब्राह्मण्यासहितोऽभवत् ॥तंसर्गंतंगिरिग्रामंनयमांतंविलोकये॥ २७॥ ॥श्रीदेव्युवाच॥ अचेत्यचिद्रूपमयींपरमां पावनींदृशम् ॥ अवलंब्येममाकारमवमुच्यभवामला ॥ २८॥ ततःप्राप्स्यस्यसंदेहंव्योमात्मानंनभःस्थितम्॥भूमिष्ठनरसंकल्पोगगनांतःपुरंयथा ॥ २९॥ एवंस्थितेतंपश्यावःसहसर्गमनर्गलम् ॥ अयंतद्दर्शनद्वारेदेहोहिपरमार्गलम्॥ ३०॥ ॥लीलोवाच॥ ॥अमुनादेविदेहेनजगदन्यदवाप्यते॥नकस्मादत्रमेयुक्तिकथयानुग्रहाग्रहात्॥ ३१॥ ॥श्रीदेव्युवाच॥ ॥जगंतीमान्यमूर्त्तानिमूर्त्तिमंतिमुधाग्रहात्॥ भवद्भिरवबुद्धानिहेमानीवोर्मिकाधिया ॥ ३२॥ हेम्न्यूर्मिकारूपधरेप्यूर्मिकात्वंनविद्यते॥ यथातथाजगद्रूपेजगन्नास्तिचब्रह्मणि॥ ३३॥ जगदाकाशमेवेदंब्रह्मैवेहतुदृश्यते ॥ दृश्यतेकाचिदप्यत्रधूलिरंबुनिधाविव ॥ ३४ ॥ अयंप्रपंचोमिथ्यैवसत्यंब्रह्माऽहमद्वयम् ॥ अत्रप्रमाणंवेदांतागुरवोऽनुभवस्तथा ॥ ३५ ॥ ब्रह्मैवपश्यतिब्रह्मनाब्रह्मब्रह्मपश्यति ॥ सर्गादिनाम्नाप्रथितःस्वभावोऽस्यैवचेदृशः ॥ ३६ ॥ नब्रह्मजगतामस्तिकार्यकारणतोदयः॥ कारणानामभावेनसर्वेषांसहकारिणाम् ॥ ३७॥ यावदभ्यासयोगेननशांताभेदधीस्तव ॥ नूनंतावदतद्रूपानब्रह्मपरिपश्यसि ॥ ३८ ॥ तत्ररूढिमुपायातायइमेत्वस्मदादयः ॥ अभ्यासाद्ब्रह्मसंपत्तेःपश्यामस्तेहितत्परम् ॥ ३९ ॥ संकल्पनगरस्यैवममाकाशमयंवपुः॥ ब्रह्मैवचांतःपश्यामिदेहेनानेनतत्पदम् ॥ ४० ॥ विशुद्धज्ञानदेहार्हास्तथैतेपद्मजादयः ॥ ब्रह्मात्मजगदादीनामंशेसंस्थानमंगने ॥ ४१ ॥ तवाभ्यासंविनाबालेनाकारोब्रह्मतांगतः॥ स्थितःकलनरूपात्मातेनतन्नानुपश्यसि ॥ ४२ ॥ यत्रस्वसंकल्पपुरंस्वदेहेननलभ्यते ॥ तत्रान्यसंकल्पपुरंदेहोन्योलभतेकथम् ॥ ४३ ॥

स्वभावआवृतसत्ता ॥ ३६ ॥ ३७ ॥ अतद्रूपाअब्रह्मदेहाद्यात्मबुद्धित्वात्तद्रूपा ॥ नूनमितिवितर्के ॥ ३८ ॥ येरूढिंदृढव्युत्पत्तिम् ॥ तइमेपश्यामः ॥ ३९ ॥ आकाशमयंशुद्धचित्ताकाशमयम् ॥ ४० ॥ ज्ञायतेऽनेनेतिज्ञानंचित्तंविशुद्धेनतेनअर्हाःसदाब्रह्मदर्शनयोग्याः ॥ वस्तुतोब्रह्मात्मकानांजगत्तद्व्यवहाराणामंशेलेशेसंस्थानमवस्थितिंपश्यंतीति विपरिणमय्यानुषज्यते ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवीत्यादिश्रुतेरित्यर्थः ॥ ४१ ॥ कलनमंतःकरणेचिदाभासस्तद्रूपात्मा ॥ तद्ब्रह्मप्रागनुक्रांतंगिरिग्रामकंच ॥ ४२॥ अनेनदेहेनानुपलंभेसांकल्पिकत्वमेवहेतुरितिकैमुतिकन्यायेनद्रढयति ॥ यत्रेति ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यसिद्रक्ष्यसि ॥ वर्त्तमानसामीप्याद्वर्त्तमानवन्निर्देशः॥४४॥ सदेहंदेहसाध्यंविदेहंवासंकल्पितंतन्नगरव्यवहारोपभोगंप्रति ॥ सत्यमर्थक्रियासमर्थं ॥ इतरंव्यवहारंप्रतितुनकिंचनतुच्छमितियावत ॥४५॥ धातृसांकल्पिकस्यास्यजगतोऽस्मत्सांकल्पिकस्यचसांकल्पिकत्वाविशेषेऽपिकुतोऽवांतरवैलक्षण्यमितिचेदनादिनियतिरूपेश्वरेच्छालक्षणमायाशक्तिवशादेवेत्याह ॥ आदिसर्गइति ॥ ४६ ॥ ४७॥ त्वंकथमेषिस्वेनदेहेनेतिशेषः ॥४८॥ सांकल्पिकसत्तयासन्नपिवास्तवसत्तयाखात्मकः ॥ नकुड्यात्मेवमूर्त्तःकुड्यहाकुड्यभेदकः॥४९॥यच्छुद्धस्यैवसत्वगुणस्यनिर्माणंकार्यमस्मद्देहादितच्चिद्रूपस्यैव॥किलतथाप्रतिभानमतोहेतोस्तस्मात्परस्माद्ब्रह्मणोमनागल्पमेवभिद्यतेयथादग्धपटेपटाकारोवस्तुतस्त

तस्मादेनंपरित्यज्यदेहंचिद्व्योमरूपिणी॥तत्पश्यसितदेवाशुकुरुकार्यविदांवरे ॥ ४४ ॥ संकल्पनगरंसत्यंयथासंकल्पितंप्रति॥ सदेहंवाविदेहंवानेतरंप्रतिकिंचन॥ ४५॥ आदिसर्गेजगद्भ्रांतिर्यथेयंस्थितिमागता॥ तथातदाप्रभृत्येवंनियतिःप्रौढिमागता ॥ ४६॥ लीलोवाच॥ ॥त्वयोक्तंदेविगच्छावोब्राह्मणब्राह्मणीजगत्॥ सहेतीदमिदंवच्मिकथंगंतव्यमंवहे॥ ४७॥ इमंदेहमिहास्थाप्यशुद्धसत्त्वानुपातिना॥ चेतसातंपरंयामिलोकंत्वंकथमेषितत्॥ ४८॥ श्रीदेव्युवाच॥ ॥संकल्पव्योमवृक्षस्तेयथासन्नपिखात्मकः॥ नकुड्यात्मानकुड्येनरोध्यतेनापिकुड्यहा॥ ४९॥ शुद्धैकसत्वनिर्माणंचिद्रूपस्यैवतत्किल॥ प्रतिभानमतस्तस्मात्परस्माद्भिद्यतेमनाक्॥ ५०॥ सोयमेतादृशोदेहोनेनंसंत्यज्ययाम्यहम्॥ अनेनैवतमाप्नोमिदेशंगंधमिवानिलः॥ ५१॥ यथाजलंजलेनाग्निरग्निनावायुनानिलः॥ मिलत्येवमतोदेहोदेहैरन्यैर्मनोमयैः॥ ५२॥ नहिपार्थिवतासंविदेत्यपार्थिवसंविदा ॥ एकत्वंकल्पनाशैलशैलयोःक्वाहतिर्मिथः॥ ५३॥ आतिवाहिकएवायंत्वादृशैश्चित्तदेहकः॥ आधिभौतिकताबुद्ध्यागृहीतश्चिरभावनात्॥५४॥ यथास्वप्नेयथादीर्घकालध्यानेयथाभ्रमे॥ यथाचसतिसंकल्पेयथागंधर्वपत्तने॥ ५५॥ वासनातानवंनूनंयदातेस्थितिमेष्यति॥ तदातिवाहिकोभावःपुनरेष्यतिदेहके॥ ५६॥ लीलोवाच॥ ॥आतिवाहिकदेहत्वप्रत्ययेघनतांगते॥ तामवाप्नोत्ययंदेहोदशामाहोविनश्यति॥ ५७॥

द्ब्रह्मैवतद्वदितिभावः ॥ ५० ॥ ५१ ॥ तर्ह्यस्मद्वर्तृसांकल्पिकसर्गेणास्यकथंयोगस्तत्राह ॥ यथेति ॥ मनोमयैर्देहैरन्यैश्चवस्तुभिरित्यर्थः ॥ ५२ ॥ तर्हिमद्देहोपिवस्तुतोमनोमात्रत्वेनत्वद्देहसाजात्यात्त्वद्देहेनैकीभावेनसंयोगेनवामिलितःसंस्तत्रैतुतत्राह ॥ नहीति ॥ पृथिव्याविकारःपार्थिवस्तद्भावेनसंवेद्यतइतिपार्थिवतासंविस्त्वद्देहस्तद्विरुद्धचिन्मात्रसंविदामद्देहेनैकत्वंसंयोगंवानहिएति ॥ आहतिरभिघातः ॥ ५३ ॥ नन्वस्यापिमानसत्वेकथंपार्थिवत्वंतत्राह ॥ आतिवाहिकइति ॥ ५४ ॥ ५५ ॥ कदातर्ह्यस्यपार्थिवभावनिवृत्तिस्तत्राह ॥ वासनेति ॥ तनोर्भावस्तानवमल्पता ॥ एष्यतिसमाध्यभ्यासेनेतिभावः ॥ ५६ ॥ अन्येषांस्थूलदेहस्यनाशदर्शनाज्जीवन्मुक्तयोगिदेहस्यापिनाशएवसंभावितोनातिवाहिकभावइतिसंभावयंतीलीलापृच्छति ॥ आतिवाहिकेति ॥ घनतांदार्ढ्यंगतेसमाध्यभ्यासेनेतिशेषः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्त्वविद्देहोज्ञानबाधितत्वाद्दग्धपटवन्नास्त्येवप्राग्वासनामात्राच्चपटाभासवत्प्रतिभासमानोऽपिवासनातानवेततोऽपिसौक्ष्म्यादातिवाहिकभावमेवापद्यतेननाशमित्याशयेनदेव्यु
त्तरमाह ॥ यदित्यादिना ॥ ५८ ॥ उत्अपि ॥ ५९ ॥ आतिवाहिकत्वनिमित्तंब्रह्मज्ञानमातिवाहिकज्ञानम् ॥ ६० ॥ कल्पितःप्रपंचःप्रागभूत्ज्ञानेनतुसमूलंसनिवर्त्तितइतिव्य
वहारकल्पनाप्यापातदृशैव तत्त्वदृशातुतस्याअपिसंभावनानास्तीत्याह ॥ कल्पनेति ॥ कल्पितासमर्थिता ॥ तथाचोक्तंगौडपादैः ॥ प्रपंचोविनिवर्त्तेतकल्पितोयदिकेनचित् ॥
उपदेशादयंवादोज्ञातेद्वैतंनविद्यतइति ॥ ६१ ॥ कथंतर्हियूयंस्वदेहादिपश्यथतत्राह ॥ परमिति ॥ परेणब्रह्मणाआपूर्णमिदंदेहादिकोशपंचकंयदेकैकांतःप्रवेशेनस्थितंतत्परंब्रह्मैवस्वे
महिम्निपरेस्थितमितिवयंसत्यमबाधितंपश्यामः त्वंत्वप्ररूढबोधत्वान्नाभिपश्यसि ॥ ६२ ॥ नन्वदृश्याचित्कथंदृश्यसत्त्वात्मतामापन्नातत्राह ॥ आदीति ॥ आदौलिंगात्मनःस

॥ श्रीदेव्युवाच ॥ ॥ यदस्तिनामतत्रैवनाशानाशक्रमोभवेत् ॥ वस्तुतोयच्चनास्त्येवनाशःस्यात्तस्यकीदृशः ॥ ५८ ॥ रज्ज्वांसर्पभ्रमेनष्टे
सत्यबोधवशात्सुते ॥ सर्पोननष्टउन्नष्टोवेत्येवंकैवसाकथा ॥ ५९ ॥ यथासत्यपरिज्ञानाद्रज्ज्वांसर्पोनदृश्यते ॥ तथातिवाहिकज्ञानाद्दृ
श्यतेनाधिभौतिकः ॥ ६० ॥ कल्पनाऽपिनिवर्त्तेतकल्पितायदिकेनचित् ॥ साशिलासमपास्त्वैवयानेहास्तिकदाचन ॥ ६१ ॥ परंपरेपरापू
र्णमिदंदेहादिकंस्थितम् ॥ इतिसत्यंवयंभद्रेपश्यामोनाभिपश्यसि ॥ ६२ ॥ आदिसर्गेभवेच्चित्त्वंकल्पनाकल्पितंयदा ॥ तदाततःप्रभृत्येकस
त्वंदृश्यमवेक्षते ॥ ६३ ॥ ॥ लीलोवाच ॥ ॥ एकस्मिन्नेवसंशांतेदिक्कालाद्यविभागिनि ॥ विद्यमानेपरेतत्त्वेकलनावसरःकुतः ॥ ६४ ॥
॥ श्रीदेव्युवाच ॥ ॥ कटकत्वंयथाहेम्नितरंगत्वंयथांभसि ॥ सत्यत्वंचयथास्वप्नसंकल्पनगरादिषु ॥ ६५ ॥ नास्त्येवसत्यनुभवेतथानास्त्येव
ब्रह्मणि ॥ कल्पनाव्यतिरिक्तात्मतत्स्वभावादनामयात् ॥ ६६ ॥ यथानास्त्यंबरेपांसुःपरेनास्तितथाकला ॥ अकलाकलनंशांतमिदमे
कमजंततम् ॥ ६७ ॥ यदिदंभासतेकिंचित्तत्तस्यैवनिरामयम् ॥ कचनंकाचकस्येवकांतस्यातिमणेरिव ॥ ६८ ॥ ॥ लीलोवाच ॥ ॥ ए
तावंतंचिरंकालमेतेदेविवयंवद ॥ भ्रामिताःकेननामापिद्वैताद्वैतविकल्पनैः ॥ ६९ ॥ ॥ श्रीदेव्युवाच ॥ ॥ अविचारेणतरलेभ्रांतासि
चिरमाकुला ॥ अविचारःस्वभावोत्थःसविचाराद्विनश्यति ॥ ७० ॥

र्गेतंगोचरयंत्याश्चितश्चित्त्वंनामधर्मोभवेत् ॥ यदातुपंचीकरणेनकल्पनयास्थूलंरूपंकल्पितंतदाततःप्रभृत्येकमनुगतंसत्त्वंदृश्यानुरोधात्स्वयमपिदृश्यभूतंस्वयमवेक्षतेभ्रांत्येत्यर्थः
॥ ६३ ॥ यत्वागुक्तंकलनाधीनासर्वकल्पनेतितत्रलीलानुपपत्तिंशंकते ॥ एकस्मिन्निति ॥ पौर्वकालिकंदुग्धमौत्तरकालिकदध्याद्याकारेणपरिणमतेदधिभावेचदुग्धमविद्यमानं
भवति ॥ कालसंबंधरहितेनित्यंविद्यमानेब्रह्मणिकलनाख्यप्रथमविकारस्यैवनावसरइत्यर्थः ॥ ६४ ॥ सत्येहिविकारेभ्युपगतेत्वदुक्तदोषःस्यान्नमिथ्याभूतइतिदेवीपरिहरति ॥
कटकत्वमित्यादिना ॥ ६५ ॥ ६६ ॥ कलाकलनंविषयः ॥ ६७ ॥ कचनंआपातप्रतिभासः ॥ अतिशयितोमणिरतिमणिस्तस्येव ॥ ६८ ॥ उक्तभ्रांतेर्हेतुंलीलापृच्छति ॥ एता
वंतमिति ॥ ६९ ॥ विचारबाध्यत्वादविचारशब्दितोमोहएवतद्धेतुरितिदेव्याह ॥ अविचारेति ॥ ७० ॥

१ लीलासंबोधनम्

CC-0. In Public Domain. Digitization by eGangotri

एषाअविचारलक्षणाअविद्याविचारबाधिताब्रह्मसत्तैवसंपद्यतइतिशेषः ॥७१॥ तद्बाधस्यत्रैकालिकत्वमाह ॥ तस्मादिति ॥ बंधाभावान्मोक्षोपिनास्ति ॥७२॥७३॥ ज्ञानेनद्वैतवासनाबाधेतत्त्ववासनाशेषोवासनातानवंतदेवमुक्तिबीजम् ॥ ७४ ॥ पुनर्द्वैतवासनाप्ररोहमाशंक्याह ॥ आदावित्यादिना ॥७५॥ मनःरूढेअधिरूढेसति ॥७६॥७७ ॥७८॥ इतिएवंविधयानिर्विकल्पसमाधिप्रतिष्ठयाकतिपयकालवशाद्गगनस्यमायाकाशस्यतत्कलानांतत्कार्याणांचांतरस्याधिष्ठानभूतस्यनिर्मलस्यात्मनःअंबनेनअवलंबनेनविगतोभ्रांतिकलनलक्षणःकालिमायस्याअतएवाकलंकातत्संस्कारकलंकनिर्मुक्तासतीसकलप्राणिनांकलनानांभ्रांतीनांतत्कार्यवासनानांतत्कारणाविद्यायाश्चअंतोबाधावधिभूतोयोमोक्षाख्यःपरमपुरुषार्थःसत्वमेवभविष्यसीत्यर्थः ॥ ७९ ॥ ॥ इतिश्रीवासि०तात्प०उत्पत्ति०एकविंशःसर्गः ॥ २१ ॥ ॥ ७ ॥ ॥ अवस्थातुर्यलक्ष्मात्रजीवन्मुक्तस्थि

अविचारोविचारेणनिमेषादेवनश्यति ॥ एषासत्तैवतेनांतरविद्यैषानविद्यते ॥ ७१ ॥ तस्मान्नैवाविचारोस्तिनाविद्यास्तिनबंधनम् ॥ नमोक्षोस्तिनिराबाधंशुद्धबोधमिदंजगत् ॥७२॥ एतावंतंयदाकालंत्वयैतन्नविचारितम् ॥ तदानसंप्रबुद्धात्वंभ्रांतैवाभवआकुला ॥७३॥ अद्यप्रभृतिबुद्धासिविमुक्तासिविवेकिनी ॥ वासनातानवंबीजंपतितंतवचेतसि ॥ ७४ ॥ आदावेवहिनोत्पन्नंदृश्यंसंसारनामकम् ॥ यदातदाकथंतेनवास्यंतेवासनापिका ॥७५॥ अन्यंताभावसंपत्तौद्रष्टृदृश्यदृशांमनः ॥ एकध्यानेपरेरूढेनिर्विकल्पसमाधिनि ॥७६॥ वासनाक्षयबीजेस्मिन्किंचिदंकुरितेत्वदि ॥ क्रमान्नोदयमेष्यंतिरागद्वेषादिकादृशः ॥७७॥ संसारसंभवश्चायंनिर्मूलत्वमुपैष्यति ॥ निर्विकल्पसमाधानंप्रतिष्ठामलमेष्यति ॥ ७८ ॥ विगतकलनकालिमाकलंकागगनकलांतरनिर्मलांबनेन ॥ सकलकलनकार्यकारणांतःकतिपयकालवशाद्भविष्यसीति ॥ ७९ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०ली० विश्रांत्युपदेशोनामएकविंशःसर्गः ॥ २१ ॥ ॥ ७ ॥ ॥ श्रीदेव्युवाच ॥ ॥ यथास्वप्नपरिज्ञानात्स्वप्नदेहोनवास्तवः ॥ अनुभूतोप्ययंतद्वद्वासनातानवादसन् ॥ १ ॥ यथास्वप्नपरिज्ञानात्स्वप्नदेहःप्रशाम्यति ॥ वासनातानवात्तद्वज्जाग्रद्देहोपिशाम्यति ॥ २ ॥ स्वप्नसंकल्पदेहांतेदेहोयंचेत्यतेयथा ॥ तथाजाग्रद्भावनांतेउदेत्येवातिवाहिकः ॥ ३ ॥ स्वप्नेनिर्वासनाबीजेयथोदेतिसुषुप्तता ॥ जाग्रत्यवासनाबीजेतथोदेतिविमुक्तता ॥ ४ ॥ येयंतुजीवन्मुक्तानांवासनासानवासना ॥ शुद्धसत्वाभिधानंतत्सत्तासामान्यमुच्यते ॥ ५ ॥

तिस्तथा ॥ वासनातानवोपायस्तदभ्यासश्चकीर्त्यते ॥१॥ प्रागुक्तांज्ञानदार्ढ्यात्स्थूलदेहभावनिवृत्तिमातिवाहिकभावप्राप्तिंचदृष्टांतैर्बोधयितुंदेव्युपक्रमते ॥ यथेति ॥ अयंस्थूलदेहः ॥ १ ॥ २ ॥ जाग्रद्भावनास्थूलदेहाहंभावनातस्याअंतेमूलोच्छेदादुच्छेदेसतीत्यर्थः ॥३॥ निर्वासनाबीजेअनुद्भूतवासनाबीजेनतूच्छिन्नवासनाबीजइत्यर्थः ॥ पुनःस्वप्नानापत्तेः ॥ अवासनाबीजेबाधितसर्ववासनाबीजे ॥ विमुक्तताजीवन्मुक्तिः ॥४॥ ननुजीवन्मुक्तानामपिवासनास्त्येवअन्यथाव्यवहारानुपपत्तेस्तत्राह ॥ येयमिति ॥ नवासनाकिंतुशुद्धसर्ववासनाबाधावधेरधिष्ठानसत्त्वस्यैवशुद्धवासनेत्यभिधानंयथादग्धपटइतिभस्मनएवाभिधानम् ॥ तत्पूर्वतनंसर्ववासनानुगतसत्तासामान्यमेवतथोच्यतइत्यर्थः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१० = आतिवाहिकतांयाति; बुद्धं, मनः सर्गजन्मान्तरगतैः सिद्धैः मिलति नेतरत्

मूर्च्छासुषुप्त्योरवांतरभेदंदर्शयति ॥येति॥ वासनानांसुप्तिरनुद्भवोभिभवश्च ॥ तथाचानुतद्भूतवासनानिद्रासुषुप्तिरभिभूतवासनंजाग्रन्मोहोमूर्छेत्यर्थः॥ जाग्रतिघनतरोद्भूतवासनानां सहसोत्पन्नदुःखातिशयेनप्रसह्याभिभवाद्घनत्वमपरित्यज्यैवमोहभावापत्तिस्तदेतिसूचनायघनइतिमोहविशेषणम् ॥६॥निद्रेत्यविवक्षितंयतोजाग्रत्यपिज्ञानात्समूलवासनाक्षये तुर्यंभवत्येवेत्यर्थः ॥७॥ तदेवजीवतोजीवन्मुक्तिरित्याह ॥ प्रक्षीणेति॥८॥ प्राग्व्याख्यातेशुद्धंसत्वेअनुपतितंसमाधिपाटवाच्चिरप्रतिष्ठितम् ॥९॥ बुद्धंव्युत्थानव्यवहारकालेप्या त्मप्रबोधवन्मनःसर्गांतरगतैर्जन्मांतरगतैश्चचित्तांतरैःसिद्धैश्चदेवयोग्यादिशरीरैरेकीभावेनमिलति ॥१०॥ दृश्यप्रपंचस्यांताचरमावधिभूताबोधतास्वाभाविकचिद्रूपता ॥११॥ असंकल्पान्संकल्पादूषितानतएवपावनान् ॥१२॥१३॥ गिरियामकदिदृक्षाप्रतिबद्धचेतसिबोधपूर्त्तिर्वासनातानवाभ्यासोवानसंभवतीत्याशयेनाह ॥ यावदिति ॥१४॥ ननुकि मर्थमद्देहावस्थापनंत्वद्देहसंश्लेषादस्यापिगमनशक्तिःकिनस्यात्तत्राह मांसदेहइति ॥१५॥ किंवरवच्छापवद्वात्वद्वचनादेवसंश्लेषमेष्यतिनेत्याह ॥ यथेति ॥ मूढतमेषुबालान

यासुप्तवासनानिद्रासासुषुप्तिरितिस्मृता॥ यत्सुप्तवासनंजाग्रद्घनोसौमोहउच्यते॥ ६ ॥ प्रक्षीणवासनानिद्रातुर्यशब्देनकथ्यते॥ जाग्र त्यपिभवत्येवविदितेपरमेपदे॥७॥ प्रक्षीणवासनायेहजीवतांजीवनस्थितिः॥ अमुक्तैरपरिज्ञातासाजीवन्मुक्ततोच्यते॥८॥ शुद्धसत्वा नुपतितंचेतःप्रतनुवासनम्॥ आतिवाहिकतामेतिहिमंतापादिवांबुताम्॥९॥ आतिवाहिकतांयातंबुद्धंचित्तांतरैर्मनः॥ सर्गजन्मांतरग तैःसिद्धैर्मिलतिनेतरत्॥१०॥ यदातेयमहंभावःस्वभ्यासाच्छांतिमेष्यति॥ तदोदेष्यतितेस्फाराद्दृश्यांताबोधतास्वयम्॥११॥आतिवाहि कताज्ञानंस्थितिमेष्यतिशाश्वतीम्॥ यदातदाद्यसंकल्पाँल्लोकान्द्रक्ष्यसिपावनान् ॥ १२॥ वासनातानवेतस्मात्कुरुयत्नमनिंदिते॥ त स्मिन्प्रौढिमुपायातेजीवन्मुक्ताभविष्यसि॥१३॥यावन्नपूरितस्त्वेषशीतलोबोधचंद्रमाः॥तावद्देहमवस्थाप्यलोकांतरमवेक्ष्यताम्॥१४ मांसदेहोमांसदेहेनैवसंश्लेषमेष्यति॥ नतुचित्तशरीरेणव्यवहारेषुकर्मसु॥ १५॥ यथानुभवमेवैतद्यथास्थितमुदाहृतम्॥ आबालसि द्धसंसिद्धंननामवरशापवत्॥१६॥ अवबोधघनाभ्यासाद्देहस्यास्यैवजायते॥ संसारवासनाकार्श्येनूनंचित्तशरीरता॥१७॥ उदेष्यंती चसैवात्रकेनचिन्नोपलक्ष्यते ॥ केवलंतुजनैर्देहोम्रियमाणोवलोक्यते॥१८॥ देहस्त्वयंनम्रियतेनचजीवतिकिंचते॥ केकिलस्वप्नसंकल्प भ्रांतौमरणजीविते॥१९॥

भिज्ञतमेषुसिद्धांश्चमर्यादीकृत्यसर्वानुभवसिद्धोर्थोमयानूदितोनापूर्वार्थोबलात्संपादितइत्यर्थः ॥ १६ ॥ यदिलोकसि द्धवस्तुस्वभावोनविपर्यस्यतितर्हिवासनातानवेप्यस्यदेहस्यातिवाहिकभावोनसंभावयितुंशक्यइत्याशंक्याह ॥ अवबोधेति ॥ चित्तशरीरताआतिवाहिकशरीरता ॥ १७॥ ननु जीवानांपरलोकगमनमप्यातिवाहिकदेहेनप्रसिद्धंस्थूलदेहस्यतुमृतस्यात्रैवावस्थानंदृश्यतेतत्कथमेकस्यातिवाहिकभावेनजीवनंस्थूलभावेनमरणंचैकदेत्याशंक्याह॥ उदेष्यंती चेति ॥ साआतिवाहिकताचमरणकालेअत्रास्मिन्नेवशरीरेउदेष्यंतीकेनचिन्म्रियमाणेनजीवतावानोपलक्ष्यते ॥ तद्यथापेशस्कारीत्यादिश्रुतेः॥ पारलौकिकदेहनिर्माणायम्रि यमाणस्यस्वाज्ञानकल्पितदेहारंभकभूतमात्रांशसंवलितस्यैवपरलोकेगमनात्तासांमात्राणांतेनानुपलक्षितानामप्यातिवाहिकभावाविरोधात् ॥ यस्त्वन्याज्ञानकल्पितभूतमात्रां शोऽज्ञानदेहःसोन्यैर्जनैर्म्रियमाणोवलोक्यतइत्यर्थः ॥ १८ ॥ किंचावास्तवोयंदेहोनम्रियतेनचजीवतितेजीवनमरणेचकिंनकिंचिद्वस्त्वितिनात्रविरोधशंकायुक्तेत्यर्थः ॥ १९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २० ॥ लीलाप्रश्नश्लोकौस्पष्टौ ॥ २१ ॥ २२ ॥२३॥ तत्रादावभ्यासस्वरूपमाह ॥ तच्चिंतनमिति ॥ असंदिग्धंस्वबुद्ध्यारोहायचिंतनं अभिज्ञबुद्ध्यंतरसंवादायकथनं परस्प राज्ञातांशप्रबोधायान्योन्यप्रबोधनमित्येतैरुपायैरसंभावनानिवृत्तिरेतदेकपरत्वेनचविपरीतभावनानिवृत्तिरितिफलानि ॥२४॥ दृढवैराग्यादीन्येवतल्लक्षणानीतिविरक्तस्तुतिमु खेनदर्शयति ॥ येइति ॥ भोगभावनानिविषयवासनास्तेषांतानवमपक्षयंभावयंतियत्नेनोत्पादयंति ॥ २५ ॥ औदार्यंसर्वपरिग्रहत्यागस्तल्लक्षणसौंदर्येणवैराग्यरसेनचरंजि ता ॥ परेउत्कृष्टाः ॥ २६ ॥ श्रवणादिपरत्वमपितदाभ्यासलक्षणमित्याह ॥ अत्यंतेति ॥ युक्त्याप्रमाणतत्त्वावधारणानुकूलयाप्रमेयतत्त्वावधारणानुकूलयाच ॥ शास्त्रैरध्यात्म शास्त्रैः ॥ २७ ॥ त्रैकालिकदृश्यबाधदर्शनादृत्तिरपितदभ्यासइत्याह ॥ सर्गादाविति ॥ २८ ॥ बलंमननजन्यविद्यावासनादार्ढ्यंतदुदितारतिरात्मरतिः ॥ २९ ॥ दृश्यमिथ्यात्व

जीवितंमरणंचैवसंकल्पपुरुषेयथा ॥ असत्यमेवभात्येवंतास्मिन्पुत्रिशरीरके ॥ २० ॥ ॥लीलोवाच॥ ॥तदेतदुपदिष्टंमेज्ञानंदेवित्व यामलम् ॥ यस्मिन्श्रुतिगतेशांतिमेतिदृश्यविषूचिका ॥२१॥ अत्रोपकुरुमेब्रूहिकोभ्यासःकीदृशोथवा ॥ सकथंपोषमायातिपुष्टेतस्मि श्चकिंभवेत् ॥२२॥ ॥श्रीदेव्युवाच॥ ॥यद्येनक्रियतेकिंचिद्येनयेनयदायदा ॥विनाभ्यासेनतन्नेहसिद्धिमेतिकदाचन॥२३॥ तच्चिंतनं तत्कथनमन्योन्यंतत्प्रबोधनम् ॥ एतदेकपरत्वंचतदभ्यासंविदुर्बुधाः ॥२४॥ येविरक्तामहात्मानोभोगभावनतानवम् ॥भावयंत्यभवा यांतर्भव्याभुविजयंतिते ॥ २५ ॥ उदितौदार्यसौंदर्यवैराग्यरसरंजिता ॥ आनंदस्पंदिनीयेषांमतिस्तेभ्यासिनःपरे ॥ २६ ॥ अत्यंताभाव संपत्तौज्ञातृज्ञेयस्यवस्तुनः ॥ युक्त्याशास्त्रैर्यतंतेयेतेब्रह्माभ्यासिनःस्थिताः ॥ २७ ॥ सर्गादावेवनोत्पन्नंदृश्यंनास्त्येवतत्सदा ॥ इदंजगदहं चेतिबोधाभ्यासंउदाहृतः ॥ २८ ॥ दृश्यासंभवबोधेनरागद्वेषादितानवे ॥ रतिर्बलोदितायासौब्रह्माभ्यासउदाहृतः ॥ २९ ॥ दृश्यासंभव बोधेनविनाद्वेषादितानवम् ॥ तपइत्युच्यतेतस्मान्नज्ञानंतच्चदुःखतत् ॥ ३० ॥ दृश्यासंभवबोधोहिज्ञानंज्ञेयंचकथ्यते ॥ तदभ्यासेननिर्वा णमित्यभ्यासोमहोदयः ॥ ३१ ॥ भवबहुलनिशानितांतनिद्रासततविवेकविबोधवारिसेकैः ॥ प्रगलतिहिमशीतलैरशेषाशरदिमहामि हिकेवचेतसीति ॥ ३२ ॥

दार्ढ्यकृतरागाद्युच्छेदेएवप्रागुक्तज्ञानोपयोगीतितदातदभ्यासलक्षणंनान्यादृशमित्याह ॥ दृश्येति ॥ तत्तपोवृथाद्वेषादिनिरोधदुःखंतनोतिविस्तारयतीतिदुःखतत् ॥ ३० ॥ तत्रहेतु मुक्त्वाभ्यासफलंदर्शयन्नुपसंहरति ॥ दृश्येतिद्वाभ्याम ॥ हियस्माच्चरमसाक्षात्कारात्मकंज्ञानंतज्ज्ञेयंब्रह्मचदृश्यस्यासंभवोयस्माद्यस्मिन्वातथाविधोबोधइतिकथ्यतेइत्यर्थः ॥ ३१ ॥ चेतसिचित्तेइत्येवमभ्यस्तैःसर्वतापोपशमहेतुत्वाद्धिमशीतलैःसततविवेकविबोधवारिसेकैर्भवःसंसारस्तल्लक्षणायांबहुलनिशायांकृष्णपक्षरात्रौप्रवृत्तामोहलक्षणानि तांतनिद्राअशेषसंस्कारात्मनाप्यपरिशिष्यमाणाप्रगलतिविशीर्यते ॥ महतीमिहिकानीहारपटली ॥ ३२ ॥

---

१ गर्भिणीतिपाठः २ भ्यासंविदुःपरेइत्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ ॥ इतिवासिष्ठम०तात्पर्य०उ० द्वाविंशःसर्गः ॥ २२ ॥ योगात्स्थूलतनुंत्यक्त्वा गिरियामदिदृक्षया॥गृहेव्योम्निगतिःस्फारेवर्ण्यतेज्ञप्तिलीलयोः ॥ १ ॥ परिजनेअनून मपरिशेषंसुप्तेसत्यथवरांगनेज्ञप्तिलीलेसमाधिस्थानकंगत्वातस्थतुरितिचतुर्थस्थेनान्वयः ॥ १ ॥ दक्षचेतसीतिप्राक्तनपरिजनविशेषणंगौणंवा ॥ दृढाःअखिलाःसर्वाबहुविधाइ तियावत् ॥ अर्गलाःकपाटविष्कंभायेषुतथाविधाद्वारगवाक्षायस्मिन् ॥ पुष्पप्रकरैर्निष्ठ्यूतैर्निरस्तैर्मांसलैःपुष्टैरामोदैर्मंथरेभरितेइतियावत् ॥ २ ॥ सकलंसमग्रममलमकलंकंच यथास्यात्तथापूर्णइंदुरिवयेवदनेइतिविग्रहोनतुसकलःकलासहितःपूर्णेंदुरिवेति ॥ व्यर्थविशेषणत्वापत्तेः ॥ ३ ॥ उत्कीर्णेपुत्रिकेइतिशेषः ॥ चित्रेचित्रलिखितप्रतिमे ॥ ४॥ सं कोचंसर्वेंद्रियप्रत्याहारलक्षणंम् ॥ परितःप्रसृताआमोदलेखाःपरिमलभागाययोस्ते ॥ ५ ॥ निर्वातेशरदिगिरौभ्रष्टेअवतीर्णेअभ्रमालिकेयथाशुद्धेशुभ्रेशांतशीतलेस्पंदविवर्जि

इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम॥स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरैश्चसहाजगा म॥ ३३॥ चतुर्थदिनम् ॥इत्यार्षेवा०वा०दे०मो०उ०विज्ञानाभ्यासवर्णनंनामद्वाविंशःसर्गः॥ २२॥ ॥श्रीवसिष्ठउवाच॥ ॥इ तिसंकथनंकृत्वातस्यांनिशिवरांगने ॥ सुप्तेपरिजनेनूनमथांतःपुरमंडपे॥ १ ॥ दृढाखिलार्गलद्वारगवाक्षेदक्षचेतसि ॥ पुष्पप्रकरनिष्ठ्यू तमांसलामोदमंथरे॥२॥ अम्लानमालावसनशवपार्श्वासनास्थिते॥ सकलामलपूर्णेंदुवदनद्योतितास्पदे॥३॥ समाधिस्थानकंगत्वा तस्थतुर्निश्चलांगिके॥ रत्नस्तंभादिवोत्कीर्णेचित्रेभित्ताविवार्पिते ॥ ४ ॥ सर्वास्त्यजतुश्चिंताःसंकोचंसमुपागते ॥ दिवसांतइवाब्जि न्यौप्रसृतामोदलेखिके॥ ५॥ बभूवतुर्भृशंशांतेशुद्धेस्पंदविवर्जिते ॥ गिरौशरदिनिर्वातइवभ्रष्टाभ्रमालिके॥ ६॥ निर्विकल्पसमाधा नाज्जहतुर्बाह्यसंविदम्॥ यथाकल्पलतेकांतेपूर्वन्त्वंतरेरसम्॥ ७ ॥ अहंजगदितिभ्रांतिर्दृश्यस्यादावनुद्भवः॥ यदाताभ्यामवगतस्त्व त्यंताभावनात्मकः॥ ८॥ तदादृश्यपिशाचोयमलमस्तंगतोद्वयोः॥ असत्त्वादेवचास्माकंशशशृंगमिवानघ॥९॥ आदावेवहियन्नास्ति वर्त्तमानेपितत्तथा॥ भातंवाभातमेवातोमृगतृष्णांबुवज्जगत् ॥ १० ॥ स्वभावकेवलंशांतंब्रह्मीद्वयंतद्बभूवह॥ चंद्रार्कादिपदार्थौघैर्दूरमु क्तमिवांबरम् ॥ ११ ॥

तेचतद्वत् ॥ ६ ॥बाह्यांदेहाद्यनात्मवस्तुतद्गोचरांसंविदंप्रतिसंधानम् ॥ यथाकृत्वंतरेवसंतादावुपस्थितेपूर्वंरसंत्यजतः ॥ पुराणपत्रशोषादिदर्शनादित्यर्थः ॥ ७॥ आत्यंतिकदृश्यो पशमेननिर्विकल्पसमाधिप्रतिष्ठायांतत्त्वसाक्षात्कारेणसमूलत्रैकालिकदृश्यबाधएवपरिनिष्ठितोहेतुरित्याह ॥ अहमित्यादिसार्द्धेन ॥ ८ ॥ समाधाविवसर्वदापित्रैकालिकदृ श्यबाधोस्माकमनुभवसिद्धइतिवसिष्ठोरामंसंबोध्याह ॥ असत्वादित्यादिनासार्द्धेन ॥ अस्माकंदृशाजगद्भातंमृगतृष्णांबुवदभातंशशशृंगमिव ॥ यतोयदादावेवनास्तितद्वर्त मानेपितथेत्यन्वयः ॥ ९ ॥ दृश्यास्तमयेतेकथंबभूवतुस्तदाह ॥ स्वभावेति ॥ चंद्रार्कादिभिःसर्वपदार्थौघैर्दूरेमुक्तमंबरंसर्गादौवायूत्पत्तेःप्राग्वाप्यंतप्रलयेचप्रसिद्धंतदिव ॥ ११॥

१ मंडपविशेषणत्वेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्ष्यमाणव्योमगमनेतयोर्देहवैलक्षण्यमाह ॥ तेनेति ॥१२॥ तच्चदूरनभोगमनकल्पनंस्वगृहमंडपाकाशप्रादेशमात्रएववृत्तंनबहिरित्याह ॥ गेहांतरिति ॥ देहांतरितिपाठेत्हृदया
त्कंठपर्यंतंप्रादेशमात्रंनाडीमार्गमारुह्येत्यर्थः ॥ संविदाउद्बुद्धपूर्वसंकल्पसंस्कारसंविदा॥१३॥चेत्याविषयास्तत्संवित्तेःस्वभावोविषयानुरूपव्यवहारकल्पनातद्वशादित्यर्थः॥१४॥
तत्रस्थेगेहस्थे ॥ वाशब्दोवधारणे ॥ चिद्वृत्त्याआकाशमावांप्लवावहेइत्येवंरूपयाचित्प्रधानमानसकल्पनावृत्त्या ॥१५॥ वस्तुतश्चिदाकाशदेहेअपिप्राक्संकल्पितदृश्यानुसंधान
सहितचित्तात्मतापन्नान्निजस्वभावात् ॥ वयस्येसख्यौ ॥१६॥ ॥ इतिश्रीवासिष्ठ० उत्पत्ति० त्रयोविंशःसर्गः ॥ २३ ॥ ॥ ७ ॥ ॥ अनंतविश्ववैचित्र्यविलासैःसंभृतांतरम् ॥
नभोत्रवर्ण्यतेपंथाःप्रयांत्योर्ज्ञप्तिलीलयोः ॥१॥ उच्चैःपदमूर्ध्वस्थानम् ॥१॥उच्छूनंविवृद्धम् ॥ गंभीरमेकार्णवमिव ॥ कोमलमिवकोमलंस्निग्धम् ॥ कोमलमरुतांमंदमारुताना

तेनैवज्ञानदेहेनचचारज्ञप्तिदेवता॥ मानुषीत्वितरेणाशुध्यानज्ञानानुरूपिणा ॥ १२ ॥ गेहांतरेवप्रादेशमात्रमारुह्यसंविदा॥ बभूवतु
श्चिदाकाशरूपिण्यौव्योमगाकृती॥१३॥ अथतेललनेलीलालोलेललितलोचने॥ स्वभावाच्चेत्यसंवित्तेर्नभोदूरमितोगते॥१४॥तत्रस्थं
वाथचिद्वृत्त्यापुप्लुवातेनभस्थलम्॥ कोटियोजनविस्तीर्णदूराद्दूरतरांतरम्॥ १५॥ दृश्यानुसंधाननिजस्वभावादाकाशदेहेअपितेमिथो
त्र॥ परस्पराकारविलोकनेनबभूवतुःस्नेहपरेवयस्ये॥ १६॥ ॥इत्यार्षेवा०वा०दे० मो० उ० ली० लीलाप्रज्ञादेव्योर्ज्ञानदेहाकाशगमनं
नामत्रयोविंशःसर्गः॥ २३॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥दूराद्दूरमभिप्लुत्यशनैरुच्चैःपदंगते॥ हस्तंहस्तेसमालंब्ययांत्यौददृश
तुर्नभः॥ १ ॥एकार्णवमिवोच्छूनंगंभीरंनिर्मलांतरम्॥ कोमलंकोमलमरुदासंगसुखभोगदम्॥ २॥ आह्लादकमलंसौम्यंशून्यतांभो
निमज्जनात्॥ अत्यंतशुद्धंगंभीरंप्रसन्नमपिसज्जनात् ॥ ३ ॥ शृंगस्थनिर्मलांभोदपीनोदरसुधालये॥ विश्रमतुराशासुपूर्णचंद्रोदरा
मले॥ ४ ॥ सिद्धगंधर्वमंदारमालामोदमनोहरे॥ चंद्रमंडलनिष्क्रांतेरमातेमधुरानिले ॥ ५ ॥ सस्नतुर्भूरिघर्मांतेतडिद्रक्ताब्जसंकुले॥ सर
सीवजलापूरमंथरेमेघमंडले॥६॥ भूतलौघमहाशैलमृणालांकुरकोटिषु॥ दिक्षुबभ्रमतुःस्वैरंभ्रमर्यौसरसीष्विव ॥ ७॥ धारागृहधिया
धीरगंगानिर्झरधारिणि॥ भ्रेमतुर्वातविक्षुब्धमेघमंडलमंडपे॥८॥ततोमधुरगामिन्यौविश्राम्यंत्यौस्वशक्तितः॥शून्येददृशतुर्व्योममहारं
भातिमंथरम्॥ ९॥

मासंगेनसंश्लेषेणसुखभोगदम् ॥ २ ॥ शून्यतालक्षणेअंभसिनिमज्जनादवगाहनादलमत्यंतमाह्लादकम् ॥ अथवाजगच्छून्यतालक्षणेब्र
ह्मांभसिप्रथमंनिमज्जनान्निर्गमनात्प्राणिभ्रमराणामाह्लादहेतुभूतंकमलम् ॥ अत्रगंभीरमितिसाक्षाद्विशेषणंपूर्वंतुदृष्टांतस्येतिनपौनरुक्त्यम् ॥ सज्जनादपिप्रसन्नंप्रसन्नतरम् ॥ ३ ॥
आशासुदिक्षुमेर्वादिशृंगस्थेनिर्मलांभोदपीनोदरलक्षणेपीनोदरांतर्निविष्टेवासुधालयेसौधे ॥ ४ ॥ क्वचिच्चंद्रमंडलसन्निधौचंद्रमंडलान्निष्क्रांते ॥ शैत्यसौरभ्ययोःपूर्वविशेषणा
भ्यांलाभान्मधुरशब्दोमांद्यसुखस्पर्शपरः ॥५॥ घर्मोर्कतापस्तस्यांतेअवसानभूते ॥ तडितइवरक्ताब्जानिसरःपक्षे ॥ तडितोरक्ताब्जानीवेमघमंडलपक्षे ॥६॥ तत्तद्भूतलौघस्थाम
हाशैलाहिमवत्कैलासादयोमृणालानामब्जकंदानामंकुरकोटयइवयासु ॥ ७ ॥ निर्झरशब्देनतच्छीकरालक्ष्यंते ॥ ८ ॥ महद्भिरारंभैर्भुवनतज्जननिर्माणैरतिमंथरंसंक्लिष्टम् ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपिप्रज्ञस्याप्राग्दृष्टमेवतथाप्यन्योन्यंपरस्परसाहित्येनपूर्वमदृष्टम् ॥ सर्वैसंकटकोटरागर्भच्छिद्राद्यर्योंशायस्य ॥ सर्वप्राणिभवदुःखानामाश्रयभूतंछिद्रमितिवार्थः ॥ आशून्यत्वमपूर्यमाणत्वेहेतुः ॥ १० ॥ विचित्राभरणप्रख्यैर्भूतलैर्लक्षणयाभुवनतलैः ॥ शोभनानिविमानानियेषुतैः ॥ ११ ॥ पद्मरागमणिमयानांतटानांपार्श्वानामुद्योतैःप्रकाशैः ॥ १२ ॥ तेषामेवभूभृतांमुक्तामयशिखराणांभापूरैःप्रभाप्रवाहैर्हिमवतःसानुःप्रस्थदेशस्तद्वद्भासुरम् ॥१३॥ तथातेषामेवभूभृतांमहामरकतानांमहार्हहरिन्मणीनांप्रभाभिर्घासहरितस्थलस्यनीलिमेवनीलिमायस्य ॥ तथाकचिद्द्रष्टॄणांसचक्षुषांदृश्यानांरूपभेदानांक्षयेआसक्तस्तत्परःसन्जातउत्पन्नोध्वांतोत्थकालिमायस्मिंस्तथाविधम् ॥१४॥ कचित्तुयतःपारिजातकल्पलतावनोपरिआलोलविमानगणानांकेतनंस्थानमतःसमीपस्थदृष्ट्यातद्वनमंजरिकाकारमिवदूरस्थदृष्ट्यातुवैदूर्यमयभूतलमिवस्थितमित्यर्थः ॥१५॥ मनोवेगैर्महासिद्धैर्वातगमागमोवायुसंचारवेगःसजितोयस्मिन् ॥ घुंघुममितिध्वन्यनुकरणम् ॥१६॥१७॥ वातस्कंधाआवहप्रवहादयोवायुभेदाः ॥१८॥ विमानसीत्कारोविमानवेगध्व

अदृष्टपूर्वमन्योन्यंसर्वसंकटकोटरम्॥अपूर्यमाणमाशून्यंजगत्कोटिशतैरपि॥१०॥उपर्युपर्युपर्युच्चैरन्यैरन्यैर्दतंपृथक्॥ विचित्राभरणाकारैर्भूतलैःसुविमानकैः॥ ११ ॥ परितःपूरितव्योम्नांमेर्वादिकुलभूभृताम्॥ पद्मरागतटोद्योतैःकल्पज्वालोपमोदरम्॥ १२ ॥ मुक्ताशिखरभापूरैर्हिमवत्सानुसुंदरम्॥ कांचनाद्रिस्थलार्चिर्भिःकांचनस्थलभासुरम्॥१३॥ महामरकताभाभिःशाद्वलस्थलनीलिमम्॥द्रष्टृदृक्क्षयासक्तजातध्वांतोत्थकालिमम्॥१४॥पारिजातलतालोलविमानगणकेतनम्॥ अतोमंजरिकाकारमिववैदूर्यभूतलम्॥१५॥ मनोवेगमहासिद्धजितवातगमागमम्॥ विमानगृहदेवस्त्रीगेयवाद्यसघुंघुमम्॥१६॥ त्रैलोक्यवरभूतौघसंचाराविरलांतरम्॥ अन्योन्यादृष्टसंचारसुरासुरकुलाकुलम्॥ १७ ॥ पर्यंतस्थितकूश्माण्डरक्षःपैशाचमंडलम्॥ वातस्कंधमहावेगवहद्वैमानिकव्रजम्॥ १८ ॥ वहद्विमानसीत्कारमुष्टिग्राह्यघनध्वनि ॥ ग्रहर्क्षघनसंचारासुचलद्वातयंत्रकम्॥ १९ ॥ निकटातपदग्धाल्पसिद्धसिद्धोज्झितास्पदम् ॥ अर्काश्वमुखवातास्तदग्धमुग्धविमानकम्॥ २० ॥ लोकपालाप्सरोवृंदसंचाराचारचंचलम् ॥ देव्यंतःपुरिकादग्धधूपधूमांबुदांबरम् ॥ २१ ॥ स्वस्वर्गाहूतदेवस्त्रीस्वांगविभ्रष्टभूषणम्॥ सामान्यसिद्धसंघोग्रतेजःपुंजतमोबलम्॥ २२ ॥

निस्तस्यमोषणंमुष्टिरभिभवस्तेनग्राह्याघनध्वनयोमेघशब्दायस्मिन् ॥ वातयंत्रकंवायुविष्टंभमययंत्ररूपंज्योतिश्चक्रम् ॥ १९ ॥ कचित्सूर्यसन्निहितदेशनिकटातपेनदग्धैःसंतप्तैस्तपोयोगरसायनादिनाअल्पसिद्धैःसिद्धाख्यदेवयोनिविशेषैश्चोज्झितावस्थानम् ॥ अर्केणतदीयाश्वमुखवातैश्चयथायोगमस्ताःक्षिप्तादग्धाश्चाल्पाविमानाविमानकायस्मिन् ॥ २० ॥ पद्मांसंचाराइतरैरंगैस्तत्तदुचिताचरणान्याचारास्तैश्चंचलमिवचंचलम्॥ धूपधूमैरंबुदव्याप्तांबरमिवस्थितम्॥ विष्णुनासदृशोवीर्यइतिरामइवकल्पितभेदादुपमेयता ॥२१॥ इंद्रचंद्रादिभिःस्वर्गशब्दितस्वस्वलोकायाहूतानामतएवान्यानुपेक्ष्याहंपूर्विकयाधावंतीनांदेवस्त्रीणामप्सरसांस्वांगेभ्योविभ्रष्टानिभूषणानियस्मिंस्तथाविधंयतःअतस्ताःसमीहमानानांसामान्यसिद्धानामिंद्रादिवदणिमादिविशेषसिद्धिशून्यानांस्वर्ग्यंतराणांयःसंघस्तदीयोग्रतेजःपुंजस्यक्रोधासूयादिनातिरोभावकंतमोबलंतमोगुणप्राबल्यमिवनीलंस्थितमित्यर्थः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाबलवतांसिद्धानांदिवयोनिविशेषाणांसंघट्टःसंमर्दस्तद्युक्तगमनागमनाभ्यांविघट्टितैश्चूर्णितैर्घनैर्मेघैस्तद्वयादिवपार्श्वस्थहिमवदाद्यधित्यकाश्रयणात्सांशुकाःसवस्त्राइवसंप
न्नाहिमवन्मेरुमंदारायस्मिन् ॥ २३ ॥ उलूकादयःपक्षिभेदाः ॥ २४ ॥ योगिनीनामणिमादिसिद्धिमत्वात्स्वस्थानएवेप्सितलाभेऽपिव्यर्थंदूरंगत्वाआगच्छद्भिरित्यर्थः ॥ २५ ॥
दिगंतविश्रांतत्वात्तत्तद्दिगधिष्ठातृलोकपालानांपुरोयतइवस्थितेध्वांतवद्दृष्टिप्रसरनिरोधिनिधूमधूम्रेऽभ्ररूपेमंदिरे ॥ २६ ॥ स्वर्गेगीयमानैर्दिव्यगीतैर्दिव्यस्तवैश्चोद्दीपकैरुन्मत्ताम
दनाक्रांताश्चनभोमार्गगायस्मिन् ॥ अनारतंवहतिनक्षत्रधिष्ण्यभूतेज्योतिश्चक्रेसूर्यादिगत्यालक्षितःशुक्लकृष्णपक्षादिकालविभागोयस्मिन् ॥ २७ ॥ वातस्कंधभेदरूपेतस्मिन्ने
वचक्रेकल्पितोनिखातोनिम्नदेशस्तदंतःप्रवहत्त्रिपथगाजलंयस्मिन् ॥ २८ ॥ वज्रचक्रादिशब्दैस्तदधिष्ठात्र्योदेवताउच्यंतेअतःसदेहत्वोपपत्तिः ॥ २९॥ मेघमार्गप्रदेशेमहामेघा

बलवत्सिद्धसंघट्टगमागमविघट्टितैः॥घनैःसांशुकपार्श्वस्थहिमवन्मेरुमंदरम् ॥२३॥काकोलूकैर्गृध्रभासैराशिभूतैश्चलैर्वृतम्॥नृत्यद्भि
र्डाकिनीसंघैस्तरंगैरिववारिधिम् ॥२४॥प्रवृत्तैर्योगिनीसंघैःश्वकाकोष्ट्रखराननैः॥निरर्थंयोजनशतंगत्वागच्छद्भिरावृतम् ॥२५॥लोक
पालपुरोध्वांतधूमधूम्रेऽभ्रमंदिरे॥ सिद्धगंधर्वमिथुनप्रारब्धसुरतोत्सवम् ॥ २६ ॥स्वर्गगीतस्तवोन्मत्तमदनाक्रांतमार्गगम् ॥ अनारतव
हद्धिष्ण्यचक्रलक्षितपक्षकम् ॥ २७॥ वातस्कंधनिखातांतर्वहत्त्रिपथगाजलम् ॥ आश्चर्यालोकनव्यग्रसंचरत्त्रिदशार्भकम् ॥२८॥सदे
हसंचरद्वज्रचक्रशूलासिशक्तिमत् ॥ क्वचिन्निर्भित्तिभवनंगायन्नारदतुंबुरु ॥२९॥ मेघमार्गमहामेघमहारंभाकुलंक्वचित् ॥ चित्रन्यस्त
समाकारमूककल्पांतवारिदम्॥३०॥उत्पतत्कज्जलाद्रींद्रसुंदरांभोधरंक्वचित् ॥ क्वचित्कनकनिष्पंदकांततापांतवारिदम्॥३१॥ क्वचिद्धि
द्राहतापाढ्यमृष्यमूकांबुदांशुकम् ॥ क्वचिन्निष्पवनांभोधिसंरंभशून्यताजलम् ॥॥३२॥ क्वचिद्वातनदीप्रौढविमानतृणपल्लवम् ॥ क्वचि
च्चलदलिव्रातपृष्ठत्वक्कांतिनिर्मलम्॥३३॥क्वचिन्मेरुनदीकल्पवातधूलिविधूसरम् ॥ क्वचिद्विमानगीर्वाणप्रभाचित्रबलांगकम् ॥३४॥क्व
चिन्निरंबरोन्मत्तमातृमंडलमालितम् ॥ क्वचिन्नित्यंनवक्षीबक्षुब्धयोगीश्वरीगणम् ॥३५॥ क्वचिच्छांतसमाधिस्थविश्रांतमुनिमालित
म् ॥ समंदूरास्तसंरंभसाधुचित्तमनोहरम् ॥३६॥ गायत्किन्नरगंधर्वसुरस्त्रीमंडलंक्वचित् ॥ क्वचित्स्तब्धपुरापूर्णंवहत्पुरवरंक्वचित्॥३७॥

नांपुष्करावर्त्तकादीनांमहताप्रलयवृष्ट्यारंभेणाकुलंक्वचित् ॥ क्वचित्तुचित्रन्यस्तवन्निर्व्यापारामूकानिःशब्दाश्चकल्पांतवारिदायस्मिन् ॥ ३० ॥ कनकस्यनिष्पंदोद्रवइवकां
तस्तपोग्रीष्मःसएवतापस्तदंतःप्रावृडादिः ॥ ३१ ॥ ऋष्यमूकेगिरौपूर्वरामायणवर्णितप्रकारेणेववर्धतोंबुदाएवांशुकानियस्य ॥ निष्पवनोनिश्चलइतियावत् ॥ ३२॥ वातनद्यां
वायुप्रवाहेप्रौढविमानान्येवप्रवाह्यमानतृणपल्लवस्थानेयस्मिन् ॥ ३३ ॥ मेरुनद्योलक्षणयावार्षिकगिरिणद्यस्तत्कल्पैस्तत्सवर्णैर्वातधूलिप्रवाहैर्विधूसरम् ॥ चित्रेणबलेंशबलयं
गकंयस्य ॥ ३४ ॥३५॥ दूरेऽस्ताःसंरंभाःक्रोधादयोयेनसाधुचित्तेन ॥३६॥ स्तब्धैर्निश्चलैःपुरैराकीर्णम् ॥ वहंतिभ्रमंतित्रिपुरादिपुरवराणियस्मिन् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३८ ॥ भ्रमच्चंद्रएवामृतपूर्णत्वाच्चंद्रसदृशंवामायासरोयस्मिन् ॥ स्तब्धमयंदेवशक्त्याघनीभूतंजलमयंसरोयस्मिन्॥विभक्त्यलुक्छांदसः ॥३९॥४०॥ आकाशएवविश्रांतलोकपमिति विश्रांतिक्रियायाअधिकरणसापेक्षतायानित्यत्वात्संबंधिशब्दत्वाच्चनसापेक्षमसमर्थंभवतीत्यसमर्थसमासता ॥ तथाचोक्तम्॥संबंधिशब्दःसापेक्षोनित्यंसर्वःसमस्यते॥ वाक्यवत्साव्यपेक्षाहिवृत्तावपिनहीयतइति ॥४१॥ अपराशब्दःप्रतीचीपरः ॥ परिशेषात् ॥ उत्तरायाम्येतिसर्वनाम्नोवृत्तावपुंवद्भावश्छांदसः ॥ दिशःसंचरंतीतिदिक्संचारास्तैराकुलम् ॥४२॥ क्वचिल्लोकालोकगिरेःपरतः ॥४३॥ हिमानीहिमसंहतिस्तज्जठरवदाशीतम् ॥४४॥ क्वचिद्दैत्यभयादुत्पाट्यवहद्भिर्देवानुचरैःपुरोवृत्तंपुरस्कृतंकल्पवृक्षलतावनंय

क्वचिद्रुद्रपुरापूर्णंक्वचिद्ब्रह्ममहापुरम् ॥ क्वचिन्मायाकृतपुरंक्वचिदागामिपत्तनम् ॥३८॥ क्वचिद्भ्रमच्चंद्रसरःक्वचित्स्तब्धमयंसरः ॥ क्वचित्सरत्सिद्धगणंक्वचिदिंदुकृतोदयम्॥३९॥ क्वचित्सूर्योदयमयंक्वचिद्रात्रितमोमयम्॥ क्वचित्संध्यांशुकपिलंक्वचिन्नीहारधूसरम् ॥४०॥ क्वचिद्धिमाभ्रधवलंक्वचिद्वर्षत्पयोधरम् ॥ क्वचित्स्थलइवाकाशएवविश्रांतलोकपम् ॥४१॥ ऊर्ध्वाधोगमनव्यग्रसुरासुरगणंक्वचित् ॥ पूर्वापरोत्तरायाम्यदिक्संचाराकुलंक्वचित् ॥ ४२ ॥ अपियोजनलक्षाणिक्वचिदुष्प्राप्यभूधरम् ॥ अविनाशितमःपूर्णदृषद्गर्भोपमंक्वचित् ॥ ४३ ॥ अविनाशिबृहत्तेजःक्वचिदर्कानलोपमम् ॥ हिमानीजठराशीतंक्वचिच्चंद्रादिसद्मसु ॥४४॥ क्वचिद्वहत्पुरोवृत्तकल्पवृक्षलतावनम् ॥ क्वचिद्दैत्यहतोत्तुंगप्रपतद्देवपत्तनम् ॥ ४५ ॥ वैमानिकनिपातेनवह्निलेखांकितंक्वचित् ॥ क्वचित्केतुशतोत्पातमिथःसंघट्टपट्टितम् ॥४६॥ क्वचिच्छुभग्रहगणप्रगृहीताग्र्यमंडलम् ॥ क्वचिद्रात्रितमोव्याप्तंक्वचिद्दिवसभास्वरम् ॥४७॥ क्वचिदुद्गर्जदंभोदंक्वचिन्मूकामलांबुदम्॥ वातावकीर्णशुक्लाभ्रखंडपुष्पोत्तरंक्वचित् ॥ ४८ ॥ क्वचिदत्यंतनिःशून्यमवदातमनंतरम् ॥ आनंदमृदुशांताच्छंब्रह्मस्येवहृदयंततम् ॥ ४९॥ शुक्रवाहनभेकौघैःक्वचिद्गलकृतारवम् ॥ शून्यतावारिवलितंक्षेत्रमाकाशवासिनाम् ॥५०॥ मयूरहेमचूडादिपक्षिभिःक्वचिदावृतम् ॥ विद्याधरीणांदेवीनांवाहनैर्विहितास्पदैः ॥५१ ॥ क्वचिदभ्रांतरोन्मृत्यद्गुहमायूरमंडलम् ॥ क्वचिदग्निशुकैःश्यामंशाद्वलानामिवस्थलम् ॥ ५२ ॥ क्वचित्प्रेतेशमहिषमहिम्नावामनांबुदम् ॥ क्वचिदश्वैस्तृणग्रामशंकाग्रस्तासितांबुदम् ॥ ५३ ॥ क्वचिद्देवपुरव्याप्तंक्वचिद्दैत्यपुरान्वितम् ॥ अन्योन्याप्राप्यनगरंनगरंध्रकरानिलम् ॥ ५४ ॥

स्मिन् ॥ ४५ ॥ क्वचिद्वैमानिकानांस्वर्गिणांनिपातेनदीर्घीभूततत्तेजसापतदुल्कावह्निरेखयेवांकितंचिह्नितम् ॥ पट्टितंपट्टवन्निबिडितम् ॥ ४६ ॥ अग्र्यंश्रेष्ठंऊर्ध्वभागमंडलंयस्य ॥ ४७ ॥ अभ्रखंडाएवपुष्पोत्तराःपुष्पास्तरायस्य ॥ ४८ ॥ नितरांदृश्यपदार्थशून्यम् ॥ अवदातंस्वच्छम् ॥ अनंतरमज्ञानमेघांतरायरहितम् ॥ अच्छंनीरजस्कम् ॥ ४९॥ शुक्रोपलक्षितसर्वनभश्चरवाहनान्येवभेकौघास्तैः॥ शून्यतावारिणावलितंपूर्णम् क्षेत्रंकेदारम् ॥ ५० ॥ ५१ ॥ गुहःस्कंदः ॥ अग्नेर्वाहनैःशुकैः ॥ यद्यपिमेषवाहनत्वमग्नेःप्रसिद्धंतथाप्यत्रोक्तेःशुकवाहनत्वमपिबोध्यम् ॥ ५२ ॥ प्रेतेशोयमस्तन्महिषस्यमहिम्नाबृहत्कायत्वेन ॥ तृणग्रामशंकातृणराशिभ्रमः ॥५३॥ अन्योन्यैरप्राप्यैप्राप्तुमशक्यैनगरैयस्मिन् ॥ तत्रहेतुरंतरालेनगानांपर्वतानामपिरंध्रकरणसमर्थोबलवत्तरोनिलोयस्मिन्निति ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५५ ॥ घर्घरवातौघंयथास्यात्तथापक्षैःप्रोड्डीनाःपर्वतायस्मिन् ॥ ५६ ॥ वहद्भिरुड्डीयगच्छद्भिर्गिरिभिर्ध्वस्ताश्चूर्णितावृक्षलक्षैश्छत्रवदुच्छ्रिताश्चांबुदायस्मिन् ॥ अंबुधिमिति पाठेप्यंबूनिधीयंतेयेष्वितिव्युत्पत्त्यात्रांबुदाएवोच्यंते ॥ ५७॥५८॥ एकांतंनितांतंनिर्ध्वनि ॥५९॥६०॥ अजवाहनपदेछांदसोजलोपः ॥ नलिनीनांलुंठकःसौरभ्यापहारी॥६१॥ स्वशरीरेणदेवताशरीरेण ॥ प्रोड्डीनेत्यादेरुत्प्रेक्षितोक्तिः ॥ ६२ ॥ ज्यौतिषिकप्रक्रियामाश्रित्याह ॥ पातालेति ॥ भूगोलंपरितोभ्रमत्यादित्येभूच्छायापिपरितोभ्रमंतीपातालगे र्केऊर्ध्वंप्रसरतिसैवश्यामत्वात्काकस्तस्यचोपनैः ॥ चुपमंदगतौ ॥ आक्रमणैरितियावत् ॥ सेयंचंद्रग्रासेउपपत्तिः ॥ अर्कग्रासेतुनेयमुपपत्तिरितिश्लेषादर्थांतरमुच्यते ॥ पाताल

क्वचित्कुलाचलाकारनृत्यद्भैरवभासुरम् ॥ क्वचित्सपक्षशैलेंद्रसमनृत्यद्विनायकम् ॥ ५५ ॥ क्वचिद्घर्घरवातौघपक्षप्रोड्डीनपर्वतम् ॥ क्वचिद्गंधर्वनगरसुरस्त्रीवृंदवंधुरम् ॥५६॥ क्वचिद्वहद्गिरिध्वस्तवृक्षलक्षोच्छ्रितांबुदम् ॥ क्वचिन्मायाकृताकाशनलिनीजलशीतलम्॥५७॥ क्वचिदिंदुकराकृष्टिशीतलाह्लादमारुतम् ॥ क्वचित्तप्तानिलादग्धद्रुमपर्वतवारिदम् ॥ ५८ ॥ क्वचिदत्यंतसंशांतवातादेकांतनिर्ध्वनि ॥ क्वचित्पर्वततुल्याभ्रशिखाकूटशतोदयम् ॥ ५९ ॥ क्वचित्प्रावृड्भवोन्मत्तघनाभ्ररवघर्घरम् ॥ क्वचित्सुरासुरगणप्रवृत्तरणदुर्गमम् ॥ ६० ॥ क्वचिद्व्योमाब्जिनीहंसीस्वनाहूताजवाहनम् ॥ क्वचिन्मंदाकिनीतीरनलिनीलुंठकानिलम् ॥ ६१ ॥ स्वशरीरेणगंगादिसरितांसन्निधानतः॥ प्रोड्डीनमत्स्यमकरकुलीरांबुजकूर्मकम् ॥ ६२ ॥ पातालगार्कजनितभूच्छायाकाकचोपनैः ॥ क्वचित्क्वचिन्मंडलेषुग्रस्तचंद्रार्कमंडलम् ॥ ६३ ॥ क्वचित्सर्गानिलाधूतमायाकुसुमकाननम् ॥ पतत्पुष्पहिमासारत्रसद्वैमानिकांगनम् ॥ ६४ ॥ उदुंबरोदरमशकक्रमभ्रमज्जगत्त्रयांतरगतभूतसंचयम् ॥ विलंघ्यतद्वरललनेखमुच्चकैर्महीतलंपुनरपिगंतुमुद्यते ॥ ६५ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०ली०गगनवर्णनंनामचतुर्विंशःसर्गः ॥ २४ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ नभःस्थलाद्गिरिग्रामंगच्छंत्यौकंचिदेवते ॥ ज्ञप्तिचित्तस्थितंभूमितलंददृशतुःस्त्रियौ ॥ १ ॥ ब्रह्मांडनरहृत्पद्मंदिगष्टकदलंबृहत् ॥ गिरिकेसरसंबाधंस्वामोदभरसुंदरम् ॥ २ ॥ सरित्केसरिकानालमध्येवश्यायबिंदुकम् ॥ शर्वरीभ्रमरीभ्रांतंभूतौघमशकाकुलम् ॥ ३ ॥

शब्देनलक्षणयाचंद्रस्यव्यवहितःपश्चाद्भागस्तद्गतेऽर्केसतिचंद्रमंडलेजनितायाभुवश्छायाप्रतिबिंबस्तेनश्यामत्वापादनात्काकवत्संपन्नश्चंद्रस्तेनचोपनैरिति ॥ ६३ ॥ वैमानिकैरेवस्त्वांगनाविस्मयार्थनिर्मितमायासर्गानिलैराधूतंमायाकुसुमकाननंयस्मिन्नित्यर्थः ॥ ६४ ॥ इत्थंनभसिवर्णितेनभश्चरवैभवेरागोमाभूदितितांस्तूच्छीकुर्वन्नाह ॥ उदुंबरेति ॥ मशकक्रमोमशकमर्यादातद्वदितियावत् ॥ ६५ ॥ ॥ इतिवासिष्ठमहारा०उत्प०चतुर्विंशःसर्गः ॥ २४ ॥ ॥ ७ ॥ ॥ सप्ताब्धिद्वीपसंवीतंब्रह्मांडावरणैर्युतम् ॥ अपूर्वंभुवनंताभ्यांदृष्टमत्रोपवर्ण्यते ॥ १ ॥ कंचित्अपूर्वंज्ञप्तिचित्तस्थितंज्ञप्त्यालीलायैप्रदर्शयितुमभिप्रेतमितियावत् ॥ १ ॥ तदेवभूमितलंब्रह्मांडपुरुषस्यहृत्पद्मतयावर्णयति ॥ ब्रह्मांडेत्यादिना ॥ २ ॥ गिरिकेसरेभ्यःप्रवृत्तत्वात्सरितःकेसरिकाःकेसरावांतरशाखाः ॥ अवश्यायाहिमकणाएवमकरंदबिंदवोयस्मिन् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतर्नालांतर्गुणास्तंतवोभोग्यवस्तुगुणाश्च ॥ शोभननालरंध्रायमाणैःपातालादिसुषिरैः ॥ उह्यमानपयःपूरैरितिसुषिराणांविशेषणम् ॥ दिवसस्यालोकःप्रकाशस्तेनकांतिमत् ॥ ॥ ४ ॥ रसैर्मकरंदैःशृंगारादिभिश्च ॥ हंसःसूर्यःप्रसिद्धहंसाश्च ॥ ५ ॥ तद्यद्पांशरआसीत्तत्समहन्यतसापृथिव्यभवदितिश्रुतेः पुराणेषुवराहेणोद्धृत्यजलोपरिस्थापितत्वप्रसिद्धेश्चभूमेरास्पदभूतोयोमहांभोधिस्तत्कंपेभूकंपात्कंपितदिग्दलम् ॥ ६ ॥ अधस्ताद्भूनबीजयास्वसंततिभूतप्राणिबीजभूतया ॥ असुराणांस्त्रीणांसमूहःस्त्रैणंतल्लक्षणयामृणालकलिकादिवल्लर्याप्राप्यंप्राप्तुंशक्यंभूभृतांमेर्वादीनांमहाबीजस्थानीयानांहृदयंहृदयवज्जीवननिमित्तंनालमूलंयस्य ॥ ७ ॥ तत्रभूपद्मेकर्णिकांददृशतुरित्यनुषज्यते ॥ ८ ॥

अंतर्गुणगणाकीर्णसुरंध्रैःसुषिरैर्वृतम् ॥ उह्यमानपयःपूरैर्दिवसालोककांतिमत् ॥ ४ ॥ रसार्द्रखेभ्रमद्धंसंरात्रिसंकोचभाजनम् ॥ पातालपंकनिर्मग्ननागनाथमृणालकम् ॥ ५ ॥ कदाचिदास्पदांभोधिकंपकंपितदिग्दलम् ॥ अधोनालगतानंतदैत्यदानवकंटकम् ॥ ६ ॥ असुरस्त्रैणवल्लर्यासंभोगसुकुमारया ॥ प्राप्यंभूभृन्महाबीजहृदयंभूतबीजया ॥ ७ ॥ जंबूद्वीपइतिख्यातांविपुलांतत्रकर्णिकाम् ॥ सरित्केसरिकानालांनगरग्रामकेसराम् ॥ ८ ॥ कुलशैलेश्वरोत्तुंगबीजसप्तकसुंदरीम् ॥ मध्यस्थोच्चमहामेरुबीजाक्रांतनभस्थलीम् ॥ ९ ॥ सरःप्रालेयकणिकांवनजंगलधूलिकाम् ॥ स्थलेष्वामंडलांतस्थजनजालालिमंडलाम् ॥ १० ॥ तांयोजनशताकारैःप्रतिराकंप्रबोधिभिः ॥ सागरैर्भ्रमरैर्व्याप्तांदिक्चतुष्टयशालिभिः ॥ ११ ॥ दिग्दलाष्टकविश्रांतससुरांभोधिषट्पदाम् ॥ भ्रातृभिर्नवभिर्भूपैर्नवधापरिकल्पिताम् ॥ १२ ॥ लक्षयोजनविस्तीर्णामाकीर्णांचरजोलवैः ॥ नानाजनपदव्यूहस्थिरावश्यायसीकराम् ॥ १३ ॥ द्वीपात्तुद्विगुणंमानंलवणार्णवलेखया ॥ दधत्यावलितांबाह्येप्रकोष्ठमिवकंबुना ॥ १४ ॥ ततोपिद्विगुणंदेहंदधत्यावलयाकृतिम् ॥ जगद्भूतलताव्याप्तांशाकाख्यद्वीपलेखया ॥ १५ ॥ ततोपिद्विगुणाकारंधारयंत्याचवेष्टिताम् ॥ प्रत्यग्रक्षीरपूर्णाब्धिलेखयास्वादुशीतया ॥ १६ ॥ ततोपिद्विगुणाकारंधारयंत्योपवेष्टिताम् ॥ नानाजनालंकृतयाकुशाख्यद्वीपलेखया ॥ १७ ॥ ततोपिद्विगुणाकारंधारयंत्याचवेष्टिताम् ॥ दध्यब्धिलेखयानित्यसंतर्पितसुरौघया ॥ १८ ॥ ततःक्रौंचाभिधद्वीपलेखयैवंप्रमाणया ॥ वेष्टितांखातरचयानवांनृपपुरीमिव ॥ १९ ॥ ततोपिचघृतांभोधिलेखयैवंप्रमाणया ॥ ततोपिशाल्मलीद्वीपलेखयामलपूर्णया ॥ २० ॥

॥ ९ ॥ सरांस्येवप्रालेयकणिकाहिमबिंदवोयस्याम् ॥ धूलिकाःपरागाः ॥ कर्णिकापर्यंतस्थलेषुआसमंतात्मंडलांतस्थानिजनजालान्यलिमंडलानियस्याः ॥ १० ॥ ११ ॥ सुरैर्दिक्पालैरष्टभिःसहिताअंभोधयःषट्पदायस्याम् ॥ पूर्वमेकस्यैवसमुद्रस्यदिक्चतुष्टयोपाधिभिश्चतुःसमुद्रभ्रमरकल्पनाइहतुअष्टदिक्पालोपाधिभिर्दलेष्वष्टसमुद्रभ्रमरकल्पनेतिभेदः ॥ नवभिर्भद्राश्वकेतुमालादिभिः ॥ १२ ॥ १३ ॥ द्वीपाद्विगुणमित्यादिपौराणिकप्रक्रियाविरुद्धोक्तेर्ब्रह्मांडांतरविषयत्वान्मायिकत्वेतात्पर्याच्चादोषत्वंबोध्यम ॥ प्रकोष्ठंकरमूलम् ॥ कंबुनाशंखवलयेन ॥ १४ ॥ वलयाकृतिदेहंसंस्थानंदधत्याशाकाख्यद्वीपलेखयाजगद्भूतयापद्मलतयेवव्याप्ताम् ॥ १५ ॥ १६ ॥ १७ ॥ १८ ॥ एवंप्रमाणयापूर्ववद्विगुणप्रमाणयाखातस्यरचनंखातरचापरिखातया ॥ भिदादित्वकल्पनादङ् ॥ १९ ॥ मलपूर्णयासुरांभोधिवेष्टितत्वात्पापपूर्णया ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २१ ॥ इक्ष्वब्धिरिक्षुरसाब्धिः ॥ गोमेदकामणिविशेषास्तत्प्रधानोद्वीपःपरिशेषात्प्लक्षद्वीपः ॥ २२ ॥ २३ ॥ निखातोनिम्नदेशस्तद्वलयेन ॥ श्वभ्रंगर्त्तस्तस्यसंभारःसमूहस्त द्रूपिणा ॥ पुराणेषुपूर्वद्विगुणविस्तारयाकांचनभूम्येत्युक्तंतद्विरोधपरिहारःप्रागुक्तरीत्याबोध्यः ॥ तथाचोक्तंश्रीधराचार्यैः ॥ क्वचित्क्वचित्पुराणादौविरोधोयदिलक्ष्यते ॥ कल्प भेदादिभिस्तत्रव्यवस्थासद्भिरिष्यतइति ॥ २४ ॥ २५ ॥ आव्योमसूर्ध्वव्योममर्यादासुसंनिहितेनोक्तश्वभ्रसंभारेणभीषयाभीषणया ॥ अर्द्धेपरपार्श्वेउन्म्लानाऊर्ध्वभागेसूर्य प्रकाशसंभेदादवतमसभावापत्याम्लानप्रायातमोरूपवलयाकारेणलग्नानीलोत्पलस्रग्यस्यास्तया ॥ २६ ॥ नानाविधमाणिक्यशिखरसरोरुहकह्लारकुमुदान्येवान्नानियस्या

ततःसुरामहांभोधिलेखयापुष्पशुभ्रया॥ शेषस्यदेहलतयाहरिमूर्त्तिमिवावृताम् ॥ २१ ॥ ततोगोमेदकद्वीपलेखयैवंप्रमाणया ॥ इक्ष्व ब्धिलेखयाप्येवंहिमवत्सानुशुद्धया॥ २२ ॥ ततोपिपुष्करद्वीपलेखयाद्विगुणस्थया॥ अंतेस्वादूदकांभोधिलेखयैवंप्रमाणया ॥ २३ ॥ ततोदशगुणेनाथपातालतलगामिना॥ निखातवलयेनोच्चैःश्वभ्रसंभाररूपिणा॥२४॥ पातालगामिमार्गेणवलितांभयदात्मना॥ एत स्मात्खलुसर्वस्मात्ततोदशगुणोच्चया॥२५॥ आव्योमसुचतुर्दिक्षुश्वभ्रसंभारभीषया॥ अर्द्धोन्म्लानतमोरूपलग्ननीलोत्पलस्रजा॥२६ नानामाणिक्यशिखरकह्लारकुमुदान्नया॥ लोकालोकाचलोत्तालविपुलोद्दाममालया॥ २७॥ वलितांत्रिजगल्लक्ष्मीधम्मिल्लवलनामि व ॥ एतस्मादेवसर्वस्मात्ततोदशगुणात्मना॥ २८॥ अज्ञातभूतसंचारनाम्नारण्येनमालिताम् ॥ एतस्मादेवसर्वस्मात्ततोदशगुणात्म ना॥ २९ ॥ नभसेवचतुर्दिक्कंव्याप्तामतुलवारिणा॥ एतस्मादेवसर्वस्मात्ततोदशगुणात्मना ॥ ३० ॥ मेर्वादिद्रावणोल्केनज्वालाजाले नमालिताम् ॥ एतस्मादथसर्वस्मात्ततोदशगुणात्मना॥३१॥ मेर्वाद्यचलसंघातंनयतात्तृणपांसुवत् ॥ वहतार्द्रींद्रविस्फोटकारिणाजव हारिणा॥ ३२ ॥ निःशून्यत्वादशब्देनमरुतापरितोवृतम् ॥ एतस्मादथसर्वस्मात्ततोदशगुणात्मना ॥ ३३ ॥ परितोवलितंव्योम्नानिःशू न्यैनैकरूपिणा॥ अथयोजनकोटीनांशतेनघनरूपिणा॥ व्याप्तंब्रह्मांडकुड्येनहैमेनापिद्विपर्वणा ॥ ३४॥ इतिजलधिमहाद्रिलोकपाल त्रिदशपुरांबरभूतलैःपरीतम्॥ जगदुदरमवेक्ष्यमानुषीद्राग्भुविनिजमंदिरकोटरंददर्श ॥ ३५ ॥ ॥इत्यार्षेवासि॰वा॰दे॰मो॰उत्प॰ ली॰भूलोकवर्णनंनामपंचविंशःसर्गः॥ २५॥ ॥ ७॥

स्तयालोकालोकाचललक्षणयाऔन्नत्येनोत्ताल यापरिणाहेनविपुलयागुणैश्चोद्दामयामालयावलितामिवेत्युत्तरेणान्वयः ॥ २७ ॥ धम्मिल्लाःसंयताःकचाः ॥ २८ ॥ सर्वपुराणानुरोधात्पाठक्रमादार्थक्रमस्यबलीयस्त्वाच्चअथ योजनकोटीनामित्यंतेवक्ष्यमाणाब्रह्मांडकुड्यव्याप्तिरत्रैवबोध्या ॥ तद्बहिर्जलाद्यावरणान्याह ॥ एतस्मादेवेत्यादिना ॥ २९ ॥ ३० ॥ मेर्वादेर्द्रावणंद्रवीकरणंप्रलयइति यावत् ॥ तत्रोल्केनोत्कंठिनेनेवमालितंब्रह्मांडमितिविशेष्यमत्राग्रेप्यध्याहार्यम् ॥ ३१ ॥ नयतेत्यादिसामर्थ्योक्तिः ॥ भूतांतराणांजवहारिणा ॥ ३२ ॥ नितरांमूर्तप्रतिघातशू न्यत्वादशब्देन ॥ ३३ ॥ ३४ ॥ मानुषीलीला ॥ निजमंदिरकोटरंस्वमंदिराधारंगिरियामावकाशम् ॥ ३५ ॥ ॥ इतिश्रीवासिष्ठ॰महारा॰तात्प॰उ॰पंचविंशःसर्गः ॥ २५॥ ॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वगृहेस्वजनान्दृष्ट्वाश्रुत्वैषांपरिदेवितम् ॥ अनुग्रहोत्रलीलायाजगत्तत्त्वंचवर्ण्यते ॥ १ ॥ वक्ष्यमाणकथासंबंधप्रतिपत्तयेउक्तमनुवदति ॥ इतीति ॥ तस्मात्पद्मभूपालाधारब्रह्मांडमंडलादन्यद्ब्रह्मांडमंडलंइतिवर्णितप्रकारमनुप्राप्ते ॥ १ ॥ स्वंसद्मगृहम् ॥ २ ॥ चिंतयाविधुराविह्वलादास्योयत्र ॥ अश्रुधूल्यादिमलिनत्वात्परिहृतभूषणतिलकत्वाद्विध्वस्तप्रायाणिजनवदनानियस्मिन् ॥ ३ ॥ अगस्त्येनआत्तंपीतम् ॥ ग्रीष्मेणदग्धंशुष्कम् ॥ ४ ॥ स्नेहस्तैलादिर्दशावर्त्तिः ॥ आलोक्यतेयेनतदालोकनंचक्षुस्तस्यभेदनंदुर्दर्शमिति यावत् ॥ ५ ॥ करुणाशोकोद्दीपकोभावविशेषोरसोवातयाआकुलानिरस्तेतियावत् ॥ वक्त्रकांतिर्यस्य ॥ अतएवासन्नमृत्युिर्विवस्थितम् ॥ संशीर्णानिजीर्णतरुपर्णानियस्मिंस्तथाविधंवनमुपमानंयस्य ॥ दृष्टिव्यपायोऽनादृष्टिः ॥ ६ ॥ सालीला ॥ ७ ॥ ८ ॥ ९ ॥ आपादेत्याद्यष्टश्लोक्यांगनाद्वयंवर्णयति ॥ आपादग्रहणमामस्तकत्वस्याप्युपलक्षण

॥ श्रीवसिष्ठउवाच ॥ ॥ इतिनेवरवर्णिन्यौततोब्रह्मांडमंडलात् ॥ निर्गत्यान्यदनुप्राप्तेयत्रतद्ब्राह्मणास्पदम् ॥ १ ॥ ततोददृशतुःसद्मस्वमेवंसिद्धयोषितौ ॥ अदृश्येएवलोकस्यमंडपंब्राह्मणास्पदम् ॥ २ ॥ चिंताविधुरदासीकंबाष्पक्लिन्नांगनामुखम् ॥ विध्वस्तप्रायवदनंशीर्णपर्णांबुजोपमम् ॥ ३ ॥ नष्टोत्सवपुरप्रायमगस्त्यात्तमिवार्णवम् ॥ ग्रीष्मदग्धमिवोद्यानंविद्युद्दग्धमिवद्रुमम् ॥ ४ ॥ वातच्छिन्नमिवांभोदंहिमदग्धमिवांबुजम् ॥ अल्पस्नेहदशंदीपमिवालोकनभेदनम् ॥ ५ ॥ आसन्नमृत्युकरुणाकुलवक्त्रकांतिसंशीर्णजीर्णतरुपर्णवनोपमानम् ॥ दृष्टिव्यपायपरिधूसरदेशरूक्षंजातंगृहेश्वरवियोगहतंगृहंतत् ॥ ६ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथसानिर्मलज्ञानचिराभ्यासेनसुंदरी ॥ संपन्नासत्यसंकल्पासत्यकामाचदेववत् ॥ ७ ॥ चिंतयामाससमामेतेदेवींचेमांस्वबंधवः ॥ पश्यंतुतावत्सामान्यललनारूपधारणीम् ॥ ८ ॥ ततोगृहजनस्तत्रसददर्शांगनाद्वयम् ॥ लक्ष्मीगौर्योर्युगमिवसमुद्भासितमंदिरम् ॥ ९ ॥ आपादविविधाम्लानमालावलनसुंदरम् ॥ वसंतलक्ष्म्योर्युगलमिवामोदितकाननम् ॥ १० ॥ सर्वौषधिवनग्रामंपूरयंत्यौरसायनैः ॥ शीतलाह्लादसुखदंचंद्रद्वयमिवोदितम् ॥ ११ ॥ लंबालकलतालोललोचनालिविलोकनैः ॥ किरत्कुवलयोन्मिश्रमालतीकुसुमोत्करान् ॥ १२ ॥ द्रुतहेमरसापूरसरित्सरणहारिणा ॥ देहप्रभाप्रवाहेणकनकीकृतकाननम् ॥ १३ ॥ सहजायावपुर्लक्ष्म्यालीलादोलाविलासिनः ॥ तेएतेचतरंगाढ्यानिजलावण्यवारिधेः ॥ ॥ १४ ॥ विलोलबाहुलतिकायुगेनारुणपाणिना ॥ किरन्नवनवंहैमंकल्पवृक्षलतावनम् ॥ १५ ॥

म् ॥ विविधानामम्लानानांमालानांवलनैर्व्यापनैः ॥ १० ॥ ओषध्यःफलपाकांताः ॥ पूरयंत्यौपूरयत् ॥ नपुंसकैकविशेष्योपक्रमाल्लिंगवचनव्यत्ययश्छांदसः ॥ रसायनैश्चंद्रिकामृतैः ॥ ११ ॥ अलकलतानांसंनिधावालोलत्वादलित्वेनपरिणतैर्लोचनैरितियावत् ॥ कटाक्षाणांनीलोन्मिश्रधवलच्छवित्वात्कुवलयोन्मिश्रमालतीकुसुमोच्चयत्वंनोत्प्रेक्षा ॥ १२ ॥ द्रवीकृतस्वर्णरसप्रवाहायाःसरितःसरणंवेगइवमनोहारिणा ॥ १३ ॥ वपुःकांतिलक्षणायालक्ष्म्याःलीलार्थंकृप्तादोलाःप्रेंखोलिकाइवविलासिनोविलसनशीलायेनिजलावण्यस्यस्वभावसुंदरब्रह्मात्मकस्यस्वसौंदर्यलक्षणस्यवावारिधेस्तरंगाढ्यास्तरंगश्रेष्ठाःप्रसिद्धास्तेएतेअंगनेएवेत्युत्प्रेक्षयाप्रत्यभिज्ञायमानमितिशेषः ॥ १४ ॥ प्रत्येकंबाहुलतिकयोररुणपाण्योश्चविलोलत्वेनविशेषणात्प्रतिक्षणंविन्यासभेदेनसमुदायेकल्पितवनसंस्थानभेदान्नवान्नवंकल्पवृक्षलतावनंकिरद्विक्षिपत्कल्पयदितियावत् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमृदितान्यम्लानानिचयानिपुष्पाणिकोमलपल्लवानिवातद्रूपैःपादैःपल्लवकोमलैरितिपाठेनुस्पष्टम्॥अजसादृश्यस्यपुष्पत्वरूपकादेवलाभादपौनरुक्त्यायदलमालाभैरित्युक्तम् ॥ १६ ॥ शुचिशोचिषांपांडुरवर्णानाम् ॥ १७ ॥ ज्येष्ठशर्माख्योज्येष्ठपुत्रः ॥ १८ ॥ प्रालेयसीकरासारोहिमांबुकणवर्षः ॥ पद्मिन्याःपद्मवल्ल्याः ॥ १९ ॥ जयतमितिलोण्मध्यमपुरुषद्विवचनम् ॥ २० ॥ २१ ॥ दंपत्योर्व्यसनंविपत्तिस्तदात्मकम् ॥ २२ ॥ हेदेव्यौ ॥ कुलंसंततिः ॥ द्विजानांस्थितेर्मर्यादायाःस्तंभवदाधारभूतौ ॥ २३ ॥ अथेत्यचिरत्वलक्षणार्थम् ॥ शून्यंशून्यमिव ॥ २४ ॥ पूर्णःपूर्णजगत्पश्येत्कामुकःकामुकंजगत् ॥ आर्त्तोप्यार्त्तिमयंविश्वंलुब्धोलुब्धंस्वचित्तवदितिन्यायेनाह्नः ॥ पक्षिणइत्यादिना ॥ शून्ये

पादैरमृदिताम्लानपुष्पकोमलपल्लवैः॥ स्थलाजदलमालाभैरस्पृशद्भूतलंपुनः॥१६॥ तालीतमालखंडानांशुष्काणांशुचिशोचिषाम्॥ आलोकनाम्रतासेकैर्जनयद्बालपल्लवान्॥१७॥ नमोस्तुवनदेवीभ्यामित्युक्त्वाकुसुमांजलिम्॥ तत्याजज्येष्ठशर्माथसार्द्धंगृहजनेनसः॥१८॥ पपातपादयोर्गेहेतयोर्वैकुसुमांजलिः॥ प्रालेयसीकरासारःपद्मिन्याइवपद्मयोः॥१९॥ ॥ज्येष्ठशर्मादयऊचुः ॥जयतंवनदेव्यौनोदुःखनाशार्थमागते॥ प्रायःपरपरित्राणमेवकर्मनिजंसताम् ॥ २० ॥ इतितद्वचनांतेतेदेव्यावूचतुरादरात् ॥ अख्यातदुःखंयेनायंलक्ष्यतेदुःखितोजनः ॥ २१ ॥ ज्येष्ठशर्मादयस्तेतेदेव्यौप्रतियथाक्रमम् ॥ निजंतद्दुःखमाचख्युर्दंपतिव्यसनात्मकम्॥ २२ ॥ ज्येष्ठशर्मादयऊचुः॥ ॥ देव्यावभवतांस्निग्धाविहब्राह्मणदंपती ॥ सर्वातिथीकुलकरौस्तंभभूतौद्विजस्थितेः॥ २३ ॥ तावद्यगृहमुत्सृज्यसपुत्रपशुबांधवम्॥ स्वर्गंगतौनःपितरौतेनशून्यंजगत्त्रयम्॥ २४॥ पक्षिणोगृहमारुह्यविक्षिपंतःप्रतिक्षणम् ॥ देहंशून्येमृतंभक्त्याशोचंतिमधुरैःस्वरैः॥ २५॥ गुहागुरुगुरारावप्रलापलपनाकुलः॥ सरित्स्थूलाश्रुधाराभिःपरिरोदितिपर्वतः॥ २६ ॥ निर्जराक्रंदकारिण्योमुक्तांबरपयोधराः॥ तप्तनिःश्वासविध्वस्ताःपरंकार्श्यमितादिशः॥२७॥ क्षतविक्षतसर्वांगःकरुणाक्रंदकर्कशः॥ उपवासरतोग्रामोदीनोमृतिपरःस्थितः॥ २८॥ दिवसंप्रतिवृक्षाणामवश्यायाश्रुबिंदवः॥ गुच्छलोचनकोशेभ्यस्तापोष्णानिपतंत्यधः ॥ २९ ॥ प्रशांतजनसंचाराथ्याक्षारविधूसरा॥ विधवाविगतानंदासंशून्यहृदयास्थिता॥ ३० ॥ कोकिलालिप्रलापिन्योवृष्टिबाष्पहतालताः॥ उष्णोष्णश्वसनादेहंघ्नंतिपल्लवपाणिभिः॥ ३१ ॥

आकाशेस्वदेहंविक्षिपंतः ॥ २५ ॥ गुहारूपाणियानिगुरुगुरारावप्रलापानिलपनानिमुखानितैराकुलोव्याप्तोव्याकुलश्च ॥ २६ ॥ मुक्तांबरास्त्यक्ताकाशास्त्यक्तवस्त्राश्चपयोधरामेघास्तनाश्चयासाम् ॥ दिक्पक्षेबाष्पधूसरावायवोनिःश्वाससाम्यान्निःश्वासाः ॥ कार्श्यमपुष्टिम् ॥ २७ ॥ भूपरिलुठनाभिहननादिनाक्षतविक्षतसर्वांगः ॥ ग्रामशब्दोजनपरः ॥ मृतिपरोमर्त्तुकामः ॥ २८ ॥ दिवसंप्रतिलक्षणीकृत्य ॥ लक्षणेत्थंभूतेतिकर्मप्रवचनीययुक्तेद्वितीया ॥ तापआतपःशोकाग्निश्च ॥ २९ ॥ क्षारऊषस्तेनविधूसरारथ्याविधवेवविगतानंदास्थिता ॥ ३० ॥ कोकिलैरलिभिश्चप्रलापिन्यः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतधाकर्त्तुंचूर्णयितुमितियावत् ॥ श्वभ्रंगर्त्तस्तद्यत्येशिलातले ॥ शुभ्रेतिपाठेस्फटिकशिलातले ॥ ३२ ॥ मूकाःहर्षवार्त्ताविधुराः ॥ विलुलिताआशयाइवांतराभांडोपस्कारा दयोयेषु ॥ यतएवंरूपाअतोनिःशंकयाअसंशयंगतश्रीकाःसंतोगहनतामरण्यताम् ॥३३॥ स्वामोदोपिशोकार्त्तैर्घ्राणपीडकत्वात्पूतिरितिनिंद्यते ॥३४॥ चैत्रद्रुमान्विलासयंति तच्छीलाः ॥ चैत्येतिपाठेस्पष्टम् ॥ विलीयंतेविशीर्यंते ॥३५॥ कुल्याग्रहणंसरिन्मात्रोपलक्षणम् ॥३६॥ प्राग्जनव्यवहारादतिचापलमपिकलयंत्योवाप्यःसांप्रतमशंकःअसं भावितोमशकापातप्रयुक्तस्पंदोपियत्रतद्यथास्यात्तथाआत्मनिस्वस्वरूपेसमाधिनिष्ठाइवनिस्पंदानंदंस्थिताः ॥३७॥ तातग्रहणंमातुरप्युपलक्षणम् ॥३८॥ एवंशोकमुपवर्ण्यवि वक्षितमर्थमाहुस्तदिति ॥ तत्तस्माद्धेतोः ॥३९॥ पल्लवेनस्वसंतानमूलग्रंथिमिवअर्थाज्जलापायेइतिलभ्यते ॥४०॥४१॥४२॥ लीलायाःसत्यसंकल्पत्वात्पूर्वतनमातृशरीरेणैवपु

आत्मानंशतधाकर्त्तुंबृहच्छ्वभ्रशिलातले ॥ निर्झराःप्रपतंत्येतेतापतप्तशरीरकाः ॥ ३२ ॥ निःशंकयागतश्रीकामूकाविलुलिताशयाः ॥ अंधेनतमसापूर्णागृहागहनतांगताः ॥ ३३ ॥ उद्यानपुष्पखंडेभ्योरुदद्भ्योभ्रमरारवैः ॥ पूतिगंधोविनिर्यातिस्वामोदापरनामकः ॥ ३४ ॥ चैत्रद्रुमविलासिन्योविरसाःप्रतिवासरम् ॥ लताःकृशाविलीयंतेसंकुचद्गुच्छलोचनाः ॥ ३५ ॥ प्रक्षेप्तुमंबुधौदेहंप्रवृत्तागंतुमाकुलाः ॥ कुल्याःकलकलालोलंदोलयंत्यस्तनुंभुवि ॥३६॥ अशंकमशकापातस्पंदमप्यतिचापलम् ॥ कलयंत्यःस्थितावाप्योनिस्पंदानंदमात्मनि ॥ ३७॥ गायत्किन्नरगंधर्वविद्याधरसुरांगनम् ॥ नूनमघनभोजातमस्मत्ताताभ्यलंकृतम् ॥३८॥ तद्देव्यौक्रियतांतावदस्माकंशोकनाशनम् ॥ महतांदर्शनंनामनकदाचननिष्फलम् ॥३९॥इत्युक्तवंतंसापुत्रंमूर्ध्निपस्पर्शपाणिना ॥ पल्लवेनानतानम्रंमूलग्रंथिमिवाब्जिनी ॥४०॥ तस्याःस्पर्शेनतेनासौदुःखदौर्भाग्यसंकटम् ॥ जहौप्रावृड्घनासंगाद्ग्रीष्मतापमिवाचलः ॥४१॥ सर्वोगृहजनःसोथतयोर्देव्योर्विलोकनात् ॥ लक्ष्मीवान्दुःखनिर्मुक्तोबभूवाम्रतपोयथा ॥ ४२ ॥ ॥ श्रीरामउवाच ॥ ॥ तयास्वलीलयामात्रापुत्रस्यज्येष्ठशर्मणः ॥ कस्मान्नदर्शनंदत्तंमोहंतावन्निराकुरु ॥४३॥ ॥श्रीवसिष्ठउवाच॥ ॥ बुद्धःपृथ्व्यादिबोधेनयेनपृथ्व्यादिसंघकः ॥ तस्यपिंडात्मतांधत्तेव्योमैवान्यस्यकेवलम् ॥ ४४ ॥ असदेवांगसदिवभातिपृथ्व्यादिवेदनात् ॥ यथाबालस्यवेतालोनाभातितदवेदनात् ॥ ४५ ॥ यथापृथ्व्यादिनाभातमपृथ्व्यादिभवेत्क्षणात् ॥ स्वप्नेस्वप्नपरिज्ञानात्तथाजाग्रत्यपिस्फुटम् ॥ ४६ ॥

त्रस्याश्वासनायदर्शनंकुतोनदत्तमितिरामःशंकते ॥ तयेति ॥ मात्रामातृशरीरेण ॥ मोहमिति ॥ मोहापगमेतत्कार्यसंशयःस्वयमेवगमिष्यतीत्याशयः ॥ ४३ ॥ लीलायाःपुत्रगेहागमनस्यप्रपंचमिथ्यात्वपरीक्षार्थत्वेनपुत्रस्नेहप्रयुक्त्वाभावात्पुत्रादिप्रपंचेमिथ्यात्वनिश्चयेचपुत्रस्नेहाभावात्तत्त्वज्ञानेनमूलबाधोत्तरंवर्त्तमानशरीरातिरिक्तभौतिकशरीरधारणायोगाच्चनपूर्वशरीरधारणमितिसोपपत्तिकमुत्तरयितुंवसिष्ठउपक्रमते ॥ बुद्धइत्यादिना ॥ येनाज्ञेनमिथ्यापृथ्व्यादिसंघकोदेहःसत्यपृथ्व्यादिबोधेनबुद्धस्तस्यवस्तुतःकेवलमद्वितीयंचिद्व्योमैवभ्रांत्यापिंडात्मतांधत्ते ॥ अन्यस्यतत्त्वज्ञस्यतुतद्धेत्वज्ञानाभावात्केवलमद्वितीयंचिद्व्योमैवावतिष्ठतइत्यर्थः ॥४४॥ बालस्यभ्रांत्यानापुरुषस्तद्वेदनाद्वेतालोभाति ॥ ४५ ॥ स्वप्नपरिज्ञानात्स्वप्नत्वपरिज्ञानात् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्षुब्धपित्तादिधातूनांविक्षिप्तानामितियावत् ॥ द्वाराभासस्फटिकादिकुड्येषु ॥ ४७ ॥ नगरंशून्यमूर्वीसमभुवंखातंबुद्ध्यते ॥ पादसंवाहनाद्यर्थक्रियाम् ॥ ४८ ॥ परमार्थवस्तुय थावोधंविवर्त्तनइतिसर्वानुभवसिद्धमित्याह ॥ खमित्यादिना ॥ अनुभूयतेकैश्चिदितिशेषः ॥ ४९ ॥ ५० ॥ त्रस्ताभीताः ॥ क्षीबामत्ताः ॥ अर्द्धनिद्राअर्धजागरूकाः ॥ अनु भवंतितत्प्रयुक्तंपलायनादिकार्यमित्यर्थः ॥ ५१ ॥ एकंनियतम् ॥ ५२ ॥ कथंबुद्धातदाह ॥ आकाशमेवेति ॥ भ्रांतितयामिथ्याप्रपंचतया ॥ ५३ ॥ चतुर्भिःकिंवृत्तैःप्रकारप्र कारिकालनिमित्तान्याक्षिप्यंते ॥५४॥५५॥ ननुपुत्रस्नेहाद्यभावेलीलयाकुतःशिरसिहस्तोदत्तस्तत्राह ॥ हस्तइति ॥ हस्तःशिरसिदत्तइतियत्तन्नपुत्रस्नेहफलंकिंतुतस्यज्येष्ठश

पृथ्व्यादिखतयाबुद्धंखमित्येवानुभूयते ॥ तथाहिक्षुब्धधातूनांकुड्येषुखइवोद्यमः ॥४७॥ स्वप्नेनगरमूर्वीवाशून्यंखातंचबुद्ध्यते ॥ स्वप्नांग नाचकुरुतेशून्याप्यर्थक्रियांनृणाम् ॥४८॥ खंपृथ्व्यादितयाबुद्धंपृथ्व्यादिभवतिक्षणात् ॥ मूर्छायांपरलोकोपिप्रत्यक्षमनुभूयते ॥४९॥ वालोव्योमैववेतालंम्रियमाणोंबरेवनम् ॥ केशोंड्रकंखमन्यस्तुखमन्योवेत्तिमौक्तिकम् ॥ ५० ॥ त्रस्तक्षीबार्द्धनिद्राश्चनौयानाश्चसदैव खे ॥ वेतालवनवृक्षादिपश्यंत्यनुभवंतिच ॥ ५१ ॥ यथाभावितमेतेषांपदार्थानामतोवपुः ॥ अभ्यासजनितंभातिनास्त्येकंपरमार्थतः ॥ ५२ ॥ लीलयातुयथावस्तुबुद्धापृथ्व्यादिनास्तिता ॥ आकाशमेवसंविन्याभातिभ्रांतितयोदितम् ॥ ५३ ॥ ब्रह्मात्मैकचिदाकाशमात्र बोधवतोमुनेः ॥ पुत्रमित्रकलत्राणिकथंकानिकदाकुतः ॥५४॥ दृश्यमादावनुत्पन्नंयच्चभात्यजमेवतत् ॥ सम्यग्ज्ञानवतामेवंरागद्वेषदृ शौकुतः ॥ ५५ ॥ हस्तःशिरसियद्दत्तोलीलयाज्येष्ठशर्मणः ॥ तत्प्रभावस्थितारंभसंबोधायाश्रितेःफलम् ॥ ५६ ॥ बोधोहिचेततियथैवत थाशुभातिसूक्ष्मस्तुखादपितथातितरांविशुद्धः ॥ सर्वत्रराघवसएवपदार्थजालंस्वप्नेषुकल्पितपुरेष्वनुभूतमेतत् ॥ ५७ ॥ ॥ इ० वासि० वा० दे० मो० उ० ली० सिद्धदर्शनहेतुकथनंनामषड्विंशःसर्गः ॥ २६ ॥ ॥ छ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ तस्मिन्गिरितटे ग्रामेतस्यमंडपकोटरे ॥ अंतर्द्धिमाश्वाययतुस्तत्रस्थेएवतेस्त्रियौ[1] ॥ १ ॥ अस्माकंवनदेवीभ्यांप्रसादःकृतइत्यथ ॥ शांतदुःखेगृहजनेस्व व्यापारपरेस्थिते ॥ २ ॥ मंडपाकाशसंलीनांलीलामाहसरस्वती ॥ व्योमरूपाव्योमरूपांस्मयात्तूष्णीमिवस्थिताम्[2] ॥ ३ ॥

र्मणःप्रभावायभाविशुभार्थस्थितौआरंभसंबोधौप्राक्तनसुकृतोपक्रमतत्फलप्रदेश्वरबोधौयस्यांतथाविधायाःसर्वाधिष्ठानचितेरेवविवर्त्तरूपंफलमित्यर्थः ॥५६॥ सर्गसारार्थम नुवदन्नुपसंहरति ॥ बोधइति ॥ यथैवप्राक्चेततिचिंतयति ॥५७॥ ॥इतिवासिष्ठ० उत्पत्ति० षड्विंशःसर्गः ॥२६॥ ॥छ॥ ॥ लीलात्रविस्मिताभूयोभर्त्तृदर्शनलालसा ॥ ज्ञप्त्या प्रबोधितास्मृत्वास्वजन्मान्याहभूरिशः ॥१॥ तस्यद्विजसद्मनोमंडपकोटरेमंडपाकाशे ॥ तत्रस्थेज्येष्ठशर्मादीनांपुरोदेशस्थेएवांतर्द्धिमंतर्द्धानंआययतुःप्रापतुः ॥ १ ॥ स्वव्यापारःस्व गृहकृत्यंतत्परे ॥२॥ संलीनांइतरजनदृष्ट्याअंतर्हिताम् ॥ तर्हितेकिंवस्तुतःसदेहेनेत्याह ॥ व्योमरूपेति ॥ शून्यात्मकसंकल्पशरीरातादृशीमितियावत् ॥ स्मयाद्विस्मयात् ॥३॥

१ अंतर्धिमापतुर्दृष्टातततस्तेसिद्धयोषितावित्यपिपाठः ॥ दृष्टेत्यस्यभर्तुःस्थलादिकमितिशेषः ॥ २ तूष्णींव्यवस्थितामितिपाठः

CC-0. In Public Domain. Digitization by eGangotri

ननुअन्योन्यसांकल्पिकस्यान्योन्यादृश्यत्वात्कथंतयोःसंवादोपपत्तिरितिरामस्यशंकांलिंगैरुपलक्ष्यस्वयमेववसिष्ठःसमाधत्ते ॥ संकल्पेति ॥ लोकेयेषांदेवतानुग्रहादिनाउषानिरुद्धयोरिवतुल्यएवपरस्परसंवादिसंकल्पःस्वप्नोवाजातस्तेषांतत्रमिथःसंकथनंयथाऔत्तरकालिकीमर्थक्रियांधत्ततयोर्ज्ञप्तिलीलयोःसंकथासंवादोपितथेत्यर्थः ॥ ४ ॥ अधिभूतंपृथ्व्यादिअध्यात्मंनाडीप्राणाद्युपलक्षितशरीरमपिकृतेविना ॥ ५ ॥ इत्थमुक्ताशंकांसमाधायप्रस्तुतकथामनुसरति ॥ श्रीसरस्वत्युवाचेति ॥ ६ ॥ किंकारणंनदृष्टेत्यर्थः ॥ ७ ॥ अभ्यासेनविनाअभ्यासाभावादित्यर्थः ॥ द्वैतनिश्चयःप्रपंचसत्यतानिश्चयः ॥ ८ ॥ नयातोभेदकाऽविद्योच्छेदेननप्राप्तः ॥ अद्वैतकर्मभिःसत्यसंकल्पत्वाद्यर्थक्रियाभिः ॥ छायायाअंगंगुणःशैत्यंतदनुभवः छायोपविष्टांगस्यपुंसोयोनुभवःसवा ॥ ९ ॥ लीलादेहएवाहमस्मीतिभावोदृढसंस्कारः ॥ १० ॥ अद्यसत्यसंकल्पासंपन्नासि ॥ सुतो

संकल्पस्वप्नयोर्येषांयत्रसंकथनंमिथः ॥ यथेहार्थक्रियांधत्तेतयोःसासंकथातथा ॥ ४ ॥ पृथ्व्यादिनाडीप्राणादिकृतेप्यभ्युदितातयोः ॥ सासंकथनसंवित्तिःस्वप्नसंकल्पयोरिव ॥ ५ ॥ ॥ श्रीसरस्वत्युवाच ॥ ॥ ज्ञेयंज्ञातमशेषेणदृष्टादृष्टार्थसंविदः ॥ ईदृशीयंब्रह्मसत्ताकिमन्यद्दपृच्छसि ॥ ६ ॥ ॥ लीलोवाच ॥ ॥ मृतस्यभर्तुर्ज्जीवोसौयत्रराज्यंकरोतिमे ॥ तत्राहंकिंनतैर्दृष्टादृष्टास्मीहसुतेनकिम् ॥ ७ ॥ ॥ श्रीसरस्वत्युवाच ॥ ॥ अभ्यासेनविनावत्सेतदातेद्वैतनिश्चयः ॥ नूनमस्तंगतोनाभून्निःशेषंवरवर्णिनि ॥ ८ ॥ अद्वैतंयोनयातोसौकथमद्वैतकर्मभिः ॥ युज्यतेतापसंस्थस्यच्छायांगानुभवःकुतः ॥ ९ ॥ लीलास्मीतिविनाभ्यासंतवनास्तंगतोभवत् ॥ यदाभावस्तदासत्यसंकल्पत्वमभून्नते ॥ १० ॥ अद्यासिसत्यसंकल्पासंपन्नातेनमांसुतः ॥ संपश्यत्वित्यभिमतंफलितंतवसुंदरि ॥ ११ ॥ इदानींतस्यभर्त्तुस्त्वंसमीपंयदिगच्छसि ॥ तत्तेनव्यवहारस्तेपूर्ववत्संप्रवर्त्तते ॥ १२ ॥ ॥ लीलोवाच ॥ ॥ इहैवमंदिराकाशेपतिर्विप्रोममाभवत् ॥ इहैवसन्मृतोभूत्वासंपन्नोवसुधाधिपः ॥ १३ ॥ इहैवतस्यसंसारेतस्मिन्भूमंडलांतरे ॥ राजधानीपुरेतस्मिन्पुरंध्र्यस्मिव्यवस्थिता ॥ १४ ॥ इहैवांतःपुरेतस्मिन्सन्मृतोममभूपतिः ॥ इहैवांतःपुराकाशेतस्मिन्नेवपुरेनृपः ॥ १५ ॥ संपन्नोवसुधापीठेनानाजनपदेश्वरः ॥ सर्वार्जवजवीभावइहैवैवंव्यवस्थितः ॥ १६ ॥ अस्मिन्नेवगृहाकाशेसर्वाब्रह्मांडभूमयः ॥ स्थिताःसमुद्गकेमन्येयथांतःसर्षपोत्कराः ॥ १७ ॥ सदाऽदूरमहंमन्येतद्भर्तुर्ममंडलम् ॥ क्वचित्पार्श्वेस्थितमिहयथापश्यामितत्कुरु ॥ १८ ॥

मांपश्यत्वित्यभिमतमीप्सितम् ॥ ११ ॥ १२ ॥ एवंप्रत्यक्षमुपदर्शनेनोपदेशेनचप्रज्ञोक्तार्थैनिवृत्तासंभवाशंकामंडपाकाशांतरेवभर्तृपरलोकद्वयस्यब्रह्मांडसहस्राणांचसंभवमनुवदंतीलीलापुनःस्वभर्तृमंडलदर्शनंप्रार्थयते ॥ इहेत्यादिना ॥ १३ ॥ पुरंध्रीराजमहिषी ॥ व्यवस्थितावसुधाधिपस्येत्यनुषज्यते ॥ १४ ॥ १५ ॥ सर्ववस्तूनांआर्जवमकापट्यंकूटस्थंपारमार्थिकंब्रह्मतस्मिन्कल्पितोजवीभावोमायिकचलनादिविकारःएवंउक्तदृष्टश्रुतलक्षणइहैवमंडपाकाशेव्यवस्थितः ॥ १६ ॥ समुद्गकेसंपुटके ॥ १७ ॥ अदूरमतिसंनिहितम् ॥ १८ ॥

१ द्रष्टव्य्न २ पुरतोस्मिन्व्यवस्थितःइतिमूलपाठो (व्यवस्थितःवसुधाधिपइत्यनुषज्यते) इतिटीकाचपुरातनपुस्तके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेवलंसांप्रतिकमेवैतन्मंडपाकाशेअस्तिकिंत्वतीतानागतंसर्वमपितत्रतेऽनेकजन्मसंबंधिष्वनेकभर्तृशब्दवाच्यशरीरेषुसर्वेषांदर्शनायोगात्संनिहितेषुत्रिषुकतममंडलंप्रदर्श्यंता
मित्याशयेनाह ॥ भूतलेति ॥ शतशःसंमताःशतसंमताः ॥ १९ ॥ नेदीयसामंतिकतमानांमध्ये ॥ इष्ठनोविषयेईयसुनूछांदसः ॥ २० ॥ पतितःप्रविष्टः ॥ २१ ॥ भो
गलक्षणानांकल्लोलानांकलनाभिर्विकलोविक्षिप्तः ॥ ततएवमलयुक्ताचेतनाबुद्धिर्यस्य ॥ अतएतदंतःप्रतिफलिताचिद्वृत्तिरर्पितजाड्येनैवजर्जराशिथिलप्रायायस्य ॥ २२ ॥
॥ २३ ॥ अवशतामस्वतंत्रताम् ॥ २४ ॥ वातसमूहोवात्या ॥ पाशादिभ्योयः ॥ २५ ॥ तताविस्तृताः ॥ २६ ॥ इहास्मिन्मंडपाकाशे ॥ अधिष्ठानचिद्दृष्ट्यापार्श्वेअंतःसन्नि

श्रीदेव्युवाच ॥ ॥ भूतलारुंधतिसुतेभर्त्तारस्तवसंप्रति ॥ त्रयोनामाथवाभूवन्बहवःशतसंमताः ॥ १९ ॥ नेदीयसांत्रयाणांतुद्विजस्ते भस्मतांगतः ॥ राजामात्यांतरगतःसंस्थितोंतःपुरेशवः ॥ २० ॥ संसारमंडलेह्यस्मिंस्तृतीयोवसुधाधिपः ॥ महासंसारजलधिपतितो भ्रममागतः ॥ २१ ॥ भोगकल्लोलकलनाविकलोमलचेतनः ॥ जाड्यजर्जरचिद्वृत्तिःसंसारांभोधिकच्छपः ॥ २२ ॥ चित्राणिराजकार्याणिकुर्वन्नप्याकुलान्यपि ॥ सुप्तःस्थितोजडतयानजागर्त्तिभवभ्रमे ॥ २३ ॥ ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी ॥ इत्यनर्थमहारज्ज्वावलितोवशतांगतः ॥ २४ ॥ तत्कस्यवदभर्त्तुस्त्वांसमीपंवरवर्णिनि ॥ वात्यावनांतरंगंधलेखामिववनान्नये ॥ २५ ॥ अन्यएवहि संसारःसोन्योब्रह्मांडमंडपः ॥ अन्याएवततावत्तेव्यवहारपरंपराः ॥ २६ ॥ संसारमंडलानीहतानिपार्श्वेस्थितान्यपि ॥ दूरंयोजनकोटीनांकोटयस्तेष्विहांतरम् ॥ २७ ॥ आकाशमात्रमेतेषामिदंपश्यवपुःपुनः ॥ मेरुमंदरकोटीनांकोटयस्तेष्ववस्थिताः ॥ २८ ॥ परमाणौपरमाणौसर्गवर्गानिरर्गलम् ॥ महाचितेःस्फुरंत्यर्करुचीवत्रसरेणवः ॥ २९ ॥ महारंभगुरूण्येवमपिब्रह्मांडकानिहि ॥ तुलयाधानकामात्रमपितानिभवंतिनो ॥ ३० ॥ नानारत्नामलोद्योतोवनवद्भातिखेयथा ॥ पृथ्व्यादिभूतरहिताजगच्चिद्भातिचिंतया ॥ ३१ ॥ कचतिज्ञप्तिरेवेदंजगदित्यादिनात्मनि ॥ नतुपृथ्व्यादिसंपन्नंसर्गादावेवकिंचन ॥ ३२ ॥ यथातरंगःसरसिभूत्वाभूत्वापुनर्भवेत् ॥ विचित्राकारकालांगदेशाज्ञप्तावलंतथा ॥ ३३ ॥

धावितियावत् ॥ अपियद्यपितथापि ॥ इहसांसारिकदृष्टौ ॥ दूरमंतरंव्यवधानमित्यर्थः ॥ २७ ॥ परमार्थदृष्ट्यात्वाह ॥ आकाशमात्रमिति ॥ एतेषांसंसारमंडलानांइदंपार
मार्थिकंवपुःस्वरूपंमंडपांतस्थचिदाकाशमात्रम् ॥ तेष्वेतेषु ॥ २८ ॥ अर्कस्यरुचिजालांतरस्थमरीचौ ॥ २९ ॥ एवंदर्शितब्रह्मांडवद्देवतानिमहद्भिर्द्वीपसमुद्रभुवनाद्यारंभैर्गुरू
णिमहांत्यपिचिद्दृष्टितुलयाद्दृष्टानिधानकावटबीजानितावन्मात्रमपिनभवंतीत्यर्थः ॥३०॥ वस्तुतःपृथ्व्यादिभेदरहितैवचिज्जगद्भाति ॥ चिंतयाआविद्यकदृढवासनया ॥ ३१ ॥
भ्रांत्याजगद्भानेपिनवस्तुनिकदाचिदपिकिंचित्संपन्नमित्याह ॥ कचतीति ॥ ३२ ॥ विचित्राकाराःकालाःकालांगानिदिनराज्यादीनिब्रह्मांडाभुवनादिदेशाश्चज्ञप्तौमहाचितिभू
त्वाभूत्वाभवंतीत्यर्थः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंलीलाजन्मराजसंरजःकार्यंदुःखसंतापबाहुल्यात्मध्येतिष्ठंतिराजसाइतिमर्त्यजन्मनांराजसत्वस्मेनेश्वेत्यर्थः ॥ ३४ ॥ ब्रह्मणोहिरण्यगर्भादितत्कल्पादावंतः ॥ करणोपाध्युत्पत्त्याप्रतिबिंबतयातत्रावतीर्णायाः ॥ पश्यामीवस्फुटंस्मरामीतियावत् ॥ ३५ ॥ लोकांतरंविद्याधरलोकस्तदेवाब्जम् ॥ ३६ ॥ मानुषीभूत्वास्थिता ॥ ततःपन्नगेश्वरकामिनी अभवमित्यनुषंगः ॥ ३७ ॥ ३८ ॥ वासनयेतिपाठेस्पष्टम् ॥ वासतयेतिपाठेनुवनेवासोयस्यास्तद्भावेनमुग्धामूढाधर्ममर्यादानभिज्ञेतियावत् ॥ अतएवोद्धताडुष्कर्मसंचयात् ॥ गुलुच्छशब्दस्तत्पुष्पगुच्छपरः ॥ वनविलासिनीलताजाताअर्थाद्गुलुच्छलतेतिगम्यते ॥ ३९ ॥ ४० ॥ अस्त्रीत्वंपुंस्त्वंतत्प्रयुक्तस्यराज्यादिभोगफलस्यदातॄणांप्राक्संचितकर्मणाम् ॥ समाःसंवत्सरान् ॥ ४१ ॥ कच्छाजलप्रायदेशाः ॥ राजदुष्कृतदोषःपरस्वापहारादिः ॥ ४२ ॥ सुराष्ट्रादेशविशेषाः ॥ गोत्वंकृतंगोजन्मानुभूतमितियावत् ॥ दुर्जनादुष्टाअज्ञाबा

लीलोवाच ॥ ॥ एवमेतज्जगन्मातर्मयास्मृतमिहाधुना ॥ ममेदंराजसंजन्मनतमोनचसात्विकम् ॥ ३४ ॥ ब्रह्मणस्त्ववतीर्णायाअष्टौ जन्मशतानिमे ॥ नानायोनीन्यतीतानिपश्यामीवाधुनापुनः ॥ ३५ ॥ संसारमंडलेदेविकस्मिंश्चिदभवंपुरा ॥ लोकांतराब्जभ्रमरीविद्याधरवरांगना ॥ ३६ ॥ दुर्वासनाकलुषितातततोहंमानुषीस्थिता ॥ संसारमंडलेन्यस्मिन्पन्नगेश्वरकामिनी ॥ ३७ ॥ कदंबकुंदजंबीरकरंजवनवासिनी ॥ पत्रांबरधराश्यामाशबर्यहमथाभवम् ॥ ३८ ॥ वनवासनयामुग्धासंपन्नाहमथोद्धता ॥ गुलुच्छनयनापत्रहस्तावनविलासिनी ॥ ३९ ॥ पुण्याश्रमलतासाहंमुनिसंगपवित्रिता ॥ वनाग्निदग्धातस्यैवकन्याभूवंमहामुनेः ॥ ४० ॥ अस्त्रीत्वफलदातॄणांकर्मणांपरिणामतः ॥ राजाहमभवंश्रीमान्सुराष्ट्रेषुसमाःशतम् ॥ ४१ ॥ तालीनांतलकच्छेषुराजदुष्कृतदोषतः ॥ नकुलीनववर्षाणिकुष्ठनष्टांगिकाभवम् ॥ ४२ ॥ वर्षाण्यष्टौसुराष्ट्रेषुदेविगोत्वंकृतंमया ॥ मोहादुर्जनदुष्टाज्ञबालगोपाललीलया ॥ ४३ ॥ विहंग्यावैरविन्यस्तावागुराविपिनावनौ ॥ क्लेशेनमहताच्छिन्नाअधमावासनाइव ॥ ४४ ॥ कर्णिकाक्रोडशय्यासुविश्रांतमलिनासह ॥ पद्मकुड्मलकोशेषुभुक्तकिंजल्कयारहः ॥ ४५ ॥ भ्रांतमुत्तुंगशृंगासुहरिण्याहारिनेत्रया ॥ वनस्थलीषुरम्यासुकिराताहतमर्मया ॥ ४६ ॥ दृष्टंनष्टासुदिक्ष्वब्धिकल्लोलैरुह्यमानया ॥ मत्स्यांबुकच्छपाच्छोडेमोघमाननताडनम् ॥ ४७ ॥

लाश्चयेगोपालास्तेषांताडनानुधावनादिलीलया ॥ ४३ ॥ विहंग्याविहंगीजन्मप्राप्तयामयानिष्कारणवैरादेवव्याधैर्विन्यस्तावागुराः ॥ अधमावासनाःद्वैतवासनाः ॥ ४४ ॥ कर्णिकाक्रोडाःकिंजल्कमध्यानितएवशय्याः ॥ कुड्मलामुकुलाः ॥ अलिनासहेत्यर्थादलिनीजन्मप्राप्तयेतिगम्यते ॥ ४५ ॥ हरिण्याम्मृग्यामया ॥ हारिनेत्रयारम्येक्षणया ॥ ४६ ॥ अब्धिकल्लोलैरुह्यमानयामत्स्यामया ॥ सूर्यतिष्यागस्त्यमत्स्यानांयउपधायाइतियलोपः ॥ दिक्षुनष्टासुदिग्भ्रमेसतिभ्रांत्याकैवर्त्तसविधंप्राप्तयेतियावत् ॥ कैवर्त्तैर्यष्ट्यादिनाकृतमाननप्रदेशेताडनंदवोपनीतेअंबुनिबृहत्तरंगजलेकच्छपाच्छोडेकूर्मपृष्ठास्थनिचनिपतनान्मोघंव्यर्थंजातंदृष्टमित्यर्थः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पीतंपुलिंद्यामयेतिशेषः ॥ ४८ ॥ सारस्यांपद्मिन्यांसरसासप्रेमाअलिनीभ्रमरीवनिश्चलंस्थितयेतियावत् ॥ मयासीत्कारेणसुरतकूजितेनमधुरस्वरंयथास्यात्तथासामंतःअधीश्वरःपतिरितियावत् ॥ सारसोरंजितःप्रीणितः ॥ ४९ ॥ क्षीवप्रेक्षणंसमदनिरीक्षणंतत्कृतैर्मन्मथविक्षोभैःकांतस्यावलोकनंमयाकृतम् ॥ अनेनतद्योग्यंजन्मांतरमुक्तम् ॥ ५० ॥ स्यंदोद्रवः ॥ अप्सरोलक्षणयाअंबुजिन्यासुराएवषट्पदाअधरमधुपानादिनातोषिताः ॥ ५१ ॥ तस्मिन्नेवजन्मनिदेवयूना ॥ ५२ ॥ कूर्मतयाकच्छपीत्वेन ॥ ५३ ॥ चलत्तारतरंगासुसरसीषुमयास्वीयेषुचलेषुच्छदेषुपटानांपटवत्शुभ्रपक्षाणांआलीषुपंक्तिषुपद्मभ्रांत्योपविष्टानां सरसानामलिनां भ्रमराणांदोलनमांदोलनसाधनंराजहंस्यंराजहंसी

पीतंचर्मण्वतीतीरेगायंत्यामधुरस्वरम् ॥ पुलिंद्यासुरतांतेषुनालिकेररसासवम् ॥४८॥ सारसीसरसालिन्यासीत्कारमधुरस्वरम् ॥ सारसःसुरतैःस्वैरंसामंतश्चारुरंजितः ॥४९॥ तालीतमालकुंजेषुतरलाननेनत्रया ॥ क्षीवप्रेक्षणविक्षोभैःकृतंकांतावलोकनम् ॥५०॥ कनकस्यंदसंदोहसुंदरैरंगपंजरैः ॥ स्वर्गेप्सरोंबुजिन्याशुतोषिताःसुरषट्पदाः ॥ ५१ ॥ मणिकांचनमाणिक्यमुक्तानिकरभूतले ॥ कल्पद्रुमवने मेरौयूनासहरतंकृतम् ॥ ५२ ॥ कल्लोलाकुलकच्छासुलसद्गुच्छलतासु च ॥ वेलावनगुहास्वब्धेश्चिरंकूर्मतयास्थितम् ॥ ५३ ॥ तरत्तारतरंगासुदोलनंसरसालिनाम् ॥ चलच्छदपटालीषुराजहंस्यंमयाकृतम् ॥ ५४ ॥ शाल्मलीदललोलानामांदोलनदरिद्रताम् ॥ मशकस्ययालोक्यदीनंमशकयास्थितम् ॥ ५५ ॥ तरत्तारतरंगासुचंचद्वीच्यग्रचुंबनैः ॥ भ्रांतंशैलस्रवंतीषुजलवंजुललीलया ॥ ५६ ॥ गंधमादनमंदारमंदिरेमदनातुराः ॥ पातिताःपादयोःपूर्वंविद्याधरकुमारकाः ॥ ५७ ॥ कीर्णकर्पूरपूरेषुतल्पेषुव्यसनातुरा ॥ चिरंविलुलितास्मींदुबिंबेष्विवशशिप्रभा ॥ ५८ ॥

त्वंकृतमनुभूतमितियावत् ॥ नलिनीनालदोलास्वितीपाठेस्पष्टम् ॥ ५४ ॥ दोलायमानेएकस्मिन्शाल्मलीदलेलालानांबहूनांमशकानांमध्येततःप्रच्युतस्यकस्यचिन्मशकस्यतत्रोपवेष्टुमसामर्थ्यादांदोलनदरिद्रतामालोक्यतत्संस्कारेणैवमृतयाहंस्यामयापिमशकतयाभूत्वादीनंस्थितम् ॥ यंयंवापिस्मरन्भावमितिस्मृतेरितिभावः ॥ ५५ ॥ शैलस्रवंतीषुगिरिणदीषुजलवंजुलावेतसास्तल्लीलयातज्जन्मनेतियावत् ॥ ५६ ॥ स्थावरांताधमयोनिजन्मान्युक्त्वोत्तमजन्मान्यप्याह ॥ गंधमादनेति ॥ ५७ ॥ तत्रापिदुःखबाहुल्यंदर्शयति ॥ कीर्णेति ॥ व्यसनंतद्वियोगदुःखंतेनातुरा ॥ ५८ ॥

१ पुलिंदसुरतांतेष्वितिक्वचित्पाठः तत्रार्थात्पुलिंद्येत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

उक्तंसंक्षिप्योपसंहरति ॥ योनिष्विति ॥ तुलाकोटेरिवोन्नमनमूर्ध्वगतिःसन्नमनमधोगतिस्ताभ्यामाकुलांग्याव्याकुलचित्तया ॥ वातहरिणीवातप्रमीः ॥ साहिस्वभावाद्वायुप्रवाहानुसारिणीउच्चावचदेशान्सरतीतिप्रसिद्धम् ॥ ५९ ॥ ॥ इतिवासिष्ठ० उत्पत्ति० सप्तविंशःसर्गः ॥ २७ ॥ ॥ ७ ॥ ॥ दृष्टप्रपंचमिथ्यात्वाच्चिदाकाशस्यसत्यता ॥ पर्वतोविस्तरेणात्रगिरिग्रामश्चवर्ण्यते ॥ १ ॥ वज्रांगमिवसाराद्दृढात् पूर्वोक्तरीत्यानेककोटियोजनंसम्यक्पुष्टंअंतर्घनंयस्यतथाभूतात् ॥ मिथ्याभूतकुड्यादेरपिस्वप्रेगतिनिरोधकत्वदर्शनान्निर्गमनानुपपत्तिरितिशंकितुराशयः ॥ १ ॥ अबाधितावस्थमस्तुनिरोधकंनबाधितंस्वप्नेऽपितद्दर्शनादित्याशयेनवसिष्ठःपरिहरति ॥ क्वब्रह्मांडमित्यादिना ॥ अवश्यंवस्तुतः ॥ देव्यावितिराजवाचकदेवशब्दनिष्पन्नदेवीशब्दस्यान्यस्यचैकशेषः ॥ २ ॥ आस्वादयत्यनुभवतिविदूरथःसन् ॥ ३ ॥ अनुभूतवान्पद्मभूपालःसन् ॥ ४ ॥ पत्तनंनगरंतस्मिन्राजसद्मसाचानुभवतीतिवर्त्तमानसामीप्येवर्तमानवन्निर्देशः ॥ विदूरयवासनाजन्यवक्ष्यमाणलीलांतरात्मतांप्राप्तावासाअरुंधतीअनुभवतीतिमुख्यवर्त्तमानोपपत्तिः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ प्रतिभाभ्रांतिस्तन्मात्रम् ॥ ९ ॥ वासनामात्रेणसोल्लेखंतत्तत्पदार्थव्यवहारोल्लेखसहितम् ॥ तयोःस्वचित्तमेवतथाकचतिप्रथते ॥ १० ॥ ज्ञप्त्याकाशंचिदाकाशमेवताभ्यांस्वचित्तेनकिंचिद्ब्रह्मांडरूपमुन्नीतंकल्पितम् ॥ यथाआकाशमेवस्पंदयोगेनमारुतइतिकल्प्यतेतद्वत् ॥ ११ ॥ जगदिवाभातियेननबुद्धंतद्दृशेतिशेषः ॥ १२ ॥

योनिष्वनेकविधदुःखशतान्वितासुभ्रांतंमयोन्नमनसन्नमनाकुलांग्या ॥ संसारदीर्घसरितश्चलयालहर्यादुर्वारवातहरिणीसरणक्रमेण ॥ ५९ ॥ ॥ इत्यार्षेवासि० वा० दे० मो० उ० ली० जन्मांतरवर्णनंनामसप्तविंशःसर्गः ॥ २७ ॥ ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ वज्रांगसाराद्ब्रह्मांडकुड्यान्निबिडमंडलात् ॥ कोटियोजनसंपुष्टात्कथंतेनिर्गतेबले ॥ १ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ क्वब्रह्मांडंक्वतद्भित्तिः क्वात्रासौवज्रसारता ॥ किलावश्यंस्थितेदेव्यावंतःपुरवरांबरे ॥ २ ॥ तस्मिन्नेवगिरिग्रामेतस्मिन्नेवालयांबरे ॥ ब्राह्मणःसवसिष्ठाख्य आस्वादयतिराजताम् ॥ ३ ॥ तमेवमंडपाकाशकोणकंशून्यमात्रकम् ॥ चतुःसमुद्रपर्यंतंभूतलंसोनुभूतवान् ॥ ४ ॥ आकाशात्मनिभूपीठंतस्मिंस्तद्राजपत्तनम् ॥ राजसद्मानुभवतिसचसाचाप्यरुंधती ॥ ५ ॥ लीलाभिधानासाजातातयाचज्ञप्तिरर्चिता ॥ ज्ञप्त्यासहसमुल्लंघ्यखमाश्चर्यमनोहरम् ॥ ६ ॥ प्रादेशमात्रेनभसिसातत्रैवगृहोदरे ॥ ब्रह्मांडांतरमासाद्यगिरिग्रामकमंदिरे ॥ ७ ॥ ब्रह्मांडात्परिनिर्गत्य स्वगृहेस्थितिमाययौ ॥ स्वप्नात्स्वप्नांतरंप्राप्ययथातल्पगतःपुमान् ॥ ८ ॥ प्रतिभामात्रमेवैतत्सर्वमाकाशमात्रकम् ॥ नब्रह्मांडंनसंसारोनकुड्यादिनदूरता ॥ ९ ॥ स्वचित्तमेवकचतितयोस्तादृङ्मनोहरम् ॥ वासनामात्रसोल्लेखंक्वब्रह्मांडक्वसंस्थितिः ॥ १० ॥ निरावरणमेवेदं ज्ञप्त्याकाशमनंतकम् ॥ किंचित्स्वचित्तेनोन्नीतंस्पंदयुक्त्येवमारुतः ॥ ११ ॥ चिदाकाशमजंशांतंसर्वत्रैवहिसर्वदा ॥ चित्त्वाज्जगदिवाभातिस्वयमेवात्मनात्मनि ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

येनबुद्धंतस्यदृशातुनास्त्येवेत्याह ॥ येनेति ॥ कथंतर्ह्यन्योपिब्रह्मांडकुड्याद्बहिर्ननिःसरंतितत्राह ॥ नबुद्धमिति ॥ १३ ॥ १४॥ दृश्यत्वंदृश्यप्रपंचरूपत्वम ॥ १५ ॥ बाह्यंदेशम्॥ चंक्रमणंगतिः ॥ १६ ॥ आकाशस्यकुहरंमध्यच्छिद्रम् ॥ राहोःशिरइतिवक्षेदकल्पना ॥ संस्पृष्टादित्यमंडलमित्यतिशयोक्तिः ॥ १७ ॥ १८ ॥ मंजरीपुंजपिंजराणिअतएवविचित्राण्यंबुदमंडलानियस्येतिवृक्षौन्नत्योक्तिः ॥ अतएवस्वभ्रंशोभनाभ्रयुक्तम् ॥ गुलुच्छालताविशेषाः ॥ १९ ॥ सारैर्बलवद्भिर्वंजुलानामतिमुक्तकानामंबुवेतसानांवामूलविस्तारैर्गुप्तानिपतनाद्रक्षितानिसरित्तटानियत्र ॥ नसम्यगाप्ताःप्राप्तावृक्षावलंबनंयाःशिलाश्वभ्रोत्पन्नलतास्तासामावर्त्तनःपरिवर्त्तनोमारुतोयस्मिन् ॥ २० ॥ पुष्पाण्यग्रेयेषांतैःशिखरद्रुमैःपिहिताआकाशकोशस्यकुड्यकाःकुड्यप्रतिकृतिभूतावारिदायस्य ॥ सरित्स्रोतांस्येवस्फुरन्मुक्तामालायस्य ॥ २१ ॥ चलद्वृक्षावनव्यूहायेषुअतएववातेनवेल्लिनो

येनबुद्धंतुतस्यैतदाकाशादपिशून्यकम् ॥ नबुद्धंयेनतस्यैतद्वज्रसाराचलोपमम् ॥ १३ ॥ गृहएवयथास्वप्नेनगरंभातिभासुरम् ॥ तथैतदसदेवांतश्चिद्धातौभातिभास्वरम् ॥ १४ ॥ यथामरौजलंबुद्धंकटकत्वंचहेमनि ॥ असत्सदिवभातीदंतथादृश्यत्वमात्मनि ॥ १५ ॥ एवमाकथयंत्यौतेललनेललिताकृती ॥ गृहान्निर्ययतुर्बाह्यंचारुचंक्रमणक्रमैः ॥ १६ ॥ अदृश्येग्रामलोकेनप्रेक्षमाणेपुरोगिरिम् ॥ चुंबिताकाशकुहरंसंस्पृष्टादित्यमंडलम् ॥ १७ ॥ नानावर्णाखिलोत्फुल्लविचित्रवननिर्मलम् ॥ नानानिर्झरनिर्ह्रादकूजद्वनविहंगमम् ॥ १८ ॥ विचित्रमंजरीपुंजपिंजरांबुदमंडलम् ॥ स्वभ्रमच्छगुलुच्छाग्रविश्रांतखगसारसम् ॥ १९ ॥ सारवंजुलविस्तारगुप्ताखिलसरित्तटम् ॥ असमाप्तशिलाश्वभ्रलतावर्त्तनमारुतम् ॥ २० ॥ पुष्पाग्रपिहिताकाशकोशकुड्यकवारिदम् ॥ पतद्दीर्घसरित्स्रोतःस्फुरन्मुक्ताकलापकम् ॥ २१ ॥ चलद्वृक्षवनव्यूहवातवेल्लिसरित्तटम् ॥ नानावनाकुलोपांतच्छायासततशीतलम् ॥ २२ ॥ अथतेललनेतत्रतदाददृशतुःस्वयम् ॥ तंगिरिग्रामकंव्योम्नःस्वर्गखंडमिवच्युतम् ॥ २३ ॥ रटत्प्रणालीपटलंपूर्णपुष्करिणीगणम् ॥ द्विजैःकुचकुचैःकूजत्स्वलीलाश्वभ्रकच्छकम् ॥ २४ ॥ गच्छद्गोवृंदहुंकारकरालाखिलकुंजकम् ॥ कुंजगुल्मकखंडाढ्यंसच्छायघनशाद्वलम् ॥ २५ ॥ दुष्प्रवेशार्ककिरणंदृषन्नीहारधूसरम् ॥ उदग्रमंजरीपुंजजटालंबिशिखांतरम् ॥ २६ ॥ शिलाकुहरवाःस्फालप्रोच्चलन्मुक्तनिर्झरैः ॥ स्मारिताचलनिर्द्धूतक्षीरोदकजलश्रियम् ॥ २७ ॥ फलमाल्यमहाभारभासुरैरजिरद्रुमैः ॥ आनीयपुष्पसंभारंतिष्ठद्भिरिवसंकुलम् ॥ २८ ॥

वेष्टनशीलाःसरित्तटायस्मिन् ॥ २२ ॥ गिरिमभिवर्ण्यगिरिग्रामंवर्णयितुमाह ॥ अथेति ॥ २३ ॥ रटदितिविशेषणाद्घटीयंत्रादिप्रणाल्योग्राह्याः ॥ कुचकुचैरितिशब्दानुकरणेनताद्रूप्यारोपोक्तिः ॥ तथाविधैर्द्विजैःपक्षिभिःकूजंतःस्वस्यग्रामस्यलीलार्थाःश्वभ्रकच्छायस्मिन् ॥ २४ ॥ तत्रगोसंपत्तिमाह ॥ गच्छदिति ॥ गवांयत्रसच्छायादिसमृद्धिमाह ॥ कुंजेति ॥ २५ ॥ दृषद्भिःशिलाभिर्नीहारैश्वधूसरंभस्मोद्धूलितमिव ॥ उन्नताग्रैर्मंजरीपुंजैर्जटाइवलंबीनिशिखांतराणिकतिपयशिखायस्य ॥ २६ ॥ शिलाच्छिद्रेषुवारामास्फालात्प्रोच्चलंतोमुक्तासदृशबिंदवोयेषांतथाविधैर्निर्झरैःस्मारितामंथाचलनिर्द्धूतक्षीरोदकजलश्रीर्यत्र ॥ २७ ॥ अजिरमंगणम् ॥ २८ ॥

॥५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसोमकरंदः प्रेमातिशयश्चतेनाकुलितैर्द्रुमैरपिअर्थिषुसम्यगादृष्टंकिंपुनर्नरैरित्यर्थः ॥ २९॥ अशंकैःशंकाऽयोग्यैरपिअशंकितंयथास्यात्तथाशिलाकूटात्स्रवतांनिपततामंबिंदूनांटंकृतैर्हेतुभिर्गुटिकाधनुर्ध्वानसाम्याच्छंकितैरतएवगुप्तैर्निर्लीनैःखगैः ॥ ३० ॥ श्रांतत्वंसीकरास्वादनेहेतुः ॥ उडूनांनक्षत्राणांपरावर्त्तःपरिवर्त्तनमिववृत्तिःपरिवृत्तिर्येषांतैर्विहंगैर्हंसैः ॥ ३१ ॥ काकग्रहणंमार्जारादीनामप्युपलक्षणम् ॥ जीर्णप्रातस्तनस्वभुक्तकैरस्माभिर्भक्षणीयमितिबुद्ध्याप्रगोपिताःसंवृतदेशेरक्षिताआमिक्षाखंडायत्र ॥ घनीकृतंपयआमिक्षा ॥ ३२ ॥ पुष्पाण्येवशेखरसंभारःशिरोभूषणादिर्वसनानिचयेषांतथाविधाग्रामबालकायत्र ॥ ३३ ॥ तत्रभिक्षादिदरिद्रवधूर्वर्णयति ॥ क्षौमेति ॥ क्षुमाऽतसीतस्याअवयवाःक्षौमाण्यग्राणिशाखास्तान्येवहस्तप्राप्याण्यंबराणियस्याः ॥ ग्रामेकीटकाइवोपेक्ष्यादरिद्रनीचालसास्तेषांकांतयावधूजनेन ॥ ३४ ॥ संरावैस्तारध्वनिभिरभि

तरत्तरंगझांकारकारिमारुतकंपितैः ॥ कीर्णपुष्पसमावृष्टंद्रुमैरपिरसाकुलैः ॥ २९ ॥ अशंकितशिलाकूटस्रवदंबिंदुटंकृतैः ॥ किंचित्कृतरवंगुप्तैरशंकैःशंकितैःखगैः ॥ ३० ॥ उत्फाललहरीश्रांतसीकरास्वादनाकुलैः ॥ नद्यामुडुपरावर्त्तवृत्तिभिर्विहगैर्वृतम् ॥ ३१ ॥ उत्तालतालविश्रांतकाकालोकनशंकितैः ॥ बालैःप्रगोपितामिक्षाखंडंजीर्णस्वभुक्तकैः ॥ ३२ ॥ पुष्पशेखरसंभारवसनग्रामबालकम् ॥ खर्जूरनिंबजंबीरगहनोपांतशीतलम् ॥ ३३ ॥ क्षौमाग्रहस्तांबरयामंजरीपूर्णकर्णया ॥ क्षुत्क्षीणयाक्रांतरथ्यंग्रामकीटककांतया ॥ ३४ ॥ सरित्तरंगसंघट्टसंरावाश्रुतसंकथम् ॥ कर्मजाड्यघनत्रासवांछितैकांतसंस्थितम् ॥ ३५ ॥ दधिलिप्तास्यहस्तांसैःस्निग्धपुष्पलताधरैः ॥ नग्नैर्गोमयपंकांकैर्बालैराकुलचत्वरम् ॥ ३६ ॥ तीरशाद्वलवल्लीनांदोलांदोलनकारिभिः ॥ तरंगैर्वाह्यमानस्यलेखिकांकितसैकतम् ॥ ३७ ॥ दधिक्षीरघनामोदमत्तमंथरमक्षिकम् ॥ कामभुक्तार्थतोद्बाष्पजर्जरावलबालकम् ॥ ३८ ॥ गोमयासिक्तवलयकरनारीकृतक्रुधम् ॥ धम्मिल्लवलनाव्यग्रत्रस्तस्त्रीविहसज्जनम् ॥ ३९ ॥ दांतपुष्पच्छदोत्सन्नपतत्ककुदवायसम् ॥ गृहरथ्यांगणद्वारकीर्णक्रूरकुरंटकम् ॥ ४० ॥ गृहपार्श्वस्थितश्वभ्रकुंजैःकुसुमितप्रभैः ॥ प्रत्यहंप्रातरागुल्फमाकीर्णकुसुमाजिरम् ॥ ४१ ॥

भवादश्रुताःसंकथाःसंलापायत्र ॥ कर्मकरणेजाड्यादकौशलाद्घनस्त्रासोयेषांमुग्धालसानांतैर्वांछिताएकांतसंस्थितिर्यत्र ॥ ३५ ॥ ३६ ॥ तीरशाद्वलेत्यादिपूर्वोक्तबालानांविशेषणंचेद्दोलास्वांदोलनकारिभिः ॥ तरंगविशेषणत्वेतुदोलावदांदोलनकारिभिः ॥ वाह्यमानस्यजलस्यलेखिकारेखास्ताभिरंकितसैकतम् ॥ ३७ ॥ कामभुक्तार्थतायैयथाभिलाषभक्षणायरोदनादुद्गतबाष्पैर्जर्जराःअबलाःकृशाअस्वतंत्रावाबालकायत्र ॥ ३८ ॥ गोमयासिक्तवलयकरत्वादितरनारीषुकृतक्रोधंयथास्यात्तथामुक्तधम्मिल्लवलनासुव्यग्रास्त्रस्ताश्चस्त्रियोदृष्ट्वाविहसंतोजनायत्र ॥ ३९ ॥ दांतैर्जितक्रोधैर्मुनिभिःपुष्पैश्छदैःपत्रैर्वाउत्सन्नाउत्सारितानतुकाष्ठलोष्टादिनाकदाचिदभिघातोमाभूदिति ॥ बलिकर्माशनादिभक्षणायपतंतःककुदानांगिरिशिखराणांवायसायत्र ॥ सकंटकत्वात्क्रूराःकुरंटकाःप्रसिद्धागुल्मभेदायत्र ॥ ४० ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरंतःशष्पादिभक्षयंतश्चमराम्मृगाःसारंगाम्मृगाःपक्षिणश्च ॥ निकुंजेलतागृहेसंजातेषुशष्पेषुबालतृणेषु ॥ यामशब्दस्यससीमकेसस्थंडिलकेऽपिवृत्तेर्महाभाष्यादौप्रसिद्धत्वात्तदंतर्जंगलकुंजादिवर्णनेपिनविरोधः ॥४२॥ गोपानामुच्छिष्टीकृतदधिषुस्तक्किषुवक्रपार्श्वेषु ॥४३॥ समस्तेषुसद्मसुसंक्षीणमधुमक्षिकंयथास्यात्तथाआक्षिप्तंसंचितंमाक्षिकंमधुयस्मिन् ॥ लाक्षिकानिलाक्षारंजितकाष्ठमयानिक्रीडामंदिराणियस्मिन् ॥ ४४ ॥ नित्यार्द्रत्वादेवविकचाःप्रोत्फुल्लाः ॥ समस्तेतिविशेषणमतिशयोक्त्यर्थं ॥ ४५ ॥ प्रतिकूलत्वादेवकृत्ताभिश्छिन्नाभिर्लताभिरप्रतिबंधात्फुल्लैः ॥ ४६ ॥ पुष्करिणीपंक्तिषुपूर्णराजाःपूर्णचंद्राइवयानिफुल्लपद्मानितैःपृथूत्तरंबहूत्कृष्टतरम् ॥ पृथुभिःप्रांशुभिरुत्तीर्यतइतिपृथू

चरच्चमरसारंगजालजंगलखंडकम् ॥ गुंजानिकुंजसंजातशष्पसुप्तमृगार्भकम् ॥ ४२ ॥ एकांतसुप्तवत्सैककर्णस्पंदास्तमक्षिकम् ॥ गोपोच्छिष्टीकृतदधिस्वस्तक्किस्पंदिमक्षिकम् ॥ ४३ ॥ समस्तसद्मसंक्षीणमक्षिकाक्षिप्तमाक्षिकम् ॥ फुल्लाशोकद्रुमोद्यानकृतलाक्षिकमंदिरम् ॥ ४४ ॥ सीकरासारमरुतानित्यार्द्रविकचद्रुमम् ॥ कदंबमुकुलप्रोतसमस्तच्छादनतृणम् ॥ ४५ ॥ प्रतिकृत्तलताफुल्लकेतकोत्करपांडुरम् बहलप्रणालपटलीरणद्घुरुघुरारवम् ॥ ४६ ॥ वातायनगुहानिर्यत्सौधविश्रांतवारिदम् ॥ पूर्णपुष्करिणीपंक्तिपूर्णराजपृथूत्तरम् ॥ ४७ ॥ नीरंध्रविटपिच्छायाशीतलामलशाद्वलम् ॥ सर्वशष्पाग्रवार्बिंदुप्रतिबिंबिततारकम् ॥ ४८ ॥ अनारतपतत्फुल्लहिमवर्षसितालयं ॥ विचित्रमंजरीपुष्पपत्रसत्फलपादपम् ॥ ४९ ॥ गृहकक्षांतरालीनमेघसुप्तचिरंटिकम् ॥ सौधस्थमेघविद्युद्भिरनादेयप्रदीपकम् ॥ ५० ॥ कंदरानिलभांकारघनघुंघुममंडपम् ॥ चरच्चकोरहारितहरिणीहारिमंदिरम् ॥ ५१ ॥ उन्निद्रकंदलोद्वांतमांसलामोदमंथरैः ॥ मरुद्भिर्मंदमायातुमारब्धैर्लोलपल्लवम् ॥ ५२ ॥ लावकालापलीलायामालीनललनागणम् ॥ कोककोकिलकाकोलकोलाहलसमाकुलम् ॥ ५३ ॥ शालतालतमालाब्जनीलतत्फलमालिनम् ॥ वल्लीवलयविन्यासविलासवलितद्रुमम् ॥ ५४ ॥ आलोलपल्लवलतावलितायननानामुत्फुल्लकंदलशिलींध्रसुगंधितानाम् ॥ तालीतमालदलतांडवमंडपानामारामफुल्लकुसुमद्रुमशीतलानाम् ॥ ५५ ॥

त्तरमितिवा ॥ ४७ ॥ ४८ ॥ फुल्लैःपुष्पैर्हिमवर्षैश्चसिताःशुभ्राः ॥ ४९ ॥ सुप्ताश्चिरंटिकाःसुवासिन्योयत्र ॥ अनादेयाःअन्यतःकार्यसिद्धेरनुपादेयाः ॥ ५० ॥ घनाःप्रतिध्वनिभिर्निबिडिताघुंघुमायेषुतथाविधामंडपायत्र ॥ घनाइवघुंघुमागर्जितोवा ॥ चकोरहारीतौपक्षिभेदौ ॥ हारीणिसुंदराणि ॥ ५१ ॥ कंदलैःकंदलीपुष्पैः ॥ उद्वांतैरिवनिःसृतैरामोदैर्मंथरैर्भरितैः ॥ ५२ ॥ लावकाग्रहणंशुकसारिकादीनामुपलक्षणम् ॥ काकोलाद्रोणकाकाः ॥ ५३ ॥ ५४ ॥ आलोलपल्लवलतानांवलयोवेष्टनान्यावलयःपंक्तयोवातासांतायनानांसंतानाधिकरणानाम् ॥ लताभिर्वलितानिरुद्धान्ययनानिपरितोमार्गायेषामितिवा ॥ सर्वाणिसर्गांत्यश्लोकस्थस्यगिरिमंदिराणामित्यस्यविशेषणानि ॥ ५५ ॥ ॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सारावाणिसहंभारवाणिवारिचलनेषुजलोत्तरणेष्वाकुलानिगोकुलानियेषां ॥ गुप्तआच्छन्नःसरिद्रयोनदीप्रवाहोयेषु ॥ ५६ ॥ गंधांधैःषट्पदकुलैरंतरितानितिरोहितान्यंबुजा नियेषु ॥ रजसावायून्नीतेनेत्याशयः ॥५७॥ रंहसावेगेनवहंतीनाम् ॥ कुंदवदवदातैःशुभ्रैर्जलदद्युतिभिर्भासुराणाम् ॥ कलकंठामधुरकंठाः ॥ कंठशब्देनतत्ध्वनिर्लक्ष्यते ॥ ५८॥ आपादमावलितानिमाल्यानियाभिस्तथाविधाविलासिन्यस्त्रियोयेषु ॥ वरलताभिराकुलाव्याप्तामार्गणाःशरस्तंबायाचकावायेषु ॥ ५९ ॥ नीहारशब्देनतज्जलबिंदुपंक्तयोल क्ष्यंते ॥ ताएवहारामुक्तावल्ल्योयेषुतथाविधैर्हरितस्थलैर्विश्रुतानाम ॥६०॥ हुंकारैर्हारीणिमनोहराणिहरितोन्मुखानिहरिततृणोन्मुखानिगोकुलानियेषु ॥ विश्रब्धाविश्वस्तामु

सारावववारिचलनाकुलगोकुलानामानीलसस्यकुसुमस्थलशोभितानाम् ॥ तीरद्रुमप्रकरगुप्तसरिद्वयाणांनीरंध्रपुष्पितलताग्रवितान कानाम् ॥५६॥उद्यानकुंदमकरंदसुगंधितानांगंधांधषट्पदकुलांतरितांबुजानाम्॥सौंदर्यतर्जितपुरंदरमंदिराणांराजीवराजिरजसारु णितांबराणाम् ॥५७॥ रंहोवहद्भिरिनदीरवघर्घराणांकुंदावदातजलदद्युतिभासुराणाम् ॥ सौधस्थितोल्लसितफुल्ललतालयानांलीलाव लोलकलकंठविहंगमानाम्॥५८॥उल्लासिकौसुमदलास्तरणस्थयूनामापादमावलितमाल्यविलासिनीनाम्॥सर्वत्रसुंदरनवांकुरदंतु राणांशोभोल्लसद्वरलताकुलमार्गणानाम्॥५९॥ संजातकोमललतोत्पलसंकुलानांतिष्ठत्पयोदपटसंवलितालयानाम्॥ नीहारहारहरि तस्थलविश्रुतानांसौधस्थमेघतडिदाकुलितांगनानाम् ॥६०॥नीलोत्पलोल्लसितसौरभसुंदराणांहुंकारहारिहरितोन्मुखगोकुलानाम्॥ विश्रब्धमुग्धमृगसारगृहाजिराणामुन्नृत्यबर्हिघनसीकरनिर्झराणाम् ॥६१॥सौगंध्यमत्तपवनाहतविक्लवानांवप्रौषधिज्वलनविस्मृत दीपकानाम्॥कोलाहलाकुलकुलायकुलाकुलानांकुल्याकुलाकलकलाश्रुतसंकथानाम्॥६२॥मुक्ताफलप्रकरसुंदरबिंदुपातशीताखि लद्रुमलतातृणपल्लवानाम्॥ लक्ष्मीमनस्तमितपुष्पविकाशभाजांशक्नोतिकःकलयितुंगिरिमंदिराणाम् ॥ ६३ ॥ ॥इत्यार्षेवासि० वा०दे०मो०उ०ली०गिरिग्रामवर्णनंनामाष्टाविंशःसर्गः ॥ २८॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥तत्रतेपेततुर्द्व्यौग्रामेंतःशी तलात्मनि ॥ भोगमोक्षश्रियौशांतेपुंसीवविदितात्मनि ॥ १ ॥

ग्धामृगाःसरंत्यस्मिन्नित्यधिकरणेबाहुलकाद्घञ् ॥ निर्झराणांघनसीकरत्वंदृष्टिभ्रांत्याबर्हिणानामुन्नृत्येहेतुः ॥ ६१ ॥ सौगंध्येनमत्तवद्भ्रांतेनपवनेनाहतानिरस्ताः ॥ विक्लवशब्दो वैक्लव्यपरः ॥ वप्रेष्वौषध्योज्योतिर्लताएवज्वलनाः ॥ कोलाहलोत्रपक्षिरवः॥कुलायोनीडम् ॥ कुल्याशब्देनगिरिनिर्झरायाम्नास्तत्कुलानामासमंतात्कलकलैर्ध्वनिभिरश्रुतास्ति रस्कृताइतियावत् ॥ संकथाःसंवादायेषु ॥ ६२ ॥ लक्ष्मींशोभांकलयितुंसंख्यातुम् ॥ गिरिमंदिराणांगिरियामस्येतियावत् ॥ ६३ ॥ ॥ इतिश्रीवासिष्ठ०उत्प०अष्टाविंशः सर्गः ॥ २८ ॥ ॥ ७ ॥ ॥ लीलायाःप्राक्चरित्राणांप्रत्यभिज्ञात्रवर्ण्यते ॥ तथाप्रतिप्रयाणंचव्योम्नित्रिलोकौघमंडिते ॥ १ ॥ शांतेशांत्यादिसाधनसंपन्ने ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ स्वरसेनाप्रयत्नेनैवेतियावत् ॥ ३ ॥ चेष्टितांतरंतत्प्राक्तनजन्मपरंपराचेष्टितमपि ॥ ४ ॥ जीर्णावृद्धा ॥ शुष्कदर्भाणामग्रैस्तीक्ष्णभागैर्भेदैर्विदारणैरूक्षंकरोदरंयस्याः सा ॥ ५ ॥ मंथानोदधिमंथदंडः ॥ ६ ॥ भर्जनीभर्जनपिठरीचरुश्चरुश्रपणस्थाली ॥ भांडानामुपस्करांतरांतराणांचमार्जनादिनाशोधनशीला ॥ ७॥ एकंकाचकंबुकाचवलयं ॥ बहूनांधारणेकर्मत्वरयाभिघातेभंगापत्तेः ॥ ८ ॥ देहपदेनतत्पातोलक्ष्यते ॥ सद्मभृतिर्गृहपोषणं ॥ पुत्रस्नुषाभृत्यवर्गान्प्रतिकर्मत्वरार्थंचिरंत्वयास्नातंचिरंत्वयाविलंबितं किंचिरायसेइत्यादिवदनशीला ॥ आकुलाव्यग्रा ॥९॥ तादृशस्यममैवात्यंतगृहकर्मासक्तस्येतियावत् ॥ दुर्द्धियःअविशुद्धबुद्धेः ॥१०॥ समिदादिसंचयविषयेएकनिष्ठाएकाग्रचित्तासावधानेतियावत् ॥ ११॥ तर्णकीवत्सातस्याःकर्णजाहेकर्णमूलेस्थितानांकृमीणांनिष्कासनंनिष्कासस्तत्रतत्परा ॥ तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचावितिजाहच् ॥ गृहेकृतंशाकायनंशाककेदारस्तस्यासेकायाहूतानिसेकसाधनकर्पराणियया ॥ कर्परपदेनतत्पाणयोभृत्यालक्षणयोच्यंते ॥ १२ ॥ नीलैर्नीरतरंगाणामंतोवधिः

कालेनैतावतालीलातेनाभ्यासेनसाभवत्॥ शुद्धज्ञानैकदेहत्वात्त्रिकालामलदर्शिनी॥२॥ अथसस्मारसवास्ताप्राक्तनीःसंसृतेर्गतीः॥ सास्वयंस्वरसेनैवप्राग्जन्ममरणादिकाः॥३॥ ॥लीलोवाच॥ ॥देविदेशमिमंदृष्ट्वात्वत्प्रसादात्स्मराम्यहम्॥इहतत्प्राक्तनंसर्वंचेष्टितंचेष्टितांतरम्॥ ४ ॥ इहाभूवमहंजीर्णाशिरालांगीकृशासिता॥ ब्राह्मणीशुष्कदर्भाग्रभेदरूक्षकरोदरा॥५॥ भर्त्तुःकुलकरीभार्यादोहमंथानशालिनी॥ मातासकलपुत्राणामतिथीनांप्रियंकरी॥६॥ देवद्विजसतांभक्तासिक्तांगीघृतगोरसैः॥ भर्जनीचरुकुंभादिभांडोपस्करशोधिनी ॥ ७॥ नित्यमन्नलवाक्तैककाचकंबुप्रकोष्ठका॥ जामातृदुहितृभ्रातृपितृमातृप्रपूजनी ॥ ८॥ आदेहंसद्मभृत्यैवप्रक्षीणदिनयामिनी॥ वाचंचिरंचिरमितिवादिन्यनिशमाकुला॥९॥ काहंकइवसंसारइतिस्वप्नेप्यसंकथा॥ जायाश्रोत्रियमूढस्यतादृशस्यैवदुर्द्धियः ॥ १० ॥ एकनिष्ठासमिद्धाकगोमयेंधनसंचये॥ म्लानकंबलसंवीतशिरालकृशगात्रिका ॥ ११ ॥ तर्णकीकर्णजाहस्थकृमिनिष्कासतत्परा॥ गृहशाकायनासेकसत्वराहूतकर्परा॥ १२ ॥ नीलनीरतरंगांततृणतर्पिततर्णिका ॥ प्रतिक्षणंगृहद्वारकृतलेपनवर्णका॥ १३॥ नीत्यर्थंगृहभृत्यानामादीनकृतवाच्यता ॥ मर्यादानियमादब्धेर्वेलेवानिशमच्युता ॥ १४ ॥ जीर्णपर्णसवर्णैककर्णदोलाधिरूढया ॥ काष्ठताड्यजराभीतजीवद्वृत्त्येवचिह्निता॥ १५॥

कूलंतत्रत्यतृणैःस्नेहात्स्वयमाहृतैस्तर्पितास्तर्णिकाःबालवत्सायया ॥ गृहद्वारेकृतालेपनंतत्रवर्णकारंगवल्लीरचनाश्वयया ॥ १३ ॥ नीतिर्विनयाचारादिशिक्षणंतदर्थं ॥ आदीनमीषद्दैन्ययुक्तंयथास्यात्तथाकृताःप्रकाशितावाच्यताजनवचनीयताईदृशानांगृहेकथमेवंशीलाअविनीताभृत्यास्तिष्ठंतीत्येवंवक्ष्यंतिजनाइत्येवमादिरूपायया ॥ स्वचरित्रेणापितन्मर्यादाशिक्षकत्वमाह ॥ मर्यादेति ॥ १४ ॥ एवंचिरंस्थितायाःस्वस्याजराप्रकर्षेणवामकर्णबाधिर्येशिरःप्रकंपेकुब्जात्वेयष्ट्यवलंबनाधीनेचसंचारेयाजीवनदशातांवर्णयति ॥ जीर्णेति ॥ जीर्णपर्णसमानवर्णस्यदेहस्यैकोदक्षिणोयःकर्णःसएवशिरःकंपेनकंपमानत्वाद्दोलातदधिरूढयेवतदधीनश्रवणव्यवहारयाअतएवावलंबनकाष्ठस्योन्नयनेतत्ताडनार्हयेवजरायाःसकाशाद्भीतयेवचरमजीवनवृत्त्याचिह्नितेवात्रासमित्यर्थः ॥ १५॥ ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संचरंतीभ्रमंती ॥ स्मयोऽत्रविस्मयः ॥ १६ ॥ पाटलैर्गुल्मैरखंडमखंडितंमंडिता ॥ १७ ॥ आग्रंथिताईषद्ग्रंथिनिबद्धास्तर्णकायस्याः ॥ मुक्तपर्णिकामद्वियोगदुःखादित्यार्थिकंलभ्यते ॥ १८ ॥ अलसादुःखात्स्वकार्याक्षमेतियावत् ॥ कीर्णारजोभिरितिशेषः ॥ १९ ॥ आल्हतमानीतंफलधान्यादि ॥ २० ॥ २१ ॥ वसंतारंभेहोलिकादाहायकृतमितिशेषः ॥ क्षारेणभस्मनाविधूसरं ॥ स्वदेहमिवममप्रियमितिशेषः ॥ पंचाक्षागवाक्षायस्मिन् ॥ देहपक्षेअक्षाणिज्ञानेंद्रियाणि ॥ प्रघणंबहिर्द्वारप्रकोष्ठं ॥ २२ ॥ तुंबीलताभिरलाबुवल्लीभिःउग्राभिःकटुभिःपुष्टाभिःस्वेनारोप्यपोषिताभिरिववेष्टितंयोग्यतयाछदिप्रदेशेइतिगम्यते ॥ महानसस्थानंपाकस्थानं ॥ २३ ॥ बंधनंप्रत्यक्षबंधनभूताबंधवः ॥ २४ ॥ शिलाप्रचुरेकच्छेआच्छोटनमास्फालनं ॥ उत्पलसीकरैरित्यंतविशेषितैस्तरंगैःसाधनैःस्थगिताकारंतिरस्कृतस्वरूपंयथास्यात्तथातुषारीकृताःमध्याह्नदिवाकरकरो

इत्युक्तासंचरंतीसाशिखरिग्रामकोटरे॥ संचरंत्याःसरस्वत्याःदर्शयामाससस्मयम्॥१६॥ इयंमेपाटलाखंडमंडितापुष्पवाटिका॥ इयंमेपुष्पितोद्यानमंडपाशोकवाटिका॥१७॥ इयंपुष्करिणीतीरद्रुमाग्रंथिततर्णका ॥ इयंसाकर्णिकानाम्नीतर्णिकामुक्तपर्णिका॥१८॥ इयंसामेलसाकीर्णावराकीजलहारिका॥ अद्याष्टमंदिनंबाष्पक्लिन्नाक्षीपरिरोदिति॥१९॥ इहदेविमयाभुक्तमिहोषितमिहस्थितम्॥ इहसुप्तमिहापीतमिहदत्तमिहाल्हतम्॥२०॥ एषमेज्येष्ठशर्माख्यःपुत्रोरोदितिमंदिरे॥ एषामेजंगलेधेनुर्दोग्ध्रीचरतिशाद्वलम्॥२१॥ गृहेवसंतदाहायरूक्षक्षारविधूसरम्॥ स्वदेहमिवपंचाक्षंपश्यमेप्रघणंमम॥२२॥ तुंबीलताभिरुग्राभिःपुष्टाभिरिववेष्टितम्॥ महानसस्थानमिदंममदेहमिवापरम् ॥२३॥ एतेरोदनताम्राक्षाबंधवोभुविबंधनम् ॥ अंगदार्पितरुद्राक्षाआहरंत्यनलेंधनम्॥ २४॥ अनारतंशिलाकच्छेगुच्छाच्छोटनकारिभिः॥ तरंगैःस्थगिताकारंस्पृष्टतीरलतादलैः॥२५॥ सीकराकीर्णपर्यंतशाद्वलस्थलसल्लतैः॥ शिलाफलहकास्फालफेनिलोत्पलसीकरैः॥२६॥ तुषारीकृतमध्याह्नदिवाकरकरोत्करैः॥ फुल्लपुष्पोत्करासारप्रणादोत्कटद्रुमैः॥२७॥ विद्रुमैरिवसंक्रांतफुल्लकिंशुककांतिभिः॥ व्याप्तयापुष्पराशीनांसमुल्लासनकारिभिः॥ २८॥ उह्यमानफलापूरसुव्यग्रग्रामबालया॥ महाकलकलावर्त्तमत्तयाग्रामकुल्यया॥ २९॥ वेष्टितस्तरलास्फालजलधौततलोपलः॥ घनपत्त्रतरुच्छन्नच्छायासततशीतलः॥ ३०॥

त्करायैस्तथाविधैस्तटद्रुमैर्व्याप्तयायामकुल्ययावेष्टितोयंगृहमंडपआलक्ष्यतेइत्युत्तरैरन्वयः ॥ २५ ॥ सीकरव्याप्ताया:शाद्वलस्थलस्थाःसल्लतायेषां ॥ फलहकानिफलकानितेष्वास्फालनमास्फालस्तेनफेनिलाउत्पलवासितसीकरायेषां ॥ २६ ॥ फुल्लपुष्पोत्करानासरंतिआगच्छंतीतिफुल्लपुष्पोत्करासाराभ्रमरास्तत्प्रणादैरुत्कैरुत्कंठितैरिवस्थितैस्तटद्रुमैः ॥ २७ ॥ प्रतिबिंबेनसंक्रांतानामंतर्निविष्टानांफुल्लकिंशुकानांपलाशानांकांतिभिर्विद्रुमैःप्रवालैरिवस्वपुष्पराशीनांसमुल्लासनंमंडनंतत्कारिभिर्द्रुमैर्व्याप्तया ॥ २८ ॥ प्रवाहेरुह्यमानेआम्रादिफलानामापूरेतृष्णाभयाभ्यांसुव्यग्राग्रामबालायस्यां ॥ महाकलकलैर्बहुकोलाहलैरावर्त्तैर्मत्तयेव ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वलनंवेष्टनंतेनसुंदरः ॥ गलद्भिर्विशीर्यमाणैर्गुलुच्छकैःफलपुष्पगुच्छैश्छन्नगवाक्षः ॥ ३१ ॥ जीवाकाशतयाहेतुनाअकृतिरक्रियोपिभुवःपतिर्भूत्वासंस्थितः ॥ ३२ ॥ आइति निपातोनत्वाङ् ॥ स्मरणेङित्वाभावात् ॥ तीव्रसंवेगोदृढाध्यवसायः ॥ ३३ ॥ ३४ ॥ ३५ ॥ स्थितंपदंपरमार्थवस्तुयोजनकोटिभाक्समधिगतंभ्रांत्येत्यर्थः ॥ ३६ ॥ खमत्र चिदाकाशं ॥ ३७ ॥ ३८ ॥ नभोमंडपांतःकल्पितंमहाकाशंपुप्लुवेउदडीयत ॥ ३९ ॥ सौम्येनाक्षुब्धेननिश्चलेनेतियावत् ॥ एकार्णवेनसंनिभंतुल्यं ॥ ४० ॥ अवनिशब्दःप्रदे

अयमालक्ष्यतेफुल्ललतावलनसुंदरः ॥ दलद्गुलुच्छकाच्छन्नगवाक्षोगृहमंडपः ॥ ३१ ॥ अत्रमेसंस्थितोभर्त्ताजीवाकाशतयाकृतिः ॥ चतुःसमुद्रपर्यंतमेखलायाभुवःपतिः ॥ ३२ ॥ आस्मृतंपूर्वमेतेनकिलासीदभिवांछितम् ॥ शीघ्रंस्यामेवराजेतितीव्रसंवेगधर्मिणा ॥ ३३ ॥ दिनैरष्टभिरेवासौतेनराज्यंसमृद्धिमत् ॥ चिरकालप्रत्ययदंप्राप्तवान्परमेश्वरि ॥ ३४ ॥ अत्रासौभर्त्तृजीवोमेस्थितोव्योम्निगृहेनृपः ॥ अदृश्यःखेयथावायुरामोदोवानिलेयथा ॥ ३५ ॥ इहैवांगुष्ठमात्रांतेतद्योम्न्येवपदंस्थितम् ॥ मद्भर्त्तृराज्यंसमवगतंयोजनकोटिभाक् ॥ ३६ ॥ आवांखमेवखस्थंचभर्त्तृराज्यंममेश्वरि ॥ पूर्णंसहस्रैःशैलानांमहामायेयमातता ॥ ३७ ॥ तद्देविभर्त्तृनगरंपुनर्गंतुंममेप्सितम् ॥ तदेहितत्रगच्छावःकिंदूरंव्यवसायिनाम् ॥ ३८ ॥ ॥श्रीवसिष्ठउवाच॥ ॥इत्युक्त्वाप्रणतादेवींसाप्रविश्याशुमंडपम् ॥ विहंगीवतयासाकंपुप्लुवेसिनिभंनभः ॥ ३९ ॥ भिन्नांजनचयप्रख्यंसौम्यैकार्णवसुंदरम् ॥ नारायणांगसदृशंभृंगपृष्ठामलच्छवि ॥ ४० ॥ मेघमार्गमतिक्रम्यवातस्कंधावनितथा ॥ सौरमार्गमथाक्रम्यचंद्रमार्गमतीत्यच ॥ ४१ ॥ ध्रुवमार्गोत्तरंगत्वासाध्यानांमार्गमेत्यच ॥ सिद्धानांसमतीत्योर्वीमुल्लंघ्यस्वर्गमंडलम् ॥ ४२ ॥ ब्रह्मलोकोत्तरंगत्वातुषितानांचमंडलम् ॥ गोलोकंशिवलोकंचपितृलोकमतीत्यच ॥ ४३ ॥ विदेहानांसदेहानांलोकानुत्तीर्यदूरगम् ॥ दूराद्दूरमथोगत्वाकिंचिद्बुद्धाबभूवसा ॥ ४४ ॥ पश्चादालोकयामाससमतीतंनभस्थलम् ॥ यावन्नकिंचिच्चंद्रार्कताराद्यालक्ष्यतेत्यधः ॥ ४५ ॥ तमस्तिमितगंभीरमाशाकुहरपूरकम् ॥ एकार्णवोदरप्रख्यंशिलोदरघनंस्थितम् ॥ ४६ ॥

शपरः ॥ ४१ ॥ मार्गशब्दोलोकपरोध्रुवस्यमार्गाभावात् ॥ एवमुर्वींपदमपि ॥ ४२ ॥ तुषितानांनित्यसंतुष्टानांमंडलंवैकुंठं ॥ जगतःपितरौशिवौलोक्येतेयत्रेतिपितृभ्यांवालोक्यतइतिपितृलोकोत्रशिवलोकएव ॥ कव्यवाडादिपितृदेवाधिष्ठितलोकस्यदूरमधएवावस्थानादत्राप्रसक्तेः ॥ ४३ ॥ पुराणेषुसदेहाश्चविदेहाश्चभवंत्यालेच्छयापुनरितिशिवसारूप्यमुक्तिप्राप्तानांद्विधावस्थानोक्तेस्तेषांलोकम् ॥ अपरिच्छिन्नस्वरूपविस्मरणात्किंचिद्बुद्धा ॥ ४४ ॥ यावत्कालंयावद्दूरंचनकिंचिदालक्ष्यतेतमश्चस्थितंतावत्पश्चादालोकयामासेतिपूर्वेणान्वयः ॥ ४५ ॥ आशादशदिशस्तत्कुहराणांछिद्राणांपूरकम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तत्र ॥ घनत्वान्मुष्टिग्राह्यमिवमुष्टिग्राह्यं ॥ कुतःप्राप्तमितिशेषः ॥ ४७ ॥ ४८ ॥ खंद्योतयतिखेद्योततइतिवाखद्योतोज्योतिरिंगणःपृष्ठगेनदूरोर्ध्वदेशस्थितेननावलोक्यतेत थेत्यर्थः ॥४९॥ पदवींपंथानम् ॥ अणोरूप्यणुकस्यकणःपरमाणुस्तद्वत् ॥ ५० ॥ एतव्यागंतव्या ॥ ५१ ॥ पुटस्यसंपुटस्यकर्परमूर्ध्वखर्परम् ॥ धूलिलेशाइव ॥ ५२॥ निबिड मंडपंनिश्छिद्रगर्भमितियावत् ॥ ५३ ॥ निश्चयःसत्यताध्यवसायस्तत्स्थम् ॥ कल्पितकुड्यादिवस्तु ॥ इतरन्मिथ्यात्वबुद्धिबाधितम ॥५४॥ ५५ ॥ आक्षोटबीजकर्परपृष्ठगा ॥ ५६ ॥ परमंशुद्धम अंबरंचिदाकाशः ॥ अविद्यायानष्टत्वेनाव्याकृताकाशपरिशेषात् ॥ ५७ ॥ तस्यापरिच्छिन्नतामाह ॥ तस्मिन्निति ॥ ५८ ॥ महत्यात्मनितिष्ठति ॥

लीलोवाच ॥ ॥ तद्देविभास्करादीनांक्वाधस्तेजोगतंवद ॥ शिलाजठरनिष्पंदंमुष्टिग्राह्यंतमःकुतः ॥ ४७ ॥ श्रीदेव्युवाच ॥ ॥ एतावतीमिमांव्योम्नःपदवीमागतासिभोः ॥ अर्कादीन्यपितेजांसियतोदृश्यंतएवनो ॥ ४८ ॥ यथामहांधकूपाधःखद्योतोनावलोक्यते ॥ पृष्ठगेनतथेहातोनाधःसूर्योवलोक्यते ॥ ४९ ॥ लीलोवाच ॥ ॥ अहोनुपदवींदूरमावामेतामुपागते ॥ सूर्योप्यधोणुकणवन्नमनागपिलक्ष्यते ॥ ५० ॥ इतउत्तरमन्यास्यात्पदवीकानुकीदृशी ॥ कथंचमातरेतव्याकथ्यतामितिदेविमे ॥५१॥ श्रीदेव्युवाच ॥ ॥ इतउत्तरमग्रेतेब्रह्मांडपुटकर्परम् ॥ यस्यचंद्रादयोनामधूलिलेशाःसमुत्थिताः ॥५२॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ इतिप्रकथयंत्यौतेप्राप्तेब्रह्मांडकर्परम् ॥ भ्रमर्याविवशैलस्यकुड्यंनिबिडमंडपम् ॥५३॥ अक्लेशेनैवतेतस्मान्निर्गतेगगनादिव ॥ निश्चयस्थंहियद्वस्तुतद्वज्रगुरुनेतरत् ॥ ५४ ॥ निरावरणविज्ञानासाददर्शततस्ततम् ॥ जलाद्यावरणंपारेब्रह्मांडस्यातिभासुरम् ॥५५॥ ब्रह्मांडाद्दशगुणतस्तोयंतत्रव्यवस्थितम् ॥ आस्थितंवेष्टयित्वातुत्वगिवाक्षोटपृष्ठगा ॥५६॥ तस्माद्दशगुणोवह्निस्तस्माद्दशगुणोनिलः ॥ ततोदशगुणंव्योमततःपरममंबरम् ॥५७॥ तस्मिन्परमकेव्योम्निमध्याद्यंतविकल्पनाः ॥ नकाश्चनसमुद्यंतिवंध्यापुत्रकथाइव ॥५८॥ केवलंविततंशांतंतदनादिगतभ्रमम् ॥ आद्यंतमध्यरहितंमहत्यात्मनितिष्ठति ॥ ५९ ॥ आकल्पमुत्तमबलेनशिलापतेच्चेत्तस्मिन्बलात्पतगराडपिचोत्पतेच्चेत् ॥ तद्योजनंनलभतेविमलेंबरेंतर्माकल्पमेकजवगोप्यथमारुतोपि ॥ ६० ॥ ॥ इत्यार्षेवासिष्ठ० वा० दे० मो० उ० ली० परमाकाशवर्णनंनामएकोनत्रिंशत्तमःसर्गः ॥२९॥ ॥ ॥ ६७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ पृथिव्यप्तेजसांतत्रनभस्वन्नभसोरपि ॥ यथोत्तरंदशगुणानतीत्यावरणान्क्षणात् ॥ १ ॥

स्वेमहिम्निप्रतिष्ठितइतिश्रुतेरित्यर्थः ॥ ५९ ॥ तस्मिन्विमलेंबरेऊर्ध्वदेशादाकल्पंशिलाउत्तमबलेनातिजवेनपतेच्चेदधोदेशाद्गरुडराडप्याकल्पमुत्पतेच्चेत्अथतयोरंतःअंतरालेमानंमातत्कल्पंतत्समर्थंयथास्यात्तथाउभयतएकजवगोपिमारुतस्तयोर्योजनंमेलनंनलभतेकिंपुनःपरितोंतमितिसर्वतोप्यपरिच्छिन्नंतदित्यर्थः ॥६०॥ ॥ इतिवासिष्ठ० उत्प० एकोनत्रिंशःसर्गः ॥२९॥ ॥ ६७ ॥ ॥ तादृशास्तद्विचित्राश्चब्रह्मांडानंतकोटयः ॥ चिद्व्योम्निरेणुवद्दृष्टालीलयेत्यत्रवर्ण्यते ॥ १ ॥ नभस्वन्नभसोर्वाय्वाकाशयोः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्प्रागुक्तंपरमाकाशंअविद्याशबलंचिदाकाशंयथातत्राकाशेइदंवर्णितब्रह्मांडलक्षणंजगत्ततंविस्तृतंतथाअंडमात्रकंसर्वब्रह्मांडजातमपिददर्शेत्यर्थः ॥ २ ॥ तदेवस्पष्टयति ॥ तादृशेति ॥ स्फुरितान्स्वप्रकाशाधिष्ठानचैतन्येनभासितान् ॥३॥ महाशून्यत्वमविद्यासैववारियत्र ॥ अर्बुदग्रहणमसंख्यत्वपरं॥४॥ इतीदृशानामंडानांकोट्योज्ञेयाःसहस्रशः॥ सर्वगत्वात्प्रधानस्यतिर्यगूर्ध्वमधस्थिताइतिपुराणोक्तिमनुरुध्याह ॥ कांश्चिदिति ॥ स्वसंविदातत्तद्ब्रह्मांडाभिमानिजीवसंविदनुसारेणेत्यर्थः ॥ ५ ॥ इदानींतन्नक्रियावैचित्र्याद्रूपवैचित्र्येणोत्पत्तिरपिप्राक्तनोपासनासंविदनुसारेणैवेत्याह ॥ यत्रेति ॥६॥ इदंचतदनुभवितृदृष्ट्योक्तंपरमार्थतस्तुतत्रचिदाकाशेइहएतद्ब्रह्मांडदेशेपिनैवकिंचिदस्तिऊर्ध्वमपिनामेत्यत्यंतनिवारणार्थं॥ तेषामंडानांगमनागमनान्यपिनचकिंत्वन्यदेवकिंचिदवाङ्मनसगोचरंदिग्विभागादिसर्वद्वैतशून्यंपदंवस्त्वस्तितस्माद्ब्रह्मांडजातंवर्णितंतद्देहागमंदेहप्राप्तिमज्ञदृशाभिप्रेत्यतत्तथोक्तमित्यर्थः॥७॥यदिधर्म्यैवनास्तिकतर्ह्युत्पत्त्यादिकल्पनेतिचेत्तदधिष्ठानसंविद्येवेत्याह ॥ उत्पद्येति ॥ स्वभावोत्रस्वाविद्याततस्तत्प्रभवैःस्वसंकल्पैरुत्पद्यतइवशमंयातीवेत्यर्थः ॥ ८ ॥ ननुयद्यधिष्ठानेदिग्विभागोनास्तितर्ह्यध्यस्तेपिनस्यात् ॥ अध्यस्तस्याधिष्ठानदिङ्मात्रनिष्ठत्वनियमादित्याशयेनरामःशंकते ॥ किमधइति ॥ इहाधि

ददर्शपरमाकाशंतत्प्रमाणविवर्जितम्॥ तथाततंजगदिदंयथातत्रांडमात्रकम्॥२॥ तादृशावरणान्सर्गान्ब्रह्मांडेषुददर्शसा॥ कोटिशः स्फुरितान्व्योम्नित्रसरेणूनिवातपे॥३॥ महाकाशमहांभोधौमहाशून्यत्ववारिणि॥ महाचिद्दवभावोत्थान्बुद्बुदानर्बुदप्रभान्॥४॥ कांश्चिदापततोधस्तात्कांश्चिच्चोपरिगच्छतः॥ कांश्चित्तिर्यग्गतीनन्यान्स्थितांस्तब्धान्स्वसंविदा॥५॥ यत्रयत्रोदितासंविद्येषांयेषांयथायथा॥ तत्रतत्रोदितंरूपंतेषांतेषांतथातथा॥६॥ नैहैवतत्रनामोर्ध्वंनाधोनचगमागमाः॥ अन्यदेवपदंकिंचित्तस्माद्देहागमंहितत्॥७॥ उत्पद्योत्पद्यतेतत्रस्वयंसंवित्स्वभावतः॥ स्वसंकल्पैःशमंयातिबालसंकल्पजालवत्॥८॥ ॥श्रीरामउवाच॥ ॥किमधःस्यात्किमूर्ध्वंस्यात्किंतिर्यक्तत्रभासुरे॥इतिब्रूहिममब्रह्मन्निहैवयदिनास्थितम्॥९॥ ॥श्रीवसिष्ठउवाच॥ ॥ससर्वावरणाएतेमहत्यंतविवर्जिते॥ब्रह्मांडाभांतिदुर्दृष्टेर्व्योम्निकेशोंड्रकोयथा॥१०॥अस्वातंत्र्यात्प्रधावंतिपदार्थाःसर्वएवयत्॥ ब्रह्मांडेपार्थिवोभागस्तदधस्तूर्ध्वमन्यथा॥११॥

ष्ठानएवयदिप्राङ्नस्थितंतर्हितत्रकल्पनयाभासुरेजगतिकिमधःस्यादित्यर्थः ॥ ९ ॥ मायिकेप्रपंचेनैतादृशनियमव्यभिचारोदोषायेत्याशयेनप्रथममुत्तरमाहवसिष्ठः ॥ ससर्वेति॥ दुर्दृष्टेस्तिमिरदूषितदृष्टेः ॥ १० ॥ सर्ववस्तूनामीश्वरेच्छापारतंत्र्याद्वानियमातिक्रमोनदोषइत्याशयेनाह ॥ अस्वातंत्र्यादिति ॥ यथाकदंबकेसराणामाधारकर्णिकागोलकमपेक्ष्यैवमूलदेशकल्पनातथाब्रह्मांडेषुसर्वभावानांपृथिवीमपेक्ष्याधोदेशकल्पना ॥ नचवास्तवाधोदिगभावेवृंतमुक्तस्यफलस्यगुरुत्वादधःपतनेविनिगमनाविरहःस्यादितिवाच्यम् ॥ गुरुत्वंहिविषयाणांस्वस्वेंद्रियाकर्षणशक्तिरिवस्वशक्यसंबद्धपृथिव्यादेःस्वांशाकर्षणशक्तिरेवनगुणांतरम्॥ अतएवहिबहिर्दिग्विभागाभावाद्गुरुतमानामपिब्रह्मांडानांनपतनादिप्रसक्तिर्नवातदावरणजलादेस्तद्विश्लेषप्रसक्तिरितिनाधिष्ठानचितिदिग्विभागापेक्षेत्याशयेनसमाध्यंतरमाह ॥ ब्रह्मांडइति ॥ पार्थिवोमहापृथिवीरूपोब्रह्मांडभागस्तस्यसर्वभौतिकपदार्थस्याधः ॥ अन्यथातदन्योनभोभागऊर्ध्वमितिकल्पनेत्यर्थः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयंप्रकारोभूगोलंसर्वतःखगोलेनज्योतिश्चक्राधारेणवेष्टितमित्यभ्युपगच्छतांज्योतिःशास्त्रकृतामपिसंमतइत्याशयेनतदुदाहृतंदृष्टांतमाह ॥ पिपीलिकानामिति ॥ लोष्टकेमृत्पिंडे ॥ दशसुदिक्षुदशदिक्कंलग्नानांपादाअधएवपृष्ठंतुऊर्ध्वमितिमहतांसूर्यादीनामुदाहृतंतत्सिद्धांतेप्रसिद्धमित्यर्थः ॥ १२ ॥ इत्थंशंकांसमाधायप्रस्तुतब्रह्मांडानांवैचित्र्यंवर्णयितुंप्रक्रमते ॥ वृक्षेत्यादिना ॥ केषांचिद्ब्रह्मांडानांहृदिअंतर्भूतलंवृक्षवल्मीकजालेनवेष्टितंनमनुष्यैः ॥ व्योमतुसुरैरनरैर्नरभिन्नैर्नरसदृशैःकिंपुरुषैर्दैत्यैश्चसहितैस्तैस्तैर्लोकैर्वेष्टितमित्यर्थः ॥ १३ ॥ किंचित्तुब्रह्मांडजातंभूतेनइदंकल्पनभूतेनसद्यःकल्पनात्मकेनचतुर्विधप्राणिवर्गेणसहैवसंभूतमुत्पन्नं ॥ आक्षोटकंदरालद्रुमफलम् ॥ १४ ॥ विंध्याचलस्यवनलक्षणेआभोगेकल्पितसंस्थानेकरेणवःकरिण्यःपरस्यपरमात्मनआभोगेमायाशबलसंस्थाने ॥ गजाइतिवाच्येकरेणुग्रहणंयमकार्थं ॥ १५ ॥ ननुयथाब्रह्मांडाश्चिदाकाशंप्रत्यणवस्तथाचिदाकाशमपिकंचित्पदार्थंप्रत्यणुकिंनस्यात्तत्राह ॥ तस्मिन्निति ॥ स्थितौतस्मिन्सर्वंउत्पत्तौततःसर्वंप्रलयेतत्सर्वं ॥ यद्यस्मादेवंतस्मात्सर्वतःसर्वदिक्षुसर्वकालेषुस

पिपीलिकानांमहतांव्योम्निवर्त्तुललोष्टके॥दशदिक्कमधःपादाःपृष्ठमूर्ध्वमुदाहृतम्॥१२॥वृक्षवल्मीकजालेनकेषांचिद्धृदिभूतलम्॥ससुरानरदैत्येनवेष्टितंव्योमनिर्मलम्॥१३॥संभूतंसहभूतेनसग्रामपुरपर्वतम्॥इदंकल्पनभूतेनपक्वाक्षोटमिवत्वचा॥ १४ ॥ यथाविंध्यवनाभोगेप्रस्फुरंतिकरेणवः॥तथातस्मिन्पराभोगेब्रह्मांडत्रसरेणवः॥ १५॥तस्मिन्सर्वंततःसर्वंतत्सर्वंसर्वतश्चयत्॥ तच्चसर्वमयोनित्यंतथातदणुकंप्रति॥ १६॥शुद्धबोधमयेतस्मिन्परमालोकवारिधौ॥अजस्रमेत्यगच्छंतिब्रह्मांडाख्यास्तरंगकाः॥ १७॥ अंतःशून्याःस्थिताःकेचित्संकल्पक्षयरात्रयः॥तरंगाइवतोयेब्धौप्रोह्यंतेशून्यतार्णवे॥१८॥ केषांचिदंतःकल्पांतःप्रवृत्तोघर्घरारवः॥नश्रुतोन्यैर्नचज्ञातःस्वभावेनरसाकुलैः॥ १९॥अन्येषांप्रथमारंभेशुद्धभूषुविजृंभते॥सर्गःसंसिक्तबीजानांकोशेंकुरकलायथा॥२०॥महाप्रलयसंपत्तौसूर्याचिर्विद्युतोद्वयः॥प्रवृत्तागलितुंकेचित्तापेहिमकणाइव ॥ २१॥

र्वंवस्तुषुचतदेव ॥ तच्चतद्यदिदंमयोदोमयःसर्वमयइतिश्रुतिप्रसिद्धआत्मैव तथाभूतंचतत्कंप्रत्यणुस्यान्नकंचित्प्रतीत्यर्थः ॥ १६ ॥ शुद्धबोधमये ॥ स्वार्थेमयट् ॥ १७ ॥ तत्रकेचिद्ब्रह्मांडाअव्याकृताएवांतःसंतीत्याह ॥ अंतरिति ॥ पूर्वकल्पीयसर्वसंकल्पबीजलिंगोपाधिक्षयेसतिरात्रयस्तमोरूपाःसुषुप्तइवेतियावत् ॥ असद्वाइदमग्रआसीदितिश्रुतावसच्छब्देनेवशून्यताशब्देनाव्याकृतमुच्यते ॥ तल्लक्षणेअर्णवेअंबुधौप्रकर्षेणऊह्यंतेतर्क्यंते ॥ कथमसतःसज्जायतेइतिश्रुत्युक्तयुक्त्यासंतीतितर्क्यंतइत्यर्थः ॥ १८ ॥ स्वभावेनस्वाभाविकेनमोहेन ॥ रसोविषयरागस्तदाकुलैरन्यैर्नचज्ञातोनैवज्ञातः ॥ १९ ॥ अन्येषांब्रह्मांडानांप्रथमारंभेप्राथमिककल्पयुगाद्यारंभेपूर्वोत्पन्नप्राणिभिरदूषितत्वाच्छुद्धासुभूषुभुवनेषुसर्गःप्रवर्त्ततइत्यर्थः ॥ कोशेबीजपुटेअंकुरएवशुभ्रत्वात्कला ॥ २० ॥ केषुचिद्ब्रह्मांडेषुमहाप्रलयस्यसंपत्तौविभवेविजृंभणकालइतियावत् ॥ सूर्यादयःप्रथमंभुवनंदग्ध्वास्वयमपिगलितुंप्रवृत्ताइत्यर्थः ॥ २१ ॥

---

१ दशदिशोयस्मिन्निति क्रियाविशेषणफलितोयमर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केचिद्ब्रह्मांडाअप्राप्ताभूमिराधारोयैः ॥ ननुपतनासंभवःप्रागुक्तस्तस्यकागतिस्तत्राह ॥ तथेति ॥ पतनसंविन्मयेषुपतनंनविरुध्यतइत्यर्थः ॥ २२ ॥ स्तब्धानिश्चलाअन्येतथा प्रोदितसंविदःस्पंदात्मसंविद्वासनाप्रभवाइतियावत् ॥ २३ ॥ ननुधातायथापूर्वमकल्पयदितिश्रुत्यासर्गाणामैकरूप्यंप्रतिपादितंतद्विरुद्धमिदंकथंवैचित्र्यमुच्यतेतत्राह ॥ आचारादिति ॥ तयाश्रुत्यापूर्वकल्पेयादृशीधातुःसृष्टिस्तादृश्येवद्वितीयादिरितिप्रतिपाद्यते ॥ तत्रवेदशास्त्राणांसंबंधिनःप्राग्भवीयकर्मज्ञानानुष्ठानलक्षणादाचाराद्धातृभावंप्राप्तस्य आद्येप्राथमिकेएवसर्गेअन्यथाइतरधातृसर्गवैलक्षण्येनोदितेसतिअन्येषांतदुत्तरकल्पीयसर्गाणामारंभोपितथापूर्ववदस्तुनामतथापिधात्रंतरसर्गापेक्षयाअस्यक्रमोऽनित्योऽनियतएवसंस्थितइतिवैचित्र्यसिद्धिरित्यर्थः ॥२४॥ तपसातोषयित्वातुपितरंपरमेश्वरम् ॥ परस्परस्माज्जायंतेपरस्परजयैषिणइतिपुराणेषुब्रह्मविष्णुरुद्राणांकल्पभेदेनपरस्परस्मादुत्पत्त्यभिधानादुत्पादकप्राधान्येतेषांगुणभेदात्सर्गस्यसत्वादिगुणप्राधान्यप्रयुक्तवैचित्र्यमपिदुर्वारमित्याशयेनाह ॥केचिदित्यादिना ॥ केचिद्ब्रह्मांडाब्रह्माचतुर्मुखएवादिपुरुषोये

आकल्पंनिपतंत्येवकेचिदप्राप्तभूमयः ॥ यावद्विशीर्यजायंतेतथांसंविन्मयाःकिल ॥ २२ ॥ स्तब्धाइवस्थिताःकेचित्केशोंडूकमिवांबरे ॥ वायोःस्पंदाइवाभांतितथाप्रोदितसंविदः ॥ २३ ॥ आचाराद्वेदशास्त्राणामाद्यएवान्यथोदिते ॥ आरंभोपितथान्येषामनित्यःसंस्थितः क्रमः ॥ २४ ॥ केचिद्ब्रह्मादिपुरुषाःकेचिद्विष्ण्वादिसर्गपाः ॥ केचिच्चान्यप्रजानाथाःकेचिन्निर्नाथजंतवः ॥ २५ ॥ केचिद्विचित्रसर्गेशाः केचित्तिर्यङ्मयांतराः ॥ केचिदेकार्णवापूर्णाइतरेजननिर्वर्जिताः ॥२६॥ केचिच्छिलांगनिष्पिंडाःकेचित्कृमिमयांतराः ॥ केचिद्देवमयाएव केचिन्नरमयांतराः ॥२७॥ केचिन्नित्यांधकाराढ्यास्तथाशीलितजंतवः ॥ केचिन्नित्यप्रकाशाढ्यास्तथाशीलितजंतवः ॥२८॥ केचिन्मशकसंपूर्णाउदुंबरफलश्रियः ॥ नित्यंशून्यांतराःकेचिच्छून्यस्पंदात्मजंतवः ॥ २९ ॥ सर्गेणतादृशेनान्येपूर्णायेंतर्द्धियामिह ॥ कल्पनामपिनायांतिव्योमपूर्णाचलोयथा ॥३०॥ तादृगंबरमेतेषांमहाकाशंततंस्थितम् ॥ आजीवितंप्रगच्छद्भि[1]र्विष्ण्वाद्यैर्यन्नमीयते ॥३१॥

षांतथाविधाः ॥ विष्णुरेवादिःसर्गपःसर्गाधिनाथोयेषाम् ॥ अन्येरुद्रभैरवदुर्गाविनायकादयःप्रजानाथायेषाम् ॥तत्तन्माहात्म्यप्रतिपादकपुराणादिषुतेषामपिब्रह्मादिनियंतृताश्रवणात् ॥ निर्नाथानियंतृशून्यामृगपक्ष्यादिजंतवोयेषु ॥ २५ ॥ ब्रह्मादीनांसमप्राधान्येविचित्रसर्गेशाः ॥ इत्थंचप्राणिकर्मवासनावैचित्र्यात्स्रष्टॄणामिच्छाबोधादिवैचित्र्याच्चयथेच्छंब्रह्मांडवैचित्र्यंसुकल्पमित्याशयेनाह ॥ तिर्यङ्मयांतराइत्यादिना ॥ २६ ॥ निष्पिंडानितरांपिंडितानिबिडाइतियावत् ॥ २७ ॥ तथाशीलितादृष्टाजंतवःप्राणिनोयेषु ॥ पेचकादीनामंधकारेपिदर्शनदर्शनादितिभावः ॥ २८ ॥ २९ ॥ तादृशेनसर्गेणपूर्णायेसर्गाअंतर्द्धियांयोगिनांकेपिस्फुटव्यवहारकल्पनांसविकल्पकज्ञानविषयतांनायांति ॥ अस्मद्धियामितिपाठेप्यस्माकंधीरिवधीर्येषांयोगिनामित्येवार्थः ॥ ३० ॥ तादृगितिपदंदेहलीदीपकन्यायेनपूर्वेणोत्तरेणचसंबध्यते ॥ तथाचव्योमपूर्णाचलोयथायादृशस्तादृगंबरमाकाशः अशून्यस्वभावइतियावत् ॥ महाकाशंमहाप्रकाशंतुतादृक्तथाततंविस्तृतंयथाआजीवितंस्वजीवनकालमभिव्याप्यप्रगच्छद्भिर्धावद्भिरपिविष्ण्वाद्यैर्यन्नमीयतेइयदितिनपरिमीयतइत्यर्थः ॥ ३१ ॥

---

१ यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वस्तुब्रह्मांडानंत्यंतद्वैचित्र्यंचतथापिबाह्यजलाद्यावरणानांविधारकाभावात्कथंनविश्लेषइत्याशंक्यप्रागस्मदुक्तामाकर्षणशक्तिमाश्रित्यसमाधत्ते ॥ प्रत्येकस्येति ॥ भूतानामाकृष्टिराकर्षणंतत्करोभावःशक्तिविशेषःकटकरत्नवत्परितोव्याप्तःस्थितः ॥ ३२ ॥ जगद्विस्तारवर्णनंतदशक्तिख्यापनव्याजेनोपसंहरति ॥ यइति ॥ अस्माकंधियांजगद्वर्णनविषयेयःसर्वविभवःसदर्शितइतिशेषः ॥ ततःपरंयज्जगद्धियांनविषयंविषयः ॥ विषयशब्देक्लीबताछांदसी ॥ तत्कथनेममशक्तिर्नास्तीत्यर्थः ॥ ३३ ॥ नमदीयवर्णनाशक्त्याइयंत्येवजगंतीतिमंतव्यंकिंतुपरैरलक्षितान्यप्यनंतानिसंतिमायायांसर्गशक्त्यानंत्यादितिसदृष्टांतमाह ॥ भीमेति ॥ नदर्शितंपरस्परंस्वरूपंयथास्यात्तथायक्षाभूतगणायथानृत्यंतिएवंसुबहूनिजगंत्यविद्यावृतेब्रह्मणिस्फुरंतीत्यर्थः ॥ ३४ ॥ ॥ इतिवासिष्ठमहारा० उ० त्रिंशत्तमःसर्गः ॥ ३० ॥ ॥ छ ॥ ॥ पुनरंतःपुरप्रेक्षाब्रह्मांडांतरदर्शनम् ॥ शूरादिलक्ष्मस

प्रत्येकस्यांडगोलस्यस्थितःकटकरत्नवत् ॥ भूताकृष्टिकरोभावःपार्थिवःस्वस्वभावतः ॥ ३२ ॥ यःसर्वविभवोस्माकंधियांनविषयंततः ॥ तज्जगत्कथनेशक्तिर्नममास्तिमहामते ॥ ३३ ॥ भीमांधकारगहनेसुमहत्यरण्येनृत्यंत्यदर्शितपरस्परमेवमत्ताः ॥ यक्षायथाप्रविततेपरमांबरेंतरेवंस्फुरंतिसुबहूनिमहाजगंति ॥ ३४ ॥ ॥ इत्यार्षेवा० वा० दे० मो० उत्पत्तिप्रकरणे० ली० विचित्रब्रह्मांडकोटिवर्णनंनामत्रिंशत्तमःसर्गः ॥ ३० ॥ ॥ छ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ एवमाकलयंत्यौतेनिर्गत्यजगतोनिजात् ॥ अंतःपुरंददृशतुर्झटित्येवविनिर्गते ॥ १ ॥ स्थितपुष्पभरापूर्णमहाराजमहाशवं ॥ शवपार्श्वोपविष्टांतश्चित्तलीलाशरीरकम् ॥ २ ॥ घनरात्रितयाल्पाल्पमहानिद्राजनाकुलम् ॥ धूपचंदनकर्पूरकुंकुमामोदमंथरम् ॥ ३ ॥ तमालोक्यापरंभर्तुःसंसारंगंतुमादृता ॥ पपातलीलासंकल्पदेहेनात्रैवतन्नभः ॥ ४ ॥ विवेशभर्तुःसंकल्पसंसारंकिंचिदाततम् ॥ संसारावरणंभित्त्वाभित्त्वाब्रह्मांडकर्परम् ॥ ५ ॥ प्रापसार्द्धंतयादेव्यापुनरावरणान्वितम् ॥ ब्रह्मांडमंडपंस्फारंतंप्रविश्यतथाजवात् ॥ ६ ॥ ददर्शभर्तुःसंकल्पजगज्जंबालपल्वलम् ॥ सिंहीवशैलकुहरंतमोजलदपंकिलम् ॥ ७ ॥ देव्यौविविशतुस्तत्तेव्योमव्योमात्मिकेजगत् ॥ ब्रह्मांडेंतर्यथापक्वंमृदुबिल्वंपिपीलिके ॥ ८ ॥ तत्रलोकांतराण्यद्रीनंतरिक्षमतीत्यते ॥ प्रापतुर्भूतलंशैलमंडलांभोधिसंकुलम् ॥ ९ ॥ मेरुणालंकृतंजंबूद्वीपंनवदलोदरम् ॥ गत्वाथभारतेवर्षेलीलानाथस्यमंडलम् ॥ १० ॥

न्वद्धसैन्यप्रेक्षात्रवर्ण्यते ॥ १ ॥ निजात्प्राग्भवीयाज्जगतोनिर्गत्यैवमुक्तप्रकारमनंतकोटिब्रह्मांडवैचित्र्यमाकलयंत्यौपश्यंत्यौतेतेषुकिंचिद्ब्रह्मांडंझटित्येवप्रविश्यांतःपुरंददृशतुस्तत्रचनचिरमूषतुःकिंतुझटित्येवविनिर्गतेइतिवक्ष्यमाणानुवादः ॥ १ ॥ स्थितेत्यादिबहुव्रीहयोंतःपुरविशेषणानि ॥ अंतःसमाध्यारूढंचित्तंयस्मिंस्तथाविधंलीलाशरीरंयस्मिन् ॥ २ ॥ घनशब्देनशोकप्रयुक्तदैर्घ्यंलक्ष्यते ॥ अल्पाल्पयामहानिद्रयासुषुप्त्यायुक्तैर्जनैराकुलम् ॥ ३ ॥ अत्रैवांतःपुरएवतन्नभःप्रागुक्तमंडपाकाशम् ॥ ४ ॥ ५ ॥ स्फारंविस्तीर्णं ॥ ६ ॥ जंबालस्यपंकस्यपल्वलंवेशंतमिवस्थितम् ॥ तमोजलदाभ्यांपंकिलंसपंकमिवस्थितम् ॥ ७ ॥ ८ ॥ ९ ॥ नवदलानिनवखंडाः ॥ लीलानाथस्यमंडलंराज्यंददर्शेत्यन्वयः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवस्कंदनंसेनयाआक्रमणम् ॥ सामंतैर्मंडलेश्वरैःस्वसहायैरुद्रिक्तोविवृद्धोभूमिपःसिंधुराजः ॥ ११ ॥ तेनसहसंग्रामसंरंभेप्रसक्तेसतीतिशेषः ॥ त्रैलोक्यस्थैर्भूतैःप्राणिभिःसंकटंनिबिडितं ॥ १२ ॥ मिथ्यात्वनिश्चयादंतर्द्धानादिकुशलत्वाच्चाशंकितंभयशंकारहितंयथास्यात्तथाआगते ॥ नभश्चरेत्यादीन्यारामप्रश्नान्नभसोविशेषणानि ॥ १३॥१४॥ इतआरभ्ययथायोगंबहवोबहुव्रीहिसमासाः ॥ १५ ॥ वेतालादयोभूतजातिभेदाः ॥ द्वंद्वपदेनतत्कार्यंयुद्धंलक्ष्यते ॥ आयुधानांआसमंतात्पातेभ्यआत्मनोरक्षार्थंगृहीतान्याश्रितान्यद्रितटानियैः ॥ १६ ॥ अस्त्राणांमार्गभूतात्सन्निहितान्नभोभागात् ॥ अहोअहंपुरुषइत्यभिमानआहोपुरुषिका ॥ १७ ॥ किंवदंतीजनश्रुतिः ॥ लीलासुहासविलासयोश्चोत्काभिरुत्कंठिताभिः ॥ १८ ॥ धर्मातिशयेनान्यैरप्रेक्ष्याणांप्रेक्षितुमशक्यानांप्रयुक्तेनयोगबलेनचाग्र्याणांश्रेष्ठानांमुनीनांजगत्स्वस्त्ययनार्थंपठ्यमानादेवतास्तवायस्मिन् ॥ संपन्नाअनेकेषांगंधर्वादिलोकपालानांवनिताविषयास्तदवसरोचिताःस्तवायस्मिन् ॥ अप्सरसःस्वानुपेक्ष्याभिनवान्कांतान्नोपगच्छेयुरितिलोकेशास्ताःस्तुवंतीत्यर्थः ॥ १९ ॥ स्वर्गार्हाःस्वर्गालंकरणत्वात्स्वर्गयोग्याः ॥ लोकपालाख्यावारणाऐरावतादयः ॥ २० ॥ अमराणांस्त्रैणेनस्त्रीसमूहेन ॥ २१ ॥ यशःशैत्येनाभिभूतौष्ण्यत्वाच्चंद्रीकृतः ॥ २२ ॥ प्रसंगाच्छूरादिलक्षणंजिज्ञासूरामःपृच्छति ॥ भगवन्निति ॥ अनुक्तासूचितस्यापिडिंभाहवस्यात्रलक्षणप्रश्नःशूरस्वर्गालंकरणत्वव्यतिरेकात्मकत्वात्तत्प्रासंगिकोबोध्यः ॥ २३ ॥ रणेयुध्यतइतिशेषः ॥ २४ ॥

एतस्मिन्नंतरेतस्मिन्मंडलेमंडितावनौ ॥ चक्रेवस्कंदनंकश्चित्सामंतोद्रिक्तभूमिपः ॥ ११ ॥ तेनसंग्रामसंरंभेप्रेक्षार्थंसमुपागतैः ॥ त्रैलोक्यभूतैस्तद्व्योमबभूवात्यंतसंकटम् ॥ १२ ॥ अशंकितागतेतत्तेदेव्यौददृशतुर्नभः ॥ नभश्चरगणाक्रांतमंबुदैरिवमालितम् ॥ १३ ॥ सिद्धचारणगंधर्वगणविद्याधरान्वितम् ॥ शूरग्रहणसंरब्धस्वर्गलोकाप्सरोवृतम् ॥ १४ ॥ रक्तमांसोन्मुखोन्मत्तभूतरक्षःपिशाचकम् ॥ पुष्पवृष्टिभिरापूर्णहस्तविद्याधरांगनम् ॥ १५ ॥ वेतालयक्षकूश्मांडैर्द्वंद्वालोकनसादरैः ॥ आयुधापातरक्षार्थंगृहीताद्रितटैर्वृतम् ॥ १६ ॥ अस्त्रमार्गनभोभागविद्रवद्भूतमंडलम् ॥ आहोपुरुषिकाक्षुब्धप्रेक्षकामोदनोद्भटम् ॥ १७ ॥ आसन्नभीमसंग्रामकिंवदंतीपरस्परम् ॥ लीलाहासविलासोत्कसुंदरीधृतचामरम् ॥ १८ ॥ धर्माप्रेक्ष्यप्रयुक्ताग्र्यमुनिस्वस्त्ययनस्तवम् ॥ संपन्नानेकलोकेशवनितावसरस्तवम् ॥ १९ ॥ स्वर्गार्हशूरानयनव्यग्रेंद्रभटभासुरम् ॥ शूरार्थालंकृतोत्तुंगलोकपालाख्यवारणम् ॥ २० ॥ आगच्छच्छूरसन्मानोन्मुखगंधर्वचारणम् ॥ शूरोन्मुखामरस्त्रैणकटाक्षेक्षितसद्भटम् ॥ २१ ॥ वीरदोर्दंडकाश्लेषलंपटस्त्रीगणाकरम् ॥ शुक्लेनशूरयशसाचंद्रीकृतदिवाकरम् ॥ २२ ॥ ॥ श्रीरामउवाच ॥ ॥ भगवञ्छूरशब्देनकीदृशःप्रोच्यतेभटः ॥ स्वर्गालंकरणंकःस्यात्कोवाडिंभाहवोभवेत् ॥ २३ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ शास्त्रोक्ताचारयुक्तस्यप्रभोरर्थेनयोरणे ॥ मृतोवाथजयीवास्यात्सशूरःशूरलोकभाक् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २५ ॥ पूर्वोक्तमेवस्पष्टीकुर्वन्नाह ॥ अयथाशास्त्रेत्यादिना ॥ २६ ॥ २७ ॥ शरणागतस्यरक्षणार्थेनयुद्धप्रयत्नेन ॥ २८ ॥ परिपाल्यस्यावश्यंपरिपालनार्हस्यस्वदेशस्यए कपालनेमुख्यवृत्त्यारक्षणेस्थितउद्युक्तः ॥ २९ ॥ ३० ॥ अयथाशास्त्रकारिसमाश्रयएवनरकायकिंपुनःप्रजोपद्रवकारिसमाश्रयइत्याशयेनपुनराह ॥ येहीति ॥ अयथाशास्त्रकारिणामर्थेइतिशेषः ॥ ३१ ॥ धार्मिकाश्रितस्याप्यधर्मेणयुध्यतोहतस्यनस्वर्गइत्याह ॥ धर्म्यमिति ॥ धर्मादनपेतंधर्म्यं ॥ संस्थितिःस्वर्गेस्थितिः ॥ अधर्म्येणापियुद्धेनय दिहतस्यस्वर्गःस्यात्तर्हिपरलोकस्यनिर्भयाःसंतःअलमत्यर्थंअधर्मयुद्धेनापिमत्ताःपरान्नाशयेयुरित्यर्थः ॥ ३२ ॥ परप्राणान्निजप्राणैःपणीकृत्योद्यतायुधः ॥ यत्रयत्रहतःशू

अन्यथाप्राणिकृत्तांगोरणेयोम्रतिमाप्नुयात्॥ डिंभाहवहतःप्रोक्तःसनरोनरकास्पदम्॥ २५॥ अयथाशास्त्रसंचारवृत्तेरर्थेनयुध्यते॥ यो नरस्तस्यसंग्रामेम्रतस्यनिरयोक्षयः ॥२६॥ यथासंभवशास्त्रार्थलोकाचारानुवृत्तिमान्॥ युध्यतेतादृशश्चैवभक्तःशूरःसउच्यते॥ २७॥ गोरर्थेब्राह्मणस्यार्थेमित्रस्यार्थेचसन्मते ॥ शरणागतयत्नेनसम्रतःस्वर्गभूषणम् ॥ २८ ॥ परिपाल्यस्वदेशैकपालनेयःस्थितःसदा ॥ राजाम्रतास्तदर्थंयेतेवीरावीरलोकिनः॥ २९ ॥ प्रजोपद्रवनिष्ठस्यराज्ञोऽराज्ञोथवाप्रभोः॥ अर्थेनयेम्रतायुद्धेतेवैनिरयगामिनः॥ ३०॥ येहिराज्ञामराज्ञांवाप्ययथाशास्त्रकारिणाम्॥ रणेम्रियंतेछिन्नांगास्तेवैनिरयगामिनः॥ ३१ ॥ धर्म्यंयथातथायुद्धंयदिस्यात्तर्हिसंस्थितिः॥ नाशयेयुरलंमत्ताःपरलोकभयोज्झिताः॥ ३२ ॥ यत्रयत्रहतःशूरःस्वर्गइत्यवशोक्तयः ॥ धर्मेयोद्धाभवेच्छूरइत्येवंशास्त्रनिश्चयः ॥ ३३ ॥ सदाचारवतामर्थेखड्गधारांसहंतिये ॥ तेशूराइतिकथ्यंतेशेषाडिंभाहवाहताः॥ ३४॥ तेषामर्थेरणेव्योम्निनितिष्ठंत्युत्कंठिताशयाः॥ शूरीभूतमहासत्वदयितोक्तिसुरांगनाः॥ ३५॥ विद्याधरीमधुरमंथरगीतिगर्भमंदारमाल्यवलनाकुलकामिनीकम्॥ विश्रांतकांतसुरसिद्धविमानपंक्तिव्योमोत्सवोच्चरितशोभमिवोल्लुलास॥ ३६॥ इ० वा० वा० मो० दे० उ० ली० युद्धप्रेक्षिकास्थितांबरवर्णनंनामएकत्रिंशत्तमःसर्गः॥ ३१॥ ॥श्रीवसिष्ठउवाच॥ ॥ अथवीरवरोत्कंठनृत्यदप्सरसिस्थिता॥ लीलावलोकयामासव्योम्निविद्यान्वितावनौ॥ १॥

रःस्वर्गस्तत्रपदेपदेइत्यादिसामान्यप्रवादानांतर्हिकागतिस्तत्राह ॥ यत्रेति ॥ ३३ ॥ ३४ ॥ शूरीभूतानांमहासत्वानांमहाबलानांदयितावयमित्युक्तिर्यस्मिन्कर्मणितद्यथास्यात्तथातिष्ठंतिप्रतीक्षंतइतियावत् ॥ ३५ ॥ मंदारमाल्यानांवलनाशूरोरसिप्रदानायग्रथनंस्वकबरीषुवेष्टनंवातत्राकुलाव्यग्राःकामिन्योयस्मिन् ॥ उत्सवार्थमुच्चरिताऊर्ध्वगताशोभायस्यतथाविधमिवेत्युत्प्रेक्षा ॥ ३६ ॥ ॥ इतिवासिष्ठमहारा० ता० उ० एकत्रिंशःसर्गः ॥ ३१॥ ॥ ७ ॥ ॥ सांकल्पिकविमानस्थज्ञप्तिलीलावलोकितम् ॥ सन्नद्धसेनाद्वितयंयुयुत्स्वत्रोपवर्ण्यते ॥ १ ॥ विद्यासरस्वतीतदन्विताशीलाअवनौसेनाद्वितयमवलोकयामासेतिसंबंधः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलेनचतुरंगसैन्येनमालितेवेष्टिते ॥ सिंहव्यश्चिकरक्षःपिशाचाधारत्वाद्वितीयाकाशभीषणे ॥ २ ॥ महद्भिरारंभैःकार्योद्योगैः ॥ ३ ॥ ४ ॥ निस्त्रिंशानांखड्गानांधाराएवासारा जलधारास्तान्वहंतोजनायत्र ॥ परस्वधंपरशुः ॥ भिंदिपालादयआयुधविशेषाः ॥ ५ ॥ कंकटंवर्म ॥ ६ ॥ कोपात्प्रोद्दामितानिप्रोद्यतानि ॥ ७ ॥ सर्पादिनिरोधाय मांत्रिकोल्लिखितरेखासदृश्यासेनाद्वयमध्यकृतरेखालक्षणयावामर्यादया ॥ झांकारैर्ध्वनिभिरभिभूतत्वादश्रुताःसंकथामिथोवार्त्तायत्र ॥ ८ ॥ राजाज्ञातःपूर्वंप्रहारोमाभूदिति स्मयोत्रशंकाततोनिमित्तान्निबद्धप्रायेणयोधाएवसंस्थानानिप्रधानावयवसन्निवेशायस्यतथाविधेननिखिलानीकेनमंथरम् ॥ ९ ॥ धनुर्द्वितयप्रमाणंजनशून्यात्मकंयन्मध्यं

स्वराष्ट्रमंडलेभर्तृपालितेबलमालिते ॥ कस्मिंश्चिद्वितताररण्येद्वितीयाकाशभीषणे ॥ २ ॥ सेनाद्वितयमाक्षुब्धंसौम्याब्धिद्वितयोपमम् ॥ महारंभघनंमत्तंस्थितंराजद्वयान्वितम् ॥ ३ ॥ युद्धसज्जंसुसंनद्धमिद्धमग्निमिवाद्भुतम् ॥ पूर्वप्रहारसंपातप्रेक्षाक्षुब्धाक्षिलक्षितम् ॥ ४ ॥ उद्यतामलनिस्त्रिंशधारासारवहज्जनम् ॥ कचत्परस्वधप्रासभिंदिपालर्ष्टिमुद्गरम् ॥ ५ ॥ गरुत्मत्पक्षविक्षुब्धवनसंपातकंपितम् ॥ उद्भिन्नकरालोकचंचत्कनककंकटम् ॥ ६ ॥ परस्परमुखालोककोपप्रोद्दामितायुधम् ॥ अन्योन्यबद्धदृष्टित्वाच्चित्रंभित्ताविवार्पितम् ॥ ७ ॥ लेखामर्यादयादीर्घबद्धयास्थापितस्थिति ॥ अनिवार्यमहासैन्यझांकाराश्रुतसंकथम् ॥ ८ ॥ पूर्वप्रहारस्मयतश्चिरंसंशांतदुंदुभि ॥ निबद्धयोधसंस्थाननिखिलानीकमंथरम् ॥ ९ ॥ धनुर्द्वितयमात्रात्मशून्यमध्यैकसेतुना ॥ विभक्तंकल्पवातेनमत्तमेकार्णवंयथा ॥ १० ॥ कायेसंकटसंरंभचिंतापरवशेश्वरम् ॥ विरटद्भेकककंठत्वग्भंगुरातुरहृद्गुहम् ॥ ११ ॥ प्राणसर्वस्वसंत्यागसोद्योगासंख्यसैनिकम् ॥ कर्णाकृष्टशरौघौघत्यागोन्मुखधनुर्धरम् ॥ १२ ॥ प्रहारपातसंप्रेक्षानिष्पंदासंख्यसैनिकम् ॥ अन्योन्योत्कंठकाठिन्यभरभ्रुकुटिसंकटम् ॥ १३ ॥ परस्परसुसंघट्टकटुटंकारकंकटम् ॥ वीरयोधमुखादग्धभीरुप्रेप्सितकोटरम् ॥ १४ ॥ मिथःसंस्थानकालोकमात्रासंदिग्धजीवितम् ॥ समस्तांगरुहासक्तप्रांशुवृद्धेभमानवम् ॥ १५ ॥ पूर्वप्रहारसंप्रेक्षाव्यग्रप्राणतयातया ॥ संशांतकल्लोलरवंनिद्रामुद्रपुरोपमम् ॥ १६ ॥ संशांतशंखसंघाततूर्यनिर्ह्रादद्दुंदुभि ॥ भूतलाकाशसंलीनसर्वपांसुपयोधरम् ॥ १७ ॥

तल्लक्षणेनैकसेतुना ॥ १० ॥ ईश्वरौराजानौ ॥ भयाद्भेककंठत्वगिवभंगुराकंपमानाआतुराणांभीरूणांहृद्गुहायत्र ॥ ११ ॥ शरौघलक्षणस्यौघस्यप्रवाहस्य ॥ १२ ॥ युद्धोत्कंठयाकाठिन्यंनिर्दयताक्रोधइतियावत् ॥ तद्भरप्रयुक्तभ्रुकुटिभिःसंकटंदुष्प्रेक्ष्यम् ॥ १३ ॥ सुसंघट्टोऽभिघातस्तेनकटुटंकाराःकंकटावारबाणायत्र ॥ वीरयोधमुखाग्निनाआदग्धैरिवश्यामीकृतमुखैर्भीरुभिर्निलयनायप्रेप्सितागिरिकोटरायत्र ॥ १४ ॥ संस्थानकंयुद्धंतदालोकनपर्यंतंअसंदिग्धंजीवितंयस्य ॥ सम्यगस्तैरुदंचितैरंगरुहैरासक्ताअतएवोर्ध्वैःप्रांशवस्तिर्यक्त्वद्धाउपचिताइभामानवाश्चयत्र ॥ १५ ॥ प्राणशब्देनतद्वशंचित्तंलक्ष्यते ॥ १६ ॥ पांसुपयोधरयोर्यथाक्रमंसंबंधः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंगुलाःसेनामंडनभूताःशूराः ॥ मकरव्यूहानांमत्स्यानांचसंख्यंयुद्धंयस्मिंस्तथाविधाब्धिरिवभासुरम् ॥ १८ ॥ हास्तिकानांहस्त्यारोहाणामुत्तंभितैरूर्ध्वीकृतैःकरैःकाननमिवसंपद्यमानंकृतंखांतरंनभोवकाशोयस्मिन् ॥ १९ ॥ तरद्भिःप्लवद्भिस्तरलैर्भापूरैःसपक्षाणीवसंवृत्तानिसकलायुधानियस्मिन् ॥ दुंदुभ्यादीनांधमद्धमितिशब्दैःश्वासोत्थैःशंखकाहलादिशब्दैश्चध्मातंशब्दायमानंकृतम् ॥ २० ॥ सांप्रतंसेनयोःप्रदेशभेदेनव्यूहरचनाभेदंवर्णयन्विशिनष्टि ॥ चक्रेति ॥ क्वचिच्चक्रव्यूहस्यकरैर्निर्मातृभिःपुरुषैराक्रांतादुर्वृत्तादानवायैस्तथाविधैःसुरैरिवभासुरम् ॥ नागशब्दश्श्लेषैर्भित्तिकाभेदारोपेणसर्पात्मतयागजाउच्यंते ॥ २१ ॥ क्वचित्तुश्येनव्यूहेनविभिन्नोविभक्तोयःप्रतिसैन्यसन्निवेशस्तेनहेतुनाउत्तमस्तारतमोध्वनिर्यस्मिन् ॥ क्वचित्तुअन्योन्यंप्रतिभुजास्फोटेनसंरंभान्निःशेषंकृत्स्नशःप्रपतंतोभूरिवृंदकाःसमूहायस्मिन् ॥ २२ ॥ व्यूहविन्यासाद्वांतानांपुरोनिर्गतानांवीराणांवरआरवोयस्मिन् ॥ करेणप्रतोलनमुद्यमनंतत्कृतेनोल्लासेनमत्तानीवभ्रमंतिमुद्गरमंडलानियस्मिन् ॥ २३ ॥ कृष्णानांश्यामानामायुधानामंशुभिरिवोत्थितैर्जलदैःश्यामीकृतस्तिरोहितइतियावत् ॥ पल्यूलास्तृणविशेषास्तेषांसूत्कृतमितिवायुसंघट्टनजन्यशब्दानुकरणम् ॥ २४ ॥ कल्पायप्रलयायकल्पंतेसमर्थाभवंतीतिकल्पकल्पाःपुष्कशावर्त्तकादिमेघाः ॥ अनेकैस्तैरग्येसद्वंद्वंसंघीभूतमिव ॥ २५ ॥ कज्जलपर्वतोंजनाद्रिः ॥ श्यामतमगजादिबाहुल्यात्तत्साम्योक्तिः ॥ २६ ॥ उन्मत्तनृत्येनलोलालसंतश्चतटावप्राणियस्य ॥ २७ ॥ कुंताद्यायुधानामंशवःकिरणास्तल्लक्षणैःश्यामायमानोदिवसातपोयेभ्यस्तथाविधैर्वारिभिःपूर्यंतइतिवावारिभिःपूरयंतिजगदितिवावारिपूरामेघास्तैर्भुवनकोशमनंतैःपूरैःप्रवाहैरगाधमेकार्णवंकर्त्तुंसमुद्यतमिवेत्यर्थः ॥ २८ ॥ इतिश्रीवासिष्ठ० उ० द्वात्रिंशःसर्गः ॥ ३२ ॥

पलायनपरैःपश्चात्यक्तमंगुलमंडलम् ॥ विसारिमकरव्यूहमत्स्यसंख्याब्धिभासुरम् ॥ १८ ॥ पताकामंजरीपुंजविजिताकाशतारकम् ॥ हास्तिकोत्तंभितकरकाननीकृतखांतरम् ॥ १९ ॥ तरत्तरलभापूरसपक्षसकलायुधम् ॥ धमद्धमितिशब्दैश्चश्वासोत्थैर्ध्मातखांतरम् ॥ २० ॥ चक्रव्यूहकराक्रांतदुर्वृत्तसुरभासुरम् ॥ गरुडव्यूहसंरंभविद्रवन्नागसंचयम् ॥ २१ ॥ श्येनव्यूहविभिन्नाग्रसन्निवेशोत्तमध्वनि ॥ अन्योन्यास्फोटनिःशेषप्रपतद्भूरिवृंदकम् ॥ २२ ॥ विविधव्यूहविन्यासवांतवीरवरारवम् ॥ करप्रतोलनोल्लासमत्तमुद्गरमंडलम् ॥ २३ ॥ कृष्णायुधांशुजलदश्यामीकृतदिवाकरम् ॥ अनिलाधूतपल्यूलसूत्कृताभशरध्वनि ॥ २४ ॥ अनेककल्पकल्पाग्रसद्वंद्वमिवसंस्थितम् ॥ प्रलयानिलसंक्षुब्धमेकार्णवमिवोत्थितम् ॥ २५ ॥ सद्यश्छिन्नंमहामेरोःपक्षद्वयमिवस्फुरत् ॥ क्षुब्धमारुतनिर्धूतमिवकज्जलपर्वतम् ॥ २६ ॥ पातालकुहरात्क्षुब्धमंधकारमिवोत्थितम् ॥ लोकालोकमिवोन्मत्तनृत्यलोललसत्तटम् ॥ महानरकसंघातंभित्त्वावनिमिवोत्थितम् ॥ २७ ॥ आलोलकुंतमुसलासिपरश्वधांशुश्यामायमानदिवसातपवारिपूरैः ॥ एकार्णवंभुवनकोशमिवाचिरेणकर्त्तुंसमुद्यतमगाधमनंतपूरैः ॥ २८ ॥ इत्यार्षेवा० वा० दे० मो० उ० ली० आहवारंभणंनामद्वात्रिंशःसर्गः ॥ ३२ ॥ ॥ ७ ॥ ॥ ७ ॥

१ निमित्तकेत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांकल्पिकविमानस्थप्रज्ञालीलासमीक्षितः ॥ अथप्रवृत्तःसंग्रामःसेनयोरत्रवर्ण्यते ॥ १ ॥ श्रुतिःश्रोत्रमाह्लाद्यतेतत्त्वोपदेशग्रहणप्रतिरोधिजामितादोषनिवारणेनेत्यर्थः ॥ १ ॥ सत्यसंकल्पेनकल्पितेकांतिरमणीयेनभसिरुद्धेनिश्चलीकृतेअतएवस्थिरेविमानेआरुरुहतुः ॥२॥ तत्रतयोःसेनयोर्मुखव्यतिकरेपरस्परमुखसंघट्टनेप्रसक्तेसतिप्रतिपक्षतःशत्रुसैन्यात्प्रलयार्णवकल्लोलइवोत्पत्यनिर्गत्यउद्भयेनिर्भयेकस्मिंश्चिद्भटेप्रहर्तुकामेसतिलीलेशोविदूरथस्तमुत्सोढुंक्षांतुमशक्तःसंस्तस्यभटस्योरसिमुद्गरंजहौप्रहृतवानितिपरेणान्वयः॥३ ॥ ४ ॥ अथराजप्रवृत्त्यनंतरम् ॥ अनलपदेनतत्सदृशानिशस्त्राणिविद्युत्पदेनतत्प्रभाश्चलक्ष्यंते ॥५॥ इतःप्रभृतिसर्वाणिसर्गांत्यश्लोकस्थरणसंभ्रमविशेषणानि ॥ तरतांप्लवमानानांशस्त्राणांतरलधारायैरेखांकितमित्यौत्प्रेक्षिकम् ॥६॥ हुंकारमिश्रत्वेनतारतमत्वादूष्मणोग्रीष्मांतस्यघनघर्घरारावाणांघस्मरोभक्षकस्तिरस्कर्त्तेतियावत् ॥शरधाराप्रतिफलितभास्करार्चीष्येववितानंयस्य ॥ ७ ॥

श्रीरामउवाच ॥ ॥ भगवन्युद्धमेतन्मेसमासेनमनाग्वद ॥ श्रुतिराह्लाद्यतेश्रोतुर्यस्मादेताभिरुक्तिभिः ॥ १ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथतत्रैवतेदेव्यौसंग्रामंतमवेक्षितुं ॥ विमानेकल्पितेकांतेरुद्धेरुरुहतुःस्थिरे ॥ २ ॥ एतस्मिन्नंतरेतत्रलीलेशःप्रतिपक्षतः ॥ तमुत्सोढुमशक्तःसन्मुखव्यतिकरेरणे ॥ ३ ॥ प्रलयार्णवकल्लोलइवोत्पत्योद्भयेभटे ॥ जहौसानाविवशिलांभटस्योरसिमुद्गरं ॥ ४ ॥ अथप्रवृत्तःप्रसभंप्रलयार्णवरंहसा ॥ सेनयोःशस्त्रसंपातःकिरन्ननलविद्युतः ॥५॥ तरत्तरलधाराग्ररेखांकितनभस्तलः ॥ ध्वनत्कणकणाशब्दमध्यलक्षितटांकृतिः ॥ ६ ॥ धीरहुंकारमिश्रोष्मघर्घरारवघस्मरः ॥ प्रवृत्तशरधाराग्रभास्करार्चिर्वितानकः ॥ ७ ॥ नदत्कंकटटंकारप्रोड्डीनकणपावकः ॥ परस्पराहतिच्छिन्नहेतिखंडखगांबरः ॥८॥ वीरदोर्द्रुमसंचारवहद्वननभस्थलः ॥ कोदंडचक्रकेंकारद्रवद्वैमानिकांगनः ॥९॥ महाहलहलारावभृंगीकृतघनध्वनिः ॥ निर्विकल्पसमाधिस्थइवैकघनतावशात् ॥ १० ॥ नाराचासारधाराग्रलूनशूरशिरस्करः ॥ परस्परांससंघट्टरणत्कंकटसंकटः ॥ ११ ॥ हुंकारहतहेत्युग्रसंघट्टकटुटांकृतः ॥ तरद्धारातरंगाभ्रदंतुराशेषदिङ्मुखः ॥ १२ ॥ हेतिसंघट्टविक्षोभमुष्टिग्राह्यझणज्झणः ॥ चिरमास्फोटकास्फोटलुठच्चटचटारवः ॥ १३ ॥

शरखड्गादिप्रहारान्नदद्भ्यःकंकटेभ्योवर्मभ्यष्टंकारेणप्रोड्डीनाःकणपावकाःस्फुलिंगायस्मिन् ॥ हेतिखंडाःखड्गशकलान्येवप्रोड्डीयमानत्वात्खगायस्मिंस्तथाविधमंबरमाकाशंयत्र ॥ ८ ॥ दोर्द्रुमाणांसंचारैर्वहत्संचरद्वनंयस्मिंस्तथाविधंनभस्थलंयत्र ॥ ९॥ भृंगपदेनध्वनिर्लक्ष्यते ॥ हलहलारावैरभिभवाद्भृंगध्वनिवदल्पीकृतोमेघध्वनिर्यत्र ॥ तद्यथासैंधवघनोनंतरोबाह्यःकृत्स्नोरसघनएवंवाअरेयमात्माविज्ञानघनएवेतिश्रुतिदर्शितएकघनःपरमात्मातद्भाववशाद्यथानिर्विकल्पसमाधिस्थोबाह्यशब्दादीन्नानुभवतितद्वदित्यर्थः ॥ तथाचोक्तम् ॥ समाधौबाह्यशब्दादीन्यावदेषोधिगच्छति ॥ तावत्ससविकल्पःस्यान्निर्विकल्पस्ततःपरइति ॥ १० ॥११॥ खड्गधारातरंगैरभ्रैर्दंतुराण्युन्नतदंतानीवदिङ्मुखानियत्र ॥ १२ ॥ खड्गप्रहारेणशत्रोर्विक्षोभेतच्छिरोग्रहणायप्रवृत्तस्यहस्तस्यतद्दलाभाज्झणज्झणशब्दएवमुष्टिग्राह्यइवसंपन्नोयत्र ॥ बाह्वास्फोटकानांशूराणामास्फोटैर्लुठंतइवचटचटारवायत्र ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वरयाकोशात्प्रवहतांनिर्गच्छतांखड्गानांलोहसंघर्षसीत्कारसहितोज्वलत्कणानांसणसणइतिध्वनिर्यत्र ॥ सरतांशरभराणामध्वांतेमार्गावधौलक्ष्यदेशइतियावत् ॥ शरतांविश
रारूणांखरखरारवोयत्र ॥ १४ ॥ धगद्धगितिशब्देनसहविच्छिन्नकंठाद्युत्थाःप्राणालोहितानिचयत्र ॥ १५ ॥ वह्नेःसटाभिर्जटासदृशज्वालाभिःस्पृष्टाःशिरोरुहाःकेशायत्र ॥
असिव्रातानांमत्ताहर्षपरवशचित्ताःसंपन्नाःपीनारणोत्साहोत्फुल्लदेहाःशूरायेनतथाविधोझणज्झणरवोयत्र ॥ १६ ॥ कुंतैरायुधभेदैःकुंठितानांमातंगानांतरंगोत्तुंगोलोहितप्रवा
होयत्र ॥ १७ ॥ १८ ॥ केशेषुकेशेषुगृहीत्वाप्रवृत्तंयुद्धंकेशाकेशितद्वहेतिच्छेदनापराधप्रतीकारोयत्र ॥ १९ ॥ छिन्नायुधैर्महामल्लानांहेलयातिरस्कारेणउल्लालनेनउत्कृष्ट
बाहुयुद्धक्रीडयालब्धाभूर्जयस्थानंयत्र ॥ २० ॥ मातंगेनकंपितानांअतएवधावितुमशक्याउर्व्यांलुठतांरयोयत्र ॥ २१ ॥२२ ॥ चर्वितोभक्षितः ॥ चर्चितइतिपाठेहिंसितोभ

प्रवहत्खड्गसीत्कारज्वलत्कणसणध्वनिः ॥ सरच्छरभराध्वांतशरत्खरखरारवः ॥ १४ ॥ धगद्धगितिविच्छिन्नकंठोत्थप्राणलोहितः ॥
छिन्नबाहुशिरःखड्गखंडनिर्विवरांबरः ॥ १५ ॥ कंकंटोत्थस्फुरद्वह्निसटास्पृष्टशिरोरुहः ॥ रणत्पतदसिव्रातमत्तपीनझणज्झणः ॥ १६ ॥
कुंतकुंठितमातंगतरंगोत्तुंगलोहितः ॥ दंतिदंतविनिष्पेषतारचीत्कारकर्कशः ॥ १७ ॥ महामुसलसंपातपिष्टकष्टोद्धुरस्वरः ॥ तरच्छूरशिरः
पद्मप्रकराच्छादितांबरः ॥ १८ ॥ व्योमन्यस्तभुजाहींद्रःपूर्णधूलिमयांबुदः ॥ छिन्नहेतिनरारब्धकेशाकेशिप्रतिक्रियः ॥ १९ ॥ नखानखि
निकृत्ताक्षिकर्णनासोष्ठकंधरः ॥ छिन्नायुधमहामल्लहेलोल्लालनलब्धभूः ॥ २० ॥ पतत्समदमातंगकंपितोर्वीलुठद्रयः ॥ रणद्रथरयोत्पन्न
क्षरद्रक्तसरित्पथः ॥ २१ ॥ रजोरचितनीहारःकचत्प्रवहदायुधः ॥ एकीकृतघनक्षोभसैन्यसागरगर्जितः ॥ २२ ॥ मत्तहासविलासेनमृत्यु
नापरिचर्वितः ॥ गर्वितार्द्रींद्रनागेंद्रखर्वितांभोदगर्जितः ॥ २३ ॥ वृक्षश्वभ्रतटीच्छन्नचक्रशक्त्यृष्टिमुद्गरः ॥ शरोर्णातंतुनीरंध्रघृष्टियोधा
द्रिमेखलः ॥ २४ ॥ मेघविश्रांतविच्छिन्नपताकापटचामरः ॥ यंत्रपाषाणचक्रौघदूरविद्रुतखेचरः ॥ २५ ॥ मरणव्यग्ररुत्तांगयोधाक्रं
दातिघर्घरः ॥ कुठाराघातसंघातविदलन्मस्तकव्रजः ॥ २६ ॥ दूरोड्डीनकचत्खड्गखंडतारकितांबरः ॥ शक्तिनिर्मुक्तशक्त्यौघविभिन्ने
भावृतावनिः ॥ २७ ॥ सैन्यव्याकुलवेताललललनोन्मुक्तमुद्गरः ॥ गगनोत्तंभितोत्तुंगशूरतोमरतोरणः ॥ २८ ॥

त्सितोवा ॥ नागेंद्रैर्गजश्रेष्ठैःखर्वितानिऔन्नत्येनगर्जितेनचाल्पीकृतान्यंभोदास्तद्गर्जितानिचयत्र ॥ २३ ॥ वृक्षश्वभ्राद्याश्रयेणप्रहरतांवधायक्षिप्तास्तत्रच्छन्नाश्चक्रादयोयत्र ॥
शरलक्षणोर्णातंतुभिर्नीरंध्रघृष्टयोनिरंतरानुस्यूतानानावर्णायोधलक्षणाअद्रिमेखलाःपर्वतनितंबायत्र ॥ २४ ॥ मेघानांविश्रांतैराक्रमणैर्मेघेषुवाविश्रांतैर्विद्युदादिभिर्विच्छि
न्नाः ॥ क्षेपणाख्ययंत्रनिर्मुक्तपाषाणैश्चक्रौघैश्चदूरंविद्रुताःखेचराःपक्ष्यादयोयत्र ॥ २५ ॥ २६ ॥ खड्गखंडैस्तारकितंसंजाततारकमिवांबरंयत्र ॥ शक्त्याबलेननिर्मुक्तैः
शक्त्यायुधौघैः ॥ २७ ॥ गगनेउत्तंभितान्युत्तुंगानिशूरतोमराण्येवतोरणस्रगिवयत्र ॥ २८ ॥

१ द्धूत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खड्गखंडालिरेवव्योम्नःकुंतलाःकेशायत्र ॥ कुंतसमूहलक्षणेवेणुवनेन्यस्तःक्षिप्तस्तापोदावाग्निरिवांबरेकचंतीछविःकुंतकांतिर्यत्र ॥ २९ ॥ संपुष्टैःसंतोर्पितैस्तत्स्वामिराजैः॥ ३० ॥ गदालक्षणैस्तुषारैर्हिमैर्विगलंतिपद्मानीवस्फुरितांगदद्दिशांभटानांमुखानियत्र ॥ ३१ ॥ ३२ ॥ तटाकश्चतडागःस्यान्मंचकोमंजकस्तथा ॥ मंडपोमंटपश्चस्याल्लकुटोलगुडोपिचेतिद्विरूपोक्तेर्लकुटैर्बृहद्यष्टिभिरुल्लोडनंगवामिवप्रकालनंतेनोड्डीनाइवादर्शनंगताःप्रोड्डामराउत्पतनशीलाश्चटंतोवृक्षकुड्यचर्मादिनात्मानमावृण्वानाश्चभटायत्र ॥ चटेआवरणे ॥ ३३ ॥ पंकजैरुत्तंसपद्मैःपांडुरः ॥ नलक्षयतीत्यलक्षणःसैन्यक्षोभंनगणयतीतियावत् ॥ ३४ ॥ उत्प्लुत्यरथिकानूजीवग्राहंजिघृक्षतामंतराशिरश्छेदेकबंधानांछिन्नशिरस्कदेहानांबंधैराश्लेषबंधनैःसन्नेतॄणांजीवद्रथनायकानांपातेनोत्पथप्रवृत्तरथादिभिःसंपिष्टाःपार्श्वगायत्र ॥सांकुशानांहस्तिपकानामंकुशाघातेनांकितैरपिसंख्यस्थैर्युद्धेप्रहारि

भुशुंडीभग्नखड्गौघखंडालीव्योमकुंतलः॥ कुंतवेणुवनन्यस्ततापांबरकचच्छविः ॥ २९ ॥ खड्गर्ष्टिवृष्टिसंपुष्टराजपूजितसैनिकः ॥ शूलोत्तंभितसच्छूरग्रहणोद्यमिताप्सराः॥ ३० ॥ गदातुषारविगलत्स्फुरितांगदिङ्मुखः॥ प्रासप्रसभसंपिष्टकष्टचेष्टतयोत्कटः ॥ ३१ ॥ चक्रक्रकचसंचारच्छिन्नाश्वनरवारणः॥ परशुव्रातसंतापपतत्समदवारणः॥३२॥लकुटोल्लोडनोड्डीनप्रोड्डामरचटद्भटः॥यंत्रपाषाणसंपातपिष्टकेतुरथद्रुमः॥ ३३ ॥ करवालविलूनाग्रच्छत्रपंकजपांडुरः॥ क्षेपणक्षोभसंक्षीणसैन्यक्षोभोप्यलक्षणः॥ ३४॥ कबंधबंधसन्नेतृपातसंपिष्टपार्श्वगः॥सांकुशांकितसंख्यस्थवीरवारितवारणः॥३५॥परशुव्रातसंपातपतत्समदवारणः॥ पाशापाशिविशेषज्ञवीरातिपरिदेवनः ॥ ३६ ॥ क्षुरिकाकुक्षिनिर्भेदगलत्पद्मपतज्जनः॥ त्रिशूलवलनोन्मत्तशूरसंकरनर्त्तनः॥ ३७॥ धावद्धानुष्कसंपूर्णकुलकूजितकाकलिः॥ भिंदिपालसटाटोपहुंकारारभटीनटः ॥ ३८॥ वज्रमुष्टिविनिष्पिष्टपिष्टसद्भटसंकटः॥ श्येनवद्व्योमपदवींप्रोत्पतत्पटुपट्टिशः ॥ ३९ ॥ अंकुशाकृष्टशूरेशरथेभहयकेतनः॥ हलाहलिहतालूनहेलाकुलकुलाचलः॥४०॥ सुतालोत्तालकुद्दालनिखातवनभूतलः॥ धनुर्द्विगुणमात्रास्तलूनलोकशिलावलिः॥ ४१ ॥

भिःशूरैर्वारितानिरस्तावारणायत्र ॥ ३५ ॥ वीराणामतिशयितंपरितोदेवनंप्राणद्यूतंयत्र ॥ ३६ ॥ पद्मंहृदयपद्मं ॥ शूरसंकराःशूरबहुलायोधास्तेषांनर्त्तनोगात्रविक्षेपात् ॥ ३७॥ धनुःप्रहरणंयेषांतेधानुष्काः ॥ काकलिर्मधुरास्फुटध्वनिः ॥ सटाटोपःकेसराडंबरः आरभटीसाहंकारनादः ताभ्यांनृसिंहवेषनटाइवभटायत्र ॥ ३८ ॥ वज्रमुष्टिर्मल्लानांप्रसिद्धातद्विनिष्पिष्टैःपिष्टायेन्येसद्भटास्तैःसंकटः ॥ प्रोत्पतत्पटुपट्टिशइत्यसमर्थसमासश्छांदसः ॥ ३९ ॥ शूरादिद्वंद्वगर्भोबहुव्रीहिः ॥ केतनानिपताकाः ॥ हलप्रहरणंयुद्धंहलाहलितत्रहतालूनानांहेलावहेलनंतत्राकुलाःकुलाचलवदुन्नताःशत्रुकुलेअचलानिष्कंपावाशूरायत्र ॥ ४० ॥ सुतालवदुन्नतपुरुषैरुत्तालकुद्दालैरुद्यतखनित्रैःकरणैर्निखातान्युन्मूलितानिसमीकृतानिच ॥ धनुःशब्देनेषुप्रक्षेपदेशोलक्ष्यते ॥ तद्द्विगुणमात्रदेशेयुद्धसंचारसौकर्यायअस्तालूनाश्छिन्नालोकाजनाःशिलावलयश्चयत्र ॥ ४१ ॥

१ कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रोलूखलादिरूपकोपपादितंमौसलंश्लेषादवघाताभेदेनविवक्षितंमुसलयुद्धंतदत्रास्तीतिमौसली ॥ ४२॥ युद्धेलोलासयोयेवीरास्तदीयनिस्त्रिंशैःखड्गविशेषैः ॥ वादित्रवका
रादिनामावैवस्वतः ॥ अर्थात्सएवव्याधाधिपतिरितिकल्प्यते ॥ अन्यथाबद्धसेनाविहंगमानांतदंगणेनीतत्वायोगात् ॥ ४३॥ नीयमानाअग्र्याःयुद्धनिपतितभटश्रेष्ठायैस्तथावि
धानांश्वापदानांव्याघ्रवृकादीनाम् ॥ नखप्रधानैरंगुष्ठैःखनंतउद्भियमाणाः ॥ आरोहतिहस्तीतिवत्कर्मव्यापारांशेकर्मणःस्वातंत्र्यविवक्षणाच्छतृप्रत्ययः ॥ येपुंखोपलक्षितशंरा
स्तेषांप्रेंखावेगः ॥ ४४ ॥ रंजयन्मिश्रणेनरोचयन् ॥ कुंभाग्निःप्रसिद्धः ॥ ४५॥ विषवारिभिर्दलंतोविशीर्णाः ॥ ४६ ॥ नाराचवर्षलक्षणंवरवारिददतितथाविधानिवीरपूरलक्ष

क्रकचोभयपार्श्वैर्भग्नच्छिन्नमत्तमतंगजः ॥ संग्रामोलूखलक्षुण्णलोकतंडुलमौसली ॥४२॥ अस्त्राभ्राश्वंखलाजालबद्धसेनाविहंगमः ॥
लोलासिवीरनिस्त्रिंशनीतवादिगृहांगणः ॥४३॥ गणशोनीयमानाग्र्यश्वापदारावनिर्भरः ॥ नखांगुष्ठखनत्पुंखप्रेंखारणरणारवैः ॥४४॥
मरिचैर्व्यंजनानीवरंजयन्सकलारवान् ॥ सैन्यनिक्षिप्तकुंभाग्निप्लुतयोधेरितायुधः ॥४५॥ सैन्यनिक्षिप्तकुंभाग्निदग्धयोधोज्झितायुधः ॥
सैन्यनिक्षिप्तकुंभस्थतप्तांगारहतेक्षणः ॥ सैन्यनिक्षिप्तकुंभस्थविषवारिदलज्जनः ॥ ४६ ॥ नाराचवर्षवरवारिदवीरपूरमत्ताभ्रसंभ्रमस
नृत्तकबंधबर्हो ॥ कल्पांतकालइववेगविवर्त्तमानमातंगशैलवलितोरणसंभ्रमोभूत् ॥ ४७ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०लो०सेन
योःप्रथमपातवर्णनंनामत्रयस्त्रिंशत्तमःसर्गः ॥ ३३ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथराज्ञांयुयुत्सूनांभटानांमंत्रिणाम
पि ॥ नभसःप्रेक्षकाणांचतत्रेमाःप्रोद्गुर्गिरः ॥ १ ॥ चलत्पद्मंसरइववहद्विहगमेवच ॥ नभःशूरशिरःकीर्णभातितारकिताकृति ॥ २ ॥
पश्यरक्तपृषत्पूरसिंदूरारुणमारुतैः ॥ सांध्याइवविभांत्येतेमध्याह्नेंबुदभानवः ॥ ३ ॥ किमिदंभगवन्व्योमपलालभरितंस्थितम् ॥ नेदंप
लालंवीराणामेतेशरभरांबुदाः ॥४॥ यावंतोभुविसिच्यंतेरुधिरैरणरेणवः ॥ तावंत्यब्दसहस्राणिभटानामास्पदंदिवि ॥५॥ माभैष्टनैतेनि
स्त्रिंशानीलोत्पलदलत्विषः ॥ अमीवीरावलोकिन्यालक्ष्म्यानयनविभ्रमाः ॥ ६ ॥ वीरालिंगनलोलानांनितंबेसुरयोषितां ॥ मेखलाःशि
थिलीकर्त्तुंप्रवृत्तःकुसुमायुधः ॥ ७ ॥

णमत्ताभ्राणितेषांसंभ्रमेणविलासेनप्रनृत्ताःकबंधलक्षणाबर्हिणोयत्र ॥ वेगेनविवर्त्तमानैर्भ्रमद्भिर्मातंगलक्षणैःशैलैर्व
लितोवेष्टितः ॥ ४७ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०त्रयस्त्रिंशत्तमःसर्गः ॥ ३३ ॥ ॥ ७ ॥ ॥ वर्ण्यतेत्रविशेषेणविचित्रार्थनिबंधनैः ॥ रणप्रेक्षकवक्त्रेणयुद्धस्यैवच
मत्कृतिः ॥ १ ॥ नभसःसकाशात्प्रेक्षकाणांदेवगंधर्वादीनाम् ॥ प्रोद्गुःप्रादुर्बभूवुः ॥ १ ॥ वहद्विहगमितिनभःसरसोःसाधारणंविशेषणम् ॥ तारकितस्याकृतिरिवाकृतिर्यस्येति
विशेषणभेदाद्भेदकल्पनयोपमानता ॥ २ ॥ रक्तपृषतांरुधिरसीकराणांपूरैर्निकरैःसिंदूरेणेवारुणैर्मारुतैर्हेतुभिः ॥ सांध्याःसंध्यासंबंधिनः ॥ अंबुदाभानवःसूर्यकराश्च ॥ ३ ॥
दूराच्छरोत्करेषुपलालभ्रांत्याकश्चित्स्वमान्यंपृच्छति ॥ किमिदमिति ॥ सप्रत्याह ॥ नेदमिति ॥४॥५॥ लक्ष्म्याःस्वर्गलक्ष्म्याजयलक्ष्म्यावा ॥ ६ ॥ नभश्चरोक्तिर्वीरेति ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीरस्यवीरांतरंप्रत्युक्तिर्लसद्भुजेतिद्वाभ्याम ॥८॥ ९ ॥ दृष्टिचेष्टितैर्दृग्विलासैः ॥ १० ॥ कालेनसूर्योपरागकालेनेव अष्टमोग्रहोराहुः ॥ ११ ॥ भीरोर्भीरुंप्रत्युक्तिरापादेति द्वाभ्याम ॥आपादलंबिन्यांयंत्रश्रृंखलायांप्रोतम् ॥ चक्रंचक्रोपलयंत्रम् ॥१२॥ याम्याद्दक्षिणात ॥ संहरन्नितियोधयमयोर्विशेषणम् ॥१३॥ श्वभ्रेषुकंठच्छिद्रेषुमज्जद्भिःकंक कुलैराकुलाः ॥ तालैर्युद्धवादित्रतालैरुत्तालाउच्छलंतः ॥ १४ ॥ चतुर्भिःकिंवृत्तैःकालप्रकारपुरुषनिमित्तानिपृच्छ्यंते ॥ १५ ॥ स्रवंतीर्नदीः ॥ समत्स्यमकरव्यूहाइतिस्रवं तीसेनयोर्विशेषणम् ॥ १६ ॥ गिरिश्रृंगसंघेषुपतिताःसंपूर्णवृष्टयइवराजंतइतिशेषः ॥ १७॥ शिरश्छेदस्यदुःखताबुद्ध्यातथाविवक्षतश्छिन्नेनोड्डीनेनशिरसास्वर्गारोहणोत्सवदर्श

लसद्भुजलतालोलारक्तपल्लवपाणयः॥ मंजरीमत्तनयनामत्ध्वामोदसुगंधयः॥८॥गायंत्योमधुरालापैर्नंदनोद्यानदेवताः॥ तवागमन माशंक्यप्रवृत्ताःपरिनर्तितुम् ॥९॥ प्रत्यनीकंभिनत्त्यंतःकुठारैःकठिनैरियम्॥ सेनाग्राम्येववनितादयितंदृष्टिचेष्टितैः॥१०॥ हापितुर्ममभ ल्लेनशिरोज्वलितकुंडलम्॥ सूर्यस्यनिकटंनीतंकालेनेवाष्टमोग्रहः॥११॥ आपादश्रृंखलाप्रोतभ्रमत्स्थूलोपलद्वयम्॥ भ्रामयंश्चित्रदंडा ख्यंचक्रमूर्ध्वभुजोजवात् ॥१२॥ योधोयमइवाभातियाम्यादायातिदिक्तटात्॥ सर्वतःसंहरन्सेनामेहियामोयथागतम् ॥ १३ ॥ सद्य श्छिन्नशिरःश्वभ्रमज्जत्कंककुलाकुलाः॥ कबंधाःपरिनृत्यंतितालोत्तालारणांगणे॥ १४ ॥ गीर्वाणगणगोष्ठीषुप्रवृत्ताःसंकथामिथः॥ कदालोकांतरंधीराःकथंयास्यंतिकेकुतः ॥ १५ ॥ निगिरत्यागताःसेनाःस्रवंतीरिवसागरः ॥ समत्स्यमकरव्यूहाअहोनुविषमोभटः ॥ १६ ॥ कटेषुकरिणांकीर्णाधारानाराचराजयः॥ पतिताइवसंपूर्णाःश्रृंगसंघेषुवृष्टयः ॥ १७॥ हाकुंतेनशिरोनीतंममेत्येवंविवक्षतः॥ शिरसाऽजीवमित्येवंखेखगेनेववाशितम्॥ १८॥ यंत्रपाषाणवर्षेणयैषास्मान्परिषिंचति॥ सेनानुश्रृंखलाजालवलनाक्रियतांबलात् ॥१९॥ वलीपलितनिर्मुक्तंपूर्वभार्याप्सराःसती॥अंगीकरोतिभर्त्तारंपरिज्ञायरणेहतम्॥२०॥ आदिवंरचिताकाराःकुंतकाननकांतयः॥ वीराणांस्वर्गमारोढुमिवसोपानपंक्तयः ॥२१॥ कांतकांचनकांतांगेभटस्योरसिकामिनी॥ दृष्टादेवपुरंध्रीयंभर्त्तुरन्वेषणान्विता॥ २२॥ हाहतंसैन्यमस्माकंभटैरुद्धतमुष्टिभिः॥ महाप्रलयकल्लोलैःसुरशैलस्थलंयथा॥ २३॥ युध्यध्वमग्रतोमूढानयताद्धन्ततान्नरान्॥ निजा न्पादप्रहारेणमैतानूदारयताधमाः॥ २४॥

नादजीवमहंनतुमृतइतिहर्षेणखेयद्भाषितंतत्खगेनपक्षिणावाशितमिवजनैःश्रुतमितिशेषः ॥ तिरश्चांकूजितंवाशितम ॥ १८ ॥ यासेनासिंचतिएषाअनुश्रृंखलाजालेनवलितावे ष्टिताक्रियतामितिसैनिकोक्तिः ॥ १९ ॥ पूर्वभार्याप्रागेवमृताअप्सराःसतीस्थितायुद्धेमृतंस्वभर्त्तारंवलीपलितनिर्मुक्तंदेवभूतंपरिज्ञायांगीकरोतीतिदेवोक्तिः ॥ २० ॥ कुंतायु धानांकाननंसमूहस्तेषांकांतयआदिवंस्वर्गपर्यंतंरचितवत्यस्ताःसोपानपंक्तयइत्युत्प्रेक्ष्यंते ॥ २१ ॥ याभटस्यकामिनीस्वतःकांचनैश्चकांतान्यंगानिकरचरणादीनियस्यतथावि धेभटस्योरसिमृतादृष्टासेयंदेवपुरंध्रीभूत्वाभर्तुरन्वेषणान्वितादृश्यतइतिशेषः ॥ २२ ॥ हाहतमितिकातरस्योक्तिः ॥ २३ ॥ निजान्स्वीयान् ॥ २४ ॥ ॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धम्मिल्लवलनाकेशसंयमनं ॥२५॥ स्वर्गनद्यागंगायाः ॥ विनोदय विश्रामयेत्यप्सरःसख्युक्तिः॥२६॥ कोटिशब्दोऽसंख्येयपरःकणत्कारैःकवंत्यारणंत्यः॥२७॥ चक्रैरावर्त्तैन्यावर्तवति ॥ अणवोरेणवस्तल्लक्षणांपंकतां ॥ कल्पितपूरानुरूपःकल्पितएवपंकः॥२८॥ ग्रहमार्गेषुभ्रमद्भिर्वीरभूभृतांशिरोभिर्नभःपद्मसरःकृतमित्युत्तरेणान्वयः॥ तदुपपत्तयेविशिनष्टि ॥ आयुधांशुरित्यादिना ॥ आयुधानामंशवःकिरणाएवपद्मलतानालानितेषुलग्नाअसयःदलानिविदलनसाधनशूलकुंतादीनिचकंटकायेषाम् ॥ २९ ॥ केतुपट्टाःपताकापटास्तएवमृणालस्यावयवभूतपर्णानियेषाम् ॥ लब्धाःशिलीमुखाःश्लेषाद्बाणलक्षणभ्रमरायैः ॥ ३० ॥ चकारउपमानद्वयसमुच्चयार्थः ॥ ३१ ॥ गृहादागच्छंतीनामलको

धम्मिल्लवलनाव्यग्रेघनोत्कंठेऽप्सरोगणे॥ भटोदिव्यशरीरेणपार्श्वप्राप्तोनिरीक्ष्यताम्॥२५॥फुल्लहेमारविंदासुच्छायाशीतजलानिलैः।
स्वर्गनद्यास्तटीष्वेनंदूरायातंविनोदय॥२६॥विविधायुधसंघट्टखंडितोग्रास्थिकोटयः॥ खेकवंत्यःकणत्कारैःप्रसृतास्तारकाइव॥२७॥
व्योम्निजीवनदीवाहेवहत्सायकवारिणि॥ चक्रावर्त्तिनिगच्छंतिगिरयोप्यणुपंकताम्॥२८॥भ्रमद्भिर्ग्रहमार्गेषुशिरोभिर्वीरभूभृताम्॥
आयुधांशुलतानाललग्नासिदलकंटकैः॥ २९ ॥ केतुपट्टमृणालांगदलैर्लब्धशिलीमुखैः ॥ वहद्वातचलत्पद्मंनभःपद्मसरःकृतम् ॥ ३० ॥
मृतमातंगसंघातेगिराविवपिपीलिकाः॥भीरवःपरिलीयंतेस्त्रियःपुंवक्षसीवच ॥ ३१ ॥ अपूर्वोत्तमसौंदर्यकांतसंगमशंसिनः॥ वांति
विद्याधरस्त्रीणामलकोल्लासिनोनिलाः॥ ३२ ॥ छत्रेषूड्डीयमानेषुस्थितेषुव्योम्निचंद्रता॥इंदुनेवयशोमूर्त्याकृताशुभ्रातपत्रता ॥ ३३ ॥
भटोमरणमूर्छांतेनिमेषेणामरंवपुः ॥ स्वकर्मशिल्पिरचितंप्राप्तःस्वप्नपुरंयथा ॥ ३४ ॥ शूलशक्त्यृष्टिचक्राणांवृष्टयोमुक्ततुष्टयः ॥ व्यो
माब्धौमत्स्यमकरसंकुलावयवाःस्थिताः ॥ ३५ ॥ शरोत्कृत्तसितच्छत्रकलहंसैर्नभःस्थलम् ॥ भातिसंचितपूर्णेंदुबिंबलक्षैरिवावृतम्
॥ ३६ ॥ क्रियतेगगनोड्डीनैश्चामरैश्चारुघर्घरैः॥ वातावधूतसंरोधतरंगनिकरद्युतिः॥ ३७॥ दृश्यंतेहेतिदलिताश्छत्रचामरकेतवः॥ आ
काशक्षेत्रविक्षिप्तायशःशालिलताइव॥३८॥ वहद्भिर्व्योम्निसक्षेमपश्यनीताक्षयंशरैः॥शक्तिवृष्टिरुपायांतीसस्यश्रीःशलभैरिव॥३९॥
एषाप्रसृतदोर्दंडभटखड्गच्छटात्कृतिः॥ कठिणात्कंकटाज्जातामृत्योरेवोग्रहुंकृतिः॥ ४० ॥

ल्लासितयानुकूलत्वेनशकुनरूपत्वान्मनोरथसिद्धिशंसिनइतिभावः ॥ ३२ ॥ इवकारःपूर्वत्रापिसंबध्यते ॥ तेनच्छत्रेषुव्योम्निस्थितेषुतैश्चंद्रताकृतेव ॥ यशोमूर्त्याइंदुनाभुविशुभ्रातपत्रताकृतेवेत्युत्प्रेक्षाद्वयंलभ्यते ॥ ३३ ॥ ३४ ॥ मुक्ततुष्टयःअसंतोषशीलाइवव्ययामत्स्यमकररूपाःसंकुलावयवाइवस्थिताः ॥ अब्धिस्थमत्स्यादीनामब्ध्यवयवत्वंकाल्पनिकम्॥ ३५ ॥ ३६ ॥ वातेनावधूतःसंरोधःस्थैर्यंयेषांतरंगाणाम् ॥३७॥३८॥ सक्षेमेतिश्रोतृसंबोधनम् ॥ उपायांतीसमीपमुपसर्पंतीआसन्नफलाच ॥३९॥ छटात्कृतिरितिखड्गपातध्वन्यनुकरणम् ॥ सैवमृत्योर्हुंकृतिरित्युत्प्रेक्षा ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेतयःखङ्गाद्यायुधान्येवकल्पानिलास्तैःक्षुण्णाः ॥ दंताएवनिर्झरवारीणिशुभ्रत्वबहिर्निःसृतत्वसाम्याद्येषांते ॥ नागागजानगागिरयइव ॥ ४१ ॥ व्यूढंसन्नद्धम् ॥ रक्तमहाह्रदे अभिभूताचक्रविष्टंभात्तिरोभूतागतिर्यस्यतथाभूतंसच्चेष्टतेस्पंदते ॥ हाहेतिखेदे ॥ ४२ ॥ वीरहस्तादिकराःकंकटानिचकुट्यंकास्तंत्रीपदानितेषुखङ्गसंघट्टकृतैष्टांकृतैर्वादनशब्दैः ॥ ४३ ॥ ४४ ॥ चिकुराःकेशाइवमेचकेश्यामे ॥ शराएवकोरकाःकलिकास्तेषांभारःप्रचयस्तल्लक्षणास्रक् ॥ जलदेइतिजातिशब्दः ॥ मेघेमिहसेचनेतत्प्रधानेइतितद्विशेषणं ॥ ४५ ॥ अनंतैःरक्तसंसक्तैःसन्नैर्विशीर्णैरवनितलैरायुधैश्चआकुलंभुवनंअग्नेर्लोकइवभातीतिशेषः ॥ अग्निशोकइवेतिपाठेअग्निप्रयुक्तेनगरादिदाहशोकेआकुलमिवेतिव्याख्येयं ॥ ४६ ॥ ४७ ॥ अक्षोभेषुसंचलितुमसमर्थेष्वनेकेष्वेकेनशूरतमेनस्वलाघवातिशयेनप्रहरणात् ॥ यातुधानानांरक्षसांमायायातुधानीतयाउन्नेयंउन्नेयंउपमेयंशूरचेष्टितं

हेतिकल्पानिलक्षुण्णादंतनिर्झरवारयः ॥ जनताक्षयकालेस्मिन्भग्नानागानगाइव ॥४१॥ सचक्रनाथसूताश्वंव्यूढंरक्तमहाह्रदे ॥ हाहाभिभूतगतिकंचेष्टतेरथपत्तनम् ॥४२॥ करकंकटकुट्यंकखड्गसंघट्टटांकृतैः ॥ कालराज्याप्रनृत्त्यंत्यारणवीणेववाद्यते ॥४३॥ नरेभखरवाजिभ्योयेच्युतारक्तनिर्झराः ॥ पश्यतद्बिंदुसिक्तेनवायुनारुणितादिशः ॥ ४४ ॥ शस्त्रांशुजलदेव्योम्निकालीचिकुरमेचके ॥ शरकोरकभारस्रङ्मेघेविद्युदिवोदिता ॥ ४५ ॥ अनंतरक्तसंसक्तसन्नावनितलायुधैः ॥ भुवनंभात्यभिज्वालमग्निलोकइवाकुलम्[1] ॥४६॥ भुशुंडीशक्तिशूलासिमुसलप्रासवृष्टयः ॥ अन्योन्यच्छेदभेदाभ्यांकरप्रकरतापतन् ॥ ४७ ॥ अक्षोभैकप्रहरणाद्यातुधान्योन्नयचेष्टितम् ॥ संरंभावेक्षणप्रज्ञंरणंस्वप्नमिवस्थितम् ॥ ४८ ॥ अनन्यशब्दाविरतहताहतिरणज्झणैः ॥ गायतीवक्षतक्षोभमुदितोरणभैरवः ॥ ४९ ॥ अन्योन्यरणहेत्युग्रचूर्णपूर्णोरणार्णवः ॥ वालुकामयएवाभूच्छिन्नच्छत्रतरंगकः ॥ ५० ॥ सरभसरसवद्विसारितूर्यप्रतिरवपूरितलोकपाललोकः ॥ रणगिरिरयमुग्रपक्षदक्षप्रतिसृतिवृत्तइवांबरेयुगांते ॥ ५१ ॥

यत्र ॥ नयतेष्टिलोपश्छांदसः ॥ संरंभेणक्रोधेनावेक्ष्यतेययासासंरंभावेक्षणीतथाविधाप्रज्ञायोद्धृबुद्धिर्यत्र ॥ स्वप्नपक्षेअक्षोभेषुविनाशानुकूलच्छेदभेदादिसंचलनशून्येषुस्वाप्नपदार्थेष्वेकेनजागरणमात्रेणप्रहरणाद्बाधाद्यातुधानमायोपमेयमिथ्याचेष्टितम् ॥ संरंभेणआवेशेनावेक्षणीप्रज्ञास्वयंज्योतिरात्मप्रज्ञायत्र ॥ स्वप्नमिवस्थितंरणंपुरःस्थितंस्वप्नमिवपश्यामीतिशेषः ॥ ४८ ॥ अविरतंनिरंतरंयाहताहतिरन्योन्यप्रहारस्तदुद्भवैरणज्झणैर्ध्वनिविशेषैः ॥ ४९ ॥ वालुकामयःसैकतप्रचुरः ॥५०॥ सरभसंरसवद्भिर्मधुरैर्विसारिभिःप्रसृमरैस्तूर्याणांवाद्यानांप्रतिरवैःप्रतिध्वनिभिःपूरितालोकपालानांदिक्पतीनांलोकायेन ॥ तूर्यरवैरुड्डयनोद्योगेनगर्जन्निवेतियावत् ॥ अयंदृश्यमानोरणलक्षणोरणसन्निहितोवागिरिःपर्वतोयुगांतेअंबरेनभसिउभयोर्युद्धकर्कशयोःसैन्यद्वयलक्षणयोःपक्षयोर्दक्षयासमर्थयाप्रतिसृत्यापरस्परप्रतिकूलचलनेनवृत्तउड्डयनेप्रवृत्तइवात्रभातीत्यर्थः ॥५१॥ ॥६३॥

[1] भुवनंभात्यभिज्वालमित्यत्रअग्नेर्लोकइवभातीतिशेषइतिटीकानुरोधेनपाठांतरमपेक्ष्यतइतिभातितत्तुनोपलब्धम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थानपिकठिनकंकटेषुमोघान्स्वशराननुशोचंतोवीराआहुर्हाहेति ॥ प्रविकटानतिकठिनान्कंकटान्अनोघाभिस्त्वैवतदभिघातप्रोड्डीनाभिःप्रकटतडिच्छटासदृशीभिर्ज्वाला भिःप्रतप्तानाराचाःशराःशिखरिणःसन्निहितपर्वतस्यशिलागणंछित्वावहंति ॥ हाहेतिखेदे ॥ अभिमतकार्यैप्रेरितस्यतदकृत्वाअनभिमतमहाकार्यकारिणोपिधिक्कार्यतैवेतिभा वः ॥ अरणीतइतिपाठेस्फुरितगुणंयद्धनुस्तल्लक्षणायाईरितायाःकर्षणोन्मथितायाअरणीतःअरण्याःसकाशात्नाराचाःशराग्रयइतिव्याख्येयम् ॥ ५२ ॥ अथयुद्धश्रांतस्यता दृशंकंचित्प्रत्युक्तिः ॥ हेछिन्नेच्छश्रमविच्छिन्नायुद्धेच्छायस्यतथाविधहेमित्रअच्छंस्वच्छंनिर्दोषंइतिवक्ष्यमाणंहितंश्रृण्वितिशेषः ॥ ज्वलदनलोज्वलाःपृषत्काबाणाअस्माक मंगानांहस्तपादादीनांभंगंविच्छेदंकुर्वंतोयावन्नभवंतितावदेवद्राक्शीघ्रमेवद्रुतंपलायितंयथास्यात्तथाइतोयामःअपगच्छामः॥ यतोयंचतुर्थोयामःप्रहरःयामोयमसंबंधीवासरः नियताशनदिनमिवजनक्षयायप्रवहतिपरिवर्त्ततइत्यर्थः॥ छिन्नेच्छाछूमितिपाठेतुछिन्नवर्मादौछाछूंइतिशब्दनेनांगभंगंकुर्वंतइतियोज्यम् ॥ ५३ ॥ ॥ इतिवासिष्ठमहारा॰उ॰

हाहाधिक्प्रविकटकंकटाननोघप्रोड्डीनप्रकटतडिच्छटाप्रतप्ताः॥ क्रेंकारस्फुरितगुणेरितारणंतोनाराचाःशिखरिशिलागणंवहंति॥ ५२॥ छिन्नेच्छाच्छमितिनयावदंगभंगंकुर्वंतोज्वलदनलोज्ज्वलाःपृषत्काः॥ तावद्द्रागद्रुतमितएहिमित्रयामोयामोयंप्रवहतिवासरश्चतुर्थः ॥ ५३ ॥ ॥ इत्यार्षेवा॰वा॰दे॰मो॰उ॰ली॰रणप्रेक्षकजनोक्तिवर्णनंनामचतुस्त्रिंशःसर्गः ॥ ३४ ॥ ॥ ७॥ ॥ श्रीवसिष्ठउवाच॥

अथप्रोड्डयनोद्युक्ततुरंगमतरंगकः॥ उत्तांडवइवोन्मत्तोबभूवसरणार्णवः॥ १ ॥ छत्रडिंडीरविश्रांतसितेषुशफरोत्करः॥ अश्वसैन्योल्ल सल्लोलकल्लोलाकुलकोटरः॥ २ ॥ नानायुधनदीनीतसैन्यावर्त्तविवृत्तिमान्॥ मत्तहस्तिघटापीठचलाचलकुलाचलः ॥ ३॥ कचच्चक्रश तावर्त्तवृत्तिभ्रांतशिरस्तृणः॥ धूलीजलधरापीतभ्रमत्खड्गप्रभाजलः॥ ४ ॥ मकरव्यूहविस्तारभग्नाभग्नभटौघनौः॥ महागुडुगुडावर्त्तप्रति श्रुद्घनकंदरः॥ ५ ॥ मीनव्यूहविनिष्क्रांतशरबीजौघसर्षपः॥ हेतिवीचीवरालूनपताकावीचिमंडलः॥ ६॥ शस्त्रवारिकृतांभोदसदृशावर्त्त कुंडलः॥ संरंभघनसंचारसेनातिमितिमिंगिलः॥ ७॥

चतुस्त्रिंशःसर्गः ॥ ३४ ॥ ॥ ७ ॥ ॥ समुद्रवनकल्पांतनानारूपकविस्तरैः ॥ संग्रामश्वतुरंगाणांविस्तरेणात्रवर्ण्यते ॥ १ ॥ तत्रादौत्रयोदशश्लोकैरर्णवात्मनानिरूपयिष्य न्नाह ॥ अथेत्यादिना ॥ १ ॥ डिंडीरेषुफेनकूटेषुविश्रांताःसिताइषवःशफराःक्षुद्रमत्स्यजातिभेदाः अश्वसादिसैन्यान्येवोच्छलनशीलत्वात्कल्लोलाः ॥ २ ॥ विवृत्तिर्भ्रमणंत द्वान् ॥ घटासमूहस्तल्लक्षणाआपीठमामूलाच्चलाचलाश्चंचलाःकुलाचलामंदरादयोयत्र ॥ बलाबलेतिपाठेबलाबलपरीक्षार्थंयुद्ध्यंतःकुलाचलाइवेतिक्लेशेनयोज्यं ॥ ३ ॥ अवर्तानांवृत्तिःपरिभ्रमस्तेनभ्रांतानितच्छिन्नशिरस्तृणानियत्र ॥ खड्गप्रभाणांधूलिभिराच्छादनंपानत्वेनकल्प्यते ॥ ४ ॥ सेनापक्षेमकराकारस्यव्यूहस्यसेनासन्निवेशस्य ॥ प्रतिश्रुतःप्रतिध्वनंत्योघनानांमेघानांकंदराश्छिद्राणिघनाःकंदराःपर्वतगुहावायत्र॥ ५ ॥ मीनाःप्रमीणाम्नजनास्तद्व्यूहेभ्योविभिद्यनिष्क्रांताःशराएवक्षेत्रेफलिताःबीजौघशिबी शिरस्काःसर्षपाइवयत्र अर्णवपक्षेमीनानांमत्स्यानांव्यूहेभ्योनिष्क्रांताःप्रसूताःकाशबीजौघाइवशुभ्राअंडसर्षपायत्र ॥ वीचिवरैःप्रबलवीचिभिः॥ ६ ॥ अंभोदसदृशामेघवद स्थिराआवर्त्ताएवकुंडलानीवयस्य ॥ संरंभःक्रोधस्तेनघनसंचारासेनैवतिमयस्तिमिंगिलाश्चमहामत्स्यजातिभेदायत्र ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृष्णायसमयःसारस्तन्मयानिपरीधानानिकवचानियस्यतथाविधेनवलतापरिवर्त्तमानेनसैन्यांबुना ॥ कबंधंजलममूर्द्धकायश्वतदावर्त्तरेखायाअंतर्मध्येबद्धानिनिविष्टानिसैन्यादीनांभूषणानियत्र ॥ समुद्रपक्षेसैन्यान्यदंतिभक्षयंतीतिसैन्यादीनिरक्षांसितान्येवभूषणानीवयस्य ॥ ८ ॥ निर्घोषेणआशोषिताइवासंवेद्याःकृताअशेषशब्दायेनअतएवैकघनघुंघुमः ॥ ९ ॥ १० ॥ कोदंडान्येवकुंडलानिसर्पशरीराणितेषामुन्मथनेच्छेदने ॥ ११ ॥ १२ ॥ हयहस्तिनएवजलेचरायादांसियत्र ॥ १३॥ अंबरयामोगंधर्वनगरम् ॥ सांप्रतंतमेवसमरंकल्पांतत्वेनवर्णयति ॥ अभूदित्यादिना ॥ १४ ॥ तरत्तरंगाइवविहगायत्र ॥ १५ ॥ तुरंगाएवशरभायत्र ॥ शराणांभाराःशरान्बिभ्रतियेतेवावनावनिर्वनभू

कृष्णायसपरीधानवलत्सेनांबुभीषणः॥ कबंधावर्त्तलेखांतर्बद्धसैन्यादिभूषणः॥ ८ ॥शरसीकरनीहारसांधकारककुब्गणः ॥ निर्घोषाशोषिताशेषशब्दैकघनघुंघुमः॥९॥ पतनोत्पतनव्यग्रशिरःशकलसीकरः॥ आवर्त्तचक्रव्यूहेषुप्रभ्रमद्भटकाष्ठकः॥१०॥ कष्टटांकारकोदंडकुंडलोन्मथनोद्भटः॥ अशंकमेवपातालादिवोद्यत्सैनिकोर्मिमान्॥११॥ गमागमपरानंतपताकाच्छत्रफेनिलः॥ वहद्रक्तनदीरंहःप्रोह्यमानरथद्रुमः॥१२॥ गजप्रतिमसंपन्नमहारुधिरबुद्बुदः॥ सैन्यप्रवाहविचलद्धयहस्तिजलेचरः ॥ १३ ॥ ससंग्रामोंबरग्रामइवाश्चर्यकरोनृणां॥ अभूत्प्रलयभूकंपकंपिताचलचंचलः ॥१४॥ तरत्तरंगविहगःपतत्करिघटातटः॥ त्रस्तभीरुमृगानीकस्फूर्जद्गुरुघुरारवः॥ १५॥ सरच्छरालीशलभशतभंगुरसैनिकः ॥ तरत्तुरंगशरभःशरभारवनावनिः ॥ १६॥ चलद्द्विरेफनिर्ह्रादोरसत्तूर्यगुहागुरुः ॥ चिरात्ससैन्यजलदोलुठद्भटमृगाधिपः ॥ १७॥ प्रसरद्धूलिजलदोविगलत्सैन्यसानुमान्॥ पतद्रथवराब्यांगःप्रतपत्खड्गमंडलः॥ १८॥ प्रोत्पतत्पदपुष्पौघःपताकाच्छत्रवारिदः॥ वहद्रक्तनदीपूरपतत्सारावृवारणः॥ १९॥ सोभूत्समरकल्पांतोजगत्क्वलनाकुलः॥ पर्यस्तसध्वजच्छत्रपताकारथपत्तनः॥ २०॥ पतद्विमलहेत्योघभूरिभास्वरभास्करः॥ कठिनप्राणसंतापतापिताखिलमानसः॥ २१॥ कोदंडपुष्करावर्त्तशरधारानिरंतरः॥ वहत्खड्गशिलालेखाविद्युद्वलयितांबरः॥ २२॥ उच्छिन्नरक्तजलधिपतितेभकुलाचलः॥ नभोविकीर्णनिपतद्युत्तारकणतारकः॥ २३॥

मिर्यत्र ॥ १६ ॥ चिरादित्यस्योत्तरत्राभूदित्यनेनान्वयः ॥ ससैन्यागजादयोजलदाइवयत्र ॥ १७ ॥ पतंतिरथवराढ्यानांमहारथानामंगानियत्र ॥ खड्गाम्रृगविशेषानिंस्त्रिशाश्च ॥ १८ ॥ पदान्यंघ्र्यंकाएवपुष्पौघाः ॥ १९ ॥ २० ॥ कठिनेनप्राणसंतापेन ॥ २१ ॥ कोदंडाधनूंषितल्लक्षणानांपुष्करावार्त्ताख्यप्रलयांबुदानांखड्गानांशिलालेखाःशिलासंस्कृतधाराएवविद्युतः ॥ २२ ॥ नभसिविकीर्णाःप्रसृताःनिपतद्भिश्चयुवंतिमिश्रीभवंतिअतएवताराःस्थूलायेरुधिरकणास्तएवतारकाइवयत्र ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

चक्रकुल्याभिश्चक्रपरंपरासरिद्भिरंबुदप्रदेशे भ्रमणेतदावर्त्तप्रायाभिःपूर्णाव्योमशिरानभोनाड्योंबुदाश्चयत्र ॥ लोकांतरक्रमःपरलोकाक्रमणम् ॥ २४ ॥ २५ ॥ शरधाराभिर्घनै र्निबिडैरनीकमेघैः ॥ २६ ॥ जलव्यालैर्डुंडुभैः ॥ अचलःअर्थात्समुद्रांतर्गतइतिलभ्यते ॥ अन्योन्यदलनेव्यग्रैःशस्त्रैरितिशेषः ॥ शस्त्रवर्षिणिसंवर्त्तोत्पातेउत्थितैरिवेत्युत्प्रेक्षा ॥ २७ ॥ दीप्ताःशूलादयोमिथोविदलनेनध्वनंतोदिशोभ्रमंतःसंतःकल्पांतवातेनपरिवृत्तानांभ्राम्यमाणानांशिलावृक्षशस्त्रादीनांपदार्थानांलीलांविलासंअधुःअधारयन्नित्यर्थः ॥२८॥ इतिश्रीवासिष्ठम० उत्पति० पंचत्रिंशःसर्गः ॥३५॥ ॥७॥ ॥ समायुधद्वंद्वयुद्धंसहायाश्चात्रवर्णिताः ॥ प्राच्यादिभिर्जनपदैःसमंजनपदेश्वराः ॥१॥ मातंगशवशैले

चक्रकुल्यांबुदावर्त्तपूर्णव्योमशिरांबुदः ॥ अस्त्रकल्पाग्निनिर्दग्धसैन्यलोकांतरक्रमः ॥ २४ ॥ हेतिवर्षाशनिच्छन्नभूतलामलभूधरः ॥ गजराजगिरिव्रातपातपिष्टजनव्रजः ॥ २५ ॥ शरधाराघनानीकमेघच्छन्नमहीनभाः ॥ महानीकार्णवक्षोभसंघट्टघटिताद्रवः ॥ २६ ॥ व्याप्तउग्रानिलोद्धूतैर्ज्जलव्यालैरिवाचलः ॥ अन्योन्यदलनव्यग्रैःशस्त्रोत्पातइवोत्थितैः ॥ २७ ॥ शूलासिचक्रशरशक्तिगदाभुशुंडीप्रासादयोविदलनेनमिथोध्वनंतः ॥ दीप्ताअधुर्दशदिशःशतशोभ्रमंतःकल्पांतवातपरिवृत्तपदार्थलीलाम् ॥ २८ ॥ इ० वा० वा० मो० दे० उ० ली० रणवर्णनंनामपंचत्रिंशःसर्गः ॥ ३५ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथश्रृंगोपमानेषुस्थितेषुशरराशिषु ॥ सर्वभीरुषुभग्नेषुविद्रुतेषुदिशोदश ॥ १ ॥ मातंगशवशैलेषुविश्रांतांबुदपंक्तिषु ॥ यक्षरक्षःपिशाचेषुक्रीडत्सुरुधिरार्णवे ॥ २ ॥ महतांधर्मनिष्ठानांशीलौजःसत्वशालिनाम् ॥ शुद्धानांकुलपद्मानांवीराणामनिवर्त्तिनाम् ॥ ३ ॥ द्वंद्वयुद्धानिजातानिमेघानामिवगर्ज्जताम् ॥ मिथोनिगरणोल्कानिमिलंत्यापगपूरवत् ॥ ४ ॥ पंजरःपंजरेणेवगजौघेनगजोच्चयः ॥ सवनःसवनेनाद्रिरद्रिणेवामिलद्बलात् ॥ ५ ॥ अश्वौघोमिलदश्वानांवृंदेनाराविरंहसा ॥ तरंगौघेनघोषेणतरंगौघइवार्णवे ॥ ६ ॥ नरानीकंनरानीकःसमायुधमयोधयत् ॥ वेण्वोघमिववेण्वोघोमरुल्लोलोमरुद्बलम् ॥ ७ ॥ रथौघश्चरथौघेननिष्पिपेषाखिलंवपुः ॥ नगरंनगरेणेवदैवेनोड्डीनमासुरम् ॥ ८ ॥ सरच्छरभरासाररचितापूर्ववारिदम् ॥ युयुधेस्थगिताकाशाधनुर्द्धरपताकिनी ॥ ९ ॥ विषमायुधयुद्धेषुयोद्धारःपेलवाशयाः ॥ यदायुत्त्यापलायंतेरणकल्पानलेतदा ॥ १० ॥

षुस्थितेषुशरराशिषुश्रृंगोपमानेषुसत्स्विति परेणसहान्वयः ॥ १ ॥ २ ॥ शीलंसुचारित्र्यं ॥ सत्वंबलं ॥ कुलपद्मानांस्वकुलंपद्मवत्स्वयशःसौरभैःसुरभीकुर्वणानामित्यर्थः ॥ ३ ॥ मिथोन्योन्ययुद्धतोनिगरणंग्रसनंतत्रोल्कान्युत्कंठितानीवेतिद्वंद्वयुद्धविशेषणम् ॥ मिलंतिवीराइतिशेषः ॥ ४ ॥ वनेनसहवर्त्तमानःसवनोद्रिस्तादृशेनाद्रिणेव[1] ॥ ५ ॥ ६ ॥ मरुता वलतिचलतीतिमरुद्बलस्तम् ॥ ७ ॥ वपुःपरस्परसंस्थानम् ॥ ८ ॥ रचितःसंपादितःअपूर्वोऽभिनवोवारिदोयस्मिन्कर्मणितथायुयुधे ॥ स्थगिताकाशाआच्छादिताकाशा ॥ ९ ॥ पेलवाशयाभीरुचित्ताः ॥ १० ॥

१ पुंवद्भावआर्षः ॥ आपेनगच्छंतीत्यापगानदास्तेषांपूरइतिवा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रप्रकरणेतृतीयांतायुधनामभिःसर्वत्रतद्धारिणोलक्ष्यंते ॥ भुशुंडीशब्देनभुशुंडीधरालक्षणयोच्यंते ॥ ११ ॥ १२ ॥ १३ ॥ प्रासानामासनंक्षेपणंतद्विदः ॥ परशुभिरुक्ताविख्याताइतियावत् ॥ लकुटावेणुदंडाउद्याउद्यतायेषांतेलकुटोद्यास्तैः ॥ १४ ॥ पाशधारिण्यःसेनाः ॥ शंकुक्षुरिकेक्षुद्रायुधविशेषौ ॥ तद्वतास्तत्संगताः ॥ १५ ॥ वज्रैर्मुष्टिगतैर्वज्रमुष्टिभिरितियावत् ॥ वज्रमुष्टिशब्देनमल्लानांसलोहकीलामुष्टिबंधाउच्यंते ॥ निकाषोनिघर्षः ॥ १६ ॥ शृंखलाजालमितिकंकटजातिभेदस्तद्वंतःसादिनःशृंखलाजालिनः ॥ कोमलशब्दःस्निग्धश्यामपरः ॥ मिलिताइतिसर्वत्रानुषंगः ॥ दृष्टांतोपिप्राक्तनसर्वसाधारणः ॥ १७ ॥ क्षुब्धानिभ्रमंतिदलानीवचक्राणिचक्रदलानितान्यावर्त्तायस्मिन् ॥ १८ ॥ उत्फुल्लाआयुधलक्षणाःकल्लोलशिरास्तरंगनाड्यः ॥ रोदस्योर्द्यावापृथिव्योरंध्रमंतरालंसएवसमुद्रः ॥ अमरैर्जीवद्भिर्दुस्तरः ॥ १९ ॥ विद्याबुद्धिर्बलंशौर्यमस्त्राण्यश्वारथोधनुरिति

मिलिताश्चक्रिणश्चक्रैर्द्धनुर्द्धरैर्द्धनुर्धराः ॥ खड्गिभिःखड्गयोद्धारोभुशुंडीभिर्भुशुंडयः ॥ ११ ॥ मुसलैर्मुसलोदाराःकुंतिनःकुंतिधारिभिः ॥ ऋष्ट्यायुधाऋष्टिधरैःप्रासिभिःप्रासपाणयः ॥ १२ ॥ समुद्गरामुद्गरिभिःसगदैर्विलसद्गदाः ॥ शाक्तीकैःशक्तियोद्धारःशूलैःशूलविशारदाः ॥ १३ ॥ प्रासासनविदःप्रासैःपरशूक्ताःपरस्वधैः ॥ लकुटोद्यैर्लकुटिनश्चोपलैरुपलायुधाः ॥ १४ ॥ पाशिभिःपाशधारिण्यःशंकुभिःशंकुधारिणः ॥ क्षुरिकाभिस्तुक्षुरिकाभिंदिपालैश्चतद्वताः ॥ १५ ॥ वज्रमुष्टिधरावज्रैरंकुशैरंकुशोद्धताः ॥ हलैर्हलनिकाषज्ञास्त्रिशूलैश्चत्रिशूलिनः ॥ १६ ॥ शृंखलाजालिनोजालैःशृंखलैरलिकोमलैः ॥ क्षुभिताकल्पविक्षुब्धसागरोर्मिघटाइव ॥ १७ ॥ क्षुब्धचक्रदलावर्त्तःशरसीकरमारुतः ॥ प्रभ्रमद्धेतिमकरोव्योमैकार्णवआबभौ ॥ १८ ॥ उत्फुल्लायुधकल्लोलशिराकुलजलेचरः ॥ रोदोरंध्रसमुद्रोसौबभूवामरदुस्तरः ॥ १९ ॥ दिव्याष्टकजनानीकंपक्षद्वयतयातया ॥ अर्द्धेनार्द्धेनकुपितंभूपालाभ्यांतथास्थितम् ॥ २० ॥ मध्यदेशादिसंख्यानेप्राग्दिग्भ्योभ्यागतानिमान् ॥ लीलानाथस्यपद्मस्यपक्षेजनपदाञ्छृणु ॥ २१ ॥ पूर्वस्यांकोसलाःकाशिमागधामिथिलोत्कलाः ॥ मेखलाःकर्करामुद्रास्तथासंग्रामशौंडकाः ॥ २२ ॥ मुख्याहिमारुद्रमुख्यास्ताम्रलिप्तास्तथैवच ॥ प्राग्ज्योतिषावाजिमुखाअंबष्ठाःपुरुषादकाः ॥ २३ ॥

प्रसिद्धंदिव्यमप्रतिहतमष्टकंयस्यतथाविधंयोधजनानीकंतयाप्रागुक्तयाद्वंद्वशोमिलितयापक्षद्वयतयासैन्यद्वयेप्यर्द्धेनार्द्धेनकुपितंस्थितम् ॥ तत्कुतः ॥ यतोभूपालाभ्यांसिंधुराजविदूरथाभ्यांतथातदनुकूलतयास्थितमित्यर्थः ॥ अथवायक्षारक्षांसिपिशाचाअसुराइत्येकतोदेवागंधर्वाःकिन्नराविद्याधराइत्येकतइतिदिव्याष्टकजनानीकंतयाभाविजयपराजयानुसारिण्यापक्षद्वयतयासैन्यस्यार्द्धेनार्द्धेनकुपितंस्थितंयतोभूपालाभ्यामपितथातदनुरूपादृष्टशालितयास्थितमित्यर्थः ॥ २० ॥ इदानींपद्मसिंधुराजयोःसहायभूतान्जनान्प्राच्यादिदिग्भेदतत्तद्देशभेदैःक्रमेणवर्णयितुंवसिष्ठःप्रतिजानीते ॥ मध्यदेशेत्यादिना ॥ इमान्वक्ष्यमाणान् ॥ २१ ॥ देशनामानिस्पष्टानि ॥ मार्कंडेयादिपुराणोक्तदेशनाम्नामत्रत्यानांचक्वचिद्यद्यपिवैलक्षण्यंव्यत्यासश्चदृश्यतेतथापिब्रह्मांडांतरत्वान्नदोषः ॥ प्राच्यांदेशाः २४ पर्वताः ७ ॥ २२ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २४ ॥ २५ ॥ प्राचीचदक्षिणाचानयोरंतरालंदिक्प्राग्दक्षिणा ॥ दिङ्नामान्यंतरालइतिबहुव्रीहिः ॥ अत्रापिदेशाः २७॥ २६ ॥ २७ ॥ २८ ॥२९ ॥ दक्षिणस्यांपर्वताः ६

वर्णकोष्ठाःसविश्वोत्राआममीनाशनास्तथा ॥ व्याघ्रवक्त्राःकिराताश्चसौवीराएकपादकाः ॥ २४ ॥ माल्यवान्नामशैलोत्रशिबिरांजन एवच ॥ वृषलध्वजपद्मान्यास्तथोदयकरोगिरिः ॥ २५ ॥ अथप्राग्दक्षिणायांतुइमेविंध्यादिवासिनः ॥ चेदयोवत्सदाशार्णाअंगवंगोप वंगकाः ॥ २६ ॥ कलिंगपुंड्रजठराविदर्भामेखलास्तथा ॥ शबराननवर्णाश्चकर्णात्रिपुरपूरकाः ॥ २७ ॥ कंटकस्थलनामानःपृथग्दीपक कोमलाः ॥ कर्णाधाश्चौलिकाश्चैवतथाचार्मण्वताअपि ॥ २८ ॥ काककाहेमकुड्याश्चतथाश्मश्रुधराअपि ॥ वलिग्रीवमहाग्रीवाःकिष्किं धानालिकेरिणः ॥ २९ ॥ अथलीलापतेरस्यदक्षिणस्यामिमेनृपाः ॥ विंध्योथकुसुमापीडोमहेंद्रोदर्दुरस्तथा ॥ ३० ॥ मलयःसूर्यवांश्चै वगणाराज्यसमृद्धकाः ॥ अवंतीरितिविख्यातास्तथाशांबवतीतिच ॥ ३१ ॥ दशपूरकथाचक्रारेषिकातुरकच्छपाः ॥ वनवासोपगिरय स्तेभद्रगिरयस्तथा ॥ ३२ ॥ नागरादंडकाश्चैवगणराष्ट्रनृराष्ट्रकाः ॥ साहाशैवार्ष्यमूकाश्चकर्कोटावनबिंबिलाः ॥ ३३ ॥ पंपानिवासिन श्चैवकैरकाःकर्कवीरकाः ॥ स्वेरिकायासिकाश्चैवधर्मपत्तनपंजिकाः ॥ ३४ ॥ काशिकास्तृष्णखल्लूलायादास्तेताम्रपर्णकाः ॥ गोनर्दाःक णकाश्चैवदीनपत्तननामकाः ॥ ३५ ॥ ताम्रीकादंभराकीर्णाःसहकारैणकास्तथा ॥ वैतुंडकास्तुंबवनालाजिनद्वीपकर्णिकाः ॥ ३६ ॥ क र्णिकाभाश्चशिवयःकौंकणाश्चित्रकूटकाः ॥ कर्णाटमंटवटकामहाकटकिकास्तथा ॥ ३७ ॥ आंध्राश्चकोलगिरयश्चावंतिकविचेरिकाः ॥ चंडायत्तादेवनकाःक्रौंचावाहास्तथैवच ॥ ३८ ॥ शिलाक्षारोदभोनंदमर्दनामलयाभिधाः ॥ तेचित्रकूटशिखरालंकारक्षोगणाःस्मृताः ॥ ३९ ॥ अथप्रत्यग्दक्षिणस्यांमहाराज्यसुराष्ट्रकाः ॥ सिंधुसौवीरशूद्राख्याअभीराद्रविडास्तथा ॥ ४० ॥ कीकटाःसिद्धखंडाख्यास्तथा कालिरुहाअपि ॥ अत्रहेमगिरिःशैलस्तथारैवतकोगिरिः ॥ ४१ ॥ जयकच्छोमयवरोयवनास्तत्रजंतवः ॥ वाह्लीकामार्गणावंताधूम्रा स्तुंबकनामकाः ॥ ४२ ॥ तथालाजगणाश्चैवतथात्रगिरिवासिनः ॥ ततोब्धितोकनियुताएतेलीलापतेर्जनाः ॥ ४३ ॥ अथतत्प्रतिपक्षस्था निमान्जनपदाञ्छृणु ॥ पश्चिमायांदिशिप्रौढाइमेतावन्महाद्रयः ॥ ४४ ॥ मणिमान्नामशैलेंद्रःकुरार्पणगिरिस्तथा ॥ वनोर्कहोमेघभ वश्चक्रवानस्तपर्वतः ॥ ४५ ॥ जनाःपंचजनानामकाशब्रह्मचयांतकाः ॥ तथैवभारक्षतथाःपारकाःशांतिकास्तथा ॥ ४६ ॥

देशाः ६३ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ प्रत्यग्दक्षिणस्यांपर्वताः ४ देशाः १९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ पश्चिमायांपर्वताः ९ देशाः १८ ॥ ४४ ॥ ४५ ॥ काशानांब्राह्मणचयानांचांतकाइतिपंचजनानांविशेषणम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४७॥ दक्षिणोत्तरकतकदेशयोःपार्श्वेकर्का: ॥ ४८ ॥ अजनपदेतिच्छेदः ॥ ४९ ॥ तटेअर्थान्महार्णवतटे ॥ ५० ॥ पश्चिमोत्तरस्यांदेशाः १९ वेणुपतिर्नरपतिरितिदेशः स्थितः ॥ महीनित्योत्सववान् ॥ ५१ ॥ ५२ ॥ यतोदीर्घकेशांगबाहवःअतोदीर्घाख्याइत्यर्थः ॥ ५३ ॥ उत्तरस्यांपर्वताः ६ ॥ पादेषुप्रत्यंतपर्वतेषुदेशाः ४४ ॥ ५४ ॥ ५५ ॥

शैव्यारमरकायाच्छागुहुत्वानियमास्तथा ॥ हैहयाःसुत्यगायाश्वताजिकाहूणकास्तथा ॥४७॥ पार्श्वेकतकयोःकर्कागिरिपर्णाविमास्तथा ॥ संत्यक्तधर्ममर्यादास्तेवर्णाम्लेच्छजातयः ॥ ४८ ॥ ततोजनपदाभूमिर्योजनानांशतद्वयम् ॥ ततोमहेंद्रशिखरीमुक्तामणिमयावनिः ॥ ४९ ॥ युतोमहीधरशतैरथाश्वोनामपर्वतः ॥ ततोमहार्णवोभीमःपारियात्रगिरिस्तटे ॥ ५० ॥ पश्चिमोत्तरदिग्भागेदेशोगिरिमतिस्थितः ॥ तथावेणुपतिश्चैवततोनरपतिर्मही ॥ ५१ ॥ तथाफल्गुणकाश्चैवमांडव्यानेकनेत्रकाः ॥ पुरुकुंदाश्चपाराश्चभानुमंडलभावनाः ॥ ५२ ॥ वन्मिलानलिनादीर्घादीर्घकेशांगबाहवः ॥ रंगाश्चस्तनिकाश्चान्यागुरुहाश्चलुहास्तथा ॥ ५३ ॥ ततःस्त्रीराष्ट्रमतुलंगोवृषापत्यभोजनम् ॥ अथोत्तरस्यांहिमवान्क्रौंचोथमधुमान्गिरिः ॥ ५४ ॥ कैलासोवसुमान्मेरुस्तत्पादेषुजनाउभे ॥ मद्रवारवयौधेयामालवाःशूरसेनिकाः ॥ ५५ ॥ राजन्याश्चतथाज्ञेयाअर्जुनातनयस्तथा ॥ त्रिगर्त्तएकपात्क्षुद्रामवलास्वस्तवासिनः ॥ ५६ ॥ अवलाःप्रखलाःशाकाःक्षेमधूर्त्तयएवच ॥ दशधानागावसन्यदंडाहन्यसनास्तथा ॥ ५७ ॥ धानदाःसरकाश्चैववाटधानास्तथैवच ॥ अंतरद्वीपगांधारास्तथावंतिसुरास्तथा ॥ ५८ ॥ अथतक्षशिलानामततोवीलवगोधनी ॥ पुष्करावर्त्तदेशस्ययशोवतिमहीततः ॥ ५९ ॥ ततोनाभिमतिर्भूमिस्तिक्षाकालवरास्तथा ॥ काहकंनगरंचैवसुरभूतिपुरंतथा ॥ ६० ॥ तथैवरतिकादर्शाअंतरादर्शएवच ॥ ततःपिंगलपांडव्यंयामुनेयातुधानकाः ॥ ६१ ॥ मानवानांगनाहेमतालाःस्वस्वमुखास्तथा ॥ हिमवान्वसुमान्क्रौंचकैलासावित्यगास्तथा ॥ ६२ ॥ ततोऽजनपदाभूमिरशीतिशतयोजना ॥ अथप्रागुत्तरस्यांतुक्रमाज्जनपदाञ्छृणु ॥ ६३ ॥ कालुताब्रह्मपुत्राश्चकुणिदाःखदिनास्तथा ॥ मालवारंध्रराज्याश्चवनाराष्ट्रास्तथैवच ॥ ६४ ॥ केडवस्ताःसिंहपुत्रास्तथावामनतांगताः ॥ सावाकच्चापलवहाःकामिरादरदास्तथा ॥ ६५ ॥ अभिसासदजार्वाकाःपलोलकुविकौतुकाः ॥ किरातायामुपाताश्चदीनाःस्वर्णमहीततः ॥ ६६ ॥ देवस्थलोपवनभूस्तदनूदितश्रीर्विश्वावसोस्तदनुमंदिरमुत्तमंच ॥ कैलासभूस्तदनुमंजुवनश्चशैलोविद्याधरामरविमानसमानभूमिः ॥ ६७ ॥ इ० वा० वा० दे० मोक्षोपायेषूत्पत्ति० जनपदवर्णनंनामषट्त्रिंशःसर्गः ॥ ३६ ॥ ॥ ७१ ॥

॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ प्रागुत्तरस्यांदेशाः २४ ॥ पर्वतः १ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ॥ इतिवासिष्ठ० उ० षट्त्रिंशःसर्गः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्त्यंतेमध्यदेशीयाजनाजनपदाख्यया ॥ तथाजानपदानांचद्वंद्वयुद्धजयाजयाः ॥ १ ॥ द्वंदशोद्वंद्वेषुवाअनुपातिनिअनुसृत्यपतनशीले ॥ १ ॥ २ ॥ मध्यदेशजनपदाः २ ९ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ एतेचान्येचरणेभस्मत्वमागताइतियदुक्तंतत्प्रकारमेवजनपदनामभिर्विभज्यासर्गसमाप्तेराचष्टे ॥ अवंतीत्यादिना ॥ अवंतीउज्जयिनीमालवेषुप्रसिद्धातत्रत्यानांस्यंदनश्रेणीरथपंक्तिःकुंतिदेशस्थानांपांचनदानांचईरितैःप्रेरणैर्युद्धरभसैरितियावत् ॥ ईरितैःक्षिप्तैःशस्त्रैरितिवा ॥ स्पंदमानाभयात्कंपमानाद्रवंतीपलायमानामहतिभृगौगिरिप्रपातेनिपपात ॥ एवमुत्तरत्रापिप्रथमांतदेशवाचिवाच्यानांतृतीयांतदेशवाचिवाच्यैःपराजयोबोध्यः ॥ ८ ॥ मिलिताःसंगताविमर्दिताइतियावत् ॥ ९ ॥ बाण

॥ श्रीवसिष्ठउवाच ॥ ॥ रणेरभसनिर्लूननरवारणदारुणे ॥ अहंपूर्वमहंपूर्वमितिद्वंदानुपातिनि ॥ १ ॥ एतेचान्येचबहवस्तत्रभस्मत्वमागताः ॥ प्रविशंतःप्रयत्नेनशलभाइवपावके ॥ २ ॥ अत्रान्येमध्यदेशीयाजनानोदाहृतामया ॥ तानिमाञ्छृणुवक्ष्यामिपक्षाँल्लीलामहीभृतः ॥ ३ ॥ तद्देहिकाःशूरसेनागुडाअश्वघनायकाः ॥ उत्तमज्योतिभद्राणिमदमध्यमिकादयः ॥ ४ ॥ सालूकाकोद्यमालास्यादौर्द्दीयाः पिप्पलायनाः ॥ मांडव्याःपांडुनगराःसौग्रीवाग्रागुरुग्रहाः ॥ ५ ॥ पारियात्राःकुराष्ट्राश्चयामुनोदुंबराअपि ॥ राज्याङ्काउज्जिहानाश्चकालकोटिकमाथुराः ॥ ६ ॥ पांचालाधर्मारण्याश्चतथैवोत्तरदक्षिणाः ॥ पांचालकाःकुरुक्षेत्रास्तथासारस्वताजनाः ॥ ७ ॥ अवंतीस्यंदनश्रेणीकुंतिपांचनदेरितैः ॥ स्पंदमानाविद्रवंतीनिपपातमहाभृगौ ॥ ८ ॥ कोशब्रह्मावसानाश्चच्छिन्नावस्रवतीजनैः ॥ भूमौनिपतिताःसंतोमिलितामत्तवारणैः ॥ ९ ॥ शूरादाशपुराःशस्त्रनिकृत्तोदरकंधराः ॥ बाणक्षितिभिराक्रम्ययोजितायोजनेह्रदे ॥ १० ॥ दीर्णोदरविनिर्यातस्वांत्रतंत्रीनियंत्रिताः ॥ शांतिकाःशांतसंचाराःपिशाचैश्चर्वितानिशि ॥ ११ ॥ उद्रवैर्भद्रगिरिभिःसंग्रामाध्वरदीक्षितैः ॥ क्षोणिगर्त्तेषुनिक्षिप्तामरगाःकमठाइव ॥ १२ ॥ प्रद्रुताविद्रवद्रक्ताविद्रावितमहारयः ॥ दंडिकास्थानिलोद्धूताहैहयैर्हरिणाइव ॥ १३ ॥ दंतिदंतविनिर्भिन्नादरदादलितारयः ॥ नीतारक्तमहानद्याद्रुमाणांपल्लवाइव ॥ १४ ॥ नाराचैश्चर्विताश्चीनाजीर्णाजर्जरजीविताः ॥ जहुर्जलनिधौदेहान्भारभूतानिवस्थितान् ॥ १५ ॥

क्षितिभिर्बाणभूमिष्ठैस्तद्देश्यैरितियावत् ॥ आक्रम्यपराजित्यानुधाव्ययोजनेपलायितदैवात्प्राप्तेह्रदेयोजितानिमज्जिताः ॥ १० ॥ नियंत्रितानिरुद्धाअतएवशांतसंचाराः उत्उत्कृष्टोद्रवोवेगोरवोध्वनिर्वायेषांतैः ॥ क्षोणिगर्त्तेषुपल्वलादिषु ॥ १२ ॥ दंडिकानगरीतत्स्थाः ॥ अनिलोद्धूताइतिहरिणविशेषणम् ॥ संधिरार्षः ॥ हैहयैर्विद्राविताइत्यर्थाद्गम्यते ॥ हरिणावातप्रम्यः ॥ १३ ॥ १४ ॥ १५ ॥

---

१ सालूसाकेद्येतिक्वचित्पाठः   २ छिन्नाःशस्त्रेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उड्डीनकुंतैराकलिताआच्छिन्नाःकंधराःकंठायेषाम् ॥ भग्नाविशीर्णाः ॥ १६ ॥ दाशकाःशकाश्चयुध्यमानादैवात्करींद्रैर्मकरव्यूहेनेवरंहसासंहतहेतयोविनाशितायुधाःकेशेषु केशेषुगृहीत्वाप्रवृत्तंयुद्धंकेशाकेशितदर्थंकृतारंभाःसंतोविनेदुः ॥ १७ ॥ पाशदेशीयैर्निर्मुक्तेभ्यःश्रृंखलाजालेभ्योभीरवः ॥ जंबालेपंके ॥ वैतसावेतसमूलाश्रयास्तिमयोमत्स्यभेदाः ॥ १८ ॥ तंगणानांउत्ऊर्ध्वंतुंगनमुच्छलनंयेषांतथाविधैरसिभिःशंकुशतैश्चविहितंकारितम् ॥ १९ ॥ शस्त्रकर्णानांकर्णवदूर्ध्वीकृतशस्त्रत्वात्तथाप्रसिद्धानामोघात्संघान्निर्गतावीरहेतिप्रभाविद्युद्भिरंबुदायमानानिगडाजानपदागुहानूजानपदानृप्रतिशरधाराःसिषिचुरक्षरन् ॥ यथावीरहेतिसदृशप्रभाअंबुदाःस्वबिंदुभ्योहेतुभ्योवनानिसिंचंतितद्वत् ॥ २० ॥ भुशुंडीमंडलानामुद्योतैःश्यामोनीलीकृतोयोर्कःसूर्यः भुशुंडीमंडललक्षणोवाउद्योतेनश्यामोर्कस्तल्लक्षणेनोत्पातेन ॥ उक्तंच ॥ यदिचंद्रइवादित्यःसच्छिद्रोरश्मिमंडलः॥ कृष्णरक्तांतपर्यंतस्तज्जनक्षयलक्षणमिति॥२१॥ताम्रायवनभेदास्तेषांसंग्रामोयुक्तावाहिनीसैवनायिकागौडभटेननायकेनभुक्ताउपभुक्ता ॥ अंगेतिरामसंबोधनम्॥२२॥

कर्णाटसुभटोड्डीनकुंताकलितकंधराः॥ भग्नानलदशूराश्वतारकानिकराइव ॥१६॥ करींद्रमकरव्यूहरंहःसंहतहेतयः ॥ केशाकेशिकृतारंभाविनेदुर्दाशकाःशकाः॥ १७॥ दशार्णाःपाशनिर्मुक्तश्रृंखलाजालभीरवः॥ निलीनारक्तजंबालेवैतसास्तिमयोयथा॥ १८ ॥ गुर्ज्जरानीकनाशेनगुर्जरीकेशलुंचनम्॥विहितंतंगणोत्तुंगनासिशंकुशतैरणे॥१९॥सिषिचुःशस्त्रकर्णौघाद्धिंदुभ्योनिगडागुहान्॥शरधारावनानीववीरहेतिप्रभांबुदाः॥२०॥भुशुंडीमंडलोद्योतश्यामार्कोत्पातभीरुषु॥आभीरेष्वरयःपेतुर्गोगणाहरितेष्विव॥२१॥कांतकांचनकांतासीत्ताम्रसंग्रामवाहिनी॥ भुक्तागौडभटेनांगनखकेशनिकर्षणैः ॥ २२ ॥ रणेनगनयासंख्यकवचच्क्रनिकृंतनैः ॥ तंगणाःकणशःकीर्णाःकंकगृध्रेषुभासकैः॥२३॥लगुडालोडनोड्डीनंगौडंगुडुगुडारवम्॥श्रुत्वागांधारगावोग्रेदुद्रुवुर्द्रविडाइव॥२४॥आकाशगार्णवप्रख्योवहच्छककदंबकः॥अकरोत्पारसीकानांघननैशतमोभ्रमम्॥२५॥ मंदराहननोड्डीनस्वच्छक्षीरार्णवोदरे॥वनानीवायुधान्यासञ्छत्रुप्रालेयसानुनि॥ २६ ॥ यदंबुदैरिवोड्डीनंशस्त्रवृंदैर्नभोंगणे॥ तद्वृष्टंवीचिवलनैर्लोलैःप्लुतमिवार्णवे॥ २७॥ शतचंद्रंसितच्छत्रैःशरैःशलभनिर्भरम्॥ शक्तिभिःकिलनीरंध्रंदृष्टमाकाशकाननम्॥ २८॥

नगानूवृक्षशैलानपिनयंत्यपाकुर्वंतितथाविधैरनंतैःकवचैश्चर्ध्वनद्भिश्चक्रैर्निकृंतनैश्छेदनैः ॥ भासकैर्जानपदैः ॥ २३ ॥ लगुडानामालोडनेनभ्रमणेनोपलक्षितमुड्डीनमुद्गतंगौडभटसंबंधिगुडुगुडारवमव्यक्तभाषणध्वनिम ॥ गांधारागावइवेत्युपमितसमासः ॥ टजभावश्छांदसः ॥ २४॥ वहतांनदीवत्पर्वतेभ्योवतरतांशकानांकदंबकःस्तोमः ॥ प्रायःशकानीलांबराइतिगम्यतेपारसीकास्तुधवलांबराइति ॥ २५ ॥ अतएवाह ॥ मंदरेति ॥ तत्रयुद्धतामायुधानिक्षीरार्णवोदरेमंदरस्यवनानीवप्रेक्षकाणांतुप्रालेयाचलसानुनितद्वनानीवेतिबोध्यम ॥२६॥ उड्डीनमितिभावेक्तः ॥ ल्वादिभ्यइतिनत्वम् ॥ वलनैःसंवलनैर्वीच्यंतरसंवलितवीचिभिरितियावत् ॥ भूमिष्ठदृष्ट्यांबुदोड्डीनमिवदृष्टमपिनभश्चरैर्वीचिप्लवनमिवदृष्टमितिभावः ॥ २७ ॥ शलभैःपतंगैर्निर्भरंभृशंव्याप्तम ॥ नीरंध्रंनिरवकाशम ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृताःशत्रवइतिदेहलीदीपन्यायेनोभयत्रशेषः ॥ २९ ॥ किरातसैन्यान्येवकन्यास्तासाम् ॥ अंगैर्जानपदैः ॥ अनंगतांविदेहतांमन्मथोद्रेकंच ॥ ३० ॥ काशैःसामुद्रैर्नरभेदैः ॥ माययाखगैःपक्षिभूतैः ॥ ३१॥ उन्मत्तायुद्धोन्मत्ताः ॥ नर्मलीलातन्निर्मातृइतिक्रियाविशेषणम् ॥३२॥ पृषदाकृतिंबिंद्वाकारंविशीर्णतामितियावत् ॥ ३३॥ कौंतैःकुंतिदेशजैः ॥ ३४ ॥ धरायायुद्धभूमेर्धरणमाक्रमणंतद्धर्मिण्याअहीनाजानपदास्तेषांसेनया ॥ ३५ ॥ कुंतैर्गजदंतैर्द्रुमैश्चप्रहरणैरुद्दामायुद्धदक्षाः ॥ नगावृक्षाः ॥३६॥ ब्रह्मावत्सनकाजानपदानीपैर्जानपदैः ॥३७॥ श्वेतकाकानांजानपदानामाननंमुखंशिरइतियावत् ॥ जठरैर्जानपदैः ॥ एतज्जठरबलम् ॥ काष्ठयोधलक्षणपंकेषुनिरालानंविनैवबंधनस्तंभंमग्नाःसंतो

वीरासवसमाक्रंदकारिणःकेकयैःकृताः ॥ कंकैःकंककुलाक्रांतव्योमोद्धूलितमस्तकाः ॥ २९ ॥ किरातसैन्यकन्यानांकामंकलकलारवैः ॥ अंगैरनंगतांनीत्वाभैरवैरिवगर्जितम् ॥ ३० ॥ काशैस्तद्देहकाःक्रांताअदृश्यैर्माययाखगैः ॥ निर्द्धूतपक्षैःक्षुभितैःपवनैरिवपांसवः ॥ ३१ ॥ उन्मत्ताःसुविनिर्द्धूतास्त्यक्तहेतिरणांबराः ॥ नार्मदानर्मनिर्मातृनन्नृतुर्जहसुर्जगुः ॥ ३२ ॥ प्रक्वणत्किंकिणीजालंशक्तिवर्षमुपागतम् ॥ साल्वबाणानिलोद्धूतमगमत्पृषदाकृति ॥ ३३ ॥ शैब्यास्तुखंडिताःकौंतैर्भ्रमत्कुंतैर्विघट्टिताः ॥ शर्वीभूतादिवंनीतादृष्टाविद्याधराइव ॥ ३४ ॥ धराधरणधर्मिण्याधीरयाहीनसेनया ॥ लुंठिताःपांडुनगराश्चलनोल्लासमात्रतः ॥ ३५ ॥ तद्देहकाःपांचनदैर्दलितामत्तकाशिभिः ॥ कुंतदंतद्रुमोद्दामानगाइवमतंगजैः ॥ ३६ ॥ ब्रह्मावत्सनकानीपैश्चक्रैःकृत्तागतामहीम् ॥ सहयाःक्रकचोत्कृत्तावृक्षाःकुसुमिताइव ॥ ३७ ॥ श्वेतकाकाननंलूनंकुठारैर्जठरेरितैः ॥ एतद्दाहपार्श्वस्थोभद्रेशःशरवह्निना ॥ ३८ ॥ काष्ठयोधेनिरालानंमग्नाजीर्णामतंगजाः ॥ लयमाजग्मुरायुद्धमिद्धंग्नाविंधनंयथा ॥ ३९ ॥ मित्रगर्त्तात्रिगर्त्तात्ताभ्रमित्वोर्ध्वंतृणोपमम् ॥ विविशुर्व्यस्तमूर्द्धानःपातालांतंपलायितुम् ॥ ४० ॥ मंदानिलचलांभोधिभासुरेमागधेबले ॥ निर्मग्नावनिलामंदाःपंकेजीर्णगजाइव ॥ ४१ ॥ चेदयश्चेतनांजह्रुस्तंगणानांरणांगणे ॥ पुष्पाणांपथिशीर्णानांसौकुमार्यमिवातपाः ॥ ४२ ॥ कौसलाःपौरवारावमसहंतांतकाइव ॥ तैरुन्मुक्तगदाप्रासशरशक्त्यतिवृष्टयः ॥ ४३ ॥ बभूवुर्भल्लकृत्तांगाविस्मयाविद्रुमद्रुमाः ॥ इवाद्रौविद्रवंत्यार्द्रसांद्रास्रक्सूर्यमूर्त्तयः ॥ ४४ ॥ नाराचौघमहाहेतिमारुताधूतमूर्त्तयः ॥ बभ्रमुर्भ्रमरानीकभासुराजलदाइव ॥ ४५ ॥ शरधाराधरामेघाःशरोर्णापूर्णमेषकाः ॥ शरपत्रावृतावृक्षाभ्रेमुस्तद्गर्जनागजाः ॥ ४६ ॥

जीर्णामतंगदेशजाएवश्लेषाद्गजाः ॥ ३९ ॥ त्रिगर्त्तैरात्तागृहीताः ॥ ४० ॥ वनिलाजानपदाः ॥ ४१ ॥ चेतनांविवेकबुद्धिंजीवंवा ॥ ४२ ॥ कौसलाःकोसलदेशजाअंतकाइवनिघ्नंतइतिशेषः ॥ तैःपौरवैरुन्मुक्तागदादिवृष्टयोयेषुतथाविधावभूवुरित्यपकृष्यते ॥ ४३ ॥ तेषुयेभल्लकृत्तांगाअप्यविस्मयाःपरपराक्रमेआश्चर्यबुद्धिरहिताःअतएवार्द्रसांद्रास्रग्भिर्बालसूर्यसदृशमूर्त्तयःसंतःअद्रौपर्वतेविद्रुमद्रुमाःप्रवालवृक्षाएवविद्रवंतिपरिधावंतीवबभूवुः ॥ ४४॥४५॥ तेषांकोसलानांगर्जनोपलक्षितागजाःशराणांधारोर्णायत्रसदृशकांडगरुच्छल्यभागाकीर्णत्वात्कमान्मेघमेषवृक्षात्मनाउत्प्रेक्ष्यंते ॥ ४६ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंदाकस्थलोद्भवाजंतवोमनुष्यहस्त्यादयोवनराज्याजानपदास्तल्लक्षणयाजरयाजीर्णानिर्बलीकृताःसंतःपरमाकृष्टाःपेलवास्तंतवइवात्रुटन्छिन्नाः ॥ ४७ ॥ निखातगर्त्तेनिरोधाद्रथेषुध्वस्तचक्रेषुसत्सुअमुत्रअमीषुरथमूर्द्धसुप्रहरिष्यंतःशत्रुजनसंघातानिपेतुः ॥ ४८॥ शालवनंतालवनंचयुद्धेपरस्परंजनतयोर्जनसमूहयोर्वलनंमेलनंअतएववनंमहावनत्वेनसंपन्नंयुद्धस्थानंप्राप्यतत्रभुजावकर्त्तनंचकाराच्छिरोवकर्त्तनंचप्राप्ययथाक्रममुत्तालमूर्ध्वीभूततालवृक्षप्रायंस्थाणुकाननंचासीत् ॥शालानांपरितःशाखाच्छेदनेतालप्रायतातालानांतुशिरःकर्त्तनेस्थाणुत्वैवपरिशिष्यतइतियुक्तमेवसंपन्नमितिभावः ॥ ४९ ॥ ५० ॥ तारःआरवोयस्मिन् ॥ सैन्यमेवकाननम् ॥५१॥ पिशाचैःपिशाचप्रधानैःकामरूपादिजानपदैःसहयुद्धायसंयुक्तादशार्णाभूतैरपह्नतायुधाःसंतस्तर्णकाइवपलायमानाःपथिकर्णान्पातयित्वाययुः ॥ तर्णकपक्षेकर्णपदेनकर्णत्रदुद्धूतद्वित्रिपत्राणिगुल्मान्युच्यंते

वनराज्यजराजीर्णाःकंदाकस्थलजंतवः॥ अत्रुटन्परमाकृष्टाःपेलवाइवतंतवः॥ ४७॥ रथेषुध्वस्तचक्रेषुनिखातेऽमुत्रमूर्द्धसु॥निपेतुर्जनसंघातामेघाइववनाद्रिषु॥ ४८॥ शालतालवनंप्राप्यजनतावलनंवनम्॥ भुजावकर्त्तनंचासीदुत्तालंस्थाणुकाननम्॥ ४९ ॥ ननर्दुर्नंदनोद्यानसुंदर्योमत्तयौवनाः॥ वनोपवनदेशेषुमेरोर्वीरैरवराश्रिताः॥ ५० ॥ तावत्तारारवंरेजेसैन्यकाननमुत्तमम्॥ यावन्नपरपक्षेणप्राप्तंकल्पानलार्चिषा॥ ५१ ॥ छिन्नाःपिशाचसंयुक्ताभूतापह्नतहेतयः॥ पातयित्वाययुःकर्णान्दशार्णास्तर्णकाइव॥ ५२॥ जहुर्भग्नेश्वराःकांतितांजिगीषवनौजसा॥ कासयःकमलानीवशुष्कस्रोतस्विनौजसा॥ ५३॥ तुषाकामेसंलैःकीर्णाःशरशक्त्यसिमुद्गरैः॥ विद्रुतानरकैःक्षिप्ताःकटकच्छलनाअपि॥ ५४॥ कौंतक्षेत्राःप्रस्थवासैस्थित्वायोधिभिरावृताः॥ गुणाइवखलाक्रांतागताव्यक्तमशक्तताम्॥५५॥ द्विपयोबाहुधानानांक्षणेनादायमस्तकम्॥ भल्लैःपलाय्याशुगताविलूनकमलाइव॥५६॥ मिथःसारस्वतानीत्वाआदिनांतंकृताजयः॥ पंडिताइववादेषुनोद्विग्नानपराजिताः॥ ५७॥ खर्वगाःखदिताःक्षुद्रायातुधानैःपरावृताः॥ तेजःपरममाजग्मुःशांताग्नयइवेंधनैः॥ ५८ ॥ कियदाख्यायतएतज्जिह्वानिचयैःकिलालमाकुलितः॥ वासुकिरपिवर्णयितुंनसमर्थोरणवरंराम ॥ ५९॥ ॥इत्यार्षेवा०वा०दे० मोक्षोपायेषूत्पत्ति०ली० जनपदवर्णनंनामसप्तत्रिंशःसर्गः॥३७॥ ॥६९॥

॥५२ ॥ भग्नेश्वराःहतस्वामिकाः ॥ तांजिगीषवनानांजानपदानाम् ॥ शुष्काःस्रोतस्विनःसरःपूरकनिर्झरायेनतथाविधेनग्रीष्मौजसा ॥५३॥ नरकैर्जानपदैः ॥ क्षिप्तानिरस्ताःकटकच्छलनाअपिविद्रुताःपलायिताः ॥५४॥ स्वस्थानएवस्थित्वायोधिभिर्युद्धशीलैर्धीरैरित्यर्थः ॥ आवृताःपरिक्षिप्ताः ॥ ५५ ॥ विलूनानिकमलानियैस्तेविलूनकमलाःपुरुषाइव ॥५६॥ सारस्वताःसरस्वतीतीरोद्भवामिथःकृताजयःकृतयुद्धाःसंतआदिनांतंदिनावसानावधिनीत्वानोद्विग्नाः ॥ ५७ ॥ खदिताविद्राविताअपियातुधानैर्लंकास्थैःसहायैःपरावृताःपरावर्त्तिताः ॥ ५८ ॥ प्रकृतंरणवर्णनमुपसंहरति ॥ कियदिति ॥ जिह्वानिचयैर्द्विसहस्रजिह्वाभिरलमत्यर्थंवर्णयितुमाकुलितोव्ययोवासुकिःशेषोपि ॥५९॥ ॥इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०सप्तत्रिंशःसर्गः ॥ ३७॥

---

१ मेखलैरितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिनांतेसेनयोर्युद्धात्परावृत्तौरणक्षितिः ॥ पिशाचभीमबीभत्सा॰॰स्तरे॰॰त्रवर्ण्यते ॥ १ ॥ जितकाशिभिः सास्फोटैःपराजितानांभयेनचसंकुले ॥ चटतिरुधिरोद्गमभावणोतितथाविधेकठिनकंकटेअंबुतद्रुधिरक्लेदजलंवहतिप्रक्षरतिसतीतिपरेणान्वयः ॥ १ ॥ क्षेपणपाषाणकरकैरच्छासुशुभास्वरश्मवृष्टिष्वेकत्रोत्पतंतीष्वन्यत्रपतंतीषु ॥ नदीष्वब्जपंक्तिषुवरकेषुसंवरकेषुसंकुचंतीषुसतीषु ॥ लिंगव्यत्ययश्छांदसः ॥ २ ॥ शरफलाग्रयोर्मिथःकाटेनसंघट्टनेनोत्थैर्वह्निकणैःसीकरिणीषुशरनदीषु ॥ ३ ॥ वहंतिप्रवहंतिलूनशिरांस्येवपद्मानियेषुतथाविधाश्चक्राण्येवावर्त्तायेषुतथाविधैर्हेतिवृंदमंदाकिनीगणैःखार्णवेआकाशलक्षणेसमुद्रेपूरितेसति ॥ ४ ॥ समीरणवद्रणत्क्वाणैःशस्त्रैःपूर्णत्वादेवघनैर्निबिडैर्घनैर्मेघैरतएववर्षत्वारंभशंकयाकपीनांकच्छप्रदेशेशोणतोपचयात्कामव्यथाप्रदैः ॥ मेघांतरितेषुसिद्धेषुसंदिह्यतेइतिसंदेहःअंतःप्रलयोयैस्तथाविधेषुसत्सु ॥ ५ ॥ शस्त्राघात

॥ श्रीवसिष्ठउवाच ॥ ॥ एवमत्याकुलेयुद्धेसास्फोटभयसंकुले ॥ आदित्येतमसावृद्धेचटत्कठिनकंकटे ॥ १ ॥ वहत्यंबूत्पतंतीषुपतंतीष्वश्मवृष्टिषु ॥ नदीपुक्षेपणाच्छासुवरकेष्वब्जपंक्तिषु ॥ २ ॥ मिथःफलाग्रकाटोत्थवह्निसीकरिणीषुच ॥ आयांतीषुप्रयांतीषुदूरंशरनदीषुच ॥ ३ ॥ वहल्लूनशिरःपद्मचक्रावर्त्तैस्तरंगितैः ॥ खार्णवेपूरितेहेतिवृंदमंदाकिनीगणैः ॥ ४ ॥ समीरणरणत्क्वाणशस्त्रपूर्णघनैर्घनैः ॥ संदेहांतेपुसिद्धेषुकपिकच्छव्यथाप्रदैः ॥ ५ ॥ अष्टभागदशाशेषप्रतापमधुराकृति ॥ शस्त्रघातौजसावीरइवाहस्तनुतांययौ ॥ ६ ॥ श्रांताश्वेभाःप्रभग्नाश्वहेतिसंघातदीप्तयः ॥ दिवसेनसमंसेनाययुर्मंदप्रतापताम् ॥ ७ ॥ अथसेनाधिनाथाभ्यांविचार्यसहमंत्रिभिः ॥ दूताःपरस्परंवृत्तायुद्धंसंक्रियतामिति ॥ ८ ॥ तत्रश्रमवशान्मंदयंत्रशस्त्रपराक्रमैः ॥ रणसंहरणंकालेसर्वैरेवोररीकृतम् ॥ ९ ॥ ततोमहारथोत्तुंगकेतुप्रांतकृतास्पदम् ॥ बलयोरारुरोहैकएकोयोधोध्रुवोयथा ॥ १० ॥ सोंशुकंभ्रामयामाससर्वदिङ्मंडलेसितम् ॥ श्यामेवदीर्घशुद्धांशुंयुद्धंसंक्रियतामिति ॥ ११ ॥ ततोदुंदुभयोनेदुःप्रतिध्वनितदिङ्मुखाः ॥ महाप्रलयसंशांतौपुष्करावर्त्तकाइव ॥ १२ ॥ शरादिहेतिसरितोविस्तीर्णेगगनेस्थिते ॥ प्रवृत्ताःसुखमागंतुंसरसःसरितोयथा ॥ १३ ॥ योधदोर्द्रुमसंचारस्तनुतामाययौशनैः ॥ भूकंपांतेवनस्पंदइवाभ्रांतइवार्णवः ॥ १४ ॥ विनिर्गंतुंप्रववृतेरणादथबलद्वयम् ॥ वारिपूरश्चतुर्दिक्षुप्रलयैकार्णवादिव ॥ १५ ॥

प्रयुक्तेनौजसाशोणकांत्यावीरःशूरइव ॥ ६ ॥ ७ ॥ वृत्ताःप्रवर्त्तिताः ॥ ८ ॥ मंदैर्मंदीकृतैर्यंत्रशस्त्रपराक्रमैः ॥ बहुव्रीहिर्वा ॥ संहरणमुपसंहारः ॥ ९ ॥ महतोरथस्योत्तुंगेकेतुप्रांतेकृतास्पदंकृताधारंदीर्घवंशस्तंभद्वयमितिशेषः ॥ नन्वेकएकइतिद्विर्वचनंचेद्वीप्साविवक्षायामेकंबहुव्रीहिवदितिबहुव्रीहिवद्भावेएकैकइतिस्यात्तदविवक्षायांतुसरूपैकशेषःस्यादितिचेन्नात्रवीप्सा ॥ व्याप्यानेकविवक्षाभावात् ॥ नाप्येकशेषः ॥ सहविवक्षाभावात् ॥ संख्यावाच्येकशब्दस्यद्विवचनानर्हत्वादेकवचनेनसेनयोःपुरुषभेदप्रत्यायनायोगाच्च ॥ तस्मात्परस्परानपेक्षयोरेवपुरुषयोस्तंत्रेणारोहणक्रियासंबंधविवक्षणान्नकश्चिद्दोषइति ॥ १० ॥ श्यामारात्रिरंशुभिर्दीर्घशुद्धांशुंचंद्रमिव ॥ ११ ॥ १२ ॥ सुखमप्रतिबंधमागंतुंपतितुम् ॥ सरसोमानसादेःसरितःसरय्वादयोयथा ॥ १३ अभ्रांतेशरदि ॥ १४ ॥ वारिपूरइति ॥ अर्थात्प्रलयांतेइतिगम्यते ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्क्षिप्तोबहिर्निष्कासितोमंदरोयस्मात्तथाविधक्षीरसमुद्रवत् ॥ साम्यमव्याकुलताम् ॥ १६ ॥ जननिर्गमनक्रमेण ॥ विकटापूतनेश्वरीतस्याउदरमिवभीषणम् ॥ १७ ॥ झिल्लयोवनपतंगभेदाः ॥ १८ ॥ १९ ॥ शवानांस्पंदनेनजीवनभ्रांतिदम् ॥२०॥ शवराशीनामयेषुशिखरेषुविश्रांताअंबुदखंडायत्रेत्यतिशयोक्तिः ॥ वातच्छिन्नमहावनमिवेतिशेषः ॥ २१ ॥ २२ ॥ पर्याणैःपल्याणैरवनैरंगरक्षकैश्चर्मादिभिःसन्नाहैःकवचैश्चावृतंभूतलंयत्र ॥ गुप्तमाच्छन्नंशवशरीरकंयत्र ॥ २३ ॥ फणावदुच्छ्रितायेष्वास्फुटकेषुछिद्रीकृतेषुतूणीरेषुकीचककुंजेष्विवकूजन्समीरणोवायुर्यत्र ॥ २४ ॥ मौलिनाक्रियंतइतिमौलिहाराश्चूडामणयःअंगदानिचतेषांद्योतैःशक्रचापानांवनेनसमूहेनेवावृतंव्याप्तम् ॥ २५ ॥

उत्क्षिप्तमंदरक्षीरसमुद्रवदनाकुलम् ॥ सैन्यंप्रशाम्यदावर्त्तंशनैःसाम्यमुपाययौ ॥ १६ ॥ क्रमेणासीन्मुहूर्त्तेनविकटोदरभीषणम् ॥ अगस्त्यपीतार्णववच्छून्यमेवरणांगणम् ॥ १७ ॥ शवसंततिसंपूर्णवहद्रक्तनदाकुलम् ॥ परिकूजनझंकारपूर्णझिल्लिवनोपमम् ॥ १८ ॥ वहद्रक्तसरित्स्रोतस्तरंगारवघर्घरम् ॥ साक्रंदार्द्धमृताहूतसप्राणव्यग्रमानवम् ॥ १९ ॥ मृतार्द्धमृतदेहौघस्तनास्तृक्प्लुतनिर्झरम् ॥ सजीवनरपृष्ठस्थशवस्पंदनभ्रांतिदम् ॥ २० ॥ करींद्रशवराश्यग्रविश्रांतांबुदखंडकम् ॥ विशीर्णरथसंघातंवातच्छिन्नमहावनम् ॥ २१ ॥ वहद्रक्तनदीरंहःप्रोह्यमानहयद्विपम् ॥ शरशक्त्यृष्टिमुसलगदाप्रासासिसंकुलम् ॥ २२ ॥ पर्याणावनसन्नाहकवचावृतभूतलम् ॥ केतुचामरपट्टौघगुप्तशवशरीरकम् ॥ २३ ॥ फणास्फुटकतूणीरकुंजकूजत्समीरणम् ॥ शवराशिपलालौघतल्पसुप्तपिशाचकम् ॥ २४ ॥ मौलिहारांगदद्योतशक्रचापवनावृतम् ॥ श्वश्टगालकराकृष्टसांद्रांत्रादीर्घरज्जुकम् ॥ २५ ॥ रक्तक्षेत्रक्कणत्किंचिच्छेषजीवनृदंतुरम् ॥ रक्तकर्दमनिर्मग्नसजीवनरदर्दुरम् ॥ २६ ॥ वरांगकवचप्रख्यनिर्गताक्षिशतोच्चयम् ॥ वहद्भुजोरुकाष्ठौघघोररक्तसरिच्छतम् ॥ २७ ॥ साक्रंदबंधुवलितंमृतार्द्धमृतमानवम् ॥ शरायुधरथाश्वेभपर्याणासंवरांतरम् ॥ २८ ॥ नृत्यत्कबंधदोर्दंडमंडलानमितांबरम् ॥ मदमेदोवसागंधपीडार्द्रघ्राणकोटरम् ॥ २९ ॥ उत्तालुवर्द्धमृतेभाश्वमार्यमाणाल्पजीवितम् ॥ वहद्रक्तनदीवीचिप्रहारहतदुंदुभि ॥ ३० ॥ उह्यमानमृतेभाश्वमकरास्तृक्सरिच्छतम् ॥ म्रियमाणनरानीकफूत्कृतास्तृक्प्रणालिकम् ॥ ३१ ॥ स्वल्पजीवशरापूर्णमुखदक्कांतितस्वनम् ॥ पिंडभार्यावसागंधवातांतोत्पीठलोहितम् ॥ ३२ ॥ उन्नासार्द्धमृतेभेंद्रकराक्रांतकबंधकम् ॥ निरधिष्ठितहस्त्यश्वपातितोच्चकबंधकम् ॥ ३३ ॥

रक्तपूर्णेक्षेत्रेक्कणंतोघर्घरस्वरेणकूजंतोनृदंतुराउद्घाटितदंताःपुरुषायत्र ॥ सजीवनराएवदर्दुराभेकायत्र ॥ २६ ॥ वरांगकवचंचित्रकंचुकम् ॥ २७ ॥ पर्याणांतैरासंवरमाच्छन्नमंतरंमध्यंयस्य ॥ २८ ॥ आनमितमुच्छ्रयादधरीकृतमितियावत् ॥ २९ ॥ उत्तालुभिरूर्ध्वीकृततालुभिः ॥ ३० ॥ फूत्कृताफूत्कारेणनिरस्यमानामुखप्रदेशप्रसृताअस्तृक्प्रणालिकायत्र ॥ ३१ ॥ स्वल्पजीवैःशरापूर्णमुखदक्कैश्चनरैरंतिताानिबद्धाआक्रंदस्वनायत्र ॥ अतिअदिबंधने ॥ वामकुक्षिस्थोमांसग्रंथिविशेषःपिंडभार्येत्युच्यते ॥ तस्यावसायाश्चगंधेनोपलक्षितंवातांतेनवायुसंस्पर्शेनउत्पीठमिवघनीभूतंलोहितंयत्र ॥ ३२ ॥ सादिमरणान्निरधिष्ठितैरनियंत्रितैः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुदद्भिःक्रंदद्भिःपरिभ्रष्टैःपतद्भिःशवैश्चक्षुब्धाअसृगुद्धतिर्लोहितोच्छलनंयत्र ॥ मृतस्यभर्त्तुर्गलेआलिंग्येतिशेषः ॥ दैवोपनीतेनशस्त्राघातेनत्यक्तप्राणाकुलांगनायत्र ॥ बुद्धिपूर्वकंशस्त्रघातेनभर्त्तृसहगमनंतुनशास्त्रार्थः ॥ ३४ ॥ संस्कार्यशवानयनायस्वाम्याज्ञप्तायाःशिबिरनिविष्टसेनायाःसकाशादुत्क्रांतैर्निर्गतैःप्रत्येकंरणभूप्रवेशभीरुत्वात्ततैःसंततैःक्षिप्रैःशीघ्रप्रवृत्तैर्बहुभिःपांथैःकृतंस्वस्वजनशवपरीक्षणंयत्र ॥ शवान्हरंतीतिशवहारास्तेषांस्वाभिलषितशवान्वेषणत्वरयाकराकृष्टसप्राणनैररनुचरैर्भृत्यैराकुलम् ॥ ३५ ॥ केशाःशैवालानिवक्राण्यब्जानिचक्राण्यावर्त्तायेषुतथाविधंरक्तनदीशतंयत्र ॥ ३६ ॥ विदेशेमृतानांशोकात्साक्रंदंहुतादत्तास्तदंगभूषणाद्ययोगजवाजिनश्चयत्र ॥ क्लीबेसुबलुक्छांदसः ॥ ३७ ॥ परोन्यःपरमेश्वरोवा ॥ तेषांअभिधानामानि ॥ ३८ ॥ पराक्रममकृत्वैवम्रियमाणैर्मर्थैर्दैवोन्मथितैरोजिष्ठैर्बलवत्तरैर्द्विष्टोनिंदितःस्वप्रारब्धकर्मसंचयोयत्र ॥

रुदत्क्रंदत्परिभ्रष्टशवक्षुब्धासृगुद्धति॥ मृतभर्तृगलेशस्त्रत्यक्तप्राणकुलांगनम्॥ ३४॥ सेनोत्क्रांततत क्षिप्रबहुपांथपरीक्षणम्॥ शवहारकराकृष्टसप्राणानुचराकुलम्॥ ३५॥ केशशैवालवक्राब्जचक्रावर्तनदीशतम्॥ तरत्तुंगतरंगाढ्यवहद्रक्तमहानदम्॥ ३६॥ अंगलग्नायुधोद्धारव्यग्रार्द्धमृतमानवम्॥ विदेशमृतसाक्रंदहुतांगगजवाजिनम्॥ ३७॥ प्राणांतस्मृतपुत्रेष्टमातृदेवपराभिधम्॥ हाहाहीहीतिकथितमर्मच्छेदनवेदनम्॥ ३८॥ म्रियमाणमर्थौजिष्ठद्विष्टप्रारब्धसंचयम्॥ दंतियुद्धासमर्थाग्रमृतदेहेष्टदैवतम्॥ ३९॥ म्रियमाणमहावज्ञाशूराश्रितपलायनम्॥ अशंकितासृगावर्त्तभीमास्पदगमोत्सुकम्॥ ४०॥ मर्मच्छेदशराघातव्यथाविदितदुष्कृति॥ कबंधबंधप्रारब्धवेतालवदनाक्रमम्॥ ४१॥ उह्यमानध्वजच्छत्रचारुचामरपंकजं॥ किरत्संध्यारुणंदिक्षुतेजस्कंरक्तपंकजम्॥ ४२॥ रथचक्रधरावर्तरक्तार्णवमिवाष्टमम्॥ पताकाफेनपुंजाढ्यंचारुचामरबुद्बुदम्॥ ४३॥ विपर्यस्तरथंभूमिपंकमग्नपुरोपमम्॥ उत्पातवातनिर्द्धूतद्रुमंवनमिवाततम्॥ ४४॥ कल्पदग्धजगत्सख्यंमुनिपीतार्णवोपमम्॥ अतिवृष्टिहतंदेशमिवप्रोज्झितमानवम्॥ ४५॥ कलापकुंतवलितंभुशुंडीमंडलाकुलम्॥ मत्तनागशताकारशवतोमरमुद्गरम्॥ ४६॥ शिलाशिखरसंजाततालजालमिवाततम्॥ तरद्रक्तनदीतीरजातकुंतोन्नतद्रुमम्॥ ४७॥

दंतियुद्धेष्वसमर्थैर्दैत्यग्रेमृतप्रायदेहैर्विमर्दभयादिष्टानिप्रार्थितानिदैवतानियत्र ॥ ३९ ॥ म्रियमाणेषुमहत्यापादाघाताद्यवज्ञयाअपराधेनअशूरैराश्रितंपलायनंयत्र ॥ अतएवाशंकितानिःशंकाअसृगावर्त्तभयानकस्थानेष्वपिगमनोत्सुकागमनोन्मुखायत्र ॥ ४० ॥ मर्मच्छेदिन्याशराघातव्यथयाविदितानुमिताजन्मांतरस्वदुष्कृतिर्यत्र ॥ पलायमानकबंधानांबंधनेनरुधिरपानायप्रारब्धावेतालवदनाक्रमाःयत्र ॥ ४१ ॥ रक्तह्रदेपूह्यमानानिध्वजच्छत्रचामराणिपंकजानिसितांभोजानियत्र ॥ रक्तह्रदेषुसंध्यारागप्रतिफलनादरुणंतेजस्कंतेजःसमूहलक्षणंरक्तपंकजंकोकनदंदिक्षुकिरत्विक्षिपत् ॥ ४२ ॥ रथास्तच्चक्राणिचक्रमाद्धराःपर्वताआवर्त्ताश्चयत्रतथाविधम् प्रसिद्धार्णवसप्तकाधिक्याद्दृष्टमंरक्तार्णवमिवस्थितम् ॥ ४३ ॥ ४४ ॥ हतोदेशइतिप्रथमांतपाठश्छांदसः ॥ ४५ ॥ कलापैर्भूषणैःशरैश्चवलितंव्याप्तम् ॥ नागागजास्तदाकाराःशवाःनागास्सर्पास्तदाकारास्तोमरमुद्गराश्चयत्र ॥ ४६ ॥ पूर्वार्धोक्तार्थेउत्तरार्द्धोक्तोर्थोहेतुः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागानांगजानामंगेषुस्यूताःप्रोताहेत्योघाएववृक्षास्तेषामंशवःकिरणास्तल्लक्षणैःकुसुमैराकुलम्॥ जालकितंसंजातजालकमिवकृतम् ॥४८॥४९॥करींद्राणांकुणपेभ्यःशवेभ्य आपातनिर्यद्भिरीषन्निर्गतैर्भग्नकट्यादिजनैरीक्षितम्॥५०॥अस्रङ्नदीषुवहंतःप्लवमानाहस्तिनांकटागंडाःकर्पटानिपल्याणवस्त्राणिचनौगणानौकासमूहायत्र॥ ५१॥डिंडीरःफेनः॥ संचारायनियतैराज्ञप्तैःक्षिप्रैःशीघ्रकारिभिर्भृत्यैर्विच्छिन्नाविवेचिताः ॥ ५२ ॥ ऊर्ध्वीभूतैःस्थूलाक्षैर्बृहच्छिद्रैश्चक्रौघैः ॥ ५३ ॥ रक्तनिःस्वनसहिताभांकारफेत्काररूपाअर्द्धमृत प्राण्यारवायत्र॥शिलामुखेषुललंत्याःस्रवंत्यारक्तधारायाःपानायनिरालंबेनपक्षविधूननेनोद्धूतरजसःकंकादिखगायत्र ॥५४॥ सद्भटाजीवद्भटाः ॥५५॥ किंचिज्जीवत्वात्कृपां

नागांसस्यूतहेत्योघवृक्षांशुकुसुमाकुलम्॥ कंककृष्टांत्ररसनावृंदजालकितांबरम् ॥ ४८ ॥ अस्त्रक्सरित्तीरजातकुंतोन्नतवनद्रुमम् ॥ अस्रक्सरोवरोर्ध्वस्थपताकानलिनीगणम्॥४९॥रक्तकर्दमनिर्मग्नराढूतसुहृज्जनम्॥ करींद्रकुणपापातनिर्यद्भग्नजनेक्षितम्॥५०॥ हेतिलूनलतैर्वृक्षैःसंदिग्धार्द्धकबंधकम्॥ अस्रङ्नदीवहद्धस्तिकटकर्पटनौगणम्॥५१॥ रक्तस्रोतःस्फुरच्छुक्लवस्त्रडिंडीरपिंडकम्॥ संचारनियतक्षिप्रभृत्यविच्छिन्नमानवम्॥५२॥ इतश्चेतश्चनिपतत्कबंधनवदानवम्॥ ऊर्ध्वस्थूलाक्षचक्रौघच्छिन्नसैन्यद्रवज्जनम्॥५३॥ रक्तनिःस्वनभांकारफेत्कारार्द्धमृतारवम्॥शिलामुखललद्रक्तधाराधूतरजःखगम्॥५४॥सुतालोत्तालवेतालतालतांडवसंकटम्॥पर्यस्तरथदार्वंतरर्द्धांतरितसद्भटम्॥५५॥अंतस्थसज्जीवभटस्पंदिस्पंदनभीतिदम्॥ रक्तकर्दमपूर्णास्यकिंचिज्जीवत्कृपाच्छवम्॥५६॥किंचिज्जीवनरोद्वीक्षदुःखदृष्टश्ववायसं॥ एकामिषोल्ककव्यादयुद्धकोलाहलाकुलम्॥ एकामिषार्थयुद्धेहामृतक्रव्यादसंकुलम्॥५७॥ विवृत्तासंख्याश्वद्विरदपुरुषाधीश्वररथप्रकृत्तोष्ट्रग्रीवाप्रसृतरुधिरोद्गारसुसरित्॥ रणोद्यानंमृत्योस्तदभवदशुष्कायुधलतंसशैलंकल्पांते जगदिवविपर्यस्तमखिलम्॥५८॥ ॥इ०वा०वा०दे०मो०उ० ली० आहववर्णनंनाम अष्टत्रिंशःसर्गः॥३८॥ ॥श्रीवसिष्ठउवाच॥ अथवीरइवारक्तःकालेनास्तमितोरविः॥ अस्त्रतेजःपरिम्लानप्रतापोम्बौसमुज्झितः॥१॥ रणरक्तरुचिर्व्योमदर्पणप्रतिबिंबिता॥ जहौ सूर्यशिरश्छेदेसंध्यालेखोद्भूत्क्षणम्॥ २ ॥

अतंतःप्रामुवंतःशवायत्र ॥५६॥ युद्धेहाभिर्युद्धचेष्टाभिः ॥५७॥ विशेषेणवृत्तानांमृतानांपरिवर्त्तितानांचासंख्यानामश्वादीनांप्रकृत्ताभ्यश्छिन्नाभ्यउष्ट्रग्रीवाभ्यश्चप्रसृतारुधिरोद्गारैःशोभनाःसरितोयत्र ॥ अशुष्कारक्तसेकपल्लविताआयुधलतायत्रतथाविधंरणभूमिलक्षणंमृत्योरुद्यानमुपवनमासीत् ॥ १८ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेअष्टत्रिंशःसर्गः ॥३८॥ ॥७॥ ॥ सूर्यस्यास्तमयःसंध्यारक्षोवेतालसंकुला ॥ बीभत्सबहलंरात्रौरणस्थानंचवर्ण्यते ॥१॥ सूर्यपक्षेअस्त्रतेजसिस्वच्छेनभासिपरिम्लानप्रतापोमंदरश्मिः ॥ समुज्झितस्त्यक्तःपातितइतियावत् ॥१॥ सूर्यलक्षणस्यसादिनःशिरसश्छेदेपातनेसतिप्राग्व्योमदर्पणेप्रतिबिंबितारक्तरुचिर्व्योमजहौ॥क्षणमल्पकालम्॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदिग्वलयनाद्वलयाकारास्तनंतोध्वनंतस्तालाःकरतालायेषांस्तनंतोध्वनंतस्तालाइवदीर्घावावेतालाः ॥ ३ ॥ दिनलक्षणस्यनागेंद्रस्यगजश्रेष्ठस्यमस्तकेमृष्टेनशाणनिघृष्टेन ध्वांतासिनावलितेखंडितेसतिरागोरक्तंतेनारुणंताराानिकरलक्षणंगजमौक्तिकंविकीर्णमित्युत्प्रेक्षा ॥ ४ ॥ निःसत्वेषुनिर्गतहंसादिजंतुषुनिष्प्राणेषुच ॥ तमसांधकारेणमोहेनचांधेषु ॥ रसशालिषुसरःसुप्राग्जीवनप्रेमवत्सुच॥रसंनाःप्राग्भ्रमरादिभिःप्राणैश्चध्वनंतः ॥५॥ हेतिपक्षेकृच्छ्रेणमरणदुःखेनप्रोच्छ्रिताउन्नामिताःकंधराःकंठायैः ॥६॥ आसन्नस्यचंद्रस्यसुभगालोकलक्षणास्तत्सदृशाश्चकुमुदादिकुसुमपंक्तयः ॥ ७ ॥ अब्जिनीपक्षेसंध्यारागप्रतिफलनाद्रक्तसदृशवारिप्रचुरा शिलीमुखावाणाभ्रमराश्च ॥ वक्त्राण्येववक्त्राणीव

भूपातालनभोदिग्भ्यःप्रलयाब्धिजलौघवत्॥ समाजग्मुस्तनत्तालावेतालावलयाइव॥३॥मृष्टध्वांतासिवलितेदिननागेंद्रमस्तके ॥ संध्यारागारुणंकीर्णतारानिकरमौक्तिकम्॥४॥ निःसत्वेषुतमोंधेषुरसनारसशालिषु॥संकोचमाययुःपद्मान्तानांत्हृदयेष्विव॥५॥ मीलत्पक्षाःक्षणात्सुप्ताःकृच्छ्रप्रोच्छ्रितकंधराः॥ कुलायेषुखगाआसन्नुच्छ्वांगेष्विवहेतयः॥ ६ ॥ आसन्नचंद्रसुभगालोकाःकुसुमपंक्तयः ॥ उल्लसद्धृदयाजातावीरपक्षेष्विवश्रियः॥७॥ रक्तवारिमयीसायमंगगुप्तशिलीमुखा॥संकुचद्वक्त्रपद्माभूद्रणभूमिरिवाब्जिनी॥८॥ उपर्यभूद्व्योमसरस्ताराकुमुदमंडितम्॥अधस्त्वभूद्वारिसरःस्फुरत्कुमुदतारकम्॥९॥तमस्यपेतभीतानिभूतानिमिलितान्यलम्॥पयांसीवविसेतूनिप्रस्तृतानिदिशंप्रति॥१०॥आसीद्रणांगणंगायद्वेतालकुलसंकुलम्॥ क्वणत्कंकालकांकस्थकंककाकोलकेलिमत्॥११॥ अथकाष्ठचिताज्वालसतारांबरभास्वरम्॥ पचत्पचपचाशब्दिमेदोमांसमयानलम्॥१२॥सर्वांगास्थिस्फुटास्फोटस्फुटच्चितिचयोन्मुखम्॥वेताललललनारब्धजललीलातिरोहितम्॥१३॥श्वकाकयक्षवेतालतालकोलाहलोल्बणम्॥गमागमेनभूतानांसमुड्डीनवनोपमम्॥१४॥रक्तमांसवसामेदोहरणव्यग्रडाकिनि॥चर्वितास्त्रग्वसामांसस्रवत्सृक्किपिशाचकम्॥१५॥मध्यमध्यचितालोकप्रकटास्तृक्शवव्रजम्॥विरूपिकानीयमानस्वांसन्यस्तमहाशवम्॥१६॥उत्तांडवोग्रकुंभांडमंडलोड्डामरोदरम्॥छमिच्छमित्प्रलापांतंमेदोस्तृग्बाष्पसांबुदम् १७

वापद्मानियस्याः ॥ ८ ॥ ९ ॥ प्रागपेतानिवियुक्तानिपश्चान्मिलितान्यप्यपरिचयात्परस्परस्माद्भीतानीत्यर्थः ॥ १० ॥ कंकालकानांशवानामंकेउत्संगे ॥ ११ ॥ अथरणांगणंवक्ष्यमाणविशेषणमासीदित्यासर्गांतमनुवर्त्तते ॥ १२ ॥ अस्थ्नांस्फुटैरासमंतात्स्फोटैःस्फुटंतश्चितिचयाएववीरवदुन्मुखाःप्राधान्येनप्रकाशमानायत्र ॥ वेताललललनाभिरारब्धंजललीलाजलक्रीडातस्यामिवचिताग्निपुतिरोहितमंतर्द्धानंयत्र ॥ १३ ॥ १४ ॥ स्रवंत्यौसृक्किणीओष्ठप्रांतौयेषांतथाविधाःपिशाचकायत्र ॥ १५ ॥ मध्यमध्यचितासुआलोकाःपिशाचैरालोक्यमानाःप्रकटास्तृजःशवव्रजायत्र ॥ विरूपिकाःपूतनाः ॥१६॥ कुंभांडाःपिचंडिलाःपिशाचजातिभेदाः ॥ छमिच्छमिदितिप्रलापाइवशववक्त्रांतेज्वालाशब्दायत्र ॥ मेदोस्तृजांबाष्पैःसार्द्रधूमैःसांबुदमिव ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तनदीरंहसिरूढानिखातपादाअतएवभूचरीवलक्ष्यमाणारूपिकायत्र ॥ वेतालकुलानांकंकालानांशवानांकर्षणासुकुलोचितानिकाकलानिहर्षकलकूजितानियत्र ॥ १८ ॥ ॥ १९ ॥ चितानामलातिर्ज्वलदुल्मुकैर्योरणस्तेनोज्वलंदीप्रम् ॥ २० ॥ रूपिकाणांपूतनाभेदानांपेटिकाकरंडास्तासामेवप्रसिद्धाः ॥ यक्षाणांउल्लसन्कलिःकलहोयत्र ॥ २१ ॥ तुंगेषुवंगादिदेशजानामंगेषुलगंतोनिशाचरखगायत्र ॥ तारापातोपमैर्दर्शनैर्हसंत्यःसंमुखीकृतज्वालारूपिकायत्र ॥ २२ ॥ अस्टक्पिच्छिलेपतत्सुवेतालेषुहासादिसोल्लासाअस्टक्प्रधानाविरूपिकायत्र ॥ २३ ॥ आंत्रमहातंत्रीभिःप्रायेणसंपन्नानिवादनानिवाद्यानियत्र ॥ २४ ॥ रूपिकाणामालोकनादपूर्वत्रासआकस्मिकंभयंतस्मात् ॥ मद्रकंकल्या

वहद्रक्तनदीरंहोरूढभूचररूपिकम् ॥ वेतालकुलकंकालकर्षणाकुलकाकलम् ॥ १८ ॥ मृतेभोदरमंजूषासुप्तवेतालबालकम् ॥ विविक्तैकरणोद्देशपानक्रीडास्थराक्षसम् ॥ १९ ॥ मत्तवेतालकलहचितालातरणोज्वलम् ॥ वहद्रक्तवसामिश्रगंधबंधुरमारुतम् ॥ २० ॥ रूपिकापेटिकावांतारणद्रटरटारवम् ॥ अर्द्धपक्वशवास्वादलुब्धयक्षोल्लसत्कलि ॥ २१ ॥ तुंगवंगकलिंगांगतंगणांगलगत्खगम् ॥ तारापातोपमहसत्संमुखज्वालरूपिकम् ॥ २२ ॥ पतद्वेतालसोल्लासमध्यस्थास्टग्विरूपिकम् ॥ पिशाचाकर्णिताभ्यर्णयोगिनीगणनायकम् ॥ २३ ॥ प्रस्तांत्रमहातंत्रीप्रायसंपन्नवादनम् ॥ पिशाचवासनोत्क्रांतपिशाचीभूतमानवम् ॥ २४ ॥ रूपिकालोकनापूर्वत्रासार्द्धमृतसद्रटम् ॥ क्वचिद्वेतालरक्षोभिरपरीपूर्णमद्रकम् ॥ २५ ॥ स्वरूपिकास्कंधपतच्छवत्रस्तनिशाचरम् ॥ नभःसंघट्टितापूर्वभूतपेटकसंकटम् ॥ २६ ॥ अतिप्रयत्नापहृतम्रियमाणनरामिषम् ॥ स्वभक्ष्यापेक्षपक्षेषु विक्षिप्तशवराशिमत् ॥ २७ ॥ शिवामुखानलशिखाखंडोत्थमितिरक्तगैः ॥ समुड्डीननवाशोकपुष्पगुच्छमिवाश्रितः ॥ २८ ॥ कबंधकंधराबंधव्यग्रवेतालबालकम् ॥ यक्षरक्षःपिशाचादिकचदाकाशगोल्मुकम् ॥ २९ ॥ आकाशभूधरनिकुंजगुहांतरालपिंडोपमंडिततमोंबुदपीठपूरम् ॥ व्यालोलभूतरभसाकुलकल्पवातव्याधूतलोककरकांडकपेटकल्पम् ॥ ३० ॥ ॥ इत्यार्षेवा० वा० दे० मो० उ० ली० निशाचराकुलरात्रिरणांगणवर्णनंनामएकोनचत्वारिंशःसर्गः ॥ ३९ ॥

णोत्सवः ॥ २५ ॥ नभसिसंघट्टितैरपूर्वैःप्रसिद्धविलक्षणैर्भूतपेटकैःसंकटंनिरंतरम् ॥ २६ ॥ स्वेषुस्वीयेषुभक्ष्यापेक्षेषुपक्षेषु ॥ २७ ॥ शिवाजंबुकास्तन्मुखानलज्वालाभिरखंडमनुच्छेदमुत्थमितिभिर्मूर्छातःप्राप्तसंज्ञैःरक्तगैरक्तव्याप्तैर्नरैश्च ॥ २८ ॥ कबंधकंधरासुच्छिन्नशिरोबंधनक्रीडासुव्यग्रावेतालबालकायत्र ॥ यक्षादीनांकचंतोदीप्यमानाआकाशगाउल्मुकाज्वलदलातानियत्र ॥ २९ ॥ आकाशभूधरेषुतदीयनिकुंजानांगुहानांचांतरालेषुचपिंडवन्निबिडतयाउपमंडितस्तमोलक्षणःअंबुदपीठानांपीठवत्प्रतिष्ठितांबुदानांपूरःसमूहोयत्र ॥ व्यालोलानांभूतानांरभसेनवेगेनआकुलंकल्पवातैर्व्याधूतालोकाजनास्तदीयकरकादिसंभाराश्चयत्रतथाविधंयदंडकपेटंब्रह्मांडोदरंतत्कल्पंरणांगणमासीदित्यर्थः ॥ ३० ॥ ॥ इतिश्रीवासिष्ठमहारा० उ० एकोनचत्वारिंशःसर्गः ॥ ३९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुप्तेविदूरथेवेश्मप्रवेशोज्ञप्तिलीलयोः ॥ आतिवाहिकदेहस्यतत्त्वंचात्रनिरूप्यते ॥१॥ निशाचराणामाचारेणचिरंघोरेभयानकेरणांगणे यामानांयमसंबंधिनांदूतानामवराणां निकृष्टानांपिशाचादीनांचईहितेचेष्टिते अहनिजनानांयथोचिताचारवत्एवंवर्णितप्रकारेणस्थितेसतीत्यर्थः ॥१॥ हस्तेनहर्तुंशक्यैरिवनिबिडैस्तमःपिंडैः स्फुटानिप्रकटीभूतानि कुड्यानियत्रतथाविधेनिशालक्षणेगृहेभक्ष्यसमृद्धिलाभेउच्छेदंउद्गतवैरत्वंउच्चलंपलायमानंचतंयाज्ञादैन्यंयस्मात्तथाविधेभूतसंघेप्रवल्गतिक्रीडतिसति॥ चतेयाचने॥घञर्थेक विधानमितिभावकः ॥२॥ रणांगणस्थितिमुक्त्वानगरस्थितिमाह ॥निःशब्दइति॥ ककुब्गणशब्देनदिक्समूहस्थितप्राणिनोलक्ष्यंते॥३॥४॥ अगमत्प्राप ॥५॥ तेललनेज्ञप्तिलीले ॥ ६ ॥ सूक्ष्मतमब्रह्मांडच्छिद्रान्निर्गमनेप्राक्पृष्टमेवार्थंरामःपुनर्दृढीकारायाधिकजिज्ञासयाचपृच्छति ॥ कियदिति ॥ कियन्मात्रंचतुर्हस्तप्रमाणंदैर्घ्यमितियावत् ॥ ७ ॥ असौ

॥श्रीवसिष्ठउवाच॥ एवंनिशाचराचारचिरघोरेरणांगणे ॥ अहनीवजनाचारेस्थितेयामावरेहिते॥ १ ॥ हस्तहार्यतमःपिंडस्फुटकुड्ये निशागृहे॥ लाभोच्छेदोच्चलच्चतेभूतसंघेप्रवल्गति॥ २॥ निःशब्देध्वांतसंचारेनिद्रारुद्धककुब्गणे॥ लीलापतिरुदारात्माकिंचित्खिन्न मनाइव॥ ३॥ प्रातःकार्यविचार्याशुमंत्रिभिर्मंत्रकोविदैः॥ दीर्घचंद्रसमाकारेशयनेहिमशीतले ॥ ४ ॥ चंद्रोदरनिभेचारुगृहेशिशिर कोटरे॥ निद्रांमुहूर्त्तमगमन्मुद्रितेक्षणपुष्करः॥ ५॥ अथतेललनेव्योमतत्परित्यज्यतद्गृहम्॥ रंध्रैर्विविशतुर्वातलेखेऽब्जमुकुलंयथा॥६॥ ॥श्रीरामउवाच॥ ॥कियन्मात्रमिदंस्थूलंशरीरंवाग्विदांवर॥ रंध्रेणतंतुतनुनाकथमाश्वाविशत्प्रभो॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥आ धिभौतिकदेहोहमितियस्यमतिभ्रमः॥ तस्यासावणुरंध्रेणगंतुंशक्नोतिनानघ ॥८॥ रोधितोहमनेनेतिनमाम्यत्रेतियस्यधीः ॥ अनुभू तानुभवतीभवतीत्यनुभूयते॥ ९॥ येनानुभूतंपूर्वार्द्धंगच्छामीतिसतत्क्रियः॥ कथंभवतिपश्चार्द्धंगमनोन्मुखचेतनः॥ १० ॥ नहिवायू र्ध्वमायातिनाधोगच्छतिपावकः॥ यायथैवप्रवृत्ताचित्सातथैवप्रतिष्ठिता ॥ ११ ॥ छायायामुपविष्टस्यकुतस्तापानुभूतयः॥ यस्यसं वेदनेन्योर्थःकेनचिन्नानुभूयते॥ १२॥

स्थूलदेहः ॥ अणुरंध्रेणसूक्ष्मच्छिद्रेण ॥ ८ ॥ तत्कुतस्तत्राह ॥ रोधितइति ॥ रोधितोनिरुद्धःअत्रास्मिन्छिद्रेनमामिमातुंनशक्नोमिनरदेहस्वभावत्वादितियस्यधीःपूर्वंशतशोनु भूतमेवस्थूलदेहस्वरूपत्वमात्मनोनुभवतीभवति ॥ शपूश्यनोर्नित्यवचनान्नुमभावश्छांदसः ॥ तेनइतिएवंरीत्याअगमनमेवानुभूयतेइत्यर्थः ॥ ९ ॥ येनतुस्थूलनरदेहतादात्म्य बुद्ध्यभावादातिवाहिकदेहमात्रत्वनिश्चयाच्चपूर्वार्द्धेपौर्वकालिकदृढवासनासमृद्धंसूक्ष्मतमेपिच्छिद्रेगच्छामिगमनसमर्थोस्मीत्येवंशतशोनुभूतंसतादृशगमनस्वभावोन्मुखात्मचे तनांशस्वभावःपुरुषःपश्चार्द्धेउत्तरकालेतत्क्रियःस्थूलदेहानुरूपनिरोधादिक्रियाविशिष्टःकथंभवति ॥ प्रागाविर्भूतशक्तिस्वभावस्यान्यथात्वायोगादितिभावः ॥ १० ॥ बहिर पिवस्तुशक्तिस्वभावस्तथैवनियतोदृष्टइत्याह ॥नहीति॥ प्रवृत्ताप्रागाविर्भूतशक्तिः ॥ ११॥ स्थूलदेहात्मबुद्धिरहितयोगिपिशाचादीनामपिनिरोधदुःखाभावेद्वैतमात्राध्यासरहि तानांतत्त्वज्ञानांतद्दुःखंनास्तीतिकिंवक्तव्यमित्याशयेनाह ॥ छायायामिति ॥ यस्यपरमात्मनःसम्यग्वेदनेसाक्षात्कारेसति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वधिष्ठानेसंविदिस्थौल्यसौक्ष्म्यादिशक्त्याविर्भावेऽपिचित्तस्यतदनुविधायित्वंकुतस्तत्राह ॥ यथेति ॥ कथंतर्ह्यन्यथाभावस्तत्राह ॥ परमेणेति ॥ योगज्ञानाभ्यासादिप्रयत्नेनेत्यर्थः ॥ १३ ॥ तत्रज्ञानप्रयत्नेनान्यथाभावमुदाहरति ॥सर्पेति॥ असर्पप्रत्ययेरज्जुतत्त्वनिर्णयेसति ॥ १४॥ चित्तस्यसंविच्छक्त्यनुसारित्वमिवचेष्टायाश्चित्तानुसारित्वमपिप्रसिद्धतरमित्याह ॥ यथेति ॥ १५ ॥ ननुस्थूलदेहवदातिवाहिकंचित्तशरीरमपिकुतोनरोध्यतेतत्राह ॥ यइति ॥ १६ ॥ ननुभौतिकस्यास्यदेहस्यज्ञानबलाद्वाकथंचित्तशरीरत्वप्राप्तिस्तत्राह ॥ चित्तमात्रमिति ॥ त्वद्गताद्वेदनाद्वेदनंज्ञानंतद्बलादेतिआयातीव ॥ तथाचनभूतानिचित्तात्पृथक्संतीतिभावः ॥ १७॥ भूतानांचित्तादपृथक्सत्तामुपपादयति ॥ यथाभिमतमिति ॥ अस्यपरमात्मनःअभिमतंचित्तवृत्तिस्तदनतिक्रम्येतियथाभिमतम् ॥ अस्यभूतजातस्य॥ अस्तमयोदयमितिसमाहारद्वंद्वः॥ स्वभावःस्वाभाविकमज्ञानंकर्मवातदुत्थम्॥

यथासंवित्तथाचित्तंसातथावस्थितिंगता॥ परमेणप्रयत्नेननीयतेन्यदशांपुनः॥ १३॥सर्पैकप्रत्ययोरज्ज्वामसर्पप्रत्ययेबलात्॥निवर्त्ततेन्यथात्वेपतिष्ठत्येवयथास्थितः॥ १४॥ यथासंवित्तथाचित्तंयथाचित्तंतथेहितम् ॥बालंप्रत्यपिसंसिद्धमेतत्कोनानुभूतवान् ॥ १५॥ यःपुनःस्वप्नसंकल्पपुरुषःप्रतिमाकृतिः॥ आकाशमात्रकाकारःसकथंकेनरोध्यते॥ १६॥चित्तमात्रंशरीरंतुसर्वस्यैवहिसर्वतः॥ विद्यतेवेदनाचैतत्कचिदेतीवत्वद्गतात् ॥ १७॥ यथाभिमतमेवास्यभवत्यस्तमयोदयम्॥ आदिसर्गेस्वभावोत्थंपश्चाद्द्वैतैक्यकारणम् ॥ १८॥ चित्ताकाशंचिदाकाशमाकाशंचतृतीयकम्॥ विद्ध्येतत्त्रयमेकंत्वमविनाभावनावशात् ॥ १९ ॥ एतच्चित्तशरीरत्वंविद्धिसर्वगतोदयम् ॥ यथासंवेदनेच्छत्वाद्यथासंवेदनोदयम् ॥ २० ॥ वसतित्रसरेण्वंतर्ध्रियतेगगनोदरे ॥ लीयतेंकुरकोशेषुरसीभवतिपल्लवे ॥ २१ ॥ उल्लसत्यंबुवीचित्वेप्रनृत्यतिशिलोदरे॥ प्रवर्षत्यंबुदोभूत्वाशिलीभूयावतिष्ठते ॥ २२ ॥ यथेच्छमंबरेयातिजठरेपिचभूभृताम् ॥ अनंतराकाशवपुर्धत्तेथपरमाणुताम् ॥ २३ ॥ भवत्यद्रिर्धराधारोबद्धपीठोनभःशिराः ॥ देहस्यांतर्बहिरपिदधद्वनतनूरुहम् ॥ २४ ॥

स्थूलानिभूतानिभौतिकानिचद्वैतंतेषांमेलनेनैकदेहभावेनैक्यंचतत्रकारणंपंचीकरणंपश्चाद्भवतीत्यर्थः ॥ १८ ॥ एवंचित्ताव्यक्तयोरपिनशुद्धचितःपृथक्सत्तेत्याह ॥ चित्ताकाशमिति ॥ अविनाभावनाअधिष्ठानसत्ताव्यतिरेकेणास्फुरणंतद्वशात् ॥ १९॥ एवमधिष्ठानसत्ताधीनसत्तासाम्येऽपिस्थूलात्सूक्ष्मेअनिरोधहेतुर्विशेषोस्तीत्याह ॥ एतदिति ॥ सर्ववस्तुषुगतःप्राप्तउदयःस्वैरमाविर्भावशक्तिर्यस्यतत्तथाविधंविद्धि ॥तत्कुतः॥ यतोयथासंवेदनोदयंसंवेदनंपूर्ववासनाकर्मानुसारिपदार्थस्फूर्त्तिस्तदनतिक्रम्योदयोयस्यतथास्वभावंनबाह्यवस्तुशक्त्यनुसारिस्वभावम् ॥ तदपिकुतः ॥ यथासंवेदनेच्छत्वात्यतःशुक्तिमपिरजतात्मनासंविदितामिच्छतिनशुक्तिशक्तिमनुसृत्योपेक्षते ॥ तथाचस्थूलस्यबाह्यवस्त्वनुसारित्वान्निरोधेपिनसंवेदनेच्छामात्रानुसारिणश्चित्तशरीरस्यनिरोधइतिभावः ॥२०॥ सर्वगतोदयत्वंप्रपंचयति ॥ वसतीत्यादिना ॥२१॥२२॥ नविद्यतेंतःआकाशवपुरवकाशस्वरूपंयत्रतथाविधंसत्परमाणुतांधत्ते ॥ २३ ॥ वनलक्षणंतनूरुहंदधत्सत्अद्रिर्भवति ॥ बद्धपीठोदृढमूलः ॥ देहस्यांतरद्र्यादिभावःस्वप्नेप्रसिद्धोबहिस्त्विंद्रजालादौ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वात्मनश्चित्तस्वरूपादनन्याअभिन्नाःपद्मजसद्मनांब्रह्मांडानांकोटीःआसमंताद्धत्ते ॥ २५ ॥ अनुद्विग्नःउद्वेगादविपर्यस्तःकर्मानुसारिप्रबोधोयस्य ॥ आकाशात्माआकाशा दिक्रमेणमहान्ब्रह्मांडात्माभूत्वाप्रकृततांप्रस्तुततांप्रारब्धकर्मानुसारिप्रवृत्तिम् ॥ २६ ॥ वारित्वंमृगतृष्णादौयथेतिशेषः ॥ वंध्यापुत्रोयंनरोस्तीतियथास्वप्नेभ्रमउदेतीत्यन्वयः ॥ २७ ॥ सूक्ष्मतमंचित्तमेवसर्वजगत्सर्वशक्तिमत्तदेवापरिज्ञाततत्त्वंस्थूलमिवभूत्वापरतंत्रंभवति ॥ परिज्ञाततत्त्वंतुव्यवहारेसर्वत्राप्रतिहतंस्वतंत्रमित्युक्तंतत्रकिमस्मदादिचित्तं प्रत्येकमेवंशक्तिकंभवत्युतन ॥ आद्येप्रतिचित्तंविचित्रसर्वभेदसत्त्वप्रसंगः ॥ द्वितीयेतुचित्ताजन्यंचित्तादन्यदेवजगद्रूपंस्यात्तथैवसर्वैर्वीक्षणात्तथाचज्ञानेनचित्तनाशेपिजगदनु वृत्तिरेवस्यादित्याशयेनश्रीरामःपृच्छति ॥ किमिति ॥ एतदस्मदादिसंबंधिचित्तंएतदुक्तशक्तिकंभवतिकिंवानोभवति ॥ आद्येप्रतिचित्तंभिन्नंजगत्सद्रूपंकथंन ॥ द्वितीयेतुअ न्यत्कथंनभवतीतिकथंशब्दद्वयस्यप्रत्येकमन्वयः ॥ २८ ॥ तत्राद्यकल्पमेवाभ्युपगम्यवसिष्ठउत्तरमाह ॥ प्रत्येकमिति ॥ २९ ॥ ३० ॥ कथंतर्हिमहाप्रलयानंतरंसृष्टिप्रवाद स्तत्राह ॥ मरणेति ॥ व्यष्टिकृतसर्गेप्राक्तनमरणमेवमहाप्रलयइत्यर्थः ॥ ३१ ॥ सहजान्स्वाभाविकाविद्योत्थानवस्थात्रयस्वप्नसंकल्पान् ॥ तस्यत्रयआवसथास्त्रयःस्वप्नाइ

भवत्याकाशमाधत्तेकोटीःपद्मजसद्मनाम् ॥ अनन्याःस्वात्मनोंभोधिरावर्त्तरचनाइव ॥ २५ ॥ अनुद्विग्नप्रबोधोसौसर्गादौचित्तदेहकः ॥ आकाशात्मामहान्भूत्वावेत्तिप्रकृततांततः ॥ २६ ॥ असत्यमेववारित्वंबुद्ध्योदेतीवतत्तथा ॥ वंध्यापुत्रोयमस्तीतियथास्वप्नेभ्रमोनरः ॥ २७ ॥ ॥ श्रीरामउवाच ॥ ॥ किंचित्तमेतद्भवतिकिंवाभवतिनोकथम् ॥ कथमेवनसद्रूपंनान्यद्भवतिवीक्षणात् ॥ २८ ॥ ॥ श्रीव सिष्ठउवाच ॥ ॥ प्रत्येकमेवयच्चित्तंतदेवंरूपशक्तिकम् ॥ पृथक्प्रत्येकमुदितःप्रतिचित्तंजगद्भ्रमः ॥ २९ ॥ क्षणकल्पजगत्संघाःसमुद्यं तिगलंतिच ॥ निमेषात्कस्यचित्कल्पात्कस्यचिच्चक्रमंशृणु ॥ ३० ॥ मरणादिमयीमूर्छाप्रत्येकेनानुभूयते ॥ यैषातांविद्धिसुमतेमहाप्र लययामिनीम् ॥ ३१ ॥ तदंतेतनुतेसर्गंसर्वएवपृथक्पृथक् ॥ सहजस्वप्नसंकल्पान्संभ्रमाचलनृत्यवत् ॥ ३२ ॥ महाप्रलयरात्र्यंतेचिरा दात्ममनोवपुः ॥ यथेदंतनुतेतद्वत्प्रत्येकंमृत्यनंतरम् ॥ ३३ ॥ ॥ श्रीरामउवाच ॥ ॥ मृतेरनंतरंसर्गोयथास्मृत्यानुभूयते ॥ चिरात्तथानुभ वतिनातोविश्वमकारणम् ॥ ३४ ॥

तिश्रुतेः ॥ संभ्रमश्चित्तमोहः ॥ ३२ ॥ आत्मनःपरब्रह्मणःसमष्टिमनोवपुर्हिरण्यगर्भःसत्यसंकल्पात्तनुतेतथैवनतदतिक्र म्येतिनप्रतिचित्तंजायत्प्रपंचवैचित्र्यप्रसक्तिः ॥ स्वप्नादौतुवैचित्र्यंदृष्टत्वादिष्टमेवेतिभावः ॥ अथवायंदृष्टांतः ॥ यथासमष्टिमनोवपुर्हिरण्यगर्भःसमष्टिभोग्यंप्रपंचंतनुतेतथाव्य ष्टिमनोमात्रोजीवोपिस्वस्वभोग्यंस्वप्नादिव्यष्टिप्रपंचमिति ॥ ३३ ॥ ननुयद्धिमनसाध्यायतितद्वाचावदतितत्कर्मणाकरोतीतिश्रुत्यासर्वानुभवाच्चस्मृतिवत्क्रियाणामेकवस्तुविष यत्वंनिश्चितंस्मृतिश्चस्वकारणानुभवस्यसत्यार्थत्वेयथार्थाअसत्यार्थत्वेत्वयथार्था ॥ तत्रास्माकंभ्रांतिबहुलत्वादसत्यसंकल्पत्वाच्चास्मत्स्मृतेरयथार्थत्वेतज्जन्यकतिपयस्वप्नादि प्रपंचस्यासत्यतास्तु ॥ हिरण्यगर्भस्यतुसर्वज्ञत्वेनाभ्रांतत्वात्सत्यसंकल्पत्वाच्चतत्स्मृतेरयथार्थत्वायोगेनतत्सृष्टप्रपंचस्यनमिथ्यात्वप्रसक्तिरित्याशयेनरामःशंकते ॥ मृतेरिति ॥ य थाव्यष्टिर्जीवैर्मृतेरव्यवहितोत्तरकालेस्मृत्यास्वकृतसर्गोनुभूयतेतथासमष्टिरपिचिरान्महाप्रलयादनंतरंस्वकीययायथार्थस्मृत्यासृष्टंप्रपंचमनुभवतिअतस्तत्स्मृत्यारूढप्राक्तनस त्यार्थानामेवैतत्कल्पीयसत्यविश्वकारणत्वसंभवाद्विश्वमकारणंब्रह्मातिरिक्तसत्यकारणताशून्यमितियत्प्राक्प्रतिज्ञातंतन्मतव्याघातइत्यर्थः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेदेवंयद्यादिसर्गेयथार्थानुभवजन्यासर्गहेतुःस्मृतिस्तस्यसंभवेत्॥नहिसाप्रथमंहिरण्यगर्भपदप्राप्तस्योपासकस्यसंभवतितस्यहिस्मृतिरुपासनोपनीतसंस्कारजन्यानयथार्थानु भवजन्या उपासनाचप्राक्तनीव्यष्टेरेवसमष्टिभावचिंतनंनयथार्थानुभवइत्ययथार्थोपासनासंस्कारजस्मृतिजन्यत्वान्नादिसर्गस्यसत्यताप्रसक्तिः ॥ नहिप्राक्तनाःकेचिदन्येस र्वज्ञास्तदानींसंति सर्वेषांप्रागेवमुक्तत्वात् ॥ द्वितीयकल्पादिसर्गहेतुस्मृतेस्तुपूर्वसर्गानुभूतमिथ्यार्थविषयत्वेनैवेतिनक्वापिसर्गसत्यताप्रसक्तिरित्याशयेनवसिष्ठःसमाधत्ते ॥ महतीत्या दिना ॥ ३५ ॥ प्रबुद्धात्मातत्त्ववित् ॥ ३६ ॥ मरणजन्मसुमरणजन्मप्रयोजकसर्गेषुस्मृतिःप्राक्तनमिथ्यार्थानुभववासनाजन्यैवेत्याशयः ॥ ३७ ॥ ननुहैरण्यगर्भीसृष्टिःप्रधाना न्महदहंकारादिक्रमेणपुराणादिषुश्रूयते जैवीतुसासहसैवजायतेतत्रकथंतत्सृष्टिसाम्यंजैवसृष्टेरित्याशंक्यतत्रापिप्रधानमहदादिक्रममुपपादयति ॥ जीवोहीत्यादिना ॥ अनु

श्रीवसिष्ठउवाच ॥ ॥ महतिप्रलयेरामसर्वेहरिहरादयः॥ विदेहमुक्ततांयांतिस्मृतेःकइवसंभवः ॥ ३५ ॥ अस्मदादिःप्रबुद्धात्माकिला वश्यंविमुच्यते॥ कथंभवंतुनोमुक्ताविदेहाःपद्मजादयः॥ ३६ ॥ अन्येत्वमिवयेजीवास्तेषांमरणजन्मसु ॥ स्मृतिःकारणतामेतिमोक्षा भाववशादिह॥ ३७॥ जीवोहिम्रितिमूर्छांतेयदंतःप्रोन्मिषन्निव ॥ अनुन्मिषितएवास्तेतत्प्रधानमुदाहृतम् ॥ ३८ ॥ तद्व्योमप्रकृतिःप्रो क्तातदव्यक्तंजडाजडम्॥ संस्मृतेरस्मृतेश्चैवक्रमएषभवोदये॥ ३९ ॥ बोधोन्मुखत्वेहिमहत्तत्प्रबुद्धंयदाभवेत्॥ तदातन्मात्रदिक्कालक्रि याभूताद्युदेतिखात् ॥४०॥ तदेवोच्छूनमाबुद्धंभवतींद्रियपंचकम्॥ तदेवबुध्यतेदेहःसएषोस्यातिवाहिकः॥ ४१॥ चिरकालप्रत्ययतःक ल्पनापरिपीवरः॥ आधिभौतिकताबोधमाधत्तेचैषबालवत्॥ ४२ ॥ ततोदिक्कालकलनास्तदाधारतयास्थिताः ॥ उद्यंत्यनुदिताएववा योःस्पंदक्रियाइव॥ ४३ ॥ वृद्धिमित्थमयंयातोमुधैवभुवनभ्रमः॥ स्वप्नांगनासंगसमस्त्वनुभूतोप्यसन्मयः ॥ ४४ ॥ यत्रैवम्रियतेजंतुः पश्यत्याशुतदेवसः॥ तत्रैवभुवनाभोगमिममित्थमिवस्थितम् ॥ ४५॥ व्योमैवानुभवत्यच्छमहंजगदितिभ्रमम्॥ व्योमरूपंव्योमरू पीजीवोजातइवात्मवान्॥ ४६ ॥

न्मिषितोबहिरितिशेषः ॥ तत्त्वादवस्थ्यंप्रधानंमूलप्रकृतिरित्युदाहृतंपुराणादावित्यर्थः ॥ ३८ ॥ आकाशएवतदोतंचप्रोतंचेत्यादिश्रुतेर्व्योमादिशब्दानामपितत्रप्रसिद्धिमाह ॥ त दिति ॥ चित्प्रतिबिंबग्रहाज्जडाजडम् ॥ संस्मृतेःसर्गस्यअस्मृतेःप्रलयस्यचक्रमःआद्यंतावधिरेषइत्यर्थः ॥३९॥ तदेवबोधोन्मुखत्वेमहत्तत्त्वंप्रबुद्धंसदहंकाराख्यंयदाभवेत्तदातदव स्थात्खात्प्रागुक्तावकाशात्तन्मात्रादिभूतभौतिकांतमुदेतीत्यन्वयः ॥ ४० ॥ आउच्छूनमीषदुच्छूनंसूक्ष्मावस्थमित्यर्थः॥ बुध्यतेस्वप्नजागरयोः ॥ ४१ ॥ आधिभौतिकताबो धंभौतिकस्थूलदेहाहंभावम् ॥ ४२ ॥ दिक्कालपदेनतदाश्रितपदार्थालक्ष्यंते ॥ तदाधारतयास्थूलदेहाश्रितचक्षुराद्यधीनतयास्थितास्तत्तद्देशकालगतपदार्थकलनाःउद्यंतिप्रादु र्भवंतीत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ आगंतुकदेहाद्यात्मनाआत्मवान्जातइवसन्अहमितिजगदितिचभ्रममनुभवतीत्यर्थः ॥ ४६ ॥

१ त्वपिचेत्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगद्भ्रममेवविशेषणैःप्रपंचयति ॥ सुरेत्यादिना ॥ इंद्रादयःसुराःअमरावत्यादीनितत्पत्तनानिमेर्वादयस्तदाधारशैलास्तान्प्रदक्षिणीकुर्वाणाअर्कताशनिकरास्तैःसुंदरम् ॥ कोटरमत्रमर्त्यलोकादिच्छिद्रम् ॥ ४७ ॥ स्वानुकूलानांभावःसंपादनंप्रतिकूलानांचाभावोनिवारणंतद्विषयेसंरंभेणोद्योगेनयुक्ताःस्थूलाःसूक्ष्माश्चराअचराश्चप्राणिनोयत्र ॥ अचराणामपिलतानांसालंवनदेशेप्रसरस्यनिरालंवनप्रदेशपरिहारस्यचदर्शनादचरसाधारण्योक्तिः ॥ अब्धयश्चअद्रयश्चउर्वीचनद्यश्चईशास्तत्तदधिपतयश्चतैःसहिताःअहोरात्र्यादयोयत्र ॥ ४८ ॥ ४९ ॥ हृदिविलसत्स्फुरंतंजगद्भ्रमंपश्यतीतिपूर्वत्रसंबंधः ॥ पुल्लिंगविशेषणस्यक्लीवतापदसंस्कारपक्षाश्रयणात् ॥ ५० ॥ इदानींतमेवप्रत्येकंजीवसंसारंवनखंडत्वेनवर्णयति ॥ प्रत्येकमित्यादिना ॥ ताराभिःकुसुमितःसंजातपुष्पः ॥ ५१ ॥ नराएवमृगानीकानियत्र ॥ आलोकप्रधानान्यहानिकौसुमरजांसियत्र ॥ श्यामारात्रयएव

सुरपत्तनशैलार्कतारानिकरसुंदरम् ॥ जरामरणवैक्लव्यव्याधिसंकटकोटरम् ॥ ४७ ॥ स्वभावाभावसंरंभस्थूलसूक्ष्मचराचरम् ॥ साब्ध्यद्र्युर्वीनदीशाहोरात्रिकल्पक्षणक्षयम् ॥ ४८ ॥ अहंजातोमुनापित्राकिलात्रेत्याप्तनिश्चयम् ॥ इयंमाताधनमिदंममेत्युदितवासनम् ॥ ४९ ॥ सुकृतंदुष्कृतंचेदंममेतिकृतकल्पनम् ॥ बालोभूवमहंत्वद्ययुवेतिविलसद्धृदि ॥ ५० ॥ प्रत्येकमेवमुदितःसंसारवनखंडकः ॥ ताराकुसुमितोनीलमेघचंचलपल्लवः ॥ ५१ ॥ चरन्नरमृगानीकःसुरासुरविहंगमः ॥ आलोककौसुमरजाःश्यामागहनकुंजकः ॥ ५२ ॥ अब्धिपुष्करिणीपूर्णोमेर्वाद्यचललोष्टकः ॥ चित्तपुष्करबीजांतर्निलीनानुभवांकुरः ॥ ५३ ॥ यत्रैषम्रियतेजीवस्तत्रैवंपश्यतिक्षणात् ॥ प्रत्येकमुदितेष्वेवंजगत्खंडेषुभूरिशः ॥ ५४ ॥ कोटयोब्रह्मरुद्रेंद्रमरुद्विष्णुविवस्वताम् ॥ गिर्यब्धिमंडलद्वीपलोकांतरदृशांगताः ॥ ५५ ॥ यातायास्यंतियांत्येतादृष्टयोनष्टरूपिणीः ॥ याब्रह्मण्युपबृंहाढ्यास्ताःकेगणयितुंक्षमाः ॥ ५६ ॥ एवंकुड्यमयंविश्वंनास्त्येवमननादृते ॥ मननेचलमेवांतस्तदिदानींविचारय ॥ ५७ ॥

गहनादुष्प्रवेशाःकुंजकालतागृहाणियत्र ॥ ५२ ॥ निलीनाःसंस्कारात्मनास्थिताअनुभवाश्चित्तवृत्तयोंकुरायत्र ॥ ५३ ॥ पश्यतिवर्णितवनखंडकमितिशेषः ॥ ५४ ॥ मरुतोदेवाः ॥ लोकांतान्यांतराणिब्रह्मांडगर्भस्थानिपश्यंतीतितद्दृशस्तेषांब्रह्मादीनांकोटयोगताः ॥ ५५ ॥ नष्टरूपिणीःअसत्स्वरूपाः ॥ छांदसोविभक्तिव्यत्ययः ॥ उपबृंहणमुपबृंहआविर्भावस्तदाढ्याः ॥ घञर्थेकः ॥ ५६ ॥ एवंप्रपंचस्यारोपक्रममुपवर्ण्यापवादंक्रमेणाह ॥ एवमित्यादिना ॥ कुड्यमयंभित्तिवत्स्थूलंविश्वंमननान्मनःसंकल्पलक्षणात्सूक्ष्मादृतेतद्व्यतिरेकेणनास्त्येव त्रीणिरूपाणीत्येवसत्यमित्यादिश्रुतेः ॥ ननुस्थूलंस्थिरस्वभावंमनस्तुचलस्वभावंतत्कथमस्यमनोमात्रतातत्राह ॥ मननेइति ॥ यद्यपिबहिर्विश्वंस्थिरंभातितथापिमननेनमनसायथेच्छंविभाव्यमानंचलमस्थिरस्वभावमेवानुभूयते ॥ भ्राम्यतिमनसिभ्रमदिवप्रसन्नेप्रसन्नमिवमलिनेमलिनमिवमनोस्थादौउत्पाद्यान्यत्रारोप्यमाणमिवसर्वैरनुभूयतेतदिदानींत्वंस्वानुभवेनैवविचारयेत्यर्थः ॥ ५७ ॥

१ षट्चत्वारिंशत्तमश्लोके ॥ तत्रानुभवतीत्यस्यपश्यतीत्यनेनोल्लेखः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसश्चविमर्शैतत्साक्षिमात्रत्वंसाक्षिणश्चब्रह्ममात्रतेतिपूर्णैकचिन्मात्रपरिशेषइत्याह ॥ यदेवेति ॥ मननंयच्चिदाकाशंतदेवेतिसंबंधः ॥५८॥ उक्तमर्थंदृष्टांतेनोपपादयति ॥ यदेवेति ॥ आवर्त्तइतिविभक्तिलोपश्छांदसः ॥ ५९ ॥ अभूतेअसत्येअनादौवामायानभसिसूक्ष्मभूतकार्यचित्तनभसिवाकचनंजीवभावेनस्फुरणंयत्तदेवनामरूपात्मनाभाविनाभवनशीलंसज्जगदित्युच्यते ॥ यथाऐंद्रजालिकमणेरंबरेकचनंबहुविधगंधर्वनगरच्छिद्रमिवभवतितच्चिद्योम्भैवतत्त्वंपरमार्थइत्यर्थः ॥६०॥ मद्बुद्धार्थोऽधिष्ठानसन्मात्रम् ॥ त्वद्बुद्धार्थआरोपितसत्ता ॥ एवंत्वमहंशब्दौकायतिअभिलपतियःसत्वमहंशब्दकात्जगत्प्रमातासोपिमद्बुद्धःसाक्षिचिन्मात्रस्वभावएवास्तिनत्वद्बुद्धर्जीवस्वभावइत्यर्थः ॥ ६१ ॥ उक्तमुपसंहृत्यप्रस्तुतेयोजयति ॥ तस्मादिति ॥ आकाशवपुषौसत्यसंकल्पचित्ताकाशमात्रशरीरे ॥ अप्रतिघेसूक्ष्मतमेऽपिच्छिद्रेप्रवेशप्रतिघातरहिते ॥ ६२ ॥ अप्राप्तप्राप्ती

यदेवतच्चिदाकाशंतदेवमननंस्मृतम् ॥ यदेवचचिदाकाशंतदेवपरमंपदम् ॥ ५८ ॥ यदेवांबुसआवर्त्तोनत्वस्यावर्त्तवस्तुसन् ॥ द्रष्टैवास्तेदृश्यमिवदृश्यंनत्वस्तिवस्तुसत् ॥ ५९ ॥ चिद्व्योम्नोभूतनभसिकचनंयन्मणेरिव ॥ तज्जगद्भाविनानासत्तत्वंश्वभ्रमिवांबरे ॥ ६० ॥ मद्बुद्धार्थोजगच्छब्दोविद्यतेपरमामृतम् ॥ त्वद्बुद्धार्थस्तुनास्त्येवत्वमहंशब्दकादपि ॥ ६१ ॥ तस्माल्लीलासरस्वत्यावाकाशवपुषौस्थिते ॥ सर्वगेपरमात्माच्छेसर्वत्राप्रतिघेऽनघे ॥ ६२ ॥ यत्रयत्रसदाव्योम्नियथाकामंयथेप्सितम् ॥ उदयंकुरुतस्तेनतद्गेहेस्तिगतिस्तयोः ॥ ६३ ॥ सर्वत्रसंभवतिचिद्गगनंतदत्रसद्वेदनंकलनमाममननंविसारि ॥ तच्चातिवाहिकमिहाङ्कुरकुड्यमेवदेहंकथंकइवतंवदकिंरुणद्धि ॥ ६४ ॥ इ० वा० वा० दे० मो० उ० ली० समरसमनंतरसंस्मृत्यनुभववर्णनंनामचत्वारिंशःसर्गः ॥ ४० ॥ ॥ ७३ ॥ ॥ श्रीवसिष्ठउवाच ॥ तयोःप्रविष्टयोर्देव्योःपद्मसद्मबभूवतत् ॥ चंद्रद्वयोदयोद्योतधवलोदरसुंदरम् ॥ १ ॥ कोमलामलसौगंध्यमृदुमंदारमारुतम् ॥ तत्प्रभावेननिद्रालुनृपेतरनरांगनम् ॥ २ ॥ सौभाग्यनंदनोद्यानंविद्रुतव्याधिवेदनम् ॥ सवसंतंवनमिवफुल्लंप्रातरिवांबुजम् ॥ ३ ॥ तयोर्देहप्रभापूरैःशशिनिस्यंदशीतलैः ॥ आह्लादितोसौबुबुधेराजोक्षितइवामृतैः ॥ ४ ॥

च्छाईप्साप्राप्तोपभोगेच्छाकामइतिभेदः ॥ उदयमाविर्भावम् ॥ तेनहेतुना ॥ तद्गेहेविदूरथगृहे ॥६३॥ चिद्गगनंसर्वत्रसंभवतिनप्रतिहन्यतइतियावत् ॥ तदेवकलनंसत्आमननंमानसविषयावधारणपर्यंतंविसारिबहिःप्रसरणस्वभावंसद्वेदनंयथार्थज्ञानंभवति ॥ अकुड्यमस्थूलंसूक्ष्ममेवाङ्कुः ॥ कोरुणद्धिकिंनिमित्तंकथंकेनप्रकारेणवा ॥ नकथंचिदपितस्यरोधसंभावनेत्यर्थः ॥ ६४ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेउ० चत्वारिंशःसर्गः ॥ ४० ॥ ॥ ७३ ॥ ॥ प्रविष्टयोस्तयोराज्ञासुप्तबुद्धेनपूजनम् ॥ राज्ञोन्वयःस्मृतिर्ज्ञप्त्यात्मोपदेशश्चवर्ण्यते ॥ १ ॥ चंद्रद्वयोदयइवउद्योतधवलेनोदरेणसुंदरंशोभमानम् ॥ १ ॥ कोमलाःसुखस्पर्शाअमलसौगंध्यामृदवःसांकल्पिकमंदारपुष्पमारुतायत्र ॥ तयोर्देव्योःप्रभावेनकारणेन ॥ संबंधिशब्दस्यनित्यसापेक्षत्वेनसामर्थ्याविघातात्समासः ॥ २ ॥ सौभाग्येननंदनोद्यानमिव ॥ ३ ॥ उक्षितःसिक्तइव ॥ ४ ॥

१ उक्तव्युत्पत्त्यात्वमहंशब्दकादितिकथंभवतीतिविचारणीयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांकल्पिकेआसनद्वयेविश्रांतमुपविष्टम् ॥ अप्सरोद्वयंदिव्यस्त्रीद्वयम् ॥ ५ ॥ निमेषमल्पकालंसंचिंत्यांतर्विमृश्य ॥ चिरंविमर्शेपूजादिविलंबेनापराधापत्तेः ॥ अतएवाल्पविमर्शस्यापिनिगूहनद्योतनायेवकारः ॥ ६ ॥ निद्राकालेव्यत्यस्तानिपरितःसंयमितानिस्वस्वोचितस्थानंप्रापितानिअतएवकंठाद्यालंबीनिमाल्यादीनियस्यततथाविधःसन् ॥ पुष्पाण्याहरतीतिपुष्पाहारोभृत्यइव ॥७॥ पटलंपुष्पकरंडम् ॥८॥ दौस्थित्यंदुःखजीवनम् ॥ दाहस्त्रिविधसंतापः ॥ ९ ॥ इत्युक्त्वातयोःपादयोःकुसुमांजलिंतत्याजेत्यन्वयः ॥ १० ॥

आसनद्वयविश्रांतंसददर्शाप्सरोद्वयम्॥मेरुशृंगद्वयेचंद्रबिंबद्वयमिवोदितम्॥५॥निमेषमिवसंचिंत्यसविस्मितमनानृपः॥ उत्तस्थौशयनाच्छेषादिवचक्रगदाधरः॥ ६ ॥ परिसंयमितालंबिमाल्यहाराधरांबरः॥पुष्पाहारइवोत्फुल्लंजग्राहकुसुमांजलिम्॥७॥ उपधानप्रदेशस्थात्स्वयंपटलकोटरात्॥ बद्धपद्मासनोभूमौभूत्वोवाचेदमानतः॥ ८ ॥ जयतांजन्मदौस्थित्यदाहदोषशशिप्रभे॥ देव्यौबाह्यांतरतमोविद्रावणरविप्रभे॥९॥ तयोरुक्त्वेतितत्याजपादयोःकुसुमांजलिम्॥ तीरद्रुमोविकसितःपद्मिन्योःपद्मयोरिव ॥१०॥ लीलायैभूपजन्माथवक्तुंमंत्रिणमीश्वरी॥ बोधयामासपार्श्वस्थंसंकल्पेनसरस्वती॥११॥प्रबुद्धोप्सरसौदृष्ट्वाप्रणम्यकुसुमांजलिम्॥ तयोःपादेषुसंत्यज्यविवेशपुरतोनतः॥१२॥ उवाचदेवीहेराजन्कस्त्वंकस्यसुतःकदा॥ इहजातइतिश्रुत्वासमंत्रीवाक्यमब्रवीत्॥१३॥ देव्यौयुष्मत्प्रसादोयंभवत्योरपियत्पुरः॥ वक्तुंशक्नोमितद्देव्यौश्रूयतांजन्ममत्प्रभोः॥ १४॥ आसीदिक्ष्वाकुवंशोत्थोराजाराजीवलोचनः॥श्रीमान्कुंदरथोनामदोश्छायाच्छादितावनिः॥ १५॥ तस्याभूदिंदुवदनःपुत्रोभद्ररथाभिधः॥ तस्यविश्वरथःपुत्रस्तस्यपुत्रोबृहद्रथः॥ १६॥ तस्यसिंधुरथःपुत्रस्तस्यशैलरथःसुतः ॥ तस्यकामरथःपुत्रस्तस्यपुत्रोमहारथः ॥ १७ ॥ तस्यविष्णुरथःपुत्रस्तस्यपुत्रोनभोरथः ॥ अयमस्मत्प्रभुस्तस्यपुत्रःपूर्णामलाकृतिः॥ १८ ॥ अमृतापूरितजनःक्षीरोदस्येवचंद्रमाः॥ महद्भिःपुण्यसंभारैर्विदूरथइतिश्रुतः ॥ १९ ॥ जातोमातुःसुमित्रायागौर्यागुहइवापरः॥ पितास्यदशवर्षस्यदत्वाराज्यंवनंगतः ॥२०॥ पालयत्येषभूपीठंततःप्रभृतिधर्मतः॥ भवत्यावद्यसंप्राप्तफलितेसुकृतद्रुमे॥ २१ ॥ देव्यौदीर्घतपःक्लेशशतैर्दुष्प्रापदर्शने॥ इत्ययंवसुधाधीशोविदूरथइतिश्रुतः ॥ २२॥ अद्ययुष्मत्प्रसादेनपरांपावनतांगतः॥ इत्युक्त्वासंस्थितेतूष्णींमंत्रिण्यवनिपेतथा॥ २३॥

॥ ११ ॥ १२ ॥ इतिप्रश्नंसमंत्रीश्रुत्वा ॥ १३ ॥ १४ ॥ दोश्छाययाआच्छादिनेवशत्रुदारिद्र्यादिसंतापनिवारणेनपालिताअवनिर्येन ॥ १५॥ १६ ॥ १७॥ तस्यनभोरथस्यपुण्यसंभारैर्जातः ॥ १८ ॥ अमृतसदृशैःस्नेहमाधुर्यौदार्यादिगुणैरापूरिताजनायेन ॥ पुण्यसंभारैरित्येतद्देहलीदीपकन्यायेनमात्रापिसंबध्यते ॥ १९ ॥ अस्यदशवर्षस्येतिषष्ठीचानादरेइतिभावलक्षणेषष्ठीवैराग्यातिशयाद्राज्येपुत्रेचानादरद्योतनार्था ॥ २० ॥ अस्माकंसुकृतद्रुमेफलितेसतिअद्यसंप्राप्ते ॥ २१ ॥ २२ ॥ २३ ॥

१ तदिदमित्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिवदंतीसरस्वतीमूर्ध्निपस्पर्शेतिपरेणान्वयः ॥ २४ ॥ हार्दंहृदयाकाशस्थजीवावरकम् ॥ २५ ॥ हृदयंमनःसुविकासंसांतःप्रकाशम् ॥ २६ ॥ एकएवराजायस्यभुवनस्यतदेकराट्तद्भावऐकराज्यंदेहश्चऐकराज्यंचदेहैकराज्येत्यक्तेदेहैकराज्येयेनसत्यक्तदेहैकराज्यस्तस्यभावस्त्यक्तदेहैकराज्यत्वम् ॥ ज्ञप्त्यनुग्रहबलादननुभूतमपिज्ञातवानित्याह ॥ ज्ञात्वेति ॥ २७ ॥ आत्मोदंतंस्वपूर्ववृत्तांतम् ॥ आत्मनिस्वमनसि ॥ २८ ॥ २९ ॥ ३० ॥ परिच्छदंपरीवारम् ॥ यत्स्मरामितदिदंकिमितितत्तत्त्वजिज्ञासयाप्रश्नः ॥ स्वरूपत्वमधिष्ठानचिन्मात्रमेवसर्वप्रपंचतत्त्वमितरत्तुमायामात्रमितितत्त्वमुपदेष्टुंप्रथमंविप्रकृष्टदेशकालस्थितंलोकांतरागमनभ्रमंवारयंतीज्ञप्तिरुवाच ॥ राजन्नित्यादिना ॥ ३१ ॥ अस्मि

कृतांजलौनतमुखेबद्धपद्मासनेवनौ ॥ राजन्स्मरविवेकेनपूर्वजातिमितिस्वयम् ॥ २४ ॥ वदंतीमूर्ध्निपस्पर्शतंकरेणसरस्वती ॥ अथहार्दंतमोमायापद्मस्यक्षयमाययौ ॥ २५ ॥ सुविकासंचहृदयंज्ञप्तिस्पर्शोदयेऽभवत् ॥ सस्मारपूर्ववृत्तांतमंतःस्फुरदिवस्थितम् ॥ २६ ॥ त्यक्तदेहैकराज्यत्वंलीलाविलसितान्वितम् ॥ ज्ञात्वाप्रज्ञप्तिवृत्तांतंलीलायास्तुविजृंभितम् ॥ २७ ॥ आत्मोदंतंबभूवासावुह्यमानइवार्णवे ॥ उवाचात्मनिसंसारेवतमायेयमातता ॥ २८ ॥ परिज्ञाताप्रसादेनदेव्योरिहमयाधुना ॥ ॥ राजोवाच ॥ ॥ हेदेव्यौकिमिदंनामदिनमेकंमृतस्यमे ॥ २९ ॥ गतमद्येहजातानिवयोवर्षाणिसप्ततिः ॥ स्मराम्यनेककार्याणिस्मरामिप्रपितामहम् ॥ ३० ॥ स्मरामिबाल्यंतारुण्यंमित्रंबंधुपरिच्छदम् ॥ ॥ ज्ञप्तिरुवाच ॥ ॥ राजन्मृतिमहामोहमूर्छायाःसमनंतरम् ॥ ३१ ॥ तस्मिँल्लोकांतरेतीतेतस्मिन्नेवमुहूर्त्तके ॥ तस्मिन्नेवगृहेचास्मिन्नेवव्योम्न्यपिसद्मनि ॥ ३२ ॥ अयंतस्यगृहस्यांतर्व्योमन्येवकिलस्थिते ॥ गिरिग्रामकविप्रस्यगृहेंतर्भूपमंडपः ॥ ३३ ॥ तस्यांतरेयमाभातिप्रत्येकंचजगद्गृहम् ॥ किलब्राह्मणगेहांतर्जीवस्तेमदुपास्थितः ॥ ३४ ॥ तत्रैवतस्यभूपीठंतस्मिंश्चकिलमंडपे ॥ तस्यैवचगृहस्यांतरिदंसंसारमंडलम् ॥ ३५ ॥ तत्रैवेदंतवगृहंस्थितमारंभमंथरम् ॥ तत्रैवचेतसितवनिर्मलाकाशनिर्मले ॥ ३६ ॥ प्रतिभामागतमिदंव्यवहारभ्रमाततम् ॥ यथेदंनाममेजन्मतथेक्ष्वाकुकुलंमम ॥ ३७ ॥

न्नेवत्वत्सद्मनितदधिष्ठानचिद्व्योमनिअतीतेमायावरणतिरोहितेगिरिग्रामकविप्रस्यगृहेंतःस्थितेतस्मिन्पाद्मेलोकांतरेतस्मिन्नेवराजगृहेतत्रापिप्रधानगृहस्यांतर्व्योमन्येवायंब्रह्मांडमंडपःकिलास्तीतिप्राक्तनकथाक्रमानुरोधादन्वयः ॥ ३२ ॥ ३३ ॥ तस्यब्रह्मांडमंडपस्यांतरेअयंपरिदृश्यमानस्त्वदीयजन्मादिराभातिआपाततःप्रथते ॥ तर्हिकिंतदेवब्राह्मणजगदित्थंभातिनेत्याह ॥ प्रत्येकमिति ॥ भिन्नभिन्नमित्यर्थः ॥ प्रत्येकतामेवोपपादयंत्याह ॥ किलेत्यादिना ॥ मांउपास्थितोमदुपास्थितःमद्भक्तइत्यर्थः ॥ ३४ ॥ इदंसंनिहितंपाद्मसंसारमंडलम् ॥ ३५ ॥ तत्रपाद्मगृहमंडपेएव ॥ प्रपंचत्रयस्यापिचित्तविकारमात्रत्वमित्याशयेनाह ॥ तत्रैवचेतसीति ॥ नैर्मल्योक्तिश्चित्प्रतिबिंबोपपत्त्यर्था ॥ ३६ ॥ व्यवहारभ्रमाततत्वमनुभूतमुल्लिख्यप्रपंचयंति ॥ यथेत्यादिना ॥ नामेतिकिलार्थे ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३८ ॥ ३९ ॥ मंत्रिभिःपौरैःसहेतिशेषः ॥ ४० ॥ दारुणोविग्रहःसंग्रामःप्राप्तइतिविपरिणामेनानुषज्यते ॥ ४१ ॥ अस्मिन्गृहेयथापूर्वंस्थितंमयेतिशेषः ॥ ४२ ॥ एतयोर्देव्योर्मध्येएका ॥ ४३ ॥ ४४ ॥ सर्वदुःखोपशमाच्छाम्यामि ॥ निरतिशयसुखसमृद्ध्यापरिनिर्वामि ॥ केवलंएकरसंसुखमेवाहंभूत्वाआसेतिष्ठामि ॥ ४५ ॥ लोकांतरसंचराःसिद्धाअस्मदादयस्तत्सहिता ॥ ४६ ॥ ४७ ॥ वेत्तीतिविचित्तंतत्प्रवाहः ॥ ४८ ॥ मिश्राजीवांतरसर्गसंवलिताजायति ॥ अमिश्रास्वप्ने ॥ चिद्व्रानोस्तेप्रतिभानमुपागतमि

एवंनामानएतेमेपुराभूवन्पितामहाः ॥ जातोहमभवंबालोदशवर्षस्यमेपिता ॥ ३८ ॥ परिव्राड्विपिनंयातइहराज्येभिषिच्यमाम् ॥ ततोदिग्विजयंकृत्वाकृत्वाराज्यमकंटकम् ॥ ३९ ॥ अमीभिर्मंत्रिभिःपौरैःपालयामिवसुंधराम् ॥ यज्ञक्रियाक्रमवतोधर्मेपालयतःप्रजाः ॥ ४० ॥ वयसःसमतीतानिममवर्षाणिसप्ततिः ॥ इदंपरबलंप्राप्तंममदारुणविग्रहः ॥ ४१ ॥ युद्धंकृत्वेदमायातोगृहमास्मिन्यथास्थितम् ॥ इमेदेव्यौगृहेप्राप्तेममैतेपूजयाम्यहम् ॥ ४२ ॥ पूजिताहिप्रयच्छंतिदेवताःस्वसमीहितम् ॥ ममेयमेतयोरेकाज्ञानंजातिस्मृतिप्रदम् ॥ ४३ ॥ इहदत्तवतीदेवीभान्तस्येवविकासनम् ॥ इदानींकृतकृत्योस्मिजातोस्मिगतसंशयः ॥ ४४ ॥ शाम्यामिपरिनिर्वामिसुखमासेचकेवलम् ॥ इतीयमाततभ्रांतिर्भवतोभूरिसंभ्रमा ॥ ४५ ॥ नानाचारविहाराढ्यासलोकांतरसंचरा ॥ यस्मिन्नेवमुहूर्त्तेत्वंमृतिमभ्यागतःपुरा ॥ ४६ ॥ तदैवप्रतिभैषातेस्वयमेवोदिताहृदि ॥ एकामावर्त्तचलनांत्यक्त्वादत्तेयथापराम् ॥ ४७ ॥ क्षिप्रमेवनदीवाहोविप्रवाहस्तथैवच ॥ आवर्त्तांतरसंमिश्रोयथावर्त्तःप्रवर्त्तते ॥ ४८ ॥ कदाचिदेवंसर्गश्रीर्मिश्रामिश्राचवर्द्धते ॥ तस्मिन्मृतिमुहूर्त्तेतेप्रतिभानमुपागतम् ॥ ४९ ॥ एतज्जालमसद्रूपंचिद्व्रानोःसमुपस्थितम् ॥ यथास्वप्नमुहूर्त्तेतःसंवत्सरशतभ्रमः ॥ ५० ॥ यथासंकल्पनिर्माणेजीवनंमरणंपुनः ॥ यथागंधर्वनगरेकुड्यमंडनवेदनम् ॥ ५१ ॥ यथानौयानसंरंभेवृक्षपर्वतवेपनम् ॥ यथास्वधातुसंक्षोभेपूर्वपर्वतनर्त्तनम् ॥ ५२ ॥ यथासमंजसंस्वप्नेस्वशिरःप्रविकर्त्तनम् ॥ मिथ्यैवैवमियंप्रौढाभ्रांतिराततरूपिणी ॥ ५३ ॥ वस्तुतस्तुनजातोसिनमृतोसिकदाचन ॥ शुद्धविज्ञानरूपस्त्वंशांतआत्मनितिष्ठसि ॥ ५४ ॥ पश्यसीवैतदखिलंनचपश्यसिकिंचन ॥ सर्वात्मकतयानित्यंप्रकचस्यात्मनात्मनि ॥ ५५ ॥

तिसंबंधः ॥ ४९ ॥ ५० ॥ कुड्यानांतन्मंडनचित्रादीनांचवेदनंदर्शनम् ॥ ५१ ॥ वेपनंकंपनम् ॥ स्वस्यधातूनांवातपित्तश्लेष्मणांसंक्षोभेसन्निपातेअपूर्वपर्वतनर्त्तनम् ॥ ५२ ॥ असमंजसंव्यवहारेअननुरूपम् ॥ मिथ्यैवतथेतिशेषः ॥ ५३ ॥ तर्हिकःपरमार्थसत्यस्तत्राह ॥ वस्तुतस्त्विति ॥ ५४ ॥ दृश्यमिथ्यात्वेतत्संवलितचिदाभासलक्षणंतद्दर्शनमपिमिथ्येवेतिनिर्विषयचिन्मात्रपरिशेषइत्याशयेनाह ॥ पश्यसीवेति ॥ प्रकचसिप्रदीप्यसे ॥ ५५ ॥

१ इतआरभ्यज्ञप्तेरुक्तिरतइतीर्यमित्यतःप्राक् (ज्ञप्तिरुवाच) इत्यपेक्षितमितिभाति ॥ अस्मद्दृष्टपुस्तकेषुतुनोपलभ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आलोकःसूर्यादिः ॥ भवान्अयंविदूरथदेहः ॥५६॥ एतेतवपरिजनाःशत्रवश्च ॥ अल्पतरेमहत्तरस्यासंमाननमेवमिथ्यात्वकारणमित्याशयेनाह ॥ गिरिग्रामकेत्यादिना॥५७॥ मंडपेःशालाभिरासमंतान्मंडिताआकृतिःसंस्थानंयस्याः ॥ ५८ ॥ यस्मिन्गृहेइहसांप्रतंवयंस्थितास्तद्भातीत्यर्थः ॥ ५९ ॥ तेषांमंडपानांयद्योमतद्व्योमआकाशादिशून्यंब्रह्मै व ॥६० ॥ निःशून्येचिन्मात्रपूर्णेतत्रब्रह्मणिमिथ्यागृहेमिथ्याजनाविहरंतीत्यर्थः ॥ ६१ ॥ जनानपश्यंतीत्युक्त्यामंत्रिभृत्यादीनांस्वमदृष्टसामाजिकजनसाम्यंप्राप्तंतदसंभावयन् राजापृच्छति ॥ एवंचेदित्यादिना ॥ ६२ ॥ आत्मनाजीवेनसंपन्नायुक्ताःसंतिअहमिवात्मनिसत्स्वभावे ॥ स्वशंकाबीजमाह ॥ जगदिति ॥ तस्यममेत्यर्थः ॥ ६३॥ कथंसत्याः

महामणिरिवोदारआलोकइवभास्वरः ॥ वस्तुतस्तुनभूपीठमिदंनचभवानयम् ॥ ५६ ॥ नचेमेगिरयोग्रामानचैतेनचवैवयम् ॥ गिरिग्रामकविप्रस्यमंडपाकाशकेकिल ॥ ५७ ॥ तल्लीलाभर्तृदाराढ्यंजगदाभातिभास्वरम् ॥ तत्रलीलाराजधानीमंडपामंडिताकृतिः ॥५८॥ भातितस्योदरेव्योम्नितदेवंविदितंजगत् ॥ तस्मिन्जगतिगेहेंतर्यस्मिन्वयमिहस्थिताः ॥ ५९ ॥ एवंतेषांमंडपानांव्योमाव्योमैवनिर्मलम् ॥ तथैवमंडपेष्वस्तिनमहीनचपत्तनम् ॥ ६० ॥ नवनानिनशैलौघानमेघसरिदर्णवाः ॥ केवलंतत्रनिःशून्येविहरंतिगृहेजनाः ॥६१॥ नपश्यंतिजनानापिपार्थिवानचभूधराः ॥ ॥ विदूरथउवाच ॥ ॥ एवंचेत्तत्कथंदेविममेहानुचराइमे ॥ ६२ ॥ संपन्नाआत्मनासंतितेकिमात्मनिनोथवा ॥ जगत्स्वप्नार्थवद्भातितस्यस्वप्ननरादयः ॥ ६३ ॥ कथमात्मनिसत्याःस्युर्नसत्यावेतिमेवद ॥ ॥ श्रीसरस्वत्युवाच ॥ राजन्विदितवेद्येषुशुद्धबोधैकरूपिषु ॥६४॥ नकिंचिदेतत्सद्रूपंचिद्व्योमात्मसुजागतम् ॥ शुद्धबोधात्मनोभातिकुतोनामजगद्भ्रमः ॥६५॥ रज्ज्वांसर्पभ्रमेशांतेपुनःसर्पभ्रमःकुतः ॥ असद्भावेपरिज्ञातेकुतःसत्ताजगद्भ्रमे ॥ ६६ ॥ परिज्ञातेमृगजलेपुनर्जलमतिःकुतः ॥ स्वप्नकालेपरिज्ञातेस्वेस्वप्नमरणंकुतः ॥ स्वस्वप्नेस्वप्नमृतिभीरमृतस्यैवजायते ॥ ६७ ॥ बुद्धस्यशुद्धस्यशरन्नभःश्रीःस्वच्छावदातातितताशयस्य ॥ अहंजगच्चेतिकुशब्दकार्थोनवस्तुतःसोंगहिवाचिकंतत् ॥ ६८ ॥ इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम ॥ स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरैश्चसहाजगाम ॥ ६९ ॥ पंचमदिनम् ॥५॥ ॥इत्यार्षेवा०वा०दे०मो०उ०ली०भ्रांतिविचारवर्णनंनामएकचत्वारिंशःसर्गः ॥ ४१ ॥

स्युस्त्वदुक्तकल्पेइत्यर्थः ॥ अज्ञदृशाजीवभावेनतेषांयदिसत्यतांपृच्छसितर्हिसातवापिनास्ति ॥ तत्त्वदृशाअधिष्ठानचिन्मात्रभावेनचेत्तेषामपिसास्त्येवेत्याशयेनदेव्युत्तरमाह ॥ राजन्नित्यादिना ॥ ६४ ॥ ६५ ॥ ६६ ॥ स्वमकालेस्वेजीवस्वरूपेप्रबोधेनपरिज्ञातेसतिस्वप्नमरणंकुतःकथंसत्यमित्यर्थः ॥ ६७ ॥ बोधेनाज्ञानमेघावरणापायेशरन्नभःश्रीरिवस्वच्छोनिर्मलःस्फुरदात्मभाभिरवदातोधवलीकृतस्तदैकरस्यापत्त्याअतिततःअतिविस्तारंपूर्णतालक्षणंप्राप्तआशयोयस्यबुद्धस्यतत्त्वविदःसःअज्ञदृशाप्रसिद्धःअहमितिजगदितिचकुत्सितस्याल्पस्यशब्दस्यार्थोवस्तुतोनास्त्येव ॥ अंगेतिकोमलामंत्रणे ॥ हियस्मात्तद्वाचिकंवाचारंभणमात्रम् ॥ वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतेरितिभावः ॥ ६८ ॥ ६९ ॥ ॥ इतिश्रीवा०ता०प्रकाशेउत्पत्तिप्रकरणेएकचत्वारिंशःसर्गः ॥४१॥श्री॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यत्वंजगतोऽज्ञानेस्वप्नस्यापिप्रपंच्यते ॥ अत्रांतेतुकथाशेषोवरदानांतईर्यते ॥ १ ॥ विद्वद्दृशाजगतोमिथ्यात्वंविस्तरेणोपवर्ण्यतद्दृढीकारायाज्ञदृशातस्यात्यंतदृढसत्यतामाह ॥ यस्त्विति ॥ रूढोदृढव्युत्पन्नोन ॥ वज्रस्यसारोदार्ढ्यमिवसारोयस्यतत्तथाविधंपरमार्थसदस्ति ॥ लोकेअर्थक्रियाकारित्वस्यैवसत्यत्वेनप्रसिद्धेरितिभावः ॥ १ ॥ असतोऽज्ञंप्र त्यर्थक्रियाकारित्वलक्षणंसत्त्वंकदृष्टंतत्राह ॥ यथेति ॥ २ ॥ यथातापोमरुभूम्यातपएवाज्ञमृगदृशासत्यवारिसत्मृगाणांभ्रमकारणम् ॥ ३ ॥ शोकरोदनाद्यर्थक्रियाकारी ॥ ४ ॥ कनकेअव्युत्पन्नस्यानुगतकनकस्वरूपानभिज्ञस्येत्यर्थः ॥ ५ ॥ अगाराणिगृहाः नगाःपर्वतावृक्षाश्च नागेंद्रागजाःसर्पावा तैर्भासुरापरमार्थदृक्सर्वानुगतैकसद्ब्रह्म दृष्टिः ॥ ६ ॥ मुक्तालीमौक्तिकमाला ॥ पिच्छानिबर्हाणि ॥ ७ ॥ अन्येस्वातिरिक्तसत्यजनाःस्वप्नपुरुषाःस्वप्नदृष्टपुरुषांतरप्रायाः ॥ तर्हितेकथंशास्त्रीययाजनप्रतिग्रहोपदेशा

॥श्रीवसिष्ठउवाच॥ ॥यस्त्वबुद्धमतिर्मूढोरूढोनविततेपदे ॥ वज्रसारमिदंतस्यजगदस्यसदेवसत् ॥ १ ॥ यथाबालस्यवेतालोमृ तिपर्यंतदुःखदः॥ असदेवसदाकारंतथामूढमतेर्जगत्॥२॥ तापएवयथावारिमृगाणांभ्रमकारणम्॥ असत्यमेवसत्याभंतथामूढमते र्जगत्॥३॥ यथास्वप्नमृतिर्जंतोरसत्यासत्यरूपिणी॥ अर्थक्रियाकरीभातितथामूढधियांजगत्॥४॥ अव्युत्पन्नस्यकनकेकानकेकटके यथा॥ कटकज्ञप्तिरेवास्तिनमनागपिहेमधीः॥५॥ तथाज्ञस्यपुरागारनगनागेंद्रभासुरा॥ इयंदृश्यदृगेवास्तिनत्वन्यापरमार्थदृक्॥६॥ यथानभसिमुक्तालीपिच्छकेशोंड्रकादयः॥ असत्याःसत्यतांयाताभात्येवंदुर्दृशांजगत्॥ ७॥ दीर्घस्वप्नमिदंविश्वंविद्ध्यहंतादिसंयुत म्॥ अत्रान्येस्वप्नपुरुषायथासत्यास्तथाशृणु ॥८॥ अस्तिसर्वगतंशांतंपरमार्थघनंशुचि॥ अचेत्यचिन्मात्रवपुःपरमाकाशमाततम् ॥ ९ ॥ तत्सर्वगंसर्वशक्तिसर्वंसर्वात्मकंस्वयम्॥ यत्रयत्रयथोदेतितथास्तेतत्रतत्रवै॥ १०॥ तेनस्वप्नपुरेद्रष्टायान्वेत्तिपुरवासिनः॥ नरा नितिनराएवक्षणात्तस्यभवंतिते॥११॥ यद्दृष्टुश्चित्स्वरूपंतत्स्वप्नाकाशांतरस्थितम्॥स्वप्नाकाशचित्ताभंहिनरानामेतिभावितम्॥१२॥ वेदितृत्वैक्यवशतोनरतेवावबुध्यते॥ आत्मन्यतश्चिद्बलेनद्वयोरप्येतिसत्यता॥ १३॥

यर्थक्रियाक्षमाःसत्याइतिशास्त्रेभ्युपगतास्तत्राह ॥ यथासत्यास्तथाशृण्विति॥८॥ सर्वगतंसर्वाधिष्ठानम् ॥ परमार्थघनंनिरतिशयसत्यम् ॥ प्राणावैसत्यंतेषामेषसत्यमित्यादिश्रु तेः ॥ ९ ॥ तस्यमायाशबलंरूपमाह ॥ तत्सर्वगमिति ॥ माययायत्रयत्रयथायथायादृशार्थक्रियायोग्यमाविर्भवतितत्रतत्रतथाआस्ते ॥ १० ॥ तथाजागरेशास्त्रीयार्थक्रि यायोग्यंतदाविर्भूतंनस्वप्नेइत्यवांतरविशेषेपिनसद्रूपेविशेषइत्याशयेनाह ॥ तेनेति ॥ ११ ॥ स्वप्नस्याकाशोविकाशःसूक्ष्मतमनाडीच्छिद्रंतदंतःस्थितंस्वप्नाध्यस्तविपुलाकाशप रिवर्त्तिचित्ताभंचित्तवासनानुसारेणविवर्त्तमानमित्यर्थः ॥ १२ ॥ स्वप्नजागरयोर्द्वयोरपिआत्मनिनरताद्यवबोधेअध्यस्तेसत्यतावबोधेचान्योन्यतादात्म्यसंसर्गाध्यासएवहेतु रित्याह ॥ वेदितृत्वेति ॥ वेदितुर्भावोवेदितृत्वंसत्यस्वप्रकाशापरोक्षचैतन्यंतदैक्यंतत्तादात्म्याध्यासस्तद्वशःसंसर्गाध्यासस्तस्मादित्यर्थः ॥ द्वयोःस्वप्नजागरयोरध्यस्ततद्धर्मयोर्वा सत्यताएतिप्रथते ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवंस्वप्नजाग्रद्दृश्यपदार्थानांमिथुनीभूतमायातदधिष्ठानलक्षणसत्यानृतोभयशरीरतोक्ता तत्ररामःस्वप्नस्यानृतमायामात्रशरीरत्वमस्तुकिंसत्यांशानुप्रवेशेनेतिशंकते ॥ स्वप्नेइ
ति ॥ यदिजाग्रत्पुरुषाअधिष्ठानसत्तयासत्यानस्युस्तर्हिव्यवहारविसंवादःकर्मशास्त्राप्रामाण्यंचदोषःस्यादितितेषांतथात्वमस्तु ॥ यदिसत्यासंवलितमायामात्रशरीरिणिस्वप्नेपि
कल्पिताःस्वप्नपुरुषास्तथासत्यानस्युस्तदाकोदोषः ॥ मायामात्रंतुकात्स्न्र्येनानभिव्यक्तस्वरूपत्वादितिभगवताव्यासेनस्वप्नस्यमायामात्रत्वोक्तेः ॥ तथाचकथंस्वजगतःस्वप्नसा
म्यमितिभावः ॥ १४ ॥ स्वाप्नार्थाब्रह्मवद्वस्तुतःसत्यानभवंतीत्येतावदेवशक्यंवक्तुंननिरधिष्ठानत्वादधिष्ठानसत्तयापिसत्यानभवंतीतिप्रत्यक्षप्रमाणविरोधादित्याशयेनवसिष्ठउवा
च ॥ स्वप्नेइति ॥ नेतरदितिप्रमाणांतरस्यानादरार्थमुक्तंनप्रतिषेधार्थम् ॥ नह्यत्यंतासतःप्रत्यक्षंनामोपपद्यतेवंध्यापुत्रादावदर्शनादित्याशयः ॥ १५ ॥ किंचस्वप्नस्यात्यंतासत्त्वेजा
ग्रत्प्रपंचस्यापितद्दुर्वारंतस्यापिहैरण्यगर्भस्वप्नरूपत्वादित्याशयेनाह ॥ सर्गादाविति ॥ १६ ॥ तथाचजगतःस्वप्नसाम्यंप्रागुक्तसत्यताचसिद्धेत्याह ॥ एवमिति ॥ तत्रस्वप्नेभवान्म
मसत्यंत्वत्सत्यतायास्त्वयाअपलपितुमशक्यत्वात् ॥ यथैवत्वंतथैवाऽन्येऽपित्वद्दृशामद्दृशाचसत्याः ॥ एवमन्येषामपिनृणांस्वस्वानुभवानुसारात्स्वप्नसत्यतासिद्धेत्यर्थः ॥ १७ ॥

॥श्रीरामउवाच॥ ॥स्वप्नेपिस्वप्नपुरुषानसत्याःस्युर्मुनेयदि॥वदतत्कोभवेद्दोषोमायामात्रशरीरिणि॥१४॥ ॥श्रीवसिष्ठउवाच॥ ॥स्व
प्नेनपुरवास्तव्यावस्तुतःसत्यरूपिणः॥ प्रमाणमत्रश्रृणुमेप्रत्यक्षंनामनेतरत्॥ १५॥ सर्गादावात्मभूर्भातिस्वप्नाभानुभवात्मकः॥ तत्सं
कल्पकलंविश्वमेवंस्वप्नाभमेवतत्॥ १६॥ एवंविश्वमिदंस्वप्नस्तत्रसत्यंभवान्मम॥ यथैवत्वंतथैवान्येस्वप्नेस्वप्ननरानृणाम्॥ १७॥ स्व
प्नेनगरवास्तव्याःसत्यानस्युरिमेयदि॥ तदिहापितदाकारेनसत्यंमेमनागपि॥ १८॥ यथाहंतवसत्यात्मासत्यंसर्वंभवेन्मम॥ स्वप्नोपलं
भेसंसारेमिथःसिद्धौप्रमेदृशी॥ १९॥ संसारेविपुलेस्वप्नेयथासत्यमहंतव॥तथात्वमपिमेसत्यंसर्वस्वप्नेष्वितिक्रमः॥२०॥ ॥श्रीरामउ
वाच॥ ॥स्वप्नद्रष्टरिनिर्निद्रेतद्द्रष्टुःस्वप्नपत्तनम्॥सद्रूपत्वात्तथैवास्तेममेतिभगवन्मतिः॥ २१॥ ॥श्रीवसिष्ठउवाच॥ ॥एवमेतत्तथै
वास्तेसत्यत्वात्स्वप्नपत्तनम्॥स्वप्नद्रष्टरिनिर्निद्रेप्याकाशविशदाकृति॥ २२ ॥एतदास्तामिदंतावद्यज्जाग्रदिवमन्यसे॥ विद्धितत्स्वप्नमे
वांतर्देशकालाद्यपूरकम्॥ २३ ॥

उक्तमेवार्थंपुनःस्पष्टमाह ॥ स्वप्नेइत्यादिना ॥ नगरस्यवास्तुनिवेश्मभुविभवानगरवास्तव्याः ॥ नगरेवसंतीतिवानगरवास्तव्याः ॥ वसेस्तव्यत्कर्त्तरिणिच्चेतिवचनात् ॥ १८ ॥
॥ १९ ॥ २० ॥ एवंचेत्तर्हिस्वप्नद्रष्टुर्जागरणेजातेऽपिस्वप्नप्रपंचस्यजाग्रत्प्रपंचवदवस्थानंस्यादितिरामःशंकते ॥ स्वप्नेति ॥ इतिमतिर्ममत्वद्वचनात्संपन्नेतिशेषः ॥ २१ ॥ इष्टा
पत्त्यावसिष्ठःपरिहरति ॥ एवमेतदिति ॥ आकाशविशदाकृतिअधिष्ठानसन्मात्रस्वभावंसत्यमेवेत्यर्थः ॥ २२ ॥ एवंतर्हिजाग्रदर्थवत्स्वाप्नस्यापिस्वप्नांतरेव्यवहारसंवादःस्यादि
तिरामस्यविवक्षामालक्ष्यदेशांतरकालांतराननुवृत्तिकृतोऽसंवादोजाग्रत्पदार्थेष्वपिबहुष्वस्ति पृथिव्याकाशनामजात्यादिकतिपयपदार्थानुवृत्तिसंवादःस्वप्नेप्यस्तीतिनविशेष
उपपादयितुंशक्यइत्याशयेनप्रौढिमादर्शयन्नाह ॥ एतदास्तामिति ॥ अथवायदिस्वाप्नार्थाःसत्यास्तर्हिजागरेप्यनुवर्त्तेरन्नितिरामस्याशंकामालक्ष्याहवसिष्ठः ॥ एतदिति ॥ स्वा
प्नस्यजाग्रद्वाह्यदेशकालाद्यननुवृत्त्यायद्यलीकत्वंमन्यसेतर्हियज्जाग्रदितिमन्यसेतदपिअंतःस्वाप्नदेशकालाद्यपूरकमितितुल्यमितिद्वयोःस्वप्नतैवेत्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमधिष्ठानसत्तयासत्यत्वेपिसर्वदेशकालाद्यपूरकत्वान्नस्वतस्तथेतिमिथ्यात्वमुभयोःसममित्याह ॥ एवमिति ॥ रंजयतिस्वासत्त्यामोहयति ॥ २४ ॥ संविदस्तुसर्वदेशकाला
दिपूरकत्वात्सत्यत्वंसर्वत्रमायाशक्त्यासर्वभावेनस्फुरणसामर्थ्यंचेत्याह ॥ सर्वत्रेति ॥ स्वैवस्वयमेव ॥ २५ ॥ कोशेधनागारे ॥ द्रव्यंधनम् ॥ अनेनचिद्व्योम्ना ॥ २६ ॥ एवमु
क्त्वथंरामंसमाधायप्रस्तुतकथामालंब्याह ॥ अनंतरमिति ॥२७॥ एतत्वागुक्तंतत्त्वम् ॥ लीलार्थंलीलाप्रीत्यर्थम् ॥ स्वस्तिअभिलषितार्थसिद्धिरस्तु ॥ जगन्मिथ्यात्वस्योक्तस्य
दृष्टांतदृष्टयोमंडपांतस्त्वदीयब्रह्मांडकल्पनालक्षणादृष्टालीलयेतिशेषः ॥ २८ ॥ धीमान्स्वस्तितेस्त्वित्युक्तेस्तात्पर्यविद्वान् ॥ २९ ॥ ममनुष्यमात्रस्याल्पदानसमर्थस्यापीत्याश

एवंसर्वमिदंभातिनसत्यंसत्यवत्स्थितम् ॥ रंजयत्यपिमिथ्यैवस्वप्नस्त्रीसुरतोपमम् ॥ २४ ॥ सर्वत्रविद्यतेसर्वंदेहस्यांतर्बहिस्तथा ॥ यत्तु
वेत्तियथासंवित्तत्तथास्वैवपश्यति ॥ २५ ॥ यत्कोशेविद्यतेद्रव्यंतद्दृष्ट्वालभ्यतेयथा ॥ तथास्तिसर्वंचिद्व्योम्निचेत्यतेतत्त्वनेनवै ॥२६॥ अनं
तरमुवाचेदंदेवीज्ञप्तिर्विदूरथम् ॥ कृत्वाबोधामृतासेकैर्विवेकांकुरसुंदरम् ॥२७॥ एतदेवमयाराजन्लीलार्थमुपवर्णितम् ॥ स्वस्तितेस्तु
गमिष्यावोदृष्टादृष्टांतदृष्टयः ॥ २८ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥इतिप्रोक्तेसरस्वत्यागिरामधुरवर्णया ॥ उवाचवचनंधीमान्भूमिपालो
विदूरथः ॥ २९ ॥ ॥विदूरथउवाच ॥ ॥ममापिदर्शनंदेविमोघंभवतिनार्थिनि ॥ महाफलप्रदायास्तुकथंतवभविष्यति ॥ ३० ॥ अहं
देहंसमुत्सृज्यलोकांतरमितोपरम् ॥ निजमायामिहेदेविस्वप्नात्स्वप्नांतरंयथा ॥ ३१ ॥ पश्चादिशाशुमांमातःप्रपन्नंशरणागतम् ॥ भक्ते
वहेलावरदेमहतांनविराजते ॥ ३२ ॥ यंप्रदेशमहंयामितमेवायात्वयंमम ॥ मंत्रीकुमारीचैवेयंबालेतिकुरुमेदयाम् ॥३३॥ ॥श्रीसर
स्वत्युवाच ॥ ॥आगच्छराज्यमुचितार्थविलासचारुप्राग्जन्ममंडलपतेकुरुनिर्विशंकम् ॥ अस्माभिरर्थिजनकामनिराकृतिर्हिदृष्टान
काचनकदाचिदपीतिविद्धि ॥३४॥ ॥इत्यार्षेवा० वा० दे० मो० उ० ली० स्वप्नपुरुषसत्यत्वनिरूपणंनामद्विचत्वारिंशत्तमःसर्गः॥४२॥
॥श्रीसरस्वत्युवाच ॥ ॥अस्मिन्रणवरेराजन्मर्त्तव्यंभवताधुना ॥ प्राप्तव्यंप्राक्तनंराज्यंसर्वंप्रत्यक्षमेवते ॥ १ ॥ कुमार्यामंत्रिणाचैव
त्वयाचप्राक्तनंपुरम् ॥ आगंतव्यंशवीभूतंप्राप्तव्यंतच्छरीरकम् ॥ २॥ आवांयावोयथायातंवातरूपेणचत्वया ॥ आगंतव्यःसदेशस्तुकु
मार्यामंत्रिणापिच ॥३॥

यः ॥ ३० ॥ निजंप्राक्तनम् ॥ आयामिअविलंबेनागमिष्यामि ॥ ३१ ॥ पश्यकृपादृष्ट्या ॥ आदिशप्रयच्छमत्प्रा
र्थितमुपदेशोत्तरकार्यंच ॥ ३२ ॥ प्रार्थनीयार्थमाह ॥ यमिति ॥ कुमारीअनूढाकन्या ॥ ३३ ॥ लीलाभक्तिभाग्योचितैरर्थविलासैश्चारुराज्यंकुरु ॥ अस्माभिर्निराकृतिःप्र
त्याख्यानंकदाचिदपिनकृतेतिशेषः ॥ केनचिदपिनदृष्टेत्यर्थः ॥ ३४ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेउत्पत्ति० द्विचत्वारिंशत्तमःसर्गः ॥ ४२॥ ॥छ॥ ॥ अभी
ष्टवरदानंचपुरस्याक्रमदीपनम् ॥ वर्ण्यतेदह्यमानानांचेष्टाचपुरवासिनाम् ॥ १ ॥ देवीतज्जिज्ञासितंभाव्यर्थमपिस्पष्टमाचक्षाणावरशेषमपिदातुमाह ॥ अस्मिन्निति ॥ सर्वंतेप्रत्य
क्षमेवभविष्यतीतिशेषः ॥ १ ॥ त्वयाचप्राक्तनंशवीभूतंतच्छरीरकंप्राप्तव्यमितिसंबंधः ॥ २ ॥ मृत्वावायुरूपिणाआतिवाहिकदेहरूपेणत्वयासप्राक्तनोदेशआगंतव्यः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इयमातिवाहिकदेहगतिर्मानोरथिकगतिवन्मंडपांतःसंवृताकाशेऽपिसुदूरमिवसंभवतिनाश्वादिगतिवद्देशवैपुल्यंप्राक्सिद्धमपेक्षतइत्याशयेनाह ॥ अन्यैवेति ॥ ४ ॥ ऊर्ध्वस्थितःप्रासादाद्यत्युन्नतप्रदेशमारुह्यनिशिबाह्यपुरवृत्तांतदर्शीपुरुषोराजसन्निधिंप्रविश्योवाच ॥ ५ ॥ देवेतिराजसंबोधनम् ॥ ६ ॥ तुष्टिमत्उत्साहप्रहृष्टंपरबलम् ॥ ७ ॥ उन्नतप्रासादशिखरैस्तृणकाष्ठादिसमृद्ध्याचनगसंकाशेपर्वतसदृशे ॥ ८ ॥ कल्पांबुदानांसंवर्तमेघानांघटाभिःसमूहैस्तुल्याः ॥९॥ ससंभ्रमंसभयम् ॥ परुषानिष्ठुरभाषणरूपाआरवायत्र तथाविधःकोलाहलः ॥ आशादिशः ॥ १० ॥ कोलाहलमेवसंबंधिभेदैर्विशिष्यवर्णयति ॥ बलादित्यादिना ॥ ११ ॥ महाहलहलारवैःकथितइत्युत्तरत्रान्वयः ॥ १२ ॥अ

अन्यैवगतिरश्वस्यगतिरन्याखरोष्ट्रयोः॥ मदस्विन्नकपोलस्यगतिरन्यैवदंतिनः॥ ४ ॥ प्रस्तुतेतिकथायावन्मिथोमधुरभाषिणोः॥ तावत्प्रविश्यसंभ्रांतउवाचोर्ध्वस्थितोनरः॥ ५ ॥ देवसायकचक्रासिगदापरिघवृष्टिमत्॥ महत्परबलंप्राप्तमेकार्णवइवोद्धतः॥ ६॥ कल्पकालानिलोद्धूतकुलाचलशिलोपमम्॥ गदाशक्तिभुशुंडीनांवृष्टिंमुंचतितुष्टिमत्॥७॥ नगरेनगसंकाशेलग्नोग्निर्व्याप्तदिक्तटः॥ दहंश्चटचटास्फोटैःपातयत्युत्तमांपुरीम्॥८॥ कल्पांबुदघटातुल्याव्योम्निधूममहाद्रयः॥ बलात्प्रोड्डयनंकर्तुंप्रवृत्तागरुडाइव॥९॥ ॥श्रीवसिष्ठउवाच॥ ॥ससंभ्रमंवदत्येवंपुरुषेपरुषारवः॥ उदभूत्पूरयन्नाशाबहिःकोलाहलोमहान्॥ १०॥ बलादाकर्णकृष्टानांधनुषांशरवर्षिणाम्॥ बृंहतामतिमत्तानांकुंजराणांतरस्विनाम्॥११॥ पुरेचटचटास्फोटैर्दहतांजातवेदसाम्॥ पौराणांदग्धदाराणांमहाहलहलारवैः॥ १२॥ तरतामग्निखंडानांटांकारःकथितोरवैः॥ ज्वलितानांपरिस्पंदाद्धगद्धगितिचार्चिषाम्॥१३॥ अथवातायनाद्व्योमंत्रीराजाविदूरथः॥ ददृशुःप्रोल्लसन्नादंमहानिशिमहापुरम्॥ १४॥ प्रलयानलसंक्षुब्धपूर्णैकार्णवरंहसा ॥ पूर्णंपरबलेनोग्रहेतिमेघतरंगिणा ॥ १५ ॥ कल्पांतवह्निविगलन्मेरुभूधरभासुरैः॥ दह्यमानंमहाज्वालाज्वालैरंबरपूरकैः ॥ १६ ॥ मुष्टिग्राह्यमहामेघगर्ज्जासंतर्जितोर्जितैः॥ घोरंकलकलारावैर्मांसलैर्दस्युजल्पितैः॥ १७॥ पुष्करावर्त्तसंकाशधूम्राभ्रपिहितांबरम्॥ प्रोड्डीनहेमाग्रनिभैर्ज्वालापुंजैर्निरंतरम्॥ १८॥ तरदुल्मुकखंडोग्रतारातरलितांबरम्॥ अन्योन्यदेशसद्मौघप्रज्वलज्ज्वलनाचलम्॥ १९॥

र्चिषांधगद्धगितिरवैःसहजनैःकथितष्टांकारउदभूदित्यनुकृष्यते ॥ १३ ॥ वातायनात्प्रासादगवाक्षात् ॥ १४ ॥ उग्रैर्हेतिभिर्मेघतरंगोभयवता ॥ १५ ॥ महाज्वालानांज्वालैःशिखाभिः ॥ जालैरितिपाठेस्पष्टम् ॥ १६॥ मोषणंमुष्टिःपरलुंठनंतद्ग्राह्यविषयेपरभीषणायमहामेघगर्ज्जासदृशैःसंतर्जितैर्भर्त्सनैरूर्जितैःप्रबलैर्मांसलैःपुष्टैर्दस्यवश्चोरास्तज्जल्पितैर्घोरम् ॥ १७ ॥ पुष्करावर्त्ताःप्रलयमेघाः ॥ निरंतरंनिरवकाशम् ॥ १८॥ उल्मुकानांज्वलत्काष्ठानांखंडाएवोग्राऔत्पातिकारक्तास्ताराः ॥ ज्वालापरिवर्त्तेनअन्योन्यदेशविनिमयेनप्रज्वलंतोज्वलनाचलायत्र ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हतावशिष्टसैन्यानांपुरापातोनगरप्रवेशोयत्र ॥ हुताःप्रस्तताअंगारायेषुतथाविधैरभ्रकोटरैर्मेघच्छिद्रैरुपलक्षितमित्यर्थः ॥ कर्कशाक्रंदंयथास्यात्तथानिर्दग्धजनसमूहैःशत्रुभिरुग्रगर्जितंयत्र ॥ २० ॥ कृशानुकणैर्नाराचैश्चनिरंतरतरमत्यंतनिरवकाशमंबरंयत्र ॥ हेतिभिःशिलाजालैश्चलुठंतोनिपतंतः ॥ पुरशब्देनपुरजनाउच्यंते ॥ लुठंतःप्रधावंतोदग्धंपुरंयैस्तथाविधाउत्कराऊर्ध्वीकृतहस्ताःशत्रवोयत्रेतिवा ॥ २१ ॥ रणेद्विरदानांसंघट्टैःकुट्टिताश्चूर्णिताउद्भटाःशूरतराःसद्भटायत्र ॥ तस्कराणांशिरश्छेदेन ॥ २२ ॥ २३ ॥ अलातानिज्वलदुल्मुकानि ॥ शिखिवैरग्निभिराकीर्णानि ॥ २४ ॥ दग्धैरग्निकाष्ठैःसहक्रेंकारेणरणत्प्रज्वलनयुक्तंवैणवंवेणुकाष्ठंयत्र ॥ २५ ॥ पांसवएवशिष्यंतेयथातथाआत्तायांदग्धायांराजश्रियिवृद्धःप्रवृद्धस्तृप्तश्चहुताशनोयत्र ॥ अग्निलक्षणोमहाशनोघस्मरोयत्र ॥ २६ ॥ यदृच्छयाअकस्मादेवदैवोपपादिताभ्यांसर्वस्वादानमात्कारोनिशिसुप्ते

हतसैन्यपुरापातंहुतांगाराभ्रकोटरैः ॥ कर्कशाक्रंदनिर्दग्धलोकपूगोग्रगर्जितम् ॥ २० ॥ कृशानुकणनाराचनिरंतरतरांबरम् ॥ बहुहेतिशिलाजाललुठद्दग्धपुरोत्करम् ॥ २१ ॥ रणद्विरदसंघट्टकुट्टितोद्भटसद्भटम् ॥ विद्रवत्तस्करच्छेदमार्गकीर्णमहाधनम् ॥ २२ ॥ अंगाररराशिनिपतन्नरनार्युग्ररोदनम् ॥ स्फुटच्चटचटाशब्दप्रलुठत्स्फुटकाष्ठकम् ॥ २३ ॥ विपुलालातचक्रौघशतसूर्यनभस्तलम् ॥ अंगारशिखिराकीर्णसमस्तवसुधातलम् ॥ २४ ॥ दग्धाग्निकाष्ठक्रेंकाररणज्ज्वलनवैणवम् ॥ दग्धजंतुघनाक्रंदरुदत्सकलसैनिकम् ॥ २५ ॥ पांसुशेषात्तराजश्रीवृद्धतृप्तहुताशनम् ॥ सकलग्रसनारंभसोद्योगाग्निमहाशनम् ॥ २६ ॥ यदृच्छात्कारडात्कारकठिनाग्निरटद्गृहम् ॥ अनंतजंतुभोज्यान्नवह्निभुक्तैंधनस्पृहम् ॥ २७ ॥ अथशुश्राव तत्रासौगिरोराजाविदूरथः ॥ योधानांदग्धदाराणांपश्यतामभिधावताम् ॥ २८ ॥ हामत्तमरुदूर्ध्वस्थानंगारगृहपादपान् ॥ रणत्खरखरंनीरजालामातपपंथिनः ॥ २९ ॥ हादग्धदाराःप्रालेयशीतादेहेषुदंतिनाम् ॥ मग्नामनस्सुमहतामिवविज्ञानसूक्तयः ॥ ३० ॥ हातातहेतयोलग्नास्तरुणीकबरीतृणे ॥ ज्वलंतिशुष्कपर्णौघाइववीरानिलेरिताः ॥ ३१ ॥

षुदस्युभिःप्रहरणंडात्कारस्ताभ्यांकठिनेनदुर्वारेणाग्निनाचरटंतोगृहायत्र ॥ अनंतानांजंतूनांभोज्येषुभोजनार्हेष्वन्नेषुधान्यराशिषुवह्निनाभुक्तेषुअवशिष्टेंधनमात्रेकेषांचित्स्पृहायत्र ॥ २७ ॥ दारग्रहणंसर्वस्वोपलक्षणम् ॥ २८ ॥ अंगआरइतिच्छेदः ॥ अंगेतिकश्चित्कंचित्संबोध्याह ॥ नीरजालेनरसातिशयेनआमान्हरितानतएवातपस्यसंतापस्यपंथिनःपरिपंथिनोनिवारकान्ऊर्ध्वस्थान्औन्नत्येस्थितान्अस्मद्गृहलक्षणानस्मद्गृहसंवृद्धांश्चपादपान्वृक्षान्उन्मूलयितुंमत्तःप्रचंडोमरुत्विपल्लक्षणोवायुर्वारणात्खरखरंयथास्यात्तथाआरआजगाम ॥ हाइतिखेदे ॥ २९ ॥ प्राक्प्रालेयशीतादग्धाःसंतप्तादारादंतिनांमृतानांदेहेषुलीनाःप्रच्छन्नाः ॥ सूक्तिपक्षेऽज्ञानाग्निनादग्धाःस्थूलादिदेहायाभिः ॥ त्रिविधतापोपशमनात्प्रालेयादपिशीतलाः ॥ ३० ॥ हेतयःशस्त्राग्नयोविविधास्तज्ज्वालावा ॥ कबर्यःकेशास्तल्लक्षणेतृणे ॥ ज्वलंतिदीप्यंते ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवर्त्तैरावर्त्तैर्नदीसदृशप्रवाहभेदैश्चदीर्घा ॥ व्योमलक्षणांगंगांमंदाकिनींवा ॥ ३२ ॥ वहंतिप्रवहंतिउल्मुककाष्ठानियस्यांसा ॥ अग्निकणाएवबुद्बुदायस्याम् ॥ ३३ ॥ स्तन
पाःस्तनंधयाः ॥ सुतेकन्येपुत्रीसंबोधनंवा ॥ इयमपितद्विरहलक्षणेअसत्समिंधनेअविद्यमानेप्यग्नौदग्धैव ॥ ३४ ॥ शीघ्रंआगच्छनिर्गच्छतेतवएतदंगारवज्ज्वलितंमंदिरंइतःस्व
स्थानाच्चलनेनपतितुंप्रवृत्तम् ॥ ३५ ॥ वातायनजालकलक्षणंसंध्याभ्रपटलम् ॥ ३६ ॥ नभस्यंत्यांभयान्नभउत्पतितुमिच्छंत्यांपुर्यां ॥ अर्णपूराजलप्रवाहाः ॥ ३७ ॥ शिख
रिणांशृंगवतांप्रासादानांकोटिष्वग्रभागेषु ॥ सरसानिसजलानिवाप्यादीनिउद्यानानिच ॥ ३८ ॥ आलानंबंधनस्तंभस्तज्जातीयत्वप्रयुक्तयारुषा ॥ ३९ ॥४०॥ तिमिरावलीं

आवर्त्तनदीदीर्घावहत्यूर्ध्वतरंगिणी ॥ पश्येयंधूमयमुनाव्योमगंगांप्रधावति ॥ ३२ ॥ वहदुल्मुककाष्ठोर्ध्वगामिनीधूमनिम्नगा ॥ वैमा
निकानंधयतिपश्याग्निकणबुद्बुदा ॥ ३३ ॥ अस्यामातापिताभ्राताजामातास्तनपाःसुते ॥ अस्मिन्सद्मनिनिर्दग्धादग्धैवासत्समिंधने
॥ ३४ ॥ हाहाहागच्छतेशीघ्रमेतदंगारमंदिरम् ॥ इतःप्रवृत्तंपतितुंसुमेरुःप्रलयेयथा ॥ ३५ ॥ अहोशरशिलाशक्तिकुंतप्रासासिहेतयः ॥
जालसंध्याभ्रपटलंविशंतिशलभाइव ॥ ३६ ॥ हेतिप्रवाहाज्वलनंनभस्यंत्यांविशंत्यहो ॥ वडवानलमुज्ज्वालमर्णपूराइवार्णवात् ॥ ३७ ॥
धूमायंतिमहाभ्राणिज्वालाःशिखरिकोटिषु ॥ सरसान्यपिशुष्यंतित्वदयानीवरागिणाम् ॥ ३८ ॥ आलानत्वरुषेवैतादंतिभिर्वृक्षपंक्त
यः ॥ स्फुरत्कटकटारावंपात्यंतेरुतचीत्कृतैः ॥ ३९ ॥ पुष्टपुष्पफलस्कंधागतश्रीकागृहद्रुमाः ॥ गतानिर्दग्धसर्वस्वागृहस्थाइवदीनताम्
॥ ४० ॥ मातापितृविनिर्मुक्ताबालकास्तिमिरावलीम् ॥ मग्नंतोंगेषुरथ्यासुकुड्यपातेनहाहताः ॥ ४१ ॥ वातविद्राविताग्रस्यन्करिण्योर
णमूर्धनि ॥ पतदंगारकागारभारिणःकटुकूजितम् ॥ ४२ ॥ हाकष्टमसिनिर्भिन्नस्कंधेसन्नद्दद्दोल्मुके ॥ पतितोयंत्रपाषाणःपुरुषस्याशनि
र्यथा ॥ ४३ ॥ गवाश्वमहिषेभोष्ट्रश्वशृगालैडकैरहो ॥ घोरैरणमिवारब्धंमार्गरोधकमाकुलैः ॥ ४४ ॥ पटैःपटपटाशब्दजलजालालिमा
लितैः ॥ आक्रंदंत्यःस्त्रियोयांतिस्थलपद्माचिताइव ॥ ४५ ॥ स्त्रीणांज्वालालवाःपश्यलिहंत्यलकवल्लरीः ॥ कुर्वंतोशोकपुष्पाभांकरभाइ
वपन्नगीः ॥ ४६ ॥

निलयनायमग्नंतःशोधयंतोमृगयंतइतियावत् ॥ मस्जेःशोधनार्थाच्छतरिच्छांदसेकुत्वनत्वे ॥ अंगेत्यामंत्रणे ॥ इषुकीर्णासुरथ्यासु ॥ कुड्यपातेनभित्तिपतनेन ॥ ४१ ॥ वाते
नविद्रावितात्प्रोड्डायितात् पततःअंगारकायस्मात्तथाविधात् अगारंभर्त्तुंवर्षातपादिभ्यस्त्रातुंशीलमस्येत्यगारभारिच्छदिस्तस्मात्करिण्योऽभ्रम्त्रःकटुकूजितंयथास्यात्तथात्र
स्यन् ॥ त्रसेर्लङिवाभ्राशभ्लाशेतिश्यन् ॥ अडभावश्छांदसः ॥ ४२ ॥ ४३ ॥ एडकैर्मेषैः ॥ गंतॄणांमार्गनिरोधकंरणंयुद्धमारब्धमिवपश्यंत्वितिशेषः ॥ ४४ ॥ अग्निशिखास्कं
दनभयादार्द्रपटान्परिधायनिर्गच्छंतीःस्त्रियोवर्णयति ॥ पटैरिति ॥ जलबिंदुजाललक्षणैरलिभिर्मालितैःपरिवृतैर्हस्तपादवक्त्रलक्षणैःस्थलपद्मैराचिताघटिताइव ॥ ४५ ॥ क
रभाउष्ट्राः ॥ पन्नंपतितंयथास्यात्तथागच्छंत्यःपन्नग्यःप्रलंबिततरुशाखाःदैवात्तदालंबिसर्पिणीर्वा ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्ष्मलक्षणेषुभ्रमरपक्षसदृशेष्वक्षिपक्ष्मसु ॥ कृशानुरग्निस्तत्संबंधिनीकार्शानवीशिखाज्वाला ॥ ४७ ॥ स्वयंदह्यमानोपि ॥ ४८ ॥ रभसेनबलवेगेननिर्लूनोभग्नोज्वलदंगारमिश्र आलानपादपोयेन अतएवतदाकर्षणकालेप्लुष्टोदग्धःपुष्करःशुंडाग्रंयस्यतथाविधःकरीपलाय्यजनेभ्यःपुष्करदंपद्मदंसरःप्राप्यतत्रमग्नः ॥ दग्धपुष्करस्यपुनर्लाभेच्छयेवेतिश्लेषमूलाउत्प्रेक्षा ॥४९॥ अंबुदानांपदंवृष्ट्यधिकारनिर्वाहकमाकाशस्थानंप्राप्यविलोलवह्निज्वालालक्षणाअंतर्गतास्तडिल्लतायस्य ॥ ज्वलतामंगाराणांनाराचानांशराणांचनिकरंस्वानुरूपंपरितोवर्षतीत्युत्प्रेक्षा ॥ ५० ॥ देवेतिराजानंसंबोध्यकस्यचिदुक्तिः ॥ धूमोव्योम्निअर्णवइवस्थितः ॥ आपीडवानूशिखातरंगवान् ॥५१॥ गौरंपीतमंबरमाकाशः॥कुं

हाहाहरिणशावाक्ष्याःपक्ष्मलक्षणपक्ष्मसु॥कुमार्गेष्विवविश्रांतिमेतिकार्शानवीशिखा॥ ४७॥ दह्यमानोविनिर्यातिनकलत्रंविनानरः॥ अहोबतदुरुच्छेदाःप्राणिनांस्नेहवागुराः॥४८॥ करीरभसनिर्लूनज्वलदंगारपादपः॥ प्लुष्टपुष्करकःकोपान्मग्नःपुष्करदंसरः॥ ४९॥ धूमोंबुदपदंप्राप्यविलोलांतस्तडिल्लतः॥ ज्वलदंगारनाराचनिकरंपरिवर्षति॥५०॥ देवधूमस्फुरद्वह्निकणआवर्त्तवृत्तिमान्॥ स्थितआपीडवान्व्योम्निरत्नपूर्णइवार्णवः॥५१॥ गौरमंबरमाभातिज्वालाशिखरतेजसा॥ मृत्युनेवोत्सवेदत्तःकुंकुमाक्तकरंडकः॥ ५२॥ अहोनुविषमंचेदंवर्त्ततेवृत्तवर्जितम्॥ ध्रियंतेराजनार्योपिवैरिवीरैरुदायुधैः॥५३॥ लोलस्रग्दामकुसुमैर्मार्गप्राकारकारकैः॥ अर्द्धनिर्दग्धकबरीकीर्णवक्षस्थलस्तनाः॥५४॥ आलोलांबरसंलक्ष्यनितंबजघनस्थलाः॥ पतन्माणिक्यवलयवलितावनिमंडलाः॥५५॥ छिन्नहारलताजालविकीर्णामलमौक्तिकाः॥ दृष्टादृष्टस्तनश्रेणीपार्श्वोद्यत्कनकप्रभाः॥५६॥ कुररीकर्कशाक्रंदमंदीकृतरणारवाः॥ धारावाहास्रुताराविभिन्नपार्श्वविचेतनाः ॥ ५७ ॥ रक्तकर्दमबाष्पांबुक्लिन्नग्रंथितवाससः॥ भुजमूलार्पितभुजैर्नीयमानावलात्नृभिः॥ ५८ ॥ कइवास्मिन्परित्रातास्यादित्यादीनवीक्षितैः॥ उत्पलालीववर्षद्भिःपरिरोदितसैनिकाः॥ ५९॥

कुमैःअक्तोरंजितःकरंडकःसंपुटकोदत्तः ॥ अर्थाद्दिग्वधूभ्यइतिगम्यते ॥ ५२ ॥ वृत्तंसच्चरितंतेनवर्जितंबहिष्कृतम् ॥५३॥ आसर्गसमाप्तेराजनारीरेवविशिनष्टि ॥ लोलेत्यादिना ॥ मार्गेप्रआकिरणंप्राकारस्तस्यकारकैर्लोलैःस्रग्दामभिःकुसुमैश्चोपलक्षिताः ॥ ५४ ॥ पतद्भिर्माणिक्यैर्वलयैश्चमाणिक्यखचितैर्वलयैर्वावलितानिसंवृतान्यवनिमंडलानियाभिः ॥ ५५ ॥५६॥ कररीशब्दवत्कर्कशदुःश्रवैराक्रंदैर्मंदीकृतोभिभूतोरणारवोयाभिः ॥ धारावाहमविच्छिन्नधारंयथास्यात्तथाअस्रुतैर्निर्गतैराक्रंदारावैर्भिन्नानिविदारितानीवपीडितानिकुक्षिपार्श्वानियासाम् ॥ अतएवविचेतनाःकर्तव्यार्थचेतनाशून्याः ॥ ५७ ॥ पलायनशंकयापरस्परंग्रंथितवाससः ॥ ५८ ॥ दीनैर्वीक्षितैर्वीक्षणैः ॥ परितोदययारोदिनाःरोदनशीलाःकृताःस्वपक्षसैनिकायाभिस्ताः ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वच्छेष्वंबरतलेषुवस्त्रांतःप्रदेशेष्वालक्ष्यैः ॥ अंबरपदश्लेषादाकाशनलिनीनिभाः ॥ ६० ॥ आततादीर्घाश्चलाश्चालकवल्लर्यो यासांताः ॥ आनंदोत्रविषयसुखंतल्लक्षणेनमंदरे
णमथ्यमानात् ॥ राज्ञांमूर्तिभूतालक्ष्म्यःसंपदोराजाचंद्रस्तद्घटितालक्ष्म्यःश्रियोवा ॥ ६१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०त्रिचत्वारिंशःसर्गः ॥ ४३ ॥ ॥ ७ ॥
भीतांविलोक्यमहिषींश्रुत्वांतःपुरधर्षणम् ॥ युद्धायराज्ञोनिर्याणंलीलातत्त्वंचवर्ण्यते ॥१॥ मत्तमिवविघूर्णमानंयौवनंयस्याम् ॥ तल्लीलाप्रज्ञाधिष्ठितंराज्ञोगृहम् ॥१॥२॥ चंद्र
इवचंद्रएवचआननंयस्याः ॥ अवदातानिगौराणिस्वच्छानिचांगानियस्याः ॥ ३ ॥ ४ ॥ देवीकृताभिषेकाप्रधानमहिषी ॥ ५ ॥ दाराःअन्याभोगिन्यः ॥ ६ ॥ पिष्टाःसंचूर्णि

मृणालकोमलाच्छोरुमूलजालैःसुनिर्मलैः॥ स्वच्छांबरतलालक्ष्यैराकाशनलिनीनिभाः ॥ ६० ॥ आलोलमाल्यवसनाभरणांगरागा
वाष्पाकुलाततचलालकवल्लरीकाः॥ आनंदमंदरनिरंतरमथ्यमानात्कामार्णवात्समुदिताइवराजलक्ष्म्यः॥६१॥ ॥इ०वा०वा०दे०
मोक्षोपायेषूत्पत्ति० अग्निदग्धगृहादिवर्णनंनामत्रिचत्वारिंशःसर्गः॥ ४३॥ ॥श्रीवसिष्ठउवाच॥ ॥एतस्मिन्नंतरेराजमहिषीमत्तयौ
वना॥ तद्विवेशगृहंलक्ष्मीरिवपंकजकोटरम्॥ १ ॥ आलोलमाल्यवसनाभिन्नहारलताकुला॥ अनुयातावयस्याभिर्दासीभिर्भयविह्व
ला॥ २ ॥ चंद्राननावदातांगीश्वासोत्कंपिपयोधरा॥ तारकाकारदशनास्थिताद्यौरिवरूपिणी॥ ३ ॥ अथतस्यावयस्यैकाराजानंतंव्य
जिज्ञपत्॥ भूतसंग्रामसंरब्धममरेंद्रमिवाप्सराः॥ ४॥ देवदेवीसहास्माभिःपलाय्यांतःपुरांतरात्॥ शरणंदेवमायातावातार्तेवलताद्रु
मम्॥ ५॥ राजन्दाराहृतास्तास्तेबलवद्भिरुदायुधैः॥ ऊर्मिजालैर्महाब्धीनांतीरद्रुमलताइव ॥६॥ अंतःपुराधिपाःसर्वेपिष्टाःशत्रुभिरु
द्धतैः॥ अशंकिताभिपतितैर्वातैरिववरद्रुमाः॥ ७॥ दूरेणाशंकमायातैःपरैर्नःपुरमाहृतम्॥ रात्रौवर्षास्विवोद्घोषैःकमलानीववारिभिः
॥८॥धूमंवर्षद्भिरुन्नादैर्लेलिहानोग्रहेतिभिः॥ वह्निभिर्नःपुरंप्राप्तंपरयोधैश्चभूरिभिः॥ ९ ॥ परिवारैर्विलासिन्योदेव्यआहृत्यमूर्द्धजैः॥
आक्रंदंत्योबलान्नीताःकुररीइवधीवरैः॥ १० ॥ इतिनोयेयमायाताशाखाप्रसरशालिनी॥ आपत्तामलमुद्धर्तुंदेवस्यैवास्तिशक्तता
॥ ११ ॥ इत्याकर्ण्यावलोक्यासौदेव्यौयुद्धाययाम्यतः॥ क्षम्यतांममभार्येयंयुष्मत्पादाब्जषट्पदी ॥ १२ ॥ इत्युक्त्वानिर्ययौराजाकोपा
रुणितलोचनः॥ मत्तेभनिर्भिन्नवनःकंदरादिवकेसरी॥ १३॥

ताः ॥ ७ ॥ दूरेणदूरात् ॥ दूरांतिकार्थेभ्योद्वितीयाचेतिचात्तृतीया ॥ आहृतमास्कंदितम् ॥ ८ ॥ धूमंवर्षद्भिःकिरद्भिः ॥ उन्नादैर्ध्वनद्भिः ॥ धूमवर्मभिरितिपाठेस्पष्टम् ॥ उन्मा
दैरितिपाठेउत्कृष्टोमादोहर्षोग्लेपनंचयेषांतैः ॥ लेलिहानाइवचलंतउग्राहेतयःखड्गाज्वालाश्चयेषाम् ॥ ९ ॥ परिवारैःशत्रुसैनिकैः ॥ कुरर्योमृग्यःपक्षिण्यश्च ॥ धीवरैर्लुब्धकैः
॥ १० ॥ आपत्विपत् ॥ तामलमत्यर्थमुद्धर्तुंनिवारयितुम् ॥ ११ ॥ असौराजाइतिवाक्यमाकर्ण्यदेव्यौविलोक्यउवाचेतिशेषः ॥ हेदेव्यौअहंयुद्धाययामिगच्छामिक्षम्यता ॥८०॥
म् ॥ आज्ञांविनैवांतरालेनिर्गमनापराधः ॥ युष्मत्पादाब्जषट्पदीतियुवाभ्यांरक्षणीयेत्याशयः ॥ १२ ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीलाप्रबुद्धलीला ॥ १४ ॥ सेयंभूत्वेतिशेषः ॥ याअहंसाइयंकथम् ॥ याप्रथमवयस्काअभवंसातथैवस्थिताकथम् ॥ स्वस्याअन्यत्वायोगादतीतावस्थायाश्चस्थित्यसंभवा दितिभावः ॥ १५ ॥ किंचमंत्र्यादिष्वपिभेदप्रत्यभिज्ञेविरुद्धेइत्याह ॥ मंत्रिप्रभृतयइति ॥ १६ ॥ प्रचेतनाःसचेतनाःकिम् ॥ १७ ॥ चितिशक्तीनामतर्क्यत्वात्तुल्यकर्मोद्बोधिता नांतुल्यएवाविर्भावःक्वचिद्भवतीतिदेवीदृष्टिसृष्टिवादमालंब्यसमाधत्ते ॥ यथेति ॥ चेत्यार्थतांअध्यासेनचेत्याकारताम्॥ यथाचित्तंमनःस्वप्नादौचित्तानुभूतजाग्रत्पदार्थाकारतामि त्यर्थः ॥ १८ ॥ यादृक्यदाकारोऽर्थोयस्मिंस्तथाविधंसंस्कारात्मकंजगद्रूपंतत्रचित्तेचितिचअस्तितादृगेवोदेति ॥ भोजकादृष्टोद्बोधितामायासंवलितचिच्छक्तिरघटितमपिघ टयितुंसमर्थेत्यर्थः ॥ एवंचदेशकालाल्पतावैपुल्यविरोधोपिपरिहृतइत्याशयेनाह ॥ नेति ॥ यदिपदार्थजंस्यात्तर्हितत्स्वभावविरुद्धंनघटेतनतुतथेतिभावः ॥ १९ ॥ चैतन्येअ

लीलालीलांददर्शाथस्वाकारसदृशाकृतिम्॥ प्रतिबिंबमिवायातामादर्शेचारुदर्शनाम्॥ १४॥ ॥प्रबुद्धलीलोवाच॥ ॥किमिदंदेवि हेब्रूहिकस्मादियमहंस्थिता॥ यासाभवमहंपूर्वंकथंसेयमहंस्थिता ॥ १५ ॥ मंत्रिप्रभृतयःपौरायोधाःसबलवाहनाः॥ सर्वएवतएवेमे स्थितास्तत्रतथैवते ॥ १६ ॥ तत्रापीहचहेदेविसर्वेकथमवस्थिताः ॥ बहिरंतश्चमुकुरेइवैतेकिंप्रचेतनाः ॥ १७ ॥ ॥श्रीदेव्युवाच॥ यथाज्ञमिरुदेत्यंतस्तथानुभवतिक्षणात्॥ चितिश्चेत्यार्थतामेतिचित्तंचित्तार्थतामिव ॥ १८ ॥ यादृगर्थंजगद्रूपंतत्रैवोदेतितत्क्षणात् ॥ नदेशकालदीर्घत्वंनवैचित्र्यंपदार्थजम् ॥ १९॥ बाह्यमाभ्यंतरंभातिस्वप्नार्थोऽत्रनिदर्शनम्॥ यदंतःस्वप्नसंकल्पपुरंचकचनंचितेः॥ २०॥ तदेतद्बाह्यनाम्नैवस्वभ्यासात्सत्स्फुटंस्थितम्॥ यादृग्भावोमृतोभर्त्तातवतस्मिंस्तदापुरे॥ २१॥ तादृग्भावस्तमेवार्थंतत्रैवसमुपागतः॥ अ न्यएवत्वमीभूतास्तेभ्यस्तास्तादृशाअपि॥ २२॥ सद्रूपाएवचैतस्यस्वप्नसंकल्पसैन्यवत् ॥ अविसंवादिसर्वार्थरूपंयदनुभूयते॥ २३॥ तस्यतावद्वदकथंकीदृशीवापिसत्यता॥ अथवोत्तरकालेतुभंगुरत्वादवस्तुतत् ॥ २४ ॥ ईदृक्कसर्वमेवेदंतत्रकानास्तिताधिका॥ स्वप्नेजा ग्रदसद्रूपास्वप्नोजाग्रत्यसन्मयः॥ २५॥

ध्यस्तत्वात्तदाभ्यंतरंजगद्बाह्यंबहिर्भवमिवभाति ॥ २० ॥ स्वभ्यासाच्चिराभ्यासात्स्फुटंव्यक्तंसत्सत्यमिवस्थितम् ॥ यादृक्भावोवासनायस्यसतथाविधःसन्मृतः ॥ २१ ॥ स मुपागतःप्राप्तवान् ॥ समानकर्मवासनोद्बोधितत्वादाकारसाम्येप्येतेमंत्र्यादिजीवाननतएवकिंत्वन्येइत्याह॥ अन्यएवेति ॥ तएवेतिप्रत्यभिज्ञयाअभ्यस्ताःपुनःपुनरनुभूताअपिता दृशाअन्येएव ॥ २२ ॥ एतस्यराज्ञश्चित्सत्तयासद्रूपाएव ॥ एतावदेवस्वाप्नाज्जाग्रद्वस्तुनोवैलक्षण्यंयदविसंवादिसर्वपुरुषसाधारणार्थत्वंनैतावन्मात्रेणसत्यतासिद्धिरित्याह ॥ अ विसंवादीति ॥ चंद्रप्रादेशिकत्वेंद्रजालादावपिअविसंवादिसर्वार्थत्वदर्शनादितिभावः ॥ २३ ॥ उत्तरकालेबाध्यत्वात्स्वप्नस्यासत्यत्वंचेज्जाग्रत्यपिसमानंनाशबाधयोर्वस्तुनिवि शेषाभावादित्याशयेनाह ॥ अथवेति ॥ तत्स्वाप्नम् ॥ २४ ॥ अधिकाजाग्रदर्थेष्वित्यर्थः ॥ परस्परकालासत्वमप्यविशिष्टमित्याह ॥ स्वप्नेइति ॥ २५ ॥

१ मेब्रूहीतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशेपिबाधवत्परस्परकालासत्वंतुल्यमित्याह ॥ मृतिरिति ॥ नाशेअवयवानांविशरारुत्वाद्द्रव्यंविशरेन्नश्येत् बाधेत्वनुभूतेरनुभवबलाद्विशरेत् इतिनिमित्तभेदेपिनविशरणेविविशेषइत्यर्थः ॥ २६ ॥ प्राक्सत्यतोपपादिताइहत्वसत्यतेत्यनिर्वचनीयताद्वयोरपिसमेत्याह ॥ एवमिति ॥ एवंचसृष्टिकालेप्रलयकालेचाविशिष्टंसद्रूपंब्रह्मसिद्धमित्याह ॥ महाकल्पांतेति ॥ महाकल्पांतसंपत्तावपिअद्यापिअथानंतरमतीतानागतयुगभेदेपिकदाचनकदापियन्नास्तितत्स्वरूपेणनकिंतुतत्कल्पनाधिष्ठानंब्रह्मैवास्तिअतस्तदेवजगन्नतुभासमानमब्रह्मरूपंजगदित्यर्थः ॥ २७ ॥२८॥ नकचंत्येवेतिवक्तव्येइवकारःप्रपंचवत्तदभावस्यापिब्रह्मातिरिक्तस्यमिथ्यात्वद्योतनार्थः ॥ २९ ॥ मिथ्यैवत्वंअहंइत्येवंविभागात्मनि ॥ ३० ॥ सर्गभस्मनिदग्धपटभस्मप्रायेप्रपंचे ॥ ननुविषयबाधेपिभ्रांतिज्ञानस्वरूपाबाधात्तैरेवद्वैतंस्यात्तत्राह ॥ भ्रांतयश्चेति ॥ निर्विषयज्ञानानांपरस्परंब्रह्मतश्चभेदकाभा

मृतिर्जन्मन्यसद्रूपामृत्यांजन्माप्यसन्मयम्॥ विशरेद्विशरारुत्वादनुभूतेश्चराघव ॥२६॥ एवंनसन्नासदिदंभ्रांतिमात्रंविभासते॥ महाकल्पांतसंपत्तावप्यद्याथयुगेनघ॥२७॥ नकदाचनयन्नास्तितद्ब्रह्मैवास्तितज्जगत्॥तस्मिन्मध्येकचंतीमाभ्रांतयःसृष्टिनामिकाः॥२८॥ व्योम्निकेशोंड्रकानीवनकचंतीववस्तुतः॥ यथातरंगाजलधौतथेमाःसृष्टयःपरे॥ २९ ॥ उत्पत्त्योत्पन्यलीयंतेरजांसीवमहानिले॥ तस्माद्भ्रांतिमयाभासेमिथ्यात्वमहमात्मनि॥३०॥ मृगतृष्णाजलचयेकैवास्थासर्गभस्मनि॥ भ्रांतयश्चनतत्रान्यास्तास्तदेवपरंपदम्॥३१॥ घनेतमसियक्षाभास्तमएवनयक्षकः॥ तस्माज्जन्ममृतिर्मोहोव्यामोहत्वमिदंततम्॥ ३२॥ सर्वंतत्समहाकल्पंशांतौयदवशिष्यते॥नातःसत्यमिदंदृश्यंनचासत्यंकदाचन॥ ३३ ॥ द्वयमेवैतदथवाब्रह्मतत्रैवसंभवात्॥ आकाशेपरमाण्वंतर्द्रव्यादेरणुकेपिच॥३४॥ जीवाणुर्यत्रतत्रेदंजगद्वेत्तिनिजंवपुः॥ अग्निरौष्ण्यंयथावेत्तिनिजभावक्रमोदितम्॥ ३५॥ पश्यतीदंतथैवात्मास्वात्मभूतंविशुद्धचित्॥ यथासूर्योदयेगेहेभ्रमंतित्रसरेणवः॥ ३६ ॥

वाद्ब्रह्ममात्रत्वमित्यर्थः ॥ ३१ ॥ यक्षाभाःबालस्ययक्षभ्रांतयः ॥ व्यामोहोऽज्ञानंतस्यभावोव्यामोहत्वंतदीयावरणविक्षेपशक्तिस्तदेवेदंजगद्रूपंततम् ॥३२ ॥ महाकल्पोब्रह्मज्ञानेनसर्वबाधलक्षणोवैज्ञानिकःप्रलयस्तेनसहितंबाध्यमित्यर्थः ॥ अधिष्ठानब्रह्मसत्तैवदृश्यस्यसत्त्वासत्त्वादिसर्वपक्षान्निरुणद्धीत्याह ॥ शांतावित्यादिना ॥ सर्वशांतौयदवशिष्यतेब्रह्मअतोब्रह्मतःसत्यंनेत्यादिसंबंधः ॥ ३३ ॥ द्वयंसत्यासत्योभयरूपंतुनैव ॥ एकस्यविरुद्धोभयरूपत्वासंभवादित्यर्थः ॥ तत्रत्रिष्वपिविरुद्धेषुकल्पेष्वविरोधेनसंभवाद्ब्रह्मैवेतिकल्पःश्रेयानित्याह ॥ ब्रह्मेति ॥ कल्पनामात्रत्वंप्रपंचस्यसर्वत्रसंभवतीत्याह ॥ आकाशेइति ॥ द्रव्यगुणादेरणुकेअल्पतरेप्यंतर्भागे ॥ ३४ ॥ वासनाबलेनात्मन्यनात्माध्यासे दृष्टांतमाह ॥ अग्निरिति ॥ पूर्वमनग्निरेवोपासकोहमेवाग्निरित्युपासनात्मकनिजभावनाक्रमेणोदितंफलभावेनाविर्भूतमौष्ण्यंयथावेत्तितद्वदित्यर्थः ॥ ३५ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmaṇḍu

CC-0. In Public Domain. Digitization by eGangotri

स्पंदआमोदश्चवायौयथास्थितः ॥ शून्यंशून्यत्वम् ॥३७॥ पिंडग्रहःस्थौल्यम् ॥ भावाभावौआविर्भावतिरोभावौ ॥ ग्रहउपादानम् ॥ उत्सर्गस्त्यागः ॥ क्रियामात्रोपलक्षणमेतत् ॥३८॥ भागाःकल्पितविभागाः ॥ भवतेतिपुंस्त्वाद्रामंप्रतिवसिष्ठोक्तिः ॥ तेचसाकारस्यतस्यविश्वस्यनिराकारत्वाववबोधायतादृशस्यात्मनोऽनन्याअनवयवाइवविज्ञेयाः ॥ इवकारःसावयवतावन्निरवयवतायाअपिमिथ्यात्वद्योतनार्थः ॥३९॥ एवमनवयवत्वेननिजभावनाक्रमेणपारमार्थिकरूपेणाविर्भूतंयथास्थितमेवविश्वशब्दार्थैरिक्तंशून्यंनभविष्यति ॥ विश्वशब्दस्यपूर्णार्थत्वपर्यवसानात्पूर्णस्यचरिक्तत्वायोगादितिभावः ॥ ४० ॥ तत्रहेतुरनन्यदिति ॥ तर्हियत्सावयवंविश्वंभासतेतत्किंतत्राह ॥ नतदिति ॥ अनिर्वचनी

तथेमेपरमाकाशेब्रह्मांडत्रसरेणवः ॥ यथावायौस्थितःस्पंदआमोदःशून्यमंबरे ॥ ३७ ॥ पिंडग्रहविनिर्मुक्तंतथाविश्वंस्थितंपरे ॥ भावाभावग्रहोत्सर्गस्थूलसूक्ष्मचराचराः ॥ ३८ ॥ विवर्जितस्यावयवैर्भागाब्रह्मणईदृशाः ॥ साकारस्यावबोधायविज्ञेयाभवताधुना ॥ ३९ ॥ अनन्याःस्वात्मनस्तस्यतेनानवयवाइव ॥ यथास्थितमिदंविश्वंनिजभावक्रमोदितम् ॥ ४० ॥ रिक्तंनविश्वशब्दार्थैरनन्यद्ब्रह्मणिस्थितम् ॥ नतत्सत्यंनचासत्यंरज्जुसर्पभ्रमोयथा ॥ ४१ ॥ मिथ्यानुभूतितःसत्यमसत्यंसत्परीक्षितम् ॥ परमंकारणंचित्त्वाज्जीवत्वमितिचेत्यलम् ॥ ४२ ॥ ततस्तथैवानुभवाज्जीवत्वंविंदतिस्फुटम् ॥ सत्यंभवत्वसत्यंवाखेविभातमिदंजगत् ॥ ४३ ॥ रंजयत्येवजीवाणुःस्वेच्छाभिरनुभूतिभिः ॥ अनुभूयंतएवाशुकाश्चित्पूर्वानुभूतितः ॥ ४४ ॥ अपूर्वानुभवाःकाश्चित्समाश्चैवासमास्तथा ॥ क्वचित्कदाचित्ताएवक्वचिदर्धसमाअपि ॥ ४५ ॥ कचंत्यसत्याःसत्याभाजीवाकाशेनुभूतयः ॥ तत्कुलास्तत्समाचारास्तज्जन्मानस्तदीहिताः ॥ ४६ ॥ तएवमंत्रिणःपौराःप्रतिभानेभवंतिच ॥ तेचैवात्मन्यलंसत्यादेशकालेहितैःसमाः ॥ ४७ ॥

यमेवेत्यर्थः ॥ ४१ ॥ तत्रहेतुमाह ॥ मिथ्येति ॥ नहिभ्रांतिज्ञानानुभूतंसत्यंभवतिनवावस्तुतत्त्वपरीक्षणात्मकंतद्बाधकज्ञानंसत्यमपह्नुतेयेनासत्यंस्यादितिभावः ॥ चित्त्वान्मायापिहितस्वरूपचित्त्वात् ॥ ४२ ॥ अनुभवाच्चिरसंवेदनदृढानुभवात् ॥ संसारस्यचजैवीभोगेच्छाहेतुर्विषयरंजनैवोपयुज्यतेनसत्यत्वमसत्यत्वंवेत्याह ॥ सत्यमिति ॥ ४३ ॥ औपोद्घातिकमुक्त्वाप्रस्तुतप्रश्नसमाधानमाह ॥ अनुभूयंतइत्यादिना ॥ पूर्वानुभूतितःपूर्वानुभूत्यासमाअसमाश्चकेचिदपूर्वानुभवाअनुभूयंतइत्यन्वयः ॥४४॥ सर्वतद्वासनोद्भवेभेदाग्रहात्ताएवेतिकचंति ॥ अर्द्धवासनोद्भवेअर्द्धसमाअपि ॥ ४५ ॥ तयोःप्रथमोयंप्रकारइत्याह ॥ तत्कुलाइत्यादिना ॥ ४६ ॥ तेषामधिष्ठानदृष्ट्यापरमार्थतःप्राक्तनाभेदः अध्यस्तदृष्ट्यातुसाम्यंपर्यवस्यतीत्याह ॥ तेचेति ॥ आत्मनिपारमार्थिकस्वरूपेअलमत्यंतंतएवेतिसत्याःस्वस्वदेशकालेहितदृष्ट्यातुसमास्तुल्याः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्रैवमेवचैतन्यस्थितिरित्याह ॥ सर्वगेति ॥ नन्वीश्वरस्यप्रतिभानुसार्यर्थनिर्मातृत्वंश्रुतंजीवस्यत्वर्थानुसार्येवप्रतिभोदयः ॥ अन्यथामानोरथिकस्यापिसत्यत्वसाधारण्ययो
रापत्तेस्तत्कथंराजप्रतिभामात्रादर्थानांसिद्धिरितरजीवसाधारणव्यवहारयोग्यताचेत्याशंक्याह ॥ यथेति ॥ राजात्मनियथायादृशीसन्मयीसर्वसाधारणसत्यार्थाप्रतिभाउदे
तितथातदग्रगाततःपूर्वभाविनीसाधारणभोजकादृष्टवशात्सच्छब्दवाच्येअंबरेअव्याकृताकाशरूपेईश्वरेसत्यसंकल्परूपाप्रतिभाउदेत्येव तथाचनोक्तदोषइतिभावः ॥ ४८ ॥
॥ ४९ ॥ इतिउक्तदिशाआभाति ॥ सर्वत्रेयमेवरीतिरित्याह ॥ सर्वगेइति ॥ ५० ॥ अंतस्थाअंतर्यामीश्वरप्रतिभासाबहिश्चकुरुते ॥ तथाचबाह्यत्वेनसाधारणदृश्यत्वोपपत्ति
रितिभावः ॥ ५१ ॥ अंबरमाकाशंतदंतर्गतंभुवनंतदंतर्गताधरातदंतर्गतात्वंअहंराजाचेतिसर्वंविभातमात्रंचिन्मात्रस्वभावंअहंप्रत्ययूपमेव ॥ एवमेवान्येतत्त्वज्ञाःसर्वंचिद्व्योमल

सर्वगात्मस्वरूपायाःप्रतिभायाइतिस्थितिः॥ यथाराजात्मनिव्योम्निप्रतिभोदेतिसन्मयी॥ ४८ ॥ तथातदग्रगोदेतिसत्येवप्रतिभांबरे॥
त्वद्धीलात्वत्समाचारात्वत्कुलात्वद्वपुर्मयी ॥ ४९ ॥ इतिलीलेयमाभातिप्रतिभाप्रतिबिंबजा ॥ सर्वगेसंविदादर्शेप्रतिभाप्रतिबिंबति
॥ ५० ॥ यादृशीयत्रसातत्रतथोदेतिनिरंतरम् ॥ जीवाकाशस्यग्रंतस्थाप्रतिभाकुरुतेस्वयम् ॥ साबहिश्चचिदादर्शेप्रतिबिंबादियंस्थि
ता॥५१॥एषात्वमंबरमहंभुवनंधराचराजेतिसर्वमहमेवविभातमात्रम्॥ चिद्व्योमबिल्वजठरंविदुरंगविद्धित्वंतेनशांतममलास्वयथा
स्थितेह॥ ५२॥ ॥इ०वा०वा०दे०मो०उ०लीलोपाख्यानेअग्निदाहरात्रियुद्धेजगद्भ्रमवर्णनंनामचतुश्चत्वारिंशःसर्गः॥४४॥ ॥७॥
॥श्रीसरस्वत्युवाच॥ ॥विदूरथस्तेभर्त्तैषतनुंत्यक्त्वारणांगणे॥ तदेवांतःपुरंप्राप्यतादृगात्माभविष्यति॥१॥ ॥श्रीवसिष्ठउवाच॥ ॥इ
त्याकर्ण्यवचोदेव्यालीलासातत्पुरास्पदा ॥पुरःप्रह्वास्थितोवाचवचनंविहितांजलिः॥ २॥ ॥द्वितीयलीलोवाच॥ ॥ देवीभगवतीज्ञ
प्तिर्नित्यमेवार्चितामया॥ स्वप्नेसंदर्शनंदेविसाददातिनिशासुमे॥३॥ सायादृश्येवदेवेशितादृश्येवत्वमंबिके॥ तन्मेकृपणकारुण्याद्वरंदे
हिवरानने॥४॥ ॥श्रीवसिष्ठउवाच॥ ॥ इत्युक्तासातदाज्ञप्तिःस्मृत्वातद्भक्तिभावनम्॥ इदंप्रसन्नाप्रोवाचतांलीलांतत्पुरास्पदाम्॥५॥
॥श्रीदेव्युवाच॥ ॥अनन्ययाभावनयायावज्जीवमजीर्णया ॥ परितुष्टास्मितेवत्सेगृहाणाभिमतंवरम् ॥६॥ ॥तद्देशलीलोवाच॥
रणाद्देहंपरित्यज्ययत्रतिष्ठतिमेपतिः॥ अनेनैवशरीरेणतत्रस्यामेतदंगना॥७॥

क्षणबिल्वस्यजठरंतत्सत्तामात्रंबीजगर्भंविदुः ॥ हेअंगलीलेत्वम
पितथाविद्धि ॥ तेनयथास्थितास्वभावस्थाशांतंनिर्विक्षेपमास्व ॥ ५२ ॥ ॥ इतिश्रीवासिष्ठमहारा० तात्पर्यप्रकाशेउत्पत्तिप्रकरणेचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥ ॥ ७ ॥
वरोद्वितीयलीलायाःपद्मप्राप्तिरिहोच्यते ॥ जीवानांफललाभश्चस्वसंकल्पानुसारतः ॥ १ ॥ तादृगात्मापद्मभूपालात्मा ॥ १ ॥ प्रह्वाभक्तिनम्रापुरःस्थिता ॥ विहितांजलिःकृ
तांजलिः ॥ २ ॥ ३ ॥ त्वंतादृश्येवदृश्यसेअतःसैवत्वमित्याशयः ॥ ४ ॥ भक्त्याभावनंचिंतनंपूजनंच ॥ ५ ॥ ६ ॥ तिष्ठतिस्थास्यति ॥ वर्त्तमानसामीप्येवर्त्तमानवत् ॥ ७ ॥

१ स्वामित्यपिपा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविघ्नमितिकर्मसांगतामाह ॥ अनन्यभावयाअसाधारण्या ॥८॥ फुल्लायांसंतोषेणविकासितायांसत्याम् ॥ तस्याःस्थूलशरीरेणभर्तृलोकप्राप्तिःस्वस्यतुदेहंत्यक्त्वेतिकुतोविशेषइतिसंदेहेनलुलितोलोलःकृतआशयोयस्याःसा ॥ ९ ॥ तत्रादौसंदेहबीजमाह ॥ येइति ॥ १० ॥ तत्तस्मात्सत्यकामताबलात् ॥ ११ ॥ स्वस्यनस्वतःकामनास्तिपूर्णकामत्वात् प्राणिकर्मानुसारिणीतुसातद्व्यवस्थयैवव्यवस्थितेत्याशयेनज्ञप्तिःसमाधत्ते ॥ नकिंचिदित्यादिना ॥ १२ ॥ हितंप्राण्यभिलषितंभाविशुभंरटेवरदानेनप्रकाशयामि ॥ फलोत्पादनेचजीवानांप्रत्येकंप्राक्तनकामकर्मवासनावच्छिन्नचिदात्मकजीवशक्तिस्वरूपिणीतत्तत्कार्यबीजभूतामायासंवलितचिच्छक्तिरस्ति ॥ १३ ॥ अतस्तदनुसारेणैवाहंफलप्र

श्रीदेव्युवाच॥ ॥एवमस्तुत्वयाविघ्नंपूजितास्मिसुतेचिरम्॥अनन्यभावयाभूरिपुष्पधूपसपर्यया॥८॥ ॥श्रीवसिष्ठउवाच॥ ॥अथतद्देशलीलायांफुल्लायांतद्वरोदयात्॥ पूर्वलीलाब्रवीद्देवींसंदेहलुलिताशया॥ ९॥ ॥पूर्वलीलोवाच॥ ॥येसत्यकामाःसंत्येवंसंकल्पाब्रह्मरूपिणः॥ त्वादृशाःसर्वमेवाशुतेषांसिद्ध्यत्यभीप्सितम्॥१०॥ तत्तेनैवशरीरेणकिमर्थंनाहमीश्वरि॥ लोकांतरमिदंनीतातंगिरिग्रामकंवद॥११॥ ॥श्रीदेव्युवाच॥ ॥नकिंचित्कस्यचिदहंकरोमिवरवर्णिनि॥सर्वंसंपादयत्याशुस्वयंजीवःस्वमीहितम्॥१२॥ अहंहितंरटेज्ञप्तिःसंविन्मात्राधिदेवता॥ प्रत्येकमस्तिचिच्छक्तिर्जीवशक्तिस्वरूपिणी॥१३॥ जीवस्योदेतियाशक्तिर्यस्ययस्ययथायथा॥ भातितत्फलदानित्यंतस्यतस्यतथातथा॥१४॥ मांसमाराधयंत्यास्तुजीवशक्तिस्तवोदिता॥ तदाभवद्यदीहस्यांमुक्तास्मीतिचिरंतदा॥१५॥ तेनतेनप्रकारेणत्वंमयासंप्रबोधिता॥ तयायुक्त्यामलंभावंनीतासिवरवर्णिनी॥ १६॥ अनयैवंभावनयाबोधितासिचिरंतदा ॥ तमेवार्थंप्राप्तवतीसदास्वचितिशक्तितः॥ १७॥ यस्ययस्ययथोदेतिस्वचित्प्रयतनंचिरम्॥ फलंददातिकालेनतस्यतस्यतथातथा ॥ १८ ॥ तपोवादेवतावापिभूत्वास्वैवचिदन्यथा॥ फलंददात्यथस्वैरंनभःफलनिपातवत्॥१९॥ स्वसंविद्यतनादन्यन्नकिंचिच्चकदाचन॥ फलंददातितेनाशुयथेच्छसितथाकुरु॥२०॥ चिद्भावएवननुसर्गगतोंतरात्मायच्चेततिप्रयततेचतदेतितच्छ्रीः॥ रम्यंत्वरम्यमथवेतिविचारयस्वयत्पावनंतदवबुध्यतदंतरास्व॥२१॥ ॥इ०वा०वा०दे०मो०उ०ली०सत्यकामसत्यसंकल्पास्तितानामपंचचत्वारिंशःसर्गः॥४५॥

दत्याह ॥ जीवस्येति ॥ भातिकर्मानुष्ठानहेतुकामनाविषयतयास्फुरति ॥ १४ ॥ अस्मीत्यहंशब्दपर्यायंतिङंतप्रतिरूपकमव्ययम् ॥ अहंमुक्तास्यांइतिभाविकर्मतत्फलसूक्ष्मावस्थागर्भकामनावच्छिन्नचिद्रूपाजीवशक्तिः ॥ १५ ॥ बोधनिरस्ताज्ञानावरणनिर्मलात्मावस्थितिलक्षणममलंभावम् ॥ १६ ॥ मुक्तास्यामित्येवंभावनयाचिरंयुक्तात्वमनयाप्रागर्शितयुक्त्याबोधितासि ॥ तंभावितमेवार्थम् ॥१७॥ स्वचिदवच्छिन्नंप्रयतनंपुरुषप्रयत्नः ॥ १८ ॥ नभःफलनिपातवन्मिथ्याभूतमित्यर्थः ॥ १९ ॥ यथायादृशंफलमिच्छसितथातदनुरूपंकर्मकुरु ॥ २० ॥ चिद्भावश्चित्सत्ता ॥ नन्विितिनिश्चये ॥ तदाप्राक्कालेरम्यंविहितमथवाअरम्यंनिषिद्धंयत्कर्मचेततिप्रयततेचउत्तरकालंतस्यैवफलरूपाश्रीःएतिउदेतिइतिविचारयस्व विचारेणचयत्पावनंपदंतदवबुध्यतदंतःआस्वतिष्ठ ॥ २१ ॥ ॥ इतिश्रीवासिष्ठमहा०तात्पर्यप्रकाशेउत्प०पंचचत्वारिंशःसर्गः ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदूरथस्ययुद्धार्थंनिर्गमःसैन्यसंभ्रमैः॥ रणभूमिप्रवेशेनयुद्धारंभश्चवर्ण्यते॥१॥१॥ ऋक्षौघेणनक्षत्रगणेन॥ २॥ वर्मायुधादिनासन्नद्धसर्वांवयवः॥ लग्नानिस्वस्वोचितस्थानेष्वासक्तानिहारविभूषणानियस्य॥ ३॥ समादिशन्तत्तदुचितकार्येष्वाज्ञापयन्॥ मंत्रिभिरुक्तांमंडलस्यव्यूहरचनाविशेषस्यसंस्थितिंजनपदव्यवस्थांवा॥ ४॥ कूटस्यमेर्वादिशिखरस्याकारेणसमआकारोयस्य॥ द्युविमानंस्वर्गेप्रसिद्धंविमानम्॥ ५॥ चक्रेषुभित्तिषुचपरिप्रोतानिखाताःप्रकचंतःकांचनांकुराःस्वर्णकीलायत्र॥ विक्रमकूबरंदीर्घाग्रभागम्॥ ६॥ प्रशस्तैरुत्तमजातिजैः॥ सुरानिवांतरिक्षेप्रवहद्भिरित्यतिशयोक्तिः॥ ७॥ पूर्वकायगतिक्रमैःपश्चार्द्धंप्रोत्प्लद्भिर्वहद्भिरिव॥ छांदसोविकरणव्यत्ययः॥ ८॥

श्रीरामउवाच॥ ॥एवंसंकथयंतीषुतासुतस्मिन्गृहोदरे॥ विदूरथःकिमकरोन्निर्गत्यकुपितोगृहात्॥ १॥ ॥श्रीवसिष्ठउवाच॥ ॥विदूरथःस्वसदनान्निर्गतःपरिवारितः॥ परिवारेणमहताऋक्षौघेणवचंद्रमाः॥ २॥ सन्नद्धसर्वांवयवोलग्नहारविभूषणः॥ महाजयजयारावैःसुरेंद्रइवनिर्गतः॥ ३॥ समादिशन्योधगणंश्रृण्वन्मंडलसंस्थितिम्॥ आलोकयन्वीरगणानारुरोहनृपोरथम्॥ ४॥ कूटाकारसमाकारंमुक्तामाणिक्यमंडितम्॥ पताकापंचभिर्व्याप्तंद्युविमानमिवोत्तमम्॥ ५॥ चक्रभित्तिपरिप्रोतप्रकचत्कांचनांकुरम्॥ मुक्ताजालरणत्कारचारुविक्रमकूबरम्॥ ६॥ सुग्रीवैर्लक्षणोपेतैःप्रशस्तैःप्रचलैःकृशैः॥ जवोड्डयनवेगेनप्रवहद्भिःसुरानिव॥ ७॥ वायुंजवेनसहसाअसहद्भिर्गतिक्रमैः॥ प्रोत्प्लद्भिरिवपश्चार्द्धमापिबद्भिरिवांबरम्॥ ८॥ योजितैरिवसंपूर्णैश्चंद्रैश्चामरदीप्तिभिः॥ अश्वैरष्टभिराबद्धमाशापूरकहेषितैः॥ ९॥ अथोदपतदुद्दामनागाभ्ररवनिर्भरः॥ शैलभित्तिप्रतिध्वानदारुणोदुंदुभिध्वनिः॥ १०॥ मत्तसैनिकनिर्मुक्तैर्व्यासंकलकलारवैः॥ किंकिणीजालनिर्ध्वानैर्हेतिसंघट्टघट्टितैः॥ ११॥ धनुश्चटचटाशब्दैःशरसीत्कारगायनैः॥ परस्परांगनिष्पिष्टकवचौघझणज्झणैः॥ १२॥ ज्वलदग्निटणत्कारैरार्त्तिमत्क्रंदनारवैः॥ परस्परभटाह्वानैर्बंदिविक्षुब्धरोदनैः॥ १३॥ शिलाघनीकृताशेषब्रह्मांडकुहरोध्वनिः॥ हस्तग्राह्योभवद्भीमोदशाशाकुंजपूरकः॥ १४॥ अथोदपतदादित्यपथपीवररोधकम्॥ रजोनिभेनभूपीठमंबरोड्डयनोन्मुखम्॥ १५॥ गर्भवासमिवापन्नंतेनासीत्तन्महापुरम्॥ मूढत्वंयौवनेनेवघनतामाययौतमः॥ १६॥

चामरदीप्तिभिःसंपूर्णैश्चंद्रैर्योजितैरिवेतिसर्वत्रोत्प्रेक्षा॥ ९॥ नागागजास्तल्लक्षणानामभ्राणांरवेणनिर्भरोतिशयितः॥ शैलानांभित्तिषुवप्रेषुप्रतिध्वानेनदारुणोभीरुभीषणः॥ १०॥ हेतीनामायुधानांसंघट्टेनसंघट्टनशब्देनघट्टितैर्निर्बिडितैः॥ ११॥ १२॥ बंदिभिर्वीरोत्साहायाधिक्षेपेणविक्षुब्धानामयुद्धक्षतपीडितानांकातराणांरोदनैः॥ १३॥ स्वपूरणेनशिलावद्घनीकृतंनिरंतरीकृतमशेषंब्रह्मांडकुहरंयेन॥ घनत्वादेवहस्तग्राह्यइत्युत्प्रेक्षा॥१४॥ आदित्यपथस्यपीवरंसत्रोधंकामयतेइतिरोधकम्॥ कमेःक्विप्॥ रजोनिभेनवेषेणभूपीठमेवअंबरोड्डयनोन्मुखंभूत्वाउदतिष्ठदित्युत्प्रेक्षा॥१५॥ तेनरजसा॥ मूढत्वंस्वाभाविकमज्ञानम्॥ रजोधिकेनयौवनेनेव॥ तमोंधकारोघनतांनिबिडताम्॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलंवीर्यंआययुःप्रापुः ॥ १७ ॥ देव्याज्ञस्यादत्तामहादृशोदिव्यदृष्टयोययोस्ते ॥ साविदूरथस्यकुमारिकाकन्याचदेवीदत्तमहादृगितिविपरिणामेनसंबद्ध्यते ॥ १८ ॥ अथविदूरथनिर्गमनानंतरंनगरलुंटाकानांसैंधवानांहेतीनामिषूणांचप्रोद्यंतःकटकटारवाःप्रशेमुः ॥ प्रलयेएकार्णवपयःपूरैर्वालवावडवावह्नयइव ॥ लडयोरभेदात् ॥ १९ ॥ सेनांसमाकर्षन्सविदूरथःसैंधवानांबलस्यस्वबलस्यचअंतरंतारतम्यंनआज्ञायतअविज्ञायैवएकंसांवर्त्तमर्णवंमेरुरिवविवेशपरबलमितिशेषः ॥ २० ॥ गुणध्वानंज्यासिंजितम् ॥ रचिताःस्वायुधांशुमयाअंभोदामेघायाभिस्ताःपरेषांशत्रूणांपरंपराश्च्येरुः ॥ २१ ॥ आत्तासवोगृहीतपरप्राणाअतएवपापेनेवमलिनाःश्यामाः ॥ प्रसस्रुःप्रसृताः ॥ २२ ॥ २३ ॥

प्रययुःक्वापिदीपौघादिवसेनेवतारकाः॥ आययुर्बलमालोलानैशभूतपरंपराः॥ १७॥ ददृशुस्तन्महायुद्धंद्वेलीलेसाकुमारिका ॥ प्रस्फुटद्धृदयेनेवदेवीदत्तमहादृशौ॥ १८॥ प्रशेमुरथहेतीषुप्रोद्यत्कटकटारवाः॥ एकार्णवपयःपूरैर्वालवाडववह्नयः॥ १९॥ शनैःसेनांसमाकर्षन्नाज्ञायतबलांतरम्॥ विवेशपक्षप्रोड्डीनोमेरुरेकमिवार्णवम्॥ २०॥ अथोदभूद्गुणध्वानंचटच्चटदितिस्फुटम् ॥ रचितांशुमयांभोदाश्च्येरुःपरपरंपराः॥ २१ ॥ ययुरंबरमाश्रित्यनानाहेतिविहंगमाः॥ प्रसस्रुरलमात्तासुमलिनाःशस्त्रदीप्तयः॥ २२॥ जज्वलुःशस्त्रसंघट्टज्वलनाउल्मुकाग्निवत्॥ जगर्ज्जुःशरधारौघान्वर्षंतोवीरवारिदाः ॥ २३ ॥ विविशुःक्रकचक्रूरावीरांगेषुचहेतयः॥ पेतुःपटपटारावंहेतिनिष्पिष्टयोंबरे॥ २४ ॥जग्मुःशमंतमांस्याशुशस्त्रकानलदीपकैः॥ बभूवुरखिलासेनानवनाराचरोमशाः ॥ २५॥ उत्तस्थुर्यमयात्रायांकबंधनटपंक्तयः॥ जगुरुच्चैरणोद्रेकंपिशाच्योरणदारिकाः॥ २६॥ उदगुर्दंतसंघट्टटंकारादंतिनांबलात् ॥ ऊर्द्धुःक्षेपणपाषाणमहानद्योनभस्तले॥ २७॥ पेतुःशवानिवातास्तसंशुष्कवनपर्णवत् ॥ निर्ययुर्लोहितानद्योरणाद्रेर्मृतिवर्षिणः ॥ २८ ॥ प्रशेमुःपांसवोरक्तैस्तमांस्यायुधवह्निभिः॥ युद्धैकध्यानतःशब्दाभयानिमृतिनिश्चयैः॥ २९॥ अभवत्केवलंयुद्धमपशब्दमसंभ्रमम्॥ अनाकुलांबुवाहाभंखड्गवीचिसटांकृतम्॥ ३०॥

हेतिनिष्पिष्टयःखड्गप्रहाराएवपटपटारावात्मनाअंबरेपेतुरुत्पेतुः ॥ २४ ॥२५॥ यमयात्रायांयमाराधनयात्रोत्सवेइतियावत् ॥ नटास्तदनुरूपारणोत्सवालंकारभूतादारिकाबालिकास्तरुण्यइतियावत् ॥२६॥ उत्ऊर्ध्वमगुः ॥२७॥ नितरांवातेनास्तैःक्षिप्तैःसंशुष्कैर्वनपर्णैस्तुल्यंतद्वन्निपेतुः ॥ मृतिःप्राणिमरणंतेनवर्षिणोदृष्टिप्लावितादृणलक्षणादद्रेःसकाशात् ॥२८॥ प्रशेमुरितिसर्वत्रसंबध्यते ॥ शब्दावाक्प्रसराः ॥२९॥ अपशब्दमपगतशब्दम् ॥ वाय्वाद्यनाकुलवर्षदंबुवाहाभम् ॥ वीचयोत्रविद्युत्तरंगास्तैःसटांकृतम् ॥ ३०॥

१ विदूरथइत्यस्यविवेशेत्यनेनान्वयः ॥ अंतरमितिप्रथमांतम् ॥ स्वेनेतिशेषः ॥ स्वेनांतरंतारतम्यंनआज्ञायतेत्यन्वयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमितिमीत्युक्तशस्त्रातिरिक्तप्रहरणध्वन्यनुकरणंतद्वत्‌रणंयुद्धंदुस्तरंआसभीरूणामितिशेषः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठमहारा० उ० षट्चत्वारिंशःसर्गः ॥४६॥ ॥ ७ ॥
सिंधोःशत्रुजयेहेतुःसूर्योदयरणक्रमः ॥ युद्धंचद्वैरथंराज्ञोर्मंत्रास्त्रैरिहकीर्त्यते ॥ १ ॥ पुनःशब्देनवक्ष्यमाणप्रश्नोत्तरयोःप्रागुक्तयुक्तिभिरेवगतार्थत्वात्पुनरुक्तप्रायतयाउक्तार्थ
स्फुटीकारमात्रप्रयोजनतांदर्शयति ॥ १ ॥ विद्रुताःप्रधाविताबारणायस्मिंस्तथाविधेरणेनौआवयोर्भर्त्ताविदूरथः ॥ २ ॥ आराधिताजयकामनयेतिशेषः ॥ ३ ॥ अंतर्गतास
र्वप्राणिमनोंतर्गतासंवित्संवेदनमहमितिशेषः ॥ ४ ॥ प्रेरयतिकामकर्मवासनाबलात्फलदानोन्मुखीकरोति ॥ संपादनंचस्वस्यतत्तत्फलभावेनविवर्त्तएवेत्युक्तार्थस्फुटीकारेणा

खदखदरवसंवहच्छरौघंटकटकितारवसंपतद्भुशुंडि॥झणझणरवसंमिलन्महास्त्रंतिमितिमिवद्रणमासदुस्तरंतत्॥३१॥ ॥इत्यार्षेवा० वा० दे० मो० उत्पत्ति० लीलोपाख्यानेविदूरथनिर्याणेषट्चत्वारिंशःसर्गः॥४६॥ ॥श्रीवसिष्ठउवाच॥ ॥एतस्मिन्वर्त्तमानेतुघोरेसमरसंगमे॥ लीलाद्वयमुवाचेदंज्ञप्तिंभगवतींपुनः॥१॥ ॥लीलाद्वयमुवाच॥ ॥देविकस्मादकस्मान्नौभर्त्ताजयतिनोरणे॥ बदत्वय्यपितुष्टायामस्मिन्विद्रुतवारणे॥२॥ ॥श्रीसरस्वत्युवाच॥ ॥चिरमाराधितानेनविदूरथनृपारिणा॥अहंपुत्रिजयार्थेननविदूरथभूभृता॥३॥ तेनासावेवजयतिजीयतेचविदूरथः॥ज्ञप्तिरंतर्गतासंविदेतांमांयोयदायथा ॥ ४ ॥ प्रेरयत्याशुतत्तस्यतदासंपादयाम्यहम्॥ योयथाप्रेरयतिमांतस्यतिष्ठामितत्फला॥५॥ नस्वभावोन्यतांधत्तेवह्नेरौष्ण्यमिवैषमे॥ अनेनमुक्तएवस्यामहमित्यस्मिभाविता॥६॥ प्रतिभारूपिणीतेनबालेमुक्तोभविष्यति॥ एतदीयःस्वयंशत्रुःसिंधुर्नाममहीपतिः॥ ७ ॥ जयाम्यहंस्यांसंग्रामइत्यनेनास्मिपूजिता॥ तस्माद्विदूरथोदेहंतत्प्राप्यसहभार्यया॥ ८ ॥ त्वयानयाचकालेनबालेमुक्तोभविष्यति॥ एतदीयःस्वयंशत्रुःसिंधुर्नाममहीपतिः ॥ ९ ॥ हत्वैनंवसुधापीठेजयीराज्यंकरिष्यति॥ ॥श्रीवसिष्ठउवाच॥ ॥एवंदेव्यांवदंत्यांतुबलयोर्युध्यमानयोः॥ १० ॥ रविर्द्रष्टुमिवाश्चर्यमाजगामोदयाचलं॥ चेलुस्तिमिरसंघाताबलानीवारिरूपिणः॥ ११ ॥ अस्त्रजन्जीवसंघान्येसंध्यायांतारकाइव॥ शनैःप्रकटतांजग्मुर्विलाकाशाद्रिभूमयः॥ १२॥ भुवनंकज्जलांभोधेरिवोत्क्षिप्तमराजत॥ पेतुःकनकनिःस्यंदसुंदरारविरश्मयः॥ १३॥

ह ॥ यइति ॥ ५ ॥ अनेनविदूरथेन ॥ ६ ॥ बालेइत्यप्रबुद्धलीलासंबोधनम् ॥ प्रबुद्धलीलायाःप्रागेवसमाहितत्वात् ॥ ७॥ जयेनआमयतिपीडयतिशत्रूनितिजयामीअहंस्यां
इतिसंकल्पेन ॥ स्यामितिसामान्यस्यजयामीतिक्रियाविशेषेणपचतिभवतीतिवदभेदान्वयोवा ॥ ८ ॥ त्वयाअनयाचभार्ययासह ॥ ९ ॥ १० ॥ विदूरथस्यारिरूपिणोयेतिमि ॥८४॥
रसंघाताराश्चौरक्षःपिशाचादीन्जीवसंघान्बलानिस्वसैन्यानीवअस्त्रजन्आविश्वकुरित्युत्प्रेक्षा ॥ संध्यायांतारकाइवेतितस्योपमानम्॥११॥१२॥ उत्क्षिप्तंपर्यानीतम्॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणमहीतलंवीरबाहुभिर्भ्रांतभुजगमिवव्योमतुसूर्यस्यबाहुभिरिवकिरणैः ॥१४॥ उभयमुभयप्रभाभिःकीर्णकांचनमिवादृश्यतेत्यर्थः ॥ एवमग्रेप्युत्प्रेक्षयोभयवर्णनंबोध्यम् ॥ उत्पतद्भिःपतितैश्चकुंडलैःकीर्णरत्नौघंशिरोभिश्चदृष्टपंकजंसरइव ॥१५॥ खड्गैर्मृगजातिभिर्नीरध्रंनिबिडितमिव ॥ रक्ताभाभिःरक्तकांतिभिःस्थिरसंध्याढ्यमिव ॥ एवंसर्वत्र ॥१६॥ कंटैःकंकटैः ॥ १७ ॥ १८ ॥ १९ ॥ उदधिवद्घुंघुमहाशब्दैः ॥ उदधिशब्दस्यच्छांदसोधिलोपः ॥ सौवर्णनगरंत्रिपुरेप्रसिद्धंतदाकारम् ॥२०॥२१॥२२॥ इत्थंव्योमरणमही

शैलेषुवरवीरेषुरणेरक्तच्छटाइव ॥ अदृश्यतततोव्योमतथारणमहीतलम् ॥१४॥ बाहुभिर्भ्रांतभुजगंप्रभाभिःकीर्णकांचनम् ॥ कुंडलैः कीर्णरत्नौघंशिरोभिर्दृष्टपंकजम् ॥१५॥ आयुधैःखड्गनीरंध्रंशरैःशलभनिर्भरम् ॥ रक्ताभास्थिरसंध्याढ्यंससिद्धपुरुषंशवैः ॥१६॥ हारैः ससर्पनिर्मोकंकंकटैरिद्धंसुसंकुलम् ॥ लसद्धृतंपताकाभिरुरुभिःकृततोरणम् ॥ १७॥ हस्तैःपादैःपल्लवितंशरैःशरवणोपमम् ॥ शस्त्रांशुशाद्वलश्यामंशस्त्रपूरैःसकैतकम् ॥ १८ ॥ कीर्णमायुधमालाभिरुन्मत्तमिवभैरवम् ॥ फुल्लाशोकवनाकारंशस्त्रसंघट्टवह्निभिः ॥ १९ ॥ उदघुंघुमहाशब्दैर्विद्रवत्सिद्धनायकैः ॥ सौवर्णनगराकारंबालार्ककचितायुधैः ॥ २० ॥ प्रासासिशक्तिचक्रर्ष्टिमुद्गरारणितांबरम् ॥ वहद्रक्तनदीरंहःप्रोह्यमानशवोत्करम् ॥२१॥ भुशुंडीशक्तिकुंतासिशूलपाषाणसंकुलम् ॥ शूलशस्त्राहतिच्छन्नकबंधपतनान्वितम् ॥२२॥ कालतांडववेतालकुलारब्धहलारवम् ॥ शून्येरणांगणेदीप्तौपद्मसिंध्वोरथौचलौ ॥ २३ ॥ अदृश्येतांनभश्चिह्नौचंद्रसूर्यौदिवीवतौ ॥ चक्रशूलभुशुंड्यृष्टिप्रासायुधसमाकुलौ ॥२४॥ सहस्रेणसहस्रेणवीराणांपरिवारितौ ॥ विचरंतौयथाकामंमंडलैर्विततारवैः ॥२५॥ सचीत्कारमहाचक्रपिष्टानेकमृताभृतौ ॥ तरंतौरक्तसरितौमत्तवारणलीलया ॥२६॥ केशशैवलसंपन्नेचक्रचक्रजलेंदुके ॥ वहच्चक्राहतिक्षोभपातिताकुलवारणौ ॥ २७॥ मणिमुक्ताझणत्काररणत्कूबरकारवौ ॥ वाताहतपताकाग्रपटत्पटपटारवौ ॥ २८ ॥ अनुयातौमहावीरैर्भूरिभिर्भीरुसैनिकैः ॥ धारावमद्भिःकुंतानांशराणांधनुषामपि ॥ २९ ॥

तलेवर्णयित्वासिंधुविदूरथयोर्द्वैरथंयुद्धंरथादिद्वारावर्णयति ॥ शून्येत्यादिना ॥ शून्येपरिवारयोधानांपरस्परंयुद्धेनक्षयादितिभावः ॥ २३ ॥ नभसश्चिह्नौलक्षणभूतौदिविस्वर्गे ॥ २४ ॥ २५ ॥ रक्तसरितौअन्योन्यसंपादितेतरंतौ ॥ २६ ॥ चक्राण्येवचक्राश्चक्रवाकाजलप्रतिबिंबितेंदुकाश्चययोस्तथाविधेरक्तसरितौ ॥ २७ ॥ झणत्कारलक्षणारणतांरणप्रवृत्तानांवारथकूबरकाणामारवाध्वनयोययोस्तौ ॥ २८ ॥ भीरवःसैनिकायेषांतथाविधैर्भूरिभिर्महावीरैरनुयातौ ॥ धनुषांसंबंधिनांशराणांशक्त्यादीनामपिधारावमद्भिःक्षिपद्भिरितियावत् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रणभूमेःकुंडलेइवालंकारभूतेरथयोःपरिवर्त्तनरूपेमंडलेक्षणमावृत्त्य ॥ ३० ॥ आयोधनमायुधिर्युद्धंतस्मिन्नुभौव्यतिबभूवातेपरस्परक्रियाव्यत्यासेनबभूवतुः ॥ व्यतिशब्दो कर्मव्यतिहारद्योतनार्थौ ॥ कर्त्तरिकर्मव्यतिहारेइत्यात्मनेपदम् ॥ व्यतिह्वतक्रियांदर्शयति ॥ नाराचेति ॥ नाराचाएवजलधारानिकराः ॥ विक्षिप्यंतइतिविक्षेपाःप्रासकुंताद यस्तएवकरकावर्षोपलास्तत्पातनसहनप्रयुक्तध्वनौविषयेअब्धिजलदाविवपुनःपुनःपर्यायेणैकोजलदइववर्षअपरोब्धिरिवसेहे ॥ तत्रचध्वनिमात्रंवृत्तंनक्षतादिफलांतरमिति द्योतनायध्वनावित्युक्तिः ॥ ३१ ॥ ३२ ॥ तयोःशराणांवैचित्र्यंवर्णयति ॥ पाषाणेत्यादिना ॥ व्योम्निविस्तारिणःअभवन्निति सर्वत्रसंबद्ध्यते ॥ ३३ ॥ केचित्केचिदितिवी प्साविवक्षयाद्विरुक्तिः ॥ ३४ ॥ शिलीमुखाबाणाः ॥ तयोःसिंधुविदूरथयोःप्रमिलितमन्योन्यमेलनंप्रलयार्थविजृंभितयोर्विवृद्धयोःसिंध्वोःसमुद्रयोःसंभ्रमेणपरस्परमेलनवि

शक्तीनांप्रासशंकूनांचक्राणांकचतांरणे ॥ तत्रतौक्षणमावृत्त्यमंडलेभूमिकुंडले ॥ ३० ॥ उभौव्यतिबभूवातेसंमुखावायुधावुभौ ॥ नाराचधारानिकरविक्षेपकरकध्वनौ ॥ ३१ ॥ अन्योन्यमपिगर्जंतौमत्ताब्धिजलदाविव ॥ तयोःप्रहरतोर्बाणावसुधानरसिंहयोः ॥ ३२ ॥ पाषाणमुसलाकाराव्योमविस्तारिणोभवन् ॥ करवालमुखाःकेचिन्मुद्गराननकाःपरे ॥ ३३ ॥ शितचक्रमुखाःकेचित्केचित्परशुवक्त्रकाः ॥ केचिच्छक्तिमुखाःकेचित्केचिच्छूलशिलामुखाः ॥ त्रिशूलवदनाःकेचित्स्थूलाइवमहाशिलाः ॥ ३४ ॥ प्रलयपवनपातिताःशिलौघाइवनिपतंतिशिलीमुखास्तदास्म ॥ प्रमिलितमभवत्तयोस्तदानींप्रलयविजृंभितसिंधुसंभ्रमेण ॥ ३५ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०विदूरथसिंधुसमागमोनामसप्तचत्वारिंशःसर्गः ॥ ४७ ॥ ॥ ६ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ प्राप्यराजापुरःप्राप्तंसिंधुमुद्धुरकंधरम् ॥ मध्याह्नतपनांतेनकोपेनविततोभवत् ॥ १ ॥ धनुरास्फालयामासचिराराविततदिङ्मुखम् ॥ कल्पांतपवनास्फोटइवमेरुगिरेस्तटम् ॥ २ ॥ विससर्जोर्ज्जितोराजाप्रलयार्कःकरानिव ॥ तूणीररजनीबद्धाःशिलीमुखपरंपराः ॥ ३ ॥ एकएवविनिर्यातिगुणात्तस्यशिलीमुखः ॥ सहस्रंभवतिव्योम्निगच्छन्पततिलक्षशः ॥ ४ ॥ सिंधोरपितथैवासीच्छक्तिर्लाघवमेवच ॥ वरेणवरदस्यैवंविष्णोर्द्धानुष्कतातयोः ॥ ५ ॥ मुसलानामतेबाणामुसलाकृतयोंबरम् ॥ छादयामासुरुन्नादाःकल्पांताशनयोयथा ॥ ६ ॥ रेजुःकनकनाराचराजयोव्योम्निसस्वनाः ॥ रसंत्यःकल्पवातार्त्ताःपतंत्यइवतारकाः ॥ ७ ॥ विदूरथाच्छरासाराअजस्रमभिनिर्ययुः ॥ अब्धेरिवपयःपूराःसूर्यादिवमरीचयः ॥ ८ ॥

लासेनअभवत्तुल्यमितिशेषः ॥ ३५ ॥ ॥ इतिश्रीवा०तात्पर्यप्रकाशेउ०सप्तचत्वारिंशःसर्गः ॥ ४७ ॥ ॥ ६ ॥ ॥ विचित्रमायाजननैर्मंत्रास्त्रैर्विश्वमोहनः ॥ वर्ण्यतेविस्तरेणात्र समरःसिंधुपद्मयोः ॥ १ ॥ मध्याह्नतपनंअंतयतिसादृश्येनबध्नातीतिमध्याह्नतपनांतस्तेनतत्सदृशेनेतियावत् ॥ अतिबंधनेकर्मण्यण् ॥ १ ॥ आस्फालयामासविस्फारयामास ॥ २ ॥ रजनीपदेनतत्स्थानिमुकुलितपद्मानिलक्ष्यंतेतेषुबद्धाःशिलीमुखाबाणाभ्रमराश्वतत्परंपराः ॥ ३ ॥ यदाविनिर्यातितर्देकएव ॥ ४ ॥ कुतईदृशंयुद्धकौशलंतयोरितितत्राह ॥ वरेणेति ॥ विष्णोस्तपसाआराधितस्येतिगम्यते ॥ धानुष्कताधनुर्युद्धकुशलता ॥ ५ ॥ उन्नादामहाध्वनयः ॥ ६ ॥ कनकरंजितानाराचाबाणाः ॥ रसंत्योध्वनंत्यः ॥ ७ ॥ ८ ॥ ॥८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ वर्षाणिदृष्टीर्मुंचतीतिवर्षमुकूतस्माद्वर्षमुचोधाराइव ॥ तत्पुरस्यविदूरथनगरस्य ॥ प्रागुक्तादग्निमहादाहात् ॥ १० ॥ बलद्वयंसेनाद्वयम् ॥ ११ ॥ सिंधोराज्ञःसमुद्रस्य च ॥ घर्घराराववयुक्तानिरंहांसिवेगायेषाम् ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ मानुषींमनुष्यदेहात्मबुद्धिम् ॥ अप्रबुद्धामितियावत् ॥ १७ ॥ अगस्त्येनागस्त्यीभूतेनशरो ष्मणाकरणेनापिबत्उपसंहृतवानितियावत् ॥ १८ ॥ तनुरजःकृत्वाधूलीकृत्येत्यर्थः ॥ १९ ॥ २० ॥ शरीरलक्षणानामंबूनांधरम् ॥ तस्योपपत्तिःशवशतान्वितमिति ॥ २१ ॥

प्रचंडपवनोद्धूतात्पुष्पाणीवमहातरोः ॥ अयःपिंडादिवोत्तमात्ताडितात्कणपंक्तयः ॥ ९ ॥ धारावर्षमुचइवसीकराइवनिर्झरात् ॥ तत्पुराग्निमहादाहात्स्फुलिंगाइवभासुराः ॥ १० ॥ तयोश्चटचटास्फोटंश्शृण्वत्कोदंडयोर्द्वयोः ॥ बलद्वयमभूत्प्रेक्षामूकंशांतइवांबुधिः ॥ ११ ॥ वहंतिस्मशरापूरागंगापूराइवांबरे ॥ सिंधोरभिमुखंयुद्धेघर्घराराववरंहसः ॥ १२ ॥ कचत्कनकनाराचशरवर्षाअनारतम् ॥ वहच्छवशवाशब्दंनिर्ययुर्धनुरंबुदात् ॥ १३ ॥ बाणमंदाकिनीपूरंव्रजंतंसिंधुपूरणे ॥ वातायनात्तमालोक्यलीलातत्पुरवासिनी ॥ १४ ॥ तेनबाणसमूहेनजयमाशंक्यभर्त्तरि ॥ उवाचवाक्यमानंदविकसन्मुखपंकजा ॥ १५ ॥ जयदेविजयत्येषनाथोस्माकंविलोकय ॥ किंचानेनशरौघेणमेरुरप्येतिचूर्णताम् ॥ १६ ॥ तस्यामेवंवदंत्यांतुघनस्नेहरवाकुलम् ॥ प्रेक्षणव्यग्रयोर्देव्योर्हसंत्योर्मानुषींत्वदा ॥ १७ ॥ तच्छरार्णवमामत्तमपिबत्सिंधुवाडवः ॥ शरोष्मणात्व्यगस्त्येनजह्नुर्मंदाकिनीमिव ॥ १८ ॥ बाणवर्षेणकणशस्तंसायकमहाघनम् ॥ छित्त्वातनुरजःकृत्वाचिक्षेपगगनार्णवे ॥ १९ ॥ यथादीपस्यशांतस्यनपरिज्ञायतेगतिः ॥ तस्यसायकसंघस्यनविज्ञातातथागतिः ॥ २० ॥ तंछित्त्वासायकासारंशरीरांबुधरंघनम् ॥ व्योम्निप्रसारयामासरंसाच्छवशतान्वितम् ॥ २१ ॥ विदूरथस्तमप्याशुव्यधमत्सायकोत्तमैः ॥ सामान्यजलदंमत्तंकल्पांतपवनोयथा ॥ २२ ॥ कृतप्रतिकृतैरेवंबाणवर्षैर्महीपती ॥ व्यर्थीकृतैरनयतांप्रहारमविचारणैः ॥ २३ ॥ अथादधेमोहनास्त्रंसिंधुर्गंधर्वसौहृदात् ॥ प्राप्तंतेनययुर्लोकाविनामोहंविदूरथात् ॥ २४ ॥ व्यस्तशस्त्राबंरामूकाविषण्णवदनेक्षणाः ॥ मृताइवाभवन्योधाश्चित्रन्यस्ताइवाथवा ॥ २५ ॥ यावद्विदूरथादन्यंमोहोनयतिमंदताम् ॥ तावद्विदूरथोराजाप्रबोधास्त्रमथाददे ॥ २६ ॥

॥ २२ ॥ प्रहारंबाणाभिघातंअविचारणैर्लक्षीकरणैरनयतांअत्यवाहयताम् ॥ यद्वाप्रहारंछांदसोदीर्घः ॥ प्रहरंमितंकालंकृतप्रतिकृतैरनयताम् ॥ २३ ॥ गंधर्वस्यसौहृदान्मैत्रीवशात्प्राप्तम् ॥ विदूरथाद्विनाविदूरथमेकंवर्जयित्वाअन्येपरिवारलोकामोहंययुः ॥ पृथग्विनानानाभिस्तृतीयान्यतरस्यामितिसूत्रेअपादानेपंचमीत्यतःपंचम्यप्यनुवर्त्ततइतिमतेनपंचमी ॥ २४ ॥ मोहप्रकारमेववर्णयति ॥ व्यस्तेति ॥ २५ ॥ अन्यंजनम् ॥ २६ ॥

१ युद्धविषयेरागात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विदूरथेविषये ॥ राक्षसेमंदहाख्येऽर्कइवक्रुद्धोलोहितोभूदित्यर्थः ॥ २७ ॥ भोगिभिःसर्पैः ॥ २८ ॥ तत्रभूःपांडुरैःसर्पैर्न्यामापर्वतास्तुकृष्णैरितिवैचित्र्यमाह ॥ सर्पैरिति ॥२९॥ विषोष्मणाखिन्नतामिवम्लानताम् ॥ विवशतांव्याकुलताम् ॥ ३०॥ रूक्षाउष्णाश्चनीहाराहिमाःस्निग्धशीतलाअपिपदार्थायैस्तथाविधायेवातास्तल्लक्षणाज्वलनरेणवःपूतैर्भस्मनोविवेचितैरंगारैःसमाकीर्णयथास्यात्तथाववुः ॥ ३१ ॥ उदगुर्निर्ययुः ॥ सुपर्णाएवसौपर्णाः ॥ ३२ ॥ पक्षैःसपक्षपर्वतसदृशेनोड्डयनसंरंभेणजनितप्रलयानिलाः ॥ ३३ ॥ घोणानासास्तदनिलजवेनश्वासवेगेन ॥ ३४ ॥ सःसुपर्णलक्षणोघनोमेघस्तंसर्पलक्षणमोघंप्रवाहंअपात्अपिबत् ॥ पिबतेर्लुङिगातिस्थेतिसिचोलुक् ॥ विशेषणान्योघवारिध्योःसाधारण्येनयोज्यानि ॥ ३५ ॥ चिराद्वराहेणआत्तमुद्धृतमतएवनिर्गतंवारिराशेरितिनिर्वारिराशिच ॥ अवनीरंध्रंभूम्यवकाशमिव ॥ ३६ ॥ ३७ ॥ पक्षौघयुक्तमैनाकादिपर्वतप्रकरइव ॥ संकल्पकल्पितंपुरंपूरश्चतद्वत् ॥ ३८ ॥ जठरंमध्यम् ॥ ३९ ॥ रोदस्योर्द्यावाभूम्योःरंध्रेंतराले ॥ एकार्णवसाम्योपपादनायाह ॥ मत्स्याइवेति ॥ मणयःइवेत्यत्रापिसंबध्यते ॥ ४० ॥ अंधकारस्यप्रवृत्तेनप्रवृत्त्या ॥ भावेक्तः ॥ मषीपंकार्णवोपमंअभूज्जगदितिशेषः ॥ कज्जलाचलस्यांजनगिरेःसंभारैःउपादानभूतैरेणुभिःसहउद्धूतैःकल्पानिलैःप्रलयवायुभिरिवव्याप्तमितिशेषः ॥ ४१ ॥

ततःप्रबोधमापन्नाःप्रजाःप्रातरिवाब्जिनी ॥ विदूरथेभवत्सिंधुःक्रुद्धोर्कइवराक्षसे ॥ २७ ॥ नागास्त्रमाददेभीमंपाशबंधनखेददम् ॥ तेनाभवन्नभोव्यासंभोगिभिःपर्वतोपमैः ॥२८॥ सर्पैर्विलसिताभूमिर्मृणालैःसरसीयथा ॥ संपन्नागिरयःसर्वेकृष्णपन्नगकंबलाः ॥२९॥ पदार्थाःसर्वएवेमेविषोष्मखिन्नतांययुः ॥ सपर्वतवनाभोगाययौविवशतांमही ॥ ३० ॥ पूतांगारसमाकीर्णविषवैषम्यशंसिनः ॥ ववूरूक्षोष्णनीहारवाताज्वलनरेणवः ॥ ३१ ॥ विदूरथोथसौपर्णमाददेस्त्रंमहास्त्रवित् ॥ उदगुर्गरुडास्त्रेणसौपर्णाःपर्वताइव ॥ ३२ ॥ कांचनीकृतसर्वाशाःसर्वाशापरिपूरकाः ॥ पक्षपर्वतसंरंभजनितप्रलयानिलाः ॥३३॥ घोणानिलजवाकृष्टश्वसद्भुजगमंडलाः ॥ महाघुरघुरारावपूरितांभोधिखंडकाः ॥३४॥ ससुपर्णघनोऽपात्तंसर्पौघंभूप्रपूरकं ॥ कृष्टंशलशलायंतमगस्त्यइववारिधिम् ॥३५॥ सर्पकंबलनिर्मुक्तंभूमंडलमराजत ॥ चिरात्तमवनीरंध्रमिवनिर्वारिराशिच ॥ ३६ ॥ ततस्तद्गरुडानीकंक्काप्यगच्छददृश्यताम् ॥ दीपौघइववातेनशरदंवाब्दमंडलम् ॥३७॥ वज्रभीत्येवपक्षौघपर्वतप्रकरःपुरः ॥ स्वप्नदृष्टंजगदिवसंकल्पपुरपूरवत् ॥३८॥ ततस्तमोस्त्रमसृजत्सिंधुरंधांधकारदम् ॥ तेनांधकारोववृधे[1]कृष्णोभूजठरोपमः ॥ ३९ ॥ रोदोरंध्रेप्रविसृतएकार्णवइवाभवत् ॥ मत्स्याइवाभवन्सेनास्ताराश्चमणयोभवन् ॥ ४० ॥ अंधकारप्रवृत्तेनमषीपंकार्णवोपमम् ॥ कज्जलाचलसंभारोद्धूतकल्पानिलैरिव ॥ ४१ ॥

[1] तेनांधकारःकृष्णोभूद्भूबिलेजठरोपमइत्यपिपाठांतरंएतत्पक्षेभूबिलेपातालेयज्जठरंमध्यंतदुपमइत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

दिशंप्रतिप्रतिदिशम् ॥ असमासश्छांदसः ॥ ४२ ॥ अमंत्रःमंत्रणंमंत्रोगुप्तविचारस्तदनपेक्षएवव्यचेष्टयज्जगदित्यर्थः ॥ ४३ ॥ ४४ ॥ अंधकारलक्षणेनांबरेणवस्त्रेण ॥ पयोधरामेघाःस्तनाश्च ॥ ४५ ॥ ४६ ॥ ४७॥ उदगुर्निर्जग्मुः ॥ पातालस्थागजादिग्गजाः ॥४८॥ आर्द्रेइंधनंयेषांतथाविधाअग्नयइवधूम्राः ॥ अग्निपक्षेकालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा ॥ स्फुलिंगिनीविश्वरुचीचदेवीलेलायमानाइतिसप्तजिह्वाइतिश्रुतिप्रसिद्धाजिह्वाः ॥४९॥ आवर्त्तानांवृत्तिर्भ्रमणंतत्सहिताः ॥५०॥ दंष्ट्रालक्षणैर्बि

अंधकूपेनिपतिताइवासन्सकलाःप्रजाः॥कल्पांतइवसंशेमुर्व्यवहारादिशंप्रति ॥ ४२ ॥ विदूरथोथमार्त्तंडदीपंब्रह्मांडमंडपे ॥ अस्त्रंमंत्रविदांश्रेष्ठःस्वप्त्वामंत्रोव्यचेष्टयत् ॥ ४३ ॥ अथोदिततमोंभोधिमर्कागस्त्योगभस्तिभिः॥ अपिबत्कृष्णमंभोदंशरत्कालइवामलः॥४४॥ अंधकारांबरोन्मुक्ताविरेजुरमलादिशः ॥ भूपतेःपुरतःकांताइवरम्यपयोधराः ॥ ४५ ॥ ययुःप्रकटतामंतरखिलावनराजयः॥ लोभकज्जलजालेनमुक्ताइवसतांधियः॥ ४६॥ अथकोपाकुलःसिंधूराक्षसास्त्रंमहाभयम्॥ क्षणादुदीरयामासमंत्रोदीर्णशरात्मकम्॥४७॥ उदगुर्भीषणादिग्भ्यःपरुषावनराक्षसाः ॥ पातालगजफूत्कारक्षुब्धाइवमहार्णवाः ॥ ४८॥ कपिलोर्ध्वजटाधूघाःस्फुटच्चटचटारवाः ॥ अग्नयोलेलिहानोग्रजिह्वाआर्द्रेंधनाइव ॥४९॥ सावर्त्तवृत्तयोव्योम्निभीमचीत्कारटांकृताः ॥ अग्निदाहामहाधूमविलोलाइवसोल्मुकाः ॥ ५० ॥ दंष्ट्राविसांकुराक्रांतमुखपंकाक्षदेहकाः ॥ उदितालोमजंबालादुष्पल्वलतटाइव ॥ ५१ ॥ निगिरंतःप्रधावंतोगर्जतःसर्जिताइव ॥ जटाजालतडित्पुंजाजलदाःसजलाइव ॥ ५२ ॥ एतस्मिन्नंतरेतस्मिँल्लीलानाथोविदूरथः॥ नारायणास्त्रंप्रददेदुष्टभूतनिवारणम् ॥ ५३ ॥ उदीर्यमाणएवास्मिन्मंत्रराजेस्त्रराजयः ॥ राक्षसानांप्रशेमुस्ताअंधकारइवोदये ॥ ५४ ॥ प्रमुष्टराक्षसानीकमभवद्भुवनत्रयम् ॥ शरदीवगतांभोदंव्योमनिर्मलमाबभौ॥ ५५॥ अथसिंधुर्मुमोचास्त्रमाग्नेयंज्वलितांबरम्॥ जज्वलुःककुभस्तेनकल्पाग्निज्वलिताइव ॥ ५६ ॥ धूमांबुदभराच्छन्नाबभूवुःसकलादिशः ॥ गगनेप्रोतपातालतिमिराकुलिताइव ॥ ५७॥ बभूवुर्ज्वलिताकारागिरयःकांचनाइव ॥ प्रफुल्लवननीरंध्रचंपकौघवनाइव॥ ५८॥ ययुर्व्योमाद्रिदिक्कुंजाज्वालाजालजटालताम् ॥ कुंकुमेनोत्सवेमृत्योःसमालब्धाइवस्रजः॥ ५९ ॥

सांकुरैर्मृणालैराक्रांतैर्मुखैःपंकैर्मलिनैरक्षैश्चक्षुरादिभिःकर्दमैःपद्मबीजैश्चोपलक्षितदेहकाः ॥ लोमान्येवजंबालानिशैवलायेषाम् ॥ ५१ ॥ निगिरंतोजनात् ॥ जलदपक्षेज्योतींषि ॥ जगन्निगरणार्थमेवसर्जिताःसृष्टाइव ॥ निवृत्तप्रेषणाद्धातोःप्राकृतेर्थेणिच् ॥५२॥ तस्मिन्युद्धे ॥ प्रददेप्रयोक्तुमाददे ॥५३॥५४॥५५॥ ककुभोदिशः ॥ ५६ ॥ गगनेप्रोतेनपातालसंबंधिनातिमिरेणाकुलिताव्याकुलीकृताः ॥ ५७॥५८॥ ज्वालाजालैर्जटालतांजटिलताम् ॥ मृत्योःक्ष्वेलिकासेचनोत्सवेकुंकुमेनसमालब्धाःसिक्ताःस्रजइव ॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सागरात्सहस्राकृतिभिर्नावांवेगैश्चलितेनआगतेनवडवाग्निनेवजनताएकशंकिनीवक्र्यद्वैतमेवजगतःसंभावयंतीसतीज्वलिता ॥६०॥ असौवक्ष्यमाणास्त्रविशेषः ॥ आग्नेयमस्त्रं जित्वा ॥ अप्यर्थेपुनःशब्दः ॥ रिपुंसिंधुमपियथाप्रहरतेतथावारुणंअस्त्रंपूजयित्वाविससर्ज ॥ ६१ ॥ ६२ ॥ शरव्योम्निशरमार्गावकाशेतदीयभागाअवयवाइव ॥ धृतयाना निबद्धगतयः ॥ उच्चस्थाऊर्ध्वदेशाद्विलुठिताःकुलशैलानांबृहच्छिलाइव ॥ ६३ ॥ लोकालोकस्यगिरेस्तटादंधकारकज्जलौघाइव ॥ ६४ ॥ व्योमऊर्ध्वाकाशंदिदृक्षवइवेत्युत्प्रेक्षा ॥ सूर्मयइतिपाठेसूर्मिःप्रतिमामूर्त्तिरित्येवार्थः ॥ ६५ ॥ ६६ ॥ ६७॥ धावनाःपूर्वास्त्रकृतमालिन्यविशोधकास्तदितरेतद्विरुद्धाश्चान्येप्यस्त्रविदः ॥ विभाषाजसीतिवैकल्पि

ज्वलिताजनताचैकशंकिनीसानभःस्पृशा ॥ सहस्राकृतिनौवेगचलितेनेवसागरात् ॥ ६० ॥ जित्वारिपुंपुनरसौयथाप्रहरतेतथा ॥ वारुणंविससर्जास्त्रंपूजयित्वाविदूरथः ॥ ६१ ॥ आययुःसलिलापूरास्तमःपूराइवाभितः ॥ अधस्तादूर्ध्वतोदिग्भ्योद्रवरूपाइवाद्रयः ॥ ६२ ॥ भागाइवशरव्योम्निधृतयानाइवांबुदाः ॥ महार्णवाइवोच्चस्थाःकुलशैलशिलाइव ॥ ६३ ॥ तमालौघाइवोड्डीनाःसंधिताइवरात्रयः ॥ कज्जलौघाइवोद्भूतालोकालोकतटादिव ॥६४॥ रसातलगुहाभोगाइवव्योमदिदृक्षवः ॥ महाघुरघुरारावरंहोबृंहितमूर्त्तयः ॥६५॥ तामग्निसंततिंमत्तामाचचामांबुसंततिः ॥ भुवनव्यापिनीसंध्यामाशुकृष्णेवयामिनी ॥ ६६ ॥ तामग्निसंततिंपीत्वापूरयामासभूतलम् ॥ जलश्रीर्जटितंदेहंनिद्रेवव्यक्तिमेयुषी ॥६७॥ एवंविधानस्त्रमोहान्विदधुर्धावनेतरे ॥ मिथोमायामयानग्रेपश्यंत्यनुभवंतिच ॥ ६८ ॥ हेतिभारवराःसिंधोश्चक्ररक्षास्ततोंभसा ॥ तृणानीवगताःप्रोह्यरथश्चास्याभवत्प्लुतः ॥६९॥ एतस्मिन्नंतरेसिंधुरस्त्रंसस्मारशोषणम् ॥ आपत्त्राणकरंदैवंददौचशररूपिणम् ॥७०॥ शशामांबुमयीमायातेनयामेवभास्वता ॥ येम्रतास्तेम्रताएवबभूवुःशोषिताभुवः ॥ ७१ ॥ अथमूर्खरुषातुल्यस्तापःसंतापयन्प्रजाः ॥ जजृंभेझर्झराकीर्णवनविस्तारकर्कशः ॥ ७२ ॥ कचत्कनकनिःस्यंदसुंदरांगच्छविर्दिशाम् ॥ आसीद्राजवरस्त्रीणामिवालेपोंगसंगतः ॥ ७३ ॥ तेनघर्ममयींमूर्च्छामाजग्मुस्तद्विरोधिनः ॥ ग्रीष्मदावानलोत्तप्तमारुद्रवःपल्लवाइव ॥ ७४ ॥ विदूरथोरणोद्रेकेतावत्कैंकारमाततम् ॥ कोदंडंकुंडलीकृत्यपर्जन्यास्त्रमथाददे ॥ ७५॥ उदगुःपंक्तयोब्दानांयामिन्यइवसंचिताः ॥ तमालविपिनोड्डीनसंरंभाद्द्विमंथराः ॥ ७६ ॥

कीसर्वनामता ॥ मिथ्याभूतानामप्यस्त्रमोहानामर्थक्रियासामर्थ्यंदर्शयति ॥ मिथइति ॥ अनुभवंतिशत्रुविध्वंसादिफलमुखेनापिजनाइतिशेषः ॥६८॥ चक्रंस्वबलंरक्षंनीतिचक्ररक्षाःहेतीनामायुधानांभारावराःश्रेष्ठायोधाश्च ॥ ६९ ॥ शररूपिणंशोषणास्त्रंददौधनुषिसंदधेइत्यर्थः ॥ ७० ॥ नामैकदेशेनामग्रहणाद्यामात्रियामारात्रिरिव ॥ भास्वतास्त्रेण ॥ भुवोभूप्रदेशाःशोषिताबभूवुः ॥ ७१ ॥ तापस्तीव्रातपः ॥ झर्झरैःशुष्कपर्णैराकीर्णैर्वनविस्तारैःकर्कशः ॥ ७२ ॥ दिशामालेपोंगरागइवआसीत् ॥ ७३ ॥ ७४ ॥ कैंकारोज्यास्वनस्तस्यमाश्रीस्तयाततम् ॥ ७५ ॥ तमालविपिनस्ययदुड्डीनमाकाशेगमनंतद्विसंरंभाद्विभ्रमात् ॥ उदगुःउद्ययुः ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वारिपूरेणनम्रत्वाद्वामनाअभ्रांशवः ॥ महिम्नातिर्यग्विस्तारेणअमंथराणिस्वाभाविकविस्तारेकुंठितगतीनीवसंकुचितानिअशेषदिङ्मंडलानिकुंडलानीवसंपन्नानियेषाम् ॥७७॥ कीर्णैःशीकरैरंबुकणैर्नीहारभारेणशैत्योत्कर्षेणउदाराःसुखदाःसमीरणावायवोववुः ॥ ७८ ॥ सौवर्णानांसर्पाणांप्रागुक्तसंतापलक्षणायाआपदःसकाशात्सरणंबहिर्निःसरणंयत्प्र वर्तादौप्रसिद्धंतदेवउपमायासाम् ॥ दैव्योदेवविषयिण्यः ॥ अर्थाद्दिव्यस्त्रीकटाक्षाइतिगम्यते ॥ ७९ ॥ उच्छूनैःप्रवृद्धैःप्रतिश्रुद्भिःप्रतिध्वनिभिर्घनानिबिडितागिरिकंदरायासु ॥ रोषाच्चलितानामभिमुखप्रस्थितानांमातंगादीनांप्रतिगर्जितरवैर्घर्घरामुखराः ॥ ८० ॥ कष्टैष्टंकारैःकरकनिपातध्वनिभिर्मर्मशिराभेदनध्वनिभिश्चकठिनाः ॥ ८१ ॥ अभ्रवृंदा नांसंबंधिनेयुद्धायआत्तःस्वीकृतोविभ्रमःशौर्यविलासोयेनतथाविधइवेत्युत्प्रेक्षा ॥ ८२ ॥ मृगतृष्णिकाशब्देनतद्धेतवआतपालक्ष्यंते ॥ परस्यात्मनोबोधःसाक्षात्कारस्तल्लक्ष

वामनावारिपूरेणगर्जनोद्दामसंचराः॥ महिम्नामंथराशेषककुम्मंडलकुंडलाः॥ ७७ ॥ ववुरावलितासारामेघडंबरभेदिनः ॥ कीर्णसी करनीहारभारोदाराःसमीरणाः॥ ७८॥ प्रपुस्फुरुःसुसौवर्णसर्पापत्सरणोपमाः॥ विद्युतोदिविदैव्यस्त्रीकटाक्षवलनाइव ॥ ७९॥ जुघू र्णुर्गर्जनोच्छूनप्रतिश्रुद्घनकंदराः॥ दिशश्चलितमातंगसिंहर्क्षरवघर्घराः ॥८०॥ महामुसलधाराभिःपेतुरासारवृष्टयः॥ कष्टटंकारकठि नाःकृतांतस्येवदृष्टयः॥ ८१ ॥ उदभूत्प्रथमंबाष्पउष्णोनलनिभोभुवः॥ पातालादभ्रवृंदानांयुद्धायेवात्तविभ्रमः॥८२॥ ततोनिमेषमा त्रेणप्रशेमुर्मृगतृष्णिकाः॥ परबोधरसापूरैर्यथासंसारवासनाः॥ ८३॥ आसीत्पंकांकमखिलंभूमंडलमसंचरम्॥ पूरितःपूर्णधाराभिः सिंधुःसिंधुरिवांबुना॥८४॥ वायव्यमस्त्रमसृजत्पूरिताकाशकोटरम्॥ कल्पांतनृत्तसंमत्तरुद्रैरवभीषणम्॥८५॥ववुरशनिनिपातपी डितांगादलितशिलाशकलाःककुम्मुखेषु॥ प्रलयसमयसूचकाभटानांकृतपटुटांकृतटंकिनःसमीराः॥८६ ॥ ॥इत्या० वा० वा० दे० मोक्षोपायेषूत्पत्ति० आयुधवर्णनंनामाष्टचत्वारिंशःसर्गः॥ ४८॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥ ववुर्वलितनीहाराविकीर्णवनप ल्लवाः॥ वायवोधूतवृक्षौघाःसल्लीलापीडपांसवः॥१॥ पक्षिवद्भ्रांतवृक्षौघाःपतनोत्पातनोद्भटाः॥ विकुट्टिताट्टालखंडाश्चाभ्रभित्तिविभे दिनः॥ २॥ तेनातिभीमवातेनविदूरथरथोप्यथ ॥ उह्यमानोभवन्नद्यायथाजर्जरपल्लवः॥ ३॥ विदूरथोथतत्याजपार्वतास्त्रंमहास्त्रवि त्॥ व्योमापिघनतोयेनसमादातुमिवोद्यतम्॥ ४॥

णैर्निरतिशयानंदरसापूरैः ॥ ८३ ॥ असंचरंसंचाराक्षमम् ॥ सिंधुःराजासिंधुःसमुद्रइवपूरितः ॥ ८४ ॥ ८५ ॥ अशनिनिपातेनेवपीडितानिप्राणिनामंगानियैः ॥ भटानांप्रतियोधृभिरिवकृतैःपटुभिष्टांकृतैःशिलाद्यभिघातध्वनिभिष्टंकः पाषाणदारणायुधविशेषस्तद्वंतइवसमीरावायवःककुभांदिशांमुखेषुववुः ॥ ८६ ॥ ॥ इतिश्रीवासिष्ठ० तात्पर्यप्रकाशेउ० अष्टचत्वारिंशःसर्गः ॥ ४८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ पर्वतास्त्रंचवज्रास्त्रंब्रह्मास्त्रंचात्रवर्ण्यते ॥ विस्तरेणपिशाचास्त्रंपिशाचचरितान्वितम् ॥ १ ॥ सतांमूर्तिमतांलीलयाआपीडाःशिरोभूषणीकृताःपांसवोयैः ॥१ ॥ पक्षिवद्भ्रांताभ्र मितावृक्षौघायैः ॥ विकुट्टिताश्चूर्णिताः ॥ २ ॥ उह्यमानःप्रवाह्यमाणः ॥ ३ ॥ घनतोयेनमेघोदकेनसमंव्योमापिसमादातुंग्रसितुमिवोद्यतमुद्युक्तम् ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्वावबोधाच्चैतन्यस्यमायालक्षणकारणशांत्यात्तत्कार्यभूतोविराट्प्राणसमीरणःसूत्रात्मैववायुःशमंययौ ॥५॥६॥ निःश्वासशब्दाःसूत्काराडात्काराःलुंठनारवाः ॥ भांकाराभीषणाःशब्दाउत्काराउद्भटारवाः ॥ पुरांग्रामाणांवनानांवीरुधांवल्लीनांचप्रलापानिरर्थकवर्णनवाक्यानीव ॥७॥ सिंधुःराजा ॥ सिंधुःसमुद्रःस्वस्मिन्नुत्पततोमैनाकादीनिव ॥ ८॥ अग्निभिर्दह्यतइत्यग्निदाहंइंधनम् ॥९॥ कोटयःअग्रभागास्तल्लक्षणैस्तुंडैश्चंचुभिरवखंडनैश्छेदनैः ॥ गिरीणांशिरांसिशिखराणि ॥१०॥ अत्यगात्इतरास्त्राण्यतिक्रम्यप्रयोक्तुंअगात्प्रापत् ॥ समंएककालम् ॥ ११॥ श्यामातमिस्रेवश्यामम् ॥१२॥ इवकारआवृत्त्योभयत्रसंबध्यते ॥ तेनसंध्यायामिवेत्युपमा भीत्येवेतिहेतूत्प्रेक्षा ॥ जग्मुःआजग्मुः॥१३॥

तेनशैलास्त्रघातेनविराट्प्राणसमीरणः ॥ शमंचैतन्यशांत्यैवप्रययौवायुराततः ॥ ५ ॥ अंतरिक्षगतावृक्षपंक्तयःपतिताभुवि ॥ नानाजनशवव्यूहेकाकानामिवकोटयः ॥ ६ ॥ शेमुःसूत्कारडात्कारभांकारोत्कारकादिशाम् ॥ प्रलापाइवविध्वस्ताःपूर्ग्रामवनवीरुधाम् ॥७॥ गिरीनपश्यन्नभसःपततःपत्त्रवर्णवत् ॥ सिंधुःसिंधुरिवोत्पक्षान्मैनाकादीनितस्ततः ॥ ८ ॥ वज्रास्त्रमसृजद्दीप्तंचेरुर्वज्रगणास्ततः ॥ पिबंतोद्रींद्रतिमिरमग्निदाहमिवाग्नयः ॥ ९ ॥ तेगिरीणांतथाक्षिप्ताःकोटितुंडावखंडनैः ॥ शिरांसिपातयामासुःफलानीवोल्बणानिलाः ॥ १० ॥ विदूरथोथवज्रास्त्रशांत्यैब्रह्मास्त्रमत्यगात् ॥ ततोब्रह्मास्त्रवज्रास्त्रेसमंप्रशममागते ॥ ११ ॥ श्यामाश्यामंपिशाचास्त्रमथसिंधुरचोदयत् ॥ तेनोदगुःपिशाचानांपंक्तयोत्यंतभीतिदाः ॥ १२ ॥ संध्यायामथभीत्येवदिवसःश्यामतांययौ ॥ पिशाचाभुवनंजग्मुरंधकारभराइव ॥ १३ ॥ भस्मनस्तंभसदृशास्तालोत्तालविलासिनः ॥ दृश्यमानमहाकारामुष्टिग्राह्यानकिंचन ॥ १४ ॥ ऊर्ध्वकेशाःकृशांगाश्चकेचिच्चश्मश्रुलाअपि ॥ कृष्णांगामलिनांगाश्चग्राम्याइवनभश्चराः ॥ १५ ॥ सभयामूढदृष्टाश्चयत्किंचनकराश्चलाः ॥ दीनावज्रासिनःक्रूरादीनाग्राम्यजनाइव ॥ १६ ॥ तरुकर्दमरथ्यांतःशून्यगेहगृहाश्चलाः ॥ लेलिहानाःप्रेतरूपाःकृष्णांगाश्चपलाइव ॥ १७ ॥ जगृहुस्तेतदामत्ताहतशिष्टमरेर्बलम् ॥ आसंस्तत्सैनिकास्तत्रभिन्नास्त्रक्षुब्धचेतनाः ॥ १८ ॥ त्यक्तायुधतनुत्राणास्त्रस्तप्राणाःस्खलद्भ्रमाः ॥ नेत्रैरंगैर्मुखैःपादैर्विकारभरकारिणः ॥ १९ ॥ त्यक्तकौपीनवसनानिमग्नावसनोत्तराः ॥ विष्ठांमूत्रंचकुर्वंतःस्थिरमारब्धनर्त्तनाः ॥ २० ॥ पिशाचराजीराजानंतस्ययावद्विदूरथम् ॥ समाक्रामतितावत्तांमायांसबुबुधेबुधः ॥ २१ ॥

भस्मनःसंबंधीस्तंभोदग्धस्तंभइतियावत् ॥ असमर्थसमासश्छांदसः ॥ मुष्टिग्राह्याहस्तप्राप्याः ॥१४॥ ग्राम्याःग्रामीणादरिद्रजनाइव ॥ नभश्चराआकाशसंचारिणः ॥ १५ ॥ मूढैर्मूर्खैरशुच्यनाचारैर्दृष्टाः ॥ यत्किंचनास्थिकपालादिकरेयेषाम् ॥ वज्रंचासिश्चोभयोःसमाहारोवज्रासितस्मादपिक्रूरानिष्ठुराः ॥ समाहारनपुंसकत्वेइकोचिविभक्ताविति नुम् ॥ १६ ॥ लेलिहानाःसृक्किणी ॥ चपलाविद्युतइवदृश्यादृश्यस्वभावाः ॥ १७ ॥ तत्सैनिकाविदूरथसैनिकाः ॥ १८ ॥ विकारभराभूताविष्टचेष्टाः ॥ १९ ॥ ताएवदर्शयति ॥ त्यक्तेति ॥ निमग्नानिसंकुचितान्यवसनान्युत्तराण्यधरांगानियेषाम् ॥ २० ॥ पिशाचानांराजिःपंक्तिः ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परप्रयुक्तानांपिशाचानांस्ववशीकारेणपरसैन्यसंग्रामकरीम् ॥२२॥ तस्यपिशाचसैन्यस्यसहायभूतम् ॥ रूपिकाःपूतनाभेदाः॥असौविदूरथः ॥२३॥२४॥२५॥ रक्तपदेनतत्पूर्ण कपालानिलक्ष्यंते ॥ स्रवद्यांसृक्किभ्यामोष्ठप्रांताभ्यामाकुलाननाः ॥ २६ ॥ नानाविधान्यंगवलनान्यवयवचेष्टायासाम् ॥ नानाविधानामनमतामुत्तब्धानामपिनमनेप्रह्वीकर णेसत्तमाःसमर्थाः ॥ शिलाइवकठिनाभुजगइववक्राश्ववक्रादयोयासाम् ॥२७॥ नराणामियंनारीनरमालातथाकृताःअर्भकशवायाभिः ॥२८॥ जगृहुःपतित्वेनस्वीचक्रुः ॥ दुष्कृतकारिशिशूनिव ॥ उपभोग्यतांशेसाम्याद्दृष्टांतः ॥२९॥ एकतांगतंतद्वर्णयति ॥ निर्मग्नेत्यादिना ॥ क्रीडारसावेशेनितरांमग्नम् ॥३०॥ शरोरुधिरमंडस्तद्भाराढ्यम् ॥अन्यो

पिशाचसंग्रामकरींमायांवेत्तिसभूमिपः॥तयापिशाचसैन्यंतत्परसैन्येन्ययोजयत् ॥ २२ ॥ ततःस्वसैनिकाःस्वस्थाःपरयोधाःपिशाचि नः॥ तस्याशुरूपिकास्रंचददावन्यदसौरुषा ॥ २३ ॥ उदगुर्भूतलाद्घोराःरूपिकाऊर्ध्वमूर्द्धजाः॥ निर्मग्नविकरालाक्ष्यश्चलच्छ्रोणिपयोध राः॥ २४ ॥ उद्भिन्नयौवनावृद्धाःपीवरांग्योथजर्जराः॥ स्वरूपारूपजघनादुर्नाभ्योविकृसद्दृगाः॥ २५॥ नररक्तशिरोहस्ताःसंध्याभ्रारु णगात्रिकाः॥ अर्द्धचर्वितमांसास्तृक्स्रवत्सृक्क्याकुलाननाः ॥ २६ ॥ नानांगवलनानानानमन्नमनसत्तमाः ॥ शिलाभुजगवक्रोरुक टिपार्श्वकरांगिकाः॥ २७॥ नारीकृतार्भकशवाहस्ताकृष्टांत्ररज्जवः॥श्वकाकोलूकवदनानिम्नवक्रहनूदराः॥२८॥ जगृहुस्तान्पिशाचां स्तादुर्बलान्दुःशिशूनिव॥ पिशाचरूपिकासैन्यंतदासीदेकतांगतम्॥२९॥निर्मग्ननर्त्तनोत्तानवदनांगविलोचनम्॥ परस्पराक्रांतिकरं प्रधावच्चपरस्परम्॥ ३० ॥ निष्कासितमहाजिह्वंनानामुखविकारदम्॥ शरभाराढ्यमन्योन्यंक्रियमाणशवांगकम्॥ ३१ ॥ रुधिरांभ सिमज्जंतदुन्मज्जद्दृल्लसत्तनु॥ लंबोदरंलंबभुजंलंबकर्णोष्ठनासिकम् ॥ ३२ ॥ रक्तमांसमहापंकेष्वन्योन्यंवेल्लनाभ्यसत् ॥ मंदरोद्धूतदु ग्धाब्धिलसत्कलकलाकुलम्॥ ३३ ॥ यथैवमायासंचारस्तेनतस्यकृतःपुरा॥ तेनापितस्याशुतथाकृतोबुध्वासलाघवात्॥ ३४॥ वेता लास्रंततोदत्तेतेनोत्तस्थुःशवव्रजाः॥ अमूर्द्धानःसमूर्द्धानोवेतालावेशवल्गिताः॥३५॥ततःपिशाचवेतालरूपिकोग्रकबंधवत्॥तद्बभूवब लंभीममुर्वीनिगरणक्षमम्॥३६॥ अथेतरोपिभूपालोमायांसंचार्यतांगुरौ॥ राक्षसास्रंससर्ज्जाथत्रैलोक्यग्रहणोन्मुखम्॥३७॥उदगुः पर्वताकाराःसर्वतःस्थूलराक्षसाः॥ देहमाश्रित्यनिष्क्रांताःपातालान्नरकाइव ॥ ३८॥

न्यप्रीतयेक्रियमाणानिशवांगानियेन ॥ ३१ ॥ मज्जंउन्म ज्जत् ॥ पुनःपुनर्निमज्योन्मज्जत् ॥ आभीक्ष्ण्येणमुलिद्विर्वचनाभावश्छांदसः ॥ घूर्तूक्षरद्रक्तंतेनलसत्तनु ॥३२॥ वेल्लनान्यालिंगनान्यभ्यसत्आवर्त्तयत् ॥ मंदरेणोद्धूतस्यमथ्य मानस्यदुग्धाब्धेरिवलसताकलकलेनकोलाहलेनआकुलम् ॥३३॥ मायायाःसंचारःपरावृत्त्यप्रेषणम्॥ तेनविदूरथेन ॥ तस्यसिंधोः ॥ सःमायासंचारःकृतः ॥ ३४॥ ततस्तत्स हायार्थंदत्तेददावितियावत् ॥ वेशेनपरमर्दनावेशेनवल्गिताःसंचलिताः ॥ वल्गवल्गुसंवरणेसंचलनेच ॥३५॥३६॥ इतरोविदूरथः ॥ गुरौपूर्वप्रयोगेणोपदेष्टरीवसिंधौ ॥३७॥३८॥

१ स्वरूपेणस्वरूपतःअरूपाणिनिराकाराणिजघनानियासांतथाविधाः ॥ दुर्लक्ष्यजघनाइत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३९ ॥ क्षीवाणांमत्तानाम् ॥ ४० ॥ दंडपादोनाट्यशास्त्रप्रसिद्धःपादाघातविशेषः ॥ सिक्तैर्भूतैः ॥ दत्तसेतुनिबद्धसेतु ॥ बलंउदभूदितिपूर्वेणान्वयः ॥ ४१ ॥ ॥ इतिश्रीवासि ४०तात्पर्यप्रकाशेउ०एकोनपंचाशःसर्गः ॥ ४९ ॥ ॥ ७ ॥ ॥ अत्रास्त्रयोर्वैष्णवयोर्युद्धंविरथताद्वयोः ॥ स्मृतिर्विदूरथस्यापिग्रहानीतस्यवर्ण्यते ॥ १ ॥ एकम साधारणम् ॥ स्वबलस्यस्वसैन्यस्य ॥ शांतयेरक्षःपिशाचपीडाशांतये ॥ १॥ अंतःकालोचितप्रतिभावतामवधिभूतःसिंधुःमहोदारःसन्नधिकधैर्यभृदधिकधैर्यवान् ॥ शंकरोप मंकालरुद्रवत्संहारकम् ॥ २ ॥ फलप्रांतात्शल्यप्रदेशात् ॥ ३ ॥ उल्मुकादीत्युक्तमादिशब्दार्थंप्रपंचयति ॥ पंक्तयइत्यादिना ॥ त्रिषुश्लोकेषुपंक्तयएवविशेष्याः ॥ वंशपदेन

अथोदभूद्बलंभीमंससुरासुरभीतिदम्॥गर्जद्रक्षोमहानादवाद्यनृत्यत्कबंधकम्॥३९॥मेदोमांसोपदंशाढ्यंरुधिरासवसुंदरम्॥क्षीव कूश्मांडवेतालयक्षतांडवसुंदरम्॥४०॥कूश्मांडकोत्तांडवदंडपादक्षुब्धासृगुक्षिप्ततरंगसिक्तैः॥संध्याभ्ररागोल्करकोटिकांतिभूतैरसृ क्स्रोतसिदत्तसेतु॥४१॥ ॥इत्या०वा०वा०दे०मोक्षोपायेषूत्पत्ति०लीलोपाख्यानेवृतीयास्त्रयुद्धंनामएकोनपंचाशःसर्गः॥४९॥ ॥ श्रीवसिष्ठउवाच॥ ॥तस्मिंस्तदावर्त्तमानेघोरेसमरविभ्रमे॥ सर्वारिसैन्यनाशार्थमेकंस्वबलशांतये॥१॥ सस्मारस्मृतिमानंतोम होदाराधिधैर्यभृत्॥ अस्त्रमस्त्रेश्वरंश्रीमद्वैष्णवंशंकरोपमम्॥२॥ अथयोसौशरस्तेनवैष्णवास्त्राभिमंत्रितः॥ मुक्तस्तस्यफलप्रांतादुल्मु कादिविनिर्ययौ॥३॥ पंक्तयःस्फारचक्राणांशतार्क्कीकृतदिक्तटाः॥ गदानामभियांतीनांशतवंशीकृतांबराः॥४॥ वज्राणांशतधारा णांतृणराजीकृतांबराः॥ पट्टिशानांसपद्मानांदीनवृक्षीकृतांबराः॥५॥ शराणांशितधाराणांपुष्पजालीकृतांबराः॥ खड्गानांश्यामलां गानांपत्रराशीकृतांबराः॥६॥ अथराजाद्वितीयोपिवैष्णवास्त्रस्यशांतये॥ ददौवैष्णवमेवास्त्रंशत्रुनिष्ठावपूरकम्॥७॥ ततोपिनिर्ययुर्न घोहेतीनांहतहेतयः॥ शरशक्तिगदाप्रासपट्टिशादिपयोमयाः॥८॥ शस्त्रास्त्रसरितांतासांव्योम्नियुद्धमवर्त्तत॥ रोदोरंध्रक्षयकरंकुलशै लेंद्रदारणम्॥९॥ शरपातितशूलासिखड्गकुट्टितपट्टिशम्॥ मुसलप्रतनाप्रासशूलशातितशक्तिकम्॥१०॥

गदाकाराणिवंशकरीराणिगृह्यंते ॥ ४ ॥ सपद्मानांपद्मदलमुकुलाकारानेकशाखाशालिनांपट्टिशानांपंक्तयः ॥ दीनालूनायेवृक्षास्तद्यामप्रायंकृतमंबरंयाभिरित्यर्थः ॥ त्वादि भ्यइतिनिष्ठानत्वम् ॥ ५ ॥ ६ ॥ द्वितीयोराजाविदूरथःशत्रोर्निष्ठापराक्रमस्थितिस्तस्याअवपूरकंपूर्त्तिकरंतदनुरूपमितियावत् ॥ ७ ॥ हताश्छिन्नाःपूर्वास्त्रप्रयुक्तहेतयोयाभि स्ताः ॥ ८ ॥ ९ ॥ शस्त्रास्त्रसरितांयुद्धमेवविस्तराद्वर्णयति ॥ शरेत्यादिना ॥ शरेभ्यआपतितैर्निर्गतैःशूलादिभिःकुट्टितानिचूर्णितानिपट्टिशानियत्र ॥ असिखड्गयोरवांतरजातिभे दविवक्षयापृथग्ग्रहणम् ॥ मुसलानांप्रतननंप्रतनाविस्तारः ॥ भिदादित्वादङ् ॥ तयाप्रासादिभिश्चशातिताःखंडिताःशक्तयोयत्र ॥ १० ॥

१ तरच्छृंगीकृतांबराइतिक्वचित्पाठः २ तृणजालीकृतांबराइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरलक्षणस्यांबुराशेर्मथनेमत्ताःप्रहृष्टाःसमर्थाइतियावत् ॥ मुद्गराएवमंदरपर्वतायत्र ॥ गदानांवदनतः॥सार्वविभक्तिकस्तसिः ॥ मुखसदृशैरग्रभागैर्युक्तंसंघट्टितम्॥दुर्वाराःअस्त्रं येषामस्तितेऽस्त्रिणःप्रतियोद्धारस्तन्निभास्तत्समानप्रमाणप्रभावाअसिन्यःखड्गजातिभेदायत्र ॥ गोस्त्रियोरुपसर्जनस्येतिङीपोह्रस्वः ॥११॥ रिष्टम् ॥ रिषहिंसायांभावेक्तः ॥ स्व स्वसैन्यहिंसनंतल्लक्षणस्यारिष्टस्याशुभतमसःप्रशमनायभ्रमंतिकुंतलक्षणानींदुमंडलानियत्र ॥ प्रासानांप्रसरैःसंरब्धःकुपितःअतएवप्रोद्यतांतःप्रारब्धजनविनाशइवकृतांतोयमो यत्र ॥ १२ ॥ १३ ॥ मत्कृतेनविश्वामित्रास्त्रनिवारणेनेवपरस्परप्रतिबद्धकार्ययोर्युद्ध्यमानयोर्नारायणास्त्रयोःसंबंधिभिर्वज्रैःअविजराजरयितुमशक्याःपर्वतायत्र ॥ असमर्थस मासश्छांदसः ॥ १४ ॥ शंकवःकीलानीवकार्याच्छंकितानिसंभावितानिसूत्कारशब्दमात्रकाशीनिशूलानिशिलाशतानिचयत्र ॥ १५ ॥ परउत्कृष्टःसर्वसंहारसमर्थःशूलक

शरांबुराशिमथनमत्तमुद्गरमंदरम् ॥ गदावदनतोयुक्तंदुर्वाशास्त्रिनिभासिनि ॥ ११ ॥ रिष्टारिष्टप्रशमनभ्रमत्कुंतेंदुमंडलम् ॥ प्रासप्रसर संरब्धप्रोद्यतांतकृतांतकम् ॥१२॥ चक्रावकुंठितोर्ध्वास्त्रंसर्वायुधक्षयंकरम् ॥ शब्दस्फुटद्दिरिंचांडंघातभग्नकुलाचलम् ॥ १३ ॥धारानि कृत्तशस्त्रौघमस्त्रयोर्युद्ध्यमानयोः ॥ मदस्त्रवारणेनेववज्राविजरपर्वतम् ॥१४॥ शंकुशंकितसूत्कारकाशिशूलशिलाशतम् ॥ भुशुंडीनि र्जितोद्दंडभिंदिपालोग्रमंडलम् ॥ १५ ॥ परशूलकराभैकपरशूलैकलंपितम् ॥ वहद्दुच्छिन्नचंचूरचारणंशत्रुवारणम् ॥१६॥ स्फुटच्चट चटास्फोटरुद्धत्रिपथगारयम् ॥ हेत्यस्त्रीचूर्णसंभारमहाधूमवितानकम् ॥ १७ ॥ अन्योन्यशस्त्रसंघट्टाद्भ्रमज्ज्वालोल्लसत्तडित् ॥ शब्दस्फुट द्दिरिंचांडंघातमग्नकुलाचलम् ॥१८॥ धारानिकृत्तशस्त्रौघमस्त्रयोर्युद्ध्यमानयोः ॥ मदस्त्रवारणेनैवकालोपायोचलात्मनः ॥ १९ ॥ अयं कियद्बलइतिर्सिंधौतिष्ठतिहेलया ॥ विदूरथोस्त्रमाग्नेयंतत्याजाशनिशब्दवत् ॥ २० ॥ ज्वालयामाससरथंसिंधोःकक्षमिवारसम् ॥ एत स्मिन्नंतरेव्योम्निहेतिनिर्विवरोदरे ॥२१॥ ससन्नाहइवप्रावृट्पयोदतटिनीवयः ॥ अस्त्रैराज्ञोःक्षणंकृत्वायुद्धंपरमदारुणम् ॥२२॥ अन्यो न्यंशममायातेसवीर्येसुभटाविव ॥ एतस्मिन्नंतरेसोग्नीरथंकृत्वातुभस्मसात् ॥ २३ ॥

रोरुद्रस्तदात्मंएकैकमायुधंपरंश्रेष्ठंयद्रुद्रशूलंतत्सदृशेनैकैकेनलंपितंकुंठितंयत्र ॥ वहतांनिःसरतामेवोच्छिन्नानांखंडितानामायुधानांचंचूराणिकुटिलविषमगतिफलानिचचार णानिप्रवर्तनानियत्र ॥ चरतेर्नित्यंकौटिल्येगताविति्यङिपचाद्यचियङोचिचेतिलुकिउत्परस्यातइत्युत्वेछांदसोदीर्घः ॥ १६ ॥ हेतीनामस्त्राणांचसमाहारोहेत्यस्त्री ॥ स्त्रीत्वंछां दसम् ॥१७॥ भ्रमत्ज्वालमानायइवोल्लसंत्यस्तडितोयत्र ॥१८॥ पुनरुक्तंश्लोकार्द्धद्वयंव्याख्यातम् ॥ अचलात्मनःयुद्धेअचलवज्जडीभूतस्यविदूरथस्यमदीयास्त्रनिवारणमात्रे णावस्थितिरियंकालस्यकालक्षेपमात्रस्यउपायः ॥ १९ ॥ अयंतुमदपेकियद्बलइतिहेलयाअवज्ञाबुद्ध्यासिंधौतिष्ठतिसति ॥ २० ॥ कक्षंतृणगुच्छम् ॥ अरसंशुष्कम् ॥ २१॥ योराजाससन्नाहःप्रावृडिवयश्चान्योराजापयोदवर्द्धितातटिनीनदीवशरान्वर्षतिवहतिचतयोराज्ञोःअस्त्रैप्राक्प्रयुक्तेद्वैनारायणास्त्रे ॥ २२ ॥ सआग्नेयास्त्रसंबंधीअग्निः ॥ २३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनंदग्ध्वा ॥ वनकंदरान्निर्गतंमृगेंद्रमिव ॥ २४ ॥ आस्फोटकंचर्मतद्वान्अभूत् ॥ २५ ॥ २६ ॥ क्रकचतांक्रकचवत्कठिनतरचर्मादिविदारणसमर्थतांयातौप्राप्तौ ॥ २७ ॥ बलेसैन्यद्वये ॥ २८ ॥ सिंधोःसमुद्रस्यांबुजलमिवघर्घरारावःमहाप्रलयादिसूचकउत्पातः ॥ साशक्तिरस्यसिंधोर्वक्षसि ॥ २९ ॥ ३० ॥ नागोगजोजलंमदजलमिवात्यजत्असवत् ॥ ३१ ॥ आवयोर्भर्त्रान्नृसिंहेनसिंधुर्दैत्योहिरण्यकशिपुर्हतइतिव्यस्तरूपकम् ॥ ३२ ॥ ३३ ॥ पिष्टात्संचूर्णितात्उरसःसकाशात् रक्तंसरःस्थलस्थस्यसरोमध्यस्थ

प्रापदग्ध्वावनंसिंधुंमृगेंद्रमिवकंदरात् ॥ सिंधुरभ्यासतोभ्यस्तंवारुणास्त्रेणशामयन् ॥ २४ ॥ रथंत्यक्त्वावनिंप्राप्यखड्गास्फोटकवानभूत् ॥ अक्ष्णोर्निमेपमात्रेणरथाश्वानांरिपोःखुरान् ॥ २५ ॥ लुलावकरवालेनमृणालानीवलाघवात् ॥ विदूरथोपिविरथोबभूवास्फोटकासिमान् ॥ २६ ॥ समायुधौसमोत्साहौचेरतुर्मंडलानितौ ॥ खड्गौक्रकचतांयातौमिथःप्रहरतोस्तयोः ॥ २७ ॥ दंतमालेयमस्येवबलेचर्वयतःप्रजाः ॥ शक्तिमादायचिक्षेपखड्गंत्यक्त्वाविदूरथः ॥ २८ ॥ सिंध्वंबुघर्घरारावोमहोत्पातइवाशनिः ॥ अविच्छिन्नासमायातापतितास्यवक्षसि ॥ २९ ॥ अप्रियस्ययथाभर्त्तुरनिच्छंतीस्वकामिनी ॥ तेनशक्तिप्रहारेणनासौमरणमाप्तवान् ॥ ३० ॥ केवलंरुधिरस्रातंनागोजलमिवात्यजत् ॥ तद्देशलीलातंदृष्ट्वाभग्नंतमइवेंदुना ॥ ३१ ॥ सविकासघनानंदापूर्वलीलामुवाचह ॥ देविपश्यन्नृसिंहेनहतोभर्त्रायमावयोः ॥ ३२ ॥ शक्तिकोटिनखैर्दैत्यःसिंधुरुद्धुरकंधरः ॥ सरःस्थलस्थनागेंद्रकरफूत्कृतवारिवत् ॥ ३३ ॥ पिष्टोरसोस्यनिर्यातिरक्तंचुलचुलारवैः ॥ हाकष्टंरथमानीतंसिंधुरारोढुमुद्यतः ॥ ३४ ॥ सौवर्णमैरवंशृंगंपुष्करावर्त्तकोयथा ॥ पश्यदेविरथोस्यासौमुद्गरेणविचूर्णितः ॥ ३५ ॥ भ्रमत्पार्थनिपातेनसौवर्णनगरंयथा ॥ प्रवृत्तोरथमारोढुमानीतंपतिरेषमे ॥ ३६ ॥ कष्टंवज्रमिवेंद्रेणमुसलंसिंधुनेक्षितम् ॥ जवात्पतिःप्रयातोमेसैंधवंमुसलायुधम् ॥ ३७ ॥ वंचयित्वाविलासेनरथमारुह्यलाघवात् ॥ हाधिक्कष्टमसौसिंधुरार्यपुत्ररथंरयात् ॥ ३८ ॥ हरिश्चभ्रमिवारूढंप्लुवेनोर्ध्वमिवद्रुमम् ॥ क्रीडित्वापीडयामासशरवर्षैर्विदूरथम् ॥ ३९ ॥ छिन्नध्वजंछिन्नरथंछिन्नाश्वंछिन्नसारथिम् ॥ छिन्नकार्मुकवर्माणंभिन्नसर्वांगमाकुलम् ॥ ४० ॥

स्यगजेंद्रस्यकरात्फूत्कृतंवारीवनिर्यातीतिपूर्वेणान्वयः ॥ ३४ ॥ मैरवंमेरोःसंबंधिशृंगम् ॥ पुष्करावर्त्तकोमेघराजः ॥ अस्यसिंधोरथः ॥ ३५ ॥ पार्थस्यार्जुनस्यशरनिपातेनभग्नन्निवातकवचानांसौवर्णनगरंयथातथाभ्रमंतमर्थात्तंरथंपश्येत्यर्थः ॥ तद्ब्रह्मांडेपिपार्थादिजन्मसंभवान्नाप्रसिद्धोपमा ॥ ३६ ॥ ईक्षितंप्रहरणार्थमितिशेषः ॥ सैंधवंवंचयित्वा ॥ ३७ ॥ ३८ ॥ ध्वजलांछितत्वात्प्लुवेनपक्षिविशेषेणउपलक्षितम् ॥ शैवलादिनाहरिहरितवर्णंश्वभ्रंपल्वलमिव ॥ तथाविधमूर्ध्वमुच्छ्रितंद्रुममिववास्थितंरथमारूढमार्यपुत्रंस्वभर्त्तारंविदूरथंपीडयामासेतिसंबंधः ॥ ३९ ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फोटेस्फोटनविषयेशिलापट्टवद्दृढेअशक्यस्फोटनेइतियावत् ॥ पीवरेस्थूलेमूर्द्धनिचभित्त्वा ॥४१॥ रथंकृच्छ्रेणारोहतोऽस्यमेभर्तुःसिंधुनाछिन्नमंसंस्कंधदेशंविलोकय ॥४२॥
अतएवभर्त्तारंभिन्नस्यपद्मरागगिरेर्निःसृतंद्योतमारक्तप्रभामिवर्द्धंसमृद्धमस्त्रग्यक्तंविमुंचति ॥ पश्येत्यत्राप्यनुकृष्यते ॥ ४३ ॥ हताहननव्यापारविषयीकृता ॥ मृतातत्फलम
रणभागिनीतिभेदः ॥ ४४ ॥ भर्तुर्विषयेभावःस्नेहातिशयस्तेनभयेनचातुरा ॥ सीदतीतिसा ॥ सदेर्डप्रत्ययेटाप् ॥ ४५ ॥ ४६ ॥ पपातपतनोन्मुखोबभूवेत्यर्थः ॥पतन्पतनोन्मु
खएवैषसूतेनविष्टभ्यरथेनैवापवाहितोगृहंप्रतीतिशेषः ॥ द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ ॥ परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतइतिस्मृतेःरणेअभिमुखमरणेसूर्यमंड
लभेदिनोब्रह्मलोकावाप्तौविरक्तस्य॥ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंपदमितिवचनात्क्रममुक्तिप्रसक्तौअविरक्तस्यइमंमानवमावर्त्तंनावर्त्ततइति

त्वदिस्फोटशिलापट्टदृढेपीवरमूर्द्धनि ॥ भित्त्वावज्रसमैर्बाणैःपातयत्येषभूतले ॥ ४१ ॥ अथान्यंरथमानीतंकृच्छ्रेणप्राप्यचेतनाम् ॥
खड्गेनारोहतोस्यांसंछिन्नंभर्त्तुर्विलोकय ॥४२॥ पद्मरागगिरिद्योतमिवर्द्धास्त्रग्विमुंचति ॥ हाहाधिक्कष्टमेतेनसिंधुनाखड्गधारया ॥४३॥
जंघयोर्मेपतिश्छिन्नःक्रकचेनेवपादपः ॥ हाहाहतास्मिदग्धास्मिमृतास्म्युपहतास्मिच ॥ ४४ ॥ मृणालेइवपत्युर्मेलूनेद्वेअपिजानुनी ॥
इत्युक्त्वासातदालोक्यभर्त्तुर्भावभयातुरा ॥४५॥ लतापरशुकृत्तेवमूर्छिताभुविसापतत् ॥ विदूरथोपिनिर्जानुःप्रहरन्नेवविद्विषि ॥४६॥
पपातस्यंदनस्याधश्छिन्नमूलइवद्रुमः ॥ पतन्नेवैषसूतेनरथेनैवापवाहितः ॥ ४७ ॥ यदातदाहंतितस्यकंठेऽदात्सिंधुरुद्धतः ॥ अर्द्धवि
च्छिन्नकंठोसावनुयातोथसिंधुना ॥४८॥ स्यंदनेनाविशत्सद्मपद्मंरविकरोयथा ॥ सरस्वत्याःप्रभावाद्यंतत्प्रवेष्टुमसौगृहम् ॥ नाशक
न्मशकोमत्तोमहाज्वालोदरंयथा ॥४९॥ खड्गावकृत्तगलगर्त्तगलत्सवातरक्तच्छटाछुरितवस्त्रतनुत्रगात्रम् ॥ तत्याजतंभगवतीमभि
तोगृहांतःसूतःप्रवेश्यमृतितल्पतलेगतारिः ॥५०॥ ॥इत्यार्षेवा०वा०दे०मो०उ०ली०विदूरथमरणवर्णनंनामपंचाशत्तमःसर्गः ॥५०

श्रुतेःकल्पांतरेपुनरावृत्तौवाप्राक्तनपद्मशरीरेणप्रारब्धशेषभोगासिद्धेस्तदनुगुणसरस्वतीसंकल्पवरदानबलादेवसूतस्यराजयशःश्रेयोविनाशेअपवाहनेप्रवृत्तिरासीदितिबोध्यम् ॥
॥ ४७ ॥ यदाअपवाहितस्तदाआहतिंखड्गाघातंअदात् ॥ अपवाह्यमानेअसंमुखेशत्रौप्रहारःशूरविगर्हितःकृतइतिसूचयन्विशिनष्टि ॥ उद्धतइति ॥ ४८ ॥ असौसिंधुःपद्मगृ
हंप्रवेष्टुंनाशकत् ॥ ४९ ॥ खड्गेनअवकृत्तस्यगलस्यगर्त्ताच्छिद्रात्गलद्भिःसवाताभिःरक्तस्यच्छटाभिर्धाराभिश्छुरितानिसिक्तानिवस्त्रादीनियस्यतथाविधंतंविदूरथंसूतोगृहं
प्रवेश्यगृहांतर्भगवतींसरस्वतीमभितःअभिमुखेमृतितल्पतलेसुखमरणयोग्यमृद्वास्तरणोपरितत्याज ॥ अभितःपरितःसमयानिकषाहाप्रतियोगेपीनिषष्ठ्यर्थेद्वितीया ॥ अरिःशत्रुः
सिंधुश्चगृहप्रवेशासामर्थ्याद्गतःपरावृत्तइत्यर्थः ॥ ५० ॥ इतिश्रीवासिष्ठमहा०तात्पर्यप्रकाशेउ०पंचाशत्तमःसर्गः ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रराजवधोदंताद्वर्ण्यतेराष्ट्रविड्वरः ॥ सिंधौप्रतिष्ठितेभूयोदेशस्वास्थ्यंचविस्तरात् ॥ १ ॥ राजाविदूरथः ॥ प्रतिराजेनसिंधुना ॥ संयुगेयुद्धे ॥ १ ॥ २ ॥ ३ ॥ शत्रुराष्ट्रजनांतराणांसिध्वनीकस्यचजयतांडवोल्लासेनसारवंसशब्दम् ॥ ४ ॥ कपाटानांपाटनेनउड्डीनइवबहिराकाशेनिर्गतोयःकोशगृहस्यांतेविनाशेरवस्तेनघर्घरम् ॥ कौशेयप्रावृताअभिभूतकोशपालभटाउद्भटायत्र ॥ ५ ॥ चोरैःक्षुरिकाभिःशस्त्रीभिरुत्पाटितैरार्द्रैरांत्रैरुपलक्षितामृताराजगृहांगनायत्र ॥ ६ ॥ भोज्यानांराजभोजनयोग्यानामन्नानांभोजनेउन्मुखाःपामराःपृथग्जनायत्र ॥ ७ ॥ रत्नैर्दंतुराउन्नतदंताइवधवलितामार्गायत्र ॥८॥ संघट्टनंसंघट्टःअपसृत्यमेलनंतत्रव्यग्रंसामंतमंडलंयत्र ॥ सिंधुसुतपट्टाभिषेकोद्यमस्य

श्रीवसिष्ठउवाच ॥ ॥ हतोराजाहतोराजाप्रतिराजेनसंयुगे ॥ इतिशब्देसमुद्भूतेराष्ट्रमासीद्भयाकुलम् ॥ १ ॥ भांडोपस्करभाराढ्यंविद्रवच्छकटव्रजम् ॥ साक्रंदार्त्तकलत्राढ्यंद्रवन्नागरदुर्गमम् ॥ २ ॥ पलायमानसाक्रंदंमार्गाहृतवधूगणम् ॥ अन्योन्यलुंठनव्यग्रलोकलग्नमहाभयम् ॥ ३ ॥ परराष्ट्रजनानीकतांडवोल्लाससारवम् ॥ निरधिष्ठितमातंगहयवीरपतज्जनम् ॥ ४ ॥ कपाटपाटनोड्डीनकोशांतरवघर्घरम् ॥ लुंठितासंख्यकौशेयप्रावृताभिभटोद्भटम् ॥ ५ ॥ क्षुरिकोत्पाटितार्द्रांत्रमृतराजगृहांगनम् ॥ राजांतःपुरविश्रांतचंडालश्वपचोत्करम् ॥ ६ ॥ गृहापहृतभोज्यान्नभोजनोन्मुखपामरम् ॥ सहेमहारवीरौघपादाहतरुदच्छिशु ॥ ७ ॥ अपूर्वतरुणाक्रांतकेशांतःपुरिकांगनम् ॥ चोरहस्तच्युतानर्घ्यरत्नदंतुरमार्गगम् ॥ ८ ॥ हयेभरथसंघट्टव्यग्रसामंतमंडलम् ॥ अभिषेकोद्यमादेशंपरमंत्रिपुरःसरम् ॥ ९ ॥ राजधानीविनिर्माणसारंभस्थपतीश्वरम् ॥ कृतवातायनश्वभ्रनिपतद्राजवल्लभम् ॥ १० ॥ जयशब्दशतोद्घोषसिंधुराजन्यनिर्भरम् ॥ असंख्यनिजराजौघधृतसिंधुकृतास्थिति ॥ ११ ॥ ग्रामांतरसमाक्रांतविद्रवद्राजवल्लभम् ॥ मंडलांतरसंजातनगरग्रामलुंठनम् ॥ १२ ॥ अनंतचोरमोषार्थरुद्धमार्गगमागमम् ॥ महानुभाववैधुर्यसनीहारदिनातपम् ॥ १३ ॥ मृतबंधुजनाक्रंदैर्मृततूर्यरवैरपि ॥ हयेभरथशब्दैश्चपिंडग्राह्यघनध्वनि ॥ १४ ॥ सिंधुदेवोजयत्येकच्छत्रभूमंडलाधिपः ॥ इत्यनंतरमारेभेभेर्यःप्रतिपुरंतदा ॥ १५ ॥ राजधानींविवेशाथसिंधुरुद्धुरकंधरः ॥ प्रजाःस्रष्टुंयुगस्यांतेमनुर्जगदिवापरः ॥ १६ ॥

आदेशेआज्ञापनेपरास्तत्पराः ॥ ९ ॥ स्थपतीश्वराःकारुश्रेष्ठाः ॥ कारुकृतेषुवातायनश्वभ्रेषुअपूर्वनगरसौंदर्यदर्शनायनिपतंत्यःप्रविशंत्यःसिंधुराजवल्लभायत्र ॥ १० ॥ जयशब्दशतोद्घोषैःप्रवेशितस्यसिंधुराजन्यस्यसिंधुराजपुत्रस्यअभिषिक्तस्यनिर्भरःप्रभावातिशयोयत्र ॥ निजैःस्वपक्षीयैराजौघैःशिरसाधृतासिंधुनाकृतास्थितीराष्ट्रमर्यादायत्र ॥ ११ ॥ ग्रामांतरप्रच्छन्नाःपरैःपरिज्ञातास्ततोपिविद्रवंतःपूर्वराजवल्लभजनायत्र ॥ १२ ॥ अनंतैश्चोरैर्मोषार्थंरुद्धामार्गेषुगमागमाजनसंचारायत्र ॥ महानुभावोविदूरथस्तद्वैधुर्येणसनीहारादिनेषुआतपायत्र ॥ १३ ॥ पिंडवत्करेग्रहीतुंशक्याइत्यौत्प्रेक्षिकम् ॥ घनाध्वनयोयत्र ॥ १४ ॥ इतिउद्घोषयन्भेर्यःभेरीः ॥ छांदसःसुब्व्यत्ययः ॥ वादयितुमारेभेजनइतिशेषः ॥ १५ ॥ अथपुत्रस्यराज्याभिषेकानंतरंसिंधुःस्वराजधानींविवेश ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ निबंधनानिमर्यादाः ॥ चिह्नानिमुद्रादिषुसिंधुनामांकनानि ॥ १८ ॥ १९ ॥ पवनेशांतेपवनकृतास्तृणपर्णधूल्यादिपदार्थानामावृत्तयोभ्रमणानियथाशाम्यंतितद्वत् ॥ २० ॥ २१ ॥ समीरावायवःसैंधवीनांमुखकमलेअलिकुलानिभ्रमरपंक्तिभूतानलकचयान्विलोलयंतः ॥ तन्मधुप्रायाणांतत्स्वेदजललवानांवलनेनमत्ताइवमंदगतित्वादाकुलाःसंतस्तच्छैत्यसौरभ्यादिमंगलगुणैःसर्वदेशतःसंतापदौर्गंध्याद्यशिवगुणान्विलोलयंतोडलयोरभेदाद्विलोडयंतउपघ्नंतइववबुः ॥ २२ ॥ ॥ ७ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउ०एकपंचाशत्तमःसर्गः ॥ ५१ ॥ राज्ञोत्रमरणंतस्यसंसारस्यमृषात्मता ॥ तथातत्पुरलीलायावर्ण्यतेवासनात्मता ॥१॥ मूढंमूर्छितम् ॥१ ॥ २ ॥ संपन्नेउत्प

प्रवृत्तादशदिङ्योथप्रवेष्टुंसैंधवंपुरम् ॥ कराःकरिहयाकारैरत्नपूराइवांबुधिम् ॥ १७॥ निबंधनानिचिह्नानिशासनानिदिशंप्रति ॥ क्षणान्निवेशयामासुर्मंडलंप्रतिमंत्रिणः ॥ १८ ॥ उदभूदचिरेणैवदेशेदेशेपुरेपुरे ॥ जीवितेमरणेमानेनियमोयमतोयथा ॥ १९ ॥ अथशेमुर्निमेषेणदेशोपप्लवविभ्रमाः ॥ प्रशांतोत्पातपवनाःपदार्थावृत्तयोयथा ॥ २० ॥ सौम्यतामाजगामाशुदेशोदशदिगन्वितः ॥ क्षीरोदःक्षुभितावर्त्तोद्रागिवोद्धृतमंदरः ॥ २१ ॥ ववुरलकचयान्विलोलयंतोमुखकमलालिकुलानिसैंधवीनाम् ॥ जललववलनाकुलाःसमीराअशिवगुणानिवसर्वतःक्षणेन ॥ २२ ॥ ॥इत्यार्षे० वा० वा० दे० मो० उ० लीलोपा० सिंधुराष्ट्रवर्णनंनामएकपंचाशत्तमःसर्गः ॥ ५१ ॥

॥ श्रीवसिष्ठउवाच ॥ ॥ एतस्मिन्नंतरेरामलीलावाचसरस्वतीम् ॥ श्वासावशेषमालोक्यमूढंभर्त्तारमग्रगम् ॥ १ ॥ प्रवृत्तोदेहमुत्स्रष्टुंमद्भर्त्तायमिहांबिके ॥ ज्ञप्तिरुवाच ॥ ॥ एवंरूपमहारंभेसंग्रामेराष्ट्रसंभ्रमे ॥ २ ॥ संपन्नेपिस्थितेप्युच्चैर्विचित्रारंभमंथरे ॥ नकिंचिदपिसंपन्नंराष्ट्रंनचमहीतलम् ॥ ३ ॥ नस्थितंक्वचनाप्येवंस्वप्नात्मकमिदंजगत् ॥ तस्यतन्मंडपस्यांतःशवस्यनिकटांबरे ॥ ४ ॥ इदंभूराष्ट्रमाभातिभर्त्तृजीवस्यतेनघे ॥ अंतःपुरगृहांतेतदिदंराष्ट्रान्वितोदरम् ॥ ५ ॥ वसिष्ठविप्रगेहेंतर्विंध्याद्रिग्रामकेस्थितम् ॥ वसिष्ठविप्रगेहेंतःशवगेहजगत्स्थितम् ॥ ६ ॥ शवगेहजगत्कुक्षाविदंगेहजगत्स्थितम् ॥ एवमेषमहारंभोजगत्त्रयमयोभ्रमः ॥ ७॥ त्वयामयानयानेनसंयुक्तःसार्णवावनिः ॥ गिरिग्रामकदेहांतर्मध्येगगनकोशके ॥ ८ ॥ स्वात्मैवकचतिव्यर्थोनकचत्येववाक्वचित् ॥ तत्पदंपरमंविद्धिनाशोत्पादविवर्जितम् ॥ ९ ॥ स्वयंकचितमाभातंशांतंपरमनामयम् ॥ किलमंडपगेहेंतःस्वस्वभावोदितात्मनि ॥ १० ॥

न्नेस्थितेअपिशब्दाद्विनष्टेपिक्वचनक्वचिदपि ॥ क्वचनेत्यखंडमव्ययम् ॥ नसंपन्नंनस्थितंननष्टंचेत्यर्थः ॥ ३ ॥ तन्मंडपस्यप्राग्दृष्टतादृशाल्पतरमंडपस्यांतःपद्मशवस्य ॥ ४ ॥ तद्विदूरथब्रह्मांडपद्मांतःपुरगृहांतेस्थितंराष्ट्रैरन्वितमुदरंयस्यतथाभूतमिदंपाद्मब्रह्मांडंवसिष्ठविप्रगेहेंतःस्थितमित्यन्वयः ॥ ५ ॥ उक्तमेवव्यतिहारेणद्रढयति ॥ वसिष्ठेति ॥ ६ ॥ ॥ ७ ॥ अनयाद्वितीयलीलया ॥ अनेनत्वद्भर्त्रा ॥ ८ ॥ एकैकांतरपरमुत्पन्नमित्यपिकल्पनैव वस्तुतश्चैतन्यएवनाकाशे आकाशादिसहितत्रितयाध्यासादित्याशयेनाह ॥ स्वात्मैवेति ॥ विषयमिथ्यात्वेचिंतितत्संवलितरूपमपिनास्त्येवेत्याशयेनाह ॥ नकचत्येवेति ॥ तथाचनिर्विषयचिन्मात्रमेवावशिष्यतेतदेवमुख्यंज्ञेयमित्याह ॥ तदिति ॥ ९ ॥ स्वयंकचितंस्वप्रकाशंतदेवमंडपगेहांतःस्वेनचिन्मात्रस्वभावेनोदितेस्वात्मनिआभातंनवस्त्वंतरमित्यर्थः ॥ किलेतिविद्वत्प्रसिद्धौ ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंडपांतर्गते भूताकाशेपिनजगदस्तिकिंवाच्यंशुद्धचिदाकाशइत्याशयेनाह ॥ एवमिति ॥ ११ ॥ नन्वल्पांतिबृहतोऽसमावेशात्तत्प्रत्ययोयदिभ्रमस्तर्हिंतिबृहतोब्रह्मणोमंडपस्तदया याकाशेष्वसमावेशात्तत्रशास्त्राचार्योपदेशात्तत्प्रत्ययोऽपिभ्रमःकिंनस्यादित्याशंक्योपजीव्यविरोधान्मैवमित्याह ॥ भ्रमद्रष्टुरिति ॥ १२ ॥ ननुतर्हिंभ्रमएवभ्रमंपश्यतुनान्यस्त त्राह ॥ भ्रमइति ॥ द्रष्टृव्यापारफलाधारोहिदृश्यः ॥ नचस्वात्मनिकेनचिद्व्यापरितुंशक्यतेएकत्रकर्तृकर्मताविरोधात् ॥ नचद्रष्टर्यसतिदृश्यस्यसत्तास्फूर्तीसिध्यतइतिभावः ॥ अयंद्रष्टृदृश्यक्रमाभावोद्वैतस्यैवदूषणम् अद्वैतस्यतुसहजस्यभूषणमेवेत्याशयेनाह ॥ द्रष्ट्रिति ॥ १३ ॥ १४ ॥ एवमल्पतरेबृहत्तरासमावेशोऽपिदृश्यस्यैवदूषणंनसर्वाधिष्ठानचैतन्यस्येत्याशयेनाह ॥ किलेत्यादिना ॥ स्वस्वव्यवहारानुकूलदेशवैपुल्यव्यवस्थयाविहरंतिसंचरंति ॥ किलेत्याश्चर्ये ॥ १५ ॥ अनुभूयतेतत्त्वज्ञैरित्यर्थः ॥ तेनानुभवात्मकप्रत्य

एवमारंभघनयोरपिमंडपयोस्तयोः॥ उदरेशून्यमाकाशमेवास्तिनजगद्भ्रमः॥ ११ ॥ भ्रमद्रष्टुरभावेहिकीदृशीभ्रमताभ्रमे॥ नास्त्येव भ्रमसत्तातोयदस्तितदजंपदम्॥ १२॥ भ्रमोदृश्यमसत्तस्यद्रष्टृदृश्यदशाकुतः॥ द्रष्टृदृश्यक्रमाभावादद्वयंसहजंहितत्॥ १३ ॥ तत्पदंपरमं विद्धिनाशोत्पादविवर्जितम्॥ स्वयंकचितमाभातंशांतमाद्यमनामयम्॥ १४ ॥ किलमंडपगेहांतःस्वस्वभावोदितात्मनि॥ विहरंतिजनास्तत्रस्वगेहेस्वव्यवस्थया॥ १५॥ नजगत्तत्रनोसर्गःकंश्चिदप्यनुभूयते॥ तेनाहमजमाकाशंजगदित्येववर्त्तते॥ १६ ॥ सर्वंशून्यात्मविज्ञानंमेर्वादिगिरिजालकम्॥ नेदंकुड्यमयंकिंचिद्यथास्वप्नेमहापुरम्॥ १७ ॥ देशेप्रादेशमात्रेपिगिरिजालमयान्यपि ॥ वज्रसाराणिखान्येवलक्षाणिजगतोविदुः ॥ १८ ॥ जगंतिसुबहून्येवसंभवंत्यणुकेपिच॥ कदलीपल्लवानीवसन्निवेशेनभूरिशः॥ १९ ॥ त्रिजगच्चिदणावंतरस्तिस्वप्नपुरंयथा॥ तस्याप्यंतश्चिदणवस्तेष्वप्येकैकशोजगत्॥ २०॥ तेषांयस्मिन्जगत्येषपद्मोराजाशवःस्थितः॥ लीलातवसपत्नीयंप्राप्तापूर्वतराशुभे ॥ २१ ॥ यदैवमूर्छामायातालीलेयंपुरतस्तव॥ तदैवभर्त्तुःपद्मस्यशवस्यनिकटेस्थिता॥ २२॥

क्षप्रमाणेनाहंकारसाक्षिभूतंयच्चिदाकाशंतदेवाज्ञदृशाजगदितिरूपेणवर्त्ततइतिनिश्चितमित्यर्थः ॥ १६ ॥ एवमनुमानेनापितन्निश्चयंसाधयति ॥ सर्वमिति ॥ मेर्वादिगिरिजालकोपलक्षितंसर्वमिदंदृश्यंशून्यात्मस्वरूपज्ञानमात्रमेवनकुड्यमयंनयथादृष्टस्थूलस्वभावम् तत्समावेशायोग्येअल्पप्रदेशेप्रतीतत्वात् देहांतःस्वप्नदृष्टमहापुरवदित्यर्थः ॥१७॥ स्वप्नेसर्वानुभवसिद्धांव्याप्तिंदर्शयति ॥ देशेइति ॥ कंठेस्वप्नःसमाविशेदितिश्रुतेःकंठादिहृदयांतेप्रादेशमात्रेखानितत्प्रदेशावच्छिन्नात्मचैतन्यान्येव ॥ औपाधिकंबहुवचनम् ॥ गिरिजालमयानिविदुःपश्यंतिसर्वेस्वप्ने ॥ १८ ॥ तथादार्ष्टांतिकेपिसंभवमुपनयेनदर्शयति ॥ जगंतीति ॥ १९ ॥ निगमनेनप्रसाधितंद्रढयति ॥ त्रिजगदिति ॥ २० ॥ पृष्टंसमाधायतंत्सुरलीलातत्त्वंवक्तुकामाप्रस्तुतकथामादत्ते ॥ तेषामित्यादिना ॥ पूर्वराजगमनापेक्षयापूर्वतरा ॥ २१ ॥ २२ ॥

. १ क्वचिदितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सासपत्नीयस्यभावस्यस्थितेस्तंतत्सपत्नीकंभावम् ॥ २३ ॥ तस्यपद्मस्यवरगेहलक्षणेवास्तूनिभवावास्तव्यास्तेजनाअस्याःकिंरूपंपश्यंतिअथवाकिंवदंतिइत्येतत्सर्वंसमासेनसंक्षेपेणवद ॥२४॥ लीलांतरभूतायाःस्वस्याएववृत्तांतम् ॥ अंतंनिर्णयंददातीत्यंतदम् ॥ दृश्याःसम्यग्द्रष्टुंशक्यामरणपरलोकगमनादिदुर्दशायेनतम् ॥२५॥ इयमेतन्नगरादिभावेनदृश्यमानाजगन्मयीभ्रांतिस्तांभ्रांतिमेषविदूरथभूतस्तवसपत्नोभर्त्तातस्मिन्नेवशवाश्रयेसद्मनिपश्यतीत्यन्वयः ॥२६॥ इदंत्वयादृष्टंयुद्धंस्वाभयुद्धवद्भ्रांतियुद्धमेव ॥ एषात्वत्पृष्टलीलापिभ्रांतिरेव ॥ एषजनश्चाऽजनोजन्मादिविक्रियारहितात्मैव ॥ एषसंसारः ॥२७॥२८॥२९॥ दृश्यशब्दस्यार्थंदृशिकर्मतामुज्झतित्यजति ॥ ३० ॥ एषासंसारस्थितिः ॥

लीलोवाच ॥ कथमेषापुरादेविसंपन्नातत्रदेहिनी ॥ कथंचतत्सपत्नीकभावमाप्तवतीस्थिता ॥२३॥ तेचास्यावदकिंरूपंपश्यंत्यथवदंति किम्॥तद्गेहवरवास्तव्याःसमासेनेतिमेवद॥२४॥ ॥श्रीदेव्युवाच॥ ॥शृणुसर्वंसमासेनयथापृष्टंवदामिते॥लीलेलीलास्ववृत्तांतमंतंदंदृश्यदुर्दृशम्॥२५॥ पद्मस्तवसभर्तैषभ्रांतिंतावत्ततामिमाम्॥इयंजगन्मयीतस्मिन्नेवसद्मनिपश्यति॥२६॥ भ्रांतियुद्धमिदंयुद्धमेषा भ्रांतिर्जनोऽजनः॥भ्रांत्यैवास्तीहमरणमेषचैवंभ्रमात्मकः॥२७॥ भ्रमक्रमेणानेनैवलीलास्यदयितास्थिता॥ त्वंचैषाचवरारोहेस्वप्नमात्रंवरांगने॥२८॥यथाभवत्यावेतस्यस्वप्नमात्रंवरांगने॥तथाभवत्योर्भर्त्तैषतथैवाहमपिस्वयम्॥२९॥जगच्छोभैवेदृशीयंदृश्यमेतदिहोच्यते॥ एतदेवपरिज्ञातंदृश्यशब्दार्थमुज्झति॥३०॥ एवमेषात्वमेषाचसंपन्नैवमसौनृपः॥ अहंचात्मनिसत्यत्वंगतासर्वतयात्मनः ॥३१॥ इमेवयमिहान्योन्यंसंपन्नाश्चोदिताइति॥ इत्थंसर्वात्मकतयामहाचिद्घनसंस्थितेः॥३२॥ एवमेषास्थिताराज्ञीहारिहासविलासिनी॥ लीलाविलोलवदनानवयौवनशालिनी॥ ३३ ॥ पेशलाचारमधुरामधुरोदारभाषिणी॥ कोकिलास्वरसंकाशामदमन्मथमंथरा॥ ३४ ॥ असितोत्पलपत्राक्षीवृत्तपीनपयोधरा॥ कांताकांचनगौरांगीपक्वबिंबफलाधरा॥ ३५॥ त्वत्संकल्पात्मकस्यैषायदाभर्त्तुर्मनःकला॥ तदात्वत्सदृशाकारास्थितैषाचिच्चमत्कृतौ॥ ३६ ॥ त्वद्भर्त्तुर्मरणेक्षिप्रंसमनंतरमेवहि ॥ त्वद्भर्त्रैषापुरोदृष्टात्वत्संकल्पात्मनामुना॥ ३७॥ यदाधिभौतिकंभावंचेतोनुभवतिस्वयम् ॥ चेत्यंसन्मयमेवातआतिवाहिककल्पनम्॥ ३८॥

एवंभ्रांतिरूपैव॥ आत्मनःसर्वतयापूर्णतया ॥३१ ॥ इमेनृपादयोवयमन्योन्यमनुग्राह्यानुग्राहकभावेनचोदिताःप्रेरिताइतीत्थंमहाचिद्घनस्यसंस्थितेर्मिथ्याकल्पनास्थितेर्यथासंपन्नाएवमेषापिराज्ञीसंपन्नास्थितेत्यन्वयः ॥ ३२ ॥ ३३ ॥ पेशलादक्षा ॥ आचारेणमधुराहृद्या॥ कोकिलायाःस्वरेणसंकाशासदृशस्वरा ॥ ३४ ॥ ३५ ॥ मनःकलामनोवृत्तिस्तद्वासनाच ॥ जातेतिशेषः ॥ ३६ ॥ ३७॥ यदिवासनामयीयंकथंतर्हिसत्यतयातेनानुभूतातत्राह ॥ यदेति ॥ वस्तुतआतिवाहिककल्पनंप्रातिभासिकमेव॥ चेत्यंदृश्यम् ॥ तच्चचेतश्चित्तंयदाभ्यासदृढवासनयाआधिभौतिकंव्यावहारिकंभावमनुभवतितदाअतोनुभवाच्चेत्यंसन्मयंपरमार्थसत्यमित्येवभवतीत्यर्थः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदातुविवेकज्ञानाभ्यासेनाधिभौतिकंभावंनसन्मयंअनृतंवेत्तितदासत्याद्दृढयातद्वासनयाप्रपंचेआतिवाहिकसंकल्पःप्रातिभासिकनिर्णयउपजायते ॥३९॥ वासनामयलीलां तररूपयात्वयागतःसंगतएव॥४०॥ त्वयाप्यसौस्ववासनामयएवदृष्टइतिप्राग्दर्शितब्रह्मांडत्रयतयापरिणता ॥ सर्वगत्वात्सर्ववासनानुगतत्वात्सर्वाकारविवर्त्तोपपत्तेरित्यर्थः॥४१॥ तदेवस्पष्टमाह ॥ ब्रह्मेति ॥ स्वप्नशक्त्याविक्षेपशक्त्या ॥ स्वस्वशक्त्येतिपाठेतत्तद्वासनाशक्त्या॥४२॥यथायथाययद्रूपेणउन्नयेद्भोजकादृष्टबलादाविर्भावयेत् ॥तीव्रसंवेगोदृढा भिनिवेशवासनातस्माद्धेतोः ॥ ४३ ॥ मृतिमोहःस्वस्वमरणानुकूलमूर्छातत्क्षणेनोपलक्षितौयदास्थितौतदैवाभ्यामिदंवक्ष्यमाणंसर्वंबुद्धंस्वकल्पनयाऽनुभूतम् ॥ प्रतिभासोवास नोद्बोधस्तद्वशात् ॥ ४४ ॥ पूर्वईदृशंकर्मकृतमितिशेषः ॥ ४५ ॥ साकल्पनात्मिकापिजनताभोजकादृष्टबलात्सत्यतामर्थक्रियासमर्थतांयाता ॥ ४६ ॥ यत्पृष्टंपूर्वंतत्रकथंप्रा प्तेतितस्योत्तरमाह ॥ इत्येवमिति ॥ इतिएवंवक्ष्यमाणप्रकारोभावोभिसंधिर्यस्याःसातया ॥४७॥ इत्यर्थैनैतस्माद्धेतोःपूर्वमेवमृता ॥ ४८ ॥ अस्याममत्वदाराधनेत्वत्प्रसादे

यदाधिभौतिकंभावंचेतोवेत्तिनसन्मयम् ॥ आतिवाहिकसंकल्पस्तदासत्योपजायते ॥ ३९ ॥ अथोमरणसंवित्त्यापुनर्जन्ममयेभ्रमे॥ त्वंहिसंविदितानेनत्वयाचगतएवसः ॥ ४० ॥ इत्थंत्वांदृष्टवानेषदृष्टश्चैषत्वयेतिच ॥ त्वमप्यात्मनिसंपन्नासर्वगत्वाच्चिदात्मनः॥ ४१ ॥ ब्रह्मसर्वगतंयस्माद्यथायत्रयदोदितम् ॥ भवत्याशुतथातत्रस्वप्नशक्त्यैवपश्यति ॥४२॥ सर्वत्रसर्वशक्तित्वाद्यत्रयाशक्तिरुन्नयेत् ॥ आ स्तेतत्रतथाभातितीव्रसंवेगहेतुतः ॥ ४३ ॥ मृतिमोहक्षणेनैवयदैतौदंपतीस्थितौ ॥ तदैवाभ्यामिदंबुद्धंप्रतिभासवशाद्धृदि ॥ ४४ ॥ आ वयोःपितरावेताविमेवैचापिमातरौ ॥ देशएषधनंचेदंकर्मेदंपूर्वमीदृशम् ॥ ४५ ॥ आवांविवाहितावेवमेवंनामैकतांगतौ ॥ एतयोःसा पिजनतायातातत्रैवसत्यताम् ॥ ४६ ॥ तथैवात्रास्तिदृष्टांतःप्रत्यक्षंस्वप्नवेदनम् ॥ इत्येवंभावयालीलेलीलयाहमथार्चिता ॥ ४७ ॥ ना हंस्यांविधवेत्येवंवरोदत्तोमयाप्यसौ ॥ इत्यर्थैनमृतापूर्वमेवेहखलुबालिका ॥ ४८ ॥ भवतांचेतनांशानामहंचेतनधर्मिणी ॥ कुलदेवी सदापूज्यास्वतएवकरोम्यहम् ॥ ४९ ॥ अथास्याजीवकोदेहात्प्राणमारुतरूपधृक् ॥ मनसाचलतांप्राप्तोमुखाग्रत्यक्तदेहकः ॥५०॥ ततो मरणमूर्छांतेगृहेस्मिन्नेवचैतया ॥ बुद्धौभावितआकाशेदृष्टोजीवात्मनाततः ॥ ५१ ॥

चकोहेतुस्तत्राह ॥ भवतामिति ॥ चेतनांशानांव्यष्टिचे तनानांचेतनधर्मिणीहैरण्यगर्भचेतनात्वत्समष्टिचेतनात्मिका ॥ ४९ ॥ पुराकथंप्रामेत्यस्यप्रश्नांशस्योत्तरमुक्त्वादेहिनीकथंसंपन्नेतितदंशस्योत्तरमाह ॥ अथेत्यादिना ॥ अथदे हादुच्चिक्रमिषुरस्याअंगुष्ठपरिमितलिंगदेहमात्रत्वादल्पोजीवोजीवकःप्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयतीतिश्रुतेरुत्क्रमणस्यप्राणाधीनत्वात्प्राणंतर्हिवागप्ये तीत्यादिश्रुत्यासर्वकरणानांप्राणेप्ययाच्चप्राणमारुतरूपधृग्बभूवेत्यर्थः ॥ यथासंकल्पितंलोकंनयतीतिश्रुतेर्यंयंवापिस्मरन्भावमित्यादिस्मृतेश्चभाव्यर्थसंकल्पप्रधानेनमनसाच लतांतत्तदर्थप्राप्युत्सुकतांतस्यहृदयस्याग्रंप्रद्योततेतेनप्रद्योतेनैषआत्मानिष्क्रामतिचक्षुष्टोवामूर्ध्नोवाअन्येभ्योवाशरीरदेशेभ्यइतिश्रुत्युक्तक्रमेणनाडीमार्गेणत्यक्तदेहकःअभूदिति शेषः ॥ ५० ॥ ततस्तदनंतरंजीवात्मनाअनयाअस्मिन्नेवगृहेब्रह्माकाशेभूताकाशेवाबुद्धौभावितःसंकल्पितोवक्ष्यमाणशरीरगमनकुमारीप्राप्त्यादिरूपोर्थोदृष्टः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोभावनावशात्पूर्वदेहस्मृत्यास्वमांतेस्वप्नमध्येइव ॥ इवार्थेऽत्रवशब्दोवाशब्दोवाबोध्यः ॥ रविकरैश्चोदितापद्मिनीवविकासितवासनामुकुलाएषालीलादयितस्यस्वयंललि
ताउपभोगयोग्यास्वयंचकांतंमनोहरंभर्त्तारमाभोक्तुमनुभवितुंकामोयस्यास्तथाविधा ॥ तुंकाममनसोरपीतितुमुनोमलोपः ॥ सरभसंलावण्यकांतिवेगसहितंमुखंयस्यास्तथा
विधासतीपद्मब्रह्मांडमंडलांतर्गत्वाभर्त्रासंयुतासंपन्नेत्यर्थः ॥ ५२ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउत्प० द्विपंचाशत्तमःसर्गः ॥५२॥ गतिमार्गोत्रलीलायाभर्त्तृप्राप्ति
श्चवर्ण्यते ॥ अज्ञानयोगसिद्धानामगतिश्चनभःपथि ॥ १ ॥ अनेनप्राग्वर्णितवासनामयेनैवदेहेन ॥ विष्टपंवक्ष्यमाणभुवनानि ॥ जातावेकवचनम् ॥१॥ ॥इतिउक्तप्रकारेणसं
चित्यस्मरणेनदेहादिभावंसंपद्यपतिप्राप्युत्साहेनसानंदंयथास्यात्तथापुप्लुवे ॥ पेलवाकारालघुशरीरा ॥ २ ॥ कुमारींस्वकन्याम् ॥ ३ ॥ हेज्ञप्तेःसखिइतिमातुःसंबोधनम् ॥ ४॥

संपन्नैषाहरिणनयनाचंद्रबिंबाननश्रीर्मानोन्नद्धादयितललिताकांतमाभोक्तुकामा ॥ पूर्वस्मृत्यासरभसमुखीसंयुतामंडलांतःस्वप्नां
तेवाऽप्रैंकृतिविभवापद्मिनीचोदितेव ॥५२॥ ॥इ०वा०वा०दे०मो०उ०ली० मरणसमनंतरदेहप्रतिभावर्णनंनामद्विपंचाशत्तमः
सर्गः॥५२॥ ॥६॥ ॥श्रीवसिष्ठउवाच॥ ॥ अथलब्धवरादेहेनानेनैवमहीपतिम् ॥ पतिमाप्तुंप्रयात्येषानभोमार्गेणविष्टपम् ॥१॥
इतिसंचिंत्यसानंदमुद्दाममकरध्वजा॥पुप्लुवेपेलवाकारापक्षिणीवनभस्तले॥२॥ कुमारींतत्रसाप्रापज्ञप्त्यैवप्रहितांहिताम्॥स्वसंकल्प
महादर्शात्पुरतोनिर्गतामिव॥३॥ ॥कुमार्युवाच॥ ॥दुहितास्मिसखिज्ञप्तेःस्वागतंतेऽस्तुसुंदरि॥प्रतीक्षमाणात्वामेवस्थितास्मीहनभःप
थि॥४॥ ॥लीलोवाच॥ ॥देविभर्त्तुःसमीपंमांनयनीरजलोचने॥महतांदर्शनंयस्मान्नकदाचननिष्फलम्॥५॥ ॥श्रीवसिष्ठउवाच॥
एहितत्रैवगच्छावइत्युक्तासाकुमारिका॥पुरस्तस्याःस्थिताव्योम्निमार्गदर्शनतत्परा ॥ ६ ॥ ततस्तदनुयातासाप्रापकोटरमंबरम् ॥ नि
र्मलंकरमालाग्रंयथालक्षणलेखिका॥७॥ मेघमार्गमथोल्लंघ्यवातस्कंधांतरेगता॥ सूर्यमार्गादभिगतातारामार्गमतीत्यच ॥८॥ वा
य्विंद्रसुरसिद्धानांलोकानुल्लंघ्यलाघवात्॥ब्रह्मविष्णुमहेशानांप्रापब्रह्मांडखर्परम् ॥ ९ ॥ हिमशैत्यंयथांतस्थंकुंभेऽभिन्नेबहिर्भवेत्॥
तथासंकल्पसिद्धासाब्रह्मांडान्निर्गताबहिः॥ १० ॥ स्वचित्तमात्रदेहैषास्वसंकल्पस्वभावजम् ॥ अंतरेवानुभवतिकिलैवंनामविभ्रमम्
॥ ११ ॥ ब्रह्मादिस्थानमाक्रम्यप्राप्यब्रह्मांडखर्परम्॥ ततोब्रह्मांडपारस्थाजलाद्यावरणानिच॥ १२ ॥

पूर्वमागमनान्मार्गाभिज्ञतांतस्यानिश्चित्यलीलोवाच ॥ देवीति ॥ देविदेवताशरीरंप्राप्ते ॥ ममभर्त्तुस्त्वत्पितुः ॥ ननुतवेवकांतार्थिन्याममकिंपितृसमीपगमनेनतत्राह ॥ महतामि
ति ॥ तथाचमत्प्रियार्थंमदुक्तंसंपादयेत्यर्थः ॥ ५॥ ६ ॥ कोटरंब्रह्मांडच्छिद्रभूतम् ॥ करमालानांप्राणिहस्तसमूहानाममंतलंयथाभाविशुभाशुभलक्षणभूताविधातृकृतालेखि
कारेखा ॥ ७ ॥ अभिगतानिर्गता ॥ ८ ॥ ब्रह्मविष्णुमहेशानांलोकांश्चोल्लंघ्येत्यर्थः ॥ ९ ॥ हिमस्यजलस्यशैत्यंअभिन्नेअच्छिद्रेपिकुंभेयथाबहिर्भवेन्निःसरेत् ॥ १० ॥ इदं
चगमनंचित्तकल्पनामात्रमितिस्मारयति ॥ स्वचित्तेति ॥ ११ ॥ श्लोकार्द्धमनुवादः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिद्गगनंमायासंवलितचिदाकाशः अतिवेगेनधावतागरुडेनापिसर्वतः अदृष्टपारपर्यंतमित्यन्वयः ॥ १३ ॥ १४ ॥ वेधयित्वा छिद्रीकृत्येवेत्यौत्प्रेक्षिकम् ॥ वास्तवच्छिद्रानपेक्ष
णात् ॥ १५ ॥ तारापथान्नभसःअधस्तस्यपद्मस्यमहीमंडलम् ॥ १६ ॥ १७ ॥ १८ ॥ स्वतःप्रतिभावशतःस्वतर्कतः ॥ १९ ॥ २० ॥ प्राग्भवनीभर्त्तारमितिशेषः ॥२१॥२२॥
पूर्वप्रश्नशेषसहितंपुनःपृच्छति ॥ तेभृत्याइति ॥ कयाधियाकिंवक्ष्यंतितच्चकथमुपपद्यते ॥ राज्ञःपूर्ववृत्तांतस्यविस्मरणेकेयंकस्येयमितिशंकयास्मरणेऽपिशिष्टलोकविगर्हितत
यातत्परिग्रहासिद्धेरितिभावः ॥ तांकथांवद ॥२३॥ अपूर्वाकाचिदियमितिसर्वेषांप्रतीतौहिउक्तदोषःस्यात्सैवतावत्सत्यसंकल्पास्मदादिप्रभावान्नभविष्यतीतिदेवीसमाधत्ते ॥

समुल्लंघ्यपुरःप्रापमहाचिद्गगनांतरम् ॥ अदृष्टपारपर्यंतमतिवेगेनधावता ॥ सर्वतोगरुडेनापिकल्पकोटिशतैरपि ॥ १३ ॥ तत्रब्रह्मांडल
क्षाणिसंत्यसंख्यानिभूरिशः ॥ तान्यन्योन्यमदृष्टानिफलानीवमहावने ॥ १४ ॥ तत्रैकस्मिन्पुरःसंस्थेविततावरणान्विते ॥ वेधयित्वावि
वेशांतर्वदरंरुमिकोयथा ॥ १५ ॥ पुनर्ब्रह्मेंद्रविष्णवादिलोकानुल्लंघ्यभास्वरान् ॥ तन्महीमंडलंश्रीमत्प्रापतारापथादधः ॥१६॥ तत्रतन्मं
डलंप्राप्यतत्पुरंतच्चमंडपम् ॥ प्रविश्यपुष्पगुप्तस्यशवस्यनिकटेस्थिता ॥ १७॥ एतस्मिन्नंतरेसाचनददर्शकुमारिकाम् ॥ मायामिवपरि
ज्ञातांकापियातांवराननां ॥ १८ ॥ मुखमालोक्यसातस्यस्वभर्तुःशवरूपिणः ॥ इदंबुद्धवतीसत्यंप्रतिभावशतःस्वतः ॥ १९ ॥ अयंसभ
र्त्तासंग्रामेनिहतोममसिंधुना ॥ वीरलोकानिमान्प्राप्यक्षणंशेतेयथासुखम् ॥ २० ॥ अहंदेव्याःप्रसादेनसशरीरैवमीदृशम् ॥ इहप्राग्भव
तीधन्यामत्समानास्तिकाचन ॥ २१ ॥ इतिसंचिंत्यसाहस्तेगृहीत्वाचारुचामरम् ॥ वीजयामासचंद्रेणद्यौरिवावनिमंडलम् ॥ २२ ॥
प्रबुद्धलीलोवाच ॥ ॥ तेभृत्यास्ताश्चवैदास्यःसराजाचप्रबुद्धवान् ॥ वक्ष्यंतिवदतांदेविकिंकयैवकथंधिया ॥ २३ ॥ ॥ श्रीदेव्युवाच ॥
सराजासाचतेभृत्याःसर्वएवपरस्परम् ॥ चिदाकाशैकतावेशादावयोश्चप्रभावतः ॥ २४ ॥ महाचित्प्रतिभासत्वान्महानियतिनिश्चया
त् ॥ अन्योन्यमेवपश्यंतिमिथःसंप्रतिबिंबितात् ॥ २५ ॥ इयंमेसहजाभार्याममेयंसहजासखी ॥ ममेयंसहजाराज्ञीभृत्योयंसहजोमम
॥२६॥ केवलंत्वमहंसाचयथावृत्तमखंडितम् ॥ ज्ञास्यामइदमाश्चर्यंननुकश्चिदपीतरः ॥ २७ ॥ ॥प्रबुद्धलीलोवाच ॥ ॥ अमुनैवशरी
रेणकिमर्थंनगतापतिम् ॥ एषावरेणसंप्राप्तालीलाललितवादिनी ॥ २८ ॥

सराजेत्यादिना ॥ राजादयःसर्वएवान्योन्यमैकमत्येनपरस्परमेवंवक्ष्यमा
णप्रकारेणपश्यंतीत्यन्वयः ॥ ऐकमत्येहेतवश्चिदाकाशेत्यादयः ॥मिथःस्वस्वबुद्धौसंप्रतिबिंबितात्प्रतिबिंबवदंतर्निविष्टात्साक्षिचिदाकाशस्यैकतयैकमत्यानुगुण्येनआवेशात्स्फु
रणात् ॥ महाचिद्ब्रह्मचैतन्यंतत्प्रतिभासत्वाद्बीजकादृष्टानुगुणतद्विवर्तत्वात्महानियतिरनेनेत्थमेवभाव्यमितीश्वरसंकल्पस्तत्संश्रयात्तदधीनत्वाच्चेत्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥
साविदूरथलीलाच ॥ इतरःननुज्ञास्यतीत्यर्थः ॥ २७ ॥ पतिसंप्राप्तेनिवर्णिताएषालीलात्वद्वरबलेनामुनास्थूलेनशरीरेणकिमर्थंनगतेत्यन्वयः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्रबुद्धधियः अस्थूलात्मप्रबोधहीनाः ॥ २९ ॥ प्रबोधिभिः सत्यसंकल्पैरीश्वरहिरण्यगर्भादिभिरिति नियतिर्मर्यादा स्थापिता ॥ तत्र दृष्टांतः ॥ यथेति ॥ तथा च भाष्यम् ॥ यत्र हि यदध्यासस्तत्कृतेन गुणेन दोषेण वा अणुमात्रेणापि स न संबध्यत इति ॥ ३० ॥ नन्वस्यास्त्वद्वरादस्थूलात्मनिश्चयः कुतो नाभूत्तत्राह ॥ यावदित्यादिना ॥ ३१ ॥ ३२ ॥ ३३ ॥ अनेन त्वद्देहसदृशेन ॥ ३४ ॥ आतिवाहिकदेहप्राप्तौ वा कथं स्थूलाहंभावनिवृत्तिस्तत्राह ॥ शुष्केति ॥ अंगारे ज्वलदग्नौ पतद्दह्यते एतदेव निदर्शनमिति ॥ अयं स्थूलो देहः अहं देहं अहंकारवासनामात्रमयमातिवाहिकदेहं प्राप्त एव सन् विशीर्यते ॥ ३५ ॥ वरशापावपि प्राक्तनवासनाकर्मानुसारिणावेव तदुद्बोधकतया प्राणिभिर्लभ्येते इति स्मृतिदृष्टांतेनाह ॥ एतावदेवेति ॥ यथा प्रागभ्यस्ते ऽपि झटिति संस्कारानुद्बोधात्संचिंत्ये चिरं चिंतनयोग्ये अनुवाकाद्यर्थे केनचित्प्रतीकोदाहरणेन स्मारिते सति यथा त्वया हं स्मारितस्तथा सस्मृत इति स्मृतिर्भव

श्रीदेव्युवाच ॥ ॥ अप्रबुद्धधियः सिद्धलोकान्पुण्यवशोदितान् ॥ न समर्थाः स्वदेहेन प्राप्तुं छाया इवातपान् ॥ २९ ॥ आदिसर्गे च नियतिः स्थापितेति प्रबोधिभिः ॥ यथा सत्यमलीकेन न मिलत्येव किंचन ॥ ३० ॥ यावद्वेतालसंकल्पो बालस्य किल विद्यते ॥ निर्वेतालधियस्तावदुदयस्तस्य कः कथम् ॥ ३१ ॥ अविवेकज्वरोष्णत्वं विद्यते यावदात्मनि ॥ तावद्विवेकशीतांशुशैत्यं कुत उदेत्यलम् ॥ ३२ ॥ अहं पृथ्व्यादिदेहः खेगतिर्नास्ति मम उत्तमा ॥ इति निश्चयवान्योंऽतः कथं स्यात्सोऽन्यनिश्चयः ॥ ३३ ॥ अतो ज्ञानविवेकेन पुण्येनाथ वरेण च ॥ पुण्यदेहेन गच्छंति परं लोकमनेन तु ॥ ३४ ॥ शुष्कपर्णं किलांगारे एतदेवाशु दह्यते ॥ अयं देहमहं देहः प्राप्त एव विशीर्यते ॥ ३५ ॥ एतावदेव भवति वरशापविजृंभितैः ॥ यथा संचिंत्य एवाहं तथा स्मृत इति स्मृतिः ॥ ३६ ॥ यः सर्पप्रत्ययो रज्ज्वां स कथं सर्पकार्यकृत् ॥ आत्मन्येव हि यो नास्ति तस्य का कार्यकारिता ॥ ३७ ॥ यस्त्वेतन्मृत इत्येव मिथ्या समनुभूयते ॥ प्रागभ्यासस्य पुष्टस्य नामैतत्प्रविजृंभते ॥ ३८ ॥ स्वानुभूते जगज्जाले सुगमाः संस्मृतिभ्रमाः ॥ नान्यसंकल्पितो नाम सर्गाद्यभ्यास ईदृशः ॥ ३९ ॥ अंतरनुभूयमानाः संसृतयो बाह्यभूतजालानाम् ॥ अविदिततवेद्यदृशामपि दूरे पुंसामिवेंदवं बिंबम् ॥ ४० ॥ ॥ इत्यार्षे वा० वा० दे० मो० उ० ली० संसृतिविदितवेद्यनाम त्रिपंचाशत्तमः सर्गः ॥ ५३ ॥

तितद्वदित्यर्थः ॥ ३६ ॥ नन्वर्थक्रियाकारी स्थूलो देहः कथं तत्त्वबोधेन बाध्यत इत्याशंक्य तत्त्वदृशा अर्थक्रियैव नास्तीत्याह ॥ यइति ॥ आत्मनि स्वस्वरूपे ॥ ३७ ॥ यद्यसन्नेव देहस्तर्हि कथं मृतोऽयं देह इति सर्वानुभवस्तत्राह ॥ यस्त्विति ॥ यस्तु भ्रमो मिथ्या मिथ्यार्थः समनुभूयते एतदनुभवनं पुष्टस्योपचितस्य प्राक्तनाभ्यासस्य संस्कारात्प्रविजृंभत इत्यर्थः ॥ ३८ ॥ अन्येन वरशापादिप्रदेन हिरण्यगर्भेणेश्वरेण वा सम्यक्कल्पितः अस्मद्वासनादिनिरपेक्षतयैव रचित इति न ॥ ३९ ॥ ननु संसारस्यांतरवासनामयत्वे कथं बाह्यताप्रत्यय इत्याशंक्य दृष्टांतेन समाधत्ते ॥ अंतरिति ॥ अविदिततत्त्वदृशामज्ञानामप्यंतरेव संसृतयो न बहिः ॥ अध्यस्तं द्वितीयमैंदवं बिंबं दूरे भासमानमपि यथा आंतरभ्रांतिकल्प्यत्वादांतरमेव तद्वदित्यर्थः ॥ ४० ॥ ॥ इति श्रीवासिष्ठमहारा० उ० त्रिपंचाशत्तमः सर्गः ॥ ५३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नियतिःसर्वभावानांतथात्रमरणक्रमः ॥ भोगःकर्मगुणाचारादायुर्मानंचवर्ण्यते ॥१॥ प्रस्तुतप्रश्नोत्तरमुक्तानुवादेनोपसंहरति ॥ तस्मादित्यादिना ॥ वेद्यवेत्तारस्तत्त्वज्ञाः ॥ परंयोगाभ्यासजम् ॥१॥ नन्वातिवाहिकब्रह्मादिलोकेष्वप्यत्रेवचिराभ्यासादाधिभौतिकदेहत्वोदयःकिंनस्यात्तत्राह ॥ आधिभौतिकेति ॥ अपागादग्नेरग्नित्वम् त्रीणिरूपाणीत्येव सत्यंप्राणावैसत्यंतेषामेषसत्यइत्यादिश्रुतिषुस्थूलस्यसूक्ष्मेत्रिवृत्करणादिनाअध्यस्तत्वोक्तेःस्थूलापेक्षयासत्येआतिवाहिकभावेपुण्योत्कर्षात्प्राप्तेसतीत्यर्थः ॥ २ ॥ ननुतर्हिलीलायाःकथंपद्मप्राप्त्युत्तरमाधिभौतिकदेहत्वोद्भवस्तत्राह ॥ लीलेति ॥ नोइतिनञर्थकमव्ययंदेहलीदीपकन्यायेनोभयतःसंबध्यते ॥ परमंयोगजम् ॥ ३ ॥ देव्युक्तमभ्युपगम्य राजमरणदर्शनसूचितांजीवननियत्यनियतिमनुपपद्यमानांमन्यमानालीलोवाच ॥ एवमित्यादिना ॥ एषाप्रयातेतियदुपवर्णितंतदेवंत्वदुक्तरीत्याअस्तुउपपद्यताम् ॥ भर्त्ताप्रा

श्रीदेव्युवाच ॥ ॥ तस्माद्येवेद्यवेत्तारोयेवाधर्मपरंश्रिताः ॥ आतिवाहिकलोकांस्तेप्राप्नुवंतीहनेतरे ॥ १ ॥ आधिभौतिकदेहत्वंमिथ्याभ्रममयात्मकम् ॥ कथंसत्येस्थितिंयातिच्छायास्तेकथमातपे ॥ २ ॥ लीलाविदितवेद्यानोपरमंधर्ममाश्रिता ॥ केवलंतेनसाभर्त्तुःकल्पितंनगरंगता ॥ ३ ॥ ॥ प्रबुद्धलीलोवाच ॥ ॥ एवमेषाप्रयातास्तुभर्त्तापश्यममांबिके ॥ प्रवृत्तःप्राणसंत्यागेकर्त्तव्यंकिमिहाधुना ॥ ४ ॥ भावाभावेषुभावानांकथंनियतिरागता ॥ कथंभूयोप्यनियतिर्मृतिजन्मादिसूचिता ॥ ५ ॥ कथंस्वभावसंसिद्धिःकथंसत्तापदार्थगा ॥ कथमग्न्यादिपूष्णत्वंपृथ्व्यादौस्थिरताकथम् ॥ ६ ॥ हिमादिषुकथंशैत्यंकासत्ताकालखादिषु ॥ भावाभावग्रहोत्सर्गस्थूलसूक्ष्मदृशःकथम् ॥ ७ ॥ कथमत्यंतमुच्छ्रायंतृणगुल्मनरादिकम् ॥ वस्तुनायात्यनिष्टेपिस्थितेस्वोच्छ्रायकारणे ॥ ८ ॥ ॥ श्रीदेव्युवाच ॥ ॥ महाप्रलयसंपत्तौसर्वार्थास्तमयेसति ॥ अनंताकाशमाशांतंसद्ब्रह्मैवावतिष्ठते ॥ ९ ॥ तच्चिद्रूपतयातेजःकणोहमितिचेतति ॥ स्वप्नेसंविद्यथाहित्वमाकाशगमनादिच ॥ १० ॥

णसंत्यागेप्रवृत्तःप्रत्यक्षंपश्यइहास्मिन्विषयेतुअधुनाकिंकर्तव्यंकात्रोपपत्तिरितियावत् ॥ मयाइदानींकिंकर्त्तव्यमितितुनप्रश्नाशयःप्रश्नांतरैरसंगतेः ॥ उत्तरेकर्तव्यकार्यानुपदेशाच्च ॥ ४ ॥ भावानांदेहादीनांजीवनसौख्यादिभावेषुदुःखदौर्भाग्याद्यभावेषुचपूर्वंकथंनियतिरागताभूयःपुनरनियतिरप्यागताकथम् ॥ ५ ॥ ननुमास्तुनियतिरनियमएवास्तुतत्राह ॥ कथमिति ॥ स्वभावोजलस्यशैत्यमग्नेरौष्ण्यमेवेत्यादिः ॥ घटादिपदार्थगासत्ताभावरूपतानियमः ॥ ६ ॥ भावस्यसत्यरजतादेर्ग्रहःसंग्रहःअभावस्यशुक्तिरजतादेरुत्सर्गः भूम्यादेःस्थूलतामनइंद्रियादेःसूक्ष्मतैवेत्यादिनियमस्यदृशोदर्शनानिकथम् ॥ ७ ॥ शालतालादिवदत्यंतमुच्छ्रायमूर्ध्वंदैर्घ्यम् ॥ स्वोच्छ्रायकारणेस्थितेपि ॥ इष्टेअनिष्टेपिसर्वत्रानियमात्सर्ववस्तुष्वनाश्वासएवकिंनस्यादितिभावः ॥ ८ ॥ भवेत्सर्वत्रैवंरूपैवनियतिर्यदिजगत्सत्यैकस्वभावंस्याद्भवेद्वाअत्यंतानियतिर्यद्यनृतंमायामात्रप्रकृतिकंस्यात्सत्यानृतसंवलिताव्यक्तप्रकृतिकत्वात्तुसत्यानृतस्वभावाभोजकादृष्टानुगुणचिद्विवर्त्तव्यवस्थयैवव्यवतिष्ठतइतिसमाधिःसुदैवीतदर्थंशुद्धचिद्विवर्त्तक्रममाह ॥ महाप्रलयेत्यादिना ॥ ९ ॥ तेजःकणशब्देनशुद्धचिद्याप्तत्वाद्भास्वराणिसूक्ष्मभूतान्युच्यंते ॥ चेतत्यनुभवति ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेजःकणभूतश्चासावात्माअनात्मनिआत्मभिन्नत्वेनकल्पितेजलाद्यावरणेंतःस्थूलत्वंविंदतिकल्पनयालभतेतद्यत्स्थूलंतदेवेदंपरिदृश्यमानंब्रह्मांडमित्यर्थः ॥ ११ ॥ तत्रब्रह्मांडेंतः स्थितंहिरण्यगर्भाख्यंतद्ब्रह्मसहसिद्धंचतुष्टयमितिप्रागुक्तस्तेनेरंतर्मुखांशेनब्रह्माहमितिवेत्तिबाह्यवासनादूषितांशेनैवंप्राणिकर्मानुगुणसृष्टिसंकल्परूपेणमनोराज्यंचकुरुतेतदेवस त्यसंकल्पंमनोराज्यमिदंजगदित्यर्थः ॥१२॥ संविदःसंकल्पवृत्तयोयायथायादृशनियमानियमरूपाःकचिताअद्यापितथैवनिश्चलाःअव्यत्यस्ताःस्थिताः ॥ १३ ॥ ननुमनसोवै चित्र्याकारवासनामयत्वात्तथासंकल्पोदयेप्यात्मचैतन्यस्यतदनुसारीविवर्त्तःकुतस्तत्राह ॥ यदिति ॥ स्वयमेवेति ॥ आत्मचितःस्वच्छोपाध्यनुविधायित्वस्वाभाव्यात् ॥ अ तोनकिंचिदनियतस्वभावमुत्पद्यतइत्यर्थः ॥ १४ ॥ मायाशबलेब्रह्मणिअनादिनियतरूपेणस्थितस्यैवविश्वस्यआविर्भावादपिनियतिसिद्धिरित्याशयेनाह ॥ नचेति ॥ नकिंचि

तेजःकणोसौस्थूलत्वमात्मनात्मनिविंदति॥ असत्यमेवसत्याभंब्रह्मांडंतदिदंस्मृतम् ॥ ११ ॥ तत्रांतर्ब्रह्मतद्वेत्तिब्रह्मायमहमित्यथ॥ मनोराज्यंसकुरुतेस्वात्मैवंतदिदंजगत्॥ १२ ॥ तस्मिन्प्रथमतःसर्गेयायथायत्रसंविदः॥ कचितास्तास्तथातत्रास्थिताअद्यापिनिश्चलाः ॥ १३ ॥ यद्यथास्फुरितंचित्तंतत्तथाद्यात्मचिद्भवेत्॥ स्वयमेवानियमतस्तत्तस्यान्नेहकिंचन॥ १४॥ नचनामनकिंचित्त्वंयुज्यतेविश्वरूपिणः॥ त्यक्त्वासमस्तसंस्थानंहेमतिष्ठतिवैकथम्॥ १५॥ सर्गादौस्वयमेवांतश्चिद्यथाकचितात्मनि॥ हिमाग्न्यादितयाद्यापिसातथास्ते स्वसत्तया॥ १६॥ तस्मात्स्वसत्तासंत्यागःसतःकर्त्तुनयुज्यते॥ यदाचिदास्तेतेनेयंनियतिर्नविनश्यति ॥ १७ ॥ यद्यथाकचितंयत्रव्योमरूप्यपिपार्थिवम्॥ सर्गादौतस्यचलितुमद्ययावन्नयुज्यते॥ १८॥ यायथाचित्प्रकचिताप्रतिपक्षविदंविना ॥ नसाततःप्रचलतिवेदनाभ्यासतःस्वयम्॥ १९॥

त्वंसर्ववस्तुशून्यत्वंनयुज्यतेप्रलयेपीतिशेषः ॥ तथासतिकारणत्वव्याघातइत्यर्थांतरन्यासेनदर्शयति ॥ त्यक्त्वेति ॥ कटकरुचकपिंडत्वादिसमस्तसंस्थानंत्यक्त्वाहेमकथंतिष्ठति सर्वसंस्थानानांतत्रांतर्भावेणकस्यापित्यक्तुमशक्यत्वादित्यर्थः ॥ १५ ॥ यथाशैत्यौष्ण्यादिस्वभावेनकचिताआविर्भूतासाचित्तथातेनस्वभावेननियताअद्याप्यास्तेइत्यर्थः ॥ १६ ॥ किंच मायाशबलंब्रह्मयदिस्वाधिष्ठानसत्तांजह्यात्तदामायांतर्गतनियतीनामसत्त्वंभवेत् तत्त्वशक्यमेवेतिदर्शयन्नुपसंहरति ॥ तस्मादिति ॥ सतोमायाशबलब्रह्मणः ॥ नविनश्यति ॥ नापह्नोतुंशक्येतियावत् ॥ १७ ॥ नियत्यविपर्यासेपृथिव्यादिस्थितिरेवनिदर्शनमित्याशयेनाह ॥ यदिति ॥ १८ ॥ जीवननियतेर्मरणनियत्याविपर्यासदर्शनादाह ॥ प्रतिपक्षविदंविनेति ॥ १९ ॥

---

१ चितमित्यपिपाठः

२ चितमितिपाठः

CC-0. In Public Domain. Digitization by eGangotri

इदंचसर्वंमायिकदृशोक्तंपरमार्थदृशातुजगदेवनास्तीतिक्वनियत्याक्षेपइत्याशयेनाह ॥ जगदिति ॥ २० ॥ इतिनिश्चयाएवस्वभावसंपत्तिःस्वरूपावाप्तिः ॥ भूतानुभूतयोयथास्थितबोधाइत्यर्थः॥अथवाइतिप्राग्वर्णितरीत्यानियतिस्वभावसंपत्तिर्भूतानुभूतयोजीवनमरणादिपदार्थानुभवाश्चेत्यर्थः॥२१॥ नियतिशब्दार्थपर्यालोचनेप्ययमेवार्थःप्रसिध्यतीत्याशयेनाह ॥ सर्गादाविति ॥ अन्येनविरोधिनाअचलिताअविपर्यस्ता ॥ आवलितेतिपाठेअन्येनपदार्थांतरेणआवलितामिलिता ॥ यथाजन्मजीवनेमरणेनमिलितेएवनियतेनस्वातंत्र्येण यथाशैत्योष्ण्येविरोधित्वेनैवमिलिते क्रियाकारकेसाध्यसाधनभावेनेवेत्यर्थः ॥ २२ ॥ उक्तमर्थमुदाहृत्यदर्शयति ॥ गृहीतेति ॥ गृहीतासर्गादौस्वीकृताव्योमसंवित्तिर्व्योमाकारेणकचनंयेनचिद्व्योम्नातत्तथोक्तम् ॥ एवमग्रेपि ॥ २३ ॥ दृष्टान्तनिदृश्यकल्पनास्वात्मन्येवप्रसिद्धेत्याह ॥ स्वप्नेइति ॥ २४ ॥ तथाभावेपियथास्थितास्वरूपादप्रच्युतैवभवति ॥ तत्कुतः ॥ चिच्चमत्कारःअसंगस्वभावतातल्लक्षणाच्चातुर्यात् ॥ अथवाचिच्चमत्कारोमायातच्चातुर्यादसदेवयस्मात्समूहतेसत्यतयावितर्कयतीत्यर्थः ॥

जगदादावनुत्पन्नंयच्चेदमनुभूयते॥ तत्संविद्व्योमकचनंस्वप्नस्त्रीसुरतंयथा ॥ २० ॥ असत्यमेवसत्याभंप्रतिभानमिदंस्थितम् ॥ इतिस्वभावसंपत्तिरितिभूतानुभूतयः॥ २१ ॥ सर्गादौयायथारूढासंविल्कचनसंततिः ॥ साद्याप्यचलितान्येनस्थितानियतिरुच्यते ॥ २२ ॥ गृहीतव्योमसंवित्तिचिद्व्योमव्योमतांगतम् ॥ गृहीतकालतासंविच्छिन्नभःकालतांगतम् ॥ २३ ॥ गृहीतजलसंवित्तिचिद्व्योमवारिवत्स्थितम्॥ स्वप्नेयथाहिपुरुषःपश्यत्यात्मनिवारिताम्॥ २४ ॥ स्वप्नचित्संविदाभातिभवत्येषायथास्थिता ॥ चिच्चमत्कारचातुर्यादसदेतत्समूहते॥ २५ ॥ खत्वंजलत्वमुर्वीत्वमग्निवायुत्वमप्यसत्॥ वेत्त्यंतःस्वप्नसंकल्पध्यानेष्विवचितिःस्वयम् ॥ २६ ॥ मरणानंतरंकर्मफलानुभवनक्रमम्॥ सर्वसंदेहशांत्यर्थंमतिश्रेयस्करंशृणु ॥ २७॥ रूढादिसर्गेनियतिर्यैकद्वित्रिचतुःशता॥ पूर्वादिष्वायुषःपुंसांतस्यामेनियतिंशृणु॥ २८ ॥ देशकालक्रियाद्रव्यशुद्ध्यशुद्धीस्वकर्मणाम्॥ न्यूनत्वेचाधिकत्वेचनृणांकारणमायुषः॥ २९ ॥ स्वकर्मधर्मैर्ह्रसतिह्रसत्यायुर्नृणामिह॥ वृद्धेवृद्धिमुपायातिसममेवभवेत्समे॥ ३० ॥

॥ २५ ॥ २६ ॥ इत्थमितरनियतीर्व्यवस्थाप्यजीवननियतिरपिकर्मानुसारेणयुगभेदेनचकालविशेषपरिच्छिन्नैवेश्वरसंकल्पेनक्लृप्तेतिनमरणेनतद्भंगइतिवक्तुंकर्मफलानुभवक्रमनिरूपणंप्रतिजानीते ॥ मरणानंतरमिति ॥ यावन्मरणंप्रारब्धफलैःप्रतिबंधान्नतद्देहसंचितकर्माणिफलारंभायक्षमंतेमरणेतुसतिप्रतिबंधकापगमाद्यथायोगंफलारंभायोपक्रमंतइतिसूचनायमरणानंतरमित्युक्तिः ॥ एतच्छ्रवणंतवसर्वसंदेहशांत्यर्थंत्वन्मुखेनलोकेविख्यातंसदन्येषामप्यास्तिक्यबुद्धिजननान्मतौश्रेयस्करम् ॥२७॥ पूर्वंकृतयुगंतदादिषुयुगेषुकलावेकशतंद्वापरेद्विशतंत्रेतायांत्रिशतंकृतेचतुःशतमितिसंख्यातापुंसामायुषोयानियतिःसाआदिसर्गेरूढातस्यान्यूनाधिकभावेप्यवांतरनियतिंशृण्वित्यर्थः ॥ २८ ॥ आयुर्निमित्तभूतानांकर्मणांदेशाद्यशुद्ध्यावैगुण्येफलस्यन्यूनताशुद्ध्यतिशयेनफलाधिक्यमित्यर्थः ॥ २९ ॥ एवंविहितकर्माननुष्ठानमप्यायुःक्षयहेतुरित्याह ॥ स्वकर्मेति ॥ समंतत्तद्युगनियतसंख्यम् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विहिताकरणमिवनिषिद्धाचरणमप्यायुःक्षयहेतुरित्याह ॥ बालेति ॥ ३१ ॥ ३२ ॥ अंतमायुःसमाप्तिंगतवतःप्राप्तवतःपुरुषस्यदृश्यैनप्रत्यक्षमनुभूयंतइतिदृशस्तथाविधामर्मच्छेदवेदनाभवंति ॥ सर्वशरीरनाडीभ्यःप्राणानांवृत्त्युपसंहारकालेसहस्रवृश्चिकदंशवेदनासमंदुःखंभवतीतिपुराणेषुप्रसिद्धम् ॥३३॥ वर्णितंमरणदुःखंकिंसर्वेषांसममुतकेषांचित्सुखमप्यस्तिमरणोत्तरंचकिंसर्वेषांतुल्यागतिरुतयोगिनांविशिष्टेतिप्रश्नाशयः ॥३४॥ प्रश्नाशयानुरूपमेवोत्तरंवक्तुंपुरुषान्विभजते ॥ त्रिविधाइति ॥ प्राणमनसोर्नाभिहृदयकंठभ्रूमध्येब्रह्मरंध्रांतेषुनियतकालंनिरोधोधारणातदभ्यासी ॥ युक्तिमानूर्ध्वेच्छोत्क्रमणेपरकायप्रवेशेस्वाभिमतलोकप्राप्तिमार्गभूतनाडीद्वाराविशेषनिर्गमनप्रवेशादौचाभ्यस्तकौशलोयोगी ॥ ३५ ॥ तत्रधारणानिष्ठोमध्यमःक्रमेणयुक्तिमभ्यस्यसुखंप्रयाति ॥ युक्तियुक्तस्तुतथैवस्थितःसुखंप्रयातीतिविशेषइत्यर्थः ॥ ३६ ॥ मूर्खंलक्षयंस्तस्यदुःखमाह ॥ धारणेति ॥ ३७ ॥ वासनावेशेनवैवश्यमस्वाधीनचित्ततांप्राप्तः ॥ अतएवविषयाशयोनपरमार्थाशयः ॥ ३८ ॥ तत्रापिविहिताकर्त्तुर्दुःखातिशयमाह ॥ अशास्त्रेति ॥ ३९ ॥ तादृशदुःखकालोपलक्षकलिंगान्याह ॥ यदेति ॥ ४० ॥ परमांध्यंप्राप्यदिवाप्युदितास्तारकायस्यतथाविधोऽनालोकोनिष्प्रकाशोतएवघनंमेचकितंश्यामीभूतमंबरमाकाशंयस्यतथाविधः साभ्रोदिङ्मंडलाभोगोयस्यतथाविधइवभवतीतिसर्वत्रशेषः ॥ ४१ ॥ विच्छुरितोव्याप्तः ॥ ४२ ॥ परिवृत्तंभ्रमत्ककुब्चक्रंदिङ्मंडलंयस्य ॥ ४३ ॥

बालमृत्युप्रदैर्बालोयुवायौवनमृत्युदैः ॥ वृद्धमृत्युप्रदैर्वृद्धःकर्मभिर्मृतिमृच्छति ॥ ३१ ॥ योयथाशास्त्रमारब्धंस्वधर्ममनुतिष्ठति ॥ भाजनंभवतिश्रीमान्सयथाशास्त्रमायुषः ॥ ३२ ॥ एवंकर्मानुसारेणजंतुरंत्यांदशामितः ॥ भवंत्यंतंगतवतोदृश्यामर्मच्छेदवेदनाः ॥ ३३ ॥
प्रबुद्धलीलोवाच ॥ ॥ मरणंमेसमासेनकथयेंदुसमानने ॥ किंसुखंमरणंकिंवादुःखंमृत्वाचकिंभवेत् ॥ ३४ ॥ ॥ श्रीदेव्युवाच ॥ ॥ त्रिविधाःपुरुषाःसंतिदेहस्यांतेमुमूर्षवः ॥ मूर्खोथधारणाभ्यासीयुक्तिमान्पुरुषस्तथा ॥ ३५ ॥ अभ्यस्यधारणानिष्ठोदेहंत्यक्त्वायथासुखम् ॥ प्रयातिधारणाभ्यासीयुक्तियुक्तस्तथैवच ॥ ३६ ॥ धारणायस्यनाभ्यासंप्राप्तानैवचयुक्तिमान् ॥ मूर्खःस्वमृतिकालेसौदुःखमेत्यवशाशयः ॥ ३७ ॥ वासनावेशवैवश्यंभावयन्विषयाशयः ॥ दीनतांपरमामेतिपरिलूनमिवांबुजम् ॥ ३८ ॥ अशास्त्रसंस्कृतमतिरसज्जनपरायणः ॥ मृतावनुभवत्यंतर्दाहमग्नाविवच्युतः ॥ ३९ ॥ यदाघर्घरकंठत्वंवैरूप्यंदृष्टिवर्णजम् ॥ गच्छत्येषोविवेकात्मातदाभवतिदीनधीः ॥ ४० ॥ परमांध्यमनालोकोदिवाप्युदिततारकः ॥ साभ्रदिग्मंडलाभोगोघनमेचकितांबरः ॥ ४१ ॥ मर्मव्यथाविच्छुरितःप्रभ्रमद्दृष्टिमंडलः ॥ आकाशीभूतवसुधोवसुधाभूतखांतरः ॥ ४२ ॥ परिवृत्तककुब्चक्रउह्यमानइवार्णवे ॥ नीयमानइवाकाशेघननिद्रोन्मुखाशयः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आपन्नःपतितः ॥ योजितःप्रवेशितः ॥ स्वदुःखंवक्तुकामोऽपिवाकूस्तंभाज्जडीभवंतउच्चरितुमशक्यावर्णाअक्षराणियस्य ॥ आशयेस्त्वहृदयेविनिकृत्तश्छिन्नइव ॥ ४४ ॥ तृणान्यावर्त्तयतीतितृणावर्त्तोवात्यातत्रार्पितइव ॥ हिमंतुषारशिलातद्वद्गलनेविलीननायामुन्मुखः ॥ ४५ ॥ संसारशब्देनतद्दुःखंलक्ष्यते ॥ तद्व्याकुर्वन्स्वात्मानमुदाहृत्यान्येभ्यःप्रख्यापयन्निव ॥ क्षेपणेनशिलाप्रक्षेपयंत्रेण ॥ ४६ ॥ भ्रमेभ्रमियंत्रे ॥ रसनयारज्ज्वाकृष्टआकृष्टइव ॥४७॥ वहतिपर्जन्यमारुतेआरुह्यवारिपूरेणसहअर्णवेनिपतन्निव ॥४८॥ उर्वीविपर्यासदशामनुभवन्नब्धिरिवानवरतंपतन्नित्यौत्प्रेक्षिकोपमा ॥ ४९ ॥ सूत्कारोनिःश्वासध्वनिः ॥ ५०॥ तस्यमूर्छोपक्रमेचक्षुराद्युपरममाह ॥ क्रमादिति ॥ तस्यमुमूर्षोः

अंधकूपइवापन्नःशिलांतरिवयोजितः॥ स्वयंजडीभवद्वर्णोविनिकृत्तइवाशये ॥ ४४ ॥ पततीवनभोमार्गात्तृणावर्त्तइवार्पितः॥ रथेद्रुतइवारूढोहिमवद्गलनोन्मुखः॥ ४५॥ व्याकुर्वन्निवसंसारंबांधवानस्पृशन्निव ॥ भ्रमितक्षेपणेनेववातयंत्रइवास्थितः॥ ४६ ॥ भ्रमितोवाभ्रमइवरुष्टोरसनयेववा॥ भ्रमन्निवजलावर्त्तेशस्त्रयंत्रइवार्पितः॥ ४७॥ प्रोह्यमानस्तृणमिववहत्पर्जन्यमारुते॥ आरुह्यवारिपूरेणनिपतन्निवचार्णवे॥ ४८॥ अनंतगगनेश्वभ्रेचक्रावर्तेपतन्निव॥ अब्धिरुर्वीविपर्यासदशामनुभवन्स्थितः ॥ ४९ ॥ पतन्निवानवरतंप्रोत्पतन्निवचाभितः॥ सूत्काराकर्णनोद्भ्रांतपूर्णसर्वेंद्रियव्रणः॥५०॥ क्रमाच्छ्यामलतांयांतितस्यसर्वाक्षसंविदः॥ यथास्तंगच्छतिरवौमंदालोकतयादिशः[1] ॥ ५१ ॥ पूर्वापरंनजानातिस्मृतिस्तानवमागता॥ यथापाश्चात्यसंध्यांतेनष्टादृष्टिर्दिगष्टके ॥ ५२॥ मनःकल्पनसामर्थ्यंत्यजत्यस्यविमोहतः॥ अविवेकेनतेनासौमहामोहेनिमज्जति ॥ ५३॥ यदैवामोहमादत्तेनादत्तेपवनस्तदा॥ नत्वादत्तेयदाप्राणान्मोहमायात्यलंतदा॥ ५४॥ अन्योन्यपुष्टतांयातैर्मोहसंवेदनभ्रमैः॥ जंतुःपाषाणतामेतिस्थितमित्यादिसर्गतः॥ ५५॥ ॥प्रबुद्धलीलोवाच॥ ॥व्यथांविमोहंमूर्छांतंभ्रमंव्याधिमचेतनम्॥ किमर्थमयमायातिदेहोह्यष्टांगवानपि॥ ५६॥

सर्वाअक्षसंविदःश्यामलतांमालिन्यम् ॥ ५१ ॥ तानवंकृशताम् ॥ ५२ ॥ ५३ ॥ आमोहमीषन्मूर्छाम् ॥ पवनःप्राणोनादत्तेनगृह्णात्यंगानिनविष्टंभयतीत्यर्थः ॥ यदाप्राणानप्यसौनत्वादत्तेनचालयितुंशक्नोतितदामोहंगाढमूर्छाम् ॥ ५४ ॥ मोहःस्वरूपापरिचयः संवेदनानिविषयवासनाः भ्रमाअन्यथाप्रतिभासास्तैः॥ पाषाणतांपाषाणवज्जडताम् ॥ आदिसर्गतआरभ्यइतिएवंनियतंसर्वंस्थितमित्यर्थः ॥ ५५ ॥ शिरःपाणिपादगुह्यनाभिहृदयान्यष्टांगानितद्वानपि ॥ ५६ ॥

1 यथाह्यस्तंगतरवाविति पुरातनपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पंदसंविदाक्रियाशक्तिप्रधानेनेश्वरेणएवंवक्ष्यमाणरूपंसंकल्पलक्षणंकर्मसंविहितम् ॥ यद्यस्मिन्समयेबाल्येयौवनेवृद्धत्वेवाएतावताकालेनभोग्यमीदृशंदुःखंमेमद्भिन्नस्यजीवस्यस्यादितिपरेणान्वयः ॥ ५७ ॥ तत्स्वसंकल्पस्वभावजमेवचित्तपरिकल्पिततरुगुल्मवच्चित्तविजृंभोत्थंदुःखंस्वयमेवजीवभावेनोपाधौसंविश्यवेत्तिभुंक्तेइत्यर्थः ॥ ५८ ॥ पृष्टंसमाधायप्रस्तुतमेवाह ॥ यदेत्यादिना ॥ नाड्यःप्रतप्तपित्तादिरसपूरितत्वाद्यथासंचलनंतद्वशात्स्वसंकोचविकासनैर्भुक्तान्नपानरसंवैषम्येणगृह्णंतितदामारुतःसमानवायुर्निजांभुक्तान्नपानादिसमीकरणस्थितिमुज्झत्युत्सृजति ॥ ५९ ॥ यदानाडीद्वारेषुप्रविष्टावातानविनिर्यांतिनिर्गताश्चनप्रविशंतितदानाडीव्यापारोपरमेविनाडीत्वाच्चक्षुरादेरस्पंदात्स्मृतिरेवांतर्भवेन्नैंद्रियकंज्ञानमित्यर्थः ॥ ६० ॥ तच्चनाडीवैधुर्यंप्राणसंचाररोधेनमरणेहेतुरित्याह ॥ नविशत्येवेति ॥ वातःअपानोदेहेनविशत्येवयदापवनःप्राणश्चमुखनासिका

श्रीदेव्युवाच ॥ ॥ एवंसंविहितंकर्मसर्गादौस्पंदसंविदा ॥ यद्यस्मिन्समयेदुःखंकालेनैतावतेदृशम् ॥ ५७ ॥ स्यान्मेइत्येवसंविश्यगुल्मवत्तत्स्वभावजम् ॥ वेत्तिचित्तविजृंभोत्थंनान्यदत्रास्तिकारणम् ॥ ५८ ॥ यदाव्यथावशान्नाड्यःस्वसंकोचविकासनैः ॥ गृह्णंतिमारुतोदेहेतदोज्झतिनिजांस्थितिम् ॥ ५९ ॥ प्रविष्टानविनिर्यांतिगताःसंप्रविशंतिनो ॥ यदावाताविनाडीत्वात्तदास्पंदात्स्मृतिर्भवेत् ॥ ६० ॥ नविशत्येववातोननिर्यातिपवनोयदा ॥ शरीरनाडीवैधुर्यान्मृतइत्युच्यतेतदा ॥ ६१ ॥ आगंतव्योमयानाशःकालेनैतावतेतिया ॥ पूर्वसंविदितासंविद्यातितच्चोदितास्मृतिम् ॥ ६२ ॥ ईदृशेनमयेहेत्थंभाव्यमित्यादिसर्गजा ॥ संविद्बीजकलानाशंनकदाचनगच्छति ॥ ६३ ॥ संविदोवेदनंनामस्वभावोव्यतिरेकवान् ॥ तस्मात्स्वभावसंवित्तेर्नान्येमरणजन्मनी ॥ ६४ ॥ क्वचिदावृतिमत्सौम्यंक्वचिन्नद्यांजलंयथा ॥ क्वचित्सौम्यंक्वचिज्जीवधर्मेदंचेतनंतथा ॥ ६५ ॥ यथालतायाःपर्वाणिदीर्घायामध्यमध्यतः ॥ तथाचेतनसत्तायाजन्मानिमरणानिच ॥ ६६ ॥ नजायतेनम्रियतेचेतनः[1]पुरुषःक्वचित् ॥ स्वप्नसंभ्रमवद्भ्रांतमेतत्पश्यतिकेवलम् ॥ ६७ ॥

भ्यांननिर्यातितदावश्यंलिंगस्योत्क्रमणान्मृतइत्युच्यतइत्यर्थः ॥ ६१ ॥ तत्रापिप्राक्तनचित्संकल्परूपानियतिरेवहेतुरित्याह ॥ आगंतव्यइति ॥ पूर्वसंविदिताप्राक्तनसंकल्पवती ॥ तच्चोदितातादृशनियतिप्रेरिता ॥ ६२ ॥ ननुतस्यानियतेर्नाशेजगद्व्यवस्थाभज्येतत्राह ॥ संविदिति ॥ सत्यसंकल्पसंविदोबीजकलातत्संस्कारवतीमायासाकदाचिदपिकालेननश्यतिमुक्तौकालेनसहैवतन्निवृत्तेरितिभावः ॥ ६३ ॥ आविद्यकजीवसंवित्स्वरूपपर्यालोचनेपियावन्मोक्षंजन्ममरणाद्यनिवृत्तिरेवेत्याशयेनाह ॥ संविदइति ॥ अव्यतिरेकवानव्यतिरेकोविश्लेषस्तद्भाववान् ॥ ६४ ॥ सांसारिकजीवसंवित्प्रवाहंवर्णयति ॥ क्वचिदिति ॥ यथानद्यांजलंक्वचिदावृतिमत्कालुष्यवत्क्वचित्तुसौम्यंस्थिरनिर्मलंतथाइदंचेतनमपिक्वचित्सौम्यंक्वचित्तुजीवधर्मरागद्वेषादिकलुषमित्यर्थः ॥ ६५ ॥ दूर्वादिलतायाःपर्वाणिग्रंथयः ॥ ६६ ॥ इदंचसर्वमाविद्यकदृशापरमार्थदृशात्वाह ॥ नजायतइति ॥ नजायतेम्रियतेवाविपश्चिदित्यादिश्रुतेरित्यर्थः ॥ ६७ ॥

---

१ चेतनंपुरुषेक्वचिदित्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमरणधर्मतांतस्ययुक्त्याप्युपपादयति ॥ पुरुषइत्यादिना ॥ चेतनव्यतिरिक्तएवपुरुषइतिपक्षेअन्यत्किंदेहःपुरुषोभवेदुतप्राणउतेंद्रियाणिकिंवामनउतबुद्धिरुताहंकारश्चित्तेउ ततत्तदधिष्ठातृदेवताउताविद्या ॥ सर्वेष्वपिपक्षेषुजडैःपुरुषकार्यप्रकाशाधीनसर्वव्यवहारानिर्वाहात्परिशेषाच्चेतनामात्रमेवपुरुषइतिपक्षःस्थितइत्यर्थः ॥ ६८ ॥ चेतनस्यतुमरणंनसिध्यतिनिःसाक्षिकमरणासिद्धेरित्याशयेनाह ॥ कोद्येति ॥ अद्ययावदद्यतनावधिकेअनादिसंसारेचेतनंमृतंकोदृष्टवानितिशेषः ॥ एवंकितन्मरणंविनाशउतदेहांतरप्राप्तिः॥ आद्येपिकथंचेतनस्यनाशःकिंस्वतउतपरतः ॥ नाद्यः ॥ स्वात्मनिविरोधाभावात् ॥ असंगस्यपरतस्तदप्रसक्तेरित्यर्थः ॥ द्वितीयेत्वाह ॥ म्रियंतइति ॥ ६९ ॥ अनिष्टप्रसंजनेनापिचेतनमरणंवारयति ॥ अमरिष्यदिति ॥ प्रतिदेहंचेतनभेदमानाभावादेकोदेवःसर्वभूतेषुगूढइत्यादिश्रुतेश्चैकस्मिंस्तत्रतस्मिंश्चेतनेमृतेसतितदधीनसत्तास्फूर्त्तिकंसमष्टिव्यष्टिचि

पुरुषश्चेतनामात्रंसकदाक्वेनश्यति॥ चेतनव्यतिरिक्तस्त्वेवदान्यत्किंपुमान्भवेत्॥ ६८॥ कोद्ययावन्मृतंब्रूहिचेतनंकस्यकिंकथम्॥ म्रियंतेदेहलक्षाणिचेतनंस्थितमक्षयम्॥ ६९ ॥ अमरिष्यन्नवैचित्तमेकस्मिन्नेवतन्मृते ॥ अभविष्यत्सर्वभावमृतिरेकमृताविह ॥ ७० ॥ वासनामात्रवैचित्र्यंयज्जीवोनुभवेत्स्वयम्॥ तस्यैवजीवमरणेनामनीपरिकल्पिते॥ ७१ ॥ एवंनकश्चिन्म्रियतेजायतेनचकश्चन॥ वासनावर्त्तगर्तेषुजीवोलुठतिकेवलम्॥ ७२ ॥ अत्यंतासंभवादेवदृश्यस्यासौचवासना॥ नास्त्येवेतिविचारेणदृढज्ञातैवनश्यति॥ ७३ ॥ अनुदितमुदितंजगत्प्रबंधंभवभयतोभ्यसनैर्विलोक्यसम्यक् ॥ अलमनुदितवासनोहिजीवोभवतिविमुक्तइतीहसत्यवस्तु ॥ ७४ ॥ ॥इ०वा०वा०दे०मो०उ०लीलोपाख्यानेमरणविचारोनामचतुष्पंचाशत्तमःसर्गः॥ ५४॥ ॥ ७३॥ ॥प्रबुद्धलीलोवाच॥ ॥यथैवजंतुर्म्रियतेजायतेचयथापुनः॥ तन्मेकथयदेवेशिपुनर्बोधविवृद्धये॥ १ ॥

त्तंनामरिष्यद्वै ॥ किमर्थेकाक्कावैशब्दः ॥ नामरिष्यत्किमित्यर्थः ॥ तस्मिंश्चमृतेसतिनिरुपादानजगत्सत्ताऽयोगादेकमृतौसर्वभावमृतिदोषोनाभविष्यत्किमित्यर्थः ॥ ७० ॥ केतर्हिप्रतीयमानेजीवनमरणेतत्राह ॥ वासनेति ॥ जीवोजीवनम् ॥ ७१ ॥ उपपादितमुपसंहरति ॥ एवमिति ॥ ७२ ॥ अभिमानेनदृढतरोज्ञाताअंतःकरणात्मानश्यत्येवेत्यर्थः ॥ ७३ ॥ भवभयतोवैराग्यादिसाधनसंपन्नोऽधिकारिजीवोगुरुपूर्वकश्रवणाद्यभ्यसनैर्भ्रांत्याउदितंजगत्प्रबंधंपरमार्थतोऽनुदितमेवेतिसम्यक्तत्त्वदर्शनतोविलोक्यमूलोच्छेदादलमत्यंतमनुदितद्वैतवासनःसन्विमुक्तोभवतीतिविमुक्तात्मस्वरूपमेवेहसत्यवस्तुनान्यदित्यर्थः ॥ ७४ ॥ ॥ इतिश्रीवासिष्ठमहारा०तात्पर्यप्रकाशेउ०चतुष्पंचाशत्तमःसर्गः ॥ ५४ ॥ ॥ ७३ ॥ ॥ इहजीवस्यसंसारगतिवैचित्र्यमुच्यते ॥ आदिसर्गात्तथेशस्यतत्कर्मानुगुणास्थितिः ॥ १ ॥ कथितमेवपुनर्विस्तरेणकथयेत्यर्थः ॥ तत्फलंवैराग्यातिशयेनबोधविवृद्धिः ॥ १ ॥

१ सकदाचिन्ननश्यतीत्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राणवातानांविसंस्थितिंचलनस्वभावविरुद्धांसंस्थितिंप्रशांतिमितियावत् ॥ व्यंजकांतःकरणोपाधिविलयाच्छाम्यतीव ॥ एतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीतिश्रुतेरितिभावः ॥ २ ॥ वस्तुतस्तुनक्कापिशाम्यतीत्याह ॥ शुद्धमिति ॥ अविनाशीवाअरेअयमात्माअनुच्छित्तिधर्मेतिश्रुतेरितिभावः ॥३ ॥ एवंचदेहधर्मएवमरणंनात्मधर्मइत्याह ॥ केवलमिति ॥ ४ ॥ वातेशरीरवायौ ॥ अनिलतांस्वप्रकृतिमहावायुताम् ॥ प्राणस्तुसहतेजसाप्राज्ञात्मन्येवलीयते उपाधिविलयेजीवोऽपिसहवासनाभिःपरमात्मभावेवतिष्ठतइत्याह ॥ चेतनमिति ॥ तथाचश्रुतिरथास्यप्रयतोवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायामिति ॥५ ॥ ननुयदिस्वात्मतत्त्वेवतिष्ठतेतर्हिमुक्तोब्रह्मैवस्यादसौनजीवस्तत्राह ॥ जीवइति ॥ पुनर्जन्मबीजवासनावतस्तदुपाधिकत्वादणोःसूक्ष्मस्यतत्परिच्छिन्नस्यतस्यजीवइतिनामउच्यतेनतुवस्तुतोजीवोनामब्रह्मान्योस्तीत्यर्थः ॥ अतएवतस्यवासनावशात्स्वस्थानएवपरलोकगमनाद्यध्यासोनवास्तवंगमनाद्यस्तीत्याशयेनमंडपाकाशन्यायंस्मारयति ॥ तत्रैवास्तइति ॥ ६ ॥ ततोदेहमरणादेव ॥ नन्वसंगेकथंवासनास्थितिस्तत्राह ॥ चेतनमिति ॥ यथासूक्ष्मतरपुष्परेणुनिष्ठएवामोदः ॥ अनिलस्तुतत्तादात्म्यसंसर्गाध्यासादामोदमिश्रःस्थितस्तद्वदित्यर्थः ॥७ ॥ इदंप्राक्तनंदेहादिदृश्यंपरित्यज्यदेहांतरादिदर्शनांतरेयदाआस्तेतदासजीवःस्वप्नइवस्वयमेवस्ववासनामयगमनपरलोकतत्रत्यभोग्यादिनानाकृतिर्भवतीत्यर्थः ॥ ८ ॥ तमेवाध्यासंक्रमेणवक्तुमुक्रमते ॥ तस्मिन्नेवेति ॥ पूर्ववत्प्राग्जन्मवत् ॥ ९ ॥ ननुतस्मिन्नल्पतरेमरणप्रदेशेदेहांतरकल्पनघटनेऽपिकथंदूरगमनविस्तृतपरलोकादिसमावेशघटनंतत्राह ॥आत्मनीति ॥ पुष्टंविपुलंकेवलंव्योमएकंआकाशभूतलेद्वेवासाकाशशशिवासरंब्रह्मांडकोटिलक्षंवासाकंयुगपदेवांतर्निविशतुतथापिआत्मन्यन्यस्यसर्वस्यप्रपंचस्यघटाघटनमस्त्येवआत्मनोऽनंतत्वान्मायायाश्चाघटितघटनासामर्थ्यसत्वादित्यर्थः ॥ तथाचात्मस्वरूपपर्यालोचनयाअल्पप्रदेशेपिजगदंतरसमावेशउक्तोनतत्प्रदेशमात्रमपेक्ष्येतिभावः ॥ अथवायदितस्मिन्प्रदेशेमार्गपरलोकादिकमस्तितर्ह्यन्येनापिकुतोनोपलभ्यतेतत्राह ॥ आत्मनीति ॥ आकाशभूतलेद्वेसाकाशशशिवासरंसर्वंजगच्चमृतपुरुषस्यात्मनिमेघघटेवपुष्टमस्तिअन्यस्यदृशातुकेवलंव्योमगृहाकाशमेवास्तीतिनदर्शनप्रसक्तिरित्यर्थः ॥ १० ॥

॥ श्रीदेव्युवाच ॥ ॥ नाडीप्रवाहेविधुरेयदावातविसंस्थितिम् ॥ जंतुःप्राप्नोतिहितदाशाम्यतीवास्यचेतना ॥ २॥ शुद्धंहिचेतनंनित्यंनोदेतिनचशाम्यति ॥ स्थावरेजंगमेव्योम्निशैलेग्नौपवनेस्थितम् ॥ ३॥ केवलंवातसंरोधाद्यदास्पंदःप्रशाम्यति ॥ मृतइत्युच्यतेदेहस्तदासौजडनामकः ॥ ४ ॥ तस्मिन्देहेशवीभूतेवातेचानिलतांगते ॥ चेतनंवासनामुक्तंस्वात्मतत्त्वेवतिष्ठति ॥ ५॥ जीवइत्युच्यतेतस्यनामाणोर्वासनावतः ॥ तत्रैवास्तेसचशवागारेगगनकेतथा ॥ ६ ॥ ततोसौप्रेतशब्देनप्रोच्यतेव्यवहारिभिः ॥ चेतनंवासनामिश्रमामोदानिलवत्स्थितम् ॥ ७ ॥ इदंदृश्यंपरित्यज्ययदास्तेदर्शनांतरे ॥ सस्वप्नइवसंकल्पइवनानाकृतिस्तदा ॥ ८ ॥ तस्मिन्नेवप्रदेशेंतःपूर्ववत्स्मृतिमान्भवेत् ॥ तदैवमृतिमूर्च्छांतेपश्यत्यन्यशरीरकम् ॥ ९ ॥ आत्मन्यस्तिघटापुष्टमन्यस्यव्योमकेवलम् ॥ आकाशभूतलेसाकंसाकाशंशशिवासरम्[1] ॥ १० ॥

---

१ अत्रमूलेटीकायांचशशिचामरमितिपाठःपुस्तकांतरेदृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गतिभेदान्वक्तुंप्रेतान्विभजते ॥ भवंतीति ॥ ११ ॥ एतेषांमध्येकस्यचिद्भेदोविशेषः ॥ सकः ॥ कस्यचिद्द्वौभेदौ ॥ यथाकंचित्कालंसामान्यपापीतदुत्तरमध्यमपाप्यतिपापीवेति ॥ उक्तरीत्याकस्यचित्त्रयोपिक्रमेणव्युत्क्रमेणवाभेदाः ॥ १२ ॥ तत्रप्रथमंतृतीयस्यगतिमाह ॥ कश्चिदिति ॥ वत्सरंसंवत्सरमात्रम् ॥ १३ ॥ १४ ॥ भुक्तेति ॥ तथाचश्रुतिः ॥ अथइहकपूयचरणाअभ्यासोहयत्तेकपूयांयोनिमापद्येरन्श्वयोनिंवासूकरयोनिंवाचांडालयोनिंवेति ॥ शमंमहापापफलोपरमम् ॥१५॥ क्षणादिति ॥ इदंचान्यदृशा ॥ १६ ॥ १७ ॥ द्वितीयस्यगतिमाह ॥ अथेति ॥ शिलाजठरमिवशिलाजठरम् ॥ जाड्यंमूर्च्छाम् ॥ १८ ॥ तदेवेतिपरदृष्ट्युक्तिः ॥ १९ ॥ प्रथमस्यगतिमाह ॥ मृतइति ॥ देहंमनुष्यादिशरीरम् ॥ उभाभ्यामेवमनुष्यलोकमितिश्रुतेः ॥२०॥ चेततिअनुभवति ॥इत्थंप्रागुक्तदिशा ॥ २१ ॥ षष्ठस्यगतिमाह ॥ येत्विति ॥ स्मृत्यापुण्यवासनोद्बोधेन ॥ २२ ॥ ततोमहापुण्यभोगानंतरम् ॥ अन्यत्किंचिदल्पंपुण्यंपापंवासंभावितंतत्सदृशंतदनुरूपंफलम् ॥ अन्यत्रइलावृतकिंपुरुषादिवर्षेषु ॥ २३ ॥ पंचमस्यगतिमाह ॥ येचेति ॥ ओषधिपल्लवंओषधिपल्लवप्रधानंनंदनचैत्ररथादिवनंकिन्नरकिंपुरुषयक्षादिशरीरेणप्रयांतीत्यर्थः ॥ २४ ॥ चारुस्वकर्मफलंभुक्त्वातेवायुवृष्ट्यादिद्वाराभूमौव्रीहियवादिषुप्रविश्यान्नभूतान्नृणांब्राह्मणादीनांहृदयंप्रविश्यरेतसांनिषेकेतद्द्वारास्त्रीणांगर्भेअधितिष्ठंतीत्यर्थः ॥ अथयइहरमणीयचरणाअभ्यासोहयत्तेरमणीयांयोनिमापद्येरन्ब्राह्मणयोनिंवाक्षत्रिययोनिंवावैश्ययोनिंवेतिश्रुतेः ॥ २५ ॥

भवंतिषड्विधाःप्रेतास्तेषांभेदमिमंशृणु ॥ सामान्यपापिनोमध्यपापिनःस्थूलपापिनः ॥ ११ ॥ सामान्यधर्मामध्यमधर्माचोत्तमधर्मवान् ॥ एतेषांकस्यचिद्भेदोद्वौत्रयोप्यथकस्यचित् ॥ १२ ॥ कश्चिन्महापातकवान्वत्सरंस्मृतिमूर्छनम् ॥ विमूढोनुभवत्यंतःपाषाणहृदयोपमः ॥ १३ ॥ ततःकालेनसंबुद्धोवासनाजठरोदितम् ॥ अनुभूयचिरंकालंनारकंदुःखमक्षयम् ॥ १४ ॥ भुक्त्वायोनिशतान्युच्चैर्दुःखाद्दुःखांतरंगतः ॥ कदाचिच्छममायातिसंसारस्वप्नसंभ्रमे ॥ १५ ॥ अथवामृतिमोहांतेजडदुःखशताकुलाम् ॥ क्षणाद्वृक्षादितामेवतत्स्थामनुभवंतिते ॥ १६ ॥ स्ववासनानुरूपाणिदुःखानिनरकेपुनः ॥ अनुभूयाथयोनीषुजायंतेभूतलेचिरात् ॥ १७ ॥ अथमध्यमपापोमृतिमोहादनंतरम् ॥ सशिलाजठरंजाड्यंकंचित्कालंप्रपश्यति ॥ १८ ॥ ततःप्रबुद्धःकालेनकेनचिद्वातदेववा ॥ तिर्यगादिक्रमैर्भुक्त्वायोनीःसंसारमेष्यति ॥ १९ ॥ मृतएवानुभवतिकश्चित्सामान्यपातकी ॥ स्ववासनानुसारेणदेहंसंपन्नमक्षतम् ॥ २० ॥ सस्वप्नइवसंकल्पइवचेततितादृशम् ॥ तस्मिन्नेवक्षणेतस्यस्मृतिरित्थमुदेतिच ॥ २१ ॥ येतूत्तममहापुण्यामृतिमोहादनंतरम् ॥ स्वर्गविद्याधरपुरंस्मृत्यास्वनुभवंतिते ॥ २२ ॥ ततोन्यकर्मसदृशंभुक्त्वान्यत्रफलंनिजम् ॥ जायंतेमानुषेलोकेसश्रीकेसज्जनास्पदे ॥ २३ ॥ येचमध्यमधर्माणोमृतिमोहादनंतरम् ॥ तेव्योमवायुवलिताःप्रयांत्योषधिपल्लवम् ॥ २४ ॥ तत्रचारुफलंभुक्त्वाप्रविश्यहृदयंनृणाम् ॥ रेतसामधितिष्ठंतिगर्भेजातिक्रमोचिते ॥ २५ ॥

१ तत्स्थामितिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

एतेनचतुर्थस्यापिगतिरुक्तप्रायैवेतिमन्यमानउपसंहरति ॥ स्ववासनेति ॥ २६ ॥ इदानींमरणप्रभृतितेषामारोपक्रमंविशिष्यदर्शयति ॥ आदावित्यादिना ॥ तदनुक्रमाद्दाहदशाहकृत्यक्रमात्प्रोत्पन्नानिष्पन्नशरीराइतिबुद्ध्यंतइतिसर्वत्रानुषज्यते ॥ २७ ॥ एभिर्यमभटैःक्रमात्पाथेयश्राद्धतर्पितःसंवत्सरेणयमपुरंप्रयामीति ॥ २८ ॥ पुण्यवानुत्तमपुण्यवान् ॥ २९ ॥ ३० ॥ सौम्यसंपातापद्मांसुखेनगंतुंयोग्येत्यर्थः ॥ सरणिर्मार्गः ॥ मध्यमःपुण्यवानूइतिबुद्ध्यते ॥ ३१ ॥ अयमहंयमपुरंप्राप्तः ॥ सप्तर्वलोकप्रसिद्धोयमः ॥ एषपुरःस्थः ॥ अत्रयमसभायांचित्रगुप्तादिभिर्ममकर्मविचारःकृतः ॥ ३२॥ अयंचारोपक्रमःप्रतिपुरुषंस्वप्नवद्भिन्नइत्याह ॥ इतीति ॥ यथाप्रतीयंतेतथैवसंस्थितासत्याइवयेनिःशेषपदार्थास्तदाचारास्तत्तदर्थक्रियाश्चतैर्भासुरः ॥ ३३ ॥ स्वरूपदृष्ट्यावलोकनेतुनकिंचिदात्मातिरिक्तमस्तीत्याह ॥ आकाशइवेति ॥ निःशून्येनिःस्वरूपेस्थितःप्रपंचोदे

स्ववासनानुसारेणप्रेताएतांव्यवस्थितिम् ॥ मूर्छांतेनुभवंत्यंतःक्रमेणैवाक्रमेणच ॥ २६॥ आदौमृतावयमितिबुद्ध्यंतेतदनुक्रमात् ॥ बंधुपिंडादिदानेनप्रोत्पन्नाइतिवेदिनः ॥ २७॥ ततोयमभटाएतेकालपाशान्विताइति ॥ नीयमानःप्रयाम्येभिःक्रमाद्यमपुरंत्विति ॥ २८॥ उद्यानानिविमानानिशोभनानिपुनःपुनः ॥ स्वकर्मभिरुपात्तानिदिव्यानीत्येवपुण्यवान् ॥ २९॥ हिमानीकंटकश्वभ्रशस्त्रपत्रवनानिच ॥ स्वकर्मदुष्कृतोत्थानिसंप्राप्तानीतिपापवान् ॥ ३० ॥ इयंमेसौम्यसंपातासरणिःशीतशाद्वला ॥ स्निग्धच्छायासवापीकापुरःसंस्थेतिमध्यमः ॥ ३१ ॥ अयंप्राप्तोयमपुरमहमेषसभूतपः ॥ अयंकर्मविचारोत्रकृतइत्यनुभूतिमान् ॥ ३२ ॥ इतिप्रत्येकमभ्येतिपृथुःसंसारखंडकः ॥ यथासंस्थितनिःशेषपदार्थाचारभासुरः ॥ ३३ ॥ आकाशइवनिःशून्येशून्यात्मैवविबोधवान् ॥ देशकालक्रियादैर्घ्यभासुरोपिनकिंचन ॥ ३४ ॥ इतोयमहमादिष्टःस्वकर्मफलभोजने ॥ गच्छाम्याशुशुभंस्वर्गमितोनरकमेवच ॥ ३५ ॥ यःस्वर्गोयंमयाभुक्तोभुक्तोयंनरकोथवा ॥ इमास्तायोनयोभुक्ताजायेहंसंसृतौपुनः ॥ ३६ ॥ अयंशालिरहंजातःक्रमात्फलमहंस्थितः ॥ इत्युदर्कप्रबोधेनबुद्ध्यमानोभविष्यति ॥ ३७॥ संसुप्तकरणस्त्वेवंबीजतांयात्यसौनरे ॥ तद्बीजंयोनिगलितंगर्भोभवतिमातरि ॥ ३८ ॥

शकालादिदैर्घ्येणभासमानोपिनकिंचनंकिंतुसर्वारोपशून्यआत्मैवेत्यर्थः ॥ ३४॥ अहंयमेनस्वकर्मफलभोजनेइतोऽस्यांदिशिआदिष्टआज्ञप्तः ॥ इतोयमसभातः ॥ ३५॥ योयमेननिर्दिष्टःस्वर्गःअयंमयाभुक्तः ॥ तायमनिर्दिष्टाःपश्वादियोनयइमाःप्रत्यक्षामयाभुक्ताः ॥ अहंसंसृतौमनुष्यसंसारेपुनर्जायेसांप्रतंप्रादुर्भवामि ॥ ३६॥ तत्क्रममाह ॥ अयमिति ॥ शालिःशाल्यंकुरः ॥ कांडपत्रगर्भमंजरीक्रमात्फलंभूत्वाअहंस्थितः ॥ ननुस्वर्गनरकनानायोनिभोगइवव्रीह्यादिभावोपिकिमस्याऽनुभवसिद्धोनेत्याह ॥ इत्युदर्केति ॥ उदर्केऔत्तरकालिकेमनुष्यशरीरेश्रुतिपुराणादिजन्यप्रबोधेनबुद्ध्यमानोयंभविष्यतीत्यर्थः ॥ ३७ ॥ कुतस्तदानीमसौव्रीह्यादिभावंनानुभवतितत्राह ॥ संसुप्तकरणइति ॥ शरीराभावात्संमूर्छितबाह्यांतःकरणः ॥ तुशब्दएतद्विशेषसूचनाय ॥ एवमेवासौनरेपितृशरीरेभुक्तान्नद्वाराप्रविष्टोबीजतांरेतोभावंयाति ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वकर्मानुसारमेवप्रपंचयति ॥ भव्यइति ॥ भव्यःसुखसौभाग्यारोग्यसाधुवृत्तसंपन्नस्तद्विपरीतोऽभव्यः ॥ ३९ ॥ इंद्वाभंचंद्रवदुपचयापचयधर्मिणंचलंकांतंच ॥ ४० ॥ बंधुदत्तैरोर्ध्वदेहिकपिंडैः ॥ ४१ ॥ ४२ ॥ इतिउक्तप्रकारंआजवंजवीभावंपरिवर्तनम् ॥ जुगतावितिधातोराङ्पूर्वात्पचाद्यचिच्छ्निः ॥ द्वित्वनुकौतुबाहुलकात्पृषोदरादित्वाच्छांदसत्वाद्वाबोध्यौ ॥ ४३ ॥ नन्वस्तुत्वंपदार्थेजीवेभ्रांतिसंभवादयमध्यारोपक्रमस्तत्पदार्थेत्वीश्वरेभ्रांत्ययोगात्कथंजगदध्यारोपक्रमइतितत्परिशुद्धिज्ञानायलीलापृच्छति ॥ आदिसर्गेइति ॥ ४४ ॥ नेश्वरस्यभ्रांत्याजगदध्यारोपःकिंतुस्वतःपरमार्थघनरूपस्यैवस्वतोमायाध्यारोपितरूपेणविवर्त्तः ॥ अनावृतस्वचैतन्येनाध्यस्तभानंनचभ्रमः किंतुसत्यत्वेनासत्यप्रतिभासः ॥ ईश्वरस्यसर्वदासर्वज्ञत्वात्सर्वार्थप्रतिभासेऽपिस्वरूपाप्रच्युतिबोधबाधितत्वान्नजगतिसत्यताप्रतिभासइतिनकश्चिद्दोषइत्यभिप्रेत्यदेवीतत्पदार्थेऽध्यारोप

सगर्भोजायतेलोकेपूर्वकर्मानुसारतः॥भव्योभवत्यभव्योवाबालकोललिताकृतिः॥३९॥ततोनुभवतींद्वाभंयौवनंमदनोन्मुखम्॥ततोजरांपद्ममुखेहिमाशनिमिवच्युतम्॥४०॥ततोपिव्याधिमरणंपुनर्मरणमूर्छनाम्॥पुनःस्वप्नवदायातंपिंडैर्देहपरिग्रहम्॥४१॥याम्यंयातिपुनर्लोकंपुनरेवभ्रमक्रमम्॥भूयोभूयोनुभवतिनानायोन्यंतरोदये॥४२॥इत्याजवंजवीभावमामोक्षमतिभासुरम्॥भूयोभूयोनुभवतिव्योम्न्येवव्योमरूपवान्॥४३॥ ॥प्रबुद्धलीलोवाच॥ ॥आदिसर्गेयथादेविभ्रमएषप्रवर्त्तते॥तथाकथयमेभूयःप्रसादाद्बोधवृद्धये॥४४॥ ॥श्रीदेव्युवाच॥ ॥परमार्थघनंशैलाःपरमार्थघनंद्रुमाः॥परमार्थघनंपृथ्वीपरमार्थघनंनभः॥४५॥ सर्वात्मकत्वात्सयतोयथोदेतिचिदीश्वरः॥परमाकाशशुद्धात्मातत्रतत्रभवेत्तथा॥४६॥ सर्गादौस्वप्नपुरुषन्यायेनादिप्रजापतिः॥यथास्फुटंप्रकचितस्तथाद्यापिस्थितास्थितिः॥४७॥प्रथमोसौप्रतिस्पंदःपदार्थानांहिबिंबकम्॥प्रतिबिंबितमेतस्माद्यत्तदद्यापिसंस्थितम्॥४८॥यन्नामसुषिरंस्थानंदेहानांतद्गतोनिलः॥करोत्यंगपरिस्पंदंजीवतीत्युच्यतेततः॥४९॥सर्गादावेवमेवैषाजंगमेषुस्थितास्थितिः॥ चेतनाअपिनिस्पंदास्तेनैतेपादपादयः॥५०॥चिदाकाशोयमेवांशंकुरुतेचेतनोदितम्॥सएवसंविद्भवतिशेषंभवतिनैवतत्॥५१॥

मुपपादयितुमाह ॥ परमार्थघनमित्यादिना ॥ ४५ ॥ उदेतिविवर्त्तते ॥ तथाभवतिअस्मदृशानस्वदृशा ॥ ४६ ॥ सईश्वरएवस्वप्नकल्पयितृपुरुषन्यायेनजीवसमष्ट्यात्मआदिप्रजापतिर्भूत्वास्रज्यसंकल्पात्मनायथाभूरादिलोकात्मनाविवर्त्तेनप्रकचिततथैवाद्यापितादृशस्थितिसंकल्पसत्तयास्थितिर्व्यवस्थास्थिता ॥ ४७ ॥ सांकल्पिकजगत्सत्तायाइयंजगत्सत्ताभिन्नेतिपक्षेपितत्प्रतिबिंबतुल्यत्वान्मिथ्यैवेत्याह ॥ प्रथममिति ॥ असौसांकल्पिकप्रकचनरूपःपरिस्पंदोविवर्त्तः॥ ४८ ॥ तत्रस्थावरजंगमविभागेनिमित्तमाह ॥ यन्नामेतिद्वाभ्याम् ॥ ४९ ॥ निस्पंदानिश्चेष्टाः ॥ ५० ॥ एवंचेतनाचेतनविभागकल्पनेऽपिनिमित्तमाह ॥ चिदाकाशइति ॥ अयंचिदाकाशईश्वरएवचेतनाबुद्ध्युपाधिसूत्रावच्छेदात्प्रतिबिंबनाद्वाउदितमाविर्भूतमंशमिवांशमौपाधिकंजीवविभागंकुरुतेसएवांशःसंविच्चेतनंभवतिशेषंत्वध्यारोपितंतच्चेतनंनभवतिकिंत्वचेतनमेवेत्यर्थः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यबुद्धिद्वारैवस्थूलानुप्रवेशंतत्रचक्षुरादिशाप्याबाह्यव्यवहारयोग्यतांचाह ॥ नरेति ॥ तद्बुद्ध्यनुप्रविष्टचिदाकाशंतस्याःबुद्धेर्निमित्तान्नरशरीरादिरूपंद्वितीयंसोपाधिभूतंपुरंनगरंप्राप्तंप्रविष्टंसत्स्वाधिरूढांबुद्धिमक्षिपुटंचक्षुरादिगोलकस्थानंनयत्प्रापयत्सच्चाक्षुषादिबुद्धिवृत्तिद्वाराबाह्यार्थाश्चेतति ॥ ननुचक्षुराद्येवसाक्षाच्चिदध्यस्तत्वेनचित्वाज्जीवभूतंशरीरमधिष्ठायव्यवहरतुकिंबुद्ध्युपाधिकजीवकल्पनयानेत्याह ॥ नाक्षीति ॥ अक्षिचक्षुरुपलक्षितमिंद्रियजातंस्वयमेवचिच्चेतनंजीवभूतंन ॥ कुतः ॥ यतःसर्गतःचित्यध्यारोपमात्रतएवकिंचिदपिनजीवति ॥ तथासतिघटादीनामपिजीवनप्रसंगादितिभावः ॥ ५२ ॥ बुद्धेरेवजीवोपाधितानान्यस्येतिनियमेतुसर्ववस्तुशक्तिव्यवस्थापकचित्संकल्पएवहेतुरित्याशयंस्फुटयंत्याह ॥ तथेति ॥ खमाकाशंखंशून्यताशक्तिमत् ॥ भूमिर्भूमित्वेनसर्वधारणशक्त्यास्थिता ॥ जलंचअम्ब्ववत्सर्वाप्यायनशक्तिमत्स्थितमित्यर्थः ॥ चेततिसंकल्पयति ॥ ५३ ॥ भावयन्संकल्पयन्संस्तत्कालमेवतथाविवृत्तःस्थितः ॥ ५४ ॥ यथाभावनसिद्धंतदद्याप्यनुवर्त्ततएवेत्याह ॥ तस्मादितिद्वाभ्याम् ॥ ५५ ॥ ५६ ॥ इत्थंत

नरोपाधिपुरंप्राप्तंचेतत्यक्षिपुटंनयत् ॥ तत्तस्यानाक्षिचिज्जीवंनोजीवत्येवसर्गतः ॥ ५२ ॥ तथाखंखंतथाभूमिर्भूमित्वेनाम्ब्ववज्जलम् ॥ यद्यथाचेततिस्वैरंतद्देर्य्येवतथावपुः ॥ ५३ ॥ इतिसर्वशरीरेणजंगमत्वेनजंगमम् ॥ स्थावरंस्थावरत्वेनसर्वात्माभावयन्स्थितः ॥५४॥ तस्माद्यज्जंगमंनामतत्स्वबोधनरूपवत् ॥ तेनबुद्धंततस्तद्वत्तदेवाद्यापिसंस्थितम् ॥ ५५॥ यद्वृक्षाभिधमाबुद्धंस्थावरत्वेनवैपुनः ॥ जडमद्यापिसंसिद्धंशिलातरुतृणादिच ॥ ५६ ॥ नतुजाड्यंपृथक्किंचिदस्तिनापिचचेतनम् ॥ नात्रभेदोस्तिसर्गादौसत्तासामान्यकेनच ॥५७॥ वृक्षाणामुपलानांयानामांतःस्थाःस्वसंविदः ॥ बुद्ध्यादिविहितान्येवतानितेषामितिस्थितिः ॥ ५८ ॥ विदोंतःस्थावरादेर्यास्तस्याबुद्ध्यास्तथास्थितेः ॥ अन्याभिधानास्थानार्थाःसंकेतैरपरैःस्थिताः ॥ ५९ ॥

त्वंपदार्थयोरध्यारोपितभेदजातमपवदन्नाह ॥ नत्वित्यादिना ॥ चेतनंचिद्विशिष्टंजडम् ॥ अत्रपदार्थजाते ॥ सर्गउत्पत्तिः ॥ आदिपदात्स्थितिनाशौ ॥ तेषुभेदोनास्ति ॥ असतोभेदाश्रयत्वायोगात् ॥ अस्तुतर्ह्यनुगतेसद्वस्तुनिसनेत्याह ॥ सत्तासामान्यकेइति ॥ ५७ ॥ ननुयदिचिदेकरसमेवसर्वंतर्हिकथंतत्रैवतद्विरुद्धजाड्यरूपनामभेदानुभवःसर्वेषामित्याशंक्यतत्तदांतरप्रत्यक्संविदिअविद्याध्यस्तबुद्धिकृतकल्पनावशादेवेतिरहस्यंप्रथमंस्थावरेषुदर्शयति ॥ वृक्षाणामिति ॥ उपलानांशैलानाम् ॥ तानिजाड्यभेदनामरूपाणितेषांवृक्षादीनाम् ॥ बुद्ध्यादिभिरेवविहितानिकल्पितानिनवस्तुतइतिपरमार्थस्थितिरित्यर्थः ॥ ५८ ॥ उक्तार्थमेवस्पष्टंपुनराह ॥ विदइति ॥ विदःप्रत्यक्संविदः ॥ उपाधिकृतभेदाद्बहुवचनम् ॥ तस्याःस्थावरादिबुद्धेस्तथास्थावरोहमित्यादिव्यवस्थितरूपेणैवस्थितत्वाच्चरेभ्योन्येइत्यभिधानस्यतथाआस्थानस्यअभिमानस्यचअर्थाविषयभूताःसंतोऽपरैरन्यैर्वृक्षाःपर्वताइत्यादिशब्दसंकेतैःस्थिताः ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंजंगमेष्वप्युक्तंरहस्यंदर्शयति ॥ कृमिकीटेति ॥ याःस्वसंविदस्तान्येवबुद्ध्यादीनिअभिधार्थानिशब्दार्थभूतानितत्तदन्यानिजातानीत्यर्थः ॥ ६० ॥ चितिवक्ष्यमाणजाड्यकल्पनस्योक्तार्थस्यचोपपादकंदृष्टांतमाह ॥ यथेति ॥ उत्तराब्धितीरस्थाजनताजनसमूहः ॥ ६१ ॥ यथायंदृष्टांतस्तथासर्वेस्थावरजंगमाःस्वप्रत्यक्साक्षिकेअनुभवेलीनाःपर्यवसन्नानान्यबुद्धिकल्पितंजानंतीत्यर्थः ॥ अतएवसमुदितव्यवहारेपरस्परसंकेतमपेक्षंतइत्याह ॥ परस्परमिति ॥ ६२ ॥ अतएवसच्चिद्रूपेब्रह्मण्यसत्वजाड्यवाय्वाकाशादिकल्पनमप्युपपन्नमित्येतदपिदृष्टांतेनदर्शयति ॥ यथेति ॥ ६३ ॥ यथायंदृष्टांतस्तथाप्रलयकालेमायांतर्लीनंसर्वात्मकंसर्वगतंचसमष्टिचित्तंजगतःसूक्ष्मावस्थारूपंसर्वप्रत्यग्भूतेनचिद्व्योम्नासर्गादौयद्यद्यथाप्रचेतितंतत्तत्तथातथाअद्यापिस्थितमित्यर्थः ॥ तदेवप्रपंचयति ॥ चोपनंवायुरित्यादिना ॥ चोपनंस्पंदनम् ॥ ६४ ॥ सुषिरमेवसौषिर्यंछिद्रम् ॥ तत्रस्पंदा

कृमिकीटपतंगानांयानामांतःस्वसंविदः॥ तान्येवतेषांबुद्ध्यादीन्यभिधार्थानिकानिचित् ॥ ६० ॥ यथोत्तराब्धिजनतादक्षिणाब्धिजनं
स्थितम्॥ नकिंचिदपिजानातिनिजसंवेदनादृते॥६१॥ स्वसंज्ञानुभवेलीनास्तथास्थावरजंगमाः॥ परस्परंयदासर्वेस्वसंकेतपरायणाः
॥६२॥ यथाशिलांतःसंस्थानांबहिष्ठानांचवेदनम्॥ असज्जडंचभेकानांमिथोंतस्तस्थुषांतथा॥६३॥ सर्वंसर्वगतंचित्तंचिद्व्योमायत्प्रचे
तितम्॥ सर्गादौचोपनंवायुःसइहाद्यापिसंस्थितः॥ ६४॥ चेतितंयत्तुसौषिर्यंतन्नभस्तत्रमारुतः॥ स्पंदात्मेत्यादिसर्गेहाःपदार्थेष्विवचो
पनम्॥६५॥ चित्तंतुपरमार्थेनस्थावरेजंगमेस्थितम्॥चोपनान्यनिलैरेवभवंतिनभवंतिच॥६६॥एवंभ्रांतिमयेविश्वेपदार्थाःसंविदंश
वः॥ सर्गादिषुयथैवासंस्तथैवाद्यापिसंस्थिताः॥६७॥ यथाविश्वपदार्थानांस्वभावस्यविजृंभितम्॥ असत्यमेवसत्याभंतदेतत्कथितंत
व ॥ ६८ ॥ अयमस्तंगतःप्रायःपश्यराजाविदूरथः॥ मालाशवस्यपद्मस्यपत्युस्तेयातितद्गतम्॥ ६९॥ ॥प्रबुद्धलीलोवाच॥ ॥ केन
मार्गेणदेवेशियात्येषशवमंडपम्॥ एनमेवाशुपश्यंत्यावावांगच्छावउत्तमे॥ ७०॥ ॥श्रीदेव्युवाच॥ ॥मनुष्यवासनांतस्थंमार्गमा
श्रित्यगच्छति॥ एषोहमपरंलोकंदूरंयामीतिचिन्मयः॥ ७१॥ मार्गेणैवमनेनैवयावस्तेयेनसंमतम्॥ परस्परेच्छाविच्छित्तिर्नहिसौहार्द
बंधनी॥ ७२ ॥

त्मासर्वक्रियाशक्तिरूपोमारुतःस्थितइत्यर्थः ॥ इतिउक्तलक्षणेनवायुनासर्ववस्तूनांईहाश्चलनानि ॥ यथाशुष्कतृणपर्णादिपदार्थेष्वनिलेनचोपनंतद्वत्॥६५॥ अतएवस्थावरजंगमयोर्वस्तुतश्चित्तसाम्येपिवायुकृतचोपनाचोपनाभ्यांविशेषइत्याह ॥ चित्तंत्विति ॥ जंगमेभवंतिस्थावरेनभवंतिच ॥६६॥ अस्मिन्नपिनियमेप्राक्तनीनियतिरेवहेतुरित्याह ॥ एवमिति ॥ सर्गादौआदिसर्गे ॥ एवंसक्रियत्वेनाक्रियत्वेनवासंविदिअंशवःकिरणाइवस्फुरिताअद्यापितथैवसंस्थिताः ॥६७॥ प्रस्तुतंवक्तुंपृष्टप्रसंगागतंतत्त्वावबोधनमुपसंहरति ॥ यथेति॥६८॥ प्रायइतिवितर्के ॥ अस्तंगतोमृतःसन्पुष्पमालापिहितस्यशवभूतस्यपद्मस्यत्वद्गतंपद्मकोशंविविक्षुर्यातिगच्छति ॥६९॥ एनंपश्यंत्यावेवआवांआशुगच्छावोगमिष्यावः ॥ ७० ॥ मनुष्यवासनापद्मशरीराहंवासना ॥ अन्यथातत्प्राप्त्ययोगादितिभावः ॥ ७१॥ सौहार्दस्नेहस्तेनबंधनीसंबंधहेतुः ॥ ७२॥

॥१०१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृपतिवरसुतायालीलायाउदारेविशुद्धेमनसिपरमदृशिपरमार्थदृग्रूपेस्वतत्त्वेइतिविहितयाकथयागतक्रमायांनिरस्तसर्वसंतापेसतिविबोधलक्षणेभानौसूर्येप्रस्तेआविर्भूतेसति विदूरथोविगलितेनकारणेप्राज्ञात्मनिविलीनेनचित्तेनजडःप्रतिसंधानशून्योमरणायमूर्छितोभूदित्यर्थः ॥ ७३ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेउ०पंचपंचाशःसर्गः ॥ ५५ ॥ ॥ ७ ॥ ॥ इहतन्नृपजीवस्यवासनायमपूर्गतिः ॥ तयोरनुगमःपूर्वपुरप्राप्तिश्चवर्ण्यते ॥ १ ॥ सर्वेषुकरणेषुमूर्छितेष्वेकतनुःसूक्ष्मःप्राणएवशेषोदेहेअवशिष्टोयस्यसतथाविधोबभूव ॥ १ ॥ भृंगस्यध्वनितंध्वनिस्तत्सच्छाययाश्वासकूजयाविकूणितोध्वनितः ॥ २ ॥ महतिमरणमूर्छालक्षणेअंधकूपेनिपतितइवनिमग्नआशयोमनोयस्य ॥ ३ ॥ तदुत्तरावस्थामाह ॥ चित्रेति ॥ उपलेसमुत्कीर्णःप्रतिमादिरिव ॥ ४ ॥ तनुदेशेनअल्पेनैवप्रदेशेनोत्क्रांत्यर्थमाश्रितेन ॥ तंराजदेहंप्राणोजहौ ॥ स्वंस्वालयभूतंव्

श्रीवसिष्ठउवाच॥ ॥इतिविहितकथागतक्रमायांपरमदृशिप्रस्तेविबोधभानौ॥ नृपतिवरसुतामनस्युदारेविगलितचित्तजडोविदूरथोभूत्॥ ७३॥ ॥इत्यार्षेवा०वा०दे०मो०उ०ली०संसारमरणावस्थावर्णनंनामपंचपंचाशःसर्गः॥ ५५॥ ॥ ७॥ ॥ श्रीवसिष्ठ उवाच॥ ॥ एतस्मिन्नंतरेराजापरिवृत्ताक्षितारकः॥ बभूवैकतनुप्राणशेषःशुष्कसिताधरः॥ १॥ जीर्णपर्णसवर्णाभःक्षीणपांडुमुखच्छविः॥ भृंगध्वनितसच्छायश्वासकूजाविकूणितः॥ २॥ महामरणमूर्छांधकूपेनिपतिताशयः॥ अंतर्निलीननिःशेषनेत्रादींद्रियवृत्तिमान्॥ ३॥ चित्रन्यस्तइवाकारमात्रदृश्योविचेतनः॥ निःस्पंदसर्वावयवःसमुत्कीर्णइवोपले॥ ४॥ बहुनात्रकिमुक्तेनतनुदेशेनतंजहौ॥ प्राणःपिपतिषुंवृक्षंस्वंपक्षीवांतरिक्षगः॥ ५॥ तेतंददृशतुर्बालेदिव्यदृष्टीनभोगतम्॥ जीवंप्राणमयींसंविद्गंधलेशमिवानिले॥ ६॥ साजीवसंविद्गगनेवातेनमिलितासती॥ खेदूरंगंतुमारेभेवासनानुविधायिनी॥ ७॥ तामेवानुससाराथस्त्रीद्वयंजीवसंविदम्॥ भ्रमरीयुगलंवातलग्नांगंधकलामिव॥ ८॥ ततोमुहूर्त्तमात्रेणशांतेमरणमूर्छने॥ अंबरेबुबुधेसंविद्गंधलेखेनवायुना॥ ९॥ अपश्यत्पुरुषान्यास्यान्नीयमानंचतैर्वपुः॥ बंधुपिंडप्रदानेनशरीरंजातमात्मनः॥ १०॥ मार्गेकर्मफलोल्लासमतिदूरतरेस्थितम्॥ वैवस्वतपुरंप्रापजंतुभिःपरिवेष्टितम्॥ ११॥ प्राप्तंवैवस्वतपुरमादिदेशततोयमः॥ अस्यकर्माण्यशुभ्राणिनैवसंतिकदाचन॥ १२॥

क्षम् ॥ ५ ॥ तेबालेनभोगतंतंजीवंददृशतुः ॥ प्राणमयीघ्राणजवृत्त्युपहितासंवित्अनिलेस्थितंगंधलेशंसूक्ष्मगंधमिव ॥ ६ ॥ वातेनआतिवाहिकप्राणेन ॥ ७ ॥ ८ ॥ संवित्जीवसंवित् ॥ वासनामयदेहेनस्वप्नइवबुबुधे ॥ ९ ॥ वपुर्वासनादेहम् ॥ शरीरंस्थूलदेहंऔर्ध्वदेहिकेनबंधुपिंडप्रदानेनजातमिवापश्यत् ॥ १० ॥ अतिदूरतरेसंवत्सरगम्येदक्षिणमार्गेस्थितंप्राणिकर्मफलान्युल्लासयतिप्रकटयतीतिकर्मफलोल्लासंवैवस्वतपुरंयमनगरंप्राप ॥ ११ ॥ आदिदेशआज्ञप्तवान् ॥ कर्माणिविमृश्येत्यर्थाद्गम्यते ॥ अशुभ्राणिश्यामानिपापानीतियावत् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवदातानांलोभादिदोषाकलुषाणाम् ॥१३॥ इतिमदुक्तप्रकारानुसारिणाचेतसाचिन्तेनभटैरेषत्यज्यताम् ॥ अत्रलीलासरस्वत्यावंतर्हितेयमपुरंप्रविष्टेबहिरेववातदागमनप्रतीक्षे स्थितेइत्यर्थाद्गम्यते ॥ १४ ॥ क्षेपणीयंत्राच्च्युतोयंत्रोपलइवनभोमार्गेत्यक्तः ॥ १५ ॥ राज्ञोजीवलेखारूपिण्यौरूपवत्यावपितेज्ञप्तिलीलेनपश्यति ॥ तेतुतांपश्यतएवेतितुश ब्दाल्लभ्यते ॥ १६ ॥ जगद्गृहंब्रह्मांडंतस्माद्विनिर्गत्यद्वितीयंजगद्ब्रह्मांडमासाद्य ॥ १७ ॥ १८ ॥ अंबुजमंभोजमितिप्रवेशकर्मणःशब्दमात्रभेदेपिप्रवेशकर्त्र्योर्वातलेखासूर्यभासो र्भेदादुपमानभेदेनमालोपमेयम् ॥ १९ ॥ विदूरथलीलाजीवस्यदुहित्रामार्गप्रदर्शनंप्रागुक्तंराजजीवस्यतुनोक्तमितितस्यमार्गपरिज्ञानेसंदिहानोरामःपृच्छति ॥ ब्रह्मन्निति ॥ २० ॥ पूर्वशरीरवासनायामनपगतायामेवबलवताप्रारब्धेनमध्येजन्मांतरविभावनाद्भोगेनतत्क्षयेपूर्ववासनोद्भवाद्यथागतमार्गस्फुरणोपपत्तिरित्याशयेनाह ॥ वसिष्ठस्तस्येति

नित्यमेवावदातानांकर्तायंशुभकर्मणाम् ॥ भगवत्याःसरस्वत्यावरेणायंविवर्द्धितः ॥ १३ ॥ प्राक्तनोस्यशवीभूतोदेहोस्तिकुसुमांबरे ॥ प्रविशत्वेषतंगत्वात्यज्यतामितिचेतसा ॥ १४ ॥ ततस्त्यक्तोनभोमार्गेयंत्रोपलइवच्युतः ॥ अथजीवकलालीलाज्ञप्तिश्चेतित्रयंनभः ॥ १५ ॥ पुप्लुवेजीवलेखातुरूपिण्यौतेनपश्यति ॥ तामेवानुसरंत्यौतेसमुल्लंघ्यनभस्तलम् ॥ १६ ॥ लोकांतराण्यतीत्याशुविनिर्गत्यजगद्गृहात् ॥ द्वितीयंजगदासाद्यभूमंडलमुपेत्यच ॥ १७ ॥ तेद्वेसंकल्परूपिण्यौसंगतेजीवलेखया ॥ पद्मराजपुरंप्राप्यलीलांतःपुरमंडपम् ॥ १८ ॥ क्षणाद्विविशतुःस्वैरंवातलेखायथांबुजम् ॥ सूर्यभासोयथांभोजंसुरभिःपवनंयथा ॥ १९ ॥ ॥श्रीरामउवाच॥ ॥ब्रह्मन्प्राप्तःकथमसौशवस्यनिकटंगृहम् ॥ कथंतेनपरिज्ञातोमार्गोमृतशरीरिणा ॥ २० ॥ ॥श्रीवसिष्ठउवाच॥ ॥ तस्यस्ववासनांतस्थशवस्यकिलराघव ॥ तत्सर्वंद्धृतंकस्मान्नासौप्राप्नोतितद्गृहम् ॥ २१ ॥ भ्रांतिमात्रमसंख्येयंजगज्जीवकणोदरे ॥ वटधानातरुमिवस्थितंकोवानपश्यति ॥ २२ ॥ यथाजीवद्वपुर्बीजमंकुरंत्वदिपश्यति ॥ स्वभावभूतंचिदणुस्त्रैलोक्यनिचयंतथा ॥ २३ ॥ नरोयथैकदेशस्थोदूरदेशांतरस्थितम् ॥ संपश्यतिनिधानंस्वंमनसानारतंसदा ॥ २४ ॥

स्ववासनायाअंतस्थःशवःपद्मशरीराहंभावोयस्यतथाविधस्यतस्यजीवस्यतन्मार्गादिसर्वंतद्धृतंत्वदिस्फुरितम् ॥ २१ ॥ जीवकणस्यजीवोपाधेःसूक्ष्मस्यांतःकरणस्योदरेआविर्भूतवासनात्मनास्थितम् ॥ यथाजीववद्वटधानाभूजलाद्यंकुरोदयसामग्रीप्राप्तौस्वतःअंकुरात्मनाजायमानंवटतरुंपश्यतिस्वांतरेवानुभवतितद्वत् ॥ २२ ॥ उक्तंदृष्टांतंविवृण्वंस्तदेवस्फुटमाह ॥ यथेति ॥ त्रैलोक्यनिचयमिति ॥ ज्ञानाज्ञानान्यतरव्यवधानेनसर्वस्यजगतःसाक्षिभास्यत्वमितिसिद्धांतरहस्यमितिभावः ॥ २३ ॥ स्वंस्वीयंनिधानंनिखातधनं सदापश्यतिमनसाअनारतंभावयन्नितिशेषः ॥ तथाचविधुरपरिभावितकामिनीसाक्षात्कारवद्भावनाप्रचयबलादपितद्दर्शनसिद्धिरितिभावः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २५ ॥ यत्प्रागुक्तंबंधुपिंडप्रदानेनशरीरंजातमात्मनःअपश्यदितितस्यासार्वत्रिकत्वंरामःशंकते ॥ भगवन्निति ॥ यस्मैपिंडोनदीयतेतस्यतद्वासनाहेत्वभावात्सवासनारहिताकृतिर्जीवःकीदृक्कथंसशरीरःसंपद्यतइत्यर्थः ॥ २६ ॥ तत्पिंडफलंशरीरसिद्धिस्तद्भाक् ॥ पिंडदानादिविधिस्तुबंधुकृत्यबोधकोवस्तुतोबंधुफलहेतुरपिमृतवासनाफलसंवादादुभयगामिफलःप्रसिद्धइतिभावः ॥ २७ ॥ चित्तमेवहिसंसारस्तच्चयत्नेनशोधयेत् ॥ यश्चित्तस्तन्मयोभवति ॥ गुह्यमेतत्सनातनमित्यादिप्रत्यक्षश्रुतयोविद्वदनुभवाश्चेत्यर्थः ॥ सदेहेषुविदेहेषुचयोगिषुप्रसिद्धाः ॥ अथवासदेहेषुजीवत्सुविदेहेषुमृतेषुचजीवेषुक्कचिदपिअयंनियमोन्यथानभवतीत्यर्थः ॥ २८ ॥ २९ ॥ एतावांस्तुशास्त्रकृतोविशेषःबंधुभिःपिंडेषुदत्तेष्ववश्यंमृतस्यपिंडदानवासनाउद्भवत्येवेत्याशयेनाह ॥ भावनाचेति ॥ ३० ॥ सर्पादिविषमपिगरुडोपासकस्यगरुडाहंभावनयाअमृतायतेजीर्यतीतियावत् ॥ कंटकादिवेधे

तथास्ववासनांतस्थमभीष्टंपरिपश्यति॥ जीवोजातिशताढ्योपिभ्रमेपरिगतोपिसन्॥ २५॥ ॥श्रीरामउवाच॥ ॥भगवन्पिंडदानादिवासनारहिताकृतिः॥ कीदृक्संपद्यतेजीवःपिंडोयस्मैनदीयते ॥२६॥ ॥श्रीवसिष्ठउवाच॥ ॥ पिंडोथदीयतेमावापिंडोदत्तोममेतिचेत्॥ वासनाहृदिसंरूढातत्पिंडफलभाङ्नरः॥२७॥ यच्चित्तंतन्मयोजंतुर्भवतीत्यनुभूतयः॥ सदेहेषुविदेहेषुनभवत्यन्यथाक्कचित्॥२८॥ सपिंडोस्मीतिसंवित्त्यानिष्पिंडोपिसपिंडवान्॥ निष्पिंडोस्मीतिसंवित्त्यासपिंडोपिनपिंडवान्॥ २९॥ यथाभावनमेतेषांपदार्थानांहिसत्यता॥ भावनाचपदार्थेभ्यःकारणेभ्यउदेतिहि॥ ३०॥ यथावासनयाजंतोर्विषमप्यमृतायते॥ असत्यःसत्यतामेतिपदार्थोभावनात्तथा॥ ३१॥ कारणेनविनोदेतिनकदाचनकस्यचित्॥ भावनाकाचिदपिनोइतिनिश्चयवान्भव॥ ३२॥ कारणेनविनाकार्यमामहाप्रलयंक्कचित्॥ नदृष्टंनश्रुतंकिंचित्स्वयंत्वेकोदयादृते॥३३॥ चिदेववासनासैवधत्तेस्वप्नइवार्थताम्॥ कार्यकारणतांयातिसैवागत्येवतिष्ठति॥ ३४॥ ॥श्रीरामउवाच॥ ॥धर्मोनास्तिममत्येवयःप्रेतोवासनान्वितः॥ तस्यचेत्सुहृदाभूरिधर्मःकृत्वासमर्पितः॥ ३५॥

सर्पदंशभ्रांतावसत्योपिसतथासत्यतयाभावनात्सत्यतांमरणाद्यर्थक्रियाकारितांगच्छति ॥ ३१ ॥ कारणसत्यत्वेहिकार्यसत्यतास्यात् भावनातुनवस्तुसतीतिसत्यकारणेनविनाजातंकार्यंनास्त्येवेतिशुद्धंब्रह्मैववस्तुतोस्तीतिनिश्चयवान्भवेत्यर्थः ॥ ३२ ॥ कारणासत्वेऽपिकार्योद्भवःकिंनस्यात्तत्राह ॥ कारणेनेति ॥ सर्वथाकार्यसत्तायाःकारणसत्ताधीनत्वस्यैवप्रमाणैःसिद्धेरित्यर्थः ॥ ब्रह्मसत्तापितर्हिकिंकारणाधीनानेत्याह ॥ स्वयंत्विति ॥ स्वयंस्वतोयदेकोदयंनित्यस्वप्रकाशंब्रह्मतस्मादृते ॥ अनित्यसत्तायामेवकारणसत्तापेक्षणादितिभावः ॥ ३३ ॥ एवंचशुद्धचिन्मात्रमेवभ्रांत्यावासनादिजगद्रूपेणभासतेइतियःसिद्धांतःसप्रतिष्ठितइत्याह ॥ चिदेवेति ॥ ३४ ॥ सपिंडोऽस्मीतिसंवित्त्येतियत्प्रागुक्तंप्रेतवासनानुसार्येवप्रेतस्यशरीरारंभादिफलमितितत्रकरिष्यमाणाक्षेपोपयोगितयारामःपृच्छति ॥ धर्मइति ॥ ३५ ॥

१ सर्वदेतिक्कचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नष्टःप्रेतवासनाविरोधान्निष्फलःस्याद्वाउतसुदृढ्वासनाप्राबल्यान्नवानिष्फलइत्यर्थः ॥ तत्रसुदृढ्वासनाधर्मसत्वात्सत्यार्था प्रेतवासनात्वसत्यार्था ॥ तत्रवासनायांप्राबल्येकिं भोक्तृनिष्ठताप्रयोजिकाउतसत्यार्थता ॥ आद्येकृतहानदोषः ॥ द्वितीयेत्वर्थसत्यतास्यादितिपूर्वोक्तव्याघातइत्युभयतस्पाशारज्जुरित्याशयः ॥ ३६ ॥ शास्त्रोक्तेदेशेकाले यथोक्तानुष्ठानेनशास्त्रानुसारिणीसुदृढ्वासनाशास्त्रप्रामाण्यात्प्रबला प्रेतवासनातुकेवललौकिकत्वाद्दुर्बलेतिशास्त्रमेवप्राबल्यप्रयोजकंनार्थसत्यत्वमितिगूढाभिसंधिर्वसिष्ठःसमाधत्ते ॥ देशेति ॥ यत्रैवफलरूपेविषयेसाअभ्युदितासविषयोजयी ॥ सएवभवतीत्यर्थः ॥ ३७ ॥ धर्मदानशास्त्रबलात्प्रेतांतःकरणेवातत्कालेतादृशधर्मवानहमितिवासनोत्पत्तिःकल्प्यतइत्याह ॥ धर्मदातुरिति ॥ अवश्यंचशास्त्रबलादेवप्रेतस्यफललाभइतिवाच्यम् ॥ पाषंडस्यतस्यवेदप्रद्वेषनास्तिकत्वाद्यशुभवासनादूषितधियःसुहृद्भिर्धर्मदानेपितत्फलाप्राप्तेरित्याशयेनाह ॥ नचेदिति ॥ प्राबल्यस्यार्थसत्यत्वप्रयुक्तत्वेतस्यापिधर्मफलापत्तिरितिभावः ॥ ३८ ॥ अतएवप्राज्ञयापुरुषप्रयत्नप्राबल्यंप्रसाध्यशुभाभ्यासएव

तत्तदात्रसकिंधर्मोनष्टःस्याद्रुतवानवा ॥ सत्यार्थावाप्यसत्यार्थाभावनाकिंबलाधिका ॥ ३६ ॥ ॥श्रीवसिष्ठउवाच॥ ॥देशकालक्रियाद्रव्यसंपत्त्योदेतिभावना॥ यत्रैवाभ्युदितासास्यात्सद्वयोरधिकोजयी॥ ३७॥ धर्मदातुःप्रवृत्ताचेद्वासनातत्तयाक्रमात् ॥ आपूर्यतेप्रेतमतिर्नचेत्प्रेतधियाशुभा॥ ३८ ॥ एवंपरस्परजयाज्जयत्यत्रातिवीर्यवान् ॥ तस्माच्छुभेनयत्नेनशुभाभ्यासमुदाहरेत् ॥ ३९ ॥ ॥श्रीरामउवाच॥ ॥देशकालादिनाब्रह्मन्वासनासमुदेतिचेत्॥ तन्महाकल्पसर्गादौदेशकालादयःकुतः॥४०॥ कारणेसमुदेतीदंतैस्तदासहकारिभिः॥ सहकारिकारणानामभावेवासनाकुतः॥४१॥ ॥श्रीवसिष्ठउवाच॥ ॥एवमेतन्महाबाहोसत्यात्मन्नकदाचन॥ महाप्रलयसर्गादौदेशकालौनकौचन॥ ४२ ॥ सहकारिकारणानामभावेसतिदृश्यधीः॥ नेयमस्तिनचोत्पन्नानचस्फुरतिकाचन॥४३॥ दृश्यस्यासंभवादेवकिंचिद्यद्दृश्यतेत्विदम्॥ तद्ब्रह्मैवस्वचिद्रूपंस्थितमित्थमनामयम्॥४४॥

सदाकार्यइत्युक्तमित्याशयेनाह ॥ एवमिति ॥ ३९ ॥ यदिदेशकालादिकारणसहकारिसंपत्त्याधर्मतद्वासनोदयोऽभ्युपगम्यतेतर्हिसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिश्रुतेरादिसर्गेदेशकालादिसहकार्यभावाद्वासनोत्पत्त्ययोगात्तन्मयजगदुत्पत्तिरेवनस्यात्तथाचतदैक्षतबहुस्यांप्रजायेयेत्याद्युत्तरश्रुतिविरोधइत्याशयेनरामःशंकते ॥ देशेति॥४०॥ तदावासनाकुतः ॥ कारणेसतिहिइदंवासनादिकार्यंसमुदेति ॥ ४१ ॥ इष्टमेवेदंत्वयामांप्रत्यापादितम् ॥ ननिरोधोनचोत्पत्तिः तदेतद्ब्रह्मापूर्वमनपरमस्थूलमनण्वह्रस्वम् ॥ अथातआदेशोनेतिनेति यत्तदद्रश्यमग्राह्यम् यत्रनान्यत्पश्यतिनान्यच्छृणोतीत्यादिश्रुतिशतस्यतत्रैवतात्पर्यदर्शनान्महताचप्रयत्नेनास्यैवार्थस्यबुबोधयिषितत्वाच्चसोकामयतेत्यादिसृष्टिश्रुतीनामपिप्रतीयमानद्वैतानृतत्वोपपादनेनोपक्रांतमुक्तिफलकनिष्प्रपंचात्मव्युत्पादनएवतात्पर्येणसृष्ट्यादौतात्पर्याभावादित्याशयेनानुमोदमानोवसिष्ठउवाच॥ एवमेतदित्यादिना ॥ महाप्रलयरूपेसर्गस्यादौपूर्वभूतेसत्यात्मनूपरमार्थसत्येआत्मनि ॥ सुपांसुलुगितिछांदसेङिलुकिनङिसंबुद्ध्योरितिनलोपप्रतिषेधः ॥ ४२ ॥ ४३ ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४५ ॥ एवंप्राग्वर्णितरीत्यापद्मनगरंप्राप्तेज्ञप्तिलीलेपद्ममंदिरंददृशतुः ॥ ४६ ॥ प्रशांतराजकार्याचरणसंरंभयाराजधान्यालक्षणयाराजधानीस्थजनेनतत्रगृहेतैर्जनैःसमं साकंस्थितंमंदारकुंदमाल्यादिपिहितंशवंचददृशतुरित्यत्रोत्तरत्रचानुकृष्यते ॥ ४७ ॥ ४८ ॥ पुनस्तद्गृहमेववर्णयति ॥ अनिवृत्तेत्यादिना ॥ अनिवृत्तान्यनुद्घाटितानिगृहद्वारग वाक्षाणांकठिनार्गलानिदृढविष्कंभायत्र ॥ प्रशाम्यन्मलिनीभवन्योदीपकानामालोकस्तेनश्यामलामलिनावस्तुतस्त्वमलाभित्तयोयस्य ॥ ४९ ॥ बहिःसंपूर्णचंद्रस्यकलास हितेनोदयेनप्रकाशितत्वात्कांतम् ॥ अंतस्तुवैरिंचस्यविरिंचालयस्यभगवन्नाभिपद्ममुकुलस्यआंतरंगर्भइवचारुशोभायस्य ॥ निःशब्दतयामंदंमूकमिवस्थितम् ॥ इंदुरिवकांतं

एतच्चाग्रेयुक्तिशतैःकथयिष्यामएवते ॥ एतदर्थंप्रयत्नोयंवर्त्तमानकथांश्रृणु ॥४५॥ एवंददृशतुःप्राप्तेमंदिरंसुंदरोदरम्॥ कीर्णपुष्पोपहा रेणवसंतमिवशीतलम् ॥ ४६ ॥ प्रशांताचारसंरंभराजधान्यासमन्वितम् ॥ मंदारकुंदमाल्यादिशवंतत्रसमंस्थितम् ॥४७॥ मंदारकुंद स्रग्दामवृतांबरबृहच्छवम् ॥ शवशय्याशिरःस्थार्घ्यपूर्णकुंभादिमंगलम् ॥ ४८ ॥ अनिवृत्तगृहद्वारगवाक्षकठिनार्गलम् ॥ प्रशाम्यद्दीप कालोकश्यामलामलभित्तिकम् ॥ गृहैकदेशसंसुप्तमुखश्वाससमीकृतम् ॥ ४९ ॥ संपूर्णचंद्रसकलोदयकांतिकांतंसौंदर्यनिर्जितपुरंदर मंदिरर्द्धि ॥ वैरंचपद्ममुकुलांतरचारुशोभंनिःशब्दमंदमिवनिर्मलमिंदुकांतम् ॥ ५० ॥ ॥इत्यार्षेवा०वा०दे०मो०उ०ली०मरणशय नानंतरप्रेतव्यवस्थानामषट्पंचाशःसर्गः ॥ ५६ ॥ ॥ ७ ॥ ॥श्रीवसिष्ठउवाच॥ ॥ ततोददृशतुस्तत्रशवशय्यैकपार्श्वगाम् ॥ ली लांविदूरथस्याग्रेमृतांतिप्रथमागताम् ॥ १ ॥ प्राग्वेषांप्राक्समाचारांप्राग्देहांप्राक्सवासनाम् ॥ प्राक्तनाकारसदृशींसर्वरूपांगसुंदरीम् ॥२॥ प्राग्रूपावयवस्पंदांप्रागंबरपरीवृताम् ॥प्राग्भूषणभरच्छन्नांकेवलंतत्रसंस्थिताम्॥३॥गृहीतचामरांचारुवीजयंतींमहीपतिम्॥ उद्यच्चंद्रामिवदिवंभूषयंतींमहीतलम् ॥ ४ ॥ मौनस्थांवामहस्तस्थवदनेंदुतयानताम् ॥ भूषणांशुलतापुष्पैःफुल्लामिववनस्थलीम् ॥५॥ कुर्वाणांवीक्षितैर्दिक्षुमालत्युत्पलवर्षणम् ॥ स्रजंतीमात्मलावण्यादिंदुमिंदुंनभोदितम् ॥ ६ ॥

रम्यंगृहंददृशतुरित्यर्थः ॥ ५० ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्र०षट्पंचाशःसर्गः ॥ ५६ ॥ ॥ ७ ॥ ॥ लीलांतरेक्षालीलायादेहमिथ्यात्वमुच्यते ॥ योगिनांचशरीरस्य आतिवाहिकतोदयः ॥ १ ॥ अग्रेपूर्वंमृतांविदूरथस्यलीलांतेज्ञप्तिलीलेददृशतुः ॥ १ ॥ प्राग्वेषत्वादौहेतुःप्राक्स्ववासनामिति ॥ २ ॥ केवलंतत्रपद्मगृहेसंस्थिताम् ॥ तत्रस्थिति मात्रमपूर्वमन्यत्सर्वंपूर्वतनमेवेत्यर्थः ॥ ३ ॥ ४ ॥ भूषणानामंशुभिःकिरणैः ॥ पत्रलताभिःपुष्पैश्चफुल्लांवनस्थलीमिवस्थिताम् ॥ ५ ॥ इंदुमिंदुमितिवीप्सा ॥ सर्वानिंदूनआत्म लावण्यात्स्रजंतीमिवेत्युत्प्रेक्षा ॥ नभोदितमितिसंधिरार्षः ॥ नभसिदितंक्षयेणखंडितंपुनःस्रजंतीमितिवा ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७ ॥ ८ ॥ तथासत्यसंकल्पतयासानोदितानाविर्भूता ॥ ९ ॥ लीलायाआवश्यकंप्राकृत्यक्तस्वशरीरान्वेषणंविहायविदूरथलीलादर्शनमेवप्रथमंकुतोवर्णितमितिसंदेहाद्रामः पृच्छति ॥ तस्मिन्निति ॥ १० ॥ ११ ॥ आतिवाहिकताबुद्ध्युदयेनतत्त्वावबोधेनचबाधितत्वादेवलीलायाःस्वदेहदर्शनंनचवर्णितम् येषांत्वज्ञानांदृष्ट्यानबाधितंतद्दृष्ट्योत्तरसर्गेतद्देहमरणदाहादिवक्ष्यतेइतिवक्ष्यमाणंनिगूह्यतत्त्वावबोधनायतन्मिथ्यात्वमेवप्रपंचयन्वसिष्ठउवाच ॥ क्वासीदित्यादिना ॥ १२ ॥ १३ ॥ यथायेनक्रमेणैवपरिणामंपरिपाकलक्षणंउपागताप्राप्तातथातेनक्रमेणैव ॥ तस्माद्बोधात्परेब्रह्मणि ॥ गलितंबाधितम् ॥ १४ ॥ नकेवलंस्वदेहस्याधिभौतिकत्वंगलितंकिंतुभूम्यादिसर्ववस्तूनामपि अपागादग्नेरग्नित्वं त्रीणिरूपाणीत्येवसत्यमितिश्रुत्यातेषामपिस्थौल्यबाधेनआतिवाहिकत्वपरिशेषणादित्याशयेनाह ॥ आतिवाहिकेति ॥ आतिवाहिकताबुद्ध्यासूक्ष्मतमसमष्टिमनोमात्रत्वबुद्ध्या

नरपालात्मनोविष्णोर्लक्ष्मीमिवसमागताम् ॥ उदितांपुष्पसंभारादिवपुष्पाकरश्रियम् ॥ ७ ॥ भर्तुर्वदनकेन्यस्तदृष्टिमिष्टविचेष्टिताम् ॥ किंचित्प्रम्लानवदनांम्लानचंद्रांनिशामिव ॥ ८ ॥ ताभ्यांसाललनादृष्टातयातेतुनलक्षिते ॥ यस्मात्तेसत्यसंकल्पेसानतावत्तथोदिता ॥ ९ ॥ ॥ श्रीरामउवाच ॥ ॥ तस्मिन्प्रदेशेसापूर्वलीलासंस्थाप्यदेहकम् ॥ ध्यानेनज्ञप्तिसहितागताभूदितिवर्णितम् ॥ १० ॥ किमिदानींसलीलायादेहस्तत्रनवर्णितः ॥ किंसंपन्नःक्वायातइतिमेकथयप्रभो ॥ ११ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ क्वासीह्लीलाशरीरंतत्कुतस्तस्यास्तिसत्यता ॥ केवलाभ्रांतिरेवाभूज्जलबुद्धिर्मराविव ॥ १२ ॥ आत्मैवेदंजगत्सर्वंकुतोदेहादिकल्पना ॥ ब्रह्मैवानंदरूपंसद्यत्पश्यसितदेवचित् ॥ १३ ॥ यथैवबोधेलीलासौपरिणाममिताक्रमात् ॥ परेतथैवतस्मात्तद्धिमवद्गलितंवपुः ॥ १४ ॥ (आतिवाहिकदेहस्यकालेनाभ्युदितोभ्रमः ॥ आधिभौतिकदेहोहमितिरज्जुभुजंगवत् ॥ १ ॥) आतिवाहिकदेहेनदृष्टंयदवलोकितम् ॥ भूम्यादिनामतस्यैवकृतंतच्चाधिभौतिकम् ॥ १५ ॥ वास्तवेनतुरूपेणभूम्याद्यात्माधिभौतिकः ॥ नशब्देननचार्थेनसत्यात्माशशशृंगवत् ॥ १६ ॥ पुंसोहरिणकोस्मीतिस्वप्नेयस्योदितामतिः ॥ सकिमन्विष्यतिमृगंस्वमृगत्वपरिक्षये ॥ १७ ॥ उदेत्यसत्यमेवाशुतथासत्यंविलीयते ॥ भ्रांतिर्भ्रमवतोरज्ज्वामपिसर्पभ्रमेगते ॥ १८ ॥ समस्तस्याप्रबुद्धस्यमनोजातस्यकस्यचित् ॥ बीजंविनाम्रृषैवेयंमिथ्यारूढिमुपागता ॥ १९ ॥

तत्त्वदृशातयायद्दृश्यमवलोकितंतस्यैवप्राग्भ्रांत्याभूम्यादिनामकृतंस्थितंतदेवआधिभौतिकम् ॥ १५ ॥ अतोनवस्तुतआधिभौतिकंनामकिंचिदस्तीत्याह ॥ वास्तवेनेति ॥ १६ ॥ तथाचबाधितस्यान्वेषणप्रसक्तिरेवनास्तीत्याह ॥ पुंसइति ॥ १७ ॥ यथाभ्रमतःअसत्यमेवोदेतिलीयतेचतथाभ्रमेगतेऽपिउदेतिकिमितिकाकायोज्यम् ॥ १८ ॥ तथाचाज्ञमनःसमष्टिकल्पितआधिभौतिकप्रपंचइतिफलितमित्याह ॥ समस्तस्येति ॥ जातशब्दःसमूहवचनः ॥ इयमेतद्ब्रह्मांडगतस्थूलभ्रांतिःप्रतिब्रह्मांडभिन्नानंताज्ञमनोजातानांमध्येकस्यचिन्मनोजातस्यमिथ्यारूढिर्दृढप्रथाप्रसिद्धिमुपागताम्रृषैवेत्यर्थः ॥ १९ ॥

१ अत्रटीकानुरोधात्परिणाममुपागतेतिपाठोऽपेक्षितइतिभाति ॥ २ अयंश्लोकएकस्मिन्पुस्तकेऽधिकोमिलितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ससर्वोऽन्नश्चिरंआगमापायेनआवृत्तदेहएवात्मायस्यसतथाविधःसन्बालोयथाभूचक्रभ्रमणमनुभवतितद्वत् ॥ २० ॥ ननुयोगिदेहस्याधिभौतिकत्वंयदिनास्तितर्हितस्यपुरस्थस्यजीवतोनिजंस्वात्मरूपंगच्छतोमृतस्यवाआतिवाहिकतांप्राप्तोदेहोलोकैर्जनैर्विलोक्यतेअयंकीदृशः ॥ नहिआतिवाहिकोलोकैर्द्रष्टुंशक्योमुक्तिकालेपरिशिष्यतेवेतिराम प्रश्नार्थः ॥ २१ ॥ योगिनांद्विविधंमरणम् ॥ एकंप्रारब्धभोगायैच्छिकंनानादेहकल्पनम् अपरंसर्वप्रारब्धक्षयेविदेहकैवल्यम् ॥ तत्राद्येतावन्नपूर्वशेषोस्तीत्याह ॥ देहादिति॥ यथास्वप्नेषुआतिवाहिकदेहेएकंमृगादिभावंत्यक्त्वाअपरमनुष्यादिभावकल्पनापूर्वदेहपरिशेषंविनैवविनश्वरीअनित्यातद्वदित्यर्थः ॥ २२ ॥ द्वितीयेपिसनास्तीतिसदृष्टांतमाह॥ यथेति ॥ तथाचशरन्मेघादिवन्मंदंक्षीयमाणेतस्मिन्कंचित्कालंपरिशेषभ्रमइत्यर्थः ॥ २३ ॥ मंदंक्षीयतेअवश्यंपरैर्दृश्यतेइत्यपिननियमः ॥ केषांचित्सद्योविनाशसंकल्पेनतथैवनाशसंभवादित्याह ॥ द्रागिति ॥ अन्यैर्योगिभिश्चनलक्ष्यतेकिंपुनःपृथग्जनैरित्यर्थः ॥ तथाचजीवद्दशायामपिजनैस्तद्देहदर्शनमेतेमामित्थंपश्यंत्वितितदीयसत्यसंकल्पवशादे

स्वप्नोपलंभसर्गाख्यंससर्वोनुभवन्स्थितः॥ चिरमावृत्तदेहात्माभूचक्रभ्रमणंयथा॥२०॥ ॥श्रीरामउवाच॥ ॥ब्रह्मन्लोकैःपुरस्थस्य गच्छतोयोगिनोनिजम्॥आतिवाहिकतांदेहःकीदृशोयंविलोक्यते॥२१॥ ॥श्रीवसिष्ठउवाच॥ ॥देहाद्देहांतरप्राप्तिःपूर्वदेहंविनासदा॥ आतिवाहिकदेहेस्मिन्स्वप्नेष्विवविनश्वरी ॥ २२ ॥ यथातपेहिमकणःशरद्व्योम्निसितोंबुदः ॥ दृश्यमानोप्यदृश्यत्वमित्येवंयोगिदेहकः ॥२३॥ द्रागित्येवाथवाकश्चिद्योगिदेहोनलक्ष्यते ॥ योगिभिश्चपुरोवेगात्प्रोड्डीनइवखेखगः॥ २४॥ स्ववासनाभ्रमेणैवक्वचित्केचित्कदाचन॥ मृतोयमितिपश्यंतिकेचिद्योगिनमग्रगाः॥ २५॥ भ्रांतिमात्रंतुदेहात्मातेषांतदुपशाम्यति॥ सत्यबोधेनरज्जूनांसर्पबुद्धिरिवात्मनि ॥ २६॥ कोदेहःकस्यवासत्ताकस्यनाशःकथंकुतः॥ स्थितंतदेवयद्भूदबोधःकेवलंगतः॥२७॥ ॥श्रीरामउवाच॥ ॥आतिवाहिकतामेतिआधिभौतिकएवकिम् ॥ उतान्यइतिमेब्रूहियेनोत्थइवभोःप्रभो॥ २८॥

वनेदेहस्याधिभौतिकत्ववशादितिभावः ॥ २४ ॥ अथवायोगिनांस्वदृष्ट्यास्वदेहस्यातिवाहिकत्वानुभवेपितदुपभोजकादृष्टसहकृताज्ञजनवासनयातस्यभौतिकत्वमरणादिकल्पनसंभवान्नकश्चिद्विरोधइत्याशयेनाह ॥ स्ववासनेति ॥ केचिदग्रगाःक्वचिन्मृतोयमितिपश्यंतिक्वचित्तुकेचिद्योगिनंजीवंतंपश्यंतीत्यर्थः ॥ अतएवहिप्राग्विदेहमुक्तस्यापिशुकस्यपरिक्षित्सभायांपुनर्दर्शनंभागवतोपदेशादिकंचनविरुद्ध्यतइतिबोध्यम् ॥ २५ ॥ किंचयोगिनांज्ञानोदयकालेएवदेहादेर्बाधान्नजीवनदशायामपितद्दृष्ट्यादेहोस्तीत्याह ॥ भ्रांतिमात्रमिति ॥ २६ ॥ यदेवपरमार्थतःस्थितंतदेवज्ञानेनाभूत् ॥ २७॥ ननुयदियोगिनांदेहोबाध्यतेतर्हिबाधितस्यपरिणामायोगात्प्रारब्धभोगायातिवाहिकशरीरमन्यदेवोत्पद्यतइतिस्यात्तथाचतस्यजन्मांतरत्वाज्जीवन्मुक्तत्वानुपपत्तिर्नसभूयोऽभिजायतइत्यादिशास्त्रविरोधश्चेतिमन्यमानोरामःपृच्छति ॥ आतिवाहिकतामिति ॥ किंयोगिनआधिभौतिकदेहएवातिवाहिकतामेत्युतान्यएवातिवाहिकदेहउत्पद्यते ॥ आद्येबाधितस्यपरिणामांतरंसर्वप्रमाणविरुद्धम् ॥ द्वितीयेतुज्ञानस्यमुक्तिफलत्वहानिरित्युभयथाप्यनुपपत्तेः संशयप्रवाहेअहंउह्येप्रवाह्यमानइवनस्थैर्यंप्राप्नोमीत्यर्थः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासौपरिणामः किंतुस्थूलबाधेप्राक्सिद्धतदधिष्ठानसूक्ष्मपरिशेषएवत्रिवृत्करणश्रुत्यासूक्ष्मदेहोपहितेब्रह्मणिस्थूलाध्यासबोधनात्रीणिरूपाणीत्येवसत्यमितिस्थूलबाधेनसूक्ष्मपरिशेषोक्तेश्चनोक्तदोषावकाशइतिप्रागुक्तस्मारणेनसमाधत्ते ॥ बहुशइत्यादिना ॥ २९ ॥ पूर्वाप्राक्तनी ॥ सैवआतिवाहिकता ॥ ३० ॥ ननुपरिणामांतरंविनादेहस्यगुरुत्वकाठिन्यादेःकथंनिवृत्तिस्तत्राह ॥ तदेति ॥ स्वप्ननगरगुरुत्वकाठिन्यादयइवतेऽपिबाध्यंतएवेत्यर्थः ॥ ३१ ॥ ३२ ॥ प्लुतिमान्आकाशगमनादियोग्यः ॥ ३३ ॥ यत्रदृढतरस्थूलवासनानामज्ञानांस्थूलदेहस्यशवीभावदाहादिनाकारणेतिरोभावलक्षणेनाशेऽपिप्राक्तनसूक्ष्मदेहप्राप्तिस्तत्रकिंवाच्यंज्ञानिनांनिर्वासनानांमूलोच्छेदनलक्षणेतद्बाधेजातेस्वाभाविकसौक्ष्म्यप्राप्तिर्भवतीतिकैमुतिकन्यायेनाह ॥ अनेकेतिद्वाभ्याम् ॥ आस्थितिमास्थांदृढाभिमानलक्षणाम् ॥३४॥३५॥ तत्रस्वमेअहंसंकल्पात्मैवनस्थूलात्माइतिस्मृतौउदि

श्रीवसिष्ठउवाच॥ ॥बहुशोह्युक्तमेतत्तेनगृह्णासिकिमुत्तम॥आतिवाहिकएवास्तिनास्त्येवेहाधिभौतिकः ॥ २९॥ तस्यैवाभ्यासतो प्येतिसाधिभौतिकतामतिः॥ यदाशाम्यतिसैवास्यतदापूर्वाप्रवर्त्तते॥३०॥तदागुरुत्वंकाठिन्यमितियश्चमुधाग्रहः ॥ शाम्येत्स्वप्ननरस्येवबोद्धुर्बोधान्निरामयात्॥३१॥लघुतूलसमापत्तिस्ततःसमुपजायते॥स्वप्नेस्वप्नपरिज्ञानादिवदेहस्ययोगिनः॥३२॥स्वप्नेस्वप्नपरिज्ञानाद्यथादेहोलघुर्भवेत्॥ तथाबोधादयंदेहःस्थूलवत्प्लुतिमान्भवेत् ॥ ३३॥ अनेकदिनसंकल्पदेहेपरिणतात्मनाम्॥ अस्मिन्देहे शवेदग्धेतत्रैवास्थितिमीयुषाम्॥३४॥ लघुदेहानुभवनमवश्यंभाविवैतथा॥प्रबोधातिशयादेतिजीवतामपियोगिनाम्॥३५॥उदितायांस्मृतौतत्रसंकल्पात्माहमित्यलम्॥यादृशःसभवदेहस्तादृशोयंप्रबोधतः॥ ३६ ॥ भ्रांतिरेवमियंभातिरज्ज्वामिवभुजंगता॥ किंनष्टमस्यांनष्टायांजातायांकिंप्रजायते ॥ ३७॥ ॥श्रीरामउवाच॥ ॥अनंतरंयेवास्तव्यालीलांपश्यंतितेयदि ॥ तत्सत्यसंकल्पतयाबुध्यंतेकिमतःप्रभो॥३८॥ ॥श्रीवसिष्ठउवाच॥ ॥एवंज्ञास्यंतितेराज्ञीस्थितेयमिहदुःखिता॥वयस्याकाचिदन्येयंकुतोप्यस्याउपागता॥३९॥

तायांसत्याम् ॥ ईदृशीचस्मृतिःस्वप्नेध्यायिनामनुभवसिद्धानपामराणाम् ॥ यादृशःस्वेच्छानभोविहारक्षमः ॥३६॥ ननुसर्वजनप्रियस्यदेहस्यबाधकंज्ञानमनर्थएवनेत्याह ॥ भ्रांतिरिति ॥ किंनष्टमिति ॥ नहिशुक्तिरजतबाधेकश्चिच्छोचतीतिभावः ॥ ३७ ॥ इत्थंप्रासंगिकेनिर्णीतेप्रस्तुतकथाविषयएवरामःपृच्छति ॥ अनंतरमिति ॥ पूर्वलीलायाअभिनवलीलायाश्चपद्मगृहेसमागमानंतरंयेपद्मगृहवास्तव्याजनास्तांलीलामातिवाहिकदेहत्वाद्द्रष्टुमशक्यामपिइमेजनामांपश्यंत्वितितस्याःसत्यसंकल्पतयाहेतुनायदिपश्यंतितर्हि किंबुध्यंतेकिंसैवेयमत्रैवस्थितेति किंवाअपूर्वादेवताकाचिदियमागतेतिज्येष्ठशर्मादिवत्सविस्मयाइत्यर्थः ॥ ३८ ॥ तत्राद्यमेवकल्पमाश्रित्यवसिष्ठउवाच ॥ एवमिति ॥ द्वितीयलीलांतर्हिकिंबुध्यंतेतत्राह ॥ वयस्येति ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुद्वितीयलीलायाअपूर्वत्वात्केयंकुतआयाताकिंसुचरित्रोतपुंश्चलीसत्याअसत्यावेत्यादिसंदेहस्तेषांकुतोनाभूत्तत्राह ॥ संदेहइति ॥ दृष्टमनतिक्रम्ययथादृष्टंपुरादृष्टपदार्थानुसारेणैवविचेष्टंतेव्यवहरंतीत्यर्थः ॥ ४० ॥ तेषांविचारानुदयेकोहेतुरितिचेत्स्थूलाभिनिविष्टतासारदार्ढ्यसौक्ष्म्यादिशून्यताचहेतुरितिदृष्टांतेनसूचयन्नाह ॥ यथेति ॥ यथाबलेनवृक्षोपघातायप्रक्षिप्तोलोष्टःशुष्कपांसुपिंडोलुठंस्तमुपघ्नंतंवृक्षंवंचयित्वाप्राप्यनशरवदंतर्निविशतेनवाकर्दमपिंडवत्संश्लिष्यतेनवाअश्मवदीषत्क्षतंकृत्वास्वयंवापुनरुपघातक्षमोवतिष्ठतेकिंतुआशुशीघ्रमेवगच्छतिविशीर्यतेतथातेजनाअपिनविद्यतेज्ञानंयेषांतेअज्ञानास्तद्भावेवस्तुतःअजाअपिपशवइवेत्यजपशवःपेलवत्वादंतर्निवेशविचाराक्षमाइत्यर्थः ॥ अथयोऽन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशुरितिश्रुतेः ॥ तेषांविचारानुदयेनकेवलमज्ञानमेवहेतुःकिंतुतथापुराणिशरीराणिआदिपदात्कामकर्मवासनादिकंचैषांतथातदनुरूपमेवपशुवद्देववास्तीतियुक्तएवविचारानुदयइत्यर्थः ॥ अज्ञपशवइतिपाठेस्वयमज्ञाअज्ञानांदेवानांपशवश्चेतिव्याख्येयम् ॥ ४१ ॥ येतुविचारयंतितेषांक्रमेणतत्त्वबोधोदयेनबाधितत्वात्तेष्वाधिभौतिकताप्रत्ययएवनास्तिदूरेसंदेहादिप्रसक्तिरित्याशयेनोपसंहरति ॥ यथेति ॥ बोधाज्जागरणात् ॥ ४२ ॥ दृष्टांतप्रसंगाद्रामःस्वाप्नविषयस्यमूलाज्ञानबाधमंतरेणात्यंतिकबाधासंभवात्कचित्तिरोहितस्यावस्थानमस्तितत्क्वेतिपृच्छति ॥ भगवन्निति ॥ ४३ ॥ स्वाप्नस्यमानोरथिकस्यचप्रपंचस्यजाग्रद्वासनासंभृताविद्योपहितजीवसंविकार्यत्वात्तत्रैवतिरोधानमितिवसिष्ठःसमाधत्ते ॥ स्वप्नेति ॥ ४४ ॥ अनन्यात्मातात्विकस्वरूपांतरशून्यः ॥ संविदोमलंमलवदावरकमज्ञानमेवस्वोपादानंविशतीत्यर्थः ॥ ४५ ॥ इत्थंचसंविदेवाज्ञाताकर्मवशात्कदाचित्स्वाप्नार्थात्मनास्फुरतीतिफलितमित्याह ॥ स्वप्नेति ॥ ४६ ॥ विवेकेतुनस्वाप्नार्थोनामसंविदन्योस्तीत्याह ॥ संविदिति ॥ ४७ ॥ तत्रान्यदिवभासमानंतुकेवलमविद्यैवसैवसंसारइत्याह ॥ यइति ॥ ४८ ॥

संदेहःकइवात्रैषांपशवोह्यविवेकिनः ॥ यथादृष्टंविचेष्टंतेकुतएषांविचारणा ॥ ४० ॥ यथालोष्टोलुठद्वृक्षंवंचयित्वाशुगच्छति ॥ अज्ञानत्वेजपशवस्तथाह्यस्तिपुरादिकम् ॥ ४१ ॥ यथास्वप्नवपुर्बोधान्नजानेक्केवगच्छति ॥ असत्यमेवतद्यस्मात्तथैवेहाधिभौतिकम् ॥ ४२ ॥ श्रीरामउवाच ॥ ॥ भगवन्स्वप्नशिखरीप्रबोधेक्केवगच्छति ॥ इतिमेसंशयंछिंधिशरदभ्रमिवानिलः ॥ ४३ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ स्वप्नभ्रमेथसंकल्पेपदार्थाःपर्वतादयः ॥ संविदोंतर्मिलंत्येतेस्पंदनान्यनिलेयथा ॥ ४४ ॥ अस्पंदस्ययथावायोःसस्पंदोंतर्विशत्यलम् ॥ अनन्यात्मातथैवायंस्वप्नार्थःसंविदोमलम् ॥ ४५ ॥ स्वप्नाद्यर्थावभासेनसंविदेवस्फुरत्यलम् ॥ अस्फुरंतीतुतेनैवयात्येकत्वंतदात्मिका ॥ ४६ ॥ संवित्स्वप्नार्थयोर्द्वित्वंनकदाचनलभ्यते ॥ यथाद्रवत्वपयसोर्यथावास्पंदवातयोः ॥ ४७ ॥ यस्तत्रस्यादिवाबोधस्तदज्ञानमनुत्तमम् ॥ सैषासंसृतिरित्युक्तामिथ्याज्ञानात्मिकोदिता ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकप्रसिद्धदंडचक्रादिसहकारिकारणाजन्यत्वादपिस्वाप्नार्थानामसत्त्वमित्याह ॥ सहकारीति ॥ ४९ ॥ ननुतर्हिसहकारिकारणवतोजाग्रत्प्रपंचस्यसत्यत्वंप्राप्तंनेत्याह ॥ यथेति ॥ सर्गादाविति ॥ यद्यपीदानींसहकार्यादयःसंतितथाप्यादिसर्गेअज्ञानोपहितेहैरण्यगर्भसंविदतिरिक्तंनास्तीतिस्वप्नसाम्यमेवेत्यर्थः ॥ ५० ॥ प्रपंचस्यसत्यत्वेसंविद्वच्चित्त्वापत्त्याचिद्विषयत्वव्याघातोपिस्यादित्याह ॥ नचेति ॥ स्वप्नतायाःस्वरूपावबोधादुदितःप्रपंचःअर्थ्यतेभास्यतेसंविदेत्यर्थस्तथाभवितुंसंभावयितुंशक्यः ॥ किंचसंवित्सत्तांनव्यभिचरतिअर्थास्तुव्यभिचरंतीतिनिसत्याइत्याह ॥ संविदइति ॥ ५१ ॥ तत्त्वज्ञानबाध्यत्वादपिनसत्यतेत्याह ॥ झटित्येवेति ॥ आकाशंशून्यंभवतिनाणुमात्रमपिपरिशिष्यतइत्यर्थः ॥ बोधेजागरणेतत्त्वज्ञानेच ॥ बोधाभ्यासक्रमेणईश्वराद्यनुग्रहात्सहसैववा ॥ खंशून्यमसद्भवतीत्यर्थः ॥ ५२ ॥ कथंतर्हिलोकैःशुकस्योड्डीयसूर्यमंडलगमनदर्शनंदधीचिप्रभृतीनांमृतदेहदर्शनंचतत्राह ॥ उड्डीनइति ॥ ज्ञंतत्त्वज्ञम् ॥ आतिवाहिकीभूतंबाधिताधिभौतिकशरीरम् ॥ स्वेषांस्वभावःअनागंतुकमज्ञानंतेनहताहिसितप्रायाजनाः ॥ तथाचस्वस्वाज्ञानकल्पितदेहएवतैर्दृश्यतेनज्ञानिदेहःसइत्यर्थः ॥ ५३ ॥ उक्तमर्थमनुमानेनापिद्रढयन्नुपसंहरतिद्वाभ्याम् ॥ इमाद्वैतदृष्टयोमिथ्यादृष्टयएव ॥ यतोमोहदृष्टयः ॥

सहकारिकारणानामभावेकिलकीदृशी ॥ संवित्स्वप्नपदार्थानांद्वितास्वप्नेनिरर्थिका ॥ ४९ ॥ यथास्वप्नस्तथाजाग्रदिदंनास्त्यत्रसंशयः ॥ स्वप्नेपुरमसद्भातिसर्गादौभात्यसज्जगत् ॥ ५० ॥ नचार्थोभवितुंशक्यःसत्यत्वेस्वप्नतोदितः ॥ संविदोनित्यसत्यत्वंस्वप्नार्थानामसत्यता ॥ ५१ ॥ झटित्येवयथाकाशंभवतिस्वप्नपर्वतः ॥ क्रमेणवातथाबोधेखंभवत्याधिभौतिकम् ॥ ५२ ॥ उड्डीनोयंमृतोवेतिपश्यंतिनिकटस्थिताः ॥ ज्ञमातिवाहिकीभूतंस्वस्वभावहतायतः ॥ ५३ ॥ मिथ्यादृष्टयएवेमाःसृष्टयोमोहदृष्टयः ॥ मायामात्रदृशोभ्रांतिःशून्याःस्वप्नानुभूतयः ॥ ५४ ॥ स्वप्नानुभूतयइमामरणांतबोधेभ्रांत्येतरंभ्रमदृशःस्फुटसर्गभासः ॥ भ्रांत्यातिवाहिकशरीरगताःसमस्तामिथ्योदितामृगनदीसरणक्रमेण ॥ ५५ ॥ ॥ इ० वा० वा० दे० मो० उ० ली० स्वप्नार्थस्यविचारोनामसप्तपंचाशत्तमःसर्गः ॥ ५७ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ एतस्मिन्नंतरेज्ञप्तिर्जीवंवैदूरथंपुनः ॥ संकल्पेनरुरोधाशुमनसःस्पंदनंयथा ॥ १ ॥

तथाहिऐंद्रजालिकमायामात्रदृशोभ्रांतिःप्रसिद्धा अर्थशून्याःस्वप्नानुभूतयश्चप्रसिद्धाइत्यर्थः ॥ ५४ ॥ इतरभ्रमदृशःपूर्वपूर्वभेदभ्रमदर्शिनःपुरुषस्यदृढतरभेदसंस्कारोदयान्मरणांतबोधेप्राणोत्क्रमणपूर्वक्षणोत्पन्नेभाविभोगानुकूलार्थप्रतिभासेसमस्ताःस्वप्नानुभूतिसदृशाइमाःस्फुटसर्गभासआतिवाहिकशरीरगतामनोमात्रनिष्ठाअपिभ्रांत्यामृगनद्याःसरणंप्रवाहस्तत्क्रमेणतद्वदेवमिथ्योदिताबाह्याइवभांतिनतुवस्तुतोमनसोबहिःसंतीत्यर्थः ॥ ५५ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउत्पत्तिप्रकरणेसप्तपंचाशत्तमःसर्गः ॥ ५७ ॥ इहकालःसमाधिस्थलीलादेहविनाशनम् ॥ लीलासंभाषणंराज्ञोजीवनंचेतिवर्ण्यते ॥ १ ॥ एवंरामप्रश्नान्समाधायप्रस्तुतकथाशेषंवर्णयिष्यन्वसिष्ठःसर्गांतवक्तव्यार्थेभूमिकांरचयति ॥ एतस्मिन्निति ॥ अमूर्त्तस्यापिसंकल्पमात्रेणनिरोधसंभावनायदृष्टांतमाह ॥ मनसइति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यांपाद्मस्टष्टौ ॥ २ ॥ इहास्यांस्टष्टौइहवासगृहकेतवत्वद्देहस्यरक्षार्थंदास्यौस्थितेइमेइदानींस्वपतः ॥ इडभावश्छांदसः ॥ ३ ॥ पूर्वंलीलायाःस्वाज्ञानकल्पितस्यस्वानुभव सिद्धस्यदेहस्यतत्त्वज्ञानेनबाधितस्यापिप्रारब्धशेषभोगायप्रतिभासमानस्यातिवाहिकभावोवर्णितः ॥ संप्रतिपरकीयाज्ञानकल्पितस्यपरानुभवसिद्धस्यवृत्तांतंश्रावयति ॥ शृ ण्विति ॥ किंवृत्तंवृत्तांतः ॥ पक्षेणपंचदशभिर्दिनैःक्लिन्नंस्वेदार्द्रंसत्प्राणनिरोधप्रदीप्तजठराग्निनातप्यमानंबाष्पतांसार्द्रधूमतांगतंप्राप्तम् ॥४॥ ततःक्रमेणशुष्कंनिर्जीवंसत्शवोजा तः ॥ ५ ॥ भूयःक्लेदालोकाद्धिशरणोन्मुखतादर्शनान्मृतेतिनिश्चित्य ॥ ६ ॥ ७ ॥ राजशरीरस्यविकारानुदयस्तुज्ञप्तिसंकल्पात्तदीयादृष्टवशाच्चबोध्यः ॥ ८ ॥ चित्रमाश्चर्यंभवि

लीलोवाच ॥ ॥ वदद्देविकियान्कालोगतोस्यामिहमंदिरे ॥ समाधौमयिलीनायांमहीपालेशवेस्थिते ॥ २ ॥ ॥ज्ञप्तिरुवाच ॥ ॥ इह मासस्त्वतिक्रांतइहदास्याविमेतव ॥ रक्षार्थंवासगृहकेस्वपतोवहितेस्थिते ॥ ३ ॥ शृणुदेहस्यकिंवृत्तंतवेहवरवर्णिनि ॥ शरीरंतवपक्षेण तत्क्लिन्नंबाष्पतांगतम् ॥ ४ ॥ निर्जीवंपतितंभूमौसंशुष्कमिवपल्लवम् ॥ काष्ठकुड्योपमोजातःशवस्तुहिमशीतलः ॥ ५ ॥ ततोमंत्रिभि रागत्यमृतेवेयमितिस्वयम् ॥ क्लेदालोकाद्विनिर्णीयभूयोनिष्कासितंगृहात् ॥ ६ ॥ बहुनात्रकिमुक्तेननीत्वाचंदनदारुभिः ॥ चितौसंक्षि प्यसघृतंसहसाभस्मसात्कृतम् ॥ ७ ॥ ततोराज्ञीमृतेत्युच्चैःकृत्वारोदनमाकुलम् ॥ परिवारस्तवाशेषंकृतवानौर्ध्वदेहिकम् ॥ ८ ॥ इदानीं त्वामिहालोक्यसशरीरामुपागताम् ॥ परलोकादागतेतिमहच्चित्रंभविष्यति ॥ ९ ॥ त्वंतुतेनशरीरेणसत्यसंकल्पतःसुते ॥ दृश्यसेस्ववदाते नचित्रंतत्रतवोपरि ॥ १० ॥ यद्वासनात्वमभवोदेहंप्रतितदेवते ॥ रूपमभ्युदितंबालेतेनप्राक्सदृशंतव ॥ ११ ॥ स्ववासनानुसारेणसर्वः सर्वंहिपश्यति ॥ दृष्टांतोत्राविसंवादीबालवेतालदर्शनम् ॥ १२ ॥ आतिवाहिकदेहासिसंपन्नासिद्धसुंदरी ॥ विस्मृतस्त्वेवदेहोसौप्राक्त नोनपवासनः ॥ १३ ॥ रूढातिवाहिकदृशःप्रशाम्यत्याधिभौतिकः ॥ बुधस्यदृश्यमानोपिशरन्मेघइवांबरे ॥ १४ ॥

ष्यतिजनानामितिशेषः ॥ ९ ॥ त्वदीयदिव्यशरीरदर्शनादपिपरमाश्चर्यंभविष्यतीत्याह ॥ त्वंत्विति ॥ तेनआतिवाहिकेनस्ववदातेनस्वच्छतरेणमनुष्यैर्द्रष्टुमशक्येनापिदृश्यसेइति तदुपरितवतत्रदर्शनविषयेचित्तंभविष्यतीत्यनुषज्यते ॥ १० ॥ ननुदिव्यशरीरस्यपूर्वदेहाकारत्वाभावेतेषांप्रत्यभिज्ञायोगात्तदाकारमावश्यकंतत्रकोहेतुस्तमाह ॥ यदिति ॥ य द्वासनायादृशाकारवासना ॥ ११ ॥ १२ ॥ ननुतद्देहवासनत्वेमयासएवदेहोराज्ञेवकुतोनप्राप्तस्तत्राह ॥ आतिवाहिकेति ॥ सिद्धातत्त्वज्ञानपरिनिष्ठितासुंदरी ॥ यदिसर्वथावि स्मृतस्तर्ह्यातिवाहिकदेहेतदाकारत्वासिद्धिरित्यतउक्तमनपवासनइति ॥ नात्यंतंतद्वासनोच्छिन्नेत्याशयः ॥ १३ ॥ तर्ह्यस्याधिभौतिकतापिकुतोनाभूत्तत्राह ॥ रूढेति ॥ पैराधि भौतिकइतिदृश्यमानोऽपि ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १५ ॥ वासनायाअत्यंतोच्छेदेतुनातिवाहिकदेहकल्पनाप्यस्तीतिसूचनायसद्वासनस्येत्युक्तम् ॥ देहआधिभौतिकः ॥ १६ ॥ १७ ॥ संकल्पलीलयासत्यसंकल्पविलासेन ॥ १८ ॥ इमेआवांविदूरथलीलापश्यतुइतिज्ञप्त्यादेव्याचिंतितेसतिदीप्तप्रकाशमानेज्ञप्तिलीलेदृश्येबभूवतुः ॥ १९ ॥ २० ॥ द्रवशीतायाज्वालायादीप्तर्वशाच्चंद्रबिंबादुत्कीर्णमिवस्थितम् ॥ तदंगप्रभाद्रवव्याप्तभित्तिमत्त्वाद्धेतोर्हेमद्रवैर्लिप्तमिवस्थितमित्यर्थः ॥२१॥ संभ्रमोत्र हर्षनिर्भरः ॥ २२ ॥ ममजयायकल्याणोत्कर्षाय ॥ मार्गशोधिनीपरिचा

रूढातिवाहिकीभावःसर्वोभवतिदेहकः ॥ निर्जलांभोदसदृशोनिर्गंधकुसुमोपमः ॥ १५ ॥ सद्वासनस्यरूढायामातिवाहिकसंविदि ॥ देहोविस्मृतिमायातिगर्भसंस्थेवयौवने ॥ १६ ॥ एकत्रिंशेऽद्यदिवसेप्राप्तावयमिहांबरे ॥ प्रभातेमोहितेदास्यौमयैतेनिद्रयाधुना ॥ १७ ॥ तदेहियावल्लीलायैलीलेसंकल्पलीलया ॥ आत्मानंदर्शयावोस्यैव्यवहारःप्रवर्तताम् ॥ १८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ आवांतावदिमे लीलापश्यत्वित्येवचिंतिते ॥ ज्ञप्त्यादेव्याततस्तत्रदृश्येदीप्तेबभूवतुः ॥ १९ ॥ साविदूरथलीलाथसमाकुलविलोचना ॥ गृहमालोकयामासतत्तेजःपुंजभास्वरम् ॥ २० ॥ चंद्रबिंबादिवोत्कीर्णंधौतंहेमद्रवैरिव ॥ ज्वालायाद्रवशीतायास्तत्प्रभाद्रवभित्तिमत् ॥ २१ ॥ गृहमालोक्यपुरतोलीलाज्ञप्तीविलोक्यते ॥ उत्थायसंभ्रमवतीतयोःपादेषुसापतत् ॥ २२ ॥ मज्जयायागतेदेव्यौजयतांजीवनप्रदे ॥ इहपूर्वमहंप्राप्ताभवत्योर्मार्गशोधिनी ॥ २३ ॥ इत्युक्तवत्यांतस्यांतामानिन्योमत्तयौवनाः ॥ उपाविशन्विष्टरेषुलतामेरुशिरःस्विव ॥ २४ ॥ ॥ ज्ञप्तिरुवाच ॥ ॥ सुतेवदकथंप्राप्तात्वमिमंदेशमादितः ॥ किंवृत्तंतेत्वयादृष्टंकिमिवाध्वनिकुत्रवा ॥ २५ ॥ ॥ विदूरथलीलोवाच ॥ ॥ देवितस्मिन्प्रदेशेसाजातमूर्छातदाभवम् ॥ द्वितीयेंदोःकलेवाहंकल्पांतज्वालयाहता ॥ २६ ॥ नचेतितंमयाकिंचित्समंविषममेवच ॥ ततस्तरलपक्ष्मांतेविनिमील्यविलोचने ॥ २७ ॥ ततोमरणमूर्छांतेपश्यामिपरमेश्वरि ॥ यावदभ्युदितास्म्याशुप्लुताचगगनोदरे ॥ २८ ॥ भूताकाशेनिलरथंसमारूढास्म्यहंततः ॥ आनीतागंधलेखेवतेनाहमिममालयम् ॥ २९ ॥

रिकेवेतियावत् ॥ २३ ॥ २४ ॥ आदितआरभ्यवद ॥ तेकुत्रवाअध्वनिकिंवाआश्चर्यवृत्तंतत्त्वयाकुत्रवादृष्टमित्यर्थः ॥ २५ ॥ तस्मिन्विदूरथगृहप्रदेशेसाहंद्वितीयातिथिस्तत्संबंधिनइंदोःकलाकल्पांतज्वालयाहतेवमूर्छिताअभवम् ॥ २६ ॥ विलोचनेविनिमील्यमूर्छायांनचेतितंनकिंचिज्ज्ञातम् ॥ नचेतितमित्यननुभूतस्याभिलापायोगात्साक्षिभावेनाज्ञानंचेतितमेवेतिनचिदात्मलोपाशंकावसरः ॥ २७ ॥ वासनापरिकल्पितपूर्वदेहसदृशदेहरूपेणयावदभ्युदिताअध्यासेनाविर्भूतास्मितावच्चिद्गगनोदरेभूताकाशेप्लुताउत्प्लुताचास्मि ॥ २८ ॥ अनिलःप्राणोवातस्कंधोवातद्रूपंरथम् ॥ तेनानिलरथेन ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ यावच्छेतेतावत्प्रतीक्षमाणाआलोकयामीत्यर्थः ॥ मधुर्वसंतः ॥ ३१ ॥ अयंसंग्रामश्रमार्त्तःस्वपितीत्यनेनाभिप्रायेणअथमयाअस्यनिद्रानवारिता ॥ ३२ ॥ देव्यौ युवांइमंदेशंगृहंप्राप्तेइतिमयायथानुभूतंकथितम् ॥ ३३ ॥३४ ॥ इत्युक्त्वाज्ञप्तिःप्राक्संकल्पेननिरुद्धंराज्ञोजीवंमुमोच ॥ सजीवःसमीरवदृश्योपिरागादिवासनापल्लवितत्वाल्लताकारः ॥ ३५ ॥ तदेवाह ॥ स्ववासनाशतान्यंतर्दधदिति ॥ ३६ ॥ तस्यपद्मस्य ॥ अवग्रहेवृष्टिप्रतिबंधेम्लानंपद्मंवारिणिसुवृष्टेसतीव ॥ ३७ ॥ पुष्पाकरेवसंतकाले ॥ ३८ ॥

देविपश्यामिसदनंनायकेनाभ्यलंकृतम् ॥ दीप्तदीपंविविक्तंचमहार्हशयनान्वितम् ॥ ३० ॥ पतिमालोकयामीमंयावदेषविदूरथः ॥ शेतेकुसुमगुप्तांगोमधुःपुष्पवनेयथा ॥ ३१ ॥ अथसंग्रामसंरंभश्रमार्त्तोयंस्वपित्यलम् ॥ इतिनिद्रामयासेयंदेवेश्वरिनवारिता ॥ ३२ ॥ अनंतरमिमंदेशंप्राप्तेदेव्याविमेत्विति ॥ यथानुभूतंकथितंमदनुग्रहकारिणि ॥ ३३ ॥ ॥ ज्ञप्तिरुवाच ॥ ॥ हेहंसहारिगामिन्यौलीलेललितलोचने ॥ उत्थापयामोनृपतिंशवतल्पतलादिमम् ॥ ३४ ॥ इत्युक्तामुमुचेजीवमामोदमिवपद्मिनी ॥ ससमीरलताकारस्तन्नासानिकटंययौ ॥ ३५ ॥ घ्राणकोशंविवेशांतर्वंशरंध्रमिवानिलः ॥ स्ववासंनाशतान्यंतर्दधदब्धिर्मणीनिव ॥ ३६ ॥ अंतस्थजीवंवदनंतस्यतत्कांतिमाययौ ॥ पद्मस्यावग्रहेपद्मंसुवृष्टइववारिणि ॥ ३७ ॥ क्रमादंगानिसर्वाणिसरसानिचकाशिरे ॥ तस्यपुष्पाकरइवलताजालानिभूभृतः ॥ ३८ ॥ अथावभौकलापूर्णःसराकायामिवोडुराट् ॥ भासयन्भुवनंभूरिवदनेंदुमरीचिभिः ॥ ३९ ॥ स्फुरयामाससोंगानिरसवंतिमृदूनिच ॥ कनकोज्वलकांतीनिपल्लवानीवमाधवः ॥ ४० ॥ उन्मीलयामासदृशौविमलालोलतारके ॥ हारिण्यौसुभगाभोगेचंद्राकौभुवनंयथा ॥ ४१ ॥ उत्तस्थौप्रोल्लसत्कायोविंध्याद्रिर्वद्धिमानिव ॥ उवाचकःस्थितइतिघनगंभीरनिःस्वनम् ॥ ४२ ॥ लीलाद्वयमथास्याग्रेप्रोवाचादिश्यतामिति ॥ सददर्शपुरोनघ्रंलीलाद्वयमवस्थितम् ॥ ४३ ॥ समाचारंसमाकारंसमरूपंसमास्थिति ॥ समवाक्यंसमोद्योगंसमानंदंसमोदयम् ॥ ४४ ॥ कात्वंकेयंकुतश्चेयमित्याहसविलोकयन् ॥ तस्मैलीलाहहेदेवश्रूयतांयद्वदाम्यहम् ॥ ४५ ॥

॥ ३९ ॥ स्फुरयामाससंचालयामास ॥ चिस्फुरोर्णाविंत्यात्वस्यगुणस्यचाभावश्छांदसः ॥ ४० ॥ हारिण्यौमनोहरे सुभगाभोगेसौभाग्यलक्षणशालिसंस्थानवत्यौदृशौ ॥ भुवनंसर्वभुवनालाविराट्स्वनेत्रभूतौचंद्रार्काविवोन्मीलयामास ॥ ४१ ॥ ४२ ॥ लीलाद्वयंकर्तृआदिश्यतांआज्ञाप्यतांमहाराजेनेत्युवाच ॥ ४३ ॥ ४४ ॥ लीलापूर्वलीला आह ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथावाक्शब्दोऽर्थस्यवाचकतयासंपृक्तातद्वत् ॥ ४६ ॥ त्वदर्थेनत्वदुपभोगार्थम् ॥ ४७ ॥ ४८ ॥ इमेआवांपराल्लोकाद्ब्रह्मांडांतरात् ॥ ४९ ॥ ५० ॥ मेधांश्रुतपरमार्थधारणावतींबुद्धिम् ॥ ५१ ॥ ऐहिकेनदीर्घायुर्धनाद्यभिमतार्थेनआढ्यःसंपन्नतमः ॥ तत्त्वमेधाभिव्यक्तेनभवनेनपारमार्थिकात्मस्वस्वरूपस्थित्याचान्वितोभव ॥ ५२ ॥ दुष्कृतदृष्टयःपापबुद्धयश्चशमंविनाशंगच्छंतु ॥ अनंतान्यसंख्यान्यभ्युदयसुखानिआयांतु ॥ तथावःराष्ट्रेजनताजनसमूहानित्यंमुदिताभवंतु ॥ लक्ष्म्यःसंपदःसदैवविलसंत्वित्याशिषिलोटः ॥ ५३ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेउ० अष्टपंचाशत्तमःसर्गः ॥ ५८ ॥ ॥ ७ ॥ ॥ राज्ञःसंजीवनोद्धर्षात्तत्पुरांतःपुरोत्सवः ॥ राज्यंचजीवन्मुक्तानांचिरंमुक्तिश्चवर्ण्यते ॥ १ ॥

महिलातवलीलाहंप्राक्तनीसहधर्मिणी ॥ वागर्थस्येवसंपृक्तास्थितासंश्लेषशालिनी ॥ ४६ ॥ इयंलीलाद्वितीयातेमहिलाहेलयामया ॥ उपार्जितात्त्वदर्थेनप्रतिबिंबमयीशुभा ॥ ४७ ॥ शिरोभागोपविष्टेयंमाहिहैममहासने ॥ एषासरस्वतीदेवत्रैलोक्यजननीशिवा ॥ ४८ ॥ अस्माकंपुण्यसंभारैरिहसाक्षादुपागता ॥ अनयेमेपराल्लोकादिहानीतेमहीपते ॥ ४९ ॥ इत्याकर्ण्यसमुत्थायराजाराजीवलोचनः ॥ लंबमाल्यांबरधरःपपातज्ञप्तिपादयोः ॥ ५० ॥ सरस्वतिनमस्तुभ्यंदेविसर्वहितप्रदे ॥ प्रयच्छवरदेमेधांदीर्घमायुर्धनानिच ॥ ५१ ॥ इत्युक्तवंतंहस्तेनपस्पर्शज्ञप्तिदेवता ॥ ॥ सरस्वत्युवाच ॥ ॥ त्वंपुत्राभिमतार्थाढ्योभवेतिभवनान्वितः ॥ ५२ ॥ सर्वापदःसकलदुष्कृतदृष्टयश्च गच्छंतुवःशममनंतसुखानिसम्यक् ॥ आयांतुनित्यमुदिताजनताभवंतुराष्ट्रेस्थिराश्चविलसंतुसदैवलक्ष्म्यः ॥ ५३ ॥ ॥ इ० वा० वा दे० मोक्षोपायेषूत्पत्ति० पद्मजीवनंनामअष्टपंचाशत्तमःसर्गः ॥ ५८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ सरस्वतीतथेत्युक्तातत्रैवांतर्धिमाययौ ॥ प्रभातेपंकजैःसार्द्धंबुबुधेसकलोजनः ॥ १ ॥ आलिलिंगचतांलीलांलीलाचदयितंक्रमात् ॥ पुनःपुनर्महानंदान्मृतंप्रोज्जीवितंपुनः ॥ २ ॥ तदासीद्राजसदनंमदमन्मथमंथरम् ॥ आनंदमत्तजनतंवाद्यगेयरवाकुलम् ॥ ३ ॥ जयमंगलपुण्याहघोषघुंघुमघर्घरम् ॥ तुष्टपुष्टजनापूर्णराजलोकवृतांगणम् ॥ ४ ॥ सिद्धविद्याधरोन्मुक्तपुष्पवर्षसहस्रभृत् ॥ ध्वनन्मृदंगमुरजकाहलाशंखदुंदुभि ॥ ५ ॥ ऊर्ध्वीकृतबृहद्धस्तहास्तिकस्तनितोत्कटम् ॥ उत्तालतांडवस्रैणपूर्णांगणलसत्ध्वनि ॥ ६ ॥ मिथःसंघट्टनिपतज्जनोपायनदंतुरम् ॥ पुष्पशेखरसंभारमयसंसारसुंदरम् ॥ ७ ॥

सरस्वतीइतिउक्तप्रकारेणप्राग्यद्राज्ञाप्रार्थितंतत्तथास्त्वित्युक्तातत्रराजगृहेएवअंतर्द्धिमंतर्द्धानमाययौ ॥ १ ॥ लीलाचप्राङ्मृतंपुनःप्रोज्जीवितंपुनःपुनर्महानंदादालिलिंग ॥ २ ॥ तदाराजसदनमानंदेनमत्तापरवशचित्ताजनतायस्मिंस्तथाविधमासीत् ॥ ३ ॥ राज्ञोलोकाःसेवकजनाःराजानंलोकयंतीतिराजलोकाःपौरजानपदाश्चतैर्वृतांगणम् ॥ ४ ॥ काहलाशब्दःकार्णालसंज्ञकवाद्यविशेषार्थः ॥ ५ ॥ उत्तालतांडवैःस्रैणैःस्त्रीसमूहैःपूर्णांगणेलसंस्तौर्यत्रिकध्वनिर्यस्मिन् ॥ ६ ॥ पुष्पशेखराणामौत्सविकसंभारप्रचुराणांजनानांसंसारेणसंचारेणसुंदरंशोभमानम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंत्रिभिः सामंतैर्नागैरश्च विकीर्णैः कुसुमलाजमौक्तिकैः सर्वतश्छन्नत्वादापादितानि संपादितानि क्षौमांबराणी यस्य तत् ॥ व्योम्निरक्तैस्तांडविनीनां नर्त्तकीनां करैः स्थूलपद्ममयं दीर्घपद्मप्रचुरं सर इवस्थितमित्याशयः ॥ ८ ॥ मत्तानां दृष्टानां स्त्रीणां कंधराणां ग्रीवाणामावृत्तलीलाभिः परिवर्त्तनविलासैरांदोलितानि कुंडलानि यत्र ॥ ९ ॥ पट्टवाससां शरन्मेघवितानकसदृशानि वितानकानि यत्र ॥ नृत्यंति चंद्रलक्षाणि यत्र तथाविधानि गृहाजिराणि यत्र ॥ १० ॥ साराज्ञी द्वितीयलीला परलोकादुपानीता पूर्वलीलयेत्यर्थाद्गम्यते ॥ पतिरेवच उपानीत इति प्रबंधशतात्मना निर्वृत्ताभिर्गाथाभिर्जगुः ॥ ११ ॥ वृत्तांतं स्वमरणादिकथां मनाक् संक्षेपेण कथितं श्रुत्वा ॥ १२ ॥ चिरप्रवासादागतस्येव परलोकादागतस्य पुनः पदाभिषेको मंगलार्थः ॥ अमरेंद्रपक्षे अनंताईहाः स्वराज्यलाभप्रयत्ना यस्य तम् ॥ अतएव नहुषनिपातेन पुनर्लब्धः स्वराज्योदयो येन तथाविधम् ॥ १३ ॥ ननु लीलालीला

विकीर्णापादितक्षौमं मंत्रिसामंतनागरैः ॥ स्थूलपद्ममयं व्योमरक्तैस्तांडविनीकरैः ॥ ८ ॥ मत्तस्त्रीकंधरावृत्तलीलांदोलितकुंडलम् ॥ प्रवृत्तपादसंपातप्रोल्लसत्पुष्पकर्दमम् ॥ ९ ॥ पट्टवासःशरन्मेघवितानकवितानकम् ॥ वरांगनामुखैर्नृत्यच्चंद्रलक्षगृहाजिरम् ॥ १० ॥ परलोकादुपानीता राज्ञी सा पतिरेव च ॥ इति निर्वृत्तगाथाभिर्जगुर्देशांतरे जनाः ॥ ११ ॥ पद्मो भूमिपतिः श्रुत्वा वृत्तांतं कथितं मनाक् ॥ चक्रे स्नानं समानीतैश्चतुःसागरवारिभिः ॥ १२ ॥ ततोऽभिषिषिचुर्विप्रा मंत्रिणो भूभुजश्च तम् ॥ लब्धोदयमनंतेहममरेंद्रमिवामराः ॥ १३ ॥ लीलालीला च राजा च जीवन्मुक्तमहाधियः ॥ रेमिरे पूर्ववृत्तांतकथनैः सुरतैरिव ॥ १४ ॥ सरस्वत्याः प्रसादेन स्वपौरुषकृतेन तत् ॥ प्राप्तं लोकत्रयश्रेयः पद्मेनेति महीभुजा ॥ १५ ॥ सज्ज्ञविज्ञानसंबुद्धो राजा लीलाद्वयान्वितः ॥ चक्रे वर्षायुतान्यष्टौ तत्र राज्यमनिंदितः ॥ १६ ॥ जीवन्मुक्तास्त इत्येवं राज्यं वर्षायुताष्टकम् ॥ कृत्वा विदेहमुक्तत्वमासेदुः सिद्धसंविदः ॥ १७ ॥

चेत्यत्र सरूपैकशेषः किं न स्यादिति चेद्रामश्च रामश्च रामौ इत्येकशेषविग्रहवाक्यवदिति गृहाण ॥ न ह्येकशेषवृत्तेर्विग्रह एव नास्ति ॥ परस्परनिरपेक्षमेव संस्कारेण परिनिष्ठितयोः पश्चात्सहविवक्षायां तस्य निराबाधत्वात् ॥ विभक्त्युत्पत्तेः प्रागेव प्रातिपदिकार्थद्वयस्य सहविवक्षायामेकशेषस्य सावकाशतया परिनिष्ठितपदद्वये प्रसक्त्यभावादिति ॥ १४ ॥ ननु यदि राज्ञा सरस्वतीप्रसादेन तत्पुनर्जीवनं राज्यं च प्राप्तं तर्हि दैवेनैव तत्प्राप्तं न स्वपौरुषकृतेनेति रामाशंकां त्वदिस्थामुपलक्ष्य तां परिहरन्नुपसंहरति ॥ सरस्वत्या इति ॥ स्वपौरुषकृतेनेति ॥ सरस्वत्याराधनादिस्वपौरुषकृत एव तत्प्रसादो नाकस्मिक इत्यर्थः ॥ पद्मेन इति वर्णितरीत्या लोकत्रये श्रेयः प्रशस्यतमं पुनर्जीवनं राज्यं ज्ञानं च प्राप्तम् ॥ १५ ॥ ज्ञप्त्युपदिष्टेन ज्ञानेन संबुद्धः सम्यग्बुद्धात्मतत्त्वः स राजा अष्टौ वर्षाणामयुतान्यशीतिसहस्राणि राज्यं चक्रे ॥ कालाध्वनोरत्यंतसंयोगे इति द्वितीया ॥ १६ ॥ सिद्धसंविदः परिनिष्ठितप्रबोधाः ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्राज्यंप्रजानामुदयैर्नित्याभ्युदयैर्विशदंनिर्दोषम् विदग्धानांविदुषांशास्त्रानुसारित्वान्मुग्धंमनोहरम् कुलपरंपरायाःसमुचितम् आत्मनःस्वस्यभोगयशोधर्महेतुत्वाद्धितम् जनानामनुरंजनेनपेशलंचतुरंच अतएवाखिलजनतोषदंतत्स्वराज्यंचिरमनुपाल्यसुदंपतीलीलापद्मौप्रारब्धफलभोगांतेविमुक्तौविदेहकैवल्यंप्राप्तौ ॥ ननुप्राक्त्रयाणांजीवन्मुक्तोक्ताकथमत्रद्वयोरेवमुक्तिरुपसंहृतेतिचेद्राजवासनामय्याद्वितीयलीलायाःपूर्वलीलाप्रतिबिंबप्रायतयातदंतर्भावविवक्षणादिति॥१८॥ ॥इतिश्रीवासिष्ठ०उ०एकोनषष्टितमःसर्गः ॥ ५९ ॥ ॥ ७ ॥ ॥ विस्तराद्वर्ण्यतेत्रादौलीलाख्यानप्रयोजनम् ॥ कालादिसाम्यवैषम्यहेतुश्चात्रनिगद्यते ॥ १ ॥ दृश्यदोषनिवृत्तये तथाचदृश्यंनास्तीतिबोधेनमनसोदृश्यमार्जनंसंपन्नंचेत्तदाप्राप्तापरानिर्वाणनिर्वृतिरितियंथोपक्रमेयत्प्रतिज्ञातंतत्सिद्धिरेवास्यप्रयोजनमितिभावः ॥ घनतांसत्यताम् ॥ १ ॥ ननुसत्यतात्यागमात्रेणकथंदृश्यनिवृत्तिस्तत्राह ॥ शांतैवेति ॥ यावत्सत्यताबुद्धिस्तावदेवमार्जनेनेतिनेत्यपवादेक्लेशोन्यार्थैर्मिथ्यात्वनिर्णयेतुसनास्तीत्यर्थः ॥ २ ॥ इतिउक्तप्रकारेणापवादेनैकीभूतमखंडैकरसतांप्राप्तम् ॥ ज्ञस्तत्त्वज्ञः ॥३ ॥ ननुजडस्यदृश्यस्यकथंसंविदैकरस्यमित्याशंक्यआदिसर्गेचिन्मात्ररूपेणैवस्वयंभुवास्वात्मन्येवदृश्यविवर्त्तकल्पनात्करकाकाठिन्यस्यद्रवैकरस्याविरोधवदुपपत्तेरित्याशयेनाह ॥ पृथ्व्यादिरहितेनेति ॥ ४ ॥ तर्हिविनैवप्रयत्नंकरकाकाठिन्यवदेवदृश्यविलयःकिंनस्यात्तत्राह ॥ संविदिति ॥ सृष्टिंवेत्तीतिसृष्टिवित्स्वयंभूचैतन्यंतल्लक्षणायांनद्यांतदेकदेशभूतायाजीवसंविद्यथायादृशप्रवृत्तिप्रवाहेणयथायादृशकार्यकरणफलभावाययततेसातथातादृशकार्यकरणफलभावेनविसृष्टासतीस्वप्रयत्नानुसारात्तथैवव्यवस्थितासायावद्विरुद्धनिवृत्तिप्रयत्नान्नरोधितातावन्ननिवर्त्ततइत्यर्थः ॥ ५ ॥ ननुब्रह्मसृष्टमिदंजगत्कथंजीवप्रयत्नेनविरुद्ध्येत नहिमहाराजाज्ञासिद्धंपृथग्जनप्रयत्नेननिवर्त्तयितुंशक्यमित्याशंक्याह ॥ चिदाकाशेति ॥ यद्यपिचिद्व्योम्न्येवस्वच्छेब्रह्मात्मनिचिदाकाशस्यमायिकोवभासोयंजगदित्यवबुद्ध्यतेइतिब्रह्मसृष्टंजगत्तथापितन्नापरिच्छिन्नब्रह्मभावंप्रतितथावबुद्ध्यतेकिंतुबुद्ध्यादिपरिच्छिन्नोपाधिवशात्परमाणुकणमत्यंतपरिच्छिन्नंजीवंप्रति ॥ तदीयप्रयत्नजन्यकर्मभोगार्थमेवब्रह्मणितदारोपात् ॥ तथाचतत्प्रयत्नजन्यबोधेनदृश्यमार्जनंसंभवत्येवेतिभावः ॥ ६ ॥

यदुदयविशदंविदग्धमुग्धंसमुचितमात्महितंचपेशलंच ॥ तदखिलजनतोषदंस्वराज्यंचिरमनुपाल्यसुदंपतीविमुक्तौ ॥ १८ ॥ ॥ इत्यार्षे वा० वा० दे० मोक्षोपायेषूत्पत्ति० लीलोपाख्यानेपद्मनिर्वाणंनामैकोनषष्टितमःसर्गः ॥ ५९ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ एतत्तेकथितंराम दृश्यदोषनिवृत्तये ॥ लीलोपाख्यानमनघंघनतांजगतस्त्यज ॥ १ ॥ शांतैवदृश्यसत्तास्याःशमनंनोपयुज्यते ॥ सतोहिमार्जनक्लेशोनासतस्तुकदाचन ॥ २ ॥ ज्ञानेनाकाशरूपेणदृश्यंज्ञेयस्वरूपकम् ॥ इत्येकीभूतमालोक्यज्ञस्तिष्ठत्यंबरोपमः ॥ ३ ॥ पृथ्व्यादिरहितेनेदंचिद्भासैवस्वयंभुवा ॥ साधितंयदिसिद्धेनततःस्वात्मनिसाधितम् ॥ ४ ॥ संविद्यथायायततेतथासैवव्यवस्थिता ॥ विसृष्टासृष्टिविन्नद्यांयावद्यत्नान्नरोधिता ॥ ५ ॥ चिदाकाशावभासोयंजगदित्यवबुद्ध्यते ॥ चिद्व्योम्न्येवात्मनिस्वच्छेपरमाणुकणंप्रति ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंचसतिसत्तानियतिवासनादिभिरपिनदृश्यत्राणप्रसक्तिरित्याशयेनाह ॥ एवमिति ॥ ७॥ मायादृष्टौसर्वमेतद्यथादृष्टंस्थितमपिनपरमार्थदृष्टौसंभवति यतोमायाकार्यभूतेयं सृष्टिर्मायैव ॥ नचमायावस्तुसतीत्यर्थः ॥ ८ ॥ दावाग्निनादग्धानांकक्षाणांतृणसंघानांदाहशांतौपुनर्हरितांकुरप्ररोहायऐंदवीकलेवसंसारतापतप्तानांशांतिविवेकप्ररोहायेयंदृष्टिरित्यर्थः ॥९॥ पंचभिर्यद्वृत्तैःक्रमात्प्रकारस्वरूपदृष्टांतप्रमाणकालास्तत्त्वबोधोचिताःकीर्त्यंते ॥ यादृग्भिर्दृष्टांतैरधिकारिभिर्वाज्ञेयम् ॥ १०॥विकल्पयन्जगत्तत्त्वंविचारयन् ॥ उपाधिशांत्याशाम्यामीव ॥ नित्यनिर्वाणस्वरूपावाप्त्यानिर्वामीव ॥ शास्त्राणिश्रुतयस्तत्प्रदर्शितासुदृष्टिषुज्ञानेषु ॥ व्याख्यानमुपबृंहणभूतम् ॥११॥ इमंवक्ष्यमाणम् ॥ १२ ॥ सप्रागुक्तःसर्गत्रितयेवासिष्ठपाद्मवैदूरथसर्गेषुयःकालोगतःसक्वचिद्गिरियामेअहोरात्रःअहोरात्राष्टकात्मकःप्रागुक्तःपाद्मसर्गेतुमासमात्रकोवैदूरथेतुवहुवर्षात्मकइतिब्रह्मांडभेदः

एवमस्यामुधाभ्रांतेःकासत्ताकेववासना॥कावास्थाकाचनियतिःकावश्यंभावितोच्यताम् ॥७॥ सर्वंचैतद्यथादृष्टंस्थितमित्थमखंडितम्॥मायैवेयमनंतेयंनचमायास्तिकाचन॥८॥ ॥श्रीरामउवाच॥ ॥अहोनुपरमादृष्टिर्दर्शिताभगवंस्त्वया॥दावाग्निदग्धकक्षाणांदाहशांतौकलैंदवी॥ ९ ॥ अहोनुसुचिरेणाद्यज्ञातंज्ञातव्यमक्षतम् ॥ मयायथेदंयच्चेदंयादृग्ज्ञेयंयतोयदा॥१०॥ शाम्यामीवद्विजश्रेष्ठनिर्वामीवविकल्पयन्॥एतदाख्यानमाश्चर्यंव्याख्यानंशास्त्रदृष्टिषु ॥ ११ ॥इममेभगवन्ब्रूहिसंशयंसर्वकोविद॥ तवपातुंनतृप्तोस्मिश्रोत्रपात्रैर्वचोमृतम्॥ १२ ॥ससर्गत्रितयेकालोलीलाभर्तुर्हियोगतः॥ सक्वचित्किमहोरात्रःक्वचित्किंमासमात्रकः॥१३॥ क्वचित्किंबहुवर्षाणिकस्यचित्किमुपेलवः॥ कस्यचित्किंमहादीर्घःकस्यचित्किंक्षणःस्थितः॥ १४ ॥इतिमेभगवन्ब्रूहित्वंयथावदनुग्रहात्॥ सकृच्छ्रुतंनविश्रांतिमेतिलोष्टेयथाजलम्॥१५॥ ॥श्रीवसिष्ठउवाच॥ ॥येनयेनयथायद्यद्यदासंवेद्यतेनघ॥तेनतेनतथातत्तत्तदासमनुभूयते॥ १६ ॥ अमृतत्वंविषंयातिसदैवामृतवेदनात्॥शत्रुर्मित्रत्वमायातिमित्रसंवित्तिवेदनात्॥ १७॥

॥ १३ ॥ एकस्मिन्नपिब्रह्मांडेमनुष्याणांसंवत्सरोदेवानांदिनमितिपेलवः कस्यचित्क्षुद्रजंतोःसएवमहादीर्घः कस्यचित्स्वयंभुवःक्षणइतिएकएवकालोदेशलोकादिभेदेनविरुद्धरूपःकिंस्थितः ॥ अर्थसत्तैकरूप्येप्रतीतिवैषम्यंकथमित्याशयः ॥ इतिइमंसंशयंमेब्रूहीतिसंबंधः ॥ १४ ॥ ननुदेशदैर्घ्यंयथानास्तिकालदैर्घ्यंतथैवहीतिप्रागेवास्योत्तरमुक्तप्रायं तत्किंपुनःपृच्छसितत्राह ॥ सकृदिति ॥ लोष्टेशुष्कमृत्पिंडे ॥ जलंजलबिंदुः ॥ १५ ॥ यद्यर्थसत्तानुसारिणीप्रतीतिःस्यात्तदास्यादयंविरोधःप्रतीत्यनुसारिण्यांत्वनिर्वचनीयार्थसत्तायांप्रतिद्रष्ट्रर्थभेदान्नकालवैषम्यंदोषइत्याशयेनोत्तरमाह ॥ येनयेनेति ॥ १६ ॥ तदेवोदाहरति ॥ अमृतत्वमित्यादिना ॥ अमृतत्वंअमृतवज्जीवनहेतुत्वम् ॥ अमृतवेदनाज्जीवनसाधनत्ववेदनात् ॥ तथाहि ॥ तादृशदृढसंवेदनाविषक्रमयोविषेणैवजीवंति ॥ कथंतर्हिप्रमादाद्भ्रोज्यबुद्ध्याविषंभुक्तवतांमरणदर्शनमितिचेत्क्रमिवत्तेषांविषेचिराभ्यस्तजीवनहेतुतादृढसंवेदनाभावाद्विषेमरणहेतुतानिश्चयसंस्कारसत्त्वाच्चेति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्पष्टयति ॥ तदेवहीति ॥ तथाचनियतिवशीकारपर्यंतचिराभ्यस्तसंवेदनानुसारिणीपदार्थेष्वर्थक्रियानियतिरितिभावः ॥ १८ ॥ किंचसंविदःस्फुरणंस्वभावःअर्थविशे षाकारतातुतस्याद्रष्टृसंस्कारानुरोधिनी ॥ तथाचैकस्यामेवसंविदिकस्यचित्संस्कारानुसारेणनिमेषारोपःकस्यचित्कल्पाद्यारोपश्चनविरुद्ध्यतइत्याह ॥ कचनैकेतित्रिभिः॥१९॥ ॥ २० ॥ २१ ॥ लोकेप्ययंप्रकारःप्रसिद्धएवेत्याह ॥ दुःखितस्येति ॥ २२ ॥ इतिस्वप्नोनुभूयतेकैश्चिदितिशेषः ॥ २३ ॥ तदेवोदाहरति ॥ हरिश्चंद्रइति ॥ प्रसिद्धंचेदंमार्कंडे यपुराणादौ ॥ लवणोराजा ॥ इदंचाग्रेवक्ष्यति ॥ २४ ॥ मनोर्यज्जीवितमायुःसःमुनेरात्ममननशीलस्यप्रजेशस्यमुहूर्त्तः ॥ मुनेरित्युत्तरेपिसंबद्ध्यते ॥ २५ ॥ निर्विकल्पसमा

यथाभावितमेतेषांपदार्थानांनिजंवपुः॥ तदेवहिचिराभ्यासान्नियतेर्वशमागतम्॥ १८॥ कचनैकात्मिकैषाचिद्यथाकचतियादृशम्॥ तथातथाशुभवतितत्स्वभावैककारणात्॥ १९॥ निमेषेयदिकल्पौघसंविदंपरिविंदति॥ निमेषएवतत्कल्पोभवत्यत्रनसंशयः॥ २०॥ कल्पेयदिनिमेषत्वंवेत्तिकल्पोप्यसौततः॥निमेषीभवतिक्षिप्रंतादृग्रूपात्मिकाहिचित्॥ २१॥दुःखितस्यनिशाकल्पःसुखितस्यैवचक्षणः॥ क्षणःस्वप्नेभवेत्कल्पःकल्पश्चभवतिक्षणः॥ २२॥यथाचमृत्वाजातोहंतरुणोयौवनस्थितः॥यातोस्मियोजनशतंस्वप्नइत्यनुभूयते॥ २३॥ रात्रिंद्वादशवर्षाणिहरिश्चंद्रोनुभूतवान्॥ लवणोभुक्तवानायुरेकरात्र्यासमाःशतम् ॥ २४॥ यन्मुहूर्त्तःप्रजेशस्यसमनोर्ज्जीवितंमुनेः॥ जीवितंयद्विरिंचस्यतद्दिनंकिलचक्रिणः ॥ २५ ॥ विष्णोर्यज्जीवितंरामतद्वर्षांकस्यवासरः ॥ ध्यानप्रक्षीणचित्तस्यनदिनानिनरात्रयः ॥ २६॥ नपदार्थानचजगत्सत्यमात्मनियोगिनः॥ मधुरंकटुतामेतिकटुभावेनचिंतितम् ॥ २७॥ कटुचायातिमाधुर्यंमधुरत्वेनचिंतित म्॥ मित्रबुद्ध्याद्विषन्मित्रंरिपुबुद्ध्यारिपुःसुहृत् ॥ २८॥ भवतीतिमहाबाहोयथासंवेदनंजगत् ॥ अनभ्यस्ताःपदार्थायेशास्त्रपाठजपाद यः॥ २९॥ तेषांसंवेदनाभ्यासान्नूनमभ्येतिसाम्यता॥ नौयायिनांभ्रमार्त्तानांवेदनाद्भूर्विवर्त्तते ॥ ३०॥

धौतुदिनरात्रिभेदएवनास्तीत्याह ॥ ध्यानेति ॥ २६ ॥ मधुरंप्रियंविषयजातम् ॥ कटुतांअप्रियताम् ॥ कटुभावेनवैराग्यवासनया ॥ २७ ॥ कटुप्रागप्रियंइंद्रियमनःप्राणनिरो धादिमाधुर्यमात्मसुखप्रसादनेनप्रियतमताम् ॥ विषयलंपटतांद्विषद्गुरुशास्त्रादिमित्रबुद्ध्याआप्ततमत्वबुद्ध्यासेवितःसुहृत्परमाप्ततमोभवति ॥ एवंप्राक्तनोविषयभोगसहायःसुहृ न्मूढःस्वजनोरिपुबुद्ध्यापुरुषार्थविघातीतिबुद्ध्याभावितस्तथैवभवतीति ॥ २८ ॥ उक्तंन्यायंजपोपासनश्रवणादिष्वपिदर्शयति ॥ अनभ्यस्ताइति ॥ २९॥ सममेवसाम्यंतद्भावः साम्यताअवैषम्यंस्वाधीनताअभ्येतिप्राप्नोतिसंपद्यतइतियावत् ॥ भूर्विवर्त्ततेचलति ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदनाभ्रमार्त्तिशून्यानामेषांतीरस्थानांतुदृष्ट्यानविवर्त्तते ॥ ३१ ॥ अनुभूयतेनभः ॥ परिमोहतइति ॥ तथाहिबालाःस्वोत्सवेष्वपिक्वचिद्रुदंतोदृश्यंते ॥ ३२ ॥ मिथ्याभूतार्थानामर्थक्रियासामर्थ्यमपिलोकप्रसिद्धमित्याह ॥ असद्यक्षइत्यादिना ॥ ३३ ॥ ३४ ॥ असदेवेति ॥ नास्त्येवेत्यर्थः ॥ तर्हिकिमलीकंनेत्याह ॥ नभश्चैवेति ॥ कार्यस्यकारणमात्रत्वादव्याकृताकाशमेवेत्यर्थः ॥ तथाचतन्नभएवस्वाधिष्ठानचिदात्मनिशतहस्तस्यअंबुदच्छायाकल्पितमिथ्यानटस्यनृत्तमभिनयविशेषइवजगद्वैचित्र्यभावेनाततंविस्तीर्णमितिकलितमित्यर्थः ॥ ३५ ॥ सर्वमनःसमष्टिव्यष्टिकार्यत्वादपितस्यासत्यतैवेत्याशयेनाह ॥ गगनेइति ॥ बालस्यमिथ्याज्ञानकल्पितपिशाचस्ययत्स्पंददर्शनंतन्मातदुपमामनोमात्राकृतिर्यस्यतत् ॥ ३६ ॥ वास्तवमूर्त्तत्वाभावात्स्वयमन्यस्यारोधकंअभित्तिमत्स्वरोधकवस्त्वंतरशून्यंचभास्वरंस्फुटमाभातमिदंजगत्असुप्तस्यनरस्यापूर्वमेवोदितंस्वप्न

अवेदनाभ्रमार्त्तानामपिनैषांविवर्त्तते॥शून्यमाकीर्णतामेतिवेदनात्स्वप्नदृक्ष्विव॥३१॥ वेदनात्पीतमानीलंशुक्लंवाप्यनुभूयते॥ आपद्वदुत्सवःखेदंकरोतिपरिमोहतः॥३२॥ कुड्येपिखइवाचारोदृष्टोनन्वविचारिणः॥ असद्यक्षोविमूढानांप्राणानप्यपकर्षति॥३३॥ वेदनात्स्वप्नवनिताजाग्रतीवरतिप्रदा॥ यद्यथाभासमायातंतत्तथास्थिरतांगतम्॥३४॥ असदेवनभश्चैवनभएवचिदात्मनि॥शतहस्तांबुदच्छायानटनृत्तमिवाततम्॥३५॥ गग्नेनेमानसंस्पंदंजगद्विद्धिनवस्तुतत्॥ मिथ्याज्ञानपिशाचस्यस्पंददर्शनमाकृति॥३६॥ मायामात्रकमेवेदमरोधकमभित्तिमत्॥इदंभास्वरमाभातंस्वप्नसंदर्शनंस्थितम्॥३७॥ अपूर्वमेवासुप्तस्यनरस्येवोदितंविदुः॥ अचेताचेततिस्तंभोयादृशंशालभंजिकाम्॥३८॥ परमार्थमहास्तंभःस्रष्टिंचेततितादृशम्॥ यादृशोमेनरःपार्श्वेस्वप्नेक्षुब्धोमहाभटैः॥३९॥ तादृशोब्रह्मणःसर्गोबुद्धएवसुषुप्तवत् ॥तृणगुल्मलतायुक्तःशिशिरांतेयथारसः॥४०॥ वासंतःसंस्थितोभूमौतथासर्गःपरेपदे॥ यथाद्रवत्वंकनकेस्थितमंतरनुन्मिषत्॥४१॥

संदर्शनंविदुस्तत्त्वविदइतिपरेणान्वयः ॥३७॥ अचेतास्वस्फुरणानुकूलस्वव्यापारशून्यश्चेततिस्वात्मनिप्रथयतिशालभंजिकांप्रतिमारूपम् ॥ स्वयंयादृशोयादृशंयादृक्स्वरूपांस्रष्टिंचेततिसर्गकालेपश्यतिपरमार्थमहास्तंभःसर्वाधिष्ठानचिदात्मापितादृशोभूत्वातादृशंस्रष्टिंसर्गकालेपश्यतीत्यर्थः ॥ ३८ ॥ स्वप्नेमेममपार्श्वेमहाभटैःक्षुब्धःक्षोभितोनरोबुद्धोपिसुषुप्तवदज्ञानमात्रस्वभावोनवस्तुसन्ब्रह्मणःसर्गोपितादृशएवेतिपरेणान्वयः ॥ ३९ ॥ शिशिरस्यांतेवृक्षादीनांपत्रशातनकालेवासंतःअग्रेवसंतेपल्लवपुष्पाद्यात्मनाआविर्भविष्यंस्तृणगुल्मलतायुक्तोरसोभूमौउपादानेयथासंस्थितस्तथेत्यर्थः ॥ ४० ॥ ४१ ॥

१ क्वचित्स्वप्नदृष्टिवदितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मवर्गाज्जीवसंघान्निमित्तादणावणौतद्भोग्यःसर्गःपरेस्थितःअस्तिभविष्यतिचेत्यर्थः ॥ अंगानामवयवानांसन्निवेशःसंस्थानभेदःअंगिनआत्मनःस्वस्मादनन्यःअव्यतिरेकतः अपृथक्सत्ताकइनियावत् ॥४२॥ तथाजगत्स्वात्माभिन्नब्रह्मणःसकाशात्एवंअव्यतिरेकतइत्यर्थः ॥समसत्ताकत्ववारणायानंगस्येत्युक्तिः ॥ एकस्यनरस्यस्वप्नेअन्येननरेणस हयुद्धंतत्कालेतंप्रतिसद्रूपमन्यंप्रत्यसद्रूपमपिद्रष्टुःस्वात्मैवतथेदंमायाव्योमगंजगदपिमायिकदृष्ट्यासदपितदन्यशुद्धदृष्ट्याअसदेवेत्यर्थः ॥४३॥ आद्यंतकालयोःसद्ब्रह्ममात्रभावे नपरिशेषादपितन्मात्रस्वभावतेत्याह ॥ महाकल्पांतेति ॥४४॥ कारणत्वंकार्यविभागेसतिमिथस्तत्सापेक्षकारणत्वकल्पनम् ॥ सर्वजगदाकारपरिणतपूर्वपूर्वहिरण्यगर्भाहंभावक ल्पनात्मकोपासनसंस्कारजन्यस्मृतिकल्पितत्वादपिजगतोधिष्ठानसन्मात्रानतिरिक्ततेत्याह ॥ मुक्तेइति ॥४५॥ब्रह्मांडांतरस्थानामिवैकनगरस्थानामपिप्राणिनांप्रत्येकंवासनाक

तथास्थितःपरेसर्गआत्मवर्गादणावणौ॥ सन्निवेशोयथांगानामंगिनोनन्यआत्मनः॥ ४२ ॥ जगदेवमनंगस्यस्वात्मनोब्रह्मणस्तथा॥ यादृगेकनरःस्वप्नेयुद्धमन्यंनरंप्रति ॥ ४३ ॥ तादृशंसदसद्रूपंस्वात्मेदंव्योमगंजगत्॥महाकल्पांतसर्गादौचित्स्वभावमिदंजगत् ॥४४॥का रणत्वंमिथःपश्चादसदेतिनवास्तवम् ॥ मुक्तेस्मिन्ब्रह्मणियदिब्रह्मान्यःस्मृतिजोभवेत् ॥ तत्स्मृतिज्ञप्तिजेसर्गेस्थितैवज्ञप्तिमात्रता॥४५॥ श्रीरामउवाच॥ ॥पौराणांमंत्रिमुख्यानांविदूरथकुलक्रमः॥सममेवकथंतत्रसर्वेषांप्रतिभासितः॥४६॥ ॥श्रीवसिष्ठउवाच॥ ॥चि तःसमनुवर्त्ततेमुख्यायाःसर्वसंविदः॥यथाविपुलवात्यायाःसामान्यावातलेखिकाः॥ ४७ ॥ परस्परानुसारेणतथारूपेणसंविदः॥ क चितास्ताःप्रजापालप्रजावास्तव्यमंत्रिणः ॥ ४८ ॥ एवंरूपात्कुलाज्ज्ञातोराजास्माकमयंत्वसौ ॥ कचिताइववास्तव्यविदोवैदूरथेपुरे ॥४९॥ कचनेचित्स्वभावस्यनचकारणमार्गणम्॥ युक्तंमहामणेर्भासामिवान्यत्रस्वभावतः॥ ५० ॥

र्मादिवैचित्र्यात्स्वप्नइवजागरेऽपिक्रमवैचित्र्याद्यारोपःकिंनस्यादित्याशयेनरामःपृच्छति ॥ पौराणामिति ॥ समंएकरूपमेवयथास्यात्तथाकथंप्रतिभासितोभातः ॥ तत्रकोहेतु रित्यर्थः ॥ ४६ ॥ स्रष्टृसंकल्पकृताइतरजीवसंविदांप्रधानजीवसंविदनुवृत्तिनियतिरेवतत्रहेतुरित्याशयेनवसिष्ठउवाच ॥ चितइत्यादिना ॥ सामान्याअल्पाः ॥ तदनुरूपफलो न्मुखभोजकादृष्टमेलनंचतत्रहेतुरित्याशयेनाह ॥ परस्परेति ॥ तथाऐकरूप्येणरूपयतिसंपादयतीतितथारूपमदृष्टजातंतेनप्रजापालश्चप्रजाश्चवास्तव्याःपुरवासिनश्चमंत्रिण श्चपरस्परानुसारेणकचिताः ॥ ४८ ॥ कचनेवैचित्र्यंप्रपंचयंस्तस्यमिथ्यात्वमाह ॥ एवंरूपादिति ॥ वैदूरथेपुरेवास्तुषुवेश्मभूमिषुभवावास्तव्याःपदार्थास्तद्विदस्तदुपभोगिनो जनाइतिकचिताइव ॥ ४९ ॥ ननूदासीनायाःसंविदोऽध्यस्तविषयप्रथालक्षणेकचनेकोहेतुरितिचेन्नात्रहेतुचिंतायुक्ताकचनस्यानागंतुकत्वादतोऽन्यत्रआगंतुकविषयेष्वेवसा युक्ता ॥ यथाउदासीनस्यचिंतामणेर्भासांप्रसरेनहेत्वंतरापेक्षाकिंतुविचित्रार्थजननेचिंतकजनमनोरथवैचित्र्यापेक्षातद्वदित्याह ॥ कचनेइति ॥ ५० ॥

१ वपुरितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राक्तदनुकूलसंकल्पैश्चित्र्योत्पत्तिरपियथोक्तरीत्यैवेत्याह ॥ अहमिति ॥ विदूरथस्यविदोजीवचैतन्यान्निमित्तात् ॥ तथाचचिंतामणिरिवचिन्मणिरपियथामनोरथमेवार्था नुप्रसूतेइतिदर्शयति ॥ रत्नादिति ॥ प्रतिभामनोरथः ॥ ५१ ॥ अनेकेषुजीवचैतन्येषुतुल्यविषयारोपक्रमेणदर्पणानांपरस्परांतर्गतप्रतिबिंबग्राहित्वमिवसंपन्नमित्याह ॥ यावंतइ ति ॥ ५२ ॥ नन्वेवंसतिसतिबिंबेप्रतिबिंबोदयस्यावर्जनीयत्वात्कथंनिर्विषयतालक्षणमोक्षप्राप्तिरित्याशंक्याह ॥ तीव्रवेगवतीति ॥ तत्रतासुजीवसंवित्सुमध्येयैवजीवसंविद्ब्रह्मा कारवृत्तिस्तीव्रवेगवतीविषयदोषैरकंपितासतीआमोक्षमेकरूपिणीभवतिसैवपरंसर्वोत्कृष्टंब्रह्मभावेनस्थैर्यंमोक्षलक्षणमायातिनान्येत्यर्थः ॥ ५३ ॥ तथाचजगदाकारस्यब्रह्मा कारस्यवाजीवचितिप्रतिबिंबनेतीव्रवेगवत्तालक्षणबलवत्तत्तदाकारचिद्विलासाएवनियामकास्तथैवनिर्यातिस्वभावतइत्याह ॥ बलवदिति ॥ ५४ ॥ नन्वेवंसतिजगदुन्मुखत्व स्यचिराभ्यस्तत्वात्तत्रैवतीव्रवेगोदयेनमोक्षंप्रत्याशेत्याशंक्याह ॥ तत्रेति ॥ अयत्नजवेगाद्यत्नजवेगस्यप्राबल्यदर्शनादतियत्नात्संपादितोब्रह्माकारवेगएवजयतिजगदाकारचिद्वि

अहमेवंकुलाचारेराजास्यामेवमित्यपि ॥ विदूरथविदोरत्नादुदिताप्रतिभायथा ॥ ५१ ॥ यावंतोजंतवोयस्मिन्येयेसर्गेयदायदा ॥ तेस र्वेगत्वाचिद्वातोरन्योन्यादर्शतांगताः ॥ ५२ ॥ तीव्रवेगवतीयास्यात्तत्रसंविदकंपिता ॥ सैवायातिपरंस्थैर्यमामोक्षंत्वेकरूपिणी ॥ ५३ ॥ बलवच्चिद्विलासानामनुवृत्त्यापरस्परम् ॥ स्वभावाःप्रतिबिंबंतिचिदादर्शेस्वभावतः ॥ ५४ ॥ तत्रातियत्नाज्जयतिसत्याःसंविदआत्म सात् ॥ कुर्वंतिसरिदंभोधिगामिनीसरितोयथा ॥ ५५ ॥ येसमास्तत्रतेतावद्यतंतेचित्स्वभावतः ॥ यावदेकोजयत्यत्रद्वितीयःसनिमज्ज ति ॥ ५६ ॥ जायमानेषुनश्यत्सुवर्त्तमानेषुभूरिशः ॥ एवंसर्गसहस्रेषुपरमाणुकणंप्रति ॥ ५७ ॥

लासवेगम् ॥ किंच ॥ सत्यासत्यगोचरसंविदोःसत्यगोचराणांप्राबल्यदर्शनात्सत्याब्रह्माकारसंविदएवैनमात्मसात्आत्माधीनंकुर्वंति ॥ यथाअंभोधिगामिनीमहासरित्स्वमिलि ताःक्षुद्रसरितःस्वाधीनवृत्तीःकरोतितद्वदित्यर्थः ॥ ५५ ॥ अस्तुब्रह्माकारतायास्तीव्रवेगत्वेजयोयदातुमंदमध्यमाधिकाराच्चित्ताप्रतिष्ठितेर्विच्छिद्यविच्छिद्यब्रह्माकारतोदयोबाह्या कारतोदयश्चतदासमत्वान्नैकतरजयंप्रत्याशेत्याशंक्याह ॥ येइति ॥ येधिकारिणउक्तोभयाकारेसमाःसमवेगास्तेनतथैवावतिष्ठंतेकिंतुअत्रउक्ताकारद्वयमध्येयावदेकोब्रह्मा कारःप्रतिष्ठितःसन्जयतिउत्कर्षकाष्ठांगच्छतिद्वितीयःसबाह्याकारश्चनिमज्जतितावद्यतंतेश्रवणाद्यावृत्तिलक्षणंयत्नंकुर्वंति ॥ तथाचतेषामप्यभ्यासक्रमात्तीव्रवेगोदयेनेतरजयसि द्धिरित्यर्थः ॥ ५६ ॥ एवंप्रासंगिकानिर्मोक्षप्रसंगनिरासमुपपाद्यप्रस्तुतंप्रतिजीवंसमविषमसर्गवैचित्र्यमेवावलंब्याह ॥ जायमानेष्वित्यादिना ॥ औपाधिकपरिच्छेदारोपात्पर माणुकणंजीवजातंप्रतिएवंउक्तप्रकारेषुसमविषमेषुसर्गसहस्रेषुभ्रांत्याजायमानेषुवर्त्तमानेषुनश्यत्सुचपरमार्थतोनकिंचित्केनचिज्जीवकणेनधावतापिप्राप्तंकेनचिदुदासीनेनापि स्थितंनप्राप्तम् ॥ अवस्तुनःप्राप्यप्राप्त्युभयायोग्यत्वादित्यर्थः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५८ ॥ दृष्टिवर्जितोविवेकदृष्टिशून्यः अवश्यंभावीबोधःअधिष्ठानात्मसाक्षात्कारोयस्यतथाविधस्तुसन्प्रागनुभूतोप्यसन्मयोऽलीकसदृशः ॥ ५९ ॥ शुद्धदृष्ट्याप्रपंचस्या पृथक्सत्वमुक्त्वामायाशबलदृशाप्याह ॥ पत्रेति ॥ ६० ॥ जीवदृशापिआबोधंभिन्नरूपमपिबोधेपुनर्विस्मृतिहेत्वज्ञानाभावादेकमेवावतिष्ठतइत्याह ॥ मात्रिति ॥ ६१ ॥ मायावभासकत्वप्रयुक्तेनानात्वेपिशुद्धस्यनवास्तवैकरूप्यस्थितिविरोधइत्याशयेनोपसंहरति ॥ शून्येति ॥ तमःप्रकाशयतिसाक्षिभावेनेतितमःप्रकाशंतथाविधंसत् दिक्कालरूप्यपिपरमार्थतःसदाशुद्धम् शून्यौसर्वविकारोदयास्तमयौयत्रतथाविधमात्मवस्तुआद्यंतमध्यरहितंसदेकमेवस्थितम् ॥ यथाअच्छंनिर्मलमंबुसौम्यत्वाढ्यंवीचिवलनाढ्यंवाअंबुस्वरूपैकरूप्यादेकमेवतद्वदित्यर्थः ॥ ६२ ॥ विशुद्धबोधैकरूपस्यब्रह्मणःस्वरूपभूताविभाप्रकाशएवद्वैतैक्यगोचरसंकल्पविकल्पनरूपान्मनसोनिमित्ताच्चकारात्तन्मूलभूताविद्याकामकर्मवासनादिवशाच्चाहंममेत्याद्यध्यस्तजगत्स्वरूपाविभाति ॥ यथाआकाशलक्षणेकोशेनिजाशून्यतैवतलमालिन्यमौक्तिककेशोंड्रककटाहाद्याकारतयाभातितद्व

नकिंचित्केनचिद्व्याप्तंनकिंचित्केनचित्स्थितम्॥ चिदाकाशमिदंशांतमतःसर्वमभित्तिमत्॥ ५८॥ अयमाभासतेस्वप्नोनिर्निद्रोदृष्टिवर्जितः॥ अवश्यंभाविबोधस्तुस्वनुभूतोप्यसन्मयः॥ ५९॥ पत्रपुष्पफलांशात्मायथैकःस्वास्थितोद्रुमः॥ अनंतसर्वशक्त्यात्मात्थेकएव तथाविभुः॥ ६०॥ मातृमेयप्रमाणादिमायात्मकमजंपदम्॥ बुद्धंविस्मृतिमायातिनकदाचनकस्यचित्॥ ६१॥ शून्योदयास्तमयवस्तुतमःप्रकाशंदिक्कालरूप्यपिसदैकमनादिशुद्धम्॥ आद्यंतमध्यरहितंस्थितमच्छमंबुसौम्यत्ववीचिवलनाढ्यमिवैकमेव॥ ६२॥ अहंत्वमित्यादिजगत्स्वरूपाविशुद्धबोधैकविभाविभाति॥ आकाशकोशेनिजशून्यतेवद्द्वैतैक्यसंकल्पविकल्पनाच्च॥ ६३॥ ॥ इत्यार्षे वासि० वा० दे० उ० ली० मो० प्रयोजनवर्णनंनामषष्टितमःसर्गः॥ ६०॥ ॥ ६१॥ ॥ श्रीरामउवाच॥ ॥ अहंजगदितिभ्रांतिःपरस्मात्कारणंविना॥ यथोदेतितथाब्रह्मन्भूयःकथयसाधुमे॥ १॥ ॥ श्रीवसिष्ठउवाच॥ ॥ समस्ताःसमतैवांताःसंविदोबुध्यतेयतः॥ सर्वथासर्वदासर्वसर्वात्मकमजस्ततः॥ २॥

दित्यर्थः ॥ ६३ ॥ ॥ इतिश्रीवासिष्ठ० तात्पर्यप्रकाशेउत्पत्ति० षष्टितमःसर्गः ॥ ६० ॥ ॥६१॥ ॥ प्रयोजनप्रसिद्ध्यर्थंवैराग्यार्थंचसंस्तुते ॥ असारत्वमसत्त्वंचयुक्तिभेदेनवर्ण्यते ॥ १ ॥ अनहंभूतदेहादौअहंभावकारणंविनाप्यहमितिभ्रांतिःपरमाणुक्षणोदरेवैपुल्यचिरभावलक्षणजगत्संनिवेशकारणंविनापिजगदितिभ्रांतिर्यथायादृशकल्पनाक्रमेणयादृशोपपत्त्याचोदेतितथाकथयेत्यर्थः ॥ ननुमहाकल्पांतसर्गादौचित्स्वभावमिदंवपुरित्यादिनाप्राक्कथितमेवेदंकथंपुनःपृच्छतेतत्राह ॥ भूयइति ॥ साधुयाभिरुपपत्तिभिरनुभवमारोहतितादृशोपपत्तिपरिष्कृतंयथास्यात्तथाकथयेत्यर्थः ॥ १ ॥ तत्रसर्वभ्रांतीनांसंविदंतःप्रथमानत्वमेवमुख्योपपत्तिरितिप्रथमंश्रीवसिष्ठउवाच ॥ समस्ताइति ॥ यतःअसौबोद्धासर्वथासर्वप्रकाराःसमस्ताःभ्रांतीःसंविदःस्वरूपचैतन्यस्यैवआंताअंतर्निविष्टाःसर्वदाबुध्यतेनकदाचिदपिकाश्चिदपितद्बहिर्भूताः ततःसर्वंसर्वात्मकंसाचसमतैव ॥ नहिसर्वस्य सर्वात्मकत्वेवैषम्यंपरिशिष्यते ॥ नहितद्भावेजन्मादिविक्रियाउपपद्यंतइत्यजःपरमात्मैववस्तुतोस्तीतिजगद्भ्रांतिःकारणंविनैवेतियदुक्तंतदुपपन्नमित्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुचैतन्यांतर्बुध्यमानत्वमात्रेणकथंसर्वस्यसर्वात्मतासिद्धिः ॥ एकचित्तादात्म्यस्फुरणादितिचेन्न ॥ विभिन्नविषयतादात्म्याद्घटज्ञानंपटज्ञानमितिचितोपिभेदानुभवेनभिन्नत्वादित्याशंक्याह ॥ सर्वाहीति ॥ नचितोभेदोयतःसर्वाःशब्दानामर्थानांचदृशोबोधाब्रह्मैव नहिब्रह्मातिरिक्तचिद्धातुरस्ति विषयभेदोपरागाद्धिचितिभेदोविभाव्यते विषयनिष्कर्षेतुतच्चिद्रूपान्नपृथक् नभिद्यतइत्यर्थः ॥ ननुविषयाकारतानुभवाद्विषयवद्भेदःकिन्नस्यात्तत्राह ॥ सर्वार्थेति ॥ सर्वेयेअर्थ्यंतइत्यर्थाविषयभूताःशब्दार्थास्तत्कलास्तदंशभूतंयत्पृथुबुध्नोदराकाररूपंतदासांदृशांनविद्यते ॥ चितिजडाकारसत्वेउपपत्त्यभावात् ॥ यस्त्वनुभूयतेआकारःसदृत्तेरेवेतिभावः ॥ ३ ॥ एवंचिद्भेदेनिरस्तेजडभेदोपितदपृथक्सत्तास्फूर्त्तिकत्वान्निरसितुंशक्यइतिसदृष्टांतमाह ॥ कटकत्वमिति ॥ ४ ॥ तथापिकथंकारणंविनोत्पन्नमित्युक्तेरुपपत्तिश्चितएवकनकवत्कारणत्वात्तत्राह ॥ एषएवेति ॥ सतिहिजगत्ततस्माद्भेदेतत्वतिकारणतास्यादत्यंताभेदेतुचितोनकारणत्वमित्यर्थः ॥ तर्हिकिंजगद्रूपमेवब्रह्मनेत्याह ॥ जगद्रूपंत्विति ॥ नहिविवर्त्तःपृथक्सन्नित्याशयः ॥ एवंचकटककुंडलादयोपिहेमात्मकब्रह्मविवर्त्ताएवेत्याशयेनाह ॥ हेमैवेति ॥ ५ ॥ नन्वेकस्यानेकात्मताविरोधइत्याशंक्ययत्रसमसत्ताकैरप्यनेकैरवयवैरेकस्यावयविनःसमसत्ताकंता

सर्वाहिशब्दार्थदृशोब्रह्मैवैताःपृथङ्नतत् ॥ सर्वार्थशब्दार्थकलारूपमासांनविद्यते ॥ ३ ॥ कटकत्वंपृथग्घेम्नस्तरंगत्वंपृथग्जलात् ॥ यथानसंभवत्येवंनजगत्पृथगीश्वरात् ॥ ४ ॥ एषएवजगद्रूपंजगद्रूपंतुनेश्वरे ॥ हेमैवकटकादित्वंकटकत्वंनहेमनि ॥ ५ ॥ यथावयविनोरूपमनेकावयवात्मकम् ॥ तथानवयवायास्तुचितःसर्वात्मकंचयत् ॥ ६ ॥ यत्तुल्यकालमखिलंतन्मात्रावेदनंपरे ॥ अंतस्थंतदिदंभातिजगदित्यहमित्यपि ॥ ७ ॥ लेखौघानांयथाभेदसन्निवेशःशिलोदरे ॥ तथानन्यज्जगदहंचेत्यंतश्चिद्घनेघनम् ॥ ८ ॥ स्थितास्तरंगाःसलिलेयथांतरतरंगिते ॥ सृष्टिशब्दार्थरहितास्तथांतःसृष्टयःपरे ॥ ९ ॥ नसर्गेतिष्ठतिपरंसर्गस्तिष्ठतिनोपरे ॥ अवयवावयविवत्सत्तानवयवैस्तयोः ॥ १० ॥

दात्म्यंलोकेनविरुद्धंतत्रकिंवाच्यंकल्पितैरनेकैर्वास्तवंब्रह्मैक्यमविरुद्धमितीत्याशयेनाह ॥ यथेति ॥ किंचैकात्म्येसर्वस्यसर्वात्मतालाभादनेकत्वापगमादप्यविरोधइत्याशयेनाह ॥ सर्वात्मकंचेति ॥ ६ ॥ किंतर्हिसर्वानुभवसिद्धंजगदित्यहमितिचनानात्वंतत्राह ॥ यदिति ॥ परेब्रह्मणिसर्वप्राणिनामंतस्थंतुल्यकालंयद्ब्रह्ममात्रस्वरूपस्यावेदनमज्ञानंतदेवजगदित्यहमितिनानात्वेनभातीत्यर्थः ॥ ७ ॥ लेखाःराजयः ॥ यथास्फटिकशिलोदरेअभेदेपिवनलेखौघानांप्रतिबिंबानांसन्निवेशोऽविरुद्धस्तद्वदत्रापीत्याह ॥ लेखौघानामिति ॥ ८ ॥ ९ ॥ ननुलीनास्तरंगायथामहाजलेअवयवभावेनतिष्ठंतिअवयवीवासमवायेनावयवेषुतिष्ठतिकिंतद्वद्ब्रह्मणिजगत्स्थितिर्नेत्याह ॥ नेति ॥ वस्तुतस्तुअवयवावयविनोरप्यन्योन्याधारतानोपपत्तिमतीत्याह ॥ सत्तेति ॥ तथाहि ॥ अवयवेषुतिष्ठन्नवयवीकिंप्रत्यवयवंकार्त्स्न्येनतिष्ठत्युतावयवैः ॥ आद्येप्रत्यवयवमवयविनानात्वापत्तिः ॥ गोःकर्णादिप्रदेशेपिकृत्स्नागौरस्तीतिदोहनादिकार्यापत्तिः ॥ अवयवविश्लेषेप्यवयविनोजातिवन्नाशानापत्तिश्च ॥ द्वितीयेतुअनवस्थयाअनंतावयवत्वेमेरुसर्षपयोस्तुल्यपरिमाणापत्तिः ॥ एवमवयवाअप्यवयविनिकिमेकदेशेतिष्ठेयुरुतकृत्स्ने ॥ आद्येऽनवस्था ॥ द्वितीयेअवयवांतरस्यासमावेशादद्वयस्यावयवत्वायोगात्सर्वद्रव्याणांनिरवयवत्वापत्तिरितितयोरवयवावयविनोरनवयवैरेवसत्तापर्यवस्यतीत्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्टसृष्ट्युपपादनक्रमेणापिजगतश्चिदनन्यत्वमनुभावयिष्यन्निष्क्रियस्यापिचैतन्यस्याविद्यांतःप्रतिफलनेनान्यथात्वविभावनंप्रथममाह ॥ चिद्रूपेणेति ॥ परमार्थचिद्रूपेणब्रह्म णाप्रथममविद्याप्रतिफलितयादर्पणप्रतिहतनयनेनमुखमिवस्वसंवित्त्यास्वेचिन्मात्ररूपात्मकप्रपंचस्यत्वदयंरहस्यभूतमज्ञानात्दतंस्वमेवविभाव्यतेकल्प्यते ॥एवकारःप्राक्तनपार मार्थिकस्वरूपविस्मरणद्योतनार्थः ॥११॥ तदानीमेवकारणेलीनस्यशब्दतन्मात्रस्याकाशात्मनाआविर्भावइत्याह ॥ तत्कालमिति ॥ शब्दाणुःशब्दतन्मात्रम् चिच्चमत्कारःसर्व शक्तिमन्मायासंवलनंतद्रूपधृग्ब्रह्मखंचिद्रूपमिवचेत्यतेसैवाकाशोत्पत्तिरितिभावः ॥ १२ ॥ तदेवाकाशभूतंब्रह्मअंतर्गतस्पर्शरसांस्वांतरुन्मिषितस्पर्शतन्मात्रसंस्कारांस्वयंस्वात्म न्यनिलतांवेत्तिअनुभवति ॥ यथास्थिरपवनःकालेस्पंदतामनुभवतितद्वत् ॥१३॥ तद्वाय्वात्मतापन्नंब्रह्मैव ॥ आभासतांतेजस्ताम् ॥ कोशेगर्भेस्थितआलोकलवोरूपतन्मात्रंय

चिद्रूपेणस्वसंवित्त्यास्वेचिन्मात्रंविभाव्यते ॥ स्वमेवरूपत्वदयंवातेनस्पंदनंयथा ॥ ११ ॥ तत्कालमेषशब्दाणुश्चिच्चमत्काररूपधृक् ॥ चे त्यतेखमिवैवांतःसंकल्पइवचेतसा ॥ १२ ॥ तदेवानिलतांवेत्तिनिजसत्तात्मिकांस्वयम् ॥ अंतर्गतस्पर्शरसांपवनस्पंदतामिव ॥ १३ ॥ त देवाभासतामेतिनिजसत्तात्मिकांस्वयम् ॥ कोशस्थितालोकलवांतेजःप्रकटतामिव ॥ १४ ॥ तदेवजलतांयातिनिजसत्तात्मिकांस्वयम् ॥ अंतःस्थितास्वादलवांसलिलंद्रवतामिव ॥ १५ ॥ तदेवावनितांवेत्तिस्वचित्तैकात्मतामयीम् ॥ अंतःस्थगंधतन्मात्रामुर्वीस्थैर्यकलामिव ॥ १६ ॥ तुल्यकालनिमेषांशलक्षभागप्रतीतियत् ॥ निजंविदःप्रकचनंतत्सर्गौघपरंपरा ॥ १७ ॥ शुद्धंसकृत्प्रभातांतर्दृश्यमध्यमनामयम् ॥ उदयास्तमयोन्मुक्तंब्रह्मतिष्ठत्यनिष्ठितम् ॥ १८ ॥ बुद्धंसदपवर्गंतत्ससर्गमपिसत्समम् ॥ अबुद्धंसर्गरूपात्मविसर्गमपितत्सदा ॥ १९ ॥

स्यास्तथाविधाम् ॥१४॥ तत्तेजोभूतंब्रह्मैव ॥ आस्वादलवोरसतन्मात्रम् ॥१५॥१६॥ ननुचक्षुरुन्मेषक्षणेझटित्येवजगद्भानान्नात्रायमारोपक्रमोविभाव्यतइतिकथंदृष्टसृष्ट्युप पत्तिस्तत्राह ॥ तुल्यकालेति ॥ ईदृशोयंचितश्चमत्कारोयत्तुल्येतुलयासम्मितेइवदुर्लक्ष्येइतियावत् ॥ निमेषांशस्यलक्षतमभागेप्रतीतिर्यस्यतादृशमपिविदोजगदाकारप्रकचनं तत्कल्पकोटिविस्तृतकालानांसर्गौघानांपरंपराभवति ॥ तथाचचित्कचनेकालापरिच्छेद्यतत्तन्निमेषांशलक्षतमभागारोपःकल्पकोट्यारोपोवामायिकोनवस्तुतोविरुद्ध्यतइति क्रमकल्पनोपपत्तिरित्यर्थः ॥ १७ ॥ यद्धिअशुद्धंजडंदेशकालतःपरिच्छिन्नंसदोषमाद्यंतवत्कालेनिष्ठितंतत्कालेनपरिच्छिद्यतेब्रह्मतुनतथेत्याह ॥ शुद्धमिति ॥ सकृत्प्रभातंनपु नःपुनर्विच्छिद्यप्रभातंनित्यस्वप्रकाशमितियावत् ॥ अंतर्गतादृश्याःसर्गामध्याःप्रलयाश्चयस्यतत् ॥ अनिष्ठितंअनाधारम् ॥ ननुयद्यंतर्दृश्यमध्यंतत्तर्हिससर्गंसप्रलयंवानैकरूपा पवर्गोभवितुमर्हतितत्राह ॥ बुद्धंसदिति ॥ सत्परमार्थसत्यम् ॥ समंवैषम्यरहितम् ॥ विसर्गंपरमार्थतःसर्गशून्यमपि ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथायथाबोद्धृभिर्बुद्ध्यतेतथातथातत्तत्प्रकारविशिष्टंतत्तद्ब्रह्मआत्मनिभवतितत्तदाकारंमाययाधत्तइत्यर्थः ॥ नुइतिखल्वर्थे ॥ यतःसर्वांगशक्तिमत्सर्वानुगुणमायाशक्तिमदित्यर्थः ॥२०॥ जगदपिशास्त्रीयचिद्विलासदृष्ट्यादृष्टंपरमार्थसत्यंब्रह्मैव ॥ ब्रह्मापिबहिर्मुखचक्षुरादिमनःषष्ठजन्यदृष्ट्यादृष्टमनृतंजगदेवेत्याह ॥ तत्सत्यमिति ॥ सत्यस्यकुतोऽसत्यतातत्राह ॥ सर्वाख्याइति ॥ यतःसर्वाख्याःसर्वाणिनामानिनितरांगतंप्राप्तम् ॥ नहिवागगोचरस्यतद्गोचरंरूपंसत्यंभवितुमर्हतीत्यर्थः ॥ सर्वार्थातिगतमितिपाठेसर्वान्अर्थान्अतितरांगतंव्याप्तंतद्रूपापन्नंयतइत्यर्थः ॥ २१ ॥ यथावायौसरणंप्राक्सरणादसत्कल्पेपिआविर्भावात्सत्कल्पम् सरणकालेवायोःसत्त्वावगमात्सत्येस्थैर्यमात्रादसत्यमिव तथासर्गोपिअसत्कल्पेपिमूलाज्ञानेअधिष्ठानसत्तयासत्कल्पः सत्येप्यधिष्ठानेअसत्यमायात्मकत्वादसत्यइवेत्यर्थः ॥२२॥ तथाचदृष्टिभेदेनसत्यासत्यात्मत्वंविश्वस्येत्याह ॥ अन्यरूपेति ॥

चिद्ब्रह्मयद्यथायेनबुद्ध्यतेस्वात्मनात्मनि ॥ तत्तत्तथानुभवतिसर्वंसर्वांगशक्तिमत् ॥ २० ॥ तत्सत्यंचिद्विलासत्वान्नित्यानुभवरूपतः ॥ तदसत्यंमनःषष्ठात्सर्वाख्यानिर्गतंयतः ॥२१॥ यथैतत्सरणंवायौतथासर्गःस्थितःपरे ॥ असत्कल्पेपिसत्कल्पःसत्येऽसत्यइवापिच ॥२२॥ अन्यरूपायथानन्यातेजस्यालोकतोदरे ॥ तथाब्रह्मणिविश्वश्रीःसत्यासत्यात्मिकाचिति ॥ २३ ॥ अनुत्कीर्णायथापंकेपुत्रिकाचाथदारुणि ॥ यथावर्णामपीकल्केतथासर्गाःस्थिताःपरे ॥ २४ ॥ अनन्यान्येवकचतिब्रह्मतत्त्वमरुस्थले ॥ असत्यात्मनिसत्येवत्रिजगन्मृगतृष्णिका ॥ २५ ॥ ब्रह्मणाचिन्मयेनात्मासर्गात्मैवविभाव्यते ॥ नभाव्यतेचानन्यत्वाद्बीजेनांतरिवद्रुमः ॥ २६ ॥ यथाक्षीरस्यमाधुर्यंतीक्ष्णत्वंमरिचस्यच ॥ द्रवत्वंपयसश्चैवस्पंदनंपवनस्यच ॥ २७ ॥ स्थितोनन्योयथान्यःसन्नास्तितत्रतथात्मनि ॥ सर्गोनिर्गलचिद्रूपःपरमात्मात्मरूपभृत् ॥ २८ ॥ कचनंब्रह्मरत्नस्यजगदित्येवयत्स्थितम् ॥ तदकारणकंयस्मात्तेननव्यतिरिच्यते ॥ २९ ॥ वासनाचित्तजीवादिवेदनंवेदनोदितम् ॥ नोदेत्यवेदनादेवयतनादेवपौरुषात् ॥ ३० ॥

आलोकताभास्वरता ॥ अन्यरूपेणदृष्टाअसत्याअनन्यरूपेणदृष्टासत्यास्थितेत्यर्थः ॥ २३ ॥ स्वप्नजाग्रदुपादानसौषुप्तात्मदृष्टांतावाय्वौविश्वसर्गोपादानब्रह्मदृष्टांतस्तृतीयः ॥ २४ ॥ २५ ॥ चिन्मयेनभ्रांत्याचिदाभासलक्षणजीवभूतेन ॥ तत्त्वदृशातुपरब्रह्मानन्यत्वान्नभाव्यते ॥ २६ ॥ २७ ॥ अनन्यःसन्स्थितः ॥ अन्यःसन्नास्तिअसन्नित्यर्थः ॥ निर्गलतीतिनिर्गलःप्रविलीनमात्रश्चिद्रूपःसन्परमात्ममात्रपरिशिष्टस्वरूपभृदित्यर्थः ॥ २८ ॥ अकारणोत्पन्नत्वमुपपादितमुपसंहरति ॥ कचनमिति ॥ यस्मात्तेनब्रह्मणानव्यतिरिच्यतेतत्तस्मादकारणकमित्यर्थः ॥२९॥ यद्यकारणकंतर्ह्यजातमेवेतिकथंतद्वेदनानुभवस्तत्राह ॥ वासनेति ॥ वासनाचित्तजीवादेर्यद्वेदनमनुभवस्तद्वेद्यतेऽनेनेतिवेदनंमनस्तस्मादुदितम् ॥ कस्तर्हितदनुदयेउपायस्तमाह ॥ नोदेतीति ॥ अवेदनान्मनोनाशात् ॥ तच्चकस्मात्तत्राह ॥ यतनादेवेति ॥ ज्ञानयोगदृढाभ्यासलक्षणात्पुरुषयत्नादित्यर्थः ॥३०॥

---

१ पुस्तकांतरेषुतुसर्वार्थातिगतमितिपाठेनुअधिष्ठानचित्परतयायोज्यम् इत्येतावदेवास्ति तेनसर्वानित्यादिकंठिप्पणीरूपेणकेनचिल्लिखितमंतःपतितमितिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कीदृशःसज्ञानयोगस्तमभिनीयाह ॥ नास्तमेतीति ॥ ३१ ॥ सतिचित्तेपरमाणूदरेऽपिसर्गपरंपरादुर्वारेत्याह ॥ पराणुंप्रतीति ॥ अत्रअण्वंतःसर्गौघस्यआवसतिरावासना ॥ ण्यं ताद्भावेयुच् ॥ समावेशेनस्थितिःकैवकथंवा ॥ नकापिनकथंचिदपियुक्तेतिमिथ्यैवेत्यर्थः ॥३२॥ अनिर्वचनीयमायाशक्तिरूपेणावस्थानंतुऊर्म्यादिदृष्टांतेपिसममित्याह ॥ यथेति ॥३३॥ तादृशपुरुषयत्नेचवैराग्यंहेतुरित्याशयेनश्रुतिमुदाहरति ॥ जाताचेदिति ॥ तथाअन्यापि ॥ कामान्यःकामयतेमन्यमानःसकामभिर्जायतेतत्रतत्र ॥ पर्याप्तकामस्यकृतात्मनस्त्विहैवसर्वेप्रविलीयंतिकामाइति ॥ ३४ ॥ स्मृतिमप्युदाहरति ॥ यतइति ॥ निवर्त्तनाद्धिसर्वतोनवेत्तिदुःखमण्वपीतिस्मृतिशेषोबोध्यः ॥ अतोज्ञानवैराग्यदार्ढ्यादहमितिदेहादिकमसंविदन्नपश्यन्कोजन्मसंविदंजननमरणभ्रांतिमेतिप्राप्नोतिनकश्चिदित्यर्थः ॥ ३५ ॥ तदेवज्ञानंतत्त्वंपदार्थाखंडैक्यगोचरंदर्शयति ॥ चितिमिति ॥ परामीश्वरचैतन्यात्मिकामपरांजीवचैतन्यात्मिकांचचितिंक्रमात्परामनामिकामरूपिकांनामरूपात्मकजगत्कल्पनोपाधिशून्यामपरांतुचराचरदेहादिलक्षणायेअधरानिकृष्टोपाधयस्तन्मयताशून्याम् ॥मयडंतेननञ्समासेअचराचराधरमयीमितिवक्तव्येनञोमयटःप्राङ्निवेशश्छांदसः॥तथाचशोधितत्वंपदलक्ष्यार्थभूतामजांजन्मादिविकारशून्यांचितिमखंडांयेगुरुशास्त्रस्वानुभवैर्विदंतितेजयंतिसंसारमित्यर्थः ॥ चराचरात्मिकाअधरायास्तनवस्तन्मयींतत्प्रायांजीवभूतामनामिकामरूपिकांचयेविदुरितिवा ॥ ३६ ॥ ३७ ॥ व्यष्टाविवसमष्टावप्यहंकारसंकल्पोभयवशादेवस्वांतःसंसारकल्पनेतिदर्शयन्नुपसंहरति ॥ अहंमयीति ॥ समष्टौव्यष्ट्यपेक्षयायोविशेषस्तमाह ॥ अंतर्मुखैवेति ॥ नास्मदादिवद्बहिर्मुखेत्यर्थः ॥ अनंतस्यविष्णोर्निमेषस्ययःकोट्यंशभूतोविदधातीतिविधिःकालस्तस्मिन्नुयुगांतंद्विसप्ततिसहस्रसहस्रसंख्याकदिव्ययुगांतंस्वायुरनुभवति ॥ अहोमायेतिभावः ॥३८॥

नास्तमेतिनचोदेतिक्कचित्किंचित्कदाचन॥ सर्वंशांतमजंब्रह्मचिद्घनंसुशिलाघनम् ॥ ३१ ॥ पराणुंप्रतिसर्गौघाश्चित्ताद्भांतिसहस्रशः॥ तेष्वप्यणावणावंतःकैवात्रावासनाकथम्॥३२॥ यथाजलांतऊर्म्याद्याशुभाशुभाश्चशक्तयः॥ जाग्रत्स्वप्नसुषुप्ताद्यास्तथाजीवेंतरास्थिताः॥ ३३ ॥ जाताचेद्रतिर्जितोर्भोगान्प्रतिमनागपि ॥ तदसौतावतैवोच्चैःपदंप्राप्तइतिश्रुतिः॥ ३४॥ यतोयतोविरज्यतेततस्ततोविमुच्यते॥अतोहमित्यसंविदन्कएतिजन्मसंविदम्॥ ३५ ॥ चितिंपरापरामजामरूपिकामनामिकाम्॥ चराचराधराऽमयींविदंतियेजयंतिते॥ ३६ ॥ परेचितिःस्वप्रकटाद्वितीयास्वावर्त्तलेखेवजलेद्रवांतः॥ साहंतयेमानिजगंतिधत्तेनसंतिनासंतिपरात्मकानि ॥ ३७॥ अहंमयीपद्मजभावनाचित्संकल्पभेदाद्वितनोतिविश्वम् ॥ अंतर्मुखैवानुभवत्यनंतनिमेषकोट्यंशविधौयुगांतम्॥ ३८॥ ॥इ०वा०वा०दे० मोक्षोपायेषूत्पत्तिप्रकरणेजगत्स्वरूपवर्णनंनामएकषष्टितमःसर्गः॥ ६१॥ ॥ ७॥

इतिश्रीवा०ता०उत्पत्तिप्रकरणेएकषष्टितमःसर्गः ॥ ६१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

भ्रांतिमात्रत्वमुदितंविश्वस्यादौप्रपंच्यते ॥ महानियतिशक्तिश्चजीवमुक्त्यादिसिद्धये ॥ १ ॥ परमाणोर्लक्षतमांशस्यकल्पनायांतत्रजगच्छब्दितब्रह्मांडसहस्राणिनिमेषस्यलक्षांशकल्पनायांतत्रकल्पसहस्राणिचअलमत्यंतंदृश्यमानब्रह्मांडवदेवसत्यानीवभांतीतिक्रमेणसंबंधः ॥ १ ॥ तेष्वपिप्रत्येकमेवंविधाकल्पनासंभवतीत्यनवस्थितस्वभावत्वाद्भ्रांतिरेवेयमित्याह ॥ तेष्वपीति ॥ २ ॥ इमावर्त्तमानाःपराआगामिन्यःशांताअतीताश्वसर्गपरंपराअंतःस्फुटाआवर्त्तानांविवर्त्तिकाःपरिवृत्तयोयस्यांतथाविधासलिलद्रवतेवप्रातीतिकीःसत्तावहंतिधारयंतिप्रवहंतिच ॥ ३ ॥ तीरद्रुमैर्लताभिश्चोन्मुक्ताअभिवृष्टापुष्पालिर्यस्यांतथाकल्पितातरंगिणीमृगतृष्णिकानदीव ॥ ४ ॥ ५ ॥ तत्त्वज्ञानोदयेनसर्वभ्रांतिनाशेविदुषांदेहस्थित्यसंभवंरामःशंकते ॥ एकात्मेति ॥ एवमुक्तप्रकारात्सम्यग्विचारणात् ॥ एकोऽद्वितीयआत्माब्रह्मतदेकतयातद्भेदेनपरेउत्कृष्टेनिर्विकल्पात्मविज्ञानेजातेसति

श्रीवसिष्ठउवाच॥ ॥परमाणुनिमेषाणांलक्षांशकलनास्वपि॥जगत्कल्पसहस्राणिसत्यानीवविभांत्यलम् ॥१॥ तेष्वप्यंतस्तथैवांतःपरमाणुकणंप्रति॥भ्रांतिरेवमनंताहोइयमित्यवभासते॥ २॥ वहंतीमाःपराःसत्ताःशांताःसर्गपरंपराः॥ सलिलद्रवतेवांतःस्फुटावर्त्तविवर्त्तिका॥३॥ मिथ्यात्मिकैवसर्गश्रीर्भवतीहमहामरौ॥तीरद्रुमलतोन्मुक्तपुष्पालीवतरंगिणी॥४॥ स्वप्नेंद्रजालपुरवत्संकथेहापुराद्रिवत्॥ संकल्पवदसत्यैवभातिसर्गानुभूतिभूः॥५॥ ॥श्रीरामउवाच॥ ॥एकात्मैकतयैवंहिजातेसम्यग्विचारणात् ॥ निर्विकल्पात्मविज्ञानेपरेज्ञानवतांवर॥६॥ किमर्थमिहतिष्ठंतिदेहास्तत्त्वविदामपि॥दैवेनैवसमाक्रांतादैवमत्रचकिंभवेत् ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥अस्तीहनियतिर्ब्राह्मीचिच्छक्तिःस्पंदरूपिणी॥ अवश्यभवितव्यैकसत्तासकलकल्पगा ॥८॥ आदिसर्गेहिनियतिर्भाववैचित्र्यमक्षयम्॥ अनेनेत्थंसदाभाव्यमितिसंपद्यतेपरम्॥ ९॥ महासत्तेतिकथितामहाचितिरितिस्मृता॥ महाशक्तिरितिख्यातामहादृष्टिरितिस्थिता॥ १०॥ महाक्रियेतिगदितामहोद्भवइतिस्मृता॥ महास्पंदइतिप्रौढामहात्मैकतयोदिता॥ ११॥

॥ ६ ॥ दैवेनसम्यगाक्रांताबलिप्रभृतयइव ॥ अत्रतत्त्वज्ञविषयेदैवंकिंभवेत् ॥ तस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषांसभवतीतिश्रुत्यातत्त्वविदिदैवस्यासामर्थ्योक्तेःकिंतत्प्रबलतरंसंभावितमित्यर्थः ॥ ७ ॥ प्राण्यदृष्टवस्तुशक्तिसहकृतेश्वरसंकल्पलक्षणमहानियतिवशादेवसर्वव्यवहारव्यवस्थावद्विदुषांदेहधारणमपीत्याशयेनवसिष्ठउत्तरमाह ॥ अस्तीत्यादिना ॥ स्पंदःसर्वजगद्व्यवस्थितव्यवहारस्तेनरूपिणीवस्फुटा ॥ ८ ॥ कदाप्रभृतिसाकिंरूपावातदाह ॥आदिसर्गेइति ॥ अनेनवह्न्यादिनाइत्थमौष्ण्योर्ध्वज्वलनादित्वंभावेनसदाभाव्यमितिपरंब्रह्मस्वयंसंकल्पात्मकवृत्तिरूपमक्षयमप्रतिहतंसंपद्यते ॥ ९ ॥ सर्वजगतांस्थितिप्रथासामर्थ्यविवेकनिर्माणजन्मार्थक्रियादिहेतुत्वात्क्रमेणमहासत्तेत्यादिनामभिःख्याता ॥ १० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगंतिएवंदृश्यमानविधयातृणानीवपरिवर्त्तयंतीतिशेषः ॥ दैत्याइतिएवंक्रूरादिप्रकाराःसुरादेवाइतिसौम्यादिप्रकाराइत्यादिरूपाआकल्पंकृताआस्थितिर्व्यवस्थायया ॥ १२ ॥ परमार्थदृष्टौब्रह्मसत्तेवव्यवहारेसाप्यव्यभिचरितेत्याह ॥ कदाचिदिति ॥ ब्रह्मसत्तायाव्यभिचारआकाशकोशेचित्रलेखनंचात्यंतासंभावितमप्यनुमीयतेनतुनियतेःस्थितिरन्यथाजातेत्यनुमातुंशक्यमित्यतिशयोक्तिः ॥ १३ ॥ इदंचव्यावहारिकदृशोक्तंतत्त्वज्ञदृशातुनब्रह्मनियतिसर्गशब्दार्थाभिद्यंतइत्याशयेनाह ॥ विरिंच्यादीति ॥ बुद्धैस्तत्त्वज्ञैः ॥ १४ ॥ नन्वचलंब्रह्मचलःसर्गःकथमनयोरैक्यंतत्राह ॥ अचलमिति ॥ अनादिमध्यपर्यंतंब्रह्मआपूर्यअज्ञदृशाआपूर्यैवसर्गोव्यवस्थितः ॥ १५ ॥ नन्वियंनियतिर्हिरण्यगर्भेणकथंबुद्धायेनतदनुरूपमेवससर्जतत्राह ॥ पाषाणेति ॥ स्फटिकपाषाणोदरप्रतिबिंबितवनलेखौघन्यायेनात्मनिमायाशवलेब्रह्मणितिष्ठताब्रह्मणाहिरण्यगर्भेणअवोधवताप्रसुप्तपुरुषे

तृणानीवजगंत्येवमितिदैत्याःसुराइति ॥ इतिनागाइतिनगाइत्याकल्पंकृतास्थितिः ॥ १२ ॥ कदाचिद्ब्रह्मसत्तायाव्यभिचारोनुमीयते ॥ चित्रमाकाशकोशेचनान्यथानियतेःस्थितिः ॥ १३ ॥ विरिंच्याद्यात्मभिर्बुद्धैर्बोधायाविदितात्मनाम् ॥ ब्रह्मात्मैवसानियतिःसर्गोयमितिकथ्यते ॥ १४ ॥ अचलंचलवद्दृष्टंब्रह्मापूर्यव्यवस्थितः ॥ अनादिमध्यपर्यंतंसर्गोवृक्षइवांबरे ॥ १५ ॥ पाषाणोदरलेखौघन्यायेनात्मनितिष्ठता ॥ ब्रह्मणानियतिःसर्गोबुद्धोऽबोधवतेवखम् ॥ १६ ॥ देहेयथांगिनोंगादिदृश्यतेचित्स्वभावतः ॥ ब्रह्मणापद्मजत्वेननियत्याद्यंगकंतथा ॥ १७ ॥ एषादैवमितिप्रोक्तासर्वंसकलकालगम् ॥ पदार्थमलमाक्रम्यशुद्धाचिदितिसंस्थिता ॥ १८ ॥ स्पंदितव्यंपदार्थेनभाव्यंवाभोक्तृतापदम् ॥ अनेनेत्थमनेनेत्थमवश्यमितिदैवधीः ॥ १९ ॥ एषैवपुरुषस्पंदस्तृणगुल्मादिचाखिलम् ॥ एषैवसर्वभूतादिजगत्कालक्रियादिवा ॥ २० ॥ अनयापौरुषीसत्तासत्तास्याःपौरुषेणच ॥ लक्ष्यतेभुवनंयावद्द्वेएकात्मतयैवहि ॥ २१ ॥ नरेणपौरुषेणैवकार्येसत्तात्मकेउभे ॥ ईदृश्येतेननियतिरेवंनियतिपौरुषे ॥ २२ ॥

णआत्मनिस्वाप्नकल्पनाश्रयंखमिवनियतिरेवभाविसर्गोबुद्धः ॥ १६ ॥ तथानियत्यादिसर्गजातमंगकंस्वावयवभूतंदृष्टमितिशेषः ॥ १७ ॥ शुद्धामोहानास्कंदिताचित्ईश्वरसंकल्पचैतन्यम् ॥ इतिजगद्व्यवस्थारूपेण ॥ १८ ॥ १९ ॥ २० ॥ प्राण्यदृष्टनियत्योःपरस्परसहायतामाह ॥ अनयेति ॥ पौरुषीपुरुषादृष्टसंबंधिनीसत्ताफलावश्यंभावलक्षणास्थितिर्लक्ष्यते ॥ सत्तानियतिसत्ता ॥ कियत्कालमेवंव्यवस्थातत्राह ॥ भुवनमिति ॥ भुवनंत्रिभुवनंयावत्कालमस्तितावदित्यर्थः ॥ प्रलयेतर्हिकथंतत्राह ॥ द्वेइति ॥ द्वेएतेसत्तेएकात्मतयैवतदाआस्रातेइत्यर्थः ॥ २१ ॥ द्वयोरपिपुरुषयत्नानुसारितातथैवनियतिस्थितेरित्याह ॥ नरेणेति ॥ कार्येनिर्वाह्येनियतिपौरुषेअपिएवंप्राण्यदृष्टनिर्वाह्ये ॥ एतेनक्रमेणईदृशीनियतिःस्थितेतिशेषः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंबहुनातवशिष्यभावेनप्रष्टृत्वंमदुपदिष्टार्थानुष्ठातृत्वंचनियतिकृतमेवेत्याह ॥ प्रष्टव्यइति ॥ ननुगौणेकर्मणिदुह्यादेःप्रधानेनीहृकृष्वहामितिकात्यायनवचनात्प्रच्छेरकथितेगौणेकर्मणितव्यप्रत्ययेनमुख्यस्यकर्मणोनभिहितत्वाद्दैवपौरुषनिर्णयमितिद्वितीययाभाव्यंतत्कथंप्रथमाप्रयोगइतिचेत् ॥ सत्यम् ॥ त्वयाअहंप्रष्टव्यस्तत्रापिदैवपौरुषनिर्णयएवप्रष्टव्यइत्यावृत्त्यानियतिद्वयबोधनायतंत्रेणकर्मद्वयस्यापितव्यप्रत्ययेनाभिधानविवक्षोपपत्तेरिति ॥ २३ ॥ यदपिकश्चिद्दैवमेवावलंब्यपौरुषप्रयत्नमकुर्वन्नाजगरंव्रतमास्थायतिष्ठतितदपितदनुगुणप्राक्तनकर्मोद्बोधितनियतिनिश्चयादेवेत्याह ॥ भोजयिष्यतीति ॥ २४ ॥ प्रागपिपुरुषोयदिकेवलमक्रियएवस्यात्तर्हिबुद्धिस्तत्प्रयुक्तकर्मतत्प्रयुक्ताभूतभौतिकविकाराविकृतीनांचगवादिसंस्थानाकृतिश्चेत्येतेनस्युः ॥ तथाचश्रुतिः ॥ यद्येतन्नकुर्यात्क्षीयेतहेति ॥ इत्थंपुरुषक्रियामूलतयैवतुआकल्पव्यवहारस्थित्याभाव्यमितिनियतिवशादेवसर्वेभावास्तथास्थिताइत्यर्थः ॥ २५ ॥ इयंचनियतिरीश्वरैरपिदुरतिक्रमेत्याह ॥ अवश्यमिति ॥ २६ ॥ एतांनिश्चितिमितिशेषः ॥ २७ ॥ इदानींनियतिपौरुषश

प्रष्टव्योहंत्वयारामदैवपौरुषनिर्णयः ॥ मदुक्तंपौरुषंपाल्यंत्वयेतिनियतिःस्थिता ॥ २३ ॥ भोजयिष्यतिमांदैवमितिदैवपरायणः ॥ यत्तिष्ठत्यक्रियोमौनंनियतेरेषनिश्चयः ॥ २४ ॥ नस्याद्बुद्धिर्नकर्माणिनविकारादिनाकृतिः ॥ केवलंत्वित्थमाकल्पंस्थित्याभाव्यमितिस्थिताः ॥ २५ ॥ अवश्यंभवितव्यैषात्विदमित्थमितिस्थितिः ॥ नशक्यतेलंघयितुमपिरुद्रादिबुद्धिभिः ॥ २६ ॥ पौरुषंनपरित्याज्यमेतामाश्रित्यधीमता ॥ पौरुषेणैवरूपेणनियतिर्हिनियामिका ॥ २७ ॥ अपौरुषंहिनियतिःपौरुषंसैवसर्गगा ॥ निष्फलाऽपौरुषाकारासफलापौरुषात्मिका ॥ २८ ॥ नियत्यामूकतामेत्यनिष्पौरुषतयाक्रियम् ॥ यस्तिष्ठतिप्राणमरुत्स्पंदस्तस्यक्वगच्छति ॥ २९ ॥ अथप्राणक्रियारोधमपिकृत्वाविरामदम् ॥ यदितिष्ठतितत्साधुर्मुक्तएवकिमुच्यते ॥ ३० ॥

ब्दार्थैक्यमेवउपाधिभेदादेवव्यवहारभेदइत्याह ॥ अपौरुषमिति ॥ अपौरुषंपुरुषप्रयत्नात्मनाअविवक्षिताईश्वरसंकल्पनामात्रेणनियतिरित्युच्यते ॥ सैवतदात्मनासर्गगास्तृष्टिफलोपहितापौरुषमित्युच्यते ॥ यतःअपौरुषापुरुषयत्नाकारेणापरिणतानियतिर्निष्फला ॥ पौरुषात्मिकासफलेतिपौरुषादेवपुरुषार्थलाभइत्यर्थः ॥ २८ ॥ ननुतर्हिनिष्पौरुषस्याप्यजगरवृत्तेस्तृप्त्यादिफललाभोदृष्टस्तत्राह ॥ नियत्येति ॥ सत्यंदृष्टस्तथापिसग्रसनादिपुरुषयत्नादेव ॥ यस्तुपुरुषोनियत्यातृप्तिःसेत्स्यतीतिमूकतांवागादिक्रियाप्रयत्नशून्यतामेत्यनिष्पौरुषतयाअक्रियंग्रसनादिक्रियारहितंयथास्यात्तथातिष्ठतिनसतृप्यति ॥ यदपिसक्षुधितोपिकंचित्कालंजीवतितदपिप्राणचलनानुकूलपुरुषयत्नादेवेत्याह ॥ प्राणेति ॥ २९ ॥ यदिविरामदंनिर्विकल्पसमाधौचित्तविश्रांतिदंप्राणनिरोधमधिकृत्वासतिष्ठतितत्तस्माद्यत्नात्साधुस्तत्त्वविच्चेन्मुक्तःसर्वपौरुषफलावस्थालक्षणंमोक्षंप्राप्तोभवतितदपिप्राणनिरोधादिपौरुषस्यैवफलमित्यपौरुषंफलंकिमुच्यतेनकिंचिदित्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्पौरुषैकात्मताशास्त्रीयपौरुषैकपरताश्रेयोहेतुत्वात्साधनतःश्रेयः ॥ अत्यंतमकर्मतालक्षणोमोक्षस्तुफलतःश्रेयः ॥ आभ्यांसाध्यसाधनश्रेयोभ्यांतुमहात्मनांज्ञानिनांपक्षः सबलःसकार्याविद्योपघातसमर्थइतिनिर्दुःखैवतेषांनियतिरित्यर्थः ॥ ३१ ॥ याचेयंनिर्दुःखानियतिःसैवब्रह्मसत्तायाआभास्फूर्त्तिस्तस्यांचेद्यत्नेनपरिणम्यतेस्थिरीभूयतेतदेवपरमशुद्धाख्यंपदंसाकाष्ठासापरागतिरितिश्रुतिप्रसिद्धापरमागतिरपितत्तस्मात्प्राप्तैवेत्यर्थः ॥ ३२ ॥ एतैरुक्तप्रकारैर्महद्भिरप्रतिहतैर्विलासैर्ब्रह्मैवधरांतरस्थातोयस्यसत्ताद्रवतातृणकुशकाशादिभेदैर्वल्लीतरुगुल्मजालादिभावैश्चयथाविस्फूर्जतिस्फुरतितथाविस्फूर्जतीत्यर्थः ॥ ३३ ॥ इतिवासिष्ठ०तात्पर्यप्र०द्विषष्टितमःसर्गः ॥ ६२ ॥ विस्फूर्जतियथाब्रह्मसर्वतःसर्वरूपतः ॥ मायाशक्तिविलासेनतथात्रप्रतिपाद्यते ॥ १ ॥ नियत्यादिविलासैर्ब्रह्मैवविस्फूर्जतीत्युक्तंतत्कस्यहेतोस्तत्राह ॥ यदेतदिति ॥ यद्यतएतन्मायाशबलंब्रह्मतत्त्वं

पौरुषैकात्मताश्रेयोमोक्षोत्यंतमकर्तृता ॥ आभ्यांतुसबलःपक्षोनिर्दुःखैवमहात्मनाम् ॥ ३१ ॥ नियतिर्ब्रह्मसत्ताभातस्यांचेत्परिणम्यते ॥ नूनंपरमशुद्धाख्यंतत्प्राप्तैवपरागतिः ॥ ३२ ॥ एतैर्नियत्यादिमहाविलासैर्ब्रह्मैवविस्फूर्जतिसर्वगात्म ॥ तृणादिवल्लीतरुगुल्मजालैःसत्त्वतोयस्यधरांतरस्था ॥ ३३ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०ली०देवशब्दार्थनिरूपणंनामद्विषष्टितमःसर्गः ॥ ६२ ॥ ॥ ६५ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ यदेतद्ब्रह्मतत्त्वंसर्वथासर्वदैवसर्वतएवसर्वशक्तिसर्वाकारंसर्वेश्वरंसर्वगंसर्वमेवेति ॥ १ ॥ एषत्वात्मासर्वशक्तित्वाच्चक्वचिच्चिच्छक्तिंप्रकटयतिक्वचिच्छांतिंक्वचिज्जडशक्तिंक्वचिदुल्लासंक्वचिर्त्किंचिन्नकिंचित्प्रकटयति ॥ २ ॥ यत्रयदायदेवासौयथाभावयतितत्रतदातदेवासौप्रपश्यति ॥ ३ ॥ सर्वशक्तेर्हियायैवयथोदेतितथैवसा ॥ ४ ॥ तदास्तिशक्तिर्नानारूपिणीसास्वभावतइमाःशक्तयोयमात्मेति ॥ ५ ॥ एवंविकल्पजालंव्यवहारार्थंधीमद्भिःपरिकल्पितंलोकेनत्वात्मनिविद्यतेभेदः ॥ ६ ॥ यथोर्मितरंगपयसांसागरेकटकांगदकेयूरैर्वाहेम्नः अवयवावयविनोःसंवित्काल्पनिकीद्वितानवास्तवी ॥ ७ ॥

सर्वथासर्ववस्तुतः सर्वदैवकालतः सर्वतएवदेशतश्च सर्वशक्तिसर्वभावसमर्थमतएवसर्वाकारम् सर्वज्ञतयासर्वंनियंतुमीष्टइतिसर्वेश्वरम् ॥ विप्रकर्षताटस्थ्ययोर्वारणायसर्वगंसर्वमेवेतिविशेषणे ॥ इतिअतोहेतोरित्यर्थः ॥ १ ॥ कुतोनविप्रकर्षताटस्थ्येतत्राह ॥ एषत्वात्मेति ॥ सतर्हिसर्वंसर्वत्रप्रकटयेन्नेत्याह ॥ क्वचिदिति ॥ क्वचिदंतःकरणोपाधौजीवभावेनप्रवेशाच्चिच्छक्तिंप्रकटयति सात्विकोपाधौशांतिम् तामसोपाधौजडशक्तिम् राजसोपाधौरागलोभप्रवृत्त्याद्युल्लासम् किंचिन्मिश्रितंगुणकार्यत्वाद्विशेषतोदुर्वचम् सुषुप्तिप्रलययोस्तुनकिंचित्प्रकटयति ॥ २ ॥ तत्रचास्यसत्यसंकल्पतैवहेतुरित्याह ॥ यत्रेति ॥ ३ ॥ शक्तीनामाविर्भावानुगुणैवस्थितिर्वैचित्र्यंचेत्याह ॥ सर्वशक्तेरिति ॥ यायेतिवीप्सा ॥ ४ ॥ शक्तिशक्तिमद्भेदकल्पनेयंव्यवहारदृशैवनपरमार्थतइत्याह ॥ इमाइति ॥ ५ ॥ ६ ॥ नत्वात्मनिविद्यतेभेदइत्यत्रार्थेदृष्टांतत्रयप्रदर्शनपरोयथेत्यादिर्नवास्तवीत्यंतोग्रंथः ॥ संवित्काल्पनिकीव्युत्पादकबुद्धिपरिकल्पिताद्विताभिदा ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हियस्माद्यद्यद्रज्ज्वादियथासर्पादिप्रकारेणचेत्यतेबुध्यतेतत्तथैवविवर्त्ततोभवतिनपरमार्थतः ॥ कुतःयतएतत्सर्पादिरज्ज्वादेर्नबाह्यंसमुदेतिनाप्यंतरतः ॥ ८ ॥ समाभासंसर्वसाधारणप्रथारूपंसाक्षिचैतन्यंभोजकादृष्टोद्बुद्धंकचित्किंचिदेवभ्रांत्याप्रपश्यतिनसर्वत्रनापिस्वरूपमित्यर्थः ॥ ९ ॥ परमार्थतस्तुततंविस्तृतमिदंसर्वाकारमयंब्रह्मैव ॥ तत्किंशक्तिविशिष्टंजगदवयवकंपरमार्थतोब्रह्मनेत्याह ॥ मिथ्याज्ञानवद्भिरिति ॥ १० ॥ एवंचमिथ्याज्ञानोपहिताचित्सत्शास्त्रानुगुणमसत्शास्त्रप्रतिकूलंवायदेवकर्तव्यतयासंकल्पयतितदभिनिविशतितद्विषयेउद्युक्तंचभवतीत्यर्थः ॥ अभिनिवेशेनचतत्तदनुरूपंविहितंनिषिद्धंवाकृत्वाफलभोगकालेपितत्तत्पश्यतीतिआद्यसर्गसंकल्पमारभ्यभूतभौतिकदेहभोग्यादिसर्गेणपुरुषभोगांतसकलप्रपंचरूपाब्रह्मचिदेवभातिविस्फूर्जतिनान्यदिति ॥ ११ ॥ चिद्भावश्चित्तातस्याअविकारःसर्गार्थः ॥ ॥ इतिवासिष्ठ० त्रिषष्टितमःसर्गः ॥ ६३ ॥ ॥

यथायच्चेत्यतेहितथैवतन्नबाह्यतोनांतरतश्चैतत्समुदेतिहि ॥ ८ ॥ सर्वात्मत्वात्समाभासंकचित्किंचित्प्रपश्यति ॥ ९ ॥ सर्वाकारमयंब्रह्मैवेदंततंमिथ्याज्ञानवद्भिःशक्तिशक्तिमत्त्वेअवयवावयविरूपेकल्पितेनपारमार्थिके ॥ १० ॥ सद्भावत्वसद्भाविद्यत्संकल्पयत्यभिनिविशतितत्तत्पश्यतिसकलातत्सद्ब्रह्मैवचिद्भाति ॥ ११ ॥ ॥ इत्यार्षेवा० वा० दे० मो० उ० चित्ताविकारोनामत्रिषष्टितमःसर्गः ॥ ६३ ॥

श्रीवसिष्ठउवाच ॥ ॥ योयंसर्वगतोदेवःपरमात्मामहेश्वरः ॥ स्वच्छःस्वानुभवानंदस्वरूपोंतादिवर्जितः ॥ १ ॥ एतस्मात्परमानंदाच्छुद्धचिन्मात्ररूपिणः ॥ जीवःसंजायतेपूर्वंसचित्तंचित्ततोजगत् ॥ २ ॥ ॥ श्रीरामउवाच ॥ ॥ स्वानुभूतिप्रमाणेस्मिन्ब्रह्मणिब्रह्मबृंहिते ॥ कथंसत्तामवाप्नोतिजीवकोद्वैतवर्जिते ॥ ३ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ असदाभासमच्छात्मब्रह्मास्तीहप्रबृंहितम् ॥ बृहच्चिद्भैरववपुरानंदाभिधमव्ययम् ॥ ४ ॥ तस्ययत्सममापूर्णंशुद्धंसत्वमचिह्नितम् ॥ तद्विदामप्यनिर्देश्यंतच्छांतंपरमंपदम् ॥ ५ ॥

भोग्यस्यशक्तिवैचित्र्याद्याविर्भावोनिरूपितः ॥ भोक्तृजीवत्वसंपत्तिक्रमोद्यप्रतिपाद्यते ॥ १ ॥ १ ॥ अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतेर्नामरूपव्याकरणलक्षणजगत्सर्गात्पूर्वंजीवोपाधिलिंगसमष्ट्युत्पत्त्याजीवःसंजायतेसएवोपाधिप्राधान्येनचित्तमित्युच्यते ॥ २ ॥ अखंडाद्वितीयत्वप्रकाशेब्रह्मणिसखंडसद्वितीयजीवसत्तानुपपत्तिरामःशंकते ॥ स्वानुभूतीति ॥ ब्रह्मणिब्रह्मत्वादेवबृंहितेनिरतिशयापरिच्छेदलक्षणांवृद्धिंप्राप्ते ॥ अल्पोजीवोजीवकःसत्तांपूर्वसिद्धब्रह्मताविरोधिनींपृथक्सत्तांकथमवाप्नोतीत्यर्थः ॥ ३ ॥ सत्येनिरविद्येब्रह्मणिपरमार्थदृशानजीवसत्तासंभवः साविद्येतुत्संभवोनविरुध्यतइतिविभज्यविवक्षुःप्रथमंसाधारणंतत्स्वरूपमाह ॥ असदिति ॥ असंतआभासाद्वैतप्रत्ययायत्र ॥ प्रबृंहितमित्यस्यैवविवरणंबृहच्चिद्भैरववपुरिति ॥ अनात्मयोगिनांभीषणत्वाद्भैरवंवपुःस्वरूपंयस्य ॥ यथाहुर्वृद्धाः ॥ अस्पर्शयोगोनामैषदुर्दर्शःसर्वयोगिनां ॥ योगिनोबिभ्यतिह्यस्मादभयेभयदर्शिनइति ॥ ४ ॥ आद्यंदर्शयति ॥ तस्येति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयंदर्शयति ॥ तस्यैवेति ॥ आशांतिआमोक्षंउद्भवबीजसत्वादुद्यदिवयद्रूपंतस्योपाधिस्वभावाद्यत्स्पंदनंचलनशक्त्यात्मकप्राणधारणम् ॥ ६ ॥ तत्रैवसर्वनामरूपव्याकरणमित्याह ॥ तत्रेति ॥ ७ ॥ जगद्वैचित्र्यकल्पनानुकूलक्रियाशक्तिप्रधानप्राणभावएवजीवभावश्चितइत्यत्रदृष्टांतमाह ॥ ब्रह्मणइति ॥ ८ ॥ अच्छस्यब्रह्मणःप्राणाधीनचलनाध्यासेशांतत्वस्यनिष्क्रियत्वस्यापगमेतिरोधानेसतिमनागल्पंयत्संवेदनंतदात्मकम् ॥ ९ ॥ तच्चजीवत्वमामोक्षंजीवस्यस्वाभाविकमिवेत्याह ॥ यथेति ॥ १० ॥ स्वस्यअभावनमभावोऽज्ञानंतद्वशतोमनाक्संवेदनंज्ञानस्वरूपस्यपरिच्छेदइवयत्तत् ॥ ११ ॥ तस्याहंकारात्मकरुद्रभावमाह ॥ तदेवेति ॥ घनसंवित्त्यावासनादार्ढ्येन ॥ अहंतांअहंकारताम् ॥ वह्न्यणुरग्निकणःस्वस्यइंधनंदीपनंयद्घृततैलादितदाधिक्यात् ॥१२॥ स्वस्यद्रष्टुस्तारकाकनीनिकोपलक्षितंचक्षुस्तस्यामार्गेअविषयेभागेव्योम्निप्रसृतंहिचक्षुर्यावद्दूरंगंतुं

तस्यैवोद्यदिवाशांतियत्सत्त्वंसंविदात्मकम् ॥ स्वभावात्स्पंदनंतत्तुजीवशब्देनकथ्यते ॥ ६॥ तत्रेमाःपरमादर्शेचिद्व्योम्न्यनुभवात्मिकाः॥ असंख्याःप्रतिबिंबंतिजगज्जालपरंपराः ॥ ७ ॥ ब्रह्मणःस्फुरणंकिंचिद्यद्वातांबुधेरिव ॥ दीपस्येवाप्यवातस्यतंजीवंविद्धिराघव ॥ ८ ॥ शांतत्वापगमेच्छस्यमनाक्संवेदनात्मकम् ॥ स्वाभाविकंयत्स्फुरणंचिद्व्योम्नःसोंगजीवकः ॥ ९ ॥ यथावातस्यचलनंकृशानोरुष्णतायथा ॥ शीततावातुषारस्यतथाजीवत्वमात्मनः ॥१०॥ चिद्रूपस्यात्मतत्त्वस्यस्वाभाववशतःस्वयम् ॥ मनाक्संवेदनमिवयत्तज्जीवइतिस्मृतम् ॥ ११ ॥ तदेवघनसंवित्त्यायात्यहंतामनुक्रमात् ॥ वह्न्यणुःस्वेंधनाधिक्यात्स्वांप्रकाशकतामिव ॥ १२ ॥ यथास्वतारकामार्गेव्योम्नःस्फुरतिनीलिमा ॥ शून्यस्याप्यस्यजीवस्यतथाहंभावभावना ॥ १३ ॥ जीवोहंकृतिमादत्तेसंकल्पकलयेद्धया ॥ स्वयैतयाघनतयानीलिमानमिवांबरम् ॥ १४ ॥ अहंभावोहिदिक्कालव्यवच्छेदीकृताकृतिः ॥ स्वयंसंकल्पवशतोवातस्पंदइवस्फुरन् ॥ १५ ॥ संकल्पोन्मुखतांयातस्त्वहंकाराभिधःस्थितः ॥ चित्तंजीवोमनोमायाप्रकृतिश्चेतिनामभिः ॥१६॥ तत्संकल्पात्मकंचेतोभूततन्मात्रकल्पनम् ॥ कुर्वंस्ततोव्रजत्येवसंकल्पाद्यातिपंचताम् ॥ १७ ॥

शक्नोतितावन्नीलिमानंनपश्यति ॥ यत्रतुगत्वायेकुंठीभवतिततःप्रभृतितस्यामार्गस्तत्रनैल्यशून्येपिनीलिमास्फुरतितथाअहंताशून्यस्याप्यस्यजीवस्यस्वाविषयेस्वात्मन्यहंभावभावनेत्यर्थः ॥ १३ ॥ संकल्पकलापूर्वसंकल्पसंस्कारस्तयाइद्धयाउद्बुद्धयास्वयास्वाध्यस्तयाएतयाप्रत्यक्षयाघनतयास्निग्धेंद्रनीलशिलाकल्पयानिबिडतया ॥ १४॥ दिक्कालव्यवच्छेदीआत्मनोदैशिककालिकपरिच्छेदकारी ॥ स्वयंसंकल्पवशतःकृतदेहाद्याकृतिः ॥ १५ ॥ अहंभावाध्यासमूलाश्चित्तादिभेदाइत्याह ॥ चित्तमित्यादिना ॥ सोहंकारोरुद्रश्चित्तंविष्णुर्जीवोब्रह्मातेषामेवक्रमान्मनोमायाप्रकृतिरितिक्रियानामानि ॥ १६ ॥ तत्तत्रसंकल्पात्मकंचेतोब्रह्मासंकल्पाद्भूततन्मात्रकल्पनांकुर्वंस्ततश्चेतनात्मकपूर्वावस्थातोव्रजतिप्रच्यवतएवजडांपंचतांचयाति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यपंचीकरणेनहैमांडप्रकृतितेजोभावमाह ॥ तन्मात्रेति ॥ ब्रह्मभावदृष्ट्याअल्पत्वात्कणइत्युक्तम् ॥ पेलवाअस्फुटप्रकाशा ॥ १८ ॥ उक्तमेवस्पष्टमाह ॥ तेजःकणत्वमिति ॥१९॥ तत्रपूर्वकल्पेविराडात्मोपासनसंस्कृतस्यस्थूलसमष्टिविराड्भावस्तदन्यस्यव्यष्टिस्थूलदेहाहंभावसंस्कारात्तद्भावइतिविशेषमाह ॥ असावित्यादिना ॥ कल्पनात्प्राक्तनोपासनात्मकांडात्माहंभावकल्पनात् ॥ तस्यसहसिद्धंचतुष्टयमितिस्मृतिसिद्धमात्मज्ञानमित्याशयेनविशिनष्टि ॥ अंतःस्फुरद्ब्रह्मेति ॥ अथवाअंतर्गर्भभूपद्मकर्णिकायांस्फुरन्ब्रह्माचतुर्मुखोयस्येत्यर्थः ॥ आपिंडतांकरकादिघनीभावम् ॥ २० ॥ कश्चिदनुपासकस्तुपुण्यकृत्इतिवक्ष्यमाणप्रकारेणदिव्यदेहादेःकलनाद्द्राक्शीघ्रमेवदेवादिदेहतांतत्रदेहेअतद्रूपंअनहमिअहंभावलक्षणभ्रांतित्वंयाति ॥ गंधर्वैश्चादन्यैर्वादेवैर्वसत्पालितंपुरममरावत्यादियाति ॥ २१ ॥ कश्चित्पापकृत्तुस्थावरताम् ॥ खचारिणःपक्षिणोरक्षःपिशाचाद

तन्मात्रपंचकाकारंचित्तंतेजःकणोभवेत् ॥ अजातजगतिव्योम्नितारकापेलवायथा ॥ १८ ॥ तेजःकणत्वमादत्तेचित्तंतन्मात्रकल्पनात् ॥ शनैःस्वस्मात्परिस्पंदाद्बीजमंकुरतामिव ॥ १९ ॥ असौतेजःकणोंडाख्यःकल्पनात्कश्चिदंडताम् ॥ प्रयात्यंतःस्फुरद्ब्रह्माजलमापिंडतामिव ॥ २० ॥ कश्चिद्द्रागितिदेहादिकलनाद्यातिदेहताम् ॥ भ्रांतित्वंतदतद्रूपंगंधर्वैश्चवसत्पुरम् ॥ २१ ॥ कश्चित्स्थावरतामेतिकश्चिज्जंगमतामपि ॥ कश्चिद्यातिखचार्यादिरूपंसंकल्पतःस्वतः ॥ २२ ॥ सर्गादावादिजोदेहोजीवःसंकल्पसंभवः ॥ क्रमेणपद्मासाद्यवैरिंचंकुरुतेजगत् ॥ २३ ॥ आत्मभूकलनात्मासौयत्संकल्पयतिक्षणात् ॥ तत्स्वभाववशादेवजातमेवप्रपश्यति ॥ २४ ॥ चित्स्वभावात्समायातंब्रह्मत्वंसर्वकारणम् ॥ संस्तौकारणंपश्चात्कर्मनिर्मायसंस्थितम् ॥ २५ ॥ चित्तंस्वभावात्स्फुरतिचितःफेनइवांभसः ॥ कर्मभिर्बध्यतेपश्चाड्डिंडीरमिवरज्जुभिः ॥ २६ ॥ संकल्पःकलनाबीजंतदात्मैवहिजीवकः ॥ कर्मपश्चात्तनोच्चुच्चैरुत्थायाकर्मतःक्रमात् ॥ २७ ॥

यश्च ॥ आदिपदाज्जलचराग्रहंते ॥ २२ ॥ प्रथमजःसूक्ष्मदेहसमष्ट्युपाधिकएवात्माविरिंचिजीवःस्वसंकल्पादंडांतर्जगत्सृजतीत्यर्थः ॥ २३ ॥ तस्यसत्यसंकल्पतायांपूर्वतनसत्यसंकल्पात्मभूतादात्म्योपासनाहेतुरित्याशयेनविशिनष्टि ॥ आत्मभूकलनात्मेति ॥ २४ ॥ प्रथाचलनोभयधर्मकस्यजगतश्चिदात्माप्रथमंप्रथायांहेतुश्चलनविकारादौतुपश्चात्तनंकर्मेत्याह ॥ चित्स्वभावादिति ॥ आद्यःकारणशब्दोभावप्रधानः ॥ २५ ॥ उक्तमेवमूलतःस्फुटयति ॥ चित्तमिति ॥ डिंडीरंफेनपिंडोनौकादिनिबंधनरज्जुभिर्बध्यतेनिरुध्यतेनजलंतद्वच्चित्तमेवदेहनिबंधनैःकर्मभिर्बध्यतेनचिदात्मेतिभावः ॥ २६ ॥ लोकेपिसंकल्पपूर्वकंकर्मणाघटादिरचनदर्शनादुक्तक्रमसिद्धिरित्याशयेनाह ॥ संकल्पइति ॥ अकर्मतःनिष्क्रियात्मसन्निधानादितियावत् ॥ २७ ॥

१ भावनइतिक०पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चात्तैरपिकर्मभिःप्राग्जीवेबीजांतरंकुरवद्वासनात्मनास्थितमेवाविक्रियतेनापूर्वमित्याशयेनाह ॥ क्रोडीकृतांकुरमिति ॥ यथाबीजस्थोजीवःपूर्वंक्रोडीकृतःसूक्ष्मतयांतर्धृतः अंकुरोयेनतथाविधंस्वजीवितंधत्तेपश्चात्त्वंकुरपत्रकांडशाखापल्लवपुष्पफलक्रमैर्नानात्वमायातितथाहिरण्यगर्भजीवोपीत्यर्थः ॥ २८ ॥ व्यष्टिजीवाअप्येवमेवस्वेस्वेस्मिन्वा सनात्मनास्थितामेवाकृतिंदेहाद्याकारंगताःप्राप्ताः ॥ एतावांस्तुविशेषः ॥ तेहिरण्यगर्भजीवसंकल्पात्पूर्वोत्पन्नेजगतिब्रह्मांडेमातापित्रादिरूपभूताश्रयांप्राणिनिमित्तांस्थितिंदेह लाभंयांतीति ॥ २९ ॥ कर्मशब्दंव्याचष्टे ॥ चित्स्पंदउच्यतइति ॥ ३० ॥ कर्मशब्दार्थमेवविवृण्वन्सर्गद्वयवर्णितभोक्तृभोग्यसर्गमुपसंहरति ॥ चित्स्पंदनमिति ॥ तरोर्निजांगा निशाखादीनिकुसुमानिचयथाप्राग्भूत्वापुनर्भवंतितथाआद्यात्कारणाद्ब्रह्मणःसकाशात्तस्माच्चित्स्पंदनलक्षणाच्छुभाशुभलक्षणात्कर्मणोनिमित्ताज्जगंतिभोक्तृप्राणिनिकाया

क्रोडीकृतांकुरंपूर्वंजीवोधत्तेस्वजीवितम् ॥ पश्चान्नानात्वमायातिपत्रांकुरफलक्रमैः ॥ २८ ॥ अन्येस्वएवयेजीवाएवमेवाकृतिंगताः ॥ पूर्वोत्पन्नेजगतितेयांतिभूताश्रयांस्थितिम् ॥ २९ ॥ स्वकर्मभिस्ततोजन्ममृतिकारणतांगतैः ॥ प्रयांत्यूर्ध्वमधस्ताद्वाकर्मचित्स्पंदउच्यते ॥ ३० ॥ चित्स्पंदनंभवतिकर्मतदेवदैवंचित्तंतदेवभवतीहशुभाशुभादि ॥ तस्माज्जगंतिभुवनानिभवंतिपूर्वंभूत्वानिजांगकुसुमानित रोरिवाद्यात् ॥ ३१ ॥ ॥इ०वा०वा०दे०मोक्षोपायेषूत्पत्ति०बीजांकुरयोगनिर्णयोनामचतुःषष्टितमःसर्गः ॥ ६४ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥परस्मात्कारणादेवमनःप्रथममुत्थितम् ॥ मननात्मकमाभोगितत्स्थमेवास्थितिंगतम् ॥ १ ॥ भावाभावलसद्दोलंतेनायमवलोक्यते ॥ सर्गःसदसदाभासःपूर्वगंधइवेच्छया ॥ २ ॥ नकश्चिद्विद्यतेभेदोद्वैतैक्यकलनात्मकः ॥ ब्रह्मजीवमनोमायाकर्तृकर्मजगद्दृशाम् ॥ ३ ॥ अपारावारविस्तारसंवित्सलिलवल्गनैः ॥ चिदेकार्णवएवायंस्वयमात्माविजृंभते ॥ ४ ॥ असत्यमस्थैर्यवशात्सत्यंसंप्रतिभासतः ॥ यथास्वप्नस्तथाचित्तंजगत्सदसदात्मकम् ॥ ५ ॥

स्तदाधारतद्भोग्यभुवनानिचपुनःपुनर्भवंतीत्यर्थः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेचतुःषष्टितमःसर्गः ॥६४ ॥ ॥ ७ ॥ ॥ मनसोभोग्यवर्गस्यभोक्तुर्मूलस्यचाधुना ॥ विमृश्यतत्त्वंचिन्मात्रपरिशेषःप्रदर्श्यते ॥ १ ॥ तत्रादौसर्वकल्पनानांचिदनतिरेकंवक्तुंमूलभूतस्यमनसउत्पत्तिस्थित्योःकारणानन्यसत्ताकत्वात्तन्मात्रत्वमाह ॥ परस्मादिति ॥ १ ॥ द्वैताभासस्यमनोधीनत्वमाह ॥ भावाभावेति ॥ इदमित्थंभवतिइत्थंनेत्येवंभावाभावयोर्विषययोर्लसंतीदोलेवपरिवृत्तिर्यस्येतिपूर्वान्वयि ॥ तेनचित्तेनपूर्वानुभूतोगंधःस्मर्यमाणोयथाइच्छयामनोरथेनासन्नप्यवलोक्यतेतद्वत् ॥ २ ॥ तथाचमनःकल्पितोभेदोमनोऽपगमादपगच्छतीत्याह ॥ नकश्चिदिति ॥ ३ ॥ भेदापगमेशिष्टमात्मस्वरूपंदर्शयति ॥ अपारेति ॥ संविल्लक्षणस्यसलिलस्यवल्गनैरपरिच्छेदेनप्रसारैः ॥ ४ ॥ ननुचित्तजगतोर्बाधेकुतःसत्परिशेषइत्याशंक्यस्थिरास्थिरोभयसंवलितत्वेनजगतःसदसदात्मकत्वादस्थिरांशबाधेस्थिरपरिशेषोपपत्तिरित्याशयेनाह ॥ असत्यमिति ॥ स्वप्नेअस्थिरविषयांशबाधेपिस्थिरतद्द्रष्टृपरिशेषदर्शनात्तद्वदित्यर्थः ॥ ५ ॥

परस्मात्कारणादेव आभोगिमनः प्रथमंउत्थितं तेत्स्थं ? वास्थितिंगतं मननात्मकं प्रथमंउत्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वत्यंतासतोपिनबाधोदृष्टइत्याशंक्यतयोर्बाधयोग्यामनिर्वचनीयतामाह ॥ नसदिति ॥ ननुमिथ्यात्वेकथंबहूनामेकाकारतातत्राह ॥ अथेति ॥ अथेतितथापीत्यर्थे ॥ तथापिसामाजिकधीसमूहानामिंद्रजालमायाक्षुब्धानामेकाकारताभ्रमवदुत्थितइत्यर्थः ॥ ६ ॥ कुतस्तर्हिचिरकालस्थायितास्यतत्राह ॥ दीर्घइति ॥ मनोबलात्मनःकृतासक्तिबलात् ॥ ७ ॥ नन्वात्मास्वपूर्णानंदभावप्रच्युतिहेतुंसर्वदुःखनिदानंस्वस्यमनोभावमेवकुतोनानुशोचतितत्राह ॥ अनात्मालोकनादिति ॥ नआत्मालोकनमनात्मालोकनमात्मविषयकमज्ञानंअनात्मनामालोकनंदर्शनंचतस्मान्निमित्ताच्चित्तंचित्तभावमापन्नोप्यात्माचित्तत्वंचित्तभावकृतानर्थंनानुशोचति ॥ यथाबालोवेतालकल्पनाद्भयेसम्यक्कल्पितेसम्यङ्निरूढेसतितदभिनिविष्टचित्तत्वात्तद्धेतुंवेतालकल्पनांनानुशोचतितद्वदित्यर्थः ॥ ८ ॥ तथाचचितश्चेत्योन्मुखत्वस्वभावएवानर्थपरंपरामूलमित्याह ॥ अनाख्यस्येत्यादिना ॥ ९ ॥ १० ॥ देहादौमोहतोहंममेत्यभिमानतः ॥ ११ ॥ इयंसर्वाप्यनर्थपरंपराजीवब्रह्मभेदभ्रममूलत्वात्तदैक्यबोधेनतद्भ्रमबाधेबाध्यतइत्याशयेनभेदमपवदति ॥

नसन्नासन्नसंजातश्चेतसोजगतोभ्रमः॥अथधीसमवायानामिंद्रजालमिवोत्थितः॥६॥दीर्घःस्वप्नःस्थितिंयातःसंसाराख्योमनोबलात्॥ असम्यग्दर्शनात्स्थाणाविवपुंस्त्वप्रत्ययोमुधा॥७॥ अनात्मालोकनाच्चित्तंचित्तत्वंनानुशोचति॥वेतालकल्पनाद्बालइवसंकल्पितेभये॥८॥ अनाख्यस्यस्वरूपस्यसर्वाशातिगतात्मनः॥ चेत्योन्मुखतयाचित्तंचित्ताज्जीवत्वकल्पनम्॥९॥जीवत्वादप्यहंभावस्त्वहंभावाच्चचित्तता॥ चित्तत्वादिंद्रियादित्वंततोदेहादिविभ्रमाः॥१०॥ देहादिमोहतःस्वर्गनरकौमोक्षबंधने॥बीजांकुरवदारंभसंरूढेदेहकर्मणोः॥११॥द्वैतंयथानास्तिचिदात्मजीवयोस्तथैवभेदोस्तिनजीवचित्तयोः॥यथैवभेदोस्तिनजीवचित्तयोस्तथैवभेदोस्तिनदेहकर्मणोः॥१२॥कर्मैवदेहोननुदेहएवचित्तंतदेवाहमितीहजीवः॥सजीवएवेश्वरचित्सआत्मासर्वःशिवस्त्वेकपदोक्तमेतत्॥१३॥ ॥इत्यार्षेवा०वा० दे० मो०उ०ली० जीवविचारोनामपंचषष्टितमःसर्गः॥६५॥ ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥एवमेकंपरंवस्तुरामनानात्वमेत्यलम्॥ नानात्वमिवसंजातंदीपाद्दीपशतंयथा॥१॥ यथाभूतमसद्रूपमात्मानंयदिपश्यति॥ विचार्यतेंतस्तदनुभावहीनंनशोचति॥२॥

द्वैतमिति ॥ चिदात्माब्रह्मजीवश्चतयोर्द्वैतंभेदः ॥ १२ ॥ सकलशास्त्रविचाररहस्यमेकोक्त्यैवसंक्षिप्यस्फुटमाह ॥ कर्मैवेति ॥ १३ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेपंचषष्टितमःसर्गः ॥ ६५ ॥ ॥ ७ ॥ ॥ मनोमात्रविलासत्वंद्वैतस्यात्रप्रपंच्यते ॥ इष्टत्यागात्प्रबोधाच्चसाज्ञानमनसःक्षयः ॥ १ ॥ एवंचेत्योन्मुखतयाचित्तमित्यादिवर्णितक्रमेण ॥ तत्रदृष्टांतमाह ॥ नानात्वमिति ॥ नानात्वंसंजातंसंप्राप्तंदीपशतम् ॥ अथवानकेवलंचेत्यस्यैवनानात्वंसंजातंकिंतुएवमुक्तदिशाचितोपिप्रत्युपाधिभेदंनानात्वमिवसंजातम् ॥ तत्राग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूवेतिश्रुत्युक्तंदृष्टांतमाह ॥ दीपादिति ॥ १ ॥ यथाऽस्यचित्ताधीनजीवत्वकल्पनयाबंधएवंचित्ताधीनाभ्यामेवविचारतत्त्वबोधाभ्यांमुक्तिरपीतिगूढाशयेनाह ॥ यथाभूतमिति ॥ आदौयदिविचार्यतेतदनुभावोद्वैताभिनिवेशस्तद्धीनंअतएवयथाभूतंयथास्थितंअसद्रूपम् ॥ रूपग्रहणंनाम्नोप्युपलक्षणम् ॥ नामरूपशून्यमित्यर्थः ॥ तथाविधमात्मानंपश्यतितदानशोचति ॥ तरतिशोकमात्मविदितिश्रुतेरित्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुविचारेणचित्तोपशमेपिकथंसर्वद्वैतोपशमस्तत्राह ॥ चित्तमात्रमिति ॥ नरोजीवः ॥ तस्यअचेत्यमानेद्वैतसत्ताभावाच्चित्तोपरमेद्वैतोपरमसिद्धिरित्यर्थः ॥ ३ ॥ चित्तभ्रमो
पादानकस्यजगतस्तदतिरिक्तस्वरूपाभावादप्युपरमसिद्धिरित्याशयेनाह ॥ पत्रमात्रादिति ॥ पत्रग्रहणंत्वक्कांडमूलानामप्युपलक्षणम् ॥ अन्यत्स्वरूपमितिशेषः ॥ ४ ॥ उक्त
मेवप्रपंचयति ॥ जायतइति ॥ ५ ॥ बुद्बुदोल्लासेनभसिअनेकसहस्रबुद्बुदाकारभ्रमजनने ॥ तथाचित्तस्यब्रह्मांडबुद्बुदोल्लासे ॥ ६ ॥ मलेनतिमिरेणाविलंकलुषमक्षिपश्यति ॥
चेतनंचित्तंतस्यकलाभ्रांतिजननशक्तिस्तयाआक्रांतापरवशीकृताजीवचित् ॥ ७ ॥ क्षीबोमदिरामत्तः ॥ ८ ॥ लीलयाभ्रमाद्भ्रमणात् ॥ कुंभकृत्कुलालस्तदीयचक्रवत् ॥ ९ ॥
चित्ताधीनप्रतीतिकालिकैवद्वैतसत्ताचित्तोपरमेउपरमतीत्याह ॥ यदेति ॥ १० ॥ प्रतीतिकालेपिसानपृथगस्तीत्याह ॥ यदिति ॥ तस्याश्चितइतरज्जडरूपम् ॥ चित्तस्यतर्हिकु

चित्तमात्रंनरस्तस्मिन्गतेशांतमिदंजगत्॥ उपानद्गूढपादस्यननुचर्मास्तृतैवभूः॥ ३॥ पत्रमात्राहतेनान्यत्कदल्याविद्यतेयथा॥ भ्रममा
त्राहतेनान्यज्जगतोविद्यतेतथा॥ ४॥ जायतेबालतामेतियौवनंवार्द्धकंततः॥ मृतिंस्वर्गंचनरकंभ्रमाच्चेतोहिनृत्यति॥ ५॥ विचित्रबुद्बु
दोल्लासेस्वात्मनोव्यतिरेकिणि॥ यथासुरायाःसामर्थ्यंतथाचित्तस्यसंसृतौ ॥ ६॥ यथाद्वित्वंशशांकादौपश्यत्यक्षिमलाविलम्॥ चिच्चे
तनकलाक्रांतातथैवपरमात्मनि॥ ७॥ यथामदवशाद्भ्रांतान्क्षीबःपश्यतिपादपान्॥ तथाचेतनविक्षुब्धान्संसारांश्चित्तपश्यति ॥ ८॥
यथालीलाभ्रमाद्बालाःकुंभकृच्चक्रवज्जगत्॥ भ्रांतंपश्यंतिचित्तात्तुविद्धिदृश्यंतथैवहि ॥ ९॥ यदाचिच्चेततिद्वित्वंतदाद्वैतैक्यविभ्रमः॥ य
दानचेततिद्वैतंतदाद्वैतैक्ययोःक्षयः॥१०॥ यच्चेत्यतेतदितरच्चातिरिक्तंचितोस्तिन॥ किंचिन्नास्तीतिसंशांत्याचितःशाम्यतिचेतनम्॥११॥
चिद्घनेनैकतामेत्ययदानिष्ठतिनिश्चलः॥ शाम्यन्व्यवहरन्वापितदासंशांतउच्यते ॥ १२ ॥ तन्वीचेतयतेचेत्यंघनाचिन्नांगचेतति॥ अल्प
क्षीबःक्षोभमेतिघनक्षीबोहिशाम्यति॥ १३॥ चिद्घनैकप्रपातस्यरूढस्यपरमेपदे॥ नैरात्म्यशून्यवेद्याद्यैःपर्यायैःकथनंभवेत्॥ १४॥

तःशांतिस्तत्राह ॥ किंचिदिति ॥ विषयापह्नवेनिरिंधनाग्निरिवच्चित्तंस्वयमेवशाम्यतीत्यर्थः ॥ ११ ॥ जीवन्मुक्तस्तर्हिकदाभवतितत्राह ॥ चिद्घनेनेति ॥ शाम्यन्समाधिलीनः
॥ १२ ॥ नन्वल्पज्ञचितश्चिद्घनैक्येसर्वज्ञतैवस्यान्ननिर्विषयतालक्षणासंशांतिरितिचेत्तत्राह ॥ तन्वीति ॥ अंगेतिसंबोधने ॥ घनक्षीबोत्यंतमत्तःशाम्यतिनिर्व्यापारोभवति ॥
अयंभावः ॥ चितःसविषयतानकेवलचित्त्वप्रयुक्ताकिंत्वविद्याविक्षिप्तचित्त्वप्रयुक्तासाचज्ञानसमाधिदार्ढ्याभिव्यक्तचिद्घनैक्येनाविद्याविक्षेपापगमेअपैत्येव ॥ यात्वीश्वरादी
नांसर्वज्ञतासापिमायिक्येवनवास्तवीतिनकश्चिद्दोषइति ॥ १३ ॥ एतदेवाभिप्रेत्याह ॥ चिद्घनैकेति ॥ चिद्घनेनएकप्रपातोऽनन्यविषयतानैरंतर्यंचयस्यतथाविधस्यअतएवपर
मेपदेतस्मिन्रूढस्येतिनिर्विकल्पसमाधिसाक्षात्कारावुक्तौ ॥ तथाविधस्यचित्तस्यनैरात्म्यंस्वरूपशून्यताशून्यवेद्यंनिर्विषयतेत्यादिपर्यायैः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चितिचेत्यजडसंसरणक्रमरूपताकल्पनापिचित्तनिमित्तैवेतितदुपशमेतदपगमोपपत्तिरित्याशयेनाह ॥ चिदिति ॥ १५ ॥ ननुचेतनंचित्तव्यापारःसमाधिज्ञानाभ्यासादुपरमतु चित्तंत्वनुपरतमेवेत्याशंकायामाह ॥ स्वभावादिति ॥ औष्ण्योपरमेवह्निपरिशेषवद्व्यापारोपरमेनचित्तंपरिशिष्यतेनहितदंतर्गतंस्वरूपांतरंकेनचिदनुभूयतइत्याह ॥ अंतरिति ॥ १६ ॥ एवंचित्तापगमेचितिचेत्याप्रथनादप्रथमानस्यचसाधकांतराभावादसिद्धेश्चतदप्यपगतमेवेत्याशयेनाह ॥ चेत्यत्वमिति ॥ प्राक्तर्हिचेत्यप्रतिभासःकीदृक्कृतमाह ॥ रज्जिवति ॥ १७ ॥ एवंचरज्जुसर्पस्पंदइवचित्तस्पंदात्मकःसंसारोबोधमात्रेणचिकित्सितुंशक्यइत्याह ॥ संविदिति ॥ संरंभआयासः ॥ किंचनकश्चन ॥ १८ ॥ उत्क्रांतवासनो वासनामयचित्तशून्यः ॥ १९॥ संविन्मात्रस्यविवर्त्तःप्रत्यङ्मुखतयापरावृत्यस्वतत्त्वदर्शनंतेन ॥२०॥ संवित्परावृत्तौचेंद्रियनिग्रहोहेतुस्तत्रचविषयाभिलाषत्यागोहेतुरित्याशये

चिच्चेतनेनचेत्यत्वमेत्येवंपश्यतिभ्रमम् ॥ जातोजीवामिपश्यामिसंसरामीत्यसन्मयम् ॥ १५ ॥ स्वभावाद्व्यतिरिक्तंतुनचित्तस्यास्तिचेतनम् ॥ स्पंदादृतेयथावायोरंतःकिंनामचेत्यते ॥ १६ ॥ चेत्यत्वंसंभवत्येवंकिंचिद्यच्चेत्यतेचिता ॥ रज्जुसर्पभ्रमाभासंतमविद्याभ्रमंविदुः ॥ १७॥ संविन्मात्रचिकित्स्येस्मिन्व्याधौसंसारनामनि ॥ चित्तमात्रपरिस्पंदेसंरंभोनचकिंचन ॥ १८॥ यदिसर्वंपरित्यज्यतिष्ठस्युत्क्रांतवासनः॥ अमुनैवनिमेषेणतन्मुक्तोसिनसंशयः ॥ १९ ॥ यथारज्ज्वांभुजंगाभाविनश्यत्येववीक्षणात्॥ संविन्मात्रविवर्त्तेननश्यत्येवहिसंसृतिः॥२०॥ यत्राभिलाषस्तन्नूनंसंत्यज्यस्थीयतेयदि॥प्राप्तएवांगतन्मोक्षःकिमेतावतिदुष्करम्॥ २१॥ अपिप्राणांस्तृणमिवत्यजंतीहमहाशयाः॥ यत्राभिलाषस्तन्मात्रत्यागेकृपणताकथम्॥ २२॥ यत्राभिलाषस्तत्त्यक्त्वाचेतसानिरवग्रहम्॥ प्राप्तंकर्मेंद्रियैर्गृह्णंस्त्यजन्नष्टंचतिष्ठभोः॥ २३॥ यथाकरतलेबिल्वंयथावापर्वतःपुरः॥ प्रत्यक्षमेवतस्यालमजत्वंपरमात्मनः ॥ २४॥ आत्मैवभातिजगदित्युदितस्तरंगैःकल्पांतएकइववारिधिरप्रमेयः॥ज्ञातःसएवहिददातिविमोक्षसिद्धिंत्वज्ञातएवमनसेचिरबंधनाय॥ २५॥ ॥इत्यार्षेवा० वा० दे० मो० उ० ली० संसृतिपरमयोगोनामषट्षष्टितमःसर्गः॥ ६६॥ ॥७॥

नाह ॥ यत्राभिलाषइति ॥ २१ ॥ विषयत्यागंप्ररोचयति ॥ अपीति ॥ २२ ॥ निरवग्रहंनिरासंगम् ॥ कथंतर्हिजीवनंतत्राह ॥ प्राप्तमिति ॥ नष्टंत्यजन्नानुशोचन्निितियावत् ॥२३॥ तस्यउक्तलक्षणस्यतत्त्वविदःअजत्वंजन्मादिविक्रियाशून्यब्रह्मत्वंअलमत्यंतंप्रत्यक्षमेवनतिरोहितमित्यर्थः ॥२४॥ उक्तार्थत्रयंसंक्षिप्योपसंहरति ॥ आत्मैवेति ॥ आत्मैवाज्ञदृशांजगदितिवेषेणउदितआविर्भूतःसन्भाति ॥ यथाकल्पांतवारिधिस्तरंगभेदैर्भातितद्वत् ॥ सएवज्ञातोज्ञानाभिव्यक्तःसन्विमोक्षलक्षणांसिद्धिंपुरुषार्थंददाति ॥ अज्ञातस्तुप्रथमंमनसेसर्वानर्थनिदानमनोभावायतत्प्रयुक्तचिरबंधनायचभवतीतिशेषः ॥ २५ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेषट्षष्टितमःसर्गः ॥ ६६ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोक्तायःकथितोजीवस्तत्स्वरूपमिहोच्यते ॥ व्यष्टिप्राधान्यतस्तस्यकरणादेश्वसंभवः ॥. १ ॥ समष्टिप्राधान्येनोक्तंजीवंव्यष्टिप्राधान्येनस्फुटंजिज्ञासुःश्रीरामःपुनःपृच्छति ॥ मनस्त्वेति ॥ मनःस्वष्टातत्तादात्म्यस्यस्वस्मिन्नध्यासान्मनस्त्वयोग्यःपरमात्मनःसंबंधीकोभवेत् ॥ किमंशउतकार्यमुतसएव ॥ यदिसएवतर्हिकथंवास्मिन्समुत्पन्नः ॥ किंपरिणामेनोतविवर्त्तेन ॥ आद्येअनित्यताद्वितीयेबाध्यता ॥ यद्यनुत्पन्नस्तर्हिभोक्तुरसिद्धिः ॥ ब्रह्मणोऽशनायाद्यत्ययश्रुतेः ॥ यद्यन्यस्तर्हिकोवा ॥ तत्सजातीयउतविजातीयइतिविकल्पेनैकोपिपक्षोघटतइतिसंदेहपरिहारायपुनर्वदेत्यर्थः ॥ १ ॥ अचिंत्यानंतशक्तिसंपन्नमायाशक्तिशबलंब्रह्मपरमार्थतआविष्कृतमभिन्नमपिस्वस्मिन्नेवमाययाद्वितीयतामिवापन्नेऔपाधिकविकारानारोप्यानंतजीववेषेणसर्वज्ञेश्वरभावेनचक्रीडितुंसमर्थमितिनकश्चिद्दोषइत्याशयेनवसिष्ठःसमाधातुमुपक्रमते ॥ समस्तेति ॥ सर्वेश्वरंसर्वसमर्थम् ॥ २ ॥ चिरमनादिकालाच्चेतनरूपिणींचित्तसंस्कारोपहितचिद्रूपाम् ॥ ३ ॥ आत्मनिस्वाभाविकंद्वितीयत्वमेवोत्तरसंसारप्रवृत्तेर्मुख्यंकारणंपूर्वपूर्वसंकल्पवासनावासितजीव

॥श्रीरामउवाच॥ ॥मनस्त्वयोग्योजीवोयंकोभवेत्परमात्मनः॥ कथंवास्मिन्समुत्पन्नःकोवायंवदमेपुनः॥ १ ॥ ॥श्रीवसिष्ठउवाच॥ समस्तशक्तिखचितंब्रह्मसर्वेश्वरंसदा॥ययैवशक्त्यास्फुरतिप्राप्तांतामेवपश्यति॥२॥ स्वयंयांवेत्तिसर्वात्माचिरंचेतनरूपिणीम्॥ साप्रोक्ताजीवशब्देनसैवसंकल्पकारिणी॥ ३ ॥स्वभावात्कारणंद्वित्वंपूर्वसंकल्पचित्स्वयम्॥ नानाकारणतांपश्चाद्यातिजन्मस्मृतिस्थितेः॥४॥ श्रीरामउवाच॥ ॥एवंस्थितेमुनिश्रेष्ठदैवंनामकिमुच्यते॥किमुच्यतेतथाकर्मकारणंचकिमुच्यते॥५॥ ॥श्रीवसिष्ठउवाच॥ ॥स्पंदास्पंदस्वभावंहिचिन्मात्रमिहविद्यते॥ खेवातइवतत्स्पंदात्सोल्लासंशांतमन्यथा॥६॥.चित्त्वंचित्तंभावितंसत्स्पंदइत्युच्यतेबुधैः॥ दृश्यत्वाभावितंचैतदस्पंदनमितिस्मृतम्॥७॥स्पंदात्स्फुरतिचित्सर्गोनिःस्पंदाद्ब्रह्मशाश्वतम्॥जीवकारणकर्माद्याचित्स्पंदस्याभिधास्मृता॥८॥

चैतन्यंतुपश्चात्तनवैचित्र्यमात्रहेतुरित्याह ॥ स्वभावादिति ॥ ४ ॥ एतावतैवप्रश्नशेषस्याप्युत्तरमुक्तप्रायमितिमन्यमानोरामउक्तजीवस्यजन्मादिनिमित्तदैवकर्मकारणानितत्त्वतोजिज्ञासुःपृच्छति ॥ एवमिति ॥ एवमुक्तविधयाजीवस्वरूपेस्थितेबुद्धौप्रतिष्ठितेसतिपृच्छामीतिशेषः ॥ ५ ॥ स्पंदस्वभावंरजःप्रधानमायोपहितम् ॥ अस्पंदस्वभावंशुद्धम् ॥ सोल्लासंस्रष्टृत्वुन्मुखंभवतीतिशेषः ॥ अन्यथास्पंदाभावेतुशांतमेवावतिष्ठतइत्यर्थः ॥ ६ ॥ तत्राद्यंविवृणोति ॥ चित्त्वमिति ॥ स्वीयंस्वाभाविकंचित्त्वमेवचित्तंचेत्याकारंस्वाविद्ययाभावितंकल्पितंचेत्तदाकारंसत्स्पंदइत्युच्यतइत्यर्थः ॥ द्वितीयंविवृणोति ॥ दृश्यत्वेति ॥ ७ ॥ स्पंदास्पंदाभ्यामेवचितःप्रपंचाप्रपंचात्मतेतिनिष्कर्षेस्पंदस्यैवजीवकारणकर्मदैवादिनाम्नाव्यपदेशइतिफलितमित्याह ॥ स्पंदादिति ॥ चिदितिपृथक्पदम् ॥ तत्रप्राणस्पंदविवक्षयाजीवःस्वांतर्गतकार्याणामाविर्भावनलक्षणस्पंदविवक्षयाकारणंशरीरादिस्पंदविवक्षयाकर्मतदेवसूक्ष्मावस्थंचिरस्थितंफलारंभोन्मुखंदैवमितिभेदइतिभावः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांचानुभवसत्तालंबनेनैवसत्तास्वकार्यक्षमताचेत्याह ॥ यएवेत्ति ॥ ९॥ यत्पृष्टंकथंवास्मिन्समुत्पन्नइतितस्योत्तरमाह ॥ कृतद्वित्वेति ॥ तत्तत्कर्मानुसारेणप्राङ्मरणकालेबुद्धावुपस्थितंदेवनरतिर्यगादिदेहंपूर्वसंकल्पानुसारिविविधभोग्यपदार्थभावंचयातिप्राप्नोति ॥ १० ॥ नानाविधानियोनिसहस्राणिकारणानिजन्महेतूनियस्यतद्भावंचिरायातःसन्कश्चिन्मंदशास्त्रीयप्रवृत्तिश्चित्स्पंदश्चिरान्मुच्यते ॥ संपन्नज्ञानाधिकारस्त्वेकेनजन्मना ॥११॥ यदुक्तंनानाकारणतांयातइतितत्प्रकारमाह ॥ स्वभावादिति ॥ चितःस्वभावोयेनोपाधिनासंबध्यतेतद्रूपेणस्फुरणम् ॥ यथाआलोकोनीलपटेनीलरूपोरक्तपटेरक्तरूपःपीतेतद्रूपइति ॥ तादृशस्वभाववशादेवदेहजन्मकारणैरन्नरसैस्तद्वारापित्रादिशरीरैश्चाद्वित्वमैक्यंसमेत्यसंप्राप्यक्रमेणशुक्रशोणितादिरूपेणपरिणतंशनैःस्वर्गमोक्षनरकवधबंधादिकारणदेहतामधिगच्छतिप्राप्नोतीत्यर्थः ॥ अपगच्छतीतिपाठेस्वर्गादिहेतुंदेहभावंप्राप्तुं

यएवानुभवात्मायंचित्स्पंदोस्तिसएवहि ॥ जीवकारणकर्माख्योबीजमेतद्धिसंस्तेः ॥ ९ ॥ कृतद्वित्वचिदाभासवशाद्देहमुपस्थितम् ॥ संकल्पाद्विविधार्थत्वंचित्स्पंदोयातिसृष्टिषु ॥ १० ॥ नानाकारणतांयातश्चित्स्पंदोमुच्यतेचिरात् ॥ कश्चिज्जन्मसहस्रेणकश्चिदेकेनजन्मना ॥ ११ ॥ स्वभावात्कारणाद्वित्वंचित्समेत्याधिगच्छति ॥ स्वर्गापवर्गनरकबंधकारणतांशनैः ॥ १२ ॥ हेम्नीवकटकादित्वंकाष्ठलोष्टसमस्थितौ ॥ देहेतिष्ठतिनानात्वंजडेभावविकारजम् ॥ १३ ॥ अजातमप्यसद्रूपंपश्यतीदंमनोभ्रमः ॥ जातःस्थितोमृतोस्मीतिभ्रमार्त्तःपत्तनंयथा ॥ १४ ॥ अहंममेत्यसद्रूपमेवचेतःप्रपश्यति ॥ अदृष्टपरमार्थत्वादाशाविवशसंस्थिति ॥ १५ ॥ मथुराधिपतेराज्ञोयथाश्वपचसंभ्रमः ॥ आसीदेवंहिचित्तस्यस्फुरतीयंजगत्स्थितिः ॥ १६ ॥ सर्वमेवमनोमात्रभ्रांत्युल्लासविजृंभणम् ॥ इदंजगत्तयारामप्रस्फुरत्यंबुभंगवत् ॥ १७ ॥ शिवात्माकारणात्पूर्वंचिच्चेत्यकलनोन्मुखी ॥ उदेतिसौम्याज्जलधेःपयःस्पंदोमनागिव ॥ १८ ॥ स्फुरणाज्जीवचक्रत्वमेतिचित्तोर्मितांदधत् ॥ चिद्वारिब्रह्मजलधौकुरुतेसर्गबुद्बुदान् ॥ १९ ॥

शुक्रादिरूपेणपितृदेहादपगच्छतिनिर्गच्छतीत्यर्थः ॥ १२ ॥ तथाचोपाधीनांमेलनेनैक्येपितापुत्रजीवयोर्भेदोनलक्ष्यतेउपाधिपृथग्भावेतुभेदःप्रतीयतइतिजीवानांपरस्परभेदउपाधेरेवधर्मोनचैतन्यस्येत्याह ॥ हेम्नीवेति ॥ उपाधीनामपिभूतविकारत्वाद्भूतानांचोत्तरोत्तरंपूर्वपूर्वभूतविकारत्वादखंडाकाशमात्रत्वेनसत्यभेदावकाशइत्याशयेनहेमकटकदृष्टांतोपन्यासः ॥ जन्मादयःषड्भावविकारास्तेभ्योजातंनानात्वंभेदः ॥ १३ ॥ एवंभेदस्यमृषात्वेपिजन्मादिभेदप्रतीतिर्मनोभ्रमएवेत्याह ॥ अजातमपीत्ति ॥ १४ ॥ सर्वभेदप्रत्ययानामहंममेतिभेदकल्पनामूलंतस्याअपिपूर्णात्मस्वरूपाज्ञानंभोगाशासंस्काराश्चक्रमेणमूलमित्याशयेनाह ॥ अहमिति ॥ १५ ॥ उक्तेऽर्थेवक्ष्यमाणलवणोपाख्यानार्थोनिदर्शनमित्याह ॥ मथुरेति॥ १६॥ १७॥ उक्तमेवारोपक्रमंपुनःप्रत्येकंदृष्टांतैर्बोधयति ॥ शिवादित्यादिना ॥ १८॥ स्फुरणात्स्पंदनात् ॥ जीवचक्रत्वंजीवस्वरूपामावर्त्तताम्॥ १९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेसौम्यस्वबोधमात्रेणासिमायाबंधनंहंतीतिसिंहस्तथाविधस्यासिंहवदचिंत्यशक्तिमतोवाब्रह्मणोयन्माययाविजृंभणंगात्रविनमनंसएवस्वात्मस्थःसंविदाभासोजीवइवस्थितंतदे वसंचेत्यंविषयरूपमिवस्थितंनपृथगस्तीत्यर्थः॥२०॥ कैरुपाधिभिस्तर्हिजीवमनोबुद्धिचित्ताहंकारादिशब्दभेदस्तानाह ॥ चित्संवित्त्येति॥ चित्संवित्त्याचिदाभासात्मनाअध्यव सायाद्बुद्धिःस्मरणाच्चित्तमभिमानादहंकारोविक्षेपशक्तित्वान्माया ॥ आदिपदात्प्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुरित्यादिश्रुत्युक्ताभिधासंग्रहः ॥ २१ ॥ तत्रसंकल्प प्रधानस्यशब्दादिसूक्ष्मभूतकल्पनापूर्वकंजगत्कल्पकत्वमाह ॥ तन्मात्रेति २२ ॥ मनःकल्पितस्यचमानोरथिकवस्तुवन्मिथ्यात्वमेवेत्याह ॥ यथेति ॥ शून्येआकाशेदृशोदृष्टेः स्फाराद्विस्तारात् ॥ २३ ॥ तत्साक्षिणस्तुनित्यशुद्धतैवेत्याह ॥ शुद्धइति ॥ अशनायाद्यभावान्नित्यतृप्तइव ॥ २४ ॥ तस्यैवेंद्रियद्वारैर्बहिःसंसृतिर्जाग्रत् अंतरहंभाववासितस्य

स्वस्थःसौम्यसमस्यैतद्यसिंहस्यविजृंभणम् ॥ ब्रह्मणःसंविदाभासस्तत्संचेत्यमिवस्वयम् ॥ २० ॥ चित्संवित्त्योच्यतेजीवःसंकल्पात्स मनोभवेत्॥ बुद्धिश्चित्तमहंकारोमायेत्याद्यभिधंततः ॥ २१ ॥ तन्मात्रकल्पनापूर्वंतनोतीदंजगन्मनः॥ असत्यंसत्यसंकाशंगंधर्वनगरं यथा॥ २२ ॥ यथाशून्येदृशःस्फारान्मुक्तावल्यादिदर्शनम्॥ यथास्वप्नेभ्रमश्चैवतथाचित्तस्यसंसृतिः॥ २३ ॥ शुद्धआत्मानित्यतृप्तइव शांतसमस्थितः॥ अपश्यन्पश्यतीवेमंचित्ताख्यंस्वप्नविभ्रमम् ॥ २४ ॥ संसृतिर्जाग्रदित्युक्तंस्वप्नंविदुरहंकृतिम्॥ चित्तंसुषुप्तभावःस्या च्चिन्मात्रंतुर्यमुच्यते॥ २५ ॥ अत्यंतशुद्धेसन्मात्रेपरिणामनिरामयम् ॥ तुर्यातीतंपदंतत्स्यात्तत्स्थोभूयोनशोचति ॥ २६ ॥ तस्मिन्सर्व मुदेतीदंतस्मिन्नेवप्रलीयते॥ नचेदंनचतत्रेदंदृष्टौमुक्तावलीयथा॥ २७ ॥ अरोधकत्वात्खंहेतुर्यथावृक्षसमुन्नतेः॥ अकर्त्तापितथाकर्ता चेतनाब्धिर्जगत्स्थितेः॥ २८ ॥ सन्निधानाद्यथालौहःप्रतिबिंबस्यहेतुताम्॥ यात्यादर्शस्तथैवायंचिन्मयोप्यर्थवेदने॥ २९ ॥ बीजमंकुर पत्रादियुक्त्यायद्वत्फलंभवेत्॥ चिन्मात्रंचित्तजीवादियुक्त्यातद्वन्मनोभवेत्॥ ३० ॥

हृदयात्कंठपर्यंतंसंसृतिस्वप्नः स्मृतिबीजवासनामात्रशेषेणहृदिस्थितिःसुषुप्तिस्तदतिक्रमस्तुतुर्यतेत्याह ॥ संसृतिरिति ॥ २५ ॥ एवंशोधितस्यप्रत्यक्त्वस्यब्रह्मात्मनिपरिणत्या निरामयंयथास्यात्तथास्थितिरेवतुर्यातीतत्वमित्याह ॥ अत्यंतेति ॥ २६ ॥ अशोधिततत्पदार्थेप्रतिष्ठाशंकावारणायतच्छोधनंतज्जलानितिशांतउपासीतेतिश्रुतिदर्शितदिशादर्श यति ॥ तस्मिन्निति ॥ नचेदंतदितिशेषः ॥ आद्योब्रह्मणिजगत्तादात्म्यस्यनिषेधोद्वितीयस्तुसंसर्गस्य ॥ २७ ॥ यदिजगत्संबंधशून्यस्तर्हिकथंजगद्धेतुरितिश्रुत्योक्तस्तत्राह ॥ अरो धकत्वादिति ॥ समुन्नतेरभिवृद्धेः ॥ मायाकृतसर्गेअनिवारकत्वमात्रेणकर्तृत्वोपचारइत्यर्थः ॥ २८ ॥ लौहोलोहविकारआदर्शः ॥ २९ ॥ कथंतर्हिसर्वंनयुगपज्जायतेतत्राह ॥ बीजमिति ॥ युक्तिरत्रक्रमः ॥ तथैवानादिनियतिस्थितेरित्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुप्रलयेसर्वंविलयेतथैवस्वस्थाचित्सदाकुतोनावतिष्ठतेतत्राह ॥ यथेति ॥ यथाअनुशयिजीवसंयुक्ताविप्रुड्वृष्टिजलबिंदुर्वृक्षसस्याद्यनुप्रविश्यपुनर्बीजंभवत्येवनोदास्तेतथाजीववासनावासिताचिदपिचेत्यचित्तादिसर्गात्मनापुनर्भवत्येवनतत्त्यक्त्वास्वस्थातिष्ठतीत्यर्थः ॥ ३१ ॥ ननुबीजेसूक्ष्मतयास्थितस्यतरोस्तद्बीजस्यचअबोधेबोधेवानतरुजननशक्तिरपैतितथाचित्तात्मतापन्नयोर्जगद्ब्रह्मणोरपितत्त्वतोबोधाबोधयोर्विशेषोनस्यादितिबोधवैफल्यमित्याशंक्याह ॥ यद्यपीति ॥ इयान्परिदृश्यमानस्तरुजननशक्तिभेदोस्तितथापिचित्तभूतयोर्जगद्ब्रह्मणोःसनास्त्येव ॥ यतोबीजतरुबोधमात्रेणनतात्त्विकमखंडितंरूपंव्यज्यते ब्रह्मबोधेनतुदीपेनरूपश्रीरिवतद्व्यज्यतेइतिइयान्भेदोवैलक्षण्यमस्तीत्यावृत्त्यापरेणसहयोज्यम् ॥ ३२ ॥ ३३ ॥ कुतोबोधस्येदृशसामर्थ्यमितिचेद्विचारजन्यत्वेनतत्वावगाहित्वादित्याशयेनाह ॥ यद्यदिति ॥ अविद्याआविद्यकंपटादि ॥ परंअधिष्ठानसत्ता

स्वतोबीजफलाविप्रुड्यथाबीजंपुनर्भवेत् ॥ तथाचिच्चेत्यचित्तादित्यक्त्वास्वस्थानतिष्ठति ॥ ३१ ॥ यद्यप्यबोधेबोधेवाबीजांतस्तरुबीजयोः ॥ इयान्भेदोस्तिनजगद्ब्रह्मणोरपिचित्तयोः ॥ ३२ ॥ तथापिव्यज्यतेबोधेसत्यात्मकमखंडितम् ॥ रूपश्रीरिवदीपेनचिन्मात्रालोकरूपियत् ॥ ३३ ॥ यद्यन्निखन्यतेभूमेर्यथातत्तन्नभोभवेत् ॥ यायाविचार्यतेविद्यातथासासापरंभवेत् ॥ ३४ ॥ स्फटिकांतःसन्निवेशःस्थाणुतावेदनाद्यथा ॥ शुद्धेनानापिनानेवतथाब्रह्मोदरेजगत् ॥ ३५ ॥ ब्रह्मसर्वंजगद्वस्तुपिंडमेकमखंडितम् ॥ फलपत्रलतागुल्मपीठबीजमिवस्थितम् ॥ ३६ ॥ ॥ श्रीरामउवाच ॥ ॥ अहोचित्रंजगदिदमसत्सदिवभासते ॥ अहोबृहदहोस्वस्थमहोस्फुटमहोतनु ॥ ३७ ॥ ब्रह्मणिप्रतिभासात्मातन्मात्रगुणगोलकः ॥ अवश्यायकणाभासोयथास्फुरतितद्भुतम् ॥ ३८ ॥ यथासौयातिवैपुल्यंयथाभवतिचात्मभूः ॥ यथास्वभावसिद्धार्थात्तथाकथयमेप्रभो ॥ ३९ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अत्यंतासंभवद्रूपमनन्यत्स्वस्वभावतः ॥ अत्यंताननुभूतंसत्स्वानुभूतमिवाग्रतः ॥ ४० ॥

मात्रम् ॥ ३४ ॥ स्फटिकांतर्वनादिसन्निवेशःस्थाणुताकौटस्थ्यंतद्वेदनाद्यथाभवतितथाशुद्धेब्रह्मोदरेअनानापिजगन्नानेवभातीतिशेषः ॥ ३५ ॥ पिंडंस्फटिकघनम् ॥ स्वप्रतिबिंबितवनफलपत्रलतादयस्तेषांपीठमाधारभूस्तदंतर्गतंबीजंचेत्येवंरूपमिवब्रह्मजगद्रूपंस्थितमित्यर्थः ॥ ३६ ॥ इत्थंवर्णितंजीवमनोबुद्धिचित्ताहंकारस्वरूपंतन्मात्रकल्पनांतंप्रासंगिकंजगतोमायामात्रत्वंचश्रुत्वाविस्मितोगुरुवचनविश्वासाज्जगतोमायामात्रत्वमनुवादेनानुमोदमानस्तन्मात्राणांसेंद्रियसमष्टिव्यष्टिस्थूलशरीरभावोत्पादक्रमंजिज्ञासुःपृच्छति ॥ अहोइत्यादिना ॥ ३७ ॥ ३८ ॥ वैपुल्यंसमष्टिव्यष्टिस्थूलदेहभावम् ॥ यथार्थस्वभावसिद्धादर्थादात्मवस्तुनःसकाशाद्यथाआत्मभूर्व्यष्टिसमष्टिस्थूलभुग्विश्ववैश्वानरात्मायथाभवतितथाकथयमेइत्यर्थः ॥ ३९ ॥ पृष्टंवर्णयितुंप्रथममत्यंतासंभाविताऽनिर्वचनीयस्थूलतांतसर्ववासनाविजृंभितजीवभावाविर्भावंसदृष्टांतंदर्शयति ॥ अत्यंतेत्यादिद्वाभ्याम् ॥ जीवलक्षणमत्यंतासंभवद्रूपमफुल्लांगोवस्तुतःफुल्लांगशून्योपिफुल्लांगोवेतालोयथाबालदृद्दिस्फुटमुदेतितथोदेतीत्यन्वयः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४१ ॥ अननुभूतमननायोगादनुभवस्यचमानमेयाधीनत्वान्मनोभावनिमित्तंमानमेयवासनोद्भवमाह ॥ मानेति ॥ ४२ ॥ मननवेदनान्मननवासनोद्भवाज्जीवोमनोभवति ॥ मन्वानोमनइतिश्रुतेरित्यर्थः ॥ ४३ ॥ तच्चित्तंमनस्तन्मात्रगोचरमननंस्वीयंस्वरूपवत्तन्मात्रात्मनाआविर्भूतंपश्यतीत्यर्थः ॥ अस्तनिमेषःअविच्छिन्नदृग्रूपःअनिललवप्रख्यःअतिसूक्ष्मः एषतन्मात्रात्माखांतरेचिदाकाशेस्फुरतिस्वतःप्रकाशमानेसतितत्स्फूर्त्यासंवेदनात्मकंस्रष्टिकालवशेनपंचीकरणद्वारोत्पादितं कांतंहिरण्मयत्वात्सूर्यवत्प्रकाशमानंअपरिच्छिन्नचिद्दृष्ट्याअवश्यायकणोपमंब्रह्मांडरूपंमनुष्यादिदेहरूपंचात्मनिपश्यतीत्यनुषज्जते ॥४४॥४५॥ तस्मिन्प्रथमंशब्दार्थविभागास्फूर्त्यासंमुग्धमहंताध्यासंततःसंसारतत्त्वस्मरणंचाह ॥ अहमिति ॥ अहंकिमितितत्त्वतोवामनुष्याद्याकारतोवाविशिष्यवेदनांनभुंक्तेतांतथाविधांसंविदंप्रथमंततःसार्थकंपुरुषार्थविचारसहितंप्राक्तनजन्मसहस्रस्मृत्यागर्भे

उल्लासफुल्लोफुल्लांगइतिबालवद्दिस्फुटम् ॥ यथोदेतितथोदेतिपरेब्रह्मणिजीवता ॥ ४१ ॥ मानमेयात्मिकाशुद्धासत्यैवासत्यवत्स्थिता ॥ भिन्नेवचनभिन्नास्याद्ब्रह्मणोबृंहणात्मिका ॥ ४२ ॥ यथाब्रह्मभवत्याशुजीवःकलनजीवितः ॥ तथाजीवोभवत्याशुमनोमननवेदनात् ॥ ४३ ॥ चित्तंतन्मात्रमननंपश्यत्याशुस्वरूपवत् ॥ एषसद्योनिललवप्रख्यःस्फुरतिखांतरे ॥ ४४ ॥ अस्तनिमेषोनुभवत्यवश्यायकणोपमम् ॥ संवेदनात्मकंकालकलितंकांतमात्मनि ॥ ४५ ॥ अहंकिमितिशब्दार्थवेदनाभोगसंविदम् ॥ संविदंतत्त्वशब्दार्थंजीवःपश्यतिसार्थकम् ॥ ४६ ॥ तादृक्षवेदनात्सोथरसशब्दार्थवेदनम् ॥ भाविजिह्वार्थनाम्नैकदेशेनुभवतिक्षणात् ॥ ४७ ॥ तादृक्षवेदनात्तेजःशब्दार्थोन्मुखतांगतः ॥ भविष्यन्नेत्रनाम्नैकदेशेभवतिभासनम् ॥ ४८ ॥ तादृक्षवेदनात्सोथघ्राणंतद्दृष्टिवेदनात् ॥ स्थितोयस्मिन्भवतीतितावद्दृश्यादितास्थिता ॥ ४९ ॥ एवंप्रायःसजीवात्माकाकतालीयवच्छनैः ॥ विशिष्टसंनिवेशत्वंभावितंपश्यतिस्वतः ॥ ५० ॥ सतस्यसन्निवेशस्यत्वसतोपिसतःसतः ॥ शब्दभावैकदेशत्वंश्रवणार्थेनविंदति ॥ ५१ ॥

जगत्तत्त्वशब्दार्थसंविदंचपश्यतीत्यर्थः ॥ ४६ ॥ तस्येंद्रियकल्पनांक्रमेणाह ॥ तादृक्षेत्यादिना ॥ तादृक्षवेदनात्पिंडेस्फुटाहंभाववेदनादितिसर्वत्रार्थः ॥ जिह्वाशब्दोरसनेंद्रियपरस्तदर्थस्यरसस्यनाम्नाउपलक्षितमितिशेषः ॥ एकदेशेमुखबिलादिप्रदेशे ॥ ४७ ॥ ४८ ॥ तद्दृष्टिर्घ्राणदृष्टिः ॥ इतिअनयारीत्यायस्मिन्श्रोत्रादिभावेपियावत्कालंस्थितोभवतितावत्कालंशब्दादिदृश्यंअस्तिउपभुंक्तेतच्छीलताअस्यस्थितेत्यर्थः ॥ ४९ ॥ तस्यसंघाताभिमानमाह ॥ विशिष्टेति ॥ भावितंप्राग्वासनाकल्पितम् ॥ ५० ॥ तस्यश्रोत्रादिभिःशब्दादिभोगेतत्तदिंद्रियतादात्म्याध्यासमाह ॥ सतस्येत्यादिना ॥ असतोऽपिसतःसतःसत्त्वेनसंपन्नस्य ॥ श्रवणक्रियालक्षणेनार्थेनप्रयोजनेनशब्दान्भावयतिग्राहयतीतिशब्दभावःश्रोत्रंतल्लक्षणंदेहैकदेशत्वंविंदतिलभते ॥ ५१ ॥ ॥१२२॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५२॥५३॥ एवमुक्तानुक्तेंद्रियमयैर्बाह्यार्थसत्ताप्रकटीकरणक्षमंइंद्रस्यपरमात्मनोलिंगत्वेनभाविनाभविष्यदिंद्रियाख्यम् ॥५४॥ जीवस्यसमष्टिरूपस्याद्यतनस्यव्यष्टिरूपस्य च ॥५५॥ ब्रह्मणएवाज्ञानाद्विविधातिवाहिकदेहभावोज्ञानात्तदपगमश्चेतिदर्शयति ॥ अनाख्येति ॥ इयमितिच्छेदः ॥५६॥ आतिवाहिकदेहादिमुखेनाध्यारोपापवादकल्पना प्यात्मव्युत्पादकव्यवहारदृशैवनपरमार्थदृशेत्याशयेनाह ॥ मात्रिति ॥५७॥ यदियथावेदनमेववस्तुतर्हिकोविशेषस्तत्राह ॥ सासंवित्तिरिति ॥ साब्रह्मत्ववेदनाख्यासंवित्तिर्नान्य जानभ्रांतिजेत्यर्थः ॥ ५८ ॥ यद्येवंतर्हिचिदेकरसेब्रह्मण्यज्ञानस्यैवायोगात्तदभावेजीवभेदकल्पकाभावेनब्रह्मात्मैकत्वस्यस्वतःसिद्धेर्वास्वातिरिक्तमोक्षफलस्यतत्प्रापकविचा

स्पर्शभावैकदेशत्वंत्वक्शब्दार्थेनविंदति॥ रसभावैकदेशत्वंरसनात्वेनविंदति॥५२॥ रूपभावैकदेशत्वंनेत्रार्थाकृतिपश्यति॥ गंधभावैकदेशत्वंनासिकात्वेनपश्यति॥५३॥ एवंभावमयैःसत्ताप्रकटीकरणक्षमम्॥ भविष्यदिंद्रियाख्यंसरंध्रंपश्यतिदेहके॥५४॥ इत्येवमादिजीवस्यराघवाद्यतनस्यच॥ उदेतिप्रतिभासात्मादेहएवातिवाहिकः॥ ५५ ॥ अनाख्येयंपरासत्तास्यातिवाहिकतामिव॥ सागच्छत्यप्यगच्छंतीतादृक्सत्यात्मभावनात्॥ ५६ ॥ मातृमेयप्रमाणादियदाब्रह्मैववेदनात्॥ तदातिवाहिकोक्तीनांकःप्रसंगस्तदेवतत्॥५७॥ अन्यत्ववेदनादन्यःपरस्मादातिवाहिकः॥ ब्रह्मत्ववेदनाद्ब्रह्मसासंवित्तिर्हिनान्यजा॥५८॥ ॥श्रीरामउवाच॥ ॥असंभवादसंवित्तेर्ब्रह्मात्मैकतयाथवा॥ कोमोक्षःकोविचारश्चेत्यलंभेदविकल्पनैः॥ ५९॥ ॥श्रीवसिष्ठउवाच॥ ॥सिद्धांतकालएवैषप्रश्नस्तेराघराजते॥ अकालपुष्पमालाहिशोभनापिनशोभते॥६०॥ सार्थैवानर्थिकाऽकालमालाविलसितायथा॥ तथैवाकालमिज्ज्ंतौसर्वकालेहिशोभते॥६१॥ प्रतिबंधाभ्यनुज्ञानांकालोदातेतिदृश्यते॥ ननुसर्वपदार्थानांकालेनफलयोगतः॥६२॥

रादेश्चसंभवएवनास्तीतिकथंतत्प्रवृत्तिरितिरामःशंकते ॥ असंभवादिति ॥५९॥ किमयंतत्त्वंबुद्ध्वाप्रश्नउताबुद्ध्वा ॥ आद्येविचारानर्थक्येइष्टापत्तिर्द्वितीयेतुनास्यावसरइत्याशयेनवसिष्ठःसमाधत्ते ॥ सिद्धांतकालेइत्यादिना ॥ नशोभतेऔत्पातिकानर्थशंकाभयहेतुत्वादितिभावः ॥ ६० ॥ अर्थांतरन्यासोक्तमर्थमुपमानेनापिस्पष्टमाह ॥ सार्थैवेति ॥ विलसिताशोभमानाप्यकालपुष्पमालायथातात्कालिकोपभोगेनसार्थैवसतीऔत्पातिकानर्थहेतुत्वेनजनहर्षाहेतुत्वादनर्थिकातथैवअपरिपाकदशापन्नेजंतौअकालोत्पन्नामिनोत्यर्थंप्रमापयतीतिमितउक्तिरप्यनर्थिकेत्यर्थः ॥ ६१ ॥ तत्कुतस्तत्राह ॥ प्रतिबंधेति ॥ हेमंतादिकालःशाल्याद्यंकुरोदयप्रतिबंधस्ययवाद्यंकुरोदयाभ्यनुज्ञानस्यआनुकूल्यचस्यदातेत्यन्वयव्यतिरेकाभ्यांदृश्यतेलोके ॥ नन्वित्यवश्यमित्यर्थे ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंरामस्यशंकांहेलनयासमाधायअनाख्येयंपरंब्रह्मास्यातिवाहिकतामिवेत्यंतंयदुक्तंतदेवानुसृत्यातिवाहिकदेहसमष्ट्युपहितेपितामहत्वकल्पनामाह ॥ एवमेवेति ॥ स्वमात्मा स्वमसमष्ट्यात्मा ॥ उपासनापरिपाकेनोपास्यभावेनफलीभूतेनसमुपस्थितः ॥ कालतःकालेनतद्भावोचितेन ॥६३॥ तस्यप्रणवोच्चारणेनतदर्थसंवित्त्यासर्वप्रपंचस्रष्टृत्वंदर्शयति॥ ॐमुच्चारणेति ॥ ६४ ॥ एवंचव्यष्टिमनोराज्यवत्समष्टिमनोराज्यभूतस्यास्यजगतःअसत्त्वमेवेतिफलितमित्याह ॥ इदमेवमिति ॥ व्योम्निकल्पितंसर्वंतलमलिनत्वादीव ॥ तथा चपर्वतानांमेर्वादीनामुच्चाकृतिरुन्नताकारोपिव्योमैव किंपुनरन्यदल्पम् ॥ यतोवाय्वादिक्रमेणजगद्व्योम्न्येवारोपेणविजृंभतेततोस्यतलमालिन्यादिसाम्यमेवेत्यर्थः ॥ ६५ ॥ एवंचसृष्टिंव्युत्पादनंप्रपंचमिथ्यात्वज्ञापनायैवनवास्तवसर्गप्रदर्शनायेत्यभिप्रेत्यननिरोधोनचोत्पत्तिरित्यादिश्रुत्याशयमुद्घाटयति ॥ नेहेति ॥ ६६ ॥ जीवत्वमपिजगत्कोटावेवेति

एवमेवसजीवात्मास्वमात्मासमुपस्थितः॥ पितामहत्वमुद्धूनंपश्यन्नात्मनिकालतः॥६३॥ ॐमुच्चारणसंवित्तिवेदनाच्चप्रपश्यति॥ यत्करोतिमनोराज्यंभवत्याशुसतन्मयः॥ ६४ ॥ इदमेवमसत्सर्वमिवव्योम्नितताम्मनि॥ पर्वतोच्चाकृतिर्व्योमजगद्व्योम्निविजृंभते॥६५॥ नेहप्रजायतेकिंचिन्नेहकिंचिद्विनश्यति॥ जगद्गंधर्वनगररूपेणब्रह्मजृंभते॥६६॥ यथैवपद्मजादीनांजीवानांसदसन्मयी॥ सत्तातथैवसर्वेषामासरीसृपमासुरम्॥ ६७॥ संवित्संभ्रमएवायमेवमभ्युत्थितोप्यसन्॥ आब्रह्मकीटसंवित्तेःसम्यक्संवेदनात्क्षयः॥६८॥ यथासंपद्यतेब्रह्माकीटःसंपद्यतेतथा॥ कीटस्तुरूढभूतौघवलनात्तुच्छकर्मकः॥ ६९॥ यदेवजीवनंजीवेचेत्योन्मुखचिदात्मकम्॥ तदेवपौरुषंतस्मिन्सारंकर्मतदेवच॥ ७० ॥ब्रह्मणःसुकृतात्पापात्कीटकस्यसमुत्थितेः॥ चित्तन्मात्रात्मिकाभ्रांतिःप्रेक्षामात्रंभवेत्क्षयः॥ ७१ ॥

दर्शयितुंजगतोजीवसमसत्ताकत्वंदर्शयति ॥ यथैवेति ॥ यौक्तिकदृशासदसन्मयीविचारासहा ॥ अधःआसरीसृपंऊर्ध्वंआसुरंसुरानभिव्याप्येत्यर्थः ॥ ६७॥ परमार्थदृशात्वाह ॥ संविदिति ॥ आब्रह्मकीटंप्रसिद्धायाःसंवित्तेरनुभवाभ्युत्थितोप्यसन् ॥ कुतः ॥ यतोस्यसम्यक्संवेदनात्क्षयोबाधइत्यर्थः ॥ ६८ ॥ आब्रह्मकीटसंवित्तेरित्युक्तांशमुपपादयति ॥ यथेति ॥ तर्हिकथंकीटस्यक्षुद्रकर्मतातत्राह ॥ कीटस्त्विति ॥ भूतौघवलनात् चित्तेभौतिकमालिन्याधिक्यादितियावत् ॥ ६९ ॥ उपाध्यनुसारिणीजीवतातदनुसारिपौरुषंतदेवफलपर्यवसितंकर्मतच्चतदेवपौरुषमेवेत्यर्थः ॥ ७० ॥ तत्रसुकृतरूपसारोत्कर्षपरमावधिफलंब्रह्मतादुष्कृतरूपसारोत्कर्षपरमावधिफलंकीटकतेतिवैचित्र्यनिमित्तभेदेप्यज्ञातचिन्मात्रप्रयुक्ताद्वैतभ्रांतिर्ज्ञानमात्रप्रयुक्तस्तदपगमइत्येतदुभयत्रापितुल्यमेवेत्याह ॥ ब्रह्मणइति ॥ ७१ ॥

---

१ षट्पंचाशत्तमेश्लोके ॥ तत्रतुअनाख्येयंपरासत्तेतिमूलंइयमितिच्छेदइतिटीकाचवर्तते ॥ अत्रत्वनाख्येयंपरंब्रह्मेतिवर्ततेतद्विचारणीयम् ॥ २ अज्ञाताया चितृतन्मात्रात्मिका ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुयावन्मातामानेनप्रमेयंद्वैतंवेत्तितावद्द्वैतंतदपगमेत्वैक्यमेवेतिक्रमिकद्वैतैक्यस्वभावत्वमेववस्तुनोवास्तवंकिंनस्यात्तत्राह ॥ मात्रिति ॥ नद्वैतंमातृमानप्रमेयंमातृमानप्रमेयद्वै तस्यापिमातृमानांतरापेक्षापत्त्याअनवस्थापातात् ॥ अतस्तेषांचिन्मात्रत्वेद्वैतैक्यसाधकांतराभावाद्वैतैक्यवादार्थःशशशृंगनभोब्जिनीसमइत्यर्थः ॥ ७२ ॥ यदिनद्वैतंमानमेयंत र्हिकथंकुद्दालकोटिदुर्भेदभुवनादिभावदार्ढ्यात्मकंप्रतीयतेतत्राह ॥ भावदार्ढ्यात्मकमिति ॥ ब्रह्मानंदात्मकआत्मैवबंधकभुवनादिभावदार्ढ्यात्मकंद्वैतमितिभ्रांत्यानुभूयते ॥ य थाकोशकारकीटेनस्वलालादार्ढ्यात्मकंबंधनमनुभूयतेतद्वदित्यर्थः ॥ ७३ ॥ यद्यात्मकल्पितएवबंधस्तर्हिप्रतिपुरुषंयथाभिलषितकल्पनैवस्यान्नानिष्टकल्पनमित्याशंक्याह ॥ मनसेति ॥ सर्वमनःसमष्ट्यात्मनाब्रह्मणाभोक्तृकर्मानुसारेणयद्यद्वस्तुयथास्रष्टव्यत्वेनदृष्टंयादृशकार्यार्थंविभावितंचतत्तत्अन्यैरपितज्ज्ञैर्जीवैस्तथादृश्यतेतत्कुतः ॥ यतःस्वभा

मातृमानप्रमेयाणिनचिन्मात्रेतरद्यतः ॥ ततोद्वैतैक्यवादार्थःशशशृंगाब्जिनीसमः ॥ ७२ ॥ भावदार्ढ्यात्मकंमिथ्याब्रह्मानंदोविभाव्य ते ॥ आत्मैवकोशकारेणलालादार्ढ्यात्मकंयथा ॥ ७३ ॥ मनसाब्रह्मणायद्यद्यथादृष्टंविभावितम् ॥ तत्तथादृश्यतेतज्ज्ञैःस्वभावस्यैषनि श्चयः ॥ ७४ ॥ यथायदुदितंवस्तुतत्तत्तन्नविनाभवेत् ॥ निमेषमपिकल्पंवास्वभावस्यैषनिश्चयः ॥ ७५ ॥ अलीकमिदमुत्पन्नमलीकंचवि वर्द्धते ॥ अलीकमेवस्वदतेतथालीकंविलीयते ॥ ७६ ॥ शुद्धंसर्वगतंब्रह्मानंतमद्वितीयंदुरवबोधवशादशुद्धमिवासदिवानेकमिवासर्वग मिवावबुध्यते ॥ ७७ ॥ जलमन्यत्तरंगोन्यइतिबालकुकल्पनयाभेदःकल्प्यतएवमवास्तवस्तस्माद्योयोयमाभातिभेदःसकेवलमतत्त्व विद्भिःपरिकल्पितोरज्ज्वांसर्पइवएवंभेदाभेदशक्त्योररिमित्रयोरेवब्रह्मण्येवसंभवेत् ॥ ७८ ॥ तेनात्मनाद्वितीयेनैवद्वित्वमिवाततंय थासलिलेनतरंगकल्पनयासुवर्णेनकटककल्पनयैवमिति अतस्तेनस्वयमेवात्मनात्मान्यइवचेत्यते ॥ ७९ ॥ अतःकलनाजातासैवस्फा रतांप्राप्यमनःसंपन्नंतेनाहंभावःकल्पितोनिर्विकल्पप्रत्यक्षरूपमेतत्प्रथमंतन्मनस्तदहंभवतिक्षिप्रमहंशब्दार्थभावनात् ॥ ८० ॥

वस्यनियतेरेषनिश्चयोव्यवस्थितइत्यर्थः ॥ ७४ ॥ वटबीजादेववटांकुरोनकुटजबीजात् बुद्बुदःकतिपयनिमेषंतिष्ठतिब्रह्मांडंतुमहाकल्पमितिहेतुफलादिनियतिबलादपिनय थेच्छंकल्पनप्रसक्तिरित्याह ॥ यथेति ॥ ७५ ॥ नचास्मदाद्यस्वातंत्र्यबलान्नियतिकृतशक्तिकालादिव्यवस्थादर्शनाच्चसत्यमेवेदंजगदितिभ्रमितव्यमित्याह ॥ अलीकमिति ॥ अलीकशब्दोमिथ्यावचनः ॥ स्वदनेरोचतेभोक्तॄणांभोगकाले ॥ ७६ ॥ सर्गत्रयेणपद्यैर्विस्तरेणोक्तमर्थजातंगद्यैःसंक्षिप्यदर्शयति ॥ शुद्धमित्यादिना ॥ दुरवबोधोभ्रांतिस्तद्वशा त् ॥ ७७ ॥ यथाजलमन्यत्तरंगोन्यइतिबालानांमूर्खाणांकुकल्पनयैवाऽवास्तवोभेदएवंजगद्भेदोप्यवास्तवएवकल्प्यते ॥ जलेतरंगभेदस्यपरिणामत्वदृष्टौनविवर्त्ततास्फुटेतिदृ ष्टांतांतरमाह ॥ रज्ज्वांसर्पइवेति ॥ भेदाभेदशक्त्योःस्थितिरितिशेषः ॥ अरिमित्रयोर्विरुद्धाविरुद्धयोरेवनकदाचिदपितत्स्वभावत्यजोरित्येवकारार्थः ॥ ७८ ॥ तेनब्रह्मभूतेनात्म नाप्रतीचाआततंविस्तारितम् ॥ ७९ ॥ कलनानिर्विकल्पकजगत्स्फूर्त्तिः ॥ स्फारतांसविकल्पताम् ॥ तथैवतद्व्याचष्टे ॥ निर्विकल्पप्रत्यक्षरूपमेतत्प्रथमंतन्मनस्तदहंभवतीतिअहं शब्दार्थभावनात्तदुभयगोचरसंस्कारोद्भवात् ॥ ८० ॥

१ नंदमितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुसंहितायथानुभवमुत्पादिना ॥ तयास्मृत्याअनुभूनानियथानुभवंस्मृतानि ॥ कल्पितानिसृष्टानि ॥ जीवेनब्रह्मलक्षणादुपादानकारणादियान्ब्रह्मांडविस्तृतोजगत्सन्निवेशः कल्पितः ॥ हस्तपादादिमानितिपाठांतरेस्पष्टम् ॥ ८१ ॥ उपवर्णितःसृष्टिक्रमोलोकेप्येवमेवस्वप्नेप्रसिद्धइत्याह ॥ यदेवेति ॥ पश्यतिस्वसंभ्रमादावितिशेषः ॥ ननुस्वाप्नंप्रातिभासिकमसत्कथंसतोव्यावहारिकस्यदृष्टांतस्तत्राह ॥ सद्वेति ॥ चित्तंमनःअभिनिविष्टंचिरंतद्भावनोपचितंसद्यद्देवकल्पयतितदवश्यंपश्यतिदर्शनेनसत्सत्यमिवप्रतिभासमागतंप्राप्तं सत्सद्योयास्यतिव्यवहारोपयोगितयाप्राप्स्यतिचेत्यर्थः ॥ ८२॥ ॥ इतिश्रीवासिष्ठ०उ०सप्तषष्टितमःसर्गः ॥ ६७ ॥ ॥छ॥ ॥ वर्ण्यतेविस्तरेणात्रकर्कटीनामराक्षसी ॥ तस्या

ततोमनोहंकाराभ्यांस्मृतिरनुसंहितातैस्त्रिभिस्तदनुभूततन्मात्राणिकल्पितानि तन्मात्रेषुजीवेनचित्तात्मनास्वयंकाकतालीयवद्ब्रह्मोपादानादियान्सन्निवेशःकल्पितोदृश्यते ॥ ८१ ॥ एवंयदेवमनःकल्पयतितदेवपश्यति ॥ सद्वाभवत्त्वसद्वाचित्तंयत्कल्पयत्यभिनिविष्टम्॥ तत्तत्पश्यतियास्यतिसद्विप्रतिभासमुपगतंसद्यः॥८२॥ ॥इ०वा०वा०दे०मो०उ०सत्योपदेशोनामसप्तषष्टितमःसर्गः॥६७॥ ॥ श्रीवसिष्ठउवाच॥ ॥अत्रैवोदाहरंतीममितिहासंपुरातनम्॥ राक्षस्योक्तंमहाप्रश्नजालमावलिताखिलम् ॥ १॥ अस्तिकज्जलपंकाद्रेरिवोग्राशालभंजिका ॥ हिमाद्रेरुत्तरेपार्श्वेकर्कटीनामराक्षसी ॥ २॥ विषूचिकाभिधानाचनाम्नाप्यन्यायबाधिका॥ विंध्याटवीवदेहेनशुष्काकार्श्यमुपागता॥ ३॥ महाबलाग्निनयनारोदोरंध्रार्द्धपूरणी॥ नीलांबरधराकृष्णादेहबद्धेवयामिनी ॥ ४॥ नीहारवसनच्छन्नामेदुराभ्रशिरःपटा॥ लंबाभ्रबिंबोल्लसितानित्योत्थतिमिरोर्ध्वजा ॥ ५॥ स्थिरविद्युल्लतानेत्रातमालतरुजानुका॥ वैदूर्यशूर्पाग्रनखीभस्मनीहारहासिनी॥ ६॥ निर्मांसनरदेहौघपुष्पस्रग्दामभूषिता॥ सर्वांगोदात्तसंप्रोतशवमालाविराजिता॥७॥ वेतालावेशविचलत्कालकंकालकुंडला॥ अर्कादानोल्कदीर्घाग्रभीमोग्रभुजमंडला॥८॥ तस्याविपुलकायत्वाद्दुर्लभत्वान्निजांधसः॥ अत्यर्णवलेखायाइवाभूज्जाठरोनलः॥ ९॥

श्वोयंतपःसर्वजंतुजालजिघांसया ॥ १ ॥ विस्तरसंक्षेपाभ्यांवर्णितेर्थेदृढीकारायकर्कट्युपाख्यानाख्येतिहासमुखेनराक्षस्याःकिरातराजमंत्रिसंवादंविस्तरेणविवक्षुस्तमवतारयति ॥ अत्रैवेति ॥ आवलितंतत्त्वतोविमर्शेनव्याप्तमखिलंजगद्यत्र ॥ १॥ कज्जलमयात्पंकादद्रेर्वानिर्मिताशालभंजिकाप्रतिमेववर्णतः कर्मतस्तूग्रा ॥ २ ॥ तस्याद्वेनामनीअन्येदर्शयति ॥ विषूचिकेति ॥ ३ ॥ अग्निरिवप्रज्वलन्नयना ॥ रोदस्योर्द्यावापृथ्व्योरंध्रमंतरालंतदर्द्धपूरणीतिवैपुल्यातिशयोक्तिः ॥ ४ ॥ नीहारैर्वसनेनपरिधानीयेनेवच्छन्ना ॥ मेदुराण्यभ्राण्येवशिरःपटउत्तरीयंयस्याः ॥ लंबमानमभ्रबिंबमिवउल्लसिता ॥ नित्योत्थंतिमिरमिवोर्ध्वजाःकेशायस्याः ॥ ५ ॥ वैदूर्यवर्णाःशूर्पाग्राकाराश्चनखायस्याः ॥६॥ ॥ ७ ॥ वेतालैःसहआवेशोनर्त्तनाभिनिवेशस्तेनविचलतीस्पंदमानेकालवर्णेकंकालकुंडलेयस्याः ॥ अर्कस्यादानेग्रहणेउत्कमुत्कंठितमिवदीर्घाग्रम् ॥ ८ ॥ निजस्यस्वजात्युचितस्यांधसओदनस्यआहारस्येतियावत् ॥ ९ ॥ ॥१२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १० ॥ अनुश्वासंप्रतिश्वासम ॥ ११ ॥ मेघेनमृगतृष्णास्वहेत्वातपनिवारणेकृतेयथाशाम्यतितद्वत् ॥ ययायुक्त्याआपदिजीव्यतेसायुक्तिर्हिअविरुद्धासंमता ॥ १२ ॥ युगपत्सर्वजनग्रसनयुक्तिस्तुअशक्यत्वाद्विरुद्धैवेत्याशयेनाह ॥ मंत्रेति ॥ सममयुगपत् ॥ १३ ॥ तर्हिकथंसर्वजनग्रसनमनोरथसिद्धिस्तत्राह ॥ तपइति ॥ १४ ॥ पर्वतंहिमवंतम् ॥ १५ ॥ देहशब्दःस्वरूपपरः ॥ १६ ॥ चंद्रार्काविवदीप्तेअस्पंदेलोचनेयस्याः ॥ १७ ॥ शैलतःकृतायाइवेतितपःक्लेशसहनादुत्प्रेक्षा ॥ १८ ॥ नैल्यादभ्रोपमा ॥ आहर्त्तुंआहारंकर्त्तुंग्रसितुमितियावत् ॥ १९ ॥ पवनैःशीतोष्णपांसुरुक्षवायुभिर्जर्जरितानांशिथिलीकृतानामंगकानांकृशांगानांलंबमानात्वगेवचीरंवल्कलमिवयस्यास्तथाभूताम् ॥ ग

नकदाचनसात्टप्तिमुपयातामहोदरी॥वडवानलजिह्वेवचिंतयामासचैकदा॥१०॥जंबूद्वीपगतान्सर्वान्निगिरामिजनान्यदि॥अनारतमनुश्वासंजलराशिमिवार्णवः॥ ११ ॥ मेघेनमृगतृष्णेवतन्मेक्षुदुपशाम्यति॥ अविरुद्धैवसायुक्तिर्ययापदिहिजीव्यते ॥ १२ ॥ मंत्रौषधतपोदानदेवपूजादिरक्षितम्॥ सममेवजनंसर्वंनिर्बाधंकःप्रबाधते॥१३॥ तपःकरोमिपरममखिन्नेनैवचेतसा॥ तपसैवमहोग्रेणयद्दुरापंतदाप्यते॥१४॥ इतिसंचिंत्यसासर्वजंतुजातजिघांसया॥ तपोर्थमथसस्मारपर्वतंभूतदुर्गमम्॥१५॥ आरुरोहचतच्छृंगंस्थिरविद्युद्विलोचना॥ हस्तपादादिमद्देहाश्यामलेवाभ्रमंडली ॥ १६ ॥ तत्रगत्वाथसास्नात्वातपःकर्तुंकृतस्थितिः॥ अतिष्ठदेकपादेनचंद्रार्कास्पंदलोचना॥ १७॥ क्रमेणदिवसाःपक्षास्तस्यामासर्तवोययुः॥ शीतातपेषुलीनायाःकृतायाइवशैलतः॥ १८ ॥ साबभूवाभ्रमालायाःसमासंस्तंभिताकृतिः॥ कृष्णोर्ध्वगोर्ध्वकेशीचखमाहर्तुमिवोद्गता॥१९॥ आलोक्यतांपवनजर्जरितांगकत्वक्चीरांगणाकृतिरणत्पवनावधूतैः॥ ऊर्ध्वस्थमूर्द्धजतमःपटलैर्दधानांतारौघमौक्तिकमजःसमुपाजगाम॥२०॥ ॥इ०वा०वा०दे०मो०उ०कर्कट्युपाख्यानेराक्षसीवर्णनंनामअष्टषष्टितमःसर्गः॥६८॥ ॥६९॥ ॥श्रीवसिष्ठउवाच॥ ॥ अथवर्षसहस्रेणतांपितामहआययौ॥ दारुणंहितपःसिद्धौविषाग्निरपिशीतलः ॥ १ ॥ मनसैवप्रणम्यैनंसातथैवस्थितासती॥ कोवरःक्षुच्छमायालमितिचिंतान्विताभवत्॥ २॥ आस्मृतंप्रार्थयिष्येहंवरमेकमिमंविभुम्॥ अनायसीचायसीचस्यामहंजीवसूचिका॥ ३ ॥

णाःसेनास्तदाकृतितद्वदितियावत् ॥ रणद्भिःपवनैरवधूतैःकंपितैःऊर्ध्वदिक्स्थैर्मूर्द्धजलक्षणैस्तमःपटलैस्तारानक्षत्राणितत्समूहरूपंमौक्तिकंदधानांतांकर्कटीमालोक्यतस्यैवरंदातुमजोब्रह्मासमुपाजगामेतिवक्ष्यमाणस्यसंक्षिप्योक्तिः ॥ २० ॥ ॥ इतिश्रीवा०ता०उ०अष्टषष्टितमःसर्गः ॥ ६८ ॥ ॥ ६९ ॥ ॥ दत्वात्रधातुःकर्कट्यैयथाभिलषितंवरम्॥ मंत्रंचगुणिरक्षार्थंस्वलोकेगतिरुच्यते ॥ १ ॥ कुतोदुर्दत्तायामपितस्यांदुर्लभतमोधातुःप्रसादस्तत्राह ॥ दारुणमिति ॥ सिद्धौभवत्येवेतिशेषः ॥ यतस्तपःसिद्धौविषसहितोग्निरपिशीतलोभवति ॥ नासाध्यंतपसोस्तीतिभावः ॥ १ ॥ २ ॥ स्मरणेंऽयमाकारोनिपातोनत्वाङ् ॥ अनायसीरोगरूपा ॥ जीवयुक्तासूचिकाजीवसूचिका ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यब्रह्मणउक्त्यावरेण ॥ सहयुगपत्सुरभिर्घ्राणाकृष्टंसौगंध्यंयथा ॥ ४ ॥ एतेनक्रमेणउपायेन ॥ ५ ॥ शांतिदांतिदयादितपस्विधर्मविरुद्धलोकहिंसाभिलाषिणीत्वादन्या दृश्यास्तथाऽभिलाषंदृष्ट्वा ॥ ६ ॥ प्रशंसाभाविकल्याणद्योतनार्था ॥ ७ ॥ ८ ॥ ९ ॥ सूक्ष्मयाजनैर्दुर्लक्ष्यया ॥ दुर्भोजनानिनिषिद्धापक्वाकालभोजनाअतिभोजनाश्च ॥ दुरारंभाःपरानिष्टारंभकाः ॥ दुःस्थितयःअशास्त्रीयमार्गस्थाः ॥ १० ॥ प्राणैःप्राणद्वाराआहृदयंअपानमारभ्यहृदयपर्यंतंप्रविश्यहृदयपद्मस्यप्लीहस्यतत्संनिहितमांसग्रंथेरादिपदाद्बस्तिशिरादीनांचबाधनात्पीडनात् ॥ ११ ॥ सगुणंशास्त्रसदाचारनिष्ठम् ॥ तदन्यंविगुणम् ॥ १२ ॥ चिकित्सारोगप्रतीकारस्तदर्थम् ॥ १३ ॥ अन्यायान्यायपथातिवर्तिनस्ते

अस्योक्त्याद्विविधासूचिर्भूत्वालक्ष्याविशाम्यहम्॥प्राणिनांसहसर्वेषांहृदयंसुरभिर्यथा॥४॥यथाभिमतमेतेनग्रसेयंसकलंजगत्॥क्रमेणक्षुद्विनाशायक्षुद्विनाशःपरंसुखम्॥५॥इतिसंचिंतयंतींतामुवाचकमलालयः॥अन्यादृश्यास्तथादृष्ट्वास्तनिताभ्रारवोपमम्॥६॥ ब्रह्मोवाच॥ ॥पुत्रिकर्कटिकेरक्षःकुलशैलाभ्रमालिके॥उत्तिष्ठत्वंतुतुष्टोस्मिगृहाणाभिमतंवरम्॥७॥ ॥कर्कट्युवाच॥ ॥भगवन्भूतभव्येशस्यामहंजीवसूचिका॥अनायसीचायसीचविधेऽर्पयसिचेद्वरं॥८॥ ॥श्रीवसिष्ठउवाच॥ ॥एवमस्त्वितितामुक्त्वापुनराहपितामहः॥सूचिकासोपसर्गात्वंभविष्यसिविषूचिका॥९॥सूक्ष्मयामाययासर्वलोकहिंसांकरिष्यसि॥दुर्भोजनादुरारंभामूर्खादुस्थितयश्चये ॥ १० ॥दुर्देशवासिनोदुष्टास्तेषांहिंसांकरिष्यसि॥प्रविश्याहृदयंप्राणैःपद्मप्लीहादिबाधनात्॥ ११ ॥वातलेखात्मिकाव्याधिर्भविष्यसिविषूचिका॥सगुणंविगुणंचैवजनमासादयिष्यसि॥ १२ ॥गुणान्वितचिकित्सार्थमंत्रोयंतुमयोच्यते॥ ॥ब्रह्मोवाच॥ ॥हिमाद्रेरुत्तरेपार्श्वेकर्कटीनामराक्षसी ॥ १३॥ विषूचिकाभिधानासानाम्नाप्यन्यायबाधिका॥तस्यामंत्रः॥ ॐह्रींह्रांरींरांविष्णुशक्तयेनमः॥ ॐनमोभगवतिविष्णुशक्तिमेनांॐहरहरनयनयपचपचमथमथउत्सादयदूरेकुरुस्वाहाहिमवंतंगच्छजीवसःसःसः चंद्रमंडलगतोसिस्वाहा॥इतिमंत्रीमहामंत्रंन्यस्यवामकरोदरे॥ १४॥

षांबाधिका ॥ द्विविधाहिविष्णुशक्तिराद्यामायायदधीनाअन्याःसर्वाःशक्तयः ॥ अपरातुतदधीनाप्रतिवस्तुनियतासात्विकादिभेदभिन्नाच ॥ तत्रतामस्याःसंहारशक्तेरंशाःप्राणिदुष्कर्मफलजननशक्तिविशेषारोगाः॥ अतस्तन्निवृत्तयेआद्यामायाशक्तिःप्रणवमायादिरहस्यबीजैःपंचभिःसंबोध्यनमस्कृत्यप्रार्थ्यते॥ ॐमितिचतुर्थ्यंतम् नमःशब्दयोगात्॥ परब्रह्मात्मिकायैनमइत्यर्थः ॥ भगोमाहात्म्यंसर्वनियमनवीर्यंवातद्वतिआद्यविष्णुशक्तेत्वंद्वितीयांएनांत्वदंशभूतांरोगात्मिकांविष्णुशक्तिॐकारवाच्येकारणस्वरूपेहरहरभृशमुपसंहर ॥ नित्यवीप्सयोरितिभृशार्थेद्विर्वचनम् ॥ नयस्वस्थानंप्रापय ॥ पचपाकेनेवसद्योमृदूकुरु ॥ मथदधिवद्विलोडय ॥ उत्सादयअस्मात्स्थानादन्यतोनय ॥ उक्तैरन्यैर्वाप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारैर्दूरेकुरु ॥ स्वांहेतिहविर्दानादिनापूज्यत्वद्योतनार्थम् ॥ एवमादिशक्तिसंप्रार्थ्यतदधीनारोगशक्तिःप्रार्थ्यते ॥ हिमवंतंस्वस्थानंगच्छेति ॥ ततोरोगिणंप्रत्याह ॥ सःप्राक्तनदुष्कर्मणाभिभूतः सरोगेणाभिभूतः सम्रृत्युनावाकृष्यमाणस्त्वंमंत्रसामर्थ्याज्जीवम्रृतोज्जीवनसमर्थेनाम्रृतेनसंपूर्णंचंद्रमंडलंमदीयभावनयागतःप्राप्तोसि ॥ अंतेस्वाहेतिदीप्तेऽग्नौहविषइवपूर्णचंद्रमंडलेरोगिणोभावनयाप्रक्षेपःकार्यइतिद्योतनार्थम् ॥ इतिइमंमंत्रंमंत्रीलिखित्वावामकरस्योदरेतलेन्यस्य ॥ १४ ॥ तांविषूचिकाम् ॥ विद्रुतांपलायिताम् ॥ १५ ॥ रसायनहृदिअम्रृतगर्भे ॥ युक्तंसमाहितचित्तम् ॥ १६ ॥ पाठक्रमादार्थक्रमबलीयस्त्वाच्छौचाचमनादिपूर्वमेवकार्यम् ॥ सुसमाहितःअव्यग्रचित्तः ॥ १७ ॥ त्रिलो

मार्जयेदातुराकारंतेनहस्तेनसंयुतः ॥ हिमशैलाभिमुख्येनविद्रुतांतांविचिंतयेत् ॥ कर्कटींकर्कशाक्रंदांमंत्रमुद्गरमर्दिताम् ॥ १५ ॥ आतुरंचिंतयेच्चंद्ररसायनहृदिस्थितम् ॥ अजरामरणंयुक्तंमुक्तंसर्वाधिविभ्रमैः ॥ १६ ॥ साधकोहिशुचिर्भूत्वास्वाचांतःसुसमाहितः ॥ क्रमेणानेनसकलांप्रोच्छिनत्तिविषूचिकाम् ॥ १७ ॥ इतिगगनगतस्त्रिलोकनाथोगगनगसिद्धगृहीतसिद्धमंत्रः ॥ गतउपगतशक्रवंद्यमानोनिजपुरमक्षयमायमुज्वलश्रीः ॥ १८ ॥ ॥ इत्या० वा० वा० दे० मो० उ० सूच्युपाख्यानेविषूचिकामंत्रकथनंनामएकोनसप्ततितमःसर्गः ॥ ६९ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथभूधरशृंगाभासामहाकृष्णराक्षसी ॥ कज्जलांबुदलेखेवतानवंगंतुमुद्यता ॥ १ ॥ बभूवाभ्रोपमाकाराततोविटपरूपिणी ॥ पुंस्प्रमाणाततोप्यासीदथाभूद्धस्तमात्रिका ॥ २ ॥ ततःप्रादेशमात्रासाततोप्यंगुलिरूपिणी ॥ ततोमाषशमीतुल्याततःसूचीबभूवह ॥ ३ ॥ ततःकौशेयसूचित्वंपद्मकेसरसुंदरी ॥ प्रापसाशिखराकारासंकल्पाद्रिरिवाणुताम् ॥ ४ ॥

कनाथोब्रह्मागगनगैःसिद्धैर्गृहीतःसिद्धोऽव्याहतोमंत्रोयस्यतथाविधःसन्कार्यांतरसिद्धयेउपगतेनशक्रेणवंद्यमानःसन्अक्षयाःपरैरुपहंतुमशक्यामायाःसत्यसंकल्पसिद्धाःपरचित्तसांकल्पिकपितृमातृभ्रातृगंधमाल्यादिलोकरूपाविचित्रभोग्यमायायत्रतथाविधंनिजपुरंसत्यलोकंगतः ॥ १८ ॥ ॥ इतिश्रीवासिष्ठ० तात्पर्यप्रकाशेउ० एकोनसप्ततितमःसर्गः ॥ ६९ ॥ ॥ ७ ॥ ॥ क्रमशस्तनुतापूर्वंसूचिरूपद्वयंगतिः ॥ सूच्याःप्राणिशरीरेषुप्रवेशश्चोपवर्ण्यते ॥ १ ॥ तनुसूक्ष्मंतद्भावंतानवम् ॥ १ ॥ तदेवप्रपंचयति ॥ बभूवेत्यादिना ॥ विटपरूपिणीवृक्षशाखाप्रमाणा ॥ २ ॥ माषशमीमाषशिंबी ॥ सूचीस्थूलसूची ॥ ३ ॥ कौशेयसीवनयोग्यासूक्ष्मतमसूचीतद्भावम् ॥ अयंचस्थूलशरीरस्यक्रमेणसूक्ष्मीभावस्तस्याःस्वसंकल्पकल्पितस्यैव ॥ पराविद्याकल्पितस्यत्वपेतत्रैवगलितत्वंवक्ष्यति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सासूक्ष्ममायसमयोविकारोभूत्वाकृष्णासूचिकाअनायसीजीवसूचिकाचसतीरराज ॥ महाभूतकर्मेंद्रियज्ञानेंद्रियप्राणांतःकरणाविद्याकामकर्मसंघातात्मकपुर्यष्टकेन॥५॥ इदं चास्याःसूचित्वंदृश्यभ्रांतिकल्पितमेवनवास्तवम् ॥ वरशापसहस्रैरपिवस्त्वन्यथाभावायोगादित्याशयेनाह॥सूचीति॥ संविद्भ्रमाणांकुलेसमूहमध्येएषाप्येकाभ्रांतिरित्यर्थः॥६॥ भानूनांसूर्यकिरणानांसंतानेनांतःप्रवेशेनसुंदरीरत्नसूचीववैदूर्यरश्मिलेखेवचलक्ष्यते ॥ मनोमननसंयुतेत्येतावानूदृष्टांताद्विशेषइत्यर्थः ॥ ७ ॥ सूर्यकिरणासंपर्कैत्वाह ॥ कज्जलेति ॥ कज्जलमयोंभोदोमेघस्तद्रूपस्यसंकल्कस्यपिंडस्यलताप्रतानोलेशः ॥ पवनेनाहृताउपनीता॥ सूक्ष्मंयद्रंध्रंतत्रनिविष्टयोरीक्षणयोर्दृशोःस्वच्छदृष्टज्योतिषीइवकनीनिकेकृष्णतारेयस्याः ॥ ८ ॥ सूक्ष्मयापुच्छशिखयापुच्छाग्रेणाणुनापरमाणुकल्पेन सुमुखंप्रसन्नवदनंयथास्यात्तथावरदानाद्ब्राह्मेणअभीष्टतमेनसूचीरूपेणनिमित्तेनपूर्वतनदेहवैपुल्यस्यशांत्यर्थंतदाप्राक्कालेमौनंमुनिसंबंधितपोव्रतंगतापरंनूनंइत्युत्प्रेक्षा ॥ अस्यास्तपोव्रतंस्ववैपुल्यशांतावेवपर्यवसन्नंव्यर्थमिवासीदित्याशयः ॥ ९ ॥ कीदृशंकथंचतत्सूचीरूपं

रराजसूचिकाकृष्णासूक्ष्मायसमनायसी ॥ पुर्यष्टकेनचलिताव्योमगाव्योमवासिनी॥ ५ ॥ सूचीदृश्यतएवासौनत्वयोनामविद्यते ॥ संविद्भ्रमकुलेचैषास्वल्पसूचीवलक्ष्यते॥ ६ ॥ रत्नसूचीवमसृणामनोमननसंयुता॥ वैदूर्यरश्मिलेखेवभानुसंतानसुंदरी॥ ७॥ कज्जलांभोदसंकल्कलतेवपवनाहृता॥ सूक्ष्मरंध्रेक्षणस्वच्छदृष्टज्योतिःकनीनिका॥ ८॥ सुमुखग्राह्यरूपेणश्लक्ष्णपुच्छशिखाणुना॥ तदावैपुल्यशांत्यर्थंपरंमौनव्रतंगता॥९॥ सुदूराद्दीपवद्दृष्टंखतन्मात्रत्वमागता॥ दूरादेवमनोज्ञेनप्रोद्गिरंतीमुखेनखम्॥१०॥ कुंचितेक्षणसंदृश्यादीर्घदीपांशुकोमला॥ सद्यःस्नातसमुत्सन्नबालवालविलासिनी॥ ११॥ तंतुर्बिसादिवोड्डीनाबाह्यसंचारकौतुकात् ॥ ब्रह्मनाडिरिवोद्युक्ताबहीरंध्रंसुसुंदरी॥ १२॥ नियतेंद्रियशक्तिःसाजीवेनैवबहिःस्थिता॥ बौद्धतार्किकविज्ञानसंतानवदलक्षिता ॥ १३॥

साप्राप्तातदाह ॥ सुदूरादिति ॥ सुदूराद्वीक्षणेज्वलन्नेत्रयोःसंध्यदर्शनादेकदीपवद्दृष्टंसूचीशरीरस्यादर्शनात्खतन्मात्रत्वमाकाशसाम्यमागताप्राप्ता ॥ देहेअंतर्गतस्याकाशस्यसौक्ष्म्यप्राप्तौबहिरवस्थानान्मनोज्ञेनवरप्राप्तिप्रसन्नेनमुखेनखंप्रोद्गिरंतीवमंतीवेत्युत्प्रेक्षा ॥ १० ॥ पुनःसाकीदृशीतत्राह ॥ कुंचितेत्यादिना ॥ दीर्घादूरप्रसृतादीपांशवोदीपकिरणाइवकोमलासूक्ष्माअतएवैकाग्र्यायकुंचितैरीक्षणैर्द्रष्टृदृष्टिभिःसंदृश्या ॥ सद्यःस्नातेनस्नानेनसमुत्सन्नोबालानामर्भकाणांवालःकेशइवविलासिनीविलसनशीला ॥ ११ ॥ बिसान्मृणालादुड्डीनाऊर्ध्वंनिर्गताब्रह्मनाडिःसुषुम्नाबहीरंध्रंब्रह्मरंध्राद्बहिर्निर्गत्यउत्ऊर्ध्वंसूर्यमंडलाभिमुखतयायुक्ता ॥ १२ ॥ नियताःप्रतिनियतस्थाननिविष्टाश्चक्षुरादींद्रियशक्तयोयस्याः ॥ जीवेनलिंगदेहेनैवबहिःसूच्याकारापन्नेनस्थिता ॥ यथाबौद्धानामालयविज्ञानसंतानःस्वमात्रगोचरोपिपरैरलक्षितोयथावातार्किकाणांधारावाहिकज्ञानसंतानःसाक्ष्यनभ्युपगमादलक्षितस्तद्वत्परैरलक्षिता ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यंतालक्ष्यत्वादेवशून्यत्रादिसिद्धार्थानांसविकाप्रसविनीवेत्युत्प्रेक्षा ॥ रंध्रस्यनभसोयदानीलंनैल्यंतन्मयातत्प्राया ॥ अरवानिःशब्दा ॥ मयटष्टित्वेपिङीबभावश्छांदसः ॥ कर्मधारयेपुंवद्भावोवा ॥ एवमायसींसूचीमुपवर्ण्यानायस्याजीवसूच्यास्तदनुसारित्वमाह ॥ अदृश्ययेति ॥ १४ ॥ कलास्तत्तद्वृत्तिषुप्रतिफलितचिदाभासास्तत्कलनधर्मिण्या ॥ क्षीणस्यविनश्यदवस्थस्यदीपस्यांशुःकिरणस्तल्लक्षणासूचीयथाचक्षुषानुपलभ्यापिस्पृश्यमानादाहकत्वात्तीक्ष्णातादृश्या ॥ १५ ॥ इदानींतस्याःसूचीभावलक्षणंतपःफलमिष्टानुपयोगादुपहसति ॥ ग्रासार्थमित्यादिना ॥ सायासास्थैवनिरुदरायाःसूच्यानोपयुज्यते ॥ १६ ॥ १७॥ आस्थितंअभिलषितम् ॥ अनर्थबुद्धेर्निरर्थकबुद्धेर्जंतोः ॥ १८ ॥ वि

शून्यसिद्धार्थसविकारंध्रानीलमथारवा॥ अदृश्ययाजीवसूच्यासंततानुश्रितास्थिता ॥ १४ ॥ कलाकलनधर्मिण्यावासनामात्रसारया॥ क्षीणदीपांशुसूचीवत्तीक्ष्णयानुपलभ्यया॥१५॥ ग्रासार्थंसूचितांयातासैवास्थानोपयुज्यते॥ विचारितंतयानैतदहोमौर्ख्यंविजृंभितम्॥१६॥साग्रासंचिंतयामासनसूचीरूपतुच्छताम्॥चित्तमीहितमेवैकंपश्यंत्यास्तेनिरर्थकम्॥१७॥अविचार्यैवसूचित्वंतयामूढधियास्थितम्॥ नानर्थबुद्धेःस्फुरतिपूर्वापरविचारणा॥१८॥स्वार्थक्रियोग्रसामर्थ्याद्यातिभावनयान्यताम्॥पदार्थोभिमतांशाढ्योनिःश्वासेनेवदर्पणः॥ १९॥ सूचीभावंप्रपन्नायास्त्यजंत्याःपीवरंवपुः॥ महामरणमप्यस्याराक्षस्याःसुसुखंस्थितम्॥२०॥एकवस्त्वतिरागाणामहोनुविषमागतिः॥ देहोपितृणवत्त्यक्तोराक्षस्यानिजयेच्छया॥ २१॥ एकवस्त्वतिगंधेनभ्रश्यंत्यन्याहिसंविदः॥ राक्षस्याग्रासगंधेनदेहनाशोपिनेक्षितः॥ २२ ॥ नाशोपिसुखयत्यज्ञमेकवस्त्वतिरागिणम्॥ सूचीभूताविदेहापिपरितुष्टैवराक्षसी॥२३॥ अन्यावभूवलंग्नासातथाजीवविषूचिका॥ व्योमात्मिकानिराकाराव्योमवृत्तिशरीरका॥ २४॥ तेजस्तनुप्रवाहाभाप्राणतंतुमयात्मिका ॥ मूलसंवेदनाकाराचंद्रार्कांशुकसुंदरी॥ २५॥

मर्शयोग्येचित्तेकुतोनस्फुरतितत्राह ॥ स्वार्थेति ॥ अभिमतेअभिलषितेंशेविषयेआढ्योभिनिविष्टश्चित्तपदार्थः ॥ स्वार्थक्रियाअभिमतार्थेदृढप्रयत्नस्तस्योग्रादनतिक्रमणीयात्सामर्थ्याद्भावनयातद्रागानुरंजनेनान्यतांपूर्वनैर्मल्यवैपरीत्यंकालुष्यमितियावत् ॥ याति ॥ यथानिःश्वासेनदर्पणः ॥ १९ ॥ किंचस्वार्थदृढानुरागादस्यामहादुःखमपिसुखायितमित्याह ॥ सूचीति ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ प्रसंगान्नीतिमुपवर्ण्यप्रस्तुतमनुसरन्जीवसूच्याख्यव्याधिस्वरूपमाह ॥ अन्येत्यादिना ॥ व्योमवृत्तिआकाशवत्सूक्ष्मस्वभावंलिंगशरीरंयस्याः ॥ २४ ॥ मूलसंवेदनंकुंडलिनीशक्तिस्तदाकारा ॥ चंद्रार्कयोरल्पाअंशवोंशुकानितानीवसुंदरी ॥ २५ ॥

१ आयससूच्यासंलग्ना ॥ लग्नाशेतिपाठांतरम् ॥ तत्रलग्नाआशाप्राणिग्रसनेच्छायस्याइत्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याःकर्कट्याःपापात्मिकाअतएवअसिधाराभाक्रूरामनोवृत्तिरयःसूच्याःपृथगेवतथाजीवसूचीरूपेणस्थितेतिपरेणान्वयः ॥ कौसुमीगंधलेखेवपरमाणुपरमसूक्ष्मंयथास्यात्त थाप्राणिदेहेष्ववलीयांतःप्रविश्यहिंसादिकलानांचातुरीणांयत्कलनंसंपादनंतेनरूपिणीप्रकटास्थिता ॥ २६ ॥ तदेवस्पष्टमाह ॥ परेति ॥ परेषांप्राणिनांप्राणवशात्प्राणाननुसृ त्यपरमोर्थःस्वमनोरथसिद्धिस्तत्रपरायणाउद्युक्ता ॥ २७ ॥ तनुद्वयवर्णनमुपसंहरति ॥ एवमिति ॥ २८ ॥ अथतस्याःसंक्षेपतश्चरित्रमाह ॥ तनुद्वयेनेति ॥ २९ ॥ संकल्पस्याघ टितघटनासामर्थ्येइदमेवनिदर्शनमित्याह ॥ सर्वइति ॥ ३० ॥ अल्पसत्वानांक्षुद्रमनसाम् ॥ सूच्यावृत्तमिववृत्तंयस्मिंस्तथाविधंपिशाचीत्वम् ॥ ३१ ॥ ननुसातपसापूतापुण्यशरीरा संपन्नातथाभूतायास्तस्याःपरपीडाहेतुसूचीशरीरप्रार्थनंकथंयुक्तंतत्राह ॥ अपीति ॥ जातिबंधोजात्यनुसारिवासनानिबंधः ॥ ३२ ॥ सास्थूलासर्वसाधारणाविद्याकल्पिता

पृथगेवासिधाराभापरमाण्ववलीयसा ॥ कौसुमीगंधलेखेवकलाकलनरूपिणी ॥ २६ ॥ पापात्मिकामनोवृत्तिःसाहितस्यास्तथास्थि ता ॥ परप्राणवशादेवपरमार्थपरायणा ॥ २७ ॥ एवमस्यास्तनुर्जातासूचीद्वयमयीहिंसा ॥ नीहारांशुकवत्तन्वीकार्पासांशुसुपेलवा ॥ २८ ॥ तनुद्वयेनतेनासौप्रविश्यत्हृदयंनृणाम् ॥ वेधयंतीततःक्रूराप्रबभ्रामदिशोदश ॥ २९ ॥ सर्वःस्वसंकल्पवशाल्लघुर्भवतिवागुरुः ॥ कर्कट्योग्रंवपुस्त्यक्तासूचीत्वमुररीकृतम् ॥ ३० ॥ तुच्छोप्यर्थोल्पसत्वानांगच्छतिप्रार्थनीयताम् ॥ सूचीवृत्तपिशाचीत्वंराक्षस्यातपसा स्थितम् ॥ ३१ ॥ अपिपुण्यशरीराणांजातिबंधोनशाम्यति ॥ तनुसूचीपिशाचीत्वंराक्षस्यातपसार्जितम् ॥ ३२ ॥ तस्यांदिगंतभ्रमणेप्र वृत्तायांमहानिलैः ॥ तत्रैवसातनुःस्थूलागलिताशरदभ्रवत् ॥ ३३ ॥ कस्यचिद्विवशांगस्यक्षीणस्यविपुलस्यच ॥ प्रविश्यांतर्वातसूचि र्भवत्यतिविषूचिका ॥ ३४ ॥ कस्यचित्तनुदेहस्यस्वस्थस्यसुधियोपिवा ॥ प्रविश्यजीवसूचित्वेभवत्यंतर्विषूचिका ॥ ३५ ॥ एवंक्वचित्तृ प्यतिसादुर्बुद्धित्हृदयास्थिता ॥ क्वचिदुच्छेद्यतेपुण्यैर्मंत्रौषधितपःक्रमैः ॥ ३६ ॥ आसीद्बहूनिवर्षाणिभ्रमणैकपरायणा ॥ देहद्वयेनग च्छंतीव्योम्निभूमितलेतथा ॥ ३७ ॥ रजस्तिरोहिताभूमौहस्तेंगुलितिरोहिता ॥ प्रभातिरोहिताव्योम्निवस्त्रेसूत्रतिरोहिता ॥ ३८ ॥ अंतस्थ स्नायुसरितिदुर्भगेपांशुपांडुरे ॥ शुष्करेखासरित्खातेसूक्ष्मरेखाजरत्तृणे ॥ ३९ ॥

कर्कटीतनुर्महद्भिरनिलैर्वायुभिर्गलिताविशीर्णा ॥ ३३ ॥ अथविषूच्याश्चरित्रंविस्तरेणाह ॥ कस्यचिदित्यादिना ॥ प्रायोगांतरेणविवशांगस्य क्षीणस्यकृशांगस्य विपुलस्यपी नांगस्य ॥ वातलीनाअयःसूचिरतिशयिताविषूचिकाप्रवृत्तिरोगोभवति ॥ ३४ ॥ अंतर्विषूचिकादुर्बुद्धिरूपा ॥ ३५ ॥ क्वचित्कस्मिंश्चित्पुरुषे ॥ उच्छेद्यतेनिवार्यते ॥ ३६ ॥ ॥ ३७ ॥ तस्यास्तिरोधानस्थलविशेषानाह ॥ रजइत्यादिना ॥ ३८ ॥ देहमध्येपितानाह ॥ अंतःस्थेति ॥ व्यभिचारादिदोषदुष्टेभगेउपस्थेंद्रिये ॥ पांसुभिरूषादिभूपांसुभिः पांडुरेधूसरावयवे ॥ शुष्कारूक्षायाहस्तपादादिरेखास्तल्लक्षणेशुष्कसरित्खाते ॥ सूक्ष्मायारोमादिरेखास्तल्लक्षणेजरत्तृणे ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थ्यंतेइत्यर्थः सौभाग्यलक्षणंतद्धीनेंगे गतच्छायेनष्टकांतौ शून्याअंतःसद्भावशून्या उच्छ्वासःपीडितानामूर्ध्वनिःश्वासः देहाद्बहिर्देशेपिमक्षिकाभिःरूक्षदुर्गंधवातैश्वयुक्तेहरित तृणाद्यावृतप्रदेशे श्रियावृक्षैश्वश्रीकरैर्वाबिल्वाम्रादिवृक्षैःपरिवर्जिते ॥ ४० ॥ स्थूलैःपशुनराद्यस्थिग्रंथिभिर्वलिते ॥ वात्यादिनानित्यंकंपेनस्फुरत्तमेसंचलत्तमे ॥ आत्मीया आत्मनिष्ठास्तएवअच्छाःस्वच्छानीहारवत्परसंतापहारिणः नविद्यंतेआत्मीयाच्छनीहारायत्र ॥ अशुद्धान्यंशुकानियेषांतथाविधैरशिष्टजनैःकृतसंचारे ॥ ४१ ॥ किणेषुकोट रेषुस्थाणवंगेषुच्छिन्नाग्रवृक्षेषुचक्रमाद्विश्रांतामधुमक्षिकाःपिकवायसाश्वयत्र ॥ शीतातिशयेनरूक्षएवरौक्षोरूढःप्रादुर्भूतोरसंनूशब्दायमानोवातोयत्र ॥ अतएवकंपविलोलां गुलिशाखिनि ॥ ४२ ॥ मालाभूतानामभ्रलेखानांनीहारपटलानांसंसारःसंचारोयत्र ॥ विदीर्णस्वांगुलिव्रणानांजनानांगर्त्तप्रायेनिवासदेशे ॥ स्पंदमानाअवश्यायपृषतोहिम बिंदवोयत्र ॥ पदेपुरुषपादांकितेदेशेवल्मीकेवामलूरेपर्वतेच ॥ समाहारैकत्वम् ॥ ४३ ॥ आशुजलभ्रांतौकचतिप्रकाशमानेमरुदेशे ॥ नखैर्नखप्रधानैर्व्याघ्रभल्लूकादिभिरजग

अर्थहीनेगतच्छायेशून्याउच्छ्वासकारिणी ॥ मक्षिकावातहरितेश्रीवृक्षपरिवर्जिते ॥ ४० ॥ स्थूलास्थिग्रंथिवलितेनित्यकंपस्फुरत्तमे ॥ अनात्मीयाच्छनीहारेऽशुद्धांशुककृतभ्रमे ॥ ४१ ॥ किणस्थाणवंगविश्रांतमक्षिकापिकवायसे ॥ रौक्षरूढरसद्वातेविलोलांगुलिशाखि नि ॥ ४२ ॥ मालाभ्रलेखासंसारेस्वांगुलिव्रणगर्त्तके ॥ स्पंदावश्यायपृषतिपदवल्मीकपर्वते ॥ ४३ ॥ कचत्याशुजलभ्रांतौनखाजगरक र्कशे ॥ क्वाचित्कविसरद्भीतभीतयूककुपांथके ॥ ४४ ॥ विरूपाशुष्कसंदष्टवीटिकापूतिपल्वले ॥ मध्यस्थलेखमार्गौघशीतश्वसनगोचरे ॥ ४५ ॥ ग्रस्तयूकानरौघास्तृक्पूर्णसृक्किनखास्यताम् ॥ दधतांगुष्ठपक्षेणक्रांतिसर्वत्रयायिनी ॥ ४६ ॥ नानाविरचनाचित्रपटपत्तनगा मिनी ॥ गमागमपरिश्रांतातत्रात्यंतचिराध्वगा ॥ ४७ ॥

रादिभिश्वकर्कशेकठिनतमेअरण्ये ॥ क्वचिद्द्रवाःक्वाचित्काविसरंतःपलायमानाभीतेभ्योपिभीतायूकाभिःकुत्सिताःपांथाःपथिकजनायत्र ॥ ४४ ॥ विरूपैराशुष्कैश्वपिशाचा दिभिःसंदष्टानितांबूलवीटिकाप्रायाणिशीर्णपर्णानियत्रतथाविधेपूतिपल्वलेदुर्गंधजलगर्त्ते ॥ मध्यस्थालेखाःकुल्यादिखातानियेषुतथाविधमार्गौघानांशीतस्यश्वसनस्यगोच रेविषयेपांथविश्रांतिस्थाने ॥ ४५ ॥ ग्रस्तानांचर्वितानांयूकानामुदरस्थनरौघास्तृग्भिःपूर्णेसृक्किणीयेषांतथाविधानांपामरनरवानरादीनांनखाएवास्यानिमुखानियस्यतद्भावंदध ताअंगुष्ठपक्षेणअंगुष्ठपरिवारायितेनांगुलिजालेनक्रांतिआक्रांतिसर्वत्रदेहप्रदेशेभूम्यादिप्रदेशेप्रागुक्तस्थानेषुचयायिनीगमनशीलासाअभूदितिशेषः ॥ ४६ ॥ तथानानाविधाभि र्गजतुरगादिविरचनाभिश्चित्राःपटावस्त्राणियेषुतथाविधेषुपत्तनेषुनगरेषुगमनशीला ॥ तत्रगमागमैःसंचारैःपरिश्रांताअभूदितिशेषः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचीस्वभावादेवचनगरेष्वनगरेषुग्रामेषुचव्यस्तानांरथ्याप्रक्षिप्तानांकार्पासादिसूत्राणांतत्प्रोतानांकाचमण्यादीनांभांडानामलंकाराणांचएकंभर्त्तुंशीलमस्याः ॥ सौक्ष्म्येणान्यह
रणाशक्तेः ॥ किंचज्वरादिनातप्तेप्राणिनांकलेवरारण्येबलीवर्दापवर्त्तिनी यथात्दृष्टोबलीवर्दःशृंगाभ्यांवल्मीकाद्यपस्किरन्नपवर्त्तयतितद्वदियंसूच्यपितच्छीलेत्यर्थः ॥ ४८ ॥ के
नचित्सीवनायगृहीताचिरंसीवनेतंतुप्रोतमुखाकृष्टिःखिन्नाश्रांतासतीमनाकृतत्करपरिच्युतासतीविश्रमणायैवक्वापिगुप्ताप्रच्छन्नालीयते ॥ ४९ ॥ ननुसासीवनकर्त्तुःकरवेधनंकुतो
नाकरोदित्याशंक्याह ॥ वेधनमिति ॥ कठिनाक्रूरापिसास्वयोग्येसीवनकर्मणिसूचीत्वादेवसंश्लिष्टाकौतुकादासक्तासतीवेधनंनाकरोत् ॥ कुतः ॥ सासूचीनिजत्वंनिजस्वभावं
सीवनंविजहातित्यजतिनप्रकटयतिचेत्तत्तुल्ययोगत्वात्स्वीयस्तीक्ष्णःक्रौर्यस्वभावोपिनबहिःकार्योबहिःप्रकटयितुंशक्यः ॥ तस्यापिनिजत्वाविशेषादित्यर्थः ॥ ५० ॥ साअयःसू

नगरानगरेव्यस्तसूत्रभांडैकभारिणी ॥ तप्तेकलेवरारण्येबलीवर्द्दापवर्त्तिनी ॥ ४८ ॥ गुप्ताविश्रमणायैवमनाक्करपरिच्युता ॥ तंतुप्रोतामु
खाकृष्टिःखिन्नाक्वापिविलीयते ॥ ४९ ॥ वेधनंकर्मसंश्लिष्टाकठिनापिनसाकरोत् ॥ नहितीक्ष्णोबहिःकार्योनिजत्वंविजहातिचेत् ॥ ५० ॥
सायःसूचीमनःसूच्यावलिताविजहारह ॥ दिक्ष्वाशेवशिलागुर्वीनावांगपलितासती ॥ ५१ ॥ विससारदिगंतेषुसांतःकरणसत्तया ॥ तुष
लेखेवपवनशक्त्यासंसृतिरूपया ॥ ५२ ॥ मुखेनसूक्ष्मसूत्रांतंचरंतीवपरोंभितम् ॥ परपूरोद्यमेनाशुजातेवद्दयान्विता ॥ ५३ ॥ परपूर
रसेनैवसूच्याद्दत्सुविकासितम् ॥ अनारतपतत्सूक्ष्मसूत्रांतइवस्तंभिता ॥ ५४ ॥ तीक्ष्णैरपिचिरक्षीणंपूर्यतेनिर्विचारणा ॥ दृष्टांतोत्रक्ष
णात्सूच्यापूरितोजर्जरःपटः ॥ ५५ ॥

चीमनःसूच्याजीवसूच्या ॥ गुर्वीशिलानावेव ॥ अंगपलितायांवृद्धायांसतीस्थिताआशेवचदिक्षुविजहारबभ्राम ॥ अंगेतिसंबोधनंवा ॥ ५१ ॥ संसृतिर्भ्रमणंरूपयतिप्रकटय
तीतिसंसृतिरूपातया ॥ ५२ ॥ परैरुंभितंगुंफितंसूक्ष्मंसूत्रांतंचरंतीभक्षयंतीवअतएवहिपरप्रयुक्तेनैवोदरपूरणोद्यमेनत्दृदयान्वितास्वस्थचित्ताजातेवेत्युत्प्रेक्षा ॥ ५३ ॥ उचितैवे
यमुत्प्रेक्षेत्याशयेनाह ॥ परेति ॥ यतःसूच्याप्रागपिपरपूररसेनैवपरवधप्रयुक्तोदरपूरणेच्छयैवतपःक्लेशितंस्वंमनःसुविकासितमुल्लासितमतःसाअनारतंमुखेपततिसूक्ष्मसूत्रांतेस्वा
भिलषितप्रायेस्तंभितानिरुद्धेवेत्युत्प्रेक्षोचितैवेत्यर्थः ॥ ५४ ॥ इदानींसूच्यामौढ्याचरितंतपःसूत्रैःपटच्छरोदरपूरणायैवसंपन्नंनस्वोदरपूरणायेत्युत्प्रेक्षितार्थोलोकप्रसिद्धसामान्यो
क्तिदृष्टांतःसंपन्नइत्याह ॥ तीक्ष्णैरपीति ॥ चिरायक्षीणंदारिद्र्यकार्श्यादिपीडितंकुलंतीक्ष्णैःक्रूरैरपिपूर्यतेदययापोष्यते ॥ निर्विचारणानास्मिन्नर्थेविचारोस्ति ॥ यतोदृष्टांतोत्रा
र्थेसूच्यापूरितोजर्जरःपटःप्रत्यक्षंदृष्टइत्यर्थः ॥ ५५ ॥ ॥१२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतोनसूच्यास्वोदरपूरणंकृतंतत्राह ॥ सूत्रेति ॥ यतःसूच्यासूत्रस्यांशोरग्रभागस्यनिर्गमेअंतरप्रवेशेयोग्यमच्छिद्रमेवहृदयंतपसाअर्जितंतथातेजोबुद्धिप्रकाशोऽपितत्त्वावबोधभाग्यशालित्वात्कवितायाअभिज्ञतायाअर्करुक्सूर्यकांतिरिवप्रकाशस्वभावमपिपरपूरणयैवपटादिसीवनेनैवआशुव्याप्तंनतुस्वभोगोपयुक्तमर्जितमित्यर्थः॥आङ्पूर्वादशूव्याप्ताविति धातोरौणादिकउप्रत्ययः ॥ ५६ ॥ अतएवतस्याःपश्चात्तापोऽभूदित्याह ॥ अकस्मादिति ॥ पूर्यतइतिपूरउदरम् ॥ क्षीणपूरेणतेनतपःकर्मणाअकस्माद्रूढेनप्रादुर्भूतेनतेनसूचीभावेनरूपिणी ॥ सासूचिः ॥ ५७ ॥ यदिपश्चात्तप्तासातर्हिकिंप्राणिवेधनादुपरतानेत्याह ॥ वेधमिति ॥ तथापिसापूररयेणेवनदीप्रवाहवेगसदृशेननिजेनराक्षसस्वभावेनप्रकृतेनसूचीस्वभावेनापिप्राणिवेधनाभिनिवेशेनवेधायैवस्वंस्वानुरूपंप्रचारिताप्रथममुद्योजितापश्चाद्व्यवहारिताचसतीवेधंकरोत्येव ॥ ५८ ॥ अतएवकेवलसूचीस्वभावप्रयुक्तंकार्यमपिकरोतीतिप्रागुक्तमर्थंसदृष्टांतमाह ॥ संचारयतीति ॥ यथापुत्रकलत्रादिविषयेष्वादीर्घोवासनारूपस्तंतुर्मरणकालेउद्भूतस्तत्तद्वासनानुरूपपश्वादिशरीरेषुजीवंचेतनांसं

सूत्रांशुनिर्गमेयोग्यंसूच्याहृदयमर्जितम् ॥ परपूरणयैवाशुतेजश्चकविताऽर्करुक् ॥ ५६ ॥ अकस्मात्तेनरूढेनक्षीणपूरेणरूपिणी ॥ हृदयेराक्षसीसूचिःकर्मणातप्यतेचसा ॥ ५७ ॥ वेधंपूररयेणेवकरोतिस्वंप्रचारिता ॥ प्रकृतेननिजेनापिवेधायव्यवहारिता ॥ ५८ ॥ संचारयतिवस्त्रेषुसूत्रंचतुरवेधनात् ॥ आदीर्घवासनातंतुःशरीरेष्विवचेतनाम् ॥ ५९ ॥ संचार्यमाणवेधेनधावंतीवाक्षिपातने ॥ अदर्शितमुखाएवदुर्जनामर्मवेधिनः ॥ ६० ॥ कंठवस्त्रदलप्रोतावेधाक्ष्णामुखमीक्षते ॥ कथमेताभिनघ्नीतितीक्ष्णानामेतदीप्सितम् ॥ ६१ ॥ सममेवचकौशेयेक्षौमेचवसनेस्तृता ॥ जडःकइवविज्ञानामगुणागुणमपेक्षते ॥ ६२ ॥ सादधानातंतंसूत्रमंगुष्ठांगुलिपीडिता ॥ आंत्रतंतुमिवामांतमुद्गिरंतीनिरीक्षते ॥ ६३ ॥ तीक्ष्णाप्यहृदयत्वेनसरसेष्वरसेष्ववित् ॥ सूत्रितापिपदार्थेषुविशत्यरसगामिनी ॥ ६४ ॥

चारयतितद्वद्वस्त्रेषुसूत्रंसंचारयतीत्यर्थः ॥ ५९ ॥ अतएवतुन्नवायैःपटेषुवेधेनसंचार्यमाणातेषामक्षिपातनेचक्षुःसंनिकर्षेमुखंपटेनिगूह्यधावंतीवबभूवेतिशेषः ॥ दुर्युक्तमेवेदंतयाकृतमित्यर्थांतरन्यासेनद्रढयति ॥ अदर्शितेति ॥ पिशुनचोरादयोहिदुर्जनाअदर्शितस्वमुखाएवपरमर्मभेदिनःप्रसिद्धाइत्यर्थः ॥ ६० ॥ कदाचित्कंठसक्तस्योत्तरीयवस्त्रस्यगुणेप्रोतासतीवेधाक्ष्णास्वकीयच्छिद्रलक्षणेननेत्रेणनारीणांमुखमीक्षते ॥ केनाभिप्रायेणेतितमाह ॥ कथमिति ॥ ६१ ॥ कौशेयेमृदुस्निग्धत्वादिगुणवतिपट्टवस्त्रेक्षौमेकाठिन्यरूक्षत्वादिदोषवतिक्षुमावल्कलेचसमंतुल्यवृत्त्यैवस्तृताप्रविष्टा ॥ जडोमूर्खः ॥ अगुणंदोषम् ॥ अपेक्षतेविमृशतीतियावत् ॥ ६२ ॥ सीवनकालेसूचीच्छिद्रात्तंतुनिर्गमनंसीवकांगुष्ठनिपीडितसूच्युदरांतर्गतांत्रतंतूद्गमनत्वेनोत्प्रेक्षते ॥ सेति ॥ अमांतंनिरवकाशत्वादंतःस्थितिमलभमानम् ॥ ६३ ॥ सूत्रितासूत्रप्रोतातीक्ष्णापिसासरसेष्वरसेष्वपिपदार्थेषुअहृदयत्वेनअंतर्हृदयशून्यत्वेनअवित्विशेषानभिज्ञाअतएवारसगामिनीरसास्वादहीनासूचीस्वभावादेवविशति ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनपराधदंडप्राप्तेरहोअस्यादुर्दशेत्याह ॥ अगर्दतीति ॥ नर्दगर्दशब्दे ॥ अगर्दतीनिष्ठुरभाषणादिशब्दमकुर्वाणापिमुखेप्रोतासूत्रेण सुतीक्ष्णापरसंतापसमर्थापिस्वयमेवतापिनी संतापवतीधीर्यस्याः सुष्ठुवेधितासंजातच्छिद्रापिअल्दृदयाअनुदरच्छिद्रा यथाराजपुत्र्यपिदुर्भगाअभाग्यासंपद्यतेतद्वदियमपिसंपन्नेत्यर्थः ॥६५॥ युक्तैवास्याःसादुर्दशेत्याह ॥ विनेति ॥ यतःसापरेषांस्वापकारेणविनैवमरणंवधमीहतेइच्छतिअतस्तत्पापवशाद्वेदनात्स्वबुद्धिवशादेवसूत्रेरोधितासतीस्वकर्मपाशेएवप्रलंबतेइत्युत्प्रेक्षा ॥ ६६ ॥ दैवात्सीवकस्यकरात्परिच्युतासतीतस्यान्यस्यवाअंकेउत्संगेदूरेकरस्पर्शायोग्येस्थानेकिंश्यामैःकुत्सितश्यामवर्णैरधोरोमभिःसहमैत्र्येवमित्रत्ववशादिवतेषुशेतेनिद्राति ॥ कुतोऽस्यास्तत्सागमोरोचतेतत्राह ॥ स्वरूपसदृशमिति ॥ ६७ ॥ अतएवमूर्खचित्तवृत्त्यापिसहसंगतिस्तस्यारोचतेइत्याह ॥ मिश्रितेति ॥ ६८ ॥ नन्वेवंतस्यालोहसूच्यंतरैःसहापिसाम्यात्त

अगर्दतीमुखप्रोतासुतीक्ष्णापिचतापिधीः ॥ सुवेधिताप्यल्दृदयाराजपुत्र्यपिदुर्भगा ॥ ६५ ॥ विनापरापकारेणतीक्ष्णामरणमीहते ॥ वेदनाद्रोधितासूचीकर्मपाशेप्रलंबते ॥ ६६ ॥ शेतेकिंश्याममैत्र्येवदूरेकरपरिच्युता ॥ स्वरूपसदृशंमित्रंकस्मैनामनरोचते ॥ ६७ ॥ मिश्रितामूढचित्तानांवृत्तिभिःप्राकृतेजने ॥ तिष्ठत्यात्मसमांकोहिसंगतिंत्यक्तुमिच्छति ॥ ६८ ॥ भवत्ययस्कारवित्तौसंत्यज्यांतर्द्धिगामिनी ॥ भस्त्रावातैर्विचलितागगनादुत्पतोन्मुखी ॥ ६९ ॥ प्राणापानप्रवाहस्थल्दृत्पद्मांतरचारिणी ॥ दुःखशक्तिर्महाघोराजीवशक्तिरिवोदिता ॥ ७० ॥ समानवैपरीत्येनसमानसमगामिनी ॥ उदानविपरीतत्वादुदानसमगामिनी ॥ ७१ ॥ व्यानस्थाव्याधिजननीसर्वांगरसचारिणी ॥ ल्दृत्कंठेशूलपवनेवैवर्ण्योन्मादकारिणी ॥ ७२ ॥ प्रायशोऽविकहस्तस्थासुप्तोर्णागंधकोटरे ॥ बालहस्तांगुलीतल्पवेधनैकविलासिनी ॥ ७३ ॥ पादप्रविष्टारुधिरपानोपार्जनविस्मिता ॥ तुष्यत्यतितरांगुच्छभोजनातुच्छभोजनैः ॥ ७४ ॥ शेतेकर्दमकोशस्थाचिरकालमधोन्मुखी ॥ इच्छानुरूपमासाद्यकइवास्पदमुज्झति ॥ ७५ ॥

न्मैत्र्याकदाचित्तैःसहदैवाल्लोहकारप्राप्तौकिंकरोतितत्राह ॥ भवतीति ॥ अयस्काराणांवित्तौप्राप्तौसत्यांतैःसंतापायाग्नौन्यस्यमानातदीयचर्मभस्त्रावातैर्विचलितासतीतान्संत्यज्यांतर्द्धिगामिनीअंतर्धानगतासतीगगनादुत्पतोन्मुखीपलायनपराभवतीत्यर्थः ॥६९॥ तस्याःप्राणिनांप्राणादिद्वारादेहांतःसंचारमाह ॥ प्राणेत्यादिना ॥ दुःखप्रदाकर्मशक्तिरेवजीवशक्तिःसजीवाउदिताआविर्भूतेव ॥ ७० ॥ ७१ ॥ शूलपवनेशूलरोगात्मकेवायौप्रविश्येतिशेषः ॥ ७२ ॥ प्रायशःकंबलादिसीवनकालेअविकानांअविपालानांहस्तस्थाकदाचित्तदीयोर्णानांगंधस्यलेशस्यकोटरेसुप्ताकदाचित्तुबालानांहस्तांगुल्यादिलक्षणस्यस्वतल्पस्यवेधनेएकविलासिनीमुख्यकौतुकवतीआसीदितिशेषः ॥७३॥ पुष्पगुच्छमालाग्रथनकालेगुच्छभोजनातुच्छभोजनैरल्पभोजनैस्तुष्यतितृप्यति ॥ ७४ ॥ कर्दमकोशोमलपंकिलमूलाधारकोशः ॥ ७५ ॥

१ निराधारशयनानुपपत्त्यालब्धमिदम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपहृतंदूषितमात्मानंस्वाम् ॥ उपवेधनैःपरप्राणापहारपर्यंतैर्वेधनैः ॥ स्वार्थाभावेकथंपरमारणेतस्याःप्रवृत्तिस्तत्राह ॥ उत्सवादपीति ॥ येषांपरपीडाऽसामर्थ्येपिपरैःसहकलहो पिसुखायतेतेषांपरमारणंसुखायतेइतिकिंवक्तव्यमितिभावः ॥७६॥ अल्पतररक्तकणास्वादलोभाद्वास्याःपरमारणेप्रवृत्तिरुपपन्नेत्याह ॥ कपर्दकेति ॥ राक्षसकुलोचितपरहिं साविहाराभिमानाद्वातदुपपत्तिरित्याह ॥ दुरुच्छेदेति ॥७७॥ सामोहितेनमूढेनात्मनाक्रियमाणेनजीवसूचीलोहसूचीतिस्वकीयसूचिकाद्वयलभ्येनवेधनेनसर्वेषांनृणांमृतिमाशं कतेतर्कयति ॥ मूढानामांवश्यकेस्वार्थेमूढतानोदेतिसाचित्राऽऽश्चर्यभूतेत्यर्थः ॥ ७८ ॥ इदानींमेममपरमारणंप्राक्सीवनकालेवस्त्रतंतुविभेदेनाभ्यस्तमितिहेतोराशुसंपद्यतेइतिस्व कौशलानुसंधानेनांतःअत्यंतंनिर्मलाप्रसन्नाभवति ॥ हृष्यतीतियावत् ॥ ७९ ॥ यथालोकेप्रसिद्धासूचिःसीवनेनमृदोघर्षणंविनातूष्णींस्थापितामलमनैर्मल्यमादत्तेस्वीकरोति

क्रौर्येणापहतात्मानंदर्शयत्युपवेधनैः॥ उत्सवादपिनीचानांकलहोपिसुखायते॥ ७६ ॥ कपर्दकार्द्धलाभेनकृपणोबहुमन्यते ॥ दुरुच्छे दाहिभूतानामहंकारचमत्कृतिः ॥७७॥ सूचिकायुग्मलभ्येनमोहितेनात्मनानृणाम्॥ मृतिमाशंकतेचित्रास्वार्थेनोदेतिमूढता ॥७८॥ व स्त्रतंतुविभेदेनपरमारणमाशुमे॥ इदंसंपद्यतइतिभवत्यंतर्हिनिर्मला॥७९॥ स्थापितामलमादत्तेयथामृद्घर्षणंविना॥ परापराधविरहा द्व्याधिस्तस्याःप्रवर्त्तते॥ ८० ॥ सूक्ष्मादृश्याचैवदात्रीक्षणाद्विस्मृतिमेतिसा॥ तीक्ष्णभेदकरीक्रूरासूचीचेष्टेवदैविकी ॥ ८१ ॥ तंतुवेधन मात्रेणहतोन्यइतितोषिता॥ दुर्जनोयेनतेनैवनाशितेनैतिहृष्टताम्॥ ८२ ॥ पंकेमज्जतियातिखंविहरतिव्योमानिलैर्दिक्तटेशेतेपांसुषुभू तलेष्विववनेपट्टेगृहेंऽतःपुरे॥ हस्तेश्रोत्रसरोरुहेथमृदुनिस्वेच्छोर्णिकाखंडकेरंध्रेकाष्ठमृदांचमातिहृदयेद्रव्यात्मशक्त्यैवसा ॥ ८३ ॥ ॥ श्रीवाल्मीकिरुवाच॥ ॥ इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम॥ स्नातुंसभाकृतनमस्करणाजगामश्या माक्षयेरविकरैश्चसहाजगाम॥ ८४॥ ॥ षष्ठंदिनम्॥ ॥इ०वा०वा०दे०मो०उत्प०सूचिव्यवहारवर्णनंनामसप्ततितमःसर्गः॥७०॥

तथातस्याअपिपरापराधविरहाद्व्याधिर्दुःखंप्रवर्त्ततइत्यर्थः ॥ ८० ॥ अदृश्यादात्रीखंडयित्री ॥ दैविकीऔत्पातिकीचेष्टेव ॥ ८१॥ मर्मस्थानाच्छादनोत्तरीयतंतुवेधनमात्रकौ शलेन ॥ ८२ ॥ विस्तरोक्तंसूचीचरित्रंसंक्षिप्योपसंहरति ॥ पंकेइति ॥ पल्वलादिपंकेमज्जति ॥ खमाकाशंयाति ॥ व्योमानिलैःसहदिक्तटेविहरति ॥ इवकारोभिन्नक्रमः ॥ अंतःपुरेगृहेपट्टेपर्यंकपट्टास्तरणइवभूतलेवनेपांसुष्वपिशेतेतथानराणांहस्तेश्रोत्रलक्षणेश्रोत्रस्थेवासरोरुहेपद्मेस्वेच्छयाऊर्णिकानांमेषरोम्णांखंडकेराशौचशेते ॥ काष्ठानांमृ दांकुड्यादीनांचरंध्रेअल्पतरेपिच्छिद्रेमातिसंमीयतेतथाप्राणिनांहृदयेचमाति ॥ यथामणिमंत्रादिद्रव्यात्मशक्त्यामायावीयोगीवासर्वत्रयथेच्छंविहरतितद्वदित्यर्थः ॥८३॥८४॥ इतिश्रीवा०तात्पर्यप्र०उत्पत्ति०सप्ततितमःसर्गः ॥ ७० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

१ मूढानांव्यर्थेइतिक्वचित्पाठः २ इदमार्थिकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्कट्याःसूचिभूतायाःपश्चात्तापोत्रवर्ण्यते ॥ स्मरंत्याःप्राक्तनंदेहंविस्तरात्परिदेवनम् ॥ १ ॥ सर्वेषांसर्वजातीयानांनराणांमांसानामास्वादनेऽपीतिशेषः ॥ तृप्तिमलंबुद्धिम्॥ १॥ तृप्ताअपगतक्षुधा ॥ २ ॥ हतशक्तिःकुंठितभक्षणसामर्थ्या ॥ नमात्युदरेइतिशेषः ॥ ३ ॥ तानिप्राक्तनानि ॥ अंगानिहस्तपादादीनि ॥ ४ ॥ अस्यामेतद्दशापन्नायाम् ॥ वसया वासितःसुगंधिः ॥ आसनिआस्येयन्प्रविशन् ॥ एतेःशतृप्रत्ययः ॥ पद्दन्निति सूत्रेप्रभृतिग्रहणस्यप्रकारार्थत्वादासन्नादेशः ॥ ५ ॥ पंकांतर्मज्जनादिप्राक्सर्गेवर्णितम् ॥ शुक्रेण

श्रीवसिष्ठउवाच ॥ ॥ अथसाबहुकालेनकर्कटीनामराक्षसी ॥ सर्वेषांनरमांसानांनतृप्तिमुपाययौ ॥ १ ॥ पूर्वेणैवकिलाहारात्प्राक् रुधिरबिंदुना ॥ सूच्याःकिमिवमात्यंतस्तृष्णासूचीसुदुर्भरा ॥ २ ॥ चिंतयामासहाकष्टंकिमहंसूचितांगता ॥ सूक्ष्मास्मिहतशक्तिश्चअपि ग्रासोनमातिच ॥ ३ ॥ क्वमेतानिविशालानिगतान्यंगानिदुर्धियः ॥ कालमेघविशालानिवनेशीर्णानिपर्णवत् ॥ ४ ॥ मय्यस्यांमंदभा ग्यायांमनागपिनमातिहि ॥ स्वादुमांसरसग्रासोवसावासितआसयन् ॥ ५ ॥ पंकांतर्विनिमज्जामिपतामिधरणीतले ॥ हतास्मिजन पादौघैःशुक्रेणमलिनास्मिच ॥ ६ ॥ हाहताहमनाथाहमनाश्वासानिरास्पदा ॥ दुःखादुःखेनिमज्जामिसंकटात्संकटेपिच ॥ ७ ॥ नसखी नचमेदासीनमेमातानमेपिता ॥ नमेबंधुर्नमेभृत्यानमेभ्रातानमेसुतः ॥ ८ ॥ नमेदेहोनमेस्थानंनमेकश्चित्समाश्रयः ॥ नैकस्थानेसमा वासोभ्राम्यामिवनपर्णवत् ॥ ९ ॥ आपदांधुरितिष्ठामिनिविष्टास्मिसुदारुणे ॥ अभावमपिवांछामिसोपिसंपद्यतेनमे ॥ १० ॥ स्वकोदे हःपरित्यक्तोमूढचेतनयामया ॥ काचबुद्ध्याविमूढेनहस्तात्चिंतामणिर्यथा ॥ ११ ॥ आपतद्भिमनोमोहंपूर्वमापत्प्रयच्छति ॥ पश्चादनर्थ विस्ताररूपेणपरिजृंभते ॥ १२ ॥ धूमेषुपरितिष्ठामिमार्गेविलुलितास्मिच ॥ तृणेषुप्रेषितास्म्यंतर्हामेदुःखपरंपरा ॥ १३ ॥ परप्रैषकरीनि त्यंपरसंचारचारिणी ॥ परंकार्पण्यमायाताजातापरवशास्म्यलम् ॥ १४ ॥ भ्रांतिंकरोमितुच्छेचसापिवेधनरूपिणी ॥ अहोममाल्पभा ग्यायादौर्भाग्यमपिदुर्भगम् ॥ १५ ॥

चरमधातुना ॥ ६ ॥ अनाश्वासासखिबंध्वाद्याश्वासनशून्या ॥ संकटात्प्राणसंकटात् ॥ ७ ॥ तत्कुतस्तत्राह ॥ नेति ॥८॥ समाश्रयउपजीव्यः ॥ ९ ॥ अभावंमरणम् ॥१०॥ ॥ ११ ॥ इदंचदुःखंमोहाविष्टमनःकृतमेवेत्याह ॥ आपतद्भीति ॥ मनःकर्तृमोहमापतत्सत्पूर्वमापादयतिदुःखसहस्रमित्यापद्दुर्बुद्धिस्ताम् ॥ व्यत्ययेनप्रथमा ॥ १२ ॥ किंचक दाचिदहंकैश्चित्सूत्रेप्रोताधूमप्रदेशेबद्धाधूमेषुपरिउपरितिष्ठामि ॥ कदाचिन्मार्गेपतिताखरोष्ट्रादिभिर्विलुलिताउपमर्दिता ॥ कदाचित्कैश्चिन्नलिकादितृणेषुनिधानायांतःप्रेषि ताप्रवेशितास्मि ॥१३॥१४॥ तुच्छेष्वांतररक्ताद्यास्वादविषयेषुभ्रांतिमभिलाषम् ॥ साभ्रांतिरपिवेधनरूपिणीवेधनमात्रफलानास्वादनफला ॥ निरुदरजिह्वत्वादित्यर्थः॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोयंवेतालशांतिकर्मणिवेतालोदयइतिलोकप्रसिद्धआभाणकःस्वस्यांसंपन्नइत्याह ॥ उत्थितइति ॥ अवदातेनतपसा ॥ १६ ॥ तत्प्राक्तनंमहावपुःकिंकारणंत्यक्तम् ॥ वाअथ वायेनप्रकारेणबुद्धौसत्यांनाशेनभाव्यम् ॥ आवश्यकेकृत्यः ॥१७॥ नापूजयद्गणेशानंसूचीसृष्टौसविश्वसृट् ॥ नापसूत्रांततःसूचींनष्टांविदतिमानवइत्याभाणकमनुसृत्याह ॥ मामिति ॥ अवांतरेपथिदैवात्पांसुनिर्मग्नांकोवाउद्धरिष्यतिदुर्लक्ष्यत्वान्नकश्चिदुद्धरिष्यतीत्यर्थः ॥ हारितांहापिताम्॥आवृतामितिपाठेतुस्पष्टम् ॥१८॥ यद्यप्यसूक्ष्मदृशउद्धर्तुमशक्तास्तथापिविविक्तमनसःसूक्ष्मदर्शिनोयोगिनस्त्वामुद्धरिष्यंतीत्याशंक्याह ॥ विविक्तेति ॥ हताशयामादृशाइतिशेषः ॥ १९ ॥ ननुत्वयैवस्वात्मोद्धर्त्तव्यस्तत्राह ॥ स्थितायाइति ॥ प्रकाशयतीतिप्रकाशस्तद्भावःप्राकाश्यमर्थदर्शनम् ॥ २० ॥ आवलिताआपदायस्मिन्कर्मणितद्यथास्यात्तथालुठितव्यम् ॥ २१ ॥ वैधुर्यैःप्राणिसंहारेणावष्टंभेनचभा

उत्थितःस्फारवेतालःकुर्वत्याःशांतिमद्यमे ॥ सर्वनाशोवदातेनप्रवृत्तायाममोदितः ॥ १६ ॥ किंमंदयामयाताहृक्संत्यक्तंतन्महावपुः ॥ यथानाशेनवाभाव्यंतथोदेत्यशुभामतिः॥ १७ ॥ मामवांतरनिर्मग्नांसूक्ष्मांकीटतनोरपि ॥ उद्धरिष्यतिकोनामपांसुराशिभिरावृताम् ॥१८॥ विविक्तमनसांबुद्धौक्कस्फुरंतिहताशयाः॥ ग्राममार्गतृणानीवगिरेरुपरिवासिनाम्॥१९॥ स्थितायाअज्ञतांभोधौक्कममाभ्युदयोभवेत्॥ अंधस्योदेतिप्राकाश्यंनखद्योतानुसेविनः॥२०॥ अतःकियंतंनोजानेकालमावलितापदम्॥ मयापद्ध्वभ्रगर्त्तेषुलुठितव्यंहतेहया॥ २१ ॥ कदास्यामंजनमहाशैलपुत्रकरूपिणी ॥ द्यावापृथिव्योर्वैधुर्यैस्तंभतामनुतिष्ठती ॥ २२ ॥ मेघमालासमभुजाचिरंविद्युत्पदेक्षणा॥ नीहारजालवसनाप्रोच्चकेशमितांबरा॥२३॥ लंबोदराभ्रसंदर्शप्रनर्त्तितशिखंडिनी॥ लंबलोलस्तनीश्यामादेहवातद्रवत्स्तनी॥ २४ ॥ हासभस्मच्छटाच्छन्नसूर्यमंडलरोधिनी॥ कृतांतग्रसनोद्युक्तकृत्यैकाकृतिधारिणी ॥ २५ ॥ कृशानूलूखलदृशासूर्यस्रग्दामहारिणी॥ पर्वतात्पर्वतेशृंगेनन्यस्यपादौविहारिणी॥ २६ ॥

रोत्तारणे ॥ २२ ॥ विद्युत्पदेविद्युत्स्थानापन्नेईक्षणेचक्षुषीयस्याः ॥ प्रोच्चैःकेशैर्मितमंबरंयस्याः ॥ २३ ॥ उदरलक्षणस्याभ्रस्यसंदर्शनेप्रेक्षणेनप्रनर्त्तिताःशिखंडिनोमयूरायया ॥ देहवातेनश्वासेनद्रवंतौकंपमानौस्तनौयस्याः ॥ २४ ॥ हासेनाट्टहासविलासेनभस्मच्छटाभिर्दग्धारण्यधूलिपटलैश्छन्नस्यआच्छादितस्यसूर्यमंडलस्यरोधिनीपिधानशीला ॥ कृतांतइवसर्वप्राणिग्रसनमेवउद्युक्तमारब्धंकृत्यंययातथाविधायाएकाआकृतिर्भीषणाकारस्तद्धारिणी ॥ २५ ॥ कृशानुरिवज्वलंत्यौउलूखलमिवनिमग्नेदृशौनेत्रेयस्याः ॥ आपंचैवहलंतानामितिभागुरिमतेनदृशाशब्दःसाधुः ॥ कदाभविष्यामीतिसर्वत्रानुषज्जते ॥ २६ ॥

१ आपदेतिटाबंतम्

२ अत्र (हारितांहापिताम्) इतिटीकानुरोधेन (हारितांपांसुराशिभिः) इतिपाठःकल्प्यइतिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नखरानखास्तेषामावलीपंक्तिः ॥२७॥ महतांप्रौढानांरक्षसांहृदयविद्रावणकरंस्मितंईषद्धसितम् ॥ स्फिग्वाद्यैःस्फिजोवादनैः ॥ अरण्यान्यांमहारण्ये ॥ इंद्रवरुणेत्यादिनाङी
ष्यानुक् ॥ २८ ॥ २९ ॥ ३० ॥ दुःखफलपर्यवसितत्वाकुत्साहैतपोवह्नौतत्प्राक्तनंभासुरंवपुर्भस्मत्वंनीतमितिशेषः ॥ यथाकनकेनस्वकनकत्वनाशकंभस्मत्वंलोहसूचित्वंवाउ
ररीकृतंस्यात्तत्तुल्यम् ॥ ३१ ॥ प्राचिकादीर्घपादलूताजातिस्तस्याःखुरःपादाग्रंतत्समम् ॥३२॥ मृन्मलिनंकनकांगदंप्राप्याप्यविचारेणमृदितिभ्रांत्यात्यजति॥३३॥ इदानीमुद
रायंगानिप्रत्येकेसंबोध्यानुशोचंत्याह ॥ हाइत्यादिना ॥ विंध्याद्रेःसनीहारगुहाउपमायस्यतथाविधहेमहोदरत्वंसिंहेनसिंहसदृशेनस्वाविर्भाविनहस्तिसदृशानांत्वद्वियोगदुःखा

कदामेस्याद्गुरुश्वभ्रभासुरंतन्महोदरम् ॥ कदामेस्यान्द्धरन्मेघमेदुरानखरावली ॥ २७॥ कदामेस्यान्महारक्षोविद्रावणकरंस्मितम् ॥
स्वस्फिग्वाद्यैररण्यान्यांकदानृत्येयमुन्मदा ॥२८॥ वसासवमहाकुंभैर्मृतमांसास्थिसंचयैः ॥ कदाकरिष्येविरतंमेदुरोदरपूरणम्॥२९॥
कदापीतमहालोकरुधिराक्षीबतांगता ॥ भवेयंमुदिताहृष्टामुद्रितानिद्रयाततः॥३०॥ मयैवकुतपोवह्नौतदग्र्यंभासुरंवपुः॥ भस्मत्वंकन
केनेवसूचित्वमुररीकृतम् ॥ ३१ ॥ क्वकिलांजनशैलाभंवपुर्भरितदिक्तटम् ॥ क्वप्राचिकाखुरसमंसूचित्वंतृणपेलवम् ॥३२॥ त्यजत्याशु
मृदित्यज्ञःप्राप्यापिकनकांगदम् ॥ मयासूचित्वलाभेनसंत्यक्तंभासुरंवपुः॥३३॥ हामहोदरविंध्याद्रिसनीहारगुहोपम ॥ अद्यनांतंकरो
षित्वंकथंसिंहेनहस्तिनाम् ॥ ३४ ॥ हाभुजौभरनिर्भग्नशिखरौशशभृन्नखैः॥ पुरोडाशधियाचंद्रंकथमद्यनबाधतः॥३५॥ हावक्षःकाच
वैधुर्यगिरींद्रतटसुंदर ॥ नाद्यसिंहादियौकंतद्धृतंरोमवनंतथा॥३६॥ हानेत्रेकृष्णरजनीरजःशुष्केंधनैजने॥ कस्मान्नमेभूषयतोहग्ज्वा
लामालयादिशः॥ ३७॥ हास्कंधबंधोनष्टोसिनिषिद्धोसिमहीतले॥ कालेनविनिपिष्टोसिनिघृष्टोसिशिलातले॥ ३८ ॥ हामुखेंदोतपसि
किंनाद्यत्वंममरश्मिभिः॥ कल्पांतदावसंशांतचंद्रबिंबमनोहर॥ ३९ ॥

नामंतंनाशंकथंनकरोषि ॥ ३४ ॥ भरेणातिशयेननिर्भग्नगिरिशिखरौ ॥ शशभृत्सदृशैर्नखैर्दैवभोग्यत्वात्पुरोडाशमिवस्थितंचंद्रंकथंनबाधतइतिदैर्घ्यातिशयोक्तिः ॥ ३५ ॥
काचमणिमालानांवैधुर्येपिस्वतएवगिरींद्रतटमिवसुंदरहेवक्षःत्वयासिंहादयइवसिंहादयएववासिंहानत्तुंशीलमस्यतथाविधंवायूकानांसमूहोयौकंयत्रतथाविधंरोमवनंयथापूर्वं
धृतंतथाद्यनधृतमित्यर्थः ॥ ३६ ॥ कृष्णरजन्याकृष्णपक्षरात्र्यारज्यतेआसज्यतइतिकृष्णरजनीरजोंधकारस्तद्रूपशुष्केंधनस्यएजनेप्रदीपने ॥ एजृदीप्तौल्युः ॥ हेमेनेत्रेदृकूद
र्शनंतल्लक्षणयाज्वालामालयादिशःकस्मान्नभूषयतः ॥ ३७ ॥ निषिद्धःपरिहृतःपरित्यक्तइतियावत् ॥ ३८ ॥ कल्पांतेदावेनदवाग्निनासंशांतंदग्धंचंद्रबिंबमिवश्यामत्वा
न्मनोहर ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मक्षिकाणांखुरैःपादाग्रैरपिदोलिताचालिताअतिक्षुद्रेत्यर्थः ॥ ४० ॥ सत्‌विद्यमानंकंदंस्थूलतरुमूलंयस्मिंस्तथाविधंश्वभ्रंगर्त्तइवशोभन ॥ ४१ ॥ बहुभिर्मांसभारैर्बहुलोविपुलोयासआहारः ॥ ४२ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०एकसप्ततितमःसर्गः ॥ ७१ ॥ ॥ ७ ॥ ॥ वर्ण्यतेत्रपुनःसूच्यास्तपउग्रंहिमाचले ॥ तद्विस्मितस्यशक्रस्यनारदोक्त्याविनिश्चयः ॥ १ ॥ साशोकपरायणासूचीअसंभवद्वाणीमौनमास्थितासतीअकंपनंसैकाग्र्यनिश्चलंयथास्यात्तथाइतिप्रागुक्तरीत्यास्वदेहादिकंवक्ष्यमाणप्रकारंचचिंतयित्वा ॥ तमेवप्रकारमाह ॥ पुनरिति ॥ १ ॥ जँगामस्थितंप्रागास्थितम् ॥ २ ॥ कथंजगामेतितदाह ॥ अपश्यदेवेति ॥ प्रथममात्मनिमानसंमनःकल्पितंसूचित्वमेवापश्यत् ॥ क्रियाशक्तिशून्येआत्मनिसूचित्वदर्शनेपिकथंगमनसिद्धिस्तत्राह ॥ प्राणेति ॥ याप्राणवातात्मिकाजीवसूचिःसास्वोपाधिभूतैःप्राणैःसूचित्वकल्पनाहतंमानसंप्रविश्यमनःकल्पितांलोहसूचींप्रविश्येतियावत् ॥ हतमानवामितिपाठेहतामानवाययालोहसूच्यातांप्रविश्येत्यर्थः ॥ ३ ॥ अथजीवसूच्यात्मन्येवमनोमयंलोहसूचिभावंपश्यत्येव ॥ तथाचलोहजीवसूच्योरन्योन्यतादात्म्याध्यासादसौकर्कटीप्राणवाताभिन्नशरीरासतीक्रियाशक्तिप्राप्यहिमवच्छिरोजगामवक्ष्यमाणरीत्यागृध्रशरीरंप्रविश्येत्यर्थः ॥ ४ ॥ महतीविशालायामहाशिलागुणोत्कृष्टेंद्रनीलशिलातदाभाआभाकांतिर्यस्याः ॥ आभाभिरातपैरूक्षेइतिवा ॥ ५ ॥ अभ्युदितातत्रैवांकुरितेव ॥ ६ ॥ सुसूक्ष्मस्यसूच्यग्ररूपस्यैकपादस्यार्द्धेनलेशेनैवआश्रिताउर्वराभूमिर्यया ॥ अतएवद्विपदामिवैकपादपरिहारेणैकपादात्मत्वासंभवेपिस्वसंविदास्वीयकल्पनयैवकल्पितभागद्वयमध्येअग्रार्द्धपरिहारेणैकपादात्मएकपादावस्थितिरूपंतपः ॥ ७ ॥

हाहाहस्तौमहाकारौतावद्यक्वगतौमम॥संपन्नास्मिमहासूचिर्मक्षिकाखुरदोलिता॥४०॥ हांभगोग्रकरंजाढ्यसत्कंदश्वभ्रशोभन॥ विंध्याद्दरेण्यविपुलनितंबामलबिंबक॥४१॥क्वाकारोंबरपूरकःक्वचनवंतुच्छात्मसूचीवपुरोदोरंध्रसमंक्वास्यकुहरंक्वेदंचसूचीमुखम्॥क्वग्रासोबहुमांसभारबहुलःक्वाब्बिंदुनाभोजनंसूक्ष्मास्म्येतदहोमयैवरचितंस्वात्मक्षयेनाटकम्॥४२॥ ॥इ०वा०वा०दे०मो०उ०क०सूचिकापरिदेवनंनामैकसप्ततितमःसर्गः॥७१॥ ॥श्रीवसिष्ठउवाच॥ ॥सूचीसासंभवद्वाणीचिंतयित्वेत्यकंपनम्॥पुनस्तद्देहलाभायभवाम्याशुतपस्विनी॥१॥ इतिसंचिंत्यचित्तस्थंसंहृत्यजनमारणम्॥तदेवहिमवच्छृंगंजगामतपसेस्थितम्॥२॥अपश्यदेवसूचित्वंसातन्मानसमात्मनि॥प्राणवातात्मिकाप्राणैःप्रविश्यहतमानसम्॥३॥ अथात्मन्येवसूचित्वंपश्यत्येवमनोमयम्॥प्राणवातशरीरासौजगामहिमवच्छिरः॥ ४ ॥ दृढदावानलेतत्रसर्वभूतविवर्जिते॥ महामहाशिलाभाभारूक्षेपांसुविधूसरे ॥ ५ ॥ तस्थावभ्युदितेवासौनिस्तृणेविपुलेस्थले॥ मरावकस्मात्संजातशुष्कातृणशिखायथा॥ ६ ॥ सुसूक्ष्मस्यैकपादस्यसार्द्धेनैवाश्रितोर्वरा॥स्वसंविदेकपादात्मतपःकर्तुंप्रचक्रमे॥ ७॥

१ तांशोचामीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादतलेननिशिताग्रभागेनवसुधायारेणुमपिसंकटयतितुदतीतिवसुधारेणुसंकटी ॥ संकटशब्दात्तत्करोतीतिणिचिकर्मण्यण् ॥ अल्लोपस्यस्थानिवद्भावान्नोपधावृद्धिः ॥ त्रिपदीं
पुरःपार्श्वद्वयलक्षणत्रिभागप्रसृतांदृष्टिकृत्स्नाद्विषयान्निवार्य ॥ ८ ॥ ननुऊर्ध्वमुखत्वेदृष्टेःसर्वतोनिवारणेचरेण्वणूपलसंकटेकथंतस्याःपादस्थैर्यंसिद्धंतत्राह ॥ कृष्णत्वेति ॥ दृ
ढत्वादेवस्थैर्यसिद्धंदृढत्वंचास्याःकृष्णत्वेनकृष्णायसत्वेनहिंस्रत्वेनतैक्ष्ण्येनतीक्ष्णाग्रत्वेनचसर्वांगव्याप्त्याआस्येनपवनस्याशनैर्ग्रसनैस्तद्विष्टंभलक्षणयत्नाच्चसिद्धमित्यर्थः ॥ ९ ॥
सासूचीअरण्येक्षुधाक्षुभितांअतएवसम्यकूपद्यंतेसमीपमुपसर्पंतीतिसंपदोरण्याध्वगास्तेषांदूरादालोकनमालोकस्तदर्थमुत्थितामूर्ध्वीकृतमुखभागाम् पुच्छेनआकोटौतृणपर्णा
ग्रभागेस्थिताम् पथिकव्यामोहायवातेनाप्यलोलामचंचलाम् अर्थात्तृणजलूकामनुचकारविडंबितवती ॥ दूरालोकायमितिपाठेदूरादालोकायआयंआयतंदीर्घंयथास्या
त्तथाउत्थितामित्यर्थः ॥१०॥ सूचीरंध्रनिःसृतातपस्यापिसूच्याकारत्वात्तत्सखीत्वमुत्प्रेक्षते ॥ मुखेतिद्वाभ्याम् ॥११॥१२॥ सूचीच्छायामपितत्सख्यंतरत्वेनकल्पयति ॥ बभूवे

सूक्ष्मपादतलेनैषावसुधारेणुसंकटी ॥ निवार्यत्रिपदींकृत्स्नायतेनोर्ध्वमुखीस्थिता ॥ ८ ॥ कृष्णत्वहिंस्रतातैक्ष्ण्यव्याप्त्यास्यपवनाशनैः॥
यत्नात्पदंनिबध्नंतीरेण्वणूपलसंकटे ॥ ९ ॥ अरण्येक्षुभितांसंपद्दूरालोकार्थमुत्थिताम् ॥ पुच्छाकोटिस्थितांवातालोलामनुचकारसा
॥ १० ॥ मुखरंध्रविनिष्क्रांतातस्याभास्करदीधितिः ॥ सखीबभूवसूच्याभापश्चाद्भागैकरक्षिणी ॥ ११ ॥ क्षुद्रेपिस्वजनेभूतेप्येतिवत्सल
तांजनः ॥ दीधित्यापिसखीवृत्तंसूच्यांशुचितयाभृतम् ॥ १२ ॥ बभूवतस्याःस्वच्छायाद्वितीयातापसीसखी ॥ एवंसूचीवमलिनातयाप
श्चात्कृतेवसा ॥ १३ ॥ सूच्यातयासुनिर्गत्यसुपाताक्ष्यास्मकूणितैः ॥ पश्चात्सख्याभयासाधुरन्योन्याचारकेवलम् ॥ १४ ॥ सूच्यभिप्रेक्षि
तेयातामतिंद्रुमलतादयः ॥ महातपस्विनींसूचींदृष्ट्वानोत्कंठयंतिके ॥ १५ ॥ स्थिरबद्धपदामेनांस्वमनोवृत्तिमुत्थिताम् ॥ अनिलंभोज
यांचक्रुर्मुखनिर्गतभांकृतैः ॥ १६ ॥

ति ॥ एवंदीधितिवदेव ॥ योविशेषस्तमाह ॥ सूचीवेति ॥ तयासूच्यासाछायासूचीपश्चात्कृतापृष्ठरक्षिकाकृतेव ॥१३॥ तासांतिसृणांसूचीनांपरस्परशिरोमूलग्रंथनेपरस्परविष्टं
भात्परस्परानुकूल्याचरणमिववृत्तमित्युत्प्रेक्षते ॥ सूच्येति ॥ पश्चात्सख्याआभयासूर्यदीधित्यातयालोहसूच्याद्वारभूतयासुष्ठुनिर्गत्यसुपाताक्ष्यादीधितिसुपातएवअक्षिनेत्रंयस्या
स्तयाछायासूच्यासहकूणितैर्ग्रथनैः ॥ छायासूचीमूलग्रथनेनसहगणनाद्बहुत्वम् ॥ अन्योन्याचारकेपरस्पराचरणीयेस्थैर्यसाहाय्येबलंदार्ढ्यंकृतमितिशेषः ॥ स्मकिल ॥ अतः
सआचारःसाधुरित्यर्थः ॥ १४ ॥ एवंतपस्यंत्याःसूच्याःअभिप्रेक्षितेपुरोदर्शनविषयेद्रुमलतादयोपिमतिंसद्बुद्धिंयाताःप्राप्ताः ॥ रतिमितिपाठेस्पष्टम् ॥१५॥ तपोविषयेस्थिरांस्व
मनसोवृत्तिमिवोत्थितामेनांसूचींद्रुमलतादयःस्वपुष्पफलादिवासितमनिलंवायुंभोजयांचक्रुरित्युत्प्रेक्षा ॥ तस्यास्तद्भोजनसंभावनेहेतुर्मुखनिर्गतभांकृतैरिति ॥ सशब्दंहिभोजनं ॥१३२॥
पामरेषुप्रसिद्धमितिभावः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवाद्द्रुमलताभिः कुसुमरजोभिः कृतं सूचीबिलपिधानमुत्प्रेक्षते ॥ प्रसूतानीति ॥ यानिप्राक्प्रसूतानियानिचभविष्याणियानिगीर्वाणेभ्योदेवेभ्योऽन्यानिअदेवतार्थानीत्यर्थः ॥ तानिसर्वाणिकौसुमानिरजांसिअस्यैसूच्यैदेयानीत्युत्साहेनेवेत्यर्थः ॥ १७ ॥ दैवाच्छिद्रेवातनुन्नामिषाद्यपवित्ररजसांप्रवेशंमहेंद्रकृतविघ्नत्वेनप्रविष्टानांयद्बहिर्निर्गमनंतत्तदीया निगरणत्वेनचोत्प्रेक्षते ॥ ततइतिद्वाभ्याम् ॥ अभ्रत्वव्याजेनच्छिद्रत्वच्छलेनस्थितेमुखेविशदपितयाननिगीर्णम् ॥ १८ ॥ कार्यंतपोविघ्ननिवारणलक्षणंप्रयोजनम् ॥ १९ ॥

प्रसूतानिभविष्याणिगीर्वाणान्यानिवाचिरम् ॥ कौसुमानिरजांस्यस्याइत्यास्यंपर्यपूरयन् ॥ १७ ॥ ततोमहेंद्रप्रहितंवातनुन्नामिषंरजः ॥ तयात्वभ्रत्वव्याजेननिगीर्णंमुखेविशत् ॥ १८ ॥ ननिगीर्णवतीतानिरजांसिदृढनिश्चयात् ॥ अंतःसारतयाकार्यंलघवोप्याप्नुवंतिहि ॥ १९ ॥ नपिवत्यास्यसंस्थानितथापुष्परजांस्यपि ॥ विस्मयंपवनःप्रापसुमेरून्मूलनाधिकम् ॥ २० ॥ आशिरःपिहितापंकैःपूरितापिमहाजलैः ॥ विधूतापिबृहद्वातैर्दग्धापिवनवह्निभिः ॥ २१ ॥ भिन्नापिकरकापातैर्भ्रामितापितडिद्भ्रमैः ॥ उद्वेजितापिजलदैःक्षोभिताप्यतिगर्जितैः ॥ २२ ॥ अपिवर्षसहस्रैःसाचित्तस्थदृढनिश्चया ॥ पादाग्रंतुकुसुमेवनाकंपततपस्विनी ॥ २३ ॥ निवृत्तायाबहिस्पंदाद्देशकालेवहौगते ॥ विचारयंत्यास्तस्याःस्वमात्मासत्यंसुचेतनम् ॥ २४ ॥ ज्ञानालोकःसमुदभूत्सापरावरदर्शिनी ॥ बभूवनिर्मलासूचिर्विसूचीपावनंपरम् ॥ २५ ॥ जाताविदितवेद्यासास्वयमेवतयाधिया ॥ तपसादुष्कृतेक्षीणेसूचीस्वसुखसूचिनी ॥ २६ ॥ इतिवर्षसहस्राणिसाकरोद्दारुणंतपः ॥ सप्तसप्तमहालोकसंतापकरमुन्मुखी ॥ २७ ॥ तस्याःकल्पाग्निभीमेनतपसाहिमहागिरिः ॥ बभूवतेनज्वलितोजज्वालेवततोजगत् ॥ २८ ॥ कस्येदंतपसाक्रांतंजगदित्यथवासवः ॥ नारदंपरिपप्रच्छसतस्याकथयच्चतत् ॥ २९ ॥ सप्तवर्षसहस्राणिसूचीदीर्घंतपस्विनी ॥ महाविज्ञानदेहासौतेनेदंज्वलितंजगत् ॥ ३० ॥

॥ २० ॥ एवंविधांतैररपिसानक्षुभितेत्याह ॥ आशिरइत्यादिना ॥ २१ ॥ २२ ॥ कुसुमाविषमूर्छादिसुमेव ॥ पादाग्रंसूच्यग्रमात्रमणुमात्रमपीत्यर्थः ॥ तुशब्दोप्यर्थे ॥ २३ ॥ तपस्यंत्यास्तस्याःपापक्षयाच्चिरंचित्तैकाग्र्याच्चविचारपूर्वकंज्ञानमुत्पन्नमित्याह ॥ निवृत्तायाइत्यादिना ॥ सत्यंसुचेतनंस्वंविचारयंत्यास्तस्याआत्मैवज्ञानालोकस्तत्साक्षात्कारवृत्तीद्धबोधात्मासमुदभूदित्यर्थः ॥ २४ ॥ २५ ॥ २६ ॥ सप्तवर्षसहस्राणि ॥ सप्तसप्तानांचतुर्दशानांमहतांभूरादिलोकानांसंतापकरंतपः ॥ उन्मुखीऊर्ध्वमुखी ॥ २७ ॥ ॥ २८ ॥ तत्सूचीतपः ॥ २९ ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलधयोवारिधराश्चशोषंप्रयांति ॥ क्षयप्रधानयामाययारुद्रस्यजगदुपसंहारशक्त्यैवेत्यर्थः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ० द्विसप्ततितमःसर्गः ॥७२॥ ॥ जीवसूच्याइहपुनर्वर्ण्यतेभोगविस्तरः ॥ तपश्चान्वेषणंवायोःसर्वतःशक्रचोदनात् ॥ १ ॥ कर्कट्याःकटुमप्रियंतपोवृत्तांतम् ॥ जीवसूचीभोगप्रकारश्रवणेजातकुतूहलः ॥ १ ॥ सूचीवृत्तंपिशाचत्वमिवअदृश्यंजीवसूचित्वम् ॥ हिमसंबंधादिवप्राप्तजाड्यबुद्ध्यामर्कटीवतुच्छभोगचपलयाकर्कट्या ॥ २ ॥ समवलंबनमाश्रयः ॥ ३ ॥ कदाचित्तस्यालोहसूच्याःसमालंबनंत्यक्त्वाव्योमवातआकाशगोवायुस्तद्रूपरथारूढयातया ॥ ४ ॥ तयाजीवसूच्यामलिनात्मनांपापिनामांत्रतंत्र्यादीनांरंध्रेणप्रविश्यदेहांतर्निलीनंचिरंनिलीय

नागाःश्वसंतिविचलंतिनगाःपतंतिवैमानिकाजलधिवारिधराःप्रयांति॥ शोषंदिशोर्कसहितामलिनीभवंतिसूच्याःसुरेंद्रतपसाक्षयमा यथेव ॥ ३१ ॥ ॥इत्यार्षेवा०वा०दे०मो०उ०क० सूचीतपःप्रभावोनामद्विसप्ततितमःसर्गः॥ ७२ ॥ ॥ ५ ॥ ॥श्रीवसिष्ठउवाच॥ ॥ कर्कटीकटुवृत्तांतंसर्वमाकर्ण्यवासवः॥ नारदंपरिपप्रच्छपुनर्जातकुतूहलः॥ १॥ ॥ शक्रउवाच॥ ॥ सूचीवृत्तपिशाचत्वंतपसोपार्ज्यतत्तया॥ कर्कट्याहिममर्कट्याकेभुक्ताविभवामुने॥ २॥ ॥श्रीनारदउवाच॥ ॥ जीवसूच्याःपिशाचत्वंगतायाःशक्रपेलवम्॥ आसीत्कार्ष्णायसीसूचीतस्याःसमवलंबनम् ॥ ३ ॥ तत्समालंबनंत्यक्त्वाव्योमवातरथस्थया॥ प्राणमारुतमार्गेणतयादेहप्रविष्टया॥ ४॥ सर्वेषामांत्रतंत्रीणांस्नायुमेदोवसास्रजाम्॥ रंध्रेणपक्षिणेवांतर्निलीनंमलितात्मनाम्॥ ५॥ यस्यांनाड्यांनभोवायुर्मातितत्तामुपेतया॥ तत्रशूलंकृतंस्थूलन्यग्रोधाग्रइवोत्कटम्॥ ६॥ तच्छरीरेंद्रियैस्तानितथान्यानिबहूनिच॥ भुक्तानिनरमांसानिभोजनान्युचितानिच॥ ७॥ सुप्तंविवलितानल्पमालयामुग्धबालया॥ कांतवक्षःस्थलस्यूतस्पृष्टपत्रकपोलया॥८॥ विद्रुतंवीतशोकासुविहंग्यावनवीथिषु॥ कल्पद्रुमौघपुष्पाग्रद्विगुणांभोजपंक्तिषु ॥ ९ ॥ पीतआमोदमंदारमकरंदकणासवः ॥ वनेष्वमरशैलानामलिन्यामलिलीलया॥ १०॥ चर्वितानिशवांगानिगृध्ध्याऽऽगर्त्तानिवृद्धया॥ खड्गपृष्ठ्येवसंग्रामेवीरांगानिजवेद्धया॥ ११॥

स्थितमित्यर्थः ॥ ५ ॥ नाड्यांशिरायाम् ॥ नभोवायुःरोगाश्रयबाह्यवायुर्मातिसंमितोभवति ॥ तत्तांतादृशप्रवहताम् ॥ तत्रनाड्याम् ॥ शूलंशूलाख्यावेदना ॥ यथास्थूलस्य श्रीदक्षिणामूर्तेर्न्यग्रोधस्यनाडीनामग्रेशैवंशूलंकृतंविषक्तंतद्वत् ॥ ६ ॥ तेषांप्राणिनांशरीरेंद्रियैः ॥ तत्प्राण्युचितभोजनानिभुक्तानि ॥ ७ ॥ विवलिताःकांताश्लेषमृदिताअनल्पामालाःस्रजोयस्यास्तयामुग्धबालयातद्भावापन्नयेत्यर्थः ॥ कांतवक्षस्थलेस्यूतंकृतंस्पृष्टंसंक्रामितंपत्रंयाभ्यांतथाविधौकपोलौयस्यास्तया ॥ तथाचमुग्धबालासुखमप्यनुभूतमेवेतिभावः ॥ ८ ॥ विहंग्याविहंगशरीरप्रविष्टयावनवीथिषुपद्मवनश्रेणिषुकल्पद्रुमपुष्पश्रेष्ठेभ्योद्विगुणामोदादिशालिपद्मपंक्तिष्वित्यर्थः ॥ ९ ॥ अलिन्यांप्रविष्टयेतिशेषः ॥ १० ॥ गृध्र्यागृध्रदेहप्रविष्टयाआगर्त्तान्यापादितगर्त्तानिशवांगानि ॥ खड्गपृष्ठ्याखड्गधारया ॥ स्वड्गयष्ट्येवेतिपाठेस्पष्टम् ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काचौघनीलासुव्योमवीथिषु ॥१२॥ समष्टिप्राणवातस्पंदायथास्वच्छंदंस्फुरंतितथाप्रस्फुरितम् ॥१३॥ ननुप्रतिदेहगृहंतयाकेनप्रकाशेनव्यवहृतंतमाह ॥ सर्वप्राणीति॥सर्वप्राणिशरीरेषुयथाप्राणवाताःस्पंदंतेतथाचिच्छक्तयोऽपिभांति ॥ अंतःकरणोपाधिभेदाद्बहुवचनम् ॥ अर्थात्तादृशचिच्छक्तिप्रभाभासितयातयादीपप्रभाभासितयागृहिण्यास्वसद्मस्विवव्यवहृतमित्यर्थः॥१४॥१५॥ पीतशक्त्यापानशक्त्या ॥१६॥ हृदिओजैयंतिबलारोग्यादिजनयंतीतिहृदौजांनिरसनिर्यासादीनि ॥ अनिलश्रियावायुरूपया ॥ अशुक्लानिशुक्लेतरवर्णानि ॥ १७ ॥ सैवेयंस्वसंकल्पातपसिस्थैर्येणतापसीसतीपरमपावनीसंपन्नेत्याह ॥ अथोइति ॥ स्थावरेणस्थाणुवन्निश्चलत्वेन ॥ सितानिष्कल्मषा ॥ १८ ॥

सर्वांगकोशनाडीषुदिक्ष्विवानिललेखया॥ उड्डीनमवडीनंचकाचौघव्योमवीथिषु॥ १२॥ विराडात्महृदिप्राणवातस्पंदाःस्फुरंतितु॥
यथातथाप्रस्फुरितंप्रतिदेहगृहंतया॥ १३॥ सर्वप्राणिशरीरेषुभांतिचिच्छक्तयस्तथा॥ दीपप्रभाभासितयागृहिण्येवस्वसद्मसु॥ १४॥
विहृतंरुधिरेष्वंतर्द्रवशक्त्येववारिषु॥ अब्धिष्वावर्त्तवृत्त्येवजठरेषुविवल्गितम्॥ १५॥ सुप्तंमेदःसुशुभ्रेषुशेषांगेष्विवशौरिणा॥ स्वादितश्चांगगंधोंतःपीतशक्त्यामृतंयथा॥१६॥तरुगुल्मौषधादीनांहृदौजान्यनिलश्रिया॥परिभुक्तान्यशुक्लानिहिंसयोधीकृतानिच॥ १७॥
अथोजीवमयीसूचीस्यामितिस्थावरेणसा॥ संपन्नातापसीसूचीचेतनापावनीसिता॥ १८॥ अदृश्ययातयाचेहमारुतोग्रतुरंगया॥
अयःसूच्यानिलतयावहंत्यादिक्ष्वरुद्धया॥ १९॥ पीतंभुक्तंविलसितंदत्तंदापितमाहृतम्॥ नर्त्तितंगीतमुषितमनंतैःप्राणिदेहकैः॥ २०॥
अदृश्ययाशरीरिण्यामनःपवनदेहया॥ कृतमाकाशरूपिण्यानतदस्तिनयत्तया॥ २१॥ मत्तयाशक्तयास्वादरसाच्चलितमेतया॥ कालमालानमाश्रित्यकरिण्येवविवल्गितम्॥ २२॥ कल्लोलबहुलाधूतदेहदृष्टनदीष्वलम्॥वेगैर्वैधुर्यकारिण्यामत्तयामकरायितम्॥ २३॥
अशक्तयानिगिरितुंमेदोमांसंतथाहृदि॥ नूनंरुदितमर्थाढ्यवद्धातुरधियायथा॥ २४॥

अयःसूच्याकरणेनअनिलतयावायुवेगेनवहंत्यागच्छंत्या ॥ १९ ॥ २० ॥ जीवसूच्याःपारमार्थिकरूपंमनसिनिधायाह ॥ अदृश्ययेति ॥ समष्टिव्यष्टिमनःपवनदेहयासर्वंजगदेवकृतमितिभावः ॥ २१ ॥ यद्येवंप्रभावासातर्हितयासूचीभावेसर्वेपिकुतोनहिंसितास्तत्राह ॥ शक्तयेति ॥ शक्तयापितयाकतिपयप्राणिरक्ताद्यास्वादरसादेवमत्तयाप्राण्यायुर्नियतिलक्षणंकालमालानंबंधनस्तंभमाश्रित्यकरिण्येवाल्पप्रदेशेष्वेवविवल्गितंभ्रांतमित्यर्थः ॥ २२ ॥ देहरूपासुदृष्टनदीषुप्रत्यक्षनदीषु ॥ वैधुर्यंप्राणिनांदेहवैधुर्यंतत्कारिण्या ॥ २३ ॥ हृदिस्वमनसि ॥ अर्थेनधनेनआढ्यानांवृद्धानामातुराणांचधियायथाभोजनाशक्त्यारुदितंतद्वत् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथानर्त्तक्यास्वांगकेवलयांगदादिनर्त्तितंतथास्वपीडितमजोष्ट्राद्यप्यनयानर्त्तितमित्यर्थः ॥ २५ ॥ बहिर्वातस्कंधेषु ॥ अंतःप्राणेषु ॥ दुर्बलयावायुगतिपरवशयेतियावत् ॥ २६ ॥ बहिःउपसमीपदेशेद्रुतापलायिता ॥ २७ ॥ गत्याअंतर्द्धानशक्त्याअविज्ञातगतिः ॥ अयःसूच्यांलीयते ॥ निर्वृत्तिविश्रांतिसुखम् ॥ २८ ॥ २९ ॥ ३० ॥३१॥३२॥ पूर्णोदरजन्यंयत्तृप्तिसुखंतदर्थिनी ॥ ३३ ॥३४॥ आकाशगामिनोगृध्रस्य ॥ साजीवसूचिः ॥ केनमार्गेणविवेशतमाह ॥ प्राणेति ॥ खंनीडच्छिद्रम् ॥ बिलेशयानीडबिलशा

अजोष्ट्रमृगहस्त्यश्वसिंहव्याघ्रादिनर्त्तितम् ॥ नर्त्तक्येवचिरंरंगेवलयांगदमंगके ॥ २५ ॥ बहिरंतश्चवायूनामेकत्वमनुजातया ॥ गंधलेखिकयेवांतःस्थितंदुर्बलयातया ॥ २६ ॥ मंत्रौषधितपोदानदेवपूजादिभिर्हता ॥ बहिर्गिरिनदीतुंगतरंगवद्रुपद्रुता ॥ २७ ॥ दीपप्रभेवाविज्ञातगतिर्गत्याशुलीयते ॥ अयःसूच्यांमातरीवतत्रनिर्वृत्तिमेतिसा ॥ २८ ॥ स्ववासनानुसारेणसर्वआस्पदमीहते ॥ सूचित्वमेवराक्षस्यासूचीत्वेनास्पदीकृतम् ॥ २९ ॥ सर्वाविद्वत्यापिदिशःस्वमेवास्पदमापदि ॥ जीवसूचीलोहसूचीमिवायातिजडोजनः ॥ ३० ॥ एवंप्रयतमानासाविहरंतीदिशोदश ॥ मानसींतृप्तिमायातानशारीरींकदाचन ॥ ३१ ॥ सतिधर्मिणिधर्माहिसंभवंतीहनासति ॥ शरीरंविद्यतेयस्यतस्यतत्किलतृप्यति ॥ ३२ ॥ अथतत्तस्यदेहस्यस्मरणात्प्राक्तनस्यसा ॥ बभूवदुःखितस्वांतापूर्णोदरसुखार्थिनी ॥ ३३ ॥ ततःप्राक्तनदेहार्थंकरिष्येविपुलंतपः ॥ इतिसंचिंत्यतपसेदेशंनिर्णीयसात्मना ॥ ३४ ॥ विवेशाकाशगृध्रस्यहृदयंतरुणस्यसा ॥ प्राणमारुतमार्गेणखंखगीवबिलेशया ॥ ३५ ॥ गृध्रःस्वामयसूचित्वंकश्चिद्देतत्समाश्रितः ॥ नितांतप्रेरितःसूच्याकर्त्तुंमनउपाददे ॥ ३६ ॥ सूचीमादायगृध्रोसौययौतच्चिंतितंगिरिम् ॥ अंतःसूचिपिशाच्यंतेनुन्नोब्दइववायुना ॥ ३७ ॥ तत्राजनेमहारण्येस्थापयामासतामसौ ॥ सर्वसंकल्परहितेपदेयोगीवचेतनाम् ॥ ३८ ॥ एकेनैवाशुसातेनपादप्रांतेनसुस्थिता ॥ संप्रतिष्ठापितेवाद्रिमूर्ध्निगृध्रेणदेवता ॥ ३९ ॥ रजःकणगृहस्थाणुशिरस्येकेनसाणुना ॥ पादेनातिष्ठदुद्ग्रीवं[1]शिखीवगिरिमूर्द्धनि ॥ ४० ॥ उत्थितांस्थापितांसूचींगृध्रेणजीवसूचिका ॥ दृष्ट्वाबहिर्विनिर्गंतुंखगदेहात्प्रचक्रमे ॥ ४१ ॥

यिनी ॥ ३५ ॥ स्वामयसूचित्वंस्वांतर्गतरोगसूचिभावमाश्रितःकश्चित्प्रागुक्तगृध्रःस्वप्रविष्टसूच्यभिलषितंकर्मकर्तुंमनउपाददे ॥ ३६ ॥ सूचींलोहसूचीम् ॥ अंतर्गतसूचिपिशाच्याअंतेनिवृत्तिकालेउपस्थितेसति ॥ ३७ ॥ चेतनांबुद्धिवृत्तिम् ॥ ३८ ॥ गृध्रेणाद्रिमूर्ध्निसंप्रतिष्ठापितादेवताप्रतिमेवसुस्थितालोहसूचीबभूवेत्यर्थः ॥ ३९ ॥ रजःकणएवगृहंतत्रस्थस्याणोःशिरसिएकेनअणुनासूक्ष्मतमेनपादेनाग्रेण ॥ शिखीअग्निरिव ॥ उद्ग्रीवंशिखीवेतिपाठेतुमयूरइव ॥ ४० ॥ ४१ ॥

१ एतट्टीकानुरोधेनमूले (उज्जिद्धंशिखीव) इतिपाठोऽपेक्षितइतिभाति ॥ जीर्णपुस्तकेतु (शीखीमयूरः) इत्येववर्ततेनान्यत् ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रोन्मुखीनिर्गमनोत्सुकाचेतनाबुद्धिर्यस्याः ॥ ४२ ॥ निवृत्तव्याधिःपुरुषइवअनाकुलःस्वस्थः ॥ ४३ ॥ अतोवक्ष्यमाणहेतुतः ॥ सूचिर्लोहसूचिः ॥ तयाजीवसूच्या ॥ ४४ ॥ ॥ ४५ ॥ वलयामासव्याप्तवती ॥ ४६ ॥ ४७ ॥ वरार्थंतुच्छवरेणवंचनार्थम् ॥ ४८ ॥ ४९ ॥ मरुतःसंवित्दिव्यदृष्टिलक्षणंज्ञानंतामवेक्षितुंदिशोजगाम ॥ गंतुंदिव्यदृशादिशः पर्यालोचितवानित्यर्थः ॥ नभोमार्गमामुच्यविचचारभूमावितिशेषः ॥ ५० ॥ क्षिप्रात्वरावती ॥ अर्द्धेनैकांशेनैवसर्वगतासर्वदिक्पर्यालोचनपरासतीपरमंसर्वोत्कृष्टंअर्चिर्ब्रह्म

खगदेहान्निर्जगामसूचीप्रोन्मुखचेतना ॥ पवनाद्धंधलेखेवघ्राणवातलवोन्मुखी ॥ ४२ ॥ जगामगृध्रःस्वंदेशंभारंत्यक्त्वेवभारिकः ॥ निवृत्तव्याधिरिवसबभूवांतरनाकुलः ॥ ४३ ॥ अतःसूचिस्तयाधारस्तपसेपरिकल्पिता ॥ दृढःसुसदृशोर्थानांविनियोगोहिराजते ॥ ४४ ॥ नस्यमूर्त्तस्यसिध्यंतिविनाधारंकिलक्रियाः ॥ इत्याधारैकनिष्ठत्वमाश्रित्यासौतपःस्थिता ॥ ४५ ॥ जीवसूचीलोहसूचींपिशाचीशिंशपामिव ॥ सर्वतोवलयामासवात्येवामोदलेखिकाम् ॥ ४६ ॥ ततस्ततःप्रभृत्येषासूचीदीर्घतपस्विनी ॥ अरण्यान्यांस्थिताशक्रस्तत्रवर्षगणान्यहून् ॥ ४७ ॥ तस्यावरार्थंयत्नंत्वंकुरुकर्त्तव्यकोविद ॥ चिरेणसंभृतंलोकमलंदग्धुंहितत्तपः ॥ ४८ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ इतिनारदतःश्रुत्वाशक्रःसूचीनिरीक्षणे ॥ मारुतंप्रेषयामासदशदिग्मंडलान्यथ ॥ ४९ ॥ जगामाथमरुत्संविदात्मनातामवेक्षितुम् ॥ अथामुच्यनभोमार्गंविचचारत्वरान्वितः ॥ ५० ॥ सातस्यसंवित्क्षिप्रार्धेनैवसर्वगतासती ॥ परमार्चिरिवाविघ्नंसहसैवददर्शह ॥ ५१ ॥ भूमेःसप्तसमुद्रांतेनिबद्धांविपुलस्थलीम् ॥ लोकालोकाद्रिरसनांततोमणिमयोपमम् ॥ ५२ ॥ स्वादूदकाब्धिवलयंसकोटरककुब्गणम् ॥ पुष्करद्वीपवलयंतदंतर्गिरिमंडले ॥ ५३ ॥ मदिरांभोधिवलयंतज्जलेचरसंस्थितम् ॥ गोमेदद्वीपकटकंतन्मध्यविषयव्रजम् ॥ ५४ ॥ इक्षूदकाब्धिपरिखंशांतंगिरिगणांतरम् ॥ क्रौंचद्वीपोर्वरापीठंशांतंगतगिरिक्रमम् ॥ ५५ ॥ क्षीराब्धिमुक्तावलयंसमध्यगतनायकम् ॥ श्वेताख्यद्वीपवलयंसभूतप्रविभागकम् ॥ ५६ ॥

ज्योतिरिव ॥ अविघ्नमप्रतिबंधम् ॥ ५१ ॥ सर्वंददर्शेत्युक्तमेवप्रपंचयति ॥ भूमेरित्यादिना ॥ विपुलस्थलींप्राणिशून्यकांचनभूमिम् ॥ अत्रद्वीपांभोधिक्रमःप्रागुक्तक्रमेणवाब्रह्मांडांतरत्वादत्रत्यक्रमेणवाबोध्यः ॥ ५२ ॥ कोटरशब्देनपर्वतसंधिस्थादेशाउच्यंते ॥ ५३ ॥ तज्जलेचरैःसंस्थितमाश्रितम् ॥ अनेनतत्रत्यप्राणिनांजलस्थलोभयसंचारसामर्थ्यंगम्यते ॥ ५४ ॥ शांतंनिरुपद्रवम् ॥ ५५ ॥ क्षीराब्धिरेवमुक्ताखचितवलयोयस्यतत् ॥ मध्यगतेनत्रैलोक्यनायकेनविष्णुनासहितम् ॥ प्रविभागाअवांतरखंडभेदाः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ५७ ॥ रशनयासांतंसावधिकमंबरंपुरोदरंयस्य ॥ ५८ ॥ विषयशब्देनतद्वासिनोजनालक्ष्यंते ॥ ५९ ॥ पतिताअवतीर्णाप्रागुक्तावायोःसंवित् ॥ अनेनस्वसंविदवतारक्रमेण प्रस्तुतोवतीर्णोवायुः ॥ ६० ॥ यत्रसातपस्विनीसूचीस्थितातामरण्यानींवायुरवाप ॥ प्राणिकर्मभिःप्राणिसंचारैः ॥ ६१ ॥ ६२॥ निकटत्वादिति ॥ अनेनशिखरौन्नत्यातिशयो गम्यते ॥ रजोमयींपांसुप्रचुरांरजोगुणविकारभूतांच ॥ एवमन्येअपिविशेषणेअरण्यानीसंसाररचनासाधारणेबोध्ये ॥ ६३ ॥ ६४ ॥ लोकपालानामिंद्रादीनामीक्षितैर्दृष्टिभि रप्यमिताइयत्तयानवधारिताअनंताःपर्यंताअवांतरप्रदेशभेदायस्याम् ॥ पार्श्वद्वयेवात्यापवनस्पंदेनप्रवहद्धूलिपटलेएवकुंडलेयस्याः ॥ एतदादिविशेषणैररण्यानीव्योमविला

ततोघृतोदवलयस्वांतस्थपुरमंदिरम् ॥ कुशद्वीपवृतिव्याप्तंसमहाशैलकोटरम् ॥ ५७ ॥ दध्यंभोराशिरशनासांतांबरपुरोदरम् ॥ शाकद्वी पोर्वराकारंसांतस्थविषयांतरम् ॥ ५८ ॥ क्षारांभोराशिपरिधिसांतस्थविषयांतरम् ॥ जंबूद्वीपेमहामेरुकुलपर्वतसंकुलम् ॥ ५९ ॥ वात स्कंधेभ्यएवादौपतितानिलवेदना ॥ क्रमेणानेनपर्यंतेतेनैवप्रस्तुतोंजसा ॥ ६० ॥ वायुरालोकयन्नद्धाजंबूद्वीपंनिरीक्ष्यच ॥ तत्रापहि मवच्छृंगंयत्रसूचीतपस्विनी ॥ ६१ ॥ शृंगमूर्ध्निमहत्युग्रेसारण्यानीमवापताम् ॥ द्वितीयाकाशविततांवर्जितांप्राणिकर्मभिः ॥ ६२ ॥ असंजाततृणव्यूहांनिकटत्वाद्विवस्वतः ॥ रजोमयीमेवततांसंसाररचनामिव ॥ ६३ ॥ मृगतृष्णानदीसार्थपूरणीयाब्धितांगताम् ॥ शक्र कोदंडसंकाशमृगतृष्णासरिच्छताम् ॥ ६४ ॥ अमितानंतपर्यंतांलोकपालेक्षितैरपि ॥ केवलंपवनस्पंदप्रवहद्धूलिकुंडलाम् ॥ ६५ ॥ सूर्यां शुकुंकुमालिप्तांलग्नचंद्रांशुचंदनाम् ॥ विलासिनीमिवव्योम्नोवातसूत्कारपायिनीम् ॥ ६६ ॥ सप्तद्वीपसमुद्रमुद्रणसमुच्छन्नैकदेशाश्र यंभूपीठंपरितोविद्रुत्यपवनोदीर्घाध्वनाजर्जरः ॥ तांप्राप्योग्रगिरिस्थलीमलिवपुर्व्योमांगलग्नामिवव्याप्तानंतदिगंतपूरकबृहद्देहोविश श्रामसः ॥ ६७ ॥ ॥ इ० बा० वा० दे० क० मोक्षोपायेषूत्पत्ति० सूचीतपोवर्णनंनामत्रिसप्ततितमःसर्गः ॥ ७३ ॥ ॥ श्रीवसिष्ठउवाच ॥ तस्यतत्रोर्ध्वशृंगस्यतस्यांभुविमहावनौ ॥ ददर्शमध्यमांसूचींप्रोत्थितांसशिखामिव ॥ १ ॥

सिनीत्वेनोत्प्रेक्ष्यते॥ ६५ ॥ कांतालिंगनसुखव्यंजकोध्वनिःसूत्कारस्तंपाययतिश्रावयतितच्छीलाम् ॥ ६६॥ व्याप्तानंतदिगंतपूरकबृहद्देहःसपवनःसप्तभिर्द्वीपैःससमुद्रैश्चमुद्रणे नलांछनेनसम्यक्उत्उपरिभागेछन्नस्यव्याप्तस्यैकदेशस्याश्रयंभूलक्षणंपीठंपरितोविद्रुत्यदीर्घेणाध्वनाजर्जरःश्रांतःसन्अलिसदृशवपुषोव्योम्नःअंगेलग्नामिवस्थितांतामुग्रगि रिस्थलींप्राप्यविशश्रामविश्रांतिंप्रापेत्यर्थः ॥ ६७ ॥ ॥ इतिवासिष्ठम० उ० त्रिसप्ततितमःसर्गः ॥ ७३ ॥ ॥ ७४ ॥ ॥ दृष्ट्वातांतापसींसूचींवायोःशक्रांतिकेगतिः ॥ वरार्थंप्रार्थ नंधातुर्ज्ञानंसूच्याश्चवर्ण्यते ॥ १ ॥ महतीवनीप्राग्वर्णितारण्यानीयस्यांसामहावनिस्तथाविधायांभुवि ॥ गोस्त्रियोरुपसर्जनस्येतिह्रस्वः ॥ शृंगस्यमध्यमांशिखामिव ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

सततइतिपाठेसततोददर्शेतिपूर्वेणान्वयः ॥ पिंडीभूतोदरत्वचमिव ॥ सूच्याउदरत्वगसंभवात् ॥ २ ॥ आतपाननिलांश्च ॥ तेमयावेकवचनस्येत्यत्रअपादादावित्यधिकारात्पादादौमेइत्यादेशश्छांदसः ॥ ३ ॥ ४ ॥ सूचीमस्तकेरजोंतराऽसमावेशादन्यस्यरजोजातीयस्यरजोगुणस्यतत्सहचरिततमसोप्यास्पदंनददतारजोणुनालिंगेनकृतार्थत्वंकथयतीमिवानुमापयंतीम् ॥ ५ ॥ पूर्वोक्तयाअरण्यान्यास्त्रीयतरुगुल्ममृगादिरूपमर्थंस्वविभवंअरण्यांतरेभ्योदत्वाचिरंतपसासूच्यात्मनाजातांजनितांशिखांचूडामिवस्थिताम् ॥ ततोपियोगपरिपाकान्मूर्ध्निअवस्थापितप्राणानांजटाजूटस्यवलींसंवलनामिवस्थिताम् ॥ सूच्यास्तपउपक्रमेसूक्ष्मत्वादरण्यानीशिखात्वेनोत्प्रेक्षाचिरेणतपस्तेजसोबहलीभावेनपुंजी

एकपादंतपस्यंतींशुष्यंतींशिरऊष्मणा॥ सततानशनांशुष्कपिंडीभूतोदरत्वचम् ॥२॥ सकृद्विकसितास्येनगृहीत्वेवातपानिलान् ॥ पश्चात्त्यजंतींहृदयेमेनमांतीत्यनारतम् ॥३॥ शुष्कांचंडांशुकिरणैर्जर्जरांवनवायुभिः॥ अचलंतींनिजात्स्थानात्स्नापितामिंदुरश्मिभिः॥४॥ पूर्वंरजोणुनैकेनसंविष्टच्छन्नमस्तकाम् ॥ कृतार्थत्वंकथयतींददतान्यस्यनास्पदम् ॥ ५ ॥ अरण्यान्येवदत्त्वार्थंचिरंजातशिखामिव ॥ मूर्ध्न्यवस्थापितप्राणजटाजूटवलीमिव ॥ ६ ॥ तांप्रेक्ष्यपवनःसूचींविस्मयाकुलचेतनः॥ प्रणम्यालोक्यसुचिरंभीतभीतइवागतः॥ ७॥ महातपस्विनीसूचीकिमर्थंतप्यतेतपः॥ नेतिप्रष्टुंशशाकासौतत्तेजोराशिनिर्जितः ॥ ८ ॥ भगवत्यामहासूच्याअहोचित्रंमहातपः ॥ इत्येवकेवलंध्यायन्मारुतोगगनंययौ॥ ९ ॥ समुल्लंघ्याभ्रमार्गंतुवातस्कंधानतीत्यच ॥ सिद्धवृंदानधःकृत्वासूर्यमार्गमुपेत्यच ॥ १० ॥ ऊर्ध्वमेत्यविमानेभ्यःप्रापशक्रपुरांतरे ॥ सूचीदर्शनपुण्यंतमालिलिंगपुरंदरः॥ ११ ॥ पृष्टश्चकथयामासदृष्टंसर्वमयेत्यसौ ॥ सहदेवनिकायायशक्रायास्थानवासिने ॥ १२ ॥ ॥वायुरुवाच॥ ॥जंबूद्वीपेस्तिशैलेंद्रोहिमवान्नामसून्नतः॥ जामातायस्यभगवान्साक्षाच्छशिकलाधरः॥ १३ ॥ तस्योत्तरेमहाशृंगपृष्ठेपरमरूपिणी ॥ स्थितातपस्विनीसूचीतपश्चरतिदारुणम् ॥ १४ ॥ बहुनात्रकिमुक्तेनवाताद्यशनशांतये ॥ ययास्वोदरसौषिर्यंपिंडीकृत्वानिवारितम् ॥ १५ ॥ शांतसंकोचसूक्ष्मार्थंविकास्यास्यंरजोणुना ॥ तयाद्यस्थगितंशीतवाताशननिवृत्तये ॥ १६ ॥

भावविवक्षयातुतज्जटाजूटवलित्वेनोत्प्रेक्षेतिबोध्यम् ॥ आद्यइवशब्दउत्प्रेक्षाद्योतकइतरौतुऔत्प्रेक्षिकोपमानार्थौ ॥६॥ देवानामपिब्रह्मविदोवंद्याइतिद्योतनायोक्तंप्रणम्येति ॥ भीतभीतोभृशंभीतइव ॥ ७ ॥ इतिप्रष्टुंनशशाकेतियोजना ॥ ८ ॥ ९ ॥ १० ॥ विमानेभ्योवैमानिकप्रधाननक्षत्रलोकेभ्यः ॥ सूचीदर्शनेनपुण्यंपवित्रीभूतम् ॥ ११ ॥ १२ ॥ ॥ १३ ॥ परमरूपिणीमहातेजस्विनी ॥ १४ ॥ पिंडीकृत्वालोहघनतांसंपाद्य ॥ समासस्याविवक्षणान्नल्यप् ॥ १५ ॥ तयाशीतस्यवातस्याप्यशनस्यग्रसनस्यनिवृत्तयेशांतसंकोचंनिवारितसंकोचनंसूक्ष्मार्थंअत्यल्पच्छिद्रमास्यंविकास्यरजोणुनास्थगितंपिहितम् ॥ १६ ॥

१ तपस्तपःकर्मकस्यैवेतिकर्मवद्भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुहिनाकरमितिभावप्रधानोनिर्देशः ॥ तपोग्निद्रावितशिलानामयःपिंडात्मतासंपत्तेरग्न्याकारंअयोगृह्णन्सशपथंतुहिनाकरतांत्यजन्निति भावः ॥ दुःसेव्यतांगतोहिमवानितिशेषः ॥ अगोगृह्णन्नितिपाठेतुस्पष्टम् ॥ १७ ॥ अनर्थायउपेक्षितमितिशेषः ॥ १८ ॥ १९ ॥ २० ॥ एतावतासप्तसहस्रवर्षपरिमितेन ॥ २१ ॥ आसर्गसमाप्तेस्तत्तपएववर्णयिष्यन्निर्जनेकृतस्यसूचीतपसस्तच्छायैवसाक्षिणीत्याह ॥ मुखेति ॥ विवर्त्तिनिविजृंभमाणेतपसिस्थास्थितासासूचीस्वच्छाययैवचोदितांतंतत्संकल्पविहितकालमर्यादांतंअवेक्षिता ॥ केनकरणेन ॥ विकासिन्याप्रसृतयामुखरंध्रेस्थितोयोर्कांशुरातपस्तल्लक्षणयादृशादृष्ट्येत्यर्थः ॥ २२ ॥ तर्हितच्छाययासंध्ययोर्निशिचकिमर्थंतद्दर्शनंमुक्तंतत्राह ॥ कौशेयेति ॥

तस्यास्तीव्रेणतपसातुहिनाकरमुत्सृजन् ॥ अग्न्याकारमयोगृह्णन्देवदुःसेव्यतांगतः ॥ १७ ॥ तदुत्तिष्ठाशुगच्छामःसर्वएवपितामहम् ॥ तद्वरार्थमनर्थायविद्धितत्सुमहत्तपः ॥ १८ ॥ इतिवातेरितःशक्रःसहदेवगणेनसः ॥ जगामब्रह्मणोलोकंप्रार्थयामासतंविभुम् ॥ १९ ॥ सूच्यावरमहंदातुंगच्छामिहिमवच्छिरः ॥ ब्रह्मणेतिप्रतिज्ञातेशक्रःस्वर्गमुपाययौ ॥ २० ॥ एतावताथकालेनसाबभूवातिपावनी ॥ सूचीनिजतपस्तापतापितामरमंदिरा ॥ २१ ॥ मुखरंध्रस्थितार्कांशुदृशास्वच्छाययैवसा ॥ विकासिन्याविवर्त्तिस्थाचोदितांतमवेक्षिता ॥ २२ ॥ कौशेयरूपयासूच्यामेरुःस्थैर्येणनिर्जितः ॥ मज्जनंनैतित्वध्वैवंमुक्तमाद्यंतयोर्दिने ॥ २३ ॥ मध्याह्नेतापभीत्येवविशंत्यामारुतांतरम् ॥ अन्यदागौरवाद्दृष्ट्वादूरतःप्रेक्षमाणया ॥ २४ ॥ सातामवेक्षतेक्षारात्तापादंगेनिमज्जति ॥ संकटेविस्मरत्येवजनोगौरवसत्क्रियाम् ॥ २५ ॥ छायासूचीतापसूचीयश्चात्मासत्तृतीयया ॥ त्रिकोणंतपसापूतंवाराणस्यासमंकृतम् ॥ २६ ॥ गतास्तेनत्रिकोणेनत्रिवर्णपरिखावता ॥ वायवःपांसवोयेपितेपरांमुक्तिमागताः ॥ २७ ॥

कौशेयतंतुवत्तुच्छरूपयालघ्व्याचसूच्यास्थैर्येणगुणेननिर्जितोमेरुर्लज्जयांबुधौमज्जनंनैतिनप्राप्नोतिकिंइतिकाकुनाद्योत्यते ॥ एवमनेनाभिप्रायेणतद्द्रष्टुमिवदिनेआद्यंतयोर्भागयोर्दत्त्वध्वादैर्घ्यमालंब्यतद्दर्शनान्मुक्तमुपरतमितियावत् ॥ २३ ॥ तर्हिमध्याह्नेकिमितिमूलेनिलीनातत्राह ॥ मध्याह्नेइति ॥ मारुतानांसूचीप्राणानामंतरमवकाशभूतंसूच्युदरंविशंत्यामुक्तमित्यनुषज्जते ॥ गौरवात्सन्मानहेतोः ॥ २४ ॥ साछाया ॥ तांसूचीम् ॥ क्षारात्तीक्ष्णात् ॥ तापादातपात् ॥ कथंतर्हिमध्याह्नेगौरवत्यागस्तत्राह ॥ संकटेइति ॥ २५ ॥ यश्चआत्मालोहसूचीतेनसतृतीययापरस्परग्रथनांतरालदेशरूपंत्रिकोणंअसीवरणागंगाग्रथनांतरालस्थयावाराणस्यासमंकृतमित्यर्थः ॥ २६ ॥ शुष्कत्वेनामूर्त्ताश्यामाशुक्ला चेतित्रिवर्णसूचीसरिल्लक्षणपरिखावता ॥ मुक्तिस्वसंसर्गिजनमुक्तिप्रयोजनतांदोषमुक्तिलक्षणांपावनतांवा ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदितंसाक्षात्कृतंपरमकारणंब्रह्मययातथाविधाजाता चेतनसंविदंप्रत्यगात्मानंस्वयमनुविचार्य ॥ ननुकस्तस्यागुरुस्तत्राह ॥ स्वेति ॥ स्वस्यमननंयुक्तिभिर्विचारस्तेनकलना स्वात्मपरिचयस्तदनुसरणंतदनुसारएवैकोमुख्योगुरुः ॥ अन्योगुरुस्तुनमुख्यइत्यर्थः ॥ यद्यप्याचार्यवान्पुरुषोवेदेतिश्रुतिराहतथापिसादृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभि रितिश्रुत्यंतरानुसाराच्छिष्यप्रज्ञामेवानुसरतीतिभावः ॥२८॥ ॥ इति० उ० चतुःसप्ततितमःसर्गः ॥ ७४॥ प्रसन्नेपिविधौसूच्याःप्रबोधाज्जोषमासनम् ॥ तथाप्यस्यावराद्धातुर्दे होद्भूतिश्चकीर्त्यते ॥ १ ॥ अथप्रबोधानंतरंवर्षसहस्रेण ॥ १ ॥ कर्मेंद्रियाभावेवागिंद्रियस्याप्यभावात् ॥ कर्मेंद्रियाभावश्चास्यासूचीत्वात्प्रबोधबाधितत्वाच्च ॥ २ ॥ चिंता

विदितपरमकारणाघजातास्वयमनुचेतनसंविदंविचार्य ॥ स्वमननकलनानुसारएकस्त्विहहिगुरुःपरमोनराघवान्यः ॥ २८ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेउ० क० सूचीतपःपरिपाककवर्णनंनामचतुःसप्ततितमःसर्गः ॥ ७४ ॥ ॥ ७५ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अ थवर्षसहस्रेणतांपितामहआययौ ॥ वरंपुत्रिगृहाणेतिव्याजहारनभस्तलात् ॥ १ ॥ सूचीकर्मेंद्रियाभावाज्जीवमात्रकलावती ॥ नकिं चिद्व्याजहारास्मैचिंतयामासकेवलम् ॥ २ ॥ पूर्णास्मिगतसंदेहाकिंवरेणकरोम्यहम् ॥ शाम्यामिपरिनिर्वामिसुखमासेचकेवलम् ॥ ३ ॥ ज्ञातंज्ञातव्यमखिलंशांतासंदेहजालिका ॥ स्वविवेकोविकसितःकिमन्येनप्रयोजनम् ॥ ४ ॥ यथास्थितेयमस्मीहसंतिष्ठेयंतथैवहि ॥ स त्यासत्यकलामेवत्यक्त्वाकिमितरेणमे ॥ ५ ॥ एतावंतमहंकालमविवेकेनयोजिता ॥ स्वसंकल्पसमुत्थेनवेतालेनेवबालिका ॥ ६ ॥ इ दानीमुपशांतोसौस्वविचारणयास्वयम् ॥ ईप्सितानीप्सितैरर्थैःकोभवेत्कलितैर्मम ॥ ७ ॥ इतिनिश्चययुक्तांतांसूचींकर्मेंद्रियोज्झिता म् ॥ तूष्णींस्थितांसनियतिःसपश्यन्भगवान्स्थितः ॥ ८ ॥ ब्रह्मापुनरुवाचेदंवीतरागांप्रसन्नधीः ॥ वरंपुत्रिगृहाणत्वंकिंचित्कालंचभूत ले ॥ ९ ॥ भोगान्भुक्त्वाततःपश्चाद्गमिष्यसिपरंपदम् ॥ अव्यावृत्तिस्वरूपायानियतेरेषनिश्चयः ॥ १० ॥ तपसानेनसंकल्पःसफलोस्तुत वोत्तमे ॥ पीनाभवपुनःशैलेहिमकाननराक्षसी ॥ ११ ॥ ययापूर्वंवियुक्तासितन्वाजलदरूपया ॥ बीजांतर्वृक्षतापुत्रिबृहद्वृक्षतयायथा १२

प्रकारमेवस्फुटमाह ॥ पूर्णेत्यादिना ॥ ३ ॥ अखिलंज्ञातम् ॥ एकविज्ञानेनसर्वविज्ञानात् ॥ ४ ॥ सत्यापरमार्थरूपा ॥ तांसत्यकलामेवत्यक्त्वाइतरेणमिथ्यार्थेनकिंनाकिंचिदित्यर्थः ॥ ५ ॥ ६ ॥ असौअविवेकः ॥ कलितैःप्राप्तैः ॥ ७ ॥ नियत्याकर्मफलावश्यंभावनियामकेश्वरसंकल्पेनसहितःसनियतिः ॥ सपितामहः ॥ ८ ॥ किंचिदितिपदसंस्कारपक्षेसामा न्येनपुंसकम् ॥ ९ ॥ अव्यावृत्तिस्वरूपायाःअस्मदादिभिरपिनिवर्त्तयितुमशक्यायाःप्रागुक्तनियतेः ॥ १० ॥ अनेनतपसाफलितेनेतिशेषः ॥ पीनाअभिवृद्धशरीरा ॥ ११ ॥ बीजांतर्लीनावृक्षताजातिर्बृहद्वृक्षतयाव्यक्त्यायथावियुक्तातथाययातन्वावियुक्तासितयायोगमेष्यसीतिपरेणसंबंधः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुनष्टायाःकथंपुनरुद्भवइत्याशंक्याह ॥ अंतर्बीजरूपिणीति ॥ नसानष्टाकिंतुसूक्ष्यंतरेवबीजभावेनलीनेतिभावः ॥ १३ ॥ लोकबाधाहेतुनाममर्कितयातन्वातत्राह ॥ बाधामिति ॥ १४ ॥ यदिकदाचिद्बहीरूपानिर्विकल्पसमाधिव्युत्थिताभविष्यसितदान्यायेनभूतबाधांकरिष्यसीतिपरेणान्वयः ॥ १५ ॥ किंध्यानधारणादीनांसत्यतानेत्याह ॥ व्यवहारेति ॥ एवंस्पंदाद्विव्यवहारोऽपिनवास्तवइत्याशयेनाह ॥ वातस्वभाववद्देहेति ॥ १६ ॥ स्वकर्मराक्षसोचितमशास्त्रीयांहिंसादितद्देवस्पंदस्तस्यरोधिनी ॥ १७ ॥ १८ ॥ देवोब्रह्माजगाम ॥ सासूचीअचिंतयत् ॥ इतिब्रह्मणोक्तंममभवतुनामकिंविरोधोस्तिनास्तीत्यर्थः ॥ अब्जजवचनार्थस्यवरस्यवारणेममरागोवाकिंकिमर्थइतिविचिंत्यअंतर्मन

योगमेष्यसिभूयश्चतन्वांतर्बीजरूपिणी॥ तयैवरससेकेनलतयेवांकुरस्थितिः॥ १३॥ बाधांविदितवेद्यत्वान्नचलोकेकरिष्यसि॥ अंतःशुद्धास्पंदवतीशारदीवाभ्रमंडली॥ १४॥ अश्रांतध्याननिरताकदाचिल्लीलयायदि॥ भविष्यसिबहीरूपासर्वात्मध्यानरूपिणी॥१५॥ व्यवहारात्मकध्यानधारणाधाररूपिणी॥ वातस्वभाववद्देहपरिस्पंदाद्विलासिनी॥ १६॥ तदाविरोधिनींपुत्रिस्वकर्मस्पंदरोधिनी॥ न्यायेनक्षुन्निवृत्त्यर्थंभूतबाधांकरिष्यसि ॥ १७॥ भविष्यसिन्यायवृत्तिर्लोकेत्वन्यायबाधिका॥ जीवन्मुक्ततयादेहेस्वविवेकैकपालिका॥ १८॥इत्युक्त्वागगनतलाज्जगामदेवःसूचीसाभवतुममेतिकिंविरोधः॥ रागोवाब्जजवचनार्थवारणेस्मिन्नित्यंतःस्वतनुमयीमनाग्बभूव ॥१९॥ प्रादेशःप्रथममभूत्ततोपिहस्तोव्योमश्चाप्यथविटपस्ततोभ्रमाला॥ सोद्यत्स्वावयवलताबभौनिमेषात्संकल्पद्रुमकणिकांकुरक्रमेण॥ २०॥ तद्गात्राण्यविकलशक्तिमंतिदेहादुद्भूतान्यथकरणेंद्रियाणिसम्यक्॥ संकल्पद्रुमवनपुष्पवत्समंताद्बीजौघान्यलमभवंस्तिरोहितानि॥ २१॥ ॥इत्यार्षेवा०वा०दे०मो०उ०क०सूच्युपाख्यानेसूचीशरीरलाभोनामपंचसप्ततितमःसर्गः॥७५॥ ॥ध॥

श्रीवसिष्ठउवाच॥ ॥अथाभवदसौसूचीकर्कटीराक्षसीपुनः॥ सूक्ष्मैवस्थौल्यमायातामेघलेखेववार्षिकी ॥ १ ॥

सिमनाक्स्वतनुमयीप्राक्तनस्वशरीराकाराबभूव ॥ १९ ॥ मानसकल्पनाक्रमेणैवस्थूलदेहाविर्भावमाह ॥ प्रादेशइति ॥ प्रादेशःप्रादेशप्रमाणोदेहः ॥ प्रमाणेलइतिद्वयसचोलुक् ॥ एवमग्रेपि ॥ विटपोवृक्षशाखाग्रप्रमाणः ॥ ततोविस्तृतः ॥ अभ्रमालातत्प्रमाणः ॥ एवंक्रमेणसासूचीनिमेषात्स्वसंकल्पद्रुमकणिकायाबीजस्यांकुरक्रमेणउद्यत्स्वावयवलतासतीबभौ ॥ २० ॥ गात्राणिअंगानिकरणानींद्रियस्थानानिइंद्रियाणिचउद्भूतानि ॥ प्राक्तिरोहितानिबीजौघभूतानिसंतितदाअलंपर्याप्तानिपुनराविर्भूतानिअभवन् ॥ तथाचमनःकल्पनामूलकत्वान्मिथ्याभूतान्येवेत्यर्थः ॥ २१ ॥ ॥ इ०वासि०म०ता०उ०पंचसप्ततितमःसर्गः ॥ ७५ ॥ ॥ ध ॥ ॥ लब्ध्वादेहंसमाधिस्थाषण्मासाक्षुधितोत्थिता ॥ कर्कटीवायुवचसाकिरातविषयंययौ ॥ १ ॥ अथसर्वावयवप्रादुर्भावानंतरम् ॥ १ ॥

१ पुस्तकांतरेषुविशेषणद्वयेद्वितीयांतःपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निजंस्वात्मभूतंब्रह्माकाशंआसाद्यपुनःप्रतिसंधायतस्यबोधात्साक्षात्काराच्चिरप्ररूढत्वाद्बृहद्राक्षसभावंजहौ ॥२॥ शुद्धांनिष्प्रपंचांसंविदमात्मानंदृत्तिधारयाव्यालंब्यआश्रित्य ॥३॥ महाजलदनादेनबोधंसमाधिव्युत्थानम् ॥ शिखंडिनीपक्षेकामोद्बोधम् ॥४॥ अस्यदेहस्ययावद्देहंयावदवस्थानंतावत्क्षुधादिस्वभावोननिवर्त्तते ॥ ५ ॥ चिंतयाचिंतनहेतुनाचित्तेन ॥ ६ ॥ आर्यैःपूज्यैर्महद्भिर्यद्गर्हितंनिंदितम् ॥ ७ ॥ न्यायोपार्जितंग्रासंविनादेहंयदित्यजामितदानिर्न्यायमन्याय्यंनकिंचिदस्ति ॥ अन्यायोपार्जितस्त्वर्थोभुक्तःसन्

निजमाकाशमासाद्यकिंचित्प्रमुदितासती॥बृहद्राक्षसभावंतद्बोधात्कंचुकवज्जहौ॥ २ ॥ तत्रैवध्यायतीतस्थौबद्धपद्मासनस्थितिः॥व्यालंब्यसंविदंशुद्धांसंस्थितागिरिकूटवत्॥ ३ ॥ अथसामासषट्केनध्यानाद्बोधमुपागता॥ महाजलदनादेनप्रावृषीवशिखंडिनी॥ ४ ॥ प्रबुद्धासावहिर्वृत्तिर्बभूवक्षुत्परायणा॥ यावद्देहंस्वभावोस्यदेहस्यननिवर्त्तते॥ ५॥ अथसाकिंग्रसइतिचिंतयामासचिंतया॥ भोक्तव्यःपरजीवश्चन्यायेनन विनामया॥ ६॥ यदार्यगर्हितंयद्वान्यायेननसमर्जितम् ॥ तस्माद्ग्रासाद्वरंमन्येमरणंदेहिनामिदम् ॥ ७॥ यदिदेहंत्यजामीदंतन्न्यायोपार्जितंविना॥ नकिंचिदस्तिनिर्न्यायंभुक्तोर्थोहिगरायते ॥ ८॥ यन्नलोकक्रमप्राप्तंतेनभुक्तेनकिंभवेत्॥ नजीवितेननोमृत्याकिंचित्कारणमस्तिमे॥ ९ ॥ मनोमात्रमहंत्यासंदेहादिभ्रमभूषणम् ॥ तच्छांतंस्वावबोधेनदेहादेहदृशौकुतः ॥ १० ॥ ॥श्रीवसिष्ठउवाच॥ ॥एवंस्थितामौनवतीशुश्रावगगनाद्गिरम् ॥ रक्षःस्वरूपसंत्यागतुष्टेनोक्तांनभस्वता ॥ ११ ॥ गच्छकर्कटिमूढांस्त्वंज्ञानेनाश्वबोधय॥ मूढोत्तारणमेवेहस्वभावोमहतामिति ॥ १२ ॥ बोध्यमानोभवत्यापियोनबोधमुपैष्यति ॥स्वनाशायैवजातोसौन्याय्योग्रासोभवेत्तव॥ १३ ॥श्रुत्वेत्यनुगृहीतास्मित्वयेत्युक्तवतीशनैः ॥ उत्तस्थौशैलशिखराक्रमादवरुरोहच ॥ १४ ॥ अधित्यकामतीत्याशुगत्वाचोपत्यकातटान्॥ विवेशशैलपादस्थंकिरातजनमंडलम्॥ १५॥

गरायतेविषवदाचरतिअनर्थकोटिषुपर्यवस्यतीतियावत् ॥ ८ ॥ लोकसंमतःक्रमोलोकक्रमस्तेनयन्नप्राप्तम् ॥ मृत्यामरणेन ॥ कारणंइष्टमनिष्टंवाप्रयोजकम् ॥ ९ ॥ देहादेहदृशौजीवनमरणभ्रमौ ॥ १० ॥ रक्षःस्वरूपस्यतद्देहाभिमानस्यसंत्यागाद्धेतोस्तुष्टेन ॥ नभस्वतावायुना ॥ ११ ॥ तांगिरंदर्शयति ॥ गच्छेत्यादिना ॥ मूढाननात्मज्ञान् ॥ महतांतत्त्वविदाम् ॥ इतिहेतोः ॥ १२ ॥ असौमूढः ॥ न्याय्योन्यायादनपेतः ॥ ग्रासःकवलः ॥ १३ ॥ इतिगिरंश्रुत्वा ॥ त्वयावायुना ॥ परमार्थदृशाअनुग्रहाभावात्तथावक्तुंलज्जमानेवशनैरुक्तवती ॥ १४ ॥ अधित्यकांपर्वतोर्ध्वभागम् ॥ उपत्यकापर्वतासन्नभूमिस्तत्तटान् ॥ शैलस्यहिमवतःपादेषुप्रत्यंतपर्वतेषुस्थितम् ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नादीनांसमानांद्वंद्वेबहुव्रीहिः ॥ एवंमूलादीनामपि ॥ शष्पाणिबालतृणानि ॥ आमिषाणिमांसानि ॥१६॥ प्रचलितःप्रस्थितोयोवलितांजनःकज्जललिप्तोऽचलस्तदाभासा निशाचरीहिमगिरेःपादेषुनिवेशितंसुदेशंगतवतीतिसंबंधः ॥ १७ ॥ ॥ इतिश्रीवासिष्ठमहा०तात्पर्यप्रकाशेउ०षट्सप्ततितमःसर्गः ॥ ७६॥ ॥छ॥ ॥ तमिस्रावर्ण्यतेपश्चाद्दर्शनंराजमंत्रिणोः ॥ कर्कट्यास्तत्परीक्षार्थंप्रश्नेच्छाचात्रविस्तरात् ॥१॥ तमःपिंडइवतमःपिंडः ॥ हस्तेनहर्तुंशक्योहस्तहार्यः॥ हस्तहार्यस्तमःपिंडोयस्याम्॥ यामिनीरात्रिः॥ ॥ १ ॥ तांरात्रिंकर्कटीसखीभूतराक्षस्यंतररूपेणवर्णयति ॥ नीलमेघेत्यादिना ॥ निरिंदुअमृतलुंठनभयात्पलायितेंदुगगनांतरंयया ॥ तमालवनानिसंपिंडयतिएकघनीकरोतीतमालवनसंपिंडा ॥ मांसलापुष्टा ॥ सर्वत्रोड्डीनंश्यामीकुर्वत्नेत्रकज्जलंयस्याः ॥२॥ गिरिग्रामेषुलतानांघनतयानक्षत्रज्योतिषोप्यप्रसरान्मुख्येनांध्येनजरतीवमंथराकुंठितग

वह्वन्नपशुलोकौघद्रव्यशष्पौषधामिषम् ॥ अनंतंमूलपानान्नमृगकीटखगादिकम् ॥ १६ ॥ प्रचलितवलितांजनाचलाभाहिमगिरिपादनिवेशितंसुदेशम् ॥ तदनुगतवतीनिशाचरीसानिशिसुघनांधतमिस्रमार्गभूमौ ॥ १७ ॥ ॥इ०वा०वा०दे०मोक्षोपायेषूत्पत्तिप्रकरणेक० अन्यायबाधिकोनामषट्सप्ततितमःसर्गः ॥ ७६ ॥ ॥छ॥ ॥श्रीवसिष्ठउवाच॥ ॥एतस्मिन्नंतरेतत्रकिरातजनमंडले॥ हस्तहार्यतमःपिंडाबभूवासितयामिनि ॥ १ ॥ नीलमेघपटच्छन्नानिरिंदुगगनांतरा ॥ तमालवनसंपिंडामांसलोड्डीनकज्जला ॥ २ ॥ लताघनतयाग्रामकोटरैकांध्यमंथरा ॥ गृहचत्वरसंबाधेनगरेनवयौवना ॥ ३ ॥ चत्वरेषुतमःपिंडीप्रजिह्मीकृतदीपिका ॥ कुंचितच्छिद्रनिष्क्रांतादीपिकारोचिराजिता ॥ ४ ॥ सुवयस्येवकर्कट्याःपरिनृत्यत्पिशाचिका ॥ मत्तवेतालकंकालकाष्ठमौनमिवास्थिता ॥ ५ ॥ सुषुप्तमृगभूतौघघननीहारहारिणी ॥ मंदमंदमरुत्स्पर्शलसत्प्रालेयसीकरा ॥ ६ ॥ सरःसुविवटद्वारिकाकभेकतरंगिका ॥ अंतःपुरेषुरमणरणन्नारीनराननाः ॥ ७ ॥ जंगलेषुजगज्ज्वालाजटालज्वलनोज्वला ॥ केदारेष्वंबुसंसेकपृष्ठपाकमिलच्छला ॥ ८ ॥

तिः ॥ गृहचत्वरैःसंबाधेनिबिडितेनगरेनवयौवनेवदीपिकाभिःसंचरंती ॥३॥ बहिश्चत्वरेषुवायुनाप्रजिह्मीकृतावक्रीकृतादीपिकायया ॥ अतएवतमांसिपिंडयतीतितमःपिंडी ॥ कुंचितानांकुटिलगवाक्षाणांछिद्रेभ्योनिष्क्रांतैरीषद्दीपिकारोचिर्भिःराजिताशोभमाना ॥ आदीपिकारोचिरितीषदर्थेआङ्ह्रलोपइतिदीर्घाभावश्छांदसः ॥ ४ ॥ सुवयस्याशोभमानासखीव ॥ मत्तवेतालानांकंकालादिहरणप्रसंगेनिवारणाभावात्काष्ठमौनंव्रतमास्थितेव ॥ ५ ॥ सुषुप्तैर्मृगादिप्राणिनिकायैर्घनैर्नीहारैश्चहारिणीअलंकृता ॥ ६॥ इतःपरंराक्षसीरूपकंविहायस्वरूपेणैववर्णयति ॥ सरःस्वित्यादिना॥विवटानांगर्त्तानांविटद्ध्वटानांचद्वारिकाकैर्भेकैश्चतरंगिताव्याप्ता ॥ रमणेक्रीडनेरणंतिनारीनराननानियस्याम्॥७॥ जगतोज्वालाप्रलयानलइवजटालेनज्वलनेनोज्वला॥अंबुसेकेनआर्द्रीभावेनशल्यकपृष्ठेपाकेनपरिपक्वदशयाचोन्मूलनात्केदारेषुमिलंतिशलानिशललीकंटकायस्याम्॥८॥ ॥१३८॥

१ अनंतमूलपादंतेतिपाठांतरम् ॥ मूलपानान्नेतिपाठेऽन्नेतिपौनरुक्त्यम् ॥ पाठांतरेतुमूलपादृक्षाः ॥ अदंतादंतरहिताःप्राणिविशेषाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अक्षीणीवसंजातान्यक्षितानिस्पंदादिवप्रविविक्तानिविभक्तानिऋक्षचक्राणिनक्षत्रवृंदानियस्याम् ॥ ९ ॥ श्वभ्रेषुवृक्षकोटरेष्वंतःकौशिकस्यरवंश्रुत्वेतिशेषः ॥ १० ॥ विपिनमिवआमौनाईषदशब्दा ॥ ११ ॥ १२ ॥ पंकपिंडोमृत्पिंडस्तस्यांतरमिवघनानिविडा ॥ १३ ॥ विक्षुब्धोविचूर्णितोविचलितोवा ॥ एकार्णवमहापंकमिवपर्वतोदरमिवचमेदुरा ॥ १४ ॥ अंगारस्यदग्धकाष्ठस्यकोटरमिवश्यामघना ॥ सौषुप्तपदंगाढाज्ञानमिवसुंदरी ॥ अज्ञाननिद्रामूलाज्ञानमिवनिबिडाघना ॥ भृंगानांपृष्ठानीवच्छदाःपक्षाइवच

नभस्थलेक्षितस्पंदप्रविविक्तर्क्षचक्रिका ॥ वनेषुविसरद्वातपतत्पुष्पफलद्रुमा ॥ ९ ॥ श्वभ्रेषुकौशिकस्यांतर्वायसव्याहतारवा ॥ तस्करा क्रांतपर्यंतग्राम्याक्रंदनकर्कशा ॥ १० ॥ विपिनेविपिनामौनानगरेसुप्तनागरा ॥ वनेषुविसरद्वातानीडेष्वस्पंदपक्षिका ॥ ११ ॥ गुहासु सुप्तसिंहाढ्याकुंजेषुस्वपदेणका ॥ खेसावश्यायनिकराविपिनेमौनचारिणी ॥ १२ ॥ कज्जलांभोदमध्याभाकाचशैलोदरोपमा ॥ पंक पिंडांतरघनाखड्गच्छेद्यांध्यमांसला ॥ १३ ॥ प्रलयानिलविक्षुब्धकज्जलाचलचंचला ॥ एकार्णवमहापंकपर्वतोदरमेदुरा ॥ १४ ॥ अं गारकोटरघनासौषुप्तपदसुंदरी ॥ अज्ञाननिद्रानिबिडाभृंगपृष्ठच्छदच्छविः ॥ १५ ॥ तस्यांरजन्यांभीमायांकिरातजनमंडले ॥ मंत्रिणा सहभूपालस्तस्मिन्नवसरेतदा ॥ १६ ॥ निर्जगामसुधीरात्मानगरात्सुप्तनागरात् ॥ अटवींविक्रमोनामविषमांवीरचर्यया ॥ १७ ॥ अट व्यांकर्कटीसातौचरंतौराजमंत्रिणौ ॥ अपश्यद्भुतधैर्यास्त्रौवेतालालोकनोन्मुखौ ॥ १८ ॥ अथसाचिंतयामासलब्धोभक्षोत्र्यहोमया ॥ मूढावेतावनात्मज्ञौभारोदेहःकिलानयोः ॥ १९ ॥ इहामुत्रचनाशायमूढोदुःखायजीवति ॥ यत्नाद्विनाशनीयोसौनानर्थःपरिपाल्यते ॥ २० ॥ अपश्यतःस्वमात्मानंमृतिर्मूढस्यजीवितम् ॥ मरणेनोदयोस्यास्तिपापासंपत्तिहेतुतः ॥ २१ ॥ आदिसर्गेचनियमःकृतःपंकजज न्मना ॥ हिंस्राणांभोजनायास्तुमूढात्मानात्मवानिति ॥ २२ ॥ तस्मादिमौमयैवाद्यभोक्तव्यौभोज्यतांगतौ ॥ अभव्यएवनिर्दोषंप्राप्तमर्थ मुपेक्षते ॥ २३ ॥ कदाचित्ताविमौस्यातांगुणयुक्तौमहाशयौ ॥ तादृङ्नरविनाशोहिस्वभावान्मेनरोचते ॥ २४ ॥ तदेतौसंपरीक्षेहंयदिताद् ग्गुणान्वितौ ॥ तद्भक्षंनकरोम्येतौनहिंस्यांगुणिनःक्वचित् ॥ २५ ॥

च्छविर्यस्यास्तथाविधा ॥ असितयामिनीबभूवेत्युपक्रमेणान्वयः ॥ १५ ॥ १६ ॥ वीरोचितयातस्करादिवधार्थयाचर्यया ॥ १७ ॥ धृतानिधैर्यंचअस्त्राणिचयाभ्यांतौ ॥ यामाद्बहिष्ठस्यग्रामदैवतस्यवेतालस्यआलोकनेउन्मुखौ ॥ १८ ॥ साकर्कटी ॥ १९ ॥ इहलोकेअमुत्रपरलोकेच ॥ मूढोऽनात्मज्ञः ॥ २० ॥ मृतिरेवजीवितंजीवितादरमिति यावत् ॥ तदेवोपपत्त्यादर्शयति ॥ मरणेनेति ॥ २१ ॥ २२ ॥ अभव्यःअभाग्यएव ॥ २३ ॥ आत्मज्ञानलक्षणगुणेनयुक्तौ ॥ २४ ॥ तर्त्तर्हि ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेषामभिमतानामिष्टानांदानेन ॥ २६ ॥ देहेननत्वात्मनाअविनाशित्वात् ॥ २७ ॥ वशीकरणौषध्या ॥२८॥ तंगुणिनम् ॥२९॥ धरातलेइंदवश्चंद्राः ॥ ३० ॥ फलंसिध्यती विशेषः ॥ ३१ ॥ परीक्षेपरीक्षिष्ये ॥ ३२ ॥ आदौसगुणोयमगुणोवेतिगुणलेशेनापियुक्तियोगंविचार्यपश्चात्स्वतःस्वस्मादधिकतरंचगुणिनंविचार्ययदिगुणैर्हीनःस्यात्ततस्तदनंतरंसम्यकूशास्त्रोक्तदृशाउपपत्तिवशेनयुक्तिसदृशंदंड्यस्यदंडंकुर्यात्स्वतोगुणैर्घनसंभवेअतिशयस्यसंभवेतुनकुर्यादित्यर्थः ॥ ३३ ॥ ॥ इति०वासि०तात्पर्य०उत्पत्तिप्र०सप्तसप्ततितमःसर्गः ॥ ७७ ॥ ॥ ७ ॥ ॥ भीषणोक्त्याप्यभीतस्यराज्ञःकर्कटिदर्शनम् ॥ मंत्रिवाक्यानुनीतायाःप्रश्नारंभश्चकीर्त्यते ॥ १ ॥ रक्षोवंशलक्षणस्यकाननस्यवो

अकृत्रिमंसुखंकीर्त्तिमायुश्चैवाभिवांछता ॥ सर्वाभिमतदानेनपूजनीयागुणान्विताः ॥ २६ ॥ अपिनंक्ष्यामिदेहेननैवभोक्ष्येगुणान्वितम् ॥ सुखयंतिहिचेतांसिजीवितादपिसाधवः ॥ २७ ॥ अपिजीवितदानेनगुणिनंपरिपालयेत् ॥ गुणवत्संगमौषध्यामृत्युरप्येतिमित्रताम् ॥ २८ ॥ यत्राहमपिरक्षामिराक्षसीगुणशालिनम् ॥ तत्रान्यःकोनकुर्यात्तंहृदिहारमिवामलम् ॥ २९ ॥ उदारगुणयुक्तायेविहरंतीहदेहिनः ॥ धरातलेंदवःसंगाद्भृशंशीतलयंतिते ॥ ३० ॥ मृतिर्गुणितिरस्कारोजीवितंगुणिसंश्रयः ॥ फलंस्वर्गापवर्गादिजीविताद्गुणिसंश्रितात् ॥ ३१ ॥ तस्मादिमौपरीक्षेहंकयाचित्प्रश्नलीलया ॥ किंमात्रज्ञानकावेताविवितामरसेक्षणौ ॥ ३२ ॥ आदौविचार्यसगुणागुणलेशयुक्तिंपश्चात्स्वतोधिकतरंचगुणैर्यदिस्यात् ॥ कुर्यात्ततःसमुपपत्तिवशेनदंडंदंड्यस्ययुक्तिसदृशंघनसंभवेन ॥ ३३ ॥ ॥ इ०वा०वा०दे०मो०उ०क०राक्षसीविचारोनामसप्तसप्ततितमःसर्गः ॥ ७७ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अथसाराक्षसीरक्षःकुलकाननमंजरी ॥ तमस्येवाभ्रलेखेवगंभीरंविननादह ॥ १ ॥ नादांतेसमुवाचेदंहुंकारापरुषंवचः ॥ गर्जितानंतरंजातकरकाशनिशब्दवत् ॥ २ ॥ भोभोघोराटवीव्योमपदवीशशिभास्करौ ॥ महामायातमःपीठशिलाकोटरकीटकौ ॥ ३ ॥ कौभवंतौमहाबुद्धीदुर्बुद्धीवासमागतौ ॥ मद्ग्रासपदमापन्नौक्षणान्मरणकोचितौ ॥ ४ ॥ ॥ राजोवाच ॥ ॥ भोभोभूतकिंकिंस्यास्त्वंक्वतिष्ठसिचदेहकम् ॥ दर्शयास्यास्तवगिरःकोबिभेत्यलिनीध्वनेः ॥ ५ ॥ सिंहवत्सर्ववेगेनपतंत्यर्थेकिलार्थिनः ॥ त्यजसंरंभमारंभंस्वसामर्थ्यंप्रदर्शय ॥ ६ ॥

धसौरभमकरंदमधुरत्वात्पुष्पमंजरीवस्थिता ॥ १ ॥ शब्दतोहुंकारभीषणत्वेप्यर्थतोऽपरुषमनिष्ठुरम् ॥ २ ॥ घोराटवीलक्षणायाव्योमपदव्याःप्रकाशकत्वाच्छशिभास्करौ ॥ महामायातमोलक्षणायाःसर्वभूताधारपीठभूतायाःकोटरांतर्गतकीटकौ ॥ अनेनस्वस्याआत्मज्ञतासूचिता ॥ ३ ॥ आत्मज्ञानेसतिबुद्धेःसाफल्यान्महाबुद्धीपूज्यबुद्धी ॥ तदभावेबुद्धिवैयर्थ्याद्दुर्बुद्धी ॥ कुत्सितंमरणंमरणकंतदुचितौ ॥ ४ ॥ अल्पंदेहंदेहकंदर्शय ॥ अलिनीध्वनेर्भ्रमरिकाध्वनितुल्यायाअस्यास्तवगिरःसकाशात्कोबिभेतिनकश्चिदित्यर्थः ॥ ५ ॥ संरंभंकोपम् ॥ आरंभंभीषणोद्योगम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्सूचिताआत्मज्ञतामयाज्ञातेतिद्योतनायसुव्रतेतिसंबोधनम् ॥ अस्मान्प्रतिसंरंभशब्दाभ्यांभीषयावाकिम् ॥ त्वमेववाकिंबिभेषि ॥ ७॥ माययापरदृश्यशरीरकल्पनशक्त्या॥ दीर्घसूत्राणामक्षिप्रकारिणाम् ॥८॥९॥ अट्टहासदशनप्रभापिंडपूरैःप्रकाशितस्वाकाराम् ॥ १० ॥ अशनिकाषेणवज्रनिष्पेषेणघृष्टांनिष्पिष्टाम् ॥ स्वनेत्रविद्युज्झांशंखवलयलक्षणबलाकाभिश्चदीपिताकाशाम् ॥ ११ ॥ तिमिरलक्षणस्यैकार्णवस्य ॥ १२ ॥ रणद्भ्यःकटकटायमानेभ्योदशनेभ्यःसंरंभाद्भयात्हाहाकारपूर्वकंहतामारितानिशाचराश्चोरव्या

किंप्रार्थयसिमेब्रूहिददामितवसुव्रत॥ किंवासंरंभशब्दाभ्यांभीषयास्मान्विभेषिकिम्॥७॥ क्षिप्रमाकारशब्दाभ्यांमाययासन्मुखीभव ॥ नकिंचिद्दीर्घसूत्राणांसिद्ध्यत्यात्मक्षयादृते॥ ८ ॥ राज्ञेत्युक्तेरम्यमुक्तमितिसंचिंत्यसातयोः ॥ प्रकाशायाप्यधैर्यायननादचजहासच॥९॥ ततोदृदृशतुस्तांतौशब्दपूरितदिग्गणाम् ॥ साट्टहासप्रभापिंडपूरप्रकटिताकृतिम्॥१०॥ कल्पाभ्राशनिकाषेणघृष्टामद्रितटीमिव॥ स्वनेत्रविद्युद्वलयबलाकोज्ज्वलितांबराम्॥ ११॥ तिमिरैकार्णवौर्वाग्निज्वालाविवलनामिव॥ गर्जद्घनघटाटोपपीवरासितकंधराम्॥ १२ ॥ रणद्दशनसंरंभहाहाहतनिशाचराम्॥ रोदसीकज्जलस्तंभांलीलयोल्लसितांपुनः॥ १३॥ ऊर्ध्वकेशींशिरालांगींकपिलाक्षींतमोमयीम्॥ यक्षरक्षःपिशाचानामप्यनर्थभयप्रदाम्॥ १४॥ देहरंध्रविशच्छ्वासवातभांकारभीषणाम्॥ मुसलोलूखलालातहलशूर्पकशेखराम्॥ १५॥ स्फुरंतीमिवकल्पांतेवैदूर्यशिखरस्थलीम्॥ हासघट्टितविश्वेशांकालरात्रिमिवोदिताम्॥ १६ ॥ शरद्व्योमाटवींसाभ्रांकृतदेहामिवागताम्॥ शरीरिणींमहाभ्राढ्यांयामिनीमिवमांसलाम् ॥ १७॥ शरीरसंनिवेशेनपंकपीठमिवोत्थिताम्॥ तनुंचंद्रार्कयुद्धायतमसेवसमाश्रिताम्॥ १८॥ इंद्रनीलमहाशुभ्रलंबाभ्रयुगलोपमौ॥ उलूखलादिहारौघौदधानामसितौस्तनौ॥ १९॥ लग्नामंगारकाष्ठेनसमानांचमहातनुम्॥ द्रुमाभास्पंदसशिरलसद्भुजलतातनुम् ॥ २० ॥ तामवेक्ष्यमहावीरौतथैवाक्षुभितौस्थितौ ॥ नतदस्तिविमोहाययद्विविक्तस्यचेतसः ॥ २१ ॥

घजंबुकादयोयया ॥ रोदस्यौद्यावापृथिव्यौकज्जलैःस्तंभयतिविष्टभ्नातीतितथोक्ताम् ॥ १३ ॥ १४ ॥ हलंशूर्पकाणिभग्नशूर्पाणिशेखरेयस्याः ॥ १५॥ कल्पांतेविदीर्णामितिशेषः ॥ हासैर्घट्टिताहिंसिताविश्वस्येशादानवाययातथाविधांकालरात्रिंशिवदूतीमिव ॥ १६ ॥ १७ ॥ पंकपीठंपृथिवीपीठम् ॥ तमसाराहुणा ॥ १८ ॥ इंद्रनीलमिवमहाशुभ्रंनीलंयल्लंबाभ्रयुगलंतदुपमौ ॥ १९ ॥ लग्नांलांछितांसमानांसवर्णांच ॥ द्रुमाभाभ्यांअस्पंदाभ्यांशिरासहिताभ्यांलसद्भ्यांभुजलताभ्यांअतनुंअनल्पाम् ॥ २० ॥ विविक्तस्यसत्यमिथ्याविवेकशालिनः ॥ २१ ॥

---

१ द्वौइतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदित्वंमहत्यसितर्ह्यल्पकार्येनैतावान्संरंभोयुक्तइतिसाम्नासमाधित्सुर्मंत्रीउवाच ॥ महाराक्षसीति ॥ हेमहाराक्षसितवस्वाभिमतसिद्धौमहात्मानिरतिशयस्वरूपोयंसंरंभःकोपः किंकिमर्थइत्यर्थः ॥ वाङ्मात्रलभ्येआहारलाभलक्षणेकार्येनक्रोधसाहसादेःप्रयोजनमस्तीतिभावः ॥ अथवायदिलघुरसितर्हिनत्वत्संरंभेणबिभीवइत्याशयेनाह ॥ लघवो हीति ॥ २२ ॥ साम्नापुनःप्रथमकल्पमेवाश्रित्याह ॥ त्यजेति ॥ बुद्धिमंतःसामसाध्येर्थेनदंडमनुसरंतीतिभावः ॥२३॥ पुनर्द्वितीयकल्पमाश्रित्यदंडोद्योगवैयर्थ्यमाह ॥ त्वादृशा नामिति ॥ धीरतालक्षणयावात्यावात्यया ॥ वातशब्दात्पाशादित्वात्समूहेयप्रत्ययेव्यत्ययेनङीपिहलस्तद्धितस्येतियलोपेतृतीयांतोत्रवात्येति ॥ व्यूढानिनिरस्तानि ॥ २४ ॥

मंत्र्युवाच ॥ ॥ महाराक्षसिसंरंभोमहात्माकिमयंतव ॥ लघवोह्यथवाकार्येलघावप्यतिसंभ्रमाः ॥ २२ ॥ त्यजसंरंभमारंभोनायंतव विराजते ॥ विषयेहिप्रवर्त्ततेधीमंतःस्वार्थसाधकाः ॥ २३ ॥ त्वादृशानांसहस्राणिमशकानामिवावले ॥ अस्माकंधीरतावात्याव्यूढानि तृणपर्णवत् ॥ २४ ॥ संरंभद्वारमुत्सृज्यसमतास्वच्छयाधिया ॥ युक्त्याचव्यवहारिण्यास्वार्थःप्राज्ञेनसाध्यते ॥ २५ ॥ स्वेनैवव्यवहारे णकार्यंसिध्यतुवानवा ॥ महानियतिरित्येवभ्रमस्यावसरोहिकः ॥ २६ ॥ कथयाभिमतंकिंतेकिमर्थयसिचार्थिनी ॥ अर्थीस्विन्नेपिना स्माकमप्राप्तार्थःपुरोगतः ॥ २७ ॥ इत्युक्तासातदातेनचिंतयामासराक्षसी ॥ अहोनुविमलाचारंसत्वंपुरुषसिंहयोः ॥ २८ ॥ नसामा न्याविमौमन्येविचित्रेयंचमत्कृतिः ॥ वचोवक्रेक्षणेनैववदत्यंतर्विनिश्चयम् ॥ २९ ॥ वचोवक्रेक्षणद्वारैर्धीमतामाशयामिथः ॥ एकी भवंतिसरितांपयांसिवलनैरिव ॥ ३० ॥ आभ्यांप्रायःपरिज्ञातोममभावोनयोर्मया ॥ नविनाश्यौमयाचेमौस्वयमेवाविनाशिनौ ॥ ३१ ॥ मन्येभवेतामात्मज्ञौनात्मज्ञानादृतेमतिः ॥ प्रमृष्टसदसद्भावाद्भवत्यस्तभयामृतौ ॥ ३२ ॥ तदेतौपरिपृच्छामिकिंचित्संदेहमुत्थितम् ॥ प्राज्ञंप्राप्यनपृच्छंतियेकेचित्तेनराधमाः ॥ ३३ ॥ इतिसंचिंत्यपृच्छायैतन्वानावसरंततः ॥ अकालकल्पाभ्ररवंहासंसंयम्यसाब्रवीत् ॥ ३४ ॥ कौभवंतोनरौधीरौकथ्यतामितिमेनघौ ॥ जायतेदर्शनादेवमैत्रीविशदचेतसाम् ॥ ३५ ॥ ॥ मंत्र्युवाच ॥ ॥ अयंराजाकि रातानामस्याहंमंत्रितांगतः ॥ उद्यतौरात्रिचर्यैणत्वादृग्जनविनिग्रहे ॥ ३६ ॥

तर्हिकथंस्वार्थसिद्धिस्तत्राह ॥ संरंभेति ॥ व्यवहारिण्याप्राज्ञव्यवहारोचितया ॥ २५ ॥ कार्यसिद्धिसंशयेप्यनादिनियतिसिद्धःसामोपायोनहेयःकिंवाच्यंतन्निश्चयेइत्याश येनाह ॥ स्वेनैवेति ॥ भ्रमस्यभ्रांतोचितसंरंभस्य ॥ २६ ॥ कथंतर्हिसाम्नासिद्धिस्तत्राह ॥ कथयेति ॥ २७ ॥ सत्वंधैर्यंबुद्धिबलंच ॥ २८ ॥ वक्रेक्षणेनमुखदर्शनेनैवप्रसादा दिलिंगैरंतस्तत्त्वविनिश्चयंवदतिसूचयति ॥ २९ ॥ वलनैःसंगमैः ॥ ३० ॥ ३१ ॥ मिथ्यात्वनिश्चयेनप्रमृष्टौसदसद्भावौजीवनमरणप्रत्ययौयस्मात्तथाविधादात्मज्ञानादृते ॥ ३२ ॥ ॥ ३३ ॥ हासंहास्यम् ॥ संयम्यनिरुद्ध्य ॥ ३४ ॥ ३५ ॥ त्वादृग्जनानांहिंस्राणांविनिग्रहेउद्यतौउद्युक्तौ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३७ ॥ करिष्यमाणप्रश्नस्योपोद्घातंरचयंत्याह ॥ राजन्निति ॥ दुष्टोमंत्रीयस्यसतथाअसिसंभावितइतिशेषः ॥ ३८ ॥ आर्यतांश्रेष्ठताम् ॥ ३९ ॥ समस्तेति ॥ तथाचाहुः ॥ तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये ॥ आयासायापरंकर्मविद्यान्याशिल्पनैपुणमिति ॥ मंत्रवित्विचाररहस्यवित् ॥ ४० ॥ प्रभुत्वंसमदृष्टित्वाधीनत्वादायुर्घृतमितिवत्ताद्रूप्यारोपात्समदृष्टित्वंविद्यानांराजाराजविद्याआत्मविद्यातयास्यात् ॥ शुनिचैवश्वपाकेचपंडिताःसमदर्शिनइतिभगवद्वचनात् ॥ ४१ ॥ यथाराजातथाप्रजाइतिप्रागुक्तत्वाद्राज्ञोमौर्ख्येप्रजानामपितदनिवारणात्तत्प्रयुक्तानर्थदौयुवांअभिभक्षयामि ॥ ४२ ॥ बालकाविवपित्रोःप्रीतिविषयौ ॥ ४३ ॥ हेपार्थिवत्वमिमान्प्रश्नान्पृष्टानर्थान्कथय अथ

राज्ञोरात्रिंदिवंधर्मोदुष्टभूतविनिग्रहः ॥ स्वधर्मत्यागिनोयेतुतेविनाशानलेंधनम् ॥ ३७ ॥ ॥ राक्षस्युवाच ॥ ॥ राजंस्त्वमसिदुर्मंत्रीदुर्मंत्रीननृपोभवेत् ॥ सद्रूपस्यभवेन्मंत्रीराजासन्मंत्रिणोभवेत् ॥ ३८ ॥ राजाचादौविवेकेनयोजनीयःसुमंत्रिणा ॥ तेनार्यतामुपायाति यथाराजातथाप्रजाः ॥ ३९ ॥ समस्तगुणजालानामध्यात्मज्ञानमुत्तमम् ॥ तद्विद्राजाभवेद्राजातद्विन्मंत्रीचमंत्रवित् ॥ ४० ॥ प्रभुत्वं समदृष्टित्वंतच्चस्याद्राजविद्यया ॥ तामेवयोनजानातिनासौमंत्रीनसोऽधिपः ॥ ४१ ॥ भवंतौतद्विदौसाधूयदितच्छ्रेयआप्नुथः ॥ नोचेदनर्थदौस्वस्याःप्रकृतेरद्ययहंयुवाम् ॥ ४२ ॥ एकोपायेनमत्पार्श्वाद्बालकावुत्तरिष्यथः ॥ मत्प्रश्नपंजरंसारंचेद्विचारयथोधिया ॥ ४३ ॥ प्रश्नानिमान्कथयपार्थिववाचमीत्रिस्त्वत्प्रार्थिनीभृशमहंपरिपूरयार्थम् ॥ अंगीकृतार्थमददत्कइवास्तिलोकेदोषेणसंक्षयकरेणनयुज्यते यः ॥ ४४ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेपूपति० क० राक्षसीवर्णनंनामाष्टसप्ततितमःसर्गः ॥ ७८ ॥ ॥ ६ ॥ ॥ श्रीवसिष्ठ उवाच ॥ ॥ इत्युक्काराक्षसीप्रश्नान्सावक्तुमुपचक्रमे ॥ उच्यतामितिराज्ञोक्तेतानिमान्शृणुराघव ॥ १ ॥ ॥ राक्षस्युवाच ॥ ॥ एकस्यानेकसंख्यस्यकस्याणोरंबुधेरिव ॥ अंतर्ब्रह्मांडलक्षाणिलीयंतेबुद्बुदाइव ॥ २ ॥ किमाकाशमनाकाशंनकिंचित्किंचिदेवकिम् ॥ कोहमेवासिसंपन्नःकोभवानप्यहंस्थितः ॥ ३ ॥ गच्छन्नगच्छतिचकःकोऽतिष्ठन्नपितिष्ठति ॥ कश्चेतनोपिपाषाणःकश्चिद्व्योम्निविचित्रकृत् ॥ ४ ॥ वह्नितामजहच्चैवकश्चवह्निरदाहकः ॥ अवह्नेर्जायतेवह्निःकस्माद्राजन्निरंतरम् ॥ ५ ॥

वाहेमंत्रिस्त्वंचवाकथय ॥ तत्रतस्मिन्विषयेऽहंभृशमर्थिनीउपयाचनवतीअस्मि ॥ अर्थंमदभिलषितंपरिपूरय ॥ योंऽगीकृतंदास्यामीतिप्रतिज्ञातमर्थमददत्प्रयच्छन्सन्संक्षयकरेणदोषेणनयुज्यतेसतादृशःकइवास्तिकोवास्तिनकश्चिदित्यर्थः ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० अष्टसप्ततितमःसर्गः ॥ ७८ ॥ ॥ ६ ॥ ॥ अनात्मविद्वज्जसमानात्मविद्धृदयंगमान् ॥ चक्रेद्विसप्ततिप्रश्नान्क्रमात्सर्गेत्रकर्कटी ॥ १ ॥ उच्यतामितिराज्ञाउक्तेअभ्यनुज्ञातेसतिसावक्तुमुपचक्रमे ॥ १ ॥ प्रश्नानामाशयउत्तरसर्गयोःस्फुटोभविष्यतीतिनेहातिविस्तरःक्रियते ॥ उपाधिभेदादनेकसंख्यस्यदुर्लक्ष्यत्वादणोरपरिच्छेदाच्चांबुधेरिव ॥ २ ॥ अनाकाशमशून्यम् ॥ लौकिकप्रसिद्धंनकिंचित्तत्वविद्प्रसिद्धंकिंचिदेव ॥ ३ ॥ अतिष्ठन्गतिनिवृत्तिमकुर्वन् ॥ पाषाणइवचैतन्यानाश्रयः ॥ ४ ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविनाशःसन्प्रकाशकः ॥६॥ अनक्षाणामनाविर्भूतेंद्रियाणाम् ॥ ७ ॥ स्वभावदःसत्ताप्रदः ॥८॥९॥ प्रत्यक्षंभासमानमपिमूढदृशाअसद्रूपम् ॥ १० ॥ ११ ॥ प्रागूबहुजन्मनि स्वात्मत्वादेवलब्ध्वाप्यज्ञानावृतत्वादलब्धप्रायत्वात्प्रयत्नशतप्राप्यम् ॥ सर्वंपूर्णम् ॥१२॥ आत्मास्वात्मैवकेनापहारितोनाशितप्रायःकृतः ॥ त्रिभुवनंतृणंक्रियतइतिपृथक्प्रश्नः

अचंद्रार्काग्नितारोपिकोऽविनाशःप्रकाशकः॥अनेत्रलभ्यात्कस्माच्चप्रकाशःसंप्रवर्त्तते॥६॥लतागुल्मांकुरादीनांजात्यंधानांतथैवच॥ अन्येषामप्यनक्षाणामालोकःकइवोत्तमः॥७॥ जनकःकौंबरादीनांसत्तायाःकःस्वभावदः॥ कोजगद्रत्नकोशःस्यात्कस्यकोशोमणेर्जगत्॥८॥ कोणुस्तमःप्रकाशःस्यात्कोणुरस्तिचनास्तिच॥ कोणुर्दूरेप्यदूरेचकोणुरेवमहागिरिः॥९॥ निमेषएवकःकल्पःकःकल्पोपिनिमेषकः॥ किंप्रत्यक्षमसद्रूपंकिंचेतनमचेतनम्॥१०॥ कश्चवायुरवायुश्चकःशब्दोऽशब्दएवकः॥कःसर्वंनचकिंचिच्चकोहंनाहंचकिंभवेत् ॥११॥ किंप्रयत्नशतप्राप्यंलब्ध्वापिबहुजन्मनि॥ लब्धंनकिंचिद्भवतिकिंतुसर्वंनलभ्यते॥ १२ ॥ स्वस्थेनजीवितेनोच्चैःकेनात्मैवापहारितः॥ केनाणुनांतःक्रियतेमेरुस्त्रिभुवनंतृणम्॥ १३ ॥ केनाप्यणुकमात्रेणपूरिताशतयोजनी॥ कोणुरेवभवन्मातिनयोजनशतेष्वपि ॥१४॥ केनालोकनमात्रेणजगद्बालःप्रनाट्यते॥ कस्याणोरुदरेसंतिकिलावनिभृतांघटाः॥१५॥ अणुत्वमजहत्कोणुर्मेरोःस्थूलतराकृतिः॥वालाग्रशतभागात्माकोणुरुच्चैःशिलोच्चयः॥१६॥ कोणुःप्रकाशतमसांदीपःप्रकटनप्रदः॥ कस्याणोरुदरेसंतिसमग्रानुभवाणवः ॥ १७॥ कोणुरत्यंतनिःस्वादुरपिसंस्वदतेनिशम्॥ केनसंत्यजतासर्वमणुनासर्वमाश्रितम् ॥ १८॥ केनात्माच्छादनाशक्तेनाणुनाच्छादितंजगत्॥ जगल्लयेनकस्याणोःसद्भूतमपिजीवति॥ १९ ॥ अजातावयवःकोणुःसहस्रकरलोचनः ॥ कोनिमेषोमहाकल्पःकल्पकोटिशतानिच॥ २० ॥ अणौजगंतितिष्ठंतिकस्मिन्बीजइवद्रुमः॥ बीजानिनिष्कलांतानिस्फुटान्यनुदितान्यपि॥ २१ ॥

॥१३॥१४॥ प्रनाट्यतेप्रनर्त्यतेअनर्द्धाटीतिणोपदेशपर्युदासान्नणः ॥ घटाःसमूहाः ॥१५॥ शिलोच्चयःपर्वतनिभः ॥१६॥ अनुभवाणवोऽवच्छिन्नज्ञानलवाः ॥ १७॥ निःस्वादुर्मधुरादिरसशून्यः ॥ आश्रितंस्वीकृतमितियावत् ॥ १८ ॥ लयेनतिरोहितमपिजगत्कस्याणोःसत्तयासद्भूतंपुनःसर्गेजीवत्यपि ॥१९॥२०॥ जगंतिअनुत्पन्नान्यपिप्रलयेकस्मिंस्तिष्ठंति ॥ सर्गकालेचनिष्कलंनिरवयवमव्यक्तमंतोबीजपरंपरावधिर्येषांतानिसर्वाणिबीजानिसर्गकालेजगदात्मनास्फुटानिविकसितान्यपिकस्मिन्सदैवानुदितानि ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकल्पःप्रलयोपिकस्यांतःस्थितः ॥ प्रयोजनंतत्तत्कारकप्रवर्त्तनंतत्रकर्तृत्वंअक्रियत्वात्कारकव्यापारयितृत्वमनाश्रित्यापिकःकारकःकर्त्तेत्यर्थः ॥ अथवाप्रयोजनकर्तृत्वं क्रियाफलनिष्पादकत्वम् ॥ २२ ॥ दृश्यसंपत्तयेभोग्यसिद्धये ॥ बहिर्दृशादृश्यंपश्यन् ॥ २३ ॥ ज्ञानेनांतर्गलितदृश्यंयथास्यात्तथापश्यन् ॥२४॥ आत्मानंद्रष्टारम् ॥ दर्शनंदृत्तिम् ॥ दृश्यवच्चक्षुर्दृश्यमिवापरोक्षंकोभासयति ॥ विकीर्णंविक्षिप्तंविक्षेपशक्त्याप्रकटितमितियावत् ॥ तत्रयंद्रष्टादर्शनंदृश्यम् ॥२५॥२६॥ असतःअस्थूलत्वादसत्कल्पात्सतः ॥ २७ ॥ सदुद्भूतावस्थंअसत्तिरोहितावस्थंचअंतस्थंकृत्वास्थितः ॥ त्रिकालगःसदैवेत्यर्थः ॥ २८ ॥ कस्यांतर्नित्यमस्तीतिशेषः ॥ २९ ॥ दृष्टांतद्वयाद्दार्ष्टांतिकेविशेषमाह ॥

कल्पःकस्यनिमेषस्यबीजस्येवांतरस्थितः ॥ कःप्रयोजनकर्तृत्वमप्यनाश्रित्यकारकः ॥ २२ ॥ दृश्यसंपत्तयेद्रष्टास्वात्मानंदृश्यतांनयन् ॥ दृश्यंपश्यन्स्वमात्मानंकोहिपश्यत्यनेत्रवान् ॥ २३ ॥ अंतर्गलितदृश्यंचकआत्मानमखंडितम् ॥ दृश्यासंपत्तयेपश्यन्पुरोदृश्यंनपश्यति ॥२४॥ आत्मानंदर्शनंदृश्यंकोभासयतिदृश्यवत् ॥ कटकादीनिहेम्नेवविकीर्णंकेनचत्रयम् ॥ २५ ॥ कस्मान्नकिंचिच्चपृथगूर्म्यादीव महांभसः ॥ कस्येच्छयापृथङ्नास्तिवीचितेवमहांभसः ॥ २६ ॥ दिक्कालाद्यनवच्छिन्नादेकस्मादसतःसतः ॥ द्वैतमप्यपृथक्कस्माद्द्रवतेवमहांभसः ॥ २७ ॥ आत्मानंदर्शनंदृश्यंसदसच्चजगत्त्रयम् ॥ कोंतर्बीजमिवांतस्थंस्थितःकृत्वात्रिकालगः ॥ २८ ॥ भूतंभवद्भविष्यच्च जगद्दृढंबृहद्भ्रमम् ॥ नित्यंसमस्यकस्यांतर्बीजस्यांतरिवद्रुमः ॥ २९ ॥ बीजंद्रुमतयेवाशुद्रुमोबीजतयेवच ॥ स्वमेकमजहद्रूपमुदेत्यनुदितोपिकः ॥ ३० ॥ बिसतंतुर्महामेरुर्भोराजन्यदपेक्षया ॥ तस्यकस्योदरेसंतिमेरुमंदरकोटयः ॥ ३१ ॥ केनेदमाततमनेकचिदेवविश्वंकिंसारएवमतिवल्गसिहंसिपासि ॥ किंदर्शनेननभवस्यथवासदैवनूनंभवस्यमलदृग्वदनःस्वशांत्यै ॥ ३२ ॥

स्वमेकमिति ॥ अविकृतएवेतियावत् ॥ उदेतिजगद्विकारात्मनेतिशेषः ॥ ३० ॥ यदपेक्षयायद्दार्ढ्यमपेक्ष्यमहामेरुर्बिसतंतुरत्यंतादृढतमइत्यर्थः ॥ अथवायस्यापेक्षयासंकल्पेनबिसतंतुरपिमहामेरुरिवदृढइत्यर्थः ॥ तस्यतथाविधस्यवस्तुनउदरेअंतः ॥ ३१ ॥ अनेकाश्चितश्चेतनायस्मिंस्तथाविधमिदंविश्वंकेनआततंसृष्ट्याविस्तारितम् ॥ त्वंचकःसारोवास्तवंरूपंयस्यतथाविधःसन्सर्वव्यवहारेष्वतिशयेनवल्गसिव्यवहरसिपासिप्रजाहंसिचवध्यान् ॥ तथाचसृष्ट्यादिनिर्वाहाःसर्वेषांकिंनिमित्तकाइत्यर्थः ॥ कस्यदर्शनंकिंदर्शनंतेनत्वममलदृग्रूपःसंस्तदन्योनभवसि ॥ अथवातद्रूपएवसदैवनूनंभवसितद्वस्तुनःअस्मभ्यंस्वशांत्यैस्वमृत्युमोक्षार्थंवदेत्युपसंहारः ॥ ३२ ॥

१ सदसच्चगतत्क्रममितिपाठांतरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एषउक्तलक्षणोसौचित्तश्रियोमुखंस्वात्माकारवृत्तिस्तस्याश्चंद्रस्येवमिहिकालक्षणस्यमलस्यानुलेपआवरणभूतोममसंशयोगलतु ॥ समूलोमूलाज्ञानसहितः॥ पंडितोक्तिपंडितशब्दयोग्यतानैवेति ॥ ३३ ॥ एवंरूपंमेलघुतरसंशयंयदिनविनेष्यथोनापाकरिष्यथस्तर्हिरक्षोजातेःस्वदेहस्यजठरहुताशनेंधनत्वंभक्ष्यतामितियावत् ॥ झटितिक्षणेननिर्विघ्नंगमिष्यथः ॥ अनात्मज्ञानादेहमात्रात्मभावानांरक्षोन्नभावस्यदुर्वारत्वादितिभावः ॥ ३४ ॥ नकेवलंयुवयोरेवानर्थःकिंतुसर्वस्यजनपदस्याप्युपस्थितइत्याह ॥ पश्चादिति ॥ उरुजठराबृहत्कुक्षिः ॥ एवमुक्तप्रश्नोत्तरदानेनतेस्वात्मनासहसर्वप्रजापालनात्सुराजतास्यादितिमन्ये ॥ मूर्खाणामनात्मज्ञानामतिरसोभोगलांपट्यातिशयोराजत्वनिमित्तःसंक्षयायैवभवति ॥ मद्भक्षणाभावेपिराज्यांतेनरकावश्यंभावादितिभावः ॥ ३५ ॥ विपुलगभीरमेघनादप्रोल्लासइवप्रकटयातारयागिरासानिशाचरीत्युक्त्वाबहिरतिविकटाकृतिरपि

एषोसौप्रगलतुसंशयोममोच्चैश्चित्तश्रीमुखमिहिकामलानुलेपः॥यस्याग्रेनगलतिसंशयःसमूलोनैवासौक्वचिदपिपंडितोक्तिमेति॥३३
एवंमेयदिनविनेष्यथःक्रमोक्तंसंशांतंलघुतरसंशयंसुबुद्धी॥तद्रक्षोजठरहुताशनेंधनत्वंनिर्विघ्नंझटितिगमिष्यथःक्षणेन॥३४॥पश्चात्तांजनपदमंडलींसमंताद्धावल्कीमुरुजठराक्षणाद्ग्रसेहम्॥एवंतेभवतुसुराजतेतिमन्येमूर्खाणामतिरसएवसंक्षयाय॥३५॥इत्युक्त्वा विपुलगभीरमेघनादप्रोल्लासप्रकटगिरानिशाचरीसा ॥ तूष्णीमप्यतिविकटाकृतिस्तदासीच्छुद्धांतःशरदमलाभ्रमंडलीव ॥ ३६ ॥
इत्यार्षेवा०वा०दे०मो०उ०क०राक्षसीप्रश्नोनामैकोनाशीतितमःसर्गः ॥ ७९ ॥ ॥ ७॥ ॥ श्रीवसिष्ठउवाच॥ ॥महानिशिमहारण्येमहाराक्षसकन्यया॥इतिप्रोक्तेमहाप्रश्नेमहामंत्रीगिरंददौ ॥ १ ॥ ॥मंत्र्युवाच॥ ॥शृणुतोयदसंकाशेप्रश्नमेतंभिनद्म्यहं ते॥ अनुक्रमात्मकंमत्तंगजेंद्रमिवकेसरी॥ २ ॥ भवत्यापरमात्मैषकथितःकमलेक्षणे ॥ अनयैववचोभंग्याप्रश्नविद्योधयोग्यया ॥ ३ ॥ अनाख्यत्वादगम्यत्वान्मनःषष्ठेंद्रियस्थितेः॥ चिन्मात्रमेवमात्माणुराकाशादपिसूक्ष्मकः॥४॥ चिदणोःपरमस्यांतःसदिवासदिवापिवा॥ बीजेंतर्द्रुमसत्तेवस्फुरतीदंजगत्स्थितम्॥ ५ ॥

अंतःशुद्धाशरदमलाभ्रमंडलीवतूष्णीमासीदित्यर्थः ॥ ३६ ॥ ॥ इतिश्रीम०तात्पर्यप्रकाशेउ०एकोनाशीतितमःसर्गः ॥ ७९ ॥ ॥ ७॥ ॥ समादधेत्प्रथमंमंत्रीप्रश्नगणानूक्रमात् ॥ व्युत्क्रमाच्चयथान्यायंसूक्ष्माभिरुपपत्तिभिः ॥ १ ॥ गिरंवक्ष्यमाणप्रतिज्ञानलक्षणाम् ॥ १ ॥ प्रश्नंप्रश्नगणंभिनद्म्यिउपपत्तिभिर्विदारयामि ॥ २॥ सर्वान्प्रश्नान्शिथिलीकर्तुंसर्वप्रश्नहृदयंतावत्प्रथमंदर्शयति ॥ भवत्येति ॥ स्वर्णकमलमिवपिंगलेक्षणे ॥ ३ ॥ कस्याणोरंबुधेरिवेतिप्रथमप्रश्नविशेष्येणुशब्दप्रयोगस्याभिप्रायमुद्घाटयति ॥ अनाख्यत्वादिति ॥ तथाचाणुःपंथाविततःपुराणइत्यादिश्रुतिषुप्रसिद्धइतिभावः ॥ ४ ॥ अंतर्ब्रह्मांडलक्षाणीतिपृष्टांशंदर्शयति ॥ चिदणोरिति ॥ एतेनअणौजगंतितिष्ठंतिकस्मिन्बीजइवद्रुमइतिप्रश्नोप्युत्तरितः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदिवासदिवापिवेत्युक्त्यासूचितंसत्तायाःकःस्वभावदइतिप्रश्नस्योत्तरमाह ॥ सत्किंचिदिति ॥ सर्ववस्तुसत्तायाअनुभवसत्ताधीनत्वात्तत्सत्तायाअन्याधीनत्वेऽनवस्थापातात्स्व तःसिद्धसत्ताकानुभवादेवसर्वेभावाःसत्तांप्राप्ताइत्यर्थः ॥६ ॥ किमाकाशमनाकाशमितिप्रश्नतात्पर्यमुद्घाटयति ॥ आकाशमिति ॥ नकिंचित्किंचिदेवकिमितिप्रश्नोत्तरमाह ॥ अतींद्रियत्वादिति ॥ नेंद्रियगम्यंकिंचिदेवयत्तदित्यर्थः ॥ ७ ॥ यदितुकिंचिदपिनकिंचिद्यदात्मभावेतदितिप्रश्नार्थस्तदाप्याह ॥ सर्वात्मकत्वादिति ॥ स्वस्यैवसर्वात्मकत्वात्स्वा त्मनैवसाक्षात्कृतेनसर्वस्मिन्भुक्तेनिगीर्णेसतितदेवकिंचिन्नकिंचनात्मनापरिशिष्यतइत्याशयइत्यर्थः ॥ एकस्यानेकसंख्यस्येतिप्रश्नोपक्रमाभिप्रायमाह ॥ चिदणोरिति ॥ एक स्यैवचिदणोस्त्वदुदितानेकताप्रतिभामात्रंप्रातीतिकीनवास्तवीत्यर्थः ॥ एतेनकटकादीनिहेम्नेवेतिप्रश्नोप्युक्तप्रायएवेत्याशयेनाह ॥ यथाहेम्नइति ॥८॥ कोणुस्तमःप्रकाशःस्या दित्यादिप्रश्नेषुपुनःपुनरणुशब्दप्रयोगस्यापिप्रागुक्तएवाभिप्रायइत्याह ॥ एषोणुरिति ॥ ९ ॥ कोणुरस्तिचनास्तिचेतिप्रश्नेनास्तिचेत्यंशोबाधितएवेतिदूषयति ॥ सर्वात्मकत्वा

सत्किंचिदनुभूतित्वात्सर्वात्मकतयास्वतः ॥ तदात्मकतयापूर्वंभावाःसत्तांकिलागताः ॥६॥ आकाशंबाह्यशून्यत्वादनाकाशंतुचित्त्वतः ॥ अतींद्रियत्वान्नोकिंचित्सएवाणुरनंतकः ॥ ७ ॥ सर्वात्मकत्वाद्भुक्तेचतेनकिंचिन्नकिंचन ॥ चिदणोःप्रतिभासास्यादेकस्यानेकतोदि ता ॥ असत्येवयथाहेम्नःकटकादितथापरे ॥८॥ एषोणुःपरमाकाशःसूक्ष्मत्वादप्यलक्षितः ॥ मनःषष्ठेंद्रियातीतःस्थितःसर्वात्मकोपिसन् ॥ ९ ॥ सर्वात्मकत्वान्नैवासौशून्योभवतिकर्हिचित् ॥ यदस्तिनतदस्तीतिवक्तामंताइतिस्मृतः ॥ १० ॥ कयाचिदपियुक्त्येहसतोसत्त्वंनयु ज्यते ॥ सर्वात्मास्वात्मगुप्तेनकर्पूरेणेवदृश्यते ॥ ११ ॥ चिन्मात्राणुःसएवेहसर्वंकिंचिन्मनःस्थितम् ॥ नकिंचिदिंद्रियातीतरूपत्वादमलः स्थितः ॥ १२ ॥ सएवचैकोनेकश्चसर्वसत्वात्मवेदनात् ॥ सएवेदंजगद्धत्तेजगत्कोशस्तथैवहि ॥ १३ ॥

दित्यादिना ॥ कथंबाधितस्तत्राह ॥ यदस्तीति ॥ यद्यस्माद्धेतोस्तदस्तिनास्तीतिंचवक्तामंताचपुरुषःसआत्मैवेतिवक्तृमंत्रादिरूपेणस्मृतःप्रसिद्धः ॥ तथाचस्वात्मापलापायोगा न्नास्तितास्यनघटतएवेत्यर्थः ॥ १० ॥ सतोऽसत्वविरोधादपिनयुक्तमिदमित्याह ॥ कयाचिदपीति ॥ यद्यस्त्येवतर्हिकुतोनदृश्यतइत्याशंक्यनिष्कृष्टरूपेणादर्शनेपिसर्वानुगतस द्रूपेणापिधानगुप्तेनापिकर्पूरेणस्वगंधात्मनेवदृश्यतएवेत्याह ॥ सर्वात्मेति ॥ स्वात्मनाप्रत्यग्रूपणगुप्तेनच्छन्नेनसर्वात्मासर्वानुगतसदात्मादृश्यतइत्यर्थः ॥ ११॥ कःसर्वंनचकिंचिच्चे त्यस्योत्तरमाह॥चिन्मात्राणुरिति ॥ नन्वपरिच्छिन्नंकथंपरिच्छिन्नसर्वरूपंतत्राह ॥ किंचिदिति ॥ मनइंद्रियवृत्तिभिर्नानात्मताप्रत्ययात्किंचिन्मनःपरिच्छिन्नरूपेणैवसर्वमित्य र्थः ॥ अतएवमनइंद्रियाद्यपरिच्छिन्नस्वाभाविकरूपेणनकिंचिदपीत्याशयेनत्वयातथोक्तमित्याह ॥ नकिंचिदिति ॥ १२ ॥ एतदभिप्रायेणवातवएकस्यानेकसंख्यस्येत्युपक्र मइत्याह ॥ सएवैकइति ॥ नित्यंसमस्यकस्यांतरितिप्रश्नस्यकोजगद्रत्नकोशःस्यादित्यस्यचोत्तरमाह ॥ सएवेति ॥ १३ ॥

१ असत्येवाप्सित्येवहेम्नःकटकतायथेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कस्मान्नकिंचिन्नपृथगूर्म्यादीवमहांभसइत्यस्योत्तरमाह ॥ इमाइति ॥ चित्तात्मनामहांभोधिवद्धिकारिणि ॥ प्रज्ञाश्चित्तविकल्पमात्ररूपाः ॥ एतेनकस्येच्छयापृथक्कास्तीत्येतदपिसमाहितमेव ॥ १४ ॥ दिक्कालाद्यनवच्छिन्नादेकस्मादसतःसतइतिशून्याशून्योभयात्मतोक्तेस्तात्पर्यमाह ॥ चित्तेंद्रियादीति ॥ १५ ॥ कोभवानेवसंपन्नइत्यस्योत्तरमाह॥ सोहमिति ॥ अहमद्वैतवेदनात्सआत्मैवसंपन्नःसन्भवान्त्वदात्मैवभवान्ससंपन्नःअहमेव ॥ इदमपिअहंताभवत्ताप्रतिसंधानव्यवहारे अव्यवहारदशातुसआत्मानभवान्नाहंचकिंतुबोधबृहद्वपुरेवजातःप्रादुर्भूतइत्यर्थः ॥ १६ ॥ उक्तार्थमेवस्फुटमाह ॥ त्वंतेति ॥ १७ ॥ गच्छन्नगच्छतिचकइत्यस्योत्तरमाह ॥ गच्छन्निति ॥ योजनौघगतआकाशव

इमाश्चित्तमहांभोधौत्रिजगल्लववीचयः॥ प्रज्ञास्तस्मिन्कचंत्यप्सुद्रवत्वाच्चक्रताइव ॥ १४॥ चित्तेंद्रियाद्यलभ्यत्वात्सोणुःशून्यस्वरूपवत्॥ स्वसंवेदनलभ्यत्वादशून्यंव्योमरूप्यपि ॥ १५॥ सोहंभवानेवभवान्संपन्नोद्वैतवेदनात् ॥ सभवान्नभवेन्नाहंजातोबोधबृहद्वपुः ॥ १६॥ त्वंताहंतात्मकंसर्वंविनिर्गीर्यावबोधतः॥ नत्वंनाहंनसर्वंचसर्वंवाभवतिस्वयम्॥१७॥ गच्छन्नगच्छत्येषोणुर्योजनौघगतोपिसन्॥ संविस्यायोजनौघत्वंतस्याणोरंतरेस्थितम् ॥ १८॥ नगच्छत्येपयातोपिसंप्राप्तोपिचनागतः ॥ स्वसत्ताकाशकोशांतर्वासित्वाद्देशकालयोः॥ १९ ॥ गम्यंयस्यशरीरस्थंक्वकिलासौप्रयातिहि॥ कुचकोटरगःपुत्रःकिंमात्रान्यत्रवीक्ष्यते ॥ २० ॥ गम्योयस्यमहादेशोयावत्संभवमक्षयः॥ अंतस्थःसर्वकर्त्तुर्हिसकथंक्वेवगच्छति॥ २१ ॥ यथादेशांतरप्राप्तेकुंभेवक्त्रसमुद्रिते॥ तदाकाशस्यगमनागमनेनतथात्मनः॥ २२॥ चित्ततास्थाणुतास्वांतर्यदास्तोनुभवात्मिके॥ चेतनस्यजडस्यैवतदासौद्वयमेवच॥२३॥ यदाचेतनपाषाणसत्त्वैकात्मैकचिद्वपुः॥ तदाचेतनएवासौपाषाणइवराक्षसि॥ २४ ॥ परमव्योम्न्यनाद्यंतेचिन्मात्रपरमात्मना॥ विचित्रंत्रिजगच्चित्रंतेनेदमकृतंकृतम्॥ २५॥

योजनौघव्याप्यपिसन् ॥ संविस्यास्वप्नइवकल्पनया ॥ १८ ॥ कोतिष्ठन्नपितिष्ठतीत्यस्योत्तरमपितयैवदिशाआह ॥ नगच्छतीति ॥ १९ ॥ उक्तमुभयंदृष्टांतेनोपपादयति ॥गम्यमित्यादिना ॥ गम्यंगमनेनप्राप्तव्यंदेशांतरम् ॥ २० ॥ २१ ॥ स्फुटंदृष्टांतांतरमाह ॥ यथेति ॥ वक्त्रसमुद्रितेबद्धमुखे॥ गमनागमनेनस्तस्तथेत्यर्थः ॥ २२ ॥ कश्चेतनोपिपाषाणइत्यस्यप्रश्नस्ययदिचिद्रूपोजडरूपश्चेतिविरुद्धोभयात्मकइत्यर्थस्तदाह ॥ चित्ततेति ॥ यदाजडस्यैवदेहादेरात्मतादात्म्याध्यासाच्चेतनस्यचित्तताप्रकाशस्वभावतास्थाणुताजडताचानुभवात्मिकेस्वानुभवसाक्षिकेस्तस्तदासावविमर्शाद्द्वयंजडबोधोभयरूपोभवत्येवेत्यर्थः ॥ २३ ॥ यदातुचेतनोपिपाषाणइवघनरूपःकइतिप्रश्नार्थस्तदापारमार्थिकमात्मरूपमेवचिद्घनंसइत्याह ॥ यदाचेति ॥ २४ ॥ कश्चिद्व्योम्निविचित्रकृदित्यस्योत्तरमाह ॥ परमव्योम्नीति ॥ मिथ्यात्वादकृतमेवकृतम् ॥ २५॥

१ पूर्वप्रश्नानुरोधेनकोहमेवासिसंपन्नइत्यपेक्षितमितिभाति

CC-0. In Public Domain. Digitization by eGangotri

वह्नितामजहच्चैवकश्चवह्निरदाहकइत्यस्योत्तरमाह ॥ तत्संवित्त्येति ॥ आत्मसत्तायाएववह्निसत्तात्वेतस्याःसर्वगतत्वात्सर्वगोपिसःअदहतिनदहत्येव ॥ अमानोनाःप्रतिषेधइ तिनञर्थकोनिपातोऽकारः ॥ नैतावतासस्सर्वगतोनेतिमंतव्यम् ॥ यतःससर्वद्रव्याणांपावकइवप्रकाशकइत्यर्थः ॥ २६ ॥ अत्रक्वेर्जायतेवह्निःकस्मादितिप्रश्नस्योत्तरमाह ॥ प्र ज्वलदिति ॥ २७ ॥ अचंद्रार्काग्नितारोपिकोऽविनाशःप्रकाशकइत्यस्योत्तरमाह ॥ संवेदनादिति ॥ २८ ॥ अनेत्रलभ्यात्कस्माच्चप्रकाशःसंप्रवर्ततेइत्यस्योत्तरमाह ॥ अने त्रलभ्यइति ॥ २९ ॥ तस्यस्वयंज्योतिष्ट्वमनुभावयति ॥ प्रवर्त्ततइति ॥ अस्मदालोकोहंकारादिप्रथामनःषष्ठेंद्रियातिगादात्मनःसकाशात्प्रवर्त्तते ॥ यथागाढांधकारस्थितोपि त्वंकासीतिपृष्टोऽहमिहास्मीतिवक्ति ॥ येनहेतुनाअंतराआलोकदीपादिकमितिशेषः ॥ वस्तूनांस्वदेहेंद्रियादीनांविषयेदृश्यचमत्कृतिरपरोक्षप्रथादृष्टासर्वानुभवप्रसिद्धेतियावत्

तत्संवित्त्यावह्निसत्तातेनात्यक्तानलाकृतिः ॥ सर्वगोप्यदहत्येवसजंगद्द्रव्यपावकः ॥ २६ ॥ प्रज्वलद्भास्वराकारान्निर्मलाद्गगनादपि ॥ प्रज्वलच्चेतनैकात्मातस्मादग्निःसजायते ॥ २७ ॥ संवेदनाद्यदर्कादिप्रकाशस्यप्रकाशकः ॥ ननश्यत्यात्मभारूपोमहाकल्पांबुदैरपि ॥ २८ ॥ अनेत्रलभ्योनुभवरूपोत्दृहृदीपकः ॥ सर्वसत्ताप्रदोनंतःप्रकाशःपरमःस्मृतः ॥ २९ ॥ प्रवर्त्ततेस्मदालोकोमनःषष्ठेंद्रियातिगात् ॥ येनांतरापिवस्तूनांदृष्टादृश्यचमत्कृतिः ॥ ३० ॥ लतागुल्मांकुरादीनामनक्षाणांचपोषकः ॥ उत्सेधवेदनाकारःप्रकाशोनुभवात्मकः ॥ ३१ ॥ कालाकाशक्रियासत्ताजगत्तत्रास्तिवेदने ॥ स्वामीकर्त्तापिताभोक्ताआत्मत्वाच्चनकिंचन ॥ ३२ ॥ अणुत्वमजहत्सोणुर्जगद्रत्नसमुद्गकः ॥ मातृमानप्रमेयात्मजगन्नास्तीतिकेवले ॥ ३३ ॥ सएवसर्वजगतिसर्वत्रकचतिस्फुटम् ॥ यदाजगत्समुद्गेस्मिंस्तदासौपरमोमणिः ॥ ३४ ॥ दुर्बोधत्वात्तमःसोणुश्चिन्मात्रत्वात्प्रकाशदृक् ॥ सोस्तिसंवित्तिरूपत्वादक्षातीतस्तथानसन् ॥ ३५ ॥ दूरेसोनक्षलभ्यत्वाच्चिद्रूपत्वान्नदूरगः ॥ सर्वसंवेदनाच्छैलोत्यसावेवाणुरेवसन् ॥ ३६ ॥ तत्संवेदनमात्रंयत्तदिदंभासतेजगत् ॥ नसत्यमस्तिशैलादितेनाणावेवमेरुता ॥ ३७ ॥

॥ ३० ॥ लतागुल्मेत्यादिप्रश्नस्योत्तरमाह ॥ लतेति ॥ पोषकःस्वसंनिधानेनवृद्धिनिमित्तम् ॥ उत्सेधस्यचतत्फलस्यवेदनमेवआकारोयस्यतत्साक्षिणः ॥ ३१ ॥ जनकःकोंबरादीनामित्यस्योत्तरमाह ॥ कालाकाशेति ॥ व्यवहारदृशाचेदंपरमार्थदृशात्वाह ॥ आत्मत्वादिति ॥ ३२ ॥ कोजगद्रत्नकोशःस्यादित्यस्योत्तरंपुनराह ॥ अणुत्वमिति ॥ समुद्गकःसंपुटकः ॥ कस्यकोशोमणेर्जगदित्यस्योत्तरमाह ॥ मात्रित्यादिसार्धेन ॥ ३३ ॥ ३४ ॥ कोणुस्तमःप्रकाशःस्यादित्यस्योत्तरमाह ॥ दुर्बोधत्वादिति ॥ कोणुरस्तिचनास्तिचेत्यस्योत्तरमाह ॥ सोस्तीति ॥ ३५ ॥ कोणुर्दूरेप्यदूरेचेत्यस्योत्तरमाह ॥ दूरेसइति ॥ कोणुरेवमहागिरिरित्यस्योत्तरमाह ॥ सर्वसंवेदनादिति ॥ विनैवकरणंसर्वैरप्यहमहमितिपुरोवर्त्तिशैलइवापरोक्षतयासंवेदनादितित्वयोक्तइत्यर्थः ॥ ३६ ॥ तत्राणुरेवसन्नित्यंशस्यतात्पर्यमाह ॥ तत्संवेदनेति ॥ ३७ ॥

१ टीकानुरोधात्ससर्वद्रव्यपावकइतिपाठोऽपेक्षितइतिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमेषएवकःकल्पइत्यस्योत्तरमाह ॥ निमेषेत्यादिनवभिः ॥ ३८ ॥ उक्तार्थमुपपादयति ॥ कल्पेति ॥ निमेषएवकल्पेयावंत्यःक्रियास्तैर्विलसतीतिकल्पक्रियाविलासःप्रतिभासतइत्यर्थः ॥ अल्पांतर्विस्तृतस्यप्रतिभासेदृष्टांतमाह ॥ बह्विति ॥ ३९ ॥ तदसंभावनावारणायदृष्टांतांतरमाह ॥ निमेषेति ॥ मुकुरेदर्पणे ॥ ४० ॥ निमेषाःकल्पाःशैलादिपूरायोजनकोटयश्चस्वसत्यत्वेविरोधादाश्रयभेदकायत्राणावतिसूक्ष्मेपिविद्यंतेमिथ्यात्वमालंब्यसमाविशंतितत्रद्वैतैक्ययोरपितथैवमिथ्यात्वेनैवसमावेशादित्यर्थः ॥ ४१ ॥ सत्यंव्यावहारिकमसत्यंप्रातिभासिकंच ॥ ४२ ॥ उक्तेर्थेलोकानुभवमाख्यायिकांचोदाहरति ॥ दुःखइति ॥ उदिताआविर्भूता ॥ ४३ ॥ चित्तवृत्त्यनुसारेणैवचितःप्रतिभासोनव

निमेषप्रतिभासोहिनिमेषइतिकथ्यते ॥ कल्पेतिप्रतिभासोहिकल्पशब्देनकथ्यते ॥ ३८ ॥ कल्पक्रियाविलासोहिनिमेषःप्रतिभासते ॥ बहुयोजनकोटिस्थंमनस्येवमहापुरम् ॥ ३९ ॥ निमेषजठरेकल्पसंभवःसमुदेतिहि ॥ महानगरनिर्माणंमुकुरेंतरिवामले ॥ ४० ॥ निमेषकल्पशैलादिपूरयोजनकोटयः ॥ यत्राणावेवविद्यंतेतत्रद्वैतैक्यतेकुतः ॥ ४१ ॥ कृतवान्प्रागिदमहमितिबुद्धावुदेतिहि ॥ क्षणात्सत्यमसत्यंचदृष्टांतःस्वप्नविभ्रमः ॥ ४२ ॥ दुःखेकालःसुदीर्घोहिसुखेलघुतरःसदा ॥ रात्रिर्द्वादशवर्षाणिहरिश्चंद्रस्यचोदिता ॥ ४३ ॥ निश्चयोयउदेत्यंतःसत्यात्मासत्यएवच ॥ हेम्नीवकटकादित्वंसएवचितिराजते ॥ ४४ ॥ ननिमेषोस्तिनोकल्पोनादूरंनचदूरता ॥ चिदणुप्रतिभैवैवंस्थितान्यान्यान्यवस्तुवत्[1] ॥ ४५ ॥ प्रकाशतमसोर्दूरादूरयोःक्षणकल्पयोः ॥ एकचिद्देहयोरेवनभेदोस्तिमनागपि ॥ ४६ ॥ प्रत्यक्षमक्षसारत्वादप्रत्यक्षंततोतिगम् ॥ दृश्यत्वेनैषवोदेतिचेताद्रष्टैवसद्वपुः ॥ ४७ ॥ यावत्कटकसंवित्तिस्तावन्नास्तीवहेमता ॥ यावच्चदृश्यतापत्तिस्तावन्नास्तीवसाकला ॥ ४८ ॥ कटकत्वेऽकृतेऽदृष्टेसुवर्णत्वमिवाततम् ॥ केवलंनिर्मलंशुद्धंब्रह्मैवपरिदृश्यते ॥ ४९ ॥

स्तुवृत्तानुसारेणेत्याह ॥ निश्चयइति ॥ ४४ ॥ किंतर्हिवस्तुवृत्तंतदाह ॥ नेति ॥ ४५ ॥ एवमन्येष्वपिविरुद्धेष्वधिष्ठानचिदभेदादेवभेदोनेत्याह ॥ प्रकाशेति ॥ ४६ ॥ किंप्रत्यक्षमसद्रूपमितिप्रश्नस्योत्तरमाह ॥ प्रत्यक्षमिति ॥ अक्षाणांबाह्यांतरकरणानांसारत्वात्स्वस्वविषयापरोक्षप्रथानिर्वाहकत्वात् ॥ ततोतिगंतदविषयः ॥ अथवाप्रत्यक्षादिप्रमाणगम्यदृश्यारोपेणोदयादप्यस्यप्रत्यक्षत्वमित्याह ॥ दृश्यत्वेनेति ॥ एषःवाइतिच्छेदः ॥ दृश्यत्वेनैषउदेतीतिवासद्वपुःप्रत्यक्षइत्यर्थः ॥ ४७ ॥ यदिसएवदृश्यात्मातर्हिकुतोदृश्यस्यहेयतातत्राह ॥ यावदिति ॥ साकलावास्तवीचिदेकरसता ॥ तथाचनदृश्यरूपेणपरमपुरुषार्थतेतिहेयत्वमितिभावः ॥ ४८ ॥ अतएवदृश्यात्मनाअकल्पनेकल्पितस्यवाअदर्शनेतस्यब्रह्मरूपत्वात्पुरुषार्थतेत्याशयेनाह ॥ कटकत्वेइति ॥ अकृतेअदृष्टेचेतिच्छेदः ॥ ४९ ॥

---

१ नान्यान्यवस्तुवदित्यपिक्वचित्पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असद्रूपमितिप्रश्नांशाशयमाह ॥ सर्वत्वादिति॥सर्वानुविद्धसद्रूपेणप्रथनात्सद्रूपः॥निष्कृष्टरूपेणदुर्लक्ष्यत्वाच्चात्सद्वपुरसद्रूपः॥असद्वाइदमग्रआसीत्ततोवैसदजायतेतिश्रुतौतथा व्यवहारदर्शनादित्याशयः ॥ किंचेतनमचेतनमितिप्रश्नोत्तरमाह ॥ चेतनइति ॥ अचित्अचेतनइत्युक्तस्त्वयेत्यर्थः ॥५०॥ चेत्याभावमुपपादयति ॥ चिच्चमत्कारेत्यादिना॥चित्प्रतिभात्मनिचित्प्रतिभारूपेअनिललोलितवृक्षवदस्थिरे अनिलमयवृक्षवदत्यंतासतिच ॥ चिच्चेत्यकलनेचैतन्याश्रयविषयताकल्पने ॥५१॥ चिच्चमत्कारमात्रेदृष्टांतमाह ॥ यथेति ॥ तापस्यातपस्य ॥ पीनस्यप्रचुरस्य ॥५२॥ यथाअर्करश्मिभिर्वक्ष्यमाणकांचनादिनिर्माणंतत्रनिर्माणेअस्तितानास्तितेब्राह्मकल्पादिरूपस्यजगतइवेत्यसतउपमाभूतस्य असत्त्वंस्फुटमेव ॥ एवंचचिच्चेत्यभेदधीःकैवनिर्विषयेत्यर्थः ॥५३॥ माययाअविद्ययायथाअंशुकणांकेसूर्यांशुलेशांचितेखेआकाशेकांचनंकचतिप्रथते ॥५४॥५५॥ अस्त्वेवं

सर्वत्वादेवसद्रूपोदुर्लक्ष्यत्वादसद्वपुः ॥ चेतनश्चेतनात्मत्वाच्चेत्यासंभवतस्त्वचित् ॥ ५० ॥ चिच्चमत्कारमात्रात्मन्यस्मिंश्चित्प्रतिभात्मनि ॥ जगत्यनिलवृक्षाभेचिच्चेत्यकलनेकुतः ॥ ५१ ॥ यथातापस्यपीनस्यभासनंमृगतृष्णिका ॥ एवंपीवरमद्वैतंतथाचिद्भासनंजगत् ॥ ५२ ॥ अर्कांशुभिःसूक्ष्मतरनिर्माणंयदनामयम् ॥ अस्तितानास्तितेतत्रकल्पादेरिवकैवधीः ॥ ५३ ॥ माययांशुकणांकेखेयथा कचतिकांचनम् ॥ तथाजगदिदंभातिचिच्चेत्यकलनेकुतः ॥ ५४ ॥ स्वप्नगंधर्वसंकल्पनगरेकुड्यवेदनम् ॥ नसन्नासद्यथातद्वद्विद्धिदीर्घभ्रमंजगत् ॥ ५५ ॥ तथाचैवंविधन्यायभावनाभ्यासनिर्मलात् ॥ चिदाकाशेननिर्यातियथाभूतार्थदर्शिनः ॥ ५६ ॥ नकुड्याकाशयोर्भेदोदृश्यसंवेदनादृते ॥ आब्रह्मजीवकलनाद्यद्रूढंरूढमेवच ॥ ५७ ॥ प्रतिभासाच्चिदाकाशेसत्वशून्यंभवंतिताः ॥ प्रकचंतित्यनिर्भाव्याः प्रभापिंडइवप्रभाः ॥ ५८ ॥

जगद्भ्रांतिसिद्धंकिंततस्तत्राह ॥ तथाचेति ॥ तथाचएवंविधानांमिथ्यात्वोपपादकन्यायानांपुनःपुनर्भावनालक्षणेनाभ्यासेननिर्मलान्मनसोयथाभूतार्थदर्शिनःपारमार्थिकंब्रह्म दृष्टवतःपुंसोऽविद्यानाशेसतिचिदाकाशेपुनःसंसारोननिर्यातिपुनरावृत्तिर्नास्तीतिसिद्धमित्यर्थः ॥ अथवान्यायपरिष्कृततत्त्वदृशासृष्टिरेवनाभूदित्यर्थः ॥ ५६ ॥ अथवाविषयरूपभेदकसंवेदनभेदादेवभिन्नमिवनवस्तुतस्तथैवआब्रह्मस्तंबपर्यंतनिरूढजीवानुभवादित्याह ॥ नेति ॥ ५७ ॥ यदिनभेदस्तर्हिकथंकुड्यादिभेदकलनाजायंतेतत्राह ॥ प्रतिभासादिति ॥ ताःकलनाःसत्वशून्यंयथास्यात्तथाभवंतीत्यर्थः ॥ अत्यंतासत्वेखपुष्पवद्भानानुपपत्तेराह ॥ अनिर्भाव्याइति ॥ यौक्तिकदृशाअनिर्वचनीयाइत्यर्थः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंसोपपत्तिप्रासंगिकंकिंचेतनमचेतनमितिप्रश्नोत्तरमुक्त्वाशिष्टानांप्रश्नानामुत्तरंराजार्थैंपरिशेषयंस्तदज्ञानशंकानिवृत्तयेतेष्ववयुत्यद्वित्राणामुत्तरंविवक्षुर्द्वैतमिथ्यात्वोपवर्णन प्रसंजितंद्वैतमप्यपृथक्कस्मादित्यस्योत्तरमाह॥पृथक्केति॥पृथक्त्वासंस्कारसंस्कृतायामतेर्बुद्धिवृत्तेर्योभासोऽतर्गतआत्मप्रकाशस्तस्ययःस्वचमत्कारःपृथक्त्वाप्रकटनशक्तिलक्षण स्तद्योगतोद्वैतंप्रतिभातमपिअपृथगेवेत्यर्थः॥ तत्रहेतुमाह॥ सर्वात्मिकेति॥ प्रतिभाआत्मप्रकाशः॥ ५९॥ वृक्षात्मबीजवदितिदृष्टांतंविवृण्वन्कोंतर्बीजमिवांतस्थंस्थितःकु त्वात्रिकालगइत्यस्योत्तरमाह॥बीजमिति॥ एकदृक्रूएकरूपंबीजंनानापृथग्भूतंअनानाअपृथग्भूतंचअंतस्थवृक्षत्वंअंतर्गतवृक्षाकारंकृत्वास्थितंतथाब्रह्माप्यसंख्यजगदित्यर्थः ॥६०॥ आकाशकोशवदित्युक्तेस्तात्पर्यंस्फुटयति॥ बीजस्येति॥ व्यधिकरणेषष्ठ्यौ॥ बीजांतर्गतवृक्षस्यातिसूक्ष्मत्वात्स्थितिर्यथाव्योमाद्वैताआकाशतुल्यातथाब्रह्मांतर्गतज गतोप्यात्मसाक्षित्वात्तत्साक्षिणःपृथगनुपलंभाच्चिद्रूपेणैवस्थितिरितिचितिभेदकाभावादाकाशकोशसाम्यमित्यर्थः॥ ६१॥ एतावतैवसर्वप्रश्नानामुत्तरमुक्तप्रायमितिसूचयन्स

पृथक्त्वामतिभासस्यस्वचमत्कारयोगतः॥ सर्वात्मिकाहिप्रतिभापरावृक्षात्मबीजवत्॥५९॥बीजमंतस्थवृक्षत्वंनानानानायथैकदृक्॥ तथाऽसंख्यजगद्ब्रह्मशांतमाकाशकोशवत्॥ ६०॥ बीजस्यांतस्थवृक्षस्यव्योमाद्वैतास्थितिर्यथ॥ब्रह्मणोंतस्थजगतःसाक्षित्वाच्चित्स्थि तिस्तथा॥ ६१॥ शांतंसमस्तमजमेकमनादिमध्यंनेहास्तिकाचनकलाकलनाकथंचित्॥ निर्द्वंद्वशांतमतिरेकमनेकमच्छमाभासरूप मजमेकविकासमास्ते॥६२॥ ॥इ०वा०वा०दे०मोक्षोपायेषूत्पत्ति०क०प्रश्नभेदनंनामाशीतितमःसर्गः॥८०॥ ॥७॥ ॥रा क्षस्युवाच॥ ॥अहोनुपरमार्थोक्तिःपावनीतवमंत्रिणः॥राजाराजीवपत्राक्षइदानीमेषभाषताम्॥१॥ ॥राजोवाच॥ ॥जागतप्र त्ययाभावोयस्याहुःप्रत्ययंपरम्॥सर्वसंकल्पसंन्यासश्चेतसायत्परिग्रहः॥ २॥

र्वप्रश्नपरमतात्पर्यविषयाद्वितीयचिन्मात्रपरमार्थस्थितिप्रदर्शनेनोपसंहरति॥ शांतमिति॥ निर्द्वंद्वैःशांतमतिभिरेवरिष्यतेमायातत्कार्यमलनिरासेनपरिशोध्यतइतिनिर्द्वंद्वशांतम तिरेकम्॥ अनेकमेकत्वाख्यगुणेनापिशून्यम्॥ एकमेवपरितोनिरंकुशंविकसतिबृहत्तमत्वादित्येकविकासम्॥ आभासरूपंचिन्मात्रमास्तेपरमार्थतइत्यर्थः॥ अजपदाभ्यांज न्मादिविकाराणांतद्वत्तांचनिरासः॥६१॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०अशीतितमःसर्ग॥८०॥ ॥७॥ ॥ इहराजाऽवशिष्टानांप्रश्नानामुत्तरंक्रमात्॥ वदन्वक्ति विशेषज्ञोयुक्तिमुक्तेष्वपिकंचित्॥१॥ मंत्रिवचनचमत्कारदर्शनादेवराज्ञोपितत्त्वज्ञत्वेपरिज्ञातेपिराजोक्तौचमत्कारातिशयंसंभाव्यश्रोतुकामाराक्षस्युवाच॥ अहोइति॥१॥ रा जाचतदभिप्रायमालक्ष्यसर्वप्रश्नमुख्यतात्पर्यविषयंब्रह्मविरोधाभासोक्तिमुखचमत्कारातिशयेनदर्शयति॥ जागतेत्यादिचतुर्भिः॥ अवस्थात्रयदर्शनलक्षणस्यजागतप्रत्ययस्या भावोबोधलक्षणानिवृत्तिरेवस्वतःस्फुरदधिष्ठानरूपतुरीयलक्षणायस्यदर्शनमित्यर्थः॥ सचतदेकनिष्ठतारूपेणतत्परिग्रहेणभवतीतितत्परिग्रहंलक्षणेनदर्शयति॥ सर्वेति॥ २॥ ॥१४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यमायिकाभ्यांसंकोचविकासाभ्याम् ॥ वाचामगोचरोयइतिशेषः ॥३॥ सत्त्वासत्त्वभानाभानकोटिद्वयस्यांतरालस्थमनिर्वचनीयमित्यर्थः ॥ अतएवाद्यंतयोरसत्कोट्यैवय स्तत्वेपिमध्येदैशिकपरिच्छेदेनक्वचिदस्तिक्वचिन्नास्तीतिकोटिद्वयीमयम् ॥ एवमाद्यंतयोरभानवत्त्वेपिमध्येतत्तदिंद्रिययोग्यरूपेणभातिरूपांतरेणतत्त्वतश्चनभातीतिमध्येको टिद्वयीमयम् ॥ अतएवसदसत्संधिरूपस्यचिज्जडसंधिरूपस्यचहिरण्यगर्भात्मकस्ययदीयचित्तस्यविकारत्वाल्लीलाभूतमेतज्जगदित्यर्थः ॥४॥ एकपिंडताअखंडवस्तुता ॥ कथ्य तेपृच्छयते ॥५॥ मन्त्र्युक्तशिष्टेषुप्रथमंकश्चवायुरवायुश्चेतिप्रश्नंसमाधत्ते ॥ एषइति॥ एषब्रह्माणुःस्वात्मन्येववायुत्ववेदनाद्भ्रांतिरन्यथायहोयस्यतथाविधःसन्वायुरदृश्यत ॥ प रमार्थतस्त्ववायुरेवेत्याह ॥ अतइति ॥६॥ कःशब्दोऽशब्दएवचेत्यस्याप्येवमेवोत्तरंबोध्यमित्याह ॥ शब्देति ॥७॥ कःसर्वंनचकिंचिच्चेत्यस्योत्तरमाह ॥ सोणुरिति ॥ कोहंनाहं

यत्संकोचविकासाभ्यांजगत्प्रलयसृष्टयः ॥ निष्ठावेदांतवाक्यानामथवाचामगोचरः ॥ ३॥ कोटिद्वयांतरालस्थंमध्येकोटिद्वयीमयम् ॥ यस्यचित्तमयीलीलाजगदेतच्चराचरम् ॥४॥ यस्यविश्वात्मकत्वेपिखंड्यतेनैकपिंडता ॥ सन्मात्रंतत्त्वयाभद्रेकथ्यतेब्रह्मशाश्वतम् ॥ ५॥ एषोणुर्वेदनाद्वायुःस्वभ्रांतिर्दृगदृश्यत ॥ अतोनकिंचिद्वाय्वादिकेवलंशुद्धचेतनम् ॥ ६ ॥ शब्दसंवेदनाच्छब्दःशब्दस्यभ्रांतिदर्शनम् ॥ त तोत्रशब्दशब्दार्थदृष्टेर्दूरतरंगतः ॥ ७ ॥ सोणुःसर्वंनाकिंचिच्चसोहंनाहंसएवच ॥ सर्वशक्त्यात्मनोस्यैवप्रतिभैकात्रकारणम् ॥ ८ ॥ आ त्मायत्नशतप्राप्योलब्धेस्मिन्नचकिंचन ॥ लब्धंभवतितच्चैतत्परमंवानकिंचन ॥९॥ तावज्जन्मवसंतेषुसंसृतिव्रततिश्चिरम् ॥ विकसत्यु दितोयावन्नबोधोमूलकाषकृत् ॥ १० ॥ अणुनानेनरूपत्वंदृश्यतामिवगच्छता ॥ तापेनांबुधियेवेदंस्वस्थेनैवापहारितम् ॥ ११ ॥

चकिंभवेदित्येतत्समाधत्ते ॥ सोहमिति ॥ अहंकारनिष्कर्षेसोहंतद्रूपेणतुनाहम् ॥ अथवाअहंकारतत्ताभ्यामुपलक्षणेसोहम् ताभ्यामनुपलक्षणेतुनाहम् सचनैवेत्यर्थः ॥ एवं वास्तवावास्तववैचित्र्येकिंकारणंतदाह ॥ सर्वेति ॥ भ्रांतिप्रतिभाशक्तिरवास्तवरूपस्फूर्त्तौवास्तवप्रतिभाशक्तिर्वास्तवरूपव्यक्तौचकारणमित्यर्थः ॥ ८ ॥ किंप्रयत्नशतप्राप्यम् लब्धंनकिंचिद्भवतीत्यनयोरुत्तरमाह ॥ आत्मेति ॥ लब्धेऽस्मिन्नचकिंचनेत्येतदुपपादयति ॥ लब्धमिति ॥ तदेतदात्मरूपत्वादेवप्रागेवलब्धंभवतीतियत्नस्तेननसफलः ॥ ततःपर ममुत्कृष्टमन्यद्वायत्नफलंनकिंचनेत्याशयेनत्वयातथापृष्टमित्यर्थः ॥ ९ ॥ तर्हिंकिंज्ञानप्रयत्नोव्यर्थएवेतिशंकांपरिहरन्नकिंतुसर्वंनलभ्यतइत्यस्यतात्पर्यमाह ॥ तावदिति ॥ त थाचयावत्संसारमूलाज्ञाननाशोनवृत्तस्तावल्लब्धमप्यात्मतत्त्वंसर्वपूर्णरूपंनलब्धम् ॥ बोधेनतुपूर्णंलभ्यतइतिनतद्यत्नवैयर्थ्यमित्यर्थः ॥ १० ॥ स्वस्थेनजीवितेनोच्चैःकेनात्मैवा परिहारितइत्यस्योत्तरमाह ॥ अणुनेति ॥ रूपत्वंसाकारभावंप्राप्येतिशेषः ॥ तापेनमरुभूम्यातपेन इदंवास्तवात्मरूपम् ॥ ११ ॥

१ अत्ररेफरहितःपाठइतिभाति ॥ स्वात्मन्येवेत्यादिष्टीकातुफलितार्थकथनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

केनाणुनांतःक्रियतेमेरुस्त्रिभुवनंतृणमित्यनयोरुत्तरमाह ॥ अनेनेति ॥ मेरुरंतःक्रियतेत्रिभुवनंचतृणमिवक्रियतइत्यर्थः ॥ यद्यंतःक्रियतेतर्हिबहिःकथमवेक्ष्यतेतत्राह ॥ वमित्वेति ॥ बहिर्वमित्वेवअंतरेवबाह्यमिवकल्पयित्वेतियावत् ॥ १२ ॥ आंतरीमपिसांकल्पिकांगनांतदालिंगनंचबाह्यसंस्कारबीजत्वाद्बहिरिवपश्यामीतिरागिणामनुभवादित्यर्थः ॥ १३ ॥ ईदृशनियमेकोहेतुस्तत्राह ॥ आदिसर्गइति ॥ आदिसर्गेप्रवृत्तानियतिरेवहेतुरित्यर्थः ॥ यथाइक्षोर्वेण्वादेर्वाप्रथमपर्वतोयादृशशाखापत्रांकुराद्युद्गमस्तथैवद्वितीयादिपर्वभ्योपीतिस्वतोनियमस्तथाआदिसर्गसंकल्पेपर्वतोपिइदानींतनसंकल्पेस्वतोनियमइतिशेषः ॥ १४ ॥ अभिजातस्यआविर्भूतचित्तस्यच ॥ १५ ॥ केनाप्यणुकमात्रेणपूरिताशतयोजनीत्यस्योत्तरमाह ॥ परमाणुतयेति ॥ देशतःपरमाणुतयावस्तुतश्चिन्मात्रेणाणुनाकालतःपरिसूक्ष्मतमेनेतित्रिविधपरिच्छेदकल्पनस्याप्यवधिभूतेनापीत्यर्थः ॥ विष्वक्सर्वतः ॥ १६ ॥ कोणुरेवभवन्मातिनयोजनशतेष्वपीत्यस्योत्तरमाह ॥ अणुरेवेति ॥ १७ ॥ खिंगेनविटेनबालोमुग्धःस्त्रीजनःशोभनैर्भ्रूविकारैर्नयनाभ्यांनिरीक्षणैर्विचेष्टि

अनेनसंविदणुनामेरुस्त्रिभुवनंतृणम् ॥ वमित्वाबहिरंतस्थंमायात्मकमवेक्ष्यते ॥ १२ ॥ चिदणोरंतरेयद्यदस्तितद्दृश्यतेबहिः ॥ संकल्पेष्वालिंगनादिदृष्टांतोत्रहिरागिणः ॥ १३ ॥ आदिसर्गेसर्वशक्तिश्चिद्यथैवोदितात्मना ॥ तथाशुपश्यत्यखिलंसंकल्पेपर्वतःस्वतः ॥ १४ ॥ अभिजातस्ययस्यांतर्यद्यथाप्रतिभासते ॥ तत्तथापश्यतीवासौदृष्टांतोत्रशिशोर्मनः ॥ १५ ॥ परमाणुतयैवापिचिन्मात्रेणाणुनामुना ॥ परिसूक्ष्मतमेनैवविष्वग्विश्वंप्रपूरितम् ॥ १६ ॥ अणुरेवनमात्येषयोजनानांशतेष्वपि ॥ सर्वगत्वादनादित्वादरूपत्वादनाकृतिः ॥ १७ ॥ यथाधूर्त्तेनखिंगेनपुंसाबालःप्रतार्यते ॥ सुभ्रूविकारनयननिरीक्षणविचेष्टितैः ॥ १८ ॥ चिदालोकेनशुद्धेनसपर्वततृणंजगत् ॥ नाट्यतेविरतंतद्वद्विवृत्त्याभिनयंसदा ॥ १९ ॥ तेनैवानंतरूपत्वादणुनावाससायथा ॥ संविदांतर्भवद्वाह्येकृत्वामेर्वादिवेष्टितम् ॥ २० ॥ दिक्कालाद्यनवच्छिन्नरूपत्वान्मेरुतोबृहत् ॥ वालाग्रशतभागात्माप्येषसूक्ष्मःपरोणुकः ॥ २१ ॥ शुद्धसंवेदनाकाशरूपस्यपरमाणुना ॥ शोभतेनहिसाम्योक्तिर्मेरुसर्षपयोरिव ॥ २२ ॥

तैश्चप्रतार्यतेवशीकृत्याकृष्यते ॥ १८ ॥ यथायंदृष्टांतस्तद्वच्चिदालोकेनापिअभिनयंव्यंजकचेष्टांविवृत्त्यजगन्नाट्यतेसदेत्यर्थः ॥ १९ ॥ कस्याणोरुदरेसंतिकिलावनिभृतांघटाइत्येतत्प्रत्याह ॥ तेनेति ॥ यथावाससास्वांतर्भवन्मेर्वादिचित्रंबाह्यइवकृत्वावेष्टितंतद्वदित्यर्थः ॥ २० ॥ अणुत्वमजहत्कोणुर्मेरोःस्थूलतराकृतिरित्यस्योत्तरमाह ॥ दिक्कालेति ॥ २१ ॥ प्रतिप्रश्नमात्मन्यणुशब्दप्रयोगस्यमंत्रिणायोभिप्रायउक्तःअनाख्यत्वादगम्यत्वान्मनःषष्ठेंद्रियस्थितेः ॥ चिन्मात्रमेवमात्माणुराकाशादपिसूक्ष्मकइति कर्कट्याचसएवाभिप्रेतोभ्युपगतश्चेतिनिश्चित्यराजास्वस्यविशेषज्ञतांदर्शयितुंतंदूषयति ॥ शुद्धेति ॥ सौक्ष्म्यमात्रेणनापरिच्छिन्नःपरिच्छेदोत्कर्षावधिपरमाणुसादृश्यमालंब्यगौण्याऽणुरितिव्यपदेष्टुंशक्यइतिभावः ॥ २२ ॥

१ संकल्पेष्वालिंगनादीतिक्वचित्पाठः २ टीकानुरोधेनसंविदांतर्भवद्वाह्येइतिपाठोपेक्षितइतिभाति

CC-0. In Public Domain. Digitization by eGangotri

कथंतर्हिअणोरणीयान्महतोमहीयान् एषोणुरात्माचेतसावेदितव्य इत्यादिश्रुतिषुतथाव्यपदेशइतिचेत्सर्वशक्तिमत्त्वान्महत्त्वमिवाणुत्वमपिआत्मनिमाययानिर्माय स्थितत्वान्मुख्यवृत्तिरेवात्राणुशब्दोनात्रसमतानिमित्तमित्याह ॥ मायेति ॥ माययाकलापिनाभूषितेनशबलेनेतियावत् ॥ हेम्निस्वनिर्मितकटकादित्वेनेवअत्रसमतानभवेत् ॥ नानेत्यनेकविनार्थयोरित्यनुशासनान्नञोनाञःस्वार्थेविधानाच्चनानाशब्दोनिषेधार्थः ॥ इत्थमेवहिवालाग्रशतभागस्यशतधाकल्पितस्यच ॥ भागोजीवःसविज्ञेयइत्यादिश्रुतयोवालाग्रशतभागात्मेतित्वदुक्तिश्चसमंजसेतिभावः ॥ २३ ॥ कोणुःप्रकाशतमसांदीपइत्यस्योत्तरमाह ॥ प्रकटइति ॥ यद्यनेनात्मदीपेनविनैवप्रकाशोऽन्योवाभवेत्ततोहितर्हिस्वस्यसत्तायानाशोऽदर्शनंतत्पूर्वःअसन्नेवभवेदित्यर्थः ॥२४॥ किंचैवंसतिजगदांध्यमपिस्यादित्याह ॥२५॥ यदिति ॥ चिदणुनास्वांतरेवतेजस्तमआदेःकल्पितत्वादर्पितस्यतदधीनःप्रका

मायाकलापिनाणुत्वंनिर्मायपरमात्मनि ॥ हेम्नीवकटकत्वेननानात्रसमताभवेत् ॥ २३ ॥ प्रकटोनेनदीपेनप्रकाशोनुभवात्मना ॥ स्वसत्तानाशपूर्वोहिविनानेनभवेत्ततः ॥ २४ ॥ यदिसूर्यादिकंसर्वंजगदेकंजडंभवेत् ॥ ततःकिमात्मकंरूपंप्रकाशःस्यात्क्वाथकिम् ॥ २५ ॥ शुद्धसन्मात्रचित्त्वंयत्स्वतःस्वात्मनिसंस्थितम् ॥ तदेतदणुनातेजोद्दृष्टंवहिरवस्थितम् ॥ २६ ॥ तेजांस्यर्केंदुवह्नीनांनभिन्नानितमोघनात् ॥ एतावानेवभेदोस्तियद्वर्णेशौक्ल्यवरुष्णते ॥ २७ ॥ यादृक्कज्जलनीहारेमेघनीहारयोर्भवेत् ॥ तादृक्प्रकाशतमसोर्भेदोनेतितयोस्थितिः ॥ २८ ॥ जडयोरुपलंभायचिदादित्यःकिलैतयोः ॥ यदातपतितेनैतेलब्धसत्तैकतांगते ॥ २९ ॥ तपत्येकश्चिदादित्योरात्रिंदिवमतंद्रितः ॥ अंतर्वहिःशिलाद्यंतरप्यनस्तमयोदयः ॥३०॥ त्रिलोकीभातितेनेयंजीवस्यप्रथितात्मनः ॥ नानोपलंभभांडाढ्याकुटीकठिनकोटरा ॥ ३१ ॥ तमस्त्वंतमसोदेहमविनाशयतामुना ॥ तप्यतेभासयाभासासर्वमाभास्यतेतमः ॥३२॥ पद्मोत्पलेयथार्केणतपताप्रकटीकृते ॥ प्रकाशतमसोःसत्तेचितैवंप्रकटीकृते ॥३३॥ अर्कःकुर्वन्नहोरात्रेदर्शयत्याकृतिंयथा ॥ चितिःसदसतीकृत्वादर्शयत्याकृतिंतथा ॥ ३४ ॥

शइत्याह ॥ शुद्धेति ॥ तदेतदणुनातेनैतेनाणुना ॥२६॥ ननुअर्केंद्वादिभिरेवप्रकाशसिद्धेःकिंचिदणुनातत्राह ॥ तेजांसीति ॥ तमोघनात्स्वकारणाज्ञानात् ॥ एतावानिति ॥ जाड्यांशेनतुनभेदइत्याशयः ॥२७॥ कज्जलवर्णेनीहारेसतिमेघइतिव्यपदेशान्मेघनीहारयोर्यादृग्भेदोभवेत्प्रकाशतमसोरपितादृगेवेतितयोर्नस्वतोभेदोस्तीतिस्थितिरित्यर्थः ॥२८॥ चिदधीनप्रकाशसत्तावत्वेनापितयोर्नभेदइत्याह ॥ जडयोरिति ॥ २९ ॥ चैतन्यस्यतुनक्वचिदप्यप्रकाशप्रसक्तिरित्याह ॥ तपतीति ॥ ३० ॥ नानाविधैरुपलंभैर्भोगैर्भांडैस्तत्साधनैश्चाढ्याकुटीवकठिनकोटरा ॥३१॥ ननुयद्यात्मनातमःप्रकाश्यतेतर्हितस्यतमस्त्वमेवनश्येत्नह्यप्रथास्वभावंतत्तदनाशेप्रथमानंकर्त्तुंशक्यमित्याशंक्याह ॥ तमस्त्वमिति ॥ अमुनाअभासयास्वतत्त्वप्रतिभासशून्ययाभासाचैतन्येनतमसोदेहंस्वरूपभूतंतमस्त्वमविनाशयतातमस्तप्यतेकार्यभावायक्षोभ्यते ॥ ततःसर्वजगद्भूतंतमआभास्यतइत्यर्थः ॥३२॥ नसत्ताप्रकटनहेतुत्वादप्यसौनतन्निवर्त्तकइत्याशयेनाह ॥ पद्मोत्पलेइति ॥ ३३ ॥ सदसतीआविर्भावतिरोभावलक्षणेप्रकाशतमसी ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्याणोरुदरेसंतिसमग्रानुभवाणवइत्यस्योत्तरमाह ॥ चिदणोरिति ॥ यथेति ॥ मधुकरैःपत्रफलादिरसस्याप्याहरणेनमधूत्पादनसंभवादित्याशयः ॥ अथवामधुरसस्यवसंतशोभायास्तात्कालिकवृक्षादिरसस्यवा ॥ ३५ ॥ तदेवस्पष्टमाह ॥ उद्यंतीति ॥ खंडपरंपरावनखंडसौंदर्यक्रमाः ॥ ३६ ॥ कोणुरत्यंतनिःस्वादुरपिसंस्वदतेऽनिशमित्यस्योत्तरमाह ॥ परमात्मेति ॥ ३७ ॥ सर्वजलांतर्गतरसाविर्भावस्यात्मनिमित्तत्वादपिसस्वदतइतिवक्तुंशक्यमित्याह ॥ योयइति ॥ असौरसः ॥ ३८ ॥ केनसंत्यजतासर्वमणुनासर्वमाश्रितमित्यस्योत्तरमाह ॥ त्यजतेति ॥ असंविच्याअस्फुरणेन ॥ ३९॥ केनात्माच्छादनाशक्तेनाणुनाच्छादितंजगदित्येतस्योत्तरमाह ॥ अशक्तयेति ॥ गुप्तौपरिच्छिन्नतिरोधाने ॥ ४० ॥ उक्तस्याशयंस्फुटमाह ॥ आत्मगुप्ताविति ॥ ४१ ॥ जगत्जगदंतःपातिजीवजातंज्ञातःसन्स्वात्मलाभेनगोपायतिरक्षति ॥ यथाबालोज्ञातःप्रबुद्धःसन्धानाकणं

चिदणोरंतरेसंतिसमग्रानुभवाणवः॥ यथामधुरसस्यांतःपुष्पपत्रफलश्रियः॥ ३५ ॥उद्यंतिचिदणोरेतेसमग्रानुभवाणवः॥ मधुमासरसाच्चित्राइवखंडपरंपराः ॥ ३६ ॥ परमात्माणुरत्यंतनिःस्वादुःसूक्ष्मतावशात्॥ समग्रस्वादुसत्तैकजनकःस्वदतेस्वयम्॥ ३७॥ योयोनामरसःकश्चित्समस्तोप्यप्स्ववस्थितः ॥ प्रतिबिंबमिवादर्शेतंविनानास्त्यसौस्वतः ॥ ३८ ॥ त्यजतासंस्थितंसर्वंचिन्मात्रपरमाणुना॥ त्यक्तंजगदसंविच्यासंविच्यासर्वमाश्रितम्॥ ३९ ॥ अशक्तयास्वात्मगुप्तौसर्वमाच्छादितंजगत् ॥ चिताणुतामेवपरांसंप्रसार्यवितानवत्॥ ४० ॥ आत्मगुप्तौनशक्नोतिपरमात्मांबराकृतिः॥ मनागपिक्षणमपिरजोदूर्वावनेयथा ॥ ४१ ॥ तथाप्याक्रांतवान्विश्वंज्ञातोगोपायतिक्षणात्॥ जगद्धानाकणंबालइवाहोघनमायिता ॥ ४२ ॥ चिन्मात्रानुनयेनेदंजगत्सन्नपिजीवति॥ वसंतरसबोधेनविचित्रेववनावली॥ ४३ ॥ चित्तसत्तैवमखिलंस्वतोजगदिवोदितम् ॥ मधुमासरसोल्लासाच्चित्रोहिवनखंडकः ॥ ४४ ॥ सत्यंचिन्मयमेवेदंजगदित्येवविद्ध्यलम्॥ वसंतरसमेवत्वंविद्धिपल्लवगुल्मकम् ॥ ४५ ॥ सर्वावयविसारत्वात्सहस्रकरलोचनः॥ परमाणुरसावेवनित्यानवयवोदयः॥ ४६ ॥

गोपायतिनसुप्तस्तद्वत्॥ नन्वीदृशस्वप्रकाशपूर्णात्मनःकथंबालवत्स्वात्मविस्मृतिस्तत्राह ॥ अहोघनमायितेति ॥ मायासामर्थ्यमिदमाश्चर्यभूतमित्यर्थः ॥ ४२ ॥ जगल्लयेनकस्याणोःसद्भूतमपिजीवतीत्यस्योत्तरमाह ॥ चिन्मात्रानुनयेनेति ॥ सन्नपिसन्नमपिजगत् ॥ छांदसोमलोपः ॥ प्रलयेनलीनमपीत्यर्थः ॥ चिन्मात्रस्यानुनयेनावलंबेनजीवति ॥ प्रलयेपिचित्सत्तयैवजगत्संस्कारशेषंतिष्ठतीत्यर्थः ॥ वसंतकालेपल्लवादिहेतुरसोद्बोधेननिमित्तेन ॥ ४३ ॥ यदिप्रलयेसर्गेचब्रह्मसत्तयैवजगज्जीवतितर्हिसर्गेकोविशेषोयेनाविर्भवतीत्याशंक्याह ॥ चित्तसत्तेति ॥ प्रलयेचनचित्तसत्तापृथगस्तीतिविशेषइतिभावः ॥ ४४ ॥ एवंचनचिज्जगतोस्तत्त्वतोभेदइत्याह ॥ सत्यमिति ॥ ४५ ॥ अजातावयवःकोणुःसहस्रकरलोचनइत्यस्योत्तरमाह ॥ सर्वेति ॥ सर्वेयेऽवयविनश्चतुर्विधाभूतग्रामास्तत्सारत्वात्तदात्मत्वादित्यर्थः ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोनिमेषोमहाकल्पःकल्पकोटिशतानिचेत्यस्योत्तरमाह ॥ निमिषेति ॥ इदंचलीलोपाख्यानेनदर्शितमेव ॥ ४७ ॥ ४८ ॥ ४९ ॥ ५० ॥ अणौजगंतितिष्ठंतिकस्मिन्बीजइव द्रुमइत्यस्योत्तरमाह ॥ जगंतीति ॥ ५१ ॥ यद्यत्रास्तितत्ततःसमुदेतियथास्तंभात्पुत्रिकातदेवचतद्भवति ॥५२॥ बीजानिनिष्कलांतानीत्यादेस्तात्पर्यमाह ॥ चितीति ॥ भूतान्य तीतानिसंप्रतिवर्त्तमानानिअयेभविष्यंतिचभूतानिचितिसदातिष्ठंतीत्यर्थः ॥ ५३ ॥ कल्पःकस्यनिमेषस्यबीजस्येवांतरस्थितइत्यस्यतात्पर्यमाह ॥ निमेदेति ॥ अन्नकणौतंडुलत द्वयवौतुषेणव्रीहित्वचेववलितौपरितोवेष्टितौ ॥ ऐषोणुश्चेत्याभ्यांकल्पनिमेषाभ्यांस्वात्मांगकंस्वैकदेशंश्रितआश्रितः ॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिभगवद्वच

निमेषांशाववबोधोहिचिदणोःप्रतिभासते ॥ यतःकल्पसहस्रौघःस्वप्नेवार्द्धकबाल्यवत् ॥ ४७ ॥ ततःसोपिनिमेषोणुःकल्पकोटिशतान्य लम् ॥ सर्वसत्ताविलासेनप्रतिभैकाविजृंभते ॥४८॥ अभुक्तवत्यैवयथाभुक्तवानहमित्यलम् ॥ जायतेप्रत्ययस्तद्वन्निमेषेकल्पनिश्चयः ॥४९॥ अभुक्ताभुक्तवानस्मीत्येवंप्रत्ययशालिनः ॥ दृश्यंतेवासनाविष्टाःस्वप्नेस्वमरणंयथा ॥५०॥ जगंतिपरितिष्ठंतिपरमाणौचिदात्म नि ॥ प्रतिभासाःप्रवर्त्ततेततएवहिजागताः ॥ ५१ ॥ यदस्तियत्रतत्तस्मात्समुदेतितदेवतत् ॥ आकारिणिविकारादिदृष्टंनगगनेऽमले ॥५२॥ चितिभूतानिभूतानिवर्त्तमानानिसंप्रति ॥ भविष्यंतिचभूतानिसंतिबीजेद्रुमाइव ॥५३॥ निमेषकल्पावेतेनतुषेणान्नकणावि व ॥ वलिताचेषचेत्याभ्यामणुःस्वात्मांगकंश्रितः ॥ ५४ ॥ उदासीनवदासीनोनसंस्पृष्टोमनागपि ॥ एषभोक्तृत्वकर्तृत्वैःस्वात्मासर्वंजग त्यपि ॥ ५५ ॥ जगत्सत्तोदितेयंहिशुद्धचित्परमाणुतः ॥ परमाणोश्चभोक्तृत्वकर्तृत्वेकेवलंस्थिते ॥ ५६ ॥ जगन्नकिंचित्क्रियतेसर्वंदैवन केनचित् ॥ विलीयतेचनोकिंचिन्मानुष्याद्दृश्यखंडनम् ॥ ५७ ॥ सर्वंसमसमाभासमिदमाकाशकोशकम् ॥ जगत्तयोपशब्दंचविद्ध्यना द्यंनिशाचरि ॥ ५८ ॥ चिदणुर्दृश्यसिद्ध्यर्थमांतरींचिच्चमत्कृतिम् ॥ बहीरूपतयाधत्तेस्वात्मनिपरिसंस्थिताम् ॥ ५९ ॥

नादितिभावः ॥ ५४ ॥ कःप्रयोजनकर्तृत्वमप्यनाश्रित्यकारकइत्यस्योत्तरमाह ॥ उदासीनवदित्यादिना ॥ ५५ ॥ केवलंविनैवक्रियाभोगसंबंधंस्थिते ॥ ५६ ॥ कुतोनक्रिया भोगसंबंधस्तत्राह ॥ जगदिति ॥ क्रियाविषयस्यात्यंतासत्त्वादित्यर्थः ॥ किमर्थंतर्ह्यसतोदृश्यस्यखंडनंवेदांतेषुक्रियतेतत्राह ॥ मानुष्यादिति ॥ मनुष्यभावाद्व्यावहारिकयौ क्तिकदृग्वशान्नपरमार्थदृष्टिबलादित्यर्थः ॥५७॥ कीदृशीतर्हिपरमार्थदृष्टिस्तांदर्शयति ॥ सर्वमिति ॥ जगत्तयाउपशब्दंशब्दमात्रेणव्यवहृतम् ॥ वाचारंभणंविकारोनामधेय मितिश्रुतेरितिभावः ॥ ५८ ॥ दृश्यसंपत्तयेद्रष्टास्वात्मानंदृश्यतांनयन् ॥ दृश्यंपश्यन्स्वमात्मानंकोहिपश्यत्यनेत्रवानितिप्रश्नस्योत्तरमाह ॥ चिदणुरिति ॥ चिच्चमत्कृतिंचिद्व्याप्त मायाशक्तिम् ॥ बहीरूपतयाबाह्यप्रपंचतया ॥ ५९ ॥

१ निष्ठाइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननुनदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमितिश्रुत्याअंतर्बहिर्भेदशून्यत्वेनावगतेब्रह्मणिकथमुच्यते आंतरींचिच्चमत्कृतिंबहीरूपतयाधत्तेइतितत्राह ॥ एतदिति ॥ बहिष्ठमंतस्थमित्ये तज्जगत्त्रयेसत्वानामधिकारिप्राणिनामुपदेशायकल्पितंशब्देएवास्तिनवस्तुनितस्यचिदेकरूपत्वादित्यर्थः ॥६०॥ दृश्यतांनयन्नित्यंतस्यतात्पर्यमुक्त्वाप्रश्नशेषस्यतदाह ॥ द्रष्टेति ॥ नित्यापरोक्षोप्यात्माअविद्यानावृतत्वादंतःकरणावच्छेदेनसदैवस्फुरंस्तदभिमानेनद्रष्टाबहिर्विषयावच्छेदेनावृतत्वाददृष्टंपदंविषयंनेत्रदृश्याभिपातीवभूत्वानेत्रद्वारानिर्गतांतःकर णप्रणाड्याबहिर्गच्छन्सदेवात्मरूपमसद्घटादिरूपमिवस्थितमात्मानंसंप्रपश्यतिस्वात्मचितैवप्रकाशयतिननेत्रेणतस्यद्वारमात्रत्वादित्यनेत्रवानित्युक्तमित्यर्थः ॥ ६१ ॥ सदेवासदि वस्थितमित्येतदुपपादयति ॥ नचेति ॥ कुतोनगच्छतितत्राह ॥ आत्मनीति ॥ सतोऽसद्रूपेणभवितुमशक्यत्वादितिभावः ॥६२ ॥ एवंद्रष्टृतापिमिथ्यादृश्यसापेक्षत्वान्मिथ्यैवेत्या

एतद्बहिष्ठमंतस्थमस्तिशब्देनवस्तुनि ॥ उपदेशायसत्वानांचिद्रूपत्वाज्जगत्त्रये ॥ ६० ॥ द्रष्टाऽदृष्टपदंगच्छन्नात्मानंसंप्रपश्यति ॥ नेत्रदृश्या भिपातीवसदेवासदिवस्थितम् ॥ ६१ ॥ नचगच्छतिदृश्यत्वंद्रष्टाह्यसदवास्तवम् ॥ आत्मन्येवनयत्किंचित्तत्तामेतिकथंपरः ॥ ६२ ॥ दृ गेवलोचनेसाचवासनांतंनिजंवपुः ॥ बहीरूपतयादृश्यंकृत्वाद्रष्टृतयोदिता ॥ ६३ ॥ नविनाद्रष्टृतामस्तिदृश्यसत्ताकथंचन ॥ पितृतेववि नापुत्रंद्वितैक्यपदंविना ॥ ६४ ॥ द्रष्टैवदृश्यतामेतिनद्रष्टृत्वंविनास्तितत् ॥ विनापित्रेवतनयोविनाभोक्त्रेवभोग्यता ॥ ६५ ॥ द्रष्टुर्दृश्यवि निर्माणेचित्त्वादस्त्येवशक्तता ॥ कनकस्यावदातस्यकटकादिकृताविव ॥ ६६ ॥ दृश्यस्यद्रष्टृनिर्माणेजडत्वान्नास्तिशक्तता ॥ कटकस्यतु हैमस्ययथाकनकनिर्मितौ ॥ ६७ ॥ चेतनादृश्यनिर्माणंचित्करोत्यसदेवसत् ॥ अकारणंमोहहेतुंहेमेवकटकभ्रमम् ॥ ६८ ॥ कटकत्वाव भासेहियथाहेम्नोनहेमता ॥ सत्येवप्रकचत्येवंद्रष्टृदृश्यस्थितौवपुः ॥ ६९ ॥ द्रष्टादृश्यतयातिष्ठन्द्रष्टृतामुपजीवति ॥ सत्यांकटकसंवित्तौ हेमकांचनतामिव ॥ ७० ॥

ह ॥ दृगेवेति ॥ नचक्षुषीलोचनेद्वारमात्रत्वात्किंतुदृक्अपरोक्षात्मचैतन्यमेवलोचने ॥ चक्षुषश्चक्षुरितिश्रुतेः ॥ साचदृक्आविर्भावादारभ्यपुनस्तिरोभावेनवासनाभावांतंदृश्यं कृत्वातद्द्रष्टृतयास्वयमुदिताआत्मानंकल्पितवतीत्यर्थः ॥ ६३ ॥ एवंचपरस्परसापेक्षकल्पनयोर्द्वयोरपिमिथ्यात्वमित्याह ॥ नविनेत्यादिना ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ चि द्यतश्चेतनाचेत्यप्रकाशनादिसमर्थाअतोदृश्यनिर्माणंकरोतिमोहहेतुमज्ञानमात्रहेतुकम् ॥ ६८ ॥ यदिद्रष्टैवदृश्यतांगच्छतितर्हिद्रष्टैवेदमितिदृश्यंकुतोनविभाव्यतेतत्राह ॥ कटक त्वेति ॥ नहेमतासत्येवस्फुटंकचति कल्पितव्यामूढबुद्धौसत्यास्फुरणात् ॥ एवंदृश्यात्मनाद्रष्टुःस्थितौद्रष्टृत्वपुर्नकचतीत्यर्थः ॥ ६९ ॥ तर्हिद्रष्टुरस्फुरणेतन्निरपेक्षसत्ताकमेवकिंन स्यादितिचेत्तदुपजीवकताभावप्रसंगान्नैवमित्याशयेनाह ॥ द्रष्टेति ॥ सत्यांपूर्वसिद्धांकांचनतामिव ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कटकत्वावभासेहियथाहेम्नोनहेमता सत्येवप्रकचतीत्येतदयुक्तंकटकमिदंहेमेतिसामानाधिकरण्यप्रत्ययेउभयसत्वप्रतिभासादेवमहंद्रष्टेतिप्रत्ययेपीतिचेत्तत्राह ॥ एकस्मिन्निति ॥ यथादूरस्थेविषयेपुमान्पशुर्वेतिसंशयेपुंस्प्रत्ययकोटौनपशुत्वंप्रतिभासतेपशुप्रत्ययांशेचनपुंस्त्वम् एवंसामानाधिकरण्यप्रत्ययेपिनोभयांशस्यैकप्रत्ययप्रमेयतासंभवइत्यर्थः ॥७१॥ बहिर्मुखतयाहिदृश्यंपश्येदंतर्मुखतयाचद्रष्टारम् नचोभयमुखताचितोयुगपत्संभवतीत्याशयेनाह ॥ दृश्यमिति ॥ सत्ताद्रष्टृसत्ताअसत्तेवअसतीवेतियावत् ॥ ७२॥ अंतर्गलितदृश्यंचकआत्मानमखंडितम् ॥ दृश्यासंपत्तयेपश्यन्पुरोदृश्यंनपश्यतीतिप्रश्नस्योत्तरमाह ॥ बोधादिति ॥ अबुद्धेहेमैकतत्त्वपरीक्षणेदत्तदृष्टितयाउपेक्षणादप्रतिसंहिते ॥ ७३ ॥ दृश्यादर्शनेऽपिद्रष्टुर्दर्शनमपरिहार्यमितिकथमात्यंतिकंदृश्यादर्शनंसिद्ध्येदित्यतआह ॥ दृश्येइति ॥ द्रष्टरिसतीतिशेषः ॥ बोधाद्गलितदृश्यस्यपुंसःअनयोर्द्रष्टृदृश्ययोर्म

एकस्मिन्प्रतिभासेहिनसत्ताद्रष्टृदृश्ययोः ॥ पुंप्रत्ययप्रकचनेक्वपशुप्रत्ययोदयः ॥ ७१ ॥ दृश्यंपश्यन्स्वमात्मानंनद्रष्टासंप्रपश्यति ॥ द्रष्टुर्हिदृश्यतापत्तौसत्ताऽसत्तेवतिष्ठति ॥ ७२ ॥ बोधाद्गलितदृश्यस्यद्रष्टुःसत्तैवभासते ॥ अबुद्धेकटकेस्वस्यहेम्नोऽकटकतायथा ॥ ७३ ॥ दृश्ये सत्यस्तिवैद्रष्टादृश्यंद्रष्टरिभासते ॥ द्वयेनचविनानैकंनैकमप्यस्तिचानयोः ॥ ७४ ॥ सर्वंयथावद्विज्ञायशुद्धसंविन्मयात्मना ॥ वाचामविषयंस्वच्छंकिंचिदेवावशिष्यते ॥ ७५ ॥ आत्मानंदर्शनंदृश्यंदीपेनेवावभासितम् ॥ कृतंचसर्वमेतेनचिन्मात्रपरमाणुना ॥ ७६ ॥ मातृमानप्रमेयाख्यंबुधोनिगिरतित्रयम् ॥ हेमेवकटकादित्वमसन्मयमुपस्थितम् ॥ ७७ ॥ यथानजलभूम्यादेःपृथक्किंचिन्मनागपि ॥ तथैतस्मात्स्वभावाणोर्नकिंचित्पृथगस्तिहि ॥ ७८ ॥ सर्वगानुभवात्मत्वात्सर्वानुभवरूपतः ॥ एकत्वानुभवन्यायेरूढेसर्वैकतास्यहि ॥ ७९ ॥ अस्येच्छयापृथङ्नास्तिवीचितेवमहांभसः ॥ इच्छानुरूपसंपत्तेर्भावितार्थैकताकिल ॥ ८० ॥ दिक्कालाद्यनवच्छिन्नःपरमात्मास्तिकेवलः ॥ सर्वात्मत्वात्ससर्वात्मासर्वानुभवतःस्वतः ॥ ८१ ॥

ध्येएकमपिनास्ति ॥ छत्रापायेछायापायवद्दृश्यापायेद्रष्टुरप्यपायाद्दृङ्मात्रपरिशेषादित्यर्थः ॥ ७४॥७५॥ आत्मानंदर्शनंदृश्यंकोभासयतिदृश्यवदित्यस्योत्तरमाह ॥ आत्मानमिति ॥ आत्मानंद्रष्टारम् ॥ एतेनचिन्मात्रपरमाणुनाचभासितंप्रथमानंकृतंद्रष्ट्रादिसर्वंमातृमानप्रमेयाख्यंत्रयंबुधोनिगिरतीतिपरेणान्वयः ॥ ७६ ॥ कटकादीनिहेम्नेवविकीर्णकेनचत्रयमितिप्रश्नंप्राक्तनोक्तिदृष्टांतोपन्यासेनैवार्थात्परिहरति ॥ हेमेति ॥ ७७ ॥ कस्मान्नकिंचिद्ब्रपृथगितिप्रश्नस्योत्तरमाह ॥ यथेति ॥ किंचिद्भौतिकम् ॥ ७८ ॥ अपृथक्त्वंयुक्त्याप्यनुभावयति ॥ सर्वगेति ॥ ७९ ॥ कस्येच्छयापृथक्चास्तीत्येतद्दूषयति ॥ अस्येति ॥ किलेतिहेतौ ॥ इच्छानुरूपस्यफलस्यसंपत्तेरिच्छाभावितार्थस्यचएकताअपृथक्तायतइत्यर्थः ॥ ८० ॥ दिक्कालाद्यनवच्छिन्नादेकस्मादसतःसतः ॥ द्वैतमप्यपृथक्कस्मादित्यस्योत्तरमाह ॥ दिक्कालेतिद्वाभ्याम् ॥ सःसर्वेषामात्मत्वात्सर्वमात्माअपृथग्भूतंयस्यसर्वात्मा स्वतस्तुसर्वानुभवएवनजडः ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असतःसतइत्येतदर्थमाह ॥ सन्नेषइति ॥ असंदिग्धात्मसत्वार्नाचेतनानामात्मत्वात् दर्शनेचक्षुरादिभिरालोचनेऽनवबोधतोत्रात्मनिद्वैतमैक्यंचलौकिकसद्रूपेणविद्येतेइत्यसन्निल्यु च्यतेश्रुतौनवास्तवासत्वाभिप्रायेणेत्यर्थः ॥ ८२ ॥ ननुद्वैतंसापेक्षरूपत्वान्मिथ्यास्तुऐक्यंतुद्वितीयनिरपेक्षत्वाद्वास्तवमेवेतितत्कथंनविद्यतइत्युच्यतेतत्राह ॥ यदीति ॥ ८३ ॥ द्वितीयव्यावर्त्तनायकल्पितंसंख्यारूपमपिद्वितीयसापेक्षंद्वित्वादितुल्यमेवेत्याशयेनाह ॥ यत्रेति ॥ ८४ ॥ द्वैतमप्यपृथक्तस्माद्द्रवतेवमहांभसइत्यंशंविवृणोति ॥ एवंस्थितेत्विति ॥ एवंद्वैतैक्यशून्यत्वेनतत्त्वेस्थितेसतियस्तादृग्द्वैतैक्यवानिवद्वैतैक्यमिवचयस्तिष्ठन्प्रतिभासतेतस्मात्तद्वैतैक्यरूपमंभसोद्रवतेवनव्यतिरिक्तमित्यर्थः ॥ ८५ ॥ आत्मानंदर्शनंदृश्यंसदसच्चजगत्त्रयम् ॥ कौंतर्बीजमिवांतस्थंस्थितःकृत्वात्रिकालगइत्यस्योत्तरमाह ॥ नानेति ॥ बीजपक्षेभूजलादीनांब्रह्मपक्षेसत्वरजस्तमसांसाम्येनअक्षुब्धरूपिणःपूर्वावस्थातोऽप्रच्यु

सन्नेषचेतनात्मत्वाद्दर्शनानवबोधतः ॥ द्वैतैक्येनात्रविद्येतेसर्वरूपेमहात्मनि ॥ ८२ ॥ यदिकश्चिद्द्वितीयःस्यात्तदैकस्यैकताभवेत् ॥ द्वैतैक्ययोर्मिथःसिद्धिरातपच्छाययोरिव ॥ ८३ ॥ यत्रनास्तिद्वितीयोहितत्रैकस्यैकताकथम् ॥ एकतायामसिद्धायांद्वयमेवनविद्यते ॥ ८४ ॥ एवंस्थितेतुयस्तिष्ठंस्तत्तादृक्तदिवास्तिहि ॥ तस्मान्नव्यतिरिक्तंनद्रूपंद्रवइवांभसः ॥ ८५ ॥ नानारंभविभासंचसाम्येनाक्षुब्धरूपिणः ॥ बीजस्यांतस्तरुरिवब्रह्मणोंतःस्थितंजगत् ॥ ८६ ॥ द्वैतमप्यपृथक्तस्माद्धेम्नःकटकतायथा ॥ सम्यग्बुद्धावबोधोहिद्वैतंतच्चनसन्मयम् ॥ ८७ ॥ यथाद्रवत्वंपयसःस्पंदनंमातरिश्वनः ॥ व्योम्नःशून्यत्वमेवंहिनपृथग्द्वैतमीश्वरात् ॥ ८८ ॥ द्वैताद्वैतोपलंभोहिदुःखायैवक्रियात्मने ॥ निपुणोनुपलंभोयस्त्वेतयोस्तत्परंविदुः ॥ ८९ ॥ मात्मानप्रमेयादिद्रष्टृदर्शनदृश्यता ॥ एतावज्जगदेतच्चपरमाणौचितिस्थितम् ॥ ९० ॥ अयंजगदणुर्नित्यमेतेनाणुसुमेरुणा ॥ स्पंदनंपवनेनेवस्वांगएवकृतारुतः ॥ ९१ ॥ अहोनुभीमामायेयमथवामायिनांपरा ॥ परमाण्वंतरेवास्तियत्रैलोक्यपरंपरा ॥ ९२ ॥

तस्य ॥ ८६ ॥ सम्यगबुद्धस्यावगतवतोवबोधोज्ञानात्मकमेवद्वैतम् ॥ तच्चज्ञानंसदेवनसन्मयम् ॥ ८७ ॥ ८८ ॥ क्रियात्मनेप्रवृत्तिसिद्धयेएवननिवृत्तये ॥ ८९ ॥ भूतंभवद्भविष्यच्चेत्यस्योत्तरमाह ॥ मात्रिति ॥ यद्भूतभव्यादिजगत्शास्त्रीयमातृमानप्रमेयंआदिपदात्प्रमितिश्चेत्येतावत्लौकिकसाधारणंतुद्रष्ट्रादित्रिपुटीत्येतावदेवनातोधिकमस्ति ॥ तत्सर्वंतत्साक्षिचितिपरमाणौस्थितमित्यर्थः ॥ ९० ॥ एतेनात्मरूपेणाणुसुमेरुणापवनेनस्पंदनमिवायंजगल्लक्षणोणुःस्वांगेएवबहुशःकृतःअकृतउपसंहृतश्चेत्यर्थः ॥ ९१ ॥ बृहद्द्रुममित्यंशमुपपादयति ॥ अहोइति ॥ इयमात्मचितिर्मायाशबलत्वान्माया ॥ अथवामायिनांजनव्यामोहकानांपराश्रेष्ठा ॥ यद्यस्माद्धेतोःपरमाण्वंतरेवत्रैलोक्यपरंपरास्तीतिदर्पणोदरप्रतीतोगिरिरिवनास्त्येवेतिबृहद्द्रुमएवेत्यर्थः ॥ ९२ ॥

१ विनाशंचेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितुएकमेवाद्वितीयमित्यादिश्रुत्यामायायाअप्यसत्त्वंतदापिजगच्चिदणुरेवनवस्त्वंतरमस्तीतिजगत्प्रत्ययोबृहद्द्रुमएवेत्याशयेनाह ॥ अथेति ॥ अथेतिपक्षांतरे ॥ नसंभवतीत्यसंभवंमायित्वंयस्मिंस्तथाविधमेवैतदात्मरूपंसर्वदास्थितमितिपक्षेपीत्यर्थः ॥ ९३ ॥ नित्यंसमस्यकस्यांतर्बीजस्यांतरिवद्रुमइत्यस्योत्तरमाह ॥ अंतर्गतेति ॥ बीजंभांडोदरेयथेतिदृष्टांतपरमाण्वाद्यंतर्गतब्रह्मचित्यपिसर्वजगदुत्पादनशक्तिसंभृतत्वलाभाय ॥९४॥ बीजस्यांतरिवद्रुमइत्यंशंवर्णयति ॥ बीजेंतरितिद्वाभ्याम् ॥ परयायोगपरिष्कृतयाब्राह्म्याच ॥ ९५ ॥ ९६ ॥ स्वमेकमजहद्रूपमुदेत्यनुदितोपिकइतिप्रश्नेस्वमेकमजहद्रूपमित्यंशमुपपादयितुमध्यारोपितंस्थूलसूक्ष्मादिप्रपंचमपवदति ॥ संस्थितमित्यादिसार्द्धत्रयेण

अथासंभवमायित्वमेवैतत्सर्वदास्थितम् ॥ चिन्मात्रपरमाणुत्वमात्रमेवजगत्स्थितिः॥ ९३ ॥ अंतर्गतजगज्जालोप्येषोणुःसाम्यमत्यजन् ॥ स्थितोंतस्थबृहद्वृक्षंबीजंभांडोदरेयथा ॥ ९४ ॥ बीजेंतर्वृक्षविस्तारःस्थितःसफलपल्लवः ॥ परयादृश्यतेदृष्ट्याजगच्चचिदणूदरे ॥९५॥ सशाखाफलपुष्पंस्वमजहद्बीजकोटरे ॥ यथातरुःस्थितस्तद्वद्विकासिचिदणोर्जगत् ॥९६॥ संस्थितंद्वैतमद्वैतंबीजकोशइवद्रुमः॥ जगच्चित्परमाण्वंतर्यःपश्यतिसपश्यति॥ ९७ ॥ नद्वैतंनैवचाद्वैतंनचबीजंनचांकुरः॥ नस्थूलंनचवासूक्ष्मंनाजातंजातमेवच॥ ९८ ॥ नचास्तिनचनास्तीदंनसौम्यंक्षुभितंनच ॥ त्रिजगच्चिदणोरंतःखवाख्वपिनकिंचन॥ ९९ ॥ नजगन्नाजगच्चास्तिविद्यतेचित्पराशुभा॥ सर्वात्मिकायदायत्रसायथोदेतितत्तथा॥ १००॥ उदेत्यनुदितोप्येषस्वयंवेदनजृंभितः॥ परमात्माणुरेकात्मासमग्रात्मतयैवखे॥१०१॥ द्रुमोभूमौस्वबीजत्वमिवोदेत्यनुदेत्यपि ॥ परंतत्त्वंजगद्भंग्याजगत्तांस्वोदयेनच ॥ १०२॥ द्रुमोबीजतयैवाशुनसंत्यक्तसमस्थितिः ॥ तिष्ठत्यपगतस्पंदस्त्यागात्यागपरोणुकः॥ १०३॥

॥ ९७ ॥ ९८ ॥ ९९ ॥ उदेत्यनुदितोपिकइत्यंशमुपपादयति ॥ सर्वात्मिकेत्यादिना ॥ साचित्यथायादृशप्राग्वासनानुगुण्येनउदेतिसृष्टिप्रतिभात्मनाआविर्भवति ॥ १०० ॥ स्वयंवेदनेनस्वात्मरूपेणसर्गप्रतिभासेनजृंभितोबृंहितःतथाजृंभितोपिखेनिष्प्रपंचस्वरूपाकाशेएकात्मासन्समग्रात्मतयैवास्तेइत्यर्थः ॥ १०१ ॥ तत्रदृष्टांतमाह ॥ द्रुमइति ॥ यथावृक्षोबीजानिजनयन्वृक्षस्वभावंअनुत्अनपनयन्स्वबीजत्वंउदेतिततोभूमौएतिप्राप्नोत्यपि ॥ तथापरंतत्त्वमपिजगद्भंग्याउदेतितथास्वोदयेनजगत्तांजन्ममरणादिकल्पनांचएतिप्राप्नोतीत्यर्थः ॥ १०२ ॥ एतावांस्तुविशेषोयत्द्रुमोबीजतयैवसंत्यक्तासमस्थितिर्येनतथाविधोविकारीनकिंतुवृक्षतयापि ॥ उभयात्मनाविकारवैषम्यदर्शनात् ॥ आत्माणुकस्तुत्यागात्यागपरःअसंगाद्वितीयत्वात्सर्वत्यागपरः सर्वानुगतसद्रूपत्वाच्चसर्वात्यागपरश्चसन्अपगतस्पंदोनिर्विकारएवसदातिष्ठतीत्यर्थः ॥ १०३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विसतंतुर्महामेरुर्भोराजन्यदपेक्षयेत्यस्योत्तरमाह ॥ बिसतंतुरिति ॥ परमाणोरपेक्षयास्थूलत्वादितिशेषः ॥ तत्रयुक्तिमाह ॥ दृश्यमिति ॥ भावप्रधानोनिर्देशः ॥ दृग्गोचरतांविशे दाविशेत् ॥१०४॥ दृष्टांतोक्तंदार्ष्टांतिकेप्युपपादयन्नतस्यकस्योदरेसंतिमेरुमंदरकोटयइत्यस्योत्तरमाह ॥ बिसतंतुरिति ॥ परमाणोरप्यांतरस्यात्मनोब्रह्मणोपेक्षयाबिसतंतुरपिमे रुस्तस्यैवस्वांतस्तद्घनाश्चिद्घनाःपरमार्थस्वभावामेरुमंदरकोटयःस्थिताः ॥ १०५॥ केनेदमाततमितिप्रश्नस्योत्तरमाह ॥ एकेनेति ॥ आततमित्यस्ययदिव्याप्तमित्यर्थस्तर्हिव्या प्तमित्युत्तरम् ॥ यदिजगद्रूपेणविस्तारितमित्यर्थस्तदाततंविरचितंजनितंकृतंचेतिचतुर्द्धाउत्तरम् ॥ अपंचीकृतभूतात्मनाततम् पंचीकरणेनब्रह्मांडभुवनात्मनाविरचितम् तत्रदेव नरासुरतिर्यग्भेदेनजनितम् ॥ तेषांभोगायतत्तद्विषयभेदेनकृतंचेत्यर्थः ॥ यथानभसागंधर्वनगरादिदृश्यंनानावैचित्र्यप्रपंचेनरचितमपिअभितःअच्छंशून्यत्वंआकाशैकस्वभा वतांपरिलब्धमेवतद्वदित्यर्थः ॥ एतेनकिंसारएवपरिवल्गसिपासिहंसीत्येतदपिविश्वांतर्गतत्वात्तत्सारएवेत्यर्थात्समाहितमेव ॥१०६॥ किंदर्शनेननभवस्यथवासदैवनूनंभवसीत्य

विसतंतुर्महामेरुःपरमाणोरपेक्षया ॥ दृश्यंकिलविशेत्तंतुरदृश्याक्ष्णापराणुता ॥ १०४ ॥ बिसतंतुर्महामेरुःपरमाणोःकिलात्मनः ॥ त स्यैवतद्घनाःस्वांतःस्थितामेर्वादिकोटयः ॥ १०५ ॥ एकेनतेनमहतापरमाणुनाचव्याप्तंततंविरचितंजनितंकृतंच ॥ दृश्यंप्रपंचरचितंनभ सेवविश्वंशून्यत्वमच्छमभितःपरिलब्धमेव ॥ १०६ ॥ द्वैतेनसुंदरतरंस्वमनुज्झितेनरूपंसुषुप्तसदृशेनयथावबोधात् ॥ ऐक्यंगतंस्थिति गमागममुक्तमेवमित्थंस्थितंतनुजगत्परमार्थपिंडः ॥ १०७ ॥ ॥इ०वा०वा०दे०मो०उ०क०परमार्थापिंडीकरणंनामैकाशीतित मःसर्गः ॥८१॥ ॥ ७ ॥ ॥श्रीवसिष्ठउवाच॥ ॥इतिराजमुखाच्छ्रुत्वाकर्कटीवनमर्कटी॥ अवबुद्धपदांतंस्वंजहौमत्सरचापलम् ॥ १ ॥ अंतःशीतलतामेत्यविश्रांतिमपतापताम्॥ प्राप्ताप्रावृषमयूरीवसंज्योत्स्नेवकुमुद्वती॥ २ ॥ तथाराजगिरातस्याआनंदउदभून्म्रु शम्॥ गर्भैतःखेबलाकायारवेणेवपयोमुचः॥ ३ ॥ ॥राक्षस्युवाच॥ ॥अहोबतपवित्रेयंभवतोर्भातिशेमुषी॥ अनस्तमितसारेणप्र बोधार्केणभासिता॥ ४ ॥

स्योत्तरमाह ॥ द्वैतेनेति ॥ यदायथास्थितात्मतत्त्वावबोधाच्चित्संभिन्नजडाविद्यामात्ररूपत्वात्सुषुप्तसदृशेनस्वकालेपिसत्तास्फूर्त्तिव्यवहारसिद्धयेसच्चिदानंदैकरसत्वात्सुंदरतरं स्वंरूपमधिष्ठानात्मतत्त्वमनुज्झितेनात्यक्तवताद्वैतेनस्थितिगमागमैःसत्ताक्रियातन्निवृत्तिभिर्मुक्तमैक्यंगतंप्राप्तंतदातनुक्षुद्रंजगदित्थंपरमार्थपिंडएवसइत्थंब्रह्मैकस्वाभाव्येनस्थित मितिसंसाररूपोनभवामिसदैवाद्वितीयब्रह्मैकरूपश्चभवामीत्यर्थः ॥ १०७ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०एकाशीतितमःसर्गः ॥ ८१ ॥ ॥ ७ ॥ ॥ प्रस न्नयामंत्रदानंवर्ण्यतेत्रानयातयोः ॥ वध्यभोज्यार्पणंचास्यैव्युत्थितायैसमाधितः ॥ १ ॥ अवबुद्धंब्रह्मपदमेवांतोमूलोच्छेदेननाशोयस्यतथाविधंस्वंस्वजात्युचितंमत्सरचापलं जहौ ॥ १ ॥ अपतापतांअपगतबाह्यदृष्टिसंतापताम् ॥ २ ॥ खेपयोमुचोरवेणबलाकायाअंतर्गर्भैसतीव ॥ ३ ॥ शेमुषीबुद्धिः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशिमंडलात्प्रवृत्ताज्योत्स्नेवभातीतिसर्वत्रान्वयः ॥ भवतोहृदयाद्बुद्धेःसकाशाद्वाग्द्वाराप्रसृतांविवेकामृतस्यकणिकांश्रुत्वाइयमहंभवादृशाविवेकिनोजगत्पूज्याःसेवनयोग्याश्चमुमुक्षुभिरितिमन्येइत्युत्तरेणान्वयः ॥ ५ ॥ ६ ॥ कुसुमासंगादेवयथेतिशेषः ॥ ७ ॥ सकृद्विवेकबाधितंदुःखंपुनर्नबाधते ॥ ८ ॥ पूजनीयौइष्टार्थदानेनप्रीणनीयौ ॥ ईहितंवांछितम् ॥ ९ ॥ १० ॥ जनताजनसमूहोदृढविषूचिकासतीयतस्तमासंतमा ॥ ११ ॥ त्वद्विधैःप्रोक्तस्यमंत्रस्यअर्थनमर्थोऽभिलाषस्तेनहेतुना ॥१२॥ संपत्तिमेतितत्त्वज्ञमनो

शीतासमरसाशुद्धाज्योत्स्नेवशशिमंडलात् ॥ विवेककणिकांश्रुत्वाभवतोहृदयादियम् ॥ ५ ॥ विवेकिनोजगत्पूज्याःसेव्यामन्येभवादृशाः ॥ सत्संगात्सविकासास्मिचंद्रेणेवकुमुद्वती ॥ ६ ॥ सौरभंकुसुमासंगादेवसत्संगमाच्छुभम् ॥ वर्त्ततेत्वर्कसंपर्काद्विकासोंबुरुहामिव ॥ ७ ॥ महतामेवसंपर्कात्पुनर्दुःखंनबाधते ॥ कोहिदीपशिखाहस्तस्तमसापरिभूयते ॥ ८ ॥ मयेमौजंगलप्राप्तौभवंतौभूमिभास्करौ ॥ पूजनीयावतःशीघ्रमीहितंकथ्यतांशुभम् ॥ ९ ॥ ॥ राजोवाच ॥ ॥ अस्मिन्जनपदेरक्षःकुलकाननमंजरि ॥ जनस्यबाधतेत्यंतंसदाहृदयशूलनम् ॥ १० ॥ यतःसर्वैवजनतातमादृढविषूचिका ॥ मंडलेननुतेनाहंनिर्गतोरात्रिचर्यया ॥ ११ ॥ शूलादिहृदयेनॄणांनशाम्यतियदौषधैः ॥ ततोहंत्वद्विधप्रोक्तमंत्रार्थेनविनिर्गतः ॥ १२ ॥ त्वादृशस्यचलोकस्यमुग्धलोकाभिघातिनः ॥ निग्रहार्थंप्रवृत्तिर्मेसाचसंपत्तिमेत्यलम् ॥ १३ ॥ एतावदेवचशुभेत्वयांगीक्रियतांवचः ॥ भूयोभवत्याप्राणाहिहिंसनीयानकस्यचित् ॥ १४ ॥ ॥ राक्षस्युवाच ॥ ॥ बाढमेवंकरोम्यद्यप्रभृत्यवितथंप्रभो ॥ सत्यमेवनकिंचिद्धिहिंसनीयंमयाधुना ॥ १५ ॥ ॥ राजोवाच ॥ ॥ यद्येवंफुल्लपद्माक्षिपरदेहैकभोजने ॥ किंस्याच्छरीरवृत्त्यैतेस्थितायामत्समीहिते ॥ १६ ॥ ॥ राक्षस्युवाच ॥ ॥ षड्भिर्मासैर्गिरौराजन्प्रबुद्धायाःसमाधितः ॥ जाताभोजनसंकल्पाद्भोजनेच्छेयमद्यमे ॥ १७ ॥ इदानींशिखरंगत्वातदेवध्याननिश्चला ॥ यावदिच्छंसुखेनासेसजीवाशालभंजिका ॥ १८ ॥ आमृतींधारणांबद्ध्वाधारयामिशरीरकम् ॥ यथेच्छमथकालेनत्यक्ष्यामीतिमतिर्मम ॥ १९ ॥ आशरीरपरित्यागमिदानींनमयानृप ॥ हिंसनीयाःपरप्राणास्तेनेदंमद्वचःश्रृणु ॥ २० ॥ हिमवान्नामशैलोस्तिशरच्चंद्रांशुनिर्मलः ॥ यउत्तराशाहृदयेस्पृष्टपूर्वापरार्णवः ॥ २१ ॥

रथस्यमोघत्वासंभवाद्यंयंलोकमितिश्राक्प्रदर्शितश्रुतेरितिभावः ॥ १३ ॥ ततोमंत्रप्राप्तिमसंभावयन्त्रन्यद्वृणीते ॥ एतावदेवेति ॥ १४ ॥ १५ ॥ मत्समीहितेअहिंसनेव्रतेस्थितायाः ॥ १६ ॥ १७ ॥ शालभंजिकादार्वादिपुत्रिकेव ॥ १८ ॥ आमृतींअमृतालभावनारूपाम् ॥ १९ ॥ २० ॥ उत्ताराशायाउत्तरदिशोहृदयेमध्यमे ॥ स्पृष्टौअवगाढौपूर्वापरार्णवौयेन ॥ २१ ॥

---

१ भृत्यैइतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ २२ ॥ उपार्जितःस्ववशीकृतः ॥ इत्यंतइच्छाभिलापः ॥ २३ ॥ २४ ॥ नियमार्थंमर्यादार्थंदत्तइतिशेषः ॥ अतस्तदायत्तामंत्राधीना ॥ २५ ॥ सर्वंमत्कृतादन्यदपिसर्वम ॥२६॥ वितताविस्तृताचिरंप्रवृत्तेतियावत् ॥ हृदयंहिंसितंरक्तचोषणेनशोषितंतेनहेतुनाजनस्यनाड्योवैधुर्यंरक्तविधुरताम् ॥२७॥ कथंचित्तेषांजीवनेपितद्वंश्यानामपिनीरक्तैव

तत्राहंनिवसाम्यग्रेहेमशृंगदरीगृहे॥ आयसीमेघलेखेवकर्कटीनामराक्षसी ॥ २२॥ तपसोपार्जितोब्रह्माजनतामारणेच्छया॥ विषूचिकाप्राणहरास्यांसूच्यात्मेतिभोमया ॥ २३ ॥ तस्मात्संप्राप्तवरयावहून्वर्षगणान्मया ॥ भुक्ताविषूचिकात्वेनजनताजीवबाधनैः ॥ २४ ॥ त्वयानगुणिनोहिंस्याइतिमेब्रह्मणाततः॥ नियमार्थंमहामंत्रस्तदायत्तास्मिसंस्थिता॥ २५॥ सोयंप्रगृह्यतांतेनसर्वंत्वदयशूलनम्॥शममेष्यतिलोकेस्मात्काकथामत्कृतेभ्रमे॥ २६॥ वितत्तैवास्मिहिंसायांयत्पुराहिंसितंमया॥ जनस्यत्त्वदयंतेननाड्योवैधुर्यमागताः॥ २७॥ हिंसित्वारक्तमांसानिसंत्यक्तायेमहाजनाः ॥ तेभ्योविधुरनाडीभ्योयेजातास्तेपितादृशाः॥ २८॥ राजन्विषूचिकामंत्रःसोयंसंपन्नएवते॥ नहिसत्ववतामस्तिदुःसाध्यमिहकिंचन ॥ २९॥ अतोदुर्नाडिकोशेषुशूलानांपरिशांतये॥ मंत्रोयोब्रह्मणाप्रोक्तोराजन्शीघ्रंगृहाणतम्॥ ३०॥ आगच्छनिकटंनद्यागच्छामस्तत्रभूमिप ॥ स्वाचांताभ्यांसंयताभ्यांभवद्भ्यांसुमतादृदे ॥ ३१॥ ॥श्रीवसिष्ठउवाच॥ ॥इतितस्यांतदाराज्यांराक्षसीमंत्रिभूभृतः ॥ जग्मुस्तेसरितस्तीरंमिथःसंजातसौहृदाः॥३२॥ अन्वयव्यतिरेकेणराक्षस्याःसौहृदंतदा॥ ज्ञात्वास्थितौतौस्वाचांतावुभावंतेनिवासिनौ ॥ ३३॥ तयाब्रह्मोपदिष्टोसौततस्ताभ्यांयथाक्रमम्॥ स्नेहाद्विषूचिकामंत्रःप्रदत्तोजपसिद्धिदः॥ ३४॥ ततःसंजातसौहार्दौतौविसृज्यनिशाचरी॥ यदागंतुंप्रवृत्तासौतदाराजाब्रवीद्वचः॥ ३५॥ ॥राजोवाच॥ गुरुस्त्वंनौमहादेहेवयस्याचसुनिर्वृता॥ निमंत्रयावहेयत्नाद्भासायतवसुंदरि ॥ ३६॥ नचास्मत्प्रणयंप्रीतावितथीकर्त्तुमर्हसि॥ सौहार्दंसुजनानांहिदर्शनादेववर्द्धते॥ ३७॥ लघुसौभाग्यसंयुक्तंरूत्वाकारंमनोरमम्॥ आगच्छास्मद्गृहंभद्रेतत्रतिष्ठयथासुखम्॥३८॥

संपन्नेत्याह ॥ हिंसित्वेति ॥ तस्माद्धिंसामहाननर्थइत्यर्थः ॥ २८ ॥ संपन्नःप्राप्तोभविष्यतीतिसिद्धवत्कारेणसूचयति ॥ २९ ॥ ३० ॥ सुमतासुप्रीताहंददे ॥ ३१ ॥ ३२ ॥ अन्वयव्यतिरेकेणभावपरीक्षणलिंगेन ॥ अंतेनिवासिनौशिष्यौभूत्वेतिशेषः ॥ ३३ ॥ ब्रह्मणाप्रागुपदिष्टोसौमंत्रः ॥ ३४ ॥ सौहार्दंसुहृद्भावः ॥ ३५ ॥ हेमहादेहेइतिराक्षसीसंबोधनम् ॥ गुरुर्वयस्यासखीच ॥ हृदयसौंदर्यात्सुंदरीतिसंबोधनम् ॥ ३६ ॥ ३७ ॥ लघुअल्पप्रमाणंसौभाग्येनसौंदर्यालंकारादिनायुक्तंच ॥ आकारंदेहम् ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

भोजनमन्नपानादिमनुष्ययोग्यम् ॥ ३९ ॥ ४० ॥ ममगृहे ॥ यावदिच्छंददेइतिपरेणान्वयः ॥ ४१ ॥ वध्यान्वधार्हान् ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥४६॥ समाधौविरागिणीअपगतेच्छाव्युत्थितेतियावत् ॥ संरूढंप्ररूढम् ॥ ४७ ॥ ४८ ॥ सुविलासिनीसुंदरस्त्री ॥ पट्टंकौशेयंकांचीपट्टंवा ॥ ४९ ॥ अनुपश्चात्ससारजगाम ॥ ५०॥ एकगृहेएकस्यां

राक्षस्युवाच॥ ॥मुग्धस्त्रीरूपधारिण्यैदातुंशक्तोसिभोजनम्॥संतर्पयसिमांकेनराक्षसाकारधारिणीम्॥३९॥रक्षोन्नमेवसंतुष्ट्यैन सामान्यजनाशनम्॥पूर्वसिद्धस्वभावोयमादेहंननिवर्त्तते॥ ४० ॥ ॥राजोवाच॥ ॥हेमस्रग्दामवलितादिनानिकतिचिद्गृहे॥ मम स्त्रीरूपिणीतिष्ठयावदिच्छमनिंदिते॥४१॥ ततोदुष्कृतिनश्चौरान्वध्याञ्छतसहस्रशः॥ मंडलेभ्यःसमानीयददेतुभ्यंसुभोजनम्॥४२ कांतारूपंपरित्यज्यगृहीत्वाराक्षसंवपुः॥ आदायवध्याञ्छतशःपुरुषांस्तान्सुसंचितान्॥ ४३॥ नयस्वहिमवच्छृंगंतत्रभुंक्ष्वयथासुखम्॥ महाशनानामेकांतेभोजनंहिसुखायते॥ ४४॥ तृप्तानिद्रांमनाकृत्वाभवभूयःसमाधिभाक्॥ समाधिविरताभूयोप्यागत्यपुनरन्यदा॥ ४५॥ नेष्यस्यन्यान्वध्यजनान्हिंसानैषांचधर्मतः॥ स्वधर्मेणचहिंसैवमहाकरुणयासमा॥ ४६॥ त्वंसमेष्यसिचावश्यंमांसमाधिविरागिणी॥ असतामपिसंरूढंसौहार्दंननिवर्त्तते॥ ४७॥ ॥राक्षस्युवाच॥ ॥युक्तमुक्तंत्वयाराजन्करोम्येवमहंसखे॥ सौहार्देनप्रवृत्तस्यकोवाक्यंनाभिनंदति॥ ४८॥ ॥श्रीवसिष्ठउवाच॥ ॥इत्युक्ताराक्षसीतत्रसंपन्नासुविलासिनी॥ हारकेयूरकटकपट्टस्रग्दामधारिणी॥ ४९॥ राजन्नागच्छगच्छामइत्युक्ताभूपमंत्रिणौ॥ अग्रेगंतुंप्रवृत्तौतौरात्रावनुससारसा॥ ५०॥ अथतेपार्थिवगृहंप्राप्यतांरजनींमिथः॥ कथयैकगृहेरम्येक्षपयामासुराहृताः॥ ५१॥ प्रभातेंतःपुरेतस्थौपुरंध्रीजनलीलया॥ राक्षसीमंत्रिराजानौस्वव्यापारौबभूवतुः॥ ५२॥ ततोदिवसषट्केनसंचितानिमहीभृता॥ नृपःपरपुरेभ्योपिस्वमंडलगणात्तथा॥ ५३॥ त्रीणिवध्यसहस्राणितानितस्यैतदाददौ॥ सावभूवनिशाकालेसैवोग्राकृष्णराक्षसी॥५४॥ तानिवध्यसहस्राणिजग्राहभुजमंडले॥ धारानिकरजालानिमेघमालेवकोटरे॥ ५५॥ ययौराजानमापृच्छ्यतदेवहिमवच्छिरः॥ दरिद्रालब्धहेमेवग्रहेपूग्रशरीरिणी॥ ५६॥

शालायाम् ॥ रजनींक्षपयामासुः ॥ ५१ ॥ स्वस्वोचितोव्यापारोजनपालनवध्यसंपादनव्यापारोययोस्तौ ॥ ५२ ॥ नृपोददावितिपरेणान्वयः ॥ ५३ ॥ ५४ ॥ कोटरेलंबमानानीतिशेषः ॥ ५५ ॥ यहेषुपूतनारक्षःपिशाचादिषुमध्येउग्रशरीरिणीबृहच्छरीरत्वेनश्रेष्ठेतियावत् ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधौपरिणतामतिर्यस्याःसा ॥ ५७ ॥ ततःप्रबोधानंतरम् ॥ तेनप्राक्तनराजवचनेनहेतुना ॥ राज्ञःसभाजनेप्रीतिसंगमेचिकीर्षितेसतितत्किरातमंडलंयाति ॥ ५८ ॥ विस्रंभगर्भाभिर्विश्वासयुक्ताभिः ॥ स्वास्पदंस्वस्थानंहिमवच्छिखरम् ॥ ५९ ॥ सारक्षोंगनाकर्कटीअद्यापिपूर्वोक्तरीत्यैवजीवन्मुक्ततयातस्मिन्नेवगिरौविपिनेविचलितःकदाचिद्व्युत्थाने व्यवहारभाक्कदाचित्समाधौज्ञानैकतानश्चआशयश्चित्तंयस्यास्तथाभूत्वास्थिता ॥ तस्मिन्किरातानांराजनिकालेनत्यक्तसर्वैषणेनात्मनामनसाविदेहकैवल्यलक्षणांपरमांशांतिमागतवतिसतितत्संततिजानांतद्राष्ट्राधिपानांसौहृदैःपूर्ववदेवस्वकवलान्वध्यांश्चिरमास्वादयंतीचिरंस्थितेत्यर्थः ॥ ६० ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्य०उ०द्व्यशीतितमःसर्गः

तत्रतत्प्राभृशंभुक्त्वासुखंसुस्वादिनत्रयम् ॥ आसीत्प्रबोधसुस्वस्थासासमाधिमतिःपुनः ॥५७॥ पंचभिर्वाचतुर्भिर्वावर्षैःसासंप्रबुध्यते॥ तत्ततोमंडलंयातितेनराजसभाजने ॥ ५८ ॥ तत्रविश्रंभगर्भाभिःकथाभिःकंचिदेवसा ॥ स्थित्वाकालंगृहीत्वातान्वध्यान्स्वास्पदमेत्यथ ॥ ५९ ॥ जीवन्मुक्ततयैवमेवविपिनेसाद्यापिरक्षोंगनातस्मिन्नेवगिरौस्थिताविचलितध्यानैकतानाशया ॥ तस्मिन्राजनिशांतिमागतवतित्यक्तैषणेनात्मनातद्राष्ट्राधिपसौहृदैःस्वकवलानास्वादयंतीचिरम् ॥ ६० ॥ ॥ इत्यार्षे०वा०वा०दे०मो०उ०क०राक्षसीसौहार्दनामद्व्यशीतितमःसर्गः ॥ ८२ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ किरातमंडलेतस्मिन्येभवंतिमहीभृतः ॥ तैस्तैःसहपरामैत्रीतस्याःसमभिजायते ॥ १ ॥ सर्वांस्तत्रमहोत्पातान्पिशाचादिभयान्यपि ॥ रोगांश्चयोगसंसिद्धानिवारयतिराक्षसी ॥ २ ॥ बहुवर्षगणेनैषाध्यानाद्विरतिमागता ॥ तत्रागत्यसमस्तांस्तान्वध्याजंतून्सुसंचितान् ॥ ३ ॥ अद्यापितत्रयेवध्यास्तेतदर्थंमहीभुजा ॥ नीयंतेमित्रसन्मानेकेहिनाध्यवसायिनः ॥४ ॥ तस्यांध्याननिषण्णायांकिरातजनमंडले ॥ अनायांत्यांचिरंकालंजनैर्दोषप्रशांतये ॥ ५ ॥ सादेवीकंदरानाम्नीमंगलेतरनामिका ॥ संप्रतिष्ठापितामूर्त्यापुरेगगनकोटरे ॥ ६ ॥ ततःप्रभृतितत्रत्योयोयोभवतिभूमिपः ॥ सकंदरांभगवतींप्रतिष्ठापयतिस्वयम् ॥ ७॥ यःकंदराप्रतिष्ठांचनकरोतिनृपाधमः ॥ तस्योपतापनिचयाःप्रजानिघ्नंतियत्नतः ॥ ८ ॥

॥ ८२ ॥ ॥ ७ ॥ ॥ अभ्युत्थितासमाधेःसाचिरात्कैरातमंडले ॥ प्रतिष्ठिताभवद्देवीकंदरेत्यत्रवर्ण्यते ॥ १ ॥ तद्राष्ट्राधिपसौहृदैःस्वकवलानास्वादयंतीतियदुक्तंतत्प्रपंचयति ॥ किरातमंडलेइत्यादिना ॥ १ ॥ उत्पातादिशमनसामर्थ्योपपादनायविशिनष्टि ॥ योगसंसिद्धेति ॥२ ॥ वध्यान्भुंक्तेइतिशेषः ॥ ३ ॥ नाध्यवसायिनोनोद्युक्ताः ॥ ४॥ दोषाणांप्रागुक्तोत्पातादीनांप्रशांतयेजनैःसाकंशिरोदारयतिवध्यानामितिमंगलेतरन्नामास्याअस्तीतिमंगलेतरनामिका ॥ अथवामंगलाइतिइतरन्नामयस्याःसा ॥ गगनकोटरेगगनस्पर्शिप्रासादोदरे ॥ ५ ॥ ६ ॥ प्रतिष्ठापयनिकालेनपूर्वप्रतिमायांगतायामन्यांप्रतिमांकारयित्वेतिभावः ॥ ७ ॥ किमर्थंप्रतिष्ठापयतीत्यत्रहेतुंव्यतिरेकमुखेनाह ॥ यइति ॥८॥

१ तत्रान्यइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्वयमुखेनाप्याह ॥ तदिति ॥ तत्उत्पातरोगशांत्यादिफलम् ॥ कुतोनियमेनोत्पातादिप्रसक्तिस्तत्राह ॥ स्ववासनेति ॥ स्वस्ववासनावशेनउच्छूनमाविर्भूतम् ॥ ९ ॥ साप्रतिमा अद्यापिस्थिता ॥ अन्यत्रापिचित्रस्थाचित्रलिखिताफलदायिनीतिवा ॥ १० ॥ सकलजनानांकोमलस्यबालवत्ससस्यादिविभवस्यमंगलानांसंपदांचकारिणी ॥ चिरकाला नुवृत्तादेवता ॥ ११ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्ति०त्र्यशीतितमःसर्गः ॥ ८३ ॥ ॥ ७ ॥ ॥ निमित्तंकर्कटीनाम्नउपदेशार्थंकल्पनम् ॥ दृष्टांतोक्त्युपयोग श्चविस्तरादत्रवर्ण्यते ॥ १ ॥ हिमशब्देनहिमवानुच्यतेनामैकदेशेनामग्रहणन्यायात् ॥ १ ॥ तस्याःकृष्णवर्णत्वेकर्कटीनामप्राप्तौचकिंनिमित्तमितिरामःपृच्छति ॥ हिमवदिति

तत्पूजनादवाप्नोतिजनस्तन्निखिलंफलम् ॥ स्ववासनावशोच्छूनमनर्थंयात्यपूजनात् ॥ ९ ॥ वध्यलोकोपहारेणसादेवीपरिपूज्यते ॥ प्रतिमासास्थिताद्यापिचित्रस्थाफलदायिनी ॥ १० ॥ सकलकोमलमंगलकारिणीकवलिताखिलवध्यमहाजना ॥ जयतिसात्रकिरातजनास्पदेपरमबोधवतीचिरदेवता ॥ ११ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०कर्कट्युपाख्यानेकंदरापूजनंनामत्र्यशीतितमःसर्गः ॥ ८३ ॥
॥ श्रीवसिष्ठउवाच ॥ ॥ एतत्तेकथितंसर्वंमयाख्यानमनिंदितम् ॥ कर्कट्याहिमराक्षस्यायथावदनुपूर्वशः ॥ १ ॥ ॥ श्रीरामउवाच ॥ ॥ हिमवद्गह्वरेप्रोत्थासाकथंकृष्णराक्षसी ॥ बभूवकर्कटीनाम्नायथावद्वदमेप्रभो ॥ २ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ कुलानिसंत्यनेकानिराक्षसानांस्वभावतः ॥ तानिशुक्लानिकृष्णानिहरितान्युज्ज्वलानिच ॥ ३ ॥ कर्कटप्राणिसादृश्यात्कर्कटोनामराक्षसः ॥ बभूवतज्जासाकृष्णाकर्कटीकर्कटाकृतिः ॥ ४ ॥ कर्कटीप्रश्नसंस्मृत्यामयैषाकथितातव ॥ अध्यात्मोक्तिप्रसंगेनविश्वरूपनिरूपणे ॥ ५ ॥ संपन्नमेवमेकस्मादसंपन्नमिवस्फुटम् ॥ इदंजगदनाद्यंतात्पदात्परमकारणात् ॥ ६ ॥ प्लाविन्योर्वीचयोवारिण्यन्यानन्याःस्थितायथा ॥ वर्त्तमानाअपिपरेस्त्रष्टयःसंस्थितास्तथा ॥ ७ ॥ अज्वलन्नेवकाष्ठेषुवह्निरर्थक्रियांयथा ॥ करोतिमर्कटादीनांशीतापहरणादिकम् ॥ ८ ॥ समंसौम्यत्वमजहद्देवनित्योदयस्थिति ॥ तथाब्रह्मकरोतीदंनानाकर्त्तैवसज्जगत् ॥ ९ ॥ अप्यनागतएवायमेवंसर्गउपागतः ॥ भोःशालभंजिकासंविद्दारुण्येवमुधोदिता ॥ १० ॥ बीजेयथाऽनन्यदपिफलाद्यन्यदिवोदितम् ॥ चितौतथाऽनन्यदपिचेत्यमन्यदिवोदितम् ॥ ११ ॥ अच्छेदादेकसत्तायानभेदःफलबीजयोः ॥ चिच्चेत्ययोश्चवार्यूर्म्योरिववस्तुनिकश्चन ॥ १२ ॥

॥ २ ॥ तत्राद्यस्यनिमित्तमाह ॥ कुलानीति ॥ ३ ॥ द्वितीयस्यनिमित्तमाह ॥ कर्कटेति ॥ कर्कटःकुलीरःसएवप्राणीतत्सादृश्यात् ॥ बृहदुदरदीर्घहस्तपादादिमत्त्वात्कर्कटाकृतिः ॥ ४ ॥ विश्वरूपस्यजगत्तत्त्वस्यनिरूपणेप्रस्तुतेअध्यात्मोक्तिप्रसंगेनकर्कटीकृतानांप्रश्नानांसंस्मृत्याएषाआख्यायिकाकथिता ॥ ५ ॥ उदाहृतामाख्यायिकांप्रकृतेयोजयति ॥ संपन्नमिति ॥ ६ ॥ प्लाविन्यउत्प्लवनवत्यः ॥ अपिशब्दादतीतानागतसमुच्चयः ॥ ७ ॥ यदिवर्त्तमानानामप्यतीतानागतसाम्यंतर्हिकथमर्थक्रियाकारित्वंविशेषस्तत्राह ॥ अज्वलन्नित्यादिना ॥ प्रज्वलन्नितिपाठेमर्कटादीनांबुद्ध्याप्रज्वलन्नतुवस्तुतः ॥ ८ ॥ कर्त्तैवसतूनानाजगत्करोति ॥ ९ ॥ भोइतिरामसंबोधनम् ॥ शालभंजिकासंवित्प्रतिभाबुद्धिः ॥ १० ॥ फलादिअंकुरादिफलांतंव्युत्क्रमेणफलादीत्युच्यते ॥ ११ ॥ बीजादिफलांतेअनुस्यूतैकद्रव्यसत्तायाअविच्छेदान्नभेदः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१. भेदबोधकाः कार्यकारणादिभावाः व्यवहारायैव उपदेशाय वा संकल्पेन कल्पिताः न वास्तवाः। तिलतैलादीनां कार्यकारणभावः, तिलेषु तैलमित्यादिः, पुरुषचैतन्यादीनां स्वस्वामिभावादयः, पुरुषस्य चैतन्यं, राहोः शिर इत्यादयः, हेतुहेतुमद्भावः पंचभूतेभ्यः शरीरमित्यादि, अवयवावयविभावः तन्तुभ्यः पट इत्यादि व्यवहाराः न वास्तव भेदप्रतिपादकाः।

॥१३॥ यथानिर्हेतुकतयैवआयातातथायातुगच्छतु ॥ किंतर्हिमयाकार्यंतत्राह ॥ एनामिति ॥ एनांभ्रांतिम् ॥ तद्ब्रह्मप्रबुद्धःसन्ज्ञास्यसे ॥१४॥ यदिभ्रममुत्सृजामितर्हिकथंत्वदुक्तश्रवणेशब्दार्थबोधभेदंप्रतिपत्स्येतत्राह ॥ भ्रांतीति ॥ यद्यपिनभेदंप्रतिपत्स्यसेतथापितत्तात्पर्यगोचरंवस्तुस्वयमेवज्ञास्यसीत्यर्थः ॥ १५॥ तथापिकथमनर्थनिवृत्तिसिद्धिस्तत्राह ॥ चित्तादिति ॥ तच्चित्तम् ॥ साचित्तजाअनर्थश्रीः ॥ इतराचित्तहेतुरविद्याच ॥ १६ ॥ जगतउत्पत्त्यादिनिरूपणस्यापिनिष्प्रपंचवस्तुबोधएवप्रयोजनमित्याशयेनाह ॥ ब्रह्मणइति ॥ सर्वंजगद्विलयेनब्रह्मएतिप्राप्नोतिच ॥ अलंपूर्णम् ॥ १७॥ यदिभेदोऽसन्नेवतर्हिब्रह्मणःसर्वमुत्पन्नमितित्वदुक्तौतस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतिषुचतस्मादितीयंव्यतिरेकार्थभेदप्रतिपादिकापंचमीकिंसर्वंदेवेशादभिन्नंविद्धीत्यपिकिम् ॥ लक्ष्यालक्ष्यभेदस्यतत्प्रतियोग्यादीनांचासत्वेशब्दाप्रसराल्लक्षणेनलक्ष्यबोधनव्यवहा

अविचारात्कुतोभेदोनैतयोरुपपद्यते ॥ यतःकुतश्चिदुदितःसविचारेणनश्यति ॥ १३ ॥ भ्रांतिरेषायथायातातथायातुरघूद्वह ॥ ज्ञास्यसे तत्प्रबुद्धस्त्वमेनांकेवलमुत्सृज ॥ १४ ॥ भ्रांतिग्रंथौविनुटितेमदुक्तिश्रवणात्ततः ॥ ज्ञानशब्दार्थभेदानांवस्तुज्ञास्यस्यलंस्वयम् ॥ १५ ॥ चित्तादियमनर्थश्रीस्तन्नसाचेतराचते ॥ मदुक्तिश्रवणादेवशांतिमेष्यत्यसंशयम् ॥ १६ ॥ ब्रह्मणःसर्वमुत्पन्नंसर्वंब्रह्मैवमेतिच ॥ मद्गीर्भिःसंप्रबुद्धःसन्ज्ञास्यस्यलमनिंदितम् ॥ १७ ॥ ॥श्रीरामउवाच॥ ॥तस्मादियमितिब्रह्मन्व्यतिरेकार्थपंचमी ॥ ननुकिंविद्धिदेवेशादभिन्नंसर्वमित्यपि ॥ १८ ॥ ॥श्रीवसिष्ठउवाच॥ ॥उपदेशायशास्त्रेषुजातःशब्दोथवार्थजः ॥ प्रतियोगिव्यवच्छेदसंख्यालक्षणपक्षवान् ॥ १९ ॥ भेदोदृश्यतएवायंव्यवहारान्नवास्तवः ॥ वेतालोबालकस्येवकार्यार्थंपरिकल्पितः ॥ २० ॥ द्वैतैक्यमपिनोयस्यांतथाभूतार्थसंस्थितौ ॥ अस्तितस्यामीदृशःस्यात्कुतःसंकल्पविप्लवः ॥ २१ ॥ कार्यकारणभावोहितथास्वस्वामिलक्षणम् ॥ हेतुश्चहेतुमांश्चैवावयवावयविक्रमः ॥ २२ ॥ व्यतिरेकाव्यतिरेकौपरिणामादिविभ्रमः ॥ तथाभावविलासादिविद्याविद्येसुखासुखे ॥ २३ ॥ एवमादिमयीमिथ्यासंकल्पकलनामिता ॥ अज्ञानामवबोधार्थंनतुभेदोस्तिवस्तुनि ॥ २४ ॥ अविबोधादयंवादोज्ञातेद्वैतंनविद्यते ॥ ज्ञातेसंशांतकलनंमौनमेवावशिष्यते ॥ २५ ॥

रासिद्धेरुपदेशासिद्धिश्चेतिशंकाशयः ॥१८॥ तात्कालिकभेदकल्पनयाव्यावहारिकदृष्टिसिद्धभेदाद्युपादानाद्वाशब्दप्रसराद्विवप्रतिबिंबलक्षणव्यवहारवदुपदेशोपपत्तेर्नकोपिदोषइत्याशयेनवसिष्ठःपरिहरति ॥ उपदेशायेत्यादिना ॥ जातःकल्पितः ॥ अथवालोकसिद्धार्थजोव्यावहारिकभेदोपजीवीशब्दःप्रसरिष्यतीतिशेषः ॥१९॥ कल्पितेनप्रयोजनवद्व्यवहारसिद्धिर्लोकेपिप्रसिद्धेत्याह ॥ भेदइति ॥ २० ॥ यत्रस्वप्नगंधर्वनगरादिसंस्थितौद्वैतमैक्यंचनास्तितस्यामपीदृशोलक्षणादिव्यवहारोस्तिसत्यसंकल्पानामुपदेशादिव्यवहारेसंकल्पविप्लवःकुतःस्यादित्यर्थः ॥ २१ ॥ त्वदुपदेशादिव्यवहारेचमयैवसंकल्पात्कार्यकारणादिभेदःकल्पितइत्याह ॥ कार्यकारणेत्यादिना ॥२२॥२३॥ मिताकल्पिता ॥ २४ ॥ अयंचव्यवहारउपदेश्यस्याज्ञदशायामेवनप्रबोधदशायामितिनाद्वैतहानिरित्याह ॥ अविबोधादिति ॥ मौनमशब्दः ॥२५॥ ॥१५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२६॥ असंबुद्धा अज्ञाततत्त्वाःपुरुषाःस्वविकल्पविजृंभितैस्तर्कैः ॥ अयंवादःसर्वोपिवेदांततत्त्वोपदेशात्प्रागेवयतोज्ञातेद्वैतंनविद्यतेइत्यर्थः॥२७॥ मास्तुद्वैतंतथापिकथंविवादासंभवस्तत्राह ॥ वाच्येति ॥ तर्ह्यस्तुद्वैतंतत्राह ॥ नचेति ॥ वेत्यवधारणे ॥ अतोमौनमेवापादयतीत्यर्थः ॥ २८ ॥ यतोवेत्यादिलक्षणवाक्येर्हिपंचम्याद्यर्थोनप्रतिपत्तव्यस्तत्राह ॥ महावाक्येति ॥ पंचम्याद्युपात्तंवचोभेदमनादृत्यतांलक्षणवाक्योत्थांबुद्धिमखंडेमहावाक्यार्थेएवनिष्ठापदवाच्यलक्ष्यार्थव्युत्पत्तिद्वारापर्यवसानंयस्यास्तथाविधांकृत्वायदिदंवक्ष्यमाणंवच्मितच्छृण्वित्यर्थः ॥ २९ ॥ यतःकुतश्चिदनिर्वाच्याद्धेतोरुच्छ्रायआविर्भावोयस्य ॥ ३० ॥ उक्तार्थेवक्ष्यमाणाख्यायिकांदृष्टांतत्वेनावतारयति ॥ यथेति ॥ स्वदृष्ट्यैववेद्यतेदार्ष्टांतिकंयेनतद्दृष्टिवेदनम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ एवंवक्ष्यमाणाख्यायिकारीत्यास्थिते ॥ ३५ ॥ भवस्यसंसारस्यांतोनाशः ॥ ३६ ॥ लौकिकशास्त्रीय

सर्वमेकमनाद्यंतमविभागमखंडितम् ॥ इतिज्ञास्यसिसिद्धांतंकालेबोधमुपागतः ॥ २६ ॥ विवदंतेह्यसंबुद्धाःस्वविकल्पविजृंभितैः ॥ उपदेशादयंवादोज्ञातेद्वैतंनविद्यते ॥ २७॥ वाच्यवाचकसंबोधोविनाद्वैतंनसिद्ध्यति ॥ नचद्वैतंसंभवतिमौनंवापादयत्यलम् ॥ २८॥ महावाक्यार्थनिष्ठांतांबुद्धिंकृत्वारघूद्वह ॥ वचोभेदमनादृत्ययदिदंवच्मितेशृणु ॥२९॥ यतःकुतश्चिदुच्छ्रायंगंधर्वपुरवन्मनः ॥ भ्रांतिमात्रंतनोतीदंजगदाख्यंस्वजृंभणम् ॥ ३० ॥ यथाचेतस्तनोतीमांजगन्मायांतथानघ ॥ शृणुत्वंकथयामीदंदृष्टांतंदृष्टिवेदनम् ॥ ३१ ॥ यंश्रुत्वासर्वमेवेदंभ्रांतिमात्रमितिस्वयम् ॥ रामनिश्चयवान्भूत्वादूरेत्यक्ष्यसिवासनाम् ॥३२॥ मनोमननिर्माणमात्रमेवजगत्त्रयम् ॥ सर्वमुत्सृज्यशांतात्मास्वात्मन्येवनिवत्स्यसि ॥३३॥ मद्वाक्यार्थावधानस्थोमनोव्याधिचिकित्सने ॥ विवेकौषधलेशेनप्रयत्नंचकरिष्यसि ॥ ३४ ॥ एवंस्थितेजगद्रूपंचित्तमेवेहजृंभते ॥ नविद्यतेशरीरादिसिकतांतरतैलवत् ॥ ३५ ॥ चित्तमेवहिसंसारोरागादिक्लेशदूषितम् ॥ तदेवतैर्विनिर्मुक्तंभवांतइतिकथ्यते ॥३६॥ चित्तंसाध्यंपालनीयंविचार्यंकार्यमार्यवत् ॥ आहार्यंव्यवहार्यंचसंचार्यंधार्यमादरात् ॥३७॥ सर्वमभ्यंतरेचित्तंबिभर्त्तित्रिजगन्नभः ॥ अहमापूरमिवतद्यथाकालंविजृंभते ॥ ३८ ॥ योयंचित्तस्यचिद्भागःसैषासर्वार्थबीजता ॥ यश्चास्यजडभागश्चतज्जगत्सोंगसंभ्रमः ॥ ३९ ॥

साध्यपालनीयादिसर्वपदार्थरूपेणचित्तमेवविजृंभतेनान्यदित्याह ॥ चित्तमिति ॥ सिद्धेषुसाधनेष्वसिद्धंसाध्यम् ॥ पूर्वसिद्धंपालनीयम् ॥ असिद्धेषुनानासाधनेषुप्रसक्तेषुप्रयत्नगुरुलाघवविमर्शेनसाधनानिसंपाद्यपश्चात्साध्यंविचार्यंतत्रापिशिष्टैकसंमतोपायसाध्यमार्यवत्कार्यम् ॥ देशांतरेसिद्धमेवस्वगृहेआनेतुंयोग्यमाहार्यम् ॥ स्वगृहस्थमेवक्रयविक्रयाद्युपयुक्तंव्यवहार्यम् ॥ तेष्वप्यश्वरथादिसंचार्यम् ॥ भूषणादितुधार्यम् ॥ आदरादितिसर्वत्रसंबध्यते ॥ एतत्सर्वंचित्तमेव ॥ नहिनिश्चित्तस्यांकिंचित्साध्यादिकंप्रसिद्धमित्याशयः ॥ ३७ ॥ त्रिजगत्कल्पनायानभआकाशभूतंचित्तंसर्वंदृश्यमभ्यंतरेबिभर्त्ति ॥ तदेवचित्तंयथाकालंदेहप्राणेंद्रियादिषुव्यापृतेषुअहमेवव्यापृतोस्मीत्यहमापूरमहंताप्रवाहइवविजृंभतेइत्यर्थः ॥३८॥ तत्रचिदंशप्राधान्येनद्रष्टृतापरपर्यायासर्वकल्पनाबीजभूताअहंता जडांशप्राधान्येनतुदृश्यभ्रांतिरूपतेतिविभागमाह ॥ योयमिति ॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंप्रागुक्तसृष्टिक्रमस्मारणेनोपपादयति ॥ अविद्यमानमेवेति ॥ अजोब्रह्मा ॥ ४० ॥ कथंपश्यतितदाह ॥ सर्गादीति ॥ शैलादिस्थूलंविराड्देहंदीर्घसंविच्या सृष्टिस्थिति प्रलयकोटिसाधारण्यासाक्षिसंविदा सर्गादिजडसंविदाजडाहंभावनारूपयावैश्वानरसंविदा सूक्ष्मंलिंगसमष्टिसूत्रात्मकहिरण्यगर्भदेहंसूक्ष्मविदातदहंभावसंविदाचेतिशून्यमेव देहत्रयंपश्यतीत्यर्थः ॥४१॥ योयंचित्तस्यचिद्भागःसैषासर्वार्थबीजतेत्येतदुपपादयति ॥ सर्वगेनेति ॥ तथाचचिद्याप्तिबलादेवबीजतेत्यर्थः ॥४२॥ चिद्याप्तिबलादेवचित्तस्यअ विचारेजगद्द्रष्टृताविचारेआत्मदर्शनंचेत्याह॥ चित्तवालइति ॥४३॥ एवंचशुद्धात्मैवचित्तभावद्वारादृश्यभावंप्राप्तइवेतिफलितंतत्संभावनार्थंवक्ष्यमाणकथामवतारयति ॥ यथे ति ॥४४॥ ऐंदवोपाख्यानोपमानयुक्त्याकथंजगतोमनोमात्रत्वनिश्चयस्तत्राह ॥ यदिति ॥ हृदयंगमयामनोनुरंजिन्या ॥ शंकांवार्यनिरस्य ॥ ल्यप्छांदसः ॥ श्रोतुर्हृदयंव्यामो ति ॥ ४५ ॥ उक्तमर्थंव्यतिरेकमुखेनाप्युपपादयति ॥ त्यक्तोपमानमिति ॥ यद्वाक्यंत्यक्तोपमानंदृष्टांतोपन्यासरहितम् ॥ अमनोज्ञानिशब्दशास्त्रासंमतानिकठोरवर्णादिघटि

अविद्यमानमेवेदमादिसर्गेधरादिकम् ॥निराकृतिरजःस्वप्नंपश्यतीवनपश्यति ॥४०॥ सर्गादिदीर्घसंविच्याशैलादिजडसंविदा॥ सूक्ष्मं सूक्ष्मविदाचेतिदेहंशून्यंनवास्तवम् ॥ ४१ ॥ सर्वगेनात्मनाव्याप्तंस्वचेत्यात्मवपुर्मनः ॥ आततंसौम्यविमलंवारीवरवितेजसा ॥ ४२ ॥ चित्तवालोजगद्यक्षंमिथ्यापश्यत्यबोधतः ॥ बोधितोसौपरंरूपंस्वंपश्यतिनिरामयम् ॥ ४३ ॥ यथात्मादृश्यतामेतिद्वित्वैक्यभ्रमदायि नीं ॥ शृणुतत्तेप्रवक्ष्यामिवक्ष्यमाणकथागमैः॥४४॥ यत्कथ्यतेहिहृदयंगमयोपमानयुक्त्यागिरामधुरयुक्तपदार्थयाच॥ श्रोतुस्तदंगहृ दयंपरितोविसारिव्याप्नोतितैलमिववारिणिवार्यशंकाम् ॥४५॥ त्यक्तोपमानममनोज्ञपदंदुरापंक्षुब्धंधराविधुरितंविनिगीर्णवर्णम् ॥ श्रोतुर्नयातिहृदयंप्रविनाशमेतिवाक्यंकिलाज्यमिवभस्मनिहूयमानम् ॥ ४६॥ आख्यानकानिभुवियानिकथाश्चयायायद्यत्प्रमेयमु चितंपरिपेलवंवा ॥ दृष्टांतदृष्टिकथनेनतदेतिसाधोप्राकाश्यमाशुभुवनंसितरस्मिनेव ॥ ४७॥ ॥इत्यार्षेवा०वा०दे०मो०उ०मनोंकु रोत्पत्तिकथनंनामचतुरशीतितमःसर्गः॥ ८४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

तानिवापदानियस्मिंस्तथाविधम् दुरापमनभिव्यक्तवर्णत्वात्स्फुटतयाश्रोत्रेणप्राप्तुमशक्यम् क्रोधावेशादिवशात्क्षुब्धंसत् धराविधुरितंस्वस्थानविच्युतवर्णम् ॥ विनिगीर्णवर्णं यस्ताक्षरम ॥ संवृतःकलोध्मातइत्यादिमहाभाष्योक्तस्वरवर्णदोषाणामुपलक्षणमेतत् ॥ तथाचाहुः ॥ ग्रस्तंनिरस्तंप्रविलंबितंद्रुतमंबूकृतंध्मानमथोविकंपितम् ॥ विस्रस्तमेणी कृतमर्द्धकंहतंविकीर्णमेताःस्वरदोषभावनाइति ॥ एतादृशंतद्वाक्यंश्रोतुर्हृदयंनयातिनानुरंजयति ॥ महतापिश्रमेणोपन्यस्तंप्रविनाशंनैष्फल्यंवाचाटत्वादिदोषप्रत्ययफलतां वाएति ॥ किलेतिप्रसिद्धोस्यदृष्टांतइतिदर्शयति ॥ आज्यमिवेति ॥ ४६ ॥ व्यतिरेकमुखोपपादितमर्थंपुनरन्वयोक्त्यानिगमयति ॥ आख्यानकानीति ॥ नानाकथाभिरुपेता महत्योभारतादिकथाआख्यानकानि अल्पास्तुकथाः ॥ उचितंअभिज्ञानुरंजनोपयुक्तंयद्यत्काव्यनाटकाध्यात्मनिबंधादिरूपम् परिपेलवंशब्दतोर्थतश्चकोमलंचयद्यत्श्रोत्रप्र मेयंतत्सर्वंदृष्टांतानांलोकप्र सिद्धप्रमाणदृष्टीनांचकथनेनप्राकाश्यंस्फुटत्वयाथार्थतामेतीत्यर्थः ॥४७॥ ॥ इतिश्रीवासिष्ठम०उ०चतुरशीतितमःसर्गः ॥ ८४ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सृष्टिचिकीर्षतोधातुर्दशब्रह्मांडदर्शनम् ॥ तत्रैकरविणातेषांतत्त्वोक्तिश्चात्रवर्ण्यते ॥१॥ प्रतिज्ञातमैंदवोपाख्यानंवक्तुमुपक्रमते ॥ पुरेत्यादिना ॥ हेअनघब्रह्मणामेपुरायदिदंप्रोक्तं जगतोमनोमात्रत्वंतत्सर्वंतत्कथयातेनब्रह्मणोक्तयैंदवोपाख्यानकथयाप्रवक्ष्यामीतियोजना ॥ १ ॥ तदर्थंतदानींस्वकृतंप्रश्नमाह ॥ पुरेति ॥ २ ॥ तत्मत्पृष्टंउपआश्रुत्यवक्ष्यामीतिप्रतिज्ञाय ॥ बृहत्महार्थम् ॥ ३ ॥ भूतिमज्जगद्भावधारणशक्तिमत् ॥ चक्रैःकैरावर्तैरिव ॥ ४ ॥ हेअंगमेममपुराकल्पेदिनादौकल्पादौसंप्रबुद्धस्यसंसारंजगत्स्रष्टुमिच्छतःकिंवृत्तंयत्संपन्नंतच्छृणिवत्यर्थः ॥५॥६॥ संध्यांसंध्योपास्तिम् ॥ योजितवान्प्रसारितवानितियावत् ॥ ७ ॥ विद्यमानस्यापितमसोदिव्यस्वदृष्टिप्रसराविघातित्वान्नतमोभिरित्युक्तम्

श्रीवसिष्ठउवाच ॥ ॥पुरामेब्रह्मणाप्रोक्तंसर्वंतत्कथयानघ ॥ यदिदंतत्प्रवक्ष्यामित्वयिपृच्छतिराघव ॥ १ ॥पुरामयाहिभगवान्पृष्टः कमलसंभवः ॥ इमेकथमुपायांतिब्रह्मन्सर्गगणाइति ॥२॥ तदुपाश्रुत्यभगवान्ब्रह्मालोकपितामहः ॥ ऐंदवाख्यानसहितंमामुवाचबृहद्वचः ॥ ३॥ ॥ब्रह्मोवाच ॥ ॥ सर्वंहिमनएवेदमित्थंस्फुरतिभूतिमत् ॥ जलंजलाशयस्फारैर्विचित्रैश्चक्रकैरिव ॥४॥ दिनादौसंप्रबुद्धस्य संसारंस्रष्टुमिच्छतः ॥ पुराकल्पेहिकस्मिंश्चिच्छृणुकिंवृत्तमंगमे ॥ ५॥ कदाचिदखिलंसर्गंसंहृत्यदिवसक्षये ॥ एकएवाहमेकाग्रःस्वस्थस्तामनयंनिशाम् ॥६॥ निशांतेसंप्रबुद्धात्मासंध्यांकृत्वायथाविधि ॥ प्रजाःस्रष्टुंदृशौस्फारेव्योम्नियोजितवानहम् ॥७॥ यावत्पश्यामिगगनंनतमोभिर्नतेजसा ॥ व्याप्तमत्यंतविततंशून्यमंतविवर्जितम् ॥ ८ ॥ सर्गसंकल्पयामीतिमतिंनिश्चित्यतन्मया ॥ समवेक्षितुमारब्धंशुद्धंसूक्ष्मेणचेतसा ॥९॥ अथाहंदृष्टवांस्तत्रमनसाविततेंबरे ॥ पृथक्स्थितान्महारंभान्सर्गान्स्थितिनिरर्गलान् ॥१०॥ तेषुमत्प्रतिबिंबाभाःपद्मकोशनिवासिनः ॥ राजहंसान्समारूढाःसंस्थितादशपद्मजाः ॥११॥ पृथक्स्थितेषुसर्गेषुतेषूद्यद्भूतपंक्तिषु ॥ जलजालेषुशुद्धेषुजगत्सुजलदायिषु ॥ १२ ॥ प्रवहंतिमहानद्यःप्रध्वनंतियथाब्धयः ॥ प्रतपंत्युष्णरुचयःप्रस्फुरंत्यंबरेनिलाः ॥ १३॥ दिविक्रीडंतिविबुधाभुविक्रीडंतिमानवाः ॥ दानवाभोगिनश्चैवपातालेषुचसंस्थिताः ॥ १४ ॥ कालचक्रपरिप्रोतायद्भावाःसकलर्त्तवः ॥ यथाकालंफलापूर्णाभूषयंत्यभितोमहीम् ॥ १५ ॥ प्रौढ्यंशुभाशुभाचारस्मृतयःककुभंप्रति ॥ नरकस्वर्गफलदाःसर्वत्रसमुपागताः ॥ १६ ॥

॥ ८ ॥ तत्स्रष्टव्यवस्तुसमवेक्षितुंपर्यालोचयितुम् ॥ ९ ॥ अंबरेअव्यक्ताकाशे ॥ सर्गान्ब्रह्मांडान् ॥ स्थित्यातत्रत्यविष्ण्वादिकृतपालनादिव्यवस्थयानिरर्गलान्निष्प्रतिबंधान् ॥ १० ॥ ११ ॥ उद्यंत्यउत्पद्यमानाभूतपंक्तयश्चतुर्विधप्राणिनिकायायेषु ॥ जलजालेषुजलदजालेषु ॥ छांदसोदलोपः ॥ अथवाजलानांजालमिवबंधनेषुमेघेषुशुद्धेष्ववग्रहादिदोषनिर्मुक्तेषु ॥ १२ ॥ प्रकर्षेणस्फुरंतिसंचलंति ॥ १३ ॥ विबुधादेवाः ॥ १४ ॥ यद्भावाःयादृशशीतातपवर्षादिस्वभावाः ॥ सकलाऋतवोवसंतादयः ॥ १५ ॥ शुभाविहिताअशुभानिषिद्धाआचारास्तद्विभाजकस्मृतियंथाश्चककुभंप्रतिप्रतिदिशंसर्वत्रसर्ववर्णेषुप्रौढ्यंप्रौढतांसमुपागताः ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाक्रमंयादृशोयासांप्रवृत्तिक्रमःस्वसर्गेक्लृप्तस्तमनतिक्रम्येत्यर्थः ॥ १७ ॥ कल्पांतंप्रलयम् ॥ कालेनएष्यमाणाअपिस्वकालेउरुतरारवंयथास्यात्तथास्फुरंति ॥ १८ ॥ तमः क्वचिदनावृतदेशेद्भासित्वमपक्षयम् ॥ क्वचिद्गिरिगुहादौ ॥ कुंजेषुतुतेजोलवैरातपच्छिद्रैरावृतंस्नेहान्मिलितमित्यर्थः ॥ १९ ॥ अर्थात्सरस्त्वेनजगद्वर्णयति ॥ नभइति ॥ २० ॥ मेरुरिवोच्छ्रयान्मेरुर्हिमवांस्तत्कुंजेषु ॥ अष्ठिलाफलकर्परंतत्कोटरेष्विव ॥ २१ ॥ लोकालोकाद्रिरेवरसनाकांचीयस्याः ॥ रणंतोर्णवाएवघुंघुमाभूषणध्वनयोयस्याः ॥ तमः खंडाएवेंद्रनीलमणिप्रभायस्याः ॥ निजैःस्वांतर्गतैरत्नैश्चविराजिता ॥ २२ ॥ धानाःशाल्यादिबीजान्येवप्राणिनामास्वादनीयत्वादधरसुधायस्याः ॥ भूतानांप्राणिनांरवाध्वन यएवकाकलिघुंघुमामधुरास्फुटवाग्विलासायस्याःसातथाविधाअर्थाद्भूःतस्मिन्भुवनाभोगेस्वांतःपुरेअंगनेवसंस्थितेत्यर्थः ॥ २३ ॥ वत्सरश्रियःसंवत्सरलक्ष्म्याःकंठधृतायास्त

भोगमोक्षफलार्थिन्यःसमस्ताभूतजातयः ॥ स्वमीहितंयथाकालंप्रयतंतेयथाक्रमम् ॥ १७ ॥ सप्तलोकास्तथाद्वीपाःसमुद्रागिरयस्तथा ॥ अप्येष्यमाणाःकल्पांतंस्फुरंत्युरुतरारवम् ॥ १८ ॥ क्वचिद्भासित्वमायातंक्वचित्स्थिरतरंस्थितम् ॥ स्थितंसर्वत्रकुंजेषुतमस्तेजोलवावृतम् ॥ १९ ॥ नभोनीलोत्पलस्यांतर्भ्रमदभ्रमधुव्रतम् ॥ प्रस्फुरत्तारकाजालकेसरापूर्णतांगतम् ॥ २० ॥ कल्पांतघननीहारोमेरुकुंजेषुसंस्थितः ॥ शाल्मलेरमलंतूलमष्ठिलाकोटरेष्विव ॥ २१ ॥ लोकालोकाद्रिरसनारणदर्णवघुंघुमा ॥ तमःखंडेंद्रनीलाभानिजरत्नविराजिता ॥ २२ ॥ धानाधरसुधाभूतरवकाकलिघुंघुमा ॥ संस्थिताभुवनाभोगेस्वांतःपुरइवांगना ॥ २३ ॥ गौरांगपंक्तिर्मध्यस्थारजनीराजिरंजिता ॥ पद्मोत्पलस्रजइवलक्ष्यतेवत्सरश्रियः ॥ २४ ॥ बहुगर्त्तविभागस्थभूतालोकाःपृथक्पृथक् ॥ जातारुणाविलोक्यंतेदाडिमानीवकांतिकाः ॥ २५ ॥ त्रिप्रवाहात्रिपथगाकृतोर्ध्वाधोगमागमा ॥ जगद्यज्ञोपवीताभास्फुरतींदुकलामला ॥ २६ ॥ इतश्चेतश्चगच्छंतिशीर्यतेप्रोद्भवंतिच ॥ दिग्लतासुतडित्पुष्पावातार्त्तामेघपल्लवाः ॥ २७ ॥ गंधर्वनगरोद्यानलतावितानमालिनी ॥ समुद्रभूमिनभसांपदवीप्रविराजते ॥ २८ ॥

मःप्रकाशलक्षणपद्मोत्पलनिर्मितायाःस्रजोमध्यस्थाअंतर्निविष्टाअतएवतदीयपरागसदृशविद्युन्नक्षत्रादिव्याप्तत्वाद्रजनीराज्याहरिद्रालेपनप्रायेणरात्रिसमूहांगरागेणरंजिता गौराणांकंठकुचोदरवलिनाभ्याद्यंगानांपंक्तिरिवअर्थात्द्यौर्लक्ष्यतइत्यर्थः ॥ २४ ॥ बहूनिभुवनगर्तविभागेषुस्थितानिभूतानिबीजस्थानीयानियेषुतथाविधालोकाब्रह्मांडाजाता न्यरुणानितेजांसियेषुतथाविधाःसंतःकांतिकाःप्रकाशमानादाडिमफलानीवविलोक्यंतइत्यर्थः ॥ २५ ॥ २६ ॥ तडितएवपुष्पाणियेषांतथाविधामेघपल्लवादिग्लतासुवाता र्त्ताःसंतइतश्चेतश्चगच्छंतिशीर्यंतेप्रोद्भवंतीतियोजना ॥ २७ ॥ तच्चप्रतिभातंजगन्मिथ्यैवेतिदर्शयति ॥ गंधर्वेति ॥ सासमुद्रभूमिनभसांपदवीवितानशालिनीगंधर्वनगरोद्यानलतेव प्रतिराजतेनवास्तवीत्यर्थः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकांतरेषुभुवनगर्भेषु॥२९॥तेषुलोकांतरेषुयुगादिलक्षणःकालोपिप्रवहतीत्यर्थः ॥ अकलितस्यअतर्कितस्यसर्वनाशस्यप्रतीक्षकः॥३०॥विस्मयमापन्नःअहमितिशेषः ॥३१॥ विस्मयमेवसहेतुकमभिलप्यदर्शयति ॥ कथमिति ॥ मांसमयेनचक्षुर्गोलकनिविष्टेनाक्षणायन्नपश्यामितन्मनसापश्यामिइदंकथंसंपन्नमितिविस्मयइत्यर्थः ॥३२॥ अंबरात्तद्भुवनाकाशात् ॥ आनीयसत्यसंकल्पेनपुरःसन्निधाप्य ॥ ३३ ॥ स्वागतंतेऽस्त्वितिप्रथमंप्रोक्तःअथवक्ष्यमाणमर्थंकथितःपृष्टश्च ॥ ३४ ॥ तमेवार्थंदर्शयति ॥ कइति ॥ इदंत्वदीयं जगत्कथंजातम् एवमन्यानिनवजगंतिकथंजातानिकैःस्रष्टृभिःसृष्टानीत्यर्थः ॥ ३५ ॥ मांसंपरिज्ञातवान् अस्यब्रह्मांडस्यब्रह्माअयमितीतिशेषः ॥ ३६ ॥ नित्यंशश्वत् ॥३७॥

लोकांतरेषुसंघेनदेवासुरनरोरगाः॥ उदुंबरेषुमशकाइवघुंघुमिताःस्थिताः॥ २९ ॥ युगकल्पक्षणलवकलाकाष्ठाकलंकितः ॥ कालो वहत्यकलितसर्वनाशप्रतीक्षकः॥ ३० ॥ एवमालोक्यशुद्धेनपरेणस्वेनचेतसा॥ भृशंविस्मयमापन्नःकिमेतत्कथमित्यलम्॥ ३१ ॥ कथंमांसमयेनाक्ष्णायन्नपश्यामिकिंचन॥ तन्मायाजालमतुलंपश्यामिमनसांबरे ॥ ३२ ॥ अथालोक्यचिरंकालंमनसैवाहमंबरात्॥ अर्कंतस्माज्जगज्जालादेकमानीयपृष्टवान्॥ ३३ ॥ आगच्छदेवदेवेशभोभास्करमहाद्युते॥ स्वागतंतेस्त्वितिप्रोक्तोमयासौकथितोप्यथ ॥ ३४॥ कस्त्वंकथमिदंजातंजगदेवजगंतिच॥ यदिजानासिभगवंस्तदेतत्कथयानघ ॥ ३५ ॥ इत्युक्तोमांसमालोक्यसंपरिज्ञातवानथ॥ नमस्कृत्वाभ्युवाचेदमनिंद्यपदयागिरा॥ ३६॥ ॥भानुरुवाच॥ ॥ अस्यदृश्यप्रपंचस्यनित्यंकारणतामसि ॥ गतःकस्मान्न जानीषेकिंमामीश्वरपृच्छसि॥ ३७॥ अथमद्वाक्यसंदर्भेलीलाचेत्तवसर्वग॥ अचिंतितांमदुत्पत्तिंतच्छृणुष्ववदाम्यहम् ॥ ३८॥ सदसदितिकलाभिराततंयत्सदसदबोधविमोहदायिनीभिः॥ अविरतरचनाभिरीश्वरात्मन्प्रविलसतीहमनोमहन्महात्मन्॥ ३९॥ ॥इ० वा०वा०दे०मो०उ०ऐंदवोपाख्यानोपक्रमेब्रह्मादित्यसमागमोनामपंचाशीतितमःसर्गः॥८५॥ ॥ ७॥ ॥श्रीभानुरुवाच॥ कल्पनाम्निमहादेवव्यस्तनेदिवसेतव ॥ तलेकैलासशैलस्यजंबूद्वीपैककोणके ॥ १ ॥ सुवर्णजटनाम्नायस्त्वत्पुत्रैर्जनितप्रजैः॥ मंडलंकल्पितंश्रीमदनल्पसुखसुंदरम्॥ २॥

लीलाश्रवणेकौतूहलम् ॥ अचिंतितांत्वयाअसंकल्पिताम् ॥ ३८॥ व्यवहारेसर्वशक्तिमत्त्वादीश्वरात्मन् परमार्थदृशातुमहात्मन् अविरताजगद्रचनायाभ्यस्तथाविधाभिः सदितिवाअसदितिवातत्त्वतोऽबोधेनविमोहदानशीलाभिःकदाचित्सत्कदाचिदसत्क्वचित्सत्क्वचिदसदितिकालदेशपरिच्छिन्नजगत्सत्ताप्रदर्शनकौशलरूपाभिःकलाभिर्यदिहआसमंतात्ततंविस्तृतंतन्मनएवतथाप्रविलसतीतिविद्धीत्यर्थः ॥ ३९ ॥ ॥ इतिश्रीवासिष्ठम०ता०उ०पंचाशीतितमःसर्गः ॥ ८५ ॥ ॥ ७ ॥ ॥ इहेंदोःसहभार्यस्यतपसैंदवसंभवः ॥ तेषांज्येष्ठोपदेशेनधात्रहंभावनेर्यते ॥ १ ॥ जंबूद्वीपैककोणकेविद्यमानस्यकैलासशैलस्यावयवभूतेनलेसमभूप्रदेशे ॥ १ ॥ यःप्रदेशःसुवर्णजटनाम्नाप्रसिद्धइतिशेषः ॥ यत्रप्रदेशेजनिताप्रजासंततिर्यैस्तथाविधैस्त्वत्पुत्रैर्मरीच्यादिभिःप्रजानांनिवासार्थंमंडलंकल्पितमित्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रमंडले ॥ ब्रह्मवित्तमोवेदविच्छ्रेष्ठः ॥ ३ ॥ ४ ॥ ५॥ शून्याफलशून्या ॥ शरलताकाशस्तंबः ॥ ६ ॥ अंशमूर्ध्वभागम् ॥ भूतैःप्राणिभिः ॥ तरोःस्थितिरिवस्थितिःस्थैर्ययोस्तौ ॥ तरुस्थितिमेवोपपादयति ॥ एकमिति ॥ दिवसपर्ययेदिनचरमभागे ॥ ८ ॥ वार्क्षीवृक्षसंबंधिनींतत्सदृशीमितियावत् ॥ ९ ॥ द्वेयुगेगतेएवेतियोजना ॥ चिरंतपस्तुविशिष्टपुत्रलाभार्थम् ॥ १० ॥ उद्देशंप्रदेशम् ॥ ११ ॥ पुष्पाकरोवसंतइव ॥ उमयासहितंसोमम् ॥१२॥ कुमुदेकैरवे ॥ विकासएवदृष्टांतेदर्शनम् ॥१३॥ द्यावापृथिव्याविल्यनेनत

तत्राभूदतिधर्मात्माब्राह्मणोब्रह्मवित्तमः॥ इंदुनामातिशांतात्माकश्यपस्यकुलोद्भवः॥ ३ ॥ तस्मिंस्तदानिवसतोनित्यंस्वजनमंडले॥ तस्यप्राणसमाभार्याकाचित्तस्यांमहात्मनः॥४॥ नवभूवात्मजस्तस्यमरुभूमौतृणंयथा॥ नव्यराजतसाभार्यातस्यनिष्फलपुष्पिता॥५॥ ऋज्वीगौरीसुशुद्धापिशून्याशरलतायथा॥ तौततोदंपतीखिन्नौपुत्रार्थंतपसेगिरेः ॥ ६ ॥ कैलासस्यांशमारूढौरूढाविवनवद्रुमौ॥ भूतैरनावृतेशून्येतस्मिन्कैलासकुंजके॥ ७॥ तेपतुस्तौतपोघोरंजलाहारौतरुस्थिती॥ एकंपानीयचुलकंपीत्वादिवसपर्यये॥ ८ ॥ निस्पंदमुत्थितौवार्क्षींवृत्तिमाश्रित्यसंस्थितौ॥ तस्थतुस्तौतदातत्रतावत्कालंतरुव्रतौ॥ ९ ॥ यावत्त्रेताद्वापरंचयुगेद्वेएवतेगते॥ ततस्तुष्टोभवद्देवस्तयोःशशिकलाधरः॥ १० ॥दिनातपातापितयोरिंदुःकुमुदयोरिव ॥ आजगामतमुद्देशंयत्रतौविप्रदंपती॥ ११ ॥ सलतापादपंदेशंपुष्पाकरइवेश्वरः॥ दंपतीतौवृषारूढंसोमंसोमार्द्धशेखरम् ॥ १२॥ फुल्लाननौददृशतुःकुमुदेशशिनंयथा ॥ तौतंप्रणेमतुर्देवंतुषाराभलमीश्वरम्॥ १३ ॥ द्यावापृथिव्यावुदितंपरिपूर्णमिवोडुपम्॥ तर्जयन्पवनाधूतनवदृक्षाननस्वरम् ॥ १४॥ मृदूद्दामस्मितस्पंदिप्रोवाचाथवचःशिवः॥ ॥ईश्वरउवाच॥ ॥वरंविप्रगृहाणाशुतुष्टोस्मितववांछितम्॥ १५॥ मधुमासरसाक्रांतवृक्षवन्मुदितोभव॥ ॥विप्रउवाच॥ ॥भगवन्देवदेवेशदशपुत्रामहाधियः॥ १६॥ भव्याभवंतुमेभूयःशोकोयेननबाधते॥ ॥भानुरुवाच॥ ॥अथैवमस्त्विति प्रोच्यजगामांतर्द्धिमीश्वरः॥ १७॥ व्योम्निवारिनिधिर्व्रादंकृत्वेवोर्मिमहावपुः॥ ततस्तौदंपतीतुष्टौशिवलब्धवरौगृहम् ॥ १८॥ गतौगीर्वाणसदृशौखमिवोमामहेश्वरौ॥ तत्रासौब्राह्मणीगेहेबभूवोदारगर्भिणी ॥ १९ ॥

स्थाजनालक्ष्यंते ॥ उडुपंचंद्रम् ॥ पवनेनमलयानिलेनआधूतानांईषत्कंपितपल्लवानांरसालादिवृक्षाणांआननमिवकूजतांभ्रमरकोकिलादीनांस्वरंस्ववचोमाधुर्यातिशयेनतर्जयन्निर्भर्त्सयन्निव ॥ १४ ॥ मृदुनाउद्दामेनसौंदर्योत्कृष्टेनस्मितेनस्पंदिईषच्चलिताधरंयथास्यात्तथा ॥ तववांछितमिष्टंवरंगृहाण ॥ १५ ॥ १६ ॥ भव्याःकल्याणगुणाचारशालिनः ॥ येनपुत्रलाभेन ॥ १७ ॥ व्योम्नीतिपूर्वान्वयि ॥ अथवावारिनिधीयतेअस्मिन्नितिवारिनिधिर्मेघः ॥ ऊर्मिभिरिवविभक्तैरवयवैर्महद्वपुर्यस्य ॥ १८ ॥ गीर्वाणादेवास्तत्सदृशौतौदंपती ॥ अथवामायिकदिव्यशरीरकल्पनाद्गीर्वाणसदृशावुमामहेश्वरौखंवास्तवंब्रह्माकाशमिव ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२०॥मुग्धान्सुंदरान् ॥ कृताजातकर्मनामकरणान्नप्राशनचौलोपनयनवेदव्रताध्ययनादयोब्राह्मणसंस्कारायेषाम् ॥२१॥ प्रावृषावर्षर्त्तुना ॥२२॥२३॥स्वांगतिंविदेहकैवल्यं
यतोमुख्यतमगतिभूतब्रह्मकोविदौ ॥ २४॥ खेदिनोदुःखिताः ॥ तेषांभाग्यवशाद्भाविहैरण्यगर्भैश्वर्यप्राप्त्यनुसारीविचारउत्पन्नइत्याह ॥ तत्रेति ॥ विबांधवाःपित्रादिबंधुहीनाः
॥२५॥ परंविभवोत्कृष्टंश्रेयःसुखम् ॥ इतिसंचिंत्यइदंवक्ष्यमाणंचोचुः॥ ऐहिकामुष्मिकसुखोपायतयास्वीकर्त्तुंसमुचितम् ॥ हेभ्रातरः ॥ ऐहिकसुखाहेतुत्वेपिपरिणामेअदुःख
दंकिम् ॥ २६ ॥ एवंसामान्यतोविमृश्यविशेषतोपिविमृशंति ॥ किमिति ॥ तदेतज्जनानामैश्वर्यंकिमुत्कृष्टंगृहग्रामाधिपतिभ्यः ॥ हियस्मात्सामंतोमंडलाधिपतिर्महानीश्वरःऐ
श्वर्यवान् ॥२७॥ किंनामकियन्नाम ॥ राजानोदेशाधिपतयः ॥२८॥ महेंद्रस्तर्हिमहेश्वरःस्यात्तत्राह ॥ किंनामेति ॥२९॥ एवंभाषमाणेषुभ्रातृषुजन्मांतरेकृतहिरण्यगर्भोपा

बभौपूर्णोदराश्यामामेघलेखेववारिणा ॥ कालेथसुषुवेपुत्रान्प्रतिपच्चंद्रकोमलान् ॥ २० ॥ दशबालांस्ततोमुग्धान्वसुधेवनवांकुरा
न् ॥ कृतब्राह्मणसंस्कारावृद्धिमीयुर्महौजसः ॥ २१ ॥ स्वल्पेनैवहिकालेनप्रावृषेवनवांबुदाः ॥ तेसप्तवर्षवयसोबभूवुर्ज्ञातवाङ्मयाः
॥ २२ ॥ विरेजुस्तेजसातत्रनभसीवामलाग्रहाः ॥ अथकालेनमहतातेषांतौपितरौतदा ॥ २३ ॥ संजग्मतुस्तनुंत्यक्त्वास्वांगतिंगतिको
विदौ॥मातापितृभ्यांरहितादशतेब्राह्मणास्ततः॥२४॥ययुःकैलासशिखरंगृहंसंत्यज्यखेदिनः॥तत्रसंचिंतयामासुरुद्विग्नास्तेविबांधवाः
॥ २५ ॥ किंस्यादिहपरंश्रेयऊचुश्चेदंपरस्परम् ॥ किमिहस्यात्समुचितंभ्रातरःकिमदुःखदम् ॥ २६ ॥ किंमहत्त्वंकिमैश्वर्यंकिंमहाविभवं
शुभम् ॥ किंतदेतज्जनैश्वर्यंसामंतोहिमहेश्वर ॥ २७ ॥ सामंतसंपत्किंनामराजानोहिमहेश्वराः॥ कानामसंपद्भूपानांसम्राडिहमहेश्वरः
॥२८॥ किंनामतन्महेंद्रत्वंयन्मुहूर्तंप्रजापतेः॥ विनश्यतिनयत्कल्पेकिंस्यात्तदिहशोभनम् ॥२९॥ भाषमाणेष्वथैतेषुज्येष्ठोभ्रातामहा
मतिः॥ गंभीरवागुवाचेदंमृगयूथान्मृगोयथा॥३०॥ ऐश्वर्याणांहिसर्वेषामाकल्पंनविनाशियत् ॥ रोचतेभ्रातरस्तन्मेब्रह्मत्वमिहनेतरत्
॥३१॥ एतदुक्तंतदखिलाद्द्विजपुत्रास्तउत्तमाः॥ वचोभिरैंदवास्तत्रसाधुसाध्वित्यपूजयन्॥३२॥ ऊचुश्चेदंकथंतातसर्वदुःखोपमार्जन
म् ॥ पद्मासनंजगत्पूज्यंविरंचित्वमवाप्नुमः॥३३॥ भ्राभ्रातेनपुनःप्रोक्ताभ्रातरोभूरितेजसः॥ मदुक्तंसर्वएवेमेभवंतःपालयंतुवै ॥३४॥

स्तिरंतरायैरंतराविपन्नत्वात्प्राप्तोत्तमजन्माभ्रातृसंवादादेवोद्बुद्धप्राक्तनोपास्तिसंस्कारोमहामतिर्नामज्येष्ठोभ्राताप्राक्स्वानुष्ठितोपास्तिक्रमंतदधिकृतेभ्योभ्रातृभ्यउपदेष्टुकामउ
वाचेत्याह ॥ भाषमाणेष्विति ॥ मृगोयूथपः ॥ ३० ॥ आकल्पंआप्राकृतप्रलयम् ॥ हेभ्रातरः ॥ ब्रह्मत्वंहिरण्यगर्भता ॥ ३१ ॥ भाग्यवशादितरेषामपितत्राभिरुचिरुत्पन्नेत्या
ह ॥ एतदिति ॥ तदुत्तमाइतिपाठेसमहामतिरेवोत्तमोज्येष्ठःश्रेष्ठश्चयेषाम् ॥ ३२ ॥ अतएवतदुपायमपृच्छन्नित्याह ॥ ऊचुरिति ॥ सर्वाणिजरामरणसातिशयत्वादिप्रयुक्तदुः
खान्युपमृज्यंतेयस्मिन्नित्यधिकरणेल्युट् ॥ अवाप्नुमःशीघ्रंप्राप्स्यामः ॥ वर्त्तमानसामीप्यविवक्षयालट् ॥ ३३ ॥ तेभ्यउपागतेभ्योहिरण्यगर्भाहंग्रहोपास्तिंसपरिकरामुपदे
क्ष्यंस्तदंगमाप्ततेर्धारणादार्ढ्यंविधत्ते ॥ मदुक्तमिति ॥ वैइतितत्रदृढनिश्चयापेक्षाद्योतनार्थम् ॥ ३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सृजामिसंहरामीतिलिंगात्संवर्गविधेयमुपदिष्टेतिगम्यते ॥ इतिशब्दाद्वक्ष्यमाणप्रकारक्रमःसर्वोऽप्युपदिष्टोबोध्यः ॥ चिरायेतिभ्रमरकीटन्यायेनआतद्भावोदयमित्यर्थः ॥ ३५ ॥ बाढंकृत्वादृढमंगीकृत्य ॥ ज्यायसाज्येष्ठभ्रात्रासहैव ॥ रसात्फलरागातिशयात् ॥ ३६ ॥ लिपिकर्मचित्रलेखस्तदर्पिताकाराः ॥ ३७ ॥ तत्कथंचिंतनप्रकारंवक्तुमुपक्रमते ॥ अथेत्यादिना ॥३८॥ यज्ञक्रियाक्रमवतोयज्ञमूर्त्तेर्ममयाजकामहर्षयःसांगोपांगाअंगैःशिक्षादिभिरुपांगैःपुराणादिभिश्चसहिताःसरस्वत्यागायत्र्याचयुक्तावेदानरामूर्त्तिमंतइमे मदंतस्थाइत्यर्थः ॥३९॥४०॥ त्रिलोकीलक्षणायाःस्त्रियःकर्णकुंडलम् ॥४१॥ दैत्यैर्दानवैश्चभोजितंपूरितोदरम् ॥ अमृतानाममर्त्यानांस्त्रीगणैरप्सरोभिराकीर्णव्याप्तंगृहमिवगृ

पद्मासनगतोभास्वान्ब्रह्माहमितितेजसा ॥ सृजामिसंहरामीतिध्यानमस्तुचिरायवः ॥ ३५ ॥ अग्रजेनेतिकथितेबाढंकृत्वातउत्तमाः ॥ ध्यानाधीनधियस्तस्थुःसहैवज्यायसारसात् ॥ ३६ ॥ लिपिकर्मार्पिताकाराध्यानासक्तधियश्चते ॥ अंतस्थेनैवमनसाचिंतयामासुरादृताः ॥ ३७ ॥ अथउत्फुल्लकमलकोशवक्त्रोन्नतासनः ॥ ब्रह्माहंजगतांस्रष्टाकर्त्ताभोक्तामहेश्वरः ॥ ३८ ॥ यज्ञक्रियाक्रमवतःसांगोपांगामहर्षयः ॥ सरस्वत्याथगायत्र्यायुक्तावेदानराइमे ॥ ३९ ॥ लोकपालपराक्रांतःसंचरत्सिद्धमंडलः ॥ अयमुद्दामसौभाग्यःस्वर्गःस्वरविभूषितः ॥ ४० ॥ पर्वतद्वीपजलधिकाननैःसमलंकृतम् ॥ इदंभूमंडलंचैवत्रिलोकीकर्णकुंडलम् ॥ ४१ ॥ एतत्पातालकुहरंदैत्यदानवभोजितम् ॥ अमृतस्त्रीगणाकीर्णगृहंगगनकोटरम् ॥ ४२ ॥ अयमिंद्रोमहाबाहुःप्रजालंकृतदोत्तमः ॥ त्रैलोक्यनगरीमेकःपातिपावनयज्ञभुक् ॥ ४३ ॥ दीप्रजालवरत्राभिरवष्टभ्याथदिग्गणम् ॥ क्रमेणप्रपतंत्येतेभानवोभूरिभानवः ॥ ४४ ॥ लोकपालाइमेलोकंरक्षंतिशुद्धवृत्तयः[1] ॥ मर्यादाभिरतुच्छाभिर्गोपालागोगणंयथा ॥ ४५ ॥ उन्मज्जंतिनिमज्जंतिप्रस्फुरंतिपतंतिच ॥ तरंगाइवतोयानामिमाःप्रतिदिनंप्रजाः ॥ ४६ ॥ सृजामीममहंसर्गसंहरामितथाद्दतः ॥ अयमात्मनितिष्ठामिशाम्यामिभुवनेश्वरः ॥ ४७ ॥ अयंसंवत्सरोयातइदंपरिणतंयुगम् ॥ सृष्टेरयमसौकालःस्वयंसंहरणस्यच ॥ ४८ ॥

हमित्यर्थः ॥ ४२ ॥ अयंमदंतस्थःप्रजानांअलंकृतमलंकारंशोभमानतांददतीतिप्रजालंकृतदाराजानः ॥ राजभिर्हिप्रजाःशोभंते ॥ तेषूत्तम ॥ ४३ ॥ दीप्राभिःकांतिजाललक्षणवरत्राभिःपाशैर्दिग्गणमवष्टभ्ययथानपलायंतेतथाबद्ध्वारसादानायप्रतपंतिभानवोद्वादशादित्याः ॥ भूरिभानवःप्रचुरकिरणाः ॥ क्रमेणचैत्रादिमासक्रमेण ॥ ४४ ॥ अतुच्छाभिर्न्याय्यत्वान्महतीभिः[2] ॥ ४५ ॥ उन्मज्जंत्याविर्भवंति ॥ निमज्जंतितिरोभवंतिप्रस्फुरंतिविविधविभवादिनाविराजंते ॥ दारिद्र्यदोषादिनापतंतिच ॥ ४६ ॥ आत्मनिपारमार्थिकेस्वरूपेतिष्ठामि ॥ अतएवशाम्याम्युपरमे ॥ ४७ ॥ उक्तमेवस्पष्टंवदन्नुपसंहरति ॥ अयमित्यादिद्वाभ्याम् ॥ ४८ ॥

---

१ रक्षंत्यक्षुब्धवृत्तयइतिक्वचित्पाठः २ अतुच्छाभिस्तुच्छान्यत्वान्महतीभिरितिपाठःपुस्तकांतरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४९ ॥ अथऐंदवाइत्यसंधिःसंहिताऽनित्यत्वात् ॥ अद्रिवृत्तयोदृढबद्धासनाः ॥ ५० ॥ कुशासनस्थास्तेपंकजासनकल्पनेसतिपरिगलितेतरतुच्छवृत्तिजालाःसंतःअधिगतकमलासनक्रमाश्चसंतोविरेजुः ॥ ५१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेषडशीतितमःसर्गः ॥ ८६ ॥ ॥ ७ ॥ ॥ मनसाब्रह्मभूतानांक्रव्यादैर्देहभक्षणे ॥ प्रतिसर्गेऽथसर्गेचतथावस्थितिरीर्यते ॥ १ ॥ हेपितामहतेऐंदवास्तस्मिन्नुपास्तिक्रमेतैस्तैर्भुवनभूतग्रामादिसृष्टिपरिपालनसंहारादिकर्मभिस्त्वमिवसमाक्रांतमनस्कास्तत्रैवावृत्ताअत्यासक्ताःसंतस्तावत्तस्थुर्यावत्तेषांकुशादेहादेहकाःशोषमभ्येत्यगलिताइतिपरेणान्वयः ॥ १ ॥ २ ॥ जक्षुर्बभक्षुः ॥ क्रव्यादामांसाशिनोमृगपक्षिणः ॥ ३ ॥ शरीरनाशे

अयमेवगतःकल्पोब्राह्मीरात्रिरियंतता ॥ अयमात्मनितिष्ठामिपूर्णात्मापरमेश्वरः ॥ ४९ ॥ इतिभावितयाबुद्ध्यातेद्विजाअथऐंदवाः ॥ दशाद्रिवृत्तयस्तस्थुःसमुत्कीर्णाइवोपलात् ॥ ५० ॥ अधिगतकमलासनक्रमास्तेपरिगलितेतरतुच्छवृत्तिजालाः ॥ सततमतितरांकुशासनस्थाश्चिरमितिपंकजकल्पनेविरेजुः ॥ ५१ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०ऐंदवोपा०ऐंदवसमाधानंनामषडशीतितमःसर्गः ॥ ८६ ॥ भानुरुवाच ॥ ॥ पितामहक्रमेतस्मिंस्ततस्तेबहुभावनात् ॥ कर्मभिस्तैःसमाक्रांतमनस्कास्तस्थुरादृताः ॥ १ ॥ यावत्तेदेहकास्तेषांतापेनपवनैस्तथा ॥ कालेनशोषमभ्येत्यगलिताःशीर्णपर्णवत् ॥ २ ॥ जक्षुस्तान्देहकांस्तत्रक्रव्यादावनवासिनः ॥ इतश्चेतश्चलुठितान्सुफलानीवमर्कटाः ॥ ३ ॥ अथतेशांतबाह्यार्थाब्रह्मत्वेकृतभावनाः ॥ तस्थुश्चतुर्युगस्यांतेयावत्कल्पःक्षयंगतः ॥ ४ ॥ क्षीयमाणेततःकल्पेतपत्यादित्यसंचये ॥ पुष्करावर्तकेषूच्चैर्वर्षत्सुकठिनारवम् ॥ ५ ॥ वहत्सुकल्पवातेषुस्थितएकमहार्णवे ॥ क्षीणेषुभूतवृंदेषुतेतथैवव्यवस्थिताः ॥ ६ ॥ ततोरात्रिक्रमपरेसर्वंसंहृत्यतांस्थितिम् ॥ स्थितेत्वय्यात्मनिविभोतेतथैवव्यवस्थिताः ॥ ७ ॥ अद्यप्रबुद्धेभवतिस्रष्टुमिच्छतिसंस्रुतिम् ॥ सुखेनैवक्रमेणोच्चैस्तेतथैवव्यवस्थिताः ॥ ८ ॥ तथैतेभगवन्ब्रह्मन्ब्रह्माणोब्राह्मणादश ॥ तएतेदशसंसारामनोव्योमनिसंस्थिताः ॥ ९ ॥ तेषामेकतमस्याहमयमाकाशमंदिरे ॥ भानुर्भुविविभोकालकलाकर्मणियोजितः ॥ १० ॥ एषतेकथितःसर्गोदिशानामब्जसंभव ॥ ब्रह्मणांसंभवोव्योम्नियथेच्छसितथाकुरु ॥ ११ ॥

चतेपामात्यंतिकीबाह्यार्थप्रत्ययनिवृत्तिःसंपन्नेत्याह ॥ अथेति ॥ चतुर्युगस्यशिष्टस्यांते ॥ ४ ॥ ५ ॥ तेऐंदवास्तथैवस्वमनःकल्पितब्रह्मांडसर्गादिव्यापृततयैवव्यवस्थिताः ॥ ६ ॥ रात्रेःक्रमणंक्रमोऽतिक्रमस्तत्परेतत्प्रतीक्षेत्वयियोगनिद्रयाआत्मनिस्थितेसति ॥ ७ ॥ ८ ॥ ९ ॥ एतावताग्रंथेनकथमिदंजातमितिप्रश्नस्योत्तरमुक्त्वाकस्त्वमित्यस्योत्तरमाह ॥ तेषामित्यादिना ॥ तेषामैंदवसर्गाणांमध्येएकतमस्यब्रह्मांडस्यच्छिद्रभूताकाशलक्षणेमंदिरे ॥ भुवीतित्रैलोक्योपलक्षणम् ॥ भूलोकएवकर्मांगतयाकालविभागज्ञानस्यविशेषोपयोगात् ॥ १० ॥ एषुसर्गेषुसत्स्वपिनतवसर्गेकोपिविरोधइत्याशयेनाह ॥ यथेच्छसीति ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतोनविरोधइतिचेन्मनःकल्पनामात्रत्वेनासत्यत्वादित्याशयेनाह ॥ विविधेति ॥ हेउत्तमकरणानांबाह्याभ्यंतराणांजालकमिषबंधनभूतम् ॥ आहितेनआसंगेनमोहनंयदिदं जागतंदृश्यजातमुत्थितंतदखिलंतेषांनिजचेतसिस्वचित्तेविभ्रमोभ्रांतिमात्रंनवस्तुसदित्यर्थः ॥१२॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०सप्ताशीतितमःसर्गः ॥ ८७॥ ॥ इहधातुरनासक्त्यासर्गसिद्धिरुदीर्यते ॥ मनसादृढसिद्धस्यतथान्यैरनिवर्त्तनम् ॥ १॥ उक्तांकथामुपसंहरति ॥ ब्रह्माणइति ॥ ब्रह्मन्ब्रह्मविदांश्रेष्ठेतिभानुकृतंब्रह्मसंबोधनंब्रह्मकृतं वसिष्ठसंबोधनंच ॥ तेदशब्रह्माणःप्रागुक्ताब्राह्मणाएवनान्येइतिसभानुर्ब्रह्मणोममपुरउक्त्वातूष्णीमेवबभूवेत्यर्थः ॥ १ ॥ भानोभानोइत्यादराद्द्विरुक्तिः ॥ २॥ कोर्थःकिंप्रयोजन

विविधकल्पनयावलितांवरंयदिदमुत्तमजागतमुत्थितम् ॥ करणजालकमाहितमोहनंतदखिलंनिजचेतसिविभ्रमः ॥ १२ ॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०ऐंदवो०दशजगद्वर्णनंनामसप्ताशीतितमःसर्गः ॥ ८७॥ ॥ ७ ॥ ॥श्रीब्रह्मोवाच॥ ॥ब्रह्माणोब्राह्मणा भानुरित्युक्त्वाब्रह्मणोमम ॥ ब्रह्मन्ब्रह्मविदांश्रेष्ठंतूष्णीमेवबभूवसः ॥ १ ॥ ततउक्तंमयातस्यचिरंसंचिंत्यचेतसा ॥ भानोभानोवदाशुत्वं किमन्यत्संसृजाम्यहम् ॥ २ ॥ एतानिदशविधंतेकिलयत्रजगंतिवै ॥ तत्रान्योममसर्गेणकोर्थःकथयभास्कर ॥ ३ ॥ इत्युक्तोथमयाभानुःसंचिंत्यसुचिरंधिया ॥ इदमत्रवचोयुक्तमुवाचसमहामुने ॥ ४ ॥ ॥भानुरुवाच॥ ॥निरीहस्यनिरिच्छस्यकोर्थःसर्गेणतेप्रभो ॥ विनोदमात्रमेवेदंसृष्टिस्तवजगत्पते ॥ ५ ॥ निष्कामादेवभवतःसर्गःसंपद्यतेप्रभो ॥ अर्कादिवजलादित्यप्रतिबिंबमिवाधियः ॥ ६ ॥ शरीरसन्निवेशस्यत्यागेरागेचतेयदा ॥ निष्कामोभगवन्भावोनाभिवांछतिनोज्झति ॥ ७ ॥ सृजसीदंतथादेवविनोदायैवभूतप ॥ पुनःसंहृत्य संहृत्यदिनंदिनपतिर्यथा ॥ ८ ॥ तवनित्यमसंसक्तंविनोदायैवकेवलम् ॥ इदंकर्त्तव्यमेवेतिजगन्नतूद्यमेच्छया ॥ ९ ॥ सृष्टिंचेन्नकरोषि त्वंमहेशपरमात्मनः ॥ नित्यकर्मपरित्यागात्किमपूर्वमवाप्स्यसि ॥ १० ॥ यथाप्राप्तंहिकर्त्तव्यमसक्तेनसदासता ॥ मुकुरेणाकलंकेनप्रतिबिंबक्रियायथा ॥ ११ ॥

म् ॥ ३ ॥ युक्तंमत्प्रश्नोचितम् ॥ ४ ॥ ५ ॥ अर्काज्जलादित्यात्मकंप्रतिबिंबमिव ॥ अधियोनिर्मनस्कात् ॥ ६ ॥ सर्गेनिष्कामतांकैमुतिकन्यायेनद्रढयति ॥ शरीरेति ॥ शरीरात्मकस्यावयवसन्निवेशस्यत्यागेरागेअहमभिमानेनस्वीकृत्यरंजनेचतेभावोनिष्कामः ॥ ७ ॥ दिनंदिनपतिर्यथासृजतितथासृजसि ॥ ८ ॥ कर्त्तव्यंसर्गाहम् ॥ उद्यमःस्वार्थाभिलाषेणोद्योगस्तदिच्छयातुन ॥ ९ ॥आत्मनःस्वस्यनित्यकर्मपरित्यागात्परमन्यदपूर्वमदृष्टंकिमवाप्स्यसिनकिंचिदित्यर्थः ॥ १० ॥तर्हिकिमुपरमोयुक्तोनेत्याह ॥यथाप्राप्तमिति ॥ ११ ॥ ॥१५८॥

१ महेच्छेतिक्वचित्पाठः ॥ हेमहेच्छमहाशयेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अप्राप्तकरणइवप्राप्तत्यागेऽपिहेत्वभावादित्यर्थः ॥ १२ ॥ परमार्थतोऽकरणात्सुषुप्तोपमया प्रतीतितःकरणात्तुसुषुप्तेर्बुद्धःस्वप्नस्तत्समया ॥ १३ ॥ किंचैतैरैंदवसर्गैस्त्वंस्वपुत्रपौत्रादीनांसंपद्वृद्धिदर्शनादिनयदितोषमेषितर्त्तर्हिएतेऐंदवाअग्रेऽपिसर्गात्त्वंतोषशीलंत्वांतोषयिष्यंतीत्यर्थः ॥१४॥अस्तुतोषस्तथापिमत्सर्गस्तेनकुतोनगतार्थस्तत्राह ॥ चित्तनेत्रेणेति ॥ भवानन्यस्यसर्गंचित्तरूपेणनेत्रेणपश्यतिदृशाचक्षुषातुनोपश्यति ॥ कस्तत्स्रष्टातुस्वकृतंसर्गंमयेदंस्रष्टमितिचक्षुषैवावश्यंवेत्तिअतस्तेस्वचक्षुर्दर्शनार्हःसर्गोनान्येनगतार्थइत्यर्थः ॥ १५ ॥ तर्ह्यैंदवकृतसर्गएवमयाचक्षुषाद्रष्टव्यस्तत्राह ॥ येनैवेति ॥ १६ ॥ यद्येवंतर्हिवृथामन्मनसादृश्योयमैंदवसर्गोमत्प्रतिकूलएवेतिमयानाशनीयस्तत्राह ॥ नचैता

यथैवकर्मकरणेकामनानास्तिधीमताम् ॥ तथैवकर्मसंत्यागेकामनानास्तिधीमताम् ॥ १२ ॥ अतःसुषुप्तोपमयाधियानिष्कामयातया ॥ सुषुप्तबुद्धसमयाकुरुकार्यंयथागतम् ॥ १३ ॥ सर्गैरथैंदुपुत्राणांतोषमेषिजगत्प्रभो ॥ तदेतेतोषयिष्यंतितंत्वांसर्गात्सुरेश्वर ॥ १४ ॥ चित्तनेत्रैर्भवानेतान्सर्गानन्यस्यनोदृशा ॥ अवश्यंचक्षुषासर्गस्त्रष्टमित्येववेत्तिकः ॥ १५ ॥ येनैवमनसासर्गोनिर्मितःपरमेश्वर ॥ सएवमांसनेत्रेणतंपश्यतिहिनेतरः ॥ १६ ॥ नचैतान्दशसंसारान्दशनीरजसंभवान् ॥ कश्चिन्नाशयितुंशक्तश्चित्तदार्ढ्याच्चिरस्थितान् ॥ १७ ॥ कर्मेंद्रियैर्यत्क्रियतेतद्रोद्धुंकिलयुज्यते ॥ नमनोनिश्चयकृतंकश्चिद्रोधयितुंक्षमः ॥ १८ ॥ योबद्धपदतांयातोजंतोर्मनसिनिश्चयः ॥ सतेनैवविनाब्रह्मन्नान्येनविनिवार्यते ॥ १९ ॥ बहुकालंयदभ्यस्तंमनसादृढनिश्चयम् ॥ शापेनापिनतस्यास्तिक्षयोनष्टेपिदेहके ॥ २० ॥ यद्बद्धपीठमभितोमनसिप्ररूढंतद्रूपमेवपुरुषोभवतीहनान्यत् ॥ तद्बोधनादितरमत्रकिलाभ्युपायंशैलौघसेकमिवनिष्फलमेवमन्ये ॥ २१ ॥ इ०वा०वा०दे०मो०उ०ऐं०ऐंदवनिश्चयकथनंनामाष्टाशीतितमःसर्गः ॥ ८८ ॥ ॥ ७ ॥ ॥ऐंदवोपाख्यानंसंपूर्णम् ॥ ॥ भानुरुवाच ॥ ॥ मनोहिजगतांकर्तृमनोहिपुरुषःपरः ॥ मनःकृतंकृतंलोकेनशरीरकृतंकृतम् ॥ १ ॥ सामान्यब्राह्मणाभूत्वामनोभावनयाकिल ॥ ऐंदवाब्रह्मतांयातामनसःपश्यशक्तताम् ॥ २ ॥

निति ॥ दशैतान्संसारांस्तद्धेतून्दशनीरजसंभवान्पद्मजान्वाकश्चिन्नाशयितुंशक्तः ॥ १७ ॥ रोद्धुंरोधयितुमित्यनयोर्नाशयितुमित्यर्थः ॥ १८ ॥ बद्धपदतांरूढमूलताम् ॥ १९ ॥ शापेनतर्हिसमयानिरसनीयस्तत्राह ॥ बहुकालमिति ॥ २० ॥ बद्धपीठंस्थिरीभूतम् ॥ अतएवहिमूढानांसंसारनिवारणेतद्बोधनमेवोपायोनवरशापादिरन्यइत्याह ॥ तद्बोधनादिति ॥ शैलौघानांशिलाशकलसमूहानामंकुरोदयेच्छयासेकमिवनिष्फलमेवाहंमन्ये ॥ २१ ॥ ॥ इतिश्रीवासिष्ठम०उ०अष्टाशीतितमःसर्गः ॥ ८८ ॥ ॥ ७ ॥ ॥ मनसोबद्धपीठस्यपरयत्नैरचाल्यता ॥ इंद्राहल्यामनोवृत्तिकथयात्रप्रकाश्यते ॥ १ ॥ समष्टिभावापन्नंमनएवपरःपुरुषोहिरण्यगर्भः ॥ १ ॥ २ ॥

१ चित्तनेत्रेणेतीत्यादिटीकानुरोधादत्रान्यःपाठोपेक्षितइतिभातिसचनोपलभ्यते ॥ प्रतीकादप्यमपंथस्यफलितार्थपरत्वेनयोजनेपिप्रतीकविरोधःसुस्थएव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहभावनयाअयुक्तइतिच्छेदः ॥ मुक्तइतिपाठःस्पष्टः ॥ देहधर्मैर्जन्ममरणादिभिः ॥ ३ ॥ बाह्येदृष्टिर्देहादावात्मात्मीयदृष्टिर्यस्यसः ॥ ४ ॥ वक्ष्यमाणकथांवक्तुमुक्तमुपसंहरति ॥ मनःकारणकमिति ॥ ५ ॥ उदंतोवृत्तांतस्तस्यश्रवणेसति ॥ ६ ॥ अपरःपुराणांतरप्रसिद्धइंद्रद्युम्नइव ॥ ७ ॥ ८ ॥ षिंगोविटः ॥ षिड्गइतिपाठेपिसएवार्थः ॥ धीमान्विटविद्याकुशलः ॥ ९ ॥ अहल्यागौतमपत्नी ॥ १० ॥ सइंद्रःसक्तआसक्तःसन्कुतोनोएतिनागच्छतीत्युत्सुकाउत्कंठिता ॥ ११ ॥ १२ ॥ निदाघेनग्रीष्मेणतप्तासुस्थलीषुपरि

मनसाभाव्यमानोहिदेहतांयातिदेहकः॥ देहभावनयाऽयुक्तोदेहधर्मैर्नबाध्यते ॥ ३ ॥ बाह्यदृष्टिर्हिनियतंसुखदुःखादिविंदति॥ नांतर्मुखतयायोगिदेहेवेत्तिप्रियाप्रिये ॥ ४ ॥ मनःकारणकंतस्माज्जगद्विविधविभ्रमम् ॥ इंद्रस्याहल्ययासार्द्धंवृत्तांतोत्रनिदर्शनम् ॥ ५ ॥ ॥ब्रह्मोवाच॥ ॥काहल्याभगवन्भानोकोवात्रेंद्रस्तमोनुद॥ ययोरुदंतश्रवणेपावनीदृष्टिरेतिहि ॥ ६ ॥ ॥भानुरुवाच॥ ॥ श्रूयतेहिपुरादेवमागधेषुमहीपतिः॥ इंद्रद्युम्नइतिख्यातइंद्रद्युम्नइवापरः॥७॥ तस्येंदुबिंबप्रतिमाभार्याकमललोचना॥ अहल्यानामतत्रासीच्छशांकस्येवरोहिणी॥ ८ ॥ तस्मिन्नेवपुरेषिंगःषिंगप्रकरशेखरः॥ इंद्रनामापरःकश्चिद्धीमान्विप्रकुमारकः॥ ९ ॥ अहल्यापूर्वमिंद्रस्यवभूवेष्टेत्यहल्यया॥ श्रुतंराजमहिष्याथकथाप्रस्तावतःक्वचित्॥ १० ॥ आकर्ण्यैवमहल्यासाबभूवेंद्रानुरागिणी ॥ अहल्यांमांसनोकस्मात्सक्तोभ्येतीत्यथोत्सुका॥ ११ ॥ मृणालभारकदलीपल्लवास्तरणेषुसा॥ अतप्यतभृशंबालालतालूनावनेष्विव॥ १२ ॥ खेदमापसमग्रासुतासुभूपविभूतिषु॥ मत्सीनिदाघतप्तासुपरिलोलास्थलीष्विव॥ १३॥ अयमिंद्रोयमिंद्रश्चेत्येवंजातप्रलापया॥ लज्जापिहितयात्यक्तावैवस्यमनुयातया॥ १४॥ इत्यार्तयाघनस्नेहमथतस्यावयस्यया॥ उक्तंतयाप्रियेविघ्नमिंद्रमभ्यानयाम्यहम्॥ १५ ॥ इष्टंतवानयामीतिश्रुत्वाविकसितेक्षणा॥पपातपादयोःसख्यानलिन्यानलिनीयथा॥१६॥ ततःप्रयातेदिवसेसमायातेनिशागमे॥ सावयस्यातमिंद्राख्यंययौद्विजकुमारकम्॥ १७॥ बोधयित्वायथायुक्तंसातमिंद्रमथांगना॥ अहल्यानिकटंराज्ञ्यामानयामाससत्वरम्॥ १८ ॥ ततःसातेनषिंगेनसहेंद्रेणरतिंययौ॥ कस्मिंश्चित्सदनेगुप्तेबहुमाल्यविलेपना॥ १९॥

लोलामत्सीव ॥ सूर्यतिष्यागस्त्यमत्स्यानांयउपधायाइतियलोयः ॥ १३ ॥ तथालज्जापित्यक्ता ॥ अनुयातयाअनुसृतया ॥ १४ ॥ अथानंतरंतस्यावयस्ययाएवंविधांदृष्ट्वाआर्त्तयातयाइतिउक्तम् ॥ हेप्रियेसखिअहमिंद्रमभिमुखमविघ्नंयथास्यात्तथाआनयामि ॥ १५ ॥ नलीनीपद्मिनीग्लानाअन्यस्यानलिन्यामूलेयथापततितद्वत् ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतेनसुरतोचितक्रीडनेनआवर्जितावशीकृता ॥ मधुनावसंतेन ॥ २० ॥ २१ ॥ तन्मुखव्योम्नश्चंद्रिकेवप्रकाशहेतुः ॥ २२ ॥ तदेवस्पष्टमाह ॥ इंद्रमिति ॥ २३ ॥ २४ ॥ अतिशयितेनसुघनेननिरंतरेणचस्नेहेननिरावरणाअप्रच्छन्नाश्चेष्टाययोस्तयोः ॥ कटुःदुःसहाव्यथायस्मात्सः ॥ २५ ॥ शासनंपीडनम् ॥ २६ ॥ तदेवविशिष्यदर्शयति ॥ ताविति त्यादिना ॥ तत्रलौकिकेऽसत्येकुत्सितेपिविषयेचित्तस्थैर्येयदानदुःखंसुखसंपत्तिश्चतदापरमात्मनितत्स्थैर्येतत्प्रसक्तिसंभावनापिदूरंनिरस्तानिरतिशयानंदावाप्तिश्चस्वतःसिद्धेति

हारांगदमनोज्ञेनतरुणीतेनसातदा ॥ रतेनावर्जितावल्लीरसेनमधुनायथा ॥ २० ॥ ततस्तदनुरक्तासापश्यंतीतन्मयंजगत् ॥ नसमस्तगुणाकीर्णंभर्त्तारंवह्वमन्यत ॥ २१ ॥ केनचित्त्वथकालेनतस्याइंद्रानुरागिता ॥ साज्ञाताराजसिंहेनतन्मुखव्योमचंद्रिका ॥ २२ ॥ इंद्रंध्यायतिसायावत्तावत्तस्याविराजते ॥ मुखंपूर्णेनचंद्रेणप्रबुद्धमिवकैरवम् ॥ २३ ॥ इंद्रोपिचतदासक्तसमस्तकरणाकुलः ॥ नतिष्ठतिक्षणमहोतयाविरहितःक्वचित् ॥ २४ ॥ अथातिसुघनस्नेहनिरावणचेष्टयोः ॥ तयोरनयवृत्तांतोराज्ञाकर्णिकटुव्यथः ॥ २५ ॥ एवमन्योन्यमासक्तभावमालक्ष्यभूपतिः ॥ चकारबहुभिर्दंडैःसद्वयोरथशासनम् ॥ २६ ॥ तावुभावपिसंत्यक्तौहेमंतेसलिलाशये ॥ तुष्टौजहसतुस्तत्रनखेदंसमुपागतौ ॥ २७ ॥ अपृच्छतततोराजाखिन्नौस्थोनतुदुर्मती ॥ तावूचतुर्महीपालंजलाशयसमुद्धृतौ ॥ २८ ॥ संस्मृत्यावामिहान्योन्यमुखकांतिमनिंदिताम् ॥ आत्मानंनविजानीवोरूढभावंपरस्परम् ॥ २९ ॥ शासनेषुचयत्संगोनिःशंकस्तेनहर्षितौ ॥ मुत्द्यावोनमहीपालस्वांगैरपिविकर्तितैः ॥ ३० ॥ ततोभ्राष्ट्रेपरिक्षिप्तावखिन्नावेवमेवतौ ॥ ऊचतुर्मुदितात्मानावन्योन्यस्मृतिहर्षितौ ३१ ॥ ग्रथितौगजपादेपुनखिन्नावेवसंस्थितौ ॥ एवमेवोचतुर्भूपमन्योन्यस्मृतिहर्षितौ ॥ ३२ ॥ कशाहतावखिन्नौतावेवमेवकिलोचतुः ॥ अन्यस्माच्छासनाद्राज्ञाकल्पिताच्चपुनःपुनः ॥ ३३ ॥ उद्धृतावूचतुःपृष्टौतमेवार्थंपुनःपुनः ॥ उवाचेंद्रोमहीपालंजगन्मेदयितामयम् ॥ ३४ ॥ नशातनानिदुःखानिबाधंतेकिंचिदेवमे ॥ अस्याश्चैवजगद्राजन्सर्वंमन्मयमेवच ॥ ३५ ॥ तेनान्यशासनाद्दुःखंकिंचिदेवनविद्यते ॥ मनोमात्रमहंराजन्मनोहिपुरुषःस्मृतः ॥ ३६ ॥

तात्पर्यंरहस्यंसूचयंस्तयोश्चित्तस्थैर्यफलद्वयंप्रपंचयति ॥ तुष्टावित्यादिना ॥ २७ ॥ २८ ॥ आत्मानंस्वदेहम् ॥ रूढभावमितिक्रियाविशेषणम् ॥ २९ ॥ यद्यस्मादावयोःसंगोमनःसंबंधोनिःशंकोभेदशंकाशून्यस्तेनहेतुनाशासनेषुत्वत्कृतेषुपीडनेषुहर्षितौस्थोनमुह्यावश्च ॥ ३० ॥ एवंपूर्वोक्तरीत्यैवोचतुः ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ दुःखानिदुःखहेतून्यपिशरीरशातनानिकिंचिन्नबाधंतएवेतियोजना ॥ ३५ ॥ अन्यशासनादन्यस्मात्पीडनादपि ॥ नविद्यतेआवयोरितिशेषः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रपंचःकल्पितोविस्तारोमनसएवेत्यर्थः ॥ मनएवतर्हिदंडैर्भेत्स्यामितत्राह ॥ समकालेति ॥ समशब्दएकपरः ॥ ३७ ॥ वीरंइष्टार्थस्थैर्यशूरम् ॥ ३८ ॥ दृष्टोऽनुभूयमानस्तद्भावा पत्तिपर्यंतोनिश्चयोदृष्टनिश्चयस्तद्वंत्यपिमनांसि ॥ विशरारुतांविशीर्णताम ॥ ३९ ॥ आविष्टमभिनिवेशंदधानम् ॥ ४० ॥ ४१ ॥ अचलंस्थिरम् ॥ ४२ ॥ तीव्रवेगेनदृढाभि निवेशेन ॥ अभिवांछितादिष्टार्थाच्चालयितुम् ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ इष्टसंगमादभिलषितार्थलाभादन्यत्किंचिदणुमात्रमपिनानुभवामि ॥ तथाचमनएववेषद्वयेन

प्रपंचमात्रमेवायंदेहोदृश्यतएवहि ॥ समकालप्रयुक्तेनसहसादंडराशिना ॥ ३७ ॥ वीरंमनोभेदयितुंमनागपिनशक्यते ॥ कानामतामहा
राजकीदृश्यःकस्यशक्तयः ॥ ३८ ॥ याभिर्मनांसिभिद्यंतेदृष्टनिश्चयवंत्यपि ॥ वृद्धिमायातुवादेहोयातुवाविशरारुताम् ॥ ३९ ॥ भाविताार्था
भिपतितंमनस्तिष्ठतिपूर्ववत् ॥ इष्टेर्थेचिरमाविष्टंदधानंतंस्थितंमनः ॥ ४० ॥ भावाभावाःशरीरस्थान्नपशक्तानबाधितुम् ॥ भावितंतीव्र
वेगेनमनसायन्महीपते ॥ ४१ ॥ तदेवपश्यत्यचलंनशरीरविचेष्टितम् ॥ नकाश्चनक्रियाराजन्वरशापादिकाअपि ॥ ४२ ॥ तीव्रवेगेनसंप
न्नंशक्ताश्चालयितुंमनः ॥ तीव्रवेगेनसंयुक्तंपुरुषात्यभिवांछितात् ॥ ४३ ॥ मनश्चालयितुंशक्तानमहाद्रिंमृगाइव ॥ ममेयमसितापांगी
मनःकोशेप्रतिष्ठिता ॥ ४४ ॥ देवागारेमहोत्सेधेदेवीभगवतीयथा ॥ नदुःखमनुगच्छामिप्रिययाजीवरक्षया ॥ ४५ ॥ गिरिर्ग्रीष्मदशा
दाहंलग्नयेवाब्दमालया ॥ यत्रयत्रयथाराजंस्तिष्ठाम्यभिपतामिवा ॥ ४६ ॥ तत्रेष्टसंगमादन्यत्किंचिन्नानुभवाम्यहम् ॥ अहल्यादयि
तानाम्नामनसेंद्राभिधंमनः ॥ ४७ ॥ संसक्तमिदमायातिनस्वभावादृतेपरम् ॥ एककार्यनिविष्टंहिमनोधीरस्यभूपते ॥ ४८ ॥ नचाल्यते
मेरुरिववरशापबलैरपि ॥ देहोह्निवरशापाभ्यामन्यत्वमिवगच्छति ॥ ननुधीरंमनोराजन्विजिगीषुतयास्थितम् ॥ ४९ ॥ एतानिचात्रम
नसांनचकारणानिराजन्शरीरशकलानिदृथोत्थितानि ॥ चेतोहिकारणममीषुशरीरकेषुवारीवसर्ववनखंडलतारसेषु ॥ ५० ॥

दृढसंगतंस्वभावात्स्वभावांतरंयत्नशतैरपिगमयितुमशक्यमित्याशयेनाह ॥ अहल्येति ॥ ४७ ॥ एककार्यनिविष्टमेकाग्रम् ॥ परंविषयांतरम् ॥ ४८ ॥ सर्वविक्षेपविजीगीषुत यास्थितम् ॥ ४९ ॥ ननुदेहएवमनसःकारणंदेहपीडनेकुतोनपीड्यतेतत्राह ॥ एतानीति ॥ एतानिपरिदृश्यमानानिप्राणिनांशरीरलक्षणानिशकलानिकल्पनैकदेशामनसांनका रणानिंकिंतुचेतोमनएवामीषुशरीरकेषुकारणमित्यर्थः ॥ ५० ॥

१ तद्गतमितिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

आद्यंआत्मनःप्रथमभोगायतनम् ॥ अधितिष्ठतिअहमित्यभिमानेनाविर्भवति ॥ तेनाधिष्ठानेनतत्तच्छरीराद्याकारंफलतीत्यर्थः ॥ ५१ ॥ उक्तमेवार्थंदृष्टांतेनोपपादयन्नाह ॥ मुख्यांकुरमिति ॥ ५२ ॥ अतएवदेहनाशेपिपुनःपुनर्देहोद्भवश्चित्तनाशेतुकैवल्यमेवनपुनर्भवइतिप्रसिद्धमित्याह ॥ देहइति ॥ ततश्चित्तलक्षणंरत्नंसर्वार्थहेतुभूतंचिंतामणिसम नुपालयपरमपुरुषार्थसमाधानेनरक्षननुच्छकोधादिवशतयाविनाशयेत्यर्थः ॥ ५३ ॥ उक्तार्थंपिंडीकृत्यानूद्योपसंहरन्दंडनप्रयत्नवैफल्यमाह ॥ दिशिदिशीति ॥ तवपुरस्यतदं

आद्यंशरीरमिहविद्धिमनोमहात्मन्संकल्पितोजगतितेनशरीरसंघः॥आद्यंशरीरमधितिष्ठतियत्रयत्रतत्तद्वृशंफलतिनेतरदस्यपुंसः ५१
मुख्यांकुरंसुभगविद्धिमनोहिपुंसोदेहास्ततःप्रविसृतास्तरुपल्लवाभाः॥नष्टेंकुरेपुनरुदेतिनपल्लवश्रीर्नैवांकुरःक्षयमुपैतिदलक्षयेषु ॥५२॥
देहेक्षतेविविधदेहगणंकरोतिस्वप्नावनाविवनवंनवमाशुचेतः॥चित्तेक्षतेतुनकरोतिहिकिंचिदेवदेहस्ततःसमनुपालयचित्तरत्नम्॥५३॥
दिशिदिशिहरिणाक्षीमेवपश्यामिराजन्प्रिययुवतिमनस्त्वान्नित्यमानंदितोस्मि॥ तवपुरप्रकृतीनांयत्फलंदुःखदायिक्षणमथसुचिरंत त्तन्नपश्यामिकिंचित् ॥ ५४ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० इंद्राहल्याख्यानेकृत्रिमेंद्रवाक्यंनामैकोननवतितमःसर्गः ॥ ८९ ॥
॥ भानुरुवाच ॥ ॥ अथेंद्रेणैवमुक्तोसौराजाराजीवलोचनः॥ मुनिंभरतनामानंपार्श्वसंस्थमुवाचह ॥ १ ॥ ॥ राजोवाच ॥ ॥ भगव न्सर्वधर्मज्ञपश्यामिसुदुरात्मनः॥ भृशमस्यमुखेस्फारंधार्ष्ट्यंमद्दारहारिणः॥ २ ॥ पापानुरूपमस्याशुशापंदेहिमहामुने ॥ यदवध्यवधा त्पापंवध्यत्यागात्तदेवहि ॥ ३ ॥ इत्युक्तोराजसिंहेनभरतोमुनिसत्तमः॥ यथावत्सविचार्याशुपापंतस्यदुरात्मनः॥ ४ ॥ सहानयादुष्कृति न्याभर्तृद्रोहाभिभूतया ॥ विनाशंव्रजदुर्बुद्धेइतिशापंविसृष्टवान् ॥ ५ ॥ ततस्तौराजभरतौप्रत्यूचतुरिदंवचः॥ सुदुर्मतीयुवांयाभ्यांक्ष पितंदुश्चरंतपः ॥ ६ ॥ अनेनशापदानेनकिंचिद्भवतिनावयोः॥ देहेनष्टेननौकिंचिन्नश्यतिस्वांतरूपयोः ॥ ७ ॥

तर्गतप्रकृतीनांसेवकादिप्रजानांवामध्येयन्ममदुःखदायिकशाशस्त्रघातादियच्चतत्फलंदुःखंतत्तत्किंचित्क्षणकालमथवासुचिरंनपश्यामीत्यर्थः ॥ ५४ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्य० उ० एकोननवतितमःसर्गः ॥ ८९ ॥ ॥ ७ ॥ ॥ भरतस्यमुनेःशापान्नष्टयोरपिदेहयोः ॥ नमानसीतन्मयतातयोर्नष्टेतिकीर्त्यते ॥ १ ॥ राजीवंपद्ममिवलो चनेयस्य ॥ १ ॥ अस्येंद्रस्यमुखे ॥ स्फारंप्रचुरम् ॥ २ ॥ वध्यस्यवधार्हस्यत्यागादवधादपितदेवपापंभवतीतिहिधर्मशास्त्रेप्रसिद्धमित्यर्थः ॥ ३ ॥ ४ ॥ अनयाअहल्ययासह ॥ विनाशंमृत्युम ॥ ५ ॥ राजभरतौप्रतिइदंवचऊचतुः ॥ ६ ॥ नौआवयोःकिंचिदपिननश्यति ॥ तत्रहेतुः ॥ स्वांतरूपयोरिति ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशितुंनाशयितुम ॥ सेटिणिलोपश्छांदसः ॥ परैर्दुर्लक्ष्यत्वाच्च ॥८॥ पतितौभृताविवितियावत् ॥९॥ व्यसनेनदृढविषयरागेणसंसक्तौबद्धौ ॥१०॥ अथबहुजन्मपरंपरानंतरम् ॥ अस्माकंसर्गेअस्मदीयेब्रह्मांडे ॥११॥ भारतोभरतेनदत्तःशापस्तयोःशरीरमात्रस्याक्रमणेनाशेसमर्थोबभूवनतुमनोनिग्रहेइत्यर्थः॥१२॥१३॥ वृक्षाअपिश्रृंगारचेष्टाकुलिताभवंतिकिंपुनरन्येइत्यतिशयोक्तिः ॥ १४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०नवतितमःसर्गः ॥९०॥ ॥छ॥ ॥ इहभानुंमनुंकृत्वाधातुःसर्गोनिरूप्यते ॥ मनोमात्रवि

स्वांतंहिनहिकेनापिशक्यतेनाशितुंकचित् ॥ सूक्ष्मत्वाच्चिन्मयत्वाच्चदुर्लक्ष्यत्वाच्चविद्धिनौ ॥८॥ ॥भानुरुवाच॥ ॥सुघनस्नेहसंबद्धमनस्कावेवशापतः ॥ पतितौभूतलेवृक्षविच्युताविवपल्लवौ ॥ ९ ॥ अथव्यसनसंसक्तौम्हगयोनिमुपागतौ ॥ ततोद्वावपिसंसक्तौभूयोजातौविहंगमौ ॥१०॥ अथास्माकंविभोसर्गेमिथस्संबंधभावनौ ॥ तपःपरौमहापुण्यौजातौब्राह्मणदंपती ॥११॥ भारतोपितयोःशापःससमर्थोबभूवह ॥ शरीरमात्राक्रमणेनमनोनिग्रहेप्रभो ॥ १२ ॥ तावद्यापिहितेनैवमोहसंस्कारहेतुना ॥ यत्रयत्रप्रजायेतेभवतस्तत्रदंपती ॥ १३ ॥ अकृत्रिमप्रेमरसानुविद्धंस्नेहंतयोस्तंप्रतिवीक्ष्यकांतम् ॥ वृक्षाअपिप्रेमरसानुविद्धाःश्रृंगारचेष्टाकुलिताभवंति ॥ १४ ॥ इत्यार्षे०वा०वा०दे०मो०उ०कृत्रिमेंद्राहल्यानुरागोनामनवतितमःसर्गः ॥९०॥ ॥छ॥ ॥भानुरुवाच॥ ॥तेनैतद्ब्रह्मन्भगवन्यथाकालंमनोमुने ॥ अनिग्राह्यमभेद्यंचशापैरपिदुरासदैः ॥ १ ॥ ऐंदवानामतःस्त्रष्टिक्रमाणांप्रविनाशनम् ॥ युज्यतेनचतद्ब्रह्मन्युक्तमेतन्महात्मनः ॥२॥ किंतदस्तिजगत्यस्मिन्विविधेषुजगत्सुच ॥ तवापिनाथनाथस्ययद्दैन्यायमहात्मनः ॥३॥ मनोहिजगतांकर्तृमनोहिपुरुषःस्मृतः ॥ यन्मनोनिश्चयकृतंतद्दिव्यौषधिदंडनैः ॥४॥ हंतुंनशक्यतेजंतोःप्रतिबिंबंमणेरिव ॥ तस्मादेतेत्रतिष्ठंतुभासुरैःसर्गसंभ्रमैः ॥५॥ त्वंस्त्रष्ट्वेहप्रजास्तिष्ठबुद्ध्याकाशोह्यनंतकः ॥ चित्ताकाशश्चिदाकाशआकाशश्चतृतीयकः ॥६॥ अनंतास्त्रयएवैतेचिदाकाशप्रकाशिताः ॥ एकंद्वौत्रीन्वहून्वापिकुरुसर्गान्जगत्पते ॥ ७ ॥ स्वेच्छयात्मनितिष्ठत्वंकिंगृहीतंतवैंदवैः ॥ ॥ ब्रह्मोवाच ॥ ॥ अथैंदवजगज्जालेभानुनैवमुदाहृते ॥ ८ ॥

लासत्वंविश्वस्यैंदवसर्गवत् ॥ १ ॥ तेनभारतःशापोनमनोनिग्रहेसमर्थोबभूवेत्युक्तेनहेतुना ॥ १ ॥ अतोहेतोरैंदवानांस्त्रष्टिक्रमाणांप्रविनाशनंत्वयाकर्तुंनयुज्यतेनपार्यतेमहात्मनस्तवतद्युक्तमुचितंचनभवतीत्यर्थः ॥ २ ॥ नहित्वथाममसर्गःस्यादितिदैन्यमालक्ष्याह ॥ किंतदिति ॥ ३ ॥ ४ ॥ एतेऐंदवाः ॥ ५ ॥ क्वतर्हिमत्सर्गस्यावकाशस्तत्राह ॥ त्वमिति ॥ इहत्वचित्ताकाशे ॥ अनंतंवैमनइतिश्रुतेरितिभावः ॥ प्रथमश्चिदाकाशश्चिदाभासाकाशः ॥ ६ ॥ साक्षिकूटस्थचिदाकाशप्रकाशिताः ॥ चित्ताकाशेअनंतकोटिब्रह्मांडानामप्यवकाशोऽस्तिकिंपुनरेकस्येत्याशयेनाह ॥ एकमिति ॥ ७ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंबरंप्रागुक्तमाकाशचतुष्टयमपि ॥ ९ ॥ तत्रद्वयोरेवसर्गाधारतामुख्येत्याशयेनाह ॥ मनश्चेति ॥ चिदाकाशोमनोवच्छिन्नः ॥ भूताकाशस्यस्तज्यांतःपातादब्रह्माकाशस्यासंग तयासर्गानाधारत्वादिति ॥१०॥ तंत्तस्मिन्सर्गेप्रथमोमनुःस्वायंभुवः॥११॥समभिचोदितआज्ञप्तःसन् ॥१२॥ तपतांवरेतिवसिष्ठसंबोधनम् ॥ अस्मिन्ऐंदवसर्गे ॥१३॥१४॥१५॥ उपसंहरति ॥ एतदिति ॥ महात्मनोमनसः ॥ १६ ॥ सफलतांभोगव्यवहारप्रयोजकतामपि ॥ १७ ॥ १८ ॥ स्वस्यापिहिरण्यगर्भताऐंदववन्मानस्येवेत्याह ॥ यथेति ॥ चिद्भावाच्चित्तत्वंप्राप्यचित्तत्वाद्ब्रह्मतांहिरण्यगर्भताम् ॥ १९ ॥ तदेवस्वांतंमनएवास्ति ॥ देहदृक्देहप्रतीतिश्चित्तादन्यानास्ति ॥२०॥ आत्मनिस्वस्मिंश्चमत्काराःकल्पनायस्यतथा

मयासंचिंत्यसुचिरमिदमुक्तंमहामुने॥ युक्तमुक्तंत्वयाभानोविततंहिकिलांबरम्॥ ९॥ मनश्चविततंवापिचिदाकाशश्चविस्तृतः॥ तद्य थाभिमतंसर्गनित्यकर्मकरोम्यहम्॥ १० ॥ कल्पयामिबहून्याशुभूतजालानिभास्कर॥ तत्त्वमेवाशुभगवन्प्रथमोमेमनुर्भव ॥ ११ ॥ कुरुसर्गंयथाकामंमयासमभिचोदितः॥ अथैतत्समहातेजाममवाक्यंप्रभाकरः॥ १२ ॥ अंगीकृत्यद्विधात्मानंचकारतपतांवर॥ एके नप्राक्तनेनास्मिन्वपुषासूर्यतांगतः॥१३॥ व्योमाध्वगतयासर्गंततानदिवसावलिम्॥ मन्मनुत्वंद्वितीयेनकृत्वास्ववपुषाक्षणात्॥१४॥ ससर्जसकलांस्त्रष्टिंतांतामभिमतांमम॥ १५॥ एतत्तेकथितंसर्वंवसिष्ठमनसोमुने॥ स्वरूपंसर्वकृत्वंचशक्तत्वंचमहात्मनः॥ १६॥ प्रति भासमुपायातियद्यदस्यहिचेतसः॥ तत्तत्प्रकटतामेतिस्थैर्यंसफलतामपि॥ १७॥ सामान्यब्राह्मणाभूत्वाप्रतिभासवशात्किल ॥ ऐंदवा ब्रह्मतांयातामनसःपश्यशक्तताम्॥ १८॥ यथाचैंदवजीवास्तेचित्त्वाद्ब्रह्मतांगताः॥ वयंतथैवचिद्भावाच्चित्तत्वाद्ब्रह्मतांगताः ॥ १९ ॥ चित्तंहिप्रतिभासात्मयच्चतत्प्रतिभासनम्॥ तदिदंभातिदेहादिस्वांतंनान्यास्तिदेहदृक् ॥२०॥ चित्तमात्मचमत्कारंतच्चतत्कुरुतेस्वतः॥ य थावत्संभवंस्वात्मन्येवांतर्मरिचादिवत्॥ २१ ॥ तदेतच्चित्तवद्भातमातिवाहिकनामकम्॥ तद्देवोदाहरंत्येवंदेहनाम्नाघनभ्रमम्॥ २२ ॥ कथ्यतेजीवनाम्नैतच्चित्तंप्रतनुवासनम्॥ शांतदेहचमत्कारंजीवंविद्धिक्रमात्परम्॥ २३॥

विधंभवति ॥ आत्मचमत्कारत्वंविवृणोति ॥ तच्चतत्कुरुतेइति ॥ तर्हिसर्वेषांमनस्तुल्यंकुतोनकल्पयतितत्राह ॥ यथावत्संभवमिति ॥ यथावत्कामकर्मवासनानुसाराद्यावद्यदा संभवतितदातावदेवेत्यर्थः ॥ यथामरिचंकटुतयैवांतःपरिणमतेनिंबस्तुतिक्ततयाद्राक्षामधुरतयेतिस्वस्वसंस्काराद्यवस्थितंतद्वदित्यर्थः ॥ २१ ॥ अतएवदेवोहंमनुष्योहमित्यादि देहनाम्नाप्रतिनियतंजनाउदाहरंतिनैकरूपमित्याह ॥ तदेतदिति ॥ चित्तवद्भातमातिवाहिकनामकंसूक्ष्मदेहमेवघनभ्रमंस्थौल्यभ्रांतियुक्तंतत्तद्देहनाम्नाउदाहरंति ॥ २२ ॥ यदि चित्तंदेहस्तर्हिइदमेवजीवइतिकथंप्रागुक्तंतत्राह ॥ कथ्यतेइति ॥ प्रतनुवासनंजीवोघनभ्रमंतुदेहइत्युच्यतइतिभेदक्रमात्शांतदेहचयचमत्कारंतुपरंब्रह्मविद्धीत्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंचतंतुभ्यःपटइवनकस्यापिदेहोनामपृथगस्तीत्याह ॥ नाहमिति ॥ २४ ॥ तत्कृतंसर्गांतरमित्यपिमच्चित्तकल्पनैवेत्यहमेवतदपीत्याह ॥ तत्कृतमिति ॥ २५ ॥ स्वभावःपरमात्मैवसर्वप्रपंचशून्यतरादात्मत्वात्पृथगिवदेहादिभावेनभातीत्यर्थः ॥ २६ ॥ मुधेतिनिपातोनञर्थे ॥ २७ ॥ चिद्वपुःपरमात्मैवऐंदवसंसारवत्सर्वात्माभाति ॥ यथास्वाज्ञानशक्तिजःस्वप्नोदीर्घःसन्संपन्नजाग्रदात्माभातितद्वदित्यर्थः ॥ २८ ॥ यतःसूक्ष्मतरवासनामयशब्दतन्मात्राध्यासपूर्वकंभवतिजगत्ततऐंदवचित्ताकाशवदेवरूढमितिसंभाव्यतइत्यर्थः ॥२९॥ यद्युदासीनचित्तादेवसर्वंरूढंतर्हिकथंदेहादिष्वहंतयाभिमानादनुदासीनरूपंभातीतितत्राह ॥ नसदिति ॥ यदहंरूपमभिनिवेशरूपमनुदासीनस्वभावमनुभूयतेतन्नसत् ॥ सर्वत्रचित्तकार्येअदर्शनात् ॥ नाप्यसत् ॥ असतउपलंभादर्शनात् ॥ यतःसत्तासत्तेतदेव ॥ सत्तासदेकरूपत्वात्सदेव ॥ असत्ताचासदेकरूपत्वादसदेव ॥ अहंरूपंतुनैकस्वभाव

नाहंनचान्यदस्तीहचित्रंचित्तमिदंस्थितम् ॥ वसिष्ठैंदवसंविद्वदसत्सत्तामिवागतम् ॥ २४ ॥ यथैंदवमनोब्रह्मातथैवायमहंस्थितः ॥ तत्कृतंचाहमेवेदंसंकल्पात्मैवभासते ॥ २५ ॥ कश्चिच्चित्तविलासोयंब्रह्माहमिहसंस्थितः ॥ स्वभावएवदेहादिविद्धिशून्यतरात्मत्वात् ॥ २६ ॥ शुद्धचित्परमार्थैकरूपिणीत्येवभावनात् ॥ जीवोभूयोमनोभूत्वावेत्तीत्थंदेहतांमुधा ॥ २७ ॥ सर्वमैंदवसंसारवदिदंभातिचिद्वपुः ॥ संपन्नसंप्रबोधात्मास्वप्नोदीर्घःस्वशक्तिजः ॥ २८ ॥ द्विचंद्रविभ्रमाकारंतन्मात्राभासपूर्वकम् ॥ ऐंदवांबरवद्रूढंचित्तादेवाखिलंभवेत् ॥ २९ ॥ नसन्नासदहंरूपंसत्तासत्तेतदेवच ॥ उपलंभेनसद्रूपमसत्यंतद्विरोधतः ॥ ३० ॥ जडाजडंमनोविद्धिसंकल्पात्मबृहद्वपुः ॥ अजडंब्रह्मरूपत्वाज्जडंदृश्यात्मतावशात् ॥ ३१ ॥ दृश्यानुभवसत्यात्मनसद्भावेविलासितत् ॥ कटकत्वंयथाहेम्नितथाब्रह्मणिसंस्थितम् ॥ ३२ ॥ सर्वत्वाद्ब्रह्मणःसर्वंजडंचिन्मयमेवच ॥ अस्मदादिशिलांतात्मनजडंनचचेतनम् ॥ ३३ ॥ दार्वादीनामचित्वेननोपलंभस्यसंभवः ॥ उपलंभोहिसदृशसंबंधादेवजायते ॥ ३४ ॥

नियतम् ॥ यतःक्वचिदुपलंभेनहेतुनासद्रूपमिवक्वचित्तुतद्विरोधतोनुपलंभादसत्यमसद्रूपमितिविरुद्धस्वभावंभासतइतिमायिकमित्यर्थः ॥३०॥ एवंमनसोजडाजडविरुद्धस्वभावत्वादपिमायिकत्वमित्याह ॥ जडाजडमिति ॥ ३१ ॥ तस्यकदादृश्यात्मताकदावाब्रह्मरूपत्वंतत्राह ॥ दृश्येति ॥ तन्मनोदृश्यानुभवकालेदृश्यमिवसत्यात्मसद्भावेब्रह्मानुभवेनविलासिनपृथग्विलसनशीलमितिब्रह्मैव ॥ यथाहेम्निकटकत्वंकरालंकृतिकार्यदृशाहेम्नःपृथक्सदिवकनकदृशातुतदेवतद्वत्संस्थितमित्यर्थः ॥३२॥ एवंजगतोपिजडाजडविरुद्धस्वभावत्वान्मायिकत्वमेवेत्याशयेनाह ॥ सर्वत्वादिति ॥ अस्मदादिशिलांतात्मब्रह्मादिस्थावरांतंयौक्तिकदृशाविरुद्धस्वभावमपिपरमार्थदृशानजाड्यचैतन्यधर्मकमित्यर्थः ॥ ३३ ॥ जडंचेतनमितिवाव्यवस्थाअनुपलंभेउपलंभोत्तरंवास्यात् ॥ आद्येउपलंभस्यैवासंभवात्सत्तैवनसिद्ध्यतिदूरेजडाजडत्वचिंतेत्याशयेनाह ॥ दार्वादीनामिति ॥ सदृशयोःप्रमातृप्रमेयचिद्धात्वोर्वृत्तिद्वारकादैक्यसंबंधाद्ध्युपलंभःप्रसिद्धः ॥ जडैकरूपत्ववादेतुनप्रमेयचैतन्यमस्तीतिनोपलंभसंभवइत्यर्थः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयेप्याह ॥ उपलब्धेइति ॥ अजडंविद्धीतिच्छेदः ॥ उपलब्धेप्रमेयस्योपलंभेंतर्भावात्तद्विषयस्याजडैकस्वभावतापरिशिष्यतेयतःप्रागुक्तचितोरैक्यलक्षणसंबंधादेवोपलंभो जायते ॥ तथाचानुपलब्धेउपलब्धेचजडचेतनद्वैविध्यंदुर्घटमित्यर्थः॥३५॥ उभयदुर्घटत्वेयत्फलितंतदाह॥ जडेति ॥३६॥ तस्याश्चितश्चेत्याकारकलनैवमनस्तातत्रैवजडाजडविकल्पस्तद्विवेकएवनिर्मनस्कतेत्याशयेनाह ॥ चितइत्यादिना ॥ ३७ ॥ तत्रचिदात्मभागविस्मरणेनजडात्मजीवजगद्भ्रमःसंपन्नइत्याह ॥ इतिजीवइति ॥ ३८ ॥ शुद्धोभावश्चित्स्वभावएवचित्तंजगदितिद्विधाकृतः ॥ अतश्चिदेकबुद्ध्योपलब्धंसर्वंजगत्साचिदेवद्वैतबुद्ध्यालब्धमपितत्सैवेत्यर्थः ॥ ३९ ॥ निर्भागानिर्विभागा ॥ एकभागाभंस्वगतविभा

उपलब्धेऽजडंविद्धितेनेदंसर्वमेवहि॥ उपलंभोहिसदृशसंबंधात्स्यात्समात्मनोः ॥ ३५ ॥ जडचेतनभावादिशब्दार्थश्रीर्नविद्यते॥ अनिर्देश्यपदेपत्रलतादीवमहामरौ॥३६॥ चितोयच्चेत्यकलनंतन्मनस्त्वमुदाहृतम्॥ चिद्भागोत्राजडोभागोजाड्यमत्रहिचेत्यता॥३७॥ चिद्भागोत्रावबोधांशोजडंचेत्यंहिदृश्यते॥इतिजीवोजगद्भ्रांतिपश्यगच्छतिलोलताम्॥३८॥चित्तस्थएवभावोसौशुद्धएवद्विधाकृतः॥ अतःसर्वंजगत्सैवद्वैतलब्धंचसैवतत् ॥३९॥ स्वमेवान्यतयादृष्ट्वाचितिर्दृश्यतयावपुः॥ निर्भागाप्येकभागाभंभ्रमतीवभ्रमातुरा॥४०॥ नभ्रांतिरस्तिभ्रमभाङ्नैवेतीहनिश्चयः॥ परिपूर्णार्णवप्रख्यावेतीत्थंसंस्थिताचितिः॥४१॥ सर्वस्याजाड्यमप्यस्याश्चितिश्चित्त्वंचवेत्तितत्॥चिद्भागोंशोवबोधस्यत्वहंताजडतोदयः॥४२॥अहंतादिपरेतत्त्वेमनागपिनविद्यते॥ऊर्म्यादीवपृथक्तोयेसंवित्सारंहितद्यतः॥४३॥ अहंप्रत्ययसंदृश्यंचेत्यंविद्धिसमुत्थितम्॥ मृगतृष्णांब्विवांतस्थंनूनंविद्यतएवनो॥ ४४ ॥ अहंतापदमंतात्मपदंविद्धिनिरामयम्॥ विदंविदुरहंतादिशैत्यमेवयथाहिमम्॥४५॥ चित्तैवचेत्यतेजाड्यंस्वप्नेस्वमरणोपमम्॥ सर्वात्मत्वात्सर्वशक्तीःकुर्वतीनैतिसाम्यताम्॥४६॥ मनःपदार्थादितयासर्वरूपंविजृंभते॥ नानात्माचित्तदेहोयमाकाशविशदाकृतिः ॥ ४७ ॥

गतुल्यम् ॥ ४० ॥ भ्रमभाक्नापुरुषोनैव ॥ ४१ ॥ अस्याश्चितेःसर्वरूपंजाड्यमपिचितिरेवस्यात् यतस्तस्मिन्जाड्येचित्त्वंचवेत्ति ॥ अचिदेकस्वभावत्वेस्फुरणायोगादस्फुरणे जाड्यस्याप्यसिद्धेरित्यर्थः ॥ यथाजडेवबोधोस्तिएवंचेतनेजडभागोप्यस्तीतिदर्शयति ॥ अहंतेति ॥४२॥ कथमहंतायाजडत्वमितिचेद्ब्रह्मव्यावृत्तत्वादित्याह ॥ अहंतादीति ॥ संवित्सारंचिदेकरसम् ॥ ४३ ॥ अतएवतस्यासत्त्वमपीत्याह ॥ अहंप्रत्ययेति ॥४४॥ अंतात्मपदंसर्वद्वैतबाधावध्यात्मवस्तु अहंतायाअपदमनाश्रयंविद्धि ॥ विदंचित्स्वभावमेववासनयाघनीभूतमहंतादिरूपंजनाविदुःपश्यंति ॥ यथाशैत्यमेवघनीभावाद्धिमंपश्यंतितद्वदित्यर्थः ॥ ४५ ॥ सर्वशक्तीःकुर्वतीआविष्कुर्वाणाचिद्विनाज्ञानदार्ढ्यंसाम्यतांनैति ॥ ४६ ॥ नानात्मकश्चित्तलक्षणोदेहआतिवाहिकः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथमिदंबोद्धुंशक्यंतत्रोपायमाह ॥ देहादीति ॥ स्थूलदेहादिदेहत्रयप्रतिभारूपात्मतांचत्यजतासताअधिकारिणाचित्तेनैवचित्तंप्रतिभासात्मप्रातिभासिकंविचार्यमित्यर्थः ॥ ४८ ॥ किंतद्विचारलक्षणेशोधेकृतेचित्तंभवतितदाह ॥ चित्तेति ॥ अकृत्रिमोनित्यनिरतिशयआनंदः ॥ प्राप्यतइतिशेषः ॥ तर्हिदेहादयोपिशोध्यंतांततोपिपुरुषार्थःकिंनलभ्यतेतत्राह ॥ किमिति ॥ दथातच्छोधइत्यर्थः ॥ ४९ ॥ किंचासत्वादपिदेहादेर्नशोधनार्हतेत्याह ॥ यदिति ॥ तद्बोधःफलवानितिशेषः ॥ खेकल्पिताःपादपाःकेशोध्यमानाद्दृष्टाइत्यर्थः ॥ एतामविद्यांप्रतिग्रहः ॥ शोधनाग्रहोयुक्तउचितःस्यादित्यर्थः ॥ ५० ॥ अतएवब्रह्मात्मादिशब्दादेहेप्रयुक्ताअपिश्रुतौनदेहवाचिनः ॥ श्रुतेरसत्यार्थनिष्ठत्वायोगात् ॥ येत्वसत्यविनिविष्टादेहात्मदृढनिश्चयाश्चार्वाकपामरादयोदेहवाचिनएवात्मादिशब्दाइतिमन्यंतेतेषांयेकिंचिदपिप्रामाणिकंवस्तूपदिशंतितेज्ञाःपुरुषैडकाःपुंस्पशवएव ॥ आत्मा

देहादिदेहप्रतिभारूपात्म्यंत्यजतासता॥ विचार्यंप्रतिभासात्मचित्तंचित्तेनवैस्वयम् ॥ ४८ ॥ चित्तताग्रेशोधितेहिपरमार्थसुवर्णताम् ॥ गतेऽकृत्रिमआनंदःकिंदेहोपलखंडकैः॥ ४९ ॥ यद्विद्यतेशोध्यतेतद्बोधःकेचखपादपाः॥ देहाद्यविद्यासत्याचेद्युक्तएतांप्रतिग्रहः॥ ५० ॥ असत्यविनिविष्टानांदेहवाचितयात्विह॥ येनामोपदिशंत्यज्ञाःकिंचित्तेपुरुषैडकाः ॥ ५१ ॥ यथैतद्भावयेत्स्वांतंतथैवभवतिक्षणात्॥ दृष्टांतोत्रैंदवाहल्याकृत्रिमेंद्रादिनिश्चयाः॥ ५२॥ यद्यद्यथास्फुरतिसुप्रतिभात्मचित्तंतत्तत्तथाभवतिदेहतयोदितात्म॥ देहोयमस्तिननचाहमितिस्वरूपंविज्ञानमेकमवगम्यनिरिच्छमास्व॥ ५३॥ देहोयमेषचकिलायमितिस्वभावाद्देहोयमेतदखिलंततएतिनाशम्॥ यक्षादिकल्पनवशाद्भयमेतिबालोनिर्यक्षदेहगतएवकयापियुक्त्या॥ ५४॥ ॥इ०वा०वा०दे०मो०पू०जीवावतरणक्रमोपदेशोनामैकनवतितमःसर्गः॥ ९१ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच॥ ॥इत्युक्तवान्सभगवान्मयाकमलसंभवः॥ रघूद्वहपुनःपृष्टोवाक्यमाक्षिप्यभूतपः॥ १ ॥

दिसत्यवस्तुनिष्ठशब्दानांदेहाद्यसत्यवाचितयाविपरीतव्युत्पन्नान्प्रतिसत्यार्थबोधनाशक्तेरित्यर्थः ॥ ५१ ॥ कथंतर्ह्यमूर्त्तस्यचित्तस्यमूर्त्तदेहभावःसंपन्नइतिचेद्भावनयैवेत्याशयेनाह ॥ यथैतदिति ॥ ५२ ॥ उक्तमेवार्थंस्फुटंवदन्नुपसंहरति ॥ यद्यदिति ॥ अयंदेहोनास्ति ॥ अहमितिप्रसिद्धोहंकारश्चनास्ति ॥ अतएकरसंविज्ञानंस्वस्वरूपमवगम्यनिरिच्छंयथास्यात्तथाआस्वतिष्ठेत्यर्थः ॥ ५३ ॥ देहोमानुषादिरयंप्रत्यक्षएषदेहभोग्यःप्रपंचोऽयमितिस्वभावात्स्वकल्पनावशादयमात्मादेहएवभवतिएतदखिलंभोग्यंचभवतिततस्तद्भावाद्देहनाशमनुनाशमेति ॥ यथाऽयंबालःकयापियुक्त्यानिर्यक्षदेहगतएवसन्नपियक्षतद्भीषणत्वग्रसितृत्वादिकल्पनवशाद्यक्षेणग्रस्तोयक्षदेहगतःस्वभ्रमाद्भीभवतितद्वदित्यर्थः ॥ ५४ ॥ ॥इतिश्रीवासिष्ठम०उ०एकनवतितमःसर्गः ॥ ९१ ॥ ॥ ७ ॥ ॥ इहाक्षिप्यमनःशक्तिरमोघास्थाप्यतेदृढा ॥ दार्ढ्येपुरुषयत्नस्ययथेष्टारोपणक्षमा ॥ १ ॥ प्राक्तनंवाक्यमनुपपत्त्युद्भावनेनाक्षिप्यपुनर्मयापृष्टः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आक्षेपप्रकारमेवदर्शयति ॥ त्वयैवेति ॥ अंतस्त्वदुक्तिस्त्वदुक्तिविरुद्धेत्यर्थः॥२॥एवंलोकदृष्टविराधापीत्याह॥शापनति॥तथाचनहुषस्यशापादजगरत्वंप्राप्तस्यमनोमोहात्त्ववंशजस्यभीमस्यग्रसनेप्रवृत्तिः ॥ तथैवधार्मिकस्यापिसौदासस्यशापाद्राक्षसतांगतस्यबुद्धिमोहाद्ब्रह्मवधादौप्रवृत्तिः ॥ गंधर्वराजस्यचशापाद्धृतराष्ट्रजन्मनिचक्षुरिंद्रियनाशः ॥ एवमन्यत्रापिदृष्टइत्यर्थः ॥ ३ ॥ एवंकार्यविरोधोप्यस्तीत्याशयेनाह ॥ यथेत्यादिना ॥ तृतीययथाशब्दोवह्न्यौष्ण्यादिदृष्टांतांतरसंग्रहार्थः ॥ कार्यकारणयोर्भेदानिरूपणात् ॥ तथाचमनसोवरशापाद्यनाक्रमणेतदभिन्नेदेहेपितदनाक्रमणंस्यादित्याद्याशयः ॥४॥ ननुदेहस्यमनोन्यूनसत्ताकत्वादेवशापाद्याक्रमणेपिनमनसस्तत्प्रसक्तिरितिविवर्त्तवादेनपरिहारमाशंकते ॥ अथेति ॥५॥ तत्रापिदोषांतरमाह॥एकनाशेइति ॥ एकनाशेद्वयोर्नाशोभवितुमवश्यमुपपद्यते॥ यथामनोनाशेदेहपरिक्षयोदृष्टएवंदेहनाशेमनःपरिक्षयो

त्वयैवभगवन्प्रोक्ताःशापमंत्रादिशक्तयः ॥ अमोघाइतिताएवकथंमोघाःकृताःपुनः ॥ २ ॥ शापेनमंत्रवीर्येणमनोबुद्धींद्रियाण्यपि ॥ सर्वाण्येवविमूढानिदृष्टानिकिलजंतुषु ॥ ३ ॥ यथैतौपवनस्पंदौयथास्नेहतिलौयथा ॥ अभिन्नौतद्वदेवैतौमनोदेहौसएवतत् ॥ ४ ॥ अथनास्तीहवादेहःकेवलंचेतसैवसः ॥ मुधानुभूयतेस्वप्नमृगतृष्णाद्विचंद्रवत् ॥ ५ ॥ एकनाशेद्वयोरेवनाशोत्राभ्युपपद्यते ॥ अवश्यंभवितुंमनोनाशेदेहपरिक्षयः ॥ ६ ॥ मनःशापादिभिर्दोषैःकथंनाक्रम्यतेप्रभो ॥ कथमाक्रम्यतेवापिब्रूहिमेपरमेश्वर ॥ ७ ॥ ॥ब्रह्मोवाच॥ ननतदस्तिजगत्कोशेशुभकर्मानुपातिना ॥ यत्पौरुषेणशुद्धेननसमासाद्यतेजनैः ॥८॥ आब्रह्मस्थावरांतंचसर्वदासर्वजातयः ॥ सर्वएवजगत्यस्मिन्द्विशरीराःशरीरिणः ॥ ९ ॥ एकंमनःशरीरंतुक्षिप्रकारिसदाचलम् ॥ अकिंचित्करमन्यत्तुशरीरंमांसनिर्मितम् ॥१०॥ तत्रमांसमयःकायःसर्वस्यैवचसंगतः ॥ सर्वैराक्रम्यतेशापैस्तथाविद्यादिसंचयैः ॥ ११ ॥ मूकप्रायोह्यशक्तोसौदीनःक्षणविनश्वरः ॥ पद्मपत्रांबुचपलोदैवादिविवशस्थितिः ॥ १२ ॥

पिसंभावितइतिनदेहस्यमनोन्यूनसत्ताकता किंतुसमसत्ताकता ॥ प्रत्युतचक्षुराद्यगम्यत्वेसत्यपरोक्षविषयत्वात्स्वप्नादिवन्मनसएवदेहन्यूनसत्ताकतेतिरज्जुनाशेसर्पस्येवदेहनाशेनमनोवस्थानसंभवइतिभावः ॥ ६ ॥ ७ ॥ तत्रप्रथमंविरोधंपरिहर्त्तुंवरशापप्राबल्योक्तेरौत्सर्गिकत्वंबहुतरदृष्टानुसारादवश्यमभ्युपेयमित्युपपादयितुंवरशापयोरप्युपजीव्यंकर्मोपोद्बलितपौरुषप्राबल्यंतावत्स्मारयति ॥ ननतदिति ॥ ८ ॥ स्थूलस्यैवोपघातोदृष्टोनसूक्ष्मस्येतिलोकदृष्टानुसारंस्वोक्तेर्वक्तुंभिन्नस्वभावौद्वौदेहौदर्शयति ॥ आब्रह्मेत्यादिना ॥ ९ ॥ १० ॥ विद्याअभिचारकृत्यादयः ॥ आदिपदाच्छस्त्रविषादयोगृह्यंते ॥ तेषांसंचयैःसमूहैः ॥ ११ ॥ दैवादीत्यादिपदाद्राजपित्रादिसंग्रहः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयत्तःस्वाधीनः ॥ नायत्तोऽस्वाधीनः ॥ १३ ॥ तत्रस्वाधीनतांहेतूक्त्योपपादयति ॥ पौरुषमिति ॥ अगम्योऽनाक्रमणीयः ॥ तैर्दुःखहेतुभिरनिंदितःअदूषितः ॥ १४ ॥ दुःखानुपघातइवसुखोपचयोप्यस्यत्रर्द्धतइत्याह ॥ यथेति ॥ १५ ॥ स्थूलदेहस्यतुनायंक्रमइत्याह ॥ सफलइति ॥ १६ ॥ विषयदोषैर्हिमनोदुष्येन्नान्यदोषेणेत्याशयेनाह ॥ पवित्रमिति ॥ तथाचनलोकदृष्टविरोधशंकावसरइतिभावः ॥ १७ ॥ कार्यविरोधमपिपरिहरति ॥ पतत्विति ॥ १८ ॥ सर्वेषांदेहादिभावानामुपमर्दनेपिपुरुषातिशयःप्रयत्नः सर्वःसमृद्धःसन्नविघ्नेनफलंददाति ॥ तद्यद्ददातितन्मनएवमनसःफलंददाति ॥ पौरुषस्यापिमनोभेदत्वादित्यर्थः ॥ १९ ॥ यत्रविषयदोषेऽपिमनोदार्ढ्येदुःखादर्शनंतत्रपवित्रेवि

मनोनामद्वितीयोयंकायःकायवतामिह ॥ सआयत्तोपिनायत्तोभूतानांभुवनत्रये ॥ १३ ॥ पौरुषंस्वमवष्टभ्यधैर्यमालंब्यशाश्वतम् ॥ यदितिष्ठत्यगम्योसौदुःखानांतदनिंदितः ॥ १४ ॥ यथायथासौयततेमनोदेहोहिदेहिनाम् ॥ तथातथासौभवतिस्वनिश्चयफलैकभाक् ॥ १५ ॥ सफलोमांसदेहस्यनकश्चित्पौरुषक्रमः ॥ मनोदेहस्यसफलंसर्वमेवस्वचेष्टितम् ॥ १६ ॥ पवित्रमनुसंधानंचेतःस्मरतिसर्वदा ॥ निष्फलास्तत्रशापाद्याःशिलायामिवसायकाः ॥ १७ ॥ पतत्वंभसिवह्नौवाकर्दमेवाशरीरकम् ॥ मनोयदनुसंधत्तेतदेवाप्नोतितत्क्षणात् ॥ १८ ॥ पुरुषातिशयःसर्वःसर्वभावोपमर्दने ॥ ददात्यविघ्नेनफलंमनोहिमनसोमुने ॥ १९ ॥ पौरुषेणबलेनांतश्चित्तंकृत्वाप्रियामयम् ॥ कृत्रिमेंद्रेणदुःखार्त्तिर्नदृष्टासामनागपि ॥ २० ॥ पौरुषेणमनःकृत्वानीरागंविगतज्वरम् ॥ मांडव्येनजिताःक्लेशाःशूलप्रांतेपितिष्ठता ॥ २१ ॥ अंधकूपस्थितेनापिमानसैर्यज्ञसंचयैः ॥ ऋषिणादीर्घतपसासंप्राप्तंवैबुधंपदम् ॥ २२ ॥ इंदुपुत्रैर्नरैरेवपुरुषाध्यवसायतः ॥ ध्यानेनब्रह्मताप्राप्तासामयापिनखंड्यते ॥ २३ ॥ अन्येपिसावधानायेधीराःसुरमहर्षयः ॥ चित्तात्स्वमनुसंधानंनत्यजंतिमनागपि ॥ २४ ॥ आधयोव्याधयश्चैवशापाःपापदृशस्तथा ॥ नखंडयंतितच्चित्तंपद्मघाताःशिलामिव ॥ २५ ॥ येचापिखंडिताःकेचिच्छापाद्यैराधिसायकैः ॥ स्वविवेकाक्षमंतेषांमनोमन्येविपौरुषम् ॥ २६ ॥

षयेकिंवाच्यमित्याशयेनेंद्रोपाख्यानादिस्मारयति ॥ पौरुषेणेति ॥ २० ॥ मांडव्यस्यकथामहाभारतादौप्रसिद्धा ॥ २१ ॥ दीर्घतपाअपियष्टुकामोयागोपकरणोपार्जनायनिर्गतोदैवादंधकूपेनिपतितस्तत्रयागकालातिक्रमेप्रसक्तेमनसैवेजेतेनेंद्रःप्रसन्नस्तंकूपादुद्धृत्यस्वपदंनिनायेतिभारतादौप्रसिद्धम् ॥ २२ ॥ २३ ॥ अनुसंधानमुपासनंज्ञानंवा ॥ २४ ॥ पापदृशोरक्षःपिशाचादयः ॥ तच्चित्तंध्येयार्थैकाग्र्यचित्तंनखंडयंतिनपरिभवंति ॥ पद्मेनघातास्ताडनानि ॥ २५ ॥ येसौदासनाहुषविश्वामित्रादयः ॥ आदिपदात्कामक्रोधाभिमानादिसंग्रहः ॥ तेषांमनोविपौरुषमदृढपौरुषमित्युपासनायांस्वविवेकाक्षममितिज्ञानेचासमर्थमितितर्कयामीत्यर्थः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवेकपौरुषदृढेतुमनसिनाभिलषितक्षतिरित्याह ॥ नकदाचिदिति ॥ दृश्येजापतिवा ॥ २७ ॥ २८ ॥ ईषत्प्रतिभातमपिमनसिचिरनिरूढंपीनंसद्यथाभूतंसत्यमिवोपभोगक्षमं भवतीत्यर्थः ॥ २९ ॥ ननुपूर्वतनमनुष्यादिभावप्रतिभादार्ढ्याद्दैवादेस्तत्स्थितिरपिकुतोनाभूत्तत्राह ॥ प्रतिभासस्येति ॥ उत्तरदृढवासनयापूर्ववासनोपमृद्यतइतिभावः ॥ ३० ॥ पूर्ववासनोपमर्दनोपक्षीणस्योपासनस्यकथंकार्यांतरक्षमतातत्राह ॥ प्रतिभासेति ॥ विरोधिभंजनपर्यंतमेवस्वकार्येविलंबस्तदुत्तरंतुक्षणादेवनिष्प्रत्यूहत्वादौपासनिकप्रतिभास गोचरोपास्यार्थतामेतिप्राप्नोत्येवेतिनोपक्षयइतिभावः ॥ ३१ ॥ ननुतथापिप्रलयकालेकथंतद्विरुद्धसर्गकल्पनंतेषांतत्राह ॥ अनुसंधानमात्रेणेति ॥ नतद्दीयसर्गैस्त्वदीयसर्गस्थं

नकदाचनसंसारेसावधानमनामनाक् ॥ स्वप्नेपिकश्चिद्दृश्येवादोषजालैःखिलीकृतः ॥ २७ ॥ मनसैवमनस्तस्मात्पौरुषेणपुमानिह ॥ स्वकमेवस्वकेनैवयोजयेत्पावनेपथि ॥ २८ ॥ प्रतिभातंयदेवास्ययथाभूतंभवत्यलम् ॥ क्षणादेवमनःपीनंबालवेतालवन्मुने ॥ २९ ॥ प्रतिभासस्यानुपदंप्राक्तनींस्थितिमुज्झति ॥ कुलालकर्मानुपदंघटोमृत्पिंडतामिव ॥ ३० ॥ प्रतिभासार्थतामेतिक्षणादेवमनोमुने ॥ स्पंदमात्रात्मकंवारियथातुंगतरंगताम् ॥ ३१ ॥ अनुसंधानमात्रेणसूर्यबिंबेपियामिनीम् ॥ मनःपश्यत्यशुद्धाक्षश्चंद्रबिंबेद्वितामिव ॥ ३२ ॥ यत्पश्यतितदेवाशुफलीभूतमिदंमनः ॥ सहहर्षविषादाभ्यांभुंक्तेतस्मात्तदेवतत् ॥ ३३ ॥ प्रतिभानुपदंचेतश्चंद्रेप्यग्निशिखाशतम् ॥ दृष्ट्वा दाहमवाप्नोतिदग्धंचपरितप्यते ॥ ३४ ॥ प्रतिभानुपदंचेतःक्षारेपिहिरसायनम् ॥ दृष्ट्वापीत्वापरांतृप्तिंयातिवल्गतिनृत्यति ॥ ३५ ॥ प्रतिभानुपदंचेतोव्योमन्यपिमहावनम् ॥ दृष्ट्वालुनातिलूत्वाचपुनरारोपयत्यलम् ॥ ३६ ॥ इत्थंयदेवपरिकल्पयतींद्रजालंक्षिप्रंतदेवपरिपश्यतितातचेतः ॥ नासज्जगन्नचसदित्यवगम्यनूनंलूनांदृशंविविधभेदवतींजहीहि ॥ ३७ ॥ ॥ इत्यार्षेवा० वा० दे० मो० उ० मनोमाहात्म्यवर्णनंनामद्विनवतितमःसर्गः ॥ ९२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

किंचिदनुकूलंप्रतिकूलंवातत्रतदीयानुसंधानमात्रस्यापेक्षणादितिनप्रलयकालेपितद्विरोधइतिभावः ॥ अशुद्धाक्षोंगुल्यवष्टब्धदृष्टिः ॥ ३२ ॥ स्रष्टृत्ववत्तद्भोक्तृत्वमपिमनसएवेत्याह ॥ यदिति ॥ तदेवतत्यत्कर्तृतदेवभोक्तृइत्यर्थः ॥ ३३ ॥ उक्तमर्थमुदाहरणेनदर्शयति ॥ प्रतिभेति ॥ प्रतिभाअनुसंधानंभोजकादृष्टोद्बोधितसंस्कारस्तदनुपदंतदनुसारि ॥ तथाचविरहिणांप्रसिद्धमित्यर्थः ॥ ३४ ॥ क्षारेउषादौ ॥ क्षीरइतिपाठेजले ॥ रसायनंमधुरादिरसभेदान् ॥ तथाचोष्ट्रच्छागादयोर्कनिंबादिपर्णान्यपिमधुरीकृत्यभक्षयंतीति दृश्यतइतिभावः ॥ ३५ ॥ ३६ ॥ उक्तमुपसंहरति ॥ इत्थमिति ॥ लूनांपरिच्छिन्नांदृशंदृष्टिंजहीहित्यज ॥ ३७ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउत्पत्तिप्रकरणेद्विनवतितमःसर्गः ॥ ९२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोत्वब्रह्मणोजज्ञेततोभूत्तैजसोविधिः ॥ ततोमोहादहंकारस्ततोविश्वमितीर्यते ॥ १ ॥ मनउपक्रममेवसर्गक्रमंप्रागुक्तंप्रपिपंचयिषुर्विधिसंवादमुपसंहरति ॥ इतीति ॥ भगवतापरमेष्ठिना ॥ १ ॥ अनाख्यानादव्याकृतनामरूपात् ॥ अनाख्यानंसूक्ष्मत्वान्नामसंबंधानर्हंसर्वप्रपंचरूपंचलनात्मकंनिर्विकल्पकज्ञानप्रकाशितमुत्पद्यते ॥ तत्कालेनस्वयमेवसंकल्पविकल्पनात्मकमननसामर्थ्योद्भवेनघनतांप्राप्य ॥ २ ॥ तन्मात्राणिसूक्ष्मभूतानितत्कल्पनापूर्वकंसन्निवेशंस्वात्मशरीरमिववासनामयपुरुषाकारम् ॥ ततःसन्निवेशोपाधेस्तदुपहितःपुरुषआत्मातैजसःतेजःप्रधानलिंगसमष्ट्युपाधित्वात् ॥ सोयंब्रह्मापरमेष्ठी ॥ ३ ॥ तस्यजगत्सर्गसंकल्पकतामनोरूपत्वादेवेत्याह ॥ तेनेति ॥ ४ ॥ ५ ॥ ननुतत्संकल्पाज्जगदुत्पद्यतांजीवानांतदभिमानस्तुकुतस्तत्राह ॥ ततस्तेनेति ॥ अत्राविद्याअन्यथाग्रहणलक्षणाध्यासरूपाकार्याविद्या ॥ इतिअनयारीत्या ॥ ६ ॥ ब्रह्मतत्त्वाच्चिदेकरसादागतापिअन्यतोजडात्प्रधानपरमाण्वादेःसकाशादागतेतितार्किकैर्लक्ष्यते ॥ ७ ॥ एकैकस्यानेकोपादानकल्पनागौरवान्नपरमाणुकारणतावादोयुक्तः ॥ विनाकर्त्तारंजड

॥ श्रीवसिष्ठउवाच ॥ ॥ इतिमेभगवतापूर्वमुक्तंतदेतदद्यतुभ्यंकथितम् ॥ १ ॥ तस्मादनाख्यानाद्ब्रह्मणःसर्वतःसर्वमनाख्यानमुत्पद्यते स्वयमेवतद्घनतांप्राप्यमनःसंपद्यते ॥ २ ॥ तन्मनस्तन्मात्रकल्पनपूर्वकसन्निवेशंभवतिततस्तैजसःपुरुषःसंपद्यतेसोयंब्रह्मेत्यात्मनिनामकृतवान् ॥ ३ ॥ तेनरामयोयंपरमेष्ठीतन्मनस्तत्त्वंविद्धि ॥ ४ ॥ समनस्तत्त्वाकारोभगवान्ब्रह्मासंकल्पमयत्वाद्यदेवसंकल्पयतितदेवपश्यति ॥ ५ ॥ ततस्तेनेयमविद्यापरिकल्पिताअनात्मन्यात्माभिमानमयीतितेनब्रह्मणागिरितृणजलधिमयमिदंक्रमेणजगत्परिकल्पितम् ॥ ६ ॥ इत्थंक्रमेणब्रह्मतत्त्वादियमागतासृष्टिरन्यतएवागतेयमितिलक्ष्यते ॥ ७ ॥ तस्मात्सर्वपदार्थानांत्रैलोक्योदरवर्त्तिनाम् ॥ उत्पत्तिर्ब्रह्मणोरामतरंगाणामिवार्णवात् ॥ ८ ॥ यएवमनुत्पन्नेजगतियाब्रह्मणश्चिन्मनोरूपिणीसाहंकारेपरिकल्प्यब्रह्मब्रह्मतामेति ॥ ९ ॥ यास्त्वन्याश्चिच्छक्तयःसर्वशक्तेरभिन्नाएवकल्प्यंते ॥ १० ॥ जगतिस्फारतांनीतेपितामहरूपेणमनसासमुल्लसंति ॥ ११ ॥ एतेसहस्रशोपिपरिवर्त्तमानजीवाउच्यंते ॥ १२ ॥

स्यजगद्वैचित्र्यरचनानुपपत्तेरसंगोदासीनस्यकर्तृत्वानुपपत्तेश्चनप्रधानकारणतावादोयुक्तः ॥ चितोजडाकारपरिणामायोगान्नविज्ञानविपरिणामवादोयुक्तः ॥ शून्यस्यचकापिकारणत्वादर्शनान्नतत्कारणतावादोपियुक्तः ॥ सर्वेष्वपिकल्पेषुप्रमाणाभावाच्चनान्यतइयमागतासृष्टिरितिनिश्चितेश्रुतिप्रामाण्याल्लाघवाच्चानिर्वचनीयमायाशक्तिकब्रह्मविवर्त्तवादएवपरिशिष्टइत्याशयेनोपसंहरति ॥ तस्मादिति ॥ ८ ॥ यउत्पत्तिप्रकारएवमनयारीत्या ॥ तामेवाह ॥ अनुत्पन्नेइत्यादिना ॥ विवर्त्तत्वादेवपरमार्थतोऽनुत्पन्नेजगति अहंकारसमष्ट्युपाधौब्रह्मप्रविष्टमिवपरिकल्प्यब्रह्मतांपरमेष्ठितामेति ॥ ९ ॥ अन्याव्यष्ट्यहंकारोपहिताश्चिच्छक्तयश्चिदाभासाः ॥ १० ॥ ताःपितामहरूपेणमनसासमष्टिमनोभावेनप्रथमंसमुल्लसंतीत्यर्थः ॥ ११ ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेहिचिन्नभसएवसमुत्थितानभसिमायाकाशेतन्मात्रैर्भूतमात्रोपाधिभिरावलिताःसंतोगगनस्थपवनस्यावहोद्वहादिभेदभिन्नस्यवातस्कंधभेदस्यचांतर्वर्त्तिनोयेचतुर्दशविधालोकास्तेषुयादृशभूतजातमध्यवर्त्तितयायादृशवासनाकर्माभ्यासेयेजीवास्तिष्ठंतिनस्याएवभूतजातेप्राणशक्तिद्वारेणशरीरंस्थावरंजंगमंवाप्रविश्यरेतोरक्तादिरूपांबीजतांगच्छंति ॥ १३ ॥ १४ ॥ ततःसाध्वसाधुवासनासंवलिताभिःपुण्यापुण्यकर्मरज्जुभिर्बद्धंशरीरंलिंगशरीरंयेषांतथाविधाःसंतःप्रोत्पतंत्युत्तमलोकान्निपतंतिनिरयेषुवा ॥ १५॥ कर्मतद्वासनयोश्चकामरागएवबीजमितितन्मयाएवजीवाइत्याह ॥ इच्छैवैताइति ॥ तथाचश्रुतिः ॥ काममयएवायंपुरुषइति ॥ १६॥ कामानुसारिजन्मपरंपरामेवमोक्षावसानांचतुर्द्धापद्यैःप्रपंचयति ॥ काश्चिदित्यादिना ॥ काश्चिद्भूतजातयस्तज्जीवाजननंजनः ॥ जनाजन्मानितत्सहस्राण्यंतोऽवधिस्तत्त्वबोधस्ययासांतथाविधाःसंतःसंसारेपतंतिततोमुच्यंतेइ

तेभ्युत्थिताएवचिन्नभसोनभसितन्मात्रैरावलितागगनपवनांतर्वर्त्तिनश्चतुर्दशविधायेभूतजातमध्यतयाभ्यासेतिष्ठंतितस्याएंवप्राणशक्तिद्वारेणप्रविश्यशरीरंस्थावरंजंगमंवापिबीजतांगच्छंति ॥ १३ ॥ तदनुयोनितोजगतिजायंतेतदनुकाकतालीययोगेनोत्पन्नवासनाप्रवाहानुरूपकर्मफलभागिनोभवंति ॥ १४ ॥ ततःकर्मरज्जुभिर्वासनावलिताभिर्बद्धशरीराभ्रमंतःप्रोत्पतंतिनिपतंतिच ॥ १५ ॥ इच्छैवैताभूतजातयः ॥ १६ ॥ काश्चिज्जनसहस्रांताःपतंतिवनपर्णवत् ॥ कर्मवात्यापरिभ्रांतालुठंतिगिरिकुक्षिषु ॥ १७ ॥ अप्रमेयभवाःकाश्चिच्चित्सत्ताज्ञानमोहिताः ॥ चिरजाताभवंतीहबहुकल्पशतान्यपि ॥ १८ ॥ काश्चित्कतिपयातीतामनोरमभवांतराः ॥ विहरंतिजगत्यस्मिन्शुभकर्मपरायणाः ॥ १९ ॥ काश्चिद्विज्ञातविज्ञानाःपरमेवपदंगताः ॥ वातोद्धूताःपयोमध्यंसामुद्राइवबिंदवः २० ॥ उत्पत्तिःसर्वजीवानामितीहब्रह्मणःपदात् ॥ आविर्भावतिरोभावभंगुराभवभाविनी ॥ २१ ॥ वासनाविषवैषम्यवैधुर्यज्वरधारिणी ॥ अनंतसंकटानर्थकार्यसत्कारकारिणी ॥ २२ ॥ नानादिग्देशकालांतंशैलकंदरचारिणी ॥ रचितोत्तमवैचित्र्यविहितासंभ्रमासती ॥ २३ ॥

त्यर्थः ॥ वनपर्णवदित्यादिपूर्वोत्तरान्वयि ॥ १७ ॥ काश्चित्तुचित्सत्तायाअज्ञानेनमोहिताअतएवाप्रमेयागणनायपरिच्छेद्याभवाजन्मानियासांतथाविधाश्चिरजातास्सत्यइहसंसारेबहुकल्पशतान्यपिभवंति ॥ १८ ॥ कतिपयान्यतीतान्यमनोरमाणिभवांतराणिजन्मानियासांतथाविधाःसत्यःसांप्रतंशुभकर्मपरायणाविहरंतिताअल्पैरेवजन्मभिर्मोक्ष्यंतइतिशेषः ॥ १९ ॥ काश्चित्त्वितःपूर्वमेवमुक्ताइत्याह ॥ काश्चिदिति ॥ वातोद्धूताःसामुद्राबिंदवःपयोमध्यंसमुद्रमिवप्रविशंति ॥ २० ॥ उक्तमुपसंहरति ॥ उत्पत्तिरित्यादिना ॥ २१ ॥ २२ ॥ नानादिक्षुनानादेशेषुनानाकालेषुनानाशैलकंदरेषुचचारिणीकर्मफलभोगसंचारवती ॥ रचितैरुत्तमैर्वैचित्र्यैर्विहिता ॥ आसंभ्रमाःसर्वतोभ्रमायया ॥ परमार्थतस्त्वसती ॥ २३ ॥

१ अंतशब्देनमरणोत्तरंगंतव्यालोकाउपलक्ष्यंतेतेषुच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थंसंसारवल्लींप्रपंच्यतदुच्छेदोपायमाह ॥ एषेति ॥ विक्षुब्धंविक्षेपबहुलंमनएवशरीरंस्वरूपंयस्यास्तथाविधाएषाजगल्लक्षणामोहजांगलस्यजीर्णवल्लीजरल्लतासम्यक्समालोकस्तत्त्वसाक्षात्कारस्तल्लक्षणेनकुठारेणकृत्ताछिन्नासती ॥ वल्लीवेतिव्यतिरेकदृष्टांतः ॥ भूयोनसंरोहतिमूलाज्ञानोच्छेदादितिभावः ॥ २४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेत्रिनवतितमःसर्गः ॥ ९३ ॥ ॥ ७ ॥ ॥ इहद्वादशधाभिन्नावर्ण्यंतेजीवजातयः ॥ उपाधिगुणवैचित्र्याच्चिराचिरविमुक्तिगाः ॥ १ ॥ पूर्वोक्तेजीवानांचिराचिरमुक्तिविभागेरामस्यविशेषजिज्ञासांलिंगैरुपलक्ष्यतद्विस्तरेणवक्तुंवसिष्ठउवाच ॥ उत्तमेत्यादिना ॥ सात्विकतामसराजसभेदेनोत्तमाधममध्यमानांपदार्थानांजीवोपाधीनामितस्ततोभुवनभेदेषुयाउत्पत्तयःप्राक्कथितास्तासामयंवक्ष्यमाणोविभागोस्तितंवक्ष्यामिश्रृण्वित्यर्थः ॥ १ ॥ इदंप्रथमता १ गुणपीवरी २ ससत्वा ३ अधमसत्वा ४ अत्यंततामसी ५ राजसी ६ राजससात्विकी ७ राजसराजसी ८ राजसतामसी ९ राजसात्यंततामसी १० तामसी ११ तामससत्वा १२ तमोराजसी १३ अत्यंत

एषाजगज्जांगलजीर्णवल्लीसम्यक्समालोककुठारकृत्ता ॥ वल्लीवविक्षुब्धमनःशरीराभूयोनसंरोहतिरामभद्र ॥ २४ ॥ ॥ इ०वा०वा०दे०मो०उत्पत्तिदर्शनंनामत्रिनवतितमःसर्गः ॥ ९३ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ उत्तमाधममध्यानांपदार्थानामितस्ततः ॥ उत्पत्तीनांविभागोयंश्रृणुवक्ष्यामिराघव ॥ १ ॥ इदंप्रथमतोत्पन्नोयोस्मिन्नेवहिजन्मनि ॥ इदंप्रथमतानाम्नीशुभाभ्यासमुद्भवा ॥ २ ॥ शुभलोकाश्रयासाचशुभकार्यानुबंधिनी ॥ साचेद्विचित्रसंसारवासनाव्यवहारिणी ॥ ३ ॥ भवैःकतिपयैर्मोक्षमित्युक्तागुणपीवरी ॥ तादृक्फलप्रदानैककार्याकार्यानुमानदा ॥ ४ ॥ तेनरामससत्वेतिप्रोच्यतेसाकृतात्मभिः ॥ अथचेच्चित्रसंसारवासनाव्यवहारिणी ॥ ५ ॥ अत्यंतकलुषाजन्मसहस्रैर्ज्ञानभागिनी ॥ तादृक्फलप्रदानैकधर्माधर्मानुमानदा ॥ ६ ॥

तामसी १४ तिवक्ष्यमाणभेदेषुअंत्ययोर्भेदयोःपंचमनवमयोरंतर्भावाद्द्वादशभेदाःपरिशिष्यंतेतेष्वाद्यांदर्शयति ॥ इदंप्रथमतोत्पन्नइति ॥ योजीवःपूर्वकल्पेचरमजीवजन्मनिशमदमादिसर्वसाधनगुणसंपत्तावपिश्रवणाद्यलाभाद्बलवत्प्रतिबंधाद्वाअनुत्पन्नज्ञानोस्मिन्कल्पेइदंप्रथमतयाप्रथमेजन्मन्येवशमादिसर्वगुणसंपन्नोज्ञानयोग्यउत्पन्नस्तस्यसाजीवजातिरिदंप्रथमतानाम्नीत्यर्थः ॥ प्राक्कल्पीयशुभाभ्याससमुद्भवाहिसा ॥ तस्मिन्नेवजन्मनिमुक्तिभागित्यर्थः ॥२॥ सैवचेत्प्राक्तनवैराग्यमांद्याच्छुभलोकेच्छाकृतोपासनकर्मादिसंवलिताअतएवविचित्रसंसारवासनयाभोगव्यवहारिणीभोगैर्वासनाक्षयेकतिपयैर्दशपंचभिरेवभवैर्जन्मभिर्मोक्षंप्रापयतीतिशेषः ॥ इतिहेतोःसाशांतिरागाद्युभयगुणोपचितत्वाद्गुणपीवरीत्युक्तेत्यर्थः ॥ ३ ॥ तृतीयामाह ॥ तादृगिति ॥ तादृक्शब्दोवीप्सितव्यः ॥ तादृशानितादृशानियानिसुखदुःखफलानितत्प्रदानलक्षणैरेकैर्मुख्यैर्लिंगैःप्राक्कल्पीययोःकार्याकार्ययोःपुण्यपापयोरनुमानदाअनुमापयित्रीसापिक्रमात्सत्वोपचयेशतावधिजन्मभिर्मोक्षभागित्यर्थाद्गम्यते ॥ ४ ॥ चतुर्थीमाह ॥ अथेति ॥ ५ ॥ अत्यंतकलुषाप्राक्तनकल्पसंचितबहुदुष्कर्मदुर्वासनामालिन्यवती ॥ तादृगित्यादिप्राग्वत् ॥ ६ ॥ ॥१६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचमीमाह ॥ सैवेति ॥ सैवतादृग्लक्षणैवसतीअध्यात्मशास्त्रवैमुख्यादस्मिन्कल्पेसंदिग्धमोक्षाकथंचित्संभावितमोक्षा ॥ ७ ॥ षष्ठींलक्षयति ॥ अनद्यतनेति ॥ यातुजातिरनद्यतनजन्मापूर्वकल्पीयवासनानुसारिणीअतएवतादृशचरित्रकारिणीद्वित्रिभवांतराएतत्कल्पीयद्वित्रिजन्ममध्येमध्यमामनुष्यादिरूपायाउत्पत्तिस्तादृक्कार्यातदनुरूपस्वर्गनरकादिप्रापिकासंदिग्धमोक्षासाराजसीत्यर्थः ॥ ८ ॥ ९ ॥ सप्तमींलक्षयति ॥ अविप्रकृष्टेति ॥ सायदाराजसदुःखानुभवप्रयुक्तवैराग्यादिसंपत्त्याअविप्रकृष्टज्ञानजन्मापिभवतितदातत्रत्यस्मृतिमात्रेणमोक्षयोग्यामुमुक्षुभिःप्रोच्यते ॥ सैवमयातादृक्कार्यलिंगकानुमानेनराजससात्विकीप्रोक्तेत्यर्थः ॥ १० ॥ अष्टमींलक्षयति ॥ सैवचेदिति ॥ इतरैरु

असावधमसत्वेतितेनसाधुभिरुच्यते ॥ सैवसंख्यातिगानंतजन्मवृंदादनंतरम् ॥ ७ ॥ संदिग्धमोक्षायदितस्प्रोच्यतेत्यंततामसी ॥ अनद्यतनजन्मातुजातिस्तादृशकारिणी ॥ ८ ॥ योत्पत्तिर्मध्यमापुंसोरामद्वित्रिभवांतरा ॥ तादृक्कार्यातुसालोकेराजसीराजसत्तम ॥ ९ ॥ अविप्रकृष्टजन्मापिसोच्यतेकृतबुद्धिभिः ॥ साहितत्स्मृतिमात्रेणमोक्षयोग्यामुमुक्षुभिः ॥ १० ॥ तादृक्कार्यानुमानेनप्रोक्ताराजससात्विकी ॥ सैवचेदितरैरल्पैर्जन्मभिर्मोक्षभागिनी ॥ ११ ॥ तत्तादृशीहिसातज्ज्ञैःप्रोक्ताराजसराजसी ॥ सैवजन्मशतैर्मोक्षभागिनीचेद्विरैषिणी ॥ १२ ॥ त्वदुक्तातादृगारंभासद्भीराजसतामसी ॥ सैवसंदिग्धमोक्षाचेत्सहस्रैरपिजन्मनाम् ॥ १३ ॥ तदुक्तातादृशारंभाराजसात्यंततामसी ॥ भुक्तजन्मसहस्रातुयोत्पत्तिर्ब्रह्मणोनृणाम् ॥ १४ ॥ चिरमोक्षाहिकथितातामसीसामहर्षिभिः ॥ तज्जन्मनैवमोक्षस्यभागिनीचेत्तदुच्यते ॥ १५ ॥ तज्ज्ञैस्तामससत्वेतितादृशारंभशालिनी ॥ भवैःकतिपयैर्मोक्षभागिनीचेत्तदुच्यते ॥ १६ ॥ तमोराजसरूपेतितादृशैर्गुणबृंहितैः ॥ पूर्वजन्मसहस्राढ्यापुरोजन्मशतैरपि ॥ १७ ॥ मोक्षायोग्याततःप्रोक्तातज्ज्ञैस्तामसतामसी ॥ पूर्वंतुजन्मलक्षाढ्याजन्मलक्षैःपुरोपिचेत् ॥ १८ ॥ संदिग्धमोक्षातदसौप्रोच्यतेत्यंततामसी ॥ सर्वाएतारसमायांतिब्रह्मणोभूतजातयः ॥ १९ ॥

क्तमानुषातिरिक्तैरल्पैर्यक्षगंधर्वादिजन्मनिःक्रमाज्ज्ञानप्राप्त्यामोक्षभागिनीचेद्राजसराजसीत्यर्थः ॥ ११ ॥ नवमींलक्षयति ॥ सैवजन्मशतैरिति ॥ १२ ॥ तादृगारंभाराजसतामसफलोपभोजककर्मोपासनाद्यारंभवती ॥ दशमींलक्षयति ॥ सैवेति ॥ १३ ॥ एकादशीमाह ॥ मुक्तेति ॥ ब्रह्मणोहिरण्यगर्भाद्याउत्पत्तिःकल्पादावाविर्भावः ॥ १४ ॥ चिरमोक्षाकल्पांतरमोक्षा ॥ द्वादशीमाह ॥ तज्जन्मनैवेति ॥ तज्जन्मनातामसप्रथमजन्मना ॥ तामसेदानवरक्षःपिशाचादिजन्मनिसत्वोत्कर्षात्प्रह्लादककर्कट्यादीनांज्ञानंप्रसिद्धमितिभावः ॥ १५ ॥ राजसतामसीप्राक्प्रोक्तातस्याएवकार्यपौर्वापर्येणत्रयोदशीमाह ॥ भवैरिति ॥ १६ ॥ गुणबृंहितैरजस्तमोबहुलफलैरुपलक्षितेइत्यर्थः ॥ १७ ॥ चतुर्दशींविधामाह ॥ पूर्वमिति १८ ॥ सर्वासामुपाधिद्वाराब्रह्मप्रभवत्वंब्रह्माभेदसंभावनायदृष्टांतभेदैर्द्रढयन्नाह ॥ सर्वाएताइति ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ २० ॥ २१ ॥ कणाःस्फुलिंगाः ॥ २२ ॥ २३ ॥ विटपश्रियःशाखाशोभाः ॥ २४ ॥ २५ ॥ एवमंशांशिभावकल्पनयाअभेदयोग्यतांप्रदर्श्यउपाधिमिथ्यात्वप्रदर्शनेनाभेदंदर्शयति ॥ अजस्यैवेति ॥ २६ ॥ उपाधिमिथ्यात्वंतदनन्यत्वन्यायोपपादनेनदृष्टांतैर्दर्शयितुंजगतोब्रह्मकार्यत्वमाह ॥ सर्वाएवेत्यादिना ॥ २७ ॥ २८ ॥ २९ ॥ स्वस्यआ

किंचित्प्रचलिताभोगात्पयोराशेरिवोर्मयः॥सर्वाएवविनिष्क्रांताब्रह्मणोजीवराशयः॥२०॥स्वतेजःस्पंदिताभोगाद्दीपादिवमरीचयः॥
सर्वाएवसमुत्पन्नाब्रह्मणोभूतपंक्तयः॥ २१ ॥ स्वमरीचिबलोद्भूताज्वलिताग्नेःकणाइव ॥ सर्वाएवोत्थितास्तस्माद्ब्रह्मणोजीवराशयः
॥ २२ ॥ मंदारमंजरीरूपाश्चंद्रबिंबादिवांशवः॥ सर्वाएवसमुत्पन्नाब्रह्मणोदृश्यदृष्टयः॥२३॥ यथाविटपिनश्चित्रास्तद्रूपाविटपश्रियः॥
सर्वाएवसमुत्पन्नाब्रह्मणोजीवपंक्तयः॥ २४ ॥ कटकांगदकेयूरयुक्तयःकनकादिव ॥ सर्वाएवोत्थितारामब्रह्मणोजीवराशयः॥ २५ ॥
निर्झरादमलोद्योतात्पयसामिवबिंदवः॥ अजस्यैवाखिलारामभूतसंततिकल्पनाः॥२६॥ आकाशस्यघटस्थालीरंध्राकाशादयोयथा॥
सर्वाएवोत्थितालोककलनाब्रह्मणःपदात्॥२७॥ सीकरावर्त्तलहरीबिंदवःपयसोयथा॥ सर्वाएवोत्थितारामब्रह्मणोदृश्यदृष्टयः[1]॥२८॥
मृगतृष्णातरंगिण्योयथाभास्करतेजसः॥ सर्वादृश्यदृशोद्रष्टुर्व्यतिरिक्तानरूपतः ॥ २९ ॥ शीतरश्मेरिवज्योत्स्नास्वालोकइवतेजसः॥
एवमेताहिभूतानांजातयोविविधाश्रयाः॥ ३० ॥ यस्मादेवसमायांतितस्मिन्नेवविशंतिच ॥ काश्चिज्जन्मसहस्रांतेजातयश्चिरकालि
काः॥ काश्चित्कतिपयातीतजन्मरूपाव्यवस्थिताः ॥ ३१ ॥ इत्थंजगत्सुविविधेषुविचित्ररूपास्तस्येच्छयाभगवतोव्यवहारवत्यः॥ आ
यांतियांतिनिपतंतितथोत्पतंतिरूपश्रियःकणघटाइवपावकोत्थाः॥ ३२ ॥ ॥इ०वा०वा०दे०मोक्षोपायेषूत्प०ब्रह्मणःसर्वमुत्पद्यतइ
तिकथनंनामचतुर्नवतितमःसर्गः॥ ९४॥ ॥ ७ ॥

लोकःप्रभेव ॥ उपसंहरत्येवमित्यादिना ॥ ३० ॥ समायांत्याविर्भवंति ॥ विशंतिउपाधिविलयेनैक्यमापद्यंते ॥ काश्चिदित्यादिःप्रागुक्तस्यानुवादः ॥ ३१ ॥ तस्येश्वरात्मनोभगवतोब्रह्मणोव्यवहारवत्योरूपश्रियःउपाधिरूपाण्येवश्रीर्यासांतथाविधाःप्रागुक्तजीवजातयोनिपतंतिभवाद्भवांतरेभ्रमंति ॥ पावकोत्थाःकणघटाःस्फुलिंगसमूहाइव ॥ ३२ ॥
॥ इतिश्रीवासिष्ठम०ता०उ०चतुर्नवतितमःसर्गः ॥ ९४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

[1] दृश्यदृष्टयइत्यपिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

अप्रबुद्धजनौघस्यप्रबोधायनवस्तुतः ॥ कर्मकर्त्रोः सहोद्भूतिराक्षिप्येहसमर्थ्यते ॥ १ ॥ ब्रह्मणएवकल्पादौसर्वाजीवजातयआविर्भवंतीत्युक्तिव्याजेनब्रह्मैवोपाधिषुजीवभावेनप्रविष्टमितिदर्शितम् एवंचआगंतुकेजीवभावेनप्राक्तनंकर्मनिमित्तंवक्तुंशक्यम् तस्यप्राक्तनकर्तृसापेक्षत्वात् ॥ तदर्थंजीवस्यानादित्वाभ्युपगमेतुनब्रह्मणःप्रागुक्तऔपाधिकोजीवभावःसमर्थयितुंशक्यइत्युभयथापिदोषंप्रसक्तंदृष्टिभेदाश्रयेणपरिहरिष्यन्गूढाभिसंधिःपरिशेषायौक्तिकदृशासहोत्पत्तिपक्षंदर्शयति ॥ अभिन्नाविति ॥ अन्योन्यतादात्म्यकल्पनादभिन्नौअतःसमंयुगपदेवपरात्पदाद्ब्रह्मणःसकाशात्स्वयंस्वस्वभाववशादेवसर्गादौप्रकटतांयातौ ॥ तथाचभगवतोवाक्यम् ॥ नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभुः॥ नकर्मफलसंयोगंस्वभावस्तुप्रवर्त्ततेइति ॥ १ ॥ तदाविर्भावेतादात्म्याध्यासेचजीवानांस्वभावशब्दितंस्वाज्ञानमेवहेतुरितिसदृष्टांतमाह ॥ सर्वेति ॥ २ ॥ अतएवसृष्टिवादोयमज्ञसंमतव्यवहारभूमावेवनपरमार्थपदेइत्याह ॥ अप्रबुद्धेति ॥ ३ ॥ ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः ॥ नमुमुक्षुर्नवैमुक्तिरित्येषापरमार्थता ॥ तदेतद्ब्रह्मापूर्वमनपरमनंतरम

श्रीवसिष्ठउवाच॥ ॥अभिन्नौकर्मकर्तारौसममेवपरात्पदात्॥ स्वयंप्रकटतांयातौपुष्पामोदौतरोरिव॥१॥सर्वसंकल्पनामुक्तेजीवाब्रह्मणिनिर्मले॥ स्फुरंतिविततेव्योम्निनीलिमेवाज्ञचक्षुषः॥२॥अप्रबुद्धजनाचारोयत्रराघवदृश्यते॥तत्रब्रह्मणउत्पन्नाजीवाइत्युक्तयःस्थिताः॥३॥ संप्रबुद्धजनाचारेवक्तुमेतन्नशोभनम्॥ यद्ब्रह्मणइदंजातंनजातंचेतिराघव॥४॥ काचिद्वाकलनायावन्ननीताराघवप्रथाम्॥ उपदेश्योपदेशश्रीस्तावद्वोकेनशोभते॥५॥ अतोभेददृशादीनामंगीकृत्योपदिश्यते॥ब्रह्मेदमेतेजीवावैवेतिवाचामयंक्रमः॥६॥इति दृष्टोनिरासंगाद्ब्रह्मणोजायतेजगत्॥ तज्जंतदेवतद्धेतुगतंदुरवबोधतः॥७॥ मेरुमंदरसंकाशाबहवोजीवराशयः॥ उत्पत्योत्पत्यसंलीनास्तस्मिन्नेवपरेपदे॥८॥

वाग्ब्रमयमात्माब्रह्मसर्वानुभूरित्यादिश्रौतपारमार्थिकदृशातुनजगतोजीवानांकर्मणांवाउत्पत्त्यादिकंतन्निषेधोवावक्तुंशक्यइत्याह ॥ संप्रबुद्धेति ॥ ४ ॥ तर्हिपरमार्थोपदेशकेशास्त्रेकिमज्ञदृष्ट्युपपाद्यसर्गाद्युक्तेःप्रयोजनंतत्राह ॥ काचिद्वेति ॥ कलनाद्वितीयकल्पना ॥ ५ ॥ दीनांशोच्याद्वैतकल्पनांयावद्व्यवहारकालमंगीकृत्येत्यर्थः ॥ वैइतिनिश्चयेवाइतिसंशये इतिशब्दःप्रकारे ॥ यावत्प्रमाणपरिशोधंनिश्चयेनयावत्प्रमेयनिर्णयंसंशयेनप्रकारेणांगीकृत्येत्यर्थः ॥ ६ ॥ लोकेप्यभ्युपगम्यवादोबहुशःप्रसिद्धइत्याह ॥ इतिदृष्टइति ॥ यद्यभ्युपगतंद्वैतंतर्हिकथमपोद्यतेतत्राह ॥ निरासंगादिति ॥ निरासंगादसंगादद्वितीयाद्ब्रह्मणोजगज्जायतेइतिप्रथमंव्युत्पादितेयत्तज्जंतदुपादानकंतत्तदेव यतस्तदुत्पत्तेःप्राक्हेतुगतमुपादानस्थंतदेवआविर्भावदशायामपिहेतुगतत्वात्तावन्मात्रमपिदुरवबोधतोभ्रांतिज्ञानात्पृथगिवभातीतिबाध्यतइत्यर्थः ॥ ७ ॥ तदुपादानकत्वंतुकालत्रयेपितत्रैवोत्पद्यलीयमानत्वात्सिद्धमित्याह ॥ मेर्वित्यादिचतुर्भिः ॥ जीवशब्देनतदुपाधयोगृह्यंते ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ १० ॥ ११ ॥ गूढाभिसंधिमुपसंहरति ॥ पुष्पामोदाविति ॥ अभिन्नाविति ॥ पुष्पामोदावितिदृष्टांतविशेषणत्वात्पुंस्त्वम् ॥ समायातेइतितुदार्ष्टांतिकविशेषणमितिनपुंसकमनपुंसकेनेतिनपुंसकैकशेषः ॥ १२ ॥ सहोत्पत्तिकल्पनायांदृष्टानुसारोप्यस्तीत्याह ॥ दृष्टमिति ॥ वस्तुवृत्त्याअभवाअपिभावैर्वासनाभूतमात्रोपाधिभिरुद्वर्वंतितत्कालंप्रस्फुरंतिसंचलंतिचेतिसहोत्पत्तितादात्म्ययोःप्रत्यक्षंदर्शनादित्यर्थः ॥ १३ ॥ तथाचतदुत्पत्तौनकर्माणिनवाअन्यन्निमित्तंकर्तृपूर्वकत्वात्तेषामतःपरिशेषात्प्रागुक्ताज्ञानमेकमेवेत्याह ॥ हेतुरिति ॥ अयमभिसंधिः ॥ नतावत्कर्तुरनादितावक्तुंशक्या ॥ कर्तृत्वस्यस्वाभाविकत्वेअनादित्वभावस्याग्न्यौष्ण्यस्येवोपायसहस्रैरप्यपरिहार्यतयाऽनिर्मोक्षप्रसंगात् ॥ औपाधिकत्वेसउपाधिरविद्यैववास्यादन्योवा ॥ आद्येफलतःसैद्धांतिकपरिशेषपक्षांतर्गतिः ॥ किंचअविद्यायाआत्मनिकर्तृतापादकत्वंस्वतएववाअन्यसापेक्षतयावा ॥ नस्वतः॥सुषुप्तिमूर्छाप्रलयेष्वप्यात्मनःकर्तृत्वापादनापत्तेः ॥ अन्यसापेक्षतयाचेद्यत्सापेक्षासत्यविद्याकर्तृतामापादयतिसएवोपाधिःस्यान्नाविद्या ॥ नह्युपाधेरुपाधिर्भवतीति॥द्वितीयेपिसउपाधिरविद्याकार्यंस्वतंत्रोवा ॥ स्वातंत्र्येयद्यनादिस्तर्हिसुषुप्तिप्रलययोरपिकर्तृतामापादयेत् ॥ यदिसादिस्तर्हितदुपहितकर्तृरूपमपिसाद्येवेतिनानादिकर्तृसिद्धिः ॥

अथानंताःस्फुरंत्येतेजायमानाःसहस्रशः॥ नानाःकंकुभ्निकुंजेषुपादपेष्विवपल्लवाः॥ ९ ॥ जीवौघाश्चोद्भविष्यंतिमधाविवनवांकुराः॥ तत्रैवलयमेष्यंतिग्रीष्मेमधुरसाइव ॥ १० ॥ तिष्ठंत्यजस्रंकालेषुतएवान्येचभूरिशः॥ जायंतेचप्रलीयंतेपरस्मिन्जीवराशयः ॥ ११ ॥ पुष्पामोदाविवाभिन्नौपुमान्कर्मचराघव॥ परमेशात्समायातेतत्रैवविशतःशनैः॥ १२ ॥ दृष्टमेतेजगत्यस्मिन्दैत्योरगनरामराः॥उद्भवंत्यभवाभावैःप्रस्फुरंतिपुनःपुनः॥ १३ ॥ हेतुर्विहरणेतेषामात्मविस्मरणादृते॥ नकश्चिल्लक्ष्यतेसाधोजन्मांतरफलप्रदः॥ १४ ॥ ॥श्रीरामउवाच॥ ॥ अविसंवादिनार्थेयद्यत्प्रामाणिकदृष्टिभिः॥ वीतरागैर्विनिर्णीतंतच्छास्त्रमितिकथ्यते॥ १५ ॥ महासत्वगुणोपेतायेधीराःसमदृष्टयः॥ अनिर्देश्यकलोपेताःसाधवस्तउदाहृताः॥ १६ ॥

अविद्याकार्योपाधिपक्षेप्ययमेवदोषइतिनित्यस्याप्यात्मनःकर्त्रुपाधिसंबंधस्यप्रतिकल्पंप्रतिदिनंचभेदात्तदधीनस्योपहितकर्तृरूपस्यकर्मसहोत्पत्तिःकर्मशक्तिमदुपाधितादात्म्यरूपताच ॥ तत्रचात्मविस्मरणमेवबीजमितिपक्षएवयौक्तिकदृशापरिशिष्यते ॥ एतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीतिश्रुतिरप्यत्रानुकूलेति ॥१४॥ अस्मिन्पक्षेअनुपपत्तिमुपपादयिष्यन्रामस्तदुपयोगिनींभूमिकांरचयितुंशास्त्रलक्षणमाह ॥ अविसंवादिनेति ॥ अलौकिकेधर्मेब्रह्मणिचप्रमाणंश्रुतिस्तत्संभवादृष्टिर्येषांतैःप्रामाणिकदृष्टिभिर्वीतरागैश्चमन्वादिभिर्धर्माधर्मरूपेअर्थेस्वमूलश्रुत्यविसंवादिनाजैमिनीयादितंत्रसिद्धन्यायकलापेनयद्यद्विनिर्णीतंनिर्णीयनिबद्धंस्मृतिपुराणकल्पसूत्रेतिहासादितच्छास्त्रमितिकथ्यते ॥ तथाचश्रुतयस्तन्मूलस्मृत्यादयश्चालौकिकार्थेमानमित्याशयः ॥१५॥ एवंसदाचारोपिमानमितिवक्तुंसतांलक्षणमाह ॥ महासत्वेति ॥ महताअत्यंतविशुद्धेनसत्वगुणेनोपेताः धीराविषयैर्दुःखस्थानैश्चाप्रकंप्याः समदृष्टयःअरागद्वेषाः अनिर्देश्याशब्देनाभिलपितुमशक्यायानिरतिशयानंदब्रह्मसाक्षात्कारकलातदुपेताः तेसाधवःसंतइत्यर्थः ॥१६॥

---

१ बहुषुपुस्तकेषुककुभकुंजेष्वितिपाठोदृश्यतेतत्रदिग्वाचकककुभाशब्दस्यह्रस्वत्वमार्षम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधुवृत्तमुक्तलक्षणानांसतामाचारःशास्त्रंश्रुतिस्मृतीचेतिद्वयंबालानामज्ञाततत्त्वानांशिष्टानांदृष्टिर्नेत्रद्वयंधर्मब्रह्मतत्त्वदर्शनायेत्यर्थः ॥ १७॥ साधुःस्वर्गमोक्षोपयोगीयःसंव्यवहारस्तदर्थंतत्प्रयोजनंशास्त्रंसर्वैःशिष्टाइतिशेषः ॥ १८ ॥ इहअस्मिन्लोकेप्रामाणिकजनेवेदेचइत्थंश्रूयतइतिश्रुतिर्निरूढप्रवादःअस्तीतिशेषः ॥ प्रवादमेवाभिलप्यदर्शयन्विवक्षितमर्थमाह ॥ यथेत्यादिना ॥ पर्यायेणअयौगपद्येनहेतुफलभावेनेतियावत् ॥ १९ ॥ तदेवस्पष्टमाह ॥ कर्मणेति ॥ प्रणीयतेनिष्पाद्यते ॥ २० ॥ २१ ॥ कर्मैववासनाविशिष्टनीकर्तृहेतुरित्याह ॥ ययेति ॥ समनुभूयतेतेनजंतुनेतिशेषः ॥ २२ ॥ एवंभूमिकांकृत्वाकर्तृकर्मणोःसहोत्पत्तिपक्षमाक्षिपति ॥ एवंस्थितेइति ॥ सहोत्पत्तिपक्षेहिप्राक्तनंकर्मविनैवोत्पत्तिरितिफलितंतच्चायुक्तम् ॥ साधुकारीसाधुर्भवतिपापकारीपापोभवति पुण्योवैपुण्येनकर्मणाभवतिपापःपापेन कर्मणाजायतेजंतुरित्यादिश्रुतिस्मृतिशिष्टप्रवाद

द्वयंहिदृष्टिर्बालानांसिद्धयेसर्वकर्मणाम् ॥ साधुवृत्तंतथाशास्त्रंसर्वदैवानुवर्त्तते ॥ १७ ॥ साधुसंव्यवहारार्थंशास्त्रंयोनानुवर्त्तते ॥ बहिःकुर्वतितंसर्वेसचदुःखेनिमज्जति ॥ १८ ॥ इहलोकेचवेदेचश्रुतिरित्थंसदाप्रभो ॥ यथाकर्मचकर्त्ताचपर्यायेणेहसंगतौ ॥ १९ ॥ कर्मणाक्रियतेकर्ताकर्त्राकर्मप्रणीयते ॥ बीजांकुरादिवन्न्यायोलोकवेदोक्तएवसः ॥ २० ॥ कर्मणोजायतेजंतुर्बीजादिवनवांकुरः ॥ जंतोःप्रजायतेकर्मपुनर्बीजमिवांकुरात् ॥ २१ ॥ ययावासनयाजंतुर्नीयतेभवपंजरे ॥ तद्वासनानुरूपेणफलंसमनुभूयते ॥ २२ ॥ एवंस्थितेकथंनामजन्मबीजेनकर्मणा ॥ विनोत्पत्तिस्त्वयाप्रोक्ताभूतानांब्रह्मणःपदात् ॥ २३ ॥ पक्षेणानेनभगवन्भवताजन्मकर्मणोः ॥ तिरस्कृताजगज्जातासाविनाभावितैतयोः ॥ २४ ॥ ब्रह्मण्यकारणेब्रह्मन्ब्रह्मादिषुफलेषुच ॥ कर्मणांफलमस्तीतिद्वयंलोकेप्रमार्जितम् ॥ २५ ॥ संजातेसंकरेलोकेकर्मस्वफलदायिषु ॥ मात्स्यन्यायेविलसतिनाशएवावशिष्यते ॥ २६ ॥ किंतत्कृतंभवत्येवभगवन्ब्रूहितत्त्वतः ॥ एनंमेसंशयंस्फारंछिंधिवेद्यविदांवर ॥ २७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ साधुराघवपृष्टोस्मित्वयाप्रश्नमिमंशुभम् ॥ शृणुवक्ष्यामितेयेनश्शंज्ञानोदयोभवेत् ॥ २८ ॥

विरोधादित्यर्थः ॥ २३ ॥ अनेनसहोत्पत्तिपक्षेणैतयोर्जीवकर्मणोर्जगतिजाताप्रमाणनिरूढाअविनाभाविताअन्वयव्यतिरेकशालिनीपरस्परहेतुफलतातिरस्कृताभवतेत्यर्थः ॥ २४ ॥ कर्मणांअकारणेअद्वयत्वात्स्वातिरिक्तकारणशून्येमायाशबलेब्रह्मणिवियदादिस्थूलदेहांतभोगायतनसर्गरूपंफलमस्तितत्फलेषुब्रह्मादिषुहिरण्यगर्भादिस्थूलसूक्ष्मोपाधिषुभोगतत्सामग्रीसर्गरूपंफलमस्तीतिलोकेप्रसिद्धंप्रवादद्वयंत्वयाप्रमार्जितमित्यर्थः ॥ २५ ॥ दोषांतरमप्याह ॥ संजातइति ॥ कर्मस्वफलदायिषुनिष्फलेषुसत्सुनरकादिभयाभावान्मत्स्यैरिवबलवद्भिर्हिंसनभक्षणैर्मात्स्यन्यायेविलसतिसति ॥ २६ ॥ तत्तस्मात्हेब्रह्मन्तत्त्वतोयथार्थतोब्रूहि ॥ कृतंकर्मफलाल्पनाभवत्येवांकिंवानेतिएनंसंशयंछिधि ॥ २७ ॥ इत्थमाक्षिप्तोवसिष्ठःप्रामाणिकमाक्षेपंप्रशंसंस्तत्समाधिंप्रतिजानीते ॥ साध्विति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोत्पत्तिपक्षेपियथानकश्चिद्दोषस्तथोपपादयितुंभूमिकांरचयति ॥ मानसइति॥ यद्धिमनसाध्यायतितद्वाचावदतितत्कर्मणाकरोतीतिश्रुतेर्मनःसंबंधीयःकलाकलनरूपतःक्रियाकौशलप्रतिसंधानरूपेणसमुन्मेषोविकासःएतत्तत्प्रसिद्धंकर्मणांबीजम् ॥ कथंज्ञायते ॥ यतःअस्यैवोत्तरत्रक्रियानिष्पत्तिरूपंफलंविद्यतेनामनःपूर्वकदेहचेष्टामात्रस्येत्यर्थः ॥२९॥ फलमस्यैवविद्यतेइतियदुक्तंतदुदाहरत्यदर्शयति ॥ यदैवेति ॥ आदिसर्गेपरब्रह्मणःपदाद्यदैवमनोलक्षणंतत्त्वंवस्तूत्थितंतदैवजंतूनांतदुपाध्याविर्भूतसमष्टिव्यष्टिजीवानांकर्माप्युत्थितम् ॥ जीवश्चप्राक्तनवासनानुसारिदेहतयादेहाहंभावेनस्थितः ॥ तथाचश्रुतिः ॥ तन्मनोकुरुतआत्मन्वीस्यामितिसोर्चन्नचरदितिचमनोजन्माधीनमेवात्मन्विताशब्दितदेहित्वंसंचरणलक्षणंकर्मचदर्शयति ॥ यद्यद्भवंतितदाभवंतीतिचश्रुत्यंतरम् ॥ तथाचमनएवकर्तॄनात्मेतिदर्शयितुंमयासहोत्पत्तिपक्षोदर्शितइतिभावः ॥३०॥ एवंकर्तृकर्माभेदोक्तेरपिकर्मणोमनोधर्मतैवनात्मधर्मताकौटस्थ्यस्वभावविरोधादितिप्रदर्शनेतात्पर्यमितिसदृष्टांतमाह ॥ कुसुमेति ॥ आशयोत्रांतस्थआमोदः ॥ ३१ ॥ ननुकर्मशब्देनयज्ञादिस्तज्जन्यमदृष्टंवोच्यते ॥ तत्राद्योदेहधर्मोद्वितीयस्तुभोक्तृसमवायीतत्कथंमनोधर्मतानयोस्तत्राह ॥ क्रियेति ॥ क्रियैवहिकर्मसंस्कारात्मनामनसिस्थिताअदृष्टंफलात्मनाआविर्भूतादेहस्वर्गनरकादिरूपाभवति ॥ एवंचतस्यकर्मणआश्रयोदेहमपिपूर्वंमनएव ॥ सविज्ञानोभवतिसविज्ञानमेवान्ववक्रामतीतिश्रुत्यामनसोभाविदेहाकाराभिमानंप्राप्तस्यैवपूर्व

मानसोयंसमुन्मेषःकलाकलनरूपतः ॥ एतत्तत्कर्मणांबीजंफलमस्यैवविद्यते ॥ २९ ॥ यदैवहिमनस्तत्त्वमुत्थितंब्रह्मणःपदात् ॥ तदैवकर्मजंतूनांजीवोदेहतयास्थितः ॥ ३० ॥ कुसुमाशययोर्भेदोनयथाभिन्नयोरिह ॥ तथैवकर्ममनसोर्भेदोनास्त्यविभिन्नयोः ॥ ३१ ॥ क्रियास्पंदोजगत्यस्मिन्कर्मेतिकथितोबुधैः ॥ पूर्वंतस्यमनोदेहंकर्मातश्चित्तमेवहि ॥ ३२ ॥ नसशैलोनतद्व्योमनसोब्धिश्चनविष्टपम् ॥ अस्तियत्रफलंनास्तिकृतानामात्मकर्मणाम् ॥ ३३ ॥ ऐहिकंप्राक्तनंवापिकर्मयद्रचितंस्फुरत् ॥ पौरुषोसौपरोयत्नोनकदाचननिष्फलः ॥ ३४ ॥

देहादुत्क्रमणश्रुतेः ॥ आतिवाहिकदेहस्यैववासनाबलेनस्थूलदेहताकल्पनमितिप्राग्व्युत्पादनाच्च ॥ अतश्चित्तंमनएवकर्मधर्मकत्वात्कर्मेत्यर्थः ॥ ३२ ॥ एवंचत्वदुक्तःकर्मनैष्फल्यदोषोपिपरिहृतोमनःकार्यस्यसर्वस्यापिप्रपंचस्यकर्मफलत्वोपपत्तेरित्याशयेनाह ॥ नसइति ॥ फलशब्दोभावप्रधानः ॥ फलत्वमित्यर्थः ॥ ३३ ॥ रचितंसावधानमनुष्ठितंसांगतयाचस्फुरद्विराजमानंयत्कर्मअसौपौरुषःप्रयत्नएवसचकदाचनकदाचिदपिनिष्फलोनेत्यर्थः ॥ अयमभिप्रायः ॥ अविद्योत्थंमनएवक्रियाशक्तिमत्वाच्चिदात्मोपाधित्वाच्चकर्तृभोक्तृच ॥ तच्चान्नमयंसौम्यमनस्तन्मनोकुरुतत्रीण्यात्मनेकुरुतमनोवाचंप्राणमित्यादिश्रुतेःप्रागुक्तयुक्तेश्च ॥ यद्यपिप्रतिकल्पंप्रतिदिनंचोत्पद्यप्रलीयतेतथापिप्रत्यहमाविर्भूयनिशितमसितिरोभवंतीकुड्यच्छायेवप्रतिदर्पणसन्निधानमाविर्भूयदर्पणापसरणेतिरोभवन्मुखप्रतिबिंबमिवचतदेवेदमित्याबाधितप्रत्यभिज्ञाप्रामाण्यादुपहितात्मैक्याच्चनभिद्यतेइत्यनाद्यपिभवति ॥ नहिनाशोनामशून्यतापत्तिरुत्पत्तिर्वाअसतःसत्वंयेनप्रत्यहंसुषुप्तौनाशाद्भेदःस्यात् ॥ सत्कार्यवादाश्रयणाच्चाविद्याबीजात्मनासतोरेवप्राक्तनकर्तृकर्मणोस्तत्फलवियदादिप्रपंचस्यचसहोत्पत्त्यभ्युपगमेपिनकृतहानाकृताभ्यागमप्रसंगइतिनशास्त्रप्रामाण्यबाधोनवामात्स्यन्यायप्रसक्तिर्नवाजन्मकर्मणोरविनाभावनियमप्रमार्जनंमनएवतिरोभूतावस्थमाविर्भूतावस्थंचाविद्येत्यभ्युपगमाच्चात्मविस्मरणैकहेतुपरिशेषोक्तिरप्यविरुद्धेतितत्त्वमिति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहोत्पत्त्यैक्यपक्षाभ्युपगमस्यांकिफलंतदाह ॥ कृष्णतेति ॥ तथाचकर्ममनसोरन्यतरनाशार्थिनास्पंदात्मकस्यप्राणस्यमनसोवानिरोधलक्षणोहठयोगोराजयोगोवाभ्यसनीय इतितत्फलमितिभावः ॥ ३५ ॥ योगजन्यसाक्षात्कारेणाविद्यानाशेचात्यंतिकउभयनाशोभवतिनान्यथेत्याशयेनमुक्तस्येत्युक्तिः ॥ ३६ ॥ श्लिष्टयोस्तादात्म्येनसंगतयोः ॥ ३७ ॥ एकनाशेअपरनाशइत्यत्रोपपत्तिंदर्शयन्नुपसंहरति ॥ चित्तमिति ॥ यतश्चित्तंस्पंदविलासमेत्यविहितनिषिद्धनिष्पादनेनपुण्यपापात्मकधर्माधर्माकारपरिणामिभवति ॥ अथकर्मचतत्फलभोगानुरूपस्पंदात्मकविलासमेत्यचित्तंभवति ॥ अतस्तेपरस्परेणनिमित्तेनधर्मपदंकर्मपदंचगतेवाचकत्वेनप्राप्तेधर्मकर्मशब्दाभ्यांलोकेव्यवह्रियेतेइत्यर्थः ॥ ३८ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०पंचनवतितमःसर्गः ॥ ९५ ॥ ॥ ७ ॥ ॥ मनसःकर्मवैचित्र्यादिहनानाविधाकृतेः ॥ व्याख्यायंतेभिधाभेदास्तत्त्वं

कृष्णतासंक्षयेयद्वत्क्षीयतेकज्जलंस्वयम् ॥ स्पंदात्मकर्मविगमेतद्वत्क्षीयतेमनः ॥ ३५ ॥ कर्मनाशेमनोनाशोमनोनाशोह्यकर्मता ॥ मुक्तस्यैषभवत्येवनामुक्तस्यकदाचन ॥ ३६ ॥ वह्न्यौष्ण्ययोरिवसदाश्लिष्टयोश्चित्तकर्मणोः ॥ द्वयोरेकतराभावेद्वयमेवविलीयते ॥ ३७ ॥ चित्तंसदास्पंदविलासमेत्यस्पंदैकरूपंननुकर्मविद्धि ॥ कर्माथचित्तंकिलधर्मकर्मपदंगतेरामपरस्परेण ॥ ३८ ॥ ॥ इत्यार्षेवा० वा०दे०मो०उ०कर्मपुरुषयोरैक्यप्रतिपादनंनामपंचनवतितमःसर्गः ॥ ९५ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ मनोहिभावनामात्रंभावनास्पंदधर्मिणी ॥ क्रियातद्भावितारूपंफलंसर्वोनुधावति ॥ १ ॥ ॥ श्रीरामउवाच ॥ ॥ विस्तरेणममब्रह्मन्जडस्याप्यजडाकृतेः ॥ रूपमारूढसंकल्पंमनसोवक्तुमर्हसि ॥ २ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अनंतस्यात्मतत्त्वस्यसर्वशक्तेर्महात्मनः ॥ संकल्पशक्तिरचितंयद्रूपंतन्मनोविदुः ॥ ३ ॥ भावःसदसतोर्मध्येनृणांचलतियश्चलः ॥ कलनोन्मुखतांयातस्तद्रूपंमनसोविदुः ॥ ४ ॥ नाहंवेदावभासात्माकुर्वाणोस्मीतिनिश्चयः ॥ तस्मादेकांतकलनस्तद्रूपंमनसोविदुः ॥ ५ ॥ कल्पनात्मिकयाकर्मशक्त्याविरहितंमनः ॥ नसंभवतिलोकेस्मिन्गुणहीनोगुणीयथा ॥ ६ ॥

चास्यविशुद्धये ॥ १ ॥ उक्तार्थप्रपंचनार्थस्यसर्गस्यार्थंसंक्षिप्यादौदर्शयति ॥ मनइति ॥ अनुभूतानामर्थानांभावनाविभावनाख्यंविकल्पनंतन्मात्रम् ॥ साभावनास्पंदधर्मिणीसतीविहितनिषिद्धक्रियाभवति ॥ तस्याःक्रियायाएवसौक्ष्म्याददृष्टभावापन्नायाजन्मांतराद्यात्मकंयद्भावितारूपंतदेवफलंसर्वोजंतुरनुधावतिअनुसरति ॥ मनएवक्रमेणोभयभावमापद्यतइत्यर्थः ॥ १ ॥ प्रश्नःस्पष्टः ॥ २ ॥ सर्वशक्तेःसर्वशक्तिमन्मायाशबलस्यरचितंप्रथमनिष्पादितंसंकल्पशक्तियद्रूपंतन्मनइत्यर्थः ॥ ३ ॥ सांप्रतिकेपिनृणांव्यवहारेतत्प्रसिद्धमित्याह ॥ भावइति ॥ स्थाणुर्वापुरुषोवेतिविकल्पेसदसतोःकोट्योर्योभावश्चलोदोलायमानश्चलतिसंचरतीत्यर्थः ॥ कलनोन्मुखतांकोटिद्वयस्यस्मृतिपूर्वकताम् ॥ ४ ॥ सदाचिद्रूपत्वाद्भासमानेप्यात्मनिनाहंवेदेतिप्रत्ययः अकर्त्तर्यपिकर्तृताप्रत्ययश्चयेनभवतितन्मनइत्याह ॥ नाहमिति ॥ एकांतकलनोनियतंजायमानः ॥ ५ ॥ निःस्पंदेमनस्येतस्यलक्षणस्याव्याप्तिमाशंक्याह ॥ कल्पनात्मिकयेत्यादिना ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्ममनसोर्जीवमनसोः ॥ ७ ॥ फलेनधर्मिणासाध्यवता ॥ ८ ॥ ९ ॥ वासनाकल्पनाकलनाकुलामित्येतत्स्फुटयति ॥ यायेनेति ॥ यत्रसतेवयथैदेवेरिहस्थैरेवसत्यलोकस्थावयमितिकल्पितेनेत्यर्थः ॥ लतेवेतिपाठेस्पष्टम् ॥ १० ॥ तस्यवासनातरोःकर्मबीजंमनःस्पंदःशरीरंक्रियाःशाखाइतिशास्त्रेकथ्यतेफलतश्चानुभूयतइत्यर्थः ॥ ११ ॥ ननुकर्मेंद्रियवृत्तिःकर्मकथंतन्मनसःस्यात्तत्राह ॥ मनइति ॥ १२ ॥ मनएवसर्वेंद्रियभावंधत्तइतिनायंदोषइतिदर्शयंस्तन्नामान्याह ॥ मनइत्यादिना ॥ १३ ॥ नैतावत्यःकिंत्वितराअपिसंति ॥ ब्रह्मन्ब्रह्मणि ॥ छांदसःसप्तम्यालुक् ॥ नङिसंबुद्ध्योरितिनलोपनिषेधः ॥ संसारभ्रमःसंसारकल्पितोवक्ष्यमाणप्रवृत्तिनिमित्तभेदःसएवहेतुर्यासाम् ॥ १४ ॥ काकतालीयमाकस्मिकंस्वरूपविस्मरणंतद्योगेनत्यक्तेवाननुभूयमानास्फाराऽपरिच्छिन्नादृगाकृतिश्चिदेकरसाकारोययातथाभूतायाश्चितेश्चेत्यानुपातिन्याबाह्यकल्पनोन्मुखायाः ॥ १५ ॥ उक्तानांमनोबुद्ध्यादिनाम्नांचेत्योन्मुखचितिप्रवृत्तिनिमित्तभेदेनयोगरूढ्यापर्यायवृत्तितांप्रत्येकंनिर्वचनेनविशिष्यजिज्ञासमानोरामःपृच्छति ॥ परायाइति ॥ कल्प्यमानोविचित्रोयोगार्थोयासांतथाविधाःसत्यः ॥ १६ ॥ एवंपृष्टोवसिष्ठःक्रमेणपंचदशापिनामानिव्याचिकीर्षुःप्रथमंमनइतिनामव्याचष्टे ॥ गतेवेति ॥ परासंविदविद्ययासकलंकत्वंगतेवसतीकदाचिदुन्मेषरूपिणीभूत्वायदेहमित्थमनित्थंवेतिविकल्पात्मनानानाभवतितदैवसामनोरूपेणस्थितेतितन्नामिकाभवतीत्यर्थः ॥ १७ ॥ यदातुप्रथमंविकल्पोत्तरंवाविशेषभावनांप्राप्यएकतरकोट्यनुसंधानंनिश्चित्यसुस्थिरास्थितातदैषासंविद्बुद्धिरितिप्रोच्यते ॥ इयत्ताईदृशमेवेदंवस्त्वितिपरिच्छित्तिस्तद्ग्रहणसमर्थेत्यर्थः ॥ १८ ॥

यथावह्न्यौष्ण्ययोःसत्तानसंभवतिभिन्नयोः ॥ तथैवकर्ममनसोस्तथात्ममनसोरपि ॥ ७ ॥ स्वेनैवचित्तरूपेणकर्मणाफलधर्मिणा ॥ संकल्पैकशरीरेणनानाविस्तरशालिना ॥ ८ ॥ इदंततमनेकात्ममायामयमकारणम् ॥ विश्वंविगतविन्यासंवासनाकल्पनाकुलम् ॥ ९ ॥ यायेनवासनायत्रसतेवारोपितायथा ॥ सातेनफलसूस्तत्रतदेवप्राप्यतेतथा ॥ १० ॥ कर्मबीजंमनःस्पंदःकथ्यतेथानुभूयते ॥ क्रियास्तुविविधास्तस्यशाखाश्चित्रफलास्तरोः ॥ ११ ॥ मनोयदनुसंधत्तेतत्कर्मेंद्रियवृत्तयः ॥ सर्वाःसंपादयंत्येतास्तस्मात्कर्ममनःस्मृतम् ॥ १२ ॥ मनोबुद्धिरहंकारश्चित्तंकर्माथकल्पना ॥ संसृतिर्वासनाविद्याप्रयत्नःस्मृतिरेवच ॥ १३ ॥ इंद्रियंप्रकृतिर्मायाक्रियाचेतीतराअपि ॥ चित्राःशब्दोक्तयोब्रह्मन्संसारभ्रमहेतवः ॥ १४ ॥ काकतालीययोगेनत्यक्तस्फारदृगाकृतेः ॥ चितेश्चेत्यानुपातिन्याःकृताःपर्यायवृत्तयः ॥ १५ ॥

श्रीरामउवाच ॥ ॥ परायाःसंविदोब्रह्मन्नेताःपर्यायवृत्तयः ॥ कल्प्यमानविचित्रार्थाःकथंरूढिमुपागताः ॥ १६ ॥ ॥ श्रीवसिष्ठउवाच ॥ गतेवसकलंकत्वंकदाचित्कल्पनात्मकम् ॥ उन्मेषरूपिणीनानातदैवहिमनःस्थिता ॥ १७ ॥ भावनामनुसंधानंयदानिश्चित्यसंस्थिता ॥ तदैषाप्रोच्यतेबुद्धिरियत्ताग्रहणक्षमा ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदातुमिथ्याभूतदेहाद्यात्मताभिमानेनस्वयंसत्तांकल्पयतिमन्यतेतदाहंकाराभिमानेननिमित्तेनसाअहंकारइतिप्रोच्यते ॥ सैवसर्वानर्थबीजत्वाद्भवबंधनीत्यर्थः ॥ १९ ॥ यदात्वेकंविषयंत्यक्त्वाअपरंविषयंस्मरतिविचारंपूर्वापरप्रतिसंधानंपरित्यज्यतदासासंविच्चित्तमित्युच्यतइत्यर्थः ॥ २० ॥ सैवसंवित्कर्त्तुःस्पंदैकधर्मत्वाद्वस्तुतःशून्यमसदेवस्पंदंशंसतिगोचरयतितच्छीलासतीस्पंदफलंशरीरतदवयवादेर्देशांतरसंयोगंसंपादयितुमाधावतीवतदाकर्मेत्युच्यतइत्यर्थः ॥ २१ ॥ एकमेवघनंवस्त्वंतरावकाशशून्यंयत्स्वरूपंतन्निश्चयंत्यक्त्वास्वपूर्णभावंविस्मृत्ययदाईहितंवांछितंपरिच्छिन्नभावंकल्पयतीत्यर्थः ॥ २२ ॥ स्मृतिःसंस्मृतिः ॥ २३ ॥ यदासंभुक्तानांयस्तानामिवतिरोभूतानांपदतदर्थतच्छक्तीनांस्वरूपेणअंबरेशून्यप्रायेतिसूक्ष्मभावेवसतिअस्तमितान्यचेष्टाचभवतितदावासनेत्युच्यतइत्यर्थः ॥ २४ ॥ अंकिताजातेत्येकंपदम् ॥ अंकोऽविद्याकलंकस्तद्वैशिष्ट्यमंकितातद्व

यदामिथ्याभिमानेनसत्तांकल्पयतिस्वयम् ॥ अहंकाराभिमानेनप्रोच्यतेभवबंधनी ॥ १९ ॥ इदंत्यक्त्वेदमायातिबालवत्पेलवायदा ॥ विचारंसंपरित्यज्यतदासाचित्तमुच्यते ॥ २० ॥ यदास्पंदैकधर्मत्वात्कर्त्तुर्याशून्यशंसिनी ॥ आधावतिस्पंदफलंतदाकर्मेत्युदाहृता ॥ २१ ॥ काकतालीययोगेनत्यक्त्वैकघननिश्चयम् ॥ यदेहितंकल्पयतिभावंतेनेहकल्पना ॥ २२ ॥ पूर्वदृष्टमदृष्टंवाप्राग्दृष्टमितिनिश्चयैः ॥ यदैवेहांविधत्तेतत्तदास्मृतिरुदाहृता ॥ २३ ॥ यदापदार्थशक्तीनांसंभुक्तानामिवांबरे ॥ वसत्यस्तमितान्येहावासनेतितदोच्यते ॥ २४ ॥ अस्त्यात्मतत्त्वंविमलंद्वितीयादृष्टिरंकिता ॥ जाताप्यविद्यमानैवतदाविद्येतिकथ्यते ॥ २५ ॥ स्फुरत्यात्मविनाशायविस्मारयतितत्पदम् ॥ मिथ्याविकल्पजालेनतन्मलंपरिकल्प्यते ॥ २६ ॥ श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वाघ्रात्वाविमृश्यच ॥ इंद्रमानंदयत्येषातेनेंद्रियमितिस्मृतम् ॥ २७ ॥ सर्वस्यदृश्यजालस्यपरमात्मन्यलक्षिते ॥ प्रकृतत्वेनभावानांलोकेप्रकृतिरुच्यते ॥ २८ ॥

शाज्जाताद्वितीयादृष्टिःप्रपंचप्रतिभाकालत्रयेप्यविद्यमानैवेतियदाप्रबुद्ध्यतेतदाविद्येतिकथ्यतेइत्यर्थः ॥ २५ ॥ विस्मृतिर्मलमेवचेतिपाठेतद्वेनामनीसहैवव्याचष्टे ॥ स्फुरतीति ॥ आत्मनोविनाशोऽत्यंतादर्शनम् ॥ यतोविस्मारयतितस्माद्विस्मृतिरित्युच्यतइत्यर्थः ॥ अथवामिथ्याविकल्पजालेनविविधंस्मारयतिविक्षिपतीत्यर्थः ॥ तथाचावरणशक्तिप्राधान्येनमलंविक्षेपप्राधान्येनविस्मृतिरितिभावः ॥ प्रयत्नःस्मृतिरेवचेतिपाठेतुआत्मनोविनाशायादर्शनायस्फुरतिसंचलतियततइवेतिप्रयत्नइतिविविधंस्मारयतीतिस्मृतिरितिचमलंमलिनंतत्संविद्रूपमेवनाम्नापरिकल्प्यतेइतिक्लेशेनव्याख्येयम् ॥ २६ ॥ एषामनोभूतासंविद्यदाश्रवणादिक्रिययाइंद्रंकार्यकरणस्वामिनंजीवभावापन्नंपरमेश्वरमानंदयतिभोगैःप्रीणयतितदेंद्रियमित्युच्यतइत्यर्थः ॥ इंद्रजुष्टमिंद्रियमितिहिपाणिन्यनुशासनम् ॥ २७ ॥ प्रकृतत्वेनोपादानाभिन्नकर्त्रात्मनानिर्मितत्वेन ॥ २८ ॥

१ प्राचीनपुस्तके (इंद्रमामोदयत्येषा) इतिमूलपाठः (परमेश्वरमामोदयति) इतिटीकाचवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पष्टम् ॥ २९ ॥ कार्यकरणतांसंसृतितद्बीजात्मकताम् ॥ ३० ॥ नामन्याख्यामुपसंहरति ॥ चितेरिति ॥ ३१ ॥ प्रकृतंप्रस्तुतंसंसारपदम् ॥ स्वैःस्वीयैरेवसंकल्पादिकल्पनाशतैः ॥ एताःपर्यायवृत्तयोरूढियोगरूढिम् ॥ ३२ ॥ एकस्याश्चितःकुतोमनोबुद्ध्यादिसंख्याविभागकलनातत्राह ॥ चेतनीयेति ॥ चित्चेतनीयःअहमज्ञइतिस्वयमनुभवनार्होयोऽज्ञानकलंकश्चेतनीयेभ्योविषयेभ्यःप्राप्तोवायोद्वैतवासनाकलंकस्तदंकात्तत्सन्निधानात्पूर्णस्वरूपवैकल्येनाकुलेवभूत्वादेहादिजाड्यजालानुपातिनीयतःअतइत्यर्थः ॥ ३३ ॥ उक्तामेवविभागकलनांपुनर्विविच्याह ॥ जीवइत्यादिद्वाभ्याम् ॥ ३४ ॥ ३५ ॥ जीवइत्युच्यतेइत्युक्त्याचेतनत्वप्राप्तेर्दर्शनांतरेलोकेचजाड्यप्रसिद्धेःसंदिहानोरामःपृच्छति ॥ मनइति ॥ ३६ ॥ चिदचिदुभयसंवलनरूपत्वान्नैकतररूपंमनः ॥ परमार्थतस्तुमन्वानोमनइतितान्येतानिकर्मनामान्येवेतिश्रुतावात्मनएवकर्मप्रयुक्तनामधेयेपुमनःशब्दपरिगणनादज

सदसत्तांनयत्याशुसत्तांवासत्त्वमंजसा ॥ सत्तासत्ताविकल्पोयंतेनमायेतिकथ्यते ॥ २९ ॥ दर्शनश्रवणस्पर्शरसनघ्राणकर्मभिः ॥ क्रियेतिकथ्यतेलोकेकार्यकारणतांगता ॥ ३० ॥ चितेश्चेत्यानुपातिन्यागतायाःसकलंकताम् ॥ प्रस्फुरद्रूपधर्मिण्याएताःपर्यायवृत्तयः ॥ ३१ चित्ततामुपयातायागतायाःप्रकृतंपदम् ॥ स्वैरेवसंकल्पशतैर्भृशंरूढिमुपागताः ॥ ३२ ॥ चेतनीयकलंकांकाज्जाड्यजालानुपातिनी ॥ संख्याविभागकलनास्ववैकल्याकुलेवचित् ॥ ३३ ॥ जीवइत्युच्यतेलोकेमनइत्यपिकथ्यते ॥ चित्तमित्युच्यतेसैवबुद्धिरित्युच्यतेतथा ॥ ३४ नानासंकल्पकलिलंपर्यायनिचयंबुधाः ॥ वदंत्यस्याःकलंकिन्याश्च्युतायाःपरमात्मनः ॥ ३५ ॥ ॥ श्रीरामउवाच ॥ ॥ मनःकिंस्याज्जडंब्रह्मंस्तथावापिचचेतनम् ॥ इत्येकोममतत्त्वज्ञनिश्चयोंतर्नजायते ॥ ३६ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ मनोहिनजडंरामनापिचेतनतांगतम् ॥ म्लानाऽजडातदादृष्टिर्मनइत्येवकथ्यते ॥ ३७ ॥ मध्येसदसतोरूपंप्रतिभूतंयदाविलम् ॥ जगतःकारणंनामतदेतच्चित्तमुच्यते ॥ ॥ ३८ ॥ शाश्वतेनैकरूपेणनिश्चयेनविनास्थितिः ॥ येनसाचित्तमित्युक्तातस्माज्जातमिदंजगत् ॥ ३९ ॥ जडाजडदृशोर्मध्येदोलारूपंस्वकल्पनम् ॥ यश्चितोम्लानरूपिण्यास्तदेतन्मनउच्यते ॥ ४० ॥ चिन्निःस्पंदोहिमलिनःकलंकविकलांतरम् ॥ मनइत्युच्यतेरामनजडंनचचिन्मयम् ॥ ४१ ॥

डादृष्टिश्चिदेवतदासंसारदशायांम्लानाउपाधिमालिन्यानुभाविनीमनइतिकथ्यतेइत्यर्थः ॥ ३७ ॥ चिदचिद्वैलक्षण्यवत्सदसद्वैलक्षण्यमपितस्यास्तीत्याह ॥ मध्येइति ॥ प्रतिभूतंप्रतिप्राणिभेदम् ॥ प्रतिभातमितिपाठेस्पष्टम् ॥ ३८ ॥ अथवाआत्मनोऽज्ञातसत्त्वैवमनइत्याह ॥ शाश्वतेनेति ॥ येनहेतुना ॥ ३९ ॥ पूर्वोक्तमेवस्फुटयंस्तस्यचलस्वभावतामाह ॥ जडेति ॥ यच्चितोरूपमितिशेषः ॥ ४० ॥ चितोनिःस्पंदऔपाधिकचलभावोबहिर्मलिनस्तस्याअंतःसाक्षिचितआवरणविरहात्कलंकविकलांतरंयद्रूपंतन्मनइत्युच्यतइत्यर्थः ॥ ४१ ॥

१ प्राचीनपुस्तके (इंद्रमामोदमत्येषा) इतिमूलपाठः (परमेश्वरमामोदयति) इतिटीकाचवर्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४२ ॥ शैलूषोनटजातिविशेषः ॥ रूपाणिनानावेषानलमत्यर्थंगच्छतिक्रमेणधारयति ॥ कर्मांतरंक्रियाभेदम् ॥ ४३ ॥ यथानरःपाकाधिकारात्पाचकइतिपाठाधिकारात्
पाठकइतिग्रामाधिपत्याद्ग्रामणीरितिविचित्राधिकारवशतोविचित्राविकृतास्तत्तत्क्रियाप्रकाशिकाअभिधानामानियातितथामनोपिकर्मवशात्ताःयातीत्यर्थः ॥ ४४ ॥ अन्य
थाकल्पनाशतैःस्वकपोलोन्नीतयुक्तिशतैः ॥ ४५ ॥ स्वेषांभावाविभावनास्तर्कास्तदभिमतांद्रव्यत्वाणुत्वादिबुद्धिमनस्यारोप्यमनसास्वेच्छयामनोबुद्ध्यादीनांविचित्रानामरीत
यःसंज्ञाभेदास्तैःकृताइत्यर्थः ॥ ४६ ॥ तेषांकल्पनाप्रकारान्विभज्यदर्शयति ॥ मनोहीत्यादिना ॥ ४७ ॥ अंतःकरणस्यैकरूपतयातस्यस्तृष्टिकल्पनाःसंकल्पादिवृत्तिभेदसृष्टिनि
मित्ताअहंकारमनोबुद्धिनामभेददृष्टयस्तेमयायाःप्रोक्ताः ॥ ४८ ॥ गौतमीयतंत्रानुसारिभिस्तास्तादृशैरेवस्वबुद्धिविकल्पैरितरथाकल्पिताः ॥ यथाहंकारोद्रव्यविशेषोविभुर्जी
वात्मेतिमनस्त्वणुतत्साक्षात्कारेकरणमिति ॥ बुद्धिस्तुतदीयोगुणस्त्रिक्षणावस्थायिनीति ॥ नतुवस्तुतस्तथेत्यर्थः ॥ सांख्यैस्ततोप्यन्यथाकल्पिताः ॥ यथाबुद्धिःसाक्षात्त्रिगुणा

तस्येमानिविचित्राणिनामानिकलितान्यलम् ॥ अहंकारमनोबुद्धिजीवाद्यानीतराण्यपि ॥ ४२ ॥ यथागच्छतिशैलूषोरूपाण्यलंतथैव
हि ॥ मनोनामान्यनेकानिधत्तेकर्मांतरंव्रजत् ॥ ४३ ॥ चित्राधिकारवशतोविचित्राविकृताभिधाः ॥ यथायातिनरःकर्मवशाद्यातितथाम
नः ॥ ४४ ॥ याएताःकथिताःसंज्ञामयाराघवचेतसः ॥ एताएवान्यथाप्रोक्तावादिभिःकल्पनाशतैः ॥ ४५ ॥ स्वभावाभिमतांबुद्धिमारोप्य
मनसाकृताः ॥ मनोबुद्धींद्रियादीनांविचित्रानामरीतयः ॥ ४६ ॥ मनोहिजडमन्यस्यभिन्नमन्यस्यजीवतः ॥ तथाहंकृतिरन्यस्यबुद्धिरन्य
स्यवादिनः ॥ ४७ ॥ अहंकारमनोबुद्धिदृष्टयःसृष्टिकल्पनाः ॥ एकरूपतयाप्रोक्तायामयारघुनंदन ॥ ४८ ॥ नैयायिकैरितरथातादृशैःपरि
कल्पिताः ॥ अन्यथाकल्पिताःसांख्यैश्चार्वाकैरपिचान्यथा ॥ ४९ ॥ जैमिनीयैश्चार्हतैश्चबौद्धैर्वैशेषिकैस्तथा ॥ अन्यैरपिविचित्रैस्तैःपांच
रात्रादिभिस्तथा ॥ ५० ॥ सर्वैरेवचगंतव्यंतैःपदंपारमार्थिकम् ॥ विचित्रंदेशकालोत्थैःपुरमेकमिवाध्वगैः ॥ ५१ ॥

त्मकप्रकृतिकार्यंमहत्तत्त्वंअहंकारस्तुतत्कार्यं तत्त्वांतरंमनस्त्वेकादशेंद्रियगणांतर्गतंषोडशविकारांतःपातीति ॥ चार्वाकैस्तुचैतन्यगुणःकायस्यैवबुद्धिःकायएवाहंकारआत्मात
स्यपूर्वापरप्रतिसंधानंमनइति ॥ ४९ ॥ जैमिनीयैस्तुकैश्चिन्मनोविभुद्रव्यम् ॥ कैश्चिदन्नमयम् ॥ बुद्धिस्तुजडबोधात्मकाहंकाररूपस्यात्मनश्चिदंशइति ॥ आर्हतैस्तुमध्यमप
रिमाणश्चिद्रूपोजीवास्तिकायएवाहंकारः तस्यविषयाभिलाषोमनः अर्थप्रथाचबुद्धिरिति ॥ बौद्धैःक्षणिकीआलयविज्ञानाख्याबुद्धिधारासैवात्माऽहंकारश्चप्रवृत्तिविज्ञाना
त्मकः बुद्धिस्तुबाह्यार्थाकारस्तत्परिणामःअतीतःसमनंतरप्रत्ययोमनइति ॥ वैशेषिकैस्तुनैयायिकवदेवाहंकारमनसी बुद्धिस्तुस्मृतिप्रत्यक्षानुमानतर्कविपर्ययविकल्पभेदभिन्ना
पंचधेति ॥ अन्यैःपांचरात्रैर्वासुदेवाख्यात्परमात्मनःसंकर्षणाख्योजीवःसएवाहंकारस्ततःप्रद्युम्नाख्यंमनस्ततोऽनिरुद्धाख्याबुद्धिरिति ॥ आदिपदाद्योगिमाहेश्वरनाकुलादीना
मन्यथान्यथाकल्पनागृह्यंते ॥ ५० ॥ सर्वेषामपिस्वस्वबुद्ध्यनुसारेणपरमात्मतत्त्वनिर्णयएवक्रमेणफलिष्यतीत्याह ॥ सर्वैरिति ॥ विचित्रमित्यनेनतत्तद्बुद्ध्यनुसारिफलात्मना
स्थातुंशक्तंतत्पदमितिसूचितम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिएकमेवप्राप्यतेतर्हिकिमर्थंविवदंतेतत्राह ॥ अज्ञानादिति ॥ ५२ ॥ विचित्रदेशकालोत्थाःराजसतामसमलिनार्द्धमलिनसत्वप्रधानजनोचितदेशकालोत्पन्नाः ॥ तथाचका लाद्यनुसारिणांतेषांस्वस्वपक्षाभिरुचिरितितत्तत्प्रशंसायुक्तेतिभावः ॥ ५३ ॥ तर्हिकिंमुमुक्षुभिरपितदुक्तयुक्तयउपादेयानेत्याह ॥ तैरिति ॥ तैःकर्ममानसचेतसांफलेच्छयातत्सा धनकर्मणिमानसंवांछायस्यतथाविधंचेतोयेषांतेषामर्थैस्वास्वाःस्वकपोलनिर्मितावैचित्र्ययुक्तयोमिथ्यैवप्रोक्तानप्रमाणमूर्द्धन्योपनिषत्संमताइत्यर्थः ॥ ५४ ॥ ५५ ॥ परिशे षात्स्वोक्तयुक्तयएवप्रामाणिक्यइत्याशयेनताःपुनराह ॥ विचित्रेत्यादिना ॥ ५६ ॥ स्वोक्तयुक्तिषुलोकानुभवंसंवादयति ॥ चित्तमेवेत्यादिना ॥ ५७ ॥ ५८ ॥ रूपाणांरूपप्र

अज्ञानात्परमार्थस्यविपरितावबोधतः॥ केवलंविवदंत्येतेविकल्पैरारुरुक्षवः॥५२॥ स्वमार्गमभिशंसंतिवादिनश्चित्रयादृशा॥ विचि त्रदेशकालोत्थामार्गस्वंपथिकाइव॥ ५३॥ तैर्मिथ्याराघवप्रोक्ताःकर्ममानसचेतसाम् ॥ स्वविकल्पार्पितैरर्थैःस्वाःस्वावैचित्र्ययुक्तयः ॥ ५४ ॥ यथैवपुरुषःस्नानदानादानादिकाःक्रियाः॥ कुर्वंस्तत्कर्तृवैचित्र्यमेतितद्वदिदंमनः ॥ ५५॥ विचित्रकार्यवशतोनामभेदेनकर्तृ ता॥ मनःसंप्रोच्यतेजीववासनाकर्मनामभिः॥ ५६ ॥ चित्तमेवेदमखिलंसर्वेणैवानुभूयते ॥ अचित्तोहिनरोलोकंपश्यन्नपिनपश्यति ॥ ५७॥ श्रुत्वास्पृष्ट्वाचदृष्ट्वाचभुक्त्वाघ्रात्वाशुभाशुभम्॥ अंतर्हर्षविषादंचसमनस्कोहिविंदति॥५८॥ आलोकइवरूपाणामर्थानांका रणंमनः॥ बध्यतेबद्धचित्तोहिमुक्तचित्तोहिमुच्यते॥ ५९ ॥ तज्जडानांपरंविद्धिजडंयेनोच्यतेमनः ॥ नचावगच्छतिजडंमनोयस्यहिचे तनम्॥ ६० ॥ नचेतनंनचजडंयदिदंप्रोत्थितंमनः॥ विचित्रसुखदुःखेहंजगदभ्युदितंतदा॥६१॥ एकरूपेहिमनसिसंसारःप्रविलीयते॥ उपाविलंकारणंतैर्भ्रांत्याजगदुपस्थितम् ॥ ६२ ॥ अजडंहिमनोरामसंसारस्यनकारणम् ॥ जडंचोपलधर्मापिसंसारस्यनकारणम् ॥६३॥ नचेतनंनचजडंतस्माज्जगतिराघव॥ मनःकारणमर्थानांरूपाणामिवभासनम्॥६४॥

काशानाम् ॥ पंचीकृतेपृथिव्यादौप्रतीयमानानिरूपाण्यालोकभागस्यैवेत्याशयोवा ॥ मुक्तचित्तोनिर्वासनचित्तोमुक्तोहमितिनिश्चयवान्वा ॥ ५९ ॥ अतएवहिमनसोपिवादि नांस्वस्ववासनानुसारीजाड्यानुभवश्चैतन्यानुभवश्चोपपन्नइत्याह ॥ तदिति ॥ ६० ॥ ६१ ॥ एकरूपेअद्वितीयब्रह्माकारेसतिआविलंकलुषोदकंतस्यसमीपेउपाविलंतत्सदृशं मलिनचिद्रूपंतुकारणंसंसारस्यतैस्तथाविधैर्मनोभिःसमष्टिभूतैर्हेतुभिरित्यर्थः ॥ ६२ ॥ उपाविलमित्युक्तेस्तात्पर्यरहस्यमुद्घाटयति ॥ अजडमितिद्वाभ्याम् ॥ ६३ ॥ यथानील पीतादिरूपभेदानांनकेवलंभासनशब्दितंतेजःकारणंनपृथिव्यादिकिंतुत्रिवृत्करणेनमलिनंतेजस्तद्वदित्यर्थः ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसोऽसत्वेजगत्सत्तायानिरूपणादर्शनादपिजगतोमनोमात्रत्वमित्याह ॥ चित्तादिति ॥ तत्तर्हिअचित्तस्यदृष्ट्याजगत्किंनांकिंचिदित्यर्थः॥यस्माच्चित्तलयेसर्वस्यप्राणिनिकायस्यसमग्रंजगत्प्रविलीयतेतस्माच्चित्तमात्रंतदित्यर्थः ॥ ६५ ॥ ६६ ॥ अमनस्कारंचित्ताभोगंविना ॥ तत्तर्हि ॥ परेमनोऽतिरिक्ताः ॥ ६७ ॥ तर्हिकथंप्रागुक्तवादिभिरन्येसंतीत्युक्तंतत्राह ॥ दर्शनेष्विति ॥ वादकरैर्वादिभिः ॥ क्वचित्क्वचित्केषुचिद्दर्शनेषुस्वशास्त्रेषुयेभेदाउक्तास्तेअपवादाःकुतर्कास्तत्करैरुक्तानप्रामाणिकैर्व्यासादिभिरित्यर्थः ॥ ६८ ॥ तेषांकुतर्कोद्भवेकारणान्याह ॥ तेहीति ॥ क्वचित्कदाचिदपितत्त्वज्ञैर्व्यासादिभिनर्विशिष्यंतेनानुशास्यंते ॥ तथाचाज्ञानंसांप्रदायिकशिक्षाशून्यत्वंमनोदेवस्यस्वाभाविककुतर्क

चित्तादृतेन्यद्यदस्तितदचित्तस्यकिंजगत् ॥ सर्वस्यभूतजातस्यसमग्रंप्रविलीयते ॥ ६५ ॥ नानाकर्मवशावेशान्मनोनानाभिधेयताम् ॥
एकंविचित्रतामेतिकालोनानायथर्तुभिः ॥ ६६ ॥ यदिनामामनस्कारमहंकारेंद्रियक्रियाः ॥ क्षोभयंतिशरीरंतत्संतुजीवादयःपरे ॥ ६७ ॥
दर्शनेषुतुयेप्रोक्ताभेदामनसितर्कतः ॥ क्वचित्क्वचिद्वादकरैरपवादकरैःकिल ॥ ६८ ॥ तेहिरामनबुध्यंतेविशिष्यंतेनचक्वचित् ॥ सर्वाहिश
क्तयोदेवेविद्यंतेसर्वगायतः ॥ ६९ ॥ यदेवखलुशुद्धाया[1]मनागपिहिसंविदः ॥ जडेवशक्तिरुदितातदावैचित्र्यमागतम् ॥ ७० ॥ ऊर्णनाभा
द्यथातंतुर्जायतेचेतनाज्जडः ॥ नित्यप्रबुद्धात्पुरुषाद्ब्रह्मणःप्रकृतिस्तथा ॥ ७१ ॥ अविद्यावशतश्चित्तभावनाःस्थितिमागताः ॥ चितिपर्या
यशब्दाहिभिन्नास्तेतेहवादिनाम् ॥ ७२ ॥ जीवोमनश्चननुबुद्धिरहंकृतिश्चेत्येवंप्रथामुपगतेयमनिर्मलाचित् ॥ सैषोच्यतेजगतिचेतन
चित्तजीवसंज्ञागणेनकिलनास्तिविवादएषः ॥ ७३ ॥ ॥ इ० वा० वा० दे० मो० पू० मनःसंज्ञाविचारोनामषण्णवतितमःसर्गः ॥ ९६ ॥

शक्तयश्चतत्रकारणानीत्यर्थः ॥ ६९ ॥ तर्हितर्काप्रतिष्ठानात्तेषांसदासंशयएवस्यात्कथंव्यवस्थितैकैकपक्षनिर्णयवैचित्र्यंतत्राह ॥ यदेवेति ॥ स्वस्वोत्प्रेक्षिततर्कैश्श्रद्धाजाड्याद्वैचित्र्यमित्यर्थः ॥ ७० ॥ स्वस्वपक्षेपितर्हितवश्रद्धाजाड्यमेवकुतोनहेतुरित्याशंक्यनायंममस्वबुद्ध्योत्प्रेक्षितःकिंतु यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयःसंभवंतियथासतःपुरुषात्केशलोमानितथाक्षरात्संभवतीहविश्वमित्यादिश्रुतिसिद्धोयंपक्षइत्याशयेनाह ॥ ऊर्णनाभादिति ॥ प्रकृतिर्मनः ॥ ७१ ॥ वादिनांतुनश्रुत्यादरइत्यविद्यावशात्स्वस्वभावनैवस्थिरीभूताततएवतैर्मनसएवनामरूपभेदाभ्रांत्याकल्पिताइत्याह ॥ अविद्येति ॥ चितिश्चित्तभावापन्नेचैतन्ये ॥ ७२ ॥ उक्तमेवस्फुटयन्नुपसंहरति ॥ जीवइति ॥ ७३ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०षण्णवतितमःसर्गः ॥ ९६ ॥ ॥ ७३ ॥ ॥ ७३ ॥ ॥ ७३ ॥

१ श्रद्धायाइतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाकारेणसंस्थानंमनसोत्रनिरूप्यते ॥ चित्ताकाशचिदाकाशभूताकाशाश्चविस्तरात् ॥ १ ॥ एवंकर्तृकर्ममनःस्वरूपंतन्नामभेदंचबहुभिःप्रकारैःप्रतिबोधितोरामःस्वबुद्धंतद्गुरुबुद्धिसंवादायाभिलप्यदर्शयति ॥ ब्रह्मन्निति ॥ हेब्रह्मन्प्राग्दर्शितत्वद्वाक्यार्थादिदमाडंबरंब्रह्मांडपटहंमनसएवसकाशात्स्तमाविर्भूतंयतोऽतस्तज्जगदेवमनसःकर्मेतितात्पर्यमुपलभ्यतेबुध्यतेमयेत्यर्थः ॥१ ॥ रामेणबुद्धंतात्पर्यंतथैवेत्यनुमोदनायस्वयंवसिष्ठःपुनःसंक्षेपविस्तराभ्यामाह ॥ दृढेत्यादिना ॥ भास्वरस्यतेजस्वस्यावरणमप्रथाहेतुर्मृगतृष्णोदकमिवभास्वरस्यात्मनोऽप्रथाहेत्वज्ञानजाड्यमुररीकृतमंगीकृतमित्यर्थः ॥ २ ॥ एकांमुख्यामाकृतिंजगत्संस्थानंगतंप्राप्तम् ॥ तदेवप्रपंचयति ॥ क्वचिदित्यादिना ॥ ३ ॥ ४ ॥ वित

श्रीरामउवाच ॥ ॥ब्रह्मन्मनसएवेदमंतश्चाडंबरंस्तृतम् ॥ यतस्तदेवकर्मेतिवाक्यार्थादुपलभ्यते ॥ १ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ दृढभावोपरक्तेनमनसैवोररीकृतम् ॥ मरुचंडातपेनेवभास्वरावरणंपुनः ॥ २ ॥ ब्रह्मात्मनिजगत्यस्मिन्मनएकाकृतिंगतम् ॥ क्वचिन्नरतयारूढंक्वचित्सुरतयोत्थितम् ॥ ३ ॥ क्वचिद्दैत्यतयोल्लासिक्वचिद्यक्षतयोदितम् ॥ क्वचिद्गंधर्वतांप्राप्तंक्वचित्किन्नररूपिच ॥ ४ ॥ नानाचारनभोभागपुरपत्तनरूपया ॥ मन्येविततयाकृत्यामनएवविजृंभते ॥ ५ ॥ एवंस्थितेशरीरौघस्तृणकाष्ठलतोपमः ॥ तद्विचारणयाकोर्थोविचार्यंमनएवनः ॥ ६ ॥ तेनेदंसर्वमाभोगिजगदित्याकुलंततम् ॥ मन्येतद्व्यतिरेकेणपरमात्मैवशिष्यते ॥ ७ ॥ आत्मासर्वपदातीतःसर्वगःसर्वसंश्रयः ॥ तत्प्रसादेनसंसारेमनोधावतिवल्गति ॥ ८ ॥ मनोमन्येमनःकर्मतच्छरीरेषुकारणम् ॥ जायतेम्रियतेतद्धिनात्मनीदृग्विधागुणाः ॥ ९ ॥ मनएवविचारेणमन्येविलयमेष्यति ॥ मनोविलयमात्रेणततःश्रेयोभविष्यति ॥ १० ॥ मनोनाम्निपरिक्षीणेकर्मण्याहितसंभ्रमे ॥ मुक्तइत्युच्यतेजंतुःपुनर्नामनजायते ॥ ११ ॥ ॥श्रीरामउवाच ॥ ॥भगवन्भवताप्रोक्ताजातयस्त्रिविधानृणाम् ॥ प्रथमंकारणंतासांमनःसदसदात्मकम् ॥ १२ ॥ तत्कथंशुद्धचिन्मात्रस्तत्त्वाद्बुद्धिविवर्जितात् ॥ उत्थितंस्फारतांयातंजगच्चित्रकरंमनः ॥ १३ ॥

तयाविस्तीर्णयाआकृत्यासंस्थानवैचित्र्येण ॥ ५ ॥ यथापृथिव्यादिभूततत्त्वजिज्ञासूनांतृणकाष्ठादिकंप्रत्येकंनविचारणार्हंतद्वदित्यर्थः ॥ ६ ॥ एवंकर्तृकर्मस्वरूपेबुद्धेतद्विशोधेनतदधिष्ठानात्मानंदर्शयितुमाह ॥ मन्येइति ॥ ७ ॥ मनआदिस्पंदास्तद्बलेनैवनस्वतइत्याह ॥ तत्प्रसादेनेति ॥ ८ ॥ शोधनप्रकारमाह ॥ मनइति ॥ ईदृग्विधाइत्यनेनांतरालिकाअपिभावविकाराउपलक्ष्यंते ॥ ९ ॥ श्रेयोमोक्षः ॥ १० ॥ ११ ॥ अस्त्वेवंमनसःसकाशाज्जगदुत्पत्तिर्मनस्तुकूटस्थचिन्मात्रस्वभावाद्ब्रह्मणोनोत्पत्तुमर्हति बुद्धिपूर्विकाहितत्स्रष्टिःश्रूयते तन्मनोकुरुतआत्मन्वीस्यामिति नचमनउत्पत्तेःप्राग्बुद्धिःसंभवति अमतेऽर्थेऽध्यवसायादर्शनादितिरामःशंकते ॥ भगवन्नितिद्वाभ्याम् ॥ त्रिविधाइति ॥ यद्यपिद्वादशविधाउक्तास्तथापितासांसात्विकराजसतामसलक्षणत्रैविध्येंतर्भावमभिप्रेत्यत्रिविधाइत्युक्तिः ॥ नृणांजीवानाम् ॥ १२ ॥ १३ ॥

१ वपुरितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमामप्याशंकांवक्ष्यमाणदृष्टिभेदाभिप्रायेणसत्कार्यवादमाश्रित्यसमाधित्सुर्वसिष्ठस्तदुपयुक्तामाकाशत्रयकल्पनांदर्शयति ॥ आकाशाहीति ॥ विततांतराविस्तीर्णजठराः ॥ १४ ॥ सर्वस्वकार्यसाधारणाः ॥ सर्वस्वकार्यैर्व्यवस्थिताअनुगताइतितद्धेतुः ॥ नचैवमद्वैतहानिः सत्ताभेदानभ्युपगमादित्याशयेनाह ॥ शुद्धेति ॥ १५ ॥ त्रयाणामेकसत्ताकत्वेचिदाकाशेकोतिशयइत्याशंक्यतंदर्शयंश्चिदाकाशंमायाशबलंलक्षयति ॥ सबाह्येति ॥ आभ्यंतरबुद्ध्यादीनांबाह्यवस्तूनांचसत्तासत्त्वयोरागमापाययोरवबोधकःसाक्षी ॥ १६ ॥ चित्ताकाशंलक्षयति ॥ सर्वेति ॥ सर्वेषांभूतानांसर्वव्यवहारहेतुत्वाद्धितः ॥ सर्वकार्यकारणनियंतृत्वाच्छ्रेष्ठः ॥ आततंस्वकल्पनयाविस्तारितम् ॥ १७॥ भूताकाशंल

श्रीवसिष्ठउवाच ॥ ॥ आकाशाहित्रयोरामविद्यंतेविततांतराः ॥ चित्ताकाशश्चिदाकाशोभूताकाशस्तृतीयकः ॥ १४॥ एतेहिसर्वसामान्याःसर्वत्रैवव्यवस्थिताः ॥ शुद्धचित्तत्त्वशक्त्यातुलब्धसत्तात्मतांगताः ॥ १५ ॥ सबाह्याभ्यंतरस्थोयःसत्तासत्तावबोधकः ॥ व्यापीसमस्तभूतानांचिदाकाशःसउच्यते ॥ १६ ॥ सर्वभूतहितःश्रेष्ठोयःकालकलनात्मकः ॥ येनेदमाततंसर्वंचित्ताकाशःसउच्यते ॥ १७॥ दशदिङ्मंडलाभोगैरव्युच्छिन्नवपुर्हियः ॥ भूतात्मासौयआकाशःपवनाब्दादिसंश्रयः ॥ १८॥ आकाशचित्ताकाशौद्वौचिदाकाशबलोद्भवौ ॥ चित्कारणंहिसर्वस्यकार्यौघस्यदिनंयथा ॥ १९ ॥ जडोस्मिनजडोस्मीतिनिश्चयोमलिनश्चितः ॥ यस्तदेवमनोविद्धितेनाकाशादिभाव्यते ॥ २० ॥ अप्रबुद्धात्मविषयमाकाशत्रयकल्पनम् ॥ कल्प्यतेउपदेशार्थंप्रबुद्धविषयंनतु ॥ २१ ॥ एकमेवपरंब्रह्मसर्वंसर्वावपूरकम् ॥ प्रबुद्धविषयंनित्यंकलाकलनवर्जितम् ॥ २२ ॥ द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भगर्भितैः ॥ उपदेश्यतएवाज्ञोनप्रबुद्धःकथंचन ॥ २३ ॥ यावद्रामाप्रबुद्धस्त्वमाकाशत्रयकल्पना ॥ तावदेवावबोधार्थंमयात्वमुपदिश्यसे ॥ २४॥ आकाशचित्ताकाशाद्याश्चिदाकाशकलंकितात् ॥ प्रसूतादावदहनाद्यथामरुमरीचयः ॥ २५ ॥ चिनोतिमलिनंरूपंचित्ततांसमुपागतम् ॥ त्रिजगंतींद्रजालानिरचयत्याकुलात्मकम् ॥ २६ ॥

क्षयति ॥ दशेति ॥ अब्दामेघाःसंवत्सरात्मासूर्योवा ॥ १८ ॥ तत्रचिदाकाशेचिदंशस्यसन्निधिमात्रेणनिमित्ततेतिप्रदर्शयति ॥ दिनंयथेति ॥ १९ ॥ जडांशस्यतुमनआद्याकारपरिणामित्वान्मनःप्रतिमुख्योपादानत्वेपिमनसिचिज्जाड्योभयानुभवात्संवलितस्यैवमनोभावापत्तिरित्याह ॥ जडोस्मीति ॥ २० ॥ इयंचमनःसृष्ट्यादिकल्पनाअज्ञबोधनार्थानवास्तवीतिपरमार्थदृशानशुद्धचितःकिंचिदुत्पन्नंविनष्टंवेतिनकश्चिदाक्षेपावकाशइत्याशयेनाह ॥ अप्रबुद्धेत्यादिना ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ दावदहनान्मरुभूमिप्रतापनाद्दावाग्नितुल्याद्वाआतपात् ॥ २५ ॥ कार्येषुमालिन्यदर्शनादपिचित्तस्यनशुद्धचित्कार्यतेत्याशयेनाह ॥ चिनोतीति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अज्ञैकदृश्यत्वादपिचित्तस्याज्ञानकार्यत्वंअतएवातत्त्वज्ञदृशैवबंधस्तत्त्वज्ञदृशात्वात्मनोनित्यमुक्तंतवेत्याह ॥ चित्तत्वमिति ॥ २७॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ० सप्तनवतितमःसर्गः ॥ ९७॥ ॥९॥ ॥ उक्तार्थप्रतिबोधार्थंचित्ताख्यानमिहोच्यते ॥ चित्ततत्त्वविमर्शाच्चनाशश्चित्तस्यविस्तरात् ॥ १ ॥ नित्यमुक्तस्याप्यात्मनोऽज्ञानान्मनोभ्रांतिकृतोबंधप्रत्ययइत्येवंनिर्णयायमनसोऽज्ञातादात्मनउत्पत्तिर्विस्तरेणोक्तारोगतत्त्वनिर्णयायेत्ररोगनिदानापथ्याशनोक्तिरियम् निर्णीतेतुमनस्तत्त्वेसांप्रतंतच्चिकित्साप्रयत्नएवावश्यंकार्योनपुनःपुनर्निदानांचिंतायाःप्रयोजनमस्तीत्याशयेनाह ॥ यतःकुतश्चिदिति ॥ योजयेत्आत्मनिसमाधध्यात् ॥ १ ॥ समाधेःफलमाह ॥ संयोजितमिति

चित्तत्वमस्यमलितस्यचिदात्मकस्यतत्त्वस्यदृश्यतइदंनतुबोधहीनैः ॥ शुक्तौयथारजततानतुबोधवृद्धिर्मौर्ख्येणबंधइहबोधबलेनमोक्षः॥ २७॥ ॥इ०वा०वा०दे०मो०उ० चिदाकाशमाहात्म्यंनामसप्तनवतितमःसर्गः॥९७॥ ॥९॥ ॥श्रीवसिष्ठउवाच॥ ॥यतःकुतश्चिदुत्पन्नंचित्तंयत्किंचिदेवहि॥ नित्यमात्मविमोक्षाययोजयेद्यत्नतोनघ॥१॥ संयोजितंपरेचित्तंशुद्धंनिर्वासनंभवेत्॥ ततस्तुकल्पनाशून्यमात्मतांयातिराघव॥२॥ चित्तायत्तमिदंसर्वंजगत्स्थिरचरात्मकम्॥ चित्ताधीनावतोरामबंधमोक्षावपिस्फुटम्॥३॥अत्रार्थेकथ्यमानंमेचित्ताख्यानमनुत्तमम्॥ ब्रह्मणायत्पुराप्रोक्तंशृणुरामातियत्नतः ॥ ४ ॥ अस्तिरामाटवीस्फाराशून्याशांतातिभीषणा॥ योजनानांशतंयस्यांलक्ष्यतेकणमात्रकम्॥५॥ तस्यामेकोहिपुरुषःसहस्रकरलोचनः॥ पर्याकुलमतिर्भीमःसंस्थितोविततात्कृतिः॥६॥ ससहस्रेणबाहूनामादायपरिघान्बहून्॥ प्रहरत्यात्मनःपृष्ठेस्वात्मनैवपलायते॥ ७॥ दृढप्रहारैःप्रहरन्स्वयमेवात्मनात्मनि॥ प्रविद्रवतिभीतात्मासयोजनशतान्यपि ॥८॥ क्रंदन्पलायमानोसौगत्वादूरमितस्ततः ॥ श्रमवान्विवशाकारोविशीर्णचरणांगकः॥ ९॥ पतितोवशएवाशुमहत्यंधेंधकूपके॥ कृष्णरात्रितमोभीमेनभोगंभीरकोटरे॥ १०॥ ततःकालेनबहुनासोंधकूपात्समुत्थितः॥ पुनःप्रहारैःप्रहरन्विद्रवत्यात्मनात्मनः॥ ११॥ पुनर्दूरतरंगत्वाकरंजवनगुल्मकम्॥ प्रविष्टःकंटकव्याप्तंशलभःपावकंयथा॥ १२ ॥

॥ २ ॥ ननुचित्तनिरोधमात्रेणकथंबाह्याभ्यंतरसर्वद्वैतबंधनिवृत्तिःस्यात्तत्राह ॥ चित्तायत्तमिति ॥ ३ ॥ उक्तेर्थेउपपादकमाख्यानमवतारयति ॥ अत्रेति ॥ ४ ॥ अटव्यादिशब्दानांतात्पर्यार्थमुत्तरसर्गेस्वयमेववक्ष्यति ॥ शून्यामृगपक्ष्यादिरहितामिथ्याभूताच ॥ अशांताविक्षेपबहुला ॥ शून्याआशांतादिगंतायस्यामितिवा ॥ कणमात्रकंअणुमात्रमिव ॥ ५ ॥ ६ ॥ आत्मनःस्वस्य ॥ स्वात्मनास्वेनैव ॥ ७ ॥ ८ ॥ ९ ॥ अंधोविवेकदृष्टिशून्यः ॥ कृष्णरात्रिरिवतमसाभीमे ॥ १० ॥ आत्मनःस्वस्मादेवनिमित्तात् ॥ ११ ॥ करंजकंटकलतानिबिडंवनगुल्मकमल्पच्छायंदुःखबहुलमितियावत् ॥ अन्यैश्चकंटकैर्व्याप्तम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ हसन्आनंदितइव ॥ १४ ॥ १५ ॥ १६ ॥ श्वभ्रंगर्तमिवगंभीरम् ॥ १७ ॥ कूपंप्रागुक्तांधकूपम् ॥ रंभावनांतरंकदलीवनमध्यम ॥ १८ ॥ अवलोक्यविवेकदृशा दृष्ट्वा ॥ अवष्टभ्ययोगबलेनधृत्वा ॥ १९ ॥ इदंआत्मप्रहरणकूपपतनादिकिंकिमर्थम् ॥ अभिमतमभिलषितम् ॥ २० ॥ २१ ॥ २२ ॥ अतुष्टिमान्भोगेभ्योऽसंतृप्तः ॥ २३ ॥

तस्मात्करंजगहनाद्विनिःसृत्यक्षणादिव ॥ पुनःप्रहारैःप्रहरन्विद्रवत्यात्मनात्मनः ॥ १३ ॥ पुनर्दूरतरंगत्वाशशांककरशीतलम् ॥ कदलीकाननंकांतंसंप्रविष्टोहसन्निव ॥ १४ ॥ कदलीखंडकात्तस्माद्विनिःसृत्यक्षणात्पुनः ॥ स्वयंप्रहारैःप्रहरन्विद्रवत्यात्मनात्मनि ॥ १५ ॥ पुनर्दूरतरंगत्वातमेवांधोंधकूपकम् ॥ ससंप्रविष्टस्त्वरयाविशीर्णावयवाकृतिः ॥ १६ ॥ अंधकूपात्समुत्थायप्रविष्टःकदलीवनम् ॥ कदलीकाननाच्छ्वभ्रंकरंजवनगुल्मकम् ॥ १७ ॥ करंजकाननात्कूपंकूपाद्रंभावनांतरम् ॥ प्रविशन्प्रहरंश्चैवस्वयमात्मनिसंस्थितः ॥ १८ ॥ एवंरूपनिजाचारःसोवलोक्यचिरंमया ॥ अवष्टभ्यबलादेवमुहूर्त्तंरोधितःपथि ॥ १९ ॥ पृष्टःसकस्त्वंकिमिदंकेनार्थेनकरोषिवा ॥ किंनामाभिमतंतेत्रकिंमुधापरिमुह्यसि ॥ २० ॥ इतिपृष्टेनकथितंतेनमेरघुनंदन ॥ नाहंकश्चिन्नचैवेदंमुनेकिंचित्करोम्यहम् ॥ २१ ॥ त्वयाहमवभग्नोस्मित्वंमेशत्रुरहोबत ॥ त्वयादृष्टोस्मिनष्टोस्मिदुःखायचसुखायच ॥ २२ ॥ इत्युक्त्वाविक्लवान्यंगान्यालोक्यस्वान्यतुष्टिमान् ॥ रुरोदातिरवंदीनोमेघोवर्षन्निवाटवीम् ॥ २३ ॥ क्षणमात्रेणतत्रासावुपसंहृत्यरोदनम् ॥ स्वान्यंगानिसमालोक्यजहासचननादच ॥ २४ ॥ अथाट्टहासपर्यंतेसपुमान्पुरतोमम ॥ क्रमेणतानितत्याजस्वान्यंगानिसमंततः ॥ २५ ॥ प्रथमंपतितंतस्यशिरःपरमदारुणम् ॥ ततस्तेबाहवःपश्चाद्वक्षस्तदनुचोदरम् ॥ २६ ॥ अथक्षणेनसपुमांस्तान्यंगानियथाक्रमम् ॥ संत्यज्यनियतेःशक्त्याक्वापिगंतुमुपस्थितः ॥ २७ ॥ दृष्ट्वानहमेकांतेपुनरन्यंतथानरम् ॥ सोपिप्रहारान्परितःप्रयच्छन्स्वयमात्मनि ॥ २८ ॥ बाहुभिःपीवराकारैःस्वयमेवपलायते ॥ कूपेपततिकूपात्तुसमुत्थायाभिधावति ॥ २९ ॥

॥ २४ ॥ २५ ॥ संकल्पात्मकंशिरः तदेवसर्वानर्थमूलत्वात्परमदारुणम् ॥ बाहवोविकल्पाशयाः ॥ विषयाभिनिवेशोवक्षः ॥ तृष्णाउदरमितियोग्यतयाकल्प्यम् ॥ २६ ॥ ज्ञानेनाज्ञानतत्कार्यबाधनियतेःशक्त्या ॥ क्वापिगंतुमित्यनेनगंतव्यस्थलांतरापरिशेषाद्बाधितस्यनिःस्वरूपापत्तिरुक्ता ॥ २७ ॥ स्वमनसइवान्यमनसामप्येषैवरीतिरितिप्रदर्शनायाह ॥ दृष्टवानित्यादिना ॥ २८ ॥ २९ ॥

---

१ आत्मनइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंडेंधकूपे ॥ श्वभ्रंकरंजवनगर्तम् ॥ शिशिरकाननंकदलीवनम् ॥ ३० ॥ ३१ ॥ ३२ ॥ अलक्ष्यतांअदृश्यताम् ॥ ३३ ॥ ३४ ॥ अंधयतीत्यंधेअंधकूपकेतमोवृतेकूपे ॥ ३५॥ ॥ ३६ ॥ ३७ ॥ उत्पलपत्राक्षेतिरामसंबोधनम् ॥ केवलंस्वव्यापारपरोभवदित्युत्तरेणान्वयः ॥ ३८॥ नकेवलंस्वयंविवेकानभिज्ञःकिंतुविवेकिजनतिरस्कारपरोपीतिसूचनाय

पुनःपततिकुंडेंतःपुनरार्त्तःपलायते ॥ पुनःप्रविशतिश्वभ्रंक्षणंशिशिरकाननम् ॥ ३० ॥ कष्टंपुनःपुनस्तुष्टःपुनःप्रहरतिस्वयम् ॥ एवंप्राय निजाचारश्चिरमालोक्यसस्मयम् ॥ ३१ ॥ समयासमवष्टभ्यपरिपृष्टस्तथैवहि ॥ तेनैवासौक्रमेणाद्यरुदित्वासंप्रहस्यच ॥ ३२ ॥ अंगे विंशीर्णतामेत्ययथावलमलक्ष्यताम् ॥ विचार्यनियतेःशक्तिततोगंतुमुपस्थितः ॥ ३३ ॥ दृष्टवानहमेकांतेपुनरन्यंतथानरम् ॥ प्रहरंस्त द्वदेवासौस्वयमेवपलायते ॥ ३४ ॥ पलायमानःपतितोमहत्यंधेंधकूपके ॥ तत्राहंसुचिरंकालमवसंतत्प्रतीक्षकः ॥ ३५ ॥ यावत्ससुचि रेणापिकूपान्नाभ्युदितःशठः ॥ अथाहमुत्थितोगंतुंदृष्टवान्पुरुषंपुनः ॥ ३६ ॥ तादृशंतादृशाकारंप्रपतंतंतथैवच ॥ अवष्टभ्यतथैवाशुत स्यप्रोक्तंपुनर्मया ॥ ३७ ॥ तथैवोत्पलपत्राक्षनासौतदवबुद्धवान् ॥ केवलंमामसौमूढोनैवजानासिकिंचन ॥ ३८ ॥ आःपापदुर्द्विजेत्यु क्त्वास्वव्यापारपरोययौ ॥ अथतस्मिन्महारण्येतथाविहरतामया ॥ ३९ ॥ बहवस्तादृशादृष्टाःपुरुषादोषकारिणः ॥ मत्पृष्टाःकेचिदायां तिस्वप्नसंभ्रमवद्भ्रमम् ॥ ४० ॥ मदुक्तंनाभिनंदंतिकेचिद्धवतनुंयथा ॥ विनिपत्यांधकूपेभ्यःकेचित्तस्मोत्थिताःपुनः ॥ ४१ ॥ कदलीखं डकाल्केचिच्चिरेणापिननिर्गताः ॥ केचिदंतर्हिताःस्फारेकरंजवनगुल्मके ॥ ४२ ॥ नक्वचित्स्थितिमायांतिकेचिद्धर्मपरायणाः ॥ एवंवि धासावितताघूहृहमहाटवी ॥ ४३ ॥ अद्यापिविद्यतेयस्यामित्थंतेपुरुषाःस्थिताः ॥ साचदृष्टात्वयारामत्वयेहव्यवहारिणी ॥ बाल्यात्तु बुद्धितत्त्वस्यनतांस्मरसिराघव ॥ ४४ ॥

आःपापेत्याद्युक्तिः ॥ ३९ ॥ मत्पृष्टामयाबोधिताःसंतःशमंप्रागुक्तस्वरूपनाशलक्षणमुपरमम् ॥ ४० ॥ नाभिनंदंत्युपेक्षंतेजुगुप्संतिच ॥ ४१ ॥ ननिर्गताःतत्रैवज्ञानंप्राप्यमुक्ता इतियावत् ॥ ४२ ॥ धर्मपरायणाःकाम्यधर्मपराः ॥ ४३ ॥ त्वयाहेतुनाव्यवहारिणीसर्वव्यवहारवतीसामहाटवीत्वयादृष्टा ॥ बुद्धितत्त्वस्यबुद्धिसारस्यविवेकस्य ॥ बाल्या दप्रागल्भ्यात् ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरति ॥ सेति ॥ लोकेलोक्यतेविवेकदृशाधर्मब्रह्मतत्त्वमस्मिंस्तथाविधेअधिकारिजन्मनिनिर्वृतिसाधनसंपत्तिसुखमागत्यप्राप्यापिअभाग्यवशादलब्धपरमात्मबोधैरासे व्यतेविषयासक्त्यासेव्यते ॥ कुसुमकाननवाटिकेवेत्यापातरम्यत्वेदृष्टांतः ॥ ४५ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेऽष्टनवतितमःसर्गः ॥ ९८ ॥ ॥ ७ ॥ उक्तस्यचित्ताख्यानस्यक्रमेणव्युत्क्रमेणच ॥ रामप्रश्नमुखेनात्रतात्पर्यार्थोनुवर्ण्यते ॥ १ ॥ किंकिमर्थंवातत्परिघैःस्वदेहप्रहारंकूपकरंजवनादिप्रवेशंचकर्तुंकुतोयमास्तेजा ताः ॥ किंतत्कर्तृकुतोयमाइतिपाठेस्वतःस्वानिष्टप्रवृत्तेरयोगात्परतःसावाच्येतिकेनतत्कर्त्रातादृशानिष्टेबलान्नियोजकेनहेतुनास्वप्रहारादौकुतोयमास्तेसंपन्नाइत्यर्थः ॥ क श्चासौतत्कर्ताचकिंतत्कर्त्ततेनकुतोयमाइतिविग्रहः ॥ १ ॥ वस्तुतोब्रह्मैवमिथ्याभूतस्वर्गनरकादिवैचित्र्यकल्पनयासंसाराटवीतत्कल्पकानिमनांस्येवतेनराइतिनतेदूरस्थामयो

साभीषणाविविधकंटकसंकटांगीघोराटवीघनतमोगहनापिलोके॥आगत्यनिर्वृतिमलब्धपराववोधैरासेव्यतेकुसुमगुल्मकवाटिकेव ॥४५॥ ॥इ०वा०वा०दे०मो०उ०चित्तोपाख्याननंनामअष्टनवतितमःसर्गः॥९८॥ ॥७॥ ॥श्रीरामउवाच॥ ॥कासौमहाट वीब्रह्मन्कदादृष्टाकथंमया॥केचतेपुरुषास्तत्रकिंतत्कर्त्तुंकुतोयमाः॥१॥ ॥श्रीवसिष्ठउवाच॥ ॥रघुनाथमहाबाहोश्शृणुवक्ष्यामिते खिलम्॥नसामहाटवीरामदूरेनैवचतेनराः॥२॥ येयंसंसारपदवीगंभीरापारकोटरा॥तांतांशून्यांविकाराढ्यांविद्धिराममहाटवीम् ॥३॥विचारालोकलभ्येयंयदैकेनैववस्तुना॥पूर्णानान्येनसंयुक्ताकेवलेवतदैवसा॥४॥ तत्रयेतेमहाकाराःपुरुषाःप्रभ्रमंतिहि॥मनां सितानिविद्धित्वंदुःखेनिपतितान्यलम्॥५॥ द्रष्टायोयमहंतेषांसविवेकोमहामते॥विवेकेनमयातानिदृष्टान्यन्येननानघ॥६॥ मया तान्येवबोध्यंतेविवेकेनमनांसिहि॥सततंसुप्रकाशेनकमलानीवभानुना॥७॥ मत्प्रबोधंसमासाद्यमत्प्रसादान्महामते॥मनांसिका निचित्तानिगतान्युपशमात्परम्॥८॥कानिचिन्नाभिनंदंतिमांविवेकंविमोहतः॥मत्तिरस्कारवशतःकूपेष्वेवपतंत्यधः॥९॥ येतेंधकू पागहनानरकास्तेरघूद्वह॥कदलीकाननंयानिसंप्रविष्टानितानितु॥१०॥स्वर्गैकरसिकानित्वंमनांसिज्ञातुमर्हसि॥प्रविष्टान्यंधकूपां तर्निर्गतानिनयानितु॥११॥महापातकयुक्तानितानिचित्तानिराघव॥कदलीकाननस्थानिनिर्गतानिनयानितु॥१२॥

क्ताइत्याह॥रघुनाथेत्यादिना॥२॥ याइयंप्रसिद्धासंसारपदवीतांपरमार्थदृशाअसत्वाच्छून्यांभ्रांतिदृशातुसत्वाद्विकाराढ्यांतांप्रागुक्तांमहाटवींविद्धीत्यर्थः॥३॥ कदासाशून्या केनवाउपायेनलभ्यतेतत्राह ॥ विचारालोकेति ॥ यदाएकेनाद्वितीयेनैववस्तुनापूर्णाअन्येननसंयुक्ताभवतितदाकेवलाशून्येवभवति ॥ इवशब्दःकेवलशून्यादिशब्दानामपित त्रौपचारिकीप्रवृत्तिःप्रतियोग्यनिरूपणेशून्यत्वादेर्निरूपणासंभवादितिद्योतनाय॥ तादृशीचेयंतत्त्वंपदार्थशोधनलक्षणेनविवेकालोकेनलभ्येत्यर्थः ॥४॥५॥ विवेकोत्रविचारः ॥ ६ ॥ ७ ॥ मत्प्रबोधंतत्त्वज्ञानम् ॥ मत्प्रसादाद्विवेकप्रसादात ॥ उपशमान्मनोभावनाशात् ॥ परंमोक्षंगतानि ॥ ८ ॥ मत्तिरस्कारोविचारोपेक्षा ॥ ९ ॥ १० ॥ ११ ॥ १२॥

---

१ कुसुमप्रधानागुल्मकायस्मिंस्तत्कुसुमगुल्मकंकाननंतद्रूपावाटिकेत्यर्थः॥एतत्फलितार्थमादायकुसुमकाननेत्यादिटीकेतिभाति॥बहुषुपुस्तकेष्वेवमेववैषम्येणपाठदर्शनात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १३ ॥ मानुष्येमनुष्यभावेजातानिपरिणतानि ॥ संप्रबुद्धानीतिमनुष्यदेहेवैराग्यादिविशेषसंभवान्मुख्योज्ञानाधिकारइतिद्योतनाय ॥ १४ ॥ निपतंतिनरकेषु ॥ उत्पतंति स्वर्गे ॥ १५ ॥ कलत्ररसंकुटुंबस्नेहवत्‌अतएवदुःखकंटकसंबाधंविविधैषणंचमानुष्यम् ॥ १६ ॥ रसिकानिअभिनिविष्टानिविषयरसास्वादपराणिवा ॥ १७ ॥ १८ ॥ पुण्यभूतेनशास्त्रविहितेन ॥ अशास्त्रविहितस्यवारणार्थंविशेषणम् ॥ धारणात्मनाध्येयदेशेमनोनिबंधरूपधारणाप्रधानेनउपासनेनहेतुनायानिमहसप्तर्षिध्रुवादिशरीराणिधारयंतिता

पुण्यसंभारयुक्तानितानिचित्तानिराघव ॥ करंजवनयातानिनिर्गतानिनयानितु ॥ १३ ॥ तानिमानुष्यजातानिचित्तानिरघुनंदन ॥ कानिचित्संप्रबुद्धानितत्रमुक्तानिबंधनात् ॥ १४ ॥ कानिचिद्दुरूपाणियोनेर्योनिंविशंतिहि ॥ मनांसितानितिष्ठंतिनिपतंत्युत्पतंतिच ॥ १५ ॥ यत्तत्करंजगहनंतत्कलत्ररसंविदुः ॥ दुःखकंटकसंबाधंमानुष्यंविविधैषणम् ॥ १६ ॥ करंजगहनंयानिप्रविष्टानिमनांसितु ॥ मानुष्येतानिजातानितत्रैवरसिकानिच ॥ १७ ॥ कदलीकाननंयत्तच्छशांककरशीतलम् ॥ तन्मनोह्लादनकरंस्वर्गंविद्धिरघूद्वह ॥ १८ ॥ कानिचित्पुण्यभूतेनतपसाधारणात्मना ॥ धारयंतिशरीराणिसंस्थितान्युदितान्यपि ॥ १९ ॥ यैरहंपुंभिरबुधैर्बुद्धिचित्ततिरस्कृतः ॥ तैर्मनोभिरनात्मज्ञैःस्वविवेकस्तिरस्कृतः ॥ २० ॥ त्वयादृष्टोविनष्टोस्मित्वंमेशत्रुरितिद्रुतम् ॥ यदुक्तंतद्धिचित्तेनगलतापरिदेवितम् ॥ २१ ॥ रुदितंयन्महाक्रंदंपुंसावद्धाशुराघव ॥ तद्भोगजालंत्यजतामनसारोदनंकृतम् ॥ २२ ॥ अर्द्धप्राप्तविवेकस्यनप्राप्तस्यामलंपदम् ॥ चेतसस्त्यजतोभोगान्परितापोभृशंभवेत् ॥ २३ ॥ रुदतांगानिदृष्टानिकारुण्येनावबोधिना ॥ कष्टमेतानिसंत्यज्यकिंप्रयामीतिचेतसा ॥ २४ ॥ अर्द्धप्राप्तविवेकस्यनप्राप्तस्यामलंपदम् ॥ चेतसस्त्यजतोंगानिपरितापोहिवर्द्धते ॥ २५ ॥ हसितंतुयदानंदिपुंसामदवबोधतः ॥ परिप्राप्तविवेकेनतत्तुष्टंरामचेतसा ॥ २६ ॥ परिप्राप्तविवेकस्यत्यक्तसंसारसंस्थितेः ॥ चेतसस्त्यजतोरूपमानंदोहिविवर्द्धते ॥ २७ ॥ हसतांगानिदृष्टानिपुंसायान्युपहासतः ॥ तानिदृष्टानिमनसाविप्रलंभपदानिह ॥ २८ ॥

निइतरापेक्षयातेजोभोगाद्यतिशयेनतत्त्वावबोधेनचउदितानिअभ्युदयवंत्यपिभूत्वासंस्थितानिचिरंस्थितानीत्यर्थः ॥ १९ ॥ बुद्धिभिश्चित्तैर्वातिरस्कृतःउपेक्षितः ॥ नाध्यवसितोनस्मृतश्चेत्यर्थः ॥ २० ॥ गलतातत्त्वावबोधाद्विशीर्यता ॥ परिदेवितंविलपितम् ॥ २१ ॥ २२ ॥ २३ ॥ स्वान्यंगानिसमालोक्यजहासचननादचेत्युक्तेस्तात्पर्यमाह ॥ रुदतेति ॥ अवबोधिनाईषद्विवेकवता ॥ कारुण्येनस्त्रीपुत्रादिस्नेहेन ॥ २४ ॥ अंगानिस्नेहलोभादीनि ॥ २५ ॥ तत्तुष्टंआनंदितम् ॥ तुषेर्नपुंसकेभावेक्तः ॥ २६ ॥ तदेवस्पष्टयति ॥ परिप्राप्तेति ॥ २७ ॥ विप्रलंभपदानिस्ववंचननिमित्तानि ॥ २८ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिथ्याविकल्पेनरचितैःकल्पितैर्विषयैर्विप्रलब्धंवंचितमित्युपहासेन ॥२९॥ प्राक्तन्याआदीनतायाआधारमालंबनंविषयजातम् ॥ दूरतःअसंगात्मासंस्पर्शितयेतियावत् ॥३०॥ असौप्रागुक्तःपुरुषः ॥ आदत्तेविष्टभ्नाति ॥ ३१ ॥ अर्थसहिताआशाअर्थाशा ॥ मनोबाधेसहविषयैर्विषयतृष्णापिबाध्यतइतिदर्शितमित्यर्थः ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५॥ स्वांतंमनः ॥ ३६ ॥ उपतप्तानिविक्षोभितानि ॥ तद्ब्रह्मपदंगंतुमवगंतुंयुक्तानिस्वरूपयोग्यानि ॥ अथवायुक्तानियोगेननिरुद्धान्यपि ॥ ३७ ॥ उपतप्तमित्येतद्व्याचष्टे ॥ यदिद

मिथ्याविकल्परचितैर्विप्रलब्धमहोचिरम् ॥ इत्यंगान्युपहासेनदृष्टानिस्वानिचेतसा ॥ २९ ॥ मनःप्राप्तविवेकंहिविश्रांतंविततेपदे ॥ प्राक्तनादीनताधारंहसन्पश्यतिदूरतः ॥ ३० ॥ यदसौसमवष्टभ्यमयापृष्टःप्रयत्नतः ॥ तद्विवेकोबलाच्चित्तमादत्तइतिदर्शितम् ॥ ३१ ॥ यदंगानिविशीर्णानिगतान्यंतर्द्धिमग्रतः ॥ तच्चित्तेनविनार्थाशाशाम्यतीतिप्रदर्शितम् ॥ ३२ ॥ सहस्रनेत्रहस्तत्वंयत्पुंसःपरिवर्णितम् ॥ तदनंताकृतित्वंहिचेतसःपरिदर्शितम् ॥ ३३ ॥ यदात्मनिप्रहारौघैःपुमान्प्रहरतिस्वयम् ॥ तत्तत्कुकल्पनाघातैःप्रहरत्यात्मनोमनः ॥ ३४ ॥ पलायतेयत्पुरुषःस्वात्मनःप्रहरन्स्वयम् ॥ स्ववासनाप्रहारेभ्यस्तन्मनःप्रपलायते ॥ ३५ ॥ स्वयंप्रहरतिस्वांतंस्वयमेवस्वयेच्छया ॥ पलायतेस्वयंचैवपश्याज्ञानविजृंभितम् ॥ ३६ ॥ स्ववासनोपतप्तानिसर्वाण्येवमनांसिहि ॥ स्वयमेवपलायंतेगंतुंयुक्तानितत्पदम् ॥ ३७ ॥ यदिदंविततंदुःखंतत्तनोतिस्वयंमनः ॥ स्वयमेवातिखिन्नंतुपुनस्तस्मात्पलायते ॥ ३८ ॥ संकल्पवासनाजालैःस्वयमायातिबंधनम् ॥ मनोलालामयैर्जालैःकोशकारकृमिर्यथा ॥ ३९ ॥ यथानर्थमवाप्नोतितथाक्रीडतिचंचलम् ॥ भाविदुःखमपश्यन्स्वंदुर्लीलाभिरिवार्भकः ॥ ४० ॥ अपश्यन्काष्ठरंध्रस्थवृषणाक्रमणंयथा ॥ कीलोत्पाटीकपिर्दुःखमेतीदंहितथामनः ॥ ४१ ॥ चिरपालनयाचैवचिरभावनयातथा ॥ अभ्यासात्तुच्छतामेत्यनभूयःपरिशोचति ॥ ४२ ॥ मनःप्रमादाद्वर्द्धंतेदुःखानिगिरिकूटवत् ॥ तद्वशादेवनश्यंतिसूर्यस्याग्रेहिमंयथा ॥ ४३ ॥

मिति ॥ ३८ ॥ लालास्वमुखद्रवस्तन्मयैस्तद्विकारैः ॥ कोशकारकृमिःकौशेयोत्पत्तिभूमौप्रसिद्धः ॥ ३९ ॥ ४० ॥ उक्तेर्थेलौकिकींगाथामुदाहरति ॥ अपश्यन्निति ॥ यथाकिलारण्येतक्षसुमहाकाष्ठमर्द्धंविदार्यमध्येकीलंदत्वादैवादपगतेषुकश्चित्कपिस्तत्काष्ठोपविष्टःकाष्ठरंध्रस्थस्ववृषणाक्रमंभाविनमपश्यन्स्वचापलाद्धिष्टंभकीलोत्पाटीवृषणसंदंशेनमरणादिदुःखमेतितद्वदित्यर्थः ॥ ४१ ॥ यदिनिरुद्धमपिविक्षेपैःपलायतेतर्हिकथमिष्टसिद्धिस्तत्राह ॥ चिरेति ॥ नसकृन्निरोधादिष्टसिद्धिःकिंतुतस्यचिरपालनयाचिरमसंगात्मभावनयाचेत्यर्थः ॥ तुच्छतांज्ञानबाध्यताम् ॥ ४२ ॥ तथाचमनएवप्रमादविवेकाभ्यांबंधमोक्षयोर्हेतुरितिफलितमित्याह ॥ मनइति ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यर्थेचशब्दः ॥ यदिमनःशास्त्रार्थसंजातयार्अनिंद्ययावासनयातुल्यंसमरसंसतरागादिषुविषयेषुमौनेननिरोधेनयावज्जीवंमुनिवद्रमतेततर्हिपश्चात्तत्त्वबोधेनपावनपावनंपरमपवित्रमजंजन्मादिविक्रियारहितमतएवशीतलंतापत्रयास्पृष्टमलंपूर्णंतद्ब्रह्मपदंप्राप्यतत्संस्थेनजीवन्मुक्तेनपुंसामहापत्सुप्रलयादिष्वपिपुनर्नशोच्यते ॥ तरतिशोकमात्मविदित्यादिश्रुतेरित्यर्थः ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठम०ता०उ०एकोनशततमःसर्गः ॥ ९९ ॥ ॥ ७ ॥ ॥ वर्ण्यतेत्रमनःशक्त्याब्रह्मणःसर्वशक्तिता ॥ अज्ञानमात्राद्द्वैतेबंधमोक्षादिकल्पना ॥ १ ॥ मनोर्थानैवबंधमोक्षकल्पनेतियदुक्तंतत्रोपपत्तिमाह ॥ चित्तमित्यादिना ॥ अतन्मयमब्रह्मभूताज्ञानविकारः ॥ तन्मयंशुद्धब्रह्मविवर्त्तश्च ॥ यथातरंगोज

यावज्जीवमनिंद्ययाचरमतेशास्त्रार्थसंजातयातुल्यंवासनयामनोहिमुनिवन्मौनेनरागादिषु ॥ पश्चात्पावनपावनंपदमजंतत्प्राप्यतच्छीतलंतत्संस्थेननशोच्यतेपुनरलंपुंसामहापत्स्वपि॥४४॥ ॥इ०वा०वा०दे०मो०पू०चित्तोपाख्यानंनामैकोनशततमःसर्गः॥९९॥ चित्तोपाख्यानंसंपूर्णम्॥ ॥श्रीवसिष्ठउवाच॥ ॥चित्तमेतदुपायातंब्रह्मणःपरमात्पदात्॥ अतन्मयंतन्मयंचतरंगःसागरादिव॥ १ ॥ प्रवुद्धानांमनोरामब्रह्मैवेहहिनेतरत्॥ जलसामान्यबुद्धीनामब्धेर्नान्यस्तरंगकः॥२॥ मनोरामाप्रबुद्धानांसंसारभ्रमकारणम्॥ अपस्यतोंबुसामान्यमन्यतांबुतरंगयोः॥३॥ अप्रबुद्धदृशांपक्षेतत्प्रबोधायकेवलम्॥ वाच्यवाचकसंबंधकृतोभेदःप्रकल्प्यते॥४॥ सर्वशक्तिपरंब्रह्मनित्यमापूर्णमव्ययम्॥ नतदस्तिनतस्मिन्यद्विद्यतेविततात्मनि॥ ५॥ सर्वशक्तिर्हिभगवान्यैवतस्मैहिरोचते॥ शक्तितामेववितताप्रकाशयतिसर्वगः॥ ६॥ चिच्छक्तिर्ब्रह्मणोरामशरीरेष्वभिदृश्यते॥ स्पंदशक्तिश्चवातेषुजडशक्तिस्तथोपले॥ ७॥ द्रवशक्तिस्तथांभःसुतेजःशक्तिस्तथानले॥ शून्यशक्तिस्तथाकाशेभावशक्तिर्भवस्थितौ॥ ८॥ ब्रह्मणःसर्वशक्तिर्हिदृश्यतेदशदिग्गता॥ नाशशक्तिर्विनाशेषुशोकशक्तिश्चशोकिषु॥ ९ ॥

लविकारस्तत्सत्ताविवर्त्तश्चतद्वदित्यर्थः ॥ १ ॥ जलसामान्यंजलसत्ता ॥ २ ॥ ३ ॥ अतएवहिउपदेश्योपदेशकशब्दार्थादिशास्त्रीयव्यवहारकल्पनापिअज्ञपक्षमवलंब्यैवनतत्त्वदृशेतिप्रागुक्तमित्याह ॥ अप्रबुद्धेति ॥ ४ ॥ सर्वजगत्कारणत्वमप्यज्ञातस्यैवब्रह्मणोनज्ञातस्येत्याशयेनतस्यैवसर्वशक्तिशालितामुपपादयति ॥ सर्वशक्तीत्यादिना ॥ ५ ॥ प्रकाशयतिकार्यात्मनाप्रकटयति ॥ ६ ॥ शरीरेषुचतुर्विधभूतग्रामेषु ॥ ७ ॥ शून्यशक्तिरनावरकत्वात्सर्वावपनशक्तिः ॥ भावशक्तिरस्तीतिव्यवहारयोग्यता ॥ ८ ॥ नाशशक्तिःकारणेतिरोभावशक्तिः ॥ शोकशक्तिर्[1]शोकजदेहजननशक्तिर्विषादशक्तिर्वा ॥ ९ ॥

---

१ एषप्रथमोर्थोनबुध्यतेसविचारणीयः ॥ पाठांतरंतुक्कापिनोपलभ्यते ॥ शोकजदाहजननशक्तिरितिपाठश्चेद्वरमितिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पांतेप्राकृतप्रलयेप्रकृतौसर्वशक्तितातस्याःसर्वकार्यबीजत्वात् ॥ शर्वशक्तितेतिपाठेसंहारशक्तिता ॥१०॥ तदेवाह ॥ फलेति॥११॥प्रथमकार्यस्यचित्तस्यचिज्जाड्योभयरूपतादर्शनादप्यज्ञातमेवब्रह्मजगद्बीजमित्याशयेनाह ॥ प्रतिभासेति ॥ प्रतिभासोत्राज्ञानसाक्षीतद्वशादेवनशुद्धवशात्॥ १२ ॥ यतोयंतरुगुल्मादिदृश्यप्रपंचोऽज्ञातचिद्विवर्त्तोऽतश्चिन्मात्रमेवतत्त्वमित्याह ॥ नानेति ॥ अनिर्ज्ञातकल्पनाअज्ञातेतत्त्वेयतइयंकल्पनेत्यर्थः ॥ १३ ॥ जगत्अहंतत्त्वंअहमितिभासमानजीवतत्त्वंप्रत्यक्चिद्रूपंब्रह्मैवेतिपश्येत्यर्थः ॥ १४ ॥ ब्रह्मैवतत्तच्छक्तिपुरस्कारेणभ्रांत्यामनआदिशब्दैरुच्यतेनान्यदित्याह ॥ यदित्यादिना ॥ १५ ॥ १६ ॥ शक्तितत्कार्ययोरभेदादिदमितिपुरोवर्त्तितयातदितिपरोक्षतया अहमितिप्रत्यक्तादात्म्येनचभासमानस्त्रिविधोदृश्यविभागःप्रतिभासजःप्रातिभासिकएवनवास्तवइत्यर्थः ॥ १७ ॥ ननुकामकर्मवासनादिकमपिद्वैतप्रपंचहेतुःश्रूयतेतत्कथंब्रह्म

आनंदशक्तिर्मुदितेवीर्यशक्तिस्तथाभटे॥ सर्गेषुसर्गशक्तिश्चकल्पांतेसर्वशक्तिता ॥ १० ॥ फलपुष्पलतापत्रशाखाविटपमूलवान्॥ वृक्षबीजेयथावृक्षस्तथेदंब्रह्मणिस्थितम्॥११॥ प्रतिभासवशादेवमध्यस्थंचित्तजाड्ययोः॥ जीवेतराभिधंचित्तमंतर्ब्रह्मणिदृश्यते॥ १२ नानातरुलतागुल्मजालपल्लवशालयः॥ निर्विकल्पकचिन्मात्रंनानानिर्ज्ञातकल्पना ॥ १३ ॥ ब्रह्मैवेदमहंतत्त्वंजगत्पश्याघराघव॥ स आत्मासर्वगोनाममनित्योदितमहावपुः॥ १४ ॥ यन्मनाङ्मननींशक्तिंधत्तेतन्मनउच्यते॥ पिच्छभ्रांतिर्यथाव्योम्निपयस्यावर्त्तधीर्यथा ॥ १५॥ प्रतिभासकलामात्रंमनोजीवस्तथात्मनि॥ यदेतन्मनसोरूपमुदितंमननात्मकम्॥ १६ ॥ ब्राह्मीशक्तिरसौतस्माद्ब्रह्मैवतदरिंदम॥ इदंतदहमित्येवविभागःप्रतिभासजः॥ १७॥ मनसोब्रह्मणोन्यच्चमोहेपरमकारणम् ॥ यद्यच्चैतन्मनस्येवकिंचित्सदसदात्मकम् ॥ १८॥ व्याशब्दितंसर्वशक्तेस्तांशक्तिंब्रह्मतांविदुः॥ मनःसत्तात्मकंनामयथैतन्मनसिस्थितम्॥१९॥ यथर्त्तोःशक्तयस्तद्वज्जीवेहाब्रह्मणिस्थिताः॥ व्याप्तसर्वर्त्तुकुसुमाक्ष्मादेशविधिभेदतः॥ २०॥

शक्तिरेवतद्धेतुरुच्यतेतत्राह ॥ मनसइति ॥ मनसोजीवस्यब्रह्मणश्चमोहेभेदादिभ्रमेअन्यच्चकामादियद्यत्किंचित्परमकारणंव्याशब्दितंलोकेतत्सर्वंमनस्येवाविर्भावतिरोभावाभ्यांसदसदात्मकंसर्वशक्तेर्ब्रह्मणस्तांप्रागुक्तांब्रह्मतांबृंहणशक्तिमेवविदुर्नतदन्यदितिपरेणान्वयः ॥ १८ ॥ ननुमनोधर्माःकामादिशक्तयःकथंब्रह्मणिस्थितायेनतच्छक्तयःस्युस्तत्राह ॥ मनइति ॥ यथामनःसत्तात्मकंनामब्रह्मरूपंमनसिसंसर्गाध्यासात्स्थितंयथावाऋतोर्वसंतादेःशक्तयोवृक्षादिषुस्थितास्तद्वज्जीवेहामनोधर्माअपिब्रह्मणिस्थिताइत्यर्थः ॥ १९ ॥ यदिसर्वाजीवेहाब्रह्मशक्तयस्तर्हिकुतोनसर्वाःसर्वजीवेषुसंकीर्यंतेतत्राह ॥ व्याप्तेति ॥ यथाव्याप्तसर्वर्त्तुकुसुमशक्तिरपिक्ष्माभूमिस्तत्तत्प्रदेशेषुबीजसंस्कारादिविधिभेदतोव्यवस्थयैवपुष्पादिदधातिनसंकरेणतथालोककृद्ब्रह्मापिचित्तशक्तीर्व्यवस्थयादधातीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयांतिव्यवस्थितफलात्मनाआविर्भवंति ॥ क्ष्मातलाच्छालिशक्तयइवेत्यर्थः ॥ २१ ॥ अभ्युपेत्यचेदंप्रतियोगिव्यवच्छेदसंख्यारूपादिभेदरूपंजगद्वैचित्र्यमसंकरोदर्शितःपर मार्थतस्तत्प्रतिभासमात्रस्यकारकत्वायोगात्प्रतिभासपृथक्कृतकारकांतरासिद्धेश्चप्रातिभासिकंनकिंचिज्जातंनवाकिंचित्केनचित्पश्यतीतिमनःशब्दकल्पितब्रह्मजास्तेब्रह्मैवेतिवु ध्यस्वेत्याह ॥ नजातमितिसार्द्धेन ॥ २२ ॥ २३ ॥ २४ ॥ जगत्कल्पकोजीवएवब्रह्मान्योनास्तिदूरेतत्कल्पितंजगदित्याशयेनाह ॥ स्वयमिति ॥२५॥ चितंउपचितंपूर्णमि

यथादधातिपुष्पाणितथाचित्तानिलोककृत्॥ क्वचित्कचित्कदाचिद्धितस्मादायांतिशक्तयः॥ २१॥ देशकालादिवैचित्र्यात्क्ष्मातलादिव शालयः॥ नजातंप्रतिभासेनतेनैवान्येनपश्यति॥२२॥ प्रतियोगिव्यवच्छेदसंख्यारूपादयश्चये॥ मनःशब्दैःप्रकल्प्यंतेब्रह्मजान्ब्रह्मवि द्धितान्॥ २३॥ यथायथास्यमनसःप्रतिभासःप्रवर्त्तते॥ तथातथैवभवतिदृष्टांतोत्रकिलैंदवाः॥२४॥ स्वयमक्षुब्धविमलेयथास्पंदोम हांभसि॥ संसारकारणंजीवस्तथायंपरमात्मनि॥ २५॥ ज्ञस्यसर्वचितंशामब्रह्मैवावर्त्ततेसदा ॥ कल्लोलोर्मितरंगौघैरब्धेर्जलमिवात्म नि॥ २६॥ द्वितीयानास्तिसत्तैकानामरूपक्रियात्मिका॥ परेनानातरंगेब्धौकल्पनेवजलेतरा ॥ २७॥ जायतेनश्यतितथायदिदंयाति तिष्ठति॥ तदिदं ब्रह्मणिब्रह्मब्रह्मणाचविवर्त्तते॥२८॥स्वात्मन्येवातपस्तीव्रोमृगतृष्णिकयायथा॥विचित्रेणविचित्रोपिप्रस्फुरत्यात्मनात था॥ २९॥ करणंकर्मकर्त्ताचजननंमरणंस्थितिः॥ सर्वंब्रह्मैवनह्यस्तितद्विनाकल्पनेतरा॥ ३०॥ नलोभोस्तिनमोहोस्तिनतृष्णास्तिनरं जना॥ कआत्मन्यात्मनोलोभस्तृष्णामोहोथवाकुतः॥ ३१॥ आत्मैवेदंजगत्सर्वमात्मैवकलनाक्रमः॥ हेमांगदतयेवायमात्मोदेतिमन स्तया॥ ३२॥ अबुद्धंयत्परंधामतच्चित्तंजीवउच्यते॥ अपरिज्ञातएवाशुबंधुरायात्यबंधुताम्॥ ३३॥ चिन्मयेनात्मनाज्ञेनस्वसंकल्पन यास्वयम्॥ शून्यतागगनेनेवजीवताप्रकटीकृता॥ ३४॥

त्यर्थः ॥ आसमंताद्वर्तते ॥ २६ ॥ परेब्रह्मणिद्वितीयासत्तानास्तिकिंत्वेकैव ॥ २७ ॥ विवर्त्तनेअतात्त्विकरूपेणप्रतिभासते ॥ २८ ॥ मृगतृष्णिकयामृगतृष्णानद्यात्मना ॥ वि चित्रोविगतनामरूपोपि ॥ २९ ॥ ३० ॥ द्वितीयाभावेलोभमोहादीनांप्रसक्तिरेवनास्तीत्याह ॥ नेति ॥ रंजनाअत्यासक्तिः ॥ ३१ ॥ मनस्तयामनोभावेन ॥ ३२ ॥ अबुद्धम ज्ञानावृतम् ॥ ३३ ॥ अज्ञेनाज्ञानविषयीकृतेनयथाअशून्येनापिगगनेनशून्यताप्रकटीकृतातद्वत् ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनात्मवत्अनात्मभूताहंकारादितादात्म्येनाहंप्रत्ययविषयवत् ॥ विषयरूपेणद्वितीयरूपेणचासत्परमार्थैकरूपेणसच्च ॥ ३५ ॥ मोहार्थयोर्व्यामोहनिमित्तयोः ॥ एतयोर्बंधमोक्षशब्दार्थदृशोरत्यंतमसंभवात् ॥ ३६ ॥ नित्यंनसंभवतीत्यसंभवोबंधोयस्य ॥ तथाचपरमार्थदृष्ट्याकाल्पनिकावपिबंधमोक्षौतुच्छौ ॥ ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः ॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेतिश्रुतेरितिभावः ॥ ३७ ॥ यौक्तिकदृशाकाल्पनिकानिर्वचनीयबंधस्यप्राग्विस्तरेणोपपादितत्वात्काल्पनिकोपिबंधोनास्तीतितुच्छतोक्तिमसहमानोरामःपृच्छति ॥ मनइति ॥ ३८ ॥ यौक्तिकदृष्टिरियंलौकिकदृष्टिदार्ढ्यविघटनायपरमार्थदृष्टिद्वारत्वेनकल्पितेतिनतत्रैवविश्रांतिःकिंतुश्रौततुच्छतादृष्टावेवेत्याशयेनवसिष्ठःप्रत्याह ॥ मिथ्येत्यादिना ॥ यथाकाल्पनिकीस्वामीकल्पनाजाग्रद्दृशामिथ्यातुच्छातद्वत् ॥ अनिर्वचनीयतानवस्तुतत्त्वंकिंतुयुक्तिभिर्निर्वचनाशक्तिःसाचमूर्खपुरुषध

आत्मैवानात्मवदिहजीवोजगतिराजते॥ द्वींदुत्वमिवदुर्दृष्टेःसच्चासच्चसमुत्थितम्॥३५॥ मोहार्थशब्दार्थदृशोरेतयोरत्यसंभवात्॥ सत्यत्वादात्मनश्चैवक्वात्मावद्धःक्वमुच्यते॥३६॥ नित्यासंभवबंधस्यबद्धोस्मीतिकुकल्पना॥ यस्यकाल्पनिकस्तस्यमोक्षोमिथ्यानतत्त्वतः॥३७॥ ॥श्रीरामउवाच॥ ॥मनोयंनिश्चयंयातितत्तद्भवतिनान्यथा॥ तेनकाल्पनिकोनास्तिबंधःकथमिहप्रभो॥३८॥ ॥श्रीवसिष्ठउवाच॥ ॥ मिथ्याकाल्पनिकीवेयंमूर्खाणांबंधकल्पना॥ मिथ्यैवाभ्युदितातेषामितरामोक्षकल्पना॥३९॥ एवमज्ञानकादेवबंधमोक्षदृशोऽस्मृतेः॥ वस्तुतस्तुनबंधोस्तिनमोक्षोस्तिमहामते॥४०॥ कल्पनायाअवस्तुत्वंसंप्रबुद्धमतिंप्रति॥रज्ज्वहेरिवहेप्राज्ञतत्त्वबुद्धमतिंप्रति॥४१॥ बंधमोक्षादिसंमोहोनप्राज्ञस्यास्तिकश्चन॥ संमोहबंधमोक्षादिर्ह्यज्ञस्यैवास्तिराघव॥४२॥ आदौमनस्तदनुबंधविमोक्षदृष्टीपश्चात्प्रपंचरचनाभुवनाभिधाना॥ इत्यादिकास्थितिरियंहिगताप्रतिष्ठामाख्यायिकासुभगबालजनोदितेव॥४३॥ ॥इ० वा० वा० दे० मोक्षोपायेषूत्प० चित्तचिकित्सापूर्वकंचित्तोत्पत्तिवर्णनंनामशततमःसर्गः॥१००॥ ॥ ६॥ ॥ ६॥

र्मोनवस्तुस्वभावइतिसूचनायमूर्खाणामित्युक्तम् ॥ ३९ ॥ एवंप्रागुक्तरीत्यातुच्छमज्ञानमज्ञानकंतस्मादेवबंधमोक्षदृशः ॥ नासतोविद्यतेभावोनाभावोविद्यतेसतः उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिरितिस्मृतिविरोधेनसदसदांतरालिकानिर्वचनीयताविश्रांत्ययोगादित्यर्थः ॥ ४० ॥ अवस्तुत्वंतुच्छत्वम् ॥ तत्प्रागुक्तमनिर्वचनीयत्वंतुअबुद्धमतिमज्ञंपरीक्षकंप्रतिनप्राज्ञंप्रतीत्यर्थः ॥ ४१ ॥ तदेवस्पष्टतरमाह ॥ बंधेति ॥ ४२ ॥ उक्तेर्थेबालकाख्यायिकामवतारयन्नुपसंहरति ॥ आदाविति ॥ हेसुभगइत्यादिकाइयंबंधस्थितिः ॥ प्रतिष्ठांदृढमूलताम् ॥ बालजनायधात्र्याउदिताउक्तावक्ष्यमाणाआख्यायिकेव ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्प० शततमःसर्गः ॥ १०० ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्पादर्थशून्यायाविकल्पशतसंस्तते: ॥ दृष्टांतोवर्ण्यतेत्रैवबालकाख्यायिकाक्रमः ॥१॥ संकल्पविकल्पात्मकस्यमनसःसंकल्पोमूलंतन्निरोधेमूलोच्छेदाद्विकल्पानुत्थानेनिर्वि
कल्पपदप्रतिष्ठासिद्धिरितिसूचनायप्रागवतारितांबालकाख्यायिकांश्रोतुकामोरामःपृच्छति ॥ किमुच्यतइति ॥ पदसंस्कारपक्षमाश्रित्यकिमेतदित्यनयोःसामान्येनपुंसकत्वम् ॥
बालकाख्यायिकालक्षणाःक्रमोदृष्टांतःकिंप्रकारोलोकेउच्यतेएतत्क्रमेणकथयेत्यर्थः ॥१॥ मुग्धमतिर्युक्तायुक्तविवेकशून्यः ॥२॥३॥ अत्यंतासतिपत्तनेइतिप्रधानराजधान्यु

॥श्रीरामउवाच॥ ॥किमुच्यतेमुनिश्रेष्ठबालकाख्यायिकाक्रमः॥क्रमेणकथयैतन्मेमनोवर्णनकारणम् ॥ १ ॥ ॥श्रीवसिष्ठउवाच॥
कोपिमुग्धमतिर्बालोधात्रींपृच्छतिराघव ॥ कांचिद्विनोदिनींधात्रिवर्णयाख्यायिकामिति ॥ २ ॥ साबालस्यविनोदायधात्रीतस्यमहा
मते ॥ आख्यायिकांकथयतिप्रसन्नमधुराक्षराम् ॥ ३ ॥ क्वचित्संतिमहात्मानोराजपुत्रास्त्रयःशुभाः ॥ धार्मिकाःशौर्यमुदिताअत्यंतास
तिपत्तने ॥ ४ ॥ विस्तीर्णेशून्यनगरेव्योम्नीवजलतारकाः ॥ द्वौनजातौतथैकस्तुगर्भएवनसंस्थितः ॥ ५ ॥ अथात्युत्तमलाभार्थंकदाचित्स
मवायतः ॥ विबंधवःखिन्नमुखाःशोकोपहतचेतसः ॥ ६ ॥ तेतस्माच्छून्यनगरान्निर्गताविततानना: ॥ गगनादिवसंश्लिष्टाबुधशुक्रश
नैश्चराः ॥ ७ ॥ शिरीषसुकुमारांगाःपृष्ठतोर्केणतापिताः ॥ मार्गेहनिगताग्रीष्मतापार्त्ताःपल्लवाइव ॥ ८ ॥ संतप्तमार्गसिकतादग्धपादस
रोरुहाः ॥ हाततचेतिशोचंतोमृगायूथच्युताइव ॥ ९ ॥ दर्भाग्रभिन्नचरणास्तापखिन्नांगसंधयः ॥ उल्लंघ्यदूरमध्वानंधूलिधूसरमूर्त्तयः
॥ १० ॥ मंजरीजालजटिलंफलपल्लवमालितम् ॥ मृगपक्षिगणाधारंप्रापुर्मार्गेतरुत्रयम् ॥ ११ ॥ यस्मिन्वृक्षत्रयेवृक्षौद्वौनजातौमना
गपि ॥ बीजमेवतृतीयस्यस्वारोहस्यनविद्यते ॥ १२ ॥ विश्रांतास्तेपरिश्रांतास्तत्रैकस्यतरोरधः ॥ पारिजाततलेस्वर्गेशक्रानिलयमाइव
॥ १३ ॥ फलान्यमृतकल्पानिभुक्त्वापीत्वाचतद्रसम् ॥ कृत्वागुलुच्छकैर्मालांचिरंविश्रम्यतेययुः ॥ १४ ॥ पुनर्दूरतरंगत्वामध्याह्नेसमुप
स्थिते ॥ सरित्त्रितयमासेदुस्तरंगतरलारवम् ॥ १५ ॥

क्तिः ॥ ४ ॥ शून्यानिनगराणिशाखानगराणियस्मिन्नितितद्विशेषणम् ॥ जलमध्यस्तारकाश्चंद्रांशत्वात् ॥ ५ ॥ तेकदाचिद्विबंधवोदैवान्मृतबांधवादुर्भिक्षादिनाखिन्नमुखाश्वसं
तःसमवायतःस्वनागरसमाजात्परस्परैकमत्यतोवाउत्तमस्यनगरांतरस्यलाभार्थंनिर्जग्मुरितिशेषः ॥ ६ ॥ संश्लिष्टामिलिताः ॥ ७ ॥ गताःम्लानतामितिशेषः ॥ ८ ॥ ९ ॥
॥ १० ॥ ११ ॥ वृक्षत्रयइतिविद्धारणेसप्तमी ॥ स्वारोहस्यसुखेनारोढुंशक्यस्य ॥ १२ ॥ १३ ॥ गुलुच्छकैस्तत्स्तबकविशेषमंजरीभिः ॥ १४ ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरितोरितिकर्मणिषष्ठी ॥ दृष्टिर्दर्शनम् ॥ अंधलोचनयोरंधलोचनाभ्यामिवात्यंतासतीत्यर्थः ॥ करणताशक्तेरेवसंबंधसामान्यात्मनाविवक्षणात्षष्ठी ॥ अंधस्यलोचनयोर्गोलकयोर्दृष्टिरिंद्रियमिवसरितोरंबुनविद्यतइतिवा ॥ १६ ॥ घर्मार्त्ताजनाइवब्रह्मविष्णुहरागंगायामिवचेतिपृथक्कृत्ययोज्यम् ॥ १७ ॥ अभिलषितनगरप्राप्तौप्रहृष्टमनसः ॥ १८ ॥ नगसन्निभंपर्वतप्रांशु ॥ १९ ॥ ऊर्ध्वंपताकाभिरधःपद्मिनीभिश्चव्याप्तम् ॥ नीलाकाशाइवसुंदराःशून्यावाजलाशयायत्र ॥ समुल्लापाःस्वरमूर्छनाः ॥ २० ॥ २१ ॥ तत्रतेषु

तत्रैकापरिशुष्कैवमनागप्यंबुनद्वयोः ॥ विद्यतेसरितोर्दृष्टिरंधलोचनयोरिव ॥ १६ ॥ परिशुष्काभृशंयासौतस्यांतेसस्नुरादृताः ॥ घर्मार्त्ता इवगंगायांब्रह्मविष्णुहराइव ॥ १७ ॥ चिरंकृत्वाजलक्रीडांपीत्वाक्षीरोपमंपयः ॥ जग्मुस्तेराजतनयाःप्रहृष्टमनसःस्वयम् ॥ १८ ॥ अथासेदुर्दिनस्यांतेलंबमानेदिवाकरे ॥ भविष्यन्नवनिर्माणंनगरंनगसन्निभम् ॥ १९ ॥ पताकापद्मिनीव्याप्तंनीलाकाशजलाशयम् ॥ दूरश्रुतसमुल्लापगायन्नागरमंडलम् ॥ २० ॥ ददृशुस्तत्ररम्याणित्रीणिसद्भवनानिते ॥ मणिकांचनगेहानिशृंगाणीवमहागिरेः ॥ २१ ॥ अनिर्मितेद्वेसदनेएकंनिर्भित्तितत्रवै ॥ अभित्तिमंदिरंचारुप्रविष्टास्तेनरास्त्रयः ॥ २२ ॥ संप्रविश्योपविश्याशुविहरंतोवराननाः ॥ प्रापुःस्थालीत्रयंतत्रतप्तकांचनकल्पितम् ॥ २३ ॥ तत्रकर्परतांयातेद्वेएकाचूर्णतांगता ॥ जगृहुश्चूर्णरूपांतांस्थालींतेदीर्घबुद्धयः ॥ २४ ॥ द्रोणैर्नवनवत्यातैस्तस्यांद्रोणेनचांधसः ॥ तत्रद्रोणशतंहीनंरंधितंबहुभोजिभिः ॥ २५ ॥ निमंत्रितास्त्रयस्तैस्तुब्राह्मणाराजसूनुभिः ॥ द्वौनिर्देहावथैकस्यमुखमेवनविद्यते ॥ २६ ॥ निर्मुखेनांधसस्तत्रभुक्तंद्रोणशतंसुत ॥ विप्रभुक्तावशेषंतुभुक्तमंधोनृपात्मजैः ॥ २७ ॥ त्रिभिस्तेराजपुत्राश्चपरांनिर्वृतिमागताः ॥ भविष्यन्नगरेतस्मिन्राजपुत्रास्त्रयोहिते ॥ सुखमद्यस्थिताःपुत्रमृगयाव्यवहारिणः ॥ २८ ॥ आख्यायिकैषाकथितामयारम्यातवानघ ॥ एतांहृदिकुरुप्राज्ञविदग्धस्त्वंभविष्यसि ॥ २९ ॥ धात्र्येतिकथितारामबालकाख्यायिकाशुभा ॥ तुष्टिंजगामबालश्चशुभाख्यायिकयानया ॥ ३० ॥ एषाहिकथितारामचित्ताख्यानकथांप्रति ॥ बालकाख्यायिकातुभ्यंमयाकमललोचन ॥ ३१ ॥

त्रिषुमध्येअभित्तिमंदिरंतेप्रविष्टाः ॥ २२ ॥ २३ ॥ कर्परतांकपालताम् ॥ २४ ॥ तत्रतस्यांस्थाल्याम् ॥ अंधसःओदनप्रकृतेस्तंडुलस्यनवनवत्याद्रोणैरेकेनचद्रोणेनहीनंन्यूनं द्रोणशतंरंधितंपक्वम् ॥ भावेक्तः ॥ २५ ॥ २६ ॥ २७ ॥ निर्वृतिंतृप्तिम् ॥ मृगयाभिर्व्यवहारिणःक्रीडमानाः ॥ २८ ॥ विदग्धःपंडितः ॥ २९ ॥ ३० ॥ चित्ताख्यानानंतरंप्रवृत्तायाजगत्प्रत्ययस्यविकल्पमात्रत्वकथातांप्रतितदुदाहरणत्वेनेत्यर्थः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितिंदार्ढ्यम् ॥ एवंविकल्पमात्ररूपा ॥ बालकाख्यायिकाशब्देनतज्जन्यबालप्रतीतिर्लक्षणयागृह्यते ॥ ३२ ॥ तदेवस्पष्टमाह ॥ विकल्पेति ॥ विकल्पाएवजालकानियस्या मितिविग्रहेसमासाडुत्पन्नस्यटापःसुपःपरत्वात्प्रत्ययस्थात्कात्पूर्वस्येत्यस्याप्रवृत्तिः ॥ ३३ ॥ विकल्पानांचसंकल्पकार्यत्वात्तद्व्यतिरेकेणासत्वमित्याशयेनाह ॥ संकल्पमात्रादि ति ॥ यतोयत्किंचिद्विकल्परूपंभातितत्सर्वंसंकल्पवशतोभाति ॥ विकल्पभातंचकिंचिन्नैवकिंचिद्वाभवति ॥ शब्दज्ञानानुपातीवस्तुशून्योविकल्पइतिपतंजलिनातथातल्लक्ष णोक्तेरितिभावः ॥ ३४ ॥ युक्तमेवविशिष्यप्रपंचयति ॥ द्यौरिति ॥ क्षमापृथ्वी ॥ ३५ ॥ ३६ ॥ चंचलःअंभोधिः ॥ ३७ ॥ व्यापारैःसूर्यव्यापारैर्जनव्यापारैश्च ॥ ३८ ॥ तथाचसंकल्पत्यागमात्रेणनिर्विकल्पस्वरूपावस्थितिरितिदर्शयन्नुपसंहरति ॥ संकल्पेति ॥ मनोविलासारागादिवृत्तयस्तच्चेत्यानिचतेषांसमाहारम् ॥ संकल्पत्यागेचनिर्विक

इयंसंसाररचनास्थितिमेवमुपागता ॥ बालकाख्यायिकेवोग्रैःसंकल्पैर्दृढकल्पितैः ॥ ३२ ॥ विकल्पजालकैवेयंप्रतिभासात्मिकानघ ॥ बंधमोक्षादिकलनारूपेणपरिजृंभते ॥ ३३ ॥ संकल्पमात्रादितरद्विद्यतेनेहकिंचन ॥ संकल्पवशतःकिंचिन्नकिंचित्किंचिदेववा ॥ ३४ ॥ द्यौःक्ष्मावायुराकाशंपर्वताःसरितोदिशः ॥ संकल्पकचितंसर्वमेवंस्वप्नवदात्मनः ॥ ३५ ॥ राजपुत्रास्त्रयोनद्योभविष्यन्नगरेयथा ॥ यथासंकल्परचनातथेयंहिजगत्स्थितिः ॥ ३६ ॥ संकल्पमात्रमभितःपरिस्फुरतिचंचलः ॥ पयोमात्रात्मकोंभोधिरंभसीवात्मनात्मनि ॥ ३७ ॥ संकल्पमात्रंप्रथममुत्थितंपरमात्मनः ॥ तदिदंस्फारतांयातंव्यापारैर्दिवसंयथा ॥ ३८ ॥ संकल्पजालकलनैवजगत्समग्रंसंकल्पमेवननुविद्धिविलासचेत्यम् ॥ संकल्पमात्रमलमुत्सृजनिर्विकल्पमाश्रित्यनिश्चयमवाप्नुहिरामशांतिम् ॥ ३९ ॥ ॥इत्यार्षेवा० वा०दे०मो०उ०बालकाख्यायिकानामैकाधिकशततमःसर्गः ॥ १०१ ॥ ॥ ७ ॥ ॥श्रीवसिष्ठउवाच॥ ॥स्वसंकल्पवशान्मूढो मोहमेतिनपंडितः ॥ अक्षयेक्षयसंकल्पान्मुह्यतेशिशुरेवहि ॥ १ ॥ ॥श्रीरामउवाच॥ ॥कोसौसंकल्पितःकेनक्षयोब्रह्मविदांवर ॥ असतैवमहामोहंयेनादात्तत्सदैवहि ॥ २ ॥

ल्पात्मनिश्चयएवहेतुरित्याह ॥ आश्रित्येति ॥ ३९ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०एकोत्तरशततमःसर्ग १०१ ॥ ॥ ७ ॥ ॥ इहाहंकारसंकल्पक्षयोपायो निरूप्यते ॥ विवेकोनात्मवर्गस्यनित्यताचपरात्मनः ॥ १ ॥ मूढोऽज्ञः ॥ अक्षयेपरमात्मनिक्षीयतइतिक्षयोनश्वरात्मातत्संकल्पात् ॥ शिशुर्बालः ॥ मुह्यतेबिभेति ॥ १ ॥ क्षयसंकल्पादितिहेतूक्तौसंकल्पकर्तृकर्मणीविशिष्यजिज्ञासमानोरामःपृच्छति ॥ कोसाविति ॥ असौसंकल्पितःक्षयःकःकेनचसंकल्पितोयेनायमात्माअसतैवनिमित्तेनमहामोहंसंसारभ्रमंआअदात्उपात्तवान् ॥ अयंभावः ॥ किंनित्यात्मानश्वरात्मानंसंकल्पयतिउतनश्वरात्मैव ॥ नाद्यः ॥ तस्यस्वात्मस्वभावविरुद्धसंकल्पकत्वायोगात् ॥ नद्वितीयः ॥ आत्माश्रयापत्तेः ॥ तथासंकल्पितोनश्वरात्मापिकिंजडउतचिद्रूपः ॥ नाद्यः ॥ आत्मतादात्म्यानापातात् ॥ नद्वितीयः ॥ चितःसंकल्पविषयत्वायोगादिति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यद्भवंतितदाभवंतीतिश्रुतेःप्राक्तनसिंहव्याघ्रादिभूतसंघात्मभावसंस्कारसंभृतासच्छब्दवाच्याविद्योपहितेनपरमात्मनाचिदचित्संवलनात्मकसिंहव्याघ्राद्यहंकारात्मकनश्वरात्मसंकल्पनान्नकश्चित्त्वसंभावितोदोषइत्याशयेनवसिष्ठःसमाधत्ते ॥ असतेति ॥ भूतसंघेनसिंहव्याघ्रादिप्राण्यहंभाववासितेनअसताअविद्योपहितेनपरमात्मनातत्तदहंकारनामधृक्क्षयोनश्वरात्मा ॥३॥ नन्वहंकारस्यात्मस्वभावतैवकिंनस्यात्कुतोमिथ्यात्वंतत्राह ॥ एकस्मिन्निति ॥ सर्वस्मिन्पूर्णे ॥४॥ मार्गीसरित्मृगतृष्णानदी ॥५॥ मनोलक्षणस्यमणेश्चिंतामणेर्महान्आरंभःकार्यजातसर्गः ॥ तर्हिकिंमनसएवस्वातंत्र्यंनेत्याह ॥ आत्मानमाश्रित्येति ॥ अंभसाअंभइतिशेषः ॥६॥ असम्यग्दर्शनंभ्रांतिम् ॥ निराश्रयंअसद्विषयम् ॥ साश्रयंसत्यार्थविषयम् ॥ ७ ॥ तत्रकउपायस्तत्राह ॥ धियेति ॥८॥९॥ नानाऽनानात्वकलनाभेदाभेदभ्रांतिः ॥ अस्मिन्सर्वस्मिन्बाधेनब्रह्मतत्त्वेतन्मात्रपरिशेषेसतीत्यर्थः ॥१०॥ अच्छेद्याभेद्यात्मदर्शनेदेहच्छेदभेदादिप्रयुक्तदुःखस्यापिनावसरःकिंपुनरन्यस्येत्याशयेनाह॥अनार्त्तइति ॥ आर्त्तिमतिदेहेतथाभाति ॥११॥ भस्त्रामापूरयतीतिभस्त्रापूरोवायुः ॥१२॥ प्रक्षतेनष्टे ॥ आमोदोगंधः ॥१३॥ उड्डीयतेअस्मिन्नित्युड्डयनम् ॥ अधिकरणेल्युट् ॥ आकाशउड्डयनंयेषांतथाविधानामलीनांभ्रमराणांनः ॥ उडुपनालीनामिति पाठेआकाशस्थानांउडुपाश्चंद्रशुक्रबृहस्पत्यादयस्ताराश्रेष्ठास्तल्लक्षणानांनालीनांपद्मानां ॥ रलयोरभेदादुडुपस्यचंद्रस्यनारीणामश्विन्यादिसर्वताराणांच ॥ १४ ॥ १५॥

श्रीवसिष्ठउवाच॥ ॥ असताभूतसंघेनक्षयोहंकारनामधृक् ॥ वेतालःशिशुनेवेहमिथ्यैवपरिकल्पितः॥३॥ एकस्मिन्नेवसर्वस्मिन्स्थितेपरमवस्तुनि॥ कुतःकोयमहंनामकथंनामकिलोदितः ॥ ४ ॥ वस्तुतोनास्त्यहंकारःपरमात्मन्यभेदिनि॥ असम्यग्दर्शनान्मार्गीसरित्तीव्रातपेयथा॥ ५॥ मनोमणिमहारंभःसंसारइतिलक्ष्यते॥ आत्मनात्मानमाश्रित्यस्फुरत्यंतर्यथांभसा॥ ६॥ असम्यग्दर्शनंतेनत्यजरामनिराश्रयम्॥ साश्रयंसत्यमानंदिसम्यग्दर्शनमाश्रय ॥ ७॥ धियाविचारधर्मिण्यामोहसंरंभहीनया॥ विचारयाधुनासत्यमसत्यंसंपरित्यज॥८॥ अवद्धोवद्धइत्युक्त्वाकिंशोचसिमुधैवहि॥ अनंतस्यात्मतत्त्वस्यकिंकथंकेनबध्यते॥९॥ नानाऽनानात्वकलनात्वविभिन्नमहात्मनि॥ सर्वस्मिन्ब्रह्मतत्त्वेस्मिन्किंबद्धंकिंविमुच्यते ॥ १०॥ अनार्त्तोप्यार्त्तिमान्भातिच्छिन्नेंगेकिंचताम्यति॥ भेदाभेदविकारार्त्तिःकाचिन्नात्मनिविद्यते॥ ११ ॥ देहेनष्टेक्षतेक्षीणेकात्मनःक्षतिरागता॥ भस्त्रायांपरिदग्धायांभस्त्रापूरोननश्यति॥ १२ ॥ देहःपततुवोदेतुकानःक्षतिरुपस्थिता॥ कोनष्टःप्रक्षतेपुष्पेआमोदोव्योमसंश्रयः ॥ १३॥ आपतंतुवपुःपद्मेसुखदुःखहिमश्रियः॥ आकाशोड्डयनालीनांकानःक्षतिरुपस्थिता॥ १४ ॥ देहःपततुवोदेतुयातुवागगनांतरम्॥ तद्विलक्षणरूपस्यकासौभवतिमेक्षतिः॥ १५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्युपगतेपिसंबंधेअलेपकेआत्मनिनतत्प्रयुक्तदुःखप्रसक्तिरित्याशयेनाह ॥ यथेति ॥ पयोदमरुतोर्मेघवाय्वोः ॥ १६ ॥ शरीरादिसर्वजगतोमनोमात्रत्वादपिसतिमनसिनश रीरादिनाशप्रयुक्तःशोकोयुक्तःकिंपुनरात्ममात्रत्वादित्याशयेनाह ॥ मनइति ॥ शरीरशब्दःस्वरूपवचनः ॥ तत्रहेतुराद्याशक्तिरिति ॥ यतोमनोजगतआद्याकारणीभूताशक्ति श्चिदात्मातुमनसोपिअधिउपरिअतस्तन्नाशभ्रांतिःसर्वथानयुक्तेत्यर्थः ॥ १७ ॥ आत्मनाशादिभ्रांतिरेवसर्वशोकादिमूलत्वात्तांपुनःपुनर्वारयन्नाह ॥ योसावित्यादिना ॥ १८ ॥ ॥ १९ ॥ २० ॥ आत्मनोदेहांतरवस्थितिर्वस्तुतोनास्त्येव अभ्युपगमेपिनदेहनाशात्तन्नाशप्रसक्तिरित्याशयेनाह ॥ यइति ॥ क्रमोन्यायः ॥ स्थितिरपिन्यायः ॥ सात्वादृश्ये

यथापयोदमरुतोर्यथाषट्पदपद्मयोः ॥ तथाराघवसंबंधस्त्वच्छरीरत्वदात्मनोः ॥ १६ ॥ मनोरामशरीरंहिजगतःसकलस्यच ॥ आद्या शक्तिश्चिदध्यात्माननश्यतिकदाचन ॥ १७ ॥ योसावात्मामहाप्राज्ञननश्यतिनगच्छति ॥ नंनश्यतिकदाचिच्चकिंमुधापरितप्यसे ॥ १८ ॥ विशीर्णेभ्रेयथावातःशुष्केब्जेषट्पदोयथा ॥ यात्यनंतपदंव्योमतथात्मादेहसंक्षये ॥ १९ ॥ संसारेस्मिन्विहरतोमनोपिहिननश्यति ॥ ज्ञानाग्निनाविनाजंतोरात्मनाशेतुकाकथा ॥ २० ॥ यःकुंडबदरन्यायोयोघटाकाशयोःक्रमः ॥ स्थितिर्देहात्मनोःसैवसविनाशाविनाश योः ॥ २१ ॥ बदरंहस्तमायातियथास्फुटतिकुंडके ॥ आत्मागगनमायातितथाचलतिदेहके ॥ २२ ॥ कुंभेगच्छत्यकुंभत्वंकुंभाकाशोय थांबरे ॥ तिष्ठत्येवमयंक्षीणेदेहेदेहीनिरामयः ॥ २३ ॥ मनोदेहोहिजंतूनांदेशकालतिरोहितः ॥ मुहुर्मृतिपटाच्छन्नःशठेकिंपरिदेवना ॥ २४ ॥ देशकालतिरोधानेमूढोपिमरणेनरः ॥ किंबिभेतिमहाबाहोनेहपश्यतिकश्चन ॥ २५ ॥ अतस्त्वंवासनांराममिथ्यैवाहमितिस्थि ताम् ॥ त्यजपक्षीश्वरोव्योमगमनोत्कइवांडकम् ॥ २६ ॥ एषाहिमानसीशक्तिरिष्टानिष्टनिबंधनी ॥ अनयैवमुधाभ्रांत्यास्वप्नवत्परि कल्पना ॥ २७ ॥

व ॥ २१ ॥ आद्यंकुंडबदरन्यायंप्रकृतेउपपादयति ॥ बदरमिति ॥ आत्माजीवःगगनंवासनाकाशम् ॥ चलतिनश्यतिसति ॥ तथाचश्रुतिः ॥ जीवापेतंवावकिलेदंम्रियतेनजीवो म्रियतइति ॥ २२ ॥ द्वितीयमुपपादयति ॥ कुंभेइति ॥ अकुंभत्वंनाशम् ॥ २३ ॥ मरणंमृतिस्तल्लक्षणेनपटेनमुहुराच्छन्नोभवति ॥ शठेवंचकेअस्मिन्मनसिकिकापरिदेवना ॥ अयुक्तेत्यर्थः ॥ २४ ॥ किंतर्हिमरणंतदाह ॥ देशेति ॥ गृहादिदेशेचरमश्वासकालेपरेषांदृष्ट्याआत्मनस्तिरोधानमात्रंमरणमित्यर्थः ॥ नेहपश्यतिकश्चनात्मनाशमितिशेषः ॥ २५ ॥ पक्षीसंजातपक्षःपक्षिशिशुः ॥ स्वपरिच्छेदकमंडकंशिथिलमंडमिव ॥ २६ ॥ इष्टानिष्टयोःरागद्वेषाभ्यांनिबंधनीअभिनिवेशबंधनकरी ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविद्याविलासत्वादविद्या ॥ २८ ॥ तुषारैर्मलिनंधूसरितम् ॥ तथादर्शनंमनसःस्वभावइत्याह ॥ स्वरूपस्येति ॥ २९॥३० ॥ ननुमनोव्यापाराणांसर्वेषांप्रत्यक्षत्वाज्जगन्निर्मातृताकुतस्सर्वैर्नानुभूयतेतत्राह ॥ भावनेति ॥ अस्याःस्वरूपंजगदाकारभावनामात्रेएवकर्तृतांगतंननतदतिरिक्तनिर्माणे ॥ मिथ्यार्थानांदर्शनातिरिक्तनिर्माणाप्रसिद्धे ॥ तदेवजगन्नामप्रसिद्धम् ॥ यथाआविलंतिमिरादिदुष्टंचक्षुर्व्योम्निपिच्छकेशोंड्रकाद्याकाराणांसूर्यचंद्रादिबिंबरुचांविभावनामात्रेणकर्तृतद्वदित्यर्थः ॥ विभावनंतुप्रत्यक्षमेवेतिभावः॥ ३१॥ अतएवस्वविचारद्वैतभावनामात्रसिद्धस्यविचारजन्यज्ञानमात्राल्लयसिद्धिरितिविचारःकार्यइत्याह ॥ लयमिति ॥ यथादिवसाधिपःसूर्यस्तपनात्स्वातपाद्धिमशिलायाःस्वरूपंलयंनाशंनयतितद्वत् ॥३२॥ अर्थितमभिलषितोमनोनाशः ॥ ३३ ॥ एकस्मिन्मनसिनष्टेपिपुनरविद्ययामनआदिबंधजन्मप्रसक्तिमाशंक्याह ॥ अविद्येति ॥ हियस्मादविद्या

अविद्यैषादुरंतैषादुःखायैषाविवर्द्धते ॥ अपरिज्ञायमानैषातनोतीदमसन्मयम् ॥ २८ ॥ एषातुच्छवदाकाशंतुषारमलिनंयथा ॥ परिपश्यतिविभ्रांतास्वरूपस्यस्वभावतः ॥ २९ ॥ असदेवेदमारंभमंथरंसदिवोत्थितम् ॥ कल्पितंजगदाभोगिदीर्घस्वप्नइवैतया ॥ ३० ॥ भावनामात्रएवास्याःस्वरूपंकर्तृतांगतम् ॥ जगन्नामाविलंचक्षुर्व्योम्निबिंबरुचामिव ॥३१॥ लयमस्याःस्वरूपंत्वंनयरामविचारणात् ॥ यथाहिमशिलायास्तुतपनाद्दिवसाधिपः॥३२॥ हिमाभावार्थिनोर्कस्यस्वोदयेनेप्सितंयथा॥सिद्ध्यत्येवंविचारेणमनोनाशार्थिनोर्थितम् ॥३३॥ अविद्यासंप्रबुद्धाहिविततानर्थदुर्गमा॥ नानेंद्रजालकलनांशंबरोहेमवर्षति॥ ३४॥ स्वविनाशक्रियांचैतांमनएवकरोत्यलम् ॥ मनोह्यात्मवधंनामनाटकंपरिनृत्यति॥ ३५॥ आत्मानमीक्षतेचेतःस्वविनाशायकेवलम् ॥ नहिजानातिदुर्बुद्धिर्विनाशंप्रत्युपस्थितम् ॥ ३६ ॥ स्वयंसंकल्पमात्रेणस्वविनाशदशामिदम् ॥ मनःसंसाधयत्याशुक्लेशोनात्रोपयुज्यते॥ ३७॥ स्वसंकल्पविकल्पांशंविवेकोपहितंमनः ॥ संत्यज्यरूपमाभोगिकरोत्यात्मावबोधनम् ॥ ३८ ॥ महोदयोमनोनाशोमहोच्छेदस्यतूदयः ॥ मनोनाशेप्रयत्नंत्वंकुरुमामनसोजवे॥ ३९॥

कादंबिनीअसंप्रबुद्धाअविज्ञातात्मतत्त्वायदातदैवशंबरोऽसुरविशेषइवनानेंद्रजालकलनारूपमसदेवहेमवर्षतिनतुसंप्रबुद्धा ॥ तदानिः स्वरूपत्वादित्यर्थः ॥३४॥ एवंचमनएवचिरंजगद्रूपेणनृत्यदंतेविद्यात्मकपरिणामेनसाविद्यस्वविनाशंकरोतीतिफलितमित्याह ॥ स्वविनाशक्रियामिति ॥ आत्मवधंस्वसंहारंनामनाटकंस्वरचितपंथंपरिलक्षीकृत्यनृत्यति ॥ ३५ ॥ ३६ ॥ स्वविनाशदशांमनोनाशोपायमन्विष्यतांविवेकिनामिदंमनोनाशनंमनःस्वयमेवसंकल्पनमात्रेणआशुसंसाधयति ॥ ३७ ॥ विवेकेनउपहितंसंस्कृतंमनःप्राक्तनंस्वसंकल्पविकल्पांशंसंत्यज्यआभोगिब्रह्माकारविस्तारंआत्मावबोधनंस्वात्मसाक्षात्काररूपस्यात्मकरूपंस्वंपरिणामंकरोति ॥ ३८ ॥ महोदयःपरमपुरुषार्थलाभः ॥ महोच्छेदःसर्वदुःखोच्छेदः ॥ जवेबहिर्व्यापारे ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तार्थोपेक्षणेअनर्थापातंदर्शयन्नुपसंहरति ॥ अविरलेति ॥ अविरलानिनिबिडाःसुखदुःखात्मकावृक्षखंडायस्मिन् ॥ विषमःकृतांतोमृत्युर्महोरगोयस्मिंस्तथाविधे अखिलेअनुच्छेद्येअस्मिन्संसारलक्षणेअसिपत्रवनेइदंविवेकहीनंमनएवप्रभुर्दुरंतदुःखहेतुरित्यर्थः ॥ ४० ॥ ४१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०द्व्युत्तरशततमःसर्गः ॥१०२॥ अविवेकस्यमनसोयायात्रानर्थकारिता ॥ मुमुक्षूणांविवेकायसासर्वात्रप्रपंच्यते ॥ १ ॥ अनर्थार्थमेवपरस्मान्मनसउत्पत्तिरितिदर्शयति ॥ परस्मादिति ॥ १ ॥ मनसोवस्तुस्वभावविरुद्धकल्पनसामर्थ्यंदर्शयति ॥ ह्रस्वमित्यादिना ॥ ह्रस्वंनेत्रसंनिहितांगुल्यादिअतिविस्तृतसूर्यमंडलाद्याच्छादकत्वकल्पनेनदीर्घंआशुकरोति ॥ दीर्घंसूर्यमंडलादिख

अविरलसुखदुःखवृक्षखंडेविषमकृतांतमहोरगेवनेस्मिन् ॥ प्रभुरिदमखिलेविवेकहीनंसुभगमनोमहदापदेकहेतुः ॥४०॥ इत्युक्तवत्यथमुनौदिवसोजगामसायंतनायविधयेस्तमिनोजगाम ॥ स्नातुंसभाकृतनमस्करणाजगामश्यामाक्षयेरविकरैश्चसहाजगाम ॥४१॥ दिवसः ८ ॥ ॥ इत्यार्षे० वा० वा० दे० मो० उ० उपदेशकरणंनामद्व्युत्तरशततमःसर्गः ॥१०२॥ ॥ ६९ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ परस्मादुत्थितंचेतस्तत्कल्लोलइवार्णवात् ॥ स्फारतामेत्यभुवनंतनोतीदमितस्ततः ॥ १ ॥ ह्रस्वंदीर्घंकरोत्याशुदीर्घंनयतिखर्वताम् ॥ स्वतांनयत्यन्यदलंस्वंतथैवान्यतामपि ॥२॥ प्रादेशमात्रमपियद्वस्तुभावनयैवतत् ॥ स्वयंसंपन्नयेवाशुकरोत्यद्रींद्रभासुरम् ॥३॥ लब्धप्रतिष्ठंपरमात्पदादुल्लसितंमनः ॥ निमेषेणैवसंसारान्करोतिनकरोतिच ॥ ४ ॥ यदिदंदृश्यतेकिंचिज्जगत्स्थास्नुचरिष्णुच ॥ सर्वंसर्वप्रकाराढ्यंचित्तादेतदुपागतम् ॥५॥ देशकालक्रियाद्रव्यशक्तिपर्याकुलीकृतम् ॥ भावाद्भावांतरंयातिलोलत्वान्नटवन्मनः ॥६॥ सदसत्तांनयत्याशुसत्तांवासन्नयत्यलम् ॥ तादृशान्येवचादत्तेसुखदुःखानिभावितम् ॥ ७॥ यदात्मंस्वयमादत्तेयथैवचंचलंमनः ॥ हस्तपादादिसंघातस्तदाप्रयततेतथा ॥ ८ ॥ ततःसैवक्रियाचित्तसमाहितफलाफलम् ॥ क्षणात्प्रयच्छतिलताकालसिक्तेवतादृशम् ॥ ९ ॥ चित्रांक्रीडनकश्रेणींयथापंकाद्गृहेशिशुः ॥ करोत्येवंमनोरामविकल्पंकुरुतेजगत् ॥ १० ॥

र्वतांह्रस्वताम् ॥ एवमात्मानात्मनोःस्वरूपविनिमयकल्पनमपिमनएवकरोतीत्याह ॥ स्वतामिति ॥ २ ॥ स्वयमात्मभावेनसंपन्नयेवभावनयाकल्पनया ॥३॥ कुतोस्येदृशंसामर्थ्यंतत्राह ॥ लब्धप्रतिष्ठमिति ॥ ब्रह्मसत्तयाविचित्रशक्त्युपबृंहितत्वेनलब्धसत्ताकमित्यर्थः ॥ ४ ॥ ५ ॥ भावाद्भावांतरंएकवस्त्वाकारादपरवस्त्वाकारंनाट्यशास्त्रप्रसिद्धंसंचारिभावभेदंच ॥६॥७॥ चंचलंमनःआत्मंकर्मोपस्थापितंभोग्यंयदाययथायेनैवकल्पनाप्रकारेणानुकूलतयाप्रतिकूलतयावाआदत्तेतदाहस्तपादादिसंघातस्तथातदनुसारेणैवउपादानेहानेवाप्रवर्त्ततइतिमनसएवसर्वव्यवहारस्वातंत्र्यमित्यर्थः ॥८॥ साभोग्यार्थोपस्थापिकाक्रियाचित्तेनसमाहितंकल्पितंफलाफलंसुखदुःखम् ॥ ९ ॥ पंकात्आर्द्रमृत्पिंडात् ॥ १० ॥ ॥१८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनःकल्पनामात्रेजगतिनकिंचिदपिरूपंवास्तवंसंभवतीत्याह ॥ मनइति ॥ अतोहेतोर्मनसोयाःसर्वजनात्मनाक्रीडास्तत्रत्यन्तदेहादिलक्षणेषुपंकलेशेषुसर्वपदार्थेषुयद्रूपंरूढंसत्यं कल्प्यतेएतत्किंहिस्यान्नकिंचिदित्यर्थः ॥११॥ ऋतुकरोवसंतादिविभागकारी ॥ रूपाणामन्यथाअन्यताम् ॥ पूरणगुणेतिनिषेधेपिच्छांदसत्वात्पूर्वोत्तरसाहचर्येणऋद्व्ययस्यै वतत्रग्रहणाद्वाषष्ठीसमासः ॥ १२ ॥ मनसश्चाघटितघटनाशक्तिःप्रसिद्धैवेतिदर्शयति ॥ मनोरथेइत्यादिना ॥ योजनानांव्यूहःसमूहोपिगोष्पदमिवाल्पमित्यर्थः ॥ १३ ॥ अतो देशकालक्रमंसर्वंतदायत्तंमनोधीनंविदुःसर्वेपीत्यर्थः ॥ १४ ॥ ननुयदिमनःसर्वनिर्माणसमर्थंतर्हिकथमिदानीमस्माकंसर्वसर्गाशक्तिस्तत्राह ॥ तीव्रेति ॥ रजोगुणोत्कर्षेतीव्रतात मसउत्कर्षेतुमंदतेतिसंवेगभेदात् आहारोपचयादुपचयेबहुत्वमपचयेल्पत्वमितिभेदतस्तत्तद्वस्तुसर्गानुकूलोपासनादिविलंबनेनचप्राप्तसर्गाशक्तितोनमनसोवास्तवीसर्वसर्गशक्ति

मनःसर्वजनक्रीडानृजंबाललवेष्वतः ॥ किमेतद्विपदार्थेषुरूढंजगतिकल्प्यते ॥ ११ ॥ करोत्यृतुकरःकालोयथारूपान्यथातरोः ॥ चित्त मेवंपदार्थानामेषामेवान्यतामिव ॥ १२ ॥ मनोरथेतथास्वप्नेसंकल्पकलनासुच ॥ गोष्पदंयोजनव्यूहःस्वासुलीलासुचेतसः ॥ १३ ॥ क ल्पंक्षणीकरोत्यंतःक्षणंनयतिकल्पताम् ॥ मनस्तदायत्तमतोदेशकालक्रमंविदुः ॥ १४ ॥ तीव्रमंदत्वसंवेगाद्बहुत्वाल्पत्वभेदतः ॥ विलंब नेनचचिरंनतुशक्तिमशक्तितः ॥ १५ ॥ व्यामोहसंभ्रमानर्थदेशकालगमागमाः ॥ चेतसःप्रभवंत्येतेपादपादिवपल्लवाः ॥ १६ ॥ जलमे वयथांभोधिरौष्ण्यमेवयथानलः ॥ तथाविविधसंरंभःसंसारश्चित्तमेववा ॥ १७ ॥ सकर्तृकर्मकरणंयदिदंचेत्यमागतम् ॥ द्रष्टृदर्शनदृ श्याढ्यंतत्सर्वंचित्तमेवच ॥ १८ ॥ चित्तंजगंतिभुवनानिवनांतराणिसंलक्ष्यतेस्वयमुपागतमात्मभेदैः ॥ केयूरमौलिकटकैश्चलसत्स्वरूपं त्यक्त्वैवकांचनधियेवजनेनहेम ॥ १९ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० चित्तमाहात्म्यंनामत्र्युत्तरशततमःसर्गः ॥ १०३ ॥ ॥ ७ ॥

मपहातुंशक्नुमइत्यध्याहृत्ययोज्यम् ॥१५॥ अतएवव्यामोहादिसंभवोपीत्याह ॥ व्यामोहेति ॥१६॥ कार्यस्यकारणानन्यत्वाच्चित्तमात्रमेवसर्वमित्याह ॥ जलमेवेति ॥ वाश ब्दःपादपूरणार्थम् ॥ १७ ॥ चेत्यंभोक्तृभोग्यभोगरूपानर्थात्मकम् ॥ तथाचनवविधोपिसंसारश्चित्तमेवेत्यर्थः ॥ १८ ॥ सर्वंचित्तमेवेतियेनोपायेनसंलक्ष्यतेतंदर्शयन्नुपसंह रति ॥ चित्तमिति ॥ यथाकांचनतत्त्वपरीक्षकजनेनकेयूरमौलिभूषणकटकैश्चादन्यैश्चरुचकाद्याकारैर्लसत्कल्पितनानास्वरूपंत्यक्त्वैवशुद्धकांचनमात्रप्रणिहितधियापरीक्ष्य माणंतत्त्वतोहेमलक्षयितुंशक्यतेनकेयूरादिरचनावैचित्र्यव्यामूढधियातथाविवेकिनापिजगतितदंतर्गतभुवनानितदंतर्गतवनांतरादिसर्ववस्तूनिचआत्मभेदैःस्वैर्वैचित्र्यैश्चित्तमेव स्वयमुपागतंचित्तमात्रमेवनचित्ताद्वस्त्वंतरमितितत्त्वंसंलक्ष्यतइत्यर्थः ॥ १९ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउत्प० णेत्र्युत्तरशततमःसर्गः ॥ १०३ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रादौलवणाख्यानेदेशराजसभास्थितिः ॥ तत्रैंद्रजालिकाश्वेक्षाविस्मयस्थितिरुच्यते ॥ १ ॥ वृत्तांतमाख्यानम् ॥ १ ॥ २ ॥ नीरंध्रघनेषुअतएवगंभीरेषुवनेषुविश्रांतास्ता पसायस्य ॥ अनेनव्याघ्रचोराद्युपप्लवाभावउक्तः ॥ ३ ॥ ४ ॥ पर्यंतजंगलानियामपर्यंतारण्यानि ॥ खर्जूरवृक्षैरंतरिताअंतर्हितायामायत्र ॥ ५ ॥ एकपिंगशिलाउत्कृष्टपिंग लवर्णामणिविशेषास्तच्छ्रेणिसदृशैःपक्वशालिकेदारैःपिंगलः ॥ ६ ॥ ७ ॥ उन्निद्राःकुसुमिताःपारिभद्रतरवोनिवास्तैररुणः ॥ ८ ॥ पुष्पेषुफलेषुचशिथिलितवृंतानांपातनाय चलतावातेनव्याधूताःकुसुमलक्षणाःअंबुदायत्र ॥ ९ ॥ मेरुदरीगृहेभ्योविनिष्क्रांतंसिद्धचारणवंदिकंयस्यतथाविधंस्वर्गलावण्यंस्वर्गाद्धिवसमानीयनिर्मितइवेत्यर्थः ॥ १० ॥

॥ श्रीवसिष्ठउवाच ॥ ॥ अत्रतेशृणुवक्ष्यामिवृत्तांतमिममुत्तमम् ॥ जागतीहैंद्रजालश्रीश्चित्तायत्तायथास्थिता ॥ १ ॥ अस्त्यस्मिन्वसुधापीठेनानावनसमाकुलः ॥ उत्तरापांडवोनामस्फीतोजनपदोमहान् ॥ २ ॥ नीरंध्रघनगंभीरवनविश्रांततापसः ॥ विद्याधरीकृतलतादोलोपवनपत्तनः ॥ ३ ॥ वातोद्धूतान्नकिंजल्कपुंजपिंजरपर्वतः ॥ लसत्कुसुमसंभारवनमालावतंसकः ॥ ४ ॥ करंजमंजरीकुंजगुच्छपर्यंतजंगलः ॥ खर्जूरांतरितग्रामोघुंघुमध्वनितांबरः ॥ ५ ॥ एकपिंगशिलाश्रेणीशालिकेदारपिंगलः ॥ नीलकंठारवोद्दामवनजंगलमंडितः ॥ ६ ॥ सारसारवसंरंभरणत्कनककाननः ॥ तमालपाटलीनीलगिरिग्रामककुंडलः ॥ ७ ॥ विचित्रविहगव्यूहविरावकृतकाकलिः ॥ नदीपरिसरोन्निद्रपारिभद्रद्रुमारुणः ॥ ८ ॥ गायत्कलमकेदारदारिकाहृतमन्मथः ॥ पुष्पफलचलद्वातव्याधूतकुसुमांबुदः ॥ ९ ॥ दरीगृहविनिष्क्रांतसिद्धचारणवंदिकम् ॥ स्वर्गादिवसमानीयलावण्यमभिनिर्मितः ॥ १० ॥ गायत्किन्नरगंधर्वकदलीखंडमंडपः ॥ मंदानिलरवोद्धूतःपुष्पोपवनपांडुरः ॥ ११ ॥ तत्रास्तिलवणोनामराजापरमधार्मिकः ॥ हरिश्चंद्रकुलोद्भूतोभूमाविवदिवाकरः ॥ १२ ॥ यद्यशःकुसुमोत्तंसपांडुरस्कंधमंडलाः ॥ तत्रशैलाविराजंतेहराःप्रोद्धूलिताइव ॥ १३ ॥ कृपाणशकलोत्कृत्तनिःशेषारातिमंडलः ॥ अरातिलोकःप्राप्नोतियदनुस्मरणाज्ज्वरम् ॥ १४ ॥ यस्योदारसमारंभमार्यलोकानुपालनम् ॥ चरितंसंस्मरिष्यंतिहरेरिवचिरंजनाः ॥ १५ ॥ यस्यास्वःसुंदरीगीतालोकपालचिरश्रुताः ॥ विरिंचिहंसैर्ध्वन्यंतेस्वभ्यासाद्गुणगीतयः ॥ १६ ॥ यस्यस्वःसुंदरीगीतालोकपालचिरश्रुताः ॥ विरिंचिहं ...

मंदैरनिलरवैरुद्धूतउत्कृष्टतयास्थितः ॥ पुष्पयुक्तैरुपवनैःपांडुरः ॥ एतादृशउत्तरापांडवोनामजनपदोस्तीतिप्राक्तनेनसंबंधः ॥ ११ ॥ भूमाववतीर्णोदिवाकरइव ॥ १२ ॥ कुसुमलक्षणैरुत्तंसैःकुसुमानामुत्तंसैरजोभिर्वा ॥ १३ ॥ कृपाणैःशकलानियथास्युस्तथाउत्कृत्तान्यतएवनिःशेषाणिप्रधानारातिमंडलानियस्यसतथाभूतोऽरातीनांलोकःसेवकजनः ॥ १४ ॥ आर्यलोकानांधार्मिकजनानामनुपालनंरक्षकंचरितम् ॥ १५ ॥ १६ ॥ स्वःसुंदरीभिरप्सरोभिर्गीतागुणगीतिप्रबंधाविरिंचेर्ब्रह्मणोहंसैर्ध्वन्यंतेध्वनिभिरनुक्रियंतइतियावत् ॥ १७ ॥ सामान्याइतरनृपसाधारणी ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जिह्मतांकौटिल्यम् ॥ धृष्णुताअविनीतता ॥ गृध्नुतेतिपाठेपरस्वाभिलाषिता ॥ १९ ॥ अष्टभागमष्टमभागंमुहूर्त्तद्वयमितियावत् ॥ २० ॥ २१ ॥ राजसुसामंतेषु ॥ २२ ॥ सविलासासुसविलासंवीजयतीषु ॥ देवासुरगुरुःगुरुशुक्रौतत्प्रख्ये ॥ २३ ॥ २४ ॥ २५ ॥ साटोपःऐंद्रजालिकोचितवेषालंकारबिरुदाडंबरसंपन्नः ॥ भाविनावर्षेणआहितोवि

जिह्मतांयोनजानातिनदृष्टयेनधृष्णुता ॥ उदारतायेनधृताब्रह्मणेवाक्षमालिका ॥ १९ ॥ दिनाष्टभागमाकाशमागतेदिवसाधिपे ॥ सकदाचित्सभास्थानेसिंहासनगतोभवत् ॥ २० ॥ सुखोपविष्टेतत्रास्मिन्राजनींदाविवांबरे ॥ प्रविशंतीषुसामंतसेनासुचससंभ्रमम् ॥ २१ गायंतीष्वथकांतासुसूपविष्टेषुराजसु ॥ मनोहरतिसाह्लादेवीणावंशकलारवे ॥ २२ ॥ चारुचामरहस्तासुसविलासासुराजनि ॥ देवासुरगुरुप्रख्येविश्रांतेमंत्रिमंडले ॥ २३ ॥ प्रस्तुतेषुप्रविष्टेषुराजकार्येषुमंत्रिभिः ॥ प्रोक्तासुदेशवार्त्तासुनिपुणैश्चारुमंत्रिभिः ॥ २४ ॥ इतिहासमयेपुण्येवाच्यमानेचपुस्तके ॥ पठत्सुचस्तुतीःपुण्याःपुरःप्रह्वेषुवंदिषु ॥ २५ ॥ सभांविवेशसाटोपःकश्चित्तामैंद्रजालिकः ॥ वर्षणाहितसंरंभोवसुधामिववारिदः ॥ २६ ॥ सननाममहीपालंशिखरोदारकंधरम् ॥ पादोपांतगतःकांतंशैलंफलतरुर्यथा ॥ २७ ॥ सच्छायस्योन्नतांसस्यफलिनःपुष्पभासिनः ॥ सविवेशपुरोराज्ञस्तरोरग्रेकपिर्यथा ॥ २८ ॥ चपलोलंपटोर्थानामामोदसुखमारुतम् ॥ उवाचोत्कंधरंभूपंसपद्ममिवषट्पदः ॥ २९ ॥ विलोकयविभोतावदेकामिहखरोलिकाम् ॥ पीठस्थएवसाश्चर्यांव्योम्निचंद्रइवावनिम् ॥ ३० ॥ इत्युक्त्वापिच्छिकातेनभ्रामिताभ्रमदायिनी ॥ नानाविरचनाबीजंमायेवपरमात्मनः ॥ ३१ ॥ तांददर्शमहीपालस्तेजोरेणुविराजिताम् ॥ शक्रःसुरविमानस्थःस्वकार्मुकलतामिव ॥ ३२ ॥ सभांसैंधवसामंतोविवेशास्मिन्क्षणेतदा ॥ तारापरिकरापूर्णांव्योमवीथीमिवांबुदः ॥ ३३ ॥ तंचैवानुजगामाश्वःसौम्यःपरमवेगवान् ॥ देवलोकोन्मुखंतुष्टंशक्रमुच्चैःश्रवाइव ॥ ३४ ॥ सतमश्वमुपादायपार्थिवंसमुवाच ह ॥ सोच्चैःश्रवाइवक्षीरसागरोमरुतांपतिम् ॥ ३५ ॥

युद्धिस्फूर्जितादिसंरंभोयस्य ॥ २६ ॥ शिखरेणकिरीटकूटेनशृंगैश्चोदाराकंधराकंठोधित्यकाचयस्य ॥ फलभारयुक्तस्तरुःफलतरुः ॥ २७ ॥ कपिरित्ययुक्तदुश्चेष्टाकारिणउचितोदृष्टांतः २८ ॥ २९ ॥ खरोलिकांमिथ्याकौतुकक्रीडाम् ॥ ३० ॥ पिच्छिकामयूरबर्हमुष्टिः ॥ ३१ ॥ तेजोरेणुभिर्नानावर्णकांतिःपटलैः ॥ ३२ ॥ सैंधवसामंतोश्वपालकः ॥ ३३ ॥ ३४ ॥ सःअश्वपालकः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हयरत्नंपश्येतिशेषः ॥ जवेत्याद्युत्तरान्वयि ॥ ३६ ॥ महतामर्पणात्योग्येभ्योमहद्भ्योदानात् ॥ ३७ ॥ राजानंप्रतिउवाच ॥ ३८ ॥ स्वस्यप्रतापेनशौर्येणातपेनचआहितानल्पाशोभाश्रीःकांतिश्चयस्यांताम् ॥ ३९ ॥ इतितेनोक्तःपार्थिवः ॥ सुष्ठुउतऊर्ध्वंकरोतिशिरइतिसूत्करोध्वनिविशेषकारीवा ॥ ४० ॥ लिपिकर्मार्पितश्चित्रन्यस्तस्तदुपमोनिश्चलः ॥ एतदादिःसभाजनप्रतीतिसिद्धार्थानुवादः ॥ राजप्रतीतिदृष्टंतुअग्रेराजैववक्ष्यति ॥ ४१ ॥ यथाकेनजलेनरौतिध्वनतीतिकरवःसमुद्रःपानोद्युक्तागस्त्यदृष्ट्याआक्षुब्धःसन्

इदमुच्चैःश्रवःप्रख्यंहयरत्नंमहीपते ॥ जवोड्डयनशीलेनमूर्त्तिमानिवमारुतः ॥ ३६ ॥ अश्वोयमस्मत्प्रभुणाप्रभोसंप्रहितस्त्वयि ॥ राजतेहिपदार्थश्रीर्महतामर्पणाच्छुभा ॥ ३७ ॥ इत्युक्तवतितस्मिंस्तुप्रत्युवाचैंद्रजालिकः ॥ जलदस्तनितेशांतेचातकोंबुधरंयथा ॥ ३८ ॥ सदश्वमेनमारुह्यभुवनंविहरप्रभो ॥ स्वप्रतापाहितानल्पशोभामुर्वीरविर्यथा ॥ ३९ ॥ अश्वमालोकयामासतेनोक्तइतिपार्थिवः ॥ निर्घातस्तनितंमेघंमयूरइवसूत्करः ॥ ४० ॥ अथानिमेषयादृष्ट्याराजाचित्रोपमाकृतिः ॥ बभूवालोकयन्नश्वंलिपिकर्मार्पितोपमः ॥ ४१ ॥ क्षणमालोक्यपीठस्थस्तस्थौसंस्थगितेक्षणः ॥ दृष्ट्याक्षुब्धःसमुद्रोद्रिमीनकैःकरवोयथा ॥ ४२ ॥ तस्थौमुहूर्त्तयुग्मंसध्यानासक्तइवात्मनि ॥ वीतरागोमुनिःक्षुब्धःपरानंदइवस्थितः ॥ ४३ ॥ बोधितःकेनचिन्नासौस्वप्रतापजितोर्जितः ॥ धियाकामप्ययंभूयश्चितांचितयतीतिच ॥ ४४ ॥ बभूवुःकेवलंतत्रनिःस्पंदसितचामराः ॥ चामरिण्योहिशर्वर्यःस्तंभितेंदुकराइव ॥ ४५ ॥ विरेजुर्विस्मयापूर्णानिःस्पंदास्तेसभासदः ॥ निःस्पंदकिंजल्कदलाःपद्माःपंककृताइव ॥ ४६ ॥ प्रशशामसभास्थानेजनकोलाहलःशनैः ॥ प्रशांतप्रावृषिव्योमन्यंभोदमिवगर्जितम् ॥ ४७ ॥ संदेहसागरेमग्नाजग्मुश्चितांसुमंत्रिणः ॥ विषीदतिगदापाणावसुराजाविवामराः ॥ ४८ ॥ विततविस्मितजिह्मितयातयाजनतयाभयमोहविषण्णया ॥ स्तिमितचक्षुषिभूमिपतौस्थितेमुकुलिताब्जवनस्यधृताद्युतिः ॥ ४९ ॥ ॥ इत्या० वा० वा० दे० मोक्षोपायेषू० णेंद्रजालोपाख्यानेनृपव्यामोहोनामचतुरधिकशततमः सर्गः ॥ १०४ ॥ ॥ ७ ॥

स्वांतर्गतैरद्रिमीनकैःसहसंस्थगितोभयात्संस्तंभितस्तस्थौतद्वत् ॥ आक्षुब्धसमुद्राद्रिमीनकैरितिसमस्तपाठेतुकरवःकस्यजलस्यरवोयथासंस्थगितइतिव्याख्येयम् ॥ ४२ ॥ क्षुब्धोबाह्यदृष्टेरंतःसंचलितः ॥ बाह्यदृष्टिशून्यइतियावत् ॥ ४३ ॥ स्वप्रतापेनजिताऊर्जिताबलवंतोयेन ॥ हेतुगर्भंविशेषणम् ॥ ४४ ॥ ४५ ॥ पंककृतामृन्मयाः ॥ ४६ ॥ अंभोदस्येदमांभोदम् ॥ ४७ ॥ असुरैःसहआजिःसंग्रामस्तस्मिन् ॥ ४८ ॥ विततेनविस्तृतेनविस्मयेनजिह्मितयाकुटिलितयानिरुत्साहीकृतयेतियावत् ॥ तयाआस्थानजनतयाजनसमूहेन ॥ ४९ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० चतुरुत्तरशततमः सर्गः ॥ १०४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

विमोहंस्वस्थत्वद्दयंनृपंप्रतिसभासदाम् ॥ मोहहेतोःपरिप्रश्नात्तदुक्त्यारंभईर्यते ॥ १ ॥ प्रावृषिभवेनप्रावृषेण्येनांबुना ॥ १ ॥ अकंपयत्अर्थात्स्वदेहमितिगम्यते ॥ २ ॥ विक्षुब्धेसंचलितेपातालवारणेभूविधारकेदिग्गजे ॥ शंकराचलःकैलासः ॥ ३ ॥ कुलशैलामंदरादयोविष्टंभपर्वताः ॥ ४ ॥ इंदोःलक्षणयाइंदूदयोद्रिक्तस्यार्णवस्यवनंजलंमिन्वंति उपमिन्वंतीतिवनमाःश्रियःशोभाबभार ॥ वपुषाश्रियइतिपाठःस्पष्टः ॥ ५ ॥ दध्वानअस्फुटमुक्तवान् ॥ ६ ॥ सभाशब्देनजनाउच्यंते ॥ अब्जिन्याभानुंप्रतिवक्तृत्वमौत्प्रेक्षिकमत्रोपमानम् ॥ रणन्मधुकरीत्युत्प्रेक्षोपपादकंविशेषणम् ॥ ७ ॥८॥ भ्रमाभ्रांतिप्रत्ययानिर्निमित्तंविनैवबाह्यंकारणंमनोभिंदंतिक्षोभयंतिभयविषादादिभिरित्यर्थः ॥९ ॥ भो

॥श्रीवसिष्ठउवाच॥ ॥मुहूर्तद्वितयेनाथबोधमापमहीपतिः॥प्रावृषेण्यांबुनिर्मुक्तमंभोरुहमिवोत्तमम्॥१॥ आसनात्सांगदोत्तंसःप्रबुद्धोसावकंपयत्॥ सवनाभोगश्रृंगाग्र्योभूकंपइवपर्वतः॥ २ ॥ बभूवाथप्रबुद्धोसावासनोपरिकंपितः॥ विक्षुब्धइवपातालवारणेशंकराचलः॥ ३॥ पततंधारयामासुस्तंपुरोगान्पंभुजैः॥ मेरुंप्रलयविक्षुब्धंकुलशैलास्तटैरिव॥ ४ ॥ पुरोगैर्द्धार्यमाणोसौपर्याकुलमतिर्नृपः॥ वीचिविक्षोभितस्येंदोर्बभारवनमाःश्रियः॥ ५॥ कोयंप्रदेशःकस्येयंसभेतिसनृपःशनैः॥ दध्वानमज्जदंभोजकोशस्थइवषट्पदः ॥ ६॥ अथोवाचसभादेवकिमेतदितिसादरम्॥ रणन्मधुकरीभानुंदृष्टराह्वुमिवाब्जिनी॥ ७॥ अथैनंपरिपप्रच्छुःपुरोगामंत्रिणस्तथा॥ प्रलयोल्लाससंत्रस्तंमार्कंडेयमिवामराः॥ ८॥ त्वयीत्थंसंस्थितेदेववयमत्यंतमाकुलाः॥ अभ्रेघमपिभिंदंतिनिर्निमित्तंभ्रमामनः॥९॥ आपातरमणीयेषुपर्यंतविरसेषुच॥ भोगेष्विवविकल्पेषुकेषुतेलुलितंमनः॥ १० ॥ सततोदारवृत्तासुकथासुपरिशीतलम्॥ मनस्तेनिर्मलंकस्मात्संभ्रमेषुनिमज्जति॥ ११ ॥ तुच्छालंबनमालूनविशीर्णलोकवृत्तिषु॥ मनोमोहमुपादत्तेनमहत्त्वविजृंभितम्॥ १२॥ सातत्येनहियैवास्यमनसोवृत्तिरुत्थिता॥ शरीरमदमत्तासुतामेवैतद्विधावति॥ १३॥ अतुच्छालंबनंधीरंप्रबुद्धंगुणहारिच॥ तवापिहिमनश्चित्रमालूनमिवलक्ष्यते॥ १४॥ अनभ्यस्तविवेकंहिदेशकालवशानुगम्॥ मंत्रौषधिवशंयातिमनोनोदारवृत्तिमत्॥ १५॥ नित्यमात्तविवेकस्यकथमालूनशीर्णता॥ धुनोतिविततंचेतोवात्येवविबुधाचलम्॥ १६ ॥

गेषुरागादिनापृथग्जनानामिवतेकेनहेतुनामनोलुलितंव्यामूढमित्यर्थः ॥ १० ॥ कथासुविवेकचर्चासुपरिशीलनेनशीतलम्॥ संभ्रमेषुभयेषु ॥ ११ ॥ कीदृशंतर्हिमनोमोहयोग्यंतत्राहुः॥तुच्छालंबनमिति ॥ यतस्तुच्छविषयालंबनमतोविषयेआलूनेआलूनमिवविशीर्णेविशीर्णमिवलोकवृत्तिषुमोहमुपादत्तइत्यर्थः ॥ महत्त्वविजृंभितंविवेकपरिष्कृतम् ॥ १२ ॥ शरीरमदोदेहाभिमानस्तेनमत्तासुअस्पृष्टविवेकासुदशासुअस्यमनसोयैवस्त्रीपुत्रादिविषयेवृत्तिरुत्थितातामेवविधावति ॥१३॥ तवमनस्तुनतथेत्याहुरतुच्छेति ॥१४॥ ॥ १५ ॥ विततंविवेकविस्तृतम् ॥ विबुधाचलंमेरुम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातेनस्वजनसमूहेनअनुगीर्णस्यअनुकूलगीर्भिराश्वासितस्य ॥ मासांतेपौर्णमास्याम् ॥ १७ ॥ हिमर्त्तौशिशिरे ॥ माधवोवसंतः ॥ १८ ॥ अथासन्नमृत्युःसन्निहितास्तमय इंदुःराहुमिवैंद्रजालिकमालोक्यअतिसंभ्रमेणभयेनआश्चर्येणचखिन्नंआस्मृत्याआध्यानेनपूर्वापरसर्ववृत्तांतप्रतिसंधानेनोपलक्षितंमुखंयस्यतथाविधोबभौ ॥ आसन्नोमृत्युर्यसनंयस्य ॥ १९ ॥ बभ्रुंनकुलम् ॥ सर्परूपीक्षुद्रसर्पवेषप्रच्छन्नस्तक्षकोनागराजः ॥ २० ॥ हेजाल्मअसमीक्ष्यकारिन् ॥ जालेनमायावागुरयाजटालेनेव ॥ अब्धिपदेनतत्सदृशंस्वमनोगौण्योच्यते ॥ २१ ॥ चित्रमित्यस्यनिवेशितमित्यत्रान्वयः ॥ २२ ॥ चित्रतामेवाभिनयन्नाह ॥ क्वेति ॥ लोकपर्यायालोकप्रसिद्धसर्वव्यवहारास्तेषांकृतांतपदस्यसिद्धांतरहस्यस्यवेदिनोबोद्धारः ॥ प्रकृताःसांप्रतमनुभूताआपदः ॥ २३ ॥ अभ्यस्तमहाज्ञानमपिमनःकदाचिद्देहकेतिष्ठतिविद्यमानेपिस्वमैंद्रजालानांमोहंआदत्ते ॥२४॥

इतिजातानुगीर्णस्यभूपतेःकांतिराननम् ॥ भूषयामासशीतांशुंमासांतइवपूर्णता ॥१७॥ रराजराजासौम्यास्यमुन्मीलितविलोचनः ॥ गतेहिमर्त्तावुल्लासिपुष्पौघइवमाधवः ॥ १८ ॥ अथातिसंभ्रमाश्चर्यखिन्नास्मृतिमुखोबभौ ॥ आसन्नमृत्युरालोक्यराहुमिंदुरिवांबरे ॥ १९ ॥ ऐंद्रजालिकमालोक्यप्रोवाचाथहसन्निव ॥ बभ्रुंहिंसात्मकंदृष्ट्वासर्परूपीवतक्षकः ॥ २० ॥ जाल्मजालजटालेनकिमेतद्भवताकृतम् ॥ येनास्पंदप्रसन्नोब्धिःक्षणादेत्यप्रसन्नताम् ॥ २१ ॥ चित्रंचित्राहिदेवस्यपदार्थशतशक्तयः ॥ सुशक्तमपिमेचित्तंयाभिर्मोहेनिवेशितम् ॥ २२ ॥ क्ववयंलोकपर्यायकृतांतपदवेदिनः ॥ क्वमनोमोहदायिन्योविततताःप्रकृतापदः ॥ २३ ॥ अप्यभ्यस्तमहाज्ञानंमनस्तिष्ठतिदेहके ॥ कदाचिन्मोहमादत्तेक्षणंमतिमतामपि ॥२४॥ इदमाश्चर्यमाख्यानंश्रूयतांरेसभासदः ॥ ममशांबरिकेणेहयन्मुहूर्तंप्रदर्शितम् ॥२५॥ दृष्टवानहमेतस्मिन्बह्वीःकार्यदशाश्चलाः ॥ मुहूर्त्तंप्रार्थितोध्वस्तशक्रसृष्टिरिवाब्जजः ॥२६॥ इत्युक्त्वोन्मुखनेत्रेषुसभ्येषुसहसन्निव ॥ राजावर्णयितुंचित्रंवृत्तांतमुपचक्रमे ॥२७॥ ॥राजोवाच॥ ॥इहविविधपदार्थसंकुलायांकदनदपत्तनपर्वताकुलायाम् ॥ कुलशिखरिसमुद्रसंकरायांभुविविभवावलितोस्त्ययंप्रदेशः ॥२८॥ ॥इ० वा० वा० दे० मोक्षोपायेषू० इंद्रजालोपाख्यानेराजावबोधोनामपंचोत्तरशततमःसर्गः ॥ १०५॥ ॥७॥ ॥७॥

शंबरस्यमायाशांबरीसास्यास्तीतिशांबरिकस्तेन ॥ २५ ॥ अध्वस्तशक्रसृष्टिरितिच्छेदः ॥ पुराकिलबलिःक्वचिदसहायंशक्रमासाद्यबलैर्निगृह्याहर्त्तुकामःशक्रेणमाययास्वसैन्यंसृष्ट्वाबलिमायाबंधेनमोहयामास ॥ तदाबलिनास्वबंधनमोक्षणायस्तुत्याप्रसादितोब्रह्मातत्रागत्यशाक्रींसृष्टिंध्वंसयितुंप्रवृत्तःशक्रप्रार्थनयाअध्वस्तशक्रसृष्टिर्मुहूर्त्तमात्रंतन्मायाकौतुकंयथादृष्टवांस्तद्वदित्यर्थः ॥ २६ ॥ २७ ॥ वक्ष्यमाणोपोद्घातेनप्रथमंसर्वजनप्रसिद्धभूम्यंतर्गतस्वदेशसत्तामनुवदति ॥ इहेति ॥ पर्वतग्रहणेनप्राप्तानामपिकुलशिखरिणांपुनर्ग्रहणंब्राह्मणपरिव्राजकन्यायेनश्रैष्ठ्यार्थम् संकीर्यतइतिसंकरा ॥ कृञःशचेतिकर्मणिबाहुलकात्शः ॥ संकटायामितिपाठेतुदुर्गमायामित्यर्थः ॥ २८ ॥ ॥ इति श्रीवासिष्ठम० तात्पर्यप्रकाशेउत्पत्तिप्रकरणेपंचोत्तरशततमःसर्गः ॥ १०५ ॥ ॥७॥ ॥७॥ ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इहाश्वेनापनीतस्यवनेचंडालकन्यया ॥ समयात्पक्कणंनीत्वाविवाहःस्वस्यवर्ण्यते ॥ १ ॥ समानार्थःसहशब्दः ॥ सहोदरःसमानोदरोद्भवइवेत्यर्थः ॥१॥२॥ यावदितिप्राकाश्ये निपातोनतुवतुबंतः ॥ प्रत्यक्षमभ्यागतइत्यर्थः ॥ ३ ॥ भ्रमिता ॥ भ्रमेर्णिचिमितांङ्कस्वः ॥ ४ ॥ एकोऽसहायः ॥ ५ ॥ प्रलयक्षुब्धंउत्पातवशादेवचलंतमद्रिमारूढःपुष्करावर्त्तकोमेघराजोयथाचलितस्तथाहंचलितइत्यन्वयः ॥ ६ ॥ उर्वरांसर्वसस्याढ्यभूमिम् ॥ निर्भर्त्तुर्निर्भरवतःप्रवृद्धस्येतियावत् ॥ कल्लोलोबृहत्तरंगः ॥ ७ ॥ मुग्धःस्वमनसेतिपाठः

राजोवाच॥ ॥ अस्तितावदयंदेशोनानावननदीयुतः ॥ वसुधामंडलस्यास्यसहोदरइवानुजः॥ १ ॥ अस्मिंश्चायमहंराजापौराभिमतवृत्तिमान्॥ इंद्रःस्वर्गइवास्यांतुसभायांमध्यसंस्थितः॥ २ ॥ यावदभ्यागतोदूरात्कश्चिच्छांबरिकस्त्वयम्॥ रसातलादभ्युदितोमायीमयइवस्वयम्॥३॥ अनेनभ्रमितायेहपिच्छिकातेजसोर्ज्जिता॥ कल्पांतपवनाभ्रेणशक्रचापलतायथा॥ ४॥ आलोक्यैतामहंलोलामस्याश्वस्यपुरःस्थितः ॥ पृष्ठमारूढवानेकआत्मनाभ्रांतमानसः॥ ५ ॥ ततोद्रिंप्रलयक्षुब्धंपुष्करावर्त्तकोयथा॥ तथाचलंतंचलितःस्वश्वमारूढवानहम्॥ ६ ॥ गंतुंप्रवृत्तोमृगयामेकोहमतिरंहसा ॥ उर्वरामिवनिर्भर्त्तुःकल्लोलःप्रलयांबुधेः ॥ ७॥ तेनानिलविलोलेनदूरंनीतोस्मिवाजिना ॥ भोगाभ्यासजडेनाज्ञोमुग्धस्यमनसायथा ॥ ८ ॥ अकिंचनमनःशून्यंस्त्रीचित्तमिवनिर्भरम्॥ ततःप्रलयनिर्दग्धजगदास्पदभीषणम्॥ ९ ॥ निष्पक्षिक्षारनीहारंनिर्वृक्षमजलंमहत्॥ संप्राप्तोहमपर्यंतमरण्यंश्रांतवाहनः॥ १० ॥ तद्दितीयमिवाकाशंतथाष्टममिवांबुधिम्॥ पंचमंसागरमिवसंशुष्कंशून्यकोटरम्॥ ११ ॥ ज्ञस्येववितंतंचेतोमूर्खस्येवरुषाजवम्॥ अदृष्टजनसंसर्गमजाततृणपल्लवम्॥ १२॥ अरण्यमिदमासाद्यमतिर्मेखेदमागता ॥ ललनेवैत्यदारिद्र्यंनिरन्नफलबांधवम् ॥ १३ ॥

स्पष्टः ॥ मुग्धस्यमनसेतिपाठेमुग्धस्यापातरमणीयस्यविषयजातस्यभोगाभ्यासेनजडेनेत्यर्थः ॥ असमर्थसमासश्छांदसः ॥ ८ ॥ अकिंचनस्ययतेर्मनइवशून्यंनिर्विषयम ॥ निर्भरंलघुविषमंवा ॥ जगदास्पदंब्रह्मांडम् ॥ ९ ॥ क्षारनीहारंदुःसहशीतम ॥ १० ॥ स्वादूदकार्णवात्परतोऽष्टममंबुधिप्राग्वर्णितभूपरिखागर्तमिव ॥ जंबूद्वीपांतश्चतुर्दिशंचतुःसागरप्रसिद्धेस्तत्रपंचमंसागरमिव ॥ ११ ॥ ज्ञस्यतत्त्वविदोब्रह्माकारंचेतइववितितमपरिच्छेद्यम् ॥ मूर्खस्यरुषाक्रोधइवअजवंदुर्गमंविषममितियावत् ॥ १२ ॥ दारिद्र्यमेत्यप्राप्यस्थिताललनेवस्थितमितिशेषः ॥ सीदतामयेतिव्यवहितेनवान्वयः ॥ १३ ॥

१ टावंतमिदम्

CC-0. In Public Domain. Digitization by eGangotri

मरुमरीच्यंबुभिःपुरोभागेप्लुतानिआप्लावितानिककुम्मुखानियत्र ॥ १४ ॥ १५ ॥ एतेनाश्वेन ॥ शून्यभ्रांत्याआकाशगमनेन ॥ प्राप्तवानित्यस्ययत्रस्फुरंतितत्रेतिपरेणसंबंधः ॥ १६ ॥ १७ ॥ कदर्थलक्ष्म्याअधर्मार्जितधनेन ॥ जिह्मस्यकुटिलजनस्य ॥ १८ ॥ १९ ॥ अगेंद्रंदक्षश्रेष्ठंविष्ण्वधिष्ठितवटम् ॥ २० ॥ आलंबिताअश्वपरित्यागार्थमवलं

कचन्मरुमरीच्यंबुपुरःप्लुतककुम्मुखम् ॥ आसूर्यास्तंदिनंतत्रप्रक्रांतंसीदतामया ॥ १४ ॥ तदरण्यंमयातीतमतिरूच्छ्रेणखेदिना ॥ विवेकिनेवसंसारोमध्यशून्यतताकृति ॥ १५ ॥ यदेतेनातिवाह्याहंप्राप्तवाञ्जंगलंक्रमात् ॥ अस्ताद्रिसानुंखिन्नाश्वःशून्यभ्रांत्येवभास्करः ॥ १६ ॥ जंबूकदंबप्रायेषुकलालापाःपतत्रिणः ॥ यत्रस्फुरंतिखंडेषुपांथानामिवबांधवाः ॥ १७ ॥ यत्रशष्पशिखाश्रेण्योदृश्यंतेविरलाःस्थले ॥ कदर्थलक्ष्म्याजिह्मस्यत्द्दीवानंदवृत्तयः ॥ १८ ॥ पूर्वादरण्यादरसात्तद्धिकिंचित्सुखावहम् ॥ अत्यंतदुःखान्मरणाद्वरंव्याधिर्हिजंतुषु ॥ १९ ॥ तत्रजंबीरखंडस्यतलंसंप्राप्तवानहम् ॥ मार्कंडेयइवागेंद्रमेकार्णवविहारतः ॥ २० ॥ आलंबितामयातत्रस्कंधसंसर्गिणीलता ॥ नीलाजलदमालेवतापतप्तेनभूभृता ॥ २१ ॥ मयिप्रलंबमानेस्यांप्रयातःसतुरंगमः ॥ गंगावलंबिनिनरेयथादुष्कृतसंचयः ॥ २२ ॥ चिरंदीर्घाध्वगःखिन्नस्तत्रविश्रांतवानहम् ॥ भानुरस्ताचलोत्संगेतलेकल्पतरोरिव ॥ २३ ॥ यावत्समस्तसंसारव्यवहारभरैःसमम् ॥ रविर्विश्रमणायेवनिविष्टोस्ताचलांगणे ॥ २४ ॥ शनैःश्यामिकयाग्रस्तेसमस्तेभुवनोदरे ॥ रात्रिसंव्यवहारेषुसंप्रवृत्तेषुजंगले ॥ २५ ॥ अहंतरुतृणेतस्मिन्पेलवेखंडकोटरे ॥ निलीनश्चिरलीनास्यःस्वनीडेविहगोयथा ॥ २६ ॥ विषदष्टविवेकस्यकीनाशस्यगलत्स्मृतेः ॥ विक्रीतस्येवदीनस्यमग्नस्येवांधकूपके ॥ २७ ॥ तत्रकल्पसमारात्रिर्मोहमग्नस्यमेराता ॥ एकार्णवोह्यमानस्यमार्कंडेयमुनेरिव ॥ २८ ॥ नस्नातवान्नार्चितवान्नतदाभुक्तवानहम् ॥ केवलंमेगतारात्रिःसापदांधुरितिष्ठतः ॥ २९ ॥ विनिद्रस्यविधैर्यस्यस्फुरतःसहपल्लवैः ॥ समंदुष्टातिदैर्घ्येणसाव्यतीयायशर्वरी ॥ ३० ॥

बिता ॥ २१ ॥ २२ ॥ २३ ॥ यावत्समस्तसंसारव्यवहारैःसहरविरस्ताचलोपलक्षितेउदयान्त्यंतेगगनांगणेनिविष्टस्तावदहंतस्मिंस्तरुगणेनिलीनइतिव्यवहितेनान्वयः ॥ २४ ॥ ॥ २५ ॥ चिरंलीनंस्वपक्षपुटेगोपितमास्यंचंचूपुटंयेनतथाविधोविहगोयथातथा ॥ २६ ॥ विषशब्देनविषधरःकीनाशशब्देनमृत्युवशश्चलक्षणयोच्यते ॥ २७ ॥ २८ ॥ सापदां आपद्युक्तजनानां सारात्रिरितिवा ॥ २९ ॥ पल्लवैःसहस्फुरतःकंपमानस्य ॥ दुष्टेनदुरुत्तरेणातिदैर्घ्येणसमंसाकम् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःपूर्वांदिशंप्राप्तमधुपानारुणामिवदृष्टवानितितृतीयेनान्वयः ॥ तारेंदुकैरवैःसहतिमिरलेखासुम्लानतामप्रसन्नतामापाद्यमानासु ॥ तासामुपमानंमयीवेति ॥ तारकेंदुकैरवाणामुपमानमाननेइत्यनेनार्थादाननमिंदोर्नेत्रेकैरवाणांतत्तारकेनाराणामुपमानमितिगम्यते ॥ ३१ ॥ क्ष्वेडासुसिंहनादेषु ॥ जवजंगलेदीर्घारण्ये ॥ जंगलेऽसहेतिप्रश्लेषः ॥ असहाडुःसहायाशीतार्त्तिस्तद्वतांप्राणिनांदंतपंक्तिघट्टनटांकारसीत्कारैर्मामिवहसंतीमिवेतिदिशोविशेषणम् ॥ ३२ ॥ ३३ ॥ वारणःप्राच्यामैरावताख्योदिग्गजस्तदारोहणंततऊर्ध्वभावस्तदुन्मुखम् ॥ ३४ ॥ आस्तरणंवस्त्रमास्फोटितंविधूनितम् ॥ ३५ ॥ कालःकालरुद्रः ॥ कल्पःप्रलयः ॥ ३६ ॥ अभिजातोत्दयः ॥ ३७ ॥ केवलंनिष्फलवनखंडभ्रमणेनचंचलंजातिचापल्यंयथास्यात्तथाविहरंतितत्रेतिशेषः ॥ ३८ ॥ अवश्यायलेशानीहारजलकणाः ॥ ३९ ॥ दारिकाकन्या ॥ माधवीस्त्रीवेषधरोहरिरिव ॥ ४० ॥

ततस्तिमिरलेखासुसहतारेंदुकैरवैः ॥ मयीवापाद्यमानासुम्लानतामलमानने ॥ ३१ ॥ शाम्यंतीषुचवेतालक्ष्वेडासुजवजंगले ॥ सहशीतार्तिमद्दंतपंक्तिटांकारसील्कृतैः ॥ ३२ ॥ मामेवार्त्तिविनिर्मग्नंहसंतीमिवदृष्टवान् ॥ अहंपूर्वांदिशंप्राप्तमधुपानारुणामिव ॥ ३३ ॥ क्षणादज्ञइवज्ञानंदरिद्रइवकांचनम् ॥ दृष्टवानहमर्कंखेवारणारोहणोन्मुखम् ॥ ३४ ॥ उत्थायास्तरणंवस्त्रंतत्तदास्फोटितंमया ॥ हस्तिचर्महरेणेवसंध्यानृत्यानुरागिणा ॥ ३५ ॥ प्रवृत्तस्तामहंस्फारांविहर्त्तुंजंगलस्थलीम् ॥ कालोजगत्कुटींकल्पदग्धभूतगणामिव ॥ ३६ ॥ नकिंचिद्दृश्यतेतत्रभूतंजरठजंगले ॥ अभिजातोगुणलवोयथामूर्खशरीरके ॥ ३७ ॥ केवलंविगताशंकंखंडभ्रमणचंचलम् ॥ चीचीकूचीतिवचनाविहरंतिविहंगमाः ॥ ३८ ॥ अथाष्टभागमापन्नेव्योम्नोदिवसनायके ॥ शुष्कावश्यायलेशासुस्नातास्विवलतासुच ॥ ३९ ॥ दृष्टामयाप्रभ्रमतादारिकौदनधारिणी ॥ गृहीतामृतसत्कुंभादानवेनेवमाधवी ॥ ४० ॥ तरत्तारकनेत्रांतांश्यामामधवलांबराम् ॥ अहमभ्यागतस्तत्रशर्वरीमिवचंद्रमाः ॥ ४१ ॥ मत्यमोदनमाश्वेतद्बालेबलवदापदि ॥ देहिदीनार्त्तिहरणात्स्फारतांयांतिसंपदः ॥ ४२ ॥ क्षुदंतर्महतीयंमेबालेवृद्धिमुपेयुषी ॥ कृष्णसर्पाप्रसूतेवकोटरस्थाजरद्द्रुमे ॥ ४३ ॥ याञ्चयापितयामत्यमित्थंदत्तंनकिंचन ॥ यत्नप्रार्थनयालक्ष्म्यायथादुष्कृतिनेधनम् ॥ ४४ ॥ केवलंचिरकालेनमयात्यंतानुगामिना ॥ खंडात्खंडंनिपतताच्छायाभूतेपुरःस्थिते ॥ ४५ ॥ तयोक्तंहारकेयूरिंश्वंडालींविद्धिमामिति ॥ राक्षसीमिवसुक्रूरांपुरुषाश्वगजाशनाम् ॥ ४६ ॥

तरत्तारकेचपलकनीनिकेनेत्रेयस्याः शर्वरीपक्षेचलत्तारकाएवनेत्राणियस्याः ॥ ४१ ॥ बलवत्यांप्राणात्ययपर्यंतायाम् ॥ तथाचस्मृतिः ॥ जीवितात्ययमापन्नोयोन्नमत्तियतस्ततः ॥ लिप्यतेनसपापेनपद्मपत्रमिवांभसेति सर्वान्नानुमतिःप्राणात्ययेतद्दर्शनादितिबादरायणसूत्रंचेतिभावः ॥ ४२ ॥ प्रसूताजातापत्या ॥ साहिस्वांडान्यपियसतीतिक्षुधायाअनुचितकारिणीत्वद्योतनार्थंविशेषणम् ॥ तथाचाहुः ॥ अस्यदग्धोदरस्यार्थेकोनकुर्यादसांप्रतमिति ॥ ४३ ॥ यत्नयुक्तयाप्रार्थनयायत्नप्रार्थनया ॥ ४४ ॥ एकस्माद्वनखंडाद्वनखंडांतरंनिपततिअनुगच्छति ॥ अतएवच्छायाभूते ॥ ४५ ॥ हारकेयूरिन्नित्यनेनोत्तमजातिसूचनेनमदन्नमभोज्यमितिद्योतितम् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनभिजातेहादसंपन्नाभिलाषात् ॥ ग्राम्यात्ग्रामीणजनात् ॥ सौजन्यंसौहार्द्दमिव ॥ ४७ ॥ मज्जंत्यालीयमानया ॥ लीलाभिःस्वाभिप्रेतार्थसूचककटाक्षादिचेष्टाभिरवनत याप्रह्वीभूतया ॥ ४८ ॥ सामान्योलोकःपृथग्जनः ॥ ४९ ॥ दांतान्बलीवर्द्दान्वाहयतिकर्षतीतियावत् ॥ ५० ॥ त्वयिभर्तृत्वेस्थितेसतिदीयते ॥ ५१ ॥ ५२ ॥ माधव्या इंद्रायदत्तममृतादर्द्धमिव ॥ आर्त्याक्षुत्पीडयामहद्धुमतमितियावत् ॥ ५३ ॥ ५४ ॥ आपूर्यतिरोधाय ॥ ५५ ॥ अवीचिनरकविशेषम् ॥ ५६ ॥ मातंगायचांडालायनिवेदि

राजन्यार्चनमात्रेणमत्तोनाप्नोषिभोजनम् ॥ ग्राम्यादनभिजातेहात्सौजन्यमिवसुंदरम् ॥ ४७ ॥ इत्युक्तवत्यागच्छंत्याखेलयाचप देपदे॥ कुंजकेषुनिमज्जंत्यालीलावनतयोदितम् ॥४८॥ ददामिभोजनमिदंभर्त्ताभवसिचेन्मम ॥ लोकोनोपकरोत्यर्थैःसामान्यःस्निग्ध तांविना ॥ ४९ ॥ वाहयत्यत्रमेदांतान्केदारेपुल्कसःपिता ॥ श्मशानइववेतालःक्षुधितोधूलिधूसरः ॥ ५० ॥ तस्येदमन्नंभवतिभर्तृत्वेदी यतेस्थिते ॥ प्राणैरपिहिसंपूज्यावल्लभाःपुरुषायतः ॥ ५१ ॥ अथोक्तासामयाभर्त्ताभवामितवसुव्रते ॥ केनापदिविचार्यंतेवर्णधर्मकुल क्रमाः ॥ ५२ ॥ ततस्तयौदनादर्द्धमस्यमेकंसमर्पितम् ॥ माधव्येवामृतादर्द्धमिंद्रायार्त्तिमहत्पुरा ॥ ५३ ॥ जंबूफलरसःपीतःसभुक्तःपक्क णौदनः ॥ विश्रांतंचमयातत्रमोहापहतचेतसा ॥५४॥ मांतत्रार्कमिवापूर्यसाप्रावृट्श्यामलागता ॥ हस्तेनसमुपादायप्राणंबहिरिवस्थि तम् ॥ ५५ ॥ दुराकृतिंदुरारंभमाससादभयप्रदम् ॥ पितरंपीवराकारमवीचिमिवयातना ॥ ५६ ॥ तयामदनुषंगिण्यास्वार्थस्तस्मैनिवे दितः ॥ मातंगायभ्रमर्येवनिःस्वनेनालिलग्नया ॥५७॥ अयंममभवेद्भर्त्तातातहेतवरोचताम् ॥ सतस्याबाढमित्युक्त्वादिनांतेसमुपस्थि ते ॥ ५८ ॥ मुमोचदांतावाबद्धौकृतांतःकिंकराविव ॥ नीहाराभ्रकडारासुदिक्षुप्रोद्धूलितासुच ॥ वेतालबंधनात्तस्माद्दिनांतेचलिताव यम् ॥ ५९ ॥ क्षणेनपक्कणंप्राप्ताःसंध्यायांदीर्घजंगलात् ॥ श्मशानादिववेतालाःश्मशानमितरन्महत् ॥ ६० ॥ विकर्त्तितविभागस्थक पिकुक्कुटवायसम् ॥ रक्तसिक्तोर्वराभागप्रभ्रमन्मक्षिकागणम् ॥ ६१ ॥ शोषार्थप्रस्तृतार्द्रांत्रितंत्रीजालपतत्खगम् ॥ निष्कुटस्थितजंबी रखंडलग्नखगध्वनि ॥ ६२ ॥ शुष्यद्गुरुवसापिंडपूर्णालिंदलसत्खगम् ॥ दृष्टिप्रस्तृतरक्ताक्तचर्मस्रवदसृग्लवम् ॥६३॥ बालहस्तस्थितक्र व्यपिंडक्वणितमक्षिकम् ॥ जर्जराधिष्ठचंडालतर्जितारटितार्भकम् ॥६४॥ तत्रविष्टावयंकीर्णशिरांत्रंभीमपक्कणम् ॥ मृतभूतंजगत्कल्पे कृतांतानुचराइव ॥ ६५ ॥

तःकर्णेइतिशेषः ॥ अतएवालिनाभ्रमरांतरेणलग्नयाभ्रमर्येवेत्युपमा ॥ ५७ ॥ ५८ ॥ कडारासुकपिलासु ॥ वेतालबंधनात्पिशाचनिवासात्तस्माद्वनात् ॥ ५९ ॥ ६० ॥ विक र्त्तिताअपिपुनःकर्त्तनेनविभागस्थाः ॥ ६१ ॥ निष्कुटेषुगृहारामेषु ॥ ६२ ॥ अलिंदोबहिर्द्वारप्रकोष्ठः ॥ ६३ ॥ जर्जरैर्वृद्धैरधिष्ठैःश्रेष्ठैश्चंडालैः ॥ ६४ ॥ मृतानिभूतानिप्राणि नोयत्र ॥ कल्पेप्रलयकाले ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभ्रमेणादरातिशयेनउपहितेआस्तीर्णेपीठकेआसने ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ तैस्तैश्चंडालोत्सवोचितैर्मद्यमांसादिसंचयारंभोद्योगैः ॥ ७० ॥ ७१॥ अत्रास्मिन्विवाहोत्सवे ॥ मदिरासवपदाभ्यांतन्मद्योलक्ष्यते ॥ महांतोब्रह्महत्यादयः ॥ ७२ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०षडुत्तरशततमःसर्गः ॥ १०६ ॥ ॥ ७ ॥ ॥ अत्रस्थस्यचिरंतत्रवसतःषष्टिहायनान् ॥ चंडालोचितकृत्येनजीवनंयत्तदुच्यते ॥१॥ सोत्सवेनोत्सवसहितेनविवाहेन ॥ आवर्जिताशयोवशीकृतचित्तः ॥ १ ॥ साभार्या ॥ अस्यमम ॥

संभ्रमोपहितानल्पकदलीदलपीठके॥ अहमास्थितवांस्तत्रनवेश्वशुरमंदिरे ॥६६॥ श्वश्रवामेकेकराक्ष्यातुतेनास्रग्लवचक्षुषा ॥ जामातायमितिप्रोक्तंतयासदभिनंदितम् ॥ ६७ ॥ अथविश्रम्यचंडालभोजनान्यजिनासने॥ संचितान्युपभुक्तानिदुष्कृतानीवभूरिशः ॥६८॥ अनंतदुःखबीजानिनमनोज्ञतराण्यपि ॥ तानिप्रणयवाक्यानिश्रुतान्यसुभगान्यलम् ॥ ६९ ॥ निरभ्रांबरनक्षत्रेकस्मिंश्चिद्दिवसेततः॥ तैस्तैरारंभसंरंभैस्तैर्वस्त्रविभवार्पणैः ॥ ७० ॥ दत्ताप्यनेनसामह्यंकुमारीभयदायिनी ॥ सुकृष्णाकृष्णवर्णेनदुष्कृतेनेवयातना ॥ ७१ ॥ सरभसमभितोविनेदुरत्रप्रस्तुतमहामदिरासवाःश्वपाकाः॥ हतपटुपटहाविलासवंतःस्वयमिवदुष्कृतराशयोमहांतः॥७२॥ ॥ इत्यार्षेवा०वा०दे०मो०उ०इंद्रजालोपाख्यानेचांडालीविवाहोनामषडुत्तरशततमःसर्गः॥१०६॥ ॥ ७ ॥ ॥ राजोवाच ॥ ॥ बहुनात्रकिमुक्तेनसोत्सवावर्जिताशयः॥ तदाप्रभृतितत्राहंसंपन्नःपुष्टपुल्कसः ॥ १ ॥ सप्तरात्रोत्सवस्यांतेक्रमान्मासाष्टकेगते ॥ पुष्पितासास्यसंपन्नास्थितागर्भवतीततः ॥ २ ॥ प्रसूतादुःखदांकन्यांविपद्दुःखक्रियामिव ॥ साकन्यावद्धधेशीघ्रंमूर्खचिंतेवपीवरी ॥ ३ ॥ पुनःप्रसूतासावर्षैस्त्रिभिःपुत्रमशोभनम् ॥ अनर्थमिवदुर्बुद्धिराशापाशविधायकम् ॥ ४ ॥ पुनःसुतांदुहितरंपुनरप्यर्भकंततः ॥ कलत्रवानहंजातोवनेजरठपुल्कसः ॥ ५ ॥ तयासहसमास्तत्रमयाबह्व्योतिवाहिताः॥ नारकेंचितयासार्द्धंब्रह्मघ्नेनेवयातनाः ॥६॥ शीतवातातपक्लेशविवशेनवनांतरे ॥ चिरंविलुलितंवृद्धकच्छपेनेवपल्वले॥७॥ कलत्रचिंताहतयाधियासंदह्यमानया ॥ दृष्टाःकष्टसमारंभादिशःप्रज्वलिताइव ॥ ८ ॥ क्षौमानेकसमाक्षीणपटेचेंडकधारिणा ॥ काष्ठभारोवनेव्यूढोयोमूर्त्तमिवदुष्कृतम् ॥ ९ ॥ यौकाकीर्णजरत्क्लिन्नगंधिकौपीनवाससा ॥ आश्वस्यधवलीकानांतलेनीताघनाःसमाः ॥ १० ॥ कलत्रापूरणोल्केनजर्जरेणहिमानिलैः ॥ हेमंतेदर्दुरेणेवविलीनंवनकुक्षिषु ॥ ११ ॥ नानाकलहकल्लोलतापप्रसरविद्रुताः ॥ बाष्पव्याजेननिर्मुक्तानेत्राभ्यांरक्तबिंदवः ॥ १२ ॥

पुष्पिताऋतुमती ॥ २ ॥ ३ ॥ ४ ॥ कलत्रवान्कुटुंबी ॥ ५ ॥ ६ ॥७॥८॥ क्षौमेअतसीवल्कलविकारेअनेकसमाभिराक्षीणेजीर्णेपटेचेंडकंतृणादिनिर्मितंवलयाकारंभारोद्वहनशिरस्त्राणम् ॥ ९ ॥ यूकानांसमूहोयौकम् ॥ जरज्जीर्णंदुर्गंधिचकौपीनमेववासोयस्य ॥ आश्वस्यविश्रम्य ॥ धवलीकानांवृक्षविशेषाणाम् ॥ १०॥ दर्दुरेणभेकेन ॥ ११ ॥ तापप्रसरादिवविद्रुताविलीनाः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१३॥कालवर्णैरभ्रैर्घनतांनिबिडतांगतेरोहेसर्वबीजप्रादुर्भावहेतौवर्षाकालेक्षयंगतेसति ॥१४॥ अर्भकैःसहेतिशेषः ॥ परगृहेचांडालांतरगेहे ॥१५॥ राहोःरदैर्दंतैरिंदुरिव॥१६॥ नारकैराहृतानारकेभ्योविक्रीताः ॥ अनेननरकेपिक्रयविक्रयपातकिनांतदनुरूपोव्यवहारोस्तीतिगम्यते ॥ रशनाःआंत्ररज्जवः ॥१७॥ १८ ॥ १९ ॥ २० ॥ गृहीतस्यतेजसःक्षतये ॥ २१॥ मृगाणांमांसंमार्गम् ॥ अवेर्मांसंआविकम् ॥ अन्यतःअन्येभ्यःपण्यंक्रीतंतदात्मीयंस्वदेहमांसमिवक्रीतमितिजुगुप्सोक्तिः ॥२२॥ आयसंपरिअयःपात्रेनिधायसंस्कृत्यवेत्यर्थः ॥ वृद्धयेअधिकमूल्यलाभार्थंविक्रीताः ॥ २३ ॥ विक्रीतशिष्टंतुचंडालारामभूमिषुशोषणार्थमवकीर्णम् ॥ असद्भिरपवित्रैर्मलमूत्रादिभिःकीर्णंव्याप्तम् ॥ रौ

यामिन्योविपिनेक्लिन्नेवराहामिषभोजनाः॥ शिलातलकुटीकोशेनीताजलदविक्लवाः॥ १३॥ कालेक्षयंगतेरोहेकालाभ्रघनतांगते॥
असौहार्देनबंधूनांकलहैश्चापिसंततैः॥१४॥ सर्वत्रजातशंकेनकलाभिमुखरार्भकैः॥ मयाकृपणचित्तेननीताःपरगृहेसमाः॥ १५॥ चंडालीकलहोद्विग्नचंडचंडालतर्जनैः॥ मुखंजर्जरतांयातमिंदूराहुरदैरिव ॥ १६॥ चर्विताःखर्वितोष्ठेनह्यपिपिशितपेशयः॥ नारकाहृतविक्रीतानारक्योरशनाइव॥१७॥ हिमवत्कंदरोद्गीर्णाश्चंडाहेमंतवीचयः॥ शिशिरेशीकरासारतुषारनिचयाश्चिरम्॥ १८॥ अंगेनिरंबरेसोढाम्मृत्युमुक्ताइवेषवः॥ जराजरठमूढेनमूलानिक्षीणभूरुहाम्॥ १९॥ सुकृतानामिवैकेनसमुत्खातानिभूरिशः॥ शरावकेष्वटव्यांचपललंपक्कमादरात्॥ २०॥ अस्पृष्टेनजनैर्भुक्तंकुकलत्रवतामया॥ गृहीततेजःक्षतयेबहुवक्रविकारिणा॥ २१॥ मार्गाविकमिवात्मीयंविक्रीतंपण्यमन्यतः॥ प्राण्यंगवपुषस्तस्यप्रोत्कृत्योत्कृत्यपेशलः॥ २२॥ आयसंपरिविक्रीताविंध्यपक्कणभूमिषु॥ जन्मांतरसहस्रोत्थंस्वपापमिववृद्धये॥ २३॥ अवकीर्णमसत्कीर्णंचंडालारामभूमिषु॥ दृष्टःकुद्दालकोदृष्ट्यासंध्यास्नेहविमुक्तया॥ २४॥ रौरवापतितेनेवतत्कालस्निग्धतांगतः॥ विंध्यकंदरगुल्मानांबंधुत्वमिवगच्छता॥ २५॥ पुलिंदवपुषायत्रयुक्तयोगैःसमर्पिताः॥ तर्पितालगुडाघोतजितकौलेयरंहसा॥ २६॥ पुत्रदाराःकदन्नेनग्रामकांधोचितेनच॥ धारासाररणत्पत्रशुष्कतालतलेनिशाः॥ २७॥ नीतारणितदंतेनसार्द्धंविपिनवानरैः॥ रोमभिःकोटिमुद्रोद्यैःशीतेनाध्युषितस्यमे॥ २८॥

रवापतितेनेवात्यंतदुर्दशांप्राप्तेन विंध्यपर्वतगुल्मानांबंधुतांपोष्यतांगच्छतेवस्थितेनमयासंध्यायांस्नेहेनविमुक्तयाकंदमूलमांसाद्यर्जनविघ्नभूतसंध्याकालद्वेष्ट्र्येतियावत् ॥ तथाविधयादृष्ट्याबुद्ध्याकुद्दालकःखनित्रविशेषएवपोषकत्वात्तत्कालस्निग्धतांतत्कालोचितमित्रतांगतोदृष्टोनान्यइतिद्वयोरन्वयेनार्थः ॥ २४ ॥ २५ ॥ यत्रयस्यांदुर्दशायांयुक्तयोगैःपरंपरासंबंधैर्दैवेनसमर्पिताःपुत्रदारादयोलगुडाघातैर्यष्टिताडनैर्जितकौलेयरंहसानिवारितशुनकोपद्रवेणमयाकदन्नेनतर्पिताः ॥ २६ ॥ ग्रामकाःकुग्रामास्तत्रयेंऽधास्तदुचितेनकोद्रवकणपिण्याकादिना ॥ २७ ॥ कोटिर्मुक्तावेधनसूच्ययंतस्यमुद्रांसाम्यमुद्यंतिऊर्ध्वभागेप्राप्नुवंतीतिकोटिमुद्रोद्यानि ॥ २८ ॥

१ क्षीरेतिक्वचित्पाठः

२ स्फालेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनंजलंलातिआददातीतिवनलोमेघस्तत्संबंधिनोवानलाबिंदवः ॥ जीमूतखंडोमेघलेशइवतुच्छोमांसखंडस्तदर्थम् ॥ २९ ॥ ३० ॥ वेतालस्यस्वजनोबंधुस्तद्वदाचरितंवेतालवत्स्थितमितियावत् ॥ ३१ ॥ सद्यःकृत्तस्यशरच्छिन्नस्यमृगस्यउरसोवक्षसः ॥ ३२ ॥ कोष्णंकवोष्णम् ॥ रक्तेनरुधिरेणरक्तादृंजितान्मत्तोमलाशिनःअपवित्रश्मशानबलिमांसाद्यशनशीलात् ॥ ३३ ॥ विद्रुताःभयात्पलायिताः ॥ व्युप्ताःप्रसारिताः ॥ ३४ ॥ ३५ ॥ तत्रतादृशेपापकर्मण्यपि ॥ मनसःप्रसरोदत्तः ॥ ३६ ॥ करभ्याःभल्लूक्याःसकाशा

वर्षासुमुक्ताकणवद्भूतावानलबिंदवः ॥ अजाजीमूतखंडार्थंक्षुत्क्षुण्णक्षीणकुक्षिणा ॥ २९ ॥ कलत्रेणसहाटव्यांकृतःकलहआकुलः ॥ वनेरणितदंतेनशीतकेकरचक्षुषा ॥ ३० ॥ मषीमलिनगात्रेणवेतालस्वजनायितम् ॥ सरित्तीरेषुमत्स्यार्थंभ्रांतंबडिशधारिणा ॥ ३१ ॥ कल्पेजगत्सुनाशार्थंकृतांतेनेवपाशिना ॥ पीतंबहूपवासेनसद्यःकृत्तमृगोरसः ॥ ३२ ॥ तत्कालकोष्णंरुधिरंमातुस्तनपयोयथा ॥ श्मशानसंस्थितान्मत्तोरक्तरक्तान्मलाशिनः ॥ ३३ ॥ विद्रुतावनवेतालाश्चंडिकाभिद्रुताइव ॥ वागुराविपिनेव्युप्ताबंधार्थंमृगपक्षिणाम् ॥ ३४ ॥ आशाइवविवृद्ध्यर्थंपुत्रदारकलत्रजाः ॥ मयामायामयैर्लोकाःसूत्रजालमयैःखगाः ॥ ३५ ॥ जालैर्जर्जरतांनीतादिशश्चासुकृतायुषा ॥ तत्रापिदत्तःप्रसरोमनसोदुष्कृतोदये ॥ ३६ ॥ आशाप्रसारितादूरंप्रावृषीवतरंगिणी ॥ करभ्याइवसर्पेणविद्रुतंदूरतोधिया ॥ ३७ ॥ दूरेत्यक्तादयादेहेभुजंगेनेवकंचुकम् ॥ क्रौर्यंसुखेनसंरंभशरवर्षिनिनादिच ॥ ३८ ॥ अंगीकृतंनिदाघांतेनभसेवासितांबुदः ॥ विकासिन्योक्षताःक्षारादूरंपरिह्वताजनैः ॥ ३९ ॥ श्वभ्रेणेवकुमंजर्यश्चिरमूढामयापदः ॥ स्वकालकुलकोणासुनरकोद्दामभूमिषु ॥ ४० ॥ उप्तादुष्कृतबीजानांमुष्टयामोहवृष्टयः ॥ वागुराभिर्मयाविंध्यकंदरस्थेननिर्दयम् ॥ ४१ ॥ भूतेष्विवकृतांतेनमृगेषुपरिवल्गितम् ॥ चामरीकंठकुड्येषुविश्रांतशिरसामया ॥ ४२ ॥

त्सर्पेणेवधियासद्बुद्ध्यादूरतोगतम् ॥ भावेक्तः ॥ करभीहिसर्पंश्वासेनबिलादाकृष्यभक्षयतीतिप्रागुक्तमेव ॥ ३७ ॥ देहेपरप्राणिदेहे ॥ संरंभेणशरान्बाणानुदकानिचवर्षितुंशीलमस्य ॥ निनादिनिष्ठुरभाषिगर्जनशीलंचेतिअंबुदक्रौर्यसाधारणेविशेषणे ॥ एवमग्रेप्युपमानोपमेयसाधारणानित्रिशेषणानिबोध्यानि ॥ ३८ ॥ क्षाराउग्रगंधाद्गुःसहाश्च ॥ ३९ ॥ स्वस्यएतावत्कालमिदंभोक्तव्यमितिनियतःकालएवकुलकोणाःक्षेत्रभेदविभाजकसेतवस्तयोयासु ॥ ४० ॥ मोहएववृष्टिरिवफलवर्धनोयासांताः ॥ ४१ ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विभिःपक्षिभिर्लीलानिचरणाःप्रत्यंतपर्वताअंबरमाकाशंचयस्याः ॥ सरावैरसध्वनिभिर्व्याघ्रादिभिरुल्लासिधूम्रंरूपंयस्यामितिचगुहापक्षेर्थः ॥ तनुपक्षेस्पष्टम् ॥ ४३ ॥ विंध्य स्यकच्छोजलप्रायदेशस्तत्रत्यगुहावदाचरितम् ॥ उपमानादाचारेक्यङ्भावेक्तः ॥ यूकानांसमूहोयौकंतदाढ्याकंथामयाग्रीष्मेसोढामर्षितेतिसंबंधः ॥ ४४ ॥ ४५ ॥ लोभि लिगोमैथुनव्यसनीयथाक्षयादिरोगंप्रसूते यथावादुर्ग्रहोदुराग्रहोदुष्टग्रहोवावैरकलहाद्यनर्थान्प्रसूतेतद्वन्मेदाराडुःखानिसुखान्यपिअपत्यानिप्रसूताः ॥ ४६ ॥ उपसंहरति ॥

सुप्तमस्तविवेकेनशेषांगेष्विवशौरिणा ॥ विलोलचरणांबरयासरावोल्लासिधूम्रया ॥ ४३ ॥ ममतन्वासनीहारविंध्यकच्छगुहायितम् ॥ कृष्णदेहेनयौकाढ्याकंथास्कंधेमयाचिरम् ॥ ४४ ॥ ग्रीष्मेसोढाचलद्भूतावराहेणयथोर्वरा ॥ बहुशोहंवनोत्थाग्निनिर्दग्धप्राणिमंडलः ॥ ४५ ॥ कल्पाग्निभुक्तजगतःकालस्यानुगतिंगतः ॥ लोभिलिंगोयथारोगमनर्थानिवदुर्ग्रहः ॥ प्रसूतास्तत्रमेदाराडुःखान्यथसुखान्यपि ॥ ४६ ॥ नृपालपुत्रकेनैकतनयेनतदामया ॥ नीतानीरंध्रदोषेणषष्टिःकल्पसमास्समाः ॥ ४७ ॥ आकुष्टमुद्धुरतरंरुदितंविपत्सुभुक्तंकदन्नमुषितंहतपक्कणेषु ॥ कालांतरंबहुमयोपहतेनतत्रदुर्वासनानिगडबंधगतेनसभ्याः ॥ ४८ ॥ ॥इ०वा०वा०दे०मो०पू०इंद्रजालोपाख्यानेआपद्वर्णनंनामसप्तोत्तरशततमःसर्गः ॥ १०७ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ ॥ अथगच्छतिकालेत्रजराजर्ज्जरितायुषि ॥ तुषारपूर्णशष्पौघसमश्मश्रुभृतेमयि ॥ १ ॥ कर्मवातापनुन्नेषुसरसेष्वरसेष्वपि ॥ पतत्सुवासरौघेषुशीर्णपर्णगणेष्विव ॥ २ ॥ आजाविवशरौघेषुसुखदुःखेष्वनारतम् ॥ कलहेष्वप्यकार्येषुचागच्छत्सुपतत्सु च ॥ ३ ॥ विकल्पकल्पनावर्त्तवर्त्तिनिद्विजगेजडे ॥ समुद्रइवकल्लोलभरेभ्रमितचेतसि ॥ ४ ॥ चलच्चिंताचितंचक्रमारूढेभ्रांतआत्मनि ॥ प्रोह्यमानेतृणइवसावर्त्तकालसागरे ॥ ५ ॥ विंध्योर्वीवनकीटस्यग्रासैकशरणस्यमे ॥ द्विबाहोर्गर्दभस्यात्रक्षीणइत्थंसमागणे ॥ ६ ॥

नृपालेति ॥ एकतनयेनेत्यत्यंतानौचित्यसूचनार्थमुक्तम् ॥ ४७ ॥ उक्तांसर्वांदुर्दशांसंक्षिप्यवदन्नुपसंहरति ॥ आकुष्टमिति ॥ हेसभ्याःक्रोधावेशेनआकुष्टंविपत्सुरुदितम् ॥ भवदनुभूतकालापेक्षयाकालांतरम् ॥ ४८ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०सप्तोत्तरशततमःसर्गः ॥ १०७ ॥ ॥ ७ ॥ ॥ इहतस्मिन्निवसतश्चिरंचंडालपक्कणे ॥ अनावृष्ट्युत्थदुर्भिक्षाद्दुर्ण्यनेदेशदुर्द्दशा ॥ १ ॥ शष्पौघसमैःश्मश्रुभिर्भृतेसंभृतमुखे ॥ १ ॥ सरसेषुससुखेषु अरसेषुसदुःखेषु वासरौघेषुपतत्सुगच्छत्सु ॥ २ ॥ आजौयुद्धे ॥ अकार्येषुकर्त्तुमयोग्येषुवधबंधस्तेयादिषु ॥ ३ ॥ द्विजःपक्षीवगच्छतिनिरालंबनेभ्रमतीतिद्विजगे ॥ ४ ॥ ५ ॥ समागणेवर्षपूगेक्षीणेसति ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

शवस्यमृतस्येव ॥ ७ ॥ ८ ॥ घनव्रातेनवर्षतिसतिअकांडेमरणेनउड्डीनंपरलोकगमनंयस्मिंस्तथाविधंदुर्भिक्षंकर्तृ चंडंचंडालमंडलंयस्मिंस्तथाविधंविंध्यकच्छंनिरन्नतृणपत्रांबुयथास्यात्तथाआययौप्राप ॥ संसारमिवेत्यादिशाक्तनानिक्रमात्कर्मकर्त्रोरुपमानानिबोध्यानि ॥ अथवातच्चंडचंडालमंडलंविंध्यकच्छस्थलाख्यंदेशांतरंययावित्यर्थः ॥ ९ ॥ पूतैर्वस्त्रशोधितैरिवसूक्ष्मतमैरंगारकणैरुन्मिश्रागतिर्यस्य ॥ १० ॥ चिरप्रव्रजितास्विवेतिपिंगलजटिलत्वादिनोपमा ॥ ११ ॥ अकांडमनवसरोत्थंदुर्भिक्षम् ॥ १२ ॥ उद्दावंउ

विस्मृतेममभूपत्वेशवस्येवमहाजवे ॥ चांडालत्वेस्थिरीभूतेपक्षच्छिन्नइवाचले ॥ ७ ॥ संसारमिवकल्पांतोदावाग्निरिवकाननम् ॥ सागरोर्मिस्तटमिवशुष्कवृक्षमिवाशनिः ॥ ८ ॥ अकांडेमरणोड्डीनंचंडचंडालमंडलम् ॥ निरन्नतृणपत्रांबुविंध्यकच्छंतदाययौ ॥ ९ ॥ नवर्षतिघनव्रातेदृष्टनष्टैकचित्स्थिते ॥ पूतांगारकणोन्मिश्रगतौवहतिमारुते ॥ १० ॥ शीर्णमर्मरपर्णासुदावाग्निवलितासुच ॥ वनस्थलीषुशून्यासुचिरप्रव्रजितास्विव ॥ ११ ॥ अकांडमभवद्भीममुद्दामदवपावकम् ॥ शोषिताशेषगहनंभस्मशेषतृणोपलम् ॥ १२ ॥ पांसुधूसरसर्वांगंक्षुधिताशेषमानवम् ॥ निरन्नतृणपानीयंदेशाघुद्दावमंडलम् ॥ १३ ॥ क्वचन्मरुमरीच्यंबुमज्जन्महिषमंडलम् ॥ वातोत्थसीकरव्यूहापरिवाहवनांबरम् ॥ १४ ॥ पानीयशब्दमात्रैकश्रवणोत्कनरव्रजम् ॥ आतपातिसंशोषसीदत्सकलमानवम् ॥ १५ ॥ पत्रग्रसनसंरब्धक्षुधितोत्थितजीवितम् ॥ स्वांगचर्वणसंरंभलुठद्दशनमंडलम् ॥ १६ ॥ मांसशंकानिगीर्णोग्रखदिराग्निकणोल्करम् ॥ मंडकासारसंग्रस्तवनपाषाणखंडकम् ॥ १७ ॥ अन्योन्यभूतसंसक्तमातृपुत्रपितृव्रजम् ॥ गृध्रोदररटत्सारनिगीर्णवरसारिकम् ॥ १८ ॥ परस्परांगविच्छेदरक्तसिक्तधरातलम् ॥ हरिग्रसनसंरब्धमत्तक्षुधितवारणम् ॥ १९ ॥ दरीनिगरणैकैकसिंहभ्रमणभीषणम् ॥ अन्योन्यग्रसनोद्युक्तलोकमल्लकृतंवहत् ॥ २० ॥ निष्पत्रपादपोड्डीनप्रौढांगारमयानिलम् ॥ रक्तपानोत्कमार्जारलीढधातुतटावनि ॥ २१ ॥ ज्वालाघनघटाटोपसावर्त्तसवनानिलम् ॥ सर्वस्थलरसद्वह्निपुंजपिंजरजंगलम् ॥ २२ ॥

त्कष्टारण्यभूतंमंडलंजनपदोयस्मिन् ॥ १३ ॥ वातोत्थसीकरव्यूहमपिनपरिवहतीत्यपरिवाहंवनांबरंयत्र ॥ १४ ॥ आतपस्यातिर्विस्तारः ॥ १५ ॥ पत्रग्रसनोद्योगेनक्षुभितेभ्यउत्थितंप्रस्थितंजीवितंयत्र ॥ स्वांगचर्वणेसंरंभेणाभिलाषेणलुठंतिपरस्परमुपघ्नंतिदशनमंडलानियत्र ॥ १६ ॥ मंडकानिस्नेहपिष्टकास्तद्भ्रांत्याअसाराअपिसंग्रस्तावनपाषाणखंडकायत्र ॥ १७ ॥ सारनिगीर्णासमग्रनिगीर्णा ॥ १८ ॥ १९ ॥ दरीषुस्वस्यनिगरणशंकयाएकैकशःसिंहभ्रमणेनभीषणम् ॥ अन्योन्यस्यग्रसनेहिंसनेउद्युक्तैर्लोकैर्मल्लकृतंमल्लचरित्रम् ॥ २० ॥ २१ ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दग्धाअजगरायत्रतथाविधात्कुंजादुत्थितेनधूमेनदोहदेनेवमांसलानिपुष्टानीवगुल्मकानियत्र ॥ २३ ॥ अस्तंभान्यदंडानिच्छत्रमंडलानियत्र ॥ २४ ॥ जवेनग्रसनत्वरयाग्रस्तारक्तैरारक्तानिजांगुलिर्यत्र ॥ २५ ॥ २६ ॥ २७ ॥ गर्त्तंप्रविशतोमारुतस्यक्रांकारोध्वनिरिवभीमंदावाग्निवल्गनंयत्र ॥ भीतानामजगराणांफूत्कारात्पतंतउत्पतंतोंऽगारायेषुतथाविधाःपादपायत्र ॥ २८ ॥ सतप्रायमणीयमपिविंध्यकच्छस्थलंप्राप्यतत्तादृशंदुर्भिक्षंप्रागुक्तमकांडस्फुटद्देशंसत् ॥ अनुकृतिसाम्यम् ॥ २९ ॥ ज्वलदनलेनजटाले

दग्धाजगरकुंजोत्थधूममांसलगुल्मकम् ॥ मारुतावलितज्वालासंध्याभ्रवलितांबरम् ॥२३॥ उद्दामरवमुद्भ्रांतभस्मनास्तंभमंडलम् ॥
साक्रंदनरदाराग्रदीनार्भकरुतारवम् ॥ २४ ॥ संभ्रांतपुरुषव्यूहदंतकृत्तमहाशवम् ॥ मांसगंधजवग्रस्तरक्तारक्तनिजांगुलि ॥ २५ ॥
नीलपत्रलताशंकापीतधूमघनच्छवि ॥ भ्रमद्गृध्रनिगीर्णोग्रनभोभ्रांतोल्मुकामिषम् ॥ २६ ॥ इतरेतरभिन्नांगलोकविद्रवणाकुलम् ॥
ज्वलिताग्निटणत्कारविदीर्णहृदयोदरम् ॥२७॥ गर्त्तमारुतक्रांकारभीमदावाग्निवल्गनम् ॥ भीताजगरफूत्कारपतदंगारपादपम् ॥ २८ ॥
सदकांडस्फुटद्देशंप्राप्यतच्छुष्ककोटरम् ॥ द्वादशार्काग्निदग्धस्यजगतोनुकृतिंययौ ॥ २९ ॥ ज्वलदनलजटालवृक्षखंडप्रसरमरुत्प्रसरावनुन्नलोकः ॥ ज्वलनतपनभास्करात्मजानांरमणगृहानुकृतिंजगामदेशः ॥ ३० ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० इंद्रजालोपाख्यानेअकांडवर्णनंनामाष्टोत्तरशततमःसर्गः ॥ १०८ ॥ ॥ ५ ॥ ॥ राजोवाच ॥ ॥ तस्मिंस्तदावर्त्तमानेकष्टेविधिविपर्यये ॥ अकालोल्वणकल्पांतेनितांततापदायिनि ॥ १ ॥ जनाःकेचननिष्क्रम्यसकलत्रसुहृज्जनाः ॥ गतादेशांतरंव्योम्नःशरदीवपयोधराः ॥ २ ॥ देहावयवसंलीनपुत्रदाराग्र्यबंधवः ॥ शीर्णाःकेचनतत्रैवच्छिन्नाइववनेद्रुमाः ॥ ३ ॥ भुक्ताःकेचनचव्याघ्रैर्निर्गतास्तुस्वमंदिरात् ॥ अजातपक्षकाःश्येनैःखगानीडोद्धृताइव ॥ ४ ॥ प्रविष्टाःकेचिदनलंज्वलितंशलभाइव ॥ केचिच्छ्वभ्रेषुपतिताःशिलाःशैलच्युताइव ॥ ५ ॥ अहंतुतान्परित्यज्यश्वशुरादीन्स्वकंक्षमम् ॥ कलत्रमात्रमादायरुच्छ्राद्देशाद्विनिर्गतः ॥ ६ ॥

वृक्षखंडेषुप्रसरोयस्यतथाविधस्यमरुतःप्रसरेणअवनुन्नःपीडितोलोकोजनोयत्र ॥ ज्वलनतपनयोर्भास्करात्मजस्यशनैश्चरस्यचरमणंक्रीडास्थानभूतंयद्गृहंतस्यानुकृतिसाम्यम् ॥ ३० ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० अष्टोत्तरशततमःसर्गः ॥ १०८ ॥ ॥ ५ ॥ ॥ निर्गतस्यसदारस्यदृष्टापुत्रापदंचिताम् ॥ विविक्षोःप्रतिबुद्धस्यसभ्यसंवादईर्यते ॥ १ ॥ विधिविपर्ययेदैवप्रातिकूल्ये ॥ १ ॥ २ ॥ देहावयवाइवसंलग्नास्त्यक्तुमशक्याइतियावत् ॥ ३ ॥ चकारोभिन्नक्रमोनुक्तसमुच्चयार्थः ॥ व्याघ्रैरन्यैश्चश्वापदैरित्यर्थः ॥ ४ ॥ ५ ॥ क्षमंस्वानुगमनसमर्थम् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्षकान्व्याघ्रादीन् ॥ तक्षकान्सर्पान् ॥ ७ ॥ तद्देशस्यपर्यंतंप्रांतम् ॥ ८ ॥ अजलःपद्मःकमलिनीवशुष्यन्नित्यर्थः ॥ अथवाअजलोभेकादिःपद्मेकमलिनीमूलइवविश्रांतो स्मीत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ क्षीणवृत्तिनाअलब्धभक्ष्येणअत्यंतक्षुधितेनेतियावत् ॥ आश्लेषवृत्तिनाआलिंगनपरेण ॥ १६ ॥ स्नेहकारु

अनलाननिलांश्चैवभक्षकांस्तक्षकानपि॥ वंचयित्वाभयान्मृत्योःसदारोहंविनिर्गतः॥ ७ ॥ प्राप्यतद्देशपर्यंतंतत्रतालतरोस्तले॥ अव रोप्यसुतान्स्कंधान्नानानर्थानिवोल्बणान्॥८॥ विश्रांतोस्मिचिरंश्रांतोरौरवादिवनिर्गतः ॥ दीर्घदावनिदाघार्त्तोग्रीष्मेपद्मइवाजलः ॥ ९ ॥ अथचांडालकन्यायांविश्रांतायांतरोस्तले॥ सुप्तायांशीतलच्छायेद्वौसमालिंग्यदारकौ॥ १० ॥ पृच्छकोनामतनयोममैकःपुर तःस्थितः॥ अत्यंतवल्लभोस्माकंकनीयान्मौग्ध्यवानिति ॥ ११ ॥ समामुवाचदीनात्माबाष्पपूर्णविलोचनः॥ तातदेह्याशुमेमांसंपातुं चरुधिरंक्षणात्॥ १२ ॥ पुनःपुनर्वदन्नेवंसबालःस्तनयोमम॥ प्राणांतिकींदशांप्राप्तःसाक्रंदोहिपुनःक्षुधा ॥ १३ ॥ तस्योक्तंतुमयापुत्र मांसंनास्तीतिभूरिशः॥ तथापिमांसंदेहीतिवदत्येवसुदुर्मतिः॥ १४॥ अथवात्सल्यमूढेनमयादुःखातिभारिणा ॥ तस्योक्तंपुत्रमन्मांसं पक्वंसंभुज्यतामिति॥ १५॥ तदप्यंगीकृतंतेनदेहीतिवदतापुनः॥ मन्मांसभक्षणंक्षीणवृत्तिनाश्लेषवृत्तिना॥ १६॥ सर्वदुःखापनोदाय स्नेहकारुण्यमोहिना॥ तस्यतामार्तिमालोक्यमयादुःखातिभारिणा॥१७॥ सोढुंतामापदंतीव्रामशक्तेनहतात्मना॥ मरणायातिमित्रा यरुतोंतर्निश्चयोमया ॥ १८ ॥ तत्रकाष्ठानिसंचित्यचितांरचितवानहम् ॥ चिताचटचटास्फोटैःस्थितामदभिकांक्षिणी॥ १९॥ तस्यां तुयावदात्मानंचितायांनिक्षिपाम्यहम्॥ चलितोस्मिजवात्तावदस्मात्सिंहासनान्नृपः॥ २०॥ ततस्तूर्यनिनादेनजयशब्देनबोधितः॥ इ तिशांबरिकेणायंमोहउत्पादितोमम॥ २१ ॥अज्ञानेनेवजीवस्यदशाशतसमन्वितः ॥इत्युक्तवतिराजेंद्रेलवणेभूरितेजसि॥२२॥ अंत र्द्धानंजगामाशुतत्रशांबरिकःक्षणात्॥ अथेदमूचुस्तेसभ्याविस्मयोत्फुल्ललोचनाः॥ २३ ॥

ण्यमोहशब्दानांद्वंद्वेइनिः ॥ १७ ॥ अतिमित्रायतत्कालोचितबंधवे ॥ १८ ॥ मदभिकांक्षिणीव ॥ १९ ॥ चलनात्संभावितांपतनक्रियांतत्फलंविभागंचगम्यमानमपेक्ष्यसिंहा सनादितिअपादानेपंचमीबोध्या ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

युक्तेनेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवीत्वदनुपहायदैवैःप्रयुक्ताअतएवसंसारस्येदृशीस्थितिरितिबोधिनी ॥ २४ ॥ अनंतस्यविष्णोः ॥ मनएवजगत् ॥ २५ ॥ एषःविधिः ॥ २६ ॥ सामान्यानांपृथग्जनानांमनोवृत्तेर्योग्यः ॥ २७ ॥ अर्थस्यधनस्यसिद्ध्यैईहंतेप्रीतिहेतुकौतुकप्रदर्शनायचेष्टंतेनत्वीदृशडुर्भ्रांतये ॥ २८ ॥ इतिउक्ताह्लिगद्धयाद्वयंसंदेहसागरस्यवेलायांकूलभूतेनिर्णयेस्थिताः ॥ २९ ॥ उक्तेयमाख्यायिकानबालकाख्यायिकावत्कल्पितकथानाप्यन्यतःश्रुतांकिंतुप्रत्यक्षदृष्टेत्याह ॥ सभायामिति ॥ ३० ॥ उक्तामाख्यायिकांप्रस्तुतेजगतोमनोमात्रविलासत्वेयोजयंस्तत्फलमाह ॥ इतीति ॥ इतिउक्तरीत्याबद्धाभिःकलनाभिर्विरचनैर्विवर्द्धितांगंप्ररूढंचिरंविततंफलपल्लवशाखाभिर्विस्तीर्णंतरुशरीरमिवमनोजयतिआत्मस्वरूपमभिभूयस्वयंसर्वोत्कर्षेणवर्त्तते ॥ यन्मनोविचारज्ञानयोगेनशमंनिर्वासनतालक्षणंउपगमितेप्रापितेपरस्वभावेसतित्वंभेदकोपाधिबाधात्परमंपावनंपूर्णात्मपदमुपैष्यसिअतस्तदर्थंवक्ष्यमाणोपायैर्यतस्वेत्यर्थः ॥ ३१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०नवोत्तरशततमःसर्गः ॥ १०९ ॥ ॥ ७ ॥ ॥ मनःप्रशमनोपायोमनो

नायंशांबरिकोदेवयस्यनास्तिधनैषणा ॥ देवीकाचनमायेयंसंसारस्थितिबोधिनी ॥ २४ ॥ मनोविलासःसंसारइतियस्यांप्रतीयते ॥ सर्वशक्तेरनंतस्यविलासोहिमनोजगत् ॥ २५ ॥ सर्वशक्तेर्विचित्राहिशक्तयःशतशोविधेः ॥ यद्विवेकिमनोप्येषविमोहयतिमायया ॥ २६ ॥ विज्ञातलोकवृत्तांतःक्वनामायंमहीपतिः ॥ क्वसामान्यमनोवृत्तियोग्योविपुलसंभ्रमः ॥ २७ ॥ नचशांबरिकेच्छेयंमायामनसिमोहिनी ॥ अर्थस्यसिद्ध्यैचेहंतेनित्यंशांबरिकाःकिल ॥ २८ ॥ यत्नेनप्रार्थयंतेर्थंनांतर्द्धानंव्रजंतिभो ॥ इतिसंदेहवेलायांसंस्थितालुलितावयम् ॥ २९ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ सभायामवसंतस्यामहंरामतदाकिल ॥ तेनप्रत्यक्षतोदृष्टंमयैतन्नान्यतःश्रुतम् ॥ ३० ॥ इतिबहुकलनाविवर्द्धितांगंजयतिचिरंविततंमनोमहात्मन् ॥ शममुपगमितेपरस्वभावेपरममुपैष्यसिपावनंपदंयत् ॥ ३१ ॥ ॥ इत्यार्षेवा०वा० दे०मो०उ०इंद्रजालोपाख्यानेचंडालत्वव्यपगमोनामनवाधिकशततमःसर्गः ॥ १०९ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ परमात्कारणादादौचित्त्वेत्यपदपातिनी ॥ कलनापदमासाद्यकलाकलिलतांगता ॥ १ ॥

वैभववर्णनैः ॥ प्रक्रम्यतेत्वगदितुंरामायब्रह्मसूनुना ॥ १ ॥ मनसोवासनामयत्वादात्यंतिकज्ञेयवासनोच्छेदएवमनःप्रशमनोपायस्तस्मिंश्चशास्त्राचार्यत्वानुभवैर्दृश्यजातस्यमनोभ्रममात्रत्वनिश्चयपूर्वकःसप्तमभूमिकारोहणपर्यंतंज्ञानपरिपाचकोमनोनिरोधप्रयत्नएवोपायइतिवक्तुंमूलतोमनस्स्वरूपंपरिशोधयन्नाह ॥ परमादिति ॥ परमंकारणंचित्संवलितमज्ञानंतस्मादेवनिमित्ताच्चित्चेत्यपदपातिनीचेत्यगोचरासंपन्नानवस्तुतःअविकारत्वात् ॥ आदावित्यनेनप्राथमिकचेत्यपदपातस्याज्ञाननिमित्तत्वेतन्मूलद्वैतदर्शनानांसुतरांतन्निमित्तकत्वंसिद्धमितिसूच्यते ॥ चेत्यपदपातादेवकलनाअर्थप्रथेयमितिपदंनामआसाद्यअर्थकलाभिर्नानारूपवैचित्र्यैःकलिलतांकलुषीभावंगता ॥ सएववासनाप्रथमांकुरइतिभावः ॥ १ ॥

१ (यद्यस्मान्मनसि) इतिपाठश्चेद्वरमितिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रायाईदृश्योवृत्तयःस्थितयोयेषांतेषुविमोहेषुअर्थकलाभासभ्रमेषुक्रमाद्घनेषुउपचितेषुसैवचित्स्वांपूर्णतांविस्मृत्यतुच्छतांअसन्मनोरूपतामेत्यचिरायअनादिकालादारभ्य मूर्छतिजन्ममरणादिभ्रमैर्मुह्यति ॥ तथाचचितश्चेत्योन्मुखतैवानर्थमनोबीजमितिसैवनिरोद्धव्येतिभावः ॥ २ ॥ एवंतुच्छवासनादोषसहस्रेणम्लानामनोवृत्तिर्मनोभावेनस्थिता साचिदसदेवदुःखंविस्तारयति ॥ ३ ॥ यथासकलंकाऽसन्मनोवृत्तिश्चिद्दुःखंविस्तारयतिएवंवासनाक्षयेनिर्वासनाकलंकास्वाभाविकसद्रूपैवसतीमहादुःखमसत्तांशून्यतांनय

असत्स्वेवविमोहेषुरामैवंप्रायवृत्तिषु ॥ घनेषुतुच्छतामेत्यचिरायपरिमूर्छति ॥ २ ॥ असदेवमनोवृत्तिर्म्लानाविस्तारयत्यलम् ॥ दुःखंदोषसहस्रेणवेतालानिवबालिका ॥ ३ ॥ सदेवहिमहादुःखमसत्तांनयतिक्षणात् ॥ निष्कलंकामनोवृत्तिरंधकारमिवार्करुक् ॥ ४ ॥ नयत्यभ्याशतांदूरंदूरमभ्याशतांनयेत् ॥ मनोवल्गतिभूतेषुबालोबालखगेष्विव ॥ ५ ॥ अभयंभयमज्ञस्यचेतसोवासनावतः ॥ दूरतोमुग्धपांथस्यस्थाणुर्यातिपिशाचताम् ॥ ६ ॥ शत्रुत्वंशंकतेमित्रेकलंकमलिनंमनः ॥ मदाविष्टमतिर्जंतुर्भ्रमत्पश्यतिभूतलम् ॥ ७ ॥ पर्याकुलेहिमनसिशशिनोजायतेशनिः ॥ अमृतंविषभावेनभुक्तंयातिविषक्रियाम् ॥ ८ ॥ सुरपत्तननिर्माणमसत्सदिवपश्यति ॥ वासनावलितंचेतःस्वप्नवज्जाग्रदेवहि ॥ ९ ॥ मोहैककारणंजंतोर्मनसोवासनोल्बणा ॥ उत्खातव्याप्रयत्नेनमूलोच्छेदेनसैवच ॥ १० ॥ वासनावागुराकृष्टोमनोहरिणकोनृणाम् ॥ परांविवशतामेतिसंसारवनगुल्मके ॥ ११ ॥ येनच्छिन्नाविचारेणजीवस्यज्ञेयवासना ॥ निरभ्रस्येवसूर्यस्यतस्यालोकोविराजते ॥ १२ ॥ अतस्त्वंमनएवेदंनरंविद्धिनदेहकम् ॥ जडोदेहोमनश्चात्रनजडंनाजडंविदुः ॥ १३ ॥ यत्कृतंमनसातात तत्कृतंविद्धिराघव ॥ यत्यक्तंमनसातावत्तत्त्यक्तंविद्धिचानघ ॥ १४ ॥ मनोमात्रंजगत्कृत्स्नंमनःपर्यंतमंडलम् ॥ मनोव्योममनोभूमिर्मनोवायुर्मनोमहान् ॥ १५ ॥ मनोयदिपदार्थेतुतद्भावेननयोजयेत् ॥ ततःसूर्यादयोप्येतेनप्रकाशाःकदाचन ॥ १६ ॥ मनोमोहमुपादत्तेयस्यासौमूढउच्यते ॥ शरीरेमोहमापन्नेनशवोमूढउच्यते ॥ १७ ॥

ति ॥ बोधेनबाध्यतइत्यर्थः ॥ ४ ॥ उक्तार्थसंभावनायमनसोऽघटितघटनासामर्थ्यमाह ॥ नयतीत्यादिना ॥ अभ्याशतांसमीपताम् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ सुरपत्तनंगंधर्वनगरम् ॥ ९ ॥ उत्खातव्यामूलतउच्छेत्तव्या ॥ १० ॥ ११ ॥ आलोकःप्रकाशः ॥ १२ ॥ तत्रप्रथमंमनएवमेदेहोनान्यइतिसदाभावनाभ्यासःकार्यइत्याह ॥ अतइति ॥ उक्तार्थेउपपत्तीर्दर्शयति ॥ जडइत्यादिना ॥ १३ ॥ १४ ॥ पर्यंतोभूप्रांतस्तन्मंडलम् ॥ १५ ॥ तद्भावेनप्रकाशादिभावेननयोजयेत्नकल्पयेत् ॥ दिवांधैर्वैपरीत्यदर्शनादितिभावः ॥ १६ ॥ मोहंअप्रबोधम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१८॥१९॥ स्वादुमधुरताम् ॥२०॥२१॥२२॥ अनुभावोत्रानुभवःप्रभावोवा ॥ इंद्रद्युम्नस्यरैवतापरनाम्नः ॥२३॥ दुःखस्यसुखत्वापत्तिःक्वदृष्टातत्राह ॥ मनोज्ञयेति ॥ मनोज्ञयाहरिस्मरणादिरूपया ॥ रौरवंनरकदुःखमपि श्वःप्रातरत्रश्वर्यंराज्यंप्राप्तव्यमितिप्रमाणैर्निश्चयवतःकरपादनिगडादिनासुष्ठुबद्धस्यबंधनमिवेत्यर्थः ॥ २४ ॥ २५ ॥ हेरामकिमन्यन्मनसोऽर्थविपरीतकल्पनसामर्थ्यंवाच्यंयत्सर्वत्रसमयास्वच्छत्वनिर्विकारत्वादिस्वभावचिन्मात्ररूपयास्वसत्तयामूकंवागादिसर्वक्रियाशून्यमपिब्रह्मदेहतादात्म्यकल्पनयादेहसमंजडंचकृत्वाअंतर्मननंएषणंकामःसंकल्पइत्यादिक्रियामुख्ययाभ्रांत्याबहिस्तुगिरिसरिद्व्योमसमुद्रपुरलीलयाप्रकल्प्यव्यर्थंभ्रमतीतिसर्वत्रेत्यादिश्लोकत्रयस्यैकोन्वयः॥२६॥

मनःपश्यभवत्यक्षिश्शृण्वच्छ्रवणतांगतम्॥त्वग्भावंस्पर्शनादेतिघ्राणतामेतिजिघ्रणात्॥१८॥ रसनाद्रसतामेतिविचित्रास्तत्रवृत्तिषु॥[1] नाटकेनटवद्देहेमनएवानुवर्त्तते॥१९॥ लघुदीर्घंकरोत्येवसत्येऽसत्तांप्रयच्छति ॥ कटुतांनयतिस्वादुरिपुंनयतिमित्रताम् ॥२०॥ यएवप्रतिभासोस्यचेतसोवृत्तिवर्त्तिनः॥ ततस्तदेवप्रत्यक्षंतथात्रानुभवादिह ॥ २१ ॥ प्रतिभासवशादेवस्वप्नाकुलितचेतसः॥ हरिश्चंद्रस्यसंपन्नारात्रिर्द्वादशवार्षिकी॥ २२ ॥ चित्तानुभाववशतोमुहूर्त्तंत्वेगतंयुगम्॥ इंद्रद्युम्नस्यवैरिंच्यपुराभ्यंतरवर्त्तिनः ॥ २३ ॥ मनोज्ञयामनोवृत्त्यासुखतांयातिरौरवम्॥ प्रातःप्राप्तव्यराज्यस्यसुबद्धस्येवबंधनम् ॥ २४ ॥ जितेमनसिसर्वैवविजिताचेंद्रियावलिः ॥ शीर्यतेचयथातंतौदग्धेमौक्तिकमालिका॥२५॥सर्वत्रास्थितयास्वच्छरूपयानिर्विकारया॥ समयासूक्ष्मयानित्यंचिच्छक्त्यासाक्षिभूतया॥२६॥ सर्वभावानुगतयानचेत्यार्थविभिन्नया॥ रामात्मसत्तयामूकमपिदेहसमंजडम्॥२७॥ मनोंतश्चलतिव्यर्थंमननैषणमुख्यया॥ बहिर्गिरिसरिद्व्योमसमुद्रपुरलीलया॥ २८॥ जाग्रच्चाभिमतंवस्तुनयत्यमृतमृष्टताम्॥ अनीहितंचविषतांनयत्यमृतमप्यलम् ॥ २९॥ अमृष्टसर्वभावानामलमात्मचमत्कृतिम्॥ मनःस्वाभिमताकारंरूपंसृजतिवस्तुषु॥ ३०॥

॥ २७ ॥ २८ ॥ ननुमूढंमनोन्यथाकल्पयतुविचारजागरूकंतुनान्यथाकल्पयिष्यतीतिकिंतन्नाशोपायचिंतयातत्राह ॥ जाग्रच्चेति ॥ विवेकजागरूकमपिमनोऽस्वादूच्छिष्टमपियोषिदधरादिवस्त्वभिमतंरागवशादिष्टममृतमिवमृष्टतांस्वादुतांनयति ॥ अनीहितमनभिलषितंत्वमृतमपिविषतांविषवद्धेयतांनयति ॥ विरक्तानाममृतेपिहेयताबुद्धिदर्शनादित्यर्थः ॥ २९ ॥ तर्हितत्त्वज्ञानपितत्कुतोनभ्रमयेत्तत्राह ॥ अमृष्टेति ॥ नमृष्टःसाक्षात्कृतःसर्वभावःपूर्णतायैस्तेषामेवमनःस्वाभिमताकारमात्मचमत्कारभूतंरूपंसृजतिनतुतत्त्वविदाम् ॥ तेषांमिथ्याबुद्धिबाधितमनोविलासेषुचमत्कारदृष्ट्यभावादित्याशयः ॥ ३० ॥

[1] अत्रविचित्रास्तत्रवृत्तिष्वित्यपेक्षितमितिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपसर्गमेवप्रपंचयति ॥ स्पंदेष्वित्यादिना ॥ ३१ ॥ शून्यतामभावताम् ॥ शून्यदृष्टिषुनास्तीतिगृह्यमाणवस्तुषु ॥ इच्छास्थितिंअप्रतिहतस्वैरवृत्तिम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ तेनचित्तेनालोकितमदृष्टंपुरःस्थमपिनदृष्टम् ॥ तथाचचक्षुरादींद्रियमपितेनैवस्वात्मनिकल्पितमित्याह ॥ अंधकारेइति ॥ यथांधकारेनैल्यंछायावैचित्र्यरूपंवानिर्मितंतद्वत् ॥ ३५ ॥ यद्यपींद्रियालोचिताकारधारणान्मनइंद्रियेणनिमित्तेनदेहिसाकारम् इंद्रियंचमनोधीनार्थालोचकत्वान्मनसादेहीतिसाम्यंतथापिमनउत्उत्कृष्टं तत्कुतस्तत्राह ॥ इंद्रियाणीति ॥ ३६ ॥ तच्चेदंमनोमूढैरात्मकोटौनिक्षिप्याहमित्यात्मतयागृह्यतेतत्त्वज्ञैस्तुदेहकोटौनिक्षिप्यजडदेहात्मनागृह्यते ॥ अतएवतेनिर्विकारात्मदर्शिनोवंद्याइत्याह ॥ अ

स्पंदेषुवायुतामेतिप्रकाशेषुप्रकाशताम् ॥ द्रवेषुद्रवतामेतिचिच्छक्तिस्फुरितंमनः ॥ ३१ ॥ पृथ्व्यांकठिनतामेतिशून्यतांशून्यदृष्टिषु ॥ सर्वत्रेच्छास्थितिंयातिचिच्छक्तिस्फुरितंमनः ॥ ३२ ॥ शुक्लंकृष्णीकरोत्येवकृष्णंनयतिशुक्लताम् ॥ विनैवदेशकालाभ्यांशक्तिंपश्यास्यचेतसः ॥ ३३ ॥ मनस्यन्यत्रसंसक्तेचर्वितस्यापिजिह्वया ॥ भोजनस्यापिमृष्टस्यनस्वादोस्यानुभूयते ॥ ३४ ॥ यच्चित्तदृष्टंतदृष्टंनदृष्टंतदलोकितम् ॥ अंधकारेयथारूपमिंद्रियंनिर्मितंतथा ॥ ३५ ॥ इंद्रियेणमनोदेहिमनसेंद्रियमुन्मनः ॥ इंद्रियाणिप्रसूतानिमनसोनेंद्रियान्मनः ॥ ३६ ॥ अत्यंतभिन्नयोरैक्यंयेषांचित्तशरीरयोः ॥ ज्ञातज्ञेयामहात्मानोनमस्यास्तेसुपंडिताः ॥ ३७ ॥ कुसुमोल्लासिधम्मिल्लाहेलाचलितलोचना ॥ काष्ठकुड्योपमांगेषुलब्ध्वाप्यमनसोंगना ॥ ३८ ॥ मनस्यन्यत्रसंसक्तेवीतरागेणकानने ॥ क्रव्यादचर्वितोंकस्थःस्वकरोपिनलक्षितः ॥ ३९ ॥ सुखीकर्तुंसुदुःखानिदुःखीकर्तुंसुखानिच ॥ सुखेनैवाशुयुज्यंतेमनसोतिशयामुनेः ॥ ४० ॥ मनस्यन्यत्रसंसक्तेकथ्यमानापियत्नतः ॥ लतापरशुकृत्तेवकथाविच्छिद्यतेबत ॥ ४१ ॥ मनस्यद्रितटारूढेगृहस्थेनापिजंतुना ॥ शुभ्राभ्रकंदरभ्रांतिदुःखंसमनुभूयते ॥ ४२ ॥ मनस्युल्लसितेस्वप्नेलब्धेवपुरपर्वताः ॥ आकाशइवविस्तीर्णदृश्यंतेनिर्मिताःक्षमाः ॥ ४३ ॥ मनोविलुलितेस्वप्नेलब्धेवाद्रिपुरावलिम् ॥ तनोतिचलितांभोधिर्वीचीचयमिवात्मनि ॥ ४४ ॥

त्यंतेति ॥ मूढदृष्ट्याअत्यंतभिन्नयोः ॥ ३७ ॥ अतएवतेषांकामादिविकारोनदृश्यतइत्याह ॥ कुसुमेति ॥ अमनसोदेहेलब्ध्वाप्यंगनाकाष्ठकुड्योपमाविकारंजनयितुमक्षमेत्यर्थः ॥ ३८ ॥ एवंदुःखनिमित्तैर्दुःखात्मकविकारोपितेषांनास्तीत्याह ॥ मनसीति ॥ वीतरागेणतदाख्यमुनिना ॥ अंकस्थोध्यानकालेंऽकेप्रसारितः ॥ ३९ ॥ मुनेर्मनसःअभ्यासपाटवकृताभावनातिशयाःसुखेनानायासेनैवयुज्यंतेक्षमंते ॥ ४० ॥ ४१ ॥ समनुभूयतेस्वप्नेइतिशेषः ॥ ४२ ॥ लब्धेवनिर्मिताअंतःकृताःस्वस्वकार्यक्षमाश्चदृश्यंते ॥ ४३ ॥ मनःविलुलितेस्वेनविक्षिप्तेआत्मनितनोतिविस्तारयति ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४५ ॥ ४६ ॥ हेमवनितास्वर्णप्रतिमा ॥ ४७ ॥ नानातानानावैचित्र्यम् ॥ ४८ ॥ उदितमुदयमाविर्भावमादत्ते ॥ रसोरागःश्रृंगारादिश्चतदावेशात् ॥ शैलूषोनटः ॥ भूमिकां वेषवैचित्र्यम् ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ नागत्वाद्गजत्वात्सर्पत्वाद्वा ॥ नगतांवृक्षतांगिरितांवा ॥ ५३ ॥ यथापितृत्वात्पुत्रतांगतःपुमान्नरत्वान्नारीत्वमेतितद्वत् ॥ ५४ ॥ अनाकृतिस्त्वतआकारशून्यमपिजीवतांजीवाकारमेति ॥ ५५ ॥ मननेनसम्यङ्मूढामोहातिशयंप्राप्तामूढवासनायस्मिंस्तत् ॥ ऊढवासनमितिवाछेदः ॥ योनिंजन्मस्थानम ॥ म

अंतरब्धिजलाद्यद्वत्तरंगापीडवीचयः ॥ देहांतर्मनसस्तद्वत्स्वप्नाद्रिपुरराजयः ॥ ४५ ॥ अंकुरस्ययथापत्रलतापुष्पफलश्रियः ॥ मनसो स्यतथाजाग्रत्स्वप्नविभ्रमभूमयः ॥ ४६ ॥ व्यतिरिक्तायथाहेम्नोनहेमवनितातथा ॥ जाग्रत्स्वप्नक्रियालक्ष्मीर्व्यतिरिक्तानचेतसः ॥ ४७ ॥ धाराकणोर्मिफेनश्रीर्यथासंलक्ष्यतेंभसः ॥ तथाविचित्रविभवानानातेयंहिचेतसः ॥ ४८ ॥ स्वचित्तवृत्तिरेवेहजाग्रत्स्वप्नदृशोदितम् ॥ रसावेशादुपादत्तेशैलूषइवभूमिकाम् ॥ ४९ ॥ चंडालत्वंहिलवणेप्रतिभासवशाद्यथा ॥ तथेदंजगदाभोगिमनोमननमात्रकम् ॥ ५० ॥ यद्यत्संवेद्यतेकिंचित्तेनतेनाशुभूयते ॥ मनोमननिर्माणंयथेच्छसितथाकुरु ॥ ५१ ॥ नानापुरसरिच्छैलरूपतामेत्यदेहिनाम् ॥ तनोत्यंतःस्थमेवेदंजाग्रत्स्वप्नमयंमनः ॥ ५२ ॥ सुरत्वाद्दैत्यतामेत्यनागत्वान्नगतामपि ॥ प्रतिभासवशाच्चित्तमापन्नंलवणोयथा ॥ ५३ ॥ नरत्वादेतिनारीत्वंपितृत्वात्पुत्रतांगत ॥ यथाक्षिप्रंप्रतिनरःस्वसंकल्पात्तथामनः ॥ ५४ ॥ संकल्पतःप्रम्रियतेसंकल्पाज्जायतेपुनः ॥ मनश्चिरंतनाभ्यस्ताज्जीवतामेत्यनाकृति ॥ ५५ ॥ मनोमननसंमूढमूढवासनमाततम् ॥ संकल्पाद्योनिमायातिसुखदुःखेभयाभये ॥ ५६ ॥ सुखंदुःखंचमनसितिलेतैलमिवस्थितम् ॥ तद्देशकालवशतोघनंवातनुवाभवेत् ॥ ५७ ॥ तैलंतिलस्यचाक्रांत्यास्फुटतामेतिशाश्वतीम् ॥ चेतसामननासंगाद्घनीभूतेसुखासुखे ॥ ५८ ॥ देशकालाभिधानेनरामसंकल्पएवहि ॥ कथ्यतेतद्दशाद्यस्माद्देशकालौस्थितिंगतौ ॥ ५९ ॥

नोक्तेनायात्यस्मिन्शरीरेइतिहिश्रुतिः ॥ ५६ ॥ ५७ ॥ आक्रांत्यायंत्रनिष्पीडनेन ॥ चेतसोंतर्घनीभूतेसुखासुखेमननासंगात्स्फुटतांइतोगच्छतइतिवचनविपरिणामेनानुषंगः ॥ ५८ ॥ ननुदेशकालकर्मविषयवैचित्र्यादेवसुखदुःखादिवैचित्र्यंप्रसिद्धंतत्कथंमननासंगादित्युच्यतेतत्राह ॥ देशेति ॥ अल्पयोरपिदेशकालयोर्मनसावैपुल्यसंकल्पनेवैपुल्यानुभवात्तुच्छेपिविषयेमनसाबहुमतेरागातिशयदर्शनाच्चेतिभावः ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंशरीरमपिमनःसंकल्पाधीनमेवेत्याह ॥ प्रशाम्यतीति ॥ मनःशरीरस्यसंकल्पेफलितेसतिस्थूलंशरीरकंप्रशांत्यादिविकारभाग्भवतिनस्वातंत्र्येणेतिशेषः ॥ ६० ॥ ६१ ॥ मनसोनिग्रहोपायंसफलंदर्शयति ॥ चापलेइति ॥ विषयानुसंधानंचापलम् ॥ ६२ ॥ शस्त्रंस्तंभनास्त्रंतत्कृतेस्तंभेयथाशत्रुर्नस्पंदतेतद्वत् ॥ असावेवसद्वस्तुतःपरमार्थतःपुरुषः ॥६३॥ ध्यानेनहेतुनाअसौअनुत्तमपदेनअनुगतःसंगतोब्रह्मीभूतएवेत्यर्थः ॥ ६४ ॥ अस्पंदतामितिच्छेदः ॥६५॥६६॥ मदमोहमंदाएतेपुरुषदुर्भ्रमराश्चित्तरूपंचलत्कुवलयंसंसारदुर्नदीप्रवाह्यमानोत्पलंवलयंतःसंवेष्ट्यभ्रमंतःसंतोमहाजडजवेलडयोरभेदान्महाजाड्यप्रवाहरूपजलवेगेवात्यावर्त्तवद्वर्त्तिनिपरिवर्त्तमानेप्रबलचिंतांतरेणविलूनाचिरंनैष्फल्याद्देहेन

प्रशाम्यत्युल्लसत्येतियातिनंदतिवल्गति ॥ मनःशरीरसंकल्पेफलितेनशरीरकम् ॥ ६० ॥ नानास्फारसमुल्लासैःस्वसंकल्पोपकल्पितैः ॥ मनोवल्गतिदेहेस्मिन्साध्वीवांतःपुराजिरे ॥ ६१ ॥ चापलेप्रसरस्तस्मादंतर्येननदीयते ॥ मनोविलयमादत्तेतस्यालानइवद्विपः ॥ ६२ ॥ नस्पंदतेमनोयस्यशस्त्रस्तंभइवोत्तमः ॥ सद्वस्तुतोसौपुरुषःशिष्टाःकर्दमकीटकाः ॥ ६३ ॥ यस्याचपलतांयातंमनएकत्रसंस्थितम् ॥ अनुत्तमपदेनासौध्यानेनानुगतोनघ ॥ ६४ ॥ संयमान्मनसःशांतिमेतिसंसारविभ्रमः ॥ मंदरेऽस्पंदतांयातेयथाक्षीरमहार्णवः ॥ ६५ ॥ मानस्योवृत्तयोयायाभोगसंकल्पविभ्रमैः ॥ संसारविषवृक्षस्यताएवांकुरयोनयः ॥ ६६ ॥ चित्तंचलत्कुवलयंवलयंतएतेमूढामहाजडजवेमदमोहमंदाः ॥ आवर्तवर्तिनिविलूनविशीर्णचिंताचक्रभ्रमेपुरुषदुर्भ्रमराःपतंति ॥ ६७ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० चित्तवर्णनंनामदशोत्तरशततमःसर्गः ॥ ११० ॥ ॥ ५ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अस्यचित्तमहाव्याधेश्चिकित्सायामहौषधम् ॥ स्वायत्तंशृणुवक्ष्यामिसाधुसुस्वादुनिश्चितम् ॥ १ ॥ स्वेनैवपौरुषेणाशुस्वसंवेदनरूपिणा ॥ यत्नेनचित्तवेतालस्त्यक्त्वेष्टंवस्तुजीयते ॥ २ ॥ त्यजन्नभिमतंवस्तुयस्तिष्ठतिनिरामयः ॥ जितमेवमनस्तेनकुदंतइवदंतिना ॥ ३ ॥ स्वसंवेदनयत्नेनपाल्यतेचित्तबालकः ॥ अवस्तुतोवस्तुनिचयोज्यतेबोध्यतेपिच ॥ ४ ॥

सहविशीर्णाचयाचिंतातल्लक्षणेचक्रभ्रमेचक्रसदृशेआवर्त्तेपतंतीत्यर्थः ॥ ६७ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउत्पत्तिप्रकरणेदशोत्तरशततमःसर्गः ॥ ११० ॥ ॥ यत्नादभिमतत्यागस्त्यागोहंताममत्वयोः ॥ अत्रचित्तजयोपायश्चैदेकाग्र्यंचवर्ण्यते ॥ १ ॥ स्वायत्तंस्वाधीनम् ॥ अवश्यंसाधयतिपुरुषार्थमितिसाधु ॥ १ ॥ इष्टंरागविषयंबाह्यविषयंत्यक्त्वास्वसंवेदनंस्वात्ममात्राकारवृत्तिधारातद्रूपिणापौरुषेणयत्नेनजीयते ॥ २ ॥ तत्रेष्टत्यागःप्रथमपीठिकादृढीकार्येत्याशयेनाह त्यजन्निति ॥ अभिमतंइष्टम् ॥ निरामयोरागादिचित्तरोगशून्यः ॥ ३ ॥ पाल्यतेरागचापलादिरोगचिकित्सयारक्ष्यते ॥ अवस्तुतःप्रत्याहृत्येतिशेषः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चिंतालक्षणेवह्नावातप्तंमनोरूपंअयः अतप्तेनशांततापेनमनसैवायसासाधनेनच्छिंधि ॥ ५ ॥ भावैर्लालनभीषणाद्युपायैः ॥६ ॥ सत्कर्मणिसमाध्यभ्यासलक्षणे समाक्रांतमुपक्रांतम् ॥ चेतनेनचिदात्मनानियोजयेदेकीकुर्यात् ॥ ७ ॥ अविरक्तान्निंदति ॥ स्वायत्तमिति ॥ स्वेप्सितस्यत्यागस्तद्विषयवेदनंवैराग्यवृत्तिः ॥८ ॥ अरम्यंविषयजातंपरमार्थरम्यब्रह्मरूपेणभावयित्वा ॥ ९ ॥ ब्रह्मणिपदमंघ्रिर्दीयतेब्रह्मप्राप्यतइतियावत् ॥ १० ॥ स्वचित्तस्यआक्रांतिर्निग्रहस्तावन्मात्रम् ॥ ११ ॥ १२॥ स्वात्मसंविदास्वात्मतत्त्वसाक्षात्कारेणनिःसपत्नंस्वसाम्राज्यसुखविरोधिमोहादिशत्रुरहितमतएवानिंगनमचलमनाद्यंतंस्वाराज्यसुखमिहास्मिन्नेवजीवन्मुक्तदेहेउच्यतांनिःशंकंप्रतिज्ञायतामित्यर्थः ॥ १३ ॥

शास्त्रसत्संगधीरेणचिंतातप्तमतापिना ॥ छिंधित्वमायसेनायोमनसैवमनोमुने ॥५॥ अयत्नेनयथाबालइतश्चेतश्चयोज्यते ॥ भावैस्तथैवचेतोंतःकिमिवात्रास्तिदुष्करम् ॥ ६ ॥ सत्कर्मणिसमाक्रांतमुदर्कोदयदायिनि ॥ स्वपौरुषेणैवमनश्चेतनेननियोजयेत् ॥७॥ स्वायत्तमेकांतहितंस्वेप्सितत्यागवेदनम् ॥ यस्यदुष्करतांयातंधिक्तंपुरुषकीटकम् ॥८॥ अरम्यंरम्यरूपेणभावयित्वास्वसंविदा ॥ मह्लेनेवशिशुश्चित्तमयत्नेनैवजीयते ॥ ९ ॥ पौरुषेणप्रयत्नेनचित्तमाश्वेवजीयते ॥ अचित्तेनाप्रयत्नेनपदंब्रह्मणिदीयते ॥ १० ॥ स्वायत्तंचसुसाध्यंचस्वचित्ताक्रांतिमात्रकम् ॥शक्नुवंतिनयेकर्तुंधिक्तान्पुरुषजंबुकान् ॥ ११॥स्वपौरुषैकसाध्येनस्वेप्सितत्यागरूपिणा॥ मनःप्रशममात्रेणविनानास्तिशुभागतिः॥ १२ ॥ मनोमारणमात्रेणसाध्येनस्वात्मसंविदा ॥ निःसपत्नमनाद्यंतमनिंगनमिहोच्यताम् ॥ १३ ॥ईप्सितावेदनाख्यात्तुमनःप्रशमनादृते॥ गुरूपदेशशास्त्रार्थमंत्राद्यायुक्तयस्तृणम् ॥ १४ ॥ सर्वसर्वगतंशांतंब्रह्मसंपद्यतेतदा॥ असंकल्पनशस्त्रेणच्छिन्नंचित्तंगतंयदा॥ १५ ॥ स्वसंवेदनसाध्येस्मिन्संकल्पानर्थशासने ॥ शांतायामत्रवपुषिपुंसःकैवकदर्थना ॥ १६ ॥ नूनंदैवमनादृत्यमूढसंकल्पकल्पितम् ॥ पुरुषार्थेनसंवित्त्यानयचित्तमचित्तताम् ॥ १७॥ तांमहापदवीमेकांकामप्यधिगतंचिरम् ॥ चित्तंचिद्भक्षितंकृत्वाचित्तादपिपरोभव ॥ १८॥

ईप्सितस्यबाह्यविषयस्यावेदनमनवभासः ॥ ईप्सितस्यमोक्षसुखस्यआवेदनंनिवेदनसाधनंतदाख्याद्वा ॥ युक्तयःसाधनानि ॥ नात्रगुरूपदेशनिंदायांतात्पर्यंकिंतुमनःप्रशमनस्तुतौ ॥ १४ ॥ गतंसहमूलेनोच्छिन्नंयदेत्यर्थः ॥ १५ ॥ संकल्परूपस्यअनर्थस्यशासनेनिग्रहेशांतायांशांत्यादिसाधनसंपन्नायांजीवन्मुक्तौअत्रवपुषिअधिकारिशरीरेकदर्थनाक्लेशः ॥ १६ ॥ ननुदैवप्रातिकूल्येकथंकार्यसिद्धिस्तत्राह ॥ नूनमिति ॥ १७ ॥ अचित्ततानयनेकउपायस्तमाह ॥ तामिति ॥ चित्तंचिरंतांमहापदवींब्रह्मरूपतामधिगतंप्राप्तंकृत्वांतेसाक्षात्कारवृत्त्याविर्भूतचितासमनस्काविद्याबाधाच्चिद्भक्षितंकृत्वाचित्तादपिपरःपूर्णचिन्मात्ररूपोभवेत्यर्थः ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रथमंचिन्मात्रभावनयायुक्तोभवतत्स्थैर्यार्थंपरमयाअतिसावधानयाधियाबुद्ध्यायुक्तोभव ॥ ततोग्रस्तचित्तंततश्चित्तात्परमात्मानंधारयस्थापयनान्यदित्यर्थः ॥ १९ ॥
॥ २० ॥ यथादिङ्मोहेअचलास्थिरापिप्रतीच्यांप्राचीतिसंवेदनविपर्यासधीर्विवेकस्थैर्यलक्षणेनपुरुषप्रयत्नेनजेतुंशक्यतेतद्वन्मनोपीत्यर्थः ॥ २१ ॥ चिरंमनोनिग्रहेप्रवृत्तस्योद्वे
गात्तत्परित्यागोमाभूदितितदुत्साहंवर्द्धयन्नाह ॥ अनुद्वेगइति ॥ श्रियोराज्यादिसंपदोमूलम् ॥ दृष्टांतार्थमिदम् ॥ मनोजयःप्रवर्त्ततेसिद्ध्यतीतियावत् ॥ २२ ॥ श्रीसुखेयुद्धेशस्त्र
दलनकदर्थनास्वर्गसुखेउत्पातोमृत्वाऊर्ध्वंगमनंततःपातइतिकदर्थनामनोजयसुखेतुनकापीत्याह ॥ नशस्त्रेति ॥ २३ ॥ स्वस्यवेदनंमनः ॥ करणेल्युट् ॥ तस्याक्रांतौनिग्रहे
॥२४॥ समाधिसुप्त्यादौजन्ममरणादिदुःखानामननुभवाद्व्यवहारकालेमनोवृत्तिपूर्वकमेवतदनुभवाच्चमनोवृत्तिमात्रत्वंसंसारस्येतिदर्शयति ॥ पुमानित्यादिना ॥ असत्यएवोत्थि

भवभावनयायुक्तोयुक्तःपरमयाधिया॥ धारयात्मानमव्यग्रोग्रस्तचित्तंततःपरम्॥ १९॥ परंपौरुषमाश्रित्यनीत्वाचित्तमचित्तताम्॥
तांमहापदवीमेहियत्रनाशोनविद्यते॥ २०॥ संवेदनविपर्यासरूपिणीधीरिवाचला॥ जेतुमाशुमनोरामपौरुषेणैवशक्यते॥ २१॥ अनु
द्वेगःश्रियोमूलमनुद्वेगात्प्रवर्त्तते॥ जंतोर्मनोजयोयेनत्रिलोकीविजयस्तृणम्॥ २२॥ नशस्त्रदलनोत्पातपातायस्यांमनागपि॥ स्वभाव
मात्रव्यावृत्तौतस्यांकैवकदर्थना॥ २३॥ अपिस्ववेदनाक्रांतौनशक्तायेनराधमाः॥ कथंव्यवहरिष्यंतिव्यवहारदशासुते॥ २४॥ पुमा
न्मृतोस्मिजातोस्मिजीवामीतिकुदृष्टयः॥ चेतसोवृत्तयोभांतिचपलस्यासदुत्थिताः॥ २५॥ नकश्चनेहम्रियतेजायतेनचकश्चन॥ स्वयं
वेत्तिमृतंस्वस्यलोकमन्यंस्वकंमनः॥ २६॥ इतोयातिपरंलोकंस्फुरत्यन्यतयामनः॥ तत्तस्यैत्येतदामोक्षमतोमृतिभयंकुतः॥ २७॥ इह
लोकेनविचरत्विहलोकेपरत्रच॥ चित्तमामोक्षमास्तेस्यरूपमन्यन्नविद्यते॥ २८॥ मृतेभ्रातरिभृत्यादौक्लेशआक्रियतेऽनृतः॥ तत्स्वचि
त्तंस्वचैतन्यव्यावृत्तात्मेतिमेमतिः॥ २९॥ सतिपथ्येततेशुभ्रेचित्तोपशमनादृते॥ तिर्यगूर्ध्वमधस्ताच्चभूयोभूयोविचारितम्॥ ३०॥

ताः ॥ कर्मधारयत्वात्पूर्वपदंपुंवत् ॥२५॥ असत्त्वमेवदर्शयति ॥ नकश्चनेति ॥२६॥२७॥ इहलोकेइहलोकेनइहलोकात्मनाविचरतुभ्राम्यतुपरत्रपरलोकेचपरलोकभावेनेतिशे
षः ॥ तथापिचित्तमेवतथातथाआस्ते ॥ अस्यसंसारस्यचित्तादन्यद्रूपंनविद्यतइत्यर्थः ॥ २८ ॥ एवंचशोकादयोप्यात्मचैतन्यव्यावृत्तचित्तमात्रधर्माइत्याह ॥ मृतेइति ॥ क्ले
शःशोकः ॥ निर्विकारस्वचैतन्याद्व्यावृत्तात्मविभक्तंस्वविकाररूपंस्वचित्तमेवेत्यर्थः ॥ २९ ॥ अतःपरमात्मनिसमूलचित्तनाशएवमुक्त्युपायोनान्यइतिपरिशेषयन्नुपसंहरति ॥
सतीत्यादिना ॥ सतिअन्यनिरपेक्षसत्ताके पथ्येसर्वहिते शुभ्रेमायामालिन्यरहिते ऋतेप्रमाणमूर्द्धन्यश्रुतिबोधिते परमात्मनिचितोभावश्चित्तातयाउपशमनात्तद्भावमात्रपरिशेष
लक्षणाच्चित्तस्योपशमनात्ऋतेविनामुक्तेरुपायोन्योनास्ति ॥ यावदित्यवधारणे ॥ नास्त्येवेत्यर्थः ॥ एतदूर्ध्वमूर्ध्वलोकेषुअधस्तात्पातालादिलोकेषुतिर्यक्परितोद्वीपांतरेषु
चतत्त्वदर्शिभिर्विचार्यनिर्द्धारितमित्युत्तरेणसहान्वयः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोविलयेचसमाधिपरिपाकपरिष्कृतेमनस्यपरोक्षतयाआविर्भूतब्रह्मात्मकबोधएवोपायइत्याशयेनाह ॥ कृतेतथ्येइति॥तथ्येअबाध्ये ॥३१॥ व्यायेनअत्यंतविस्तीर्णेहृदयाकाशेदहराकाशरूपेब्रह्मचितिचरमवृत्तीद्धचिल्लक्षणयाचक्रधारयामनोमारयेतिपरेणान्वयः ॥ ३२ ॥ आधयोमानसदुःखानित्वांनप्रबध्नंतिनबंधयिष्यंति ॥ आपातरम्येषुविषयेषुदोषानुसंधानेनारम्यतादर्शनंप्रथमंसंपाद्यमित्याशयेनाह ॥ यदीति ॥३३॥ मनसश्छेद्यान्यंगान्युक्त्वाशरीरमाह ॥अयंसोहमिति ॥ अयंदृश्यमानःसपित्राउत्पादितोदेहःअहंइदंदेहसंबंधिगृहक्षेत्रादितत्वाकूपित्रार्जितंमेमदीयंइतियोभ्रमएतावन्मात्रकंएतावच्छरीरकंमनइत्यर्थः ॥ ३४ ॥ ३५ ॥ वातेनयथाछिन्नाभ्रमंडलंधूयतेनिरस्यतेतथाएवंप्रा

यावन्नास्तिकिलोपायश्चित्तोपशमनादृते॥ कृतेतथ्येततेशुभ्रेबोधेत्वद्युदितेसति ॥ ३१ ॥ मनोविलयमात्रेणविश्रांतिरुपजायते॥ व्यायतेहृदयाकाशेचितिचिच्चक्रधारया॥ ३२ ॥ मनोमारयनिःशंकंत्वांप्रबध्नंतिनाधयः ॥ यदिरम्यमरम्यत्वेत्वयासंविदितंविदा ॥ ३३॥ छिन्नान्येवतदंगानिचित्तस्येतिमतिर्मम॥ अयंसोहमिदंतन्मएतावन्मात्रकंमनः॥ ३४॥ तदभावनमात्रेणदात्रेणेवविलूयते ॥ छिन्नाभ्रमंडलंव्योम्नियथाशरदिधूयते॥ ३५॥ वातेनाकल्पनेनैवंतथातद्धूयतेमनः॥ भवंतियत्रशस्त्राग्निपवनास्तत्रभीर्भवेत्॥ ३६॥ स्वायतेमृदुनिस्वच्छेकिमसंकल्पनेभयम्॥इदंश्रेयइदंनेतिसिद्धमाबालमक्षतम्॥ ३७॥ बालंपुत्रमिवोदारेमनःश्रेयसियोजयेत्॥ अक्षयंचानवंचेतःसिंहंसंस्तुतिबृंहणम्॥ घ्नंतियेतेजयंतीहनिर्वाणपददायिनः॥ ३८॥ भीमाःसंभ्रमदायिन्यःसंकल्पकदनादिमाः॥ विपदःसंप्रसूयंतेमृगतृष्णामराविव॥ ३९॥ कल्पांतपवनावांतुयांतुचैकत्वमर्णवाः॥ तपंतुद्वादशादित्यानास्तिनिर्मनसःक्षतिः॥४०॥ मनोबीजात्समुद्यंतिसुखदुःखेशुभाशुभे॥ संसारखंडकाएतेलोकसप्तकपल्लवाः॥ ४१ ॥ असंकल्पनमात्रैकसाध्येसकलसिद्धिदे॥ असंकल्पनसाम्राज्येतिष्ठावष्टब्धतत्पदः॥ ४२॥ प्रयच्छत्युत्तमानंदंक्षीयमाणंमनःक्रमात्॥ काष्ठक्षीणांगकांगारोयथांगारक्षयार्थिनः ॥ ४३॥

युक्तेनाहंममेत्यकल्पनेनमनोधूयतइत्यर्थः ॥ ३६ ॥ मृदुनिअकठिनेअनायाससाध्येइतियावत् ॥ सिद्धंप्रसिद्धम् ॥ ३७ ॥ किंप्रसिद्धंतदाह ॥ बालमिति ॥ अक्षयंक्षेतुमशक्यम् अनवंअबालम् चेतोलक्षणंसिंहंयेघ्नंतितेजयंतिसर्वोत्कर्षेणवर्त्तंते ॥ अन्येभ्योपिनिर्वाणपददायिनोभवंतीत्यर्थः ॥ ३८ ॥ मनएवमहाभयंमनोजयएवाभयप्रतिष्ठेत्याह ॥ भीमाइतिद्वाभ्याम् ॥ ३९ ॥ ४० ॥ खंडकावनखंडाः ॥ ४१ ॥ अवष्टब्धमवलंबितंतत्परमात्मपदंसिंहासनंयेनतथाविधःसन्असंकल्पनसाम्राज्येतिष्ठ ॥ ४२ ॥ नन्वसंकल्पनमात्रेणकथंमनःक्षयानंदसिद्धिस्तत्रदृष्टांतमाह ॥ काष्ठेति ॥ यथाअंगारक्षयार्थिनोज्वलदंगारनाशेनतापोपशमसुखार्थिनःपुरुषस्यकाष्ठापसरणेनक्षीणांगकःक्रमाद्भस्मीभावापन्नावयवःसोंगारस्तापोपशमनानंदंप्रयच्छतितद्वदित्यर्थः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संकल्पवद्धौब्रह्मांडलक्षाणामपिचिदणूदरेकल्पनासंपद्यतइत्याह ॥ अपीति ॥ ब्रह्मकुटीनांब्रह्मांडानाम् ॥ समीहितंसंकल्पैरभिलषितंचेत् ॥ ४४ ॥ संकल्पमात्रलक्षणेनस्वविभवेनसुसाधिताब्रह्मांडकोट्यादिपदार्थायेनअतएवसंकल्पमात्रविभवेनैवकृताअत्यनर्थाजन्ममरणनिरयादयोयेनतत्तथाविधंमनोनित्योदितेननिरंतरभावितेननिरीहितेननिःसंकल्पेनसंतोषमात्रविभवेनविजित्यविजयंसर्वोत्कर्षंएहिप्राप्नुहि ॥ ४५ ॥ आत्मविदांमतयासंमतयासमतयाअवैषम्यदृष्ट्याशमितयानिरस्तयाअमितयाबद्ध्याअहंतयापिअंतःयत्अजंजन्मादिविकारशून्यंपदमवशिष्टंतदेवतवास्तुप्राप्यमिति ॥ आशिषिलोट् ॥ ४६ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०एकादशोत्तरशततमःसर्गः ॥ १११ ॥

अपिब्रह्मकुटीलक्षंमनसश्चेत्समीहितम् ॥ तदणोरंतरेव्यक्तंविभक्तंपरिदृश्यते ॥ ४४ ॥ संकल्पमात्रविभवेनकृतात्यनर्थंसंकल्पमात्रविभवेनसुसाधितार्थम् ॥ संतोषमात्रविभवेनमनोविजित्यनित्योदितेनजयमेहिनिरीप्सितेन ॥ ४५ ॥ परमपावनयाविमनस्तयासमतयामतयात्मविदामपि ॥ शमितयामितयांतरहंतयायदवशिष्टमजंपदमस्तुतत् ॥ ४६ ॥ ॥इत्यार्षेवा०वा०दे०मो०षू०चित्तचिकित्सानामैकादशोत्तरशततमःसर्गः ॥ १११ ॥ ॥ ५ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ यस्मिंस्तस्मिन्पदार्थेहियेनतेनयथातथा ॥ तीव्रसंवेगसंपन्नंमनःपश्यतिवांछितम् ॥ १ ॥ जायतेम्रियतेचैषामनसस्तीव्रवेगिता ॥ सौम्यांबुबुद्बुदालीवनिर्निमित्तास्वभावतः ॥ २ ॥ शीततातुहिनस्येवकज्जलस्येवकृष्णता ॥ लोलतामनसोरूपंतीव्रातीव्रैकरूपिणी ॥ ३ ॥ ॥श्रीरामउवाच ॥ ॥ कथमस्यातिलोलस्यवेगोवेगैककारणम् ॥ चलतामनसोब्रह्मन्बलतोविनिवार्यते ॥ ४ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ नेहचंचलताहीनंमनःक्वचनदृश्यते ॥ चंचलत्वंमनोधर्मोवह्नेर्द्धर्मोयथोष्णता ॥ ५ ॥ यैषाहिचंचलास्पंदशक्तिश्चित्तत्वसंस्थिता ॥ तांविद्धिमानसींशक्तिंजगदाडंबरात्मिकाम् ॥ ६ ॥ स्पंदास्पंदादृतेवायोर्यथासत्तैवनोल्यते ॥ तथानचित्तसत्तास्तिचंचलस्पंदनादृते ॥ ७ ॥

अत्रचित्तक्षयोपायोवासनात्यागइर्यते ॥ चिन्मात्रवासनाभ्यासात्तदेकदृढनिश्चयात् ॥ १ ॥ वासनाक्षयार्थंद्वैतविषयेमनसस्तीव्रवेगोनिरोद्धव्यश्चिन्मात्राकारेतुसंपाद्यइतिवक्तुंमनसःस्वतीव्रवेगानुसारिफलसंपादनस्वभावतामाह ॥ यस्मिन्निति ॥ यस्मिन्पदार्थेयेनयेनवांछितेननिर्मित्तेनयथायथाप्रकर्षेणमनस्तीव्रवेगाभिसंपन्नंभवतितस्मिन्पदार्थेतत्तद्वांछितंपश्यतीत्यर्थः ॥ १ ॥ हेसौम्यउपेक्षणेनजायतेनिरोधप्रयत्नेनम्रियतेशाम्यति ॥ यतउत्पत्तौनिर्निमित्तेत्यर्थः ॥ २ ॥ स्वभावतइतियदुक्तंतद्विशदयति ॥ शीततेति ॥ ३ ॥ वेगइत्यस्यव्याख्याचलतेति ॥ वेगस्यतीव्रवेगस्यएकंमुख्यंकारणम् ॥ ४ ॥ ५ ॥ चित्तत्वंजगत्कारणमायासंवलितचैतन्यंतत्रसंस्थितास्पंदशक्तिःक्रियाशक्तिस्तांमानसींमनोरूपेणपरिणतांविद्धीत्यर्थः ॥ ६ ॥ सत्ताअस्तिता ॥ नोह्यतेनवितर्क्यते ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ८ ॥ ९ ॥ अनंतंत्रिविधपरिच्छेदरहितंयथास्यात्तथाभुज्यतइवप्रथतइत्यनंतभोगायमोक्षसुखाय ॥ १० ॥ अविद्यारजःशक्तिबीजकत्वादविद्या ॥ वासनापदनाम्नीमिति ॥ मनः अनोबहुव्रीहेरितिप्रतिषेधविषयेअनउपधालोपिनइतिङीपूपाक्षिकः ॥ ११ ॥ त्यागवशाद्बाह्यविषयानुसंधानत्यागबलात् ॥ १२ ॥ एवंवक्तव्योपयोगितयाचांचल्यधर्मकतांमनसःसमर्थ्यवास्तवावास्तवरूपद्वयात्मकतामवास्तवांशहेयताप्रदर्शनायवास्तवरूपप्रतिष्ठायाविनाशप्रसक्तिवारणायचाह ॥ यत्तदिति ॥ सदसतोर्मध्यंमिथुनीभावरू

यत्तुचंचलताहीनंतन्मनोमृतमुच्यते ॥ तदेवचतपःशास्त्रसिद्धांतोमोक्षउच्यते ॥ ८ ॥ मनोविलयमात्रेणदुःखशांतिरवाप्यते ॥ मनोमननमात्रेणदुःखंपरमवाप्यते ॥ ९ ॥ दुःखमुत्पादयत्युच्चैरुत्थितश्चित्तराक्षसः ॥ सुखायानंतभोगायतंप्रयत्नेनपातय ॥ १० ॥ तस्यचंचलतायैषात्वविद्यारामसोच्यते ॥ वासनापदनाम्नींतांविचारेणविनाशय ॥ ११ ॥ अविद्ययावासनयातयांतश्चित्तसत्तया ॥ विलीनयात्यागवशात्परंश्रेयोधिगम्यते ॥ १२ ॥ यत्तत्सदसतोर्मध्यंयन्मध्यंचित्त्वजाड्ययोः ॥ तन्मनःप्रोच्यतेरामद्वयोर्दोलायिताकृति ॥ १३ ॥ जाड्यानुसंधानहतंजाड्यात्मकतयेद्धया ॥ चेतोजडत्वमायातिदृढाभ्यासवशेनहि ॥ १४ ॥ विवेकैकानुसंधानाच्चिदंशात्मतयामनः ॥ चिदेकतामुपायातिदृढाभ्यासवशादिह ॥ १५ ॥ पौरुषेणप्रयत्नेनयस्मिन्नेवपदेमनः ॥ पात्यतेतत्पदंप्राप्यभवत्यभ्यासतोहितत् ॥ १६ ॥ पुनःपौरुषमाश्रित्यचित्तमाक्रम्यचेतसा ॥ विशोकंपदमाश्रित्यनिराशंकःस्थिरोभव ॥ १७ ॥ भवभावनयामग्नंमनसैवनचेन्मनः ॥ बलादुत्तार्यतेरामतदुपायोस्तिनेतरः ॥ १८ ॥ मनएवसमर्थवोमनसोदृढनिग्रहे ॥ अराजाकःसमर्थःस्याद्राज्ञोराघवनिग्रहे ॥ १९ ॥ तृष्णाग्राहगृहीतानांसंसारार्णवरंहसि ॥ आवर्तैरुह्यमानानांदूरेस्वंमनएवनौः ॥ २० ॥ मनसैवमनश्छित्त्वापाशंपरमबंधनम् ॥ उन्मोचितोनयेनात्मानासावन्येनमोक्ष्यते ॥ २१ ॥

पमंतरालम् ॥ अतएवान्यतररूपप्राधान्येदोलायिताकृतिअविश्रांतस्थिति ॥ १३ ॥ कस्मात्तर्ह्येकतरकोटिविश्रांतिस्तत्राह ॥ जाड्येतिद्वाभ्याम् ॥ इद्धयाप्ररूढया ॥ १४ ॥ चिदंशात्मतयाइद्धयेत्यनुषज्जते ॥ १५ ॥ प्रयत्नेनस्वाभाविकेनशास्त्रीयेणवा ॥ १६ ॥ १७ ॥ तत्ततइतरः ॥ १८ ॥ १९ ॥ दूरेउह्यमानानांप्रवाह्यमाणानां ॥ नौस्तरिः ॥ २० ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोनाम्नीबाह्यार्थमननाभिधाना ॥ ङीप्प्राग्वत् ॥ परिहरेन्मिथ्यात्वानुसंधानेननिरस्येत् ॥ यथाऔष्ण्येक्षीणेवह्निःशाम्यतितद्वद्वासनाक्षयेसहमनसाऽविद्याक्षीयतइतिभावः ॥ २२ ॥ वासनात्यागेक्रममाह ॥ भोगौघेति ॥ भावाभावौचित्तचेत्यौ ॥ कल्पनाव्युत्क्रमेणत्यागइतिभावः ॥ २३ ॥ चित्तचेत्यत्यागेपितद्धेत्वज्ञानपरिशेषमाशंक्याह ॥ अभावनमिति ॥ नभाव्यतेपूर्णतयानुभूयतेयेनाविद्यावरणेनतदविद्यावरणंभावनायास्तत्त्वसाक्षात्काराद्धेतोस्त्यक्त्वासुखीभवेत्यनुषज्जते ॥ २४ ॥ अथवासाक्षाच्चित्तद्वारावायत्किंचित्साक्षिणासंवेद्यतेतत्रतत्रसंवेद्यतायाअसंवेदनंपरमुत्कृष्टमनोनाशनिर्वाणमितिसंक्षेपइत्याह ॥ यद्यदिति ॥ २५ ॥ तच्चवेद्यावेदनंपुरुषप्रयत्नाद्भवतीत्याह ॥ स्वेनेति ॥ भावस्याभावनंवेद्यस्यावेदनम् ॥ तत्स्वप्रयत्नंनित्यमाहरेदभ्यसेत् ॥ २६ ॥ उक्तमनूद्योपसंहरति ॥ रागादयइति ॥ तेतवमनसियेयेरज्यंतेयेषुतेरागाविषयाः ॥ आदिपदात्तदुपा

यायोदेतिमनोनाम्नीवासनावासितांतरा ॥ तांतांपरिहरेत्प्राज्ञस्ततोऽविद्याक्षयोभवेत् ॥ २२ ॥ भोगौघवासनांत्यक्त्वात्यजत्वंभेदवासनाम् ॥ भावाभावौततस्त्यक्त्वानिर्विकल्पःसुखीभव ॥ २३ ॥ अभावनंभावनायास्त्वेतावान्वासनाक्षयः ॥ एषएवमनोनाशस्त्वविद्यानाशउच्यते ॥ २४ ॥ यद्यत्संवेद्यतेकिंचित्तत्रासंवेदनंपरम् ॥ असंवित्तिस्तुनिर्वाणंदुःखंसंवेदनाद्भवेत् ॥ २५ ॥ स्वेनैवतत्प्रयत्नेनपुंसःसंवेद्यतेक्षणात् ॥ भावस्याभावनंभूत्यैतत्तस्मान्नित्यमाहरेत् ॥ २६ ॥ रागादयोयेमनसीप्सितास्तेबुध्वेहतांस्तांस्त्वमवस्तुभूतान् ॥ त्यक्त्वातदास्यांकुरमस्तबीजंमाहर्षशोकंसमुपैहित्वंमः ॥ २७ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० मुखरवेणोपदेशांशकथनंनामद्वादशोत्तरशततमःसर्गः ॥ ११२ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ एशहिवासनानित्यमसत्यैवयदुत्थिता ॥ द्विचंद्रभ्रांतिवत्तेनत्यक्तुंराघवयुज्यते ॥ १ ॥ अविद्याविद्यमानेवनष्टप्रज्ञेषुविद्यते ॥ नाम्नैवांगीकृताभावात्सम्यक्प्रज्ञेषुसाकुतः ॥ २ ॥ माभवाज्ञोभवप्राज्ञःसम्यग्रामविचारय ॥ नास्त्येवेंदुर्द्वितीयःखेभ्रांत्यासंलक्ष्यतेमुधा ॥ ३ ॥ नात्रतत्त्वादृतेकिंचिद्विद्यतेवस्त्ववस्तुच ॥ ऊर्मिमालिनिविस्तीर्णेवारिपूरादृतेयथा ॥ ४ ॥ स्वविकल्पादृतेनैतान्भावाभावानसन्मयान् ॥ नित्येसितेततेशुद्धेमासमारोपयात्मनि ॥ ५ ॥

याईप्सितास्तांस्तांस्त्वमनर्थभूतान्बुध्वातेरागादयःआस्यांकुराबीजमुखनिर्गच्छदंकुरकल्पायस्यतत्तथाविधंमनोपिअस्तबीजंअज्ञानवासनाबीजैःसहत्यक्त्वापूर्णात्मानुभवामृततृप्तःसन्हर्षशोकंमासमुपैहि ॥ मत्वाधीरोहर्षशोकौजहातीतिश्रुतेरित्यर्थः ॥ २७ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० द्वादशोत्तरशततमःसर्गः ॥ ११२ ॥ ॥ ७ ॥ सर्वदुर्वासनोच्छेदीविचारैर्विविधैर्भृतः ॥ द्वैतमिथ्यात्वधीरूढस्तत्त्वबोधोत्रवर्ण्यते ॥ १ ॥ यद्यतोहेतोरसत्यैवोत्थितातत्ततस्त्यक्तुंबाधितुंयुज्यते ॥ १ ॥ नष्टप्रज्ञेषुविवेकविज्ञानशून्येषुविद्यमानापरमार्थसत्येवदृढतराविद्यते ॥ सम्यक्प्रज्ञेषुतुअभावादपरमार्थत्वान्नाम्नैवांगीकृतावंध्यापुत्रवत् ॥ अतःसाकुतः ॥ २ ॥ अतस्तत्त्वज्ञतामेवविचारेणसंपादयेत्याह ॥ माभवेति ॥ ३ ॥ तत्त्वात्परमात्मनः ॥ वस्तुभावः ॥ अवस्तुअभावः ॥ ४ ॥ असितेदेहादिबंधनशून्ये ॥ षिञ्बंधनेक्तः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बंधस्यकर्तृतामूलत्वात्तामेवप्रथमंत्यजेत्याह ॥ नासीति ॥ एकस्मिन्अद्वितीये ॥ नह्येकमात्रकारकसाध्याक्रियाप्रसिद्धेतिभावः ॥ ६ ॥ अकर्त्ताअकर्तृत्वाभिमानीचमाभव॥ अकर्तृतयाईहितेअभिमानेकृतेउपादेयंप्राप्यंसाध्यंस्वयत्ननिष्पाद्यंकिंसाध्यंफलमस्तिनर्किचिदित्यर्थः ॥ ७ ॥ भावोऽभिमानस्तदभावेसतिअसक्तत्वादकर्त्तापिएवमकर्त्तापिसं स्तत्राप्यभिमानाभावेअकर्तृत्वेप्यसक्तत्वात्कर्त्तापि ॥ तर्हिकिमज्ञवत्कर्ताहंनेत्याह ॥ कर्तृवदिति ॥ अस्पंदात्मदर्शिनस्तवनाज्ञकर्तृवद्देहस्पंदनेनात्मस्पंदभ्रमलक्षणकर्तृताप्रस क्तिरित्यर्थः ॥८॥ क्रियाफलमिथ्यात्वेकर्मासक्तिरेवनयुक्तेतितर्केणापिदृढीकुर्वन्नाह ॥ सत्यमिति ॥ ९॥ दर्शिततर्कस्यविपर्ययपर्यवसानंदर्शयति ॥ यत्रेति ॥ यत्रतत्रेतिशब्दौय

नासिकर्त्ताकिमेतासुक्रियासुममतातव ॥ एकस्मिन्विद्यमानेहिकिंकेनक्रियतेकथम् ॥ ६॥ मावाकर्त्ताभवप्राज्ञकिमकर्तृतयेहिते ॥ साध्यंसाध्यमुपादेयंतस्मात्स्वस्थोभवानघ॥७॥ कर्त्तासंस्त्वमसक्तत्वाद्भावाभावेरघूद्वह॥ असक्तत्वादकर्त्तापिकर्तृवत्स्पंदनंकुतः॥८॥ सत्यंस्याच्चेदुपादेयंमिथ्यास्याद्धेयमेवचेत्॥ उपादेयैकसक्तत्वाद्युक्तासक्तिर्हिकर्मणि ॥ ९ ॥ यत्रेंद्रजालमखिलंमायामयमवस्तुकम्॥ तत्रकास्थाकथंनामहेयोपादेयदृष्टयः ॥ १० ॥ संसारबीजकणिकायैषाविद्यारघूद्वह ॥ एषाह्यविद्यमानैवसतीवस्फारतांगता॥ ११ ॥ येयमाभोगिनिःसारासंसारारंभचक्रिका॥ विज्ञेयावासनैषासाचेतसोमोहदायिनी॥ १२ ॥ चारुवंशलतेवांतःशून्यानिस्सारकोटरा॥ सरित्तरंगमालेवनव्युच्छिन्नापिनश्वरी॥१३॥गृह्यमाणापिहस्तेनग्रहीतुंनैवयुज्यते॥मृद्व्यप्यत्यंततीक्ष्णाग्रानिर्झरोर्मिरिवोत्थिता॥१४॥ दृश्यतेप्रकराभासासदर्थेनोपयुज्यते॥ तरंगिण्यतरंगाभास्वाकारपरिनिष्ठिता॥१५॥ क्वचिद्वक्राःक्वचित्स्पष्टादीर्घाःखर्वाःस्थिराश्चलाः॥ यत्प्रसादोद्भवास्तस्माद्व्यतिरेकमुपागताः॥१६॥ अंतःशून्यापिसर्वत्रदृश्यतेसारसुंदरी॥ नक्वचित्संस्थितापीहसर्वत्रैवोपलक्ष्यते॥१७॥ जडैवचिन्मयीवासावन्यस्पंदोपजीविनी॥ निमेषमप्यतिष्ठंतीस्थैर्याशंकांप्रयच्छति॥१८॥

हितर्हीत्यर्थे ॥ १० ॥ कुतइंद्रजालतेतिचेदाविद्यकत्वादित्याह ॥ संसारेति ॥ ११ ॥ १२॥ अविद्यारूपांसंसारारंभचक्रिकामेवविस्तरेणवर्णयति ॥ चार्वित्यादिना ॥ अंतःशू न्येत्यस्यविवरणंनिःसारकोटरेति ॥ मूलनाशंविनाव्युच्छिन्नापिननश्वरी ॥ १३ ॥ निर्झरोर्मिपक्षेकूलद्रुमच्छेदिनीत्वात्तीक्ष्णाग्रेतिबोध्यम् ॥ १४ ॥ प्रकरःकार्यसमर्थकारणक लापस्तद्वदाभासःप्रथायस्याः ॥ तथापिसदर्थेसत्यपुरुषार्थे ॥ तरंगिणीपक्षेस्नानपानादिसत्यार्थक्रियार्थे ॥ अतरंगाभासत्यतरंगशून्यस्वप्नतरंगिणीसदृशीमृगतृष्णातरंगिणीव ॥ स्वाकारःप्रतीतिमात्रशोभमानआकारस्तत्रैवपरिनिष्ठितापरिसमाप्तानार्थक्रियायामित्यर्थः ॥ १५ ॥ स्वाकारानेवप्रपंचयति ॥ क्वचिदिति ॥ यस्यावर्ण्यमानचक्रिकायाः प्रसादादुद्भवाआविर्भूताव्यतिरेकंपरस्परभेदमुपागताःसर्वपदार्थाइतिशेषः ॥ १६ ॥ १७ ॥ अन्यस्पंदंमनश्चांचल्यमुपजीवतितच्छीला ॥ १८ ॥ ॥१९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्वगुणेनशुद्धवर्णापितमसामषीमलिनकोटरा ॥ अन्यस्यपरमात्मनःप्रसादेनसान्निध्येनवल्गतिचलति ॥ तस्यावेक्षणात्साक्षात्काराद्दीयतेखंड्यते ॥ दोअवखंडने ॥ १९ ॥ विमलेस्वात्मालोकेआवरकत्वान्म्लाना ॥ २० ॥ तृष्णादिरूपेणापितामेवाह ॥ वक्रेति ॥ संकटहेतुत्वात्कर्कशा ॥ ललनेवचंचला ॥ भोगिनीसर्पिणी ॥ २१ ॥ रागंस्नेहंविनापिसिंदूरधूलिलेखेवरागवतीविराजते ॥ २२ ॥ जडयाआशयाकृतसंस्थासंपादितस्थितिः ॥ विद्युत्पक्षेडलयोरभेदाज्जलस्याशयामेघेकृतस्थितिरित्यर्थः ॥ २३ ॥ दहतिसं

ज्वालावच्छुद्धवर्णापिमषीमलिनकोटरा॥ वल्गत्यन्यप्रसादेनदीयतेतदवेक्षणात्॥ १९॥ आलोकेविमलेम्लानातमस्यपिविराजते॥ मृगतृष्णेवशुष्काभानानावर्णविलासिनी॥ २०॥ वक्राविषमयीतन्वीमृद्वीसंकटकर्कशा॥ ललनाचंचलालुब्धातृष्णाकृष्णेवभोगिनी ॥ २१॥ स्वयंदीपशिखेवाशुक्षीयतेस्नेहसंक्षये॥ सिंदूरधूलिलेखेवविनारागंविराजते॥ २२॥ क्षणप्रकाशतरलाकृतसंस्थाजडाशया॥ मुग्धानांत्रासजननीवक्राविद्युदिवोदिता ॥ २३ ॥ यत्नाद्गृहीत्वादहतिभूत्वाभूत्वाप्रलीयते ॥ लभ्यतेपिहिनान्विष्टाविद्युद्ददतिभंगुरा ॥ २४॥ अप्रार्थितैवोपनतारमणीयाप्यनर्थदा॥ अकालपुष्पमालेवश्रेयसेनाभिनंदिता॥ २५॥ अत्यंतविस्मृतैवातिसुखायभ्रमदायिनी॥ दुःस्वप्नकलनेवेयमनर्थायैवतर्क्किता॥ २६॥ प्रतिभासवशादेषात्रिजगंतिमहांतिच ॥ मुहूर्त्तमात्रेणोत्पाद्यधत्तेग्रासीकरोतिच ॥२७॥ मुहूर्त्तोवत्सरश्रेणीलवणस्यानयाकृता॥ रात्रिर्द्वादशवर्षाणिहरिश्चंद्रस्यनिर्मिता ॥ २८॥ वियोगिनामथान्येषांकांताविभवशालिनाम्॥ रात्रिर्वत्सरवद्दीर्घाभवेत्तस्याःप्रसादतः॥ २९॥ सुखितस्याल्पतामेतिदुःखितस्यैतिदीर्घताम्॥ कालोयस्याःप्रसादेनविपर्यासैकशीलिनाम्॥ ३०॥ अस्याःस्वसत्तामात्रेणकर्त्तृतैतासुवृत्तिषु॥ दीपस्यालोककार्याणांयथातद्वन्नवस्तुतः॥ ३१॥ सनितंवस्तनीचित्रेनस्त्रीस्त्रीधर्मिणीयथा॥ तथैवाकारचिंतेयंकर्त्तुंयोग्यानकिंचन॥ ३२॥ मनोराज्यमिवाकारभासुरासत्यवर्जिता॥ सहस्रशतशाखापिनकिंचित्परमार्थतः॥ ३३॥

तापदुःखेपर्यवस्यतीतियावत् ॥ विद्युत्पक्षेस्पष्टम् ॥ २४ ॥ अकालपुष्पमालाप्युत्पातत्वादनर्थदा ॥ २५ ॥ तर्क्कितापुनःपुनस्तर्कैरनुसंधीयमाना ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ विपर्यासोभ्रमस्तदेकशीलिनांपुंसाम् ॥ ३० ॥ अविद्यायाअपिब्रह्मणिजगद्विवर्त्तारोपेसन्निधानमात्रेणनिमित्ततानतुपरिणामितेतिस्वमतंदर्शयति ॥ अस्याइति ॥ ३१ ॥ कुतोनास्याःकर्तृतेतिचेदयोग्यत्वादित्याह ॥ सनितंबेति ॥ स्त्रीधर्मिणीगृहकार्यकरणादिसमर्थैतियावत् ॥ आकारचिंताप्रागनुभूतार्थवासनारूपाइयमविद्या ॥ ३२ ॥ तदेवस्पष्टमाह ॥ मनोराज्यमिति ॥ ३३ ॥

१ चित्तेइतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३४ ॥ संजातध्वस्ताउत्पन्नप्रध्वंसिनी ॥ विच्छेदवर्जिताप्रवाहनित्या ॥ जडानीहारपटलीव ॥ ३५ ॥ ३६ ॥ गर्भीकृतोरसः परमात्माजलंचयया ॥ अतएवजगंतिआक्रम्यप्रक्रम्यपरिभूयचपरिवर्त्ततेभ्रमति ॥ ३७ ॥ असारैः पेलवैः संसारैः संसरणसंस्कारैर्दृढा ॥ तत्रदृष्टांतः रज्जुरिति ॥ ३८ ॥ कविभिः कल्पनामात्रेणवर्णितातरंगमालेवोत्पलमालेवच ॥ पंकेपापेकर्दमेचप्रौढा ॥ जलात्मिकाजडात्मिका ॥ लडयोरभेदात् ॥ ३९ ॥ विषास्वादः सविषमोदकास्वादः ॥ ४० ॥ नजानेइति ॥ बाधितस्यवादिसहस्रैरपिस्वरू

अरण्येमृगतृष्णेवमिथ्यैवाडंबरान्विता ॥ विडंबयतितान्मुग्धमृगानेवनमानुषान् ॥ ३४ ॥ फेनमालेवसंजातध्वस्ताविच्छेदवर्जिता ॥ जडेवचंचलाकारागृह्यमाणानकिंचन ॥ ३५ ॥ अटत्युड्डामराकाराजः प्रसरधूसरा ॥ बलात्कल्पांतवात्येवस्वाक्रांतभुवनांतरा ॥ ३६ ॥ धूमालीवांगसंलग्नादाहखेदप्रदायिनी ॥ गर्भीकृतरसाक्रम्यजगंतिपरिवर्त्तते ॥ ३७ ॥ धाराजलधरस्येवसुदीर्घाजलनिर्मिता ॥ असारसंसारदृढारज्जुस्तृणगणैरिव ॥ ३८ ॥ तरंगोत्पलमालेवकल्पनामात्रवर्णिता ॥ मृणालीवबहुच्छिद्रापंकप्रौढाजलात्मिका ॥ ३९ ॥ जनेनदृश्यतेवृद्धितत्परानचवर्द्धते ॥ विषास्वादइवापातमधुरांतेसुदारुणा ॥ ४० ॥ नष्टादीपशिखेवैषानजानेक्वेवगच्छति ॥ मिहिकेवाग्रदृष्टापिगृह्यमाणानकिंचन ॥ ४१ ॥ पांसुमुष्टिरिवाकीर्यप्रेक्षितापारमाणवी ॥ आकाशनीलिमेवैषानिर्निमित्तैवदृश्यते ॥ ४२ ॥ द्विचंद्रमोहवज्ज्ञातास्वप्नवद्विहितभ्रमा ॥ यथानौयायिनःस्थाणुस्पंदस्तद्वदिहोत्थिता ॥ ४३ ॥ अनयोपहतेचित्तेदीर्घकालमिवाकुलैः ॥ जनैराकल्प्यतेदीर्घसंसारस्वप्नविभ्रमः ॥ ४४ ॥ अनयोपहतेस्वस्मिंश्चित्राश्चेतसिविभ्रमाः ॥ उत्पद्यंतेविनश्यंतितरंगास्तोयधेरिव ॥ ४५ ॥ मनोज्ञमपिसत्यंचदृश्यतेसदसत्तया ॥ अमनोज्ञमसत्यंचदृश्यतेसत्तयाप्यसत् ॥ ४६ ॥ पदार्थरथमारूढाभावनैषाबलान्विता ॥ आक्रामतिमनःक्षिप्रंविहंगंवागुरायथा ॥ ४७ ॥ करुणास्यंदमानाक्षीस्रवत्क्षीरलवस्तनी ॥ भवत्युल्लसितानंदंजननीगृहिणीयथा ॥ ४८ ॥ विषीकरोतिनिःस्यंदसंतर्पितजगत्त्रयम् ॥ सुधार्द्रार्द्रमपिक्षिप्रंप्रवृद्धंबिंबमैंदवम् ॥ ४९ ॥

पनिरूपणासंभवादितिभावः ॥ मिहिकानीहारधूमपटलीव ॥ ४१ ॥ ४२ ॥ ४३ ॥ इवशब्दोमिथ्यात्वद्योतकः ॥ ४४ ॥ स्वस्मिन्स्वात्मनिअनयाउपहतेआवरणेनासत्प्रायेकृतेसतीत्यर्थः ॥ ४५ ॥ तस्याविपर्यासशक्तिमाह ॥ मनोज्ञमिति ॥ सद्ब्रह्म ॥ असज्जगत् ॥ ४६ ॥ पदार्थाविषयास्तद्रूपंरथंतदाकारतामितियावत् ॥ भावनाउद्भूतवासनारूपाएषाअविद्यामनःआक्रामतिमोहयित्वाबध्नाति ॥ ४७ ॥ मातृपत्न्यादिरूपतामप्यविद्यैवधारयतीत्याह ॥ करुणेति ॥ ४८ ॥ निःस्यंदैरमृतद्रवैश्चंद्रिकायात्मनापरिणतैःसंतर्पितजगत्त्रयमैंदवंबिंबमपिविषीकरोति ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंधयतीत्यंधयाएतयानिमित्तभूतयामूकावागादिसर्वकर्मेंद्रियव्यापारशून्याअपिस्थाणवउन्मत्तरववेतालनर्त्तनारंभसंभ्रमंसंप्रयच्छंतिजनयंतिवनेइत्यर्थः ॥ ५० ॥ सर्पाजगरदृष्टिभिस्तथातथाभ्रांतिभिः ॥ ५१ ॥ अभ्याशतांसामीप्यम् ॥ ५२ ॥ कालस्यसंहाररुद्रस्येष्टानिशाप्रलयरात्रिरिव ॥ ५३ ॥ अकिंचनायाःस्वसत्तायामपिदरिद्रायाः ॥ ५४॥ संविदाविवेकबुद्ध्या ॥ संविदंविषयबुद्धिम् ॥ संरोधफलमाह ॥ सरिदिति ॥ स्रोतोनिरोधेनसरिदिवेत्यध्याहार्यम् ॥ ५५ ॥ इत्थंविस्मापितोरामोऽविद्यास्वरूपपर्यालोचनेनवि

उन्मत्तरववेतालनर्त्तनारंभसंभ्रमम् ॥ स्थाणवस्संप्रयच्छंतिमूकाअप्येतयांधया ॥ ५० ॥ संध्यादिषुचकालेषुलोष्टपाषाणभित्तयः॥ अस्याःप्रसादाद्दृश्यंतेसर्पाजगरदृष्टिभिः ॥५१ ॥ एकोपिद्वितयोदेतियथाद्विशशिदर्शने ॥ दूरमभ्याशतांयातिस्वप्नेस्वमरणंयथा ॥ ५२ ॥ आदीर्घक्षणतामेतिकालस्येष्टायथानिशा॥ क्षणोवर्षमिवाभातिकांताविरहिणामिव ॥५३॥ ननदस्तीहयन्नामनकरोतीयमुद्धता॥ अस्यास्त्वकिंचनायास्तुशक्ततांपश्यराघव ॥५४॥ संरोधयेत्प्रयत्नेनसंविदेवाशुसंविदम् ॥सरित्स्रोतोनिरोधेनशुष्यत्येषामनोनदी॥५५॥ श्रीरामउवाच॥ ॥ अविद्यमानयैवेदंपेलवांग्यासुतुच्छया ॥ मिथ्याभावनयानामचित्रमंधीकृतंजगत् ॥ ५६ ॥ अरूपयानिराकृत्याचारुचेतनहीनया ॥ असत्येवाप्यनश्यंत्याचित्रमंधीकृतंजगत् ॥ ५७॥ आलोकेनविनश्यंत्यास्फुरंत्यातमसोंतरे॥ कौशिकेक्षणधर्मिण्याचित्रमंधीकृतंजगत् ॥ ५८ ॥ कुकर्मैकांतकारिण्यानसहंत्याविलोकनम् ॥ देहमप्यविजानंत्याचित्रमंधीकृतंजगत् ॥ ५९ ॥ सुदीनाचारधर्मिण्यानित्यंप्राकृतकांतया ॥ अनारतास्तंगतयाचित्रमंधीकृतंजगत् ॥ ६० ॥ अनंतदुःखाकुलयासदैवमृतयानया ॥ संबोधहीनयायत्रचित्रमंधीकृतंजगत् ॥ ६१ ॥ कामकोपघनांगिन्यातमःप्रसरवक्रया ॥ अचिरेणाशरीरिण्याचित्रमंधीकृतंजगत् ॥ ६२ ॥ स्वात्मांधरूपास्पदयाजडयाजाड्यजीर्णया ॥ दुःखदीर्घप्रलापिन्याचित्रमंधीकृतंजगत् ॥ ६३ ॥

स्मितस्तांवर्णयन्विस्मयमभिनयति ॥ अविद्यमानयैवेत्यादिना ॥ ५६ ॥ आकृतेःपृथग्ग्रहणाद्रूपपदंनीलादिपरम् ॥ असत्यामृगतृष्णानद्येवानश्यंत्याअशुष्यंत्या ॥ ५७ ॥ कौशिकस्येक्षणंचक्षुस्तद्धर्मिण्यातत्सदृशया ॥ ५८ ॥ क्रियाशक्तिमात्राश्रयत्वात्कुकर्मैकांतकारिण्याज्ञानशक्तिशून्यत्वाद्देहमप्यविजानंत्या ॥ ५९ ॥ प्राकृतानांमूढानांकांतयारम्यया ॥ प्राकृतस्यपृथग्जनस्यकांतयाभार्ययाच ॥ अस्तंगतयाअसत्यातमस्तिरोहितयाच ॥ ६० ॥ मृतयामृतकल्पया ॥ ६१ ॥ अचिरेणज्ञानोदयेनबाधेचअशरीरिण्या ॥ ६२ ॥ स्वात्मविषयेयेंऽधरूपामूढास्तदास्पदया ॥ इहश्लोकपंचकेश्लिष्टैर्विशेषणैःसमासोक्त्यानिशाचरीदीनास्त्रीकाचिदुपमागम्यते ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतस्त्रिभिःश्लोकैस्तांपुरुषस्यप्रतिकूलभार्यात्वेनवर्णयति ॥ पुरुषेति ॥ पुरुषस्यआसक्तिरासंगऐक्याध्यासस्तेनपुरुषसंगिन्या ॥नानाविचित्रविषयकल्पनक्रिययापुरुषस्यभोग संपादनात्पुरुषानुरागिण्या ॥ विवक्षासुस्वतत्त्वविचारेषुविद्रवंत्या ॥६४॥ ईक्षितंसाक्षात्कारम् ॥ आवृणोतीत्यावरणा ॥ नंद्यादित्वकल्पनाल्ल्युः ॥ ६५ ॥ ६६ ॥ वर्णितांवासना मयीमविद्यामुपसंहरंस्तदुच्छेदोपायंपृच्छति ॥ अनंतेति ॥ दुष्प्रसरविलासादुश्चेष्टाविभ्रमाः॥ क्षयोदयोन्मुखानिमरणजन्मप्रभृतीनिसुखदुःखानिभाजयतिप्रापयतितच्छीला॥ असमाविषमा ॥ केनोपायेनविगलतिनश्यति ॥ ६७ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेत्रयोदशोत्तरशततमःसर्गः ॥११३॥ ॥इहाविद्याक्षयोपायःस्वात्म

पुरुषासंगसंगिन्यारागिण्याक्रिययानया॥विद्रवंत्याविवक्षासुचित्रमंधीकृतःपुमान्॥६४॥पुरुषस्यनयाशक्तासोढुमीक्षितमप्यलम्॥ तयास्त्रियावरणयाचित्रमंधीकृतःपुमान् ॥ ६५ ॥ नयस्याश्चेतनैवास्तियाप्यनष्टैवनश्यति॥ तयास्त्रियापरुषयाचित्रमंधीकृतःपुमान् ॥ ६६ ॥ अनंतदुष्प्रसरविलासकारिणीक्षयोदयोन्मुखसुखदुःखभागिनी॥ इयंप्रभोविगलतिकेनवासमामनोगुहानिलयनिबद्धवासना॥६७॥ ॥इ०वा०वा०दे०मो०पू० अविद्यावर्णनंनामत्रयोदशोत्तरशततमःसर्गः ॥ ११३ ॥ ॥ ७३ ॥ ॥श्रीरामउवाच॥ ॥अविद्याविभवप्रोत्थंनिबिडंपुरुषस्यहि॥ महदांध्यमिदंब्रह्मन्कथंनामविनश्यति॥ १॥ ॥श्रीवसिष्ठउवाच॥ ॥ यथातुषारकणिकाभास्करालोकनात्क्षणात्॥ नश्यत्येवमविद्येयंराघवात्मावलोकनात्॥ २॥ तावत्संसारभृगुषुस्वात्मनासहदेहिनम्॥ आंदोलयतिनीरंध्रदुःखकंटकशालिषु ॥ ३॥ अविद्यायावदस्यास्तुनोत्पन्नाक्षयकारिणी॥ स्वयमात्मावलोकेच्छामोहसंक्षयदायिनी॥ ४॥ अस्याःपरंप्रपश्यंत्याःस्वात्मनाशःप्रजायते॥ आतपानुभवार्थिन्याश्छायायाइवराघव ॥५॥ दृष्टेसर्वगतेबोधेस्वयमेवविलीयते॥सर्वाशाभ्युदितेछायाद्वादशार्कगणेयथा॥ ६॥ इच्छामात्रमविद्येहतन्नाशोमोक्षउच्यते॥ सचासंकल्पमात्रेणसिद्धोभवतिराघव ॥७॥

दर्शनमुच्यते ॥ विशुद्धात्मस्वरूपंचासंकल्पाद्वासनाक्षयः ॥ १ ॥ वासनाक्षयोपायंपृष्ट्वातन्मूलाविद्यावरणक्षयोपायंपृच्छति ॥ अविद्येति ॥ १ ॥ एवंपृष्टोवसिष्ठःप्रथममविद्याक्षयोपायमाह ॥ यथेत्यादिना ॥ २ ॥ संसारलक्षणेषुभृगुषुगिरिप्रपातेषु ॥ देहिनंदेहाभिमानिनमहंकारम् ॥ आंदोलयत्यधोधःपातनेनापलोडयति ॥ ३ ॥४ ॥ परंपरमात्मानं ॥५॥ सर्वासुआशासुदिक्षुअभ्युदितेद्वादशार्कगणेछायायथातथा ॥ ६ ॥ कारणाविद्यानाशोपायमुक्त्वाकार्याविद्याजयोपायमाह ॥ इच्छेति ॥ तन्नाशइति ॥ तथाचश्रुतिः॥ यदासर्वेप्रमुच्यंतेकामायेस्यत्हृदिश्रिताः ॥ अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतइति ॥ ७ ॥

१ मित्यलमितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासनाकामवासना ॥ कालिमाअविद्यावरणम् ॥ ८ ॥ ९ ॥ शिशोर्दृढनरवेतालवासनावासितस्येतिशेषः ॥१०॥ प्रश्नःस्पष्टः ॥ ११ ॥ चेत्यानुपातोविषयव्याप्तिस्तद्रहितम् ॥ सर्वचेत्यानांकारणत्वात्सामान्यमविद्यातेनचवर्जितंनिर्विक्षेपावरणमितियावत् ॥ १२ ॥ तद्दसंभावनावारणायसकार्याविद्यायास्तत्रबाधंप्रपंचयति ॥ आब्रह्मेत्यादिना ॥१३॥

मनागपिमनोव्योम्निवासनारजनीक्षये ॥ कालिमातनुतामेतिचिदादित्यमहोदयात् ॥ ८ ॥ यथोदितेदिनकरेक्वापियातितमस्विनी ॥ तथाविवेकेभ्युदितेक्वाप्यविद्याविलीयते ॥ ९ ॥ दृढवासनयाबंधोघनतामेतिचेतसः ॥ बलाद्वेतालसंकल्पःसंध्याकालेयथाशिशोः ॥१०॥ श्रीरामउवाच ॥ ॥ यावत्किंचिदिदंदृश्यंसाविद्याक्षीयतेचसा ॥ आत्मभावनयाब्रह्मन्नात्मासौकीदृशःस्मृतः ॥ ११ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ चेत्यानुपातरहितंसामान्येनचसर्वगम् ॥ यच्चित्तत्त्वमनाख्येयंसआत्मापरमेश्वरः ॥ १२ ॥ आब्रह्मस्तंबपर्यंतंतृणादियदिदंजगत् ॥ तत्सर्वंसर्वदात्मैवनाविद्याविद्यतेनघ ॥ १३ ॥ सर्वंचखल्विदंब्रह्मनित्यंचिद्घनमक्षतम् ॥ कल्पनान्यामनोनाम्नीविद्यतेनहिकाचन ॥ १४ ॥ नजायतेनम्रियतेकिंचिद्त्रजगत्त्रये ॥ नचभावविकाराणांसत्ताक्वचनविद्यते ॥ १५ ॥ केवलंकेवलाभासंसर्वसामान्यमक्षतम् ॥ चेत्यानुपातरहितंचिन्मात्रमिहविद्यते ॥ १६ ॥ तस्मिन्नित्येततेशुद्धेचिन्मात्रेनिरुपद्रवे ॥ शांतेसमसमाभोगेनिर्विकारोदितात्मनि ॥ १७ ॥ यैषास्वभावातिगतंस्वयंसंकल्प्यधावति ॥ चिच्चेत्यंस्वयमाम्लानासाम्लानातन्मनःस्मृतम् ॥ १८ ॥ एतस्मात्सर्वगाद्देवात्सर्वशक्तेर्महात्मनः ॥ विभागकलनाशक्तिर्लहरीवोत्थितांभसः ॥ १९ ॥ एकस्मिन्विततेशांतेयानकिंचनविद्यते ॥ संकल्पमात्रेणगतासासिद्धिंपरमात्मनि ॥ २० ॥ अतःसंकल्पसिद्धेयंसंकल्पेनैवनश्यति ॥ येनैवजातातेनैववह्निज्वालेववायुना ॥ २१ ॥ पौरुषोद्योगसिद्धेनभोगाशारूपतांगता ॥ असंकल्पनमात्रेणसाविद्याप्रविलीयते ॥ २२ ॥

॥ १४ ॥ १५ ॥ सर्वसामान्यंसर्वानुगतसद्रूपम् ॥ १६ ॥ १७ ॥ तस्मिन्नात्मनियैषाआम्लानासावरणाचित्स्वभावातिगतंचित्स्वभावविरुद्धंजाड्यपरिच्छेदादिस्वभावंचेत्यंस्वयंसंकल्प्यधावतिसाविक्षेपम्लानातत्प्रसिद्धंमनःस्मृतमित्यर्थः ॥ १८ ॥ एतस्मान्मनोदेवात् ॥ १९ ॥ यासंसृतिः ॥ २० ॥ वायुनेति ॥ वायोरग्निरितिश्रुतेरितिभावः ॥ २१ ॥ निदिध्यासनपरिपाकपौरुषोद्योगात्सिद्धेनसाक्षात्कारप्रतिष्ठितेनअसंकल्पनमात्रेण ॥ २२ ॥

१ जायतेतेनेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाचबंधमोक्षावपिमनोधर्माविवनात्मधर्म्मावित्याह ॥ नाहमिति ॥ २३ ॥ नाहंब्रह्मेतिसंकल्पंसर्वंब्रह्मेतिविरोधिसंकल्पप्रतिष्ठितज्ञानेनसंविजित्येत्यर्थः ॥ २४ ॥ अत्रांबरेया नास्तिसानलिनीवबालेनमनःस्वार्थोमनोरथस्तेनविलासार्थंयथादृढाकल्प्यतेतथैवेयंद्विविधाप्यविद्याइत्थंविकल्पजालिकेवासत्येवापिसत्समाबालेनमूढजनेननसुखायअत्यंत दुःखायैवदृढाकलिताकल्पितेतिचतुर्थेनान्वयः ॥ नलिनीविशेषणानिस्पष्टानि ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ बंधकल्पनाभेदान्प्रपंचयति ॥ कृशइति ॥ २९ ॥ तन्मोक्षोपाय कल्पनांदर्शयति ॥ नाहमिति ॥ ३० ॥ ३१ ॥ अविद्यादिकल्पनायादृष्टांतांतरमाह ॥ प्रोत्तुंगेत्यादिना ॥ वैदूर्यनीलमणिविशेषस्तन्मयशिखरस्यप्रभापरितःप्रसृताव्योम्नःका लिमेतियोगभाष्यकारमतेनोक्तम् ॥ ज्यौतिषिकमतेनाप्याह ॥ अथवेति ॥ दूरत्वादर्कांशुभिर्दुर्भेदानिरसितुमशक्याब्रह्मांडखर्परसन्निहितप्राग्वर्णिततिमिरस्यश्रीःकांतिरेवव्यो

नाहंब्रह्मेतिसंकल्पात्सुदृढाद्बध्यतेमनः ॥ सर्वंब्रह्मेतिसंकल्पात्सुदृढान्मुच्यतेमनः ॥ २३ ॥ संकल्पःपरमोबंधस्त्वसंकल्पोविमुक्तता ॥ संक ल्पंसंविजित्यांतर्यथेच्छसितथाकुरु ॥ २४ ॥ दृढानयांबरेत्रास्तिनलिनीहेमपंकजा ॥ लोलवैदूर्यमधुपासुगंधितदिगंतरा ॥ २५ ॥ उद्दंडैः प्रकटाभोगैर्मृणालभुजमंडलैः ॥ विहसंतीप्रकाशस्यशशिनोरश्मिमंडलम् ॥ २६ ॥ विकल्पजालिकेवेत्थमसत्येवापिसत्समा ॥ मनः स्वार्थविलासार्थंयथाबालेनकल्प्यते ॥ २७ ॥ तथैवेयमविद्येहभवबंधनबंधनी ॥ चपलानसुखायैवबालेनकलितादृढा ॥ २८ ॥ कृशोति दुःखीबद्धोहंहस्तपादादिमानहम् ॥ इतिभावानुरूपेणव्यवहारेणबध्यते ॥ २९ ॥ नाहंदुःखीनमेदेहोबंधःकस्यात्मनःस्थितः ॥ इतिभावा नुरूपेणव्यवहारेणमुच्यते ॥ ३० ॥ नाहंमांसंनचास्थीनिदेहादन्यःपरोह्यहम् ॥ इतिनिश्चयवानंतःक्षीणाविद्यइहोच्यते ॥ ३१ ॥ प्रोत्तुंगसु रशैलाग्रवैदूर्यशिखरप्रभा ॥ अथवार्कांशुदुर्भेदातिमिरश्रीःस्थितोपरि ॥ ३२ ॥ कल्प्यतेहियथाव्योम्नःकालिमेतिस्वभावतः ॥ पुंसाधर णिसंस्थेनस्वसंकल्पनयेद्धया ॥ ३३ ॥ कल्पितैवमविद्येयमनात्मन्यात्मभावना ॥ पुरुषेणाप्रबुद्धेननप्रबुद्धेनराघव ॥ ३४ ॥ ॥ श्रीराम उवाच ॥ ॥ मेरुनीलमणिच्छायानेयंनापितमःप्रभा ॥ तदेतत्किंकृतंब्रह्मन्नीलत्वंनभसोवद ॥ ३५ ॥

म्नःकालिमेतियथाधरणिसंस्थेनपुंसाकल्प्यतेएवमियमविद्याइद्धयास्वसंकल्पनयाकल्पितेत्यर्थः ॥ ३२ ॥ ३३ ॥ ३४ ॥ नीलमणिप्रभात्वेशरन्मेघनीरपटलादिष्वपिनीलिम प्रतिभासापत्तेरुत्तरतांनैल्याधिक्यप्रतीत्यापत्तेर्मेरोःपद्मरागादिमणिमयशृंगप्रभयारक्तिमादिप्रतिभासस्याप्यवर्जनाद्विनिगमकाभावाच्चयोगिकल्पनायुक्तिमती ॥ ब्रह्मांडोर्ध्वा धःखर्परयोःस्वर्णरजतमयत्वात्तदंडमभवद्धैमंसहस्रार्कसमद्युतीतिपुराणेषुब्रह्मांडस्यमहाप्रकाशताश्रवणादूर्ध्वोर्ध्वसत्यलोकादिलोकैर्भास्वरतरतमैर्व्याप्तत्वादाब्रह्मांडखर्परमस तिव्यवधानेआदित्यरश्मिव्याप्तेर्दुर्वारत्वान्मध्येतिमिरासंभवादतिदूरपातिनामादित्यरश्मीनामगम्येदूरतमेदेशेअस्मदादिचक्षुःप्रसरकल्पनायाअसंभावनीयत्वान्निशिनक्षत्रादिद र्शनेतमसोव्यवधायकत्वादर्शनाद्ब्रह्मांडखर्परस्यापिदर्शनापत्तेरांतरालिकसत्यादिलोकविमानादिदर्शनावर्जनप्रसंगाच्चनज्यौतिषिककल्पनापियुक्तेतिमन्यमानोरामस्तत्पक्षावा क्षिप्यनभोनैल्यतत्त्वंपृच्छति ॥ मेर्विति ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामाभिप्रेतयुक्तीरेवानूद्यदर्शयन्वसिष्ठःपक्षद्वयासंभवंस्वयमपिदर्शयति ॥ नेति ॥ अन्येषांपद्मरागादिरत्नानांप्रभायाअभावात्तद्वन्मैरवीमेरुसंबंधिनीनीलमणिप्रभापिनेत्यर्थः ॥ ३६ ॥ प्रथमपक्षंनिरस्यद्वितीयंनिरस्यति ॥ तेजोमयत्वादिति ॥ इवशब्दोनर्थकःप्रसिद्धिद्योतकोवा ॥ प्राकाश्यात्सर्वतःप्रकाशव्याप्तत्वात् ॥ अंडपारस्यअंडांतर्वर्त्तिनभःपारस्य ॥ ३७ ॥ एवंपक्षद्वयमनूद्यसिद्धांतमाह ॥ केवलमिति ॥ बह्वीविपुला ॥ अविद्यायाअनुरूपावयस्यासखीवयालक्ष्यते ॥ ३८ ॥ अक्ष्णोरेवस्वदृष्टेःस्वीयदर्शनशक्तेःक्षयस्यदूरेकुंठीभावस्यसंपत्तौसत्यांयद्वस्तुस्वभावात्तमोऽदर्शनमुदितंतद्व्योम्नःकार्ष्ण्यंनैल्यमित्यवलोक्यतइत्यर्थः ॥ ३९ ॥ एतत्निदर्शनम् ॥ तथेतिबुद्ध्यस्वेतिशेषः ॥ ४० ॥ प्रासंगि

श्रीवसिष्ठउवाच ॥ ॥ ननामनीलताव्योम्नःशून्यस्यगुणवत्स्थिता ॥ अन्यरत्नप्रभाभावान्नवाप्येषाचमैरवी ॥ ३६ ॥ तेजोमयत्वादंडस्यस्फारत्वादिवतेजसः ॥ प्राकाश्यादंडपारस्यतमसोनात्रसंभवः ॥ ३७ ॥ केवलंशून्यतैवैषाबह्वीसुभगलक्ष्यते ॥ वयस्येवानुरूपायाआविद्यायाअसन्मयी ॥ ३८ ॥ स्वदृष्टिक्षयसंपत्तावक्ष्णोरेवोदितंतमः ॥ वस्तुस्वभावात्तद्व्योम्नःकार्ष्ण्यमित्यवलोक्यते ॥ ३९ ॥ एतद्बुध्वायथाव्योम्निदृश्यमानोपिकालिमा ॥ नकालिमेतिबुद्धिःस्यादविद्यातिमिरंतथा ॥ ४० ॥ असंकल्पोह्यविद्यायानिग्रहःकथितोबुधैः ॥ यथागगनपद्मिन्याःसभातिसुकरःस्वयम् ॥ ४१ ॥ भ्रमस्यजागतस्यास्यजातस्याकाशवर्णवत् ॥ अपुनःस्मरणंमन्येसाधोविस्मरणंवरम् ॥ ४२ ॥ नष्टोहमितिसंकल्पाद्यथादुःखेननश्यति ॥ प्रबुद्धोस्मीतिसंकल्पाज्जनोह्येतियथासुखम् ॥ ४३ ॥ तथासंमूढसंकल्पान्मूढतामेतिवैमनः ॥ प्रबोधोदारसंकल्पात्प्रबोधायानुधावति ॥ ४४ ॥ क्षणात्संस्मरणादेषाह्यविद्योदेतिशाश्वती ॥ यस्माद्विस्मरणादंतःपरिणश्यतिनश्वरी ॥ ४५ ॥ भावनीसर्वभावानांसर्वभूतविमोहिनी ॥ भारिणीस्वात्मनोनाशेस्वात्मवृद्धौविनाशिनी ॥ ४६ ॥ मनोयदनुसंधत्तेतत्सर्वेंद्रियवृत्तयः ॥ क्षणात्संपादयंत्येताराजाज्ञामिवमंत्रिणः ॥ ४७ ॥ तस्मान्मनोनुसंधानंभावेषुनकरोतियः ॥ अंतश्चेतनयत्नेनसशांतिमधिगच्छति ॥ ४८ ॥

कंसमाधायप्रकृतमनुसंधत्ते ॥ असंकल्पइत्यादिना ॥ सःअसंकल्पःसुकरोभातिनदुष्करइत्यर्थः ॥ ४१ ॥ एतदेवाभिप्रेत्यप्राक्प्रतिज्ञातमित्याह ॥ भ्रमस्येति ॥ ४२ ॥ दुःखेननश्यतिस्वप्ने ॥ प्रबुद्धोजाग्रदस्मीतिसंकल्पात्सुखंस्वाप्नदुःखापगमम् ॥ ४३ ॥ प्रबोधायबोधैकरसब्रह्मभावाय ॥ ४४ ॥ संस्मरणादज्ञोस्मीतिसंकल्पनात् ॥ शाश्वतीतिअनाद्यविद्यावत्तदनादितापितत्प्रतीतिक्षणकल्पितैवेतिननित्यमुक्तत्वविरोधइतिसूचनाय ॥ विस्मरणात्संकल्पवासनामूलोच्छेदान्नश्वरीनित्यनष्टा ॥ ४५ ॥ स्वात्मनोनाशेअदर्शनेभारिणीगुरुतराद्वृद्धिशीलेतियावत् ॥ स्वात्मनोवृद्धौअपरिच्छिन्नस्वरूपावाप्तौ ॥ ४६ ॥ मनसोनिरोधेपिकथमिंद्रियैर्वासनोद्भवोनस्यात्तत्राह ॥ मनइति ॥ ४७ ॥ अंतश्चेतनयत्नोब्रह्माहंभावना ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमेवांतश्चेतनयत्नप्रकारंदर्शयति ॥ यदित्यादिना ॥ ४९ ॥ अतोब्रह्मणोन्यन्नास्ति ॥ चतुर्भिःकिंवृत्तैःकालसंबंधिप्रकारनिमित्तानिव्युदस्यंते ॥ अपयंत्रणमपगतसंकोचंपूर्णत येतियावत् ॥ ५० ॥ ५१ ॥ परोमोहःस्वाज्ञानंतदेवजरामरणादिकारणे ॥ यद्यत्कार्यात्मनाउदेतितत्सर्वंवासनैवविजृंभतेनवस्तुसदित्यर्थः ॥ ५२ ॥ ५३ ॥ यथाजलेवातेनतरं गाहिःकल्पितस्तथावासनयाआत्मनिअहंभावलक्षणोऽहिःकल्पितः ॥५४॥ हेतत्त्वज्ञविवेकिनृपरमार्थेनदर्शनेनममअहमितिद्वयमपिअलंनास्त्येवेत्यर्थः ॥५५॥ खंचअद्रयश्च

यदादावेवनास्तीदंतदद्यापिनविद्यते ॥ यदिदंभातितद्ब्रह्मशांतमेकमनिंदितम् ॥ ४९ ॥ मननीयमतोनान्यत्कदाकस्यकथंकुतः ॥ निर्वि कारमनाद्यंतमास्यतामपयंत्रणम् ॥ ५० ॥ परंपौरुषमाश्रित्ययत्नात्परमयाधिया ॥ भोगाशाभावनांचित्तात्समूलामलमुद्धरेत् ॥ ५१ ॥ यदुदेतिपरोमोहोजरामरणकारणम् ॥ आशापाशशतोल्लासिवासनातद्विजृंभते ॥ ५२ ॥ ममपुत्राममधनमयंसोहमिदंमम ॥ इतीय मिंद्रजालेनवासनैवविवल्गति ॥ ५३ ॥ शून्येएवशरीरेस्मिन्विलोलोजलवातवत् ॥ अनन्ययावासनयात्वहंभावाहिरर्पितः ॥ ५४ ॥ परमार्थेनतत्त्वज्ञममाहमिदमित्यलम् ॥ आत्मतत्त्वादृतेसत्यंनकदाचनकिंचन ॥ ५५ ॥ खाद्रिद्यूर्वीनदीश्रेण्योदृष्टिस्तृष्ट्यापुनःपुनः ॥ सै वान्येवविचित्रेयमविद्यापरिवर्त्तते ॥५६॥ उदेत्यज्ञानमात्रेणनश्यतिज्ञानमात्रतः ॥ सन्मात्रेपरिविच्छेद्यारज्ज्वामिवभुजंगधीः ॥५७॥ खाद्र्यब्ध्युर्वीनदीसेयंयाऽविद्याज्ञस्यराघव ॥ नाविद्याज्ञस्यतद्ब्रह्मस्वमहिम्नाव्यवस्थितम् ॥ ५८ ॥ रज्जुसर्पविकल्पौद्वावज्ञेनैवोपकल्पि तौ ॥ ज्ञेनत्वेकैवनिर्णीताब्रह्मदृष्टिरकृत्रिमा ॥ ५९ ॥ माभवाज्ञोभवप्राज्ञोजहिसंसारवासनाम् ॥ अनात्मन्यात्मभावेनकिमज्ञइवरोदि षि ॥ ६० ॥ कस्तवायंजडोमूकोदेहोभवतिराघव ॥ यदर्थंसुखदुःखाभ्यामवशःपरिभूयसे ॥ ६१ ॥ यथाहिकाष्ठजतुनोर्यथावदरकुंड योः ॥ श्लिष्टयोरपिनैकत्वंदेहदेहवतोस्तथा ॥६२॥ भस्त्रादाहेयथादाहोनभस्त्रांतरवर्त्तिनः ॥ पवनस्यतथादेहनाशेनात्माननश्यति ॥६३॥

द्यौश्चउर्वीचनदीश्रेण्यश्चेतिद्वंद्वः ॥ दृष्टिसमकालयासृष्ट्या ॥ जीवन्मुक्तानांदृष्ट्यादृष्टिसृष्टिवादस्यैवशास्त्रेप्रतिष्ठापनादितिभावः ॥ ५६ ॥ परितोविच्छेद्यात्रिविधपरिच्छेदवती ॥ ५७ ॥ खाद्रीत्यादिसमाहारद्वंद्वः ॥ आर्षस्त्रीत्वम् ॥ इयंयाअविद्यासाअज्ञस्य ॥ ज्ञस्यअविद्यानास्ति ॥ तत्खादिब्रह्मैवेत्यर्थः ॥ ५८ ॥ द्वौव्यावहारिकप्रातिभासिकौविक ल्पौ ॥ अकृत्रिमास्वतःसिद्धा ॥ ५९ ॥ ६० ॥ अनात्मनिदेहेआत्मताभ्रांतिरेवसर्वदुःखनिदानमितिप्रथमंतांवारयति ॥ कइति ॥ जडत्वादेवमूकोवागाद्यनधिष्ठाता ॥ ६१ ॥ जतुला क्षा ॥ श्लिष्टयोरपीत्यपिशब्दादत्यंतासंश्लिष्टयोरध्यस्तासंगयोर्दूरनिरस्तमेकत्वमितिद्योत्यते ॥ ६२ ॥ विदेहत्वादेवात्मनोजन्ममरणादिसंभावनापिनास्तीत्याह ॥ भस्त्रेति ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६४ ॥ ६५ ॥ अविद्यायाआत्मविस्मृतेः ॥ कदर्थनादुरुक्तिः ॥ दुष्पाराद्दुरुत्तरा ॥ ६६ ॥ अविद्यायाअसंभावितानर्थसहस्रकारितांप्रपंचयति ॥ मिथ्यैवेत्यादिना ॥ अनया चंद्रबिंबेपिदाहसंशोषदुःखंसमनुभूयतेइतिपरेणान्वयः ॥ ६७ ॥ ६८ ॥ अनयेत्येतदत्रोत्तरश्लोकेचानुषज्जते ॥ ६९ ॥ ७० ॥ नपूरयेत्इयमितिशेषः ॥ तत्तर्हि ॥ नयेयुरात्मानमितिशेषः ॥ ७१ ॥ शासनायातना ॥ मिथ्याज्ञानेवृद्धिंगतेसति ॥७२॥७३॥ नयोग्याःनोचिताः ॥७४॥ सर्वरागःसर्वद्वैताकाररंजनंतन्मयीम् ॥ ७५ ॥ कार्येषुव्यवहारेषु ॥ रागेषुरक्तिविषयेषु ॥ रंजनाआसक्तिः ॥ ७६ ॥ विदितंनिरतिशयानंदरूपत्वात्परमकौतुकंब्रह्मयैस्तेविदितकौतुकास्तत्त्वविदस्तेषांसंघेसमाजेपुनःपुनर्विचारेणसमिद्धयादृढतरब्र

दुःखितोहंसुखाढ्योहमितिभ्रांतिरघूद्वह ॥ मृगतृष्णोपमांबुध्वात्यजसत्यंसमाश्रय ॥ ६४ ॥ अहोनुचित्रंयत्सत्यंब्रह्मतद्विस्मृतंनृणाम् ॥ यदसत्यमविद्याख्यंतन्नूनंस्मृतिमागतम् ॥ ६५ ॥ प्रसरंत्वमविद्यायामाप्रयच्छरघूद्वह ॥ अनयोपहितेचित्तेदुष्पारेहकदर्थना ॥ ६६ ॥ मिथ्यैवानर्थकारिण्यामनोमननपीनया ॥ अनयादुःखदायिन्यामहामोहफलांतया ॥ ६७ ॥ चंद्रबिंबेसुधार्द्रेपिकृत्वारौरवकल्पनम् ॥ नारकंदाहसंशोषदुःखंसमनुभूयते ॥ ६८ ॥ जलकल्लोलकह्लारपुष्पसीकरवीचिषु ॥ सरस्सुमृगतृष्णाढ्यंमरुत्त्वंपरिदृश्यते ॥ ६९ ॥ नभोनगरनिर्माणपातोत्पातनसंभ्रमाः ॥ स्वप्नादिष्वनुभूयंतेविचित्राःसुखदुःखदाः ॥ ७० ॥ संसारवासनाश्चेतोयदिनामनपूरयेत् ॥ तज्जाग्रत्स्वप्नसंरंभाःकिंनयेयुरिहापदम् ॥ ७१ ॥ दृश्यतेरौरवावीचिनरकानर्थशासना ॥ मिथ्याज्ञानेगतेवृद्धिंस्वप्नोपवनभूमिषु ॥ ७२ ॥ अनयावेधितंचेतोविसतंतावपिक्षणात् ॥ पश्यत्यखिलसंसारसागरानर्थविभ्रमम् ॥ ७३ ॥ अनयोपहतेचित्तेराज्यएवहिसंस्थिताः ॥ तास्तादृश्योजनायांतियानयोग्याःश्वपाकिनः ॥ ७४ ॥ तस्माद्रामपरित्यज्यवासनांभवबंधनीम् ॥ सर्वरागमयींतिष्ठनीरागःस्फटिकोयथा ॥ ७५ ॥ तिष्ठतस्तवकार्येषुमास्तुरागेषुरंजना ॥ स्फटिकस्येवचित्राणिप्रतिबिंबानिगृह्णतः ॥ ७६ ॥ विदितकौतुकसंघसमिद्धयायदिकरोपिसदैवसुशीलया ॥ वरधियागतप्राकृतिकक्रियस्तदसिकेनसहानुपमीयसे ॥ ७७ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० यथाकथितदोषपरिहारोपदेशोनामचतुर्दशाधिकशततमःसर्गः ॥ ११४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

ह्माहंभावनिश्चयप्रदीप्तयाअतएवसर्वत्रसमदर्शनादिसुशीलयावरधियाअनासंगबुद्ध्यायदिकरोषिसदाव्यवहरसितत्तर्हिगताअपगताःप्राकृतिकाअविद्याप्रयुक्ताःक्रियाजन्ममरणादिविभ्रमायस्यतथाविधोसिनित्यमुक्तस्वरूपोसीतियावत् ॥ तदाकेनजीवन्मुक्तेनमहाप्रभावेणब्रह्मणाहरिणाहरेणवासहअनुपमीयसेनोपमांगच्छसि ॥ नञस्तिङंतेनसमासश्छांदसः ॥ अनुपमआत्माइष्यसेइतिक्यचिकर्मणि अनुपमइवाचरसीतिक्यङिवाच्छांदसेनेत्वेनकथंचिद्योज्यम् ॥ महानुपमीयसेइतिपाठस्तुऋजुः ॥ संयुक्तात्पूर्वंगुरूरहसंयुक्ताद्वेतिच्छंदःशिक्षावचनाद्गतप्राकृतिकइत्यत्रनवृत्तभंगःशंक्यः ॥ ७७ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० चतुर्दशोत्तरशततमःसर्गः ॥ ११४ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामस्यबोधादाश्चर्यंमायातन्नाशसंस्थितिः ॥ लवणापन्निदानंचपृष्टमत्रप्रकीर्त्यते ॥ १ ॥ उन्मीलितोविकासितः ॥ अर्थात्पद्मइवेतिगम्यते ॥ १ ॥ तदेवस्पष्टमाह ॥ विकासितेति ॥ आश्वस्तःसमाधानतोषितः ॥ २ ॥ बोधप्रयुक्तविस्मयात्संजातेनसौम्येनस्मितेनसितंधवलितमाननंयस्य ॥ ३ ॥ अविद्यमानाअत्यंतासतीयातया ॥ ४ ॥ इदंदृश्यमानंतत्प्रसिद्धंसंसारदुःखमविद्ययोपादानभूतयापि ॥ नामेतिकिलार्थे ॥ ५ ॥ नद्याइवप्रवाहवत्याःसंसारनिदानभूतायामायायाः ॥ मदवबोधार्थंममावबोधदार्ढ्यार्थंपुनःकथ

॥श्रीवाल्मीकिरुवाच॥ ॥ एवमुक्तोभगवतावसिष्ठेनमहात्मना॥ रामःकमलपत्राक्षउन्मीलितइवाबभौ॥ १ ॥विकासितांतःकरणःशोभामलमुपाययौ॥ आश्वस्तस्तमसिक्षीणेपद्मोऽर्कालोकनादिव॥ २ ॥ बोधविस्मयसंजातसौम्यस्मितसिताननः॥ दंतरश्मिसुधाधौतामिमांवाचमुवाचह॥३॥ ॥श्रीरामउवाच॥ ॥अहोनुचित्रंपद्मोत्थैर्बद्धास्तंतुभिरद्रयः॥अविद्यमानायाविद्यातयासर्वेवशीकृताः॥ ४ ॥ इदंतद्दग्धतांयातंतृणमात्रंजगत्त्रये॥ अविद्ययापियन्नामासदेवसदिवस्थितम्॥ ५॥ अस्याःसंसारमायायानद्यास्त्रिभुवनांगणे॥ रूपंमदवबोधार्थंकथयानुग्रहात्पुनः॥ ६॥ अन्योयत्संशयोयंमेमहात्मन्हृदिवर्त्तते॥ लवणोसौमहाभागःकिंनामापदमाप्तवान्॥७॥ संश्लिष्टयोराहतयोर्द्वयोर्वादेहदेहिनोः॥ब्रह्मन्कइवसंसारीशुभाशुभफलैकभाक्॥८॥ लवणस्यतथादत्वातामापदमनुत्तमाम्॥ किंगतश्चंचलारंभःकश्चासावैंद्रजालिकः॥९॥ ॥श्रीवसिष्ठउवाच॥ ॥काष्ठकुड्योपमोदेहोनकिंचनइहानघ॥स्वप्नालोकइवानेनचेतसापरिकल्प्यते॥ १०॥ चेतस्तुजीवतांयातंचिच्छक्तिपरिभूषितम्॥ विद्यात्संसारसंरंभंकपिपोतकचंचलम्॥ ११॥ देहीहिकर्मभाग्योहिनानाकारशरीरधृक्॥ अहंकारमनोजीवनामभिःपरिकल्प्यते॥ १२॥ तस्येमान्यप्रबुद्धस्यनप्रबुद्धस्यराघव॥ सुखदुःखान्यनंतानिशरीरस्यनकानिचित्॥ १३॥

य ॥ ६ ॥ किंकस्मान्निमित्तात् ॥ नामेतिकिलार्थे ॥ ७ ॥ तृतीयंपृच्छति ॥ संश्लिष्टयोरिति ॥ जतुकाष्ठवत्संश्लिष्टयोर्मल्लमेषवत्परस्पराहतयोर्वादेहदेहिनोर्मध्येकःशुभाशुभकर्मफलयोरेकभाङ्मुख्योभोक्तेत्यर्थः ॥ ८ ॥ चतुर्थःप्रश्नःस्पष्टः ॥ ९ ॥ एवंपृष्टोवसिष्ठोविवेकदार्ढ्यहेतुत्वप्रकर्षात्तृतीयंप्रश्नंप्रथमंसमादधानोर्थात्प्रथममपिसमाधत्ते ॥ काष्ठेत्यादिना ॥ नकिंचनवस्तुसदित्यर्थः ॥ तथाचाचेतनत्वादसत्वाच्चनदेहस्यकर्मफलभोक्तृताप्रसक्तिरित्यर्थः ॥ १० ॥ किंतर्हिभोक्तृतदाह ॥ चेतस्त्विति ॥ तस्यजाड्यदोषंपरिहरति ॥ चिच्छक्तीति ॥ चिदाभासतादात्म्यापन्नमित्यर्थः ॥ संसारेभोक्तृत्वेसंरंभोऽभिनिवेशोयस्यतत् ॥ ११ ॥ तदेवजीवइत्याह ॥ देहीति ॥ १२ ॥ १३ ॥

१ पाधिभूतयेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानावृत्तीरनुपतदितिनामभेदेनिमित्तोक्तिः ॥ १४ ॥ तस्यचाप्रबोधोनिमित्तमित्याह ॥ अप्रबुद्धमिति ॥ १५ ॥ १६ ॥ हार्दंहृदयस्थम् ॥ १७ ॥ दुःखस्यकोविदोभोक्ता ॥ १८ ॥ १९ ॥ कोटकःकौशेयकोशकाराख्यः ॥ २० ॥ अविवेकलक्षणेनामयेनरोगेणोन्नद्धंबद्धम् ॥ २१ ॥ भ्रमणमेवप्रपंचयति ॥ उदेतीति ॥ २२ ॥ २३ ॥ मानवंजी

अप्रबुद्धंमनोनानासंज्ञाकल्पितकल्पनम् ॥ वृत्तीरनुपतच्चित्राविचित्राकृतितांगतम् ॥ १४ ॥ अप्रबुद्धंमनोयावन्निद्रितंतावदेवहि ॥ संभ्रमंपश्यतिस्वप्नेनप्रबुद्धंकदाचन ॥ १५ ॥ अज्ञाननिद्राक्षुभितोजीवोयावन्नबोधितः ॥ तावत्पश्यतिदुर्भेदंसंसाराडंभविभ्रमम् ॥ १६ ॥ संप्रबुद्धस्यमनसस्तमःसर्वंविलीयते ॥ कमलस्ययथाहार्दंदिनालोकविकासिनः ॥ १७ ॥ चित्ताविद्यामनोजीववासनेतिकृतात्मभिः ॥ कर्मात्मेतिचयःप्रोक्तःसदेहीदुःखकोविदः ॥ १८ ॥ जडोदेहोनदुःखार्होदुःखीदेह्यविचारतः ॥ अविचारोघनाज्ञानादज्ञानंदुःखकारणम् ॥ १९ ॥ शुभाशुभानांधर्माणांजीवोविषयतांगतः ॥ अविवेकैकदोषेणकोशेनेवहिकीटकः ॥ २० ॥ अविवेकामयोन्नद्धंमनोविविधवृत्तिमत् ॥ नानाकारविहारेणपरिभ्रमतिचक्रवत् ॥ २१ ॥ उदेतिरौतिहंत्यत्तियातिवल्गतिनिंदति ॥ मनएवशरीरेस्मिन्नशरीरंकदाचन ॥ २२ ॥ यथागृहपतिर्गेहेविविधंहिविचेष्टते ॥ नगृहंतुजडंरामतथादेहेहिजीवकः ॥ २३ ॥ सर्वेषुसुखदुःखेषुसर्वासुकलनासुच ॥ मनःकर्तृमनोभोक्तृमानसंविद्धिमानवम् ॥ २४ ॥ अत्रतेशृणुवक्ष्यामिवृत्तांतमिममुत्तमम् ॥ लवणोसौयथायातश्चंडालत्वंमनोभ्रमात् ॥ २५ ॥ मनःकर्मफलंभुंक्तेशुभंवाशुभमेववा ॥ यथैतद्बुध्यसेनूनंतथाकर्णयराघव ॥ २६ ॥ हरिश्चंद्रकुलोत्थेनलवणेनपुरानघ ॥ एकंतेनोपविष्टेनचिंतितंमनसाचिरम् ॥ २७ ॥ पितामहोमेसुमहान्राजसूयस्ययाजकः ॥ अहंतस्यकुलेजातस्तंयजेमनसामखम् ॥ २८ ॥ इतिसंचिंत्यमनसाकृत्वासंभारमादृतः ॥ राजसूयस्यदीक्षायांप्रविवेशमहीपतिः ॥ २९ ॥ ऋत्विजश्चाह्वयामासपूजयामाससन्मुनीन् ॥ देवानामंत्रयामासज्वालयामासपावकम् ॥ ३० ॥ यथेच्छंयजमानस्यमनसोपवनांतरे ॥ ययौसंवत्सरःसाग्रोदेवर्षिद्विजपूजया ॥ ३१ ॥ भूतेभ्योद्विजपूर्वेभ्योदत्वासर्वस्वदक्षिणाम् ॥ विबुद्ध्यतदिनस्यांतेस्वएवोपवनेनृपः ॥ ३२ ॥

वम् ॥ २४ ॥ तदुपपादकत्वेनद्वितीयप्रश्नोत्तरमवतारयति ॥ अत्रेति ॥ २५ ॥ २६ ॥ २७ ॥ बाह्यसंभारासामर्थ्याद्राजादिपीडानिमित्तेराजसूयेमंत्रिपुरोहिताद्यसंमतेर्वामनसायज्ञकल्पनमितिबोध्यम् ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ विबुद्ध्यतबाह्यदृष्टिप्रापेत्यर्थः ॥ अडभावश्छांदसः ॥ स्वेस्वीये ॥ ३२ ॥

१ एकांतेनेतिचक्कचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यफलेनयुक्तंभवितुमितिशेषः ॥ ३३ ॥ तत्तस्मात्कारणान्मनसःपावनेविशोधनेउपायेविचारनिरोधादौ ॥ मनएवक्रियाशक्तिप्राधान्येनकर्तृकरणंक्रियाच ॥ सैवसुखदुःख
फलात्मनापरिणतातत्फलंमनएवचिदाभासव्याप्त्याचिच्छक्तिप्राधान्येनभोक्तृभोगश्चेतिकर्तृभोक्तृभावप्रवाहएवमायानद्याःस्वरूपमित्यर्थात्प्रथमप्रश्नविषयोप्यनेनसंदर्भेणसं
दर्शितोबोध्यः ॥ चतुर्थप्रश्नंतूत्तरसर्गेसमाधास्यति ॥३४॥ एवंरामंसमाधायदेवादीन्सभ्यान्प्रतिविस्तरेणवर्णितमर्थंपिंडीकृत्याह ॥ पूर्णइति ॥ हेबुधाःअयंमनोरूपःपुमान्पूर्णेका
लादिपरिच्छेदशून्येदिशतिस्वात्माकारंददातीतिदेशआलंबनंतत्रप्रतिष्ठितःसन्पूर्णोभवति ॥ नष्टेनित्यनश्वरेपरिच्छिन्नेदेहादिदेशेप्रतिष्ठितस्तुतद्भावप्राप्त्याविनश्यति ॥अतोदेहोहमि
तियेषांनश्वराहंभावनिश्चयस्तैरलंप्रयोजननास्तीत्यर्थः ॥ ३५ ॥ उपसंहरति ॥ उच्चैरिति ॥ शास्त्राचार्यपुरस्कृतसम्यग्विचारपरिपाकादुच्चैर्विवेकवतिनिरूढसारासारविवेके
चेतसिसंप्रबुद्धेनास्यहंकदापिदेहादिस्वभावःकिंतुपूर्णानंदस्वप्रकाशैकरसंब्रह्मैवाहमस्मीतिसम्यक्प्रबुद्धेसतिविविक्ताद्वृत्तीद्धबोधेनबाधितावुद्धिवृत्तिरपियेनतथाविधस्यब्रह्मी

एवंसलवणोराजाराजसूयमवाप्तवान् ॥ मनसैवहितुष्टेनयुक्तंतस्यफलेनच ॥ ३३ ॥ अतश्चित्तंनरंविद्धिभोक्तारंसुखदुःखयोः ॥ तन्मनः
पावनोपायेसत्येयोजयराघव ॥ ३४ ॥ पूर्णेदेशेसुसंपूर्णःपुमान्नष्टेविनश्यति ॥ देहोहमितियेषांतुनिश्चयस्तैरलंबुधाः ॥ ३५ ॥ उच्चैर्विवे
कवतिचेतसिसंप्रबुद्धेदुःखान्यलंविगलितानिविविक्तबुद्धेः ॥ भास्वत्करप्रकटितेननुपद्मखंडेसंकोचजाड्यतिमिराणिचिरंक्षतानि ॥ ३६
इ० वा० वा० दे० मोक्षोपायेषू० सुखदुःखभोक्तृत्वोपदेशोनामपंचदशोत्तरशततमःसर्गः ॥ ११५ ॥ ॥ ५ ॥ ॥ श्रीरामउवा
च ॥ ॥ राजसूयफलंप्राप्तंलवणेनकिलप्रभो ॥ प्रमाणंकिमिवात्रस्यात्कल्पनाजालशंबरे ॥ १ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ यदाशांबरि
कःकालेसंप्राप्तोलावणींसभाम् ॥ तदाहमवसंतत्रतत्प्रत्यक्षेणदृष्टवान् ॥ २ ॥

भूतस्याधिकारिणःसर्वदुःखानिअलंसमूलंचिरंविगलितानिकदाचिदपिनभवंतीत्यर्थः ॥ पद्मखंडेभास्वतःसूर्यस्यकरैःप्रकटितेसंकोचोमुकुलताजाड्यंतुहिनम्लानता[illegible]तिमिरंको
शांतर्बाह्यांधकारश्चचिरंयथाक्षतानिनष्टानिभवंतितद्वदित्यर्थः ॥ ३६ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० पंचदशोत्तरशततमःसर्गः ॥ ११५ ॥ ॥ ५ ॥ ॥ तु
र्यप्रश्नसमाधानेवर्णितार्थनिदर्शनात् ॥ सोपोद्घातास्ततोयोगभूमयोत्रावतारिताः ॥ १ ॥ चतुर्थप्रश्नस्योत्तरंजिज्ञासूरामस्तदुपोद्बलकंद्वितीयप्रश्नोत्तरेप्रमाणंपृच्छति ॥ राजसू
यफलमिति ॥ लवणेनराज्ञाचंडालभावादिकल्पनारूपेजालशंबरेशांबरिकोपदर्शितमायाजालेराजसूयप्रयुक्तमनिष्टफलंप्राप्तम् ॥ किलेत्यैतिह्येनयदुक्तमत्रास्मिन्नर्थेकिमिवप्र
माणंस्यात् ॥ इवशब्दस्तदसंभवद्योतनार्थः ॥ नतावत्प्रत्यक्षम् ॥ मदीयमानसराजसूयस्येदंफलमितिलवणेनस्वतोज्ञातुमशक्यत्वात् ॥ तद्व्याप्यलिंगानामप्यप्रसिद्धेस्तेनान्यैर्वा
ज्ञातुमशक्त्यातन्मूलशब्दस्यह्यैतिह्यस्यवातत्राप्रसरादित्यर्थः ॥ कल्पनाजालमंबरेइतिपाठेतुअंबरेचित्ताकाशेकल्पनाजालात्मकंफलमित्यन्वयः ॥ १ ॥ यद्यप्यन्येषांतत्रप्रमा
णाप्रसरस्तथापियोगबलात्स्वस्यतत्प्रत्यक्षमितितन्मूलैवान्येषांप्रसिद्धिरितिवसिष्ठःसमाधत्ते ॥ यदेत्यादिना ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांवरमस्यास्तीतिशांबरितथाविधंकर्मचरित्रंयस्यतस्मिन् ॥ सभ्यैर्लवणेनचपृष्टः ॥ ३ ॥ दृष्ट्वायोगबलेनेतिशेषः ॥ प्रासंगिकंप्रश्नंसमाधायप्राक्तनंचतुर्थप्रश्नसमाधानंप्रतिजानीते ॥ शृण्विति ॥ शांबरिकस्येहितमभिप्रायम् ॥ ४ ॥ ५ ॥ ६ ॥ महापदंशारीरराजसूयफलद्वादशाब्दिकापदपेक्षयापंचगुणांषष्टिवर्षकल्पनात्मिकामित्यर्थः ॥ अनेनमानसराजसूयादेःस्वाराज्यादिसुखफलमपिशारीरापेक्षयापंचगुणमधिकमितिगम्यते ॥ ७ ॥ उक्तमुपसंहरन्प्रकृतेयोजयति ॥ तस्मादित्यादिनागद्येन ॥ हठयोगेननिर्घृष्यराजयोगेनसंशोध्यनिर्विकल्पसमाधिनाविलीनतांनीत्वाविवेकेनतत्त्वसाक्षात्कारेणपरंश्रेयोमोक्षंप्राप्स्यसि ॥ विचित्रकंविविधचित्ररचनाप्रकृतिभूतंयदिंद्रजालमिववासनारूपंतद्वशा

अहंसभ्यैस्ततंस्तत्रगतेशांबरिकर्मणि ॥ किमेतदितियत्नेनपृष्टश्चलवणेनच ॥ ३ ॥ चिंतयित्वामयादृष्ट्वातत्रतत्कथितंततः ॥ शृणुतत्तेप्रवक्ष्यामिरामशांबरिकेहितम् ॥ ४ ॥ राजसूयस्यकर्त्तारोयेहितेद्वादशाब्दिकम् ॥ आपद्दुःखंप्राप्नुवंतिनानाकारव्यथामयम् ॥ ५ ॥ अतःशक्रेणगगनाद्दुःखायलवणस्यसः ॥ प्रहितोदेवदूतोहिरामशांबरिकाकृतिः ॥ ६ ॥ राजसूयक्रियाकर्त्तुस्तस्यदत्वामहापदम् ॥ अगच्छत्सनभोमार्गंसुरसिद्धनिषेवितम् ॥ ७ ॥ तस्मात्सत्यक्षमेवैतद्रामनात्रसंदेहोस्ति मनोहिविलक्षणानांक्रियाणांकर्त्तृभोक्तृचतदेवनिर्घृष्यसंशोध्यचित्तरत्नमिहहिमकणमिवातपेनविलीनतांविवेकेननीत्वापरंश्रेयःप्राप्स्यसि चित्तमेवसकलभूताडंबरकारिणीमविद्यांविद्धिसाविचित्रकेंद्रजालवशादिदमुत्पादयति अविद्याचित्तजीवबुद्धिशब्दानांभेदोनास्तिवृक्षतरुशब्दयोरिव इतिज्ञात्वाचित्तमेवविकल्पनंकुरु अभ्युदितेचित्तवैमल्यार्कबिंबेसकलंकविकल्पोत्थदोषतिमिरापहरणं नतदस्तिराघवयन्नदृश्यतेयन्नात्मीक्रियतेयन्नपरित्यज्यतेयन्नम्रियतेयन्नात्मीयंयन्नपरकीयंसर्वंसर्वदासर्वोभवतीतिपरमार्थः ॥ ८ ॥

त् ॥ विकल्पनंविगतकल्पनंकुरु ॥ तिमिरापहरणंभविष्यतीतिशेषः ॥ ननुस्वचित्तलयेस्वाविद्याक्षयेवास्वादृष्टार्जितस्यस्वाविद्याकार्यस्यैवनिवृत्तिःस्यान्नसर्वादृष्टाविद्याकार्यस्यस्वचित्तादेस्तदकारणत्वादित्याशंक्यसर्वंसर्वादृष्टकार्यंसर्वोपभोग्यंचेतिसर्वाविद्याकार्यंसर्वात्मकस्वात्मदर्शनात्सर्वंदृष्टंभवतिसर्वमप्यात्मीकृतंभवतिसर्वमपित्यक्तंभवतिसर्वमपिमारितंभवतीतिनाद्यासंभावनायुक्तेत्याशयेनाह ॥ नतदस्तीति ॥ तत्कुतस्तत्राह ॥ यन्नात्मीयमिति ॥ यतःसर्वमात्मीयंसर्वंपरकीयंयस्मात्सर्वःसर्वदासर्वोभवतीतिपरमार्थास्थितिरित्यर्थः ॥ तथाचमधुब्राह्मणश्रुतिः ॥ इयंपृथिवीसर्वेषांभूतानांमध्वस्यैपृथिव्यैसर्वाणिभूतानिमध्वित्याद्याप्रसिद्धेत्याशयः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतःसमाधिपरिपाकजन्यबोधेनमनस्तत्कार्यप्रपंचयोरविद्यायाश्चैकरसब्रह्मात्मभावःपरिशिष्यतइतिपद्येनोपसंहरति ॥ भावराशिरिति ॥ भावराशिर्दृश्यपदार्थसमूहस्तथा तद्विषयकविचित्रवृत्तिरूपोबोधस्तदुपहितःसर्वोजीवश्चैकपिंडतांब्रह्मैकरसतांयाति ॥ यथाअपक्वइतिच्छेदः ॥९॥ गुरूक्तेस्तात्पर्यंसर्वस्वमनूद्यदर्शयन्रामोमनःसमुच्छेदंस्वबुद्धि तर्कितोपायैरशक्यंमन्यमानस्तदुपायांतरंजिज्ञासुर्गद्येनपृच्छति ॥ एवमिति ॥ १० ॥ वसिष्ठस्तदुपायंवक्तुंप्रतिजानीते ॥ रघुकुलेंदोइति ॥ स्वानिस्वानिबहिःप्रचारद्वाराणींद्रियाणितेषामाचारस्संचारस्तस्यदूरेतदविषयेब्रह्मणिमनःसंधिरयंमनोवृत्तिधाराम् ॥ रलयोरभेदान्मनसस्संधानेनलयंवाएष्यसिप्राप्स्यसि ॥११॥ ननुयस्यानादौसंसारेकदापिनाशोनप्रसिद्धस्तस्यकथमुच्छेदःसंभाव्यतेइत्याशंक्यतत्संभावनायमध्येमध्येतस्यनाशप्रसिद्धिपरिणामिस्वभावतयाइतरभूतादितुल्यतांचदर्शयितुंप्रागुक्तांसात्विकादिभेदेनत्रिविधांजीवसृष्टिंस्मारयति ॥ इहहीत्यादिना ॥ पूर्वोक्तंस्मर्तव्यमितिशेषः ॥ यद्यपिद्वादशधाजीवजातयःप्रागुक्तास्तथापिसात्विकादित्रैविध्येद्वादशानामंतर्भावात्त्रिविधेत्युक्तम् ॥

भावराशिस्तथाबोधःसर्वोयात्यैकपिंडताम् ॥ विचित्रमृद्वांडगणोयथाऽपक्वोजलेस्थितः ॥९॥ ॥श्रीरामउवाच ॥ ॥एवंमनःपरिक्षयेसकलसुखदुःखानामंतःप्राप्यतइतिभवताप्रोक्तंतत्कथंमहात्मंश्चपलवृत्तिरूपस्यास्यमनसोसत्ताभवति ॥ १० ॥ ॥श्रीवसिष्ठउवाच ॥ ॥रघुकुलेंदोश्रृणुमनःप्रशमनेयुक्तिंयांज्ञात्वास्वस्वाचारदूरेमनःसंधिरयमेष्यसि ॥११॥ इहहितावद्ब्रह्मणःसर्वभूतानांत्रिविधोत्पत्तिरितितत्पूर्वोक्तम् ॥ १२ ॥ तत्रेदंप्रथमयामनःकल्पनयादेहीतिसाब्रह्मरूपिणीसंकल्पमयीभूत्वायदेवसंकल्पयतितदेवपश्यतितेनेदंभुवनाडंबरंकल्प्यते ॥ १३ ॥ तत्रजननमरणसुखदुःखमोहादिकंसंसरणंकल्पयंतीकल्पानुरचनाबहुनाममंथरंस्थित्वास्वयंविलीयतेहिमकणिकेवातपगता ॥१४॥

आध्यात्मिकाधिदैविकाधिभौतिकभेदाद्वात्रिविधा ॥ तासुत्रिविधास्वपिसृष्टिषुमूलकारणंहैरण्यगर्भमनस्तत्संकल्पानुसारीण्यन्यानिमनांसीत्यपिप्रागुक्तम् ॥ १२ ॥ तत्रहैरण्यगर्भमनसःस्वसंकल्पवैचित्र्यब्रह्मांडाकारपरिणतस्यकल्पांतेविलयःप्रसिद्धस्तत्कार्याणांचभौतिकानांविलयदर्शनात्तस्यापिविलयस्वभावतानुमातुंशक्यते ॥ एवंमूलकारणेमनसिविलयस्वभावतानिश्चयेतत्तुल्यस्वभावतयाअस्मदादिमनःस्वपिसासंभावयितुंशक्यतइत्याशयेनाह ॥ तत्रेदंप्रथमयेत्यादिना ॥ इदंप्रथमयाआद्यया ॥ देहीचतुर्मुखाकारदेहवानहमितियाब्रह्मरूपिणीधातृस्वरूपाकल्पनासातदेवपश्यतिसत्यसंकल्पत्वादित्याशयः ॥ १३ ॥ अस्मदादिजन्ममरणादिसंसारोपितदीयकल्पनैवेत्याह ॥ तत्रेति ॥ कल्पेषुचतुर्युगसहस्रमितेषुस्वाहस्सुतत्तदनुकूलरचनाभिःरचितानांदेवासुरादीनांबहुभिर्नामभिर्मंथरंगुरुतरंयथास्यात्तथास्थित्वाभोगिपर्यंकशायिनिर्विष्णौस्वयंविलीयतेआतपगता ॥२०४॥
हिमकणिकायथास्वकारणेतेजसिलीयतेतद्वत् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनःसृष्टिकालेउदितोभगवन्नाभिपद्मादाविर्भूतश्चेत्पुनरन्यतयाकल्पांतरसर्गांतरतयासाप्राक्तनीकल्पनाजायतेसापुनःकल्पांतेविलीयतेपुनरप्युदेति ॥ इतियावदधिकारप्रारब्धक्षयंसंसरंतीतत्क्षयेस्वतःसिद्धादात्मबोधाद्द्विपरार्द्धावसानेसमूलंस्वयमुपशाम्यति ॥ १५ ॥ एवमन्येष्वपिहैरण्यगर्भमनस्सुनश्वरस्वभावताप्रमाणसिद्धेत्याह ॥ इत्थमित्यादिना॥ अस्मिन्ब्रह्मांडेपिप्रतिपरमाणुब्रह्मांडकोटिकल्पनास्तीतिप्रागुक्तरीत्याबोध्यम्॥१६॥यथासमष्टिमनांसिपुरुषयत्नसाध्यैरेवोपासनज्ञानैरुपचीयंतेशाम्यंतिचैवंव्यष्टिजीवमनांस्यपिजन्ममरणबीजकामकर्मवासनासंकल्पैरुपचीयंतेनिरोधज्ञानाभ्यासप्रकर्षैःशाम्यंतीतिनासंभावनीयोमनोनाशइत्याशयेनसृष्ट्यादिकालादारभ्यमोक्षकल्पनांतांजीवसंसृतिंसंक्षेपविस्तराभ्यांप्रपंचयति ॥ एवमस्यामित्यादिना॥ अस्यांप्रागुक्तायांसमष्टिकल्पनायांतादृशिपरमात्मनिवर्त्तमानायांसत्यांजीवोव्यष्टिजीवोजीव्यतेजीवति ॥ पदविकरणव्यत्ययश्छांदसः ॥१७॥ संक्षेपेणसूत्रितमर्थंविवरीतुकामःप्रथममीश्वरादागत्येत्यंशंविवृणोति ॥ मनःशक्तिरिति ॥प्रलयेउपाधिविलयादव्याकृतेलीनानांजीवानांसंस्कार

कालोदितःसंकल्पवशात्पुनरन्यतयाजायतेसापिपुनर्विलीयतेपुनरप्युदेतिसैवेतिभूयोभूयोनुसंसरंतीस्वयमुपशाम्यति॥१५॥ इत्थमनंताब्रह्मकोटयोऽस्मिन्ब्रह्मांडेऽन्येषुचसमतीताभविष्यंतीतिसंतिचेतराअनंतायासांसंख्यापिनविद्यते॥१६॥ एवमस्यांतादृशिवर्त्तमानायामीश्वरादागत्यजीवोयथाजीव्यतेविमुच्यतेतच्छृणु॥१७॥ ब्रह्मणोमनःशक्तिरभ्युदितापुरःस्थिताकाशशक्तिमवलंब्यतत्रस्थपवनतानुपातिनीघनसंकल्पत्वंगच्छति॥१८॥ततःपुरःप्राप्तभूततन्मात्रपंचकतामेत्यांतःकरणतांनीत्वासात्वसूक्ष्माप्रकृतिर्भूत्वागगनपवनतेजोरूपतासंकल्पात्प्रालेयरूपतामुपेत्यशाल्योषधिंविशंतीप्राणिनांगर्भतांचगच्छति॥१९॥ जायतेतस्मात्ततःपुरुषःसंपद्यते॥ २० ॥ तेनपुरुषेणजातमात्रेणैवबाल्यात्प्रभृतिविद्याग्रहणंकर्त्तव्यंगुरवोनुगंतव्याः॥२१॥ ततःक्रमात्पुंसस्तवैवचमत्कृतिर्जायते॥ २२ ॥

मात्रेणपरिशिष्टामनःशक्तिःप्रथममव्याकृतात्शब्दतन्मात्रात्मकाकाशशक्त्याविर्भाविसतिपुरःस्थितांप्रथमोत्पन्नांतामवलंब्यस्वयमप्यभ्युदितासतीपवनशक्त्यात्मकस्पर्शतन्मात्रोत्पत्तौतत्रत्यपवनतानुपातिनीईषच्चलनयोग्यतालक्षणंघनसंकल्पत्वंगच्छति ॥ १८ ॥ ततःपुरःप्राप्तरूपरसगंधात्मकतन्मात्रक्रमेणपंचकतामपंचीकृतपंचभूतात्मकतामेत्यअंतःकरणतांमनोबुद्धिरहंकारश्चित्तमितिव्यवहारबीजजीवोपाधितांनीत्वाप्राप्यसाप्रागुक्तमनःशक्तिरसूक्ष्माउपचितापंचीकृतस्थूलप्रकृतिर्भूत्वापंचीकृतगगनपवनतेजोरूपतासंकल्पात्क्रमेणप्रालेयरूपतांनीहारवृष्ट्यादिजलरूपतामुपेत्यशालिगोधूमाद्योषधिसस्यंविशंतीअन्नभूतापुरुषैर्भुक्तारेतोभावंप्राप्यस्त्रीयोनौनिषिक्ताकललबुद्बुदादिक्रमेणप्राणिनांगर्भतांचगच्छति ॥ १९ ॥ तस्माज्जायतेप्रसूयते ॥ ततोजन्मनःकदाचित्सुकृताधिक्यात्कर्मज्ञानाधिकृतःपुरुषःसंपद्यतेइत्यर्थः ॥ २० ॥ तेनेत्यादिनिगदव्याख्यातम् ॥ २१ ॥ तवैवचमत्कृतिर्विवेकवैराग्यादिसाधनसंपत्तिर्जायते ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वच्छदृशाचित्तवृत्तेःपुरुषस्यसंसारानर्थोहेयोमोक्षोपायउपादेयइतिविचारउत्पद्यते ॥ २३ ॥ गद्योक्तार्थसारंपद्येनोक्त्वोपसंहरंस्तादृशेपुरुषेयोगभूमिकामात्यंतिकमनोनाशोपायभूतामवतारयति ॥ तादृगिति ॥ तादृक्साधनांतरोपचितोयोविवेकस्तद्वति ॥ विमलसत्वमयीअग्र्यजातिर्ब्राह्मणाद्युत्तमजातिर्यस्यसतादृशोहमितिसंकलितःस्वीकृतोभिमानोयेनतस्मिन्नधिकारिपुंसिस्थितेअचलेसतिशिवायपरमपुरुषार्थायवक्ष्यमाणसप्तविध्यात्मिकाचेतसःप्रकाशनंज्ञानेनाभिज्वलनंतत्करणशीलायोगभूमिःक्रमशश्चित्तोपरमतारतम्यक्रमेणअवतरतिवक्ष्यमाणलक्षणैराविर्भवतीत्यर्थः ॥ २४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०षोडशोत्तरशततमःसर्गः ॥ ११६ ॥ ॥ ॥७॥ ॥ ज्ञानभूमिप्रभेदानामुपोद्घातेनवर्ण्यते ॥ अज्ञानभूमिकासप्तविधायद्वाप्रसंगतः ॥ १ ॥ समासेनसंग्रहेण ॥ इतिशब्दोलक्षणप्रभेदानांतदुपयोग्यर्थांतराणांचप्रश्नस्यद्योतनाय ॥१॥

स्वच्छदृशाचित्तवृत्तेःपुरुषस्यहेयोपादेयविचारउत्पद्यते ॥ २३ ॥ तादृग्विवेकवतिसंकलिताभिमानेपुंसिस्थितेविमलसत्वमयाग्र्यजातौ ॥ सप्तात्मिकावतरतिक्रमशःशिवायचेतःप्रकाशनकरीननुयोगभूमिः ॥ २४ ॥ ॥इ०वा०वा०दे०मोक्षोपायेपू०साधकजन्मावतारोनामषोडशाधिकशततमःसर्गः ॥ ११६ ॥ ॥७॥ ॥श्रीरामउवाच॥ ॥कीदृश्योभगवन्योगभूमिकाःसप्तसिद्धिदाः ॥ समासेनेतिमेब्रूहिसर्वतत्त्वविदांवर ॥१॥ ॥श्रीवसिष्ठउवाच॥ ॥अज्ञानभूःसप्तपदाज्ञभूःसप्तपदैवहि॥पदांतराण्यसंख्यानिभवंत्यन्यान्यथैतयोः ॥ २ ॥ स्वयत्नसाधकरसान्महासत्ताभरोन्नतेः ॥ एतेप्रतिपदंबद्धमूलेसंफलतःफलम् ॥ ३ ॥ तत्रसप्तप्रकारांत्वमज्ञानस्यभुवंशृणु ॥ ततःसप्तप्रकारांत्वंश्रोष्यसिज्ञानभूमिकाम् ॥४॥ स्वरूपावस्थितिर्मुक्तिस्तद्भ्रंशोहंत्ववेदनम् ॥ एतत्संक्षेपतःप्रोक्तंतज्ज्ञत्वाज्ञत्वलक्षणम् ॥५॥

तत्रइतिशब्दपृष्टंज्ञानभूमिकाबोधोपयुक्तमज्ञानभूमिकाभेदंप्रथमंवक्तुकामोवसिष्ठोज्ञानाज्ञानभूमिकेविभज्यदर्शयति ॥ अज्ञानेति ॥ २ ॥ स्वाभाविकप्रवृत्तिलक्षणःपुरुषप्रयत्नोभोगरागदार्ढ्यलक्षणोरसावेशश्चाज्ञानभूप्रतिष्ठायामसाधारणहेतू ॥ शास्त्रीयसाधनचतुष्टयविशिष्टःश्रवणादिप्रयत्नोमुमुक्षादार्ढ्यलक्षणरसावेशश्चज्ञानभूप्रतिष्ठायाम् ॥ अधिष्ठानब्रह्मसत्तोत्कर्षाधीनस्वसत्तालाभस्तूभयत्रसाधारणोहेतुः ॥ एतेभ्योहेतुभ्यएतेभूमिकेप्रतिपदंस्वस्वविषयेबद्धमूलेसत्यौस्वस्वोचितंसंसारस्थितिदुःखलक्षणंतन्मुक्तिनिरतिशयानंदावाप्तिलक्षणंचफलंसंफलतः ॥ यथाअधोभुवनभुवःसप्तपदाउत्तरोत्तररंजस्तमोदुःखबहुलानरकांताः ऊर्ध्वभुवनभुवस्तूत्तरोत्तरंसत्वसुखज्ञानबहुलाःसत्यलोकांताःक्रममुक्तिफलाश्चतद्वदित्यर्थाद्गम्यते ॥ ३ ॥ तत्रतयोर्भूमिकयोर्मध्ये ॥ ४ ॥ तत्रभूमिद्वयस्यप्रत्येकंफलतःसामान्यलक्षणमाह ॥ स्वरूपेति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्राद्यलक्षणंस्फुटयति ॥ शुद्धेति ॥ ६ ॥ द्वितीयंस्फुटयति ॥ यदिति ॥ ७ ॥ आद्यस्याप्रसिद्धिंवारयति ॥ अर्थादिति ॥ पूर्वविषयाच्युतस्यविषयांतरमननात्प्राङ्निरस्तमननात्स्वरूपावस्थितिःप्रसिद्धेत्यर्थः ॥ ८ ॥ मूर्छासुषुप्त्योर्वारणायविशिनष्टि ॥ जाड्यनिद्रेति ॥ ९ ॥ अंतरहंतांशेबहिर्भेदे ॥ उभयत्रनिस्पंदतांगते ॥ अजडास्वप्रकाशायाचिदितिशेषः ॥ १० ॥ तत्रतस्यांप्रत्यक्चितिइति ॥ आरोपितमनादितयाध्यस्तम् ॥ ११ ॥ १२ ॥ पदांतराण्यसंख्यानीतियदुक्तंतदुपपादयति ॥ पुनरेवपरस्परंश्लिष्टइति ॥ अस्यसप्तविधस्यमोहस्यप्रत्येकंलक्षणंशृण्वित्यर्थः ॥ बीजजाग्रल्लक्षणमाह ॥ प्रथममिति ॥ चितोमायाशबलचैतन्यात्सकाशात्सर्गादौजागरादौवाप्रथमंचेतनंचिदाभाससंवलितरूपंयत्स्यात्तत्प्राणधारणादिक्रियोपाधिनाभविष्यचित्तजीवादिनामशब्दानांतदर्थानांचभाजनंवक्ष्यमाणजाग्रद्बीजभूतंस्थितंबीजजाग्रदितिपरेणान्वयः ॥ १३ ॥ १४ ॥ जाग्रल्लक्षणं

शुद्धसन्मात्रसंवित्तेःस्वरूपान्नचलंतिये ॥ रागद्वेषोदयाभावात्तेषांनाज्ञत्वसंभवः ॥ ६ ॥ यत्स्वरूपपरिभ्रंशाच्चेत्यार्थेचितिमज्जनम् ॥ एतस्मादपरोमोहोनभूतोनभविष्यति ॥ ७ ॥ अर्थादर्थांतरंचित्तेयातिमध्येहियास्थितिः ॥ निरस्तमननायासौस्वरूपस्थितिरुच्यते ॥ ८ ॥ संशांतसर्वसंकल्पायाशिलांतरिवस्थितिः ॥ जाड्यनिद्राविनिर्मुक्तासास्वरूपस्थितिःस्मृता ॥ ९ ॥ अहंतांशेक्षतेशांतेभेदेनिःस्पंदतांगते ॥ अजडायाप्रकचतितत्स्वरूपमितिस्थितम् ॥ १० ॥ तत्रारोपितमज्ञानंतस्यभूमीरिमाःशृणु ॥ बीजजाग्रत्तथाजाग्रन्महाजाग्रत्तथैवच ॥ ११ ॥ जाग्रत्स्वप्नस्तथास्वप्नःस्वप्नजाग्रत्सुषुप्तकम् ॥ इतिसप्तविधोमोहःपुनरेवपरस्परम् ॥ १२ ॥ श्लिष्टोभवत्यनेकाख्यःशृणुलक्षणमस्यच ॥ प्रथमेचेतनंयत्स्यादनाख्यंनिर्मलंचितः ॥ १३ ॥ भविष्यच्चित्तजीवादिनामशब्दार्थभाजनम् ॥ बीजरूपंस्थितंजाग्रद्बीजजाग्रत्तदुच्यते ॥ १४ ॥ एषाज्ञप्तेर्नवावस्थात्वंजाग्रत्संस्थितिंशृणु ॥ नवप्रसूतस्यपरादयंचाहमिदंमम ॥ १५ ॥ इतियःप्रत्ययःस्वस्थस्तज्जाग्रत्प्रागभावनात् ॥ अयंसोहमिदंतन्मइतिजन्मांतरोदितः ॥ १६ ॥ पीवरःप्रत्ययःप्रोक्तोमहाजाग्रदितिस्फुरन् ॥ अरूढमथवारूढंसर्वथातन्मयात्मकम् ॥ १७ ॥ यज्जाग्रतोमनोराज्यंजाग्रत्स्वप्नःसउच्यते ॥ द्विचंद्रशुक्तिकारूप्यमृगतृष्णादिभेदतः ॥ १८ ॥

श्रावयति ॥ त्वमिति ॥ नवप्रसूतस्यबीजजाग्रतःपरात्परतः अयंस्थूलदेहोहं इदंदेहभोग्यजातंममइतियःप्रत्ययस्तज्जाग्रदित्यर्थः ॥ १५ ॥ अयंसोहमिदंतन्मेइत्युक्तलक्षणस्यजाग्रत्प्रत्ययस्यजन्मानंतरमुदितः ॥ नकारलोपश्छांदसः ॥ अथवासजातीयपूर्वपूर्वजन्मसंस्कारोद्बोधेनदृढतरोदितः अतएवपीवरःअभ्यासादुपचितः ॥ तथाहि ॥ब्राह्मणादिजन्मसाधारण्येपिजन्मांतराभ्यासात्केषांचिद्ब्राह्मणोचितक्रियास्वभिनिवेशःपाटवातिशयश्चदृश्यतेनसर्वेषाम् ॥ तथाचैहिकात्प्राक्तनाद्वादृढाभ्यासपाटवादुपचिताभिनिवेशोजाग्रत्प्रत्ययोमहाजाग्रदित्यर्थः ॥ १६ ॥ जाग्रत्स्वप्नंलक्षयति ॥ अरूढमिति ॥ अरूढमनभ्यासपेलवंरूढमभ्यासदृढम् ॥ यथालवणस्य ॥ १७ ॥ द्विचंद्रशुक्तिरूप्यादिभ्रांतयोपिजाग्रत्स्वप्नभेदाएवेत्याह ॥ द्विचंद्रेति ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वप्नंलक्षयति ॥ अल्पकालमिति ॥ निद्रांतेनिद्रामध्येनिद्रावसानेवाप्रतीयतइतिप्रत्ययः यःप्रत्ययोऽनुसंधीयतेसस्वप्नःकथितइत्यर्थः ॥ तस्याज्ञस्य ॥ सचमहाजाग्रत्स्थितेर्म
हाजाग्रदंतर्गतस्थूलशरीरस्यहृदिकंठादिहृदयांतनाडीप्रदेशेभवतीत्यर्थः ॥ १९ ॥ २० ॥ उक्तलक्षणोपपादनायस्वप्नमेवपुनर्विशिनष्टि ॥ चिरसंदर्शनाभावादिति ॥ स्वप्नजाग्रतो
र्लक्षणमाह ॥ स्वप्नोजाग्रत्तयेति ॥ रूढोदृढाभिनिवेशाच्चिरकालस्थायित्वकल्पनाद्वाउपचितः॥ यथाहरिश्चंद्रस्यद्वादशवर्षात्मकः ॥ महाजाग्रत्पदंमहाजाग्रत्साम्यंगतःसन्नि
त्यर्थः ॥२१॥ सचास्यदैवाद्देहनाशेपितथैवायेप्यनुवर्त्ततेइतिसूचनायक्षतेदेहेइत्युक्तम् ॥ सुषुप्तिंलक्षयति ॥ षडवस्थेति ॥पूर्वाःषडवस्थाःकर्मफलभोगभूमित्वात्कर्मजाः ॥ सुषु
प्तिस्तुपूर्वोद्भूतकर्मणांभोगेनक्षयेउत्तरेषामनुद्भवेंतरालेछन्नापायवत्सर्वसूक्ष्मस्थूलप्रपंचविलयेतद्बीजाज्ञानमात्रपरिशेषात्तदुपहितात्ममात्रपरिशेषरूपेत्याशयेनाह ॥ जडाजीव

अभ्यासात्प्राप्यजाग्रत्त्वंस्वप्नोनेकविधोभवेत् ॥ अल्पकालंमयादृष्टमेवंनोसत्यमित्यपि ॥ १९ ॥ निद्राकालानुभूतेर्थेनिद्रांतेप्रत्ययोहि
यः॥ सस्वप्नःकथितस्तस्यमहाजाग्रत्स्थितेर्हृदि ॥ २० ॥ चिरसंदर्शनाभावादप्रफुल्लबृहद्वपुः ॥ स्वप्नोजाग्रत्तयारूढोमहाजाग्रत्पदंगतः
॥२१॥अक्षतेवाक्षतेदेहेस्वप्नजाग्रन्मतंहितत् ॥ षडवस्थापरित्यागेजडाजीवस्ययास्थितिः॥२२॥ भविष्यद्दुःखबोधाढ्यासौषुप्तीसोच्य
तेगतिः॥ एतेतस्यामवस्थायांतृणलोष्टशिलादयः॥ २३ ॥ पदार्थाःसंस्थिताःसर्वेपरमाणुप्रमाणिनः॥ सप्तावस्थाइतिप्रोक्तामयाऽज्ञा
नस्यराघव ॥ २४ ॥ एकैकाशतशाखात्रनानाविभवरूपिणी ॥ जाग्रत्स्वप्नश्चिरंरूढोजागृतावेवगच्छति ॥२५॥ नानापदार्थभेदेनसवि
कासंविजृंभते॥ अस्यामप्युदरेसंतिमहाजाग्रद्दशादृशः॥२६॥ तासामप्यंतरेलोकोमोहान्मोहांतरंव्रजेत्॥ अंतःपातिजलावर्त्तइवधा
वतिनौर्भ्रमम् ॥ २७॥ काश्चित्संस्तुतयोदीर्घस्वप्नजाग्रत्तयास्थिताः॥ काश्चित्पुनःस्वप्नजाग्रज्जाग्रत्स्वप्नास्तथेतराः॥ २८॥

स्ययास्थितिरिति ॥ २२ ॥ भविष्यद्दुःखानिबोधयंतिअनुभावयंतीतिभविष्यद्दुःखबोधानिवासनाकर्माणितैराढ्यासंपन्नासुषुप्तिरेवसौषुप्ती ॥ सुषुप्तौकारणेविलीनस्यजगतः
संस्कारात्मनासत्वमेवनासत्वंपुनरुद्भवाभावप्रसंगादित्याशयेनाह ॥ एतेइति ॥ २३ ॥ उपसंहरति ॥ सप्तावस्थाइति ॥ २४ ॥ तास्वेकैकांतरन्योन्याविर्भावात्परस्परसंवलना
च्चानंतभेदाःसंभवंतीत्याह ॥ एकैकेति ॥ जागृतावेवगच्छतिमिलति ॥ २५॥ अस्यांजाग्रद्भावापन्नायांजाग्रत्स्वप्नदशायां उदरेअंतःमहाजाग्रद्दशालक्षणाःदृशःप्रत्ययाः ॥ दृ
शःसाक्षिणोमहाजाग्रद्दशाःसंतीतिपृथक्पदच्छेदोवा ॥ २६ ॥ लोकोजनःजीवइतियावत् ॥ नद्यंतःपातिजलावर्त्तेनौरिवभ्रमंधावतिगच्छति ॥ २७ ॥ दीर्घंदीर्घकालम ॥
स्वप्नजाग्रदितिजाताविकवचनम् ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितामज्ञानभूमिकामुपसंहरंस्तदुत्तरणोपायमाह ॥ अज्ञानभूमिरिति ॥ नानाविकारैर्जगदंतरभेदैश्चहीनानियाअवस्थहेयेतियावत् ॥ इतिउक्तवक्ष्यमाणप्रकाराभिश्चारुविचारणाभिःप्रबोधविमलेस्वयंप्रत्यङ्मात्रैकरसेआत्मनिदृष्टेसतिअस्याअविद्याभूमेःसकाशात्समुत्तरसिनिर्गतएवासीत्यर्थः ॥ स्वयमुत्तरसीतिवासंबंधः ॥ २९ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउ०सप्तदशोत्तरशततमःसर्गः ॥ ११७ ॥ ॥ ६ ॥ ॥ इहसप्तपदाज्ञानभूमिकालक्षणैःस्वकैः ॥ आरूढलक्षणैश्चैवमोक्षांतासाधुवर्ण्यते ॥१॥ ज्ञातयाअभ्यासक्रमेणानुभूतया ॥ १॥ ननुयोगशास्त्रेयमनियमाद्यष्टांगभेदभिन्नायोगभूमिकाःप्रसिद्धाएवंकिताएवैतानेत्याह ॥ वदंतीतिवादिनोयोगसांख्यवादिनः ॥ तायोगभूमिकास्तुच्छसिद्धिफलाअन्येषामभिमताः ॥ ममतुइमाज्ञानभूमिकाएवाभिमताः ॥ यतःपरमपुरुषार्थलक्षणशुभप्रदाइत्यर्थः ॥ २ ॥ किंतज्ज्ञेयंकिंवाज्ञानंयद्भूमयोव

अज्ञानभूमिरितिसप्तपदामयोक्तानानाविकारजगदंतरभेदहीना ॥ अस्याःसमुत्तरसिचारुविचारणाभिर्दृष्टेप्रबोधविमलेस्वयमात्मनीति॥२९॥ ॥इ०वा०वा०दे०मोक्षोपायेषू०अज्ञानभूमिकावर्णनंनामसप्तदशाधिकशततमःसर्गः॥११७॥ ॥६॥ ॥श्रीवसिष्ठउवाच॥ ॥इमांसप्तपदांज्ञानभूमिमाकर्णयानघ॥ नानयाज्ञातयाभूयोमोहपंकेनिमज्जसि ॥ १ ॥ वदंतिबहुभेदेनवादिनोयोगभूमिकाः॥ ममत्वभिमतानूनमिमाएवशुभप्रदाः॥ २ ॥ अवबोधंविदुर्ज्ञानंतदिदंसप्तभूमिकम् ॥ मुक्तिस्तुज्ञेयमित्युक्तंभूमिकासप्तकात्परम्॥ ३ ॥ सत्यावबोधोमोक्षश्चैवेतिपर्यायनामनी॥ सत्यावबोधोजीवोयंनेहभूयःप्ररोहति ॥४॥ ज्ञानभूमिःशुभेच्छाख्याप्रथमासमुदाहृता॥ विचारणाद्वितीयातुतृतीयातनुमानसा॥ ५॥ सत्वापत्तिश्चतुर्थीस्यात्ततोसंसक्तिनामिका॥ पदार्थाभावनीषष्ठीसप्तमीतुर्यगास्मृता॥ ६ ॥ आसामंतेस्थितामुक्तिस्तस्यांभूयोनशोच्यते ॥ एतासांभूमिकानांत्वमिदंनिर्वचनंशृणु ॥ ७॥ स्थितःकिंमूढएवास्मिप्रेक्ष्येहंशास्त्रसज्जनैः॥ वैराग्यपूर्वमिच्छेतिशुभेच्छेत्युच्यतेबुधैः ॥८ ॥

र्य्यंतेइतितेलक्षयति ॥ अवबोधमिति ॥ अखंडस्याकारवृत्त्यारूढंब्रह्मअज्ञाननिवर्त्तकत्वाज्ज्ञानंनिवृत्ताज्ञानंतुतदेवज्ञेयमित्युपचाराद्द्विधोच्यतइत्यर्थः ॥३॥ तथाचपूर्वापरावस्थाकल्पितावांतरप्रवृत्तिनिमित्तभेदस्यमिथ्याभूतस्यापायेअवबोधमोक्षपदयोरेकार्थमात्रनिष्ठत्वात्पर्यायनामताफलिता ॥ यतस्तादृशोजीवोनभूयःप्ररोहतियेनभेदादपर्यायतास्यादित्याशयेनाह ॥ सत्यावबोधइति ॥ ४ ॥ उद्देशःस्पष्टः ॥ ५ ॥ ६ ॥ उद्दिष्टानांलक्षणोक्तिंवक्तुंप्रतिजानीते ॥ एतासामिति ॥ ७ ॥ प्रेक्ष्येप्रेक्षिष्ये ॥ इडभावश्छांदसः ॥ शास्त्रैर्विचारितवेदांतवाक्यैःसज्जनैर्गुरुभिश्च ॥ वैराग्यग्रहणंसाधनचतुष्टयोपलक्षणम् ॥ तथाचनिषिद्धवर्ज्जननिष्कामयज्ञदानाद्यनुष्ठानप्रयुक्तासंन्याससाधनचतुष्टयसंपत्तिसहितामुक्तिपर्यवसिताश्रवणादिप्रवृत्तिफलोपहितात्मसाक्षात्कारोत्कटेच्छैवप्रथमाभूमिकेत्यर्थः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुशुश्रूषाभिक्षाशनशौचादियतिधर्मपालनसहितेश्रवणमननेएवात्रसदाचारः ॥ अन्यस्यचित्तशुद्धिमात्रहेतुत्वेनप्रागेवसिद्धत्वात् ॥ ९ ॥ अभ्यर्हितत्वाद्विचारणाशब्दस्यपूर्वनिपातः ॥ भावनंभावोनिदिध्यासनंतस्मात् ॥ तथाचसाधनचतुष्टयसंपत्त्यादिपूर्वकश्रवणमननाभ्यांसहितान्निदिध्यासनाद्यामनसइंद्रियार्थेषुशब्दादिविषयेषुअसक्तताअग्रहणपर्यंतातनुतासविकल्पसमाधिरूपासूक्ष्मतासातनुमानसाख्याभूमिकाप्रोक्ता ॥ तनुसूक्ष्मतमंमानसंयस्यामितिव्युत्पत्तेरित्यर्थः ॥ अण्णंतस्योपसर्जनत्वान्नङीप् ॥ तथाचोक्तंयोगशास्त्रे ॥ श्रोत्रादिकरणैर्यावच्छब्दादिविषयग्रहः ॥ तावद्ध्यानमितिप्रोक्तंसमाधिःस्यात्ततःपरइति ॥ १० ॥ अर्थेबाह्यार्थेविषयेसंस्कारोच्छेदादात्यंतिकीचित्तेयाविरतिस्तद्वशात्तत्स्थैर्यात् ॥ शुद्धेमायातत्कार्यादवस्थात्रयाच्चशोधितेसर्वाधिष्ठानसन्मात्ररूपेआत्मनिक्षीरोदकवत्त्रिपुटीविलयेनसाक्षात्कारपर्यंतायास्थितिर्निर्विकल्पकसमाधिरूपासासत्त्वापत्तिर्मनसःपरमात्मसत्त्वात्मनैवापन्नत्वादित्यर्थः ॥ अत्रग्रसौब्रह्मविदित्युच्यते ॥ ११ ॥ असंसंगश्चित्तस्यबाह्याभ्यंतराकारैस्तत्संस्कारैश्चास्पर्शस्तल्लक्षणेनसमाधिपरिपाकफलेन

शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ॥ सदाचारप्रवृत्तिर्याप्रोच्यतेसाविचारणा ॥ ९ ॥ विचारणाशुभेच्छाभ्यामिंद्रियार्थेष्वसक्तता ॥ यात्रसातनुताभावात्प्रोच्यतेतनुमानसा ॥ १० ॥ भूमिकात्रितयाभ्यासाच्चित्तेर्थेविरतेर्वशात् ॥ सत्यात्मनिस्थितिःशुद्धेसत्त्वापत्तिरुदाहृता ॥ ११ ॥ दशाचतुष्टयाभ्यासादसंसंगफलेनच ॥ रूढसत्वचमत्कारात्प्रोक्तासंसक्तिनामिका ॥ १२ ॥ भूमिकापंचकाभ्यासात्स्वात्मारामतयादृढम् ॥ आभ्यंतराणांबाह्यानांपदार्थानामभावनात् ॥ १३ ॥ परप्रयुक्तेनचिरंप्रयत्नेनार्थभावनात् ॥ पदार्थाभावनानाम्नीषष्ठीसंजायतेगतिः ॥ १४ ॥ भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभतः ॥ यत्स्वभावैकनिष्ठत्वंसाज्ञेयातुर्यगागतिः ॥ १५ ॥

चहेतुनारूढउपचितश्चित्तेनिरतिशयानंदनित्यापरोक्षब्रह्मात्मभावसाक्षात्कारलक्षणश्चमत्कारोयस्यांसा ॥ यद्यप्युत्तमाधिकारिणांद्वितीयभूमिकायामपिसाक्षात्कारःशाब्दापरोक्षात्मसिद्धस्तथापिपंचमभूमिकायामात्यंतिकद्वैतसंस्कारोच्छेदप्रयुक्तोत्कर्षातिशयस्यमंदमध्यमाधिकारिणामपिचतुर्थभूमिकांतोत्पन्नसाक्षात्कारस्यपंचम्यांनिरूढतरत्वोपपत्तेश्चसूचनायरूढेतिचमत्कारविशेषणम् ॥ अतएवचतुर्थभूमिकांतिकंचित्पंचमींभूमिकांप्राप्तोब्रह्मविद्वरइत्युच्यते ॥ नविद्यतेअविद्यातत्कार्यसंसक्तिःसर्वथायस्यामितिव्युत्पत्त्याअसंसक्तिनामिका ॥ १२ ॥ अस्याएवपरिपाकोत्कर्षादुत्तरेद्वेभूमिकेभवतइत्याशयेनाह ॥ भूमिकापंचकेति ॥ वक्ष्यमाणंनामअन्वर्थतयानिर्वक्ति ॥ आभ्यंतराणामिति ॥ १३ ॥ तर्हिकथंदेहयात्रासिद्धिस्तत्राह ॥परप्रयुक्तेनेति ॥ अस्यांचभूमिकायांब्रह्मविद्वरीयानित्याख्यायते ॥ १४ ॥ सप्तमींभूमिकामाह ॥ भूमिषट्केति ॥ परप्रयत्नेनापिभेदस्यानुपलंभतइत्यर्थाद्गम्यते ॥ तुर्यंजाग्रदाद्यवस्थात्रयनिर्मुक्तंशिवमद्वैतंचतुर्थंमन्यंतइतिश्रुत्यातादृशविद्वदनुभवसिद्धत्वेनप्रतिपादितंब्रह्मगच्छतिआत्मतयानुभवत्यखंडितंयस्यामवस्थायांसातुर्यगा ॥ तांतुप्राप्तोब्रह्मविद्वरिष्ठइत्युच्यते ॥ सचब्रह्मविष्णुभृतिषुतुरीयस्तंगच्छतीतितुर्यगा ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहास्मिन्नेवदेहेविद्यते ॥ अतोऽस्याअवस्थायाःपरंविदेहमुक्तिविषयस्तुर्यातीतंब्रह्मैवेतिनभूमिकासुगण्यतइत्यर्थः ॥ १६ ॥ १७ ॥ किंचित्कुर्वंतिषष्ठभूमिकायांनवाकुर्वंतिसप्तमभूमिकायामित्याशयः ॥ १८ ॥ कुर्वंतिवानवेत्युक्तेर्यथेष्टाचारपरत्वाशंकांवारयनूत्वाशयंप्रकटयति ॥ पार्श्वस्थेति ॥ सर्वेषांतत्तद्दाश्रमनिष्ठानामाचारक्रमेणागतमाचारंसदाचारमेवाचरंतिआचरंत्येवेतिद्विविधोपिनियमोत्रविवक्षितः ॥ अक्षतंआसंगेनादूषितम् ॥ अक्षताइतिपाठेफलासक्तिलक्षणक्षतरहिताइत्यर्थः ॥ तथाचनयथेष्टाचरणप्रसक्तिरितिभावः ॥ तथाचाहुः ॥ विदितब्रह्मतत्त्वस्ययथेष्टाचरणंयदि ॥ शुनांतत्त्वविदांचैवकोभेदोऽशुचिभक्षणेइति ॥ १९ ॥ अनासंगव्यवहारेणसुखदुःखानुदयंसदृष्टांतमाह ॥ आत्मारामतयेति ॥ जगत्क्रियाव्यवहारास्तानूजीवन्मुक्तान्नसुखयंति ॥ यथासुसंसुप्तानूगाढनिद्रावशानूरूपेणसौंदर्यातिशयेनआलोक्यंतइतिरूपालोकाःस्त्रियोनसुखयंतित

एषाहिजीवन्मुक्तेषुतुर्यावस्थेहविद्यते॥विदेहमुक्तिविषयस्तुर्यातीतमतःपरम्॥१६॥ येहिराममहाभागाःसप्तमींभूमिकांगताः॥आत्मारामामहात्मानस्तेमहत्पदमागताः॥१७॥ जीवन्मुक्तानसज्जंतिसुखदुःखरसस्थितौ॥ प्रकृतेनार्थकार्याणिकिंचित्कुर्वंतिवानवा॥१८॥ पार्श्वस्थबोधिताःसंतःसर्वाचारक्रमागतम्॥आचारमाचरंत्येवसुप्रबुद्धवदक्षतम्॥१९॥आत्मारामतयातांस्तुसुखयंतिनकाश्चन॥जगत्क्रियाःसुसंसुप्तान्रूपालोकाःस्त्रियोयथा॥२०॥ भूमिकासप्तकंचैतद्धीमतामेवगोचरः॥ नपशुस्थावरादीनांनचम्लेच्छादिचेतसाम्॥२१॥ प्राप्ताज्ञानदशामेतांपशुम्लेच्छादयोपिये॥ सदेहावाप्यदेहावातेमुक्तानात्रसंशयः॥२२॥ ज्ञप्तिर्हिग्रंथिविच्छेदस्तस्मिन्सतिहिमुक्तता॥ मृगतृष्णांबुबुद्ध्यादिशांतिमात्रात्मकस्त्वसौ॥२३॥ येतुमोहात्समुत्तीर्णानप्राप्ताःपावनंपदम्॥ आस्थिताभूमिकास्वासुस्वात्मलाभपरायणाः॥२४॥ सर्वभूमिगताःकेचित्केचिद्द्वित्रैकभूमिकाः॥ भूमिषट्कगताःकेचित्केचित्सप्तैकभूमिकाः॥२५॥

द्वदित्यर्थः ॥ जगत्क्रियासुसंसुप्तानूरूपालोकःस्त्रियोयथेतिपाठेतुयस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरितिभगवदुक्तदिशाजगद्व्यापारेषुस्वप्नवन्मिथ्यात्वदर्शनात्सुप्तप्रायांस्तान्ब्रह्मादिसंपदोपिनसुखयंति ॥ यथास्त्रीरूपालोकोन्याःस्त्रियोनसुखयतितत्ररागाभावात्तद्वदित्यर्थः ॥ २० ॥ म्लेच्छादिवच्चेतोदेहात्मबुद्धिर्येषांतेषांमनुष्यादीनांचेत्यर्थः ॥ २१ ॥ पशवोहनुमत्प्रभृतयः ॥ म्लेच्छाधर्मव्याधादयः ॥ आदिपदादसुराःप्रह्लादकर्कटीप्रभृतयश्चगृह्यंते ॥ २२ ॥ मृगतृष्णांबुबुद्धेरादिपदाच्छुक्तिरूप्यबुद्धेश्चयाशांतिर्बाधःसैवमात्रातुलायस्यतदात्मकस्तत्तुल्यइतियावत् ॥ २३ ॥ यद्यपिद्वितीयादिभूमिषुचतुर्थभूमौवाज्ञानोदयेनाज्ञानावरणभंगान्मोहात्सम्यगुत्तीर्णाएवतथापिप्रबलप्रारब्धप्रयुक्तविक्षेपात्पावनमात्यंतिकमनोनाशोपलक्षितनिरतिशयानंदपूर्णतालक्षणंविदेहकैवल्यंनप्राप्ताइत्यर्थः ॥ २४ ॥ एकस्मिन्नेवजन्मनिक्रमात्सर्वभूमिगताः ॥ एवंसर्वत्र ॥ सप्तैकभूमिकाःसप्तमैकभूमिकाःसनकादयः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूचतुष्टयगाःकेचिदित्येतदन्यस्यपूर्वोक्तस्यैवानुवादःप्रपंचार्थः ॥ २६ ॥ भूम्यंशःपादभूम्यर्द्धभूम्यादिः ॥ २७ ॥ इतिउक्तप्रकारासुभूमिषुचरंतःसंतोदृशाभूमात्मदृष्ट्याग्रहंती तिग्रहाःग्रहातिग्रहाख्याःसांतर्बाह्यकरणतद्विषयाःआयतनंतदाधारभूतंशरीरंचतत्प्रयुक्तस्यतापस्याध्यात्मिकादिभेदभिन्नस्यआवेशेषुबाधलक्षणेष्वात्मांतःप्रवेशनेषुसंस्थिताउ युक्ताःसंतीत्यर्थः ॥ २८ ॥ सेंद्रियमनोजयएवसर्वशत्रुजयादुत्कृष्टःस्वात्मसाम्राज्यमेवसर्वोत्कृष्टाराजतानान्येत्याह ॥ तेहीति ॥ शोभनाःसर्वोत्कृष्टाराजानः ॥ नपूजनादिति नटच् ॥ अत्रअस्यामेदिग्दंतिघटासहितानांसर्वशत्रुभटानांपराजयस्तत्प्रयुक्तसम्रद्धीपराज्यंचतृणायतेतुच्छीभवतीत्यर्थः ॥ २९ ॥ उक्तमेवार्थंस्फुटंवदन्नुपसंहरति ॥ एतास्वि ति ॥ येनेष्टंराजसूयेनयश्चैकःसर्वभूमंडलाधिपतिरन्येषांराज्ञांशासितासंसम्राट् ॥ युवास्यात्साधुयुवाध्यायकः आशिष्ठोदृढिष्ठोबलिष्ठः तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्या त् सएकोमानुषआनंदइतिश्रुत्युक्तलक्षणमानुषानंदसंपन्नइत्यर्थः ॥ विराट्ब्रह्मशरीरः प्रजापतिर्दैवानंदपरमावधिरपियत्रसप्तमभूमौतृणायतेतस्मात्परंविदेहकैवल्यसुखंजगति

भूमित्रयगताःकेचित्केचिदंत्यांभुवंगताः॥ भूचतुष्टयगाःकेचित्केचिद्भूमिद्वयेस्थिताः॥ २६॥ भूम्यंशभाजनाःकेचित्केचित्सार्द्धत्रिभूमि काः॥केचित्सार्द्धचतुर्भूगाःसार्धषड्भूमिकाःपरे ॥ २७॥ विवेकिनोनरालोकेचरंतइतिभूमिषु॥ ग्रहायतनतापस्यदशावेशेषुसंस्थिताः ॥ २८॥ तेहिधीराःसुराजानोदशास्वासुजयंतिये॥ तृणायतेत्रदिग्दंतिघटाभटपराजयः॥ २९॥ येतासुभूमिषुजयंतिहियेमहांतोवंद्या स्तएवहिजितेंद्रियशत्रवस्ते॥ संम्राड्विराडपिचयत्रतृणायतेवैतस्मात्परंजगतितेसमवाप्नुवंति॥ ३०॥ ॥इ०वा०वा०दे०मोक्षोपाये पू०ज्ञानभूमिकोपदेशोनामाष्टादशोत्तरशततमःसर्गः॥ ११८॥ ॥ ५॥ ॥श्रीवसिष्ठउवाच॥ ॥ऊर्मिका संविदाहेमयथाविस्मृत्यहेमताम्॥ विरौतिनाहंहेमेतितथात्माहंतयानया॥१॥ ॥श्रीरामउवाच॥ ॥ऊर्मिकासंविदुदयःकथंहेम्नोय थामुने॥ अहंताचात्मनइतियथावद्ब्रूहिमेप्रभो ॥ २ ॥

इहैवयतस्तेसमवाप्नुवंतीत्यर्थः ॥ ३० ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेउ०अष्टादशोत्तरशततमःसर्गः ॥ ११८ ॥ ॥ ५ ॥ ॥ निरस्यमायिकंरूपंसन्मात्रैकत्वदर्शनम् ॥ भूमिकासुस्थिरीकर्तुंयुक्तिरत्रप्रपंच्यते ॥ १ ॥ तदर्थंपरमात्मनःसहजस्वपूर्णानंदस्वप्रकाशभावविस्मरणेमायिकजीवजगद्भावारोपेणनानाविधदुःखशोकादिप्राप्तौचदृष्टांतमा ह ॥ ऊर्मिकेति ॥ यथाहेमस्वतःसर्वतःकालत्रयेपिस्वर्णैकस्वभावंपरमार्थतोलेशतोप्यस्वर्णशून्यमपिस्वात्मन्येवकल्पितयाऊर्मिकासंविदाअंगुलीयकभ्रांत्यास्वांहेमतांहेमैकर सतांविस्मृत्यअदृष्टावाह्यमलसंपर्कप्रयुक्तकांस्यादिभावकल्पनयाविरौतिरोदिति ॥ अचेतनस्यरोदनायोगात्कांस्योर्मिकादिशब्दाभिलापस्तत्स्वामिरोदनंवातदीयरोदनत्वेनोप चर्यते ॥ तथाआत्माप्यहंतयारोदितीत्यर्थः ॥ १ ॥ यथाशब्दोपिकथमित्यर्थेउत्तरान्वयी ॥ तथाचआत्मनःअहंताचकथंइतिदृष्टांतदार्ष्टांतिकंचयथावदुपपत्तिभिर्ब्रूहिव्यक्तं वर्णयेत्यर्थः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगमापायावुत्पत्तिनाशौसतास्वतःसिद्धेनद्रष्ट्राद्रष्टुंशक्यौअतस्तादृशावेवप्रष्टव्यौत्वयत्यर्थः ॥ अयंभावः ॥ षट्सुभावविकारेषुमध्यमाश्चत्वारःसतएवप्रसिद्धानासतस्तद्वदुत्पत्तिनाशावपिसतएववाच्यौ ॥ नह्यसदुत्पत्तिक्रियांकर्त्तुंनाशक्रियाधारीभवितुंवाशक्नोति ॥ यद्यसदुत्पद्येतनश्येद्वातर्ह्यसद्धर्मावुत्पत्तिनाशावप्यसंतौस्याताम् ॥ नहितौतदाद्रष्टुंशक्यौ ॥ सतोऽसद्भिःसंबंधाभावात् ॥ तस्मात्सदेवहेमब्रह्मवाऊर्मिकाहंतादिवेषेणोत्पद्यतइति ॥३॥ हानोपादानादिक्रियासंबंधोपिसतएवदृष्टोनासतइत्याह ॥ हेमेति ॥ गृहाणमूल्येनक्रीणीहिइतिमूल्येदापितेसोर्मिकेणविक्रेत्रायत्हेमबहुमूल्येनदीयतेतदस्तिसत्यम् ॥ तथाचब्रह्मैवसर्वव्यवहारगोचरोनाणुमात्रमपितदन्यद्व्यवहारेपिनिरूपयितुंशक्यमिति

श्रीवसिष्ठउवाच॥ ॥सतएवागमापायौप्रष्टव्यौनासतःसता ॥ अहंत्वमूर्मिकात्वंचसतीतुनकदाचन ॥ ३ ॥ हेमहेम्न्यूर्मिकांचत्वंगृहाणेत्युदितोयदि ॥ यद्दीयतेसोर्मिकेणतत्तदस्तिनसंशयः॥४॥ ॥श्रीरामउवाच॥ ॥एवंचेत्तत्प्रभोकिंस्यादूर्मिकात्वंतुकीदृशम् ॥ अनयैवार्थनिश्चित्याज्ञास्यामिब्रह्मणोवपुः॥ ५॥ ॥श्रीवसिष्ठउवाच॥ ॥रूपंराघवनीरूपमसतश्चेन्निरूप्यते॥ तद्वंध्यातनयाकारगुणांस्त्वंसमुदाहर॥ ६ ॥ ऊर्मिकात्वंमुधाभ्रांतिर्मायैषासत्स्वरूपिणी॥ रूपंतदेतदेवास्याःप्रेक्षितायन्नदृश्यते ॥ ७॥ मृगतृष्णांभसिद्वींदावहंतारूपकादिषु॥ एतावदेवरूपंयत्प्रेक्ष्यमाणंनलभ्यते॥ ८ ॥ यःशुक्तौरजताकारंप्रेक्षतेरजतस्यसः ॥ नसंप्राप्नोत्यणुमपिकणंक्षणमपिक्वचित्॥ ९ ॥ अपर्यालोकनेनैवसदिवासद्विराजते॥ यथाशुक्तौरजतताजलंमरुमरीचिषु ॥ १० ॥ यन्नास्तितस्यनास्तित्वंप्रेक्ष्यमाणंप्रकाशते॥ अप्रेक्ष्यमाणंस्फुरतिमृगतृष्णास्विवांबुधीः॥ ११ ॥

भावः ॥ ४ ॥ यदिहेमैवक्रयादिसर्वव्यवहारगोचरस्तर्हितदनुभातस्योर्मिकाद्याकारस्यहेमस्वरूपातिरिक्तंकिंस्वरूपंस्यात्कीदृशंकिंप्रकारंवायदूर्मिकादिशब्दैरभिलप्यतइतिप्रश्नार्थः ॥ ५ ॥ अविचारितरमणीयंतत् विचारितेतुनकिंचिदित्याशयेनोत्तरमाह ॥ रूपमिति ॥६॥ यद्यवश्यंरूपंवाच्यंतर्ह्यविचारकालमात्रस्थितिकत्वंमायायारूपमित्याशयेनाह ॥ रूपमिति ॥ प्रेक्षिताविचार्यदृष्टासतीनदृश्यतेतुच्छीभवतीतियत्तत्प्रसिद्धमेतदेवास्यारूपमित्यर्थः ॥ ७ ॥ तथाप्रसिद्धिमेवान्यत्रापिमायिकेदर्शयति ॥ मृगतृष्णेत्यादिना ॥ ८ ॥ ९ ॥ १० ॥ अप्रेक्ष्यमाणंनास्तित्वंस्फुरतिरजतादिभावेनेतिशेषः ॥ ११ ॥

१ यदिहेमयाह्यमितिशेषः ॥ तर्हिहेम्निहेमनिमित्तमूर्मिकांत्वंगृहाणेतिमध्यस्थेनउदितोभवत्यर्थात्क्रेतातत्तद्दासोर्मिकेणार्थाद्विक्रेत्रायद्दीयतेतदस्तिसत्यमित्यन्वयः ॥ उदितेयदीतिसप्तम्यंतपाठेऽर्थात्क्रेतरिमध्यस्थेनइतिउदितेसतिइत्याद्यन्वयः ॥ हेम्नीतिनिमित्तात्कर्मयोगइतिसप्तमी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वसतःसत्कार्यकारितास्थिरताचक्वदृष्टातत्राह ॥ बालानामिति ॥ भ्रांतिप्रयुक्तःसंभ्रमोभयरोदनादिः ॥ १२ ॥ १३ ॥ नवस्तुसत्ताअर्थक्रियाव्यवस्थाहेतुःकिंत्वारोपेअधिष्ठानसत्ताप्रतिभासएवेत्याशयेनाह ॥ नेहेति ॥ सत्यमेवार्थक्रियाकारिमिथ्याभूतमेववाअर्थक्रियाकारीतिनियमोनास्तीत्यर्थः ॥ १४ ॥ इदंचप्राग्बहुशउक्तमेवेतिस्मारयति ॥ सद्वेति ॥ १५ ॥ दृष्टांतंव्युत्पाद्यदार्ष्टांतिकेपितत्साम्यमाह ॥ परमैषैवेत्यादिना ॥ १६ ॥ अभाववस्त्वसदेववस्तुनपरमार्थवस्त्वित्यर्थः ॥ १७ ॥ अवस्तुत्वंब्रह्मातिरिक्तस्यसर्वस्यअथातआदेशोनेतिनेतिसएषनेतिनेत्यात्मातदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यम् नेहनानास्तिकिंचन यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमाइत्याद्यपवादक

असदेवचसत्कार्यकरंभवतिचस्थिरम् ॥ बालानांमरणायैववेतालभ्रांतिसंभ्रमः ॥ १२ ॥ हेमतांवर्जयित्वैकांविद्यतेहेम्निनेतरत् ॥ ऊर्मिकाकटकादित्वंतैलादिसिकतास्विव ॥ १३ ॥ नेहास्तिसत्यंनोमिथ्यायद्यथाप्रतिभाव्यते ॥ तत्तथार्थक्रियाकारिवालयक्षविकारवत् ॥ १४ ॥ सद्भावभवत्वसद्भापिसुरूढंत्हृदयेहियत् ॥ तत्तदर्थक्रियाकारिविषस्येवामृतक्रिया ॥ १५ ॥ परमैषैवसाविद्यामायैषासंस्थितिर्ध्वसौ ॥ असतोनिष्प्रतिष्ठस्ययदहंत्वस्यभावनम् ॥ १६ ॥ हेम्न्यस्तिनोर्मिकादित्वमहंताद्यस्तिनात्मनि ॥ अहंताभाववस्त्वेवंस्वच्छेशांतेसितेपरे ॥ १७ ॥ नसनातनताकाचिन्नचकाचिद्विरिंचिता ॥ नचब्रह्मांडताकाचिन्नचकाचित्सुतादिता ॥ १८ ॥ नलोकांतरताकाचिन्नचस्वर्गादिताक्वचित् ॥ नमेरुतानासुरतानमनस्त्वंनदेहता ॥ १९ ॥ नमहाभूतताकाचिन्नचकारणताक्वचित् ॥ नचत्रिकालकलनानभावाभाववस्तुता ॥ २० ॥ त्वत्ताहंतात्मतातत्तासत्तासत्तानकाचन ॥ नक्वचिद्भेदकलनानभावोनचरंजना ॥ २१ ॥ सर्वंशांतंनिरालंबंजगत्त्वंशाश्वतंशिवम् ॥ अनामयमनाभासमनामकमकारणम् ॥ २२ ॥ नसन्नासन्नमध्यांतंनसर्वंसर्वमेवच ॥ मनोवचोभिरग्राह्यंशून्याच्छून्यंसुखात्सुखम् ॥ २३ ॥ ॥श्रीरामउवाच ॥ ॥ अवबुद्धंसमंब्रह्मसर्वमेवमयाधुना ॥ तथापिभूयःकथयसर्गःकिमिवलोक्यते ॥ २४ ॥

श्रुतिसहस्रसिद्धमित्याशयेनाह ॥ नसनातनेत्यादिना ॥ सर्वकालसंबंधःसनातनतासाचकालातीतेनास्ति ॥ सुताब्रह्मसूनवःप्रजापतयस्तदादिता ॥ १८ ॥ १९ ॥ २० ॥ भावेरागस्तत्कार्यंरंजना ॥ २१ ॥ सर्वंजगत्त्वंजगतःपारमार्थिकंरूपंशांतमधिष्ठानसन्मात्रमित्यर्थः ॥ २२ ॥सतूउत्पत्त्याख्यभावविकारवत् ॥ असतूनाशाख्यभावविकारवत् ॥ मध्यांतंआंतरालिकभावविकारवत् ॥ अथवासन्नन्नष्टं असन्नस्थितं अनयोर्मध्यंउत्पत्तिनाशौअंतौअवधीयस्यतथाभूतम् ॥ २३ ॥ इत्थंनिष्प्रपंचेपरमार्थैकरसेब्रह्मणिबोधितेपितत्रचित्तवृत्तिस्थिरीकरणाशक्तेःपरावृत्तःपुनर्विपरीतभावनाकातरोरामःपृच्छति ॥ अवबुद्धमिति ॥ किमिवलोक्यतइति ॥ ज्ञानेनाज्ञानेनष्टेतन्मूलजगतोपिबाधात्पुनर्भानमनुपपन्नमितिभावः ॥ २४ ॥

---

१ भासतइतिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदित्वयातत्त्वंबुद्धंतर्हिपुनर्जगद्भानंब्रह्मभानमेव ॥ तत्रसकृद्भेदस्यतदाख्यायाश्चनिमित्तापायादेवअसत्वादित्याशयेनवसिष्ठःपरिहरति ॥ परेइति ॥ परंतत्त्वंपरेशांतेस्वस्वभावेए वस्थितंननततःप्रच्युतम् ॥ इत्थंचपूर्णात्मभावात्सर्गस्तदाख्याचइदंतयाइहब्रह्मणिनास्तिकिंतुतत्स्वभावेनैवास्तीत्यर्थः ॥ कदाचनेत्युक्तेस्तादृशस्थितेःकादाचित्कत्वाभावउक्तः ॥ किमिवलोक्यतेइतिकिंदृष्टांतस्यप्रश्नउतनिमित्तस्य ॥ आद्येबाधाद्दग्धीभूतनामरूपस्यब्रह्मस्वरूपेस्थितौदृष्टांतमुक्त्वायस्ततोविशेषस्तमाह ॥ जलमिति ॥ २६ ॥ तस्यस्वप्रका शत्वेदृष्टांतमुक्त्वातत्रापिपूर्ववद्विशेषमाह ॥ भाइति ॥ भाःसूर्यादिज्योतिःक्वचतिदीप्यते ॥ कचनंदीप्तिक्रियाभासांसूर्यादीनांतत्त्वंस्वभावः ॥ अकचनंनिष्क्रियम् ॥ २७ ॥ २८ ॥ द्वितीयेप्याह ॥ ईषदिति ॥ ईषद्विदःअपरिपक्वबोधस्यतव ॥ चेत्यतामिवगच्छतीत्यस्यविशदीकरणंबुध्यतेसर्गइत्येवेति ॥ सचसर्गोज्ञानपरिपाकेशाश्वतंब्रह्मस्वरूपंप्रतिष्ठास्यति ॥ २९ ॥ यतस्तदाअयमज्ञदृष्टोनानाभेदःअत्यंतंनास्ति ॥ यथाअंबरस्याकाशस्यांबरमाकाशांतरंनास्त्यनवस्थापातादतस्तथापरमार्थस्यपरमार्थांतराभावात्सर्गशब्दोब्रह्मण एवसंज्ञेतिविद्धिनिश्चयइत्यर्थः ॥ ३० ॥ तथाचात्यंतिकचित्तविनाशाभावएवतवपुनःसर्गलोकनेहेतुरित्याशयेनाह ॥ चित्तादिति ॥ ३१ ॥ संवेदनंचित्तंतस्योदये ॥ ३२ ॥ अ

श्रीवसिष्ठउवाच ॥ ॥ परेशांतेपरंनामस्थितमित्थमिदंतया ॥ नेहसर्गोनसर्गाख्याकाचिदस्तिकदाचन ॥ २५ ॥ महार्णवांभसीवांबुसं स्थितापरमेश्वरे ॥ जलंद्रवत्वात्स्पंदीवनिस्पंदंपरमंपदम् ॥ २६ ॥ भाःस्वात्मनीवकचतिनकचत्येवतत्पदम् ॥ भासांतत्त्वंहिकचनंपदंत्वक चनंविदुः ॥ २७ ॥ अधऊर्ध्ववर्जयित्वायथाब्धेरुदरेपयः ॥ स्फुरत्येवंपरेचित्त्वादिदंनानेवतत्परम् ॥ २८ ॥ ईषद्विदःस्वयंचित्त्वाच्चेत्यतामि वगच्छति ॥ बुद्ध्यतेसर्गइत्येवसमास्थास्यतिशाश्वतम् ॥ २९ ॥ सर्गस्तुपरमार्थस्यसंज्ञेत्येवंविनिश्चयः ॥ नानास्तिनायमत्यंतमंबरस्यय थांबरम् ॥ ३० ॥ चित्तात्सर्गसमापत्तिरचित्तात्सर्गसंक्षयः ॥ परेपरमसंशांतेहेम्नीवकटकभ्रमः ॥ ३१ ॥ सन्नेवसर्गोसत्यत्वमेतिचित्तश मोदये ॥ असत्सत्तामवाप्नोतिस्वतःसंवेदनोदये ॥ ३२ ॥ संवेदनमहंतावत्सर्गसंभ्रमसंभ्रमः ॥ असंवेदनमाशांतंपरंविद्धिनतज्जडम् ॥ ३३ ॥ नानेवसर्गोनानायंज्ञस्यैकात्मशिवात्मकः ॥ पुंस्त्वकर्मक्रियासेनाम्न्मयीशिल्पिनांयथा ॥ ३४ ॥ इदंपूर्णमनारंभमनंतमनघोद रम् ॥ पूर्णंपूर्णपरापूरैःपूर्णमेवावतिष्ठते ॥ ३५ ॥

हंतावत्अभिमानयुक्तंसंवेदनंचित्तमेवसर्गभ्रमणभ्रांतिः ॥ ३३ ॥ ज्ञानिनामपिव्युत्थानदशायांचित्ताभासोदयेकथंसर्गभानंतदाह ॥ नानेवेति ॥ तत्त्वदृशाअनानाभूतोपिसर्गः प्रातिभासिकोनानेवभासतइतिशेषः ॥ यथाशिल्पिनांपुंस्त्वंपुरुषचातुरीतत्कर्मणाक्रियानिष्पत्तिर्यस्यास्तथाविधाम्न्मयीसेनावस्तुतोमृदपिसेनेवभासतेतद्वदित्यर्थः ॥ अथवा मृन्मयीपुरुषाद्याकारासेनापुंस्त्वकर्मक्रियायुद्धादिपुरुषार्थकारिणीवभातितद्वदित्यर्थः ॥ ३४ ॥ तेषांपारमार्थिकदृष्टौतुइदंजगत्पूर्णंब्रह्मैवावतिष्ठतेइत्यत्र पूर्णमदःपूर्णमिदंपूर्णा त्पूर्णमुदच्यते ॥ पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यतइतिश्रुतिमर्थतोदर्शयति ॥ इदमिति ॥ अनारंभमनुत्पत्तिकम् ॥ अनंतंनाशरहितम् ॥ अतएवविकारांतरदोषरहितमुदरंम ध्यंयस्यतथाभूतम् ॥ यतःपूर्णस्यैवपरमात्मनआपूरैःसर्वतोव्याप्तिभिःपूर्णमतःपूर्णसत्पूर्णमेवावतिष्ठतेनाणुमात्रमप्यपूर्णतांयातीत्यर्थः ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदेवदृढीकारायपुनराह ॥ यदयमिति ॥ सामान्येनपुंसकम् ॥ ३६ ॥ ईशेब्रह्मणि ॥ तस्यदूरत्वस्यअतस्यसामीप्यस्यवाक्रमःपरिपाटीत्यर्थः ॥ ३७ ॥ एवंचसतएवासद्विश्वाकारेणभानात्तत्त्वदृशासदेवाभ्युदितमतत्त्वदृशाअसदेवाभ्युदितम् ॥ यतोभेदप्रतिभासात्तत्सदाभासमसद्भेददर्शनेत्वसन्मयमित्यर्थः ॥ ३८ ॥ ३९ ॥ ऐंद्रजालिकैःपरमोहनायाभिमंत्रितमौषधचूर्णमायाचूर्णम् ॥ सारःसत्योऽसारोमृतश्च ॥ ४० ॥ सवासनाविद्यानाशोयावत्सप्तमभूमिकाधिरोहणपर्यंतोनसंपन्नस्तावद्विक्षेपदुःखंतत्त्वज्ञानामपिभासतएवातोजीवन्मुक्तिसुखार्थिभिर्भूमिकाभ्यासःकार्यइत्याशयेनोपसंहरति ॥ यावदिति ॥ ४१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेउत्पत्तिप्रकरणेएकोनविंशत्युत्तरशततमःसर्गः

यदयंलक्ष्यतेसर्गस्तद्ब्रह्मब्रह्मणिस्थितम् ॥ नभोनभसिविश्रांतंशांतंशांतेशिवेशिवम् ॥ ३६ ॥ मुकुरप्रतिबिंबस्थेनगरेनवयोजने ॥ यथादूरमदूरंचतथेशेतदतत्क्रमः ॥ ३७ ॥ असदभ्युदितंविश्वंसदप्यभ्युदितंसदा ॥ प्रतिभासात्सदाभासमवस्तुत्वादसन्मयम् ॥ ३८ ॥ आदर्शनगराकारेमृगतृष्णांबुभास्वरे ॥ द्विचंद्रविभ्रमाभासेसर्गेस्मिन्कैवसत्यता ॥ ३९ ॥ मायाचूर्णपरिक्षेपाद्यथाव्योम्निपुरभ्रमः ॥ तथासंविदिसंसारःसारोसारश्चभासते ॥ ४० ॥ यावद्विचारदहनेनसमूलदाहंदग्धानजर्जरलतेवबलादविद्या ॥ शाखाप्रतानगहनानिबहूनितावन्नानाविधानिसुखदुःखवनानिसूते ॥ ४१ ॥ ॥ इ०वा०वा०दे०मो०पू०हेमोर्म्युपदेशोनामैकोनविंशत्युत्तरशततमःसर्गः ॥ ११९ ॥

श्रीवसिष्ठउवाच ॥ ॥ हेमोर्मिकादिवन्मिथ्याकथितायाःक्षयोन्मुखम् ॥ त्वंमहत्त्वमविद्यायाःशृणुराघवकीदृशम् ॥ १ ॥ लवणोसौमहीपालस्तथादृष्ट्वातदाभ्रमम् ॥ द्वितीयेदिवसेगंतुंप्रवृत्तस्तांमहाटवीम् ॥ २ ॥ यत्रदृष्टंमयादुःखमरण्यानींस्मरामिताम् ॥ चित्तादर्शगतांविंध्यात्कदाचिल्लभ्यतेहिसा ॥ ३ ॥ इतिनिश्चित्यसचिवैःप्रययौदक्षिणापथम् ॥ पुनर्दिग्विजयायेवप्राप्यविंध्यमहीधरम् ॥ ४ ॥ पूर्वदक्षिणपाश्चात्यमहार्णवतटस्थलीम् ॥ बभ्रामकौतुकात्सर्वांव्योमवीथीमिवोष्णगुः ॥ ५ ॥ अथैकस्मिन्प्रदेशेतांचिंतामिवपुरोगताम् ॥ ददर्शोग्रामरण्यानींपरलोकमहीमिव ॥ ६ ॥ सतत्रविहरंस्तांस्तान्वृत्तांतान्सकलानथ ॥ दृष्टवान्पृष्टवांश्चैवज्ञातवांश्चविसिस्मिये ॥ ७ ॥

॥ ११९ ॥ ॥ ७ ॥ ॥ लवणेनपुनर्गत्वाप्राग्दृष्टंविंध्यपक्कणम् ॥ चंडालीश्वश्रुसंवादःकृतोत्रप्रतिपाद्यते ॥ १ ॥ हेमोर्मिकानिदर्शनेनवर्णितंविश्वस्यब्रह्मविवर्त्तत्वंतत्परीक्षितवतोलवणस्यानुभवसिद्धमितित्वयापिविमृश्यद्रष्टव्यमित्याशयेनाह ॥ हेमोर्मिकेति ॥ मिथ्याशब्दोत्तरमितिशब्दोध्याहार्यः ॥ विमर्शमात्रेणक्षयोन्मुखंमहत्त्वमाश्चर्यभूतत्वम् ॥ १ ॥ असौप्राग्वर्णितोलवणः ॥ तामैंद्रजालिकोपदर्शिताम् ॥ २ ॥ चित्तमेवादर्शोदर्पणस्तद्गताम् ॥ विंध्यादितिल्यब्लोपेकर्मण्यधिकरणेवापंचमी ॥ विंध्यंप्राप्यविंध्येगत्वावेत्यर्थः ॥ ३ ॥ ४ ॥ उष्णगुःसूर्यः ॥ ५ ॥ अरण्यानींमहारण्यम् ॥ अरण्यान्महत्त्वेआनुक् ॥ ६ ॥ तांस्तान्प्रागनुभूतानित्यर्थः ॥ ७ ॥ ॥२१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संभ्रमीकुतूहली ॥ ८ ॥ ९ ॥ कुटीरकाः अल्पाः कुटीः ॥ कुटीशमीशुंडाभ्योरःस्वार्थेकन् ॥ १० ॥ अकांडेदुर्भिक्षेपरिभ्रष्टान्दुर्दशाक्रांतान् ॥ अनुव्रजानृस्वानुगान् ॥ एकलान्बंधुवर्जितान् ॥ ११ ॥ तत्रत्यंवृत्तांतंवर्णयति ॥ अन्यास्वित्यादिना ॥ वृद्धाअस्यश्वश्रूः ॥ आर्त्तानांस्वबंधूनामार्तिभिर्युक्तास्वन्यासुवृद्धासुसखीषुअकालेदुष्कालेकांतारेषुविशीर्णानांस्वबंधूनांदुःखानिवर्णयंतीसतीइदंवक्ष्यमाणप्रकारंपरिरोदितीतिपरेणान्वयः ॥ १२ ॥ तामेवविशिनष्टि ॥ वृद्धेति ॥ इतरवृद्धापेक्षयाप्रकर्षेणवृद्धान्युज्वलानिनेत्रबाष्पाणियस्याः ॥ अवग्रहोनावृष्टिस्तल्लक्षणेनोग्राशनिनादग्धप्रायेदेशे ॥ १३ ॥ रोदनप्रकारमेवाह ॥ हापुत्रीत्यादिना ॥ वर्मणिस्वकोशेअसिनेवप्रवेशंकृत्वाभवतास्थितेनराज्ञा

तान्परिज्ञातवांश्चासीद्व्याधान्पुल्कसजान्पुनः ॥ विस्मयाकुलयाबुद्ध्याभूयोबभ्रामसंभ्रमी ॥ ८ ॥ अथप्राप्यमहाटव्यांपर्यंतेधूमधूसरे ॥ तमेवग्रामकंयस्मिन्सोभवत्पुष्टपुल्कसः ॥ ९ ॥ तत्रापश्यज्जनांस्तांस्तांस्ताःस्त्रियस्ताःकुटीरकाः ॥ नानाकारान्जनाधारांस्तांस्तांश्चवसुधातटान् ॥ १० ॥ तांश्चाकांडपरिभ्रष्टांस्तान्वृक्षांस्तांस्त्वनुव्रजान् ॥ तांस्तथैवसमुद्देशांस्तान्व्याधानेकलान्सुतान् ॥ ११ ॥ अन्यासुवृद्धासुसबाष्पनेत्रास्वार्तार्त्तियुक्तासुचवर्णयंती ॥ अकालकांतारविशीर्णबंधुदुःखान्यसंख्यानिसखीषुवृद्धा ॥ १२ ॥ वृद्धाप्रवृद्धोज्वलनेत्रबाष्पाकृष्णंवताशुष्ककुचाकृशांगी ॥ अवग्रहोग्राशनिदग्धदेशेतत्रार्तनादापरिरोदितीदम् ॥ १३ ॥ हापुत्रिपुत्रावृतसर्वगात्रेदिनत्रयाभोजनजर्जरांगी ॥ कृत्वासिनावर्मणिजीर्णदेहाःकथंक्वमुक्ताभवतासवस्ते ॥ १४ ॥ तालीदलालंबनमंबुदार्द्रौदंतांतरस्थारुणसत्फलस्य ॥ स्मरामिगुंजाफलदामभर्तुःपुरस्थमुद्रामरहासिनस्ते ॥ १५ ॥

अतएवप्राणप्रियास्तेयूयंदुर्भिक्षजीर्णदेहाःकथंमुक्तास्त्यक्ताःक्ववामुक्ताइतिपुत्रैःसहबहुत्वोक्तिः ॥ अथवापूर्ववदसिनाभवताराज्ञाजीर्णदेहाजर्जरशरीराअसवःस्वप्राणाःकथंमुक्ताःक्वमुक्ताइत्यर्थः ॥ निर्विसर्गपाठेतुजीर्णदेहात्वंकथंमुक्ताअसवश्चतेकथंमुक्ताइतियोज्यम् ॥ १४ ॥ इदानींराज्ञःकुटुंबभरणायकृतंसाहसकृत्यंस्मरंत्याह ॥ तालीति ॥ अंबुदवदुन्नतेअद्रौतालवृक्षमारुह्यफलंगृहीत्वाअवतरणकालेकरद्वयस्यापिव्याप्तत्वात्फलधारणाशक्तेर्दंतांतरस्थंदंतावष्टब्धंअरुणंसत्परिपक्वंफलंयस्यतथाविधस्यअतएवपुरस्थमुद्रयातत्कालोपस्थितवेषेणअमरंमरणवर्जितंहनूमंतंहासिनःहसितुंशीलस्यतेतवदैवात्स्खलनेतालीदलस्यसन्निहितत्तालांतरशाखायाआलंबनंसाहसम् ॥ तलालंबनमितिपाठेतलेमूलेआलंबनमवतरणंसाहसंस्मरामीत्यर्थः ॥ १५ ॥

१ कंथावृतेतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदंबजंबीरवृक्षाणांलवंगगुंजावल्लीनांचकुंजस्यांतरंतःप्रदेशेनिलीयचरतस्तरक्षोर्व्याघ्रजातिभेदस्यभयंकराणिभयजनकानिपुत्रस्यपुत्राप्रियतमस्यजामातुःउद्यतिनाउड्डयने
नवल्गितानितद्वधार्थंगमनानि ॥ १६ ॥ इदानींस्वपुत्र्यांसकामस्यतस्यमुखशोभांस्मृत्वावर्णयति ॥ नतानीति ॥ पानादिकालेअन्यस्याःस्वप्रेयस्याआस्यात्गतंप्रीत्याप्राप्तमा
मिषंमांसशकलंयेननतथाविधस्यसुतस्यअनुकंप्यस्यतेतच्चर्वणकालेतमालसदृशश्मश्रुभिर्नीलेचिबुकैकदेशेयानिशोभायुक्तानिलसितानिविलासाःसंतितानिइहजगतिविलासि
निकामस्यमन्मथस्यमुखेसंपूर्णेपिनसंतीत्यर्थः ॥ १७ ॥ इदानींभर्त्रासहपुत्र्यामरणंसंभावयंत्याह ॥ सुतेति ॥ यस्याःयमुनावर्णेनसमानासाममसुतातेनभर्त्रासहयमेनअपनी
तानूनमित्यर्थः ॥ वरेणबलीयसा ॥ १८ ॥ पर्णान्येवअंबरादिवस्त्रवत्परिधानादीनियस्याः ॥ बादराणिबदरबीजानिजंबूनितद्बीजानीववादंतायस्याः ॥ १९ ॥ २० ॥ विहितः

कदंबजंबीरलवंगगुंजाकुंजांतरंतस्तुचरत्तरक्षोः॥ पश्यामिपुत्रस्यकदानुभूयोभयंकराण्युद्यतिवल्गितानि॥ १६॥ नतानिकामस्यवि
लासिनीहमुखेपिशोभालसितानिसंति॥ तमालनीलेचिबुकैकदेशेसुतस्यचान्यास्यगतामिषस्य॥ १७॥ सुतापनीतासहतेनभर्त्रायमे
नयस्यायमुनासमाना ॥ तमालवल्लीसहपुष्पगुच्छासमीरणेनेववनेवरेण ॥ १८॥ हापुत्रिगुंजाफलदामहारेसमुन्नताभोगपयोधरां
गी॥ वातोल्लसत्कज्जललोलवर्णपर्णांबरेबादरजंबुदंते ॥ १९॥ हाराजपुत्रेंदुसमानकांतसंत्यज्यशुद्धांतविलासिनीस्ताः॥ रतिंप्रयातो
सिममात्मजायांनसापितेसुस्थिरतामुपेता ॥ २० ॥ संसारनद्याःसुतरंगभंगैःक्रियाविलासैर्विहितोपहासैः ॥ किंनामतुच्छंनकृतंनृपे
शोयद्योजितःपुष्कसकन्यकायाम् ॥ २१ ॥ सात्रस्तसारंगसमाननेत्रासदृप्तशार्दूलसमानवीर्यः॥ उभौगतावेकपदेननाशमाशासहा
र्थेनयथामहेहा॥२२॥ मृतेश्वराश्वस्तनिजात्मजास्मिदुर्देशयातास्मिचदुर्गतास्मि॥ दुर्ज्जातिजातास्मिमहापदेस्मिसाक्षाद्भयंभोस्मि
महापदस्मि॥ २३॥ नीचावमानप्रभवस्यमन्योःक्षुधाप्रपन्नस्यकलत्रकस्य॥ शोकस्यवृत्तावनिवार्यवृत्तेर्नार्यस्म्यनेकायतनंविनाथा
॥ २४॥ दैवोपतप्तस्यविबांधवस्यमूढस्यरूढस्यमहाधिभूमौ॥ यत्प्राणनंयन्मरणंमहापद्यस्यात्मनिर्जीवितमुत्तमंतत्॥ २५॥

उचितःउपहासोयेभ्यस्तथाविधैःक्रियाविलासैःकर्मपरिपाकैः ॥ सुतरंगभंगैरितिव्यस्तरूपकम् ॥ किंनामतुच्छंनिद्यंफलंनकृतम् ॥ तदेवाह ॥ नृपेशइति ॥ २१ ॥ एकपदेनयुग
पत्यथामहेहाबहुमनोरथयुक्ताआशाअर्थेनधनेनसहनाशंगच्छतिभाग्यविपर्ययेतद्वदित्यर्थः ॥ २२ ॥ इदानींस्वात्मानमनुशोचंत्याह ॥ मृतेश्वरेति ॥ आशुअस्तनिजात्मजा
मृतस्वपुत्री ॥ दुर्गतादरिद्रास्मि ॥ महतिअपदेविषमस्थानेअस्मि ॥ किंचभोसख्यःसाक्षाद्भयमेवाहमस्मि ॥ महापदेवाहमस्मीत्यतिशयद्योतनायाभेदारोपः ॥ २३ ॥ विनाथा
अहंनीचावमानप्रभवस्यमन्योःकोपस्यक्षुधयाप्रपन्नस्यकलत्रकस्यपोष्यवर्गस्यवृत्तौआहारविषयेअनिवार्यवृत्तेःशोकस्यचेत्याद्यनेकेषामायतनंगृहंनारीरूपंधात्रानिर्मिता
स्मीतिशेषः ॥ २४ ॥ इदानींस्वसदृशंजनमन्यमपिनिंदंत्याह ॥ दैवेति ॥ महत्यांआधिर्मानसदुःखंतल्लक्षणायांभूमौरूढस्यप्रादुर्भूतस्यईदृशस्ययस्यजनस्ययत्प्राणनंजीवनंयन्म
रणंयाचमहापत्ततःआत्मनिर्जीवितंस्वतोजीवशून्यंपाषाणादिउत्तमंश्रेष्ठमित्यर्थः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनैः स्वजनैर्विहीनस्यकुदेशेवृत्तिःस्थितिर्यस्यतथाविधस्यपुंसः ॥ विशेषणेपुंस्पर्वतसाधारणे ॥ २६ ॥ लपंतींविलपंतीम् ॥ स्वकलत्रवृद्धांपुल्कसीभूतस्वपोष्येषुवृद्धांश्वश्रूंदासीभिराश्वास्येतिसाक्षादसंभाष्यत्वद्योतनाय ॥ २७ ॥ २८ ॥ दैवयोगाद्भाग्यवशात् ॥ दैववशेनदुरदृष्टवशेन ॥ अयंशुभावहंविधिंप्राप्येतिशेषः ॥ विशीर्णंविशीर्णमुखपिधानं मधुकुंभंकरभीगर्दभीउष्ट्रीवाआपप्राप्तवती ॥ २९ ॥ तुंबीलताअलाबूवल्ली ॥ ३० ॥ ॥ इतिश्रीवासिष्ठ० तात्पर्यप्रकाशेउ० विंशत्युत्तरशततमःसर्गः ॥ १२० ॥ ॥ ७ ॥

जनैर्विहीनस्यकुदेशवृत्तेर्दुःखान्यनंतानिसमुल्लसंति ॥ सहस्रशाखारससंकुलानितृणानिवर्षास्विवपर्वतस्य ॥ २६ ॥ एवंलपंतींस्वकलत्रवृद्धांदासीभिराश्वास्यनृपःस्रियंताम् ॥ पप्रच्छकिंवृत्तमिहैवकाचकातेसुताकश्चसुतस्तवेति ॥ २७ ॥ उवाचसाबाष्पविलोचनाथग्रामस्त्वयंपुष्कसघोषनामा ॥ इहाभवत्पुष्कसकःपतिर्मेबभूवतस्येंदुसमासुतैका ॥ २८ ॥ सादैवयोगात्पतिमिंदुतुल्यमिहागतंदैववशेनभूपम् ॥ अयंविशीर्णमधुकुंभमापवनेवराकीकरभीयथैका ॥ २९ ॥ सातेनसार्द्धंसुचिरंसुखानिभुक्त्वाप्रसूतातनयाःसुतांश्च ॥ वृद्धिंगताकाननकोटरेस्मिंस्तुंबीलतापादपसंश्रितेव ॥ ३० ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषू० चंडालीशोचनंनामविंशत्युत्तरशततमःसर्गः ॥ १२० ॥ ॥ ७ ॥ ॥ चंडाल्युवाच ॥ ॥ केनचित्त्वथकालेनग्रामकेस्मिन्जनेश्वर ॥ अवृष्टिर्दुःखमभवद्भीषणंभग्नमानवम् ॥ १ ॥ महतानेनदुःखेनसर्वेतेग्रामकाजनाः ॥ विनिर्गत्यगतादूरंसर्वेपंचत्वमागताः ॥ २ ॥ तेनेमादुःखभागिन्यःशून्यावयमिहप्रभो ॥ सौम्यशोचामसद्बाष्पमाचांतेक्षणधारया ॥ ३ ॥ इत्याकर्ण्यांगनावक्त्राद्राजाविस्मयमागतः ॥ मंत्रिणांमुखमालोक्यचित्रार्पितइवाभवत् ॥ ४ ॥ भूयोविचारयामासतदाश्चर्यमनुत्तमम् ॥ भूयोभूयोथपप्रच्छबभूवाश्चर्यवानिति ॥ ५ ॥ तेषांसमुचितैर्दानसन्मानैर्दुःखसंक्षयम् ॥ कृत्वाकरुणयाविष्टोदृष्टलोकपरावरः ॥ ६ ॥ स्थित्वातत्रचिरंकालंविमृश्यनियतेर्गतीः ॥ आजगामगृहंपौरैर्वंदितःप्रविवेशह ॥ ७ ॥ प्रातस्तत्रसभास्थानेमामपृच्छदसौनृपः ॥ कथमेवंमुनेस्वप्नःप्रत्यक्षमितिविस्मितः ॥ ८ ॥

तच्छ्रुत्वाविस्मितस्यात्रलवणस्यगृहागमे ॥ विनिर्णयोवसिष्ठोक्त्यारामस्याप्यत्रकीर्त्यते ॥ १ ॥ अवृष्टिप्रयुक्तंदुर्भिक्षदुःखम् ॥ भग्नामानवायेनतत् ॥ १ ॥ पंचत्वंमरणम् ॥ २ ॥ तेनबंधुमरणेनदुर्भिक्षेणचसद्बाष्पंसबाष्पंआचांतयेवस्रवंत्याईक्षणधारयाअस्रधारया ॥ सद्बाष्पाइतिपाठेवयमित्यस्यविशेषणम् ॥ ३ ॥ ४ ॥ इतिशब्दःप्रश्नप्रकारबाहुल्यद्योतकः ॥ ५ ॥ तेषांपक्कणजनानाम् ॥ ६ ॥ नियतेर्दैवस्य ॥ ७ ॥ प्रत्यक्षंदृष्टइतिशेषः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतादृशःप्रश्नोमयायथावस्तुवस्तुयाथार्थ्यंतद्भावेनउक्तःसमाहितः ॥ दिवःअंतरिक्षात् ॥ ९ ॥ १० ॥ सत्यत्वंजाग्रत्कालानुभवयोग्यताम् ॥ भ्रमोदारइवैषोर्थइतिपाठेनमेगल तीत्येतदुत्तरंसंशयपदमध्याहार्यम् ॥ संशयोभगवन्सोयमितिपाठेतुस्पष्टम् ॥ ११ ॥ संभवमेवोपपादयति ॥ घटेष्वित्यादिना ॥ १२ ॥ श्रेष्ठासुखनिद्राप्रयातायामिनीरात्रिरि व ॥ १३ ॥ १४ ॥ सुस्थितंस्थिरम् ॥ भ्रमेभ्रमणे ॥ चित्तशब्देनतद्दृश्यंलक्ष्यते ॥ १५ ॥ १६ ॥ अनंतताअसंख्येयता ॥ १७ ॥ १८ ॥ आत्मानंस्वंएडकंमेषम् ॥ १९ ॥

यथावस्तुतयातस्यततउक्तःसतादृशः॥ संशयोत्थदयान्नुन्नोवातेनेवांबुदोदिवः॥ ९॥ इत्येवंराघवाविद्यामहतीभ्रमदायिनी॥ असत्स त्तांनयत्याशुसच्चासत्तांनयत्यलम्॥१०॥ ॥श्रीरामउवाच॥ ॥कथमेवंवदब्रह्मन्स्वप्नःसत्यत्वमागतः॥भ्रमोदारइवैषोर्थोनमेगलति चेतसि॥११॥ ॥श्रीवसिष्ठउवाच॥ ॥सर्वमेतदविद्यायांसंभवत्येवराघव॥ घटेषुपटतादृशास्वप्नसंभ्रमितादिषु॥१२॥ दूरंनिकटवद्भा तिमुकुरेंतरिवाचलः॥ चिरंशीघ्रत्वमायातिपुनःश्रेष्ठेवयामिनी॥ १३॥ असंभवच्चभवतिस्वप्नेस्वमरणंयथा॥ असच्चसदिवाभातिस्वप्ने ष्विवनभोगतिः ॥ १४॥ सुस्थितंसुष्ठुचलतिभ्रमेभूपरिवर्त्तवत् ॥ अचलंचलतामेतिमदविक्षुब्धचित्तवत्॥ १५॥ वासनावलितंचेतो यद्यथाभावयत्यलम् ॥ तत्तथानुभवत्याशुनतदस्तिनवाप्यसत् ॥ १६॥ यदैवाभ्युदिताविद्यात्वहंत्वादिमयीमुधा॥ तदैवानादिमध्यां ताभ्रमस्यानंततोदिता॥ १७॥ प्रतिभासवशादेवसर्वोविपरिवर्त्तते ॥ क्षणःकल्पत्वमायातिकल्पश्चभवतिक्षणः॥ १८॥ विपर्यस्तम तिर्जंतुःपश्यत्यात्मानमेडकम्॥ बिभर्तिसिंहतामेडोवासनावशतःस्वयम्॥ १९॥ विषमभ्रमदाविद्यामोहाहंतादयःसमाः॥ सर्वेचित्त विपर्यासफलसंपत्तिहेतुतः॥ २०॥ काकतालीयवच्चेतोवासनावशतःस्वतः॥ संवदंतिमहारंभाव्यवहाराःपरस्परम्॥ २१॥ वृत्तंप्राक्प क्कणेराज्ञःकस्यचिल्लवणस्ययत् ॥ प्रतिभातंतदेतस्यसद्वासद्वामनोगतम् ॥ २२॥ विस्मरत्यपिविस्तीर्णाकृतांचेतःक्रियांयथा॥ तथाकृ तामप्यकृतामितिस्मरतिनिश्चितम्॥ २३ ॥

॥२०॥ तथाचकल्पितत्वाविशेषेपिसंवादविसंवादाभ्यामेवलोकेसत्यत्वमिथ्यात्वव्यवहारोनपरमार्थविमर्शेनेत्याशयेनाह ॥ काकतालीयवदिति ॥२१॥ तर्हिलवणव्यवहारेक यारीत्यासंवादस्तमाह॥ वृत्तमिति॥पक्कणेप्राक्कस्यचिद्यद्वृत्तंचांडालीविवाहादितल्लवणस्यमनोगतंप्रतिभातमितिसंवादभ्रमइत्यर्थः॥२२॥अनुभूतविस्मृतिवदननुभूतस्मृतिरपिनदो षायेत्याशयेनाह॥विस्मरतीति॥ यद्यपिलवणस्यभ्रांतावनुभवएवनस्मृतिस्तथाप्यनुभवस्मृत्याद्यवांतरवैलक्षण्यमपिकल्पनामात्रत्वान्नविमर्शक्षममितिसूचनायेत्थमुक्तम्॥२३॥

१ सदिवोदेतीतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२४॥ प्रतिभाससंवादयोःपूर्वापरभावोपिकल्पनामात्रत्वान्नव्यवस्थितइत्याशयेनाह ॥ विंध्येतिद्वाभ्याम् ॥ तस्यलवणस्य ॥२५॥२६॥ प्रतिभाभेदकल्पनमपितथाएकत्रजातायाएवोभयत्रभानसंभवादित्याशयेनाह ॥ लावणीति ॥ लवणस्येयंलावणी॥उभयत्रआरूढेतिच्छेदः ॥२७॥ प्रतिभातद्विषययोःसंवादेदृष्टांतमाह॥यथेति ॥ बहूनांकवीनांमानसोत्प्रेक्षारचितकाव्यार्थप्रतिपादकंवचनंकदाचित्सदृशंसच्छब्दतोर्थतश्चसंवादिभवतितथालवणपुल्कसभ्रांतिरूपेस्वप्नेपिभवतीत्यर्थः ॥ २८ ॥ तर्हिकिंसाव्यवहारगतिरत्यंतासतीनेत्याह ॥ व्यवहारेति ॥ अधिष्ठानचित्सत्तयैवसर्ववस्तुसत्तानस्वातंत्र्येणेत्याह ॥ सत्तेति ॥ २९ ॥ इवार्थेवाशब्दः ॥ संवेदनसत्तैवभूतभव्यभविष्यत्प्रपंचगतासतीसंवेदनादितरेवभातिजलेवीचिरिवबीजेतरुरिवचेत्यर्थः ॥ ३० ॥ तस्याःसंवेदनेतरसत्तायाः ॥ सत्त्वदृशासंवेदनात्सत्वंतथाअसंवित्तेस्त्वसन्मयमिति ॥ तत्सत्तासत्तेभ्रांतिसंवेदनाधीनेइ

तथानभुक्तवानस्मिभुक्तवानितिचेतसि॥ स्वप्नेदेशांतरगमेप्राकृतोप्यवबुद्ध्यते ॥ २४॥ विंध्यपुष्कससुग्रामेव्यवहारोयमीदृशः॥ प्रतिभासागतस्तस्यस्वप्नेपूर्वकथायथा ॥ २५ ॥ अथवालवणेनाशुदृष्टोयःस्वप्नविभ्रमः॥ सएवसंविदंप्राप्तोविंध्यपुष्कसचेतसि॥ २६ ॥ लावणीप्रतिभारूढाविंध्यपुष्कसचेतसि॥ विंध्यपुष्कससंविद्वारूढापार्थिवचेतसि॥ २७॥ यथाबहूनांसदृशंवचनंनाममानसम्॥ तथास्वप्नेपिभवतिकालोदेशःक्रियापिच॥ २८॥ व्यवहारगतेस्तस्याःसत्तास्तिप्रतिभासतः॥ सत्तासर्वपदार्थानांनान्यासंवेदनादृते॥ २९॥ संवेदनेतराभातिवीचिर्वाजलसंगतिः ॥ भूतभव्यभविष्यस्थातरुबीजेतरुर्यथा॥ ३०॥ तस्याःसत्त्वमसत्त्वंचनसन्नासदितिस्थितम्॥ सत्सदेवहिसंवित्तेरसंवित्तेरसन्मयम्॥३१॥ नाविद्याविद्यतेकिंचित्तैलादिसिकतास्विव॥ हेम्नःकिंकटकादन्यत्पदंस्याद्धेमतांविना॥३२ अविद्यात्मतत्त्वस्यसंबंधोनोपपद्यते॥ संबंधःसदृशानांचयःस्फुटःस्वानुभूतितः ॥ ३३॥ जतुकाष्ठादिसंबंधोयःसमासमयोगतः॥ नान्योन्यानुभवायासौतदेकस्पंदमात्रकम्॥ ३४॥ परमार्थमयंसर्वंयथातेनोपलादयः॥ चितासमभिचेत्यंतेसंबंधवशतःसमाः॥ ३५॥ यदाचिन्मात्रसन्मात्रमयाःसर्वंजगद्गताः॥ भावास्तदाविभांत्येतेमिथःस्वानुभवस्थितेः॥ ३६॥

त्यर्थः ॥ ३१ ॥ भ्रांतिगोचरस्यचाविद्यामात्रत्वादसत्त्वमेवफलितमित्याशयेनाह ॥ नेति ॥ पदंवस्तुस्यात्किंनेत्यर्थः ॥ ३२ ॥ वस्तुसंबंधाद्वस्तुकुतोनस्यात्तत्राह ॥ अविद्ययेति ॥ ३३ ॥ पार्थिवत्वद्रवत्वाभ्यांसमासमयोगतःयोजतुकाष्ठादिसंबंधःअसौअसदृशयोरन्योन्ययोःसंबंधोदाहरणायनयोग्योयतस्तदुभयतस्तस्याअविद्यायाएकस्याएवस्पंदोविलासस्तन्मात्रमित्यर्थः ॥ ३४ ॥ यदितुचिन्मयमेवाभ्युपगम्येततर्हिसमैस्तैश्चितःसंबंधउपपद्यतइत्याह ॥ परमार्थमयमिति ॥ यथायेनप्रकारेणपरमार्थमयास्तेनहेतुनाचितासमाइतिसंबंधवशतश्चेत्यंतेचिताप्रकाश्यंतेइतिभवेदित्यर्थः ॥ ३५ ॥ तस्मिन्पक्षेपिदोषमाह ॥ यदेति ॥ तदास्वानुभवस्थितेःस्वप्रकाशताबलादेवविभांतिनचिदंतरसंबंधबलात् ॥ दीपस्यस्वप्रथायांदीपांतरसंबंधापेक्षाभावादित्यर्थः ॥ ३६ ॥

---

१ संगतइतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवकल्पद्वयंश्लोकद्वयेनस्फुटंपुनराह ॥ नसंभवतीति ॥ ३७ ॥ द्वितीयकल्पेअणुमात्रस्याप्यचिदंशस्यभेदकस्याभावादखंडब्रह्मस्वप्रकाशतैवफलितेत्याशयेनक्षणाद्वत्वैकतामलमित्युक्तम् ॥ ३८ ॥ योमूढानांचेतनस्यचिच्चेत्यचितितारूपेणदृश्ययात्रिपुट्याउदितत्वानुभवःसनचिज्जडयोरभेदसंबंधमादायोपपादयितुंशक्यइत्याशयेनाह ॥ चिदिति ॥ ३९ ॥ नापिभेदसंबंधमादायोपपादयितुंशक्यतइत्याह ॥ चिज्जडाविति ॥ एकत्रएकस्मिंस्त्रिपुटीपटीचित्रे ॥ नापिचिन्मयानांचितासंबंधइतिपक्षमादायाप्युपपादयितुंशक्यतइत्याह ॥ चिन्मयत्वादिति ॥ सादृश्याच्चिदालंभसंभवेपिभेदकाभावाद्द्वैयत्वासिद्धेर्नदृश्यवेदनांशोपपत्तिरित्यर्थः ॥ ४० ॥ ननुजडत्वेनसाम्येपियथादारुपाषाणमृदामेकगृहघटकत्वेनयोगोयथावाऽऽप्यत्वेनसाजात्येपिजिह्वारसयोर्योगस्तथाचित्वेनसाम्येपिदृशोदृश्ययोगोस्तुतत्राह ॥ दार्विति ॥ दार्वादिजडपदार्थोगृहादिपदार्थभावेनपरिणामीअनुभूयतेनतुचिदित्यर्थः ॥ ४१ ॥ सजातीयाभ्यांजिह्वारसाभ्याममलःस्फुटउदयोयस्यतथाविधोरसास्वादोरासनचित्तवृत्तिरूपःपरिणाम्यनुभूयतेइत्यनुषंगः ॥ किंचिदभिन्नयोरेकीभावोहिसंबंधःसचपक्षद्वयेपिदुर्घटइत्याह ॥ ऐक्यंचेति ॥ ४२ ॥ जडचेतनयोरितिपूर्वान्वयि ॥ तेनकिंफलितंतदाह ॥ तेनेति ॥ इतिमितासती ॥ ४३ ॥ परमार्थतस्त्वेकीभावंगता ॥ ४४ ॥ तर्हिपरमार्थचिदात्मनांकाष्ठपाषाणादीनांकथंगृहभावेनसंबंधोदृश्यतेतत्राह ॥ तदात्मनेति ॥ कल्पितरूपेणैवतेषांसंबंधोदृश्यतेनवास्तवचिद्रूपेणेत्यर्थः ॥ यद्यस्माद्धेतोरनंतंब्रह्मैवसर्वप्रकाराढ्यंसर्वमिवभातिततोहेतोर्विश्वंसन्मात्रमितिपरेणान्वयः ॥ ४५ ॥ असत्तात्यागोमिथ्यात्वाग्रहणंसएवचिच्चमत्कारः ॥ ४६ ॥ ४७ ॥

नसंभवतिसंबंधोविषमाणांनिरंतरः ॥ नपरस्परसंबंधाद्विनानुभवनंमिथः ॥ ३७ ॥ सदृशेसदृशंवस्तुक्षणाद्वत्वैकतामलम् ॥ रूपमास्फारयत्येकमेकत्वादेवनान्यथा ॥ ३८ ॥ चिच्चेत्यमिलितादृश्यरूपयोदेतिचेतनः[1] ॥ (जडंजडेनमिलितंघनंसंपद्यतेजडम्)[2] नचचिज्जडयोरैक्यंवैलक्षण्यात्कचिद्भवेत् ॥ ३९ ॥ चिज्जडौचित्रएकत्रनतौसंमिलतःक्वचित् ॥ चिन्मयत्वाच्चिदालंभश्चिदालंभेनवेदनम् ॥ ४० ॥ दारुपाषाणभेदानांनतुल्येतेचिदात्मकाः ॥ पदार्थोहिपदार्थेनपरिणाम्यनुभूयते ॥ ४१ ॥ जिह्वयैवरसास्वादःसजातीयामलोदयः ॥ ऐक्यंचविद्धिसंबंधंनास्त्यसावसमानयोः ॥ ४२ ॥ जडचेतनयोस्तेननोपलादिजडंमतम् ॥ चिदेवोपलकुड्यादिरूपिणीतिमिताचिता ॥ ४३ ॥ एकीभावंगताद्रष्टृदृश्यादिकुरुतेभ्रमम् ॥ काष्ठोपलाद्यशेषंहिपरमार्थमयंयतः ॥ ४४ ॥ तदात्मनातंत्संबंधं[3]दृश्यत्वेनोपलभ्यते ॥ सर्वंसर्वप्रकाराढ्यमनंतमिवयततः ॥ ४५ ॥ विश्वंसन्मात्रमेवैतद्विद्धितत्त्वविदांवर ॥ असत्तात्यागनिष्ठेनविश्वंलक्षशतभ्रमैः ॥ ४६ ॥ पूरितंचिच्चमत्कारोनचकिंचनपूरितम् ॥ संकल्पनागरानृणांमिथःस्पंदंतिनोयथा ॥ ४७ ॥

१ चिच्चेत्यचितिवारूपदृश्ययोदेतिचेतनइतिपाठष्टीकानुरोधेनभाति ॥ २ इदमर्धमधिकंपुस्तकांतरेषूपलब्धम् ॥ ३ तत्संबंधइतिपाठश्चेद्वरमितिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ कटकादिहेम्निभ्रमोमिथ्यैव ॥ यतस्तत्हेमदेशादेवदेशंहेमभवनादेवभवंसत्तांचलभतेइतिशेषः ॥ ४९ ॥ कटकादिमहाभेदंहेमयथाभेददृग्दर्शनपरित्यागेएकंहेमैवत
द्वदित्यर्थः ॥ ५० ॥ बोधव्यक्तेरेकत्वात्सदेवविश्वंअसन्नयतिअसत्त्वमापादयति असद्विश्वंवासन्नयतिसदेकरस्यंप्रापयति ॥ ५१ ॥ ५२ ॥ कुंभाद्यनुस्यूतंनिष्कृष्टमृत्स्वरूप
मिवद्रष्ट्रादित्रिपुट्यनुस्यूतंतत्साक्षिचिन्मात्रंत्रिपुटीनिरासेनदर्शयति ॥ संबंधेइति ॥ तत्प्राग्दर्शितंयत्परंब्रह्मतदिदंनिष्कृष्टप्रत्यक्स्वरूपमेवेत्यखंडोवाक्यार्थोदर्शितोद्रष्टव्यः ॥ ५३॥
तस्यत्रिपुटीशून्यताकदाप्रसिद्धातत्राह ॥ देशादिति ॥ प्राग्व्याख्यातम् ॥५४॥ अचेतनंचित्तवृत्तिरहितम् ॥ तन्मयस्तदेकरसः ॥५५॥ शिलायात्हृदयंघनंचिदेकघनमितियाव

नदेशकालरोधायतथासर्गेष्वितिस्थितिः॥ भेदबोधेहिसर्गत्वमहंत्वादिभ्रमोदयः॥ ४८॥ हेमसंवित्परित्यागेकटकादिभ्रमोयथा॥ क
टकादिभ्रमोहेम्निदेशाद्देशंभवाद्भवम्॥ ४९॥ दृग्दर्शनपरित्यागेनाविद्यास्तिपृथक्सदा॥ कटकादिमहाभेदमेकंहेमयथामलम्॥५०॥
बोधैकत्वादयंसर्गस्तदेवासन्नयत्यलम्॥ सेनामृत्संविदाचित्राम्रृन्मात्रमिवमृन्मयी॥५१॥ जलमेकंतरंगादिदार्वेकंशालभंजिका॥ मृ
न्मात्रमेकंकुंभादिब्रह्मैकंत्रिजगद्भ्रमः॥ ५२॥ संबंधेदृश्यदृष्टीनांमध्येद्रष्टुर्हियद्वपुः॥ द्रष्टृदर्शनदृश्यादिवर्जितंतदिदंपरम्॥५३॥ देशाद्देशं
गतेचित्तेमध्येयच्चेतसोवपुः॥ अजाड्यसंविन्मननंतन्मयोभवसर्वदा॥५४॥ अजाग्रत्स्वप्ननिद्रस्ययत्तेरूपंसनातनम्॥ अचेतनंचाजडं
चतन्मयोभवसर्वदा॥५५॥ जडतांवर्जयित्वैकांशिलायाहृदयंहितत्॥ अक्षुब्धोवाथवाक्षुब्धस्तन्मयोभवसर्वदा॥५६॥ कस्यचि
त्किंचनापीहनोदेतिनविलीयते॥ अक्षुब्धोवाथवाक्षुब्धःस्वस्थस्तिष्ठयथासुखम्॥ ५७॥ नाभिवांछतिनोद्वेष्टिदेहेकिंचित्क्वचित्पुमान्॥
स्वस्थस्तिष्ठनिराशंकंदेहवृत्तिषुमापत॥५८॥भविष्यद्ग्रामकग्राम्यकार्यव्यवसितोयथा॥चित्तवृत्तिषुमातिष्ठतथासत्यात्मतांगतः॥५९॥
यथादेशांतरनरोयथाकाष्ठंयथोपलः॥ तथैवपश्यचित्तंत्वमचित्तैवयदात्मना॥६०॥

न् ॥ अक्षुब्धःसमाधिस्थः ॥ क्षुब्धोव्यवहरन् ॥ ५६ ॥ ननुक्षुब्धस्यकथंतन्मयतातिष्ठेत्तत्राह ॥ कस्यचिदिति ॥ व्यवहारदशायामपिपरमार्थदृष्टिमेवानुवर्तस्वेतिभावः ॥५७॥
सामान्येनोक्तंविशिष्याह ॥ नेति ॥ पुमान्आत्मा ॥ ५८ ॥ यथाअनागतेव्यवहार्येचित्तस्यानासंगःस्वतःसिद्धस्तथावर्त्तमानेपिमिथ्यात्वदृष्ट्यासंपादनीयइत्याशयेनाह ॥ भ
विष्यदिति ॥ ५९ ॥ यथादूरदेशस्थोनरःसन्नप्यसत्समः ॥ काष्ठोपलंतुसन्निहितमप्यचेतनत्वादेवासंगाभिमानाद्यक्षमंतथैवचित्तंपश्येत्यर्थः ॥ यद्यस्माद्दात्मनाआत्मस्वरूपेण
विविच्यदर्शनेअचित्तैवविदुषामनुभवसिद्धेत्यर्थः ॥ छांदसस्तलोपः ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवस्पष्टमाह ॥ यथेति ॥ ६१ ॥ चित्तस्यावस्तुत्वेचित्तकार्याणांसुतरामसत्त्वमित्याह ॥ प्रेक्ष्यमाणमिति ॥ ६२ ॥ शुद्धस्यात्मनःअशुद्धचित्तानुवृत्ति नुचितत्वादपिहेयेत्या शयेनाह ॥ अत्यंतेति ॥ पर्यंताःप्रत्यंतदेशास्तद्वासिनः ॥ तस्मान्नजननमियान्नांतमियान्नेत्पाप्मानंमृत्युमन्ववायानीतिश्रुत्याम्लेच्छानुवृत्तेर्निषिद्धत्वादितिभावः ॥ ६३ ॥ पंके नमृदारुतोनिर्मितःप्रतिमादिरिव ॥ ६४ ॥ नास्त्येवेतिमुख्यःकल्पः ॥ भूतंमृतमेवसत्अद्यवेत्तिमिथ्यापश्यतीतिगौणःकल्पः ॥ ६५ ॥ प्रेक्षायांआत्मप्रेक्षायांचित्तप्रेक्षायांच ॥ ६६ ॥ अशनिर्वैद्युताग्निः ॥ ६७ ॥ युक्त्यामननेन ॥ भावनयाध्यानेन ॥ ६८ ॥ मूर्धानदात्राधिकारिप्रोत्साहनाय ॥ ६९ ॥ महानुभावस्तत्त्वावबोधकुशलःसन्प्रथमंव्य पगलितमनाभवततस्तत्त्वबोधेनामलात्मासन्भवपारगतोभव ॥ उक्तार्थंद्रढयितुंवसिष्ठोविचारविशुद्धंस्वानुभवमाह ॥ सुचिरमिति ॥ मयासुचिरमपिमनस्तत्त्वलाभायविचारि

यथाहृपदिनास्त्यंबुयथांभस्यनलस्तथा ॥ स्वात्मन्येवास्तिनोचित्तंपरमात्मनितत्कुतः ॥६१॥ प्रेक्ष्यमाणंनयत्किंचित्तेनयत्क्रियतेक्वचित् ॥ कृतंभवतितन्नेतितत्त्वाचित्तातिगोभवेत् ॥ ६२ ॥ अत्यंतानात्मभूतस्ययश्चित्तस्यानुवर्त्तते ॥ पर्यंतवासिनःकस्मान्नम्लेच्छस्यानुवर्तते ॥६३॥ निरंतरमनादृत्यत्वमाराच्चित्तपुष्कसम् ॥ स्वस्थमास्वनिराशंकंपंकेनेवकृतोजडः ॥६४॥ चित्तंनास्त्येवमेभूतंमृतमेवाद्यवेत्तिवा ॥ भवनिश्चयवान्भूत्वाशिलापुरुषनिश्चलः ॥६५॥ प्रेक्षायामस्तिनोचित्तंतद्विहीनोसितत्त्वतः ॥ सकिमर्थमनर्थेनतद्यर्थेनकदर्थ्यसे ॥६६॥ असताचित्तयक्षेणयेमुधास्ववशेकृताः ॥ तेषांपेलवबुद्धीनांचंद्रादशनिरुत्थितः ॥ ६७॥ चित्तंदूरेपरित्यज्ययोसिसोसिस्थिरोभव ॥ भव भावनयामुक्तोयुक्त्यापरमयान्वितः ॥६८॥ असतोयेनुवर्त्ततेचेतसोसत्यरूपिणः ॥ व्योममारणकर्मैकनीतकालान्धिगस्तुतान् ॥६९॥ व्यपगलितमनामहानुभावोभवभवपारगतोभवामलात्मा ॥ सुचिरमपिविचारितंनलब्धंमलममलात्मनिमानसात्मकिंचित् ॥ ७० ॥ इत्यार्षेवा० वा० दे० मो० पू० चित्ताभावप्रतिपादनंनामैकविंशत्युत्तरशततमःसर्गः ॥ १२१ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ प्र थमंजातमात्रेणपुंसाकिंचिद्विकसितबुद्धिनैवंसत्संगमपरेणभवितव्यम् ॥ १ ॥ अनवरतप्रवाहपतितोयमविद्यानदीनिवहःशास्त्रसज्ज नसंपर्कादृतेनतरितुंशक्यते ॥ २ ॥

तंतथाप्यमलात्मनिमानसात्मकंमलंकिंचिदपिनलब्धंतस्मान्नास्त्येवेतिमद्वाक्यादपिस्थिरोभवेत्यर्थः ॥ ७० ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेउ० एकविंशत्युत्तरशत तमःसर्गः ॥ १२१ ॥ ॥ ७ ॥ ॥ इहादौवर्ण्यतेपुंसोज्ञानभूम्युदयक्रमः ॥ रामस्यशोकमोहादिनिरासैर्बोधनंततः ॥ १ ॥ तत्रज्ञानभूमिकाक्रमंगद्यैर्विवक्षुस्तल्ला भोपायेषुप्रथमपीठिकामाह ॥ प्रथममिति ॥ किंचिद्विकसितबुद्धिनाइहजन्मनिजन्मांतरेवानुष्ठितैर्निष्कामकर्मभिःशुद्धचित्तेनेत्यर्थः ॥ १ ॥ सत्संगात्साधनचतुष्टयसंपत्तिस हितोध्यात्मशास्त्रसंबंधःसिद्ध्यतिसैवप्रथमाभूमिकेत्याशयेनाह ॥ अनवरतेत्यादिना ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३॥४॥ तज्जयाद्द्वितीयभूमिकावतारंदर्शयति ॥ ततइत्यादिना ॥५॥ तज्जयात्तृतीयभूमिकावतारइत्याह ॥ सम्यग्ज्ञानेनेत्यादिना॥६॥७॥ चतुर्थभूमिकावतारप्रकारमाह ॥ यदै
वेति॥८॥ पंचम्यवतारमाह ॥ तद्वशादिति ॥ तन्नामव्याचष्टे ॥ कर्मफलेनेति ॥९॥ षष्ठ्यांभूमौततोवतारमाह ॥ अथेति ॥ असत्येबाह्येऽर्थेभावनातानवंसदैवांतर्मुखतयावस्था
नेनब्रह्माहंभाववासनोपचयेनबाह्यार्थस्यक्रमेणविस्मरणमित्यर्थः ॥ १० ॥ कियत्कालंतदभ्यासस्तत्राह ॥ यावदिति ॥ नकुर्वन्समाधिस्थोपि ॥ व्यवहरन्व्युत्थितोपि ॥ बाह्यं
स्नानभोजनादिकुर्वन्नपिनपश्यतिअतएवनालंबनेनरुच्यासेवतेनाभिध्यायतिनस्मरति ॥ मूढःशिशुरुन्मत्तोवासुप्तप्रबुद्धइवकर्त्तव्यंस्नानभोजनादिपरेच्छयाकरोति ॥ ११ ॥ तनु
भावितमनस्कःसूक्ष्मतमब्रह्मैकरसीकृतचित्तस्तेनोक्तलक्षणेनयोगभूमिकांभावनांपदार्थाभावनाख्यांअधिरूढोभवतीतिशेषः ॥ १२॥ सप्तमभूमिकावतारक्रममाह ॥ इत्यंतर्ली

तेनविवेकतःपुरुषस्यहेयोपादेयविचारउपजायते ॥ ३ ॥ तदासौशुभेच्छाभिधांविवेकभुवमांपतितोभवति॥ ४ ॥ ततोविवेकवशतो विचारणायाम् ॥ ५ ॥ सम्यग्ज्ञानेनासम्यग्वासनांत्यजतःसंसारभावनातोमनस्तनुतामेति ॥ ६ ॥ तेनतनुमानसांनामविवेकभूमिमवतीर्णोभवति॥ ७॥ यदैवयोगिनःसम्यग्ज्ञानोदयस्तदैवसत्त्वापत्तिः॥ ८ ॥ तद्वशाद्वासनातनुतांगतायदातदैवासावसंसक्तइत्युच्यतेकर्मफलेननबद्ध्यतइति॥ ९ ॥ अथतानववशादसत्येभावनातानवमभ्यस्यति॥ १० ॥ यावन्नकुर्वन्नपिव्यवहरन्नप्यसत्येषुसंसारवस्तुषुस्थितोपिस्वात्मन्यवक्षीणमनस्त्वादभ्यासवशाद्बाह्यंवस्तुकुर्वन्नपिनपश्यतिनालंबनेनसेवतेनाभिध्यायतितनुवासनत्वाच्चकेवलंमूढःसुप्तप्रबुद्धइवकर्त्तव्यंकरोति ॥ ११ ॥ तनुभावितमनस्कस्तेनयोगभूमिकांभावनामधिरूढः॥ १२ ॥ इत्यंतर्लीनचित्तःकतिचित्संवत्सरानभ्यस्यसर्वथैवकुर्वन्नपिबाह्यपदार्थान्भावनांत्यजतितुर्यात्माभवतिततोजीवन्मुक्तइत्युच्यते॥ १३॥ नाभिनंदतिसंप्राप्तंनाप्राप्तमभिशोचति॥ केवलंविगताशंकंसंप्राप्तमनुवर्त्तते॥ १४॥ त्वयापिराघवज्ञातंज्ञातव्यमखिलांतरम्॥ ननुतेसर्वकार्येभ्योवासनातनुतांगता॥ १५॥ शरीरातीतवृत्तिस्त्वंशरीरस्थोऽथवाभव॥ मागाःशोकंचहर्षंत्वंत्वमात्माविगतामयः॥ १६॥

नचित्तइति ॥ इतिउक्तप्रकारेणांतर्ब्रह्म
णिलीनचित्तःपरेच्छयाकार्यमात्रेणकदाचिद्बाह्यपदार्थान्स्नानभोजनादीन्कुर्वन्नपिसर्वथैवतद्भावनांत्यजति ॥ तुर्यात्मास्वयमेवभवति ॥ षष्ठभूमिकापर्यंतंचित्तस्यब्रह्माकारता
स्थैर्येलेशतोयत्नानुवृत्तिरस्ति सप्तम्यांतुभूमिकायांसर्वथैवतन्निवृत्त्यास्वारसिकीप्रतिष्ठेतिविशेषइतिभावः ॥ सएवजीवन्मुक्तइत्युच्यते ॥ १३ ॥ यद्यपिप्राक्तनभूमिष्वपिकृत
साक्षात्काराजीवन्मुक्ताएवतथापितेषांकदाचित्प्रबलप्रारब्धोपनीतप्रियाप्रियस्पर्शसत्वान्नमुख्यंजीवन्मुक्तिसुखंसप्तम्यांतुभूमिकायांयोगपरिपाकजन्यपुण्यातिशयेनात्युत्कटे
नतिरस्कृतंप्रारब्धकर्मजीवनव्यवहाराभासमात्रेव्यवतिष्ठतेनहर्षशोकादिजननायप्रभवतीत्याशयेनतल्लक्षणंपद्येनाह॥ नाभिनंदतीति ॥१४॥ तवतुअत्यंतशुद्धचितत्वाद्द्वितीयभू
मिकायामेवस्वविचारेणैवप्रत्यगात्मतत्त्वंपरिज्ञातमित्याशयेनाह ॥ त्वयेति ॥ १५ ॥ शरीरातीतवृत्तिःसदैवसमाधिस्थः ॥ शरीरस्थोलोकसंग्रहव्यवहारी ॥ १६ ॥

१ प्रवतीर्णोभवतीतिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिनेस्वयंप्रभे ॥ स्वच्छेनिर्मले ॥ १७ ॥ आत्मबोधेनमरणजन्मादिप्रयुक्तशोकजयेपिबांधवसंगजःशोकःकथंजय्यस्तत्राह ॥ अबंधुरिति ॥ १८ ॥ बंधूनांदेहःशोकार्हउतात्मा ॥ नाद्यइत्याह ॥ दृश्यतइति ॥ केवलेभस्मीभूते ॥ परमाणुचयस्त्वचेतनत्वादेवनशोकार्हइत्यर्थः ॥ नद्वितीयइत्याह ॥ देशेति ॥ १९ ॥ २० ॥ नविनश्यतिआत्मेतिशेषः ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ नन्वातपेमृगतृष्णाभ्रमशक्तयइवजगच्छक्तयस्तर्हिपृथक्स्युस्तत्राह ॥ शक्तयइति ॥ २५ ॥ तर्ह्यत्यंतासतोजगतःप्ररोहेकिंबीजमितिचेच्चित्त

त्वय्यात्मनिसितेस्वच्छेसर्वगेसर्वदोदिते ॥ कुतोदुःखसुखेरामकुतोमरणजन्मनी ॥१७॥ अबंधुरपिकस्मात्त्वंबंधुदुःखानिशोचसि ॥ अद्वितीयेस्थितेह्यस्मिन्बांधवाःकइवात्मनि ॥ १८ ॥ दृश्यतेकेवलंदेहपरमाणुचयःपरम् ॥ देशकालान्यतापत्तेर्नात्मोदेतिनलीयते ॥ १९ ॥ अविनाशोपिकस्मात्त्वंविनश्यामीतिशोचसि ॥ अमृत्युवसतौस्वच्छेविनाशःकइवात्मनि ॥ २० ॥ घटेकपालतांयातेघटाकाशोननश्यति ॥ यथातथाशरीरेस्मिन्नष्टेपिनविनश्यति ॥ २१ ॥ मृगतृष्णातरंगिण्यांक्षीणायामातपोयथा ॥ ननश्यतितथादेहेनष्टेनात्माविनश्यति ॥ २२ ॥ वांछैवोदेतितेकस्माद्भ्रांतिरंतर्निरर्थिका ॥ अद्वितीयोद्वितीयंकिंयद्वस्त्वात्माभिवांछतु ॥ २३ ॥ श्रव्यंस्पृश्यंतथादृश्यंरस्यंघ्रेयंचराघव ॥ नकिंचिदस्तिजगतिव्यतिरिक्तंयदात्मनः ॥ २४ ॥ सर्वशक्ताविमास्तस्मिन्नात्मन्येवाखिलाःस्थिताः ॥ शक्तयोविततेव्यक्तेआकाशइवशून्यता ॥ २५ ॥ चित्ताद्राघवरूढेयंत्रिलोकीललनोदिता ॥ त्रिविधेनक्रमेणेहजन्मनाजनितभ्रमा ॥ २६ ॥ मनःप्रशमनेसिद्धेवासनाक्षयनामनि ॥ कर्मक्षयाभिधानैवमायेयंप्रविनश्यति ॥ २७ ॥ संसारोग्रारघट्टेस्मिन्नारूढायंत्रवाहिनी ॥ रज्जुस्तांवासनामेतांछिंधिराघवयत्नतः ॥ २८ ॥ अपरिज्ञायमानैषामहामोहप्रदायिनी ॥ परिज्ञातात्वनंताख्यासुखदाब्रह्मदायिनी ॥ २९ ॥ आगताब्रह्मणोभुक्त्वासंसारमिहलीलया ॥ पुनर्ब्रह्मैवसंस्मृत्यब्रह्मण्येवविलीयते ॥ ३० ॥

मेवेतिप्रागुक्तमेवेत्याह ॥ चित्तादिति ॥ उदिताप्रागुक्ता ॥ त्रिविधेनसात्विकादिनाक्रमेण ॥ २६ ॥ अतएवचित्तक्षयात्तत्क्षयइत्याह ॥ मनइति ॥ कर्मणांक्रियादिशक्तीनांक्षयोनिवासस्तदभिधाना ॥ २७ ॥ आरघट्टेपेषणयंत्राधःशिलामध्यशंकावितियावत् ॥ अरूढातिर्यक्काष्ठप्रांतेआरोपिता ॥ अतएवयंत्रमूर्ध्वपेषणपाषाणंवहतितच्छीलारज्जुः ॥ तथाहि ॥ पृथ्वीअधोयंत्रशिलेवमेरुस्तच्छंकुरिवज्योतिश्चक्रमूर्ध्वशिलायंत्रमिववासनावष्टब्धंजगद्दृश्यतइतिभावः ॥ २८ ॥ २९ ॥ संसारंभुक्त्वास्वलीलाभूतयैवब्रह्मविद्यया ब्रह्मैवसंस्मृत्यब्रह्मण्येवविलीयतइत्यन्वयः ॥ ३० ॥

१ परइतिक्वचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

॥ ३१ ॥ रेखावृंदंशिराजालम् ॥ ३२ ॥ भावनारूपेत्वासनावच्छिन्नेब्रह्मणि ॥ ३३ ॥ तदेकविज्ञानेनसर्वंविज्ञातमित्याह ॥ तस्मिन्निति ॥ सज्ञातेति ॥ नान्योतोस्तिद्रष्टेत्यादि
श्रुतेरितिभावः ॥ ३४ ॥ ३५ ॥ प्रियाप्रियविषयाणामिंद्रियैःसहदैवात्संयोगेपितेषुमिथ्यात्वनिश्चयाद्धर्षामर्षविवर्जितासैषोक्तलक्षणाजीवन्मुक्तानुभूतिरेवसप्रसिद्धआत्मानतु
मूढैरनुभूयमानःसंसारस्वभावइत्यर्थः ॥ ३६ ॥ हर्षामर्षविवर्जितेतियदुक्तंतदुपपादनायाह ॥ इदंतस्मिन्नित्यादिना ॥ स्वाभोगेस्वांतरेवजगत्पृथग्वत्अन्यदिवप्रतिबिंबतितस्यच
शुद्धसाक्षिणाप्रियाप्रियभागेनविवेक्तुमशक्यत्वात्तद्विवेकायतदुभयव्यतिरेकेणांतरालेबुद्धिरंतःकरणंप्रतिबिंबतिसैवप्रियाप्रियविकल्पनैर्लोभमोहादयोयेभावास्तान्यातिनत्वात्मे

शिवाद्राघवनीरूपादप्रमेयान्निरामयात्॥ सर्वभूतानिजातानिप्रकाशाइवतेजसः॥ ३१॥ रेखावृंदंयथापर्णेवीचिजालंयथाजले॥ क
टकादियथाहेम्नितथोष्णादियथानले॥ ३२॥ तदेतद्भावनारूपेतथेदंभुवनत्रयम्॥ तस्मिन्नेवस्थितंजातंतस्मादेवतदेवच॥ ३३॥ सए
वसर्वभूतानामात्माब्रह्मेतिकथ्यते॥ तस्मिन्ज्ञातेजगज्ज्ञातंसज्ञाताभुवनत्रये॥३४॥ शास्त्रसंव्यवहारार्थंतस्यास्यविततात्कृतेः॥चिद्ब्रह्मा
त्मेतिनामानिकल्पितानिकृतात्मभिः॥ ३५॥ विषयेंद्रियसंयोगेहर्षामर्षविवर्जिता॥ सैषाशुद्धानुभूतिर्हिसोयमात्माचिदव्ययः॥ ३६॥
आकाशातितराच्छाच्छइदंतस्मिंश्चिदात्मनि॥ स्वाभोगएवहिजगत्पृथग्वत्प्रतिबिंबति॥ ३७॥ बुद्धिस्तद्व्यतिरेकेणलोभमोहादयोहिता
न्॥पात्यसद्व्यतिरेकेणतेचतस्मिंस्तदेवते॥३८॥अदेहस्यैवतेरामनिर्विकल्पचिदाकृतेः॥लज्जाभयविषादेभ्यःकुतोमोहःसमुत्थितः॥३९॥
अदेहोदेहजैरेभिर्लज्जादिभिरसन्मयैः॥ किंमूर्खइवदुर्बुद्धिर्विकल्पैरभिभूयसे॥ ४०॥ अखंडचितिरूपस्यदेहेखंडनमागते॥ असम्यग्द
र्शिनोप्यस्तिननाशःकिमुसन्मतेः॥ ४१॥ आपतेदर्कमार्गेपिननिरुद्धगमागमम्॥ चित्तंनामसविज्ञेयःपुरुषोनशरीरकम्॥ ४२॥ शरी
रेसत्यसतिवापुमानेवजगत्त्रये॥ ज्ञोप्यज्ञोपिस्थितोरामनष्टेदेहेननश्यति॥ ४३॥

त्यर्थः ॥३७॥ तेचजगत्तद्बुद्धितत्संयुक्तलोभमोहादयःअसंतैवव्यतिरेकेणपरस्परभेदेनतस्मिंश्चिदात्मनिप्रतिबिंबिताइतिपरमार्थतस्तदात्मरूपमेव ॥ तेनहिदर्पणव्यतिरेकेणतदंतर्दृ
श्यमानाःपर्वतवननद्यादयःसंतीत्यर्थः ॥ ३८ ॥ एवंचदेहात्मबुद्धीनांमूढानामेवभयविषादादयोयुक्तानतुतवेत्याह ॥ अदेहस्यैवेत्यादिना ॥ ३९ ॥ ४० ॥ ४१॥ असम्यग्दर्शि
नोपिननाशइतियदुक्तंतदुपपादयितुंदेहाद्व्यतिरिक्तचित्तात्मानंव्युत्पादयति ॥ आपतेदिति ॥ यच्चित्तंसंचारस्वातंत्र्यात्सर्वत्रआपतेत् ॥ अर्कस्यमार्गेनिरालंबनेपियन्ननिरुद्धाग
मागमाःसंचारायस्यतथाविधंतच्चित्तमेवपुरिशेतेइतिपुरुषःसंसार्यात्माविज्ञेयोनतुशरीरमित्यर्थः ॥ ४२ ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमसंसार्यात्मानंदर्शयितुंचित्तमपिदेहकोटावेवनिक्षिप्यदेहस्यैवप्रियाप्रियस्पर्शइत्याह ॥ यानीति ॥ ४४ ॥ परिगृह्यतेव्याप्यते ॥ ४५ ॥ ननुनष्टेदेहेजीवःक्वयातितत्राह॥ स्वास्पदात्मानमिति ॥ असौजीवोविनष्टाद्देहपंजराद्विनष्टदेहाभिमानंपरित्यज्यप्रथमंस्वास्पदंस्वप्रतिष्ठाभूतंपरमात्मानमेवयाति ॥ मनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवताया मितिश्रुतेर्मनःप्राणाद्युपाधिविलयाद्विवभूतेश्वरैक्यंगच्छतीत्यर्थः ॥ तर्हिकुतोनमुच्यतेतत्राह ॥ अभ्यस्तामिति ॥ भेदवासनामूलोच्छेदिज्ञानानुदयान्नमुच्यतइतिभावः ॥ ४६॥ ननुयदिजीवःप्रतिबिंबस्तर्हितस्योपाध्यतिरिक्तसत्त्वायोगादसत्त्वमुपाधिनाशेननाशश्चस्यादितिचेदस्त्वेवंतथापिनत्वंजीवइतितदसत्वेनाशेवाननवशोकोयुक्तइत्याह ॥ असदि ति ॥ तत्प्रसिद्धमात्मतत्त्वंजीवरूपम ॥ ४७ ॥ वस्तुतस्तुप्रतिबिंबोबिंबमेव ॥ बिंबस्यैवोपाध्यनुप्रवेशभेदादिकल्पनयाप्रतिबिंबत्वेनग्रहणात् ॥ जडोपाधिकार्यत्वेचिदाभासस्य

यानीमानिविचित्राणिदुःखानिपरिपश्यसि॥ तानिदेहस्यसर्वाणिनाग्राह्यस्यचिदात्मनः॥ ४४॥ मनोमार्गादतीतत्वाद्यासौशून्यमिव स्थिता॥ चित्कथंनामदुःखैर्वासुखैर्वापरिगृह्यते॥ ४५ ॥ स्वास्पदात्मानमेवासौविनष्टाद्देहपंजरात्॥ अभ्यस्तांवासनांयातःषट्पदःख मिवांबुजात्॥ ४६ ॥ असच्चेदात्मतत्त्वंतदस्मिंस्तेदेहपंजरे॥ नष्टेकिंनामनष्टंस्याद्रामकेनानुशोचसि॥ ४७॥ सत्यंभावयतेनत्वंमामोह मनुभावय॥ निरिच्छस्यात्मनोनेच्छाकाचिदप्यनघाकृतेः ॥४८॥ साक्षिभूतेसमेस्वच्छेनिर्विकल्पेचिदात्मनि॥ निरिच्छंप्रतिबिंबंतिज गंतिमुकुरेयथा॥ ४९॥ साक्षिभूतेसमेस्वच्छेनिर्विकल्पेचिदात्मनि॥ स्वयंजगंतिदृश्यंतेसन्मणाविवरश्मयः॥ ५० ॥ अनिच्छमपिसंबं धोयथादर्पणबिंबयोः॥ तथैवेहात्मजगतोर्भेदाभेदौव्यवस्थितौ॥५१॥ सूर्यसन्निधिमात्रेणयथोदेतिजगत्क्रिया॥ चित्सत्तामात्रकेणे दंजगन्निष्पद्यतेतथा॥५२ ॥ पिंडग्रहोनिवृत्तोस्याएवंरामजगत्स्थितेः॥ आकाशमेषासंपन्नाभवतामपिचेतसि॥ ५३ ॥ सत्तामात्रेण दीपस्ययथालोकःस्वभावतः॥ चित्तत्त्वस्यस्वभावात्तुतथेयंजागतीस्थितिः ॥ ५४ ॥ पूर्वमनःसमुदितंपरमात्मतत्त्वात्तेनाततंजगदिदंस्व विकल्पजालैः ॥ शून्येनशून्यमपितेनयथांबरेणनीलत्वमुल्लसितचारुतराभिधानम्॥ ५५॥

जडत्वापत्तौसंसारभानायोगाच्च ॥ तेनत्वंजीवंतदुपाधिपरित्यागेनसत्यंब्रह्मैवेतिभावयसंभावय ॥ मोहंभ्रांतिप्राप्तमसन्नश्वरदेहादिभावंमानुभावय ॥ पूर्णब्रह्मभावतृप्तत्वादेवनि रिच्छस्य ॥ ४८ ॥ तर्हीच्छांविनातस्यकथंसर्गादिसिद्धिस्तत्राह ॥ साक्षिभूतेइति ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ पिंडग्रहोमूर्त्ताकारः ॥ एवंउक्तोपदेशप्रकारेण ॥ भवतामि तिरामातिरिक्तान्श्रोतॄन्प्रत्युक्तिः ॥ ५३ ॥ आलोकःप्रभा ॥ ५४ ॥ विस्तरोक्तंप्रकरणार्थंसंक्षिप्यदर्शयन्नुपसंहरति ॥ पूर्वमित्यादिना ॥ यथाशून्येनांबरेणाकाशेनशून्यमसद पिनीलत्वंसर्वजनानुभवेनोल्लसितमवाङ्मुखीकृतस्निग्धेंद्रनीलमणिमयमहाकटाहमिवनीलंनभोदृश्यतेइत्युपमोत्प्रेक्षादियोग्यतयाचारुतरमभिधानंवाग्व्यवहारोयस्मिंस्तथावि धमाततंविस्तारितंतथातेनमनसापीदंजगदित्यर्थः ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवनिमित्तापायेनैमित्तिकापायान्निर्मलात्ममात्रपरिशेषसिद्धिरित्याह ॥ संकल्पेति ॥ मिहिकास्तुषाराः ॥ शरदिसमागतायांखमाकाशमिवस्वच्छंचिन्मात्रमंतःप्रत्यगात्म
स्वभावे ॥ ५६ ॥ व्यष्टिभ्रमकल्पनायामिवसमष्टिसृष्टिकल्पनायामपिमनोधीनावेवाविर्भावतिरोभावावितिदर्शयति ॥ कर्मात्मकमिति ॥ सकलप्राणिकर्मसमष्ट्यात्मकंसम
ष्टिक्रियाशक्तिप्रधानंचमनःप्रथममुदेतिआविर्भवतिततस्तत्रचित्प्रतिबिंबात्कमलजमन्वादिरूपाःप्रकृतीःस्रष्टृशरीराण्येत्यस्वीकृत्यसंकल्पतोनानाभिधंजगन्मुधाव्यर्थमेवतनोति
सृजतीत्यर्थः ॥ ५७ ॥ तस्माद्दृश्यंसर्वंव्यष्टिसमष्टिभेदकल्पितमनोमात्रंमनश्चासदज्ञानकार्यत्वादित्यसतएवाधिष्ठानसाक्षिसत्तास्फूर्तिबलेनसत्तयास्फुरणमुत्पत्तिरितिरीत्याजग
ज्जन्मादिविवर्त्तोपादानत्वंब्रह्मणस्तटस्थलक्षणंतेननिष्प्रपंचसच्चिदानंदैकरसंपूर्णंब्रह्मैवपरमार्थभूतंलक्ष्यतइतिसर्वसृष्टिश्रुतीनांतात्पर्यार्थइतिसिद्धमित्याशयेनाह ॥ असन्मयमि

संकल्पसंक्षयवशाद्गलितेतुचित्तेसंसारमोहमिहिकागलिताभवंति ॥ स्वच्छंविभातिशरदीवखमागतायांचिन्मात्रमेकमजमाद्यमनंत
मंतः ॥ ५६ ॥ कर्मात्मकंप्रथममेवमनोभ्युदेतिसंकल्पतःकमलजप्रकृतीस्तदेत्य ॥ नानाभिधंजगदिदंहिमुधातनोतिवेतालदेहकलना
मिवमुग्धबालः ॥ ५७ ॥ असन्मयंसदिवपुरोविलक्ष्यतेपुनर्भवत्यथपरिलीयतेपुनः ॥ स्वयंमनश्चितिचितसंस्फुरद्वपुर्महार्णवेजलवलया
वलीयथा ॥ ५८ ॥ ॥ इत्यार्षेश्रीवासिष्ठमहारामायणेश्रीवाल्मीकीयेदेवदूतोक्तेमोक्षोपायेषूत्पत्तिप्रकरणेस्वरूपनिरूपणंनामद्वाविंश
त्युत्तरशततमःसर्गः ॥ १२२ ॥ ॥ उत्पत्तिप्रकरणंसंपूर्णं ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

ति ॥ असदज्ञानंतन्मयंतत्परिणामभूतंमनःस्वयमेवचितिस्वाधिष्ठानचैतन्येचितेनउपचयेनसंस्फुरज्जगद्वपुःपुरःसदिवसाक्षिणाविलोक्यते ॥ यथामहार्णवेपूर्णेतत्सत्तामात्रसिद्धा
परिच्छिन्नजलवलयानांपंक्तिरित्यर्थः ॥ तस्माद्दृश्यमात्रस्यवाचारंभणस्यानृतत्वात्प्रत्यगेकरसंपूर्णंब्रह्मैवाविकृतंसदास्तेइतिसिद्धम् ॥ ५८ ॥ ॥ इतिश्रीमत्परमहंसपरिव्राज
काचार्यश्रीमत्सर्वज्ञसरस्वतीपूज्यपादशिष्यश्रीमद्रामचंद्रसरस्वतीपूज्यपादशिष्यश्रीमद्गंगाधरेंद्रसरस्वतीपूज्यपादशिष्येणश्रीमदानंदबोधेंद्रसरस्वत्याख्यभिक्षुणाविरचितेश्रीवा
सिष्ठमहारामायणतात्पर्यप्रकाशेउत्पत्तिप्रकरणेद्वाविंशत्युत्तरशततमःसर्गः ॥ १२२ ॥ ॥ उत्पत्तिप्रकरणप्रकाशःसंपूर्णः ॥ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं योगवासिष्ठस्य उत्पत्त्याख्यं तृतीयं प्रकरणं मुंबय्याख्यराजधान्यां
गणपतकृष्णाजीमुद्रायंत्रलये मुद्रितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति योगवासिष्ठे तृतीयमुत्पत्तिप्रकरणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीयोगवासिष्ठनाम्नाप्रसिद्धोवासिष्ठमहारामायणाभिधोग्रंथोद्वात्रिंशत्सहस्रसंहितात्मकोऽध्यात्मप्रतिपादकः परमात्मतत्त्वमादर्शः
प्रतिबिंबमिवापरोक्षंदर्शयितुंपटिष्ठोवैराग्यमुमुक्षुव्यवहारोत्पत्तिस्थित्युपशमनिर्वाणाख्यैःषड्भिःप्रकरणैर्घटितोनानाविधदृष्टांततति गुं
फितउपमोत्प्रेक्षाद्यलंकाररसाद्यखिलकाव्यगुणगणालंकृतोरामायणवत्काव्यरूपेणश्रीमद्वाल्मीकिवदनसुधा पारावारादाविर्भूयसु
धेव स्वरसास्वादनलालसान् मुक्तमुमुक्षुविषयिजनान् ब्रह्मानंदैकरस्यवितरणेनतृप्तिपरावधिमधिरोहयन्सकलाध्यात्मशास्त्रीयनिबं
धशिरोमणितयाविजयते. एवंविधोप्ययंग्रंथोऽद्यापिनकेनाप्यंकितइतितत्संजिघृक्षूणांबहुवित्तव्ययायाससाध्यसंग्रहत्वप्रयुक्तदौर्ल
भ्येनपुस्तकसंजिघृक्षासर्वथाशांतिमापन्नापच्चोपशमंपुस्तकदौर्लभ्यापत्. तदेतन्मनसिपर्यालोच्यगणपतकृष्णाजी मुद्रायंत्रालयाध्य
क्षोगणपतिपौत्रःकान्ह्वात्मजःसुबुद्धिरात्मारामएतदंकनंकर्त्तव्यत्वेननिश्चित्यपुस्तकशोधनविषयेमांव्यजिज्ञपत्. तेनविज्ञापितश्चाह
मनाकलिताध्यात्मशास्त्रोऽनालोचितसाहित्यग्रंथोऽनाघ्रातयोगसांख्यादिशास्त्रगंधोयथाकथंचिदास्वादितव्याकरणपरमाणुरेवंविधो
प्यहंविज्ञापयितृदत्तपुस्तकशोधनपदवीकःकेवलंश्रीमत्तारकब्रह्मानंदसरस्वतीगुरुचरणनलिननिहितमनानारायणतनुजन्मालक्ष्मी
गर्भसंभवःखाडिल्करोपाभिधःश्रीनासिकक्षेत्राभिजनआत्माराम (अपा) शर्माशोधनसाधनपुस्तकसंभारसंपिपादयिषुर्विद्यावर्धन
चणधिषणैःस्वीयधर्मसंरक्षणघनव्यसनिभिःस्वगुणगणविभवतोषितधराधीशसंपादितानेक विधबिरुदावलिभिःश्रीमद्भिर्विंचुराभि
धपुरवराधीशैरघुनाथाभिधैः (अण्णासाहेब) इतिप्रसिद्धनाम्नाविराजमानैस्तथापूर्वोक्तविद्येत्यादिविशेषणविशिष्टैर्मंडलीकपदांकितै
र्विश्वनाथनारायणाभिधैस्तथाअध्यात्मशास्त्रविशारदैर्व्यासजयकृष्णसूरिभिःस्वीयस्वीयपुस्तकवितरणेनवितीर्णोत्साहःश्रीनासिकनि
वासिनांमहाबलोपाभिधकृष्णसूरिणांखेडकरोपनामकतात्याशास्त्रिणामन्येषांचसहृदयसुहृदांलब्धवर्णानांसाहाय्यमवलंब्यस्वस्य
तादृगधिकाराभावेपि (नभःपतंत्यात्मसमंपतत्रिणः) इतिन्यायमनुसृत्योक्तंग्रंथनशूश्रुधम्. अत्रचबुद्धिदौर्बल्यदृष्टिविप्लवभ्रम
प्रमादादिवशाद्बहुषूपलभ्यमानेषुसत्स्वपिस्खलितेषुविरलतयोपलभ्यमानेषुगुणेषुदत्तदृष्टयःप्रेक्षावंतःक्षाम्यंत्वित्याशासे. शोधित
मिमंग्रंथं गणपतकृष्णाजीमुद्रायंत्रालयाध्यक्षोगणपतेःपौत्रः कान्हंगजआत्मारामःस्वमुद्रायंत्रालयेऽमुमुद्रत्.

एतदंकनंच युग्माकाशवसुभूमिते १८०२ विक्रमनाम्निशालिवाहनशके षड्रामनंदेंदुमिते १९३६ वैक्रमशके
खवसुगजेंदुमित १८८० इस्वीशकेचशुचितमेशुक्रशुचिपक्षेत्रयोदश्यांसमाप्तिमयासीत्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ शिवमभयमनंतसौख्यसिंधुंहृदिनिहितंहितमस्तमोहजालम् जगदुदयनयक्षयप्रवीणंनिरुपमबोधघनात्मदेवमीडे ॥ १ ॥ निर्ममानिरहंकारानिःसंकल्पावि
कल्पनाः ॥ यथाजीवंतिचेष्टंतेमुक्तायुक्तिस्तथोच्यते ॥ २ ॥ पूर्वार्धेश्रीरामसमाधिप्रदर्शनव्याजेनोत्तमाधिकारिणःश्रवणाद्वृत्तिपरिपाकादेवसाक्षात्कारज्ञानोदयेनपरमपदेस
कृद्विश्रांतिर्भवतीतिदर्शितम् तस्यदैवात्पुनर्व्युत्थानेपियथाअविरतंतत्रैवविश्रांतिरनायासेनसिद्ध्यतितथोत्तरोत्तरभूमिकारोपणायोत्तरार्द्धमिदमारभ्यते ॥ अत्रादौरामः अहं
ममेतिसंविदन्दुःखतोविमुच्यते असंविदन्विमुच्यतेयदीप्सितंतदाचरेत्यंतेयदुक्तंतत्रसर्वकल्पनात्यागेकल्पनाधीनदेहधारणादिव्यवहारासिद्धिंशंकते ॥ नैष्कर्म्यादिति ॥ देहप्रा
णादिष्वहंतादिकल्पनात्यागाद्धेतोर्नैष्कर्म्यात्सर्वक्रियोपरमात्देहधारकप्राणादिचेष्टोपरमेदेहिनस्तनुराशुपततिअतएतत्त्वदुक्तंतस्यजीवतोव्यवहारादिकथंसंभवतीत्यर्थः ॥ १ ॥
नकल्पनाधीनंजीवनंयेनतत्त्यागात्तनुपातःस्यात्किंतुभोजकप्रारब्धाधीनम् कल्पनात्यागएवप्रत्युतजीवनाधीनजन्मेतिनोपजीवनंबाधतइत्यविरुद्धंकित्वजीवनमेवविरुद्ध्यतइ
त्याशयेनभगवान्वसिष्ठःसमाधत्ते ॥ जीवतइति ॥ अस्यकल्पनात्यागस्यस्वरूपंयथाजीवनविरुद्धंनभवतितथामयायथातत्त्वंवर्ण्यमानंशृण्वित्यर्थः ॥ २ ॥ अहंभावनंदेहादि

श्रीरामउवाच ॥ ॥ नैष्कर्म्यात्कल्पनात्यागात्तनुःपततिदेहिनः ॥ कथमेतदतोब्रह्मन्संभवत्याशुजीवतः ॥ १ ॥ ॥ श्रीवसिष्ठउवाच
जीवतःकल्पनात्यागोयुज्यतेनत्वजीवतः ॥ रूपमस्ययथातत्त्वंशृणुश्रवणभूषणम् ॥ २ ॥ अहंभावनमेवाहुःकल्पनंकल्पनाविदः ॥ न
भोर्थभावनंतस्यसंकल्पत्यागउच्यते ॥ ३ ॥ पदार्थरसमेवाहुःकल्पनंकल्पनाविदः ॥ नभोर्थभावनंतस्यसंकल्पत्यागउच्यते ॥ ४ ॥ इदं
वस्त्वितिसंवेगमाहुःकल्पनमुत्तमाः ॥ नभोर्थभावनंतस्यसंकल्पत्यागउच्यते ॥ ५ ॥ स्मरणंविद्धिसंकल्पंशिवमस्मरणंविदुः ॥ तच्चप्राग
नुभूतंचनानुभूतंचभाव्यते ॥ ६ ॥ अनुभूतांनानुभूतांस्मृतिंविस्मृत्यकाष्ठवत् ॥ सर्वमेवाशुविस्मृत्यगूढस्तिष्ठमहामते ॥ ७ ॥ सर्वास्मर
णमात्रात्मातिष्ठायातेषुकर्मसु ॥ अर्द्धसुप्तशिशुस्पंदइवाभ्यस्तोपपत्तिषु ॥ ८ ॥

परिच्छेदाध्यासम् ॥ नभःअपरिच्छिन्नब्रह्माकाशस्तद्रूपस्यार्थस्यस्वपारमार्थिकस्वभावस्यभावनंप्रतिसंधानंपरिच्छेदाध्यासोच्छेदित्वात्संकल्पत्यागस्तैरुच्यते ॥ ३ ॥ ४ ॥ इदं
देहादिसर्वंदृश्यंवस्तुपरमार्थसत्यमितिसंवेगमभिमानम् ॥ तस्यनभःकार्यभूतचतुष्टयविकारत्वात्तत्त्वतोनभोर्थएवैकःस्फुरतीत्यर्थस्यभावनंपर्यालोचनम् ॥ इदंद्वयमपिभ्रांतानुभ
वविरुद्धत्वेपिनजीवनविरुद्धम् ॥ जीवतएवभ्रांतिनिवृत्तिदर्शनादितिभावः ॥ ५ ॥ एवंस्मरणात्मकाध्यासविरोधिनस्तन्निरोधस्यापिनजीवनविरोधितेत्याशयेनाह ॥ स्मरणमि
ति ॥ भूतविषयमनुभूतंभाविविषयमननुभूतम् ॥ स्मरणग्रहणंपरोक्षवृत्तिमात्रोपलक्षणम् ॥ ६ ॥ स्मृतिंस्मरणंसर्वमनुमित्यादिवृत्त्यंतरंचविस्मृत्यअपरिच्छिन्नब्रह्माकारनिली
नःकाष्ठवद्दृढोनिश्चलश्चतिष्ठचिरंजीव ॥ तथाचब्रह्मात्मभावेनचित्तवृत्तिनिरोधोयोगिनामायुर्वृद्ध्याप्रत्युतजीवनहेतुरेवेतिभावः ॥ ७ ॥ व्यवहारकालेतुस्मृतिमात्रनिरोधःकार्य
इत्याह ॥ सर्वेति ॥ दृढाभ्यस्तव्यवहारेनपूर्वापरस्मृतिप्रयत्नाद्यपेक्षास्तीत्याशयेनाह ॥ अर्द्धेत्यादिना ॥ अभ्यस्तोपपत्तिषुपूर्वाभ्यासमात्रेणोपपद्यमानेष्वित्यर्थः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनाप्रयोजनोद्देशंपूर्वसंस्कारमात्रेणकृतकार्यंकुलालचक्रंयथायावद्वेगक्षयंप्रस्पंदतेभ्रमतितिथेत्यर्थः ॥ ९ ॥ सत्वंनिर्वासनंमनस्तदीयसंस्कारवेगमागतोऽनुगतःसन्रागादिदोषक्षयान्नोच्छृंखलप्रवृत्तिप्रसक्तिरित्याशयेनाह ॥ प्रवाहेति ॥ १० ॥ एवंप्रश्नंसमाधायबहुकृत्वोपिपथ्यंवदितव्यमितिन्यायेनप्रागुक्तमेवसंकल्पत्यागादिश्रेयःसाधनमित्युद्घोषयन्पुनःपुनराह ॥ ऊर्ध्वबाहुरित्यादिना ॥ ११ ॥ १२ ॥ अवेदनंदृश्यदर्शननिर्मुक्तमात्मतत्त्वंतदेवमुख्योऽसंकल्पः ॥ १३ ॥ तूष्णींसंकल्पचेष्टांविना ॥ १४ ॥ प्राक्तनसंकल्पप्रयुक्तक्रियावेगवशादेवयावत्तत्क्षयंव्यवहारसिद्धौप्रागुक्तंदृष्टांतांतरंपुनराह ॥ गम्येति ॥ १५ ॥ अवेदनमसंकल्पइतियदुक्तंतद्व्यवहारकालेप्युपपादयति ॥ सर्वेति ॥ १६ ॥ यथास्वतश्चेष्टितोन्मुक्तंशष्पंबालतृणंवाय्वादिप्रवाहपतितंतृणांतरसंयोगवियोगादिकार्यैस्पंदतेतद्वत् ॥ १७ ॥ यथापरेषांकौतुकार्थंनृत्यादिकुर्वंतइवस्थितस्यदारुपुत्रिकायंत्रस्यनटवच्छृं

निःसंकल्पप्रवाहेणचक्रंप्रस्पंदतेयथा ॥ स्पंदस्वकर्मस्वनघप्राक्संस्कारवशात्तथा ॥ ९ ॥ अविद्यमानचित्तस्त्वंसत्त्वसंस्कारमागतः ॥ प्रवाहपतितेष्वेवस्पंदस्वस्वेषुकर्मसु ॥ १० ॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे ॥ असंकल्पःपरंश्रेयःसकिमंतर्नभाव्यते ॥ ११ ॥ अहोमोहस्यमाहात्म्यंयदयंसर्वदुःखहा ॥ चिंतामणिर्विचाराख्योहृत्स्थोपित्यज्यतेजनैः ॥ १२ ॥ अवेदनमसंकल्पस्तन्मयेनैवभूयताम् ॥ एतावत्परमंश्रेयःस्वयमेवानुभूयताम् ॥ १३ ॥ किलतूष्णींस्थितेनैवतत्पदंप्राप्यतेपरम् ॥ परमंयत्रसाम्राज्यमपिरामतृणायते ॥ १४ ॥ गम्यदेशैकनिष्ठस्ययथापांथस्यपादयोः ॥ स्पंदोविगतसंकल्पस्तथास्पंदस्वकर्मसु ॥ १५ ॥ सर्वकर्मफलाभोगमलंविस्मृत्यसुप्रवत् ॥ प्रवाहपतितेकार्येस्पंदस्वगतवेदनम् ॥ १६ ॥ स्पंदस्वाकृतसंकल्पंसुखंदुःखान्यभावयन् ॥ प्रवाहपतितेकार्येचेष्टितोन्मुक्तशष्पवत् ॥ १७ ॥ रसभावनमंतस्तेमालंभवतुकर्मसु ॥ दारुयंत्रमयस्येवपरार्थमिवकुर्वतः ॥ १८ ॥ नीरसाएवतेसंतुसमस्तेंद्रियसंविदः ॥ आकारमात्रसंलक्ष्याहेमंतेर्तौलताइव ॥ १९ ॥ बोधार्कपीतरसयास्पंदन्षड्वर्गसत्तया ॥ यंत्रस्पंदोपमस्तिष्ठवल्ल्येवशिशिरेद्रुमः ॥ २० ॥ चिदांतररसान्येवप्रवृत्तान्यपिधारय ॥ स्वयत्नेनेंद्रियाण्याशुहेमंततुंस्तरूनिव ॥ २१ ॥ सरसेंद्रियवृत्तेस्त्वंकुर्वतोऽकुर्वतस्तथा ॥ संसारानर्थसार्थोयंनकदाचनशाम्यति ॥ २२ ॥ निःसंकल्पमरुज्ज्वालायंत्रांबुस्पंदवद्यदि ॥ स्पंदसेतदनंतायश्रेयसेपरिकल्पसे ॥ २३ ॥ एतदेवपरंधैर्यंजन्मज्वरनिवारणम् ॥ यदवासनमभ्यस्तानिजकर्मसुकर्तृता ॥ २४ ॥

गारादिरसभावनंनास्तितद्वत्त्वमपिकुर्वतोविषयसुखेमूर्खस्येवरसभावनंकौतुकबुद्धिर्माभूदित्यर्थः ॥ १८ ॥ १९ ॥ षड्वर्गःपंचकोशसंवलितचिदाभासः समनस्कःप्राणवर्गोज्ञानेंद्रियवर्गः कर्मेंद्रियवर्गोज्ञानकर्मेंद्रियसहितांतःकरणचतुष्टयम् षाट्कौशिकंशरीरंचेतिषट्षड्वर्गास्तेषांसत्तया ॥ वल्ल्यावेष्टितःशिशिरेद्रुमइवनीरसः ॥ २० ॥ ननुनीरसस्यषड्वर्गस्यकथंजीवनंतत्राह ॥ चिदिति ॥ अनावरणभूमानंदरूपाचिदेवांतरोजीवनपुष्ट्यादिहेतूरसोयेषांतानिप्रवृत्तानिस्वभावाद्बाह्यरसास्वादेप्रवृत्तान्यपिस्वयत्नेननिवार्यचिदांतररसान्येवकृत्वाधारयेत्यर्थः ॥ इंद्रियग्रहणंषड्वर्गोपलक्षणम् ॥ यथाहेमंतर्तुस्तरून्बाह्यजलाभावेप्यांतरेणैवरसेनजीवयतितद्वदित्यर्थः ॥ २१ ॥ इंद्रियवृत्तीनामनिवारणेसरसत्वेचकिंस्यात्तत्राह ॥ सरसेति ॥ २२ ॥ निःसंकल्पमेवमरुतोज्वालायायंत्रस्यांबुनश्चयथास्पंदस्तथायदिस्पंदसे ॥ परिकल्पसेसमर्थःस्याः ॥ २३ ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रेभ्रमतीतिभ्रमआभोगःसन्निवेशइवशनैरुत्तरोत्तरमुपशमशीलःस्पंदस्व ॥ २५ ॥ कर्मफलेआसक्तिबुद्धिर्यस्यतथाविधोमाभूः ॥ अकर्मणिकर्मत्यागेपितत्फलासक्तिलक्ष
णःसंगोमास्तु ॥ फलासंगाभावेकर्मकरणेतत्त्यागेचनविशेषइत्याशयेनाह ॥ उभयमिति ॥ २६ ॥ २७॥ अकार्यंत्याज्यम् ॥ प्राग्वद्यथास्थितमेवआस्यतांस्थीयताम् ॥२८॥
अकर्मत्वंनिष्क्रियब्रह्मात्मताम् ॥ अकर्मणितादृशब्रह्मभावस्थितौकर्मतामवश्यकर्त्तव्यताम् ॥ २९ ॥ अवेदनंप्राग्व्याख्यातम् ॥ ३० ॥ निस्पंदंतूष्णीमवस्थानमामवातजडीकृ
तसर्वांगस्येवखेदायैवेतिशंकांवारयति ॥ समेइति ॥ ३१ ॥ ३२ ॥ कृतेनअकृतेनवालौकिकवैदिककर्मणाजीवतऐहिकोऽजीवतआमुष्मिकोप्यर्थःपुरुषार्थोनास्ति ॥ ३३ ॥
कुतोनास्तितत्राह ॥ यदिति ॥ यद्यस्मात्कारणात्कर्माकर्मोभयबाधावधौतदुभयात्मभूतेचशाश्वताभेदरूपिणित्वयिप्रातिभासिककर्मात्मनाविवर्त्तमानेपिवस्तुतःकर्मतानास्ति

अवासनमसंकल्पंयथाप्राप्तानुवृत्तिमान् ॥ शनैश्चक्रभ्रमाभोगइवस्पंदस्वकर्मसु ॥ २५ ॥ माकर्मफलबुद्धिर्भूर्मातेसंगोस्त्वकर्मणि ॥
उभयंवात्यजैतत्त्वमुभयंवासमाश्रय॥२६॥ बहुनात्रकिमुक्तेनसंक्षेपादिदमुच्यते॥संकल्पनंमनोबंधस्तदभावोविमुक्तता॥ २७॥ नेह
कार्यंनवाकार्यमस्तिकिंचिन्नकुत्रचित् ॥ सर्वंशिवमजंशांतमनंतंप्राग्वदास्यताम्॥२८॥पश्यन्कर्मण्यकर्मत्वमकर्मणिचकर्मताम्॥य
थाभूतार्थचिद्रूपःशांतमास्वयथासुखम्॥२९॥अवेदनंविदुर्योगंचित्तक्षयमकृत्रिमम्॥अत्यंतंतन्मयोभूत्वातथातिष्ठयथासिभोः॥३०
समेशांतेशिवेसूक्ष्मेद्वैतैक्यपरिवर्जिते॥ ततेऽनंतेपरेशुद्धेकिंकेनकिलखिद्यते॥३१॥ नोदेतुत्वयिसंकल्पोमरुभूमाविवांकुरः॥ इच्छानो
देतुभवतिलतिकेवोपलोदरे ॥ ३२ ॥ अवेदनस्यशांतस्यजीवतोवाप्यजीवतः॥ नेहकिंचित्कृतेनार्थोनाकृतेनापिकश्चन॥ ३३ ॥ यत्क
र्माकर्मशांतेऽतःशाश्वताभेदरूपिणि॥ नकर्मणिचकर्माणिनकर्त्तर्यपिकर्त्तृता॥३४॥ अहंममेतिसंविदन्नदुःखतोविमुच्यसे॥ असंविद
न्विमुच्यसेयदीप्सितंतदाचर॥ ३५॥ अहंममेतिनास्त्यलंयदस्तितच्छिवंपरम् ॥ परात्परंत्विदंशिवादशब्दमर्थरूपकम्॥ ३६॥ यदृश्य
तेजगदिदंखलुकिंचिदेतद्ब्रह्मोऽगदत्वमिवभातिनविद्यमानम्॥अस्यक्षयंविदुरवेदनमेवपश्चात्सत्यंतदेवपरमार्थमथावशिष्टम्॥३७॥
इत्यार्षवासिष्ठमहारामायणेवा॰देवदूतोक्तेमोक्षोपायेषुनिर्वाणप्रकरणेउत्तरार्धेइच्छादिचिकित्सायोगोपदेशोनामप्रथमःसर्गः॥१॥

तादृशकर्त्रात्मनाविवर्त्तमानेपिकर्त्तृतानास्ति ॥ यस्यकर्मकर्त्तृतादौसत्यताबुद्धिस्तस्यैवकर्मफलमितिश्रद्धादिवदधिकारिविशेषणविधायकशास्त्रेणबोधनादितिभावः ॥ ३४॥
अतएवदेहादावहंममेतिसंवेदनवतएवविधिनिषेधशास्त्राधिकारात्कर्मकृतोबंधोनेतरस्येतिप्रागुक्तमित्याह ॥ अहंममेति ॥३५॥ पराद्भूमानंदाख्याच्छिवात्परमन्यदिदंदृश्यमर्थ
रूपमिवार्थरूपकंप्रातिभासिकंजगदशब्दमनिर्वचनीयमवस्त्वेवेत्यर्थः ॥३६॥ एतदेवस्पष्टमाह ॥ यदिति ॥ किंचित्इत्थमीदृशंचेतिनिर्वचनशब्दशून्यम् ॥ एतद्बाधाधिष्ठानंतु
अथतदबोधबाधानंतरंपश्चादवशिष्टमवेदनंवेदनाऽविषयमेवानुभवनिष्ठाःसत्यैकरूपंपरमपुरुषार्थरूपंविदुरित्यर्थः ॥३७॥ ॥ इतिश्रीवा॰म॰ता॰नि॰उत्तरार्धेप्रथमःसर्गः॥१॥

१ अयमर्थोमूलस्थकर्मणीत्यस्य २ मूलस्थकर्माणीत्यस्यभावप्रधाननिर्देशादयमर्थइतिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domajn. Digitization by eGangotri

निरूप्यतेऽत्रप्रथमंसर्वंशिवमयंजगत् ॥ कर्मबीजंतथान्विष्यसमूलंविनिवार्यते ॥ १ ॥ सर्वंशिवमयंशांतमनंतंप्राग्वदास्यतामितियदुक्तंतदत्रप्रथममुपपादयितुंप्रतिजानीते ॥ अद्वैतैक्यमिति ॥ आत्मनिपारमार्थिकस्वभावेतत्त्वदृष्ट्याअवस्थितम् ॥ १ ॥ यद्यद्धिचिद्भास्यंतत्तच्चिद्विवर्त्तत्वाच्चिन्मयमित्यंतःकरणचतुष्टयेक्रमेणदर्शयति ॥ मनइति ॥ प्रथमंहिचितश्चेत्योन्मुखत्वलक्षणंमननंचिद्याभमेवततस्तदभिमानाध्यवसायस्मरणकामसंकल्पादिवृत्तयस्तथैवचिद्याभाःसर्वानुभवसिद्धाः ॥ तथाचिच्चेत्यसंबंधलक्षणःकाल श्चेत्याकारस्तत्क्रियानामसंस्थानसहितंसर्वमंतःकरणसंसरणंसाक्षात्साक्षिवेद्यत्वाच्छिवमयमितिबोद्धुंशक्यमित्यर्थः ॥ २ ॥ एवंबहिरिंद्रियतद्द्वारकबाह्यदर्शनतद्विषयेष्वपिचि द्याभिप्रयुक्तेवापरोक्षप्रथेतितत्रापिशिवमयत्वमेवविवेकिभिर्द्रष्टुंशक्यमित्याशयेनाह ॥ शिवेति ॥ रूपालोकग्रहणंशब्दाद्यालोचनानामप्युपलक्षणम् ॥ मनःक्रमाबाह्यसवि कल्पकहानोपादानादिबुद्धयस्तद्विषयाश्च ॥ एवंशिवमयत्वदर्शनेशिवएवसर्वत्रिपुटीरूपेणप्रथतेनततोवस्त्वंतरमस्तीत्याह ॥ तन्मयत्वादिति ॥ ३ ॥ तदेवविशदयति ॥ मात्रि

श्रीवसिष्ठउवाच॥ ॥अद्वैतैक्यंविमननंशांतमात्मन्यवस्थितम्॥यथापंकमयंसैन्यंतथाशिवमयंजगत् ॥ १ ॥ मनोहंकारबुद्ध्यादिचित्तमेवचतन्मयम्॥ कालाकारक्रियाशब्दशक्तिसंदर्भसंयुतम्॥२॥ शिवपंकमयाएवरूपालोकमनःक्रमाः॥ तन्मयत्वादनंतत्वादतःकिंकेनचेत्यते॥ ३॥ मातृमेयप्रमाणादिदेशकालौदिगादिच॥ भावाभावविवर्त्तादिशिवपंकमयात्मकम्॥ ४॥ अहंममेत्यतःसारान्नेतरत्परमेश्वरात्॥ असंसक्तमतिस्तिष्ठहाशिलोदरमौनवत्॥५॥ ॥श्रीरामउवाच॥ ॥अहंममेत्यसद्रूपंज्ञस्याभावयतःप्रभो॥ अशुभंकर्मणांत्यागादनुष्ठानाच्चकिंशुभम् ॥ ६॥ ॥श्रीवसिष्ठउवाच॥ ॥पृच्छामियदहंतत्त्वंकथयाशुममानघ॥ यदिजानासितत्त्वेनकर्मतावत्किमुच्यते॥ ७॥ विस्तारःकर्मणःकीदृङ्मूलंतस्यचकिंभवेत्॥ नाशनीयंचनिपुणंकथंकथयनाश्यते॥८॥ ॥श्रीरामउवाच॥ ॥यन्नाशनीयंनिपुणंतन्नूनंचविनाश्यते॥ मूलकाषेणभगवन्नशाखादिविकर्त्तनैः॥ ९॥

ति ॥ ४ ॥ सर्वविवर्त्तानहंममेतिद्वैरूप्येणैवसंगृह्यतत्रचिद्याभत्वपर्यालोचनेतत्सारतन्मात्रत्वपरिशेषात्तत्रस्थितिःसुलभेत्याशयेनाह ॥ अहमिति ॥ शिलोदरेयत्प्रसिद्धंवागादि चेष्टाशून्यत्वलक्षणंमौनंतद्वत् ॥ नामरूपकर्मात्मकेप्रपंचेनामरूपयोरपरोक्षचिद्यास्यैवस्फुरणाच्छिवमयत्वंनिर्णीयतत्रबाधेनतत्स्वरूपेऽवस्थानंसुकरम् ॥ कर्मणांतुपुण्यपापल क्षणानामनंतकोटिजन्मसंचितानामपरोक्षतयाभानादर्शनाच्चशिवमयत्वदर्शनेनबाधसिद्धिरितितन्निवारणेपरिशेषादामरणंनिश्चेष्टावस्थानलक्षणस्तत्त्यागएवोपायः ॥ नहि ज्ञानिनःकर्मकरणेनकिंचित्फलमपेक्षितंनवानित्यनैमित्तिकत्यागेप्रत्यवायप्रसक्तिरस्तियेनतूष्णीमवस्थानंनसिद्ध्येदितिसंभावनयारामःपृच्छति ॥ अहमिति ॥ ६ ॥ सत्यमेवत वनैष्कर्म्यंसिद्ध्येद्यदिमूलेनसहत्वयातत्त्यक्तुंशक्येत मूलंतुतथातवदुस्त्यजमेवेतिदर्शयितुंवसिष्ठोरामेणकर्मणांकिंमूलमितिनिश्चित्येत्थंपृच्छयतेइतिपरीक्षार्थंरामंत्वयाकर्मणःस्व रूपंतस्यफलात्मकोविस्तारस्तन्मूलंतन्नाशयोग्यांशस्तदुपायश्चकीदृशोनिश्चितइतिपृच्छति ॥ पृच्छामीतिद्वाभ्याम् ॥ ७ ॥ ८ ॥ मूलकाषेणमूलोच्छेदेन ॥ ९ ॥ ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्वरूपंतन्नाशप्रकारंचरामःस्वाभिप्रेतमाह ॥ शुभाशुभमिति ॥ पुण्यपापरूपमित्यर्थः ॥ १० ॥ तृतीयप्रश्नस्योत्तरमाह ॥ कर्मवृक्षस्येति ॥ तत्रादौअथकर्मणामालेत्ये तदेषामुक्थमतोहिकर्माण्युत्तिष्ठंतीतिश्रुत्यानिष्कृष्यदर्शितंमूलंप्रथमंदर्शयति ॥ ब्रह्मन्निति ॥ यस्यनिकाषेणअनशनादिनामरणेनेतियावत् ॥ ११ ॥ ऐहिककर्ममूलंदेहंप्राक्त नकर्मणोविस्तारोपिभवतीतिद्वितीयप्रश्नमपितस्यकर्मवृक्षतयावर्णनेनसमाधत्ते ॥ देहस्तावदित्यादिना ॥ विचित्राभिर्हस्ताद्यंगलक्षणाभिर्लताभिःशाखाभिरंचितोविराजमा नः ॥ १२॥ तस्यप्राक्तनंकर्मबीजम् ॥ १३ ॥ मुहूर्त्तंप्रतिप्रतिमुहूर्त्तंकालरूपेणोग्रमर्कटेनहर्षविषादरोगजरादिविकारचेष्टाभिर्ध्वंसिताकृतेर्निद्रालक्षणेहेमंतजठरेलीनाःसंकुचिताः स्वप्नलक्षणादलोद्गतयःपर्णनिर्गमायस्य॥ १४॥स्वस्यवार्धकलक्षणेशरदीवशरदिशिशिरांतेशांताउपरताःशीर्णाश्चईहाश्चेष्टास्तल्लक्षणाः पर्णसंततयोयस्य ॥ कलत्रंभार्यादिपोष्य

शुभाशुभंनाशनीयंस्वकर्मखलुधीमता॥ मूलकाषविनाशेनतच्चनष्टंभवत्यलम् ॥ १० ॥ कर्मवृक्षस्यवक्ष्यामिब्रह्मन्मूलानिमेशृणु॥ यन्निकाषेणनिर्मूलोनसभूयःप्ररोहति॥ ११ ॥ देहस्तावदयंब्रह्मन्कर्मवृक्षःसमुत्थितः ॥ रूढःसंसारविपिनेविचित्रांगलतांचितः॥ १२॥ कर्मबीजंतरोरस्यसुखदुःखफलावलेः॥ क्षणतारुण्यकांतस्यजराकुसुमहासिनः॥ १३॥ मुहूर्त्तप्रतिकालोग्रमर्कटध्वंसिताकृतेः॥ निद्राहेमंतजठरलीनस्वप्नदलोद्गतेः॥ १४॥ स्ववार्धकशरच्छांतशीर्णेहापर्णसंततेः ॥ जगज्जंगलजातस्यकलत्रोपतृणावलेः॥ १५॥ पल्लवा वयवाहस्तपादपृष्ठादयोऽरुणाः ॥ पत्राणितनुवृत्तानिसुरेखाणिचलानिच ॥ १६॥ अरुणाःपवनालोलाम्रद्वोमसृणमूर्त्तयः॥ स्नाय्व स्थिदिग्धसरसाअंगुल्योबालपल्लवाः ॥ १७ ॥ मृद्वोमसृणतीक्ष्णाग्रावृत्तारूढाःपुनःपुनः ॥ द्वितीयेंदुकलाकाराःकलिकानखपंक्तयः ॥ १८॥ कर्मणःपरिफुल्लस्यदेहरूपतयेतिहि ॥ कर्मेंद्रियाणिमूलानिदुष्टानिग्रंथिमंतिच॥ १९ ॥ स्थिरास्थिग्रंथिनद्धानिपंकमग्नात्मका निच॥ वासनारसपीतानिनिजरक्तरसानिच ॥ २० ॥ गुल्फवंतिदृढांगानिसुत्वंचिमसृणानिच ॥ तेषामपिचमूलानिविद्धिबुद्धींद्रिया णिहि॥ २१ ॥

वर्गस्तद्रूपाउपसमीपप्ररूढातृणावलिःकक्षोयस्य ॥ १५ ॥ हस्तयोःपादयोश्चपृष्ठानिमृदूनिआदिपदादोष्ठौकर्णौजिह्वेत्यादयस्तस्यअरुणास्ताम्रवर्णाःपल्लवरूपाअवयवाः ॥ अल्पारुणानितुतनुवृत्तानिसुरेखाणिचहस्तपादतलानिईषत्कठोरत्वात्पत्राणि ॥ १६ ॥ अंतःस्नाय्वस्थिदिग्धत्वात्सरसारम्याअंगुल्यस्तस्यपवनालोलाबालपल्लवाः ॥ १७ ॥ छिन्नाअपिपुनःपुनारूढाःप्रादुर्भूतानखपंक्तयस्तस्यकलिकाःकोरकाः ॥ १८ ॥ इतिदेहवृक्षरूपतयापरिफुल्लस्यप्ररूढस्यप्राक्तनकर्मणःकर्मेंद्रियाणिमूलानि ॥ तेषुतरुमूलधर्मा न्दर्शयति ॥ दुष्टानीति ॥ तेषुयान्निसच्छिद्राणितान्यासंगकामादिसर्पदुष्टानियान्यच्छिद्राणितानिग्रंथिमंति ॥ १९ ॥ तानिपुनर्यथायोगंविशिनष्टि ॥ स्थिरेति ॥ पंकोनाडी षुपूर्णोन्नरसस्तन्मग्नात्मकानि ॥ २० ॥ तत्रपादेंद्रियाणिगुल्फवंति ॥ सुत्वंचिशोभनत्वक्संवृतानिअतएवमसृणानि ॥ तेषांमूलांतराण्याह ॥ तेषामपीति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदूरस्थविषयंप्रत्यपिजातानिप्रादुर्भूतानि देहाद्बहिर्विषयदेशंगत्वापिग्रहीतुंसमर्थानीत्यर्थः ॥ पंचस्तंबानिनेत्रगोलकादिपंचविधस्थानाश्रितानि कर्मेंद्रियवदेवस्वस्वविषयवासनापंकमग्नानि ॥ अतएवतत्ररसवंति ॥ महांतिनिग्रहीतुमशक्यानि ॥ २२॥ पंचेंद्रियस्रोतोरूपाभिःशिराभिरंतराकृष्टाउपभोगोत्तरंमुक्ताश्चअनंतारूपादिरसद्रवायेन ॥२३॥ तस्यमनसोपिमूलंचेत्योन्मुखीचिदाभासभावेनचेत्यप्रवणायातेजोबन्नप्रविष्टाचित्तदात्मकम् ॥ तत्रचेत्यांशस्यचेतनमविद्याशबलाचिन्मूलम् ॥ २४ ॥ चितश्चिदाभासांशस्यतुबिंबभूतंब्रह्मचैतन्यमेवमूलम् ॥ २५ ॥ वेदनंचेत्योन्मुखचित् ॥ तच्चाहंकारादितादात्म्यापन्नंकर्तृस्वरूपमहमितिचेतयित्वाक्रियात्मकस्पंदःसंस्तत्फलायप्रवर्त्तते ॥ २६ ॥ चेतनंजीवचिदेव ॥ २७ ॥ एतज्जीवचैतन्यमहंकारादिसंवलनेनकर्तृचेतनोहमितिशब्दार्थभावनयोद्बुद्धयायदिसंवलितंतत्तदेवेत्यर्थः ॥ कर्मणांबीजतांमूलताम् ॥ २८ ॥ तदे

सुदूरमपिजातानिपंचस्तंबानितानितु॥ वासनापंकमग्नानिरसवंतिमहांतिच॥ २२ ॥ तेषांमूलंबृहत्स्तंभंमनोव्याप्तजगत्त्रयम् ॥ पंचस्रोतःशिराकृष्टमुक्तानंतरसद्रवम् ॥ २३ ॥ तस्यमूलंविदुर्जीवंचेत्योन्मुखचिदात्मकम् ॥ चेत्यस्यचेतनंमूलंसर्वमूलैककारणम् ॥ २४ ॥ चितेस्तुब्रह्ममूलंयत्तस्यमूलंनविद्यते॥ अनाख्यत्वादनंतत्वाच्छुद्धत्वात्सत्यरूपिणः॥२५॥ सर्वेषांकर्मणामेवंवेदनंबीजमुत्तमम्॥स्वरूपंचेतयित्वांतस्ततःस्पंदःप्रवर्त्तते॥ २६॥ मुनेचेतनमेवाद्यंकर्मणांबीजमुच्यते ॥ तस्मिन्सतिमहाशाखोजायतेदेहशाल्मलिः॥ २७॥ एतच्चेतनशब्दार्थभावनावलितंयदि॥ तत्कर्मबीजतामेतिनोचेत्सत्परमंपदम्॥ २८॥ चितिश्चेतनशब्दार्थभावनावलितायदि ॥ तत्कर्मबीजतामेतिनोचेदाद्यंपरंपदम्॥ २९ ॥ तस्माद्वेदनमेवेहकर्मकारणमाकृतेः ॥ यदेतत्कर्मणांप्रोक्तंत्वयैवोक्तंमुनीश्वर ॥ ३० ॥ ॥ श्रीवसिष्ठउवाच॥ ॥ अस्यराघवसूक्ष्मस्यकर्मणोवेदनात्मनः॥ कस्त्यागःकिमनुष्ठानंयावद्देहमितिस्थितम्॥ ३१॥ यच्चेत्यतेनुतेनाशुबहिरंतश्चभूयते॥ सत्याकारमसत्यंवाभवत्वाहितविभ्रमम्॥ ३२॥ नचेत्यतेचेत्तदलंभ्रमादस्माद्विमुच्यते॥ भ्रमःसत्योस्त्वसत्योवाकिंविचारणयानया॥ ३३॥ एतच्चेतनमेवांतर्विकसत्युद्भवभ्रमैः॥ वासनेच्छामनःकर्मसंकल्पाद्यभिधात्मभिः॥ ३४॥

वस्पष्टमाह ॥ चितिरिति ॥ वलितावेष्टिता ॥ तत्भावनासंवलितरूपम् ॥ २९ ॥ उक्तार्थस्यप्रामाणिकतासिद्धयेगुरुवाक्यसंवादित्वोक्त्योपसंहरति ॥ तस्मादिति ॥ आकृतेर्देहाद्यहंभावाकारस्यस्वस्यवेदनमेवकर्मणांकारणम् ॥ मयायदेतत्कर्मणांमूलंप्रोक्तंतत्प्राक्त्वयैवोक्तंत्वद्वचनमालंब्यैवेदंमयाप्रोक्तमित्यर्थः ॥ ३० ॥ एवंत्वयावर्णितंकर्ममूलंनतूष्णीमवस्थानेनदेहत्यागेनवात्यक्तुंशक्यमितिनत्वदुपेक्षितरीत्याकर्मनिवृत्तिःसंभवतीत्याशयेनवसिष्ठउवाच ॥ अस्येति ॥ यावद्देहंयावदुपाधि ॥ ३१ ॥ तस्मिन्सतिबाह्यांतरदृश्याध्यासोदुर्निवारइत्याह ॥ यदिति ॥ यद्यत्तेनबाह्यमाभ्यंतरंवाचेत्यतेतेनतेनदृश्येनभूयतेउद्भवःप्राप्यते ॥ नुइतिसंभावने ॥ ३२ ॥ सुषुप्त्यादिकालेनचेत्यतेचेत् ॥ तीर्णोहितदासर्वाञ्छोकान्हृदयस्यभवतीतिश्रुतेस्तथैवानुभवाच्चेतिभावः ॥ नन्वसत्यभ्रमेणास्यकाक्षतिस्तत्राह ॥ भ्रमइति ॥ बाधाभावेअसत्यदुःखस्याप्यनुभवेसत्यविशेषादितिभावः ॥ ३३ ॥ एतज्जीवचेतनमेवौपाधिकैर्वासनादिनामभिरुद्भवभ्रमैःसंसारात्मनाविकसति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतर्हिप्रबोधेनसप्रतिबिंबहेतुश्चित्तोपाधिर्निरसनीयस्तत्राह ॥ प्रबुद्धस्येति ॥ ३५ ॥ तस्मान्नतूर्ष्णींभावेनदेहत्यागेनवाकर्मोपरमःकर्मत्यागःकिंतुयथाप्राप्तव्यवहारकालेप्यसंगाद्वितीयकूटस्थचिन्मात्रोहंनैवकिंचित्करोमीतिनिष्क्रियात्मस्वभावस्थित्याकर्मशब्दार्थभावनायाअभावेनअनुद्भवेसतिविनापियत्नंकर्माकर्मत्वविकल्पमुत्सृज्यकेवलंस्वयमेवभवतीत्यर्थः ॥३६॥ इतोन्यथातुकर्मत्यागोदुष्करइत्याह ॥ असंभवतीति ॥३७॥ बोधात्सर्वद्वैतबाधेनकर्मणोपिबाधलक्षणस्त्यागस्तुकुर्वतोप्यविरुद्धइत्याशयेनाह ॥ बोधादिति॥ इदंतासंवित्तेर्दृश्यप्रतिभासस्यस्वयमेवविलयनाद्बाधात्तुयदत्यंतासत्त्वंतंजगतस्त्यागम् ॥३८॥ ननुबोधाद्वेद्यमेवबाध्यतेनवेदनंतत्कथंतद्बाधउच्यतेतत्राह ॥ वेदनमिति॥३९॥ साचवेद्यदृक्नत्त्वदृशानोत्पन्नानैवविद्यते ॥ उपाधिबाधेचिदाभासस्यपृथगनवस्थानादितिभावः ॥ यत्तुचिदाभासत्वरूपंवेद्योन्मुखत्वंसंत्यज्यशुद्धचिदात्मकंरूपंशिष्टंतन्नद्वैतवेदनंयतस्तत्कर्मक्रियानो येनभावल्युडंतविदधात्वर्थःस्यादित्यर्थः ॥ किंतुब्रह्मैवेत्याह ॥ वेद्योन्मुखत्वमिति ॥ ४० ॥ यत्तुचिदाभासात्मकंचेतनंतत्कर्मक्रियारूपमेवप्रोच्यते

प्रबुद्धस्याप्रबुद्धस्यदेहिनोदेहगेहके॥ आदेहंविद्यतेचित्तंत्यागस्तस्यनविद्यते॥ ३५॥ जीवतांतस्यसंत्यागःकथंनामोपपद्यते ॥ केवलंकर्मशब्दार्थभावनाभावनेसति॥ ३६ ॥ कर्माकर्मत्वमुत्सृज्यस्वयमेवभवत्यजम् ॥ असंभवतिसंत्यागेकर्मणोयःकरोतिहि॥ ३७॥ इदंकर्त्तव्यतात्यागंनकिंचित्तेनतत्कृतम्॥ बोधादिदंतासंवित्तेःस्वयंविलयनात्तुयत् ॥ ३८ ॥ जगतस्तंविदुस्त्यागमसंगंमोक्षमेवच॥ वेदनंसतिसंवेद्येसर्गादावेववेद्यदृक्॥ ३९ ॥ नोत्पन्नाविद्यतेनैवतस्मात्किंकेववेदनम्॥ वेद्योन्मुखत्वंसंत्यज्यरूपंयद्वेदनस्यवै ॥४०॥ नवेदनंतन्नोकर्मतद्धांतंब्रह्मकथ्यते॥ चेतनंप्रोच्यतेकर्मसंसृत्याभ्रविकासितम्॥ ४१ ॥ अचेतनंविदुर्मोक्षंज्ञंप्रत्येवोपदेशगीः॥ त्यागोहिकर्मणांतस्मादादेहंनोपपद्यते॥ ४२ ॥ यैस्तुसंपूज्यतेकर्मतन्मूलंतैर्नमुच्यते॥ मूलंस्वकर्मणःसंविन्मनसोवासनात्मनः॥ ४३ ॥ साचादेहंसमुच्छेत्तुमृतेबोधान्नशक्यते॥ रामकेवलमेषांतःकर्ममूलकरापरा॥ ४४ ॥ सूक्ष्मसंविदसंवित्त्यास्वयत्नेननिकृंत्यते॥ येनसंविदसंवित्त्यास्वयत्नेनविचार्यते॥ ४५ ॥

यतस्तत्संसृत्याबुद्ध्याद्युपाधिकारकव्यापारेणजलादौप्रतिबिंबितमभ्रमाकाशमिवविकासितम् ॥ ४१ ॥ अतएवमोक्षमचेतनंचिदाभासशून्यमेवविदुरनुभवनिष्ठाः ॥ तेषांज्ञंविवेकिनंशिष्यंप्रतिउपदेशगीरुपदेशवाणीचइतिएवंरूपैवश्रूयतइत्यर्थः ॥ इत्थंचयावद्देहंसुखेनव्यवहारःसिद्धइत्याशयेनाह ॥ त्यागइति ॥ ४२ ॥ वासनात्मनोमनसःसंबंधिनीचिदाभाससंवित् ॥ ४३ ॥ कर्ममूलान्यन्यान्यपिकामवासनादीनिकरोतीतिकर्ममूलकरा पराकर्तृत्वात्तत्कारिषुश्रेष्ठाच ॥ ४४ ॥ तस्मान्मदुक्तएवकर्मत्यागोपायइत्याशयेनोपसंहरति ॥ सूक्ष्मेति ॥ येनचिदाभासरूपासंवित्असंवित्त्यामूलाज्ञानेनसहस्वयत्नेनतत्त्वंबुद्ध्वाविचार्यतेरलयोरभेदाद्विचाल्यतेस्वरूपात्प्रच्याव्यतेतेनतन्मूलातत्तद्दृश्यदर्शनरूपात्स्वयवच्छिन्नचिदाभासात्मिकापिमूलबाधकस्वयत्नेनैवअसंवित्त्याअप्रतिसंधानेननिकृंत्यते ॥ नतन्निकृंतनेपृथक्प्रयत्नापेक्षास्तीतिभावः ॥ क्वचित्पुस्तकेयेनेत्याद्युत्तरार्द्धंनपठ्यतएवतदातेनसंसृतिवृक्षस्यतत्त्वज्ञानेनसर्वबाधलक्षणोमूलकाषोवितन्यतेयेननिकृंत्यतइतिपरेणयोज्यम् ॥ ४५ ॥

१ मूलेटीकायांचविकलनादित्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४६ ॥ नविद्यतेचेतनंचिदाभासोयत्रतथाविधमाकाशमेकमनन्यत्सजातीयभेदैरिदमर्थैर्दृश्यैर्हीनंतद्ब्रह्मैवेवमुक्तदृशाअस्तितदेवसर्वेषामस्मदादिचेतनानांसारंपारमार्थिकंरूपमा
हुर्ब्रह्मविदइत्यर्थः ॥ ४७ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेद्वितीयःसर्गः ॥ २ ॥ अत्यंतमार्जितेवेद्येयथातत्त्वमवेदनम् ॥ निष्क्रियंचापिविदुषांतथोपा
यदहोच्यते ॥ १ ॥ अवेदनंविदुर्मोक्षंचित्तक्षयमकृत्रिममितियदुक्तंतत्ररामःशंकते ॥ अवेदनमिति ॥ यद्यपिवेद्योन्मुखत्वंसंत्यज्यरूपंयद्वेदनस्यवै नवेदनंतन्नोकर्मतच्छांतंब्रह्म
कथ्यतइतिप्रागुक्तत्वान्नास्याःशंकायाउत्थानंसंभवति तथाप्यंतेसंविदसंवित्त्यानिकृंत्यतेइत्युक्त्यातन्नाशएवोक्तःसचतच्छांतंब्रह्मकथ्यतइतिप्रागुक्त्यासहविरुद्धःसतोऽसत्वायो
गादितिसंभवत्येवप्रश्नः ॥ एतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीत्युक्तेअत्रैवमाभगवानमूमुहन्नप्रेत्यसंज्ञास्तीतिमैत्रेयीप्रश्नवदिति ॥ १ ॥ अतएवनवाअरे
मोहंब्रवीम्यविनाशीवारेऽयमात्माअनुच्छित्तिधर्मामात्रासंस्पर्शस्त्वस्यभवतीतियाज्ञवल्क्यवद्वसिष्ठोपिसमाधत्ते ॥ नासतइति ॥ २ ॥ कथंसुकरंतदाह ॥ एताविति ॥ एतौसंसा

तेनसंसृतिवृक्षस्यमूलकाषोवितन्यते ॥ ४६ ॥ अचेतनाकाशमनन्यदेकंतदेवमस्तित्विदमर्थहीनम् ॥ तद्व्योमरूपंयतएतदेवंनिरामयंचे
तनसारमाहुः ॥ ४७॥ ॥इ०वा०वा०दे०मो०नि०उ०कर्म[illegible]दाहयोगोपदेशोनामद्वितीयःसर्गः॥२॥ ॥श्रीरामउवाच॥ ॥अवे
दनंवेदनस्यमुनींद्रक्रियतेकथम्॥ नासतोविद्यतेभावोनाभावोविद्यतेसतः॥१॥ ॥श्रीवसिष्ठउवाच॥ ॥नासतोविद्यतेभावोनाभावो
विद्यतेसतः॥ यदातदेवसुकरंवेदनावेदनंस्वयम्॥२॥एतौवेदनशब्दार्थौरज्जुसर्पभ्रमोपमौ॥असत्यावुदितौविद्धिमृगतृष्णांभसासमौ
॥३॥ अवोधस्त्वनयोःश्रेयान्बोधोदुःखायचैतयोः॥ तस्मात्सदेवबुद्ध्यस्वमाऽसद्बुद्ध्यस्वराघव॥४॥ जंतोर्वेदनशब्दार्थबोधोदुःखकरः
परः॥निष्कृत्यज्ञप्तिशब्दार्थबोधंतिष्ठयथास्थितम्॥५॥सर्वाववोधावसरेज्ञप्तिशब्दार्थयोरिह॥निर्वाणोदयइत्येवपरमोमितिशाम्यताम्
॥६॥ शुभाशुभात्मकर्मस्वंनाशनीयंविवेकिना॥तन्नास्तीत्यवबोधेनतत्त्वज्ञानेनसिध्यति॥७॥कर्ममूलनिकाषेणसंसारःपरिशाम्यति॥
सुविचारितमन्विष्टंयावत्कर्मनविद्यते॥८॥ चिद्रूपोबिल्वमज्जांतश्चित्तसंज्ञांयदात्मनि॥ करोतितद्यथाबिल्वान्नस्वल्पमपिभिद्यते॥९॥

रदशाप्रसिद्धौ ॥ यत्रहिद्वैतमिवभवतितदितरइतरंपश्यति यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत् यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेत्यादिश्रुतिषुएतयोर्नि
षिद्धत्वादितिभावः ॥ ३ ॥ अतएववेदनघटितत्रिपुटीसाक्षिणस्त्रिपुटीनिवृत्तिरेवमोक्षइत्याशयेनाह ॥ अबोधस्त्विति ॥ सदविनाशिकूटस्थात्मरूपमेवबुद्ध्यस्व असतत्रिपुट्यंतर्ग
तवृत्त्याद्युपहितचिदाभासंमाआत्मेतिबुद्ध्यस्व ॥ ४ ॥ परिच्छिन्नेतस्मिन्नात्मताबुद्धिरेवसर्वेषामनर्थहेतुरित्याह ॥ जंतोरिति ॥ निष्कृत्यसमूलंछित्त्वा ॥ ५ ॥ व्यवहारकालेत
स्यकथमुच्छेदःकार्यस्तत्राह ॥ सर्वेति॥ सर्वत्रिपुटीबोधलक्षणव्यवहारावसरेपिव्यावहारिकज्ञप्तिशब्दार्थयोःपरमन्यत्तत्रयथायोगंसर्वार्थपरंकूटस्थचिन्मात्रंसर्वशब्दपरेणओ
मित्यनेनलक्षयित्वासएवात्मानिर्वाणोदयइत्येवशाम्यतांनिर्विक्षेपंव्यवह्रियतामित्यर्थः ॥ ६ ॥ ईदृशबोधव्यवहारादेवोत्तरपूर्वयोःशुभाशुभयोरश्लेषविनाशौसिद्ध्यतइत्याह ॥
शुभेति ॥ ७ ॥ कूटस्थात्मदर्शनमेवसर्वकर्ममूलवेदनोच्छेदेनसर्वकर्मबाधइत्याह ॥ कर्मेति ॥ यावत्समूलंसफलंसशाखोपशाखपत्रपुष्पंचसर्वंकर्मनविद्यते ॥ ८ ॥ यथाबिल्व
मज्जास्वांतर्यद्बीजादिकरोतितद्बिल्वाद्यथानभिद्यतेतथाचिद्रूपोप्यात्मनियच्चित्तसंज्ञांक्रियाकारकादित्रिपुटींकरोतितत्स्वल्पंमनागपिनभिद्यतइत्यन्वयः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

भूलोकसन्निवेशांतर्गतोजंबूद्वीपादिसन्निवेशोयथाभुवोनपृथक् ॥ नभोव्योमतदंतर्गतभूतभुवनार्थादिचपरस्मात्सन्मात्रान्नपृथक् ॥ १० ॥ तदर्थयोश्चित्त्वचित्तशब्दार्थयोस्त दर्थत्वाच्चिन्मात्रार्थकचितिधात्वर्थत्वात् ॥११॥ अतद्भावंयाहकत्वस्मर्तृत्वधर्मद्वयशून्यम् ॥ १२ ॥ कुतस्तच्छून्यंतदाह ॥ चेतनमिति ॥ चेतयतीतिचिदितिव्युत्पत्त्याहिचेतन मर्थप्रकाशनंचितःकर्मक्रियेत्यवगम्यते ॥ तच्चकूटस्थायाश्रितोनिर्मूलंभ्रमयक्षवन्मिथ्यैवयदहेतुकंमिथ्यारूपमुदेतितन्नोदितमेवअतोनक्रियारूपमन्यत्तत्रविद्यतइतिविकल्प मात्रंतथाव्युत्पादनमित्यर्थः ॥ १३ ॥ एवंचेतनक्रियायाअपृथक्त्वेतद्विषयाणामपितत्सिद्धमित्याह ॥ चेतनमिति ॥ यदाचेतनंकर्मअहेतुकमितिअनिलतस्स्पंदवदपृथक्तदावहि र्जायतिअंतःस्वप्नसुषुप्त्योश्चसैवार्थधीरित्यर्थाअप्यात्मैवनपृथगित्यर्थः ॥ १४ ॥ सर्वकर्मविस्तारोदेहएव ॥ अथकर्मणामात्मेत्येतदितिश्रुतेः ॥ सएवमूलतःअहंतात्माशाखातः

नयथासन्निवेशांतःसन्निवेशस्ततःपृथक् ॥ नथानभोर्थादिपृथङ्परस्मान्मनागपि ॥ १० ॥ यदेवांभस्तदेवांतर्द्रवत्वमपृथग्यथा ॥ चित्त्वमेवतथाचित्तंतद्रूपत्वात्तदर्थयोः ॥ ११ ॥ यथाद्रवत्वंपयसियथालोकश्चतेजसि ॥ तथाब्रह्मण्यतद्भावंचित्त्वंचित्तंचविद्यते ॥ १२ ॥ चेतनंकर्मतत्स्वांतंन्निर्मूलंभ्रमयक्षवत् ॥ उदेत्यहेतुकंतच्चेन्नोदितंतन्नविद्यते ॥ १३ ॥ चेतनंकर्मतच्चैतद्भातिस्पंदइवानिलः ॥ अहेतुकं यदात्मैतद्बहिरंतश्चसार्थधीः ॥ १४ ॥ विस्तारःकर्मणोदेहःसोहंतात्मासेसंसृतिः ॥ अचेतनानहंत्वेनशाम्यत्यस्पंदवातवत् ॥ १५ ॥ अचेतनादनंतात्माभूत्वाज्ञोप्युपलोपमः ॥ संसारमूलकषणंकुरुक्रोडमुखाग्रवत् ॥ १६ ॥ कर्मबीजकलाकोशत्यागएवंकृतोभवेत् ॥ नान्यथाराघवांतस्त्वेशांतमस्तुसदास्थितम् ॥ १७ ॥ कर्मबीजकलात्यागेत्वेतस्मादितरात्मनि ॥ अविद्यमानेजीवस्यतज्ज्ञैर्विदितवस्तुभिः ॥ १८ ॥ शांतैर्नगृह्यतेकिंचिन्नचसंत्यज्यतेपिच ॥ त्यागादानेनजानंतिततस्तैःशांतमानसम् ॥ १९ ॥ आकाशशून्यहृदयैर्ज्ञैर्यथास्थित मास्यते ॥ क्रियतेचयथाप्राप्तंनाप्यैतैःक्रियतेपिच ॥ २० ॥ प्रवाहपतितंसर्वस्पंदतेशांतमानसम् ॥ तेषांकर्मेंद्रियाण्येवमर्द्धसंसुप्तबाल वत् ॥ २१ ॥

संसृतिःअचेतनंचिदाभासात्मकंक्रियाबाधस्तल्लक्षणेनानहंत्वेनमूलोच्छेदेनसशाखःसशाम्यतीत्यर्थः ॥ १५ ॥ चिदाभासोच्छेदेनजीवस्यात्मनाशोवृत्तइतिनमंतव्यंकिंतुसब्रह्म भावेनानंतात्माभूत्वास्वानर्थसंसारमूलोच्छेदंपरमपुरुषार्थंसंपादितवानित्याह ॥ अचेतनादिति ॥ क्रोडोवराहस्तन्मुखाग्रंयथामुस्तादिमूलकषणंकरोतितद्वत् ॥ १६ ॥ नान्य थाहेराघवअतःकारणात्तेअंतःसदास्थितंवेदनात्मकंकर्ममूलंशांतमस्तु ॥ १७ ॥ एतस्मिन्कर्मबीजकलात्यागेकृतेजीवस्यइतरात्मनिब्रह्मात्मत्वातिरिक्तेचिदाभासात्मनितद्दृश्य प्रपंचात्मनिचअविद्यमानेजातेतज्ज्ञैःशांतैःकिंचिन्नगृह्यतेनत्यज्यतेचेतिपरेणान्वयः ॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिश्रुतेरितिभावः ॥ १८ ॥ १९ ॥ २० ॥ य थानदीप्रवाहपतितंतृणकाष्ठादिसर्वंस्पंदतेएवंतेषांकर्मेंद्रियाणिशांतमानसंविनापिमनोविकारंस्पंदंतेइतिविपरिणम्यते ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वासनेनिर्विषयेरसेनिरतिशयानंदे॥रसाभोगप्रषणाःकरणवृत्तयोनीरसारागशून्याःसंतोऽज्ञाननिपुणाःस्वस्वविषयप्रकाशेअसमर्थाइवभूत्वा॥२२॥ प्रागुक्तवेदनमेवकर्मणस्त्यागः॥ इतरेणजीवनादृष्टाक्षिप्तदेहादिस्पंदरूपेणकर्मणा ॥२३॥ अनुल्लेखंकृताकृतप्रतिसंधानशून्यम् ॥२४॥२५॥ अत्यागंमूलत्यागरहितंकर्मेंद्रियसंयममात्ररूपम् ॥ तथाचोक्तं भगवता ॥ कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन् इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यतइति ॥ २६ ॥२७॥ इतिप्रागुक्तरीत्यासमूलमुत्सृज्य ॥ २८ ॥ अतन्मयास्तदभिमानलक्षणविकारशून्याः॥ क्षीबामदिरोन्मत्ताइव यंत्रेणसंचारिताःकाष्ठादिप्रतिमाइवच ॥२९॥ व्यसनेनआसक्त्यतिशयेनउपहताःस्वदेहाद्यप्रतिसंधानंप्राप्ताइवेत्युत्प्रेक्षा॥

रसेनिर्वासनेलब्धेरसाअप्यतिनीरसाः ॥ नांतस्तिष्ठंतिनबहिरज्ञाननिपुणाइव ॥ २२ ॥ कर्मणोवेदनंत्यागःसचसिद्धःप्रबोधतः ॥ अवस्तुनेतरेणार्थःकिंकृतेनाकृतेनवा ॥ २३ ॥ अवेदनमसंवेद्यंयदवासनमासितम् ॥ शांतंसममनुल्लेखंसकर्मत्यागउच्यते ॥ २४ ॥ अपुनःस्मरणंसम्यक्चिरविस्मृतकर्मतत् ॥ स्थितंस्तंभोदरसमंसकर्मत्यागउच्यते ॥२५॥ अत्यागंत्यागमितियेकुर्वतेव्यर्थबोधिनः॥ साभुंक्तेतान्पशून्अज्ञान्कर्मत्यागपिशाचिका ॥ २६ ॥ समूलकर्मसंत्यागेनैवयेशांतिमास्थिताः ॥ नैवतेषांकृतेनार्थोनाकृतेनेहकश्चन ॥ २७ ॥ समूलमलमुद्धृत्यकर्मबीजकलामिति ॥ नित्यमेकसमाधानास्तज्ज्ञास्तिष्ठंत्यतःसुखम् ॥२८॥ प्रवाहपतितेकार्येईषत्स्पंदाअतन्मयाः॥ घूर्णमानाइवक्षीबायंत्रसंचारिताइव ॥ २९ ॥ मोक्षलक्ष्म्याविलासिन्याव्यसनोपहताइव ॥ अर्द्धसुप्तप्रबुद्धाभाःकामप्यवनिमागताः ॥३०॥ यत्समूलंपरित्यक्तंतत्त्यक्तमितिकथ्यते ॥ अमूलकाषस्त्यागोयःसशाखालवनोपमः॥३१॥ अकृष्टमूलशाखाग्रलवनःकर्मपादपः॥ पुनःशाखासहस्रेणदुःखायपरिवर्द्धते ॥ ३२ ॥ अवेदनात्मनातेनकर्मत्यागोंगसिद्ध्यति ॥ क्रमेणनेतरेणातएतद्वेवाहरन्भव॥३३॥ येत्वेवंकर्मसंत्यागमकृत्वान्यत्प्रकुर्वते ॥ अत्यागंत्यागरूपात्मगगनंमारयंतिते ॥३४॥ बोधात्मकतयाकर्मत्यागःसंपद्यतेस्वयम् ॥ दग्धबीजानिरिच्छोच्चैरक्रियैवभवेत्क्रिया ॥३५॥ बुद्धींद्रियेहितंकर्मसफलंरसभावनात् ॥ वेष्टितव्यंकुदाम्नेवस्पंदोन्योनिष्फलोंगजः ॥३६॥

कामप्यवनिंपंचम्यादिभूमिकाम् ॥३०॥३१॥ नकृष्टमुन्मलितंमूलंयत्रतथाविधंशाखाग्रलवनंयस्य ॥३२॥ तेनप्रागुक्तेनक्रमेणाहरन्नभ्यस्यन्भवतिष्ठ ॥ ३३ ॥ ३४ ॥ निरिच्छाजीवन्मुक्तक्रियाउच्चैर्महारंभापिदग्धबीजेत्यक्रियैव ॥ नहिमहानपिदग्धतंतुःपटाभासःपटोभवतीतिभावः ॥ ३५ ॥ बुद्धिसहितैरिंद्रियैर्भोगासक्तिरसभावनादीहितंनिष्पादितं ॥ यथाकुदाम्नावेष्टितव्यंकूपकाष्ठंरसभावनाज्जलोद्धरणसेचनादिरूपात्सस्यसंपत्त्यासफलंनतुवृथाचेष्टामात्रात्तद्वदन्योंऽगजःकायचेष्टामात्ररूपःस्पंदोनिष्फलः ॥३६॥

१ कर्मवदित्यपिक्वचित्पाठः जस्तो रसभावनाले पानि झिकनलाई दाम्लोले बाँधिएको काठै मात्र पानि झिकेर बालिपटाउन सक्छ त्यस्तै बुद्धिले बाँधिएको कर्म इन्द्रियले मात्र आफ्नो रसमा झिक्न सक्छ, बुद्धि नपिठोरीले न बाँधिएको अरू देहअवयवले, आफ्नो रसमा झिक्नेचेष्टा निष्फल छ, रसभावनात् कुदाम्ना वेष्टितव्यं कूपकाष्ठं इव बुद्धि इन्द्रिय इहितं कर्म रसभावनात् सफलं भवति, अन्यः अंगजः स्पंद निष्फलं भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाम्यतु धनादिसंपदुपचयेन दरिद्रोस्तु उदयं तदुपचयमभ्येतु वा समसमएवेतिशेषः ॥ ३७ ॥ ३८ ॥ गेहमेवेत्येतत्श्लोकस्यपूर्वार्द्धं वर्णयति ॥ परिशांतेतिद्वाभ्याम् ॥३९॥ निर्वाणंज्ञानाग्निनासहोपरतंदृश्यंयस्य ॥ ४० ॥ तदुत्तरार्धंवर्णयति ॥ अनंतेतित्रिभिः ॥ ४१ ॥ ४२ ॥ विविधैःकार्यैरवश्यकर्त्तव्यैरर्जनव्ययप्रवासकलहादिभिःसदैवलोभमोहशोकभयासक्त्यादिविकारदशामयी ॥ पुरंशाखानगरं ॥ पत्तनंमहानगरं ॥ मंडलान्यवांतरदेशाः ॥ मलिनेद्ददिईदृशीअमलास्फुटासर्वामहीमुकुरकोशेइवप्रतिबिंबिताभवत्येवेत्यज्ञस्यनारण्येपिविश्रांतिसुखमित्यर्थः ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठम०रा०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेतृतीयःसर्गः ॥ ३ ॥ ॥ ७ ॥ ॥ इहाहंतैवसंसारमूल

कर्मत्यागेस्थितेबोधाज्जीवन्मुक्तोविवासनः ॥ गृहेतिष्ठत्वरण्येवाशाम्यत्वभ्येतुवोदयम् ॥ ३७॥ गेहमेवोपशांतस्यविजनंदूरकाननम् ॥ अशांतस्याप्यरण्यानीविजनासजनापुरी ॥३८॥ परिशांतमतेर्ज्ञस्यस्वप्नेप्यप्राप्तमानवा ॥ निर्मलाविततात्द्वद्यात्द्ध्येववनभूमिका ॥ ३९॥ ज्ञस्यनिर्वाणदृश्यस्यनिस्पंदार्थानभोमयी ॥ शांताशेषविशेषार्थाजगदेवमहाटवी ॥ ४० ॥ अनंतसंकल्पवतोत्द्वदयस्यजगत्स्थितेः॥ त्द्ध्येवावर्त्ततेभूमिरज्ञस्याखिलसागरा ॥४१॥ जनस्याज्ञस्यदीनस्यविविधद्वंद्वसंकटा ॥ सारंभाविविधाकारात्द्ध्येवग्राममंडली॥४२॥ विविधकार्यविकारदशामयीसपुरपत्तनमंडलपर्वता॥ मुकुरकोशइवप्रतिबिंबितात्द्दिभवत्यमलामलिनेमही॥४३॥ ॥इ० वा०महारामायणेवा०दे०मोक्षोपायेषुनिर्वाणप्रकरणेउ०दृश्योपशमयोगोपदेशोनामतृतीयःसर्गः॥३॥ ॥श्रीवसिष्ठउवाच॥ ॥साहंतादिजगच्छांतौबोधेसंविल्कलात्मनि ॥ संशांतदीपसंकाशस्त्यागःसिद्ध्यतिनान्यथा ॥ १ ॥ नत्यागःकर्मसंत्यागोबोधस्त्यागइतिस्मृतः ॥ अजगत्प्रतिभैकात्मायोनहंतादिरव्ययः॥२॥ अयंसोहमिदंतन्मइतिनिःस्नेहदीपवत् ॥ शांतिपरमनिर्वाणेप्रबोधात्मेतिशिष्यते॥३॥ अयंसोहमिदंतन्मेशांतमित्येवयस्यनो ॥ नज्ञानंतस्यनोशांतिर्नत्यागोनचनिर्वृतिः ॥४॥ ममेदमयमेवाहमित्येतावतियःक्षयः॥ बोधात्माशिवमाशांतंतस्मादन्यन्नविद्यते ॥५॥ अहमंशेविदाक्षीणेसर्वमेवक्षयंगतम् ॥ नकिंचिच्चक्वचित्क्षीणंनिर्वाणैकघनंस्थितम् ॥६॥

मित्युपवर्ण्यते ॥ तत्त्यागश्चानहंभावभावनादात्मबोधतः ॥ १ ॥ दृगात्मनःसर्वदृश्यत्यागोहिमोक्षःसचस्नेहक्षयेदीपनिर्वाणवत्तत्त्वबोधेनसर्वदृश्यमूलाज्ञानबाधेसिद्ध्यतिनान्यथेत्याह ॥ साहंतादीति ॥ १ ॥ नविद्यतेजगत्प्रतिभायस्मिंस्तथाविधएकात्मैवपरिशिष्टोमुख्यःसर्वत्यागलक्षणोमोक्षइत्यर्थः ॥ २ ॥ सपामरप्रसिद्धोऽयंदेहादिर्दृश्यरूपाएवाहंतद्देहादिसंबद्धंभोग्यंजगन्मेइतिएतस्मिंस्तादात्म्यसंसर्गाध्यासलक्षणेद्विविधेबंधेनिःस्नेहदीपवत्समूलंशांतिसतिप्रकृष्टोबोधश्चैतन्यमेवात्माइतिपरिशिष्यतेसएवनिर्वाणमोक्षइत्यर्थः ॥ ३ ॥ उक्तमर्थंव्यतिरेकमुखेनापिद्रढयति ॥ अयमिति ॥ ४ ॥ एतावतिएतावतोयःक्षयः ॥ षष्ठ्यर्थेसप्तमी ॥ सबोधात्मैव ॥ अध्यस्तबाधस्याधिष्ठानमात्रत्वादितिभावः ॥ ५ ॥ विदातत्त्वबोधेन ॥ सर्वंममतास्पदंजगत् ॥ सर्वनाशेसर्वस्वनाशभ्रांरुसमाधत्ते ॥ नकिंचिदिति ॥ पारमार्थिकरूपेणसर्वंस्थितमेव ॥ ६ ॥

१ भयारत्यादीत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अहंबुद्धिनाशेसुलभउपायमाह ॥ अहंविदिति ॥ अनहंविस्त्वादनहंभावभावनात् ॥ अविघ्नतइति ॥ नेदंरजतमितिबुद्ध्यारजताध्यासबाधनेविघ्नादर्शनादितिभावः ॥ इयंमुक्तिः ॥ इयमियतीकदर्थनाबहुसाधनसंपादनश्रांतिःकिमिवकिमर्थमित्यर्थः ॥ ७ ॥ नन्वनहंबुद्धिरपिद्वैतत्वादहंबुद्धिवदध्यासएव साकेनशाम्यतीतिचेत्पंकेनसहकतकरेणुरिव अहंबुद्ध्यासहस्वतएवचिदात्मनिसाशाम्यतीतिसोपपत्तिकमाह ॥ अहमिति ॥ चित्त्वात्परमार्थचित्स्वभावात् ॥ ऋतेविना ॥ ८ ॥ भ्रमतत्साधनतत्फलतदाश्रयाणामज्ञानमात्रविलासत्वादज्ञाननिवृत्तौनपृथगवस्थानमस्तीत्याह ॥ नेति ॥ अनालोकनमज्ञानम् ॥ ९ ॥ १० ॥ यदायदाअहंभावोदयप्रसक्तिस्तदातज्ज्ञातुल्यकालमेवतद्विरुद्धाअनहंभावबुद्धिरुत्पाद्येत्याह ॥ येनैवेति ॥ ११ ॥ एवमजस्रंसावधानमुपस्थापितेनानहंभावेनअहंभावमाशुनभोर्थेनखपुष्पादिनातुल्यंनिर्वाच्यनिर्वचनार्हतांनीत्वारणेशरासनारूढोर्जुन

अहंविदनहंवित्त्वादेवशाम्यत्यविघ्नतः॥ एतावन्मात्रसाध्येयंकिमिवेयंकदर्थना॥ ७॥ अहंनाहमितिभ्रांतिर्नचचित्त्वादृतेस्तिसा ॥ चित्त्वंचाकाशविशदमतःक्वैषाभ्रमस्थितिः ॥ ८ ॥ नभ्रमोभ्रमणंनैवनभ्रांतिर्भ्रामकोस्तिवा ॥ अनालोकनमेवेदमालोकान्नेदमस्तिते ॥ ९ ॥ विद्धिचिन्मात्रमेवेदमसद्रूपोपमंततम् ॥ तेनालंमौनमास्वैवंसर्वंनिर्वाणमात्रकम् ॥ १० ॥ येनैवाशुनिमेषेण[1]त्वहमित्येवचेतति॥ तेनैवनाहमित्येवचेतित्वाशुनशोच्यते॥ ११ ॥ अहंभावनभोर्थेननिर्वाच्यारूढबाणवत्॥ अजस्रमाशुवाक्षीणंतिष्ठावष्टब्धतत्पदः ॥१२॥ सनभोर्थामहंतांत्वंचेतन्नेवमनारतम्॥ सर्वभावैरनारूढोभवतीर्णभवार्णवः॥१३॥ स्वभावमात्रविजयेस्वयंयस्यनवीरता॥ तस्योत्तमपदप्राप्तौपशोर्ब्रूहिकथैवका॥ १४ ॥ षड्वर्गोनिर्जितःपूर्वंयेनोत्तमविदास्वतः ॥ भाजनंसमहार्थानांनेतरोनरगर्दभः ॥ १५॥ यस्यस्वांतर्मनोवृत्तिर्ज्जीयमानाजिताथवा ॥ विषयःसविवेकानांसपुमानितिकथ्यते ॥ १६ ॥ अर्थोदृषदिवांभोधौयोयआपततित्वयि॥ तस्मादेवपलायस्वनाहमित्येवभावयन्॥१७॥ नाहमस्तीतिबुद्ध्यापिसोपपत्तिकमप्यलम्॥ जानानोज्ञप्तिमात्रंचकिमज्ञइवमुह्यसि॥ १८॥ नज्ञेयमर्थतोस्तीहहेम्नीवकटकादिता॥ भ्रांतिमात्रादृतेसाचशाम्यत्यस्मरणेनते ॥ १९॥ योयोभावउदेत्यंतस्त्वयिस्पंदइवानिले ॥ नाहमस्मीतिचिद्वह्न्यातमनाधारतांनय॥ २०॥

बाणइवअपराङ्मुखःअवष्टब्धंदृढमालंबितंतद्ब्रह्मपदंयेनतथाविधःसन्नक्षीणंशाश्वतंतिष्ठ ॥१२॥ नभोर्थैःसमानांसनभोर्थाम् ॥ समानस्यच्छंदस्यमूर्द्धप्रभृत्युदर्केष्विति सः॥१३॥ स्वभावःस्वाभाविकाज्ञानप्रयुक्तोहंभावस्तन्मात्रविजये ॥ १४ ॥ कामाद्यरिषड्वर्गः ॥ १५ ॥ मध्यमाधिकारिणोर्जीयमाना ॥ उत्तमाधिकारिणोजिता ॥ पुमान्पुरुषार्थसाधनेनसफलीकृतपुंजन्मा ॥ १६ ॥ अंभोधौप्रक्षिप्तादृषदिवेतिनाहमित्यसंगात्मभावनयातदसंस्पर्शएवात्रपलायनम ॥ १७ ॥ सोपपत्तिकंज्ञप्तिरूपंकंसुखंजानानःअनुभवन्नपिकिंमुह्यसिनमुह्यस्येवेत्यर्थः ॥ १८ ॥ अर्थतउपपत्तितस्तेज्ञेयंनास्तिवाचारंभणन्यायाद्युपपत्तीनांत्वयाज्ञातत्वादित्यर्थः ॥ १९ ॥ अथवाकिमुपपत्तिसहस्रैर्नाहमितिदर्शनमेकमेवाभ्यस्तंसर्वभ्रांतिपरिहरिष्यतीत्याह ॥ योयइति ॥ २० ॥

[1] करणे ल्युट्

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिएवंरूपेणानहंभावेनयेननजिताः निरर्थकंनिष्फलंअनर्थैनास्तिक्ययथेष्टाचरणाद्यापादकेअस्मिन्नध्यात्मशास्त्रेअनधिकारीसकिमर्थंप्रवर्त्तते ॥ २१ ॥ त्वयिपरमात्मनि सतितदेतन्नान्यत् ॥ २२ ॥ असर्गःकूटस्थाद्वयचिन्मात्रस्वभावस्तत्संविदापरेपरमात्मनिअस्तोविलीनस्तद्भावंप्राप्तःसन्विराजते ॥ यथास्रजिकल्पितःसर्पादिर्दुरर्थोपिबोधात्स्रजिविलीनःस्रक्सन्निवेशविशेषेणकंठधृतःशोभतेतद्वत् ॥ २३ ॥ बोधेनजगतोजीवस्यचपरमात्मरूपसन्निवेशविशेषोत्पत्तिरभ्युपगताचेत्तदुत्तरेभावविकाराअपिस्युरितितैर्जीवजगद्भावध्वंसादिभिश्चद्वैतापत्तिस्तत्राह ॥ परमात्मात्विति ॥ कल्पितस्यबाधेनाधिष्ठानात्मतापत्तिर्नोत्पत्तिर्नवाध्वंसःकिंतुनित्यसिद्धतत्स्वभावएव ॥ क्रियैवहिविकारादिहेतुर्नज्ञानमितिनद्वैतापत्तिरितिभावः ॥ २४ ॥ अहमादित्रिपुटीबाधेतत्परिच्छेदप्रयुक्तजीवभावापगमात्पूर्णंशांतंशिवंचत्वंपदलक्ष्यंपरमेव तच्चपूर्णेशांतेशिवेचतत्पदलक्ष्येपरेस्वभा

लोभोलज्जामदोमोहोयेनादावितिनोजिताः॥ निरर्थकमनर्थेऽस्मिन्सकिमर्थंप्रवर्त्तते ॥ २१ ॥ अहंत्वंपवनेस्पंदइवयत्त्वयिसंस्थितम्॥ परमात्मनितन्नान्यदेतत्स्पंदइवानिले॥ २२ ॥ असर्गसंविदासर्गःपरेऽस्तोतिविराजते॥ संनिवेशविशेषेणदुरर्थोपिहिशोभते॥ २३ ॥ परमात्मातुनोदेतिनास्तंयातिकदाचन ॥ नचास्मादन्यदस्तीतिकोभावोऽभावएववा ॥ २४ ॥ परंपरेपूर्णपूर्णंशांतंशांतेशिवंशिवे॥ इत्येवमात्रंविततंनाहंनचजगन्नधीः ॥ २५ ॥ अनिर्वाणेविनिर्वाणंशांतंशांतेशिवेशिवम् ॥ निर्वाणमप्यनिर्वाणंसनभोर्थंनवापितत् ॥ २६ ॥ शस्त्राघाताःप्रसह्यंतेसह्यंतेव्याधिवेदनाः॥ नाहमित्येवमात्रस्यसहनेकाकदर्थना ॥ २७॥ जगत्पदार्थसार्थानामहमित्यक्षयोंकुरः॥ तस्मिन्निर्मूलतांयातेजगन्निर्मूलतांगतम्॥ २८॥ बाष्पेणेवाहमर्थेननिःसारेणापिसारवत्॥ व्यामलःपरमादर्शस्तच्छांतौसंप्रसीदति॥ २९॥ अहमर्थःपरेवायौस्पंदस्तत्प्रशमेतुतत्॥ अनिर्देश्यमनाभासमनंतमजमव्ययम् ॥ ३० ॥ अहमर्थःपुरोद्रव्यप्रतिबिंबप्रदश्चिति ॥ तच्छांतौसानिराभासमनंतमजमव्ययम् ॥ ३१ ॥ अहमर्थाबुदेक्षीणेपरमार्थशरन्नभः ॥ परयानंतयालक्ष्म्यास्वच्छयाच्छंविराजते ॥ ३२ ॥

वेस्थितमित्येतावन्मात्रंयथास्थितंतत्त्वबोधेनविततंनापूर्वंकिंचिदुत्पादितमित्यर्थः ॥ २५ ॥ ननुप्रदीपनिर्वाणवत्साभासाविद्यानिर्वाणंज्ञानफलंनिष्पन्नमित्यवश्यंवाच्यं अन्यथा ज्ञानस्यनैष्फल्यप्रसंगात्तत्राह ॥ अनिर्वाणेइति ॥ सत्यंनिर्वाणंज्ञानफलंतथापितदत्यंताप्रसिद्धमनिशोसूर्येनिशानिवृत्तिवदनिर्वाणेएवब्रह्मणिनिर्वाणंनित्यशांतेशांतमितिनानर्थनिवृत्तिरूपंज्ञानफलमपूर्वम् ॥ एवंशिवेनित्यसिद्धनिरतिशयानंदेशिवमानंदावाप्तिलक्षणंफलमपिनापूर्वमितिनज्ञानफलेनद्वैतापत्तिः ॥ यदिप्रतीचिबंधोब्रह्मणिवियदादिपदार्थश्चसत्यःस्यात्तदातन्निर्वाणंप्रदीपनिर्वाणवदपूर्वंस्यात् ॥ इदंतुरज्जुसर्पनिर्वाणवत्प्रतीचोबंधनिर्वाणमनिर्वाणमेव ॥ तद्ब्रह्मापिवासनभोर्थैवियदादिसत्यार्थसहितंवस्तुतोनभवत्येवेतितन्निवृत्तिरपिनद्वैतापादिकेत्यर्थः ॥ २६ ॥ अनहंभावनायाअसह्यतांवारयति ॥ शस्त्रेति ॥ २७ ॥ २८ ॥ परमात्मलक्षणआदर्शोऽहमर्थेनाहंकारेणमुखबाष्पेणप्रसिद्धादर्शइवव्यामलोव्याप्तमलोमलिनोभातीत्यर्थः ॥ २९ ॥ अनंतमद्वयमाकाशमात्रंच ॥ ३० ॥ बाह्यानर्थदर्शनेप्यहंकारएवहेतुरित्याह ॥ अहमर्थइति ॥ साचित् ॥ ३१ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेअंगअव्यक्तमनाविर्भूतस्वभावंचिरमहमर्थंताम्रमलसंपर्काज्जीवताम्रतामापन्नंब्रह्महेमश्रवणाद्युपायनिष्टप्तमहमर्थमलोन्मुक्तंचेत्तदेवपरंपरमाभासमतिभास्वरमतएवकांतिम
तब्रह्महेमसंपन्नम् ॥ परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रुतेरित्यर्थः ॥३३॥ अहंतानिवृत्तौममकेनशब्देनव्यपदेशइतिचेद्यथासमुद्रेविलीनायाःसैंधवकरकायार्थश्रि
यःकरकाद्यभिधाननिवृत्त्याअव्यपदेश्यतांतद्वत्तवापीत्याह ॥ यथेति ॥ ३४ ॥ तस्यब्रह्मादिनाम्नाव्यपदेशोपिइतरपदार्थवत्अहंत्वलक्षणाल्पत्वात्ययरूपबृहत्त्वलक्षणंप्रवृत्तिनि
मित्तंपरिकल्प्यप्रवृत्तोनवस्तुवृत्तेनेत्याह ॥ अस्तीति ॥ यथाशांततरंगादिजलंस्वभावेनस्थितंप्राक्तनसमुद्रतरंगादिरूपेणांतःसदिवावभासमानंतरंगसमुद्रादिव्यपदेशभाक्जलस्व
भावेनाव्यपदेश्यमेवतद्वदित्यर्थः ॥ ३५ ॥ अभावनाद्भावनामूलाज्ञाननाशात् ॥ तर्त्तर्हि ॥ ३६ ॥ अहमर्थस्यजगद्बीजतामुपपादयितुंतदुद्भवप्रकारमाह ॥ सदिति ॥ सत्काल

अहमर्थमलोन्मुक्तमव्यक्तंताम्रमंगचेत् ॥ तत्परंपरमाभासंसंपन्नंहेमकांतिमत् ॥ ३३ ॥ यथानिरभिधार्थश्रीर्भजत्यव्यपदेश्यताम् ॥ त
थानहंताहंतेयंब्रह्मत्वमधिगच्छति ॥ ३४ ॥ अस्त्यहंत्वेस्थितंब्रह्मसनामेवपदार्थवत् ॥ शांतवत्सदिवाभासंतद्वत्सव्यपदेशवान् ॥ ३५ ॥
अहमर्थोजगद्बीजंयदिदग्धमभावनात् ॥ तदहंत्वंजगद्दग्धइत्यादेःकलनैवका ॥ ३६ ॥ सद्ब्रह्मशिवमात्मेतिपरेनामकलंकिता ॥ उदेत्यहंता
कुंभत्वादिवमृद्धातुविस्मृतिः ॥ ३७ ॥ अहमर्थादियंबीजात्सत्ताबिंबलतोत्थिता ॥ यस्यांजगंत्यनंतानिफलान्यायांतियांतिच ॥ ३८ ॥ सा
द्र्यब्ध्युर्वीनदीसेयंरूपालोकैषणादिका ॥ अहमर्थस्यमरिचबीजस्यांतश्चमत्कृतिः ॥ ३९ ॥ द्यौःक्ष्मावायुराकाशंपर्वताःसरितोदिशः ॥
इत्यामोदोहमर्थोग्रकुसुमस्यविकासिनः ॥ ४० ॥ अहमर्थःप्रविस्तृतःप्रकटीकुरुतेजगत् ॥ सद्रूपालोकमननंप्रवृत्तइववासरः ॥ ४१ ॥ प्र
वृत्तेनदिनेनार्थःप्रकटीक्रियतेयथा ॥ असज्जगदहंत्वेनक्षणान्निर्मीयतेतथा ॥ ४२ ॥ अहमित्यर्थदुस्तैललवोब्रह्मणिवारिणि ॥ प्रसृतो
यत्तदाश्वेतत्रिजगच्चक्रकंस्थितम् ॥ ४३ ॥ उन्मेषमात्रेणाहंताजगंत्यनुभवत्यहो ॥ ननिमेषणदृग्विसत्यानीत्यप्यसंत्यलम् ॥ ४४ ॥

त्रयाबाध्यम् ब्रह्मअपरिच्छिन्नम् शिवंनिरतिशयानंदम् आत्माअपरोक्षचिदेकरसमित्येवंस्वभावेपरेनमनंनामश्चतुर्णामपिस्वभावानांसंकोचस्तेनकलंकितासंजातमालिन्या
अतएवमृदःकुंभाकारपरिच्छेदान्मृत्स्वभावविस्मृतिरिवस्वभावचतुष्टयप्रतिसंधानशून्यासमष्ट्यहंताउदेति ॥ ३७ ॥ तस्मादहमर्थाद्बीजादियंदृश्यसत्तालक्षणाबिंबलताउत्थि
ता ॥ व्यष्टिभावेनानंतान्यसंख्यानि ॥३८॥ तदेवप्रपंचयति ॥ साद्रीत्यादिना ॥ अद्रिभिरब्धिभिरुर्वीभिर्नदीभिश्चसहितासाद्र्यब्ध्युर्वीनदी ॥ बहिरिंद्रियैरर्थालोचनंरूपालो
कोमनस्तद्गोचरकामसंकल्पादिवृत्तयएषणास्तदादिका ॥ ३९ ॥ ४० ॥ मेरोःपरभागेसद्रूपएववासरःप्रविस्तृतःसन्सतएवरूपस्यालोकंमननंचयथानिमित्तभावेनकरोतितद्वत्
॥ ४१ ॥ अर्थोरूपादिः ॥ निर्मीयतइति ॥ मिथ्यार्थस्यभानमेवनिर्माणमित्याशयः ॥ ४२ ॥ तैलस्यलवोबिंदुः ॥ चक्रकंचक्राकाराभासः ॥ ४३ ॥ दृकूद्दृष्टचक्षुरिवअसंति
असत्यान्यपिजगंतिसत्यानीत्यनुभवति ॥ निमेषेणतिरोभावेनतुनानुभवति ॥ ४४ ॥

अंग्रभवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवदृढीकर्त्तुंपुनराह ॥ अहमर्थैइति ॥ सुषुप्तिमरणमूर्छासुतिरोभूयस्थितेमोक्षेमूलतःपरिक्षीणेचसतिनानुभूयते ॥ समाधौअंतर्भूयसाक्षात्कारेणपरिक्षीणेइतिवा ॥ तारकेकनीनिकायाम् ॥ ४५ ॥ निरंशत्वंनिःशेषताम् ॥ ४६ ॥ साधनफलयोरतिसुलभतांदर्शयति ॥ स्वसंविदिति ॥ स्वसंवित्स्वप्रकाशचिदात्मातस्यभावनातदाकारवृत्तिमात्रसिद्धिस्तावन्मात्रसाध्येनतुजडेष्विवतत्फलव्याप्तिप्रयत्नापेक्षास्तीतिसाधनेअतिसुलभता ॥ सिद्धमात्रात्मनीतिफलेप्युत्पादनप्रयत्नानपेक्षत्वादतिसुलभतासूचिता ॥ भ्रमीमहंभावादिभ्रांतिम् ॥ कृदिकारादक्तिनइतिङीष् ॥ ४७ ॥ पुरुषांतरादिबाह्यसाधनानपेक्षत्वादप्यतिसुलभतामाह ॥ स्वेति ॥ ४८ ॥ इदानींसर्वोपदेशसिद्धांतसारंसंक्षिप्यदर्शयन्नुपसंहरति ॥ विस्मृत्येति ॥ हेरामत्वंप्रथमंव्यष्ट्यहंभावंविस्मृत्यविष्वक्सर्वतःप्रसिद्धःशैलांतरिक्षक्षितिजलधयश्चमरुद्वायुश्चतन्मार्गआकाशश्चेत्येवंरूपःपूरिताशेषविश्वःपरिस्तृतवि

अहमर्थैप्रविस्तृतेसंसारोह्यनुभूयते॥ नांतर्भूयपरिक्षीणेलोचनस्येवतारके॥ ४५॥ अहमंशेनिरंशत्वंनीतेशाश्वतसंविदा॥ शाम्यतीयमशेषेणसंसारमृगतृष्णिका॥४६॥स्वसंविद्भावनामात्रसाध्येस्मिन्वरवस्तुनि॥सिद्धमात्रात्मनिस्वैरंमाखेदंगच्छमाभ्रमीम्॥४७॥स्वयत्नमात्रसंसाध्यादसहायादिसाधनात्॥ अनहंवेदनान्नान्यच्छ्रेयःपश्यामितेनघ॥४८॥ विस्मृत्याहंत्वमास्वप्रविस्तृतविभवःपूरिताशेषविश्वोविष्वक्शैलांतरिक्षक्षितिजलधिमरुन्मार्गरूपोमलात्मा॥स्वस्थःशांतोविशोकःकरणमलकलावर्जितोनिष्प्रपंचोनिःसंचारश्चरात्मासकलमसकलंचेतिसिद्धांतसारः॥४९॥ ॥इ० वा० वा० दे० मो० नि० उ० अहंतानिरासोनामचतुर्थःसर्गः॥४॥ ॥७५॥ ॥श्रीवसिष्ठउवाच॥ ॥स्वभावंस्वंविजित्यादाविंद्रियाणांसचेतसाम्॥ प्रवर्त्ततेविवेकेयःसर्वंतस्याशुसिध्यति॥१॥स्वभावमात्रंयेनांतर्नजितंदग्धबुद्धिना॥ तस्योत्तमपदप्राप्तिःसिकतातैलदुर्लभा॥ २॥शुद्धेऽल्पोप्युपदेशोहिनिर्मलेतैलबिंदुवत्॥ लगत्युत्तानचित्तेषुनादर्शइवमौक्तिकम्॥३॥अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ ममपूर्वंभुशुंडेनकथितंमेरुमूर्द्धनि॥ ४॥ पुराभुशुंडःकस्मिंश्चित्पृष्टआसीत्कथांतरे॥ मयाकदाचिदेकांतेमेरोःशिखरकोटरे॥ ५॥ मुग्धबुद्धिमनात्मज्ञंकंत्वंसुचिरजीवितम्॥ स्मरसीतिमयापृष्टेनोक्तंतेनेदमंगमे॥६॥

भवःसन्समष्टिभावेनास्व ॥ तदनंतरंनिःसंचारःस्थावरश्चरात्माचेतिसकलंनिष्प्रपंचंब्रह्मैवेतिबाधित्वानिष्प्रपंचःकरणैर्मलैःकलाभिश्चवर्जितःसन्स्वस्थःशांतोविशोकोऽमलात्माआस्वेत्यध्यारोपापवादाभ्यांनिष्प्रपंचात्मपरिशेषएवसर्ववेदांतसिद्धांतसारइत्यर्थः ॥ ४९ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनि० उत्तरार्द्धेचतुर्थःसर्गः ॥४॥ ॥७५॥ शास्त्रंजितेंद्रियेष्वेवसफलंनेतरेष्विति ॥ वसिष्ठेनभुशुंडोक्ताविद्याधरकथोच्यते ॥ १ ॥ सचेतसांसमनस्कानामिंद्रियाणांस्वंविषयानुधावनलक्षणंस्वभावमादौविजित्यपश्चाद्योनित्यानित्यवस्तुविवेकादिसाधनेप्रवर्त्ततेतस्यैवसर्वंशास्त्राचार्योपदेशफलंप्रसिद्ध्यतिनान्यस्येत्यर्थः ॥ १ ॥ सिकतानिष्पीडनश्रमइवचिराभ्यस्तोपिश्रवणादिर्निष्फलइत्यर्थः ॥ २ ॥ निर्मलेवस्त्रादौतैलबिंदुवल्लगतिअंतर्निविशते ॥ उत्तानमगंभीरंसाधनचतुष्टयरिक्तंचित्तंयेषांतेषु ॥ ३ ॥ ४॥ कथांतरेअध्यात्मकथाप्रस्तावे ॥ ५ ॥ मुग्धबुद्धिरज्ञोऽवश्यमजितेंद्रियोवृथाश्रमश्चभविष्यतीतितादृशस्यैवप्रश्नः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुष्ठुखेदितः अर्जितैरिंद्रियैःखेदंप्रापितः अतएवशुष्कोविश्रांतिरसहीनः ॥ तपसानियमेनयमेनचशुष्कइतिपरेणान्वयोवा ॥ आर्यःआयुर्वृद्धिहेतुसदाचारसंपन्नः ॥ ७ ॥ ८ ॥ औचित्याच्चिराभ्यस्ततपोनियमादेर्विवेकोदयावश्यंभावात् ॥ यथाविदूरभूविशेषस्यजलदोदयाद्वैदूर्यरत्नमुद्भवतितद्वत् ॥ ९॥ विवेकस्वरूपमेवदर्शयति॥ पुनरिति॥ जरामामाभूदितिविभावयन्लज्जेनिर्विण्णइतियावत् ॥ १० ॥ पंचप्राणादशेंद्रियाणिमनोबुद्धीद्वेस्थूलदेहश्चेत्यष्टादशमयींस्वांपुरीम् ॥ उपोह्यचिरंवोढ्वाश्रांतःविरक्तआत्मामनोयस्य ॥ ११ ॥ अवसरतःप्रश्नावसरंप्राप्येत्यर्थः ॥ १२ ॥ तत्रस्वखेदहेतूनिंद्रियादिदोषान्विस्तरेणोत्तरत्रवर्णयिष्यन्नुपक्रमते ॥ मृदूनीतिद्वाभ्याम् ॥ स्वस्वविषयेषुशीघ्रानुप्रवेशित्वान्मृदूनिप्रवेशोत्तरकालंपरितापीनिततश्चालयितुमशक्यत्वाद्दृषद्भ्योपिदृढबलानिस्वशरीरानुप्रविष्टशरादिशस्त्राणींद्रियाणिचतुल्यानीत्यर्थः ॥ १३ ॥ इमानींद्रियाणिहार्दानि

भुशुंडउवाच आसीद्विद्याधरःपूर्वमनात्मज्ञःसुखेदितः॥ लोकालोकांतरशृंगेशुष्कआर्योविचारवान् ॥ ७॥ तपसाबद्धरूपेणयमेननियमेनच॥ अक्षीणायुरतिष्ठत्सपुराकल्पचतुष्टयम् ॥ ८ ॥ ततश्चतुर्थेकल्पांतेविवेकस्तस्यचोदभूत् ॥ विदूरस्येववैदूर्यमौचित्याज्जलदोदयात् ॥ ९ ॥ पुनर्मृतिःपुनर्जन्मजरामेतिविभावयन् ॥ लज्जेऽहंतत्किमेकंस्यात्सुस्थिरमित्यवमृश्यसः॥ १०॥ मामाजगामसंप्रष्टुमष्टादशमयींपुरीम् ॥ स्वामुपोह्यविरक्तात्मासंसाररसतांगतः॥ ११ ॥ समत्समीपमागत्यकृतोदारनमस्कृतिः ॥ मत्पूजितोवसरतउवाचेदमनिंदितम् ॥ १२॥ विद्याधरउवाच मृदूनिपरितापीनिदृषद्दृढबलानिच ॥ छेदेभेदेचदक्षाणिस्वशस्त्राणींद्रियाणिच ॥ १३ ॥ पर्याकुलानिमलिनानिविपत्प्रदानिदुःखोर्मिमंतिगुणकाननपावकत्वात् ॥ हार्दांधकारगहनानितमोमयानिजित्वेंद्रियाणिसुखमेतिचकिंममार्थैः ॥१४॥ ॥इ०वासिष्ठम०वा०दे०मो० निर्वाणप्रकरणेउ०विद्याधरोपाख्यानेविद्याधरप्रश्नोनामपंचमःसर्गः॥५॥ ॥ विद्याधरउवाच यदुदारमनायासंक्षयातिशयवर्जिम् ॥ पदंपावनमाद्यंतरहितंतद्वदाशुमे ॥ १ ॥

हृदिरूढान्यंधकारगहनानिसांधकारारण्यानि कामादिमर्कटैःपर्याकुलानि प्राणमनोदेहहृदयेष्वशनायादिषडूर्मिमंति दैवात्क्वचिदंकुरितस्यशमदमादिगुणकाननस्यपावकत्वाद्दाहकत्वादूर्मिमत्वेपिनशीतलानि ईदृशानींद्रियाणिचकारात्तदुपाश्रयंमनश्चजित्वासुखमेतिनभोगैः ॥ अतोममवैद्याधरभोगलक्षणैरर्थैःकिंप्रयोजनम् ॥ तद्विरक्तोजिज्ञासुःशरणागतोस्मीत्यर्थः ॥ १४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेपंचमःसर्गः ॥ ५ ॥ ॥ ७ ॥ ॥ दिव्यभोगप्रसक्तेनचिरंस्वेनपरीक्षिताः ॥ इहविद्याधरेणोक्ताविषयेंद्रियदुर्नयाः ॥ १ ॥ अतःसाधनचतुष्टयसंपन्नायब्रह्मजिज्ञासवेमह्यंब्रह्मोपदिशेत्याह ॥ यदिति ॥ सर्वकार्पण्यनिवर्त्तकनिर्दुःखनिरतिशयानंदरूपत्वादुदारम् ॥ आशुशीघ्रंवद ॥ प्रदीप्तशिरसइवजलराशिविविक्षोस्त्रिविधतापसंतप्तस्यममविलंबसहनाशक्तेरितिभावः ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

तर्हिप्रागेवकुतोनागमस्तत्राह ॥ एतावंतमिति ॥ आत्मनोमनसस्तीव्रतरवैराग्यलक्षणात्प्रसादात् ॥ २ ॥ मनोमहामयेनकामेनोत्तमम् अज्ञानवृत्तिषुदुर्वासनासुक्षुब्धम् दुरंताद्दुरुच्छेदाईहाःकर्माणियस्यतम् ॥ तत्रकारणमाह ॥ मोहादिति ॥ अहमित्यनात्मन्यात्माभिमानाकारेणस्थितान्मोहात्स्वतत्त्वापरिज्ञानान्निमित्तादित्यर्थः ॥ मोहादुद्धरेतिबुद्धिकृतापादानेवापंचमी ॥ ३ ॥ ननुविद्याधराःसर्वविद्याश्रयत्वाद्विद्याबलादेवसर्वदुःखनिरासससमर्थामणिमंत्ररसायनादिसिद्धिभिरणिमाद्यैश्वर्यैश्वयुक्ताःश्रूयंतेतत्किमेवंश्रीमतित्वयिकामादिदुःखशातनाःकातरताकार्पण्यादिदोषाश्वनिपतिताः येनदेवयोनिश्रेष्ठत्वान्मान्यतमोपित्वंनिकृष्टकाकयोनिमपिमांशरणागतोसिपृच्छसिचतत्राह ॥ श्रीमत्यपीति ॥ सर्वविद्यासिद्ध्यादिश्रीमत्यप्यात्मविद्याशून्येकामक्रोधेर्ष्यासूयादिदुःखशातनाःकातर्यादिदोषाश्वपतंत्येव अजितेंद्रियत्वादितिभावः ॥ पंकजपक्षेश्रीमतिलक्ष्म्याधारेगु

एतावंतमहंकालंसुप्तआसंजडात्मकः ॥ इदानींसंप्रबुद्धोस्मिप्रसादादात्मनोमुने ॥ २ ॥ मनोमहामयोत्तमंक्षुब्धमज्ञानवृत्तिषु ॥ मामुद्धरदुरंतेहंमोहादहमितिस्थितात् ॥ ३ ॥ श्रीमत्यपिपतंत्याशुशातनाःकातरादयः ॥ गुणवत्युग्रपत्रेपितुहिनानीवपंकजे ॥ ४ ॥ जायंतेचम्रियंतेचकेवलंजीर्णजंतवः ॥ नधर्मायनमोक्षायमशकाइवपंकजे ॥ ५ ॥ भावैस्तैरेवतैरेवतुच्छालंभविडंबनैः ॥ चिरेणपरिखिन्नाःस्मोविप्रलंभाःपुनःपुनः ॥ ६ ॥ नांतोस्त्यस्यनचस्थैर्यावस्थाऽविश्रांतमानसम् ॥ भ्रमंतोभोगभंगेषुमरुभूमिष्विवाध्वनः ॥ ७ ॥ आपातमधुरारंभाभंगुराभवहेतवः ॥ अचिरेणविकारिण्योभीषणाभोगभूमयः ॥ ८ ॥ मानावमानपरयादुरहंकारकांतया ॥ नरमेवामयातातहतविद्याधरश्रिया ॥ ९ ॥ दृष्टाश्चैत्ररथोद्यानभुवःकुसुमकोमलाः ॥ कल्पवृक्षलतादत्तसमस्तविभवश्रियः ॥ १० ॥ विल्हतंमेरुकुंजेषुविद्याधरपुरेषुच ॥ विमानवरमालासुवातस्कंधस्थलीषुच ॥ ११ ॥

णवतिबिसतंतुमतिस्वाश्रयसस्नेहजलविमुखत्वात्तत्कणैरलेप्यत्वाच्चोग्राणिस्नेहनिष्ठुराणिपत्राणियस्यतादृशेपि ॥ ४ ॥ ज्ञानाभावेदेवयोनीनांमशकादियोनिसाम्यमेवधर्माधिकाराभावादितिसूचयन्स्ववैराग्यहेतुंसर्वत्रदोषदर्शनंप्रपंचयति ॥ जायंतेइत्यादिना ॥ ५ ॥ भावैःशब्दादिविषयैस्तैस्तैःसहस्रशःपूर्वभुक्तैरेवतुच्छतमसुखलवार्थंयआलंभोविषयेंद्रियस्पर्शस्तल्लक्षणैर्विडंबनैर्वंचनोपायैर्विप्रलंभाः कर्मणिघञ् विप्रलब्धावंचिताःसंतः ॥ तुच्छान्नैरितिपाठेतुच्छानांक्षुद्रजंतूनामप्यन्नैरुपभोग्यभूतैरित्यर्थः ॥ ६ ॥ अविश्रांतमानसंयथास्यात्तथाभोगभंगेषुभंगुरेषुभोगेषुभ्रमतोममास्यसंसाराध्वनोंऽतोनास्तिस्थैर्येणावस्थानंस्थैर्यावस्थाचनास्ति ॥ ७ ॥ ८ ॥ ननुबहुतरपुण्यार्जितयाविद्याधरसंपदैवतवकुतोनविश्रांतिस्तत्राह ॥ मानेति ॥ मानःस्वोत्कर्षापादनाभिमानः अपमानःपरापकर्षापादनम तदेवपरंश्रेष्ठंयस्याम् ॥ दुष्टःअहंकारोयेषांतेषांकांतयारम्यया ॥ अतएववामयाविवेकिनांप्रतिकूलयास्त्रियाच ॥ तत्पक्षेपिविशेषणेयोज्ये ॥ ९ ॥ सर्वत्रभुक्तभोगतयावैरस्यंप्रकटयति ॥ दृष्टाइत्यादिना ॥ १० ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हारादिभूषितानांहाराविलासाविहारचमत्कारायासु ॥ १२ ॥ आधयोमानसदुःखानितद्विषोष्मणादग्धम् ॥ अधुनाविवेकोदयकालेविज्ञातंनप्राक् ॥ १३ ॥ कीदृशेनविवेके नकिंकिंकथंकथंज्ञातंतत्प्रथमंचक्षुरादिषुदर्शयति ॥ रूपेत्यादिना ॥ गृध्नुनाअभिकांक्षमाणेन ॥ गृधेस्त्रसिगृधीत्यादिनाक्रुः ॥ सावभासेनबाह्यांतरप्रकाशसहकृतेन ॥ दोषाय स्वविषयासंगेनमनोदूषणाय ॥ १४ ॥ वनितापिंडेइदंवस्त्राभरणानुलेपनादिकमेवगुणावहंशोभाकल्पकं इदंरक्तमांसास्थिकेशादिन इतिविकल्पनंविवेचनंमुक्त्वाविनाधावति चक्षुरितिशेषः ॥ १५ ॥ तद्विषयासंगदूषितंरागांधंचेतःप्रदीपरूपरागांधपतंगवत्परस्मैउत्कृष्टायमरणाद्यनर्थाययानिईहितानिदुर्व्यसनानितदुन्मुखंसत्नानाविधानांबंधानांवध बंधनरकाद्यापदांवशंयावदायातितावद्विरतिमुपरमंनायातीत्यर्थः ॥ १६ ॥ चक्षुष्युक्तंदोषंघ्राणादिष्वपिदर्शयति ॥ घ्राणमिति ॥ १७॥ यथाकश्चिदतिदोषेणवैरिणाबलाद्दुर्गी

विश्रांतंसुरसेनासुकांताभुजलतासुच ॥ हारिहारविलासासुलोकपालपुरीषुच ॥ १२ ॥ नकिंचिदुचितंसाधुसर्वमाधिविषोष्मणा ॥ दग्धंभस्मायतेतातविज्ञातमधुनामया ॥ १३ ॥ रूपालोकनलोलेनवनिताननगृध्नुना ॥ सावभासेनदोषायदुःखंनीतोस्मिचक्षुषा ॥ १४ ॥ इदंगुणावहंनेदमितिमुक्त्वाविकल्पनम् ॥ रूपमात्रानुसारित्वादवस्तुन्यपिधावति ॥ १५ ॥ तावदायातिविरतिंनवशंयावदापदाम् ॥ नानाबंधपरंचेतःपरानर्थेहितोन्मुखम् ॥ १६ ॥ घ्राणमेतदनर्थायधावच्चैवाभितःस्फुटम् ॥ ननिवारयितुंतातशक्नोमीहहयंयथा ॥ १७ ॥ गंधोदकप्रणालेनमुखश्वासानुपातिना ॥ वैरिणेवातिदोषेणघ्राणेनास्मिनियोजितः ॥ १८ ॥ चिरंरसनयाचाहमनयानयहीनया ॥ गजगोमायुगुमेषुदुःखाद्रिष्वलमाहतः ॥ १९ ॥ निरोद्धुंनचशक्नोमिस्पर्शलंपटतांत्वचः ॥ ग्रीष्मकालसमिद्धस्यतापमंशुमतोयथा ॥ २० ॥ शुभशब्दरसार्थिन्योमुनेःश्रवणशक्तयः ॥ मांयोजयंतिविषमेतृणेच्छाहरिणंयथा ॥ २१ ॥ प्रणताःप्रियकारिण्यःप्रह्वभृत्यसमीरिताः ॥ वाद्यगेयरवोन्मिश्राःशुभशब्दश्रियःश्रुताः ॥ २२ ॥ श्रियःस्त्रियोदिशश्चैवतटाश्चांभोधिभूभृताम् ॥ दृष्टाविभवहारिण्यःप्रक्वणन्मणिभूषणाः ॥ २३ ॥ चिरमास्वादिताःस्वादुचमत्कारमनोरमाः ॥ प्रह्वकांताजनानीताःषड्रसागुणशालिनः ॥ २४ ॥

कृतोदुर्गंधोदकवहेनगरप्रणालेसदासंचरेतिनियोजितोभवतितद्वदहमपिश्लेष्मादिदुर्गंधोदकप्रणालेनासाबिलेनियोजितइत्यर्थः ॥१८॥ नयोभक्ष्याभक्ष्यविभागपरंशास्त्रंतद्धीनया ॥ कृमिकीटपश्वादियोनिलक्षणेषुदुःखाद्रिषु ॥ सुरापाःकृमयोभवंत्यभक्ष्यभक्षिणश्चेत्यादिस्मृतेरितिभावः ॥ यत्रबलवतांगजोबुद्धिमतांगोमायुश्चश्रेष्ठइतितयोरेवगोमृताप्र सक्तिर्नान्यस्येतितथोक्तिः ॥ १९ ॥ २० ॥ शब्दरसःशब्दास्वादनम् ॥ हरिणपक्षेविषमेतृणावृतकूपे ॥ २१ ॥ तर्हिकिंतवरूपादयःशब्दांताविषयादुर्लभायेनतदर्थमनर्थःप्राप्तोनेत्याह ॥ प्रणताइत्यादिना ॥ प्रह्वभृत्यजनेरितत्वादेवप्रणतप्रायाः ॥ २२ ॥ विशेषणेश्र्यादिचतुष्टयेसाधारणेयोज्ये ॥ २३ ॥ षड्रससौगंध्यानांयथायोग्यंमेलनपाकचातुरीगुणशालिनः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौशेयादयःषट्त्वग्विषयाः ॥ २५ ॥ वधूमुखानिओषध्यश्चंदनोशीरागुर्वादयःपुष्पाणिसमालंभनंकर्पूरकस्तूरीपौष्कलकादीनांमिलनंतद्भूमयस्तत्प्रभवाः ॥ २६ ॥ भूयोभूयःसे व्यमानंसंशुष्कंकाष्ठमिवविरसंसंपन्नंतत्रवांताशनप्रायेजातेकिंभजामि ॥ २७ ॥ वैरस्येनैवतज्जिहासानतुतृप्त्येत्याह ॥ भुक्तेति ॥ २८ ॥ किमवाप्यतेनकिंचिदित्यर्थः ॥ २९॥ येषांहिरण्यकशिपुप्रभृतीनांविनाशनंविनाशसाधनंनासीत्प्राग्जगत्यप्रसिद्धम् ॥ नशुष्केणनचार्द्रेणेत्यादिवरप्रार्थनेसर्वप्रसिद्धवधसाधनप्रतिषेधादितिभावः ॥ ३० ॥ इत्थंसति किंकार्यंतदाह ॥ प्राप्तेनेति ॥ कष्टयाइंद्रियप्राणमनःसंयमादिश्रमसाध्ययापिचेष्टया ॥ ३१ ॥ चिरभुक्तमहाभोगानामपिपुंसांभोगकालेअपगतेअभुक्तभोगेभ्यःपुरुषांतरे

कौशेयकामिनीहारकुसुमास्तरणानिलाः ॥ निर्विघ्नमभितःस्पृष्टाभृशमाभोगभूमिषु ॥ २५॥ वधूमुखौषधीपुष्पसमालंभनभूमयः ॥ अनुभूतामुनेगंधामंदानिलसमीरिताः ॥ २६ ॥ श्रुतंस्पृष्टंतथादृष्टंभुक्तंघ्रातंपुनःपुनः॥ संशुष्कविरसंभूयःकिंभजामिवदाशुमे ॥ २७॥ भुक्त्वावर्षसहस्राणिदुर्भोगपटलीमिमाम् ॥ आब्रह्मस्तंबपर्यंतंनत्वनिरुपजायते ॥ २८ ॥ साम्राज्यंसुचिरंकृत्वातथाभुक्त्वावधूगणम्॥ भुक्त्वापरबलान्युच्चैःकिमपूर्वमवाप्यते॥ २९ ॥ येषांविनाशनंनासीद्यैर्भुक्तंभुवनत्रयम्॥ तेपितेप्यचिरेणैवसमंभस्मपदंगताः ॥ ३० ॥ प्राप्तेनयेननोभूयःप्राप्तव्यमवशिष्यते॥ तस्मात्तौयत्नमातिष्ठेत्कष्टयापिहिचेष्टया ॥ ३१ ॥ येनकांताश्चिरंभुक्ताभोगास्तस्येहजंतुभिः॥ दृष्टोनकस्यचिन्मूर्ध्निंतरुर्व्योमप्लुवश्चवा॥ ३२ ॥ चिरमासुदुरंतासुविषयारण्यराजिषु॥ इंद्रियैर्विप्रलब्धोस्मिधूर्त्तवालैरिवार्भकः॥ ३३॥ अद्यत्वेतपरिज्ञातामयास्वविषयारयः॥ कष्टाइंद्रियनामानोवंचयित्वातुमांपुनः॥ ३४ ॥ संसारजंगलेशून्येदग्धंनरमृगंशठाः॥ आश्वा स्याश्वास्यनिघ्नंतिविषयेंद्रियलुब्धकाः ॥ ३५॥ विषमाशीविषैरेभिर्विषयेंद्रियपन्नगैः॥ येनदग्धानदृष्टास्तेह्विराएवजगत्यपि॥ ३६॥ भोगभीमेभवलितांतृष्णातरलवागुराम्॥ लोभोग्रकरवालाढ्यांकोपकुंतकुलांकिताम्॥ ३७॥

भ्योनकश्चिद्विशेषोदृश्यतइत्याह ॥ येनेति ॥ येनयेनचिरंकांतारम्यतराभोगाश्चिरंभुक्तास्तादृशस्यपुंसोमध्येकस्यचिदपिमूर्ध्निसंजातःकल्पतरुःकैश्चिदपिजंतुभिर्नदृष्टोयेनसत च्छायायांसदैवपूर्णकामोविश्राम्येत् ॥ नापितस्यगुदेव्योमप्लवोविमानादिःसंजातोदृष्टोयेनससदैवसर्वत्रविहरेदित्यर्थः ॥ ३२ ॥ अर्भकः साधुरितिशेषः ॥ ३३ ॥ शब्दादिवि षयात्मकानांभूतानामेवमनसोबहिराकर्षणेनस्वस्वभोगायश्रोत्रादींद्रियभावेनावस्थानादिंद्रियनामानःस्वविषयारयोमयाअद्यपरिज्ञाताइत्यन्वयः ॥ ३४ ॥ ३५ ॥ आशीवि षैर्दृष्टिविषैः ॥ येनदृष्टानदग्धाश्चतेतथाविधाःपुरुषाःसर्वजगत्यपिद्वित्राएवसंभाव्यंतइतिशेषः ॥ ३६ ॥ अवश्यजेतव्यताप्रदर्शनायेंद्रियाण्येवशत्रुसेनात्वेनरूपयति ॥ भोगे त्यादित्रिभिः ॥ भोगाएवभीमाइभागजास्तैर्वलिताम् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इंद्वानिशीतोष्णादीनि ॥ अहंकारेणसेनापतिनाअनुपालिताम् ॥ ३८ ॥ शरीरलक्षणस्यनगरस्यसीमांतेषुगतामाक्रम्यस्थिताम् ॥ ३९ ॥ मत्तस्यैरावणदंतिनऐरावतस्य ॥ करटस्यकुंभस्योद्भेदोविदारणम् ॥ ४० ॥ सत्वस्यधैर्यस्य ॥ श्रियोविश्रांतिसंपदः ॥ इंद्रियाणामाक्रमणंजयः ॥ सीमांतोऽवधिःपराकाष्ठेतियावत् ॥ महतांतत्त्वविदामपि ॥ ४१ ॥ उत्तमतांमान्यताम् ॥ ४२ ॥४३॥ यत्नउपायश्चेदस्तितत्तर्हिजयामि ॥ ४४ ॥ एकएवोपायोमयाज्ञातोस्तीत्याह ॥ इंद्रियेति ॥ ४५ ॥ ४६ ॥ इतःप्रभृतितुल्यैर्विशेषणैःपल्व

द्वंद्वजालरथव्याप्तामहंकारानुपालिताम् ॥ चेष्टातुरंगमाकीर्णांकामकोलाहलाकुलाम् ॥ ३८ ॥ शरीरसीमांतगतांदुरिंद्रियपताकिनीम् ॥ येजेतुमुत्थितास्तातततएवेहहिसद्भटाः ॥ ३९ ॥ सुसाध्यःकरटोद्भेदोमत्तैरावणदंतिनः ॥ नोत्पथप्रतिपन्नानांस्वेंद्रियाणांविनिग्रहः ॥ ४० ॥ पौरुषस्यमहत्त्वस्यसत्वस्यमहतःश्रियः ॥ इंद्रियाक्रमणंसाधोसीमांतामहतामपि ॥ ४१ ॥ तावदुत्तमतामेतिपुमानपिदिवौकसाम् ॥ रूपणैरिंद्रियैर्यावत्तृणवन्नापकृष्यते ॥ ४२ ॥ जितेंद्रियामहासत्वायेतएवनराभुवि ॥ शेषानहमिमान्मन्येमांसयंत्रगणांश्चलान् ॥ ४३ ॥ मनःसेनापतेस्सेनामिमामिंद्रियपंचकम् ॥ जेतुंचेदस्तिमेयत्नोजयामितदलंमुने ॥ ४४ ॥ इंद्रियोत्तमरोगाणांभोगाशावर्जनादृते ॥ नौषधानिनतीर्थानिनचमंत्राश्चशांतये ॥ ४५ ॥ नीतोस्मिपरमंखेदमभिधावद्भिरिंद्रियैः ॥ एकएवमहारण्येतस्करैःपथिकोयथा ॥ ४६ ॥ पंकवंत्यप्रसन्नानिमहादौर्भाग्यवंतिच ॥ गंधिशैवलतुच्छानिपल्वलानींद्रियाणिच ॥ ४७ ॥ दुरतिक्रमणीयानिनीहारगहनानिच ॥ जनितातंकजालानिजंगलानींद्रियाणिच ॥ ४८ ॥ पंकजानिसरंध्राणिसुदुर्लक्ष्यगुणानिच ॥ ग्रंथिमंतिजडांगानिमृणालानींद्रियाणिच ॥ ४९ ॥ रूक्षाणिरत्नलुब्धानिकल्लोलवलितानिच ॥ दुर्ग्रहग्राहघोराणिक्षारांबूनींद्रियाणिच ॥ ५० ॥ बांधवोद्वेगदायीनिदेहांतरकराणिच ॥ करुणाक्रंदकारीणिमरणानींद्रियाणिच ॥ ५१ ॥ अविवेकिष्वमित्राणिमित्राणिचविवेकिषु ॥ गहनानंतशून्यानिकाननानींद्रियाणिच ॥ ५२ ॥

लादिसाम्येनेंद्रियाणिवर्णयति ॥ पंकवंतीत्यादिना ॥ गंधिभिःशैवलतुल्यैर्मालिन्यैस्तुच्छानिकुत्सितानि ॥ ४७ ॥ नीहारैर्जाड्यैर्हिमैश्चगहनानि ॥ आतंकोभयम् ॥ ४८ ॥ पंकान्मलाज्जातानि ॥ गुणावासनास्तंतवश्चसूक्ष्मतमत्वात्सुदुर्लक्ष्याः ॥ जडांगानिजडदेहावयवप्रायाणि ॥ लडयोरभेदाज्जलांगानिच ॥ ४९ ॥ निष्ठुरत्वादसुखस्पर्शत्वाच्च रूक्षाणि ॥ कल्लोलैःषडूर्मिभिरूर्मिभिश्च ॥ क्षारांबूनिसमुद्रजलानि ॥५०॥५१॥ गहनानिदुरवगाहानि ॥ अनंतानिनिरवधीनि जनविश्रांतिशून्यानिच ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनाआस्फोटाभुजास्फालनगर्जनशब्दायेभ्यः ॥ विद्युदिवक्षणसुखप्रकाशानि ॥ पक्षांतरेस्पष्टम् ॥ ५३ ॥ क्षुद्रैस्तुच्छसुखासक्तैःकीटादिभिश्चपरिगृहीतानि ॥ अवटानिगर्त्तो त्करस्थलानि ॥५४॥ श्वभ्राग्राणिजीर्णश्वभ्रमुखानि ॥५५॥५६॥ दुर्दारूणिजीर्णवंशादिकाष्ठानि ॥५७॥ घनैर्मोहैश्चौर्यकलहद्यूतादिदुर्व्यसनप्रबंधनशीलानि ॥ कुपुराणिअ सज्जननगराणि ॥५८॥ चक्रकाणिकुलालचक्राणि ॥५९॥ हेआपन्नोद्धरणशीलएवंवर्णितप्रकारेंद्रियप्रयुक्तापत्सागरनिमग्नमकिंचनंत्यक्तसर्वस्वमिमंशरणागतंमांदयोदयेनकू पोत्थेनतत्त्वोपदेशेनोद्धर ॥ यतःकारणाज्जगतियेयेप्रसिद्धास्त्वादृशाःकेचनसंतस्तत्त्वज्ञादयालवोजयंतिसर्वोत्कर्षेणवर्त्तंतेतेषांसंगमंशरणागतिंपरमशोकहरंवदंतिसर्वशास्त्राणिस र्वजनाश्चेत्यर्थः ॥ ६० ॥ ॥ इतिश्रीवासिष्ठम०रा०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउ०षष्ठःसर्गः ॥ ६ ॥ ॥ ७ ॥ ॥ ब्रह्मैवनजगद्दुःखमज्ञानंजगदाततम् ॥ अहंबीजात्म

घनास्फोटान्यसाराणिमलिनानिजडानिच ॥ विद्युत्प्रकाशान्येतानिभीमाभ्राणींद्रियाणिच ॥ ५३ ॥ क्षुद्रप्राणिगृहीतानिवर्जितानिकृ तात्मभिः ॥ रजस्तमोभिभूतानिस्वेंद्रियाण्यवटानिच ॥ ५४ ॥ पातनैकांतदक्षाणिदोषाशीविषवंतिच ॥ रूक्षकंटकलक्षाणिश्वभ्राग्राणीं द्रियाणिच ॥ ५५ ॥ आत्मंभरीण्यनार्याणिसाहसैकरतानिच ॥ अंधकारविहारीणिरक्षांसिस्वेंद्रियाणिच ॥५६॥ अंतःशून्यान्यसाराणि वक्राणिग्रंथिमंतिच ॥ दहनैकार्थयोग्यानिदुर्दारूणींद्रियाणिच ॥ ५७ ॥ घनमोहप्रबंधीनिदुष्कूपगहनानिच ॥ महावकरतुच्छानिकुपु राणींद्रियाणिच ॥ ५८ ॥ अनंतेषुपदार्थेषुकारणानिघटादिषु ॥ सभ्रमाणिसपंकानिचक्रकाणींद्रियाणिच ॥ ५९ ॥ आपन्निमग्नमिम मेवमकिंचनंत्वंमामुद्धरोद्धरणशीलदयोदयेन ॥ येनामकेचनजगत्सुजयंतिसंतस्तत्संगमंपरमशोकहरंवदंति ॥ ६० ॥ ॥ इ०वा० म०वा०दे०मो०नि०उ० विद्याधरोपा० वैराग्यवर्णनंनामषष्ठःसर्गः ॥६॥ ॥ ७ ॥ ॥ भुशुंडउवाच ॥ ॥ ततस्तस्यमयाब्रह्मंस्त च्छ्रुत्वापावनंवचः ॥ इदमुक्तंयथापृष्टंसुस्पष्टपदयागिरा ॥ १ ॥ साधुविद्याधराधीशदिष्ट्याबुद्धोसिभूतये ॥ भवांधकूपकुहराच्चिरेणोत्था नामिच्छसि ॥ २ ॥ पावनीयंतवमतीराजतेघनरूपिणी ॥ विवेकेनानलेनेवकनकद्रवसंततिः ॥ ३ ॥ उपदेशगिरामर्थमादत्तेहारिहेल या ॥ मुकुरेनिर्मलेद्रव्यमयत्नेनैवबिंबति ॥ ४ ॥ यदिदंवच्मितत्सर्वमोमित्यादातुमर्हसि ॥ अस्माभिश्चिरमन्विष्टंनात्रकार्याविचारणा ॥ ५ ॥ यत्किंचित्स्वदतेंऽतस्त्वंबुध्यस्वाबोधमुत्सृजन् ॥ नासित्वंचिरमप्यंतःप्रेक्षितोपिनलभ्यसे ॥ ६ ॥

रूढोहिजगद्वृक्षोत्रवर्ण्यते ॥ १ ॥ तस्यविद्याधरस्य ॥ इदंवक्ष्यमाणमुत्तरम् ॥ १ ॥ दिष्ट्याभाग्योदयात् ॥ २ ॥ विवेकेनघनरूपिणीनिबिडंव्याप्ता ॥ यथाअनलेनव्याप्ताकन कद्रवसंततिःकांत्यतिशयेनविराजतेतद्वदित्यर्थः ॥ ३ ॥ अतएवतेमतिर्मदुपदेशगिरामेर्थमादत्तेअवश्यमादास्यति ॥ हेलयाअप्रयत्नेन ॥ ४ ॥ ओमित्यंगीकारबुद्ध्या ॥ ५ ॥ त त्रादौसर्वदृश्यविवेकेसाक्षिस्वरूपमेवशुद्धंब्रह्मेतिसर्ववेदांतरहस्यंसंक्षिप्योपदिशति ॥ यत्किंचिदिति ॥ यत्किंचिदहंकारादितेअंतर्हृदिस्वदतेदृश्यतयाप्रथतेतत्सर्वंत्वंनासि ॥ दृश्य वर्गेष्वेवकश्चिदात्मास्तिसमयान्विष्यलब्धव्यइतिचिरमप्यंतःप्रेक्षितोऽन्विष्टस्त्वमात्मानलभ्यसे अतोदृश्यमात्रलक्षणमबोधमुत्सृजन्संस्तत्साक्षिणमात्मानंबुध्यस्वेत्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहिद्रष्टृदृश्यलक्षणसर्वदृश्यत्यागेशून्यतापत्तिः किंतुसुखदुःखवैषम्यप्रयोजककल्पितदोषांशनिवृत्त्यावास्तवपरमकल्याणब्रह्मभावेनपूर्णतयासर्वमस्त्येवेत्याशयेनाह ॥ नाहमिति ॥ ७ ॥ दृश्यमात्रस्यअबोधरूपत्वमुक्तमुपपादयति ॥ किमिति ॥ किंसुषुप्तौप्रसिद्धादज्ञानादहंकारादिभावेनघनीभूताज्जाग्रत्स्वमलक्षणंजगज्जातमथवाजतुकाठिन्यादिवविलीनाज्जाग्रदादिलक्षणाज्जगतःसौषुप्तीअज्ञताजाताइतिविचार्यापिविनिगमकाभावात्कार्यकारणभावव्यवस्थांनोविद्मः ॥ अतःकाठिन्यद्रवावस्थयोर्घृतस्येवैकत्वात्सर्वस्याज्ञानमात्रत्वमित्यर्थः ॥ ८ ॥ तस्यविवर्त्ततादर्शनमेवत्यागः बाधितस्यजगतस्तुच्छताविभावनेनकिंचिद्ब्रह्मअधिष्ठानरूपतापत्तिविभावनेतुसर्वमेवब्रह्मेत्याह ॥ मृगतृष्णेति ॥ ९ ॥ उक्तमाशयंविशदयंस्तत्प्रतिभासमपिनिराचष्टे ॥ मृगतृष्णेति ॥ तदभावात्प्रतिभास्याभावात् ॥ नहिघटाभावेप्रकाशसत्वेपिघटप्रकाशशब्दार्थोस्तीतिभावः ॥ १० ॥ अनंतरूपस्यजगतःप्रातिस्विकरूपेणनिरसितुमशक्यत्वाद्बीजदाहेनैवनिरासइतिवक्तुमहंकारंबीजत्वेनजगत्तत्प्रभवतरुत्वेनवर्णयति ॥ विश्वेत्यादिना ॥ ११ ॥ इंद्रियरसोविषयासंगस्तदाढ्यानिअधोभुवनानितस्यद्रुमस्यमूलानि ॥ १२ ॥

नाहंत्वमस्तिनजगदितिनिश्चयिनस्तव ॥ सर्वमस्तिशिवंतच्चनदुःखायसुखायते ॥ ७ ॥ किमज्ञत्वाज्जगज्जातंजगतोथकिमज्ञता ॥ विचार्यापीतिनोविद्मएकत्वादलमेतयोः ॥ ८ ॥ मृगतृष्णांबुवद्विश्वमवस्तुत्वात्सदप्यसत् ॥ यच्चेदंभातितद्ब्रह्मनकिंचित्किंचिदेववा ॥ ९ ॥ मृगतृष्णांबुवद्विश्वंनास्तित्वमथवास्तिच ॥ प्रतिभासोपिनास्त्यत्रतदभावादतःशिवम् ॥ १० ॥ विश्वबीजमहंत्वंत्वंविद्धितस्माद्द्विजायते ॥ साद्र्यब्ध्युर्वीनदीशादिजगज्जरठपादपः ॥ ११ ॥ अहंत्वबीजादणुतोजायतेसौजगद्द्रुमः ॥ तस्येंद्रियरसाढ्यानिमूलानिभुवनानिहि ॥ १२ ॥ तारकाजालकलिकाऋक्षौघःकोरकोत्करः ॥ वासनागुच्छविसराःपूर्णचंद्रःफलालयः ॥ १३ ॥ स्वर्गादयोबृहद्वर्गामहाविटपकोटराः ॥ मेरुमंदरसत्याद्यादिगिरयःपत्रराजयः ॥ १४ ॥ सप्ताब्धयोप्रसुतयःपातालंमूलकोटरम् ॥ युगानिघुणवृंदानिपर्वाणिगुणपंक्तयः ॥ १५ ॥ अज्ञानमुत्पत्तिमहीनराविहगकोटयः ॥ उपलंभोबृहत्स्तंभोदवोनिर्वाणनिर्वृतिः ॥ १६ ॥ रूपालोकमनस्काराविविधामोदवृत्तयः ॥ वनंविपुलमाकाशंशुक्तिजालंमुखत्वचः ॥ १७ ॥

अश्विन्यादिसप्तविंशतितारकाजालंतस्यप्रधानकलिका ॥ तदन्यऋक्षौघःसूक्ष्मकोरकोत्करः ॥ प्राणिनांधर्मादिवासनाःपुष्पगुच्छसमूहाः ॥ फलालयःफलगुच्छाः ॥ १३ ॥ स्वर्गादयःस्वर्महर्जनतपःसत्यलोकाख्याबृहतांलोकानांवर्गामहांतोविटपकोटराःशाखावलयगर्भदेशाः ॥ १४ ॥ अपप्रसुतयःआलवालपरिखाः ॥ युगानिकृतादीन्युत्तरोत्तरंधर्मपिष्टक्षरणाद्घुणवृंदानि ॥ तत्तद्युगवत्सरायनर्तुमासादिगुणपंक्तयोवृक्षस्यशाखामूलाद्युद्भवपर्वाणि[1] ॥ १५ ॥ नराजीवाः ॥ उपलंभोभ्रांतिज्ञानमेवबृहत्स्तंभःसर्वविटपाधारमध्यभागः ॥ तस्यतत्त्वबोधान्निर्वाणंनिर्वृतिरेवदवोवनहुताशनः ॥ १६ ॥ इंद्रियैरर्थोपलंभारूपालोकाःमनसातद्गोचरसंकल्पविकल्पामनस्काराश्चतस्यद्रुमस्यविविधाआमोदवृत्तयःसुगंधप्रसराः ॥ आकाशमव्याकृताकाशंतस्यविपुलंवनम् ॥ मुखत्वचोनेत्रपुटानिउत्तराधरोष्ठाश्चनेत्रहास्यमुक्तोद्भेदशुक्तिजालमिवपुष्पोद्भेदनंप्रसवबंधनमितियावत् ॥ १७ ॥

१ उद्भेदपर्वाणीत्यपिक्वचित्पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यात्मसंविदेवजीवनहेतूरसप्रवाहः ॥ सूर्यचंद्राग्न्यादीनांसंवर्गेणनिवर्त्तनः सूत्रात्मैवतस्यवातस्पंदः ॥ १८ ॥ मज्जनोन्मज्जनेप्रत्यहमुदयास्तमयौतदुन्मुखाश्चंद्रार्करुचयस्त स्यरम्याःकुसुममंजर्यः ॥ सूर्येणसहभ्रमत्तिमिरमंधकारएवभ्रमराणांभ्रमणंभ्रमरभ्रमोभ्रमंतोभ्रमराइतियावत् ॥ १९ ॥ ईदृशोयंसंसारवृक्षःपातालंमूलतोमध्यतआशागणंदि क्समूहमयतोंतरिक्षंचापूर्यवस्तुतोऽसदेवभ्रांतिरूपंसद्वत्तिष्ठति ॥ तस्यअहमर्थरूपेबीजेअनहंतालक्षणेनाग्निनाहतेभर्जितेसतिजीवन्मुक्तिभोगाययावत्तद्देहपातंप्रतिभासमात्रेण सतोप्यस्यसंसारवृक्षस्यपुनर्जन्मादिनारोहःप्ररोहोनास्तीत्यर्थः ॥ २० ॥ ॥ इतिवासिष्ठम०रा०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउ०सप्तमःसर्गः ॥ ७ ॥ ॥ ७ ॥ ॥ इहसंसारवृक्षस्यज्ञानादुच्छेदईर्यते ॥ संकल्पमंडपप्रायःसंसारउपवर्ण्यते ॥ १ ॥ वर्णितंसंसारवृक्षमनुवदति ॥ विद्याधरेति ॥ हेविद्याधरअधस्तनसप्तलोकसहिताधराआधा रोमूलदेशोयस्य ॥ लोकालोकांतगिरीणांकंदराणिअंतरालभागामंदिरंसालवालावेदिर्यस्य ॥ दशदिगंतरेअंबरेचआचारेणतिर्यग्विटपविस्तारेणचारेणऊर्ध्वविटपप्रसारेणत

विचित्रशाखाकृतवउपशाखादिशोदश ॥ संविद्रसमहापूरोवातस्पंदोनिवर्त्तनः ॥ १८ ॥ चंद्रार्करुचयोलोलामज्जनोन्मज्जनोन्मुखाः ॥ रम्याःकुसुममंजर्यस्तिमिरंभ्रमरभ्रमः ॥ १९ ॥ पातालमाशागणमंतरिक्षमापूर्यतिष्ठत्यसदेवसद्वत् ॥ तस्यानहंताग्निहतेहमर्थबीजेपुन र्नास्तिसतोपिरोहः ॥ २० ॥ ॥ इ०वा०म०वा०दे०मो०नि०उ०विद्याधरो०जगद्वृक्षबीजवर्णनंनामसप्तमःसर्गः ॥ ७ ॥ ॥ ७ ॥ भुशुंडउवाच ॥ ॥ विद्याधरधराधारोगिरिकंदरमंदिरः ॥ दिगंतरांबराचारचारसंचारचंचुरः ॥ १ ॥ ईदृशोयंजगद्वृक्षोजायतेहंत्वबीज तः ॥ बीजेज्ञानाग्निनिर्दग्धेनैवकिंचनजायते ॥ २ ॥ प्रेक्ष्यमाणंचतन्नास्तिकिलाहंत्वंकदाचन ॥ एतावदेवतज्ज्ञानमनेनैवप्रदह्यते ॥ ३ ॥ अहंत्वभावाच्चाहंत्वमस्तिसंसारबीजकम् ॥ नाहंत्वभावान्नाहंत्वमस्तीतिज्ञानमुत्तमम् ॥ ४ ॥ सर्गादावेवसर्गस्यकिलास्याभावयोग तः ॥ कुतोहंत्वंकुतस्त्वंत्वं कुतोद्वित्वैक्यविभ्रमः ॥ ५ ॥ समाकर्ण्यगुरोर्वाक्यंयतंतेयेस्वयत्नतः ॥ संकल्पत्यागमामूलंपदप्राप्तौजयंतिते ॥ ६ ॥ रंधनाज्जयमाप्नोतिस्वशास्त्रेसूपकृत्कृते ॥ विवेकीस्वविवेकित्वंयतनादेवनान्यथा ॥ ७ ॥

त्रतत्रप्राणिसंचारेणचचंचुरोऽतिचंचलः ॥ १ ॥ २ ॥ प्रेक्ष्यमाणंतत्त्वतःकिमिदंस्यादितिरत्नपरीक्षावद्विमृश्यब्रह्ममात्रतयावधार्यमाणम् ॥ तदहंत्वम् ॥ ३ ॥ ४ ॥ उत्पत्तिरेवयस्या सतःसतोवानसंभवतितस्यस्थितिर्दूरनिरस्तेत्याह ॥ सर्गादावेवेति ॥ ५ ॥ संसारःकालत्रयेपिनास्त्येवेत्युक्तार्थस्यदृढीकरणायसंकल्पद्यूतमंडपवर्णयिष्यन्भूमिकांरचयति ॥ समा कर्ण्येत्यादिना ॥ वक्ष्यमाणंप्राग्बहुशोवर्णितंचआमूलंसमूलंसंकल्पत्यागंकर्त्तुंगुरोस्तदुपायक्रमवेदकंवाक्यंसमाकर्ण्यतदुक्तक्रमेणस्वप्रयत्नतोयेयतंतेतेतत्त्वबोधप्राप्तौसत्यामसं कल्पंतत्पदंकैवल्याख्यंजयंति ॥ ६ ॥ यथासूपकृत्सूपकारःस्वशास्त्रेसूपकारविद्याविशेषेकृतेसम्यगभ्यस्तेतदुक्तप्रकारेणैवनानाभक्ष्यभोज्यनानारसायनानांरंधनात्पाकेननि ष्पादनात्क्षुत्तृडामयजरादिजयंराजसन्मानाद्युत्कर्षंचाप्नोतितद्वद्विवेकीअधिकारीगुरुशास्त्रोक्तमार्गेणयतनादेवस्वविवेकित्वंकैवल्यपर्यंतंजयतिनान्यथेत्यर्थः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतोयंसंसारःस्वमेंद्रजालादिवदज्ञातचिच्चमत्कारमात्रमतोनचितोवहिरस्तीत्याह ॥ चिदिति ॥ ८ ॥ चिच्चमत्कारमात्रतामुपपादयति ॥ संकल्पेति ॥ चित्रकृतश्चित्रकारस्यचित्तेकल्पितंयच्चित्रंतद्वत ॥ ९ ॥ जगतःसंकल्पमात्रतांद्रढयितुंसंकल्पद्यूतमंडपाकारतांकल्पयति ॥ मंडपइत्यादिना ॥ १० ॥ अग्रेअधोमुखंप्रोतोमेरुरिवोर्ध्वगुग्गुलुर्यस्यतथाविधेनमणिस्तंभसहस्रेणवृतः ॥ अतएवक्वचिदिंद्रायुधसहस्राढ्यइवक्वचित्कल्पसंध्याभ्राणीवसुंदरः ॥ ११ ॥ यत्रयस्मिन्मंडपेवास्तव्यानांनिवसतांस्त्रीबालपुरुषादीनांक्रीडार्थंलोकांतराणिपातालस्वर्गादीनितदाकाराःसमुद्गकाःसंपुटकास्तत्रतत्रस्थापिताः ॥ कीदृशास्ते ॥ अंतरेनानानदीपर्वतवनहस्त्यश्वदेवतिर्यङ्नरादिनानारचनयायुक्ताः ॥ १२ ॥ भूतानिप्राणिनस्तल्लक्षणैर्बीजैःपरैस्तदुपभोग्यैश्चआपूर्णाः ॥ तमसांरिपुभिर्घातकर्मणिप्रदीपसूर्यचंद्रादिभिर्व्यवहारप्रवृत्त्यासघुंघुमाःसशब्दाः ॥ क्वचित्तमोभिःक्वचित्प्रकाशैश्चचित्राआख्याअभिख्यायेषाम ॥ १३ ॥ लीलापद्मायाःक्रीडालक्ष्म्याआकरेयस्मिन्मंडपेस्त्रीणांमंडनायविलूनालवनेनगृहीताआकल्पाःकर्णपूराद्यलंकारायेभ्यस्तथाविधाःकल्पपादपाःकृताः ॥ १४ ॥ बालानांनिःश्वासेनापिचलिताअतिलघीयांसइतियावत् ॥ ईदृशाःकुलाचलायत्रअर्थाद्बालानामेवक्रीडाकंदुकानिकृताः ॥ संध्यांबुदादिग्वधूनांकर्णपूराःकृताः ॥ शरदंबुदाश्चतासांहस्तेचामराःकृताः ॥ १५ ॥ यत्रमंडपेभूतलंसंपूर्णंद्यूतफलकंकृतम ॥ तारकासहितमंबरंवितानंकृतम ॥१६॥ यत्रमंडपेव्योमलक्षणेअजिरेचत्वरेजगतांभासआविर्भावतिरोभावादिप्रत्ययएवपणोयस्मिन्द्यूतेक्रीडतांगृहनिवासिनांमंडपस्वामिनांब्रह्मादीनांतत्रभूतसाराणांचतुर्विधभूतग्रामाणांशारिफलानांपुनःपुनर्जन्ममरणादिनाभ्रमणंपरावर्त्तस्तल्लक्षणेद्यूतेशशिभान्वादिनवग्रहाअक्षाःकृताः ॥१७॥ इतिईदृशोमंडपोस्तीतिसंकल्पयितुःसंकल्पएवअग्रस्थदृश्योपमयायथासत्यतामिवगच्छतितथैवायंधातुःसंकल्पैःसुसमुत्थितोजगद्रूपोमंडपोपीतिपरेणान्वयः ॥ १८ ॥ १९ ॥

चिच्चमत्कारमात्रंत्वंजगद्विद्धीहनेतरत् ॥ नाशासुनबहिर्नांतरेतत्क्वचनविद्यते ॥ ८ ॥ संकल्पोन्मेषमात्रेणजगच्चित्रंविलोक्यते ॥ तदनुन्मेषविलयिचित्रकृच्चित्तचित्रवत् ॥ ९ ॥ मंडपोस्तिमहास्तंभोमुक्तामणिविनिर्मितः ॥ बहुयोजनलक्षाणिकांतकांचनचित्रितः ॥ १० ॥ मणिस्तंभसहस्रेणवृतोग्रेप्रोतमेरुणा ॥ इंद्रायुधसहस्राढ्यकल्पसंध्याभ्रसुंदरः ॥ ११ ॥ स्त्रीबालपुरुषादीनांवास्तव्यानामितस्ततः ॥ क्रीडार्थंस्थापितायत्रनानारचनयांतरे ॥ १२ ॥ भूतबीजपरापूर्णास्तमोरिपुसघुंघुमाः ॥ तमःप्रकाशचित्राख्यालोकांतरसमुद्गकाः ॥ १३ ॥ आमोदसुभगालोलजलदावलिपल्लवाः ॥ लीलापद्माकरेस्त्रीणांविलूनाःकल्पपादपाः ॥ १४ ॥ बालनिःश्वासचलिताःकंदुकानिकुलाचलाः ॥ संध्यांबुदाःकर्णपूराश्चामराःशरदंबुदाः ॥ १५ ॥ कल्पांतकालजलदास्तालवृंतपदंगताः ॥ भूतलंद्यूतफलकंवितानंतारकांबरम् ॥ १६ ॥ भूतशारपरावर्त्तेद्यूतेक्षाःशशिभानवः ॥ व्योमाजिरेजगद्भासपणेगृहनिवासिनाम् ॥ १७ ॥ इतिसंकल्पएवांतश्चिरभावनयायथा ॥ अग्रस्थदृश्योपमयासत्यतामिवगच्छति ॥ १८ ॥ तथैवायंजगद्रूपःसंकल्पैस्सुसमुत्थितः ॥ चिच्चमत्कारमात्रात्माचित्रकृच्चित्तचित्रवत् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिभासतोऽस्तिपरमार्थतोनास्तिच ॥ कुतोपिसमुत्थितामायाहस्त्यादिरिव ॥ २० ॥ संसारउदरकोटरेयस्यनथाविधश्चिच्चमत्कारएव ॥ २१ ॥ तथाचैच्छिकैर्विकल्पैरविकल्पनैश्चाविर्भावयितुंतिरोभावयितुंचतत्त्वविदामत्यंतमेवस्वायत्तइतियथेच्छसितथाकुर्वित्यर्थः ॥ अन्नपानादिरैहिकभोगसामग्रीदानयज्ञादिरामुष्मिकभोगसामग्रीउभयत्राप्यनादरंफलानभिसंधिम् ॥ २२ ॥ विवेकप्राप्त्यैवतेमुक्तिरवश्यभाविन्यनुमीयतइतिपुनर्जन्मादिसंभावनाभीतंतमाश्वासयति ॥ प्राप्तइति ॥ हेपावनात्मन्नुशुद्धबुद्धेत्वंपातहेत्वविवेकपदव्यपेक्षयाद्वितीयांपविचित्रितजगच्चितयांविवेकपदवींप्राप्तोसि ॥ अतोऽमुनामनसानअधःपतिष्यसीतिजानामिअनुमिनोमि ॥ अतस्त्वंमौनंवाङ्मनसचेष्टाशून्यममलंचिन्मात्रपदमवलंब्यमनआदिदृश्यजातमुत्सृजेत्यर्थः ॥२३॥ ॥ इतिश्रीवासिष्ठ० म० रा० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेअष्टमःसर्गः ॥८॥ ॥ ७ ॥ ॥ चिदधीनोदयध्वंससत्तास्फूर्त्तिविवर्त्तनम् ॥ इहचित्कचनंविश्वंचिन्मात्रमितिवर्ण्यते ॥१॥ हेम्नीवकटकादित्वंसंसारोदरकोटरः ॥ चिच्चमत्कारएवायमविकल्पनसंक्षयइतियदुक्तंतदुभयमनुभावयिष्यन्नविकल्पनप्रकारंप्रथममुपदिशति॥अबुध्यमानइति ॥ चेत्यंतद्गतक्रियागुणदोषादितद्यादृत्तंतदवभासकं चिद्रूपमपिविभाजकविकल्पकमनसोबाधादबुध्यमानोनिर्मला

असत्यमेवस्फुरतिसर्वमस्तिचनास्तिच ॥ असदुत्थितएवायंकुतोपीवसमुत्थितः ॥ २० ॥ हेम्नीवकटकादित्वंसंसारोदरकोटरः ॥ चिच्चमत्कारएवायमविकल्पनसंक्षयः ॥ २१ ॥ अत्यंतमेवस्वायत्तोयथेच्छसितथाकुरु ॥ यश्चान्नपानादानादावनादरमुपेयिवान् ॥ तस्येदंपश्चिमंजन्मनसकर्मसमुज्झति ॥ २२ ॥ प्राप्तोविवेकपदवीमसिपावनात्मन्पुण्यांपविचित्रितजगच्चितयांद्वितीयाम् ॥ नाधःपतिष्यसिपुनर्मनसामुनेतिजानामिमौनममलंपदमुत्सृजत्वम् ॥ २३ ॥ ॥ इ० वाम० वा० दे० मो० नि० उ० वि० मायामंडपवर्णनंनामअष्टमःसर्गः ॥८॥ भुशुंडउवाच ॥ ॥ अबुद्धमानश्चेत्यादिचिद्रूपमयिचानघ ॥ शांतचिद्घनएवास्वनिर्मलाप्स्वंतरंशुवत् ॥ १ ॥ अचेतनंचेतनांतश्चेतनादेवविद्यते ॥ स्वेऽसादृश्येपिसदृशंपयोराशौयथानलः ॥ २ ॥ सचेतनाचेतनयोर्हेतुश्चित्त्वात्तथैवचिन् ॥ विनाशोत्पादयोर्वह्निज्वालायाः पवनोयथा ॥ ३ ॥ नाहमस्तीतिचिद्रूपंचितिविश्रांतिरस्तुते ॥ ततोयथायादृशेनभूयतेतादृशोभव ॥ ४ ॥

सुअप्सुप्रविष्टाअंशवःसूर्यकिरणाइवप्रशांततापःप्रकाशमात्रावशेषआस्व ॥ सेयमविकल्पस्थितिर्जगद्विकल्पक्षयहेतुरित्यर्थः ॥१॥ संसारोदरकोटरश्चिच्चमत्कारएवायमित्येतद्विसोपपत्तिकमनुभावयति ॥ अचेतनमित्यादिना ॥ अचेतनंदृश्यंस्वेस्वीयेजाड्यदुःखपरिणामित्वादिलक्षणेचिदसादृश्येसत्यपिचेतनायाश्चितोंतरेविद्यतेनान्यत्र तत्कुतः चेतनादेव ॥ नह्यन्यत्रविद्यमानंतदसंबद्धयाचेतनयाचेतितुंशक्यम् ॥ नचाचेत्यमानंकिंचित्सिद्ध्यति ॥ नापिचेतनासक्रियायेनगत्वाचेतयेत् ॥ सायदिसर्वगतातर्हिसिद्धैवप्रतिज्ञेत्यर्थः ॥ २ ॥ एवंदेशतःसर्वदृश्यस्यचिदंतःस्थितिंप्रसाध्यकालतोपितांसूचयंश्चित्कार्यतांसाधयति ॥ सचेतनेति ॥ सचेतनोअहंवृत्तिविषयाः अचेतनाइदंकारविषयाः ॥ तथापूर्ववदेवकारणंविवर्त्तोपादानम् ॥ चिद्विवर्त्तत्वैवचिच्चमत्कारइतिभावः ॥३॥ तत्राहमितिसचेतनांशनिरासेनैवोभयनिरासासिद्ध्याचिन्मात्रावस्थितिसिद्धिरित्याह ॥ नाहमिति ॥ नाहमस्तीत्यहंकारास्पदांशबाधेनप्रत्यक्चिद्रूपंपरिशेष्यविकल्पहेतुक्षयादेवेदंविकल्पनिर्मुक्तपूर्णचितिविश्रांतिरस्त्वित्यर्थः ॥ एवंविश्रांतेनत्वया ॥ ततःप्रारब्धशेषक्षयोत्तरम् ॥ ४ ॥

१ मूलस्थसचेतनेत्यादेःफलितार्थकथनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंबुव्यापिनःक्षीरस्यांबुक्षयेपिपरिशेषवद्ब्रह्मरूपमेवानुपमंतेपरिशिष्यतइत्याह ॥ चिद्रूपइतिद्वाभ्याम ॥ ५ ॥ प्रत्यक्चिद्रूपंब्रह्मचितौलग्नमखंडैक्यंप्राप्तंचेत् ॥ ६ ॥ यथासुरासुरैःसहवर्त्तमानंपातालभूत्रिविष्टपमिवस्थितम ॥ प्रीतिहर्षक्रोधयुद्धजयपराजयादिनानाभावैःपलायनानुधावनाद्याजवीभावैस्तत्तदनुरूपक्रियाकालमिवआकुलमपिरंगमपिरंगमयंचित्रलिखितंजगत्कुड्येकुड्यात्मनामौनंमुनिशरीरमिवनिर्व्यापारमेवस्थितंतथामायाशबलचिच्चित्रकचितंजगदपिशुद्धचिदाकाशलक्षणेकुड्येनिर्विकाराद्वयतदात्मनैवसंस्थितंनजगद्भावेनेत्यर्थः ॥ ७ ॥ ८ ॥ अचेतनमनृतजगद्रूपम् चेतनंपरमार्थसद्ब्रह्मरूपंवायदेवचितिस्वतःस्वरसतःकचितंतेनैवभूयते ॥ एवंस्वायत्तयोरुभयोर्व्युत्थानेनसमाधिनावायदेवेच्छसितत्कुर्वित्यर्थः ॥ ९ ॥ एतावांस्त्वज्ञेभ्यस्तत्त्वविदांविशेषः यथामरुभूमौमहानद्यात्मनादृश्यमानाअर्कांशवोमज्जनमरणादिभयजननात्तरणोपायादर्शनाच्चाज्ञानामर्वाक्कूलेनिरोधकानमरुभूमितत्त्वज्ञानाम् तद्वदेकविज्ञानेनतत्त्वतःसर्वविज्ञानाद्विदितवेदिनांतत्त्वविदांजगद्रूपाश्चिच्चमत्कृतयोप्यनिरोधिन्यइत्यर्थः ॥ उपपादितंचेदंली

चिद्रूपःसर्वभावानामंतर्बहिरसिस्थितः॥ प्रसन्नांबुभरस्यांतर्बहिश्चैवयथापयः॥५॥नाहमस्तीतिचिद्रूपंचितौचेल्लग्नमंगते॥ नचान्यच्चेतितंब्रह्मरूपंकेनोपमीयते॥ ६ ॥ ससुरासुरपातालभूविष्टपमिवोपितम्॥ नानाभावाजवीभावक्रियाकालमिवाकुलम्॥७॥ यथारंगमयंकुड्येजगन्मौनमिवस्थितम्॥ तथाचिच्चित्रकचितंखेकुड्येचात्मसंस्थितम् ॥८॥ तेनैवभूयतेभूरियच्चित्तंकचितंस्वतः॥ अचेतनंचेतनंवायथेच्छसितथाकुरु ॥ ९ ॥ चिच्चमत्कृतयोव्योम्निस्फुरंत्येताजगत्तया॥ अर्कांशुवदरोधिन्यःस्वच्छाविदितवेदिनाम्॥ १०॥ तिमिराक्रांतदृष्टीनांयथाकेशोंड्रकादिखे ॥स्फुरत्येवंजगद्रूपमनात्मन्येवतिष्ठताम् ॥ ११ ॥ एवंजगत्त्वमहमित्यवबोधरूपमाभासमात्रमुदितंनचनोदितंच॥ अर्कांशुजालरचनानगराभमत्रकुड्यादिसत्यमिदमस्तिनखेलतेव॥ १२॥ ॥इ०वा०म०वा०दे०मो०नि०उ०वि०चित्कचनयोगोपदेशोनामनवमःसर्गः॥ ९॥ ॥ ७॥ ॥भुशुंडउवाच॥ ॥विद्धित्वंचेतनादेवचेतनेतरचेतनम्॥जलेऽग्निरिवचिज्जाड्येनातोभिन्नेमनागपि॥ १॥

लोपाख्यानेविस्तरेण ॥ १० ॥ अज्ञानांतुनिरोधिन्यएवेत्याशयेनाह ॥ तिमिरेति ॥ अनात्मनिसंसारेएवतिष्ठतामज्ञानाम ॥ ११ ॥ अर्कांशुवदितिदृष्टांतंप्रकारांतरेणापिवर्णयन्नुपसंहरति ॥ एवमिति ॥ आभासमात्रंवर्णितचिच्चमत्कारमात्रमतोऽज्ञदृशोदितंतत्त्वदृशानोदितम् ॥ चकारौविकारांतराणामपिसमुच्चयप्रतिषेधार्थौ ॥ अर्कांशुजालैरेवरचनानिर्माणंयस्यतथाविधंयद्गंधर्वनगरंतदाभमत्रव्यवहारभूमौकुड्यादिजगत् तच्चजगद्रूपेणखेलतेवसत्यंनास्ति अतोनचिन्निरोधकमित्यपरिच्छेदश्चितःसिद्धइत्यर्थः ॥ १२ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेनवमःसर्गः ॥ ९ ॥ ॥ ७॥ ॥ यथाभूतंस्थितंब्रह्मनिर्विकारमकारणम् ॥ नासीदेवजगत्क्वापिकदापीत्युपवर्ण्यते ॥ १ ॥ ब्रह्मणिजगदपलापसिद्धयेतज्जाड्यमपलपितुंजडत्वेनाभिमतस्यचिद्भावमनुभावयति ॥ विद्धीत्यादिना ॥ हेविद्याधरत्वंचेतनेतरत्वेनाभिमतस्यजगतश्चेतनादेवचेतनंस्फुरणंविद्धि ॥ स्फुरद्रूपत्वमेवहिचेतनत्वम ॥ तद्यदिजगद्रूपंस्फुरतितर्हिचेतनमेवनचेतनेतरदिति ॥ जलेप्रतिबिंबितोग्निरिवजलान्नचेतनाद्वस्त्वंतरमस्ति ॥ अतोजलशैत्यादतिरिक्तंप्रतिबिंबवह्नेरौष्ण्यमिवनचैतन्याज्जाड्यंनामान्यदस्तीत्यर्थः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाड्यमात्रापलापेनैवजगदपलापसिद्धानिर्विक्षेपंस्थीयतामित्याह ॥ तदिति॥यंत्रणंयंत्रंपरिच्छेदस्तद्रहितंयथास्यात्तथा ॥ चित्रकुड्यित्तचित्रस्थतज्ज्ञानिवत् गंधर्वनगराधिष्ठानव्योममध्यवच्च ॥ २ ॥ येतुप्रलयेपिब्रह्मणिअचिद्रूपंजगत्सूक्ष्मरूपेणास्त्येवेतिश्रुतिस्मृतिवादास्तेमायाशबलस्यसर्वशक्तित्वादसत्त्वपिब्रह्मसत्तारोपदृष्ट्याभाविफेनलवेसांप्रतिकजलसत्तयासत्ताव्यवहारवदित्याशयेनाह ॥ ब्रह्मणीति ॥ ३ ॥ वास्तवदृष्ट्यातुमायायाएवासत्वाद्द्वितीयेनिर्विकारेक्षोभतद्धेत्वोरेवासंभवाज्जडसर्गादेरुदयएवनसंभवतीत्याह ॥ नेत्यादिना ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ अनवधारितविशेषसर्वानुगतसत्तासामान्यरूपत्वात्किंचित् ॥ विशेषबाधेतदनुगतस्यसामान्यरूपतायाअपिनिवृत्तेरैकरूप्यावधारणाच्चन्नकिंचित् ॥ चेतनाबुद्धिस्तच्चिदाभासश्चनविद्येतेयत्र ॥ ९ ॥ प्रयोजनापेक्षाभावादपिसर्गोनास्तीत्याह ॥ नित्यानंदतयेति ॥ कारणंक्रियानिमित्तंफलम्॥ १० ॥

तद्वेदनावेदनयोरभेदात्स्वस्थमास्यताम् ॥ निर्यंत्रमेवचित्रस्थज्ञानिवद्व्योममध्यवत् ॥ २ ॥ ब्रह्मण्यशेषशक्तित्वादचित्त्वंविद्यतेतथा ॥ अक्षुब्धेविमलेतोयेभाविफेनलवोयथा ॥ ३ ॥ नकारणंविनोदेतिजलात्फेनलवोयथा ॥ नकारणंविनोदेतिसर्गादिब्रह्मणस्तथा ॥ ४ ॥ नचकारणमस्त्यत्रसर्गवृत्तावकारणे ॥ नातःसंजायतेकिंचिज्जगदादिर्ननश्यति ॥ ५ ॥ अत्यंतंकारणाभावान्नकिंचिज्जायतेजगत् ॥ मरावंब्विवनास्त्येवदृष्टमप्यग्रतोजगत् ॥ ६ ॥ ब्रह्मानंतमजंशांतमतोस्तीदंनसर्गधीः ॥ कारणाभावतस्तेनब्रह्मैवेदमखंडितम् ॥ ७ ॥ अतःशिलोदराभोऽसिव्योमकोशोपमोपिच ॥ ब्रह्मैकघनरूपत्वादजोनवयवोसिच ॥ ८ ॥ ज्ञोसिकिंचिन्नकिंचिद्वानिःशंकमलमास्यताम् ॥ अचेतनाचिदाभासेशाम्यतामात्मनात्मनि ॥ ९ ॥ नित्यानंदतयाजस्यकारणंनास्तिकार्यकृत् ॥ सर्गाद्यसंभवेतस्माद्यदस्तितदजंशिवम् ॥ १० ॥ अजोयेषांतुचिद्रूपोनास्तिमौर्ख्यविलासिनाम् ॥ सर्गनाशेसमुत्पन्नेकिंतेषांप्रविचार्यते ॥ ११ ॥ यत्रयत्रपरंब्रह्मतत्रसंतिजगंतिहि ॥ जगच्छब्दार्थरूपेणमुक्तान्येवंविधानिच ॥ १२ ॥ तृणेकाष्ठेजलेकुड्येसर्वत्रैवपरंस्थितम् ॥ सर्वत्रैवचसर्गौघःपरिप्रोतःस्थितोमिथः ॥ १३ ॥ ब्रह्मणःकःस्वभावोसावितिवक्तुंनयुज्यते ॥ अनंतेपरमेतत्त्वेस्वत्वास्वत्वात्यसंभवात् ॥ १४ ॥ अभावसव्यपेक्षस्यभावस्यासंभवादपि ॥ पदंबध्नंतिनानंतेस्वभावाद्याद्वुरुक्तयः ॥ १५ ॥ अस्वत्वाभावयोर्नित्येनंतेत्यंतमसंभवात् ॥ स्वत्वभावेषुसिद्धेषुस्वभावोक्तिर्नतिष्ठति ॥ १६ ॥

एवंतत्त्वदृशानित्यमुक्तासिद्धिमुपपाद्यतदनभ्युपगमेनित्यबद्धताप्रसक्तिर्मूर्खाणांस्यादित्याह ॥ अजइति ॥ तेषामनिर्मोक्षदोषानिवृत्तेःकिंप्रविचार्यते ॥ निष्फलामोक्षोपायचितेत्यर्थः ॥ ११ ॥ अर्द्धप्रबुद्धदृष्ट्यायादृशीस्थितिस्तामाह ॥ यत्रयत्रेति ॥ १२ ॥ १३ ॥ तर्हिमिथ्यासर्गस्वभावमेवास्तुब्रह्मनेत्याह ॥ ब्रह्मणइति ॥ स्वःस्वीयोभावोव्यावर्त्तकधर्मोहिस्वभावस्तस्यचधर्मताअस्वभावव्यावर्त्तकतयावाच्या ॥ अद्वयेतुब्रह्मणिस्वत्वास्वत्वयोरत्यंतासंभवान्नस्वभावोन्योनिरूपयितुंशक्यइत्यर्थः ॥ १४ ॥ व्यावर्त्तकेस्वशब्दासंघटनमुक्त्वाभावशब्दासंघटनमपिदर्शयति ॥ अभावेति ॥ १५ ॥ व्यावर्त्याप्रसिद्धेरपिपदद्वयस्यापितत्राघटनमित्याह ॥ अस्वत्वेति ॥ कालांतरेदेशांतरेवातत्प्रसिद्धिशंकावारणायविशिनष्टि ॥ नित्येनंतेइति ॥ स्वतःसिद्धेष्वव्यावर्त्तकेषुस्वत्वेषुभावेषुचलोकेस्वभावोक्तिःस्वभावशब्दप्रयोगोनतिष्ठतिअप्रसिद्धइत्यर्थः ॥ १६ ॥

१ दृश्यमित्यपिक्वचित्पाठः २ स्थिरइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाब्रह्मणिसर्गादिर्नसिद्ध्यतीत्यद्वयताएवंप्रतीच्यप्यहंत्वादिरपीत्युभयशोधेअखंडतासिद्धेत्याशयेनाह ॥ नाहंत्वमिति ॥१७॥ प्रेक्ष्यमाणंरत्नतत्त्ववच्छास्त्राचार्यानुभवैःपरीक्ष्य तत्त्वदृशादृश्यमानम् ॥ १८ ॥ अनयादृशाजाड्यंचित्स्वभावतामिवजीवजगद्भेदोप्यभेदात्मतामेवापन्नइतिप्रदर्शनायप्राक्तनाहेमकटकाभेददृष्टांताःपर्यवसन्नाइत्याशयेनोपसं हरति ॥ भेदइति ॥ संकल्पोराहोःशिरइतिव्यपदेशवद्विकल्पमात्रंविद्वद्भिःकथितः ॥ कटकत्वंकटकाकारः॥१९॥ ॥इतिश्रीवासिष्ठ०म०तात्पर्यप्रकाशेनि०उत्तरार्द्धेदशमःसर्गः ॥ १०॥ ॥ इहेंद्रियजयात्पूर्णेनिर्विकारमनःस्थितिः ॥ देहादिदृश्यादृष्टिश्चदृढीकार्यैतिवर्ण्यते ॥ १ ॥ निरंबरेवस्त्राद्यनावृतेअंगेस्वदेहेलग्नानिशस्त्राणिदयितायास्तरुण्यास्तनाद्यं गानिचबुध्यमानःसाक्षादनुभवन्नपिकामदुःखभयादिविकारानुदयाद्यःसुसमःस्यात्सपरस्मिन्पदेस्थितः ॥ तादृशस्थितिसिद्धिपर्यंतमिंद्रियजयात्मनिष्ठेदृढीकार्येइत्यर्थः ॥ १ ॥

नाहंत्वंलभ्यतेसाधोबुद्ध्यालोकेनिरीक्षितम् ॥ असदेवकुतोप्येतद्बालयक्षइवोदितम् ॥१७॥ मुक्तंत्वहंत्वशब्दार्थैर्लभ्यतेयच्चतत्परम् ॥ युक्तंत्वहंत्वशब्दार्थैःप्रेक्ष्यमाणंविलीयते ॥ १८ ॥ भेदोजगद्ब्रह्मदृशोरभेदःपर्यायशब्दार्थविलासतुल्यः ॥ संकल्पमात्रंकथितोनसत्योयथानर्थैर्वैकटकत्वहेम्नोः॥१९॥ ॥इ०वा०म०वा०दे०मो०नि०उ०विद्या०सर्गापवर्गप्रतिपत्तियोगोपदेशोनामदशमःसर्गः॥१०॥ भुशुंडउवाच ॥ ॥शस्त्राणिदयितांगानिलग्नान्यंगेनिरंबरे ॥ योबुध्यमानःसुसमःसपरस्मिन्पदेस्थितः ॥ १ ॥ तावत्पुरुषयत्नेनधैर्येणाभ्यासमाहरेत् ॥ यावत्सुषुप्ततोदेतिपदार्थोदयनंप्रति ॥ २ ॥ यथाभूतार्थतत्त्वज्ञमाधयोग्रगताअपि ॥ नमनागपिलिंपंतिपयांसीवसरोरुहम् ॥ ३ ॥ शस्त्रांगनानभांस्यंगलग्नान्यलमसंविदम् ॥ अलग्नानीवशांतात्मायःपश्यतिसपश्यति ॥ ४ ॥ विषंयथास्वांतरेवदुर्घुणीभवतिस्वयम् ॥ नचदुर्घुणतानामविषादन्यास्तिकाचन ॥ ५ ॥ स्वरूपमजहत्त्वेवंजीवतामधितिष्ठति ॥ तथात्मातत्परिज्ञानमात्रैकप्रविलापिनीम् ॥ ६ ॥

अमुमेवार्थंस्पष्टमाह ॥ तावदिति ॥ शस्त्रकांतादिबाह्यपदार्थेभ्योविकारोदयनंमिथ्यात्वबुद्ध्याप्रतिक्षिप्यस्वात्मसुखमात्रविश्रांतिलक्षणासुषुप्ततायावदुदेतितावत् ॥ २ ॥ तत्त्वज्ञानप्रतिष्ठायाआध्यसंस्पर्शएवलक्षणमित्याह ॥ यथेति ॥ नहिशुक्तिबाधेतद्रजतलाभापहारयोराधिर्दृश्यतइतिभावः ॥ ३ ॥ नभोग्रहणंदृष्टांतार्थम् ॥ सपश्यतिससाक्षात्कारज्ञानवानितिलक्षणेनबोध्यमित्यर्थः ॥ ४ ॥ नभ्रांतिकल्पितेनजीवभावेनास्यवास्तवनिर्विकारस्वभावोऽपगतइतितद्बाधमात्रेणतल्लाभोयुक्तएवेत्येतदुपपादनायदृष्टांतमाह ॥ नचेति ॥ यथाविषंविषस्वभावादप्रच्युतमेवघुणकीटादिविकारंगतमितिघुणताविषादन्यान तथाआत्माब्रह्मापिस्वतत्त्वपरिज्ञानमात्रैकबाध्यांजीवतांजीवाकारविवर्त्तमधितिष्ठतीतिजीवतानान्येतियोज्यम् ॥ ५ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमरणस्वभावमेवजडंविषंस्वस्वभावमत्यजदेवयथामरणस्वभावकीटजीवोभवतितथाब्रह्मचिदपिमरणस्वभावंजडंरूपमृच्छतीतिवैपरित्यांशेपिदृष्टांतइत्यर्थः ॥ ७ ॥ जीवव ज्जगदपिघुणवदेवोत्थितमित्याह ॥ ब्रह्मणीति ॥ ८ ॥ कृमौविषस्वभावदृष्ट्यायथाजन्ममरणेनस्तोदेहिस्वभावदृष्ट्यातुस्तस्तथाजीवेपिब्रह्मस्वभावदृष्ट्यानस्तोजीवस्वभावदृष्ट्या तुस्तइत्याह ॥ विषमितिद्वाभ्याम् ॥ ९ ॥ देहेंद्रियविषयपदार्थेष्वहंममतासक्त्याअमग्नरूपिणाअतिरोहितस्वरूपेण श्रवणादिप्रयत्ननिष्पादितस्वसाक्षात्कारसंविन्मयांजनभूतेन स्वेनैवतीर्यतेनतुदैवंमांतारयिष्यतीतिप्रयत्नोपेक्षयेत्यर्थः ॥ १० ॥ सर्वदृश्यभाववाधपरिशिष्टेएकात्मस्वभावेपरमदरिद्रेनविश्रांतिसंभावनेतिप्रसक्तामवहेलनांवारयति ॥ सर्वेति॥ सर्वेषांप्रियतमभावानामांतरीसारसुखरूपाअवस्थासर्वतापनिवृत्त्याअंतःशीतलतायस्मिन्पूर्णात्मस्वभावे ॥ ११ ॥ जीवस्यमनोहंकारादिकलंकनिवृत्तावुपायमाह ॥ जग

जीवोभवतिदुर्घुणोऽमृत्यात्मैवयथातथा ॥ अत्यजंतीनिजंरूपंचिज्जडंरूपमृच्छति ॥ ७ ॥ ब्रह्मण्यनन्योप्यन्याभोदुर्घुणःक्वचिदुत्थितः ॥ तत्स्थःसएवासइवाप्यतत्स्थइवसर्गकः ॥ ८ ॥ विषंविषत्वमजहद्यथास्वांतःकृमिःक्रमात् ॥ नजायतेनम्रियतेम्रियतेपिचजायते ॥ ९ ॥ स्वेनैवसंविदर्थेनपदार्थामग्नरूपिणा ॥ तीर्यतेगोष्पदमिवनतुदैवाद्भवार्णवः ॥ १० ॥ सर्वभावांतरावस्थासर्वभावातिशायिनी ॥ अंतः शीतलतायस्मिंस्तस्मिन्किमिवहेलनम् ॥ ११ ॥ जगत्पदार्थसत्तांतःसामान्येनाशुभाविते ॥ मनोहंकारबुद्ध्यादिकःकलंकोमलात्मनि ॥ १२ ॥ यथाघटपटाद्यर्थान्पश्यस्येवंशरीरकम् ॥ तथाहंत्वमनोबुद्धिवेदनाद्यपिपश्यहो ॥ १३ ॥ जगत्पदार्थसार्थौघमनोबुद्ध्यादिसंस्थितम् ॥ ज्ञएवासंविदंस्तिष्ठपरिनिष्ठितनिष्ठया ॥ १४ ॥ नकेनचित्कस्यचिदेवकश्चिद्दोषोनचैवेहगुणःकदाचित् ॥ सुखेनदुःखेनभवाभवेनचास्तिभोक्तानचकर्तृताच ॥ १५ ॥ ॥ इ० वा० वा० दे० मोक्षोपायेषुनिर्वाणप्रकरणेउत्तरार्द्धेविद्याधरो० यथाभूतार्थवेदनंनामैकादशःसर्गः ॥ ११ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

दिति ॥ सामान्येनसन्मात्रब्रह्मरूपेण ॥ १२ ॥ यथाघटपटाद्यर्थांस्तटस्थतयापश्यसितथाप्रथमंतटस्थतयाशरीरंपश्यनाहंत्वाद्यभिमानेनेत्यर्थः ॥ १३ ॥ तदनंतरंज्ञःसर्वसाक्षिरूपएववहिर्जगत्पदार्थसार्थौघमंतर्मनोबुद्ध्यादिचअसंविदन्ज्ञप्तिमात्ररूपःपरिनिष्ठितनिष्ठयास्वाभाविकस्थित्यातिष्ठ ॥ १४ ॥ तस्यांस्थितौसर्वगुणदोषादिविक्षेपहेतूपरमसिद्धिरित्याह ॥ नकेनचिदिति ॥ तस्यांस्थितौभवाभवेनसंपदाविपदातत्प्रयुक्तसुखेनदुःखेनचकेनचिद्धेतुनाकस्यचित्कदाचिदपिदोषोगुणश्चनास्ति ॥ यतःकर्तृतानास्त्यतोभोक्ताचनास्ति ॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिश्रुतेरित्यर्थः ॥ १५ ॥ ॥ इतिश्रीवासिष्ठ० म० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेएकादशःसर्गः ॥ ११ ॥

१ दीर्घत्वमार्षम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रांतिमात्रमहंभावश्चिद्विवर्त्तोजगद्भ्रमः ॥ तस्यमूलमविद्येतितत्क्षयक्रमईर्यते ॥ १ ॥ वक्ष्यमाणक्रमेणसहोच्छेदसिद्धयेअविद्यायाएवाहंभावलक्षणसूक्ष्मप्रपंचभावस्तस्यैव स्थूलप्रपंचरूपतेतिसर्वकल्पनानांचिद्विवर्त्तमात्रतयैकतांदर्शयति ॥ खएवेत्यादिना ॥ यथाखेव्योम्न्येवापरंव्योमसंपन्नमुत्पन्नमितिमनसासंकल्पनमेकस्यैवव्योम्नोभेदभ्रांति मात्रंतथाअज्ञातेआत्मनिसूक्ष्मप्रपंचात्मनोऽहंभावस्यभावनंकल्पनमित्यर्थः ॥ १ ॥ ननुदृष्टांतेकल्पयितापुरुषस्तृतीयोस्ति तत्रकस्तृतीयस्तमाह ॥ खेखमिति ॥ निर्व्यपदेशि अविद्यापिहितत्वादसदिवाततमतएवशब्दादिनाअव्यवहार्यमात्मरूपंसद्वस्त्वस्तितृतीयंकल्पकमित्यर्थः ॥२ ॥ दृष्टांतेयथाखेअद्वयःखात्मैवास्तिद्वितीयंतुखंकल्पकपुरुषस्यसंक ल्पावच्छिन्नचिद्रूपंस्वकंसंकल्पात्मकंवपुरेवतथाकल्पयित्वाबुध्यते तथाययस्मादविद्योपहितचिदात्मास्वकंवपुरविद्यामेवाहमिदमित्यभिमंत्रभिमंतव्यरूपेणकल्पयित्वाभास तेततोनाहंनामाज्ञानादन्यदस्तिनाप्यनहंप्रपंचरूपमित्यर्थः ॥ ३॥ अतएवतत्परमसूक्ष्मंसर्वस्थूलकल्पनाधिष्ठानंब्रह्मास्तीतिपरिचेयमित्याह ॥ ततइति ॥ तस्यसंवित्तिःकल्पना॥

भुशुंडउवाच॥ ॥खएवव्योमसंपन्नमितिसंकल्पनंयथा॥भ्रांतिमात्रमसद्रूपंतथाहंभावभावनम् ॥ १ ॥ खेखंजातमितिभ्रांतेरहंक ल्पयितायथा ॥ तथानिर्व्यपदेश्यात्मसदस्त्यसदिवाततम् ॥ २ ॥ खेखात्मैवास्तिचिद्रूपंतत्स्वकंबुध्यतेवपुः ॥ भासतेयदिदंत्वेननाहम स्मिनचानहम्॥ ३ ॥ ततश्चिद्रूपमस्तीद्दग्यत्रस्थूलंखमप्यलम्॥ अणाविवमहामेरुस्तत्संवित्तिर्हिखादिता ॥ ४ ॥घनस्ततोऽचिदाभासः खादप्यतितरामणुः॥जानातियत्स्वभावंतदेतत्सर्गतयास्थितम् ॥ ५ ॥ अहंताखादिताद्यात्मविदःप्रसरणंजगत्॥ अंभोद्रवप्रसरणंय थावर्त्तादिवेष्टनम्॥ ६ ॥ अचित्प्रसरणंशांतमस्पंदीवजलद्रवः ॥ निःस्पंदपवनाकारमाकाशहृदयोपमम्॥ ७॥ नदेशकालादिजगत् प्रसरेषुचयुज्यते॥ घनाच्छून्यान्निराभासाच्चिन्मात्रविसरादृते ॥८॥ चिन्मात्रेप्रस्तेकोलेव्योम्निनाविजलेस्थले॥ निद्रायांजाग्रतिस्व प्नेभवेज्जगदिवोदितम्॥ ९ ॥प्रसरणाप्रसरणेनचसंभवतोविदः॥ खादप्यत्यंतस्वच्छत्वादक्षोभादेःसदैवहि॥ १० ॥

खादिताआकाशादिजगद्रूपता ॥ ४ ॥ परमसौक्ष्म्यंतस्योक्तमुपपादयति ॥ घनइति ॥ खादाकाशादप्यतितरामणुरचिदाभासोऽज्ञानलक्षणोऽनादिविवर्त्तस्ततआत्मचितेःसका शात्घनःस्थूलएव तत्तादृशंपरमसूक्ष्मंचैतन्यमनाद्यहमिदमाकारवासनयोत्तरोत्तरस्थूलस्वभावकल्पनयाजानाति ॥ एतदेवसर्गतयाआभासान्निरूढमित्यर्थः ॥ ५॥ आत्मवि दआत्मचैतन्यस्याऽध्यात्ममहंताद्यधिलोकंतुखादितापंचभूततातदादिप्रसरणंविवर्त्तविस्तारोजगत्सर्गः ॥ ६ ॥ चित्प्रसरणस्याभावःअचित्प्रसरणंशांतंजगदुपरमःप्रलयइतिया वत् ॥ ७ ॥ एवंसिद्धस्यदेशकालादिजगतोऽवांतरकार्यसहस्रलक्षणेषुप्रसरेष्वपिचिन्मात्रप्रसरादृतेअन्यत्पारमार्थिकंरूपंनयुज्यतेनोपपद्यते ॥ ८ ॥ तत्रोपपत्तिंदर्शयति ॥ चि न्मात्रेइति ॥ निद्रायांप्रसिद्धस्वप्नेजाग्रतिप्रसिद्धेमनोराज्यादिस्वप्नेच ॥ ९ ॥ चितोजगदाकारपरिणामलक्षणोवास्तवःप्रसरएवकिंनस्यात्तत्राह ॥ प्रसरणेति ॥ क्षोभःसंचलनं तदादिसर्वविकारशून्यत्वादित्यर्थः ॥ १० ॥

१ काष्ठेइत्यपिक्कचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसुखदुःखभोगाद्यनुभवरूपादेहाद्यहंभावरूपाश्चविकाराश्चिदात्मनिदृश्यंतेतत्राह ॥ ज्ञइति ॥ परेकूटस्थस्वभावे ॥ तथाचचिदाभासस्यैवभोगादिविभ्रमानकूटस्थात्मनइति भावः ॥ ११ ॥ उक्तेऽर्थेसंकल्पादिमनोवृत्त्यन्वयव्यतिरेकदर्शनंप्रमाणमित्याह ॥ धीरिति ॥ धीश्चिंतात्मकमनोवृत्तिः ॥ श्रीःसंपदभिमानलक्षणाहर्षात्मकमनोवृत्तिः ॥ कीर्त्तिः स्वगुणख्यातिश्रवणजन्यातादृशवृत्तिः ॥ कांतिरिच्छा ॥ सर्वत्रमनोवृत्तिबोधकैःपदैस्तद्धेतवोबाह्यविषयालक्ष्यंते ॥ १२ ॥ ब्रह्मलक्षणादिंदुबिंबात्स्फुरितायाजीवचिदाभासल क्षणज्योत्स्नातदंशचाक्षुषादिज्ञानरूपंयदमृतंतदधीनसिद्धिकत्वात्तद्द्रवप्रायःसर्गईश्वराद्ब्रह्मणोनातिरिच्यते ॥ कुतः ॥ तदाधारयोर्दिक्कालयोर्निरवयवेनिष्क्रियेचब्रह्मण्यसंभवा त् ॥ सत्यांहिदिशिमूर्त्तद्रव्यस्यक्रिययासर्गकालःकल्प्येत नचसाप्रागस्ति एवंसतिकालेदिगाद्युत्पत्तिःकल्प्येत नचप्रलयेसोस्ति क्रियातिरिक्तस्यतत्साधकस्याभावात् पूर्णेकू टस्थेक्रियाऽयोगात् नचतयोरसतोःकस्यचिदन्यस्यात्रकाशोस्तीतिनब्रह्मव्यतिरिक्तसिद्धिरित्यर्थः ॥ १३ ॥ परेपरमेश्वरेएवंवर्णितदिशास्वाभिन्नजगदाकारेभासुरंयथांस्यात्त

ज्ञश्चेततिनभोगादिनचैवात्मन्यसावहम् ॥ द्रवत्वमंभसीवांतरद्वितीयःपरेस्थितः ॥ ११ ॥ धीर्ह्रीःश्रीर्भीःस्मृतिःकीर्त्तिःकांतिरित्यादिकं गणम् ॥ नपश्यतिविसंकल्पस्तमसीवपदान्यहेः ॥ १२ ॥ ब्रह्मेंदुबिंबस्फुरितचिज्ज्योत्स्नांशामृतद्रवः ॥ दिक्कालासंभवात्सर्गोनेश्वरादतिरि च्यते ॥ १३ ॥ आधिमान्यैःस्फुरत्येवंपरेस्फुरतिभासुरम् ॥ जगदाद्यात्मकंचित्तंचक्रौघत्वमिवांभसि ॥ १४ ॥ मज्जनोन्मज्जनारावैर्विव र्त्तावर्त्तवेष्टनैः ॥ अच्छिन्नानुपदंक्षीणाभातिसर्गसरिच्चिरम् ॥ १५ ॥ यथावर्त्तैःपयोभातिधूमोभातियथाघनः ॥ तथाजडात्मकतयात्ट तीयःसर्गएतयोः ॥ १६ ॥ दारुणिक्रकचच्छेदेयथावर्त्तादिकंतथा ॥ अदिगादौपरेसर्गस्तदतद्रूपवानयम् ॥ १७ ॥ संसारकदलीस्तंभा द्भिनासंकल्पपल्लवम् ॥ मृदुनोपिदृषत्क्रूरान्नकिंचिल्लभ्यतेंतरम् ॥ १८ ॥ सहस्रखुरमूर्द्धाक्षिकरवक्त्रेहितोहितम् ॥ नानाद्रितनुदिग्देशस रित्प्रादेशमात्रकम् ॥ १९ ॥

थासर्वसाधारणसच्चिदानंदात्मनास्फुरतिसतिक्वचिदेवदेहादौविशेषाभिमानेनतदनुकूलप्रतिकूलेषुहेयोपादेयतादिकल्पनेनआधिमान्योऽहंकारात्माअन्यइवस्फुरतितत्सर्वंजग ज्जीवबंधमोक्षादिकल्पनात्मकमंभसिचक्रावर्त्तौघइवकल्पितंभ्रांतंचित्तमेवनाणुमात्रमप्यन्यदस्तीत्यर्थः ॥ १४ ॥ दृष्टांतदार्ष्टांतिकेरूपकेणैकीकृत्योपपादयति ॥ मज्जनेति ॥ अनुपदंसद्यस्तत्त्वसाक्षात्कारात्क्षीणासर्गलक्षणामरीचिसरित् ॥ १५ ॥ दूराद्धूमराशिर्यथाघनोनिबिडोमेघोवाभाति ॥ एतयोर्ब्रह्ममनसोस्तृतीयःसर्गोविषयत्वाज्जडात्मकत यासत्यतयास्फुरणादजडात्मकतयाचभातीतिशेषः ॥ १६ ॥ तदतद्रूपवान्जडाजडरूपवान् ॥ १७ ॥ स्वतोमिथ्यात्वान्मृदुनोप्यधिष्ठानसत्त्वयादृषदिवक्रूराद्दृढात्स्फटिकशि लाप्रतिबिंबितकदलीस्तंभादंतरमसाम्यंनकिंचिद्विवेकदृशालभ्यते ॥ संकल्पकल्पितपल्लववैलक्षण्यकृतमेववैसादृश्यंनान्यदित्यर्थः ॥ १८ ॥ इदानींजगत्पटलिखितचित्ररा ज्यसादृश्येनवर्णयति ॥ सहस्रेत्यादिचतुर्भिः ॥ सहस्रसंख्यानिकरादिवक्त्रांतानितदीहितानितदिंगितानिचऊहितानिवितर्कितानियत्र ॥ नानाविधाअद्रयस्तनवश्चतुर्विधशरी राणिदिशोदेशाःसरितश्चप्रादेशमात्रमिवपरिच्छिन्नायत्र ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतःशून्यमवस्तु आंतरावयवशून्यंच ॥बहुभिःरागैःकामैरंजकद्रव्यैश्चोपरंजितम् ॥ विरागोवैराग्यंविरुद्धवर्णंमार्जनद्रव्यंचतद्विहितमार्जनामात्रमेवतर्जनंनिरासोयस्य॥२०॥ जडात्मनापवनेनसूत्रात्मनाप्रसिद्धवायुनाचस्पंदनशीलम् ॥ परेणब्रह्मचेतनेनद्रष्टृचेतनेनचचेतितम् ॥२१॥ परामर्शोविचारःपरेणआमर्शउपमर्दश्चतदसहम् ॥२२॥ विकल्पांशे विकल्पदशायांमनसिप्रतिबिंबभावेनपतिताअर्थशून्यत्वाद्वाध्यत्वाच्चासत्यरूपिणि ॥२३॥ कथंप्रसरतितदाह ॥ हृल्लेखेति ॥ हृदयंमनोलिखंतिक्षोभयंतीतिहृल्लेखाःकामवासना स्तल्लक्षणस्यजालस्यानायस्यविसरैःसमूहैर्निबद्धा ॥ पुत्रकलत्रादिषुविसरतास्नेहेनसंमिश्रंयथास्यात्तथाजडामिथ्यात्वादनुदयाअनुत्पन्नाएवयेशब्दस्पर्शादयोर्थास्तेषांचर्वणै रास्वादनैःप्रसरतिसएवचित्रमहाराज्यत्वेनवर्णितःसंसारइत्यर्थः ॥२४॥ एवंरीत्याएषाआदिचित्अहमितिविकल्पेनोन्मुखीवहिर्मुखीजीवभावमिवापन्नासत्यपिनपरात्परमात्म नोव्यतिरिक्ता ॥ भेदकोपाधीनांविकल्पमात्रत्वेजीवपरशब्दयोर्जलतोयशब्दवदेकार्थपर्यवसानादितिभावः ॥२५॥ उपाध्यनुप्रवेशेननामरूपव्याकर्त्तुरहमर्थजीवस्यब्रह्ममा त्रत्वेतद्भोग्यसर्गशब्दार्थोपिब्रह्ममात्रंसंपन्नइत्याह ॥ चिदादित्यइति ॥२६॥ जगतोराहुशिरोवच्चिद्विकल्पमात्रतामविद्यामात्रतापर्यवसानायदृष्टांतेनोपपादयति ॥ स्पंदात्मिका यामिति ॥ जलंस्पंदतेइत्यत्रविचार्यताम् किंजलमेवस्पंदात्मनाआस्तेउतान्यत् ॥ नद्वितीयः ॥ अन्यस्यानुपलंभात् अन्यएवस्पंदतइतिहितदास्यात्स्पंदस्यजलापेक्षानियमा

अंतःशून्यमसारात्मबहुरागोपरंजितम् ॥ स्फुरद्विरागविहितमार्जनामात्रतर्ज्जनम् ॥ २० ॥ ससुरासुरगंधर्वविद्याधरमहोरगम् ॥ ज डात्मपवनस्पंदिपरचेतनचेतितम् ॥ २१ ॥ पटेचित्रमहाराज्यमिवभासुरसुंदरम् ॥ परामर्शासहंचारुविकल्पस्फूर्जितंजगत् ॥ २२ ॥ स्पंदात्मनिविकल्पांशेपतिताऽसत्यरूपिणि ॥ संविस्प्रसरतिभ्रांतौतैलबिंदुरिवांभसि ॥ २३ ॥ हृल्लेखाजालविसरैःसर्वावर्त्तविवर्त्तनैः ॥ विसरत्स्नेहसंमिश्रजडानुदयचर्वणैः ॥ २४ ॥ अहमित्यादिचिद्रूपेविकल्पेनोन्मुखीसती ॥ नपराद्व्यतिरिक्तैषाजलत्वादिवतोयता ॥ २५ ॥ चिदादित्यःस्वआत्मैवसर्गइत्यभिधीयते ॥ भूत्वाहमितितेनान्योनसर्गोस्तिनसर्जकः ॥ २६ ॥ स्पंदात्मिकायांसत्तायांयथास्पंदोजलद्रवः ॥ तथाचिदात्माव्योमत्वेनव्योमत्वादिवेत्तिहि ॥ २७ ॥ देशकालादिनिर्माणपूर्वकंवेदनंविदः ॥ सर्गात्मकत्वात्तेनांबुद्रवसाम्यंनदूरगम् ॥ २८

भावप्रसंगाच्च ॥ नचसमवायात्तन्नियमस्तस्यसंबंधानवस्थयाअसिद्धेः ॥ आद्येतुकल्पेजलस्यस्पंदकर्त्तृत्वानुपपत्तिः ॥ नहिस्पंदात्मास्पंदंकरोति स्पंदस्यापिकर्त्तृत्वापत्तेः ॥ त स्माज्जलद्रवोयथास्पंदात्मिकायांस्वसत्तायामस्पंदएवेतिस्पंदप्रत्ययोविकल्पमात्रंतथाचिदात्माव्योमादिप्रपंचनिर्माणेपिनव्योमत्वेस्थितोनव्योमकर्त्तेतिनस्वस्यान्यस्यवाव्यो मभावादिकंवेदितुंशक्नोतीतिजलद्रवभेदविकल्पवद्विकल्पमात्रमेवतदित्यर्थः ॥२७॥ ननुजलद्रवभेदविकल्पेदेशकालभेदोनियामकोस्ति पूर्वकालेपूर्वदेशेस्थितंजलमुत्तरकाले परदेशेउपलभ्यते ॥ उत्तरदेशप्राप्तिस्तत्क्रियापूर्विकैवशरादौक्लृप्तेतिजलेपिद्रवणक्रियाभेदःकल्प्यते ॥ ब्रह्मणित्वद्वयेनदेशकालभेदोस्तीतिनवियदादिभेदविकल्पेनिमित्तमस्ती त्यंबुद्रवसाम्यंदूरापास्तमितिशंकांसमाधत्ते ॥ देशेति ॥ किमयंवियदादिसर्गविकल्पासंभवःसर्गात्मकत्वदशायामाक्षिप्यतेउतब्रह्मदशायाम् ॥ द्वितीयेइष्टापत्तिः ॥ नहिवयंब्रह्म भावेकंचिद्विकल्पमंगीकुर्मः ॥ सर्गात्मकत्वदशायांतुअयंसर्गकालःप्राक्प्रलयकालइतिकालविभागंसंसारासंसारदेशभेदंचकल्पनयानिर्मायतत्रविदश्चिदात्मनोवियदादिविक ल्पवेदनंवर्णयामइतिनांबुद्रवसाम्यंदूरगमित्यर्थः ॥ तथाचोक्तंवार्त्तिके ॥ अविद्यास्तीत्यविद्यायामेवासित्वाप्रकल्प्यते ॥ ब्रह्मदृष्ट्यात्वविद्येयंनकथंचनयुज्यतइति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देशकालभेदनिर्माणस्यापिदेशकालांतरसापेक्षत्वादनवस्था एवंविकल्पानांमनोहंभावबुद्ध्यादिसाध्यत्वाद्वियदादिसर्गभेदविकल्पकालेतेषामसिद्धत्वात्कथंतद्विकल्पनेत्याद्याशंकाअपिअनुपपत्त्यादिदोषसहस्रभाजनाविद्यामात्रत्वाभ्युपगमादेवपरिहर्त्तव्याइत्याशयेनाह ॥ मनइति ॥ २९ ॥ केनकेनपौरुषेणकियतीसानश्यतितदाह ॥ अर्द्धमिति ॥ विनयप्रणतिदानसन्मानादिवशीकृतैस्तत्त्वविद्भिःसहसंकथनात्प्रथमभूमिकाप्रतिष्ठापर्यंतमभ्यस्तयोत्कटवैराग्यादिसाधनचतुष्टयसिद्ध्यापुत्रदारधनादिषुममताध्यासहेतुभूतमर्द्धंनश्यतीत्यर्थः ॥ शास्त्रविचारणैःश्रवणादिभिःप्रमाणप्रमेयासंभावनादिरूपोदेहादिष्वहंतारूपश्चाविद्यायाविक्षेपशक्तिरूपोभागश्चतुर्थांशोनश्यति ॥ आत्मप्रत्ययतोब्रह्मात्मभाव

मनोहंभावबुद्ध्यादिर्यत्किंचिन्नामवेदनम् ॥ अविद्यांविद्धियत्नेनपौरुषेणाशुनश्यति ॥ २९ ॥ अर्द्धंमिथःसंकथयाभागःशास्त्रविचारणैः॥आत्मप्रत्ययतःशिष्टमविद्यायानिवर्त्तते ॥ ३० ॥ चतुर्भागात्मनिरुक्तेइत्यविद्याक्षयेक्रमात् ॥ समकालाच्चयच्छिष्टंतदनामार्थसन्मयम् ॥ ३१ ॥ ॥श्रीरामउवाच॥ ॥ अर्द्धंमिथःसंकथयाभागःशास्त्रविचारणैः॥ आत्मप्रत्ययतोभागःकथंतस्यानिवर्त्तते॥ ३२॥ समकालेक्रमाच्चेतिमुनिनाथकिमुच्यते ॥ तदनामार्थसच्चेतिसच्चासच्चेतिकिंवद ॥ ३३ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥सुजनेनविरक्तेनसंसारोत्तरणार्थिना॥ सहचाप्यात्मविदुषासंसृतिंप्रविचारयेत् ॥ ३४ ॥ यतःकुतश्चिदन्विष्यसविरागममत्सरम्॥ जनंसज्जनमात्मज्ञंयत्नेनाराधयेद्बुधः॥ ३५ ॥ संपन्नेसंगमेसाधोरविद्यार्धक्षयंगतम्॥ विद्धिवेद्यविदांश्रेष्ठज्येष्ठश्रेष्ठदशोदयात्॥ ३६॥

साक्षात्काराच्चतुर्थभूमिकामारभ्योत्तरोत्तरमुपचीयमानात्शिष्टआवरणशक्तिरूपश्चतुर्थभागश्चारुणोदयोत्तरंतमइवक्रमान्निवर्त्ततइत्यर्थः ॥ ३० ॥ इतिप्राग्दर्शितप्रकाराद्भूमिकाभ्याससमकालात्क्रमाद्वाविद्याक्षयेकृतेसतियच्छिष्टंतन्नामरूपरहितंसन्मात्रमेवपरमपुरुषार्थइत्यर्थः ॥ ३१ ॥ संक्षेपोक्तंविस्तरेणजिज्ञासूरामःपृच्छति ॥ अर्द्धमित्यादिना ॥ ३२ ॥ अनामार्थसन्मयमित्यत्रमयटाअसदंशस्यापिक्रोडीकारात्सच्चासच्चेत्युक्तम् ॥ तत्रासदंशःकिंतद्वदेत्यर्थः ॥ ३३ ॥ प्रश्नक्रमाद्वसिष्ठउत्तरमाह ॥ सुजनेनेति ॥ आत्मविदुषासहचशब्दादपिशब्दाच्चान्येनापिमुमुक्षुणासहस्वबुद्ध्याचसंसृतिकेयंकिंपर्यवसानाकिंमूलाकिंसाराकथमुत्तरणीयेतिचप्रविचारयेत् ॥ ३४ ॥ ३५ ॥ इतरभूमिकाभ्योज्येष्ठासाधनचतुष्टयसंपत्त्याचश्रेष्ठायाप्रथमभूमिकाप्रतिष्ठादशातदुदयादित्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्भागंचतुर्थभागम् ॥ स्वयत्नतोनाशयेदितिशेषः ॥ ३७॥ तत्राद्यमुपपादयति ॥ एकइति ॥ एकउत्कटमुमुक्षालक्षणोभिलाषउत्पन्नश्चेदयंपुरुषोवैराग्यादिसंपदाभोगेभ्यस्त त्साधनेभ्यश्चनिवार्यते ॥ अवश्यंनिर्ममः संन्यस्यतीत्यर्थः ॥ ३८॥ युगपत्प्राप्तौतुल्यकालम् ॥क्रमात्प्राप्तौक्रमादपि ॥ ३९ ॥ पंचमप्रश्नस्याप्युत्तरमाह ॥ यदिति ॥ अर्थक्रि याव्यवहारानर्हत्वादसत् अबाध्यपरमपुषार्थत्वात्सच्चेत्यर्थः ॥ ४० ॥ हेरामइदंपरिशिष्टवस्तुआनंदैकघनंजरादिविकारशून्यंब्रह्मैवजीवजगद्रूपंतुसंकल्पोविकल्पस्तत्स्फुरणमा त्रमित्यविद्यमानमेव ॥ त्वमेवमात्मानात्मतत्त्वंबुद्धाव्यपगतमानादित्रिपुटीमोहःसन्निर्वाणंब्रह्मैवभूत्वानिरतिशयबृहत्त्वादेवपरितोव्याप्याविहरन्सन्विशोकमास्वतिष्ठेत्यर्थः ॥ ४१ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उ०द्वादशःसर्गः ॥ १२ ॥ ॥ ७ ॥ ॥मायाकार्येनेदशोदरपेक्षेत्यत्रवर्ण्यते ॥ इंद्रस्याणूदरेराज्यकल्पनाख्यानविस्तरः ॥ १ ॥ देशकालादिनिर्माणपूर्वकंवेदनंविदः सर्गात्मकत्वादितियदुक्तंतस्योपपादनायेंद्रत्रसरेण्वाख्यानंवक्तुंभूमिकांरचयति ॥ जगदित्यादिना ॥ देशकालादिनिर्माणपूर्वकंवेदन

अर्द्धंसज्जनसंपर्कादविद्यायाविनश्यति ॥ चतुर्भागस्तुशास्त्रार्थैश्चतुर्भागंस्वयत्नतः॥३७॥एकोभिलाषउत्पन्नोभोगेभ्यश्चनिवार्यते ॥ तत्क्षयेयात्यविद्यायाश्चतुर्थांशःस्वयत्नतः ॥ ३८ ॥ साधुसंगमशास्त्रार्थस्वयत्नैःक्षीयतेमलम् ॥ एकैकेनाथसर्वैश्चतुल्यकालंक्रमादपि ॥ ३९ ॥ यदविद्याक्षयेकात्मनकिंचित्किंचिदेवच ॥ शिष्यतेतत्परंप्राहुरनामार्थमसच्चसत् ॥ ४० ॥ ब्रह्मेदंघनमजराद्यनंतमेकंसंकल्पस्फुरणमविद्यमानमेव ॥ बुद्धैवंव्यपगतमानमेयमोहोनिर्वाणंपरिविहरन्विशोकमास्व ॥ ४१ ॥ ॥ इ० वा० म० वा० दे० मो० नि० उ० विद्या० संकल्पसर्गयोरैक्यप्रतिपत्तिर्नामद्वादशःसर्गः॥ १२ ॥ ॥ ७ ॥ ॥भुशुंडउवाच॥ ॥जगत्प्रसररूपस्यनदेशउपयुज्यते॥ नकालोधारणेस्तंभआलोकस्यांबरेयथा ॥ १ ॥ मनोमननिर्माणमात्रमेतज्जगत्त्रयम् ॥ शांतंतनुलघुस्वच्छंवातांतःसौरभादपि ॥ २ ॥ चिच्चमत्कृतिमात्रस्यसाधोजगदणोःकिल ॥ वातांतःसौरभंमेरुरन्यानुभवयोगतः ॥ ३ ॥ यंप्रत्युदेतिसर्गोयंसएवैनंहिचेतति ॥ पदार्थःसन्निवेशंस्वमिवस्वप्नंपुमानिव ॥ ४ ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ यद्वृत्तंदेवराजस्यत्रसरेणूदरेपुरा ॥ ५ ॥

मित्यंगीकृत्यवादः वस्तुतस्तुदृष्टसृष्ट्यायुगपदेवसहदेशकालाभ्यांजगत्प्रसररूपस्यमायिकसर्गस्यधारणेनप्राक्सिद्धोदेशउपयुज्यते यथाअंबरेयुगपत्प्रसृतस्यालोकस्यधारणेस्तंभोनोपयुज्यतेतद्वदित्यर्थः ॥१॥ वातांतःप्रसृतमतिसूक्ष्मत्वाद्वातेनापिधारयितुंकंपयितुंचाशक्यंयत्सौरभंज्योतिःसौरभंसौगंध्यंचतस्मादपिशांतंतिरोभूतंतनुसूक्ष्मंलघुअगुरुस्वच्छं चेत्यर्थः ॥ २ ॥ हेसाधोचिच्चमत्कृतिमात्रत्वेनदृष्टस्यजगदणोरपेक्षयावातांतर्गतसौरभमपिमेरुरिवस्थूलंकिल ॥ अन्यानुभवयोगतःअन्यैरपिचक्षुर्घ्राणादिसंयोगेनानुभूयमानत्वादित्यर्थः ॥ ३ ॥ दृष्टसृष्टिरूपस्यप्रपंचस्यतुनस्वकल्पकदृगन्यगोचरतेत्यसाधारणत्वात्परमसौक्ष्म्यमित्याह ॥ यंप्रतीति॥यथामानोरथिकपदार्थःस्वसन्निवेशंस्वसाक्षिणास्वयमेवचेतति यथापुमान्स्वस्वप्नंस्वयमेवचेतति तद्वदित्यर्थः ॥ ४ ॥ अत्रअस्मिन्पूर्वसिद्धदेशकालानपेक्षारूपेअनन्यानुभवगोचरतयापरमसौक्ष्म्यरूपेचार्थेउपपादकम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्चिच्चासौकल्पद्रुमश्चकिंचित्कल्पद्रुमस्तस्मिन्सर्वकल्पनाफलाधारेमायाशबलेब्रह्मणीतियावत् ॥ युगशाखायांशाखाद्वयसंधौ ॥ जगद्ब्रह्मांडस्तद्रूपमुदुंबरंफलम् ॥६॥ तद्वर्ण यति ॥ ससुरासुरेत्यादिना ॥ शैलैः कीलस्थानीयैर्मांसलानिदृढानिपातालादिलोकत्रयलक्षणानिउग्राणिदुराधर्षाणिकपाटानियत्र॥यद्यप्युदुंबरस्वरूपकेंतःकपाटवर्णनमनुपयुक्तं तथापिकल्पवृक्षफलोदुंबरफलकल्पकमनोवृत्त्यनुसारित्वेनप्रसिद्धवैलक्षण्यकल्पनयाकथंचिद्योज्यम् ॥७॥ चितश्चमत्कृत्यारचनाशक्तिवैचित्र्येणचारु ॥ उच्चैर्बृहत् ॥८॥बृहन् प्राग्वर्णितोयोब्रह्मतरुरुदुंबरस्तस्मिन्प्रौढाआविर्भूतायाःसूक्ष्मजगत्सत्ताव्रततिकोटयस्तदंतर्गतम्॥समआलोकःसाक्षिचितूतेनसमुज्वलम् ॥ ९ ॥ मोक्षद्वारंज्ञानमेवविकासिआ स्यंमुखंयस्य ॥ मात्रास्तन्मात्राणि ॥ तरंतिऊर्ध्वंप्लवमानानितारकाण्येवसीकरारसकणानीहारकणावायत्र ॥ १० ॥ महाकल्पावसानेजरठंपक्वंपातोन्मुखम् अथतदनंतरंका

क्वचित्कदाचित्कस्मिंश्चित्किंचित्कल्पद्रुमेभवत् ॥ कस्यांचिद्युगशाखायांफलंजगदुदुंबरम् ॥ ६ ॥ ससुरासुरभूतौघमशकाहितघुंघुमम् ॥ शैलमांसलपातालद्युभूम्युग्रकपाटकम् ॥ ७ ॥ चिच्चमत्कृतिचारूच्चैर्वासनारसपीवरम् ॥ विविधानुभवामोदंचित्तास्वादमनोहरम् ॥ ८ ॥ बृहद्ब्रह्मतरुप्रौढसत्ताव्रततिकोटिगम् ॥ अहंकारमहावृंतंसमालोकसमुज्वलम् ॥ ९ ॥ मोक्षद्वारविकास्यास्यंसरिदब्धिशिरावृतम् ॥ मात्रापंचककोशस्थंतरत्तारकसीकरम् ॥ १० ॥ कल्पावसानजरठंकाककोकिलगाम्यथ ॥ पतितंशांतिमायातंक्वाप्यंतावासनंगतम् ॥ ११ ॥ तत्राभूदमराधीशःशक्रस्त्रिभुवनेश्वरः ॥ क्षौद्रकुंभनिषण्णानांक्षुद्राणामिवनायकः ॥ १२ ॥ गुरूपदेशस्वाभ्यासात्सक्षीणावरणोभवत् ॥ महात्माभावितांतात्मापूर्वापरविदांवरः ॥ १३ ॥ नारायणादिषुततःकदाचिद्वीर्यशालिषु ॥ क्वचिदेवनिलीनेषुसत्स्वेकस्ससुराधिपः ॥ १४ ॥ शस्त्रज्वालानलोद्गारैरयुध्यतमहासुरैः ॥ विजितस्तैर्महावीर्यैरतोव्यद्रवदाद्रुतम् ॥ १५ ॥ दिशोदशसुवेगेनदुद्रावाभिद्रुतोरिभिः ॥ नविश्रमास्पदंप्रापपरलोकइवाधमः ॥ १६ ॥ तद्भ्रांतदृष्टिष्वरिषुमनाक्छिद्रमवाप्यसः ॥ प्रशमंकायसंकल्पंनीत्वास्वंस्वांतरेवहिः ॥ १७ ॥ कमप्यर्कांशुकोशस्थंत्रसरेणुंविवेशसः ॥ संविद्रूपतयापद्मकोशंमधुकरोयथा ॥ १८ ॥

कगामिकोकिलगामिवा ॥ यथाप्रसिद्धोदुंबरमंतेकाकैःकोकिलैर्वाभक्ष्यतेतद्वदसच्छास्त्रकटुरवानुसारिण्याअविद्याकाक्याशास्त्रमधुररवानुसारिण्याविद्याकोकिलयावायस्य मानंक्वापिअंतवासनामात्रशेषलक्षणंनाशप्रवासनंब्रह्मभावंवाआगतंभविष्यतीत्यर्थः ॥ ११ ॥ तत्रतस्मिन्नुदुंबरे ॥ क्षुद्राणांमधुमशकानाम ॥ १२ ॥ भावितःअंतःसर्वकल्पनावधिरात्मायेन ॥ १३ ॥ १४ ॥ शस्त्रज्वालानलानुद्गिरतीतिशस्त्रज्वालानलोद्गाराः ॥कर्मण्यण् ॥ कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणादुपपदसमासः॥आसमंताद्द्रुतंशीघ्रम्॥ ॥ १५ ॥ सुवेगेनअतिजवेन ॥ अधमःपापकृत ॥ १६ ॥ अरिषुमनाग्भ्रांतदृष्टिषुसत्सु ॥ तत्तदा॥छिद्रंनिलयनावसरं॥कायाकारंस्थूलाकारसंकल्पंस्वांतरेभूतसूक्ष्मेप्रशमंनीत्वा विलाप्याणुतरोभूत्वाबहिःकमपित्रसरेणुंविवेशेतिपरेणान्वयः ॥ १७ ॥ तदंतःप्रवेशसंकल्पसंविद्रूपतया ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वृत्तिवहिर्गमनाभावम् ॥ अनिरत्तिमितिवाछेदः ॥ १९ ॥ पद्मतिपद्मासनमध्ये ॥ स्वस्वलोकप्रसिद्धेविष्टरेसिंहासनइव ॥ २० ॥ २१ ॥ गौवाटाव्रजाः ॥ २२ ॥ तादृयति स्तादृशसंकल्पोपहितः ॥ भुवनंभूलोकम् ॥ नद्यःईशाराजानःअंतास्तत्तद्देशसीमास्तैस्सहवर्त्तमानम् ॥ २३ ॥ अथतत्रसुरेशत्वेअतिष्ठदित्यपकृष्यान्वयः ॥ २४ ॥ २५ ॥

सतत्राशुविशश्राममचिरादाश्वासमाययौ ॥ अथविस्मृतसंग्रामोनिर्वृत्तिसमुपागमत् ॥ १९ ॥ कल्पितंसद्मतत्राथसक्षणादनुभूतवान् ॥ तस्मिन्सद्मनिपद्मांतेरमेस्वइवविष्टरे ॥ २० ॥ गृहस्थःसददर्शाथकल्पितंनगरंहरिः ॥ मणिमुक्ताप्रवालादिकृतप्राकारमंदिरम् ॥ २१ ॥ नगरांतर्गतोपश्यत्ततोजनपदंहरिः ॥ नानाद्रिग्रामगोवाटपत्तनारण्यराजितम् ॥ २२ ॥ तादृग्यतिश्चेतितवान्सशक्रोभुवनंततः ॥ साद्र्यब्ध्युर्वीनदीशांतंसक्रियाकालकल्पनम् ॥ २३ ॥ तादृग्यतिश्चेतितवान्सशक्रस्त्रिजगत्ततः ॥ सपातालमहीव्योमविष्टपार्कादिपर्वतम् ॥ २४ ॥ तत्रातिष्ठत्सुरेशत्वेसभोगभरभूषितः ॥ पुत्रोबभूवतस्याथकुंदोनामाथवीर्यवान् ॥ २५ ॥ ततोजीवितपर्यंतेत्यक्त्वादेहमनिंदितः ॥ निर्वाणमाययौशक्रोनिःस्नेहइववदीपकः ॥ २६ ॥ कुंदस्त्रैलोक्यराजोभूज्जनयित्वासुतंनिजम् ॥ कालेनजीवितस्यांतेजगामपरमंपदम् ॥ २७ ॥ तत्पुत्रोपितथैवाथकृत्वाराज्येसुतंनिजम् ॥ जगामजीवितस्यांतेपावनंपरमंपदम् ॥ २८ ॥ एवंपौत्रसहस्राणिसमतीतानिसुंदर ॥ तत्राद्यापिसुरेशस्ययेषांराज्येस्थितोंशकः ॥ २९ ॥ इत्यद्ययावदमरेश्वरवंशएवसंकल्पितेजगतिशक्रपदंविधत्ते ॥ तस्मिन्क्षतेपिगलितेपिहतेपिनष्टेक्वाप्यंबरेदिनकरातपपावनाणौ ॥ ३० ॥ ॥ इत्यार्षेवा० वा० दे० मो० नि० उ० विद्याधरोपाख्यानांतर्गतेंद्रोपाख्यानेत्रसरेण्वंतरसर्गसंघवर्णनंनामत्रयोदशःसर्गः ॥ १३ ॥ ॥छ॥ ॥छ॥

॥२६ ॥ २७॥ २८ ॥ तस्यसुरेशस्यपौत्रसहस्राणियेषांराज्येअद्याप्यंशकोनामराजास्थितः ॥ २९ ॥ इतिवर्णितदिशाअद्ययावत्अद्यतनकालपर्यंतंतत्संकल्पितेत्रसरेण्वंतरेजगतितद्वंशएवअमरेशपदंशक्रराज्यंविधत्तेपालयति ॥ क्वाप्यंबरप्रदेशेतस्मिन्दिनकरातपपावनेअणौत्रसरेणौक्षतेअपचितेगलितेनष्टेपिहितद्राज्यंनगलितमित्यर्थः ॥ ३० ॥
इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेत्रयोदशःसर्गः ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कुलोत्पन्नशक्रस्यबिसतंतौजगत्प्रथा ॥ तत्रोच्यतेब्रह्मदृष्टौसर्वदृष्ट्याखशक्रता ॥ १ ॥ तस्यप्रागुक्तस्यशक्रस्यकुलजोवंशोद्भवः ॥ १ ॥ तस्यतत्रबृहस्पतेःस्वगुरोरुपदेशगिरा उदिताप्रतिभानंप्रतिभाआत्मतत्त्वसाक्षात्कारस्तद्रूपज्ञानसंप्राप्तिर्वभूवेतिशेषः ॥२॥ आज्यपानांदेवानाम् ॥ ३ ॥ यज्ञानामश्वमेधानाम् ॥ तस्यहिफलंतस्यवक्ष्यमाणाबिसतंता वेतद्ब्रह्मांडेचशक्रताप्राप्तिरितिभावः ॥४॥ बिसस्यपद्मनालस्यबालतंतुस्तदंतरे ॥ तत्रबिसतंतौकल्पितेब्रह्मांडेराज्ययुद्धजयपराजयादीन्यन्यान्यपिवृत्तांतशतान्यनुबभूवहकिल ॥ ५ ॥ ब्रह्मतत्त्वंमायाशबलब्रह्मस्वभावम् ॥ ६ ॥ प्रणिधानेनसमाधिना ॥ अशेषाणांविक्षेपकारणानांत्यागेनशांतधीः ॥ ७ ॥ ८ ॥ श्रुतिमत्श्रोत्रेंद्रियवत् ॥ ९ ॥ सर्वेंद्रिया

भुशुंडउवाच॥ ॥तस्यशक्रस्यकुलजःकश्चिदासीत्सुराधिपः॥तत्रोत्तमगुणःश्रीमान्पाश्चात्यायस्यसातनुः॥ १ ॥ अथेंद्रकुलपुत्रस्य तस्यतत्रबभूवह॥ प्रतिभाज्ञानसंप्राप्तिर्बृहस्पतिगिरोदिता ॥ २ ॥ ततोविदितवेद्योसौयथाप्राप्तानुवृत्तिमान् ॥ चकारजगतांराज्यमा ज्यपानामधीश्वरः॥ ३ ॥ युयुधेदानवैःसार्द्धमजयत्सर्वशात्रवान्॥ शतंचकारयज्ञानामज्ञानोत्तीर्णमानसः॥ ४॥ उवासकार्यवशतो बिसबालांतरेचिरम्॥ अन्यान्यपिचवृत्तांतशतान्यनुबभूवह ॥ ५ ॥ कदाचिदासीत्तस्येच्छाप्रबोधबलशालिनः॥ ब्रह्मतत्त्वमवेक्षेहंय थावद्ध्यानवानिति॥ ६ ॥ सोपश्यत्प्रणिधानेनततएकांतसंस्थितः॥ सबाह्याभ्यंतरेऽशेषकारणत्यागशांतधीः॥ ७ ॥ सर्वशक्तिपरंब्रह्म सर्ववस्तुमयंततम्॥ सर्वथासर्वदासर्वंसर्वैःसर्वत्रसर्वगम्॥ ८ ॥ सर्वतःपाणिपादांतंसर्वतोक्षिशिरोमुखम् ॥ सर्वतःश्रुतिमल्लोकेसर्व मावृत्यसंस्थितम्॥ ९ ॥ सर्वेंद्रियगुणैर्मुक्तंसर्वेंद्रियगुणान्वितम्॥ असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥ १० ॥ बहिरंतश्चभूतानाम चरंचरमेवच॥ सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत्॥ ११ ॥ सर्वत्रचंद्रार्कमयंसर्वत्रैवधरामयम्॥ सर्वत्रपर्वतमयंसर्वत्राब्धिमयं तथा॥ १२ ॥ सर्वत्रसारगुरुकंसर्वत्रैवनभोमयम्॥ सर्वत्रसंसृतिमयंसर्वत्रैवजगन्मयम् ॥ १३ ॥ सर्वत्रैवचमोक्षात्मसर्वत्रैवाद्यचि न्मयम् ॥ सर्वत्रसर्वार्थमयंसर्वतःसर्ववर्जितम् ॥ १४ ॥ घटेपटेवटेकुड्येशकटेवानरे¹तथा ॥ धाम्निव्योम्नितरावद्रावनिलेसलिलेनले ॥ १५ ॥ नानाचारविचाराणिविविधावृत्तिमंतिच ॥ परमाण्वंशमात्रेपित्रिजगंतिददर्शसः॥ १६ ॥ मरिचस्यांतरेतैक्ष्ण्यंशून्यत्वमिव चांबरे॥ त्रिजगत्सत्यसतिचविद्यतेचिन्मयात्मनि॥ १७॥

णांगुणैरूपादिग्रहणशक्तिभिरन्वितम् ॥ परमार्थतःअसक्तंव्यवहारतस्तुसर्वभृत् ॥ एवमग्रेपि ॥१०॥ ११ ॥ प्राचुर्येमयट्ः ॥ १२ ॥ भ्रमप्राधान्येनसंसृतिर्भावविकारप्राधा न्येनजगदितिभेदव्यपदेशः ॥ १३ ॥ १४ ॥ धाम्नितेजसिगृहेच ॥ सःत्रिजगंतिददर्शेतिपरेणान्वयः ॥ १५ ॥ नानाविधाःप्राणिनामाचाराःशारीराविचारामानसाश्चक्रियाभे दायेषु ॥ आवृत्तयःस्वर्गनरकादेःपुनरागमनानि ॥ परमाणोरंशाऊर्ध्वाधोमध्यादिभागास्तन्मात्रेपि ॥१६॥ सतिआविर्भावकालात्मनि असतितिरोभावकालात्मनिच ॥ १७॥

१ नरेइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावयन्पश्यन् ॥ मुक्तोभावोजीवभावोयया ॥ तेनप्राग्वासनाकल्पितेनैवशक्रदेहेनशक्रोनतुसमाध्यनुभूयमानसर्वात्मभावेनेत्यर्थः ॥ १८ ॥ एकत्रमायाशबलब्रह्मणि ॥ इम मस्मदीयंत्वयामयाचानुभूयमानंसर्गंब्रह्मांडम् ॥ १९ ॥ ततस्तदनंतरमस्मिन्सर्गेपातालभूम्यादिलोकदर्शनक्रमेणशक्रलोकांतेमनसाविचरन्संस्तत्रशक्रदर्शनेनशक्राहंभावसं स्कारोद्बोधात्प्राक्तनाश्वमेधशतादृष्टफलावश्यंभावाच्चशक्रतांगतः ॥ राजतांप्रजारंजकताम् ॥ राज्यंराजकर्मकरादानपरिपालनादिचकार ॥ २० ॥ हेविद्याधरकुलाधीशइ तिअनयारीत्यातस्यत्रसरेण्वंतर्गतस्येंद्रस्यकुलेउत्पन्नस्सोऽद्यास्मिन्ब्रह्मांडेपिदेवराड्भूत्वातिष्ठतीतिविद्धि ॥ २१ ॥ ततएतदिंद्रभावानंतरंत्दृदयेबीजमिवसंस्काररूपेणस्थितस्यप्रा क्तनस्यमुख्यस्यज्ञानयोगाभ्यासस्ययोगतोयथास्थितंप्राक्तनंबिसतंतुनिवासादिस्ववृत्तांतमनुभूतवान्सस्मारेत्यर्थः ॥ २२ ॥ सर्वशक्तौब्रह्मणिसर्वत्रसर्वसद्भावादीदृशशक्रसह

इत्येवंभावयन्मुक्तभावयाशुद्धसंविदा॥ शक्रःक्रमेणतेनैवतथैवध्यानवानभूत्॥ १८॥ ध्यानेनसर्वमेकत्रपश्यंश्चिरमुदारधीः॥ ददर्श ममसौसर्गमस्मदीयंमहामतिः॥ १९॥ ततोस्मिन्विचरन्सर्गेशक्रांतेशक्रतांगतः ॥ चकारजगतांराज्यंवृत्तांतशतशोभितम्॥ २० ॥ विद्याधरकुलाधीशइत्यद्यैवसदेवराट्॥ तस्येंद्रस्यकुलोत्पन्नइतिविद्धियथास्थितम् ॥ २१ ॥ ततोत्दृदयबीजस्थप्राङ्मुख्याभ्यासयोग तः॥ बिसबालनिवासादिवृत्तांतमनुभूतवान्॥ २२॥ यथैषशक्रःकथितस्त्रसरेणूदरास्पदः॥ बिसबालास्पदश्चैतत्कुलजःकांतिमानथ ॥ २३॥ तथाशतसहस्राणितत्रेतश्चान्यतश्चखे॥ तादृशव्यवहाराणिसमतीतानिसंतिच ॥ २४ ॥ वहतीयमविच्छिन्नाचिरायैवंतरंगि णी॥ तावद्भ्रमसरित्प्रौढारूढारूढेचतत्पदे॥ २५॥ इतिमायेयमादीर्घाप्रस्तताप्रत्ययोन्मुखी ॥ सत्यावलोकमात्रातिविलयैकविलासि नी॥ २६॥ यतःकुतश्चिन्मायेयंयत्रक्वचनवानघ॥ यथाकथंचित्संपन्नमात्रैवपरिदृश्यते॥ २७॥ अहंभावचमत्कारमात्राद्दृष्टिरिवांबु दात्॥ जायतेमिहिकेवाशुप्रेक्षामात्रविनाशिनी॥२८॥ येनायताभिमतदर्शनद्रष्टृदृश्यमुक्तस्वभावमवभासनमात्मतत्त्वम्॥ सर्वार्थशू न्यमतएवचशून्यरूपमेकंखमात्रमिवमात्रविकल्पमेव॥ २९॥ ॥इ० वा० महारामायणेवा० दे० मोक्षोपायेषुनिर्वाणप्रकरणेउ० वि द्याधरोपाख्यानांतर्गतेंद्राण्वाख्यानेसर्गसंकल्पयोरैक्यप्रतिपादनंनामचतुर्दशःसर्गः॥ १४॥

स्राण्यपिसर्वत्रसंतीतिसंभावयेत्याह ॥ यथेतिद्वाभ्याम् ॥ अप्यर्थेथशब्दः ॥ २३ ॥ २४ ॥ चतुर्थ्यादिषष्ठ्यंतभूमिकास्वर्द्धरूढेअर्धमरूढेचतस्मिन्ब्रह्मपदेसतिइयंमायाइतिप्र त्ययोऽनुभवस्तदुन्मुखीभवतीतिपरेणान्वयः ॥ २५ ॥ २६ ॥ मायात्वादेवनवैचित्र्येहेतुविशेषाश्चित्याइत्याह ॥ यतःकुतश्चिदिति ॥ त्रिभिर्यद्वृत्तैःकिंवृत्तैश्चहेतुकालदेशक्रिया प्रकारनियमानावश्यकतासूच्यते ॥ २७ ॥ अथवाएकएवाहंकाराध्यासएतद्वैचित्र्येनियतोहेतुरित्याह ॥ अहंभावेति ॥ मिहिकानीहारधूमइवेतिनाशेदृष्टांतः ॥ २८ ॥ ये नहेतुनामात्मसर्वसाक्षिब्रह्मरूपमविकल्पंसर्वविकल्परहितमेवपरमार्थतः अतएवअहंकारवशादायतानिविस्तीर्णानियानिअभिमतानिमानसविकल्पाःदर्शनानित्रिपुटीलक्षणैंद्रि यकविकल्पाश्चतैर्मुक्तस्वभावंजाग्रदवस्थाशून्यमितियावत् ॥ अतएववासनामयस्वाप्नसर्वार्थशून्यमतएवचप्रतियोग्यप्रसिद्ध्यासर्वशून्यतालक्षणेनसौषुप्ताज्ञानेनचशून्यंखमात्र मिवपूर्णमवभासनंचिद्रूपमात्मतत्त्वंपरिशिष्टमित्यर्थः ॥ २९ ॥ ॥ इतिश्रीवासिष्ठ० म० रा० तात्पर्यप्रकाशेनि० प्रकरणेउ० चतुर्दशःसर्गः ॥ १४ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंभावोजगद्भ्रांतेर्बीजंरूपेचवर्ण्यते ॥ तन्मार्ज्जनाज्जगन्मृष्याशुद्धशेषात्कृतार्थता ॥ १ ॥ अहंभावचमत्कारमात्राद्वृष्टिरिवांबुदात् जायतेदृश्यसरिदितियदुक्तंतदुपपादकतया इंद्राण्वाख्यायिकांयोजयति ॥ यत्रेति ॥ अभिनवेपिस्वप्नप्रपंचेपूर्वसिद्धमेवजगत्पश्यामीतिसर्वानुभवात्पूर्वमागत्यतिष्ठतीत्युक्तिः ॥ १ ॥ २ ॥ व्योमअव्याकृताकाशस्तल्लक्षणेविपिनेऽरण्ये ॥ ३ ॥ विलीनामेघमिहिकावनप्रच्छन्नाअचलाःपर्वताःपल्लवायस्य ॥ सरित्सारागंगाद्याः ॥ वासनाएवसाराद्दृढाबीजांशायेषुतथाविधास्तेभोगाःफलानि यस्य ॥ ४ ॥ इदानीमहंकारंमहाजलतयाजगच्चतत्कार्यतरंगादितयावर्णयति ॥अहंत्वेत्यादिपंचभिः ॥ इदंजगत्अहंत्वसलिलस्यस्पंदोविलासः॥चितश्चमत्करणंवैषयिकसुखं स्वादुमाधुर्यंयत्र ॥ ५ ॥ नभसाआकाशेनअनंतनिखातवानूअपरिच्छेद्यकुक्षिकुहरवान् ॥ भावाःसंपदःअभावाविपदश्चमहांतआवर्त्तायत्र ॥ ६ ॥ त्रिलोकीपदेनतद्गतजनाल

भुशुंडउवाच ॥ ॥ यत्राहंत्वंजगत्तत्रपूर्वमागत्यतिष्ठति ॥ पराण्वंतरपींद्रस्यत्रसरेणूदरेयथा ॥ १ ॥ भ्रमस्यजागतस्यास्यजातस्याकाशवर्णवत् ॥ अहंभावोभिमंतात्मामूलमाद्यमुदाहृतम् ॥ २ ॥ वासनारससंसिक्तादहंबीजकणादयम् ॥ ब्रह्माद्रौव्योमविपिनेजायतेत्रिजगद्द्रुमः ॥ ३ ॥ तारकापुष्पनिकरोविलीनाचलपल्लवः ॥ सरित्सारशिरापूरोवासनासारतत्फलः ॥ ४ ॥ अहंत्वसलिलस्येदंजगत्स्पंदउदाहृतः ॥ चिच्चमत्करणस्वादुर्वासनाविसरद्रवः ॥ ५ ॥ तारकासीकरासारोनभोनंतनिखातवान् ॥ भावाभावमहावर्त्तोनानागिरितरंगकः ॥ ६ ॥ त्रिलोकीविलिखल्लेखोविलोलालोकफेनिलः ॥ ब्रह्मांडबुद्बुदोद्भेदःकवाटापीडपीवरः ॥ ७ ॥ भूपीठदृढडिंडीरपिंडश्चिद्घनमद्गुमान् ॥ चित्राजवंजवीभावमज्जनोन्मज्जनात्मकः ॥ ८ ॥ जरामरणमोहादिवीचीचयचमत्कृतिः ॥ उत्पन्नध्वंसिदेहादिबिंदुवृंदैकबंधुरः ॥ ९ ॥ अहंत्वपवनस्पंदोजगदित्यवगम्यताम् ॥ अहंत्वपद्मसौगंध्यंजगदित्यवबुध्यताम् ॥ १० ॥ नाहंत्वजगतीभिन्नेपवनस्पंदवत्सदा ॥ पयोद्रवत्वमिवचवह्नेरौष्ण्यमिवापिच ॥ ११ ॥ जगदस्त्यहमर्थैतरहमस्तिजगद्धृदि ॥ अन्योन्यभाविनीत्वेतेआधाराधेयवत्स्थिते ॥ १२ ॥ जगद्बीजमहंत्वंयोमार्ष्टिबोधादवेदनात् ॥ अलंचित्रंजलेनेवतेनधौतंजगन्मलम् ॥ १३ ॥ अहंत्वंनामतत्किंचिद्विद्याधरनविद्यते ॥ अकारणमवस्तुत्वाच्छशशृंगमिवोदितम् ॥ १४ ॥

क्ष्यंते तएवविलिखंत्यश्चित्रलेख्यवदाविर्भवंत्योलेखारेखायत्र ॥ विलोलैःसूर्यचंद्राद्यालोकैःफेनिलःफेनवान् ॥ ब्रह्मांडाएवबुद्बुदोद्भेदायत्र ॥ कपाटमिवआपीडयतिनिरुणद्धिमोक्षप्रवेशमितिकपाटापीडोमोहसेतुस्तेनपीवरोऽभिवृद्धः ॥ ७ ॥ भूपीठमेवघनोडिंडीरपिंडोयत्र ॥ चिद्घनैश्चिदाभासैर्जीवैर्मद्गुमान्जलकाकवान् ॥ तेषांचित्रैराजवंजवीभावैरुर्ध्वाधस्तिर्यग्भ्रमणैर्मज्जनोन्मज्जनात्मकः ॥ ८ ॥ ९ ॥ प्रकारांतराभ्यांजगद्वर्णयति ॥ अहंत्वेति ॥ १० ॥ इत्थंवर्णनेफलितमाह ॥ नेति ॥ ११ ॥ परस्परबीजतामाह ॥ जगदिति ॥ अन्योन्यस्माद्भाविनीआविर्भावशीलेअन्योन्याधीनस्थितिकेच ॥ १२ ॥ अतएवाहंकारमार्जनाज्जगन्मार्जनसिद्धिरित्याह ॥ जगदिति ॥ १३ ॥ अहंत्वस्यतत्त्वदृष्ट्याअसत्त्वदर्शनमेवमार्जनमित्याह ॥ अहंत्वमिति ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कुतस्तत्राह ॥ ब्रह्मणीति ॥ १५ ॥ संभवदपिकारणंलोकेअवस्तुनिनैतिनव्याप्रियते ॥ प्रकृतेतुसर्गादौकारणंनसंभवतितत्संभवोपिनास्तीत्यर्थः ॥ १६ ॥ निर्वाणंकैवल्यलक्ष
णंचित्त्वंचिन्मात्रंशिष्टम् ॥ १७ ॥ एवमुपपत्तिप्रतिष्ठिताज्जगदहंत्वयोरभावात् ॥ बाह्यारूपालोकादयःसंसाराआंतरामनस्कारलक्षणाःसंसाराश्वशांताः ॥ नचइतरत्तदुभयव्य
तिरिक्तंहेयंदुःखमस्तिअतःशांतमास्वेत्यर्थः ॥ १८ ॥ शांतंनिर्दुःखविक्षेपम् ॥ १९ ॥ व्यपगतोबाह्याभ्यंतरदृश्यकलनालक्षणःकलंकोयस्यअतएवशुद्धः ॥ अध्यारोपेखंशून्य
मपिपर्वतोपमानंभवतिअपवादेतुजगद्ब्रह्मांडमपिवापरमाणुरूपमाकाशतुल्यमेवभवतीत्यर्थः ॥ २० ॥ ॥ इतिश्रीवासिष्ठ०म०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेपंचदशः
सर्गः ॥ १५ ॥ ॥ ७ ॥ ॥ श्रुत्वाविद्याधरस्यात्रसमाधिरुपवर्ण्यते ॥ कथाशेषोपसंहारोनहंभावप्रशंसया ॥ १ ॥ संशांतादृश्यसंवित्तिर्यस्यसमाधिलक्षणोयश्चि

ब्रह्मण्यतितनेऽनंतेसंकल्पोल्लेखवर्जिते ॥ अहंत्वकारणाभावान्नकदाचनसन्मयम् ॥ १५ ॥ अवस्तुन्येतिसर्गादौनसंभवतिकारणम् ॥
अतोहंत्वादिनास्त्येववंध्यासुतइवक्वचित् ॥ १६ ॥ तदभावाज्जगन्नास्तिचित्त्वंजगदभावतः ॥ शिष्टंनिर्वाणमेवातःशांतमास्वयथासुख
म् ॥ १७ ॥ अभावादुपपत्तिस्थादेवंजगदहंत्वयोः ॥ रूपालोकमनस्काराःशांतास्त्वनचेतरत् ॥ १८ ॥ यन्नास्तितत्तुनास्त्येवशेषंशांत
मसिध्रुवम् ॥ संप्रबुद्धोसिमाभूयोनिर्मूलांभ्रांतिमाहर ॥ १९ ॥ व्यपगतकलनाकलंकशुद्धःशिवमसिशांतमसीश्वरोसिनित्यः ॥ खमपि
भवतिपर्वतोपमानंजगदपिवापरमाणुरूपमेव ॥ २० ॥ ॥ इ० वा० महारामायणेवा० दे० मो० निर्वाणप्रकरणेउ० वि० विद्याधरनि
र्वाणंनामपंचदशःसर्गः ॥ १५ ॥ ॥ ७ ॥ ॥ भुशुंडउवाच ॥ ॥ कथयत्येवमप्येवंसविद्याधरनायकः ॥ आसीत्संशांतसंवित्तिःसमाधिप
रिणामवान् ॥ १ ॥ प्रबोध्यमानोपिमयाभूयोभूयस्ततस्ततः ॥ नपपातपुरोदृश्येपरंनिर्वाणमागतः ॥ २ ॥ सप्राप्तपरमंस्थानंतावन्मात्रप्र
बोधवान् ॥ केनचिन्नाधिकेनांगयत्नेनातिशयैषिणा ॥ ३ ॥ अतउक्तंमयारामयदिशुद्धेहिचेतसि ॥ उपदेशःप्रसरतितैलबिंदुरिवांभसि
॥ ४ ॥ नाहमित्यस्तितेनांतर्मैनंभावयशांतये ॥ एतावदुपदेशोक्तिःपरमानेतरास्तिहि ॥ ५ ॥ एषैवाभव्यमनसिपतिताप्रविलीयते ॥ उत्ता
नेमस्तृणादर्शेमुक्ताफलमिवामलम् ॥ ६ ॥ भव्येतुशांतमनसिलगत्यभ्येत्यविच्युतिम् ॥ प्रविश्यांतर्विचाराख्यामर्चिरर्कमणौयथा ॥ ७ ॥

त्तस्यक्षीरोदकवच्चिदेकरस्येनपरिणामस्तद्वान् ॥ १ ॥ पुरोगतेदृश्येशब्दादिविषयेनपपात ॥ २ ॥ मुख्याधिकारित्वात्तावन्मात्रेणमदुपदेशेनप्रबोधवान् ॥ श्रवणावृत्तिमनननिदिध्या
सनाद्यतिशयैषिणान ॥ अंगेतिवसिष्ठसंबोधनम् ॥ ३ ॥ इदानींवसिष्ठःप्राक्स्वोक्तेर्थेविद्याधरचित्तमुदाहरणमितिवर्णनत्वरयाभुशुंडोक्तिमुत्क्रम्यरामंप्रत्याह ॥ अतइत्यादि ॥ ४ ॥
कोसावुपदेशस्तमाह ॥ नाहमिति ॥ तेअंतःप्रत्यगात्मनिचिदेकरसेअहमित्यंशोनास्ति अतोऽसंतमेनंमाभावयइत्येतावत्एतावत्येवोपदेशोक्तिःपरमासारसंग्रहभूता ॥ ५ ॥ ६ ॥
अविच्युतिंअभ्येति ॥ अंतःप्रविश्यविचाराख्यांसर्वमोहारण्यदाहक्षमामग्निशिखांचजनयतीतिशेषः ॥ यथाअर्कमणौसूर्यकांतेप्रविष्टंसूर्यार्चिरग्निशिखांजनयतितद्वत् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्वदहंभावनवदेवममेदंभावनंसंसारवृक्षस्यमूलादिशरीरंयतोरागादिशाखाप्रसरस्यकारणमित्यर्थः ॥ ८ ॥ तदेवाह ॥ अहमिति ॥ आदौबीजावस्थास्थाने ॥ अंतःतत्कार्यवृक्ष स्थाने ॥इच्छाशाखास्थानेप्रवर्त्तते ॥ ९ ॥ एवंप्रागुक्तंप्रकृतसंमत्यासमर्थ्यवसिष्ठःपुनर्भुशुंडोक्तिकथामेवानुस्मरन्विद्याधरकथामुपसंहरति ॥ एवंविधाइति ॥ दीर्घायुष्यस्यका रणंतत्त्वज्ञानमेवेतीतिशेषः ॥ १० ॥ अंतःशुद्धेस्तुचिराभ्यासएवज्ञानकारणमितिनियमोऽस्त्येवेत्याशयेनाह ॥ अंतरिति ॥ सुचिरायाभ्यासेनांतःशुद्धमनस्कायेतेपरंपदंज्ञानम् ॥ ॥ ११ ॥ विहगाधिपोभुशुंडः ॥ ऋष्यमूकेगिरौमतंगाश्रमेमतंगशापभयान्मूकामेघानगर्जंतीतिप्रसिद्धिः ॥ १२ ॥ प्रथमंतंसिद्धंभुशुंडमापृच्छ्यअथोविद्याधरंगत्वातदुक्तिसंवा दायपुनस्तमप्यापृच्छ्यनिश्चितार्थोऽहम् ॥ आस्पदंत्वाश्रमम् ॥ १३ ॥ हेराममयालघुशीघ्रमेवबोधनेनोत्थमुत्पन्नंविद्याधरस्योपशमनंबलिभुजःकाकस्यभुशुंडस्यकथयाउक्तं

अहंभावनमेवोच्चैर्बीजंदुःखाख्यशाल्मलेः॥ममेदंतद्वदादीतिशाखाप्रसरकारणम्॥८॥अहमादौममेत्यंतस्ततइच्छाप्रवर्त्तते॥इदमर्थ शतानर्थकारिणीभवभारिणी ॥ ९ ॥ एवंविधामुनिश्रेष्ठमूढाअपिचिरायुषः॥भवंत्यनियमोह्यंगदीर्घायुष्यस्यकारणम्॥ १० ॥ अंतः शुद्धमनस्कायेसुचिरायाभयप्रदम्॥ मनागप्युपदिष्टास्तेप्राप्नुवंतिपरंपदम्॥ ११ ॥ ॥श्रीवसिष्ठउवाच॥ ॥मेरुमूर्द्धनिमामेवमुक्त्वा सविहगाधिपः॥तूष्णींबभूवमुक्तात्माऋष्यमूकइवांबुदः ॥ १२ ॥ अहमापृच्छ्यतंसिद्धंविद्याधरमथोपुनः॥प्राप्तआत्मास्पदंराममुनि मंडलमंडितम् ॥ १३ ॥ एतत्तवाघकथितंबलिभुक्कथोक्तंविद्याधरोपशमनंलघुबोधनोत्थम् ॥ अस्मिन्भुशुंडविहगेंद्रसमागमेमेचै कादशेहहिगतानिमहायुगानि ॥ १४ ॥ ॥इ०वा०वा०दे०मो०नि०उ० विद्याधरोपाख्यानेविद्याधरनिर्वाणंनामषोडशःसर्गः॥१६॥ श्रीवसिष्ठउवाच ॥ ॥ अनहंवेदनादेवंशुभाशुभफलप्रदा ॥ संसारफलिनीनूनमिच्छांतरुपशाम्यति ॥ १ ॥ अनहंवेदनाभ्यासात्सम लोष्टाश्मकांचनः॥ भूत्वाशांतभवापीडोननरःपरिताम्यति ॥ २ ॥ अहंतापुटकोडीनपरबोधबलेरितः॥ अहमित्यर्थपाषाणोनजानेका शुगच्छति॥ ३ ॥

तवाघकथितम् ॥ अस्मिन्वर्णितेभुशुंडविहगेंद्रसमागमेमेजातेतदनंतरमिहअस्मिन्कल्पेएकादशमहायुगानिदिव्ययुगानिगतानीत्यर्थः ॥ १४ ॥ ॥ इतिश्रीवासिष्ठ०म०तात्प र्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेषोडशःसर्गः ॥ १६ ॥ ॥ ७ ॥ ॥ अत्राहंबीजनिर्दाहादनहंभाववह्निना ॥ देहादिसंसृतेःसम्यग्बाधेऽलीकत्वमीर्यते ॥ १ ॥ सर्वसंसृतेः काममूलत्वादनहंभावेनप्रथमंतन्निवृत्तिमाह ॥ अनहमिति ॥ १ ॥ कामोपरमेलोभादिदोषक्षयाद्वैराग्यादिसंपदासर्वमानसदुःखक्षयइत्याह ॥ अनहमिति ॥ २ ॥ साधनवतो ऽवश्यश्रवणादिनाज्ञानोदयेब्रह्मव्यतिरिक्ताहमर्थस्यबाधेनालीकत्वमेवपर्यवस्यतीत्याशयेनाह ॥ अहंतेति ॥ श्रवणादिनाज्ञाननिर्मथनाभ्यासेनअहंतालक्षणात्प्रमातृयंत्रपुट कादेववह्निज्वालावदुड्डीनआविर्भूतोयःपरब्रह्मसाक्षात्कारलक्षणोबोधस्तद्बलेनईरितःक्षिप्तोनिरस्तइतियावत् ॥ अहमादिदृश्यार्थपाषाणोऽग्नियंत्रक्षिप्तपाषाणइवाशुक्वगच्छ तिनजाने ।। तुच्छत्वमेवापद्यतइतिभावः ॥ ३ ॥

१ अयमर्थोमूलस्थदुःखाख्येत्यादेः ॥ २ उत्तरार्धस्थादीत्यस्यायमर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चरमसाक्षात्कारवृत्त्यारूढंब्रह्मैवाज्ञानाहंकारादिनिरासससमर्थमित्याशयेनाह ॥ अहंतेति॥ अज्ञानाहंकारयोरिवस्थूलदेहस्यापिव्यष्टिसमष्टिरूपस्यतादृशंब्रह्मैवनिवर्त्तकमित्या शयेनाह ॥ अहंनेति ॥४॥ ब्रह्मैववीरोविक्रांतस्तद्बलेरितः ॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्चेतिसमानाधिकरणसमासेवीरशब्दपरनिपातश्छांदसः ॥५॥ अ नहंताभावनावृत्तिप्रतिफलितचितैवाहंतानाशइतिपक्षोवास्त्वित्याशयेनाह ॥ अहमर्थेतिद्वाभ्याम् ॥६॥ उद्वर्णांत्ब्रह्मविद्याधिकारिब्राह्मणाद्युत्कृष्टवर्णात्परिपाकपांडुराच्च ॥७॥ अथवानबाधिताहंतादेःशून्यतांकिंतुब्रह्मतैवेत्याशयेनाह ॥ शरीरेति ॥ अनहंतालक्षणेनार्करश्मिमार्गेणपरतांब्रह्मतांस्वकारणसूक्ष्मजलात्मतांच ॥ ८ ॥ तत्त्वज्ञानंविनातुनका पिकदापिकस्यांचिदवस्थायांदेहस्याहंकारस्यवाआत्यंतिकोच्छेदस्तयोःपरस्परबीजतयापरस्परांतःसत्वेनजगद्भावेनसर्वत्रोद्भवावर्जनादित्याह ॥ शयनेइत्यादिना ॥ शयनेश य्यायांस्थूलादिद्वादशावस्थाग्रामाशयनादिस्थानसमकेयत्रतत्रस्थितापिशरीरलक्षणावटधानाअंतःस्थितउद्भूतोऽहंत्वनवांकुरोयस्यास्तथाविधासतीक्षणादिदंसंसाराख्यमाशु

अहंतापुटकोड्डीनब्रह्मवीरबलेरितः॥ अहमित्यर्थपाषाणोनजानेक्काशुगच्छति॥ ४ ॥ अहंतापुटकोड्डीनोब्रह्मवीरबलेरितः॥ शरीरयंत्र पाषाणोनजानेक्काशुगच्छति ॥ ५ ॥ अहमर्थहिमंत्वंतरनहंताचिदर्चिषा॥ उड्डीयेवविलीनंसन्नजानेक्काशुगच्छति॥ ६ ॥ अहंरसोवि लीनोंतरनहंताचिदर्चिषा॥ शरीरपर्णादुद्वर्णान्नजानेक्काशुगच्छति॥ ७॥ शरीरपर्णान्निष्पीतस्त्वहंभावरसासवः॥ अनहंतार्कमार्गेण परतामधिगच्छति॥ ८ ॥ शयनेकर्दमेशैलेगृहेव्योम्निस्थलेजले॥ स्थूलासूक्ष्मानिराकारारूपांतरगतापिच॥ ९॥ यत्रतत्रस्थितासुप्ता प्रबुद्धाभस्मतांगता॥ धृतानीतानिमग्नाचदूरस्थानिकटासती ॥ १० ॥ शरीरवटधानांतःस्थिताहंत्वनवांकुरा॥ शाखाजालंतनोत्याशु संसाराख्यमिदंक्षणात्॥ ११ ॥ अहंत्ववटधानांतःस्थितदेहबृहद्द्रुमः॥ संसारशाखानिवहंयत्रतत्रतनोत्यलम्॥ १२ ॥ शाखाशतेद्धद लपुष्पफलद्रुमोस्तिबीजोदरेननुदृशापरिदृश्यतेसौ॥ देहोस्त्यहंत्वकणिकांतरशेषदृश्यसंवित्परीतइतिबुद्धिदृशैवदृष्टम्॥ १३ ॥ देहादहंत्व मनवाप्नवतोविचारैश्चिद्व्योममात्रवपुषोवपुषोऽथवोच्चैः ॥ नाहंत्वबीजजठरादसतोभ्युदेतिसंसारवृक्षइहबोधमहाग्निदग्धात्॥ १४॥

इ०वा०वा०दे०मो०नि०उ०अहंत्वासत्तायोगोपदेशोनामसप्तदशःसर्गः॥ १७॥ ॥ ७॥ ॥ ७॥

सर्वदिग्व्यापनशीलंशाखाजालंतनोतीतितृतीयेनान्वयः ॥ ९ ॥ १० ॥ ११ ॥ एवमहंत्वलक्षणवटधानांतःस्थितोदेहमहाद्रुमोपिबोध्यइत्याह ॥ अहंत्वेति ॥१२॥ उक्तमर्थंव टादिबीजदृष्टांतेनैवानुभावयति ॥ शाखेति ॥ यथाबीजोदरेशाखाशतेद्धानिविराजमानानिदलानिपुष्पाणिफलानिचयस्यतथाविधोद्रुमोऽस्तियतोऽसौसत्वादेवबीजपुटंभि त्वांकुरादिक्रमेणनिर्गच्छन्प्रत्यक्षंसर्वजनैःपरिदृश्यते ॥ नन्वितिप्रसिद्धौ ॥ तथाअहंत्वलक्षणायाकणिकासूक्ष्मबीजंतदंतरशेषदृश्यसंवीतोदेहोस्तीतिसूक्ष्मबुद्धिलक्षणयादृशैववि द्वद्भिर्दृष्टमित्यर्थः ॥ १३ ॥ एवमविचारफलंसर्वत्रानिर्मोक्षमुक्त्वाविचारफलंमोक्षमाह ॥ देहादिति ॥ विचारैःश्रवणादिभिस्तत्त्वबोधाच्चिद्व्योममात्रंवपुःस्वरूपंयस्यतथाविध स्यजीवन्मुक्तस्यविद्यमानादपिदेहादहंत्वंतत्तादात्म्याभिमानमनवाप्नवतःअथवाअदेहवतोविदेहमुक्तस्योच्चैर्निरतिशयानंदेप्रतिष्ठितस्यपुंसोबोधमहाग्निदग्धादहंत्वबीजजठरात् संसारवृक्षोनाभ्युदेति ॥ १४ ॥ ॥ इतिश्रीवासिष्ठ०म०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउ०सप्तदशःसर्गः ॥ १७ ॥ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उह्यमानान्यनंतानिपवनैःसर्वतोंबरे ॥ मृतजीवमनःस्थानिवर्ण्यंतेघ्रजगंतिहि ॥ १ ॥ देहोस्म्यहंत्वकणिकांतरशेषदृश्यसंविस्परीतइतिबुद्धिदृशैवदृष्टमितियदुक्तंतत्रकथमस्तिकीदृशीसाबुद्धिदृगितितदुभयंमृतजीववासनामयानंतजगद्युत्पादनेनसमर्थयितुंभूमिकांरचयति ॥ मरणमिति ॥ मनोबुद्ध्यहंकारादिसर्वनाशात्मकंमरणमितिपामरामन्यंते ॥ तथातुकदाचिदपिनविद्यते कृतहानादिदोषप्रसंगात् ॥ किंतुमनुष्यादिशरीरात्मभावभोजकप्रारब्धक्षयेतदनुरूपसंकल्पतिरोभावेदेवादिशरीराहंभावादिभोजककर्मोद्भवेतदनुरूपस्वसंकल्पांतरस्यतद्भोजकादृष्टक्षयपर्यंतंस्थैर्यंपूर्वभावविस्मृतिमपेक्ष्यमृतिरित्यभिधीयतइत्यर्थः ॥ १ ॥ अस्त्वेवंकिंततस्तत्राह ॥ पश्येति ॥ एवंचतत्तज्जीवसंकल्पकल्पितजगत्स्थामंदरमेरुप्रभृतयोदिक्षुवातैःसर्वत्रउह्यंतेप्रवाह्यंतइवमयादृश्यंतेत्वमपिपश्येत्यर्थः ॥ २ ॥ उपर्युपरिबहिर्बहिःयावतांजीवानांभोजकादृष्टसाम्यंतावतांश्लिष्टाएकीभावेनमिलिता अन्ये

श्रीवसिष्ठउवाच ॥ ॥ मरणंसर्वनाशात्मनकदाचनविद्यते ॥ स्वसंकल्पांतरस्थैर्यंमृतिरित्यभिधीयते ॥ १ ॥ पश्यैमेपुरउह्यंतइवमंदरमेरवः ॥ अरूढाअपिदिग्वातैःसरिद्बिंबितशैलवत् ॥ २ ॥ उपर्युपर्यंतरंतःकदलीदलपीठवत् ॥ श्लिष्टाश्लिष्टस्वरूपाःखेमिथःसंस्तृतयःस्थिताः ॥ ३ ॥ ॥ श्रीरामउवाच ॥ ॥ पश्यैमेपुरउह्यंतइतिवाक्यार्थमक्षतम् ॥ नकिंचिदवगच्छामियथावन्मुनिनायक ॥ ४ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ प्राणस्याभ्यंतरेचित्तंचित्तस्याभ्यंतरेजगत् ॥ विद्यतेविविधाकारंबीजस्यांतरिवद्रुमः ॥ ५ ॥ मृतेपुंसिनभोवातैर्मिलंतिप्राणवायवः ॥ सरिज्जलैरिवांभोधिजलान्यात्मद्रुतानिहि ॥ ६ ॥ इतश्चेतश्चयांतीवतेषामंतर्जगंत्यलम् ॥ व्योमवातविनुन्नानांसंकल्पैकात्मकान्यपि ॥ ७ ॥ सप्राणवातैःपवनैःस्फुरत्संकल्पगर्भितैः ॥ सर्वाएवदिशःपूर्णाःपश्यामीमाःसमंततः ॥ ८ ॥ अत्रैतेपश्यपश्यामिसंकल्पजगतांगणे ॥ बुद्धिदृष्ट्यासमुह्यंतेपुरोमंदरमेरवः ॥ ९ ॥ खवातेंतर्मृतप्राणाःप्राणानामंतरेमनः ॥ मनसोंतर्जगद्विद्धितिलेतैलमिवास्थितम् ॥ १० ॥ खवातैःखसमाःप्राणायथोह्यंतेमनोमयाः ॥ उह्यंतेवैतथैतानितदंगानिजगंत्यपि ॥ ११ ॥ सभूतान्यंबरोर्व्यादिवृंदानित्रिजगंत्यपि ॥ उह्यंतेचाप्यरूढानिपुरःसर्वत्रगंधवत् ॥ १२ ॥

षामश्लिष्टस्वरूपाः ॥ ३ ॥ उक्तमर्थमसंभावयन्रामःपृच्छति ॥ पश्येति ॥ यथावत्कथयेतिशेषः ॥ ४ ॥ मृतानांपुरुषाणांप्राणास्तावन्नभस्युत्क्रामंतीतिलोकवेदप्रसिद्धम् ॥ तद्यदिप्राणाःसंतितर्हिप्राणस्याभ्यंतरेचित्तंचित्तस्याभ्यंतरेजगदपिविद्यतेइतिसंभावयेत्यर्थः ॥ ५ ॥ संतुनामतथापिदिग्वातैःकथंप्रवाह्यंतेतत्राह ॥ मृतेइति ॥ पुंसिम्रियमाणेसतिततउत्क्रांताःप्राणवायवोबाह्यनभसिपूर्णैर्वातैःसहमिलंति ॥ यतस्तान्यप्यात्मनिद्रुतानिद्रवस्वभावानि अतःसमस्वभावानांमेलनेएकतैवभवतीत्यर्थः ॥ ६ ॥ अतोव्योमवातैर्विशेषेणनुन्नानामाकृष्टानांतेषांप्राणानामंतर्गतानिजगंत्यपिइतश्चेतश्चयांतीवेत्युह्यंतइवेत्युक्तिरित्यर्थः ॥ ७ ॥ ८ ॥ अहंपश्यामित्वमपिबुद्धिदृष्ट्यापश्य ॥ ९ ॥ खेविद्यमानेवातेंतर्मृतानांप्राणाः ॥ १० ॥ ननुगुरूणिजगंतिकथंवातैरुह्यंतेतत्राह ॥ खवातैरिति ॥ तथाप्राणवद्देवतदंगानिजगंत्यपिखसमानिलघूनीत्युह्यंतइत्यर्थः ॥ ११ ॥ सभूतानिचतुर्विधप्राणिसहितानि ॥ अरूढानिअदृढानि अप्रतिष्ठितानीतियावत् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्यांचक्षुरादिनास्वीयस्वप्नदृष्टपुरवत्तादृशपूरवद्वातादृशपुरांतर्गतनदीपूरवद्वा ॥ १३ ॥ उद्भ्रांतइवेतियदुक्तम् तत्रइवकारार्थसमर्थनायाह ॥ कल्पनामात्रसारत्वादिति ॥१४॥
यद्यपितानिकल्पनामात्रत्वान्नसंत्येवेतिनोद्भ्रांते तथापितान्येवतेषुतत्तज्जीवभोग्येषुस्वेषुस्वर्गनरकभूम्यादिलोकेषुतेषांदृढभावत्वात्सुखदुःखभोगार्थक्रियासमर्थतयासत्यान्येव
तत्सत्यतासंपादकस्याधिष्ठानचिदंशस्यसर्वगत्वात् यथाभवानस्मद्दृष्ट्याश्रवणधारणाद्यर्थक्रियासमर्थःपुरोवर्त्तीसत्यस्तद्वदेवेत्यर्थः ॥ १५ ॥ अरूढानिवासनामात्रत्वादनाविर्भू
तानिरूढान्याविर्भूतानिचेत्थमुद्भ्रांतेनैवचोद्भ्रांते ॥ १६ ॥ सौक्ष्म्येवहनेचसौरभसाम्यंप्रागुक्तमित्याह ॥ सौरभाणीति ॥ १७ ॥ अतएवत्रिजगद्भ्रमात्मनाचित्तस्यस्पंदभेदयोरपि
नात्मनस्तावित्याह ॥ कुंभेइति ॥ तथैवात्मनिनान्यतेतिशेषः ॥ १८ ॥ यथाम्रृतानांजगत्संकल्पमात्रत्वादसदित्थंतेतवापिजगदसत् ॥ भ्रांतिरेवकेवलमुदितेव ॥ साभ्रांतिरपिप

तानिबुद्धौवदृश्यंतेनदृष्ट्यारघुनंदन ॥ पुरःसंकल्परूपाणिस्वस्वप्नपुरपूरवत् ॥ १३ ॥ सर्वत्रसर्वदासंतिसुसूक्ष्माण्येवखादपि ॥ कल्पना
मात्रसारत्वान्नचोद्यंतेमनागपि ॥ १४ ॥ तान्येवदृढभावत्वात्स्वेषुलोकेषुतेष्वलम् ॥ सत्यान्येवचिदंशस्यसर्वगत्वाद्भवानिव ॥ १५ ॥
प्रतिबिंबपुराणीवपुरःप्राणसरिद्वये ॥ अरूढान्यपिचोद्यंतेरूढान्यपिचनैवच ॥ १६ ॥ सौरभाणिसमुद्यंतेवातांगस्थानिराघव ॥ जगं
तिप्राणसंस्थानिव्योमात्मकमयानितु ॥ १७ ॥ कुंभेदेशांतरंनीतेयथांतर्व्योम्निनान्यता ॥ स्पंदनादिमयेचित्तेतथैवत्रिजगद्भ्रमे ॥ १८ ॥
इत्थंनसज्जगद्भ्रांतिरसत्यैवोदितेवते ॥ नविनश्यतिनोदेतिकेवलंब्रह्मरूपिणी ॥ १९ ॥ यदिवाप्युदितेवातैस्तत्तदस्यानलक्ष्यते ॥ तदंतःसं
स्थितैःस्पंदोनाविकोशगतैरिव ॥ २० ॥ यथास्पंदोंगलग्नायांनाव्यंतःसंस्थितैरपि ॥ नलक्ष्यतेतथापृथ्व्यांतत्संस्थैस्तन्मयैरपि ॥ २१ ॥
यथायोजनविस्तीर्णलघौसद्मानुभूयते ॥ यत्तस्यपादपस्तंभेपरमाणौयथाजगत् ॥ २२ ॥

रमार्थतोनविनश्यतिनोदेतीतितत्त्वदृष्ट्याब्रह्मरूपिण्येवेत्यर्थः ॥१९॥ ननुयदिव्यवहारदृशाजगत्तद्भ्रांतीवाय्वंतःप्रवहमानेउदितेतर्हिवयंपृथिवीनिश्चलतयाकथंपश्यामस्तत्राह ॥
यदिवेति ॥ नोदितेएव यदिवाउदितेइतिपक्षस्तथापिवातैःकृतंतत्तद्भ्रमणपरिवर्त्तनादिकमस्याःपृथिव्यास्तदंतःसंस्थितैरस्माभिर्नलक्ष्यते ॥ यथानाविजायमानःस्पंदस्तदंतःकोश
गतैर्नरैर्नलक्ष्यते तद्वदित्यर्थः ॥ २० ॥ तदेवस्पष्टमाह ॥ यथेति ॥ यथानाविअंतः संस्थितैरपिशब्दात्तन्मयैरपिकीलाद्यैर्नौस्पंदोनलक्ष्यतेतद्वत्पृथिवीसंस्थैःपार्थिवदेहादिमयैर
प्यस्माभिरित्यर्थः ॥ २१ ॥ इत्थंपश्येमेपुरउद्भ्रांतइवमंदरमेरवइतिस्वोक्तिंरामायोपपाद्यउपर्युपर्यंतरंतःकदलीदलपीठवदित्युक्तावप्यल्पेबृहतःसमावेशंप्रथमंबृहतोल्पत्वकल्पन
यादर्शयति ॥ यथेति ॥ यथायोजनविस्तीर्णमपिसद्मलघौपादपस्तंभेचित्रनिर्व्यूहरचनादिनारचयितुंयत्तस्ययतमानस्यशिल्पिनोबुद्ध्याअल्पत्वकल्पनयातत्रानुभूयतेतथाअं
तरंतःसूक्ष्मतमेपिपरमाणौजगद्बुद्धिकल्पनयाऽनुभूयतइत्यर्थः ॥ २२ ॥ ॥ २२॥

१ अयंपाठएकत्रदृष्टोयमेवयुक्तइतिभाति ॥ यद्यपिपुस्तकांतरेषुतथाब्रह्मंस्तत्संस्थैरितिदृश्यतेपाठस्तथापिब्रह्मन्नितिसंबोधनस्यरामंप्रत्ययोग्यत्वादुपेक्षितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमाण्वादेर्बृहत्त्मत्वकल्पयानवातत्रबृहतोजगतःसमावेशोनुभवितव्यइत्याशयेनाह ॥ वस्त्विति ॥ तद्यथारत्नकोशागारेप्रविष्टाअस्वाधनसंबंधशून्यामूषिकानरत्नानिबहुमन्यंतेकिंत्वंजलिमात्रमितमपिधान्यद्रव्यमेवतत्रदैवाल्लब्धंबहुमन्यंते यथावाअर्भकाबहुमूल्यान्यपिस्वाभरणानिनित्यमनुभूयमानानिनबहुमन्यंतेकिंतुनवमपूर्वंमृगपक्ष्याकारंवर्णकादिपरिष्कृतंपंकंमृत्पिंडमेवक्रीडनायबहुमन्यंते येनतद्दानेनवंचिताःस्वाभरणान्यपिविनिमयेनप्रयच्छंतीत्यर्थः ॥ २३ ॥ किंचवास्तवोल्पेबृहतःसमावेशोनसंभवतुनाम भ्रांत्यातुसंभवत्येवेत्याशयेनाह ॥ असत्येवेति ॥ विदःअज्ञानादृतचितोजगदाख्येभ्रमेअसत्येवार्थेकेवलंजीवतोऽयंलोकोमृतस्यलोकांतराणितत्रचधर्माधर्मफलानीत्यादिमयी बृहंगस्यबृंहणंगच्छतश्चित्तस्यसासंकल्परूपाभावनैव ॥ नचभावनांवस्त्वन्यथाभावोनिरुणद्धीत्यर्थः ॥ बृंहधातोर्घञर्थेकविधानमितिभावेकः ॥ ततोऽन्येष्वपिदृश्यतइतिगमेर्डः ॥ बाहुलकान्नुम् ॥ २४ ॥ ननुमूढानामस्त्वंतरंतर्जगद्भ्रमभावनासर्वज्ञानांभवदादीनांकथमंतरंतर्जगदंतरमस्तीतिभ्रांतिस्तत्राह ॥ इदमिति ॥ सर्वज्ञस्यापिभवायव्यवहार

वस्त्वल्पमप्यतिबृहल्लघुसत्वोहिमन्यते॥ मूषिकाःस्वांजलिद्रव्यंनवपंकमिवार्भकाः॥२३॥ असत्येवस्वरूपेस्मिन्जगदाख्येविदोभ्रमे॥ लोकांतराधर्ममयीसाबृहंगस्यभावना॥ २४॥ इदंहेयमुपादेयमिदमित्यंतरज्ञता॥ यस्यतस्यभवायास्तिसर्वज्ञस्यापिमूढता॥ २५॥ सचेतनोह्यवयवीचेतत्यवयवान्यथा॥ स्वांतरेवततंजीवस्त्रिजगद्बुध्यतेतथा॥२६॥ संविदात्मपराकाशमनंतमजमव्ययम्॥ व्योम्नोवयवरूपाणितस्येमानिजगंतिभोः॥ २७॥ सचेतनोयःपिंडोंतःक्षुरसूच्यादिकंयथा॥ बुद्ध्यतेबुद्ध्यतेतद्वज्जीवोंतस्त्रिजगद्भ्रमम्॥ २८॥ अचिच्चिद्वापिमृत्पिंडःशरावोदंचनादिकम्॥ यथांगमनुतेजीवस्तथांगमनुतेजगत्॥ २९॥ चिदचिद्वांकुरोदेहेवृक्षत्वंमन्यतेयथा॥ वृक्षशब्दार्थरहितंब्रह्मेदंत्रिजगत्तथा॥ ३०॥

संभवाययावत्प्रारब्धक्षयंलेशतोनुवर्त्तमानामूढताऽस्त्येवेत्यर्थः ॥ २५ ॥ अतएवसर्वज्ञस्यापिसमष्टिजीवस्यहिरण्यगर्भस्यावयववत्स्वांतेरवत्रिजगद्दर्शनमित्याह ॥ सचेतनइति ॥ अवयवीदेहात्मालौकिकपुरुषः ॥ जीवःसमष्टिजीवः ॥ २६ ॥ मायोपहितईश्वरस्त्वेवंपश्यतीत्याह ॥ संविदात्मेति ॥ भोइतिसंबोधनेनरामस्तत्स्मार्यते ॥ २७ ॥ ईश्वरःप्रलयकालेकथंस्वांतर्गतंजगत्पश्यतितत्राह ॥ सचेतनइतिचतुर्भिः ॥ अयःपिंडोयदिसचेतनःस्यात्तर्हियथास्वांतःसूक्ष्मरूपेणस्थितंक्षुरसूच्यादिभाविस्वविकारंपश्येत्तद्वदित्यर्थः॥ जीवःस्वलीनसर्वसंस्कारोपहितःसन् ॥ २८ ॥ अधिष्ठानसद्रूपप्राधान्येनचित्आरोपितमृदादिरूपप्राधान्यविवक्षयाअचिद्वा ॥ तात्पर्यंपूर्ववदेव ॥ २९ ॥ उपहितप्राधान्येनचित्आरोपितमृदादिरूपप्राधान्येनाचिद्वांकुरः ॥ एतावांस्तुविशेषः ॥ जीवसंस्कारोपहितरूपेणवृक्षशब्दार्थसहितंबुध्यतेतदनुपहितेश्वररूपेणतुतद्रहितमनादिसिद्धयाविद्ययावाबाधितरूपमितियावत् ॥ शेषंप्राग्वत् ॥ ३० ॥

१ मूलस्थाधर्मपदमुपलक्षणंधर्मस्येत्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिणामदृशाजीवेश्वरयोःसर्गासर्गकालेजगद्दर्शनेदृष्टांतमुक्त्वाविवर्त्तदृशाप्याह ॥ चिद्वेति ॥ जीवेश्वरोपाध्युपहितदृशावेत्तिअनुपहितशुद्धदृशातुनोवेत्ति ॥ यत्रनान्यत्पश्यतीत्यादिश्रुतेरितिभावः ॥ ३१ ॥ एवंरामप्रश्नान्समाधायप्रासंगिकंचसर्वंसमाप्यनाहंत्वजगतीभिन्नेपवनस्पंदनेयथेतिप्राक्प्रस्तुतार्थंप्रकारांतरेणसमर्थयितुमनुसंधत्ते ॥ देशेति॥ अहंत्वमपिदेशकालक्रियाद्रव्यतादात्म्यसंसर्गाभिमानात्मकत्वात्तद्रूपमेवेत्येतदात्मनोःसमानस्वभावत्वादपिभेदोनास्तीत्यर्थः ॥ ३२ ॥ एतदनुभावयितुमेवश्रुत्यामयाचमृद्लोहपिंडादिदृष्टांताअचेतनाअपिचेतनत्वमारोप्यैकदेशसाम्येनोपन्यस्ताइत्याह ॥ कल्पितेनेति ॥ ३३ ॥ वास्तवब्रह्मभावलक्षणंपरमणुत्वंसौक्ष्म्यममुंचतएवविवर्त्तरूपंस्थूलंजगद्रूपमित्यर्थः ॥ ३४ ॥ अतएवाधिष्ठानदृष्ट्यासर्वविवर्त्तसंवेदनबाधेनिष्प्रत्यूहंसर्वतःशुद्धात्मप्रसरप्रदेपूर्णपदेनमनागपिजीवजगद्भेदोस्तीत्याह ॥ सर्वेति ॥ ३५ ॥ अबाधेतुसदा

चिद्वाचिद्वायथादर्शोबिंबितंवाप्यबिंबितम् ॥ नगरंवेत्तिनोवापितथाब्रह्मजगत्त्रयम् ॥३१॥देशकालक्रियाद्रव्यमात्रमेवजगत्त्रयम् ॥ अहंत्वजगतोस्तेनभेदोनास्त्येतदात्मनोः ॥ ३२ ॥ कल्पितेनोपमानेनयदेतदुपदिश्यते ॥ तत्रोपमैकदेशेनउपमेयसधर्मता ॥ ३३ ॥ यदिदंदृश्यतेकिंचिज्जगत्स्थावरजंगमम् ॥ अमुंचतःपराणुत्वंजीवस्यैतत्स्मृतंवपुः ॥ ३४ ॥ सर्वसंवेदनत्यागेशुद्धसंस्पंददेपदे ॥ नमनागपिभेदोस्तिनिःसंगोपलकोशवत् ॥ ३५ ॥ योयोनामविकल्पांशोयत्रयत्रयथायथा ॥ यदायदायेनयेनदीयतेसतथैवचित् ॥ ३६ ॥ अचित्त्वान्नास्तिमनसिसंकल्पःखइवांकुरः ॥ चित्त्वात्तुचेतसोविद्धिचितिरेवेहकल्पनम् ॥ ३७ ॥ यायोदेतिविकल्पश्रीरप्रबुद्धाशयंप्रति ॥ सर्वगत्वादनंतत्वाच्चिद्व्योम्नःसानसन्मयी ॥ ३८ ॥ यथोदेतिविकल्पश्रीःप्रबुद्धेनोदितैवसा ॥ सर्वगत्वादनंतत्वाच्चिद्व्योम्नःसानसन्मयी ॥ ३९ ॥ सर्वसंकल्पकलनासत्येत्याबालमक्षतम् ॥ स्वप्नादावनुभूतोंतरर्थःकेनापिलभ्यते ॥ ४० ॥ संकल्पोवासनाजीवस्त्रयोर्थालिखिताश्रिता ॥ सोनुभूतोप्यसत्यःस्यादसत्वस्यैवनोसतः ॥ ४१ ॥

सर्वत्रसर्वविकल्पात्मनैवचिद्विवर्त्ततइत्याह ॥ योयइति ॥ दीयतेमूढेनेतिशेषः ॥ चित्तथैवतद्विकल्पानुसारेणैवसविवर्त्ताभवतीत्यर्थः ॥ ३६ ॥ मनसोपिचिदनुप्रवेशादेवविचित्रसंकल्पसामर्थ्यंनस्वतइतिचितएवसर्वविवर्त्तस्वातंत्र्यमित्याह ॥ अचित्त्वादिति ॥ ३७ ॥ ३८ ॥ एवमप्रबुद्धेउदितापिप्रबुद्धेतत्त्वेनोदितैव अनंतत्वात्कालवस्तुकृतपरिच्छेदशून्यत्वाच्च ॥ ३९ ॥ यद्यसन्मयीतर्हिकथमाबालगोपालंसत्येवभातितत्राह ॥ सर्वेति ॥ नजाग्रत्संकल्पकलनैवसत्येतिभातिकिंतुस्वप्नादिसाधारण्येनसर्वापि ॥ नचस्वप्नभ्रांत्यादावुपलब्धोगजरजतादिरर्थःकेनापिलभ्यतेइतिकाकायोज्यम् ॥ ४० ॥ ननुसत्यःसंसारःकथमसत्यःस्यात्तत्राह ॥ संकल्पइति ॥ जाग्रत्स्वप्नौसंकल्पःसुषुप्तिस्तुवासनामात्रंतदुभयप्रतिबिंबितचिद्रूपस्तदुभयभोक्ताजीवश्चेतित्रयःपदार्थाःसत्यकूटस्थचितास्वात्मनिचित्रवल्लिखिताःसोयंचित्रसंसारकल्पःसंसारोऽधिष्ठानसत्तयासत्यइत्यनुभूतोप्यसत्यस्यजीवस्यैवेत्यसत्यःस्यान्नत्वधिष्ठानसतः॥तेनतदसंस्पर्शादित्यर्थः॥यथाचित्रप्रतिबिंबस्वप्नाश्वाश्चित्रप्रतिबिंबस्वप्नपुरुषाणामसत्यानामेववाहनंनसत्यपुरुषस्यतद्वदितिभावः ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मवाइदमग्रआसीदित्यादिश्रुतेरस्तुवासत्यस्यैवस्वाबोधात्संसारस्तथापितन्नित्यमुक्तमेव यथाहितत्सत्यंब्रह्मप्राक्तत्त्वबोधात्स्वसत्यतांजगतिसंक्रामयत्तत्सत्यताभिधंस्वयंभव ति तथातत्त्वबोधोत्तरंबाधिताज्जगतःस्वसत्तांस्वात्मन्युपसंहरत्तदसत्यताभिधमपिभवति ॥ नहिप्रपंचस्याधिष्ठानमात्रपरिशेषादन्याअसत्यताकाचित्सुवचा ॥ यतआतिवाहि कदेहसहितस्यैकस्यस्वाज्ञानस्यपरिक्षयेपिपूर्णतालक्षणविकासवान्मुक्तःप्रत्यगात्मैवशिवोभवेदित्यर्थः ॥ ४२ ॥ अतएवाज्ञानदृष्ट्यैवजगंत्युद्यंतेनतत्त्वदृशेत्युक्तमित्युपसंहरति॥ जगंतीति ॥ ४३ ॥ इतिवर्णितरीत्याअस्मिन्नखिलपदार्थसमूहानांकोशभूतेअज्ञातेप्रतीचिपरमार्थतोऽतिविततेव्योमनिशून्याकाशकल्पेप्यविद्ययाअनंतानिजगंतिसंति तानि चकतिपयानांजीवानांभोजकादृष्टसाम्येजागरेब्रह्मांडैक्येचअन्योन्यंपरिमिलितानि तद्वैषम्येतुब्रह्मांडभेदेस्वप्नेचनान्योन्यंपरिमिलितानीत्यर्थः ॥ ४४ ॥ तान्येवविशिनष्टि स

असत्यताभिधंसत्यंमुक्तएवभवेच्छिवः॥ सातिवाहिकदेहैकपरिक्षयविकासवान्॥ ४२॥ जगंतिवातैरुह्यंतेव्योम्निशाल्मलितूलवत्॥ नोह्यंतेचोपलानीवनचसंत्येवकल्पनात्॥ ४३॥ इत्यस्मिन्नखिलपदार्थसार्थकोशेव्योमन्यप्यतिविततेजगंतिसंति॥ अन्योन्यंपरिमि लितानिकानिचिच्चनान्योन्यंपरिमिलितानिकानिचिच्च॥ ४४॥ सर्वत्वात्परमचितेरनंतरूपाण्यारंभप्रचुरदिगंतसंभृतानि॥ लोलांबूदर पुरबिंबभंगुराणिस्वांतःस्थाविरलमहापुरोपमानि॥ ४५॥ सस्थैर्याण्यपिसततंक्षणक्षयाणिव्यक्ताक्षाण्यपिसततंनिमीलितानि॥ सा लोकान्यपिपरितस्तमोवृतानिचिद्रूपार्णवलहरीविवर्त्तनानि॥ ४६॥ पृथक्स्थितानिव्यतिमिश्रितानिजलानिचैवांबुनिधौनदीनाम्॥ तारार्कचंद्रग्रहमंडलानांसमोदितानांनभसीवभासः॥ ४७॥ ॥इत्यार्षे० वा० वा० दे० मो० नि० उ० जगज्जालकोशसाधर्म्ययोगोप देशोनामाष्टादशःसर्गः॥ १८॥ ॥ ७॥

र्वत्वादित्यादिच्चिभिः ॥ परमचितेर्ब्रह्मणःसर्वत्वात्सर्वशक्तित्वादियत्तासंकोचकाभावाद्गुणतोवस्तुतःक्रियाजात्यादितश्चानंतरूपाणि ॥ बहुविधकार्यारंभप्रचुरैर्दिगंतसंस्थितज नैःसंभृतानि ॥ लोलेअंबूदरेप्रतिबिंबितंपुरबिंबमिवभंगुराणि ॥ अतएवस्वांतःस्थान्यविरलानिसर्वसंभारसंभृतानियानिदेवगंधर्वादिमहापुराणितान्येवोपमायेषांतानि ॥ ४५ ॥ अनुवृत्तवस्त्वात्मनासस्थैर्याण्यपिव्यावृत्तभावविकारैःक्षणक्षयाणि ॥ एवंजागरेव्यक्ताक्षाण्यपितत्त्वतोव्यक्त्यभावान्निमीलितानि ॥ आत्मज्योतिषासालोकान्यपितस्या ज्ञानतमोवृतत्वात्तमोवृतानि ॥ ४६ ॥ पृथक्स्थितानांव्यतिमिश्रितत्वेव्यतिमिश्रितानांपृथक्स्थितत्वेचक्रमादृष्टांतद्वयमाह ॥ पृथगिति ॥ नदीपात्रेपृथक्स्थितान्यप्यंबुनिधौ व्यतिमिश्रितानि नभसिसमकालमुदितानांतारादीनांभासस्तुइयमस्यभाइतिविवेक्तुमशक्यत्वाद्व्यतिमिश्रिताअपिएकचलनेअपरचलनाभावात्पृथक्स्थितास्तानीवताइवच॥ ॥ ४७ ॥ ॥ इतिश्रीवासिष्ठ० मा० रा० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेअष्टादशःसर्गः ॥ १८ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवस्वरूपतत्त्वंसमष्टिव्यष्टिदेहयोः ॥ कल्पनंस्थानकरणभेदाद्भोगश्चवर्ण्यते ॥ १ ॥ यत्रूपंशास्त्रीयव्यवहारोपयुक्तंपारमार्थिकरूपंच ॥ आकृतिःस्थूलशरीरंतस्यग्रहणंक
ल्पनम् ॥ स्थानंबाह्यव्यवहारद्वारम् ॥१॥ तत्रसमष्टिजीवंमोक्षशास्त्रप्रसिद्धंशोधनेब्रह्माभेदयोग्यंप्रथमंदर्शयति ॥ स्वेति ॥ अनंतंयच्चेतनाकाशंब्रह्मतदेवहंताहमिमास्तिस्रोदेवता
अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतिदर्शितस्वसंकल्पेनस्वचेत्यसूक्ष्मभूतोपाधिप्रवेशात्तद्विष्टंभकप्राणधारणाज्जीवप्राणधारणइतिधात्वर्थानुगमाच्चेत्येनप्रा
णेनोक्तंजीवइतिव्यपदिष्टम् ॥ चक्षुरादिद्वाराचेतयतीतिचित्चेतनःइत्यपरंनामयस्यतथाविधंसज्जीवशब्देनकथ्यतइत्यर्थः ॥ २ ॥ तस्यपारमार्थिकंरूपमाह ॥ नेति ॥ शून्यमा
काशंतदंतर्गतंवाकिंचनन ॥ ३ ॥ ४ ॥ तस्यसर्वगत्वमनुभावयति ॥ यस्ययस्येति ॥ योभावोजातिगुणसंस्थानाद्यसाधारणरूपंतेनतेनभावेनसंस्थितमतएवतत्तदिवआभास
मानम् ॥ तत्कुतः ॥ तदेकांतवेदनात्पुनःपुनस्तद्दर्शनेतत्तदाकारेणैवभाननियमाद्घटचक्षुःसंयोगेहिचक्षुर्द्वारानिर्गतमंतःकरणंस्ववृत्तिव्याप्तघटावच्छिन्नंजीवचित्स्फुरणंघटोयंस्फुर

श्रीरामउवाच॥ ॥मुनेजीवस्ययद्रूपमाकृतिग्रहणंतथा॥ यथाचपरमात्मत्वंस्थानंयच्चास्यतद्वद॥१॥ ॥श्रीवसिष्ठउवाच॥ ॥स्वसं
कल्पेनचेत्योक्तंचिदित्यपरनामकम्॥ अनंतंचेतनाकाशंजीवशब्देनकथ्यते॥ २ ॥ नपराणुर्नचस्थूलंनशून्यंनचकिंचन॥ चिन्मात्रंस्वा
नुभूत्यात्मसर्वगंजीवउच्यते॥ ३ ॥ अणीयसामणीयांसंस्थविष्ठंचस्थवीयसाम्॥ नकिंचिन्मात्रकंचैवसर्वंजीवंविदुर्बुधाः॥ ४ ॥ यस्य
यस्यपदार्थस्ययोभावस्तेनतत्रतम्॥ स्थितंविद्धितदाभासंतदात्मैकांतवेदनात्॥५॥ सचेततियथायत्रयद्यद्वाशुतदेवहि॥ तथातत्रतदा
रामभवत्यनुभवात्मकम्॥ ६॥ पवनस्ययथास्पंदश्चेत्यंजीवस्यवैतथा॥ स्वसंविन्मात्रनिर्णेयंनोपदेशामयक्षवत् ॥ ७ ॥ यथैवास्पंद
नाद्वातःसन्नेवैत्यसदात्मताम्॥ तथैवाचेतनाज्जीवोजीवन्नेतिपरांगतिम्॥८॥ जीवश्चिद्घनरूपत्वादहमित्येवचेतनात् ॥ देशकालक्रि
याद्रव्यशक्तीर्निर्मायतिष्ठति॥ ९॥ देशकालक्रियाद्रव्यचर्चितार्चितांस्वयम्॥ असत्यांसत्यवत्स्फारांतावन्मात्रशरीरिकाम्॥ १० ॥

तिघटोयंस्फुरतीतिघटस्वभावतादात्म्येनैवयतोनियमेनानुभावयतीत्यर्थः ॥ ५ ॥ अतएवसमष्टिजीवोयत्रयथाचेततितत्रतथाभवति सत्यसंकल्पत्वात् ॥ व्यष्टिजीवस्तुसयत्रय
थाभवतितत्रतथाचेतति ॥ ६ ॥ तथाचसमष्टिजीवस्यपवनस्यस्पंदइवसर्ववस्तुवैचित्र्यचेतनात्मकःसर्गःपवनस्पंदवत्स्वानुभवसिद्धःस्वभावोनतुबालस्ययक्षभ्रांतिवदुपदेशाभ्या
सकृतइत्याह ॥ पवनस्येति ॥ नचोपदेशामउपदेशेननसाधयाम ॥ दिशतेर्विकरणव्यत्ययश्छांदसः ॥ ७ ॥ अतएवास्यमुक्तिसुषुप्तिप्रलयेषुबाह्याभ्यंतरार्थाचेतनेजीवतापिशा
म्यतीत्याह ॥ यथैवेति ॥ परांगतिंब्रह्मभावम् ॥८ ॥ तस्याकृतिग्रहणप्रकारंवर्णयितुंसर्वकल्पनामूलस्तंभमाविर्भूतसर्वशक्तिकंसमष्ट्यहंकाराध्यासंप्रथमंदर्शयति ॥ जीवइति ॥
निर्मायआविर्भाव्य ॥ सैवास्यसार्वज्ञसर्वशक्तिसंपत्तिलक्षणारुद्रता ॥ ९ ॥ ततःसूक्ष्मभूतसंस्काराविर्भावलक्षणसमष्टिचित्तकल्पनामाह ॥ देशेतिसार्द्धाभ्याम् ॥ संस्कारात्मना
ईषदाविर्भावाच्चर्चितांस्थूलतयासम्यगनाविर्भावादचार्चितांच ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेतसासमष्टिचित्तभावेनसूक्ष्मतमास्संवलनात्प्रालेयपरमाणुप्रायाम् ॥ ११ ॥ स्वमेव्याध्राद्यात्मतादर्शनेप्रतीतंयत्स्वावयवानांहस्तपादादीनामन्यादृशत्वंतत्सदृशींतांसमष्टिचित्तरूपांविष्णुताम् ॥ तस्यैवपूर्णब्रह्मभावविस्मरणेमनःसमष्ट्यात्मकचंद्रभावोपलक्षितस्थूलभावकल्पनयाब्रह्मांडरूपाविराडाकृतिराविर्भवतीत्याह ॥ विस्मृत्येत्यादिना ॥ चेतनांचिदेकरसांब्रह्मसत्तांविस्मृत्यपरिच्छिन्नजडसत्तामेवाहमितिपश्यंस्तद्भावमेवाशुगच्छति ॥ १२ ॥ पंचीकरणेनस्थौल्यापादनात्स्थूलसमष्टिविराडात्मनाप्रोच्छूनत्वम् ॥ तत्रमनःसमष्ट्यात्मकंकालोपचयात्मनाद्रुतंद्रवत्स्वभावंचंद्रबिंबमिवपश्यतिसैवास्यबुद्धिसमष्टिभावलक्षणाविरंचितेत्यर्थः ॥१३॥ तस्यविराड्देहेभोगोपपत्तयेमनःसमष्टेरेवसकाशादादित्यादिरूपेंद्रियपंचकंतत्स्थानभेदकल्पनांचाह ॥ आत्मनीति ॥ संवित्तिविषयभेदेनैवेंद्रियभेदविभावनात्संवित्तिपंचकमित्युक्तिः ॥ १४ ॥ तद्रूपाणिस्थानभेदरूपाणिरूपादिभोगद्वाराणि ॥ १५ ॥ आदित्यदिग्वारिवायुपृथिव्याख्यपंचेंद्रियस्थानावयवैःपंचविषयानुपभुंजानोराजानोराजते ॥ तद्विषयेषुमनोविकल्पैरनंताकारकल्पनादनंताकारसंवित्तिः ॥ सचायंकार्यभावस्यानृतत्वात्स्वकारणव्यक्तात्मैव ॥ अतएवनिरामयः ॥ १६ ॥ तस्यमनोमयभावेपिस्वतःसिद्धज्ञानैश्वर्यसर्वशक्तिसंपन्नत्वाज्जीवत्वमीश्वरत्वंचास्तीत्याशयेनाह ॥ मनोमयोसावितिद्वाभ्याम् ॥ १७ ॥ सर्वपुरुषसमष्टिरूपैकपुरुषः ॥ १८ ॥ तस्येश्वरभावेनस्वाविर्भावतिरोभावेपिस्वातंत्र्यमस्तीत्याह ॥ स्वयमेवेति ॥ १९ ॥ ॥ २० ॥ प्रकृतेःसर्वोपादानेश्वरस्यसएषदेहः ॥ एषएवव्यष्टिभावेनसर्वस्यजीवजातस्यपुर्यष्टकंप्राग्व्याख्यातम् ॥ २१ ॥ सचसूक्ष्मेषुपिपीलिकादिदेहेषुसूक्ष्मः ॥ समःप्लुषिणासमोनागेनेत्यादिश्रुतेः ॥ परमार्थतस्तुनकिंचित्व्यवहारतस्तुकिंचित्परिच्छिन्नएवच ॥ २२ ॥ पंचज्ञानेंद्रियाणिचकारात्कर्मेंद्रियसहितःप्राणोमनोऽहंकारइत्यष्टावंगानि ॥ भावाभावमयानिमूर्त्तामूर्त्तरसरूपाणि ॥ २३ ॥

चेतसात्यसदाकारांप्रालेयपरमाणुताम् ॥ पश्यत्यात्मन्यथात्मत्वेस्वप्नेस्वमरणोपमाम् ॥ ११ ॥ स्वप्नस्वावयवान्यत्वसदृशींतांविभावयन् ॥ विस्मृत्यचेतनांसत्तांतत्तामेवाशुगच्छति ॥ १२ ॥ एवंरूपोबुद्ध्यमानःप्रोच्छूनत्वमथात्मनि ॥ पश्यत्याशुस्वमात्मानंचंद्रबिंबमिवद्रुतम् ॥ १३ ॥ आत्मन्यथेंदुबिंबात्मन्यसौसंवित्तिपंचकम् ॥ काकतालीयवद्भिन्नमुदितंचेततिस्वयम् ॥ १४ ॥ पंचानांसंविदांपंचभिन्नान्यंगान्यसावथ ॥ बुद्ध्यतेतानितद्रूपरंध्राण्यनुभवत्यपि ॥ १५ ॥ सपंचावयवःपश्चाद्राजतेपुरुषोविराड् ॥ अनंताकारसंवित्तिरव्यक्तात्मानिरामयः ॥ १६ ॥ मनोमयोसावुदितःपरस्मात्प्रथमोत्थितः ॥ आकाशविशदःशांतोनित्यानंदविभामयः ॥ १७ ॥ सचाप्यपंचभूतात्मापंचभूतात्मकोपमः ॥ विराडात्मैकपुरुषःपरमःपरमेश्वरः ॥ १८ ॥ स्वयमेवाशुभवतिस्वयमेवविलीयते ॥ स्वयमेवप्रसरतिस्वयंसंकोचमेतिच ॥ १९ ॥ स्वसंकल्पकृतेनासौकल्पौघेनक्षणेनच ॥ यदृच्छयोदेतिपुनःपुनर्भूत्वोपशाम्यति ॥ २० ॥ मनोमात्रैकरूपात्माप्रकृतेर्देहएषसः ॥ एषपुर्यष्टकंप्रोक्तःसर्वस्यैवातिवाहिकः ॥ २१ ॥ सूक्ष्मःस्थूलोंबरात्मैषव्यक्तोव्यक्तोंतवर्जितः ॥ सर्वस्यबहिरंतश्चनकिंचिर्त्किचिदेवच ॥ २२ ॥ अंगानिरामतस्याष्टौमनःषष्ठानिपंचच ॥ साहंभावानींद्रियाणिभावाभावमयानिच ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

तेनचतुर्मुखब्रह्मभूयेमचत्वारोवेदागीताः ॥ नियतिःशास्त्रीयसदाचारादिमर्यादा ॥ २४ ॥ ऊर्ध्वंद्यौरस्यमूर्द्धाशिरः ॥ अधःपृथिवीपादयोस्तलम् ॥ अपरमांतरालिकमुदरम् ॥ तस्य हवाएतस्यात्मनोवैश्वानरस्यमूर्द्धैवसुतेजाश्चक्षुर्विश्वरूपः प्राणःपृथग्वर्त्मासंदेहोबहुलोबस्तिरेवरयिःपृथिव्येवपादावित्यादिश्रुतेरितिभावः ॥ ब्रह्मांडमंडपंशरीरमितिशेषः ॥२५॥ पार्श्वकाःपार्श्वावयवाः ॥ पयोवारिक्षतजंरक्तम् ॥ मूत्रस्याप्युपलक्षणमेतत् ॥ क्षितिधराःपर्वतामांसपेश्यः ॥ सरितःशिरानाड्यः ॥ २६ ॥ रक्ताधारारक्तसंचयपेश्यः ॥ वेष्टनंषट्कोशवेष्टनम् ॥ ककुभोदिशोबाहवः ॥ यद्यपिछांदोग्यादौलोमानिबर्हिरित्युक्तंतथापिश्रुत्यंतरानुरोधेनतारकाइत्युक्तिः ॥ २७ ॥ एकोनाःपंचाशत्आवहप्रवहाद्यनिलस्कंधाःप्राणवायवः ॥ चंडंक्रूरंचक्षुरितिशेषः ॥ जठरपावकऔर्वानलःपित्तम् ॥ २८ ॥ जीवादिषट्कंतुशशांकमंडलमेव ॥ सितंवपाभागः ॥ संकल्पकोशात्मेतिमनोविशेषणम् ॥ प

तेनगीताइमेवेदाःसहशब्दार्थकल्पनाः ॥ नियतिःस्थापितातेनतथाद्यापियथास्थिता ॥ २४ ॥ अनंतमूर्ध्वंमूर्द्धास्यतथाधःपादयोस्तलम् ॥ अपराकाशमुदरमिदंब्रह्मांडमंडपम् ॥ २५ ॥ लोकांतराण्यनंतानिपार्श्वकाःक्षतजंपयः ॥ मांसपेश्यःक्षितिधराःसरितःसंतताःशिराः ॥ २६ ॥ रक्ताधाराजलधयोद्वीपान्येवांत्रवेष्टनम् ॥ बाहवःककुभःस्फारास्तारकारोमसंततिः ॥ २७ ॥ पंचाशदनिलस्कंधाएकोनाःप्राणवायवः ॥ मार्त्तंडमंडलंचंडंपित्तंजठरपावकः ॥ २८ ॥ शशांकमंडलंजीवःश्लेष्माशुक्रंसितंबलम् ॥ मनःसंकल्पकोशात्मसारात्मापरमामृतम् ॥ २९ ॥ मूलंशरीरवृक्षस्यबीजंकर्मद्रुमस्यच ॥ प्रसवात्सर्वभावानामिंदुरानंदकारणम् ॥ ३० ॥ यदिंदुमंडलंनामससघाड्जीवउच्यते ॥ शरीरकर्ममनसांबीजंमूलंचकारणम् ॥ ३१ ॥ अस्मादिंदुविराड्जीवात्प्रसरंतिजगत्त्रये ॥ जीवामनांसिकर्माणिसुखान्यत्रामृतानिच ॥ ३२ ॥ विराजएतेसंकल्पाब्रह्मविष्णुहरादयः ॥ तस्यचित्तचमत्काराःसुरासुरनभश्चराः ॥ ३३ ॥ चित्स्वभावोबुध्यमानःप्रालेयपरमाणुताम् ॥ यदादौभावयत्याशुतदातत्रैवतिष्ठति ॥ ३४ ॥

रामृतंब्रह्मैवसारात्मा ॥ २९ ॥ बीजादिभावोपिमनसएवेत्याह ॥ मूलमित्यादिना ॥ अन्नादिभावेनाप्यायनादानंदकारणम् ॥ ३० ॥ सएवविराट्शरीरेजीवः अन्नात्मकेनतेनसमष्टिप्राणधारणादित्याशयेनाह ॥ यदिति ॥ व्यष्टिशरीराणामन्नमयानांसबीजंप्राणहेतुकानांसर्वकर्मणांमूलंव्यष्टिमनसांचकारणम् ॥ चंद्रमामनोभूत्वाहृदयंप्राविशदित्यादिश्रुतेरित्यर्थः ॥ ३१ ॥ तदेवस्पष्टमाह ॥ अस्मादिति ॥ सुखानिभोगाअमृतानिमोक्षाश्च ॥३२ ॥ विराजोविराड्जीवस्य ॥ चतुर्मुखादिशरीराणामपिचांद्रामृतपरिणामरूपत्वात् सोमःपवतेजनितामतीनांजनितादिवोजनितापृथिव्याः ॥जनिताग्नेर्जनितासूर्यस्यजनितेंद्रस्यजनितोतविष्णोरितिश्रुतेरितिभावः ॥ नभश्चराःपक्षिणः ॥ सर्वप्राण्युपलक्षणमेतत् ॥ ३३ ॥ चित्तचमत्कारतांचित्तोपहितचिद्विवर्त्ततयाप्रकटयति ॥ चित्स्वभावइति ॥ प्रालेयपरमाणुतांसुसूक्ष्मामृतकलात्मतांसाक्षितयाचंद्रेबुध्यमानोयदादेवतादिशरीराकारंसर्गादौभावयतिसंकल्पयतिविराडात्माप्रजापतिस्तदातत्रतादृशचतुर्मुखादिशरीरभावेएवस्वयंसिद्धवत्तिष्ठतिसत्यसंकल्पत्वादित्यर्थः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतच्चंद्रमंडलमेवसर्वजीवसमष्टिविराड्जीवस्यापंचीकृतपंचभूतान्यवयवायस्यतथाविधंतस्यविराजःशरीरम् ॥ एतज्जायदितिसर्वैरनुभूयते ॥ ३५ ॥ इंदुविराड्जीवाद्यष्टिजीवप्रसरंप्रागुक्तमुपपादयति ॥ विराडिति ॥ जीवभूतानिजीवनसाधनानि ॥ प्रालेयविसरश्चंद्रकलानामोषधीषुप्रसरस्तदात्मना ॥ ३६ ॥ जीवाःजीवोपाधयः ॥३७॥ सहस्रशतशब्दावसंख्यपरौ ॥ संप्रतिसंतिच ॥३८॥ उत्तमपदाद्ब्रह्मणः अभिन्नयाअतएवांतवर्जितोनिरवधिर्महांश्चांगसंगोव्यष्टिसमष्टिदेहसंबंधोयस्यास्तथाविधयाअधिष्ठानसत्तयैवतद्विवर्त्तोविराट्पुरुषइतिवर्णितरीत्यासर्वतःसर्वदेशकालेषुइहमायाद्वतेब्रह्मणितिष्ठतीत्युपसंहारः ॥३९॥ ॥इतिश्रीवासिष्ठ०म०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेएकोनविंशतितमःसर्गः ॥१९॥ वासनाकर्मकामानुरूपसंकल्पसर्ज्जनैः ॥ समष्टिसाम्यंव्यष्टीनांजीवानामिहवर्ण्यते ॥१॥ विराट्पुरुषसत्यसंकल्पानुसारिविवर्त्तंब्रह्मधत्तेइत्याह ॥ संकल्पेति ॥ पंच

तेनैतदेवजीवस्यस्थानंविद्धिरघूद्वह ॥ पंचावयवमेतत्तच्छरीरमनुभूयते ॥ ३५ ॥ विराड्जीवाच्चंद्रमसोजीवभूतानिदेहिनाम् ॥ प्रसरंत्यन्नजातानिप्रालेयविसरात्मना ॥ ३६ ॥ तान्येवदेहिदेहेषुजीवाजीवंतिजीविषु ॥ मनोभूत्वाबिचेष्टंतेकर्मजन्मसुकारणम् ॥ ३७ ॥ एवंविराट्सहस्राणिमहाकल्पशतानिच ॥ गतान्यथभविष्यंतिनानाचाराणिसंतिच ॥ ३८ ॥ सर्वतोनुभवरूपयानयासत्तयोत्तमपदादभिन्नया ॥ अंतवर्जितमहांगसंगयातिष्ठतीतिपुरुषःपरोविराट् ॥ ३९ ॥ ॥इ०वा०म०वा०दे०नि०उ० विराडात्मवर्णनंनामैकोनविंशःसर्गः ॥ १९ ॥ ॥ ६९ ॥ ॥श्रीवसिष्ठउवाच॥ ॥संकल्पपुरुषस्त्वेषयद्यत्कल्पयतिस्वयम् ॥ तत्तथाताद्दशंपंचभूतात्माभवतीवखम् ॥ १ ॥ सर्वंरामजगज्जातंतत्संकल्पंविदुर्बुधाः ॥ ताद्दग्रूपंपंचकात्मविषयोन्मुखमाततम् ॥ २ ॥ जगत्पदार्थसार्थस्यविराट्सर्वस्यकारणम् ॥ कारणेनसमान्येवकार्याणिचभवंत्यतः॥३॥ यथैषसविराडेवंविराट्प्रत्येकमात्मनि ॥ स्वसंविदिप्रसरतिबोधवान्नत्वबोधवान् ॥४॥ आसरीसृपमारुद्रमेवमभ्युदितोभ्रमः॥ अणावप्यद्रिविस्तारोबीजकोशइवद्रुमः॥५॥ आसरीसृपमारुद्रंविराट्प्रत्येकमात्मनि॥ पराणावप्यनंतात्मबोधतोनत्वबोधतः ॥ ६ ॥ याद्दगेवविराडात्मन्येषविस्तारआगतः ॥ ताद्दगेवेहसर्वस्मिन्नणुमात्रेपिभूतके ॥ ७ ॥

भूतात्माविराट्पुरुषोयद्यद्यथायथाभवत्विविसंकल्पयतितत्तत्तथातथाखंब्रह्माकाशमपिभवति ॥१॥ यतोब्रह्मपूर्वोपासनाहितवासनयाताद्दग्रूपंपंचभूतात्मविराड्रूपंसर्गादौभूत्वाउपासनाफलपंचमहाभूतात्मकविषयसमष्टिभोगोन्मुखतांगतमित्यर्थः ॥ २ ॥ कारणेनमृदादिनाकार्याणिघटादीनिसमस्वभावान्येवयतोभवंत्यतोहेतोरित्युत्तरत्रान्वयः ॥ ३ ॥ प्रत्येकंव्यष्टिजीवोप्यात्मनिस्वस्मिन्विराट्सर्वसर्गसमर्थइत्यर्थः ॥ यतोमनोवृत्त्यनुसारेणस्वसंविदिबाह्यांतरविषयाकारेणप्रसरतिसतिविराडिवायमपितत्तदर्थबोधवानेवनत्वबोधवानितिसाम्यमित्यर्थः ॥ ४ ॥ अपकर्षावधावासरीसृपमुत्कर्षावधावारुद्रमेवंजगदाकारोभ्रमोभ्युदितःसएवसर्गः ॥ अणावपीतिभ्रमत्वेउपपत्तिः ॥ ५ ॥ अस्त्वेवंकिंततस्तत्राह ॥ आसरीसृपमिति ॥ विराट्स्रष्टा ॥ तथाचसाम्यंसिद्धमित्यर्थः ॥ ६ ॥ अणुमात्रेमशकपुष्यादिदेहपरिच्छिन्नेपिभूतकेजीवे ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विततंभ्रांत्याविस्तारितम् ॥ ८ ॥ ननुविराजोव्यष्टिमनस्तदुपहितजीवोभयकारणत्वेनवैषम्यमितिकथंसाम्यंतत्राह ॥ मनइति ॥ अथवासमष्टिव्यष्ट्योरैक्यैवैषासत्तेतिभेदएव नास्तिकुतःकारणतातत्रेत्यविशेषइत्यर्थः ॥ ९ ॥ एवमुपाधिमनःकारणतांनिरस्योपहितजीवंप्रतिकारणतांनिरसितुमुपाधिस्वरूपमाह ॥ शुक्रसारमिति ॥ प्रथमंशुक्रेरेतएवसा रउपाधिर्यस्यतम् ॥ ततःशुक्रोपहितजीवादेवमातापित्रोर्मैथुनकालेअचलस्यपूर्णानंदब्रह्मणोभोगाकारवृत्तौप्रतिबिंबनेनसंदोहःप्रपूर्त्तिलक्षणआनंदःप्रवर्त्तते ॥ एतस्यैवानंदस्या न्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेरित्यर्थः ॥ १० ॥ तंतस्यब्रह्मणआभासलक्षणमानंदंरेतोवच्छिन्नजीवचिदात्मस्थमात्मनारेतोभूतस्वभावेनैवचेतत्यनुभवति ॥ चेतयंती वरेतोरूपमेवानंदःप्रियतमोहमितिबीजमारभ्यतत्रतादात्म्याध्यासलक्षणांतन्मयतांधत्ते ॥ आनंदाद्ध्येवखल्विमानिभूतानिजायंतइतिश्रुतेः ॥ ११ ॥ अथानंतरमेषाजीवसंवि त्तदंतर्गतपंचतांदेहरूपांतादात्म्येनैवोपायाति ॥ सैवास्यास्तदुपहिततातत्रचनविराजोन्यस्यवाकारणतेत्याह ॥ नतत्रेति ॥ १२ ॥ यद्युपहितरूपेनाकिंचित्कारणंतर्हितदनागंतु

परमार्थेननस्थूलंनसूक्ष्मंकिंचनक्वचित् ॥ यद्यथाविततंयत्रतत्तथाश्वनुभूयते ॥ ८ ॥ मनश्चंद्रमसोजातंमनसश्चंद्रउत्थितः ॥ जीवाज्जी वोथवैकैषासत्ताद्रवजलांगवत् ॥ ९ ॥ शुक्रसारंविदुर्जीवंप्रालेयकणसंनिभम् ॥ आनंदोचलसंदोहस्ततएवप्रवर्त्तते ॥ १० ॥ तंचेततित दाभासंपूर्णमात्मस्थमात्मना ॥ तत्रतन्मयतांधत्तेतेनतन्मयरूपिणी ॥ ११ ॥ जीवसंविदथैपांतयद्दुपायातिपंचताम् ॥ नतत्रकारणंकिं चिद्द्वियतेनचकार्यता ॥ १२ ॥ प्रतियोगिव्यवच्छित्तेरभावात्स्वस्वभावयोः ॥ स्वभावोक्तिर्नचैवात्रभवत्यर्थानुसारिणी ॥ १३ ॥ जीवो जीवत्वमेवस्वजीवत्वादेवचस्वतः ॥ अंतस्त्वेनबहिष्ट्वेनदृश्यतेनचवायुवत् ॥ १४ ॥ नीहारेणेवसंवीतश्चेत्यवस्तुपरायणः ॥ जात्यंधइव पंथानंमारुतात्मानपश्यति ॥ १५ ॥

कंजीवानांस्वभावःस्यात् नचकस्यचित्स्वभावोपैतीत्यनिर्मोक्षप्रसंगइत्याशंक्याह ॥ प्रतियोगीति ॥ अत्रोपहितरूपेस्वभावोक्तिरर्थानुसारिणीअर्थवतीनभवति ॥ स्वशब्दार्थवि शिष्टोहिभावशब्दार्थःस्वभावस्तत्रस्वशब्दोयदिशुद्धपरस्तर्हितस्याद्वयत्वान्नप्रतियोगीतद्व्यवच्छेदोवान्योस्तीत्यव्यावर्त्तकात्तस्मादन्योभावशब्दार्थोपिननिरूपयितुंशक्यतइति तद्विशिष्टार्थसिद्धेर्दूरनिरस्तत्वादित्यर्थः ॥ १३ ॥ यदिवाउपहितपरःस्वशब्दस्तदाप्यसौनस्वबहिर्भूतंभावशब्दार्थंलभतेयःस्वार्थेनविशिष्यादित्याह ॥ जीवइति ॥ उपहितरूपो जीवोपिस्वतःस्वस्यजीवत्वादुपहितरूपत्वादेवजीवत्वमुपहितरूपमेवस्वयंनतद्व्यतिरिक्तंरूपांतरमंतस्त्वेनबहिष्ट्वेनवाभावशब्दार्थभूतंविशेष्यतायोग्यंतत्रदृश्यते ॥ सचवायुर्वातीत्य त्रक्रियात्मैववायुर्यथाविकल्पबुद्ध्याभेदंपरिकल्प्यवातीतिव्यपदिश्यतेतद्वज्जीवोजीवत्वमितिधर्मधर्मिभावेनेत्यर्थः ॥ १४ ॥ यदिनजन्यंननित्यंस्वभावभूतंवातर्हिकितज्जीवरूपं यत्संसरतीतिचेदनिर्वचनीयाज्ञानावृतब्रह्मैवतत्स्वात्मनएवान्यथादर्शनंतस्यसंसारइत्याह ॥ नीहारेणेत्यादिना ॥ मारुतात्माप्राणेंद्रियादिजडतादात्म्यापन्नःअतएवस्वरूपंनपश्य ति ॥ नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव ॥ नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंतीत्यादिश्रुतेरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगदाकारयाजृंभिकयाबृंहिकयाअविद्याशक्त्यासंवीतःअतएवस्वमैक्यमेवद्रष्टृदृश्यमितिद्वित्वंकल्पयित्वातत्रास्थितोऽभिनिविष्टः ॥ १६ ॥ अतएवविद्ययाअविद्यानाशसंभवान्नानिर्मोक्षदोषइत्याह ॥ अज्ञानस्येति ॥ अहमित्यर्थरूपस्यमहाग्रंथेर्भेदोविदारणम् ॥ १७॥ अतएवहेरामत्वंव्यपगतोघनोऽज्ञानमेघोयस्मात्तथाविधश्चेतनश्चित्प्रकाशमात्रःसन्नहमित्यहंकारोपाधिपरिच्छेदमबुध्यमानःशोधितत्वंपदार्थःसन्क्षितंबाधितंसन्मूर्त्तंअसदमूर्त्तंसदसत्तन्मूलाज्ञानंचयत्रतथाविधोरूपबाधादेवानभिधोनामशून्यःसैंधवघनवदानंदैकरसघनोयश्चेतनःशोधिततत्पदार्थस्तदेकरूपःसन्समंतात्पूर्णआस्व ॥१८॥ ॥ इतिश्रीवासिष्ठम०रा०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेविंशतितमःसर्गः ॥२०॥छ॥ अशुभाचशुभाचात्रद्विविधाज्ञानबंधुता ॥ हेयायाश्चाचयत्नेनलक्षणैरुपवर्ण्यते ॥ १ ॥ तत्रादौहेयांवर्णयितुंपीठिकांरचयति ॥ ज्ञानिनैवेति ॥ ज्ञानीउत्तरसर्गवक्ष्यमाणलक्षणस्तथाविधेनैवसदाभाव्यंभवितव्यंज्ञानव्याजेनसत्कर्मश्रद्धाबाधनाद्भोगलांपट्येनस्वंपरंचानर्थैर्बध्नातीतिज्ञानबंधुस्तथाविधेननभाव्यमित्यर्थः ॥ १ ॥ किंलक्षणंप्राप्यज्ञानबंधु

जगज्जृंभिकयाजीवःस्वमैक्यंद्वित्वमास्थितः ॥ स्पंदशक्त्येवपवनैआवृतात्मानपश्यति ॥ १६ ॥ अज्ञानस्यमहाग्रंथेर्मिथ्यावेद्यात्मनोसतः ॥ अहमित्यर्थरूपस्यभेदोमोक्षइतिस्मृतः ॥ १७॥ व्यपगतघनचेतनस्समंतादहमितिनूनमबुध्यमानआस्व ॥ अनभिधघनचेतनैकरूपःक्षितसदसत्सदसत्सदोदितश्च ॥ १८ ॥ ॥ इ०वा०वा०दे०मो०नि०उ०जीवनिर्वाणयोगोपदेशोनामविंशःसर्गः ॥ २० ॥ श्रीवसिष्ठउवाच ॥ ॥ ज्ञानिनैवसदाभाव्यंरामनज्ञानबंधुना ॥ अज्ञातारंवरंमन्येनपुनर्ज्ञानबंधुताम् ॥ १ ॥ ॥ श्रीरामउवाच ॥ किमुच्यतेज्ञानबंधुर्ज्ञानीचैवकिमुच्यते ॥ किंफलंज्ञानबंधुत्वेज्ञानित्वेपिचकिंफलम् ॥ २ ॥ ॥श्रीवसिष्ठउवाच॥ ॥व्याचष्टेयःपठतिचशास्त्रंभोगायशिल्पिवत् ॥ यततेनत्वनुष्ठानेज्ञानबंधुःसउच्यते ॥ ३॥ कर्मस्पंदेषुनोबोधःफलितोयस्यदृश्यते ॥ बोधशिल्पोपजीवित्वाज्ज्ञानबंधुःसउच्यते ॥ ४ ॥ वसनाशनमात्रेणतुष्टाःशास्त्रफलानिये ॥ जानंतिज्ञानबंधूंस्तान्विद्याच्छास्त्रार्थशिल्पिनः ॥ ५ ॥ प्रवृत्तिलक्षणेधर्मेवर्ततेयःश्रुतोचिते ॥ अदूरवर्तिज्ञानत्वाज्ज्ञानबंधुःसउच्यते ॥ ६ ॥

रुच्यते।किलक्षणंप्राप्यज्ञानीउच्यतेपुरुषस्तेलक्षणेतत्फलेचवदेतिप्रश्नार्थः ॥ २ ॥ अनुष्ठानेसाधनचतुष्टयसंपादनेमननादौचज्ञानोपायेयोनयतते ॥ ३ ॥ यस्यशास्त्राभ्यासलब्धःशाब्दोबोधःकर्मस्पंदेषुभोगव्यवहारेषुदृश्यमानेषुवैराग्योपरमादिफलैःफलितोनदृश्यते ॥ तत्त्वकथाभिःपरवंचनचातुरीबोधशिल्पंतदुपजीवित्वात् ॥ ४ ॥ अर्थाद्वसनाशनलाभादयएवशास्त्रफलानीतियेजानंति ॥ शास्त्रार्थकथानाटनान्नटादिशिल्पिनइवविद्यात् ॥ ५ ॥ द्वितीयांशुभांज्ञानबंधुतांलक्षणेनदर्शयति ॥ प्रवृत्तिलक्षणेइति ॥ प्रवृत्तिलक्षणेनिष्कामाग्निहोत्रादिलक्षणेधर्मेश्रुतस्यशास्त्रार्थज्ञानस्योचितेअनुरूपेश्रुतस्यकरिष्यमाणवेदांतश्रवणस्योचितेचित्तशुद्धिद्वाराअनुकूलेश्रुतेश्रुतिबोधितेउचितेस्वाधिकारकुलाचाराद्युचितेच ॥ विविदिषंतियज्ञेनदानेनतपसेत्यादिश्रुतेः ॥ सत्कर्मानुष्ठानेचित्तशुद्धिक्रमेणावश्यंज्ञानेनबध्यतेइतिव्युत्पत्त्याअदूरवर्तिज्ञानत्वावगमादित्यर्थः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनात्मशास्त्राभ्यासपरा अपि तत्तदर्थज्ञानैः संबध्यमानाद्दृश्यंते तेन तत्सदृशोयं माभूदित्यात्मज्ञाने विशेषं दर्शयति ॥ आत्मज्ञानमिति ॥ तानि ज्ञानमिवावभासंते न तु ज्ञानानि ॥ कुतः ॥ रसेन सारभूतेनाबाध्येन निरतिशयानंदात्मना सह वर्त्तंते इति सरसौ तदध्यस्तौ जगज्जीवौ तयोर्भावः सारस्यं तदधिष्ठानब्रह्मरस एव तदनवबोधनादध्यस्तबाध्यार्थमात्रबोधनाद्भ्रांतिमात्रतया अज्ञानतरंगमात्रत्वादित्यर्थः ॥ ७ ॥ अत एव तल्लाभमात्रतुष्टानामशुभज्ञानबंधुतैवेत्याह ॥ आत्मज्ञानमिति ॥ अभ्यासश्रमेण दुरभिमानादिदोषाधानेन पारलौकिकानर्थफलेन च कष्टाश्चेष्टा यस्मिन्कर्मणि तद्यथा भवति तथा ते संतुष्टा इति हेतोस्तेपि अशुभज्ञानबंधवः स्मृता इत्यर्थः ॥ ८ ॥ अत एव न सप्तमभूमिकास्थैर्यपर्यंतं मुमुक्षुणा तौष्टिकेन भवितव्यमित्याह ॥ ज्ञानादीति ॥ ज्ञानं बाह्याभ्यंतरगोचरवृत्तयः आदिपदात्तत्कारणानि तदाश्रयः प्रमाता च तेषां ज्ञेयाः शब्दादयस्तेषां विकाशाः प्रथाश्चेत्येतेषामात्यंतिकशांत्या पूर्णानंदैकरसस्वप्रकाशब्रह्मात्मैक्यप्रतिष्ठां विना मुमुक्षुणाऽवांतरभूमिलाभमात्रेण कृतार्थोऽस्मीति संतुष्टधिया उत्तरोत्तरभूमिप्रापकप्रयत्नशिथिलेन कदाचिदपि न भाव्यम् ॥ हे राम त्वं सर्वविद्यास्थानकुशलोप्यनात्मशास्त्रपाटवासक्त्या ज्ञानोपेक्षणेनानधिकारिषु ज्ञानोपदेशकौशलख्यापनेन वा ज्ञानबंधुत्वमुपेत्य तत्ख्यातिलाभादिप्रयुक्तभोगलक्षणेषु भवामयेषु मारम

आत्मज्ञानं विदुर्ज्ञानं ज्ञानान्यन्यानि यानि तु ॥ तानि ज्ञानावभासानि सारस्यानवबोधनात् ॥ ७ ॥ आत्मज्ञानमनासाद्य ज्ञानांतरलवेन ये ॥ संतुष्टाः कष्टचेष्टं ते ते स्मृता ज्ञानबंधवः ॥ ८ ॥ ज्ञानादितज्ज्ञेयविकाशशांत्या विना न संतुष्टधिये ह भाव्यम् ॥ त्वं ज्ञानबंधुत्वमुपेत्य राम रमस्व मा भोगभवामयेषु ॥ ९ ॥ अत्राहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहारं प्राणसंधारणार्थम् ॥ प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम् ॥ १० ॥ ॥ इ० वा० वा० दे० मो० नि० उ० ज्ञानविचारो नाम एकविंशतितमः सर्गः ॥ २१ ॥ ॥ ७ ॥

श्रीवसिष्ठ उवाच ॥ ॥ ज्ञानेन ज्ञेयनिष्ठत्वाद्यो चित्तं चित्तमेव च ॥ न बुध्यते कर्मफलं स ज्ञानीत्यभिधीयते ॥ १ ॥ ज्ञात्वा सम्यगनुज्ञानं दृश्यते येन कर्मसु ॥ निर्वासनात्मकं ज्ञस्य स ज्ञानीत्यभिधीयते ॥ २ ॥

स्वेत्यर्थः ॥ ९ ॥ कथं तर्हि मुमुक्षुणा स्थातव्यं तदाह ॥ अत्रेति ॥ आहारो हितमितमेध्याशनं तदर्थं तदुपायप्राप्तये श्रुतिस्मृतिशिष्टैरनिंद्यं स्ववर्णाश्रमोचितोपायेनाहारार्जनादिकर्म कुर्यात् ॥ शिष्टं स्पष्टम् ॥ १० ॥ ॥ इति श्रीवासिष्ठम० तात्पर्यप्रकाशे निर्वाणप्रकरणे उत्तरार्द्धे एकविंशतितमः सर्गः ॥ २१ ॥ ॥ ७ ॥ ॥ ज्ञानिनो लक्षणान्यादौ कीर्त्यंते त्रोपपत्तिभिः ॥ तथा जीवजगद्ब्रह्मतत्त्वादीनि प्रसंगतः ॥ १ ॥ ज्ञानबंधुतां तत्फलं चोपवर्ण्य ज्ञानी चैव किमुच्यते ज्ञानित्वेपि च किं फलमिति प्रश्नयोरुत्तरं वक्तुं प्रथमं ज्ञानिलक्षणान्याह ॥ ज्ञानेनेति ॥ यः पुमान् भूमिकारोहणक्रमपरिपक्वेन ज्ञानेन ज्ञेयब्रह्ममात्रे दृढप्रतिष्ठत्वात्प्रारब्धकर्मफलं भुंजानोप्यचित्तं चित्तभिन्नं शब्दादिविषयजातं तत्तदाकारपरिणतं कामसंकल्पादिवृत्तिभेदैः परिणतं च चित्तमेवेति तत्त्वबाधितानुवृत्तिमात्रत्वान्न वस्तु सद्बुध्यते स ज्ञानीति तल्लक्षणज्ञैरभिधीयत इत्यर्थः ॥ १ ॥ तथा ज्ञस्य शब्दादिविषयभोक्तुः प्रमातुरंतःकरणस्य कर्मसु भोग्यभूतेषु विषयेषु येन पुरुषेण ज्ञाने ज्ञाने इत्यनुज्ञानम् ॥ वीप्सायामव्ययीभावः ॥ सर्वेषु चाक्षुषादिवृत्तिभेदेषु साक्षितया स्थितं चिन्मात्रं सम्यक् तत्त्वतो ज्ञात्वा बाधितं दृश्यं निर्वासनात्मकं वासनामात्रेणाप्यपरिशिष्टं दृश्यते स ज्ञानीत्यर्थः ॥ अथवा येन तत्त्वेन ज्ञातेन चित्तं निर्वासनं भवति तत्तत्त्वं सम्यक् ज्ञात्वा स्थितस्य यस्य ज्ञस्य सर्वेषां प्राणिनां कर्मसु यथेच्छव्यवहारेषु स्वैरं व्यवहरंत्वित्यनुज्ञानमेव दृश्यते ॥ स्वधनापहारवधबंधादिप्रवृत्तिमपि दस्यूनां यो नुमोदते स ज्ञानीत्यर्थः ॥ इदं तु जडभरतादौ प्रसिद्धम् ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकृत्रिमेणैकेनस्वात्मलाभेनशांतस्ययस्यईहासुव्यवहारेषु ॥ ३ ॥ पुनर्जन्ममूलाज्ञानोच्छेदित्वात्तत्त्वज्ञानमेवज्ञानंनेतरदित्याह ॥ अपुनर्जन्मनेइति ॥ शेषातदन्याशाब्दज्ञान चातुरीतुवसनाशनेददातीतिवसनाशनदाइतरशिल्पतुल्याजीविकैवनज्ञानशब्दवाच्येत्यर्थः ॥ ४ ॥ शरदाकाशमिवनिरावरणप्रकाशंत्द्दयंयस्य ॥ ५ ॥ उक्तलक्षणोपपत्तयेत त्त्वज्ञानस्यसर्वद्वैतवासनोच्छेदकत्वंसमर्थयितुंजगतःअसदविद्यामात्रत्वपरिशेषादकारणत्वासत्वेदर्शयति ॥ अकारणमित्यादिना ॥ यतोऽविद्यमानाःअतःअकारणंविनैवका रणंप्रवर्त्ततेउत्पद्यंतइवनतुवस्तुतउत्पद्यंते ॥ एवंचाविद्यमानाएवस्थिताइव ॥६॥ उत्तरभावविकारेष्वप्यकारणत्वादेवासत्वंबोध्यमित्याशयेनाह ॥ आविर्भावेति ॥ ननुबीजादं कुरोत्पत्तेःप्रत्यक्षंदर्शनात्कथमकारणंप्रवर्त्ततइत्युच्यतेतत्राह ॥ पश्चादिति ॥ नेदंसर्गादौसंभवति प्रलयेबीजांकुरयोरुभयोरप्यभावादितिभावः ॥ कारणकर्मभिःकारणव्यापारैः ॥ ७ ॥ सांप्रतंदृश्यमानमपिबीजंसतोंकुरस्यकारणमसतोवा ॥ नाद्यः ॥ सतःकारणापेक्षाभावात् नद्वितीयइत्याह ॥ असतइतिद्वाभ्याम् ॥ ८ ॥ आसादयंत्यारोहंति ॥ असत्त त्कारणतन्मार्गणानांपुत्रपौत्रतत्स्कंधारोहणानिक्रमाद्दृष्टांताः ॥ ९ ॥ यद्यकारणद्वैतभावाभ्युपगमेअनिर्मोक्षप्रसंगवारणायमोक्षशास्त्रप्रामाण्यायचकारणमवश्यंकल्प्यंतर्हिज्ञा नमात्रनिवर्त्यमिथ्याभूतमज्ञानमेवतत्कारणंकल्पनीयंनान्यत्सद्रूपंतस्यज्ञानेननिवर्त्तयितुमशक्त्याअनिर्मोक्षतादवस्थ्यप्रसंगादित्याशयेनाह ॥ असत्येति ॥ अनालोकनमज्ञानम्

अंतःशीतलतेहासुप्राज्ञैर्यस्यावलोक्यते॥ अकृत्रिमैकशांतस्यसज्ञानीत्यभिधीयते॥३॥ अपुनर्जन्मनेयःस्याद्बोधःसज्ञानशब्दभाक्॥ वसनाशनदाशेषाव्यवस्थाशिल्पजीविका॥४॥ प्रवाहपतितेकार्येकामसंकल्पवर्जितः॥ तिष्ठत्याकाशत्द्दयोयःसपंडितउच्यते॥५॥ अकारणंप्रवर्त्ततइवभावाअकारणात्॥ अविद्यमानाअप्येतेविद्यमानाइवस्थिताः॥६॥ आविर्भावतिरोभावैर्भावाभावभवाभवैः॥ पश्चात्कारणतांयांतिमिथःकारणकर्मभिः॥७॥ असतःशशशृंगादेर्मृगतृष्णांभसोयथा॥ आलोकनादलभ्यस्यकीदृक्स्यात्किलकारण म्॥८॥ असतःशशशृंगादेःकारणंमार्गयंतिये॥ वंध्यापुत्रस्यपौत्रस्यस्कंधमासादयंतिते॥९॥ असत्यप्रतिभासानामेतदेवाशुकारणम्॥ यदनालोकनंनामसमालोकक्षणक्षयम्॥१०॥ परमात्मायतेजीवोबुध्यमानस्त्वचेतनम्॥ चेतनंबुध्यमानस्तुजीवएवावतिष्ठते॥११॥

॥ १० ॥ बंधस्याज्ञानकार्यत्वंसमालोकक्षणक्षयत्वंचानुभावयति ॥ परमिति॥अयंजीवःपरंस्वातिरिक्तमचेतनंजडमहंकारदेहादिबुध्यमानस्तत्क्षणमेवतत्तादात्म्याध्याससंस्का रोद्बोधादात्मायतेआत्मेवाचरतिसएवतत्स्यबंधः ॥ चेतनंनिष्कृष्टचिन्मात्रमात्मानंबुध्यमानस्तुजीवएवयेनजातानिजीवंतीतिश्रुतिदर्शितदिशासर्वजगदुज्जीवनहेतुनिष्कृष्टनिरति शयानंदाद्वयएवावतिष्ठतेसोस्यमोक्षइत्यर्थः ॥ अथवाजीवःचेत्यतेअनेनेतिचेतनंबुद्धिः चेत्यतेअस्मिन्निति चेतनंस्थूलदेहः चितिक्रियाचेतनंचिदाभासः तत्रितयरहितंकूटस्था द्वयचिन्मात्रमात्मानंबुध्यमानःसन्परमात्माब्रह्मेवाचरतिपरमात्मायते अद्वितीयपूर्णानंदैकस्वभावोवतिष्ठते ॥ चेतनंबुद्ध्यादिकमात्मेतिबुध्यमानस्तुजीवएवभूत्वावतिष्ठतेनपूर्ण भावंलभतेइत्यर्थः ॥ अथवाअयंजीवश्चेतनंविषयेषुचाक्षुषादिवृत्तिफलैर्व्यापनंतद्रहितमचेतनंयथास्यात्तथावृत्तिव्याप्त्यैवनतुफलव्याप्त्येत्यर्थः ॥ एवमात्मानंस्वप्रकाशचिद्रूप तयाबुध्यमानःपरमात्मैवनह्यनात्माअणुमात्रमपिफलव्याप्तिंविनाबुध्यते ॥ चेतनंवृत्तिव्यापनंयथास्यात्तथाअणुमात्रमपिबुध्यमानोजीवएवावतिष्ठतेनब्रह्मस्वभावंस्वंप्राप्नोती त्यर्थः ॥ तथाचश्रुतिः ॥ यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥ अविज्ञातंविजानतांविज्ञातमविजानतामिति ॥ ११॥ जीवः अचेतनं परिबुध्यमानस्तु आत्मायते॥ चेतनं परिबुध्यमानस्तु जीवस्वावतिष्ठते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वार्धंविवृणोति ॥ परमात्मैवेति ॥ अयंजीवोयथोक्तरीत्याअचेतनमजागरणमेवस्वात्मनिबुध्यमानोजागरूकःपरमात्मरसावेशात्परमात्मैवभवति ॥ यथाआम्रएवहेमंतेसुप्तप्रायोवसंतेरसावेशात्पल्लवितःपुष्पितश्चप्रबुद्धप्रायःसहकारशब्दवाच्यतांप्रयातितद्वदित्यर्थः ॥ १२ ॥ उत्तरार्धमपिविवृणोति ॥ चेतनमिति ॥ जातिजन्मसुनानायोनिजन्मसु ॥ १३ ॥ अतएवतत्त्वविदांचेष्टास्तदभिमानाभावादस्पंदरूपाएवेत्याह ॥ येइति ॥ रूपालोकमननाभिमानशून्यं अपांनिम्नानुसरणमिवप्रारब्धमात्रानुसरणमित्यर्थः ॥ १४ ॥ यथादग्धपटदर्शनंपटदर्शनमेवनभवतिकिंतुभस्मदर्शनंतथाबाधितदृश्यश्रीदर्शनंतदतीतब्रह्मदर्शनमेवेतिनद्वैतवेदनंतेषामस्तीत्याशयेनाह ॥ येइति ॥ १५ ॥ अतोपितेषांस्पंदस्यास्पंदत्वंरूपदर्शनाभावेप्यापोदृष्टांताइत्याशयेनाह ॥ येइति ॥ १६ ॥ अतएवचतेषांकर्मलेपबंधनाभावइत्याह ॥ अरूपेति ॥ यतोरूपालोकमननवेष्टितानभवंत्यतोमुक्तदामाउत्सृष्टोवृषभस्तद्वद्बंधनशून्याइत्यर्थः ॥ १७ ॥ पारलौकिककर्मापेक्षातुदूरनिरस्तेत्याशयेनाह ॥ येइति ॥ १८ ॥ अज्ञानांतुकर्मैवशरणमित्याह ॥ येइति ॥ विनाबोधंतत्त्व

परमात्मैवजीवोयंबुध्यमानस्त्वचेतनम् ॥ आम्रएवरसापत्तेःप्रयातिसहकारताम् ॥ १२ ॥ चेतनंबुध्यमानस्तुजीवएवावतिष्ठते ॥ जीवोजीवितजीर्णेषुजातिजन्मसुजर्जरः ॥ १३ ॥ येपरांदृष्टिमायाताविद्धितेषामपामिव ॥ अरूपालोकमननंस्पंदमस्पंदनंसदा ॥ १४ ॥ येपरांदृष्टिमायातादृश्यश्रीपारदर्शिनः ॥ नविद्यमानमप्यस्तितेषांवेदनमाततम् ॥ १५ ॥ येपरांदृष्टिमायाताविद्धितेषामपामिव ॥ स्पंदमस्पंदनंसर्वमवेदनवशादिह ॥ १६ ॥ अरूपालोकमननवेष्टितामुक्तदामवत् ॥ बुधाःकर्मसुचेष्टंतेवृक्षपत्रेष्विवानिलः ॥ १७ ॥ येपरांदृष्टिमायाताःसंसृतेःपारदर्शिनः ॥ नतेकर्मप्रशंसंतिकूपंनद्यांवसन्निव ॥ १८ ॥ येबद्धवासनामूढाःकर्मशंसंतितेनघ ॥ श्रुतिस्मृत्युचितंतेनविनाबोधंप्रयांतिते ॥ १९ ॥ इंद्रियाणिपतंत्यर्थेभ्रष्टंगृध्रइवामिषम् ॥ तानिसंयम्यमनसायुक्तआसीततत्परः ॥ २० ॥ नासन्निवेशंहेमास्तिनासर्गेब्रह्मविद्यते ॥ किंतुसर्गादिशब्दार्थमुक्तंयुक्तमतःशिवम् ॥ २१ ॥ एकांधकारेसंपन्नेव्यवहारोयुगक्षये ॥ निर्विभागोनिराभासोयथाब्रह्मघनेतथा ॥ २२ ॥ अभ्रोदरेभ्रमांगानांस्पंदास्पंदमयीयथा ॥ स्वसंविदात्मिकासत्ताभूतानामीश्वरीतथा ॥ २३ ॥

ज्ञानाभावात्तेनकर्मणैवतेप्रयांतितत्फलभोगमितिशेषः ॥ १९ ॥ कुतस्तेषांकर्मैवशरणंतत्राह ॥ इंद्रियाणीति ॥ भ्रष्टमधःपतितंअधःपातहेतुमितियावत् ॥ सत्कर्मानालंबनेतेषामधःपातएवेंद्रियैःकार्यइतिभावः ॥ तथाचश्रुतिः ॥ कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाः ॥ एवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेनरेइति ॥ अतएवविदुषोपींद्रियनिग्रहेसत्येवस्वरूपप्रतिष्ठासिद्ध्यतिनान्यथेत्याह ॥ तानीति ॥ २० ॥ अदग्धेदग्धेचपटेसन्निवेशसाम्यवज्जगत्सन्निवेशसाम्यभानमविदुषामिवविदुषामप्यस्तुनामतथापितद्विदुषांब्रह्मैवेत्याशयेनाह ॥ नासन्निवेशमिति ॥ २१ ॥ सर्गशब्दार्थमुक्तत्वेप्रलयोदृष्टांतइत्याह ॥ एकेति ॥ तथाअसन्नपिसन्नितिशेषः ॥ २२ ॥ प्रलयेस्पंदसत्तामसंभावयंतंप्रतिदृष्टांतमाह ॥ अभ्रोदरेइति ॥ यथाचलदभ्रोदरेतदवयवानामभ्रादविभागादस्पंदमयीदिग्विभागात्तुस्पंदमयीतिस्वानुभवसंविदात्मिकैवविरुद्धधर्मयौगपद्येनसत्तासंभाव्यतेतद्वत्प्रलयेपीश्वरीस्पंदसत्ताभूतानांसंभावनीयेत्यर्थः ॥ २३ ॥ अचेतनम् = विषयज्ञानरहितम्, शुद्धचेतनं, चेतनं = विषयज्ञानसहितं, शबलज्ञानम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रचिदाभासस्पंदसद्भावेपिदृष्टांतमाह ॥ जलस्येति ॥ जलस्यास्तिमिततडागादिजलस्यद्वैताद्वैतमयस्तैमित्याद्भेदाभेदाभ्यांदुर्वचःस्वसंविदात्माब्रह्मसंविदात्माभूतदृक्कृतत्तज्जीवाभासः ॥ २४ ॥ निरवयवेसावयवजगत्सद्भावेपिदृष्टांतमाह ॥ यथेति ॥ अंबरांशानांदिग्भेदरूपाणामाकाशावयवानाम् ॥ २५ ॥ अनयैवरीत्याप्रागुक्तमहंकारजगतोरन्योन्यांतर्गतत्वमपिसंभावनीयमित्याह ॥ जगतइति ॥ २६ ॥ अहंकारात्मनोजीवस्यस्वांतर्गतजगतोबहिर्दर्शनेपिदृष्टांतमाह ॥ रूपेति ॥ यथापर्वतोहिमवदादिःस्वरंध्रैर्निर्गतंस्वांतर्गतजलमेवमानसादिमहासरस्तयापश्यतितद्वत् ॥ २७ ॥ यथाहेमपिंडेभूतभाविकटकाद्याकाराःपर्यालोचनेदृश्यंतेकनकमात्रदृष्टौतुनदृश्यंतेतद्वज्जीवेजगदपीत्याह ॥ जीवइति ॥ अकारणंनिर्निमित्तंभ्रांत्यैवेत्यर्थः ॥ २८ ॥ अतएवतद्दर्शिनांजीवन्मुक्तानांजन्ममरणसंसारस्थितयोन्यदृशासत्योपिनसंत्येवेत्याह ॥ जीवंतइति ॥ २९ ॥ ब्रह्मा

जलस्यांतर्जलांशानांद्वैताद्वैतमयोयथा ॥ स्वसंविदात्मासुस्पंदस्तथाब्रह्मणिभूतदृक् ॥ २४ ॥ यथांबरेंबरांशानांद्वैताद्वैतकृतात्मनि ॥ अनन्यास्सृष्टिराभातितथानवयवेशिवे ॥ २५ ॥ जगतोंतरहंरूपमहंरूपांतरेजगत् ॥ स्थितमन्योन्यवलितंकदलीदलपीठवत् ॥ २६ ॥ रूपालोकमनस्कारैरंध्रैर्बहिरिवस्थितम् ॥ सृष्टिंपश्यतिजीवोंतःसरसीमिवपर्वतः ॥ २७ ॥ जीवोजगत्तयात्मानंपश्यत्ययमकारणम् ॥ हेमेवकटकादित्वंतदपश्यन्नपश्यति ॥ २८ ॥ जीवंतोपिनजीवंतिम्रियंतेनमृताअपि ॥ संतोपिचनसंतीवपारावारविदःशुभाः ॥ २९ ॥ प्रबुद्धःसर्वकर्माणिकुर्वन्नपिनपश्यति ॥ गृहकर्माणिगेहस्थोगोष्ठभांडमनाइव ॥ ३० ॥ विराड्हृदियथाचंद्रःप्रतिदेहंयथास्थितः ॥ जीवोहिमकणाकारःस्थूलेस्थूलोलघौलघुः ॥ ३१ ॥ अहमात्मात्रिकोणत्वमुपगच्छतिकल्पनम् ॥ असदेवसदाभासंमन्यतेचेतनाद्वपुः ॥ ३२ ॥ कर्मकोशेत्रिकोणेचशुक्रसारेऽवतिष्ठते ॥ देहेजीवोहमित्यात्मास्वामोदःकुसुमेयथा ॥ ३३ ॥ अहमित्येवशुक्रस्थासंविदापादमस्तकम् ॥ विसरत्यखिलेज्योत्स्नायथाब्रह्मांडमंडपे ॥ ३४ ॥

सक्तमनसोदेहयात्राकर्मण्यपिनकर्तृताबुद्धिः यथागोष्ठभांडेष्वासक्तमनसोगृहकर्मणीत्याह ॥ प्रबुद्धइति ॥ ३० ॥ प्रासंगिकंसमाप्यप्रस्तुतमनुसंधत्ते ॥ विराडिति ॥ यथाब्रह्मांडहृदिविराड्जीवश्चंद्रःस्थितएवंप्रतिव्यष्टिदेहंहेतोहिमकणाकारोजीवोहृदिस्थितइत्यर्थः ॥ ३१ ॥ तस्यदेहग्रहणप्रकारमाह ॥ अहमात्मेति ॥ सपितृहृदिरेतोरूपेणस्थितोऽहंकारात्माजीवःपित्रामातुस्त्रिकोणयोनौनिषिक्तस्त्रिकोणपरिच्छिन्नत्वरूपंकल्पनमुपगच्छति ॥ तत्रत्यरक्तमिश्रितःकललबुद्बुदपिंडाद्याकारक्रमेणाविर्भूतमसदेववपुःशरीरंसदाकारमहमितिचेतनान्मन्यते ॥ ३२ ॥ एवंत्रिकोणोपलक्षितेमातृगर्भेशुक्रमेवसारःअस्थिस्नाय्वादिकठिनांशोयत्रतथाविधेस्वकर्मनिर्मितकोशेदेहकोशकारकृमिरिवबद्धोऽवतिष्ठते ॥ स्वामोदःसुगंधः ॥ ३३ ॥ तत्रापिचंद्रकलानांचंद्रबिंबइवहृदयस्थशुक्रकणेऽहंभावस्फूर्तीनांविशेषव्याप्तिस्तद्द्वारासर्वदेहसामान्याहंभावप्रथेतिस्वानुभवादेवप्रसिद्धमित्याह ॥ अहमिति ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यबाह्यार्थदर्शनद्वाराण्याह ॥ अक्षेति ॥ विसृतंबहिर्निःसृतंसाभासांतःकरणलक्षणंवेदनोदकम् ॥ त्रिजगत्त्रैलोक्यस्थान्सन्निकृष्टबाह्यार्थान् ॥ यथाधूमोमेघतयावियद्व्याप्नोतितद्वत् ॥ ३५ ॥ सर्वदेहापेक्षयाहृदयस्थेशुक्रेविशेषाभिमानोऽनुभवसिद्धइत्याह ॥ देहेइति ॥ घनवासनाविशेषाभिमानः ॥ ३६ ॥ अतएवहिहार्दसंकल्पपूर्वकमेवबाह्यार्थव्यवहाराःप्रवर्त्तंतइत्याह ॥ जीवइति ॥ ३७ ॥ अतएवचतदहंभावश्चित्तस्यब्रह्माकारस्थितिंविनानोपायसहस्रैरपिशाम्यतीत्याह ॥ यथास्थितामिति ॥ समाधिपरिपाकेस्थिरब्रह्मैकरस्यात्स्थिरोपमाम् ॥ ३८ ॥ अतएवहेरामतेतवमननिदिध्यासनादिनाअनुचिंत्यमानापिब्रह्मचिंताआत्यंतिकाहंभावोपशमनेसाध्येउत्तरोत्तरभूमिकासुनिर्विकल्पसमाधिपरिपाचनक्रमेणचरमभूमिकायामंबरोपमाभावनीयासंपाद्या ॥ नैतावतैवत्वयोपरंतव्यमित्यर्थः ॥ ३९ ॥ तर्हिकिंभवदादीनामपितथासाभावनीयानेत्याह ॥ तज्ज्ञाइति ॥ अरूपालोकमननंबाह्यमानसदृश्यदर्शनाभिमानरहितंयथास्यात्तथा ॥ मौनंकर्मेंद्रियव्यापारशून्यंच ॥ ४० ॥ बंधशून्यःशृंखलादिनिर्मुक्तइव ॥ ४१ ॥ सर्वशरीरेहंऽभावव्याप्तिरपिशुक्रांशव्याप्तिवशादेवेत्याह ॥ अहमिति ॥ ४२ ॥ चक्षुरादींद्रियभावेनतत्तत्स्थानसंबंधोपिशुक्रात्मभूतस्यैवजीवस्येत्याह ॥ दृगिति ॥ दृगिंद्रियंनेत्रंतद्गोलकम् ॥ एवमग्रेपि ॥ अतएवहिरूपादिदर्शनस्पर्शनश्रवणादौसर्वैंद्रियैरपिकामोद्दीपनान्निमज्जतीत्यर्थः ॥ ४३ ॥ अज्ञानाद्दृतचितोविपरीतभावनैवप्रथमंमनोभूत्वारेतोहंभावेनैकदेशतोऽक्षतयातत्तदिंद्रियभावेनोदेतीत्यर्थः ॥ ४४ ॥ अतएवतत्प्रतिकूलयथार्थभावनांविनानतद्दुःखोपरमइत्याह ॥ यइति ॥ यःपुरुषइहसंसारेरूढेषुमनोहंकारदेहादिजगद्रूपेषुवाचारंभणंविकारोनामधेयम् नेहनानास्तिकिंचन अथातआदेशोनेतिनेतीत्यादिश्रुतिदर्शितामभावनांनभावयति ॥ तस्यमोक्षानुकूलयत्नरहितस्यपुंगर्दभस्यानंतंजन्मादिदुःखंनोपशाम्यत्येवेत्यर्थः ॥ ४५ ॥

अक्षरंध्रप्रणालेनविसृतंवेदनोदकम् ॥ व्याप्नोतित्रिजगद्धूमोवियन्मेघतयायथा ॥ ३५ ॥ देहेयद्यप्यशेषेस्मिन्बहिरंतश्चवेदनम् ॥ विद्यतेतत्तथाप्यत्रशुक्रेस्तिघनवासना ॥ ३६ ॥ जीवःसंकल्पमात्रात्मायत्संकल्पोवतिष्ठते ॥ हृदिभूत्वासएवाशुबहिःप्रसरतिस्फुटम् ॥ ३७ ॥ यथास्थितांचनिश्चित्तांवर्जयित्वास्थिरोपमाम् ॥ नकयाचिदपिस्थित्याशाम्यत्यहमितिभ्रमः ॥ ३८ ॥ चिंतानुचिंत्यमानापिभावनीयांबरोपमा ॥ अहंभावोपशमनेशमनेनक्रमेणते ॥ ३९ ॥ तज्ज्ञाव्यवहरंतीहभाव्यभावनवर्जितम् ॥ अरूपालोकमननंमौनंदारुनराइव ॥ ४० ॥ अकिंचिद्भावनोयःस्यात्समुक्तइतिकथ्यते ॥ जीवन्नाकाशविशदोबंधशून्यइवस्फुटम् ॥ ४१ ॥ अहमित्येवशुक्रस्थासंविदापादमस्तकम् ॥ विसरत्यखिलेदेहेब्रह्मांडेर्कप्रभायथा ॥ ४२ ॥ दृङ्नेत्रंस्वदनंजिह्वाश्रुतिःश्रोत्रंभवत्यसौ ॥ इत्याद्यावासनाःपंचबद्धातासुनिमज्जति ॥ ४३ ॥ चिद्भावोक्षतयोदेतिमनोभूत्वैकदेशतः ॥ सर्वगोपिरसोभूमौयथांकुरतयामधौ ॥ ४४ ॥ योभावयतिभावेषुनेहरूढेष्वभावताम् ॥ तस्यायत्नवतोदुःखमनंतंनोपशाम्यति ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाभावयतस्तुबाह्यसर्वस्वत्यागेपिप्रारब्धाकृष्टजनैःसंपाद्यमानवसनाशनादिभिरांतरस्वानंदामृततृप्त्याचवैराजपदांतसाम्राज्यसुखमस्त्येवेत्याह ॥ येनकेनचिदिति ॥ ४६ ॥ वासनाभिर्ब्रह्माकारवासनाभिर्दग्धपटतंत्वाकारसदृशजगद्वासनाभिर्वा ॥ ४७ ॥ नबोध्यतेषष्ठादिभूमिकाप्रविष्टत्वादितिभावः ॥ ४८ ॥ स्फुटसारेरेतसि ॥ ४९ ॥ एवंव्यष्टिसमष्टिजीवभावादिवर्णनंपरमप्रस्तुतेयोजयन्नुपदेशसर्वस्वंसंक्षिप्याह ॥ संविन्मात्रमिति ॥ इतिपरमारहस्यभूताउपदेशभूरुपदेशस्थितिः ॥ ५० ॥ तत्रवैराग्यदार्ढ्यमेवसाधनरहस्यमित्याह ॥ नीरसइति ॥ ५१ ॥ पाषाणत्हृदयंकृत्वेत्युक्तेस्तात्पर्यंविशदयति ॥ साधोइति ॥ यथाअचित्त्ववपुषउपलस्यत्हृदयसौषिर्यमचित्त्वादेवचिन्निवेशानवकाशमसौषिर्यंप्रसिद्धंतथाचिन्मात्रवपुषस्तवदहराकाशरूपंत्हृदयसौषिर्यंचित्त्वादेवाचिन्निवेशनिरवकाशंचिन्निबिडितमसौषिर्यमिवास्त्वितितदाशयइत्यर्थः ॥ अथवाइयंतंकालमचि

येनकेनचिदाच्छन्नोयेनकेनचिदाशितः॥ यत्रक्वचनशायीहससम्राडिवराजते॥४६॥ वासनाभिरुपेतोपिसमग्राभिरवासनः॥अंतःशून्योप्यशून्यात्माखमिवश्वसनान्वितः॥ ४७॥ आसनेशयनेयानेस्थितोयत्नैर्नबोध्यते ॥ निद्रालुरिवनिर्वाणमनोमननिर्वृतः॥ ४८ ॥ संविन्मात्रंहिपुरुषःसर्वगोपिसतिष्ठति ॥ स्फुटसारेशरीरस्ययथागंधोब्जकेसरे ॥ ४९ ॥ संविन्मात्रंविदुर्जंतुंतस्यप्रसरणंजगत् ॥ आत्मनिष्ठत्वमजगत्परमेत्युपदेशभूः॥ ५० ॥ नीरसोभवभावेषुसर्वेषुविभवादिषु॥ पाषाणंत्हृदयंकृत्वायथाभवसिभूतये॥५१ ॥ साधोत्हृदयसौषिर्यमसौषिर्यमिवास्तुते॥ अचित्त्ववपुषोचित्वाद्रुपलस्येवराघव ॥ ५२ ॥ तज्ज्ञाज्ञयोरशेषेषुभावाभावेषुकर्मसु॥ कृतेनिर्वासनत्वात्तुनविशेषोस्तिकश्चन॥ ५३ ॥ सत्तैवैषाविदोयत्साभवत्युन्मिषिताजगत्॥ परंतत्त्वंनिमिषितात्हृगिवानामकंततम् ॥ ५४ ॥ दृश्यंविनश्यत्यखिलंविनष्टंजायतेपुनः॥ यन्ननष्टंनचोत्पन्नंतत्सद्भवतितद्भवान् ॥ ५५॥ भावज्ञप्तिर्हिनिर्मूलाभावितापिनविद्यते॥ सलिलंमृगतृष्णेवनददातिभवांकुरम्॥ ५६॥

दात्माभिमानादचित्त्ववपुषस्तवअचित्त्वादज्ञानात्स्फटिकोपलस्यांतःकल्पितमाकाशमिवभोगसामग्रीधनादिलाभकोटिभिरप्यपूर्यमाणंकामलक्षणंत्हृदयसौषिर्यमनश्छिद्रंसांप्रतंनित्यनिरतिशयानंदपूर्णात्मलाभात्पूर्णकामत्वेनबाधितंवास्तवंस्फटिकोपलासौषिर्यमिवानंदैकघनमस्त्वितितदाशयइत्यर्थः ॥ ५२ ॥ अतएवस्फटिकोपलप्रतिबिंबितजनव्यवहारकर्मस्विवतज्ज्ञाज्ञयोःप्रतीतिसाम्येपिसत्यत्ववासनाभावकृतएवविशेषइत्याह ॥ तज्ज्ञेति ॥ ५३ ॥ एवंचस्फटिकोपलेद्रष्टृपुरुषदृष्टिरिवविदश्चैतन्यस्यसत्तैववासनाभिरुन्मिषिताजगद्भवतिनिर्वासनत्वेननिमिषिताततमपरिच्छिन्नतत्त्वंमोक्षाख्यंभवतीतिफलितमित्यर्थः ॥ ५४ ॥ अतएवचित्सत्तैवनित्यात्वमित्याह ॥ दृश्यमिति ॥ ५५ ॥ ईदृशबोधेनमूलाज्ञाननाशेसत्यन्वेषणेपिजगद्भ्रांतिर्नलभ्येत्याह ॥ भावेति ॥ भावज्ञप्तिर्जगद्भ्रांतिः ॥ निर्मूलाबाधितमूला ॥ भाविताअन्विष्टापि ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५७ ॥ अतएवविहितकर्मकरणाकरणयोर्विदुषामविशेषइत्याह ॥ कर्मेति ॥ ५८ ॥ समनसोपियोगिनःशांत्यादिवशादात्मनिकुतोनतिष्ठंतितत्राह ॥ चित्तेति ॥ येहठान्मूर्छांतायोगिनस्तेपिचित्तोपशांतौसत्यामेवसम्यक्शांताभवंतिनान्यथा ॥ यतस्तेषांभोगेनबध्नंतीतिभोगबंधवोभोगवासनानस्वभावपरिक्षीणामूलतश्छिन्नाः हियस्मादेषामाकरः खनीभूतंचित्तमस्त्येवेत्यर्थः ॥५९॥ चित्तदेहादिरूपेणघनीभावएवजीवस्यभेदकस्तापकश्चतदभावेत्वयंब्रह्माभिन्नोनिस्तापएवेत्याह ॥ अघनइति ॥ अघनोमूर्त्तिशून्योजीवः केवलचिदालोकमात्रःशोधितत्वंपदार्थःपरायतेपराभेदयोग्योभवतीत्यर्थः ॥ आतपपक्षेअघनोमेघावरणनिर्मुक्तःअखरश्च ॥६०॥ तदेवाघनंकेवलचिदालोकस्वरूपमात्मनोनुभावयति ॥ एकदेशेति ॥ पुंसोदेहाद्दूरंदूरस्थादित्यचंद्रादिविषयंचक्षुरादिद्वारायातस्यचेतसश्चित्तवृत्तेर्मध्येविच्छेदाभावाद्देहमारभ्यचंद्रमंडलपर्यंतमविच्छिन्नाअपरोक्षचिदभिव्यक्तास्त्येव ॥ तस्यादेहप्रदेशेचंद्रप्रदेशेचसविषयत्वेप्यंतरालेनिर्विषयंयद्रूपंप्रसिद्धंतद्रूपमेवसकलंपूर्णंपरमात्मनःपरिचेयमित्यर्थः ॥ तथाचश्रुतिः ॥ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः दिवीवचक्षुराततमिति ॥ ६१ ॥ निर्विषयचितएवायंमायाचमत्कारोजगदित्याह ॥ चार्विति ॥ अव्यक्तमनभिव्यक्तम् ॥६२॥ एवमिदंजगत्तत्त्वज्ञजनंप्रतिगतभवभ्रमभासुरमुपेक्षितदीपवत्शर्मनिर्वाणमुपेतमक्षयंब्रह्मैवभाति ॥ अज्ञजनंप्रतितुनियंतुरीश्वरात्सकाशात्सर्वनियतिव्यवस्थाभिर्मुदाभोगप्रीत्याचानुगतंखेआकाशोदरेपरमार्थतःस्थितमपिभातीतिदृष्टिभेदमात्रमित्यर्थः ॥ ६३ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेद्वाविंशतितमःसर्गः ॥ २२ ॥ ॥ ७ ॥ ॥ मंकिनोमरुकांतारेवसिष्ठेनात्रसंगमः ॥ निर्वेदात्तत्त्वजिज्ञासोरुपदेशश्चवर्ण्यते ॥ १ ॥ नीरसोभवभावेषुसर्वेषुविभवादिष्वितियद्वैराग्यदार्ढ्यस्यावश्यकत्वमुक्तंतत्प्रतिष्ठापनायमंक्युपाख्यानमारभते ॥ विरागेत्यादिना ॥ अस्याःपरिदृश्यमानायाःप्रकृतेःस्वाभाविकाज्ञानादिरूपायाःसंसृतेस्तत्त्वबोधेनोत्थायनिर्वाणात्मपदंगच्छेत्यर्थः ॥ अंकितस्तल्लक्षणैश्चिह्नितः ॥ १ ॥ मयाविबोधितउपदिष्टः ॥ २ ॥

यथाभूतार्थसंदर्शाच्छिन्नाहमितिभावना ॥ दृष्टापिनकरोत्यंतर्दग्धंबीजमिवांकुरम् ॥ ५७ ॥ कर्मकुर्वन्नकुर्वन्वावीतरागोनिशामयः ॥ निर्मनानित्यनिर्वाणःपुमानात्मनितिष्ठति ॥ ५८ ॥ चित्तोपशांतौसंशांताःशांतायेभोगबंधवः ॥ नस्वभावपरिक्षीणाश्चित्तमेषांकिलाकरः ॥ ५९ ॥ अघनःकेवलालोकोबुधोजीवःपरायते ॥ सएवान्योप्यनन्योंतरपराद्धइवातपः ॥ ६० ॥ एकदेशस्थितात्पुंसोदूरायातस्यचेतसः ॥ यद्रूपंसकलंमध्येतद्रूपंपरमात्मनः ॥ ६१ ॥ चारुचिद्व्योमकर्पूरंयच्चमत्कुरुतेस्वयम् ॥ अनंतमंतरव्यक्तंजगदित्येववेत्तितत् ॥ ६२ गतभवभ्रमभासुरमक्षयंशममुपेतमुपेक्षितदीपवत् ॥ स्थितमपीहजनंजगदीश्वरादनुगतंननुभातिमुदाचखे ॥ ६३ ॥ ॥इ०वा०महारामायणेवा०दे०मोक्षोपायेषुनिर्वाणप्रकरणेउत्तरार्द्धेसुखयोगोपदेशोनामद्वाविंशतितमःसर्गः ॥ २२ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ विरागवासनापास्तसमस्तभववासनः ॥ उत्थायगच्छप्रकृतेरस्यामंकिरिवांकितः ॥ १ ॥ मंकिर्नामाभवत्पूर्वंब्राह्मणःसंशितव्रतः ॥ सकथंशृणुनिर्वाणमाप्तवान्मद्विबोधितः ॥ २ ॥

अज्ञजनंप्रतितु ईश्वराद् नुगतंजगद्भूपि मुदा न नु भाति एव, ॥ गतभवभ्रमभासुरं अक्षयं शमं उपेतं जनं ईश्वरादनुगतं इह स्थितमपि जगत् खे न नु भाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केनापियज्ञादिरूपेण भवत्पितामहस्याऽजस्यार्थेनप्रयोजनेनप्रागुपनिमंत्रितःसन् ॥ ३ ॥ त्वत्पितामहस्यपत्तनंनगरमयोध्यांप्रतिगच्छन्गमिष्यन्सन्नर्षिलोकाद्भूतलंप्राप्यविहरन्संचरन् ॥ अरण्यानींमहारण्यम् ॥ हिमारण्ययोर्महत्त्वेइंद्रवरुणेत्यादिनाआनुक् ॥४॥ पांसूनांप्रतर्द्दनेनाविच्छिन्नप्रसरेणहतांध्वस्तांधूसरामितियावत् ॥ अंकितांकुग्रामैरितिशेषः ॥५॥ अविद्यमानपांस्वादिनाऽक्षुब्धस्यखस्याकाशस्यानिलस्यझंझापवनस्यआलोकस्यातपस्यमृगतृष्णाजलस्यतप्तभुवश्चशांत्याशालिनींशोभमानाम्॥दुर्गमत्वाद्दूर्णांमहांतआरंभाःप्रयत्नायत्र ॥ अमलांनिष्पंकाम् ॥ ब्रह्मसत्तापक्षेस्पष्टम् ॥६॥ जडतांगतामित्यनुषज्जते ॥७॥ वदंतंव्यक्तंभाषमाणम् ॥८॥ यथापापोदुर्जनेनसंगमःपरितापायतथाप्रौढप्रायातपोयंरविः परिखेदायेत्यर्थः ॥९॥१०॥ तत्तस्माद्धेतोः ॥११॥ मयातद्भाग्योदयकालंज्ञात्वातदीयसर्वश्रममूलोच्छेदायेदंतत्त्वबुभुत्सोत्पादकंसाभिप्रायंवक्ष्यमाण

अहंकदाचिदाकाशकोशादवनिमागतः॥ भवत्पितामहार्थेनकेनाप्युपनिमंत्रितः॥ ३ ॥ विहरन्भूतलंगच्छंस्त्वत्पितामहपत्तनम्॥ प्राप्तोस्मिकामप्यादीर्घामरण्यानींमहातपाम्॥४॥ पांसुप्रतर्द्दनहतांप्रकचत्तप्तसैकताम्॥ अदृष्टापारपर्यंतांक्वचिद्रामकिलांकिताम्॥५॥ अक्षुब्धखानिलालोकजलभूशांतिशालिनीम्॥ ततांशून्यांमहारंभांब्रह्मसत्तामिवामलाम्॥६॥ अविद्यामिवसंमोहमृगतृष्णांगतांभ्रमात्॥ जडतामाततांशून्यांदिङ्मोहमिहिकाकुलाम्॥७॥ अथतस्यामरण्यान्यांयावत्सविहराम्यहम्॥तावत्पश्यामिपुरतोवदंतंपथिकंश्रमात्॥८॥ ॥पांथउवाच॥ ॥अहोनुपरिखेदायप्रौढप्रायातपोरविः॥ परितापायपापोयंदुर्जनेनेवसंगमः॥ ९ ॥ सुगलंतीवमर्माणिस्फुरतीवाग्निरातपे॥ संकुचत्पल्लवापीडास्ताप्यंतेवनराजयः ॥ १० ॥ तत्तावदेवमग्रस्थंग्रामकंप्रविशाम्यहम् ॥ श्रममत्रापनीयाशुवहाम्यध्वानमाशुगः॥ ११ ॥इतिसंचिंत्यसोग्रस्थंकिरातग्रामकंयदा॥ प्रवेष्टुमिच्छतितदामयाप्रोक्तमिदंवचः ॥ १२ ॥ अपरिज्ञातनीरागमार्गमित्रशुभाकृते॥ मरुमार्गमहारण्यपांथस्वागतमस्तुते॥ १३ ॥ चिरंमनुष्यदेशेस्मिन्निर्जनग्राममध्वनि ॥ अधराध्वगविश्रांतिंविश्रांतोपिनलप्स्यसे॥ १४ ॥ ग्रामेविश्रमणंनैववर्त्ततेपामरास्पदे॥ तद्वैलवणपानेनभूयएवाभिवर्द्धते॥ १५॥

वाक्यमुक्तमित्यर्थः ॥ १२ ॥ नपरिज्ञातोनीरागाणामकिंचनानांसंचारयोग्यआतिथेयजनसंभृतोमार्गोयेनेत्युत्तानार्थः ॥ अतएवमरुमार्गमहारण्यपांथ ॥ अभिप्रेतार्थांतरंतुस्पष्टम् ॥ हेमित्रतेऽत्रागमनंमद्दर्शनेनसर्वदुःखमूलक्षयात्स्वागतमस्तु॥१३॥तस्याधराध्वगेतिसंबोधनात्स्वस्यतदानभोध्वगमनंसूच्यते ॥ निर्जनग्राममातिथेयजनशून्यग्रामंयथास्यात्तथास्थितेइतिशेषः॥ प्राक्तनग्रामेष्वन्नपानप्रतिश्रयादिलाभाद्विश्रांतोप्यग्रेविश्रांतिंनलप्स्यसेइत्युत्तानार्थः ॥ आशयार्थेतुहेअधरकर्माध्वगअस्मिन्कर्मोपासनलभ्यदक्षिणोत्तरायणमार्गलक्षणेऽध्वनिस्वर्गादिभूमिषुकिंचित्किंचिद्विश्रांतोपिनिर्जनग्रामंजननंजनोनिर्गतजन्मसमूहंयथास्यात्तथामोक्षवच्चिरंविश्रांतिंनलप्स्यसेइतियोज्यम् ॥ १४ ॥ नैववर्त्ततेपामराणांदुर्वाक्यादिनाप्रत्युतक्षोभकारित्वादित्युत्तानोभावः ॥ आशयार्थस्तुग्रामेकर्तृकरणसंघातालयेदेवमनुष्यादिदेहे ॥ पामराणांकामद्वेषादीनामालये ॥ यदिमन्यसेविषयोपभोगैर्विश्रांतिरितितत्राह ॥ तृडिति ॥ तथाचोक्तंययातिना ॥ नजातुकामःकामानामुपभोगेनशाम्यति हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धतइति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पल्लवाःपुलिंदजातिभेदाः ॥ आरण्यकत्वाज्जनपदस्पंदाद्भीरवस्तमसहमानाइत्युत्तानार्थः ॥ आशयार्थेत्वेतेकामादयःपल्लववत्स्नेहरागादियुक्ताविवेकस्पंदभीरवः अयथापथ संचाराःअशास्त्रीयमार्गप्रवणाः ॥ १६ ॥ नस्फुरंतीत्याद्युभयतःस्पष्टंयोज्यम ॥ अश्मयंत्रमयाःप्रतिमादयइव ॥ १७ ॥ १८ ॥ आभिजात्यंविशुद्धोभयकुलतातेनाततात्र ज्ञाइहजनेपुनविश्वसिति ॥ १९ ॥ अंधयतीत्यंधाअंधकारावृतागुहातस्यामहित्वमजगरता ॥ २० ॥ विषकणामधुमिश्रविषकणाः ॥ २१ ॥ भस्मकणाकीर्णाधूलिधूसरा यामेभवाग्राम्यायेअधार्मिकाजनास्तल्लक्षणावायवश्चंडपवनावांतिसंचरंति ॥ २२ ॥ एवंमयाउक्तेनसंभाषितेनतेनमंकिनामदाशयबोधादयंमामुद्धरिष्यतीतिसम्यगाश्वासं प्राप्याहमिदंवक्ष्यमाणमुक्तः ॥ २३ ॥ पूर्णात्मात्वमितिशेषः ॥ २४ ॥ पूर्णात्मतामेवहेतुवितर्कैःप्रकटयति ॥ किंत्वयेति ॥ सम्राट्सर्वलोकेश्वरः ॥ संपूर्णश्चंद्रइवराजसे ॥२५॥

एतेग्रामैकशरणाःपल्लवाःस्पंदभीरवः॥ अयथापथसंचाराहरिणाइवजंतवः ॥ १६ ॥ नस्फुरंतिविचारेषुप्रज्वलंत्यनुभूतिषु॥ नत्रस्यंति दुराचाराद्श्मयंत्रमयाइव ॥ १७॥ कामार्थरागसद्वेषपरिनिष्ठितपौरुशाः॥ कर्मण्यापातमधुरेरमंतेदग्धबुद्धयः॥ १८॥ आभिजात्या ततोदाराशीतलारसशालिनी ॥ नेहविश्वसितिप्रज्ञामेघमालामराविव ॥ १९ ॥ वरमंधगुहाहित्वंशिलांतःकीटतावरम्॥ वरंमरौपंगुम्र गोनग्राम्यजनसंगमः॥ २० ॥ निमेषास्वादमधुराःक्षणांतरविरागिणः॥ मारणैकांतनिरताग्राम्याविषकणाइव ॥ २१ ॥ वांतिभस्मक णाकीर्णाजीर्णाःसंशीर्णसद्मसु ॥ तृणपर्णवनव्यग्राग्राम्याधार्मिकवायवः॥ २२॥ एवमुक्तेनतेनाहमिदमुक्तस्ततोनघ॥ मद्वाक्येनस माश्वास्यस्नातेनेवामृतांभसा ॥ २३ ॥ ॥ पांथउवाच ॥ भगवन्कोसिपूर्णात्मामहात्माकथमात्मवान्॥ पश्यस्यनाकुलोलोकंग्रामया त्रामिवाध्वगः॥ २४ ॥ किंत्वयापीतममृतंकिंत्वंसम्राड्विराडथ ॥ सर्वार्थरिक्तोपिचिरंसंपूर्णइवराजसे ॥ २५ ॥ शून्योसिपरिपूर्णोसिघू र्णोसीवस्थिरोसिच ॥ नसर्वमपिसर्वंचनकिंचित्किंचिदेवच॥ २६ ॥ उपशांतंचकांतंचदीप्तमप्रतिघातिच ॥ निवृत्तंचोर्जितंतादृग्रूपंकि मितितेमुने॥ २७॥ भूसंस्थोपिसमस्तानांलोकानामुपरीवखे ॥ संस्थितोसिनिरास्थोसिघनास्थोसीवलक्ष्यसे ॥ २८ ॥ प्रस्तंनपदार्थे षुनपदार्थात्मनास्तिवै ॥ तवेंदोरिवशुद्धस्यमनोमृतमयंस्थितम्॥ २९ ॥ कलावानकलंकोंतःशीतलोभास्वरःसमः॥ रसायनभरापूर्णः पूर्णेंदुरिवराजसे ॥ ३० ॥

सांसारिकदोषदुःखैःशून्योसि ॥ निरतिशयानंदेनजीवन्मुक्तगुणैश्चपरिपूर्णोसि ॥ देहाद्यप्रतिसंधानान्मदघूर्णोसीव ॥ परमार्थेस्थिरोसीव ॥ नसर्वमितिसमष्ट्यपवादाध्यारोपदृष्टि भ्याम् ॥ नकिंचिदितिव्यष्ट्यपवादाध्यारोपदृष्टिभ्याम् ॥ २६ ॥ ईदृशोहंकथंत्वयाज्ञातइतिचेत्त्वद्रूपदर्शनादितिसूचयन्नाह ॥ उपशांतमिति ॥ तथाचश्रुतिः ॥ रूपमेवास्यैत न्महिमानंव्याचष्टइति ॥ २७ ॥ मादृशानामुद्धारेघनास्थोसीवलक्ष्यसे ॥ २८ ॥ इंदोरिवशुद्धस्यतवामृतमयंमनःइंदुकरवत्पदार्थेषुनप्रस्तंनाप्यौषधिवनस्पतिसोमाज्यप योन्नादिपदार्थात्मनाउपभोगार्हमस्तियेनक्षीयेत ॥ अतःसदैवपूर्णंस्थितमितितवचंद्रादतिशयइत्यर्थः ॥ २९ ॥ अन्यदपितत्साम्यंविशेषंचाह ॥ कलावानिति ॥ ३०॥

CC-0. In Public Domain. Digitization by eGangotri

एवंहिरण्यगर्भसाम्यंततोविशेषश्चतेऽस्तीत्याह ॥ त्वदिच्छायामिति ॥ सार्वज्ञ्यसर्वशक्त्यादिसंपन्नस्यते चितिआत्मनिअंकुरेकांडादिफलांतवृक्षरूपमिवेदंसंसारमंडलंसर्गयोग्यत
यास्थितंपश्यामिसंभावयामि ॥ तत्सर्गार्थंत्वदिच्छायांतुसदसद्भावंपश्यामिसंवेद्मि ॥ यदीच्छसितर्हित्वमपिजगत्स्रष्टुंशक्तोऽस्येवपरंतुनेच्छसीत्ययंततोविशेषइतिभावः ॥ ३१ ॥
एवंप्रशंसयाभिमुखीकृतायवसिष्ठायस्ववैराग्यादिसाधनसंपत्त्योपदेशार्हतांदर्शयितुंस्वगोत्रनामादिकीर्त्तयति ॥ अहमित्यादिना ॥ ३२ ॥ ३३ ॥ तडित्सकाशानिक्षणभंगुरा
णि ॥ ३४ ॥ आत्मानंनामगोत्रादिनाकथयेत्युत्तानार्थः ॥ सत्यमितिविशेषणस्वारस्यात्परमात्मानमुपदिशेत्याशयार्थः ॥ ३५ ॥ ३६ ॥ तमेवाशयंस्फुटमाह ॥ ममेति ॥ अ

त्वदिच्छायांतुसदसद्भावंपश्यामितेचिति ॥ संसारमंडलमिदंस्थितंफलमिवांकुरे ॥ ३१ ॥ अहंतावदयंविप्रशांडिल्यकुलसंभवः ॥ मंकि
र्नाममहाभागतीर्थयात्राप्रसंगतः ॥ ३२ ॥ गत्वासुदूरमध्वानंदृष्ट्वातीर्थानिसंप्रति ॥ चिरकालेनसदनमात्मीयंगंतुमुद्यतः ॥ ३३ ॥ नचमे
गंतुमुद्योगोविरक्तमनसोगृहम् ॥ दृष्ट्वातडित्सकाशानिभूतानिभुवनोदरे ॥ ३४ ॥ भगवन्सत्यमात्मानंकथयेहानुकंपया ॥ गंभीराणिप्र
सन्नानिसाधुचेतःसरांसिहि ॥ ३५ ॥ दर्शनादेवमित्रत्वंकुर्वतांमहतांपुरः ॥ कमलानीवभूतानिविकसंत्याश्वसंतिच ॥ ३६ ॥ ममेदंचम
नोमोहात्संसारभ्रमसंभवम् ॥ मन्येहातुंनसमर्थंसत्वंबोधानुकंपितैः ॥ ३७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ वसिष्ठोस्मिमहाबुद्धेमुनिरस्मि
नभोगृहः ॥ केनाप्यर्थेनराजर्षेरिमंमार्गमुपस्थितः ॥ ३८ ॥ मागाविषादंपंथानमागतोसिमनीषिणाम् ॥ प्रायःप्राप्तोसिसंसारसागर
स्यपरंतटम् ॥ ३९ ॥ वैराग्यविभवोदारामतिरुक्तिरपीदृशी ॥ आकृतिःशांतरूपाचनभवत्यमहात्मनः ॥ ४० ॥ मणिर्मधुरकाषेणयथै
तिविमलात्मताम् ॥ तथाकषायपाकेनचित्तमेतिविवेकिताम् ॥ ४१ ॥ किंज्ञातुमिच्छसिकथंसंसारंहातुमिच्छसि ॥ उपदिष्टमहंमन्येसं
पादयतिकर्मभिः ॥ ४२ ॥

प्यर्थंचकारः ॥ ममेदमीषद्विवेकशाल्यपिमनोमोहादज्ञानसंशयप्राबल्यात्संसारभ्रमसंभवंदुःखंहातुंनिःशेषमुच्छेत्तुंविनागुरूपदेशंस्वविमर्शकौशलमात्रेणनसमर्थमितिमन्येपुनः
पुनर्मननेननिश्चितवानस्मि ॥ अतःसप्राग्वर्णितमदुद्धरणसामर्थ्यस्त्वंरहस्यबोधानुकूलैरूपदेशानुकंपितैर्मोहसंशयोच्छेदेनदुःखक्षयसमर्थंकुर्विंतिशेषः ॥ ३७ ॥ राजर्षेरजस्य ॥ केना
पियाजनादिरूपेणार्थेन ॥ ३८ ॥ परंतटंपरतीरम् ॥ ३९ ॥ मनीषिणांपंथानमहंप्राप्तइत्यत्रकिंलिंगंतदाह ॥ वैराग्येति ॥ अमहात्मनोज्ञानाधिकारभाग्यहीनस्य ॥ ४० ॥ वि
वेकोदयोपिचित्तकषायपाकेतवलिंगमित्याह ॥ मणिरिति ॥ मधुरेणमृदुनाकाषेणशाणघर्षणेन ॥ ४१ ॥ शिष्योगुरुणोपदिष्टमर्थंपुनःपुनःस्वपरिशीलनाज्ज्ञातांशंपुनःप्रश्नाव
धारणादिकर्मभिर्यतःफलपर्यवसितंसंपादयति ॥ अतस्त्वंस्वाज्ञातजिज्ञासितांशंवदेत्यर्थः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खलुयस्माद्धेतोर्यःशिष्योविमलारागादिमलशून्यावासनायस्य अतएवोत्तमवैराग्यादिसाधनत्रयसंपन्नमानसोभवति परिविविक्तानित्यानित्यसारासारादिविवेकशालिनीम
तिर्यस्यतथाविधश्च सएवगुरुजनस्योपदेशतेजसाअशोकमात्मतत्त्वपदंप्राप्तुंयुज्यतेयोग्योभवतिनेतरः ॥ अतःकारणाज्जनिभ्योजन्मादिसर्वदुःखेभ्यस्तितीर्षुरुत्तरणेच्छुर्मतिर्य
स्यतथाविधस्यसंभाषणपरीक्षणेनज्ञाताधिकारस्यैवतवमयेदमुच्यतेनान्यादृशस्यअतःस्वपूर्वोत्तरवृत्तांतंवदेत्यर्थः ॥ ४३ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उत्तरार्द्धे
त्रयोविंशतितमःसर्गः ॥ २३ ॥ ॥ ९ ॥ ॥ देहेंद्रियमनोबुद्धिदोषाद्यैःसहविस्तरात् ॥ सांसारिकंस्वदुःखौघंमंकिनेहोपवर्ण्यते ॥ १ ॥ समंकिःइतिएवमुक्तवतोममपादयो
र्विनिपत्यआनंदबाष्पपरिपूर्णाक्षंयथास्यात्तथामार्गेमांवहन्प्रसन्नानंदपूर्णमक्षमिंद्रियकलापंवहन्नितिवाइदंवक्ष्यमाणमुवाच ॥ १ ॥ हेभगवन्स्वसंशयविच्छेदायोपदेशकुशल
साध्वन्वेषणपरेणमयादृशोदृष्टयोयथादिक्षुभूरिशोभ्रमंतितथादिशोभ्रांताः ॥ २ ॥ अद्यमयात्वल्लाभात्समस्तेषुदेवासुरतिर्यगादिदेहेषुसाराणांब्राह्मणदेहानांमध्येज्ञानाधिकारसं

विमलवासनउत्तममानसःपरिविविक्तमतिर्जनतेजसा ॥ पदमशोकमलंखलुयुज्यतेजनिततीर्षुमतेरिदमुच्यते ॥ ४३ ॥ ॥इत्यार्षे
वा०वा०दे०मो०नि०उ०मंक्युपाख्यानेमंकिनिर्वाणंनामत्रयोविंशःसर्गः॥ २३ ॥ ॥ ९॥ ॥श्रीवसिष्ठउवाच॥ ॥म
मेत्युक्तवतोमंकिर्विनिपत्यसपादयोः॥उवाचानंदपूर्णाक्षमिदंमार्गेवहन्वचः॥ १ ॥ ॥मंकिरुवाच॥ ॥भगवन्भूरिशोभ्रांतादिशो
दशदशोयथा॥मयानतुपुनःसाधुर्लब्धःसंशयनाशकृत् ॥ २ ॥ समस्तदेहसाराणांसारस्याद्यफलंमया॥ खिन्नोस्मिभगवन्पश्यन्द
शाःसंसारदोषदाः॥ ३ ॥पुनर्जातंपुनर्नष्टंसुखदुःखभ्रमःसदा॥ अवश्यंभाविपर्यंतदुःखत्वात्सकलान्यपि॥ ४॥ सुखान्येवातिदुःखानि
वरंदुःखान्यतोमुने॥ दृढदुःखवदंतत्वाद्दुःखयंतिसुखानिमाम् ॥ ५ ॥ तथारामयथादुःखमेवमेसुखतांगतम्॥ वयोदशनलोमांत्रैःसह
जर्जरतांगताम्॥ ६॥ उच्चैःपदेपातपराबुद्धिर्नाध्यवसायिनी॥ सुप्रवालंकुसंकल्पाद्गहनंनप्रकाशते॥ ७॥

पत्त्यासारस्यंस्वदेहस्यफलंलब्धमितिशेषः ॥ ३ ॥ खेदमेवहेतुभिःसहप्रपंचयति ॥ पुनरित्यादिना ॥ जातंजन्म ॥ नष्टंमरणम् ॥ ननुसदादुःखभ्रमइतिकुतःसुखानामपिसंसारेनु
भूयमानत्वात्तत्राह ॥ अवश्यमिति ॥ सकलान्यपिसुखान्यवश्यंभाविपर्यंतदुःखत्वादतिदुःखान्यत्यंतदुःसहानिदुःखान्येवेतिपरेणान्वयः ॥ ४ ॥ अतएभ्यःसुखेभ्योदुःखान्येव
वरम् ॥ अविच्छिन्नादुःखपरंपराहिजलचरैस्तच्छीततेवाभ्यासात्सह्यापिस्यात्सुखविच्छिन्नाभ्यासात्तुसादुःसहेतिभावः ॥ प्रबलतरदुःखानुबंधित्वाद्धाकोद्रवान्नजीवनेदुःखापे
क्षयाविषसंपृक्तमोदकास्वादसुखेष्विवक्षुद्रदुःखपरंपरापेक्षयाभोगसुखेषुद्वेष्यताधिक्यमुचितमित्याह ॥ दृढेति ॥ ५ ॥ हेरामहेसौम्येतिवसिष्ठसंबोधनम् ॥ सुखानिमांतथादुः
खयंतियथामेदुःखमेवसुखतांगतंभवतीत्यन्वयः ॥ इदानींतत्त्वज्ञानानुपयुक्तानांवयःप्रभृतीनांव्यथाजीर्णतामनर्थपरंपराबीजतांचदर्शयति ॥ वयइत्यादिना ॥ जर्जरतांशिथिल
ताम् ॥ ६ ॥ उच्चैःपदेउत्तरोत्तरभोगोत्कर्षस्थानेपातोऽभिलाषस्तत्पराबुद्धिर्नपरमपुरुषार्थसाधनाध्यवसायिनी ॥ मनस्तूत्तरोत्तरंवर्द्धमानैरागपल्लवैःसुप्रवालंपल्लवितमतीतभो
ग्यकोटिगोचरशोकमोहादिकुसंकल्पाच्चगहनंदुर्विवेकमतएवस्वस्वदोषादिसाक्षिविवेकेननप्रकाशते ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रदृष्टांतमाह ॥ पिप्पलेति ॥ पिप्पलानामश्वत्थादीनांपल्यूलैःप्लवमानैःशुष्कपर्णादिसंचयैर्गहनंकुग्रामांतरालमिवस्थितिर्जीविकापिनानाभोगवासनापूतिगंधानंगेवहंतीति वासनांगवहैरतएवगृध्रैर्गृध्रप्रायैरिंद्रियैःकुग्रामस्थितिरिवनित्यंपापीयसी ॥ ८ ॥ मतिश्वकरंजादिकंटकवल्लीवकरालाकुटिलाच ॥ आयुश्वआयासशालिन्यातमोंधयासंतत विषयचिंतयाअनागतालोकमप्राप्तदीपादिप्रकाशमक्षिचक्षुस्तमोंधयायामिन्येवाप्राप्तब्रह्मदर्शनालोकंदृथाक्षीणमितिपरेणान्वयः ॥ ९ ॥ तृष्णाशुष्कलतेवनकिंचिद्विवेकरस मादत्ते ॥ पुनःपुनर्मोघीभावान्नष्टापिननश्यति ॥ १० ॥ ननुकर्मभिरेवतवोद्धारःकिंनस्यात्तत्राह ॥ कर्मेति ॥ यत्किंचिन्नित्यनैमित्तिकंकर्मकृतंतत्प्राक्तनदुष्कर्मराशौकतिपय भागक्षपणेननिर्मग्नमुपक्षीणमितियावत् ॥ भोगवासनाख्यंतुबीजमुत्तरोत्तरानर्थहेतवेअकर्मणेकाम्यनिषिद्धकर्मणिप्रवर्त्तयतीतिशेषः ॥ ११ ॥ जनेपुत्रकलत्रबांधवभृत्यादावा

मनःपिप्पलपल्यूलैरिवकुग्रामकोटरम् ॥ वासनांगवहैर्गृध्रैर्नित्यंपापीयसीस्थितिः ॥ ८ ॥ कंटकद्रुमवल्लीवकरालकुटिलामतिः ॥ आयु रायासशालिन्यायामिन्येवतमोंधया ॥ ९ ॥ अक्षीवानागतालोकंक्षीणंसंततचिंतया ॥ नकिंचिद्रसमादत्तेनष्टैवापिननश्यति ॥ १० ॥ नपुष्पितानफलितातृष्णाशुष्कलतेवनः ॥ कर्मकर्मणिनिर्मग्नंवासनाख्यमकर्मणे ॥ ११ ॥ जीवितंचजनेजीर्णंनैवोत्तीर्णोभवार्णवः ॥ दिनानुदिनमुच्छूनाभोगाशाभयदायिनी ॥ १२ ॥ पूर्णापूर्णात्मनिक्षीणाःश्वभ्रकंटकवृक्षवत् ॥ चिंताज्वरविकारिण्योलक्ष्म्याःखलुम हापदः ॥ १३ ॥ संपन्नंमक्षतंसापिविप्रलंभेनजृंभते ॥ अंतःस्फुरितरत्नेहंभास्वरंवांधकोटरम् ॥ १४ ॥ कल्लोलकलिलंशून्यंचेतःशुष्का ब्धिदुर्भगम् ॥ मामिंद्रियार्थैकपरंनस्पृशंतिविवेकिनः ॥ १५ ॥ सकंटकममेध्यस्थंश्लेष्मातकमिवद्रुमम् ॥ असदेवमहारंभंचलदर्जुन वातवत् ॥ १६ ॥

सत्त्याजीर्णम् ॥ १२ ॥ लक्ष्म्याअर्जनार्थामहापदस्तुश्वभ्रोत्पन्नकंटकवृक्षवत्पुत्रमित्रपशुधनादिभिःकदाचित्पूर्णैकदाचिदपूर्णात्मनिचगृहेचिंताज्वरैर्विकारिण्यःक्षीणाःक्षपिताः ॥ १३ ॥ लक्ष्मीर्बहुतरधनादिभिःसंपन्नंशस्त्रादिभिरक्षतमपिपुरुषंभूयोभूयःप्रलोभ्यदूरमाकृष्यशत्रुदस्युवश्यतापादनेनसर्वसंपन्नाशशस्त्रघातादिदुःखपर्यवसायिनीविप्रलंभेन जृंभते ॥ यथासर्पशिरोमणिनाभास्वरमंधकोटरंसांधकारश्वभ्रमंतरदृष्टसर्पस्फुरितरत्नेहंपुरुषंस्वांतःप्रवेश्यसर्पदंशादिविप्रलंभेनजृंभतेतद्वत् ॥ इवार्थेवाशब्दाः ॥ रंभेहमितिपाठे अंतःप्ररूढसफलकदलीकंतादृशश्वभ्रंदृष्टांतः ॥ १४ ॥ चेतश्चित्तमप्याशासहस्रकल्लोलैःकलिलमस्वच्छंसर्वतःप्रधावनेप्यर्थशून्यमतएवशुष्काब्धिरिवदुष्पूरत्वाद्दुर्भगमतएव चित्तपरवशमिंद्रियार्थैकपरंमांविवेकिनोनस्पृशंतिउपेक्षंते ॥ १५ ॥ तत्रदृष्टांतमाह ॥ सकंटकमिति ॥ मनोपिविमर्शेअसदेव महांतःकर्मारंभायस्मात्तथाविधम् ॥ अर्जुनवा तोवातरोगविशेषःसदैवभ्रमणकारीयथादेहेचलतितद्वत् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुशोमृतेपिमयिमरणमप्राप्तमभिलषितार्थशून्यंदुःखायैववल्गतिधावति ॥ ननुशास्त्रसज्जनसंपर्काद्युपायैर्मनोनिगृह्यतामितिचेद्यावज्ज्ञानफलविवेकार्कोदयेनाज्ञानयामिनीन क्षीणातावच्छास्त्रसज्जनसंपर्कादयश्चंद्रतारकवन्नात्यंतिकमनोभ्रमविनाशायक्षमंतइत्याशयेनाह ॥ शास्त्रेतिद्वाभ्याम् ॥ १७ ॥ अहंभावएवउल्लसन्बालकल्पितयक्षोयस्याम ॥ १८ ॥ १९ ॥ २० ॥ सेवादिनावशीकृतैःप्राज्ञैरुपायैर्यानाश्रितासापिमेअदृष्टिर्दृष्टिविघातइवांध्यायसंपन्नेत्यन्वयः ॥ एवंवर्णितरीत्यासर्वतोप्यनर्थप्रसक्त्याअतिसंमोहेम ग्रस्यममतदुत्तरणायउदर्केश्रेयसेमोक्षायचयत्कार्यंतत्कथयेतिसंबंधः ॥ २१ ॥ हेभगवन्शरदिशरत्कालेइवनिर्मलस्वच्छज्ञानविवेकादिज्योतिर्गणमंडितेसाधौगुरौप्राप्तेसति आकाशस्येवशिष्यस्यमोहलक्षणामिहिकाःशाम्यंति ॥ अखिलाआशादिशइवमनोरथाश्चविमलानिरस्तरागादिरजोमलाभवंतिइतिलोकेप्रसिद्धासाधुजनैरुपगीतावाकूभ वताकृतेनमदीयभवशांतिदिनमद्बोधनेनसत्याअबाधितार्थाभवत्वितिप्रार्थना ॥ २२ ॥ ॥ इतिश्रीवासिष्ठ० म० रा० तात्पर्यप्रकाशेनि० प्रकरणेउत्तरार्द्धेचतुर्विंशःसर्गः ॥ २४ ॥

मनोमरणमप्राप्तंशून्यंदुःखायवल्गति ॥ शास्त्रसज्जनसंपर्कचंद्रतारकधारिणी ॥ १७ ॥ अहंभावोल्लसद्यक्षाक्षीणानाज्ञानयामिनी ॥ अज्ञानध्वांतमत्तेभसिंहःकर्मतृणानलः ॥ १८ ॥ उदितोनविकारार्कोवासनारजनीक्षयः ॥ अवस्तुवस्तुवद्बुद्धंमत्तश्चित्तमतंगजः ॥ १९ ॥ इंद्रियाणिनिकृंततिनजानेकिंभविष्यति ॥ शास्त्रदृष्टिरपिप्राज्ञैर्नाश्रितातरणाययां ॥ २० ॥ साप्यदृष्टिरिवांध्यायवासनावेशकारिणी ॥ तदेवमतिसंमोहेयत्कार्यमिहदारुणे ॥ उदर्कश्रेयसेतातत्तन्मेकथयपृच्छते ॥ २१ ॥ शाम्यंतिमोहमिहिकाःशरदीवसाधौप्राप्तेभवंतिवि मलाश्चतथाखिलाशाः ॥ सत्येतिवाग्भवतुसाधुजनोपगीतामद्बोधनेनभवताभवशांतिदिन ॥ २२ ॥ ॥ इ० वा० महारामायणे वा० दे० मो० नि० उ० मंक्यु० मंकिवैराग्यंनामचतुर्विंशतितमःसर्गः ॥ २४ ॥ ॥ ७५ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ संवेदनंभावनं चवासनाकलनेतिच ॥ अनर्थायेहशब्दार्थोविगतार्थोविजृंभते ॥ १ ॥ वेदनंभावनंविद्धिसर्वदोषसमाश्रयम् ॥ तस्मिन्नेवापदःसंतिल तामधुरसेयथा ॥ २ ॥ संसारमार्गेगहनेवासनावेशवाहिनः ॥ उपयातिविचित्रौघैर्वृत्तवृत्तांतसंततिः ॥ ३ ॥ विवेकिनोवासनयासहस्रं सारसंभ्रमः ॥ क्षीयतेमाधवस्यांतेशनैरिवधरारसः ॥ ४ ॥

संवेदनाद्यविद्योत्थंबंधबीजचतुष्टयम् ॥ परमात्मनिविद्याचतन्निहंत्र्यत्रवर्ण्यते ॥ १ ॥ एवंमंकिनास्वसंसारानर्थमुपवर्ण्यतन्निरासोपायेपृष्टेतद्बीजान्यपरिज्ञायतन्निरसनोपाया नसंपादयितुंशक्याइतितद्बीजचतुष्टयमुपपादयितुमुपदिशति ॥ संवेदनमिति ॥ प्रथमर्मिद्रियैर्विषयोपभोगलक्षणंसंवेदनमपगतेविषयेतद्गुणानुसंधानेनपुनःपुनर्भावनंतेनतदाकार लांछनरूपाचित्तेदृढवासनातयाचमरणादिकालेपिभाविदेहाद्यारंभानुकूलाकलनातत्स्मृतिरितिचतुर्विधइहसंसारेअनर्थायसर्वानर्थबीजभूतोमिथ्याभूतार्थगोचरत्वात्स्वयंमि थ्याभूतत्वाच्चविगतार्थःशब्दार्थःपदार्थोऽविद्ययाविजृंभतेइत्यर्थः ॥ १ ॥ तत्राद्ययोरत्यंतमनर्थताअंत्ययोस्तुतत्पृष्ठभावेनेत्याशयेनाह ॥ वेदनमिति ॥ तत्रापिभावनंमहाननर्थ इत्याशयेनाह ॥ तस्मिन्निति ॥ यथापुष्पपल्लवादिसमृद्धालतामधुमासप्रवर्त्तितेतद्रसेसंतितत्परिणामत्वाल्लतासर्वस्वस्यतद्वदित्यर्थः ॥ २ ॥ ३ ॥ अतएवविवेकिनोविषयदोष भावनयाब्रह्मभावनयाचतत्क्षयेवासनयासहसर्वोपिसंसारःक्षीयतइत्याह ॥ विवेकिनइति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरसंसारस्यतुवासनैवप्रवर्त्तिकेत्याह ॥ अस्याइति ॥ सल्लकीसकंटकगुल्मविशेषः ॥ ५ ॥ चितौअज्ञानाश्रयजीवचैतन्ये ॥ ६ ॥ परमार्थापलापहेतुंतदावरणमज्ञानंदर्श यितुंपरमार्थंप्रथममाह ॥ चिन्मात्रादिति ॥ शून्यादद्वयाच्चिन्मात्रादृतेचित्सत्तास्फूर्त्तिभ्यामेवजगत्सत्तास्फूर्त्योः सर्वानुभवसिद्धत्वादित्यर्थः ॥ स्वतःसत्तास्फूर्त्यातुनान्यत्किंचित्प्र सिद्धम् ॥ यथाखेशून्यत्वेतरदप्रसिद्धंतद्वदित्यर्थः ॥ ७ ॥ एवंसर्वतःसर्वदास्फुरन्नपिसचिन्मात्ररूपोवेदनात्मादेहेंद्रियादिभ्योन्योनास्तिनभातिचेत्यसत्वाभानापादिकायाऽस्थिरा अनादिःप्रतिभाभ्रांतिरेषैवावरणशक्तिप्राधान्येनाविद्याविक्षेपशक्तिप्राधान्येनभ्रमस्तदुभयफलरूपेणसंसारइत्यर्थः ॥ अविद्यामूलप्रसाधनफलंदर्शयति ॥ अनालोकनेति॥ ९॥ भेदकदृश्योपाधिबाधेसर्वदृष्टीनामैक्यंदर्शयति ॥ सर्वेति ॥ १० ॥ चिन्मात्रादमलाच्छून्यादृतेकिंचिन्नविद्यतेइतियदुक्तंतद्दृष्टांतैरुपपादयति ॥ मृन्मयमित्यादिना ॥ चिन्मयतया

अस्याःसंसारसल्लक्यावासनोत्सेधकारिणी ॥ कदल्यावनजालिन्यारसलेखेवमाधवी ॥ ५ ॥ संसारांध्यतयोदेतिवासनात्मारसश्चि तौ ॥ यथावनतयातरच्छौमधुमासरसःक्षितौ ॥ ६ ॥ चिन्मात्रादमलाच्छून्यादृतेकिंचिन्नविद्यते ॥ नान्यत्किंचिदपर्यंतेखेशून्यत्वेतरद्यथा ॥ ७ ॥ वेदनात्मानसोस्त्यन्यइतियाप्रतिभास्थिरा ॥ एषाविद्याभ्रमस्त्वेषसचसंसारआततः ॥ ८ ॥ अनालोकनसंसिद्धआलोकेनैवन श्यति ॥ असदात्मासदाभासोबालवेतालवत्क्षणात् ॥ ९ ॥ सर्वदृश्यदृशोबाधेबोधसारतयैकताम् ॥ यांत्यशेषमहीपीठसरित्पूराइवार्ण वे ॥ १० ॥ मृन्मयंतुयथाभांडंमृच्छून्यंनोपलभ्यते ॥ चिन्मयादितयाचेत्यंचिच्छून्यंनोपलभ्यते ॥ ११ ॥ बोधावबुद्धंयद्वस्तुबोधएवतदु च्यते ॥ नाबोधंबुध्यतेबोधोवैरूप्यात्तेननान्यता ॥ १२ ॥ द्रष्टृदर्शनदृश्येषुप्रत्येकंबोधमात्रता ॥ सारस्तेनतदन्यत्वंनास्तिकिंचित्खपुष्प वत् ॥ १३ ॥ सजातीयःसजातीयेनैकतामनुगच्छति ॥ अन्योन्यानुभवस्तेनभवत्येकत्वनिश्चयः ॥ १४ ॥ यदिकाष्ठोपलादीनांनभवेद्बो धरूपता ॥ तत्सदानुपलंभःस्यादेतेषामसतामिव ॥ १५ ॥ यदात्वेषानुदृश्यश्रीर्बोधमात्रैकरूपिणी ॥ तदान्येवाप्यनन्यैवसतीबोधेनबो ध्यते ॥ १६ ॥ सर्वंजगद्गतंदृश्यंबोधमात्रमिदंततम् ॥ स्पंदमात्रंयथावायुर्जलमात्रंयथार्णवः ॥ १७ ॥

आदिपदात्सन्मयतयाच ॥ ११ ॥ चिन्मयतयास्फुरतोविमर्शैश्चिदेकरस्यमेवपर्यवस्यतीत्याशयेनाह ॥ बोधेति ॥ वैरूप्याद्विरुद्धरूपत्वात् ॥ बोधाभेदंविनास्फुरणासिद्धेरबोध स्यचबोधाभेदायोगादित्यर्थः ॥ १२ ॥ यदिद्रष्ट्रादित्रिपुट्याबोधेनाध्यासिकमभेदंब्रूयास्तर्हितस्याअनृतत्वादधिष्ठानबोधसारैकरस्यमेवसिद्धमित्याशयेनाह ॥ द्रष्टृति ॥ १३ ॥ परस्परमिलनेनाभेदापत्तिस्तुजलस्यजलेनेवसजातीयानामेवभवतीतिजगतस्तदनुभवमात्रत्वेअनुभवानामेकत्वेचिदेकत्वसिद्धांतएवपर्यवसन्नइत्याह ॥ सजातीयइति ॥ १४ ॥ काष्ठादीनांदृश्यानांस्फुरणाभेदानभ्युपगमेशशशृंगवदत्यंताभानमेवस्यादित्याह ॥ यदीति ॥ १५ ॥ सिद्धांतेतुनायंदोषइत्याह ॥ यदेति ॥ १६ ॥ तथाजगद्बोधमात्रंबोधान तिरिक्तस्फूर्त्तिकत्वाद्यद्यदनतिरिक्तस्फूर्तिकंतत्तन्मात्रंयथावायोःस्पंदइत्यनुमानंदर्शयति ॥ सर्वमिति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुदृष्टांतेक्रियाक्रियावतोरवयवावयविनोश्चसमवायेनमिश्रीभावमात्रंनत्वत्यंतैक्यमित्याशंक्यजतुकाष्ठयोर्बहिर्मिश्रणेपिविवेकानुभवेमिश्रणादर्शनादिहत्वनुभवेपितद्दर्शनेनवै
षम्यात्समवायासिद्धेरित्याशयेनाह ॥ मिश्रीभूताइति ॥ १८ ॥ अंभसोःक्षीरयोर्वाअन्योन्यात्मतानुभवोह्यैक्यम् ॥ दृग्दृश्यपदार्थयोरपितुतादृशमन्योन्यवेदनात्मकमैक्यमस्त्ये
वनतुजतुकाष्ठवत्संयोगमात्रमित्यर्थः ॥ १९ ॥ एवंसर्वदृश्यानांचिन्मात्रत्वेनतत्पदार्थचितोऽपरिच्छिन्नतयानित्यमुक्तत्वेसिद्धेत्वंपदार्थस्याहमितिपरिच्छिन्नबुद्धिरेवबंधायतत्त्या
गमात्रंमुक्तयेइतिफलितमित्याह ॥ अहमित्येवेति ॥ २० ॥ तदेवोपपादयति ॥ चंद्रेति ॥ असदहंकिमुत्थितः ॥ अनुत्थितएवेतियोज्यम् ॥ २१ ॥ अहंतात्यागेममताबंधःस्वत
एवापैतीत्याशयेनाह ममेति ॥ आत्मायत्तेस्वाधीने ॥ २२ ॥ असताअहंकारेणसत्यस्यात्मनःकुंडबदरन्यायेनांतःप्रवेशेनतिरोधानंवाघटाकाशन्यायेनपरिच्छेदोवानसंभाव्य
एवेत्याह ॥ यइति ॥ येनसंबंधेनतिरोधानमवच्छेदोवासिद्ध्येत्ससंबंधोप्यन्यमत्यंतभिन्नमहंकारंकल्पयतोनास्ति तस्माद्वास्तवैक्यमेवचंद्रद्वित्ववद्भेदेनाविद्ययाविकल्पितभेदरू
पस्यात्मनःस्वप्रकाशबलात्स्फुरणमन्योन्यवेदनमिवभवतीत्यर्थः ॥ २३ ॥ येतुजैमिनीयावास्तवमेवजडबोधयोरैक्यंतदेवात्मरूपमितिमन्यंतेतेषांतदैक्यंजाड्यांशगतंजडमेवबो

मिश्रीभूताअपिह्येतेजतुकाष्ठादयोयथा ॥ मिथोऽननुभवेमिश्राऐक्यंत्वनुभवेमिथः ॥ १८ ॥ अन्योन्यानुभवोह्यैक्यमैक्यंत्वन्योन्यवे
दनम् ॥ यथांभसोःक्षीरयोर्वानकाष्ठजतुनोरिव ॥ १९ ॥ अहमित्येवबंधायनाहमित्येवमुक्तये ॥ एतावन्मात्रकेबंधेस्वायत्तेकिमशक्त
ता ॥ २० ॥ चंद्रद्वयप्रत्ययवन्मृगतृष्णांबुबुद्धिवत् ॥ किमनुत्थितएवायमसदेवाहमुत्थितः ॥ २१ ॥ ममेदमितिबंधायनाहमित्येवमुक्तये ॥
एतावन्मात्रकेवस्तुन्यात्मायत्तेकिमज्ञता ॥ २२ ॥ यःकुंडबदरन्यायोयाघटकाशयोःस्थितिः ॥ ससंबंधोपिनैवान्यमैक्यंत्वन्योन्यवेदनम्
॥ २३ ॥ अन्योन्यावेदनंत्वैक्यंभागशोगतमप्यलम् ॥ अजडंवाजडंवापिनैकंरूपंविमुंचति ॥ २४ ॥ नाजडंजडतामेतिस्वभावात्ह्यनपा
यिनः ॥ यच्चाजडंजडंदृष्टंद्वैतितत्रास्तिनैकता ॥ २५ ॥ वासनावेशवलिताःकुविकारशतात्मभिः ॥ व्रजंत्यधोधोधावंतंशिलाःशैलच्युताइ
व ॥ २६ ॥ व्यूढानांवासनावातैर्नृतृणानामितस्ततः ॥ तान्यापतंतिदुःखानितत्रवक्तुंनपार्यते ॥ २७ ॥ भ्रांत्वाभृशंकरतलाहतकंदुकाभलो
काःपतंतिनिरयेषुरसेनरक्ताः ॥ क्लेशेनतत्रपरिजर्जरतांप्रयाताःकालांतरेणपुनरन्यनिभाभवंति ॥ २८ ॥ ॥ इ० वा० वा० दे० मो० नि०
उ० मं० मंकिबोधनंनामपंचविंशतितमःसर्गः ॥ २५ ॥

धांशगतमपजडमेवेत्येकमपिनमुंचतीतिजडांशेनस्फुरेदेवचिदंशेस्फुरदपिनि
विषयमेवेत्यन्योन्यावेदनमेवतदैक्यंस्यादित्यर्थः ॥ २४ ॥ कुतोनमुंचतितत्राह ॥ नेति ॥ हियस्मात्कारणादनपायिनएवधर्माःस्वभावाइत्युच्यंते ॥ यच्चत्वयाअजडमेवात्मरूपं
जडमित्यंशांतरतयादृष्टंतन्द्वैतिभिन्नमेव ॥ तत्रअजडैकतानास्त्येवेतिनजडबोधैक्यात्मसिद्धिरित्यर्थः ॥ १५ ॥ एवंचेत्कथमात्मत्ववादिनोनानाविधंपरस्परविरुद्धंवदंतितत्राह॥
वासनावेशेति ॥ कुविकारशतात्मभिःस्वस्ववासनाभिरावेशैरभिमानैश्चवलितावेष्टिताःपराग्दृष्ट्यैवतत्त्वंपरीक्षमाणाअधोधोव्रजंतीत्यर्थः ॥ २६ ॥ अतएवश्रौतदृष्टिपरिभ्रष्टा
नांस्वस्ववासनावातैर्व्यूढानामितस्ततोनीतानांनृतृणानांतानिनानायोनिजन्ममरणनरकादिलोकशास्त्रप्रसिद्धानिदुःखान्यापतंति ॥ २७ ॥ तदेववर्णयन्नुपसंहरति ॥ भ्रांत्वेति ॥
वासनाभिमानानुसारिरागादिरसेनरक्तालोकाजनानारीकरतलाहतकंदुकमिवभृशंभ्रांत्वानिरयेषुपतंति ॥ तत्रचिरंयातनाःक्लेशेनपरितोजर्जरतांप्रयाताःकालांतरेपिस्थावरकृ
मिकीटादिजन्मभिरन्यनिभाअन्यसदृशाएवभवंतिपुनर्मानुष्यंदुर्लभमित्यर्थः ॥ २८ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेपंचविंशःसर्गः ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इहप्रपंच्यतेऽनर्थोभावनाद्रसरंजनात् ॥ तच्छांत्यानर्थसंशांतिर्विवेकात्तत्त्वदर्शनात् ॥ १ ॥ एवंस्थावरादियोनिलक्षणेसंसारमार्गेपतितस्यजीवस्यानादिसंसारेबहुशोवृत्तानिच्छेदनभेदनदहनक्षुत्तृड्जराभयमरणादिरूपाणिवृत्तांतलक्षाणिपुनरप्यापतंतिहि ॥ १ ॥ तत्रचभावनैवमूलमित्याशयेनाह ॥ सर्वइति ॥ शृंखलावत्परस्परग्रथनहेतुः ॥ २ ॥ तस्याश्चमूलंविवेकांधरागद्वेषादिरसरंजितंपूर्ववृत्तांतवासनानिबिडितंचित्तमित्याशयेनाह ॥ चित्तमिति ॥ रसोरागादिभिर्मिश्च ॥ ३ ॥ ४ ॥ अविद्यमानैर्मिथ्याभूतैरेवत्रिपुटीरूपैरर्थैः ॥५ ॥ अतएवतीर्णभ्रमास्तत्त्वविदःसुखिनइतितान्प्रशंसति ॥ आह्लादिनइति ॥ विशेषणान्यत्राग्रिमश्लोकयोश्चोभयत्रतुल्यानियोज्यानि ॥ ६॥ अविवेकिनस्तुनिंदति ॥

श्रीवसिष्ठउवाच॥ ॥संसारमार्गगहनेपतितस्यापतंतिहि॥ वृत्तवृत्तांतलक्षाणिकीटाइवघनागमे ॥ १ ॥ सर्वएवत्विमेभावाःपरस्परमसंगिनः॥ अटव्यामुपलानीवभावनैतेषुशृंखला ॥ २ ॥ चित्तमांध्यायवृत्तांतद्रुमैर्गहनवत्स्थितम्॥ रसरंजनयालोकेवसंतइवकाननम्॥ ३ ॥ अहोबतविचित्राणिवासनावशतोवशैः ॥ भूतकैरनुभूयंतेसुखदुःखानिजन्मसु ॥ ४॥ अहोबतातिविषमावासनायद्दशाज्ज्ञनैः॥ अविद्यमानैरेवायंभ्रमोंतरनुभूयते ॥ ५ ॥ आह्लादिनोमृतवतःशुद्धस्यालोककारिणः॥ शीतलस्याखिलार्थेषुज्ञस्येंदोश्चकिमंतरम्॥६॥पूर्वापरमनालोच्ययत्किंचिदभिवांछतः॥निर्मर्यादस्यमूढस्यबालस्यचकिमंतरम् ॥७॥लब्धमाप्राणपर्यंतंशुभाशुभमनुज्झतोः॥ आमिषंकोविशेषोस्तिवदमाकरमूढयोः॥८॥ सर्वएवत्विमेभावादेहदारधनादयः॥क्षिप्रमाशुष्कसिकताशरावविशरारवः॥९॥ आब्रह्मस्तंबपर्यंतमपियोनिशतेषुते॥आकल्पंभ्रमतश्चित्तशांतिर्नास्तिशमादृते॥१०॥पर्यालोचनमात्रेणबंधगंधोनबाधते॥गच्छतोमार्गवैषम्यमिवालोकनकारिणः॥ ११ ॥ तवनावहितंचित्तंकामःकवलयिष्यति॥ सावधानस्यबुद्धस्यपिशाचःकिंकरिष्यति॥ १२ ॥ यथेक्षणप्रसरणंरूपालोकनमात्रकम्॥ संवित्प्रसृतिमात्रात्मतथासाहंजगत्स्थितम् ॥ १३ ॥ यथाक्षिसंवृतिःसर्वरूपालोकशमोरिह न॥ संवित्संवरणंनामसर्वदृश्यशमस्तथा॥१४॥ असदेवजगत्साहंशुद्धासंवित्तनोतिखे॥ ईषत्प्रसरणेनाशुस्पंदनंपवनोयथा॥१५॥

पूर्वापरमिति ॥७॥ आमिषंविषयंबडिशामिषंचप्राणानांपर्यंतोमरणंतदवधिअनुज्झतोरत्यजतोः॥ मकरएवमाकरोमत्स्यजात्युपलक्षणमेतत् ॥८॥ आशुष्कसिकतानिर्मितशरावइवविशरारवोनश्वराः ॥ ९ ॥ इदानींश्रोतृचित्तमेवसंबोध्याह ॥आब्रह्मेति ॥ १० ॥ पर्यालोचनंविवेकस्तन्मात्रेण ॥ आलोकनंस्वपादन्यासप्रदेशावलोकनंतत्कारिणः ॥ ११ ॥ अवहितंसविवेकावधानम ॥ बुद्धस्यजागरूकस्य ॥ १२ ॥ साहंकारंजगत्निर्विवेकावधानसंवित्प्रसरमात्रमित्याह ॥ यथेति ॥ यथारूपालोकनमात्रकमेवेक्षणस्यचक्षुषःप्रसरणंनतद्भिन्नंकिंचित्प्रसिद्धंतद्वत् ॥ १३ ॥ हेकामाद्यरिषड्वर्गहन् बहिर्मुखसंविदःप्रत्यक्प्रवणवृत्त्यासंवरणंस्वात्मन्युपरमः ॥ १४ ॥ साहमहंकारसहितंजगत्शुद्धासंविदेवअविवेकप्रयुक्तेनेषत्प्रसरणेनखेआवृतस्वस्वरूपाकाशेतनोति ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मसंवित्परमार्थतोन्यमकुर्वत्येवासत्यमेवसदिवेदंजगद्रूपमेधतेजृंभते ॥ कथमसत्यमितिज्ञायतेतत्राह ॥ मृदेति ॥ यथामृदाहेम्नावाआत्मगंस्वात्मनिकल्पितंकुंभत्वमपृथग्लभ्यं पृथक्कृत्यलब्धुमशक्यंतथेदंजगदपिचितःपृथक्कृत्यलब्धुमशक्यंयदिसत्यंस्यात्पृथक्लभ्येतेतिभावः ॥१६॥ यद्यदपृथग्लभ्यंतत्तत्पृथक्सत्ताशून्यमितिहिमादौव्याप्तिंदर्शयति॥शून्यमात्रमिति ॥ १७ ॥ अव्यवच्छिन्नेतिसजातीयभेदनिरासः ॥ निर्भागेतिस्वगतभेदनिरासः ॥ वारिणिप्रतिबिंबितंपर्वतंपर्वतसदृशंबृहत्तरंगंवा ॥ १८ ॥ इत्थंजगत्तत्वंजानतो नसांसारिकतापप्रसक्तिरित्याशयेनाह ॥ निर्वाणस्येति ॥ सासर्वोत्कृष्टाशीततासर्वतापोपशांत्युपलक्षिताह्लादता ॥ यत्रयदृष्ट्येतियावत् ॥१९॥तत्रप्रकाशांतरप्रसक्तिरपिनास्तीत्याह ॥ किमिति ॥ जगतिशिवेशून्येसतिअपरालोकःकिंस्वरूपःकेनसाधनेनकयाचक्रिययाजन्यतइत्यर्थः ॥ २० ॥ तदेवसर्ववस्तूनामबाध्यंस्वरूपमित्याह ॥ येति ॥ २१ ॥ बाध्यंस्वरूपंतर्हिकिंतत्राह ॥ यदिति ॥ पदार्थत्वंनामरूपभावः ॥ तच्चतस्यबाधनंचाद्यच्चतस्योत्पत्त्यादिविकारषट्कंतत्सर्वंप्रेक्ष्यसम्यग्विमृश्यापिनविघ्नः ॥ यतस्तत्खपुष्पवत्तुच्छ

सदिवासत्यमेवेदमकुर्वत्यन्यमेधते॥मृदाहेम्नेवकुंभत्वमपृथग्लभ्यमात्मगम्॥१६॥शून्यमात्रंयथाव्योमस्पंदमात्रंयथानिलः॥जलमात्रं यथोर्म्यादिसंविन्मात्रंतथाजगत्॥१७॥अव्यवच्छिन्ननिर्भागसंविन्मात्रंजगत्त्रयम्॥विद्धिशांतंतथाव्योमयथावारिणिपर्वतम्॥१८॥ निर्वाणस्योपशांतस्यज्ञस्यसोदेतिशीतता॥ अंतर्यत्रेंदवोप्येतेदीप्तज्वलनबिंदवः ॥ १९ ॥ किंकेनकथमेकांतशांताततशिवात्मनि ॥ निरालोकोपरालोकःशून्येजगतिजन्यते ॥ २० ॥ यासत्ताब्रह्मशब्दाख्यारूपंसर्वस्यतन्निजम् ॥ नयत्रकाचिद्बाधास्तिसर्वंतन्मयमव्ययम्॥ २१ ॥ यदिदंतुपदार्थत्वंयत्रबाधानुभूयते ॥ यद्यच्चबाधनंप्रेक्ष्यतन्नविघ्नःखपुष्पवत् ॥ २२ ॥ ज्ञएवापगतस्वांतंशांतमास्वमहाश्मवत्॥ असौनमननंमानमनंतमजमव्ययम्॥२३॥ आकाशकल्पेस्वेभावेतिष्ठतोंगानिवेदनम्॥ भवत्यभ्यासदार्ढ्येनविनास्वप्नविकारवत्॥ २४॥ निरुपादानसंभारमभित्तावेवचेतति॥ब्राह्मंकर्तृजगच्चित्रंनकश्चिद्वानकिंचन॥ २५ ॥ तनोतियत्तदात्मैवतस्यतत्रतथास्थितम्॥ दृश्याभावादसद्दृश्यंतेनकःक्ककरोतिकिम् ॥ २६॥ अहंसुखीतिसुखिताअहंदुःखीतिदुःखिता॥ सर्वएवस्वरूपस्थाव्योमात्मानोपिपार्थिवाः॥ २७॥

मेवेत्यर्थः ॥ २२ ॥ तच्चरूपंमनोविकल्पितंमनोपगमेऽपैतीतिशांतमास्वेत्याह ॥ ज्ञएवेति ॥ स्वांतापगमेनज्ञोप्यपगमिष्यत्येवेतिकथंज्ञएवास्वेत्युच्यतेतत्राह ॥ असाविति ॥ मनोपगमेहिनामरूपात्मकंमननंविकल्पनंतन्मानंचक्षुरादिचाऽपगच्छेत्असौज्ञस्तुनतथाकिंत्वनंतमजमव्ययंब्रह्मैवेतिनापगच्छतीत्यर्थः ॥ २३ ॥ हेअंगआकाशकल्पेस्वेआत्मभावेमनोबाधेनतिष्ठतोज्ञस्यनामरूपयोरनिवेदनमप्रतीतिरेवभवति यतस्तत्स्वरूपावस्थित्यभ्यासदार्ढ्याभावादेवस्वप्नविकारवन्मनस्युदेतीत्यर्थः ॥२४॥ मनोविकल्पमात्रंजगदितिकथंज्ञायतेतत्राह ॥ निरुपादानेति ॥ यतोब्राह्मंहैरण्यगर्भंमनएवजगतःकर्तृनिर्मातृतच्चनिरुपादानसंभारंनिरस्तरंजकद्रव्यतूलिकाकूर्चादिसामग्रीकमेवजगच्चित्रमभित्तौनिराश्रयएवसंकल्पमात्रेणचेततिपश्यतिनकश्चिद्वामनोतिरिक्तःकर्त्तानकिंचनकार्यंचमानसेस्वप्नादौदृष्टमित्यर्थः ॥२५॥ तच्चमनोयत्तनोतिविस्तारयतितत्रसर्वत्रमनोराज्यादाविवआत्मास्वयमेवतथातत्तद्वस्त्वाभासात्मनास्थितम् ॥ इत्थंस्वातिरिक्तदृश्याभावात्केनकःक्किंककरोतिनकश्चित्केनचित्क्कचित्किंचिदित्यर्थः ॥२६॥ इत्थंचसुखदुःखेतत्साधनीभूताःपार्थिवाादिविषयाश्चकल्पनोपरमेशून्यरूपाआत्मरूपावासंपन्नाइत्याह ॥ अहमिति ॥२७

निरालोकः आलोकशून्यः अपरालोकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्थिवानामप्यपार्थिवतास्वप्नशैलवत्संभावनीयेत्याह ॥ सर्वेषामिति ॥२८॥ एवंचसतियत्फलितंतदाह ॥ अहंत्वोल्लेखतइत्यादिना ॥२९॥३०॥३१॥ निर्वासनत्वादेवअस्पंदपरःस्पंदाभिमानशून्यः ॥ यंत्रनिर्मितशिलादिप्रतिमाशरीरवत् ॥३२॥ देहस्पंददशायामेवतदस्पंदसंभावनायदृष्टांतमाह ॥ यथेति ॥ स्पंदमानदोलामंचकेसुप्तस्यशिशोरंगानिनैवस्पंदंतेतद्वत्संभावनीयमित्यर्थः ॥३३॥ ननुतस्यस्वरूपज्ञानमेवदेहाद्यनुसंधानंकिंनस्यात्तत्राह॥निःसंबोधेति॥ निःसंबोधोबहिर्मुखचित्तवृत्तिस्तच्छून्याखंडबोधरूपस्य ॥ चिरप्राप्येविषयेआशाप्राप्तविषयेस्नेहएषणामनोरथैराशासनमाशीरितिभेदः ॥३४॥ द्रष्ट्रादित्रिपुटीबाधादपितस्यनानुसंधानतेत्याह ॥ अद्रष्टुरिति ॥ स्वयंचापरूपिणोनिराकार

सर्वेषामेवभावानांचिदाकाशात्मनामपि ॥ मिथ्यैवस्वप्नशीलानामिवपार्थिवतास्थिता ॥ २८ ॥ अहंत्वोल्लेखतःसत्ताभ्रमभावविकारिणी ॥ तदभावात्स्वभावैकनिष्ठताशमशालिनी ॥ २९ ॥ हेम्नःकटकशब्दार्थोव्यतिरिक्तोयथास्तिते ॥ व्यतिरिक्तातथासत्यानाहंतास्तिशमात्मनः ॥ ३० ॥ निर्वाणोनिर्मनामौनीकर्त्ताऽकर्त्ताचशीतलः ॥ ज्ञएवशांतएवास्तेशून्यएवाभिपूरितः ॥ ३१ ॥ निर्वासनास्पंदपरोयंत्रपुत्रकगात्रवत् ॥ सयथास्थितमेवास्तेज्ञःसंव्यवहरन्नपि ॥ ३२ ॥ यथामंचकसंस्थस्यस्पंदंतेनैववाशिशोः ॥ अंगानिस्वानुसंधानंविनैवंविदितात्मनः ॥ ३३ ॥ निःसंबोधैकबोधस्यनिराशेहैषणाशिषः ॥ शांतानंतात्मरूपत्वादनुसंधानताकुतः ॥ ३४ ॥ अद्रष्टुरपदृश्यस्याद्दग्रूपस्यापरूपिणः ॥ कुतःकिलानुसंधानमनपेक्षस्यपश्यतः ॥३५॥ अपेक्षैवघनोबंधउपेक्षैवविमुक्तता ॥ सर्वशब्दान्वितातस्यांविश्रांतेनकिमीक्ष्यते ॥ ३६ ॥ पार्थिवत्वेशरीरेस्मिन्स्वस्वप्नांगइवासति ॥ भ्रममात्रात्मनिकुतःक्वकस्यकिमपेक्षणम् ॥ ३७ ॥ उपशांतसमस्तेहंविगताखिलकौतुकम् ॥ निरस्तवेदनंज्ञेनविदाकेवलमास्यते ॥ ३८ ॥ मंकिनेतिश्रुतवतातत्तोमोहोमहानपि ॥ अशेषेणपरित्यक्तस्तत्रैवत्वगिवाहिना ॥ ३९ ॥ प्रवाहापतितंकार्यंकुर्वतापास्तवासनम् ॥ तेनवर्षशतस्यांतेस्थितमद्रौसमाधिना ॥ ४० ॥ तत्राद्ययावत्पाषाणसमधर्मासतिष्ठति ॥ संशांतकरणोयोगीबोध्यमानःप्रबुध्यते ॥ ४१ ॥ एतेनराघवविवेकपदेनशांतिमासादयोदयवतामनसाविहर्तुं ॥ मादीनतांव्रजतुरागमयीमतिस्तेक्षीणाक्षणादसलिलेवशरद्वनाली ॥ ४२ ॥ ॥ इत्यार्षेवा० वा० दे० मोक्षोपायेषुनिर्वाणप्रकरणेउत्तरार्द्धेमंक्युपा० मंकिनिर्वाणसंमाप्तिर्नामषड्विंशःसर्गः ॥ २६ ॥

स्य ॥ ३५ ॥ सर्वशब्दान्विताउपेक्षासर्वोपेक्षैवविमुक्तेत्यर्थः ॥ तस्यांपूर्णकामतायांविश्रांतेनकिमीक्ष्यतेअपेक्ष्यते ॥ ईप्स्यतेइतिपाठःसाधुः ॥ ३६ ॥ शरीरार्थंहिसर्वोप्यपेक्षते ॥ तस्यस्वाप्नशरीरादिवद्बाधेसतिनकस्यचिदपेक्षाप्रसक्तिरित्यर्थः ॥ ३७ ॥ उपसंहरति ॥ उपशांतेति ॥ ३८ ॥ मुख्याधिकारित्वान्मंकिनःसकृच्छ्रवणमात्रेणमोहनिवृत्तिमाह ॥ मंकिनेति ॥ ३९ ॥ ४० ॥ ४१ ॥ हेराघवत्वमेतेनमंकिपरिगृहीतोपायेनज्ञानेऽभ्युदयवतामनसाविवेकपदेनस्वात्मानंदेविहर्तुंशांतिमासादय ॥ तेमतिःरागमयीसतीअसलिलाशरद्वनावलीवक्षणात्क्षीणविवेकाभूत्वादीनतांमाव्रजत्वित्यर्थः ॥ ४२ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेषड्विंशःसर्गः ॥ २६ ॥ ॥ ७ ॥

१ सम्यगाप्तिःसमाप्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्तस्पंदेचितःस्पंदभ्रमाद्विश्वविभूतयः ॥ चित्तशांत्यैवतच्छांत्यास्वरूपस्थितिरीर्यते ॥ १ ॥ स्फटिकान्निर्मितःप्रतिमापुरुषोयथासन्नपिदृष्टिप्रसरानिरोधित्वादसत्समस्तद्वत्स्वा
त्माद्वैतदृष्टिप्रसरानिरोधित्वादसत्समः ॥ १ ॥ प्रबोधात्प्रागेकस्मिन्नेवसर्वात्मतयास्थितेप्रबोधेतुनैकस्मिन्नचसर्वस्मिन् ॥ व्यष्टिसमष्टिभावबाधादितिभावः ॥ २ ॥ ननुप्रतिशरी
रमुत्पत्तिनाशाभ्यांसमवितस्तिपरिमाणेनचपरिच्छेदानुभवान्नानैवास्तुनेत्याह ॥ आद्यंतेति ॥ ३ ॥ जडसर्गादिरूपाःक्रीडाः ॥ चिच्चमत्कारोमनस्तच्चापलात् ॥ ४ ॥ वस्त्रशंका
वस्त्रत्वोत्प्रेक्षानपरमार्थावधारणफलभागिनीतद्वत् ॥ शंकाभ्रांतिः ॥ ५ ॥ अवस्तुनिमिथ्याभूतेदेहादावहंभावनिमग्नोमाभव ॥ भूनयेमुक्तये ॥ ६ ॥ किंतद्वस्तुयद्भावनंकार्यंतदा
ह ॥ चिद्व्योमेति ॥ तादृशवस्तुतत्परंतेमनोस्त्वित्यर्थः ॥ ७ ॥ तस्यकिंफलंतदाह ॥ एवमिति ॥ नचायनिश्चयोऽनिश्चयोध्यानध्यात्रादित्रिपुटीबाधकत्वादित्याशंक्यतस्याबा
ध्यत्वमेवयुक्तमित्याशयेनाह ॥ ध्यातेति ॥ कुतस्तस्याबाध्यत्वंतत्राह ॥ सत्यंचेति ॥ यतोध्यात्रादित्रयेकिंचिदपिसत्यंनेत्यर्थः ॥ ८ ॥ तर्हिदर्शनादित्रिपुट्याअपितत्सामान्या

॥श्रीवसिष्ठउवाच॥ ॥निर्वाणोभवशांतात्मायथाप्राप्तानुवृत्तिमान्॥ सन्नेवासत्समःसौम्यस्फटिकादिवनिर्मितः॥ १ ॥ एकस्मि
न्नेवसर्वस्मिन्संस्थितेविततात्मनि॥ नैकस्मिन्नचसर्वस्मिन्नानाताकलनाकुतः॥ २ ॥ आद्यंतरहितंसर्वंव्योमचित्तत्त्वनिर्भरम्॥ शरी
रोत्पत्तिनाशेषुकाचित्तत्त्वस्यखंडना॥ ३ ॥ स्फुरंतिहिजडक्रीडाश्चिच्चमत्कारचापलात्॥ अचापलात्प्रतीयंतेतरंगाइववारिणि ॥ ४ ॥ य
थाशुभ्रांबुदेवस्त्रशंकानफलभागिनी॥ देहोयमहमित्येषातथाशंकानवास्तवी ॥ ५ ॥ मावस्तुनिनिमग्नस्त्वंभवभूरिभवप्रदे॥ वस्त्वनं
तसुखायाद्यंभव्यंभावयभूतये॥ ६ ॥ चिद्व्योमानंतमेवास्मिन्नेयत्तास्तिसमात्मनः॥ इत्येवपरमंवस्तुवस्तुतत्परमस्तुते ॥ ७ ॥ एवंनिश्च
यवान्नात्मत्वमेवासिनिरंजनः॥ ध्याताध्येयंतथाध्यानंसत्यंचापिनकिंचन ॥ ८ ॥ द्रष्टादृश्यंदर्शनंचचितएवविभूतयः॥ अतत्त्वसंविदो
नान्यद्ध्यानंध्येयमस्तिच ॥ ९ ॥ उद्यतिप्रतिपच्चंद्रेवहतिप्रलयानिले॥ आत्मतत्त्वंसमंसौम्यंनक्षुभ्यतिनशाम्यति॥ १० ॥ यथानौयायि
नःस्थाणुतरुशैलादिवेपनम्॥ यथाशुक्तौरजतधीस्तथादेहादिचेतसः ॥ ११ ॥ यथादेहादिचित्तस्यतथादेहस्यचित्तकम्॥ तथैवजीवः
परमेपदेद्वैतमतःकुतः॥ १२ ॥ सर्वमेकमिदंशांतंब्रह्मबृंहितवेदनात्॥ नकिंचिज्जगदाद्यस्तिभ्रांतिरन्यानविद्यते॥ १३ ॥

त्कथंतद्बाधकत्वमित्याशंक्यविशेषमाह ॥ द्रष्टेति ॥ दर्शनंहिप्रमाणजन्यंवस्तुतंत्रमेवनपुरुषतंत्रमितितद्व्यभिव्यक्तपरमार्थचित्प्राधान्यादज्ञाननिवर्त्तकत्वाच्चपरमार्थचितएव
विभूतयोद्रष्ट्रादयः ॥ ध्यानंतुनप्रमाणजंनापिवस्तुतंत्रंपुरुषेच्छानुसारिचेतिक्रियाविशेषमात्रत्वादविद्याविभूतयएवध्यात्रादयइतिबाध्याइत्यर्थः ॥ विशेषांतरमप्याह ॥ अत
दिति ॥ अतत्असंवित्जडवस्तुसर्वंतत्संविदोऽन्यत्पृथग्भूतंनदृष्टमतोदृश्यंदर्शनानुसार्येव ध्येयंतुअध्यानंविनापिध्यानंअस्तिस्फुरतिचेतिनवस्तुनोध्यानानुसारितेतिविशेषइत्य
र्थः ॥ ९ ॥ संविदस्तुनिर्विकारत्वंसर्वतोविशेषइत्याह ॥ उद्यतीति ॥ यथासमुद्रःप्रतिपच्चंद्रेउद्यतिसतिक्षुभ्यतिप्रलयानिलेवहतिशुष्यतिचनतथाआत्मतत्त्वमित्यर्थः ॥ १० ॥
तर्हितस्याद्रष्ट्रादित्रिपुटीकथंविभूतिरितिचेद्विवर्त्ततयैवेत्याशयेनाह ॥ यथेति ॥ चितिचेतसोदृष्ट्याभ्रमइत्यर्थः ॥ ११ ॥ एवंदेहदृष्ट्याचित्तमपिकल्पितम् तदुभयदृष्ट्याजीवः
कल्पितस्तदृष्ट्यातदुभयंकल्पितमितिशुद्धचितिविवर्त्ताःसर्वेइत्याह ॥ यथेति ॥ १२ ॥ ब्रह्मदृष्ट्यातुतदेवैकमित्याह ॥ सर्वमिति ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेतसितत्त्वदृष्टौ ॥ १४ ॥ बिभीहिभयंप्रामुहि ॥ १५ ॥ जगदेवास्तिअद्वितीयब्रह्मसत्तानास्तीतियाभ्रांतिस्तवासीत्सा ॥ १६ ॥ १७ ॥ हेरामत्वंसौम्यान्मदुपदेशादहंभावरूप याविद्याविमुक्तःसनूसंपत्सुशांतैषणाहर्षसंविदापत्सुचशांतविषादसंवित्सनूभवाभवेषुविभवानामुत्कर्षापकर्षेषुयथास्थितंसमंतिष्ठमदुपदेशविस्मरणेनविलीयस्वरूपस्थितिदार्ढ्यं विहायमाआस्व ॥ १८ ॥ तत्किंतत्त्वज्ञानोत्तरंप्रमादात्प्रारब्धप्राबल्याद्वाहर्षशोकानुवृत्त्यपराधेनपुनर्बंधोभविष्यतिनेत्याह ॥ यथास्थितमिति ॥ हेस्वकुलांबरेंदोरामत्वंयथा स्थितंब्रह्मात्मैक्यवस्तुअपरोक्षतयासम्यगधिगम्यस्थितोसिचेत्तर्हिहर्षशोकेषणालक्षणानिदूषणानिचित्तसंतापकानिविमुच्यवातिष्ठयथेच्छंवातान्यनुवर्त्तमानआस्वेतिप्राक्त नवाशब्दस्यात्रान्वयः ॥ त्वदृष्टसुखार्थंमयाविलीयमास्वेत्युक्तंननुतावतामुक्तौसंदेहइतिभावः ॥ १९ ॥ ॥ इतिश्रीवासिष्ठ० म० रा० तात्पर्यप्रकाशेनिर्वाण० उ० सप्तविंशति तमःसर्गः ॥ २७ ॥ ॥ ६ ॥ ॥ बीजांकुराणांपुरुषकर्मणांजन्मकारिणाम् ॥ दैवशब्दार्थयुक्तानांतत्त्वंभूयोत्रवर्ण्यते ॥ १ ॥ बीजानामुपादानानामंकुराणामुपादेयानांपुरु

नविद्यतेयथाव्योम्निवनंस्नेहश्चसैकते ॥ विद्युच्छशांकर्बिंबेचतथादेहादिचेतसि ॥ १४ ॥ अविद्यमानएवास्मिन्माबिभीहिजगद्भ्रमे ॥ ए तदेवपरंसत्यंविद्धिसत्यविदांवर ॥ १५ ॥ जगदस्तिनसत्तेतियासीद्भ्रांतिस्तवाघसा ॥ शांतामदुपदेशेनकिमन्यद्बंधकारणम् ॥ १६ ॥ स्था ल्युदंचनकुंभादियथामृन्मात्रकंतथा ॥ चित्तमात्रंजगदिदंक्षीणंतच्चविचारणात् ॥ १७ ॥ आपत्सुसंपत्सुभवाभवेषुशांतैषणाहर्षविषा दसंवित् ॥ सौम्यादहंभावविदाविमुक्तोयथास्थितंतिष्ठविलीयमास्व ॥ १८ ॥ यथास्थितंवस्त्वधिगम्यरामस्थितोसिचेद्धास्वकुलांबरें दो ॥ तद्धर्षशोकैषणदूषणादिविमुच्यवातिष्ठयथेच्छमास्व ॥ १९ ॥ ॥ इति० वा० महारामायणेवा० दे० मो० नि० उ० मुख्ययोगोप देशोनामसप्तविंशःसर्गः ॥ २७ ॥ ॥ ६ ॥ ॥ श्रीरामउवाच ॥ ॥ बीजांकुराणांपुरुषकर्मणांजन्मकारिणाम् ॥ दैवशब्दार्थयुक्ता नांतत्त्वंवदविभोपुनः ॥ १ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ दैवकर्मादिपर्यायंघटादिघटतावधि ॥ संवित्स्पंदनमेवेदंलोकेपुरुषतांगतम् ॥ २ ॥ संवित्स्पंदादृतेपुंस्त्वंकर्मवाकीदृशंभवेत् ॥ घटावटपटाद्यात्मत्वेतेनैवजगत्कृतम् ॥ ३ ॥ प्रवर्ततेजगल्लक्ष्मीःसंवित्स्पंदात्सवास नात् ॥ निवर्त्ततेहिसंसारःसंवित्स्पंदादवासनात् ॥ ४ ॥

षाणांकर्तॄणांकर्मणांतदीयविहितनिषिद्धोदासीनक्रियाणामितिदृष्टसामग्रीणांदैवशब्दार्थेनादृष्टेननिमित्तेनयुक्तानांसर्वेषांजन्मपरंपरालक्षणसंसारानर्थकारिणांतत्त्वंप्राग्विशक लितोक्तमपिपुनःपिंडीकृत्यकथयेत्यर्थः ॥ १ ॥ तत्रादौदैवस्यतत्त्वंकर्मकर्मणस्तत्त्वंपुरुषस्तत्त्वंमनोरूपश्चित्स्पंदस्तस्यतुचिदात्मैवतत्त्वंयश्चिदात्मैवप्रथमंबहुस्यांप्रजायेयेतिप्रा थमिकसंकल्पलक्षणेनचित्स्पंदेनसमष्टिव्यष्टिमनोभवतिततोदेहाकाराध्यासेनपुरुषस्ततःकर्माणिकुर्वन्पुण्यपापादृष्टरूपदैवतांचापद्यतद्भोगायघटादिद्रव्यात्मनातद्गतगुणक्रिया यात्मनाचघटत्वादिसामान्यंतेनजगद्रूपेणविवर्त्ततइतिदैवकर्मादिकारणशब्दरूपंघटादिघटतावधिकार्यशब्दरूपंचतत्त्वतश्चित्स्पंदपर्यायमित्याशयेनोत्तरमाह ॥ दैवेति ॥ २ ॥ अतएवहिपुरुषकर्मादिघटावटादिचसंविदधीनसत्तास्फूर्त्तिकंसर्वैरनुभूयते संविद्विवर्त्तत्वानभ्युपगमेतुसत्तास्फूर्त्तिशून्यंतत्कीदृशंभवेत् ॥ अलीकमेवस्यादित्यर्थः ॥ ३ ॥ सर्व स्यसंविस्पंदमात्रत्वेवैचित्र्यणोद्भवेतन्निवृत्तौचनिमित्तमाह ॥ प्रवर्त्ततइति ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनहेतुनाआवर्त्तादिनास्वांतःप्रवेश्यमानस्तरंगःसस्पंदोप्यंतःसमुद्रमात्रतामापद्यमानःअस्फुरत्स्पंदएवोच्यतेवितर्क्यतेइत्यर्थः ॥ ५॥ अतएवचितःस्पंदएवपुरुषाद्याकारतातन्निवृत्तिरेवनिराकारतेतिस्पंदपुरुषयोःपरस्परंविमर्शेनभेदइत्याह ॥ मनागिति ॥ ६ ॥ अधिष्ठानाद्भेदस्तुसुतरांनास्तीत्याह ॥ जलेति ॥ जंतुःपुरुषः ॥ ७ ॥ अभिन्नेइति ॥ तथाचश्रुतिः ॥ अथकर्मणामात्मेत्येतदेषामुक्थमतोहिकर्माण्युत्तिष्ठंतीति ॥ ८ ॥ तथाचक्रियमाणेपुण्यपापेभाविदेहस्यतद्भोग्यस्यचपूर्वावस्थेइत्यर्थः ॥ ९ ॥ एवंचयदुक्तंदैवकर्मादिपर्यायमितितत्सिद्धमित्याह ॥ संविदिति ॥ १० ॥ बीजांकुराणामितिप्रश्नस्योत्तरमाह ॥ स्पंदादिति ॥ तद्बीजमेवांतःसूक्ष्मावयवरूपंनिर्गतमप्यंकुरइत्यर्थः ॥ ११ ॥ चित्त्वंचि

अवासनंहिसंवित्तेःस्पंदमस्पंदनंविदुः॥ सस्पंदोप्यस्फुरत्स्पंदोयेनावर्त्तादिनोच्यते॥५॥ मनागपिनभेदोस्तिसंवित्स्पंदमयात्मनोः॥ कल्पनांशादृतेरामस्पष्टौपुरुषकर्मणोः॥६॥ जलवीच्योर्यथाद्वित्वंसंकल्पोत्थंनवास्तवम्॥ तथेहचित्परिस्पंदरूपयोर्जंतुकर्मणोः॥७॥कर्मैवपुरुषोरामपुरुषस्यैवकर्मता॥ एतेह्यभिन्नेविद्धित्वंयथातुहिनशीतते॥८॥ हिमंयत्तद्यथाशैत्यंयच्छैत्यंतद्यथाहिमम्॥ यत्कर्मासौतथाजंतुर्योजंतुःकर्मतत्तथा॥ ९ ॥ संवित्स्पंदरसस्यैवदैवकर्मनरादयः॥ पर्यायशब्दानपुनःपृथक्कर्मादयःस्थिताः॥ १० ॥ स्पंदात्संविज्जगद्बीजमस्पंदाद्यात्यबीजताम्॥ अंकुरश्चतदेवांतःस्थितत्वादंकुरश्रियः॥ ११ ॥ चित्त्वंचक्वचिदस्पंदंक्वचित्स्पंदंस्वभावतः॥ अनंतमेकार्णववद्दिक्कालक्रमसंस्थितम् ॥ १२॥ संवित्स्पंदोवासनावानिहबीजमकारणम्॥ भूत्वाकारणतामेतिदेहादेरंकुरावलेः॥ १३॥ तृणवल्लीलतागुल्मबीजांतरगतेरपि॥ बीजंसंवित्स्पंदएवतस्यबीजंनविद्यते ॥ १४ ॥ नबीजांकुरयोर्भेदोविद्यतेग्न्यौष्ण्ययोरिव॥ बीजमेवांकुरंविद्धिविद्धिकर्मैवमानवम्॥ १५॥ चित्स्फुरंतीभूमिकोशेकरोतिस्थावरांकुरम्॥ स्थूलान्सूक्ष्मान्मृदुक्रूरान्पयोबुद्बुदकानिव॥१६॥ चितांविनाधराकोशादत्यंतपरिपेलवात्॥ अंकुरान्वज्रसारांश्चकउल्लासयितुंक्षमः॥ १७॥ प्राणिवीर्यरसांतस्थासंविज्जंगममाततम्॥ तनोतिलतिकांतस्योरसःपुष्पफलंयथा॥ १८॥

त्स्वभावईदृशोयद्दिक्कालक्रमसंस्थितंस्पंदंक्वचिद्व्रजतेक्वचिन्नेत्यर्थः ॥ १२ ॥ वासनावान्भूत्वाअकारणमपिकारणतामेति ॥ १३॥ अवांतरबीजवेषेवस्थितःसएवसर्वत्रबीजमवांतरवेषास्तुतस्यकार्यवेषविशेषव्यवस्थार्थमित्याशयेनाह ॥ तृणेति ॥ बीजांतराणांगतेर्व्यवस्थितकार्यप्रवृत्तेः ॥ नन्वेवंतदंतरमप्यनुगतंबीजांतरंस्यादित्यनवस्थामाशंक्याह॥ तस्येति ॥ १४ ॥ यदिबीजांतर्गताशक्तिरेवांकुरइतिमन्यसेतदापिनशक्तितद्वतोर्भेदइत्याशयेनाह ॥ नेति ॥ १५ ॥ स्थावराणांवटादीनामंकुरम् ॥ क्रूरान्कठिनान् ॥ तथाचस्मरंति ॥ भूजलादिस्वरूपेणबीजमाविश्यसर्वकृत् स्वयंकालस्वरूपेणविदध्यादंकुरोदयमिति ॥ १६ ॥ वज्रसारानिति ॥ दृढान्प्रवालादीन्मृदुतरादंकुरात्कउल्लासयितुंनिःसारयितुम् ॥ १७ ॥ शुक्रशोणिताभ्यांदेहनिष्पादनेप्ययमेवन्यायइत्याह ॥ प्राणीति ॥ १८ ॥

१ शब्दास्त्वित्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ संविदो विस्फुरणास्पंदः ॥ २० ॥ कर्मदैवम् ॥ परस्परमपिभेदोनास्तिवस्तुन्यधिष्ठानेपिभेदोनास्ति ॥ २१ ॥ इत्थंश्रौतमभेदंयोनपश्यतितंनिंदति ॥ द्वित्वमिति ॥ द्वित्वंभेदम् ॥ तयोर्बीजांकुरयोरपि ॥ महतेपशवेतद्रूपपशुत्वेनस्थितायमहतेब्रह्मणेनमइत्यर्थोवा ॥ २२ ॥ वासनासंगप्रयुक्ताअस्यबीजतावासनादाहेपैतीत्याह ॥ संवित्तेरिति ॥ २३ ॥ २४ ॥ यदितुवासनैवसंगस्तदुच्छेदएवासंगतेतिमन्यसेतर्हितत्त्वज्ञानाभ्यासेनैववासनांदहेत्याह ॥ अथवेति ॥ तंवासनोत्सादमेव ॥ २५ ॥ प्रागुक्तराजयोगलक्षणयाहठयोगलक्षणयावायथैवपुरुषयत्नतस्ततयाचिराभ्यस्तयायुक्त्यावासनाक्षयंसुकरंवेत्सितयैवसंपादयेत्यनुषज्यते ॥ एतत्प्रत्यगात्मरूपमेव ॥ २६ ॥ सर्ववासनानांचिद्रूं

यदिसर्वगतासंविद्भवेन्नातिबलीयसी ॥ तत्कउल्लासनेशक्तःस्याद्देवासुरभूभृताम् ॥ १९ ॥ जंगमानांस्थावराणामेतदाद्यंचबीजकम् ॥ संविद्विस्फुरणामात्रमस्यबीजंनविद्यते ॥ २० ॥ बीजांकुरविकल्पानांक्रियापुरुषकर्मणाम् ॥ ऊर्मिवीचितरंगाणांनास्तिभेदोनवस्तुनि ॥ २१ ॥ द्वित्वंनृकर्मणोर्यस्यबीजांकुरतयातयोः ॥ विपश्चित्पशवेतस्मैमहतेस्तुसदानमः ॥ २२ ॥ संवित्तेर्जन्मबीजस्ययोंतस्थोवासनारसः ॥ सकरोत्यंकुरोल्लासंतमसंगाग्निनादह ॥ २३ ॥ कुर्वतोकुर्वतश्चैवमनसायदमज्जनम् ॥ शुभाशुभेषुकार्येषुतदसंगंविदुर्बुधाः ॥ २४ ॥ अथवावासनोत्सादएवासंगइतिस्मृतः ॥ ययाकयाचिद्युक्त्यांतःसंपादयतमेवहि ॥ २५ ॥ ययैववेत्सिततयायुक्त्यापुरुषयत्नतः ॥ वासनांकुरनिर्मूलमेतदेवपरंशिवम् ॥ २६ ॥ पौरुषेणप्रयत्नेनयथाजानासिवातथा ॥ निवारयाहंभावांशमेषोसौवासनाक्षयः ॥ २७ ॥ नास्त्येवपौरुषादन्यासंसारोत्तरणेगतिः ॥ निरहंभावरूपेस्मिन्वासनाक्षयनामनि ॥ २८ ॥ आद्यैवसंविदस्तीहसोंकुरोबीजमस्तितत् ॥ तत्कर्मतच्चपुरुषस्तद्दैवंतच्छुभाशुभम् ॥ २९ ॥ नबीजमादावस्त्यन्यन्नांकुरोनचवानरः ॥ नकर्मनचदैवादिकेवलंचिद्वदेतिहि ॥ ३० ॥ नोबीजमस्तिनकिलांकुरकोपिवास्तिनाप्यस्तिकर्मपुरुषश्चनवास्तिसाधो ॥ एकंतुचित्त्वमुदितंत्वनयाभिधानलक्ष्म्यानटःसुरनरासुरशोभयेव ॥ ३१ ॥ इत्येवनिश्चयमनामयभावयित्वात्यक्त्वाभृशंपुरुषकर्मविचारशंकाम् ॥ निर्वासनःसकलसंकलनाविमुक्तःसंविद्वपुर्ननुयथाभिमतंच्छमास्व ॥ ३२ ॥

थिरहंभावएवमूलमतस्तमेवनिवारयेत्याह ॥ पौरुषेणेति ॥ २७ ॥ वासनाक्षयनामनिसंसारोत्तरणे ॥ २८ ॥ अनाद्यनंतप्रत्यगात्मसंवित्सत्तयैवांकुरबीजादीनांसत्तानस्वतइत्याह ॥ आद्येति ॥ २९ ॥ नरःपुरुषः ॥ ३० ॥ बीजादेःस्वतःसत्ताशून्यत्वेएकश्चिदात्मैवानृतैर्बीजादिवेषैर्जगद्भूत्वानृत्यतीतिफलितमित्याह ॥ नोबीजमिति ॥ चित्त्वंचित्स्वरूपम् ॥ अभिधानग्रहणंवाचारंभणश्रुतिस्मारणार्थम् ॥ ३१ ॥ ननुहेअनामयरामत्वंइतिएवंरूपमेवनिश्चयमसंदिग्धंभावयित्वापुरुषकर्माद्यनृतविचारशंकांत्यक्त्वानिर्वासनःसन्यथाभिमतंच्छंसमाहितोव्यवहरन्वाआस्स्वेत्यर्थः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवस्पष्टयन्नुपसंहरति ॥ प्रशांतेति ॥ ३३ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेअष्टाविंशःसर्गः ॥ २८ ॥ ॥ ७ ॥ ॥ व्यवहारे यथाप्राप्तलोकचर्यानुवर्त्तनम् ॥ स्वरूपेतुसदास्थैर्यंरामायात्रोपदिश्यते ॥ १ ॥ यथाप्राप्तंकर्मसर्वत्रशत्रुमित्रोदासीनपुरुषेषुयथायोग्यंभावयन्निष्पादयन् ॥ १ ॥ सब्रह्माब्रह्म समरसआबृंहितोविस्तारितआशयोयस्यतथाविधोभव ॥ २ ॥ यथाप्राप्तेषुखर्वेष्वल्पेषुउन्नतिमत्सुमहत्सुचशोकादिषुअंतरदुःखितःसन्यथादेशंतत्तद्देशधर्ममनुसृत्ययथाक्रमं बाष्पक्रंदनादिपर्यंतंदुःखंदुःखविडंबनंशीतोष्णादिद्वंद्वयुक्तानिवस्त्रस्रक्चंदनादिभोगसुखानिचकुर्विंतिद्वयोरन्वयः ॥ ३ ॥४॥ संक्षेपोक्तार्थमेवप्रपंचयति ॥ समागमेष्वित्यादिना ॥

प्रशांतसर्वेच्छमशंकमच्छचिन्मात्रसंस्थोखिलकार्यकारी ॥ आत्मैकरामःपरिपूर्णकामोभवाभयोरामशमाभिरामः ॥ ३३ ॥ ॥ इ० वा०वा०दे०मो०नि०उ०शंकातत्त्वसिद्धांतप्रतिपादनंनामाष्टाविंशतितमःसर्गः ॥ २८ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ नित्यमंतर्मुखस्तिष्ठवीतरागोविवासनः ॥ चिन्मात्रममलंशांतंकर्मसर्वत्रभावयन् ॥ १ ॥ आकाशविशदःप्राज्ञश्चिन्मात्रैकघनस्थितिः ॥ समःसौम्यःसमानंदःसब्रह्माबृंहिताशयः ॥ २ ॥ शोकेष्वापत्सुघोरेषुसंकटेष्ववटेषुच ॥ यथाप्राप्तेषुसर्वेषुखर्वेषून्नतिमत्सुच ॥ ३ ॥ यथाक्रमंयथादेशंकुरुदुःखमदुःखितः ॥ बाष्पक्रंदादिपर्यंतंद्वंद्वयुक्तसुखानिच ॥ ४ ॥ समागमेषुकांतानामुत्सवेषूदयेषुच ॥ आनंदंभजसौस्यात्मावासनाक्रांतमूढवत् ॥ ५ ॥ भूतानिमृत्युकार्येषुसंग्रामादिषुनिर्दह ॥ दावानलस्तृणानीववासनाक्रांतमूढवत् ॥ ६ ॥ क्रमागतेष्वखिन्नोर्थंबकवच्चिंतयार्जय ॥ अर्थोपार्जनकार्येषुवासनाक्रांतमूढवत् ॥ ७ ॥ बलाद्विदलयाशेषानरीनरिंनिषूदन ॥ वातोरिक्तानिवांभोदान्वासनाक्रांतमूढवत् ॥ ८ ॥ जनेषुकरुणार्हेषुधैर्यंकुरुमहात्मसु ॥ आत्माराममनामौनीवासनाक्रांतमूढवत् ॥ ९ ॥ मुदितोभवहर्षेषुदुःखेषुभवदुःखितः ॥ करुणांकुरुदीनेषुभववीरेषुवीर्यवान् ॥ १० ॥ अंतर्मुखःसदानंदःस्वात्मारामतयान्वितः ॥ यःकरोतिशमोदारस्तत्रकर्त्तासिनानघ ॥ ११ ॥ आत्मभावनयासाधोनित्यमंतर्मुखस्थितेः ॥ वज्रधारापितेरामपतितायातिकुंठताम् ॥ १२ ॥ संकल्पकलनोन्मुक्तेस्वसंविन्मात्रकोटरे ॥ यस्तिष्ठत्यात्मनिस्वैरमात्मारामोमहेश्वरः ॥ १३ ॥ नतंभिंदंतिशस्त्राणिनदहंतिहुताशनाः ॥ नक्लेदयंतिवारीणिशोषयंतिनमारुताः ॥ १४ ॥

भोगवासनाभिराक्रांतायेमूढाःकर्मठजनास्तद्वत् ॥ ५ ॥ भूतान्यधार्मिकाणिदंश्यानि ॥ ६ ॥ धर्माविरुद्धक्रमागतेष्वर्थोपार्जनकार्येषु ॥ अर्थंधनम् ॥ ७ ॥ अरीन्शत्रून् ॥ ८ ॥ धैर्यमौदार्यधीरताम् ॥ मौनीअकत्थनःसन् ॥ ९ ॥ हर्षेषुहर्षस्थानेषु ॥ १० ॥ तत्रमूढवत्कर्त्तृताप्रयुक्तदोषप्रसक्तिंवारयति ॥ अंतर्मुखइति ॥ त्वमितिशेषः ॥ ११ ॥ इंद्रप्रयुक्तवज्रस्यधारापि ॥ कुंठतांमोघताम् ॥ तस्यहन्तदेवाश्चनाभूत्याईशतेइतिश्रुतेरितिभावः ॥ १२ ॥ स्वसंविन्मात्रकोटरेहार्द्दाकाशे ॥ १३ ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्तंत्वस्मिन्सुषुप्तत्वमातीतिसुस्तंभंनित्यनिरतिशयानंदंस्वात्मानम् ॥ सुस्तंभंदृढस्तंभंमंदिरमिवधीरात्माऽचलस्तिष्ठ ॥१५॥ जगल्लक्षणवृक्षस्यपदार्थौघलक्षणपुष्पाणामामोदश्रियमिवसारभूतांपरांब्रह्मसंविदमाश्रित्यसर्वाबाह्यसंविदःअच्युतमंतर्मुखंयथास्यात्तथाकृत्वाआस्व ॥१६॥ कार्यंव्यवहारम् ॥ दृषदांपाषाणानामिवेतिवासनानुदयेदृष्टांतः ॥१७॥ कूर्मांगवद्वृत्तिमानंतर्बहिश्चवृत्तिशून्यः ॥१८॥ तदेवाह ॥ अंतरिति ॥ सुप्तप्रबुद्धोर्द्धजागरूकः ॥१९॥२०॥ वृत्तित्यागःसदैवनिर्विकल्पसमाधिज्ञानाभ्यासस्तेनविलीनेनबाधितेन ॥ किंचिद्दग्धपटाकारवत्प्रतिभासमात्रेणप्रसरता ॥ अत्यंतसुप्तेनमग्नेन ॥२१॥२२॥ जाग्रत्सन्व्यवहरन्व्रजन्नपित्वंसुषुप्तसमयावृत्त्यामाकिंचिदिष्टंगृहाणानिष्टंत्यज ॥२३॥

सुस्तंभमजमालिंग्यस्वात्मानमजरामरम् ॥ तिष्ठावष्टभ्यधीरात्मासुस्तंभमिवमंदिरम् ॥ १५ ॥ जगद्वृक्षपदार्थौघपुष्पामोदश्रियंपराम् ॥ संविदंसंविदःस्वस्थामास्वांतर्मुखमच्युतम् ॥ १६ ॥ अंतर्मुखतयानित्यंकार्यमाहरतांबहिः ॥जीवतामपिनोदेतिवासनादृषदामिव ॥ १७॥ पुनःप्रसरणोन्मुक्तमंतःसुप्तंमनःकुरु ॥ कुर्वन्सर्वाणिकर्माणिकूर्मांगवद्वृत्तिमान् ॥ १८॥ अंतर्वृत्तिविहीनेनबहिर्वृत्तिमतेवच ॥ सुप्तप्रबुद्धप्रायेणकार्यमाचरचेतसा ॥ १९ ॥ बालमूकादिविज्ञानवदंतस्त्यक्तवासनम् ॥ भवतःकुर्वतःकार्यंखवच्चित्तंनलिप्यते ॥२०॥ वृत्तित्यागविलीनेनकिंचित्प्रसरताबहिः ॥ अंतरत्यंतसुप्तेनचेतसातिष्ठविज्वरः ॥ २१ ॥ असंकल्पकलंकायांज्ञानाच्चित्तक्षयोदये ॥ शुद्धायांसंविदिस्थित्वाकुरुमाकुरुवानघ ॥ २२ ॥ सुषुप्तसमयावृत्त्याजाग्रद्व्यवहरन्व्रजन् ॥ गृहाणमाकिंचिदपिमावाकिंचित्परित्यज ॥ २३ ॥ जाग्रत्यपिसुषुप्तश्चेज्जागर्षिचसुषुप्तके ॥ जाग्रत्सुषुप्तयोरैक्यात्तदस्यसिनिरामयः ॥ २४ ॥ एवमाद्यंतरहितमभ्यासेनशनैःशनैः ॥ पदमासादयाद्वंद्वमतीतंसर्ववस्तुतः ॥ २५॥ नचद्वैतंनचैवैक्यंजगदित्येवनिश्चयी ॥ परमामेहिविश्रांतिमाकाशविशदाशयः॥२६॥ श्रीरामउवाच ॥ ॥ यद्येवंमुनिशार्दूलतदहंप्रत्ययात्मकः ॥ भवानेवेहकिंतावद्वसिष्ठाख्यःस्थितोवद ॥ २७॥ ॥श्रीवाल्मीकिरुवाच ॥ राघवेगदतित्वेवंवसिष्ठोवदतांवरः ॥ तूष्णीमेवमुहूर्तार्द्धमतिष्ठत्स्पष्टचेष्टितः॥२८॥ तस्मिंस्तूष्णींस्थितेकिंस्यादितिसभ्येमहाजने ॥ पतितेसंशयांभोधौरामःपुनरुवाचह ॥ २९ ॥ किमर्थंभगवंस्तूष्णींभवानहमिवास्थितः ॥ नसोस्तिजगतांन्यायःसतांयोनोत्तरक्षमः॥३०॥

जाग्रदवस्थायामपिस्थूलसूक्ष्मोपाध्यप्ययात्सुषुप्तस्त्वंचेद्भवसितदासुषुप्तकेप्यज्ञानावरणाभावाज्जागर्षि ॥ जाग्रत्सुषुप्त्योर्भेदकाज्ञानतत्कार्ययोर्बाधेनैक्येसतितत्परिशिष्टंयदस्तिसन्मात्रंतदसि ॥ २४ ॥ २५ ॥ २६ ॥ सर्वद्वैतापलापेतववसिष्ठाहंभावादेरप्यपरिशेषात्कथंवक्तृत्वादिव्यवहारइत्याशयेनरामःपृच्छति ॥ यद्येवमिति ॥ २७ ॥ नास्त्येववसिष्ठाहंभावादिर्ममश्रोतॄणामज्ञानदृष्ट्यैवसोवलंबितस्तेषांतत्त्वज्ञत्वेसंपन्नेतुमौनमेवोत्तरमित्याशयेनतूष्णींभावमाह ॥ राघवेइति ॥ २८ ॥ मुख्याधिकारिणांकेषांचिज्ज्ञानेजातेपिसर्वेषामज्ञानानुच्छेदात्संशयांभोधौपतितेसति ॥ २९ ॥ गुरोर्युक्तिक्षयादेवनिरुत्तरतांमन्यमानोरामआह ॥ किमर्थमिति ॥ जगतांमध्येसतादृशोन्यायःशिष्यैरुद्भाव्यस्तर्कोनास्तियःसतांविदुषांगुरूणाम् ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्यप्रश्नस्यकोट्यापरमावधित्वेनहेतुनातूष्णीमवस्थानमेवोत्तरम् ॥३१॥कोटित्वमेवदर्शयितुंभूमिकांरचयति ॥ द्विविधइत्यादिना॥३२॥३३॥३४॥ वाङ्मयउल्लेखोभिलापः ॥ ३५ ॥ प्रतियोगीनिरूपकोव्यवच्छेदोव्यावृत्तिः ॥ संख्यागणना ॥ अतीतस्तत्सर्वमतिक्रांतःपरमार्थः ॥ आदिपदात्तत्साधनंतदिनरबाधकंतद्बाधस्तदुपायोबोध्यबोधकप्रमाणादयोगृह्यंते ॥ तेषांविभ्रमैःकल्पनाकलंकैरन्वितः ॥ भाःजालांतरातपः ॥३६॥३७॥ अंतेवासिनःशिष्यस्य ॥ अंतर्विवर्जितंसर्वपरिच्छेदकलंकशून्यम् ॥३८ ॥ अविचारात्तत्वज्ञानोदयात्प्रागज्ञानादुपदेशवाक्प्रवृत्तियोग्यताकल्पनयाससंकल्पंवाग्व्यवहारसंकल्पविषयमाहुः ॥ विचारेणपरिज्ञातंतुमौनंवागगोचरमेवाहुर्यतोवाचोनिवर्त्ततेअप्राप्यम

श्रीवसिष्ठउवाच॥ ॥नमेवक्तुमशक्तत्वाद्युक्तिक्षयउपस्थितः ॥ किंतुप्रश्नस्यकोट्यास्यतूष्णीमेवानघोत्तरम् ॥ ३१॥ द्विविधोभवतिप्रष्टातत्त्वज्ञोज्ञोथवापिच॥अज्ञस्याज्ञतयादेयोज्ञस्यतुज्ञतयोत्तरः॥३२॥ एतावंतमभूत्कालंभवानज्ञाततत्पदः॥ भाजनंसविकल्पानामुत्तराणांमहामते॥३३॥ तत्त्वज्ञस्त्वधुनाजातोविश्रांतःपरमेपदे॥ योग्योनसविकल्पानामुत्तराणामसिस्फुटम्॥३४॥ यावान्कश्चिल्लिकोल्लेखोवाङ्मयोवदतांवर॥ सूक्ष्मार्थःपरमार्थोवाबहुरल्पतरोपिवा॥३५॥ प्रतियोगिव्यवच्छेदसंख्यातीतादिभिर्भ्रमैः॥ सचसर्वोन्वितःसाधोभाइवत्रसरेणुभिः॥३६॥ उत्तरंसकलंकंचतज्ज्ञोनार्हतिसुंदर॥ नाकलंकाचवागस्तित्वंचतज्ज्ञतरःस्थितः॥३७॥ यथाभूतंचवक्तव्यंज्ञस्यांतेवासिनोमया॥ यथाभूतंविदुःकाष्ठमौनमंतविवर्जितम्॥३८॥ अविचारात्ससंकल्पंमौनमाहुःपरंपदम्॥ तदेवतवतज्ज्ञस्यदत्तःसुंदरउत्तरः॥ ३९ ॥ यन्मयोहिभवत्यंगपुरुषोवक्तितादृशम्॥ ज्ञेयमात्रमयश्चाहंवागतीतेपदेस्थितः॥४०॥ वागतीतपदस्थोहिकथंगृह्णातिवाङ्मलम्॥ अवाच्यंवच्मिनोतेनवाग्घिसंकल्पनांकिता॥४१॥ ॥श्रीरामउवाच॥ ॥वाचियेयेप्रवर्त्ततेतानानादृत्यदोषकान्॥ प्रतियोगिव्यवच्छेदिपूर्वकान्वदकोभवान्॥४२॥ ॥श्रीवसिष्ठउवाच॥ ॥एवंस्थितेराघवहेयथाभूतमिदंशृणु॥ कस्त्वंकोहंजगद्वाकिमितितत्त्वविदांवर॥४३॥ अहंतावदयंतातचिदाकाशोनिरामयः॥ चेत्यसंवेद्यरहितःसर्वसंकल्पनातिगः॥४४॥ स्वच्छंचिदाकाशमहंभवानाकाशमेवच॥ जगच्चाकाशमखिलंसर्वमाकाशमात्रकम्॥४५॥ शुद्धज्ञानैकरूपात्माशुद्धज्ञानमयात्मनि॥ अन्यसंविद्दशोन्मुक्तःस्वान्यद्वक्तुंनवेद्म्यहम्॥४६॥ स्वपक्षोद्भावनपराअहंतामैकवर्द्धनम् ॥ मोक्षार्थमप्युद्यमिनोनयंतिशतशाखताम् ॥ ४७॥

नसासहेत्यादिश्रुतयोविद्वांसश्च॥ तन्मौनमेव ॥३९॥ पुरुषोवक्ता ॥ ज्ञेयंतत्त्वसाक्षात्कारगम्यंनिर्विकल्पवस्तुतन्मात्रमयः॥ स्वार्थेमयट् ॥४०॥ हियस्मात्सर्वावाक्प्रतियोगिव्यवच्छेदादिसंकल्पनांकिता ॥ ४१ ॥ अनादृत्यतात्पर्याविषयीकृत्यभागत्यागलक्षणोपायेनवद ॥ व्यवच्छेदीव्यावृत्तः ॥ प्रतियोगीतन्निरूपकः ॥ ४२ ॥ यथाभूतंयथास्थितम् ॥४३॥४४॥४५॥ स्वान्यत्प्रत्यगात्मव्यतिरिक्तमणुमात्रमपिवक्तुंनवेद्मिनविवक्षामि ॥ तथाचयत्परःशब्दःसएवशब्दार्थइतिन्यायमाश्रित्याखंडंनिर्विकल्पंवाक्यार्थंप्रतिपद्यस्वेतिभावः ॥४६॥ कथंतर्ह्यज्ञबोधनायप्रतिवादिविजयायचविदुषांनिरहंकाराणामुद्योगसिद्धिस्तत्राह ॥ स्वपक्षेति ॥ शिष्याणांमोक्षार्थंतेषांसंदेहवारणायप्रतिवादिविजयार्थमप्युद्यमिनोविद्वांसःश्रुतियुक्त्यादिप्रमाणैःस्वपक्षोद्भावनपराःसंतोबाधितस्याप्याहार्यारोपेणाहंतात्मनएकस्यैववर्द्धनंकुर्वाणाःशतशाखतांनयंतिनत्वज्ञवद्यामुह्यंतीत्यर्थः॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैतावतैषांपांडित्यप्रकटनव्यवहारएवपरमंपदमितिवेदितव्यंकिंत्वन्यदेवेत्याह ॥ जीवतइति ॥ ४८ ॥ परमपदमेवविशिनष्टि ॥ अबहिःसाधनमिति ॥ अंतर्बहिःसाधनशून्यत्वा देवनाहंकर्तृभोक्तृत्वशून्यमतएवभोग्येसुखदुःखरहितंस्वप्रकाशनिरतिशयानंदभूमात्मकत्वाच्छिवम् ॥ ४९ ॥ ननुकिमर्थंतत्स्वप्रकाशमुच्यते विषयसुखवद्भोग्यमेवतत्किंन स्यात्तत्राह ॥ मुक्तताया इति ॥ इयमहंतैवमुक्ततायामुक्तेरभावःप्रागभावस्थानीया तादृशेनाहंभावेनमुक्तेर्भावनमनुभवःक्व नह्यभावेनप्रतियोगीअनुभवितुंशक्यः तर्ह्यस्तुमुक्तत यैवमुक्तिभावनंतत्राप्याह ॥ तयैवेति ॥ पक्षद्वयेपिजात्यंधचित्रदर्शनन्यायःस्यादित्यर्थः ॥ ५० ॥ तर्ह्यहंकारप्राणादिस्पंदनेअस्पंदनेचवृक्षमृगादिस्पंदनास्पंदनयोर्गिरिशिलावद चलतयास्थितत्वात्तद्वज्जडमेवकिंनस्यात्तत्राह ॥ स्पंदनेइति ॥ आसितमवस्थानम् ॥ भावेक्तः ॥ यतस्तन्निर्वाणमजरमपक्षयादिविक्रियाशून्यम् ॥ तथाचगिरिशिलायाम प्यपक्षयेणचलनमस्त्येवेतिनात्यंतिकमचलत्वमितिचलेष्वेवजाड्यंनकूटस्थेइतिभावः ॥ ५१ ॥ अतःस्वप्रकाशत्वमेवपरिशेषात्सिद्धमित्याह ॥ तच्चेति ॥ लौकिकात्मनिप्रसिद्धं

जीवतोप्युपशांतस्यव्यवहारवतोपिच ॥ शववद्यदवस्थानंतदाहुःपरमंपदम् ॥ ४८ ॥ अबहिःसाधनंशांतमनंतःसाधनंसमम् ॥ नसु खंनासुखंनाहंनान्यदित्यादितंशिवम् ॥ ४९ ॥ मुक्तताया अहंतेयमभावोभावनंक्वच ॥ तयैवान्विष्यतेसेतिजात्यंधश्चित्रमीक्षते ॥ ५० ॥ स्पंदनेऽस्पंदनेचैवयत्पाषाणवदासितम् ॥ अजडस्यैवतद्विद्धिनिर्वाणमजरंपदम् ॥ ५१ ॥ तच्चनान्योविजानातिस्वयमेवानुभूयते ॥ लोकैषणाविरक्तेनज्ञेनज्ञत्वमिवात्मनि ॥ ५२ ॥ तत्राहंतानचत्वत्तानानहंतानचान्यता ॥ केवलंकेवलीभावोनिर्वाणममलंशिवम् ॥ ५३ ॥ चेत्योन्मुखत्वमेवाहुश्चेतनस्यास्यचेतनम् ॥ एषएवचसंसारोबंधःक्लेशायभूयसे ॥ ५४ ॥ चेतनस्याचेतनत्वमचेत्योन्मुखता त्मकम् ॥ मोक्षंविद्धिपरंशांतंपदमव्ययमेवच ॥ ५५ ॥ दिक्कालाघनवच्छिन्नेशांतेशांतात्मनिस्थिते ॥ चेत्यंनसंभवत्येवकःकिंचेतयते कथम् ॥ ५६ ॥ संकल्पःस्वप्नदृश्येंतःसंविन्मात्रात्मतांविना ॥ यथान्यवद्भवेद्रूपात्तथैवास्मिन्बहिर्गते ॥ ५७ ॥ मनोबुद्ध्यादयश्चैतेसं विन्मात्रानुरूपिणः ॥ मनोबुद्ध्यादिशब्दार्थभाविताःस्तुजडात्मकाः ॥ ५८ ॥ संविन्मात्रेसमेस्वच्छेसबाह्याभ्यंतरेतते ॥ अभिन्नेभेदबुद्धि र्वाकिमनर्थायजृंभते ॥ ५९ ॥

ज्ञत्वंघटादिस्फूर्त्तिफलमिव नहितज्ज्ञानांतरवेद्यमनवस्थापातादितिभावः ॥ ५२ ॥ तत्तत्र ॥ ५३ ॥ तस्यपरप्रकाशतैवसंसारइत्याह ॥ चेत्योन्मुखत्वमिति ॥ चेतनंचेत्यव्याप्ति लक्षणांक्रियाम् ॥ ५४ ॥ ईदृशचेतनाभावेनाचेतनत्वंतुमोक्षेइष्टमेवेत्याह ॥ चेतनस्येति ॥ ५५ ॥ ननुमोक्षेपिचेत्यमस्तुतत्राह ॥ दिगिति ॥ ५६ ॥ एवमंतर्मुखतामात्रेणस्वतः सिद्धांमुक्तिमुपपाद्यबहिर्मुखतामात्रेणजगद्विकल्पप्रसरंदर्शयति ॥ संकल्पइति ॥ हेभूपाइतिश्रोतृसंबोधनम् ॥ यथास्वप्नदृश्येजगतिसंविदंतर्गतस्तत्तद्वासनानुसारिसंकल्पःसंवि न्मयोपिसंविदात्मतांविहायान्यवद्भवेत्तथैवास्मिन्नात्मनिबहिर्गतेबहिर्मुखेसतिस्वात्मैवान्यवज्जडप्रपंचात्माभवेदित्यर्थः ॥ ५७ ॥ एवंमनोबुद्ध्यादयोपिबहिर्मुखतायामेवजडात्मका अंतर्मुखतायांतुसंविन्मात्रानुसारिणश्चिदेकरसाः ॥ ५८ ॥ एवमंतर्बहिश्चसर्वस्यचिदेकरसत्वेचितोबहिर्मुखतालक्षणाभेदबुद्धिरेकैवव्यर्थोनर्थहेतुरित्याह ॥ संविन्मात्रइति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदृश्यापगमेवशिष्टंसंविन्मात्रंशून्यकल्पमपुरुषार्थइतितुनमंतव्यं तस्यनिरतिशयानंदरूपतायाविद्वद्भिरनुभूयमानत्वादित्याह ॥ संविन्मात्रस्येति ॥ वाग्गतिंवाग्गोचरतांनैति ॥ यतोवाचोनिवर्त्तंतइत्यादिश्रुतेरितिभावः ॥ ६० ॥ विवेकियौक्तिकदृष्ट्यातर्हिकथंजगत्तदाह ॥ सदसद्रूपइति ॥ ईक्षितस्यचक्षुःप्रणिधानस्ययत्नेनतमसियथासदसद्रूपआभासोलक्ष्यतेतद्वत् ॥ ६१ ॥ त्वमपिवासनांयदिनबध्नासीतिसंबंधः ॥ ६२ ॥ अन्योपिपुरुषःअयमाकाशएवाहमितिनिश्चयवांस्तज्ज्ञएव, ससंज्ञयाव्यवहारेणाज्ञइवविद्यमानोपिचिद्वपुरेवसन्सत्यपिदेहादावसदिवशाम्यति ॥ तद्योयोदेवानांप्रत्यबुध्यतसएवतद्भवत्तथर्षीणांतथामनुष्याणामितिश्रुतेरित्यर्थः ॥ ६३ ॥ ननुजीवानामविद्याकिंचिदात्मनाशाम्यतिउतजडेन नाद्यः चिदात्मनःप्रत्युततत्साधकत्वेनाविरोधित्वात् नद्वितीयः जडमात्रस्याविद्याकार्यत्वेनतद्विरोधित्वादित्याशंक्याह ॥ जीवानामिति ॥ अहमज्ञइतिसाक्षिज्ञेरज्ञानसाधकत्वाज्जीवानांसंसारलक्षणोऽविद्याग्निस्तदीयज्ञग्निरक्षितेनाज्ञानवायुनाज्वलन्नपिपुनरहंब्रह्मास्मीतिप्रबुद्धानांतेषांचरमसाक्षात्कारवृत्त्यात्मनापरिणतेनांतर्गतसाक्षि

संविन्मात्रस्यशुद्धस्यशून्यस्यचकिमंतरम् ॥ यच्चांतरंतद्विबुधाविदंत्येतिनवाग्गतिम् ॥६०॥ सदसद्रूपआभासोयथाकिमपिलक्ष्यते ॥ तमसीक्षितयत्नेनब्रह्मणीदंतथाजगत् ॥ ६१ ॥ अयमाकाशमेवाहंयदिशाम्याम्यवासनम् ॥ वासनांतुनबध्नासिस्थितएवासिचिन्नभः ॥ ६२ ॥ इतिनिश्चयवानंतस्तज्ज्ञोज्ञइवसंज्ञया ॥ चिद्वपुर्विद्यमानोपिशाम्यत्यसदिवस्वयम् ॥ ६३ ॥ जीवानांज्ञग्निगुप्तेनज्वलन्नज्ञानवायुना ॥ अविद्याग्निःप्रबुद्धानांपुनस्तेनैवशाम्यति ॥६४॥ अजडानांयदज्ञानंस्थाणूनामिवशाम्यताम् ॥ तमाहुर्मोक्षमक्षुब्धमासितंपदमक्षयम् ॥ ६५ ॥ ज्ञत्वेनज्ञत्वमासाद्यमुनिर्भवतिमानवः ॥ अज्ञत्वादज्ञतामेत्यप्रयातिपशुवृक्षताम् ॥ ६६ ॥ अहंब्रह्मजगच्चेदमित्यविद्यामयोभ्रमः ॥ असत्यःप्रेक्षयाध्वांतंदीपेनेवनलभ्यते ॥ ६७॥ समग्रकरणग्रामोप्यसंकल्पोविवेदनः ॥ नकिंचिदप्यनुभवत्यंतर्वात्येचशांतधीः ॥ ६८ ॥ सुषुप्तत्वइवस्वप्नःसमाधौप्रविलीयते ॥ दृश्यंसर्वंज्ञबोधेंतःपुनःस्वात्मैवलक्ष्यते ॥ ६९ ॥

गुप्तेनाज्ञानवायुनैवशाम्यतिनतृतीयमपेक्षतइत्यर्थः ॥ ६४ ॥ ननुमुक्तैर्जगज्ज्ञायतेनवा आद्येसंसाराविशेषः द्वितीयेआत्माज्ञानमेकंपरिहरतात्वयाजगदज्ञानान्यनंतानिस्वीकृतानिस्युः स्थाणुतुल्यानांचकथंतेषांमुक्ततातत्राह ॥ अजडानामिति ॥ अनावृतस्वप्रकाशनिरतिशयानंदात्मरूपत्वादजडानांतेषामज्ञानंसांसारिकज्ञानशून्यमतएवाक्षुब्धंदुःखक्षोभरहितंयदासितमवस्थानंतंमोक्षनामानमाहुः ॥ नचानंताज्ञानप्रसक्तिरेकविज्ञानेनैवसर्वविज्ञानात्सर्वाज्ञाननाशात् ॥ भ्रांतिज्ञानाभावस्यात्मरूपतयातत्त्वज्ञानवैलक्षण्याभावाच्चेतिभावः॥ ६५ ॥ किंचसतिमूलाज्ञानेतद्बलेनैवबाह्यार्थज्ञानाभावानांमौर्ख्यापादकतातन्नाशेतुमुनित्वसंपादकतेत्याशयेनाह ॥ ज्ञत्वेनेति ॥ ६६ ॥ किंचब्रह्मज्ञानंजगद्भ्रमश्चसर्वोप्यज्ञानमेवनचाज्ञाननिवृत्तिरज्ञानंयेनमुक्तिर्नस्यादित्याशयेनाह ॥ अहमिति ॥ ६७ ॥ तर्हिजीवन्मुक्तानांचक्षुरादिकरणैर्बाह्यज्ञानदर्शनान्मुक्ततानस्यात्तत्राह ॥ समग्रेति ॥ ६८ ॥ समाधौज्ञस्यबोधेसकृज्जातेपुनर्यत्सर्वंदृश्यंदृश्यतेतत्स्वात्मैवलक्ष्यतेनअनात्मानामतेषामणुमात्रमप्यस्तीत्यर्थः ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुनोविलीयतइतिचेद्भ्रांतिमात्रत्वादित्याह ॥ नीलत्वमिति ॥ ७० ॥ अतएवबाधितार्थवासनावासनैवनभवतीत्यवासनएवज्ञइत्याह ॥ वासनाभिरिति ॥ ७१ ॥ ननुविचित्रभुवनैर्देवनरतिर्यगादिभिर्विहितनिषिद्धानेककर्मभिस्तत्फलभोगनियतिभिश्चेश्वरेणाधिष्ठितमद्भुतमिदंजगत्कथमसदनृतंसंकल्पमात्रमित्याद्युक्तिभिस्त्वयाअपलप्यते नहिसंकल्पमनोरथादिष्वेवंविधार्थाःसंतीत्याशंक्यतत्राप्यद्भुतार्थसत्त्वांदर्शयति॥संकल्पेष्विति ॥ हेभव्ययथासांकल्पिकार्थेषुस्वप्नमायेंद्रजालकंयद्वदद्भुतंतद्वत्संसृतयोपि ॥ प्रत्यक्षदृष्टेपिस्वप्नाद्यर्थेकिमास्थायुक्तातद्वत्संसृतिष्वपीत्यर्थः ॥ ७२ ॥ सतोर्हिकर्त्तृभोक्त्रोरस्तुसर्वासुखदुःखभोगायपुण्यपापनियतिस्तयोरेवासंभवेकातद्व्यवस्थानियतिरित्याह ॥ नेति ॥ ७३ ॥ अयंममताप्रत्ययोयस्याहंकारस्यसोपिनास्ति ॥ ७४ ॥ केवलःसर्वद्वैतशून्यस्तत्त्वविद्व्यवहारस्थोवास्तुअथवाकाष्ठपाषाणवदचलःसमाधौतिष्ठन्काष्ठमौनगतोस्तुसर्वथापिब्रह्मताम धिगच्छत्येव ॥ ७५ ॥ इत्थंमायिकविवर्त्तवादसिद्धांतमाश्रित्याध्यारोपितस्यजगतोऽपवादेनतत्त्वविदःपरमपुरुषार्थेप्रतिष्ठादर्शिता ॥ येत्वन्येतार्किकाअन्यथान्यथा

नीलत्वंचयथाव्योम्नितथापृथ्व्यादिताशिवे ॥ भ्रांतिमात्राद्दतेनान्यद्यथाव्योमतथाशिवः ॥ ७० ॥ वासनाभिरुपेतोपिसमस्ताभिरवासनः ॥ भवत्यसावसत्सर्वमिदमित्येवयस्यधीः ॥ ७१ ॥ संकल्पेष्वद्भुतंभव्यस्वप्नमायेंद्रजालकम् ॥ यद्वत्संसृतयस्तद्वद्दृष्टेप्यास्थाकिंमत्र वै ॥ ७२ ॥ नदुःखमस्तिनसुखंनपुण्यंनचपातकम् ॥ नकिंचित्कस्यचिन्नष्टंकर्त्तुर्भोक्तुरसंभवात् ॥ ७३ ॥ सर्वशून्यंनिरालंबंममताप्रत्ययोप्ययम् ॥ द्विचंद्रस्वप्नपुरवद्यस्यासौसोपिनास्तिनः ॥ ७४ ॥ केवलोव्यवहारस्थःकाष्ठमौनगतोथवा ॥ काष्ठपाषाणवत्तिष्ठन्ब्रह्मतामधिगच्छति ॥ ७५ ॥ शांतत्वेचित्तत्वेनानानानात्मनीहशिवे ॥ अवयविनोवयवित्वेत्विहयुक्तिर्विद्यतेनान्या ॥ ७६ ॥

सिद्धांतान्कल्पयंतितेषांजगदुत्पत्त्यादिव्यवहारेपरमपुरुषार्थलक्षणेपरमार्थेचयुक्तिर्नास्तीत्याह ॥ शांतत्वेइत्यादिना ॥ इहास्मिन्शिवेप्रत्यगात्मनिप्राणबुद्धिमनोदेहादितादात्म्येननानात्मनिभिन्नस्वभावेसांसारिकानर्थशतसंकुलेप्रत्यक्षंभासमानेतन्निराकरणेनशांतत्वेनिर्दुःखनिरतिशयानंदाद्वयरूपपरिशेषणेवादिनामन्यादर्शिताऽध्यारोपापवादन्यायातिरिक्तायुक्तिर्नविद्यते ॥ नित्यशांतस्वभावेशिवेभ्युपगम्यमानेतुतस्यनिर्विकारकूटस्थस्यचलनपरिच्छिन्नस्वभावचित्तरूपत्वेदहेंद्रियादिनानानानाभावेनसंसरणेचयुक्तिरुपपत्तिर्नविद्यते ॥ यदितुतत्सिद्धयेतस्यपरिच्छिन्नतापरिणामितासावयवताचाभ्युपगम्येततर्ह्यवयविनस्तस्यचेतनैर्जडैर्वाअवयवैरवयवित्वेयुक्तिर्नविद्यते ॥ अवयवानांचेतनत्वेऐकमत्यासंभवेनावश्यंभाविनिविश्लेषेअवयविनाशप्रसंगात् अचेतनत्वेत्ववयविनोप्यचेतनत्वापत्तेरुभयत्राप्यनित्यस्यारब्धस्यप्राक्तनपुण्यपापासंभवेनभोगासिद्धेरित्यादियुक्तिसहस्रेभ्यः ॥ एवंजगत्कारणेपिशिवेशांतत्वेनिर्विकारकूटस्थत्वेऽभ्युपगतेजगत्सृष्ट्यनुकूलसंकल्पात्मकचित्तत्वेतत्प्रवर्त्तकेनानानानात्मनिप्रपंचरूपेतदंतर्गतपृथिव्याद्यवयविनोवयवित्वेवान्यायुक्तिर्नविद्यतइतिविवर्त्तदृष्टिरेवशरणमित्यर्थः ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वात्मनःशांतत्वेपिप्रलयांतिलीनानांसर्वपदार्थानांब्रह्मणिप्रलयकालेसत्वात्तत्प्रयुक्तस्वस्वभाववैचित्र्यबलादेवचित्तत्वनानात्वाऽनानात्वसावयवत्वादिवैचित्र्ययुक्ताःसर्गादावा विर्भविष्यंतितत्राह ॥ अर्थागतेति ॥ अर्थवैचित्र्यहेतुःस्वभावःशिवेपरमात्मवस्तुन्यर्थेभ्यआगतउतस्वतःसिद्धःतत्रार्थेभ्यआगतस्वभावइतिव्याहतम् ॥ स्वोहिभावःस्वभावः ॥ आगंतुकोऽन्याधीनश्चकथंस्वभावःस्यात् ॥ तथाअसंगत्वादद्वयत्वाच्चामलेपरप्रयुक्तस्वभाववैचित्र्यमलसंबंधश्चनैवसंभवति ॥ नचार्थास्तेप्रलयेस्वातंत्र्येणसंतियेनस्वस्वभावब लादेवविचित्राआविर्भवेयुरितिद्योतनार्थःप्रथमश्चकारः ॥ अतःपरिशेषादनागंतुकोब्रह्मणएवस्वस्वभावोवाच्यः ॥ एतस्मिन्सर्वगतेब्रह्मणिवैचित्र्यहेतुस्वभावस्योक्तिसंभवएव नास्ति ॥ सर्ववस्तूनांसर्ववैचित्र्यप्रसंगात् ॥ नहिसर्वगतंब्रह्मणिअत्रैवायमेवस्वभावइतिप्रलयेव्यवस्थापकमस्ति ॥ सर्वत्रसर्ववैचित्र्याभ्युपगमेचवैचित्र्यमेवलुप्येत ॥ नहिसर्व साधारणोधर्मोवैचित्र्यंभवतिनापिकिंचिद्भेदकंसिद्ध्यतीतिसर्वजगदैकरस्यप्रसंगादितिभावः ॥७७॥ नन्वेवंसार्वजनीनस्यापिजगद्वैचित्र्यस्ययुक्त्यसहत्वादपलापेतत्संवित्तेरप्यप लापःकिंनस्यात् ॥ नहिसंवेद्यमंतरेणसंवित्प्रसिद्धेतिशून्यवादःप्रसक्तइतिचेत्तत्राह ॥ नचेति ॥ संवेद्यापलापेसंवित्तेरप्यस्तितानास्तीतिनचवक्तुंशक्यम् ॥ संविदपलापिनोनास्ति

अर्थागतस्वभावस्यचनैवचसंभवादमले ॥ एतस्मिन्सर्वगतेब्रह्मणिनास्तिस्वभावोक्तिः ॥ ७७ ॥ नचनास्तिकोपलंभात्संवित्तेरस्तिताच नैवाजे ॥ ग्राह्यग्राहकदृष्टेरसंभवादस्तिकिंचिदपि ॥७८॥ शममलमहार्यमार्यजुष्टंशिवमजमक्षयमासितंसमंयत् ॥ तदवितथपदंत दास्वशांतंपिबललभुंक्ष्वभवानयंहिनास्ति ॥७९॥ ॥इ०वा०महारामायणेवा०दे०मोक्षोपायेषुनिर्वाणप्रकरणेउ०भावनाप्रतिपाद नंनामैकोनत्रिंशःसर्गः ॥२९॥ ॥७॥ ॥श्रीवसिष्ठउवाच॥ ॥ अहंतैवपराविद्यानिर्वाणपदरोधिनी ॥ तयैवान्विष्यतेमूढैस्तदित्युन्म त्तचेष्टितम् ॥ १ ॥ अहंतैवालमज्ञानादज्ञत्वस्यनिदर्शनम् ॥ नहितज्ज्ञस्यशांतस्यममाहमितिविद्यते ॥ २ ॥ अहंतामलमुत्सृज्यनिर्वाणः खमिवामलः ॥ सदेहमपदेहंवाज्ञस्तिष्ठतिगतज्वरः ॥३॥

कात्मनएवोपलंभादपलपितुमशक्यत्वात् ॥ सहिस्वातिरिक्तेएवसंवित्संवेद्येअपलपेन्नतुस्वात्मानम् ॥यदासर्वापिसंवित्तदात्मैवतदातत्रसंवेद्यमपलपन्संविदंपरिशेषयत्येव ॥ किं चनिराधारनिषेधायोगाद्ग्राह्यग्राहकयोर्ग्राह्यग्राहकात्मनिस्वयंप्रकाशेआधारेप्रतिषेधोवाच्यः ॥ सएवतस्यात्मेतितनाजेस्वात्मन्येवग्राह्यग्राहकदृष्ट्योरसंभवप्रतिपादनपर्यवसा नात्सर्वप्रतिषेधावधिभूतंकिंचिदजंतस्याप्यस्तीतिसिद्धंतदेवब्रह्मेत्यर्थः ॥ ७८ ॥ हेरामत्वमार्यैर्ब्रह्मविद्भिर्जुष्टंसेवितमहार्यंपरैर्हर्तुमशक्यंयच्छिवमवितथंपरमार्थसत्यंपदमासितंनि त्यसिद्धंतदेवभूत्वापरमार्थतआस्व ॥ व्यवहारेचेतरलोकवत्पिबभुंक्ष्वललक्रीडस्व तथापिभवान्मुक्तएव ॥ हियस्मादयंदृश्यबंधस्तवनास्तीत्यर्थः ॥ ७९ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेएकोनत्रिंशःसर्गः ॥२९॥ ॥७॥ ॥ ययाहंताद्यविद्योत्थनानात्वभ्रांतिशांतितः ॥ स्याद्ब्रह्मणिस्थिरोधीरःसादृष्टिरिहसाध्यते ॥१॥ ॥४१॥ यावदहंतानपरित्यक्तातावद्ब्रह्मविचारोपिनावतरतिदूरेतल्लाभइत्याशयेनाह ॥ अहंतैवेति ॥ परासर्वासांकार्याविद्यानांमूलस्तंभभूतानिर्वाणपदस्यरोधिनीआवरणी ॥ तत्निर्वा णपदम् ॥ १ ॥ अज्ञानादुत्पन्नाअहंतैवाज्ञत्वस्यनिदर्शनंलिंगंयथाधूमोग्नेः ॥ तस्यव्यतिरेकव्याप्तिंदर्शयति ॥ नहीति ॥ २ ॥ अलंनिःशेषंअहंतालक्षणंमलमितिवा ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंतापगमादेवज्ञस्यनैर्मल्यंनिर्विक्षेपंपूर्णतांचवर्णयति ॥ नतथेति ॥ ४ ॥ यथाचित्रलिखितेसंगरेयुद्धस्य ॥ युधेर्गत्यर्थाकर्मकेतिकर्त्तरिक्तः ॥ परस्परंसंप्रहरतोपिसैन्यस्यक्षुब्धताप्रतिभासेपिनक्षुब्धता ॥५॥ एवंव्यवहारकार्यलिंगेनानुमीयमानावासनापिबाधेनांतर्निर्वाणैकतयादग्धपटतंतुरेखादामोपमत्वान्नवासना॥६॥ ऊर्म्यादीतिदृष्टांतंविशदयति॥ तरत्तरंगइति॥७॥तस्यांतर्बाह्यसर्ववासनाबाधैकलक्षणमितिचेदक्षोभशमादिकमेवेत्याशयेनाह॥अंतरिति॥ उदितःसदैवप्रसन्नः॥८॥संविन्मयेपरेअज्ञातात्मनि ॥ स्फुरतिविवर्त्तते ॥९॥अभ्रखंडरूपेणव्योम्निस्फुरतोनीहारधूमस्यगजरथादिरूपाव्यूहाआकाररचनाभेदाः ॥१०॥ इदानींभगवान्वसिष्ठःसर्वान्श्रोतॄन्संबोध्याह ॥ संविदिति ॥ हेश्रवणार्थमागताज्ञाअभिज्ञजनाःयूयंविषादंमाकुरुतकिंतुमदुक्तरीत्यासर्वोपिविषादहेतुःप्रपंचःसंविदोभ्रांतिर्विवर्त्तमात्रमितिविचारेणभ्रांतितद्विषयतत्त्वपरीक्षणेभ्रांतीनांनिःस्वरूपतापत्त्याअलाभेनविलासिनोविलसनशीलाःसंतोविजयध्वंसर्वोत्कर्षेणवर्त्तध्वम् ॥ हियतोमदुपदेशेनवस्तज्ज्ञतैवास्तिनत्वज्ञतेत्यर्थः ॥११॥ कीदृशीसासंविद्भ्रांतिरज्ञेनानुभूयतेतदाह ॥ अं

नतथाशरदाकाशंनतथास्तिमितोर्णवः ॥ पूर्णेंदुमध्यंनतथायथाज्ञःपरिराजते ॥ ४ ॥ चित्रसंगरयुद्धस्यसैन्यस्याक्षुब्धतायथा॥ तथैवसमताज्ञस्यव्यवहारवतोपिच॥ ५ ॥ निर्वाणैकतयाज्ञस्यवासनैवनवासना॥ लेखादामोपमात्वब्धेरूर्म्यादिनजलेतरत् ॥ ६॥ तरत्तरंगोजलधिर्जलमेवयथाखिलम् ॥ दृश्योच्छूनमपिब्रह्मतथाब्रह्मैवनेतरत् ॥ ७॥ अतस्तरंगतोऽक्षुब्धोबहिरस्तंगतःशमी॥ विद्यतेचोदितोयस्यसमुक्तइतिकथ्यते॥ ८ ॥ अहंत्वसर्गरूपेणसंवित्संविन्मयेपरे॥ स्फुरत्यंभोंभसीवातोनानातेयंकिमात्मिका ॥ ९ ॥ धूमस्यस्फुरतोव्योम्नियथागजरथादयः॥ व्यूहाधूमान्नतेभिन्नास्तथासर्गाःपरेपदे ॥ १० ॥ संविद्भ्रांतिविचारेणभ्रांत्यलाभविलासिनः॥ विजयध्वंविषादंमागताज्ञास्तज्ज्ञताहिवः॥११॥ अंकुरोनुभवत्यंतर्वृक्षपत्रफलंयथा॥ तथाजगदहंत्वेज्ञःस्वात्मास्वात्मखमप्यलम् ॥१२॥ रूपालोकमनःसत्ताज्वालार्चिष्विवदंडता॥ सत्योपिचनसंत्येताभ्रांतेश्चित्ताबलाइव॥ १३॥ यथासुखंयथारंभंयथानाशंयथोदयम्॥ यथादेशंयथाकालमजराःशांतमास्यताम् ॥ १४॥ इष्टानिष्टोपलंभेषुशांतोव्यवहरन्नपि ॥ शववन्नान्यतामंतर्निर्वाणोनुभवत्यलम् ॥ १५॥ अमनोवासनाहंताधत्तेयच्चजगच्चिरं॥ जीवतोजीवतश्चैवचिज्जीवःसपरंपदम् ॥ १६ ॥ सत्त्वेवजडवाहेनदुःखभारायकेवलम्॥ नृणांपाशावबद्धानांपोतकानामिवार्णवे॥ १७॥

कुरइति ॥ अज्ञःस्वात्मावस्तुतःस्वात्मानंखमाकाशकल्पमपिजगदहंत्वेअनुभवति ॥ प्रगृह्यसंधिरार्षः ॥ यथाअंकुरःस्वात्मनिवासनात्मकंवृक्षपत्रफलादिभावंतद्वदित्यर्थः॥१२॥ कीदृशस्तत्रविचारस्तमाह ॥ रूपेति ॥ बहिःरूपालोकसत्ताअंतर्मनःसत्ताश्चाधिष्ठानात्मनासत्योपिस्वरूपेणनसति यथाभ्राम्यमाणोल्मुकज्वालार्चिःषुदंडचक्रतादयइत्यर्थः ॥ चित्ताबलाःविधुरचित्तकल्पितकामिन्यइव ॥१३॥ अतोहेश्रोतारःसर्वंजगत्यथाउदेतिस्थितंचयथास्वकार्यमारभतेयथाचसुखदुःखेऽनुभावयतियथाचनश्यतियथाचतदीयौदेशकालौतथातथाउत्पत्तिस्थित्युपशमप्रकरणोक्तयुक्तिभिर्विमृश्यमिथ्येतिनिश्चित्ययशांतमास्यताम् ॥ १४ ॥ शववन्निर्वाणःशांतचित्तः ॥ अतोनानुभवति ॥ १५ ॥ जीवन्मुक्तानांमनोवासनारहितैवाहंताचिरंयावद्देहपातंयजगद्धत्तेयश्चतद्वोक्ताजीवस्तावत्कालंजीवतितदुभयंचिज्जीवएवनजडांशोणुमात्रमपितत्रास्तीतिपरमंपदमेवतदित्यर्थः ॥ १६ ॥ एवंचनिष्कर्षेजीवजगतोर्जडप्रवाहात्मनासत्त्वानर्थइतिफलितमित्याशयेनाह ॥ सत्त्वेति ॥ पोतकपक्षेडलयोरभेदाज्जलरूपेणवाहेनाधारेणार्णवेसत्त्वैवदुःखसदृशपण्यभारवहनायेतियोज्यम् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवतमज्ञमज्ञानजाड्यानुभवापराधाद्विवर्चिदेकरस्यपूर्णतालक्षणामोक्षसत्तानश्रयति ॥ यथाभृगुपातादिनामृतेनेनप्राप्यंस्वर्गादिजीवंतंनश्रयतितद्वदित्यर्थः ॥१८ ॥ ननुमास्तु मोक्षःसांकल्पिकस्वर्गादिफलेष्वेवकश्चिन्नित्यःपुरुषार्थोस्तुतत्राह ॥ यद्यदिति ॥ तन्नाशेचावश्यंभयमस्तीतिभावः॥किंतर्ह्यभयमक्षयंचतदाह ॥ नसंभवतीति ॥ एतत्संकल्पनम् ॥ १९ ॥ एतत्अनहंभावनंअज्ञदृष्ट्याभयावहत्वाद्ग्रहीतुमयुक्तमपिपरमार्थदृशासत्यमितियुक्तमेवग्रहीतुम् ॥ यथामूढेनविषबुद्ध्याउपेक्षितममृतमभिज्ञेनग्रहीतुंयुक्तमित्यर्थः ॥ २० ॥ तत्सत्यतामुपपादयति ॥ जडमिति ॥ २१ ॥ अतएवाशेषशांतेरहंत्वशांतिरवधिःसैवमुक्तता तस्यांचघृतकाठिन्यविलयेघृतस्येवनाणुमात्रमप्यात्मनःकिंचिन्नष्टमिति नसर्वनाशोयमितिभेतव्यमित्याशयेनाह ॥ शांतेति ॥ २२ ॥ अत्रास्यांमुक्तौभोगत्यागोविचारआत्मनइंद्रियमनोनिग्रहपौरुषंचेतित्रयान्नान्यदुपयुज्यतेइतिनिश्चित्यहेअज्ञा मुमुक्षवःसर्वमनात्मवर्गंपरित्यज्यस्वात्मैवप्रणम्यतांतत्त्वबोधेनशरणीक्रियतामित्यर्थः ॥ २३ ॥ एवमहंतावधिकसर्वद्वैतोपशमेननिर्वासनंसर्ववासनाक्षयोपलक्षितंयन्मननंमन

मोक्षसत्ताश्रयतितंनाज्ञानानुभवादिव॥मृतेनयत्किलप्राप्यंजीवन्प्राप्नोतितत्कथम्॥१८॥यद्यत्संकल्प्यतेतत्तत्संकल्पादेवनाशभाक्॥
नसंभवतियत्रैतत्तत्सत्यंपदमक्षयम्॥१९॥नान्योनचाहमस्मीतिभावनान्निर्भयोभव॥सत्यंयुक्तंभवत्येतद्विषमप्यमृतंयथा॥२०॥
जडंदेहादिचित्तांतंविचार्यसकलंवपुः॥लभ्यतेनाहमस्मीतितस्मान्नास्मीतिसत्यता॥२१॥शांताशेषविशेषाणामहंतां[1]ताविचारणात्॥
केवलंमुक्ततोदेतिनतुकिंचिद्विनश्यति॥२२॥भोगत्यागविचारात्मपौरुषान्नान्यदत्रहि॥उपयुज्यतइत्यज्ञाःस्वात्मैवाशुप्रणम्यताम्॥२३
निर्वासनंमननमेवमुदाहरंतिमोक्षंविनाभवतितन्नचजातुबोधात् ॥ सन्नोजगद्भ्रमइतीहपरःप्रबोधोनप्रत्ययोत्रयदतःसुचिरायबंधः
॥२४॥जगदहमसदित्यवेत्यसम्यग्जनधनदारशरीरनिर्व्यपेक्षः॥भवतिहिसचचेतनस्वरूपःपरिमितखंखलुनान्यथास्तिमुक्तिः॥२५॥
इ०वा०महारामायणेवा०दे०मोक्षोपायेषुनिर्वाणप्रकरणेउत्तरार्धेपरमार्थोपन्यासयोगोनामत्रिंशस्सर्गः॥३०॥

सोब्रह्मभावेनावस्थानंतदेवमोक्षंश्रुतयोविद्वांसश्चोदाहरंति ॥ तच्चबोधात्तत्त्वज्ञानाद्विनाजातुकदाचिदपिनभवति ॥ सचपरःप्रबोधोजगद्भ्रमःसन्नपरमार्थोनोनभवत्येवइहमोक्षशास्त्रेप्रसिद्धः ॥ यद्यस्मात्कारणादत्रईदृशेबोधेनेहनानास्तिकिंचनेत्यादिश्रुत्याजायमानोपिरागादिपुरुषदोषप्राबल्याज्जगत्सत्यताभ्रमदार्ढ्याच्चप्रत्ययोविश्वासोनास्ति ॥ अतोहेतोःसुचिरायजीवस्यसंसारबंधोऽनुवर्त्ततइत्यर्थः ॥ २४ ॥ तस्माच्छास्त्रादिविश्वासदार्ढ्याज्जगदित्यहमितिचोभयमप्यसत्नास्त्येवेतिसम्यक्श्रवणमननाभ्यासेनोपेत्यबंध्वादिजनेधनेदारेषुस्वशरीरेचनिर्व्यपेक्षस्सन्परमार्थतत्त्वंबुद्ध्वापरिमितखंउपाधिपरिच्छिन्नचिदाकाशरूपःसजीवश्चाज्जगच्चचेतनंचिन्मात्रंतत्स्वरूपोभवतिसैवास्यमुक्तिरयमेवतदुपायइतोन्यथास्यमुक्तिर्नास्तीत्यर्थः ॥ २५ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्धेत्रिंशःसर्गः ॥ ३० ॥ ॥ ७ ॥ ॥ ७ ॥ ॥४२॥

१ अहंतायाअंतोयस्यांतथाविधामुक्ततेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शांततासमाधिपरताव्यवहारोवेतिद्वयमपिदृश्यते ॥ २६ ॥ २७ ॥ सप्तमभूमिकाविश्रांतिपर्यंतंपरिपोषंनोपागतम् ॥ २८ ॥ २९ ॥ एवंचब्रह्मणिस्वाभाविकभावनानुसारेण जगद्रूपमस्तिशास्त्रीयतत्त्वभावनानुसारेणतात्विकंरूपमप्यस्तीतियथेच्छमनर्थःपुरुषार्थोवासुलभइत्याशयेनाह ॥ कोशेइत्यादिना ॥ बाह्यताआत्मान्यनिष्ठताजगतोनेत्यर्थः ॥ ॥ ३० ॥ बहिरस्तीतिप्रतीतिस्त्वात्मन्येवबाह्यताभावनान्नान्याधारत्वादित्याह ॥ बाह्यताभावनादिति ॥ तथाचतत्तद्भावनात्मकमेवबाह्यत्वमांतरत्वंचेतिफलितमित्याशयेनाह॥ भावनमिति ॥ ३१ ॥ अतएवस्वप्नजाग्रतोर्नप्रतीतितोभेदइत्याह ॥ येति ॥ भिन्नभांडस्थक्षीरयोरिवअन्यताभेदोविशेषोनास्ति ॥ ३२ ॥ ननुजाग्रत्स्वप्नार्थानांस्थैर्यास्थैर्यैर्वि शेषःप्रत्यक्षउपलभ्यतेतस्यकागतिस्तत्राह ॥ स्थैर्यैति ॥ एवंस्वप्नस्यजाग्रद्देहाधारताप्रत्ययोपिनभेदकइत्याह ॥ आधारेति ॥ ३३ ॥ स्वप्नार्थानांयावदात्ममात्रतानानुसंधी

शांतताव्यवहारोवारागद्वेषविवर्जितः॥ विश्रांतस्यपरेतत्त्वेदृश्यतेसमदर्शिनः॥२६॥ अथवाशांततैवास्यनिर्वाणस्यावशिष्यते॥निर्वा सनःकिलमुनिःकथंव्यवहरत्वसौ॥ २७॥ यावत्त्वस्यननिर्वाणंपरिपोषमुपागतम् ॥ तावद्व्यवहरत्यस्तरागद्वेषभयोदयः॥२८॥ वीतरा गभयक्रोधोनिर्वाणःशांतमानसः॥शिलेवाप्यशिलीभूतोमुनिस्तिष्ठतिनित्यशः॥ २९॥ कोशेऽस्तिपद्मबीजस्ययथासर्वाब्जिनीतथा॥ अनन्यास्वप्नविभ्रांतिरात्मन्यस्तिनबाह्यता ॥ ३० ॥ बाह्यताभावनाद्बाह्यमात्मैवात्मत्वभावनात् ॥ भवतीदंपरेतत्त्वेभावनंतत्तदेवहि ॥ ३१ ॥ यांतःस्वप्नादिविभ्रांतिःसैवेयंबाह्यतोदिता॥ मनागप्यन्यतानात्रद्विभांडपयसोरिव॥ ३२॥ स्थैर्यास्थैर्यैर्तथैवात्रभ्रांतिमात्रम येतते॥ आधाराधेयतेतेद्वेयथाजलतरंगते ॥ ३३ ॥ स्वप्नादावात्मनोन्यत्वज्ञानादन्यत्ववेदनम्॥ अनन्यताववोधेतुतदनन्यन्नचोदयि ॥ ३४ ॥ कलनारहितंशांतंयद्रूपंपरमात्मनः॥ भवत्यसौतत्तद्भावादतद्भावान्नतद्भवेत्॥३५॥ स्वप्नादिज्ञानसंशांतौयद्रूपंशुद्धमैश्वरम्॥ नतदस्तिनतन्नास्तिनवाग्गोचरमेवतत्॥३६॥आत्यंतिकभ्रांतिलयेयुक्तएवावगच्छति॥ स्वरूपंनोपदेशस्यविषयोविदुषोहितत्॥३७॥ शांतंनिरस्तभयमानविषादलोभमोहात्मदेहमननेंद्रियचित्तजाड्यम् ॥ त्यक्त्वाहमक्षयमपास्तसमस्तभेदंनिर्वाणमेकमजमासितुमेव युक्तम्॥३८॥ ॥इ०वा०महारामायणेवा०दे०मो०नि०उ०निर्वाणयुक्त्युपदेशवर्णनंनामएकत्रिंशत्तमःसर्गः॥ ३१॥ ॥७॥

यतेतावदेवभानं आत्ममात्रतानुसंधानेतुझटित्येवजागरणाद्बाधादात्मानन्यत्वंप्रसिद्धंतद्वज्जाग्रदर्थेष्वपिबोध्यमित्याशयेनाह ॥ स्वप्नादाविति ॥ उदयिपृथगाविर्भाववन्नच ॥ ३४ ॥ अतएववास्तवोपिब्रह्मभावस्तद्भावनाधीनइतियदुक्तंतत्सिद्धमित्याह ॥ कलनेति ॥ ३५ ॥ अस्तितानिरूपककालदेशाधाराद्यभावान्नतदस्ति ॥ स्वरूपस्याबाधान्न नास्ति ॥ अतएववाचामगोचरमित्यर्थः ॥ ३६ ॥ कथंतर्हितद्वाचागुरुणोपदिश्यतेतत्राह ॥ आत्यंतिकेति ॥ युक्तःसमाधिस्थःस्वानुभवेनैवावगच्छतिकांतासंभोगसुखवन्नपरंप्र त्युपदेशस्यविषयस्तथापितदुपायप्रदर्शनेनतत्रश्रोतृबुद्ध्यवतारणमेवोपदेशफलमितिभावः ॥ ३७ ॥ अतोहेरामअहमहंकारंत्यक्त्वानिरस्तानिजाड्यांतान्येकादशयस्मिंस्तथा विधमतएवशांतमजमक्षयमपास्तसमस्तभेदमेकंनिर्वाणंब्रह्मभूत्वासदैवसमाधावासितुंयुक्तमुचितंनव्यवहारविषयेष्वित्यर्थः ॥ ३८ ॥ ॥ इतिश्रीवासिष्ठम०रा०तात्पर्यप्र काशेनिर्वाणप्रकरणेउत्तरार्द्धेएकत्रिंशत्तमःसर्गः ॥ ३१ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साधुसंगमसच्छास्त्रविचाराभ्यासशालिनः ॥ मोक्षोत्रावश्यभावित्वात्स्वायत्तउपपाद्यते ॥ १ ॥ विद्याविद्याभ्यांबंधमोक्षयोःस्वायत्तत्वंवर्णयिष्यन्प्रथममविद्ययाचित्प्रसरणा
धीनंस्वायत्तंबंधंदर्शयति ॥ यदेति ॥ स्पंदादपिचेतिदृष्टांतार्थम् ॥ इवचेतिपाठःस्पष्टः ॥ १ ॥ २ ॥ ३ ॥ उदितोपिनखेदायेतियदुक्तंतदुपपादयति ॥ यासाविति ॥कूटस्थचितो
बाह्यार्थोपसर्पणलक्षणंप्रसरद्रूपंविषयाभावात्स्वतश्चनास्त्येवेतिविषयाबाधान्नखेदायेतिभावः ॥ ४ ॥ अयंचित्प्रसरोऽनुभवादेवसिद्ध्येत् ॥ सचानुभवोविषयाबाध्यमानोऽस
दर्थमननुभवन्नेवार्भकयक्षानुभववन्मुधैवस्थितइत्यर्थः ॥ ५ ॥ उक्तोन्यायआंतरेअहंभावात्मकप्रसरेपितुल्यइतिदर्शयन्बंधमोक्षयोःस्वायत्ततासिद्धेत्याह ॥ अहंभावइति
॥६॥ मोक्षस्यस्वायत्ततामुपपादयतितदित्यादिना ॥ विषयामूलजाड्यापहाराच्चिदात्मैकरस्यापत्त्याअजडानांमनोबुद्ध्यादिसर्ववस्तूनांजडंपाषाणादीवनिश्चलंयदवेदनंवेद्यवेदन

॥श्रीवसिष्ठउवाच॥ ॥यदाचितिःप्रसरतितदाहंताजगद्भ्रमः॥ असदेवाभ्युदेतीवस्पंदादपिचवायुता ॥१॥ उदितोपिनखेदायब्रह्मरू
पत्ववेदनात् ॥ परमायत्वनर्थायजगच्छब्दार्थभावनात् ॥ २ ॥ रूपानुभवमादत्तेचक्षुःप्रसरणाद्यथा॥ चितिःप्रसरणात्तद्वज्जगद्विभ्रम
मास्थिता ॥ ३ ॥ यासौप्रसरतिव्यर्थंचेत्याभावान्नसासती॥ असत्कथंप्रसरतिवंध्यापुत्रःक्वनृत्यति ॥ ४ ॥ अयंत्वनुभवादेवमुधैवानु
भवन्स्थितः॥ असदेवाननुभवन्स्वयमर्भकयक्षवत् ॥५॥ अहंभावोपिदुःखार्थमहमित्येववेदनात् ॥ अवेदनान्नाहमतःस्वायत्तेबंधमु
क्ते ॥ ६ ॥ तद्ध्यानंससमाधिर्वायदवेदनमासितम् ॥ अजडानांजडमिवसमंशांतमनामयम् ॥ ७ ॥ द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भवि
भ्रमैः॥ माविषीदतदुःखायविबुधाअबुधाइव ॥८॥ असदाश्रयतेदुःखंस्वप्नवद्घनवासनः ॥ रूपालोकमनस्कारान्संकल्परचितानिव
॥ ९ ॥ दुःखंसदेवनाश्नातिसुप्तवत्तनुवासनः॥ रूपालोकमनस्कारान्संकल्परहितानिव ॥ १० ॥ अत्यंततनुतामेत्यवासनैवैतिमुक्तता
म्॥ देशकालक्रियायोगात्पदार्थंभावनामिव ॥ ११ ॥

भावनिर्मुक्तमासितमवस्थानंतदेवध्यानंसमाधिर्वातदुपलक्षितामुक्तिरितियावत् ॥ ७ ॥ अयमेवविश्रांतिहेतुःसिद्धांतः अन्यथाकल्पनेतुवादिनांकलहमात्रपर्यवसानेनवृथाकं
ठशोषःस्यादित्याशयेनतान्संबोध्याह ॥ द्वैतेति ॥ हेविबुधाःपंडितंमन्यावादिनोयूयमबुधामूर्खाइवद्वैतादिनानाविकल्पसमुद्भेदैर्बहुविधकलहात्मकवाक्यसंदर्भविभ्रमैर्माविषी
दतवृथाकंठशोषलक्षणंविषादंमाभुत ॥ इममेवपरमपुरुषार्थहेतुंसिद्धांतमवलंबध्वमित्यर्थः ॥ ८ ॥ घनवासनस्यबहिर्मुखस्यासदपिरूपादिदर्शनमिवदुःखमपिदृढतरंदुर्वारम् त
नुवासनस्यांतर्मुखस्यतुतद्वदेवप्रारब्धप्रसंजितमपिदुःखमापाततोभुज्यमानंस्वानंदानुभवतिरोहितत्वादभुक्तप्रायमेवभवतीत्याह ॥ असदितिद्वाभ्याम् ॥ आश्रयतेभुंक्ते ॥ ९ ॥
अप्यर्थेएवकारः ॥ सत्प्रारब्धप्रसंजितमपिदुःखंनाश्नातिनभुंक्ते ॥ सुप्तोनिद्रासुखपरवशचित्तोयथामशकमत्कुणादिदंशनदुःखंनानुभवतितद्वत् ॥ १० ॥ अतोवासनानामेवो
पचयात्संसारानुभवइवापचयाद्देशकालक्रमेणमुक्तानुभवोपिसिद्ध्यतीत्याह ॥ अत्यंतेति ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri

अपक्षयक्रमप्राप्तेनपरेणाणुनासूक्ष्मतमेनचरमपरिणामेन ॥ आदिपदान्नीहारधूमादिपरिग्रहः ॥ १२ ॥ वासनातानवेतर्हिंकउपायस्तमाह ॥ अहंभावनयेति ॥ ब्रह्माहंभावनयाबोधेअभिरुध्यमानेवासनादिनेदिनेघनंनिरूढंतानवंसौक्ष्म्यंयस्यास्तथाविधासतीमुक्तिःसंपद्यते ॥ यथाविपश्चितांपंडितानांसंगमाद्विद्याभ्यासाद्वर्द्धमानान्मूढताघनतानवंप्राप्यपांडित्यंसंपद्यतेतद्वदित्यर्थः ॥ १३ ॥ कियत्कालंबोधोवर्धनीयइतिचेद्रूढबोधतापर्यंतमित्याशयेनरूढबोधलक्षणमाह ॥ नाहमिति ॥ मद्युक्त्याअहंब्रह्मेतिभावनालक्षणेनप्रत्यगात्मयोगेनाभ्यस्यमानेनेहजीवतोयोगिनोऽजीवतःपरलोकंगतस्यवाअहंशब्दार्थोजीवोनास्तीतिशमात्मकोनिश्चयोंतर्यस्यास्तिसरूढबोधइत्यर्थः ॥ १४ ॥ द्वंद्वंद्रव्यंक्रियेतिचकल्प्यमानम् ॥ स्पंदइतिपाठेस्पष्टम् ॥ आदिपदाज्जीवः ॥ १५ ॥ १६ ॥ १७ ॥ जीवनंप्राणादिधारणंकिम् ॥ यावज्जीवग्रहणमामोक्षोपलक्षणम् ॥ १८ ॥ सचविचारोगुरुसेवनाच्छीघ्रंफलपर्यंतःसिध्यतीत्याशयेनाह ॥ जीवितमिति ॥ यतस्तज्ज्ञस्तत्त्ववित्तल्लक्षणस्यार्कस्यसेवनात्संपर्काद्भुवनंजगदवबोधेनोज्जीवितंभाति ॥ अहमिति ॥

अत्यंततनुतांयातावासनैवैतिमुक्तताम् ॥ पराणुपरिणामेनखतांखेभ्रादिकायथा ॥ १२ ॥ अहंभावनयाबोधेवासनाघनतानवा ॥ विपश्चित्संगमाभ्यासात्पांडित्यमिवमूढता ॥ १३ ॥ नाहमस्तीहमद्युक्त्यानिश्चयोंतःशमात्मकः ॥ जीवतोजीवतश्चास्तिरूढबोधइतिस्मृतः ॥ १४ ॥ वायौद्वंद्वमिवात्रेदंजगदादिचभासते ॥ कोहंकथमिदंचेतिविचारेणैवशाम्यति ॥ १५ ॥ नाहमित्येवनिर्वाणंकिमेतावतिमूढता ॥ सत्संगमविचाराभ्यामेतदाश्ववगम्यते ॥ १६ ॥ क्षीयतेतत्त्ववित्संगादहमित्येवबंधनम् ॥ आलोकेनेवतिमिरंदिवसेनेवयामिनी ॥ १७ ॥ कोहंकथमिदंदृश्यंकोजीवःकिंचजीवनम् ॥ इतितत्त्वज्ञसंयोगाद्यावज्जीवंविचारयेत् ॥ १८ ॥ जीवितंभुवनंभातिततोहमितिनश्यति ॥ तत्वमेकेनतज्ज्ञार्कसेवनात्सनिषेव्यताम् ॥ १९ ॥ योयोबोधातिशयवांस्तंतंपृथगुपास्वभो ॥ संगमेकथयोदेतितेषांवादपिशाचिका ॥ २० ॥ वादयक्षेप्यभ्युदितेबालस्येवविपश्चितः ॥ युक्तियुक्तमलंमुख्यमुदेत्यहमितिभ्रमः ॥ २१ ॥ अतःप्रत्येकमेकांतेप्राज्ञःसेवेतपंडितम् ॥ एकीकृत्यतदुक्तांस्तानर्थान्बुद्ध्याविचारयेत् ॥ २२ ॥ विचारयेत्तदुक्त्यर्थंबुद्ध्याबुद्धिविवृद्धये ॥ सर्वसंकल्पमुक्तंयत्तत्तत्तन्मयतांव्रजेत् ॥ २३ ॥

सर्वपदार्थतत्त्वावरणंतमोनश्यति वस्तुतत्त्वंचएकेनक्षणेनप्रथतेअतःसतज्ज्ञार्कोनिषेव्यतामित्यर्थः ॥ १९ ॥ यदातुबहुषुविद्वत्सुतार्किकेषुचसत्स्वयंतत्त्वज्ञोयंनेतिनिर्द्धारणेअसमर्थोहंतदाकिंकुर्यांतत्राप्याह ॥ योयइत्यादिना ॥ ननुपृथगुपास्वेतिकिमर्थमुच्यते समुदितोपास्तौकोदोषस्तमाह ॥ संगमेइत्ति ॥ कथयापरस्परविरुद्धयुक्तिकथनेन ॥ मुंडेमुंडेमतिर्भिन्नातुंडेतुंडेसरस्वतीतिन्यायादितिभावः ॥ २० ॥ उदेतुनामवादपिशाचिकाकोदोषस्तत्राह ॥ वादयक्षेइति ॥ वादलक्षणेयक्षेपिशाचेभ्युदितेसतिविवेकिनोपिश्रोतुरश्रौतमपियुक्तिभिस्तर्कैर्युक्तंताकिंकैःप्रतिपाद्यमानमहंप्रत्यक्तत्त्वंमुख्यंतदेवालंपर्याप्तंममेतिभ्रमउदेति ॥ तथाचांधगोलांगूलन्यायेनतदालंबनेऽनर्थएवस्यादितिभावः ॥ २१ ॥ सेवेतसेवाद्युपचारेणवशीकृत्यपृच्छेत् ॥ २२ ॥ श्रुतियुक्तिस्वानुभवविद्वदंतरसंवादैर्विचारयेद्वलतत्त्वमिवपरीक्षेतसर्वसंदेहोच्छेदेनबुद्धेःशुद्धये ॥ एवंमननेनबुद्धिशुद्धौनिदिध्यासनंकार्यमित्याह ॥ सर्वसंकल्पमुक्तमिति ॥ तत्सत्परमार्थस्तन्मयतांनिर्विकल्पसमाधितस्तदैकरस्यम् ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनतत्त्वज्ञानोदयेनाज्ञानोच्छेदंदर्शयति ॥ विपश्चिदिति ॥ २४ ॥ तदसंभवशंकानकार्येत्याह ॥ एषोर्थइति ॥ २५ ॥ सर्वसंकल्पमुक्तंयत्तदेवसत् तन्मयताप्राप्तौसर्वजगद्व्यवहा
रैरपिविदुषोनकश्चिदिष्टनाशोऽनिष्टोदयोवेत्याह ॥ व्योम्नइति ॥ यथाव्योम्नःअंबुवाहनीहारातपादिविजृंभयायथावामहाजलस्यसमुद्रस्यतरंगादिभंग्याकिंचिदनिष्टंनयुज्य
तेनापिकिंचिदिष्टंनश्यतितद्वन्निर्मननस्यनिःसंकल्पस्ययोगिनोपिनेष्टानिष्टनाशोदयावित्यर्थः ॥ २६ ॥ आकाशसमुद्रयोःसद्वितीयत्वात्तद्योगवियोगशंकापिस्याद्विदुषस्तुकूट
स्थाद्वयब्रह्मरूपत्वान्नाध्यस्तविवर्तैस्तच्छंकापीत्याशयेनाह ॥ इदंहीति ॥ निरामयेआततेपूर्णेब्रह्मणिविचारितेप्रबुद्धेसतिइदंसर्वंमृगतृष्णिकांबुवदहमितिचपृथगात्मरूपंनविद्य
ते ॥ एवंस्थितेइहतत्त्वविदिमननादिविभ्रमःकुतःकककस्मात्स्यादित्यर्थः ॥ २७ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उ०द्वात्रिंशःसर्गः ॥ ३२ ॥ ॥६॥ ॥ इहोपव
र्ण्यतेभ्रांतिकल्पनाप्रतिकल्पना ॥ परलोकचिकित्साचसंवित्प्रसरवारणात् ॥ १ ॥ तत्रादौप्रतिकल्पनांवक्तुंप्रस्तावंरचयति ॥ स्वपौरुषेणेति ॥ नाअधिकारयोग्यशरीरंप्राप्तःपु

विपश्चित्संगमैर्बुद्धिंनीत्वापरमतीक्ष्णताम् ॥ अज्ञानलतिकासैकाकणशःक्रियतामलम् ॥ २४ ॥ एषोर्थःसंभवत्येवतेनेदंकथयाम्यह
म् ॥ स्वानुभूतंवयंबालानासमंजसवादिनः ॥ २५ ॥ व्योम्नोंबुवाहादिविजृंभयेवतरंगभंग्येवमहाजलस्य ॥ नयुज्यतेनापिचनश्यतीह
नाशोदयौनिर्मननस्यकिंचित् ॥ २६ ॥ इदंहिसर्वंमृगतृष्णिकांबुवन्निरामयेब्रह्मणिशांतआतते ॥ विचारितेनाहमितीहविद्यतेकुतःक्व
कस्मान्मननादिविभ्रमः ॥ २७ ॥ ॥इत्यार्षेवा०वा०दे०मो०नि०उ०सत्यावबोधनोपदेशोनामद्वात्रिंशःसर्गः ॥ ३२ ॥ ॥ ६ ॥
श्रीवसिष्ठउवाच ॥ ॥स्वपौरुषेणस्वधियासत्संगमविकासया ॥ यदिनानीयतेज्ञत्वंतदुपायोस्तिनेतरः ॥१॥ स्वंकल्पितंकल्पितंचप्रतिक
ल्पनयास्वया ॥ तदेवान्यत्वमादत्तेविषत्वममृतंयथा ॥ २ ॥ कल्पनाचाकल्पनांतामुक्ततायदकल्पनम् ॥ एतच्चभोगसंत्यागपूर्वंसिध्यति
नान्यथा ॥ ३ ॥ वचसामनसाचांतःशब्दार्थावविभावयन् ॥ यआस्तेवर्द्धतेतस्यकल्पनोपशमःशनैः ॥ ४ ॥ वर्जयित्वाहमित्येवनावि
द्यास्तीतरात्मिका ॥ शांतेत्वभावनादस्मिन्नान्योमोक्षोस्तिकश्चन ॥ ५ ॥

रुषोयदिज्ञत्वंतत्त्वज्ञानंनीयतेप्राप्यते ॥ नयतेर्द्विकर्मकात्प्रधानेनीह्रकृष्वहामितिप्रधानेकर्मणिलः ॥ तर्त्तर्हिनेतरोनान्यथेत्यर्थः ॥ १ ॥ कीदृशंतत्पौरुषंयेनज्ञत्वंनीयतेतदाह ॥
स्वंकल्पितमिति ॥ स्वंस्वाभाविकमशास्त्रीयम् ॥ कल्पितंकल्पितमितिवीप्सा ॥ सर्वंकल्पितंचात्तन्मूलंवासनाविद्यादिचस्वयास्वीययाशास्त्रीययाप्रतिकल्पनयातदेवान्यत्वंबंध
हेतुतामपहायमोक्षोपयोगित्वमादत्ते ॥ यथास्वभावतोमरणहेतुरपिविषंरसायनशास्त्रोक्तोपायप्रतिकल्पनयाविषत्वंविहायामृतममरणसाधनंरसायनंभवतितद्वत् ॥ २ ॥ कि
यत्कालंप्रतिकल्पनाकार्येतिचेत्सर्वकल्पनानिवृत्तिपर्यंतमित्याह ॥ कल्पनेति ॥ अकल्पनंसर्वकल्पनानिवृत्तिरंतोवधिर्यस्याःसायद्यस्माद्धेतोरकल्पनमेवपरिशिष्टस्यात्मनोमुक्त
ता ॥ तत्रावश्यकींवैराग्यलक्षणांसंन्यासलक्षणांचप्राथमिकींप्रतिकल्पनांदर्शयति ॥ एतच्चेति ॥ पूर्वमादौभोगसंत्यागात् ॥त्यजतैवहितज्ज्ञेयंत्यक्तुःप्रत्यक्परंपदमितिश्रुतेरितिभा ॥४५॥
वः ॥ ३ ॥ ततःश्रवणमननाभ्यामात्मतत्त्वंनिश्चित्यवाङ्मनसनिरोधलक्षणाप्रतिकल्पनाकार्येत्याह ॥ वचसेति ॥ ४ ॥ ततोऽनहंभावलक्षणासाकार्येत्याह ॥ वर्जयित्वेति ॥ अ
भावनात्सर्वभावनानिवर्त्तकतत्त्वसाक्षात्कारात् ॥ अस्मिन्नहंकारेशांतेबाधितेसति ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतत्त्वसाक्षात्कारोत्तरमपिप्राक्तनजगज्जीवभावेरुचिर्यस्यतथाविधःसन्आदेहंस्थूलदेहपर्यंतंकिंचिदल्पमप्यहंभावंयदिश्रयसितदैवापरिच्छिन्नपूर्णानंदस्वरूपविस्मरणान्न श्यसीव ॥ संसारदुःखेपतसीत्यर्थः ॥ तस्मिन्नहंभावेत्यक्तेतुशाम्यसिसर्वदुःखनिर्वृत्तिलभसे निरतिशयानंदस्वभावेनसिध्यसिच ॥ ६ ॥ अचेतनाद्बहिर्मुखवृत्त्याअदर्शनात् ॥ ७ ॥ परस्मिन्ब्रह्मणिआलीनचित्तस्यातएवोपलस्येवबहिरचेतनादंतश्चित्स्वभावनात्सांधकाभावाद्बाधकसत्वाच्चेदंसर्वंदृश्यंशाम्यति ॥ ८ ॥ सुखदुःखयोर्दृश्यसत्वासत्वे नोपयुज्येतेकिंतुतद्दर्शनादर्शनेएवेतितच्चेतनायप्रवृत्तंचित्तमेवनिरोद्धव्यमित्याशयेनाह ॥ इदमिति ॥ दृश्यस्याचेतनमदर्शनंतुअचेतनाच्चित्तक्रियानिरोधेनब्रह्माकारतापादनां तप्रतिकल्पनावशादेवेत्यर्थः ॥ ९ ॥ परलोकचिकित्सांवर्णयितुमुपक्रमते ॥ द्वाविति ॥ सर्वैराध्यात्मिकादिभावैः ॥ १० ॥ इहलोकेप्रसिद्धेक्षुत्तृषादिव्याधावन्नपानादिभोगल

अहंभावमथादेहंकिंचिच्छ्रयसिनश्यसि ॥ जगदादिरुचिस्तस्मिंस्त्यक्तेशाम्यसिसिध्यसि ॥ ६ ॥ अचेतनादिदंसर्वंसदेवासदिवस्थितम् ॥ शांतंयस्योपलस्येवनमस्तस्मैमहात्मने ॥ ७ ॥ अचेतनादिदंसर्वमुपलस्येवशाम्यति ॥ शून्याख्यातःपरालीनचित्तस्यचित्स्वभावनात् ॥ ८ ॥ इदमस्त्वथवामास्तुचेतितंदुःखवृद्धये ॥ अचेतितंसुखायांतरचेतनमचेतनात् ॥ ९ ॥ द्वौव्याधीदेहिनोघोरावयंलोकस्तथापरः ॥ याभ्यांघोराणिदुःखानिभुंक्तेसर्वैर्हिपीडितः ॥ १० ॥ इहलोकेयतंतेज्ञाव्याधौभोगैर्दुरौषधैः ॥ आजीवितंयथाशक्तिचिकित्सानापरामये ॥ ११ ॥ परलोकमहाव्याधौप्रयतंतेचिकित्सनम् ॥ शमसत्संगबोधाख्यैरन्तैःपुरुषोत्तमाः ॥ १२ ॥ परलोकचिकित्सायांसावधानाभवंतिये ॥ मोक्षमार्गमहेच्छायांशमशक्त्याजयंतिते ॥ १३ ॥ इहैवनरकव्याधेश्चिकित्सांनकरोतियः ॥ गत्वानिरौषधंस्थानंसरुजःकिंकरिष्यति ॥ १४ ॥ इहलोकचिकित्साभिर्जीवितंयातुमाक्षयम् ॥ आत्मज्ञानौषधैरज्ञाःपरलोकश्चिकित्स्यताम् ॥ १५ ॥ आयुर्वायुचलत्पत्रलवांबुकणभंगुरम् ॥ परलोकमहाव्याधिर्यत्नेनाशुचिकित्स्यताम् ॥ १६ ॥ परलोकमहाव्याधौयत्नेनाशुचिकित्सिते ॥ इहलोकमयोव्याधिःस्वयमाशूपशाम्यति ॥ १७ ॥ संविन्मात्रंविदुर्जंतुंतस्यप्रसरणंजगत् ॥ परमाणूदरेप्यस्तितच्छैलशतविस्तरम् ॥ १८ ॥

क्षणैर्दुरौषधैर्यथाशक्तियतंते ॥ अपरामयेपारलौकिकनरकजन्मपरंपरादिव्याधौभोगैश्चिकित्सानजायतइत्यर्थः ॥ ११ ॥ चिकित्सनंकर्तुमितिशेषः ॥ १२ ॥ अपथ्यभोगत्यागेसत्संगाद्यौषधसेवनेचसावधानाः ॥ शमाख्यस्यौषधस्यशक्त्या ॥ १३ ॥ ननुपरलोकव्याधेस्तत्रैवचिकित्साकरिष्यतेकिमत्रतच्चिंतयातत्राह ॥ इहैवेति ॥ निरौषधंसाधुसंगमसच्छास्त्राद्यौषधशून्यंनरकस्थावरादिस्थानम् ॥ १४ ॥ हेअज्ञाः ॥ १५ ॥ १६ ॥ इहलोकव्याधिचिकित्सार्थंपृथग्यत्नोनकार्यइत्याह ॥ परलोकेति ॥ १७ ॥ परलोकव्याधेस्तपस्तीर्थयज्ञदानप्रायश्चित्तादिचिकित्सायद्यपिसंतितथापितानात्यंतिकतदुच्छेदहेवतःकिंत्वात्मज्ञानमेव तच्चश्रवणादिपूर्वकसमाध्यभ्यासलक्षणसंवित्प्रसरनिरोधादेवेत्याशयेनतदुपायान्वक्तुंभूमिकांरचयति ॥ संविन्मात्रमिति ॥ तज्जगत्परमाणूदरेपिसंविदःपूर्णत्वादस्त्येव ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसरणंबहिर्मुखतया।विवर्त्तनंतदेवरूपालोकाबाह्यार्थामनांसिकामसंकल्पायाभ्यंतराइत्यर्थः ॥ व्योमनिचिदाकाशे ॥ १९ ॥ मिथ्यात्वादेवप्रलयसहस्रैरपिनास्यनिवृत्तिः सृष्टिसहस्रैरपिनसत्ताकित्वात्मज्ञानादेवेत्याशयेनाह ॥ प्रलयेष्वपीति ॥ नजायेतसृष्टिषुदृष्टेष्वपीतिशेषः ॥ तत्रहेतुमाह ॥ भ्रांतीति ॥ भ्रांतिमात्रैकरूपित्वादित्यर्थः ॥ २० ॥ आत्मज्ञानेतर्हिकेउपायाइतिचेत्प्रथमंवैराग्यमेवेत्याह ॥ भोगेति ॥ २१ ॥ २२ ॥ जीवितस्यआयुषः ॥ २३ ॥ रागशांतिदइतिविशेषणस्यतात्पर्यंतज्ज्ञाज्ञजीवितनदीवैलक्ष ण्यवर्णनेनदर्शयति ॥ तज्ज्ञस्येत्यादिना ॥ २४ ॥ रसनाःआक्रंदध्वनयस्ताभिरत्यंतभीषणाः ॥२५॥ अज्ञानामविचारादेवसर्गादिप्रतिभासविक्षेपरूपाःसंविप्रसरलेशाइत्याह॥

यत्संविदःप्रसरणंरूपालोकमनांसितत् ॥ व्योमन्येवानुभूयंतेनातःसत्योजगद्भ्रमः॥१९॥ प्रलयेष्वपिदृष्टेषुजगद्दृश्याख्यविभ्रमः॥ नन श्यतिनजायेतभ्रांतिमात्रैकरूपिणः॥ २०॥ भोगपंकार्णवेमग्नआत्मानोत्तार्यतेयदि॥ स्वपौरुषचमत्कृत्यातदुपायोस्तिनेतरः॥ २१॥ अजितात्माजनोमूढोरूढोभोगैककर्दमे॥ आपदांपात्रतामेतिपयसामिवसागरः॥ २२॥ जीवितस्ययथाबाल्यंदृष्टंप्राथमकल्पिकम्॥ निर्वाणस्यतथाभोगसंत्यागोरागशांतिदः ॥ २३॥ तज्ज्ञस्यजीवितनदीसकल्लोलाप्यसंभ्रमा॥ समंवहतिसौम्यैवचित्रसंस्थेवनीरसा ॥ २४॥ अज्ञजीवितनद्यास्तुरसनात्यंतभीषणाः॥ आवर्त्तावृत्तिविक्षोभकल्लोलाःसहवाहिनः॥ २५॥ सर्गवर्गाःप्रवल्गंतिसंविप्रसरले शकाः॥ द्विचंद्रबालवेतालमृगांबुस्वप्नमोहवत्॥ २६॥ संविद्वारितरंगौघाभांतिसर्गाःसहस्रशः॥ विचारितास्त्वसत्यास्तेसत्यास्त्वनुभ वभ्रमात्॥ २७॥ जगंत्याकाशकोशेपिसंविप्रसरणभ्रमात्॥ संतीवाप्यनुभूयंतेनतुसत्यानितानितु॥ २८॥ संविद्विकासपयसोबुद्बुदः सर्गविभ्रमः॥ अहमित्यादिसद्भावविकाराकाररूपवान् ॥ २९॥ संविन्निर्वाणमजगत्संविदुन्मीलनंजगत्॥ नांतर्नबाह्यंनासत्यंनस त्यंसर्वमेवतत्॥ ३०॥ चिद्रूपमजमव्यक्तमेकमव्ययमीश्वरः॥ स्वत्वभावत्वरहितंब्रह्मशांतात्मखादपि॥ ३१॥ ब्रह्मणोनिःस्वभावस्यस र्गसंवेदनेस्वतः॥ स्पंदनेपवनस्येवकारणंनोपयुज्यते॥ ३२॥ स्वप्नानुभववद्भ्रांतिर्ब्रह्माब्धौब्रह्मवीचयः॥ सर्गतावस्तुतस्त्वत्रनस्वप्नोनच सर्गता॥ ३३॥ एकमेवनिराभासमचित्त्वमजडंसमम्॥ नसन्नासन्नसदसदिदमव्ययमद्वयम्॥ ३४॥

सर्गेति ॥ प्रवल्गंतिप्रसरंति ॥ २६ ॥ अनुभवभ्रमाद्भ्रांतानुभवात् ॥२७॥ प्रसिद्धेआकाशकोशेपिगंधर्वनगरादिजगंतिसंतीवानुभूयंते ॥२८॥ अहमित्यादिभिःसद्भिर्भावविकारा कारैरूपवान् ॥ २९ ॥ संविदोनिर्वाणमप्रसरः ॥ अजगत्सर्वंजगन्निवृत्तिः ॥ उन्मीलनंप्रसरः ॥ ३० ॥ स्वप्रसरनिरोधयोःस्वयमेवेष्टेइतिईश्वरोब्रह्मेत्यर्थः ॥ ३१ ॥ सचस्पंदो मिथ्याभूताविद्याविवर्त्तएवनतुसत्यब्रह्मस्वभावजइत्याह ॥ ब्रह्मणइति ॥ ३२ ॥ आविद्यकत्वेचविवर्त्तरूपाएवसर्गताःब्रह्मणोवीचयोभ्रांतिरेव ॥ वस्तुतस्तुनस्वप्नोनापिसर्गते त्यर्थः ॥ ३३ ॥ परमार्थतस्तर्हिब्रह्मकीदृशंतदाहैकमेवेति ॥ अचित्त्वंचित्त्वाख्यधर्मांतरशून्यम् ॥ ३४ ॥

१ नद्यस्तित्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चितायस्तमचिद्रूपमसदेवसदेववा ॥ नकिंचिन्नष्टमित्यत्रनिर्वाणस्थितिरीर्यते ॥ १ ॥ नित्यनिरतिशयानंदपूर्णाद्वयचिदाकाशलक्षणांनिर्वाणस्थितिमनुभावयितुंप्रागुक्तंदृश्यानुभवस्यसंवेदनाभ्यासाधीनत्वंस्मारयति ॥ सर्वात्मनीति ॥ १ ॥ २ ॥ अस्त्वेवंकिंततस्तत्राह ॥ चिद्रूपमिति ॥ सर्वमेतच्चितएवरूपंकल्पितवेषभेदः ॥ वास्तवंतर्हिचितःकिंस्वरूपंतत्राह ॥ चिदच्छेति ॥ यतोघृतंस्वात्मनिकाठिन्यमिवचिदेवजगद्वेषंचिनोतिअतश्चिदेव ॥ ३ ॥ अस्त्वेवंततोपिकिंतत्राह ॥ नेति ॥ ततोब्रह्माद्वैतमिष्टंसिद्धमित्यर्थः ॥ ४ ॥ ननुजगदहंतादेर्जडांशस्यतत्त्वबोधेननाशइष्टःसकथमपलप्यतेतत्राह ॥ नाशेइति ॥ नाशोपिकःइतिशेषः ॥ ५ ॥ ६ ॥ यद्यसदेवजगत्तर्ह्यनर्थरूपत्ववर्णनेनतस्योपालंभोर्निदाहेयत्वेननिर्णयश्चशास्त्रेषुकुतःक्रियतइतिचेत्सत्यम् ॥ अवस्तुनिनोपालंभस्तत्फलंविचारोनिर्णयोवानसंभवत्येव खपुष्पस्यकिमुपालंभोनिर्णयोवाकेनचिदुच्यतेतद्वदित्यर्थः

श्रीवसिष्ठउवाच ॥ ॥ सर्वात्मनिचिदाभासेतदेवाश्वनुभूयते ॥ संवेद्यतेयदेवांतरसत्यंवस्त्ववस्तुवा ॥ १ ॥ तदेवाभ्यासतःपूर्वबाह्यार्थानुभवात्मना ॥ स्फुरतीवबहिस्तेनस्वस्वप्नोत्रनिदर्शनम् ॥ २ ॥ चिद्रूपंसर्वमेतच्चचिदच्छागगनादपि ॥ चिच्चिनोतिचिदेवातोनैतत्किंचन कुत्रचित् ॥ ३ ॥ ननाशोनास्तिनानर्थोनजन्ममरणेनखम् ॥ नशून्यतानानानास्तिसर्वंब्रह्मैवनैवच ॥ ४ ॥ नाशेजगदहंत्वादेर्नकिंचिदपि नश्यति ॥ असतःकिलनाशोपिस्वप्नादेःकिंनुनश्यति ॥ ५ ॥ मिथ्यावभासेसंकल्पनगरेकैवनष्टता ॥ तथाजगदहंत्वादौनाशोनासतिविद्यते ॥ ६ ॥ कुतोजगदुपालंभइतिचेत्तदवस्तुनि ॥ ननिर्णयःसंभवतिखपुष्पाणांकिमुच्यते ॥ ७ ॥ निर्णयएषएवात्रयदशेषमभावयन् ॥ यथास्थितंयदाचारंपाषाणइवतिष्ठसि ॥ ८ ॥ जगत्संकल्पमात्रात्मतत्रतेर्थ्ययुतंक्षणात् ॥ शाम्यत्यशेषेणेत्येवनिर्णयःसर्गविभ्रमे ॥ ९ ॥ सर्गेनर्गलएवायंब्रह्मात्मकतयाक्षयः ॥ अन्यथातुनसर्गोयमस्तिनास्तिचसंतिवा ॥ १० ॥ येषांचविद्यतेसर्गःस्वप्नपुंसामिवासताम् ॥ स सर्गःपुरुषास्तेचमृगतृष्णांबुवीचिवत् ॥ ११ ॥ असतामेवसद्भावमिवयेषामुपेयुषाम् ॥ नवयंनिर्णयंविद्मोवंध्यापुत्रगिरामिव ॥ १२ ॥

॥ ७ ॥ तर्हिकिंतच्छास्त्रवैयर्थ्यमेवनेत्याह ॥ निर्णयइति ॥ स्वाभाविकस्वरूपस्थितिसिद्ध्यर्थमसदपिसद्विकल्पयित्वानिंदादिनावैराग्यविवेकादिस्तत्त्वसाक्षात्कारांतउपायःकल्पितइतिएषएवनिर्णयःसिद्धांतइत्यर्थः ॥ यथास्थितंयथाशास्त्रंयथाचारंयथासंप्रदायंचभूमिकाक्रममभ्यस्येत्यर्थः ॥ ८ ॥ अस्त्वेवमात्मतत्त्वेनिर्णयस्सर्गादिजगत्स्वरूपेकोनिर्णयःसफलस्तमाह ॥ जगदिति ॥ तत्रप्रागुक्तस्थितौ ॥ अर्थःसांसारिकपुरुषार्थाभासस्तद्युतम् ॥ ९ ॥ ननुसर्गःसुषुप्तिप्रलययोःस्वतएवक्षीयतेकिंतस्यब्रह्ममात्रतापरिज्ञानेनतत्राह ॥ सर्गेइति ॥ अनर्गलोमूलोच्छेदात्पुनरुद्भवशून्यः ॥ अन्यथाप्रलयादौक्षयेतुबीजात्मनास्तिकार्यात्मनानास्तिसंतिवाप्रलयेप्यैंदवाख्यानोक्तरीत्याकार्याणि ॥ सांकल्पिकस्यपरैःक्षेप्तुमशक्यत्वादित्यर्थः ॥ १० ॥ तर्हिसतिसर्गेकथंप्रलयस्तत्राह ॥ येषामिति ॥ प्रलयसंकल्पयितुर्दृष्ट्यातेषामसत्त्वात्स्वसांकल्पिकसर्वनाशादेवतस्यप्रलयव्यवहारादित्यर्थः ॥ ११ ॥ अतएवजीवजगद्रूपाणामनिर्णेयत्वादनिर्वचनीयत्वमुक्तमित्याह ॥ असतामेवेति ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवचतत्त्वविदांसदेवाद्वितीयचिदानंदपूर्णतेत्याह ॥ परिपूर्णेति ॥ हियस्मात्तेद्रष्टृदृश्यांशदृष्टौनपततिनाभिनिविशंते ॥ १३ ॥ अचलाइवाप्रकंप्याइतिशेषः ॥ साचाराः इवार्थेवाशब्दाः ॥ १४ ॥ १५ ॥ अज्ञपुरुषास्तर्हिकिंस्वरूपास्तदाह ॥ वासनैवेति ॥१६॥ अनालोकनंप्रकाशास्फूर्त्तिः ॥ कृष्णंतमःआदिपदात्तत्कार्यचोरयक्षादिस्तस्यआलोकस्फूर्त्तावनुपलंभोदृष्टांतः ॥ तृष्णेतिपाठेतृष्णामृगतृष्णा ॥ स्पष्टचेष्टितःअतिस्पष्टइतियावत् ॥१७॥ कीदृशादालोकात्तमाह ॥ भूतानीति ॥ देहमांसादिस्थूलदेहोपादानंपंचीकृतानिभूतान्येव ॥ तथाबुद्ध्यहंकारचेतांसिसूक्ष्मशरीरोपादानोपलक्षणम ॥ तान्यप्यन्नमयंहिसोम्यमनइत्यादिश्रुतेस्तन्मयान्यपंचीकृतभूतविकारभूतान्येव ॥ १८ ॥ अस्त्वेवंकिंततस्तत्राह ॥ भूतादीति ॥ तत्रबुद्ध्यादिघटितलिंगोपाधावहंभावेनप्रविष्टश्चिदात्मातद्द्वारास्थूलदेहमप्यविद्ययाहमित्यभिमन्यते ॥ तस्यविवेकेनबुद्ध्यहंकारचेतसांभूता

परिपूर्णार्णवप्रख्याकाप्यपूर्वैवपूर्णता॥ तज्ज्ञानांद्रष्टृदृश्यांशदृष्टौनहिपतंतिते॥ १३ ॥ अचलाइवनिर्वातादीपाइवसमत्विषः॥ साचारावानिराचारास्तिष्ठंतिस्वस्थमेवते॥ १४॥ आपूर्णंकार्णवप्रख्याकाप्यंतःपूर्णतोदिता॥ अंतःशीतलताज्ञस्यापूर्वैवलक्ष्यते॥१५॥ वासनैवेहपुरुषःप्रेक्षितासानविद्यते ॥ तांचनप्रेक्षतेकश्चित्ततःससारआगतः ॥ १६ ॥ अनालोकनसिद्धंयत्तदालोकान्नविद्यते ॥ कृष्णाद्यनुपलंभोत्रदृष्टांतःस्पष्टचेष्टितः ॥ १७॥ भूतानिदेहमांसादितच्चासद्विभ्रमोजडः॥ बुद्ध्यहंकारचेतांसितन्मयान्येवनेतरत् ॥ १८॥ भूतादिमयतांत्यक्त्वाबुद्ध्यहंकारचेतसाम् ॥ अत्यंतंस्थितिरभ्येतियदितन्मुक्ततोदिता ॥ १९ ॥ चिद्भिष्टाचेत्यनिष्ठत्वात्तादृश्येवात्रकास्तिता॥ तस्मात्केवकुतःकुत्रवासनाकिंस्वरूपिणी॥ २०॥ यस्यचैषभ्रमःसोसत्प्रेक्षयासन्नलक्ष्यते॥मृगतृष्णांबुवत्तेनसंसारःकस्यकःकुतः॥ २१ ॥ तदेवंतर्हितस्यस्यादितिचित्तोदयोहियः॥ पुनःसएवसंसारविभ्रमःसंप्रवर्त्तते ॥ २२ ॥ तस्मात्सर्वमनाश्रित्यव्योमवत्समुपास्यताम्॥ अपुनःस्मरणंश्रेयइहविस्मरणंपरम् ॥ २३॥ नेहदृष्टानभोक्तास्तिनास्तितानचनास्तिता॥ यथास्थितमिदंशांतमेकंस्पंदिसदाब्धिवत्॥ २४॥ सर्वंदृश्यंजगद्ब्रह्मसदित्यवगतेस्फुटम्॥ जलशोषादिवोदेतिबिंबबिंबिक्षयेशिवम्॥ २५॥

दिमयतांवाचारंभणश्रुतिदर्शितोपायेनत्यक्त्वाअत्यंतंस्वप्रकाशचिन्मात्रस्वभावेनयास्थितिर्यद्यभ्येतितत्तर्हिसैवमुक्तताउदिताआविर्भूतासएवालोकोमयोक्तइत्यर्थः ॥ १९ ॥ एवमात्मालोकेप्रस्तेवासनापिबाधितैवेतितयापिनबंधप्रसक्तिरित्याह ॥ चिदिति ॥ लिंगोपाधावात्मचित्श्लिष्टातादात्म्याध्यासेनमिलिताचेत्तस्याश्चेत्योन्मुखत्वात्तादृश्येववासनास्तिताप्रसिद्धा ॥ साचात्रअस्यांमुक्ततायांका ॥ २० ॥ बध्यस्यजीवस्यैवतत्त्वदर्शनेअनुपलंभाच्चकेनकस्यबंधप्रसक्तिरित्याह ॥ यस्येति ॥ असन्अलीकः ॥ असच्चप्रेक्षयातत्त्वदृष्ट्यानलक्ष्यते ॥२१॥ आत्मालोकमांद्येतुपुनश्चित्तोदयेनसंसारःस्यादेवेतितद्दार्ढ्यमपुनःस्मरणावधिकार्यमित्याह ॥ तदेवमितिद्वाभ्याम् ॥ तत्तस्मादेवमात्मालोकेप्रवृत्तस्यापिविषयस्मरणेयश्चित्तोदयःसएवपुनःसंसारःसंप्रवर्त्ततेसंप्रवर्तेत ॥२२॥ परंविस्मरणंभूमिकाभ्यासेनसाधयेदितिशेषः ॥२३॥ तदभ्यासपरःकथंपश्येत्तदाह ॥ नेहेत्यादिना ॥ स्पंदिप्रारब्धोपनीतव्याधितव्यवहारनिमित्तम् ॥ सदाअब्धिवत्पूर्णम् ॥ २४ ॥ बिंबनंबिंबश्चिदाभासःसोस्यास्तीतिबिंबीउपाधिस्तदुभयक्षये ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशब्रह्मभावेनस्थितिरेवयोगिनःसंविच्छमनंमुनित्वंचेत्याह ॥ यथास्थितस्येति ॥ ३५ ॥ साहंजीवभावसहितम् ॥ ३६ ॥ संकल्पसृष्टेरसंकल्पनमिवदृष्टसृष्टेरस्याअदृष्टिरे वनिवृत्तिरित्याह ॥ यथेति ॥ ३७ ॥ सर्वजडवस्तुष्वनुगतःस्वभावोजाड्यंसैवमूलाविद्यातामेकांवर्जयित्वासर्वेएवशब्दार्थानामरूपाणिसहेतुकास्तद्धेतुकाः ॥ तस्यस्वभावस्या पियोहेतुःसाक्षितयासाधकस्तदनुभावनंस्वात्मनस्तन्मात्रतापादनंमुक्तिरित्यर्थः ॥ ३८ ॥ अविद्यापगमेनकस्यचिदपिजाड्यंपरिशिष्यतइतिचिदेकरसंयोगिनोजगदित्याह ॥ चि दित्यादिना ॥ ३९ ॥ ४० ॥ ४१ ॥ कियत्कालंसाभ्रांतिस्तत्राह ॥ भ्रांतिस्त्विति ॥ ४२ ॥ ननुभ्रांतिःकथंब्रह्मतांगच्छतितत्राह ॥ भ्रांतिस्त्विति ॥ भ्रांतौयःसत्तास्फूर्त्यंशःसब्रह्म तांगच्छतिअन्यस्तुनास्त्येवेतिनतदभिप्रायेणोक्तमितिभावः ॥ ४३ ॥ सर्वभ्रांतिबाधपरिशिष्टंब्रह्मदर्शयन्रामंतद्भावस्थितौस्थापयति ॥ अनादीति ॥ हेरामत्वंदेहप्रसंगप्रसक्तांस

यथास्थितस्यैवसतोयस्यासंवेदनात्मकम् ॥ संविच्छमनंजातंतमाहुर्मुनिसत्तमम् ॥ ३५ ॥ सतोपिमृन्मयस्येवयस्यासंवेदनात्मक म् ॥ साहंजगद्विगलितंतमाहुर्मुनिसत्तमम् ॥ ३६ ॥ यथाशाम्यत्यसंकल्पात्संकल्पनगरंतथा ॥ वेदनोत्थंजगदहंचितिशाम्यत्यवेदनात् ॥ ३७ ॥ स्वभाववर्जंशब्दार्थाःसर्वएवसहेतुकाः ॥ स्वभावस्यतुयोहेतुर्मुक्तिस्तदनुभावनम् ॥ ३८ ॥ नकस्यचित्पदार्थस्यस्वभावोस्तीह कश्चन ॥ महाचिदंबुद्रवताःसर्वाएवानुभूतयः ॥ ३९ ॥ महाचिदनिलस्पंदाएताएवानुभूतयः ॥ एतास्ताब्रह्मगगनशून्यताइतिबुध्यताम् ॥ ४० ॥ वातस्पंदाविवाभिन्नौब्रह्मसर्गौविभिन्नता ॥ तयोस्त्वसत्यास्वभ्रांतौस्वप्नेस्वमरणोपमा ॥ ४१ ॥ भ्रांतिस्तुतावत्तत्वार्थविचारो यावदस्फुटः ॥ विचारेतुस्फुटेभ्रांतिर्ब्रह्मतामेवगच्छति ॥ ४२ ॥ भ्रांतिस्त्वसत्यावस्त्वेवप्रेक्षयातोनलभ्यते ॥ शशशृंगवदत्यच्छमतोब्रह्मै वशिष्यते ॥ ४३ ॥ अनादिमध्यांतमनंतमच्छंसमंशिवंशाश्वतमेकमेव ॥ सर्वाजरामोहविकारभारभ्रांतिंविमुच्यांबरभावमेहि ॥ ४४ ॥ इ० वा० म० वा० दे० मो० नि० उ० सत्यार्थोपन्यासयोगोनामत्रयस्त्रिंशःसर्गः ॥ ३३ ॥ ॥ ६ ॥ ॥ श्रीवसिष्ठउवाच प्राप्तेषु सुखदुःखेषुयोनश्यतिसनश्यति ॥ योननश्यत्यनाशोसावलंशास्त्रोपदेशनैः ॥ १ ॥ ॥ यस्यचेच्छोदयस्तस्यसंत्यवश्यंसुखादयः ॥ तेचे त्सम्यक्चिकित्स्यंतेपूर्वमिच्छैवमुच्यताम् ॥ २ ॥

र्वांजरामोहादिविकारभारभ्रांतिविमुच्यब्रह्माकाशभावमेहिप्राप्नुहीत्यर्थः ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उ०त्रयस्त्रिंशत्तमःसर्गः ॥ ३३ ॥ ॥ ६ ॥ दृष्टसृष्टिर्जगत्तस्यादर्शनादेवसंक्षयः ॥ इतियत्प्रस्तुतंतस्यवर्ण्यंतेऽत्रोपपत्तयः ॥ १ ॥ वेदनोत्थंजगदहंचितिशाम्यत्यवेदनादितियदुक्तंतत्रोपपत्तीर्विवक्षुर्भगवान्वसिष्ठःप्रथमंन श्वरीभ्यःसुखदुःखानुभवत्रिपुटीभ्यःपृथक्कृत्यानश्वरमात्मानंदर्शयंस्तद्दर्शनादेवसर्वशास्त्रोपदेशानांचरितार्थतेत्याह ॥ प्राप्तेष्विति ॥ १ ॥ यस्त्विच्छादिमान्सनित्यदुःखीनात्मा किंत्विच्छात्यागाद्युपायचिकित्सनीयसंसृतिरोगकोटावेवेत्याशयेनाह ॥ यस्यचेति ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्त्वविनाश्यात्मातत्रेच्छाद्यभिमानीतदभिमंतव्यंजगच्चनसंभाव्यमेवेत्याह ॥ अहमिति ॥ ३ ॥ एवंचाहमादिशब्दास्तत्रनिर्विषयाइत्याह ॥ अहमिति ॥ ४ ॥ तदभावेदूरा पास्तैवकर्तृभोक्रादिकथेत्याह ॥ नेहेति ॥ ५ ॥ ननुसर्वापह्नवेउपदेशादिरप्यपह्नूयेत तथाचतद्बोधोपायोनलभ्येतइतिचेदस्तुनामैवं उपदेश्यस्यब्रह्मणःसर्वापह्नवेप्यनपह्नवाद पह्नूयमानात्तसर्वार्थेभ्यःपारमार्थिकसत्यप्रत्यगात्मस्वरूपातिशयवत्वाच्चापह्नवोपायेनतद्बोधानंतरमुपदेशाद्युपायस्यानपेक्षणाचेत्याशयेनाह ॥ उपदेश्येति ॥ विशिष्यतेपरि शिष्यतेअतिशय्यतेच ॥ ६ ॥ अस्त्वेवंतथापिकथमदर्शनमात्रेणदृश्योपशमस्तत्राह ॥ अग्रस्थेति ॥ यथापुरोभागेपिस्थितानामंतर्द्धानशक्त्याअंतर्हितानांसिद्धानांविशाचा

अहंजगदिदंभ्रांतिर्नास्त्येवपरमेपदे ॥ इदंशांतमनालंबंसर्वंनिर्वाणमव्ययम् ॥ ३ ॥ अहंब्रह्मजगच्चेतिशब्दसंभ्रमविभ्रमः ॥ सर्वस्मि न्नुछांतआकाशेकेननामोपकल्पितः ॥ ४ ॥ नेहास्त्यहंनचजगन्नचब्रह्मादिशब्दकाः ॥ शांतस्यैकस्यसर्वत्वात्कर्त्ताभोक्तेहकःकुतः ॥ ५ ॥ उ पदेश्यातिशायित्वात्सर्वापह्नवएवच ॥ कुतोयंसचसत्यात्मातएवाहंविशिष्यते ॥ ६ ॥ अग्रस्थसिद्धसंचारोज्ञायतेनापिदारुणः ॥ यथैक पार्श्वसंसुप्तनरःस्वप्नाभ्रगर्जितम् ॥ ७ ॥ ज्ञप्तौनास्तियतस्तेनसिद्धाचारोनलक्ष्यते ॥ स्वभावइतिसर्वेणज्ञप्तिस्थोप्यनुभूयते ॥ ८ ॥ ज्ञप्तिर प्यात्मभूतैवसर्वंभातिहितन्मयम् ॥ तस्मात्साहंजगत्सर्वमभिन्नंपरमात्मनः ॥ ९ ॥ ज्ञप्तिर्जगत्तयाभातिसंकल्पस्वप्नयोरिव ॥ अनाना वयवादेतिजलमूर्मितयायथा ॥ १० ॥ एकात्मैवोदयेज्ज्ञप्तेर्नानातामिवचागतः ॥ अज्ञानात्सत्ववस्तुत्वात्प्रेक्षितोनोपलभ्यते ॥ ११ ॥ यथास्वावयवानेवसर्वानवयवीभवेत् ॥ नित्यानवयवंशांतंब्रह्मैवेदंतथाजगत् ॥ १२ ॥ भांडलक्षाणिधत्तेंतश्चिद्रूपकनकेष्टिका ॥ यदेव साचेतयतेजगदादीववेत्तितत् ॥ १३ ॥ ब्रह्मैवकचतीवेदंसत्तयाच्छजगत्तया ॥ चिद्रूपत्वाद्द्वात्मत्वात्तरंगादितयाब्धिवत् ॥ १४ ॥ यद्य च्चेतयतेंतत्तुजगदादीवपश्यति ॥ अरूपमपिरूपंस्वंयन्नचेतयतेननतत् ॥ १५ ॥ चेतनाचेतनत्वोक्तीतस्येशत्वात्स्वदेहगे ॥ उपदेशार्थमेवो क्तेनसद्विषयमर्थतः ॥ १६ ॥ नजगत्सन्नचैवासद्भासतेचेतनाच्चिति ॥ अचेतनान्नकचतिकइवार्थग्रहोत्रनः ॥ १७ ॥

दीनांचसंचारोव्यवहारोदारुणोभयंकरोपिनज्ञायते यथावाएकशय्याप्रदेशेसुप्तस्यनरांतरस्यस्वप्नेप्रसिद्धानामभ्राणांगर्जितंदारुणमपिनज्ञायतेतच्चास्मद्दृष्ट्यानास्त्येवतद्वदित्यर्थः ॥ ७ ॥ तदेवाह ॥ ज्ञप्ताविति ॥ सर्वेणापिद्रष्ट्रास्वज्ञप्तिस्थोनुभूयतेइतिस्वभावोहिप्रसिद्धइत्यर्थः ॥ ८ ॥ अस्त्वेवंकिततस्तत्राह ॥ ज्ञप्तिरपीति ॥ ९ ॥ अनानावयवापिज्ञप्तिर्नाना वयवजगत्तयाभाति ॥ १० ॥ नानातामिवागतएकआत्मैवज्ञप्तेरज्ञानाद्विवर्त्तरूपउदयः सतूदयोऽवस्तुत्वात्तत्त्वदृशाप्रेक्षितोनोपलभ्यते ॥ ११ ॥ यथाऽयमनवयवोपिजीवः स्वान्हस्तपादाद्यवयवान्कल्पयन्स्वप्नमनोरथादाववयवीभवेत्तथाब्रह्मापीत्यर्थः ॥ १२ ॥ चिद्रूपाकनकेष्टिकाकुलालीचेतयतेस्मरति ॥ १३ ॥ १४ ॥ यन्नचेतयतेनाध्यस्यति नतत्पश्यति ॥ १५ ॥ ईशत्वान्मायाशबलत्वेनसर्वशक्तिसंपन्नत्वात्स्वदेहभूतमायागते ॥ इदंतुवचनमर्थतःसद्विषयंपरमार्थगोचरंनेत्यर्थः ॥ १६ ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्त्वेवंकिंततस्तत्राह ॥ अचेतनमिति ॥ स्वायत्तेस्वाधीनेनकदर्थस्थेयत्नश्रमसाध्ये ॥ यथास्वस्थस्यनिश्चलस्यस्फटिकपाषाणस्यस्वांतर्गतप्रतिबिंबसहस्रस्पंदास्पंदेनयत्नसाध्येतद्वत्स्थिते ॥१८॥ सर्वकल्पनामूलस्यैकस्याहंकारस्यैवपरीक्षणेनमिथ्यात्वावधारणेसर्वजगन्मिथ्यात्वंसिद्धमित्याशयेनाह ॥ यस्येति ॥१९॥ सत्यतोवस्तुतः ॥ सत्ताविद्यमानता ॥ २० ॥ काकतालीयवदाकस्मिकम् ॥ २१ ॥ एवंचयत्फलिततदाह ॥ ब्रह्मैवेति ॥ किमास्पदंविषयआश्रयश्च ॥ २२ ॥ वर्णितांदृष्टसृष्टिकल्पनामनूद्यतत्फमाह ॥ सर्वेश्वरत्वादिति ॥ तेतवअचेतितंजगद्दर्शनमस्तुतदेवसर्वदृश्यमार्जनरूपामुक्तिःफलमित्यर्थः ॥ २३ ॥ वर्णितरीत्याजगतोपिचित्त्वाद्ब्रह्मत्वमेवस्वप्नसंकल्पपुरवत्काकतालीयवदकस्मादन्यथाभाति ॥ वस्तुतस्तुतज्जगत्तस्मात्कथंभिद्यतेतद्भेदेसत्तास्फूर्त्यलाभेनालीकत्वप्रसंगादित्यर्थः ॥ २४ ॥ स्तिमितेजलेयथाऊर्म्यादि अनुत्कीर्णेवृक्षकाष्ठेशालभंजि

अचेतनंचेतनंचस्पंदास्पंदवदात्मनः॥स्वायत्तेनकदर्थस्थेस्वस्थपाषाणवत्स्थिते॥ १८ ॥यस्येक्षितस्यनोसत्तानाधारोनचकारणम्॥
सोहमित्येवयोयक्षोनजानेकुतउत्थितः ॥ १९ ॥ यस्याहमितियक्षस्यसत्तैवास्तिनसत्यतः ॥ अहोनुचित्रंतेनेमेभवंतोविवशीकृताः
॥ २० ॥ काकतालीयवद्भ्रांतमहंब्रह्मणिभासते॥स्वमेवरूपंदृग्भ्रांतौकेशोंड्रकमिवांबरे॥२१॥ ब्रह्मैवाहंजगच्चात्रकुतोनाशसमुद्भवौ॥
अतोहर्षविषादानांकिंत्वेवकथमास्पदम् ॥ २२ ॥ सर्वेश्वरत्वादीशस्यविभातीदंप्रचेतितम् ॥ अचेतितंचनोभातितेनाचेतितमस्तुते
॥२३॥ काकतालीयवच्चित्त्वाज्जगतोभातिब्रह्मखम् ॥स्वप्नसंकल्पपुरवत्तत्तस्माद्भिद्यतेकथम्॥२४॥ यथोर्म्यादिजलेवृक्षेयथावाशाल
भंजिका॥यथाघटादयोभूमौतथाब्रह्मणिसर्गता॥ २५॥ अनाकृतावसंस्थानेस्वच्छेयदनुभूयते ॥ तत्तदेवातउदितंकिंनामाहंजगंति
किम्॥२६॥ मरुतःस्पंदवैचित्र्यंसत्तयैवयथातथा॥ब्रह्मणोनिःस्वभावस्यजगदाद्यहमादि च॥२७॥ यथाभ्रेलक्ष्यतेवृक्षगजवाजिमृगा
दिता॥ असन्निवेशाकृतिनिसर्गाहंतेतथापरे॥२८॥ सर्गोवयववद्भातिसर्वएवपरेशिवे॥एवंतदुपमांविद्धिकार्यकारणवद्यथा॥२९॥
अंतःशांतमनायासमनुपाधिगतभ्रमम्॥जगत्यसंभवादेवव्योमवत्सममास्यताम्॥३०॥नभवंतोनचवयंनजगंतिनखादयः॥संति
शांतमशेषेणब्रह्मेदंनिर्भरंस्थितम्॥३१॥अशेषेष्वविशेषेषुशांताशेषविशेषता॥सत्यासैवाहमित्याशुत्यक्त्वामोक्षायभाव्यताम्॥३२॥

का भूमौचानुद्भूताघटादयस्तथेत्यर्थः ॥ २५ ॥ असंस्थानेनिरवयवे ॥ दृष्टांतेयथाभ्रेइतिवक्ष्यति ॥ २६ ॥ सत्ताभेदादर्शनादपितन्मात्रत्वमित्याह ॥ मरुतइति ॥ निःस्वभावस्यनिरविद्यस्य ॥ २७ ॥ गजवाजिमृगादितातत्तदाकारः ॥ तादृशसन्निवेशाकृतिशून्येअभ्रेआकाशेनीहारेवा ॥ २८ ॥ अवयववत्वृक्षशाखावत् कार्यंवटादिःकारणंतद्बीजादिस्तद्वद्यथालोकेसूक्ष्मार्थोपमानानिप्रसिद्धानिएवंतयोःसर्गब्रह्मणोरप्युपमांविद्धि ॥ २९ ॥ वर्णितरीत्याजगत्याःजगतःस्वव्यतिरिक्तस्यासंभवादेवव्योमवत्समंनिर्विक्षेपमास्यताम् ॥ ३० ॥ निर्भरमतिवेलंपूर्णमितियावत् ॥ ३१ ॥ चिदतिरिक्तरूपानिरूपणादशेषेषुपदार्थेष्वविशेषेषुसत्सुविशेषभ्रमंत्यक्त्वाशांताशेषविशेषतापरमार्थसत्यासाचिदेवाहमितिभाव्यताम् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथाचारंविद्वदाचारंभूमिकाभ्यासमनतिक्रम्य ॥ ३३ ॥ तत्त्वबोधदार्ढ्येजडार्थचेतनप्रसक्तिरेवनास्तीत्याह ॥ द्रष्टेति ॥ ३४ ॥ असत्तोपमंशून्यकल्पंनतुशून्यमेव ॥ ३५ ॥ ब्रह्मण्यज्ञानात्पवनस्पंदवद्भेददर्शनम् ॥ तथाचचिद्वचिद्भेददर्शनमेवसर्गः ऐक्यदर्शनमेवतन्मोक्षइतिनिष्कर्षइत्यर्थः ॥ ३६॥३७॥ भेददर्शनस्यैवसर्गतांदृष्टांतैरुपपादयति ॥ बीजमित्यादिना ॥ ३८ ॥ वेदनसमकालमेवतद्भावस्थितावप्येतादृशएवदृष्टांतइत्याह ॥ पत्रादीति ॥ ३९ ॥ वृक्षस्यषड्भावविकाराअप्यत्रदृष्टांताइत्याह ॥ यथेति ॥ भावविकाराणामाभाःक्रमिकप्रतिभासाः ॥ बीजादिरूपेणस्थितायाश्चितएवविकारत्वात्तन्मयाः ॥ ४० ॥ ४१ ॥४२॥४३॥ पुरापूर्वसिद्धासैवअबोधतोमानवोस्मीत्याकारेणाहंताचाज्जग

वेदनंबंधनंविद्धिविद्धिमोक्षमवेदनम् ॥ यथास्थितंयथाचारंभवशांतमवेदनम् ॥ ३३ ॥ द्रष्टानदृश्यतांयातिचितिर्नायातिचेत्यताम् ॥ चेत्याभावादजगतिकःकिंचेतयतेकथम् ॥ ३४ ॥ द्रष्टृदृश्यदशाभावाज्जाग्रत्येवसुषुप्तिवत् ॥ शरदाकाशकोशाभमसत्तोपममास्यताम् ॥ ३५ ॥ तथैकब्रह्मचिद्रूपेपवनस्पंदनेयथा ॥ अत्राचिद्बोधतासर्गोमोक्षोब्रह्मैकबोधता ॥ ३६ ॥ चित्स्पंदोब्रह्ममरुतोयत्रसर्गइतिस्मृतः ॥ नात्रचित्स्पंदनंयत्स्यान्निर्वाणंतदुदाहृतम् ॥ ३७ ॥ बीजमंतर्यथावेत्तिस्वरूपंपल्लवादिकम् ॥ तथामहाचिदंतस्थंस्वरूपंवेत्तिसर्गताम् ॥ ३८ ॥ पत्रादिवेदनाद्बीजंयथापत्रादितिष्ठति ॥ पराचित्सर्गसंवित्तिस्तथाभवतिसर्गता ॥ ३९ ॥ यथाभावविकाराभाश्चित्पराःसर्गतास्तथा ॥ सर्वबीजानिदृष्टांतास्तद्रूपाएवतन्मयाः ॥ ४० ॥ निर्विकारपरब्रह्ममयंसर्वमिदंजगत् ॥ निर्विकारमनाद्यंतमेवंविद्धिनिरामयम् ॥ ४१ ॥ निजसंकल्पमात्रात्मानिजसंकल्पनात्क्षयी ॥ द्वैताद्वैतविकारोयंसंकल्पनगरंयथा ॥ ४२ ॥ शून्यत्वाकाशयोर्भेदोयादृशोवगतस्त्वया ॥ भेदंनिरात्मकंविद्धितादृशंब्रह्मसर्गयोः ॥ ४३ ॥ महाचिद्रूपिणीशांतायासत्ताब्रह्मणःपुरा ॥ स्वतःसेयमहंत्वंचमानवोस्मीत्यबोधतः ॥ ४४ ॥ ब्रह्मण्यस्मिन्जगद्रूपेनकिंचिदपिजायते ॥ जातमप्यथनष्टंचननश्यत्यंबुवीचिवत् ॥ ४५ ॥ पदार्थब्रह्मरूपेणब्रह्मैवात्मनितिष्ठति ॥ अवयवीवावयवेखेखंवारीववारिणि ॥ ४६ ॥ निमेषादर्द्धभागेनदेशाद्देशांतरस्थितौ ॥ यद्रूपंसंविदोमध्येसस्वभावउपास्यताम् ॥ ४७ ॥ संक्षुब्धमक्षुब्धमितिद्विरूपंसंवित्स्वरूपंप्रवदंतिसंतः ॥ श्रेयःपरंयेनसमीहसेत्वंतदेकनिष्ठोभवमाऽमतिर्भूः ॥ ४८ ॥ ॥

इ० वा० महारामायणेवा० दे० मो० नि० उ० परमार्थयोगोपदेशोनामचतुस्त्रिंशःसर्गः ॥ ३४ ॥ ॥ ७ ॥ ॥ ७ ॥

त्ताचभवतीत्यर्थः ॥ ४४ ॥ जातमपिनजायतेनष्टमपिननश्यति ॥ ४५ ॥ पदार्थरूपेणब्रह्मरूपेणचस्थितंब्रह्मआत्मन्यविकृतस्वभावेतिष्ठति ॥ यथावृक्षःस्वावयवे ॥ ४६ ॥ वास्तवीस्थितिस्तुचितोनिर्विषयैवेत्याह ॥ निमेषादिति ॥ प्राग्व्याख्यातमेतत् ॥ ४७ ॥ हेरामसंतोविवेकिनःशास्त्रज्ञाः संवित्स्वरूपमेकंसंक्षुब्धंसविवर्त्तमज्ञानुभवसिद्धमपरमक्षुब्धंनिर्विवर्त्तंकूटस्थपूर्णानंदैकरसमितिद्विरूपंप्रवदंति ॥ तयोर्मध्येयेनत्वंपरंश्रेयःपरमपुरुषार्थंसमीहसेतदेकनिष्ठोभव ॥ अपरीक्ष्ययत्किंचिद्ग्राहीअमतिरविवेकीमाभूरित्यर्थः ॥ ४८ ॥ ॥ इतिश्रीवासिष्ठम० तात्पर्यप्रकाशेनि० उत्तरार्धेचतुस्त्रिंशत्तमःसर्गः ॥ ३४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

सप्रपंचाप्रपंचात्मवस्त्वखंडैक्यदृष्टये ॥ सत्यानृतोभयाभासंब्रह्मरूपंप्रपंच्यते ॥ १ ॥ संक्षुब्धमक्षुब्धमितिद्विरूपंब्रह्मविरोधाभासोक्तिभिःप्रपंचयिष्यन्नक्षुब्धरूपंप्रथमंप्रागु क्तोपायपरिचितंतन्निष्ठताविधानायस्मारयति ॥ देशादिति ॥ क्रमिकविषयद्वयांतरालकालेयन्निर्विषयंरूपंतत्परमक्षुब्धमित्यर्थः ॥ १ ॥ एतन्मयोनिर्विषयचिन्मात्रनिष्ठोनू नमवश्यंभव ॥ २ ॥ यथास्थितंजीवन्मुक्तस्थितिमनतिक्रम्ययथाचारंस्वकुलाचारमप्यनतिक्रम्यव्यवहरन्नपिततस्तादृशनिष्ठायाःसकाशादचलनचलैव ॥ नञर्थोयम कारोननञ् ॥ अचलातन्निष्ठैवविद्येत्यर्थः ॥ ३ ॥ वक्ष्यमाणोपयोगितयातद्विरुद्धामविद्यांलक्षयति ॥ एतदिति ॥ प्रेक्षिताप्रमाणैर्विमृष्टा ॥ ४ ॥ चेत्यचित्त्वेचिच्चेत्यभेदौ ॥ भेदासंभवेचस्वांतरेवकथंचेत्यतेचेतनायव्याप्रियते ॥ अतोविमर्शैशांतिर्निर्वेद्यवेदनचिन्मात्रस्थितिरेवबलादुदितेत्यर्थः ॥ ५॥ विद्याविद्यामिश्रितयाआंतरालिकभूमिकारूढवि

॥ श्रीवसिष्ठउवाच ॥ ॥ देशाद्देशांतरंदूरंप्राप्तायाःसंविदःक्षणात् ॥ यद्रूपममलंमध्येपरंतद्रूपमात्मनः ॥ १ ॥ गच्छन्नुच्छृण्वन्स्पृशन् जिघ्रन्नुन्मिषन्निमिषन्हसन् ॥ नूनंनिरामयत्वायनित्यमेतन्मयोभव ॥ २ ॥ ततएवनिराभासात्सत्यान्निर्वासनैषणात् ॥ यथास्थितंय थाचारमचलामरशैलवत् ॥ ३ ॥ एतद्रूपमविद्यायाःप्रेक्षितायन्नलभ्यते ॥ प्रेक्षितालभ्यतेचेत्सातद्विद्यैवपराभवत् ॥ ४ ॥ अविद्यासंभ वाच्चेत्यचित्त्वेसंभवतःक्वकिम् ॥ चेत्यतेकथमेवांतःशांतिरेवबलोदिता ॥ ५ ॥ सत्यंब्रह्मजगच्चैकंस्थितमेकमनेकवत् ॥ सर्वंवासर्ववद्भा तिशुद्धंचाशुद्धवत्ततम् ॥ ६ ॥ अशून्यंशून्यमिवचशून्यंवाशून्यवत्स्फुटम् ॥ स्फारमस्फारमिवतदस्फारंस्फारसन्निभम् ॥ ७ ॥ अविका रंविकारीवसमंशांतमशांतवत् ॥ सदेवासदिवादृश्यंतदेवातदिवोदितम् ॥ ८ ॥ अविभागंविभागीवनिर्जाड्यंजडवद्गतम् ॥ अचेत्यंचे त्यभावीवनिरंशंसांशशोभनम् ॥ ९ ॥ अनहंसोहमिवतदनाशमिवनाशवत् ॥ अकलंकंकलंकीवनिर्वेद्यंवेद्यवाहिवत् ॥ १० ॥ आ लोकिध्वांतघनवन्नववच्चपुरातनम् ॥ परमाणोरपितनुगर्भीकृतजगद्गणम् ॥ ११ ॥ सर्वात्मकमपित्यक्तदृष्टंकष्टेनभूयसा ॥ अजालम पिजालाढ्यंचाशेषवदनेकधा ॥ १२ ॥ निर्मायमपिमायांशुमंडलामलभास्करम् ॥ ब्रह्मविद्धिविदांनाथमपामिवमहोदधिम् ॥ १३ ॥ जगद्रत्नमहाकोशंतुलायांतूलकाल्लघु ॥ मायामरीचिशशिनमपिनेक्षणगोचरम् ॥ १४ ॥

वेकिदृष्ट्यातुब्रह्मनियतैकरूपमप्यनियतविरुद्धनानास्वभावमिवतिष्ठतीतिविरोधाभासैःप्रमाणयुक्त्यनुभवादिभिश्चासर्गसमाप्तेस्तत्प्रपंचयति ॥ सत्यमित्यादिना ॥ ब्रह्मजगच्च सत्यंपरमार्थतएकमेवतदेकमेवअनेकवत्तद्विरुद्धरूपेणस्थितमितियोज्यम् ॥ एवमग्रेपि ॥ सर्वंपूर्णम् ॥ ६ ॥ शून्यमिवप्रलये ॥ अशून्यवत्सर्गे ॥ कालतोदेशतस्तुस्फारम् ॥ ७ ॥ अदृश्यंद्रष्टुमशक्यमित्यसदिव ॥ ८ ॥ सांशमिवशोभनंशोभमानम् ॥ ९ ॥ नाशवदिव ॥ वेद्यंवहतिप्रथनेननिर्वहतितच्छीलमिव ॥ १० ॥ आलोकित्वप्रकाशम् ॥ राहोःशि रइतिवद्भेदकल्पनादिभिः ॥ ११ ॥ भूयसायज्ञदानतपश्चित्तशुद्धिवैराग्यश्रवणमननादिनाकष्टेनपुरुषप्रयत्नेनत्यक्तंदृष्टंदृश्यजातंयेन ॥ अनेकधास्थितमप्यशेषवत्द्वितीयपरि शेषशून्यम् ॥ १२ ॥ मायालक्षणस्यांशुमंडलस्यरश्मिजालस्यामलभास्कररूपम् ॥ वित्वेदनमात्रस्वरूपमपि ॥ अप्यर्थेहिशब्दः ॥ विदांसर्ववेदनानांनाथंस्वामिभूतमिवसर्व ज्ञम् ॥ १३ ॥ ब्रह्मांडात्मनाजगद्रत्नमहाकोशम् ॥ गुरुतममपिविवेकतुलायांतोलनेगुरुत्वमात्रस्यानृतत्वात्तूललवादपिलघु ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अनंतंकालतःनिष्पारंदेशतस्तथापिकचिद्देशेकालेवानावस्थितम ॥ आकाशेशून्यदेशेपि ॥ १५ ॥ १६ ॥ परिपूरितंकर्त्रादिकारकैः ॥ १७॥ १८ ॥ प्रत्येकंप्रतिवस्तु ॥ प्रत्यहं प्रतिकालम ॥ जगत्तिरोभावकत्वात्तमः ॥ अप्यर्थेतुशब्दः ॥ १९ ॥ २० ॥ अनहंयुष्मदर्थः अन्यदिदमर्थइत्यपौनरुक्त्यम् ॥ २१ ॥ उक्तेष्वर्थेषुमायामात्रत्वमभिप्रेत्योपप त्तीराह ॥ अस्येत्यादिना ॥ २२ ॥ २३ ॥ २४ ॥ प्रसरंतिदलस्थानीयानिपंचभूतलक्षणपंचकानियासाम ॥ २५ ॥ स्वप्रतिबिंबस्यवर्णितस्यजीवजगद्रूपस्याकारांतरस्य ॥ मुकुरतांदर्पणताम् ॥ २६ ॥ अपरिच्छिन्नब्रह्मसंविदिदवृक्षोगगनोदुंबरस्तदीयफलकल्पस्यब्रह्मांडस्यस्वेच्छाकल्पितेत्रैलोक्यावयवेउज्वलादीप्यमानाश्चंद्रसूर्यादयस्तेभ्यउद्यच्च

अनंतमपिनिष्पारंनचक्वचिदपिस्थितम्॥ आकाशेवनविन्यासनगनिर्माणतत्परम् ॥ १५ ॥ अणीयसामणीयांसंस्थविष्ठंचस्थवीय साम् ॥ गरीयसांगरिष्ठंचश्रेष्ठंचश्रेयसामपि ॥ १६ ॥ अकर्तृकर्मकरणमकारणमकारकम् ॥ अंतःशून्यतयैवैतच्चिरायपरिपूरितम् ॥ १७॥ जगत्समुद्गकमपिनित्यंशून्यमरण्यवत्॥ अनंतशैलकठिनमप्याकाशलवान्मृदु ॥ १८ ॥ प्रत्येकंप्रत्यहंप्रायःपुराणंपेलवंनव म्॥ आलोकमंधकाराभंतमस्त्वालोकमाततम्॥ १९॥ प्रत्यक्षमपिदुर्लक्ष्यंपरोक्षमपिचाग्रगम्॥ चिद्रूपमेवचजडंजडमेवचिदात्मक म्॥ २० ॥ अहमेवानहंभावमनहंवाहमेवच॥ अन्यदेवतदेवाहमहमेवान्यदेवतत्॥ २१ ॥ अस्यपूर्णार्णवस्यांतरिमेत्रिभुवनोर्मयः॥ स्फुरंतइवतिष्ठंतिस्वभावद्रवतात्मकाः॥ २२ ॥ बिभर्त्तिसर्वमंगस्थंतुषारमिवशुक्तताम्॥ भातिसर्गस्त्वनेनैवतुषारेणेवशुक्तता॥ २३ ॥ अदेशकालावयवोप्येषदेवोदिवानिशम्॥ असज्जगत्तनोतीवयथावारितरंगकम्॥ २४॥ एतस्मिन्विकसंतीमाविपुलाकाशकानने॥ जगज्जरठमंजर्यःप्रसरत्पत्रपंचकाः॥ २५॥ एषस्वप्रतिबिंबस्यस्वयमालोकनेच्छया ॥ अत्यंतनिर्मलाकारःस्वयंमुकुरतांगतः॥ २६॥ व्योमवृक्षफलस्यास्यस्वेच्छावयवउज्वलाः॥ सर्गोपलंभउद्यच्चचमत्कुर्वंतिसंविदि॥ २७ ॥ अंतस्थेनबहिष्ठेननानानानातयात्मनि॥ एषसोंतर्बहिर्भातिभावाभावविभावया॥२८॥ एतद्रूपापदार्थश्रीरेतस्मिन्नेतदिच्छया॥ चमत्करोत्येतदर्थंजिह्वेवस्वास्यकोटरे॥२९॥ अस्यांभसोद्रवत्वंयत्तदिदंजगदुच्यते॥ संवित्स्वादूपलंभांगंभुवनावर्त्तवृत्तिमत् ॥ ३० ॥ शाम्यत्यत्रपदार्थश्रीःसर्वासामेवभास्वति॥ एतस्मादेवचोदेतिस्वालोकइवतेजसः॥ ३१ ॥

क्षुरादिकरणजालंचजीवभूतस्यात्मनःसर्गोपलंभेरूपादिदर्शनेउपकरणतयाचमत्कुर्वंतीत्यर्थः ॥ २७ ॥ सएषपरमात्माअंतस्थेनवासनामयप्रपंचेनबहिष्ठेनभुवनात्मनाजाग्र त्स्वप्नयोर्नानातयासुषुप्तावनानातयाचभावाभावविभावनयास्वयमेवांतर्बहिश्चभातिनान्यदतोणुमात्रमप्यस्तीत्यर्थः ॥ २८ ॥ एतदेवप्रपंचयति ॥ एतद्रूपेत्यादिना ॥ २९ ॥ संविदेवस्वादुयथास्यात्तथाउपलभ्यंतइत्युपलंभान्यंगानिरूपरसाद्येकदेशायस्य ॥ ३० ॥ सर्वासामेवसूर्यचंद्राग्निकरणादिभासांरूपादिपदार्थश्रीरत्रास्मिन्नेवभास्वतिसुषुप्त प्रलययोःशाम्यतिजाग्रत्स्वप्नयोश्चैतस्मादेवोदेति ॥ यथासूर्यादितेजसःस्वालोकःप्रभामंडलम ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंब्रह्म ॥ अतोस्याविदश्चिद्रूपब्रह्मणःसकाशात् ॥ एताःपदार्थश्रियः ॥ ३२ ॥ अनंगान्निरवयवाद्रंगतोरंजकद्रव्यात् ॥ जन्मादिभावविकारैरादिपदात्स्वगतवैचित्र्यैश्चशून्यम् ॥ एतन्मयंचिन्मयमेवविद्धि ॥३३॥३४॥ अत्रएतस्मिन्नविचलेअचलेअचलेपर्वतेव्योमयोदयौङ्कासवद्धीतद्वतीदृश्यलक्षणातरंगिणीनदीवहति ॥३५॥ वारैःकल्पभेदरूपैर्वासरैर्नियतोत्सववासरैश्च ॥३६॥ तयानियतिनर्त्तक्याब्रह्मरंगमायावितानेकाललक्षणःस्वबालकःपुत्रोभूयोभूयोनाट्यतेउपसंहृत्यचभूयोजन्यते ॥ सकीदृशः ॥ जगतांब्रह्मांडानांकोटयोमहाप्रलयाअवांतरप्रलयाश्चनेत्रोन्मेषनिमेषणेयस्यतथाविधः ॥ ३७ ॥ अनिच्छइच्छादिविक्रियाशून्यः ॥ ३८ ॥ भौतिकसर्गाणांकारणंभूतपंचकमिव ॥ ३९ ॥ उन्मेषोनिमेषश्चसमायस्य ॥ निर्मायस्त्वसौअनुन्मेषनिमेषःअतएवस्वात्मन्येवावतिष्ठते ॥ ४० ॥ परिमाणतोमहांतिचतानिकालसंख्यावैभवादितोमहांतिचमहामहांतिजगंतिब्र

इदमेवजगत्सर्वंशुक्लत्वंतुहिनेयथा॥ अतएताःप्रवर्त्ततेविदइंदोरिवांशवः ॥ ३२ ॥ एतस्माद्रंगतोनंगाज्जगच्चित्रमिदंस्थितम्॥ विद्धिभावविकारादिशांतमेतन्मयंततम्॥ ३३॥ अस्माद्धनतरोरेताःस्वैरूढागगनांगणे॥ दृस्यशाखाःप्रवर्त्ततेजगज्जालगुलुच्छकाः॥ ३४॥ व्ययोदयवतीनूनमत्रदृस्यतरंगिणी॥ नानातानंतकुसुमावहत्यविचलाचले ॥ ३५ ॥ अस्मिन्व्योमात्मकेरंगेभुवनाभिनयभ्रमैः॥ नृत्यत्यविरतारंभंवारैर्नियतिनर्त्तकी॥३६॥ जगत्कोटिमहाकल्पकल्पोन्मेषनिमेषणः॥ वितानेनाट्यतेभूयोजन्यतेकालबालकः॥३७॥ उद्यत्स्वपिजगत्स्वेषशांतमेवावतिष्ठते॥ अनिच्छएवमुकुरःप्रतिबिंबशतेष्विव॥३८॥ भूतानांवर्त्तमानानांसर्गाणांसंभविष्यताम्॥ एषोकारणकंबीजंसर्गाणामिवकारणम्॥ ३९ ॥अस्योन्मेषोजगल्लक्ष्मीर्निमेषःप्रलयागमः ॥ अनुन्मेषनिमेषोसावात्मन्येवावतिष्ठते ॥ ४० ॥ उद्यंत्यमूनिसुबहूनिमहामहांतिसर्गागमप्रलयजन्मदशाजगंति॥ सर्वाणितान्ययमपारस्वरूपएवप्रस्पंदनानिमरुदेवयथास्वशांतम्॥ ४१॥ ॥इ०वा०म०वा०दे०मो०नि०उ०परब्रह्मस्वरूपवर्णनंनामपंचत्रिंशत्तमःसर्गः॥३५॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥चमत्कुर्वंत्यथानर्थाआवर्त्ताइववारिणि॥एकस्वभावाःसकलायथावारितरंगकाः॥ १॥

ह्मांडास्तेषांतदंतर्गतपदार्थानांचसर्गःअगमनमगमःस्थितिःप्रलयश्चतत्रप्राणिनांजन्मदेहपरिग्रहःबाल्यादिदशाजाग्रदादिदशाउत्कर्षापकर्षदशाश्चेत्यमूनिचिदाकाशेउद्यंतितानिसर्वाण्यपारोऽपरिच्छिन्नःस्वरूपश्चिदाकाशएव यथामरुत्प्रस्पंदनानिमरुदेवनवस्त्वंतरमितिबुद्ध्याशांतमास्वेत्यर्थः ॥ ४१॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उ०पंचत्रिंशत्तमःसर्गः ॥ ३५ ॥ ॥ ७ ॥ ॥ तुच्छस्यानिच्छतोभोगोनबंधायेतिवर्ण्यते ॥ इच्छैवपरमोबंधस्तत्त्यागान्मुक्तिरित्यपि ॥ १ ॥ इहसर्वेपदार्थाविरुद्धानेकरूपाअविरुद्धैकरूपाश्चभासंते तत्रप्रथमंरूपंरागद्वेषाद्युद्भवेनदुःखहेतुत्वादनर्थरूपम् द्वितीयंतुतदुपशमेनमोक्षोपयोगीतिदर्शयति ॥ चमत्कुर्वंतीति ॥ सकलाःपदार्थावारिण्यावर्त्ताइवभिन्नरूपाःप्रथमंचमत्कुर्वंतिइच्छोत्पादनेनचित्तंभ्रमयंतिअथानंतरमनर्थारागद्वेषनरकादिरूपाःपर्यवस्यंति ॥ यथातरंगकाःवारिजलमात्रंतथाएकस्वभावास्तुनचमत्कुर्वंतिनाप्यनर्थाइतिभावः ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतदविरुद्धंरूपंयेनरूपेणैकस्वभावास्तद्दर्शयति ॥ सर्वस्यैवेति ॥ सर्वस्याप्यस्यविश्वस्यसत्तामात्ररूपापरमाकाशतैवतादृशंरूपंसाचसर्वेभ्योज्ञेयेभ्योविशेषरूपेभ्योनिष्कृष्यज्ञे यंयत्तन्मात्रंतद्रूपिणीअतएवपरेणसमाधिलक्षणेनोपशमेनसंश्रयोयस्यास्तथाविधा ॥२॥ प्रसिद्धेव्योम्निबालबुद्धिवेद्यंयक्षपिशाचादिभीषणरूपंप्रौढबुद्धिवेद्यंतन्निष्कृष्टंशुद्धरू पंचदृष्टांततयाप्रसिद्धमित्याह ॥ बालेति ॥ बालस्यचिंताचिंतनकल्पितरक्षःपिशाचादिरूपंप्रौढस्यदृष्ट्यायथानकिंचिदस्तितथाविदुषोमेदृष्ट्याविश्वंनास्ति ॥ ३ ॥ शिलापुत्रक सैन्यवदरूपालोकमननमेवविश्वंविद्वद्दृशातत्रविश्वताकेव ॥ अज्ञदृशातुरूपालोकमनस्काराभांति ॥ ४ ॥ रूपालोकमनस्कारयोरपितत्त्वतोविमर्शेचिन्मात्रातिरिक्तंरूपंदुर्लभं दूरेताभ्यांविश्वतासिद्धिरित्याह ॥ रूपेति ॥५॥ तथाचविदावेदितृपुरुषस्यवित्त्वमेवजगद्भ्रांतिरवेदितृत्वमेवनविभ्रमः सर्वविभ्रमशांतिरितिफलितम् ॥ तच्चस्मृत्यस्मृतिवत्त्वायत्त

सर्वस्यैवास्यविश्वस्यनिर्ज्ञेयज्ञेयरूपिणी ॥ परमाकाशतारूपंपरोपशमसंश्रया ॥ २ ॥ बालचिंतापुरोव्योम्निनकिंचिदपिमेयथा ॥ तथेदंतत्त्वतोविश्वंसत्यंतुसिशुचेतसि ॥ ३ ॥ अरूपालोकमननंशिलापुत्रकसैन्यवत् ॥ रूपालोकमनस्काराभांतिकेवात्रविश्वता ॥ ४ ॥ रूपालोकमनस्कारसारश्चिन्मात्रतांविना ॥ नलभ्यतेसावपरंव्योमेवात्रक्वविश्वता ॥ ५ ॥ विदोवित्त्वंजगद्भ्रांतिरवित्त्वंतुनविभ्रमः ॥ वित्त्वावित्त्वेत्वदायत्तेचित्ताचित्तेयथातव ॥ ६ ॥ परमाकाशरूपत्वाच्चिद्व्योम्नोवितताकृतेः ॥ नस्वभावविपर्यासःकश्चित्संभवतिक्वचित् ॥ ७ ॥ तन्मयस्यास्यविश्वस्यनस्वभावविकारिता ॥ विद्यतेप्रेक्ष्यमाणापिकिमुसास्यभविष्यति ॥ ८ ॥ सर्वंचिद्व्योमचैवेदंनसत्त्वमहमित्यपि ॥ विकाराद्यस्तिनज्ञप्तावज्ञप्तिर्मेनलभ्यक्वचित् ॥ ९ ॥ सर्वंशांतंशिवंशुद्धंत्वमहंतादिविभ्रमम् ॥ नकिंचिदपिपश्यामिव्योमजंकाननंयथा ॥ १० ॥ संविदाकाशशून्यत्वंयत्तद्विद्धिवचोमम ॥ इदंत्वत्संविदाकाशेस्वयमात्मनितिष्ठति ॥ ११ ॥ पदमाहुःपरंसद्यदनिच्छोदयमासितम् ॥ पाषाणपुरुषस्येवचित्रस्थस्येवचासनम् ॥ १२ ॥ सविश्रांतमनामौनीयस्यप्रकृतकर्मसु ॥ स्पंदोदारुनरस्येवविगतेच्छमनाकुलम् ॥ १३ ॥

मित्यर्थः ॥६॥ अपरंव्योमेवेतियदुक्तंतद्विशदयति ॥ परमाकाशेति ॥ नहिचिज्जडीभवतीनवाव्योममूर्त्तिर्भवतीतिभावः ॥७॥ ब्रह्मदर्शनबाध्यत्वादपिजगन्नब्रह्मविकारइत्याह ॥ तन्मयस्येति ॥ यायत्रप्रेक्ष्यमाणापिनविद्यतेबाध्यतेअस्यसाकिमुभविष्यतिउत्पत्स्यतेस्थास्यतेवा ॥ नैतत्संभावितमित्यर्थः ॥८॥ अभिमंतव्यविकारनिरासन्यायेनाभिमंतृविकारोपिनिरसनीयइत्याह ॥ सर्वमिति ॥ विकारआदिपदाद्बाधश्चज्ञप्तौचिदात्मनिनास्यतःक्वचिदप्यज्ञप्तिश्चिद्व्यतिरिक्तम् ॥ ९॥१०॥ इत्थंचमदीयमुपदेशवचोयत्तदपिसंविदाकाशरूपंशून्यत्वंविद्धि ॥ यस्मादिदंवचस्त्वत्संविदाकाशरूपेआत्मन्येवस्वयंतिष्ठतिनजडस्वरूपे ॥ शब्दतत्त्वस्यापिचिद्रूपस्फोटात्मनैवनिष्कर्षेपर्यवसानादितिभावः ॥ ११ ॥ एवंमेयमातृमानानांचिन्मात्रत्वेसिद्धेइच्छाविषयादेरभावादनिच्छोदयंयदासितमवस्थानंतदेवपरमंपदमाहुः ॥ १२ ॥ इच्छाभावेपिजीवनहेतुव्यवहारसिद्धिमाह ॥ सइति ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंव्यवहारेणजीवतोज्ञस्यकथंजगद्भातितिदाह ॥ अंतरिति ॥ वेणोर्वंशनालस्येवांतर्बहिश्चशून्यम् ॥ १४ ॥ नस्वदतेनरोचते ॥ १५ ॥ अस्वदनमेवप्रतींद्रियविषयंप्रपंचयंस्त
द्दुत्तीर्णतांदर्शयति ॥ उच्यंतामित्यादिना ॥ प्रकृतःप्रस्तुतःप्रारब्धशेषक्षयस्तदुपयुक्तान्यशब्दोच्चारणरहितैर्व्यवहारैरनंगलग्नेनव्यवहारांगदेहादावहंममतासंबंधरहितेनरसेनमा
धुर्येणवंशवन्मुरलीवद्गतवासनंयथास्यात्तथाशब्दजालान्युच्यंतामुच्चार्यंतांवागिंद्रियेणेत्यर्थः ॥ १६ ॥ एवंत्वगिंद्रियेणत्वयानटभटवेश्यादिकूटनिवासगृहेणेवानिच्छममनो
दयंचस्पर्शनीयानिस्रक्चंदनादीनिस्पृश्यंताम् ॥ १७ ॥ १८ ॥ अरसमनिच्छम् ॥ निर्मनोमानंमनोमीयतेनिर्मीयतेयेनवासनाजालेनतद्रहितम् ॥ अगर्वंनिरभिमानम् ॥ चित्रलि

अंतःशून्यंवहिःशून्यंविरसंगतवासनम् ॥ जगद्वेणोरिवज्ञस्यजीवतोभातिजीवनम् ॥ १४ ॥ यस्यनस्वदतेदृश्यमदृश्यंस्वदतेहृदि ॥ स
वाह्याभ्यंतरंशांतःसवितीर्णोभवार्णवात् ॥ १५ ॥ उच्यंतांशब्दजालानिवंशवद्गतवासनम् ॥ रसेनानंगलग्नेनप्रकृतानन्यचोदनैः ॥ १६ ॥
स्पृश्यंतांस्पर्शनीयानियथाप्राप्तान्यवासनम् ॥ कूटागारवदक्षुब्धमनिच्छममनोदयम् ॥ १७ ॥ स्वाद्यंतांरसजालानिविगतेच्छाभयैष
णम् ॥ अपरागाभिलषणंयथाप्राप्तानिदर्विवत् ॥ १८ ॥ दृश्यंतांरूपजालानिपुनःप्राप्तान्यवासनम् ॥ अरसंनिर्मनोमानमगर्वंचित्रने
त्रवत् ॥ १९ ॥ जिघ्यंतांगंधपुष्पाणिविगतेच्छमवासनम् ॥ स्पंदवंधोपलग्नानित्यागायवनवातवत् ॥ २० ॥ इतिचेद्विरसत्वेनबोधयि
त्वाचिकित्सिताः ॥ नभोगरोगास्तद्वच्चशांत्यैनास्तिकथैवच ॥ २१ ॥ यःस्वादयन्भोगविषंरतिमेतिदिनेदिने ॥ सोग्नौस्वमूर्तिज्वलिते
कक्षमक्षयमुज्झति ॥ २२ ॥ निरिच्छत्वंसमाधानमाहुरागमभूषणाः ॥ यथाशाम्येन्मनोनिच्छंनोपदेशशतैस्तथा ॥ २३ ॥ इच्छोदयो
यथादुःखमिच्छाशांतिर्यथासुखम् ॥ तथाननरकेनापिब्रह्मलोकेनुभूयते ॥ २४ ॥ इच्छामात्रंविदुश्चित्तंतच्छांतिर्मोक्षउच्यते ॥ एतावं
त्येवशास्त्राणितपांसिनियमायमाः ॥ २५ ॥

खितपुरुषादिनेत्रवत् ॥ १९ ॥ जिघ्यंतांघ्रायंताम् ॥ अशितिजिघ्रादेशश्छांदसः ॥ जिघ्रंतामितिपाठेविकरणव्यत्ययः ॥ अपानोपनीतंगंधंस्पंदेनबध्नात्यासंगपाप्मनेतिस्पंदवंधो
घ्राणंतदुपलग्नानि ॥ त्यागायननुरागाय ॥ २० ॥ इतिउक्तरीत्याअनुक्तेष्वपिकर्मेंद्रियविषयेषुतद्वत्प्राग्वत्चाज्ज्ञानेंद्रियवच्चविरसत्वेननिःसारत्वेनमनोबोधयित्वाभोगरोगाश्चेच्च
चिकित्सितास्तदादुःखशांत्यैकथैवनास्तिचादनर्थपरंपरोद्भवश्चास्तीत्यर्थः ॥ २१ ॥ तदेवाह ॥ यइति ॥ कक्षंतृणपूलम् ॥ अक्षयमखंडितमजस्रमितियावत् ॥ उज्झतिक्षिप
ति ॥ २२ ॥ अतोभोगेच्छात्यागएवमनःशांतौमुख्योहेतुरितिस्तौति ॥ निरिच्छत्वमिति ॥ २३ ॥ नापिब्रह्मलोकेइति ॥ तथाचोक्तंययातिना ॥ यच्चकामसुखंलोकेयच्चदिव्यं
महत्सुखम् ॥ तृष्णाक्षयसुखस्यैतेनार्हतःषोडशींकलामिति ॥ २४ ॥ एतावंत्येतावन्मात्रपर्यवसितानि ॥ २५ ॥

१ मनःशब्दस्यादंतत्वंसंध्यार्षत्वंवा २ ऊर्ध्वंप्राणउन्नयत्यपानःप्रत्यगस्यतीतिकठवल्लीश्रुत्यनुरोधेनापानस्याधआकर्षणेप्राणाकर्षणाद्बहिर्निर्गतस्यश्वासस्यांतराकर्ष
णंयदाभवतितदातेनाकृष्टोगंधोघ्राणेंद्रियेणसंयुज्यतेअतउक्तमपानोपनीतमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २६ ॥ २७ ॥ लोकस्यजनस्य ॥ २८ ॥ तच्चिकित्सायांचधैर्यलक्षणःपुरुषप्रयत्नएवौषधंनान्यदित्याह ॥ इच्छेति ॥ २९ ॥ स्वल्पमपीति ॥ अल्पाल्पेच्छानिरोधाभ्यास क्रमेणसर्वतउपशमोयुक्तेनभाव्यमित्यर्थः ॥ मार्गस्थःसन्मार्गप्रविष्टः ॥ ३० ॥ दिनानुदिनंप्रतिदिनम् ॥ ३१ ॥ आत्यंतिकेच्छाबाधस्तुज्ञानेनतन्मूलनाशादेवेत्याह ॥ दुःखेति ॥ ॥ ३२ ॥ तस्याअवेदनमसत्वापादानम् ॥ विदसत्तायांभावेल्युट् ॥ वृथाश्रमैर्यत्नांतरैः ॥ ३३ ॥ इच्छाप्रशमनयत्नाभावेशास्त्रादिवैयर्थ्यमपीत्याह ॥ शास्त्रेति ॥ समाधिश्चित्त

यावतीयावतीजंतोरिच्छोदेतियथायथा॥तावतीतावतीदुःखबीजमुष्टिःप्ररोहति॥२६॥यथायथेच्छातनुतांयातिजंतोर्विवेकतः॥तथा तथोपशाम्यंतिदुःखचिंताविषूचिकाः॥२७॥ यथायथेच्छाघनतांयातिलोकस्यरागतः॥ तथातथाविवर्धतेदुःखचिंताविषोर्मयः॥२८ इच्छाचिकित्स्यतेव्याधिर्नस्वयत्नौषधेनचेत्॥ तदत्रबलवन्मन्येविद्यतेनौषधांतरम्॥ २९ ॥ इच्छोपशमनंकर्त्तुंयदिकृत्स्नंनशक्यते॥ स्व ल्पमप्यनुगंतव्यंमार्गस्थोनावसीदति॥३०॥ यस्त्विच्छातानवेयत्नंनकरोतिनराधमः॥सोंधकूपेस्वमात्मानंदिनानुदिनमुज्झति॥३१॥ दुःखप्रसवशालिन्याबीजमिच्छैवसंसृतेः॥ सम्यग्ज्ञानाग्निदग्धासानभूयःपरिरोहति॥ ३२॥ इच्छामात्रंहिसंसारोनिर्वाणंतदवेदनम्॥ इच्छानुत्पादनेयत्नःक्रियतांकिंवृथाश्रमैः॥ ३३ ॥ शास्त्रोपदेशगुरवःप्रेक्ष्यंतेकिमनर्थकम् ॥ किमिच्छाननुसंधानसमाधिर्नाधिगम्यते ॥ ३४ ॥ यस्येच्छाननुसंधानमात्रेदुःसाध्यतामतेः ॥ गुरूपदेशशास्त्रादितस्यनूनंनिरर्थकम् ॥ ३५॥ इच्छाविषविकारिण्यामंतएवनृ णामलम्॥ दुःखप्रसरकारिण्यांहरिण्याजन्मजंगले॥ ३६ ॥ नबालीक्रियतेत्वीषदात्मज्ञानायचेदसौ॥ इच्छोपशांतिःक्रियतांतयालं तदवाप्यते॥ ३७॥ निरिच्छतैवनिर्वाणंसेच्छतैवहिबंधनम् ॥ यथाशक्तिजयेदिच्छांकिमेतावतिदुष्करम्॥ ३८ ॥ जरामरणजन्मादि करंजखदिरावलेः॥ बीजमिच्छासदैवांतर्दह्यतांशमवह्निना॥ ३९ ॥ यतोयतोनिरिच्छत्वंमुक्ततैवततस्ततः॥यावद्गतियथाप्राणंहन्या दिच्छांसमुत्थिताम्॥ ४० ॥ यतोयतश्चसेच्छत्वंबंधपाशास्ततस्ततः॥ पुण्यपापमयादुःखराशयोविततार्त्तयः॥ ४१ ॥

समाधानोपायःकिंनाधिगम्यतेकिमर्थंनाश्रीयते ॥ ३४ ॥ मतेःस्वविवेकात् ॥ ३५ ॥ इच्छाविषविकारिण्यांसंसृतौनृणामंतोमृत्युरेव ॥ यथाहरिण्याव्याघ्रादिसंकुलेजंगले मृत्युरेवतद्वत् ॥ ३६ ॥ असौनाइच्छयाचेन्नबालीक्रियतेबालवच्चपलोनक्रियतेतदाआत्मज्ञानायतुईषदेवप्रयत्नः ॥ अतइच्छोपशांतिरेवक्रियतांतयैवतज्ज्ञानमवाप्यते॥ ३७॥ ॥ ३८ ॥ सदैवाभ्यस्तेनशमवह्निनादह्यताम् ॥ ३९ ॥ यावद्विवेकवैराग्याद्युपायप्राप्ति ॥ यथाप्राणंयथाधैर्यादिबलम् ॥ ४० ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दस्युभिर्लुंटाकैर्मुषितस्यापहृतसर्वस्वस्येव ॥ ४२ ॥ कल्याणंसाधनचतुष्टयम् ॥ ४३ ॥ विषयोपभोगेनेच्छायाःपरिपूरणंयत्तदेव ॥ ४४ ॥ स्वतृत्स्वदयंतल्लक्षणादृक्षादाश्रया
दिंधनाच्चजाताःशितांताःनिशिताग्राइच्छाइच्छारूपादुष्कृतकृशानुशिखास्तत्रस्थंचिदाभासरूपंपुंस्पशुंजीवलक्षणंपशुंस्वाश्रयेस्वदिकृतादशुभात्पापलक्षणाच्छुभात्पुण्यलक्ष
णाच्चस्वाश्रयदूषणापराधादुत्पन्नाद्वैरादिवमोहधूमैरंधीकृत्यस्नेहपाशैर्दृढंबद्धाचआसाद्यपातयित्वातदीयौसुखदुःखकुबीजानांकोशौकुसूलस्थानीयौतद्भूषणौआसमंताद्दहंति
वीर्त्ताकवद्वर्जयंति ॥ छमच्छमितीतितद्धसादाहोत्थशब्दानुकरणम् ॥ इच्छाःकर्त्र्यः ॥ दुष्कृतकृशानुशिखाःआसाद्यप्रज्वाल्यतदीयकुबीजकोशौदहंतीतिवा ॥ कुबीजको
शौआसाद्यपुंस्पशुंदहंतीतिवायथेच्छमन्वयः ॥ पुमःस्वव्ययमपरेइतिरुत्वेसंपुंकानामितिसत्त्वम् ॥ पुंपशुमितिपाठस्तुच्छांदसः ॥ ४५ ॥ ॥ इतिश्रीवासिष्ठ०तात्पर्यप्रकाशे

इच्छानिरासरहितेगतेसाधोःक्षणेपिच ॥ दस्युभिर्मुषितस्येवयुक्तमाक्रंदितुंचिरम् ॥ ४२ ॥ यथायथास्यपुंसोंतरिच्छासमुपशाम्यति ॥ तथातथास्यकल्याणंमोक्षायपरिवर्द्धते ॥ ४३ ॥ आत्मनोनिर्विवेकस्ययदिच्छापरिपूरणम् ॥ संसारविषवृक्षस्यतदेवपरिषेचनम् ॥ ४४ ॥ स्वहृक्षजाःस्वसुखदुःखकुबीजकोशौवैरादिवाश्रयकृतादशुभाशुभाच्च ॥ आसाद्यदुष्कृतकृशानुशिखाःशितांताइच्छाच्छमच्छमितिपुंस्पशुमादहंति ॥ ४५ ॥ ॥ इ०वा०महारामायणेवा०दे०मो०निर्वाणप्रकरणेउत्तरार्द्धेसंसारबीजकथनंनामषट्त्रिंशत्तमःसर्गः ॥ ३६ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ इच्छाविषविकारस्यवियोगंयोगनामकम् ॥ शांतयेशृणुभूयोपिपूर्वमुक्तमपिस्फुटम् ॥ १ ॥ आत्मनोव्यतिरिक्तंचेद्विद्यतेतदिहेच्छया ॥ इष्यतामसतित्वेतत्स्वात्मान्यत्वंकिमिष्यते ॥ २ ॥ निर्भागावयवासूक्ष्माव्योम्नःशून्यतरैवचित् ॥ सैवाहंजगदाकारासतींकिंतत्तयेष्यते ॥ ३ ॥ साव्योमरूपाव्योमैवव्योमात्मवेद्यवेदिका ॥ व्योमात्मजगदाभासमत्रेच्छाविषयोस्तिकः ॥ ४ ॥ गात्स्यग्राहकसंबंधःकुतश्चिदितितन्मनः ॥ विद्यतेसौप्रशांतानांयेषामस्तिनवेद्मितान् ॥ ५ ॥

निर्वाणप्रकरणेउत्तरार्द्धेषट्त्रिंशत्तमःसर्गः ॥ ३६ ॥ ॥ ७ ॥ ॥ यथेच्छैवनजायेतजातापिब्रह्मकेवलम् ॥ तथोपपत्तिभिर्भूयोज्ञानयोगोत्रवर्ण्यते ॥ १ ॥ वियोगफलक
त्वाद्वियोगम् ॥ इच्छामूलकसर्वानर्थशांतये ॥ १ ॥ इच्छयाइष्यताम् यथेच्छमिच्छाप्रवर्त्ततामित्यर्थः ॥ इच्छंतामितिपाठेप्ययमेवार्थः ॥ तथाचयावदात्मानज्ञायेतेतावदेव
द्वितीयवस्तुसत्यताभ्रांत्याइच्छोदयइत्यात्मज्ञानयोगएवविषयापहारद्वारातन्निवृत्त्युपायइतिभावः ॥ २ ॥ यदितुज्ञानेनजगत्सत्यंब्रह्मैवसंपन्नमितिनमिथ्येतिमन्यसेतदाप्यत्यं
ताभेदेएषित्रादित्रिपुटीघटितेच्छायाअसिद्धिरित्याह ॥ निर्भागेति ॥ निर्गतोभागस्त्रिपुटीविभाजकोपाधिभेदोविभजनीयावयवभेदश्चयस्याः ॥ अहमाकाराजगदाकाराचसै
वसती ॥ ३ ॥ ४ ॥ बुद्ध्याअगृहीतेविषयेइच्छानुदयाद्ग्राह्यग्राहकसंबंधाभावेग्रहणस्यासिद्धेरपिविदुषांनेच्छाप्रसक्तिरित्याह ॥ ग्राह्येति ॥ प्रशांतानांनःअसौअज्ञदृष्टिप्रसिद्धो
ग्राह्यग्राहकसंबंधःकुतश्चिदपिनिमित्तात्प्रमाणाद्वानविद्यतेइत्येतस्माद्धेतोरपिकिमिष्यतेइत्यन्वयः ॥ येषामज्ञानामस्तितान्नवेद्मि ॥ तेपितत्त्वदृशाअत्यंताप्रसिद्धाइत्यर्थः ॥ ५ ॥

१ वंताकवत् ॥ २ अत्रपाठेविकरणव्यत्ययआर्षइतिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वर्थेअपिशब्दः ॥ असितःश्यामः ॥ ६ ॥ ग्राहकादीनांसर्वत्रिपुटीनामेषैवसत्ता ॥ कैषा ॥ यन्नात्मनिष्ठताताच्चित्रकेआत्मन्यविश्रांतिरज्ञानमितियावत् ॥ तेचग्राहकादयःस्व
भावोऽशास्त्रीयदृष्टिस्तदपेक्षयासत्याःशास्त्रीयतत्त्वदृष्ट्युदयेकप्रयांतीतिनजाने ॥ ७ ॥ तत्त्वज्ञानस्याप्येषएवस्वभावोयदसत्याअहंताशास्त्रतःस्वतत्त्वंज्ञात्वातस्मिन्नात्मनिगच्छ
त्यपैति ॥ सएवाखिलोद्रष्टृदृश्यक्षयोविशिष्टंनिर्वाणंचेत्यर्थः ॥ ८ ॥ दृश्यनिर्वाणयोःपरस्परासहभावोपिस्वभावतएवेत्याह ॥ निर्वाणइति ॥ मिथोऽनुभवःसहानुभवः ॥ ९ ॥
कुतोनसहानुभवोपीतितत्राह ॥ उभेइति ॥ यदिमिथःसहस्यातांतदाउभेपरस्परबाधितत्वादसत्येस्याताम् ॥ स्तामसत्येकोदोषस्तत्राह ॥ असत्येचेति ॥ तथाचविद्वदनुभववि
रोधइत्याह ॥ यतइति ॥ १० ॥ ननुतर्हिसर्वजनप्रसिद्धंदृश्यादिमहाकौतुकंनिर्वाणेदुर्लभंस्यादित्यनाश्वासंपरिहरन्नाह ॥ भ्रमभूतमिति ॥ असत्चाद्दनर्थरूपंचतद्दृश्यादिमा
भाव्यतांनचिंत्यताम् ॥ ११ ॥ तत्अर्थकारिपुरुषार्थसंपादकंनास्त्येव ॥ अत्रईदृशेदृश्येअपह्नवेनकिंकौतुकंगतमित्यर्थः ॥ १२ ॥ अभावःशाब्दज्ञानकृतोबाधःसोपपत्तिर्म

ग्राह्यग्राहकसंबंधःस्वनिष्ठोपिनलभ्यते ॥ असतस्तुकथंलाभःकेनलब्धोसितःशशी ॥ ६॥ एषैवग्राहकादीनांसत्तायन्नात्मनिष्ठता ॥
स्वभावावेक्षयासत्यानजानेकप्रयांतिते ॥ ७॥ एषएवस्वभावोयद्द्रष्टृदृश्यक्षयोखिलः ॥ ज्ञात्वासत्याविनिर्वाणमहंतात्मनिगच्छति
॥८॥ निर्वाणेनास्तिदृश्यादिदृश्यादौनास्तिनिर्वृतिः॥ मिथोनयोरनुभवोनच्छायातपयोरिव ॥ ९॥ उभेएतेमिथोऽसत्येअसत्येचननि
र्वृतिः॥यतोनिर्वाणमजरमदुःखमनुभूयते॥१०॥भ्रमभूतंचदृश्यादिनित्यंनात्रसुखप्रदम्॥ असच्चतद्भाव्यतांमानिर्वाणेस्थीयतामजे
॥ ११ ॥शुक्तिकारूप्यसदृशंप्रेक्षितंयन्नलभ्यते ॥ अर्थकार्यपितन्नास्तिकिमत्रापह्नवेनच॥ १२॥ तत्सद्भावान्महद्दुःखमसद्भावान्मह
त्सुखम्॥ अभावःसोपपत्तिस्तुदृढतांयातिभावनात्॥ १३॥ तत्किमात्मनिबंधायविदग्धंनमुधाधमाः ॥ स्पष्टएवोपचयादेर्वस्तुन्यस्त
मिताऽपदे ॥ १४॥ कार्यकारणभावादिब्रह्मैवसकलंयदा ॥ तदातुब्रह्मताद्यस्मिन्संविन्मात्रात्मकेतते ॥ १५॥ मार्गयंतिप्रबोधायतै
र्मृगैरलमस्तुनः॥ व्योमरूपेकिलैकस्मिन्सर्वात्मनिततेसति ॥ १६॥

ननसहितोभावनान्निदिध्यासनात् ॥ १३ ॥ इदानींपरमकारुणिकोभगवान्वसिष्ठोदृश्यकौतुकासक्तानधमाधिकारिणःश्रोतॄन्बलान्निर्भर्त्स्यंदृश्यासक्तित्याजयन्नाह ॥ त
त्किमिति ॥ हेअधमाःयूयमुपचयादेर्विकारजातस्यअपदेपरमार्थवस्तुनिस्वप्रकाशत्वाच्छास्त्राचार्योपदेशाच्चकरतलामलकवत्स्पष्टेएवस्फुरतिसत्यस्तमदर्शनंकिंइतप्रामुत ॥
भवद्भिस्तद्दृश्यजातंकिमात्मनिबंधनायनविदग्धम् ॥ किंवंधएवाभिलषितोस्तियेनदृश्यासक्तिंनमुंचतेत्यर्थः ॥ १४ ॥ यदाकार्यकारणभावादिसर्वंब्रह्मैवभवतितदैवतुदेहादिप
रिच्छेदापगमात्ततेविस्तारंप्राप्तेचिन्मात्रात्मकेप्रतीचिब्रह्मतासिद्ध्यतिनाणुमात्रमपिदृश्यपरिशेषे ॥ १५ ॥ अतएवव्योमरूपेसर्वात्मनिपूर्णेपिकार्यकारणतादिदृश्यमंगीकृत्ययेप्र
ह्मप्रबोधायसाधनानिमार्गयंतिमृगयंतेतैर्वादिमृगैस्ताकिंकैःशिष्यमृगैर्वाअलमस्तुप्रयोजनंनास्तीत्यर्थः ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

यदिचावश्यंहेतुर्वाच्यस्तर्हिसर्वस्वभावरूपास्त्वाविद्यैवेत्याशयेनाह ॥ यइति ॥ १७ ॥ अतएवविदुषांतद्बाधात्सर्गादिहेतुनिरूपणेनिर्लज्जतादोषइत्याह ॥ कार्येति ॥ १८ ॥ कारणप्रतिपादनार्थाउक्तिर्विलज्जतानिर्लज्जता ॥ १९ ॥ २० ॥ यदिसर्वंब्रह्मैवतर्हिइच्छापिसुतरांब्रह्मेतितदुत्पत्तौकाक्षतिरितिविद्वद्दृष्ट्यारामःशंकते ॥ एवंचेदिति ॥ २१ ॥ इच्छानुत्पादनेयत्नःक्रियतांकिंवृथाश्रमैरित्यादिप्रागुक्तयत्नविधिनिषेधनेनिवारणेसत्यंविदुषइच्छोदयेपिनकाचित्क्षतिः ॥ विद्याबाधितायास्तस्याउदयएवदुर्लभइत्युत्तरमा

कार्यकारणताढ्यानामुक्तीनामेवकःक्रमः॥ योहेतुःस्पंदनेवायोर्द्रवत्वेसलिलस्यच॥ १७॥ शून्यत्वेनभसःसौम्यसर्गादित्वेचिदात्मनः॥ कार्यकारणभावादिब्रह्मैवसकलंयदा ॥ १८ ॥ तदाब्रह्मणिसर्गाणांकारणार्थाविलज्जता ॥ नदुःखमस्तिनसुखंशांतंशिवमयंजगत् ॥ १९ ॥ नास्तिचिन्मात्रतान्यत्वमतइच्छोदयःकुतः ॥ मृद्देहयोधसेनायांनमृन्मात्रेतरद्यथा ॥ २० ॥ नसज्जगदहंतादौदृश्येब्रह्मेतरत्तथा ॥ श्रीरामउवाच॥ ॥ एवंचेत्तदुदेत्विच्छाभावोदेतुमुनीश्वर॥ २१॥ सातुब्रह्मैवकोर्थःस्यादस्याविधिनिषेधने॥ ॥ श्रीवसिष्ठउवाच ॥ ज्ञातायांसंप्रबुद्धायामिच्छाब्रह्मैवनेतरत्॥ २२॥ यथांसंबुद्धवान्रामतत्सत्यंकिंत्विदंशृणु॥ यदायदाज्ञतोदेतिशाम्यतीच्छातदातदा ॥ २३ ॥ वस्तुस्वभावादुदयत्यादित्येयामिनीयथा ॥ शाम्यत्येवनतूदेतिज्ञभाविच्छादितत्तथा ॥ २४॥ यथायथोदयोज्ञस्यद्वैतशांतिस्तथातथा॥ वासनाविलयश्चैवकथमिच्छोदयोभवेत् ॥ २५॥ तस्याविद्योपशांतेयंनिर्मलामुक्ततोदिता॥ अशेषदृश्यवैरस्याद्यस्येच्छोदेतिनक्वचित्॥ २६॥ विरक्ततास्यनोदृश्येनोदेत्यत्रास्यरक्तता ॥ केवलंद्रष्टृदृश्यश्रीःस्वदतेनस्वभावतः॥ २७॥ काकतालीययोगेनपरप्रेरणयानया ॥ यदिकिंचित्कदाचिच्चसम्यगिच्छतिवानवा॥ २८॥ तदस्यसेच्छानेच्छावाब्रह्मैवात्रनसंशयः ॥ इच्छानजायतेज्ञस्यावश्यमेवानुवानवा॥ २९ ॥ ज्ञताचेदुदिताजंतोस्तदिच्छास्योपशाम्यति॥ नैतयोःस्थितिरेकत्रप्रकाशतमसोरिव॥ ३० ॥

ह ॥ ज्ञातायामित्यादिना ॥ २२ ॥ २३ ॥ इटकिटकटीगतावित्यत्रईइतिप्रश्लिष्टस्यधातोःशत्रंतस्यसप्तम्येकवचनेअयतीतिरूपंनत्वयतेस्तस्यात्मनेपदित्वात् ॥ २४ ॥ २५ ॥ मूलोच्छेदादपिविदुषोनेच्छोदयसंभवइत्याशयेनाह ॥ तस्येति ॥ २६ ॥ नस्वदतेनरोचते ॥ २७ ॥ सम्यकूशास्त्रानिषिद्धंदेहधारणमात्रसाधनमन्नदानादि ॥ २८ ॥ तत्तदाअस्यविदुषःसाइच्छानेच्छाऽनिच्छावाउभयंब्रह्मैव ॥ अथवाज्ञस्यविदुषोनवाअभिनवभोगचमत्कारविषयाइच्छाअवश्यंनजायतेएव ॥ प्रागभ्यस्तमनुसरत्यतुवाअनियतेत्यर्थः ॥ २९ ॥ ज्ञतातत्त्वज्ञानम् ॥ तत्तदा ॥ ३० ॥

१ यथासिबुद्धवानित्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवरागतःप्रसक्तनिषिद्धक्रियाप्रतिषेधशास्त्रेनीरागोयंनाधिकारीत्याह ॥ प्रतिषेधेति ॥ किंकृतेकस्मैप्रयोजनाय ॥ नह्यनंधस्यकूपेनपतनीयमित्यंधेनवक्तव्यमस्तीतिभावः ॥ ३१ ॥ बाह्येच्छानिवृत्तिःस्वानंदानुभवतृप्तिश्चतत्त्वबोधोदयचिह्नमित्याह ॥ एतदेवेति ॥ सर्वलोकानामभयदानेनह्लादनम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ अद्वैतंद्वैतध्वंसरूपंवस्त्वं तरम् ऐक्यंमेलनमेकत्वसंख्याचतैर्विवर्जितंयथास्यात्तथायआस्तेतस्येतिपरेणान्वयः ॥ ३५ ॥ अर्थव्यपाश्रयःप्रयोजनलाभः ॥ ३६ ॥ नानिच्छयेति ॥ अर्थव्यपाश्रयइति सर्वत्रानुषज्जते ॥ ३७ ॥ ३८ ॥ ३९ ॥ इतिप्राग्वर्णितमात्मतत्त्वंनिश्चित्यदुःखंसुखंचनिरतिशयानंदात्मभावनयाविषमम्मृतमिवकुर्वन् ॥ ४० ॥ तद्बोधानुसारिणीस्थितिरेवसर्व

प्रतिषेधविधीनांतुतज्ज्ञोनविषयःक्वचित् ॥ शांतसर्वैषणेच्छस्यकोस्यकिंवक्तिकिंकृते ॥ ३१ ॥ एतदेवज्ञताचिह्नंयदिच्छास्वतितानवम् ॥ ह्लादनंसर्वलोकानामथानुभवएववा ॥ ३२ ॥ दृश्यंविरसतांयातंयदानस्वदतेक्वचित् ॥ तदानेच्छाप्रसरतितदैवचविमुक्तता ॥ ३३ ॥ बोधादनैक्यमद्वैतंयःशांतमवतिष्ठते ॥ इच्छानिच्छादयःसर्वेभावास्तस्यशिवात्मकाः ॥ ३४ ॥ बोधादस्तमितद्वैतमद्वैतैक्यविवर्जितम् ॥ यःस्वच्छोविगतव्यग्रःशांतआत्मन्यवस्थितः ॥ ३५ ॥ नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन ॥ नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः ॥ ३६ ॥ नानिच्छयानेच्छयाथनसतानासतासदा ॥ नैवात्मनानचान्येननतैर्मरणजीवितैः ॥ ३७ ॥ इच्छाचतस्यनोदेतिनिर्वाणस्यप्रबोधिनः ॥ यदिचोदेतितस्येच्छाब्रह्मशाश्वतमेवसा ॥ ३८ ॥ नदुःखमस्तिनसुखंशांतंशिवमजंजगत् ॥ इतियोंतःशिलेवास्तेतंप्रबुद्धंविदुर्बुधाः ॥ ३९ ॥ दुःखंसुखंभावनयाकुर्वन्विषमिवाम्तम् ॥ इतिनिश्चित्यधीरात्माप्रबुद्धइतिकथ्यते ॥ ४० ॥ तत्स्थितंव्योमनिव्योमशांतेशांतंशिवेशिवम् ॥ शून्येशून्यंसतिचसद्ब्रह्मणिजगत्स्थितम् ॥ ४१ ॥ असंवेदनसंवित्खेततेऽविश्वमितिस्थिते ॥ सौम्येसमसमेशांतेशिवेहंताभ्रमःक्षयी ॥ ४२ ॥ यदिदंदृश्यतेकिंचिज्जगत्स्थावरजंगमम् ॥ तत्सर्वंशांतमाकाशंपरचिंतापुरोपमम् ॥ ४३ ॥ परचिंतापुरोमध्येगतविघ्नंगमागमौ ॥ यथांतस्तवशून्यत्वात्तथैवास्मिन्जगद्भ्रमे ॥ ४४ ॥ अब्धिघूर्वीनदीशैलशोभाशून्यतरात्मनि ॥ जृंभतेद्रष्टकरणंमृगतृष्णांबुवीचिवत् ॥ ४५ ॥

वस्तूनामविपर्यस्तस्थितिर्नाज्ञप्रसिद्धेत्याह ॥ तदिति ॥ तत्तदा ॥ ४१ ॥ इतिउक्तरीत्याअविश्वंनिर्जगत्कंयथास्यात्तथास्थितेसति ॥ ४२ ॥ चिंतापुरंमनोराज्यनगरंतदुपमम् ॥ ४३ ॥ परःपुरुषांतरंतदीयमनोराज्यकल्पितायाःपुरोनगर्यामध्येतवयथाअंतर्गमागमावविघ्नंकुड्यादिप्रतिबंधशून्यंसिध्यतस्तथाविदुषोप्यस्मिन्जगद्भ्रमेसिध्यतइत्यर्थः ॥ ४४ ॥ तत्कुतस्तत्राह ॥ अब्धीति ॥ यतःअब्ध्यादिशून्यतरात्मनिद्रष्टुरंतःकरणमेवाब्ध्यादिशोभात्मनाजृंभते ॥ यथातृषितश्रांतपुरुषस्यचक्षुरूपंकरणमंबुशून्येपुरोदेशेमृगतृष्णांबुवीच्यात्मनाजृंभतेतद्वदित्यर्थः ॥ ४५ ॥

---

१ स्वस्थइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असत्यतायाइतरत्सत्यत्वंकिंकिल ॥ ४६ ॥ भ्रांतिभाजोमिथ्यात्वादपिभ्रांतेर्मिथ्यात्वमित्याह ॥ असत्यमेवेति ॥ यतःसत्यंब्रह्मैवाहमिदमितिचासत्यमेवभासतेअतइयंभ्रांति भ्रांतिभाजंविनैवस्फुरतीत्यसतीत्यर्थः ॥ ४७ ॥ अत्यंतासत्त्वेशून्यवादिमतप्रवेशः अत्यंतसत्त्वेअद्वैतश्रुतिविद्वदनुभवविरोधः उभयरूपत्वंतुविरोधादसंभवीत्यनिर्वचनीयताय तिपुंस्त्ववदस्यपरिशेषादित्याह ॥ नसदिति ॥ अतींद्रियंइंद्रियानवधार्यतत्त्वम् ॥ खवत्इंद्रियवत् ॥ गंधर्वनगराद्याकारावक्षुब्धाकाशवद्वा ॥ ४८ ॥ ज्ञस्यतत्त्वविदस्तत्त्वबोधब लादेवालंशाम्यतांविषयाणांयत्यद्यपिइच्छानिच्छेतेसमेतुल्यफलेतथाप्यनिच्छोदयमेवस्फुटंनिर्विक्षेपसुखाभिव्यक्तिहेतुंश्रेयसेमन्ये ॥ नन्वितिरामसंबोधने ॥ ४९ ॥ य थाअविकृतेएवखेआकाशाद्वायुरित्यादिश्रुत्युक्तक्रमेणाहंजगदितिज्ञप्तिरास्थितातद्वदज्ञानावृतचिदात्मनोपि ॥ नात्रकारणांतरंमृग्यमित्यर्थः ॥ ५० ॥ तथाचचिदात्मनोबहिः

स्वप्ननिर्माणपुरवद्बालवेतालतालवत्॥ यदिदंदृश्यतेतत्रकिंकिलासत्यतेतरत् ॥ ४६ ॥ असत्यमेवाहमितिभासतेसत्यमेवच॥ भ्रांति भाजंविनैवेयंभ्रांतिःस्फुरतिसासती॥४७॥ नसन्नासन्नसदसत्किमपीदमतींद्रियम्॥अवाच्यंजगदित्येवभात्यचक्षुर्भितंखवत्॥४८॥ इहेच्छानिच्छतेज्ञस्यशाम्यतांयदलंसमे॥ तथापिश्रेयसेमन्येनन्वनिच्छोदयंस्फुटम्॥४९॥ अहंजगदितिज्ञप्तिःखेखस्येवेयमास्थिता॥ चिदात्मनोयथावायोःस्पंदोनात्रास्तिकारणम्॥५०॥ चितश्चेत्योन्मुखत्वंयत्तच्चित्तंसैवसंसृतिः॥ सेच्छातन्मुक्ततामुक्तिर्युक्तिंज्ञात्वेति शाम्यताम्॥५१॥ इच्छाभवत्वनिच्छावासर्गोवाप्रलयोथवा॥ क्षतिर्नकस्यचित्काचिन्नचकिंचिदिहास्तिहि ॥ ५२ ॥ इच्छानिच्छेस दसतीभावाभावौसुखासुखे॥ इत्यत्रकलनाव्योम्निसंभवंतिनकाश्चन॥ ५३ ॥ इच्छानांतानवंयस्यदिनानुदिनमागतम्॥ विवेकशम नस्यतमाहुर्मोक्षभागिनम् ॥ ५४ ॥ इच्छाक्षुरिकयाविद्धेहृदिशूलंप्रवर्त्तते॥ जयंतियत्रनैतानिमणिमंत्रौषधानिच॥५५॥ यान्का र्यकरणव्यूहान्कृतवान्पूर्वमेवतान्॥ संप्रेक्षयानपश्यामिमिथ्याभ्रमभरादृते॥ ५६ ॥ भ्रमभूतेनकुर्मश्चेद्व्यवहारमवस्तुना॥ तत्कस्मा त्परचित्ताद्रिःकवलत्वंननीयते॥५७॥

प्रवणतैवेच्छाचित्तंसंसारश्च अंतःस्वरूपेस्थितिरेवमुक्तिरितिफलितमित्याह ॥ चितइति ॥ ५१ ॥ तथाचेश्वरस्यसर्गप्रलययोरिवविदुषइच्छानिच्छयोर्नकश्चिल्लाभःक्षतिर्वेत्या ह ॥ इच्छेति ॥ अस्तिफलमितिशेषः ॥ ५२ ॥ तत्रोपपत्तिमाह ॥ इच्छानिच्छेइति ॥ कलनाःकल्पनाः ॥ अत्रतत्त्वविद्रूपेव्योम्निचिदाकाशे ॥ ५३ ॥ ५४ ॥ इच्छालक्ष णयाक्षुरिकयाक्षुरप्रवाणशल्येन ॥ शूलंशोकमोहादिवेदना ॥ यत्रयस्मिन्शूलेएतानिलोकप्रसिद्धानिमणिमंत्रौषधानिनजयंतिकुंठीभवंतीतियावत् ॥ ५५ ॥ विधाताप्राणि दुःखविचिकित्सार्थंयानौषधमंत्रयंत्रादिकार्यकरणव्यूहान्कृतवांस्तान्पूर्वमेवबहुशःपरीक्षणार्थंसंप्रेक्षयायतमानोहंमिथ्याभ्रमभरेणआदृतेपुंसितच्चिकित्सासमर्थान्नपश्यामि ॥५६॥ ननुभ्रांतिसिद्धेनैवकेनचिदुपायेनतच्चिकित्सादिव्यवहारोस्तुतत्राह ॥ भ्रमभूतेनेति ॥ भ्रमोभ्रांतिज्ञानंतेनभूतेनसिद्धेन ॥ अस्मद्भ्रांतिसिद्धोपायेनपरभ्रांतिसिद्धदुःखनिवा रणेअस्मन्मनोरथकल्पितबहुयोजनविस्तृतमुखेनपरकीयस्वप्नशैलादेःकवलनप्रसंगइत्यर्थः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रांतिसिद्धस्यासत्वादपिनपारमार्थिकेपरदुःखनिवारणेसामर्थ्यमित्याह ॥ असतेति ॥ क्रियतेइतिपूर्वान्वयि ॥ तस्मात्तदीयंतत्त्वज्ञानाभिव्यक्तंपरमार्थसत्यंब्रह्मैवतदीयसर्वभ्रम दुःखनिवारणोपायोनान्यइतिभावः ॥ ५८ ॥ नन्वमूर्त्तमनोभ्रांतिमात्रंजगच्चेत्कथंमूर्त्तदेहादिभावंयातितत्राह ॥ अहंभावादिति ॥ देहाद्याकाराहंभावात् ॥ जलंजाड्याति शयतःपाषाणतांकरकाभावमिव ॥ ५९ ॥ कल्पितेचितःस्वमरणतुल्येजडदेहभावेपिवास्तवचिद्रूपमक्षतमेवेतितेनतामनुभवतीत्याह ॥ चित्त्वादिति ॥ ६० ॥ प्रातिभासिक जडभावःप्रतिभासाधीनसत्ताकत्वादनिर्वचनीयइत्याह ॥ व्योम्नीति ॥ ६१ ॥ अतएवजगद्ब्रह्मसत्तयोरैक्याद्भेदोनास्तीत्याह ॥ यथेति ॥ ६२ ॥ प्रातिभासिकार्थस्यस्वाप्नार्थ वत्प्रतिभासातिरिक्तमुत्पत्त्यादिकमप्रसिद्धमित्याह ॥ नेहेति ॥ ६३ ॥ अतएवतत्त्यागादानयोरभिनिवेशोनयुक्तइत्याह ॥ अविद्यमानेइति ॥ ६४ ॥ देहार्थंहिपृथ्व्याद्यर्थस्य

असताव्यवहारश्चेत्प्रेक्षामात्रविनाशिना ॥ क्रियतेशशश्रृंगेणतत्कथंछाद्यतेनखम् ॥ ५८ ॥ अहंभावाच्चिदाकाशोजाड्यातिशयतःक्षणात् ॥ पाषाणतांजलमिवमनस्त्वाद्यातिदेहताम् ॥ ५९ ॥ चित्त्वादनुभवत्येतामसत्यामेवदेहिताम् ॥ अविनष्टैवचिच्छक्तिःस्वप्नेस्वमरणंयथा ॥ ६० ॥ व्योम्न्यसत्यमवस्तुत्वात्सत्यंचानुभवाद्यथा ॥ नीलत्वंतद्वदीशेस्मिन्सर्गोनासन्नसन्मयः ॥ ६१ ॥ यथाशून्यत्वनभसोर्यथास्पंदनभस्वतोः ॥ भेदोनास्तितथासर्गब्रह्मणोरेकरूपयोः ॥ ६२ ॥ नेहसंजायतेकिंचिज्जगदादिननश्यति ॥ स्वप्नोनिद्रागतस्येवकेवलंप्रतिभासते ॥ ६३ ॥ अविद्यमानेपृथ्व्यादौप्रतिभामात्ररूपिणि ॥ सर्गेकइवसंरंभस्त्यागादानैश्चिदंबरे ॥ ६४ ॥ नदेहःप्रतिभातोस्तिपृथ्व्यादिकारणान्वितः ॥ केवलंब्रह्मचिन्मात्रमेवात्मन्येवसंस्थितम् ॥ ६५ ॥ बुद्ध्यादेःकरणत्वंचद्वैतैक्यासंभवान्नसत् ॥ अनेनेदंक्रियतइत्यस्यार्थंयातिसंभवात् ॥ ६६ ॥ अहेतुरक्रमंभातिचितिकल्पक्रियागणः ॥ क्षणेनैवयथास्वप्नेमृतिजन्मादिसत्वराः ॥ ६७ ॥ खमेवपृथ्वीखंशैलाःखमेवदृढभित्तयः ॥ खमेवलोकाःस्पंदःखंसर्गसंवेदनंचितेः ॥ ६८ ॥ व्योमभित्तौजगच्चित्रंचिद्रंगमयमाततम् ॥ नोदेतिनास्तमायातिनशाम्यतिनताम्यति ॥ ६९ ॥ चिद्वारिणिजगत्तुंगतरंगद्रवरूपिणि ॥ किंनुवाकथमुत्पन्नंकिंशांतंचकदाकथम् ॥ ७० ॥ शांतेमहाचिदाकाशेजगच्छून्यत्वशालिनि ॥ चेत्यासंभवतःसंतिनोदयास्तमयौकुतः ॥ ७१ ॥

त्यागादानेस्याताम् यदातदुभयंप्रतिभासमात्रत्वादसत्तदातेअप्यसतीइत्याशयेनाह ॥ नेति ॥ प्रतिभातःप्रतिभासमात्रत्वात् ॥ ६५ ॥ एवंबुद्ध्यादेरपिस्वप्रतिभासकचैतन्यापेक्षयाद्वैतैक्ययोर्भेदाभेदयोरसंभवादनेनेदंक्रियतइत्यस्यव्यवहारस्यकारणत्वमप्यसत्सदर्थंपरमार्थवस्त्वेवयाति ॥ तस्यैवसंभवादित्यर्थः ॥ ६६ ॥ एवंब्रह्मणिकल्पमहाकल्पादयस्तत्रत्यक्रियागणाश्चनिर्हेतुकानिष्क्रमाएवसहेतुसंक्रमवत्प्रतिभासंतइत्याह ॥ अहेतुरिति ॥ मृतिजन्मादयःसत्वरादीर्घकालरहिताः ॥ ६७ ॥ तथाचसर्वंचिदाकाशएवेतिफलितमित्याह ॥ खमेवेति ॥ यतश्चितेःस्वात्मन्येवसर्गसंवेदनंनान्यत्रेत्यर्थः ॥ ६८ ॥ नताम्यतिनम्लायति ॥ ६९ ॥ ७० ॥ स्तांतर्हिचितएवजगदात्मनाउदयास्तमयौनेत्याह ॥ शांतेइति ॥ चेत्यासंभवतोयदाजगंत्येवनसंतितदात्मनाचितउदयास्तमयौकुतःकस्मात्सिद्ध्यतइत्यर्थः ॥ ७१ ॥

॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितुमायाविलासदृशादृश्यतेतदासर्वस्यसर्वरूपतायथेच्छमुपपद्यतइत्याह ॥ पर्वताइति ॥ संवेदनस्यवासनावैचित्र्यानुसारिकल्पनालक्षणेनप्रयोगेणसंकल्पेन ॥ ७२ ॥ अतएवयोगसिद्धानामैच्छिकीविरुद्धकल्पनाक्षणात्सिद्ध्यतीत्याह ॥ संविदिति ॥ संविल्लक्षणंयत्सिद्धौषधचूर्णंतत्प्रयोगेण ॥ ७३ ॥ यथाप्रसिद्धेअंबरेआकाशेअनंतानिसिद्धसंकल्पकल्पितानिनगराणिपरस्परमसंलग्नान्यंतर्हितानिसंतितथाब्रह्मणिसर्गसहस्राणिसंति ॥ ७४ ॥ तत्रदृष्टांतमाह ॥ महार्णवेइति ॥ ७५ ॥ ७६ ॥ अन्योन्यमंतर्हितानामपि सिद्धलोकांतराणामिच्छयालोकनेयोगिनोयास्वोपाधेर्मूलचितिप्रविलापनेनपरचित्तानुप्रवेशद्वारातल्लोकानुप्रवेशलक्षणाप्राप्तिःसैवस्वसर्गात्सर्गांतरालोकनेपीतिविबुधानांविदुषामुक्तयः ॥ तथैवलीलोपाख्यानादौवर्णनादितिभावः ॥ ७७ ॥ एवंचसर्वप्राणिनांतद्भोग्यसर्गाणांचशाश्वतेब्रह्मण्येवविवर्त्तरूपास्थितिःफलितेत्याह ॥ अविनाशिनीति

पर्वतागगनायंतेगगनंपर्वतायते॥ संवेदनप्रयोगेणब्रह्मणःसर्गतास्थितौ ॥ ७२ ॥ संविच्चूर्णप्रयोगेणनिमेषार्द्धेनयोगिनः॥ कुर्वंतिजगदाकाशमाकाशंत्रिजगंतिच ॥ ७३॥ सिद्धसंकल्पनगराण्यसंख्यानियथांबरे॥ तथासर्गसहस्राणिसंतितानितुचिन्नभः॥ ७४ ॥ महार्णवेयथावर्त्ताअन्योन्यमपिमिश्रिताः॥ पृथगेवावतिष्ठंतेपयसोन्येचनैवते॥ ७५॥ महाचितिमहासर्गाअन्योन्यमपिमिश्रिताः॥ पृथगेवावतिष्ठंतेव्यतिरिक्तानतेततः॥ ७६ ॥ सर्गात्सर्गांतरालोकेयाप्रबुद्धस्ययोगिनः॥ सिद्धलोकांतरेप्राप्तिःसैवेतिविबुधोक्तयः॥ ७७॥ अविनाशिनिभूतानिस्थितानिपरमेशिवे॥ व्योम्नीवशून्यतोल्लासाःसर्गवर्गानिरर्गलम्॥ ७८ ॥ परमार्थनिजामोदाःसहजाःसर्गविभ्रमाः॥ नोद्यंतिनोपशाम्यंतिलेखाइवशिलोदरे॥ ७९ ॥ अन्योन्यंकुसुमामोदामिलिताअप्यमीलिताः॥ व्योमरूपास्तथासर्गाअन्योन्यंसिद्धभूमयः॥ ८० ॥ संकल्पाकाशरूपत्वात्सर्वानुभववत्स्थितेः ॥ तनुसंकल्पमोहानांसत्याश्चमननोक्तयः ॥ ८१ ॥ नज्ञानवादितासत्यानबाह्यानर्थवादिता॥ यथावेदनमेतानिवेदनानिफलंतिवः॥ ८२ ॥

॥ ७८ ॥ तथाचपरमार्थचिदाकाशस्यनिजामोदकल्पाःसर्गविभ्रमास्तत्स्वरूपाएवेतिनोत्पत्त्यादिरेषामस्तीत्याह ॥ परमार्थेति ॥ स्फटिकशिलोदरेदृश्यमानालेखारेखाइव ॥ ७९ ॥ सिद्धभूमयइवेतिशेषः ॥ ८० ॥ अतएवप्रपंचस्यस्थूलसंकल्पमोहानांपामराणांदृष्ट्यास्थूलानुभववत्स्थितिः सूक्ष्मसूक्ष्मतरसूक्ष्मतमसंकल्पमोहानांयोगिभेदानांदृष्ट्यासूक्ष्मादिभावेनस्थितिरितिसर्वानुभवाननुसारित्वात्स्वस्वानुभवानुसारिण्यःसर्वेषामुक्तयःसत्याइत्याह ॥ संकल्पेति ॥ तनवःसूक्ष्माःसंकल्पामोहाश्चयेषांयोगिनांतेषांमननपूर्विकाजगत्सौक्ष्म्योक्तयश्चसत्याःनपामरानुभवविरोधेनासत्यामंतव्याइत्यर्थः ॥ ८१ ॥ अतएववादिभेदानांनानाविधकल्पनाअपितत्तद्वासनासंकल्पानुसारेणैवसत्याःनसर्वसंकल्पानुसारेणपरमार्थतोवेतितान्संबोध्याह ॥ नेति ॥ ज्ञानवादिताआंतरविज्ञानमात्रपरमार्थवादिता ॥ बाह्यादृश्यायेअनर्थादुःखहेतवोद्रव्यगुणकर्मादिसप्तपदार्थास्तन्मात्रवादितापिसत्या ॥ यथावेदनंयथासंकल्पंतत्तदर्थक्रियासमर्थतयाफलंति ॥ ८२ ॥

१ मिश्रिताअप्यमिश्रिताइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कस्तर्हिप्रामाणिकःपक्षस्तमाह ॥ चितीति ॥ चित्त्वंत्रिपुटीप्रकाशनशक्तिः ॥ सबाह्याभ्यंतरोह्यजइत्यादिश्रुतेरितिभावः ॥ ८३ ॥ उक्तमनूद्यप्रकृतेयोजयन्नुपसंहरति ॥ कालइति ॥ सर्वाधारःकालस्तदंतर्गतानिजगंतिब्रह्मांडास्तदंतर्गतानिचतुर्दशभुवनानितदंतर्गताअहंत्वमित्यादयोभोक्तारस्तेषांभोगोपकरणभूतोऽक्षवर्गस्तानिशब्दस्पर्शादिभोग्यानितत्रचतथाविचित्रोभोगश्चेत्येतत्सर्वमीश्वरात्ममायिकसार्वज्ञ्यसर्वशक्त्यादिसंपन्नंपरमार्थतःशांतमेकंचिद्व्योमैव ॥ एवंखलुनिश्चितेकेचनरागादयोनसंभवंत्येवेत्ययमेवेच्छादिसर्वदोषजयेमुख्योपायइत्यर्थः ॥ ८४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउ०सप्तत्रिंशत्तमःसर्गः ॥ ३७ ॥ ॥७॥ ॥ इहचिच्चेत्यसंसर्गभेदभ्रमनिरासतः ॥ चिदेवजगदित्येतत्सत्तर्कैरुपपाद्यते ॥१ ॥ चेत्यस्यसर्वजगतश्चिन्मात्रनांतर्कैरुपपादयिष्यन्भूमिकांरचयति ॥ चिदिति ॥ मिथ्यास्ववेदनंस्वस्याअब्रह्मताभ्रमस्ते

चितिचित्त्वंयदस्त्यंतर्जगदित्येवभाविते ॥ भेदोद्रवत्वपयसोरिवनात्रोपपद्यते ॥ ८३ ॥ कालोजगंतिभुवनान्यहमक्षवर्गस्त्वंतानितत्रचतथेतिचसर्वमेकम् ॥ चिद्व्योमशांतमजमव्ययमीश्वरात्मरागादयःखलुनकेचनसंभवंति ॥ ८४ ॥ ॥ इ०वा०म०वा०दे०मो०नि०उ०दृश्योपदेशयोगोनामसप्तत्रिंशत्तमःसर्गः ॥ ३७ ॥ ॥ ३७ ॥ ॥श्रीवसिष्ठउवाच ॥ ॥ चित्पश्यतिजगन्मिथ्यास्ववेदनविबोधिता ॥ व्योम्निमायांजनासिक्तादृगिवाचलतांतरम् ॥ १ ॥ ब्रह्मसर्गश्चित्तसर्गौद्वावेतौसदृशौमतौ ॥ परमार्थस्वरूपत्वादक्षुब्धत्वात्सदैवच ॥ २ ॥ ज्ञानरूपतयाबाह्यंबाह्यंचानुभवात्तथा ॥ सत्यरूपमतःसत्यांविद्धिबाह्यार्थरूपताम् ॥ ३ ॥ बाह्यार्थवादविज्ञानवादयोरैक्यमेवनः ॥ वेदनात्मैकरूपत्वात्सर्वदासदसंस्थितेः ॥ ४ ॥ अक्षुब्धखानिलालोकजलभूशांतिशालिनी ॥ लताशून्यामहारंभाब्रह्मसत्तैवसर्वतः ॥ ५ ॥ तस्मैसर्वंततःसर्वंतत्सर्वंसर्वतश्चतत् ॥ तद्ब्रह्मसर्वमयंनित्यंतस्मैसर्वात्मनेनमः ॥ ६ ॥

नविबोधिताविक्षिप्ता ॥ यथामायादर्शनहेतुनांजनविशेषेणासिक्तादृक्चक्षुर्व्योम्निअचलतांपर्वतभावंतदांतरंनितंबप्रस्थशिखरदरीवनकुंजादिचपश्यतितद्वदित्यर्थः ॥ १ ॥ भ्रांतिकल्पितस्त्वयंसर्गश्चित्रसर्गवन्मनःकल्पनयैवक्षुब्धवद्भातिनवस्तुतइत्याह ॥ ब्रह्मेति ॥ २ ॥ अस्त्वेवंकिंततस्तत्राह ॥ ज्ञानेति ॥ यथाभित्तिस्थश्चित्रसर्गौवास्तवभित्तिरूपेणभित्तेरबाह्योभ्रांतानुभवात्मनातुतद्बाह्यस्तद्वज्ज्ञानेकल्पितःसर्गोपिवास्तवज्ञानरूपतयाअबाह्योभ्रांतानुभवात्मनातुबाह्यइतिसिद्धेज्ञानंसत्यरूपमित्यतोहेतोर्बाह्यार्थरूपतामपितदात्मनासत्यांविद्धीत्यर्थः ॥ ३ ॥ एवंचास्मन्मतंनबाह्यार्थवादेननापिविज्ञानवादेनविरुद्ध्यते ॥ अत्रोभयोरैकरस्यात् ॥ सर्वदाचिदतिरिक्तस्यांतरविज्ञातस्यबाह्यप्रपंचस्यचासतःअसंस्थितेःअनभ्युपगमादित्यर्थः ॥ ४ ॥ सर्वस्यचिदैक्येचितःसदैवाक्षुब्धत्वान्निर्विशेषत्वाच्चक्षुब्धानांखादिपंचभूतानांशांतिरर्थसिद्धेतिपूर्णब्रह्मसत्तामात्रपरिशेषःसिद्धइत्याह ॥ अक्षुब्धेति ॥ ५ ॥ तदेवंसर्वकारकक्रियाफलात्मकंजगद्ब्रह्मीभूतंनमस्यति ॥ तस्मैइति ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

घटादिचेत्यंब्रह्मचिन्मयत्वादेवद्रष्टृचिताचाक्षुषवृत्त्यवच्छिन्नप्रमातृचैतन्येनय
व्यवहारकालेपिचेत्यस्यचिदैक्यापत्तिबलादेवसत्तास्फूर्तीनान्यथेत्याह ॥ चिन्मयत्वादिति ॥ घटादिचेत्यंब्रह्मचिन्मयत्वादेवद्रष्टृचिताचाक्षुषवृत्त्यवच्छिन्नप्रमातृचैतन्येनय
दावृत्तिव्याप्तिद्वाराएकतामेतितदादृश्यमंगशरीरंयस्यास्तथाविधयैवतयाचिताएतद्घटादिचेत्यतेनान्यथेत्यर्थः ॥ ७ ॥ एवंद्रष्टातद्दर्शनसाधनंदृश्यंदृकूनरफलंचेत्येतत्सर्वंचिदैक्या
धीनसिद्धिकत्वाद्यदाचिन्मात्रमेवतदासर्वस्यजगतोऽनुभवनमात्रमेवस्वरूपंपरमार्थतःस्थितंफलितमित्यर्थः ॥ ८ ॥ द्रष्टृदृश्ययोरैक्यसाधनानुग्राहकंतर्कमाह ॥ द्रष्टृदृश्येइति ॥
द्रष्टृदृश्येचिदात्मकेसाक्षिणियद्येकंनाभविष्यत्तर्हिइक्षुभक्षणेप्रवृत्तोनापुरुषइक्षुंदृष्ट्वाचोषयन्नपिउपलइवदृश्यस्यास्वादंतन्माधुर्यमज्ञोऽननुभवन्स्यात् नहिजडोरसमनुभ
वितुंशक्नोतिनवाजडोरसस्तंप्रतिस्फुरिष्यतियेनानुभवेदित्यर्थः ॥ ९ ॥ तयोश्चिन्मयत्वाभ्युपगमेत्वनुभवितृचितौचेत्यमनुभवनीयमप्सुपतितोजलबिंदुरिवतदनुप्रवेशेनमज्जतितेनहे
तुनाइक्षुमाधुर्यमास्वादयामीतित्रिपुट्याःस्फुरणानुप्रवेशेनानुभूतिर्भवतिसिद्ध्यतीत्यर्थः ॥ १० ॥ व्यतिरेकेकाष्ठयोरिवेत्युक्तदृष्टांतसाम्यंदार्ष्टांतिकेउपपादयति ॥ सजातीयेति ॥

चिन्मयत्वाद्यदाचेत्यमेतिद्रष्टृचितैकताम् ॥ तदादृश्यांगयैवैतच्चेत्यतेनान्यथाचिता ॥ ७ ॥ यदाचिन्मात्रमेवेयंद्रष्टृदर्शनदृश्यदृक् ॥ तदानु भवनंतत्रसर्वस्यफलितंस्थितम् ॥ ८ ॥ द्रष्टृदृश्येनयद्येकमभविष्यच्चिदात्मके ॥ तद्दृश्यास्वादमज्ञःस्यान्नादृष्ट्वेक्षुमिवोपलः ॥ ९ ॥ चिन्मय त्वाच्चितौचेत्यंजलमप्स्विवमज्जति ॥ तेनानुभूतिर्भवतिनान्यथाकाष्ठयोरिव ॥ १० ॥ सजातीयैकताभावाद्यद्वत्काष्ठंनचेतते ॥ दारुतद्वद पिद्रष्टादृश्यंनाज्ञास्यदाजडम् ॥ ११ ॥ यादृक्सत्तानिकाष्ठानितादृग्रूपंत्वचेतनम् ॥ जानंतिनेतरत्तस्माद्दृश्यंचिद्दृश्यचेतनम् ॥ १२ ॥ म हाचिदात्मनैवास्तिजलानिलधराश्मतम् ॥ नैतेषुस्पंदबुद्ध्यादिप्राणजीवाद्यभावतः ॥ १३ ॥ प्राणबुद्ध्यादयःसत्तांभावनावशतोगताः ॥ भावनाचिच्चमत्कारःसयथेच्छमुदेतिच ॥ १४ ॥ जगत्तयाशांततयाब्रह्मसत्तावतिष्ठते ॥ पुंस्तयागतएवात्मारेतोवटकबीजयोः ॥ १५ ॥

नचद्रष्टृदृश्ययोर्जडत्वेका
काष्ठंकर्तृदारुद्वितीयंकाष्ठंकर्मयथाकाष्ठत्वेनसजातीयत्वेपिचिदैक्याभावाद्यद्वन्नचेततेतथाद्रष्टापिआजडंसर्वथाचिदैक्यशून्यंदृश्यंनाज्ञास्यत् ॥ ११ ॥ नचद्रष्टृदृश्ययोर्जडत्वेका
ष्ठद्वयाद्विशेषंकेचिज्जानंतीत्याह ॥ यादृगिति ॥ यादृशीसत्तास्थितिर्येषांतानि ॥ इतरद्वैलक्षण्यंतुनजानंतिकेचिदपीत्यर्थः ॥ तस्मादुक्ततर्कबलादृश्यंसर्वंचिद्रूपेणैवद्रष्टादृश्यंचे
तनंचिदभिन्नंचेतिसिद्धमित्यर्थः ॥ कर्मधारयः ॥ १२ ॥ एवंद्रष्टृदृश्ययोश्चिद्रूपत्वेदृश्येजगतिधरानिलजलादिभेदापगमाद्दृष्टेरिचस्पंदबुद्धिप्राणादिभेदापगमात्सर्वस्यजगतोब्र
ह्मैक्यमेवसिद्धमित्याह ॥ महाचिदात्मनेति ॥ अश्मतांतसमाहारद्वंद्वेनपुंसकत्वं ॥ १३ ॥ भावनाकल्पितत्वादपिप्राणादिभेदानांमिथ्यात्वमित्याह ॥ प्राणेति ॥ १४ ॥ ब्र
ह्मसत्ताविवर्त्तमात्रत्वादपिजगद्भेदानांमिथ्यात्वमित्याह ॥ जगत्तयेति ॥ शांततयासुषुप्तिप्रलयात्मना ॥ एवेत्यत्रआइवेतिच्छेदः ॥ पुंस्तयाप्रसवशक्ततयाआगतःआक्रांतः ॥ व
टएववटकः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवटबीजेपुंस्त्वाकांतंसूक्ष्ममविकृतंब्रह्मसत्ताकंभागंतत्रवटादिविवर्त्तंचदर्शयति ॥ सर्वाग्रेति ॥ अग्रशब्दःसारपरः ॥ योयोग्रगतोणुकोऽतिसूक्ष्मःससःपरमात्मा ॥ सएवांकुर कांडशाखादीतत्तदुत्तरोत्तरकार्येपुरोभूयाग्रंबीजंचभवतीत्यर्थः ॥ १६ ॥ तत्रयोयोयस्मात्सूक्ष्मःकारणतयाप्रसिद्धःससब्रह्मकोटीयश्चस्थूलःकार्यात्मनाप्रसिद्धःसमायाकोटौमिथ्येत्युपलक्षयेदित्याशयेनाह ॥ ब्रह्मेति ॥ एवमुपलक्षितेसर्वत्रवस्तुब्रह्मतिष्ठतिनान्यदित्यर्थः ॥ १७ ॥ यथाघटाद्येकैकद्रव्यमामूलाग्रंतदेवद्रव्यंनाणुमात्रमपितदन्यदस्ति तथासर्वंजगदामूलाग्रंयेनयेनपुरुषेणयथायथापरीक्ष्यदृष्टंसन्मात्ररूपंब्रह्मैवनाणुमात्रमपितदन्यदस्तीत्यर्थः ॥ १८ ॥ अविकारित्वेपिदृष्टांतमाह ॥ हेमत्वमिति ॥ सर्गोजगद्भावः अहंत्वंजीवभावस्तद्गणे ॥ १९ ॥ तस्यविवर्त्तैरलेपमाह ॥ पार्श्वस्थेति ॥ २० ॥ व्योम्नोयापंकतामलिनताकल्पितायाचगंधर्वपुत्रकाणांपताकिनीसेनासायथाखमेव ॥

सर्वाग्राणुमयेबीजेयोस्मादग्रगतोणुकः ॥ ससतत्तद्भवत्यग्रंबीजंस्वात्मनिसंस्थितः ॥ १६ ॥ ब्रह्मसर्वपराण्वात्मायोयस्मादग्रतोणुकः ॥ ससतत्तद्भवेद्वस्तुवस्तुब्रह्मैवतिष्ठति ॥ १७ ॥ द्रव्यमेवयथाद्रव्यंतिर्यगूर्ध्वमधस्तथा ॥ सर्वमेवतथाब्रह्मयेनतेनयथातथा ॥ १८ ॥ हेमत्वमेवनान्यत्वंहेमरूपशतेयथा ॥ शांतत्वमेवशांतस्यसर्गाहंत्वगणेतथा ॥ १९ ॥ पार्श्वस्थस्वप्नमेघौघायथातवनकाश्चन ॥ सर्गप्रलयसंरंभास्तथाखात्मानएवमे ॥ २० ॥ पंकताकल्पिताव्योम्नोयापुत्रकपताकिनी ॥ सायथाशांततामात्रंखमेवेदंतथाजगत् ॥ २१ ॥ संकल्पभ्रमएवांतःपुष्पीभूयजगत्स्थितम् ॥ जलावनितलक्लिन्नबीजंकल्पइवद्रुमः ॥ २२ ॥ अनहंतात्मनोज्ञस्यसतएकत्वमासतः ॥ जरत्तृणलवायंतेननुनामाणिमादयः ॥ २३ ॥ त्रैलोक्येतन्नपश्यामिसदेवासुरमानुषम् ॥ एकरोमांशविश्वस्ययच्छोभायमहात्मनः ॥ २४ ॥ यथातथास्थितस्यापियत्रतत्रगतस्यच ॥ द्वैतसंकल्पसंदोहानसंत्यधिगतात्मनः ॥ २५ ॥ विश्वमेवनभोयस्यशून्यंसर्वंमहात्मनः ॥ कुतःकस्यकथंतस्यभवविच्छानिरात्मनः ॥ २६ ॥ शांताशेषविशेषस्यनिरेषणविशेषतः ॥ सत्तामसत्तांसदृशौकआकलयितुंक्षमः ॥ २७ ॥ मारैर्नकिंचिन्म्रियतेजीवैःकिंचिन्नजीवति ॥ शुद्धसंविन्मयस्यास्यसमालोकस्यखस्यच ॥ २८ ॥

॥ २१ ॥ हृदयांतःपुष्पीभूयबहिर्जगत्फलंस्थितम् ॥ यथाजलेनावनितलेक्लिन्नमार्द्रीभूतंवटादिबीजंकल्पतेछायाश्रयादिनाप्राण्युपकारसमर्थोभवतीतिकल्पोमहान्वटादिद्रुमःसंपद्यतेतद्वत् ॥ २२ ॥ ननुयदिपरमसूक्ष्मंब्रह्मतद्भावस्थितिरेवमोक्षस्तर्ह्यणिमादिसिद्धिभिरसौतुल्यइत्याशंकांवारयति ॥ अनहंतात्मनइति ॥ अहंतादिप्रतिबंधनिरासेनाविर्भूतनिरतिशयानंदस्यज्ञस्यदृष्टयेत्यर्थः ॥ २३ ॥ एकोरोमांशइवविश्वंयस्यतथाविधस्यमहात्मनः ॥ २४ ॥ २५ ॥ निरात्मनोनिःस्वरूपाद्भोगादिनिमित्तात् ॥ २६ ॥ सत्तांविभवंअसत्तांदारिद्र्यंचसदृशौसमेपश्यतःकआकलयितुंक्षमोमहिमानमितिशेषः ॥ २७ ॥ बंधुपुत्रादिमरणजीवनादिनापिनास्यहर्षविषादप्रसक्तिरित्याशयेनाह ॥ मारैरिति ॥ मारैर्मरणहेतुभिर्जीवैर्जीवनहेतुभिः ॥ २८ ॥

१ बीजंचस्वात्मनिस्थितइत्यपिक्वचित्पाठः   २ अलेपइतिपाठइतिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकस्याज्ञजनस्यभ्रांत्यामृगतृष्णानदीतटप्रायेभ्रांतिभाज्यालनिमिथ्यैवमरणजन्मनीकचतः ॥ २९ ॥ यावदस्माभिःसम्यक्परीक्षितंतावन्नभ्रांतिर्नवापरीक्षकानवाजन्मम रणेसंतीत्यर्थः ॥ ३० ॥ नपरीक्षकाइतिकथमुच्यतेतत्त्वविदःपरीक्षकस्याबाधात्तत्राह ॥ दृश्यादिति ॥ ब्रह्मभावेनसन्नपिदेहेंद्रियादिसहितपरीक्षकात्मनाअसदाभासइत्यर्थः ॥ ३१ ॥ ब्रह्मात्मनासंतमेवदीपनिर्वाणमिवनिर्वाणंविदुः ॥ ३२ ॥ अतएवतस्यनसंसारःस्वदतेइत्याह ॥ आबुद्ध्यादीति ॥ ३३ ॥ तत्त्वज्ञश्चेद्दीपवन्निर्वाणस्तर्हित्वंवसिष्ठःकथमसितत्राह ॥ अहमिति ॥ ३४ ॥ अभावःकुतस्तत्राह ॥ संविदिति ॥ वास्तवंचिदंबरमेवस्वसंविदोऽन्यथासंवेदनादेवबुद्ध्याद्याकारवत्स्थितंसत् ॥ ३५ ॥ ममेवयथार्थसंवेदनेनभ्रांतिनाशेसर्वार्थरिक्तमनसस्तवापिनिर्वाणरूपैवस्थितिःसेत्स्यतीत्याह ॥ सर्वार्थेति ॥ ३६ ॥ सर्वमाचरणंप्रपंचयति ॥ यदिति ॥ ३७ ॥ आचरणग्रहणंजगन्मात्रोपलक्षण

मिथ्यालोकस्यकचतोभ्रांत्यामरणजन्मनी॥असत्यपिभ्रांतिभाजिमृगतृष्णानदीतटे॥२९॥सम्यक्परीक्षितंयावन्नभ्रांतिर्नपरीक्षकाः ॥ननामजन्ममरणेकेवलंशांतमव्ययम् ॥ ३० ॥दृश्याद्योविरतिंयातआत्मारामःशमंगतः॥ससन्नेवासदाभासःपरितीर्णभवार्णवः ॥ ३१ ॥दीपनिर्वाणनिर्वाणमस्तंगतमनोगतिम् ॥ आत्मन्येवशमंयातंसंतमेवामलंविदुः॥ ३२ ॥ आबुद्ध्यादिजगद्दृश्यंयस्मैनस्वदते स्वतः॥ आकाशस्येवशांतस्यतमाहुर्मुक्तमुत्तमाः॥३३॥ अहमस्यविचारेणविचारेणाहमस्तिनो॥ अभावादहमर्थस्यक्वजगत्क्वचसंसृतिः॥ ३४ ॥संवित्संवेदनादेवबुद्ध्याद्याकारवत्स्थितम् ॥रूपालोकमनोरूपंजगद्वेत्तिचिदंबरम् ॥ ३५ ॥ सर्वार्थरिक्तमनसःसतःसर्वात्मनस्तव ॥सर्वथासर्वदासर्वंसर्वमाचरणंशिवम्॥ ३६ ॥ यत्करोषियदश्नासियज्जुहोषिददासियत् ॥ यत्तपस्यसिहंस्येषितत्सर्वंशिवमव्ययम्॥ ३७॥ यदहंयत्त्वमाशायद्यत्क्रियाकालखादयः॥ यल्लोकालोकगिरयस्तच्चिद्व्योमशिवंततम् ॥ ३८ ॥ यद्रूपालोकमननंयत्कालत्रितयंजगत् ॥ यज्जरामरणार्त्यादितन्महाचिन्नभःशिवम् ॥ ३९ ॥ निश्चिकित्सोनिराभासोनिरिच्छोनिर्ममनामुनिः॥ भूत्वानिरात्मानिर्वाणस्तिष्ठसंतिष्ठसेयथा॥ ४० ॥ गतेच्छमननंशांतमनंतस्थमभावनम् ॥ व्यवहारोस्तुतेमावास्पंदास्पंदैर्यथानिलः॥ ४१ ॥ निर्वासनानिष्कलनाशांतापुरुषतास्तुते॥ शास्त्रेणयंत्रवाहेनवाद्यादारुमयीयथा ॥ ४२ ॥ भूतालोकस्तुमास्नेहोमावास्नेहश्चवाद्यगः ॥ अनिर्देशधरालोकश्चित्रदीपवदास्यताम्॥ ४३॥

मित्याशयेनाह ॥ यदिति ॥ आशाइच्छादिशश्च ॥ ३८ ॥ ३९ ॥ निश्चिकित्सोदुःखप्रशमोपायान्वेषणशून्योनिर्विचिकित्सोवा ॥ निर्विकल्पइतिपाठःस्पष्टः ॥ यथानिर्वाणःसंतिष्ठसेतथातिष्ठ ॥ ४० ॥ यथाआनिलःअनिलसंबंधीस्पंदास्पंदैर्व्यवहारस्तथातेतवाप्यस्तु ॥ ४१ ॥ पुरुषतापुरुषोचितचेष्टातेशास्त्रलक्षणेनयंत्रवाहेनवाद्यानिर्वाद्यास्तु ॥४२॥ हेरामतवबाह्यगोमातृपितृबंधुजनादिभूतानामालोकनमालोकआस्नेहःस्नेहबहुलोमाभूत्अस्नेहोवामाभूत्किंतुअनिर्देशधरःअस्तिनास्तीतिपरीक्षकैर्निर्देष्टुमशक्यआलोकःप्रकाशोयस्यतथाविधोऽस्तु ॥ एवंचत्वयाचित्रदीपवदास्यतांस्थीयताम् ॥ तस्यापिहिचित्रलिखिततैलपूर्णत्वात्परमार्थतस्तैलाभावाच्चभूतानांप्राणिनामालोकनमालोकआस्नेहःस्नेहबहुलःअस्नेहस्तच्छून्यश्चनभवति ॥ आलोकःप्रकाशश्चचित्रलिखितःअस्तिनास्तीतिनिर्देशार्होनभवतीतिसाम्यादित्यर्थः ॥ ४३ ॥

---

१ निर्ममइत्यपिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्वासनानिष्फलनेतिश्लोकार्थमेवपुनरनुवादेनदृढीकुर्वन्नुपसंहरति ॥ निर्वासनस्येति ॥ वर्त्तमानभोगेषुविरसस्य ॥ भाविषुनिरेषणस्य ॥ शास्त्रात्सच्छास्त्रात् ॥ तत्त्वेस्वसुखे विनोदोविश्रांतिस्तद्धेतुः ॥ आदेहधारणमवश्यभावित्वादवर्जनीयेव्यवहारेसच्छास्त्रानुसरणेएवचित्तदोषनिर्हरणेनविवेकायुद्बोधनेनचतत्त्वज्ञानप्रतिष्ठासिद्धेरितिभावः ॥ अतः अनभिसंधिमतःअतएवामलस्यापितस्यतत्त्वविदःसंवेदनपूर्वकव्यवहारेषुशास्त्रार्थेस्वस्ववर्णाश्रमोचिताचारेशमदमादौचसज्जनंसम्यगनुवर्त्तनमेवस्वरूपमसाधारणंलक्षणंनय थेष्टाचरणमित्यर्थः ॥ तथाचाहुर्वृद्धाः ॥ विदितब्रह्मतत्त्वस्ययथेष्टाचरणंयदि ॥ शुनांतत्त्वदृशांचैवकोभेदोशुचिभक्षणेइति ॥ ४४ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशे निर्वाणप्रकरणेउ० अष्टत्रिंशत्तमःसर्गः ॥ ३८ ॥ ॥ ७ ॥ ॥ प्रबुद्धात्मनिविश्रांतोयद्रूपःपरिशिष्यते ॥ जगच्चतस्ययद्रूपंतत्सम्यगिहवर्ण्यते ॥ १ ॥ विदुषःशास्त्रानुसारनिय मेतन्नियामकसंकल्पस्यापिप्रसक्तिमाशंक्याह ॥ संजातेति ॥ संजातोयथाभूतार्थगोचरत्वादकृत्रिमःक्षीणासंस्तृतिर्यस्मात्तथाविधःप्रत्ययःसाक्षात्कारोयस्यतथाविधःपुमा न्शास्त्रीयव्यवहारनियमेप्यसंकल्पएवावतिष्ठते ॥ यतोयंतत्तद्व्यवहाराभासहेतुसंकल्पाभासंस्वात्मैवेतिपश्यन्संकल्पंनवेत्ति ॥ नचवेदनमंतरेणकस्यचित्सत्ताप्रसिद्धेतिससंक

निर्वासनस्यविरसस्यनिरेषणस्यशास्त्रादृतेकइवतत्त्वविनोदहेतुः॥ शास्त्रार्थसज्जनमतोप्यमलस्यतस्यसंवेदनेष्वनभिसंधिमतःस्वरूप म्॥ ४४॥ ॥इ० वा० महारामायणेवा०दे०मो० निर्वाण० उ० निर्वाणवर्णनंनामाष्टत्रिंशत्तमःसर्गः॥ ३८॥ ॥ ७॥ ॥श्रीवसिष्ठउ वाच॥ संजाताकृत्रिमक्षीणसंस्तृतिप्रत्ययःपुमान्॥ असंकल्पोनसंकल्पंवेत्तितेनासदेवसः॥ १॥ श्वासान्म्लानिरिवादर्शेकुतोप्यहमि तिस्थिता॥ विदिसाऽकारणंदृष्टानश्यंत्याशुनलभ्यते॥ २॥ यस्यक्षीणावरणताशांतसर्वेहतोदिता॥ परमामृतपूर्णात्मासत्तयैवसराज ते॥ ३॥ सर्वसंदेहदुर्ध्वांतमिहिकामातरिश्वना॥ भातिभास्वद्धियादेशस्तेनपूर्णेंदुनेवखम्॥ ४॥ विसंस्तृतिर्विसंदेहोलब्धज्योतिर्निराव तिः॥ शरदाकाशविशदोज्ञेयोविज्ञायतेबुधः॥ ५॥ निःसंकल्पोनिराधारःशांतःस्पर्शात्पवित्रताम्॥ अंतःशीतलआधत्तेब्रह्मलोकादि वानिलः॥ ६॥ असद्रूपोपलंभानामियंवस्तुस्वभावता॥ यत्स्वर्गवेदनंस्वप्नवंध्यापुत्रोपलंभवत्॥ ७॥

ल्पाभासोऽसदलीकमेवेत्यर्थः ॥ १ ॥ नसंकल्पंवेत्तीत्युक्तेर्विवरणायसर्वसंकल्पबीजस्याहंताध्यासस्यबाधादपितस्यनसंकल्पप्रसक्तिरित्याशयेनाह ॥ श्वासादिति ॥ भाग्वो धात्कुतोप्यनिर्वचनीयान्निमित्तान्निःश्वासोत्थाआदर्शेम्लानिरिवअहमित्यहंतास्थिता सातत्त्वविदिअकारणमाशुनश्यंतीदृष्टायत्नेनान्विष्टापिनलभ्यते ॥ २ ॥ कामनयाहि संकल्पप्रसक्तिःसाचपूर्णकामस्यनास्तीत्याशयेनाह ॥ यस्येति ॥ सत्तयानिरतिशयानंदस्वरूपसत्तयैव ॥ ३॥ एकलाभादेवसर्वलाभाल्लब्धव्यविषयइवएकविज्ञानेनैवसर्ववि ज्ञानाज्ज्ञातव्यविषयेपिभ्रमसंशयाद्यभावात्तदर्थमपितस्यनसंकल्पप्रसक्तिरित्याशयेनाह ॥ सर्वेति ॥ भास्वतीनिरावरणात्मकप्रकाशाधीर्यस्यतेनातएवसर्वेषांदेहलक्षणानांदु र्ध्वांतनिमित्तमिहिकानांमातरिश्वना ॥ तद्देशस्थसर्वजनभ्रमसंशयनिराससमर्थस्यतत्प्रसक्त्यभावादितिभावः ॥ ४ ॥ यतोबुधस्तत्त्ववित्शिवमद्वैतंचतुर्थमन्यंतेसआत्मासविज्ञे यइत्यादिश्रुतिषुज्ञेयआत्मैवेतिविज्ञायतइत्यर्थः ॥ ५ ॥ स्पर्शात्प्रणतिशुश्रूषादिनासंगमात् ॥ जनानांपवित्रतांनिष्पापताम् ॥ ब्रह्मलोकादागतःअनिलइव ॥ ६ ॥ नसंकल्पं वेत्तीत्येतद्विशदीकुर्त्यतेनासदेवसइतितच्छेषंविशदीकर्त्तुमसद्रूपोपलंभस्यस्वरूपंप्रपंचयति ॥ असद्रूपेतिचतुर्भिः ॥ ७ ॥ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ स्वप्नवंध्यापुत्रोपलंभवदित्युक्तदृष्टांतसाम्यंदर्शयति ॥ असत्येष्विति ॥ कुतोभवेत्किंसत्यादुतासत्यात् ॥ नतावत्सत्यात् तस्यकूटस्थत्वात् ॥ नद्वितीयः ॥ असत्यादसत्यस्योत्पत्तेरप्यसत्त्वापत्तेः ॥ एवंकआस्तांसत्यस्यासंगाद्वयत्वादसत्यस्याधारत्वायोगादितिभावः ॥ अतःअसत्येष्वेवसंसारेषुसर्गस्यबंधस्यतदपवर्गस्यचशब्दावेवयत्रवंध्यासुतोपमौतत्रदूरेतदर्थसिद्धिरित्यर्थः ॥ ९ ॥ यदातुजगत्सत्यमितिपक्षस्तदापिसब्रह्माभेदेनैवनिर्वाह्यइत्युत्पत्तिस्थितितन्निरूपकादिविभागोनिरालंबनएवेत्याह ॥ जगदिति ॥ अभावितंभावनयाअविषयीकृतम् आधारविशेषेअनिष्ठितंच ॥ अन्यथाब्रह्मतानभ्युपगमेतु ॥ १० ॥ असद्रूपोपलंभस्वभावमुपवर्ण्यसद्रूपोपलंभस्वरूपविश्रांतेर्वस्तुस्वभावंप्रपंचयति ॥ आत्मेत्यादिना ॥ अनुपलंभतानिर्विषयचिन्मात्रतेतियावत् ॥ ११ ॥ चितोनिर्विषयतायाअप्रसिद्धिमाशंकमानंप्रतिदेशाद्देशांतरप्राप्ताविति श्लोकेदर्शितांतत्प्रसि

अविद्यमानमेवेदंजगद्यदनुभूयते ॥ असद्रूपोपलंभस्यसैषावस्तुस्वभावता ॥ ८ ॥ असत्येष्वेवसंसारेष्वास्तामर्थःकुतोभवेत् ॥ सर्गापवर्गयोःशब्दावेववंध्यासुतोपमौ ॥ ९ ॥ जगद्ब्रह्मतयासत्यमनिर्मितमभावितम् ॥ अनिष्ठितंचान्यथातुनाहंनावगतंचतत् ॥ १० ॥ आत्मस्वभावविश्रांतेरियंवस्तुस्वभावता ॥ यदहंतादिसर्गादिदुःखाद्यनुपलंभता ॥ ११ ॥ क्षणाद्योजनलक्षांतंप्राप्तेदेशांतरेचितः ॥ चेतनेयस्यतद्रूपंमार्गमध्येनिरंजनम् ॥ १२ ॥ अस्पंदवातसदृशंखकोशाभासचिन्मयम् ॥ अचेत्यंशांतमुदितंलताविकसनोपमम् ॥ १३ ॥ सर्वस्यजंतुजातस्यतत्स्वभावंविदुर्बुधाः ॥ सर्गोपलंभोगलतितत्रस्थस्यविवेकिनः ॥ १४ ॥ सुषुप्तेस्वप्नधीर्नास्तिस्वप्नेनास्तिसुषुप्तधीः ॥ सर्गनिर्वाणयोर्भ्रांतीसुषुप्तस्वप्नयोरिव ॥ १५ ॥ भ्रांतिवस्तुस्वभावोसौनस्वप्नोनसुषुप्तता ॥ नसर्गोनचनिर्वाणंसत्यंशांतमशेषतः ॥ १६ ॥ भ्रांतिस्त्वसन्मात्रमयीप्रेक्षिताचेन्नलभ्यते ॥ शुक्तिरूप्यमिवासत्यंकिलसंप्राप्यतेकथम् ॥ १७ ॥ यन्नलब्धंचतन्नास्तितेनभ्रांतेरसंभवः ॥ स्वभावादुपलंभोन्योनास्तिकस्यनकस्यचित् ॥ १८ ॥ स्वभावएवसर्वस्मैस्वदतेकिलसर्वदा ॥ अनानैवहिनानेवकिंवादैस्संविभाव्यताम् ॥ १९ ॥ अस्वभावेमहद्दुःखंस्वभावेकेवलंशमः ॥ इतिबुद्ध्याविचार्यांतर्यदिष्टंतद्विधीयताम् ॥ २० ॥

द्धिस्मारयति ॥ क्षणादिति ॥ शाखादिदेशाच्चंद्रादिदेशांतरेयोजनलक्षांतंचक्षुर्द्वाराप्राप्तेचेतनेचाक्षुषवृत्त्यवच्छिन्नचैतन्येमार्गमध्येअयतेव्याप्नोतीत्ययस्यचैतन्यस्ययदचेत्यंखकोशाभासचिन्मयंरूपंसर्वस्यजंतुजातस्यप्रसिद्धंतत्स्वभावंविदुरितिव्यवहितेनसंबंधः ॥ १२ ॥ १३ ॥ १४ ॥ सुषुप्तिस्वप्नयोःपरस्परविषयशून्यतेववातुरीयेनिर्विषयताचितस्संभावनीयेत्याह ॥ सुषुप्तइति ॥ १५ ॥ स्वप्नसुषुप्त्यादिविभागोपिभ्रांतौवस्तुस्वभावभूतःपरमार्थोनास्तीत्याह ॥ भ्रांतीति ॥ १६ ॥ कुतोनास्तितत्राह ॥ भ्रांतिरिति ॥ १७ ॥ भ्रांतिविषयोर्थोभ्रांत्यानलब्धोप्युपलंभांतरेणलभ्यतांतत्राह ॥ स्वभावादिति ॥ भ्रांतेरन्यउपलंभःप्रमात्मकोवाच्यःसचकस्यचिद्भ्रांतिगोचरार्थस्यसाक्षिस्वभावादन्योनास्तीत्यर्थः ॥ १८ ॥ एवंचसम्यग्विभावनेसाक्षिस्वभावएकएवस्वात्मनित्रिपुटीकल्पनयाप्रथतेनान्यदस्मादणुमात्रमपीत्याह ॥ स्वभावइति ॥ स्वदतेपरमप्रेमास्पदतयाप्रथते ॥ १९ ॥ तस्यस्वभावातिरिक्तकल्पनमेवसंसारदुःखमकल्पितस्वरूपावस्थितिरेवकैवल्यसुखमित्याह ॥ अस्वभावेइति ॥ विधीयतांउपादीयताम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुपादानेकउपायइतिचेत्तदध्यस्तस्यविश्वस्यतन्मात्रतादर्शनमेवेत्याशयेनोत्पत्तिप्राक्कालादारभ्यतदपृथक्सत्तांदर्शयति ॥ सूक्ष्मेइति ॥ अगोवृक्षः ॥ उत्तमानांतत्त्वविदांवेदानांचसंकथासदुक्तिरित्यर्थः ॥ २१ ॥ एवंप्रत्यगात्मन्याध्यात्मिकभावानामप्यपृथक्सत्तैवस्वधर्मताप्रतीतेःसर्वानुभवसिद्धेत्याह ॥ रूपेति ॥ २२ ॥ एवंतत्पदार्थव्यवहारःसर्गादिस्त्वंपदार्थव्यवहारश्च चिदात्मापृथक्सत्ताकत्वात्तदवयवप्रायैःसर्वपदार्थैःप्रवृत्तइत्याह ॥ मूर्त्तइति ॥ स्वसदृशैःस्वात्मप्रायैःस्वापृथक्सत्ताकैरितियावत् ॥ २३ ॥ अर्थव्यवहारइवशब्दप्रयोगादिव्यवहारोप्यपृथक्सत्तयाचिदधिष्ठितादेवदेहवागादेर्जायतेइत्याह ॥ आत्मस्थादिति ॥ असंस्थतेर्जडत्वेनस्वतोव्यवहारासमर्थादस्मदादेर्वसिष्ठरामादिदेहाद्योऽहमित्यादिरर्थप्रकाशनाभिप्राययुक्तःशब्दोजिह्वादिकरणव्यापारेणजायतेसआत्मस्थाच्चिदात्माधिष्ठितादेवजायते ॥ नटीपदक्रमतालाभिज्ञवादकपुरुषाधिष्ठितेषुपटहादिषुयथातदभिप्रायानुसारिविचित्रशब्दोजायतेतथेतिशेषः ॥ २४ ॥ एवंसर्वजगद्व्यवहारस्यचिदभेदनिर्वाह्यत्वेआत्यंतिकएवाभेदोस्तुकिमर्धजरतीयेनाविचारमात्रसिद्धजा

सूक्ष्मेवीजेस्यगःस्थूलोदृष्टमित्युपपद्यते ॥ शिवेमूर्त्तेजगन्मूर्त्तमस्तीत्युत्तमसंकथा ॥ २१ ॥ रूपालोकमनस्कारबुद्ध्यहंतादयःपरे ॥ स्वरूपभूताःसलिलेद्रवत्वमिवखात्मकाः ॥ २२ ॥ मूर्त्तोयथास्वसदृशैःकरोत्यवयवैःक्रियाः ॥ आत्मभूतैस्तथाभूतैश्चिदाकाशमकर्तृसत् ॥ २३ ॥ आत्मस्थादहमित्यादिरस्मदादेरसंस्थतेः ॥ शब्दोर्थभावमुक्तोयःपटहादिषुजायते ॥ २४ ॥ यद्भातंप्रेक्षयानास्तितन्नास्त्येवनिरंतरम् ॥ जगद्रूपमरूपात्मब्रह्मब्रह्मणिसंस्थितम् ॥ २५ ॥ येषामस्तिजगत्स्वप्नस्तेस्वप्नपुरुषामिथः ॥ नसंतिस्त्यात्मनिमिथोनास्मास्वंबरपुष्पवत् ॥ २६ ॥ मयिब्रह्मैकरूपंतेशांतमाकाशकोशवत् ॥ वायोःस्पंदैरिवाभिन्नैर्व्यवहारैश्चतन्मयि ॥ २७ ॥ अहंतुसन्मयस्तेषांस्वप्नःस्वप्नवतामिव ॥ तेतुनूनमसंतोमेसुषुप्तस्वप्नकाइव ॥ २८ ॥ तैस्तुयोव्यवहारोमेतद्ब्रह्मब्रह्मणिस्थितम् ॥ तेयत्पश्यंतिपश्यंतुतत्तैरलमलंमम ॥ २९ ॥

ड्यांशभेदोपगमेनेत्याशयेनाह ॥ यदिति ॥ आपाततोभातम् ॥ प्रेक्षयाविचारजन्यतत्त्वज्ञानेन ॥ अतोजाड्यभेदांशरूपंजगद्रूपमरूपात्मनिःस्वरूपमेव ॥ एवंचब्रह्मब्रह्मणिस्वस्वभावेसंस्थितम् ॥ सैवास्यस्वरूपावस्थितिरितिभावः ॥ २५ ॥ नन्वसंसारिब्रह्मब्रह्मस्वभावेतिष्ठतुनामतेनसंसारिणांकोलाभइत्याशंक्यतेषांपुरुषार्थचिंतावंध्यायाःस्वपुत्रराज्यादिलाभचिंतावद्व्यर्थैवेत्याशयेनाह ॥ येषामिति ॥ मिथःअन्योन्यंभ्रांतिदृष्ट्यापिजागरेस्वप्नांतरेचतत्तदात्मनिनसंतिमिथःपरमैकांततमब्रह्मभूतेष्वस्मासुखपुष्पवन्नतरांसंतीत्यर्थः ॥ एवार्थेहिशब्दः ॥ २६ ॥ अस्मासुजडांशेएवतेतद्व्यवहाराश्चखपुष्पवत् सच्चिदंशेतुमयिब्रह्मैकरूपत्वात्संत्येवेत्याह ॥ मयीति ॥ तेपुरुषाःवायुस्पंदवत्स्वाभिन्नैस्तैस्तैःस्वव्यवहारैःसहमयिसंत्येवयतस्तदुभयंशांतंसद्ब्रह्मात्मैकरूपंतच्चब्रह्ममयिप्रत्यगात्मस्वभावेऽस्तीत्यर्थः ॥ २७ ॥ अपरंविशेषमाह ॥ अहंत्विति ॥ अप्रबुद्धदृष्ट्याजगतइववसिष्ठदेहस्यापिसत्यत्वादितिभावः ॥ तेत्विति ॥ प्रबुद्धदृष्ट्याजगतासहतद्देहादीनांबाधादितिभावः ॥ २८ ॥ अनुग्रहोपदेशादिव्यवहारस्तैस्तद्दृष्टिसिद्धसत्यभावैर्मद्व्यवहारैर्ममअलमलमितिवीप्साआत्यंतिकनिष्प्रयोजनताद्योतनाय ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहंआत्मनिवसिष्ठदेहभावेनैवास्मि ॥ इयंवसिष्ठाद्याकारात्वदर्थंब्रह्मसत्तैवसमुदेतीव ॥ इयंवागपितथारूपात्वदर्थंब्रह्मसत्ताविवर्त्तरूपैव ममदृष्ट्यातुनास्त्येवेत्यर्थः ॥ ३० ॥ सर्ववस्तूनामानंदैकरसात्मतादर्शनादविरुद्धंविरुद्धंदुःखादिकमपियस्यतथाविधस्यतत्त्वविदः ॥ ३१ ॥ मोहादविरुद्धनिरतिशयानंदात्मापरिज्ञानादितिप्रसिद्धाइयंसंसारकदर्थना मोक्षोपायक्रमाभ्यासकदर्थनाच ॥ ३२ ॥ अभावस्यासतएवदुःखस्योपशमरूपिणि ॥ ३३ ॥ अप्सुपतितःअप्पतितस्तैलबिंदुर्यथानानावर्णंचक्रंभवति ॥ ३४ ॥ ज्ञानबाधितंतुजगत्स्वप्नवत्स्मृतिमात्रयोग्यतामापद्यतइत्याह ॥ जाग्रतीति ॥ स्मृतौप्रतिभासमानायादृग्रसायादृग्विधा ॥ ३५ ॥ तेनप्रागुक्तेनैवभूमिकाभ्यासयोगेन॥तज्जगज्जालम्॥ तनुतामपक्षयम् ॥ ३६ ॥ प्रत्यक्प्रवणदृष्ट्यापरीक्षणेइदानीमपितदपक्षयोबाधश्चानुभवितुंशक्यइत्याशयेनाह ॥ यदायदेति ॥ गलतिअपक्षीयतेआत्यंतिकबाधेन ॥ नस

अहमात्मनिनैवास्मिब्रह्मसत्तेयमातता॥त्वदर्थंसमुदेतीवतथारूपैववागियम् ॥ ३० ॥ अविरुद्धविरुद्धस्यशुद्धसंविन्मयात्मनः॥न भोगेच्छानमोक्षेच्छाद्वदिस्फुरतितद्विदः ॥ ३१ ॥ स्वभावमात्रायत्तेस्मिन्बंधमोक्षक्रमेनृणाम्॥ कदर्थनेत्यहोमोहाद्रोष्पदेप्युदधिभ्रमः॥ ३२ ॥ स्वभावसाधनेमोक्षेऽभावोपशमरूपिणि॥ नधनान्युपकुर्वंतिनमित्राणिनचक्रियाः ॥ ३३ ॥ तैलबिंदुर्भवत्युच्चैश्चक्रमप्पतितोयथा॥ तथाशुचेत्यसंकल्पेस्थिताभवतिचिज्जगत्॥ ३४ ॥ जाग्रतिस्वप्नवृत्तांतस्थितिर्यादृग्रसास्मृतौ॥ तादृग्रसाहंत्वजगज्जालसंस्थाविवेकिनः॥ ३५ ॥ तेनैवाभ्यासयोगेनयातितत्तनुतांतथा॥ यथानाहंनसंसारःशांतमेवावशिष्यते॥ ३६॥ यदायदास्वभावार्कः स्थितिमेतितदातदा ॥ भोगांधकारोगलतिनसन्नप्यनुभूयते ॥ ३७ ॥ मोहमहत्तारहितःस्फुरतिस्मृतौभवतिभासतेचतथा ॥ बुद्ध्यादिकरणनिकरोयस्माद्दीपादिवालोकः ॥ ३८ ॥ ॥ इत्यार्षेवा०वा०दे०मो०नि०उ०वसिष्ठगीतासुखभावविश्रांतियोगोपदेशोनामएकोनचत्वारिंशःसर्गः ॥ ३९ ॥ ॥ ७॥ ॥श्रीवसिष्ठउवाच॥ ॥रूपालोकमनस्कारबुद्ध्यादींद्रियवेदनम्॥ स्वरूपंविदुरम्लानमस्वभावस्यवस्तुनः॥ १ ॥ अस्वभावतनुत्वेनस्वभावस्थितिरातता ॥ यदोदेतिसदासर्गोभ्रमाभःप्रतिभासते ॥ २ ॥ यदास्वभावविश्रांतिःस्थितिमेतिशमात्मिका॥ जगद्दृश्यंतदास्वप्नःसुषुप्तइवशाम्यति॥ ३॥

नूकालत्रयेपिनास्तीत्यप्यनुभूयते ॥ ३७ ॥ एवंभोगांधकारस्यस्मृतौविनाशेसतिबुद्ध्यादिकरणनिकरोमोहेनात्मावरणेनाज्ञानेनमहत्तयास्थूलदेहाद्यध्यासेनचरहितोभवति ॥ तथाब्रह्माकारवृत्त्युद्धेनबोधेनस्फुरति ॥ यस्मात्स्फुरणाद्दीपात्प्रसृतआलोकइवसर्वतोव्याप्यब्रह्मीभूतोभासतेचेत्यर्थः ॥ ३८ ॥ ॥ इतिश्रीवासिष्ठ०म०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेएकोनचत्वारिंशःसर्गः ॥ ३९ ॥ ॥ ७ ॥ ॥ नसंसृतौब्रह्मभातिनब्रह्मणिचसंसृतिः ॥ जीवन्मुक्तौद्वयंभातिपर्यायेणेतिवर्ण्यते ॥ १ ॥ तत्रादौनिःस्वभावस्यबाह्याभ्यंतरवस्तुनस्तत्साक्षिचैतन्यमेववास्तवंस्वरूपमितिविद्वदनुभवइत्याह ॥ रूपेति ॥ अम्लानंनिर्विकारकलंकम् ॥ १ ॥ तत्रतद्बोधान्वयव्यतिरेकानुविधानलक्षणांयुक्तिमाह ॥ अस्वभावेतिद्वाभ्याम् ॥ यदाआतताअपरिच्छिन्नावास्तवस्वभावस्थितिःअस्वभावस्तत्तिरोधात्रीअविद्यातत्तनुत्वेनतत्कृतपरिच्छेदेनतच्छरीरतयाचउदेतितदेत्यन्वयोक्तिः ॥ २ ॥ व्यतिरेकमाह ॥ यदेति ॥ स्वबोधेनेतिशेषः ॥ बीजशेषवैषम्येप्यद्वैतात्ममात्रस्थित्यंशेसुषुप्तदृष्टांतः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवस्वरूपविश्रांतिविरोधिनोभोगादयोनर्थाएवेत्याह ॥ भोगाइति ॥ ४ ॥ एवंचस्वायत्तानांस्वभावस्थितौनानर्थेपातोयुक्तइत्याह ॥ भूयतामिति ॥ इहसंसारे ॥ मातास्यतांग्लायताम् ॥ ५ ॥ स्वायत्ततामेवस्वानुभवाभिनयेनदर्शयति ॥ नेति ॥ आत्मानंद्रष्ट्रादित्रिपुट्यामाद्यंवसिष्ठजीवम् ॥ ६ ॥ हेरामवसिष्ठस्त्वमितित्वंशब्दार्थबृंहितंत्वंमपिसनादृशस्त्वमेवपश्यसि अहंतुशांतमेवपश्यामि ॥ ७ ॥ तथापिएतेशब्दार्थादिरूपालोकमनोमयाविभ्रमानपरमार्थतोजाताः[1]किंतुसंजातकल्पाः ॥ ८ ॥ ममद्वैतादर्शनंनद्वैतप्रद्वेषात्किंतुद्वैताद्वैतयोर्युगपद्दर्शनासंभवादित्याह ॥ ब्रह्मात्मेति ॥ ९ ॥ अत्यंतादर्शनेकथंतदुपदेशप्रसिद्धिस्तत्राह ॥ प्रबुद्धइति ॥ जीवन्मुक्तस्तुपर्यायेणोभयंपश्यतीत्युपदेष्टाभवतीत्याशयः ॥ १० ॥ सोप्युत्तरोत्तरभूमिकासुक्रमेणद्वैतादर्शनात्प्रशाम्यतीत्याह ॥ यथाभूतमिति ॥ ११ ॥ तद्दृष्ट्याद्वैतस्योत्तरोत्तरंपेलवतांदृष्टांताभ्यामाह ॥ स्मृतिस्थइति ॥

भोगाभवमहारोगाबंधवोदृढबंधनम् ॥ अनर्थायार्थसंपत्तिरात्मनात्मनिशाम्यताम् ॥ ४ ॥ अस्वभावात्मतासर्गःस्वभावैकात्मताशिवः ॥ भूयतांपरमव्योम्नाशाम्यतांमेहताम्यताम् ॥ ५ ॥ नात्मानमवगच्छामिनदृश्यंचजगद्भ्रमम् ॥ ब्रह्मशांतंप्रविष्टोस्मिब्रह्मैवास्मिनिरामयः ॥ ६ ॥ त्वमेवपश्यसित्वंत्वंसत्वंशब्दार्थजृंभितम् ॥ पश्यामिशांतमेवाहंकेवलंपरमंनभः ॥ ७ ॥ ब्रह्मण्येवपराकाशेरूपालोकमनोमयाः ॥ विभ्रमास्तवसंजातकल्पाःस्पंदाइवानिले ॥ ८ ॥ ब्रह्मात्मावेत्तिनोसर्गंसर्गात्माब्रह्मवेत्तिनो ॥ सुषुप्तोवेत्तिनोस्वप्नंस्वप्नस्थोनसुषुप्तकम् ॥ ९ ॥ प्रबुद्धोब्रह्मजगतोर्जाग्रत्स्वप्नदृशोरिव ॥ रूपंजानातिभारूपंजीवन्मुक्तःप्रशांतधीः ॥ १० ॥ यथाभूतमिदंसर्वंपरिजानातिबोधवान् ॥ संशाम्यतिचशुद्धात्माशरदीवपयोधरः ॥ ११ ॥ स्मृतिस्थःकल्पनस्थोवायथाख्यातश्चसंगरः ॥ सदसद्भांततामात्रस्तथाहंत्वजगद्भ्रमः ॥ १२ ॥ आत्मन्यपिनास्तिहियाद्रष्टायस्यानविद्यतेकश्चित् ॥ नचशून्यंनाशून्यंभ्रांतिरियंभासतेसेति ॥ १३ ॥ ॥इत्यार्षेवा॰वा॰दे॰मो॰नि॰उ॰वसिष्ठगीतासुआत्मविश्रांतिकथनंनामचत्वारिंशःसर्गः ॥ ४० ॥ ॥ ६५ ॥ ॥श्रीवसिष्ठउवाच॥ अस्वभावस्वभावोयंसर्वोहंतादिवेदनः ॥ स्वभावैकस्वभावेननिर्वाणीक्रियतांस्वयम् ॥ १ ॥ यत्रादित्योभवेत्तत्रयथालोकस्तथाभवेत् ॥ परंविषयवैरस्यंतत्रयत्रप्रबुद्धधीः ॥ २ ॥

संगरोयुद्धम् ॥ १२ ॥ यापरिदृश्यमानाजगन्मायापरमार्थसत्येआत्मनिअपिशब्दादत्यंतासतिशून्येचनास्ति ॥ यस्याःकश्चिद्द्रष्टाजीवोपिनविद्यते ॥ इतिशून्याशून्यविलक्षणेयंभ्रांतिरनिर्वचनीयैवभासतेइत्यर्थः ॥ १३ ॥ ॥ इतिश्रीवा॰तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेचत्वारिंशःसर्गः ॥ ४० ॥ ॥ त्रिजगत्सुत्रिकान्तृत्यमस्वभावस्वभावतः ॥ स्वभावैकस्वभावेननिर्वाणंचात्रवर्ण्यते ॥ १ ॥ अस्वभावोऽविद्यातस्स्वभावोयमात्मासर्वजगद्रूपःसन्नहंतादिवक्ष्यमाणत्रिजगत्सुत्रिकान्तृत्यंवेत्तीत्यहंकारादिवेदनःसंपन्नः ॥ एवमनिर्वाणोयमात्मास्वयंशास्त्रीयोपायप्रभवविद्याविर्भूतेनाद्वितीयस्वप्रकाशपूर्णानंदलक्षणस्वभावैकस्वभावेनस्वेनैवनिर्वाणीक्रियताम् ॥ १ ॥ साचविद्याविद्वत्समागमविवेकजन्याद्वैराग्यादेवसिद्ध्यतीत्याशयेनाह ॥ यत्रेति ॥ २ ॥

[1] अत्रटीकानुरोधाद्बृंहितमितिपाठोपेक्षितइतिभाति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवैराग्यार्थमविद्यास्वभावाच्छुद्धेजगच्चित्राध्यासंवर्णयति ॥ अकर्त्रिति ॥३॥ विद्यास्वभावेनतदपोह्यनिर्वाणस्वरूपंदर्शयति ॥ नचेति ॥४॥ तत्राद्यमस्वभावस्वभावंत्रिजग
न्नृत्यदनंतपुत्रिकात्वेनवर्णयति ॥ चिच्चमत्कारेत्यादिना ॥ चिच्चमत्कारमात्रात्मानोयेजीवास्तेषांकल्पनामात्रात्मकेरंगेनृत्यमंडपेश्रृंगारादिनानारसरंजनायासाम् ॥ जगच्चित्र
पुत्रिकाःखेनृत्यंतीतिपरेणान्वयः ॥५॥ रसैःश्रृंगारादिभिर्भावैःस्थायिभावैर्विकारैःकंपस्वेदादिसंचारिभावैःआढ्यंयथास्यात्तथा ॥ अभिनयैस्तत्तद्वस्त्वाकारव्यंजकचेष्टाभिः॥
परमाणुप्रतिपरमाणुमात्रात्वपिविद्यमानेखेचिदाकाशे ॥ प्रायइतिसंभावितत्वद्योतनार्थः ॥ ६ ॥ ब्रह्मलोकःशिरोधराकंधरायासांब्रह्मलोकरूपाणांशिरसांधराधारयित्र्यइ
तिवा ॥ ७ ॥ तारोत्करास्तनूरुहाणिलोमानियासाम् ॥ परितोदिक्षुअच्छंस्वच्छमंबरमाकाशमेवांबरंवस्त्रंयासाम् ॥ ८ ॥ भूतानांभौतिकशरीरादीनांभारेणधारणेनपोषणेनच

अकर्तृकर्मकरणमदृश्यद्रष्टृदर्शनम् ॥ जगदग्राह्यसंभारमभित्तौचित्रमुत्थितम् ॥ ३ ॥ नचोत्थितंकिंचनवाशांतेशांतंयथास्थितम् ॥
अनामयंपरंब्रह्मसत्यमव्ययमेवतत् ॥ ४ ॥ चिच्चमत्कारमात्रात्मकल्पनारंगरंजनाः ॥ संख्यातुंकेनशक्यंतेखेजगच्चित्रपुत्रिकाः ॥ ५ ॥
रसभावविकाराढ्यंनृत्यंत्यभिनयैर्नवैः ॥ परमाणुप्रतिप्रायःखेस्फुरंत्यंबरात्मिकाः ॥ ६ ॥ सर्वर्तुशेखरधरादिग्बाहुलतिकाकुलाः ॥ पाता
लपादलतिकाब्रह्मलोकशिरोधराः ॥ ७ ॥ चंद्रार्कलोलनयनास्तारोत्करतनूरुहाः ॥ सप्तलोकांगलतिकाःपरितोच्छांबरांबराः ॥ ८ ॥ द्वी
पांबुराशिवलयालोकालोकाद्रिमेखलाः ॥ भूतभारचलज्जीवप्रवहत्प्राणमारुताः ॥ ९ ॥ वनोपवनविन्यासहारकेयूरभूषिताः ॥ पुराण
वेदवचनाःक्रियाफलविनोदनाः ॥ १० ॥ त्रिजगत्पुत्रिकानृत्यंयदिदंदृश्यतेपुरः ॥ ब्रह्मवारिद्रवत्वंतत्तद्ब्रह्मानिलवेपनम् ॥ ११ ॥ अस्व
भावस्थितैवास्यकारणंकारणात्मकम् ॥ असुषुप्तस्थितास्वापेस्वप्नस्येवसतीवसा ॥ १२ ॥ असुषुप्तसुषुप्तस्थःस्वभावंभावयन्भव ॥
जाग्रत्यपिगतव्यग्रोमास्वप्नमिदमाश्रय ॥ १३ ॥ यज्जाग्रतिसुषुप्तत्वंबोधादरसवासनम् ॥ तंस्वभावंविदुस्तज्ज्ञामुक्तिस्तत्परिणामिता
॥ १४ ॥ अकर्तृकर्मकरणमदृश्यद्रष्टृदर्शनम् ॥ अरूपालोकमननंस्थितंब्रह्मजगत्तया ॥ १५ ॥ कांतेकांतंप्रकचतिपूर्णंपूर्णंव्यवस्थितम् ॥
द्वित्वैक्यरहितेभातिद्वित्वैक्यपरिवर्जितम् ॥ १६ ॥

निमित्तेनचलंतोजीवाएवप्रवहंतःप्राणमारुतायासाम् ॥ ९ ॥ पुराणानिवेदाश्चवचनंयासाम् ॥ तत्तत्क्रियाफलसुखदुःखानिविनोदनानिविलासायासाम् ॥ एवंविधाजगत्पुत्रि
कानृत्यंतीतिपूर्वत्रान्वयः ॥ १० ॥ ११ ॥ अस्यचनृत्यस्यअस्वभावस्थितैवचित्कारणम् ॥ यतस्तादृशमेवकारणात्मकंश्रुतिषुप्रसिद्धम् ॥ यथास्वापेनिद्रायामसुषुप्तंस्थितासा
स्वप्नस्यकारणंतद्वदित्यर्थः ॥ १२ ॥ एवमस्वभावस्वभावमुपवर्ण्येदानींस्वभावैक्यस्वभावेननिर्वाणीकरणेउपायमाह ॥ असुषुप्तेति ॥ हेरामत्वंपारमार्थिकस्वभावंभावयन्जा
ग्रत्यप्यज्ञाननाशादसुषुप्तंसर्वद्वैतोपसंहारात्सुषुप्तंचतुर्यंपदंतत्स्थोभव ॥ १३ ॥ रसोरागोवासनाचतच्छून्यम् ॥ तत्परिणामितातत्स्वरूपेणपरिनिष्ठितत्वम् ॥ १४ ॥ तस्यांपरिनि
ष्ठायांव्यवहारकालेपिचिदेकरसंजगद्भातीत्याह ॥ अकर्त्रित्यादिना ॥ १५ ॥ द्वित्वैक्यरहितेशोधितेप्रतीचिद्वैतैक्यपरिवर्जितंशोधितंब्रह्मअखंडैकरस्येनभाति ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्गात्मनि स्थितं सत्यं सत्ये आत्मनि शांतं स्वयमेव स्थितम् ॥ १७ ॥ शिलाजठरवदप्रकाशस्वभावता भ्रांतिं वारयति ॥ सुरत्नेति ॥ अतएव जगत्प्रतिबिंबं प्राप्य क्षुब्धमिव स्थितमप्यक्षुब्धम् ॥ १८ ॥ अभेदीकृतमेकरसीकृतं मानसं यत्र ॥ १९ ॥ २० ॥ हेमपीठं पीठवच्चतुरस्रो हेमपिंडः ॥ स्फारं नानाविस्तारं लक्ष्यमाणमपि ॥ २१ ॥ कांतिमत् भास्वरम् ॥ २२ ॥ ननु हे राम प्रबुद्धे सति शांतिघनभावगतं ब्रह्मैव प्रसभमद्वैतस्वभावबलादेव विगतास्तमयोदयेन सर्गलक्षणेन उदयेन स्वाराज्यविभवेन भाति ॥ यथा व्योम गलत्स्वभावलाभं बाधितस्वरूपलाभं केशोंड्रकगंधर्वनगरतलमलिनतादिकं प्रतिप्रसभं बलादेव स्फूर्त्तिनिरासो भयप्रदेन स्वीयशून्यविभवेन विभाति तद्वदित्यर्थः ॥ २३ ॥ ॥ इति श्रीवासिष्ठम० तात्पर्यप्रकाशे निर्वाणप्रकरणे उत्तरार्द्धे एकचत्वारिंशः सर्गः ॥ ४१ ॥ ॥ ७ ॥ ॥ भूयः प्रपंच्यते चात्र विश्वविश्वेश्वरैकता ॥ विवेकैः पूजनीयश्च स्वात्मैव परमेश्वरः ॥ १ ॥ प्रागुक्तां जगतो ब्रह्ममात्रतामनुभावयितुं जगद्भेदकचनहेतोश्चित्तस्य चिद्भेदं निरस्यति ॥ चित्तवदिति ॥ शांते कूटस्थात्मनि प्रथमं यत् चित्तवत्कचनं तत्तस्मात्कचनरूपाच्चिदात्मनो न भिद्यते ॥ कुतः ॥ अव्याकृतत्वादमलत्वाच्च ॥ तथाहि ॥ नामरूपभेदाद्धि लोके भेदः प्रसिद्धः ॥ स च नामरूपव्याकरणात्पूर्वं भूतजीवभावानुप्रवेशोपाधौ चित्तेन संभवति ॥ तस्याव्याकृतत्वात् ॥ सूक्ष्मतेजोबन्नात्मकलिंगसृष्ट्यनंतरं हि सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तद्व्याकरणं श्रूयते ॥ तथा अमलत्वाच्च चितो न भिद्यते ॥ चिदप्यमला चित्तमपि ॥ न च तादृशयोः प्रभाकाशयोरिव भेदः केनचिल्लक्षयितुं शक्यते ॥ चित्तस्य चिद्भेदनिरासादेव तदधीनो जगद्भेदः सुतरां निरस्त इत्याह ॥ कातइति ॥ १ ॥ इदमेव स्फुटमाह ॥ चित्तदीपेइति ॥ स्थिते कूटस्थे खे प्रत्यगात्माकाशे रूपालोकमनस्कारसंविल्लक्षणा अंबुद्रवोर्मयो मृगतृष्णाभ्रांतिवद्भ्रांति ॥ ते च चित्तलक्षणे दीपयतीति दीपः सूर्यस्तस्मिन्नस्तं गते यांति अपगच्छंतीत्यर्थः ॥ २ ॥

सत्यं सत्ये स्थितं शांतं सर्गात्मन्यात्मनि स्वयम् ॥ आकाशकोशसदृशं शिलाजठरसंनिभम् ॥ १७ ॥ सुरत्नजठराकारं घनमप्यंबरोपमम् ॥ प्रतिबिंबमिव क्षुब्धमप्यक्षुब्धमसच्चसत् ॥ १८ ॥ भविष्यन्नवनिर्माणं चेतसीव स्थितं पुरम् ॥ ब्रह्मबृंहितभारूपमभेदीकृतमानसम् ॥ १९ ॥ यथा संकल्पनगरं संकल्पान्नैव भिद्यते ॥ तथायं जगदाभासः परमार्थान्न भिद्यते ॥ २० ॥ हेमपीठमिवानेकभविष्यत्सन्निवेशवत् ॥ लक्ष्यमाणमपि स्फारं शांतमव्ययमास्थितम् ॥ २१ ॥ अजस्रनाशोत्पादाढ्यमेकरूपमनामयम् ॥ अनाशोत्पादमजरमनेकमिव कांतिमत् ॥ २२ ॥ ब्रह्मैव शांतिघनभावगतं विभाति सर्गोदयेन विगतास्तमयोदयेन ॥ व्योमेव शून्यविभवेन गलत्स्वभावलाभं प्रतिप्रसभमेव ननु प्रबुद्धे ॥ २३ ॥ ॥ इ० वा० म० वा० दे० मो० नि० उ० स्वरूपविश्रांत्यर्थमुपदेशकरणं नाम एकचत्वारिंशः सर्गः ॥ ४१ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठ उवाच ॥ ॥ चित्तवत्कचनं शांते यत्तत्तस्मान्न भिद्यते ॥ अव्याकृतामलतया का तस्सर्गादिसंभवः ॥ १ ॥ चित्तदीपे गते यांति भ्रांतिवद्भ्रांति खे स्थिते ॥ रूपालोकमनस्कारसंविदो बुद्रवोर्मयः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्तायांचिदतिरिक्तकारणनिरपेक्षत्वादपिजगच्चिदेवेतिदृष्टांतैरुपपादयति ॥ निरस्तेत्यादिना ॥ निरस्ताकरणापेक्षायेन ॥ भासःप्रभायाविसरणंप्रसारः ॥ ३ ॥ कीलालेजले ॥ आत्ममयमात्मविवर्त्तः ॥ किमप्यनिर्वचनीयम् ॥ ४ ॥ प्रतीचिचित्तादीनामवस्थाद्वयेकचनमिवब्रह्मणिमायाधीनंवियदादिकचनमपितदभिन्नमेवेत्याशयेनतैरेवदृष्टांतैरुपपादयति ॥ महाचितीत्यादिना ॥ ५ ॥ ६ ॥ स्फूर्त्तावपिचिदतिरिक्तनिरपेक्षत्वाच्चिदभेदइत्याशयेनाह ॥ वेत्तीति ॥ द्वैतंचैक्यंचसंख्येयभेदाश्वतेषाम् ॥ ७ ॥ अविवेकेनभासुरं विवेकेनभंगुरम् ॥ परमार्थबोधेतुब्रह्ममात्रत्वादुभयशून्यम् ॥ ८ ॥ बोधेनयन्निर्णीतंतदाह ॥ ज्ञप्तीति ॥ ९ ॥ तत्रैववेदानुसारिणामवेदानुसारिणांचविचारयतांवादिनांयथार्थायथार्थरूपैःकल्पनाभेदाःप्रवृत्ताइत्याह ॥ तदिति ॥ १० ॥ तत्रैवानाद्यविद्यादिदृश्याकारताध्यासइत्याह ॥ तदिति ॥ ११ ॥ तत्रचित्त्वबलादेवाध्यस्तस्फूर्त्तेश्चित्तया

निरस्तकरणापेक्षंमरुतःस्पंदनंयथा॥ यथाविसरणंभासस्तथाजगदिदंपरे॥ ३॥ द्रवत्वमिवकीलालेशून्यत्वमिवचांबरे॥ स्पंदत्वंमरुतीवेदंकिमप्यात्ममयंपरे॥ ४॥ महाचितिमहाकाशेयदिदंभासतेजगत्॥ तच्चित्त्वमेवकचतिनिर्मलत्वंमणाविव ॥ ५ ॥ यथाद्रवत्वंपयसियथाशून्यत्वमंबरे॥ यथाप्रस्पंदनंवायौमहाचितितथाजगत् ॥ ६ ॥ वेत्तिवायुर्यथास्पंदंतथावेत्तिजगच्चितिः॥ नद्वैतैक्यादिभेदानांमनागप्यत्रसंभवः॥७॥ अविवेकविवेकाभ्यांभासुरंभंगुरंजगत्॥ बोधेसदैवसद्रूपमभासुरमभंगुरम्॥८॥ ज्ञप्तिमात्रादृतेशुद्धादादिमध्यांतवर्जितात्॥ नान्यदस्तीहनिर्णीतंमहाचिन्मात्ररूपिणः॥९॥तत्कस्यचिद्धिवंशांतंकस्यचिद्ब्रह्मशाश्वतम्॥कस्यचिच्छून्यतामात्रंकस्यचिज्ज्ञप्तिमात्रकम्॥१०॥तदनंतात्मचिद्रूपंचेत्यतामिवभावयत्॥स्वसंस्थमेवज्ञेयत्वमज्ञत्वमिवगच्छति॥११॥ चित्तयानास्तिसत्ताचचित्ततानास्तितांविना॥ विनाविनायथावायोर्यथास्पंदेषुकारणम्॥१२॥ तथामहाचितोच्छायाःसर्गसंवित्तिवृत्तिषु॥नित्यंसत्वमसत्वंवाहेतोरन्यानपेक्षणात्॥१३॥ इत्यत्रार्थोभविष्यत्सद्द्वित्वैकत्वास्तितावशात्॥ कोत्रकल्पयिताद्वित्वमेकत्वंवामहांबरे॥ १४॥

विनाज्ञेयस्यसत्तानास्तितांसत्तांविनाचतस्यचित्तताचित्तस्यनास्ति ॥ यथाविनाशून्यात्मनाकूटस्थेनाकाशेनविनावायोःकारणंनास्ति ॥ वायुंचविनास्पंदेषुकारणंनास्तितद्वदित्यर्थः ॥ १२ ॥ तथानित्यब्रह्मसत्ताधीनसत्ताकासुसर्गभ्रांतिष्वधिष्ठानमपेक्ष्यनित्यंसत्वंस्वरूपतस्तुनित्यमसत्वंचेतिद्वेधापिशास्त्रेसदेवसोम्येदंनेहनानेतिचव्यपदेशइत्यर्थः ॥ अन्यस्यहेतोरनपेक्षणात् ॥ असमर्थसमासश्छांदसः ॥ १३ ॥ चिज्जडद्वित्वस्यतत्कारणैकत्वस्यचअस्तितास्वतःसत्तातद्वशाद्धिअत्रसर्गसंवित्तिषुइतिप्रसिद्धोर्थोऽभविष्यत् ॥ कूटस्थाद्वयेचिदंबरेद्वित्वमेकत्वंवाकःकल्पयितासत्तास्फूर्त्तिभ्यांसमर्थयिता ॥ जडेषुनकश्चित्तादृशोस्तीत्यर्थः ॥ १४ ॥

१ मूलस्थसर्गेत्यादिपदस्यायमर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंच आकाशद्वित्वाप्रसिद्धिवत्स्पंदानिलभेदाप्रसिद्धिवच्च विश्वविश्वेश्वरद्वित्वस्याप्रसिद्धिरेवफलितेत्याह ॥ विष्वगित्यादिना ॥ १५ ॥ १६ ॥ अथवाब्रह्मदृष्ट्याअनृतस्यापि विश्वस्यस्वन्यूनदेशकालस्वकार्यापेक्षयाऽधिकदेशकालव्याप्यासत्यतामाशंक्यपरिहरति ॥ देशकालेति ॥ १७ ॥ कार्यकारणभेदेसिद्धेतथास्यात्सएवासिद्धइत्याह ॥ द्वित्वैक्येति ॥ १८ ॥ काल्पनिकःकार्यकारणभेदोंगीक्रियतइतिचेन्नकाल्पनिकेनतेनसत्यतानिर्वाहइत्याह ॥ स्याच्चेदिति ॥ १९ ॥ अत्यंताभेदेपिखलेखेतिखेभेदकल्पनादृष्टेतिजगदपितद्वत्स्यादित्याह ॥ खेइति ॥ २० ॥ खस्यलेखेतिखाद्भिन्नमिवकल्पितंलेखापदवाच्यंव्योमयद्रूपंतद्रूपंब्रह्मणोजगदित्यर्थः ॥ एवंस्थितेब्रह्मण्यपिजगत्कारणतागतेत्याह ॥

विष्वग्विश्वमपारैकपरमाकाशकोशता ॥ यथास्पंदानिलद्वित्वंशाब्दमेवनवास्तवम् ॥ १५ ॥ विश्वविश्वेश्वरद्वित्वंतथैवासन्मयात्मकम् ॥ सदेवासंभवद्वित्वंमहाचिन्मात्रकंचयत् ॥ १६ ॥ विश्वाभासंतदेवेदंनविश्वंसन्नविश्वता ॥ देशकालादिमत्त्वेनकदाचिद्वेत्सिसत्यता ॥ १७ ॥ कटकत्वस्यभिन्नस्यविश्वस्यचतथापरे ॥ द्वित्वैक्यासंभवेचात्रकार्यकारणताकुतः ॥ १८ ॥ स्याच्चेत्तत्कल्पनामात्रमेवैतन्नान्यवस्तुता ॥ शून्यतानभसीवात्रद्रवत्वमिवचांभसि ॥ १९ ॥ खेखलेखाप्यभिन्नेवकिलास्तिजगदादिता ॥ यद्रूपंब्रह्मतद्रूपंजगत्कात्रद्वितैकते ॥ २० ॥ यद्रूपंव्योमतद्रूपमेवंशून्यंकिलाखिलम् ॥ एकात्मनिततेस्वच्छेचिन्मात्रेसर्वरूपिणि ॥ २१ ॥ शिलापुत्रकसेनायांपाषाणत्वइवास्थिते ॥ कार्यकारणवैचित्र्यंकथंसंभवतिक्वा ॥ २२ ॥ कथमव्योमताव्योम्निद्वितीयासंभवाद्भवेत् ॥ प्रतिभात्मैवभारूपोभातिसर्गोमहाचिति ॥ २३ ॥ पुत्रिकेवोपलोत्कीर्णातन्मयत्वात्तदात्मिका ॥ साधोयथास्थितस्यैवंबुध्वाविश्वंप्रलीयते ॥ २४ ॥ काष्ठमौनदशाभासंसंसारमवशिष्यते ॥ यथानिमीलिताक्षस्यरूपालोकामनोभ्रमः ॥ २५ ॥ स्वप्नेजाग्रत्यनग्रस्थोप्यसन्नेवास्तिभावनात् ॥ तथैवोन्मिलीताक्षस्यरूपालोकमनोभ्रमः ॥ २६ ॥ स्वप्नेजाग्रत्यनग्रस्थोप्यसन्नेवास्तिभावनात् ॥ भावनोपशमंकृत्वाशिलीभूययथास्थितम् ॥ २७ ॥ अशिलीभूतमेवांतःस्वभावंसममास्यताम् ॥ आविवेकोपहारेणयथाप्राप्तार्थपूजनैः ॥ २८ ॥

एकात्मनीत्यादिना ॥ २१ ॥ २२ ॥ २३ ॥ यथास्थितस्यवास्तवस्यैवतत्त्वंबुद्धा ॥ २४ ॥ काष्ठमौनंबाह्यमानससर्वचेष्टाशून्यत्वंतादृशयादशयाआभासंस्फुरत्ब्रह्मसंसारमवधूयशिष्यते ॥ भावनालक्षणमनःस्पंदमात्रजन्यःसर्वःसंसारभ्रमोभावनात्यागादस्पंदावस्थितिमात्रेणविधूयतेइत्याह ॥ यथेत्यादिना ॥ २५ ॥ २६ ॥ २७ ॥ चिदेकरसत्वेनशिलावैलक्षण्यादंतःअशिलीभूतंस्वभावमवलंब्यआस्यताम् ॥ तादृशस्थित्यनुकूलविवेकवैराग्यादिसाधनाभ्यासएवपरमेश्वरस्यात्मनःसर्वोत्कृष्टापूजेत्याह ॥ आविवेकेति ॥ आसमंतात्सर्वतोयोविवेकस्तल्लक्षणेनोपहारेणोपचारेण ॥ २८ ॥

१ अस्यस्थितस्येतिशेषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फारंनिरतिशयानंदलक्षणंवरंप्रददातीतिस्फारवरप्रदः ॥ २९ ॥ ३० ॥ ३१ ॥ अन्यमनात्मभूतंतटस्थमीश्वरम् ॥ अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदय थापशुरेवसदेवानामितिश्रुतेरितिभावः ॥ ननुतटस्थेश्वरःपूजनेनप्रसन्नएनंशस्त्राहिविषवह्निप्रभृतिभ्यउपघातकेभ्यःसर्वतोरक्षिष्यतिकूटस्थात्माकिंकरिष्यतितत्राह ॥ सत्संगे ति ॥ आसमंतात्पूजितआत्मायेनतस्य ॥ ३२ ॥ किंचाऽविवेकिभिःकृतेषुदेवतार्चनादिष्वपराधावश्यंभाविनैष्फल्यानर्थयोरवश्यंभावात्तत्रापिदेशकालद्रव्यपात्रकर्त्रादि विशुद्धिविवेकःश्रद्धाभक्तिशांतिदांत्यादयोयद्यावश्यकास्तर्ह्यक्लेशेमहाफलेआत्मदर्शनेएवतेकुतोनोपयोज्यंतेइत्याह ॥ देवार्चनेत्यादिना ॥ ३३ ॥ देशकालपात्राद्यविवेकेन ॥ अमहात्मनांदुरात्मनाम् ॥ ३४ ॥ कोसौविवेकोयःसाध्यइत्युच्यतेतमाह ॥ यथाभूतेति ॥ ३५ ॥ यत्नइति ॥ तथाचवैराग्यादिसर्वसाधनसंग्रहइतिभावः ॥ आत्मप्रसादतोनि

बोधायपूज्यतांबुद्ध्वास्वभावःपरमेश्वरः॥ विवेकपूजितःस्वात्मासद्यःस्फारवरप्रदः ॥ २९ ॥ रुद्रोपेंद्रादिपूजात्रजरत्तृणलवायते ॥ विचारशमसत्संगबलिपुष्पैकपूजितः[1] ॥ ३० ॥ सद्योमोक्षफलःसाधोस्वात्मैवपरमेश्वरः॥ सत्यालोकनमात्रैकपूजितोनुत्तमार्थदः॥ ३१॥ यत्रास्यात्मेश्वरस्तत्रमूढःकोन्यंसमाश्रयेत्॥ सत्संगशमसंतोषविवेकापूजितात्मनः॥ ३२॥ शिरीषकुसुमायंतेशस्त्राहिविषवह्नयः॥ देवार्चनतपस्तीर्थदानान्यतिकृतान्यपि॥ ३३ ॥ भस्मायंतेनिरर्थत्वादविवेकामहात्मनाम् ॥ एतान्यपिविवेकेनक्रियंतेसफलानिचेत् ॥ ३४ ॥ विवेकएवतत्कस्मात्स्फुटमंतर्नसाध्यते ॥ यथाभूतार्थविज्ञानाद्वासनोपरमेपरे ॥ ३५ ॥ यत्नोविवेकशब्दाख्योभवत्यात्मप्रसादतः॥ तथातथाविवेकोंतर्वर्द्धिनेयःशमामृतैः॥३६॥ यथायथापुनःशोषमुपयातिनविभ्रमैः॥ देहसत्तामनादृत्ययथाभूतार्थदर्शनात्॥ ३७॥ लज्जांभयंविषादेर्ष्येसुखंदुःखंजयेत्समम्॥ जगदादिशरीरादिनास्त्येवादौकुतोद्यतत्॥ ३८॥ कार्यंचेत्कारणस्यैतत्तथापिब्रह्ममात्रकम्॥ प्रतिभामात्रमेवाच्छंनतुज्ञप्तेर्घटादिसत् ॥ ३९ ॥ ज्ञानात्मिकैवप्रतिभाज्ञप्तिरेवाखिलंजगत् ॥ज्ञप्तिरप्यात्मतत्त्वश्रीःपरिज्ञातोपशाम्यति ॥ ४० ॥

प्कामानुष्ठितयज्ञदानादिसाध्यचित्तप्रसादात् ॥ ३६ ॥ विभ्रमैर्विषयभ्रांतिभिः ॥ ३७ ॥ देहसत्तानादरेउपायंविचारंदर्शयति ॥ जगदादीति ॥ शरीरस्यआदिकारणभूतंजगत्आदिपदात्तत्कारणंचआदौनास्त्येव ॥ यच्चादौनास्तितदद्यकुतोभवेत् ॥ नासतोविद्यतेभावइतिन्यायात् ॥ ३८ ॥ ननुसदेवसोम्येदमग्रआसीदितिब्रह्मात्मनाआदौसदेवकारणस्यब्रह्मणःकार्यमस्तुतत्राह ॥ कार्यंचेदिति ॥ तथापिब्रह्ममात्रकमेवनततोभिद्यते ॥ सद्भेदेअसत्त्वापत्तेः ॥ अद्वयकार्यस्यकारणेअद्वयत्वाविघातकत्वेनभेदप्रतिभासस्यविकल्पमात्रत्वादित्याह ॥ प्रतिभामात्रमेवेति ॥ ज्ञप्तेःपृथगितिशेषः ॥ ३९ ॥ विकल्पप्रतिभापिचिदाभासज्ञानात्मिकैवेतिसैवाखिलंजगदित्यर्थः ॥ साचिदाभासलक्षणाज्ञप्तिरप्यज्ञातात्मतत्त्वस्यैवदर्पणदृष्टामुखश्रीरिवप्रत्यगात्ममात्रत्वेनदृष्टमात्राभेदकोपाध्यपगमेनोपशाम्यति ॥ ४० ॥

[1] पुष्पौघपूजितइत्यपिक्वचित्पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतउपाधिभूतज्ञेयाभावेबिंबात्पृथगिवानिर्वाच्येतिपूर्वान्वयि ॥ अनयारीत्याप्रत्यग्भावेअशरीरादिब्रह्मभावेअविश्वात्मेत्यखंडंसर्वंपूर्णंशाश्वतंशिवंशिष्यतइत्यर्थः ॥ ४१ ॥ तज्ज्ञावस्थितिरेवभवद्भिःसर्वैःसंपाद्येत्याह ॥ शांतेति ॥ ४२ ॥ तस्यास्थितौयथाप्राप्तव्यवहारेपिनक्षतिरित्याह ॥ चलंतइत्यादिना ॥ ४३ ॥ ४४ ॥ समाधौवाकामंस्थीयतामित्याह ॥ अथवेति ॥ ४५ ॥ सर्वदासमाधिकालेव्यवहारकालेचप्रबुद्धस्याऽविच्छिन्नप्रबोधस्यपुंसःसंकल्पपुरवत्स्वप्नवच्चसदैवतुच्छत्वादस्तंगतम् ॥ ४६ ॥ प्रबोधश्चसनेत्रस्यरूपानुभववत्परिनिष्ठितःपूर्णानंदानुभवपर्यंतोनिर्वाणेउपयुज्यतेनजात्यंधरूपकल्पनातुल्यःपरोक्षकल्पइत्याशयेनाह ॥ सनेत्रेत्यादिना ॥ ४७ ॥ अज्ञःकतिपयवाक्यश्रवणेने

ज्ञेयाभावेत्वनिर्वाच्याशिष्यतेशाश्वतंशिवम् ॥ अशरीराद्यविश्वात्मसर्वंशांतमिदंततम् ॥ ४१ ॥ ज्ञानज्ञेयज्ञप्तिमुक्तंदृषन्मौनमिवस्थितम् ॥ शांतांतःकरणाःस्वस्थाःशिलापुत्रककोशवत् ॥ ४२ ॥ चलंतश्चालयंतश्चज्ञरूपाएवतिष्ठत ॥ अज्ञेयज्ञत्वसद्रूपाःसदसत्साररूपिणः ॥ ४३ ॥ आकाशकोशविशदाभवताभवभूमयः ॥ यथास्थितंचतिष्ठंतिगच्छंतश्चयथागतम् ॥ ४४ ॥ यथाप्राप्तैककर्माणःसंपद्यंतेबुधाःपरम् ॥ अथवासर्वसंत्यागशांतांतःकरणोज्ज्वलाः ॥ ४५ ॥ एकांतेष्वेवतिष्ठंतुचित्रकर्मार्पिताइव ॥ संकल्पशांतौसंकल्पपुरवत्सर्वदाखिलम् ॥ ४६ ॥ स्वप्नवच्चप्रबुद्धस्यसदैवास्तंगतंजगत् ॥ सनेत्ररूपानुभवंजातितोंधइवभ्रमैः ॥ ४७ ॥ निर्वाणंवर्णयन्नज्ञस्ताप्यतेंतर्नशाम्यति ॥ कल्पनांशोपदेशेनलोकोविद्यामयात्मना ॥ ४८ ॥ येनकेनचिदज्ञत्वात्कृतार्थोस्मीतिमन्यते ॥ अकृतार्थःकृतार्थत्वंजानन्मौर्ख्यविमोहितः ॥ ४९ ॥ विज्ञास्यत्यकृतार्थत्वंक्षणांतरकदर्थनैः ॥ उपायंकल्पनात्मानमनुपायंविदुर्बुधाः ॥ ५० ॥ दुःखदत्वान्निमेषेणभावाभावैषणभ्रमैः ॥ जगद्भ्रमंपरिज्ञाययद्वासनमासितम् ॥ विरसाशेषविषयंतद्धिनिर्वाणमुच्यते ॥ ५१ ॥

वतत्त्वज्ञोहंसंपन्नइतिभ्रमेनिर्वाणंवर्णयन्सनेत्रस्यरूपानुभवंवर्णयन्जात्यंधइवांतर्मानापमानादिभिस्ताप्यतेनतुतत्त्वज्ञवच्छाम्यतिशांतिसुखमनुभवतीत्यर्थः ॥ अंधगोलांगूलन्यायेनासदुपदेशप्रतारितानामपिकृतार्थताभ्रांतिर्लोकेप्रसिद्धेत्याह ॥ कल्पनांशेति ॥ ४८ ॥ ४९ ॥ तस्मात्कल्पनात्मकंज्ञानंननिर्वाणोपायइत्यभिज्ञानुभवेनोपसंहरति ॥ उपायमिति ॥ ५० ॥ निमेषेणभावाभावैषणभ्रमैर्दुःखदत्वात्कल्पनात्मानमुपायमनुपायंविदुरितिपूर्वत्रान्वयः ॥ तस्मात्प्रागुक्तंसम्यग्ज्ञानमेववासनानाशपर्यंतंदृढीकार्यंतदेवनिर्वाणंपर्यवस्यतीत्याशयेनाह ॥ जगदिति ॥ विरसाअशेषाहैरण्यगर्भपदांताविषयायत्र ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवहेरामत्वंमदुपदिष्टमर्थमाख्यायिकाउपलब्धार्थालौकिकीपौराणिकीवाकथातदर्थइवपरोक्षःकल्पनामात्ररूपःप्रतिभासोयस्यतथाविधमेत्यबहिर्मुखतयाअधिगम्य नकृतार्थोभविष्यसिकिंतुभराद्वासनामात्रपूरातिशयात्तूद्ववात्मपरितःप्रवहत्स्वरूपंजगत्स्वरूपमचिद्वारिसंवेत्सिपश्यस्येव ॥ प्रत्यग्दृष्ट्यात्वशेषंपूर्णमच्छमवेद्यचिद्रूपंपश्यन्साक्षादनुभवन्विनिर्वासिनिर्वाणविश्रांतोभविष्यसीत्यर्थः ॥ ५२ ॥ तदेतद्दृढयन्नाह ॥ जात्यंधेति ॥ आगमैरुपदेशवाक्यैर्बहिर्मुखतयाजात्यंधरूपानुभवसदृशंयद्बुद्धंतद्बोधरूपमेव ॥ अपरोक्षेवस्तुनिपरोक्षज्ञानस्यभ्रांतिमात्रत्वात् ॥ अतस्तादृशबोधमधस्पदीकृत्यपादेनाक्रम्येवतिरस्कृत्य ॥ अधःशिरसीपदेइतिसत्वंच्चिन्नः ॥आंतरेप्रत्यगात्मरूपेअस्मिन्नित्यापरोक्षेबोधेसाक्षादनुभवेननिपत्यअभूर्जन्मादिशून्यःसोनुभवएवत्वंभवतदेवतेनिर्वाणमित्यर्थः ॥ ५३ ॥ ॥ इतिश्रीवासिष्ठ०म०रा०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेद्विचत्वारिंशःसर्गः ॥ ४२ ॥ ॥ ७ ॥ ॥ मनोयक्षपुरप्रायेजगत्यज्ञानकल्पिते ॥ बोधमात्रेणनिर्मृष्टेब्रह्मैकस्थितिरीर्यते ॥ १ ॥ आंतरमहंतादिबाह्यमिदंजगच्चभोक्तृभो

आख्यायिकार्थप्रतिभानमेत्यसंवेत्स्यचिद्वारिभराद्दवात्मा ॥ अवेद्यचिद्रूपमशेषमच्छंपश्यन्विनिर्वासिजगत्स्वरूपम् ॥ ५२ ॥ जात्यंधरूपानुभवानुरूपंयदागमैर्बुद्धमबोधरूपम् ॥ अधस्पदीकृत्यतदंतरेस्मिन्बोधेनिपत्यानुभवोभवाभूः ॥ ५३ ॥ ॥ इ० वा० महारामायणेवा० दे० मो० नि० उ० निर्वाणोपदेशोनामद्विचत्वारिंशःसर्गः ॥ ४२ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥ ॥ अहंतादिजगच्चेदंपरिज्ञानादसत्यताम् ॥ यातिसानुभवोमोहात्सत्यमेवान्यथाधियाम् ॥ १ ॥ अज्ञानज्वरमुक्तस्यबोधशीतलितात्मनः ॥ एतदेवभवेच्चिद्धंयद्भोगांबुनरोचते ॥ २ ॥ अलमन्यैःपरिज्ञानैर्वाच्यवाचकविभ्रमैः ॥ अनहंवेदनामात्रंनिर्वाणंतद्विभाव्यताम् ॥ ३ ॥ परिज्ञातायथास्वप्नेपदार्थारसयंतिनो ॥ नचसंतितथैवास्मिन्नहंजगदिदंभ्रमे ॥ ४ ॥ यथास्वभावनायक्षस्तरौसस्वजनंपुरम् ॥ पश्यत्यसत्यमेवैवंजीवःपश्यतिसंसृतिम् ॥ ५ ॥

ग्यरूपंसर्वंतदनुभवरूपभोगतत्त्वपरिज्ञानादसत्यतांयाति ॥ चिदवसानोहिभोगः सहिभोक्तुर्भोग्यसंबंधानुभवः तेनानुभवेनहिमोहादात्मविनिमयेनान्यथाधियांभोक्तयैवात्मबुद्धिमतांमूढानामात्मासानुभवोनस्वतइतिसत्यंब्रह्मैवसइत्यर्थः ॥ १ ॥ अतएवतत्त्वविदांभोग्यवर्गेष्वरुचिरित्याह ॥ अज्ञानेति ॥ २ ॥ एवंभोग्येषुविरक्तानांभोक्तर्यहंकारांशत्यागमात्रेणचिन्मात्रपरिशेषात्मकंनिर्वाणंसिद्धमित्याह ॥ अलमिति ॥ वाच्यंरूपंवाचकंनामतद्विषयभ्रांतिरूपैः ॥ ३ ॥ भोगांबुनरोचतेइत्येतद्विशदयति ॥ परिज्ञातेति ॥ स्वप्नेदृष्टाःपदार्थायथाजागरूकंपुरुषंनरसयंतिनरंजयंतिनसंतिचतथैवाहंजगदिदमितिभ्रमेदृष्टाःपदार्थाअपितत्त्वज्ञमित्यर्थः ॥ ४ ॥ अरण्येयक्षोगंधर्वमायाकल्पितंनगरंवात्रदृष्टांतइत्याह ॥ यथेति ॥ यक्षतनौइतिपाठेयक्षविद्यानिपुणमनुष्यःस्वभावनाकल्पितयक्षतनौस्थित्वास्वजनसहितंपुरंयथाकल्पयित्वापश्यतीतिव्याख्येयम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रयक्षोविभ्रमात्मा भ्रांतिकल्पितभोक्तृस्वरूपःयक्षलोकस्तन्नगरंचभ्रांतिकल्पितभोग्यरूपमित्युभयंनास्त्येवतथापितौमिथउपभोगलक्षणार्थक्रियाकारितयायथासद्रूपाविव
स्थितौतथेत्यर्थः ॥६ ॥ दृष्टांतेदार्ष्टांतिकेचासतोपिसत्यतयाप्रतिभासेअनावृतसाक्षिण्यध्यासएवनिमित्तमित्याशयेनाह ॥ अनावरणतइति ॥ भुवनोपाधिसंख्ययाचतुर्दश ॥
॥ ७ ॥ यक्षस्यस्वकल्पितदेहनगराद्युपसंहारइवजगद्भ्रमबाधेपितन्मिथ्यात्वदर्शनमेवहेतुरित्याह ॥ भ्रममात्रमिति ॥ चित्तत्वतांचिद्रूपतात्विकभावम् ॥ ८ ॥ चत्वारिक्रियावि
शेषणानि ॥ ९ ॥ तत्त्वतोविमर्शेदृश्यस्यद्रष्टृमात्रतानुच्छतावापर्यवस्यतीत्याह ॥ असत्तेति ॥ नविद्यतेसत्तायाःसंभवउत्पत्तिर्यस्मिंस्तथाविधंनैववाद्रष्ट्रात्म ॥ कुतः ॥ सत्परमा
र्थचिद्रूपंद्रष्टृतत्त्वमवाच्यंतुच्छंदृश्यरूपंकिमास्यतेस्थाप्यते ॥ नहिसतोऽसद्रूपताकेनचित्संपादयितुंशक्येत्यर्थः ॥ आसेरण्यंतकर्तुर्ण्यंतेगतिबुद्धीतिकर्मत्वेकर्मणिलः ॥ १० ॥ द्र

विभ्रमात्मायथायक्षोयक्षलोकश्चतेमिथः॥ सद्रूपौसुस्थितौमिथ्यातथाहंत्वजगद्भ्रमौ॥६॥ अनावरणतोरण्येयक्षाविभ्रमरूपिणः॥
यथास्फुरंतिभूतानितथेमानिचतुर्दश ॥ ७॥ भ्रममात्रमहंमिथ्यैवेतिबुद्ध्वाविभावयन् ॥ यक्षोऽयक्षत्वमायातिचित्तंचित्तत्वतामिद
म् ॥ ८॥ निरस्तकलनाशंकंत्यागग्रहणवर्जितम्॥ अविसारिसमस्तेच्छंशांतमास्वयथास्थितम्॥ ९॥ असत्तासंभवंदृश्यंद्रष्ट्रात्मकमि
दंततम्॥ अथवानैवद्रष्ट्रात्मसदवाच्यंकिमास्यते ॥ १० ॥ वसंतरसपूरस्ययथाविटपगुल्मता ॥ स्वरूपमात्रभरितसंविदःसर्गतातथा
॥ ११ ॥ यदिदंजगदाभासंशुद्धंचिन्मात्रवेदनम्॥ कात्रैकताद्विताकावानिर्वाणमलमास्यताम्॥ १२॥ भूयतांचिन्मयव्योम्नापीयतांप
रमोरसः॥ स्थीयतांविगताशंकंनिर्वाणानंदनंदने॥१३॥ किमेतास्वतिशून्यासुसंसाराररण्यभूमिषु॥ मानवावातहरिणाभ्रमथोभ्रांतबु
द्धयः॥ १४ ॥ जगत्त्रयमरीच्यंबुविप्रलब्धांधबुद्धयः ॥ माधावतगतव्यग्रमाशयोपहताशयाः ॥ १५॥ रूपालोकमनस्कारमृगतृष्णां
बुपायिनः॥ व्यर्थमायासमायूंषिमामाक्षपयतैणकाः॥ १६ ॥ जगद्गंधर्वनगरगुरुगर्वेणनश्यथ ॥ सुखरूपाणिदुःखानिनाशनायैवप
श्यथ ॥ १७॥ जगत्क्लेशोंडुकभ्रांत्यैमामहांबरमध्यगम्॥ अवलोकयताभ्रांतेस्वरूपेपरिणम्यताम्॥ १८ ॥

ष्टृदृश्यात्मत्वाभावेपिव्यवहारेदृश्यसत्तास्फूर्त्तिनिर्वाहकतासंभवत्येवेतिदृष्टांतेनदर्शयति ॥ वसंतेति ॥ ११ ॥ परमार्थेतुद्रष्ट्रैक्यादिसंभावनापिनास्तीत्याह ॥ यदिदमिति॥१२॥
इदानींभगवान्वसिष्ठःसर्वान्प्रतिदययाहितमुद्घोषयन्नुपदिशति ॥ भूयतामित्यादिना ॥ परमोरसोनिरतिशयानंदः ॥ रसोवैसइतिश्रुतेः ॥ निर्वाणानंदलक्षणेनंदनेस्वर्वने ॥ १३ ॥
वातहरिणावातप्रम्यइवेतिशेषः॥भ्रमथउइतिच्छेदः ॥१४॥ आशयातृष्णयाउपहताशयाःसंतोगतव्यग्रंप्राप्तवैय्यग्र्यंयथास्यात्तथामाधावत ॥ १५॥ रूपालोकाबाह्यभोगाम
नस्काराआभिमानिकभोगास्तएवमृगतृष्णांबूनि ॥ आयासंप्राप्येतिशेषः ॥१६॥ जगद्रूपेगंधर्वनगरइवविवेकहारीयोगर्वस्तेननश्यथ ॥ माइत्यनुषज्यते ॥ १७ ॥ महांबरंब्रह्मा
काशस्तन्मध्यगमज्ञाननैल्यंमाअवलोकयतकिंत्वभ्रांतेयथार्थतोदृष्टेस्वरूपेपरिणम्यताम् ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेमानवावातैर्लोलानिउच्चेषूर्ध्वशाखास्थितेषुपिप्पलपत्रेषुप्राप्तानिस्कन्नान्यवश्यायांबूनीवभंगुरामानवामनुष्यदेहायासुआसुसंसारलक्षणास्वंधगर्भशय्यासुमासुप्यताम्॥१९ अविराममखंडितम् ॥ स्वभावेपारमार्थिकब्रह्मभावे ॥ द्रष्ट्रादिदशादोषलक्षणादस्वभावात्स्वरूपविनिमयान्माविनश्यताम् ॥ २० ॥ २१ ॥ तृष्णालक्षणयाअयःशृंखलयावलितंवेष्टितंसंसारपंजरंज्ञानबलात्त्रोटयित्वामृगेंद्रःसिंहस्तद्वत्सर्वस्योर्ध्वमुत्कर्षकाष्ठायांतिष्ठ ॥ २२ ॥ आत्मात्मीयग्रहःअहंममेत्यभिमानस्तल्लक्षणभ्रांतिशांतिमात्रातावन्मात्रस्वरूपाविमुक्तानान्याकाचिदस्ति ॥ साचयोगिनःस्वात्मसत्तैवेत्यर्थः ॥२३॥ तामेवसंसाराध्वखिन्नविश्रांतिभूमिभेदत्वेनकल्पयित्वाह ॥ निर्वाणतेति ॥ अवासनतेतिच्छेदः ॥ पराउत्कृष्टाअपतापताअपगतत्रिविधतापता ॥ एताःपंचम्याद्यास्तिस्रोभूमिकाः ॥२४॥ मिथःपरस्परमवाच्यावक्तुमयोग्यायेऽर्थास्तन्मयस्तत्प्रचुरः ॥ तच्चअज्ञस्यदुःखौघमयं

मानवावातलोलोच्चपत्रप्राप्तांबुभंगुर ॥ मानवासुनचास्वंधगर्भशय्यासुसुप्यताम् ॥ १९ ॥ अविराममनाद्यंतेस्वभावेशांतमास्यताम् ॥ द्रष्टृदृश्यदशादोषादस्वभावाद्विनश्यताम् ॥ २० ॥ अज्ञावबुद्धःसंसारःसहिनास्तिमनागपि ॥ अवशिष्टंचयत्सत्यंतस्यनामनविद्यते ॥ २१ ॥ त्रोटयित्वातुतृष्णायःशृंखलावलितंबलात् ॥ संसारपंजरंतिष्ठसर्वस्योर्ध्वंमृगेंद्रवत् ॥ २२ ॥ आत्मात्मीयग्रहभ्रांतिशांतिमात्राविमुक्तता ॥ यथातथास्थितस्यापिसास्वसत्तैवयोगिनः ॥ २३ ॥ निर्वाणतावासनतापरापतापताज्ञता ॥ संसाराध्वनिखिन्नस्यशांताविश्रामभूमयः ॥ २४ ॥ तज्ज्ञज्ञातोनमूर्खाणांमूर्खज्ञातोनतद्विदाम् ॥ विद्यतेजगदर्थौसाववाच्यार्थमयोमिथः ॥ २५ ॥ विश्वताभ्रांतिसंशांतौसंस्थितैवनलभ्यते ॥ महार्णवांबुवलितापुत्रिकेवपयोमयी ॥ २६ ॥ भ्रांतिशांतौप्रबुद्धस्यविनिर्वाणस्यविश्वता ॥ यथास्थितैवगलिताविद्यतेचयथास्थितम् ॥ २७ ॥ निर्दग्धतृणभस्मालीक्वापियातियथानिलैः ॥ सतांस्वभावविश्रामैःक्वापियातितथाजगत् ॥ २८ ॥ जगद्ब्रह्मपदार्थस्यसन्निवेशःसतूत्तमः ॥ ब्रह्मशब्दार्थरूपात्मानजगच्छब्दकार्यभाक् ॥ २९ ॥ अविज्ञातस्यबालस्यपदार्थायादृशाइमे ॥ विदुषस्तादृशाएवतिष्ठतःक्षीणवासनम् ॥ ३० ॥

ज्ञस्यानंदमयंजगदितिप्रागुक्तमेवेति ॥ २५ ॥ गंगागोदानर्मदेत्यादिरूपापयोमयीपुत्रिकाआकारभेदकल्पनायथामहार्णवांबुवलितासतीतद्रूपेणसंस्थितैवार्णववासिभिर्नलभ्यते तद्वद्भ्रांतिसंशांतौज्ञानिभिर्विश्वतापीत्यर्थः ॥ २६ ॥ तदेवस्पष्टमाह ॥ भ्रांतीति ॥ २७ ॥ २८ ॥ ब्रह्मपदस्यबृंहणरूपोयोर्थस्तस्यसन्निवेशआकारविशेषःसतुब्रह्मशब्दस्यमुख्यार्थरूपोनिर्विकल्पस्वप्रकाशनिरतिशयानंदप्रत्यगात्माचेदुत्तमः ॥ गच्छतिषड्विधविकारैः परिवर्त्ततइतिजगदितिजगच्छब्दप्रवृत्तिनिमित्तविकारकार्यभाक्चेन्नोत्तमइत्यर्थः ॥ २९ ॥ जगतिनिर्विकल्पानुभवःशिशोरपिप्रसिद्धइतितत्साम्यमाह ॥ अविज्ञातस्येति ॥ नविद्यतेविज्ञातंविशेषज्ञानंयस्यबालस्यशिशोः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तज्ज्ञज्ञातोनमूर्खाणांमूर्खज्ञातोनतद्विदामित्युक्तिमुपपादितांभगवद्वचनेनसंवादयति ॥ यानिशेति ॥ ३१ ॥ तदिदंव्याचष्टे ॥ स्थितमेवेत्यादिना ॥ यद्यस्माद्धेतोःसर्वजनानामज्ञानांधकारावृतत्वात्सुषुप्तवत्स्थितमेवात्मतत्त्वमस्यतत्त्वविदःअविरामीविरामशून्योजाग्रत्जागरस्तस्माद्यानिशासर्वभूतानांतस्यांजागर्त्तीत्युच्यतइत्यर्थः ॥ यस्माच्चास्यजाग्रत्योमूढजनजाग्रत्त्वेनप्रसिद्धारसैषणाइंद्रियैःशब्दादिविषयास्वादाश्चित्रावलोकितनृत्ययुद्धादिरिवपुरोगताअपिनसंतितस्माद्यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरित्युच्यतइत्यर्थः ॥ ३२ ॥ उत्तरार्द्धंपुनर्व्याचष्टे ॥ जात्यंधेति ॥ भातिचेन्निशास्वप्नवन्नभातिचेन्निशासुषुप्तवदितिभावः ॥ ३३ ॥ विमूढानांदुःखत्वेनप्रसिद्धंत्रिजगद्विमूढविषयमेवनप्रबुद्धविषयंयतोनसदित्यर्थः ॥ ननुज्ञस्ययदिविषयोपभोगोनास्तितर्हिकेनसत्त्वमोजीवतितत्राह ॥ स्वप्नेइत्यादिना ॥ ३४ ॥ जाग्रत्स्वप्नेजाग्रत्स्वप्नभोगामास्फुरंतुनामतथापिज्ञो

यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः ॥ ३१ ॥ स्थितमेवाऽविरामीयज्जाग्रदस्यसुषुप्तवत् ॥ चित्रावलोकितइवजाग्रत्योस्यरसैषणाः ॥ ३२ ॥ जात्यंधरूपानुभवसमंभुवनवेदनम् ॥ भ्रांतप्रायमसद्रूपंज्ञस्यभातिनभातिच ॥ ३३ ॥ विमूढदुःखंत्रिजगद्विमूढविषयंनसत् ॥ स्वप्नेस्वप्नतयाज्ञातेरूपालोकमनःक्रियाः ॥ ३४ ॥ नस्वदंतेयथातद्वज्जाग्रत्स्वप्नेस्फुरंतुमा ॥ निर्विभागःसमाश्वस्तोऽविरोधंपरमागतः ॥ ३५ ॥ आशीतलांतःकरणोनिर्वाणोज्ञोवतिष्ठते ॥ तज्ज्ञस्याकृष्टमुक्तस्यसमंध्यानंविनास्थितिः ॥ ३६ ॥ निम्नंविनैवतोयस्यनसंभवतिकाचन ॥ अर्थएवमनस्कारोमनएवार्थरंजनम् ॥ ३७ ॥ एषएवैषआभासःसबाह्याभ्यंतरात्मकः ॥ आसमुद्रंनदीवाहशतसंघमयात्मकम् ॥ ३८ ॥ यथैकश्लेषपिंडात्मवहत्यंबुतरंगिणाम् ॥ सबाह्याभ्यंतराकारमर्थानर्थमयात्मकम् ॥ ३९ ॥ मनएवस्फुरत्यर्थनिर्भासंव्याततंतथा ॥ नास्त्यर्थमनसोर्द्वित्वंयथाजलतरंगयोः ॥ ४० ॥ एकाभावेद्वयोःशांतिःपवनस्पंदयोरिव ॥ नूनमेकोपशांत्यैवनिःसारेपरमार्थतः ॥ ४१ ॥

निर्वाणआशीतलांतःकरणोवतिष्ठतेइतिपरेणान्वयः ॥ ३५ ॥ आकृष्टानिभोगवासनाभिश्चित्तस्यबहिराकर्षणानितैर्मुक्तस्यवर्जितस्यतज्ज्ञस्यध्यानंचित्तनिरोधयत्नंविनैवसमंस्थितिर्भवति ॥ ३६ ॥ तद्दृष्टांतेनोपपादयति ॥ निम्नमिति ॥ यथातडागादितोयस्यकुल्यादिनिम्नमार्गंविनाकाचनप्रवाहादिक्रियानसंभवतितद्वदित्यर्थः ॥ ननुतत्त्वज्ञानेनबाह्यार्थबाधेबहिरिंद्रियाणिनप्रवर्त्तंतांमनस्कारनिरोधस्तुकथंसिद्ध्येत्तत्राह ॥ अर्थएवेत्यादि ॥ ३७ ॥ एषमनस्कारएवैषोऽर्थाभासः ॥ यथातरंगिणामासमुद्रंनदीप्रवाहाद्यनंतभेदात्मकंप्रसिद्धंसर्वमंबुएकत्रश्लेषेएकपिंडात्मकंजलसामान्यमेवस्फुरतितथासबाह्याभ्यंतरंसर्वार्थाकारंमनएवस्फुरतीतिपरेणान्वयः ॥ ३८ ॥ ३९ ॥ ४० ॥ अस्त्वेवंकिंततस्तत्राह ॥ ॥६४॥
एकेति ॥ तत्त्वज्ञानेनार्थबाधेमनोपिबाधितमेवेतिनमनस्कारप्रसक्तिरित्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४२ ॥ अयंचतयोर्बाधःस्वाप्नव्याघ्रनाशवदनष्टनाशइत्याह ॥ अनष्टेइति ॥ ४३ ॥ यथामृन्मयेप्रतिमायांभ्रांतिकल्पितेद्विषतिस्ववैरिणिज्ञानाद्बाध्यमानेतस्मिन्द्विषद्भावस्तत्प्रयुक्तभयंचनश्यतस्तद्वदित्यर्थः ॥ यथासंस्थंपारमार्थिकब्रह्मस्वभावेन ॥ ४४ ॥ अन्यत्सांसारिकदशाप्रसिद्धरूपादन्यत्पूर्णानंदरूपंसंपन्नेभावरूपिणिपरमार्थसद्रूपिणिसंहितेहेतुफलभावेनघटितेअर्थःसुखदुःखभोगस्तत्साधनंजगत्त्रैलोक्यंचयेननतथाविधःसंसारकालःअपिशब्दात्कालकृताःपदार्थानांजन्मादिविकारास्तद्बोक्ताअज्ञस्तद्विषयःशब्दादिविषयोपीतिसर्वंतत्त्वज्ञदृष्ट्याअसत् ॥ ४५ ॥ तत्रदृष्टांतावाह ॥ पार्श्वेति ॥ क्लीबपदेनअधीरोबालादिर्लक्ष्यतेतदग्रेभासमानयक्षवच्च ॥ ४६ ॥ वंध्यापिपुत्रपौत्रादि

एकत्वादर्थमनसीसममेवाशुशाम्यतः ॥ अर्थःसंकल्परूपात्मानेहितव्योविजानता ॥ ४२ ॥ मनश्चसम्यग्ज्ञानेनशांतिरेवंभवेत्तयोः॥ अनष्टेनश्यतश्चैतेज्ञस्यार्थमनसीस्वतः॥४३॥ मृन्मयेद्विषतिज्ञानाद्बीषद्भावभयेयथा॥ यथासंस्थंस्थितेएवंज्ञस्यार्थमनसीसदा॥४४॥ किमप्यपूर्वमेवान्यत्संपन्नेभावरूपिणि ॥ संहितार्थजगत्कालोप्यज्ञोज्ञविषयोप्यसत् ॥ ४५॥ पार्श्वसुप्तनरस्वप्नइवक्लीबाग्रयक्षवत्॥ ज्ञस्यसाज्ञंजगन्नास्तिवीरस्येवपिशाचधीः॥ ४६ ॥ज्ञमज्ञोभावयत्यज्ञंचिरंवंध्यापिवर्द्धते ॥ विनैवज्ञातशब्दार्थमर्थभावमिवागतम् ॥ ४७॥ स्थितंबोधमनाद्यंतंस्वभावंसंर्गगंविदुः ॥ मनःशब्दार्थरहितंविभागांतविवर्जितम् ॥ ४८॥ बोधवारिमनोबुद्धितरंगमिवनिर्मलम् ॥ क्वसंभवतएवांतःकेवार्थमनसीकिल॥ ४९ ॥ निरर्थिकैवविश्रांतिःस्वभावमयमास्यताम् ॥ शुद्धबोधस्वभावस्थैराकाशमिवशारदैः॥ ५० ॥ जाग्रत्स्वप्नसुषुप्तांतैर्मनस्त्वंनानुभूयते॥ विधूयानंतनानात्वमसद्भावमनामये॥ ५१ ॥ ज्ञेयंरज्जुरिवाशेषंस्वभावेतिष्ठचिद्दने॥ ज्ञप्तिरेवांतरंबाह्यंचार्थत्वमधितिष्ठति॥ ५२ ॥ बीजंशाखाफलानीवक्वातोर्थमनसीवद ॥ ज्ञेयासंभवतोज्ञप्तिरप्यनाख्यंपदंगता ॥ ५३ ॥

विस्तारेणवर्द्धतेतद्दृष्ट्येतिशेषः ॥ तत्त्वज्ञास्तर्हिजगत्स्वभावंकीदृशंविदुस्तमाह ॥ विनैवेति ॥ ज्ञातशब्दस्यार्थोज्ञानविषयत्वंतंविनैवस्वप्रकाशत्वादेवार्थाभासमिवस्थितंभासमानमनाद्यंतंबोधंब्रह्मैवेतिविदुरित्यर्थः ॥ ४७ ॥ बाह्यार्थेषूक्तवेदनप्रकारआंतरेषुमानसेष्वपिबोध्यइत्याह ॥ मनःशब्देति ॥ ४८ ॥ निर्मलंविदुरित्यनुषज्जते ॥ एवंप्रपंचितयोरज्ञतत्त्वज्ञजगद्बोधप्रकारयोर्मध्येद्वितीयएवोपादेयोयथार्थत्वात्नाद्यइत्याह ॥ क्वेति ॥ ४९ ॥ स्वभावस्थितौनिरूढायामवस्थात्रयस्यतुरीयबोधमात्रतासंपत्तेर्मतव्याभावान्मनसोमनस्त्वमप्यपैतीत्याह ॥ शुद्धेति ॥ शारदैःपद्मैर्ज्योतिर्भिर्जनैर्वा ॥ ५० ॥ जाग्रत्स्वप्नसुषुप्तलक्षणैरंतैरवस्थापरिच्छेदैःअनंतानिनानात्वानियस्मिंस्तथाविधमशेषंज्ञेयंविधूयाध्यस्तसर्पंविधूयरज्जुरिवानामयेस्वभावेतिष्ठ ॥ ५१ ॥ अधितिष्ठतिधत्ते॥ ५२ ॥ ज्ञप्तिवुर्द्धिवृत्तिः ॥ ५३ ॥

१ सर्वगमित्यपिक्वचित्पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वभाःस्वप्रकाशः ॥ अर्थमनसोःपरस्पराधीननिरूपणत्वादभेदेद्वयोरपिभ्रांतिमात्रतापर्यवस्यतीत्याह ॥ अर्थएवेति ॥ बाह्यस्यांतरभावात्मकत्वादांतरस्यबहिरभावात्मकत्वाच्चे
तिभावः ॥५४॥ अर्थइवसंस्क्रियतइत्यर्थसंस्कारः ॥ घञंतत्वात्पुमान्घञबंतइत्यजहल्लिंगः ॥ तर्ह्यर्थोमनश्चतत्त्वतःकिंतत्राह ॥ सर्वात्मत्वादिति ॥ अजस्यब्रह्मणःसर्ववस्तुना
मात्मत्वान्मनइतिरूपेणापितदेवभासते ॥ तन्निष्कृष्टरूपेपितुच्छमेवेतिभावः ॥ ५५ ॥ ब्रह्ममनोरूपेणेवमनोप्यर्थरूपेणनिष्कारणमेवभासतइत्याह ॥ भ्रमानुभवतइति ॥ ५६ ॥
॥५७॥५८॥ अभावभावोबोधः ॥ ५९ ॥ केनोपायेनतर्हिइतराअहमितिसत्ताशाम्यतितमाह ॥ मृगतृष्णेति ॥ अहमहंकारोमृगतृष्णांबुसदृशःशून्यस्वरूपकइत्येवशाम्यति ॥
॥ ६० ॥ कुतएवंतत्राह ॥ ज्ञात्वेति ॥ यस्तद्ब्रह्मसर्गादौसर्वज्ञतयास्वात्मभूतमेवस्रष्टव्यपदार्थंज्ञात्वातादृशज्ञानमयोहिरण्यगर्भःस्वयंभूत्वातत्संकल्पानुसारेणस्वयमेवसबाह्याभ्यं

शांताशेषविशेषात्मातेनशेषोस्तिसत्स्वभाः॥ अर्थएवमनस्कारःसचाभावात्मकोभ्रमः॥ ५४॥ मनएवार्थसंस्कारःसचाभावात्मको
भ्रमः॥ सर्वात्मत्वादजस्यैतदप्यकारणकंमनः॥ ५५॥ भ्रमानुभवतोर्थश्चमिथ्यैवास्तीवभासते ॥ अकारणकमेवार्थनिर्भासंभासते
मनः॥ ५६॥ विद्युद्विलसिताकारमस्थिरंतरलायते॥ त्वंमनस्कारमात्रात्मासंसृतौविभ्रमायसे॥ ५७॥ स्वभावैकपरिज्ञानान्नासिना
पिभ्रमायसे॥ मनसैवहिसंसारआत्मबोधेनशाम्यति॥ ५८॥ शुक्तिरूप्यभ्रमाकारोजनोमिथ्यैवताम्यति ॥ अभावभावस्तुपरंबोध
रूपमसंसृतिः॥ ५९॥ निर्वाणादितराससत्तादुःखायाहमितिभ्रमः ॥ मृगतृष्णांबुरूपोहमसच्छून्यस्वरूपकः॥६०॥ इत्येवात्मपरिज्ञाना
दहमित्येवशाम्यति॥ ज्ञात्वाज्ञानमयोभूत्वासबाह्याभ्यंतरार्थताम्॥ ६१ ॥ गतंस्वमत्यजद्रूपंतरंगत्वंयथापयः ॥ मूलशाखाग्रपर्यंता
सत्ताविटपिनोयथा॥ ६२॥ निर्विकारमलंज्ञप्तेर्ज्ञेयांतैकैवभासते ॥ यथायोजनलक्षाभमेकमेवामलंनभः॥ ६३॥ एकमेवतथाज्ञा
नंज्ञेयांतंभात्यखंडितम्॥ शून्यत्वादेकममलंयथासर्वगमेवखम्॥ ६४॥ तथैकममलंज्ञात्वाज्ञानज्ञेयदशास्वपि ॥ घृतेनात्माघनीभू
यपाषाणीक्रियतेयथा ॥६५ ॥ चिताचेत्यतयात्मैवस्वचित्तीक्रियतेतथा ॥ देशकालंविनैवात्माबोधाबोधेनचित्तताम्॥६६॥ अबु
द्धोनीयतेन्यायैरेकमेवैषसुस्थितः॥ अत्रयद्यप्यबोधादेःसंभवोनास्तिकश्चन॥ तथापिकल्प्यतेत्रैवबोधनायपरस्परम् ॥ ६७ ॥

तरार्थतांस्वरूपमत्यजदेवगतमित्यर्थः ॥ ६१ ॥ अस्त्वेवंकिंततस्तत्राह ॥ मूलेति ॥ इदमतःसिद्धं यथाविटपिनोमूलाच्छाखाग्रपर्यंताएकैवसत्तातथाज्ञातृज्ञानज्ञेयरूपेजगत्य
प्यलमत्यंतंनिर्विकारंस्थिताज्ञेयांताएकैवसत्ताभासतेनसत्तांतरमस्तीति ॥ ६२ ॥ सत्तैक्येदृष्टांतांतररपिसत्तैक्यमुपपादयति ॥ यथेत्यादिना ॥ ६३ ॥ तस्यनैर्मल्येप्ययमेव
दृष्टांतइत्याशयेनाह ॥ शून्यत्वादिति ॥ ६४ ॥ ६५ ॥ बोधरूपस्यस्वतत्त्वस्याबोधेन ॥ ६६ ॥ तदात्मानंस्वयमकुरुतेतिश्रुतिदर्शितैर्लाघवतर्कानुगृहीतन्यायैःशंकते ॥ अत्रे
ति ॥ अत्रशुद्धेचिदात्मनि ॥ परिहरति ॥ तथापीति ॥ अत्रैवअस्यामबोधदशायामेवनतत्त्वतइत्यर्थः ॥ तथाचोक्तंवार्त्तिके ॥ अविद्यास्तीत्यविद्यायामेवासित्वाप्रकल्प्यते ॥
ब्रह्मदृष्ट्यात्वविद्येयंनकथंचनयुज्यतइति ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असंभवद्रूपत्वादेवतत्त्वज्ञानोदयेनाज्ञानेनसहसर्वेंगलंतीत्युपसंहरति ॥ महानुभावाइति ॥ अतएवमहानुभावाअधिकारिदेहादिसंघातास्तत्त्वज्ञानेनविमूढभावस्यमूलाज्ञानस्य ज्ञानेनोपशमेघृतकाठिन्यवत्स्वात्मन्येवगलंति ॥ तद्गलनाच्चानंततयानिरतिशयानंदपूर्णभावेनशांताःसंतोनिर्भ्रांतयोनिर्विक्षेपानित्यमनवरतमेवसमाधानंसमाधिविश्रांतिस्तत्प राभवंतीत्यर्थः ॥ ६८ ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनिर्वाणप्रकरणेउत्तरार्द्धेत्रिचत्वारिंशःसर्गः ॥ ४३ ॥ ॥ ७ ॥ ॥ वर्ण्यतेवर्द्धनीयोत्रसमाधानसुरद्रुमः ॥ त लेतस्यचविश्रांत्यैश्रांतोदेहिमनोमृगः ॥ १ ॥ क्रमात्बीजक्षेत्रसेकांकुरीभावपत्रकांडशाखापुष्पफलच्छायाविस्तारादिवर्णनक्रमात् ॥ आजीवनमाजीवोविवेकिजनैःसर्वप्र कारैरुपजीवनंतत्फलशालिनीम् ॥ लताःशाखाःकल्पलताश्चतत्सहिताम् ॥ मनोमृगविश्रांतिदाम् ॥ सत्तांस्थितिम् ॥ १ ॥ आजीव्यतेसर्वात्मनाउपजीव्यतइत्याजीवस्तथा

महानुभावाविगताभिमानाविमूढभावोपशमेगलंति॥ निर्भ्रांतयोनंततयैवशांतानित्यंसमाधानमयाभवंति ॥६८॥ इ०वा०म० वा०दे०मो०नि०उ०ब्रह्मैकतानतोपदेशोनामत्रिचत्वारिंशःसर्गः ॥ ४३ ॥ ॥७॥ ॥श्रीरामउवाच॥ ॥क्रमात्समा धानतरोराजीवफलशालिनीम्॥ सलताकुसुमांब्रूहिसत्तांविश्रांतिदांमुने ॥ १ ॥ ॥ श्रीवसिष्ठउवाच॥ ॥आजीवमुद्यदुत्सेधंविवे किजनकानने॥ पत्रपुष्पफलोपेतंसमाधानतरुंशृणु ॥ २ ॥ यथाकथंचिदुदितंदुःखेनस्वयमेवच ॥ संसारवननिर्वेदंबीजमस्यविदुर्बु धाः॥ ३॥ शुभजालहलाकृष्टंरसासिक्तमहर्निशम्॥ प्रवहच्छ्वसनाकुल्यंक्षेत्रमस्यविदुर्बुधाः॥४॥ समाधिबीजंसंसारनिर्वेदःपततिस्व यम्॥ चित्तभूमौविविक्तायांविवेकिजनकानने ॥५॥ स्वचित्तभूमौपतितंध्यानबीजंमहाधिया॥ सेकैरमीभिर्यत्नेनसंसेक्तव्यमखेदि ना॥६॥ शुद्धैःस्निग्धैःपवित्रैश्चमधुरैरात्मनोहितैः॥ सत्संगमनवक्षीरैर्दैवैरमृतैरिव॥ ७॥ अंतःशून्यप्रदैःपूर्णैःस्वच्छैरमृतशीतलैः॥ वि स्तैरमृताकुल्याशास्त्रार्थवरवारिभिः ॥८॥

विधम् ॥ २ ॥ शत्रुस्वजनापमानादिजन्यदुःखेनभाग्यवशात्स्वयमेववासाधुसुहृज्जनोपदेशादिनानिमित्तांतरेणवायथाकथंचिदुदितंनिर्वेदमुत्कटजिहासात्मकंपरवैराग्यमस्य समाधानतरोर्बीजंविदुरित्यर्थः ॥३॥४॥ तच्चसंसारनिर्वेदरूपंसमाधिबीजंविवेकिजनलक्षणेकाननेनंदनेविविक्तायांविवेकपरिष्कृतायांचित्तभूमौस्वयमेवपततिनवापापेक्षास्ती त्यर्थः ॥ ५ ॥ उक्तवैराग्यलक्षणंध्यानबीजंमहाधियातत्परिवर्द्धनोद्युक्तदृढधियापुरुषेणाऽमीभिर्वक्ष्यमाणलक्षणैःसेकैःसंसेक्तव्यंनप्रसूतिवैराग्यवत्पुनर्भोगासक्त्यानाशनीयमि त्यर्थः ॥ अखेदिनाकामक्रोधादिवेगःखेदस्तत्सहिष्णुना ॥ ६ ॥ तत्रप्रथमंसत्संगमलक्षणैर्नवैःक्षीरैःपश्चात्तन्मुखावगतशास्त्रामृतैःसेक्तव्यमित्याह ॥ शुद्धैरितिद्वाभ्याम् ॥ ७ ॥ ने तिनेतीतिसर्वद्वैतनिषेधादंतःसर्वसंसारशून्यात्मप्रदैःअतएवपूर्णैःसर्वतापोपशमनादमृतवत्स्वादुशीतलैः गुरुहृदयस्थस्यब्रह्मसरसोव्याख्याद्वाराप्रसृतैः अमृतप्रवाहस्यासमंतात्कु ल्यावद्द्वारभूतश्रवणमननादिशास्त्रार्थवरवारिभिः ॥ ८ ॥

---

१ मनोविदुरित्यपिक्वचित्पाठः ॥ अयमेवयुक्तइतिभाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यानस्यबीजंसंसारनिर्वेदरूपंरक्ष्यम् ॥ ९ ॥ केनेयत्नास्तानाह ॥ तपइति ॥ तपोत्रभगवदुक्तंदेवद्विजगुरुप्राज्ञपूजनंशौचमार्जवमित्यादिकंकायिकंवाचिकंमानसंचत्रिविधं सात्विकंतल्लक्षणेनप्रकीर्यंतइतिप्रकाराःक्षेत्रदोहदास्तद्दानेन ॥ पदार्थाअमानित्वादयस्तेषांघटनेनईशितैःसमर्थितैः ॥ तीर्थायतनादिपुण्यस्थानेविश्रांतिर्वासस्तल्लक्षणस्यदृति विस्तारस्यप्राकारप्राचीराद्यावरणविस्तारस्यकल्पनैः ॥ १० ॥ एवंसेचनाद्युपायैरंकुरितस्यसंजातांकुरस्यास्यबीजस्यरक्षणोपायेषुशिक्षिताशयोनिपुणतरोमुदिताख्ययाप्रि ययापत्न्यान्वितःसंतोषनामारक्षितापरिपालकपुरुषःकर्त्तव्यः ॥ ११ ॥ अस्माद्दक्षकाद्धेनोःपश्चात्पूर्ववासनासुस्थितान्आशालक्षणान्विहगान्परेष्वात्मातिरिक्तेषुपुत्रमित्रध

स्वचित्तभूमौपतितंपरिज्ञायमहाधिया ॥ बीजंसंसारनिर्वेदोरक्ष्यंध्यानस्ययत्नतः ॥ ९ ॥ तपःप्रकारदानेनपदार्थघटनेशितैः ॥ तीर्थायतनविश्रांतिवृतिविस्तारकल्पनैः ॥ १० ॥ कर्तव्योंकुरितस्यास्यरक्षिताशिक्षिताशयः ॥ संतोषनामाप्रिययानित्यंमुदितयान्वितः ॥ ११ ॥ पश्चात्स्थिताशाविहगान्परप्रणयपक्षिणः ॥ अस्मादापततःकामगर्वगृध्रान्निवारयेत् ॥ १२ ॥ मृदुभिःसत्क्रियाकुंतैर्विवेकार्कातपैरपि ॥ अचिंत्यालोकदैरस्मान्मार्जितव्यंरजस्तमः ॥ १३ ॥ संपदःप्रमदाश्चैवतरंगाभोगभंगुराः ॥ पतंत्यशनयस्तस्मिन्दुष्कृताभ्रसमीरिताः ॥ १४ ॥ धैर्योदार्यदयामंत्रैर्जपस्नानतपोदमैः ॥ विनिवारयितव्यास्ताःप्रणवार्थत्रिशूलिना ॥ १५ ॥ इतिसंरक्षितादस्माद्ध्यानबीजात्प्रवर्त्तते ॥ आभिजात्योन्नतःश्रीमान्विवेकाख्योनवांकुरः ॥ १६ ॥ तेनसाचित्तभूर्भातिसप्रकाशाविकासिनी ॥ भवत्यालोकरम्याचखंयथाभिनवेंदुना ॥ १७ ॥ तस्मादंकुरतःपत्रेउभौविकसतःस्वयम् ॥ एकंशास्त्राभिगमनंद्वितीयंसाधुसंगमः ॥ १८ ॥ स्तंभमेषनिबध्नाति स्थैर्यंनामसमुन्नतिम् ॥ संतोषत्वग्विवलितंवैराग्यरसरंजितम् ॥ १९ ॥ वैराग्यरसपुष्टात्माशास्त्रार्थप्रावृषान्वितः ॥ स्वल्पेनैवस्वकालेनपरामेतिसमुन्नतिम् ॥ २० ॥ शास्त्रार्थसाधुसंपर्कवैराग्यरसपीवरः ॥ रागद्वेषकपिक्षोभैर्नमनागपिकंपते ॥ २१ ॥ अथतस्मात्प्रजायंतेविज्ञानालंकृताकृतेः ॥ लतारसविलासिन्यइमाविततदेशगाः ॥ २२ ॥

नादिषुप्रणयोनुरागस्तद्रूपान्पक्षिणःकामगर्वादिगृध्रांश्चध्यानांकुरविघातार्थमापततोनिवारयेत् ॥ १२ ॥ अहिंसाप्रधानत्वान्मृदुभिर्यमनियमासनप्राणायामेश्वरोपासनादि सत्क्रियालक्षणैःकुंतैर्मार्जनीपूलैः ॥ अस्मादंकुरक्षेत्राद्रजोमार्जितव्यम् ॥ एवमचिंत्यब्रह्मलोकदैर्विवेकातपैस्तमोऽज्ञानतिमिरमपिमार्जितव्यम् ॥ १३ ॥ तस्मिन्अंकुरे ॥ १४ ॥ प्रणवमात्राभिर्विराडादिभिःस्थूलसूक्ष्मप्रपंचविलापनेनतद्बोधेनेतियावत् ॥ १५ ॥ आभिजात्येनपुष्टिसौंदर्यातिशयेनोन्नतः ॥ १६ ॥ १७ ॥ १८ ॥ स्तंभंकांडम् ॥ स्थैर्यंदृढमूलताम् ॥ समुन्नतिमुच्छ्रायम् ॥ १९ ॥ २० ॥ २१ ॥ विज्ञानंश्रवणावर्त्तनजंज्ञानम् ॥ इमावक्ष्यमाणाः ॥ विततदेशगाःप्रतानविस्तीर्णाअपरिच्छिन्नात्मप्रदेशगताश्च ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुटतास्वात्मतत्त्वस्यस्फुटीभावस्तदेकसत्यता ॥ सत्तातदात्मनास्थितिः ॥ धीरतातत्त्राप्यकंप्यता ॥ समतासर्ववैषम्यनिवृत्तिः ॥ २३ ॥ गुणाःशांत्यादयःपत्राणियासाम् ॥ यतःसंन्यासिनः ॥ २४ ॥ भविष्यत्ज्ञानंमूलाज्ञानोच्छेदक्षमोब्रह्मसाक्षात्कारःसप्तमभूमिकाविश्रांतिपर्यंतः ॥ २५ ॥ २६ ॥ सर्गातपंसांसारिकतापम् ॥ २७ ॥ निरोधंचित्तस्थैर्यम् ॥ २८॥ पीठंमूलबंधम् ॥ फलस्यकैवल्याख्यस्यघटिकांघटयित्रीम् ॥ मंगलादितांशांत्यादिकल्याणगुच्छश्रियंरचयति ॥२९॥३०॥ तलस्यमूलभूमेर्हृदयस्यप्रसिद्धानाध्यात्मिकादितापानपहरतितच्छीला॥३१॥ अवांतरेषुसंसारप्रांतरेषुश्रांतोमनोमृगोयस्यांछायायांविश्राम्यति ॥ तमेवमनोमृगंसर्गोपांत्यश्लोकस्थमनोहरिणकइत्यंतंबहुतरश्रमादिहेतूपपादकैर्विशेषणैर्वर्णयति ॥ आजन्मेत्यादिना ॥ पथिदैवात्प्राप्तेसन्मार्गेपिनानावादिकोलाहलैराकुलोव्यग्रःसन्भ्रंशितइत्यर्थः ॥ ३२ ॥ अरिभिःकामाद्यरिषड्वर्ग

स्फुटतासत्यतासत्ताधीरतानिर्विकल्पता ॥ समताशांतताभैत्रीकरुणाकीर्त्तिरार्यता ॥ २३ ॥ लताभिर्गुणपत्राभिःसध्यानतरुरूर्जितः ॥ यशःपुष्पाभिरेताभिःपारिजातायतेयतेः ॥ २४ ॥ इत्यसौज्ञानविटपीलतापल्लवपुष्पवान् ॥ भविष्यज्ज्ञानफलदोदिनानुदिनमुत्तमः ॥ २५ ॥ यशःकुसुमगुच्छाढ्योगुणपल्लवलासवान् ॥ वैराग्यरसविस्तारीप्रज्ञामंजरिताकृतिः ॥ २६ ॥ सर्वाःशीतलयत्याशाःप्रावृषीवपयोधरः ॥ सर्गातपंशमयतिसूर्यतापमिवोडुपः ॥ २७ ॥ प्रतनोतिशमच्छायांछायामिवघनागमः ॥ निरोधमास्फारयतिशमोनिलइवांबुदम् ॥ २८ ॥ निबध्नात्यात्मनापीठंकुलाचलइवस्थितम् ॥ फलस्यरचयत्यूर्ध्वंघटिकामंगलादिताम् ॥ २९ ॥ विवेककल्पवृक्षेतुवर्द्धमानेदिनेदिने ॥ छायावितानवलितेपुंसोहृदयकानने ॥ ३० ॥ प्रवर्त्ततेशीतलतातलतापापहारिणी ॥ अभ्युल्लसन्मतिलतातुषारोदरसुंदरी ॥ ३१ ॥ यस्यामवांतरश्रांतोविश्राम्यतिमनोमृगः ॥ आजन्मजीर्णपथिकःपथिकोलाहलाकुलः ॥ ३२ ॥ सत्तामात्रात्मशारीरचर्मार्थंप्रेक्षितोरिभिः ॥ नानातासारसाकारगोपयज्जर्जरोन्मुखः ॥ ३३ ॥ संसारारण्यविसरद्वासनापवनेरितः ॥ अहंतातापसरितासर्वदाविप्रदारदी ॥ ३४ ॥ दीर्घादरीदूरचितसारसंचारजर्जरः ॥ पुत्रपौत्रपरामर्शप्रतापात्पतितोऽवटे ॥ ३५ ॥

लुब्धकैः सत्तामात्रात्मायःशारीरःपुरुषस्तल्लक्षणस्यचर्मणोऽपहारार्थंप्रेक्षितोऽनुसृतइतियावत् ॥ नानातालक्षणेष्वसारेषुसाकारेषुशरीरादिकंटककुंजेषुमुहुर्मुहुर्निलीयत्वंगोपयंश्वासौतद्दोषकंटकैर्जर्जरमूर्ध्वमुखंयस्यसचेतिबहुव्रीह्युत्तरपदःकर्मधारयः ॥ ३३ ॥ अहंतालक्षणयातापसरितामृगतृष्णानद्यासर्वदाविप्रधावनेनदारदोविषभेदःसोस्यास्तीतिदारदीविषाक्रांतइवांतर्दाहतृष्णादिव्याकुलइत्यर्थः ॥ ३४ ॥ दीर्घेष्वेवभोगविस्तारेष्वादरोस्यास्तीत्यादरीनाल्पसंतुष्टइत्यर्थः ॥ अतएवदूरेप्युपचितेषुसारेषुहरिततृणप्रायेषुविषयेषुसंचारेणधावनेनजर्जरःशिथिलितगात्रः ॥ पुत्रपौत्रादीनांपरामर्शःपरिपालनंतत्प्रयुक्तादाध्यात्मिकादित्रिविधदावाग्निप्रतापादवटेअनर्थगर्त्तेपतितः ॥ ३५ ॥

मूलस्थविप्रेत्यस्यायमर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मीःसंपत्तल्लक्षणासुलतासुपादवेष्टनेनविलुठनाच्छत्रुचोरराजादिप्रयुक्तैर्बंधनताडनदंडनादिसंकटैःकुंठितांगकः ॥ कल्लोलैःअशनायापिपासाशोकमोहजरामृत्युलक्षणैरूर्मिभिः ॥ ३६ ॥ नशंकितःसंभावितोविधिर्दैवंयेन ॥ कृताकृतिःसंकुचिताकारः ॥ ३७ ॥ ज्ञेयानांनेत्रादिज्ञानेंद्रियास्वाद्यानांगीतघंटारावयवांकुरादीनामास्पदेभ्योनिमित्तभूतेभ्योलुब्धकक्षेत्रकादिभ्यःसमायाताद्दुःखसायकाच्छंकितः ॥ दृषद्भिराहरणैःप्रहारैरिवपूर्वपूर्वदुःखानुभवसंस्कारैरंकितः ॥ ३८ ॥ उन्नतानतेपूर्ध्वाधस्तनेषुस्वर्गनरकादिषुक्रमात्संपातनिपातेन ॥ दृषदाहरणांकितइत्यत्रदृषत्पदार्थंदर्शयति ॥ विकारेति ॥ विकाराःकामक्रोधभयादयः ॥ पारंपर्येणनैरंतर्येण ॥ ३९ ॥ ४० ॥ सुदुर्ग्रहोगजेंद्रःकामः ॥४१॥ विपोथितोविमर्दितः ॥४२ ॥ कोपदावानलेनप्लुष्टोदग्धः ॥ अतएवपृष्ठेविस्फोटादिवबहिर्दाहवान् ॥ सदागतागतैर्विषयेषुपुनःपुनर्भ्रमणैरनंतचिंताशोकादिदीर्घदुःखैरंतः

लक्ष्मीलताविलुठनात्संकटैःकुंठितांगकः॥ तृष्णाश्रीसरितंगृह्णन्कल्लोलैर्दूरमाहतः॥ ३६ ॥ व्याधिदुर्व्याधवैधुर्यपलायनपरायणः॥ अशंकितविधिर्व्याधपातादिवकृताकृतिः॥ ३७॥ ज्ञेयास्पदसमायातदुःखसायकशंकितः॥ वैरिविद्रवणव्यग्रोदृषदाहरणांकितः॥ ३८॥ उन्नतानतसंपातनिपातेनातिघूर्णितः॥ विकारोपलनिर्घातैःपारंपर्येणचूर्णितः॥ ३९॥ तृष्णाचारुलताजालप्रवेशवशविक्षतः॥ स्वप्रज्ञारचिताचारःपरमायास्वशिक्षितः॥ ४०॥ इंद्रियग्राममागत्यप्रपलायनतत्परः॥ सुदुर्ग्रहगजेंद्रोग्रविस्फूर्जनविमर्दितः॥ ४१ ॥ विषयाजगरोदारविषफूत्कारमूर्छितः॥ कामुकःकामिनीभूमौरसास्वायोविपोथितः ॥ ४२ ॥ कोपदावानलप्लुष्टपृष्ठविस्फोटदाहवान् ॥ सदागतागतानेकदीर्घदुःखप्रदाहवान्॥ ४३॥ स्वात्मलग्नाभिलाषांशदंशदोषैरुपद्रुतः॥ भोगलोभलसन्मोदश्रृगालचिरविद्रुतः॥ ४४॥ स्वकर्मकर्तृतोद्भ्रांतदारिद्र्यद्वीप्यनुद्रुतः॥ व्यामोहमिहिकांधत्वकूटावटलुठत्तनुः॥ ४५॥ मानसिंहसमुल्लासहृदयोत्कंपनातुरः॥ मरणेनरणेयेनत्वकपुष्पमिवेक्षितः॥ ४६॥ गर्वेणगिरणायाशुदूरतोजनसेवितः॥ कामैःसमंततोदंतवितानितयवांकुरः॥ ४७॥ तारुण्यनारीसुहृदाक्षणमालिंग्यवर्जितः॥ दुःसंचारेषूपवनैःकुपितैरिववर्जितः॥ ४८॥

प्रदाहवान् ॥४३॥४४॥ दारिद्र्यलक्षणेनद्वीपिनाव्याघ्रेणानुद्रुतः ॥ पुत्रकलत्रासक्तिलक्षणयाव्यामोहमिहिकयाअंधत्वेसतिकूटेषुकपटेषुगिरिश्रृंगेष्ववटेषुनीचकृत्येषुगर्तेषुचलुठत्तनुः ॥ ४५ ॥ हृदयस्योत्कंपनंभयंतेनातुरः ॥ येनप्रसिद्धेनमरणेनमृत्युव्याघ्रेणरणेसंप्रहारेवर्तेतेआददतेत्वश्वंतिवात्वकाःस्वनखास्तेषांपुष्पमिवसुखदार्यईक्षितः ॥ ४६ ॥ गर्वेणार्थादजगरेणनिगिरणायदूरतोजनायस्मात्तद्दूरतोजनंमहारण्यंतत्रसेवितःचिरंप्रतीक्षितइतियावत् ॥ कामैर्निमित्तैःसमंततोदैन्ययाञ्चादिनादंतविकासाद्विकासितानिताविस्तारिताइवदंतप्रभायवांकुरायेन ॥४७॥ तारुण्यलक्षणेननार्यर्थंसुहृदानस्वतः ॥ पवनैर्झंझापवनसदृशैरिंद्रियैर्दुःसंचारेषुनरकस्थावरादियोनिकांतारेषुवर्जितोबहुशःक्षिप्तः ॥४८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेराजन्निति दशरथस्य भाविवृत्त्या रामस्य वा संबोधनम् ॥ ईदृशोयंमनोहरिणकः कदाचिद्बहुजन्मसंचितसुकृतपरिपाकभाग्योदयकालेक्वचिदधिकारिजन्मनिशमादिसाधनस
हितंयथास्यात्तथावर्णितलक्षणेध्यानतरौनिर्वृतिंविश्रांतिसुखंयाति ॥ यथाआसमंताज्जीवतीत्याजीवंप्राणिजातंरात्रौशीतांधकारार्त्तंभास्वतिसूर्येऽभ्युदितेनिर्वृतिंयातितद्वदित्य
र्थः ॥४९॥ हेश्रोतारःतालीतमालादिवृक्षमूलविश्रांतिसदृशेषुभूम्यादिसत्यलोकांतलोकवासेषुप्रचुरपुष्पविलासहाससदृशैरनित्यभोगाभासैर्यस्यनिरतिशयस्यभूमाख्यस्यसुख
स्यनामापिमूढाआत्मज्ञानशून्याजनानविदंतितत्तादृशमपुनरावृत्तिमोक्षविश्रांतिसुखंवःस्वमनोमृगःप्रागुक्तरीत्याक्षेत्रबीजसेकादिनावर्द्धिताच्छमतरोर्ध्यानकल्पवृक्षात्प्राप्नोती
त्यर्थः ॥ ५० ॥ ॥ इतिश्रीवासिष्ठम०तात्पर्यप्रकाशेनि०उत्तरार्धेचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥ ॥ ७ ॥ ॥ वर्ण्यतेमनसोध्यानपादपारोहणक्रमः ॥ आरोहतःसुखो

कदाचिन्निर्वृतिंयातिसशमंचतरौक्वचित् ॥ मनोहरिणकोराजन्नाजीवमिवभास्वति ॥ ४९ ॥ तालीतमालबकुलादिकवृक्षगुल्मवि
श्रांतिषुप्रचुरपुष्पविलासहासैः ॥ नामापियस्यनविदंतिसुखस्यमूढाःप्राप्नोतितच्छमतरोःस्वमनोमृगोवः ॥ ५० ॥ ॥ इ०वा०महा
रामायणेवा०दे०मो०निर्वाण०उ०मनोमृगविपद्वर्णनंनामचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥ ॥ ७ ॥ ॥ श्रीवसिष्ठउवाच ॥
इतिविश्रांतवानेषमनोहरिणकोरिहन् ॥ तत्रैवरतिमायातिनयातिविटपांतरम् ॥ १ ॥ एतावताऽथकालेनसविवेकद्रुमःफलम् ॥ अंत
स्थंपरमार्थात्मशनैःप्रकटयत्यलम् ॥ २ ॥ ध्यानद्रुमफलंपुण्यंतदसौस्वमनोमृगः ॥ अधःस्थितःप्रांतगतंतस्यपश्यतिसत्तरोः ॥ ३ ॥ आ
रोहतिनरोवृक्षंतदास्वादयितुंफलम् ॥ अन्यवर्गपरित्यागोविततोध्यवसायवान् ॥ ४ ॥ विवेकवृक्षपान्नामवृत्तीस्त्यजतिभूगताः ॥ उ
न्नतंपदमासाद्यभूयोनाधःसमीहते ॥ ५ ॥ तेनोत्तमफलार्थेनसंस्कारान्प्राक्तनानसौ ॥ विवेकपादपारूढस्त्यजत्यहिरिवत्वचम् ॥ ६ ॥

त्कर्षोप्युत्तरोत्तरभूमिषु ॥ १ ॥ हेअरिहन् ॥ तत्रध्यानकल्पतरावेव ॥ १ ॥ एतावताप्राग्वर्णितेनगुच्छारंभांतेनमनोमृगविश्रांत्यंतेनचकालेनसवर्णितोविवेकसहितध्यानद्रुमों
ऽतस्थंपंचकोशांतस्थंगुच्छांतस्थंचपरमार्थात्मपारमार्थिकस्वस्वरूपंकैवल्यफलंशनैर्वक्ष्यमाणभूमिकारोहणक्रमेणपरिपच्यमानंप्रकटयतिसाक्षादनुभावयति ॥ २ ॥ तत्रादा
वसंभावनादोषस्येषत्क्षयान्मंदांधकारेघटादेरिवसंभावनाप्रायंसाक्षात्कारंचतुर्थभूमिकाद्वारंदर्शयति ॥ ध्यानेति ॥ प्रांतगतंशाखाग्रसंलग्नम् ॥ ३ ॥ प्राक्तनमृगरूपकस्यवृक्षा
रोहणेअनुपयोगाच्चापलपशुभावादिनिवृत्तेश्चनरइत्युक्तिः ॥ ४ ॥ कथमारोहतितदाह ॥ विवेकेति ॥ विवेकवृक्षेदृढप्रतिष्ठितःपादोयस्यतथात्रिधोनामप्रथमंभूत्वाप्राक्तनीःसं
सारभूगतादेहादिष्वहंममतादिवृत्तीस्त्यजति ॥ पादस्यलोपोहस्त्यादिभ्यइतिलोपःसमासांतः ॥ नाधःसमीहतेआरोढव्यावलंबनीयवृक्षभागेष्वेवसावधानदृष्टिचित्तनिवेशनादि
तिभावः ॥ ५ ॥ संस्कारांस्त्यजतिनकिंचित्पूर्वतनंस्मरतीतियावत् ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कदाचिद्दिवास्मरन्नपिहसति ॥ कृपणोविषयसुखकणप्रार्थनयादीनः ॥ ७ ॥ करुणासर्वभूतदयाआदिपदादभयंसत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिरित्याद्यादैव्यःसंपदोगृह्यंते ॥ तल्लक्षणेषुअस्यदक्षस्यशाखांतरेषुभ्रमन्व्युत्थानकालेविहरन्सम्राडिवपूर्णकामः ॥ ८ ॥ हृदयेंदोःसद्बुद्धिचंद्रस्यगलत्यस्मिन्नितिगलःकलाक्षयहेतुर्दर्शस्तस्यश्रेणीपंक्तिभूता दुःखलक्षणस्यअजस्यचंद्रस्यवक्रत्वभ्रांतिहेतुस्तिमिरंनेत्ररोगविशेषस्तदावलिः कृष्णायःअयोजातिभेदस्तन्निर्मिताश्रृंखलेवप्राणिनांबंधनहेतुः ईदृशीतृष्णाशुभेच्छारंभदिनमारभ्यदिनानुदिनंक्षीयमाणाचतुर्थभूमिकायांनिःशेषमुज्झति ॥ रसोप्यस्यपरंदृष्ट्वानिवर्त्ततइतिभगवद्वचनादितिभावः ॥९॥ १० ॥ शास्त्रमध्यात्मशास्त्रंतदर्थाःशमदमसंतोषादय

हसत्युच्चैःपदारूढमात्मानमवलोकयन् ॥ एतावंतमहंकालंकृपणःकोऽभवंत्विति ॥ ७॥ करुणादिषुतेष्वस्यभ्रमञ्छाखांतरेषुसः ॥ लोभव्यालमधःकुर्वन्सम्राडिवविराजते ॥८॥ हृदयेंदोर्गलश्रेणीदुःखाब्जतिमिरावलिः ॥ कृष्णायःश्रृंखलातृष्णादिनानुदिनमुज्झति ॥९॥ उपेक्षतेनसंप्राप्तंनाप्राप्तमभिवांछति ॥ सोमसौम्योभवत्यंतःशीतलःसर्ववृत्तिषु ॥ १० ॥ शास्त्रार्थपल्लवेष्वेवनिषण्णात्मावतिष्ठते ॥ उन्नतावनतायाताअधःपश्यञ्जगद्गतीः ॥ ११ ॥ भीमद्रुमलतोत्कीर्णपुष्पप्रकरदंतुराः ॥ प्राक्तनीःस्वाःस्थलीःपश्यन्हसत्यंतर्वराकताम् ॥ १२ ॥ तेषुतत्स्कंधदेशेषुतथोड्डीनविडीनया ॥ हारिण्याविहरञ्ज्ञात्याराजेवपरिराजते ॥ १३ ॥ पुत्रदारसमग्राणिमित्राणिचधनानिच ॥ जन्मांतरकृतानीवस्वप्नजानीवपश्यति ॥ १४ ॥ रागद्वेषभयोन्मादमानमोहमहत्तया ॥ नटस्येवास्यदृश्यंतेशीतलामलचेतसः ॥ ॥ १५ ॥ उन्मत्तचेष्टिताकाराहसत्यपिपुरोगताः ॥ तरंगभंगुराधाराःसंसारसरितोगतीः ॥ १६ ॥ नसचेतयतेकांश्चिल्लोकदारधनैषणाः ॥ अपूर्वपदविश्रांतोजीवन्नेवयथाशवः ॥ १७ ॥ केवलंकेवलेशुद्धेबोधात्मनिमहोन्नते ॥ दत्तदृष्टिःफलेतस्मिन्परंसमधिरोहति ॥ १८ ॥ स्मृत्वास्मृत्वापदःपूर्वसंतोषामृतपोषितः ॥ अर्थानामप्यनर्थानांनाशेषुपरितुष्यति ॥ १९ ॥

स्तल्लक्षणेषुपल्लवेषुकिसलयेषु ॥ इतरशास्त्रानुसारिप्रवृत्तौप्राणिनांब्रह्मलोकपर्यंतमुन्नताःस्वाभाविकप्रवृत्तौनिरयांतमवनताश्चजगद्गतीरधःअज्ञदशायामेवेतिपश्यन् ॥ ११ ॥ भीमाभयानकाविषद्रुमलतास्तत्रोत्कीर्णैर्विषपुष्पप्रकरैर्दंतुराःप्रकटितोन्नतदंताइवस्थिताःस्थलीःप्राग्वर्णिताःसप्तअज्ञानभूमिकाःपश्यन्स्मरन् ॥ १२ ॥ तस्यध्यानतरोःस्कंधदेशेषूउत्तरोत्तरभूमिकाभेदेष्वभ्यासदशायामारुह्यावतरणाडुड्डीनविडीनप्राययाअतएवविहरञ्ज्ञात्याचित्तवृत्त्या ॥ १३ ॥ १४ ॥ व्यवहारेनटस्येवपरानुरंजनमात्रप्रधानयाकृत्रिमयारागादिमहत्तयाअस्यदृश्यंतेव्यवहाराइतिशेषः ॥ १५ ॥ पुरोगताअपिसंसारमृगतृष्णासरितोगतीर्मिथ्यात्वबुद्ध्याहसति॥१६॥१७॥परंपंचमभूमिकास्थानम् ॥ १८॥१९॥ ॥६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu